THE NATIONAL HIGH SCHOOL
BANGALORE

EXHIBITION

Name: ವಾಲ್ಮೀಕಿ ರಾಮಾಯಣ Class: ……

Exhibit: ೬ ಅರಣ್ಯಕಾಂಡ No. ……

SRIMAD VĀLMIKI RĀMĀYANA

A CRITICAL EDITION

With the commentary of Sri Govindaraja

AND

Extracts from many other commentaries and Readings.

ĀRAṆYA... ṆDA 3.

EDITED AND PUBLISHED BY

T. R. KRISHNACHARYA, T. R. VYASACHARYA &
T. R. SRINIVASACHARYA,
Proprietors, Madhva Vilâs Book Depot, Kumbakonam.

Printed by B. R. Gha... ...e proprietors,
at the "Nirnaya-saga... ...ess, 23, Kolbhat Lane,
BOMBAY.

1911.

॥ श्रीः ॥

श्रीमद्वाल्मीकिरामायणम् ।

श्रीमद्गोविन्दराजीयव्याख्यानसमलंकृतम् ।

तथा

तिलकप्रभृत्यनेकापूर्वव्याख्यानोद्धृतैः
गोविन्दराजीयानुक्तापूर्वविषयैश्च संवलितम् ।

आरण्यकाण्डम् ३.

एतच्च

कुम्भघोणस्थेन श्रीमन्मध्वविलासपुस्तकालयाधिपतिना

टी. आर्. कृष्णाचार्येण टी. आर्. व्यासाचार्येण
टी. आर्. श्रीनिवासाचार्येण च

अनेकेषां विदुषां साहाय्येन नानादेशीयकोशानुसारेण

संशोध्य

मुंबापुर्यां

तुकाराम जावजी इत्येतेषां निर्णयसागरमुद्रणयन्त्रे मुद्रयित्वा प्रकाशितम् ।

शाके १८३३ विरोधकृन्नाम संवत्सरे ।

-॥ श्रीः ॥-

श्रीमद्वाल्मीकिरामायणम् ।

श्रीमद्गोविन्दराजीयव्याख्यासमलंकृतम् ।

आरण्यकाण्डम् ३

श्रीरामचन्द्राय नमः ॥

प्रथमः सर्गः ॥ १ ॥

वाल्मीकिनादण्डकारण्यस्थतापसाश्रममण्डलवर्णनम् ॥ १ ॥ तत्रत्यैस्तापसैःस्वाश्रमप्रवेशिनांरामादीनांप्रत्युद्गममङ्गलाशासनपूर्वकमर्घ्यादिनापूजनम् ॥ २ ॥ तथारामंप्रतिसप्रशंसनंस्वरक्षणप्रार्थनपूर्वकंस्तुतिप्रणामादिनापरितोषणम् ॥ ३ ॥

प्रविश्य तु महारण्यं दण्डकारण्यमात्मवान् ॥ [1]ददर्श रामो [2,3]दुर्धर्षस्तापसाश्रममण्डलम् ॥ १ ॥
कुशचीरपरिक्षिप्तं ब्राह्मया लक्ष्म्या समावृतम् ॥ यथा प्रदीप्तं दुर्दर्शं गगने सूर्यमण्डलम् ॥ २ ॥

श्रीरामचन्द्रायनमः ॥ वात्स्यश्रीशठकोपदेशिकवरश्रीपादरेणवश्चनैर्दृष्ट्या निर्मलया निरीक्ष्य बहुधा वल्मीकजन्माशयम् । श्रीमत्कौशिकवंशसागरमणिर्गोविन्दराजाह्वयो व्याचक्षेऽहमरण्यकाण्डमधुना पश्यन्तु निर्मत्सराः ॥ १ ॥ श्रीरामायणराजस्य दत्त्वा पीताम्बरं महत् । अर्पये परया लक्ष्म्या राजन्तीं रत्नमेखलाम् ॥ २ ॥ एवं पूर्वस्मिन्काण्डे जगज्जन्मादिकारणस्य वेदान्तवेद्यस्य ब्रह्मणो निरस्तसमस्तावद्यत्वं नित्यानन्दपरिपूर्णत्वं निखिलान्तर्यामित्वं निरतिशयौज्ज्वल्यं निरुपमधर्मप्रवर्तकत्वमित्याद्यनन्तकल्याणगुणजातमुपवर्णितम् । संप्रति सज्जनसंरक्षणरूपं धर्मविशेषमभिधातुमारण्यकाण्डआरभ्यते । यद्वा पूर्वकाण्डे पितृवचनपरिपालनरूपो धर्मः सद्भिरनुष्ठातव्य इति प्राधान्येन दर्शितम् । अथ सज्जनसंरक्षणरूपं धर्मविशेषं प्रतिपादयितुमारण्यकाण्ड आरभ्यते—प्रविश्येत्यादि । तुशब्दः पूर्वारण्यवैलक्षण्यं द्योतयति । महारण्यं इतरदुरवगाहं । दण्डकारण्यं दण्डकस्य राज्ञोरण्यं शुक्रशापादरण्यभूतं जनपदं । प्रविश्य । आत्मवान् धैर्यवान् । दुरवगाहमहागहनप्रवेशेप्यजनितभयलेश इत्यर्थः । तत्र हेतुमाह—दुर्धर्ष इति । हिंस्रादिभिरप्रधृष्य इत्यर्थः । रामः । तापसानां तपस्विनां आश्रममण्डलं आश्रमसमूहं । "तपोवने मठे ब्रह्मचर्यादावाश्रमोस्त्रियां" इति बाणः । ददर्श ॥ १ ॥ अभिगम्यत्वायाश्रममण्डलं वर्णयति—कुशेत्यादिभिस्सार्धसप्तश्लोकैः । कुशैः यज्ञार्थमाहृतैः चीरैः स्नानानन्तरमातपे परिशोषणार्थं क्षिप्तैर्वल्कलैश्च परिक्षिप्तं व्याप्तं । ब्रह्मवेदः तत्संबन्धिनी । वेदाध्ययनतदर्थानुष्ठानजन्येत्यर्थः । तया लक्ष्म्या श्रिया । समावृतं समन्तादावृतं । अत एव गगने प्रदीप्तं गगनमध्यस्थमित्यर्थः । दुर्दर्शं सूर्यमण्डलं यथा तथाऽवस्थितमित्यर्थः । तद्वद्रक्षोभिरनभिभवनीयं । उदयास्तमययोर्हि सूर्यस्य मन्देहाख्यरक्षोभिराक्रमणं नतु मध्याह्ने

श्रीरामचन्द्रायनमः ॥ **ति०** प्रविश्येति । ऋषिदर्शितवर्त्मनेतिशेषः ॥ दण्डकारण्यं प्रायेणमहाराष्ट्रदेशोऽयं ॥ दुर्धर्षमितिपाठे रक्षोयुतत्वादशक्यप्रवेशमित्यर्थः ॥ **शि०** तापसाश्रममण्डलं तापसानांपरमात्मविचारशीलानां आश्रममण्डलं पर्णशालासमूहं । **स०** आत्मवान् प्रशस्तचित्तः ॥ १ ॥ **ती०** ब्राह्मीलक्ष्मीः तपोजनिततेजोविशेषः । तयासमावृतत्वादेव गगनाधिकरणकसूर्यमण्डलवद्दुर्दर्शं रक्षोसुरादिभिर्द्रष्टुमप्यशक्यं ॥ **शि०** कुशचीराणि परिक्षिप्तानियस्मिंस्तं । कुशचीराणां परिक्षिप्तं परिक्षेपोयस्मिंस्तमितिवा ॥

[पा०] १ ङ. छ. झ. ञ. ट. रामोददर्श. २ ग. दुर्धर्षं. ३ च. घ. दुर्धर्षं.

शरणं सर्वभूतानां सुसंमृष्टाजिरं सदा ॥ मृगैर्बहुभिराकीर्णं पक्षिसङ्घैः समावृतम् ॥ ३ ॥
पूजितं [1] च प्रनृत्तं च नित्यमप्सरसां गणैः ॥ विशालैरग्निशरणैः स्रुग्भाण्डैरजिनैः कुशैः ॥ ४ ॥
समिद्भिस्तोयकलशैः फलमूलैश्च शोभितम् ॥ आरण्यैश्च महावृक्षैः पुण्यैः [2] स्वादुफलैर्वृ[3]तम् ॥ ५ ॥
बलिहोमार्चितं पुण्यं ब्रह्मघोष[4]निनादितम् ॥ पुष्पै[5]र्वन्यैः परिक्षिप्तं पद्मिन्या च सपद्मया ॥ ६ ॥
फलमूलाशनैर्दान्तैश्चीरकृष्णाजिनाम्बरैः ॥ सूर्यवैश्वानराभैश्च पुराणैर्मुनिभिर्वृ[6]तम् ॥ ७ ॥
पुण्यैश्च नियताहारैः शोभितं परमर्षिभिः ॥ तद्ब्रह्मभवनप्रख्यं ब्रह्मघोषनि[7]नादितम् ॥
ब्रह्मविद्भिर्महाभागैर्ब्राह्मणैरुपशोभितम् ॥ ८ ॥
स[8] दृष्ट्वा राघवः श्रीमांस्तापसाश्रममण्डलम् ॥ अभ्यगच्छन्महातेजा विज्यं कृत्वा महद्धनुः ॥ ९ ॥
दिव्यज्ञानोपपन्नास्ते रामं दृष्ट्वा महर्षयः ॥ अभ्य[9]गच्छंस्तथा प्रीता वैदेहीं च यश[10]स्विनीम् ॥ १० ॥
ते [11]तं सोममिवोद्यन्तं दृष्ट्वा वै धर्म[12]चारिणः ॥ लक्ष्मणं चैव [13]दृष्ट्वा तु वैदेहीं च यशस्विनीम् ॥
मङ्गलानि प्रयुञ्जानाः प्रत्यगृह्णन्दृढव्रताः ॥ ११ ॥

॥ २ ॥ अत एव शरण्यं शरणार्हं । "तदर्हति" इति यत्प्रत्ययः। सहजवैरप्रयुक्तवध्यघातुकभावाभावेन सर्वप्राणिनां वरणीयमित्यर्थः । रक्षोभ्यो भीतानां वासार्हं वा "शरणं गृहरक्षित्रोः" इत्यमरः । सदा सुसंमृष्टाजिरं सम्यक् संमृष्टाङ्गणं । "अङ्गणं चत्वराजिरे" इत्यमरः । सर्वभूतशरण्यत्वंप्रपञ्चयति मृगैरिति ॥ ३ ॥ प्रनृत्तं प्रकृष्टनृत्तवत् । अर्शआद्यच् बहुव्रीहिर्वा। अतिरमणीयप्रदेशत्वाद्देवतासान्निध्याद्वा नर्तनं । अत एव पूजितं । अग्निशरणैः अग्निहोत्रगृहैः । स्रुङ्मुखानि भाण्डानि यज्ञपात्राणि स्रुग्भाण्डानि "स्फ्यश्चकपालानि च" इत्याद्याम्नातानि तैः। "वणिङ्मूलधने पात्रे भाण्डं" इतिवैजयन्ती । कुशैः परिस्तरणार्थैः । कुशचीरेत्यत्र संगृहीतकुशोक्तिः ॥ ४ ॥ अरण्ये भवैः आरण्यैः ॥ ५ ॥ बलिभिः भूतबलिप्रभृतिभिः होमैर्वैश्वदेवादिहोमैश्च। अर्चितं सत्कृतं। ब्रह्मघोषैर्वेदघोषैः । निनादितं संजातनिनादं । पुष्पैः देवपूजार्थमुपक्षिप्तैः । सपद्मया पद्मसहितया। पद्मिन्या सरस्या ॥६॥ मुनिषु तारतम्यप्रदर्शनार्थं सूर्यवैश्वानराभैरित्युपमानद्वयं । पुराणैः वृद्धैः ॥ ७ ॥ परमर्षिभिः उक्तमुनीनामपि पूजनीयैः । तत् प्रसिद्धं । ब्रह्मभवनप्रख्यं ब्रह्मलोकतुल्यप्रसिद्धिकं ब्रह्मघोषैः कर्मकालिकवेदमन्त्रघोषैः । निनादितं । ब्रह्मविद्भिः परब्रह्मज्ञानिभिः । महाभागैः महाभाग्यैः। "भागो रूपार्थके प्रोक्तो भागधेयैकदेशयोः" इति विश्वः । एतादृशं तापसाश्रममण्डलं ददर्शेति पूर्वेणान्वयः ॥ ८ ॥ विज्यं विसृष्टमौर्वीकं । कृत्वा । विनीतवेषप्रवेश्यत्वादाश्रमाणामाश्रममृगपक्ष्यादिभयनिवृत्त्यर्थं च विज्यकरणं । अभ्यगच्छत् अभिमुखीभूयगतः ॥ ९ ॥ दिव्यं लोकविलक्षणं ज्ञानं तेन उपपन्ना युक्ताः । अतीतानागतज्ञानवन्त इत्यर्थः । रामोयं रावणवधार्थमवतीर्णो विष्णुः सीता लक्ष्मीः लक्ष्मणश्च तदंश इतिविज्ञाततद्वृत।रहस्या इतियावत् ॥ १० ॥ ते तमित्यादिसार्धश्लोक एका-

स० ब्राह्म्यालक्ष्म्या ब्राह्मणसंबन्धिन्याशोभया वेदसंबन्धिन्यावा ॥ २ ॥ **स०** फलमूलैः उत्कृत्तकन्दैः । ञिफलाविशरणेकर्मणिघञ् । फलानिमूलानिचतैरितिवा ॥ ५ ॥ **स०** पद्मिन्या सरस्यापरिक्षिप्तं सरामः पद्मया रमारूपयासीतयासह ददर्शेत्यनेनान्वयः ॥ ६ ॥ **ति०** ब्रह्मविद्भिः सर्वत्रब्रह्मानन्यत्वज्ञानवद्भिः । ब्राह्मणैः उक्तलक्षणैरन्वर्थब्राह्मणैः । तादृशैर्युक्तत्वादेवब्रह्मभवनप्रख्यत्वमाश्रमस्य ॥ ८ ॥ **स०** तापसानामाश्रमे श्रमाभावविषये मण्डलीकृतंयत्तद्धनुः विज्यंकृत्वाऽभ्यगच्छदित्यन्वयः ॥ ९ ॥ **स०** पूर्वमेतन्निमित्तकरक्षोविक्षोभभिया त्यक्तचित्रकूटाः पुनाराममागतमवलोक्य न जहर्षिरेमहर्षयः किमित्यतोनेत्याह—**महर्षयइति**। नायंरूढोमहर्षिशब्दः किंतुयौगिकइत्याह—**दिव्यज्ञानोपपन्नाइति** । एतेन चित्रकूटेरामसहवासानुमतिरत्रतदनुमतिश्च खरादिनिराकरणाहेतुस्थानत्वतत्स्थानत्वाभ्यामितिसूचयति ॥ १० ॥ **तनि०** प्रत्यगृह्णन् आत्मीयताकरणंप्रतिग्रहः ।

[पा०] १ क. ग. ङ.—ट. चोपनृत्तं. २ झ. पुण्यस्वादुफलैः. ३ घ. युतं. ४ च. छ. ज. घोषानुनादितं. क. घोषविनादितं. ५ ग. ङ. झ. ञ. ट. पुष्पैश्चान्यैः. छ. पुष्पैरन्यैः. ६ झ. ञ. ट. युतं. ७ च. छ. ज. विनादितं. ८ क. ख. ग. ङ.—ज. ञ. तंदृष्ट्वा. झ. तद्दृष्ट्वा. ९ ङ. च. झ. ञ. ट. अभिजग्मुस्तदाप्रीताः. घ. अभ्यगच्छन्ततेप्रीताः. ग. अभ्यागच्छन्तसौमित्रिं. क. अभ्यागच्छंस्तदाप्रीत्या. १० घ. तपस्विनीं. ११ ङ झ. ञ. ट. तेतु. १२ क. ग. ङ.—ट. धर्मचारिणं. १३ क. दृष्ट्वावै.

रूपसंहननं लक्ष्मीं सौकुमार्यं सुवेषताम् ॥ ददृशुर्विस्मिताकारा रामस्य वनवासिनः ॥ १२ ॥
वैदेहीं लक्ष्मणं रामं नेत्रैरनिमिषैरिव ॥ आश्चर्यभूतान्ददृशुः सर्वे ते वनचारिणः ॥ १३ ॥
अत्रैनं हि महाभागाः सर्वभूतहिते रतम् ॥ अतिथिं पर्णशालायां राघवं संन्यवेशयन् ॥ १४ ॥
ततो रामस्य सत्कृत्य विधिना पावकोपमाः ॥ आजहुस्ते महाभागास्सलिलं धर्मचारिणः ॥
[मङ्गलानि प्रयुञ्जाना मुदा परमया युताः] ॥ १५ ॥

न्वयः । ते त्रिकालज्ञाः । तं राक्षसनिरासायावतीर्णं रामं । उद्यन्तं सोममिव स्थितं अन्धकारनिवर्तनप्रवृत्तं चन्द्रमिव स्थितं । यद्वा उद्यन्तं सोममिव प्रतिपच्चन्द्रमिवार्चनीयं । यद्वा वनराज्यन्तःप्रादुर्भवत्तया मेघावृतमिन्दुमिव स्थितं । धर्मचारिणो दृष्ट्वा स्वाचर्यमाणधर्माराध्यं साक्षात्कृत्य । यद्वा इतः पूर्वं धर्मवीर्येण पश्यन्ति संप्रति चक्षुषा साक्षात्कुर्वन्तीत्यर्थः । तथा लक्ष्मणं च वैदेहीं च दृष्ट्वा मङ्गलानि प्रयुञ्जानाः स्वापेक्षितरक्षाभ्यर्थनात्प्रागेव मङ्गलानि प्रयुञ्जानाः । रामस्य सौन्दर्यसौकुमार्यादिकंदृष्ट्वा रक्षोभूयिष्ठेच वने किं भविष्यतीति व्याकुलहृदयतया तस्मै विरोधिनिरसनवचनानि प्रयुञ्जानाः । दृढव्रताः अशिथिलतद्रक्ष्यत्वनियमाःसन्तः । प्रत्यगृह्णन् प्रतिगृहीतवन्तः । प्रत्युत्थानफलप्रदानाद्युपचारमकुर्वन्नित्यर्थः ॥ ११ ॥ मङ्गलाशासननिमित्तं सौन्दर्यसौकुमार्यादिकमाह— रूपेति। रूपस्य शरीरस्य संहननं "समः समविभक्ताङ्गः" इत्युक्तावयवसंस्थानविशेषं । लक्ष्मीं समुदायशोभां । सौकुमार्यं पुष्पहासतुल्यकोमलतां । सुवेषतां शोभनलावण्यवत्तां । लावण्यस्वरूपमुक्तम् "मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा । प्रतिभातियदङ्गेषु लावण्यंतदिहोच्यते" इति ॥ विस्मितानामाकारा इवाकारा येषां ते विस्मिताकाराः । विस्मयावेदकस्वमुखप्रसादफुल्लनेत्रत्वादियुक्ता इत्यर्थः । वनवासिनः विकारहेतौ सत्यप्यविकृतचित्ता इत्यर्थः । वनवासिनोपि विस्मिताकाराःसन्तः रामस्य रूपसंहननादिकं ददृशुः । अभेदेन प्रत्ययद्योतनार्थं चकाराप्रयोगः । यद्वा अभूषणेपि भूषितवद्भासमानत्वं रूपं । तथोक्तं "अङ्गान्यभूषितान्येव वलयाद्यैर्विभूषणैः । येनभूषितवद्भाति तद्रूपमितिकथ्यते" इतिसंहननं सौन्दर्यं तदप्युक्तं "अङ्गप्रत्यङ्गकानांयः सन्निवेशो यथोचितः । सुश्लिष्टसन्धिबन्धः स्यात्तत्सौन्दर्यमिहोच्यते" इति ॥ लक्ष्मीं लावण्यं तच्चोक्तं पूर्वमेव। सौकुमार्यमप्युक्तमेव। सुवेषतां उचितशृङ्गारसंपन्नत्वं ॥ १२ ॥ एतं न्यायं सीतालक्ष्मणयोरप्यतिदेष्टुमाह—वैदेहीमिति । सर्वे वनचारिणः । आश्चर्यभूतान् अदृष्टपूर्वतया आश्चर्यावहान् वैदेहीं लक्ष्मणं रामं च दिव्यरूपदर्शनजनितानन्दभङ्गभीरुतया विस्मयविस्फारितेक्षणतया च सर्वथा निर्निमेषैरिव स्थितैर्नेत्रैरुपलक्षिताः सन्तः ददृशुः । अनेन पूर्वश्लोके विस्मिताकारा इत्येतद्विवृतम ॥ १३ ॥ अत्र आश्रममण्डले । महाभागाः महाभाग्या ऋषयः । सर्वभूतहिते रतं । अतिथिं न्यायतः पूजार्हं । एनं राघवं । पर्णशालायां स्वस्वपर्णशालायां संन्यवेशयन् स्थापयामासुः॥ १४॥ रामस्य सत्कृत्येति षष्ठ्यार्षी। "नलोकाव्ययनिष्ठा" इत्यादिना निषेधात् । सत्कृत्य सत्कारंकृत्वा कुशलप्रश्नादिकं कृत्वेत्यर्थः । पावकोपमा इत्यनेन रामस्य पवित्राणां पवित्रत्वमुक्तं धर्मचारिण इत्यनेन सत्कारस्य धर्माचरणफलत्वमुक्तं। महाभागा इति सुकृतपरिपाक उच्यते । सलिलं

" निम्नृष्टात्मासुहृत्सुच " इतिवक्ष्यति । **स०** उद्यन्तंसोमंचन्द्रमिव । एतेन स्वराजदर्शनेनेव महर्षीणांहर्षोद्योत्यते । " सोमोवैब्राह्मणानांराजा " इतिश्रुतेः । यद्वा सोमं उमयासहितं रुद्रमिवोद्यन्तंलक्ष्मणमित्युत्तरत्रापिसंबध्यते । उभयोरशेषरुद्रयोस्साम्यादितिभावः ॥ **ती०** तंराममेव स्वेष्टदेवतात्वेन प्रत्यगृह्णन् स्वीचक्रुरित्यर्थः ॥ ११ ॥ **स०** सुवेषतां सुशोभनोवेषः कृत्रिमतापसाकारता यस्य तस्यभावस्सुवेषता तां । वनवासिनइतिषष्ठ्यन्तं रामविशेषणं । प्रथमाबहुवचनान्तमृषिविशेषणं ॥ १२ ॥ **तनि०** नेत्रैरनिमिषैरिव जगन्मोहनदिव्यमङ्गलविग्रहदर्शनानन्दविच्छेदभयेन निमेषरहितैर्नेत्रैः । इवशब्दोवाक्यालङ्कारे । अनिमिषत्वे हेतुमाह—**आश्चर्यभूतानिति** । **ती०** वनचारिणः पशुपक्षिमृगादयः । अयंभावः पद्मभवप्रमुखानामप्यगोचरोभगवान्सीता-

[पा०]१ ग. च. छ. ज. आश्चर्यभूताः. २ ग. सर्वेच. ३ क. ङ.—झ. ञ. वनवासिनः. ४ ख. च. ज. अत्रैवं. छ. तत्रैनं. ५ ट. सर्वभूत. ६ क.—ज. रताः. ७ क. च. छ. ज. ञ. रामंसुसत्कृत्य. ८ ख. प्रजहुः. ९ क. ट. ब्रह्मचारिणः. १० इदमर्धं क. ङ.—ट. पाठेपुदृश्यते.

मूलं पुष्पं फलं वन्यमाश्रमं च महात्मनः ॥ निवेदयित्वा धर्मज्ञास्ततः प्राञ्जलयोऽब्रुवन् ॥ १६ ॥
धर्मपालो जनस्यास्य शरण्यस्त्वं महायशः ॥ पूजनीयश्च मान्यश्च राजा दण्डधरो गुरुः ॥ १७ ॥
इन्द्रस्येह चतुर्भागः प्रजा रक्षति राघव ॥ राजा तस्माद्वरान्भोगान्भुङ्क्ते लोकनमस्कृतः ॥ १८ ॥
ते वयं भवता रक्ष्या भवद्विषयवासिनः ॥ नगरस्थो वनस्थो वा त्वं नो राजा जनेश्वरः ॥ १९ ॥
न्यस्तदण्डा वयं राजञ्जितक्रोधा जितेन्द्रियाः ॥ रक्षितव्यास्त्वया शश्वद्गर्भभूतास्तपोधनाः ॥ २० ॥

अर्घ्याद्युचितं आजह्रुः ॥ १५ ॥ धर्मज्ञाः शेषिणि शेषवृत्तिरूपधर्मज्ञाः । प्राञ्जलयः प्रकृष्टाञ्जलयः । मूर्ध्नि कृताञ्जलय इत्यर्थः । महात्मनः शेषिणो रामस्य । वन्यंमूलादिकं आश्रमं च । निवेदयित्वा इमानि भवदीयानि यथेष्टं विनियुङ्क्ष्वेति निवेद्य । ततोऽब्रुवन् ॥ १६ ॥ धर्मपालः वर्णाश्रमधर्मपालकः । अस्य आर्तस्य मुनिजनस्य । शरण्यः शरणार्हः । पूजनीयश्च देवताबुद्ध्या अर्चनार्हः । मान्यः राजबुद्ध्या बहुमानार्हः । मान्यत्वेहेतुः—राजा दण्डधर इति । दण्डस्य निग्रहस्य धरः कर्ता । पूजनीयत्वे हेतुः—गुरुरिति ॥१७॥पूज्यत्वे हेत्वन्तरमाह—इन्द्रस्येहेति । इह भूस्वर्गे। इन्द्रस्य चतुर्भागः चतुर्थांशः । राजा प्रजा रक्षति । तस्माद्धेतोः । वरान् श्रेष्ठान् भोगान् भुङ्क्ते अनुभवति । इन्द्रस्येति लोकपालान्तराणामुपलक्षणं । "अष्टाभिर्लोकपालानां मात्राभिः कल्पितो नृपः" इति वचनात् । वस्तुतस्तु इन्द्रशब्दोयं परमात्मपरः । इदि परमैश्वर्ये इतिधातोस्तत्रैव मुख्यवृत्तित्वात् "इन्द्रो मायाभिः पुरुरूपईयते" इति श्रौतप्रयोगाच्च । इन्द्रस्य परमात्मनः । चतुर्भागःचतुर्थांशः । तदवतारभूते व्यक्तिचतुष्टये एकव्यक्तिभूतो भवान्भोगान्भुङ्क्त इत्यर्थः। पूर्वापरश्लोकानुगुण्याच्चायमेवार्थः । नह्यन्यस्मै ऋषयः प्राञ्जलयो भवन्ति नचाश्रमं निवेदयन्ति नापिगर्भभूतत्वं वदन्ति ॥ १८ ॥ भवता रक्ष्यत्वे त्वद्देशवासित्वमेव निष्प्रमादोहेतुः नोपासनादिकमित्याहुः—ते वयमिति । तेवयं आर्ता वयं । भवता रक्ष्याः । आर्तरक्षणदीक्षितेन त्वया रक्षितुमर्हाः । किमुपासनबलेनैवमुच्यते नेत्याहुः—भवद्विषयवासिन इति । भवद्देशवासित्वमेव भवद्रक्ष्यत्वेहेतुः नान्यः । तत्र प्रमादादिसंभवात् देशवासित्वे तदभावादिति भावः । भवतु तथैव रक्षिष्यामः यदारक्षणप्रदेशे स्थास्याम इत्यत्राहुः—नगरस्थ इति । नगरस्थः सिंहासनस्थो वा । वनस्थः तद्रहितो वा । त्वं स्वतःसिद्धसर्वशक्तिकः निरुपाधिकसर्वशेषी च त्वं। नःअस्माकं राजारक्षकः।तत्रहेतुः—जनेश्वर इति । निरुपाधिकसर्वशेषीत्यर्थः॥१९॥ ननु भवन्त एव तपःप्रभावेन स्वरक्षणक्षमा इत्यत्राहुः—न्यस्तेति । न्यस्तः त्यक्तो दण्डो यैस्ते न्यस्तदण्डाः । शापतो निग्र-

---

लक्ष्मणोपेतः श्रीरामः पङ्कपरिगङ्गाप्रवाहवदस्माकमपिपुरतः प्रादुरासीदिति मृगादयोप्याश्चर्ययुता ददृशुरित्यर्थः ॥ १३ ॥ **तनि०** आत्मीयभरसमर्पणमन्त्रोच्यते ॥ **स०** निवेदयित्वा सर्वंतावकमित्युक्त्वा । प्राञ्जलयः बद्धाञ्जलयः । क्षत्रियंप्रत्यपि विदितस्वरूपाणामृषीणामञ्जलिबन्धउचित इतिनानौचिती ॥ १६ ॥ **शि०** धर्मपालः परमधर्मरक्षकः अतएव अस्य एतल्लोकस्थस्यजनस्य इन्द्रस्य तदुपलक्षितोर्ध्वलोकस्थस्यच ब्रह्मादित्रयस्यवा शरण्यः शरणेहितः अतएव महायशाः समातिशयरहितयशोविशिष्टः ॥१७॥ **शि०** चतुर्भागः चतुर्णां अर्थधर्मकाममोक्षाणांभागः आश्रितकर्तृकसेवा यस्मात्सः ॥ १८ ॥ **ति०** भवद्विषयवासिनइति । विषयोदेशः । सार्वभौमत्वाद्दण्डकारण्यमपि तद्देशएवेतिभावः । विष्ण्ववतारत्वात्सर्वोदेशस्तवैवेतिगूढोऽभिप्रायः । **स०** यद्वा भवद्विषये वासिनः त्वद्रूपविषयध्यानयुक्ताः ॥ **तनि०** ते पूर्वोक्तप्रकारेणात्मात्मीयभरसमर्पकाः । वयं उपायशून्यत्वापायबहुलत्वादिमन्तः । भवता निरुपाधिकसर्वलोकशरण्येन रक्ष्याः । अतिप्रसङ्गपरिहारार्थमाह—**भवद्विषयवासिनइति** । भवद्विषयवासित्वात् साकेतसंभवचराचरजन्तुन्यायेन प्रपत्तिनिरपेक्षमेव रक्षणमित्येकःपक्षः । पूर्वोत्तरश्लोकपर्यालोचनया प्रपत्तिद्वारकमित्यन्यः पक्षः । नच पूर्वकृतात्मात्मीयरक्षाभरसमर्पणेनैव प्रयोजनेसिद्धे विषयवासित्वकथनं व्यर्थमितिशङ्क्यं । रक्षकेपश्यति तत्संनिधाने रक्ष्यविनाशस्यदोषभूयस्त्वकथनार्थत्वात् विषयवासित्वस्यनिरपेक्षहेतुत्वनिर्बन्धेपि मोक्षव्यतिरिक्तरक्षणोपायस्याविरोधात् । नह्यत्र महर्षयो मोक्षापेक्षयोपायानुष्टानंचक्रुः किंतु दुष्टराक्षसनिरसनापेक्षया । नगरस्थोवनस्थोवेति इतरे मूर्धाभिषिक्ताः बुद्धि-

[पा०] १ क. पुष्पंमूलं. घ. पुष्पमूलफलंरम्यं. ङ. झ. ट. पुष्पमूलफलंसर्वं. २ घ. महात्मने. ३ ङ. च. झ. ट. तेतुप्राञ्जलयः. ४ ङ. झ. ट. शरण्यश्च. ख. ग. शरणंच. ५ क. घ.—ट. इन्द्रस्यैव. ६ ङ. झ. ट. न्भोगान्रम्यान्भुङ्क्तेनमस्कृतः. क. ख. ग. छ. ज. भोगानग्र्यान्भुङ्क्तेनमस्कृतः. ७ ङ. झ. ट. रक्षणीयाः.

एवमुक्त्वा फलैर्मूलैः [1]पुष्पैर्वन्यैश्च [2]राघवम् ॥ [3]अन्यैश्च विविधाहारैः सलक्ष्मणमपूजयन् ॥ २१ ॥
तथान्ये तापसाः सिद्धा रामं [4]वैश्वानरोपमाः ॥ न्यायवृत्ता यथान्यायं तर्पयामासुरीश्वरम् ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे प्रथमः सर्गः ॥ १ ॥

द्वितीयः सर्गः ॥ २ ॥

मुनिकृतातिथ्यस्वीकारपूर्वकंसीतालक्ष्मणाभ्यांसहवनमध्यंप्रविष्टवतारामेणतत्रविराधाख्यघोरराक्षसदर्शनम् ॥ १ ॥ विराधेनसीतापहरणपूर्वकंराघवौप्रतिसगर्हणंतद्वधप्रतिज्ञानम् ॥ २ ॥ सीतायास्तादृशावस्थादर्शनेनकैकेय्युपालंभगर्भवचनोक्तिपूर्वकंशोचन्तंरामंप्रतिलक्ष्मणेनससान्त्वनंविराधवधप्रतिज्ञानम् ॥ ३ ॥

कृतातिथ्योथ रामस्तु सूर्यस्योदयनं प्रति ॥ आमन्त्र्य [5]स मुनीन्सर्वान्वनमेवान्वगाहत ॥ १ ॥

हकरणरहिताइत्यर्थः । तत्रहेतुः—जितक्रोधा इति । तपोनाशभीत्या त्यक्तक्रोधा इत्यर्थः । तत्रापि हेतुः—जितेन्द्रिया इति । इन्द्रियजयेन कामाद्यभिष्वङ्गाभावात्तन्मूलक्रोधरहिता इत्यर्थः । वस्तुतस्तु स्वसामर्थ्ये सत्यपि स्वरूपविरोधान्नास्माभिरस्मद्रक्षणमुचितमित्याहुः । त्वया रक्षितव्या इति । अनन्यार्हशरणा इत्यर्थः । गर्भभूताः प्रजातुल्याः । अनेनानन्यार्हशेषत्वमुक्तं । शश्वदिति काकाक्षिन्यायेनोभयत्राप्यन्वेति । तेनानन्यार्हशेषत्वानन्यशरणत्वयोस्स्वाभाविकत्वमुक्तं तथापि साधनं विना रक्षणेऽतिप्रसङ्गस्स्यादित्यत्राहुः । तपोधना इति । तपोत्र न्यासनिक्षेपापरपर्यायः "तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः" इति श्रुतेः प्रपत्त्येकधनावयमित्यर्थः । अस्मत्कृतां प्रपत्तिं व्याजीकृत्यास्मान्रक्षेत्यर्थः । रक्षणमत्र मोक्षप्रापणमेव । खरादिभ्यस्त्राणस्य शरभङ्गाश्रमवासिभिर्वक्ष्यमाणत्वात् । इमे तु मुनयो मोक्षैकपराः ॥ २० ॥ अतस्तेषां प्रपन्नानां यथोचितकैङ्कर्यप्रवृत्तिं दर्शयति—एवमित्यादि । ऋषयः एवमुक्त्वा सलक्ष्मणंराघवं । वन्यैः पुष्पैः फलादिभिश्चापूजयन् । राघवमित्यनेन सीतापूजनमप्यर्थसिद्धं । मिथुनशेषित्वस्यैव स्वरूपत्वात् । प्रभाप्रभावन्न्यायेन तयोरपृथग्भावात् । अन्यैः संकल्पसिद्धैः । विविधाहारैः मृष्टान्नादिभिः ॥ २१ ॥ सिद्धाःसिद्धसाधननिष्ठाः । न्यायवृत्ताः न्ययानुगुणव्यापाराः । स्वरूपानुरूपकैङ्कर्यवृत्तयइत्यर्थः । वैश्वानरोपमाः अस्पृष्टविरोधिनः स्वरूपविरुद्धनिषिद्धकाम्यकर्मान्तरत्यागिन इत्यर्थः । अन्ये पूर्वेभ्यो विलक्षणाः । तापसाः कायिककैङ्कर्याशक्ता इत्यर्थः । ईश्वरं परमशेषिणं रामं । यथान्यायं यथोचितं । स्तुतिप्रणामादिभिस्तर्पयामासुरित्यर्थः ॥२२॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने प्रथमः सर्गः ॥ १ ॥

एवं प्रथमसर्गेण सिद्धसाधननिष्ठानां मुमुक्षूणां मुनीनां तदीयपर्यन्तं विशिष्टविषयकैङ्कर्यं प्रतिपाद्य खरवधार्थिमुनिजनशरणागतिंवक्ष्यञ्शरण्यत्वोपयोगिसामर्थ्यं विराधवधकथनमुखेन बोधयितुमुपक्रमते । कृतातिथ्य इत्यादिना । अतएव संक्षेपे विराधं राक्षसं हत्वा शरभङ्गं ददर्श हेत्यत्र विराधवधोपहारमुखेन शरभङ्गं दृष्टवानिति व्याख्यातं ।तुशब्देन अन्यादिकृतातिथ्याद्वैलक्षण्यमुच्यते । अनन्यप्रयोजनदत्तं हि भगवतःपरमभोग्यं पत्रं पुष्पमित्यादि । अथशब्दः कृत्स्नवाची । कात्स्न्र्येन कृतातिथ्य इत्यर्थः। भक्तैर्यत्किञ्चिद्दत्त-

---

बलेन स्थानबलेन चतुरङ्गबलेनच स्वराज्यमात्ररक्षणेसमर्थाभवन्ति । सकललोकरक्षणधुरंधरस्यासहायशूरस्यतव नगरवासेकिंबलमुपचीयते वनवासेकिमपचीयते स्वाभाविकनित्यनिरतिशयशक्तिसंपन्नस्यावसादकंसत्त्वंकिमपिनास्तीत्यर्थः । सोपाधिकशेषिणो देशविशेषादिसंबन्धापेक्षा । निरुपाधिकशेषिणस्तव यत्रकुत्रचिदवस्थानेप्यस्मद्रक्षणमावश्यकमितिराजशब्दार्थः ॥ १९ ॥ स० सलक्ष्मणं लक्ष्मणेन श्रीवत्सचिह्नेन वैदेह्या सहितमितियावत् । एतेन पूर्वरामलक्ष्मणाभ्यांसहदृष्टायास्सीतायाः कथमनर्च्यत्वमितिशङ्कापरास्ता । ति० सलक्ष्मणमित्यनेन लक्ष्मणस्याप्याहारभक्षणंस्पष्टमुक्तं ॥२१॥ ती० सिद्धाः भरद्वाजादिवत्सिद्धसंकल्पाः । न्यायवृत्ताः न्यायोभगवदुपासनादिरूपधर्मः सएववृत्तंशीलंयेषांतेतथा ॥ २२ ॥ इतिप्रथमस्सर्गः ॥ १ ॥

[पा०] १ क. ख. ग. ङ.—ट. पुष्पैरन्यैश्च. २ क. ख. च. छ. ज. पार्थिवं. ३ क. ख. ग. ङ.—ट. वन्यैश्च. ४ च. छ. अ. ञ. वैश्वानरोपमं. ५ ख. ग. आमन्त्र्यच.

नानामृग[1]गणाकीर्णं शार्दूलवृकसेवितम् ॥ ध्वस्तवृक्षलतागुल्मं दुर्दर्शसलिलाशयम् ॥ २ ॥
निष्कूजनाना[2]शकुनिझिल्लिकागण[3]नादितम् ॥ [4]लक्ष्मणानुगतो रामो वनमध्यं ददर्श ह ॥ ३ ॥
[5]सीतया सह काकुत्स्थस्तस्मिन्घोरमृगायुते ॥ ददर्श गिरिशृङ्गाभं पुरुषादं महास्वनम् ॥ ४ ॥
[6]गम्भीराक्षं [7]महावक्त्रं विकटं [8]विषमोदरम् ॥ बीभत्सं विषमं दीर्घं विकृतं घोरदर्शनम् ॥ ५ ॥
वसानं चर्म वैयाघ्रं वसार्द्रं रुधिरोक्षितम् ॥ त्रासनं सर्वभूतानां व्यादितास्यमिवान्तकम् ॥ ६ ॥
त्रीन्सिंहांश्चतुरो व्याघ्रान्द्वौ वृकौ पृषतान्दश ॥ सविषाणं वसादिग्धं गजस्य च शिरो महत् ॥
अवसज्यायसे शूले विनदन्तं महास्वनम् ॥ ७ ॥
स रामं लक्ष्मणं चैव सीतां दृष्ट्वा च मैथिलीम् ॥ [9]अभ्यधावत संक्रुद्धः प्रजाः काल इवान्तकः ॥ ८ ॥
स कृत्वा भैरवं नादं चालयन्निव मेदिनीम् ॥ अङ्केनादाय वैदेहीमपक्रम्य [10]ततोऽब्रवीत् ॥ ९ ॥
युवां जटाचीरधरौ सभार्यौ क्षीणजीवितौ ॥ प्रविष्टौ दण्डकारण्यं शरचापा[11]सिधारिणौ ॥ १० ॥

मपि तत्सर्वातिथ्यत्वेन हि भगवान्स्वीकरोति । सूर्यस्योदयनंप्रतीति कर्मप्रवचनीययोगे द्वितीया । "लक्षणेत्थंभूताख्यान–" इत्यादिना प्रतेः कर्मप्रवचनीयत्वं । उदयनं प्रति उदयकाले । प्रातःस्नानादिकर्मावसान इत्यर्थः । वनमेवान्वगाहत नच तत्र स्थातुमैच्छदित्यर्थः ॥ १ ॥ नानामृगगणेत्यादिश्लोकद्वयमेकान्वयं । ध्वस्तवृक्षलतागुल्मं तुङ्गकठिनविराधदेहसंपर्कादिति भावः । दुर्दर्शसलिलाशयमित्यत्राप्येष्ययमेव हेतुः । निष्कूजनानाशकुनि निःशब्दनानाविधपक्षिकं । सुदूरमुड्डीयमानोपि पक्षी तस्माद्भिया निःशब्दं लीयत इति भावः । झिल्लिकागणनादितं झिल्लिकाभिस्तु दुर्दर्शत्वात्सर्वदा शब्द्यत इत्यर्थः । नानेत्यादि सर्वं वनमध्यविशेषणं ॥ २—३ ॥ सीतया सहेत्यादि सार्धश्लोकचतुष्टयमेकान्वयं । घोरमृगास्तरक्ष्वादयः । पुरुषानत्ति भक्षयतीति पुरुषादः । पचाद्यच् । राक्षसमित्यर्थः । महास्वनं दृढकण्ठध्वनिकं ॥ ४ ॥ गम्भीराक्षं निम्नाक्षं । महावक्त्रं पृथुतरमुखं । विकटं विशालं । विषमोदरं निम्नोन्नतोदरं । बीभत्सं मांसरुधिरालिप्तशरीरतया कुत्सितं । विषमं न्यूनाधिकावयवं । विकृतं उक्तप्रकारेण विकृतवेषं । अतएव घोरदर्शनम् ॥ ५ ॥ वसा मांसं तया आर्द्रं । रुधिरोक्षितं रक्तसिक्तं । व्यादितास्यं व्यात्तास्यं । आर्ष इट् ॥ ६ ॥ भक्षणार्थमितिशेषः । पृषतान् बिन्दुमृगान् । आयसे अयोमये । शूले अवसज्य प्रोतान् कृत्वा । महास्वनं यथाभवति तथा विनदन्तं विनादं कुर्वन्तं ॥ ७ ॥ काले संहारकाले । प्रजा उद्दिश्य अन्तको यथा धावति तथा अभ्यधावत ॥ ८ ॥ अङ्केन कटिप्रदेशेन ॥ ९ ॥ सभार्याविति भार्याशब्दो योषिन्मात्रवाचीत्येके वदन्ति। अन्ये तु यथा "प्राणभृत उपदधाति" इत्यत्र प्राणभृच्छब्दः प्राणभृदप्राणभृत्साधारणः । यथाच "ऋतं पिबन्तौ" इत्यत्र पानकर्त्रकर्तृसाधारणो जीवेश्वरयोः पिबच्छब्दप्रयोगस्तथा छत्रिन्यायेनात्रापि सभार्याविति युक्तमित्याहुः । तथापि ध्वनिदोषोऽवर्जनीयः । वस्तुतस्तु द्वयोरेका भार्यास्तीति दुर्बुद्धिनैवमुक्तमिति

स० कुरुपाण्डवन्यायेन नानामृगगणाकीर्णं ऋक्षशार्दूलसेवितमितिसंभवति । दुर्दर्शसलिलाशयं गंभीरत्वात् ॥ २ ॥ **शि०** झिल्लिकागणनादितमित्यनेन झिल्लिकाशब्दस्यराक्षसप्रियत्वंसूचितं ॥ **स०** निष्कूजनानाशकुनि स्वधनुर्दर्शनेननिश्शब्दनानापक्षि । झिल्लिकानांचीरीणां । लक्ष्मणः अनुगतोयंरामंसः । लक्ष्मणानुचरइतिपाठे लक्ष्मणैः शुभलक्षणैः अनुचरास्सर्वैपियस्य सः ॥ ३ ॥ **स०** मृगाणामयुतंयस्मिंस्तस्मिन् । **ती०** गिरिशृङ्गाभं गिरेश्शृङ्गं आभा उपमा यस्यतं ॥ ४ ॥ **ती० टी०** अत्र विराधेनसीताग्रहणं स्वाघौघपरिहारार्थमेव नतुदारबुद्ध्या । तदुक्तंस्कान्दे " सोपितांजानकींदृष्ट्वाशीघ्रंसंजातविक्रमः । इयंपुरामहाशक्तिस्सेयंस्वर्गस्यकारणम् । अस्याविबोधोमोक्षेपिकारणंबन्धनेपिच । तस्मादिमांभजिष्यामिदिष्ट्याप्राप्तंहिदर्शनम् । इतिदर्शनमात्रेण विमुक्ताघौघपञ्जरः । भक्तियुक्तोजहारैनांसीतांचैतन्यरूपिणीम् । " इति । **शि०** अङ्केन शीघ्रगत्या । वैदेहीं अपक्रम्य स्वस्कन्धयोस्संस्थाप्य ॥ ९ ॥ **ती०** यद्वा सभायामार्यौ सभार्यौ । **स०** सभार्यौ भार्यासहितौ । सीतायाउभयभार्यात्वभ्रमेणेयमुक्तिः । द्वयो-

[पा०] १ ग. समाकीर्णं. २ ट. शकुनं. ३ ग. सेवितं. ४ ङ. झ. ट. लक्ष्मणानुचरो. ५ क. ख. ग. वनमध्येतुकाकुत्स्थः. ६ च. झ. ञ. ट. गभीराक्षं. ७ ग. घ. महासत्वं. ८ क. च. ज. ञ. विकृतोदरं. झ. ट. विकटोदरं. ९ क. ख. ग. अभ्यधावत्सुसंक्रुद्धः. क. ख. ग. अभ्यगच्छत्सु. १० ङ. झ. ट. तदाऽब्रवीत्. ११ ङ. झ. ट. पाणिनौ.

कथं तापसयोर्वां च वासः प्रमदया सह ॥ अधर्मचारिणौ पापौ कौ युवां मुनिदूषकौ ॥ ११ ॥
अहं वनमिदं दुर्गं विराधो नाम राक्षसः ॥ चरामि सायुधो नित्यमृषिमांसानि भक्षयन् ॥ १२ ॥
इयं नारी वरारोहा मम भार्या भविष्यति ॥ युवयोः पापयोश्चाहं पास्यामि रुधिरं मृधे ॥ १३ ॥
तस्यैवं ब्रुवतो धृष्टं विराधस्य दुरात्मनः ॥ श्रुत्वा सगर्वितं वाक्यं संभ्रान्ता जनकात्मजा ॥
सीता प्रावेपतोद्वेगात्प्रवाते कदली यथा ॥ १४ ॥
तां दृष्ट्वा राघवः सीतां विराधाङ्कगतां शुभाम् ॥ अब्रवील्लक्ष्मणं वाक्यं मुखेन परिशुष्यता ॥ १५ ॥
पश्य सौम्य नरेन्द्रस्य जनकस्यात्मसंभवाम् ॥ मम भार्यां शुभाचारां विराधाङ्के प्रवेशिताम् ॥
अत्यन्तसुखसंवृद्धां राजपुत्रीं यशस्विनीम् ॥ १६ ॥
यदभिप्रेतमस्मासु प्रियं वरवृतं च यत् ॥ कैकेय्यास्तु सुसंपन्नं क्षिप्रमद्यैव लक्ष्मण ॥ १७ ॥
या न तुष्यति राज्येन पुत्रार्थे दीर्घदर्शिनी ॥ ययाऽहं सर्वभूतानां हितः प्रस्थापितो वनम् ॥
अद्येदानीं सकामा सा या माता मम मध्यमा ॥ १८ ॥

सम्यक् । क्षीणजीवितौमद्धस्ते पतनादिति भावः । यद्वा क्षीणजीवितौ प्रविष्टौ क्षीणजीवितत्वादेव प्रविष्टौ । अत्र प्रविष्टानां जीवितं दुर्लभमितिभावः ॥ १० ॥ वस्तुतो विपरीताचारौ युवां मम वध्यावेवेत्याशयेनाह —कथमिति । वां युवयोः । प्रमदया सह वासश्च कथं विरुद्ध इत्यर्थः । "नचवाहा–" इति निषेधेपि वामादेशआर्षः । कथंशब्दोक्तं विवृणोति—अधर्मेति। मुनिदूषकौ मुनिवेषविरुद्धशरचापासिधारणादितिभावः । अतएव पापौ ॥११—१२॥ मृधे युद्धे ॥१३॥ सगर्वितं सगर्वं । भावे निष्ठा । उद्वेगात् भयात् ॥ १४ ॥ परिशुष्यता शोकसंकुचितेन । मुखेन उपलक्षितः ॥ १५—१६ ॥ कैकेय्याः अस्मासु विषये यदभिप्रेतं योभिप्रायः । यच्च प्रियं वरवृतं वरव्याजेन वृतं । तदद्यैवसुसंपन्नं फलितं ॥१७॥ अभिप्रेतशब्दोक्तं सूक्ष्मेक्षिकया विवृणोति—या न तुष्यतीति । दीर्घदर्शिन्या कैकेय्या अस्मद्व्यसनं पूर्वमेव यदि नचिन्तितं स्यात्तर्हि पुत्रार्थं राज्यमेव वरयेत् । नतु मत्प्रवासनं । मत्प्रवासनवरणादवगम्यते । अयं वनं गतश्चेत्सीतापि गच्छेत् । सा च राक्षसादिभिरपह्रियेत । तेन रामोपि व्यसनं महत्प्राप्नुयात् । ततश्च मत्पुत्रस्य राज्यं निष्कण्टकं स्यादिति कैकेयी नूनममन्यतेति भावः । पुत्रार्थे पुत्रप्रयोजननिमित्तं । माता मम मध्यमेति । यद्यपि पूर्वं मम माता कनीयसीत्युक्तं तथापि महिषीत्रयापेक्षया कनीयसीत्वं सर्वदशरथपत्न्यपेक्षया मध्यमात्वं । त्रिशतंपञ्चाशच्च दशरथपत्न्यः सन्तीति पूर्वमेवोक्तं । अद्य अस्मिन्दिवसे । इदानीं अस्मिन्क्षणे

रेकप्रियत्वंप्रमाणविकलंसदपि तदनुमतंचेन्ममापि सा भार्याभवितुंयोग्येतिभावमवगमयितुमियमुक्तिर्वा । अतएव "इयंनारीवरारोहाममभार्याभविष्यति" इतिवक्ष्यमाणंयुक्तंभवति । छत्रिन्यायेनवा ॥ **ति०** यद्वा विराधस्येदंनिन्दोक्तिरूपमेववाक्यं ॥१०॥ **ति०** तदेवाह—**कथमिति** । प्रमदया एकयासह द्वयोर्वासः कथंचेत्यन्वयः । **स०** मुनिदूषकौ मुनिधर्मदूषकौ ॥११॥ **शि०** वरारोहा वरः अत्युत्कृष्टः आरोहः ममस्कन्धयोरारोहणं यस्यास्सा इयंनारी ममभार्या मत्पोष्याभविष्यति । एतेन तस्यसीतायांसेव्यत्वबुद्धिस्संजातेतिध्वनितं ॥ १३ ॥ **शि०** विराधाङ्कगतां विराधस्याङ्केन शीघ्रगत्याहेतुभूतया गतां तत्स्कन्धयोः प्राप्तां ॥१५॥ **शि०** विराधाङ्के प्रवेशितां विराधाङ्कस्य विराधशीघ्रगमनस्य या ईः व्याप्तिस्तया प्रवेशितां स्कन्धयोस्संस्थापितां । राजपुत्रीं राजती शोभावतीचसा पुत्री तां । **स०** प्रवेशितां तेनेतिशेषः ॥ १६ ॥ **ति०** मध्यमामाता कौसल्यातः कनिष्ठत्वात्सुमित्रातो ज्येष्ठत्वात् । कौसल्यापेक्षयाकनिष्ठत्वात्पूर्वंयवीयसीत्युक्तिरपिनासंगता । भगवतोपीदृशोक्तिस्तु लक्ष्मणोत्साहवर्धनायेतिभावः । **स०** यद्वा मध्यमा सुमित्रा तत्सामीप्यान्मध्यमाकैकेयी । अथवा मध्यमा उक्तकारिणी । स्वतस्सद्बुद्धित्वान्मन्थरोक्तकारिणीति

[५१०] १ क. ग. मुनिदूषणौ. २ ङ. च. झ. ञ. ट. दुष्टं. ३ क. ख. ग. सगर्ववचनं. ज. सममर्वचनं. ४ झ. ट. प्रवेपितोद्वेगात्. घ. प्रावेपतोद्विग्ना. ५ घ. च. ज. ञ. राघवःश्रीमान्. ६ क.—घ. प्रवेपितां. ७ क. ख. ग. च. ज. ञ. मनस्विनीं. ८ घ. वरकृतंच. ज. वरमयंचतत्. ९ क. ग. ङ. च. ज. झ. ञ. ट. स्सुसुसंवृत्तं. घ. स्तत्सुसंवृत्तं. १० ज. झ. ट. मध्यमामम.

परस्पर्शात्तु वैदेह्या न दुः[1]खतरमस्ति मे ॥ पि[2]तुर्वियोगात्सौमित्रे स्वराज्यहरणात्तथा ॥ १९ ॥
इति ब्रुवति काकुत्स्थे बाष्पशोकपरि[3]प्लुते ॥ अब्रवील्ल[4]क्ष्मणः क्रुद्धो रुद्धो नाग इव श्वसन् ॥ २० ॥
अनाथ इव [5]भूतानां नाथस्त्वं वासवोपमः ॥ मया प्रेष्येण काकुत्स्थ किमर्थं परितप्यसे ॥ २१ ॥
शरेण निहतस्याद्य मया क्रुद्धेन रक्षसः ॥ विराधस्य गतासोर्हि मही पास्यति शोणितम् ॥ २२ ॥
राज्यकामे मम क्रोधो भरते यो बभूव ह ॥ तं विराधे [6]प्रमोक्ष्यामि वज्री वज्रमिवाचले ॥ २३ ॥
मम भुजबलवेगवेगितः पततु शरो[9]स्य महान्महोरसि ॥
[7]व्यवसयतु [8]तनोश्च जीवितं पततु [9]ततस्स महीं विघूर्णितः ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे द्वितीयः सर्गः ॥ २ ॥

॥ १८ ॥ किं ते तादृशं व्यसनं तत्राह—परस्पर्शादिति । वैदेह्याः परस्पर्शाद्यथा दुःखतरं अतिदुःखं । पितृवियोगाद्राज्यहरणाच्च तथा दुःखं नास्तीति योजना ॥ १९ ॥ रुद्धः मन्त्रगणनिरुद्धः । नागः सर्पः । श्वसन् रामशोकदर्शनादिति भावः ॥ २० ॥ वासवोपमो भूतानां नाथः सन् अनाथ इव नाथसापेक्षो नर इव । विशिष्य मया प्रेष्येण सहितोपि किमर्थं परितप्यसे । वास्तवार्थस्तु भूतानां सर्वलोकानां नाथःवासव उपमीयतेनेनेति वासवोपमः त्वं अनाथ इव नाथभिन्न इव किमर्थं परितप्यसे । एवमेव तत्त्वं जगुः । यथा विश्वामित्रः "अहं वेद्मि महात्मानं" इति । यथा च परशुरामः "त्वया त्रैलोक्यनाथेन यदहं विमुखीकृतः" इति । एवमृषयोपि ॥ २१ ॥ प्रेष्येण त्वया किं क्रियत इत्यत्राह—शरेणेति ॥२२॥ कैकेय्याः भरतार्थं राज्यकाङ्क्षित्वाद्भरतस्यापि राज्यकामत्वं । तं विराधे विमोक्ष्यामीति शरणागतेभरते दुर्विमोचत्वादिति भावः । ननु भरतकैकेयीभ्यामज्ञानात्प्रवासनं कारितं पुनरागन्तव्यमिति क्षमापणस्य कृतत्वात् । कुतः पुनः रामलक्ष्मणाभ्यां तत्र राज्यापहारित्वमनुस्मर्यते । उच्यते अनन्तरं तथाऽनुष्ठानेपि पूर्वं कैकेय्या तथा चिन्तितत्वात्तस्यचावश्यकर्तव्यत्वाद्दुःखकाले तच्चिन्तनं । तथापि व्यसनकालेपि परदोषोद्घाटनं सत्पुरुषानुचितं रामप्रकृतिविरुद्धं च । सुप्तप्रमत्तकुपितानां भावज्ञानंदृष्टमितिन्यायेन दोषदर्शनमेवरामस्यहार्दं तदुपेक्षकत्वं त्वभिनयमात्रमिति स्यात् । अत्रोच्यते । व्यसनकाले लोकोवाच्यमवाच्यं च न जानातीत्यमुमर्थं व्यञ्जयितुमेवमुक्तमिति ॥ २३ ॥ भुजबलवेगेन धनुराकर्षणवेगेन वेगितः आनीतवेगः । इतजन्तोवा । विघूर्णितः संजातभ्रमणः ॥ २४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्वितीयः सर्गः ॥ २ ॥

प्रोक्तकारिणीत्यर्थः । "प्रोक्तकारीतुमध्यमः" इत्युक्तेः ॥ १८ ॥ **ती०** क्रुद्धः कैकेयींप्रति ॥२०॥ **ती०** सरामंलक्ष्मणंदृष्ट्वेत्यारभ्य किमर्थंपरितप्यसइत्यन्तस्यग्रन्थसंदर्भस्य वास्तवार्थस्तु सः विराधः रामंलक्ष्मणंवैदेहींचदृष्ट्वासंक्रुद्धस्सन् सीतामभ्यधावत् गृहीतुमितिशेषः ।रामादीन्दृष्ट्वा तत्तेजसाऽभिभूतोविराधः स्ववृत्तान्तंकथयंस्तान्पृच्छति । स कृत्वेत्यादिश्लोकपञ्चकेन । ततस्सविराधः अन्तेसमीपे । आगत्येतिशेषः । वैदेहीमादायापक्रम्याब्रवीत् । रामलक्ष्मणावितिशेषः। युवामिति । सभार्यौ सभायामार्यौ । क्षीणजीवितौ क्षीणंजीवितमरीणांयाभ्यां । शरचापासिधारिणौसन्तौ जटाचीरधरौचसन्तौ दण्डकारण्यंप्रविष्टौ । यद्यपि तापसयोर्वांप्रमदयासहवासोयद्यपि । तथापि कथंपापौ कथंमुनिदूषकौ । तादृशौनभवतइत्यर्थः । अत्रहेतुः अधर्मचारिणौ अधर्मंचरतो भक्षयतो नाशयतइतितथा । एतादृशविशेषणविशिष्टौकौयुवां । किंच । अहमिति । अहंविराधोनामराक्षसः। इदानींमम पापयोः पापाभ्यां । हस्ताभ्यामितिशेषः । ऋषिमांसानिभक्षयन् सायुधोमृधेरुधिरंपास्यामीतिधिया दुर्गंवनंचरामि । किंच भया कान्त्या आर्याश्रेष्ठा इयंनारी युवयोःकाभविष्यतीति तावब्रवीदितिपूर्वेणसंबन्धः । तस्येति । ऋषिमांसानिभक्षयंश्चरामीत्येवं दुष्टंयथातथा विराधस्यब्रुवतस्सतः सीताप्रावेपत । तामिति । विराधाङ्के तत्समीपे प्रवेशितां स्थितामित्यर्थः । सीतांदृष्ट्वा परिशुष्यतामुखेनोपलक्षितः सीताभीत्येतिशेषः । अब्रवीत् पश्येति । विराधाङ्के तत्समीपे प्रवेशितांस्थितां । यदभिप्रेतमित्यादिवाक्यानि सीताभीतिनिमित्तेनोक्तानीति द्रष्टव्यानि । परस्पर्शात् परस्यराक्षसस्यस्पर्शात् समीपागमनादित्यर्थः । बाष्पशोकपरिप्लुते सीताभीतिनिमित्तमितिभावः ॥२१॥ इतिद्वितीयस्सर्गः ॥२॥

[पा०] १ ग. दुःखान्तर. २ क. ख. ग. ङ. च. ज. झ. ट. पितुर्विनाशात्. ३ ङ. झ. ट. परिप्लुतः. ४ ख. लक्ष्मणस्तत्र क्रुद्धोनागइव. ५ घ. लोकानां. ६ क. ग. ङ. च, झ, ञ. ट. विमोक्ष्यामि. ७ क. ट. व्यपनयतु. ८ च. ञ. ततोस्य. ९ क. ख. ङ, च. ज. झ, ञ. ततश्च.

तृतीयः सर्गः ॥ ३ ॥

रामेणविराधंप्रतिस्ववृत्तान्तनिवेदनपूर्वकंतद्वृत्तान्तनिवेदनप्रश्नेतेनतंप्रतिस्वपितृनामस्वप्रभावनिवेदनपूर्वकंसीताविसर्जनेन त्वरयापलायनचोदना ॥ १ ॥ ततोरामबाणाभिहतिव्यथितेनतेनसीतायाभुविन्यसनपूर्वकंरामलक्ष्मणयोःस्वस्कन्धारोपणेन वनमध्यप्रवेशः ॥ २ ॥

[इत्युक्त्वा लक्ष्मणः श्रीमान्राक्षसं प्रहसन्निव ॥ को भवान्वनमभ्येत्य चरिष्यति यथासुखम् ॥ १ ॥]
अथोवाच पुनर्वाक्यं विराधः पूरयन्वनम् ॥ आत्मानं पृच्छते ब्रूतं कौ युवां क्व गमिष्यथः ॥ २ ॥
तमुवाच ततो रामो राक्षसं ज्वलिताननम् ॥ पृच्छन्तं सुमहातेजा इक्ष्वाकुकुलमात्मनः ॥ ३ ॥
क्षत्रियौ वृत्तसंपन्नौ विद्धि नौ वनगोचरौ ॥ त्वां तु वेदितुमिच्छावः कस्त्वं चरसि दण्डकान् ॥ ४ ॥
तमुवाच विराधस्तु रामं सत्यपराक्रमम् ॥ हन्त वक्ष्यामि ते राजन्निबोध मम राघव ॥ ५ ॥
पुत्रः किल जयस्याहं मम माता शतह्रदा ॥ विराध इति मामाहुः पृथिव्यां सर्वराक्षसाः ॥ ६ ॥
तपसा चापि मे प्राप्ता ब्रह्मणो हि प्रसादजा ॥ शस्त्रेणावध्यता लोकेऽच्छेद्याभेद्यत्वमेव च ॥ ७ ॥
उत्सृज्य प्रमदामेनामनपेक्षौ यथागतम् ॥ त्वरमाणौ पलायेथां न वां जीवितमाददे ॥ ८ ॥
तं रामः प्रत्युवाचेदं कोपसंरक्तलोचनः ॥ राक्षसं विकृताकारं विराधं पापचेतसम् ॥ ९ ॥

अथ विराधानुग्रहाय तदाक्रमणं तृतीये—अथोवाचेत्यादि । पूरयन् शब्देनेति शेषः । आत्मानं युष्मत्स्वरूपं । पृच्छते मह्यमिति शेषः । ब्रूतमिति लोण्मध्यमपुरुषद्विवचनम् । प्रश्नप्रकारमाह—काविति ॥ १—२ ॥ राक्षसत्वेन प्रकृत्या ज्वलिताननमिति भयहेतूक्तिः । आत्मनः सम्बन्धि इक्ष्वाकुकुलमुवाचेत्यन्वयः । इक्ष्वाकुवंश्यदशरथपुत्रावावां पितृवचनाद्वनं गमिष्याव इत्युवाचेत्यर्थः ॥ ३ ॥ अधर्मचारिणौ पापाविति पूर्वोक्तविराधवचनस्योत्तरमाह—क्षत्रियौ वृत्तसंपन्नाविति । त्वामिति । कस्य पुत्रः किंप्रभाव इति ज्ञातुमिच्छावइत्यर्थः । "अहं वनमिदं दुर्गं विराधो नाम राक्षसः" इति नामजात्योः पूर्वमुक्तत्वान्नतद्विषयोयं प्रश्नः ॥४॥ हन्तस्वाभिप्रायकीर्तनोद्योगजगर्वेण । मम मत्तः मे स्वरूपमिति शेषः । निबोधेत्युवाचेत्यन्वयः ॥ ५ ॥ विराधः विगताराधनः दुराराध्यइत्यन्वर्थसंज्ञः । राक्षसाः सजातीयाः सजातीयैः कृतं नामेदं नतु मातापितृभ्यामिति भावः ॥ ६ ॥ चापि किञ्च । तपसा साधनेन । ब्रह्मणः प्रसादजा शस्त्रेणावध्यता अमारणीयता प्राप्ता । अच्छेद्याभेद्यत्वं च प्राप्तं । प्राणवियोजनहेतुखण्डनविदारणानर्हत्वं च प्राप्तमित्यर्थः ॥७॥ अनपेक्षौ अपेक्षायां मरणं ध्रुवमिति भावः । त्वरमाणौ मन्दगमने मे मनश्चलेदिति भावः । न वां जीवितमाददे उत्तमप्रमदारत्नप्रापणादिति भावः ॥ ८ ॥ तं एवं परुषं वदन्तं । परुषवचनादेव

शि० विराधंज्ञातुकामस्य लक्ष्मणस्योक्तिमाह—**इतीति** । श्रीमाँल्लक्ष्मणः इतिवचः उक्त्वा रामंप्रतीतिशेषः । वनं अभ्येत्य प्राप्य यथासुखं यश्चरिष्यति चरति । सभवान्कः इतिवचःप्रहसन्निव विराधं आहेतिशेषः ॥ १ ॥ **स०** वनं गोचरोययोस्तौ । यद्वा वनस्ययागौर्भूस्तस्यां चरत इतितौ तथोक्तौ । समासान्तविधेरनित्यत्वान्नटच् । यद्वा गविचरतोगोचरौ वनस्य गोचरौवनगोचरौ । वनपदार्थस्य योग्यतयागोचरपदैकदेशगोपदार्थेनानन्वयः । "दीप्तानलार्कद्युतिमप्रमेयं"इत्यत्राप्रमेयत्वस्य द्युतावन्वयोज्ञेयः ॥ ४ ॥ **स०** सर्वराक्षसाइत्यनेन लोकप्रसिद्धत्वंद्योतयति ॥ ६ ॥ **स०** लोके ये छेद्यास्तेषामभेद्यत्वं । यद्वा छेद्यानामङ्गानामभेद्यत्वं । अवध्यत्वप्रकारनिरूपणं वैतत् ॥ **ती०** शस्त्रेण येनकेनापिशस्त्रेण । शस्त्रबलेनाच्छेद्याभेद्यत्वं छेदभेदाभ्यामव्यथनीयत्वं ॥ **शि०** अच्छेद्यत्वं अवयवद्वैधीभवनाभावः । अभेद्यत्वं शरीरेव्रणप्राप्त्यभावः । वस्तुतस्तु छेद्येन छेत्तुमर्हेणप्राकृतशस्त्रेणेत्यर्थः । अतएव वक्ष्यमाणरामशस्त्रकरणकभेदनंसंगच्छते । तेषांप्राकृतभिन्नत्वात् ॥ ७ ॥ **ती०** अनपेक्षौ प्रमदाशारहितौ । वस्तुतस्तु उत्सृज्य मामितिशेषः । प्रमदामादायेतिशेषः । वां युवयोः जीवितं प्राणसमंस्त्रीरत्नं नाददे इत्युवाचेतिपूर्वेण

[पा०] १ अयंश्लोकः क. ग. च. छ. ज. ञ. ट. पुस्तकेष्वेवदृश्यते. २ क. च. ज. ञ. ट. न्विराधं. ३ ग. प्रदहन्निव. ४ क. तावुवाचततोभीमोविराधः. ५ ङ. झ. ट. पृच्छतोममहिब्रूतं. ६ घ. विराधं. ७ क. अहं. ८ ख. ग. ङ. च. ज. झ. ञ. मातामम. ९ ङ. ज. झ. ट. चाभिसंप्राप्ता.

[1]क्षुद्र धिक्त्वां तु हीनार्थं मृत्युमन्वेषसे ध्रुवम् ॥ रणे सं[2]प्राप्स्यसे तिष्ठ न मे जीवन्गमिष्य[3]सि ॥ १० ॥
ततः सज्यं धनुः कृत्वा राम[4]स्सुनिशिताञ्शरान् ॥ सुशीघ्रमभिसन्धाय राक्षसं निज[5]घान ह ॥ ११ ॥
धनुषा ज्यागुणवता सप्त बाणान्मुमोच ह ॥ रुक्मपुङ्खान्महावेगान्सुपर्णानिलतुल्यगान् ॥ १२ ॥
ते शरीरं विराधस्य भित्त्वा बर्हिणवाससः ॥ निपेतुः शोणितादिग्धा धरण्यां पावकोपमाः ॥ १३ ॥
स विद्धो न्यस्य वैदेहीं शूलमुद्यम्य राक्षसः ॥ अभ्यद्रवत्सुसंक्रुद्धस्तदा रामं सलक्ष्मणम् ॥ १४ ॥
स विनद्य महानादं शूलं शक्रध्वजोपमम् ॥ प्रगृह्याशोभत तदा व्यात्तानन इवान्तकः ॥ १५ ॥
अथ तौ भ्रातरौ [6]दीप्तं शरवर्षं ववर्षतुः ॥ विराधे राक्षसे तस्मिन्कालान्तकयमोपमे ॥ १६ ॥
स प्रहस्य [7]महारौद्रस्स्थित्वाऽजृम्भत राक्षसः ॥ जृम्भमाणस्य ते बाणाः कायान्निष्पेतुराशुगाः ॥१७॥
[8]स्पर्शात्तु वरदानेन प्राणान्[9]संरोध्य राक्षसः ॥ विराधः शूलमुद्यम्य [10]राघवावभ्यधावत ॥ १८ ॥
तच्छूलं वज्रसंकाशं गगने ज्वलनोपमम् ॥ द्वाभ्यां शराभ्यां चिच्छेद रामः शस्त्रभृतां वरः ॥ १९ ॥

हेतोः कोपसंरक्तलोचनः । विकृताकारं विकृताकारमपि पापे सीताहरणे चेतो यस्य तं ॥ ९ ॥ क्षुद्रहीनजाते । धिक्कारे हेतुरयं । हीनार्थं उत्तमाङ्गनाभिलाषरूपहीनप्रयोजनमितियावत् । मृत्युं अन्वेषणहेतुं मरणं संप्राप्स्यसे । अन्वेषणं सफलं भविष्यतीत्यर्थः । तदा किञ्चिदुपेक्षया गन्तुमुद्युक्तं प्रत्याह—तिष्ठेति । गमनं च दुर्लभमित्याह—नेति । मे पुरत इति शेषः ॥१०॥ राक्षसं प्रति शरान् । निजघान अमुञ्चत् । हन हिंसागत्योरिति धातुः ॥ ११ ॥ पुनःशरान्विशिंषन्नाह—धनुषेति । ज्यारूपो गुणो रज्जुः तद्वता । महावेगान् अतएव सुपर्णानिलाभ्यां तुल्यं गच्छन्तीति तथोक्तान् ॥ १२ ॥ बर्हिणवासस इति स्वार्थे इनच् । बर्हिणवाससः बर्हपत्रा इत्यर्थः । शोणितेन आदिग्धाः ईषल्लिप्ताः । रक्तोद्गमात्पूर्वमेव शरीरान्निर्गमादितिभावः । पावकोपमा इति भूस्थतृणादिदहनादग्निसाम्यसिद्धिः ॥ १३ ॥

विद्धः बाणवेधजनितवेदनातिशयवान् । न्यस्य भूमौ निक्षिप्य ॥ १४ ॥ महान् नादः प्रतिध्वनिर्यस्मिंस्तद्यथा भवति तथा विनद्य । शक्रध्वजोपमं तद्वदुन्नतं । व्यात्ताननः विवृत्तास्यः । अनेन प्रसारितजिह्वत्वं लक्ष्यते शूलोपमेयतालाभाय ॥ १५ ॥ अथ सीतानिक्षेपानन्तरं । यथेष्टं बाणमोचनार्हत्वात् दीप्तं पूर्वबाणेभ्यस्तेजस्वि शरवर्षं शरसमूहं । उभाभ्यामपि मोचनीयत्वे हेतवः राक्षस इत्यादिविशेषणानि । कालान्तकयमोपमे काले संहारकाले अन्तको नाशको यो यमस्तत्तुल्ये ॥ १६ ॥ प्रहस्यकिमेतैर्मशकप्रायैरिति हसित्वा । अजृम्भत गात्रविनाममकरोत् । बाणाः काये किञ्चिल्लग्नाः । आशु गच्छन्तीत्याशुगाः आशुगा अपीत्यर्थः । निष्पेतुः जगलुः ॥ १७ ॥ वरदानेन स्पर्शात् संबन्धात् । प्राणान् प्राणवायून् । संरोध्य हृदये समूह्य बलं कृत्वेत्यर्थः ॥ १८ ॥ तत् हस्तस्थं । गगने ज्वलनः आकाशस्थाग्निः तदुपममित्यभूतोपमा

संबन्धः ॥ ८ ॥ **ती०** ज्यागुणवता ज्याशब्दवता । **स०** ज्यागुणवता भूमौप्रशस्तगुणवता । यद्वा ज्या मौर्वी गुणो मास्तृण्यादिः ताभ्यांयुक्तेन । **शि०** सुपर्णानिलतुल्यगान् सुपर्णानिलौ तुल्यं स्वसादृश्यं गच्छन्तिप्रापयन्ति तान् ॥१२॥ **शि०** बर्हिणवाससः बर्हिणः मयूराः तत्संबन्धिपिञ्छानीत्यर्थः । तान्येववासांसियेषांतेतथा ॥ **स०** बर्हिणवासएव वासोयेषांतेबर्हिणवाससः । मयूरपक्षवस्त्राः ॥ १३ ॥ **ती०** वस्तुतस्तु वैदेहींन्यस्य सीतासमीपमगत्वा ॥ १४ ॥ **ती०** कालोन्तकोयमश्चेतित्रयो मारणाधिकारिणः । तत्र कालस्याधिकारो जीवितविच्छेदे । अन्तकस्य प्राणापहारे । यमस्यपुण्यापुण्यविवेके इतिभेदः ॥ **ति०** कालान्तकयमाः प्राणतनुमनस्संहारप्रधानास्संहाररुद्रस्यमूर्तयः तत्सदृशे ॥ **शि०** कालान्तकयमोपमे अन्तकः मृत्युः । कालस्तन्निमित्तं । यमस्तन्नियन्ता । तैरुपमा यस्य । किंच कालः प्राप्तः अन्तकोयस्य सएव यमोपमस्तस्मिन् ॥ **स०** कालः कालाभिमानी अन्तकोमृत्युरित्युभौ यमभृत्यौ । तौच यमश्च तेषामुपमायस्य तस्मिन् ॥ १६ ॥ **ति०** प्रहस्य शस्त्रावध्येमयि वृथैवबाणपातइतिहासः ॥ १७ ॥ **ती० टी०** वरदानेन ईश्वरवरदानेन । तदुक्तं । "विराधोहाटकपुरेविधिवन्मामपूजयत् । मदनुग्रहवैशिष्ट्यादवध्यस्ससुरा-

[पा०] १ च. क्षुद्रं. २ क. ख. ङ. च. ज.—ट. प्राप्स्यसिसंतिष्ठ. ३ ख. घ. ङ. च. ज.—ट. न्विमोक्ष्यसे. ४ ग. सतु. ५ ख. निजघानसः. ६ क. च. ज. ञ. तत्र. ७ क. ख. ञ. महारौद्रंस्थित्वा. ८ क. ख. ग. च. ज. बलात्तुवरदानस्य ९ क. च. ज संरुध्य. १० क. ङ. च. छ. ज. ट. राघवायव्यसर्जयत्.

तद्राम[1]विशिखच्छिन्नं शूलं तस्य कराद्भुवि ॥ पपाताशनिना छिन्नं मेरोरिव शिलातलम् ॥ २० ॥
तौ खड्गौ[2] क्षिप्रमुद्यम्य कृष्णसर्पोपमौ[3] शुभौ ॥ तूर्णमापततस्तस्य[4] तदा प्रहरतां बलात् ॥ २१ ॥
स वध्यमानस्सुभृशं[5] बाहुभ्यां[6] परिरभ्य[7] तौ ॥ अप्रकंप्यौ नरव्याघ्रौ रौद्रः प्रस्थातुमैच्छत ॥ २२ ॥
तस्याभिप्रायमाज्ञाय[8] रामो लक्ष्मणमब्रवीत् ॥ वहत्वयमलं तावत्पथाऽनेन तु राक्षसः ॥ २३ ॥
यथा[9] चेच्छति सौमित्रे तथा वहतु राक्षसः ॥ अयमेव हि नः पन्था येन याति निशाचरः ॥ २४ ॥
स तु स्वबलवीर्येण समुत्क्षिप्य[10] निशाचरः ॥ बालाविव स्कन्धगतौ चकारातिबलौ[11] ततः ॥ २५ ॥
तावारोप्य ततः स्कन्धं[12] राघवौ रजनीचरः ॥ विराधो[13] निनदन्घोरं जगामाभिमुखो वनम् ॥ २६ ॥

वनं महामेघनिभं प्रविष्टो द्रुमैर्महद्भिर्विविधैरुपेतम् ॥
नानाविधैः पक्षिशतैर्विचित्रं[14] शिवायुतं व्यालमृगैर्विकीर्णम् ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः ॥ ४ ॥

विराधेनरामलक्ष्मणापहरणेसीतयाविषादादुच्चैराक्रोशनम् ॥ १ ॥ राघवाभ्यांशस्त्रेणविराधबाहुद्वयभञ्जनपूर्वकंशस्त्रादिना बहुधापीडनेप्यविमुक्तप्राणेतस्मिन्रामेणलक्ष्मणंप्रतिविराधस्यशस्त्राद्यवध्यत्वोक्तिपूर्वकंगर्तेनिखननस्यतद्वधोपायत्वोक्तिः ॥ २ ॥ रामपादस्पर्शमहिम्नापूर्वजन्मस्मृतिमताविराधेनतंप्रतिकुबेरशापात्स्वस्यराक्षसत्वप्राप्तिनिवेदनपूर्वकंशरभङ्गाश्रमगमनचोदना ॥ ३ ॥ विराधेनापिस्वस्यगर्तक्षेपंप्रार्थितेनरामेणलक्ष्मणखातगर्तेतन्निखननम् ॥ ४ ॥ ततःसीतालक्ष्मणाभ्यांसहवनेसुखनिवासः ॥ ५ ॥

ह्रियमाणौ तु[15] तौ दृष्ट्वा वैदेही रामलक्ष्मणौ ॥ उच्चैस्स्वरेण चुक्रोश प्रगृह्य सुभुजा[16] भुजौ ॥ १ ॥

॥ १९ ॥ अशनिना वज्रेण ॥ २० ॥ प्रहरतां प्राहरतां ॥ २१ ॥ अप्रकम्प्यौ चालयितुमप्यशक्यौ । किंपुनः परिग्रहीतुमिति कविःपरिहसति । रौद्रः रौद्राकृतिः । अप्रकम्प्यत्वे हेतुः—नरव्याघ्राविति । नरव्याघ्रौ पुरुषोत्तमौ ॥२२ ॥ अभिप्रायं वनान्तर्नयनेच्छां । वहतु नौ प्रापयतु । अनेन आवाभ्यां गन्तव्येन पथावहतु । अथवा यथेच्छति येनमार्गेण गन्तुमिच्छति तथा वहतु । उभयथापि न दोष इति भावः । तत्र हेतुमाह —अयमिति । नः वनमध्यगमनेच्छूनामस्माकं ॥ २३—२४ ॥ अतिबलौ रामलक्ष्मणौ समुत्क्षिप्य बालाविव स्कन्धगतौ चकार तयोरिच्छावशादिति भावः ॥ २५—२६ ॥ इमावपि स्वाभीष्टवनं प्रविष्टावित्याशयेनाह—वनमिति । शिवाः सृगालविशेषः ताभिर्युतं । व्यालमृगैः दुष्टमृगैः । "दुष्टे द्विपे श्वापदे च व्यालः पुंसि शठेपि च" इति बाणः । अत्र सर्गे भगवतः स्वायत्तसकलप्रवृत्तिकत्वं महाभयहेतावपि निर्भयत्वं च दर्शितं । अस्मिन्सर्गे षड्विंशतिः श्लोकाः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने तृतीयः सर्गः ॥ ३ ॥

अथ परमपुरुषवहनफलं वक्तुमुपक्रमते—ह्रिय-

सुरैः" इति ॥ १८ ॥ **ति०** तच्छूलं करस्थमूलमागमेवेतिशेषः । गगनेज्वलनोपमं शिखाभागावच्छेदेनेतिभावः ॥ १९ ॥ **स०** महामेघनिभं सूर्यप्रकाशाच्छादकत्वेनेतिभावः ॥ २७ ॥ इतितृतीयस्सर्गः ॥ ३ ॥

शि० सुमहाभुजौ सुमहान्तौस्वबाहूप्रगृह्य समुत्थाप्य । सुमहाभुजौ काकुत्स्थौ प्रगृह्य ह्रियमाणौदृष्ट्वा चुक्रोशेत्यन्वयो वा ॥१॥

[पा०] १ क. ख. ङ.—ट. विशिखैश्छिन्नं. ग. विशिखैर्भिन्नं. २ घ. च. छ. ज. भुजौ. ३ ङ. झ. ट. सर्पाविवोद्यतौ. ४ ठ. मापेततुस्तस्य. ५ क. वध्यमानस्सतुभृशं. ६ ख. ग. ङ.—ट. भुजाभ्यां. ७ क.—ज. ञ. ट. परिगृह्य. ८ ज. मासाद्य. ९ क. ख. ग. च. छ. ज. ञ. यथेच्छतिहि. १० क. च. छ. ज. ञ. तौसमुत्क्षिप्यराक्षसः. ११ ग. चचारातिबलौ. ङ. झ. ट. चकारातिबलोद्धतः. १२ क. ङ. ज. ञ. स्कन्धे. १३ ख. घ.—ठ. विनदन्घोरं. १४ क. च. छ. ज. ञ. पक्षिगणैः. ङ. झ. ट. पक्षिकुलैः. १५ ङ. झ. ट. तुकाकुत्स्थौदृष्ट्वासीतारघूत्तमौ. क. ख. ततोदृष्ट्वा. १६ ङ. झ. ञ. ट. सुमहाभुजौ.

एष दाशरथी राम[1]स्सत्यवाञ्छीलवाञ्छुचिः ॥ रक्षसा [2]रौद्ररूपेण ह्रियते सहलक्ष्मणः ॥ २ ॥
[3]मां वृका भक्षयिष्यन्ति शार्दूला द्वीपिनस्तथा ॥ मां हरोत्सृज्य काकुत्स्थौ नमस्ते [4]राक्षसोत्तम ॥ ३ ॥
तस्यास्तद्वचनं श्रुत्वा [5]वैदेह्या रामलक्ष्मणौ ॥ वेगं प्रचक्रतुर्वीरौ वधे तस्य दुरात्मनः ॥ ४ ॥
तस्य रौद्रस्य [6]सौमित्रिर्बाहुं सव्यं बभञ्ज ह ॥ [7]रामस्तु दक्षिणं बाहुं तरसा तस्य रक्षसः ॥ ५ ॥
स भग्नबाहुः संविग्नो [8]निपपाताशु राक्षसः ॥ धरण्यां मेघसंकाशो वज्रभिन्न इवाचलः ॥ ६ ॥
मुष्टिभिर्जानुभिः पद्भिः [9]सूदयन्तौ तु राक्षसम् ॥ उद्यम्योद्यम्य चाप्येनं स्थण्डिले निष्पिपेषतुः ॥७॥
स विद्धो बहुभिर्बाणैः खङ्गाभ्यां च परिक्षतः ॥ निष्पिष्टो बहुधा भूमौ न ममार स राक्षसः ॥८॥
[10]तं प्रेक्ष्य रामः सुभृशमवध्यमचलोपमम् ॥ भयेष्वभयदः श्रीमानिदं वचनमब्रवीत् ॥ ९ ॥
तपसा पुरुषव्याघ्र राक्षसोयं न शक्यते ॥ शस्त्रेण युधि निर्जेतुं राक्षसं निखनावहे ॥ १० ॥
[[11]कुञ्जरस्येव रौद्रस्य [12]राक्षसस्यास्य लक्ष्मण ॥ [13]वनेऽस्मिन्सुमहच्छ्वभ्रं खन्यतां [14]रौद्रवर्चसः ॥ ११ ॥
इत्युक्त्वा लक्ष्मणं रामः प्रदरः खन्यतामिति ॥ तस्थौ विराधमाक्रम्य कण्ठे पादेन वीर्यवान् ॥१२॥]
तच्छ्रुत्वा राघवेणोक्तं राक्षसः [15]प्रश्रितं वचः ॥ इदं प्रोवाच काकुत्स्थं विराधः पुरुषर्षभम् ॥१३॥
[16]हतोस्मि पुरुषव्याघ्र शक्रतुल्यबलेन वै ॥ मया तु पूर्वं त्वं [17]मोहान्न ज्ञातः पुरुषर्षभः ॥ १४ ॥

माणावित्यादि । चुक्रोश रामस्यातिमानुषं चरित्रमवगच्छन्त्यपि स्नेहातिशयेन व्याकुला रुरोदेत्यर्थः ॥ १ ॥ सत्यवान् सत्यवचनवान् । शीलवान् सदाचारसंपन्नः । शुचिः ऋजुबुद्धिः ॥ २ ॥ एवं दैवं प्रत्याक्रुश्य विराधं प्रत्याह—मामिति । वृकाः ईहामृगाः । "कोकस्त्वीहामृगो वृकः" इत्यमरः । शार्दूलाः महाव्याघ्राः । द्वीपिनः अल्पव्याघ्राः । "व्याघ्रो मृगारिः शार्दूलो हिंसारुश्चित्रकी मृगात् । चण्डश्चाल्पस्त्वयं द्वीपी" इति वैजयन्ती । नमस्त इत्येवं चुक्रोशेति पूर्वेणान्वयः ॥ ३—४ ॥ सव्यमिति । ननु विराधादानेकबन्धादाने च लक्ष्मणः सव्यं रामो दक्षिणं भुजमच्छिनदित्यविशेषेणोच्यते किमत्र नियामकमिति चेत् । उच्यते । सर्वदा लक्ष्मणो रामस्य दक्षिणपार्श्वे एव तिष्ठति अतो गृह्णन्दक्षिणेन रामं सव्येन लक्ष्मणं चागृह्णादित्यविरोधः । तरसा बलेन ॥ ५ ॥ संविग्नः भीतः ॥ ६ ॥ मुष्टिभिरिति । बहुवचनमावृत्त्या उद्यम्योद्यम्य सूदयन्तौ मुष्ट्यादिकमुद्धृत्योद्धृत्य प्रहरन्तौ । स्थण्डिले भूतले ॥ ७—८ ॥ भयेष्वभयदः शापापायकारणाय प्रसन्न इत्युच्यते ॥ ९ ॥ शस्त्रेण शस्त्रादिभिः । निखनावहे भूमौ निक्षिपेव ॥ १० ॥ प्रश्रितं विनयान्वितं यथा तथा प्रोवाचेत्यन्वयः ॥ ११—१३ ॥ रामपादस्पर्शेन प्रत्यभिजानन्नाह—हत इत्यादि । त्वयेति शेषः । पुरुषर्षभः पुरुषोत्तमस्त्वं रामत्वेनावतीर्ण इति न ज्ञात इत्यर्थः ॥ १४ ॥

ती० शार्दूलद्वीपिनः सबिन्द्वबिन्दुव्याघ्राः ॥ ३ ॥ **ति०** बाहुंबभञ्जनैतावतापिप्राणहानिरिति नवरदानविरोधः । अभेद्याच्छेद्यत्वंच प्राणनाशक्षमावयवविशेषपरंबोध्यं । बभञ्ज मुष्टिप्रहारेणेतिशेषः । अभेद्याच्छेद्यत्ववरस्तु शस्त्रकरणकतद्विषयइत्यन्ये ॥५॥ **स०** संविग्नखिन्नः । अनेनवरस्तु रामेतरविषयइतिज्ञायते ॥६॥ **ति०** भयेषुभयकालेषु । **स०** भयेषु भयसाधनेषु । **ती०** भयेष्वभयदइति स्वश्रवणस्मरणकीर्तनादिसंविदधतः पुरुषस्य सकलभयापहारीभवति ॥ ९ ॥ **स०** मया रमयासीतया सहितस्त्वंनज्ञातइतिवा ॥ १४ ॥

[पा०] १ क. च. छ. ज. ञ. सत्यवान्बलवानृजुः. २ ख. घोररूपेण. ३ झ. मामृक्षाः. ४ ग. राक्षसेश्वर. क. ५ भ्रातरौ. ६ क. ख. ङ.—ट. सौमित्रिस्सव्यंबाहुं. ७ ग. रामोपि. ८ ङ. झ. ट. पपाताशुविमूर्च्छितः. ९ क. च. छ. ज. ञ. सूदयन्तौच. १० क. संप्रेक्ष्य. घ. संप्रेक्षमाणस्सभृशं. ११ इदंश्लोकद्वयं क.—ट. पुस्तकेष्वत्रापिदृश्यते. १२ क. च. ज. ञ. राक्षसस्याद्य. घ. राक्षसस्यतु. छ. राक्षसस्यच. १३ ख. महतस्सुमहच्छ्वभ्रं. घ. महतस्सुमहच्छिद्रं. क. च. छ. ज. ञ. महतोस्यमहच्छ्वभ्रं. १४ ग. रौद्रकर्मणः. छ. रौद्ररक्षसः. १५ च. ज. प्रथितं. १६ क. ख. ग. ङ.—ट. हतोहं. घ. भक्तोस्मि. १७ क. घ. च. छ. ज. ञ. मोहादज्ञातः.

कौसल्या [1]सुप्रजा राम [2]तात त्वं विदितो मया ॥ वैदेही च महाभागा लक्ष्मणश्च [3]महायशाः ॥ १५ ॥
[4]अपि शापादहं घोरां प्रविष्टो राक्षसीं तनुम् ॥ तुम्बुरुर्नाम गन्धर्वः शप्तो [5]वैश्रवणेन ह ॥ १६ ॥
प्रसाद्यमानश्च मया सोब्रवीन्मां महायशाः ॥ यदा दाशरथी रामस्त्वां वधिष्यति संयुगे ॥
[6]तदा प्रकृतिमापन्नो भवान्स्वर्गं गमिष्यति ॥ १७ ॥
[7]इति वैश्रवणो राजा [8]रम्भासक्तं पुराऽनघ ॥ अनुपस्थीयमानो मां [9]संक्रुद्धो व्याजहार ह ॥ १८ ॥
तव प्रसादान्मुक्तोऽहम[10]भिशापात्सुदारुणात् ॥ [11]भुवनं स्वं गमिष्यामि स्वस्ति [12]वोऽस्तु [13]परंतप ॥ १९ ॥
इतो वसति धर्मात्मा शरभङ्गः प्रतापवान् ॥ अध्यर्धयोजने तात महर्षिः सूर्यसन्निभः ॥ २० ॥
तं क्षिप्र[14]मभिगच्छ त्वं स ते [15]श्रेयो विधास्यति ॥ अवटे [16]चापि मां राम [17]प्रक्षिप्य [18]कुशली व्रज॥२१॥
रक्षसां [19]गतसत्त्वानामेष धर्मः सनातनः ॥ अवटे ये निधीयन्ते तेषां लोकाः सनातनाः ॥ २२ ॥
एवमुक्त्वा तु काकुत्स्थं विराधः शरपीडितः ॥ बभूव स्वर्गसंप्राप्तो न्यस्तदेहो महाबलः ॥ २३ ॥
तच्छ्रुत्वा राघवो वाक्यं लक्ष्मणं व्यादिदेश ह ॥ २४ ॥
कुञ्जरस्येव रौद्रस्य [20]राक्षसस्यास्य लक्ष्मण ॥ [21]वनेऽस्मिन्सुमहच्छ्वभ्रं खन्यतां रौद्रकर्मणः ॥ २५ ॥

ज्ञानप्रकारमाह—कौसल्येति । तात सर्वलोकजनक । त्वं कौसल्यायाः सुप्रजाः । "नित्यमसिच् प्रजामेधयोः" इत्यसिच् । इति विदितोसि । महाभागा श्रीवैदेहीत्यवगता । अयं च त्वदंशभूतो महायशाः त्वदनुवर्तनजकीर्तिमान् । लक्ष्मण इति विदितः ॥ १५ ॥ एतावत्पर्यन्तं कुतो न ज्ञातवानसीत्यत्राह—अपीति । अपिर्गर्हायां । कस्य केन शाप इत्यत्राह—तुम्बुरुरित्यादि । अहमिति शेषः ॥ १६ ॥ उपकारस्मृत्योपश्लोकयति—महायशा इति । प्रकृतिं स्वरूपं । शापनिमित्तमाह—अनुपस्थीयमान इति । रम्भासक्तं मां अनुपस्थीयमानः अवसरे मया असेव्यमानः । अत एव संक्रुद्धः राजा अस्मत्स्वामी वैश्रवणः इति उक्तप्रकारेण। राक्षसो भवेति व्याजहार । पुनर्मया प्रसाद्यमान इत्यब्रवीच्च। उक्तप्रकारेण शापावसानं चोवाचेति योजना ॥ १७—१८ ॥ स्वंभुवनं स्वर्गलोकं । उपकारस्मृत्या मङ्गलमाशास्ते—स्वस्ति व इति ॥ १९ ॥ वाचिककैङ्कर्यमातनोति—इत इति । प्रतापवान् महातपाः। अधिकमर्धं यस्य तदध्यर्धं तच्च तद्योजनं च तस्मिन् सार्धयोजन इत्यर्थः ॥२०॥ क्षिप्रं तदग्निप्रवेशात्पूर्वं । ते त्वत्तः । श्रेयः ब्रह्मलोकं । विधास्यति पोषयिष्यति । यद्वा ते श्रेयः निवासस्थानप्रवेशनादिकं । अवटे श्वभ्रे । कुशली आर्तत्राणरूपकुशलयुक्तः ॥२१॥ गतसत्त्वानां गतासूनां । "द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु" इत्यमरः । एषः अवटप्रक्षेपः । अस्य धर्मस्य फलमाह—अवट इति ॥ २२ ॥ स्वर्गसंप्राप्तः संप्राप्तप्राय इत्यर्थः । खननानन्तरं स्वर्गप्राप्तेः ॥२३—२४ ॥ कुञ्जरस्येत्यादि श्लोकद्वयं । वैपुल्यं विधाय निम्नतां विधत्ते—प्रदरः खन्यतामिति । प्रकृष्टोदरः प्रदरः ॥२५

ति० त्वयाकौसल्यासुप्रजाइति त्वंविदितः कौसल्यापुत्रइतिज्ञातोसीत्यर्थः ॥ १५ ॥ **ति०** व्याजहारेत्यस्य राक्षसींतनुंप्रविशेतीति शेषः ॥ १८ ॥ **ति०** अनुपस्थानेकारणमाह—**इतीति** । उक्तंशापं तत्प्रतीकारंचोवाचेत्यर्थः । शापमुक्तिकालजानन्दपारवश्यात्पुनरुक्तिर्नदोषाय । रंभासक्तं पुरानघेतिपाठे पुनरुक्त्यभावएव ॥ १८ ॥ **स०** सते सज्जनाय तुभ्यं । तेसकाशात्स्वस्य श्रेयोविधास्यतीतिवा ॥ २१ ॥ **ति०** सनातनः परंपराप्राप्तः । अतएव कलिराक्षसेषुयवनेष्वेतद्धर्मप्रवृत्तिः ॥ २२ ॥ **ति०** बभूव तथाभवितुमुद्यतोबभूव । यद्वा बभूवेत्यर्धेनसंक्षिप्ततयोक्तस्य विस्तरमाह—**तच्छ्रुत्वेति** । अवटनिक्षेपेणस्वर्गप्राप्तिंश्रुत्वा ॥

[पा०] १ ग. घ. ङ. झ. ट. सुप्रजास्तातराम. २ ख. मयात्वंविदितोधुना. क. च. छ. ज. ञ. विदितस्त्वंमयाधुना. ३ क. ख. ग. महाबलः. ४ क. अहंशापादिमां. ख.—ञ. अभिशापादहं. ५ ङ.—ट. वैश्रवणेनहि. ६ क. ग. ततः प्रकृतिसंपन्नो. ख. ततःप्रकृतिसंपन्नःपुनस्स्वर्गं. ७ इतिवैश्रवणइत्यस्मिञ्श्लोकेपूर्वोत्तरार्धयोःपौर्वापर्यं क. ङ.—ट. पुस्तकेषुदृश्यते. ८ ङ.—ठ. सक्तमुवाचह. ९ ङ. झ. ञ. सक्रुद्धो. १० क. च. छ. ञ. ट. मिहशापात्. ११ क.—घ. च. छ. ज. ञ. ट. भवनं. १२ क. च. छ. ज. ञ. तेस्तु. १३ ख. वरानन. १४ क. मधिगच्छ. १५ झ. श्रेयोऽभिधास्यति. १६ ग. वापि. १७ ङ.—ट. निक्षिप्य. १८ ख. कुशलं. १९ ख. हतसत्वानां. २० क. ख. ङ. छ. ज. ञ. राक्षसस्याद्य. २१ क. च. छ. ज. ञ. महतस्सुमहच्छ्वभ्रं. ख. घ. ङ. झ. वनेऽस्मिन्सुमहाञ्श्वभ्रः.

इत्युक्त्वा लक्ष्मणं रामः प्रदरः खन्यतामिति ॥ तस्थौ विराधमाक्रम्य कण्ठे पादेन वीर्यवान् ॥ २६ ॥
ततः खनित्रमादाय लक्ष्मणश्श्वभ्रमुत्तमम् ॥ अखनत्पार्श्वतस्तस्य विराधस्य [1]महात्मनः ॥ २७ ॥
तं मुक्त[2]कण्ठं निष्पिष्य शङ्कुकर्णं महास्वनम् ॥ विराधं प्राक्षिपच्छ्वभ्रे नदन्तं भैरवस्वनम् ॥ २८ ॥

[3]तमाहवे निर्जितमाशुविक्रमौ [4][5]स्थिरावुभौ संयति रामलक्ष्मणौ ॥
मुदान्वितौ चिक्षिपतुर्भयावहं नदन्तमुत्क्षिप्य बिले[6] तु राक्षसम् ॥ २९ ॥
अवध्यतां प्रेक्ष्य [7]महासुरस्य तौ शितेन शस्त्रेण तदा नरर्षभौ ॥
[8]समर्थ्य चात्यर्थविशारदावुभौ बिले विराधस्य वधं प्रचक्रतुः ॥ ३० ॥
स्वयं विराधेन हि [9]मृत्युरात्मनः प्रसह्य रामेण [10]वधार्थमीप्सितः ॥
निवेदितः काननचारिणा स्वयं न मे वधः शस्त्रकृतो भवेदिति ॥ ३१ ॥
[11]तदेव रामेण निशम्य भाषितं कृता मतिस्तस्य बिलप्रवेशने ॥
बिलं च [12]रामेण बलेन रक्षसा प्रवेश्यमानेन वनं [13]विनादितम् ॥ ३२ ॥
प्रहृष्टरूपाविव रामलक्ष्मणौ विराधमु[14]र्व्याः प्रदरे [15]निहत्य तौ ॥
ननन्दतुर्वीतभयौ महावने शिलाभिरन्तर्दधतुश्च राक्षसम् ॥ ३३ ॥
ततस्तु तौ [16]काञ्चनचित्रकार्मुकौ निहत्य रक्षः परिगृह्य मैथिलीम् ॥

—२६ ॥ उत्तमं अतिनिम्नं । महात्मनः महाकायस्य ॥२७॥ मुक्तकण्ठं कण्ठाक्रमणरहितं । अतएव महास्वनं शङ्कुकर्णं शङ्कुः कीलं तत्सदृशकर्णं गर्दभाकारं वा । "शङ्कुकर्णौ गर्दभोष्ट्रौ" इति बाणः । भैरवस्वनं भयंकरप्रतिध्वानं यथा भवति तथानदन्तं । महास्वनमित्यत्र स्वभावोक्तिः । अत्रोच्चारणरूपकार्योक्तिरिति भिदा ॥ २८ ॥ समस्तमुक्तमेवार्थं वृत्तान्तरेण संगृह्णाति—तमाहव इत्यादिना । संयति युद्धे स्थिरौ ॥ २९ ॥ बिलप्रक्षेपनिमित्तमाह—अवध्यतामिति । महासुरस्य वृत्राद्यसुरसदृशस्य । समर्थ्य अयमेवास्य वधोपाय इतिनिश्चित्य ॥ ३० ॥ न केवलं स्वनिश्चयः विराधेन चानन्तरं तथोक्तमित्याह—स्वयमिति । काननचारिणा रामेण प्रसह्य बलात्कृत्य । आत्मनो वधार्थं स्वयमीप्सितः मृत्युः बिलप्रवेशरूपवधोपायः । न मे वधः शस्त्रकृतो भवेदित्युपायान्तरं प्रतिषिध्य स्वयं निवेदितः उक्तो हीति योजना ॥ ३१ ॥ रामेण तद्भाषितमेव निशम्य तस्य विराधस्य । बिलप्रवेशने मतिः कृता । रामेण बलेन बिलं प्रवेश्यमानेन रक्षसा वनं विनादितमिति योजना ॥ ३२ ॥ प्रहृष्टरूपौ पुलकितशरीरौ । वस्तुतो हर्षशोकावनयोर्न स्तः किंतु तन्नटनमात्रमिति इवशब्देन सूचयति॥३३॥पत्नीसहितस्य रामस्य तद्रहितस्य परतन्त्रस्य लक्ष्मणस्य चोपमानमाह—चन्द्रदिवा-

२३—२४ ॥ **ति॰** महात्मनः गन्धर्वत्वप्रत्यापत्त्यभिप्रायेण रामस्वरूपज्ञानाभिप्रायेणच कविना महात्मनइतिप्रयुक्तंवा ॥ २७ ॥ **ती॰** मुक्तकण्ठं श्रीरामचरणपीडनेन शिथिलीकृतकण्ठं । यद्वा श्वभ्रेक्षेपणार्थं रामेणमुक्तकण्ठाक्रमणं । नदन्तं परमेश्वरेणश्रीरामेण वधंप्राप्तोस्म्यतो धन्योहं धन्योहमिति हर्षेण नादंकुर्वन्तमित्यर्थः । **शि॰** महास्वनं महाऽसुभिः ऊर्ध्वोच्छ्वासैः अनिति जीवतितं आसन्नमरणमित्यर्थः ॥ २८ ॥ **ति॰** यथार्थं स्वप्रयोजनोचितं । रामेणकर्त्रा प्रसह्यस्वयं स्वस्य योमृत्युरीप्सितः तमात्मनोमृत्युं प्रसह्य उद्दिश्य । प्रपद्येतिपाठेप्ययमेवार्थः । काननचारिणा विराधेन । मेवधः शस्त्रकृतो नभवेदिति निवेदितोभूत् रामइतिशेषः ॥३१॥ **ति॰** नीलत्वाद्विशालत्वाच्चवनस्याकाशसादृश्यं । उभावपि चन्द्रवत्कलासंपन्नौसूर्यवत्प्रतापयुतौ ॥ ३४ ॥ इतिचतुर्थसर्गः ॥ ४ ॥

[पा॰] १ क. ख. ग. च. छ. ज. ञ. दुरात्मनः. २ ख. ग. ङ.—ट. कण्ठमुत्क्षिप्य. ३ क. महावने. ४ ङ. झ. ञ. दारुणमाशु. ५ क. च. छ. ज. ञ. स्थितावुभौ. ६ क. ख. घ.—ट. बलेन. ७ क. महाबलस्य. ८ क.—घ. संमन्त्र्य. ९ ख. घ. ङ. च. झ. ञ. ट. मृत्युमात्मनः. १० ङ. झ. ट. यथार्थं. ११ क. च. छ. ज. ञ. तथैव. घ. निशम्य रामेणतदेवभाषितं. १२ क. ख. घ.—ट. तेनातिबलेन. १३ घ. ट. निनादितं. १४ क. ङ.—ट. मुर्व्यां. ख. ग. मुग्रं. १५ क. ङ.—ट. निपात्यतं. १६ ख. ग. कार्मुकखड्गधारिणौ.

विंजहतुस्तौ मुदितौ महावने दिवि स्थितौ चन्द्रदिवाकराविव ॥ ३४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे चतुर्थः सर्गः ॥ ४ ॥

पञ्चमः सर्गः ॥ ५ ॥

विराधवनाच्छरभङ्गाश्रमंप्रविशतारामेणरथादवरुह्यशरभङ्गेणसहसंभाषमाणस्येन्द्रस्यावलोकनम् ॥ १ ॥ तथालक्ष्मणंप्रति सपरिजनेन्द्रप्रदर्शनपूर्वकंसीतयासहतत्रैवावस्थानचोदनेनप्रत्यक्षतोर्पितस्येन्द्रत्वजिज्ञासयातत्समीपंप्रतिप्रस्थानम् ॥ २ ॥ रामागमनमवलोकयतेन्द्रेणशरभङ्गंप्रतितदानींस्वस्यरामसंभाषणादीनामनौचित्यनिवेदनपूर्वकंतदापृच्छनेनस्वलोकगमनम् ॥ ३ ॥ रामेणसीतालक्ष्मणाभ्यांसहशरभङ्गाभिवादनपूर्वकंतंप्रतीन्द्रागमनकारणप्रश्नः ॥ ४ ॥ शरभङ्गेणरामंप्रतितत्कारणमभिधायसुतीक्ष्णाश्रमगमनचोदनपूर्वकंतत्संनिधावग्नौशरीरविसर्जनेनब्रह्मलोकगमनम् ॥ ५ ॥

हत्वा तु तं भीमबलं विराधं राक्षसं वने ॥ ततः सीतां परिष्वज्य समाश्वास्य च वीर्यवान् ॥
अंब्रवील्लक्ष्मणं रामो भ्रातरं दीप्ततेजसम् ॥ १ ॥
कष्टं वनमिदं दुर्गं न च स्म वनगोचराः ॥ अभिगच्छामहे शीघ्रं शरभङ्गं तपोधनम् ॥ २ ॥
आश्रमं शरभङ्गस्य राघवोभिजगाम ह ॥ तस्य देवप्रभावस्य तपसा भावितात्मनः ॥ ३ ॥
समीपे शरभङ्गस्य ददर्श महदद्भुतम् ॥ विभ्राजमानं वपुषा सूर्यवैश्वानरोपमम् ॥ ४ ॥
अंवरुह्य रथोत्सङ्गात्सकाशे विबुधानुगम् ॥ असंस्पृशन्तं वसुधां ददर्श विबुधेश्वरम् ॥ ५ ॥
सुंप्रभाभरणं देवं विरजोम्बरधारिणम् ॥ तद्विधैरेव बहुभिः पूज्यमानं मंहात्मभिः ॥ ६ ॥

कराविवेति ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुर्थः सर्गः ॥ ४ ॥

एवं विराधवनवासिमुमुक्षुमुनिजनशरणागतेरानुषङ्गिकफलभूतं विराधवधमभिधाय खरादिवधफलशरभङ्गाश्रमवासिमुनिजनशरणागतिं दर्शयिष्यन् तदुचितसौलभ्यदर्शनायशरभङ्गाश्रमवनगमनं दर्शयति पञ्चमे—हत्वेत्यादि । परिष्वज्य समाश्वास्य चेति विराधाङ्कस्पर्शजभयदुःखव्रीडाशान्त्यर्थमिति भावः ॥१॥ कष्टं कृच्छ्रं गहनं वा । "कृच्छ्रगहनयोःकषः" इत्यनिण्निष्ठा । अतएव दुर्गं विषमं विश्रमायोग्यमित्यर्थः ॥ २ ॥ तस्य विराधोक्तस्य । देवप्रभावस्य तपसा साधनेन भावितात्मनः साक्षात्कृतपरब्रह्मणः । "तपसा ब्रह्म विजिज्ञासस्व" इति श्रुतेः ॥ ३ ॥ महदद्भुतंमहाश्चर्यभूतं किमपि वस्तु । विभ्राजमानं वपुषा भ्राजमानवपुषमित्यर्थः । वैश्वानराः सूर्यव्यतिरिक्ततेजांसि । सूर्यादितेजःसमुदायोपममित्यर्थः ॥ ४ ॥ ततः किंचित्समीपगमनानन्तरं रथोत्सङ्गात् रथतटादवरुह्य वसुधामसंस्पृशन्तं । अभूमिस्पर्शस्य देवस्वभावत्वात् । सकाशे समीपे । विबुधानुगं विबुधा अनुगाः यस्य तं विबुधेश्वरमिन्द्रंददर्श ॥५॥ सुप्रभान्याभरणानि यस्य तं । देवं देदीप्यमानं । विरजो निर्मलं अम्बरं धर्तुं शीलमस्यास्तीति विरजोम्बरधारिणं । तद्विधैः इन्द्रतु-

---

स० कष्टं कष्टसाधनं । वयं अवनगोचराः । वनंगोचरोविषयोयेषांते वनगोचराः । ते नभवन्तीत्यवनगोचराः । नचस्मः अत्रेतिशेषः । नस्थास्यामः । अन्यत्रगच्छामइतिभावः । यद्वावनगोचरा नचस्म इतीदंवनं दुर्गंकष्टमित्यब्रवीत् ॥२॥ स० इत्युक्त्वेति शेषः । ती० तपसा सर्वेश्वरालोचनेन । भावितः वासितः आत्मा अन्तःकरणं यस्य सतथा ॥ ३ ॥ स० महदद्भुतं महतामद्भुतं। आत्त्वस्यानित्यत्वान्महांश्चासावद्भुतश्चेतिवा ॥ ति० वपुषा वपुःकान्त्या ॥४॥ स० विबुधेश्वरं ज्ञानिश्रेष्ठं । टीका० रथोत्सङ्गादाकाशे इतिपाठान्तरं । आकाशे भूमेस्समीपवर्तिनि ॥ ५ ॥ स० हरिभिरितिपाठे "त्वक्केशवालरोमाणि सुवर्णाभानियस्यतु ।

[पा०] १ क. विजहतुर्वै. २ झ. ट. अब्रवीद्भ्रातरंरामोलक्ष्मणं. ३ क. ङ.—ट. वैश्वानरप्रभं. ४ क. ख. ङ.—ट. रथप्रवरमारुह्यमाकाशे. ५ ख. ग. झ. संप्रभा. ६ क. ग. छ. ज. ञ. महर्षिभिः.

हरिभिर्वाजिभिर्युक्तमन्तरिक्षगतं रथम् ॥ ददर्शादूरतस्तस्य तरुणादित्यसन्निभम् ॥ ७ ॥
पाण्डुराभ्रघनप्रख्यं चन्द्रमण्डलसन्निभं ॥ अपश्यद्विमलं छत्रं चित्रमाल्योपशोभितम् ॥ ८ ॥
चामरव्यजने चाग्र्ये रुक्मदण्डे महाधने ॥ गृहीते वरनारीभ्यां धूयमाने च मूर्धनि ॥ ९ ॥
गन्धर्वामरसिद्धाश्च बहवः परमर्षयः ॥ अन्तरिक्षगतं देवं वाग्भिरग्र्याभिरीडिरे ॥ १० ॥
सह संभाषमाणे तु शरभङ्गेण वासवे ॥ दृष्ट्वा शतक्रतुं तत्र रामो लक्ष्मणमब्रवीत् ॥
रामोऽथ रथमुद्दिश्य लक्ष्मणाय प्रदर्शयन् ॥ ११ ॥
अर्चिष्मन्तं श्रिया जुष्टमद्भुतं पश्य लक्ष्मण ॥ प्रतपन्तमिवादित्यमन्तरिक्षगतं रथम् ॥ १२ ॥
ये हयाः पुरुहूतस्य पुरा शक्रस्य नः श्रुताः ॥ अन्तरिक्षगता दिव्यास्त इमे हरयो ध्रुवम् ॥ १३ ॥
इमे च पुरुषव्याघ्रा ये तिष्ठन्त्यभितो रथम् ॥ शतं शतं कुण्डलिनो युवानः खड्गपाणयः ॥ १४ ॥
विस्तीर्णविपुलोरस्काः परिघायतबाहवः ॥ शोणांशुवसनास्सर्वे व्याघ्रा इव दुरासदाः ॥ १५ ॥
उरोदेशेषु सर्वेषां हारा ज्वलनसन्निभाः ॥ रूपं बिभ्रति सौमित्रे पञ्चविंशतिवार्षिकम् ॥ १६ ॥
एतद्धि किल देवानां वयो भवति नित्यदा ॥ यथेमे पुरुषव्याघ्रा दृश्यन्ते प्रियदर्शनाः ॥ १७ ॥

त्याकारैः । ददर्शेत्यनुषङ्गः ॥ ६ ॥ हरिभिः श्यामैः । यद्वा वाजिभिः वेगवद्भिः हरिभिः अश्वैः । तस्य इन्द्रस्य ॥ ७ ॥ पाण्डुराभ्रस्येव घना अधिका प्रख्या कान्तिर्यस्य तदिति श्वैत्ये दृष्टान्तः । चन्द्रमण्डलसन्निभमिति वृत्ततायां । चित्रमाल्यैर्लम्बमानकुसुमसरैः उपशोभितं ॥ ८ ॥ चामरव्यजने चामररूपव्यजने । महाधने बहुमूल्ये । मूर्धनि तस्येति शेषः । अपश्यदित्यनुषङ्गः ॥ ९ ॥ ईडिरे तुष्टुवुः । ईडमानानपश्यदित्यर्थः ॥१०॥ सहेत्यादिसार्धःश्लोक एकान्वयः । तत्र तदानीं । राम इति पदस्यावृत्तिःक्रियाभेदात् । अतो न पुनरुक्तिः । उद्दिश्य हस्तेन निर्दिश्य शरभङ्गेण साकं वासवे संभाषमाणे सति तत्र समये रामः शतक्रतुं दृष्ट्वा तदीयरथं रामः लक्ष्मणाय उद्दिश्य प्रदर्शयन् सन् अथ लक्ष्मणमब्रवीदिति योजना ॥ ११ ॥ अर्चिष्मन्तं सतेजस्कं । श्रिया कान्त्या ॥ १२ ॥ पुरुहूतस्य । यज्वभिर्बहुशो हूतस्य । नः अस्माभिः । इमे हरितवर्णाः । हरयः अश्वाः ते । यद्वा त इमे शक्रस्य हरय इत्यन्वयः ॥ १३ ॥ इमे चेत्यादिश्लोकत्रयमेकं वाक्यं । शतं शतमिति प्रतिदिशमिति शेषः ॥ १४ ॥ विस्तीर्णविपुलोरस्काः अत्यन्तविशालोरस्काः । शोणांशुवसनाः रक्तकान्तियुक्तवस्त्राः । एवंभूता य इमे तिष्ठन्तीत्यन्वयः ॥ १५ ॥ येषां सर्वेषामुरोदेशेषु हाराः ज्वलनसन्निभाः अग्निवच्छुक्लभास्वराः दृश्यन्ते । रूपमित्यत्रापि ये इत्यध्याहार्यं । पञ्चविंशतिः वर्षाः परिमाणमस्य पञ्चविंशतिवार्षिकं । "तदस्य परिमाणं" इति ठक् । "वर्षस्याभविष्यति" इत्युत्तरपदवृद्धिः । एवंभूतं रूपं शरीरं ये बिभ्रति "अदभ्यस्तात्" इत्यदादेशः । पञ्चविंशतिवार्षिकमिति यौवनावस्थोच्यते । "कौमारं स्यात्पञ्चदशाद्यौवनं तु ततः परं" इत्युक्तेः । त इमे सुरा इत्यध्याहार्यम् ॥ १६ ॥ तत्रयुक्तिमाह—एतद्धीति । एतत् पञ्चविंशतिवार्षिकं । वयः शरीरावस्था । देवानां नित्यदा भवति । नित्यदेति निपातः । किलेति प्रसिद्धौ । यथेमे वसनाभरणादिभिश्चारुदर्शनाः

हरिस्सवर्णतोश्वस्तुपीतकौशेयसप्रभः" इतिशालिहोत्रोक्तेर्हरिशब्दार्थोज्ञेयः ॥ ७ ॥ स० पाण्डुराश्वते अभ्रेविद्यमानघनाश्च तै प्रख्या सादृश्यं यस्यतं । पाण्डुराभ्रेषुमेघेषु येघनाश्श्रेष्ठास्तत्प्रख्यमितिवा ॥ ८ ॥ ति० महाधने रत्नयुतत्वाद्बहुमूल्ये । चामरव्यजने चामरं वालनिर्मितं । व्यजनं मयूरपिच्छनिर्मितं । धूयमाने प्रकंप्यमाने ॥ ९ ॥ ति० तं शतक्रतुं दृष्ट्वा ज्ञात्वा । रामो ब्रवीत् उक्तस्यैवप्रपञ्चः **रामोथेति** । दर्शयत अदर्शयतेत्यर्थः ॥ ११ ॥ ती० शतशब्दोत्रानेकवाची ॥ १४ ॥ ती० शोणाश्मवसना

[पा०] १ ङ. झ. ञ. ट. हरितैः. २ क. घ. च. छ. ज. ञ. ददर्शदूरतः. ३ क. धूयमानेतु. ४ ङ. झ. ट. गीर्भिः ५ क. च. छ. ज. रस्तुवन्. ङ. झ. रैडयन्.. ६ क. च. छ. ज. ञ. रामोपि. ७ क. ङ.—ट. भ्रातुर्दर्शयताद्भुतं. ८ ङ. झ. ट. दिशं. ९ ग. घ. च. छ. ज. ञ. शोणाश्मवसनाः. ख. शोणाश्ववसनाः. १० क. च. छ. ज. ञ. यइमे. ११ च. छ. ज. ञ. शुभदर्शनाः.

इहैव सह वैदेह्या मुहूर्तं तिष्ठ लक्ष्मण ॥ यावज्जानाम्यहं व्यक्तं क एष द्युतिमान्रथे ॥ १८ ॥
तमेवमुक्त्वा सौमित्रिमिहैव स्थीयतामिति ॥ अभिचक्राम काकुत्स्थः शरभङ्गाश्रमं प्रति ॥ १९ ॥
[1]ततः समभिगच्छन्तं प्रेक्ष्य रामं शचीपतिः ॥ शरभङ्गम[2]नुप्राप्य विविक्त इदमब्रवीत् ॥ २० ॥
इहोपयात्यसौ रामो यावन्मां नाभिभाषते ॥ निष्ठां [3]नयतु तावत्तु ततो मां द्रष्टुमर्हति ॥ २१ ॥
[[4]तावद्गच्छामहे शीघ्रं यावन्मां नाभिभाषते ॥ २२ ॥]
[5]जितवन्तं [6]कृतार्थं च [7]द्रष्टाऽहमचिरादिमम् ॥ कर्म ह्यनेन कर्तव्यं महर्दन्यैस्सुदुष्करम् ॥
निष्पादयित्वा तत्कर्म ततो मां द्रष्टुमर्हति ॥ २३ ॥
[9]इति वज्री तमामन्त्र्य [10]मानयित्वा च तापसम् ॥ रथेन हरि[11]युक्तेन ययौ दिवमरिन्दमः ॥ २४ ॥
प्रयाते तु सहस्राक्षे राघव[12]स्सपरिच्छदम् ॥ अग्निहोत्रमुपासीनं शरभङ्गमुपागमत् ॥ २५ ॥
तस्य [13]पादौ च संगृह्य रामः सीता च लक्ष्मणः ॥ निषेदुस्सम[14]नुज्ञाता लब्धवासा निमन्त्रिताः ॥२६॥
ततः शक्रो[15]पयानं तु [16]पर्यपृच्छत्स राघवः ॥ शरभङ्गश्च तत्सर्वं राघवाय न्यवेदयत् ॥ २७ ॥

तथा किल देवा इति योजना ॥ १७ ॥ रथे इत्यनेन तदानीं रामं दृष्ट्वा रथमारूढ इत्यवगम्यते । यावज्जानामि ज्ञास्यामि। "यावत्पुरानिपातयोर्लट्"इति लट् । व्यक्तं अनुमितिं विना स्पष्टं प्रत्यक्षेण ज्ञास्यामीत्यर्थः ॥ १८ ॥ विरहासहिष्णुतया अनुव्रजन्तं लक्ष्मणं पुनः प्रदिश्य जगामेत्याह—तमेवमिति ॥ १९ ॥ अनुप्राप्य एकान्तवचनश्रवणाय समीपमागत्य । विविक्ते रहसि । वक्ष्यमाणस्यातिगोप्यत्वात् ॥ २० ॥ असौ रामः इह मत्समीपे । उपयाति । उपयानसौ यावति काले मां नाभिभाषते तावत्स्वप्रतिज्ञां निष्ठां समाप्तिं नयतु। "निष्ठा निष्पत्तिनाशान्ताः" इत्यमरः। मया असंभाषमाण एव स्वप्रतिज्ञां निर्वर्तयतु मया संभाषणेऽस्यदेवत्वप्रकटनं स्यादिति भावः । संभाषणाभावेपि दर्शनमस्त्वित्यत आह—तत इति । ततः स्वप्रतिज्ञानिष्ठानयनानन्तरं । मां द्रष्टुमर्हति स मां पश्यतु ॥ २१—२२ ॥ भवांस्तं पश्यत्वित्यत्राह—जितवन्तमिति । रावणं जितवन्तं अतएव कृतार्थं कृतदेवप्रयोजनं इममहमचिराद्द्रष्टा द्रष्टास्मि । दर्शनसंभाषणाभ्यां देवत्वप्रकटने का हानिरित्यत्राह—कर्मेति । हि यस्मादन्यैर्देवैर्दुष्करं महत्कर्म रावणवधादिकं । अनेन मानुषवेषेण कर्तव्यं तस्मादित्यर्थः ॥ २३ ॥ इति उक्तप्रकारेण तापसं तापसवेषं। मानयित्वा बहुमान्य । तं शरभङ्गमामन्त्र्य । हरियुक्तेन अश्वयुक्तेन रथेन दिवं ययौ ॥ २४ ॥ प्रयाते त्विति रामागमनोद्योगकाल एवेन्द्रस्य प्रयातत्वात् । सपरिच्छदं स्त्रीभ्रातृरूपपरिवारसहितं यथा भवति तथा । अग्निहोत्रं वह्निं । उपासीनं तत्रप्रवेशार्थमुपतिष्ठन्तं । शरभङ्गमुपागमत्॥२५॥ समनुज्ञाताः आसनाय कृतानुमतिकाः । लब्धवासाः मुनितो लब्धासनाः । ततो निमन्त्रिताः सत्कृताश्च सन्तः निषेदुः ॥२६॥ शक्रो-

---

पद्मरागसदृशवसनाः ॥ **टीका०** शोणाश्ववसनाइतिपाठे शोणा अश्वा वसनानिच येषांते ॥ १५ ॥ **ति०** अनुज्ञाप्य गमनाय कृतानुमतिकंकृत्वा ॥ २० ॥ **ति०** यावदसौ मां नाभिभाषते तावन्मां निष्ठां स्थानान्तरं स्वर्गंवा नयत मयासहगच्छत । ततो वनचारित्वाद्धेतोः मा मां अद्रष्टुमर्हति द्रष्टुं नार्हतीत्यर्थः । अइतिनिषेधार्थमव्ययं पृथक्पदं । विपदीवस्थितेन एवंवैभवस्य दर्शनमनुचितमितिभावः ॥ २१ ॥ **ति०** कृतार्थं निस्तीर्णविपदं। तदावैभवयुक्तमिमं द्रक्ष्यामीतिशेषः । कतकस्त्वेतत्पद्यं प्रक्षिप्तमित्याह। तद्वृथैव मदीयव्याख्याने सर्वसामञ्जस्यात् । **शि०** जितवन्तं कृतरावणवधमित्यर्थः । अहं द्रष्टास्मीतिशेषः। एतेन रामसंभाषणे सति रावणः कोपंकर्तेतीन्द्रस्यभीतिर्व्यञ्जिता ॥ **स०** जितवन्तमिति । अनेन रामेण अन्यैस्सुदुष्करंकर्म रावणहननरूपंकर्तव्यं । जितवन्तं तत्कर्मप्राप्तिमन्तं । जिःप्राप्त्यर्थकः । स्वर्जितइत्यादौ तथात्वात् । कृतार्थं पूर्णं ॥२३॥ **स०** सपरिच्छदः धनुर्बाणसहि-

[**पा०**] १ ख. ततस्तमभि. २ क.—ट. मनुज्ञाप्यविबुधानिदं. ३ क.—ट. नयत. ४ इदमर्धं क. च. छ. ज. पुस्तकेपुदृश्यते. ५ घ. जीवितंच. ६ ङ. झ. ट. कृतार्थंहि. ७ ङ. झ. ट. तदाहं. क. च. छ. ज. ञ. दिष्ट्याद्रक्ष्याम्यहंहरिं. ८ ख. ग. मन्यैर्दुरासदं. ९ ङ. झ. ट. अथ. १० घ. मानयित्वातु. ११ ङ. झ. ट. हययुक्तेन. १२ ख. घ. ङ. झ. ञ. ट. सपरिच्छदः. क. च. छ. ज. सपरिच्छदे. १३ क. पादौतु. १४ क. ङ. च. ज.—ट. स्तदनुज्ञाताः. १५ क. ख. च. छ. ज. ञ. यानंतत. १६ घ. झ. पर्यपृच्छत.

मामेष वरदो राम ब्रह्मलोकं निनीषति ॥ जितमुग्रेण तपसा दुष्प्राप[1]मकृतात्मभिः ॥ २८ ॥
अहं ज्ञात्वा नरव्याघ्र वर्तमानमदूरतः ॥ ब्रह्मलोकं न गच्छामि [2]त्वामदृष्ट्वा प्रियातिथिम् ॥ २९ ॥
त्वयाऽहं पुरुषव्याघ्र धार्मिकेण महात्मना ॥ समागम्य गमिष्यामि त्रिदिवं दे[3]वसेवितम् ॥ ३० ॥
अक्षया नरशार्दूल [4]मया लोका जिताश्शुभाः ॥ [5]ब्राह्मयाश्च नाकपृष्ठ्याश्च प्रतिगृह्णीष्व [6]मामकान् ॥३१॥
एवमुक्तो नरव्याघ्रः सर्वशास्त्र[7]विशारदः ॥ ऋषिणा शरभङ्गेण राघवो वाक्यमब्रवीत् ॥ ३२ ॥
अहमेवाहरिष्यामि [8]सर्वलोकान्महामुने ॥ आवासं त्वहमिच्छामि [9]प्रदिष्टमिह कानने ॥ ३३ ॥
राघवेणैवमुक्तस्तु शक्रतुल्य[10]बलेन वै ॥ शरभङ्गो महाप्राज्ञः पुनरेवाब्रवीद्वचः ॥ ३४ ॥

पयानं इन्द्रागमननिमित्तं ॥ २७ ॥ कथं न्यवेदयदित्यत्राह—मामिति । सर्वेषां वरं ददातीति वरदः एष इन्द्रः मां ब्रह्मलोकं निनीषति नेतुमिच्छति । ब्रह्माज्ञयेति शेषः ॥ २८ ॥ तर्हि किमर्थं न गतोसीत्यत्राह—अहमिति । हे नरव्याघ्र अदूरतो वर्तमानं मनसि सदा सन्निहितं त्वां योगतो ज्ञात्वा प्रियातिथिं त्वामदृष्ट्वा त्वदनुभवानन्दं विहाय ब्रह्मलोकं आब्रह्मभवनाल्लोकाः पुनरावर्तिन इत्युक्तलोकं न गच्छामि ॥ २९ ॥ तर्हि केन साधनेन कं लोकं गमिष्यसीत्यत्राह—त्वयेति । धार्मिकेण धर्मस्वरूपेण । स्वार्थे ठक् । महात्मना सत्यसंकल्पेन त्वया समागम्य त्वत्कटाक्षविषयो भूत्वा । देवसेवितं "यत्र पूर्वे साध्याः सन्ति देवाः" इत्युक्तरीत्या नित्यसूरिसेवितं । त्रिदिवं त्रिपाद्विभूतिं ब्रह्मलोकादुत्कृष्टं । गमिष्यामि ब्रह्मलोकं न गच्छामि । त्रिदिवं गमिष्यामीत्यनेनायमर्थोवगम्यते ॥ ३० ॥ क्रमेण तथा भविष्यति आर्जितकर्मफलानि प्रथममनुभवेत्यत आह—अक्षया इति । ब्राह्मयाः ब्रह्मलोकभवाः । नाकपृष्ठ्याः स्वर्गलोकभवाः । अक्षयाः चिरकालस्थायिनः । ये लोकाः भोगभूमयः मया आर्जिताः तान्मामकान् प्रतिगृह्णीष्व मत्कृतानि सर्वाणि सुकृतानि त्वदर्पितानि सन्त्विति भावः । सर्वत्रातिथिसत्कारः प्रातीतिकोर्थः । कर्मणां भगवदर्पणं नाम फलसङ्गत्यागकर्तृत्वत्यागपूर्वकं भगवत्कैङ्कर्यतयानुष्ठानं ॥३१—३२ ॥ तदिदमङ्गीकुर्वन् तस्य वाचिककैङ्कर्यं नियमयति—अहमेवेति । आहरिष्याम्येव स्वीकरिष्याम्येव । सर्वलोकान् त्वया मय्यर्पितान् । इह कानने प्रदिष्टं त्वया निर्दिष्टं । आवासं त्विच्छामि तुशब्देन त्वदभिमतदेश एव वास इत्युच्यते । "सा काशीति न चाकशीति भुवि साऽयोध्येति नाध्यास्यते" इत्यादिकमिहानुसंधेयम् ॥ ३३ ॥ महाप्राज्ञ इत्यनेन

तः ॥ २५ ॥ **ति०** रामस्तस्यपादौसंगृह्येति । रामस्येश्वरावतारत्वेपि क्षत्रियरूपेणावतीर्णत्वात् " यद्यदाचरतिश्रेष्ठः " इतिन्यायेन क्षत्रियमर्यादांप्रवर्तयतीतिसूचितं ॥ **ती०** हेनरव्याघ्र पुरुषोत्तम अदूरतोवर्तमानं बहुकालंमनसाध्यातं अधुनाममभाग्यवशेन बाह्येप्यदूरेवर्तमानं प्रियातिथिं प्रियाअतिथयोभक्तायस्यतं त्वामदृष्ट्वा ब्रह्मलोकं नगच्छामि नगमिष्यामीत्यर्थः ॥ **स०** प्रियातिथिमित्यनेन ब्रह्मलोकापेक्षया रामदर्शनस्यानश्वरेष्टसाधनत्वंद्योतयति ॥ २९ ॥ **ती०** महात्मना महान् जगदाधारः आत्मा मूर्तिर्यस्य तेनत्वया ॥ **ति०** त्वत्समागमश्च सकृदपिसंवृत्तः एतावत्कालपर्यन्तानुष्ठितोपासनातोऽधिकफलदइतिभावः ॥३०॥ **तनि०** ब्राह्मयाः ब्रह्मलोकभवाः भोगप्रदेशविशेषाः । नाकपृष्ठ्याः स्वर्गलोकभवाः भोगप्रदेशविशेषाः । उभयत्र " दिगादिभ्योयत् " इतियत् । प्रतिगृह्णीष्वमामकानिति सर्वेश्वरेफलसमर्पणाभिप्रायेणोक्तं । अतिथिसत्कारविवक्षा प्रातीतिकी । उत्तरत्र " मत्प्रसादात्सभार्यस्त्वं विहरस्व सलक्ष्मणः " इतीदमपि फलसमर्पणाभिप्रायमेव । **ति०** तान्प्रतिगृह्णीष्व स्वकृतत्वेनाङ्गीकुरुष्व । अनेन सर्वकर्मणां भगवदर्पणमकरोदितिसूचितं । "कामतोकामतोवापियत्करोमिशुभाशुभम् । तत्सर्वंत्वयिसंन्यस्तंत्वत्प्रयुक्तःकरोम्यहम् । नाहंकर्ता सर्वमेतद्ब्रह्मैवकुरुतेतथा । एतद्ब्रह्मार्पणंप्रोक्तमृषिभिस्तत्वदर्शिभिः" इतिकौर्मोक्तिः यैर्जिताः भवत्कृपया स्वप्राप्तियोग्याः कृतास्तान्मामकाँल्लोकान् त्वंप्रतिगृह्णीष्व स्वकीयत्वेन जानीहि । एतेन तल्लोकेरघुनाथागमनंप्रार्थितमितिसूचितं ॥३१॥ **ति०** अहमे वेति । तपसेत्यर्थः त्वद्दत्तप्रतिग्रहे नाहमधिकारीत्यापाततोर्थः । वास्तवस्तु ऋषेः परमभक्तस्यानुग्रहाय तदर्पितधर्माङ्गीकारमाहभगवान्—**अहमेवेति** ॥ मयिन्यासत्वेनस्थापितानिमांस्त्वदर्जितान्सर्वलोकांस्तुभ्यमहमेवाहरिष्यामि प्रापयिष्यामीत्युक्त्वेतरजरनप्रतारणायाह—**आवासंत्विति** । **तनि०** अहमेवाहरिष्यामि संपादयामि प्रदास्यामीत्यर्थः । "इष्टापूर्तंबहुधाजातंजायमानंविश्वंबि-

[पा०] १ ख. घ. मजितात्मभिः. २ घ. त्वांदृष्ट्वाच. ३ ङ. झ. ट. चावरंपरं. ४ क. ङ.—ट. जितालोकामयाशुभाः. ख. मयालोकाःशुभाजिताः. ५ ग. ब्राह्मयास्तु. ६ ग. रामतान्. ७ च. छ. ज.ञ. शास्त्रविदांवरः. ८ ख. ग. स्वयंलोकान्. झ—ट. सर्वाँल्लोकान्. ९ ख. निर्दिष्टमिह. १० क. बलेनतु.

इह राम [1]महातेजास्सुतीक्ष्णो नाम धार्मिकः ॥ वसत्यरण्ये [2]धर्मात्मा स ते [3]श्रेयो विधास्यति ॥ ३५॥
सुतीक्ष्णमभिगच्छ त्वं [4]शुचौ देशे [5]तपस्विनम् ॥ रमणीये वनोद्देशे स ते वासं विधास्यति ॥ ३६ ॥
इमां मन्दाकिनीं राम प्रतिस्रोताम[6]नुव्रज ॥ नदीं [7]पुष्पोडुपवहां [8]तत्र तत्र गमिष्यसि ॥ ३७ ॥
एष पन्था नरव्याघ्र मुहूर्तं [9]पश्य तात माम् ॥ [10]यावज्जहामि गात्राणि जीर्णां त्वचमिवोरगः ॥ ३८॥
[11]ततोऽग्निं सुसमाधाय हुत्वा चाज्येन [12]मन्त्रवित् ॥ शरभङ्गो [13]महातेजाः प्रविवेश हुताशनम् ॥ ३९ ॥
तस्य रोमाणि केशांश्च [14]ददाहाग्निर्महात्मनः ॥ जीर्णां [15]त्वचं तथाऽस्थीनि यच्च [16]मांसं सशोणितम्॥४०॥
रामस्तु विस्मितो भ्रात्रा भार्यया च सहात्मवान् ॥ ४१ ॥
स च पावकसंकाशः कुमारः समपद्यत ॥ उत्थायाग्नि[17]चयात्तस्मा[18]च्छरभङ्गो व्यरोचत ॥ ४२ ॥
स लोकानाहिताग्नीनामृषीणां [19]च महात्मनाम् ॥ देवानां च व्यतिक्रम्य ब्रह्मलोकं व्यरोहत ॥४३॥

मृगरूपमारीचनिरसनं मनसि कृतवानिति सूचयति ॥ ३४ ॥ धार्मिकः धर्मचारी । धर्मात्मा धर्मबुद्धिः । वसति अदूर इति शेषः ॥ ३५—३६ ॥ मन्दाकिनीशब्दः पुण्यनदीमात्रे मुनिभिरुपचर्यते । अतएव चित्रकूटेप्युक्तं । प्रतिस्रोतामिति टाबार्षः । प्रतिस्रोतसं कृत्वाऽनुसृत्य व्रज नद्यां पूर्ववाहिन्यां पुरुषेण पश्चिमाभिमुखतया गमने प्रतिस्रोतस्त्वं भवति । पुष्पोडुपवहां उडुपः प्लवः उडुपाकारपुष्पचयावहामित्यर्थः । नदीं तत्र तत्र गमिष्यसीत्यनेन कचिन्नदीतीरे कचिद्व्यवहिते च मार्ग इत्युच्यते ॥ ३७ ॥ अनयोक्त्या सुतीक्ष्णाश्रममार्गो हस्तेन निर्दिश्यते । अथ मुनिः स्वदेहत्यागकाले रामसन्निधानमर्थयते—मुहूर्तं पश्य तात मामिति तात सर्वलोकजनक ॥३८॥ मन्त्रवित् ब्रह्ममेधमन्त्रवित् शरभङ्गः अग्निं सुसमाधाय परिस्तरणादिभिरलंकृत्य । आज्येन ब्रह्ममेधमन्त्रैर्हुत्वा हुताशनं प्रविवेश । अत्र विधिः “यद्युत्कण्ठा तदावाप्तौ ब्रह्ममेधानलं व्रजेत् । नाभिवक्रात्मगानग्नीनवरोप्य यथास्थलम् ॥ संस्कारयेत्” इति ॥ ३९—४१ ॥ अथास्य देवयानमार्गेण ब्रह्मलोकप्राप्तिं दर्शयति—सचेत्यादिना । कुमारलक्षणमुक्तं रत्नाकरे “बालोथ पञ्चदशभिस्त्रिंशद्भिस्तु कुमारकः”इति ॥ ४२ ॥ ब्रह्मलोकं “तेर्चिषमभिसंभवन्त्यर्चिषोहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्केति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयति” इत्युक्तं ब्रह्मात्मकं लोकं ॥४३॥

र्तिभुवनस्यनाभिः ” इतिश्रुतेः । “ लभतेचततःकामान्मयैवविहितान्हितान्” इति भगवदुक्तेश्च ॥ ३३ ॥ **ति०** मन्दाकिनीं तामिवपुण्यां तन्नामिकांवा चित्रकूटस्थेयमेव । पुष्पवल्लघूडुपवहां ॥ **स०** पुष्पाणिच नौकादीनिच वहतीति तां ॥ **शि०** प्रतिस्रोतां देवादिभिः प्रतिस्रोतस्त्वंप्रापितां पश्चिमाभिमुखं वाहितामित्यर्थः । मन्दाकिनीं तदवयवभूतामल्पधारां नदीं ॥ ३७ ॥ **ती०** तात जगज्जनक मांपश्य अयंकृतार्थोभवत्विति करुणाकटाक्षेणेतिशेषः । गात्राणीत्यवयवाभिप्रायेण । वृद्धश्शौचक्रियालुप्तः प्रत्याख्यातभिषक्क्रियः । आत्मानंघातयेद्यस्तुभृग्वग्न्यनशनादि(म्बु)भिः ॥” इति वचनाच्छरभङ्गस्याग्निप्रवेशस्समञ्जसइति ॥ **स०** जुहोमि अग्नाविति शेषः ॥ ३८ ॥ **ति०** वह्निः ददाहेतिशेषः ॥ ४० ॥ **ति०** आहिताग्निलोकाः कर्मणा पितृलोकइति श्रुताश्चन्द्रप्रदक्षिणाः ऋषिलोकाः । “विद्ययादेवलोकः” इति श्रुतास्सूर्यप्रदक्षिणाः । देवानां आजानदेवानां ब्रह्मविष्णुरुद्राणांच लोकाः यान्ध्रुवःप्रदक्षिणीकरोति । ततोब्रह्मलोकंतुर्यं । व्यरोहत आरूढवान् । **स०** ऋषीणां कश्यपादीनां । ब्रह्मलोकं भगवद्धारत्वेनेत्यर्थः । “स्वगतिंतथादात्” इत्याचार्योक्तेः ॥ ४३ ॥

[**पा०**] १ क. महाप्राज्ञः. २ ङ. झ. ट. नियतः. ३ ख. ग. वासं. ४ घ. शुचिदेशे. ५ क. छ. तपस्विनां. ६ क. च. छ. ज. ञ. मभिव्रज. ७ ख. पुष्पोत्करवहां. ८ क. ख. ग. ज.—ञ. ततस्तत्र. ९ क. छ. ज. पश्यतांतु. १० ठ. यावज्जुहोमि. ११ क. ख. ग. ङ. झ. ट. ततोऽग्निंस. छ. ज. ञ. ततोवह्निंसमाधाय. १२ ग. ङ. झ. ञ. ट. मन्त्रवत्. १३ क. च. छ. ज. ञ. महाप्राज्ञः. १४ ङ. झ. ट. तदावह्निः. १५ क. ग. च. छ. ज. ञ. त्वचमथा. झ. त्वचंतदस्थीनि. १६ घ. झ. मांसंच. १७ क. चितान. १८ ग. च्छरभङ्गोप्यरोचत. १९ क. च. छ. ज. ञ. ञ. सुकर्मणां. ख. ग. भावितात्मनां.

स पुण्यकर्मा [1]भवने द्विजर्षभः पितामहं सानुचरं ददर्श ह ॥
पितामहश्चापि समीक्ष्य तं द्विजं ननन्द सुस्वागतमि[2]त्युवाच ह ॥ ४४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे पञ्चमः सर्गः ॥ ५ ॥

षष्ठः सर्गः ॥ ६ ॥

शरभङ्गाश्रमेमुनिगणैःश्रीरामंप्रतिराजधर्मकथनपूर्वकंस्वेषांराक्षसकृतपीडानिवेदनेनतद्वधप्रार्थनम् ॥ १ ॥ रामेणसबहुमानंतेभ्योऽभयप्रदानपूर्वकंसुतीक्ष्णाश्रमंप्रतिप्रस्थानम् ॥ २ ॥

शरभङ्गे दिवं [3]याते मुनिसङ्घाः समागताः ॥ अभ्यगच्छन्त काकुत्स्थं रामं ज्वलिततेजसम् ॥ १ ॥
वैखानसा वालखिल्यास्संप्रक्षाला मरीचिपाः ॥ अश्मकुट्टाश्च बहवः पत्राहाराश्च [4]धार्मिकाः ॥ २ ॥
दन्तोलूखलिनश्चैव तथैवोन्मज्जकाः परे ॥ [5]गात्रशय्या अशय्याश्च [6]तथैवाभ्रावकाशकाः ॥ ३ ॥

अत्र पितामहशब्दोपि सविग्रहपरमात्मपरः । सर्वमिदं शरभङ्गस्य रामसान्निध्यप्रतीक्षया व्यज्यते । अस्मिन्सर्गे चतुश्चत्वारिंशच्छ्लोकाः ॥ ४४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चमः सर्गः ॥ ५ ॥

एवं खरवधार्थिमुनिजनशरणागतिं वक्तुं तदुपयोगितया रामस्य समर्थकारुणिकत्वमुक्त्वा अथ तच्छरणागतिं वक्तुमुपक्रमते—शरभङ्ग इत्यादि । शरभङ्गे दिवं यात इति कालप्रदर्शनं सुतीक्ष्णादीनां विद्यमानत्वात् । समागताः संमिलिताः ॥ १ ॥ वैखानसा इत्यादि । "ये नखास्ते वैखानसाः येवालास्ते वालखिल्याः" इत्युक्तरीत्या भगवन्नखरोमजाता ऋषयः । सदाशरीरं संप्रक्षालयन्तीति संप्रक्षालाः । मरीचींश्चन्द्रसूर्यादिकिरणान् सदा पिबन्तीति मरीचिपाः । सदाऽन्तःकिरणान् प्रवेशयन्तः विवृतास्या इत्यर्थः । अश्मभिरात्मशरीराणि कुट्टन्तीत्यश्मकुट्टाः । पत्राहाराः पर्णाशनाः ॥ २ ॥ दन्ता एवोलूखलं तदेषामस्तीति दन्तोलूखलिनः दन्तैरेव व्रीह्यादितुषनिर्मोकंकृत्वा भक्षयन्तइत्यर्थः । उन्मज्जकाः शिरोमात्रमुद्धृत्य सदा जलावगाढाः । गात्रमेव शय्या येषां ते गात्रशय्याः । उरसि पृष्ठेंऽसयोर्वा शिरः कृत्वा शयाना इत्यर्थः । अतो न स्थण्डिलशायिन इत्यनेन पुनरुक्तिः । अशय्याः अनम्रगात्रा इत्यर्थः । अभ्रावकाशकाः

ति० पितामहं ब्रह्मादित्रयसमष्टिरूपं ॥ ४४ ॥ इतिपञ्चमस्सर्गः ॥ ५ ॥

ती० मुनिसंघाः काकुत्स्थं ककुत्स्थान्वयेऽवतीर्णं । रामं " रमन्तेयोगिनोऽनन्ते " इतिश्रुतेः परंब्रह्म । अभ्यगच्छन्त द्रष्टुं किञ्चिद्विज्ञापयितुंचेतिशेषः । अयंभावः—स्वप्रकाशंपरंब्रह्मैव ककुत्स्थान्वयेऽवतीर्णं सद्भाग्यवशेनास्मद्दृष्टिगोचरोऽभूत् । अतोस्मत्तपोदानादिकमद्य फलितमिति दर्शनानन्देन कृतार्थीभवितुं निर्धनस्यधनलाभेयथा तद्वदानन्दनिर्भरामुनिसंघा नानादिग्भ्यस्समागताइति ॥ १ ॥ **ती०** वैखानसादयस्तपोविशेषलब्धसंज्ञास्तापसविशेषाः । यद्वा विखनसमुनिनाप्रोक्तंसूत्रमधिकृत्य तन्मार्गानुसारिणो वैखानसाः । वालखिल्यास्तु नवेऽन्नेलब्धे पूर्वसंचितत्यागिनः । संप्रक्षालास्तु भगवतःश्रीपादप्रक्षालनजाता महर्षयः । यद्वा प्रत्यहं जीवनसाधनंसंपाद्य सर्वंतद्विनियुज्यवर्तन्ते ये ते वा संप्रक्षालाः । अश्वस्तनिकाइत्यर्थः । अश्मकुट्टास्तु भक्षणार्थंप्रियंग्वादीनश्मन्येवकुट्टयन्तीतितथा । अश्मकुट्टाः अपक्वकुट्टितान्नभक्षकाः ॥ **स०** विखनसःप्रजापतेर्जातावैखानसाः । विखनसाप्रोक्तंसूत्रमधीयन्ते वैखानसाइतिवा । "तेनप्रोक्त"मित्यणन्तात् "तदधीते—" इत्यणि तस्य "प्रोक्ताल्लुक्" इतिलुक् अनुशतिकादिनिवेशादुभयपदवृद्धिः । संप्रक्षालाः निरन्तरं भक्षप्रक्षालितोदकोपजीविनोवा संप्रक्षालितपात्रावा अश्वस्तनिकाइतियावत् । अश्मकुट्टकाः कुट्टिताश्मभक्षकाः ॥ २ ॥ **ती०** उन्मत्तकाइतिपाठे उद्गतः मत्तोमात्सर्यं येषां ते तथा । स्वार्थेकः । यद्वा ज्ञानिनः बालोन्मत्तपिशाचवदितिस्मरणात्तथा । ये कदाचिदपि नशेरते ते अशय्याः । अभ्यवकाशिनइतिपाठे अभ्यवकाशिनः सदाजाग्रत्स्वभाविनः । **स०** उन्मज्जकाः सदास्नानपराः उपदेशादिनेतरमज्जकावा । अनवकाशकाः सर्वदाभगवदुपासनेनेतरव्यासंगार्थमवकाशरहिताः । **ति०** अनवकाशिकाः एकपादस्य स्थित्यवकाशदानरहिताः । एकपादस्थितिमन्तइतियावत् । **शि०** गात्रशय्याः गात्रावयवानि

[पा०] १ ङ.—ट. भुवने. २ घ. झ. मित्युवाच. ३ क.—ट. प्राप्ते. ४ ग. घ. ङ. छ. झ. ट. तापसाः. ५ घ. गतशय्याश्चआर्याश्च. ६ ङ. झ. ट. तथैवानवकाशिकाः.

मुनयः सलिलाहारा वायुभक्षास्तथा परे ॥ आकाशनिलयाश्चैव तथा स्थण्डिलशायिनः ॥ ४ ॥
[1]व्रतोपवासिनो दान्तास्तथाऽऽर्द्रपटवाससः ॥ सजपाश्च [2]तपोनित्यास्तथा पञ्चतपोऽन्विताः ॥ ५ ॥
सर्वे ब्राह्मया श्रिया [3]जुष्टा [4]दृढयोगाः समाहिताः ॥ शरभङ्गाश्रमे राममभिजग्मुश्च तापसाः ॥ ६ ॥
[5]अभिगम्य च धर्मज्ञा रामं धर्मभृतां वरम् ॥ ऊचुः परमधर्मज्ञमृषिसङ्घाः [6]समाहिताः ॥ ७ ॥
[7]त्वमिक्ष्वाकुकुलस्यास्य पृथिव्याश्च [8]महारथ ॥ प्रधान[9]श्चासि नाथश्च देवानां मघवानिव ॥ ८ ॥
[10]विश्रुतस्त्रिषु लोकेषु यशसा विक्रमेण च ॥ [11]पितृभक्तिश्च सत्यं च त्वयि [12]धर्मश्च पुष्कलः ॥ ९ ॥
त्वामासाद्य महात्मानं धर्मज्ञं धर्मवत्सलम् ॥ अर्थित्वान्नाथ वक्ष्यामस्तच्च नः क्षन्तुमर्हसि ॥ १० ॥

वर्षवातातपादिष्वप्यनावृतदेश एव वर्तमानाः ॥ ३ ॥ सलिलाहाराः सलिलमात्राहाराः । वायुभक्षाः वायुमात्रभक्षाः । आकाशे वृक्षाग्रादौ निलीयन्तइत्याकाशनिलयाः । स्थण्डिले कुशाद्यास्तृतभूतले शेरत इति स्थण्डिलशायिनः ॥ ४ ॥ व्रतोपवासिनः व्रतोपवासनिरताः । सर्वाहारशून्या इत्यर्थः । आर्द्रपटवाससः आर्द्रपटवसनशीलाः । सजपाः सदाजपशीलाः । तपोनित्याः "स्वाध्यायमधीते तपएव तत्तप्यते तपो हिस्वाध्यायः" इत्युक्तसदास्वाध्यायपारायणरूपतपोनिष्ठाः । पञ्चतपोन्विताः ग्रीष्मे पञ्चाग्निमध्यस्थाः ॥ ५ ॥ ब्राह्मया श्रिया ब्रह्मविद्यानुष्ठानजनितब्रह्मवर्चसेन । दृढः परिपक्कः योगो यमनियमाद्यष्टाङ्गयोगो येषां ते दृढयोगाः । समाहिताः योगैकाग्रचित्ताः । एवंभूतास्तापसाः राममभिजग्मुरित्यन्वयः । मुनिवैविध्योक्तिर्दर्शनीयत्वाय । अत्राभिजग्मुरित्यनेन शरणागतिरुक्ता ॥ ६—७ ॥ इक्ष्वाकुकुलस्य प्रधानः पृथिव्याश्च नाथः । प्रथमे दृष्टान्तः—देवानामिति । यथादेवन्द्र इति शक्रस्य नाम तथा रघुपतिरिति तव नामेत्यर्थः ॥ ८ ॥ यशसा शरभङ्गानुग्रहकीर्त्या । विक्रमेण विराधनिरसनेन च त्रिषु लोकेषु भूर्भुवःसुवर्लोकेषु । विश्रुतः प्रसिद्धः । पितृभक्तिस्त्वयि पुष्कला तद्वचनेन लब्धस्यापि राज्यस्य त्यागात् सत्यं सत्यवचनं च । त्वयि पुष्कलं भरतप्रार्थनयापि प्रतिज्ञातस्याभञ्जनात् । धर्मश्च त्वयि पुष्कलः शरभङ्गानुग्रहात् ॥ ९ ॥ धर्मज्ञं धर्मवत्सलमित्युक्तानुवादः । अर्थिनो याचकास्तेषां भावोर्थित्वं याच्ञेत्यर्थः । सा च रक्षोनिरसनविषया तया त्वां किंचिद्वक्ष्यामः तत् क्षन्तुमर्हसि आर्ततया त्वदग्रगमनमेव कार्यसाधनं आर्त्यतिशयेन विज्ञापनं तु क्षमस्वेत्यर्थः । एतेन उपायत्वाध्यवसाय एव चेतनस्य कृत्यं प्रार्थनं तु न कर्तव्यं । हठात्कृतेपि क्षमापणं कर्तव्यमित्युक्तं भवति ॥ १० ॥

व्याघ्रचर्मादीनि शय्या येषांते ॥ ३ ॥ **ती०** आकाशनिलयाः आकाशएव वायुधारणबलेन ये निलीयन्ते तेतथा ॥४॥ **ति०** ऊर्ध्ववासिनः गिरिशिखराद्यूर्ध्वप्रदेशे नित्यंवासशालिनः ॥५॥ **स०** दृढयोगसमाहिताः दृढंयोगस्समाहितोयेषु । यद्वा दृढंयोगाः अणिमादयोवा समाहितायेषु । यद्वा दृढयोगाः अत्यन्तसंबन्धवन्तः पुत्रादयोबान्धवाश्च । तैस्समाः अहिता येषांते । "सुहृन्मित्रार्युदासीन–" इत्यादेः समबुद्धयइतियावत् ॥ ६ ॥ **ती०** त्वमित्यादिश्लोकद्वयस्य प्रातीतिकार्थस्स्पष्टः । वस्तुतस्तु देवानांमघवानिव इक्ष्वाकुकुलस्य इक्ष्वाकुकुलमात्रस्य पृथिव्याश्च पृथिवीमात्रस्यच प्रधानोनाथस्त्वमितिकाकुः । किंतु जगद्धारणपोषणकर्ता । अतएव निरवधिकेनयशसा विक्रमेणच त्रिषुलोकेषु सर्वलोकेषु विश्रुतः सकललोकाधीश्वरइतिशेषः । तथापि क्षत्रियरूपेणावतीर्णत्वाल्लोकशिक्षार्थं पितृव्रतत्वं पित्रर्थंव्रतंयस्यपितृव्रतः तस्यभावस्तत्त्वं पितृवचनपरिपालकत्वमितियावत् । सत्यं सत्यवचनत्वं । पुष्कलं अधिकोधर्मश्च त्वय्यस्तीत्यर्थः । **ति०** किंच त्वयिस्मृते धर्मश्चपुष्कलः अङ्गहीनोपि सकलाङ्गपूर्णो भवतीत्यर्थः । "प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुच । तद्विष्णोस्स्मरणादेवसंपूर्णस्यादितिश्रुतिः" इतिस्मृतेः । **स०** यशसा विक्रमेणच विश्रुतः । यशस्वी विक्रमीचेति प्रसिद्धइत्यर्थः । त्वयि विक्रमेणापि विरुद्धः क्रमः कनिष्ठराज्यप्रदानरूपस्तेनापि त्यागहेतौसत्यपीतियावत् । पितृव्रतत्वं पित्रनुव्रतत्वं

[पा०] १ क. च. ज. ञ. मासोपवासिनो. ख. घ. तथोपवासिनो. ग. ङ. झ. तथोर्ध्ववासिनो. २ ङ. झ. ट. तपोनिष्ठाः. ३ ङ. झ. ञ. ट. युक्ताः. ४ ङ. झ. ञ. ट. योगसमाहिताः. छ. ज. योगाःसहस्रशः. ५ घ. अभिजग्मुश्च. ६ घ. ङ. ञ. ट. समागताः. क. सहस्रशः. ७ क. इक्ष्वाकूणांकुलस्यास्य. ८ क. ङ.—ट. महारथः. ९ घ. ङ. झ. ट. श्चापि. १० ग. विश्रुताः. घ. विश्रुतं. ११ क. ख. ङ. ट. पितृव्रतत्वं. १२ घ. धर्माश्चपुष्कलाः.

[1]अधर्मस्तु महांस्तात भवे[2]त्तस्य महीपतेः ॥ यो हरेद्बलिषड्भागं न च रक्षति पुत्रवत् ॥ ११ ॥
[3]युञ्जानः स्वानिव प्राणान्[4]प्राणैरिष्टान्सुतानिव ॥ नित्ययुक्तः सदा रक्षन्सर्वान्विषयवासिनः ॥१२॥
प्राप्नोति शाश्वतीं राम कीर्तिं स बहुवार्षिकीम् ॥ ब्रह्मणः स्थानमासाद्य [5]तत्र चापि महीयते ॥१३॥
[6]यत्करोति परं धर्मं [7]मुनिर्मूलफलाशनः ॥ तत्र राज्ञश्चतुर्भागः प्रजा धर्मेण [8]रक्षतः ॥ १४ ॥
सोयं ब्राह्मणभूयिष्ठो वानप्रस्थगणो महान् ॥ त्वन्नाथोऽनाथवद्राम राक्षसै[9]र्बाध्यते भृशम् ॥ १५ ॥
एहि पश्य शरीराणि मुनीनां भावितात्मनाम् ॥ [10]हतानां राक्षसैर्घोरैर्बहूनां बहुधा वने ॥ १६ ॥
[11]पम्पानदीनिवासानामनुमन्दाकिनीमपि ॥ चित्रकूटालयानां च क्रियते कदनं महत् ॥ १७ ॥

स्वविषये रामेण रक्षणं स्वाभाविकमिति दर्शयिष्यन्तः औपाधिकलौकिकराजरक्षणप्रकारंदर्शयन्ति—अधर्मस्त्वित्यादिना । यः प्रजाभ्यो बलिषड्भागं हरति हृत्वा च ताः न रक्षति तस्य महानधर्मः । बलिः करः । "भागधेयःकरोबलिः" इत्यमरः । षष्ठो भागः षड्भागः लुप्तपूरणो निर्देशः बलिश्चासौ षड्भागश्च बलिषड्भागः ॥ ११ ॥ एवमरक्षणे प्रत्यवायमुक्त्वा रक्षणेऽभ्युदयमाहुः—युञ्जान इति । युञ्जानो यतमानः । नित्ययुक्तो नित्यावहितः । सर्वान् स्वविषयवासिनः स्वकीयान् प्राणानिव प्राणैः प्राणेभ्योपि । इष्टान् सुतानिव च यो रक्षति स महीपतिः बहुवार्षिकीं बहुकालस्थायिनीं । शाश्वतीं अनुवृत्तां । " मुहुःपुनःपुनःशश्वत् " इतिबाणः । भवार्थेण् । तोङीप् । कीर्तिं प्राप्नोति । ब्रह्मणः स्थानमासाद्य तत्र ब्रह्मणा महीयते पूज्यते च ॥ १२—१३ ॥ यस्तु करप्रदानासमर्थो मुनिजनस्तद्रक्षणं कुत इत्यत्राह—यदिति । यद्धर्मं तत्र धर्मे राज्ञः चतुर्भागः चतुर्थांशोभवति ॥ १४ ॥ एवं धर्माय प्रजारक्षकस्य फलमुक्त्वा धर्मानपेक्षे रामे शरणागतिरेव रक्षणहेतुरित्याहुः—सोयमित्यादिना । सः पूर्वोक्तवैखानसादिरूपः । ब्राह्मणाः भूयिष्ठाः अधिकाः यस्मिन् स ब्राह्मणभूयिष्ठः । क्षत्रियवैश्यवानप्रस्थसंभवाद्ब्राह्मणभूयिष्ठ इत्युक्तं । यद्वाब्राह्मणाः ब्रह्मविदः । "तदधीतेतद्वेद" इत्यण् । वानप्रस्थानां तृतीयाश्रमिणां गणः त्वं नाथो यस्यासौ त्वन्नाथः । अनाथवद्बाध्यते ॥ १५ ॥ बाधामेव दर्शयन्ति—एहीत्यादिना । दूरे सम्यङ् नदृश्यत इत्यत एहि पश्येत्युक्तं । भावितात्मनां ध्यातात्मनां । बहुधा छेदनभेदनभक्षणादिभिः ॥ १६ ॥ हतानां बहूनामित्युक्तं विवृणोति—पम्पेति । अनुमन्दाकिनीमपीति अनुर्ल-

---

विश्रुतमिति विपरिणामेनान्वयः । यद्वा हेपितृव्रत त्वं विश्रुत इत्यन्वयः ॥ ८ ॥ ९ ॥ **स०** बलयश्चते षट्च बलिषण्णांभागो यस्य तं षष्ठांशमितियावत् । पूरणार्थकप्रत्ययलोपोवा ॥ ११ ॥ **स०** शाश्वतीं बहुकालसंबन्धिनीं । बहुवार्षिकीं बह्वीचसा वार्षिकीच रक्षकसंबन्धिनीं तां कीर्तिं प्राप्नोतीत्यन्वयः । "वार्षिकंत्रायमाणंस्याद्वर्षाकालभवेऽन्यवत्" इतिविश्वः । **शि०** बहुवार्षिकीं भारताद्यनेकखण्डसंबन्धिनीं । शाश्वतीं नित्यां ॥ १३ ॥ **ती०** ननु क्वचित्षष्ठोभागउच्यते अत्र चतुर्थोभागोभण्यते क्वचिद्द्वितीयोभागः पठ्यते तत्कथमितिचेदुच्यते उपवासिभिक्षाहारजनकृतधर्मात्षष्ठोभागः । राजपरिपालितदेशसंभूतफलाशिनोधर्माच्चतुर्थोभागः । तदन्नपानपुष्टाङ्गजनस्य धर्माद्द्वितीयोभागः । " यस्यान्नपानपुष्टाङ्गःकुरुतेधर्मसंचयम् । अन्नप्रदातुस्तस्यार्धंकर्तुश्चार्धंनसंशयः" इतिस्मरणात् । **ति०** यदिति सामान्ये नपुंसकं । प्रजाः वानप्रस्थप्रजाः । **स०** " स्याद्धर्ममस्त्रियां" इत्यमरात् यद्धर्ममिति संभवति ॥ १४ ॥ **तनि०** सोयंब्राह्मणभूयिष्ठइत्यनेन क्षत्रियवैश्यवानप्रस्थाश्च केचिदिह संतीति व्यज्यते । यद्वा ब्रह्मविद्ब्राह्मणः । ब्राह्मणत्वादिपरमैकान्तिकधर्मनिष्ठइत्यर्थः । अतएव त्वन्नाथइत्येकंपदं । त्वमेव नाथोयस्य सः । तेनानन्यशेषत्वमुक्तं । तस्यैव नाथनीयत्वेनानन्यसाधनत्वानन्यभोग्यत्वे कथिते । अतएव महान् निरतिशयमहिमयुक्तः । तथाविधोप्यनाथवदयं वध्यते । अस्मत्पराभवोनाथ नतेऽनुरूपइतिभावः । **स०** त्वां नाथत इतिवा प्रार्थयतइत्यर्थः ॥ १५ ॥ **तनि०** मुनीनां सर्वेश्वरमननपराणां । भावितात्मनां निदिध्यासननिष्ठानां हतानांशरीराणिपश्येति कारुण्यातिशयोत्पादनायोक्तं । बहुधाहतानां अङ्गप्रत्यङ्गशस्त्रभिन्नानामस्माकं शरीराणि पश्येतिव्यज्यते ॥ **स०** बहुधा खड्गादिनानाशस्त्रेण ॥१६॥ **ति०** सकलदण्डकारण्यपीडामाहुः—**पंपेत्यादि ।**

[**पा०**] १ ङ.—ट. अधर्मस्सुमहान्नाथ. २ ङ.—ट. तस्यतुभूपतेः. ३ ग. प्रजाःस्वानिवचप्राणान्स्वसुतानिवनित्यशः. ४ च. छ. ञ. न्प्राणिनःस्वान्सुतानिव. ५ च.—झ. तत्रापिच. ६ क.—घ. च. छ. ज. ञ. यःकरोति. ७ क. च. छ. ज. ञ. पर्णमूल. ८ ग. रक्षितुं. ९ क.—घ. च. ज. ञ. र्वध्यते. ङ. झ. ट. र्हन्यते. १० घ. भीतानां. ११ क. ख. ग. पंपावननिवासानां.

एवं वयं न मृष्यामो विप्रकारं तपस्विनाम् ॥ क्रियमाणं वने घोरं रक्षोभिर्भीमकर्मभिः ॥ १८ ॥
ततस्त्वां शरणार्थं च शरण्यं समुपस्थिताः ॥ परिपालय नो राम वध्यमानान्निशाचरैः ॥ १९ ॥
परा त्वत्तो गतिर्वीर पृथिव्यां नोपपद्यते ॥ परिपालय नः सर्वान्राक्षसेभ्यो नृपात्मज ॥ २० ॥
एतच्छ्रुत्वा तु काकुत्स्थस्तापसानां तपस्विनाम् ॥ इदं प्रोवाच धर्मात्मा सर्वानेव तपस्विनः ॥२१॥
नैवमर्हथ मां वक्तुमाज्ञाप्योऽहं तपस्विनाम् ॥ केवलेनात्मकार्येण प्रवेष्टव्यं मया वनम् ॥
विप्रकारमपाक्रष्टुं राक्षसैर्भवतामिमम् ॥ २२ ॥
पितुस्तु निर्देशकरः प्रविष्टोऽहमिदं वनम् ॥ भवतामर्थसिद्ध्यर्थमागतोहं यदृच्छया ॥ २३ ॥
तस्य मेऽयं वने वासो भविष्यति महाफलः ॥ २४ ॥

क्षणे कर्मप्रवचनीयः । मन्दाकिनीं शरभङ्गाश्रमवाहिनीं । मन्दाकिन्यास्तटवासिनामित्यर्थः । कदनं हिंसा ॥ १७ ॥ शरीराण्युपेक्ष्य तपस्यतां किं हिंसाभयेनेत्याशङ्क्य न वयं स्वशरीरपीडातो भीताः किंतु महत्सु गरीयस्सु क्रियमाणं कदनं न मृष्याम इत्याहुः—एवमिति । विप्रकारं निकारं । "निकारोविप्रकारः–स्यात्" इत्यमरः । स्वजनपीडा दुःसहेति भावः ॥ १८ ॥ शरणार्थं रक्षणार्थं । समुपस्थिताः प्रपन्नाः । "गत्यर्थाकर्मक—" इत्यादिना कर्तरि क्तः ॥ १९ ॥ त्वत्तः परा अन्या । गतिः उपायः नोपपद्यते । पृथिव्यामिति सर्वभुवनोपलक्षणं । तथाच श्रुतिः । "नान्यः पन्था अयनाय विद्यते" इति । इत्यूचुरिति पूर्वेणान्वयः ॥ २० ॥ तपस्विनां प्रशस्ततपसां । तापसानां मुनीनां ॥ २१ ॥ शरणागत्यैवाऽऽज्ञाप्तोहं परिपालयेत्यादिकं वक्तुं नार्हथ । केवलेनात्मकार्येण केवलात्मप्रयोजनत्वेन । राक्षसैः क्रियमाणं भवतामिमं विप्रकारं अपाक्रष्टुं निवर्तयितुं । मया वनं प्रवेष्टव्यं प्रविष्टं । "तयोरेव कृत्यक्तखलर्थाः" इति कर्मणि तव्यप्रत्ययः । स्वतो मत्प्रयोजनरूपं भवद्विरोधिनिरसनं कर्तुमेवेदं वनं प्रविष्टोस्मीत्यर्थः । शेषभूतरक्षणस्य शेषिप्रयोजनत्वादिति भावः ॥ २२ ॥ पितृवाक्यपरिपालनाय वनं प्रविष्टोसीति किंवदन्त्याः का गतिरित्यत्राह–पितुरिति । अहं भवतामर्थसिद्ध्यर्थमागतोस्मि यदृच्छया दैवगत्या । पितुर्निर्देशकरः वनमिदं प्रविष्टोस्मि । पितृवाक्यकरणव्याजेन भवदर्थसिद्ध्यर्थमेवागतोस्मीतिभावः ॥ २३ ॥ भवत्कार्यार्थमेवागतस्य मे वने

पंपा च नद्यश्च तत्रनिवासो येषांतेषां । पंपारूपा नदीवा । अनुमन्दाकिनीमपीति । मन्दाकिन्या अत्रत्यपुण्यनद्यास्तीरवासिनां । मन्दाकिन्याविस्तीर्णप्रवाहत्वाद्दुरवगाहतयापृथगुक्तीराघवाख्याने । **स०** मन्दाकिनीमित्यनेनास्यास्स्वर्णदीत्वं पंपादीनांचभूनदीत्वं सूच्यते ॥ १७ ॥ **तनि०** शरण्यमितिनिरुपपदेन सर्वलोकशरण्यत्वमुक्तं । तेन तदुपयुक्तगुणास्स्वामित्वादयः पूर्वखण्डनारायणपदोक्तास्स्मारिताः । शरणार्थं उपायान्तरस्थाने निवेशयितुमित्यर्थः । समुपागताः विश्वासाद्यङ्गसंपत्तिपूर्वकरक्षाभरसमर्पणं कृतवन्तः । नःपरिपालयेति गोप्तृत्ववरणोक्तिः । उत्तरार्धेनानिष्टनिवृत्तिरूपफलप्रार्थना पर्यवसिता ॥ १९ ॥ **तनि०** उत्तरखण्डविवरणमाकिंचिन्यमाह—**परेति** । त्वत्तः सिद्धोपायात्परा । गतिः । यद्वा "नान्यःपन्थाअयनायविद्यत"इति श्रुत्यर्थं मनसिकृत्याह—**परेति** । पृथिव्यांनोपपद्यते यस्मात्परिमितंफलमित्याद्युक्तबहुदोषदुष्टत्वादितिभावः । नस्सर्वानिति आत्मात्मीयसर्वसंग्रहः । राक्षसेभ्यइति सर्वानिष्टोपलक्षणं । **स०** यतोतइतिशेषः । यतस्त्वत्तः परागतिः पृथिव्यांनोपपद्यते अतः परिपालयेत्यन्वयः ॥ २० ॥ **स०** एवं क्षन्तुमर्हसीत्यादिरूपेण । आज्ञाप्यः नियोज्यः । केवलेन मुख्येनस्वकार्येण चतुर्दशवर्षवनवासरूपकार्येणेत्यर्थः ॥ २२ ॥ **स०** भवतां विप्रकारमपाक्रष्टुं पितुर्निर्देशकरश्च वनंप्रविष्टइत्यन्वयः । तुना मद्वनगमनं पितृनिर्देशकरणभवद्विप्रकारापाकरणरूपप्रयोजनवदिति विशेषस्सूच्यते । **ति०** यदृच्छयाऽऽगतएवाहं भवतामर्थसिध्यर्थमपि भविष्याम्येवेतिशेषः ॥ २३ ॥ पितुस्त्वित्यनेनोक्तएवार्थः कविना श्लोकान्तरेण वर्ण्यते । इयमपिशैली कवेरिति कतकतीर्थौ । यतश्शत्रून्हन्तुमिच्छामि अतस्तस्य यदृच्छया वनमागतस्य मेऽयं वनवासो महाफलोभविष्यतीति स्वगतोविचारः । अथ कार्यपिर्ययाय प्रकाशंप्रतिजानीते—**पश्यन्त्विति** । **तनि०** तस्य भवत्कार्यार्थमेवागतस्य मे वनवासः तपस्विनांमहाफलः अतः रणे तपस्विनांशत्रून्हन्तुमिच्छामीति योजनीयं । महाफलं नाम अनिष्टनिवृत्तिपूर्वकेष्टप्राप्तिरूपं ॥ **स०** तपस्विनांशत्रून्हन्तुमि-

[पा०] १ ख. एवंविधं. २ क. च. छ. ज. ञ. भीमविक्रमैः. ३ घ. समुपागतान्. ४ क.—ट. माज्ञाप्योहं. ५ क. ङ. च. छ. झ. ञ. ट. केवलेनस्वकार्येण. ज. केवलेनच. ख. ग. घ. केवलेनैव. ६ क.—ट. वनंमया. ७ घ. महोदयं.

[1]तपस्विनां रणे शत्रून्हन्तुमिच्छामि राक्षसान् ॥ पश्यन्तु वीर्यमृषयः सभ्रातुर्मे तपोधनाः ॥ २५ ॥
[2]दत्त्वाऽभयं चापि [3]तपोधनानां धर्मे धृतात्मा सह लक्ष्मणेन ॥
तपोधनैश्चापि [4]सभाज्यवृत्तः सुतीक्ष्णमेवाभिजगाम वीरः ॥ २६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे षष्ठः सर्गः ॥ ६ ॥

सप्तमः सर्गः ॥ ७ ॥

रामेणसीतालक्ष्मणाभ्यांसहसुतीक्ष्णाश्रममेत्यतदभिवादनपूर्वकंतंप्रतिस्वावासस्थलप्रदर्शनप्रार्थना ॥ १ ॥ सुतीक्ष्णेन-रामंप्रतिस्वाश्रमस्यवासोपयोगिगुणवत्ताकथनपूर्वकंमृगगणप्रलोभनरूपदोषोत्कीर्तनेरामेणतंप्रतिस्वस्यतत्रवासानभिरोचनोक्तिः ॥ २ ॥

[5]रामस्तु सहितो भ्रात्रा सीतया च परंतपः ॥ सुतीक्ष्णस्याश्रमपदं जगाम [6]सह तैर्द्विजैः ॥ १ ॥
[7]स गत्वाऽदूरमध्वानं नदीस्तीर्त्वा बहूदकाः ॥ [8]ददर्श विपुलं शैलं [9]महामेघमिवोन्नतम् ॥ २ ॥
ततस्तदिक्ष्वाकुवरौ [10]संततं विविधैर्द्रुमैः ॥ काननं तौ विविशतुस्सीतया सह राघवौ ॥ ३ ॥
[11]प्रविष्टस्तु वनं [12]घोरं [13]बहुपुष्पफलद्रुमम् ॥ ददर्शाश्रममेकान्ते चीरमालापरिष्कृतम् ॥ ४ ॥
तत्र [14]तापसमासीनं मलपङ्क[15]जटाधरम् ॥ रामस्सुतीक्ष्णं विधिव[16]त्तपोवृद्धमभाषत ॥ ५ ॥

वासो महाफलो भविष्यति ॥ २४ ॥ तदेवफलमाह—तपस्विनामिति । तपस्विनां शत्रून् रणे हन्तुमिच्छामि इतीदं प्रोवाचेत्यन्वयः ॥ २५ ॥ अभयमिति छेदः । धृतात्मा निश्चलमनाः । तपोधनैः ऋषिभिश्च सभाज्यवृत्तः पूज्याचारः ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षष्ठःसर्गः ॥ ६ ॥

अथ सुतीक्ष्णाभ्यर्थनया मृगरूपमारीचादिदुष्टराक्षसनिरासःसप्तमे । आश्रमपदं उद्दिश्येति शेषः । तैर्द्विजैः वैखानसादिभिः ॥ १ ॥ अदूरमितिच्छेदः । पूर्वं शरभङ्गेण "इह राम महातेजाः" इति सुतीक्ष्णाश्रमस्यादूरत्वोक्तेर्नदीरिति बहुवचनमेकस्या एव मन्दाकिन्याः बहुप्रदेशेष्वावृत्त्या । बहूदकाः विपुलोदकाः । नौतार्यत्वानुक्तेः शैलं शैलसंबन्धिवनं काननमित्यनुवादात् । तस्येदमित्यण् । महामेघमिवेति श्यामिकायामुपमा ॥ २ ॥ द्रुमैः संततं व्याप्तं । इक्ष्वाकुवरौ राघवावित्युभयथा धैर्यमूलोक्तिः ॥ ३ ॥ चीरमालया वल्कलपङ्क्त्या परिष्कृतं अलंकृतं ॥ ४ ॥ मलपङ्कजटाधरं नित्यनिश्चलतपोयोगेन वा वार्धकेन वा मलपङ्क-

---

च्छामीति पारोक्ष्यनिर्देशेन पश्यन्त्विति पारोक्ष्येण निर्देशस्संभवति ॥ २४ ॥ २५ ॥ **शि०** आर्यदत्तः आर्यं सर्वश्रेष्ठं अचलमित्यर्थः दत्तंदानं यस्यसः ॥ **स०** आर्यवृत्तः आर्याणांवृत्तंयस्यसः । आर्यैर्वृत्तंयस्येतिवा । सुतीक्ष्णं तन्नामकमृषिं । सुतीक्ष्णं राक्षसानां तीक्ष्णंयथाभवतितथा जगामेत्यथोवा ॥ २६ ॥ इतिषष्ठस्सर्गः ॥ ६ ॥

स० तैर्द्विजैस्सह । यद्वा हतैः राक्षसैर्हतप्रायैः । स रामः ॥ १ ॥ **ति०** विमलं पवित्रं । महामेघमिवेतिपाठे स्थितमितिशेषः । नैल्यस्थौल्याभ्यां सादृश्यं । उन्नतमिति स्वरूपकथनं ॥ **स०** महामेरुमिव स्थौल्येनेत्यर्थः । उन्नतं अनेकपक्षिभिर्ध्वनितं । "णमुप्रह्वत्वेशब्देच" इत्युक्तेः ॥ २ ॥ **रामानुजीयं** । तदित्यनेन प्रस्तुतस्यकाननस्यपरामर्शः । प्रथमं शैलस्यप्रस्तुतत्वात्तत्स्यकाननमपि प्रस्तुतमेवेति ॥ ३ ॥ **स०** पूर्वं त्रयाणांप्रस्तुतत्वेप्युत्तरत्र प्रश्नप्रतिवचनयोरामैककर्तृकत्वतदेकविषयत्वाभ्यां प्रविष्टइत्येकवचनमुपपद्यते । अमुमेवविशेषंद्योतयति तुशब्दः ॥ ४ ॥ **ती०** मलपङ्कजटाधरं मलंनाम उद्वर्तनादिसंस्काराभा-

[**पा०**] १ ङ. छ. तपस्विनो. २ क. ग.—ट. दत्वावरं. ३ क. च. छ. ज. ञ. सतापसानांधर्मप्रधानःसह. ४ ख. ग. च. छ. ञ. सहार्यवृत्तः. ङ. झ. ट. सहार्यदत्तः. क. महानुभावः. ५ च. छ. ज. ञ. रामश्च. ६ क. घ. च. छ. ज. ञ. सहितोद्विजैः. ट. सहितैर्द्विजैः. ७ घ. ते. गत्वा. ८ घ. ददृशुर्विपुलं. ख. ग. ङ.—ट. ददर्शविमलं. ९ क. ग. ङ.—ट. महामेरुं. १० झ. सततं. ११ ख. ग. प्रविष्टस्स. १२ क. च. छ. ज. ञ. रामो. १३ ख. ग. बहुमूलफल. १४ छ. तावत्समासीनं. १५ ङ. झ. ट. पङ्कजधारिणं. १६ ख. ङ. झ. ट. तपोधनं.

रामोऽहमसि भगवन्[1]भवन्तं द्रष्टुमागतः ॥ [2]त्वं माऽभिवद धर्मज्ञ महर्षे सत्यविक्रम ॥ ६ ॥
[3]स निरीक्ष्य [4]ततो वीरं रामं धर्मभृतां [5]वरम् ॥ समाश्लिष्य च [6]बाहुभ्यामिदं वचनमब्रवीत् ॥ ७ ॥
स्वागतं [7]खलु ते वीर राम [8]धर्मभृतां वर ॥ आश्रमोऽयं त्वयाऽऽक्रान्तः सनाथ [9]इव सांप्रतम् ॥ ८ ॥
प्रतीक्षमाणस्त्वामेव नारोहेऽहं महायशः ॥ देवलोकमितो वीर देहं त्यक्त्वा [10]महीतले ॥ ९ ॥
चित्रकूट[11]मुपादाय राज्य[12]भ्रष्टोसि मे श्रुतः ॥ १० ॥
इहोपयातः काकुत्स्थ देवराजः शतक्रतुः ॥ [13]उपागम्य च [14]मां देवो महादेवस्सुरेश्वरः ॥
[15]सर्वाँलोकाञ्जितानाह मम पुण्येन कर्मणा ॥ ११ ॥

जटानां धरं । विधिवत् क्रमवद्यथा भवति तथा । अभाषत । मीलितनयनत्वेन स्वाभिवादनापरिज्ञानाद्भाषणं ॥ ५ ॥ मा अभिवादयन्तं मां अभिवाद प्रत्यभिवादनं कुरु । सत्यविक्रम अमोघतपःप्रभाव ॥ ६—७ ॥ सनाथइव सनाथएव । यद्वा सर्वदा त्वया सनाथत्वेपि पामराणां सनाथत्वप्रतिभेदानीं जातेत्यर्थः ॥ ८ ॥ स्वस्य मोक्षापेक्षां व्यञ्जयति—प्रतीक्षमाण इति । त्वामेव प्रतीक्षमाणः प्रतिपालयन् त्वदागमनं काङ्क्षमाण इत्यर्थः । देवलोकं नारोहे "तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलं" इति तस्य मोक्षविरोधित्वादिति भावः ॥ ९ ॥ मदागमनं कुतोवगतं तत्राह—चित्रकूटमिति । चित्रकूटमुपादाय चित्रकूटगमनमारभ्य । राज्याद्भ्रष्टः प्रच्युत इति मे मया श्रुतोसि ॥ १० ॥ स्वर्गारोहणस्य कः प्रसङ्ग इत्यत्राह—इहेति । उपयातः शरभङ्गार्थमागतः । मामुपागम्याह । तर्हि तादृशमहाफलं किमिति त्यक्त-

वाच्छरीरजन्यं । पङ्कोनाम वनसंचाराच्छरीरलग्नमितिभेदः ॥ **कतक०** मलपङ्कजधारिणं मलस्यसर्वाघस्य शान्तये पङ्कजे पद्मासने स्थित्वा धारणशीलं । यद्वा कपङ्कजे हृदयपङ्कजे धारिणं ऐश्वरयोगधारणशीलमित्यर्थः । अत्र ततस्तदिक्ष्वाकुवरौ इत्यादिश्लोकत्रयंप्रक्षिप्तं । **स०** मलपङ्कजधारिणं मलं शारीरमलं । पङ्कजाः पङ्कोद्भूताः कणाः । तान्धर्तुंशीलमस्यास्तीति मलपङ्कजधारी तं तापसं । यद्वा तापसमासीनमित्येकंपदं । तापेषु पञ्चाग्नितापेषु सम्यगासीनं । **ति०** विधिवत् उपगम्येतिशेषः ॥ ५ ॥ **स०** मा मां वद । अनेन ऋषेर्मौनंसूच्यते ॥ ६ ॥ **स०** धीरः धीषुरमणकर्ता ॥ ७ ॥ **ति०** सनाथइव सस्वामिकइव । अत्रायमाश्रमः ब्रह्मचर्याद्याश्रमव्यवहार्योऽयंदेहः । त्वया जीवरूपेणाक्रान्तोपि सांप्रतं अद्य बहिश्चक्षुषानुभवन् सनाथइव मायया सच्चिदानन्दस्यैवैवंशरीररूपेणप्रतिभासमानस्येदृशस्यत्वद्रूपस्य दर्शनेन चित्तशुद्ध्या पूर्वंजीवाभेदेनाहमितिप्रतीत्यागृहीतस्य । तद्वैलक्षण्येनेदानींग्रहाद्भेदनिबन्धनसनाथत्वव्यवहारः । इवेन जडानामप्यतिरिक्तत्वाभावस्सूचितइति ध्वनिः ॥ **स०** पूर्वं मयासनाथ इव सांप्रतं त्वयासमाक्रान्तइति सनाथः ॥ ८ ॥ **स०** अहं देवलोकं सत्यलोकं । नारोहे नगच्छेयं । यद्वा हेदेव महीतले देहंत्यक्त्वा इतः परं लोकं देहान्तरं नरोहे इत्यान्तरङ्गिकार्थः ॥ ९ ॥ **ति०** ननु कात्र मदागमनसंभावना तत्राह—**चित्रेति**। यदा राज्यभ्रष्टः चित्रकूटं उपादाय प्राप्य स्थितोसि तदाप्रभृति मे मया श्रुतोसि ॥ आश्रमोयमित्यस्य व्यङ्ग्यार्थेतु चित्रं विचित्रफलहेतुकूटं दुरवगाहत्वात्संसारं प्राप्य राज्यभ्रष्टो विद्यासंसर्गेणस्वाराज्यात् नित्यशुद्धबुद्धमुक्तस्वरूपात् भ्रष्टः । तद्योगात्संसारंप्राप्तस्त्वमेव मया श्रुतिवाक्येभ्यश्श्रुतोसि । अतस्तत्प्रतीक्षया नदेवलोकं गतइति व्यङ्ग्योर्थः ॥ १० ॥ नन्विदानीं क्वते देवलोकारोहणप्रसक्तिस्तत्राह—**इहेति** । शरभङ्गाह्वानानन्तरमिहाप्यागतइत्यर्थः । **ति०** पुण्येनकर्मणाजितानित्यनेन श्रवणसंपत्तावपि निदिध्यासनसंपत्त्यभावोस्योक्तः । पूजावचनेषु पौनरुक्त्यं नदोषाय । देवादिपदानां प्रवृत्तिनिमित्तभेदस्य स्पष्टत्वान्नपौनरुक्त्यमितिकेचित् ॥ **स०** महादेवः महेनउत्सवेन आदेवः अतिकान्तिमान् सुरेश्वरः । सर्वान् चितान् प्राप्तानाहेत्यन्वयः । आहेत्यनेन तन्निदिध्यासितब्रह्मलोकादिज्ञानं तस्यास्तीति तत्र साक्षित्वेनेन्द्रवचसउपयोगइति कविस्सूचयति । तन्निदिध्यासनाभावोस्योक्तइति नागोजिभट्टीयंव्याख्यानं "यंयंलोकंमनसासंविभाति "यंयंवापिस्मरन्भावं" इत्यादिश्रुतिस्मृतिविरुद्धत्वादसंगततर-

[पा०] १ घ. भद्रंलां. २ क. च. छ. ज. आगतंपाहिधर्मज्ञ. ग. ङ. झ. ट. तन्माऽभिवद. ३ क. च. ज. संनिरीक्ष्य. ४ ख. ग. ङ. झ. ट. ततोधीरो. क. च. छ. ज. ञ. तदारामंवीरं. ५ क. वरः. ६ क. बाहुभ्यांवचनंचेदं. ७ ङ. झ. ट. तेरघुश्रेष्ठ. क. च. ज. ञ. तेनरश्रेष्ठ- ८ ङ. झ. ट. सत्यभृतां. ९ क. इति. ग. इह. १० ख. ग. महीतलात्. ११ क. ख. च. छ. ज. ञ. मनुप्राप्तो. १२ क. छ. ञ. भ्रष्टोमयाश्रुतः. च. ज. भ्रंशोमयाश्रुतः. १३ क. छ. ज. ञ. उपगम्य. १४ ग. घ. ङ. झ. ट. मेदेवो. ख. देवेशो. १५ छ. सर्वलोकान्.

तेषु देवर्षिजुष्टेषु जितेषु तपसा मया ॥ मत्प्रसादात्[1]सभार्यस्त्वं विहरस्व सलक्ष्मणः ॥ १२ ॥
तमुग्र[2]तपसा युक्तं महर्षिं [3]सत्यवादिनम् ॥ प्रत्युवाचात्मवान्रामो ब्रह्माणमिव [4]कश्यपः ॥ १३ ॥
[5]अहमेवाहरिष्यामि स्वयं लोकान्महामुने ॥ आवासं त्वहमिच्छामि प्रदिष्टमिह कानने ॥ १४ ॥
भवान्सर्वत्र कुशलस्सर्वभूतहिते रतः ॥ [6]आख्यातश्शरभङ्गेण गौतमेन महात्मना ॥ १५ ॥
एवमुक्तस्तु रामेण महर्षिर्लोकविश्रुतः ॥ अब्रवीन्मधुरं वाक्यं हर्षेण महताऽऽप्लु[7]तः ॥ १६ ॥
अयमेवाश्रमो राम गुणवान्रम्यता[8]मिह ॥ ऋषिसङ्घानुचरितस्सदा मूलफला[9]न्वितः ॥ १७ ॥
इममाश्रममागम्य मृगसङ्घा [10]महायशः ॥ [11]अटित्वा प्रतिगच्छन्ति लोभयित्वाऽकुतोभयाः ॥
नान्यो दोषो भवेदत्र मृगेभ्योऽन्यत्र विद्धि वै ॥ १८ ॥
तच्छ्रुत्वा वचनं [12]तस्य महर्षेर्लक्ष्मणाग्रजः ॥ उवाच वचनं धीरो वि[13]कृष्य सशरं धनुः ॥ १९ ॥
तानहं सुमहाभाग मृगसङ्घान्[14]समागतान् ॥ हन्यां निशितधारेण शरेणा[15]शनिवर्चसा ॥ २० ॥
भवांस्तत्राभिषज्येत किं स्यात्[16]कृच्छ्रतरं ततः ॥ [17]एतस्मिन्नाश्रमे वासं चिरं तु न समर्थये ॥ २१ ॥

वानसीत्युक्ते तारतम्यज्ञानादिति भावः ॥ ११—१४॥ गौतमेन गौतमवंश्येन ॥ १५ ॥ हर्षेण महता प्लुतः मोक्षानुग्रहेण परमानन्दभरितः ॥ १६—१७ ॥ गुणमुक्त्वा दोषमाह निरसनीयत्वाभिप्रायेण—इममिति । आश्रमं तपोवनं । अविद्यमानं कुतोपि भयं येषां ते अकुतोभयाः सन्तः अटित्वा इतस्ततः परिप्लुत्य । लोभयित्वा समाधिभङ्गं जनयित्वा । विचित्रतरवेषैरिति शेषः । प्रतिगच्छन्ति प्रतियान्ति । अत्र वने । मृगेभ्योन्यत्र मृगान्विनाऽन्यो दोषो न भवेदिति विद्धि मृगप्रलोभनरूपदोषादन्यो दोषोत्र नास्तीत्यवेहीत्यर्थः । इति वाक्यमब्रवीदिति पूर्वेण संबन्धः ॥ १८ ॥ तत् मृगभयविषयकं वचनं । विकृष्य सशरं धनुरिति स्वोत्साहप्रकटनं ॥ १९ ॥ हन्यामिति प्राप्तकाले लिङ् । वधकाले प्राप्ते सकलमृगहननं कुर्यामित्यर्थः । प्राप्तकालश्च तद्दर्शनकालः ॥ २० ॥ तच्च हननमिह स्थित्वा न कर्तुं शक्यमित्याह—भवानिति । तत्र मृगसङ्घवधविषये । भवान् मया अभिषज्येत अभिभूयेत । अभिपूर्वात् षञ्जेः कर्मणि लिङ् । "अभिषङ्गः परिभवे सङ्गाक्रोशनयोरपि" इति बाणः । तादृशमृगहनने मया त्वं

मिति द्रष्टव्यं ॥ ११ ॥ **ती०** वस्तुतस्तु मत्प्रसादात् मय्यनुग्रहात् । तेषुविहरस्वेत्यपि तान्विशेषेण हरस्वस्वीकुर्विति भगवति कर्मफलसमर्पणबुद्ध्या मुनिनोक्तं ॥ १२ ॥ **स०** आहरिष्यामीत्यनेन त्वया तपसासंपादितांल्लोकांस्तुभ्यं दास्यामीति रामस्य स्वातन्त्र्यंद्योत्यते । प्रदिष्टमित्यनेन मयैव पूर्वंतुभ्यंप्रदिष्टमिति भावमाविष्करोतिदेव इत्यवगमयति कविः । **ति०** अहमेवेति । तपसेत्यर्थः । त्वत्तःप्रतिग्रहे नाहमधिकारीत्यापाततोर्थः । वास्तवस्तु तद्दत्तपुण्याङ्गीकारेणानुगृह्णाति भगवान्—**अहमेवेति** । न्यासत्वेन त्वयास्थापितं तुभ्यंप्रापयिष्यामि । अहमेवेत्यनेन सर्वकर्मफलदाता सर्वोपासनास्वहमेवेति सूचितं । अथ लोकदृष्ट्येतरजनप्रतारणायावासमिति । प्रदिष्टं । त्वयेतिशेषः ॥ १४ ॥ **टीका०** मृगेभ्यइति हेतुगर्भितं । मृगरूपधारिणोराक्षसाएवागत्य तपोभङ्गंकुर्वन्तीत्यर्थः । **ति०** महीयसः अतिशयितमहत्त्ववतोपि अहत्वा हननमकृत्वा लोभयित्वारूपकान्तिगतिविशेषैश्चित्तक्षोभंकृत्वा गच्छन्तीत्यर्थः । अनेन भावी मारीचवृत्तान्तस्सूचितः । **स०** एतन्निवेशिनांपशूनामपि नद्वेषबुद्धिः किमु मनुष्याणामित्याह—**इममिति** । महीयसः महीयांसः । अहत्वा विरोधिनमितिशेषः । लोभयित्वा स्वस्थावलोकान् सस्वाकाङ्क्षान्कृत्वा । अकुतोभयाः मुक्ताः तइव ॥ **स०** अन्यत्र मदाश्रमातिरिक्ते । अत्र दण्डकारण्ये । मृगेभ्योऽन्योदोषोनास्ति मृगाएवदोषाः । भयकारिणइति यावत् । अतएव पूर्वश्लोके इममितीममर्थं ज्ञापयति ॥ १८ ॥ **स०** तत्रभवानभिषज्येत शपथंवा आक्रोशंवा कुर्यात् मृगहननं नकुर्विति । अतः भवदाक्रोशात् शपथाद्वा । कृच्छ्रतरं कष्टतरं किमु । हातुं हन्तुं नशक्नोमीतिभावः ॥ "अभिषङ्गो

[पा०] १ क. त्सभार्यस्तु. २ क. ख. ग. ङ.—ट. मुग्रतपसंदीप्तं. ३ छ. सत्यविक्रमः. ४ क. ङ. ट. वासवः. ५, ङ. ज. ट. अहमेवहरिष्यामि. ६ ङ. झ. ट. आख्यातं. ७ ङ. झ. ट. युतः. ८ ङ. झ. ट. मिति. ९ क.—घ. च. छ. फलायुतः. ङ. झ. ट. फलैर्युतः. १० ङ. झ. ट. महीयसः. ११ ङ. झ. ट. अहत्वा. ग. अभितः. १२ क. च. छ. ज. ञ. रामो. १३ ङ. झ. ट. विगृह्य. १४ ग. सहागतान्. १५ ङ. झ. ट. शरेणानतपर्वणा. १६ ग. स्याद्दुःखतरं. १७ च. छ. ज. एकस्मिन्नाश्रमे.

तमेवमु[1]क्त्वा वरदं रामस्संध्या[2]मुपागमत् ॥ २२ ॥
अन्वास्य पश्चिमां संध्यां तत्र वासमकल्पयत् ॥ सुतीक्ष्णस्याश्रमे [3]रम्ये सीतया लक्ष्मणेन च ॥२३॥
ततश्शुभं तापस[4]भोज्यमन्नं स्वयं सुतीक्ष्णः पुरुषर्षभाभ्याम् ॥
[5]ताभ्यां सुसत्कृत्य ददौ महात्मा संध्यानिवृत्तौ [6]रजनीमवेक्ष्य ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे सप्तमः सर्गः ॥ ७ ॥

अष्टमः सर्गः ॥ ८ ॥

प्रभातेकृताह्निकेनरामेणसुतीक्ष्णंप्रतिस्वस्यदण्डकारण्यदर्शनोत्कण्ठानिवेदनेनतद्गमनाभ्यनुज्ञाप्रार्थनम् ॥ १ ॥ मुनिना कृताभ्यनुज्ञेनरामेणतत्प्रदक्षिणीकरणपूर्वकंदण्डकारण्यंप्रतिप्रस्थानम् ॥ २ ॥

रामस्तु सहसौमित्रिस्सुतीक्ष्णेनाभिपूजितः ॥ परिणाम्य निशां तत्र [7]प्रभाते प्रत्यबुध्यत ॥ १ ॥
[8]उत्थाय तु यथाकालं राघवः सह सीतया ॥ [9]उपास्पृशत्सुशीतेन [10]जलेनोत्पलगन्धिना ॥ २ ॥
अथ [11]तेऽग्निं सुरांश्चैव वैदेही रामलक्ष्मणौ ॥ [12]काल्यं विधिवदभ्यर्च्य तपस्विशरणे वने ॥ ३ ॥

कृतापराधोभवेः आश्रमसंबन्धित्वादितिभावः । ततः किमित्यत्राह—किंस्यात्कृच्छ्रतरं तत इति । ततः भवदभितापात् । कृच्छ्रतरं कष्टतरं । किं न किमपीत्यर्थः । तस्मादेतस्मिन्नाश्रमे चिरं तद्दर्शनपर्यन्तं । वासं न समर्थये नेच्छामि । इह वासे मृगसङ्घपीडां सोढ्वा स्थातव्यं । हत्वावस्थाने स्वाश्रममृगाणां स्वसन्निधौहनने तव वैमनस्यं स्यात् । तच्च ममानिष्टं अतोन्यत्र त्वदसन्निधाने मृगान् हनिष्यामीत्यर्थः । इत्युवाचेति पूर्वेणान्वयः ॥ २१ ॥ वरदमित्यनेन मुनिस्तथैवानुज्ञातवानिति गम्यते । सन्ध्यामुपागमत् सन्ध्यामुद्दिश्य सरस्तीरं गतवानित्यर्थः ॥ २२ ॥ पश्चिमां सन्ध्यामन्वास्य । अत्यन्तसंयोगे द्वितीया । यावत्सन्ध्यं जलतीरे जपन् स्थित्वेत्यर्थः । तत्राश्रमे वासमकल्पयदित्यनेन प्रातर्जिगमिषा जातेति व्यज्यते । अन्यत्र गत्वा मृगनिरासश्च रावणं प्रति मारीचानुवादादवगन्तव्यः ॥ २३ ॥ शुभं भक्त्युपनीतत्वेन पावनं तापसभोज्यं फलमूलादि । अन्नं अदनीयं । स्वयं नतु शिष्यमुखेन । सुसत्कृत्य अर्घ्यपाद्यादिना संपूज्य । महात्मा तत्र परमपुरुषत्वज्ञानवान् । सन्ध्यानिवृत्तौ सन्ध्याकर्मावसाने । रजनीमवेक्ष्य ददौ रजनीभक्ष्यानुसारं ददावित्यर्थः । सीता तु रामभुक्तशेषं भुक्तवतीत्याशयः ॥ २४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्तमः सर्गः ॥ ७ ॥

अथ सुतीक्ष्णानुज्ञया रामस्याश्रममण्डलं प्रति प्रस्थानमष्टमे—रामस्त्वित्यादि । परिणाम्य अतिवाह्य । प्रभाते उषःकाले ॥ १ ॥ सह सीतयेत्यनेन पूर्वमेव सौमित्रिः स्नात इति व्यज्यते । उपास्पृशत् स्नातवान् । "स्नानाचान्त्योरुपस्पर्शः" इति बाणः । सुशीतेनेत्युष्णोदकव्यावृत्तिः । उत्पलगन्धिनेत्यनेन तटाकस्नानं सूच्यते ॥ २ ॥ अग्निमित्येकवचनेन एकाग्नित्वावगमान्न त्रेताग्निरिदानीमिति गम्यते । सुरान् नारायणं । "सहपत्न्या विशालाक्ष्या नारायणमुपागमत्" इत्ययोध्याकाण्डोक्तेः । परिवारापेक्षया बहुवचनं । काल्यं यथाकालप्राप्तं यथा तथा । देशानुगुण-

---

थशपथे स्यादाक्रोशे पराभवे" इतिविश्वः ॥ २१ ॥ ति० उपरमं उपरम्य । क्वचिदुपरम्येत्येवपाठः ॥ शि० उपरमं अतिनिवृत्तचित्तं । तं महर्षिं ॥ २२ ॥ इतिसप्तमस्सर्गः ॥ ७ ॥

[पा०] १ ङ. झ. ट. मुक्त्वोपरमं. क. घ. मुक्त्वावचनं. २ क. ख. ग. मुपाविशत्. ३ क. च. छ. ज. ञ. रामः. ख. ग. पुण्ये. ४ ङ. झ. ट. योग्यमन्नं. ५ क. च. छ. ज. ञ. सत्कृत्यताभ्यांप्रददौ. ६ क. ख. ग. ङ. झ. ट. रजनींसमीक्ष्य. च. छ. ज. ञ. रजनींनिरीक्ष्य. ७ क. च. छ. ज. ञ. प्रत्यूषे. ८ ङ. झ. ट. उत्थायच. ९ ख. ग. च. छ. ज. ञ. उपस्पृश्यतुशीतेन. ङ. झ. ट. उपस्पृश्यसुशीतेन. १० ङ.—ट. तोयेनोत्पल. ११ क. छ. ज. ञ. तेऽग्नीन्. १२ क. ट. काल्ये.

उदयन्तं दिनकरं दृष्ट्वा विगतकल्मषाः ॥ सुतीक्ष्णमभिगम्येदं श्लक्ष्णं वचनमब्रुवन् ॥ ४ ॥
सुखोषितास्स्म भगवंस्त्वया पूज्येन पूजिताः ॥ आपृच्छामः प्रयास्यामो मुनयस्त्वरयन्ति नः ॥ ५ ॥
[1]त्वरामहे वयं द्रष्टुं कृत्स्नमाश्रममण्डलम् ॥ ऋषीणां पुण्यशीलानां दण्डकारण्यवासिनाम् ॥ ६ ॥
[2]अभ्यनुज्ञातुमिच्छामस्सहैभिर्मुनि[3]पुङ्गवैः ॥ धर्मनित्यैस्तपोदान्तैर्विशिखैरिव पावकैः ॥ ७ ॥
अविषह्यातपो यावत्सूर्यो नाति विराजते ॥ अमार्गेणागतां लक्ष्मीं प्राप्येवान्वयवर्जितः ॥ ८ ॥
तावदिच्छामहे गन्तुमित्युक्त्वा चरणौ मुनेः ॥ [4]ववन्दे सहसौमित्रिस्सीतया [5]सह राघवः ॥ ९ ॥
[6]तौ संस्पृशन्तौ चरणावुत्थाप्य मुनिपुङ्गवः ॥ गाढमा[7]लिङ्ग्य [8]सस्नेहमिदं वचनमब्रवीत् ॥ १० ॥
अरिष्टं गच्छ पन्थानं राम सौमित्रिणा सह ॥ सीतया चानया सार्धं छाययेवानुवृत्तया ॥ ११ ॥
[9]पश्याश्रमपदं [10]रम्यं दण्डकारण्यवासिनाम् ॥ एषां तपस्विनां वीर[11] तपसा भावितात्मनाम् ॥ १२ ॥
[12]सुप्राज्यफलमूलानि पुष्पितानि वनानि च ॥ [13]प्रशस्तमृगयूथानि शान्तपक्षिगणानि च ॥ १३ ॥
फुल्लपङ्कज[14]षण्डानि प्रसन्नसलिलानि च ॥ कारण्डवविकीर्णानि तटाकानि सरांसि च ॥ १४ ॥
द्रक्ष्यसे दृष्टिरम्याणि गिरिप्रस्रवणानि च ॥ रमणीयान्यरण्यानि मयूराभिरुतानि च ॥ १५ ॥
गम्यतां वत्स सौमित्रे भवानपि च गच्छतु ॥ [15]आगन्तव्यं त्वया तात पुनरेवाश्रमं [16]मम ॥ १६ ॥
एवमुक्तस्तथेत्युक्त्वा काकुत्स्थस्स[17]हलक्ष्मणः ॥ [18]प्रदक्षिणं मुनिं कृत्वा प्रस्थातुमुपचक्रमे ॥ १७ ॥

पूजाकथनायतपस्विशरण इत्युक्तं । उदयन्तं उद्यन्तं । अनेन होमानन्तरमादित्योपस्थानोक्त्या अनुदितहोमपक्षसूचनात् कात्यायनसूत्रक्रमेण राघवाणामनुष्ठानमितिगम्यते ॥ ३—४ ॥ सुखोषिता इत्यादित्रिश्लोक्येकान्वया । आपृच्छामः आपृच्छामहे । परस्मैपदमार्षं । अभ्यनुज्ञातुमिति भावेतुमुन् । त्वत्कर्तृकं गमनानुज्ञानं प्रार्थयामहे इत्यर्थः । मुनयः सहवासयोग्याइत्याह—धर्मनित्यैरित्यादि । धर्मनित्यैः नित्यधर्मैः । तपोभिर्दान्तैः निगृहीतेन्द्रियैः । तपो हीन्द्रियनिग्रहहेतुः । विशिखैः विगतज्वालैः । " आर्चिर्हेतिः शिखास्त्रियां "इत्यमरः । गुप्तमाहात्म्यैरित्यर्थः ॥ ५—७ ॥ सूर्यः अविषह्यातपः असह्यातपः सन् यावन्नातिविराजते नात्यन्तमुद्गच्छति । कथमिव अमार्गेणान्यायेनागतां लक्ष्मीं ऐश्वर्यं । प्राप्य अन्वयवर्जितः साधुसमागमवर्जितो दुष्प्रभुरिवाविषह्यातप इत्यन्वयः । तावदिच्छामहे गन्तुमित्यनेन रावणवधत्वरा व्यज्यते । अतो न हीनोपमादोषोपि ॥ ८—१० ॥ अरिष्टं अनुपद्रवं । रिषेः " तीषसह—" इति भावे निष्ठा । अनेनापि रावणविजयाभ्यनुज्ञा सूच्यते ॥ ११ ॥ तपोवनपदार्थान् कृतार्थयितुमाह—पश्येत्यादि ॥ १२ ॥ प्राज्यं अदभ्रं । " प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु " इत्यमरः ॥ १३ ॥ कारण्डवो जलकुक्कुटः । " मद्गुः कारण्डवः प्लवः " इत्यमरः ॥ १४ ॥ रमणीयत्वादिना विशेषयितुं पुनरप्याह—रमणीयानीति । मयूराणामभिरुतानि येषु तानि ॥ १५ ॥ गम्यतां त्वयेति शेषः । भवानिति

टीका० त्वरयन्तिमामितिपांठान्तरं । मुनयस्त्वभियन्तिमामित्यनेनचित्रकूटमारभ्यमार्गप्रदर्शनव्याजेनपञ्चवटीप्रवेशपर्यन्तंरामेणसहमुनयस्समागताइतिगम्यते ॥ ५ ॥ **ति०** अभ्यनुज्ञातुमिच्छामः त्वत्कर्तृकंगमनानुज्ञानंप्रार्थयामः । विशिखैः विधूमैः । **स०** पावकैः शुचित्वादिनातत्समैः ॥ ७ ॥ **स०** नातिविराजते नतापयति । अन्वयवर्जितः अकुलीनः ॥ ८ ॥ **शि०** अश्रमपदं श्रमनिवर्तकंस्थानंपश्य । **ति०** आश्रमपदमितिजातावेकवचनं ॥ १२ ॥ **ति०** शान्तपक्षिगणत्वं परस्परविरोधाभावात् । **स०** शान्तपक्षिगणानि मरन्दतुन्दिलत्वादितिभावः ॥ १३ ॥ **शि०** अत्रस्रोतोरहितानितटाकानि तत्सहितानिसरांसीतिनपौनरुक्त्यं ॥ १४ ॥

[**पा०**] १ ज. इच्छामहे. २ घ. तदनुज्ञातुं. ३ क. च. ज. ञ. सत्तमैः. ४ क. च. छ. ज. ववन्दतुस्तावेकाग्रौसीतयासहराघवौ. ५ घ. चैव. ६ घ. संस्पृशन्तौच. च. छ. ज. संस्पृशन्तावुत्थाप्यचरणौ. ७ क. ख. ग. ङ.—ट. माश्लिष्य. ८ च. छ. ज. तंराममिदं. ९ क. ख. ग. पश्याश्रममिदं. १० ग. पुण्यं. ११ क. च. छ. ज. राम. १२ क. ख. घ. ट. सुप्राज्य. १३ क.—घ. प्रशान्तमृग. १४ ङ. च. छ. झ. ञ. खण्डानि. १५ ग. गन्तव्यंच. ङ. झ. आगन्तव्यंचतेद्रष्टुं. ट. आगन्तव्यंचतंद्रष्टुं. १६ ङ. झ. ट. प्रति. १७ क. च. छ. ज. ञ. सहसीतया. १८ क. च. छ. ज. ञ. प्रदक्षिणमृषिं.

ततः शुभतरे तूणी धनुषी चायतेक्षणा ॥ ददौ सीता तयोर्भ्रात्रोः खड्गौ च विमलौ ततः ॥ १८ ॥
आबध्य च शुभे तूणी चापौ चादाय सस्वनौ ॥ निष्क्रान्तावाश्रमाद्गन्तुमुभौ तौ रामलक्ष्मणौ ॥१९॥
श्रीमन्तौ रूपसंपन्नौ दीप्यमानौ स्वतेजसा ॥ प्रस्थितौ धृतचापौ तौ सीतया सह राघवौ ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे अष्टमस्सर्गः ॥ ८ ॥

नवमः सर्गः ॥ ९ ॥

सीतयादण्डकारण्यप्रस्थानसमयेआयुधधारिणंरामंप्रतिदृष्टान्ततयापुरावृत्तकथनपूर्वकमायुधधारणेदोषोक्त्यातत्त्यसनप्रार्थना ॥ १ ॥

सुतीक्ष्णेनाभ्यनुज्ञातं प्रस्थितं रघुनन्दनम् ॥ हृद्यया स्निग्धया वाचा भर्तारमिदमब्रवीत् ॥ १ ॥
अयं धर्मस्सुसूक्ष्मेण विधिना प्राप्यते महान् ॥ निवृत्तेन तु शक्योऽयं व्यसनात्कामजादिह ॥ २ ॥

राम उच्यते आश्रमं प्रतीति शेषः ॥१६—१७॥ ततः प्रस्थानोपक्रमानन्तरं । विमलौ तत इति । ततः धनुरादिदानानन्तरमित्यर्थः । ततः शुभतरे इत्यादिनायमर्थोऽवगम्यते । आश्रमप्रवेशे किमस्माकमायुधैरिति मन्यमाना सीता आयुधानि मुनिगृहे कुत्रचिन्निहितवती । अथ अमार्गेणेत्यादिरामवाक्येन अरिष्टं गच्छेत्यादिमुनिवाक्येन च तयोर्हृदयं विदित्वा स्वयमेवादाय पुनर्दत्तवतीति । अत एवोत्तरसर्गे स्वाशयं वक्ष्यति ॥१८–२०॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने अष्टमः सर्गः ॥ ८ ॥

अथ सीता वीरपत्नीत्वेन धनुर्मुष्टिग्रहणविशेषेण सायुधतया सन्नद्धं पतिमालोक्य यदि त्वं सायुधो राक्षसभूयिष्ठे देशे प्रविष्टः स्याः तर्हि तैः साकं विरोधः स्यात् तेनावयोर्विश्लेषः स्यात् तेन भवतो महान्क्लेशः स्यात् अतो निधायायुधं वनेस्माभिर्गन्तव्यमित्याह नवमे—सुतीक्ष्णेनेत्यादि । अभ्यनुज्ञातं "अरिष्टं गच्छ पन्थानमिति" रावणवधाभिप्रायेणानुज्ञातं । हृद्यया युक्तियुक्तत्वेन हृदयंगमया । स्निग्धया स्नेहप्रवृत्तया । अनेन वक्ष्यमाणवचने स्नेह एव मूलमित्युक्तं । रामेण ऋषिभ्यः प्रतिज्ञाकरणं रामप्रतिज्ञाया दुरावरत्वं च बहुशो दृष्टवत्यपि राक्षसैर्वैरे भर्तुः स्वविरहद्वारा महान्क्लेशो भवेदिति प्रेमान्धतया तथोक्तवतीति भावः ॥ १ ॥ किं तदुक्तं तत्राह—अयं धर्म इति । महानयं धर्मः त्वयाऽनुष्ठीयमानो मुनिधर्मः । सुसूक्ष्मेण विधिना मार्गेण । प्राप्यते धर्मकामैरिति शेषः । सूक्ष्मविधिमेवाह—निवृत्तेनेति । इह वने । कामजात् इच्छाकृताद्व्यसनान्निवृत्तेन पुरुषेणायं धर्मः शक्यः

ति॰ चापे चापशब्दोद्विलिङ्गकः ॥ १९ ॥ इत्यष्टमस्सर्गः ॥ ८ ॥

टीका॰ अथ "केवलेनात्मकार्येण प्रवेष्टव्यंवनंमया । विप्रकारमपाक्रष्टुं राक्षसैर्भवतामिमं" इतिमुनीनां राक्षसवधप्रतिज्ञां कुर्वाणंभर्तारंप्रति सीता "अहिंसापरमोधर्म" इतिन्यायंमनसिनिधाय हिंसांनिवर्तयितुं लोकदृष्टान्तेनवक्तुमारभते—**यस्तुधर्मइत्यादिना** । महान् उत्कृष्टः । योधर्मः सुतीक्ष्णेनमुनिना विधिना शास्त्रोक्तप्रकारेणप्राप्यते । अयंधर्मः । इहलोकेकामजाद्व्यसनान्निवृत्तेनपुरुषेण त्वयेतिवा शक्यः आचरितुंशक्यइतियोजना । अधर्मंतुसुसूक्ष्मेणेतिपाठेतु महान् महात्मायद्यपिभवान् । तथापि सुसूक्ष्मेणविधिना सूक्ष्ममार्गेणविचारणेसति अधर्मंप्राप्यते । आपेश्छान्दसश्श्यन्वा कर्तरियग्वा छान्दसः । अधर्ममेवप्राप्नोति

[पा॰] १ च. छ. ज. ञ. कनकत्सरू. ख. ग. विमलौशुभौ. २ क. च. छ. ज. ञ. स्वापेचादायसुस्वने. ख. ग. ङ. झ. चापेचादायसस्वने. ३ क. च. छ. ज. ञ. वाश्रमपदात्तावुभौ. ४ ङ. झ. ट. शीघ्रंतौ. ५ क. ख. ग. ङ.—ट. संपन्नावनुज्ञातौमहर्षिणा. ६ ङ. झ. ञ. ट. प्रस्थितौधृतचापासी. ख. ग. संप्रस्थितौमहावीरौ. ७ ख. राघवौसहसीतया. ८ क. वैदेही. ९ ङ. झ. अधर्मंतुसु. ख. ग. अथधर्मः. च. छ. ज. ञ. यस्तुधर्मः. ट. योधर्मस्तु. १० ङ. झ. ट. निवृत्तेनच.

त्रीण्येव [1]व्यसनान्यत्र कामजानि भवन्त्युत ॥ मिथ्यावा[2]क्यं परमकं तस्माद्[3]गुरुतरावुभौ ॥
परदाराभिगमनं विना वैरं च रौद्रता ॥ ३ ॥
मिथ्यावाक्यं न ते भूतं न भविष्यति राघव ॥ कु[4]तोभिलाषणं स्त्रीणां परेषां धर्मनाशनम् ॥ ४ ॥
तव नास्ति मनुष्येन्द्र न चाभूत्ते कदाचन ॥ म[5]नस्यपि तथा राम न चैतद्विद्यते क्वचित् ॥ ५ ॥
स्वदारनि[6]रतस्त्वं च नित्यमेव नृपात्मज ॥ धर्मिष्ठस्सत्यसन्धश्च पि[7]तुर्निर्देशकारकः ॥ ६ ॥
सत्यसन्ध म[8]हाभाग श्रीमँल्लक्ष्मणपूर्वज ॥ त्व[9]यि सत्यं च धर्मश्च त्वयि सर्वं प्रतिष्ठितम् ॥ ७ ॥
तच्च सर्वं महाबाहो शक्यं [10]धर्तुं जितेन्द्रियैः ॥ त[11]व वश्येन्द्रियत्वं च जा[12]नामि शुभदर्शन ॥ ८ ॥
तृतीयं यदिदं रौद्रं परप्राणाभिहिंसनम् ॥ निर्वैरं क्रियते मोहात्तच्च ते समुपस्थितम् ॥ ९ ॥

संपाद्यः । व्यसनमिति जात्येकवचनं ॥२॥ किंतद्व्यसनं तत्राह—त्रीण्येवेति । अत्र लोके । उत अत्यर्थं । कामजानि रागकृतानि । त्रीण्येव व्यसनानि भवन्ति । कानि तानि त्रीणीत्यत्राह—मिथ्यावाक्यमित्यादि । मिथ्यावाक्यं परमकं प्रथममित्यर्थः । सर्वेभ्यो व्यसनेभ्यः श्रेष्ठमित्यर्थः । स्वार्थेकः । तस्मादपि व्यसनात् गुरुतरावुभौ व्यसनविशेषौ तावाह–परदारेत्यादिना । परदाराभिगमनं परदाराभिमर्शनं । वैरं विनारौद्रता हिंसकता चेति ॥ ३ ॥ एवं सामान्येन व्यसनरूपमुक्त्वा प्रकृते परिहार्यत्वेन वक्तव्यं व्यसनं दर्शयितुमितरपरिशेषमाह—मिथ्येत्यादिना । अत्र भूतभविष्यतोर्वर्तमानस्यान्तर्भावः । कुत इति परेषां संबन्धिनीनां स्त्रीणां धर्मनाशनं अधर्मकरं च । अभिलाषणं अभिलाषः । कुतः असंभावित इत्यर्थः । धर्मनाशनशब्देन गुरुतरशब्दोक्तातिशयो दर्शितः । मिथ्यावाक्यमधर्मकरं इदमुभयकरमिति भावः ॥४॥ कुत इत्यादिना परदाराभिलाष एव नास्ति कुतस्तदभिगमनमित्युक्तं कालत्रयेपि तदभाव इति विशेषयति —तवेति । मनुष्येन्द्रेति हेतुगर्भं संबोधनं । तव परदाराभिलाषणमिदानीं नास्ति । कदाचन ते तन्नाभूत् । हे राम एतत् अभिलाषणं । ते क्वचित्सुन्दरेष्वपि परदारेषु मनसा संकल्पेनापि न विद्यते । अनेन भविष्यत्कालेपि नास्तीत्युक्तं । तथेति समुच्चये । चोवधारणे ॥ ५ ॥ उक्तव्यसनद्वयाभावे बहून्हेतून्दर्शयति —स्वदारेत्यादिना । हे नृपात्मज त्वं नित्यमेव स्वदारनिरतः धर्मिष्ठश्च । अतएव सत्यसन्धः सत्यप्रतिज्ञः । तत्र निदर्शनं—पितुर्निर्देशकारकः ॥६ ॥ उक्तानुवादपूर्वकं भर्तारं स्तौति—सत्यसन्धेति । महाभाग महाधर्मन् । श्रीमान् निरवधिकैश्वर्य । लक्ष्मणपूर्वज वैराग्ये लक्ष्मणादप्यधिक । त्वयि सत्यं प्रतिष्ठितं । धर्मश्चप्रतिष्ठितः । अन्यत्सर्वमैश्वर्यवैराग्यादिकं च त्वयि प्रतिष्ठितं सुस्थिरं ॥ ७ ॥ तृतीयव्यसनसद्भावं वक्तुमुक्तव्यसनद्वयाभावं स्वानुभवसिद्धत्वेन द्रढयति—तच्चेति । हेमहाबाहो जितेन्द्रियैः धर्तुं शक्यं तत्पूर्वोक्तं धर्मिष्ठत्वादिकं सर्वं तव वश्येन्द्रियत्वं च जानामि शुभदर्शन तत्सद्भावे तवदर्शनमेव प्रमाणं । "रूपमेवास्यैतन्महिमानं व्याचष्टे" इति श्रुतेः ॥ ८ ॥ एवं व्यसनद्वयरहितेन त्वया तृतीयव्यसनमपि कथंचित्परिहर्तव्यमित्याशयेनाह—तृतीयमिति । निर्वैरं यथा भवति तथा परप्राणाभिहिंसनरूपं यदिदं रौद्रं रौद्राख्यं । तृतीयं महद्व्यसनं पामरैः क्रियते । तच्च तत्तु । ते समुपस्थितं त्वया कर्तुमुद्युक्तमित्यर्थः ॥ ९ ॥

भवानित्यर्थः ॥२॥ **शि०** परमं परा अत्युत्कृष्टा मा अर्थाभावेपिमनोहारिका संपत्तिर्यस्मिंस्तत् मिथ्यावाक्यं । **स०** परदाराभिगमनं विनावैरंचरौद्रता । इतीतिशेषः । उभावित्यन्वयः ॥ ३ ॥ **स०** परेषांस्त्रीणामित्यन्वयः । अभिलषणं इच्छापूर्वकसंबन्धः । कुतः कुतश्चित्कारणादपिनास्ति । कदाचन नचाभूदित्यर्थः । अथवा मूलरूपे तवपरस्त्रीसंबन्धाभावेपि भूमौ किंनस्यादित्यतआह— **कुतइति** । भूसंबन्धादपीत्यर्थः ॥ ४ ॥ **स०** स्वदारनिरतः स्वदारेषुमयि निरतः ॥ ६ ॥ **स०** रक्षणार्थाय रक्षणाभिन्नप्रयो-

[पा०] १ क. ग. ङ—ट. व्यसनान्यद्य. २ ग. वादंपरमकं. ङ. झ. ट. वाक्यंतुपरमं. घ. वाक्यंगुरुतरं. ३ ख. ग. द्गुरुतरेशुभे. ४ घ. ङ. च. झ. ञ. ट. कुतोभिलषणं. ग. कुतोहिधर्षणं. ५ ख. मनसापि. ६ ङ. झ. ट. निरतश्चैव. ७ क. पितृनिर्देश. ८ ख. ग. महाबाहो. ९ क. ख. ङ—ट. त्वयिधर्मश्चसत्यंच. ग. वेत्सिधर्मंचसत्यंच. घ. वेत्सिसत्यंचधर्मंच. १० ग. घ. ङ. छ—ट. वोढुं. ख. च. बोद्धुं. ११ ज. तच्च. १२ ङ. झ. ट. भूतानां.

ातिज्ञातस्त्वया वीर दण्डकारण्यवासिनाम् ॥ ऋषीणां रक्षणार्थाय वधस्संयति रक्षसाम् ॥ १० ॥
एतन्निमित्तं च वनं दण्डका इति विश्रुतम् ॥ प्रस्थितस्त्वं सह भ्रात्रा धृतबाणशरासनः ॥ ११ ॥
ततस्त्वां प्रस्थितं दृष्ट्वा मम चिन्ताकुलं मनः ॥ [1]त्वद्वृत्तं चिन्तयन्त्या वै [2]भवेन्निःश्रेयसं हितम् ॥१२॥
न हि मे रोचते वीर गमनं दण्डकान्प्रति ॥ कारणं [3]तत्र वक्ष्यामि वदन्त्याः श्रूयतां मम ॥ १३ ॥
त्वं हि बाणधनुष्पाणिर्भ्रात्रा सह [4]वनं गतः ॥ दृष्ट्वा वनचरान्[5]सर्वान्कच्चित्कुर्याश्शरव्ययम् ॥ १४ ॥
[6]क्षत्रियाणां च हि धनुर्हुताशस्येन्धनानि च ॥ समीपतस्स्थितं तेजो बलमुच्छ्रयते भृशम् ॥ १५ ॥
ुरा किल महाबाहो तपस्वी [7]सत्यवाक्छुचिः ॥ कस्मिंश्चिदभवत्पुण्ये वने रतमृगद्विजे ॥ १६ ॥
तस्यैव तपसो विघ्नं कर्तुमिन्द्रश्शचीपतिः ॥ खड्गपाणिरथागच्छदाश्रमं भट[8]रूपधृत् ॥ १७ ॥
तस्मिंस्तदाश्रमपदे [9]निशितः खड्ग उत्तमः ॥ स न्यासविधिना दत्तः पुण्ये तपसि तिष्ठतः ॥ १८ ॥
स तच्छस्त्रमनुप्राप्य न्यासरक्षणतत्परः ॥ [10]वने तं [11]विचरत्येव रक्षन्प्रत्ययमात्मनः ॥ १९ ॥

कथमुद्युक्तमित्यत्राह—प्रतिज्ञात इति ॥ १० ॥ न केवलमृष्यभ्यर्थनया प्रतिज्ञातं प्रथमसंकल्पश्च तवतथैवेत्याह—एतन्निमित्तमिति । दण्डका इतिविश्रुतं वनं प्रति त्वं भ्रात्रा सह धृतबाणशरासनः सन् प्रस्थितः । " केवलेनात्मकार्येण " इत्यादिना भवतैवोक्तत्वादिति भावः ॥ ११ ॥ ततः किमित्यत्राह——ततस्त्वामिति । प्रस्थितं त्वां दृष्ट्वात्वद्वृत्तं सत्यप्रतिज्ञत्वस्वदारैकनिरतत्वादिकं च दृष्ट्वा। त्वन्निःश्रेयसं तव सौख्यं हितं तत्साधनं च चिन्तयन्त्या मम मनश्चिन्ताकुलं भवेद्वै भवतिहि । भवान् सत्यप्रतिज्ञत्वेन रक्षोवधान्न निवर्तेत निर्वैरं परहिंसनं च न करोषि । यस्य कस्यचिद्वैरमूलस्य करणे तदहमेव स्यां । मद्विरहं च त्वमेकदारव्रतनिरतो न सोढुमर्हसि । अतः कथमिदं संपत्स्यत इति भावः ॥ १२ ॥ तर्हि क उपायस्ते प्रतिभातीत्यपेक्षायां रामपक्षस्यैव स्वपक्षत्वात्तत्पक्षं स्थूणादिखननन्यायेन द्रढयितुं पक्षान्तरमाह—नहीति । मम मत्तः ॥ १३ ॥ शरव्ययं शरमोक्षं । कच्चिदिति कामप्रवेदने ॥ १४ ॥ तर्हि शरव्ययं न करोमीत्यत्राह—क्षत्रियाणामिति । क्षत्रियाणां समीपतःस्थितं धनुः तेजोरूपं बलं भृशं उच्छ्रयते वर्धयति। हुताशस्य समीपस्थितानीन्धनानि च तेजोबलमुच्छ्रयन्ते । दृष्टान्तालंकारः ॥ १५ ॥ उक्तार्थे ऐतिह्यमाह—पुरेत्यादि । रतमृगद्विजे संतुष्टमृगपक्षिके । तपस्वी कश्चिदभवदित्यन्वयः ॥ १६—१७॥ स इति खड्गविशेषणं । न्यासविधिना न्यासप्रकारेण । " राजचोरादिकभयाद्दायादानां च वञ्चनात् । स्थाप्यतेऽन्यगृहे द्रव्यं न्यासः स परिकीर्तितः " इत्युक्तो न्यासः । तिष्ठतः तस्येति शेषः । चतुर्थ्यर्थे षष्ठी ॥ १८ ॥ आत्मनः प्रत्ययं विश्वासस्थापितं वस्तु । "प्रत्ययोधीनशपथज्ञानविश्वासहेतुषु " इत्यमरः । रक्षन्नेव

नाय ॥ १० ॥ स० दण्डकाइतीत्यस्य विवक्षाऽभावान्नसंधिः ॥ ११ ॥ ति० ममनश्चिन्ताकुलं भवेत् भवति । रक्षसांबलवत्त्वेन तेभ्योऽनिष्टसंभावनया ऐहिकसुखभङ्गोपि संभावितइतिभावः । शि० त्वद्वृत्तं राक्षसवधप्रतिज्ञावृत्तान्तं । चिन्तयन्त्याममहितंनिश्श्रेयसं कल्याणं भवेत् । मत्प्रार्थनांस्वीकुर्वित्यर्थः । एतेन राक्षसमात्रवधप्रतिज्ञाश्रयणादनपराधिविभीषणादिवधविषयकसंशयो जातइति व्यञ्जितं । नच "तपस्विनांरणेशत्रून्हन्तुमिच्छामिराक्षसान्" इति प्रतिज्ञावाक्ये तपस्विशत्रुत्वविशिष्टराक्षसवधप्रतिज्ञया विभीषणादिव्यावृत्तिस्सिद्धैवेति संशयस्यनावकाशइति वाच्यं । शत्रुभ्रातृत्वादेश्शत्रुत्वाभासस्य संशयबीजत्वात् । नच प्रतिज्ञावाक्ये रणइतिसप्तम्यन्तस्योपादानाद्रणेआगतान्राक्षसान्हन्तुमिच्छामीत्यर्थात्कथंविभीषणादिसंग्रहसंशयइति वाच्यं । रणेविद्यमानोऽहं हन्तुमिच्छामीत्यर्थस्यापि संभवात् विभीषणानुयायिनामपि बहूनां रावणाधीनत्वाद्रणागमनसंभवाच्च यत्नविशेषमन्तरा विभीषणागमनस्यापि दुर्वारत्वाच्चेतिदिक् ॥ १२ ॥

[पा०] १ ट. तद्वृत्तं. २ क. घ. तवनिश्रेयसंहितत्. ३ क. छ. ज. तव. ४ च. वने. ५ क. च. छ. ज. ञ. न्घोरान्. ६ क. च. छ. ज. ञ. क्षत्रियाणामपि. ङ. झ. ट. क्षत्रियाणामिह. ७ क—ङ. छ. झ. ञ. ट. सत्यवाञ्शुचिः. ८ क. ग. ङ. छ. ज. ञ. ट. रूपधृक्. ९ ङ. छ. झ. ट. निहितः. १० क—ट. वनेतु. ११ ख. ग. ङ. ट. विहरत्येव. क. विहरत्येवं. ञ. विचरत्येवं.

यत्र गच्छत्युपादातुं मूलानि च फलानि च ॥ न विना याति तं खड्गं न्यासरक्षणतत्परः ॥ २० ॥
नित्यं शस्त्रं परिवहन्क्रमेण स तपोधनः ॥ चकार रौद्रीं स्वां[1] बुद्धिं त्यक्त्वा तपसि निश्चयम्[2] ॥२१॥
ततः स[3] रौद्रेऽभिरतः प्रमत्तो धर्मकर्शितः[4] ॥ तस्य शस्त्रस्य संवासाज्जगाम नरकं मुनिः ॥ २२ ॥
एवमेतत्पुरा वृत्तं शस्त्रसंयोगकारणम् ॥ २३ ॥
अग्निसंयोगवद्धेतुश्शस्त्रसंयोग उच्यते ॥ स्नेहाच्च बहुमानाच्च स्मारये त्वां[5] न शिक्षये ॥ २४ ॥
न कथंचन सा कार्या गृहीतधनुषा त्वया ॥ बुद्धिर्वैरं विना हन्तुं राक्षसान्दण्डकाश्रितान् ॥
अपराधं विना हन्तुं लोकान्[6]वीर न कामये ॥ २५ ॥
क्षत्रियाणां तु वीराणां वनेषु[7] निरतात्मनाम्[8] ॥ धनुषा कार्यमेतावदार्तानामभिरक्षणम् ॥ २६ ॥
क्व च शस्त्रं[9] क्व च वनं क्व च क्षात्रं तपः क्व[10] च ॥ व्याविद्धमिदमस्माभिर्[11]देशधर्मस्तु पूज्यताम् ॥ २७॥
[12]तदार्य कलुषा बुद्धिर्जायते शस्त्रसेवनात् ॥ पुनर्गत्वा त्वयोध्यायां[13] क्षत्रधर्मं चरिष्यसि ॥ २८ ॥

विचरति व्यचरत् ॥ १९ ॥ एतदेवोपपादयति—यत्रेति ॥ २० ॥ परिवहन् रक्षन् । रौद्रीं हिंसापरां । स्वां शस्त्रधार्यसाधारणां ॥ २१ ॥ रौद्रे हिंसारूपकर्मणि । अधर्मेण कर्शितः पीडितः । संवासात्संपर्कात् ॥ २२ ॥ शस्त्रसंयोगकारणं पुरावृत्तं उक्तमिति शेषः ॥ २३ ॥ पुरावृत्तफलितमर्थमाह—अग्नीति । अग्निसंयोगो यथा वस्तुनो विकारहेतुः एवं शस्त्रसंयोगोपि शस्त्रिणो विकारहेतुर्भवति । स्नेहात् त्वद्विषयस्नेहात् । बहुमानात् मद्विषये त्वत्कृतबहुमानात् । स्मारये भवद्विज्ञातार्थमेव स्मारयामि । न शिक्षये नापूर्वमर्थमुपदिशामि ॥ २४ ॥ गृहीतधनुषा त्वयावैरं विना राक्षसान् हन्तुं सा रौद्री बुद्धिः । कथंचन केनापि प्रकारेण । न कार्या न कर्तुं योग्या । त्वत्प्रकृत्यननुगुणत्वादिति भावः । इयं बुद्धिर्मत्प्रकृतेरप्यननुगुणेत्याह—अपराधमिति । लोकान् प्राणिनः ॥ २५ ॥ यद्येवं तर्हि क्षत्रियधर्मो धनुर्धारणं निरवकाशं स्यादित्याशङ्क्याह—क्षत्रियाणां त्विति । वीराणां क्षत्रियाणां धनुषा कार्यं कर्तव्यं । वनेषु निरतात्मनां आर्तानां पीडितानां रक्षणं बाधकोत्सारणमित्येतावदेव । तुरवधारणे ॥ २६ ॥ ननु रक्षणार्थं वा धनुर्धार्यमेवेत्याशङ्क्य तदपिनेदानीमुचितं किंतु राज्यपालनकाल इत्याह—क्वचेत्यादिना । क्षात्रं क्षत्रधर्मः । किंशब्दाभ्यांगम्यमानमर्थमाह—व्याविद्धमिदमिति । शस्त्रवने क्षात्रतपसी च । परस्परविरुद्धमिदमस्माभिर्न पूज्यतां । किंतु देशधर्मस्तपोवनधर्मःपूज्यतां । क्षात्रशस्त्रे विहाय वनवासतपश्चरणे एव क्रियतामित्यर्थः ॥ २७ ॥ व्यत्ययो वा किं न स्यादित्यत्राह—तदार्येति । तर्हि वर्णधर्मो

ति० स्नेहात् भवद्विषयात् । बहुमानात् त्वत्कर्तृकान्मद्विषयात् । किंच बहुमानोनाम मदीयोऽयंभर्तेत्येवमभिमानः । स्मारये पुरावृत्तमितिशेषः । अत्र स्नेहोहेतुः । बहुमानाच्च त्वां तु शिक्षये इत्यर्थः । तदेवशिक्षणंकरोति । नकथंचनेति । यत्तुतीर्थः स्मारयेत्वांनशिक्षये इतिपठति व्याचष्टेच तत्तूत्तरवाक्ये करिष्यमाणशिक्षणेन व्याहतमिति कतकः ॥ २४ ॥ **तनि०** अपराधंविनेति । निरपराधहननमेवात्रप्रतिषिध्यते नतु तपस्विषुसापराधराक्षसहननं । तेन सापराधं सम्यगालोच्य तत्राप्यपराधक्षालनोपायान्तराभावे हन्तव्यमितिभावः । लोकान्हन्तुमिति । "अकुर्वन्तोपिपापानि शुचयःपापसंश्रयात्" इत्युक्तन्यायेन एकापराधिलक्षीकरणेनप्रवृत्तेहनने अनपराधिनामपि बाधा यथा नभवति तथा कार्यमितीहार्थः । **ति०** हन्तुं राक्षसानिति शेषः । नमंस्यते तवयत्नमौचित्येनेतिशेषः ॥ लोकान्वीरनकामये इति पाठे लोकान्हन्तुंनेच्छामि राक्षसवधवदितरप्राणिवधस्याप्येवंसति प्रसङ्गादितिभावः ॥ **शि०** नमंस्यते प्रशस्तत्वेननिश्चेष्यतिकश्चिद्विद्वानितिशेषः ॥ २५ ॥ **शि०** निवृत्तानांतु प्राकृतक्षत्रियाणामपि शस्त्रधारणमनुचितमित्याह—**क्वचेति** । क्षात्रं क्षत्रियसंबन्धि शस्त्रंक्व तपश्चक्व । इदं धर्मद्वयस्वीकारः व्याविद्धं विरुद्धं अस्माभिर्निश्चीयतइतिशेषः । अतोदेशधर्मः प्राकृतविलक्षणायोध्योचितरीतिः सद्वारकाद्वारकपालनं पूज्यतां क्रियतां ॥२७॥

[पा०] १ ङ. तां. २ ग. नित्यतां. ख. निष्ठतां. ३ क. घ. ङ. च. ज—ट. रौद्राभिरतः. ४ क. धर्मदर्शने. घ. धर्मवर्जितः. ५ ङ. झ. त्वांतुशिक्षये. ६ ङ. झ. लोकोवीरनमंस्यते. ट. लोकेवीरनमंस्यते. क. वीरलोकान्नकामये. ग. लोकान्वीरान्नकामये. ७ क. ख. ग. वनेतु. ८ ङ. च. ज. ञ. नियतात्मनां. ९ ग. धार्यं. १० ग. क्वचित्. ११ क. च. छ. ज. ञ. मस्माकंदेश. १२ क. ङ. झ. ट. कदर्यकलुषा. १३ क. त्वयोध्यांवै.

अक्षया तु भवेत्प्रीतिः श्वश्रूश्वशुरयोर्मम ॥ यदि [1]राज्यं परित्यज्य भवेस्त्वं निरतो मुनिः ॥ २९ ॥
धर्मादर्थः [2]प्रभवति धर्मात्प्रभवते सुखम् ॥ धर्मेण [3]लभते सर्वं धर्मसारमिदं जगत् ॥ ३० ॥
आत्मानं नियमैस्तैस्तैः कर्शयित्वा प्रयत्नतः ॥ प्राप्यते निपुणैर्धर्मो न सुखा[4]ल्लभ्यते सुखम् ॥ ३१ ॥
नित्यं शुचिमतिः [5]सौम्य चर धर्मं तपोवने ॥ [6]सर्वं हि विदितं तुभ्यं त्रैलो[7]क्यमपि तत्त्वतः ॥ ३२ ॥
स्त्रीचापलादेतदुदाहृतं मे धर्मं च वक्तुं तव कस्समर्थः ॥
विचार्य बुद्ध्या तु[8] सहानुजेन यद्रोचते तत्कुरु मा चिरेण ॥ ३३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे नवमः सर्गः ॥ ९ ॥

दशमः सर्गः ॥ १० ॥

रामेणसीतांप्रतिसश्लाघंशरणार्थिषुमुनिजनेषुरक्षोहननस्यस्वेनप्रतिज्ञानत्वोक्त्याप्रतिज्ञापालनस्यप्राणादिभ्योपिगरीयस्त्वेन दुस्त्यजत्वोक्तिपूर्वकंरक्षोवधेनमुनिजनरक्षणस्यावश्यंकर्तव्यत्वोक्तिः ॥ १ ॥

वाक्यमेतत्तु वैदेह्या व्याहृतं भर्तृभक्तया ॥ श्रुत्वा [9]धर्मे स्थितो रामः प्रत्युवाचाथ मै[10]थिलीम् ॥ १ ॥

लुप्येतेत्यत्राह—पुनरिति ॥ २८ ॥ तपोमात्रकरणे फलान्तरमप्याह—अक्षयेति । यद्वा सर्वदा क्षत्रधर्मं त्यक्त्वा मुनिवृत्तिराश्रीयतामित्याह—अक्षयेति । तुः समुच्चये । अकलुषा बुद्धिश्च ते भवेदित्यर्थः । श्वश्रूश्वशुरयोः कैकेयीदशरथयोः । "श्वशुरः श्वश्वा" इत्येकशेषाभाव आर्षः ॥ २९ ॥ केवलधर्मानुष्ठानस्य सर्वश्रेयोमूलत्वमाह—धर्मादित्यादिना । सर्वं मुक्तिमपि ज्ञानद्वारा लभत इत्यर्थः ॥ ३० ॥ धर्मार्थज्ञानप्रकारमाह—आत्मानमिति । नियमैः चान्द्रायणादिव्रतैः । आत्मानं शरीरं ॥ ३१ ॥ त्रैलोक्यं त्रिलोकभवं पुरुषार्थतत्साधनतदङ्गकलापं ॥ ३२ ॥ स्त्रीचापलात् स्त्रीत्वप्रयुक्तचापलात् । मे मया । मा चिरेण विचारस्य विलम्बो मा भूत् । अत्र सार्धत्रयस्त्रिंशच्छ्लोकाः ॥ ३३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने नवमः सर्गः ॥ ९ ॥

एवं रामः सत्यप्रतिज्ञो निर्वैरं च रक्षोवधं नकरिष्यति । तथाच मद्वियोगेन रक्षोवधेन भवितव्यं । मद्विरहं च न सहिष्यते । संकटमिदमुपस्थितमित्याकुलचित्ता वैदेही पतिप्रेमान्धा रक्षोवधान्निवर्तयितुमुपक्रान्ता । रामस्तु सीताविरहं सोढ्वापि तन्मूलवैरेण रक्षांसि निहत्य प्रतिज्ञा निर्वोढव्येति समाधत्ते दशमे—वाक्यमेतत्त्वित्यादि । भर्तृभक्तयेत्यनेन भर्तृप्रेमपारवश्येन पूर्वमुक्तमिति ज्ञायते । धर्मेस्थित इत्यनेन सीताविरहक्लेशमङ्गीकृत्यापि प्रतिश्रुतनिर्वहणपरता द्योत्यते । यद्यपि

ति० यतः शस्त्रसेवनात् कदर्याणां कृपणानामिव कलुषाबुद्धिर्जायतेधर्मानुष्ठानविरोधिनी । अतः शस्त्रसेवनं वने नकर्तव्यमिति ध्वनिः ॥ २९ ॥ **ती०** श्वश्रूश्वशुरयोः अक्षयाप्रीतिर्भवेत् वनवासोचितधर्मानुष्ठाने श्वशुरस्यस्वर्गलाभजा प्रीतिः । पुत्रस्य युद्धादिक्लेशराहित्येन श्वश्वाःकौसल्यायाः प्रीतिरित्यर्थः ॥ **स०** श्वश्रूश्वशुरयोः वैकल्पिकत्वान्नैकशेषः ॥ २९ ॥ **ति०** अत्रेदं गूढंसीतातात्पर्यं । यदि सकलरक्षःक्षयेण सकलत्रिभुवनवर्त्यार्तरक्षणमनपराधिपीडांविहाय कर्तुंशक्यं तदा क्षात्रधर्मं चर नोचेच्छुद्धतपोधर्मंचरेति "धनुषाकार्यमेतावदार्तानामभिरक्षणं" इत्यनेनेदं ध्वनितं । "क्षत्रियाणांतुवीराणां वनेषुनियतात्मनां" इति पूर्वार्धस्य वनेष्वपिवसतांक्षत्रियाणांवीराणामुत्तरार्धोक्तमावश्यकमिति गूढतात्पर्यं ॥ **स०** पूर्वं स्वस्यस्त्रियाः प्रकृतत्वेपि कस्समर्थइति पुंनिर्देशेन स्त्रीपुरुषसाधारण्येनसमर्थोनास्तीति सूचयति । यद्वा कूटस्थोक्षरइति रमायाः पुंशक्तिमत्त्वेन पुंलिङ्गशब्दवाच्यत्वात्कस्समर्थइति वक्ती स्वस्य तत्वंसूचयामासेत्यवसेयं । अनुजेनसहविचार्येति लोकानुकरणार्थं ॥ ३३ ॥ इतिनवमस्सर्गः ॥ ९ ॥

स० आपाततोऽधर्मत्वेनप्रतिपादितहिंसांसीतासंमत्यैवधर्मत्वेनोदाहरति—**वाक्यमिति** । **ति०** संवर्धितइतिपाठेसंवर्धि-

[पा०] १ क. ख. ग. ङ—ट. राज्यंहिसंन्यस्य. २ ख. ग. घ. प्रभवते. ३ ग. ज. लभ्यते. ४ ङ. झ. ट. लभते. ५ क. च. ज. ञ. सम्यक्चर. ६ ङ—ज. ञ. ट. सर्वंतु. ७ च. छ. ज. ञ. त्रैलोक्येयद्विवर्तते. क. त्रैलोक्येयद्विवर्तते. ८ ख. ग. सहलक्ष्मणेन. ९ च. ञ. धर्मस्थितो. १० क. ख. ग. ङ—ट. जानकीं.

हितमुक्तं त्वया देवि स्निग्धया सदृशं वचः ॥ कुलं व्यपदिशन्त्या च [1]धर्मज्ञे जनकात्मजे ॥ २ ॥
[2]किंतु वक्ष्याम्यहं देवि त्वयैवोक्तमिदं वचः ॥ [3]क्षत्रियैर्धार्यते चापो नार्तशब्दो भवेदिति ॥ ३ ॥
[4]मां सीते स्वयमागम्य [5]शरण्याः शरणं गताः ॥ ते चार्ता दण्डकारण्ये मुनयः संशितव्रताः ॥ ४ ॥
[6]वसन्तो धर्मनिरता [7]वने मूलफलाशनाः ॥ न लभन्ते सुखं [8]भीता राक्षसैः [9]क्रूरकर्मभिः ॥ ५ ॥
[10]काले काले च निरता नियमैर्विविधैर्वने[11] ॥ भक्ष्यन्ते राक्षसैर्भीमैर्नरमांसोपजीविभिः ॥ ६ ॥
[12]ते भक्ष्यमाणा मुनयो दण्डकारण्यवासिनः ॥ अस्मानभ्यवपद्य[13]ेति मामूचुर्द्विजसत्तमाः ॥ ७ ॥
मया तु वचनं श्रुत्वा [14]तेषामेवं मुखाच्युतम् ॥ कृत्वा [15]चरणशुश्रूषां वाक्यमेतदुदाहृतम् ॥ ८ ॥
प्रसीदन्तु भवन्तो मे [16]ह्रीरेषा हि ममातुला ॥ [17]यदीदृशैरहं विप्रैरुपस्थेयैरुपस्थितः ॥
किं करोमीति च मया व्याहृतं [18]द्विजसंनिधौ ॥ ९ ॥
[19]सर्वैरेतैः समागम्य वागियं समुदाहृता ॥ १० ॥
राक्षसैर्दण्डकारण्ये बहुभिः कामरूपिभिः ॥ [20]अर्दिताः स्म दृढं राम भवांस्[21]तत्र रक्षतु ॥ ११ ॥

खरवध एवदण्डकारण्यवासिभिरार्थितो रामेण प्रतिज्ञातश्च । तथापि खरवधो रावणवधमूलमिति खरवधद्वारा रावणवधोप्यर्थित एवेति सीतयोक्तमुपपन्नं ॥१॥ स्निग्धया अनुरक्तया । कुलं व्यपदिशन्त्या स्वमहाकुलीनत्वं प्रख्यापयन्त्या । त्वया सदृशं अनुरागकुलसदृशं हितमुक्तं । हितोक्तौ हेतुः—धर्मज्ञ इति । कुलव्यपदेशे हेतुः—जनकात्मज इति ॥ २ ॥ यदि मया हितमुक्तं तर्हि तथैव क्रियतामिति चेत्तत्र वक्ष्यामि । तदेवाह—त्वयैवेति । क्षत्रियैर्धार्यते चापो नार्तशब्दो भवेदितीदं वचनं त्वयैवोक्तं खलु । मुनयश्चार्ताः तस्मात्तद्विरोधिवधः कर्तव्य एवेति भावः ॥ ३ ॥ ननूक्तं विरोध्युत्सारणेनार्तरक्षणंकर्तव्यं नतु निरपराधवध इत्याशङ्क्य तेषां शरणागतत्वेन मत्प्राणभूतत्वात्तेष्वपराधो मदपराध इत्याशयेनाह—मामित्यादि । अत्रत्यविशेषणैरात्मनः शरणागतपक्षपातं स्फोरयति ॥ ४—५ ॥ काले काले सर्वकालेष्वित्यर्थः ॥ ६ ॥ अभ्यवपद्य अनुगृह्णेत्यर्थः । लोण्मध्यमपुरुषैकवचनं । आर्षं परस्मैपदं । अभ्यवपत्तिः अनुग्रहः ॥ ७ ॥ चरणशुश्रूषां पादवन्दनं ॥ ८ ॥ प्रसीदन्तु मदपचारं क्षमन्तां । ह्रीः लज्जा । अतुला अधिका । तत्रहेतुमाह—यदिति । उपस्थेयैः अभिगन्तव्यैः । उपस्थितः अभिगतः । किं करोमीति लोडर्थे लट् । किं करवाणीत्यर्थः ॥ ९—१० ॥ अर्दिताः पीडिताः । तत्र तेभ्यः रक्षत्विति अभ्यवपद्येत्यत्र सामान्येनानुग्रहः प्रार्थितः । इह तु तद्विशेषे पृष्टे विशेष उक्तः ॥ ११ ॥

ततेजाः ॥ १ ॥ **ती०** कुलंव्यपदिशन्त्या क्षत्रियाणांहिवीराणामित्यादिना क्षत्रियकुलधर्मप्रकाशयन्त्येत्यर्थः ॥ १ ॥ **ती०** हेदेवि किंनुवक्ष्यामि किंचिदपिमयानवक्तव्यं । तत्कुतः त्वयैवोक्तमिदंवचः ॥ ३ ॥ **स०** संशितव्रताः सम्यक् तीव्रफलजनकव्रतविशिष्टाः । संसितव्रताइतिपाठे सम्यक् सितंबद्धं व्रतंयेषांतेतथा । राक्षसोपद्रवादननुष्ठितसद्व्यापाराइतिभावः ॥ ४ ॥ **ति०** कालकालेषु सर्वकालेष्वित्यर्थः । राक्षसैरित्यस्य वध्यमानाइतिशेषः ॥ ५ ॥ **ती०** वचनशुश्रूषां वचनानुष्ठानलक्षणशुश्रूषामित्यर्थः । कृत्वा मनसिकृत्वेत्यर्थः ॥ ८ ॥ **ति०** उपस्थितः रक्षणार्थमितिशेषः ॥ एषा ममह्रीः अकीर्तिः । अतःप्रसीदन्त्वित्यर्थः । **स०** उपस्थेयैः अस्माभिरुपगम्यसंरक्षणीयैः ॥ **तनि०** स्तोत्रादिनाचेतस्संकोचनं ह्रीः " वीतरागस्यस्तोत्राद्यैश्चेतस्संकोचनं व्रीडा " इतिलक्षणात् ॥ ९ ॥ **स०** तत्र तत्कृतपीडावस्थायां । यद्वा तांस्त्रायतइति तत्रः । तस्यसंबुद्धिः हेतत्र । एतावत्काल-

[पा०] १ क. च. छ. ज. ञ. जनकस्यमहात्मनः. २ क. ङ—झ. ट. किंनु. ३ क. ग. घ. धार्यतेक्षत्रियैश्चापो. ४ अस्मिञ्श्लोकेपूर्वोत्तरार्धयोःपौर्वापर्यं क—ट. पुस्तकेषुदृश्यते. ५ घ. ङ. झ. ट. शरण्यं. ६ ङ. झ. ट. वसन्तःकालकालेषु. ७ ग. वनमूल. ८ क. ख. ग. ङ—ट. भीरु. ९ ग. भीमकर्मभिः. १० क. ख. च. छ. ज. ञ. सर्वकालेषुनिरताः. ग. सर्वकालेऽभिनिरताः. ११ क. च. छ. ज. ञ. र्युताः. ख. र्वृताः. १२ क. च. छ. ज. ञ. तैर्भक्ष्यमाणा. १३ घ. ङ. झ. ट. पद्यैते. १४ क. ख. घ. च. छ. ज. ञ. तेषामेव. १५ क. ग. ङ—ट. वचनशुश्रूषां. १६ ग. घ. झ. ह्रीरेषातु. ख. श्रीरेषातु क. ह्रीरेषाच. १७ च. छ. ज. रुपस्थेयैरहंवीरैरुपस्थितः. क. रहंवीरैरुपस्थेयैः. १८ क. च. छ. ज. ञ. मुनिसंनिधौ. १९ क. ख. ग. ङ—ट. सर्वैरेव. २० ख. अर्दितान्सुदृढं. घ—ट. अर्दितास्मभृशं. २१ क. च. छ. ज. ञ. नस्त्रातुमर्हसि.

होम[1]कालेषु संप्राप्ताः पर्वकालेषु चानघ ॥ [2]धर्षयन्ति सुदुर्धर्षा राक्षसाः पिशिताशनाः ॥ १२ ॥
राक्षसैर्धर्षितानां च तापसानां तपस्विनाम् ॥ गतिं मृगयमाणानां भवान्नः परमा गतिः ॥ १३ ॥
कामं तपःप्रभावेन शक्ता हन्तुं निशाचरान् ॥ चिरार्जितं तु[3] नेच्छामस्तपः खण्डयितुं वयम् ॥१४॥
बहुविघ्नं तपो नित्यं दुश्चरं चैव राघव ॥ तेन शापं न मुञ्चामो भक्ष्यमाणाश्च राक्षसैः ॥ १५ ॥
[4]तदर्द्यमानान्रक्षोभिर्दण्डकारण्यवा[5]सिभिः ॥ र[6]क्ष नस्त्वं सह भ्रात्रा त्वन्नाथा हि वयं वने ॥ १६ ॥
मया चैतद्वचः श्रुत्वा कार्त्स्न्येन परिपालनम् ॥ ऋषीणां दण्डकारण्ये संश्रुतं जनकात्मजे ॥ १७ ॥
संश्रुत्य च न शक्ष्यामि जीवमानः प्रतिश्रवम् ॥ मुनीनामन्यथा कर्तुं सत्यमिष्टं हि मे सदा ॥१८॥
अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम् ॥ न तु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः ॥१९॥
तदवश्यं मया कार्यमृषीणां परिपालनम् ॥ अनुक्तेनापि वैदेहि प्र[7]तिज्ञाय तु किं पुनः ॥ २० ॥
[8]मम स्नेहाच्च सौहार्दादिदमुक्तं त्व[9]याऽनघे ॥ परितुष्टोस्म्यहं सीते न ह्यनिष्टोऽनु[10]शिष्यते ॥ २१ ॥
सदृशं [11]चानुरूपं च कुलस्य तव [12]चात्मनः ॥ सधर्मचारिणी [13]मे त्वं प्राणेभ्योपि गरीयसी ॥ २२ ॥

न केवलं पीडयन्ति यज्ञविघ्नं च कुर्वन्तीत्याहुः—होमेति। यज्ञविघ्नकरं हन्यामिति मद्भोजननिवर्तनात्कः परोपराध इति सीतायै सूचयितुमिदमनूदितं । होमकालेषु अग्निहोत्रकालेषु । पर्वकालेषु दर्शपौर्णमासादियज्ञकालेषु । धर्षयन्ति अभिधावन्ति ॥ १२ ॥ गतिं रक्षकं । मृगयमाणानां अन्वेषयतां ॥१६॥ परमशब्दव्यवच्छेद्यं दर्शयति—काममिति ॥१४॥ उक्तं विवृणोति—बह्विति ॥१५॥ उपसंहरति—तदिति । त्वन्नाथा इति बहुव्रीहिः । इयं वाक् समुदाहृतेति पूर्वेणान्वयः ॥१६॥ कार्त्स्न्येन परिपालनं रक्षोवधपर्यन्तपरिपालनं। संश्रुतं प्रतिज्ञातं । मदाश्रितविरोधिनो मद्विरोधित्वात् मद्भोजनविघातकत्वाच्चेत्यर्थः ॥ १७ ॥ जीवमानः जीवन् । प्रतिश्रवं प्रतिज्ञां। अन्यथाकर्तुं न शक्ष्यामि । तत्र हेतुः—सत्यमिष्टमिति । सत्यं सत्यवचनं॥ १८॥ तर्ह्यावयोर्विश्लेषो दुर्विषहः स्यात्तत्राह—अप्यहमिति। "आत्मानं सर्वदा रक्षेद्दारैरपि धनैरपि" इत्युक्तं जीवितमपि जह्यां। "भ्राता स्वा मूर्तिरात्मनः" इत्युक्तं लक्ष्मणमपि जह्यां। "अर्धो वा एष आत्मनो यत्पत्नी" इत्युक्तांत्वांवा जह्यामिति किमाश्चर्यं । संश्रुत्य यस्मै कस्मैचित्किंचिद्यत्प्रतिज्ञाय तां प्रतिज्ञां न जह्यां। ब्राह्मणेभ्यः ब्रह्मविद्भ्यः कृतां प्रतिज्ञां विशेषतो न जह्यां ॥ १९ ॥ अनुक्तेनापीति ऋषिभिरिति शेषः । उक्तरीत्या रक्षसां मदपराधित्वेन तद्वधस्य मत्कार्यत्वादिति भावः ॥ २० ॥ एवं वदन्त्यास्तव हृदयं च जानामीत्याह—ममेति । मम त्वयि स्नेहात् तव मयि सौहार्दाच्चोक्तं । विरहो दुःसहो भविष्यतीत्युक्तमित्यर्थः । अनिष्टः अप्रियः पुरुषः ॥ २१ ॥ तव आत्मनः सदृशं तव कुलस्य चानुरूपमिदं वचः धर्मप्राधान्योक्तिस्त्वत्कुलानुरूपा । "कर्मणैव हि संसिद्धिमास्थिता जनकादयः" इति हि त्वत्कुलपद्धतिः । सापराधेष्वपि निरपराधोक्तिस्तव सदृशी । " पापानां वा शुभानां वा वधार्हाणां प्लवंगम । कार्यं करुणमार्येण न कश्चि-

पर्यन्तं राक्षससंरक्षक । त्वद्रक्षणमन्तरेण तेषांजीवनासंभवादितिभावः ॥ ११ ॥ स० तापसानां तपसइमे तापसाः अतीतकालीनतपस्काः तेषां । तपस्विनां वर्तमानकालीनतपस्कानां। यद्वा तपस्विनामिति निर्धारणेषष्ठी । तपस्विनांमध्ये तापसानामित्यर्थः । अत्यन्ततपस्विनामितिभावः ॥ शि० तपस्विनां परमात्मविचारशीलानां । तापसानां वेदशास्त्रसंपन्नानां ॥ १३ ॥ ति० चतुर्दशवर्षपर्यन्तं पित्राज्ञया राज्यत्यागेप्यग्रेराज्यसंबन्धस्यावश्यकत्वाच्छरणागतरक्षणेऽस्त्येवाधिकारः । किंच क्षत्रजातेरेवात्राधिकारः नतुराज्यपदस्थस्यैवेतितात्पर्यं ॥ १७ ॥ शि० जीवमानः जीवेनसकलपालनेन मानः सत्कारोयस्य सोहं ॥ सदेत्यनेन स्वाभाविकोधर्मस्त्यक्तुं नशक्यत इतिसूचितं॥ १८ ॥ शि० सधर्मचारिणी सहधमर्चरणशीला । त्वं मेप्राणेभ्योपिगरीयसी। असीतिशेषः। एतेन संसर्गप्राप्तानपराधिवधस्त्वयापियत्नतस्त्याजनीयइतिसूचितं । तेन लङ्कागमनाय सीतामाज्ञापयामासेति ध्वनितं ।

[पा०] १ क. ख. ग. ङ—ट. कालेतुसंप्राप्ते. २ क. ख. ग. ङ—ट. धर्षयन्तिस्म. ३ ङ. झ. ट. नचेच्छामः. ४ क. च. छ. ज. तद्धन्यमानान्. ५ क. छ. ञ. वासिनः. ६ ङ. झ. ञ. ट. रक्षकस्त्वं. ७ क. ख. ग. छ. ज. प्रतिज्ञायाथकिं. ङ. झ. ञ. ट. प्रतिज्ञायकथं. ८ क. मयि. ९ क. ख. ग. ङ. च. छ. झ. ञ. ट. त्वयावचः. १० झ. शास्यते. ख. शिक्ष्यते. ११ क. चानुकूलं. १२ क—ट. शोभने. १३ ख. नित्यं.

इत्येवमुक्त्वा वचनं महात्मा सीतां प्रियां मैथिलराजपुत्रीम् ॥
रामो धनुष्मान्सह लक्ष्मणेन जगाम रम्याणि तपोवनानि ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे दशमः सर्गः ॥ १० ॥

एकादशः सर्गः ॥ ११ ॥

दण्डकारण्यंगच्छतारामेणपञ्चाप्सरोनामकेक्कचनतटाकेअन्तर्जलेगीतवादित्रध्वनिश्रवणेनादर्शनेनचवाद्यवादकादीनां विस्मयात्सहचरंकंचनमुनिंप्रतितत्तत्त्वकथनप्रार्थना ॥१॥ तस्मान्मुनिवरात्तत्तटाकादिवृत्तान्तंशृण्वतैवगच्छतारामेणदण्डकारण्येमुनिगणाश्रममण्डलदर्शनम् ॥ २ ॥ तथासीतालक्ष्मणाभ्यांसहतत्रतत्राश्रमेषुत्रिचतुरादिमासक्रमेणनिवासेनदशवर्षपरिमितकालयापनम् ॥ ३ ॥ पुनरपिसुतीक्ष्णाश्रममुपागतवतारामेणतंप्रतिस्वस्यागस्त्यावलोकनौत्सुक्यनिवेदनेनतदाश्रममार्गप्रश्नः ॥४॥ तेनतंप्रत्यगस्त्यभ्रातुराश्रममार्गलक्षणकथनपूर्वकंतत्रैकरात्रिवासेनतेनैवपथाऽगस्त्याश्रमगमनचोदना ॥ ५ ॥ अगस्त्यभ्रात्राश्रमसमीपंगतेनरामेणलक्ष्मणंप्रतिवातापील्वलनिषूदनरूपागस्त्यचरितानुवर्णनपूर्वकंसायाह्नेतद्भ्रातरमेत्यतदभिवादनादिपूर्वकं तत्रतद्रात्रियापनम् ॥ ६ ॥ प्रभातेऽगस्त्याश्रममुपगतेनरामेणलक्ष्मणंप्रतिविन्ध्यगिरिनिरोधकत्वाद्यगस्त्यप्रभाववर्णनपूर्वकमगस्त्यायस्वागमननिवेदनचोदना ॥ ७ ॥

अग्रतः प्रययौ रामः सीता मध्ये सु[1]मध्यमा ॥ पृष्ठतस्तु धनुष्पाणिर्लक्ष्मणोऽनुजगाम ह ॥ १ ॥
तौ पश्यमानौ विविधाञ्शैलप्रस्थान्वनानि च ॥ नदीश्च विविधा रम्या जग्मतुः सीत[2]या सह ॥२॥
सारसांश्चक्रवाकांश्च नदीपुलिनचारिणः ॥ सरांसि च सपद्मानि यु[3]क्तानि जलजैः खगैः ॥ ३ ॥
यूथबद्धांश्च पृषतान्मदोन्मत्तान्विषाणिनः ॥ महिषांश्च वराहांश्च ना[4]गांश्च द्रुमवैरिणः ॥ ४ ॥
ते गत्वा दूरमध्वानं लम्बमाने दिवाकरे ॥ ददृशुः सहिता रम्यं तटाकं योजनायतम् ॥ ५ ॥

न्नापराध्यति" इति हि तव प्रकृतिः । तथापि त्वं मे प्राणेभ्यो गरीयस्यपि सधर्मचारिणीभव मया यो धर्मः संकल्पितस्तत्रैव त्वयापि संकल्पयितव्यमिति भावः ॥ २२॥ महात्मा महाधृतिः । प्रियां मैथिलराजपुत्रीं । इतीति उक्तधर्मद्वयानुवादः ॥ २३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने दशमः सर्गः ॥१०॥

अथ कर्माणि सापायानि रामसेवैका निरपायेति दर्शयितुं माण्डकर्णिवृत्तान्तप्रकटनपूर्वकं सकलमुनिजनाश्रममण्डलसंचरणमेकादशे—अग्रत इत्यादि । अनेन श्लोकेन प्रणवार्थ उक्तः । तौ पश्यमानावित्यादिना नारायणपदार्थः । माण्डकर्णिवृत्तान्ते नम इत्यस्यार्थः । ततः परं विरोधिनिवृत्तिः सूच्यते । एवं मूलमन्त्रार्थानुसंधानमेव परमा गतिरित्युच्यते ॥ १ ॥ पश्यमानौ पश्यन्तौ । शैलप्रस्थान् शैलसानूनि ॥ २॥ सारसान् हंसविशेषान् । पुलिनं सैकतं । जलजैः खगैः जलपक्षिभिः ॥ ३ ॥ यूथबद्धान् यूथतयाबद्धान् समूहीभूतानित्यर्थः । पृषतान् बिन्दुमृगान् विषाणिन इति महिषादिविशेषणं । नागान् गजान् ॥ ४ ॥ लम्बमाने अस्तमयोन्मुखे । योजनायतं चतुर्दिशि योजनप्रमाणविस्तारं । पद्मपुष्करसंबाधं पद्मैः पुष्करैः

नहिलङ्कागमनमन्तरा संग्रामाय विभीषणस्य रावणसहगमनं. निवारणार्हमिति तात्पर्यं ॥ **स०** सधर्मचारिणी समानोधर्मस्सधर्मः । सधर्मं चरितुं शीलमस्याअस्तीति सधर्मचारिणी ॥ २२ ॥ इतिदशमस्सर्गः ॥ १० ॥

तनि० अनेनश्लोकेन प्रणवार्थःप्रकाशितइति संप्रदायः । तत्र अग्रतइति अवर्णप्राथमिकत्वं । अग्रतः प्रययावित्यर्थप्राथम्यं । रामइति सत्तासंपादनरक्षणादिना रमयतीति कारणत्वेरक्षकत्वेच रमासंबन्धित्वेन श्रीशत्वंच । सुमध्यमेति प्रणवद्वितीयवर्णश्च । मध्यइतितस्यवर्णद्वयमध्यवर्तित्वं । सीतामध्येइति लक्ष्म्याः पुरुषकारत्वं । लक्ष्मणइति मनज्ञानेइति धातोः असाधारणधर्मवत्वं । धनुष्पाणिरिति निरन्तरकैङ्कर्यवत्त्वं । अनुजगामेति अहंकारममकारविरहेणानुसरणं । पदान्तमकारेण प्रणवतृतीयवर्णश्च व्यज्यतइतिसंक्षेपः । तौपश्यमानावित्यादिना नारायणपदार्थःप्रकाशितइतिसंप्रदायः ॥ **स०** मध्ये रामलक्ष्मणयोर्मध्ये जगाम । मध्येकटिप्रदेशे

[पा०] १ ङ. झ. ट. सुशोभना. २ क—ट. सहसीतया. ३ च. छ. झ. ञ. ट. युतानि. ४ क. ख. ग. ङ—ट. गजांश्च.

पद्मपुष्करसंबाधं गजयूथैरलंकृतम् ॥ सारसै[१]र्हंसकादम्बैः संकुलं [२]जलचारिभिः ॥ ६ ॥
प्रसन्नसलिले रम्ये तस्मिन्सरसि शुश्रुवे ॥ गीतवादित्रनि[३]र्घोषो न तु कश्चन दृश्यते ॥ ७ ॥
ततः [४]कौतूहलाद्रामो लक्ष्मणश्च [५]महाबलः ॥ मुनिं धर्मभृतं नाम प्रष्टुं समुपचक्रमे ॥ ८ ॥
इदमत्यद्भुतं [६]श्रुत्वा सर्वेषां नो महामुने ॥ कौतूहलं महज्जातं [७]किमिदं साधु कथ्यताम् ॥ ९ ॥
वक्तव्यं यदि चेद्विप्र नातिगुह्यमपि प्रभो ॥ १० ॥
तेनैवमुक्तो धर्मात्मा राघवेण मुनिस्तदा ॥ [८]प्रभवं सरसः कृत्स्नमाख्यातुमुपचक्रमे ॥ ११ ॥
इदं पञ्चाप्सरो नाम तटाकं [९]सार्वकालिकम् ॥ निर्मितं तपसा राम मुनिना [१०]माण्डकर्णिना ॥ १२ ॥
स हि तेपे तपस्तीव्रं माण्डकर्णिर्म[११]हामुनिः ॥ दशवर्षसहस्राणि वायुभक्षो [१२]जलाश्रयः ॥ १३ ॥
ततः प्रव्यथिताः [१३]सर्वे देवाः साग्निपुरोगमाः ॥ अब्रुवन्वचनं सर्वे परस्परसमागताः ॥ १४ ॥
अस्माकं कस्यचित्स्थानमेष प्रार्थयते मुनिः ॥ इति संविग्नमनसः [१४]सर्वे ते त्रिदिवौकसः ॥ १५ ॥
[१५]तत्र कर्तुं तपोविघ्नं [१६]देवैः सर्वैर्नियोजिताः ॥ प्रधानाप्सरसः पञ्च वि[१७]द्युच्चलितवर्चसः ॥ १६ ॥
अप्सरोभिस्ततस्ताभिर्मुनिर्दृष्टपरावरः ॥ नीतो मदनवश्यत्वं [१८]सुराणां कार्यसिद्धये ॥ १७ ॥
[१९]तांश्चैवाप्सरसः पञ्च मुनेः पत्नीत्वमागताः ॥ तटाके निर्मितं [२०]तासामस्मिन्नन्तर्हितं गृहम् ॥ १८ ॥
[२१]तथैवाप्सरसः पञ्च निवसन्त्यो यथासुखम् ॥ रमयन्ति तपोयोगान्मुनिं यौवनमास्थितम् ॥ १९ ॥

सर्पैश्च संबाधं निबिडं। "वाद्यभाण्डमुखे सर्पे कारण्डे पुष्करं स्मृतं" इति विश्वः। सारसैः "सारसो मैथुने कामी गोनर्दः पुष्कराह्वयः" इत्युक्तेः। हंसैः राजहंसैः। कादम्बैः कलहंसैः। "कादम्बः कलहंसश्च हंसः स्याद्धूसरच्छदः" इत्युक्तेः ॥ ५—६ ॥ गीतेति गीतानि षड्जादिस्वरनिबद्धप्रबन्धाः। वादित्राणि ततघनसुषिरानद्धभेदेन चतुर्विधानि तेषां निर्घोषः। अत्र यादवः। "वादित्रं वादितं वाद्यमातोद्यं तच्चतुर्विधम्। ततं वीणादिकं वाद्यं तालं तु विततं घनम्। वंशादिकं तु सुषिरमानद्धं मुरजादिकं" इति कश्चन वादयिता। न दृश्यते नादृश्यत ॥७॥ धर्मभृतं सहागतेषु मुनिष्वन्यतमं। कथ्यतामित्येवं प्रष्टुं समुपचक्रम इत्यन्वयः ॥ ८—१० ॥ प्रभवं उत्पत्तिं। कृत्स्नं गीतवादित्रमूलं चेत्यर्थः ॥ ११ ॥ पञ्चाप्सरःक्रीडासाधनत्वात् पञ्चाप्सरो नाम। सार्वकालिकं सर्वकाले भवं। "कालाट्ठञ्" उभयपदवृद्धिः। सर्वस्मिन्नपि काले अशुष्यदित्यर्थः ॥ १२ ॥ उक्तार्थे इतिहासमाह—स हीत्यादिना। जलाश्रयः स्वनिर्मिततटाकजलावगाढः ॥ १३ ॥ साग्निपुरोगमाः अग्निना पुरःसरेण सहिताः। क्रियाभेदात्सर्वशब्दावृत्तिः ॥ १४ ॥ अस्माकं मध्ये। संविग्नमनसः भीतमनस्काः ॥ १५ ॥ तत्र तदा। विद्युच्चलितवर्चसः विद्युतइव तरलतेजसः चलितविद्युद्वर्चस इति वार्थः ॥ १६ ॥ दृष्टपरावरः दृष्टपरमात्मजीवस्वरूपः ॥ १७—१८ ॥ तपोयोगात्

सुशोभनेत्यपि द्योत्यते ॥ १ ॥ ती० पद्मानां रक्तपङ्कजानां। पुष्कराणां पुण्डरीकाणां ॥ कतक० पद्मानां पुष्करेजले संबाधोनैबिड्यं यत्र तं ॥ स० पद्मानि कमलानि। पुष्कराः पक्षिणः। तेषां संबाधः संमर्दो यस्मिंस्तं। "पुष्करः। औषधद्वीपविहगेषु" इतिविश्वः। जलजातिभिः। जलेषु जातिर्जन्म येषां तैर्मत्स्यादिभिः ॥ ६ ॥ ती० सर्वेप्रव्यथिता अभूवन्। सर्वे अब्रुवन्निति च सर्वशब्दद्वयस्यनिर्वाहः ॥ १४ ॥ प्रधानाप्सरसः पञ्चेत्यनेन तत्परिचारिकाअन्याअपि सन्तीत्यवगम्यते ॥ १६ ॥ ति० दृष्टपरावरः

[पा०] १ घ. च. छ. कारण्डैः. २ ङ—ट. जलजातिभिः. ३ क. च. छ. निर्घोषस्तत्रकश्चिन्नदृश्यते. ४ क. ग. कुतूहलात्. ५ ख—ङ. झ. ट. महारथः. ६ क. च. छ. ज. ञ. दृष्ट्वा. ७ छ. ज. किमेतत्. ८ क. ख. घ. ङ. च. ज—ट. प्रभावं. ९ च. छ. ज. सार्वकामिकं. १० क. ग. माण्डुकर्णिना. ११ ख. महातपाः. १२ क. ख. ग. च. छ. ज. ञ. जलाशयः. ङ. झ. ट. जलाशये. १३ क. देवास्सर्वे. १४ क. ख. ग. ङ—झ. सर्वतत्र. १५ क—ट. ततः. १६ ख. ग. ङ. ट. सर्वदेवैः. झ. सर्वदेवैः. १७ ग. विद्युत्सदृश. १८ ङ—ट. देवानां. १९ ख. तस्सैवा. २० क. ग—ट. तासांतस्मिन्. २१ ख. ग. ङ—ट. तत्रैवा.

तासां संक्रीडमानानामेष वादित्रनिःस्वनः ॥ श्रूयते [1]भूषणोन्मिश्रो गीतशब्दो मनोहरः ॥ २० ॥
[2]आश्चर्यमिति तस्यैतद्वचनं भावितात्मनः ॥ राघवः प्रतिजग्राह सह भ्रात्रा महायशाः ॥ २१ ॥
[3]एवं [4]कथयमानस्य ददर्शाश्रममण्डलम् ॥ कुशचीरपरिक्षिप्तं [5]ब्राह्म्या लक्ष्म्या समावृतम् ॥ २२ ॥
प्रविश्य सह वैदेह्या [6]लक्ष्मणेन च राघवः ॥ उवास [7]मुनिभिः सर्वैः पूज्यमानो [8]महायशाः ॥ २३ ॥
[9]तथा तस्मिन्स काकुत्स्थः श्रीमत्याश्रममण्डले ॥ उषित्वा [10]तु सुखं तत्र पूज्यमानो महर्षिभिः ॥ २४ ॥
जगाम [11]चाश्रमांस्तेषां पर्यायेण तपस्विनाम् ॥ येषामुषितवान्पूर्वं सकाशे [12]स महास्त्रवित् ॥ २५ ॥
क्वचित्परिदशान्मा[13]सानेकं संवत्सरं क्वचित् ॥ क्वचिच्च चतुरो मासान्पञ्च [14]षट्च चापरान्क्वचित् ॥ २६ ॥

तपोरूपोपायात् । यौवनमास्थितं । " योगःसन्नहनोपायध्यानसंगतियुक्तिषु" इत्यमरः ॥ १९ ॥ संक्रीडमानानामिति " क्रीडोनुसंपरिभ्यश्च" इत्यात्मनेपदं । भूषणोन्मिश्रः भूषणघोषोन्मिश्रः वादित्रनिःस्वनविशेषणं । भूषणोन्मिश्रो वादित्रनिःस्वनो गीतशब्दश्च श्रूयत इत्यन्वयः ॥२०॥ एतत् पूर्वोक्तं वचनं । आश्चर्यमिति प्रतिजग्राह श्रुतवान् ॥ २१ ॥ कथयमानस्य कथयमाने तस्मिन्मुनौ । कथयमानःस इतिपाठे एवं संभाषमाणः स रामः ब्राह्म्या ब्राह्मणसंबन्धिन्या । लक्ष्म्या समृद्ध्या ब्राह्मणसंपूर्णमित्यर्थः । आश्रममण्डलं ददर्श राघव इत्यनुषङ्गः ॥ २२ ॥ प्रविश्येति आश्रममण्डलमित्यनुषज्यते । सर्वैस्तदाश्रमवासिभिः पूज्यमानः स्वस्वाश्रमे अर्घ्यादिना अर्च्यमानः ॥ २३ ॥ कियन्तं कालं तत्रोवासेत्यपेक्षायां कालपरिमाणं वक्तुं रामस्याश्रमवासप्रकारंदर्शयति–तथेत्यादिश्लोकद्वयेन । तथा उक्तप्रकारेण । तस्मिन्नाश्रममण्डले । सुखमुषित्वा तत्र पूज्यमानः स राम इत्युक्तानुवादः । येषां सकाशे पूर्वमुषितवान् तेषामाश्रमान् पर्यायेण द्वितीयपर्यायेण च जगाम । एवमाश्रमवासप्रकारः । एकवारं सर्वेषामाश्रमान्गत्वा पुनरपि तेषामेवाश्रमाञ्जगामेति वाक्यार्थः । महास्त्रविदित्यनेन तत्रत्यराक्षसोपद्रवपरिहाराय पुनर्गमनमिति सूचयति । वक्ष्यति हि मारीचः "तेन मुक्तास्त्रयो बाणाः" इत्यारभ्य "पराक्रमज्ञौ रामस्य शरो दृष्टभयः पुरा । समुद्भ्रान्तस्ततो मुक्तस्तावुभौ राक्षसौ हतौ" इति ॥ एतदर्थमेव सुतीक्ष्णेनात्र गमनमनुज्ञातं ऋषिभिः कारितं च ॥ २४—२५ ॥ पूर्वमुषितवानित्युक्तवासक्रमं दर्शयति—क्वचिदित्यादिना । राघवो रामः क्वचिदाश्रमे परिदशान् परिगताः दश येषां ते परिदशाः । "संख्ययाव्यय—" इत्यादिना बहुव्रीहिसमासः । "बहुव्रीहौ संख्येयेडजबहुगणात्" इतिटच् समासान्तः । तान्मासान् त्रयोदशमासानित्यर्थः । अत्यन्तसंयोगे द्वितीया । सुखं यथा भवति तथा न्यवसत् । क्वचिदाश्रमे एकं संवत्सरं सुखं न्यवसत् । क्वचिदाश्रमे चतुरो मासान् सुखं न्यवसत् । क्वचित् पञ्च मासान् क्वचित् षण्मासान् क्वचिदपरान् षड्भ्योन्यान् सप्त मासान् । सुखं न्यवसत् । पञ्च षट् च तथा क्वचिदिति पाठे तथा पुनः क्वचित् षण्मासानित्यर्थः । परिदशानित्यत्र चतुर्दशमासानित्यर्थः । अपरत्राश्रमे मासादधिकं सुखं न्यवसत् । अधिकशब्देनात्र मासचतुर्थांशो विवक्षितः । एकमासं मासपादं चेत्यर्थः । अपरत्राधिकं माससिति पाठे मासं अधिकं तत्पादं चेत्यर्थः । अपिशब्दः सर्वत्र मासानुकर्षणार्थः । क्वचिदाश्रमे अर्धमधिकं च न्यवसत् पादोनमासमित्यर्थः । तथा चैतदव्यवहितपूर्वाश्रमवासदिनैर्द्वौ मासौ संवृत्तौ एकत्र सपादमासः अपरत्र पादोनमास इत्याहत्य मासद्वयसंभवात् । अध्यर्धमधिकं

दृष्टैहिकपारलौकिकधर्माधर्मः ॥ १७ ॥ **ति०** एवंकथयमानः आश्चर्यमित्येवं कथयन् ॥ २२ ॥ **ती०** तस्मिन्नाश्रममण्डले उषित्वा तत्रैव महर्षिभिःपूज्यमानइति तच्छब्दद्वयस्यसंबन्धः ॥ २४ ॥ **ती०** परिदशान् दशसमीपान् एकादशनववेत्यर्थः ॥

[**पा०**] १ क. भूषणैर्मिश्रो. २ ख. ग. आश्चर्यतरमस्यैतत्. ३ एवंकथयमानस्येत्यर्धस्यस्थाने क. च. छ. ज. ञ. पुस्तकेषु. एवंकथयमानस्यसहभ्रात्रामहामुनेः । अग्रतोरमणीयंचददर्शाश्रममण्डलम् । इत्यर्धद्वयं दृश्यते. ४ ङ. झ. ट. कथयमानस्स. ५ ग. घ. च. छ. ज. नानावृक्षसमाकुलं. ६ क. राघवोलक्ष्मणेनच. ७ ग. ऋषिभिः. ८ क. ख. ग. च. छ. ज. महात्मभिः. ९ घ—ट. तदा. १० ग. ङ. झ. ट. ससुखं. क. ख. घ. सुसुखं. ११ क. ख. ग. चाश्रमंतेषां. १२ क. परमास्त्रवित्. च. छ. ज. सुमहास्त्रवित्. १३ ङ. झ. ट. नेकसंवत्सरं. १४ घ. ङ. झ. षट्चपरान्. च. ज. षड्वासरान्. छ. ञ. षड्वापरान्.

परत्राधिकं मासादप्यर्धमधिकं क्वचित् ॥ त्रीन्मासानष्टमासांश्च राघवो न्यवसत्सुखम् ॥ २७ ॥
था संवसतस्तस्य मुनीनामाश्रमेषु वै ॥ रमतश्चानुकूल्येन ययुः संवत्सरा दश ॥ २८ ॥
रिवृत्य च धर्मज्ञो राघवः सह सीतया ॥ सुतीक्ष्णस्याश्रमं श्रीमान्पुनरेवाजगाम ह ॥ २९ ॥
तमाश्रममासाद्य मुनिभिः प्रतिपूजितः ॥ तत्रापि न्यवसद्रामः किंचित्कालमरिंदमः ॥ ३० ॥
थाश्रमस्थो विनयात्कदाचित्तं महामुनिम् ॥ उपासीनः स काकुत्स्थः सुतीक्ष्णमिदमब्रवीत् ॥३१॥
स्मिन्नरण्ये भगवन्नगस्त्यो मुनिसत्तमः ॥ वसतीति मया नित्यं कथाः कथयतां श्रुतम् ॥ ३२ ॥
तु जानामि तं देशं वनस्यास्य महत्तया ॥ कुत्राश्रममिदं पुण्यं महर्षेस्तस्य धीमतः ॥ ३३ ॥
सादात्तत्र भवतः सानुजः सह सीतया ॥ अगस्त्यमभिगच्छेयमभिवादयितुं मुनिम् ॥ ३४ ॥
नोरथो महानेष हृदि मे परिवर्तते ॥ यदहं तं मुनिवरं शुश्रूषेयमपि स्वयम् ॥ ३५ ॥
ति रामस्य स मुनिः श्रुत्वा धर्मात्मनो वचः ॥ सुतीक्ष्णः प्रत्युवाचेदं प्रीतो दशरथात्मजम् ॥३६॥
हमप्येतदेव त्वां वक्तुकामः सलक्ष्मणम् ॥ अगस्त्यमभिगच्छेति सीतया सह राघव ॥ ३७ ॥
दिष्ट्या त्विदानीमर्थेऽस्मिन्स्वयमेव ब्रवीषि माम् ॥ अहमाख्यामि ते वत्स यत्रागस्त्यो महामुनिः॥३८॥
जनान्याश्रमादस्मात्तथा चत्वारि वै ततः ॥ दक्षिणेन महाञ्छ्रीमानगस्त्यभ्रातुराश्रमः ॥ ३९ ॥

क्वचिदितिपाठे अध्यर्धं अर्धाधिकं अर्धमासाधिकमित्यर्थः । अधिकं पूर्वोक्तपादमासात्मकाधिकं तथाच त्रिपादमासमित्यर्थः । क्वचित्रीन्मासान् न्यवसत् क्वचिदष्टमासान् न्यवसत् । एवं षष्टिमासाः सिद्धाः । केचिदाहुः परिदशान् दशाधिकानिति । वक्ष्यमाणेष्वष्टसुस्थानेष्वन्वेति । तथाचायमर्थः । एवं संवत्सरं क्वचिदित्यत्र द्वाविंशतिमासानित्यर्थः । क्वचिच्च चतुरो मासानित्यत्र चतुर्दश मासानित्यर्थः । पञ्च षट् चापरान् क्वचिदित्यत्र क्वचित् पञ्चदश मासान् क्वचित् षोडशमासानित्यर्थः । अपरानधिकं मासादप्यर्धमधिकं क्वचिदित्यत्र प्रथमाधिकशब्दोऽर्धमासरूपाधिकांशपरः । तथा च अपरान्परिदशान्मासान् अधिकं चेत्यन्वये अर्धाधिकदशमासानित्यर्थः । मासादप्यर्धमित्यादेरयमर्थः । क्वचित्परिदशान्मासान् तदुपरिमासादधिकमर्धमपि चेति । तथाच अर्धाधिकैकादशमासानित्यर्थः । त्रीन्मासानष्टमासांश्चेत्यत्र त्रयोदश मासान् अष्टादश मासांश्चेत्यर्थः । तथाच विंशत्युत्तरशतमासा लब्धा इति । तस्मिन्पक्षे प्राथमिकक्वचित्पदमासपदानर्थक्यं पूर्वग्रन्थविरोध इत्यादि द्रष्टव्यम् ॥२६—२७॥ तथाचाश्रममण्डले दश संवत्सराः संवृत्ता इत्याह—तथा संवसत इति । इयमेवाश्रमवाससंख्या । पूर्वापरसंख्या तु किष्किन्धाकाण्डे वक्ष्यते ॥ २८ ॥ परिवृत्य एवमाश्रमं सर्वं परिक्रम्य ॥ २९—३१ ॥ कथाः नानाकथाः । कथयतां कथयत्सु ॥ ३२—३३ ॥ तत्र वने । अगस्त्यमभिवादयितुमभिगच्छेयमित्यन्वयः ॥ ३४ ॥ तं मुनिवरं शुश्रूषेयमिति यत् एष मनोरथः अभिलाषो मे हृदि परिवर्तत इत्यन्वयः । शुश्रूषेयमिति परस्मैपदमार्षं ॥ ३५—३६ ॥ अहमिति । अगस्त्यमभिगच्छेत्येतद्वक्तुकामोस्मीत्यन्वयः ॥ ३७—३८ ॥ अस्मादाश्रमाद्दक्षिणेन । तथेति हस्तेन निर्देशः । चत्वारि

ति० परिदशान् दशत्वसंख्यांपरिगतान् । दशसंख्यानित्यर्थः ॥ २६ ॥ ति० "योजनादाश्रमादस्मादभिचत्वारिवैततः" इति कतकपाठे अस्मादाश्रमाद्योजनादभि अधिकं चत्वारियोजनानीत्यर्थः । स० अगस्त्यभ्रातुः इध्मवाहस्य । "अगस्त्यः

[पा०] १ क. ङ—ट. अपरत्राधिकान्मासानध्यर्धं. २ क. ख. घ. च. छ. ज. ञ. ततः. ङ. झ. ट. तत्र. ३ क. . छ. ज. ञ. ट. माश्रमेषुच. ४ क. ख. झ. परिसृत्यच. च. ज. ञ. परिवृत्यस. ५ ङ. ट. स्याश्रमपदंपुनः. ग. स्याश्रमं रामःपुनः. ६ क. ख. ग. ङ.—ट. मागम्य. ७ क. च. छ. ज. ञ. पूजितस्तदा. ख.—ङ. झ. ट. परिपूजितः. ८ घ. दाश्रमस्थो. च. ज. अथाश्रमस्थं. ९ क.—घ. च. ज. भगवान्. १० क. च. छ. ज. ञ. नहि. ११ क. च. छ. ज. ञ. त्राश्रमं. ग. यत्राश्रमपदं. ख.—च. ज. झ. कुत्राश्रमपदं. १२ ङ. ज. झ. ञ. रम्यं. १३ ख. ग. ङ. छ. झ. ट. सादार्थभगवतः. १४ ख. ग.—ङ. ट. संपरिवर्तते. १५ घ. यद्यहं. १६ क. च. छ. ज. तच्छ्रुत्वाधर्मात्मामुनिसत्तमः. १७ च.—झ. ट. राम. १८ ख. ङ.—ट. न्याश्रमात्तातयाहि.

[1]स्थलीप्राये वनोद्देशे पिप्पलीवनशोभिते ॥ बहुपुष्पफले रम्ये नाना[2]शकुनिनादिते ॥ ४० ॥
पद्मिन्यो विविधास्तत्र प्रसन्न[3]सलिलाः शिवाः ॥ हंसकारण्डवाकीर्णा[4]श्चक्रवाकोपशोभिताः ॥ ४१ ॥
तत्रैकां [5]रजनीं व्युष्य प्रभाते राम गम्यताम् ॥ दक्षिणां दिशमास्थाय वन[6]षण्डस्य पार्श्वतः ॥ ४२ ॥
[7]तत्रागस्त्याश्रमपदं गत्वा योजनमन्तरम् ॥ रमणीये वनोद्देशे बहुपाद[8]पसंवृते ॥ ४३ ॥
[9]रंस्यते तत्र वैदेही लक्ष्मणश्च [10]सह त्वया ॥ [11]स हि रम्यो वनोद्देशो बहुपादपसंकुलः ॥ ४४ ॥
यदि बुद्धिः कृता द्रष्टुमगस्त्यं तं महामुनिम् ॥ अद्यैव गमने बुद्धिं रोचयस्व [12]महायशः ॥ ४५ ॥
इति रामो मुनेः श्रुत्वा सह भ्रात्राऽभिवाद्य च ॥ प्रतस्थेऽगस्त्यमुद्दिश्य सानुजः सी[13]तया सह ॥ ४६ ॥
पश्यन्वनानि [14]रम्याणि पर्वतांश्चाभ्रसन्निभान् ॥ सरांसि सरितश्चैव [15]पथि मार्ग[16]वशानुगाः ॥ ४७ ॥
सुतीक्ष्णेनोपदिष्टेन गत्वा तेन पथा सुखम् ॥ इदं परमसंहृष्टो वाक्यं लक्ष्मणमब्रवीत् ॥ ४८ ॥
एतदेवाश्रमपदं नूनं तस्य महात्मनः ॥ अगस्त्यस्य मुनेर्भ्रातुर्दृश्यते पुण्यकर्मणः ॥ ४९ ॥
[17]यथा हि मे वनस्यास्य [18]ज्ञाताः पथि सहस्रशः ॥ संनताः फलभारेण पुष्पभारेण च द्रुमाः ॥ ५० ॥
पिप्पलीनां च पक्वानां वनादस्मादुपागतः ॥ गन्धोऽयं पवनोत्क्षिप्तः सहसा कटुकोदयः ॥ ५१ ॥
तत्र तत्र च दृश्यन्ते [19]संक्षिप्ताः काष्ठसंचयाः ॥ लूनाश्च [20]पथि दृश्यन्ते दर्भा [21]वैडूर्यवर्चसः ॥ ५२ ॥
एतच्च वनमध्यस्थं कृष्णाभ्रशिखरोपमम् ॥ पावकस्याश्रमस्थस्य धूमाग्रं संप्रदृश्यते ॥ ५३ ॥
विविक्तेषु च तीरेषु[22] [23]कृतस्नाना [24]द्विजातयः ॥ [25]पुष्पोपहारं कुर्वन्ति कुसुमैः स्वय[26]मार्जितैः ॥ ५४ ॥

योजनानि अभियाहीति शेषः । ततस्तत्र अगस्त्यभ्रातुराश्रमो वर्तते। आश्रमाद्दक्षिणेनेत्यत्र "एनपा द्वितीया" इति द्वितीयाऽभाव आर्षः ॥ ३९ ॥ स्थलीप्राये स्थलीप्रचुरे ॥ ४० ॥ कारण्डवाः सारसाः ॥ ४१ ॥ तत्र अगस्त्यभ्रात्राश्रमे रजनीं व्युष्य रात्रिमतिवाह्य वनषंडस्य वनसमूहस्य।पार्श्वतः दक्षिणां दिशं।आस्थाय उद्दिश्य। निर्वणदेशे योजनमन्तरं योजनावकाशं गत्वा अगस्त्याश्रमपदं गम्यतामित्यन्वयः ॥ ४२—४५ ॥ इति एवंप्रकारेण । मुनेःसकाशाच्छ्रुत्वा ॥ ४६ ॥ अभ्रसन्निभान् मेघसन्निभान् । मार्गवशानुगाः मार्गवशेनानुगम्यमानाः । रामइति पूर्वश्लोकादनुकृष्यते ॥ ४७—४८ ॥ नूनमिति वितर्के । यदाश्रमपदं दृश्यते एतन्मुनेर्नूनमित्यन्वयः ॥ ४९ ॥ उक्तेर्थे हेतुमाह—यथाहीति । यथाहि मे पथि चिह्नतया वनंश्रुतं तथैवास्य वनस्य फलभारेण पुष्पभारेण च संनताः द्रुमाः सहस्रशो मया ज्ञाताः ज्ञायमाना वर्तन्ते॥५०॥ असाधारणोपदिष्टलिङ्गं चानुभूयत इत्याह—पिप्पलीनामित्यादि । पक्वानां पिप्पलीनामिति तत्फलानामित्यर्थः। कटुकस्य कटुरसस्य उदयोभिव्यक्तिरानुमानिकी येन स तथा गन्धः उपागतः ॥ ५१—५२ ॥ कृष्णाभ्रशिखरोपमं नीलमेघाग्रोपमं ॥ ५३ ॥ विविक्तेषु पूतेषु । "विविक्तौ पूतविजनौ" इत्यमरः ।

प्राग्दुहितरमुपयेमेदृढव्रताम् । यस्यांदृढच्युतोजातइध्मवाहात्मजोमुनिः" इतिभागवतेज्येष्ठत्वाद्दुहितृसमायामिध्मवाहभार्यायां देवरात्सुतोत्पत्तिन्यायेन दृढच्युतमपत्यमगस्त्योलेभइतिभावः॥ ३९ ॥ **स०** " स्थलीप्राये अकृत्रिमस्थलबहुले ।"जानपद–" इत्यादिनाङीष् ॥ **ती०**"स्थलप्रायेवनोद्देशेपिप्पलीवनशोभिते "इतिमार्गप्रदर्शनार्थमुक्तं। स्थलप्राये स्थलं प्रायः प्रायेणयस्मिंस्तथा॥ **शि०** स्थलीं अकृत्रिमभूमिलं प्रैति प्राप्नोति तस्मिन् । किंच स्थल्याः अकृत्रिमभूमेः प्रायः नित्यंस्थितिर्यस्मिंस्तस्मिन् ॥ ४० ॥

[पा०] १ ग. च. छ. ज. ञ. स्थलप्राये. झ. स्थलीप्रायवनोद्देशे. २ ङ. झ. ट. विहगनादिते. ३ ङ. झ. ट. सलिलाशयाः. घ. सलिलाःशुभाः. ४ क. च. छ. ज. ञ. चक्रवाकैरलंकृताः. ५ क.—घ. च. छ. ज. ञ. रजनीमुष्य. ६ ङ. च. छ. झ. ञ. ट. खण्डस्य. ७ क. च. छ. ज. ञ. ततोऽगस्त्या. ८ ङ. झ. ट. शोभिते. ९ ङ. झ. ट. त्वयासह. १० ख. ग. सतु. ११ ङ. झ. ट. संयुतः. १२ ङ. च. ज.—ट. महामते. १३ क—ट. सहसीतया. १४ ख. ग. ङ. झ. ट. चित्राणि. १५ क. च. छ. ज. ञ. सानूनिविविधानिच. १६ ङ. झ. ट. वशानुगान्. १७ क. ख. ग. ङ. च. ज. झ. ञ. यथाहिमे. १८ ख. च. छ. ज. ञ. जाताः. १९ ख. संसक्ताः. २० ख. ङ. झ. ट. परिदृश्यन्ते. २१ झ. ञ. वैदूर्य. २२ ख. ङ.—झ. ट. तीर्थेषु. घ. देशेषु. २३ ख. ग. च. छ. कृतस्नाता. २४ च. ज. ञ. महर्षयः. २५ ङ. झ. पुण्योपहारं. क. च. छ. ज. ञ. पुष्पोपहारान्. २६ ङ. च. झ. ञ. ट. मर्जितैः.

त्सु[1]तीक्ष्णस्य वचनं यथा सौम्य मया श्रुतम् ॥ अगस्त्यस्याश्रमो भ्रातुर्नू[2]नमेष भविष्यति ॥ ५५ ॥
निगृह्य त[3]रसा मृत्युं लोकानां हितकाम्यया ॥ य[4]स्य भ्रात्रा कृतेयं दिक्छरण्या पुण्यकर्मणा ॥५६॥
हैकदा किल क्रूरो वातापिरपि चेल्वलः ॥ भ्रातरौ सहितावास्तां ब्राह्मणघ्नौ महासुरौ ॥ ५७ ॥
ारयन्ब्राह्मणं रूपमिल्वलः संस्कृतं वदन् ॥ आमन्त्रयति वि[5]प्रान्स श्रा[6]द्धमुद्दिश्य निर्घृणः ॥ ५८ ॥
्रातरं संस्कृतं कृत्वा ततस्तं मेषरूपिणम् ॥ ता[8]न्द्विजान्भोजयामास श्राद्धदृष्टेन कर्मणा ॥ ५९ ॥
तो भुक्तवतां तेषां विप्राणामिल्वलोऽब्रवीत् ॥ वातापे निष्क्रमस्वेति स्वरेण महता वदन् ॥ ६० ॥
तो भ्रातुर्वचः श्रुत्वा वातापिर्मेषवन्नदन् ॥ भि[9]त्त्वा भित्त्वा श[10]रीराणि ब्राह्मणानां विनि[11]ष्पतत् ६१॥
ाह्मणानां सहस्राणि तैरेवं कामरूपिभिः ॥ विनाशितानि सं[12]हत्य नित्यशः पिशिताशनैः ॥६२॥
अगस्त्येन तदा देवैः प्रार्थितेन महर्षिणा ॥ अनुकूलः किल श्राद्धे भक्षितः स म[13]हासुरः ॥ ६३ ॥
ततः संपन्नमित्युक्त्वा दत्त्वा ह[14]स्तोदकं ततः ॥ भ्रातरं निष्क्रमस्वेति चेल्व[15]लः सोऽभ्य[16]भाषत ॥६४॥
स[17] तं तथा भाषमाणं भ्रातरं विप्रघातिनम् ॥ अब्रवीत्प्रहसन्धीमानगस्त्यो मुनिस[18]त्तमः ॥ ६५ ॥
कुतो निष्क्रमितुं शक्तिर्मया जीर्णस्य रक्षसः ॥ भ्रा[19]तुस्ते मेषरूपस्य गतस्य यमसादनम् ॥ ६६ ॥
अथ त[20]स्य वचः श्रुत्वा भ्रातुर्निधन[21]संश्रयम् ॥ प्रधर्षयितुमारेभे मुनिं क्रोधान्निशाचरः ॥ ६७ ॥
सोऽभि[22]द्रवन्मुनिश्रेष्ठं मुनिना दीप्ततेजसा ॥ चक्षुषाऽनलकल्पेन निर्दग्धो निधनं गतः ॥ ६८ ॥

उपहारं पुष्पबलिं । स्वयमार्जितैः । "समित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत्" इति स्मरणात् ॥ ५४ ॥ नूनं निश्चये । "नूनं तर्के विनिश्चये" इत्यमरः ॥ ५५ ॥ मृत्युं वातापील्वलनिमित्तकं मरणं । हितकाम्यया हितेच्छया । इयं दिक् दक्षिणा दिक् । शरण्या संश्रयितुं योग्या ॥ ५६ ॥ अस्मिन्नर्थे आख्यायिकामाह—इहेत्यादिना ॥ ५७ ॥ संस्कृतं व्याकरणसंस्कारवतीं वाचं । वदन् ॥ ५८ ॥ संस्कृतं श्राद्धोचितपाकसंस्कारसंस्कृतं कृत्वा श्राद्धदृष्टेन श्राद्धकल्पावगतेन ॥ ५९ ॥ भुक्तवतां भुक्तवत्सु । वदन्नब्रवीत् व्यक्तमब्रवीत् ॥ ६० ॥ व्यनिष्पतत् विनिरपतत् ॥ ६१ ॥ तैरिति बहुवचनं परिवारापेक्षया । संहत्य बहुश इतियावत् ॥ ६२ ॥ अनुभूय श्राद्धवरणादिकमनुभूय ॥ ६३ ॥ ततः श्राद्धान्ते संपन्नमित्युक्त्वा ततो हस्तोदकं च दत्त्वा ॥६४—६६ ॥ निधनसंश्रयं नाशविषयं । प्रधर्षयितुं हिंसितुं ॥ ६७ ॥ अनलकल्पेन अग्निसदृशेन ॥ ६८ ॥ वि-

रामानु० मेषवन्नदन् मृतसंजीविनीवैभवात् उदरान्तरितिशेषः ॥ ६१ ॥ **स०** जीर्णस्य पक्वीकृतस्य "जीर्णं पक्वेपुराणेच" इतिविश्वः ॥ ६६ ॥ **स०** ननु वनपर्वणि "ततोजगामकौरव्य—भिक्षितुंवसु" इत्यारभ्य "ततोराजर्षयस्सर्वेविषण्णागतचेतसः । वातापिंसंस्कृतंदृष्ट्वामेषभूतंमहासुरम् । अथाब्रवीदगस्त्यस्तान्राजर्षीन्नृषिसत्तमः । विषादोवोनकर्तव्योह्यहंभोक्ष्येमहासुरम् । धुर्यासनमथासाद्य निषसाद महामुनिः । तं पर्यवेषद्दैत्येन्द्र इल्वलः प्रहसन्निव । अगस्त्यएव कृत्स्नंतु वातापिं बुभुजेततः" इतिगर्भीकृत्य "गवांदशसहस्राणि राज्ञामेकैकशोसुर । तावदेव सुवर्णस्य दित्सितं तु महासुर । मह्यं ततोवै द्विगुणं रथश्चैवहिरण्मयः । मनोजवौ वाजिनौ च दित्सितंतेमहासुर । जिज्ञास्यतां रथस्सद्यो व्यक्तएष हिरण्मयः । ततः प्रव्यथितोदैत्योददावभ्यधिकंवसु । विराजाश्चसुवाजाश्च तस्मिन्युक्तौ रथे हयौ । ऊहतुस्स वसूनाशु तानगस्त्याश्रमंप्रति । सर्वान्राज्ञस्सहागस्त्यान्निमेषादिवभारत"

[पा०] १ ङ. झ. ट. ततःसुतीक्ष्णवचनं. ज. सुतीक्ष्णस्यास्यवचनं. २ क. ख. च. छ. ज. मेव. ३ छ. ज. ञ. तपसा. ४ ख. ग. अस्य. ५ क. ख. घ.—ट. विप्रान्स. ६ घ. श्राद्धकर्मणि. ७ क. ख. ग. भ्राता. ८ क. सद्विजान्. च.—ञ. द्विजातीन्. ९ घ. हित्वा. १० ख. सहस्राणि. ११ क. विनिष्पतन्. ख. सहस्रशः. १२ क. च. छ. ज. ञ. सुभृशं. ग. ङ. ट. संहृत्य. १३ क. च. छ. ज. ञ. निशाचरः. १४ ङ. झ. ट. हस्तेवनेजनं. क. ख. ग. च. छ. ज. ञ. हस्तावसेचनं. १५ क. ख. ग. ङ.—ट. इल्वलः. १६ ङ. छ. झ. ट. समभाषत. १७ ङ. झ. ट. सतदाभाषमाणंतु. क. च. छ. ञ. तंतदाभाषमाणंतु. ख. ग. घ. तंतथाभाषमाणंतु. १८ क. च. छ. ञ. मुनिपुङ्गवः. १९ ङ. झ. ट. भ्रातुस्तु. २० क. च. छ. ज. ञ. तद्वचनं. २१ क. ख. ङ.—ट. संश्रितं. २२ क. ख. ग. ङ. झ. ट. सोभ्यद्रवद्विजेन्द्रंतं. घ. सोभ्यद्रवद्विजश्रेष्ठं. छ. सोभ्यद्रवद्विजेन्द्रंतु ।

तस्यायमाश्रमो भ्रातुस्तटाकवनशोभितः ॥ विप्रानुकम्पया येन कर्मे[1]दं दुष्करं कृतम् ॥ ६९ ॥
एवं कथयमानस्य तस्य सौमित्रिणा सह ॥ रामस्यास्तं गतः सूर्यः सन्ध्याकालोऽभ्यवर्तत ॥ ७० ॥
उपास्य पश्चिमां सन्ध्यां सह भ्रात्रा यथाविधि ॥ प्रविवेशाश्रमपदं तमृषिं सो[2]ऽभ्यवादयत् ॥ ७१ ॥
सम्यक्प्र[3]तिगृहीतश्च मुनिना तेन राघवः ॥ न्यवसत्तां निशामेकां प्राश्य मूलफलानि च ॥ ७२ ॥
तस्यां रात्र्यां व्य[4]तीतायां विमले सू[5]र्यमण्डले ॥ भ्रातरं तमगस्त्यस्य ह्या[6]मन्त्रयत राघवः ॥ ७३ ॥
अभिवादये त्वां भगवन्सुखमध्युषितो निशाम् ॥ आ[7]मन्त्रये त्वां गच्छामि गुरुं ते द्रष्टुमग्रजम् ७४।
गम्यतामिति तेनोक्तो जगाम रघुनन्दनः ॥ यथोद्दिष्टेन मार्गेण वनं तच्चावलोकयन् ॥ ७५ ॥
नि[8]वारान्पनसांस्तालांस्तिमिशान्वञ्जुलान्धवान् ॥ चि[9]रिबिल्वान्मधूकांश्च बि[10]ल्वानपि च तिन्दुकान् ७६।
पुष्पितान्पुष्पिताग्राभिर्ल[11]ताभिरनुवेष्टितान् ॥ ददर्श रामः शतशस्तत्र कान्तारपादपान् ॥ ७७ ॥
हस्तिहस्तैर्विमृदितान्वानरैरुपशोभितान् ॥ मत्तैः शकुनिसंघैश्च श[12]तशश्च प्रणादितान् ॥ ७८ ॥
ततोऽब्रवीत्समीपस्थं रामो राजीवलोचनः ॥ पृष्ठतोऽनुगतं वीरं लक्ष्मणं लक्ष्मिवर्धनम् ॥ ७९ ॥
स्निग्धपत्रा यथा वृक्षा यथा क्षान्ता मृ[13]गद्विजाः ॥ आश्रमो नातिदूरस्थो महर्षेर्भावितात्मनः ॥८०॥
अगस्त्य इति विख्यातो लोके स्वेनैव कर्मणा ॥ आश्रमो दृश्यते तस्य परिश्रान्तश्रमापहः ॥ ८१ ॥
प्रा[14]ज्यधूमाकुलवनश्चीरमालापरिष्कृतः ॥ प्रशान्तमृगयूथश्च नानाशकुनि[15]नादितः ॥ ८२ ॥
निगृह्य तरसा मृत्युं लोकानां हितकाम्यया ॥ दक्षिणा दिक्कृता येन शरण्या पुण्यकर्मणा ॥ ८३ ॥

प्रानुकम्पया विप्रेष्वनुकम्पया ॥ ६९—७१ ॥ प्रतिगृहीतः प्रत्युद्गतः। प्राश्य भुक्त्वा ॥ ७२—७३ ॥ अभिवादय इति अत्रवर्णाधिक्यमार्षं ॥ ७४ ॥ यथोद्दिष्टेन सुतीक्ष्णोक्तेन ॥ ७५॥ निवारान् जलकदम्बान् । वञ्जुलान् बकुलान् । “ बकुलोवञ्जुलोशोकः ” इत्यमरः । तिमिशान् नेमिवृक्षान् । धवान् चिरिबिल्वान् नक्तमालान् । “ करञ्जः स्यान्नक्तमालः प्रकीर्यश्चिरिबिल्वकः ” इति वैजयन्ती । मधूकान् मधुद्रुमाख्यवृक्षान् । तिन्दुकान् स्फूर्जकाख्यान्वृक्षान् ॥७६—७९ ॥ स्निग्धपत्राः आश्रमवासिभिः रक्षितत्वेन सरसपत्राः । क्षान्ताः शान्ताः । यथा येन प्रकारेण । तथा तेन प्रकारेण । आश्रमो नातिदूरस्थ इति मन्ये ॥ ८० ॥ स्वेन कर्मणा विन्ध्यस्तम्भनरूपेण । अगस्त्य- इति विख्यातः अगं स्तम्भयतीत्यगस्त्य इति व्युत्पत्तेः । परिश्रान्तानां श्रममपहन्तीति परिश्रान्तश्रमापहः । प्राज्यैर्बहुभिर्धूमैराकुलं वनं यस्य सः ॥ ८१—८३ ॥

इत्यन्तेन प्रधर्षणारंभस्येल्वलकृतस्य तेनागस्त्येन तद्धननस्यचानुक्तेर्विरोधइतिचेत्सत्यं । कल्पभेदेन समाधिसंभवात् । यद्वा अनलकल्पेनस्वेनचक्षुषा दग्धइव सन्निल्वलस्तंमुनिमभ्यद्रवत् । अनन्तरं तेनदीप्तेनतेजसामुनिनागस्त्येन निधनं भारतरीत्या धनाभावरूपंनिधनंगतइत्यर्थैककण्ठ्यंज्ञेयम् ॥ ६८ ॥ **ती०** प्रतिगृहीतः प्रतिपूजितः ॥ ७२ ॥ **स०** लक्ष्मिवर्धनं इकारान्तलक्ष्मीशब्दोप्यस्तीतिभावः । **शि०** लक्ष्मिणां सुचिह्नानां वर्धनं वृद्धिर्यस्मिंस्तं ॥ ७९ ॥ **शि०** अगइतिस्त्यः विन्ध्याद्रौशब्दः नामेतिया-

[पा०] १ ख. ग. कर्मैतत्. २ क. ख. ङ.—ट. चाभ्यवादयत्. ३ ङ. झ. ट. प्रतिगृहीतस्तु. क. च. छ. ज. ञ. प्रतिगृहीतस्स. ख. ग. परिगृहीतस्तु. ४ ख. ङ.—ञ. व्यतीतायामुदिते. ५ ङ. झ. ट. रविमण्डले. ६. क.—घ. च. छ. झ. ट. आमन्त्रयत. ७ क. च. छ. ज. आमन्त्रयित्वा. ८ क. च. छ. ज. ञ. निवारांस्तिमिशांश्चैवपनसान्वञ्जुलान्धवान्. ख. ग. ङ. ट. निवारान्पनसान्सालान्वञ्जुलांस्तिलशांस्तथा. झ. निवारान्पनसान्सालान्वञ्जुलांस्तिनिशांस्तथा. ९ घ. च. चीरबिल्वान्. १० क. प्रकीर्यानपिकिंतुकान्. च. छ. ज. ञ. प्रकीर्यानपि. झ. ट. बिल्वानथच. ११ क. च. छ. ज. ञ. र्लताभिःपरिवेष्टितान्. ङ. झ. ट. र्लताभिरुपशोभितान्. १२ क.—च. झ. ट. शतशःप्रतिनादितान्. छ. ज. ञ. शतशःप्रविनादितान्. १३ ख. मृगाद्विजाः १४ ग. च. छ. ज. ट. आज्य. १५ क. ग. च. छ. ज. ञ. संकुलः.

स्येदमाश्रमपदं प्रभावाद्यस्य राक्षसैः ॥ दिगियं दक्षिणा त्रासाद्दृश्यते नोप[2]भुज्यते ॥ ८४ ॥
दाप्रभृति चाक्रान्ता दिगियं पुण्यकर्मणा ॥ तदाप्रभृति निर्वैराः प्रशान्ता रजनीचराः ॥ ८५ ॥
ाम्ना चेयं भगवतो दक्षिणा दिक्प्रदक्षिणा ॥ प्रथिता त्रिषु लोकेषु दुर्धर्षा क्रूरकर्मभिः ॥ ८६ ॥
ार्गं निरोद्धुं नि[3]रतो भास्करस्याचलोत्तमः ॥ [4]निदेशं पा[5]लयन्यस्य वि[6]न्ध्यः शैलो न वर्धते ॥८७॥
यं दीर्घायुषस्तस्य लोके वि[7]श्रुतकर्मणः ॥ अगस्त्यस्याश्रमः श्रीमान्विनीतज[8]नसेवितः ॥ ८८ ॥
ष लोकार्चितः साधुर्हिते नित्यर[9]तः सताम् ॥ अस्मा[10]नभिगतानेष श्रेयसा योजयिष्यति ॥ ८९ ॥
ाराधयिष्याम्यत्राहमगस्त्यं तं महामुनिम् ॥ शेषं च वनवासस्य सौम्य वत्स्याम्यहं [11][12]प्रभो ॥ ९० ॥
ात्र देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ अगस्त्यं नि[13]यताहारं सततं पर्युपासते ॥ ९१ ॥
ात्र जीवेन्मृषावादी क्रूरो वा यदि वा शठः ॥ नृशंसः [14]कामवृत्तो वा मुनिरेष तथाविधः ॥ ९२ ॥
त्र दे[15]वाश्च यक्षाश्च नागाश्च पतगैः सह ॥ वसन्ति नियताहारा धर्ममाराधयिष्णवः ॥ ९३ ॥
त्र सिद्धा महात्मानो विमानैः सूर्यसंनिभैः ॥ [16]त्यक्तदेहा नवैर्देहैः स्वर्याताः परमर्षयः ॥ ९४ ॥
क्षत्वममरत्वं च राज्यानि विविधानि च ॥ अत्र देवाः प्रयच्छन्ति भूतैराराधिताः शु[17]भैः ॥ ९५ ॥

ासात् दृश्यते न तु प्राचीनकाल इवोपभुज्यते ॥८४॥ दाप्रभृतीति अगस्त्यागमनात्प्रभृति । दिक् अगस्त्या- श्रमप्रदेशः । अन्यथा पूर्वोक्तविराधादिराक्षसोपद्रवो विरुध्येत । यद्वा दिक् सर्वापि । विराधादयोप्यगस्त्या- गमनप्रभृति मन्दोपद्रवाएव । अशुचितादशायामेव मुनिमांसभक्षणं । निर्वैराः वैरप्रवर्तनाशक्ताः । प्रशान्ताः शान्तवद्वर्तमानाः । अतएवेयं दक्षिणा दिक् नाम्ना भगवतोऽगस्त्यस्य दिगिति प्रसिद्धेत्युच्यते ॥ ८५—८६ ॥ निरतः उद्युक्तः । वर्धमान इत्यर्थः । न वर्धते अद्यापीति शेषः ॥ ८७—८८ ॥ सतां हिते साधुः नित्यरतश्च ॥ ८९ ॥ प्रभो इत्युक्तिः लक्ष्मण-

स्यापि राजपुत्रत्वात् । प्रभोरिति पाठे प्रभोरगस्त्यस्य । नियोगादिति शेषः ॥ ९० ॥ देवाः वक्ष्यमाणाः पूज्यव्यतिरिक्ताः ॥ ९१ ॥ क्रूरः निर्दयः । "क्रूरौ कठिणनिर्दयौ" इत्यमरः । शठः गूढविप्रियकृत् । नृशंसः घातुकः । कामेन वृत्तं यस्य सः कामवृत्तः स्वैरवृत्तः । एषमुनिः अगस्त्यः । तथाविधः मृषावा- द्याद्यनर्हः ॥ ९२ ॥ देवाः वक्ष्यमाणब्रह्मादिभिन्नाः । पतगैः गरुडजातिभिः । आराधयिष्णवः आराधय- न्तः । छान्दस इष्णुच् ॥ ९३ ॥ सिद्धाः तपस्सिद्धाः । नवैः दिव्यैः ॥ ९४ ॥ भूतैः प्राणिभिः । देवाः ब्रह्मा- दयः । अगस्त्योपासनकृतनित्यसान्निध्यादितिभावः ।

ात् । यस्मात् ॥ ८१ ॥ **स०** तस्येदमाश्रमपदं दृश्यतइत्यन्वयः ॥ ८४ ॥ सनिर्वैराः एतद्देशस्थितप्राणिषुवैररहिताः ॥ ८५ ॥ **स०** भगवतः अगस्त्यस्यमहिम्ना इयंदिक् क्रूरकर्मभीरक्षोभिर्दुर्धषा । अतोदक्षिणा अत्युदारा इतिहेतोः नाम्ना दक्षिणेति त्रिपुलोकेषु प्रथितेत्यन्वयः ॥ ८६ ॥ **ति०** मेरुस्पर्धयाभास्करमार्गनिरोद्धुं वर्धितुकामोप्यचलोविन्ध्यः तस्यअगस्त्यस्य संदेशं मदागमनपर्यन्तं मावर्धस्वेत्याज्ञां पालयन्न वर्धते । अद्यापीति शेषः । **शि०** इयमत्राख्यायिका । सूर्यमाक्रमितुंवर्धमानोऽगस्त्यशिष्यो- विन्ध्यो गुरूद्देश्यकनित्यसाष्टाङ्गप्रणामसमये देवप्रार्थितागस्त्येन शिष्यद्वारा यावन्मदागमं प्रणमन्भूमावेव पतेत्याज्ञाप्य तदारभ्य स्वयं दक्षिणस्यांदिश्येवातिष्ठदिति ॥ ८७ ॥ **स०** श्रेयसा धनुर्दानादिना ॥ **ति०** श्रेयसायोजयिष्यति इन्द्रोदीरितं शरभङ्गोक्तमर्थं मनसिनिधायेदमुक्तमित्यनुसंधेयं ॥ ८९ ॥ **ति०** प्रभो शुश्रूषणसमर्थेत्यर्थः ॥ **स०** तमगस्त्यं प्रभोइत्यहमाराधयिष्यामीत्यन्वयः ॥ ९० ॥ **ति०** तथाविधः दुर्वृत्तासहिष्णुः ॥ ९२ ॥ **ति०** अत्र आश्रमे । भूतैःप्राणिभिः कर्तृभिः । शुभैः सत्कर्मभिः आराधितादेवादयः आश्रममाहात्म्यादल्पकालेनैव राज्यादीनि प्रयच्छन्तीत्यर्थः ॥ ९५ ॥ इत्येकादशःसर्गः ॥ ११ ॥

[**पा०**] १ क. ख. ग. च. छ. ज. ञ. तस्यैतदाश्रम. २ च. छ. ज. नोपयुज्यते. ३ क. ख. घ.—ट. सततं. ४ क. ङ. छ. ट. संदेशं. ५ ग. ङ. झ. ट. पालयंस्तस्य. ख. पालयंस्तत्र. ६ क. ख. घ.—ट. विन्ध्यशैलो. ७ क. प्रथित. ८ क. ङ.—ट. मृगसेवितः. ९ क. च. छ. ज. ञ. चाभिरतः. ख. ङ. झ. ट. निलंरतः. १० च. ज. निद्दागतान्. ग. ङ. झ. ञ. ट. नधिगतान्. ख. नभ्यागतान. ११ क. च. छ. ज. ञ. सुखं. १२ ख. तत्र. १३ ङ. झ. ट. नियताहाराः. १४ ङ. झ. ट. पापवृत्तो. १५ क. देवास्सयक्षाश्च. १६ ङ. च. ज.—ट. त्यक्त्वादेहान्नवैः. १७ घ. शुभाः.

आगताः स्माश्रमपदं सौमित्रे प्रविशाग्रतः ॥ निवेदयेह[1] मां प्राप्तमृषये सीतया[2] सह ॥ ९६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकादशः सर्गः ॥ ११ ॥

द्वादशः सर्गः ॥ १२ ॥

लक्ष्मणेनागस्त्यशिष्यंप्रत्यगस्त्येरामागमननिवेदनचोदना ॥ १ ॥ तेनागस्त्याज्ञयाससीतालक्ष्मणस्यरामस्याश्रमप्रवेशनम् ॥ २ ॥ तत्रब्रह्मादिदेवगणस्थानान्यवलोकयतारामेणशिष्यैःसहाभ्यागच्छतोऽगस्त्यस्यपादाभिवादनम् ॥ ३ ॥ अगस्त्येनश्रीरामायसादरमातिथ्यकरणपूर्वकमिन्द्रदत्तवैष्णवधनुराद्यायुधदानम् ॥ ४ ॥ अगस्त्येनरामंप्रतिभृगुशापेनमरुभूतस्यदण्डकारण्यस्यपुनःस्वप्रभावेणयथापुरंतरुनिकरसरित्सरस्समुदयरूपनिजरूपप्राप्तिकथनपूर्वकंरक्षश्शिक्षणेनमुनिकुलरक्षणप्रार्थना ॥ ५ ॥

स प्रविश्याश्रमपदं लक्ष्मणो राघवानुजः ॥ अगस्त्यशिष्यमासाद्य वाक्यमेतदुवाच ह ॥ १ ॥
राजा दशरथो नाम ज्येष्ठस्तस्य सुतो बली ॥ रामः प्राप्तो मुनिं द्रष्टुं भार्यया[3] सह सीतया ॥ २ ॥
लक्ष्मणो नाम तस्याहं भ्राता त्ववरजो हितः ॥ अनुकूलश्च[4] भक्तश्च यदि ते श्रोत्रमागतः ॥ ३ ॥
ते वयं वनमत्युग्रं[5] प्रविष्टाः पितृशासनात् ॥ द्रष्टुमिच्छामहे सर्वे भगवन्तं निवेद्यताम् ॥ ४ ॥
तस्य तद्वचनं श्रुत्वा लक्ष्मणस्य तपोधनः ॥ तथेत्युक्त्वाऽग्निशरणं प्रविवेश निवेदितुम् ॥ ५ ॥
स प्रविश्य मुनिश्रेष्ठं[6] तपसा दुष्प्रधर्षणम्[7] ॥ कृताञ्जलिरुवाचेदं रामागमनमञ्जसा[8] ॥
यथोक्तं लक्ष्मणेनैव शिष्योऽगस्त्यस्य संमतः ॥ ६ ॥
पुत्रौ[9] दशरथस्येमौ रामो[10] लक्ष्मण एव च ॥ प्रविष्टावाश्रमपदं[11] सीतया सह भार्यया ॥ ७ ॥
द्रष्टुं भवन्तमायातौ[12] शुश्रूषार्थमरिंदमौ[13] ॥ यदत्रानन्तरं तत्त्वमाज्ञापयितुमर्हसि ॥ ८ ॥
ततः शिष्यादुपश्रुत्य प्राप्तं रामं सलक्ष्मणम् ॥ वैदेहीं च महाभागामिदं वचनमब्रवीत् ॥ ९ ॥

शुभैः सत्कर्मनिरतैः ॥ ९५ ॥ सीतया सह प्राप्तमित्यन्वयः । अनेन रावणवधोद्युक्तत्वं द्योतयति ॥९६॥ अत्र चतुर्नवतिः श्लोकाः ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकादशः सर्गः ॥ ११ ॥

रुद्रस्यापूज्यत्वमाह—स प्रविश्येत्यादि ॥ १—२॥ हितः हितकारी । अनुकूलः प्रियकरः । प्रियहितकरत्वे हेतुः—भक्तइति । भक्तः प्रीतिमान् । यदीति संभावनायां । अहं रामश्च ते श्रुतौ भवेवेत्यर्थः । अग्रजत्वादिविशेषणानि रामेण तुल्यप्रतिपत्तिवारणाय ॥ ३ ॥ निवेद्यतां अस्मद्दर्शनेच्छेति शेषः । एतद्वाक्यमुवाचेति पूर्वेणान्वयः । तेवयमित्यस्मिन् श्लोके यमिति गायत्र्या अष्टमाक्षरं सप्तसहस्रसंख्याकाः श्लोका गताः ॥ ४ ॥ अग्निशरण अग्निगृहं ॥ ५ ॥ अञ्जसा आशु । यथोक्तमित्यस्य उवाचेत्यनेनान्वयः । संमतः शिष्येषु मान्यत्वेन संमतः ॥ ६—७ ॥ शुश्रूषार्थं सेवार्थं चेत्यर्थः । अत्र अस्मिन् रामे विषये । अनन्तरं तदागमनानन्तरं । यद्वक्तव्यं तत्त्वं तस्यभावं प्रकारं आज्ञा-

---

ती० हितः शुभोदर्ककारी । अनुकूलः तदिच्छाकरणशीलः । भक्तः पूज्यविषयकानुरागो भक्तिस्तद्वान् ॥१॥ ती० ततइति । प्रातीतिकार्थस्स्पष्टः । वस्तुतस्तु अस्मत्कुलदैवतं सीतालक्ष्मणोपेतश्रीराम आगतइति शिष्यादुपश्रुत्य स्वयं श्रवणानन्दमनुभूय

[पा०] १ क. घ. च ज. निवेदयस्व. २ ख. ङ. च. ज.—ट. सहसीतया. ३ क. च. ञ. सीतयासहभार्यया. ४ क. च. ज. ञ. अनुरक्तश्च. ५ घ. मव्यग्रं. ६ ग. मुनिंश्रेष्ठं. ७ क. च. ज. ञ. द्योतितप्रभं. ८ क. च. छ. ज. वचनंव्यक्तयागिरा. ९ क. च. छ. ज. ञ. पुत्रोदशरथस्यासौ. १० क. च. छ. ज. ञ. रामोनाममहायशः. ख. भ्रतारौरामलक्ष्मणौ. ११ क. च. छ. ज. ञ. सहभ्रात्राश्रम. १२ क. च. छ. ज. ञ. मायातो. १३ क. च. छ. ज. ञ. मरिंदमः.

दिष्ट्या रामश्चिर[1]स्याद्य द्रष्टुं मां स[2]मुपागतः ॥ मनसा काङ्क्षितं ह्यस्य मयाऽप्यागमनं प्रति ॥ १० ॥
गम्यतां सत्कृतो रामः स[3]भार्यः सहलक्ष्मणः ॥ प्रवेश्यतां समीपं मे किं[4] चासौ न प्रवेशितः ॥११॥
एवमुक्तस्तु मुनिना धर्मज्ञेन महात्मना ॥ अभिवाद्याब्रवीच्छिष्यस्तथेति नियताञ्जलिः ॥ १२ ॥
त[5]तो निष्क्रम्य संभ्रान्तः शिष्यो लक्ष्मणमब्रवीत् ॥ क्वा[6]सौ रामो मुनिं द्रष्टुमेतु प्रविशतु स्वयम् ॥१३॥
ततो गत्वाऽऽश्रम[7]द्वारं शिष्येण सह लक्ष्मणः ॥ दर्शयामास काकुत्स्थं सीतां च जनकात्मजाम् ॥१४॥
[8]तं शिष्यः प्रश्रि[9]तो वाक्यमगस्त्यवचनं ब्रुवन् ॥ प्रावेशयद्यथान्यायं सत्कारार्हं सुसत्कृतम् ॥ १५॥
प्रविवेश ततो रामः सीतया सह लक्ष्मणः ॥ प्रशान्तहरिणाकीर्णमाश्रमं ह्यवलोकयन् ॥ १६ ॥
[10]स तत्र ब्रह्मणः स्थानमग्नेः स्था[11]नं तथैव च ॥ वि[12]ष्णोः स्थानं महेन्द्रस्य स्थानं चैव विवस्वतः ॥१७॥
सोमस्थानं [13]भगस्थानं स्था[14]नं कौबेरमेव च ॥ धातुर्विधातुः स्था[15]ने च वायोः स्थानं तथैव च ॥१८॥
[16]नागराजस्य च स्थानमनन्तस्य महात्मनः ॥ स्थानं तथैव गायत्र्या वसूनां स्थानमेव च ॥ १९ ॥
स्थानं च पाशहस्तस्य वरुणस्य महात्मनः ॥ कार्तिकेयस्य च स्थानं धर्मस्थानं च पश्यति ॥ २० ॥

पयितुमर्हसि ॥ ८—९॥ दिष्ट्या यदृच्छया। चिरस्य चिरात् प्रतिकाङ्क्षितमित्यन्वयः । प्रतिर्वीप्सायां । सत्कृतः सत्कारार्हः । किंचासौ न प्रवेशितः—कुतो विलम्बितइत्यर्थः ॥ १०—११॥ अभिवाद्येति । विलम्बकरणापचारनिवृत्त्यर्थं वन्दनं । अतएव संभ्रान्त इति वक्ष्यति ॥ १२—१४ ॥ अगस्त्येनोच्यत इत्यगस्त्यवचनं अगस्त्योक्तमित्यर्थः । सुसत्कृतं सविनयवाक्येनबहुमतं ॥ १५ ॥ आश्रमं मुनिगृहं ॥ १६ ॥ अयं तत्र देवपूजागृहाण्यपश्यदित्याह—स तत्रेत्यादि। तत्र अगस्त्यगृहे। ब्रह्मणः चतुर्मुखस्य। अग्नेः पावकस्य। तथैव चेति निपातसमुदायस्समुच्चये ॥ १७ ॥ भगो देवताविशेषः ॥१८—१९॥ पाशहस्तस्येत्यादिविशेषणानि तत्र मुनेरगस्त्यस्य भक्तिविशेषद्योतनार्थं । इमे ब्रह्मादयः पूर्वसर्गे फलप्रदत्वेनोक्ताः । अन्ये अगस्त्योपासकत्वेनोक्ताः । एते ब्रह्माग्निविष्णुमहेन्द्रविवस्वत्सोमभगकुबेरधातृविधातृवाय्वनन्तगायत्रीवसुवरुणकार्तिकेयधर्माख्याः सप्तदशदेवाः । " यो वै सप्तदशं " इत्यनुवाकोक्तसप्तदशाक्षरदेवताः यायजूकेन मुनिना पूजार्थं प्रतिष्ठिता इति बोध्यं । अत्र पूज्यदैवतेषु रुद्रस्यानुपादानादपूज्यत्वमुक्तम् । अधुना जनैः कैश्चित्पूज्यमानता तु तामसशास्त्रानुरोधेनेति बोध्यम् । ननु विष्णोः स्थानं महेशस्येति पाठात् स्थानानुक्त्यसंभव इति चेत् तदापूर्वं रामेण " अगस्त्यं नियताहारं सततं पर्युपासते " इत्युक्तावपि स्थाननिर्देशे

पश्चादब्रवीदित्यर्थः ॥२॥ **ती०** वस्तुतस्तु मयापि अन्तरङ्गभूतया लक्ष्म्यापि। यस्यास्य विष्णोः। "अकारोब्रह्मविष्ण्वीशेषु" इतिनिघण्टुः। आगमनं ज्ञानं। "सर्वेगत्यर्था ज्ञानार्था इतिवचनात्। मनसा काङ्क्षितंहि काङ्क्षितंखलु । "दृश्यतेत्वग्र्यया बुद्ध्यासूक्ष्मयासूक्ष्मदर्शिभिः" इतिश्रुतेः। सएव सर्वलोकैकशरण्यश्श्रीरामः भीषणामयपीडितस्यभिषगिव चिरस्य चिरकालस्य अद्य द्रष्टुं मांप्रति मामुद्दिश्य दिष्ट्या मद्भाग्यवशेन समुपागतः ममपुरतआविर्भूतइत्यहो ममभाग्यं किंवर्णनीयमित्यर्थः। एतदात्मगतं ॥ **ति०** किंच । अन्तर्भावितण्यर्थो दृशिः । मामात्मानं दर्शयितुं यद्वनेवसतः चिरस्यचिरकालस्य गमनेप्यागतः तद्दिष्ट्या मद्भाग्येन । उद्बुद्धेनेत्यर्थः । **स०** चिरस्यबहुकालक्षेपंकृत्वा । चिरमस्यति । असुक्षेपणेण्यत् । संज्ञापूर्वकत्वाद्वृद्ध्यभावः शकंध्वादित्वात्पररूपं। "चिरस्याद्याश्चिरार्थकाः" इत्यमरः ॥ १० ॥ **ति०** अग्निरत्ररुद्रः । **शि०** पश्यति अपश्यत्। तत्राग्निशब्देन शंभुरुच्यते । अतएव ब्रह्मविष्णुवाचकशब्दयोरन्तरापाठः ॥ १७ ॥ **ति०** भगः स्थूलमण्डलाभिमानी। **कतक०** धाता कार्यप्रजापतिः । विधाताविश्वकर्मा ॥ **स०** धातुर्विधातुः तन्नामसूर्ययोः पृथक्पृथग्विद्यमानंस्थानं ॥ १८॥ **ति०** गायत्रीति सरस्वतीसावित्र्योरप्युपलक्षणं ॥ १९ ॥ **ति०** एतेन

[**पा०**] १ ग. चिरादद्य. २ ग. समुपस्थितः. ३ क. सहभार्यस्सलक्ष्मणः. ४ छ. झ. किमसौ. ङ. ट. किमयं. ५ ङ. झ. ट. तदा. ६ ङ. झ. ट. कोसौ. ७ क. ङ.—ट. पदं. ८ क. ख. सशिष्यः. ९ ग. ङ.—ट. प्रथितं. १० क. ख. ङ.—ज. तत्रतु. ११ क. स्थानंचपश्यति. १२ क. ग. विष्णुस्थानं. १३ घ. शिवस्थानं. १४ च. छ. ज. कौबेरंस्थानमेव. १५ क. ग. ङ.—ट. स्थानंच. १६ नागराजस्यचेत्याद्यर्धत्रयं क. ख. ग. ङ.—ट. पुस्तकेषु स्थानंचपाशहस्तस्य. स्थानंतथैवगायत्र्याः. स्थानंचनागराजस्य. इतिव्युत्क्रमेणदृश्यते. क. च. छ. ज. ट. स्थानंचनागराजस्यगरुडस्यतथैवच. ङ. झ. ञ. स्थानंचनागराजस्यगरुडस्थानमेवच. ख. ग. स्थानंचनागराजस्यवासुकेःसुमहात्मनः.

ततः शिष्यैः परिवृतो मुनिरप्यभिनिष्पतत् ॥ तं ददर्शाग्रतो रामो मुनीनां [1]दीप्ततेजसाम् ॥ २१ ॥
अब्रवीद्वचनं [2]वीरो लक्ष्मणं लक्ष्मिवर्धनम् ॥ [3]एष लक्ष्मण निष्क्रामत्यगस्त्यो [4]भगवानृषिः ॥
औदार्येणावगच्छामि [5]निधानं तपसामिमम् ॥ २२ ॥
एवमुक्त्वा महाबाहुरगस्त्यं सूर्यवर्चसम् ॥ [6]जग्राह परमप्रीतस्तस्य पादौ परंतपः ॥ २३ ॥
अभिवाद्य तु धर्मात्मा तस्थौ रामः कृताञ्जलिः॥सीतया सह वैदेह्या तदा रामः सलक्ष्मणः ॥२४॥
[7]प्रतिजग्राह काकुत्स्थमर्चयित्वाऽऽसनोदकैः ॥ [8]कुशलप्रश्नमुक्त्वा च [9]आस्यतामिति [10][11]चाब्रवीत् ॥२५॥
अग्निं हुत्वा प्रदायार्घ्यमतिथीन्प्रतिपूज्य च ॥ वानप्रस्थेन धर्मेण स तेषां भोजनं ददौ ॥ २६ ॥
प्रथमं चोपविश्याथ धर्मज्ञो मुनिपुङ्गवः ॥ उवाच राममासीनं प्राञ्जलिं धर्मकोविदम् ॥ २७ ॥
[12]अग्निं हुत्वा प्रदायार्घ्य[13]मतिथिं प्रतिपूजयेत् ॥ अन्यथा खलु काकुत्स्थ तपस्वी समुदाचरन् ॥
दुःसाक्षीव परे लोके स्वानि मांसानि भक्षयेत् ॥ २८ ॥
राजा सर्वस्य लोकस्य धर्मचारी महारथः ॥ पूजनीयश्च मान्यश्च भवान्प्राप्तः प्रियातिथिः ॥ २९ ॥

उपास्योपासकयोरुभयोरपि निर्देशो नविरुध्यते । यद्वा उपासनं समीपावस्थानं नत्वाराधनं । धर्ममाराधयिष्णव इत्युक्तेः । धर्मस्याराधनं परिपालनमेव ॥ २० ॥ अभिनिष्पतत् अभ्युत्थानं कृतवान् अडभावआर्षः । मुनीनामग्रतः स्थितमिति शेषः ॥ २१ ॥ औदार्येण तेजोविशेषरूपौन्नत्येन । इममवगच्छामि अगस्त्यत्वेनेति शेषः । इति वचनमब्रवीदित्यन्वयः ॥ २२ ॥ अगस्त्यं उद्दिश्येति शेषः ॥ २३ ॥ रामः अभिवाद्य रामस्तस्थावित्यन्वयः ॥ २४ ॥ प्रतिजग्राह अतिथित्वेनेति शेषः । उदकानि पाद्यानि ॥ २५ ॥ तस्मिन्नासीने अग्निं हुत्वा वैश्वदेवं कृत्वा । तेभ्यः अर्घ्यं दत्त्वा अतिथीन् तान् प्रतिपूज्य आचमनीयपुष्पादिभिः पूजयित्वा । वानप्रस्थेन धर्मेण सिद्धं भोजनं कन्दमूलादिकं ददौ ॥ २६ ॥ स्वयं प्रथममुपविश्य आसीनं राममुवाच ॥ २७ ॥ अयं रामव्याजेन सीतां प्रत्युपदेशः । धर्मकोविदमित्युक्तस्य रामस्य हि नेदं वक्तव्यं । अतएव सीता रावणं सत्करिष्यति । अन्यथा समुदाचरन् होममतिथिसत्कारं चकुर्वन्नित्यर्थः । दुःसाक्षी कूटसाक्षी ॥ २८ ॥ भवांस्तु विशिष्टातिथिरित्याह—राजेति । राजपक्षे स्पष्टोर्थः । तत्त्वार्थस्तु सर्वस्य लोकस्य भुवनत्रयस्य। राजा स्वामी। "पतिं विश्वस्य" इति श्रुतेः । अतएव लोकस्य पूजनीयः कर्मभिराराध्यः । "इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः" इति श्रुतेः । मान्यः मुक्तये योगिभिश्चिन्त्यः । प्रियातिथिः लौकिकातिथिभ्यो विलक्ष-

---

पूजास्थाने एतावतांदेवानां पूजाऽऽवश्यकीतिसूचितं ॥ २० ॥ **ती०** योगरूढिभेदेन रामशब्दस्यापौनरुक्त्यं ॥ **स०** स-आरामः उपवनंयस्यसः तदारामः । अतो नपुनरुक्तिः । **शि०** आरामः सर्वाभिरामदाता । रामः ॥ २४ ॥ **ति०** आसीनं पश्चादासीनमित्यर्थइतिप्राञ्चः । ममतुभाति प्रथममिति भोजनं ददावित्यनेनान्वेति । अथ उपविश्य । अतिथिपूजाव्यग्रतया तावत्पर्यन्तमनुपवेशनमिति ॥ २७ ॥ **ती०** ननु निरपेक्षेण पूजनीयो न क्षत्रियः । कथं किमर्थं पूजितइत्याशङ्कायां वानप्रस्थधर्मइति मयैवमनुष्ठितं नान्यथेति समाधित्सुराह—**अन्यथेति** । तपस्वी वानप्रस्थः । अन्यथासमुदाचरन् पूज्यपूजातिक्रमंकुर्वन् परेलोके स्वानिमांसानिभक्षयेत् । किंच दुस्साक्षी कूटसाक्ष्यपि परलोके स्वानिमांसानिभक्षयेत् । अतः प्रत्यवायपरिहाराय त्वां पूजयामीत्यर्थः ॥ **स०** ब्राह्मणैः क्षत्रियपूजा न कार्येत्यतो धर्मस्वरूपनिरूपणव्याजेनातिथिमात्रस्य पूज्यत्वं सूचयति—**अन्यथेति** । परेलोके यमलोके ॥२८ ॥ **ती०** वस्तुतस्तु सर्वस्यलोकस्य ब्रह्माण्डस्य राजा प्रभुः । तथापि धर्मचारी लो-

[पा०] १ ङ. झ. ञ. ट. दीप्ततेजसं. २ क. च. ञ. रामो. ग. धीरो. ३ ङ. झ. ट. बहिर्लक्ष्मण. ४ ग. मुनिसत्तमः. ५ च. छ. ज. ञ. तपसोराशिमुत्तमं. क. तपसोराशिमव्ययं. ङ. झ. निधानंतपसामिदं. ट. निदानंतपसामिदं. ख. निधानं तपसामिव. ६ ङ. झ. ट. जग्राहापततस्तस्यपादौचरघुनन्दनः. ७ ग. ङ—ट. प्रतिगृह्यच. क. प्रतिगृह्यतुतंवीरं. ८ ख. कुशलंप्रश्नयित्वा. ९ क. च. छ. ज. मुक्त्वातु. १० क. ख. ग. ङ—ट. आस्यतामिति. ११ ङ—ट. सोब्रवीत्. १२ इदमर्धं क. ख. ग. छ—ट पुस्तकेषुनदृश्यते. १३ थ. मतिथीन्प्रति.

एवमुक्त्वा फलैर्मूलैः [1]पुष्पैरन्यैश्च [2]राघवम् ॥ पूजयित्वा यथाकामं [3]पुनरेव ततोऽब्रवीत् ॥ ३० ॥
इदं दिव्यं महच्चापं हेम[4]रत्नविभूषितम् ॥ वैष्णवं पुरुषव्याघ्र निर्मितं विश्वकर्मणा ॥
अमोघः सूर्यसंकाशो ब्रह्मदत्तः शरोत्तमः ॥ ३१ ॥
दत्तौ मम महेन्द्रेण तूणी [5]चाक्षयसायकौ ॥ संपूर्णौ निशितैर्बाणैर्ज्वलद्भिरिव पावकैः ॥ ३२ ॥
महा[6]रजतकोशोयमसिर्हेमविभूषितः ॥ ३३ ॥
अनेन धनुषा [7]राम हत्वा संख्ये महाऽसुरान् ॥ आजहार श्रियं दीप्तां पुरा विष्णुर्दिवौकसाम् ॥३४
तद्धनुस्तौ च [8]तूणीरौ शरं खड्गं च मानद ॥ जयाय प्रतिगृह्णीष्व वज्रं वज्रधरो यथा ॥ ३५ ॥
एवमुक्त्वा महातेजाः समस्तं तद्वरायुधम् ॥ दत्त्वा रामाय भगवानगस्त्यः पुनरब्रवीत् ॥ ३६ ॥
[[9]सुखं स्वप महाबाहो ससीतः सहलक्ष्मणः ॥ रविरस्तंगतः सौम्य सन्ध्याकालोप्युपागमत् ॥३७॥
एते निशाचरा राम निलीना मृगपक्षिणः ॥ नगाग्रेषु भृशं लीना दृश्यन्ते सुसमाहिताः ॥
नैशेन तमसा व्याप्तमप्रकाशं नभस्स्थलम् ॥ ३८ ॥
एवमुक्तो महाबाहुरगस्त्येन महात्मना ॥ उपास्य पश्चिमां सन्ध्यां रामः सौमित्रिणा सह ॥ ३९ ॥
अभिवाद्य महात्मानमगस्त्यमृषिसत्तमम् ॥ सुष्वाप रजनीमेकां पूजितः परमर्षिणा ॥ ४० ॥
सुखोषितस्तदा रामः सन्ध्यामन्वास्य सानुजः ॥ कृतपूर्वाह्णिकस्तस्थौ स्नात्वा हुतहुताशनः ॥४१॥
लक्ष्मणेन सह भ्रात्रा सीतया च परंतपः ॥ उपागच्छदमेयात्मा अगस्त्यं सूर्यवर्चसम् ॥ ४२ ॥
स दृष्ट्वा राघवं श्रीमानगस्त्यः संयताञ्जलिम् ॥ प्रतिपूज्य यथान्यायमिदं वचनमब्रवीत् ॥ ४३ ॥
कच्चित्सुखा निशा राम व्यतीता रघुनन्दन ॥ तव सभ्रातृभार्यस्य ममाश्रमपदे शुभे ॥ ४४ ॥

णः । एवमुवाचेति पूर्वेणान्वयः ॥ २९ ॥ एवमिति पुनः फलादिदानं सीतायाः ॥ ३० ॥ परशुरामाद्गृहीत्वा वरुणहस्ते दत्तं रामेण तदेववरुणः खरादिवधः सन्निहित इत्यगस्त्यहस्ते निक्षिप्तवानित्यवगम्यते । वैष्णवशब्दप्रत्यभिज्ञानात् । ब्रह्मदत्तः ब्रह्मणा दत्तः । अयमितिशेषः ॥ ३१॥ तूणी इमाविति शेषः ॥३२॥ महारजतं सुवर्णं तन्मयः कोशः खड्गपिधानं यस्य सः महारजतकोशः । बालरामायणे ऐन्द्रं शरासनमिति इन्द्रदत्तत्वोक्तिश्छत्रिन्यायात् ॥ ३३ ॥ धनुषा धनुरादिना ॥ ३४ ॥ शरं खड्गं च वैष्णवाविति शेषः । वज्रं वज्रधरो यथेत्यनेन तावकं त्वमेव गृहाणेत्युक्तं ॥ ३५ ॥ एवमुक्त्वा ततः पुनरेव इत्यब्रवीदित्यन्वयः ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्वादशः सर्गः ॥ १२ ॥

कशिक्षार्थं धर्मांश्चरति आचरतीतितथा। महारथः महान्महात्मा गरुडो रथो यस्य सतथोक्तः । किंच पूजनीयः सत्कर्मभिराराध्यः। मान्यः मुक्तिसिद्धये मन्तव्यश्चेतियोजना । **स०** अतिथिमात्रस्ययदापूज्यता तदा काकथा सर्वोत्तमस्यतवेत्याह—**राजेति ।** प्रियातिथिरिति कर्मधारयो बहुव्रीहिर्वा । बहुव्रीहिपक्षे रामस्यापिप्रियातिथिकत्वंसूचयति ॥ २९ ॥ **कतक०** परशुरामाद्गृहीत्वा वरुणहस्तेदत्तंयद्रामेण तदेव वरुणादादाय महेन्द्रोऽगस्त्ये निक्षिप्तवान्॥ योगेन महेन्द्रपदेन वरुणएवेत्यन्ये ॥ **स०** महत् चापमितिपदद्वयं । इदंच शार्ङ्गमिन्द्रदत्तं । " शार्ङ्गंतदादिपुरुषो निजमाजहार " इत्याचार्योक्तेः । एतदुत्पत्तिप्रकारस्तु " अत्रागमंतेवक्ष्यामि " इत्यारभ्य ' एतत्तेसर्वमाख्यातं ' इत्यन्तेनानुशासनिकेपर्वण्युक्तः । नन्वानुशासनिकेपर्वणि धनुषोवेणुविकृतत्वोक्तेः कथं शृङ्गविकृतत्वाच्छार्ङ्गत्वोक्तिरितिचेत् कण्वशिरस्स्थवल्मीकगवेणुविकृतत्वात्तथा व्यपदेशः । **ति०** ब्रह्मणादत्तो ब्रह्मदत्तः तदास्यश्च ॥ ३१ ॥ तूणीचेति चेन धनुश्शरयोरुभयोरिन्द्रदत्तत्वंगम्यते ॥ ३२ ॥ **स०** दिवौकसांश्रियंसंपदं । **ति०** वज्रं वज्रधरोयथेत्यनेन त्वदीयमेव त्वयास्वीक्रियतइतिध्वनितं ॥३५॥ **ति०** वरायुधं वरस्यविष्णोरायुधंच ॥ ३६ ॥ इतिद्वादशस्सर्गः ॥ १२ ॥

[**पा०**] १ ङ. झ. ट. पुष्पैश्चान्यैश्च. २ ख. पार्थिवं. ३ ततोऽगस्त्यस्तमब्रवीत्. क. छ. ज. ञ. पुनरेवाब्रवीद्वचः. घ. पुनरेवनमब्रवीत्. ४ क. ख. घ. ङ. झ. ञ. ट. वज्र. ५ ङ—ञ. चाक्षय्य. ६ झ. राजत. ७ ग. सौम्य. संख्येहत्वाराम. ८ ङ. छ. झ. ट. तूणींच. ९ इमेसमत्रिंशच्छ्लोकाः क. पुस्तकएवाधिकादृश्यन्ते.

अगस्त्येनैवमुक्तस्तु काकुत्स्थो वाक्यमब्रवीत् ॥ मानिताः स यथान्यायं त्वया पूज्येन पूजिताः ॥ ४५
शयनासनदानेन भोजनाच्छादनैः शुभैः ॥ राज्ञो दशरथस्यैव पुरस्यान्तःपुरे यथा ॥
सुखोषिताः स भगवन्सर्वकामैरुपस्थिताः ॥ ४६ ॥
सुखोपविष्टे रामे तु सहसीते सलक्ष्मणे ॥ स तेन ऋषिसङ्घेन अगस्त्यो वाक्यमब्रवीत् ॥ ४७ ॥
कालोऽयं गतभूयिष्ठो यः कालस्तव राघव ॥ समयो यो नरेन्द्रेण कृतो दशरथेन ते ॥
तीर्णप्रतिज्ञः काकुत्स्थ सुखं राम निवत्स्यसि ॥ ४८ ॥
धन्यस्ते जनको राम स राजा रघुनन्दन ॥ यस्त्वया ज्येष्ठपुत्रेण ययातिरिव तारितः ॥ ४९ ॥
एवमुक्तस्ततो रामः प्रत्युवाच कृताञ्जलिः ॥ प्रीतः प्रीततरं वाक्यं प्रत्युवाच महायशाः ॥ ५० ॥
धन्योस्म्यनुगृहीतोस्मि यस्य मे मुनिपुङ्गव ॥ प्रीयमाणस्तु सुप्रीतो नास्ति धन्यतरो मम ॥ ५१ ॥
मया न तारितो राजा स्वगुणैरेव तारितः ॥ स्वर्गं दशरथः प्राप्तः स्वकृतैः पुण्यकर्मभिः ॥ ५२ ॥
अयं तु देशो निखिलः सर्व एव महातपः ॥ अशरण्यः शरण्योऽभूद्यथैव विनिवेशितः ॥
तथाऽऽख्याह्यर्थतत्वेन परं कौतूहलं मम ॥ ५३ ॥
श्रुत्वा तु वचनं तस्य रामस्य मधुराक्षरम् ॥ प्रत्युवाच ततो राममगस्त्यो भगवानृषिः ॥ ५४ ॥
शृणु राघव तत्वेन देशस्यास्य यथातथम् ॥ ५५ ॥
दण्डकेन परित्यक्तो ह्ययं देशो महात्मना ॥ भार्गवस्य च शापेन निर्मनुष्यमृगोऽभवत् ॥ ५६ ॥
वृक्षगुल्मलताहीनं तापसैरभिवर्जितम् ॥ कान्तारमभवत्तात घोरं परमदारुणम् ॥
योजनार्धसहस्रं तु विन्ध्यपादस्तु दक्षिणः ॥ ५७ ॥
नानुवर्षति पर्जन्यो नानुवाति सुखोऽनिलः ॥ रक्षःप्रतिभयं घोरमासीत्परमदारुणम् ॥ ५८ ॥
बहून्यब्दसहस्राणि ह्येतदासीदमानुषम् ॥ गन्धर्वैर्ऋषिसंघैश्च देवैश्च परिवर्जितम् ॥ ५९ ॥
कस्य चित्त्वथ कालस्य दैवयोगादहं नृप ॥ हिमवच्छिखराद्देशादिह प्राप्तोसि मानद ॥ ६० ॥
ततो मया समाहूतः पर्जन्यो जलदैः सह ॥ स्वच्छन्दवर्षश्च कृतः कंचित्कालमरिन्दम ॥ ६१ ॥
यमस्य चैव चारास्तु बहून्यब्दशतानि वै ॥ तेजसा मृत्युभूताश्च व्याधयश्च निराकृताः ॥ ६२ ॥
हिमवत्पादजा वृक्षाश्चिन्तिता मनसाऽऽगताः ॥ प्रवृत्ताश्च पुनर्नद्यः फुल्लपङ्कजमण्डिताः ॥
तटाकानि च रम्याणि सरितश्च सरांसि च ॥ ६३ ॥
प्रवृद्धवनषण्डं तु स्फीतसस्यवनाकुलम् ॥ अचिरेणाभवद्रम्यं सर्षिसङ्घानुसेवितम् ॥ ६४ ॥
केवलं त्वभिशापेन तस्यैव रघुनन्दन ॥ सोपद्रुतमिवाप्येतद्राक्षसैरुग्रकर्मभिः ॥ ६५ ॥
यदाप्रभृति चापि त्वं चित्रकूटमुपागतः ॥ तदाप्रभृति रक्षांसि विप्रकुर्वन्ति तापसान् ॥
ऋषीणामभयं वीर दातुमर्हसि मानद ॥ ६६ ॥
अस्माद्धि कारणाद्राम दण्डकारण्यवासिनाम् ॥ त्राणार्थमिह संप्राप्तस्त्रातुमर्हति नो भवान् ॥ ६७ ॥
समर्थो ह्यसि काकुत्स्थ त्रैलोक्यस्यापि रक्षणे ॥ किंपुनर्वीर रक्षांसि द्विजमन्युहतानि वै ॥ ६८ ॥
अयमिक्ष्वाकुपुत्रेण दण्डकेन महाबल ॥ देशो निराकृतो राजञ्शापदोषेण राघव ॥ ६९ ॥
दण्डकारण्यमखिलं दर्शनादेव राघव ॥ शापस्यान्ताय काकुत्स्थ प्राप्तस्त्वमरिमर्दन ॥ ७० ॥
स त्वं मन्युपरावृत्तैः पितृभिः संनिराकृतम् ॥ तारय त्वं महाबाहो दण्डकारण्यमद्य वै ॥ ७१ ॥
एवमुक्तस्तदा रामः प्रत्युवाच महामुनिम् ॥ आश्चर्यमिदमाख्यातं देशस्यास्य यथातथम् ॥ ७२ ॥
एवमुक्तस्तु रामेण महर्षिस्त्विदमब्रवीत्] ॥ ७३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे द्वादशस्सर्गः ॥ १२ ॥

त्रयोदशः सर्गः ॥ १३ ॥

अगस्त्येनरामंप्रतिलौकिकनारीजनदुस्स्वभावनिरूपणपूर्वकंसीतायास्तद्वैलक्षण्योक्त्याप्रशंसनम् ॥ १ ॥ रामेणस्वावासो-चितस्थाननिवेदनमर्थितेनागस्त्येनतंप्रतिपञ्चवट्यास्तदर्हत्वोक्तिपूर्वकंलक्षणोक्त्यातन्मार्गनिवेदनम् ॥ २ ॥ रामेणसीतालक्ष्म-णाभ्यांसहसप्रणाममगस्त्यामन्त्रणेनपञ्चवटींप्रतिप्रस्थानम् ॥ ३ ॥

राम प्रीतोस्मि भद्रं ते परितुष्टोस्मि लक्ष्मण ॥ अभिवादयितुं यन्मां प्राप्तौ स्थः सह सीतया ॥ १ ॥
अध्वश्रमेण वां खेदो बाधते प्रचुरश्रमः ॥ व्यक्तमुत्कण्ठते चापि मैथिली जनकात्मजा ॥ २ ॥
एषा हि सुकुमारी च दुःखैश्च न विमानिता ॥ प्राज्यदोषं वनं प्राप्ता भर्तृस्नेहप्रचोदिता ॥ ३ ॥
यथैषा रमते राम इह सीता तथा कुरु ॥ दुष्करं कृतवत्येषा वने त्वामनुगच्छति ॥ ४ ॥
एषा हि प्रकृतिः स्त्रीणामासृष्टे रघुनन्दन ॥ समस्तमनुरज्यन्ति विषमस्थं त्यजन्ति च ॥ ५ ॥
शतह्रदानां लोलत्वं शस्त्राणां तीक्ष्णतां तथा ॥ गरुडानिलयोः शैघ्र्यमनुगच्छन्ति योषितः ॥ ६ ॥
इयं तु भवतो भार्या दोषैरेतैर्विवर्जिता ॥ श्लाघ्या च व्यपदेश्या च यथा देवी ह्यरुन्धती ॥ ७ ॥
अलंकृतोऽयं देशश्च यत्र सौमित्रिणा सह ॥ वैदेह्या चानया राम वत्स्यसि त्वमरिन्दम ॥ ८ ॥

एतादृशस्थले सर्गविच्छित्तिर्नास्तीति प्रतीयते कथा-या अपर्यवसानात् । अथ खरवधायागस्त्येनानुज्ञातस्य रामस्य पञ्चवटीं प्रति प्रयाणं त्रयोदशे—रामेत्यादि । ते इत्यस्य लक्ष्मणेत्यत्राप्यन्वयः ॥ १ ॥ अध्वश्रमेण मार्गायासेन । प्रचुरः श्रमः श्रमजलं येन सः प्रचुर-श्रमः । खेदः वां बाधते । उत्कण्ठते विश्रान्तिमभि-लषति । अनेनास्याःश्रमातिशय उच्यते । जनकात्म-जेति सौकुमार्यातिशयोक्तिः ॥ २ ॥ एषासुकुमार्यपि प्राज्यदोषं बहुदोषं वनं प्राप्ता दुःखैर्न विमानिता न परिभूता च । तत्र हेतुः—भर्तृस्नेहप्रचोदितेति ॥ ३ ॥ इह आश्रमे ॥ ४ ॥ प्रकृतिः स्वभावः । आसृष्टेः जगत्सृष्टिमारभ्य । समस्थं सुस्थं प्रति । विषमस्थं दुर्दशापन्नं ॥ ५ ॥ शतह्रदानां विद्युतां । लोलत्वं चञ्चलत्वं । अनुगच्छन्ति चञ्चलचित्तत्वादिति भावः । शस्त्राणां तीक्ष्णतां क्रौर्यं । अनुगच्छन्ति बहुकालागतस्नेहबन्धच्छेदनादिति भावः । गरुडा-निलयोः शैघ्र्यं अनुगच्छन्ति । अविचारेणकार्य-करणादिति भावः ॥ ६ ॥ एवंलौकिकस्त्रीणां दुष्ट-स्वभावमुक्त्वा सीतायास्तद्वैलक्षण्यमाह—इयंत्विति । न केवलं दोषरहिता श्लाघ्या सद्भिः प्रशंसनीया च । व्यपदेश्या पतिव्रतास्वग्रगण्या । एवं सीताप्रशंसनं वक्ष्यमाणदेवबन्दीमोचनोत्साहनाय ॥ ७ ॥ अयं देशः आश्रमप्रदेशः । यद्वा भूलोकः । वत्स्यसि दश-

ति० लक्ष्मण त्वयिच परितुष्टोस्मि । रामसेवातत्परत्वेन परितोषः । भगवद्विषयप्रीतेरेव भक्तित्वेन त्वद्भक्तोऽहमितिध्वनितं ॥ १ ॥ ती० अध्वश्रमेण मार्गश्रमेण आगमनादिप्रयुक्तस्वेदादिकार्यकृत्खेदः खिन्नता वां बाधतेकिमितिशेषः । प्रचुरश्रमः मैथिली-मितिशेषः । व्यक्तंबाधतइतियोज्यं । अतएवमैथिलीउत्कण्ठते आकाङ्क्षते क्वचिद्विश्रान्तिमितिशेषः । स० अध्वश्रमेण खेदः तज्जन्यं दुःखंवांबाधतइतिव्यक्तं । ममापि प्रचुरश्रमः मैथिलीसंबन्धमात्रात् । हेजनक जगज्जनक राम आत्मनः स्वतएव जायतइत्यात्मजा अयोनिजेतियावत् ॥ २ ॥ स० इहवने रामे त्वयि यथा रमते सीता तथाकुरु । अभिगच्छतीति दीर्घान्तपाठे शत्रन्तं । ह्रस्वा-न्तपाठे तिङ् । आद्यपाठे अभिगच्छतीसती दुष्करंकृतवतीत्यन्वयः । द्वितीये यतोतइतिशेषः ॥ ४ ॥ स० आसृष्टेः ईषज्जन्मनः विवाहरूपद्वितीयजन्मारभ्येतियावत् । " स्त्रीणां प्रदानकमैव यथोपनयनंतथा " इत्याद्युक्तेः । यद्वा आसृष्टे जगति । समस्थं समया संपदा सहितास्समाः तेषुतिष्ठतीति समस्थस्तं संपद्युक्तं । अनुरज्यन्ति अनुरागयुक्ता भवन्ति ॥ विषमस्थं दरिद्रं ॥ ५ ॥ स० " अजाद्यदन्तं " इत्यनिलशब्दएव प्राक्प्रयोज्यः । तथापि गरुडशब्दस्य मुख्यगरुडवाचकत्वादनिलशब्दस्य भूतवायुपर-त्वात्तदपेक्षया गरुडस्याभ्यर्हितत्वात्पूर्वनिपातः । यद्वा " समुद्राभ्राद्धः " इत्यत्रादर्शनात् " अजाद्यदन्तं " इत्यस्यानित्यत्वाद्गरुड-

[पा०] १ ङ. झ. ट. वापि. क. च. छ. ञ. देवी. २ क. ङ. च. छ. झ. ञ. ट. एषाच. ३ च. छ. झ. ञ. खेदैश्च. ४ ग. ङ. झ. ञ. ट. त्वामभि. ख. त्वामिह. ५ ङ. झ. रज्यन्ते. ६ घ. रेतैस्तुवर्जिता. ७ ङ. झ. ट. देवैष्वरुंधती. ग. देवीष्वरुंधती. क. च. छ. ञ. देवीत्वरुंधती.

एवमुक्तः[1] स मुनिना राघवः संयताञ्जलिः ॥ उवाच प्रश्रितं वाक्यमृषिं दीप्तमिवानलम् ॥ ९ ॥
धन्योस्म्यनुगृहीतोस्मि यस्य मे मुनिपुङ्गवः ॥ गुणैः सभ्रातृभार्यस्य वरदः[2] परितुष्यति ॥ १० ॥
किंतु व्यादिश मे देशं सोदकं बहुकाननम् ॥ यत्राश्रमपदं कृत्वा वसेयं निरतः सुखम् ॥ ११ ॥
ततोऽब्रवीन्मुनिश्रेष्ठः श्रुत्वा रामस्य तद्वचः[4] ॥ ध्यात्वा मुहूर्तं धर्मात्मा धीरो[3] धीरतरं वचः ॥ १२ ॥
इतो द्वियोजने तात बहुमूलफलोदकः ॥ देशो बहुमृगः श्रीमान्पञ्चवट्यभिविश्रुतः ॥ १३ ॥
तत्र गत्वाऽऽश्रमपदं कृत्वा सौमित्रिणा सह ॥ [वैदेह्या[5] चानया राम वत्स्यसि त्वमरिंदम ॥]
रंस्यसे[6] त्वं पितुर्वाक्यं यथोक्तमनुपालयन् ॥ १४ ॥
कालोऽयं गतभूयिष्ठो यः कालस्तव राघव ॥ समयो यो नरेन्द्रेण कृतो दशरथेन ते ॥ १५ ॥
तीर्णप्रतिज्ञः काकुत्स्थ सुखं राज्ये निवत्स्यसि ॥ धन्यस्ते जनको राम स राजा रघुनन्दन ॥
यस्त्वया ज्येष्ठपुत्रेण ययातिरिव तारितः ॥ १६ ॥
विदितो ह्येष वृत्तान्तो मम सर्वस्तवानघ[7] ॥ तपसश्च प्रभावेन स्नेहाद्[8]दशरथस्य च ॥ १७ ॥
हृदयस्थश्च ते छन्दो विज्ञातस्तपसा मया ॥ इह वासं प्रतिज्ञाय मया सह तपोवने ॥ १८ ॥
[वसन्तं[9] त्वां जनास्सर्वे ज्ञास्यन्ति रघुनन्दन ॥] अतश्च त्वामहं ब्रूमि गच्छ[10] पञ्चवटीमिति[11] ॥१९॥
स हि रम्यो वनोद्देशो मैथिली तत्र रंस्यते ॥ स देशः श्लाघनीयश्च नातिदूरे च राघव ॥ २० ॥
गोदावर्याः समीपे च मैथिली तत्र रंस्यते ॥ प्राज्यमूलफलश्चैव नानाद्विजगणायुतः[12] ॥
विविक्तश्च महाबाहो पुण्यो रम्यस्तथैव च ॥ २१ ॥

वर्षसहस्राणि दशवर्षशतानि च ॥ ८ ॥ संयताञ्जलिः बद्धाञ्जलिः ॥९—१०॥ निरतः एकाग्रः ॥११॥ ध्यात्वा भाविकार्योचितदेशं ध्यात्वा । धीरः धीमान् निश्चितकार्योचितदेशइत्यर्थः । धीरतरं अतिनिश्चितं वचः ॥ १२ ॥ पञ्चानां वटानां समाहारः पञ्चवटीतद्युक्तदेशो लक्षणया पञ्चवटीत्युच्यते । पञ्चवटीत्यभिविश्रुतो देश इत्यन्वयः ॥ १३—१६॥ मम पितृवाक्यपरिपालनप्रकारःकथं ज्ञात इत्यत्राह—विदित इति । तपःप्रभावेन पर्यालोचनकरणे निमित्तमाह—स्नेहादिति ॥ १७ ॥ छन्दोभिप्रायः । "अभिप्रायवशौ छन्दौ" इत्यमरः । खरादिवधसंकल्प इत्यर्थः । तपसा आलोचनेन तन्मूलत्वद्वचनभङ्ग्याचेत्यर्थः । अलंकृतोयं देशश्चेति ममेह वासे प्रस्तुते किंतु व्यादिश मे देशमिति त्वदुक्त्या चेत्यर्थः । अभिप्रायवेदनकार्यमाह—इहेति । यस्मात्त्वदभिप्रायो मया विदितः अतो हेतोः इह तपोवने मया सह वासं प्रतिज्ञाय अनुज्ञाय तदनन्तरमेव त्वं पञ्चवटीं गच्छेति ब्रूमि ब्रवीमि । अनित्यमागमशासनमिति ईडभावः ॥ १८—१९ ॥ आयुतः व्याप्तः । विविक्तःविजनः ॥२०—

शब्दस्य पूर्वनिपातः ॥ ६ ॥ **ती०** ध्यात्वेति । भाविकार्यनिश्चयाय ध्यानं । ध्यानेनागामिसीतावियोगरूपं किञ्चिद्विक्षेपं दृष्ट्वापि भाविवाञ्छितरावणादिवधसीतावाप्त्यादिकार्यसिद्धिदर्शनेन धीरस्सन् तं वचोऽब्रवीत् । **ति०** ततउवाचेत्यर्थेततोवाचेति संधिरार्षः ॥ १२ ॥ **स०** द्वियोजने द्वैयोजने । द्वितीयाद्विवचनमेतत् । इतः प्राप्तः । योजनद्वयमवधीकृत्य विद्यमानोदेशइतियावत् ॥१३॥ दशरथस्यस्नेहात् कैकेयीविषयदशरथस्नेहात् । तव सर्वोपिवृत्तान्तः प्रवृत्तइति मम तपसःप्रभावेन विदितइत्यन्वयः । यद्वा ममतपसःप्रभावेन । दशरथस्य तवोपरिपरमस्नेहाच्च तवदशरथस्यच वृत्तान्तः पितृवाक्यपरिपालनायवनवासवृत्तान्तः दशरथवृत्तान्तः कैकेयीविषयस्नेहात्त्वत्प्रेरणारूपः विदितइत्यर्थः । **स०** सर्वस्तवेतिव्यस्तं समस्तंच । समस्तत्वपक्षे सर्वैः स्तवो यस्यसः ॥ १७ ॥ **ति०** यदिह वासंप्रतिज्ञाय । "आराधयिष्याम्यत्राहमगस्त्यंतंमहामुनिम् ॥ शेषंचवनवासस्यसौम्यवत्स्याम्यहंप्रभो" इत्यनेन ममसमीपे इह मदाश्रमे वासंप्रतिज्ञाय पुनर्मांप्रति व्यादिशमेवासमित्येतद्वदसि तन्मूलं ते हृदयस्थः छन्दः अभिप्रायः

[**पा०**] १ ग. ङ. झ. ट. मुक्तस्तु. २ ङ. झ. ट. गुरुर्नः. ३ क.—ट. भाषितं. ४ ङ. झ. ट. ततोवाचवचःशुभं. ५ इदमर्धं क. च. छ. पुस्तकेषु दृश्यते. ६ ग. ङ.—ट. रमस्व. ७ ग. घ. तदानघ. ८ घ. हार्दात्. ९ क. ख. ग. च. छ. ज. पुस्तकेषुदृश्यते. १० ग. याहि. ११ ख. पञ्चवटीमितः. १२ च. छ. झ. ञ. गणैर्युतः.

भवानपि सदारश्च[1] शक्तश्च[2] परिरक्षणे ॥ अपि चात्र वसन्राम तापसान्पालयिष्यसि[3] ॥ २२ ॥
एतदालक्ष्यते वीर मधूकानां महद्वनम्[4] ॥ उत्तरेणास्य गन्तव्यं न्यग्रोधमभिगच्छता ॥ २३ ॥
ततः स्थलमुपारुह्य पर्वतस्याविदूरतः ॥ ख्यातः पञ्चवटीत्येव नित्यपुष्पितकाननः ॥ २४ ॥
अगस्त्येनैवमुक्तस्तु रामः सौमित्रिणा सह ॥ सत्कृत्यामन्त्रयामास तमृषिं सत्यवादिनम् ॥ २५ ॥
तौ तु तेनाभ्यनुज्ञातौ कृतपादाभिवन्दनौ ॥ तदाश्रमात्[5]पञ्चवटीं जग्मतुः सह सीतया ॥ २६ ॥
गृहीतचापौ तु नराधिपात्मजौ विषक्ततूणौ[6] समरेष्वकातरौ ॥
यथोपदिष्टेन पथा महर्षिणा प्रजग्मतुः पञ्चवटीं समाहितौ ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

चतुर्दशः सर्गः ॥ १४ ॥

पञ्चवटींगच्छतारामेणमध्येमार्गंदृष्टंजटायुषंप्रतितत्तत्त्वप्रश्नः ॥ १ ॥ तेनरामंप्रतिप्रसङ्गात्सर्वभूतसमुद्भवकथनपूर्वकंस्वस्यारुणात्मजत्वकथनम् ॥ २ ॥ तथास्वस्यदशरथसखत्वकथनेनवनवासेसीतारक्षणादिरूपसाहाय्यकरणोक्तिः ॥ ३ ॥ रामेणसबहुमानंतत्परिष्वङ्गादिपूर्वकंसीतालक्ष्मणाभ्यांतेनचसहपञ्चवटींप्रतिगमनम् ॥ ४ ॥

अथ[7] पञ्चवटीं गच्छन्नन्तरा रघुनन्दनः ॥ आससाद महाकायं गृध्रं भीमपराक्रमम् ॥ १ ॥
तं[8] दृष्ट्वा तौ महाभागौ वटस्थं[9] रामलक्ष्मणौ ॥ मेनाते राक्षसं पक्षिं ब्रुवाणौ को भवानिति ॥ २ ॥
स[10] तौ मधुरया वाचा सौम्यया[11] प्रीणयन्निव ॥ उवाच वत्स मां विद्धि वयस्यं पितुरात्मनः ॥ ३ ॥

---

२१ ॥ परिरक्षणे तापसानामिति शेषः । अत्र पञ्चवट्याश्रमे ॥ २२ ॥ अस्य मधूकवनस्य । न्यग्रोधमभिगच्छता उत्तरेण मार्गेण गन्तव्यं । इदंमधूकवनंगत्वातदुत्तरेण मार्गेण गन्तव्यं स मार्गो न्यग्रोधं प्रापयतीत्यर्थः ॥ २३ ॥ ततो न्यग्रोधात्परतः । स्थलं निर्वणप्रदेशं । किंचिदुन्नतमुपारुह्य गमने कश्चित्पर्वतो दृश्यते । तस्याविदूरतः पञ्चवटीति ख्यातः पञ्चवटत्वेन प्रसिद्धः । नित्यपुष्पितकाननत्वेन ज्ञातुं योग्यश्चाश्रमो दृश्यत इत्यर्थः ॥ २४ ॥ सत्कृत्य प्रदक्षिणनमस्काराभ्यामिति शेषः ॥ २५—२६ ॥ विषक्ततूणौ बद्धतूणीरौ । अकारान्तोपि तूणशब्दः । महर्षिणा यथोपदिष्टेन पथेत्यन्वयः । समाहितौ एकाग्रौ । अस्मिन्सर्गे सार्धसप्तविंशतिः श्लोकाः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रयोदशः सर्गः ॥ १३ ॥

अथ गृध्रराजसमागमश्चतुर्दशे—अथ पञ्चवटीमित्यादि ॥ १ ॥ वटस्थं अगस्त्योपदिष्टवटस्थं । पक्षिमिति च्छान्दसं रूपं । को भवानिति ब्रुवाणौ सन्तौ राक्षसं मेनाते राक्षसं मत्वा को भवानित्यब्रूतामित्यर्थः ॥ २ ॥ सौम्यया सौजन्यपरया । प्रीणयन्निवेति इव-

---

मयाज्ञातः अत्रावस्थाने प्रतिज्ञातराक्षसवधनिर्वाहो नभवति । अत्र राक्षसागमनाभावादित्येवंरूपइतिभावः ॥ १८ ॥ **ति०** भवानपीत्यनेन स्वस्यापि तापसलक्षणेसामर्थ्यबोधनेन स्वाश्रमे रक्षसामपीडा सूचिता ॥ २२ ॥ इतित्रयोदशस्सर्गः ॥ १३ ॥

शि० महाकायं अतएव राक्षसं राक्षसत्वेन प्रतीयमानं तं जटायुषं दृष्ट्वा महाभागौ रामलक्ष्मणौ पक्षिं पक्षिणं मेनाते । को भवानितिविशेषं ब्रुवाणौ अभवतां चेति शेषः ॥ १—२ ॥ **ति०** तं पक्षिणं राक्षसं मेनाते विज्ञातवन्तौ । तं राक्षसं ब्रुवाणौ

[**पा०**] १ ङ. झ. ञ. ट. सदाचारः. २ ग. शक्तोहि. ३ ग. पालयिष्यति. ४ ङ. झ. ट.. महावनं. ५ क. ख. ङ. च. झ. ट. तमाश्रमं पञ्चवटीं. ग. तदाश्रमं. ६ क. ख. ङ.—ट. तूणी. ७ क. ततः. ८ ग. तंदृष्ट्वाथ. ख. दृष्ट्वातुतं. ९ ख. ग. ङ. झ. ञ. ट. वनस्थं. १० झ. ततो. ११ ख. स्निग्धया.

स तं पितृसखं [1]बुद्ध्वा पूजयामास राघवः ॥ स तस्य कुलमव्यग्रमथ पप्रच्छ नाम च ॥ ४ ॥
रामस्य वचनं श्रुत्वा [2]सर्वभूतसमुद्भवम् ॥ आचचक्षे द्विजस्तस्मै [3]कुलमात्मानमेव च ॥ ५ ॥
पूर्वकाले महाबाहो ये प्रजापतयोऽभवन् ॥ तान्मे निगदतः सर्वानादितः शृणु राघव ॥ ६ ॥
कर्दमः प्रथमस्तेषां [4]विश्रुतस्तदनन्तरः ॥ शेषश्च [5]संश्रयश्चैव बहुपुत्रश्च वीर्यवान् ॥ ७ ॥
स्थाणुर्मरीचिरत्रिश्च क्रतुश्चैव महाबलः ॥ पुलस्त्यश्चाङ्गिराश्चैव प्रचेताः पुलहस्तथा ॥ ८ ॥
दक्षो विवस्वानपरोरिष्टनेमिश्च राघव ॥ कश्यपश्च महातेजास्तेषामासीच्च पश्चिमः ॥ ९ ॥
प्रजापतेस्तु दक्षस्य बभूवुरिति [6]विश्रुतम् ॥ षष्टिर्दुहितरो राम यशस्विन्यो महायशः ॥ १० ॥
कश्यपः प्रतिजग्राह तासामष्टौ सुमध्यमाः ॥ अदितिं च दितिं चैव [7]दनुमप्यथ कालिकाम् ॥
ताम्रां क्रोधवशां चैव मनुं चाप्यनलामपि ॥ ११ ॥
तास्तु कन्यास्ततः प्रीतः कश्यपः पुनरब्रवीत् ॥ पुत्रांस्त्रैलोक्यभर्तॄन्वै जनयिष्यथ मत्समान् ॥१२॥
अदितिस्तन्मना राम दितिश्च [8]मनुजर्षभ ॥ [9]कालिका च महाबाहो शेषास्त्वमनसोऽभवन् ॥ १३ ॥
अदित्यां जज्ञिरे देवास्त्रयस्त्रिंशदरिंदम ॥ आदित्या वसवो रुद्रा [10]ह्यश्विनौ [11]च परंतप ॥ १४ ॥
दितिस्त्वजनयत्पुत्रान्दैत्यांस्तात यशस्विनः ॥ तेषामियं वसुमती पुराऽऽसीत्सवनार्णवा ॥ १५ ॥
दनुस्त्वजनयत्पुत्रमश्वग्रीवमरिंदम ॥ नरकं [12]कालकं चैव [13]कालिकाऽपि व्यजायत ॥ १६ ॥
क्रौञ्चीं [14]भासीं तथा श्येनीं धृतराष्ट्रीं तथा शुकीम् ॥ [15]ताम्राऽपि सुषुवे कन्याः पञ्चैता लोकविश्रुताः ॥१७॥
उलूकाञ्जनयत्क्रौञ्ची भासी भासान्व्यजायत ॥ श्येनी श्येनांश्च गृध्रांश्च व्यजायत सुतेजसः ॥१८॥
धृतराष्ट्री तु हंसांश्च कलहंसांश्च सर्वशः ॥ चक्रवाकांश्च भद्रं ते विजज्ञे [16]साऽपि भामिनी ॥ १९ ॥

शब्द एवकारार्थः । आसन इत्यन्ते इतिकरणं ज्ञेयं । आसनः रामस्य ॥ ३–४ ॥ द्विजः आसानं आसनाम ॥ ५ ॥ स्वोत्पत्तिं कथयिष्यन् प्रसङ्गादादौ सर्वभूतसमुद्भवमाह—पूर्वकाल इत्यादि ॥ ६–८ ॥ अरिष्टनेमिरिति कश्यपविशेषणं ॥ ९–१० ॥ तासां दुहितॄणां मध्ये सुमध्यमाः अष्टौ कन्याः प्रतिजग्राह पर्यणैषीत् ॥ ११ ॥ त्रैलोक्यभर्तॄन् त्रैलोक्यरक्षणक्षमान् ॥ १२ ॥ तन्मनाः तद्वचनदत्तावधाना । कालिकाचेत्यत्र चकारेण मनुरप्युच्यते । तन्मना इति दितिकालिकामनूनामपि विशेषणं । चतस्रः प्रौढपुत्रोत्पादनमनसोभवन् चतस्रो नाभवन्नित्यर्थः ॥ १३ ॥ भर्तृवचनादरानादरफलेदर्शयति—अदित्यामित्यादिना । द्वादशादित्याः अष्टौ वसवः एकादश रुद्राः अश्विनौ द्वौ एवं त्रयस्त्रिंशत् ॥ १४ ॥ तेषां दितिपुत्राणां ॥ १५–१७ ॥ ताम्रावंशं प्रपञ्चयति—उलूकानित्यादिना । जनयदित्यत्र आगमशास्त्रस्यानित्यतया नाडागमः ॥ १८ ॥ अप्रसक्तवृत्तान्तानादरप्रतिषेधाय मध्ये भद्रं ते इत्युक्तिः । सा भामिनीति धृतराष्ट्रीवि-

---

परस्परं कथयन्तौ कोभवानिति पप्रच्छतुरितिशेषः ॥ २ ॥ **ति०** पूर्वकाले ब्रह्मणोऽहरादिकाले ॥ ६ ॥ **ति०** कर्दमाद्यास्सप्तदश प्रजापतयो बभूवुः ॥ ७ ॥ **ती०** ननु “ ददौ स दश धर्माय कश्यपाय त्रयोदश ” इतिश्रूयते । अत्र कथमष्टावित्युच्यत इतिचेत्सत्यं । अष्टावित्येकवारमितिवा उपलक्षणमितिवा वैवस्वतमन्वन्तरे एवमितिवा द्रष्टव्यं ॥ **ति०** वक्ष्यमाणसन्तानोपयोगिन्योष्टावितिवा ॥ ११ ॥

[पा०] १ ङ. झ. ट. मत्वा. २ क. ख. ग. ङ.—ट. कुलमात्मानमेव च. ३ क. ख. ग. ङ.—ट. सर्वभूतसमुद्भवं. ४ ग. ङ. ट. विकृतस्तदनन्तरः. छ. झ. ञ. विकृतस्तदनन्तरं. ख. घ. च. छ. ज. विक्रीतस्तदनन्तरं. ५ घ. संश्रितश्चैव. ६ ङ. झ. ट. विश्रुतः. क. नःश्रुताः. ख. ग. च. छ. ज. ञ. नःश्रुतं. ७ ख. घ. ङ. झ. ट. दनूमपि च. ८ क. घ. ङ. च. झ. ञ. ट. दनुरेवच. ख. मनुरेवच. ९ ङ. झ. ट. कालका. १० ङ.—ञ. अश्विनौ. ११ ग. चैवराघव. १२ ग. घ. च. छ. ज. ञ. कालिकं. १३ ङ. झ. ट. कालकापि. १४ क. घ. हंसीं. १५ ङ. छ. झ. ट. नाम्रातु. १६ च. ज. ञ. साच.

शुकी नतां [1]विजज्ञे तु नताया विनता सुता ॥ २० ॥
[2]दश क्रोधवशा राम [3]विजज्ञे ह्यात्मसंभवाः ॥ मृगीं च मृगमन्दां च हरिं भद्रमदामपि ॥ २१ ॥
[4]मातङ्गीमपि शार्दूलीं श्वेतां च [5]सुरभिं तथा ॥ सर्वलक्षणसंपन्नां सुरसां कद्रुकामपि ॥ २२ ॥
अपत्यं तु मृगाः सर्वे मृग्या नरवरोत्तम ॥ ऋक्षाश्च मृगमन्दायाः सृमराश्चमरास्तथा ॥ २३ ॥
[6]हर्यांश्च हरयोपत्यं वानराश्च तरस्विनः ॥ ततस्त्विरावतीं नाम जज्ञे भद्रमदा सुताम् ॥ २४ ॥
तस्यास्त्वैरावतः पुत्रो लोकनाथो महागजः ॥ [7]मातङ्गास्त्वथ मातङ्ग्या अपत्यं मनुजर्षभ ॥ २५ ॥
[8]गोलाङ्गूलांश्च शार्दूली व्याघ्रांश्चाजनयत्सुतान् ॥ [9]दिशागजांश्च काकुत्स्थ [10]श्वेतांऽप्यजनयत्सुतान् ॥२६॥
ततो दुहितरौ राम [11]सुरभिर्द्वे व्यजायत ॥ रोहिणीं नाम भद्रं ते गन्धर्वीं च यशस्विनीम् ॥ २७ ॥
रोहिण्यजनयद्[12]गा वै गन्धर्वी वाजिनः सुतान् ॥ सुरसाऽजनयन्नागान्राम [13]कद्रूस्तु पन्नगान् ॥२८॥
मनुर्मनुष्या[14]ञ्जनयद्राम पुत्रान्यशस्विनः ॥ ब्राह्मणान्क्षत्रियान्वैश्याञ्शूद्रांश्च मनुजर्षभ ॥ २९ ॥
[[15]मुखतो ब्राह्मणा जाता [16]उरसः क्षत्रियास्तथा ॥ [17]ऊरुभ्यां जज्ञिरे वैश्याः पद्भ्यां [18]शूद्रा इति श्रुतिः] ॥३०॥
सर्वान्[19]पुण्यफलान्वृक्षाननलाऽपि व्यजायत ॥ [[20]जज्ञे राम महाबाहो तांश्च सर्वान्महीरुहान्] ॥३१॥
[21]विनता च शुकीपौत्री कद्रूश्च सुरसास्वसा ॥ कद्रू[22]र्नागं सहस्रास्यं विजज्ञे [23]धरणीधरम् ॥ ३२ ॥

शेषणं ॥ १९ ॥ शुकी ताम्रापुत्री । विजज्ञे एवमाद्योन्तर्भावितण्यर्थाः शब्दाः ॥ २० ॥ क्रोधवशा कश्यपपत्नी ॥ २१–२२ ॥ अपत्यमिति जात्येकवचनं । सृमराः स्त्रीणां केशसहायोपयुक्तविनीलदीर्घवालाः मृगाः । चमराः चामरमृगाः ॥ २३ ॥ हरयः सिंहाः ॥ २४ ॥ मातङ्गाः गजाः ॥ २५ ॥ गोलाङ्गूलाः अत्यन्तदीर्घलाङ्गूलाः मर्कटजातिविशेषाः ॥२६–२७॥ रोहिण्यजनयद्गा वै इति पाठः । नागाः बहुफणाः सर्पाः । पन्नगाः केवलसर्पाः ॥ २८ ॥ मनुः कश्यपपत्नी ॥ २९–३० ॥ पुण्यफलान् चारुफलान् । "पुण्यं तु चारु" इत्यमरः । विषवृक्षनिम्बादयोपि महौषधत्वेन पुण्यफला एव । पिण्डफलानितिपाठे पिण्डाकारफलानित्यर्थः । प्रायिकं चैतदिति बोध्यं ॥ ३१ ॥ एवं प्रासङ्गिकं परिसमाप्य स्वकुलमवतारयति—विनता चेति । अत्र कद्र्वा उपादानं स्वप्रतिपक्षकुलत्वेनेति केचित् । वस्तुतस्तु धरणीधरशेषजनकत्वेन स्वकुलतुल्यत्वं वक्तुं "कद्रूर्नागं सहस्रास्यं

ती० येषांश्वेतवालैर्देवराजादिवीजनंक्रियते ते चमरामहिषाकृतयः ॥ २३ ॥ **शि०** लोकनाथः सर्वैरीप्सितः ॥ २५ ॥ **ति०** गोलाङ्गूलाइतिपूर्वान्वयि ॥ २६ ॥ **ति०** गावः गाइत्यर्थः ॥ **ती०** यद्वा मनुष्याकाराः फणालाङ्गूलयुक्ता नागाः । तदन्ये पन्नगाः ॥ **कतक०** निर्विषा नागाः । तदन्ये पन्नगाः । **स०** नागान् फणानुद्धृत्य गन्तॄन् पन्नगान् भूमिमालंब्य गन्तॄन् ॥२८॥ **ति०** उरसः बाहुमध्यात् । क्वचित्तु बाहुभ्यामितिपाठः । **ति०** नागसहस्रं पन्नगसहस्रमित्यर्थः । अतोनोक्तेनविरोधः । **शि०** कद्रूस्तुधरणीधरान्नागसहस्रंविजज्ञे । "सुरसाजनयन्नागान्रामकद्रूश्चपन्नगान्" इतिपूर्वोक्तेन न विरोधः । सुरसाया धरणीधरनागातिरिक्त नागोत्पादकत्वेन विरोधाभावात् ॥ ३२ ॥

[पा०] १ क. च. छ. ज. ञ. विजज्ञेसा. २ ग. ततःक्रोशवशानाम. ३ क. ग. ङ. च. छ. ञ. ट. विजज्ञेप्यात्म. ४ ख. ग. ङ—ट. मातङ्गामथ. ५ ख. ग. झ. सुरभीं. ६ हर्यांश्चहरयोपत्यं. ततस्त्विरावतींनाम. तस्यास्त्वैरावतः पुत्रो. मातङ्गास्त्वथ. गोलाङ्गूलांश्च. इतिपञ्चानामर्धानां. ख.—ट. पुस्तकेषु. ततस्त्विरावतींनाम. तस्यास्त्वैरावतःपुत्रो. हर्यांश्चहरयोपत्यं. गोलाङ्गूलाश्च. मातङ्ग्यास्त्वथ. इतिक्रमभेदोदृश्यते. ७ झ. ञ. ट. मातङ्ग्यास्त्वथमातङ्गाः. ८ क. ख. घ. ङ. च. झ. ञ. गोलाङ्गूलाश्च. ९ ग. छ.—ट. दिशागजंतु. १० ग. छ.—ट. श्वेताव्यजनयत्सुतं. घ. श्वेताचजनयत्सुतं. ११ ख. ग. सुरभीर्द्वे. झ. ञ. सुरभिर्देव्यजायत. १२ क. ङ—ट. द्वावो. १३ घ. ङ. झ. ट. कद्रूश्च. १४ क. ग. छ. झ. ञ. जनयत्काश्यपस्यमहात्मनः. १५ अयं श्लोकः क. घ. ङ. छ. झ. ट. पुस्तकेष्वधिकोदृश्यते. १६ घ. शिरसो. १७ च. छ. ज. ञ. बाहुभ्यां. क. भुजाभ्यां. १८ च. छ. ज. ञ. शूद्राविनिस्सृताः. घ. शूद्राइतिस्मृतिः. १९ घ. च. छ. ज. ञ. निपिण्डफलान्. २० इदमर्धं क. च. छ. ज. पुस्तकेपुदृश्यते. २१ ग. विनतातु. २२ ख. ग. ङ. ज. झ. ट. र्नागसहस्रंतु. क. र्नागसहस्रंच. २३ ङ. झ. ट. धरणीधरान्.

द्वौ पुत्रौ विनतायास्तु गरुडोऽरुण एव च ॥ तस्माज्जातोऽहमरुणात्संपातिस्तु ममाग्रजः ॥
जटायुरिति मां विद्धि श्येनीपुत्रमरिंदम ॥ ३३ ॥
सोहं वाससहायस्ते भविष्यामि यदीच्छसि ॥ इदं दुर्गं हि कान्तारं मृगराक्षससेवितम् ॥
सीतां च तात रक्षिष्ये त्वयि याते सलक्ष्मणे ॥ ३४ ॥
जटायुषं तं प्रतिपूज्य राघवो मुदा परिष्वज्य च सन्नतोऽभवत् ॥
पितुर्हि शुश्राव सखित्वमात्मवाञ्जटायुषा संकथितं पुनः पुनः ॥ ३५ ॥
स तत्र सीतां परिदाय मैथिलीं सहैव तेनातिबलेन पक्षिणा ॥
जगाम तां पञ्चवटीं सलक्ष्मणो रिपून्दिधक्षञ्शलभानिवानलः ॥ ३६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

पञ्चदशः सर्गः ॥ १५ ॥

लक्ष्मणेनरामचोदनयापञ्चवट्यांगोदावरीसमीपेपर्णशालासहिताश्रमनिर्माणम् ॥ १ ॥ पर्णशालारामणीयकावलोकनहृष्टेन रामेणलक्ष्मणश्लाघनपूर्वकंसीतयासहतत्रसुखनिवासः ॥ २ ॥

ततः पञ्चवटीं गत्वा नानाव्यालमृगायुताम् ॥ उवाच भ्रातरं रामः सौमित्रिं दीप्ततेजसम् ॥ १ ॥
आगताः स्म यथोद्दिष्टममुं देशं महर्षिणा ॥ अयं पञ्चवटीदेशः सौम्य पुष्पितपादपः ॥ २ ॥
सर्वतश्चार्यतां दृष्टिः कानने निपुणो ह्यसि ॥ आश्रमः कतरस्मिन्नो देशे भवति संमतः ॥ ३ ॥

विजज्ञे धरणीधरं " इत्युक्तं ॥ ३२ ॥ श्येनीपुत्रमिति इयं च श्येनी पूर्वोक्ताया अन्या । यद्वा कश्यपसुता श्येनीमाता कश्यपस्य पञ्चमोऽरुणः । पिता कश्यपप्रजापतिः कूटस्थ इति स्वीयवंशप्रभावो निवेदितः । विधिनिषेधयोस्तिर्यङ्क्ष्वभावान्न मातृपुत्रयोरेकवंश्यत्वादिदोषः । अयंच सृष्टिक्रमो वैवस्वतमन्वन्तरप्रकारः । अतो न पुराणान्तरविरोधः ॥ ३३ ॥ वाससहायः वासस्थले सीतायाः रक्षणे सहाय इत्यर्थः । यदीच्छसि उक्तार्थमिति शेषः । सहायापेक्षत्वे हेतुमाह —इदमिति । याते मृगयार्थमिति शेषः ॥३४॥ सन्नतौ हेतुमाह—पितुर्हीति ॥ ३५ ॥ सीतां तत्र परिदाय रक्षणाय जटायुवशां कृत्वेत्यर्थः । "यमाय त्वा परिददाम्यसावन्तकाय त्वा परिददाम्यसौ " इत्यादौ तथा प्रयोगात् । शलभानिवानल इत्यनेन लीलया विरोध्युन्मूलनाभिप्रायोवगम्यते ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुर्दशः सर्गः ॥१४॥

अथ शेषभूतस्य शेष्यभिमतकैङ्कर्यमेव कर्तव्यमिति दर्शयति पञ्चदशे—तत इत्यादि । सौमित्रिं रामं दशरथं विद्धीत्यादिसुमित्रानियोगेन रामकैङ्कर्योद्युक्तं । दीप्ततेजसं कैङ्कर्योचितदेशलाभेन संतुष्टमित्यर्थः । व्यालाः दुष्टसर्पाः ॥ १ ॥ यथोद्दिष्टं अगस्त्योक्तक्रमेण आगताः स्म । यं देशं मुनिरब्रवीत् सोयं पञ्चवटीदेश इत्यर्थः ॥ २ ॥ सर्वतः सर्वत्र । कानने त्वया दृष्टिश्चार्यतां सर्वं काननमवलोक्यतामित्यर्थः । हिर्हे-

---

ती० ननु श्येनीशुक्यौ ताम्रायाःपुत्र्यौ श्येनीपुत्रस्तु कथंजटायुः अरुणस्यकथंश्येनी भार्या । उच्यते । श्येनीसंतानपरंपरापतिता काचन श्येनी भविष्यतीत्यदोषः ॥ ३३ ॥ ति० परिधायेतिपाठे परिवार्येत्यर्थः ॥ ३६ ॥ इतिचतुर्दशस्सर्गः ॥ १४ ॥

ति० यं देशं मुनिरब्रवीत् यथोद्दिष्टं तंदेशमागतास्स्मेत्यन्वयः ॥ २ ॥

[पा०] १ क. ख. ग. ङ. छ.—ट. संपातिश्च. २ ख. ग. रामसहायः. ३ क.—ट. जटायुषंतु. ४ क. च. छ. ज. रामः. ख. सीतासहितोरघूत्तमःसहैव. ५ घ. च. छ. ज. ञ. ट. परिधाय. ६ ङ. झ. दिधक्षन्सवनानिपालयन्. ७ ग. सतु. ८ ङ. झ. ट. लक्ष्मणंरामोभ्रातरं. क. च. छ. ज. ञ. भ्रातरंश्रीमान्. ९ घ. च.—ञ. यथोद्दिष्टंयंदेशंमुनिरब्रवीत्. ख. ङ. ट. यथोद्दिष्टमिमं. १० ङ. झ. ञ. ट. पुष्पितकाननः.

रमते यत्र वैदेही त्वमहं चैव लक्ष्मण ॥ तादृशो दृश्यतां देशः सन्निकृष्टजलाशयः ॥ ४ ॥
वनरामण्यकं यत्र [1]स्थलरामण्यकं तथा ॥ सन्निकृष्टं च [2]यत्र स्यात्समित्पुष्पकुशोदकम् ॥ ५ ॥
एवमुक्तस्तु रामेण लक्ष्मणः संयताञ्जलिः ॥ सीतासमक्षं काकुत्स्थमिदं वचनमब्रवीत् ॥ ६ ॥
परवानस्मि काकुत्स्थ त्वयि वर्षशतं स्थिते ॥ स्वयं तु रुचिरे देशे क्रियतामिति मां वद ॥ ७ ॥
सुप्रीतस्तेन वाक्येन लक्ष्मणस्य [3]महात्मनः ॥ [4]विमृशन्रोचयामास देशं सर्वगुणान्वितम् ॥ ८ ॥
स तं रुचिरमाक्रम्य देशमाश्रमकर्मणि ॥ [5]हस्तौ गृहीत्वा हस्तेन रामः सौमित्रिमब्रवीत् ॥ ९ ॥
अयं देशः समः श्रीमान्पुष्पितैस्तरुभिर्वृतः ॥ इहाश्रमपदं [6]सौम्य यथावत्कर्तुमर्हसि ॥ १० ॥
इयमादित्यसंकाशैः पद्मैः सुरभिगन्धिभिः ॥ अदूरे दृश्यते [7]रम्या पद्मिनी [8]पद्मशोभिता ॥ ११ ॥

तौ । असीति त्वमित्यर्थे निपातः । यस्मात्त्वमाश्रमोचितस्थलपरिज्ञाने निपुणः तस्मात्कतरस्मिन्प्रदेशे सर्वेषां नः संमत आश्रमो भवतीति सर्वत्र कानने दृष्टिश्चार्यतामित्यर्थः ॥ ३ ॥ सर्वसंमतत्वमुपपादयति —रमत इति । त्वं रमस इति शेषः । सर्वरतिहेतुमाह —सन्निकृष्टेति ॥ ४ ॥ तदेवविवृणोति—वनेति । रामण्यकं रमणीयता । "योपधाद्गुरूपोत्तमाद्वुञ्" इति वुञ् । ईकारलोपश्छान्दस इति बोध्यं । वनस्य रमणीयता चूतपुन्नागादिमिश्रत्वं । स्थलस्य रमणीयता निम्नोन्नतत्वरहितकोमलसिकतामयत्वं । समिदिति "जातिरप्राणिनां" इत्येकवद्भावः । वनरामण्यकं कुसुमाभिलाषिण्याः सीताया रतिहेतुः । स्थलरामण्यकं सुखशयनादिकाङ्क्षिणो रामस्य । सन्निकृष्टसमिदादिमत्त्वं शुश्रूषमाणस्य सौमित्रेः ॥ ५ ॥ एवं स्वसौख्यमप्युक्तवतो रामस्य वचनमसहमानःसौमित्रिः सीतायास्तव च यः प्रदेशो रमणीयः स एवाज्ञप्तव्यः न तु मे सौकर्यावह इत्याह—एवमिति । सीतासमक्षमिति पुरुषकारसांनिध्योक्तिः ॥ ६ ॥ परवानस्मि ममास्मिता तवास्मितावन्न भवति पारतन्त्र्यैकवेषा ममास्मितेति भावः । काकुत्स्थ इदं च पारतन्त्र्यं न परत्वावस्थायामेव किंत्ववतारावस्थायामपीत्यर्थः । इदं च पारतन्त्र्यं कियत्कालं तत्राह—त्वयि वर्षशतं स्थित इति । शतशब्द आनन्त्यवचनः । सार्वकालिकं मम पारतन्त्र्यमिति भावः । एवं पारतन्त्र्यस्यैव मत्स्वरूपत्वेन तदनुकूलतया त्वया आज्ञापनं कर्तव्यमित्याह—स्वयमिति । स्वयं रुचिरे देशे तवैव रमणीये प्रदेशे । आश्रमः क्रियतामिति मां वद ॥ ७ ॥ विमृशन् पर्यालोचयन् । देशं कंचिदितिशेषः ॥ ८ ॥ आक्रम्य स्वीयत्वेनाभिमन्य । आश्रमकर्मणि आश्रमनिमित्तं । हस्तौ कृताञ्जलिकौ । स्वहस्तेन गृहीत्वाअब्रवीत् । स्नेहातिशयकृतानुभावो हस्तग्रहणं ॥ ९ ॥ समः समतलः । पुष्पितैः संजातपुष्पैः । यथावत् यथायोग्यं ॥ १० ॥ आदित्यसंकाशैः आदित्यविकसितैः तद्वदुज्ज्वलैर्वा । "तुलसीकाननं यत्र यत्र पद्मवनानि च । वसन्ति वैष्णवा यत्र तत्र सन्निहितो हरिः" इत्युक्तरीत्या नित्यसंनिहितहरिभिरिति वा ।

तनि० एवमुक्तः त्वमहंचैव लक्ष्मणेति तवापि सौख्यकारिणि कस्मिंश्चिद्देशे पर्णशालांकुर्विति लक्ष्मणे स्वातन्त्र्यं निक्षिप्य श्रीरामेणोक्ते मयि स्वातन्त्र्यनिक्षेपकालएव रामो मां त्यक्तवान् । एतावत्पर्यन्तं ममाज्ञानेन स्वरूपहानिः कृता । इतःपरं ममस्वरूपं नाम कश्चनपदार्थोस्ति किमित्येवमवस्थान्तरं प्राप्तवाँल्लक्ष्मणः पारतन्त्र्यैकलक्षणः संयताञ्जलिः इदानीं श्रीरामं प्रत्यञ्जलिरेव मद्रक्षकः । अञ्जलेस्सर्वाभिमतसाधनत्वादितिमत्वा कृताञ्जलिस्सन् । सीतासमक्षं पुरुषकारभूतायाःश्रियस्संनिधौ काकुत्स्थं प्रति वचनमब्रवीत् । एतादृशमुक्तवानिति ऋषिःस्तौति । सीतासमक्षमित्यनेनकैङ्कर्यप्रतिसंबन्धित्वं द्वयोत्तरखण्डोक्तं लक्ष्मीविशिष्टस्यैवेति व्यञ्जितं । परवानस्मि ममास्मिता तवास्मितावन्न भवति । तच्च पारतन्त्र्यं न केनाप्याकांक्षितं । अतएव भवता न दीयते । लोकस्य भिन्नरुचित्वात् । मयोऽपेक्षितमेव वर्षशतं । अत्र शतशब्द आनन्त्यवाची । तेन सार्वकालिकत्वोक्तिः । परवानस्मीति सर्वदा परवत्त्वप्रतीत्या सर्वावस्थोक्तिः । क्रियतामिति मां वदेति निरुपपदक्रियापदयोगात्सर्वविधकैङ्कर्योपलक्षणं । एवंकैङ्कर्यरूपफलप्रार्थना द्वयोत्तरखण्डोक्ता व्यञ्जिता ॥ ७ ॥ **ति०** हस्तेन स्वहस्तेन । हस्ते लक्ष्मणस्यहस्ते । लक्ष्मणंगृहीत्वेत्यर्थः

[पा०] १ क.—ट. जलरामण्यकं. २ क. ङ.—ट. संनिकृष्टं च यस्मिंस्तु. ग. संनिकृष्टं वनस्यास्य इध्मपुष्पकुशाजिनं. ३ क.—ट. महाद्युतिः. ४ ग. सद्दर्शरोचयामास. ५ ख. ङ.—झ. ट. हस्ते. क. ञ. हस्तं. ६ ङ. झ. ट. रम्यं. ७ ग. पुण्या. ८ ग. घ. च. छ. ज. ञ. पद्मसेविता.

यथाऽऽख्यातमगस्त्येन मुनिना भावितात्मना ॥ इयं गोदावरी रम्या पुष्पितैस्तरुभिर्वृता ॥
हंसकारण्डवाकीर्णा चक्रवाको[1]पशोभिता ॥ १२ ॥
[2]नातिदूरेण चासन्ने मृगयूथ[3]निपीडिताः ॥ मयूरनादिता रम्याः प्रांशवो [4]बहुकन्दराः ॥
दृश्यन्ते गिरयः [5]सौम्य [6]फुल्लैस्तरुभिरावृताः ॥ १३ ॥
सौवर्णै राजतैस्ताम्रैर्देशे देशे [7]च धातुभिः ॥ गवाक्षिता इवाभान्ति गजाः परमभक्तिभिः ॥ १४ ॥
सालै[8]स्तालैस्तमालैश्च [9]खर्जूरपनसाम्रकैः ॥ निवारैस्तिमिशै[10]श्चैवं पुन्नागैश्चोपशोभिताः ॥ १५ ॥
चूतैरशोकै[11]स्तिलकैश्चम्पकैः केतकैरपि ॥ [12]पुष्पगुल्मलतोपेतैस्तै[13]स्तैस्तरुभिरावृताः ॥ १६ ॥
[14]चन्दनैः स्पन्दनैर्नीपैः पर्णासैर्लि[15]कुचैरपि ॥ धवाश्वकर्णखदिरैः शमीकिंशुकपाटलैः ॥ १७ ॥
इदं पुण्यमिदं [16]मेध्यमिदं बहुमृगद्विजम् ॥ इह वत्स्यामि सौमित्रे सार्धमेतेन पक्षिणा ॥ १८ ॥
एवमुक्तस्तु रामेण लक्ष्मणः परवीरहा ॥ अचिरेणाश्रमं भ्रातुश्चकार सुमहाबलः ॥ १९ ॥
पर्णशालां सुविपुलां तत्र [17]संखातमृत्तिकाम् ॥ सुस्तम्भां मस्करैर्दीर्घैः कृतवंशां सुशोभनाम् ॥ २० ॥

सुरभिगन्धिभिः सौम्यगन्धयुक्तैः । "गन्धस्येत्—" इत्यादिना इकारोन्तादेशः । "सुरभिर्मधुमासे स्याद्वसन्ततावपि त्रिषु । सौम्ये सुगन्धौ स्त्रीधेन्वाम्" इति दर्पणः । "सर्वगन्धः सर्वरसः" इत्युक्तरीत्या सुरभिणा हरिणा गन्धिभिः गन्धवद्भिरिति वा । पद्मिनी गोदावरीसमीपस्था पुष्करिणी । पद्मया शोभिता पद्मशोभिता । "ङ्यापोःसंज्ञाछन्दसोर्बहुलं" इति ह्रस्वः । हरिसांनिध्येन तन्नित्यानपायिन्या श्रिया च युक्तेत्यर्थः । अनेन श्लोकेन वासयोग्यत्वमुक्तं ॥ ११ ॥ अगस्त्येन यथा ख्यातं तथेयं गोदावरी दृश्यत इत्यनुषङ्गः ॥१२॥ नातिदूरेण चासन्न इति । अस्य गोदावर्या गिरिभिश्चान्वयः । काकाक्षिन्यायात् । मृगेत्यादि गिरिविशेषणं । मयूरनादिताः मयूरनादयुक्ताः । इतच्प्रत्ययः । प्रांशवः उन्नताः । बहुकन्दराः विपुलगुहाः । "दरी तु कन्दरो वा स्त्री देवखातबिले गुहा" इत्यमरः । फुल्लैः विकसितपुष्पैः । "अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः" इति निपातितः ॥ १३ ॥ देशे देशे नानादेशे वर्तमानैः सुवर्णादिसदृशैः धातुभिः परिणतत्वदशासंक्रान्तैः गैरिकैः । "धातवो गिरिसंभवाः" इत्यमरः । उपलक्षिताः गजाः परमभक्तिभिः उत्कृष्टरेखालंकारैः । गवाक्षिताः संजातगवाक्षा इवाभान्ति । गजानां हि गवाक्षाकाराः भक्तीः कुर्वन्ति ॥ १४ ॥ प्रीत्यतिशयेन वनं वर्णयति—सालैरित्यादिना । सालैः सर्जकाख्यैर्वृक्षैः । तमालैः कालस्कन्धाख्यैः । खर्जूरैः खर्जूरवृक्षैः । पनसैः । आम्रकैः रसालभेदैः । निवारैः जलकदम्बैः । तिमिशैः नेमिद्रुमैः । पुन्नागैः । तिलकैः क्षुरकवृक्षैः । गुल्माः जातिप्रभृतयः । लताः माधवीप्रभृतयः । स्पन्दनैःतिमिशभेदैः । नीपैः स्थलकदम्बकैः । पर्णासैः करञ्जराख्यैः । लिकुचैः धवैः अश्वकर्णैः खदिरैः शमीभिः । किंशुकैः पलाशैः । पाटलैः । अत्र पूर्वश्लोकात् गिरयो दृश्यन्त इत्यनुषक्तपदाभ्यामन्वयः ॥ १५—१७॥ पुण्यं पुण्यप्रदं । मेध्यं पवित्रं । एतेन अस्माभिः सहागतेन । पक्षिणा जटायुषा ॥ १८ ॥ परवीरहेति क्विप् छान्दसः । आश्रमं अङ्गणादिविस्तारवदाश्रमप्रदेशं ॥ १९ ॥ तत्र आश्रमे । पर्णशालां उटजं । संखातमृत्तिकां भित्तीकृतमृत्तिकामित्यर्थः । मस्करैः वेणुभिः । "मस्करमस्करिणौ वेणुपरिव्राजकयोः" इति निपातनात्साधुः । कृतवंशां कृतगृहोर्ध्वकाष्ठां ।

॥ ९ ॥ ती० परमभक्तिभिः नीलपीतादिवर्णरचनाभिः । गवाक्षिताः चित्रित्ताः । अलङ्कृताइतियावत् ॥ १४ ॥ ती० खर्जूरः कण्टकच्छदः । नीवारः स्थलकदंबः ॥ १५ ॥

[पा०] १ च. छ. ज. ञ. सेविता. २ क.—च. ज. झ. ञ. नातिदूरेनचासन्ने. ३ घ. यूथाभिपीडिताः. क. यूथावपीडिता. ङ. झ. ञ. ट. यूथावपीडिताः. ४ घ. गिरिकन्दराः. ५ ङ. झ. ट. सौम्याः. ६ ग. पुष्पितैस्तरुभिर्वृताः. ७ ङ. झ. ट. तथाशुभैः. ८ ख. ग. घ. स्तमालैस्तालैश्च. ९ ङ. झ. ट. खर्जुरैःपनसैर्द्रुमैः. च. ज. ञ. खर्जुरैःपनसाम्रकैः. १० झ. स्तिनिशैश्चैव. ११ ङ. झ. ट. स्तिलकैः केतकैरपि चंपकैः. १२ ख. फुल्लगुल्म. १३ घ. स्तैर्बहुभिरावृताः. १४ ङ.—ट. स्यन्दनैश्चन्दनैर्नीपैः. क. स्यन्दनैश्चन्दनैः. १५ ख.—ट. र्लकुचैरपि. १६ ङ. झ. रम्यमिदं. १७ ख. ग. ङ—ट. संघात.

शमीशाखाभिरास्तीर्य दृढपाशावपाशिताम् ॥ कुशकाशशरैः पर्णैः सुपरिच्छादितां तथा ॥ २१ ॥
समीकृततलां रम्यां [1]चकार लघुविक्रमः ॥ निवासं राघवस्यार्थे प्रेक्षणीयमनुत्तमम् ॥ २२ ॥
स गत्वा लक्ष्मणः श्रीमान्नदीं गोदावरीं तदा ॥ स्नात्वा पद्मानि चादाय [2]सफलः पुनरागतः ॥ २३ ॥
ततः [3]पुष्पबलिं कृत्वा शान्तिं च स यथाविधि ॥ दर्शयामास रामाय तदाश्रमपदं कृतम् ॥ २४ ॥
स तं दृष्ट्वा कृतं सौम्यमाश्रमं [4]सह सीतया ॥ राघवः पर्णशालायां हर्षमाहारयत्[5]परम् ॥ २५ ॥
[6]सुसंहृष्टः परिष्वज्य बाहुभ्यां लक्ष्मणं तदा ॥ अतिस्निग्धं च गाढं च वचनं चेदमब्रवीत् ॥ २६ ॥
प्रीतोस्मि ते महत्कर्म त्वया [7]कृतमिदं प्रभो ॥ प्रदेयो यन्निमित्तं ते परिष्वङ्गो मया कृतः ॥ २७ ॥
भावज्ञेन कृतज्ञेन धर्मज्ञेन च लक्ष्मण ॥ त्वया [8]पुत्रेण धर्मात्मा न संवृत्तः पिता [9]मम ॥ २८ ॥
एवं लक्ष्मणमुक्त्वा तु राघवो लक्ष्मिवर्धनः ॥ तस्मिन्देशे बहुफले न्यवसत्[10]सुसुखं वशी ॥ २९ ॥
कंचित्कालं स धर्मात्मा सीतया लक्ष्मणेन च ॥ अन्वास्यमानो न्यवसत्[11]स्वर्गलोके यथाऽमरः ॥ ३० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

" वंशस्तु पृष्ठास्थ्नि गृहोर्ध्वकाष्ठे वेणौ गुणे कुले " इति वैजयन्ती । वेणुमयस्तम्भोपरि प्रसारिततिर्यक्काष्ठामित्यर्थः । शमीशाखाभिरास्तीर्य तिर्यग्वेणूपरि शमीशाखाभिरास्तीर्य । दृढपाशावपाशितां दृढवल्कलादिकृतपाशैरवपाशितां संजातपाशां । तिर्यग्वंशैः सह शमीशाखाः दृढं बध्वेत्यर्थः । कुशकाशशरैः कुशादिरूपैः पर्णैः सुपरिच्छादितां सुशोभनं रमणीयं यथा तथा परिच्छादितां । पर्णशालारूपं निवासं चकारेत्यन्वयः ॥ २०—२२ ॥ सफलः फलानि चादायेत्यर्थः ॥ २३ ॥ पुष्पबलिं वास्तुपूजां । शान्तिं आभ्युदयिकीं क्रियां । यथाविधि वास्तुकल्पानुसारेण ॥ २४ ॥ पर्णशालायां विषये हर्षमाहारयत् संतोषं प्राप्तवानित्यर्थः ॥ २५ ॥ अतिस्निग्धं च गाढं चेति परिष्वङ्गक्रियाविशेषणं ॥ २६ ॥ हे प्रभो समर्थ । त्वया इदं महत्कर्म कृतं अतस्ते प्रीतोस्मि । यन्निमित्तं यदाश्रमनिर्माणनिमित्तं । प्रदेयः पारितोषिकोस्ति तन्निमित्तं मया परिष्वङ्गः कृतः आश्चर्यभूतपर्णशालानिर्माणस्य उचितपारितोषिकान्तराभावात्परिष्वङ्गमेव दत्तवानस्मीत्यर्थः ॥ २७ ॥ भावज्ञेन मच्चित्तज्ञेन सीतया सह रहसि स्थातुं मम स्थलं रचयेति रामो न वदेत् किंतु मनसि कुर्यादिति तदपि ज्ञातवतेत्यर्थः । कृतज्ञेन चिरमपुत्रेण दशरथेन स्वस्मिन्नादरातिशयाद्येन क्रमेण चन्द्रताराबलालोचनपूर्वकं गृहं निर्मापितं तेन क्रमेण तत्कृतप्रकारज्ञेनेत्यर्थः । धर्मज्ञेन स्वयं राजपुत्रोपि स्वोचितस्थलमकृत्वा यथा रामः संतुष्यति तथैव मया स्थातव्यमित्येवंविधधर्मज्ञेन । त्वया पुत्रेण पुन्नाम्नो नरकात्त्रायत इति पुत्रः । ततो मदभिमतासिद्धिरेव स्वस्यनिरय इत्यभिमेने । मदभिमतकरणेन तस्य निरयनिस्तारकेण त्वयेत्यर्थः । धर्मात्मा स्वयं यावज्जीवंमदभीष्टमेव कृत्वा स्वचरमकालेपि मदभिमतकरणाय त्वां स्थापितवान् पानीयशालाप्रवर्तकवत् । मम पिता न संवृत्तः किंतु त्वमेव त्वन्मुखेन पित्रा मम सर्वाभिलषितपरिपूरणात् अहं सर्वं करिष्यामीति हि त्वयोक्तमिति भावः ॥ २८ ॥ वशी विषयचापलरहितः ॥ २९—३० ॥ अत्र एकत्रिंशच्छ्लोकाः । इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चदशः सर्गः ॥ १५ ॥

ती० लघुविक्रमः अनलसगतिः ॥ २२ ॥ **ती०** नाथेन पालकेनत्वया ॥ २८ ॥ इतिपञ्चदशस्सर्गः ॥ १५ ॥

[पा०] १ क. ङ. छ. झ. ञ. ट. चकारसुमहाबलः. घ. चकारसमहाबलः. च. छ. ज. चकारातुलविक्रमः. २ ख. सजलः. ३ घ. पुष्पाञ्जलिं. ४ घ. सीतयासह. ५ क. ख. ग. ङ.—ट. त्परं. ६ क.—घ. ससंहृष्टः. ७ ङ. ञ. ट. कृतमरिंदम. ८ च. नाथेन. ९ ख. तव. १० च. ज. त्ससुखीसुखं. छ. झ. ञ. त्ससुखंसुखी. ग. ङ. त्सुसुखंसुखी. क. त्सुखंसुखी. ११ घ. स्वर्गलोके.

षोडशः सर्गः ॥ १६ ॥

हेमन्तागमेप्रातस्स्नानायसीतयासहकदाचनगोदावरींगच्छन्तंराममनुगच्छतालक्ष्मणेनहेमन्तवर्णनम् ॥ १ ॥ लक्ष्मणेन भरतवृत्तान्तप्रस्तावपूर्वकंकैकेय्युपालंभेरामेणतत्प्रतिषेधपूर्वकंभरतप्रशंसनम् ॥ २ ॥ तथासीतालक्ष्मणाभ्यांसहस्नानपूर्वकं सन्ध्योपासनाद्याचरणम् ॥ ३ ॥

वसतस्तस्य तु सुखं राघवस्य महात्मनः ॥ शरद्व्यपाये हेमन्त ऋतुरिष्टः प्रवर्तते ॥ १ ॥
स कदाचित्प्रभातायां शर्वर्यां रघुनन्दनः ॥ प्रययावभिषेकार्थं रम्यां गोदावरीं नदीम् ॥ २ ॥
प्रह्वः कलश[1]हस्तस्तं सीतया सह वीर्यवान् ॥ पृष्ठतोऽनुव्रजन्[2]भ्राता सौमित्रिरिदमब्रवीत् ॥ ३ ॥
अयं स कालः संप्राप्तः प्रियो यस्ते प्रियंवद ॥ अलङ्कृत इवाभाति येन संवत्सरः शुभः ॥ ४ ॥
नीहारपरुषो लोकः पृथिवी सस्यशा[3]लिनी ॥ जलान्यनुपभोग्यानि सुभगो हव्यवाहनः ॥ ५ ॥
नवाग्रयणपूजाभिरभ्यर्च्य पितृदेवताः ॥ कृताग्रयणकाः काले सन्तो विगतकल्मषाः ॥ ६ ॥
प्राज्यकामा जनपदाः संपन्नतरगोरसाः ॥ विचरन्ति महीपाला या[4]त्रास्था विजिगीषवः ॥ ७ ॥
सेवमाने दृढं सूर्ये दिशमन्तकसेविताम् ॥ विहीनतिलकेव स्त्री नोत्तरा दिक्प्रकाशते ॥ ८ ॥
प्रकृत्या हिमकोशाढ्यो दूरसूर्यश्च सांप्रतम् ॥ यथार्थनामा सुव्यक्तं हिमवान्हिमवान्गिरिः ॥ ९ ॥
अत्यन्तसुखसंचारा मध्याह्ने [5]स्पर्शतः सुखाः ॥ दिवसाः सुभगादित्याश्छायासलिलदुर्भगाः ॥१०॥

अथ भाविशूर्पणखादर्शनाद्यनर्थसूचकतया हेमन्तवर्णनं प्रस्तौति—वसत इत्यादि। इष्टः तपस्विनां तपःसाधनायेष्टः । रामस्य तु खरादिराक्षसवधविजयमूलशूर्पणखाऽऽगमनहेतुतयेष्टः ॥ १ ॥ प्रभातायां विरामोन्मुखायां ॥ २—३ ॥ येन हेमन्तेन ॥ ४ ॥ लोको जनः । नीहारेण हिमेन । परुषः परुषत्वक् । सर्वत्र भवतीति शेषः । स्वभावोक्तिरलंकारः । "स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनं" इति लक्षणात् ॥ ५ ॥ काले आग्रयणकर्मानुष्ठानकाले । आग्रयणं नाम कश्चिद्धविर्यज्ञो नूतनधान्यभोजनस्यादावनुष्ठेयः । तदुक्तमापस्तम्बेन "नानिष्ट्वाग्रयणेनाहिताग्निर्नवस्य धान्यस्याश्नीयाद्व्रीहीणां यवानां श्यामाकानामग्रे पाकस्य यजेत" इति । आग्रयणरूपपूजाभिः पितृदेवता अभ्यर्च्य कृताग्रयणकाः नतु कृताग्रयणप्रतिनिधय इत्यर्थः ॥ ६ ॥ प्राज्यकामाः बहुलकामोद्रेकाः । "प्राज्यमदभ्रंबहुलंबहु" इत्यमरः । जनपदाः जनपदस्थाः । यात्रायां युद्धयात्रायां आस्था येषां ते यात्रास्थाः ॥ ७ ॥ अन्तकसेवितां दक्षिणामित्यर्थः । अत्रोत्प्रेक्षालंकारेण दक्षिणा दिक् सतिलकेव प्रकाशत इत्युत्प्रेक्षा व्यज्यते ॥ ८ ॥ प्रकृत्या स्वभावेन । हिमकोशैः घनीभूतहिमैः । आढ्यः संपूर्णः । सांप्रतं दक्षिणायने दूरसूर्यः अत एव हिमवान् अधिकहिमः । भूमार्थे मतुप् । हिमवान् गिरिः यथार्थनामा भवति सुव्यक्तमित्युत्प्रेक्षाव्यञ्जकं निरुक्तिश्चालंकारः । "निरुक्तिर्योगतो नाम्नामन्वर्थत्वप्रकल्पनं" इति लक्षणात् ॥ ९ ॥ मध्याह्ने स्पर्शतः उष्णस्पर्शतः । सुखाः सुखकराः । अतएव तदानीं अत्यन्तसुखसंचाराः सुभगादित्याः दर्शनयोग्यादित्याः । छायासलिलदुर्भगाः दुर्भगच्छायासलिलाः । आहिताग्न्यादित्वात्परनिपातः । अतिशीतच्छायासलिला इत्यर्थः ।

ती० इष्टः कामिनीनां कामिनामिष्टइत्यर्थः ॥ १ ॥ **ती०** येन हेमन्तेनसुपक्वसस्यादिसंपन्नेन । शुभस्सन्नयंसंवत्सरः अलङ्कृतो यद्यपि तथापि तवातिसुकुमारस्य प्रियइवाभातिकिमितियोजना। यद्वा । यःहेमन्तकालः तेप्रियः । येनहेमन्तेनसंवत्सरश्शुभस्सन्नलङ्कृतइवभाति । अयंकालस्संप्राप्तइतियोजना ॥ ४ ॥ **ती०** जलान्यनुपभोग्यानि शैत्यातिशयात्स्नानाद्यर्थमशक्यानि । सुभगः इष्टः ॥ ५ ॥ **ती०** संपन्नतरगोरसाः बहुलतरगोक्षीराः । जनपदाः भवन्तीतिशेषः ॥ ७ ॥ **शि०** हिमकोशाढ्यः हिमकोशैः कोशवद्घनीभूतहिमैः आढ्यः हिमवान्गिरिः सांप्रतंदूरसूर्यस्सन् सुव्यक्तंहिमवानिति यथार्थनामाऽभवत् । सूर्यस्यदूरस्थत्वात्

[पा०] १ ग. ङ. झ. ञ. ट. हस्तस्तु. २ घ. न्भ्रातुः. ख. न्भ्रात्रा. ३ क,—घ. च. ज. झ. ञ. मालिनी. ४ ङ. ज—ञ. यात्रार्थं. छ. यात्रार्थे. ५ च. पश्यतः.

मृदुसूर्याः सनीहाराः पटुशीताः समारुताः ॥ शून्यारण्या हिमध्वस्ता दिवसा भान्ति सांप्रतम् ॥ ११ ॥
निवृत्ताकाशशयनाः पुष्यनीता हिमारुणाः ॥ शीता वृद्धतरायामास्त्रियामा यान्ति सांप्रतम् ॥ १२ ॥
रविसंक्रान्तसौभाग्यस्तुषारारुणमण्डलः ॥ निश्श्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ॥ १३ ॥
ज्योत्स्नी तुषारमलिना पौर्णमास्यां न राजते ॥ सीतेव चातपश्यामा लक्ष्यते न तु शोभते ॥ १४ ॥
प्रकृत्या शीतलस्पर्शो हिमविद्धश्च सांप्रतम् ॥ प्रवाति पश्चिमो वायुः काले द्विगुणशीतलः ॥ १५ ॥

भवन्तीति शेषः । स्वभावोक्तिरलंकारः ॥ १० ॥ मृदुसूर्याः अक्रूरसूर्याः । पटुशीताः प्रबलशीताः । शून्यारण्याः आरण्या वनचरा: तैः शून्याः आवरणरहितत्वेन शीतपीडिताः न बहिः संचरन्तीत्यर्थः । हिमध्वस्ताः हिमध्वस्तजनवन्तः । शैत्येन पिण्डीभूतशरीरजना इत्यर्थः । अनेन राक्षसकृतसार्वत्रिकपीडा द्योतिता ॥ ११ ॥ निवृत्ताकाशशयनाः निवृत्तचन्द्रशालाद्यनावृतप्रदेशशयनाः । पुष्यनीताः पुष्यनक्षत्रयुक्ता पौर्णमासी पुष्यं तेन नीताः तत्प्रधाना इत्यर्थः। यद्वा पुष्यः पुष्यमासः तेन नीताः पुष्यमाससन्निहिता इत्यर्थः । हिमारुणाः हिमधूसराः । शीताः शीतवाताः । वृद्धतरायामाः चतुर्विंशतिघटिकायुक्तत्वेनातिवृद्धतरविस्ताराः त्रियामाः रात्रयः । दिनान्ते अर्धयामस्य दिनादावर्धयामस्य च दिनशेषत्वात् । अनेन स्वर्गलोकोपद्रवः तामसराक्षसवृद्धिः सज्जनक्षयः कल्यनुसारिता चोक्ता । पुष्यः कलिः ॥ १२ ॥ मन्दरश्मित्वेन संक्रान्तं संप्रवृत्तं सौभाग्यं भोग्यत्वं यस्य सः सूर्ये स्वसौभाग्यं दत्तवानित्यर्थः । तुषारैः हिमशीकरैः अरुणं रक्तं मण्डलं यस्य । हिमशीकरावरणेन चन्द्रसूर्यमण्डलयोरारुण्यं प्रत्यक्षसिद्धं । निःश्वासेन अन्धः अप्रकाशः । आदर्शः दर्पणमिव । उपमालंकारः । अनेन रावणापहृतसर्वस्वस्य मलिनाकृतेरिन्द्रस्यावस्थोक्ता ॥ १३ ॥ ज्योत्स्नी चन्द्रिकयान्विता रात्रिः । तुषारमलिना सती पौर्णमास्यामपि न राजते न शोभते । एवंभूता सा आतपश्यामा आतपापहृतवर्णा सीतेव लक्ष्यते किंतु सीतावन्न शोभते । व्यतिरेकालंकारः । "व्यतिरेको विशेषश्चेदुपमानोपमेययोः" इति तल्लक्षणं । अनेन सीताया भाविरावणाभिभवः तेनापि सुरनारीजनबन्दीमोक्षणार्थत्वेनातिशयश्च व्यज्यते ॥ १४ ॥ प्रकृत्या शीतलस्पर्शः वायोः शीतस्पर्श एव स्वभावः । उष्णस्पर्शत्वागन्तुक इति हृदयं । सांप्रतं हेमन्ते । हिमविद्धः हिमयुक्तः । काले प्रातःकाले । द्विगुणशीतलः द्विरावृत्त्या शीतलः । "अथो गुणः । रूपादौ सूदशिञ्जिन्योरावृत्तीन्द्रियतन्तुषु । सञ्ध्यादावपि सत्त्वादौ त्यागादावुपसर्जने" इति रत्नमाला । पश्चिमो वायुः पश्चिमदिग्वायुः । अनेन स्वभावतः करुणाशीलस्य अवतारकाले देवप्रार्थनोत्तम्भितकृपस्य पुनर्मुन्याश्रमे

हिमद्रवाभावेन घनीभूतहिमविशिष्टोभवतीत्यर्थः ॥ ९ ॥ **टीका०** सनीहाराइत्युक्त्वा हिमध्वस्ताइतिपुनर्वचनं हिमवासराइतिविशेषणदर्शनार्थं । **स०** हे मध्वस्त मधुरस्तो ध्वस्तोयेन सतथा तत्संबुद्धिः । आहिताग्न्यादित्वात्परनिपातः । आदिवसाः ईषद्दिवसाः अहर्मानन्यौन्यात् । छन्दस्तुल्यत्वादाभान्तीति तिङावाऽऽङोन्वयः । अरण्यपुरहिमभेदाद्वाऽपौनरुक्त्यं । **शि०** मृदुसूर्याः मृदुः सहनयोग्योष्मविशिष्टःसूर्योयेषु । अतएवसनीहाराः । अतएव हिमैर्ध्वस्ताः ध्वंसकर्मीभूताजनायेषुते । अतएव शून्यानि हिमध्वस्तत्वेनकोमलपत्रादिरहितानि अरण्यानि येषुते । **ति०** हिमध्वस्ताः हिमध्वस्तपङ्कजाः ॥ ११ ॥ **ती०** पुष्यनीताः पुष्यनक्षत्रेण नीताः प्रवर्तिताः । येषुदिवसेषु पुष्यनक्षत्रं रात्रिकालपरिमाणंबोधयतीत्यर्थः । अन्येतु पुष्यनीताः पुष्यशब्देन पुष्यनक्षत्रयुक्तापौर्णमासी नीतालक्ष्यते । तथाच पुष्यनक्षत्रयुक्तांपौर्णमासीं नीताः गताः तदुपलक्षिताइतियावत् । कादाचित्कतया भेदधीहेतुरुपलक्षणमित्याहुः । यद्वा पुष्यनीताः पुष्याः पोष्याः गुणाभावआर्षः । शीतनिवारकोपचारैःपोष्याः भोगिनइत्यर्थः । तैर्नीताः कृच्छ्रेणगमिताः । **स०** पुष्यनीताः पुष्यमासावधिकाः ॥ **ति०** हिमारुणाः हिमधूसराः । कपोतवर्णेप्यरुणशब्दः । शीतं वृद्धतरं यासुताः । आयामाः दैर्घ्यवत्यः ॥ १२ ॥ **स०** निश्श्वासान्धः निश्श्वासएव अन्धं तिमिरंयस्यसः । "अन्धंस्यात्तिमिरं" इति विश्वः । प्रतिफलनप्रतिबन्धकत्वादितिभावः ॥ १३ ॥ **ती०** प्रकृत्या स्वभावेन अशीतलस्पर्शः । अशीतेत्युपलक्षणं । अनुष्णोपीतिद्रष्टव्यं । तथाच अनुष्णाशीतस्पर्शइत्यर्थः । काले प्रातःकाले । हिमविद्धस्सन् द्विगुणशीतलः प्रातःकालभवत्वेन हिमविद्धत्वेन द्विगुणशीतलत्वमितिभावः । **स०** यद्वा प्रकृत्याशीतलस्पर्शः । त्रिवृत्करणाज्जलविशेषगुणस्यापि वायुवृत्तित्वं नानुपपन्नं ॥ १५ ॥

[पा०] १ झ. सुनीहाराः. २ ङ. झ. समाहिताः. ३ क. ङ. च. झ. ञ. ट. शीतवृद्धतरा. ४ क.—ट. ज्योत्स्ना. ५ ङ—ट. नच.

बा[1]ष्पच्छन्नान्यरण्यानि यवगोधूमवन्ति च ॥ शोभन्तेऽभ्युदिते सूर्ये नदद्भिः क्रौञ्चसारसैः ॥ १६ ॥
खर्जूरपुष्पाकृतिभिः शिरोभिः पूर्णतण्डुलैः ॥ शोभन्ते किंचिदा[2]नम्राः शालयः कनकप्रभाः ॥१७॥
मयूखैरुपसर्पद्भिर्हिमनीहारसंवृतैः ॥ दूरमभ्युदितः सूर्यः शशाङ्क इव लक्ष्यते ॥ १८ ॥
अ[3]ग्राह्यवीर्यः पूर्वाह्णे मध्याह्ने स्पर्शतः सुखः ॥ सं[4]रक्तः किंचिदापाण्डुरातपः शोभते क्षितौ ॥ १९ ॥
अवश्यायनिपातेन किंचित्प्रक्लिन्नशाद्वला ॥ वनानां शोभते भूमिर्निविष्टतरुणातपा ॥ २० ॥
[5]स्पृशंस्तु विपुलं शीतमुदकं द्विरदः सुखम् ॥ अ[6]त्यन्ततृषितो वन्यः प्रतिसंहरते करम् ॥ २१ ॥
एते हि समुपासीना वि[7]हगा जलचारिणः ॥ न[8] विगाहन्ति सलिलमप्रगल्भा इवाहवम् ॥ २२ ॥
अवश्यायतमोनद्धा नीहारतमसा वृताः ॥ प्रसुप्ता इव लक्ष्यन्ते विपुष्पा वनराजयः ॥ २३ ॥
बाष्पसंछन्नसलिला रुतविज्ञेयसारसाः ॥ हिमार्द्रवालुकै[9]स्तीरैः सरितो भां[10]न्ति साम्प्रतम् ॥ २४ ॥
तुषारपतनाच्चैव मृदुत्वाद्भास्करस्य च ॥ शैत्याद[11]गाग्रस्थमपि प्रायेण रसवज्जलम् ॥ २५ ॥

द्विगुणितकरुणस्य रामस्य व्यापारः सूचितः ॥१५॥ बाष्पैः ऊष्मभिः छन्नानि यथा कूपोदकेभ्यो निर्गच्छन्तो धूमाकारा बाष्पाः । अनेन रामसमागमानन्तरभाव्याश्रमसमृद्धिरुच्यते । बाष्पशब्देन रामकृपोच्यते । यवेत्यादिना तपःसमृद्धिः । नदद्भिरिति वेदघोषः ॥ १६ ॥ खर्जूरपुष्पाकृतिभिः तद्वत्पिशङ्गवर्णैः । शिरोभिः कणिशैः । कनकप्रभाः परिपक्वनालपत्रवत्त्वात्कनकवर्णाः । अनेन वृद्धा अपि जटाभरितशिरोभिस्त्वां प्रणमन्तीति द्योतितं ॥ १७ ॥ हिमनीहारैः शीतलनीहारैः संवृताः तैः । अनेन बहुकालं समागतोपि राक्षसप्रभाभिभूततेजस्को मृदुरिव किमर्थं वर्तस इत्यर्थः सूच्यते ॥ १८ ॥ पूर्वाह्णे अग्राह्यवीर्यः अग्राह्यौष्ण्यः चन्द्रिकायमाणो वर्तत इत्यर्थः । ईषदर्थे वा नञ् । अनुदरा कन्येतिवत् । तदुक्तं "तत्साद्दश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः" इति । मध्याह्ने स्पर्शेन सुखः सुखकरः । किंचित्संरक्तः किंचिदापाण्डुश्च । अनेनापि राक्षसाक्रमेप्यपराक्रमत्वमनुचितमिति गम्यते ॥ १९ ॥ अवश्यायः हिमं । शाद्वलः शष्पप्रचुरा भूमिः । "नडशादाड्ड्वलच्" इति वलच् । अनेन राक्षसाभिभवकृतमुनिजनरोदनं रामकृपाप्रवृत्तिश्चोच्यते ॥ २० ॥ प्रतिसंहरते अतिदुःसहशैत्यवदिति भावः । अनेनेन्द्रस्य राज्यभोगाभिलाषिणोपि तद्भोगभीरुत्वं सूचितं ॥ २१ ॥ समुपासीनाः जलमिति शेषः । अनेन मुनीनां समाधिभङ्गो द्योत्यते । अप्रगल्भाः अधृष्टाः । आहवं युद्धं ॥ २२ ॥ अवश्यायः हिमसलिलं स एव तमः तेन नद्धाः बद्धाः । अनेन निश्चलत्वं लक्ष्यते । हिमक्लिन्ना हि लता निश्चलीभवन्ति । नीहारः अजलवर्षिमहाहिमं तदेव तमः तेनावृताः । अनेन प्रच्छादनपटाच्छन्नत्वं व्यज्यते । विपुष्पा इत्यनेन निमीलिताक्षत्वमुक्तं । अनेन वनवासिनां दैन्यातिशय उक्तः । अत्रोत्प्रेक्षालंकारः ॥२३॥ रुतं शब्दः । हिमार्द्रवालुकैः हिमसिक्तसिकतः । अनेनापि ऋषिजनदैन्यमेव द्योत्यते ॥ २४ ॥ तुषारः हिमं । अगाग्रस्थमपि निर्मलशिलातलस्थमपि । रसवत् विषवत् । "रसो रागे विषे द्रव्ये शृङ्गारादौ

ती० प्रातःकालेकूपोदकादिष्विव वनादप्यूष्मा प्रादुर्भवतीत्यनुभवएवप्रमाणं ॥ १६ ॥ **ति०** खर्जूरपुष्पाकृतित्वं प्रलंबत्वेनपीतत्वेनच ॥ किंचिदालंबाः किंचिन्नम्राः ॥ १७ ॥ **ति०** नीहारः हिमातिशयरूपो वृक्षपर्वताद्यदर्शनसंपादनक्षमः ॥ १८ ॥ **ति०** आग्राह्यवीर्यः ईषद्ग्राह्यौष्ण्यः ॥ **स०** अग्राह्यवीर्यः अग्राह्यं हिमप्रसरात्स्वेनगृहीतुमशक्यंवीर्यंयस्यसः ॥ १९ ॥ **ति०** नावगाहन्ति नावगाहन्ते ॥ २२ ॥ **ति०** अवश्यायतमोभ्यां नद्धा रात्रौ । नीहारतमसावृताः प्रत्यूषे ॥ २३ ॥ **स०** रुतविज्ञेयसारसाः हिमाच्छादितत्वादितिभावः ॥ २४ ॥ **ती०** अगाधस्थमपि गंभीरस्थमपि । अगाग्रस्थमितिपाठे पर्वताग्रस्थमपीत्यर्थः ।

[**पा०**] १ ग. शष्पच्छन्नानि. २ क. ग. ङ.—ट. दालंबाः. ३ झ. आग्राह्यवीर्यः. ४ क. ङ—ञ. संसक्तः. ५ ङ. च. छ. ज. ञ. संस्पृशन्विमलं. घ. स्पृशंस्तुविमलं. ६ ख. च. छ. ज. ञ. अत्यर्थं. ७ घ. विहंगाः. ८ क. ख. घ. ङ. ज.—ट. नावगाहति. ९ ङ. झ. ट. वालुकास्तीरैः. १० ग. यान्ति. ११ ग. च. दगारस्थमपि. छ. ज. ञ. दगाधस्थमपि. क. ख. दपाग्रस्थमपि.

जराज[1]र्झरितैः प[2]द्मैः शीर्णके[3]सरकर्णिकैः ॥ [4]नालशेषैर्हिमध्वस्तैर्न भान्ति कमलाकराः ॥ २६ ॥
अस्मिंस्तु पुरुषव्याघ्रः काले दुःखसमन्वितः ॥ तपश्चरति धर्मात्मा त्वद्भक्त्या भरतः पुरे ॥ २७ ॥
त्यक्त्वा राज्यं च मानं च भोगांश्च विविधान्बहून् ॥ तपस्वी नियताहारः शेते शीते महीतले ॥ २८ ॥
सोपि वेलामिमां नूनमभिषेकार्थमुद्यतः ॥ वृतः प्रकृतिभिर्नित्यं [5]प्रयाति [6]सरयूनदीम् ॥ २९ ॥
अत्यन्तसुखसंवृद्धः [7]सुकुमारः सुखोचितः ॥ कथं [8]न्वपररात्रेषु सरयूमवगाहते ॥ ३० ॥
पद्मप[9]त्रेक्षणो वीरः श्यामो निरुदरो महान् ॥ धर्मज्ञः सत्यवादी च ह्रीनिषेधो जितेन्द्रियः ॥ ३१ ॥
प्रियाभिभाषी मधुरो दीर्घबाहुररिंदमः ॥ संत्यज्य विवि[10]धान्भोगाना[11]र्यं सर्वात्मना श्रितः ॥ ३२ ॥
जितः स्वर्गस्तव भ्रात्रा भरतेन महात्मना ॥ वनस्थमपि तापस्ये यस्त्वाम[12]नुविधीयते ॥ ३३ ॥
न पित्र्यमनुवर्तन्ते मातृकं द्विपदा इति ॥ ख्यातो लोकप्रवादोऽयं भरतेनान्यथा कृतः ॥ ३४ ॥

पराक्रमे ” इतिबाणः । शैत्यातिशयेन विषवदनुपादेयं भवतीत्यर्थः । एतेन राक्षसप्रकोपात् भवतश्चानुद्योगान्मुनिमनो दुःखितं भवतीति द्योत्यते ॥ २५ ॥ जरया चिरप्ररूढतया जर्झरितैः विवर्णैः । जीर्णकेसरकर्णिकैः शिथिलकिञ्जल्ककर्णिकैः । पद्मैर्न भान्ति । स्पष्टं व्यङ्ग्यं ॥ २६ ॥ एवमृषिपीडातिशयेपि रामस्य राक्षसवधानुद्यममुक्त्वा भरतस्य त्वदागमनव्यसनित्वात्तद्दर्शनकालोपि संनिहित इत्याशयेनाह—अस्मिन्नित्यादिना । दुःखसमन्वितः त्वद्विरहादिति शेषः ॥२७॥ राज्यं राजत्वं प्रभुत्वमित्यर्थः । मानं राजपुत्रोहमित्यभिमानं । भोगान् स्रक्चन्दनवनितादीन् । बहूनित्यपरित्याज्यत्वमुच्यते । तपस्वी तपस्विचिह्नजटादिमान् । नियताहरः फलमूलाद्यशनः । शीत इत्यनेनावरणराहित्यमुच्यते । महीतल इत्यनेन खट्वादिराहित्यं ॥ २८ ॥ वेलां प्राप्येति शेषः । प्रकृतिभिरिति “ उपभोक्तुं व्यवस्यन्ति पौरा वै धर्मवत्सलं ” इति वक्ष्यमाणरीत्या भरतभक्त्या त्वद्भक्त्या च भरतमनुसरन्तीभिरित्यर्थः ॥ २९ ॥ अत्यन्तसुखसंवृद्धः राज्ञा उपलालितत्वात् सुखसंवृद्धः त्वयापि लालितत्वादत्यन्तसुखसंवृद्धः । सुकुमारः भवतोपिदृष्टयवेक्षणासहसौकुमार्यः । सुखोचितः त्वया सह वस्तुं योग्यः नतु त्वद्वियोगार्हः । कथं नु आत्मौपम्येन मन्यते स्वस्य रामविरहाभावेन शैत्यानुभवः तस्य रामतापात् “ उपतप्तोदका नद्यः ” इत्युक्तरीत्या नदीनामपि रामविरहेणोष्णत्वाच्च शैत्यप्रसक्तिरेव नास्ति । अपररात्रेषु यथा नववैधव्याः स्त्रियः मनुष्यसंचारात्पूर्वमेव मनुष्यमुखमनवलोकयन्त्यो गच्छन्ति । तथाऽयमपि । कैकेयीपुत्रोयं । एतन्निमित्त एवानर्थ इति जना वक्ष्यन्तीति भीत्या अपररात्रेष्वेव गच्छति । सरयूमवगाहते निर्वेदातिशयेनातित्वरितगामिनीमपि सरयूं निर्भयोवगाहते । अवगाहते जलेनिमग्नश्चेन्मनुष्यादाव्यो भवति ॥३०॥ निरुदरः अतुन्दिलः । ह्रीनिषेधः ह्रिया लज्जया निषेधः अकृत्येभ्यो निवर्तनं यस्य सः ॥ ३१ ॥ मधुरः मधुरवाक् सुन्दरो वा । आर्यं ज्येष्ठं त्वां सर्वात्मना करणत्रयेण श्रितः ॥३२॥ स्वर्गः रामप्राप्त्यन्तरायभूतः स्वर्गः । जितः तिरस्कृतः । वनस्थमपि त्वांतापस्ये तापसकर्मविषये । अनुविधीयते अनुकरोति श्यन्नार्षः ॥ ३३ ॥ एवं प्रतिज्ञातराक्षसवधे विलंबः कृतः भरतक्लेशेन तत्रापि शीघ्रं गन्तव्यं । अतःकिमत्र कृत्यमिति सूचयित्वा सर्वस्यानर्थस्य मूलभूता कैकेयीत्याशयेनाह—न पित्र्यमित्यादिश्लोकद्वयेन । पित्र्यं पितृस्वभावं । द्वे पदे येषां ते द्विपदाः मनुष्याः । अन्यथाकृतः पितृस्वभाव

रसवत् रुचिकरं ॥ २५ ॥ स० निरुदरः अल्पाहारत्वात्कृशोदरः । निस्संदेहोवा । अभिधानंतूक्तं । ह्रियाःनिषेधोयस्यसः । राजपुत्रोऽहं कथंस्थण्डिलशायीभविष्यामीति ह्रीप्रतियोगिकनिषेधवानित्यर्थः ॥ ३१ ॥ ती० आर्यं ज्येष्ठंत्वां । वस्तुतस्तु सर्वात्मना श्रवणादिरूपनवविधभक्त्या । आर्यं ब्रह्मादीनामपिपूज्यंत्वामेवाश्रितः ॥ ३२ ॥ ति० अनुविधीयते अनुकरोति सेवत

[पा०] १ ङ. कर्करितैः. ञ. मर्मरितैः. २ क. ङ. ञ. ट. पत्रैः. ख. पर्णैः. ३ क. च. छ. ज. केसरपाण्डुभिः. ४ ङ. झ. ट. नालशेषाहिमध्वस्ताः. ५ क. ज. संयाते. छ. सयाति. ६ क—ट. सरयूंनदीं. ७ क—ट. सुकुमारोहिमार्दितः. ८ च. ज. चापररात्रेषु. ग. घ. ङ. झ. ञ. ट. त्वपररात्रेषु. छ. वापररात्रेषु. ९ क. ख. घ. च. छ. ज. ञ. पत्रेक्षणःश्रीमान्. ग. ङ. झ. ट. पत्रेक्षणःश्यामःश्रीमान्निरुदरो. १० ग. ङ. झ. ट. विविधान्सौख्यान्. ११ ख. नार्यैः. १२ क. विधास्यते.

भर्ता दशरथो यस्याः साधुश्च भरतः सुतः ॥ कथं नु साम्बा कैकेयी तादृशी क्रूरशीलिनी ॥३५॥
इत्येवं लक्ष्मणे वाक्यं स्नेहाद्ब्रुवति धार्मिके ॥ परिवादं जनन्यास्तमसहन्राघवोऽब्रवीत् ॥ ३६ ॥
न तेऽम्बा मध्यमा तात गर्हितव्या कथंचन ॥ तामेवेक्ष्वाकुनाथस्य भरतस्य कथां कुरु ॥ ३७ ॥
निश्चिताऽपि हि मे बुद्धिर्वनवासे दृढव्रता ॥ भरतस्नेहसंतप्ता बालिशीक्रियते पुनः ॥ ३८ ॥
संस्मराम्यस्य वाक्यानि प्रियाणि मधुराणि च ॥ हृद्यान्यमृतकल्पानि मनःप्रह्लादनानि च ॥३९॥
कदान्वहं समेष्यामि भरतेन महात्मना ॥ शत्रुघ्नेन च वीरेण त्वया च रघुनन्दन ॥ ४० ॥
इत्येवं विलपंस्तत्र प्राप्य गोदावरीं नदीम् ॥ चक्रेऽभिषेकं काकुत्स्थः सानुजः सह सीतया ॥४१॥
तर्पयित्वाऽथ सलिलैस्ते पितॄन्दैवतानि च ॥ स्तुवन्ति स्मोदितं सूर्यं देवताश्च समाहिताः ॥ ४२ ॥

एवानुकृतो न मातृस्वभाव इत्यर्थः ॥ ३४ ॥ साधुशब्दस्य भर्तरि भरतेचान्वयः । तादृशीति पूर्वं कैकेय्युक्तस्मरणं ॥३५॥ इत्येवमिति । अनेन लक्ष्मणः प्रत्यूषे रामस्य ससीतस्य सरःस्नानादिक्लेशमालोक्य सुदुःखिततया कैकेयीं निन्दितुमुपक्रम्य झटितिनिन्दायां क्रियमाणायां रामः कुप्येदिति प्रथमं हेमन्तस्वभावं प्रस्तुत्य तत्प्रसङ्गेन भरतमुपक्षिप्य कैकेयीं निन्दतिस्मेति गम्यते। स्नेहात् रामस्नेहात् । परिवादं अपवादं । असहन् असहमानः ॥ ३६ ॥ मध्यमा सर्वदशरथपत्न्यपेक्षया । कथंचन प्रासङ्गिककथायामपि। मध्यमाम्बेति स्वाभिमानद्योतनाय । इक्ष्वाकुनाथस्य राजनि स्वर्गं गते अस्मासु च वनं गतेषु पूर्वतरास्मत्कुलमर्यादास्थापकस्य ॥ ३७ ॥ वनवासे निश्चिता दृढव्रतापि मे बुद्धिः । भरते स्नेहसंतप्ता सती बालिशीक्रियते बालबुद्धिरिव भवति । असंपूर्णेपि वनवासकाले तद्दर्शने संजातकुतूहला भवतीत्यर्थः ॥ ३८ ॥ स्नेहमेव प्रकाशयति—संस्मरामीत्यादिना। लोके कैश्चिदुक्तानि वाक्यानि प्रियाण्यपि कर्णकठोराणि भवन्तीति तद्व्युदासायाह—मधुराणीति। हृद्यानि हृदयादनपेतानि । अमृतकल्पानि शुभोदर्काणि । इदानीमपि मनःप्रह्लादनानि ॥ ३९ ॥ कदेति भरतसाहित्याभावेन विद्यमानाभ्यां सीतालक्ष्मणाभ्यामपि विरहितमात्मानं मन्यते। भरतस्नेहातिशयप्रकारोयम्॥४०॥ इत्येवं विलपन् भरतस्नेहकृतानि बहूनि वाक्यानि जल्पन्नित्यर्थः। अभिषेकं स्नानं॥ ४१ ॥ तर्पयित्वेति। ऋषितर्पणस्याप्युपलक्षणं । स्तुवन्ति स्म उपतस्थिरे । "मित्रस्य—" इत्यादिमन्त्रैः । सीतात्वमन्त्रेण । देवताः संध्यादिदेव-

इत्यर्थः । धीडोदैवादिकस्यरूपं ॥ **स०** जितः प्राप्तः ॥ ३३ ॥ **स०** असहन्नितिपदव्यत्ययेन मत्प्रव्राजनं कैकेयीबुद्धिकृतं नभवतीतिसूच्यते । परस्मैपदतापिसंभवति । "सएवायंनागस्सहतिकलभेभ्यःपरिभवं" इत्यादिकौमुद्युक्तेः ॥ ३६ ॥ **तनि०** तामेव तस्मिन्पुरुषव्याघ्रइत्याद्युक्तां । इक्ष्वाकुनाथस्य "आस्फोटयन्तिपितरः" इत्यादिना इक्ष्वाकुभिःप्रार्थनीयस्य । भरतस्य पद्मपत्रेक्षणइत्याद्युक्तसद्गुणभरितस्य ॥ **स०** आमध्यमेतिच्छेदः । सुमध्यमेतितदर्थः । यद्वा यथातथाशब्दावध्याहार्यौ । तथाच यथाते मातामध्यमा सुमित्रा । मध्येमकारोयस्याइतियोगाद्वा । नगर्हितव्या तथेयमपिनगर्हितव्येत्यन्वयः ॥ ३७ ॥ **तनि०** वाक्यानि अर्थपरिपूर्णानि । प्रियाणि श्रवणप्रियाणि । मधुराणि "माधुर्यंसुकुमारता" इत्याद्युक्तगुणवन्ति । एवं शब्दधर्मानुक्त्वाऽर्थधर्मानाह—**हृद्यानीति** । हृद्यानि हृदयाह्लादजननानि । अमृतकल्पानि शर्करामध्वादिवदत्यन्तभोग्यानि । मनःप्रह्लादनानि विजातीयप्रत्ययमूलतया आनन्दैकजनकानि ॥ यद्वा हृद्यानि हृदयंगमानि । "बन्धनेचर्षौ" इति यत्प्रत्ययः । वश्यमन्त्रवत्परहृदयबन्धनानीतियावत् ॥ ३९ ॥ **तनि०** रघुनन्दन शत्रुघ्नेन त्वयाचसहितेनभरतेन कदासमेष्यामि संगतोभविष्यामीतियोजनीयं । चकारेण सीतासमुच्चयः । यावदनुरक्तमेलनेपि एकानुरक्तविरहे सर्वानुरक्तविरहइवार्तिर्जायते। तस्यैकस्यापिमेलने अपूर्वसर्वसुहृज्जनमेलनइवातिहर्षोजायतइति त्वयाचेति लक्ष्मणमेलनस्यसिद्धत्वेप्यसिद्धवत्कथनं भरतशत्रुघ्नविषयप्रेमातिशयेनेतिभावः ॥ ४० ॥ इतिषोडशस्सर्गः ॥ १६ ॥

[पा०] १ क—ट. क्रूरदर्शिनी. २ ङ. छ.—ट. ब्रुवति. ३ ज. तेसा. ४ ग. वत्स. ५ घ. गर्हितास्यात्कथंचन. झ. गर्हितव्याकदाचन. ६ ङ. झ. ट. निश्चितैव. ख. सुनिश्चिता. ७ ग. ङ.—ट. कदाह्यहं. कदाप्यहं. ८ ग. तर्पयित्वातु. तर्पयित्वायथान्यायंसपितॄन्. ९ क. ग. ङ. च. ज. झ. ट. सलिलैस्तैः. १० ग. न्देवताअपि. ख. झ. दैवतानपि. ११ ङ. छ. घ. ट. दैवतांश्च. १२ क. ख. ङ. च. छ. ज. ट. तथानघाः.

कृताभिषेकः स रराज रामः सीताद्वितीयः सह लक्ष्मणेन ॥
[1]कृताभिषेको गिरिराजपुत्र्या रुद्रः सनन्दी भगवानिवेशः ॥ ४३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे षोडशः सर्गः ॥ १६ ॥

सप्तदशः सर्गः ॥ १७ ॥

गोदावरीतीरात्सीतालक्ष्मणाभ्यांसहपर्णशालामेत्यऋषिभिःसहसंभाषमाणंराममेत्यशूर्पणखयातत्तत्त्वप्रश्नः ॥ १ ॥ रामेण स्वतत्त्वकथनपूर्वकंतांप्रतितत्तत्त्वादिप्रश्नः ॥ २ ॥ तयारामंप्रतिस्वतत्त्वकथनेनस्वस्यभार्याभावेमस्वीकारप्रार्थनापूर्वकंसीतालक्ष्मणयोर्भक्षणप्रतिज्ञानम् ॥ ३ ॥

कृताभिषेको रामस्तु सीता सौमित्रिरेव च ॥ तस्माद्गोदावरीतीरात्ततो जग्मुः स्वमाश्रमम् ॥ १ ॥
आश्रमं तमुपागम्य राघवः सहलक्ष्मणः ॥ कृत्वा पौर्वाह्णिकं कर्म[2] पर्णशालामुपागमत्[3] ॥ २ ॥
उवास सुखित[4]स्तत्र पूज्यमानो महर्षिभिः ॥ [5]लक्ष्मणेन सह भ्रात्रा चकार विविधाः कथाः ॥ ३ ॥
स रामः पर्णशालायामासीनः सह सीतया ॥ विरराज महाबाहुश्चित्रया [6]चन्द्रमा इव ॥ ४ ॥
[7]तथाऽऽसीनस्य रामस्य कथासंसक्तचेतसः ॥ तं देशं राक्षसी [8]काचिदाजगाम यदृच्छया ॥ ५ ॥
सा तु [9]शूर्पणखा नाम दशग्रीवस्य रक्षसः ॥ भगिनी राम[10]मासाद्य ददर्श त्रिदशोपमम् ॥ ६ ॥
[11]सिंहोरस्कं महाबाहुं [12]पद्मपत्रनिभेक्षणम् ॥ [13]आजानुबाहुं दीप्तास्यमतीव प्रियदर्शनम् ॥ ७ ॥
गजविक्रान्तगमनं जटामण्डलधारिणम् ॥ सुकुमारं महासत्त्वं पार्थिवव्यञ्जनान्वितम् ॥ ८ ॥

ताः ॥ ४२ ॥ रुद्रः सनन्दीत्युपमया दुष्प्रधर्षणत्वमुच्यते । रुद्रः सविष्णुर्भगवानिवेश इति न क्वचिदपि कोशे दृश्यते । कश्चिद्दृश्यत इत्याह तदा अभूतोपमेति युक्तमिति ज्ञेयं ॥ ४३ ॥ इतिश्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षोडशः सर्गः ॥ १६ ॥

एवं रामतपोविशेषद्योतनाय हेमन्तं प्रथमप्रवृत्तमुपवर्ण्य ततस्त्रिषु संवत्सरेष्वतीतेषु कदाचिच्चैत्रमासे प्रसक्तं भाविसकलराक्षसवधनिधानत्वेन शूर्पणखावृत्तान्तमुपक्षिपति सप्तदशे—कृताभिषेक इत्यादि । ततः अभिषेकान्तरभाविकृत्यानन्तरं । आश्रमं तपोवनं । " तपोवने मठे ब्रह्मचर्यादावाश्रमोस्त्रियां " इति बाणः ॥ १ ॥ पूर्वाह्णे भवं पौर्वाह्णिकं ब्रह्मयज्ञादि नत्वग्निकृत्यं । अनुदितहोमत्वेन तस्य सूर्योपस्थानानन्तरभावित्वाभावात् । पर्णशालामुपागमत् आश्रमे पर्णशालातो बहिरेव कर्तव्यमनुष्ठाय वासस्थानमगमदित्यर्थः ॥ २ ॥ कथाः पुराणेतिहासकथाः । चकार उवाचेत्यर्थः । तथा चोक्तं धातुवृत्तौ " करोतिरभूतप्रादुर्भावे वर्तते अश्मानमितः कुरु पादं जले कुरु यः प्रथमः शकलः परापतेत् स्स्वरुः कार्यः चोरंकारमाक्रोशतीत्यदौ अवस्थापननिर्मलीकरणोपादानोच्चारणादौ प्रयोगात् । चौरंकारमित्यत्र चोरशब्दमुच्चार्येत्यर्थः । नह्यत्र चोरः क्रियते । अर्थनिर्देशस्तूपलक्षणं " इति ॥ ३ ॥ चित्रया चित्रानक्षत्रेण । चित्रापौर्णमास्यामितिभावः ॥ ४ ॥ रामस्यासीनस्य रामे आसीने ॥ ५ ॥ राक्षसीमृषिर्विशेषयति—सेति । राममासाद्य ददर्श रामं दृष्ट्वाआससादेत्यर्थः । समानकर्तृकत्वमात्रेल्यप् ॥ ६ ॥ सिंहोरस्कं सिंहशब्दः श्रेष्ठवाची विशालोरस्कमित्यर्थः ॥ ७ ॥ महासत्त्वं महाबलं । पार्थिवव्यञ्जनानि रा-

ति० पर्णशालां बाह्यां ॥ २ ॥

[पा०] १ क. ख. ग. ङ. च. ज.—ट. कृताभिषेकस्त्वगराज. २ क. ग. छ. ज. ञ. सर्वं. ३ क. ग. च. छ. ज. ञ. मुपाविशत्. ४ ख. सहितः. ५ इदमर्धं क. ग. ङ.—ट. पुस्तकेषु. विरराजमहाबाहुरित्यर्धात्परतः. तथासीनस्येत्यर्धात्पूर्वं दृश्यते. ६ क. सहचन्द्रमाः. ७ ङ. ट. तदा. ८ घ. कामात्. ९ क.—घ. छ. ज. शूर्पनखी. १० क. मागम्य. ११ ङ. झ. ट. दीप्तास्यंच. १२ ङ. झ. ट. पत्रायतेक्षणं. १३ इदमर्धं ङ. झ. ट. पाठेषुनदृश्यते.

राममिन्दीवरश्यामं कन्दर्प[1]सदृशप्रभम् ॥ बभूवेन्द्रोपमं दृष्ट्वा राक्षसी काममोहिता ॥ ९ ॥
सुमुखं दुर्मुखी रामं वृत्तमध्यं महोदरी ॥ विशालाक्षं विरूपाक्षी सुकेशं ताम्रमूर्धजा ॥ १० ॥
[2]प्रीतिरूपं विरूपा सा सुस्वरं भैरवस्वरा ॥ तरुणं दारुणा वृद्धा दक्षिणं वामभाषिणी ॥ ११ ॥
न्यायवृत्तं सुदुर्वृत्ता प्रियमप्रियदर्शना ॥ शरीरजसमाविष्टा राक्षसी [3]वाक्यमब्रवीत् ॥ १२ ॥
जटी तापस[4]रूपेण सभार्यः शर[5]चापधृत् ॥ आगतस्त्वमिमं देशं कथं राक्षससेवितम् ॥
किमागमन[6]कृत्यं ते तत्त्वमाख्यातुमर्हसि ॥ १३ ॥
एवमुक्तस्तु राक्षस्या शूर्पणख्या परंतपः ॥ ऋजुबुद्धितया सर्वमाख्यातुमुपचक्रमे ॥ १४ ॥
अनृतं न हि रामस्य कदाचिदपि संमतम् ॥ [7]विशेषेणाश्रमस्थस्य समीपे स्त्रीजनस्य च ॥ १५ ॥
आसीद्दशरथो नाम राजा त्रिदशविक्रमः ॥ तस्याहमग्रजः पुत्रो रामो नाम जनैः श्रुतः ॥ १६ ॥
भ्राताऽयं लक्ष्मणो नाम यवीयान्मामनुव्रतः ॥ इयं भार्या च वैदेही मम सीतेति विश्रुता ॥ १७ ॥
नियोगात्तु नरेन्द्रस्य पितुर्मातुश्च यन्त्रितः ॥ धर्मार्थं धर्मकाङ्क्षी च वनं वस्तुमिहागतः ॥ १८ ॥
त्वां तु वेदितुमिच्छामि [8]कथ्यतां [9]काऽसि [10]कस्य वा ॥ १९ ॥
[11]न हि तावन्मनोज्ञाङ्गी राक्षसी [12]प्रतिभासि मे ॥ [13]इह वा किंनिमित्तं त्वमागता ब्रूहि तत्त्वतः ॥२०॥
साऽब्रवीद्वचनं श्रुत्वा राक्षसी [14]मदनार्दिता ॥ श्रूयतां राम [15]वक्ष्यामि तत्त्वार्थं वचनं मम ॥ २१ ॥

जलक्षणानि । कामकृतमोहहेतवो विशेषणानि ॥ ८—९ ॥ तस्यास्तस्मिन्मनःप्रवृत्तिं मुनिः परिहसति—सुमुखमित्यादिना । वृत्तमध्यं तनुमध्यं । विरूपाक्षी विकटनेत्री । सुकेशं नीलकेशं ॥ १० ॥ प्रीतिरूपं प्रियरूपं । प्रीयत इति प्रीतिः । विरूपा विकटरूपा । सुस्वरं स्निग्धगम्भीरस्वरं तरुणं युवानं सौम्यं चेत्यर्थः। दारुणेति प्रतियोगिनिर्देशात् दक्षिणं ऋजुभाषिणं । वामभाषिणी वक्रभाषिणी ॥ ११ ॥ न्यायवृत्तं उचिताचारं । शरीरजो मन्मथः ॥१२॥ तापसरूपेण जटी कामुकरूपेण सभार्यः क्षत्रियरूपेण शरचापधृत् । राक्षससेवितं एतद्रूपासहैः सेवितमित्यर्थः ॥१३॥ शूर्पनख्येति छान्दसौ ङीप्णत्वाभावौ। ऋजुबुद्धितया कुटिलेष्वप्यकुटिलबुद्धितया ॥ १४ ॥ आश्रमस्थस्य तपोवनस्थस्य ॥ १५—१६ ॥ यवीयान् कनिष्ठः । अनुव्रतः अनुसरणं व्रतं यस्य सः । वैदेही विदेहराजपुत्री ॥ १७ ॥ मातुः कैकेय्याः । यन्त्रितः नियतः चोदित इति यावत् । धर्मकाङ्क्षी पितृवाक्यपालनरूपधर्मकाङ्क्षी । धर्मार्थं तपोरूपधर्मसिद्ध्यर्थं । वनंवस्तुं यन्त्रितः सन्निहागत इत्यन्वयः ॥ १८ ॥ कासीति नामजातिप्रश्नः। कस्येति पित्रादिविषयः प्रश्नः ॥ १९ ॥ तावत् कार्त्स्न्येन । मनोज्ञाङ्गी न भवसि मां प्रति राक्षसीति प्रतिभासि । यद्वा राक्षससेवित इति तद्वचनात् राक्षसीत्व मित्याशङ्क्य परिहरति । मनोज्ञाङ्गि त्वं राक्षसीति न प्रतिभासीति रामदर्शनकाले तथारूपं कृतवती कामरूपत्वात् । दुर्मुखीत्यादिकं वास्तवाभिप्रायेण मुनिनोक्तमिति ज्ञेयं ॥ २० ॥ तत्त्वार्थं परमार्थं

ति० सुमुखमित्यादि । विषमालङ्कारोत्र ॥ १० ॥ **ति०** शूर्पनख्येतियौगिकं ॥ १४ ॥ **शि०** त्रिदशेषुदेवेषु विक्रमः प्रसिद्धः पराक्रमोयस्यसः ॥ १६ ॥ **ति०** कस्यत्वं कन्येतिशेषः । कासि किंनामासि । कस्य वंशजेतिशेषः ॥ १९ ॥ **ति०** राक्षसी एवंमनोज्ञाङ्गत्वस्य कामरूपत्वंविनाऽसंभवात् । कामरूपत्वंच राक्षसत्वंविनानेतिभावः ॥ २० ॥ **ति०** मदनार्दिता रामदर्शनादितिशेषः ॥ २१ ॥

[**पा०**] १ क. च. छ. ज. सदृशंप्रभुं. २ क. ङ. च. छ. झ. ञ. ट. प्रियरूपं. ३ ख.—ट. राममब्रवीत्. ४ ङ. झ. ट. वेषेण. ५ घ. चापभृत्. ख. च.—ट. चापधृक्. ६ क. ग. च. छ. ज. ञ. कार्यं. ७ क. ख. च. ज. ञ. विशेषादाश्रम. ८ ङ. झ. ट. कस्यत्वं. ९ क. काच. १० ग. छ. कस्यच. ११ ङ. च. झ. ट. त्वंहि. १२ क. घ. प्रतिभाति. १३ च. छ. ज. इहैव. १४ च. ज. मदनान्विता. १५ ङ. छ. ट. तत्वार्थंवक्ष्यामि. च. ज. ञ. वक्ष्यामितत्वार्थवचनं.

अहं [1]शूर्पणखा नाम राक्षसी कामरूपिणी ॥ अरण्यं विचरामीदमे[2]का सर्वभयंकरा ॥ २२ ॥
[3]रावणो नाम मे भ्राता [4]बलीयान्राक्षसेश्वरः ॥ [5]वीरो विश्रवसः पुत्रो यदि ते श्रोत्रमागतः ॥ २३ ॥
[6]प्रवृद्धनि[7]द्रश्च सदा कुम्भकर्णो महाबलः ॥ विभी[8]षणस्तु धर्मात्मा न तु राक्षसचेष्टितः ॥ २४ ॥
प्रख्यातवीर्यौ च रणे भ्रातरौ खरदूषणौ ॥ तानहं समतिक्रान्ता राम त्वा पूर्वदर्शनात् ॥
समुपेताऽस्मि भावेन भर्तारं पुरुषोत्तमम् ॥ २५ ॥
अहं प्रभावसंपन्ना स्वच्छन्दबलगामिनी ॥ चिराय भव [9]मे भर्ता सीतया किं करिष्यसि ॥ २६
विकृता च विरूपा च न चेयं सदृशी तव ॥ अहमेवानुरूपा ते [10]भार्यारूपेण पश्य माम् ॥ २७ ॥
[11]इमां विरूपामसतीं [12]करालां निर्णतोदरीम् ॥ अनेन [13]ते सह भ्रात्रा भक्षयिष्यामि मानुषीम् ॥२८॥
ततः पर्वतशृङ्गाणि वनानि विविधानि च ॥ पश्यन्सह मया [14]कान्त दण्डकान्विचरिष्यसि ॥ २९ ॥

॥ २१ ॥ कामरूपिणी इतोप्यधिकरूपधारणेसमर्था । सर्वभयंकरेति वक्ष्यमाणरतिप्रतिबन्धकनिवारणक्षमतोक्ता॥ १२॥ कासीति प्रश्नस्योत्तरमुक्त्वा कस्येत्यस्य प्रश्नस्योत्तरमाह—रावणइत्यादिना ॥ २३ ॥ कुम्भकर्णश्च मे भ्रातेत्यन्वयः। विभीषणस्तु तस्य विशेषोस्ति सोपि मे भ्रातेत्यर्थः । तं विशेषमाह—धर्मात्मेति । धर्मात्मा धर्मस्वभावः । राक्षसचेष्टितो न जन्मना राक्षसोपि न राक्षसव्यापारइत्यर्थः ॥ २४ ॥ एतद्देशागमने निमित्तमाह—प्रख्यातेति । खरदूषणौ जनस्थानस्थावितिशेषः । एवं भ्रातृकथनेन रामस्य स्वपरिग्रहे भीतिर्माभूदित्याह—तानहमिति । अतिक्रान्ता अतिक्रम्य वर्तमाना स्वच्छन्दचारिणीत्यर्थः । त्वा त्वां । पूर्वदर्शनात् प्रथमदर्शनमारभ्य । अपूर्वदर्शनादिति वा छेदः । देवदानवमर्त्येष्वितः पूर्वमदृष्टत्वद्रूपदर्शनाद्धेतोः। भावेन हृदयेन रत्याख्यभावेन वा । भर्तारं समुपेतास्मि तत्र हेतुः—पुरुषोत्तममिति ॥ २५ ॥ सीतायां विद्यमानायां किंत्वयेत्यत्राह—अहमिति । स्वच्छन्दबलगामिनी स्वेच्छानुगुणबलगमना च ॥ २६ ॥ सीतां निन्दति—विकृताचेति । विकृतेति विषमशरीरत्वमुच्यते॥२७॥ करालां विकृतां "करालो दन्तुरे तुङ्गे विशाले विकृतेपि च" इति वैजयन्ती । निर्णतं निरतिशयेन नतं निम्नमुदरं यस्याः सा निर्ण-

---

ति० यदितेश्रोत्रमागतः प्रायश्श्रुतएवभविष्यतीतिभावः ॥ २३ ॥ **ति०** खरदूषणौ विभीषणवत्रिशिराअराक्षसस्वभावत्वान्नोक्तः । रावणादीन्वीर्येणसमतिक्रान्ता ततोधिका । अतस्तान्समतिक्रान्ता त्वदभिसरणेतन्निमित्तभयरहितेत्यावृत्त्यायोज्यं ॥ २५ ॥ **ति०** प्रभावसंपन्ना प्रकृष्टेनभावेनशृङ्गारेणसंपन्ना । यद्वा प्रभावेण शक्त्यतिशयेनसंपन्ना ॥ २६ ॥ **ति०** आत्मनोदेवयोनिभेदत्वेनानभिमतग्रहणसामर्थ्याभिमानेनस्वस्मिन्रामप्रवृत्तयेसीतादूषणमाह—**विकृताचेति** । विकृता मायास्वरूपतयापरिणामाख्यविकारवती । विरूपा नानारूपोच्चावचकार्यकारिणी । अतएव शुद्धमुक्तस्वभावस्यतव नसदृशीतिपरमार्थः । अहमेवानुरूपा उभयोरपिमायाधिष्ठातृत्वादित्यर्थः ॥ २७ ॥ **ति०** असतीं स्वपुरुषस्यदुस्तरानेकसंसारदत्वात् । कार्यरूपेणसतींच । त्वयासहप्रौढ्यानिर्मनुष्येवनेआगमनाच्चासतीं । सतीहिवृद्धानांश्वश्वादीनांसविधएव पातिव्रत्यरक्षणायतिष्ठेदित्याशयः । **ती०** निर्णतोदरीं लंबोदरीं । **स०** मानुषीमितिभक्ष्यत्वेहेतुः ॥ **शि०** ननुसीतायाःकागतिरित्यत्राह—**इमामिति** । विरूपां मदीप्सितरूपविहीनां । असतीं सूक्ष्माङ्गत्वेनाविद्यमानामिव । अतएव करालां पतनभीत्युत्पादिकां । निर्णतोदरीं अतुन्दिलां ॥ २८ ॥

[पा०] १ क. ख. ग. च. छ. ज. ञ. शूर्पनखी. २ घ. मेकाकीतुभयंकरा. ख. च. मेकाकीतुभयंकरी. ३ रावणोनामेत्येकश्लोकस्यस्थाने ङ. झ. ट. पाठेषु. रावणोनाममेभ्रातायदितेश्रोत्रमागतइत्यर्धमेवदृश्यते. ४ क. ख. ग. च. छ. ज. ञ. राक्षसोराक्षसाधिपः. ५ घ. छ. जै. सोयं. क. ख. च. योयं. ञ. साक्षाद्विश्रवसः. ६ अस्मिञ्श्लोके पूर्वोत्तरार्धयोः पौर्वापर्यं ङ. ट. पाठयोर्दृश्यते. ७ क. ज. छ. ज. ञ. निद्रस्तु. ८ ख. घ. विभीषणश्च. ९ ङ. झ. भर्तामे. १० छ. ज. ञ. जायारूपेण. ११ ङ. इमानरूपां. १२ ग. च. छ. ज. ञ. करालीं. १३ क. ख. ग. ङ. ट. सहते. १४ क. ख. ग. ङ. झ. ट. कामी.

[1]इत्येवमुक्तः काकुत्स्थः प्रहस्य मदिरे[2]क्षणाम् ॥ इदं वचनमारेभे वक्तुं वाक्यविशारदः ॥ ३० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे सप्तदशः सर्गः ॥ १७ ॥

अष्टादशः सर्गः ॥ १८ ॥

रामेणशूर्पणखांप्रतिस्वेनतदपरिग्रहेहेतूक्तिपूर्वकंसोपहासंलक्ष्मणवरणचोदना ॥ १ ॥ लक्ष्मणेनसयुक्त्युपन्यासंचोदितया शूर्पणखयापुनारामंप्रतिस्वपरिग्रहप्रार्थनापूर्वकंसीताभक्षणोद्यमः ॥ २ ॥ रामचोदनयालक्ष्मणेनछिन्नकर्णनासयाशूर्पणखया खरसमीपगमनम् ॥ ३ ॥

[3]ततः [4]शूर्पणखां रामः कामपाशावपाशिताम् ॥ [5]स्वेच्छया श्लक्ष्णया वाचा स्मितपूर्वमथाब्रवीत् ॥ १ ॥
कृतदारोस्मि भवति भार्येयं दयिता मम ॥ त्वद्विधानां तु नारीणां [6]सुदुःखा ससपत्नता ॥ २ ॥
अनुजस्त्वेष मे भ्राता शीलवान्प्रियदर्शनः ॥ श्रीमानकृतदारश्च लक्ष्मणो नाम वीर्यवान् ॥ ३ ॥
[7]अपूर्वी भार्यया चार्थी तरुणः प्रियदर्शनः ॥ अनुरूपश्च ते भर्ता [8]रूपस्यास्य भविष्यति ॥ ४ ॥

तोदरी ॥ २८—२९ ॥ तां मदिरेक्षणां मदयति दर्पयतीति मदिरं तादृशमीक्षणं यस्यास्तां । मददर्पशोभनयोरित्यस्माद्धातोः " इषिमदि—" इत्यादिना किरच् प्रत्ययः । अत्रसार्धत्रिंशच्छ्लोकाः ॥ ३० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्तदशः सर्गः ॥ १७ ॥

अथ खरक्रोधहेतुः शूर्पणखाविरूपकरणमष्टादशे। ततः तत्र पर्णशालायां । अथ शूर्पणखावचनानन्तरं । स्वेच्छया स्पष्टार्थया श्लक्ष्णया मृद्व्या। काम एव पाशः तेनावपाशितां संजातपाशां बद्धामित्यर्थः ॥ १ ॥ कृतदारः स्वीकृतभार्यः । करोतेरनेकार्थत्वात् । अस्मीत्यहमित्यस्मिन्नर्थे निपातः । भवतीति शूर्पणखायाः संबोधनं । इष्टत्वेन त्यक्तुमनर्हेत्याह—दयितेति । तर्हि " तुल्योनेकत्रदक्षिणः " इत्युक्तदक्षिणो भवेत्याशङ्क्याह—त्वद्विधानामिति । सुदुःखा सुतरां दुःखकरी । सपत्न्या सहिता ससपत्नी तस्या भावः ससपत्नता । "त्वतलोर्गुणवचनस्य " इति पुंवद्भावः । गुणत्वं चास्य न शुक्लतादिवत् किंतु कठिनत्वमित्यादिवद्द्रव्यत्वव्यावृत्तिः । अतः सपत्नीसाहित्यरूपगुणवचनत्वात्पुंवद्भावः ॥ २ ॥ अकृतदारः असहकृतदार इत्यर्थः । " न वितथापरिहासकथास्वपि " इत्युक्तेः "अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन" इत्युक्तेश्चाकृतदार इति नार्थः ॥ ३ ॥ पूर्वं भार्यासुखं ज्ञातमनेन पूर्वी " पूर्वादिनिः " इति इनिः । न पूर्वी

टीका० मदिरेक्षणां रक्तलोचनां ॥ ३० ॥ इतिसप्तदशस्सर्गः ॥ १७ ॥

ति० स्वेच्छयेतिपाठे परिहासविनोदेनेत्यर्थः । अतएवस्मितपूर्वमितितीर्थः । स्वच्छन्दामितिपाठोयुक्तः । स्वेच्छाचारिणीमित्यर्थः । **स०** स्वेच्छया स्वपतित्वापेक्षया ॥ १ ॥ **ति०** कृतदारः ऊढभार्यः । इयंभार्यामम दयिता संनिहिताचेतिशेषः । ससपत्नता सशत्रुता । पत्युर्भार्यान्तरंहिभार्यान्तरस्यशत्रुभूतंभवति । सपत्नीसाहित्यमितिवार्थः । अगुणवचनत्वेप्यार्षःपुंवद्भावः । सपत्नीशब्दश्चसपत्नप्रकृतिकोपिभर्तुर्द्वितीयभार्यायामेवरूढइतिध्येयं । **शि०** नन्वियंतुमयाभक्ष्यतइत्यतआह—**दयितेति** । अतिप्रिया । एतेन न भक्षणीयेतिसूचितं । ननुमयासहइयमपितिष्ठत्वित्यतआह—**त्वद्विधानामिति** ॥ २ ॥ **ती०** " गुरुणापि समंहास्यंकर्तव्यंकुटिलंविना " इतिन्यायेन भ्रातृविषयमपिपरिहासंप्रयोजयन्रामोलक्ष्मणविषयत्वेनप्रवृत्त्याभासप्रत्यायकैस्तात्पर्येण निवृत्तिप्रतिपादकैश्श्लिष्टशब्दैरुत्तरमनुभाषते—**अनुजइत्यादिना** । **ति०** अकृतदारः अकृतपरदारपरिग्रहइति धातूनामनेकार्थत्वादसंनिहितदारइतिवाहृदिस्थोर्थः । नहिरामोमिथ्याब्रूते । परिहासादौमिथ्याभाषणे न दोषइत्यनेनसूच्यतइतिवयं ॥ ३ ॥ **शि०** अकृतदारः न कृताः वनेस्वीकृता दारायेनसः । अतएवापूर्वी पूर्वभार्याभाववान् अतएवभार्ययाऽर्थीप्रयोजनवांश्च

[**पा०**] १ अस्यार्धस्यवैपरीत्येनैकमर्धं ततोऽधिकमर्धद्वयंच क. ख. पाठयोर्दृश्यते. इत्येवमुक्त्वाकाकुत्स्थंप्रहस्यमदिरेक्षणा । देवीलक्ष्मणमध्येतुबभूवावस्थितापुनः । संप्रहासनिमित्तंतुरामःशूर्पणखांततःइति. २ क. ग. छ. ज. ञ. मदिरेक्षणः. ३ क. ग. ङ. च. ज.—ट. तांतु. ४ क. शूर्पनखीं. ५ क. ख. ङ.—ट. स्वेच्छया. ६ च. ज. ट. सुदुःखाच. ख. सुदुःखाहि. ७ ख. च. ज. अपूर्वभार्यया. घ. अपूर्वभावोभार्यार्थी. च. शीलवान्प्रिय. ८ घ. रूपस्यच.

एनं भज विशालाक्षि भर्तारं भ्रातरं मम ॥ असपत्ना वरारोहे मेरुमर्कप्रभा यथा ॥ ५ ॥
इति रामेण [1]सा प्रोक्ता राक्षसी काममोहिता ॥ विसृज्य [2]रामं सहसा ततो लक्ष्मणमब्रवीत् ॥ ६ ॥
अस्य रूपस्य ते युक्ता भार्याऽहं वरवर्णिनी ॥ मया सह सुखं सर्वान्दण्डकान्विचरिष्यसि ॥ ७ ॥
एवमुक्तस्तु सौमित्री राक्षस्या वाक्यकोविदः ॥ ततः [3]शूर्पनखीं स्मित्वा लक्ष्मणो [4]युक्तमब्रवीत् ॥८॥
कथं दासस्य मे दासी भार्या भवितुमिच्छसि ॥ सोहमार्येण परवान्भ्रात्रा कमलवर्णिनि ॥ ९ ॥
समृद्धार्थस्य सिद्धार्था मुदिता[5]मलवर्णिनी ॥ आर्यस्य त्वं विशालाक्षि भार्या भव यवीयसी ॥ १० ॥
[6]एनां विरूपामसतीं करालां निर्णतोदरीम् ॥ [7]भार्यां वृद्धां परित्यज्य त्वामेवैष भजिष्यति ॥ ११ ॥
को हि रूपमिदं श्रेष्ठं संत्यज्य वरवर्णिनि ॥ मानुषीषु वरारोहे [8]कुर्याद्भावं विचक्षणः ॥ १२ ॥
इति सा लक्ष्मणेनोक्ता [9]कराला निर्णतोदरी ॥ मन्यते [10]तद्वचस्तथ्यं परिहासाविचक्षणा ॥ १३ ॥
सा रामं पर्णशालायामुपविष्टं परंतपम् ॥ सीतया सह दुर्धर्षमब्रवीत्काममोहिता ॥ १४ ॥

अपूर्वी चिरादज्ञातभार्यासुख इत्यर्थः । अतएव भार्यया अर्थी प्रयोजनवान् । इदं वचनद्वयं स्वभार्याविषयकान्तराशयेन प्रयुक्तं । अनुरूपश्च ते भर्तेत्यत्र अभर्तेति च्छेदेनान्तराशयः । रूपस्यास्य कुत्सितस्य रूपस्येत्यर्थः ॥ ४ ॥ विशालाक्षी वर्तुलतया विशालाक्षीत्वमपि गम्यते । अर्कप्रभा मेरुं यथा भजति तथेत्यन्वयः । अर्कप्रभा मेरुं प्राप्य यथा निवर्तते तथेत्यप्यर्थः । एवं रामो दयालुतया स्वस्मिन्काममोहेन प्राप्तायाः स्त्रियाः सहसा धिक्कारेण दुःखं मा भूदिति परिहासकथां प्रवर्तयामास ॥५—७॥ शूर्प इव नखो यस्याः सा शूर्पनखी संज्ञाया अविवक्षितत्वात् "स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्" इति ङीष् । असंज्ञात्वादेव "पूर्वपदात्संज्ञायां—" इति णत्वाभावः ॥ ८ ॥ दासस्य मे भार्या भूत्वा कथं दासी भवितुमिच्छसि । कस्य दासस्त्वमित्यत्राह—सोहमिति । अहमार्येण ज्येष्ठेनभ्रात्रा । परवान् नाथवान् । "दूरानात्मोत्तमाःपराः" इत्यमरः । तस्य दासोहमित्यर्थः । अकमलवर्णिनीत्यपि च्छेदः ॥ ९ ॥ सिद्धार्था सिद्धनिवृत्तिः । "अर्थोभिधेयरैवस्तुप्रयोजननिवृत्तिषु" इत्यमरः । अमुदिता मलवर्णिनीत्यपि । यवीयसी कनिष्ठा हीना च ॥ १० ॥ सीतायां विद्यमानायां कथं मां परिग्रहीष्यसीत्यत्राह—एनामिति । एतादृशावस्थां त्वामेव परित्यज्य सीतां भजिष्यतीति हार्दोर्थः । असतीं अप्रशस्तामिति सीतापक्षे । अतो नपुरः स्फूर्तिकदोषः । करालां दन्तुरां । निर्णतं निरतिशयं उदरं यस्यास्तां ॥ ११ ॥ कोहीति । विपरीतलक्षणा ॥ १२ ॥ परिहासाविचक्षणा परिहासानभिज्ञा ॥ १३ ॥ पर्णशालायामित्यनेन लक्ष्मणो बहिरेव स्थित इति गम्यते

यदिभविष्यतितदाभर्ताभविष्यति । भविष्यतीत्यावर्तते ॥ **ती०** अपूर्वभार्यया चार्थीतिपाठेअयमर्थः । अपूर्वा नूतना या भार्या तामेवार्थयतीति साच त्वमेवभविष्यसीतिपरिहासानुकूलःप्रातीतिकोर्थः । अन्तराशयस्तु अकृतदारः अकृतपरदारपरिग्रहः असंनिहितभार्योवा । अपूर्वभार्यया प्रथमभार्ययैवार्थी चरितार्थः । शीलवान् एकपत्नीव्रतशीलः । प्रियदर्शनः प्रियेषुमित्रेषुदर्शनंदृष्टिर्यस्य सतथोक्तः । तेअभर्तेतिच्छेदः । अनुरूपः स्वभार्यानुरूपइतियावत् । अस्यरूपस्य योग्यइतिशेषः । भविष्यति काक्कादरेणनभविष्यतीत्यर्थः । यद्वा अस्यरूपस्यानुरूपोभविष्यतीतिकाकुः ॥ ४ ॥ **ती०** भर्तारं मद्दास्यकर्मणाऽस्मत्पोषकमित्यन्तराशयः ॥ ५ ॥ **स०** सहसेत्यव्ययं प्रथमैकवचनंच । बलात्कारेण हसेनहासेनसहितेतिचार्थः ॥ ६ ॥ **स०** आर्येणपरवान् आर्याभिन्नपरवान् कमलवर्णिनि कमलसदृशवर्णवति । पुण्डरीकवद्यशस्विनीतिवा । "वर्णोरूपयशोक्षरे" इतिविश्वः ॥ ९ ॥ **स०** अमलवर्णिनि शुद्धाक्षरालापे ॥ १० ॥ **ती०** वस्तुतस्तुविरूपां विशेषरूपां त्रिलोकसुन्दरीमित्यर्थः । असतीं नविद्यतेअन्यासतीयस्यास्तां । परमपतिव्रतेत्यर्थः । करालां उन्नतां । "करालोदन्तुरेतुङ्गेदारुणेपिचकथ्यते" इतिनिघण्टुः । निर्णतोदरीं निर्णतंनिम्नंउदरंयस्यास्सातां ।

[**पा०**] १ ख. सुप्रोक्ता. २ च. छ. ज. ञ. सहसारामं. ३ च. ज. शूर्पणखां. ४ क. ख. ग. वाक्यं घ. युक्तिं. ५ च. छ. ज. ञ. वरवर्णिनी. क. कामरूपिणी. ६ ङ. झ. ञ. ट. एतां. ७ क. ख. घ. वृद्धांभार्यां. ८ च. छ. ज. ञ. रतिंकुर्याद्विचक्षणः. ९ ख. च. छ. ज. कराली. १० ङ. झ. ट. तद्वचस्सत्यं. छ. ज. तद्वचःपथ्यं.

ऍनां विरूपामसतीं करालां निर्णतोदरीम् ॥ वृद्धां भार्यामवष्टभ्य मां न त्वं बहुमन्यसे ॥ १५ ॥
अद्येमां भक्षयिष्यामि पश्यतस्तव मानुषीम् ॥ त्वया सह चरिष्यामि निःसपत्ना यथासुखम् ॥ १६ ॥
इत्युक्त्वा मृगशावाक्षीमलातसदृशेक्षणा ॥ अभ्यधावत्सुसंक्रुद्धा महोल्का रोहिणीमिव ॥ १७ ॥
तां मृत्युपाशप्रतिमामापतन्तीं महाबलः ॥ निगृह्य रामः कुपितस्ततो लक्ष्मणमब्रवीत् ॥ १८ ॥
क्रूरैरनार्यैः सौमित्रे परिहासः कथंचन ॥ न कार्यः पश्य वैदेहीं कथंचित्सौम्य जीवतीम् ॥ १९ ॥
इमां विरूपामसतीमतिमत्तां महोदरीम् ॥ राक्षसीं पुरुषव्याघ्र विरूपयितुमर्हसि ॥ २० ॥
इत्युक्तो लक्ष्मणस्तस्याः क्रुद्धो रामस्य पार्श्वतः ॥ उद्धृत्य खड्गं चिच्छेद कर्णनासं महाबलः ॥ २१ ॥
निकृत्तकर्णनासा तु विस्वरं सा विनद्य च ॥ यथागतं प्रदुद्राव घोरा शूर्पणखा वनम् ॥ २२ ॥
सा विरूपा महाघोरा राक्षसी शोणितोक्षिता ॥ ननाद विविधान्नादान्यथा प्रावृषि तोयदः ॥२३॥
सा विक्षरन्ती रुधिरं बहुधा घोरदर्शना ॥ प्रगृह्य बाहू गर्जन्ती प्रविवेश महावनम् ॥ २४ ॥

ततस्तु सा राक्षससंघसंवृतं खरं जनस्थानगतं विरूपिता ॥
उपेत्य तं भ्रातरमुग्रदर्शनं पपात भूमौ गगनाद्यथाऽशनिः ॥ २५ ॥
ततः सभार्यं भयमोहमूर्च्छिता सलक्ष्मणं राघवमागतं वनम् ॥
विरूपणं चात्मनि शोणितोक्षिता शशंस सर्वं भगिनी खरस्य सा ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे अष्टादशः सर्गः ॥ १८ ॥

॥१४॥ अवष्टभ्य अवलम्ब्य ॥१५॥ पश्यतस्तव त्वयि पश्यति । निःसपत्ना निष्प्रतिबन्धिका ॥ १६ ॥ अलातसदृशेक्षणा निर्ज्वालकाष्ठाग्नितुल्येक्षणा । उल्का निर्गतज्वाला सा चोत्पातकालभाविनी प्रकृते विवक्षिता ॥ १७ ॥ निगृह्य हुंकारेण प्रतिषिध्य ॥ १८ ॥ अनार्यैः दुर्जनैः । कथंचिज्जीवतीं शूर्पणखायाः क्रौर्यमालोक्य कथंचित्स्वास्थ्यमापन्नां ॥ १९ ॥ पूर्वमेव विरूपां पुनर्विरूपयेति भावः । एतावत्पर्यन्तमपराधाभावात्तूष्णीं स्थितं अद्य सीताक्रमणव्याजेनेमां विरूपयेत्यर्थः ॥ २० ॥ तस्याः कर्णनासमित्यन्वयः । प्राण्यङ्गत्वादेकवद्भावः । रामे बद्धभावाया अपि शूर्पणखायास्तदीयापचारेण हानिर्जातेत्यनुसन्धेयं ॥२१॥ यथागतं आगतमार्गमनतिक्रम्य । वनं प्रदुद्रावेति संबन्धः ॥ २२ ॥ शोणितोक्षिता रक्तेन सिक्ता । नादान्ननाद नादांश्चकारेत्यर्थः । ओदनपाकं पचतीतिवत् । प्रावृषि वर्षाकाले ॥२३॥ विसरन्ती स्रवन्ती । रुधिरं रक्तं । प्रगृह्य उद्यम्य ॥ २४ ॥ तं रामवध्यत्वेन प्रसिद्धं । यथाऽशनिः अशनिरिव । गगनात् भूमौ पपात ॥ २५ ॥ उत्तरसर्गार्थमेकेन संगृह्णाति—ततः सभार्यमिति । भयजो मोहो भयमोहः निःसंज्ञता

तनुमध्यामित्यर्थः । वृद्धां ज्ञानशीलगुणवृद्धामित्यर्थः ॥ ११ ॥ **ति०** अनार्यैःपरिहासोनकथमपिकार्यइत्यत्रानुभवंप्रमाणयति । पश्यवैदेहींभक्षयितुमुद्युक्ता । अस्मत्कृतपरिहासदोषादितिशेषः । हेसौम्य कथंचिज्जीवतीमेवेत्युत्तरश्लोकान्वयि ॥ **कतक०** इदंपरिहासेनाप्यनृतवचनंसत्यनिष्ठस्यरामस्यसर्वानर्थमूलं । मूलाविद्यायांमायायांबीजावेशमूलंच ॥ १९ ॥ **टीका०** कर्णनासमित्युपलक्षणं । स्तनोष्ठमपीत्यर्थः । उक्तंचभारते " निकृत्तकर्णनासोष्ठांचकाररघुनन्दनः " इति । स्कान्देच " लक्ष्मणस्तूर्णमुत्थायकरवालेनवीर्यवान् । कर्णौस्तनौनासिकांचअच्छिनद्रामशासनात् " । **स०** कर्णनासेइतिपाठे छान्दसएकवद्भावाभावः । यद्वा कर्णश्च नासाचकर्णनासं । कर्णनासंचकर्णनासंचकर्णनासेइत्येकशेषाद्द्विवचनोपपत्तिः ॥२१॥ **ति०** अत्रेदंबोध्यं—दशवर्षगमनोत्तरंपुनस्सुतीक्ष्णाश्रमगमनंरामस्य । तत्रचवर्षाकालापगमपर्यन्तंस्थित्वाकिंचिच्छिष्टेएकादशेऽगस्त्याश्रमगमनं । ततोवर्षाकालारंभेपञ्चवट्यांवासः। "मयूरनादितारम्याः" इतितत्रोक्तेः । एवंवसतस्तस्यशरद्व्यपायेहेमन्तर्तुःप्रविष्टइत्युक्तेरत्रद्वादशवर्षपूर्तिः। "पञ्चमेपञ्चमेवर्षेद्वौद्वावधि-

[पा०] १ ख.—च. ज.—ट. इमां. २ ङ. झ. ट. नमांलं. च. छ. ञ. मांलंन. ३ ङ. निस्सपत्नी. ४ ङ. झ. ट. अभ्यगच्छत्. ५ ट. प्रगृह्य. ६ क.—ट. पश्यतः. ७ ङ. झ. ञ. ट. कर्णनासे. ८ ख. ग. घ. विकृत्त. ९ च. छ. ज. महानादा. १० ङ. झ. ट. सुमतेजसं.

एकोनविंशः सर्गः ॥ १९ ॥

खरेण शूर्पणखांप्रतितद्वैरूप्यकारिजनप्रश्ने तयातंप्रति रामवृत्तान्तकथनपूर्वकंतच्चोदनयालक्ष्मणेनस्वस्यवैरूप्यकरणोक्तिः ॥ १ ॥ खरेण रामलक्ष्मणवधंचोदितैश्चतुर्दशभीराक्षसैः शूर्पणखयासह रामाश्रमाभिगमनम् ॥ २ ॥

तां तथा पतितां दृष्ट्वा विरूपां शोणितोक्षिताम् ॥ भगिनीं क्रोधसंतप्तः खरः पप्रच्छ राक्षसः ॥ १ ॥
उत्तिष्ठ तावदाख्याहि प्रमोहं जहि संभ्रमम् ॥ व्यक्तमाख्याहि केन त्वमेवंरूपा विरूपिता ॥ २ ॥
कः कृष्णसर्पमासीनमाशीविषमनागसम् ॥ तुदत्यभिसमापन्नमङ्गुल्यग्रेण लीलया ॥ ३ ॥
कः कालपाशमासज्य कण्ठे मोहान्न बुध्यते ॥ यस्त्वामद्य समासाद्य पीतवान्विषमुत्तमम् ॥ ४ ॥
बलविक्रमसंपन्ना कामगा कामरूपिणी ॥ इमामवस्थां नीता त्वं केनान्तकसमा गता ॥ ५ ॥
देवगन्धर्वभूतानामृषीणां च महात्मनाम् ॥ कोयमेवं विरूपां त्वां महावीर्यश्चकार ह ॥ ६ ॥
न हि पश्याम्यहं लोके यः कुर्यान्मम विप्रियम् ॥ अन्तरेण सहस्राक्षं महेन्द्रं पाकशासनम् ॥ ७ ॥

तेन मूर्च्छिता व्याप्ता । राघवं वनमागतं शशंस आत्मविरूपणंच सर्वं शशंस समूलं शशंसेत्यर्थः । खरस्य भगिनी सपत्नीमातृपुत्रत्वान्मातृष्वसेयत्वाच्चेति पूर्वमुपपादितं ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने अष्टादशः सर्गः ॥ १८ ॥

अथ खरवधमूलभूतः खरक्रोध उच्यते एकोनविंशे । भगिनीं ज्येष्ठां ॥ १ ॥ प्रमोहो विसंज्ञता । संभ्रमश्चित्ताप्रतिष्ठा । एवंरूपा यथा भवसि तथा विरूपितेत्यर्थः ॥ २ ॥ उत्तरकाल एवापकर्तुरनिष्टावाप्तिंसूचयन्पृच्छति—क इति । कृष्णेत्यमोघविषत्वव्यञ्जनाय। आसीनं निश्चलमित्यर्थः । आशिषि दंष्ट्रायां विषं यस्येति सर्पविशेषणं । पृषोदरादित्वात्सकारलोपः । " आशीरुरगदंष्ट्रायां प्रियवाक्याभिषङ्गयोः " इति निघण्टुः । ईकारान्तोप्याशीशब्दोस्ति । तुदति व्यथयति । अभिसमापन्नं आभिमुख्येनागतमिति शीघ्रप्रतीकारमूलं । अङ्गुल्यग्रेण लीलयेति प्रभावानभिज्ञत्वोक्तिः । अनेनस्वस्यलीलया सद्यःप्रतीकारसामर्थ्यं द्योतितं ॥ ३ ॥ पुनरपि स्वमहिमानं प्रकटयञ्शूर्पणखां चाश्वासयन्पृच्छति—कः कालेति । यः कण्ठे कालपाशं मृत्युपाशं । आसज्य आबध्य । न बुध्यते उत्तरक्षणे स्वमरणं न जानातीत्यर्थः । यश्च त्वां आसाद्य प्राप्य । उत्तमं विषं कालकूटं पीतवान् स क इत्यन्वयः। अत्र आसादनशब्देन विरूपकरणमुच्यते । त्वदासादनरूपं विषमित्यर्थः ॥ ४ ॥ अथ विस्मयेन पृच्छति—बलेति । इतो गता त्वं केनेमामवस्थां नीतेत्यन्वयः॥५॥ देवेत्यादि । निर्धारणे षष्ठी । देवादीनां मध्ये । अयं एतादृशकार्यकर्ता कः एवं विरूपां चकार ॥ ६ ॥ स्वनिश्चयमाह—नहीति । अत्रतमित्यध्याहार्यं । तस्य

कमासकौ " इत्युक्तेर्मार्गशुक्लैकादश्यांत्रयोदशारंभः । अतएवपाद्मउक्तं—" तत्र तु द्वादशाब्दानि रामस्य अतिचक्रमुः । कस्मिंश्चिदथ काले तु राक्षसी कामरूपिणी । तत्र शूर्पणखा भेजे राघवं रावणानुजा" इतिकेचित् । अन्येतु त्रयोदशेकिञ्चिदवशिष्टेशूर्पणखागमनं ततोमाघेसीताहरणमित्याहुः । भारतेयुधिष्ठिरवनवासस्याधिकमासंगृहीलाऽर्वागेवसमाप्तेः । "पञ्चमेपञ्चमेवर्षेद्वौमासावुपजायतः । एषामभ्यधिकामासाःपञ्चद्वादशक्षपाः । त्रयोदशानांवर्षाणामितिमेवर्ततेमतिः" इतिभीष्मेणोक्तत्वात्तद्रीत्याऽत्रापितथैवोचितमितिपूर्वव्याख्यैवयुक्तेतिममभाति । यत्तुतत्रत्रयोदशाब्दानिरामस्यअतिचक्रमुरितिपाद्मेपाठःक्वचित् तत्रापिप्रवेशमात्रेणतदतिक्रमव्यवहारः । यथान्येतु वादिनामर्धावस्थितौतद्व्यवहारइतिबोध्यं । प्रचुरस्तुद्वादशाब्दानीत्येवपाठः ॥ **टीका०** सर्गफलं—" कर्णनासापहारंचशृण्वतांपठतामपि । नजातुमानभङ्गस्स्याद्रघुनाथप्रसादतः ।" इतिस्कान्दे ॥२६॥ इत्यष्टादशस्सर्गः ॥ १८ ॥

ती० बलंआत्मशक्तिः । विक्रमः पराभिभवनसामर्थ्यं ॥ ५ ॥ **ती०** अमरेष्विति । अत्रमहेन्द्रशब्दोविशेष्यं । पाकशासन·

[पा०] १ क. ख. ग. तदा. २ ग. क्रोधसंरक्तः. ख. कोपसंतप्तः. ३ व्यक्तमाख्याहीत्यर्धमारभ्यदेवगन्धर्वभूतानामित्यर्धपर्यन्तंविद्यमानानामष्टानामर्धानांपौर्वापर्यं च. छ. ज. ञ. पुस्तकेषु. यस्त्वामद्य. बलविक्रमसंपन्ना. इमामवस्थां. देवगन्धर्व. व्यक्तमाख्याहि. कःकृष्णसर्प. तुदत्यभि. कःकालपाशं. एवंक्रमेणदृश्यते. ४ ङ. छ. रूपविरूपिता. ५ घ. कृतान्तसममापन्नं. ६ च. छ. ज. झ. ञ. ट. कालपाशंसमासज्य. ७ क. ख. घ. मता. ८ ख. सुमहात्मनां. ९ क—ट. महावीर्यस्त्वांविरूपां. १० क. ग. ङ—ट. अमरेषु.

अद्याहं मार्गणैः प्राणानादास्ये जीवितान्तकैः ॥ सलिले क्षीरमासक्तं निष्पिबन्निव सारसः ॥ ८ ॥
निहतस्य मया संख्ये शरसंकृत्तमर्मणः ॥ सफेनं रुधिरं रक्तं मेदिनी कस्य पास्यति ॥ ९ ॥
कस्य पत्ररथाः कायान्मांसमुत्कृत्य संगताः ॥ प्रहृष्टा भक्षयिष्यन्ति निहतस्य मया रणे ॥ १० ॥
तं न देवा न गन्धर्वा न पिशाचा न राक्षसाः ॥ मयापकृष्टं कृपणं शक्तास्त्रातुमिहाहवे ॥ ११ ॥
उपलभ्य शनैः संज्ञां तं मे शंसितुमर्हसि ॥ येन त्वं दुर्विनीतेन वने विक्रम्य निर्जिता ॥ १२ ॥
इति भ्रातुर्वचः श्रुत्वा क्रुद्धस्य च विशेषतः ॥ ततः शूर्पणखा वाक्यं सबाष्पमिदमब्रवीत् ॥ १३ ॥
तरुणौ रूपसंपन्नौ सुकुमारौ महाबलौ ॥ पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ॥ १४ ॥

गर्वविशेषद्योतनाय इन्द्रस्य विशेषणद्वयं ॥ ७ ॥ प्राणान् तस्येति शेषः । जीवितान्तकैः शत्रुजीवितविनाशकरैः । मार्गणैः बाणैः । सारसः हंसविशेषः ॥ ८ ॥ संख्ये युद्धे । शरसंकृत्तमर्मणः बाणच्छिन्नमर्मस्थलस्य । सफेनं प्राणवायुनिर्गमनकालिकफेनसहितं । रक्तं रक्तवर्णं । अचिरप्रवृत्तत्वमनेनोच्यते । मेदिनी भूमिः ॥ ९ ॥ पत्ररथाः पक्षिणः । कायात् देहात् । उत्कृत्य उच्छिद्य । संगताः संघशः समवेताः ॥ १० ॥ मया आहवे अपकृष्टं आकृष्टं इहेति युद्धसन्निधानोक्तिः ॥ ११ ॥ उपलभ्य प्राप्य । दुर्विनीतेन दुर्जनेन । विक्रम्य शौर्यं कृत्वा ॥ १२ ॥ विशेषतः अतिशयेन । क्रुद्धस्य कृतक्रोधस्य ॥ १३ ॥ ननु व्यक्तमाख्याहि केन त्वमेवंरूपा विरूपितेति पृच्छन्तं खरं प्रति " पुत्रौ दशरथस्यास्तां भ्रातरौ रामलक्ष्मणौ " इत्येव

सहस्राक्षशब्दौविशेषणे । एतेषुषष्ठ्यर्थेद्वितीया । यथामहेन्द्रस्येतिदृष्टान्तः । पाकं पाकाख्यंवृत्रासुरभ्रातरं शासितवानितिपाकशासनः । अन्तरेणसहस्राक्षमितिपाठे महेन्द्रमन्तरेण इन्द्रंविना । कोममविप्रियंकुर्यात् तंनहिपश्यामीत्यन्वयः । **ति०** महेन्द्रमित्यस्यान्तरेणेतिशेषः । मनुष्यादीनांतुस्वाप्रियकरणेसंभावनैवनेतिभावः ॥ ७ ॥ **ति०** जीवितान्तगैः जीवितस्यान्तंगमयन्तिप्रापयन्तितैः । तृषयानिष्पिबन् सारसोहंसो यथा सलिलेआसक्तंक्षीरमादत्ते एवंप्राणानादास्यइत्यर्थः ॥ ८ ॥ **ती०** श्रीरामचन्द्रेदोषाणामभावाद्गुणोक्त्यैवतंबोधयति—**तरुणावित्यादि** ॥ **तनि०** एतत्पुत्रावेतन्नामकावितिवक्तव्ये सौन्दर्यवर्णनमस्यावैरूप्यप्राप्तावपिवैराग्योत्पत्त्यभावेन । काममोहितत्वादवशा भ्रातुस्संनिधाववाच्यमपिहृद्गतमेवाह ॥ विषयाभिनिवेशवन्तोह्यनुकूलप्रतिकूलविचारमन्तरेणप्रथमंमनसियल्लग्नंतदेवानुवदन्ति ॥ यद्वा " सर्वाणिरूपाणिविचित्यधीरःनामानिकृत्वा " इतिवत्प्रथमंरूपोदाहरणं । अथवा सुप्तमत्तकुपितानांभावज्ञानंदृष्टमितिकुपितत्वाद्भावज्ञानंप्रकाशितं । यद्वा एवंराक्षसावासवनप्रवेशविरूपकरणाभ्यां तौबलिष्ठावितिमाभैषीः किंतुमृदुप्रकृतिकावित्युच्यते । यद्वा " युवाकुमारं " इत्यादिवेदान्तसिद्धमर्थंराक्षस्याचष्टे । "व्यक्तमेषमहायोगी " इतिमन्दोदरीवत् परत्वंखलुमुक्तवेद्यं स्नेहस्तु दशरथादिभिःकार्यः तदविशेषेणराक्षस्या जातं ज्ञानंस्नेहश्चेत्युभयं रघुनन्दनसौन्दर्यवैलक्षण्यमहिम्नेतिज्ञेयं । ननुरूपसंपदाप्रथमंतरुणत्वादिविशेषणविशिष्टेश्रीरामेभावानुबन्धः । लक्ष्मणेतुविरूपकरणाद्द्वेषः । उभयोःप्राधान्येनग्रहणंकथमितिचेत्परस्परस्यसदृशावितितारुण्यादिसामान्याद्रामप्रत्याख्यानेलक्ष्मणेपिभावबन्धनात् रामेणापिकर्णनासच्छेदाभ्यनुज्ञानेनद्वेषसाम्याच्च नदोषः । ताभ्यामुभाभ्यामिमामवस्थांसंप्राप्तेतिवक्ष्यति । कथं युगपदेकस्याद्द्वयोर्भावबन्धो जातः। ज्येष्ठकनिष्ठभावानुसंधानेपिनतारुण्यवैषम्यं । तेनोभयत्रैकधा(दा)भावबन्धः तारुण्यैक्येपिरूपवैषम्ये अन्यथाभावबन्धस्स्यात्तच्चनेत्याह । **रूपसंपन्नौ** । लोके मन्मथादिभिःरूपापेक्षया यथाप्रार्थनीयौभवेतां तथा रूपसमृद्धौ एतदङ्गप्रत्यङ्गसौष्ठवलेशयाश्रयाखलुमदनोरूपवान् । " रूपदाक्षिण्यसंपन्नःप्रसूतः" इत्युक्तरीत्या उत्पत्तिसिद्धरूपसमृद्धौ नतुवयउपाचितरूपसमृद्धौ । "रामेतिरामेतिसदैवबुद्ध्याविचार्यवाचाब्रुवतीतमेव" इत्येतादृशातिव्यामोहजनकरूपसंपन्नौ । सुकुमारौ आलिङ्गनेकाठिन्यरहितावयवौ पुष्पसमुदायालिङ्गनवत् । अतएव शिरीषपुष्पसाम्यं । सौकुमार्यप्रयुक्तदौर्बल्यंपरिहरति—**महाबलावित** । बलमनुभवसामर्थ्यं । तेन " रामस्तुसीतयासार्धंविजहारबहूनृतून्" इत्युक्तरीत्याऽनवरतकान्तानुभवसंभवेपिबलहानिराहित्यमुक्तं । एतेन राक्षसजातिप्रयुक्तकठिनप्रकृतियुक्ताया अपिस्वस्याःसमरतिप्रदानसामर्थ्यमभिप्रेतं । स्त्रीणांतुस्वानुभवविशेषैः पुरुषोजेतव्यइतिमनोरथः । तमतिक्रम्यस्वबलाधिक्येनक्रीडायांस्त्रियं यो जयति स महाबलः । पुण्डरीकविशालाक्षौ अवयवानांसौन्दर्यंसमीपगमनेसम्यक्प्रकाशते । नेत्रेतु दूरेस्फुटंप्रकाशते । यद्वा पुण्डरीकंसितांभोजं । अनेन सत्वगुणप्रचुरतयादृष्टिप्रसन्नतोच्यते नतुमहापुरुषलक्षणोपयुक्तरक्तान्तत्वं कनीनिकानैल्यंचनिवार्यते । अथवा मनुष्यावतारेणपरत्वगोपनेपि " कप्यासं पुण्डरीकाक्षं' इत्युक्तपुण्डरीकाक्षत्वंप्रकाशतएव । किंच क्षीरसमुद्रवन्नेत्रविशालत्वगांभीर्यंकेनापिनिश्चेतुमशक्यं लोकरीत्यापुण्डरीकसाम्यमुक्तं । वस्तुतस्तु

[पा०] १ झ. जीवितान्तगैः. २ ङ. सफेनरुधिरं. ३ ङ. झ. ट. कस्य. ४ ङ. झ. ट. पातुमिच्छति. ५ घ. मुद्धृत्य. ६ ङ—ट, त्रातुंमहाहवे. ७ च. ज. ञ. ततः. ८ क.—घ. निष्क्रम्य.

वक्तव्ये तरुणावित्यादिना रामादिसौन्दर्यादिकं किमर्थं कथयतीति चेत् अस्या वैरूप्ये जातेपि वैराग्याजननात्काममोहातिशयेन भ्रात्रादिसन्निधानेपि हृद्गतमेवोक्तवती । अनुकूलानां प्रतिकूलानां च रामं दृष्टवतामयमेव स्वभावः । अतएव " यानि रामस्य चिह्नानि " इति पृष्टवतीं सीतां प्रति " त्रिस्थिरस्त्रिप्रलम्बश्च " इति वक्तव्ये " रामः कमलपत्राक्षः सर्वसत्त्वमनोहरः " इत्येवमाह हनुमान् । यद्वा । " सुप्तप्रमत्तकुपितानां भावज्ञानं दृष्टं " इति न्यायेन कर्णनासाच्छेदेनप्रमत्ता कुपिता च शूर्पणखा हृद्गतमेवाह । तरुणौ कामिनीनां प्रथमाकर्षकं वय एव हि अतस्तदुच्यते । परस्परपरिहासकरणेनोभयत्र भावबन्धाविशेषाद्द्विवचनं । वयसातुल्यत्वेपि रूपेकिमनयोस्तारतम्यमस्ति नेत्याह—रूपसंपन्नौ । रूपं सौन्दर्यं तेन संपन्नौ समृद्धौ । इतरेषां कामादीनां रूपमाभ्यां भिक्षित्वा संपादयितव्यमिति मन्यमानावित्यर्थः । यद्वा रूपसंपन्नौ संपन्नरूपौ । आहिताग्न्यादित्वात्परनिपातः । तेन " उत्पन्नं द्रव्यं क्षणमगुणं तिष्ठति " इतिन्यायं विहाय " रूपदाक्षिण्यसंपन्नः प्रसूतः " इत्युक्तरीत्या धर्मिणा सहैवोत्पन्नरूपावित्यर्थः । वयोरूपसत्त्वेपि किं कठिनस्पर्शौ नेत्याह—सुकुमारौ । परुषतरभवच्छरीरवन्नभवत्यनयोश्शरीरं किंतुपुष्पहाससुकुमारौ । एवं सौकुमार्यसत्त्वेपि रतिवैयात्ये किं श्रान्तौ स्यातां नेत्याह—महाबलौ । " रामस्तु सीतया सार्धं विजहार बहूनृतून् " इत्याद्युक्तरीत्याऽनेकर्तुषु विहरणेपि श्रमलवरहितौ । एवं समुदायशोभासंपन्नत्वेपि किमवयवशोभासु वैकल्यं नेत्याह—पुण्डरीकविशालाक्षौ । "संरक्तनयनाघोरा " इत्युक्तरीत्या त्वादृशनयनवन्न भवति तन्नयनमित्यर्थः । पुण्डरीकं सिताम्भोजं । तमोगुणोद्रेकेण निद्राकषायितत्वं रजोगुणोद्रेकेण संरक्तत्वं वा नास्ति । किंतु सर्वदा सत्त्वप्रसन्ननयनावित्यर्थः । न केवलमेवावयवशोभातिशयः चीरकृष्णाजिनाम्बरौ " किमिव हि मधुराणां मण्डनं नाकृतीनां " इत्युक्तरीत्या वल्कलाजिनधारणेप्यतिरमणी-

" अदीर्घमप्रेमदुघं " इत्याद्युक्तरीत्याऽनुपममेव । अपिच बद्धमुक्तनित्यात्मकत्रिविधकोव्युभयविभूतिमेकप्रत्यत्वेनकटाक्षयितुं विशालत्वं । महाबलौ पुण्डरीकाक्षाविति बलंप्रदर्श्य भयंजनयित्वा " जितंतेपुण्डरीकाक्ष " इतिस्तुतिप्रसन्ननेत्रतांप्रकाशयति । सुकुमारौ पुण्डरीकविशालाक्षाविति नयनपुष्पबाणवत्त्वमुक्तं अरविन्दस्यमदनबाणत्वात् । तेनशूर्पणखामनोदारकत्वंव्यज्यते । चीरकृष्णाजिनांबरौ आभरणरहितावेव मां मन्मथपीडितां कृत्वाव्यथयतः । " इयमधिकमनोज्ञावल्कलेनापि"—इत्युक्तंहि कालिदासेन । अतश्चीरकृष्णाजिनधारणेन तयोस्सौन्दर्यं न्यूनतांनैति । किंतु तत्तारुण्यादिगुणसमुदायरञ्जितमिदंचीरं रामशरीरसंनिकर्षेणसर्वस्यापिहृदयाकर्षकंसत् " रूपसंहननंलक्ष्मींसौकुमार्यंसुवेषताम् । ददृशुर्विस्मिताकारारामस्यवनवासिनः" इति स्वरूपध्यानपराणामिदमेव हृदयग्राहकंभवति । द्वितीययोजनायां तरुणौ "ऊनषोडशवर्षः नयुद्धयोग्यतामस्यपश्यामि" इत्याद्युक्तरीत्या युद्धायोग्यौ । यद्वा विषयप्रवणौ नतुयुद्धप्रवणौ । रूपसंपन्नौ " कन्याकामयतेरूपं " इतिरूपेण वनिताजनानुरागजनकसौन्दर्यवन्तौ नतुपौरुषज्ञापकपराक्रमसंपन्नौ ॥ केवलमाकारसुन्दरौ नत्वन्तस्सारवन्तौ । अत्रहेतुः **सुकुमारौ** श्रीमत्कुमारतया श्रमासहनौ भवदीयरक्तलोचननिरीक्षणासहावत्युग्रभवदायुधनिपातंकथंसहेतां महाऽबलौ अत्यन्ताबलौ । स्त्रीनिमित्तंराज्यत्यागेनतयोर्बलंदृष्टमेव । यद्वा महतीरक्षणीया अबला ययोस्तौ । प्रतिबन्धकीभूताऽबलाचास्तीत्यर्थः । पुण्डरीकविशालाक्षौ भाविकार्यापरिज्ञानेन कर्णनासच्छेदःकृतः इतःपरंकिं भविष्यतीति भयेन निर्निमेषेणप्रफुल्लनेत्रौ दैन्येनशीतायमाननेत्रौवा स्वस्थानसामर्थ्येपि जलादपनीतपुण्डरीकवदन्यत्रासामर्थ्यलोचनेनप्रकाशितं । स्वयमशक्तत्वेप्यैश्वर्यादिसंपत्तौप्रबलौ भवतः साचनेत्याह—**चीरकृष्णाजिनांबरौ।** वस्त्राभावेन दारुचर्म मृगचर्मंच वसानौ । अतोद्रव्यसाध्यसेनासंपादनं कथमित्यर्थः । यद्वा आच्छादनमेकजातीयमपिन । किंतु स्थावरेणैकंदत्तं जङ्गमेनैकंदत्तमिति । तृतीययोजनायांतु तरुणौ " ऊनषोडशवर्षः—" इत्युक्तरीत्या अनतिबालावनतिवृद्धौच । यौवनेविजिगीषूणामितिवत् युद्धेनहस्तकण्डूनिरसनंकर्तुमिच्छन्तौ । रूपसंपन्नौ वीररसाभिव्यञ्जकसंहननविशेषौ । "सिंहोरस्कंमहाबाहुं" इतिवत् संनिवेशदर्शनेनशत्रवः पलायन्ते । रूप्यते अनेनेतिव्युत्पत्त्या रूपशब्दोसाधारणनिरतिशयरूपविशेषवाची "नाविजित्यनिवर्तते " इति " यशसश्चैकभाजनं " इतिचबाल्यादारभ्य सुबाहुप्रभृतिनिरसनेनैतावत्पर्यन्तंप्रसिद्धापदानौ । सुकुमारौ अनायासेनशत्रुनिरासकौ । पौरुषदर्शनेहृदयग्राहित्वव त्पसौकुमार्ययोरपि हृदयग्राहित्वं । महाबलौ " सदेवगन्धर्वमनुष्यपन्नगंजगत्सशैलंपरिवर्तयाम्यहम् ।" " सागरमेखलां । महींदहतिकोपेन " इत्याद्युक्तरीत्याप्रसिद्धबलयुक्तौ । बलशब्देनबाहुबलंमनोबलसुप्रायबलंचोच्यते । पुण्डरीकविशालाक्षौ अतिसङ्कटवनसंचारेप्यम्लाननेत्रौ । एतेन युद्धेश्रमावितिज्ञायते । युद्धादिकालेपि शत्रुष्वलक्ष्ययुद्धयानेत्रविकारादिरहितौ "प्रीतिविस्फुरितेक्षणं" इतिवत् शत्रुदर्शनेप्युत्तरोत्तरमुत्साहेनातिविस्तृतनेत्रौ । चीरकृष्णाजिनांबरौ सर्वदायुद्धसंनाहसूचकवस्त्रबन्धादियुक्तौ । यद्वा मृगयाशीलतया तदुचितकृष्णाजिनदारुपटकञ्चुकधरौ । "सत्येनलोकाञ्जयति" इत्युक्तरीत्या तदुचितवेषव्यापारवत्त्वंप्रसिद्धं । महाबलावित्यनेन खरोक्तवीरालापाननादृत्याजेयत्वंसमर्थितं ॥ १४ ॥

फल[1]मूलाशनौ दान्तौ तापसौ धर्मचारिणौ ॥ पुत्रौ द[2]शरथस्यास्तां भ्रातरौ रामलक्ष्मणौ ॥ १५ ॥
गन्धर्वराजप्रतिमौ पार्थिवव्यञ्जनान्वितौ ॥ देवौ[3] वा मानुषौ वा तौ न तर्कयितुमुत्सहे॥ १६ ॥
तरुणी रूपसंपन्ना सर्वाभरणभूषिता ॥ दृष्टा तत्र मया नारी तयोर्मध्ये सुमध्यमा॥ १७ ॥
ताभ्यामुभाभ्यां संभूय प्रमदामधिकृत्य ताम् ॥ इमामवस्थां नीताऽहं यथाऽनाथाऽसती तथा ॥१८॥
तस्याश्चा[4]नृजुवृत्तायास्तयोश्च हतयोरहम् ॥ सफेनं पातुमिच्छामि रुधिरं रणमूर्धनि ॥ १९ ॥
एष मे प्रथमः कामः कृतस्तात[5] त्वया भवेत् ॥ तस्यास्तयोश्च रुधिरं पिबेयमहमाहवे ॥ २० ॥
इति तस्यां ब्रुवाणायां चतुर्दश महाबलान् ॥ व्यादिदेश खरः क्रुद्धो राक्षसानन्तकोपमान् ॥२१॥

यौ । यद्वा कोयमेवं महावीर्य इति भीतं प्रति तयोर्दुर्बलत्वमुच्यते । तरुणौ ऊनषोडशवर्ष इत्याद्युक्तरीत्या युद्धायोग्यौ । यद्वा यौवने विषयैषिणामित्याद्युक्तरीत्या विषयप्रावण्येन युद्धभीतौ । रूपसंपन्नौ "कन्या कामयते रूपं" इत्युक्तरीत्या वनिताजनवशीकरणाय शरीरमुद्धासयन्तौ नपौरुषसंपन्नौ । सुकुमारौ श्रीमत्पुत्रतया संपत्कुमारौ । अतो भवदायुधप्रहारासहौ । महाबलौ विपरीतलक्षणया द्वावेतौ दुर्बलौ । ससैन्यस्य भवतो न पर्याप्तावित्यर्थः । यद्वा सुकुमारतराबलासहितौ युद्धविरोधिकलत्रसहितत्वान्न युद्धार्हौ । पुण्डरीकविशालाक्षौ तयोर्युद्धासामर्थ्यं मद्वैरूप्यकरणानन्तरं किं भविष्यतीति भीत्या शुभ्रीभूतलोचनतया चावगम्यते । चीरकृष्णाजिनाम्बरौ परिधानसंपादनस्याप्यशक्तौ । तत्राप्येकरूपोत्तरीयरहितौ । चीरकृष्णाजिनाम्बरौ स्थावरतिर्यग्भ्यां याचित्वा लब्धे अम्बरे बिभ्राणौ । यद्वा खरस्य प्रोत्साहनाय तयोर्बलातिशय उच्यते—तरुणावित्यादि । तरुणौ जयोत्साहयोग्यवयस्कौ । रूपसंपन्नौ "सिंहोरस्कं महाबाहुं" इत्युक्तरीत्या युद्धाभावेपि दर्शनमात्रेण परहृदयकम्पजनकशरीरौ । सुकुमारौ लीलयैव सर्वसंहरणक्षमौ । महाबलौ मनोबलबाहुबलोपायबलसंपन्नौ । पुण्डरीकविशालाक्षौ वैरिषु गौरवबुद्धिमूलककालुष्यरहिततया विमलनेत्रौ । अनेन शत्रुदर्शनकृतक्षोभराहित्यमुच्यते । चीरकृष्णाजिनाम्बरौ सदा बद्धवसनतया युद्धसन्नद्धावित्यर्थः । एवमुत्तरत्रापि योज्यं ॥ १४—१५ ॥ पुनरपि हृदये परिवर्तमानं तत्सौन्दर्यमाह—गन्धर्वेति । देवाविति । यद्यपि दशरथसुताविति श्रुतं तथापि तत्प्रभावदर्शनेनतदसत्यमेवोक्तमिति मन्य इति भावः ॥ १६ ॥ तत्र आश्रमे ॥ १७ ॥ प्रमदां अधिकृत्य निमित्तीकृत्य । उभाभ्यां संभूय ऐकमत्यं प्राप्य इमामवस्थां नीतास्मि । यथा अनाथा असती कुलटा नीयते तथा नीतास्मीति योजना ॥ १८ ॥ अनृजुवृत्तायाः कुटिलवृत्तायाः । अनेन तत्प्रेरणैव मां तौ विरूपितवन्तावित्यमन्यतेति गम्यते । रणमूर्धनिहतयोरित्यन्वयः। सीताया रणमूर्धनि गमनासंभवाद्धताया इति विपरिणामो न युक्तः । अन्यथा अशक्यत्वाद्रणमूर्धनीत्युक्तं ॥ १९ ॥ अवश्यकर्तव्यत्वाय पुनरप्याह—एष इति । प्रथमः श्रेष्ठः । कामः अभिलाषः । "प्रथमौ प्रवरादिमौ" इतिवैजयन्ती । *तातेति पितृवज्ज्येष्ठसंबोधनं ॥ २० ॥ चतुर्दशेति

स॰ भ्रातराविति खरदूषणयोस्संबोधनं । अतोनपुत्रावित्यादिनाऽर्थतःपुनरुक्तिः ॥ १५ ॥ ती॰ रुधिरंपातुमिच्छामीत्यनेन श्रीरामवर्णनेनस्वस्यकामुकीत्वशङ्कांखरस्यनिवर्तयतीतिज्ञेयं । तस्याहतायाइतिविपरिणामः । तस्याश्चानृजुवृत्तायाइत्यादिश्लोकद्वयस्यवास्तवार्थस्तु रणमूर्धनितयोःरामलक्ष्मणयोः । तृतीयार्थेषष्ठी । अनृजुवृत्तायाः तस्याः त्वद्भगिन्याः । ममेतिशेषः । हतयोः छिन्नयोः । द्वितीयार्थेषष्ठी । कर्णनासिके । पश्येतिशेषः । अतइतःपरमहं सफेनमपिरुधिरंपातुमिच्छामीतिकाकुः । नेच्छाम्येवेत्यर्थः । आहवेतयोस्त्वयंकृतोभवेद्यदि । अपकारइतिशेषः। छिन्नकर्णनासांमांदृष्ट्वाप्युपेक्षसेयदि तदा त्यक्ताहारा देहंत्यक्ष्यामीतिभावः ॥ २० ॥ ती॰ इतितस्यांब्रुवाणायामित्यारभ्य सर्गसमाप्तिपर्यन्तस्यवास्तवार्थस्तु––तस्यांब्रुवाणायां रामवृत्तान्तमितिशेषः । खरः–"तस्माद्यःक्रूररूपेणदेहेनहरताऽमृतम् । विष्णुर्दाशरथिर्भूत्वामोक्षयिष्यतिसुव्रत" इति शिवशापाद्राक्षसत्वंप्राप्तो याज्ञवल्क्यसुतश्चन्द्रकान्तइत्यर्थः । अतएव शूर्पणखामुखाद्रामवृत्तान्तश्रवणानन्तरं विष्णुत्वेनज्ञात्वा सपरिवारस्यस्वस्यरामहस्ताद्वधेच्छुस्सन्भगिनीप्रीतयइव रामेणसहयुद्धार्थराक्षसान्व्यादिदेशेत्यर्थः । अस्मिन्नर्थेशेषधर्मेभीष्मयुधिष्ठिरसंवादकथाऽनुसंधेया ।

[पा॰] १ घ. ङ. छ. ज. मूलाशिनौ. २ ख. घ. दशरथस्येमौ. ३ ङ. झ. ट. दानवावेतौ. ४ क. ख. श्चानतवृत्तायाः. ५ ङ. ज. झ. ञ. स्तत्र.

मानुषौ शस्त्रसंपन्नौ चीरकृष्णाजिनाम्बरौ ॥ प्रविष्टौ दण्डकारण्यं घोरं प्रमदया सह ॥ २२ ॥
तौ हत्वा तां च दुर्वृत्ता[1]मपावर्तितुमर्हथ ॥ इयं च रु[2]धिरं तेषां भगिनी मम पास्यति ॥ २३ ॥
मनोरथोयमिष्टोस्या भगिन्या मम राक्षसाः ॥ शीघ्रं संपाद्यतां [3]तौ च प्रमथ्य स्वेन तेजसा ॥२४॥
[[4]युष्माभिर्निहतौ दृष्ट्वा तावुभौ भ्रातरौ रणे ॥ इयं प्रहृष्टा मुदिता रुधिरं यु[5]धि पास्यति]॥ २५ ॥
इति प्रतिसमादिष्टा राक्षसास्ते चतुर्दश ॥ तत्र जग्मुस्तया सार्धं घना वातेरिता यथा ॥ २६ ॥
ततस्तु [6]ते तं समुदग्रतेजसं [7]तथापि तीक्ष्णप्रदरा निशाचराः ॥
न शेकुरेनं सहसा प्रमर्दितुं [8]वनद्विपा दीप्तमि[9]वाग्निमुत्थितम् ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

विंशः सर्गः ॥ २० ॥

रामेण शूर्पणखासहागतराक्षसावलोकनेन सीतारक्षणे लक्ष्मणनियोजनपूर्वकंरणायनिर्गमनम् ॥ १ ॥ तथा स्वेनस्ववृत्तान्तनिवेदनपूर्वकं सामोक्तौपरुषोक्तावप्यपरावर्तनेनसमरोद्यतानांरक्षसां हननम् ॥ २ ॥ शूर्पणखया खरसमीपमेत्य चतुर्दशराक्षसक्षयनिवेदनम् ॥ ३ ॥

ततः शूर्पणखा घोरा राघवाश्रम[10]मागता ॥ [11]रक्षसामाचचक्षे तौ भ्रातरौ सह सीतया ॥ १ ॥
ते रामं पर्णशालायामुपविष्टं महाबलम् ॥ ददृशुः सीतया सार्धं वैदेह्या[12] लक्ष्मणेन च ॥ २ ॥
[13]तान्दृष्ट्वा राघवः श्रीमान[14]ागतां तां च राक्षसीम् ॥ अब्रवीद्भ्रातरं रामो लक्ष्मणं दीप्ततेजसम् ॥ ३ ॥
मुहूर्तं भव सौमित्रे सीतायाः प्रत्यनन्तरः ॥ इमानस्या वधिष्यामि पदवी[15]मागतानिह ॥ ४ ॥

चतुर्दशसहस्राध्यक्षानित्यर्थः ॥ २१—२२ ॥ दुर्वृत्तां भगिनीवैरूप्यमूलत्वात् । अपावर्तितुं आनेतुं । तां चेतिचकारेण तावपीत्युच्यते । आनयनप्रयोजनमाह —इयं चेति ॥ २३ ॥ अस्या अयं मनोरथः मम चायमिष्टः संमत इत्यर्थः । प्रमथ्य हत्वा ॥ २४—२५ ॥ इतीति । तयोर्मार्गं प्रदर्शयन्त्येति शेषः । इयं खरेणाप्रेरितापि गतेति बोध्यं ॥ २६ ॥ प्रदराः बाणाः । "प्रदरा भङ्गनारीरुग्बाणाः" इत्यमरः । तथा तीक्ष्णप्रदरा अपीति योज्यं । तमेनमित्यन्वयः । उत्थितं राक्षसान् दृष्ट्वा अभिमुखमुद्गतमिति रामविशेषणं । उत्तरसर्गसंग्रहोयं श्लोकः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकोनविंशः सर्गः ॥ १९ ॥

अथ चतुर्दशराक्षसवधो विंशे । ततः शूर्पणखेत्यादि ॥ १—३ ॥ प्रत्यनन्तरः प्रत्यासन्नः रक्षक इति

" भीष्मउवाच । याज्ञवल्क्यसुता राजंस्त्रयोवैलोकविश्रुताः । चन्द्रकान्तमहामेधविजयाब्राह्मणोत्तमाः । खरश्चदूषणश्चेतित्रिशिरा ब्रह्मवित्तमाः । आसंस्तेषांचशिष्याश्च चतुर्दशसहस्रधा " इति । अतएव बाह्यदृष्ट्यापरुषोक्तिवत्प्रतीयमानानि तस्यवाक्यानिसौम्यरूपाण्येव तथाव्याख्यास्यामः ॥ २१ ॥ **स०** रुधिरंममपास्यतीत्यन्वयेन खरमरणमसूचयत्कविरितिज्ञेयं ॥ **ती०** वस्तुतस्तु हेराक्षसाः इयंभगिनी प्रमथ्यममरुधिरंपास्यति । अतस्तेषांसमीपंगत्वा स्वतेजसाशीघ्रेणतौरामलक्ष्मणौ । दुर्वृत्तां दुर्लभंवृत्तंआचारोयस्यास्तांसीतांच हत्वा ज्ञात्वा । "हन हिंसागत्योः" इतिधातोर्गत्यर्थस्यज्ञानार्थत्वात् । अपावर्तितुं प्रतिनिवर्तितुमर्हथ । अयंमम भगिन्याः इष्टोमनोरथः ॥ २३ ॥ इत्येकोनविंशस्सर्गः ॥ १९ ॥

ति० सहसीतया वर्तमानावितिशेषः ॥ १ ॥

[**पा०**] १ क.—ट. मुपावार्तितुं. २ ख. ङ.—ट. भगिनीतेषांरुधिरं. ३ क.—ट. गत्वातौप्रमथ्यस्वतेजसा. ४ क. ख. ङ. झ. ट. पुस्तकेष्वयंश्लोकोदृश्यते. ५ क. भूरि. अयं पाठः झ. ट. पाठयोर्नदृश्यते. ६ च. छ. ज. तेराघवमुग्रतेजसं. ७ च. छ. ज. तथामुतीक्ष्णप्रदराश्चराक्षसाः. घ. दुरासदंधर्षयितुंनचाशकन्वनद्विपादीप्तमिवाग्निमुद्धतं. ८ क. च. ज. वनेद्विपाः. ९ छ. दीप्तदवाग्नि. १० क. ग. घ. माश्रिता. ११ ङ. झ. ट. राक्षसानाचचक्षे. १२ ङ.–ट. लक्ष्मणेनापिसेवितं. १३ झ. ट. तांदृष्ट्वा. १४ ख. ङ. झ. ट. नागतांस्तांश्चरक्षसान्. १५ ज. मागतानहं.

वाक्यमे[1]तत्ततः श्रुत्वा रामस्य विदितात्मनः ॥ तथेति लक्ष्मणो वाक्यं [2]रामस्य प्रत्यपूजयत् ॥ ५ ॥
राघवोपि महच्चापं चामीकरविभूषितम् ॥ चकार सज्यं धर्मात्मा तानि रक्षांसि चाब्रवीत् ॥ ६ ॥
पुत्रौ दशरथस्यावां भ्रातरौ रामलक्ष्मणौ ॥ प्रविष्टौ सीतया सार्धं दुश्चरं दण्डकावनम् ॥ ७ ॥
फलमूलाशनौ दान्तौ तापसौ [3]धर्मचारिणौ ॥ वसन्तौ दण्डकारण्ये किमर्थमुपहिंसथ ॥ ८ ॥
युष्मान्[4]पापात्मकान्हन्तुं विप्रकारान्[5]महाहवे ॥ ऋषीणां तु नियोगेन [6]प्राप्तोऽहं [7]सशरायुधः ॥ ९ ॥
तिष्ठतैवात्र सं[8]तुष्टा नो[9]पावर्तितुमर्हथ ॥ यदि प्राणैरिहार्थो [10]वां निवर्तध्वं निशाचराः ॥ १० ॥
तस्य तद्वचनं श्रुत्वा राक्षसास्ते चतुर्दश ॥ ऊचु[11]र्वाचं सुसंक्रुद्धा ब्रह्मघ्नाः शूलपाणयः ॥ ११ ॥
संरक्तनयना घोरा रामं सं[12]रक्तलोचनम् ॥ [13]परुषं मधुराभाषं [14]हृष्टा दृष्टपराक्रमम् ॥ १२ ॥
क्रोधमुत्पाद्य नो भर्तुः खरस्य सुमहात्मनः ॥ त्वमेव हास्यसे [15]प्राणानद्यास्माभिर्हतो युधि ॥ १३ ॥
का हि ते शक्तिरेकस्य बहूनां रणमूर्धनि ॥ अस्माकमग्रतः स्थातुं किं पुनर्योद्धुमाहवे ॥ १४ ॥
[16]एहि [17]बाहुप्रयुक्तैर्नः परिघैः शूलैः[18]पट्टिशैः ॥ प्राणांस्त्यक्ष्यसि वीर्यं च धनुश्च करपीडितम् ॥ १५ ॥
इत्येवमुक्त्वा सं[19]क्रुद्धा राक्षसास्ते चतुर्दश ॥ [[20]उद्यतायुधनिस्त्रिंशा [21]राममेवाभिदुद्रुवुः ॥]
चिक्षिपुस्तानि शूलानि राघवं प्रति दुर्जयम् ॥ १६ ॥

यावत् । अस्याः पदवीमागतानित्यन्वयः ॥ ४ ॥ प्रत्यपूजयत् परिपालितवान् ॥ ५ ॥ चामीकरं स्वर्णं ॥ ६ ॥ स्वस्य कपटवेषत्वं परिहरन्नाह्—पुत्रावित्यादि । आवां किमर्थमुपहिंसथ ॥७—८॥ प्रत्युत युष्मानेवाहं हन्तुमागत इत्याह्—युष्मानिति । विप्रकारान् हिंसकान् । भवतां प्रथमप्रवृत्तिमाकाङ्क्षन्स्थितोस्मीत्यर्थः ॥ ९ ॥ अत्रैव संतुष्टाः अभीता इति यावत् । तिष्ठत नोपावर्तितुमर्हथेति मा पलायध्वमित्यर्थः । यदि वा प्राणैः अर्थः प्रयोजनं प्राणापेक्षास्ति चेन्निवर्तध्वमित्यर्थः ॥ १० ॥ ब्रह्मघ्नाः ब्राह्मणघ्नाः ॥ ११—१३ ॥ शक्तिः बलं । " शक्तिर्बले प्रभावादौ " इतिविश्वः ॥ १४ ॥ परिघैः गदाभेदैः । पट्टिशैः असिभेदैः ॥१५॥ तानि

ति० अनपकारिणामस्माकंहिंसार्थया युष्मत्प्रवृत्त्या युष्मद्वधार्थमस्मदपेक्षितनिमित्तं संपन्नमित्याह—**युष्मानिति** । विप्रकारात् भवत्कृतपीडारूपान्निमित्ताज्जातनियोगेन युष्मान्हन्तुं सशरासनोऽहं संप्राप्तः संप्राप्तनिमित्तः । यद्वा विप्रकारानित्यर्शआद्यजन्तं । अस्मास्वस्मदीयेषुच वृथावैरवतोयुष्मानित्यर्थः ॥ ९ ॥ **ती०** हेसंदुष्टाः अतिदुष्टाः ॥ १० ॥ **शि०** संरक्तनयाः रामवचनश्रवणजनितकोपहेतुकारुण्यविशिष्टनेत्रवन्तः । संरक्तलोचनं स्वाभाविकारुण्यविशिष्टनयनविशिष्टं ॥ **ति०** अदृष्टपराक्रममितिच्छेदः संधिरार्षः ॥ १२ ॥ **ती०** क्रोधमुत्पाद्येत्यादिश्लोकत्रयस्यप्रातीतिकार्थस्स्पष्टः । वस्तुतस्तु सुमहात्मनः सुमहानात्माशरीरंयस्यसः भर्तूराज्ञःखरस्य क्रोधमुत्पाद्य । तत्प्रेरितैरस्माभिरतितुच्छैःहतः ताडितोपित्वं प्राणान्नोहास्यस्येव । अत्रहेतुः **काहीति** । रणमूर्धन्येकस्यतेऽग्रतः स्थातुंबहूनामप्यस्माकंकाशक्तिः शक्तिर्नास्ति तदा किंपुनर्योद्धुमितियोजना । अतएव खरनिर्बन्धेनागतानामस्माकमित्यत्राप्याकृष्यते । परिघादिभिरुपलक्षितानामस्माकंप्राणान् । वीर्यमित्यादिजात्येकवचनं । वीर्यादिकंच त्यक्ष्यसि । गर्भितणिच् । त्याजयिष्यसि । नसंदेहः । अतएवहीतिसंबन्धः । इतःपरावृत्यगतानामस्माकंखरहस्तवधाद्वरं त्वद्धस्तेनवधइतिभावः ॥ १३—१५ ॥

[पा०] १ ख. ग. ज. मेतत्तुतच्छ्रुत्वा. २ घ. ङ. झ. राघवस्यप्रपूजयन्. ३ ब्रह्मचारिणौ. ४ च. ज. ञ. पापात्मनो हन्तुं. ५ क. घ. च. छ. ज. ञ. न्महावने. ६ ङ.–ट. संप्राप्तः. ७ ङ. झ. ट. सशरासनः. ८ च. संदुष्टाः. ९ क. ङ.—ज. ञ. ट. नोपसर्पितुं. ख. ग. घ. नोपासर्पितुं. १० ख. ग. च.–ञ. वो. ११ ख. र्वचः. ग. र्वचनसंक्रुद्धाः. १२ क. ग. च. छ. ज. ञ. रक्तान्तलोचनं. १३ क. ख. ङ.–ट. पुरुषः. १४ ख. दृष्ट्वाधृष्ट. १५ क. प्राणानिहास्माभिः. ङ. झ. प्राणान्सद्योस्माभिः. च. छ. ज. ञ. प्राणान्नामास्माभिः. १६ क. ख. घ. ङ. च. ज.–ट. एभिः. १७ छ. ञ. बाहुविनिर्मुक्तैः. च. ज. बाहुविमुक्तैर्नः. ङ. झ. बाहुप्रत्युक्तैश्च. ख. बाहुप्रत्युक्तैस्तु. १८ क.–घ. पट्टसैः. १९ क. ङ. च. छ. झ. ञ. ट. संरब्धाः. ज. संरुद्धाः. २० क. ख. ङ.–ट. पाठेष्विदमर्धंदृश्यते. २१ ख. तावुभावभिदुद्रुवुः.

[1]तानि शूलानि काकुत्स्थः समस्तानि चतुर्दश ॥ तावद्भिरेव चिच्छेद शरैः [2]काञ्चनभूषणैः ॥ १७ ॥
ततः [3]पश्चान्महातेजा नाराचान्सूर्यसन्निभान् ॥ जग्राह परमक्रुद्धश्चतुर्दश [4]शिलाशितान् ॥ १८ ॥
[5]गृहीत्वा धनुरायम्य लक्ष्यानुद्दिश्य राक्षसान् ॥ मुमोच राघवो बाणान्वज्रानिव शतक्रतुः ॥ १९ ॥
रुक्मपुङ्खाश्च विशिखा दी[6]प्ता हेमविभूषिताः ॥ [[7]अन्तरिक्षे महोल्कानां बभूवुस्तुल्यदर्शनाः]॥२०॥
ते भित्त्वा रक्षसां वेगाद्वक्षांसि रुधिराप्लुताः ॥ [9]विनिष्पेतुस्तदा भूमौ [10]न्यमज्जन्ताशनिस्वनाः ॥२१॥
[11]ते भिन्नहृदया भूमौ [12]छिन्नमूला इव द्रुमाः ॥ निपेतुः [13]शोणितार्द्राङ्गा विकृता विगतासवः ॥२२॥
[14]तान्दृष्ट्वा पतितान्भूमौ [15]राक्षसी क्रोधमूर्च्छिता ॥ परित्रस्ता पुनस्तत्र व्यसृजद्भैरव[16]स्वनान् ॥ २३ ॥
सा नदन्ती [17]पुनर्नादं [18]जवाच्छूर्पणखा पुनः ॥ [[19]जगाम तत्र संभ्रान्ता खरो यत्र महाबलः]॥२४॥
उपगम्य खरं सा तु किंचित्संशुष्कशोणिता ॥ पपात पुनरेवार्ता सनिर्यासेव [20]सल्लकी ॥ २५ ॥
भ्रातुः समीपे शोकार्ता [21]ससर्ज निनदं [22]मुहुः ॥ [[23]भूमौ शयाना दुःखार्ता लब्धसंज्ञा चिरात्पुनः]॥
सस्वरं मुमुचे बाष्पं [24]विषण्णवदना तदा ॥ २६ ॥

निपातितान्[25]दृश्य रणे तु राक्षसान्प्रधाविता शूर्पणखा [26]पुनस्ततः ।
वधं च [27]तेषां निखिलेन रक्षसां शशंस सर्वं भगिनी खरस्य सा ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे विंशः सर्गः ॥ २० ॥

शूलपाणय इति पूर्वमुक्तानि ॥ १६—१७ ॥ नाराचान् अफलकान्बाणान् । शिलाशितान् शिलास्वपि शितान् शिलानिर्भेदक्षमानित्यर्थः । शाणोपलसन्निघृष्टानित्यप्याहुः ॥ १८ ॥ लक्ष्यान् वेध्यान् । वज्रानित्यभूतोपमा ॥ १९—२० ॥ न्यमज्जन्त न्यमज्जन्तचेत्यर्थः ॥ २१ ॥ विकृताः विरूपाः । विगतासवः विगतप्राणाः ॥ २२ ॥ भैरवस्वनान् भयंकरशब्दान् ॥ २३ ॥ महानादं नदन्ती कुर्वन्तीत्यर्थः ॥ २४ ॥ निर्यासः क्षतप्रसृतवृक्षरसः । सल्लकीलताविशेषः ॥२५—२६॥ पुनः सर्गार्थं संक्षेपेणाह—निपातितानिति । दृश्य दृष्ट्वा । अस्मिन्सर्गे पञ्चविंशतिश्लोकाः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने विंशः सर्गः ॥ २० ॥

स० खिलोदुर्बलोनभवतीत्यखिलः प्रबलोरामः । तेनवधं ॥ २७ ॥ इतिविंशस्सर्गः ॥ २० ॥

[पा०] १ तानिशूलानीतिश्लोकानन्तरं च. छ. ज. पुस्तकेषु. अभिपत्यततो वेगाच्चिक्षिपुस्तेनिशाचराः । परिघान्पट्टिशाञ्शूलांश्चतुर्दश चतुर्दश ॥ तावद्भिरवचिच्छेदसमस्तान्सवरायुधान् । चतुर्दशभिरव्यग्रःशरैःकाञ्चनभूषणैः ॥ इतिश्लोकद्वयमधिकं दृश्यते. ञ. पुस्तकेतु. तानागतान्प्रचिच्छेदसमस्तान्सवरायुधान् । चतुर्दशभिरव्यग्रःशरैःकाञ्चनभूषितैः ॥ इत्येकःश्लोकोऽधिको दृश्यते. २ ख. कनकभूषणैः. ग. ङ. झ. ट. काञ्चनभूषितैः. ३ ङ. छ.–ञ. पश्यन्महातेजाः. ४ ख. ग. शराञ्शितान्. ५ च. ज. गृहितधनुरानम्य. ६ च. छ. ज. प्रदीप्ताहेमभूषणाः. क. ग. प्रदीप्ताहेमभूषिताः. ख. दीप्ताहेमपरिष्कृताः. ७ इदमर्धं क. ख. पाठयोर्दृश्यते. ८ ङ. ज. झ. ट. रुधिरप्लुताः. ९ क. विनिपेतुः. १० ङ.–ट. वल्मीकादिवपन्नगाः. ११ क. ख. ग. ञ. तैर्भिन्न. ङ. झ. ट. तैर्भग्न. १२ ङ. झ. भिन्नमूलाः. १३ ग. ङ. झ. ट. शोणितस्नाताः च. छ. ज. ञ. शोणिताक्ताङ्गाः. क. शोणितादिग्धाः. १४ च. छ. ज. ञ. राक्षसान्पतितान्दृष्ट्वा. क. ख. ग. ङ. झ. ट. तान्भूमौपतितान्दृष्ट्वा. १५ ख. घ. क्षणेनैवमहाबलान्. १६ ख. ग. स्वरान. १७ क.–घ. च. छ. ज. ञ. महानादं. १८ छ. यथाशूर्पनखी. १९ इदमर्धं च. छ. ज. ञ. पाठेषुदृश्यते. २० ख. घ.–ट. वल्लरी. २१ ग. विसृज्य. २२ ङ.—झ. ट. महत्. २३ इदमर्धं क. च. छ. ज. ञ. पाठेषुदृश्यते. २४ ङ.—ट. विवर्णवदना. २५ क. घ.–ट. न्प्रेक्ष्य. २६ च. छ. ज. ञ. पुनःपुनः. २७ ठ. तेषामखिलेन.

एकविंशः सर्गः ॥ २१ ॥

खरेणसरोदनंपुनरागतांशूर्पणखांप्रतिससान्त्वनंरोदनकारणप्रश्नः ॥ १ ॥ तयातंप्रतितत्प्रेषितरक्षसांरामेणहननिवेदनपूर्वकं परुषभाषणैरणप्रोत्साहनम् ॥ २ ॥

स पुनः पतितां दृष्ट्वा क्रोधाच्छूर्पणखां खरः ॥ उवाच व्यक्तया वाचा तामनर्थार्थमागताम् ॥१॥
मया त्विदानीं शूरास्ते राक्षसा रुधिराशनाः ॥ त्वत्प्रियार्थं विनिर्दिष्टाः किमर्थं रुद्यते पुनः ॥ २ ॥
भक्ताश्चैवानुरक्ताश्च हिताश्च मम नित्यशः ॥ घ्नन्तोपि न निहन्तव्या न न कुर्युर्वचो मम ॥ ३ ॥
किमेतच्छ्रोतुमिच्छामि कारणं यत्कृते पुनः ॥ हा नाथेति विनर्दन्ती सर्पवल्लुठसि क्षितौ ॥ ४ ॥
अनाथवद्विलपसि नाथे तु मयि संस्थिते ॥ उत्तिष्ठोत्तिष्ठ मा भैषीर्वैक्लव्यं त्यज्यतामिह ॥ ५ ॥
इत्येवमुक्ता दुर्धर्षा खरेण परिसान्त्विता ॥ विमृज्य नयने सास्रे खरं भ्रातरमब्रवीत् ॥ ६ ॥
अस्मीदानीमहं प्राप्ता हृतश्रवणनासिका ॥ शोणितौघपरिक्लिन्ना त्वया च परिसान्त्विता ॥ ७ ॥
प्रेषिताश्च त्वया वीर राक्षसास्ते चतुर्दश ॥ निहन्तुं राघवं क्रोधान्मत्प्रियार्थं सलक्ष्मणम् ॥ ८ ॥
ते तु रामेण सामर्षाः शूलपट्टिशपाणयः ॥ समरे निहताः सर्वे सायकैर्मर्मभेदिभिः ॥ ९ ॥
तान्दृष्ट्वा पतितान्भूमौ क्षणेनैव महाबलान् ॥ रामस्य च महत्कर्म महांस्त्रासोऽभवन्मम ॥ १० ॥
अहमस्मि समुद्विग्ना विषण्णा च निशाचर ॥ शरणं त्वां पुनः प्राप्ता सर्वतोभयदर्शिनी ॥ ११ ॥
विषादनक्राध्युषिते परित्रासोर्मिमालिनि ॥ किं मां न त्रायसे मग्नां विपुले शोकसागरे ॥ १२ ॥
एते च निहता भूमौ रामेण निशितैः शरैः ॥ येऽपि मे पदवीं प्राप्ता राक्षसाः पिशिताशनाः॥१३॥
मयि ते यद्यनुक्रोशो यदि रक्षस्सुतेषु च ॥ रामेण यदि ते शक्तिस्तेजो वाऽस्ति निशाचर ॥
दण्डकारण्यनिलयं जहि राक्षसकण्टकम् ॥ १४ ॥

अथ खरप्रोत्साहनमेकविंशे—स पुनरित्यादि । अनर्थार्थं सर्वराक्षसविनाशार्थं ॥ १—२ ॥ भक्ताः विश्वासभाजः । हिताः हितपराः । नकुर्युरिति न किंतु कुर्युरेवेत्यर्थः ॥ ३ ॥ किमेतदिति विस्मये । यत्कृते यस्यकृते । कृत इत्यव्ययं । यन्निमित्तं लुठसि तस्य कारणं श्रोतुमिच्छामीत्यन्वयः ॥४॥ विलपसीति किमिति शेषः । वैक्लव्यं कातर्यं । इह मत्समीपे ॥५॥ दुर्धर्षा दुःसाध्या ॥ ६ ॥ खरोक्तमङ्गीकरोति—अस्मीत्यादिना ॥ ७—१० ॥ समुद्विग्ना भीता । विषण्णा दुःखिता । सर्वतो भयदर्शिनी सर्वत्ररामप्रतिभासवतीति भावः ॥ ११ ॥ नक्रो ग्राहः ॥ १२ ॥ क्रोधभीतिभ्यां पूर्वोक्तं विस्मृत्य पुनराह—एते चेति ॥ १३ ॥ अनुक्रोशो दया । शक्तिरिति तुल्येति शेषः

ति० यदितेशक्तिः योद्धुमितिशेषः । ती० रामेणेत्यादिश्लोकचतुष्टयस्यप्रातीतिकार्थस्स्पष्टः । वस्तुतस्तु—शूर्पणखारामेनजहीतिहितबुद्ध्याखरंनिवारयति—**रामेणेत्यादिना** । हेनिशाचर रामेण तेशक्तिः वीर्यंतेजोवास्तियदि । तथापिअमित्रघ्नंदण्ड-

[पा०] १ ख. तांपुनः. २ ङ. झ. ट. पुनः. ३ ख. गतास्त्विदानीं. ४ ख. ङ.—ट. पिशिताशनाः. ५ ख. मयोद्दिष्टाः. ६ ख. भीताश्च. ७ क. ख. ग. ङ.—ट. हन्यमानानहन्यन्ते. ८ घ. निहन्यन्ते. ९ क.—घ. सर्पवद्वेष्टसे. ङ. च. ज.—ट. सर्पवच्चेष्टसे. १० क.—घ. च. ट. किंतुनाथेमयिस्थिते. ङ. छ.—ञ. किंतुनाथेमयिस्थिते. ११ क.—घ. च. ज. ञ. माभैस्त्वं. ङ. झ. ट. मामैवं. १२ ङ.—ट. त्यज्यतामिति. १३ ग. सालेवं. १४ ख. विमृज्य. १५ ग. सास्ये. १६ ख. त्वयातु. १७ ख. प्रेषितास्ते. १८ क.—ट. शूराः. १९ ख. छ. ट. राक्षसाश्च. २० च.—ञ. घोरंमत्प्रियार्थं. ङ. ट. घोरामत्प्रियार्थं. २१ क. ख. ग. ङ. च. ज.—ट. तान्भूमौपतितान्दृष्ट्वा. २२ ङ.—ट. महाजवान्. २३ च. छ. ज. ञ. सास्मिभीताभयोद्विग्ना. क. ग. ङ. झ. ट. सास्मिभीतासमुद्विग्ना. २४ ख. विषण्णास्मि. २५ ख. प्रपन्नाहं. २६ च. छ. ज. ञ. विनिहता. २७ ख. घ. ङ. झ. येच. २८ च. ज. ञ. यदितेमय्यनु. २९ क. रामेवा. ३० ङ. झ. यदिशक्तिस्ते.

यदि [1]रामं मम[2]मित्रं न त्वमद्य वधिष्यसि ॥ [3]तव चैवाग्रतः प्राणांस्त्यक्ष्यामि निरपत्रपा ॥ १५ ॥
बुद्ध्याऽ[4]हमनुपश्यामि न त्वं रामस्य संयुगे ॥ स्थातुं प्रतिमुखे शक्तः [5]सबलश्च महात्मनः ॥ १६ ॥
[6]शूरमानी न शूरस्त्वं मिथ्यारोपितविक्रमः ॥ [7]मानुषौ यौ न शक्नोषि [8]हन्तुं तौ रामलक्ष्मणौ ॥ १७ ॥
रामेण यदि ते शक्तिस्तेजो [9]वाऽस्ति निशाचर ॥ दण्डकारण्यनिलयं जहि [10]तं कुलपांसन ॥ १८ ॥
निःसत्त्वस्याल्पवीर्यस्य वासस्ते कीदृशस्त्विह ॥ अपयाहि जनस्थानात्त्वरितः सह[11]बान्धवः ॥
[[12]जहि त्वं समरे मूढाऽन्यथा तु कुलपांसन] ॥ १९ ॥
रामतेजोभिभूतो हि त्वं क्षिप्रं विनशिष्यसि ॥ २० ॥
स हि तेजःसमायुक्तो रामो दशरथात्मजः ॥ भ्राता चास्य महावीर्यो येन चास्मि विरूपिता ॥ २१ ॥
एवं विलप्य [13]बहुशो राक्षसी वि[14]ततोदरी ॥ भ्रातुः समीपे दुः[15]खार्ता नष्टसंज्ञा [16]बभूव ह ॥
कराभ्यामुदरं हत्वा रुरोद भृशदुःखिता ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकविंशः सर्गः ॥ २१ ॥

द्वाविंशः सर्गः ॥ २२ ॥

खरेणशूर्पणखासमाश्वासनपूर्वकंदूषणंप्रतिसेनासंनाहनादिचोदना ॥ १ ॥ तथादूषणानायितरथाधिरोहणेनचतुर्दशसहस्रसंख्याकराक्षससेनयादूषणेनचसहरणायनिर्याणम् ॥ २ ॥

एवमाधर्षितः शूरः शूर्पनख्या खरस्[17]तदा ॥ उवाच रक्षसां मध्ये खरः खरतरं वचः ॥ १ ॥
तवावमानप्रभवः [18]क्रोधोऽयमतुलो मम ॥ न शक्यते धारयितुं लवणाम्भ [19]इवोत्थितम् ॥ २ ॥

॥ १४ ॥ निरपत्रपा निर्लज्जा । हृतकर्णनासात्वादिति भावः ॥ १५ ॥ प्रतिमुखे अग्रे । सबलः ससैन्यः ॥१६॥ मिथ्येति मिथ्यावचोभिरित्यर्थः । आरोपितविक्रमः कल्पितपराक्रमः ॥ १७—१८ ॥ कीदृश इति अत्यन्तायोग्य इत्यर्थः ॥१९—२१॥ विततोदरी प्रहारार्थं विस्तृतोदरी। अत्र द्वाविंशतिःश्लोकाः ॥२२॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकविंशः सर्गः ॥ २१ ॥

अथ खरस्य युद्धोद्योगो द्वाविंशे। आधर्षितः अवमानितः। खरः दारुणः। खरतरं परुषतरं॥१॥ लवणा-

---

कारण्यनिलयं। रामंत्वंनजहि मावधीः । यदिहनिष्यसि तर्हि तवाग्रतोहंप्राणांस्त्यक्ष्यामीतिसंबन्धः । विचार्यमाणेतयोर्हननेतवशक्तिरपिनास्तीत्याह—**बुद्ध्येति** ॥ १४—१७ ॥ इत्येकविंशस्सर्गः ॥ २१ ॥

स० अखरः स्वभावतोऽक्रूरः । याज्ञवल्क्यसुतत्वात् । यथोक्तंशान्तिपर्वणि “ याज्ञवल्क्यसुताराजन्– ” इत्यादि ॥ १ ॥ **ती०** आत्मनीत्यध्याहारः । आत्मनिकोपोधारयितुंनशक्यतइत्यन्वयः । लवणांभइवोल्बणं । व्रणइतिशेषः । व्रणेविक्षिप्तलवणयुक्तमंभइव धारयितुंनशक्यतइत्यर्थः । उदितमितिपाठे उदितं न्यस्तं । **ति०** ममेतिमयेत्यर्थेसंबन्धेषष्ठी । **स०** क्रोधः यम-

[पा०] १ क. ग. ङ. छ. झ. ट. रामममित्रघ्नं. २ च. छ. ज. ञ. मित्रमद्यत्वंन. ३ च. छ. ज. ञ. तवाहमग्रतः. घ. तवैवचाग्रतः. ४ क. मनुशोचामि. ५ क. ग. च. छ. ज. सचापस्यमहारणे. ख. सचापस्यमहात्मनः. ङ. झ. ञ. ट. सबलोपिमहारणे. ६ शूरमानीत्यर्धादनन्तरं झ. पुस्तके. अपयाहि. जहित्वं. मानुषौतौ. निस्सत्वस्येत्यर्धानिएवंक्रमेणदृश्यन्ते. किंचरामेणयदितेशक्तिरितिपुनरपिदृश्यमानोऽष्टादशःश्लोकश्चनदृश्यते. ७ ङ. झ. ञ. मानुषौतौ. क. ग. मनुष्यौयौ. च. छ. ज. मनुष्यौयत्न. ८ ङ. झ. ञ. हन्तुंवै. क. ग. हन्तुंत्वं. ९ घ. वापि. १० ग. त्वं. ११ ख. च. छ. ज. ञ. बान्धवैः. १२ इदमर्धं झ. पुस्तके दृश्यते. १३ क. ग. बहुधा. १४ घ. च. छ. ज. ञ. प्रततोदरी. ङ. झ. ट. प्रदरोदरी. १५ क. ग. ङ.—ट. शोकार्ता. १६ क. ग. घ. च. छ. ज. बभूवसा. १७ क. ग. झ. ट. स्ततः. १८ क. कोपोयं. १९ ङ.—ट. इवोल्बणं.

न रामं गणये वीर्यान्मानुषं क्षीणं[1]जीवितम् ॥ आत्मदुश्चरितैः प्राणान्हतो योऽद्य वि[2]मोक्ष्यति ॥३॥
बाष्पः संह्रि[3]यतामेष संभ्रमश्च विमुच्यताम् ॥ अहं रामं सह भ्रात्रा नयामि यमसादनम् ॥ ४ ॥
परश्वध[4]हतस्याद्य मन्दप्राणस्य संयु[5]गे ॥ रामस्य रुधिरं रक्तमुष्णं पास्यसि [6]राक्षसि ॥ ५ ॥
[7]सा प्रहृष्टा वचः श्रुत्वा खरस्य वदनाच्च्युतम् ॥ प्रशशंस पुनर्मौर्ख्याद्भ्रातरं रक्षसां वरम् ॥ ६ ॥
तया परुषितः पूर्वं पुनरेव प्रशंसितः ॥ अब्रवीद्दूषणं नाम खरः सेनापतिं तदा ॥ ७ ॥
चतुर्दश सहस्राणि मम चित्तानुवर्तिनाम् ॥ रक्षसां भीमवेगानां समरेष्वनिवर्तिनाम् ॥ ८ ॥
नील[8]जीमूतवर्णानां घोराणां [9]क्रूरकर्मणाम् ॥ लोक[10]हिंसाविहाराणां बलिनामुग्रतेजसाम् ॥ ९ ॥
[11]तेषां [12]शार्दूलदर्पाणां महास्यानां [13]महौजसाम् ॥ सर्वोद्योगमुदीर्णानां रक्षसां सौम्य कारय ॥ १० ॥
उपस्थापय मे क्षिप्रं रथं सौम्य धनूंषि च ॥ [14]शरांश्चित्रांश्च खड्गांश्च शक्तीश्च विविधाः शिताः ॥११॥
अग्रे निर्यातुमिच्छामि पौलस्त्यानां महात्मनाम् ॥ वधार्थं दुर्विनीतस्य रामस्य [15]रणकोविदः ॥१२॥
इति तस्य ब्रुवाणस्य सूर्यवर्णं महारथम् ॥ सदश्वैः [16]शबलैर्युक्तमाचचक्षेऽथ दूषणः ॥ १३ ॥
तं मेरुशिखराकारं तप्तकाञ्चनभूषणम् ॥ हेमचक्रमसंबाधं वैडूर्यमयकूबरम् ॥ १४ ॥

म्भः लवणसमुद्राम्भः । उत्थितं पर्वण्युल्बणं ॥२॥ यः आत्मदुश्चरितैरेव हतः सन् अद्य प्राणान्विमोक्ष्यति तं रामं न गणये ॥३॥ संह्रियतां निवर्त्यतां । सदनमेव सादनं ॥ ४ ॥ परश्वधः कुठारः । मन्दप्राणस्य अल्पप्राणस्य । औष्ण्यार्थमिदमुक्तं रक्तवर्णत्वार्थं च ॥ ५ ॥ मौर्ख्यात् अव्यवस्थितचित्ततया । पुनः प्रशशंस॥६॥ अमुमर्थं विशदयति—तयेति ॥ ७ ॥ चतुर्दशेत्यादिश्लोकत्रयमेकंवाक्यं । चतुर्दश सहस्राणि सन्तीति शेषः । घोराणां घोररूपाणां । लोकहिंसाविहाराणां जनवधैकलीलानां । महास्यानां विकृतमुखानामिति यावत् । उदीर्णानां गर्वितानां सर्वोद्योगं सर्वप्रकारैरुद्योगं सर्वायुधवाहनादिभिरुद्योगमित्यर्थः ॥८—१०॥ शक्तिः आयुधविशेषान् ॥ ११ ॥ पौलस्त्यानां पुलस्त्यवंश्यानां अग्रे रणकोविदोहं गन्तुमिच्छामीत्यन्वयः । रामस्य रणज्ञत्वात् पौलस्त्यानां वधार्थमिति दैवी वाक् भाविसूचनी ॥१२॥ शबलैः नानावर्णैः । "शबलैताश्च कर्बुरे" इत्यमरः । महारथं सदश्वैर्युक्तमाचचक्ष इत्यन्वयः ॥ १३ ॥ तप्तकाञ्चनं परिशुद्धकाञ्चनं । असंबाधं विस्तीर्णं । कूबरः युगंधरः ।

तुलः यमसदृशः । तद्वन्मारकत्वात् । अयमित्यपिच्छेदः ॥ २ ॥ **ती०** आत्मदुश्चरितैः विरूपकरणैः ॥ ३ ॥ **ती०** संभ्रमः भयं ॥ ४ ॥ **ति०** तवावमानप्रभवइत्यादिश्लोकचतुष्टयस्य वास्तवार्थस्तु–तवावमानप्रभवः त्वत्संबन्ध्यवमानोत्पन्नः मयित्वयाकृतावमानप्रभवइत्यर्थः । क्रोधः धारयितुंनशक्यते ॥ किंचमानुषंच । वीर्यात् मच्छौर्यात् । क्षीणजीवितं नगणये । तमहंजेतुंनशक्नोमीत्यर्थः । स रामएव । प्राणान् मदीयप्राणान् । मोक्ष्यति मोक्षयिष्यतीत्यर्थः । अतोहेदुर्भगे आत्मदुश्चरितैः स्वापचारव्यापारैः । अद्य अयः मच्छुभावहविधिः हतः । त्वन्निमित्तंममैश्वर्यंक्षीणजीवितंच नष्टमितिभावः । इतःपरंबाष्पस्संह्रियतां । संभ्रमश्चविमुच्यतां । अहंभ्रात्रासहरामंप्रतियामि । यमसादनंचयामि नसन्देहइत्यर्थः । परश्वथेति । ततः परं रामस्यपरश्वथहतस्य रामसंबन्धिपरश्वथेनहतस्य मन्दप्राणस्य भूतलेपतितस्य । ममेतिशेषः । हेराक्षसि रुधिरंपास्यसीतिसंबन्धः । **ति०** परश्वथहतस्येति । परश्वथस्तस्य मुख्यमायुधमित्यनेनज्ञायते । रक्तं रक्तवर्णमित्यर्थः ॥ ५ ॥ **ती०** तयेति । पुनश्शंसितत्वमेवसकलरक्षश्श्रेष्ठइत्यादि । **स०** परुषितः श्रावितनिष्ठुरवाक् । दूषितइतियावत् ॥ ७ ॥ **स०** पौलस्त्यानांमध्ये रणकोविदः ॥ १२ ॥

[**पा०**] १ ख. क्षणजीवितं. २ घ.—झ. ट. विमोक्ष्यते. ३ ङ. झ. ट. संधार्यतां. घ. संभ्रियतां. ४ ख. हतस्यास्य. घ. हतस्याथ. ५ क. ख. ग. ङ. ट. भूतले. ६ क. च. छ. ज. काङ्क्षितं. ७ च. छ. ज. ञ. प्रहृष्टावचनं. ङ. झ. ट. संप्रहृष्टा. ८ अस्यश्लोकस्यप्रतिनिधितया. नीलजीमूतवर्णानांलोकहिंसाविहारिणां. इत्यर्धमेव ग. ङ. झ. ट. पुस्तकेषुदृश्यते. ९ क. ख. च. छ. ञ. कामरूपिणां. १० लोकहिंसाविहाराणां. तेषांशार्दूलदर्पाणां. इत्यनयोरर्धयोःपौर्वापर्यं च. छ. ज. ञ. पाठेषुदृश्यते. ११ ग. ङ. छ. ट. पुस्तकेष्विदमर्धंनदृश्यते. १२ ख. शार्दूलसत्वानां. १३ च. छ. ज. ञ. महात्मनां. १४ ग. रथांश्चचित्रान्खड्गांश्च. ख. ङ.—ट. शरांश्चचित्रान्खड्गांश्च. १५ च. छ. ञ. रणमूर्धनि. १६ ग. सबलैः.

मत्स्यैः पुष्पैर्द्रुमैः शैलैश्चन्द्र[1]सूर्यैश्च काञ्चनैः ॥ मङ्गलैः[2] पक्षिसङ्घैश्च ताराभिरभिसंवृतम्[3] ॥ १५ ॥
ध्वजनिस्त्रिंशसंपन्नं किङ्किणीकविराजितम्[4] ॥ सदश्वयुक्तं सोमर्षादारुरोह[5] खरो[6] रथम् ॥ १६ ॥
निशाम्य तु रथस्थं[7] तं राक्षसा भीमविक्रमाः ॥ तस्थुः संपरिवार्यैनं[8] दूषणं च महाबलम् ॥ १७ ॥
खरस्तु तान्[9]महेष्वासान्घोरवर्मायुधध्वजान् ॥ निर्यातेत्य[10]ब्रवीद्धृष्टो रथस्थः[11] सर्वराक्षसान् ॥ १८ ॥
ततस्त[12]द्राक्षसं सैन्यं घोरवर्मा[13]युधध्वजम् ॥ निर्जगाम जनस्थानान्महानादं महाजवम् ॥ १९ ॥
मुद्गरैः पट्टिशैः शूलैः सुतीक्ष्णैश्च[14] परश्वधैः ॥ खड्गैश्चक्रैश्च[15] हस्तस्थैर्भ्राजमानैश्च[16] तोमरैः ॥ २० ॥
शक्तिभिः परिघैर्घोरैरतिमात्रैश्च कार्मुकैः ॥ गदासिमुसलै[17]र्वज्रैर्गृहीतैर्भीमदर्शनैः[18] ॥ २१ ॥
राक्षसानां सुघोराणां सहस्राणि चतुर्दश ॥ निर्यातानि जनस्थानात्खरचित्तानुवर्तिनाम् ॥ २२ ॥
[19]तांस्त्वभिद्रवतो दृष्ट्वा राक्षसान्भीमविक्रमान्[20] ॥ खरस्यापि[21] रथः किंचिज्जगाम तदनन्तरम् ॥२३॥
ततस्ताञ्शबलानश्वांस्तप्तकाञ्चन[22]भूषितान् ॥ खरस्य मति[23]माज्ञाय सारथिः समचोदयत् ॥ २४ ॥
स[24] चोदितो रथः शीघ्रं खरस्य रिपुघातिनः ॥ शब्देनापूरयामास दिशश्च[25] प्रदिशस्तदा[26] ॥ २५ ॥
प्रवृद्धमन्युस्तु खरः खरस्वनो[27] रिपोर्वधार्थं त्वरितो यथाऽन्तकः ॥
अचूचुदत्सारथि[28]मुन्नदन्घनं महाबलो मेघ इवाश्मवर्षवान् ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

" कूबरस्तुयुगंधरः " इत्यमरः ॥ १४ ॥ मङ्गलैः मङ्गलावहैः अलंकारकरैरित्यर्थः । काञ्चनैः काञ्चनविकारैः । इदं विशेषणद्वयं मत्स्यादिसर्वविशेषणं । निस्त्रिंशः असिः ॥ १५—१८ ॥ राक्षसं राक्षससंबन्धि ॥ १९ ॥ मुद्गरः लोहमयगदा । पट्टिशः पट्टयमितिद्रमिडनामयुक्त आयुधविशेषः । तोमरः वल्लयमिति द्रमिडनामयुक्तः ॥ २० ॥ शक्तिः ईट्टीति द्रमिडनामकः । परिघः कुण्डान्तडीति द्रमिडनामा । अतिमात्रैः महद्भिः । वज्रैः अष्टास्रैरायुधैः ॥ २१—२२ ॥ किंचिज्जगाम सेनासंमर्दादिति भावः । खरानुज्ञाभावाद्वा ॥ २३ ॥ मतिं संमतिं यात्राभिप्रायमिति यावत् ॥ २४ ॥ शब्देन नेमिघोषेण । प्रदिशः विदिशः ॥ २५ ॥ महाबलः झञ्झामारुतः । "झञ्झावातो महाबलः " इति निघण्टुः । तद्वान् अर्शआद्यच् । झञ्झामारुतप्रेरित इत्यर्थः । महानिल इत्यपि पाठः । अश्मवर्षवान् अश्मवर्षोद्युक्त इत्यर्थः । घनं उपरितनमेघं ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्वाविंशः सर्गः ॥ २२ ॥

ती० अमर्षात् क्रोधादारुरोहेतिपराजयसूचनं । "क्रोधःकार्यविभङ्गाय" इतिशकुनशास्त्रे ॥ १६ ॥ **ति०** दूषणः दूषणश्चेत्यर्थः ॥ १८ ॥ **ति०** संचोदितइत्यादिश्लोकद्वयं कतकसंख्यारीत्याप्रक्षिप्तं ॥ २५ ॥ इतिद्वाविंशस्सर्गः ॥ २२ ॥

[पा०] १ ङ. झ. श्चन्द्रकान्तैश्च. २ क. घ. ङ. झ. ट. माङ्गल्यैः. छ. पक्षिसंघैश्चताराभीरामाभिश्चसमावृतं. ख. पुष्पसंघैश्चमाङ्गल्यैः. ३ ग. ङ. च. झ. ञ. ताराभिश्चसमावृतं. ४ च. छ. ज. ञ. किङ्किणीभिर्विभूषितं. झ. किङ्किणीवरभूषितं. ङ. ट. किङ्किणीरवभूषितं. क. ख. किङ्किणीजालभूषितं. ग. घ. किङ्किणीकविभूषितं. ५ ग. घ. च. छ. ज. ञ. ट. सामर्षात्. ६ क. च. छ. ज. ञ. ट. रथंखरः. ख. घ. ङ. झ. खरस्तदा. ७ ख. ते. ८ क. ग. च. छ. ज. ञ. तस्थुश्चपरिवार्यैनं. ९ ङ. ज. झ. तन्महत्सैन्यंरथचर्मायुधध्वजं. ट. तत्सैन्यंरथवर्मायुधध्वजं. क. तान्महाप्रासान्. १० ङ. झ. ट. त्यब्रवीत्प्रेक्ष्य. ख. घ. त्यब्रवीद्दृष्ट्वा. ११ क. सरथः. ङ. झ. ट. दूषणः. १२ च. छ. ज. ञ. ततस्तद्रक्षसां. घ. ततस्तुतन्महत्सैन्यं. १३ ङ. झ. ट. चर्मायुध. १४ ख. तीक्ष्णैश्चैव. १५ ख. चक्रैःखड्गैश्च. ङ. झ. ट. खड्गैश्चक्रैरथस्थैश्च. १६ क.—ट. भ्राजमानैस्स. १७ ङ. ज. झ. गदाभिर्मुसलैः. १८ क. ग. रुग्रदर्शनैः. १९ ङ. च. छ. झ. ञ. ट. तांस्तुनिर्धावतो. २० ङ. च. छ. झ. ञ. ट. भीमदर्शनान्. २१ ङ. झ. ट. खरस्याथ. २२ क. ख. ङ. च. छ. ञ. भूषणान्. २३ क.—ङ. छ. झ. ञ. ट. मतं. २४ झ. संचोदितः. २५ ङ. च. झ. ट. दिशस्सप्रदिशः. २६ क. ङ. च. छ. झ. ञ. ट. स्तथा. २७ ङ. झ. खरस्वरे. २८ क. ग. ङ.—ट. मुन्नदन्पुनः. ख. घ. मुन्नदन्भृशं.

त्रयोविंशः सर्गः ॥ २३ ॥

खरेण रणप्रयाणसमयसमुद्भूतदुर्निमित्तनिरीक्षणेपि गर्वात्तदविगणनेनैव दूषणादिभिस्सहरणायनिर्याणम् ॥ १ ॥

[1]तस्मिन्याते जनस्थानादशिवं शोणितोदकम् ॥ [2]अभ्यवर्षन्महामेघस्तुमुलो गर्दभारुणः ॥ १ ॥
निपेतुस्तुरगास्तस्य रथयुक्ता महाजवाः ॥ समे पुष्पचिते देशे राजमार्गे यदृच्छया ॥ २ ॥
श्यामं रुधिरपर्यन्तं बभूव परिवेषणम् ॥ अलातचक्रप्रतिमं [3]परिगृह्य दिवाकरम् ॥ ३ ॥
ततो ध्वजमुपागम्य [4]हेमदण्डं समुच्छ्रितम् ॥ समाक्रम्य महाकायस्तस्थौ गृध्रः सुदारुणः ॥ ४ ॥
जनस्थान[5]समीपे तु [6]समागम्य [7]खरस्वनाः ॥ विस्वरान्विविधांश्चक्रुर्[8]मांसादा मृगपक्षिणः ॥ ५ ॥
[9]व्याजह्रुश्च प्रदीप्तायां दिशि वै भैरवस्वनम् ॥ अशिवं यातुधानानां शिवा घोरा [10]महास्वनाः ॥ ६ ॥
[11]प्रभिन्नगिरिसंकाशास्तोयशोणितधारिणः ॥ आकाशं तदनाकाशं [12]चक्रुर्भीमा बलाहकाः ॥ ७ ॥
बभूव तिमिरं घोरमुद्धतं रोमहर्षणम् ॥ दिशो वा विदिशो वाऽपि [13]न च व्यक्तं चकाशिरे ॥ ८ ॥
क्षतजार्द्रसवर्णाभा सन्ध्या कालं विना बभौ ॥ [14]खरस्याभिमुखा नेदुस्तदा [15]घोरमृगाः खगाः ॥ ९ ॥
कङ्कगोमायुगृध्राश्च चुक्रुशुर्भयशंसिनः ॥ [[16]चक्रिरे विस्वरान्घोरान्मांसादा वनगोचराः] ॥ १० ॥
[17]नित्याशुभकरा युद्धे शिवा घोरनिदर्शनाः ॥ नेदुर्[18]बलस्याभिमुखं ज्वालोद्गारिभिराननैः ॥ ११ ॥
[19]कबन्धः परिघाभासो दृश्यते भास्करान्तिके ॥ जग्राह सूर्यं स्वर्भानुरपर्वणि महाग्रहः ॥ १२ ॥

अथ युद्धाय प्रयातस्य खरस्य उत्पातवर्णनं त्रयोविंशे । अशिवं अशुभावहं । शोणितोदकं रक्तवर्णजलं । तुमुलः संकुलः । गर्दभारुणः गर्दभवद्धूसरः ॥१॥ निपेतुः स्खलिताः रथयुक्ताः रथे बद्धाः । पुष्पचिते पुष्पैः निबिडे । यदृच्छया दैवगत्या ॥ २ ॥ सूर्यपरिवेषमाह—श्याममिति । सर्वत्र श्यामं । पर्यन्ते प्रान्ते रुधिरं रुधिरवर्णं । अलातचक्रप्रतिममिति ह्रस्वत्वमुच्यते । परिवेषणं परिवेषः । परिगृह्य परितो व्याप्य ॥३॥ समुच्छ्रितं उन्नतं । ध्वजमुपागम्य समाक्रम्य परिक्रम्य तस्थौ ॥४॥ खरस्वनाः परुषस्वनाः । विस्वरान् विकृतस्वरान् । मांसमदन्तीति मांसादः ॥ ५ ॥ प्रदीप्तायां दिशि सूर्यसन्निहितदिशीत्यर्थः । शिवाः सृगालाः । घोराः ज्वालामुखाः ॥ ६ ॥ प्रभिन्नाः इन्द्रच्छिन्नपक्षाः । तोयशोणितधारिणः शोणिततोयधारिणः । परनिपातः । अनाकाशं अप्रकाशं छन्नमिति यावत् । बलाहकाः मेघाः ॥ ७ ॥ उद्धतं सान्द्रं ॥ ८ ॥ क्षतजार्द्रसवर्णाभा क्षतजेन रक्तेनार्द्रं संसिक्तं यत् पटादिकं तत्तुल्याभा । कालं विना स्वकालं विना । सन्ध्या बभौ मेघेष्विति शेषः । खरस्येति । पूर्वं सूर्याधिष्ठितदिशि शिवारुतमुक्तं । अधुना खरस्याभिमुखमुच्यते । घोरमृगाः श्वापदादयः । कङ्काः स्थूलकायाः भयंकराः मृतपशुनरादिभक्षणशीलाः पक्षिविशेषाः ॥ ९—१० ॥ सेनाभिमुखशिवारुतमाह—नित्येति । युद्धे नित्यमशुभकराः अशुभशंसिनः । घोरनिदर्शनाः घोरफलकनिदर्शनाः । शिवाः गोमायवः । " स्त्रियां शिवाभूरिमायगोमायुमृगधूर्तकाः " इत्यमरः । ज्वालामुद्गिरन्तीति ज्वालोद्गारीणि तैः आननैः उपलक्षणे तृतीया ॥ ११ ॥ परिघवत् परिघायुधव-

---

ति० तुमुलः तुमुलशब्दः । अभ्यवर्षत् मेघइतिशेषः ॥ १ ॥ ति० प्रभिन्नगजेतिपाठे मत्तगजेत्यर्थः । प्रभिन्नगिरीतिपाठे गैरिकादिधातुस्राविणइत्यर्थः ॥ ७ ॥ टीका० कङ्कः श्वेतगृध्रः ॥ १० ॥ ती० कबन्धः धूमकेतुः ॥ १२ ॥

[पा०] १ ङ—ट. तंप्रयातंबलंघोरमशिवं. घ. तंप्रयातंजनस्थानात्. ग. तंप्रयान्तंबलंघोरमशिवं. २ ङ. ज.–ट. महाघोरः. ३ क—ट. प्रतिगृह्य. ४ घ. दण्डसमुच्छ्रितं. ५ क. ग.—ट. समीपेच. ६ ङ.—ट. समाक्रम्य. ७ ख. ग. घ. खरस्वराः. ८ ङ. झ. ट. विविधान्नादान्मांसादाः. ९ ङ. झ. ट. व्याजह्रुरभिदीप्तायां. क. ख. व्याजह्रुरपिदीप्तास्यादीप्तायां दिशिभैरवं. १० ख. महास्वराः. ११ क. ख. ङ. झ. ट. प्रभिन्नगज. १२ घ. भीमवलाहकाः. ङ. झ. ट. भीमांबुवाहकाः. १३ च. ज. ञ. नव्यक्तंसंचकाशिरे. ङ. झ. ट. सुव्यक्तंनचकाशिरे. क. ग. नव्यक्तंप्रचकाशिरे. १४ ट. खरंचाभिमुखे. ङ. झ. खरंचाभिमुखं. ख. खरस्याभिमुखे. १५ क.—छ. झ. ञ. ट. घोरामृगाः. १६ इदमर्धं क. पुस्तकेदृश्यते. १७ क—ट. नित्याशिवकराः. १८ घ, च. छ. ज. ञ. बलस्याभिमुखा. १९ घ. च. ञ. कबन्धाःपरिघाभासोदृश्यन्ते.

[1]प्रवाति मारुतः शीघ्रं निष्प्रभोऽभूद्दिवाकरः ॥ उत्पेतुश्च विना रात्रिं ताराः खद्योत[2]सप्रभाः ॥ १३ ॥
संलीनमीनविहगा नलिन्यः शुष्कपङ्कजाः ॥ तस्मिन्क्षणे बभूवुश्च विना [3]पुष्पफलैर्द्रुमाः ॥ १४ ॥
उद्धूतश्च विना वातं रेणुर्जलधरारुणः ॥ [4]वीचीकूचीति [5]वाश्यन्त्यो बभूवुस्तत्र [6]शारिकाः ॥ १५ ॥
उल्काश्चापि [7]सनिर्घाता निपेतुर्घोरदर्शनाः ॥ प्रचचाल मही सर्वा सशैलवनकानना ॥ १६ ॥
खरस्य च रथस्थस्य नर्दमानस्य धीमतः ॥ प्राकम्पत भुजः सव्यः स्वरश्चास्यावसज्जत ॥ १७ ॥
[9]सास्रा संपद्यते दृष्टिः पश्यमानस्य सर्वतः ॥ ललाटे च रुजा जाता न च मोहान्न्यवर्तत ॥ १८ ॥
तान्समीक्ष्य महोत्पाता[10]नुत्थितान्रोमहर्षणान् ॥ अब्रवीद्राक्षसान्सर्वान्[11]प्रहसन्स खरस्तदा ॥ १९ ॥
महोत्पातानिमान्सर्वा[12]नुत्थितान्घोरदर्शनान् ॥ न चिन्तयाम्यहं वीर्याद्बलवान्दुर्बलानिव ॥ २० ॥
तारा अपि शरैस्तीक्ष्णैः [13]पातयामि नभःस्थलात् ॥ मृत्युं मरणधर्मेण संक्रुद्धो योजयाम्यहम् ॥ २१ ॥
राघवं तं बलोत्सिक्तं भ्रातरं [14]चास्य लक्ष्मणम् ॥ अहत्वा सायकैस्तीक्ष्णैर्नोपावर्तितुमुत्सहे ॥ २२ ॥
[15]सकामा भगिनी मेऽस्तु [16]पीत्वा तु रुधिरं तयोः ॥ [17]यन्निमित्तस्तु [18]रामस्य लक्ष्मणस्य विपर्ययः ॥ २३ ॥

दाभासत इति परिघाभासः कबन्धः शिरःशून्यमनुष्यकायः । भास्करान्तिके सूर्यस्य समीपे । दृश्यते अदृश्यत । तथोक्तं कामन्दकीये । “ सूर्यदृष्टकबन्धादिरकस्मान्मूढवाहनः ” इति । कबन्धाकारमेघखण्ड इतियावत् । महानाग्रहो यस्य स महाग्रहः स्वर्भानुः राहुः । अपर्वणि प्रतिपदर्शसंधिः पर्व तस्मादन्यस्मिन्नपि काले सूर्यं जग्राह । तदाह वराहमिहिरः । “ अपर्वणि तथा राहुग्रहणं चन्द्रसूर्ययोः ” इति ॥ १२ ॥ प्रवाति प्रतिकूलो वाति । उत्पेतुः प्रचकाशिरे । खद्योतसप्रभाः ज्योतिरिङ्गणसमानकान्तयः ॥ १३ ॥ संलीनाः जलान्तरगताः । पुष्पफलैर्विना बभूवुः गलितपुष्पादिका बभूवुरित्यर्थः ॥ १४ ॥ उद्धूतः उत्क्षिप्तः । जलधरारुणः मेघवद्धूसरः । वीचीकूचीति शब्दनुकारः । वाश्यन्त्यः शब्दं कुर्वन्त्यः ॥ १५ ॥ उल्कानिर्घातौ ज्योतिर्वायुविशेषौ । अत्रवराहमिहिरः “ उल्का शिरसि विशाला निपतन्ती वर्धते तनुप्रभया । पवनाभिहता गगनादवनौ च यदा समापतति ॥ भवति तदा निर्घातः स च पापो दीर्घखगविरुतः ” इति ॥ १६ ॥ अवसज्जत अवासज्जत । गद्गदकण्ठतया प्रतिबद्धोभूदित्यर्थः ॥ १७ ॥ रुजा पीडा । “ स्त्रीरुग्रुजाचोपतापरोगव्याधिगदामयाः ” इत्यमरः । मोहात् अज्ञानात् । न न्यवर्तत एवमनेकदुर्निमित्तदर्शनेपियुद्धगमनान्न न्यवर्ततेत्यर्थः ॥ १८ ॥ उत्थितान् उद्भूतान् । रोमहर्षणान् रोमाञ्चकरान् भयजनकानित्यर्थः । तदुक्तं साहित्यचिन्तामणौ “ उल्कानिपातनिर्घातव्यालव्याघ्रादिदर्शनैः । उत्पन्नः सहसा चित्तविक्षोभस्त्रास इष्यते ॥ नेत्रसंमीलनोत्कम्पगात्रसंकोचगद्गदैः । वैवर्ण्यस्वेदरोमाञ्चस्तम्भाद्यैरनुभाव्यते ” इति ॥ प्रहसन्नित्यनेन गर्वःसूच्यते ॥ १९ ॥ तत्कार्यप्रतिज्ञामाह—महोत्पातानिति । तथाचोक्तं चिन्तामणौ । “ कुलरूपवयोविद्याबलैश्वर्यधनादिभिः । या भवेदात्मनः श्लाघा स गर्व इति कथ्यते ॥ उद्ग्रीवावेक्षणावज्ञाप्रतिज्ञातिर्भवेदिह ” इति । दुर्बलानिव पुरुषान् ॥ २०—२१ ॥ उत्सिक्त

ति० खद्योतसप्रभत्वंनिस्तेजस्कत्वेनचाञ्चल्येनच ॥१३॥ ति० वाश्यन्तः । आर्षं ॥१५॥ शि० वनकाननयोर्निबिडानिबिडत्वे नभेदान्नपौन रुक्त्यं ॥१६॥ स० मरणधर्मेण मरणाख्यधर्मेण ॥२१॥ टीका० ननुरामस्यामानुषचरित्रंज्ञात्वा युद्धागमनवेलायां स्वस्यदुर्निमित्तानिदृष्ट्वाचखरोनिर्भीकःप्रहृष्टःकिमर्थमभूदित्याशङ्कायामुच्यते। स्वस्यशिवशापविमुक्तिर्भविष्यतीतितद्वासनावशात्प्रमोदो जातइत्यविरोधः ॥ ती० वस्तुतस्तुअहत्वानो पावर्तितुमुत्सहइत्यनेन हत्वैवोपावर्तितुमुत्सहइत्यभिप्रायः । हन्तुमसमर्थः अतोनोपावर्तनइतिव्यज्यते ॥२२॥ ती० वस्तुतस्तु रामस्यलक्ष्मणस्यचजयइतिशेषः । मेममविपर्ययः नाशश्च यन्निमित्तः याशूर्पणखानिमित्तं

[पा०] १ ग. विवाति. २ क. ख. च. छ. ञ. संनिभाः. ३ घ. च. छ. ज. ञ. पुष्पैःफलैः. ४ झ. चीचीकूचीति. ५ झ. वाश्यन्तो. घ. शंसन्त्यो. ६ ङ. छ.—ट. सारिकाः. ७ ङ. झ. ञ. ट. सनिर्घोषाः. ८ क.—ट. चापि. ९ घ. सास्रं. १० ङ. ट. नुदितान्. ११ क. ख. ग. च. छ. ज. ञ. प्रहसन्वाहिनीपतिः. १२ ङ. ट. नुदितान्. १३ क. ग. ङ.—ट. पातयेयं. १४ ङ. ट. चापि. १५ एतच्छ्लोकार्धयोःपौर्वापर्यं. क. ङ.—ट. पुस्तकेषुदृश्यते. १६ ख. ग. पीत्वाच. छ. ज. ञ. पास्येशोणितं. १७ क. ग.—ट. यन्निमित्तंतु. १८ ख. रामश्चलक्ष्मणश्चविपत्स्यते.

न क्वचित्[1]प्राप्तपूर्वो मे [2]संयुगेषु पराजयः ॥ युष्माकमेतत्प्रत्यक्षं नानृतं कथयाम्यहम् ॥ २४ ॥
देवराजमपि क्रुद्धो मत्तैरावत[3]यायिनम् ॥ वज्रहस्तं रणे हन्यां किं पुन[4]स्तौ कुमानुषौ ॥ २५ ॥
सा तस्य गर्जितं श्रुत्वा [5]राक्षसस्य महाचमूः ॥ प्रहर्षमतुलं लेभे मृत्यु[6]पाशावपाशिता ॥ २६ ॥
[7]समीयुश्च महात्मानो युद्धदर्शनकाङ्क्षिणः ॥ ऋषयो देवगन्धर्वाः सिद्धाश्च सह चारणैः ॥
समेत्य चोचुः सहितास्तेऽन्योन्यं पुण्यकर्मणः ॥ २७ ॥
स्वस्ति गो[8]ब्राह्मणेभ्योस्तु लोकानां [9]येऽभिसंगताः ॥ जयतां [10]राघवः संख्ये [11]पौलस्त्यान्रजनीचरान् ॥
चक्रहस्तो [12]यथा युद्धे सर्वानसुर[13]पुङ्गवान् ॥ २८ ॥
एतच्चान्यच्च बहुशो ब्रुवाणाः परमर्षयः ॥ जातकौतूहलास्तत्र विमानस्थाश्च देवताः ॥
ददृशुर्वाहिनीं तेषां राक्षसानां गतायुषाम् ॥ २९ ॥
रथेन तु खरो [14]वेगादुग्रसैन्यो विनिःसृतः ॥ तं दृष्ट्वा [15]राक्षसं भूयो राक्षसा[16]श्च विनिःसृताः ॥ ३० ॥
श्येनगामी [17]पृथुग्रीवो यज्ञ[18]शत्रुर्विहङ्गमः ॥ दुर्जयः [19]करवीराक्षः परुषः कालकार्मुकः ॥ ३१ ॥
मेघमाली [20]महामाली [21]सर्पास्यो रुधिराशनः ॥ द्वादशैते महावीर्याः प्रतस्थुरभितः खरम् ॥ ३२ ॥
महाकपालः स्थूलाक्षः [22]प्रमाथी त्रिशिरास्तथा ॥ चत्वार एते [23]सेनान्यो दूषणं [24]पृष्ठतो ययुः ॥ ३३ ॥

सा भीमवेगा समराभि[25]कामा [26]महाबला राक्षसवीरसेना ॥
तौ राजपुत्रौ सहसाऽभ्युपेता माला ग्रहाणामिव चन्द्रसूर्यौ ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

गर्वितं ॥२२—२६ ॥ समीयुः सङ्गताः । सहिताः लोकहितपराः । पुण्यकर्मणः पुण्यकर्माणः। दीर्घाभाव आर्षः ॥ २७ ॥ लोकानामभिसङ्गता इति ये लोकानां अभिसङ्गताः अनुकूलाः तेभ्योपि स्वस्त्यस्त्वित्यर्थः । जयतां जयतु। आर्षमात्मनेपदं। संख्ये युद्धे। चक्रहस्तो विष्णुः । वाहिनीं सेनां । गतायुषां गन्तुमुद्युक्तायुषां । एतत् स्वस्तीत्यादिवाक्यं । अन्यच्च राघवजयविषयकं वाक्यं । ब्रुवाणाः परमर्षयः विमानस्था देवताश्च जातकौतूहलाः सन्तः । राक्षसानां वाहिनीं ददृशुरिति संबन्धः ॥ २८—२९ ॥ वेगात् रथवेगात् । विनिःसृतः गतः ॥ ३० ॥ श्येनगाम्यादयो द्वादशखरामात्याः ॥३१—३३॥ समराभिकामा युद्धेप्सुः । ग्रहाणां अङ्गारकादीनां ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रयोविंशः सर्गः ॥ २३ ॥

यस्यसः । साभगिनी तयोः ताभ्यां मृतस्यममेतिशेषः । रुधिरंपीलासकामाऽस्तु ॥ २३ ॥ **ती०** कुमानुषौ कौ भूमौ मनुष्यरूपेणावतीर्णावित्यवगन्तव्यं ॥ २५ ॥ **ति०** सैन्यस्याग्राद्विनिस्सृतः पूर्वंसैन्यसंबद्धएवतदग्रभागेस्थितः । इदानींतुसेनांबहुदूरेपृष्ठतस्त्यक्त्वास्वयमेवाग्रेगतइत्यर्थः ॥ ३० ॥ इतित्रयोविंशस्सर्गः ॥ २३ ॥

[पा०] १ च. छ. ज. ञ. प्राप्तपूर्वस्तु. २ ख. संग्रामेषु. ३ ख. ङ. च. झ. ढ. गामिनं. ४ ख. ग. छ. स्तौतुमानुषौ. ङ. झ. ट. स्तौतुमानवौ. ५ ङ. झ. ट. राक्षसानां. ६ ख. पाशवशंगता. ७ क.—च. ञ. ट. समेयुश्च. ८ ङ. झ. ञ. ट. ब्राह्मणेभ्यस्तु. ९ ङ. झ. ञ. ट. येचसंमताः. ख. येहितैषिणः. १० क. ख. ग. ङ. झ. ञ. ढ. राघवोयुद्धे. ११ सर्वानसुरसत्तमान्. १२ ङ. झ. ञ. ट. यथाविष्णुः. १३ क. ग. ङ. झ. ञ. ट. सत्तमान्. १४ ङ. झ. ट. वेगात्सैन्याग्राद्विनिस्सृतः. १५ च. छ. ज. ञ. निस्सृतंभूमौ. १६ घ. श्चापिनिस्सृताः. १७ ङ. ट. पृथुश्यामो. १८ क. ख. शत्रुर्महाविषः. १९ ट. परवीराक्षः. २० ख. महाबाहुः. २१ ङ. ट. वरास्यो. २२ ङ. ट. प्रमाथित्रिशिराः. झ. प्रमाथस्त्रिशिराः. २३ घ. च. छ. ज. ञ. सेनाग्र्याः. क. ग. ङ. झ. ट. सेनाग्रे. २४ ङ.—ट. पृष्ठतोन्वयुः. २५ ङ. झ. ट. कांक्षिणी. २६ क. ग. ङ.—ट. सुदारुणा.

चतुर्विंशः सर्गः ॥ २४ ॥

रामेणलक्ष्मणंप्रति खरप्रयाणकालिकदुर्निमित्तप्रदर्शनेन तेषां स्वपरजयापजयसूचकत्वकथनपूर्वकंसीतारक्षणाय तया-सहगुहाश्रयणचोदना ॥ १ ॥ श्रीरामेयुद्धसन्नद्धे समरावलोकनायदेवगन्धर्वादिपुगगनाङ्गणमवतीर्णेषु खरसैन्येनरणायरामं-प्रत्यभिसर्पणम् ॥ २ ॥

आश्रमं प्रतियाते तु खरे खरपराक्रमे ॥ तानेवोत्पातिकान्रामः सह भ्रात्रा ददर्श ह ॥ १ ॥
तानुत्पातान्महाघोरानुत्थितान्रोमहर्षणान् ॥ प्रजानामहितान्दृष्ट्वा वाक्यं लक्ष्मणमब्रवीत् ॥ २ ॥
इमान्पश्य महाबाहो सर्वभूतापहारिणः ॥ समुत्थितान्महोत्पातान्संहर्तुं सर्वराक्षसान् ॥ ३ ॥
अमी रुधिरधारास्तु विसृजन्तः खरस्वनान् ॥ व्योम्नि मेघा विवर्तन्ते परुषा गर्दभारुणाः ॥ ४ ॥
सधूमाश्च शराः सर्वे मम युद्धाभिनन्दिनः ॥ रुक्मपृष्ठानि चापानि विवेष्टन्ते च लक्ष्मण ॥ ५ ॥
यादृशा इह कूजन्ति पक्षिणो वनचारिणः ॥ अग्रतो नो भयं प्राप्तं संशयो जीवितस्य च ॥ ६ ॥
संप्रहारस्तु सुमहान्भविष्यति न संशयः ॥ ७ ॥
अयमाख्याति मे बाहुः स्फुरमाणो मुहुर्मुहुः ॥ सन्निकर्षे तु नः शूर जयं शत्रोः पराजयम् ॥ ८ ॥
संप्रभं च प्रसन्नं च तव वक्त्रं हि लक्ष्यते ॥ उद्यतानां हि युद्धार्थं येषां भवति लक्ष्मण ॥
निष्प्रभं वदनं तेषां भवत्यायुःपरिक्षयः ॥ ९ ॥
रक्षसां नर्दतां घोरः श्रूयते च महाध्वनिः ॥ आहतानां च भेरीणां राक्षसैः क्रूरकर्मभिः ॥ १० ॥

अथ रामस्य युद्धसन्नाहश्चतुर्विंशे । औत्पातिकानिति स्वार्थेठक् ॥ १—२ ॥ सर्वभूतापहारिणः सर्वभूतापहारसूचकान् । प्रकृतेतु सर्वराक्षसान् संहर्तुमुद्यतानिति योजना ॥ ३ ॥ रुधिरमय्यो धारा येषां ते रुधिरधाराः । खरस्वनान् घोरस्तनितानि । विवर्तन्ते संचरन्ति ॥ ४ ॥ सधूमा इति । प्रतापानलोद्युक्ता इतिभावः । अत एव मम युद्धाभिनन्दनः रुक्मपृष्ठानि स्वर्णमयपृष्ठानि । चापानि धनूंषि । "अथास्त्रियां । धनुश्चापौ" इत्यमरः । विवेष्टन्ते चलन्ति । युद्धसन्नद्धानि भवन्तीत्यर्थः । आत्मनश्चापद्वयं लक्ष्मणस्यैकमिति बहुवचनं ॥ ५ ॥ यादृशाः प्रसिद्धाः । पूर्वकृतसंवादा इत्यर्थः । अग्रतः अव्यवहितोत्तरकाले । नो भयमिति सुवाक् ॥ ६ ॥ सुमहान् संप्रहारः युद्धं ॥ ७ ॥ बाहुः दक्षिणः । सन्निकर्षे अव्यवहितोत्तरकाले ॥८॥ स्वमुखप्रसादादेः स्वयं द्रष्टुमशक्यत्वेन स्वसमानसुखे लक्ष्मणेनिदर्शयति—सप्रभमिति । मुखप्रसादफलं व्यतिरेकमुखेनाह—उद्यता-

स० तान् ये खरदृष्टाः ॥१॥ **शि०** अत्यमर्षणः मुनिखेदासहिष्णुः । रामः प्रजानां दशरथराज्यनिवासिराक्षसानां । किंच प्रकर्षेण जो मृत्युञ्जयोयेषांतेषांराक्षसानां । अहितान् घोरानुत्पातान् दृष्ट्वा अवलोक्य दृष्ट्वा विचार्यच । लक्ष्मणमब्रवीत् । "जो ना मृत्युञ्जयेजन्यांतातमात्रेजनार्दने" इतिमेदिनी ॥२॥ **ती०** एवंराक्षसानांदुर्निमित्तान्युक्त्वा स्वस्यजयसूचकानिनिमित्तान्याह—**सधूमाइति** । ममयुद्धाभिनन्दिताः युद्धेअभितोनन्दः आनन्दः एषांसंजातइतितथोक्ताः । श्रीरामगतोयुद्धहर्षश्शरेषूपचर्यते । ममयुद्धहर्षसूचकाइतिफलितार्थः । चापानिविवेष्टन्ते विशेषेणवेष्टन्ते । अभिमन्त्रिततत्तद्देवतासांनिध्याच्चापेषुस्वयमेवशरास्संसक्ताभवन्तीत्यर्थः । **स०** शराः तदभिमानिदेवताः । एवमुत्तरत्रापि ॥ ५ ॥ **ती०** अग्रतः अस्माकंपुरतइत्यर्थः । वनचारिणः यादृशाःसौम्याः पक्षिणःकूजन्ति । तादृशैस्सुनिमित्तैः नः अस्माकं अभयंप्राप्तं । चकारादरीणांजीवितस्यसंशयश्चप्राप्तइत्यर्थः ॥ ६ ॥ **स०** आयुः परिक्षयइतिपदद्वयं । यतस्तववक्त्रंसुप्रसन्नंलक्ष्यते तस्माद्भवतित्वयि आयुः । येषांपरिक्षयोभावी तेषांवदनंनिष्प्रभंभवति ॥ ९ ॥

[**पा०**] १ ङ.—ट. घोरान्रामोदृष्ट्वात्यमर्षणः. २ ख. महितान्घोरान्. ३ च. छ. ञ. लक्ष्मणंवाक्यं. ४ ग. ङ. झ. ट. विसृजन्तेखरस्वनाः. क. ख. ग. विसृजन्तःखरस्वनाः. च. छ. ज. ञ. विसृजन्तःखरस्वराः. ५ ग. निवर्तन्ते. च. छ. ज. ञ. विनर्दन्ते. ६ ङ.—ट. नन्दिताः. ७ च. छ. ज. ञ. चेष्टन्तेपिच. ङ. ट. विचेष्टन्तेच. झ. विचेष्टन्तेविचक्षण. ८ ग. गर्जन्ति. ९ च. छ. ञ. ससंप्रहारः. १० ख. घ.—ट. सुप्रभं. ११ ट. युद्धार्थे. १२ क. च. ज. ञ. श्रूयतेहि. ङ. झ. ट. श्रूयतेऽयं.

अनागतविधानं तु कर्तव्यं [1]शुभमिच्छता ॥ [2]आपदं शङ्कमानेन पुरुषेण विपश्चिता ॥ ११ ॥
तस्माद्गृहीत्वा वैदेहीं शरपाणिर्धनुर्धरः ॥ गुहामाश्रय शैलस्य दुर्गां पादपसंकुलाम् ॥ १२ ॥
प्रतिकूलितुमिच्छामि न हि वाक्यमिदं त्वया ॥ शापितो मम पादाभ्यां गम्यतां [3]वत्स मा चिरम् ॥ १३
त्वं हि शूरश्च [4]बलवान्हन्या ह्येतान्न संशयः ॥ [5]स्वयं तु हन्तुमिच्छामि सर्वानेव निशाचरान् ॥ १४ ॥
एवमुक्तस्तु रामेण लक्ष्मणः सह सीतया ॥ शरानादाय चापं च गुहां दुर्गां समाश्रयत् ॥ १५ ॥
तस्मिन्प्रविष्टे तु गुहां लक्ष्मणे सह सीतया ॥ हन्त [6]निर्युक्तमित्युक्त्वा रामः कवचम[7]आविशत् ॥ १६ ॥
स तेनाग्निनिकाशेन कवचेन विभूषितः ॥ बभूव रामस्तिमिरे [8]विधूमोग्निरिवोत्थितः ॥ १७ ॥
स चापमुद्यम्य मह[9]च्छरानादाय वीर्यवान् ॥ [10]बभूवावस्थितस्तत्र ज्यास्वनैः पूरयन्दिशः ॥ १८ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च [11]सह चारणैः ॥ [12]समेयुश्च महात्मानो युद्धदर्शन[13]काङ्क्षिणः ॥ १९ ॥
ऋषयश्च महात्मानो लोके ब्रह्मर्षिसत्तमाः ॥ समेत्य चोचुः [14]सहिता अन्योन्यं पुण्यकर्मणः ॥ २० ॥
स्वस्ति [15]गोब्राह्मणेभ्योऽस्तु लोकानां [16]येऽभिसङ्गताः ॥ जयतां राघवो युद्धे पौलस्त्यान्रजनीचरान् ॥ २१ ॥
चक्रहस्तो यथा युद्धे सर्वानसुर[17]पुंगवान् ॥ [[18]एतच्चान्यच्च बहवो ब्रुवाणाः परमर्षयः ॥]
एवमुक्त्वा पुनः प्रोचुरालोक्य च परस्परम् ॥ २२ ॥

नामिति ॥ ९—१० ॥ आपदं निमित्तवशाच्छङ्कमानेन शुभं आपत्परिहारं । इच्छता विपश्चिता दूरदर्शिना पुरुषेण अनागतविधानं अनागतस्य भाविनोऽनर्थस्य विधानं प्रतिविधानं कर्तव्यं ॥ ११ ॥ गृहीत्वा रक्ष्यत्वेन गृहीत्वा । पादपसंकुलां वृक्षावृतां ॥ १२ ॥ अहमेव योत्स्यामीति वक्तुमुद्यतं प्रत्याह—प्रतिकूलितुमिति । इदं वाक्यं प्रतिकूलितुं नेच्छामि । मयाशापितोसीति वक्तव्ये मम पादाभ्यामित्युक्तिर्लक्ष्मणव्यवहारानुसारेण ॥ १३ ॥ त्वन्निवर्तनं न त्वदशक्त्या किंतु मुनिभ्यः प्रतिज्ञानान्मयैव तद्वधः कर्तव्य इत्याशयेनाह—त्वं हीति ॥ १४ ॥ दुर्गां अन्यैर्दुरासदां ॥ १५ ॥ हन्तेति हर्षे । निर्युक्तं निश्चयेन उपायश्चिन्तित इत्यर्थः । " योगः सन्नहनोपायध्यानसंगतियुक्तिषु " इत्यमरः । आविशत् प्राविशत् अधारयदित्यर्थः ॥ १६ ॥ अत्रोपमालंकारेण क्षणेन रक्षःक्षयो ध्वन्यते ॥ १७—१८ ॥ ततो देवा इत्यादि । पूर्वसर्गे समागमनमुक्तं अत्र सन्निधानं । चारणाः देवजातिविशेषाः ॥ १९ ॥ लोके त्रैलोक्ये । ब्रह्मर्षिसत्तमाः भृग्वादयः । पुण्यकर्मणः पुण्यकर्माणः ॥ २० ॥ लोकानां येभिसंगता इति ये लोकानामभिसंगताः अनुकूलाः । तेभ्योपि स्वस्त्यस्त्वित्यर्थः । देवादयः समेत्य स्वस्तीत्याद्यूचुः । तएवैवमुक्त्वा कथं युद्धं भविष्यतीत्यन्तं पुनः प्रोचुरिति संबन्धः ॥ २१ ॥

ति० प्रतिकूलितुं विपरीतंकर्तुं नेच्छामि । भिन्नकर्तृके तुमुनार्षः । **ती०** प्रतिकूलितमितिपाठे त्वयाप्रतिकूलितं त्वत्कर्तृकप्रातिकूल्यवद्वाक्यंनेच्छामीत्यर्थः । **स०** इदंवाक्यंत्वयाप्रतिकूलितुंनेच्छामीतिभिन्नकर्तृकत्वेपिभोक्तुमनुजानामीत्यादिवत्तुमुन्संभवति । यद्वा इदंत्वयेत्येकंपदं अयंचासौत्वंचइदंत्वंतेन प्रतिकूलितुं । भवान्युवत्यासहगच्छतीतिशङ्कामारोपयितुंवाक्यंनेच्छामीतिपादाभ्यांशापितोसि । अतश्चिरंमामाकुरु। यद्वा इदं वाक्यं। चिरमुत्तरं प्रत्युत्तररूपं मामाकार्षीः ॥ १३ ॥ **ती०** निर्युक्तं अस्मदुक्तं लक्ष्मणेन निर्युक्तं नितरांयुक्तंकृतमित्युक्त्वा रामः कवचमाविशत् धृतवानित्यर्थः । **स०** निर्युक्तं अतिशोभनं । इत्युक्त्वा। यथोक्तंकर्मनिर्णयटीकायां "युक्तशब्दश्शोभनपर्यायः । यथाहभिक्षुः" इति । तट्टिप्पण्यांच यथाहभिक्षुः " बालक्रीडावासुदेवस्ययुक्ता" इतीति ॥ १६ ॥ **ती०** येलोकानामभिसंगताः हविर्मुखेनानुकूलाभवन्तीत्यर्थः । तदुक्तं " अग्नौप्रास्ताहुतिस्सम्यगादित्यमुपतिष्ठते । आदित्याज्जायतेवृष्टि-

[**पा०**] १ ख. घ. जयमिच्छता. २ झ. आपदा. ३ ख. च. छ. ज. ञ. तत्र. ४ ख. बलवानेतांहन्तुंन. ५ क. ग. ङ. च. छ. झ. ञ. ट. स्वयंनिहन्तुं. ख. अहंतुहन्तुं. ६ ख. निर्यामिचेत्युक्त्वा. ७ घ. मादधत्. ८ क. ग. ङ. ट. महानग्निः. ९ ग. च्छरमादाय. १० ङ. झ. ट. संबभूवास्थितः. ११ ख. च. छ. ज. ञ. परमर्षयः. १२ ख. समेताश्च. च. छ. ज. ञ. समेयुश्चारणैस्तत्र. १३ क. ङ.—ट. काङ्क्षया. १४ क. ग. ङ.—ट. सहितास्तेऽन्योन्यं. १५ क. ग.—च. झ. ट. ब्राह्मणानांच. ख. ब्राह्मणेभ्यश्च. १६ ङ. झ. ट. चेतिसंस्थिताः. घ. च. छ. ज. येहिसंगताः. क. ख. ग. चेतिसंगताः. १७ क. सत्तमान्. १८ इदमर्धं क. च. छ. ज. पाठेषुदृश्यते.

चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् ॥ एकश्च रामो धर्मात्मा कथं युद्धं भविष्यति ॥ २३ ॥
इति राजर्षयः सिद्धाः सगणाश्च द्विजर्षभाः ॥ जातकौतूहलास्तस्थुर्विमानस्थाश्च देवताः ॥ २४ ॥
आविष्टं तेजसा रामं संग्रामशिरसि स्थितम् ॥ [1]दृष्ट्वा सर्वाणि भूतानि भयाद्विव्यथिरे तदा ॥ २५ ॥
रूपमप्रतिमं [2]तस्य रामस्याक्लिष्टकर्मणः ॥ बभूव रूपं क्रुद्धस्य रुद्रस्येव [3]पिनाकिनः ॥ २६ ॥
इति संभाष्यमाणे [4]तु देवगन्धर्वचारणैः ॥ ततो गम्भीरनिर्ह्रादं घोर[5]वर्मायुधध्वजम् ॥
अनीकं यातुधानानां समन्तात्[6]प्रत्यदृश्यत ॥ २७ ॥
[7]सिंहनादं विसृजताम[8]न्योन्यमभिगर्जताम् ॥ चापानि विस्फारयतां जृम्भतां चाप्यभीक्ष्णशः ॥२८॥
[9]विप्रघुष्टस्वनानां च [10]दुन्दुभींश्चापि निघ्नताम् ॥ तेषां [11]सुतुमुलः शब्दः पूरयामास तद्वनम् ॥ २९ ॥
तेन शब्देन वित्रस्ताः श्वापदा वनचारिणः ॥ दुद्रुवुर्यत्र निःशब्दं पृष्ठतो [12]न व्यलोकयन् ॥ ३० ॥
[13]तत्त्वनीकं महावेगं [14]रामं समुपसर्पत ॥ धृतनानाप्रहरणं गम्भीरं सागरोपमम् ॥ ३१ ॥
[15]रामोपि चारयंश्चक्षुः सर्वतो रणपण्डितः ॥ ददर्श खरसैन्यं [16]तद्युद्धाभिमुख[17]मुत्थितम् ॥ ३२ ॥
[18]वितत्य च धनुर्भीमं [19]तूण्योश्चोद्धृत्य सायकान् ॥ क्रोधमाहारयत्तीव्रं वधार्थं सर्वरक्षसाम् ॥ ३३ ॥

—२३ ॥ राजर्षयः देवत्वं प्राप्ताः । यद्वा वानप्रस्थीभूताः । सगणाः सपरिकराः ॥ २४ ॥ संग्रामशिरसि युद्धाग्रे ॥ २५ ॥ रामस्य रूपं रुद्रस्य रूपमिव बभूव ॥ २६ ॥ निर्ह्रादः शब्दः । वर्म कवचं । अनीकं सेना ॥ २७ ॥ अन्योन्यमभिगर्जतां अहमेव शत्रुं हनिष्यामीति जल्पतामित्यर्थः । विस्फारयतां ज्याशब्दं कुर्वतां । अभीक्ष्णशः भृशं । जृम्भतां जृम्भमाणानां मदेनोद्गच्छतामित्यर्थः । विप्रघुष्टस्वनानां घोषो गुञ्जनाख्यध्वनिविशेषः । "घोषो गुञ्जनमञ्जने" इति वैजयन्ती । भावे निष्ठा । तद्रूपस्वनवतामित्यर्थः ॥ २८—२९ ॥ श्वापदाः हिंस्रा व्याघ्रादयः । यत्र निःशब्दं शब्दाभावः । "अव्ययं विभक्ति—" इत्यादिना अव्ययीभावः । तं देशं दुद्रुवुरित्यन्वयः । पृष्ठतः पश्चाद्भागं ॥ ३० ॥ समुपसर्पत समुपासर्पत् । गम्भीरं इतरदुष्प्रवेशं ॥ ३१ ॥ उत्थितं उद्युक्तं ॥३२॥ वितत्य किञ्चिद्बाणविसर्पणं कृत्वेत्यर्थः । "विततं संहितस्येषोः किंचिदेव विसर्पणं" इति वैजयन्ती । तूण्योः पृष्ठपार्श्वद्वयबद्धयोः । आहारयदित्यनेन करुणामूर्तिरप्याश्रितकण्टकोद्धारणाय क्रोधमारोपयामासेति गम्यते । भीमं धनुरुद्धृत्य तूण्योः शरांश्चोद्धृत्य

वृष्टेरन्नंततःप्रजाः" इति ॥ २१ ॥ **ति०** धर्मात्मा अच्छद्मयोधीत्यर्थः ॥ २३ ॥ **ति०** तेजसा वैष्णवेनक्षात्रेण । एतेनसहजस्वभावोभगवतोग्राह्यएव । क्षात्रस्तुस्वेच्छयाकार्यायभगवतास्वीक्रियतइतिसूचितं । भयात् अनुमितरामपरिश्रमजनितभीतेः ॥२५॥ **ती०** रूपमिति । जगत्संहरणार्थमुद्युक्तस्यप्रलयकालरुद्रस्यरूपंयद्वत् तद्वत्खरादिवधार्थमुद्युक्तस्यरामस्यरूपमपिबभूवेत्यर्थः । तदुक्तंस्कान्दे—"रुद्रतेजोविलसितंदृष्ट्वारामकलेबरम् । शङ्खंचक्रंचशूलंचपिनाकंखेटमेवच । खट्वांघण्टांचडमरुंबाणपाशाङ्कुशंतथा । चापंवज्रंचखड्गंचपरशुंत्रासकारणम् । जयश्रियंचगङ्गांचददृशुस्सिद्धचारणाः ।" इति ॥ **शि०** नक्लिष्टं नकस्मैचित्खेदप्रदं कर्म व्यापारोयस्यतस्य ॥ **ति०** रुद्रस्यरूपमिव रामस्यरूपमप्रतिमं ॥ २६ ॥ **स०** समन्तात् सम्यगन्तमुद्दिश्येतिल्यब्लोपनिमित्तापञ्चम्यपि ॥ २७ ॥ **ति०** अन्योन्यमभिगच्छतां एवंयुद्धंकर्तव्यमितिचबोधनार्थमितिशेषः । देहममताराहित्येनयुद्धप्रवृत्तये मादकद्रव्यस्वीकारजंजृंभणं ॥ २८ ॥ **शि०** विप्रहृष्टस्वनानां अतिहर्षसूचकशब्दवतां ॥ २९ ॥ **ति०** सर्वरक्षसांवधार्थं सर्वरक्षोवधद्वारत्वादस्ययुद्धस्येतिभावः ॥ ३३ ॥ इतिचतुर्विंशस्सर्गः ॥ २४ ॥

[**पा०**] १ ट. तं दृष्ट्वासर्वभूतानि. २ तत्र. ३ ङ. झ. ट. महात्मनः. ४ क. सर्षिसंघैश्चचारणैः. ५ ङ. झ. ट. चर्मायुध. ६ ङ. झ. ट. त्वप्रत्यपद्यत. ७ ङ. च. ज.—ट. वीरालापान्विसृजतां. क. छ. ज. विरावांस्तान्विसृजतां. ८ ङ. झ. ट. मन्योन्यमभिगच्छतां. ख. मन्योन्यंभयगर्जनां. ९ ग. घ. च. ज. ट. विप्रहृष्ट. १० क. ख. दुन्दुभीनांचनिःस्वनैः. ११ क.—ट. सुविपुलः. १२ क.—ट. नावलोकयन्. १३ ङ.—ट. तच्चानीकं. ग. गत्वानीकं. १४ ङ. च. छ. झ. ञ. ट. रामंसमनुवर्तत. क. ख. राघवंसमसर्पत. ज. रामंसमनुवर्तते. १५ ख. रामोविचारयन्. ग. घ. च. छ. ज. ञ. ट. रामोपिचालयन्. १६ घ. तद्युद्धायसमुपस्थितं. ङ. झ. तद्युद्धायाभिमुखोगतः. १७ क. ख. ग. च. छ. ज. ञ. ट. मुद्यतं. १८ ख. विनम्यच. क. सज्यंकृत्वा. १९ झ. तूण्याश्चोद्धृत्यसायकं. क. ख. ङ. च. ञ. तूण्याश्चोद्धृत्य. घ. तूणाच्चोद्धृत्य.

दु[1]ष्प्रेक्षः सोभवत्क्रुद्धो युगान्ताग्निरिव ज्वलन् ॥ तं दृष्ट्वा तेजसाऽऽविष्टं प्राद्रवन्वनदेवताः ॥ ३४ ॥
तस्य क्रु[2]द्धस्य रूपं तु रामस्य द[3]दृशे तदा ॥ दक्षस्येव क्रतुं ह[4]न्तुमुद्यतस्य पिनाकिनः ॥ ३५ ॥
आ[5]विष्टं तेजसा रामं संग्रामशिरसि स्थितम् ॥ दृष्ट्वा सर्वाणि भूतानि भयार्तानि प्रदुद्रुवुः ॥ ३६ ॥
तत्कार्मुकैराभरणैर्ध्वजैश्च तैर्वर्मभि[6]श्चाग्निसमानवर्णैः ॥
बभूव सैन्यं पिशिताशनानां सूर्योदये नीलमिवाभ्र[7]वृन्दम् ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

पञ्चविंशः सर्गः ॥ २५ ॥

रामस्यखरसैन्येनसहसंकुलयुद्धम् ॥ १ ॥

अवष्टब्धधनुं रामं क्रु[8]द्धं च रिपुघातिनम् ॥ ददर्शाश्रममागम्य खरः सह पु[9]रःसरैः ॥ १ ॥
तं दृष्ट्वा स[10]शरं चापमुद्यम्य ख[11]रनिःस्वनम् ॥ रामस्याभिमुखं सूतं चो[12]द्यतामित्यचोदयत् ॥ २ ॥
स खरस्याज्ञया सूतस्तुरगान्समचोदयत् ॥ यत्र रामो महाबाहुरेको धू[13]न्वन्स्थितो धनुः ॥ ३ ॥
तं तु निष्पतितं दृष्ट्वा [14]सर्वे ते रजनीचराः ॥ [15]नर्दमाना महानादं सचि[16]वाः पर्यवारयन् ॥ ४ ॥
स तेषां यातुधानानां मध्ये रथगतः खरः ॥ बभूव मध्ये ताराणां लोहिताङ्ग [17]इवोदितः ॥ ५ ॥
ततः शरसहस्रेण राममप्रतिमौजसम् ॥ अर्दयित्वा महानादं ननाद समरे खरः ॥ ६ ॥
ततस्तं भीमधन्वानं क्रुद्धाः सर्वे निशाचराः ॥ रामं नानाविधैः शस्त्रैरभ्यवर्षन्त दुर्जयम् ॥ ७ ॥
मु[18]द्गरैः पट्टिशैः शूलैः प्रा[19]सैः खड्गैः परश्वधैः ॥ राक्षसाः समरे रामं निजघ्नू रोषतत्पराः ॥ ८ ॥
ते वलाहकसंकाशा म[20]हानादा महौजसः ॥ अभ्यधावन्त काकुत्स्थं [21]रथैर्वाजिभिरेव च ॥
[22]गजैः पर्वतकू[23]टाभै रामं युद्धे जिघांसवः ॥ ९ ॥

वितत्य सर्वरक्षसां वधार्थं क्रोधमाहारयदित्यन्वयः ॥ ३३—३४ ॥ दक्षस्येति क्रोधातिशयमात्रे दृष्टान्तः ॥३५—३६॥ कवचसूर्यकिरणयोः साम्यं । नीलाभ्राणां रक्षसां च कार्मुकवत्त्वं ध्वजवत्त्वं च तुल्यं मेघे उत्पातध्वजसंभवात् । अत्र सार्धसप्तत्रिंशच्छ्लोकाः ॥३७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुर्विंशः सर्गः ॥ २४ ॥

तुमुलयुद्धं पञ्चविंशे। धन्यत इति धनुः। धन धान्य इत्यस्माद्धातोः "भृमृशीङ्तृचरितत्सरितनिधनिमिमस्जिभ्यउः" इत्यौणादिकसूत्रेण उप्रत्ययः । "धनुषां च धनुं विदुः धनुरिवाजनिवक्रः" इति कविकाव्यप्रयोगश्च ॥ १ ॥ चोद्यतामिति रथ इतिशेषः ॥२—३॥ निष्पतितं युद्धोन्मुखं । सचिवाः श्येनगाम्यादयः ॥४॥ लोहिताङ्गः अङ्गारकः ॥ ५॥ अर्दयित्वा पीडयित्वा । महानादं ननाद चकारेत्यर्थः ॥ ६ ॥ भीमधन्वानं "धनुषश्च" इत्यनङ्समासान्तः । शस्त्रैः आयुधैः । "शस्त्रमायुधलोहयोः" इत्यमरः ॥ ७ ॥ मुद्गरैःस्थूलगदाभिः । प्रासैः कुन्तैः । रोषतत्पराः क्रोधपरवशाः ॥ ८ ॥ वलाहकसंकाशाः मेघतुल्याः । कूटं शृङ्गं ।

[पा०] १ ङ.—ज. ञ. ट. दुष्प्रेक्षश्चाभवत्. २ क. ग. ङ. झ. ट. रुष्टस्य. ३ ख. ददृशुस्तदा. ४ च. छ. ज. ञ. हन्तुंक्रुद्धस्येव. ५ ख. ग. घ. प्रविष्टं. ६ ख. ङ. झ. ट. तद्वर्मभिः. ७ ग. ङ. झ. ञ. ट. जालं. ८ ङ. झ. ञ. ट. क्रुद्धंतं. ९ क. ग. पुरस्सरः. १० ख. ग. ङ. च. छ. झ. ञ. ट. सगुणं. ११ क. च. छ. ज. ञ. खरनिस्स्वनः. १२ ख. चोदयामासराक्षसं. १३ ङ.—ट. धुन्वन्धनुस्स्थितः. १४ ङ. झ. ट. सर्वतो. घ. सर्वेपि. १५ ङ.—ट. मुञ्चमानाः. १६ क. सचापाः. १७ क. च. ज. ञ. ट. इवोत्थितः. ङ. झ. इवोद्धतः. १८ क. ख. ग. ङ.—ट. मुद्गरैरायसैः. १९ ख. खड्गैःप्रासैः. २० ङ.—ट. महाकायामहाबलाः. २१ ख. गजैर्वाजिभिः. २२ ख. रथैः. २३ क. संकाशैः.

ते रामे शरवर्षाणि व्यसृजन्रक्षसां गणाः ॥ शैलेन्द्रमिव धाराभिर्वर्षमाणा [1]वलाहकाः ॥ १० ॥
[2]स तैः परिवृतो घोरै राघवो रक्षसां गणैः ॥ तिथिष्व[3]िव महादेवो वृतः पारिषदां गणैः ॥ ११ ॥
तानि मुक्तानि शस्त्राणि यातुधानैः स राघवः ॥ प्रतिजग्राह विशिखैर्नद्योघानिव सागरः ॥१२॥
स तैः प्रहरणैर्घोरैर्भिन्नगात्रो न विव्यथे ॥ रामः प्रदीप्तैर्बहुभिर्वज्रैरिव [4]महाचलः ॥ १३ ॥
स विद्धः क्षत[5]जादिग्धः सर्वगात्रेषु राघवः ॥ बभूव रामः सन्ध्याभ्रैर्दिवाकर इवावृतः ॥ १४ ॥
विषेदुर्देवगन्धर्वाः सिद्धाश्च परमर्षयः ॥ एकं सहस्रैर्बहुभिस्तदा दृष्ट्वा समा[6]वृतम् ॥ १५ ॥
ततो रा[7]मः सुसंक्रुद्धो मण्डलीकृतकार्मुकः ॥ ससर्ज [8]विशिखान्बाणाञ्शतशोथ सहस्रशः ॥ १६ ॥
दुरावारान्दुर्विषहान्का[9]लदण्डोपमान्रणे ॥ मुमोच लील[10]या रामः कङ्कपत्रानजिह्मगान् ॥ १७ ॥
ते शराः शत्रुसैन्येषु मुक्ता रामेण लीलया ॥ आददू रक्षसां प्राणान्पाशाः कालकृता इव ॥१८॥
भि[11]त्त्वा राक्षसदेहांस्तांस्ते शरा रुधिराप्लुताः ॥ अन्तरिक्षगता रेजुर्दीप्ताग्निसमतेजसः ॥ १९ ॥
अ[12]संख्येयास्तु रामस्य सायकाश्चापमण्डलात् ॥ विनिष्पेतुरतीवोग्रा रक्षःप्राणापहारिणः ॥ २० ॥
तैर्धनूंषि ध्वजाग्राणि व[13]र्माणि च शिरांसि च ॥ बाहून्सहस्ताभरणानूरून्करिकरोपमान् ॥
चि[14]च्छेद रामः समरे शतशोथ सहस्रशः ॥ २१ ॥
हयान्काञ्चनसन्नाहान्रथयुक्तान्ससारथीन् ॥ गजांश्च स[15]गजारोहान्सहयान्सादिनस्त[16]था ॥
[[17]चिच्छिदुर्बिभिदुश्चैव रामबाणा गुणच्युताः]॥ २२ ॥

अभ्यधावन्त आभिमुख्येनाधावन्त ॥ ९ ॥ शैलेन्द्रमिवेत्युपमानेन रामस्य निर्दुःखत्वमुक्तं ॥ १०—११ ॥ विशिखैः बाणैः । प्रतिजग्राह प्रतिरुरोध । नद्योघान् नदीप्रवाहान् ॥ १२ ॥ वज्रैः अशनिभिः ॥ १३ ॥ क्षतजादिग्धः रुधिरालिप्तः ॥ १४ ॥ बहुभिः सहस्रैः चतुर्दशसहस्रैः ॥ १५ ॥ मण्डलीकृतकार्मुकः आकर्णाकर्षणेन मण्डलाकारीकृतधनुः । विशिखान् बाणान् अर्धचन्द्राग्रबाणान् । प्रथमं शतशः अनन्तरं सहस्रशः स निर्बिभेदेति योजना ॥ १६ ॥ दुरावारान् वारयितुमशक्यान् । दुर्विषहान् दुःसहान् । कालदण्डोपमान् यमदण्डतुल्यान् । अजिह्मगान् अवक्रगामिनः । अस्खलितलक्ष्यकानित्यर्थः । कङ्कपत्रान् बाणान् । " कङ्कपत्रशरमार्गणबाणाः " इति हलायुधः ॥ १७ ॥ प्राणानाददुः अमारयन्नित्यर्थः । कालकृताः यममुक्ता इत्यर्थः ॥ १८ ॥ रुधिराप्लुता इति विशेषणं दीप्ताग्न्युपमासिद्ध्यर्थं ॥ १९ ॥ सायकाः बाणाः ॥ २० ॥ तैरित्याद्यर्धत्रयमेकं वाक्यं । वर्माणि कवचानि ॥ २१ ॥ काञ्चनसन्नाहान् काञ्चनाभरणान् । रथयुक्तान् रथबद्धान् । सगजारोहान्

ति० तिथिषु प्रदोषतिथिषु । पारिषदां नुडभावआर्षः ॥ ११ ॥ ती० वज्रैरिवमहाचलइतिव्यतिरेकदृष्टान्तः । वज्रैः वज्रनिपातैः । अनयोपमया श्रीरामस्यनकदाचिदपितत्कृतव्यथेतिसूच्यते । शि० भिन्नगात्रः भिन्नंप्राकृतविलक्षणं गात्रंशरीरंयस्यसः ॥ १३ ॥ क्षतजादिग्धः स्वीकृतकोपाभासहेतुकारुण्यविशिष्टत्वेन रुधिरलिप्तइव ॥ १४ ॥ ती० विशिखान्बाणान् बाणसंज्ञाञ्शरान् । " बाणास्तुगतपत्रिणः " इतिवैजयन्ती ॥ १६ ॥ ति० लीलयेति । युगपत्सकलप्रपञ्चसंहारस्वरूपस्यैतावन्मात्रंलीलैवेति नाश्चर्यायेतिभावः ॥ १८ ॥ ति० चापमण्डलात् सन्धानमोचनशैघ्र्यान्मण्डलाकारताचापस्य ॥ २० ॥ ति० छेदभेदौ द्वैधीभा

[पा०] १ क. ख. ग. ङ. च. छ. झ. ञ. ट. महाघनाः. २ ङ.—ट. सर्वैःपरीवृतोरामोराक्षसैःक्रूरदर्शनैः. ३ इदमर्धं ङ. झ. ञ. ट. पाठेषुदृश्यते. एतदर्धस्यप्रतिनिधितया. घोररूपैर्महादेवोवृतःपारिषदांगणैः. इत्यर्धं च. छ. ज. पाठेषु दृश्यते. ४ घ. च. महाबलः. ५ क. ग. क्षतजैर्दिग्धः. ६ घ. समागतं. ७ ङ. झ. ट. रामस्तु. ८ क. ङ.—ट. निशितान्. ख. विविधान्. ९ ङ. झ. ट. कालपाशोपमान्. १० ङ. झ. लीलयाकङ्कपत्रान्काञ्चनभूषणान्. ११ ख. हत्वा. १२ घ. असङ्ख्येयाश्च. १३ ङ.—ट. चर्माणिकवचानिच. १४ घ. बिभेद. १५ ख. गजसंरोहान्. १६ ङ.—ट. स्तदा. १७ इदमर्धं ङ.—ट. पुस्तकेषुदृश्यते. चिच्छिदुर्बिभिदुश्चैव. पदातीन्समरे. इत्यनयोरर्धयोःपौर्वापर्यं. च. छ. ज. ञ. पुस्तकेषुदृश्यते.

पदातीन्समरे हत्वा [1]ह्यनयद्यमसाधनम् ॥ २३ ॥
ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः ॥ भीममार्तस्वरं चक्रु[2]र्भिद्यमाना निशाचराः ॥ २४
तत्सैन्यं [3]निशितैर्बाणैरर्दितं मर्मभेदिभिः ॥ [4]रामेण न सुखं लेभे शुष्कं वनमिवाग्निना ॥ २५ ॥
केचिद्भीम[5]बलाः शूराः [6]शूलान्खड्गान्परश्वधान् ॥ [7]रामस्याभिमुखं गत्वा चिक्षिपुः परमायुधान् ॥२६
[9]तानि बाणैर्[10]महाबाहुः शस्त्राण्यावार्य [8]राघवः ॥ जहार समरे प्राणांश्चिच्छेद च शिरोधरान् ॥ २७
[11]ते छिन्नशिरसः पेतुश्छिन्न[12]वर्मशरासनाः ॥ सुपर्ण[13]वातविक्षिप्ता जगत्यां पादपा यथा ॥ २८ ॥
अवशिष्टाश्च ये तत्र वि[14]षण्णाश्च निशाचराः ॥ खरमे[15]वाभ्यधावन्त शरणार्थं [16]शरार्दिताः ॥ २९ ॥
तान्[17]सर्वान्पुनरादाय समाश्वास्य च दूषणः ॥ [18]अभ्यधावत काकुत्स्थं [19]क्रुद्धो रुद्रमिवान्तकः ॥ ३० ॥
निवृत्तास्तु पुनः सर्वे दूषणाश्र[20]यनिर्भयाः ॥ राममेवाभ्यधावन्त सालतालशिलायुधाः ॥ ३१ ॥
शूलमुद्गरहस्ताश्च [21]चापहस्ता महाबलाः ॥ सृजन्तः शरवर्षाणि शस्त्रवर्षाणि संयुगे ॥
द्रुमवर्षाणि मुञ्चन्तः शिलावर्षाणि राक्षसाः ॥ ३२ ॥
तद्बभूवाद्भुतं युद्धं तुमुलं रोमहर्षणम् ॥ [22]रामस्य च महाघोरं पुनस्तेषां च रक्षसाम् ॥ ३३ ॥
ते समन्तादभिक्रुद्धा राघवं [23]पुनरभ्ययुः ॥ ३४ ॥

सनिषादान् । सादिनः अश्वारोहान् ॥ २२ ॥ सदनमेव सादनं स्वार्थे अण् ॥ २३ ॥ नालीकाः नालमात्रशराः । नाराचाः आयसशराः । विकर्णिनः कर्णशराः । भीममिति क्रियाविशेषणं ॥ २४ ॥ रामेण कर्त्रा बाणैः अर्दितं पीडितं । तत्सैन्यं सुखं दुःखनिवृत्तिं । अग्निनार्दितं शुष्कं वनमिव न लेभे ॥ २५ ॥ परमायुधानिति शूलादिविशेषणं ॥ २६ ॥ आवार्य निवार्य शिरोधरानिति पुल्लिङ्गत्वमार्षं । शिरोधरांश्चिच्छेद प्राणाञ्जहारेति क्रमः ॥ २७ ॥ सुपर्णो गरुडः तस्य वातेन पक्षानिलेन विक्षिप्ताः उन्मूलिताः । जगत्यां भुवि ॥ २८ ॥ तत्र सैन्येषु । अवशिष्टाः हतावशिष्टाः । विषण्णाः दुःखिताः । शरणार्थं रक्षणार्थमिति यावत् ॥ २९ ॥ आदाय खरसमीपगमनान्निवर्त्य । अन्तकः रुद्रपराजितो यमः ॥ ३० ॥ निवृत्ताः युद्धान्निवृत्ताः । दूषणरूपाश्रयेण निर्भयाः सन्तः अभ्यधावन्त अभिमुखमाजग्मुः । प्रायशो नष्टायुधत्वात्सालतालेत्याद्युक्तं ॥ ३१ ॥ शस्त्रवर्षाणि शरभिन्नायुधवर्षाणीत्यर्थः । सृजन्त इति आसन्निति शेषः ॥ ३२ ॥ रामस्य रक्षसां च तुमुलं संकुलं । महाघोरं अत एव रोमहर्षणं भयातिरेकेण रोमाञ्चकं । अत एवाद्भुतं तद्युद्धं पुनरपि बभूव ॥ ३३॥ त इत्यर्धमेकं

ववदारणरूपौ ॥ २२ ॥ **शि०** यमसादनं ईनांसर्वसंपत्तीनांअमःनित्यंप्राप्तिर्यस्मिन् तदेवसादनंगृहंयस्मिंस्तंनित्यलोकं ॥ २३ ॥ **ति०** नालीकाः मुखमात्रायस्संयुक्ताः । नाराचाः सर्वतआयसाः । विकर्णिनः अग्राङ्कुशाः उद्धारेप्राणहराः ॥ २४ ॥ **स०** शूलान् "शूलोस्त्री रोगआयुधे" इत्यमरव्याख्या ॥ २६ ॥ **कतक०** सुपर्णवातेन गरुडपक्षवातेन अमृतहरणयु[illegible] विक्षिप्ताः भग्नाः । पादपाः नन्दनस्थाःकल्पवृक्षादयोयथा तद्वत् । समग्रालङ्कारयुतत्वाद्रक्षस्तनूनांकल्पवृक्षादिसाम्यं ॥ २८ ॥

[पा०] १ ङ. झ. ञ. ट. अनयत्. २ ङ.—ट. चक्रुश्छिद्यमानाः. ३ ङ. झ. ट. विविधैर्बाणैः. ४ ङ.—ट. नरामे[illegible] ५ ग. भीमबलान्प्रासान्. ६ क. ख. ङ. झ. ट. प्रासाञ्शूलान्परश्वधान्. च. छ. ज. ञ. शूलांश्चैवपरश्वधान्. ७ ङ. झ. [illegible] चिक्षिपुःपरमक्रुद्धारामायरजनीचराः. ८ च. छ. ज. ञ. स्थिला. ९ ङ. झ. ट. तेषां. क. तेषांयुधिमहा. ग. तेषांसुधीर्मह[illegible] १० ङ. झ. ट. वीर्यवान्. ११ घ. तैश्छिन्न. ग. तैर्भीन्न. १२ ङ. झ. ट. चर्मशरासनाः. ग. वर्मशिरोधराः. १३ च[illegible] पक्षविक्षिप्ता. घ. ङ. ट. वातनिक्षिप्ता. क. ख. पादविक्षिप्ता. १४ ङ. झ. विपण्णास्ते. १५ ग. ङ. मेवाभिधावन्तः. १६ ङ[illegible] झ. शराहताः. १७ ङ.—ट. सर्वान्धनुरादाय. १८ ङ. झ. ञ. ट. अभ्यधावत्सुसंक्रुद्धःक्रुद्धंक्रुद्धइवान्तकः. १९ ग. रुद्रंक्रु[illegible] इवान्तकः. क. ख. क्रुद्धंरुद्रमिवान्तकः. २० च. छ. ज. संश्रयाः. ग. दुर्जयाः. ञ. संश्रिताः. २१ क. ङ.—ट. पाशहस्त[illegible] २२ क. ग. ङ.—ट. रामस्यास्य. २३ ङ. झ. ट. पुनरर्दयन्.

तैश्च[1] सर्वा दिशो दृष्ट्वा प्रदिशश्च [2]समावृताः ॥ राक्षसैरुद्यतप्रासैः शरवर्षा[3]भिवर्षिभिः ॥ ३५ ॥
स कृत्वा भैरवं नादमस्त्रं परमभास्वरम् ॥ [4]संयोजयत गान्धर्वं राक्षसेषु महाबलः ॥ ३६ ॥
ततः शरसहस्राणि निर्ययुश्चापमण्डलात् ॥ सर्वा दश दिशो बाणैरावार्यन्त[5] समागतैः ॥ ३७ ॥
नाददानं शरान्घोरान्[6] मुञ्चन्तं शिलीमुखान्[7] ॥ [8]विकर्षमाणं पश्यन्ति राक्षसास्ते शरार्दिताः ॥३८॥
[शरा रामेण तूत्सृष्टा रुक्मपुङ्खाः पतत्रिणः ॥ सर्पाः पञ्चानना भूत्वा भक्षयन्ति स्म राक्षसान्]॥३९॥
शरान्धकारमाकाशमावृणोत्सदिवाकरम् ॥ बभूवावस्थितो रामः प्रवमन्निव[10] ताञ्शरान् ॥ ४० ॥
युगपत्पतमानैश्च [11]युगपच्च हतैर्भृशम् ॥ [12]युगपत्पतितैश्चैव [13]विकीर्णा वसुधाभवत् ॥ ४१ ॥
निहताः पतिताः क्षीणाश्छिन्ना भिन्ना[14] विदारिताः ॥तत्रतत्र स्म दृश्यन्ते राक्षसास्ते सहस्रशः ॥४२॥
सोष्णीषैरुत्तमाङ्गैश्च साङ्गदैर्बाहुभिस्[15]तथा ॥ ऊरुभिर्जानुभि[16]श्छिन्नैर्नानारूप[17]विभूषणैः ॥ ४३ ॥

वाक्यं । अभ्ययुः आवव्रुः ॥३४॥ इदमनुवदन्नाह—तैश्चेत्यादि श्लोकद्वयमेकं वाक्यं । महाबलः स रामः दिशः प्रदिशश्च तैरावृता दृष्ट्वा भैरवं भयंकरं नादं कृत्वा राक्षसेषु राक्षसनिमित्तं । गान्धर्वमस्त्रं धनुषि संयोजयत समयोजयत् । शरवर्षाभिवर्षिभिः शरवर्षकारिभिरित्यर्थः ॥ ३५—३६ ॥ चापमण्डलात् संहितगान्धर्वास्त्रात् । आकर्षणातिशयेन मण्डलीकृताच्चापान्निर्ययुः । समागतैस्तैर्बाणैर्दश दिशः सर्वाः अन्यूनाः अवार्यन्त ॥ ३७ ॥ राक्षसा रामस्य शरादानकर्षणमोचनानि नापश्यन् किंतु स्वहिंसनमेवापश्यन्निति क्रियाप्रधानो निर्देशः । यद्यपि गान्धर्वास्त्रप्रयोगे विचित्रबाणनिर्गमोस्ति तदस्मिञ्श्लोके नोच्यते । किंतु तदनन्तरभाविकेवलशरमोक्ष इति ज्ञेयं ॥ ३८—३९ ॥ अन्धकारमिति क्लीबत्वमार्षं । प्रवमन् उद्गिरन् ॥ ४० ॥ युगपच्छरनिर्गमः समुत्प्रेक्ष्यते—युगपदिति । पतमानैः पतद्भिः । एककाले शरहतैः एककाले भूमौ पतद्भिः एककाले पतितैश्च राक्षसैः । वसुधा विकीर्णा व्याप्ताऽभवदिति युगपच्छरनिर्गमनकार्योक्तिः ॥ ४१ ॥ अथ हिंसावैचित्र्यमाह—निहता इति । निहताः केवलं प्रहताः । पतिताः अशनिपात इव भयेन भूमौ पतिताः । क्षीणाः कण्ठगतप्राणाः । छिन्नाः द्विधाकृताः । भिन्नाः खण्डितावयवाः । विदारिताः नृसिंहेन हिरण्यवदानाभिकण्ठमुद्भिन्नशरीराः । तत्र तत्रेत्यनेन कश्चिद्भिन्नः कश्चिद्विदारितः पुनः कश्चिद्भिन्न इत्येवं विचित्रशववत्त्वमुक्तं ॥ ४२ ॥ चित्रवधं दर्शयति—सोष्णीषैरित्यादिना । सोष्णीषैः शिरोवेष्टनवद्भिः । उत्तमाङ्गैः केवलशिरोभिः । नानारूपविभूषणैरित्यूरुजानूनां विशेषणं । सार्धोरुकैरूरुभिः सकटकैर्जानुभिश्चेत्यर्थः। अनेकशो भिन्नैरिति हयादित्रयविशेषणं । विच्छिन्नैरिति चामरादिसर्वविशेषणं । विचित्रैरिति शूलादिविशेषणं । नानाविधैरिति चामरादिविशेषणं । पूर्वोक्तैरेतैर्विकीर्णा अतएव भयंकराऽभूदिति योजना । एतावता ग्रन्थेन रामशरप्रभावातिशयो दर्शितः ।

स० सर्वाइत्यनुपचरितत्वंद्योतयति । **शि०** अत्र दशशब्दोपादानेनैव सर्वदिशांग्रहणेसिद्धे पुनस्सर्वशब्दोपादानमवान्तरदेशव्याप्तिपरिग्रहाय ॥३७॥ **शि०** प्रक्षिपन्निवबभूव प्रक्षिपन्निवेत्यनेनाभिप्रायविज्ञानमात्रेण स्वतश्चलन्तीतिसूचितं । तेन रामबाणानांचेतनत्वं सूचितं । **ति०** प्रक्षिपन्निव भूयोभूयःप्रक्षिपन्निवेत्यर्थः । इवशब्दएवार्थे ॥ ४० ॥ **वि०** विस्तीर्णा विशेषतःकृताच्छादना ॥ ४१ ॥ **ति०** विभूषणैरुपलक्षितैः । राक्षसैरितिशेषः ॥ ४३ ॥ इतिपञ्चविंशस्सर्गः ॥ २५ ॥

[पा०] १ ङ. झ. ट. ततः. २ ङ. झ. ट. राक्षसैस्सर्वतःप्रासैः. ३ क. ग. च. छ. ज. ञ. वर्षाणिवर्षिभिः. ङ. झ. ट. वर्षाभिराप्लुतः. ४ ङ. झ. ट. समयोजयद्गान्धर्वं. ५ च. ट. रापूर्यन्तः. ख. ग. रावार्यन्ते. ६ ख. घोरान्नामुञ्चन्तं. ङ. झ. ट. घोरान्विमुञ्चन्तं. ७ ख. ग. ङ.—ट. शरोत्तमान्. ८ क. न कार्मुकं विकर्षन्तं रामं पश्यन्ति संयुगे. ९ अयं श्लोकः क. पुस्तके दृश्यते. १० ङ. झ. ञ. ट. प्रक्षिपन्निव. च. छ. ज. विसृजन्निशिताञ्शरान्. ११ ग. च. छ. ज. ञ. युगपत्प्रहितैःशरैः. १२ घ. युगपत्प्रेरितैश्चैव. १३ क.—घ. च. छ. ज. विस्तीर्णा. १४ घ. भग्नानिवारिताः. १५ ख. बंहुभिस्तदा. १६ क. ख. घ. ङ. झ. ट. बाहुभिः. १७ क. ट. रूपैर्विभूषणैः.

हयैश्च द्विपमुख्यैश्च रथैर्भिन्नैरनेकशः ॥ [1]चामरैर्व्यजनैश्छत्रैर्ध्वजैर्नानाविधैरपि ॥ ४४ ॥
[2]रामस्य बाणाभिहतैर्विचित्रैः[3] शूलपट्टिशैः ॥ [4]खड्गैः खण्डीकृतैः प्रासैर्विकीर्णैश्च परश्वधैः ॥ ४५ ॥
[5]चूर्णिताभिः शिलाभिश्च [6]शरैश्चित्रैरनेकशः ॥ [7]विच्छिन्नैः समरे भूमिर्विकीर्णा[8]ऽभूद्भयंकरा ॥ ४६ ॥
[[9]तान्दृष्ट्वा निहतान्सर्वे[10] राक्षसा[11]ः परमातुराः ॥ न तत्र [12]चलितुं शक्ता रामं परपुरंजयम् ॥ ४७ ॥
बलावशेषं तु निरस्तमाहवे खराधिकं राक्षसदुर्बलं बलम् ॥
जघान रामः स्थिरधर्मपौरुषो धनुर्बलैरप्रतिवारणैः शरैः ॥ ४८ ॥]

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

षड्विंशः सर्गः ॥ २६ ॥

दूषणेन स्वसेनाक्षयजकोपात्पञ्चसहस्रराक्षसैस्सह रामंप्रत्यभियानम् ॥ १ ॥ रामेण दूषणेतदनुयायिनिसेनापतित्रयेच सेनयासहनिहते खरेणद्वादशसेनाध्यक्षैस्सहतंप्रत्यभियानम् ॥ २ ॥ खरेण स्वसहचराणांद्वादशसेनापतीनामपिरामेणहनने स्वयमेवतंप्रत्यभियानम् ॥ ३ ॥

दूषणस्तु स्वकं सैन्यं हन्यमानं [13]निरीक्ष्य सः ॥ संदिदेश महाबाहुर्भीमवेगा[14]न्दुरासदान् ॥
राक्षसान्पञ्च साहस्रान्समरेष्वनिवर्तिनः ॥ १ ॥
ते शूलैः पट्टिशैः खड्गैः [15]शिलावर्षैर्द्रुमैरपि ॥ शरवर्षै[16]रविच्छिन्नं व[17]वृषुस्तं समन्ततः ॥ २ ॥
[18]सद्रुमाणां शिलानां च वर्षं प्राणहरं महत् ॥ प्रतिजग्राह धर्मात्मा राघवस्तीक्ष्णसायकैः ॥ ३ ॥
[19]प्रतिगृह्य च तद्वर्षं निमीलित इवर्षभः ॥ रामः क्रोधं परं [20]भेजे वधार्थं सर्वरक्षसाम् ॥ ४ ॥
ततः क्रोधसमाविष्टः प्रदीप्त इव तेजसा ॥ शरै[21]रवाकिरत्सैन्यं सर्वतः सहदूषणम् ॥ ५ ॥

अस्मिन्सर्गे पञ्चचत्वारिंशच्छ्लोकाः ॥ ४३—४८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चविंशः सर्गः ॥ २५ ॥

अथ दूषणप्रमुखसर्वसैन्यविनाशः षड्विंशे । दूषणस्त्वित्याद्यर्धत्रयमेकं वाक्यं । निरीक्ष्य चेति खिन्नश्चेत्यर्थः । भीमवेगान् भयंकरधावनान् । अतएव दुरासदान् । पञ्चसहस्रानित्यनेन पञ्चसाहस्री पूर्वं हतेति व्यज्यते ॥ १ ॥ तं रामं ॥ २ ॥ प्राणहरं अन्येषामिति शेषः । प्रतिजग्राह प्रतिरुरोध । धर्मात्मेत्यनेन कूटयोधित्वव्युदासः ॥ ३ ॥ निमीलितइवर्षभ इत्यनेन शरवर्षेपि निर्व्यथत्वमनायासत्वं च द्योत्यते ॥ ४ ॥ क्रोधसमाविष्ट इति राम इति शेषः। प्रदीप्त इव तेजसेति तेजोयुक्तत्वेन प्रदीप्त इव स्थित

स० पञ्चसाहस्रान् " शतमानविंशतिक—" इत्यण् । सहस्राणीतिवक्तव्येयत्साहस्रानितिकथनं तेन अहस्रैःअमूर्खैस्सहितास्साहस्रास्तान् कुशलपुरुषसहितानितियावत् । " हस्रोमूर्खेविदूषके " इतिसंसारावर्तः ॥ १ ॥ **ति०** निमीलितः वर्षधारयानि-

[पा०] १ क. ख. घ. झ. ट. चामरव्यजनैः. २ क. ग. ङ. झ. ञ. ट. रामेण. ३ ख. ग. ङ.—ट. विच्छिन्नैः. ४ खड्गैः खण्डीकृतैः. चूर्णिताभिःशिलाभिश्च. इत्यर्धद्वयं झ. ञ. ट. पाठेषु न दृश्यते. ५ ख. चूर्णीकृतैः. ६ च. शरैश्छिन्नैः. घ. ज. शरैश्छत्रैः. ७ च. छ. ज. विच्छिन्नैस्तोमरैर्भूमिः. ञ. विचित्रैस्समरे. क. विभिन्नैस्समरे. ८ क.—ट. विस्तीर्णाभूत्. ९ इदं श्लोकद्वयं क. ख. ङ.—ज. ञ. पुस्तकेषुदृश्यते. झ. ट. पाठयोस्तु तान्दृष्ट्वेतिश्लोकमात्रं दृश्यते. १० क. ख. च. छ. ज. ञ. न्सङ्ख्ये. ११ च. छ. ज. राक्षसान्परमातुरान्. १२ क. ख. च. छ. ज. सहितुं. १३ ङ.—ट. विलोक्यच. ख. निरीक्ष्यतत्. क. ग. घ. निरीक्ष्यच. १४ घ. वेगान्निशाचरान्. ख. वेगान्महाबलान्. १५ ख. ग. वर्षद्रुमैरपि. १६ घ. रविच्छिन्नैः. १७ ख. ववृषुश्च. १८ ङ.—ट. तद्द्रुमाणां. १९ क. प्रतिगृह्यतु. २० ग. ङ. च. छ. झ. ञ. ट. लेभे. २१ क. ख. ग. ङ. झ. ट. रभ्यकिरत्. च. छ. ज. ञ. रभ्यहनत्तूर्णं.

ततः सेनापतिः क्रुद्धो दूषणः शत्रुदूषणः ॥ शरैरशनि[1]कल्पैस्तं राघवं [2]समवाकिरत् ॥ ६ ॥
ततो रामः सुसंक्रुद्धः क्षुरेणास्य महद्धनुः ॥ चिच्छेद समरे वीरश्चतुर्भिश्चतुरो हयान् ॥ ७ ॥
हत्वा चाश्वाञ्शरैस्तीक्ष्णैरर्धचन्द्रेण सारथेः ॥ शिरो [3]जहार तद्रक्षस्त्रिभिर्विव्याध वक्षसि ॥ ८ ॥
स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः ॥ जग्राह गिरि[4]शृङ्गाभं परिघं रोमहर्षणम् ॥ ९ ॥
वेष्टितं काञ्चनैः पट्टैर्देव[5]सैन्यप्रमर्दनम् ॥ आयसैः शङ्कुभिस्तीक्ष्णैः कीर्णं परवसोक्षितम् ॥ १० ॥
वज्राशनिसमस्पर्शं [6]परगोपुरदारणम् ॥ तं महोरगसंकाशं प्रगृह्य परिघं रणे ॥
[7]दूषणोऽभ्यद्रवद्रामं क्रूरकर्मा निशाचरः ॥ ११ ॥
तस्याभिपतमानस्य दूषणस्य स राघवः ॥ द्वाभ्यां शराभ्यां चिच्छेद सहस्ताभरणौ भुजौ ॥ १२ ॥
भ्रष्टस्तस्य महाकायः पपात रणमूर्धनि ॥ परिघश्छिन्नहस्तस्य शक्रध्वज [8]इवाग्रतः ॥ १३ ॥
[9]स कराभ्यां विकीर्णाभ्यां पपात भुवि दूषणः॥ विषाणाभ्यां विशीर्णाभ्यां मनस्वीव महागजः १४
[10]तं दृष्ट्वा पतितं भूमौ दूषणं निहतं रणे ॥ साधु साध्विति काकुत्स्थं सर्वभूतान्यपूजयन् ॥ १५ ॥
एतस्मिन्नन्तरे क्रुद्धास्त्रयः सेनाग्रयायिनः ॥ [11]संहत्याभ्यद्रवन्रामं मृत्युपाशावपाशिताः ॥ १६ ॥
महाकपालः स्थूलाक्षः प्रमाथी च महाबलः ॥ महाकपालो विपुलं शूलमुद्यम्य राक्षसः ॥
स्थूलाक्षः पट्टिशं गृह्य प्रमाथी च परश्वधम् ॥ १७ ॥
दृष्ट्वैवापततस्[12]तूर्णं राघवः सायकैः शितैः ॥ तीक्ष्णाग्रैः प्रतिजग्राह संप्राप्तानतिथीनिव ॥ १८ ॥
महाकपालस्य शिरश्चिच्छेद [13]परमेषुभिः ॥ असंख्येयैस्तु बाणौघैः प्रममाथ प्रमाथिनम् ॥ १९ ॥
[14]स पपात [15]हतो भूमौ विटपीव महाद्रुमः ॥ स्थूलाक्षस्याक्षिणी [16]तीक्ष्णैः पूरयामास सायकैः ॥ २० ॥
दूषणस्यानुगान्पञ्चसा[17]हस्रान्कुपितः क्षणात् ॥ [18]बाणौघैः पञ्च साहस्रैरनयद्यमसादनम् ॥ २१ ॥

इत्यर्थः । सहदूषणं दूषणसहितं ॥ ५ ॥ दूषणः खरस्य सेनापतिः ॥६॥ चतुर्भिरिति शरैरित्यनुषङ्गः ॥ ७ ॥ तद्रक्षः दूषणं। वक्षसि विव्याधेति संबन्धः ॥८॥ परितो हन्यतेनेनेति परिघः तं। पट्टैः बन्धनैः। परवसोक्षितं शत्रुमेदःसिक्तं "ह्न्मेदस्तु वपावसा" इत्यमरः । वज्राशनिसमस्पर्शं वज्रं वज्राख्यरत्नं। अशनिः वज्रायुधं । तदुभयसदृशकाठिन्यं । परगोपुरदारणं परेषां शत्रूणां यत् गोपुरं पुरद्वारं तस्य दारणं भेदकं। "पुरद्वारं तु गोपुरं" इत्यमरः ॥ ९—११ ॥ अभिपतमानस्य अभिपततः । सहस्ताभरणावित्यनेन शौर्यविरुदवत्त्वं लक्ष्यते ॥ १२ ॥ रणमूर्धनि छिन्नहस्तस्य तस्य दूषणस्य भ्रष्टः हस्ताच्च्युतः। महाकायः महाप्रमाणः । परिघः शक्रध्वज इवाग्रतः पपातेत्यन्वयः ॥ १३ ॥ कराभ्यां सह पपातेत्यन्वयः । मनस्वी धीरः ॥ १४ ॥ अपूजयन् अस्तुवन् ॥ १५—१६ ॥ त्रीनेवाह—महाकपाल इति । कः किमायुधंगृहीत्वाऽभ्यद्रवदित्यत्राह—महाकपाल इति ॥ १७ ॥ शितैः शाणोल्लीढैः। प्रतिजग्राह तेषु बाणानर्पयामासेत्यर्थः । यथा गृहं प्राप्तानतिथीनुपचारैः प्रतिगृह्णाति तथेत्यर्थः ॥ १८ ॥ प्रतिजग्राहेत्युक्तं विवृणोति—महाकपालस्येत्यादिना । प्रममाथ चूर्णीचकारेत्यर्थः ॥ १९ ॥ चूर्णशरीरत्वे दृष्टान्ततयोक्तं—

मीलिताक्षः ॥ ४॥ ति० क्षुरेण क्षुरधारेण शरेण ॥७॥ ति० पुरगोपुरदारणं शत्रूणांगावइन्द्रियाणितेषांपुरंशरीरंतस्यदारणंविदारकं । ती० वज्राशनिसमस्पर्शं व्रजतियात्येव न प्रतिहन्यतइतिवज्रं । अश्नाति शत्रुजीवितमित्यशनिः । तदुभयसमस्पर्शं ॥ ११ ॥ शि० असंख्येयैः अतिद्रुतगमनवत्त्वेनसंख्यातुमशक्यैः ॥ १९ ॥ ति० पञ्चसाहस्रान्पञ्चसाहस्रैरित्यनेन भगवतोऽमोघेषुत्वंसूचितं

[पा०] १ ख. कल्पैश्च. २ ङ. झ. ट. समवारयत्. ३ क. जघान. ४ ख. संकाशं. ५ क.—घ. च.—ट. सैन्याभिमर्दनं. ६ ग. च. छ. ज. पुरगोपुर. ७ ख. ग. ङ.—ट. दूषणोऽभ्यपतत्. क. दूषणोह्यपतत्. ८ घ. इवोच्छ्रितः. ९ ङ. झ. ट. कराभ्यांच. १० क.—ट. दृष्ट्वा तं. ११ क. संगम्याभ्यद्रवन्. १२ क.—ट. स्तांस्तु. १३ ङ.—ट. रघुनन्दनः. क. परमेषुणा. १४ एतच्छ्लोकार्धयोः पौर्वापर्यं क.—ट. पुस्तकेषु दृश्यते. १५ ख. ग. महान्भूमौ. १६ ङ. झ. ट. स्थूले. १७ ख. ग. च. छ. ज. ञ. सहस्रान्. १८ क. ङ. झ. ञ. हलातुपञ्च. च. छ. ज. ट. हलातान्पञ्चसाहस्रान्.

दूषणं निहतं [1]दृष्ट्वा तस्य चैव [2]पदानुगान् ॥ व्यादिदेश खरः क्रुद्धः सेनाध्यक्षान्महाबलान् ॥२२॥
अयं विनिहतः [3]संख्ये दूषणः सपदानुगः ॥ महत्या सेनया सार्धं युध्वा रामं कुमानुषम् ॥ २३ ॥
शस्त्रैर्नानाविधाकारैर्हनध्वं सर्वराक्षसाः ॥ एवमुक्त्वा खरः क्रुद्धो राममेवाभिदुद्रुवे ॥ २४ ॥
श्येनगामी पृथुग्रीवो यज्ञशत्रुर्विहङ्गमः ॥ दुर्जयः करवीराक्षः परुषः कालकार्मुकः ॥ २५ ॥
[4]मेघमाली महामाली सर्पास्यो रुधिराशनः ॥ द्वादशैते महावीर्या बलाध्यक्षाः ससैनिकाः ॥
[5]राममेवाभ्यवर्तन्त विसृजन्तः शरोत्तमान् ॥ २६ ॥
ततः पावकसंकाशैर्हेमवज्रविभूषितैः ॥ जघान [6]शेषं तेजस्वी तस्य सैन्यस्य सायकैः ॥ २७ ॥
ते रुक्मपुङ्खा विशिखाः सधूमा इव पावकाः ॥ निजघ्नुस्तानि रक्षांसि [7]वज्रा इव [8]महाद्रुमान् ॥२८॥
रक्षसां तु शतं रामः [9]शतेनैकेन कर्णिना ॥ [10]सहस्रं च सहस्रेण जघान रणमूर्धनि ॥ २९ ॥
तैर्भिन्नवर्माभरणाश्छिन्नभिन्नशरासनाः ॥ निपेतुः शोणितादिग्धा धरण्यां रजनीचराः ॥ ३० ॥
तैर्मुक्तकेशैः समरे पतितैः शोणितोक्षितैः ॥ [11]आस्तीर्णा वसुधा [12]कृत्स्ना महावेदिः कुशैरिव ॥ ३१ ॥
[13]क्षणेन तु महाघोरं वनं निहतराक्षसम् ॥ बभूव निरयप्रख्यं मांसशोणितकर्दमम् ॥ ३२ ॥
चतुर्दश सहस्राणि रक्षसां [14]भीमकर्मणाम् ॥ हतान्येकेन रामेण मानुषेण पदातिना ॥ ३३ ॥
तस्य सैन्यस्य सर्वस्य खरः शेषो महारथः ॥ राक्षसस्त्रिशिराश्चैव रामश्च रिपुसूदनः ॥ ३४ ॥
शेषा हता [15]महासत्त्वा राक्षसा [16]रणमूर्धनि ॥ घोरा दुर्विषहाः सर्वे लक्ष्मणस्याग्रजेन ते ॥ ३५ ॥
ततस्तु तद्भीमबलं महाहवे समीक्ष्य [17]रामेण हतं बलीयसा ॥
रथेन रामं महता [18]खरस्तदा समाससादेन्द्र इवोद्यताशनिः ॥ ३६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे षड्विंशः सर्गः ॥ २६ ॥

विटपीति ॥ २०—२३ ॥ हनध्वं घ्नत ॥ २४ ॥ सेनाध्यक्षानेवाह—श्येनगामीत्यादिना ॥२५—२६॥ वज्रं वज्रमणिः । तेजस्वी राम इति शेषः ॥ २७ ॥ सधूमा इत्यनेन दहनोन्मुखत्वं व्यज्यत इत्यङ्गारावस्थाव्यावृत्तिः । वज्रा इवेति " वज्रमस्त्रियां " इत्युभयलिङ्गो वज्रशब्दः ॥ २८ ॥ कर्णिना कर्णाकारशरीरेण ॥ २९ ॥ छिन्नं खण्डितं । भिन्नं विदारितं । आदिग्धाः आलिप्ताः ॥ ३० ॥ रणाग्रपतितत्वातिशयात्कुशसाम्योक्तिः ॥ ३१ ॥ निरयप्रख्यं नरकतुल्यं । मांसशोणितैः कृतः कर्दमः पङ्को यस्य तत्तथा ॥ ३२ ॥ मानुषेण ऋजुना । पदातिना वाहनरहितेनेत्यद्भुतोक्तिः ॥ ३३ ॥ सैन्यस्य युद्धप्रवृत्तस्य । अतो रामस्यापि तत्रान्तर्भावः । खरादित्रयं शेषः अवशिष्टांश इत्यर्थः । शेषाः सर्वे राक्षसा हता इत्यन्वयः । महासत्त्वा इत्यादिविशेषणैर्महारथा एव हताः क्षुद्राः केचन भीरवो न हता इतिगम्यते । अत एवोत्तरसर्गे हतशेषा इति वक्ष्यति । लक्ष्मणस्याग्रजेनेति रामस्य विष्णवधांशभाक्त्वेनाधिकबलत्वोक्तिः ॥ ३४—३५ ॥ भीमबलं भीमसैन्यं । उद्यताशनिः उद्यतवज्रः ॥३६॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षड्विंशः सर्गः ॥ २६ ॥

शि० पञ्चसाहस्रान्दूषणस्यानुगान्हत्वा तान्पञ्चसाहस्रान् यमसादनं सकलसंपत्तिविशिष्टलोकविशेषं अनयत् । **वि०** पञ्चसाहस्रैः बाणैरितिशेषः ॥ २१ ॥ **स०** कुमानुषं कौ भूमौमनुष्याकारंप्राप्तं ॥ २३ ॥ **ति०** शतं एकेन शतेन तत्संख्याकेन कर्णिना बाणविशेषेण । एवंसहस्रंसहस्रेण ॥ २९ ॥ **शि०** मुक्ताः ग्रन्थिरहिताःकेशाःयेषांतैः ॥ ३१ ॥ इतिषड्विंशस्सर्गः ॥२६॥

[**पा०**] १ ङ. झ. ट. श्रुत्वा. २ ग. वशानुगान्. ३ च. छ. ज. ञ. शेते. ४ ङ.—ट. हेममाली. ५ क. ङ.—ट. वाभ्यधावन्त. ६ ख. शेषांस्तेजस्वी. ७ क. वज्राणीव. ८ च. छ. ज. ञ. महासुरान्. ९ च. छ. ज. शरेणैकेन. १० क.—ट. सहस्रंतु. ११ ङ. झ. ट. विस्तीर्णा. १२ क. तत्र. १३ ङ. च. छ. झ. ञ. ट. तत्क्षणेतु. १४ क. क्रूरकर्मणां. १५ ङ.—ट. महावीर्याः. १६ क. रणनिर्भयाः. ख. ग. रणदुर्जयाः. १७ ङ. झ. ट. धर्मेण. १८ क. ङ.—ट. स्ततः.

सप्तविंशः सर्गः ॥ २७ ॥

त्रिशिरसा रामाभियायिनः खरस्यरामवधप्रतिज्ञानेननिवर्तनपूर्वकं तंप्रत्यभियानम् ॥ १ ॥ रामेणत्रिशिरसोपिवधे खरेणरामंप्रति स्वयमेवाभियानम् ॥ २ ॥

खरं तु रामाभिमुखं प्रयान्तं [1]वाहिनीपतिः ॥ राक्षसस्त्रिशिरा नाम सं[2]निपत्येदमब्रवीत् ॥ १ ॥
मां नियोजय विक्रा[3]न्त [4]संनिवर्तस्व साहसात् ॥ पश्य रामं महाबाहुं संयुगे विनिपातितम् ॥ २ ॥
प्रतिजानामि ते [5]सत्यमायुधं [6]चाहमालभे ॥ यथा रामं वधिष्यामि [7]वधार्हं सर्वरक्षसाम् ॥ ३ ॥
अहं वाऽस्य रणे मृत्युरेष वा समरे मम ॥ विनिवृत्य रणोत्साहान्मुहूर्तं प्राश्निको भव ॥ ४ ॥
[8]प्रहृष्टे वा हते रामे जनस्थानं प्रयास्यसि ॥ मयि वा निहते रामं संयु[9]गायोपयास्यसि ॥ ५ ॥
खरस्त्रिशिरसा तेन मृत्युलोभात्प्रसादितः ॥ गच्छ [10]युध्येत्यनुज्ञातो राघवाभिमुखो ययौ ॥ ६ ॥
[11]त्रिशिराश्च रथेनैव वाजियुक्तेन भास्वता ॥ अभ्यद्रवद्रणे रामं त्रिशृङ्ग इव पर्वतः ॥ ७ ॥
शरधारासमूहान्स महामेघ इवोत्सृजन् ॥ [12]व्यसृजत्सदृशं नादं [13]जलार्द्रस्य तु दुन्दुभेः ॥ ८ ॥
आगच्छन्तं त्रिशिरसं राक्षसं प्रेक्ष्य राघवः ॥ धनुषा प्रतिजग्राह विधून्वन्सायकाञ्शितान् ॥ ९ ॥
स संप्रहारस्तुमुलो रामत्रिशि[14]रसोर्महान् ॥ [15]बभूवातीव बलिनोः सिंहकुञ्जरयोरिव ॥ १० ॥

त्रिशिरश्शिरसां छेददृष्टान्तेन स्वसेविनाम् । दुःखत्रयनिहन्तारं लक्ष्मणाग्रजमाश्रये ॥ वाहिनीपतिः सेनापतिः । संनिपत्य समीपमागत्येत्यर्थः ॥ १ ॥ साहसात् युद्धाभिमुख्यलक्षणात् । विनिपातितमिति मयेतिशेषः ॥ २ ॥ आलभे स्पृशामि । प्रतिज्ञाप्रकारमाह—यथेति । सर्वरक्षसां सर्वरक्षोभिः ॥ ३ ॥ मृत्युः मारयिता । प्राश्निकः जयापजयनिर्णायकः ॥४॥ प्रहृष्टे गर्विष्ठे । संयुगाय युद्धं कर्तुं । "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" इति चतुर्थी ॥५॥ मृत्युलोभात् मृत्युना कृतो लोभो युद्धलोभस्तस्मात् । प्रसादितः निवर्तित इति यावत् । युध्य युद्धं कुरु । अनुज्ञातः खरेणेति शेषः । त्रिशिरा इति सिद्धं ॥ ६ ॥ त्रिशिराश्चेति चकारो न समुच्चयार्थः ॥ ७ ॥ शरा एव धाराः आसाराः तासां समूहान् । दुन्दुभिशब्दः पुंलिङ्गः । "भेरी स्त्री दुन्दुभिः पुमान्" इत्युक्तेः । दुन्दुभेः दुन्दुभिनादस्य । जलार्द्रस्येत्यनेनास्य हीनस्वरत्वमुक्तं ॥ ८ ॥ धनुषा सायकान् विधून्वन् कम्पयन् मुञ्चन्निति यावत् ॥ ९ ॥ संप्र-

---

ती० सप्तविंशेसर्गेमांनियोजयेत्यादिसार्धश्लोकस्यचतुष्टयस्यवास्तवार्थस्तु—हेखर संयुगेरामंच तेनविनिपातितंसैन्यंचेतिशेषः । पश्य । अतस्त्वंसाहसान्निवर्तस्व । मांनियोजय । तर्हित्वं तंहनिष्यसिकिं तत्राह—**प्रतिजानामीत्यादि** । सर्वरक्षसांवधार्हं सर्वरक्षसांहन्तारमित्यर्थः । रामं यथा यथावत् । अहंप्रतिजानामि सम्यग्जानामीत्यर्थः । अतस्तं वधिष्यामीति सर्वमायुधमालभे प्रहिष्यामिकेवलमित्यर्थः । हन्तुमशक्यश्चेदनेनाकिं तत्राह—**अहमिति** । अस्यरामस्य अहं वा रणेमृत्युः किंतु एषवा एषरामएव समरेममृत्युः । अतस्त्वं महोत्साहाद्विनिवर्तस्व । मुहूर्तंप्राश्निकोभवेतिसंबन्धः । प्रहृष्टोवाहतइत्यत्र अहतइतिच्छेदः । रामे अहतेसति मे मयिच निहतेसति प्रहृष्टस्त्वं रामंप्रति संयुगायोपयास्यसि अथवा जनस्थानंवा प्रयास्यसीतिसंबन्धः । प्रसादितः प्रार्थितः ॥ २—६ ॥ **स०** सर्वरक्षसांवधार्हं सर्वराक्षसकर्मकवधयोग्यं वधकर्तारमितियावत् ॥ ३ ॥ **ति०** अहंवासमरेइतिपाठे मृत्युरित्यस्यास्येतिशेषः ॥ ४ ॥ **ति०** मृत्युलोभात् मृत्युकृतेयुद्धलोभात् । मृत्युसमये रक्षःप्रकृतिविपर्ययात्तस्यभगवत्तत्वंज्ञात्वा तद्धस्तमृत्युलोभादित्यर्थश्च ॥६॥ **ति०** जलार्द्रस्येति । अनेन नादवैपरीत्येनमृत्युसांनिध्यंसूचितं । **स०** मेघपक्षे शरशब्दउदक-

[**पा०**] १ च. छ. ज. ञ. वाहिनीपतिं. २ क. ख. संनिवर्त्येदं. ३ च. छ. ज. ञ. संग्रामे. घ. ङ. झ. विक्रान्तं. ४ ङ. झ. ट. त्वंनिवर्तस्व. ५ क. सर्वं. ६ क. च. समालभे. ७ ख. हितार्थं. ८ घ. प्रहृष्टोनिहते. क. ख. ग. ङ.—ट. प्रहृष्टोवाहते. ९ ङ.—ट. संयुगायप्रयास्यसि. १० क. ग. युद्धेऽभ्यनुज्ञातः. ११ घ. ङ. झ. ट. त्रिशिरास्तु. १२ च. छ. ज. ञ. व्यसृजद्भैरवं. १३ क.—ट. जलार्द्रस्येव. १४ ङ. झ. ट. त्रिशिरसोस्तदा. १५ ङ.—ट. संबभूवाति.

ततस्त्रिशिरसा बाणैर्ललाटे ताडितस्त्रिभिः ॥ अमर्षी कुपितो रामः [1]संरब्धमिदमब्रवीत् ॥ ११ ॥
अहो विक्रमशूरस्य राक्षसस्येदृशं बलम् ॥ पुष्पैरिव [2]शरैर्यस्य ललाटेऽसि परिक्षितः ॥ १२ ॥
ममापि प्रतिगृह्णीष्व शरांश्चापगुणच्युतान् ॥ एवमुक्त्वा [3]तु संरब्धः शरानाशीविषोपमान् ॥
त्रिशिरोवक्षसि क्रुद्धोः [4]निजघान चतुर्दश ॥ १३ ॥
चतुर्भिस्तुरगानस्य शरैः संनतपर्वभिः ॥ न्यपातयत तेजस्वी चतुरस्तस्य वाजिनः ॥ १४ ॥
अष्टभिः सायकैः सूतं [5]रथोपस्थे न्यपातयत् ॥ रामश्चिच्छेद बाणेन ध्वजं चास्य समुच्छ्रितम् ॥१५॥
ततो हतरथात्तस्मादुत्पतन्तं निशाचरम् ॥ [6]बिभेद रामस्तं बाणैर्हृदये सोभवज्जडः ॥ १६ ॥
सायकैश्चाप्रमेयात्मा सामर्षस्तस्य रक्षसः ॥ [7]शिरांस्यपातयद्रामो वेगवद्भिस्त्रिभिः [8]शितैः ॥ १७ ॥
[9]स भूमौ रुधिरोद्गारी रामबाणाभिपीडितः ॥ न्यपतत्पतितैः पूर्वं [10]स्वंशिरोभिर्निशाचरः ॥ १८ ॥
[11]हतशेषास्ततो भग्ना राक्षसाः खरसंश्रयाः ॥ द्रवन्ति स्म न तिष्ठन्ति व्याघ्रत्रस्ता मृगा इव ॥१९॥
तान्खरो द्रवतो दृष्ट्वा निवर्त्य [12]रुषितः स्वयम् ॥ राममेवाभिदुद्राव राहुश्चन्द्रमसं यथा ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

हारो युद्धं ॥ १० ॥ संबन्धं सकोपमित्यर्थः । लोके कश्चित्कुपितोपि वचनेन कोपं न प्रकटयति अयं तु प्रकटयतीति भावः ॥ ११ ॥ अहो इत्यादिव्यङ्ग्योक्तिः । विक्रमः पराभिभवनं तत्र शूरस्य समर्थस्येत्यर्थः । ईदृशमित्यस्यैव विवरणं—पुष्पैरिवेत्यर्धं । ललाटे स्वललाटे । ललाटे स्वल्पापि क्षतिर्बाधिका भवति सापि नास्तीति सूचयितुं पुष्पतौल्यं । चापगुणः चापमौर्वी । संरब्धः सन्नेवमुक्त्वा क्रुद्धो निजघानेत्यन्वयः ॥ १२—१३ ॥ सन्नतपर्वभिः ऋजुपर्वभिः । वाजिनः वेगवतः ॥ १४ ॥ रथोपस्थे रथोपरिभागे ॥१५॥ हतरथात् हतहयसारथिकरथात् । हृदये वक्षसि । बिभेदेत्यन्वयः । जडः निश्चेष्टः ॥ १६—१७ ॥ पूर्वं पतितैः शिरोभिः हेतुभिः स्वयं न्यपतत् ॥ १८ ॥ खरसंश्रयाः खरसेवकाः ॥ १९—२० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्तविंशः सर्गः ॥ २७ ॥

वाची ॥ ८ ॥ **शि०** अमर्षी ऋष्यपराधासहनशीलः ॥ ११ ॥ **ती०** अहोइतिसोपहासवचनं । पुष्पैस्स्वल्पापीडाभवति । त्वच्छरैस्तादृशपीडापिनास्तीतिभावः । **स०** परिक्षतः वर्जितक्षतः । “ अपपरीवर्जने ” इतिवचनात् पुष्पैरितिसुलग्नं ॥ १२ ॥ **ति०** जडः आयुधपरिग्रहेइतिशेषः ॥ १६ ॥ **ति०** पूर्वपतितैः शिरोभिरुपलक्षितः पश्चान्न्यपतत् । “ चतुर्दशसहस्राणिममचित्तानुवर्तिनाम्” इतिसेनोद्योगेखरोक्तेः चतुर्दशसहस्राणिहतानि खरत्रिशिरसावेवावशिष्टाविति पूर्वसर्गान्ते उक्तेर्हतशेषान्निवर्त्येत्यत्रत्योक्तिश्चचतुर्दशसहस्रं यूथपाअत्रेतिज्ञायते । हतशेषाइतितु खरीयमूलबलाभिप्रायंबोध्यं । **टी०** ननु खरश्शेषोमहारथः । त्रिशिराश्चैवरामश्चेत्युक्तं कथमिदानींहतशेषाइति । उच्यते । तत्र प्रधानेषुत्रयोऽवशिष्टाइतिमुनेरभिप्रायः ॥ १९ ॥ **स०** निवर्त्य निवर्तयित्वा । रुषितः रुष्टः ॥ २० ॥ इतिसप्तविंशस्सर्गः ॥ २७ ॥

[पा०] १ क. ख. ङ. च. छ. झ. ञ. ट. संरब्धइदं. २ ङ.—ट. शरैर्योहं. ३ ट. सुसंरब्धः. क. ख. तु संक्रुद्धः. ४ ख. घ. निचखान. ५ ञ. रथोपस्थान्न्यपातयत्. ६ ङ.—ट. चिच्छेद. ७ क. ग. ङ.—ट. स्पपातयत्त्रीणि. ८ क.—ट. शरैः. ९ ङ. झ. ट. सधूमशोणितोद्गारी. ख. ग. च. छ. ज. ञ. सभूमौशोणितोद्गारी. १० ख. ङ. ट. समरस्थोनिशाचरः. घ. स्वशिरोभिर्महाबलः. ११ क. शेषास्तु. १२ ङ. झ. ट. रुषितस्त्वरन्.

अष्टाविंशः सर्गः ॥ २८ ॥

खरकृतधनुश्छेदरुष्टेनरामेणागस्त्यदत्तधनुरादानेन शरैः खरस्यविरथीकरणम् ॥ १ ॥ रथसङ्गेगदापरिग्रहेणधरणीतलस्थे खरे विमानस्थैर्देवादिभिः सहर्षश्रीरामाभिष्टवः ॥ २ ॥

निहतं दूषणं दृष्ट्वा रणे त्रिशिरसा सह ॥ खरस्याप्यभवत्रासो दृष्ट्वा रामस्य विक्रमम् ॥ १ ॥
स दृष्ट्वा राक्षसं सैन्यमविषह्यं [1]महाबलः ॥ हतमेकेन रामेण [2]त्रिशिरोदूषणावपि ॥ २ ॥
[3]तद्बलं हतभूयिष्ठं विमनाः प्रेक्ष्य राक्षसः ॥ आससाद खरो रामं नमुचिर्वासवं यथा ॥ ३ ॥
विकृष्य बलवच्चापं नाराचान्रक्तभोजनान् ॥ खरश्चिक्षेप रामाय क्रुद्धानाशीविषानिव ॥ ४ ॥
ज्यां विधून्वन्[4]सुबहुशः शिक्षयाऽस्त्राणि दर्शयन् ॥ [5]चकार समरे मार्गाञ्शरै रथगतः खरः ॥ ५ ॥
स सर्वाश्च दिशो बाणैः प्रदिशश्च महारथः ॥ पूरयामास तं दृष्ट्वा रामोपि सुमहद्धनुः ॥ ६ ॥
स सायकैर्दुर्विषहैः सस्फुलिङ्गैरिवाग्निभिः ॥ [6]नभश्चकाराविवरं पर्जन्य इव वृष्टिभिः ॥ ७ ॥
तद्बभूव शितैर्बाणैः खररामविसर्जितैः ॥ पर्याकाशमनाकाशं सर्वतः शरसंकुलम् ॥ ८ ॥
शरजालावृतः सूर्यो न तदा [7]स प्रकाशते ॥ अन्योन्यवधसंरम्भादुभयोः संप्रयुध्यतोः ॥ ९ ॥
ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः ॥ आजघान [8]खरो रामं तोत्रैरिव महाद्विपम् ॥ १० ॥
तं रथस्थं धनुष्पाणिं राक्षसं पर्यवस्थितम् ॥ ददृशुः सर्वभूतानि पाशहस्तमिवान्तकम् ॥ ११ ॥
हन्तारं [9]सर्वसैन्यस्य पौरुषे पर्यवस्थितम् ॥ परिश्रान्तं महासत्त्वं मेने रामं खरस्तदा ॥ १२ ॥
तं सिंहमिव विक्रान्तं सिंहविक्रान्तगामिनम् ॥ दृष्ट्वा नोद्विजते रामः सिंहः क्षुद्रमृगं यथा ॥ १३ ॥
ततः सूर्यनिकाशेन रथेन महता खरः ॥ आससाद रणे रामं पतङ्ग इव पावकम् ॥ १४ ॥

महामोहसहायस्य दर्पस्याश्रयनिग्रहम् । व्यञ्जं खरोपकरणं हन्तारं राममाश्रये ॥ निहतं दूषणं दृष्ट्वा रामस्य विक्रमं च दृष्ट्वा स्थितस्य खरस्य त्रासोऽभवदिति योजना ॥ १ ॥ रक्षसां संबन्धि राक्षसं त्रिशिरोदूषणौ हतावित्यनुषङ्गः । बलं सैन्यं । हतभूयिष्ठं हतप्रवरराक्षसं । चतुर्दशसहस्रसंख्याकाः प्रधाना हताः अवशिष्टं सैन्यं प्रेक्ष्येत्यर्थः । विमनाः विगतगर्वावस्थं मनो यस्य स तथा ॥ २—३ ॥ बलवत् अत्यन्तं । नाराचान् "प्रक्ष्वेडनास्तु नाराचाः" इत्यमरः । रक्तभोजनानिति रक्तरूषितत्वेन रक्तभोजनत्वव्यपदेशः । आशीविषानिव सर्पानिव स्थितान् ॥ ४ ॥ शिक्षया धनुर्वेदशिक्षापाटवेन । ज्यां विधून्वन् अस्त्राणि दर्शयन् अस्त्रप्रयोगपाटवं दर्शयन्नित्यर्थः । समरे शरैः मार्गान् नानाप्रकारांश्चकार ॥ ५ ॥ स रामोपि तं दृष्ट्वा बाणैः सुमहद्धनुः सर्वा दिशः प्रदिशश्च पूरयामासेत्यन्वयः ॥ ६ ॥ सः रामः । अविवरं नीरन्ध्रं ॥ ७ ॥ पर्याकाशं परितः स्थितमाकाशं । खररामयोश्चतुःपार्श्ववर्त्याकाशमित्यर्थः । सर्वतः सर्वत्र । अनाकाशं अनवकाशं बभूव ॥ ८ ॥ संरम्भात् कोपात् । "संरम्भः संभ्रमे कोपे" इत्यमरः । उभयोः शरजालावृत इत्यन्वयः ॥ ९ ॥ तोत्रैः गजशिक्षणयष्टिभिः ॥ १०—११ ॥ खरः सर्वसैन्यहननपरिश्रान्तमपि रामं पौरुषे पर्यवस्थितं महासत्त्वं मेने । यद्वा उक्तविशेषणं रामं परिश्रान्तं मेने ॥ १२ ॥ नोद्विजते नाचलत् । क्षुद्रमृगं शशं ॥ १३ ॥ पतङ्ग

स० मार्गान् शरसंघातप्रक्षेपणादिप्रकारभेदान् । स० रथगतइत्यनेन रामस्यपदातित्वेप्यस्यरथगतत्वमन्याय्यमितिसूचयति ॥ ५ ॥ स० शरसंकुलं उदकसंकुलमिव ॥ ८ ॥ ति० रामंखरःपरिश्रान्तंमेने । अनेनायंप्रहारावसरइति खरबोधस्सूचितः ।

[पा] १ ख.—च. झ. ट. महाबलं. २ ङ. झ. ञ. ट. दूषणस्त्रिशिराअपि. ३ ख. तत्सैन्यं. ४ क. घ. सबहुशः. ५ क. च.—ट. चचार. ६ क. ग. रामश्चकार. ख. रामश्चकाराविरतं. ७ ख. च. छ. ज. ञ. संप्रकाशते. ८ क.—ट. रणे. ९ क. च. छ. ज. ञ. तस्यसैन्यस्य.

ततोस्य सशरं चापं मुष्टिदेशे महात्मनः ॥ खरश्चिच्छेद रामस्य दर्शयन्[1]पाणिलाघवम् ॥ १५ ॥
स पुनस्त्वपरान्सप्त शरानादाय [2]वर्मणि ॥ [3]निजघान खरः [4]क्रुद्धः शक्राशनि[5]समप्रभान् ॥ १६ ॥
[6]ततस्तत्प्रहतं बाणैः खरमुक्तैः [7]सुपर्वभिः ॥ पपात कवचं भूमौ रामस्यादित्य[8]वर्चसः ॥ १७ ॥
ततः शरसहस्रेण [9]राममप्रतिमौजसम् ॥ [10]अर्दयित्वा महानादं ननाद समरे खरः ॥ १८ ॥
स शरैरर्पितः क्रुद्धः सर्वगात्रेषु राघवः ॥ रराज समरे रामो [11]विधूमोग्निरिव ज्वलन् ॥ १९ ॥
ततो गम्भीरनिर्ह्रादं रामः शत्रुनिबर्हणः ॥ चकारान्ताय स रिपोः सज्यमन्यन्महद्धनुः ॥ २० ॥
सुमहद्वैष्णवं यत्तदतिसृष्टं महर्षिणा ॥ वरं तद्धनुरुद्यम्य खरं समभिधावत ॥ २१ ॥
ततः कनक[12]पुङ्खैस्तु शरैः सन्नतपर्वभिः ॥ [13]बिभेद रामः संक्रुद्धः खरस्य समरे ध्वजम् ॥ २२ ॥
[14]स दर्शनीयो बहुधा [15]विकीर्णः काञ्चनध्वजः ॥ जगाम धरणीं सूर्यो देवतानामिवाज्ञया ॥ २३ ॥
[16]तं चतुर्भिः खरः क्रुद्धो [17]रामं गात्रेषु मार्गणैः ॥ विव्याध [18]युधि मर्मज्ञो मातङ्गमिव तोमरैः ॥२४॥
स रामो बहुभिर्बाणैः खरकार्मुकनिःसृतैः ॥ विद्धो रुधिर[19]सिक्ताङ्गो बभूव रुषितो भृशम् ॥ २५ ॥
स धनुर्धन्विनां श्रेष्ठः [20]प्रगृह्य परमाहवे ॥ मुमोच परमेष्वासः षट् छरानभिलक्षितान् ॥ २६ ॥
शिरस्येकेन बाणेन द्वाभ्यां [21]बाह्वोरथार्दयत् ॥ त्रिभिश्चन्द्रार्ध[22]वक्त्रैश्च वक्षस्यभि[23]जघान ह ॥ २७ ॥

इत्यनेन अमृत्वा अनिवृत्तिरुच्यते ॥ १४ ॥ मुष्टिदेशे मुष्टिबन्धनसमीपदेशे । महात्मन इत्यनेन मुष्टिदेशे पततो बाणस्य परिहरणसामर्थ्यं व्यज्यते । लाघवं शैघ्र्यं। चिच्छेदरामस्य किंचिच्छ्रान्तत्वेनानवधानादिति भावः ॥ १५ ॥ पाणिलाघवमेवाह—स पुनरित्यादिना । वर्मणि निजघान अवदारयति स्म ॥ १६ ॥ आदित्यवर्चस इत्यनेन कवचपतनानन्तरं प्रकाशमानतेजोविशेष उच्यते ॥१७—१८ ॥ अर्पितः संयुक्तः । विधूम इत्यनेन ज्वालाधिक्यमुच्यते ॥ १९ ॥ गम्भीरनिर्ह्रादं गम्भीरध्वनिकं। धनुः रिपोरन्ताय नाशाय । चकारेत्यन्वयः ॥२०॥ यत्तदिति प्रसिद्ध्यतिशयवाची। महर्षिणा अगस्त्येन । अतिसृष्टं दत्तं । समभिधावत समभ्यधावत ॥ २१ ॥ सन्नतपर्वभिः ऋजुपर्वभिः ॥ २२ ॥ दर्शनीयः रम्यः । आज्ञया शापेन । उत्प्रेक्षेयं ॥ २३ ॥ मातङ्गं गजं । तोमरैः गजशिक्षादण्डैः । चतुर्भिरित्यत्र वीप्सा बोध्या। बहुभिरित्यनुवादात् ॥ २४—२५ ॥ परमेष्वासः उत्कृष्टशरासनः । अभिलक्षितान् प्रसिद्धान् ॥२६॥ षण्णां विनियोगप्र-

अतएवानुपदं तेनरामधनुषश्छेदः । **स०** महासत्वमपि रामं परिश्रान्तंमेने । अनेन श्रमस्सूच्यते। **शि०** पौरुषे परमपुरुषत्वे पर्यवस्थितंरामं खरःपरिश्रान्तंमेने । एतेन खरस्याज्ञानंसूचितं ॥ १२ ॥ **शि०** चिच्छेद । एतेन तद्धनुषोऽदिव्यत्वंसूचितंयद्यपि । वस्तुतस्तु चिच्छेदेत्यस्य द्विधाभवनानुकूलव्यापारंचकारेत्यर्थः । नहि व्यापारमात्रेण फलसिद्धिस्सार्वत्रिकीति अत्र फलसिद्धेरभावा॰ च्चापस्यदिव्यत्वमक्षतमेव ॥१५॥ **शि०** खरमुक्तैर्बाणैः प्रहतं ताडनाश्रयत्वेनेच्छविषयीभूतं । आदित्यवर्चसं तद्रामकवचं भूमौपपात ताडितस्वसंस्पर्शजनितरामखेदसंभावनया बाणसंबन्धात्पूर्वमेव रामशरीरान्निस्सृत्य खरप्रक्षिप्तबाणान्गृहीत्वा पृथिव्यामतिष्ठदित्यर्थः ॥ १७ ॥ **शि०** अगस्त्येनदत्तमित्यनेन मद्दत्तचापेनैव खरोहन्तव्य इत्यगस्त्यप्रार्थना सूचिता । तेनागस्त्यस्याप्यनेन कश्चिदपराधःकृतइति सूचितं ॥ २१ ॥ **स०** देवतानां स्वोत्तमानां हरिब्रह्महराणां आज्ञया सूर्यः अस्तसमयेधरणींमिव ध्वजोजगामेत्यर्थः ॥ २३ ॥ **शि०** बाणैर्विद्धस्ताडितः. रुधिरसिक्ताङ्गः निहतानेकराक्षसशरीरजनितशोणितोक्षितोरामः ॥ **स०** रुधिरसिक्ताङ्गः तद्वद्बभूवेत्यर्थः ॥ २५ ॥ **स०** अभिलक्षितान् ज्ञातसामर्थ्यान् ॥ २६ ॥

[**पा०**] १ ङ. झ. ट. न्हस्तलाघवं. २ क.—घ. च.—ञ. मर्मणि. ३ क—घ. निचखान. ४ क.—ट. रणे. ५ क. ग. समस्वनान्. ६ ततस्तत्प्रहितं. ततःशरसहस्रेणेत्यनयोः श्लोकयोः पौर्वापर्यं क. ख. ग. ङ.—ट. पाठेषु दृश्यते. क. ततस्तन्मृदितं. छ. ततस्तत्प्रहतैः. ७ ग. सपर्वभिः. ८ ङ. झ. ञ. ट. वर्चसं. ९ ख. रामंचापिमहौजसं. १० ख. ग. घ. च. छ. ज. अर्पयित्वा. ११ घ. विधूमाग्निरिव. १२ च. ज. पुङ्खैश्च. १३ ङ.—ट. चिच्छेद. १४ ख. दर्शनीयोथ. १५ क. ङ.—ट. विच्छिन्नः काञ्चनो ध्वजः. १६ ख. खरश्चतुर्भिःक्रुद्धोथ. १७ ज. रामगात्रेषु. १८ ङ. झ. ट. हृदि. १९ ख. च. छ. ज. ञ. दिग्धाङ्गो. २० ङ. झ. ट. संगृह्य. २१ क. ग. घ. ङ. छ. झ. ञ. ट. बाह्वोरथार्पयत्. ख. बाह्वोस्समार्पयत्. २२ घ. वक्रैस्तं. २३ घ. जघानच.

निर्णयसागरयन्त्रालयस्थविक्रेयसंस्कृतपुस्तकानां सूची ।

न्यायशास्त्रग्रन्थाः । मू॰ डा॰

कारिकावली–(सिद्धान्तमुक्तावलीसहिता)—नास्त्यविदितमेतत्कृतगीर्वाणभाषापरिचयानां विशेषतश्च भारतीयानां यत्किल सकलप्रकरणमौलिभूता सिद्धान्तमुक्तावलीभासिता कारिकावली न्यायसिद्धान्तं करतलगतमिव प्रकाशयन्ती गादाधरीजागदीशीप्रभृतितत्त्वचिन्तामणिदीधितिव्याख्याध्ययनयोग्यतामादधात्यध्येतॄणामिति । सेयमस्माभिर्दिनकरीव्याख्यया पाठान्संवाद्य विषमस्थलटिप्पणीनिवेशनपुरःसरं प्रकाशिता. .... ·।= ८-

तर्ककौमुदी—लौगाक्षिभास्करकृता. ... . ८= ८॥

तर्कसंग्रहः—न्यायबोधिनीपदकृत्यव्याख्याटिप्पणैः संवलितः. .... ·।- ८-

तर्कसंग्रहः—अन्नंभट्टकृतः, तत्कृततर्कदीपिकाटीकासहितः. .... ·।= ८-

भास्करोदया—तर्कसंग्रह-दीपिका-प्रकाश (नीलकण्ठी) संवलितेयमपूर्वा व्याख्या मुद्रितास्ति । तर्कसंग्रहदीपिकाया यथावदवबोधाय यथा नीलकण्ठ्युपकरोति एवमेव नीलकण्ठ्या अप्यवयवशो यथावज्ज्ञानायेयं भास्करोदयातीव साहाय्यकारिण्यस्ति. ·॥= ८=

व्याकरणग्रन्थाः ।

अष्टाध्यायीसूत्रपाठः—पाणिनिमुनिप्रणीतः. .... ८≡ ८॥

पातञ्जलमहाभाष्यम्—(नवाह्निकम् ।) कैयटप्रणीतप्रदीपेन नागेशकृतोद्द्योतेन पायगुण्डेकृतछायया च परिवृतम् । श्रीवाराणस्यादिनगरेषु विहितमुद्रणमपीदं नवाह्निकभाष्यमविभक्तविषयतया साहायकमिवाचरति दुर्बोधतायां विषयगाम्भीर्यस्येत्याकर्ण्य विविधविचक्षणमुखात्, संजातसुविभक्तमुद्रणोत्साहेन मयैतत् पूर्वपक्षि–सिद्धान्त्येकदेशि–सिद्धान्त्युक्तिभिस्तदन्तर्गतैरवान्तरविषयैश्च संविभज्य, संयोज्य च यथास्वं शिरोलेख्ये–(हेडिंग)न संविभक्तविषयसूचकेन, विभूष्य च कृतसंविभागप्रदीपोद्द्योतयोरधस्तात् संनिवेशनेन मुद्रितम् । येनास्थानतिशिक्षिता अपि रहस्यमवगच्छेयुः । पायगुण्डे इत्युपाभिधनागेशछात्रप्रवरकृतछायायास्तु प्रथमोऽयं मुद्रणशालाप्रवेशः । इयमत्र टिप्पणीरूपं प्रतिलम्भिता. .... ४ ·।=

धातुरूपावलिः.... .... ८= ८॥

प्राकृतमञ्जरी—श्रीमत्कात्यायनमुनिप्रणीतप्राकृतसूत्रवृत्तिः । संस्कृतनाटकादिप्रबन्धेषु नट्यादिपात्रेषु प्राकृतभाषा प्रयुक्तोपलभ्यते । सा किल मागधी–शौरसेनी–पैशाचीत्यादिभेदेन षोढा प्रविभक्ता प्राचीनैः प्राकृतभाषाव्याकर्तृभिः प्राकृतकल्पलतिकाकारादिभिः । तेष्वन्यतमस्य प्राथमकल्पिकस्य प्राकृतभाषाभेदस्येयं परिचायिकास्माभिर्भूयसायासेन संपाद्य मुद्रिता. .... ·।· ८॥

मध्यसिद्धान्तकौमुदी—वरदराजप्रणीता, इदं पुस्तकं विपुलटिप्पण्यादिभिरलंकृतं, मध्यकौमुदीगतसूत्राणामकारादिवर्णक्रमकोशसहितं च मुद्रितमस्ति. .... ·॥· ८=

रामचन्द्रिका—संस्कृतशब्दरूपावलिः, गुञ्जीकरकृता. .... ·।· ८॥

लघुसिद्धान्तकौमुदी—श्रीवरदराजविरचिता, टिप्पण्या सूत्राणामकारादिकोशेन च सहिता. ८≡ ८-

लघुधातुरूपसंग्रहः—अत्र प्राचीनपण्डितवरसुबोधशास्त्रिप्रणीताः सोपसृष्टधात्वर्थादर्शना-

	मू॰	डा॰
मिकाः कारिकाः सव्याख्याः लकारार्थनिरूपणं च विद्यते । तथा च धातूनां लक्षणानि, अनुबन्धप्रयोजनानि, उपसर्गार्थनिरूपणं च ।	८≡	८॥
शब्दरूपावलिः—गुञ्जीकरकृता.	८-	८॥
समासचक्रम्.	८॥।	८॥
सारस्वतपूर्वपक्षावलिः.	८=॥	८॥
सारस्वतव्याकरणम्—चन्द्रकीर्तिप्रणीतव्याख्यासहितम् (वृत्तित्रयात्मकम्.)	२॥	।·
सारस्वतव्याकरणम्—चन्द्रकीर्तिव्याख्यासहितम् । **पूर्वार्धं.**	१	८=
सारस्वतव्याकरणम्—चन्द्रकीर्तिव्याख्यासहितम् । **उत्तरार्धं.**	१॥	।·
सारस्वतव्याकरणं पूर्वार्धम्—वस्त्रबद्धम्.	।-	८-
सारस्वतव्याकरणं पूर्वार्धम्—पत्रमात्रबद्धम्.	।·	८॥
सारस्वतव्याकरणम्—वृत्तित्रयात्मकम्—पत्रमात्रबद्धम्	॥=	८-॥
सारस्वतव्याकरणं वृत्तित्रयात्मकम्—इदं पुस्तकं प्राचीनहस्तलिखितपुस्तकान्येकीकृत्य संशोधय्य च मुद्रितम् । केवलं वस्त्रबद्धपुस्तकस्य.	।॥·	८=
सिद्धान्तकौमुदी—भट्टोजिदीक्षितकृता, अष्टाध्यायीसूत्रपाठः, गणपाठः, धातुपाठः, लिङ्गानुशासनं, शिक्षा, सूत्रानुक्रमणी चेत्येतैः सहिता.	२	।-
सिद्धान्तकौमुदी (तत्त्वबोधिनीसमाख्यव्याख्यासंवलिता.)—इयं चोत्तरकृदन्तान्तं श्रीमत्परमहंसपरिव्राजकाचार्य**ज्ञानेन्द्रसरस्वती**भिर्विरचित- **तत्त्वबोधिनी**संवलिता, उत्तरत्र स्वरवैदिकीप्रकरणयोस्तु **श्रीमज्जयकृष्ण**विरचिता सुबोधिनी; **लिङ्गानुशासनो**परि भैरवमिश्रविरचित**भैरवी**टीका च वर्तते । ग्रन्थान्ते च पाणिनीय**शिक्षा, गणपाठः, धातुपाठः, लिङ्गानुशासनं** चेति परिशिष्टानि अकाराद्यनुक्रमेण **कौमुदीगताष्टाध्यायी**सूत्राणां पृष्ठाङ्कसूत्राङ्कसूची, **वार्तिक-गण-सूत्र-परिभाषाणां** समुचितसूची **धातूनां** पृष्ठाङ्कसूची, **उणादिसूत्रसूची फिट्सूत्र**सूचीति कोशपञ्चकं च संगृहीतम्.	४	।॥·

कोशग्रन्थाः ।

	मू॰	डा॰
अभिधानसंग्रहः–(**प्रथमो भागः**)—अमरसिंहकृतं नामलिङ्गानुशासनं, पुरुषोत्तमदेवकृतस्त्रिकाण्डशेषः, हारावली, एकाक्षरकोशो द्विरूपकोशश्च इयन्तः कोशा अस्मिन् संगृहीताः.	१	८=
अभिधानसंग्रहः–(**द्वितीयो भागः**)—हेमचन्द्रकृतोऽभिधानचिन्तामणिः, अभिधानचिन्तामणिपरिशिष्टं, अनेकार्थसंग्रहः, निघण्टुशेषः, लिङ्गानुशासनं, जिनदेवमुनिविरचितोऽभिधानचिन्तामणिशिलोञ्छश्च इयन्तः कोशा अस्मिन् संगृहीताः.	१।·	८=
अमरकोशः—अमरसिंहकृतः, भानुजीदीक्षितकृतया व्याख्यासुधया (रामाश्रमीटीकया) सहितः....	४	॥-
अमरकोशः सटीकः—शब्दकोशसहितश्च.	।॥·	८-॥
अमरकोशः मूलमात्रः—शब्दकोशसहितः.	।=	८-

ऐतरेयब्राह्मणम् ।

(पंचिका ८)

अयं ग्रन्थ आमूलान्तं भाष्येण संवाद्य वैदिकसंप्रदायपाठान्मूले संस्थाप्य भाष्यादृतपाठान्पृष्ठाधो विनिवेश्य वैदिकद्वारा संशोधनेन संस्कृत्य मुद्रितोस्ति । मूल्यं १ रु. ट. ८=

मीमांसान्यायप्रकाशः ।

(आपोदेवी)

अयं पूर्वमीमांसाशास्त्रस्य सुप्रसिद्धः प्रकरणग्रन्थोऽध्येतॄणामध्यापकानांतीचावोपकारकोऽस्ति । अस्य प्राचीनानि हस्तलिखितानि मुद्रितानि च कतिपयपुस्तकानि संपाद्य पाठान्तरैः स्थलविशेषे विशेषटिप्पणैश्च सनाथीकृत्यायमङ्कितः. मू. ।।. ट. ८-

---

कुण्डरत्नावली-व्याख्यासहिता ।

कुण्डानां वेदीनां च ६४ आकृतिसंख्या ।

इष्टापूर्तादिकृत्यानि प्रायः सन्ति कुण्डमण्डपसाध्यानि । तत्र कस्मिन्कर्मणि कियदायामविस्तरवान्मण्डपोऽपेक्षितः कथंवा विविधकुण्डानां वेदीनां च प्रमाणायामविस्तारादीति निर्णयो भवत्यनेन ग्रन्थरत्नेन । **अत्रविशेषः**—वृत्तकरणात्सूत्रपातनेन साध्या कुण्डवेदीप्रकृतिः सूत्रमार्जनेन सिद्धा सेत्युभयविधाकृतयः प्रयत्नेन निर्माय तत्रतत्र यथा सर्वेषां यथावज्ज्ञानं स्यादेवं विन्यस्ताः सन्ति. मू. १ ट. ८=

पादुकासहस्रम् ।

वेङ्कटनाथदेशिकप्रणीतम् ।

श्रीनिवासकृतपरीक्षाख्यव्याख्यासहितम् ।

अनुपममिदं स्तोत्ररत्नरूपं काव्यं विद्वज्जनमनोविनोदावहमखिलकाव्यचूडामणीभूय वरीवर्ति । अत्र कविसार्वभौमेन श्रीरामपादुकैव हृद्यैः सहस्रपद्यैरपूर्वत्वेन वर्णितास्ति. रसपूर्णत्वेऽपि क्वचन स्वेष्टविवक्षितमद्यापयन्पद्मबन्धादयोत्र नैकशः साधिता इत्यहो कविप्रौढी. मूल्यं २।. रु. ट. ।.

पाण्डवचरितम् ।

श्रीमलधारिदेवप्रभसूरिविरचितम् ।

ग्रन्थकृता महाशयेन श्रीमहाभारततात्पर्यं मनसिकृत्यात्र सर्वाण्यपि चरित्राणि विस्तृतै १८ रष्टादशसर्गैर्नातिसंक्षेपविस्तराणि मनोहरैः पद्यैरेव ललिततराणि गुम्फितानि सन्ति. मूल्यं ४। रु. ट. ।.

वेदान्तसारः ।

द्वितीयावृत्तिः

नृसिंहसरस्वतीस्वामिकृता सुबोधिनी

तथा

रामतीर्थविरचिता विद्वन्मनोरंजनी च ।

निर्दिष्टव्याख्याद्वयोपेतोऽयं ग्रन्थः जे. ई. जेकब इत्यनेन पाठान्तरैः आङ्ग्लटिप्पणैश्च सनाथीकृत्य संस्कृतः । अस्य प्रथमावृत्तौ मूल्यं १॥ सार्धैकरूप्यकमासीत्परंच संप्रति ग्राहकसौलभ्यायास्यां द्वितीयावृत्तौ केवलं १ रु. रक्षितः । ट. ८॥

शिक्षादिवेदांगचतुष्टयम्.

१ शिक्षा, २ ज्योतिषं, ३ छंदः, ४ निघंटुः. मूल्यं. ८ मा. व्य. ८॥

शिक्षादिवेदषडंगानि.

१ शिक्षा, २ ज्योतिषं, ३ छंदः, ४ निघंटुः, निरुक्तं—पूर्वषट्कं, उत्तरषट्कं, ५ आश्वलायनश्रौतसूत्रं—पूर्वषट्कं, उत्तरषट्कंच, ६ अष्टाध्यायी (सूत्रपाठः) इयन्तो विषया अत्र संगृहीताः सन्ति. मूल्यं. १। मा. व्य. ।.

एतान्यन्यान्यपि च पुस्तकानि ग्रहीतुकामास्तानि मूल्यप्रेषणेन, व्ही. पी. द्वारा प्रेषणावेदनेन वा निर्णयसागरयन्त्रालयाल्लभेरन् । अत्रानिर्दिष्टानि पुस्तकानि जिघृक्षवश्च सूचीपत्रं पत्रप्रेषणमात्रेण लभेरन्निति विज्ञापयति—

निर्णयसागरयन्त्रालयाधिपतिः

तुकाराम जावजी,

कालकादेवीरोड, मुंबई.

ततः पश्चान्महातेजा नाराचान्भास्करोपमान् ॥ जि[1]घांसू राक्षसं क्रुद्धस्त्रयोदश समा[2]ददे ॥ २८ ॥
त[3]तोस्य युगमेकेन च[4]तुर्भिश्चतुरो हयान् ॥ ष[5]ष्ठेन तु शिरः सङ्ख्ये ख[6]रस्य रथसारथेः ॥ २९ ॥
त्रिभिँ[7]स्त्रिवेणुं बलवान्द्वाभ्यामक्षं महाबलः ॥ द्वादशेन तु बाणेन खरस्य स[8]शरं धनुः ॥ ३० ॥
छित्त्वा वज्रनिकाशेन राघवः प्रहसन्निव ॥ त्रयोदशेनेन्द्रसमो बिभेद समरे खरम् ॥ ३१ ॥
प्र[9]भग्नधन्वा विरथो हताश्वो हतसारथिः ॥ गदापाणिरवप्लुत्य तस्थौ भूमौ खरस्तदा ॥ ३२ ॥
तत्कर्म रामस्य महारथस्य समेत्य देवाश्च महर्षयश्च ॥
अ[10]पूजयन्प्राञ्जलयः प्रहृष्टास्तदा विमानाग्रगताः समेताः ॥ ३३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे अष्टाविंशः सर्गः ॥ २८ ॥

एकोनत्रिंशः सर्गः ॥ २९ ॥

रामेण खरंप्रति सगर्हणंवीरवादः ॥ १ ॥ तथा सगर्हणंसवीरवादं खरप्रक्षिप्तायागदाया बाणैर्बहुधाखण्डनम् ॥ २ ॥

खरं तु विरथं रामो गदापाणिमवस्थितम् ॥ मृदुपूर्वं महातेजाः परुषं वाक्यमब्रवीत् ॥ १ ॥
गजाश्वरथसंबाधे बले महति तिष्ठता ॥ कृतं सु[11]दारुणं कर्म सर्वलोकजुगुप्सितम् ॥ २ ॥
उद्वेजनीयो भूतानां नृशंसः पापकर्मकृत् ॥ त्रयाणामपि लोकानामीश्वरोपि न तिष्ठति ॥ ३ ॥
कर्म लोकविरुद्धं तु कुर्वाणं क्षणदाचर ॥ तीक्ष्णं सर्वजनो हन्ति सर्पं दुष्टमिवागतम् ॥ ४ ॥

कारमाह—शिरसीत्यादिना । द्वाभ्यामिति । बाह्वोरिति एकैकस्य बाहोरेकैकेनेत्यर्थः । चन्द्रार्धवक्त्रैः । अर्धचन्द्राकारमुखैरित्यर्थः ॥ २७ ॥ त्रयोदश नाराचान् समादद इत्यन्वयः । अन्तिमपादे त्रयोदशशराञ्छितानिति पाठे मुमोचेति क्रियाध्याहार्या ॥ २८ ॥ त्रयोदशानां विनियोगमाह—ततोस्येत्यादिना । छित्त्वेत्युत्तरत्र स्थिता क्रिया सर्वत्र संबध्यते । त्रिवेणुर्नाम रथमुखस्थो युगाधारदण्डः । प्रहसन्निव लीलयेत्यर्थः ॥ २९ ॥ ३० ॥ ३१ ॥ अवप्लुत्य रथात्समुलङ्घ्य ॥ ३२ ॥ तत्कर्म खरभङ्गकर्म । अपूजयन् अस्तुवन् । समेत्य समूहीभूय । समेताः आगताः ॥ ३३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने अष्टाविंशः सर्गः ॥ २८ ॥

अहंकारस्य हीनस्य व्यक्तां शक्तिमिव स्थिताम् । गदां खरस्य निर्भिद्य राजन्तं राममाश्रये ॥ सर्वसाधनवैकल्येन खरस्यानुकूल्यमपि भवेदिति तच्चित्तपरीक्षार्थमाह—खरं त्वित्यादिना । मृदुपूर्वं न्यायावलम्बनेनोक्तं । परुषं मर्मोद्घाटनरूपत्वात् ॥ १ ॥ तिष्ठता अधिपतित्वेन तिष्ठतेत्यर्थः ॥ २ ॥ मृदुपूर्वत्वसिद्धये लोकन्यायमाह—उद्वेजनीय इति । उद्वेजनीयः उद्वेजकः । नृशंसो घातुकः । एवंविधो लोकानामीश्वरोपि न तिष्ठति न जीवेत् । किंपुन-

---

ति० भास्करोपमानित्यस्य गृहीत्वेतिशेषः ॥ २८ ॥ शि० रथस्य युगं रथाङ्गं । यद्यपि "युगोरथहलाद्यङ्गे" इतिकोशाद्युगेनैव रथाङ्गग्रहणेसिद्धे रथस्येति निरर्थकं । तथापि स्पष्टतइतराङ्गव्यावृत्तये तदुपात्तं । अन्वयस्तु विशेषणाविवक्षया ॥ २९ ॥ स० कर्म समेत्य ज्ञात्वा अपूजयन्नित्यन्वयः ॥ ३३ ॥ इत्यष्टाविंशस्सर्गः ॥ २८ ॥

स० मृदुपूर्वं शब्दतः । परुषं अर्थतः ॥ १ ॥ ति० त्वत्कृतान्यायेनायंतवनाशइत्याह—**गजेत्यादि** ॥ स० तिष्ठता त्वया ॥ २ ॥ ति० नतिष्ठति नचिरंतिष्ठति । स० उद्वेजनीयः जनकतासंबन्धेनभयवानित्यर्थः । सर्वजनः अपकृतानपकृतजनः ॥३॥

[पा०] १ ङ. झ. ञ. ट. जघान. २ ग. समादिशत्. क. ख. घ.—ट. शिलाशितान्. ३ ङ. झ. ञ. ट. रथस्य. ४ क. ङ.—ट. चतुर्भिःशबलान्हयान्. ५ क. ङ.—ट. षष्ठेनच. ६ ङ. झ. ञ. ट. चिच्छेदखरसारथेः. ७ ग. ङ. झ. ञ. ट. त्रिवेणून्. ८ ङ. झ. ञ. ट. सकरं. ९ घ. च. छ. ज. ञ. सभग्नधन्वा. ख. प्रभिन्नधन्वा. १० ख. ग. आपूजयन्. ११ ङ. झ. ट. तेदारुणं.

लोभात्पापानि कुर्वाणः कामाद्वा यो न बुध्यते ॥ [1]भ्रष्टः पश्यति तस्यान्तं ब्राह्मणी करकादिव ॥५॥
वसतो दण्डकारण्ये तापसान्धर्मचारिणः ॥ किंनु हत्वा महाभागान्फलं प्राप्स्यसि राक्षस ॥ ६ ॥
न चिरं पापकर्माणः [2]क्रूरा लोकजुगुप्सिताः ॥ ऐश्वर्यं प्राप्य तिष्ठन्ति शीर्णमूला इव द्रुमाः ॥ ७ ॥
अवश्यं लभते [3]जन्तुः फलं पापस्य कर्मणः ॥ घोरं पर्यागते काले [4]द्रुमाः पुष्पमिवार्तवम् ॥ ८ ॥
नचिरात्प्राप्यते लोके पापानां कर्मणां फलम् ॥ सविषाणामिवान्नानां भुक्तानां क्षणदाचर ॥ ९ ॥
पापमाचरतां घोरं लोकस्याप्रियमिच्छताम् ॥ अहमासादितो [5]राज्ञा प्राणान्हन्तुं निशाचर ॥ १० ॥
अद्य हि [6]त्वां मया मुक्ताः शराः काञ्चनभूषणाः ॥ [7]विदार्य निपतिष्यन्ति वल्मीकमिव पन्नगाः ॥११॥
ये त्वया दण्डकारण्ये भक्षिता धर्मचारिणः ॥ तानद्य [8]निहतः संख्ये ससैन्योऽनुगमिष्यसि ॥ १२ ॥
अद्य त्वां [9]पतितं बाणैः पश्यन्तु परमर्षयः ॥ निरयस्थं विमानस्था ये त्वया हिंसिताः पुरा ॥ १३ ॥
[10]प्रहर त्वं यथाकामं कुरु यत्नं कुलाधम ॥ अद्य ते पातयिष्यामि शिरस्तालफलं यथा ॥ १४ ॥
एवमुक्तस्तु रामेण क्रुद्धः संरक्तलोचनः ॥ प्रत्युवाच [11]खरो रामं प्रहसन्क्रोधमूर्च्छितः ॥ १५ ॥

भवादृश इति भावः ॥ ३ ॥ सर्वजन इति दयालुरपीति भावः ॥ ४ ॥ लोभात् लब्धस्य त्यागासहिष्णुतया । कामात् अपूर्वलाभेच्छया । न बुध्यते न पश्चात्तापं करोतीत्यर्थः । भ्रष्टः ऐश्वर्याद्भ्रष्टः । तस्य कर्मणः। अन्तं फलं । पश्यति अनुभवति । कथमिव करकात् ब्राह्मणीव । करकाः वर्षोपलाः । "वर्षोपलस्तु करकः" इत्यमरः । तानत्तीति करकात् । ब्राह्मणी रक्तपुच्छिका "ब्राह्मणी रक्तपुच्छिका" इति निघण्टुः । तस्यास्तद्भक्षणं विषभक्षणवन्मारकमिति प्रसिद्धिः । यथा ब्राह्मणी स्वमारकं कर्म स्वयमेव करोति तथा त्वमपीत्यर्थः ॥५॥ किं पापं मया कृतमित्यत्राह—वसत इति ॥६॥ ननु तर्हि कथं पापिनोपि बहवो जीवन्तीत्यत्राह —न चिरमिति । केवलपापिनो जन्मान्तरे फलं भुञ्जते क्रूरास्तु पुण्यलेशेन ऐश्वर्यं प्राप्यापि न चिरं तिष्ठन्ति क्षिप्रमेव विनश्यन्तीत्यर्थः ॥ ७ ॥ पापस्य कर्ता जन्तुः काले प्राप्ते अवश्यं घोरं दुःखरूपं फलं लभते ऋतुलक्षणे काले पर्यागते प्राप्ते आर्तवं तत्तदृतुप्राप्तं पुष्पमिव ॥८॥ नचिरादित्येकं पदं अविलम्बेनेत्यर्थः । अत्र पुरुषेणेति शेषः । पापानां अत्युत्कटानामित्यर्थः ॥ ९ ॥ एवं मृदुपूर्वमुक्त्वा परुषमाह—पापमित्यादिना । आसादितः प्राप्तोस्मि । आगमने हेतुमाह —राज्ञेति ॥ १० ॥ मया मुक्ताः शराः त्वां विदार्य निपतिष्यन्ति प्रवेक्ष्यन्ति । यथा पन्नगाः सर्पाः । वल्मीकं प्रविशन्ति तथा ॥ ११ ॥ताननुगमिष्यसीति पापिनामपि समरे हतानां स्वर्गसंभवादिति भावः ॥ १२ ॥ निरयस्थं नरकसदृशं दुःखं भूमौ पतित्वाऽनुभवन्तमित्यर्थः ॥ १३ ॥ तालफलं यथेत्यनेनाना-

कतक० एवंयःकर्मकरणकाले नाशकमिदमितिनबुध्यते तस्यतत्कर्मप्राप्तं अन्तं नाशं लोकोहृष्टस्सन्पश्यतीत्यर्थः । **स०** पापानिकुर्वाणः यःभ्रष्टः नबुध्यते मयेदंकृतमिति सः तस्य पापस्यसकाशात् अन्तं स्वनाशं पश्यति । कस्मात्केव करकाद्ब्राह्मणीव । " वर्षोपलस्तुकरका " इत्यमरव्याख्यानावसरे " वर्षोपलस्तुकरकाकरकोपिचदृश्यत " इतिभानुदीक्षिताभिधानात्करकशब्दः पुँल्लिङ्गोप्यस्ति ॥ ५ ॥ **ति०** घोरं कर्मणःफलंभवतीतिशेषः । अतोहेतोरहंराजा दुष्टनिग्रहाधिकारी । हेनिशाचर रक्षसांप्राणान्हन्तुंआसादितः । ऋषिभिरितिशेषः । त्वयेतिवा । राज्ञेतिपाठे राज्ञा दशरथेन आसादितःनियुक्तइत्यर्थइतितीर्थः ॥ १० ॥ **ती०** येधर्मचारिणस्ताननुगमिष्यतीत्यनेन पापिनामपिस्वेनहतानामुत्तमलोकप्राप्तिरस्तीत्युक्तंभवति । तदुक्तंस्कान्दे—"रामविद्धा निशिचरा बाणैर्मर्मसु ताडिताः । राममासाद्य समरे सायुज्यपदवींगताः " इति ॥ **ति०** अत्र ऋष्यनुगमनं प्राणनाशमात्रेण । अतएव निरयस्थमितिवक्ष्यति ॥१२॥ **ति०** निरयस्थमिति । ननु भगवताहतस्य मृतिसमयेभगवद्दर्शनवतः कथंनिरयस्थत्वमितिचेन्न । अत्युग्रस्य ब्रह्मवधकर्मणः फलस्यावश्यंभोक्तव्यत्वेनादौभगवदिच्छयैव निरयभोगपूर्वमुत्तमपदवीप्राप्तेस्सत्वेनादोषात् । **स०** विमानस्थाइत्यनेन तेषामुत्तमलोकस्थितत्वं द्योतयति ॥ १३ ॥ **शि०** यत्नं स्ववधाभावप्रयत्नं । कामं यथेच्छं

[**पा०**] १ ङ. झ. ट. हृष्टः. ख. नष्टः. २ घ. पापाः. ३ क.—ट. कर्ता. ४ ख. ग. ङ.—ट. द्रुमः. ५ क. ख. घ. ङ. झ. राजा. ६ क. ख. घ. ङ. झ. ञ. ट. भित्त्वा. ग. हत्वा. ७ झ. विदार्यापि. ग. ङ. छ. ञ. ट. विदार्याति. ८ ख.—च. ज.—ट. निहतं. ९ ङ. च. छ. झ. ञ. ट. निहताः. १० ङ.—ट. प्रहरस्व. ११ क. ख. ङ—ट. ततो.

प्राकृतान्राक्षसान्हत्वा युद्धे दशरथात्मज ॥ आत्मना कथमात्मानमप्रशस्यं प्रशंससि ॥ १६ ॥
विक्रान्ता [1]बलवन्तो वा [2]ये भवन्ति नरर्षभाः ॥ कथयन्ति न ते किंचित्तेजसा स्वेन गर्विताः ॥१७॥
[3]प्राकृतास्त्वकृतात्मानो लोके क्षत्रियपांसनाः ॥ निरर्थकं विकत्थन्ते यथा राम विकत्थसे ॥ १८ ॥
कुलं व्यपदिशन्वीरः समरे [4]कोऽभिधास्यति ॥ मृत्युका[5]ले हि संप्राप्ते स्वयमप्रस्तवे स्तवम् ॥ १९ ॥
[6]सर्वथैव लघुत्वं ते कत्थनेन विदर्शितम् ॥ सुवर्णप्रतिरूपेण [7]तप्तेनेव कुशाग्निना ॥ २० ॥
न तु मामिह तिष्ठन्तं पश्यसि त्वं गदाधरम् ॥ धराधरमिवाकम्प्यं पर्वतं [8]धातुभिश्चितम् ॥ २१ ॥
पर्या[9]प्तोहं गदापाणिर्हन्तुं प्राणान्रणे तव ॥ त्रयाणामपि लोकानां पाशहस्त इवान्तकः ॥ २२ ॥
कामं बह्वपि वक्तव्यं त्वयि वक्ष्यामि न त्वहम् ॥ अस्तं गच्छेद्धि सविता युद्धविघ्नस्ततो भवेत् ॥२३॥
[[10]अग्रतस्संस्थितं दृष्ट्वा त्वां मनो रुष्यते मम ॥ रणे यस्य तु रुष्यामि मुहूर्तं न स जीवति ॥ २४ ॥
मम कृत्वाऽप्रियं राम दुर्लभं तव जीवितम् ॥ तोयवर्षमिवावर्षे तोयदस्य विनर्दतः ॥ २५ ॥]
चतुर्दश सहस्राणि राक्षसानां [11]हतानि ते ॥ त्वद्विनाशात्[12]करोम्येष तेषाम[13]श्रुप्रमार्जनम् ॥ २६ ॥

यासोक्तिः ॥ १४—१५ ॥ आत्मना स्वयमेव ॥१६॥ तेजसा प्रतापेन ॥ १७ ॥ प्राकृताः क्षुद्राः । अकृतात्मानः अप्रतिष्ठितधृतयः । क्षत्रियपांसनाः क्षत्रियाधमाः । निरर्थकं निष्प्रयोजनं यथा तथा विकत्थन्ते श्लाघन्ते ॥ १८ ॥ कुलं व्यपदिशन् आत्मनो महाकुलप्रसूतत्वं प्रकटयन् । को वीरः मृत्युकाले संप्राप्ते अप्रस्तवे अनवसरे । स्वयं स्तवमभिधास्यतीत्यन्वयः ॥ १९ ॥ ते कत्थनेन लघुत्वमल्पत्वं सर्वथैव स्पष्टमेव विदर्शितं यथा तप्तेन अतएव सुवर्णसदृशेन कुशाग्निना कुशदर्भमाश्रितेनाग्निना । लघुत्वं विदर्श्यते तद्वत् । यथा तृणाग्निः सुवर्णतुल्यतया भासमानोपि ज्वलन्नप्युत्तरकाले दाहकार्यकरो न भवति । तथा कत्थनेन वीरवद्भासमानोपि पुरुषः उत्तरकाले लघुरेव भविष्यतीत्यर्थः । शीघ्रं ज्वलन् तृणाग्निः यथा सद्यः शान्तो न दग्धुमीष्टे तथा कत्थमानः पुरुषः स्वकत्थनानुरूपं कार्यं न करोतीति सिद्धमिति ॥२०॥ इह तव पुरतः तिष्ठन्तं निश्चलतया स्थितं । गदाधरं शत्रुरक्तोक्षितगदावन्तं । मां सर्वनिर्वाहकं पर्वतमिवाकम्प्यं न पश्यसि अतएवैवं कत्थस इति भावः ॥ २१ ॥ गदापाणिरहं पाशहस्तोन्तक इव तव त्रयाणां लोकानामपि प्राणान् हन्तुं पर्याप्तः समर्थ इति योजना ॥ २२ ॥ त्वयि आत्मश्लाघिनि विषये। कामं यद्यपि बहु पारुष्यं वक्तव्यमस्ति तथापि तन्न वक्ष्यामि । कुतः हि यस्मात् । सविता अस्तं गच्छेत्। ततः अस्तमयेन युद्धविघ्नो भवेत् । यद्यपि स्वस्य रात्रिर्बलायैव तथापि रात्र्यशक्तमनुष्यवधे स्वस्य न कापि कीर्तिरिति खरहृदयं ॥ २३—२५ ॥ ते त्वया । एष इत्यव्यवधानोक्तिः । तेषां तद्बन्धूनामि-

कुरु । अनवधानतयाहतोस्मीति न वक्तव्यमितितात्पर्यं ॥ १४ ॥ **स०** अप्रस्तवे अप्रस्तावे ॥ १९ ॥ **ती०** सुवर्णप्रतिरूपेण सुवर्णसदृशेन । अग्निना अग्निवर्णेन । अश्मना पाषाणेन । नतप्यते वस्त्विविशेषः । सुवर्णवर्णमश्मानंदृष्ट्वा अयमङ्गारइति स्तुत्या व्यपदिशन्ति तथापि तेनाग्निनावस्तु न तप्यते । किं तु मुख्येनैवाग्निना तप्यतइत्यर्थः । एतदुक्तंभवति । अग्निबुद्ध्याऽग्निवर्णमश्मानंस्पृशते पुरुषायानुपलभ्यमानोष्णस्पर्शेनात्मनाऽऽत्मनोऽनग्नित्वंनाम लघुत्वं यथाविदर्शितं भवति तथा ते त्वया । त्वांवीरंमन्वानायमह्यं कत्थनेन आत्मप्रशंसया अवीरत्वंनामात्मनोलघुत्वंविदर्शितमित्यपेक्षितपदाध्याहारेणयोजना । तप्तेनेवकुशाग्निनेतिपाठेत्वयमर्थः । कुशाग्निना सुवर्णशोधकाग्निना तप्तेन सुवर्णप्रतिरूपेणारकूटेन । लघुत्वं कार्ष्ण्यरूपं यथाविदर्शितंभवति तथा ते त्वया । कत्थनेनात्मप्रशंसयालघुत्वमशूरत्वं प्रदर्शितंभवतीति ॥ **ति०** कत्थनेन प्राकृतेन । ते त्वया सर्वथैवात्मनोलघुत्वंदर्शितं । यथा सुवर्णप्रतिरूपेण स्वर्णतुल्यरूपेणपित्तलेन । कुशाग्निना स्वर्णादिशोधनाग्निना तप्तेन यथा स्वस्यकृष्णवर्णत्वरूपं लाघवं दर्शितंभवति तद्वत्तापात्पूर्वंहि तत्र स्वर्णताबुद्धिः सा तापेयथानश्यति तथा त्वयास्वस्मिन्स्थिता प्राक्छूरत्वबुद्धिः कत्थनेनापहृतेत्यर्थः । तुषाग्निनेतिपाठान्तरं ॥ २० ॥ **ती०** प्राकृतानित्यादीनांवास्तवार्थस्तु आत्मानंप्रशंससि । इह महात्मनस्तवैतन्नयुक्त-

[पा०] १ ग. बलवन्तोहि. २ क. ग. भवन्तीह. घ. येनिहन्ति. ३ ख. प्राकृताविकृतात्मानो. ४ ज. कोविधास्यति. ५ ङ.—ट. कालेतु. ६ क. ख. ग. ङ. झ. ट. सर्वथातु. ७ च. तप्तेनेवाश्मनाग्निना. ग. तप्तेनेवतुषाग्निना. ८ ख. धातुमण्डितं. ९ ङ. झ. ट. प्राप्नोनि. १० इदंश्लोकद्वयं. क. ख. पाठयोर्दृश्यते. ११ ख. हतानिवै. १२ ङ.—ट. त्करोम्यद्य. ख. ग. घ. त्करिष्यामि. १३ क.—घ. मास्रप्रमार्जनं.

[ततो रुधिरधाराभिस्त्वच्छरीरविमर्दनात् ॥ करिष्यामि बलिं भूमौ त्वां हत्वा सर्वरक्षसाम् ॥२७॥]
इत्युक्त्वा परमक्रुद्धस्तां गदां परमाङ्गदः ॥ खरश्चिक्षेप रामाय प्रदीप्तामशनिं यथा ॥ २८ ॥
खरबाहुप्रमुक्ता सा प्रदीप्ता महती गदा ॥ भस्म वृक्षांश्च गुल्मांश्च कृत्वाऽगात्तत्समीपतः ॥ २९ ॥
तामापतन्तीं ज्वलितां मृत्युपाशोपमां गदाम् ॥ अन्तरिक्षगतां रामश्चिच्छेद बहुधा शरैः ॥ ३० ॥
सा विकीर्णा शरैर्भग्ना पपात धरणीतले ॥ गदा मन्त्रौषधबलैर्व्यालीव विनिपातिता ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

त्रिंशः सर्गः ॥ ३० ॥

रामेणसवीरवादमधिक्षिप्तेनखरेण निरायुधतयासक्रोधं तदुपरिवृक्षप्रक्षेपः ॥ १ ॥ रामेणखरक्षिप्ततरुच्छेदपूर्वकंशूरगणैस्तच्छरीरविदारणे स्रवद्रुधिराप्लुतेनतेन सरभसंरामोपरिसमुत्पतनोद्यमः ॥ २ ॥ रामेण जुगुप्सयापश्चात्किंचिदपसर्पणपूर्वकंखरोरसि शरार्पणेनतद्धननम् ॥ ३ ॥ खरनिधने देवर्ष्यादिभिस्सपुष्पवर्षणंरामाभिष्टवः ॥ ४ ॥ लक्ष्मणेनसहगुहामुखान्निर्गतयासीतया निजाश्रममुपेयुषोरामस्य हर्षात्परिष्वङ्गः ॥ ५ ॥

भित्त्वा तु तां गदां बाणै राघवो धर्मवत्सलः ॥ स्मयमानः खरं वाक्यं संरब्धमिदमब्रवीत् ॥ १ ॥
एतत्ते बलसर्वस्वं दर्शितं राक्षसाधम ॥ शक्तिहीनतरो मत्तो वृथा त्वमवगर्जसि ॥ २ ॥
एषा बाणविनिर्भिन्ना गदा भूमितलं गता ॥ अभिधानप्रगल्भस्य तव प्रत्यरिघातिनी ॥ ३ ॥

त्यर्थः । यद्वा तद्वधप्रतिक्रियां करिष्यामीत्यत्र हृदयं ॥ २६—२७ ॥ परमाङ्गदः गदाप्रहारसामर्थ्यबिरुदयुक्त इत्यर्थः । अशनिं वज्रं ॥ २८ ॥ भस्म कृत्वा तत्समीपमगादित्यन्वयः । समीपत इति सार्वविभक्तिकस्तसिः ॥ २९-३० ॥ व्याली पन्नगी ॥ ३१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकोनत्रिंशः सर्गः ॥ २९ ॥

निरस्तनिखिलालम्बमहंकारमिव स्थितम् । खरं विहत्य साधूनां सुखावहमहं भजे ॥ धर्मवत्सल इत्यनेन निरायुधवधोनुचित इति श्रीरामोमन्यतेति गम्यते । स्मयमानः परिहसन्नित्यर्थः । संरब्धं भ्रान्तमिति खरविशेषणं "संरम्भः संभ्रमे कोपे" इत्यमरः ॥१—२॥ अभिधाने वचसि प्रगल्भस्य धृष्टस्य । प्रत्यरिघातिनीति वीप्सायां प्रतिः । अरीनरीन् प्रतिघाति-

---

मितिभावः । विक्रान्ताइति । ये नरर्षभाः त्वादृशमहात्मानः । ते एवं नकथयन्ति । केचित्स्वतेजसागर्विताः कथयन्ति । अतस्तवोचितंनभवतीतिभावः ॥ प्राकृताइति । क्षत्रियपांसनाः यथानिरर्थकंविकत्थन्ते तथात्वंविकत्थसे । तवनयुक्तमितिभावः । कुलमिति । समरे शत्रुपक्षस्यमृत्युकालेसंप्राप्तेसति स्तवंकोवाभिधास्यति नकोपीत्यर्थः । सर्वथेति । आत्मानमेवं भूषयसियदि तदा तवलघुत्वमेवप्रदर्शितंभविष्यति । अतस्तवैतन्नयुक्तमितिभावः । नन्विति । हेराम गदाधरंमांपश्यसि । नन्वेतादृशगदापाणिरहं पाशहस्तोन्तकइव त्रयाणामपिलोकानांप्राणान्हन्तुं पर्याप्तोयद्यपि । तथापि रणे तव नपर्याप्तइतिशेषः । चतुर्दशेति । राक्षसानां चतुर्दशसहस्राणि ते त्वयाहतानि । तथा त्वन्नाशात् त्वत् त्वत्तः । नाशात् मन्नाशात् । त्वत्तोमन्नाशेसतीत्यर्थः । तेषां तद्दारादीनां । अश्रुप्रमार्जनंकरोमीतिसंबन्धः । त्वदिति । घातयितुर्मम मरणे तद्दाराणांदुःखनिवृत्तिर्भवतीतिभावः ॥ २६ ॥ **ति०** परमा अङ्गदाः कनकवलयानियस्याः । तां प्रसिद्धां हस्तस्थांगदांचिक्षेप । **ती०** इत्युक्त्वा अश्रुप्रमार्जनंकरोमीत्युक्त्वेत्यर्थः । रामाद्वधाकाङ्क्षीसन्नितिशेषः । परमक्रुद्धः खरः गदांरामायचिक्षेपेतिसंबन्धः ॥ २८ ॥ इत्येकोनत्रिंशस्सर्गः ॥ २९ ॥

ति० तवप्रत्ययघातिनी अभिधानेकेवलंप्रगल्भस्यतवानयाशत्रुवधोभवत्येवेत्ययं यःप्रत्ययो विश्वासः तस्य स्वनाशेन घातिका

[पा०] १ अयंश्लोकः क. च. छ. ज. पुस्तकेषुदृश्यते. २ ख. ङ. झ. ट. क्रुद्धस्सगदां. ३ ख. ङ. झ. ट. परमांगदां. च. छ. ज. ञ. कनकाङ्कितां. ४ क. ग. मशनीमिव. ५ ग. ङ. झ. ट. महतीं. ख. सहसा. ६ ङ. छ.—ट. विशीर्णा. ७ ङ. झ. ञ. ट. शरैर्भिन्ना. ख. च. छ. ज. शरैर्दग्धा. ८ ङ. झ. ट. मन्त्रौषधि. ९ ग. सहला. १० ग. रघुनन्दनः. ११ घ. ङ. झ. ट. मुपगर्जसि. ग. मभिगर्जसि. १२ घ. तले. १३ ङ.—ट. प्रत्ययघातिनी. ख. प्रत्ययघातिनः.

यत्त्वयोक्तं विनष्टाना[1]महमश्रुप्रमार्जनम् ॥ राक्षसानां करोमीति मिथ्या तदपि ते वचः ॥ ४ ॥
नीचस्य क्षुद्रशीलस्य मिथ्यावृत्तस्य [2]रक्षसः ॥ प्राणानपहरिष्यामि गरुत्मानमृतं यथा ॥ ५ ॥
अद्य ते [3]छिन्नकण्ठस्य फेनबुद्बुद[4]भूषितम् ॥ विदारितस्य मद्बाणैर्मही पास्यति शोणितम् ॥ ६ ॥
पांसुरूषितसर्वाङ्गः स्रस्तन्यस्तभुजद्वयः ॥ स्वप्स्यसे गां [5]समालिङ्ग्य दुर्लभां प्रमदामिव ॥ ७ ॥
[6]प्रवृद्धनिद्रे शयिते त्वयि राक्षसपांसने ॥ [7]भविष्यन्त्यशरण्यानां शरण्या दण्डका इमे ॥ ८ ॥
जनस्थाने हतस्थाने तव राक्षस मच्छरैः ॥ निर्भया विचरिष्यन्ति सर्वतो मुनयो वने ॥ ९ ॥
अद्य विप्रसरिष्यन्ति राक्षस्यो हतबान्धवाः ॥ बाष्पार्द्र[8]वदना दीना भयादन्यभयावहाः ॥ १० ॥
अद्य शोकरसज्ञास्ता भविष्यन्ति निरर्थकाः ॥ अनुरूपकुलाः पत्न्यो यासां त्वं पतिरीदृशः ॥ ११ ॥
[10]नृशंस नीच क्षुद्रात्मन्नित्यं ब्राह्मण[11]कण्टक ॥ [12]यत्कृते शङ्कितैरग्नौ मुनिभिः पात्यते हविः ॥ १२ ॥
तमेवमभिसंरब्धं ब्रुवाणं राघवं [13]रणे ॥ खरो निर्भर्त्सयामास रोषात्खरतर[14]स्वनः ॥ १३ ॥
दृढं खल्ववलिप्तोसि भयेष्वपि च निर्भयः ॥ वाच्यावाच्यं [15]ततो हि त्वं मृत्युवश्यो न बुध्यसे ॥१४॥
[16]कालपाशपरिक्षिप्ता भवन्ति पुरुषा हि ये ॥ [17]कार्याकार्यं न जानन्ति ते निरस्तषडिन्द्रियाः ॥१५॥

नी गदा ॥ ३—४ ॥ नीचस्य केवलवाचाटकत्वेन क्षुद्रस्य । क्षुद्रशीलस्य हीनस्वभावस्य । मिथ्यावृत्तस्य असद्वृत्तस्य ॥ ५ ॥ फेनबुद्बुदाभ्यां भूषितं अलङ्कृतं । अनेन नूतनत्वमुक्तं। विदारितस्य विदारितोदरस्य॥६॥ पांसुरूषितेति । रूषितं लिप्तं । स्रस्तं यथा तथा भुवि न्यस्तं भुजद्वयं येन । गां भूमिं समालिङ्ग्येत्यनेनावाग्भूतत्वमुच्यते ॥ ७ ॥ प्रवृद्धनिद्रे दीर्घनिद्रे । अशरण्यानां ऋष्यादीनामगतीनां । शरण्याः सुखावासभूताः ॥ ८ ॥ हतस्थाने हतराक्षसावस्थानसन्निवेशे ॥ ९ ॥ पूर्वमन्यभयावहाः राक्षस्यः अद्य मद्भयात् जनस्थानात् विप्रसरिष्यन्ति पलायिष्यन्ते ॥ १० ॥ यासां त्वमीदृशः पापी पतिः ताः पत्न्यः अनुरूपकुलाः त्वत्सदृशदुर्वृत्ता इत्यर्थः । इतः पूर्वं शोकानभिज्ञा अपि अद्य शोकरसज्ञाः निरर्थकाः निर्गतकामपुरुषार्थाः भविष्यन्ति ॥ ११ ॥ ईदृश इत्युक्तं विवृणोति—नृशंसेति । नृशंस घातुक । नीच वृत्ततोहीन । क्षुद्रात्मन् क्षुद्रबुद्धे । ब्राह्मणकण्टक ब्राह्मणशत्रो । मुनिभिः यत्कृते यन्निमित्तं । शङ्कितैः सद्भिः अग्नौ हविः पात्यते हविर्दानसमयेपि किमेतदपहरिष्यन्तीति भीता भवन्तीत्यर्थः ॥ १२—१३ ॥ अवलिप्तोसि गर्वितोसि । दृढं निश्चितं । ततः कारणात् । भयेषु भयकारणेषु सत्स्वपि । निर्भयोसि वाच्यं चावाच्यं च वाच्यावाच्यं । "येषां च विरोधः शाश्वतिकः" इति द्वन्द्वैकवद्भावः । तन्मृत्युवश्यः सन् न बुध्यस इति योजना ॥ १४ ॥ उक्तमर्थं विशिष्य दर्शयति—कालेति । परिक्षिप्ताः बद्धाः ।

॥ ३ ॥ **स०** अमृतमित्यनेन खरदेहे सचेतनोस्तीति सूचितं ॥ ५ ॥ **स०** शयिते शायिते । **ति०** शरण्यानां तपोमहिम्ना सर्वजनशरण्यानां ॥ ८ ॥ **स०** हतस्थाने राक्षस तव मृतस्थानेसति । यद्वा तवजनस्थाने राक्षसानांमृतस्थानेसति ॥ ९ ॥ **स०** भयात् दीनाः अन्यभयावहाः अन्येषांस्वविकारेणभयावहाः ॥ १० ॥ **ति०** शङ्कितैः त्वद्भटेभ्यः । यद्यपि भगवतईदृशेषुक्षुद्रेष्वेवंवादोऽनुचितः । तथापि निरयस्थमिति स्वोक्तिं सत्यांकर्तुं मरणकाले क्रोधजनकतमोगुणोद्रेकस्य तामसगुणगतिसंपादकस्योद्भवायेतिबोध्यम् ॥ १२ ॥ **ती०** वस्तुतस्तु एवंब्रुवाणंरामं मृत्युवश्यः खरः हेराम त्वं वाच्यावाच्यंनबुध्यसइति दृढमवलिप्तोसीतिच निर्भर्त्सयामासेतिसंबन्धः ॥ १३—१४ ॥ एवंनिर्भर्त्सनेहेतुमाह—**कालपाशेति** । लोकेकालपाशपरिक्षिप्ताः पुरुषाः महात्मानमपि निर्भर्त्सयन्त्येवेतिभावः । **ति०** मृत्युकाले स्फुरितभगवद्रूपश्लेषेणस्वाविनयंक्षमापयतिच—**कालेति** । अतस्त्वया मदुक्तयः क्षन्तव्याइति व्यङ्ग्यमित्यन्ये । तेषां निरयस्थमितिभगवदुक्तेरसंगतिस्स्पष्टैव । **शि०** मनसोपीन्द्रियत्वमितिमतेन मनसः प्रधा-

[पा०] १ क. ख. ग. महमास्र. ङ—झ. ट. मिदमश्रु. २ क. च. छ. ज. ञ. राक्षस. ३ क.—ट. भिन्नकण्ठस्य. ४ च. छ. ञ. दूषितं. ख. ग. रूषितं. घ. शोभितं. ५ क. ग. ङ.—ट. समाश्लिष्य. ६ क. ख. च. ज. प्रबद्ध. ७ ङ. झ. ट. भविष्यन्तिशरण्यानां. घ. प्रभवन्त्यशरण्यानां. ८ क. ग. नयनाः. ९ क. च. ज. निशाचर. १० क. ग. ङ.—ट. नृशंसशील. ११ क. ग. कण्टकः. १२ क. ग. ङ. झ. ट. त्वत्कृते. १३ ङ. झ. ट. वने. १४ ङ. च. झ. ट. खरः. १५ ख. प्रयाहि. १६ ख. ध्रुवंकालपरिक्षिप्ता. १७ ख. वाच्यावाच्यं.

एवमुक्त्वा ततो रामं संरुध्य भ्रुकुटीं ततः ॥ स ददर्श महासालमविदूरे निशाचरः ॥
रणे प्रहरणस्यार्थे सर्वतो[1]ह्यवलोकयन् ॥ १६ ॥
स तमुत्पाटयामास [2]संदश्य दशनच्छदम् ॥ १७ ॥
तं समुत्क्षिप्य बाहुभ्यां वि[3]नद्य च [4]महाबलः ॥ राममुद्दिश्य चिक्षेप हतस्त्वमिति चाब्रवीत् ॥ १८ ॥
तमापतन्तं बाणौघैश्छित्त्वा रामः प्रतापवान् ॥ रोषमाहारयत्तीव्रं निहन्तुं समरे खरम् ॥ १९ ॥
जातस्वेदस्[5]ततो रामो रो[6]षाद्रक्तान्तलोचनः ॥ नि[7]र्बिभेद सहस्रेण बाणानां समरे खरम् ॥ २० ॥
तस्य [8]बाणान्तराद्रक्तं बहु सुस्राव फेनिलम् ॥ गिरेः प्र[9]स्रवणस्येव तोयधारां[10]परिस्रवः ॥ २१ ॥
वि[11]ह्वलः स कृतो बाणैः खरो रामेण संयुगे ॥ मत्तो रुधिरगन्धेन तमे[12]वाभ्यद्रवद्द्रुतम् ॥ २२ ॥
तमापतन्तं सं[13]रब्धं [14]कृतास्त्रो रुधिराप्लुतम् ॥ अ[15]पासर्पत्प्रतिपदं किंचित्त्वरितविक्रमः ॥ २३ ॥
ततः पावकसंकाशं वधाय समरे शरम् ॥ खरस्य रामो जग्राह ब्रह्मदण्डमि[16]वापरम् ॥ २४ ॥
[17]स तं दत्तं मघवता सुरराजेन धीमता ॥ संदधे [18]चापि धर्मात्मा [19]मुमोच च खरं प्रति ॥ २५ ॥

निरस्तषडिन्द्रियाः निरस्तषडिन्द्रियव्यापाराः ॥१५॥ भ्रुकुटीं संरुध्य कुटिलेत्यर्थः । प्रहरणस्यार्थे आयुधार्थं । सर्वतोवलोकयन्सन्नपि दूरे महासालं ददर्शेत्यन्वयः ॥ १६ ॥ दशनच्छदं अधरं । संदश्य निपीड्य । अनेन सालस्य दुर्ग्रहत्वमुक्तं ॥ १७ ॥ बाहुभ्यामित्यनेन सालस्थौल्यमुक्तं । विनद्येत्यादिना जयाशोच्यते ॥ १८ ॥ रोषमिति सर्वसामग्रीविरहेप्यानुकूल्यलेशाभावादिति भावः ॥ १९ ॥ रोषाज्जातस्वेदः नतु श्रमात् । रक्तान्तलोचनः रक्तवर्णापाङ्गः ॥ २० ॥ बाणान्तरात् बाणक्षतविवरात् । फेनिलं फेनवत् । प्रस्रवणस्य प्रस्रवणाख्यस्य । परिस्रवः प्रवाहः ॥ २१ ॥ विह्वलः विक्लवः । रुधिरगन्धेनोपलक्षितः ॥ २२ ॥ संरब्धं संभ्रान्तं । प्रतिपदं अस्त्रमोचनप्रतिकूलं तं खरं किंचिदपासर्पत् पश्चादागतः तस्मादपासर्पदित्यर्थः । अपसर्पणनिमित्तमाह—कृतास्त्र इति । संहितास्त्रत्वात् अस्त्रमोचनावकाशलाभायापासर्पदिति भावः । निमित्तान्तरमाह—रुधिराप्लुतमिति । तत्स्पर्शबीभत्सेनापसर्पणमित्यर्थः । यद्यपि किंचिदपसर्पणं शूरस्यायुक्तं तथापि " सर्वतो बलवती ह्यन्यथानुपपत्तिः " इति न्यायेनापसर्पणं विना तत्संहारहेत्वलाभादपसर्पणं न दोष इति हृदयम् ॥ २३ ॥ ततः बाणपातावसरलाभात् । ब्रह्मदण्डं ब्रह्मशापं ॥ २४ ॥ धीमता भावज्ञेन दत्तं अगस्त्यमुखेनेति शेषः

नत्वेनचेन्द्रियाणांषट्त्वमिति नानुपपत्तिः॥१५॥ **ति०** जातस्वेदः रोषादितिशेषः । नतुश्रमादिति । अयंरोषोपि भगवताऽऽरोपितएव नटवत् । नतु वास्तवोमानुषत्वस्थिरीकरणायेतिबोध्यं । **स०** जातस्वेदइव ॥२०॥ **ति०** विकलः परवशः कृतः । नतु मृत इत्यर्थः ॥ २२ ॥ **तनि०** संरब्धं अतिक्रुद्धं । आपतन्तं आयुधप्रसारणानवकाशतयाऽतिसन्निकृष्टमागच्छन्तं । तत्रहेतुः **त्वरितविक्रमइति** । शस्त्रसन्धानावकाशार्थं त्वरितविक्रमतया किंचिदपासर्पदित्यर्थः । हेत्वन्तरमाह—**रुधिराप्लुतमिति** । तद्देहरुधिरस्य स्वस्मिन्संश्लेषोभवेदिति जुगुप्सयेत्यर्थः । इदमेवाभिप्रेत्य वेदान्ताचार्यैरुक्तं क्वचिदतिसंकटविषये सुभटानामभिमतोऽयमपसर्पइति । **शि०** कृतास्त्रः कृतानि छिन्नानि अस्त्राणि खरायुधानियेनसः । **ति०** आपतन्तं बाणक्षेपावकाशोयथानभवति तथोपर्यापतन्तंखरंदृष्ट्वा अत्यासत्तौधनुर्व्यापारो नस्यादिति स्वशरीरे तद्रुधिरपातभियाच द्वित्रीणिपदानित्वरितपदन्यासोबाणंसंदधदेव पृष्ठतोपासर्पत । अनेन महाबलत्वंखरस्योक्तं । नह्यन्यथा रामधनुश्छेदोऽनन्ततद्बाणसहनंवा सुशकं । अतएवाग्रे तद्वधाय विशिष्यस्वशक्तिरूपवैष्णवबाणग्रहणं ॥ २३ ॥ **स०** सधर्मात्मा धर्मेआत्मा मनः धर्मात्मा तेनसहितः सधर्मात्मा ॥ २५ ॥

[**पा०**] १ क. ग. व्यवलोकयन्. २ ङ. झ. ञ. ट. संदष्टदशनच्छदं. ३ क.—ट. विनर्दित्वा. ४ ख. महाबलं. ५ घ. स्तथा. क. ख. स्तदा. ६ ङ. झ. ट. रोषरक्तान्त. ७ ग. बिभेदच. क. ख. तं बिभेद. ८ क. च. छ. तस्मिन्बाणान्तरे रक्तं. ग. तत्र बाणान्तररक्तं. ९ क. प्रस्रवतोयद्रुत्. १० ङ. झ. ट. धाराणां च परिस्रवः. ११ ङ. झ. ट. विकलः. १२ च. छ. ज. ञ. मेवाभ्यपतत्. क. तमेवाभ्यागमत्. १३ क. ग. ङ. झ. ट. संक्रुद्धं. च. छ. ज. ञ. संप्रेक्ष्य. १४ क. ग. रुधिरौघपरिप्लुतं. १५ ङ. झ. अपासर्पद्द्वित्रिपदं. १६ क. ग. मिवोद्यतं. १७ घ. च. छ. ज. ञ. सतुदत्तं. ङ. झ. ट. सतद्दत्तं. १८ क. ग. ङ.—ट. चसधर्मात्मा. १९ ख. समुमोच.

स विमुक्तो महाबाणो निर्घातसमनिस्वनः ॥ रामेण धनुरायम्य खर[1]स्योरसि चापतत् ॥ २६ ॥
स पपात खरो भूमौ दह्यमानः शराग्निना ॥ [2]रुद्रेणेव विनिर्दग्धः श्वेतारण्ये [3]यथान्तकः ॥ २७ ॥
स वृत्र इव वज्रेण फेनेन नमुचिर्यथा ॥ [4]बलो वेन्द्राशनिहतो निपपात हतः खरः ॥ २८ ॥
ततो राजर्षयः सर्वे सं[5]गताः परमर्षयः ॥ सभा[6]ज्य मुदिता [7]राममिदं वचनमब्रुवन् ॥ २९ ॥
एतदर्थं महातेजा महेन्द्रः पाकशासनः ॥ शरभङ्गाश्रमं पुण्यमाजगाम पुरंदरः ॥ ३० ॥
आनीतस्त्वमिमं देशमुपायेन महर्षिभिः ॥ एषां वधार्थं [8]क्रूराणां रक्षसां [9]पापकर्मणाम् ॥ ३१ ॥
तदिदं नः कृतं कार्यं त्वया दशरथात्मज ॥ [10]सुखं धर्मं चरिष्यन्ति दण्डकेषु महर्षयः ॥ ३२ ॥
[11]एतस्मिन्नन्तरे देवाश्चारणैः सह संगताः ॥ दुन्दुभींश्चाभिनिघ्नन्तः पुष्पवर्षं समन्ततः ॥
रामस्योपरि संहृष्टा ववृषुर्विस्मितास्तदा ॥ ३३ ॥
अर्धाधिकमुहूर्तेन रामेण निशितैः शरैः ॥ चतुर्दशसहस्राणि रक्षसां भीम[12]कर्मणाम् ॥ ३४ ॥
खरदूषणमुख्यानां निहतानि [13]महाहवे ॥ अहो बत महत्कर्म रामस्य विदितात्मनः ॥ ३५ ॥
अहो वीर्यमहो दाक्ष्यं विष्णोरिव हि दृश्यते ॥ इत्येवमुक्त्वा ते सर्वे ययुर्देवा [14]यथागतम् ॥ ३६ ॥
एतस्मिन्नन्तरे वीरो लक्ष्मणः सह सीतया ॥ [15]गिरिदुर्गाद्विनिष्क्रम्य संविवेशाश्रमं [16]सुखी ॥ ३७ ॥
ततो रामस्तु विजयी पूज्यमानो महर्षिभिः ॥ [17]प्रविवेशाश्रमं वीरो लक्ष्मणेनाभि[18]पूजितः ॥ ३८ ॥
तं दृष्ट्वा शत्रुहन्तारं महर्षीणां सुखावहम् ॥ बभूव हृष्टा वैदेही भर्तारं परिषस्वजे ॥ ३९ ॥

॥ २५ ॥ रामेण धनुरायम्य आकृष्य । विमुक्त इत्यन्वयः ॥ २६ ॥ स खरः शराग्निना दह्यमानः सन् रुद्रेण रुद्रनेत्राग्निना । दग्धोन्तक इव श्वेतारण्येयथा श्वेतारण्य इव । भूमौ पपात ॥ २७ ॥ सः रामबाणेन हतः खरः । अमोघबाणहतत्वज्ञापनाय प्रथमो दृष्टान्तः । लीलया हतत्वज्ञापनाय द्वितीयः । समर्थाधिष्ठितत्वज्ञापनाय तृतीयः । आर्द्राच्छुष्काचाव-ध्यत्वं नमुचेर्लब्धं तदर्थं फेनेन हतः । बलो वेति वा-शब्द इवार्थः । वृत्रादित्रयमिन्द्रेणैव हतं ॥ २८ ॥ परमर्षयः ब्रह्मर्षयः । सभाज्य संपूज्य ॥ २९ ॥ एतदर्थं एतद्वधाय ॥ ३० ॥ इदमुपपादयति— आनीत इति । उपायेन तत्तदाश्रमदर्शनव्याजेन ॥३१—३२॥ एतस्मिन्नित्याद्यर्धत्रयमेकान्वयं ॥३३॥ रामं स्तुवन्ति—अर्धेत्यादिना । अर्धाधिकमुहूर्तेन घटिकात्रयेण ॥ ३४—३५ ॥ दाक्ष्यं सर्वसंहारचातुर्यम् ॥ ३६ ॥ अन्तरे अवसरे । गिरिदुर्गात् गिरिदुर्गप्रदेशात् । सुखी रामपराक्रमदर्शनजन्यसंतोषवान् ॥ ३७—३८ ॥ चतुर्दशसहस्ररक्षोभिरयमेकाकी किं करिष्यतीत्युद्विग्ना सीता रामेण जिते वीरतारतम्याभिज्ञकुलप्रसूततया सबहुमानं परिषस्वज

ति० श्वेतारण्येयथान्धकः अन्धकासुरः श्वेतारण्ये रुद्रेणहतइति पुराणप्रसिद्धं । रुद्रेणेवेतीवशब्दो वाक्यालङ्कारे । श्वेतारण्येयथान्तकइति प्रचुरः पाठः । तत्र कावेरीतीरवर्तिनिश्वेतारण्ये मार्कण्डेयचिरजीवित्वायान्तकसंहारो रुद्रेणकृतइति तन्माहात्म्येप्रसिद्धिः । कौर्मेतूत्तरखण्डे—श्वेतस्यराजर्षेः परमशैवस्य कालञ्जरेपर्वते तपस्यभिरतस्य मारणायागतस्यान्तकस्य शिवेन वामपादप्रहारेण संहारः कृतइति षट्त्रिंशेऽध्यायेउक्तं ॥ २७ ॥ **ति०** फेनेन तदाच्छादितवज्रेण । एवंचान्तकादिवधस्य रुद्रेन्द्रातिरिक्तासाध्यत्ववत्खरवधस्य रामातिरिक्तासाध्यत्वं प्रकाशितंकविना ॥ २८ ॥ **स०** विदितात्मनः विख्यातस्वरूपस्य विष्णोरिवेत्यन्वयः । "स्वदृष्टान्तोहरेर्भवेत्" इतिऋग्भाष्यं ॥ ३५॥ **ती०** "तेतुयावन्तएवाजौ तावांस्तु ददृशेसतैः" इत्युक्तरीत्या तात्कालिकस्वेच्छागृहीत-

[पा०] १ क. स्योरस्यवापतत्. २ घ. रुद्रेणपरिनिर्दग्धः. ३ ग. च. झ. ञ. यथान्धकः. ४ ग. बलोवज्राशनिहतो. ख. बलोवज्राभिनिहतो. च. छ. ज. बलोयथाऽशनिहतो. ५ च. छ. ज. ञ. संगताश्रमहर्षयः. ६ घ. समेत्य. ७ ङ. झ. ट. सागस्त्याइदमब्रुवन्. ८ ङ. झ. ट. शत्रूणां. क. च. छ. ज. ञ. शूराणां. ९ घ. क्रूरकर्मणां. १० ङ. झ. ट. स्वधर्मंप्रचरिष्यन्ति. ११ एतस्मिन्नन्तरेदेवाश्चारणैरित्यारभ्य. ययुर्देवायथागतमित्यन्तं विद्यमानाश्चत्वारःश्लोकाः ङ. झ. ट. पुस्तकेषु ततो राजर्षयः सर्वे इति श्लोकात्पूर्वं समुपलभ्यन्ते. १२ क. ग. ङ—ट. कामरूपिणां. १३ क. ग. ङ—ट. महामृधे. १४ ख. यथासुखं. १५ ख. गिरिकुञ्जात्. १६ च. छ. ज. सुखं. १७ क. ग. घ. प्रविवेशाश्रमपदं. १८ क. च. छ. ज. ञ. वन्दितः. ग. वन्दितः.

मुदा परमया युक्ता दृष्ट्वा रक्षोगणान्हतान् ॥ रामं चैवा[1]व्यथं दृष्ट्वा तुतोष जनकात्मजा ॥ ४० ॥

इत्याह । तं दृष्ट्वा पूर्वं महासमरे अदृश्यतया स्थितं इदानीं दृष्ट्वा । तं दृष्ट्वा "वीरव्रणेन विगलद्रुधिरेण रोमकूपोल्लसद्भिरपि घर्मपयःकणौघैः । कोदण्डदण्डमवलम्ब्य विनीय वर्म किंचित्परिश्रमभृतं प्रियमीक्षमाणा" इत्युक्तप्रकारं दृष्ट्वा । तं दृष्ट्वा ततोद्ग्रथितजटामण्डलेन दृढबद्धकक्ष्यतया स्कन्धावलम्बितूणीरेण रणावसाननिर्वापितकोपाग्नितया प्रसन्नवदनेन सीतालक्ष्मणमार्गावलोकनेन पुनरपि किमागमिष्यन्ति राक्षसा इति दत्तावधानेन च लक्षितं दृष्ट्वा । तं दृष्ट्वा । पूर्वं वीर इति श्रुतं इदानीं निर्वर्तितवीरकृत्यं दृष्ट्वा । दर्शनप्रकारमाह शत्रुहन्तारं हननव्यापारे कर्मभावः शत्रूणां । स्वस्य तु कर्तृभाव एव । हन्तारं हननव्यापार एव दृष्टः नतु शरसंधानादिव्यापार इत्यर्थः । शत्रुपदेन देवगन्धर्वादिसङ्गेसत्यपि शत्रूनेव हतवानित्युच्यते । दुष्टनिग्रह उक्तः । शिष्टपरिपालनमाह—महर्षीणां सुखावहं महर्षीणां तपोलेशेन हन्तुं सामर्थ्येपि रक्षकस्वरूपस्यरक्ष्यभूतस्वस्वरूपस्य च हानिर्मा भूदिति केवलं रक्षकव्यापारप्रतीक्षाणां रामप्रतिज्ञामेवावलोकयतां । सुखावहं "एहि पश्य शरीराणि" इत्युक्तदुःखगन्धं निवर्त्य सुखस्यैव प्रापकं । बभूव बहुतरशत्रुगणाक्रमणाद्रामस्यैकाकितया च पूर्वं सत्तारहिता सीता संप्रति सत्तां लेभे जगत्प्राणस्य रामस्य सत्तालाभात् स्वयमपि सत्तामवाप । "आत्मा वै पुरुषस्य दाराः" इत्युक्तरीत्या रामसत्तालाभात्स्वस्या अपि सत्ता जातेति भावः । यद्वा भूप्राप्तावित्यस्माल्लिटि व्यत्ययेन परस्मैपदं । भर्तारं विजयिनमालोक्य सरभसं गुहान्तरादागतेत्यर्थः । दृष्टा "सति धर्मिणि धर्माः" इति न्यायेन धर्मिलाभानन्तरं तद्धर्महर्षोभूदित्यर्थः । यद्वा आन्तरप्रीत्यङ्कुरोपमरोमाञ्चाञ्चितेत्यर्थः । एवं शौर्यावलोकनप्रीतत्वेहेतुमाह वैदेही । "मिथिलाधिपतिर्वीरः" इत्युक्तरीत्या वीरकुलप्रसूतत्वादित्यर्थः । भर्तारं परिषस्वजे तादृशनिरवधिकप्रेमभारभरिततया स्वयमालिलिङ्गे । भर्तारं लोकभर्तारं । सर्वलोकमातृत्वेन सर्वप्रजारक्षणं दृष्ट्वा परिषस्वजे । आयुधक्षतव्रणेषु सुखोष्णाभ्यां स्तनाभ्यां पस्पर्श परिषस्वजे पर्याप्तं सस्वजे । पश्चात् पुरस्तात् पार्श्वतश्च पस्पर्शेत्यर्थः । यद्यपि रणे अपलायमानस्य पृष्ठे शरपातप्रसङ्ग एव नास्ति तथापि सर्वतः समावृत्य आयुधप्रक्षेपात् पृष्ठतोपि व्रणसंभवः बाणानां सम्यक्प्रक्षिप्तानां पृष्ठतो निर्गमोपि संभवति । महर्षीणां सुखावहं परिषस्वजे पुत्रविषये स्वभर्त्रोपकारकरणे पुत्रवात्सल्याद्भर्तरि संतुष्टा भार्येव ऋषिजनसंरक्षणेन प्रीता परिषस्वजे । रामं विना गुहागता सीता ततो निर्गत्य निरस्तसमस्तशत्रुं रामं परिषस्वज इत्यनेन हृदयगुहागतो जीवः परतन्त्रः आचार्यमुखेन परमशेषिणं दृष्ट्वा तेन सकलविरोधिवर्गे निवर्तिते ततो निर्गत्य नित्यसूरिपरिषदासीनं शेषिणमासाद्य तद्भोगपरिवाहमनुबभूवेति ध्वन्यते ॥ ३९ ॥ उक्तमेवार्थं

चतुर्दशसहस्रदिव्यमङ्गलविग्रहवत्तया प्रतिराक्षसंप्रत्येकं रामइवस्थित्वा दृश्यमानमिति तच्छब्दार्थः । यद्वा इन्द्रादिभिरपि संभूयाप्रधृष्यान्बलीयसश्चतुर्दशसहस्रराक्षसानेकएवार्धाधिकमुहूर्तेन स्वयमक्षतएव लीलयासंहृत्य स्वपुरस्स्थितं । "राम जामातरंप्राप्य स्त्रियंपुरुषविग्रहं" इत्यात्मनाऽज्ञानात्पूर्वंविप्रलब्धमितिवा तच्छब्दार्थः । "तैर्धनूंषिध्वजाग्राणि वर्माणिचशिरांसिच । बाहून्सहस्ताभरणानूरून्करिकरोपमान् । चिच्छेद समरेरामः" इत्युक्तप्रकारेण शत्रुहन्तारंदृष्ट्वेत्यर्थः । किंच "परित्राणायसाधूनां विनाशायच दुष्कृतां । धर्मसंस्थापनार्थाय संभवामियुगेयुगे" इति स्वप्रतिज्ञां परिपालयन्नवतीर्यासतोराक्षसान्हत्वा सतामृष्यादीनां जगन्मोहनदिव्यमङ्गलस्वमूर्तिसाक्षात्कारेण परमानन्दं संपादितवानित्याह—**महर्षीणांसुखावहमिति** ॥ ३९ ॥ **तनि०** रक्षोगणान्हतानिति वीर्यगुणविवरणं । तत्र रामंचैवाव्यथमिति वीर्यलक्षणे स्वयमक्षतइति विशेषविवरणं । रक्षोगणान्हतानित्यनेन यः पराजयतीति लक्षणगतविशेष्यविवरणं ॥ ४० ॥

[पा०] १ क. ग. ङ–ट. चैवाव्ययं.

ततस्तु तं राक्षससङ्घमर्दनं संभाज्यमानं मुदितैर्महर्षिभिः ॥
पुनः परिष्वज्य शशिप्रभानना बभूव हृष्टा जनकात्मजा तदा ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे त्रिंशः सर्गः ॥ ३० ॥

एकत्रिंशः सर्गः ॥ ३१ ॥

अकंपननाम्नाराक्षसेनलङ्कामेत्यरावणंप्रतिश्रीरामेणखरादिसकलराक्षसक्षपणनिवेदनम् ॥ १ ॥ तथारामवधप्रतिज्ञानेन जनस्थानप्रस्थानोन्मुखंदशमुखंप्रतिराममहिमानुवर्णनेनतस्यसर्वाबध्यत्वकथनपूर्वकंसीतापहारस्यतद्वधोपायत्वकथनम् ॥ २ ॥ रावणेनमारीचाश्रममेत्यतंप्रतिरामेणखरादिनिधननिवेदनपूर्वकंसीतापहरणेसाहाय्यकरणप्रार्थना ॥ ३ ॥ मारीचेनरावणंप्रति रामप्रभावप्रतिपादनपूर्वकंतस्याजय्यत्वकथनेनतस्यपुनर्लङ्कांप्रतिनिवर्तनम् ॥ ४ ॥

त्वरमाणस्ततो गत्वा जनस्थानादकम्पनः ॥ प्रविश्य लङ्कां वेगेन रावणं वाक्यमब्रवीत् ॥ १ ॥
जनस्थानस्थिता राजन्राक्षसा बहवो हताः ॥ खरश्च निहतः सङ्ख्ये कथंचिदहमागतः ॥ २ ॥
एवमुक्तो दशग्रीवः क्रुद्धः संरक्तलोचनः ॥ अकम्पनमुवाचेदं निर्दहन्निव चक्षुषा ॥ ३ ॥

विशदं दर्शयति द्वाभ्यां—मृदेत्यादि ॥४०—४१॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रिंशः सर्गः ॥ ३० ॥

एवं शरणागतिमन्त्रविवरणरूपे श्रीरामायणे इयता ग्रन्थसंदर्भेण उत्तरखण्डार्थो विवृतः । अनुष्ठानदशायां हि प्रथमखण्डार्थस्य प्राथम्यं व्युत्पत्तिदशायां तूत्तरखण्डार्थस्य फलानुसारेणोपायप्रवृत्तेः । अतो द्वितीयखण्डार्थः प्रथमं विवृतः । तत्र बालकाण्डे प्रथमपदार्थभूतपुरुषकारयोगो दर्शितः । अयोध्याकाण्डे द्वितीयपदार्थभूतसौलभ्यादिगुणयोगः । आरण्यकाण्डे शूर्पणखागमनात्पूर्वभाविवृत्तान्तेन चतुर्थ्यर्थभूता किंकरवृत्तिरुक्ता । ततः खरवधान्तवृत्तान्तेन चरमपदार्थभूता विरोधिनिवृत्तिरिति । अथ पूर्वखण्डार्थ उच्यते शास्त्रशेषेण । तत्र चारण्यकाण्डशेषेण विभीषणस्य पुरुषकारसान्निध्यमुच्यते । किष्किन्धाकाण्डेन नारायणपदार्थभूतं वात्सल्यं । सुन्दरकाण्डेन चरणशब्दोक्तदिव्यमङ्गलविग्रहवैशिष्ट्यं । "रामःकमलपत्राक्षः" इत्यादिना तथोक्तेः । युद्धकाण्डे शरणागतिः । उत्तरकाण्डे प्रपन्नचर्येति बोध्यं । एवमानुषङ्गिकमुनिजनशरणागतिफलं देवशरणागतिकार्यरावणवधाङ्गत्वेनोक्त्वा अथ तन्निमित्तभूतसीतापहाररूपबीजमुपक्षिपति—त्वरमाण इत्यादिना ॥ संहृत्य सकलं लोकं पुनः स्रष्टुं च यः क्षमः । तमहं शिरसा वन्दे जानकीप्राणनायकम् ॥ त्वरमाणः शूर्पणखागमनापेक्षयेति शेषः । अकम्पनो रावणचारः । त्वरमाणो गत्वा वेगेनाब्रवीदित्यन्वयः ॥ १ ॥ कथंचिदिति स्त्रीवेषधारणेनेति भावः । अतएव शूर्पणखा वक्ष्यति । "एका कथंचिन्मुक्ताहं परिभूय महात्मना । स्त्रीवधं शङ्कमानेन राघवेण महात्मना" इति ॥ २ ॥ क्रुद्धत्वं नारोपितमितिज्ञापयितुं संरक्तलोचन इत्युक्तं कोपा-

ति० हर्षातिशयात्पुनरालिङ्गनं । इदंयुद्धंप्रायश्शिशिरार्धे ॥ ४१ ॥ टीका० सर्गफलंस्कान्दे—"श्रुत्वा श्रीरामविजयं पापबन्धात्प्रमुच्यते । तथैव शृङ्खलाबन्धादृणबन्धाद्विमुच्यते । श्रुत्वा पुष्पवतीनारी तनयं वंशवर्धनं । लभते राघवेन्द्रस्य प्रसादात्कीर्तिवर्धनम् । " इति ॥ इतित्रिंशस्सर्गः ॥ ३० ॥

स० जनस्थानात् तदन्तर्गतगोदावरीतीरात् । गत्वा शूर्पणखागमनात्पूर्वमितिशेषः ॥ १ ॥ स० कथंचित् पलायनादिना । ति० कथंचित् केवलंप्रेक्षकतया स्थितत्वाद्रामबाणाविषयीकृतइत्याशयः ॥ तनि० लङ्काया जनस्थानं पुरद्वारसदृशंखलु । लङ्कायाराज्यं जनपदग्रामादिसंकुलंकिंचिदपि नास्तिखलु । एकालङ्का तस्यारक्षाभूतं जनस्थानमेकं । तस्य नाशाल्लङ्कायाअपावृतद्वारंसंवृत्तं राजंस्तवैव सत्ताहानिःखलु । राक्षसाः राक्षसराजस्य तव । तन्नाशेराजत्वंनाशितंकिल । बहवः एकद्वित्रिनाशेपि हानिर्भवत्येव किमुत बहूनांनाशे । हताः मारिताः । नतु सप्राणाः । सर्वराक्षसनाशे खरेणकिंकृतमित्यत्राह—खरश्चेति । चकारेण

[पा०] १ ङ. झ. ट. संपूज्यमानं. २ ङ. झ. ट. महात्मभिः. ३ ङ. झ. ट. मुदान्वितानना. ४ ङ.—ट. तेजसा.

केन [1]रम्यं जनस्थानं हतं मम परासुना ॥ [2]को हि सर्वेषु लोकेषु गतिं [3]चाधिगमिष्यति ॥ ४ ॥
न हि मे विप्रियं कृत्वा शक्यं मघवता सुखम् ॥ प्राप्तुं वैश्रवणेनापि [4]न यमेन न विष्णुना ॥ ५ ॥
कालस्य चाप्यहं कालो दहेयमपि पावकम् ॥ मृत्युं मरणधर्मेण संयोजयितुमुत्सहे ॥ ६ ॥
[5]दहेयमपि संक्रुद्धस्तेजसाऽऽदित्यपावकौ ॥ वातस्य तरसा वेगं निहन्तुम[6]हमुत्सहे ॥ ७ ॥
तथा क्रुद्धं दशग्रीवं कृताञ्जलिरकम्पनः ॥ भयात्संदिग्धया वाचा रावणं याचतेऽभयम् ॥ ८ ॥
दशग्रीवोऽभयं तस्मै प्रददौ रक्षसां वरः ॥ स विस्रब्धोऽब्रवीद्वाक्यमसंदिग्धमकम्पनः ॥ ९ ॥
पुत्रो दशरथस्या[7]स्ति सिंहसंहननो युवा ॥ रामो नाम [8]वृषस्कन्धो वृत्तायतमहाभुजः ॥ १० ॥
[9]वीरः पृथुयशाः श्रीमानतुल्यबलविक्रमः ॥ [10]हतं तेन जनस्थानं खरश्च सहदूषणः ॥ ११ ॥
अकम्पनवचः श्रुत्वा रावणो राक्षसाधिपः ॥ [11]नागेन्द्र इव निःश्वस्य [12]वचनं चेदमब्रवीत् ॥ १२ ॥
स सुरेन्द्रेण संयुक्तो रामः सर्वामरैः सह ॥ उपयातो जनस्थानं ब्रूहि कच्चिदकम्पन ॥ १३ ॥
रावणस्य पुनर्वाक्यं निशम्य तदकम्पनः ॥ आचचक्षे बलं तस्य विक्रमं च महात्मनः ॥ १४ ॥
रामो नाम महातेजाः श्रेष्ठः सर्वधनुष्मताम् ॥ दिव्यास्त्रगुणसंपन्नः [13]पुरंदरसमो युधि ॥ १५ ॥
तस्यानुरूपो बलवान्[14]रक्ताक्षो दुन्दुभिस्वनः ॥ कनीयाँल्लक्ष्मणो [15]नाम भ्राता शशिनिभाननः ॥ १६ ॥
स तेन सह संयुक्तः पावकेनानिलो यथा ॥ श्रीमान्राजवरस्तेन जनस्थानं निपातितम् ॥ १७ ॥
नैव देवा महात्मानो नात्र कार्या विचारणा ॥ १८ ॥
शरा रामेण तूत्सृष्टा रुक्मपुङ्खाः पतत्रिणः ॥ सर्पाः पञ्चानना भूत्वा भक्षयन्ति स्म राक्षसान् ॥१९॥
येन येन[16] च गच्छन्ति राक्षसा [17]भयकर्शिताः ॥ तेन तेन[18] स्म पश्यन्ति राममेवाग्रतः स्थितम् ॥
इत्थं विनाशितं तेन जनस्थानं तवानघ ॥ २० ॥

तिरेकं दृष्टान्तमुखेनाह—निर्दहन्निवेति ॥ ३ ॥ परागताः असवः प्राणाः यस्य तेन परासुनेति परुषभाषणमात्रं । गम्यत इति गतिः स्थानं ॥ ४—५ ॥ कालस्यापि काल इत्यत्रोपपत्तिमाह—मृत्युमिति ॥ ६ ॥ आदित्यपावकौ परस्परसाहाय्येन संयुक्तावपीत्यर्थः । अतो न पुनरुक्तिः ॥ ७ ॥ संदिग्धया सदिग्धाक्षरया । याचते अयाचत । अभयमिति छेदः ॥ ८—११ ॥ नागेन्द्रः सर्पेन्द्रः ॥ १२ ॥ स रामः सुरेन्द्रेणामरैश्च युक्तः सन् जनस्थानमुपयातः कच्चित् । अन्यथा तस्यैतादृशसामर्थ्यं न युज्यत इति भावः ॥ १३—१४ ॥ इन्द्रादिसहायानपेक्षो राम इत्याशयेनाह—रामो नामेत्यादिना । दिव्यास्त्रगुणसंपन्नः दिव्यास्त्रकृतातिशययुक्तः ॥१५॥ रक्ताक्षः रक्तरेखाञ्चितनयनः । दुन्दुभिस्वनः दुन्दुभिवत् गम्भीरस्वनः । संयुक्त इति वर्तत इति शेषः ॥ १६—१७ ॥ नैव देवा इति । सहायार्थमागता इतिशेषः ॥ १८ ॥ पञ्चाननाः विस्तृताननाः भूत्वा भक्षयन्ति स्मेत्युत्प्रेक्षा ॥ १९ ॥ राक्षसाः भयकार्शिताः भयपीडिताः सन्तो येन येन

दूषणत्रिशिरसावुच्येते ॥ २ ॥ **स०** परासुना मृतेन । तस्यमरणंनिश्चित्येयमुक्तिः । गतिं त्रातारं ॥ ४ ॥ **स०** सिंहसंहननः वराङ्गरूपोपेतः । " वराङ्गरूपोपेतोयस्सिंहसंहननोहिसः " इत्यमरः ॥ १० ॥ **स०** हेइन रावण सता लक्ष्मणेन यःश्रीमान्राजवरोरामःसंयुक्तः तेन जनस्थानंनिपातितं । **शि०** संयुक्तः अतिविचारवान् ॥१७॥ **स०** ससुरेन्द्रेणसंयुक्तइत्यस्योत्तरमाह—**नैवेति** । देवाः एतदपेक्षया महात्मानोनैव । तस्माद्युक्तंतेषां तेन हननमितिभावः ॥ १८ ॥ **स०** पञ्चाननास्सर्पाभूत्वा तद्धन्मारकाः ॥ १९ ॥ **तनि०** येनयेन मार्गेणेत्यर्थः । अथवा येनयेन यद्यद्रूस्त्वन्तर्धानसाधनत्वबुद्ध्यागच्छन्ति तेनतेन तस्मिंस्त-

[पा०] १ ख. ङ. झ. ट. भीमं. २ क. ग. च. छ. ज. ञ. कोद्य. ३ क. ग.—ट. नाधिगमिष्यति. ४ ग. यमेनवरुणेनवा. ङ. झ. ट. नयमेनच. ५ च. छ. ज. ञ. दहेयंवास्वयंक्रुद्धः. ६ ङ. झ. मपिचोत्सहे. ७ ख. स्यासीत्. ङ. झ. ट. स्यास्ते. ८ ङ—ट. महास्कन्धो. ९ ख. ङ—ट. श्यामः. १० ग. ङ. झ. ञ. ट. हतस्तेनजनस्थाने. ११ छ. मृगेन्द्रइव. १२ क.—ट. इदंवचनमब्रवीत्. १३ क. ङ. झ. ट. परंधर्मगतो. ख. परंधामयुतो. १४ ख. त्र्यक्तास्यो. १५ ङ. झ. ट. भ्राताराकाशशिनिभाननः. १६ क. येनहि. १७ क. भयशङ्किताः. १८ क. तेनच.

अकम्पनवचः श्रुत्वा रावणो वाक्यमब्रवीत् ॥ जनस्थानं[1] गमिष्यामि हन्तुं[2] रामं सलक्ष्मणम् ॥२१॥
अथैवमुक्ते वचने प्रोवाचेदमकम्पनः ॥ शृणु राजन्यथावृत्तं रामस्य बलपौरुषम् ॥ २२ ॥
असाध्यः[3] कुपितो रामो विक्रमेण महायशाः ॥ आपगायाः[4] सुपूर्णाया वेगं परिहरेच्छरैः ॥ २३ ॥
सताराग्रहनक्षत्रं नभश्चाप्यवसादयेत् ॥ असौ रामस्तु मज्जन्तीं[5] श्रीमानभ्युद्धरेन्महीम् ॥ २४ ॥
भित्त्वा वेलां समुद्रस्य लोकानाप्लावयेद्विभुः[6] ॥ वेगं वाऽपि[7] समुद्रस्य वायुं वा विधमेच्छरैः ॥ २५ ॥
संहृत्य वा पुनर्लोकान्विक्रमेण महायशाः ॥ शक्तः[8] स पुरुषव्याघ्रः स्रष्टुं पुनरपि प्रजाः ॥ २६ ॥
न हि रामो दशग्रीव शक्यो जेतुं त्वया[9] युधि ॥ रक्षसां वाऽपि[10] लोकेन स्वर्गः पापजनैरिव ॥ २७ ॥

मार्गेण गच्छन्ति तेन तेन मार्गेणाग्रतः स्थितं राममेव पश्यन्ति स्म । अत्र विशेषणासामर्थ्याद्रामदर्शनं भयकृतमिति व्यज्यते ॥ २०—२१ ॥ यथावृत्तं परमार्थभूतमित्यर्थः ॥ २२ ॥ असाध्यः अनिग्राह्यः ॥२३॥ ग्रहाः नवग्रहाः । नक्षत्राणि सप्तविंशतिनक्षत्राणि । ताराः तदन्यज्योतींषि । अवसादयेत् विशीर्णं कुर्यात् । मज्जन्तीं समुद्र इति शेषः ॥ २४ ॥ विप्लावयेत् सिञ्चेत् । विधमेत् दहेत् । ध्मा शब्दाग्निसंयोगयोरिति धातोर्लिङि धमादेशः ॥ २५ ॥ लोकान् भूरादीन् । संहृत्य पुनः स्रष्टुं शक्तः इमाः प्रजाश्च संहृत्य पुनः स्रष्टुं शक्त इत्यर्थः ॥ २६ ॥ लोकेन समूहेन ॥२७॥

स्मिन्वस्तुनि राममेवाग्रतस्स्थितंपश्यन्ति । अत्रप्रतिराक्षसमिच्छागृहीतदेहत्वंध्वन्यते ॥ २० ॥ **तनि०** यथावृत्तं तत्कृतातिमानुषकर्मानतिक्रमेण । यद्वा रामस्यवृत्तं इतिहासपुराणोक्तवृत्तान्तं यथा यथावत् । बलं पराभिभवसामर्थ्यं । पौरुषं महापुरुषकर्म । कुपितः मर्यादोल्लङ्घनविषयनिग्रहवान् रामइति कोपस्यापरिहार्यत्वंव्यज्यते । विक्रमेणासाध्यः विक्रमेप्रवृत्ते निवारयितुमशक्यइत्यर्थः । असाध्यइतिनिरुपपदेन ब्रह्मरुद्रेन्द्रादिभिरसाध्यत्वंध्वन्यते । महायशाः लोकेवेदेचप्रसिद्धविभवः । अनेन त्रिविक्रमावतारोव्यज्यते । आपगायास्सुपूर्णायावेगंपरिहरेदित्यनेन भविष्यत्कृष्णावतारो भूतकृष्णावतारोवा व्यज्यते । "भयानकावर्तशताकुलानदी मार्गं ददौसिन्धुरिवश्रियःपतेः" इति श्रीभागवतोक्तेः । अनेन मत्स्यावतारइति केचित् ॥२३॥ **तनि०** सताराग्रहनक्षत्रं ताराः अश्विन्यादयः । ग्रहाः सूर्यादयः । तदितराणि नक्षत्राणि । नभश्चापीति तदधिष्टानाण्डकोशउच्यते । तमप्यवसादयेदित्यनेनापित्रिविक्रमावतारध्वनिः । तथाचश्रुतिः "योअस्कभायदुत्तरंसधस्थंविचक्रमाणस्त्रेधोरुगायः" इति । सीदन्तीं मज्जन्तीं । महीमभ्युद्धरेदसाविति वराहावतारोव्यज्यते"तांवराहोभूत्वाऽहरत्" इतिश्रुतेः । श्रीमानित्यवतारेषुसर्वत्रानुवृत्तिर्लक्ष्म्यास्सूच्यते । "अन्येषुचावतारेषु विष्णोरेषानपायिनी" इतिपराशरवचनात् । श्रीमानिति लक्ष्मीसमभिव्याहारबलेन संसारेमज्जन्तंचेतनमभ्युद्धरेदिति परत्वासाधारणलिङ्गमोक्षप्रदत्वंव्यञ्जितं । श्रीमान्महीमभ्युद्धरेदिति लक्ष्म्यास्सहकारित्वश्रवणेन सपत्नीद्वेषाभावोव्यज्यते ॥ २४ ॥ **तनि०** भित्वेति । समुद्रवेलाभेदेन लोकानाप्लावयेदिति संकर्षणावतारोध्वन्यते । समुद्रस्यवेगमपिविधमेदिति करिष्यमाणसमुद्रबन्धनं व्यज्यते । वायुंवाविधमेदिति पृथिव्यादिभूतोपलक्षणं । "पृथिव्यप्सुप्रलीयते, आपस्तेजसिलीयन्ते" इत्याद्युक्तप्रकारेण प्रलयं कुर्यादितिध्वन्यते । संहृत्येत्यनन्तरमनुवादात् ॥ २५ ॥ **तनि०** पुनस्संहृत्येत्यनेन पूर्वसंहारसृष्ट्योरप्येतत्कर्तृकत्वंव्यज्यते । "बभूवभूयश्चयथा महाभागभविष्यती"ति प्रश्नवल्लोकानितिबहुवचनस्यासंकोचेन साण्डास्सर्वेलोकाविवक्षिताः । विक्रमेण संकल्पमात्रेणेत्यर्थः । "एतस्यवाअक्षरस्य—" इत्यादिश्रुतेः । महायशाः षड्गुणैश्वर्यकृतप्रसिद्धिः । शक्तः अनन्तशक्तिमान् । "परास्य शक्तिः" इतिश्रुतेः । ननु नारायणस्य "एकोहवैनारायणः" इत्यादिना सृष्ट्यादिकर्तृत्वंश्रूयते कथमेतस्येति तत्राह—**सपुरुषव्याघ्रइति** । "सहिदेवैरुदीर्णस्य" इत्यादिना सएवायंनारायणोरामात्मनाऽवतीर्णइत्युक्तत्वात् । स्रष्टुंपुनरित्यत्रापि पुनश्शब्दःपूर्वसृष्टेरेतदधीनत्वव्यञ्जकः । प्रजाइतिप्रकृतिसंसृष्टचेतनवर्गस्समष्टिकारणभूतउच्यते । अकंपनस्यापि भगवत्प्रसादादेवंज्ञानं ॥ २६ ॥ **स०** स्वर्गपक्षे जेतुं प्राप्तुमित्यर्थः ॥ **तनि०** रामः विक्रमैरञ्जनीयः । दशग्रीवः अनितरसाधारणदशवदनत्वंखलु तवावलेपहेतुः रामरामानुजौतु सहस्रशीर्षाविितिव्यज्यते । त्वयाजेतुंयुधिनशक्यः अल्पशक्तिस्त्वं अपरिमितानन्तशक्तिमान्रामः कथंजेतुंशक्यः । रक्षसां नमुचिहिरण्यकशिपुशंबरबलिप्रभृतीनां । लोकेन जनेन । "कोमज्जतोरणुकुलाचलयोर्विशेषः" इति न्यायसाम्यंद्योतयितुं त्वयालोकेनेत्येकवचननिर्देशः । जयस्यात्यन्तासंभावनाद्योतयितुं स्वर्गःपापजनैरिवेत्युक्तं । प्रसिद्धैर्बहुभिरेकः

[पा०] १ क—ङ. झ. ट. गमिष्यामिजनस्थानं. २ क—ङ. झ. ट. रामंहन्तुं. ३ क. अवध्यः. ४ ङ. झ. ट. आपगायास्तु. ५ क. ग. ङ. छ—ट. सीदन्तीं. ६ ख. ग. च. छ. ज. ञ. नाप्लावयेदिमान्. ७ च. चापि. घ. सोपि. ८ ङ. झ. ट. शक्तश्चैवपुरुषः. घ. शक्तश्च. ९ ङ. झ. ट. रणेत्वया. १० घ. चापि.

न तं वध्यमहं मन्ये सर्वैर्देवासुरैरपि ॥ अयं तस्य वधोपाय[1]स्त्वं ममैकमनाः शृणु ॥ २८ ॥
भार्या तस्योत्तमा लोके सीता नाम सुमध्यमा ॥ श्यामा [2]समविभक्ताङ्गी स्त्रीरत्नं रत्नभूषिता ॥ २९ ॥
नैव देवी न गन्धर्वी नाऽप्सरा [3]नाऽपि दानवी ॥ तुल्या सीमन्तिनी तस्या [4]मानुषीषु कुतो भवेत् ॥ ३० ॥
[5]तस्यापहर भार्यां [6]त्वं [7]प्रमथ्य तु महावने ॥ [8]सीतया [9]रहितः कामी रामो हास्यति जीवितम् ॥ ३१ ॥
अरोचयत तद्वाक्यं रावणो [10]राक्षसाधिपः ॥ चिन्तयित्वा महाबाहुरकम्पनमुवाच ह ॥ ३२ ॥
बाढं काल्यं गमिष्यामि ह्येकः सारथिना सह ॥ [11]आनयिष्यामि वैदेहीमिमां हृष्टो महापुरीम् ॥ ३३ ॥

मम मत्तः । एकमनाः सावधानः ॥२८॥ "श्यामा यौवनमध्यस्था" इत्युत्पलः । समं यथा तथा विभक्तानि नेत्रकर्णाद्यङ्गानि यस्याः सा तथोक्ता । स्त्रीरत्नं स्त्रीश्रेष्ठा अस्तीति शेषः ॥ २९ ॥ देवी देवस्त्री । "पुंयोगादाख्यायां" इति ङीष् । एवमुत्तरत्रापि । अप्सरःशब्द एकवचनान्तोप्यस्ति । सीमन्तिनी स्त्री ॥ ३० ॥ महावने प्रमथ्य विलोड्य । येनकेनाप्युपायेन रामं वञ्चयेत्यर्थः ॥ ३१ ॥ चिन्तयित्वा रामोच्चाटनोपायमिति शेषः ॥ ३२ ॥ बाढमित्यङ्गीकारे । काल्यं

कथंजेतुमशक्यइत्यत्राह—**स्वर्गःपापजनैरिवेति** ॥ २७ ॥ **तनि०** इन्द्रजिता निर्जिता इन्द्रादयोस्मत्सहायाभविष्यन्तीत्याशां वारयति—**नतमिति** । देवासुरैरितिबहुवचनेन सर्वदेवासुरग्रहणे पुनस्सर्वशब्दो भूतभविष्यद्वर्तमानकालिकेन्द्रजालाद्यादिसमुदायवाचकः । अहंमन्ये राक्षसजातित्वेपि सुकृतपरिपाकवशेन श्रीराममहत्त्वविषयंज्ञानमुत्पन्नं । तवतु " आसुरींयोनिमापन्ना मूढा जन्मनिजन्मनि " इतिशास्त्ररीत्या दुष्कर्मवशेननोत्पन्नमिति । इदंचाकंपनस्यपरत्वज्ञानं सनत्कुमारादिप्रोक्तेतिहासश्रवणादिनावा माल्यवत्प्रभृतिभिरुक्तसुमालिमालिवधादिवृत्तान्तादिनावा विश्वरूपादिदर्शनवच्चतुर्दशसहस्रराक्षसयुद्धे प्रतिराक्षसं रामविग्रहाभेदादिप्रतिपत्त्यावा संजातमितिवा अकंपनापदेशेन ऋषिरेवपरत्वख्यापनंकृतवानितिवा न कोपिविरोधः । **स०** समुद्रमथनकाले सख्यस्यापिदर्शनेन विरोधस्य शाश्वतिकत्वाभावाद्देवासुरैरितिसाधु ॥ २८ ॥ **स०** उत्तमेति सामान्यतःप्रतिज्ञा । शिष्टं तद्विवरणं ॥ **शि०** उत्तमा उद्गतःतमः आकाङ्क्षा यस्याः रामातिरिक्तसर्वाकाङ्क्षारहिता ॥ २९ ॥ **ती०** अरोचयततद्वाक्यमित्यस्य वास्तवार्थस्तु—चिन्तयित्वा अकम्पनाद्रामवृत्तान्तश्रवणानन्तरंचिन्तयित्वा त्रेतायुगे श्रीरामोऽवतरिष्यतीति सनत्कुमारवाक्यंस्मृत्वेत्यर्थः । श्रीरामहस्ताद्वधेच्छूरावणः तद्वाक्यं तस्याकम्पनस्यवाक्यं सीतामाहरेत्येवंरूपंवचनं । अरोचयत अनुकूलत्वेनाङ्गीचकारेतिसंबन्धः । अस्मिन्नर्थे उत्तररामायणोक्ता सनत्कुमाररावणसंबन्धिनी अगस्त्यरामसंवादरूपा कथाऽनुसंधेया । तथाहि रामंप्रत्यगस्त्यवचनं— " अथापरां कथां दिव्यां शृणु राजन्पुरातनीम् । यदर्थं राम वैदेही रावणेनहृतापुरा । पुरा कृतयुगे राम प्रजापतिसुतं प्रभुम् । सनत्कुमारमासीनं रावणो वाक्यमब्रवीत् । दैत्यदानवरक्षांसि ये हतास्समरेऽरयः । कां गतिं प्रतिपद्यन्ते केन ते हरिणा हताः । सनत्कुमारः । येये हताश्चक्रधरेण राजंस्त्रैलोक्यनाथेन जनार्दनेन । तेते गतास्तन्निलयं नरेन्द्राः क्रोधोपि देवस्य वरेण तुल्यः । श्रुत्वा ततस्तद्वचनं निशाचरस्सनत्कुमारस्य मुखाद्विनिर्गतम् । तदा प्रहृष्टस्स बभूव विस्मितः कथंनु यास्यामि हरिं महाहवे । मुनिः । मनसश्चेप्सितं यत्तद्भविष्यति तदाहवे । सुखीभव महाबाहो किंचित्कालं प्रतीक्षय । अथवा राक्षसेन्द्र त्वं यदीदं प्रष्टुमिच्छसि । कथयिष्यामि ते सर्वं श्रूयतां यदि रोचते । कृतेयुगे व्यतीते वै मुखे त्रेतायुगस्य तु । हितार्थं देवमर्त्यानां भविता नृपरिग्रहः । इक्ष्वाकूणां च यो राजा भाव्यो दशरथो भुवि । तस्य सूनुर्महातेजा रामो नाम भविष्यति । एवं श्रुत्वा महाबाहू राक्षसेन्द्रः प्रतापवान् । त्वया सह विरोधेच्छुश्चिन्तयामास राघव । सनत्कुमारात्तद्वाक्यं चिन्तयानो मुहुर्मुहुः । रावणो मुमुदे मोहाद्युद्धार्थी विचचार ह । एतदर्थं महाबाहो रावणेन दुरात्मना । सुता जनकराजस्य हृता राम महामते । लङ्कामानीय यत्नेन मातेव परिरक्षिता । " इत्यादि ॥ अतएव रावणस्य सीतारामभृत्यत्वेन तावुद्दिश्य तेनवक्ष्यमाणानि बाह्यदृष्ट्यादुर्भाषणवत्प्रतीयमानान्यपि वाक्यानि वस्तुतस्स्तुतिपराण्येव । तथा तत्रतत्रव्याख्यास्यामः ॥ ३२ ॥ **ति०** उत्तमस्त्रीलाभोभविष्यतीति हृष्टइत्यर्थउचितः । श्रुतस्यापितस्यार्थस्य तामसत्वेनविस्मरणात् । तेपद्येतु नयथाश्रुतार्थे । वक्ष्यमाणविष्णुपुराणविरोधात् । किंतु श्रीरामस्य स्वमृत्योरवतारंश्रुत्वा त्वयासहमृत्युविघातकविरोधेच्छुस्तांहृतवान् । तद्वियोगे तवमरणमित्याशयेनेतितयोरर्थइत्यन्ये । वस्तुतस्त्वेतेषांश्लोकानां तद्वतांसर्गाणांच प्रक्षिप्तत्वान्नते प्रमाणभूताः । अतएव तेसर्गाःकतकादिभिस्तीर्थेनच नव्याख्याताः । एतेन " एतदर्थंमहाबाहो रावणेनदुरात्मना । विज्ञायापहृतासीता त्वत्तोमरणकाङ्क्षया " इति तत्रपाठोदृश्यते तत्रचत्वदुक्तार्थासंभवइत्यपास्तं ॥ कल्यं प्रातः ।

[पा०] १ क. ङ—ट. स्त्वन्ममैक. २ च. छ. ज. ञ. सर्वविभक्ताङ्गी. ३ ङ. झ. ट. नचपन्नगी. ग. नापिपन्नगी. ४ ङ. झ. ट. मानुषीतु. ५ ग. तस्याहरस्व. ६ च. छ. ज. तां. ७ ङ. झ. ट. तंप्रमथ्य. ८ ख. घ. सतया. ९ ङ. झ. ट. रहितोरामोनचैवहिभविष्यति. १० क. लोकरावणः. ख. कालचोदितः. ११ ङ. झ. ट. आनेष्यामिच. ग. आनेष्यामितु.

[1]अथैवमुक्त्वा प्रययौ खरयुक्तेन रावणः ॥ रथेनादित्यवर्णेन दिशः सर्वाः प्रकाशयन् ॥ ३४ ॥
स रथो राक्षसेन्द्रस्य नक्षत्रपतगो महान् ॥ [2]संचार्यमाणः शुशुभे जलदे चन्द्रमा इव ॥ ३५ ॥
स [3]मारीचाश्रमं [4]प्राप्य ताटकेयमुपागमत् ॥ मारीचेनार्चितो राजा भक्ष्यभोज्यैरमानुषैः ॥ ३६ ॥
तं स्वयं पूजयित्वा तु आसनेनोदकेन च ॥ अर्थोपहितया वाचा मारीचो वाक्यमब्रवीत् ॥ ३७ ॥
कच्चित्सुकुशलं राजँल्लोकानां [5]राक्षसेश्वर ॥ आशङ्के [6]नाथ जाने त्वं [7]यतस्तूर्ण[8]मिहागतः ॥ ३८ ॥
एवमुक्तो महातेजा मारीचेन स रावणः ॥ ततः पश्चादिदं वाक्यमब्रवीद्वाक्यकोविदः ॥ ३९ ॥
आरक्षो मे हतस्तात रामेणाक्लिष्ट[9]कर्मणा ॥ जनस्थानमवध्यं तत्सर्वं युधि निपातितम् ॥
तस्य मे कुरु साचिव्यं तस्य भार्यापहारणे ॥ ४० ॥
राक्षसेन्द्रवचः श्रुत्वा मारीचो वाक्यमब्रवीत् ॥ ४१ ॥
आख्याता [10]केन सीता सा मित्ररूपेण शत्रुणा ॥ त्वया राक्षसशार्दूल को न नन्दति [11]निन्दितः ॥
सीतामिहानयस्वेति को ब्रवीति ब्रवीहि मे ॥ ४२ ॥
रक्षोलोकस्य [12]सर्वस्य कः शृङ्गं छेत्तु[13]मिच्छति ॥ प्रोत्साहयति [14]कश्चित्त्वां [15]सहि [16]शत्रुरसंशयः ॥ ४३ ॥
आशीविषमुखाद्दंष्ट्रामुद्धर्तुं चेच्छति त्वया ॥ [17]कर्मणा तेन केनाऽसि कापथं प्रतिपादितः ॥ ४४ ॥

प्रातः ॥ ३३ ॥ खराः अश्वतराः । तत्स्वरूपमुक्तमश्वशास्त्रे । "अश्वसृग्भ्यः समुत्पन्नास्तस्मादश्वतराः खराः । खररूक्षस्वरास्तीक्ष्णाः खरशीलाः खराङ्घ्रयः" इति ॥ ३४ ॥ नक्षत्रपथगः आकाशगः । संचार्यमाणः प्रेर्यमाणः ॥३५॥ ताटकेयं ताटकापुत्रं । भक्ष्यभोज्यैः पेयखाद्यैः । अमानुषैः मनुष्यलोकदुर्लभैः ॥ ३६ ॥ अर्थोपहितया अर्थेन प्रयोजनेन उपहितया विशिष्टया ॥ ३७ ॥ हे राजन् । लोकानां राक्षसलोकानां। राक्षसेश्वरेतिसमभिव्याहारादयमर्थोलभ्यते । सुकुशलंकच्चिदिति सामान्येन प्रश्नः । अथ अथवा । त्वं यतस्तूर्णमिहागतः ततः कारणात्किंचिदत्याहितमस्तीत्याशङ्के । तद्विशिष्य न जाने । महत्कार्यं विना भवतस्तूर्णमागमनं नोपपद्यत इति भावः । यद्वा लोकानां कच्चित्सुकुशलं । अथ अथवा । तेषां कुशलं नेत्याशङ्के यतस्त्वंतूर्णमागतः । न जाने तद्विशिष्य न जान इत्यर्थः ॥३८॥ ततःपश्चात् तद्वाक्यादनन्तरं ॥ ३९॥ आरक्षः अन्तपालः । उक्तमुपपादयति—जनस्थानमित्याद्यर्धेन । जनस्थानशब्देन तत्स्थो रक्षोगणो लक्ष्यते । तत् प्रसिद्धं । साचिव्यं साहाय्यं । तस्य मे हतस्वजनस्य मे ॥ ४०—४१ ॥ आख्यातेत्याद्यर्धत्रयमेकान्वयं । यः सीतायाः आख्याता स भिन्नरूपः शत्रुः । यश्च तामानयेत्युपदेष्टा सः त्वया निन्दितः सन् तिरस्कृतः सन् । त्वदैश्वर्यं न नन्दति तावुभौ ब्रूहीत्यर्थः । ब्रवीहीत्यत्र ईडागमश्छान्दसः ॥ ४२ ॥ शृङ्गं प्राधान्यं । "शृङ्गं प्राधान्यसान्वोश्च" इत्यमरः । प्रोत्साहयति सीताऽऽनयनं प्रतीति शेषः । सच स एव ॥ ४३ ॥ आशीविषः सर्पविशेषः । उद्धर्तुं उद्धारयितुं । क इति शेषः । तेन कर्मणा सीतापहारलक्ष-

---

मान्तमव्ययं ॥ ३३ ॥ **ति०** चञ्चूर्यमाणः भृशंचरन् ॥ ३५ ॥ **स०** अमानुषैः राक्षसयोग्यैः ॥ ३६ ॥ **ति०** आशङ्के भयमितिशेषः । नाधिजाने क्षेममितिशेषः ॥ ३८ ॥ **ति० स०** आरक्षः रक्षणीयःखरादिः । " आरक्षंरक्षणीयेस्यात् " इतिविश्वः ॥ ४० ॥ **ति०** सासीता केनाख्याता हर्तव्यत्वेनकथिता । येनकथिता समित्ररूपस्तेशत्रुः । त्वयादानादिना नन्दितः कोननन्दति । निन्दितइतिपाठे निन्दितः अवमानितः । कस्त्वांननन्दति नसंतुष्यति क्रुध्यतीतियावत् । त्वयातिरस्कृतस्तावकमैश्वर्यमसहमानस्संस्त्वयासह कृत्रिममित्रभावंप्राप्तस्संस्तवेदृशींबुद्धिमुपदिशतीतिभावः ॥ ४२ ॥ **स०** शृङ्गं प्रभुत्वमुत्कर्षंवा । " शृङ्गंप्रभुत्वे

[पा०] १ ङ. झ. ट. तदेवमुक्त्वा. २ ङ. झ. ञ. ट. चञ्चूर्यमाणः. क. च. छ. ज. संत्वर्यमाणः. ३ ङ. झ. दूरेचाश्रमं ४ ङ.-च. छ. झ. ञ. ट. गत्वा. ५ क. ङ—ट. राक्षसाधिप. ६ ग. ङ. झ. ट. नाधिजाने. ७ क. यतश्शीघ्रं. ८ ङ. झ. ट. मुपागतः. ९ ङ. झ. ट. कारिणा. १० घ. ङ. झ. केनवासीता. च. छ. ज. ञ. ट. केनसासीता. ११ ङ. च. छ. झ. ञ. ट. नन्दितः. १२ च. छ. ज. कःशृङ्गंछेत्तुमिच्छतिसांप्रतं. १३ घ. मर्हति. १४ क. ग. ङ—ट. यश्चत्वां. १५ च. छ. ज. ञ ट. सचशत्रुर्नसंशयः. क. ख. ग. ङ. झ. सचशत्रुरसंशयं. १६ ग. कस्त्वयेच्छति. १७ ख—ट. कर्मणानेन.

सुखसुप्तस्य ते राजन्प्रहृतं केन मूर्धनि ॥ ४५ ॥
विशुद्धवंशाभिजनाग्रहस्तस्तेजोमदः संस्थितदोर्विषाणः ॥
उदीक्षितुं रावण नेह युक्तः स संयुगे राघवगन्धहस्ती ॥ ४६ ॥
असौ रणान्तस्थितिसन्धिवालो विदग्धरक्षोमृगहा नृसिंहः ॥
सुप्तस्त्वया बोधयितुं न युक्तः शराङ्गपूर्णो निशितासिदंष्ट्रः ॥ ४७ ॥
चापावहारे भुजवेगपङ्के शरोर्मिमाले सुमहाहवौघे ॥
न रामपातालमुखेऽतिघोरे प्रस्कन्दितुं राक्षसराज युक्तम् ॥ ४८ ॥
प्रसीद लङ्केश्वर राक्षसेन्द्र लङ्कां प्रसन्नो भव साधु गच्छ ॥
त्वं स्वेषु दारेषु रमस्व नित्यं रामः सभार्यो रमतां वनेषु ॥ ४९ ॥

णकर्मणा । कापथं कुमार्गं । "ऋक्पूरब्धूःपथामनक्षे" इति समासान्तोऽप्रत्ययः । प्रतिपादितः उपदिष्टोसि । कर्मणा केनेति पाठे केन पुरुषेण केन कर्मणा केनोपायेन । कापथं प्रतिपादितोसीत्यन्वयः । मूर्ध्नि केन प्रहृतं केन प्रहारः कृतः । वृथैव केन दुःखमुत्पादितमित्यर्थः ॥ ४४—४५ ॥ रामे कं गुणं दृष्ट्वैवं वदसीत्याशङ्क्याह—विशुद्धेति । अनेन रामस्य मत्तगजसमाधिरुच्यते । विशुद्धवंशे अभिजनः अभिजननं तदेवाग्रहस्तो यस्य स तथा । द्वयोरौन्नत्यकरत्वसाम्याद्रूपकं निरूढं । तेजोमदः तेजःप्रताप एव मदो यस्य सः । तेजोमदयोर्दुर्धर्षताहेतुत्वसाम्याद्रूपकोपपत्तिः । उपरितनपदे संस्थितत्वसाम्याद्रूपकं । संस्थितौ समीचीनसंस्थानवन्तौ दोषौ बाहू एव विषाणे यस्य सः । राघव एव गन्धहस्ती मदगजः । यस्य गन्धमात्रेणान्ये गजाः पलायन्ते स गन्धहस्तीत्युच्यते । उदीक्षितुमपि इहअस्मिन्देशे काले च न युक्तः ॥ ४६ ॥ पुनरप्यतिशयं वक्तुं रामस्य सिंहसाम्यमाह—असाविति । रणान्तो रणाग्रं तत्र स्थितिर्नासीरावस्थानं सैव संधिवालो यस्य स तथा । संदधातीति संधिः । "उपसर्गे घोः किः"इति किः । संधिभूतः लोमसंघभूत इत्यर्थः। वालो लाङ्गूलं । यद्वा संधिर्मध्यः तद्गतो वालो लाङ्गूलं यस्य स तथेति वा । सिंहस्य लाङ्गूलं क्रोधदशायां मध्योपरिप्रदेशे वर्तत इति प्रसिद्धिः । तस्य मृगाणां गर्वहेतुत्वेन रणाग्रस्थितिसाम्यं । विदग्धानि पटूनि रक्षांस्येव मृगाः तान् हन्तीति तथा । ब्रह्मादिव्यतिरिक्तेष्युपपदे प्रयोगानुसारात् क्विप् । शराङ्गपूर्णः शरा एवाङ्गानि नखाद्यवयवाः तैः पूर्णः । निशितासिरेव दंष्ट्रे यस्य स तथा । नृसिंहो नरश्रेष्ठः । सिंह इत्यपि ध्वन्यते । यद्वा नृसिंह एव सिंह इत्येकशेषः । यद्वा विद्वन्मानसहंस इतिवत् श्लिष्टं रूपकं । यद्वा नृसिंहो रामः पुरुषसिंह इति व्यङ्ग्यं ॥ ४७ ॥ सिंहाभिमुखगमनेपि दैवाद्दृष्टिवैषम्यान्निवर्तितुं शक्यं न तु रामाहवगमन इत्याशयेन रामस्य पातालसाम्यमाह—चापेति । चाप एवावहारो ग्राहो यस्मिन् स तथा । "ग्राहोवहारः" इत्यमरः । अनेन पतनकाल एव ग्रहणसामर्थ्युक्ता । भुजवेगः शरमोक्षणवेगः स एव पङ्को यस्य स तथा । अनेन मज्जने निर्गमायोग्यतोक्ता । शरा एवोर्मिमाला तरङ्गपङ्क्तिर्यस्य स तथा । अनेन मज्जनसामर्थ्युक्ता । सुमहानाहव एव ओघो जलपूरो यस्य स तथा । अनेन दुस्तरत्वमुक्तं । अतिघोरे राम एव पातालं महाबिलं तस्य मुखे मध्ये । प्रस्कन्दितुं पतितुं न युक्तं ॥ ४८ ॥ एवं वस्तुस्थितिमुक्त्वा प्रेमातिशयेन पुनः पुनः सान्त्वयति

विषाणोत्कर्षयोरपि " इतिविश्वः ॥ ४३ ॥ **ती०** सुप्तः परद्रोहविमुखतयाऽवस्थानमेव सुप्तत्वंरामपक्षेद्रष्टव्यं ॥ **शि०** सुप्तः लदपकारविषयकोयोगरहितः ॥ ४७ ॥ इत्येकत्रिंशस्सर्गः ॥ ३१ ॥

[पा०] १ घ. आवीक्षितुं. च. छ. ज. ञ. उद्वीक्षितुं. २ ख. रणाग्रस्थिति. ३ ङ. झ. ट. शक्यः. ४ ग. वेगनागे. ५ ग. जाले. ख. मालेतु. ६ ग. प्रपन्नो.

[1]एवमुक्तो दशग्रीवो मारीचेन स [2]रावणः ॥ न्यवर्तत [3]पुरीं लङ्कां [4]विवेश च [5]गृहोत्तमम् ॥ ५० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

द्वात्रिंशः सर्गः ॥ ३२ ॥

खरादिनिधनखिन्नयाशूर्पणखयालंकामेत्यरावणायस्ववैरूप्यप्रदर्शनम् ॥ १ ॥

[6]ततः शूर्पणखी दृष्ट्वा सहस्राणि चतुर्दश ॥ हतान्येकेन रामेण रक्षसां [7]भीमकर्मणाम् ॥ १ ॥
दूषणं च खरं चैव [8]हतं [9]त्रिशिरसा सह ॥ दृष्ट्वा पुन[10]र्महानादं ननाद [11]जलदो यथा ॥ २ ॥
सा दृष्ट्वा कर्म रामस्य कृतमन्यैः सुदुष्करम् ॥ जगाम परमोद्विग्ना लङ्कां रावणपालिताम् ॥ ३ ॥
सा ददर्श विमानाग्रे रावणं दीप्ततेजसम् ॥ [12]उपोपविष्टं सचिवैर्मरुद्भिरिव वासवम् ॥ ४ ॥
आसीनं सूर्यसंकाशे काञ्चने परमासने ॥ रुक्मवेदि[13]गतं [14]प्राज्यं ज्वलन्तमिव पावकम् ॥ ५ ॥
देवगन्धर्वभूतानामृषीणां च महात्मनाम् ॥ अजेयं समरे [15]शूरं [16]व्यात्ताननमिवान्तकम् ॥ ६ ॥
देवासुरविमर्देषु वज्राशनिकृतव्रणम् ॥ ऐरावतविषाणाग्रै[17]रुद्धृष्टकिणवक्षसम् ॥ ७ ॥
विंशद्भुजं दशग्रीवं दर्शनीयपरिच्छदम् ॥ विशालवक्षसं वीरं राजलक्षण[18]शोभितम् ॥ ८ ॥
[19]स्निग्धवैडूर्यसंकाशं तप्तकाञ्चन[20]कुण्डलम् ॥ सुभुजं [21]शुक्लदशनं महास्यं पर्वतोपमम् ॥ ९ ॥
विष्णु[22]चक्रनिपातैश्च शतशो देवसंयुगे ॥ अन्यैः [23]शस्त्रप्रहारैश्च महायुद्धेषु ताडितम् ॥ १० ॥
[24]आहताङ्गं [25]समस्तैश्च देवप्रहरणैस्तथा ॥ अक्षोभ्याणां समुद्राणां [26]क्षोभणं क्षिप्रकारिणम् ॥ ११ ॥

प्रसीदेति ॥ ४९—५० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकत्रिंशः सर्गः ॥ ३१ ॥

तपोबाहुबलोपेतं सर्वभूतभयंकरम् । यो हनिष्यति दुर्बुद्धिं रावणं सोस्तु मे मुदे ॥ शूर्पणखीत्यार्षोङीषादिः । महानादमिति क्रियाविशेषणं ॥ १—२ ॥ कृतं कर्म पर्याप्तं कर्म । परमोद्विग्ना अत्यन्तभीता ॥ ३ ॥ विमानाग्रे पुष्पकविमानाग्रे । उपोपविष्टं उपोपेत्येकनिपातः । उपनिविष्टमित्यर्थः । मरुद्भिः देवैः ॥ ४ ॥ रुक्मवेदिगतं हिरण्येष्टकचितवेदिगतं । तदुक्तमापस्तम्बेन "सावित्रं स्वर्गकामश्चिन्वीत पञ्चाशीतिशतं हिरण्येष्टकाः" इत्यादिना । प्रभूतमाज्यं यस्य तं प्राज्यं प्रभूतेनाज्येन वर्धितमित्यर्थः । अत एव ज्वलन्तं ॥५—६॥ विमर्देषु युद्धेषु । वज्राशनिकृतव्रणमित्यनेन तदवध्यत्वमुक्तं । उद्धृष्टं उल्लेखनं भावे क्तः । तेन जातो यः किणः तदङ्कितवक्षसं ॥ ७ ॥ विंशद्भुजं विंशतिभुजं । दर्शनीयपरिच्छदं दर्शनीयच्छत्रचामरादिकं ॥ ८ ॥ स्निग्धवैडूर्यैः कान्तियुक्तवैडूर्यरत्नैः आभरणस्थैः संकाशं भासमानं । सुभुजं दीर्घवृत्तभुजं ॥ ९ ॥ विष्णुचक्रनिपातैरित्यत्र ताडितमित्यनुषज्यते ॥१०॥ क्षोभणं

स० विष्णुचक्रस्येवनिपातोयेषांतैः । यद्वा विष्णुचक्रैः आयुधान्तरैः । अन्यैः पूर्वोक्तिभ्यः । कर्तृभिः । शस्त्रप्रहारैःकरणैस्ताडितं॥१०॥

[पा०] १ अयंश्लोकः च. छ. ज. पाठेषु ३२ तमाध्यायारंभेदृश्यते. २ ग. राक्षसः. ३ घ. ततो. ४ छ. ज. ञ. प्रविवेश. ५ ख. घ. पुरोत्तमं. ६ घ. तत्र. ७ ख. ट. क्रूरकर्मणां. ८ ख. ञ. हतौ. ९ ङ. झ. ट. त्रिशिरसंरणे. ग. त्रिशिरसंतथा. १० ङ. झ. महानादान्ननाद. ११ ङ—ट. जलदोपमा. १२ ख. उपोपविष्टैः. १३ क. कृतं. १४ ग. पूज्यं. १५ ङ. झ. ट. घोरं. १६ क. ग. घ. व्यक्तानन. १७ ग. च—ट. रुत्कृष्ट. क. रुत्कृत्त. घ. रुत्सृष्ट. १८ ङ. झ. ट. लक्षितं. १९ ङ. झ. ट. नद्धवैदूर्य. २० ग. भूषितं. ङ. झ. ट. भूषणं. २१ घ. श्लक्ष्णदशनं. २२ ग. चक्रप्रहारैश्च. २३ च. छ. ज. ञ. शत्रुप्रहारैश्च. झ. शस्त्रैःप्रहारैश्च. २४ ङ. झ. अहताङ्गैः. २५ ग. समर्थैश्च. ङ. झ. समस्तैस्तं. च. छ. ज. ञ. समस्तैस्तु. २६ क. ख. क्षोभकं.

क्षेप्तारं [1]पर्वतेन्द्राणां [2]सुराणां च प्रमर्दनम् ॥ उच्छेत्तारं च धर्माणां परदाराभिमर्शनम् ॥
सर्वदिव्यास्त्रयोक्तारं यज्ञविघ्नकरं सदा ॥ १२ ॥
पुरीं भोगवतीं [3]प्राप्य पराजित्य च वासुकिम् ॥ तक्षकस्य प्रियां भार्यां पराजित्य जहार यः ॥१३॥
[4]कैलासपर्वतं गत्वा विजित्य नरवाहनम् ॥ विमानं पुष्पकं तस्य कामगं वै जहार यः ॥ १४ ॥
वनं चैत्ररथं दिव्यं नलिनीं नन्दनं वनम् ॥ विनाशयति यः [5]क्रोधाद्देवोद्यानानि वीर्यवान् ॥ १५॥
चन्द्रसूर्यौ [6]महाभागावुत्तिष्ठन्तौ परंतपौ ॥ निवारयति बाहुभ्यां यः शैलशिखरोपमः ॥ १६ ॥
दशवर्षसहस्राणि तपस्तप्त्वा महावने ॥ पुरा स्वयंभुवे [7]धीरैः शिरांस्युपजहार यः ॥ १७ ॥
देवदानवगन्धर्व[8]पिशाचपतगोरगैः ॥ अभयं [9]यस्य संग्रामे मृत्युतो मानुषादृते ॥ १८ ॥
मन्त्रैरभिष्टुतं पुण्यमध्वरेषु द्विजातिभिः ॥ हविर्धानेषु यः सोममुपहन्ति महाबलः ॥ १९ ॥
[10]आप्तयज्ञहरं क्रूरं ब्रह्मघ्नं [11]दुष्टचारिणम् ॥ कर्कशं निरनुक्रोशं प्रजानामहिते रतम् ॥ २० ॥
रावणं [12]सर्वभूतानां [13]सर्वलोकभयावहम् ॥ [14]राक्षसी भ्रातरं [15]शूरं सा ददर्श महाबलम् ॥ २१ ॥
[16]तं दिव्यवस्त्राभरणं दिव्यमाल्योपशोभितम् ॥ आसने [17]सूपविष्टं च [18]कालकालमिवोद्यतम् ॥२२॥
राक्षसेन्द्रं महाभागं पौलस्त्यकुलनन्दनम् ॥ [19]रावणं शत्रुहन्तारं मन्त्रिभिः परिवारितम् ॥
[20]अभिगम्याब्रवीद्वाक्यं राक्षसी भयविह्वला ॥ २३ ॥

तमब्रवीद्दीप्तविशाललोचनं प्रदर्शयित्वा [21]भयमोहमूर्च्छिता ॥

क्षोभकर्तारं ॥ ११ ॥ योक्तारं प्रयोक्तारं । यज्ञेति । उच्छेत्तारमित्यत्र उच्छास्त्रवर्तित्वमुक्तं । अत्र परयज्ञध्वंसकत्वं ॥ १२ ॥ भोगवतीं सर्पनगरीं । पराजित्य बलात्कृत्येति यावत् ॥ १३ ॥ नरवाहनं कुबेरं ॥१४॥ नलिनीं कुबेरस्य पुष्करिणीं । नन्दनं वनं इन्द्रोद्यानं । देवोद्यानानि नन्दनवनादन्यानि ॥ १५ ॥ उत्तिष्ठन्तौ उद्यन्तौ ॥ १६ ॥ उपजहार पूजोपकरणानि चकार ॥ १७ ॥ देवदानवेति देवादिभिः कर्तृभिः । मृत्युतः मृत्योः । षष्ठ्यर्थे तसिः । अभयं भयाभावः । अस्तीति गम्यमानत्वादप्रयोगः । मनुष्यादृते मनुष्यं विना मनुष्यात्तु भयमस्तीत्यर्थः ॥ १८ ॥ अध्वरेषु यागेषु । हविर्धानेषु सोमाभिषवशालासु । मन्त्रैः प्रातरनुवाकग्रावस्तोत्रादिभिः करणैः । द्विजातिभिः कर्तृभिः । अभिषुतं क्षरितं । सोमं उपहन्ति होमकाले नाशयतीत्यर्थः ॥ १९ ॥ आप्तयज्ञहरं आप्तान् दक्षिणाकालं प्राप्तान् यज्ञान् हरतीति तथा । कर्कशं निर्दाक्षिण्यं । निरनुक्रोशं निर्दयं ॥ २० ॥ रावणं रावकं । सा ददर्शमहाबलमित्युपसंहारः । अतो न सर्गादिस्थेन ददर्शेति पदेन पौनरुक्त्यं ॥ २१ ॥ कालकालं मृत्योरपि मृत्युं । उद्यतं उद्युक्तं ॥ २२ ॥ पौलस्त्यानां कुलं नन्दयतीति तथा ॥ २३ ॥ पुनः सर्गान्ते संग्रहश्लोकः—तमिति । प्रदर्शयित्वा स्वकं वैरूप्य-

शि० मानुषात् नित्यनराकृतिपरमात्मनः । मृत्युतोमरणात् यस्याभयं । अतएवदेवादिभ्यश्चाभयं ॥ **स०** देवदानवादिभिस्सहमृत्युतोऽभयं । तत्रापवादमाह—**मानुषादृते** भक्ष्यत्वेनालक्ष्यत्वात्ततोऽवध्यत्वाप्रार्थनादितिभावः ॥ १८ ॥ **ति०** काले प्रलयकाले ॥ २२ ॥ **शि०** भयलोभमोहिता भयेनराक्षसविनाशजनितभीत्या लोभेन अतिसुन्दररामविषयकप्राप्त्युत्कटेच्छयाच मोहिता कर्तव्यविषयकाविवेकंप्राप्ता ॥ २४ ॥ इतिद्वात्रिंशस्सर्गः ॥ ३२ ॥

[पा०] १ ङ--ट. पर्वताग्राणां. २ ग. परेषांच. क. परेषांपुरमर्दनं. घ. परचक्रप्रमर्दनं. ३ क--ट. गत्वा. ४ क. ग--ट. कैलासंपर्वतं. ५ क. ग. क्रुद्धोदेवोद्यानानि. ६ घ. महावेगावुत्तिष्ठन्तौ. ७ ख. घ. वीरः. ८ घ. देवर्षिपतगो. ९ ख. सर्वभूतेभ्यो. १० ङ--ट. प्राप्तयज्ञहरंदुष्टं. ख. सर्वयज्ञहरं. ११ ङ. झ. ट. क्रूरकारिणं. १२ ख. च. ज. ञ. सर्वलोकानां. १३ च. ञ. सर्वभूत. क. ग. सर्वभूतभयंकरं. १४ क. राक्षसं. १५ क. ग. ङ. छ--ट. क्रूरं. १६ क. सादिव्य. १७ ख--ट. सूपविष्टंतं. १८ क. ख. ग. ङ. च. छ. झ. ञ. ट. कालेकाल. १९ रावणंशत्रुहन्तारं. अभिगम्याब्रवीद्वाक्यं. इत्यनयोरर्धयोःपौर्वापर्यं ङ. झ. ट. पाठेषुदृश्यते. २० ङ. झ. ट. उपगम्य. २१ च. छ. ज. भयशोकमोहिता. ङ. झ. ञ. ट. भयलोभमोहिता. क. भयशोकमूर्च्छिता.

सुदारुणं वाक्यमभीतचारिणी महात्मना शूर्पणखा विरूपिता ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

शूर्पणखयासभामध्येरावणंप्रतिजनस्थानवृत्तान्तनिवेदनपूर्वकंतस्मिन्राजगुणराहित्यप्रतिपादनेनोपालंभः ॥ १ ॥

ततः शूर्पणखा [1]दीना रावणं लोकरावणम् ॥ अमात्यमध्ये संक्रुद्धा परुषं वाक्यमब्रवीत् ॥ १ ॥
प्रमत्तः कामभोगेषु स्वैरवृत्तो निरङ्कुशः ॥ [2]समुत्पन्नं भयं घोरं बोद्धव्यं नावबुध्यसे ॥ २ ॥
सक्तं ग्राम्येषु भोगेषु कामवृत्तं महीपतिम् ॥ लुब्धं न बहुमन्यन्ते श्मशानाग्निमिव प्रजाः ॥ ३ ॥
स्वयं कार्याणि यः काले नानुतिष्ठति पार्थिवः ॥ स तु वै सह राज्येन तैश्च कार्यैर्विनश्यति ॥ ४ ॥
अयुक्तचारं दुर्दर्शमस्वाधीनं नराधिपम् ॥ वर्जयन्ति नरा दूरान्नदीपङ्कमिव द्विपाः ॥ ५ ॥
ये न रक्षन्ति विषयम[3]स्वाधीना नराधिपाः ॥ ते न [4]वृद्ध्या प्रकाशन्ते [5]गिरयः सागरे यथा ॥ ६ ॥
आत्मवद्भिर्विगृह्य त्वं देवगन्धर्वदानवैः ॥ अयुक्तचारश्चपलः कथं राजा भविष्यसि ॥ ७ ॥
त्वं तु बालस्वभावश्च बुद्धिहीनश्च राक्षस ॥ [6]ज्ञातव्यं तु न जानीषे कथं राजा भविष्यसि ॥ ८ ॥
येषां चारश्च कोशश्च नयश्च जयतां वर ॥ अस्वाधीना नरेन्द्राणां प्राकृता[7]स्ते जनैः समाः ॥ ९ ॥
यस्मात्पश्यन्ति दूरस्थान्सर्वानर्थान्नराधिपाः ॥ चारेण तस्मादुच्यन्ते राजानो दीर्घचक्षुषः ॥ १० ॥

मिति शेषः । विरूपितेत्युक्तेः । अभीततया सर्वपुरुषेषु सर्वलोके च चारोस्या अस्तीति सा ॥ २४ ॥
इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्वात्रिंशः सर्गः ॥ ३२ ॥

अमर्यादो भृशं मूर्खो वध्यो यस्य निशाचरः । तमहं नीतिसंपन्नं रघुनाथं समाश्रये ॥ दीना रामपरिभूतत्वात् । स्वपरिभवदर्शनेपि भ्रातुर्निश्चलतया संक्रुद्धा ॥ १ ॥ कामभोगेषु स्वैरवृत्तः स्वतन्त्रः । सदा कामपरवश इत्यर्थः । निरङ्कुशः कामभोग एव निष्प्रतिबन्धः । घोरंभयं शृण्वतामपि भयंकरमित्यर्थः । बोद्धव्यं चारमुखेनेति शेषः ॥ २ ॥ एवं कामवृत्तस्य संभावितां हानिं लोकरीत्या दर्शयति—सक्तमित्यादिना । ग्राम्येषु मैथुनादिषु । कामवृत्तं यथेच्छव्यापारं ॥ ३ ॥ कार्याणि पालनादीनि ॥ ४ ॥ अयुक्तचारं अनियोजितचारं । दुर्दर्शं उचितकाले सभायां प्रजादर्शनप्रदानरहितं । अस्वाधीनं पत्न्यादिपरतन्त्रं परप्रत्ययनेयबुद्धिं वा । पङ्केपि विशेषणद्वयं योज्यं । अयुक्तश्चारो यस्मिन् स्वस्य संचारकर्तुरधीनो न भवतीत्यर्थः ॥ ५ ॥ विषयं स्वराज्यं । वृद्ध्या वर्तमानयाऽपीति शेषः ॥ ६ ॥ आत्मवद्भिः यत्नवद्भिः त्वत्प्रतीकारदत्तावधानैरित्यर्थः । चपलः विषयचपलः ॥७॥ उक्तमेवार्थं पुनरपि प्रलपति रावणस्याग्रहोत्पादनाय—त्वमित्यादिना । बालस्येव स्वभावो विवेकशून्यत्वं यस्य स तथा । बुद्धिहीनः विवेकहेतुर्बुद्धिः तयाहीनः ॥८॥ स्वपरराष्ट्रकार्याकार्यज्ञापकश्चारः । कोशो धनसमृद्धिः । नयो नीतिः । प्राकृतैर्जनैः साधारणैर्जनैः ॥ ९॥ चार-

---

स० लोकरावणं जनरोदकं ॥ १ ॥ **स०** बोद्धव्यं अवश्यंज्ञातव्यं ॥ २ ॥ **स०** ग्राम्येषुभोगेषु स्वरुच्यादिभोगेषु । विहितमर्यादोल्लङ्घनेनासक्तं । कामवृत्तं परनार्यादिनिरतं । श्मशानाग्निं शवाग्निं । **ति०** श्मशानाग्निमिव अस्पृश्यत्वेनसादृश्यं ॥ ३ ॥ **स०** राज्येनकार्यैश्च सहेतिसंबन्धः । **ति०** तैः कार्यैः अननुष्ठितैः ॥ ४ ॥ **ति०** अस्वाधीनं स्वभिन्नाधीनं । पूर्वंस्वाधीनं देशं पश्चात्परायत्तं ये नरक्षन्ति स्वाधीनीकरणेनेतिशेषः ॥ ६ ॥ **ती०** आत्मवद्भिः प्रशस्तधैर्यैः ॥ ७ ॥ **टीका०** चारः देशा-

[पा०] १ ङ. झ. दीप्ता. २ ग. समुत्पन्नमिदं. ३ ङ. झ. ञ. ट. मस्वाधीनं. ४ क. बुद्ध्या. ५ च. छ. ज. ञ. सागरे गिरयोयथा. ६ ङ. झ. ट. ज्ञातव्यंतं. ख. ग. ज्ञातव्यंच. ७ ख. स्तैःसमाजनैः. घ. स्तैर्जनैस्समाः.

अयुक्तचारं मन्ये त्वां प्राकृतैः सचिवैर्[1]वृतम् ॥ [2]स्वजनं तु [3]जनस्थानं [4]हतं यो नावबुध्यसे ॥ ११ ॥
चतुर्दश सहस्राणि रक्षसां [5]क्रूरकर्मणाम् ॥ हतान्येकेन रामेण खरश्च सहदूषणः ॥ १२ ॥
ऋषीणामभयं दत्तं कृतक्षेमाश्च दण्डकाः ॥ धर्षितं च जनस्थानं रामेणाक्लिष्ट[6]कर्मणा ॥ १३ ॥
त्वं तु लुब्धः प्रमत्तश्च पराधीनश्च [7]रावण ॥ विषये स्वे समुत्पन्नं [8]भयं यो नावबुध्यसे ॥ १४ ॥
तीक्ष्णमल्पप्रदातारं प्रमत्तं गर्वितं शठम् ॥ व्यसने [9]सर्वभूतानि नाभिधावन्ति पार्थिवम् ॥ १५ ॥
[10]अतिमानिनमग्राह्यमात्मसंभावितं नरम् ॥ [11]क्रोधिनं व्यसने हन्ति स्वजनोपि [12]महीपतिम् ॥ १६ ॥
नानुतिष्ठति कार्याणि भयेषु न बिभेति च ॥ क्षिप्रं राज्याच्च्युतो दीनस्तृणैस्तुल्यो [13]भविष्यति ॥१७॥
[14]शुष्कैः काष्ठैर्भवेत्कार्यं लोष्टैरपि च पांसुभिः ॥ [15]न तु स्थानात्परिभ्रष्टैः कार्यं स्याद्वसुधाधिपैः ॥१८॥
[16]उपभुक्तं यथा वासस्स्रजो वा मृदिता यथा ॥ एवं राज्यात्परिभ्रष्टः समर्थोपि निरर्थकः ॥ १९ ॥
अप्रमत्तश्च यो राजा सर्वज्ञो विजितेन्द्रियः ॥ कृतज्ञो धर्मशीलश्च स राजा तिष्ठते चिरम् ॥ २० ॥
नयनाभ्यां [17]प्रसुप्तोपि जागर्ति नयचक्षुषा ॥ व्यक्तक्रोधप्रसादश्च स राजा पूज्यते जनैः ॥ २१ ॥
त्वं तु रावण दुर्बुद्धिर्गुणैरेतैर्विवर्जितः ॥ यस्य तेऽविदितश्चारै रक्षसां सुमहान्वधः ॥ २२ ॥
परावमन्ता विषयेषु [18]संगतो नदेशकालप्रविभागतत्त्ववित् ॥
अयुक्तबुद्धिर्गुणदोषनिश्चये विपन्नराज्यो नचिराद्विपत्स्यसे ॥ २३ ॥

प्रयोजनमाह—यस्मादिति ॥ १० ॥ एवं लोकरीत्योक्तं रावणे उपसंहरति—अयुक्तेत्यादिना । जनस्थानं जनस्थानस्थं ॥ ११—१२ ॥ स्वजनवधादपि दुःसहं कार्यान्तरमाह—ऋषीणामिति ॥१३॥ लुब्धः चारादीनामभिमताप्रदाता ॥ १४ ॥ तीक्ष्णं क्रूरं । शठं गूढविप्रियकारिणं । व्यसने व्यसनकाले । सर्वभूतानि भृत्यामात्यादीनि । नाभिधावन्ति तद्रक्षणाय न प्रवर्तन्ते ॥ १५ ॥ अग्राह्यं सद्भिरितिशेषः । आत्मना स्वेनैव बहुमानंप्राप्तः सोयमात्मसंभावितः तं । क्रोधिनं अस्थाने क्रोधवन्तं । व्यसने व्यसनकाले । स्वजनोपि अमात्यादिरपि ॥ १६ ॥ भयेषु भयहेतुषु न बिभेति साशङ्को नवर्ततइत्यर्थः ॥ १७—१८ ॥ उपभुक्तवस्त्रादिदृष्टान्तः परेषामयोग्यत्वप्रदर्शनाय ॥ १९ ॥ चिरं तिष्ठत इत्यत्र आर्षमात्मनेपदं ॥ २० ॥ जागर्ति अप्रमत्तो भवतीत्यर्थः ॥ २१ ॥ यस्य ते येन त्वया । अविदित इति च्छेदः ॥ २२ ॥ सर्गार्थमेकेन संगृह्णाति—परेति । परावमन्ता शत्रुषूपेक्षावान् । विषयेषु शब्दादिषु । सङ्गतः संगवान् । नदेशकालप्रविभागतत्त्वविदित्येकंपदं । नगनैकादिवन्नसमासः । देशकालभेदातत्त्वज्ञ इत्यर्थः । गुणदोषनिश्चये विषये । अयुक्तबुद्धिः अनियोजितबुद्धिः अप्रवृत्तबुद्धिरित्यर्थः । नचिरात् क्षिप्रं । विपत्स्यसे आपदं प्राप्स्यसीत्यर्थः ।

न्तरवर्तमानकार्यवक्ता ॥ ९ ॥ **ति०** स्वजनं स्वस्यजनाःयस्मिंस्तत् । **शि०** प्राकृतैः प्रकृतिःस्वभावएवयेषांतैः शास्त्रसंस्काररहितैरित्यर्थः ॥ ११ ॥ **ती०** तीक्ष्णं प्रत्यक्षदृश्यमानं ॥ १५ ॥ **ती०** सर्वज्ञः स्वराष्ट्रपरराष्ट्रवृत्तान्तज्ञः ॥ २० ॥ **ती०** व्यक्तक्रोधप्रसादश्च व्यक्तौ सार्थकत्वेनाभिव्यक्तौ क्रोधप्रसादौ यस्यसतथोक्तः । **शि०** व्यक्तौ दण्डदानाभ्यांप्रकटितौ क्रोधप्रसादौयस्यसः ॥२१॥

[पा०] १ ङ—ट. युतं. २ क. ग. ङ—ट. स्वजनंच. ३ क. ख. घ. च. छ. ज. जनस्थाने. झ. यतस्स्थानं. ४ ङ. झ. ट. निहतंनाव. ५ क. ख. ग. ङ. झ. ट. भीमकर्मणां. च. छ. ज. ञ. कामरूपिणां. ६ ङ. झ. कारिणा. ७ झ. राक्षस. ८ ङ. झ. ट. यद्भयंनाव. ९ च. छ. ज. ञ. नाभिधावन्तिसर्वभूतानि. १० च. छ. ज. ञ. अभिमानिनं. ११ ङ—ट. क्रोधनं. १२ ख. ङ—ट. नराधिपं. १३ ङ. झ. ञ. ट. भवेदिह. १४ क—ट. शुष्ककाष्ठैः. १५ ग. नहि. १६ च. उपयुक्तं. १७ झ. प्रसुप्तोवा. १८ क. ख. घ—ट. सङ्गवान्नदेश.

इति स्वदोषान्परिकीर्तितांस्तया समीक्ष्य बुद्ध्या क्षणदाचरेश्वरः ॥
धनेन दर्पेण बलेन चान्वितो विचिन्तयामास [1]चिरं स रावणः ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

चतुस्त्रिंशः सर्गः ॥ ३४ ॥

रावणेनशूर्पणखांप्रतिरामगुणविषयकप्रश्नपूर्वकंतेनतद्वैरूप्यकरणकारणप्रश्नः ॥ १ ॥ शूर्पणखयारामलक्ष्मणसीतागुणानुवर्णनपूर्वकंरावणंप्रतितदर्थंस्वेनसीतापहरणोद्यमस्यस्ववैरूप्यकरणकारणत्वोक्त्यासीतापहारचोदना ॥ २ ॥

ततः शूर्पणखां [2]क्रुद्धां [3]ब्रुवन्तीं परुषं वचः ॥ अमात्यमध्ये संक्रुद्धः परिपप्रच्छ [4]रावणः ॥ १ ॥
कश्च रामः कथंवीर्यः किंरूपः किंपराक्रमः ॥ किमर्थं दण्डकारण्यं [5]प्रविष्टः स [6]दुरासदम् ॥ २ ॥
आयुधं किंच रामस्य [7]निहता येन राक्षसाः ॥ खरश्च [8]निहतः संख्ये दूषणस्त्रिशिरास्तथा ॥
[[9]तत्त्वं ब्रूहि मनोज्ञाङ्गि केन त्वं च विरूपिता ॥ ३ ॥]
इत्युक्ता राक्षसेन्द्रेण राक्षसी क्रोधमूर्छिता ॥ ततो रामं [10]यथातत्त्वमाख्यातुमुपचक्रमे ॥ ४ ॥
दीर्घबाहुर्विशालाक्ष[11]श्चीरकृष्णाजिनाम्बरः ॥ कन्दर्पसमरूपश्च रामो दशरथात्मजः ॥ ५ ॥
शक्रचापनिभं चापं विकृष्य [12]कनकाङ्गदम् ॥ दीप्तान्क्षिपति नाराचान्सर्पानिव महाविषान् ॥ ६ ॥
नाददानं शरान्घो[13]रान्न मुञ्चन्तं [14]शिलीमुखान् ॥ न कार्मुकं विकर्षन्तं रामं पश्यामि संयुगे ॥ ७ ॥
[15]हन्यमानं तु तत्सैन्यं पश्यामि शरवृष्टिभिः ॥ इन्द्रेणेवोत्तमं सस्यमाहतं [16]त्वश्मवृष्टिभिः ॥ ८ ॥
रक्षसां भीम[17]रूपाणां सहस्राणि चतुर्दश ॥ निहतानि शरैस्ती[18]क्ष्णैस्तेनैकेन पदातिना ॥ ९ ॥
अर्धाधिकमुहूर्तेन खरश्च सहदूषणः ॥ ऋषीणामभयं दत्तं कृतक्षेमाश्च दण्डकाः ॥ १० ॥

त्वमिति शेषः ॥ २३—२४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

परगोष्ठीप्रसिद्धानां गुणानामाकरो महान् । अनुजो यस्य सौमित्रिस्तमहं राममाश्रये ॥ संक्रुद्धः शत्रुविषयेऽतीव क्रोधवान् ॥ १ ॥ कथंवीर्यः कीदृशवीर्यः ॥२॥ येन खरदूषणत्रिशिरःप्रभृतयो राक्षसा निहतास्तादृशं तदीयमायुधं किं किंरूपं । इति परिपप्रच्छेति पूर्वेणान्वयः ॥ ३—४ ॥ रामानुजपरवशहृदयापि तदग्रजकृतमहोन्मादहेतुभूतं रामलावण्यं संग्रहेणाभिधत्ते —दीर्घबाहुरित्यादिना ॥५ ॥ कनकाङ्गदं कनकमयपट्टबन्धं ॥ ६ ॥ नाददानमिति अत्रादानमोचनविकर्षणानि लक्ष्यन्ते । वेगातिशयेनादानादिकं नपश्यामि किंतु हननमेवेति भावः । अश्मवृष्टिभिः करकामयवर्षैः ॥ ७—९ ॥ अर्धाधिकमुहूर्तेन घटिकात्र-

---

ती० विचिन्तयामासेति मारीचस्समरोमास्त्विति ब्रूते इयंभगिनीतु समरंप्रोत्साहयति किमत्रकर्तव्यमिति चिन्तयामासेत्यर्थः ॥ २४ ॥ इतित्रयस्त्रिंशस्सर्गः ॥ ३३ ॥

शि० हेमनोज्ञाङ्गि त्वं केनहेतुनाविरूपिता । तत् त्वंब्रूहि ॥ ३ ॥ स० विकर्षन्तंरामंनपश्यामीत्यस्य " सविशेषणे—"

[पा०] १ च. छ. ज. ञ. ट. चिरेण. २ ङ. झ. ञ. ट. दृष्ट्वा. ख. छ. घोरां. ३ ज. झ. ट. ब्रुवतीं. ग. वदन्तीं. ४ ख. च. छ. ज. राक्षसः. ५ क. ख. ग. ङ—ट. प्रविष्टश्च. ६ ङ. झ. ट. सुदुस्तरं. क. ग. च. छ. ज. ञ. सुदुश्चरं. ७ ङ. झ. ट. येननेराक्षसाहताः. ८ ख. दूषणःसंख्येहतस्त्रिशिरसासह. ९ इदमर्धं ङ—ट. पुस्तकेषुदृश्यते. १० क. ग. ङ—ट. यथान्यायं. ११ ख. श्रीमाञ्शत्रुनिबर्हणः. १२ च. छ. ज. कनकाङ्कितं. १३ ङ. झ. ट. घोरान्विमुञ्चन्तं. १४ क. ग. ङ—ट. महाबलं. १५ घ. दह्यमानंतुमत्सैन्यं. १६ च. ञ. त्वतिवृष्टिभिः. १७ क. ग. ङ. छ—ट. भीमवीर्याणां. १८ ख. स्तीक्ष्णैरामेणाक्लिष्टकर्मणा.

एका कथंचिन्मुक्ताऽहं [1]परिभूय महात्मना ॥ स्त्रीवधं शङ्कमानेन रामेण विदितात्मना ॥ ११ ॥
भ्राता चास्य महातेजा [2]गुणतस्तुल्यविक्रमः ॥ अनुरक्तश्च भक्तश्च लक्ष्मणो नाम वीर्यवान् ॥ १२ ॥
अमर्षी दुर्जयो जेता विक्रान्तो बुद्धिमान्बली ॥ रामस्य दक्षिणो बाहुर्नित्यं प्राणो बहिश्चरः ॥१३॥
रामस्य तु विशालाक्षी [3]पूर्णेन्दुसदृशानना ॥ धर्मपत्नी प्रिया [4]भर्तुर्नित्यं प्रियहिते रता ॥ १४ ॥
सा सुकेशी सुनासोरुः सुरूपा च यशस्विनी ॥ देवतेव वनस्यास्य राजते श्रीरिवापरा ॥ १५ ॥
त[5]प्तकाञ्चनवर्णाभा रक्ततुङ्गनखी शुभा ॥ सीता नाम वरारोहा वैदेही तनुमध्यमा ॥ १६ ॥
नैव देवी न गन्धर्वी न यक्षी न च किन्नरी ॥ नै[6]वंरूपा मया नारी दृष्टपूर्वा महीतले ॥ १७ ॥
यस्य सीता भवेद्भार्या यं च हृष्टा परिष्वजेत् ॥ [7]अतिजीवेत्स सर्वेषु [8]लोकेष्वपि पुरंदरात् ॥ १८ ॥
सा[9] सुशीला वपुःश्लाघ्या रूपे[10]णाप्रतिमा भुवि ॥ तवानुरूपा [11]भार्या स्यात्त्वं [12]च तस्यास्तथा पतिः ॥१९॥
तां तु विस्तीर्णजघनां पीन[13]श्रोणीपयोधराम् ॥ [14]भार्यार्थे च तवानेतुमु[15]द्यताहं वराननाम् ॥
वि[16]रूपिताऽस्मि क्रूरेण लक्ष्मणेन [17]महाभुज ॥ २० ॥
[18]तां तु दृष्ट्वाऽद्य वैदेहीं पूर्णचन्द्रनिभाननाम् ॥ मन्मथस्य [19]शराणां वै त्वं विधेयो भविष्यसि ॥२१॥

येण । ससैन्यः खरो हत इत्यर्थः ॥ १० ॥ स्त्रीवधं शङ्कमानेन स्त्रीवधोभविष्यतीति शङ्कमानेनेत्यर्थः ॥ ११ ॥ अनुरक्तः अनुरागवान् । भक्तः तत्कार्यभजनशीलः ॥ १२ ॥ दक्षिणो बाहुरित्यनेन सर्वकार्यधुरंधरत्वमुक्तं । प्राणत्वरूपणेन निरतिशयप्रेमास्पदत्वं । अनुरक्त इत्यस्य दृष्टान्तोयमिति न पुनरुक्तिः ॥१३॥ रामस्य प्रिया अस्तीत्यन्वयः ॥ १४ ॥ तां वर्णयति—सेत्यादिना । यशस्विनी उक्तरूपादिमत्त्वकीर्तिमती । वनस्य देवतेव स्थिता श्रीरिव राजते ॥ १५ ॥ तप्तकाञ्चनवर्णाभा तप्तकाञ्चनवर्णतुल्या आभा यस्याः सा । वैदेही विदेहराजेन पुत्रीकृता ॥ १६ ॥ एवंरूपा देवी च न दृष्टपूर्वा गन्धर्वी च न दृष्टपूर्वा यक्षी च न दृष्टपूर्वा किन्नरी च न दृष्टपूर्वा एवंरूपा नारी महीतलेपि न दृष्टपूर्वा इत्यन्वयः । उत्तरार्धे महीतल इत्यनेन पूर्वार्धे स्वर्गलोक इति सिद्धं । देव्यादीनां तत्रैव वाससंभवात् । यद्वा महीतल इति सर्वलोकोपलक्षणं ॥ १७ ॥ परिष्वङ्गं विना भार्यात्वेन स्थिता चेत् सः सर्वेषु लोकेषु सर्वानपि लोकान् । अतिजीवेत् अतीत्य जीवेत् सर्वलोकोत्तीर्णपरमसुखमयजीवन इत्यर्थः । परिष्वङ्गाभावेपि सदा सन्निधानादिसौख्यादिति भावः । भार्यात्वं विनापि यं सकृत् परिष्वजेत् । सः पुरंदरादपि पुरंदरमपि । अतिजीवेत् अतिशय्य जीवेत् ॥ १८ ॥ वपुश्श्लाघ्या वपुषा श्लाघ्या सर्वानवद्याङ्गीत्यर्थः ॥१९॥ विस्तीर्णजघनां विशालजघनां।

इतिन्यायेनविशेषणेतात्पर्यं ॥ ७ ॥ **ति०** पूर्वतनंस्ववृत्तंगोपयन्त्याह—**एकेति** ॥ ११ ॥ **शि०** तुल्यविक्रमोमहातेजा लक्ष्मणो नामास्यभ्राता गुणतः रामनिष्ठातिसौशील्यादेर्हेतोः अनुरक्तः रामविषयकात्यनुरागवान् ॥ **स०** रामगुणसदृशगुणानततीतिगुणात् तेनतुला सास्तीतितत्तुली । सोपिकंकंहतवानित्यतआह—**अविक्रमः** इदानीमिति ॥ १२ ॥ **शि०** यथारूपानारी सीता । मयामहीतलेदृष्टपूर्वा दृष्टंदर्शनंपूर्वंयस्यास्सा तथारूपानारी देव्यादिर्न ॥ १७ ॥ **ति०** यंचहृष्टापरिष्वजेत् सएवसर्वेषुकालेषुलोकेषुच पुरन्दरादप्यधिकंजीवेत् । तस्यालक्ष्म्यवतारत्वादितिव्यङ्ग्यं ॥ १८ ॥ **ति०** तवानेतुमुद्यताऽहमितिमृषावचोरावणसंतोषार्थं ॥२०॥ **स०** विधेयः अधीनः ॥ २१ ॥

[**पा०**] १ ख. परिभूता. २ ठ. गुणात्ततुल्यविक्रमः. क. ग. गुणतस्तुल्यलक्षणः. ३ ख. पूर्णचन्द्रनिभानना. ४ क. ग. ङ—ट. नित्यंभर्तुः. घ. भर्तुर्नित्या. ५ ख. काञ्चनोज्वलवर्णाभा. ६ क. ग. ङ—ट. तथारूपा. ७ ङ. झ. ट. अभिजीवेत्. ८ च. छ. ज. ञ. देवेष्विवपुरन्दरः. ख. ग. लोकेष्विवपुरन्दरः. ९ घ. साधुशीला. क. यासुशीला. १० क. ग. च. छ. ज. ञ. णाप्रतिदर्शना. ११ क. ग. ङ—ट. भार्यासात्वं. ख. भार्यार्थेत्वं. १२ ङ. झ. ट. चतस्याःपतिर्वरः. ग. चैवास्यास्तथापतिः. ख. चतस्याःपतिस्समः. १३ ङ. झ. ट. पीनोत्तुङ्गपयोधरां. १४ ग. ङ. छ. ज. झ. ट. भार्यार्थेतु. ञ. भार्यार्थंतु. १५ क. ग. मुद्युक्ताहं. १६ ख. विरूपिताहि. १७ ग. च. छ. ज. महात्मना. १८ ग. तांदृष्ट्वाद्यच. क. ख. तांचदृष्ट्वैव. १९ क. ख. ग. ङ—ट. शराणांच.

यदि तस्यामभिप्रायो भार्यार्थे[1] तव जायते[2] ॥ शीघ्रमुद्ध्रियतां पादो जयार्थमिह दक्षिणः ॥ २२ ॥
कुरु[3] प्रियं तथा तेषां रक्षसां राक्षसेश्वर ॥ वधात्तस्य नृशंसस्य रामस्याश्रमवासिनः[4] ॥ २३ ॥
तं शरैर्निशितैर्हत्वा लक्ष्मणं च महारथम्[5] ॥ हतनाथां[6] सुखं सीतां यथावदुपभोक्ष्यसि[7] ॥ २४ ॥
रोचते यदि ते वाक्यं ममैतद्राक्षसेश्वर ॥ क्रियतां[9] निर्विशङ्केन वचनं मम रावण ॥ २५ ॥
विज्ञायेहात्मशक्तिं[8] च ह्रियतामबला बलात् ॥ सीता सर्वानवद्याङ्गी[10] भार्यार्थे[11] राक्षसेश्वर[12] ॥ २६ ॥
निशम्य रामेण शरैरजिह्मगैर्हतान् जनस्थानगतान्निशाचरान् ॥
खरं च बुद्ध्वा[13] निहतं च दूषणं त्वमत्र[14] कृत्यं प्रतिपत्तुमर्हसि ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

पञ्चत्रिंशः सर्गः ॥ ३५ ॥

रावणेनसीतापहरणनिर्धारणेनरथाधिरोहिणा समुद्रानूपचारिणा मध्येमार्गमप्सरोविमानाद्यद्भुतावलोकिनाचसता पुनस्सागरोत्तरतीरेमारीचाश्रममेत्यतदवलोकनम् ॥ १ ॥

ततः शूर्पणखावाक्यं तच्छ्रुत्वा रोमहर्षणम्[15] ॥ सचिवानभ्यनुज्ञाय कार्यं[16] बुद्ध्वा जगाम[17] सः ॥ १ ॥
तत्कार्यमनुगम्याथ[18] यथावदुपलभ्य च ॥ दोषाणां च गुणानां च संप्रधार्य बलाबलम् ॥ २ ॥

तव चेत्यन्वयः ॥ २०—२४ ॥ ते तुभ्यं । "रुच्यर्थानांप्रीयमाणः" इति चतुर्थी । निर्विशङ्केन त्वयेति शेषः ॥ २५ ॥ आत्मशक्तिं स्वबलं । "शक्तिर्बले प्रभावादौ" इति विश्वः । विज्ञाय पर्यालोच्य । बलात् पौरुषेण । सीता भार्यार्थे ह्रियतां ॥ २६ ॥ उक्तमर्थं सर्गान्ते पुनः संगृह्णाति—निशम्येति । प्रतिपत्तुं ज्ञातुं ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुस्त्रिंशः सर्गः ॥ ३४ ॥

यद्वाहनस्य माहात्म्यं सर्वेषां विस्मयावहम् । अवतीर्णं रघोर्वंशे तमहं विष्णुमाश्रये ॥ रोमहर्षणं भयोत्पादकत्वेन रोमाञ्चकरं । सचिवमुखेन कार्यं बुद्ध्वा तानभ्यनुज्ञाय विसृज्य ॥ १ ॥ तदित्यादिश्लोकद्वयमेकान्वयं । अनुगम्य स्वयमनुसंधाय पर्यालोच्येत्यर्थः । यथावदुपलभ्य इदमित्थमिति निश्चित्य । पुनरपि दार्ढ्याय गुणदोषप्राबल्यदौर्बल्यविषयचिन्तां निर्णयान्तां दर्शयति—दोषाणां चेति । इदमत्र संप्रधार्य स्वेन चिकीर्षितं सीतापहारलक्षणं कार्यं किं पौरुषेण सुकरं आहोस्विच्चौर्येण कर्तव्यमिति । कतरस्मिन्पक्षे दोषाल्पत्वं गुणभूयस्त्वमिति । तत्रपौरुषेण कर्तुमशक्यं । खरादियुद्धे रामस्याचिन्त्यपराक्रमत्वेन श्रुतत्वात् । उपायपरिकल्पितचौर्याश्रयणेतादात्विकदोषा न लक्ष्यन्ते । सीतारहितेनतद्व्यसनिना रामेण कापि हानिर्न संभाव्यते । तस्मादयमेव पक्षः सम्यगित्येवं निश्चित्य प्रावर्ततेत्यर्थः । स्थिरबुद्धिः निश्चलबुद्धिः ।

स० भार्यात्वे भार्यात्वेनादाने । **ति०** भार्यात्वे भार्यात्वेनसंपादने ॥ २२ ॥ **ति०** एषां रामादीनां । अशक्तिं । तेषां राज्याद्यभावात् । चकारात्तवशक्तिंच । विज्ञाय सीतातवभार्यात्वेक्रियतां । भार्यात्वे तद्व्यवहारेयथाविषयोभवति तथाक्रियतां यत्यतामित्यर्थः ॥ २६ ॥ इतिचतुस्त्रिंशस्सर्गः ॥ ३४ ॥

ती० शूर्पं शोणितभाजनं तेनयज्ञादिसत्क्रियां नखयति विदूषयतीति शूर्पणखा । नखविदूषणइतिधातुः ॥ **ति०** शूर्पणखावाक्यस्य कामविकारजनकतयारोमाञ्चकरत्वं ॥ १ ॥ **ति०** तत्कार्यं सीतापहरकार्यं । अन्तः चित्ते । अनुगम्य उद्दिश्य ॥ २ ॥

[**पा०**] १ ङ. झ. ट. भार्यात्वे. २ ख. जृंभते. ३ २३—२४ एतच्छ्लोकद्वयं. झ. ट. पुस्तकयोर्नदृश्यते. ४ च. छ. ज. ञ. रामस्यवनवासिनः. ५ ग. महाबलं. ६ ख. सीतामानीयलङ्कांत्वंयथावदुपसेवसे. ७ क. ग. घ. च. छ. ज. ञ. भोक्ष्यसे. ८ ङ. झ. ट. विज्ञायैषामशक्तिं. ख. विचार्येहात्म. ९ ङ. झ. ट. क्रियतांचमहाबल. १० क—ट. तवानवद्याङ्गी. ११ ख. ङ. झ. ट. भार्यात्वे. १२ ग. राक्षसाधिप. १३ ङ. झ. ट. दृष्ट्वा. १४ क. ख. ङ—ट. त्वमद्य. १५ ख. राक्षसाधिपः १६ ग. ङ. कार्यबुद्ध्या. १७ क—च. ञ. ट. जगामह. १८ क. मुपगम्याथ. ङ. झ. ट. मनुगम्यान्तर्यथा.

इतिकर्तव्यमित्येव कृत्वा निश्चयमात्मनः ॥ स्थिरबुद्धिस्ततो रम्यां यानशालां[1] जगाम ह ॥ ३ ॥
यानशालां ततो गत्वा प्रच्छन्नो[2] राक्षसाधिपः ॥ सूतं संचोदयामास रथः संयोज्यतामिति[3] ॥ ४ ॥
एवमुक्तः क्षणेनैव सारथिर्लघुविक्रमः ॥ रथं संयोजयामास[4] तस्याभिमतमुत्तमम् ॥ ५ ॥
काञ्चनं रथमास्थाय कामगं रत्नभूषितम् ॥ पिशाचवदनैर्युक्तं खरैः काञ्चनभूषणैः[5] ॥ ६ ॥
मेघप्रतिमनादेन स तेन धनदानुजः ॥ राक्षसाधिपतिः श्रीमान्ययौ नदनदीपतिम् ॥ ७ ॥
स श्वेतवालव्यजनः श्वेतच्छत्रो दशाननः ॥ स्निग्धवैडूर्यसंकाशस्तप्तकाञ्चनकुण्डलः ॥ ८ ॥
[7]विंशद्भुजो दशग्रीवो दर्शनीयपरिच्छदः ॥ त्रिदशारिर्मुनीन्द्रघ्नो दशशीर्ष[8] इवाद्रिराट् ॥ ९ ॥
कामगं रथमास्थाय शुशुभे राक्षसेश्वरः[9] ॥ विद्युन्मण्डलवान्मेघः सबलाक इवाम्बरे ॥ १० ॥
सशैलं सागरानूपं वीर्यवानवलोकयन् ॥ नानापुष्पफलैर्वृक्षैरनुकीर्णं सहस्रशः ॥ ११ ॥
शीतमङ्गलतोयाभिः पद्मिनीभिः समन्ततः ॥ विशालैराश्रमपदैर्वेदिमद्भिः[10] समावृतम् ॥ १२ ॥
[11]कदल्याढकिसंबाधं नालिकेरोपशोभितम् ॥ सालैस्तालैस्तमालैश्च पुष्पितैस्तरुभिर्वृतम्[12] ॥ १३ ॥
[13]नागैः सुपर्णैर्गन्धर्वैः किन्नरैश्च सहस्रशः ॥ अजैर्वैखानसैर्माषैर्वालखिल्यैर्मरीचिपैः ॥ १४ ॥
अत्यन्तनियताहारैः शोभितं परमर्षिभिः ॥ जितकामैश्च सिद्धैश्च चारणै[14]रुपशोभितम् ॥ १५ ॥
दिव्याभरणमाल्याभिर्दिव्यरूपाभिरावृतम् ॥ क्रीडारति[15]विधिज्ञाभिरप्सरोभिः सहस्रशः ॥ १६ ॥
सेवितं देवपत्नीभिः श्रीमती[16]भिः श्रिया वृतम् ॥ देवदानवसङ्घैश्च चरितं त्वमृताशिभिः ॥ १७ ॥

यानशालां अश्वशालां ॥ २—३ ॥ प्रच्छन्न इति प्रकाशश्चेद्वृद्धा मन्दोदर्यादयश्च वारयिष्यन्तीति भावः । यद्वा पौरुषं विहाय चौर्यमार्गाश्रयणं लज्जावहमिति प्रच्छन्नमार्गाश्रयणं । यद्वा तत इत्यादि । सचिवान् तदानीं सभास्थितान् । विसृज्य स्वयं कार्यं बुद्ध्वेत्यर्थः । अतएव सचिवैः पर्यालोचनाभावात्प्रच्छन्न इत्युक्तं । अतएव कुम्भकर्णादिभिरुच्यते । सचिवैरमन्त्रयित्वा कृतस्य कथमिदानीं प्रतीकार इति । खरलक्षणं पूर्वमुक्तं ॥ ४—९ ॥ विद्युत्स्थाने आभरणानि । मेघस्थाने रावणः । बलाकास्थाने अलंकृतरथः ॥ १० ॥ सशैलं शैलसहितं । सागरानूपं समुद्रतीरं ॥ ११ ॥ मङ्गलतोयाभिः शुभजलाभिः । पद्मिनीभिरिति समावृतमित्यनुकर्षः ॥ १२ ॥ आढकिः सूपोपयुक्तधान्यस्तम्बः ॥ १३ ॥ सुपर्णैः गरुडैः । अजैः अयोनिजैः वैखानसैः ब्रह्मनखजैः । "ये नखास्ते वैखानसाः" इति श्रुतेः । माषैः माषगोत्रजैः । वालखिल्यैः ब्रह्मवालजैः । "ये वालास्ते वालखिल्याः" इति श्रुतेः । मरीचिपैः रविकिरणपानव्रतनिष्ठैः ॥ १४—१६ ॥ अमृताशिभिः देवैश्चेति शेषः । यद्वा "ऋतामृताभ्यां जीवेत"इत्युक्तायाचितलब्धाशिभिः । "ऋतमुञ्छशिलं

ति० प्रच्छन्नं गूढं ॥४॥ ति० बलाकास्थाने छत्रं ॥ १० ॥ ति० शैलसहितसागरानूपं तत्कूलं । तस्यैववर्णनंनानापुष्पैरित्यादिना ॥ ११ ॥ ति० कदल्यटविः कदलीवनं तेनशोभावत् ॥१३॥ स० आजैः ब्रह्मपुत्रैर्योनिजैः । वैखानसैः अयोनिजब्रह्मपुत्रैः । माषैः तत्संज्ञिकैः । शि० आजैः अजस्यब्रह्मणइमे तैः । किंच शरीरसंबन्धेनोत्पत्तिरहितैः मानसैरित्यर्थः । आङीषदर्थे । किंच स्वसिद्ध्याऽनेकशरीरधारिभिः । वालखिल्यैः ब्रह्मकेशजैः । तथाचश्रुतिः "येवालास्तेवालखिल्याः" इति ॥१४॥ स० जितकामैः

[पा०] १ च. छ. ज. ञ. शालामुपागमत्. २ क. ग—ट. प्रच्छन्नं. ३ क. ख. ग. ङ—ट. संयुज्यतामिति. ४ ख. घ. संचोदयामास. ५ क. ग. ङ. छ. झ. ट. कनकभूषणैः. ख. शीघ्रजवैस्तदा. ६ क. ङ—ट. भूषणः. ७ च. छ. ज. ञ. दशास्योविंशतिभुजो. ङ. झ. दशग्रीवोविंशतिभुजो. ८ ख. च. छ. ज. ञ. दशशृङ्गः. ९ क—ट. राक्षसाधिपः. १० च. छ. ज. ञ. वेदिमद्भिर्विराजितं. ङ. झ. ट. वेदिमद्भिरलंकृतं. ११ ङ. झ. ञ. ट. कदल्यटविसंशोभं. ग. कदल्यटविसंबाधं. घ. कदलीवनसंबाधं. १२ क. ख. घ. ङ. झ. ट. तरुभिश्चसुपुष्पितैः. १३ नागैःसुपर्णैः. अजैर्वैखानसैः. अत्यन्तनियताहारैः. जितकामैश्चेत्यर्धानि क—ट. पुस्तकेषु. अत्यन्तनियताहारैः. नागैस्सुपर्णैः. जितकामैश्च. अजैर्वैखानसैः इतिक्रमभेदेनदृश्यन्ते. १४ ग. ङ. झ. ट. चारणैश्चोप. १५ क. च. छ. ज. ञ. विधिरसज्ञाभिः. ङ. झ. रतविधिज्ञाभिः. ट. रसविधिज्ञाभिः. १६ क. ख. श्रीमतीभिस्समावृतं. ङ. झ. ट. श्रीमतीभिरुपासितं.

हंसक्रौञ्चप्लवाकीर्णं सारसैः सं[१]प्रणादितम् ॥ वैडूर्यप्रस्तरं [२]रम्यं स्निग्धं सागरतेजसा ॥ १८ ॥
पाण्डराणि विशालानि दिव्यमाल्ययुतानि च ॥ तूर्यगीताभि[३]जुष्टानि विमानानि समन्ततः ॥१९॥
तपसा जितलोकानां कामगान्यभिसंपतन् ॥ गन्धर्वाप्सरसश्चैव ददर्श धनदानुजः ॥ २० ॥
निर्यासरसमूलानां चन्दनानां सहस्रशः ॥ वनानि पश्यन्सौम्यानि घ्राणतृप्तिकराणि च ॥ २१ ॥
[४]अगरूणां च मुख्यानां वनान्युपवनानि च ॥ तक्कोलानां च जात्यानां [५]फलानां च सुगन्धिनाम् ॥२२॥
पुष्पाणि च तमालस्य गुल्मानि [६]मरिचस्य च ॥ मुक्तानां च समूहानि शुष्यमाणानि तीरतः ॥२३॥
[७]शङ्खानां प्र[८]स्तरं चैव प्रवालनिचयं तथा ॥ काञ्चनानि च [९]शैलानि राजतानि [१०]च सर्वशः ॥ २४ ॥
प्रस्रवाणि मनोज्ञानि [११]प्रसन्नानि ह्रदानि च ॥ धनधान्योपपन्नानि [१२]स्त्रीरत्नैः शोभितानि च ॥२५॥
हस्त्यश्वरथगाढानि [१३]नगराण्यवलोकयन् ॥ तं समं सर्वतः स्निग्धं मृदुसंस्पर्शमारुतम् ॥
[१४]अनूपं सिन्धुराजस्य ददर्श त्रिदिवोपमम् ॥ २६ ॥
तत्रापश्यत्स मेघाभं [१५]न्यग्रोधमृषिभिर्वृतम् ॥ समन्ताद्यस्य ताः शाखाः शतयोजनमायताः ॥ २७॥
यस्य हस्तिनमादाय महाकायं च कच्छपम् ॥ भक्षार्थं गरुडः शाखामाजगाम महाबलः ॥ २८ ॥
तस्य तां सहसा शाखां भारेण पतगोत्तमः ॥ सुपर्णः पर्णबहुलां [१६]बभञ्ज च महाबलः ॥ २९ ॥
तत्र वैखानसा माषा वालखिल्या मरीचिपाः ॥ अजा बभूवुर्धूम्राश्च संगताः परमर्षयः ॥ ३० ॥

प्रोक्तममृतं स्यादयाचितं" इति मनुः ॥ १७ ॥ प्लवाः जलकुकुटाः । मण्डूका इत्यप्याहुः । वैडूर्यप्रस्तरं वैडूर्यमयाः प्रस्तराः शिलाः यस्मिन् तं । "पाषाणप्रस्तरग्रावोपलाश्मानः शिलादृषत्" इत्यमरः ॥ १८ ॥ तपसा जितलोकानां पुरुषाणां विमानानीत्यन्वयः । अभिसंपतन् मार्गवशात् प्राप्नुवन् । सशैलं नानापुष्पफलैर्वृक्षैरनुकीर्णमित्यारभ्य सागरतेजसा स्निग्धमित्यन्तविशेषणविशिष्टं सागरानूपमवलोकयन् पाण्डुरत्वादिविशेषणविशिष्टानि तपसाजितलोकानांविमानान्यभिसंपतन् गन्धर्वाप्सरसो ददर्शेत्यन्वयः ॥ १९—२० ॥ निर्यासरसमूलानामित्यादिसार्धश्लोकषट्कमेकान्वयं । निर्यासरसमूलानां हिङ्गुरूपनिर्यासरसयुक्तमूलानां मूलाख्यौषधीविशेषाणां । मूलाख्यौषधीमूलाद्धिङ्गुरूपनिर्यासा उत्पद्यन्त इति प्रसिद्धिः । वनानि अकृत्रिमाणि । उपवनानि कृत्रिमाणि । तक्कोलानां गन्धद्रव्याणां । जात्यानां जातिभवानां । फलानां जातिफलानामित्यर्थः। सुगन्धिनां उपवनानीत्यन्वयः। गुल्मानि स्तम्बान् । मरिचस्य मरीचस्य। समूहानीति नपुंसकत्वमार्षं । शुष्यमाणानि चिरसङ्गतत्वेनानार्द्राणीत्यर्थः । तीरतः तीरे । शैलानीति नपुंसकत्वमार्षं । तथा प्रस्रवह्रदशब्दयोः । प्रस्तरं समूहं । निचयं समूहं । प्रस्रवाणि प्रस्रवणानि निर्झरानित्यर्थः । गाढानि निबिडानि । एवं बहुधा सागरानूपवर्णनं पुनर्बहुदूरमार्गगमनप्रयासेनमारीचोपदेशानिवर्त्याध्यवसायविशेषं व्यञ्जयितुं ॥ २१—२६ ॥ यस्य वाहनप्रभावोप्यपरिच्छेद्यस्तेन रामेण विरुणद्धि रावणो मूढ इति परिहसन्नाह—तत्रापश्यदित्यादिना । ताः प्रसिद्धाः ॥ २७ ॥ गरुडः महाकायं महाप्रमाणं । हस्तिनं गजं । कच्छपं चादाय यस्य शाखामाजगामेत्यन्वयः ॥ २८ ॥ भारेण बभञ्ज नतु यत्नेनेत्यर्थः । महागजकच्छपवहनात् भारेण शाखा भग्नाभूदित्यर्थः ॥ २९ ॥ तत्र शाखाया अधःप्रदेशे ये सङ्गताः मरी-

प्राप्तमनोरथः पराजितमन्मथैर्वा ॥ १५ ॥ **ति०** सागरतेजसा सागरोर्मिवैभवेन । स्निग्धं सान्द्रंशीतलं ॥ १८ ॥ **स०** शोभनश्चासौगन्धश्च सोस्तियेषांतेषां ॥ २२ ॥ **ति०** शैलानि शिलासमूहान् ॥ २४ ॥ **ति०** समं समभूतलंदेशं ॥ २६ ॥

[**पा०**] १ ङ. झ. ट. प्रसादितं. २ च. छ. ज. ञ. दिव्यं. ङ. झ. ट. स्निग्धंसान्द्रं. ३ क. घुष्टानि. ४ च. छ. ज. ञ. ट. अंकोलानांच. ५ च. छ. ज. ञ. पलाशानां. ६ ख. मलयस्यच. ७ ङ. झ. ट. शैलानिप्रवरांश्चैवप्रवालनिचयांस्तथा. ८ च. प्रकरं. ९ ङ. ट. शृङ्गाणि. १० ङ. झ. ट. तथैवच. घ. सहस्रशः. ११ च—झ. प्रसन्नान्यद्भुतानिच. १२ क. ख. ग. ङ—ट. रत्नैराश्रतानिच. १३ ङ. झ. ट. नगराणिविलोकयन्. १४ झ. अनूपे. १५ ङ—ट. न्यग्रोधंमुनिभिः. १६ क. ख. ङ. च. झ. ञ. ट. बभञ्जाथ.

तेषां दयार्थं गरुडस्तां शाखां शतयोजनाम् ॥ [१]जगामादाय वेगेन तौ चोभौ गजकच्छपौ ॥
एकपादेन धर्मात्मा भक्षयित्वा तदामिषम् ॥ ३१ ॥
निषादविषयं हत्वा शाखया [२]पतगोत्तमः ॥ प्रहर्षमतुलं लेभे मोक्षयित्वा [३]महामुनीन् ॥
[[४]शाखानिपातभीतांश्च शाखां चोत्सृज्य सर्ववित् ॥ ३२ ॥]
[५]स तेनैव प्रहर्षेण द्विगुणीकृतविक्रमः ॥ अमृतानयनार्थं वै चकार [६]मतिमान्मतिम् ॥ ३३ ॥
[७]अयोजालानि निर्मथ्य भित्त्वा [८]रत्नमयं गृहम् ॥ महेन्द्रभवनाद्गुप्तमाजहारामृतं ततः ॥ ३४ ॥
तं महर्षिगणैर्जुष्टं सुपर्णकृतलक्षणम् ॥ नाम्ना सुभद्रं न्यग्रोधं ददर्श धनदानुजः ॥ ३५ ॥
तं तु गत्वा परं पारं समुद्रस्य नदीपतेः ॥ ददर्शाश्रममेकान्ते [९]रम्ये पुण्ये वनान्तरे ॥ ३६ ॥
तत्र कृष्णाजिनधरं [१०]जटावल्कलधारिणम् ॥ ददर्श नियताहारं मारीचं नाम राक्षसम् ॥ ३७ ॥
[११]स रावणः समागम्य विधिवत्तेन रक्षसा ॥ मारीचेनार्चितो राजा सर्वकामैरमानुषैः ॥ ३८ ॥
तं स्वयं [१२]पूजयित्वा तु [१३]भोजनेनोदकेन च ॥ अर्थोपहितया [१४]वाचा मारीचो वाक्यमब्रवीत् ॥ ३९ ॥
[१५]कच्चित्सुकुशलं राजँल्लङ्कायां राक्षसेश्वर ॥ [१६]केनार्थेन पुनस्त्वं वै [१७]तूर्णमेवमिहागतः ॥ ४० ॥
एवमुक्तो महातेजा मारीचेन स रावणः ॥ [१८]तं तु पश्चादिदं वाक्यमब्रवीद्वाक्यकोविदः ॥४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

चिपाः रविकिरणपानव्रताः । धूम्राः धूमपाः । तेषां दयार्थं शाखापातेन पीडा माभूदिति तदनुग्रहार्थमित्यर्थः । एकपादेन आदाय अवष्टभ्येत्यर्थः । भक्षयित्वा आकाश एवेति शेषः । आमिषं गजकच्छपरूपं मांसं ॥ ३०—३१ ॥ निषादविषयं निषादग्रामं । शाखया हत्वा तानपि भक्षयित्वा । महामुनीन् वैखानसादीन् निषादविषयस्थब्राह्मणान्वा निषादैः पीड्यमानान्वा । तद्रक्षणार्थमेव तद्धननमिति भावः । तादृशशाखारूपप्रहरणलाभेन तदैव मुनिबाधकनिषाददेशं सर्वं हत्वा शिष्टपालनाद्दुष्टनिग्रहाच्चातुलं प्रहर्षं लेभ इति भावः ॥ ३२ ॥ तेनैव भक्षणजन्येनेत्यर्थः ॥ ३३ ॥ अयोजालानि अयोनिर्मितजालकानि । निर्मथ्य ध्वंसयित्वा । तदन्तर्वर्तिरत्नमयं गृहं भित्त्वा ततः तदन्तरे गुप्तममृतं महेन्द्रभवनादाजहार ॥३४॥ सुपर्णकृतलक्षणं सुपर्णेन गरुडेन कृतं भग्नैकशाखत्वरूपं लक्षणं चिह्नं यस्य ॥ ३५—३६ ॥ कृष्णाजिनेत्यादिना रामभक्ततया जनितवैराग्यचिह्नोक्तिः ॥३७॥ समागम्य मारीचं प्राप्य सर्वकामैः सर्वभोग्यवस्तुभिः । अर्चितो बभूव ॥ ३८—३९ ॥ एवं तूर्णं एकाकितया शीघ्रं ॥ ४० ॥ इदं उत्तरसर्गे वक्ष्यमाणं ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चत्रिंशः सर्गः ॥ ३५ ॥

ती० अयोजालानि अयश्शृङ्खलनिर्मितानिजालानि रत्नमयगेहोपरिपक्षिराजप्रवेशपरिहारायबद्धानि निर्मथ्य ॥ ३४ ॥ इतिपञ्चत्रिंशस्सर्गः ॥ ३५ ॥

[पा०] १ ङ. झ. ट. भग्नामादाय. २ क. पतगाधिपः. ३ ख. तदामुनीन्. ४ इदमर्धं ख. पाठेदृश्यते. ५ ङ. झ. ट. सतुतेन. ६ ग. झ. गमनेमतिं. ७ ग. अयोजालंतु. क. अयोजालंविनिर्मथ्य. ८ ङ. छ—ट. रत्नगृहंवरं. ख. रत्नगृहं महत्. ९ क. ग. ङ—ट. पुण्येरम्ये. १० ङ—ट. जटामण्डल. ११ ख. रावणस्सहसागम्य. घ. रावणस्तं. १२ ङ. झ. ट. पूजयित्वाच. १३ क. ग. भोजनेनासनेनच. १४ घ. बुद्ध्या. १५ ङ. झ. ट. कच्चित्तेकुशलं. घ. कच्चित्सुकुशली. १६ च. छ. ज. केनैवचार्थजातेन. ख. केनचैवार्थजातेन. १७ ख. च. छ. ज. तूर्णमेवत्वमागतः. ङ. झ. ञ. ट. तूर्णमेवइहागतः. १८ क. ग. ङ—ट. ततःपश्चात्.

षट्त्रिंशः सर्गः ॥ ३६ ॥

रावणेनमारीचंप्रतिपुनर्जनस्थानवृत्तान्तकथनपूर्वकंस्वचिकीर्षितसीतापहरणेसाहाय्यप्रकारनिवेदनेनतत्करणप्रार्थना ॥ १ ॥ रामवार्ताश्रवणमात्रेणत्रस्तविषण्णचेतसामारीचेनरावणायहितोपदेशसमुद्यमः ॥ २ ॥

मारीच श्रूयतां [1]तात वचनं मम भाषतः ॥ आर्तोस्मि मम चार्तस्य भवान्हि परमा गतिः ॥ १ ॥
जानीषे त्वं [2]जनस्थाने [3]यथा भ्राता खरो मम ॥ दूषणश्च महाबाहुः स्वसा शूर्पणखा च मे ॥ २ ॥
त्रिशिराश्च [4]महातेजा राक्षसः पिशिताशनः ॥ अन्ये च बहवः शूरा लब्धलक्षा [5]निशाचराः ॥ ३ ॥
वसन्ति मन्नियोगेन [6]नित्यवासं च राक्षसाः ॥ बाधमाना महारण्ये [7]मुनीन्वै धर्मचारिणः ॥ ४ ॥
चतुर्दश सहस्राणि [11]रक्षसां भीमकर्मणाम् ॥ शूराणां लब्धलक्षाणां खरचित्तानुवर्तिनाम् ॥ ५ ॥
ते त्विदानीं जनस्थाने [8]वसमाना महाबलाः ॥ [9]संगताः परमायत्ता रामेण सह संयुगे ॥
नाना[10]प्रहरणोपेताः खरप्रमुखराक्षसाः ॥ ६ ॥
तेन संजातरोषेण रामेण रणमूर्धनि ॥ अनुक्त्वा परुषं किंचिच्छरैर्व्यापारितं धनुः ॥ ७ ॥
चतुर्दश सहस्राणि [11]रक्षसामुग्रतेजसाम् ॥ निहतानि [12]शरैस्तीक्ष्णैर्मानुषेण पदातिना ॥ ८ ॥
खरश्च निहतः संख्ये दूषणश्च [13]निपातितः ॥ [14]हतश्च त्रिशिराश्चापि निर्भया दण्डकाः कृताः ॥ ९ ॥
पित्रा निरस्तः क्रुद्धेन सभार्यः क्षीणजीवितः ॥ स हन्ता तस्य सैन्यस्य रामः क्षत्रियपांसनः ॥१०॥
[15]दुःशीलः कर्कशस्तीक्ष्णो मूर्खो लुब्धोऽजितेन्द्रियः ॥ [16]त्यक्तधर्मो ह्यधर्मात्मा भूतानामहिते रतः ॥११॥

महासमरमध्येपि गाम्भीर्यं यस्य निश्चलम् । तमहं शिरसा वन्दे जानकीप्राणवल्लभम् ॥ भाषतः भाषमाणस्य ॥ १ ॥ कर्तव्यं वक्ष्यन्पूर्ववृत्तं स्मारयति—जानीष इत्यादिना । अनुवर्तिनामित्यन्तमेकं वाक्यं । खरादयश्चतुर्दशसहस्रराक्षसान्ताः जनस्थाने नित्यवासं यथा तथा वसन्तीति जानीष इत्यन्वयः । रतिवासमिति पाठे रत्या प्रीत्या वासो यस्मिन्कर्मणि तत्तथा ॥ २—५ ॥ वसमानाः ताच्छील्ये शानच् । संयुगे रामेण सह संगताः रामेण सह युद्धमकुर्वन्नित्यर्थः । परं अत्यन्तं । आयत्ताः सन्नद्धाः । प्रहरणं आयुधं ॥६॥ अनुक्त्वा परुषंकिंचिदित्यनेन गाम्भीर्यं विवक्ष्यते । व्यापारितं संधानमोक्षणव्यापारविशिष्टं कृतं ॥७–८॥ संख्ये युद्धे। "युद्धमायोधनं इत्यारभ्य मृधमास्कन्दनं संख्यं" इत्यमरः ॥ ९—१० ॥ कर्कशः कठिनहृदयः

ति०तातेत्युपलालने ॥ १ ॥ **ति०** जानीषइति भ्रात्रादयो मन्नियोगाज्जनस्थानंप्राप्यवसन्तीति त्वंजानीषेकिलेत्यन्वयः ॥२॥ **ती०** लब्धलक्षाः लब्धावसराः । प्राप्तयुद्धोत्साहाइतियावत् ॥३॥ **ति०** अथतत्रस्थित्वाक्रियमाणंवृत्तंच जानीषेइत्याह—**अधिवासंचेति** । मुनीन्बाधमानाः बाधहेतवे । हेतौशानच् । अधिवासंचकुर्वन्ति । मन्नियोगादितिशेषः । **कतक०** । अधिवासः उपद्रवः ॥४॥ **स०** वसमानाः । आर्षश्शानच् । व समानाइतिपदद्वयंवा । ममसमानाः सदृशाः मानेन मत्कृतमानेन सहितावा ॥ ६ ॥ **ती०** वस्तुतस्तु क्रुद्धेनपित्रानिरस्तः निष्कासितःकिं । किंतु कैकेयीवरदानमोहितेनपित्राप्रार्थितस्सन्वनमागतः । सभार्यः सभायामार्यः सभ्यः। क्षीणजीवितःकिं। किंतु तस्यखरस्यसैन्यस्यसंहर्ता। कुतः क्षत्रियपांसनः क्षत्रियान्पातीतिक्षत्रियपः । सचासावंसनश्च शत्रुनाशकः अंससमाघातइतिधातुः । अतएव अशीलःकिं किंतुसद्वृत्तः । तथापि कर्कशः कठिनः । शत्रुविषयइतिशेषः । तीक्ष्णः कार्येष्वनलसः । अतएव अमूर्खः अलुब्धः । जितेन्द्रियइतिच्छेदः । त्यक्तधर्मः त्यक्ताः विरुद्धाः धर्मायेनेति मध्यमपदलोपिसमासः । अतएवाधर्मात्माकिं ।किंतु धार्मिकएव । अतएव भूतानामहिते अरतः सर्वभूतदयापरइत्यर्थः ॥ १०—११ ॥

[पा०] १ ग. वत्स. २ क—ङ. झ. ञ. ट. जनंस्थानं. ३ क—ट. भ्रातायत्र. ४ ङ.—ट. महाबाहूराक्षसः. ५ ग. महाबलाः. ६ ग. ङ. झ. ञ. ट. अधिवासंच. ख. तन्निवासंच. क. च. कृतवासाश्च. घ. निवासंचैव. छ. ज. रतिवासाश्च. ७ ङ. झ. ट. मुनीन्ये. क. ग. मुनींस्तान्धर्म. ८ ख. वर्तमानाः. ९ ख. संयताः. १० ङ. झ. ट. शस्त्रप्रहरणाः. ११ ख. रक्षसांभीमकर्मणां. १२ क. ग. ङ—ज. ट. शरैर्दीप्तैः. १३ ग. महाबलः. १४ च. छ. ज. ञ. हत्वात्रिशिरसंचैव. क. ख. ग. ङ. झ. ट. हत्वात्रिशिरसंचापि. १५ क. ङ—ट. अशीलः. १६ ख. घ. त्यक्त्वाधर्ममधर्मात्मा. ङ. झ. ट. त्यक्तधर्मा त्वधर्मात्मा. क. च. छ. ज. ञ. त्यक्तधर्मस्त्वधर्मात्मा.

येन वैरं विनाऽरण्ये सत्त्व[1]माश्रित्य केवलम् ।। कर्ण[2]नासापहरणाद्भगिनी मे विरूपिता ।। १२ ।।
[3]तस्य भार्यां जनस्थानात्सीतां सुरसुतोपमाम् ।। आनयि[4]ष्यामि विक्रम्य सहायस्तत्र मे भव ।।१३।।
त्वया [5]ह्यहं सहायेन पार्श्वस्थेन महाबल ।। भ्रातृभिश्च [6]सुरान्युद्धे समग्रान्नाभिचिन्तये ।। १४ ।।
तत्सहायो भव त्वं मे समर्थो ह्यसि राक्षस ।। वीर्ये [7]युद्धे च दर्पे च न ह्यस्ति सदृशस्तव ।। १५ ।।
[8]उपायज्ञो [9]महाञ्शूरः [10]सर्वमायाविशारदः ।। एतदर्थमहं प्राप्तस्त्वत्[11]समीपं निशाचर ।। १६ ।।
शृणु तत्कर्म साहाय्ये यत्कार्यं वचनान्मम ।। १७ ।।
सौवर्णस्त्वं मृगो भूत्वा चित्रो रजतबिन्दुभिः ।। आश्रमे तस्य रामस्य सीतायाः प्रमुखे चर ।।१८।।
[12]त्वां तु निःसंशयं सीतां[13] दृष्ट्वा तु मृगरूपिणम् ।। गृह्यतामिति भर्तारं लक्ष्मणं चाभिधास्यति ।।१९।।
ततस्तयोरपाये तु शून्ये सीतां यथासुखम् ।। नि[14]राबाधो हरिष्यामि राहुश्चन्द्रप्रभामिव ।। २० ।।
ततः पश्चात्सुखं रामे भार्याहरणकर्शिते ।। वि[15]स्रब्धः प्रहरिष्यामि कृतार्थेनान्तरात्मना ।। २१ ।।
[16]तस्य रामकथां श्रुत्वा मारीचस्य महात्मनः ।। शुष्कं समभवद्वक्त्रं परित्रस्तो बभूव सः ।। २२ ।।
ओष्ठौ परिलिहञ्शुष्कौ नेत्रैरनिमिषैरिव ।। मृतभूत इवार्तस्तु रावणं समुदैक्षत ।। २३ ।।
[17]स रावणं त्रस्तविषण्णचेता महावने रामपराक्रमज्ञः ।।
कृताञ्जलि[18]स्तत्त्वमुवाच वाक्यं हितं च तस्मै हितमात्मनश्च ।। २४ ।।

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे षट्त्रिंशः सर्गः ।। ३६ ।।

।। ११ ।। सत्त्वं बलं केवलमाश्रित्य नतु धर्ममित्यर्थः । "सत्त्वं बले च जन्तौ च" इति विश्वः । आनयिष्यामि आनेष्यामि इडार्षः ।। १२—१३ ।। भ्रातृभिः कुम्भकर्णादिभिः । समग्रान् संपूर्णान् । नाभिचिन्तये न गणयामि ।। १४—१६ ।। शृणुतत्कर्मेत्यत्र तदिति भिन्नं पदं । प्रकृते कार्यसाहाय्येयत्कर्म कार्यं कर्तव्यं । तन्मम वचनाच्छृणिवति संबन्धः ।। १७ ।। प्रमुखे अग्रे ।। १८ ।। गृह्यतामिति अयमिति शेषः ।। १९ ।। तयोः रामलक्ष्मणयोः । अपाये अपगमे सति शून्ये प्रदेशे । निराबाधः अप्रतिबन्धः ।। २० ।। विस्रब्धः निःशङ्कः । अन्तरात्मना अन्तस्थधैर्येण ।। २१ ।। सः मारीचः । रामकथां श्रुत्वा परित्रस्तो बभूव । तेन त्रासेन तस्य वक्त्रं शुष्कं समभवदित्यन्वयः ।। २२ ।। भयकार्यान्तरमाह—ओष्ठाविति । शुष्कौ ओष्ठौ परिलिहन् सः अनिमिषैः निमेषरहितैः । नेत्रैः नेत्रव्यापारैः । मृतभूत इव मृतजन्तुरिवार्तः सन् रावणं समुदैक्षत ।। २३।। उत्तरसर्गार्थं संगृह्णाति—स इति । त्रस्तविषण्णचेताः भीतदुःखितमनाः । तत्र हेतुः—

स० क्षीणजीवितः मत्संगमनावधिकत्वात्तज्जीवनक्षयस्येतिभावः । **ति०** अथभगिनीवैरूप्यंनिष्कारणंमन्यमानःक्रोधाद्दूषयतिरामं—**पित्रेत्यादिना** । क्षीणजीवितः निरपराधस्त्रीवैरूप्यकरणादेवतथात्वंमन्यते । **ती०** वस्तुतस्तु सनत्कुमारवचनाद्विष्णुरूपश्रीरामाद्वधंप्राप्यतत्पदंप्राप्तुं तस्यभार्यामानयिष्यामि नतुद्रोहबुद्ध्येतिभावः ।। **ति०** अतएवाशीलोऽजितेन्द्रियश्च । अस्थानेक्रोधात् ।। ११ ।। **ति०** उपायतः उपायेष्वित्यर्थः ।। १६ ।। **ती०** वस्तुतस्तु रामेभार्याहरणकर्शिते रामएवेभः रामेभस्य आर्यासीता तस्याआहरणं तेनहेतुना कर्शिते नाशितेसति । रामेणमच्छरीरे इतिशेषः । ततः कृतार्थेनान्तरात्मना उपलक्षितस्सन् पश्चाद्विस्रब्धं निष्कलङ्कं । सुखं परमानन्दसुखं मोक्षमितियावत् । प्रहरिष्यामि प्रकर्षेणाहरिष्यामि प्राप्स्यामीत्यर्थः । इदमात्मगतं ।।२१।। **ती०** मृतभूतइव मृतसदृशः । नेत्रैः नेत्रव्यापारैः । अन्यथाबहुवचनायोगात् । **स०** भयेनपुनःपुनःपरिभ्रमणाद्बहुवचनं नेत्रैरिति । यद्वा अनिमिषैर्नेत्रैरुपलक्षितंरावणं समुदैक्षतेत्यध्याहारेणान्वयः ।। २३ ।। इतिषट्त्रिंशस्सर्गः ।। ३६ ।।

[पा०] १ ङ. झ. ट. मास्थाय. २ ङ—ट. नासापहारेणभगिनी. ३ ङ. झ. ट. अस्य. ४ क. यिष्याम्यतिक्रम्य. ५ ट. सह. ६ ङ. ट. सुरान्सर्वान्नाहमत्रानुचिन्तये. झ. सुरान्सर्वान्नाहमत्राभिचिन्तये. ख. सुरान्सर्वान्समग्रान्. ७ ख. दर्पेचयुद्धेच. ८ झ. ञ. ट. उपायतो. ९ घ. ङ. ञ. ट. महाशूरः. १० ङ. झ. ञ. ट. महामाया. ख. सर्वशास्त्रविशारदः. ११ च. छ. ज. ञ. तत्सकाशं. १२ क. त्वांहि. १३ च. छ. ज. ञ. दृष्ट्वासीताच. १४ क. निराबाधं. घ. निरायासो. ग. निरापायो. १५ ङ. झ. ट. विस्रब्धं. १६ क. तस्माद्राम. १७ च. छ. ज. ञ. सराक्षसस्तत्र. क. ख. सरावणंतत्र. १८ ञ. स्त्रस्तमुवाच.

सप्तत्रिंशः सर्गः ॥ ३७ ॥

मारीचेनरावणंप्रतिसीतारामयोःप्रभावातिशयानुवर्णनपूर्वकंसीताहरणस्यस्वमरणकारणत्वोक्त्यातततोनिवृत्तिरूपहितोपदेशः ॥ १ ॥

तच्छ्रुत्वा राक्षसेन्द्रस्य वाक्यं वाक्यविशारदः ॥ प्रत्युवाच [1]महाप्राज्ञो मारीचो राक्षसेश्वरम् ॥ १ ॥
सुलभाः पुरुषा राजन्सततं प्रियवादिनः ॥ अप्रि[2]यस्य तु पथ्यस्य वक्ता श्रो[3]ता च दुर्लभः ॥ २ ॥
न नूनं बुध्यसे रामं महा[4]वीर्यं गुणोन्नतम् ॥ अयुक्तचारश्चपलो महेन्द्रवरुणोपमम् ॥ ३ ॥
अपि स्वस्ति भवेत्तात [5]सर्वेषां भुवि रक्षसाम् ॥ अपि रामो न संक्रुद्धः कुर्या[6]ल्लोकमराक्षसम् ॥ ४ ॥
अपि ते जीवितान्ताय नोत्पन्ना जनकात्मजा ॥ अपि सीतानिमि[7]त्तं च न भवेद्व्यसनं [8]मम ॥ ५ ॥
अपि त्वामीश्वरं प्राप्य कामवृत्तं निरङ्कुशम् ॥ न विनश्येत्पुरी लङ्का त्वया सह सराक्षसा ॥ ६ ॥
त्वद्विधः कामवृत्तो हि दुःशीलः पापमं[9]त्रितः ॥ आत्मानं स्वजनं राष्ट्रं स राजा हन्ति दुर्मतिः ॥७॥
[10]न च पित्रा परित्यक्तो नामर्यादः कथंचन ॥ न लुब्धो न च दुःशीलो न च क्षत्रियपांसनः ॥८॥
न च धर्मगुणैर्हीनः कौसल्या[11]नन्दिवर्धनः ॥ [12]न तीक्ष्णो न च भूतानां [13]सर्वेषामहिते रतः ॥ ९ ॥

रामपराक्रमज्ञइति । पूर्वं दण्डकारण्ये यो रामपराक्रम आसीत् तज्ज्ञ इत्यर्थः । तस्मै रावणाय । हितं अनपायं । "हितयोगे च" इति वार्तिकेन चतुर्थी ॥२४॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षट्त्रिंशः सर्गः ॥ ३६ ॥

सीतापतित्वसंभूतमप्रमेयं वहन्महः । समस्तापायरहितो रामो जयतु मे धनम् ॥ तच्छ्रुत्वेत्यादि ॥ १ ॥ सततं आपत्प्राप्तावपि । प्रियवादिनः स्वामिहिताहितविमर्शमुपेक्ष्य केवलं स्वप्रयोजनाय यथेच्छावादशीलाः। पुरुषाः सुलभाः । राज्ञः अप्रियस्य तु अप्रियस्यापि तत्काले श्रवणकटुतया प्रतीयमानस्यापि । कालान्तरे पथ्यस्य हितस्य शुभोदर्कस्येत्यर्थः । वचनस्य वक्ता भृत्यः तथाविधवचनस्य श्रोता च पथ्यभक्षणवन्ममेदं हितमिति ग्रहीता राजा च दुर्लभः । अतो मयोच्यमानमप्रियमिवस्थितमपि परमहितमिति गृहाणेति भावः ॥ २ ॥ पथ्यवचनमेवाह—ननूनमित्यादिना । अयुक्तचारः अनियोजितचारः । चपलतया अयुक्तचारत्वाद्वा तद्वीर्यं सम्यङ्ग जानासीत्यर्थः ॥ ३ ॥ अद्यैव निर्गत्यपुनरागमनान्नूनं नमे वचनंश्रोष्यतीतिनिश्चित्य रावणचापलेन संभावितानन्र्थानाह—अपीत्यादिना । अपिः संभावनायां । काकुस्वरो द्रष्टव्यः । एवमुत्तरवाक्येष्वपि स्वरपर्यवसानेनार्थपरिच्छेदः कार्यः । रक्षसां सजातीयानां । स्वस्ति भवेदपि । आर्षी षष्ठी । अकार्यनिवृत्त्यर्थं तातेति संबोधनं ॥४—५॥ ईश्वरं स्वामिनं । कामवृत्तं यथेच्छव्यापारं । निरङ्कुशं अमर्यादं ॥ ६॥ य इत्यध्याहार्यं । पापं दुष्टं मन्त्रितं विचारो यस्य सः ॥ ७॥ पित्रा निरस्त इत्यादिनापूर्वं रावणोक्तदूषणानि परिहरति—न चेत्यादिना ॥ ८ ॥ कौसल्यानन्दिवर्धन इति । आनन्दिरानन्दः "सर्व-

---

स० अप्रियस्य तत्कालंतथाऽवभासमानस्य वचसःत्रिकटुकादेश्च वक्तेव भोक्तापिदुर्लभः । **ति०** भोक्ताअहितवत्प्रतिभासमानमपीदंपथ्यमेवेतिग्रहीता राजाविवेकीदुर्लभः ॥ २ ॥ **स०** सर्वेषांरक्षसांस्वस्तीतिषष्ठ्या नस्वस्तिभवतिरक्षोभ्यइत्यभिप्रैति ॥४॥ **स०** निरङ्कुशंगजमिवविद्यमानं निरङ्कुशं निषेधकबुद्धिमत्पुरुषशून्यं ॥ ६ ॥ **ति०** तैक्ष्ण्याभावेहेतुः **सर्वभूतहितेरतत्वं**

[पा०] १ ङ.—ट. महातेजाः. २ घ. ङ—ट. अप्रियस्यच. ३ ङ. झ. भोक्ताच. ४ च—ञ. वीर्यगुणोन्नतं. ख. घ. वीर्यगुणान्वितं. ५ ङ.—ट. सर्वेषामपि. क. सर्वेषांरक्षसांभुवि. ६ ग. ङ. झ. ट. ल्लोकानराक्षसान्. ७ च. छ. ज. ञ. निमित्तंते. ८ क. ग. ङ.—ट. महत्. ९ क. ख. च. छ. ज. यन्त्रितः. १० क. ख. घ. च. छ. ज. ञ. नस. ११ क. घ—ट. नन्दवर्धनः. १२ क. ख. ग. ङ.—झ. ट. नचतीक्ष्णोहिभूतानां. १३ ङ. झ. ट. सर्वभूतहिते. क. ख. ग. च. छ. ज. सर्वेषांचहिते.

वञ्चितं पितरं दृष्ट्वा कैकेय्या सत्यवादिनम् ॥ करिष्यामीति धर्मात्मा तात[1] प्रव्रजितो[2] वनम् ॥ १० ॥
कैकेय्याः प्रियकामार्थं पितुर्दशरथस्य च ॥ हित्वा राज्यं च भोगांश्च[3] प्रविष्टो दण्डकावनम् ॥ ११ ॥
न[4] रामः कर्कशस्तात नाविद्वान्नाजितेन्द्रियः ॥ अनृतं दुःश्रुतं[5] चैव नैवं[6] त्वं वक्तुमर्हसि ॥ १२ ॥
रामो[7] विग्रहवान्धर्मः साधुः[8] सत्यपराक्रमः ॥ राजा सर्वस्य लोकस्य देवानां[9] मघवानिव ॥ १३ ॥
कथं[10] त्वं तस्य वैदेहीं रक्षितां स्वेन तेजसा ॥ इच्छसि[11] प्रसभं हर्तुं प्रभामिव विवस्वतः ॥ १४ ॥
शरार्चिषमनाधृष्यं चापखड्गेन्धनं[12] रणे ॥ रामाग्निं सहसा दीप्तं न प्रवेष्टुं त्वमर्हसि ॥ १५ ॥
धनुर्व्यादितदीप्तास्यं शरार्चिषम[13]मर्षणम्[14] ॥ चापपाशधरं[15] वीरं शत्रुसैन्यप्रहारिणम्[16] ॥ १६ ॥
राज्यं सुखं च संत्यज्य जीवितं चेष्टमात्मनः ॥ नात्यासादयितुं तात[17] रामान्तकमिहार्हसि[18] ॥ १७ ॥
अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा ॥ न त्वं समर्थस्तां हर्तुं रामचापाश्रयां[19] वने ॥ १८ ॥
तस्य[20] सा नरसिंहस्य सिंहोरस्कस्य भामिनी ॥ प्राणेभ्योपि प्रियतरा भार्या नित्यमनुव्रता ॥ १९ ॥
न सा धर्षयितुं शक्या मैथिल्यो[21]जस्विनः प्रिया ॥ दीप्तस्येव हुताशस्य शिखा सीता सुमध्यमा ॥ २० ॥
किमुद्यम[22]मिमं व्यर्थं कृत्वा ते राक्षसाधिप ॥ दृष्टश्चेत्[23]त्वं रणे तेन तदन्तं[24] तव जीवितम् ॥ २१ ॥
जीवितं च सुखं चैव राज्यं चैव सुदुर्लभम् ॥ यदीच्छसि [25]चिरं भोक्तुं मा कृथा रामविप्रियम् ॥ २२ ॥

धातुभ्य इन्'' इति इन् ॥ ९ ॥ कैकेय्या वञ्चितं पितरं दृष्ट्वा तं सत्यवादिनं करिष्यामीति स्वयं प्रव्रजितः गतः । तातेति सान्त्वोक्तिः ॥ १० ॥ वनगमने हेत्वन्तरमाह—कैकेय्या इति । प्रियस्य कामः कामना स एवार्थो यस्मिन्कर्मणि ॥ ११ ॥ अनृतं असत्यं । दुःश्रुतं वैपरीत्येन श्रुतं च । त्वंवक्तुं नार्हसीत्यन्वयः ॥१२॥ रामः विग्रहवान् मूर्तो धर्म एव । तत्रदोषसंभावनाकथंचिदपिनकार्येतिभावः । यथा वासवो देवानां नायकस्तथा रामः सर्वेषां लोकानां नायक इत्यर्थः ॥१३॥ स्वेन तेजसा पातिव्रत्यवैभवेन । प्रसभं बलात्कृत्य ॥ १४ ॥ शरार्चिषमिति शरपदं खड्गधाराया अप्युपलक्षणं । चापखड्गेन्धनमिति रूपणात् । सहसा साहसेन ॥ १५ ॥ धनुरित्यादिश्लोकद्वयमेकान्वयं । धनुरेव व्यादितदीप्तास्यं । व्यादितं विवृतं । अत्यासादयितुं अत्यन्तमासन्नो भवितुं ॥ १६—१७ ॥ जनकात्मजा यस्य यत्संबन्धिनी । तत्तेजः तस्य तेजः । अप्रमेयं अपरिच्छेद्यं । ''श्रद्धया देवो देवत्वमश्नुते '' इत्युक्तरीत्या सीतासंबन्धेन रामस्यातिशय उक्तः । वने सावधानतयारक्षणीयप्रदेशे । रामचापाश्रयामिति रामवैभवोक्तिः । उभयथापि न हर्तुं शक्येत्यर्थः । जनकात्मजेति कुलप्रभावादपि न हर्तुं शक्येत्यर्थः ॥ १८—२० ॥ व्यर्थमिममुद्यमं उद्योगं । कृत्वा ते किं किं फलं प्राप्तव्यमित्यर्थः । तदन्तं दर्शनान्तं ॥ २१ ॥ न केवलं जीवितं सुखादिकं च दुर्लभमित्याह—जीवितं

॥ ९ ॥ ति० अनृतंनश्रुतंचैव अनृतप्रसंगमपिनजानाति । तेन तत्कथनंदूरापास्तमित्यर्थः । एवंवक्तुं रामंदुर्गुणंवक्तुं ॥ १२ ॥ ति० अप्रमेयंहितत्तेजइत्यनेनावाङ्मनसगोचरत्वंध्वनितं । यस्यसेत्यनेन तस्याअपितत्त्वंसूचितं ॥ १८ ॥ ति० नरसिंहस्येत्यनेन हिरण्यकशिपुप्रभृतिहन्ताऽयमेवेतिसूचितं । नित्यमनुव्रतेत्यनेन तस्यास्तच्छक्तित्वंसूचितं ॥१९॥ शि० तदन्तं तेन रणेरामदर्शनेन अन्तोविध्वंसोयस्यतत् । उपजीवितं स्वजीवनं । विद्धीतिशेषः ॥ २१ ॥ इतिसप्तत्रिंशस्सर्गः ॥ ३७ ॥

[पा०] १ क–ट. ततः. २ क.–घ. छ. ज. ञ. ट. प्रव्राजितो. ३ क. ख. घ. भोगंच. ४ ख. रामोनकर्कशः. ५ ख. घ. ङ. झ. ट. नश्रुतं. च. छ. ज. दुष्कृतं. ६ ख. ङ. झ. ञ. ट. नैवंत्वंवक्तुमर्हसि. ७ क. ख. ग. च. छ. ज. ञ. धर्मोविग्रहवान्रामः. ८ ग. रणे. ९ क. ख. ग. ङ—ट. देवानामिववासवः. १० क. ङ.—झ. ट. कथंनु. ख. ग. ञ. कथंतु. ११ ङ. झ. ठ. इच्छसे. १२ ख. खड्गधरं. १३ ग. शरजिह्वं. १४ ख. ममर्षिणं. १५ ङ. झ. ट. चापबाणधरंतीक्ष्णं. च. छ. ज. ञ. खड्गचापधरं. क. खड्गपाशधरं. १६ क. घ. सैन्यापहारिणं. ङ—ट. सेनापहारिणं. १७ ख. तंतु. १८ घ. मथार्हसि. १९ क. ख. घ. पादाश्रयां. २० ङ. झ. ट. तस्यैव. २१ ख. ग. च. छ. ज. ञ. मैथिलीजनकात्मजा. २२ ङ—ट. मुद्यमं व्यर्थमिमं. २३ क. च. छ. ज. ञ. दृष्टश्चेत्तु. २४ ङ. झ. ट. तदन्तमुपजीवितं. ख. तदन्तंजीवितंतव. २५ क. सुखं.

स[1] सर्वैः सचिवैः सार्धं विभीषणपुरोगमैः[2] ॥ मन्त्रयित्वा तु धर्मिष्ठैः[3] कृत्वा निश्चयमात्मनः[4] ॥ २३ ॥
दोषाणां च गुणानां च संप्रधार्य बलाबलम् ॥ आत्मनश्च बलं ज्ञात्वा राघवस्य च तत्त्वतः ॥
हिताहितं[5] विनिश्चित्य क्षमं त्वं कर्तुमर्हसि ॥ २४ ॥
अहं तु मन्ये तव न क्षमं रणे समागमं[6] कोसलराजसूनुना ॥
इदं हि भूयः शृणु वाक्यमुत्तमं क्षमं च युक्तं च निशाचरेश्वर[7] ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

अष्टत्रिंशः सर्गः ॥ ३८ ॥

मारीचेनरावणंप्रतियज्ञभङ्गादिरूपस्वकृतपीडामसहमानेनविश्वामित्रेणयज्ञरक्षणायस्वाश्रमंप्रतिरामानयनादिवृत्तान्तनिवेदनपूर्वकंरामेणैकशरेणसुदूरतरसागराम्भसिस्वस्यप्रक्षेपादिनिवेदनम् ॥ १ ॥ तथासीताहरणस्यैहिकपारत्रिकमहानर्थहेतुत्वोक्त्यातततोनिवर्तनोपदेशः ॥ २ ॥

कदाचिदप्यहं वीर्यात्पर्यटन्पृथिवीमिमाम् ॥ बलं नागसहस्रस्य धारयन्पर्वतोपमः ॥ १ ॥
नीलजीमूतसंकाशस्तप्तकाञ्चनकुण्डलः ॥ भयं लोकस्य जनयन्किरीटी परिघायुधः ॥
व्यचरं दण्डकारण्ये[8] ऋषिमांसानि भक्षयन् ॥ २ ॥
विश्वामित्रोथ[9] धर्मात्मा मद्वित्रस्तो महामुनिः ॥ स्वयं गत्वा दशरथं नरेन्द्रमिदमब्रवीत् ॥ ३ ॥
अयं[10] रक्षतु मां रामः पर्वकाले समाहितः ॥ मारीचान्मे भयं घोरं समुत्पन्नं नरेश्वर ॥ ४ ॥
इत्येवमुक्तो धर्मात्मा राजा दशरथस्तदा ॥ प्रत्युवाच महाभागं विश्वामित्रं महामुनिम् ॥ ५ ॥
बालो[11] द्वादशवर्षोऽयमकृतास्त्रश्च राघवः ॥ कामं तु मम यत्सैन्यं[12] मया सह गमिष्यति ॥ ६ ॥
बलेन चतुरङ्गेण स्वयमेत्य निशाचरान्[13] ॥ वधिष्यामि मुनिश्रेष्ठ शत्रूंस्ते[14] मनसेप्सितान् ॥ ७ ॥

चेति ॥ २२ ॥ स इत्यादि सार्धश्लोकद्वयमेकान्वयं । सत्वमित्यन्वयः । क्षमं साधु ॥ २३—२४ ॥ अधुना स्वबुद्धिं दर्शयति—अहं त्विति । युक्तं युक्तिसहितं ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्तत्रिंशः सर्गः ॥ ३७ ॥

आबाल्यसिद्धसहजशौर्यादिगुणशेवधिः । रघुनाथो महाप्रीत्या परिस्फुरतु सर्वतः ॥ तद्गुणजातं नयुक्त्याकल्पयित्वोच्यते किंत्वनुभवसिद्धमित्याह—कदाचिदित्यादिना । सार्धश्लोकद्वयमेकान्वयं । अहंव्यचरमित्यन्वयः । नागो गजः । भयजनने हेतुमाह—नीलेत्यादिना ॥ १—२ ॥ मदिति पञ्चमी ॥ ३ ॥ पर्वकाले यज्ञसुत्याकाले ॥ ४—५ ॥ द्वादशवर्षः द्वादशवर्षवयस्कः । केचित्तु इदं रावणबिभीषयोक्तं वस्तुत ऊनषोडशवर्ष इत्युक्तमित्यूचुः । कामं भृशं । यत्सैन्यं

ति० पञ्चदशवर्षोपि तथादशरथेनानूदितोप्यत्यन्तबाल्यद्योतनायातिबालेनापीदृशंकृतं किमधुनावाच्यमिति रावणस्यात्यन्तभयाय मारीचेन तथा दशरथेनोक्तइत्यूनद्वादशवर्षइत्युक्तं । ऊनषोडवर्षोयमितिपाठान्तरं । स० ऊनषोडशवर्षइत्येवपाठः । शि० ऊनद्वादशवर्षः किंचिन्मासोनषोडशवार्षिकइत्यर्थः । अयमर्थः द्वौचद्वौचद्वौचेत्येकशेषेणलब्धः । अत्रबीजंतु बालकाण्डघटकीभूतोनषोडश-

[पा०] १ च. छ. ज. ञ. सर्वैश्च. २ क. ग. ङ. झ. ञ. ट. पुरस्कृतैः. ३ क. ख. ग. च. छ. ज. ञ. धर्मिष्ठं. ४ घ. कार्यविनिश्चयं. ५ क. च—ट. हितंहितव. ङ. हिताहितंच. ६ ग. समागतं. ७ क. ग. ङ—ट. निशाचराधिप. ८ क. ग. ङ—झ. ट. दण्डकारण्यं. ९ ख. ग. विश्वामित्रोपि. १० ग. ङ. झ. ट. अयं. ११ ङ. झ. ट. ऊनद्वादश. १२ ङ. झ. ट. तत्सैन्यं. १३ ङ—ट. निशाचरं. १४ ङ—ट. शत्रुंतवयथेप्सितं.

इत्येवमुक्तः[1] स मुनी राजानमिदमब्रवीत्[2] ॥ रामान्नान्यद्बलं लोके पर्याप्तं तस्य रक्षसः ॥ ८ ॥
देवतानामपि भवान्समरेष्वभिपालकः ॥ आसीत्तव कृतं कर्म त्रिलोके[3] विदितं नृप ॥ ९ ॥
काममस्तु[4] महत्सैन्यं तिष्ठत्विह परंतप ॥ १० ॥
बालोप्येष[5] महातेजाः समर्थस्तस्य निग्रहे ॥ गमिष्ये राममादाय स्वस्ति तेस्तु परंतप ॥ ११ ॥
एवमुक्त्वा[6] तु स मुनिस्तमादाय नृपात्मजम् ॥ जगाम परमप्रीतो विश्वामित्रः स्वमाश्रमम् ॥ १२ ॥
तं तदा[7] दण्डकारण्ये यज्ञमुद्दिश्य दीक्षितम् ॥ बभूवोपस्थितो[9] रामश्चित्रं[10] विस्फारयन्धनुः ॥ १३ ॥
अजातव्यञ्जनः श्रीमान्[11]पद्मपत्रनिभेक्षणः ॥ एकवस्त्रधरो धन्वी शिखी कनकमालया ॥ १४ ॥
शोभयन्दण्डकारण्यं दीप्तेन स्वेन तेजसा ॥ अदृश्यत ततो[12] रामो बालचन्द्र इवोदितः ॥ १५ ॥
ततोऽहं मेघसंकाशस्तप्तकाञ्चनकुण्डलः[13] ॥ बली दत्तवरो दर्पा[14]दाजगाम तदाश्रमम् ॥ १६ ॥
तेन दृष्टः प्रविष्टोऽहं सहसैवोद्यतायुधः ॥ मां तु दृष्ट्वा धनुः सज्यमसंभ्रान्तश्च[15]कार सः ॥ १७ ॥
अवजानन्नहं[16] मोहाद्बालोऽयमिति राघवम् ॥ विश्वामित्रस्य तां वेदिम[17]भ्यधावं कृतत्वरः ॥ १८ ॥
तेन मुक्तस्ततो[18] बाणः शितः शत्रुनिबर्हणः ॥ तेनाहं त्वा[19]हतः क्षिप्तः समुद्रे शतयोजने ॥ १९ ॥
नेच्छता तात मां हन्तुं तदा वीरेण रक्षितः ॥ रामस्य शरवेगेन निरस्तो[20]ऽहमचेतनः ॥ २० ॥
पातितोहं तदा तेन गम्भीरे सागराम्भसि ॥ प्राप्य संज्ञां चिरात्तात लङ्कां प्रति गतः पुरीम् ॥ २१ ॥

तदित्यध्याहार्यं ॥ ६—७ ॥ रामादन्यत् बलं सैन्यं तस्य न पर्याप्तं न समर्थं ॥ ८ ॥ दशरथस्य कोपो माभूदिति सान्त्वयति—देवतानामिति । तव कृतं त्वया कृतं कर्म । त्रिलोके लोकत्रये । आर्षत्वान्न ङीप् । विदितं प्रसिद्धं । यद्यपि महत्सैन्यमप्यस्तु तथापि तत्सर्वमिह तिष्ठतु । प्रकृतकार्यासामर्थ्यादितिभावः ॥ ९—१२ ॥ रामः चित्रं धनुः विस्फारयन् नयन्सन् उपस्थितः रक्षणाय समीपं प्राप्तो बभूवेत्यर्थः ॥ १३ ॥ अजातेत्यादिश्लोकद्वयमेकान्वयं । अजातव्यञ्जनः अनुत्पन्नयौवनलक्षणः । एकवस्त्रधरः ब्रह्मचर्यव्रते स्थित इत्यर्थः । शिखी कुलोचितशिखायुक्तः । व्रीह्यादित्वादिनिः । कनकमालयेत्युपलक्षणे तृतीया ॥ १४ ॥ शोभयन् मयूरकण्ठच्छायया व्याप्तं कुर्वन्नित्यर्थः । उदितचन्द्रौपम्येन विरोधिनिरसनोद्युक्तत्वं गम्यते । शत्रोरपि विग्रहवर्णनमाकर्षकतया ॥ १५ ॥ आजगामेत्युत्तमपुरुषः ॥ १६—१७ ॥ मोहात् अवजानन् तिरस्कुर्वन् ॥ १८ ॥ तेन रामेण । बाणो मुक्तः मयि क्षिप्त इत्यर्थः ॥ १९ ॥ नेच्छता अनिच्छता । नशब्दस्य "सुप्सुपा" इति समासः । अनिच्छाहेतुर्न ज्ञायते स्वयं हन्तुं समर्थ एवेति भावः । अचेतनः

वर्षोमेइतिपद्येनिरूपितं । अतएवाकृतार्थः अस्त्राभ्यासरहितोस्तीतिशेषः ॥ ६ ॥ **ति०** रामादन्यद्बलं तस्यरक्षसोनपर्याप्तं । अतः कामं तवबलं यदस्ति तदत्रैवतिष्ठतु । तदुपयोगाभावात् । अतएव बालोपियतस्तन्निग्रहसमर्थः अतोदेयएवेतिशेषः ॥१०—११ ॥ **तनि०** श्रीमान् अनपायश्रीकः । पद्मपत्रनिभेक्षणः रविकरविकसितपुण्डरीकदलायतेक्षणः । धन्वी बाल्योचितप्रशस्तधनुः ॥ १४ ॥ **तनि०** शोभयन्निति । स्वेन स्वासाधारणेनतेजसा दण्डकारण्यंशोभयन्निति । मयूरग्रीवासदृशस्वकान्त्या श्यामारुणकान्तिवर्धयन्नित्याचार्याः । तादृशतेजोवत्त्वेप्यनुद्वेगदायित्वमाह—**बालचन्द्रइति** ॥ १५ ॥ **ति०** आजगामेत्युत्तमपुरुषः । अत्र पारोक्ष्यार्थकलिटा दैवपारवश्यादेवाहमागतो नतु तदागमनं ममप्रत्यक्षमितिध्वनयति । यद्वा बहुकालिकत्वेनविस्मृतत्वाद्वा तत्वारोपः । आर्षोवालिट् आश्रमान्तरं आश्रममध्यं । **स०** आजगामेति रामभयाद्व्यत्यासः ॥ १६ ॥ **ति०** नेच्छतेति । एतच्चरक्षणं केवलंकृपाजन्यमिति मारीचाशयः । भाविकार्यार्थमिति वस्तुतत्वं ॥ **शि०** अहंनिरस्तएव । "सर्ववाक्यंसावधारणंभवति" इति

[पा०] १ ङ. झ. ट. एवमुक्तस्सतुमुनिः. २ क. ग. च. छ. ज. राजानंपुनरब्रवीत्. ३ क. ग—ट. त्रिलोकविदितं. ४ ङ. झ. ट. काममस्ति. च. छ. ज. ञ. ममश्रीमान्पद्मपत्रनिभेक्षणः. ५ ख. रामोह्येष. क. बालोप्ययं. ६ ङ—ट. इत्येवमुक्त्वासमुनिः. ७ ङ. झ. ट. तथा. ८ ख. रक्षितुं. ९ क. ग. घ. च. छ. ज. ञ. बभूवावस्थितो. १० च. छ. ज. ञ. रामः सज्यं. ११ ङ—ट. श्रीमान्बालःश्यामःशुभेक्षणः. १२ क. ग. ङ—ट. तदा. १३ ख. भूषणः. १४ च. छ. ज. दागतोस्मि. ङ. झ. ट. दाजगामाश्रमान्तरं. ग. दाजगामापराश्रमं. १५ ङ. झ. ट. श्चकारह. १६ ख. च. छ. ज. अवज्ञानादहं. १७ घ. मभ्यधावमतित्वरः. १८ च. छ. ज. ञ. स्तदा. १९ ख. ग. ङ—ट. ताडितः. २० ङ. झ. ट. निरस्तोभ्रान्तचेतनः.

एवमस्मि तदा मुक्तः सहायास्तु[1] निपातिताः ॥ अकृतास्त्रेण बालेन[2] रामेणाक्लिष्टकर्मणा ॥ २२ ॥
तन्मया वार्यमाणस्त्वं[3] यदि रामेण विग्रहम् ॥ करिष्यस्यापदं घोरां क्षिप्रं प्राप्स्यसि[4] रावण ॥ २३ ॥
क्रीडा[5]रतिविधिज्ञानां समाजोत्सवशालिनाम्[6] ॥ रक्षसां चैव सन्तापमनर्थं चाहरिष्यसि ॥ २४ ॥
हर्म्यप्रासादसंबाधां नानारत्नविभूषिताम् ॥ द्रक्ष्यसि त्वं पुरीं लङ्कां विनष्टां मैथिलीकृते ॥ २५ ॥
अकुर्वन्तोपि पापानि शुचयः पापसंश्रयात् ॥ परपापैर्विनश्यन्ति मत्स्या नागह्रदे यथा ॥ २६ ॥
दिव्यचन्दनदिग्धाङ्गान्[7]दिव्याभरणभूषितान् ॥ द्रक्ष्यस्यभिहतान्भूमौ तव दोषात्तु राक्षसान्[8] ॥ २७ ॥
हृतदारान्[9]सदारांश्च दश विद्रवतो दिशः ॥ हतशेषान[10]शरणान्द्रक्ष्यसि त्वं निशाचरान् ॥ २८ ॥
शरजालपरिक्षिप्तामग्निज्वालासमावृताम् ॥ प्रदग्धभवनां लङ्कां द्रक्ष्यसि त्वं[11] न संशयः ॥ २९ ॥
परदाराभिमर्शात्तु नान्यत्पापतरं महत् ॥ प्रमदानां सहस्राणि तव राजन्परिग्रहः[12] ॥ ३० ॥
भव स्वदारनिरतः स्वकुलं रक्ष राक्षस[13] ॥ मानमृद्धिं च राज्यं[14] च जीवितं चेष्टमात्मनः ॥ ३१ ॥
सीता[15]हेतोः समग्राणि विद्रविष्यन्ति भीतवत् ॥ ३२ ॥
आत्मनश्च दशग्रीव पुरस्यान्तःपुरस्य च ॥ रक्षसां च विनाशाय मैथिलीमानयिष्यसि ॥
मा नाशय त्वं राज्यं च जीवितं चेष्टमात्मनः ॥ ३३ ॥]
कलत्राणि च सौम्यानि मित्रवर्गं[16] तथैव च ॥ यदीच्छसि चिरं भोक्तुं मा कृथा रामविप्रियम् ॥ ३४ ॥
निवार्यमाणः सुहृदा मया भृशं प्रसह्य सीतां यदि धर्षयिष्यसि ॥
गमिष्यसि क्षीणबलः सबान्धवो यमक्षयं रामशरात्त[17]जीवितः ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे अष्टत्रिंशः सर्गः ॥ ३८ ॥

निश्चेष्टः मूर्छितो वा ॥ २०—२१ ॥ निपातिताः हताः ॥ २२—२३ ॥ क्रीडा लीला रतिः भोगः तयोर्विधिः क्रमः तज्ज्ञानां तत्र सक्तानामित्यर्थः । समाजः सभा । अनर्थं दुःखं । संतापः तत्कार्यं । आहरिष्यसि यत्नेन संपादयिष्यसि ॥ २४ ॥ हर्म्येति “ हर्म्यादि धनिनां वासः प्रासादो देवभूभुजां ” इत्यमरः । संबाधां निबिडां । रत्नविभूषितां गृहद्वारादौ ॥ २५ ॥ त्वद्दोषेण सकलराक्षसक्षयो भविष्यतीति दर्शयिष्यन् तदर्थमसत्सङ्गदोषन्यायारूढमुपवर्णयति—अकुर्वन्तोपीति । शुचयः परिशुद्धाः अपापा इत्यर्थः । पापान्यकुर्वन्तोपि पापसंश्रयात् पापपुरुषसंसर्गात् । परपापैर्विनश्यन्ति । यथा नागह्रदे सर्पह्रदे । नागनिग्रहाय प्रवृत्तेन मत्स्याअपि तत्सहवासाद्धन्यन्ते तद्वदित्यर्थः ॥ २६ ॥ तव दोषात्तु तव दोषादेव ॥ २७ ॥ हृतदारान् त्यक्तदारान् । अशरणान् रक्षकरहितान् ॥ २८ ॥ प्रदग्धभवनां प्रकर्षेण दग्धगृहां ॥ २९ ॥ एवं दृष्टदोषमुपपाद्यादृष्टदोषं दर्शयति—परदारेति । “ परिग्रहः कलत्रे स्यात् ” इतिशाश्वतः । जात्यभिप्रायेणैकवचनं ॥ ३०—३३ ॥ रामविप्रियं रामापराधं ॥ ३४ ॥ प्रसह्य बलात्कृत्य मामनादृत्येत्यर्थः । रामशरेण आत्तं आ-

---

न्यायेनैवकारलाभः । तेन हननव्यवच्छेदः ॥ २० ॥ स० सह अयोगतिर्येषांते सहायाः ॥ २२ ॥ ति० नागह्रदे सर्पयुक्तह्रदे । सर्पनिग्रहायप्रविष्टेन राजप्रेरितधीवरादिना गरुडेनवा यथाप्रसङ्गान्मत्स्या नश्यन्ति तद्वत् ॥ २६ ॥ ति० तव परिग्रहे अन्तःपुरे । प्रमदानांसहस्राणि । अतस्तास्वेवरमस्व नान्यत्रमनोधेहीत्यर्थः ॥ ३० ॥ इत्यष्टत्रिंशस्सर्गः ॥ ३८ ॥

[पा०] १ ख. ङ. झ. ञ. ट. सहायास्ते. २ क. ङ—ट. रामेणबालेनाक्लिष्ट. ३ क. च—ञ. वार्यमाणस्तु. ४ क. ग. ङ—ट. प्राप्यनशिष्यसि. ५ क. विधिरसज्ञानां. ६ ङ. झ. दर्शिनां. ७ क. ग. च. छ. ज. ञ. लिप्ताङ्गान्. ८ ख. रावण. ९ झ. हृतदारान्. १० ख. नशेषेण. ११ ख. घ. ङ. झ. ट. त्वमसंशयं. १२ ङ. झ. ट. परिग्रहे. १३ झ. ट. राक्षसान्. ख. रावण. १४ ख. राष्ट्रं. च. १५ इदमर्धचतुष्टयं क. च. छ. ज. पाठेषुदृश्यते. १६ क. मित्रवर्गांस्तथैव. १७ ख. ग. शरार्तजीवितः. ङ. झ. ट. शरास्तजीवितः.

एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

मारीचेनरावणंप्रतिरामेपूर्ववैरानुस्मरणेनतज्जिघांसयामृगरूपधारिभ्यांराक्षसाभ्यांसहस्वेनापिमृगरूपस्वीकारेणदण्डका
ण्यमेत्यतद्वधप्रयतनेतेनशरद्वयेनस्वसहचरद्वयहननेपलायनोपायेनतत्तृतीयशरादात्मरक्षणनिवेदनम् ॥ १ ॥ तथातंप्रतियु
नक्षमयावावैरनिर्यातनकरणोक्तिपूर्वकंसीताहरणोद्यमान्निवर्तनोपदेशः ॥ २ ॥

एवमस्मि तदा मुक्तः कथंचित्तेन संयुगे ॥ इदानीमपि यद्वृत्तं [1]तच्छृणुष्व [2]निरुत्तरम् ॥ १ ॥
राक्षसाभ्यामहं द्वाभ्यामनिर्विण्णस्तथाकृतः ॥ सहितो मृगरूपाभ्यां प्रविष्टो दण्डकावनम् ॥ २ ॥
दीप्तजिह्वो [3]महाकायस्तीक्ष्णदंष्ट्रो महाबलः ॥ व्यचरं [4]दण्डकारण्यं [5]मांसभक्षो महामृगः ॥ ३ ॥
अग्निहोत्रेषु तीर्थेषु चैत्यवृक्षेषु रावण ॥ अत्यन्तघोरो व्यचरं [6]तापसान्संप्रधर्षयन् ॥ ४ ॥
निहत्य दण्डकारण्ये तापसान्धर्मचारिणः ॥ रुधिराणि पिबंस्तेषां [7]तथा मांसानि भक्षयन् ॥ ५ ॥
ऋषिमांसाशनः क्रूरस्त्रासयन्वनगोचरान् ॥ [8]तथा रुधिरमत्तोहं विचरन्धर्मदूषकः ॥ ६ ॥
आसादयं [9]तदा रामं तापसं धर्म[10]चारिणम् ॥ वैदेहीं च महाभागां लक्ष्मणं च [11]महारथम् ॥ ७ ॥
तापसं नियताहारं सर्वभूतहिते रतम् ॥ सोहं वनगतं रामं परिभूय महाबलम् ॥ ८ ॥
तापसोऽयमिति ज्ञात्वा पूर्ववैरमनुस्मरन् ॥ अभ्यधावं [12]हि संक्रुद्धस्तीक्ष्णशृङ्गो मृगाकृतिः ॥ ९ ॥
जिघांसुरकृतप्रज्ञस्तं प्रहारमनुस्मरन् ॥ तेन [13]मुक्तास्त्रयो बाणाः शिताः शत्रुनिबर्हणाः ॥
विकृष्य [14]बलवच्चापं सुपर्णानिल[15]निस्वनाः ॥ १० ॥
[[16]तैर्बाणैर्दण्डकारण्ये मत्तैराशीविषोपमैः । कृतं वितिमिरं सर्वं रामेणाक्लिष्टकर्मणा] ॥ ११ ॥
ते बाणा वज्रसंकाशाः [17]सुमुक्ता रक्तभोजनाः ॥ आजग्मुः सहिताः सर्वे त्रयः सन्नतपर्वणः ॥ १२ ॥

कष्टं नाशितमिति यावत् । तादृशं जीवितं यस्य सः ॥३५॥ इतिश्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने अष्टत्रिंशः सर्गः ॥ ३८ ॥

अपराधविहीनेषु नापराधं करोति यः । दयालुं सर्वभूतेषु तमहं राममाश्रये ॥ इदानीमपि प्रौढावस्थायामपि । यद्वृत्तं मद्विषयमभूत् तत् निरुत्तरं शृणुष्व मध्ये वाक्यविच्छेदाकरणेन शृण्वित्यर्थः । यदुत्तरमिति पाठे यत्सर्वान्तोत्तरं तदतिरिक्तासाध्यं तदपिशृण्वित्यर्थः ॥ १ ॥ तथाकृतः उक्तरीत्या प्राप संकटं प्रापितोपि । अनिर्विण्णः निर्वेदरहितः । निर्वे दोनिष्फलत्वधीः । अप्राप्ततद्विषयप्रवृत्तिवैराग्यइत्यर्थ ॥ २ ॥ दीप्तजिह्व इत्यादिविशेषणत्रयेण निरपेक्षहनन साधनभूयस्त्वं विवक्ष्यते ॥ ३—८ ॥ रामपराक्र जानन्नपि कथंतत्परिभवायोद्युक्त इत्यत्राह—तापसो यमितिज्ञात्वेति तापसत्वादहिंसापरेणभवितव्यमि विश्वस्येत्यर्थः । एवंविधदुर्व्यापारप्रयोजकं वैरस्मर ॥९॥ अकृता अप्रवर्तिता प्रज्ञा बुद्धिर्यस्य सः ॥१० सर्वे इति प्रयोगयौगपद्यार्थमुक्तं । सन्नतपर्वणः सन्न

स० यदुत्तरमितिपाठे यद्वृत्तं मदनुभवसिद्धं उत्तरं सर्वलोकासाध्यत्वेनोत्तमं । तच्छृणुष्वेत्यन्वयः । **शि०** यत् यत्नवान् य ऽहमस्मि तस्यमे उत्तरं लोकविलक्षणं । यद्वृत्तं तच्छृणुष्व । अहंवच्मीत्यर्थः ॥ १ ॥ **शि०** तदारामं तदः अमृतदाता आरा

[पा०] १ घ. तच्छृणुत्वं. २ ग. ङ—ट. यदुत्तरं. घ. निशाचर. ३ क. ख. ग. ङ—ट. महादंष्ट्रस्तीक्ष्णशृङ्गो. ४ दण्डकारण्ये. ५ च. छ. ज. ञ. ऋषिमांसानिभक्षयन्. ६ क. ख. ग. ङ—ट. तापसांस्तान्प्रधर्षयन्. ७ ङ. झ. ट. तन्मांसानि ८ तथारुधिरमत्तोहमित्यर्धस्थाने क. ङ—ट. पुस्तकेषु. तदारुधिरमत्तोहंव्यचरंदण्डकावनं । तदाहंदण्डकारण्येविचरन्धर्मदूषक इत्यर्धद्वयंदृश्यते. ९ क. घ. च. छ. ज. ञ. तथा. १० ग. ङ. झ. ञ. ट. माश्रितं. क. च. छ. ज. संश्रितं. ११ ग. च. ज. ञ. महाबलं. १२ क. ख. ग. ङ—ट. सुसंक्रुद्धः. १३ ङ. झ. ट. त्यक्ताः. १४ ङ. झ. ट. सुमहच्चापं. १५ ङ. झ. तुल्यगाः. १६ अयंश्लोकः क. पुस्तकेदृश्यते. १७ क. ग. ङ.—ट. सुघोराः.

पराक्रमज्ञो रामस्य [1]शरो दृष्टभयः पुरा ॥ [2]संमुद्भ्रान्तस्[3]ततो मुक्तस्तावुभौ राक्षसौ हतौ ॥ १३ ॥
शरेण मुक्तो रामस्य कथंचित्प्राप्य जीवितम् ॥ इह प्रव्राजितो युक्तस्तापसोह समाहितः ॥ १४ ॥
वृक्षे[4]वृक्षे च पश्यामि चीरकृष्णाजिनाम्बरम् ॥ गृहीतधनुषं रामं पाशहस्तमिवान्तकम् ॥ १५ ॥
अपि रामसहस्राणि भीतः पश्यामि रावण ॥ रामभूतमिदं सर्वमरण्यं प्रतिभाति मे ॥ १६ ॥
[5]राममेव हि पश्यामि रहिते [6]राक्षसाधिप ॥ दृष्ट्वा स्वप्नगतं [7]राममुद्भ्रमामि विचेतनः ॥ १७ ॥
रकारादीनि नामानि रामत्रस्तस्य रावण ॥ रत्नानि च रथाश्चैव [8]त्रासं संजनयन्ति मे ॥ १८ ॥
अहं तस्य प्रभावज्ञो न युद्धं तेन ते क्षमम् ॥ बलिं वा नमुचिं वाऽपि हन्याद्धि रघुनन्दनः ॥१९॥
रणे रामेण युध्यस्व [9]क्षमां वा कुरु [10]राक्षस ॥ न ते रामकथा कार्या [11]यदि मां द्रष्टुमिच्छसि ॥ २० ॥

पर्वाणः ॥११-१२॥ दृष्टं भयं येन करणेन स दृष्टभयः। उद्भ्रान्तः पलाय्यगतः । मुक्त इति पलायितेषु रामशराप्रवृत्तेरिति भावः। रामस्येतिपदं काकाक्षिन्यायात्पूर्वोत्तरपदयोरन्वेति । यतः मया रामस्य शरः पुरा दृष्टभयः ततः रामस्य पराक्रमज्ञोहं समुद्भ्रान्तः सन् मुक्तः। रामपराक्रमाज्ञौ तावुभौराक्षसौ तु हताविल्यन्वयः ॥ १३ ॥ प्रव्राजितः कृतसकलदुर्वृत्तपरित्याग इत्यर्थः। युक्तः उचिताचरणः । तापसः तपोनिष्ठः। समाहितः नियतमनस्कः ॥ १४ ॥ वृक्षेवृक्ष इति । "हृदयान्नापयातोसि दिक्षु सर्वासु दृश्यसे ॥ रामभूतं जगदभूद्रामे राज्यं प्रशासति " इत्यादाविव शोकरागभयादिजनितनिरन्तरसंतन्यमानचिन्तासक्तस्य साक्षात्कारोपपत्तिः । भयस्योत्तरोत्तरभूमिकाभिप्रायेण दर्शनस्याप्युत्तरोत्तरदशेत्यनुसंधेयं ॥ १५ ॥ एकस्यैव रामस्य प्रतिवृक्षंगत्वागत्वा दृश्यमानत्वमुच्यत इति भ्रमं वारयति—अपीति । नकेवलं प्रतिवृक्षं किंतु सर्वत्रप्रदेश इत्याह—रामभूतमिति ॥ १६ ॥ नेदं रामस्य मायाकृतमित्याह—राममेवेति । रहिते रामरहिते प्रदेशे । न केवलं जाग्रद्दशायामेव प्रतीतोयं किंतु स्वप्नदशायामपीत्याह—दृष्ट्वेति । उद्भ्रमामि भ्रान्तं प्रलापं करोमीत्यर्थः ॥ १७ ॥ नकेवलं दर्शनदशायां भीतिकार्यं श्रवणदशायामपीत्याह—रकारादीनीति । कारप्रत्ययश्छान्दसः । रेफादीनि यानि रत्नादीनि नामानि तेषामाद्याक्षरोच्चारणे राममेवायमब्रवीदिति त्रासोजायते । द्वितीयाक्षरोच्चारणे शनैः स निवर्तत इति भावः ॥ १८—१९ ॥ यदिवैरनिर्यातनं कर्तुमिच्छसि तदा रामेण रणे युध्यस्व । यद्वा क्षमां कुरु खरादिवधं सहस्व । सर्वथा चोरव्यापारो न कर्तव्य इति भावः । हितं चाह—न त इति । रामकथा रामप्रसङ्गोपि। ते त्वया। न कार्या।

विहारोयस्य तंरामं । आसादयं अपीडयं ॥ ७ ॥ **ति०** शठः गूढविप्रियकारी । दृष्टभयः रामादितिशेषः । **शि०** समुत्क्रान्तः पलायितः ॥ **शि०** पलायनान्मुक्तइत्यनेन पलायनपरंरामबाणोनहन्तीतिसूचितं । तेनतद्बाणस्यापिपरमधर्मज्ञत्वंसूचितं ॥ १३ ॥ **ति०** युक्तः योगाभ्यासरतः ॥ १४ ॥ **तनि०** चीरकृष्णाजिनांबरमिति गृहीतधनुषमितिच शुभाश्रयसंशीलने पीतांबरशङ्खचक्रादियोगइव ज्ञानालंबनयोगोव्यज्यते ॥ १५ ॥ **शि०** रकारादीनि रत्नरथप्रभृतीनिनामानि । रामत्रस्तस्यमे वित्रासंजनयन्ति-एतेन रकारोच्चारणमात्रेण राममेवोच्चारयतीति भ्रान्तिरुत्पद्यतइतिसूचितं । तेन रामेतिनाम्ना रामवाच्यमयत्नंबोधितं । तेन यदि रकारोच्चारणमात्रेणभीतिस्तर्हि रामोच्चारणेभीतिरिति किंवक्तव्यमिति काव्यार्थापत्तिरलङ्कारोध्वनितः । तेन रामसमीपगमनयोग्यता ममनास्तीतिसूचितं ॥ १८ ॥ **स०** यद्यपिनक्षमं तथापियुध्यस्वेत्युक्तिः विशिष्टनाशापेक्षयारावणमात्रनाशस्यलघीयस्त्वादिति भावेन ॥ २० ॥

[पा०] १ क. ख. ग. ङ. छ.—ट. शठो. २ ङ. झ. ट. समुत्क्रान्तः. ३ ख. स्तथा. ४ क. ख. ग. ङ.—ट. वृक्षेहि. ५ घ. राममेवाभि. ६ ङ.—ट. राक्षसेश्वर. ७ ख. रामंसहसोद्भ्रान्तचेतनः. ८ ङ. झ. ट. वित्रासंजनयन्ति. ९ घ. क्षमांचकुरु. ख. नक्षमंतव. १० ख. ङ. झ. ट. रावण. ११ घ. नचैनंद्रष्टुमर्हसि.

बहवः साधवो लोके युक्ता धर्ममनुष्ठिताः ॥ परेषामपराधेन विनष्टाः सपरिच्छदाः ॥ २१ ॥
सोहं तवापराधेन विनश्येयं निशाचर ॥ कुरु यत्ते क्षमं तत्त्वमहं त्वा नानुयामि ह ॥ २२ ॥
रामश्च हि महातेजा महासत्त्वो महाबलः ॥ अपि राक्षसलोकस्य न भवेदन्तकोपि सः ॥ २३ ॥
यदि शूर्पणखाहेतोर्जनस्थानगतः खरः ॥ अतिवृत्तो हतः पूर्वं रामेणाक्लिष्टकर्मणा ॥ २४ ॥
अत्र ब्रूहि यथा तत्त्वं को रामस्य व्यतिक्रमः ॥ २५ ॥
इदं वचो बन्धुहितार्थिना मया यथोच्यमानं यदि नाभिपत्स्यसे ॥
सबान्धवस्त्यक्ष्यसि जीवितं रणे हतोद्य रामेण शरैरजिह्मगैः ॥ २६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

चत्वारिंशः सर्गः ॥ ४० ॥

रावणेनमारीचंप्रतिपरुषभाषणैरुपालंभपूर्वकंमाययाचित्रमृगरूपधारणेनसीताप्रलोभनाकरणेसावधारणंतस्यहननोक्तिः १

मारीचेन तु तद्वाक्यं क्षमं युक्तं निशाचरः ॥ उक्तो न प्रतिजग्राह मर्तुकाम इवौषधम् ॥ १ ॥
तं पथ्यहितवक्तारं मारीचं राक्षसाधिपः ॥ अब्रवीत्परुषं वाक्यमयुक्तं कालचोदितः ॥ २ ॥
यत्किलैतदयुक्तार्थं मारीच मयि कथ्यते ॥ वाक्यं निष्फलमत्यर्थमुप्तं बीजमिवोषरे ॥ ३ ॥
त्वद्वाक्यैर्न तु मां शक्यं भेत्तुं रामस्य संयुगे ॥ पापशीलस्य मूर्खस्य मानुषस्य विशेषतः ॥ ४ ॥

यदि मां द्रष्टुमिच्छसि जीवितुमिच्छसीत्यर्थः ॥ २० ॥ लोकन्यायमाह—बहव इति । युक्ताः सम्यगाचाराः । धर्मं अनुष्ठिताः अनुष्ठितवन्तः साधवोपि परेषामपराधेन विनष्टाः । असत्संसर्गदोषेणेत्यर्थः ॥ २१ ॥ सामान्यन्यायं स्वविषये दर्शयति—सोहमिति । सोहं साधुभूतोहं । यत्ते क्षमं यत्त्वया कर्तुं शक्यं तत् त्वमेव कुरु । अहं त्वा त्वां । नानुयामि अनर्थस्य निश्चितत्वादित्यर्थः ॥ २२ ॥ तत्र हेतुमाह —रामश्च हीति । हिः प्रसिद्धौ । अपिः कामचारकरणे । "अपिः संभावनाप्रश्नशङ्कागर्हासमुच्चये । तथा युक्तपदार्थेषु कामचारक्रियासु च" इति विश्वः । द्वितीयोपिशब्दः अवधारणे ॥ २३ ॥ खरवधेन नाग्रहः कार्य इत्याह —यदीति । सीतापरिभवकरणेन शूर्पणखाविरूपिता। खरश्चातिवृत्तः रामस्योपरि गत्वा प्रहारोद्युक्तो रामेण हतः । अत्र रामस्य व्यतिक्रमः कः न कोपीत्यर्थः ॥ २४—२५ ॥ अवश्यं वक्तव्यमर्थं पुनर्निष्कृष्य दर्शयति—इदमिति । यथोच्यमानं परमार्थेत उच्यमानं । नाभिपत्स्यसे नाङ्गीकरोषि॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

यस्य तत्त्वंसमुद्दिष्टं नाभिजानन्ति दुर्जनाः । तमहं शिरसा वन्दे रघुनाथं गुणार्णवम् ॥ क्षमं निवर्तनसमर्थं । युक्तं कार्यं ॥ १ ॥ पथ्यं अनपायं । हितं सुखावहं । अयुक्तं अयुक्तार्थं ॥ २ ॥ अयुक्तार्थं राजचित्तप्रतिकूलत्वादनुचितार्थं । उप्तं निक्षिप्तं ॥ ३ ॥ रामस्य संयुगे विषये मां भेत्तुं सीताप्रहरणोपायाद्युद्धे

ती० सर्गफलश्रुतिस्स्कान्दे । "मारीचोक्तिमुपश्रुत्य गुरुमान्भवतिक्षितौ" इति ॥ २६ ॥ इत्येकोनचत्वारिंशस्सर्गः ॥३९॥
ति० मारीचस्य मारीचेन ॥ १ ॥ **स०** पथ्यवद्धितं । रोगिणोयथापथ्यान्नंहितंतद्वद्धितमितिभावः ॥ २ ॥ **ति०** शत्रोर्मानुषस्यस्तावकत्वात्क्रोधेनाह—**दुष्कुलेति** । निष्फलं तमोगुणाक्रान्तेममहृदयेतस्यानवकाशात् ॥ ३ ॥

[पा०] १ ख. नष्टाःसर्वपरिच्छदाः. २ ङ. झ. ट. परापराधेन. ३ ग. ननश्येयं. ४ ख. रामश्चापि. ५ क. महावीर्यो. ञ. महासत्वोमहातेजाः. ६ क. ग. घ. ट. भवेदन्तकरोहिसः. ख. भवेदन्तकरोपिहि. ७ ग. कुतोरामव्यतिक्रमः. ८ ङ. झ. ट. मारीचस्तु. ९ क.—घ. च ज. क्षेमयुक्तंचरावणः. ङ. छ. झ. ञ. ट. क्षमंयुक्तंचरावणः. १० ङ. झ. ट. दुष्कुलैतत्. ११ ख. ग. ङ. च. झ. ञ. ट. मत्यर्थंबीजमुप्तं. १२ ङ. झ. ट. मूर्खस्यपापशीलस्य.

यस्त्यक्त्वा सुहृदो राज्यं मातरं पितरं तथा ॥ स्त्रीवाक्यं प्राकृतं श्रुत्वा वनमेकपदे गतः ॥ ५ ॥
अवश्यं तु मया तस्य संयुगे खरघातिनः ॥ प्राणैः प्रियतरा सीता हर्तव्या तव सन्निधौ ॥ ६ ॥
एवं मे निश्चिता [1]बुद्धिर्हृदि मारीच [2]वर्तते ॥ न व्यावर्तयितुं शक्या सेन्द्रैरपि सुरासुरैः ॥ ७ ॥
दोषं गुणं वा संपृष्टस्त्वमेवं वक्तुमर्हसि ॥ अपायं [3]वाऽप्युपायं वा कार्यस्यास्य विनिश्चये ॥ ८ ॥
संपृष्टेन तु वक्तव्यं सचिवेन विपश्चिता ॥ उद्यताञ्जलिना [4]राज्ञे य इच्छेद्[5]भूतिमात्मनः ॥ ९ ॥
वाक्यमप्रतिकूलं तु मृदुपूर्वं [6]हितं शुभम् ॥ उपचारेण [7]युक्तं च वक्तव्यो वसुधाधिपः ॥ १० ॥
[8]सावमर्दं तु यद्वा[9]क्यं मारीच हितमुच्यते ॥ नाभि[10]नन्दति तद्राजा [11]मानार्हो [12]मानवर्जितम् ॥ ११ ॥
पञ्च रूपाणि राजानो धारयन्त्यमितौजसः ॥ अग्नेरिन्द्रस्य सोमस्य [13]वरुणस्य यमस्य च ॥ १२ ॥
औष्ण्यं तथा विक्रमं च सौम्यं दण्डं प्रसन्नताम् ॥ धारयन्ति महात्मानो राजानः क्षणदाचर ॥
तस्मात्सर्वास्ववस्थासु मान्याः पूज्याश्च [14]पार्थिवाः ॥ १३ ॥
त्वं तु धर्ममविज्ञाय केवलं मोहमास्थितः ॥ अभ्यागतं मां दौरात्म्यात्परुषं [15]वक्तुमिच्छसि ॥ १४ ॥

मां प्रवर्तयितुं । त्वद्वाक्यैर्न शक्यं । तत्र हेतुत्रयं—पापेत्यादि । पापशीलत्वान्मूर्खत्वाद्विशेषतो मानुषत्वाच्च तेन नाहं योद्धुमर्हः किंतु तद्भार्यापहरणमेव तदपकाराय प्रतिक्रियेति भावः ॥ ४ ॥ मूर्खत्वमुपपादयति—यदिति । प्राकृतं असारं । स्त्रीवाक्यं कैकेयीवाक्यं । एकपदे उत्तरक्षणे । प्राणैः प्राणेभ्यः । प्रियतरा तत्प्राणापहरणादपि वरं तत्स्त्रियाअपहरणमिति भावः । तव सन्निधौ सति हर्तव्या त्वत्सन्निधिमुखेन हर्तव्येत्यर्थः ॥ ५—६ ॥ निश्चिता निश्चयरूपा । सेन्द्रैः किं पुनस्त्वयेति भावः ॥ ७ ॥ अपिचापृष्टोत्तरप्रलापस्तवासंगत इत्याह—दोषमिति । कार्यनिश्चये विषये कौ गुणदोषौ तत्साधने कावुपायाविति पृष्टश्चेदुत्तरं वक्तुमर्हसि नास्माकं तज्जिज्ञासा ततो नैवं वक्तुं युक्तमित्यर्थः ॥ ८ ॥ प्रसङ्गाद्राजसन्निधौ विज्ञापनप्रक्रियां दर्शयति—संपृष्टेनेत्यादिना । विपश्चिता विदुषा राजसेवाप्रकारज्ञेनेति यावत् । भूतिं ऐश्वर्यं ॥ ९ ॥ एवं वक्तृगुणा उक्ताः अथ वचनप्रकारमाह—वाक्यमिति। उपचारेण युक्तं बहुमानेन पुरस्कृतं । हितमप्युपचारपूर्वं वक्तव्यमित्यर्थः ॥ १० ॥ प्रकारान्तरेण न वक्तव्यमित्याह—सावमर्दमिति । सावमर्दं तिरस्कारसहितं ॥ ११ ॥ पञ्च रूपाणि अग्न्यादिपञ्चकस्यया निरूपाणि तानि धारयन्तीत्यर्थः ॥१२॥ तान्येवाह—औष्ण्यमिति । औष्ण्यं तैक्ष्ण्यं । सौम्यं आह्लादकरत्वं । दण्डं दुष्टनिग्रहं । मान्याः मनसा पूज्याः । पूज्याः वाचा बहुमन्तव्याः ॥ १३ ॥ सामान्यत उक्तमर्थं प्रकृते संगमयति—त्वं त्विति । धर्मं राजधर्मं । मोहं

ती० मारीचेनेत्यादेः हर्तव्यातवसंनिधावित्यन्तस्यग्रन्थस्यवास्तवार्थेऽयमर्थः । तद्वाक्यं सीतांनाहरेतिवाक्यं । नजग्राह । तंप्रतिपरुषवाक्यंचाब्रवीत् । तदेवाह—**यदिति** । हेमारीच मयि सीताहरणकामेइत्यर्थः । अयुक्तार्थं अयोग्यार्थं । वाक्यंनिष्फलं । इदंचेद्युक्तमित्याह—**त्वदिति** । मानुषस्यमूर्खस्य विशेषतःपापशीलस्य । द्वितीयार्थेषष्ठी । भेत्तुंशक्यं । रामस्य रामंतु मयाभेत्तुंनशक्यमितियदुक्तं त्वद्वाक्यैः तत्सत्यमेवकरुणाशालितयाप्राकृतस्त्रीवाक्यमपिश्रुत्वा राज्यादिकंत्यक्त्वावनंगतः तस्यसीताभार्यात्ववश्यंमया आहर्तव्येतिसंबन्धः ॥ सीतापहरणाभावे स्वस्यरामहस्तान्मरणंनभविष्यतीतिहृद्गतः ॥ **शि०** प्राणैःप्रियतरेत्यनेन तद्दुःखार्थमेव सीताहरणमितिसूचितं ॥ ६ ॥ **ति०** अथवेति यद्यप्यर्थे । यद्यपिहितं तथापि नाभिनन्देत । त्वंत्वपृष्टएवममाहितमवमर्दसहितं मानहीनंवदसीत्यनुचितमितिभावः ॥ ११ ॥ **शि०** धारयन्तीति । एतेन राजा द्रोहिणोऽवश्यंविनाशयतीतिसूचितं ॥ १३ ॥ इतिचत्वारिंशस्सर्गः ॥ ४० ॥

[पा०] १ च. छ. ज. ञ. बुद्धिर्मारीचहृदि. २ ङ. झ. ट. विद्यते. ३ ङ. झ. ट. वाउपायंवा. ४ क. ख. ङ. झ. ट. राज्ञो. ५ घ. द्वतिं. ६ क. ख. ङ. ट. शुभंहितं. ७ झ. वक्तव्योयुक्तंच. ८ क. घ. च. छ. ज. ञ. सोपमर्दं. ग. सावमानं. ९ ङ. झ. ञ. ट. वाक्यमथवाहितं. ख. वाक्यंमानहारीदं. ग. वाक्यंमानहानंनिशाचर. १० ङ—ट. नन्देत. ११ ङ. झ. ञ. ट. मानार्थी. १२ क. ग. घ. मानवर्जितः. १३ क. ख. ङ—ट. यमस्यवरुणस्यच. १४ ङ. झ. नित्यदा. १५ क. ग. ङ—ट. वदसीदृशं.

गुणदोषौ न पृच्छामि क्षेमं चात्मनि राक्षस ॥ [१]मयोक्तं तव चैतावत्संप्रत्यमितविक्रम ॥ १५ ॥
अस्मिंस्तु [२]त्वं महाकृत्ये साहाय्यं कर्तुम[३]र्हसि ॥ शृणु तत्कर्म साहाय्ये यत्कार्यं [४]वचनान्मम ॥ १६ ॥
सौवर्णस्त्वं मृगो भूत्वा चित्रो रजतबिन्दुभिः ॥ आश्रमे तस्य रामस्य सीतायाः प्रमुखे चर ॥ १७ ॥
प्रलोभयित्वा वैदेहीं यथेष्टं गन्तुमर्हसि ॥ १८ ॥
[५]त्वां तु मायामृगं दृष्ट्वा काञ्चनं जातविस्मया ॥ आनयैनमिति क्षिप्रं रामं वक्ष्यति मै[६]थिली ॥ १९ ॥
[७]अपक्रान्ते तु काकुत्स्थे दूरं [८]यात्वा व्युदाहर ॥ हा सीते [९]लक्ष्मणेत्येवं रामवाक्यानुरूपकम् ॥ २० ॥
तच्छ्रुत्वा रामपदवीं सीतया [१०]च प्रचोदितः ॥ अनुगच्छति संभ्रान्तः सौमित्रिरपि सौहृदात् ॥ २१ ॥
अपक्रान्ते च काकुत्स्थे लक्ष्मणे च यथासुखम् ॥ [११]आनयिष्यामि वैदेहीं सहस्राक्षः शचीमिव ॥ २२ ॥
एवं कृत्वा त्विदं कार्यं यथेष्टं गच्छ राक्षस ॥ राज्यस्यार्धं [१२]प्रयच्छामि मारीच तव सुव्रत ॥ २३ ॥
गच्छ सौम्य शिवं मार्गं कार्यस्यास्य विवृद्धये ॥ अहं [१३]त्वाऽनुगमिष्यामि सरथो दण्डकावनम् ॥ २४ ॥
प्राप्य सीतामयुद्धेन वञ्चयित्वा तु [१४]राघवम् ॥ लङ्कां प्रति गमिष्यामि कृतकार्यः सह त्वया ॥ २५ ॥
[१५]न चेत्करोषि मारीच हन्मि त्वामहमद्य वै ॥ एतत्कार्यमवश्यं मे बलादपि करिष्यसि ॥
[१६]राज्ञो हि प्रतिकूलस्थो न जातु सुखमेधते ॥ २६ ॥

आसाद्य तं जीवितसंशयस्ते मृत्युर्ध्रुवो ह्यद्य मया विरुध्य ॥
एतद्यथावत्[१७]प्रतिगृह्य बुद्ध्या [१८]यदत्र पथ्यं कुरु तत्तथा त्वम् ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

अज्ञानं । दौरात्म्यात् दौर्जन्यात् ॥ १४ ॥ तर्हि कथं मया वक्तव्यमित्यत्राह—गुणेति । गुणदोषौ आत्मनि क्षेमं च न पृच्छामि किंतु संप्रति मया तव तुभ्यं मयोक्तमेतावत् ॥ १५ ॥ किंतदित्यत्राह—अस्मिन्निति । कृत्ये कार्ये शृण्विति साहाय्ये करणीये यत्कार्यं तद्वचनं तद्विषयवचनं शृणु ॥ १६ ॥ प्रमुखे अग्रे ॥ १७—॥ १८ ॥ किं तस्य प्रयोजनं तत्राह—त्वामिति ॥ १९ ॥ अनुरूपकं स्वार्थे कप्रत्ययः ॥ २० ॥ पदवीं मार्गं ॥ २१ ॥ यथासुखं यत्नंविना ॥ २२—२३ ॥ मार्गं मृगसंबन्धिरूपं । शिवं मनोहरं । गच्छ प्राप्नुहि ॥ २४—२५ ॥ बलादपि करिष्यसि अनिच्छतापि त्वया सर्वथाऽहमेतत्कार्यं कारयिष्यामीत्यर्थः । विपक्षे बाधकमाह—राज्ञ इति ॥ २६ ॥ कार्यकरणाकरणयोर्गुणदोषौ दर्शयति—आसाद्येति । तं रामं । आसाद्य मृगरूपेण प्राप्य । जीवितस्य संशयः दैवाज्जीवितं लभ्येतापि । मद्विरोधे तु जीवितहानिरेव स्यात् । प्रतिगृह्य निश्चित्य । अत्र कार्यद्वये । यत्ते पथ्यं तत्कुरु । मदुक्ताकरणे अवश्यं हननमित्यर्थः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चत्वारिंशः सर्गः ॥ ४० ॥

[पा०] १ क. ग. ङ—ट. मयोक्तमपिचैतावत्त्वां. २ क. ग. च. छ. ञ. तद्भवान्कृत्ये. ङ. झ. ट. सभवान्कृत्ये. ३ क. ग. ङ—ट. मर्हति. ४ ग. वचनंमम. ५ क. ख. च. छ. ज. ञ. त्वांहि. ६ क. जानकी. ७ घ—ट. अपक्रान्तेच. ८ क. च. छ. ज. ञ. गत्वाभ्युदाहर. ९ च. छ. ज. ञ. लक्ष्मणइति. १० च. छ. ज. ञ. प्रतिचोदितः. ११ क. ङ. च. झ. ञ. ट. आहरिष्यामि. १२ क. ख. ग. ङ. झ. ट. प्रदास्यामि. १३ ख. च. छ. ज. ञ. चानु. १४ च. छ. झ. ञ. राघवौ. १५ ङ. झ. ट. नोचेत्. १६ ङ. झ. ट. राज्ञोविप्रति. १७ ङ. झ. ट. त्परिगण्य. ग. त्प्रतिगम्य. क. च. छ. ज. ञ. त्परिगृह्य. १८ ख. यद्रोचतेतत्कुरु प्राचिरेण.

एकचत्वारिंशः सर्गः ॥ ४१ ॥

मारीचेनरावणंप्रतिपुनर्वैयात्यात्परुषभाषणैरुपालंभपूर्वकंसीताहरणस्यमहानर्थहेतुत्वोक्त्यातंप्रतिपरिशोचनम् ॥ १ ॥

[1]आज्ञप्तोऽराजवद्वाक्यं प्रतिकूलं निशाचरः ॥ अब्रवीत्[2]परुषं वाक्यं [3]मारीचो राक्षसाधिपम् ॥ १ ॥
केनायमुपदिष्टस्ते विनाशः पापकर्मणा ॥ [4]सपुत्रस्य [5]सराष्ट्रस्य सामात्यस्य निशाचर ॥ २ ॥
कस्त्वया सुखिना राजन्नाभिनन्दति [6]पापकृत् ॥ केनेदमुपदिष्टं ते मृत्युद्वारम[7]मुपायतः ॥ ३ ॥
शत्रवस्तव सुव्यक्तं हीनवीर्या निशाचराः ॥ इच्छन्ति त्वां विनश्यन्तमुपरुद्धं बलीयसा ॥ ४ ॥
केनेदमुपदिष्टं ते क्षुद्रेणाहितवादिना ॥ यस्त्वामिच्छति नश्यन्तं स्वकृतेन निशाचर ॥ ५ ॥
वध्याः खलु न [9]हन्यन्ते सचिवास्तव रावण ॥ ये त्वामुत्पथमारूढं न निगृह्णन्ति सर्वशः ॥ ६ ॥
अमात्यैः कामवृत्तो हि राजा [10]कापथमाश्रितः ॥ निग्राह्यः सर्वथा [11]सद्भिर्न निग्राह्यो निगृह्यसे ॥ ७ ॥
धर्ममर्थं च कामं च यशश्च जयतां वर ॥ स्वामिप्रसादात्सचिवाः प्राप्नुवन्ति निशाचर ॥ ८ ॥
विपर्यये तु तत्सर्वं व्यर्थं भवति रावण ॥ व्यसनं स्वामिवैगुण्यात्प्राप्नुवन्तीतरे जनाः ॥ ९ ॥
राजमूलो हि धर्मश्च [12]जयश्च जयतां वर ॥ तस्मात्सर्वास्ववस्थासु रक्षितव्या नराधिपाः ॥ १० ॥
राज्यं पालयितुं शक्यं न तीक्ष्णेन निशाचर ॥ [13]न चापि प्रतिकूलेन नाविनीतेन राक्षस ॥ ११ ॥
ये तीक्ष्णमन्त्राः सचिवा भज्यन्ते सह तेन वै ॥ विषमे तुरगाः शीघ्रा मन्दसारथयो यथा ॥ १२ ॥

येन सर्वात्मना वर्ज्यं प्रातिकूल्यं हितैषिणाम् । सर्वलोकानुकूलं तमाश्रये रघुनायकम् ॥ अराजवत् यदा रामप्रातिकूल्ये प्रवृत्तस्तदैव राजत्वं गतमिति मुनेराशयः । यद्वा राजवत् राजार्हं । "तदर्हं" इत्यर्हार्थे वतिः । यद्वा राजवदिति पूर्वसर्गोक्तमौद्धत्यं लक्ष्यते । वाक्यं वाक्यार्थानुष्ठानं मृगरूपमासाद्य त्वया गन्तव्यमित्येवंरूपं प्रतीत्यर्थः । यद्वा प्रतिकूलंवाक्यं आज्ञप्तः चोदितः उक्त इत्यर्थः ॥ १ ॥ विनाशः विनाशोपायः ॥ २ ॥ सुखिना त्वया अवस्थानमिति शेषः । मृत्युद्वारं मृत्युद्वारतुल्यमिदं कार्यं । उपायतः व्याजेन ॥ ३ ॥ बलीयसा रामेण उपरुद्धं आक्रान्तं । अतएव विनश्यन्तं त्वामिच्छन्ति त्वद्विनाशं रामविरोधमुखेनेच्छन्तीत्यर्थः ॥ ४ ॥ न केवलं शत्रवः तत्रापि क्षुद्रा एवेदं कार्यमिच्छन्तीत्याह—केनेति । स्वकृतेन त्वत्कृताकृत्येन ॥ ५ ॥ ये उत्पथं लोकशास्त्रविरुद्धमार्गं । आरूढं प्रविष्टं त्वां न निगृह्णन्ति तस्मान्मार्गान्न निवर्तयन्ति । ते सचिवाः वध्याः वधार्हाः ॥ ६ ॥ एतदुपयुक्तत्वेन सचिवकर्तव्यं दर्शयन् प्रकृते तदभावं चतुर्थपादेनाह—अमात्यैरिति । कापथं कुमार्गं । निग्राह्यः निवर्तनीयः ॥ ७ ॥ स्वामिप्रसादात् स्वामिनः प्रसन्नभावात् स्वामिसाद्गुण्यादित्यर्थः ॥ ८ ॥ विपर्यये स्वामिवैगुण्ये । स्वामिवैगुण्यान्न केवलममात्या एव नश्यन्ति किंतु तदितरेपि जना इत्याह—व्यसनमिति ॥ ९ ॥ उक्तमर्थमुपसंहरति—तस्मादिति ॥ १० ॥ तीक्ष्णेन क्रूरदण्डेन । प्रतिकूलेन प्रजाविरुद्धेन । अविनीतेन इन्द्रियजयरहितेन । "विनयो हीन्द्रियजयः" इति कामन्दकः ॥ ११ ॥ तीक्ष्णमन्त्राः तीक्ष्णोपायप्रयोक्तारः । तेन स्वमन्त्रग्राहिणा राज्ञा सह । विषमे निम्नोन्नतप्रदेशे । शीघ्रगास्तुरगाः मन्दसारथयः अपटुसारथयः सन्तः । यथा सारथिना सह नश्यन्ति

ती० यद्वा राजवदितिशब्देन पूर्वसर्गोक्तरावणगतमौद्धत्यंलक्ष्यते । तदस्मिन्वाक्ये प्रवर्तकत्वेनास्तीतिराजवदितियोज्यं । **स०** राज्ञातुल्यंराजवत् भयाभावाद्रावणोयथाऽवदत्तथैवाब्रवीदितिभावः । **ति०** मृत्योर्निश्शङ्कोमारीचः । परुषं शब्दतोऽर्थतश्च । वाक्यमब्रवीत् ॥ १ ॥ **स०** विनाशः विनाशहेतुर्व्यापारः ॥ २ ॥ **स०** पूर्वमुत्तरत्रचकेनेदमित्येकवचननिर्देशेपि शत्रवइतिबहुवचनं दुर्बुद्धिप्रवर्तकानांनाशयोग्यानांबहुलात्संभवति ॥ ४ ॥ **शि०** सः कापथमाश्रितः अतएवनिग्राह्यस्त्वं नगृह्यसे ग्राह्यत्वेननस्वीक्रियसे ॥ ७ ॥

[पा०] १ ङ. झ. ट. आज्ञप्तोरावणेनेत्थंप्रतिकूलंचराजवत्. २ छ. तत्परुषं. ३ ङ. झ. ट. निश्शङ्को. ४ क. च. ज. ञ. सपुरस्य. ५ ङ. झ. ट. सराज्यस्य. ६ च. छ. ञ. निन्दितः. ७ क. ख. मपात्रृतं. ८ ङ. झ. ट. बुद्धिना. ९ क—ट. वध्यन्ते. १० क. ख. च. छ. ज. ञ. कुपथं. ११ ङ. झ. ट. सद्भिस्सनिग्राह्योनगृह्यसे. १२ क. ग. ङ.—ट. यशश्च. १३ च. ज—ट. नचापि.

बहवः साधवो लोके [1]युक्ता धर्ममनुष्ठिताः ॥ परेषामपराधेन विनष्टाः सपरिच्छदाः ॥ १३ ॥
स्वामिना प्रतिकूलेन प्रजास्तीक्ष्णेन रावण ॥ रक्ष्यमाणा न वर्धन्ते मे[2]षा गोमायुना यथा ॥ १४ ॥
अवश्यं विनशिष्यन्ति सर्वे रावण राक्षसाः ॥ येषां त्वं कर्कशो राजा दुर्बुद्धिरजितेन्द्रियः ॥ १५ ॥
तदिदं काकतालीयं घोरमासादितं मया ॥ [3]अत्रैव शोचनीयस्त्वंससैन्यो विनशिष्यसि ॥ १६ ॥
मां निहत्य तु [4]रामश्च नचिराच्वां वधिष्यति ॥ अनेन कृतकृत्योस्मि म्रिये [5]यदरिणा हतः ॥ १७ ॥
दर्शनादेव रामस्य हतं [6]मामुपधारय ॥ आत्मानं च हतं विद्धि हृत्वा सीतां सबान्धवम् ॥ १८ ॥
आनयिष्यसि चेत्सीतामाश्रमात्सहितो मया ॥ नैव [7]त्वमसि [8]नाहं च [9]नैवं लङ्का न राक्षसाः ॥ १९ ॥

निवार्यमाणस्तु मया हितैषिणा न मृष्यसे वाक्यमिदं निशाचर ॥
परेतकल्पा हि गतायुषो नरा हितं न गृह्णन्ति सुहृद्भिरीरितम् ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

तथेत्यर्थः ॥ १२ ॥ उत्तरश्लोके वक्ष्यमाणस्य सामान्यन्यायं दर्शयति—बहव इति । साधवो धर्मज्ञाः । युक्ताः नीतिमार्गनिष्ठाः । धर्मं अनुष्ठिताः अनुष्ठितवन्तः । "गत्यर्थाकर्मक—" इत्यादिना कर्तरि क्तः । सपरिच्छदाः सपरिवाराः ॥ १३ ॥ गोमायुना क्रोष्ट्रा । सहि मेषघातुक इति प्रसिद्धिः ॥ १४ ॥ कर्कशः क्रूरबुद्धिः ॥ १५ ॥ काकतालीयं यादृच्छिकं । घोरं भयंकरं इदं कृत्यं मया आसादितं ततो नाहं शोच्यः । नहि प्रमादविपन्नः शोच्य इति भावः । यद्वा ससैन्यस्त्वं विनशिष्यसीत्यत्रैव कृत्ये त्वं मे शोचनीयः बुद्धिपूर्वकारी त्वमेव हि शोच्य इति भावः । यद्वा ससैन्यो विनशिष्यसीति यत् तदिदं काकतालीयं घोरं कार्यं त्वया आसादितं । अत्रैव मया त्वं शोचनीयः हन्त दैवान्महाननर्थो राज्ञ उपस्थित इति शोचामीत्यर्थः ॥ १६ ॥ त्वयि विद्यमाने मम का हानिरित्यत्राह—मामिति । नचिरात् क्षणेनैव । अहं न शोचनीय इत्यत्र हेतुमाह—अनेनेति । तवारिणा रामेण हतो म्रिये इति यत् अनेन हेतुना कृतकृत्योस्मि विश्वामित्रयागसंरक्षणप्रभृतिखरादिवधान्तातिमानुषचारित्रानुस्मृतिकृतासाधारणमहिमस्फूर्त्या राघवं परमपुरुषं निश्चितवतो मम तत्करप्रापितमरणस्य परमपुरुषार्थत्वादितिभावः । तथोक्तं नृसिंहपुराणे "रामादपि हि मर्तव्यं मर्तव्यं रावणादपि । उभयोरपि मर्तव्ये वरं रामान्न रावणात्" इति ॥ यद्वा त्वत्तो निरुपाधिकवधाच्छत्रुहस्ताद्वधो निःश्रेयसकर इति भावः ॥ १७—१९ ॥ उक्तमर्थं न्यायप्रदर्शनेन प्रतिपादयति—निवार्यमाण इति । हिर्हेतौ । यस्मात् गतायुषो नराः हितं न गृह्णन्ति तस्माद्वाक्यमिदं न मृष्यसे न सहसे । गतायुष्कत्वाद्धितं न गृह्णासीत्यर्थः । परेतकल्पाः आसन्नमरणाः । ईषदसमाप्तौ कल्पप्प्रत्ययः ॥ २० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकचत्वारिंशः सर्गः ॥ ४१ ॥

ति० राजतो बलान्मरणापेक्षया रणेशत्रुतोमृत्योःस्वर्गदत्वादाद्यमृत्योरपमृत्युत्वेनदुर्मरणत्वेनशास्त्रेउक्तेः राज्ञामारितस्य शौचोदकदानाद्यभावश्रवणाद्रामतोमरणेन कृतकृत्योहमितिव्यङ्ग्यं । ईदृशंज्ञानंचास्य तपसायोगेनचशुद्धचित्तत्वादितिबोध्यं ॥ १७ ॥ इत्येकचत्वारिंशस्सर्गः ॥ ४१ ॥

[पा०] १ ख. घ—ट. युक्तधर्मं. २ ग. ङ. छ. झ. ञ. ट. मृगाः. ३ क. घ. च. छ. ज. ञ. अत्रकिं. ङ. झ. ट. अत्रत्वंशोचनीयोसि. ४ घ. ङ, छ, झ, ञ. ट. रामोसावचिरात्. ५ ङ. झ. चाप्यरिणा. ६ घ. मांविद्धिरावण. ङ. झ. ट. मामवधारय. ७ घ. त्वमपि, ८ ङ, झ, ञ, ट, नाहंवै. ९ ख. नापि.

द्विचत्वारिंशः सर्गः ॥ ४२ ॥

मारीचेनकृच्छ्राद्रावणनिदेशाभ्युपगमेनतेनसहरथाधिरोहणेनदण्डकारण्येरामाश्रमसमीपंप्रत्यागमनम् ॥ १ ॥ तथारथादवरुह्यरावणचोदनयामायथाविचित्रमृगरूपपरिग्रहेणरामाश्रमद्वारिविक्रीडनम् ॥ २ ॥ कविनाचित्रमृगविहाराकाररामणीयकवर्णनम् ॥ ३ ॥ आश्रमान्निर्गत्यकुसुमान्यवचिन्वन्त्यासीतयाऽद्भुततरंविहरमाणमायामृगविलोकनम् ॥ ४ ॥

एवमुक्त्वा तु [1]वचनं मारीचो रावणं [2]ततः ॥ गच्छावेत्यब्रवीद्दीनो भयाद्रात्रिंचरप्रभोः ॥ १ ॥
दृष्टश्चाहं पुनस्तेन शरचापासिधारिणा ॥ मद्वधोद्यतशस्त्रेण वि[3]नष्टं जीवितं च मे ॥ २ ॥
न हि रामं पराक्रम्य जीवन्प्रतिनिवर्तते ॥ वर्तते प्रतिरूपोसौ यमदण्डहतस्य ते ॥ ३ ॥
[4]किंतु शक्यं मया कर्तुमेवं त्वयि दुरात्मनि ॥ एष गच्छाम्यहं तात स्वस्ति तेऽस्तु निशाचर ॥ ४ ॥
प्रहृष्टस्त्वभवत्तेन वचनेन स रा[5]वणः ॥ परिष्वज्य सुसंश्लिष्टमिदं वचनमब्रवीत् ॥ ५ ॥
एतच्छौण्डीर्ययुक्तं ते मच्छ[6]न्दादिव भाषितम् ॥ इदानीमसि मारीचः पूर्वमन्यो निशाचरः ॥ ६ ॥
आरुह्यतामयं शीघ्रं [7]रथो रत्नविभूषितः ॥ मया सह [8]तथा युक्तः पिशाचवदनैः खरैः ॥ ७ ॥
प्रलोभयित्वा [9]वैदेहीं यथेष्टं गन्तुमर्हसि ॥ तां शून्ये प्रसभं सीतामानयिष्यामि मैथिलीम् ॥ ८ ॥
ततो रावणमारीचौ विमानमिव तं रथम् ॥ आरुह्य ययतुः शीघ्रं तस्मादाश्रममण्डलात् ॥ ९ ॥
तथैव तत्र पश्यन्तौ पत्तनानि वनानि च ॥ गिरींश्च सरितः सर्वा राष्ट्राणि [10]नगराणि च ॥ १० ॥
समेत्य दण्डकारण्यं राघवस्याश्रमं ततः ॥ ददर्श सहमारीचो रावणो राक्षसाधिपः ॥ ११ ॥

क्षणं क्षणार्धमपि वा वियोगो यस्य दुःखदः । तमहं शिरसा वन्दे जानकीप्राणवल्लभम् ॥ भयात् रावणादधुनैव वधो भविष्यतीति भयात् ॥ १ ॥ दीन इत्युक्तं दौस्थ्यमुपपादयति—दृष्ट इत्यादिना । यद्यहं तेन दृष्टः तदा मे जीवितं विनष्टमित्यन्वयः ॥ २ ॥ यमदण्डहतस्य ते प्रतिरूपः सदृशः । असौ जनो वर्तते त्वमिवाहमपि यमदण्डहत इत्यर्थः ॥ ३—४ ॥ सुसंश्लिष्टं दृढं ॥ ५ ॥ शौण्डीर्यं वीरत्वं । "कॄशॄपॄकटिपटिशौण्डिभ्यईरन्" इत्यौणादिकसूत्रेण शौडिगर्वे इत्यस्मादीरन्प्रत्ययः । "शौण्डिरोवीरः" इति वृत्तिकारः । "शौण्डीरस्त्यागिनीरयोः" इति निघण्टुः । तत्कर्म तद्भावो वा शौण्डीर्यं । गुणवचनत्वात् ष्यञ् । शौण्डीर्ययुक्तमेतत्ते भाषितं मच्छन्दादिव मदभिप्रायादिव । भाषितं मत्सदृशं भाषितमित्यर्थः । पूर्वमन्यो यः कश्चन निशाचरोसि विक्लबभाषणात् । इदानींमारीचोसि मारीच इति लोकप्रसिद्धनामधेयानुरूपव्यापारोसि । स्वप्रकृतिं प्राप्तोसीत्यर्थः ॥ ६ ॥ तथेति समुच्चये । खरैर्युक्तो रत्नविभूषितश्चेत्यर्थः ॥ ७—८ ॥ तस्मात् मारीचीयात् ॥ ९ ॥ तथैव रथरूढावेव । सहैव स्थिताविव्यर्थः । पत्तनानि नगरविशेषान् । नगाः वृक्षाः सन्त्येष्विति नगराणि उद्यानाकीर्णपुराणीत्यर्थः । "नगपांसुपाण्डुभ्यश्च" इति मत्वर्थीयो रप्रत्ययः । नगरपत्तनादिलक्षणमुक्तं वास्तुशास्त्रे— "ग्रामश्च नगरं चैवं पत्तनं खर्वटं पुरम् । खेटकं कुसुमं चैव शिबिरं राजवासिकम् । सेनामुखमितित्वेवं दशधा कीर्तितं बुधैः । विप्राणां च सभृत्यानां वासो ग्राम इतीरितः । स एव विप्रैराकीर्णस्त्वग्रहार इति स्मृतः । कुटुम्बिभेदैरेकोनत्रिंशद्भिश्च समन्वितः । अनेकनारीसंबद्धं नानाशिल्पिजनैर्वृतम् । क्रयविक्रयकैः कीर्णं सर्वदेवैः समन्वितम् । नगरं त्विति विख्यातं पत्तनं शृणु साम्प्रतम् । द्वीपान्तरागतद्रव्यक्रयविक्रयकैर्युतम् । पत्तनं त्वब्धितीरे स्यात्तयोर्भिश्रं

स० यमदण्डहतस्य यमदण्डेनैष्यद्धननस्य । प्रतिरूपः योग्यः ॥३ ॥ ति० मच्छन्दवशवर्तिनः मदभिप्रायवशवर्तिनः ॥ ६ ॥ ति० खगः आकाशगामी रथः ॥ ७ ॥

[पा०] १ क. ख. ग. ङ—ट. परुषं. २ क. च. छ. ज. ञ. तदा. ३ ङ. झ. ट. निहतं. ४ झ. ट. किंतुकर्तुमयाशक्यमेवं. ५ ख. ग. ङ—ट. राक्षसः. ६ झ. ञ. ट. मच्छन्दवशवर्तिनः. ७ क. घ—ट. खगो. ८ क. ख. ग. ङ—ट. रथो. ९ क. ख. घ. जानकीं. १० घ. विविधानिच.

अवतीर्य रथात्तस्मात्[1]ततः काञ्चनभूषणात् ॥ हस्ते गृहीत्वा मारीचं रावणो वाक्यमब्रवीत् ॥ १२ ॥
[2]एतद्रामाश्रमपदं दृश्यते कदलीवृतम् ॥ क्रियतां तत्सखे शीघ्रं यदर्थं वयमागताः ॥ १३ ॥
[3]स रावणवचः श्रुत्वा मारीचो राक्षसस्तदा ॥ मृगो भूत्वाऽऽश्रमद्वारि रामस्य विचचार ह ॥ १४ ॥
स तु रूपं समास्थाय महदद्भुतदर्शनम् ॥ मणिप्रवरशृङ्गाग्रः सितासितमुखाकृतिः ॥ १५ ॥
रक्तप[4]द्मोत्पलमुख इन्द्र[5]नीलोत्पलश्रवाः ॥ किंचि[6]दभ्युन्नतग्रीव इन्द्रनीलद[7]लाधरः ॥ १६ ॥
[8]कुन्देन्दुवज्रसंकाश मुदरं चास्य भास्वरम् ॥ [9]मधूकनिभपार्श्वश्च [10]पद्मकिञ्जल्कसन्निभः ॥ १७ ॥
वैडूर्यसंकाशखुरस्तनुजङ्घः सुसंहतः ॥ इन्द्रायुधसवर्णेन पुच्छेनोर्ध्वं विराजता ॥ १८ ॥
मनोहरः स्निग्धवर्णो रत्नैर्नानाविधैर्वृतः ॥ क्षणेन राक्षसो जातो मृगः परमशोभनः ॥
वनं प्रज्वलयन्रम्यं रामाश्रमपदं च तत् ॥ १९ ॥
मनोहरं दर्शनीयं रूपं कृत्वा स राक्षसः ॥ प्रलोभनार्थं वैदेह्या नानाधातुविचित्रितम् ॥
विच[11]रन्गच्छते तस्मा[12]च्छाद्वलानि समन्ततः ॥ २० ॥
[13]रूप्यैर्बिन्दुशतैश्चित्रो [14]भूत्वा स प्रि[15]यदर्शनः ॥ विटपीनां किसलयान्भ[16]ङ्क्त्वादन्विचचार ह ॥ २१ ॥

तु खर्वटम् । क्रयविक्रयकैर्युक्तं नानाजातिसमन्वितम् । तन्तुवायसमायुक्तं तत्पुरं त्विति कथ्यते । एतैरधिष्ठितं यत्तत्खेटकं परिकीर्तितम् । तेषामेकान्तरेष्वेव वासः कुसुममुच्यते—" इत्यादिना ॥ १०—११ ॥ हस्ते गृहीत्वेत्यनेनावश्यकत्वं द्योत्यते ॥ १२ ॥ यदर्थं यत्कार्यार्थं । तत् कार्यं । क्रियतां आगमप्रयोजननिर्वाहकं मृगरूपं भजस्वेत्यर्थः ॥ १३—१४ ॥ संग्रहेणोक्तं विवृणोति—स त्वित्यादिना । अद्भुतं विस्मयावहं दर्शनं यस्य तत्तथा । मणिप्रवरः इन्द्रनीलः तत्तुल्ये शृङ्गाग्रे यस्य स तथा । कचित्सिता—कचिदसिता च मुखस्याकृतिः शोभारेखा यस्य । "वर्णोवर्णेन" इति समानाधिकरणसमासः । अवयवद्वारेण सितासितशब्दौ समुदाये वर्तमानौ समानाधिकरणौ भवतः॥१५॥ रक्तपद्मोत्पलमुखः मुखपुटयोरेकोरक्तपद्मवर्णः अन्यस्तूत्पलवर्ण इत्यर्थः । इन्द्रनीलोत्पलश्रवाः श्रवसोरिन्द्रनीलसादृश्यं नीलभास्वररूपेण । उत्पलसादृश्यं रूपेण । इन्द्रनीलदलवदधरो यस्य स तथा ॥ १६ ॥ अस्य मृगरूपस्य कुन्देन्दुवज्रसंकाशमुदरमासीत् । तस्मात्तादृशोदर इति विपरिणमयितव्यं । अन्यथा पूर्वापरविरोधः । मधूकनिभपार्श्वः गुडपुष्पतुल्यवर्णैकपार्श्वः । पार्श्वान्तरे हेमवर्णस्य वक्ष्यमाणत्वात् । पद्मकिञ्जल्कसन्निभः उक्तावयवव्यतिरिक्तपृष्ठसर्वप्रदेशे पद्मकेसरवर्णः ॥ १७ ॥ सुसंहतः सुश्लिष्टसंधिबन्धः । ऊर्ध्वं पुच्छोर्ध्वपार्श्वे । इन्द्रायुधसवर्णेन इन्द्रधनुर्वन्नानावर्णेन । पुच्छेनोपलक्षितः ॥ १८ ॥ स्निग्धवर्ण इति पूर्वोक्तसर्ववर्णानां स्निग्धत्वं विशेषणं । रत्नैः रत्नाकारबिन्दुभिः । उपसंहरति—क्षणेनेति । प्रज्वलयन् प्रकाशयन् । मृगो जात इति पूर्वेणान्वयः ॥ १९ ॥ मनोहरमित्यादिसार्धश्लोक एकान्वयः । धातुर्वर्णः । शाद्वलानि शादाः बालतृणानि "शादोजम्बालशष्पयोः" इत्यमरः । तद्वन्ति स्थलानि शाद्वलानि । "नडशादाड्ड्वलच्" इतिड्वलच्प्रत्ययः । विचरन् भक्षयन् । चर गतिभक्षणयोः । गच्छते गच्छति ॥ २० ॥ विटपीनामिति दीर्घश्छान्दसः । किस-

स० वयमितिबहुवचनं " अस्मदोद्वयोश्च " इतिसंभवति । विधेयविशेषणत्वात्सविशेषणत्वप्रयुक्तप्रतिषेधाभावश्च ॥ १३ ॥
कतक० मणिशब्दः केवलइन्द्रनीले इतिकविसमयः ॥ १५ ॥

[पा०] १ ख. तप्तकाञ्चन. २ क. ग. एतत्तदाश्रम. ३ च. ज. ञ. ट. रावणस्यवचः. ४ ख. रत्ननीलोत्पलमुखः. ५ ख. नीलोपम. ६ ङ. झ. दत्युन्नत. ७ क. ख. ङ—ट. निभोदरः. ग. घ. तलोदरः. ८ इदमर्धं क—ट. पुस्तकेषुनदृश्यते. ९ क. मयूरनिभपार्श्वश्च. ख. मयूरनिभपार्श्वोयं. १० ङ. झ. ट. कञ्जकिञ्जल्क. ११ ख. ग. विचरंश्चवनंसर्वंशाद्वलानि. १२ क. च. छ. ज. ञ. सम्यकछाद्वलानि. ङ. झ. ट. शष्पंशाद्वलानि. १३ ङ—ट. रौप्यैर्बिन्दुशतैः क. ख. रूप्यबिन्दुशतैः. १४ क. ख. ग. ङ—ज. ञ. भूत्वाच. १५ क. ख. ग. ङ.—ट. प्रियनन्दनः. १६ ङ. झ. ट. भक्षयन्विचचार.

कदलीगृहकं गत्वा कर्णिकारानितस्ततः ॥ समाश्रयन्मन्दगतिः सीतासंदर्शनं तथा ॥ २२ ॥
राजीवचित्रपृष्ठः स विरराज महामृगः ॥ रामाश्रमपदाभ्याशे विचचार यथासुखम् ॥ २३ ॥
पुनर्गत्वा निवृत्तश्च विचचार मृगोत्तमः ॥ गत्वा मुहूर्तं त्वरया पुनः प्रतिनिवर्तते ॥ २४ ॥
विक्रीडंश्च क्वचिद्भूमौ पुनरेव निषीदति ॥ आश्रमद्वारमागम्य मृगयूथानि गच्छति
मृगयूथैरनुगतः पुनरेव निवर्तते ॥ २५ ॥
सीतादर्शनमाकाङ्क्षन्राक्षसो मृगतां गतः ॥ परिभ्रमति चित्राणि मण्डलानि विनिष्पतन् ॥
[समीपे मृगयूथस्य विस्मितानि विशेषतः] ॥ २६ ॥
समुद्वीक्ष्य च तं सर्वे मृगा ह्यन्ये वनेचराः ॥ उपागम्य समाघ्राय विद्रवन्ति दिशो दश ॥ २७ ॥
राक्षसः सोपि तान्वन्यान्मृगान्मृगवधे रतः ॥ प्रच्छादनार्थं भावस्य न भक्षयति संस्पृशन् ॥२८॥
तस्मिन्नेव ततः काले वैदेही शुभलोचना ॥ कुसुमापचयव्यग्रा पादपानभ्यवर्तत ॥ २९ ॥
कर्णिकारानशोकांश्च चूतांश्च मदिरेक्षणा ॥ कुसुमान्यपचिन्वन्ती चचार रुचिरानना ॥ ३० ॥
अनर्हाऽरण्यवासस्य सा तं रत्नमयं मृगम् ॥ मुक्तामणिविचित्राङ्गं ददर्श परमाङ्गना ॥ ३१ ॥
सा तं रुचिरदन्तोष्ठी रूप्यधातुतनूरुहम् ॥ विस्मयोत्फुल्लनयना सस्नेहं समुदैक्षत ॥ ३२ ॥

लयान् पल्लवान् । पुँल्लिङ्गत्वमार्षं ॥ २१ ॥ कदलीगृहकं कृत्रिमकदलीमयगृहं । तदनन्तरं कर्णिकारान् गत्वा ततः सीता संदृश्यतेऽस्मिन्निति सीतासंदर्शनं अधिकरणे ल्युट् । सीतासंदर्शनयोग्यस्थानमित्यर्थः । तथेति समुच्चये । तदपि गत्वा मन्दगतिः सन् इतस्ततः समाश्रयत् ॥ २२ ॥ राजीवचित्रपृष्ठः राजीवकेसरवदाश्चर्यकरपृष्ठदेशः । चित्रत्वं पूर्वस्माद्विशेषः । रामाश्रमपदाभ्याशे रामाश्रमस्थानसमीपे ॥ २३ ॥ पुनर्गत्वेति पुनर्निवृत्तश्चेत्यन्वयः । निवृत्य गमनमुक्त्वा गत्वानिवर्तनमाह—गत्वेति ॥ २४ ॥ एवं गमनागमनाभ्यां विक्रीडन्सन् पुनः क्वचित्तूष्णीं निषीदति ॥ २५ ॥ विनिष्पतन् संचरन् ॥ २६ ॥ समाघ्रायेति घ्राणेन विशेषं जानन्ति तिर्यञ्च इति प्रसिद्धिः ॥२७॥ भावस्य क्रौर्यस्य । प्रच्छादनार्थं मृगवधे रतोपि मृगान्न भक्षयति । किंतु संस्पृशन्नास्ते ॥ २८ ॥ ततः आश्रमात् । अभ्यवर्ततेत्यन्वयः ॥ २९ ॥ मदिरं आनन्दजनकं ईक्षणं यस्याः सा मदिरेक्षणा । अनेन रुचिराननेत्यनेन च वक्ष्यमाणकार्योपयोग्युल्लासो द्योत्यते ॥ ३० ॥ अरण्यवासस्यानर्हेत्यनेन सन्निहितव्रतसमाप्तिकालत्वकथनान्मृगग्रहणत्वरातिशयो द्योत्यते । रत्नमयं श्रेष्ठभूतं । स्वार्थे मयट् । "रत्नं स्वजातौ श्रेष्ठेपि" इत्यमरः । मुक्तामणिशब्देन तत्तुल्यबिन्दुमत्त्वमुक्तं ॥ ३१ ॥ रुचिरदन्तोष्ठीत्यनेन कुतुकानुभाव उक्तः । रूप्यं रजतं धातवः ताम्रगैरिकादयः तत्तुल्यतनूरुहं । "तनूरुहं रोम लोम" इत्यमरः

ति० कदलीगृहं कदलीवाटिकां कर्णिकारान् तद्वनंच गत्वा त्यक्त्वा । सीतासंदर्शनमपेक्ष्य इतस्ततोमन्दगतिंसमाश्रयन्विचचार विरराजच ॥ २२—२३ ॥ ति० अपचयः ग्रहणं । अत्राशोकचूतकुसुमानामपचयोक्त्या शिशिरान्तकालोयं । " गन्धवान्सुरभिर्मासो जातपुष्पफलद्रुमः " इति " संतापयतिसौमित्रे क्रूरश्चैत्रवनानिलः " इतिच पंपातीरेरामोक्तेश्च । किंच अग्रे द्वादशमासोत्तरंयद्येषा मां नाङ्गीकरोतितदैनांहन्मीतिरावणप्रतिज्ञा । ततोहनुमद्दर्शनकालेच तंप्रतिसीतावाक्यं " वर्ततेदशमो मासोद्वौतुशेषौप्लवङ्गम " इतिसंगच्छते । माघशुक्लाष्टम्यांहरणेहि मार्गशुक्लाष्टम्यां ततोऽर्वागेववा दशमसमाप्त्या तस्यवर्तमानलोक्तिरसंगतैवस्यात् । तच्छुक्लपक्षान्तेहनूमतस्तद्दर्शनात् ॥ ३० ॥

[पा०] १ झ. न्मन्दगतिं. २ च. छ. ज. ञ. तदा. ङ. झ. ट. ततः. ३ क. ङ.—ज. ञ. पृष्ठश्च. ४ च. छ. ज. मृगोत्तमः. ५ क—ट. पुनर्भूमौ. ६ ख. घ. मण्डलान्यभिनिष्पतन्. ७ इदमर्धं च. छ. ज. पाठेषुदृश्यते. ८ ङ—ट. उपगम्य. ९ ङ—ट. कुसुमापचये. १० झ. ञ. ट. न्यवर्तत. ११ ङ. झ. ट. अनर्हावनवासस्य. १२ ख. रत्नविभूषितं. १३ ङ. झ. ट. तंवै. ख. तंसा. १४ ख. झ. रुचिरदन्तोष्ठं.

स च तां रामदयितां पश्यन्मायामयो मृगः ॥ विचचार पुनश्चित्रं दीपयन्निव तद्वनम् ॥ ३३ ॥
अदृष्टपूर्वं [2]तं दृष्ट्वा नानारत्नमयं मृगम् ॥ विस्मयं परमं सीता जगाम जनकात्मजा ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

सीतयाहर्षादाह्वानेनरामलक्ष्मणाभ्यांमायामृगप्रदर्शनम् ॥ १ ॥ लक्ष्मणेनरामंप्रतिमृगस्यरत्नमयत्वासंभवरूपहेतूक्त्यामारीचमायामयत्वाभिधानेपिसीतयातन्निवारणपूर्वकंरामंप्रतिमृगेस्वस्योत्कण्ठाविष्करणेनतदानयनप्रार्थना ॥ २ ॥ रामेणलक्ष्मणंप्रतिमृगस्यमारीचत्वपक्षेपिअगस्त्येनवातापेरिवस्वेनतस्यावश्यंहन्तव्यत्वोक्त्यातद्धननेनतदीयचर्मानयनप्रतिज्ञानपूर्वकंतावत्सीतारक्षणचोदना ॥ ३ ॥

सा तं संप्रेक्ष्य सुश्रोणी [3]कुसुमान्यपचिन्वती ॥ [4]हैमराजतवर्णाभ्यां पार्श्वाभ्यामुपशोभितम् ॥ १ ॥
प्रहृष्टा चानवद्याङ्गी मृष्टहाटकवर्णिनी ॥ [5]भर्तारमभिचक्रन्द लक्ष्मणं [6]चापि सायुधम् ॥ २ ॥
[[7]आहूयाहूय च पुनस्तं मृगं साधु वीक्षते ॥ आगच्छागच्छ शीघ्रं वै आर्यपुत्र सहानुजः] ॥ ३ ॥
[8]तयाऽऽहूतौ नरव्याघ्रौ वैदेह्या रामलक्ष्मणौ ॥ वीक्षमाणौ तु तं देशं तदा ददृशतुर्मृगम् ॥ ४ ॥
शङ्कमानस्तु तं दृष्ट्वा लक्ष्मणो [9]राममब्रवीत् ॥ तमेवैनमहं मन्ये मारीचं राक्षसं मृगम् ॥ ५ ॥
चरन्तो मृगयां हृष्टाः पापेनोपाधिना वने ॥ अनेन निहता [10]राजन्राजानः [11]कामरूपिणा ॥ ६ ॥
[12]अस्य [13]मायाविदो माया मृगरूपमिदं कृतम् ॥ [14]भानुमत्पुरुषव्याघ्र गन्धर्वपुरसन्निभम् ॥ ७ ॥
मृगो ह्येवंविधो रत्नविचित्रो नास्ति राघव ॥ जगत्यां जगतीनाथ मायैषा हि न संशयः ॥ ८ ॥
एवं ब्रुवाणं [15]काकुत्स्थं [16]प्रतिवार्य शुचिस्मिता ॥ उवाच सीता संहृष्टा [17]चर्मणा [18]हृतचेतना ॥ ९ ॥

॥ ३२ ॥ दीपयन् प्रकाशयन् ॥ ३३—३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्विचत्वारिंशः सर्गः ॥ ४२ ॥

सीतायास्त्वेकनाथायाः पूरयिष्यन्मनोरथम् । मायामृगं योनुययौ श्रीरामं तमुपास्महे ॥ हैमराजतवर्णाभ्यामित्यनेन द्वयोः पार्श्वयोर्वर्णभेद उच्यते । मृष्टं शुद्धं हाटकं सुवर्णं तस्य वर्णोस्या अस्तीति तथा । " स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकं " इत्यमरः । अभिचक्रन्द उच्चैराह्वयत् । क्रदि आह्वाने रोदने चेति धातुः । सायुधमित्यनेन आयुधेनसहागन्तव्यमित्याहूतवतीति गम्यते ॥ १—५ ॥ मृगयां चरन्तः मृगयार्थं पर्यटन्तो राजानः । अनेन पापेन मृगरूपोपाधिनानिमित्तेन हताः ॥ ६ ॥ मायां वेत्तीति मायावित् अस्य । मायैव मृगरूपंकृतं मृगाकारेण परिणतं। भानुमत् प्रकाशवत् । गन्धर्वपुरं नानाविधविस्मयनीयाकारसंस्थानं क्षणभङ्गुरमभ्रं तत्सन्निभं तद्वद्विस्मयनीयमित्यर्थः ॥ ७ ॥ जगत्यां भूमौ ॥ ८ ॥ काकुत्स्थं प्रतिवार्य निवर्त्य । उवाच राममिति शेषः ।

स० विस्मयंजगाम जगामेव ॥ ३४ ॥ इतिद्विचत्वारिंशस्सर्गः ॥ ४२ ॥

स० हैमंचराजतंच । स्वार्थेऽण् । तयोर्वर्णाविववर्णोययोस्ताभ्यां ॥ १ ॥ चक्रन्देति रोदनार्थेन भाव्यशुभमितिसूचितंकविना ॥ २ ॥ **स०** अयंमायावीतिजानन्त्यपि छद्मनावञ्चनेनहृतचेतनेवोवाच ॥ ९ ॥

[पा०] १ क. ङ. झ. ञ. ट. ततस्तत्र. २ क.—ट. दृष्ट्वातं. ३ क.—ट. कुसुमानिविचिन्वती. ४ ङ. छ. झ. ञ. हेमराजत. ५ क. ख. घ. च. भर्तारमपिचाक्रन्दल्लक्ष्मणं. झ. भर्तारमपिचक्रन्द. ६ क—ट. चैव. ७ अयंश्लोकः ङ. झ. ट. पाठेषुदृश्यते. ८ ख. ङ. झ. ट. तावाहूतौ. ९ ङ. झ. ट. वाक्यमब्रवीत्. १० क. ख. ङ. झ. ट. रामराजानः. ११ ङ. झ. ट. पापरूपिणा. १२ ग. मन्ये. १३ ख. घ. मायाविनो. १४ घ. सुमतेपुरुष. १५ क. सौमित्रिं. १६ च. छ. ज. ञ. परिवार्य. १७ झ. ञ. ट. छद्मना. क. च. छ. ज. मृगेण. १८ ग. हृतलोचना.

आर्यपुत्राभिरामोसौ मृगो हरति मे [1]मनः ॥ आनयैनं महाबाहो क्रीडार्थं नो भविष्यति ॥ १० ॥
इहाश्रमपदेऽस्माकं बहवः पुण्यदर्शनाः ॥ मृगाश्चरन्ति सहिताः [2]सृमराश्चमरास्तथा ॥ ११ ॥
ऋक्षाः पृषतसङ्घाश्च वानराः किन्नरास्तथा ॥ [3]विचरन्ति महाबाहो रूपश्रेष्ठा [4]मनोहराः ॥ १२ ॥
न [5]चास्य सदृशो राजन्[6]दृष्टपूर्वो [7]मृगः पुरा ॥ तेजसा क्षमया दीप्त्या यथाऽयं मृगसत्तमः ॥ १३ ॥
नानावर्णविचित्राङ्गो [8]रत्नबिन्दुसमाचितः ॥ द्योतयन्वनम[9]व्यग्रं [10]शोभते शशिसन्निभः ॥ १४ ॥
अहो रूपमहो लक्ष्मीः स्वरसंपच्च शोभना ॥ मृगोऽद्भुतो [11]विचित्राङ्गो हृदयं हरतीव मे ॥ १५ ॥
यदि ग्रहणमभ्येति जीवन्नेव मृगस्तव ॥ आश्चर्य[12]भूतं भवति विस्मयं जनयिष्यति ॥ १६ ॥
समाप्तवनवासानां राज्यस्थानां च नः पुनः ॥ [13]अन्तःपुरविभूषार्थो मृग एष भविष्यति ॥ १७ ॥
भरतस्यार्यपुत्रस्य श्वश्रूणां [14]मम च प्रभो ॥ मृगरूपमिदं [15]व्यक्तं विस्मयं जनयिष्यति ॥ १८ ॥
जीवन्न यदि तेऽभ्येति ग्रहणं मृगसत्तमः ॥ अजिनं नरशार्दूल [16]रुचिरं मे भविष्यति ॥ १९ ॥
निहतस्यास्य सत्त्वस्य जाम्बूनदमयत्वचि ॥ शष्पबृस्यां विनीतायामिच्छाम्यहमुपासितुम् ॥ २० ॥
कामवृत्तमिदं रौद्रं स्त्रीणामसदृशं मतम् ॥ वपुषा त्वस्य सत्त्वस्य विस्मयो जनितो मम ॥ २१ ॥

तत्र हेतुःचर्मणेति । हृतचेतना हृतप्रज्ञा ॥ ९ ॥ नो भविष्यति नः भविष्यति । नभविष्यतीत्यपि वाग्दोषः ॥ १० ॥ सहिताः सङ्घीभूताः । सृमराः व्यालमृगाः । "सृमरः स्याद्व्यालमृगः" इति वैजयन्ती । चमराः चामरमृगाः । ऋक्षाः भल्लूकाः । पृषताः बिन्दुमृगाः । किन्नराः मृगविशेषाः ॥ ११—१२ ॥ तेजसा वर्णेन । क्षमया अत्वरया । दीप्त्या शारीरप्रकाशेन । यथाऽयं मृगो दृश्यते तथा तेजआदिभिः अस्य सदृशो मृगो न दृष्टपूर्वः । पुरा भाविकालेपि । न दृश्यत इति शेषः । "स्यात्प्रबन्धे चिरातीते निकटागामिके पुरा" इत्यमरः ॥ १३ ॥ समाचितः व्याप्तः । अव्यग्रं समग्रंयथा तथा शोभते। शशिसन्निभः आनन्दकरत्वेन शशिसाम्यं ॥ १४ ॥ रूपं वर्णः । लक्ष्मीः कान्तिः । उक्तानुवादपूर्वकं मनोहरत्वमाह—मृगइति ।अतो न पूर्वार्धेन गतार्थता ॥ १५ ॥ श्लोकद्वयमेकान्वयं । तवग्रहणं त्वत्कर्तृकग्रहणं । कर्तरि षष्ठी । तदा एष मृगः आश्चर्यभूतं अस्माकं विस्मयावहं सत्त्वं भवति इदानीमिति शेषः। समाप्तवनवासानां अतएव पुनः राज्यस्थानां च नः विस्मयं जनयिष्यति । किंच अन्तःपुरविभूषार्थोपि भविष्यति ॥ १६—१७ ॥ आर्यपुत्रस्य तव । श्वश्रूणां ममश्वश्रूणां चेति योजना । मृगरूपं प्रशस्तमृगः । प्रशंसायां रूपप् प्रत्ययः । मृगस्य रूपं वा ॥ १८ ॥ जीवतः अग्रहणेपि प्रयोजनमाह—जीवन्निति । अजिनं चर्म । रुचिरं प्रियं ॥ १९ ॥ प्रियत्वमेव विवृणोति—निहतस्येति । जाम्बूनदमयत्वचि स्वर्णसदृशत्वचि । शष्पबृस्यां बालतृणैःकृतायांबृस्यां । मध्यमपदलोपिसमासः । "व्रतिनामासनं बृसी" इत्यमरः। तस्यां विनीतायां आस्तृतायां । उक्तरूपत्वचि उपासितुं स्थातुं । इच्छामि त्वयासहेति शेषः ॥ २० ॥ अथ सविनयमाह—कामवृत्तमिति । रौद्रं घोरं । इदं कामवृत्तं भर्तृप्रेरणरूपस्वेच्छाव्यापारः । स्त्रीणां असदृशं अयुक्तं । कैकेयीवत् । तथाप्यस्य सत्त्वस्य तु वपुषा विलक्षणदेहेन । मम विस्मयो जनितः ममात्यन्तं कुतूहलं वर्तते । आनयेति वक्तुमप्ययुक्तं अतः तवापि कुतूहलमस्ति चेत्तथा क्रियतामिति भावः ।

ति० नोस्माकं । अयोध्यागमनोत्तरं तत्रसख्यभिप्रायेण बहुवचनं ॥ १० ॥ ति० सृमरचमरौ कृष्णशुक्लपुच्छौ ॥ ११ ॥

[पा] १ च. छ. ज. ञ. मन्मनः. २ ग—ट. चमरास्सृमरास्तथा. ३ ङ. झ. ट. विहरन्ति. ४ क. ख. ग. ङ—ट. महाबलाः. ५ ङ. झ. ट. चान्यः. ६ झ. न्दृष्टःपूर्वं. ७ ङ. झ. ट. मृगोमया. ८ ङ. झ. रत्नभूतोममाग्रतः. छ. ट. रत्नबिन्दुसमन्वितः. ९ ग. घ. च. छ. ज. ञ. मव्यग्रः. १० ङ. झ. ट. द्योतते. ११ ग. च. छ. ज. विचित्रोसौ. १२ ख. भूतो. घ. च. ज. रूपं. १३ झ. अन्तःपुरेविभूषार्थो. ङ. ट. अन्तःपुरेपिभूषार्थो. १४ ख. चमम. १५ ङ. झ. ट. दिव्यं. १६ ङ. झ. ट. रुचिरंतु.

तेन काञ्चनरोम्णा तु मणिप्रवरशृङ्गिणा ॥ तरुणादित्यवर्णेन नक्षत्रपथवर्चसा ॥
बभूव राघवस्यापि मनो विस्मयमागतम् ॥ २२ ॥
[1]एवं सीतावचः श्रुत्वा [2]तं दृष्ट्वा मृगमद्भुतम् ॥ लोभितस्तेन रूपेण सीतया च प्रचोदितः ॥
उवाच राघवो हृष्टो भ्रातरं लक्ष्मणं वचः ॥ २३ ॥
पश्य लक्ष्मण वैदेह्याः स्पृहां मृगगतामिमाम् ॥ रूपश्रेष्ठतया ह्येष मृगोऽद्य न भविष्यति ॥ २४ ॥
न वने नन्दनोद्देशे न चैत्ररथसंश्रये ॥ कुतः पृथिव्यां सौमित्रे योऽस्य कश्चित्समो मृगः ॥ २५ ॥
प्रतिलोमानुलोमाश्च रुचिरा रोमराजयः ॥ शोभन्ते मृगमाश्रित्य चित्राः कनकबिन्दुभिः ॥ २६ ॥
पश्यास्य जृम्भमाणस्य दीप्तामग्निशिखोपमाम् ॥ जिह्वां मुखान्निस्सरन्तीं मेघादिव शतह्रदाम् ॥२७॥
[3]मसारगल्लर्कमुखः शङ्खमुक्तानिभोदरः ॥ कस्य [4]नामाभिरूपोसौ न मनो लोभयेन्मृगः ॥ २८ ॥
कस्य रूपमिदं दृष्ट्वा जाम्बूनद[5]मयं प्रभो ॥ नानारत्नमयं [6]दिव्यं न मनो विस्मयं व्रजेत् ॥
[[7]किं पुनर्मैथिली सीता बाला नारी न विस्मयेत् ॥ २९ ॥]
मांसहेतोरपि मृगान्विहारार्थं च धन्विनः ॥ घ्नन्ति लक्ष्मण राजानो मृगयायां महावने ॥ ३० ॥
धनानि व्यवसायेन विचीयन्ते महावने ॥ धातवो विविधा[8]श्चापि मणिरत्नसुवर्णिनः ॥ ३१ ॥

अनेन पूर्वमानयेति प्रमादादुक्तस्य क्षमापणं कृतं ॥ २१ ॥ न केवलं स्त्रीपारवश्येन कृतवान् किंतु स्वविस्मयेनापीत्याह—तेनेत्यादिना । मणिप्रवरो नीलरत्नं । काञ्चनवर्णरोमत्वात् बालसूर्यवर्णत्वं । नक्षत्रपथः छायापथः तत्तुल्यवर्चसा । नक्षत्रसदृशबिन्दूपलक्षितत्वात् । आगतं प्राप्तं ॥ २२ ॥ रूपेण मृगेण । "रूपं मृगेपि विज्ञेयं" इतिहलायुधः ॥ २३ ॥ पश्येति । सीता स्पृहायुक्तेतिभावः । तत्र हेतुमाह—रूपेति । मृगेषुश्रेष्ठतयावा एष मृगः एतादृशमृगः । अद्य वनवासे न भविष्यति न सेत्स्यति । दुर्लभ इत्यर्थः ॥ २४ ॥ नकेवलमत्र देशान्तरेपि दुर्लभ इत्याह—न वन इति । नन्दन इत्युद्देशः । कीर्तनं यस्य तस्मिन् वने चैत्ररथसंश्रये चैत्ररथाख्ये वने च । न भविष्यतीत्यनुषज्यते । पृथिव्यां कुतो हेतोर्भविष्यति ॥२५॥ प्रतिलोमाः तिर्यग्भूताः । अनुलोमाः अनुकूलाः । रोमराजयश्च मृगमाश्रित्य दृश्यन्ते । चित्राः आश्चर्यभूताः । कनकबिन्दवः कनकवर्णबिन्दवश्च । मृगमाश्रित्य शोभन्ते ॥ २६ ॥ शतह्रदां तटितं ॥२७॥ मसारः इन्द्रनीलः । गल्लर्कः चषकः । "गल्लर्कश्चानुतर्षश्च तर्षकश्चषकः स्मृतः" इति हलायुधः । इन्द्रनीलनिर्मितचषकाकारमुखसंपुट इत्यर्थः । अभिरूपः सुन्दरः ॥ २८ ॥ रूपं मृगं । जाम्बूनदमयेति स्वार्थे मयट् । नानारत्नमयं नानाबिन्दुप्रचुरं ॥ २९ ॥ मांसहेतोरपि विनोदार्थं च राजानो मृगान् घ्नन्ति । किं पुनरेवंविधविचित्रवस्तुलाभहेतोरिति भावः ॥ ३० ॥ एतन्मृगरूपं महद्धनं एतच्च वन एव संभवति तस्मादिदं व्यवसायेन स्वीकर्तव्यमित्यभिप्रायेणाह—धनानीति । मणिरत्नं मणिश्रेष्ठं सुवर्णं च मणिरत्नसुवर्णे ते येषु स्त इति मणिरत्नसुवर्णिनः । मणयः सुवर्णानि च धातुषु भवन्तीति प्रसिद्धिः । तथाभूता विविधा धातवश्च धनानि करिमस्तकमुक्ताप्रभृतीनि । महावने व्यवसायेन मृगयोर्योगेन । राजभिः विचीयन्ते संगृह्यन्ते । यद्वा धनानि व्यवसायेन मृगयोद्योगेन । महावने विचीयन्ते । ननु कुतो वने

स० काञ्चनरूपेणेतिपाठे काञ्चनात्मकेन काञ्चनमृगेणेतिवा । " रूपंमृगेऽपिविज्ञेयं " इतिहलः । नक्षत्रपथवर्चसा नक्षत्रसदृशनानाबिन्दूपलक्षिततयातत्पथवर्चाःतेन ॥ २२ ॥ **ति०** सर्वश्रेष्ठरूपेणहेतुना अद्यैषमृगो नभविष्यति नजीविष्यति । जीवनमस्य नसंभावितमित्यर्थः ॥ **कतक०** प्रायेणमृगत्वमत्र नसंभावितमित्यर्थः ॥ २४ ॥ **ति०** योस्यकश्चित्समोमृगः सः पृथिव्यामस्तीतिकुतस्संभाव्यतइत्यर्थः ॥ **स०** चैत्ररथसंश्रये चैत्ररथाभिन्नस्संश्रयः नानावृक्षाश्रयः कुबेरवनं ॥ २५ ॥

[पा०] १ ङ. झ. ट. इति. २ ङ—ट. दृष्ट्वाच. ख. दृष्ट्वातु. ३ ग. बालार्काभमुखःशङ्खमुक्तामणिमनोहरः क. ख. घ. मसारगल्वर्क. ४ ख. ग. नामानुरूपः. ङ. छ—ट. नामानिरूप्योसौ. घ. नामातिरूपोसौ. ५ क—ट. मयप्रभं. ६ ग. रम्यं. ७ इदमर्धं क—ट. पुस्तकेषुनदृश्यते. ८ घ. श्चैव.

त्सारमखिलं नृणां धनं निचयवर्धनम् ॥ मनसा चिन्तितं सर्वं यथा शुक्रस्य लक्ष्मण ॥ ३२ ॥
र्थी येनार्थकृत्येन संव्रजत्यविचारयन् ॥ तमर्थमर्थशास्त्रज्ञाः प्राहुरर्थ्याश्च लक्ष्मण ॥ ३३ ॥
तस्य मृगरत्नस्य परार्ध्ये काञ्चनत्वचि ॥ उपवेक्ष्यति वैदेही मया सह सुमध्यमा ॥ ३४ ॥
 कादली न प्रियकी न प्रवेणी न चाविकी ॥ भवेदेतस्य सदृशी स्पर्शनेनेति मे मतिः ॥ ३५ ॥
ष चैव मृगः श्रीमान्यश्च दिव्यो नभश्चरः ॥ उभावेतौ मृगौ दिव्यौ तारामृगमहीमृगौ ॥ ३६ ॥
दि वाऽयं तथा यन्मां भवेद्वदसि लक्ष्मण ॥ मायैषा राक्षसस्येति कर्तव्योस्य वधो मया ॥ ३७ ॥
तेन हि नृशंसेन मारीचेनाकृतात्मना ॥ वने विचरता पूर्वं हिंसिता मुनिपुङ्गवाः ॥ ३८ ॥

नसंग्रहप्रसक्तिरित्यत्राह—धातव इति । यस्मादुक्तरूपा विविधा धातवः सन्ति तस्मादित्यर्थः ॥ ३१ ॥ षां धनानां सारं श्रेष्ठभूतं। अखिलं धनं नृणां निचयर्धनं कोशवर्धनं भवेत् । किमिव शुक्रस्य मनसा चिन्तितं संकल्पितंवस्तुजातम् । तथैवाविर्भूयनिचयवर्धनंयथा। तद्वदित्यर्थः । यद्वा नृणां मनसा चिन्तितं वृथामनोरथकल्पितं सर्वं धनं यथा शुक्रस्य कोशं पूरयति तथेत्यर्थः । तदुक्तमुद्योगपर्वणि । "मनुष्येभ्यः समादत्ते शुक्रश्चिन्तार्जितं धनं" इति । यद्वा नृणां राजादिधनिनां । कोशवर्धनं तत् वन्यं धनं । सारं भवति । जानपदधनादपि वन्यं धनं सारं अतिप्रशस्तंभवति । अपूर्वत्वात् । अतोनिवृत्तवनवासैरस्माभिर्वनादपूर्वधनतया पुरीं नेतुमयं ग्रहीतव्य इति भावः ॥ ३२ ॥ अस्त्विदं अथापिविचार्य कार्यमिति चेत्तत्राह—अर्थीति । अर्थी असन्निहितार्थापेक्षी ।"अर्थाच्चासन्निहिते" इति इनिप्रत्ययः। सः येन अर्थकृत्येन अर्थकार्येणहेतुना । अविचारयन् संव्रजति सम्यग्गच्छति यद्वस्तुसौन्दर्यजातोपकारलोभेन पुरुषस्तत्साधनेव्यग्रःप्रवर्तते तमेवार्थं प्राहुः । अर्थशास्त्रज्ञाः नीतिशास्त्रज्ञाः । अर्थ्याः अर्थादनपेताश्च। "अर्थ्योभिज्ञार्थशालिनोः" इत्यजयः । "धर्मपथ्यर्थन्यायादनपेते" इतियत्प्रत्ययः । यस्य गुणप्रीतः पुरुषः अभिनिविशते सएवार्थ इति नीतिशास्त्रज्ञा अर्थवन्तश्चाहुः । अयंच तथाविधइतिभावः ॥ ३३ ॥ एवं प्रयत्नसंपाद्यं वस्त्वयमेव मृग इत्यभिप्रायेणाह—एतस्येति । मृगरत्नस्य मृगश्रेष्ठस्य । परार्ध्ये श्लाघ्ये । काञ्चनत्वचि काञ्चनसदृशत्वचि । पुंलिङ्गत्वमार्षं ॥ ३४ ॥ परार्ध्यत्वं विवृणोति—नेति । कदल्येव कादली मृगविशेषः । तल्लक्षणमुक्तं वैजयन्त्यां "कदली तु बिले शेते मृदुसूक्ष्मोच्चकर्बुरैः । नीलाग्रैर्लोमभिर्युक्ता सा विंशत्यङ्गुलायता ॥ प्रियकी लोमभिर्युक्ता मृदुश्च मसृणैर्घनैः" इति । प्रवेणी आस्तरणविशेषः मृगविशेषो वा । अविरेव अविकः "अवेः कः" इति स्वार्थे कप्रत्ययः । तस्येयमाविकी तल्लोमनिर्मिताशाटीत्यर्थः । स्पर्शनेन मार्दवेन ॥ ३५ ॥ दिव्यः श्लाघ्यः । नभश्चरो मृगः मृगशीर्षः । दिव्यौ शोभमानौ ॥ ३६ ॥ एवं सीतामतमङ्गीकृत्य प्रवृत्तिरुक्ता। अथ लक्ष्मणमतमङ्गीकृत्याह—यदि वेति । मायैषा राक्षसस्येति यन्मां वदसि तथाऽयं यदि वा भवेत् एवमप्यस्य वधो मया कार्यः ॥ ३७ ॥ हनने हेतुत्वेन

ति० तत् वन्यंधनं नृणांसारं अतिप्रशस्तंभवति । शुक्रं ब्रह्म । "सपर्यगाच्छुक्रमकायमव्रणं" इतिश्रुतेः । एवंच शुक्रस्य ब्रह्मलोकंप्राप्तस्य तद्रूपमापन्नस्य मनसाचिन्तितंसर्वं संकल्पमात्रसिद्धंसर्वभोग्यवस्तु यथा सर्वस्मात्सारतरं तद्वत् ॥ स० तत् वन्यंधनं नृणां सारं वरेण्यं । तत्रदृष्टान्तमाचष्टे । मनसाचिन्तितं सर्वं तत्वन्यंशुक्रस्यउशनसःयथासारं तथेत्यर्थः ॥ अन्यरसेनैवकूपंनिर्माय मृतजीवनकर्तृत्वाच्छुक्रस्येतिभावः ॥ ३२ ॥ ति० अर्थीअर्थापेक्षःपुमान् । येनार्थकृत्येन अर्थनिमित्तेनकर्तव्येन कर्मणा । तत्सौन्दर्यादाक्षिप्तहृदयः अविचारयन्नेवसंव्रजति तत्संपादनार्थपारवश्येनव्रजतीत्यर्थः । तमेव अर्थ्याः अर्थसंपादनचतुराः । अर्थशास्त्रज्ञाः अर्थं अर्थपदवाच्यमाहुः ॥ ३३ ॥ ति० अतोऽविचारितैवात्रप्रवृत्तिरित्याह—एतस्येति । अत्रविचारोनकर्तव्यः । एतन्मूलेन महतोर्थस्यसिद्धिरितिगूढतात्पर्यम् ॥ ३४ ॥ ति० कदल्याइयंत्वक्कादली । प्रियकस्येयंत्वक्प्रियकी । प्रवेणी अजविशेषसंबन्धिनी । आविकी अवित्वक् । प्रत्येकंनञुक्तिः सर्वथा सादृश्याभावबोधनाय । अनेन तन्दीयस्त्वचा ॥ शि० एतस्य मृगत्वचः । कादली मृगविशेषत्वक् सदृशीन । एतस्येतिसामान्येनपुंसकं । एतच्छब्देमृगस्यैवपरामर्शे कादल्यादिशब्दैर्मृगीविशेषाणामेवग्रहणेच एतच्छब्दस्यपुँल्लिङ्गत्वमितिदिक् ॥ ३५ ॥ शि० उभावेतौ तारामहीमृगौ दिव्यौ क्रीडायोग्यौ । एतेनतयोर्द्वयोरेवपरस्परमुपमानोपमेयभावस्सूचितः ॥ ३६ ॥

[पा०] १ ख. ग. शुक्रमतंतथा. २ . ख. भवान्वदति. ३. घ. मारीचेनदुरात्मना.

उत्थाय [1]बहवो येन मृगयायां [2]जनाधिपाः ॥ निहताः परमेष्वासास्तस्माद्वध्य[3]स्त्वयं मृगः ॥ ३९ ॥
पुरस्तादिह वातापिः परिभूय तपस्विनः ॥ उदरस्थो द्विजान्हन्ति स्वगर्भोऽश्वतरीमिव ॥ ४० ॥
स कदाचिच्चिरा[4]ल्लोभादाससाद महामुनिम् ॥ अगस्त्यं तेजसा युक्तं [5]भक्षस्तस्य [6]बभूव ह ॥ ४१ ॥
समुत्थाने च तद्रूपं कर्तुकामं समीक्ष्य तम् ॥ उत्स्मयित्वा तु भगवान्वातापिमिदमब्रवीत् ॥ ४२ ॥
त्वयाऽविगण्य वातापे परि[7]भूताः स्वतेजसा ॥ जीवलोके द्विजश्रेष्ठास्तस्मादसि जरां गतः ॥ ४३ ॥
[8]तदेतन्न भवेद्रक्षो वातापिरिव लक्ष्मण ॥ मद्विधं योतिमन्येत धर्मनित्यं जितेन्द्रियम् ॥
भवेद्धतोऽयं वातापिरगस्त्येनेव मां गतः ॥ ४४ ॥
इह त्वं भव सन्नद्धो यन्त्रितो रक्ष मैथिलीम् ॥ अस्यामायत्तमस्माकं यत्कृत्यं रघुनन्दन ॥ ४५ ॥
अहमेनं [9]वधिष्यामि ग्रहीष्याम्य[10]थवापि वा मृगम् ॥ यावद्गच्छामि सौमित्रे मृगमा[11]नयितुं द्रुतम् ॥ ४६ ॥
पश्य लक्ष्मण [12]वैदेहीं मृगत्वचि [13]गतस्पृहाम् ॥ त्वचा प्रधानया ह्येष मृगोद्य नभविष्यति ॥ ४७ ॥
अप्रमत्तेन ते भाव्यमाश्रमस्थेन सीतया ॥ ४८ ॥
यावत्पृषतमेकेन सायकेन निहन्म्यहम् ॥ हत्वैतच्चर्म चादाय शीघ्रमेष्यामि लक्ष्मण ॥ ४९ ॥

तदीयदौरात्म्यमाविष्करोति—एतेन हीति । नृशंसेन घातुकेन । अकृतात्मना दुष्टभावेन ॥ ३८ ॥ उत्थाय प्रादुर्भूय ॥ ३९ ॥ पूर्वोक्तमपि वातापिवृत्तान्तं मारीचस्य मायाव्यापारे दृष्टान्तत्वेनाह—पुरस्तादिति । पुरस्तात् पूर्वस्मिन्काले । इह दण्डकारण्ये । अश्वतरो नाम गर्दभादश्वायामुत्पन्न इति वृत्तिकारः । "गोखरोऽश्वतरोमतः" इति हलायुधः । तत्स्वरूपमुक्तं शालिहोत्रीये "खररूक्षस्वरास्तीक्ष्णाः खरशीलाः खरांघ्रयः" इति । तामश्वतरीं स्वगर्भो यथा हन्ति तथाऽयमपि गर्भस्थो द्विजान् हन्ति । अश्वतरी वृश्चिकेत्यप्याहुः ॥ ४० ॥ भक्षः आहारः ॥ ४१ ॥ समुत्थाने श्राद्धान्ते । तद्रूपं रक्षोरूपं । उत्स्मयित्वा । ईषत्स्मित्वा । ल्यबभाव आर्षः ॥ ४२ ॥ अविगण्य अविचार्य । पापमिति शेषः । जीवलोके भूलोके । जरां जीर्णतां । इति वातापिमब्रवीदिति पूर्वेणान्वयः ॥ ४३ ॥ तदिति रक्षःशब्दाभिप्रायेण नपुंसकत्वं । अतिमन्येत अतिक्रामेत् । मां गत इति अगस्त्यो यथा-अजरूपंवातापिंलोकहितार्थं नाशितवान् तथाऽहमपि मृगरूपमेनंहनिष्यामीत्यर्थः ॥ ४४ ॥ सन्नद्धः धनुःकवचादिसन्नाहयुक्तः । यन्त्रितः व्याक्षेपान्तररहितः । अस्यामिति अस्माकं यत्कृत्यमावश्यकं तत्सर्वमस्यामायत्तं एतद्रक्षणप्रधानमित्यर्थः । एतन्मूलतया रावणवधादिकं कर्तव्यं । इयंहि पूर्वं वेदवतीभावे तथा संकल्पितवतीत्यपि सूचयति ॥ ४५ ॥ यावद्गच्छामि गमिष्यामि । "यावत्पुरानिपातयोः" इति भविष्यदर्थे लट् ॥ ४६ ॥ गतस्पृहां प्राप्तस्पृहां । प्रधानया प्रधानप्रयोजनभूतया । नभविष्यति मरिष्यतीत्यर्थः । अत्र सीताप्रार्थितमेव प्रधानप्रयोजनं अन्यदानुषङ्गिकमित्यर्थः ॥ ४७ ॥ सीतया हेतुभूतया । आश्रमस्थेन ते त्वया । अप्रमत्तेन भाव्यं । आश्रमस्थोऽप्रमत्तः सन्

ति० अश्वतरी गर्दभादश्वायामुत्पन्नेतितीर्थः । अश्वतरी कर्कटीतिपरे । वृश्चिकइतिकतकः । अत्राद्यव्याख्यैवज्यायसी । तस्या गर्भस्योदरपाटनंविना ननिस्सरणमिति सर्वजनप्रसिद्धेः ॥ ४० ॥ **ति०** अस्माकंयत्कृत्यमावश्यकंकर्तव्यं तदस्यां एतद्रक्षणविषये । आयत्तं स्थितं । तन्मुख्यकृत्ये त्वंसावधानस्तिष्ठ । स्वकर्तव्यमाह—**अहमिति** । अत्रपूर्वश्लोकचतुर्थचरणश्लेषेणअयन्त्रितःयन्त्रणयाहीनः अतियत्नरहितः । सीतांरक्ष । यदस्माकंकृत्यं अवतारग्रहणप्रयोजनं । तदस्यामायत्तं अनयैवसाधनीयमित्यपिसूचितं ॥ ४५ ॥ **ति०** यावद्गच्छामि आनयितुं आनेतुं । तत्रहेतुः **पश्येति** ॥ **शि०** वैदेहींपश्य रक्षेत्यर्थः ॥ ४७ ॥ **ति०** सीतया सहेतिशेषः ॥ ४८ ॥ **शि०** हत्वा मृगंनिहत्य । चर्म तद्विषयकस्पृहां । आदाय छित्वा निवर्त्येत्यर्थः । अवखण्डनार्थकदोरूपं ॥ ४९ ॥ इतित्रिचत्वारिंशस्सर्गः ॥ ४३ ॥

[पा०] १ ख. ग. ङ. ञ. बहवोऽनेन. २ क. च. छ. ञ. नराधिपाः. ३ घ. स्त्वयामृगः. ४ क. ङ. झ. ट. ल्लोकेआससाद. ५ घ. तस्यभक्ष्यो. ६ क. ग. च. ज. ञ. बभूवसः. ७ क. घ. ङ. च. ज.–ट. भूताश्वतेजसा. ग. भूताश्वदेवताः. ८ क. ख. घ. छ. एवंतन्नभवेद्रक्षो. ङ. झ. ट. तद्रक्षोनभवेदेव. च. ज. ञ. एवंतुनभवेद्रक्षो. ९ ग. हनिष्यामि. १० ङ. झ. ट. म्यथवा. ११ ख. मानेतुमुद्धतं. १२ वैदेह्याः. १३ झ. गतां.

प्रदक्षिणेनातिबलेन पक्षिणा जटायुषा बुद्धिमता च लक्ष्मण ॥
भवाप्रमत्तः [1]परिगृह्य मैथिलीं प्रतिक्षणं सर्वत एव शङ्कितः ॥ ५० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

रामेणमृगग्रहणायधनुष्पाणिनासतातदनुधावनम् ॥ १ ॥ तथामृगेणमाययागतिवैचित्र्येणात्मप्रलोभनेकोपाच्छरेणतन्मारणम् ॥ २ ॥ म्रियमाणेनमारीचेनमृगशरीरपरित्यागपूर्वकंनिजशरीरपरिग्रहेणरामकण्ठस्वरानुकरणेनहासीतेलक्ष्मणेत्युच्चैराक्रोशनम् ॥३॥ रामेणमारीचाक्रोशनश्रवणेनसीतालक्ष्मणयोर्दुरवस्थासंभावनयासविषादंस्वाश्रमंप्रत्यभिनिवर्तनम् ॥ ४ ॥

तथा तु तं समादिश्य भ्रातरं रघुनन्दनः ॥ [2]बबन्धासिं महातेजा जाम्बूनदमयत्सरुम् ॥ १ ॥
[3]ततस्त्र्यवनतं चापमादायात्मविभूषणम् ॥ आबध्य च कलापौ द्वौ [4]जगामोदग्रविक्रमः ॥ २ ॥
तं वञ्चयानो राजेन्द्र[5]मापतन्तं निरीक्ष्य वै ॥ बभूवान्तर्हितस्त्रासात्पुनः [6]संदर्शनेऽभवत् ॥
बद्धासिर्धनुरादाय प्रदुद्राव यतो मृगः ॥ ३ ॥
[7]तं स पश्यति रूपेण [8]द्योतमानमिवाग्रतः ॥ अवेक्ष्यावेक्ष्य धावन्तं [9]धनुष्पाणिं महावने ॥ ४ ॥
अतिवृत्तमिषोः पाताल्लोभयानं [10]कदाचन ॥ शङ्कितं तु समुद्भ्रान्तमुत्पतन्तमिवाम्बरे ॥ ५ ॥
दृश्यमानमदृश्यं च वनोद्देशेषु [11]केषुचित् ॥ छिन्नाभ्रैरिव संवीतं शारदं चन्द्रमण्डलम् ॥ ६ ॥

सीतारक्षणं कुर्वित्यर्थः । पृषतं मृगं ॥ ४८—४९ ॥ प्रदक्षिणेन अत्यन्तसमर्थेन । जटायुषेति सहार्थे तृतीया । "वृद्धो यूना—" इति ज्ञापकात् । मैथिलीं परिगृह्य स्ववशीकृत्य । सर्वतः शङ्कित एव प्रतिक्षणमतिशङ्कयैवाप्रमत्तो भवेत्यन्वयः। अत्र पञ्चाशच्छ्लोकाः ॥ ५० ॥ इतिश्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रिचत्वारिंशःसर्गः ॥ ४३ ॥

अजानन्निव यो मायामृगं कार्यान्तरैकदृक् । अनुसृत्य जघानाशु तं लीलामानुषं भजे ॥ अथ मारीचवधः—तथात्वित्यादिना । त्सरुः खड्गमुष्टिः । "त्सरुः खड्गादिमुष्टिः स्यात्" इत्यमरः ॥ १ ॥ त्र्यवनतं त्रिपु स्थलेष्ववनतं शार्ङ्गमित्यर्थः । आत्मविभूषणं आत्मालंकारं । कलापौ द्वौ द्वौ तूणीरौ । "कलापो भूषणे बर्हे तूणीरे संहतेपि च" इत्यमरः ॥ २ ॥ वञ्चयानः वञ्चयमानः । अनित्यो मुमागमः । संदर्शने दृष्टिविषये । अभवत् स्थितः । यतः यस्मिन्प्रदेशे । मृगो वर्तते तत्र प्रदुद्राव ॥ ३ ॥ तमित्यादिश्लोकत्रयमेकं वाक्यं । रूपेण कान्त्या । अग्रे द्योतमानमिव स्थितं इषोः पातात् अतिवृत्तं अतिक्रान्तं । शङ्कितमिवेत्यन्वयः । धनुष्पाणिं दृष्ट्वा शङ्कितमिवेत्यनेन धनुष्पाणिदर्शनादन्यमृगाणामिवास्य शोको न भवतीतीवशब्दः प्रयुज्यते । यद्वा रामाद्भयं शङ्कमानं सन्तं उत्पतन्तमिव स्थितं। वस्तुतस्तत्राप्यदर्शनादिति भावः। लोभयानं हस्तप्राप्तमिवदृश्यमानमित्यर्थः । दृश्यमानमिति केषुचिद्दृश्यमानं केषुचिददृश्यं । अतएव छिन्नाभ्रैः संवीतं व्याप्तं चन्द्रमण्डलमिव स्थितं । शारदमिति

ति० मध्येस्थलत्रये विनतं त्रिविनतं । आत्मविभूषणं चापस्यवीरालङ्कारत्वात् । आत्मविभूषणमित्यनेनागस्त्यदत्तं वैष्णवमितिसूचितं ॥ २ ॥ ति० वन्यराजः वन्यानां मृगाणांराजा । विचित्रमृगत्वात् ॥ स० संदृश्यतइति संदर्शनः । कर्मणि ल्युट् । चक्षुर्विषयोऽभूत् । शि० वन्यराजः वन्येषुमृगेषुराजतेशोभते समारीचः । त्रासात् रामभयात् । अन्तर्हितोबभूव । पुनः त्रासात् रावणभयात् । संदर्शनेऽभवत् ॥ ३ ॥

[पा०] १ क. ख. घ. ङ. झ. ट. प्रतिगृह्य. २ ङ. झ. ट. दधारासिं. ३ क. ङ—ट. ततस्त्रिविनतं. ४ क. ग. जगामलघुविक्रमः. ५ क. ख. च. छ. ज. मात्रजन्तं. ६ ठ. संदर्शनो. ७ ख. तंपश्यतिस्म. ८ च. ज.—ट. द्योतयन्तमिव. ९ ख. ग. ङ. झ. ट. धनुष्पाणिर्महा. १० घ. कथंचन. ११ च. ज. ञ. कुत्रचित्.

मुहूर्तादेव ददृशे मुहुर्दूरात्प्रकाशते ॥ ७ ॥
[1]दर्शनादर्शनादेवं सोपाकर्षत राघवम् ॥ सुदूरमाश्रमस्यास्य मारीचो मृगतां गतः ॥ ८ ॥
आसीत्क्रुद्धस्तु काकुत्स्थो विवशस्तेन मोहितः ॥ अथावतस्थे [2]संभ्रान्तश्छायामाश्रित्य शाद्वले ॥९॥
स तमुन्मादयामास मृगरूपो निशाचरः ॥ मृगैः [3]परिवृतो वन्यैरदूरात्प्रत्यदृश्यत ॥ १० ॥
ग्रहीतुकामं [4]दृष्ट्वैनं पुनरेवाभ्यधावत ॥ तत्क्षणादेव संत्रासात्पुनरन्तर्हितोऽभवत् ॥ ११ ॥
पुनरेव ततो दूराद्वृक्ष[5]षण्डाद्विनिःसृतम् ॥ दृष्ट्वा रामो महातेजास्तं हन्तुं कृतनिश्चयः ॥
भूयस्तु शरमुद्धृत्य कुपितस्तत्र राघवः ॥ १२ ॥
सूर्यरश्मिप्रतीकाशं ज्वलन्तमरि[6]मर्दनः ॥ सन्धाय सुदृढे चापे विकृष्य बलवद्बली ॥ १३ ॥
तमेव मृगमुद्दिश्य [7]श्वसन्तमिव पन्नगम् ॥ मुमोच ज्वलितं दीप्तमस्त्रं ब्रह्मविनिर्मितम् ॥ १४ ॥
[8]शरीरं मृगरूपस्य विनिर्भिद्य शरोत्तमः ॥ मारीचस्यैव हृदयं बिभेदाशनिसन्निभः ॥ १५ ॥
तालमात्रमथोत्प्लुत्य न्यपतत्स शरातुरः ॥ विनदन्भैरवं नादं धरण्यामल्पजीवितः ॥ १६ ॥
म्रियमाणस्तु मारीचो जहौ तां कृत्रिमां तनुम् ॥ स्मृत्वा [9]तद्वचनं रक्षो दध्यौ केन तु लक्ष्मणम् ॥
इह प्रस्थापयेत्सीता [10]शून्ये तां रावणो हरेत् ॥ १७ ॥
स प्राप्तकालमाज्ञाय चकार च ततः स्वरम् ॥ सदृशं राघवस्यैव हा सीते लक्ष्मणेति च ॥ १८ ॥
तेन मर्मणि निर्विद्धः शरेणा[11]नुपमेन च ॥ मृगरूपं तु तत्त्यक्त्वा राक्षसं रूप[12]मात्मनः ॥
चक्रे स [13]सुमहाकायो मारीचो जीवितं त्यजन् ॥ १९ ॥
ततो विचित्रकेयूरः सर्वाभरणभूषितः ॥ हेममाली महादंष्ट्रो राक्षसोऽभूच्छराहतः ॥ २० ॥

मेघशकलसंभावनार्थमुक्तं ॥ ४—६ ॥ समीपे मुहूर्तात् मुहूर्तं । ददृशे । दूरात् दूरं । मुहुः प्रकाशते ॥ ७ ॥ अतः एवं उक्तरीत्या । दर्शनादर्शनात् दर्शनादर्शनाभ्यां । सुदूरमपाकर्षत आकृष्टवान् ॥ ८ ॥ विवशः कुतूहलपरवशः । मोहितः वञ्चितः ॥ ९ ॥ उन्मादयामासेति उन्मादश्चित्तविभ्रमः । बहुदूराकर्षणेन चित्तमोहं चकारेत्यर्थः ॥ १०—११ ॥ भूयः अत्यर्थं । कुपितोभूत् ॥ १२ ॥ सूर्येत्यादिश्लोकद्वयमेकं वाक्यं ॥ १३—१४ ॥ प्रथमं मृगरूपस्यशरीरंविनिर्भिद्य ततः मारीचस्य हृदयं तदन्तर्वर्तिस्वशरीरं । बिभेद ॥ १५ ॥ तालमात्रं तालप्रमाणं । "प्रमाणे द्वयसच्—" इत्यादिना प्रमाणे मात्रच् ॥ १६ ॥ सीता केनोपायेन लक्ष्मणमिह प्रस्थापयेत् केनोपायेन रावणस्तां हरेदिति दध्यौ चिन्तयामास ॥ १७ ॥ प्राप्तकालं कालप्राप्तं कालोचितमर्थं । आज्ञाय निश्चित्य

स० दर्शनादर्शनेन । " सर्वोद्वन्द्वः " इत्येकवद्भाव इतिकेचित् । वस्तुतस्तु । " विप्रतिषिद्धं च—" इत्येकवद्भावः ॥ ८ ॥ **शि०** अविवशः क्रोधादिवशभिन्नः । तेनमोहितः ते नमइशब्दोच्चारणमात्रेणैव हितकारी । काकुत्स्थोरामः क्रुद्धः क्रुद्धत्वेनप्रतीयमानआसीत् ॥ ९ ॥ **ति०** मृगरूपसदृशरूपस्यमायाकृतरूपेयक्षवत्प्रविश्यस्थितस्यमारीचस्यैवहृदयं नतुतत्कृतमायामृगाकारमात्रस्य ॥ **स०** मृगरूपस्यसदृशं विनिर्भिद्य अन्तर्विद्यमानमारीचशरीरं बिभेद ॥ **ती०** सदृशमिति । रूपमितिशेषः । मारीचस्यतदानींरूपमन्यदीयं । हृदयंतुस्वीयमेव । तथाचायमर्थः । मृगरूपस्यसदृशंरूपं तस्यास्वकीयं रूपंभित्वा पश्चात्स्वकीयंहृदयंबिभेदेतिभावः ॥ १५ ॥ **ती०** स्मृत्वेति । तांमतिं रावणोक्तसीतालक्ष्मणाह्वानोपायंस्मृत्वा । केन मत्कृतोपायेनेतिशेषः । सीता लक्ष्मणंप्रेषयेत् । तांसीतांशून्ये रावणोहरेदितिदध्याविति योजना ॥ **टीका०** तांमतिं विश्वामित्रयागेरामकृतवैरबुद्धिं स्मृत्वावा ॥ १७ ॥

[**पा०**] १ क. ख. ग. ङ—ट. दर्शनादर्शनेनैव. २ क. ख. ग. ङ—ट. सुश्रान्तः. ३ ङ. झ. ट. वृतोथान्यैः. ४ ङ. झ. ट. दृष्ट्वातं. ख. घ. च. छ. ज. ञ. दृष्ट्वैव. क. ग. दृष्ट्वाच. ५ क. छ. ङ. ट. खण्डात्. ६ ख. ङ. च. ज—ट. मरिमर्दनं. ७ क. ख. ग. ङ—ट. ज्वलन्तमिव. ८ झ. ञ. ठ. सदृशं. ९ च. तांतुमतिं. १० ग. ङ—ट. तांशून्ये. ११ ख—ङ. छ. झ. ट. णानुपमेनहि. १२ क. ख. ङ. झ. ञ. ट. मास्थितः. १३ झ. ट. सुमहाकायं.

तं दृष्ट्वा पतितं भूमौ राक्षसं घोरदर्शनम् ॥ रामो रुधिरसिक्ताङ्गं वेष्टमानं महीतले ॥
जगाम मनसा सीतां लक्ष्मणस्य वचः स्मरन् ॥ २१ ॥
मारीचस्यैव मायैषा पूर्वोक्तं लक्ष्मणेन तु ॥ तत्तथा ह्यभवच्चाद्य मारीचोयं मया हतः ॥ २२ ॥
हा सीते लक्ष्मणेत्येवमाक्रुश्य च महास्वनम् ॥ ममार राक्षसः सोयं श्रुत्वा सीता कथं भवेत् ॥२३॥
लक्ष्मणश्च महाबाहुः कामवस्थां गमिष्यति ॥ इति संचिन्त्य धर्मात्मा रामो हृष्टतनूरुहः ॥ २४ ॥
तत्र रामं भयं तीव्रमाविवेश विषादजम् ॥ राक्षसं मृगरूपं तं हत्वा श्रुत्वा च तत्स्वरम् ॥ २५ ॥
निहत्य पृषतं चान्यं मांसमादाय राघवः ॥ त्वरमाणो जनस्थानं ससाराभिमुखस्तदा ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

हासीतेलक्ष्मणेतिमारीचाक्रोशश्राविण्यासीतयासादृश्यात्तस्मिन्रामकण्ठस्वरत्वज्ञानेनतस्य विपत्संभावनयातद्रक्षणाय लक्ष्मणंप्रतितदनुधावनचोदना ॥१॥ लक्ष्मणेनसीतांप्रतिराममहिमानुवर्णनेनतस्यविपदभावप्रतिपादनम् ॥ २ ॥ सीतया तंप्रत्यश्राव्यानुचितपरुषभाषणेतदसहिष्णुतयालक्ष्मणेनराममार्गानुधावनम् ॥ ३ ॥

आर्तस्वरं तु तं भर्तुर्विज्ञाय सदृशं वने ॥ उवाच लक्ष्मणं सीता गच्छ जानीहि राघवम् ॥ १ ॥
न हि मे हृदयं स्थाने जीवितं वाऽवतिष्ठति ॥ क्रोशतः परमार्तस्य श्रुतः शब्दो मया भृशम् ॥२॥
आक्रन्दमानं तु वने भ्रातरं त्रातुमर्हसि ॥ तं क्षिप्रमभिधाव त्वं भ्रातरं शरणैषिणम् ॥
रक्षसां वशमापन्नं सिंहानामिव गोवृषम् ॥ ३ ॥

॥ १८—२१ ॥ मायैषेत्यत्र इतिकरणं बोध्यं ॥ २२—२३ ॥ हृष्टतनूरुहः भयात्पुलकितः । अभूदितिशेषः ॥ २४ ॥ विषादजं विषादोत्थं । विषादो भविष्यतीत्युत्पन्नं । हत्वा मरणानुकूलव्यापारं कृत्वा । ततस्तदुक्तं स्वरं श्रुत्वा ॥ २५ ॥ त्वरमाणो रामः जनस्थानं जनस्थानस्थस्वाश्रममुद्दिश्याभिमुखः सन् ससार ययौ । अत्र सार्धसप्तविंशतिश्लोकाः ॥२६॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

अस्थाने भयशङ्किन्या जानक्यापि सुहृज्जनम् । धिक्कृत्य चिन्तितं रामं नित्यापूर्वमहं भजे ॥ भर्तुः भर्तुः स्वरस्य ॥ १ ॥ हृदयं मनः । जीवितं प्राणः । वाशब्दः समुच्चये । स्थाने स्वस्थाने । मोहो जायत इति भावः । शरणैषिणं रक्षकार्थिनं । गोवृषमिति

स० कथंभवेत् किंप्रकाराभवेत् । **ति०** कथंभवेत् किं लक्ष्मणंप्रेषयेत् उतधीराभवेदित्यर्थः ॥ २३ ॥ **ति०** कामवस्थां अधैर्यादितिशेषः ॥ हृष्टतनूरुहः त्रासादिवरोमाञ्चिततनुः । वस्तुतएतन्मूलेन सर्वकार्यनिष्पत्तिरितिहर्षाद्रोमाञ्चिततनुः ॥ २४ ॥ **ति०** तत्रनटवद्भगवान्मनुष्यरूपत्वाद्भयशोकादिमत्त्वंनाटयतीतिकविरपि सर्वलोकवेद्यंतथैवाह—**तत्रशमंभयमिति** । तात्विकमर्थंतु हृष्टतनूरुहइतिहृष्टपदेन प्रागेवध्वनितवान् ॥ २५ ॥ इति चतुश्चत्वारिंशस्सर्गः ॥ ४४ ॥

ति० भर्तुस्स्वरेणसदृशंस्वरं भर्तुस्स्वरइत्येवज्ञात्वेत्यर्थः ॥ १ ॥ **स०** स्थाने एकस्मिन् । क्रोशतउपरीतिवा ॥ २ ॥ **शि०** शरणैषिणं स्वरक्षाकामं । सिंहानांगोवृषमिव रक्षसांवशमापन्नं अतएव आक्रन्दमानं तंजनं भ्रातरंच क्षिप्रंलं त्रातुमर्हसि । अतः भ्रातरमभिधाव । भ्रातरमभिधावेत्युक्त्या तदनुमत्यैवाक्रन्दमानजनस्यरक्षा कर्तव्येतिसूचितं । रक्षसांवशमापन्नमित्यनेन रावणप्रेरणयैव मारीचोत्रागतइतिसूचितं । तेन तस्यात्रागमने स्वातन्त्र्याभावोव्यञ्जितः । रामंत्रातुमर्हसीत्युक्त्या दूरगमनेन तद्विषय-

[पा०] १ ङ. झ. ट. भीमदर्शनं. २ ङ—ट. चेष्टमानं. ३ क—ट. मारीचस्यतु. ४ क. ग—ट. पूर्वोक्ता. ५ क. ख. ग. ङ—ट. माक्रुश्यतु. ६ ग. ममस्वरं. ७ घ. ङ. झ. ट. मुखंतदा. ८ च. छ. ज. ञ. वचः. ९ ङ. झ. ट. जीवितंस्थानेहृदयं. १० ङ. झ. ट. तिष्ठते. ११ क. ख. ज्ञातुमर्हसि.

न जगाम तथोक्तस्तु भ्रातुराज्ञाय शासनम् ॥ तमुवाच ततस्तत्र [१]कुपिता जनकात्मजा ॥ ४ ॥
सौमित्रे मित्ररूपेण भ्रातुस्त्वमसि शत्रुवत् ॥ [२]यस्त्वमस्यामवस्थायां भ्रातरं नाभिपत्स्यसे ॥ ५ ॥
इच्छसि त्वं विनश्यन्तं [४]रामं [५]लक्ष्मण मत्कृते ॥ [३]लोभान्मम कृते नूनं नानुगच्छसि राघवम् ॥ ६ ॥
व्यसनं ते प्रियं मन्ये स्नेहो भ्रातरि नास्ति ते ॥ तेन तिष्ठसि [६]विस्रब्धस्तमपश्यन्महाद्युतिम् ॥ ७ ॥
किं हि संशयमापन्ने तस्मिन्निह मया भवेत् ॥ कर्तव्यमिह तिष्ठन्त्या यत्प्रधानस्त्वमागतः ॥ ८ ॥
[७]इति ब्रुवाणां [८]वैदेहीं बाष्पशोकपरिप्लुताम् ॥ अब्रवील्लक्ष्मणस्त्रस्तां सीतां मृगवधूमिव ॥ ९ ॥
पन्नगासुरगन्धर्व[९]देवमानुषराक्षसैः ॥ अशक्यस्तव वैदेहि भर्ता जेतुं न संशयः ॥ १० ॥
देवि देवमनुष्येषु गन्धर्वेषु पतत्रिषु ॥ राक्षसेषु पिशाचेषु किंनरेषु मृगेषु च ॥ ११ ॥
दानवेषु च घोरेषु न स विद्येत शोभने ॥ यो रामं प्रतियुध्येत समरे वासवोपमम् ॥ १२ ॥
अवध्यः समरे रामो नैवं त्वं वक्तुमर्हसि ॥ न त्वामस्मिन्वने हातुमुत्सहे राघवं विना ॥ १३ ॥
अनिवार्यं बलं तस्य बलैर्बलवतामपि ॥ त्रिभिर्लोकैः समुद्युक्तैः [१०]सेश्वरैरपि सामरैः ॥ १४ ॥
हृदयं निर्वृतं तेऽस्तु संतापस्[११]त्यज्यतामयम् ॥ आगमिष्यति ते भर्ता शीघ्रं हत्वा मृगोत्तमम् ॥१५॥
[१२]न च तस्य स्वरो व्यक्तं मायया केनचित्कृतः ॥ गन्धर्वनगरप्रख्या माया सा तस्य रक्षसः ॥१६॥

सामान्यविशेषयोःप्रयोगः करिकलभवत् । इति सीता लक्ष्मणमुवाचेतिसंबन्धः ॥ २—३ ॥ शासनं अप्रमत्तेन ते भाव्यमित्याद्युक्तं ॥ ४ ॥ मित्ररूपेणोपलक्षितः रूपेण मित्रसदृशः क्रियया शत्रुतुल्योसीत्यर्थः। शात्रवक्रियां दर्शयति—यस्त्वमिति ॥ ५ ॥ इच्छायां हेतुमाह—मत्कृत इति । मत्परिग्रहार्थमित्यर्थः । दार्ढ्याय पुनराह—लोभादिति । लोभो मल्लाभेच्छा ॥ ६—७ ॥ त्वद्रक्षणं विहाय कथं गमिष्यामीत्याह—किं हीति । यो रामः प्रधानं यस्य सः यत्प्रधानः त्वमिहागतः तस्मिन् रामे । संशयं प्राणसंशयमापन्ने सति । इहाश्रमपदे तिष्ठन्त्या मया किं कार्यं न किमपीत्यर्थः ॥ ८—१२ ॥ एवं उक्तप्रकारं परुषभाषणं । राघवं विना स्थितां त्वामित्यन्वयः ॥ १३ ॥ समुद्युक्तैः सन्नाहवद्भिः । सेश्वरैः सेन्द्रैः ॥ १४ ॥ निर्वृतं निर्दुःखं ॥ १५ ॥ तस्य रामस्य । नायं स्वरः अपितु केनचिदन्येन मायया विचित्रशक्त्या कृतः ।

स्संशयउत्पन्नइतिव्यञ्जितं । तेन तत्रस्नेहातिशयोध्वनितः । सार्धश्लोकएकान्वयी ॥ ३ ॥ **शि०** तमुवाचेत्यर्धंपृथक् । सौमित्रइत्याद्यर्धद्वयमेकान्वयि । यद्वा इदमप्यर्धंपृथक् । तथाहि भ्रातुर्मित्ररूपेणहेतुना त्वमपिशत्रुवत् रामशत्रुत्वापन्नराक्षसशत्रुतुल्योसि । शत्रुमित्रेपि शत्रुत्वबुद्धेर्लोकेप्रसिद्धत्वादितितात्पर्यं । एतेन यदि रामसमीपेत्वंनगमिष्यसि तर्हि एकाकिनंत्वामवलोक्य तच्छत्रव इहाप्यापतिष्यन्तीतिव्यञ्जितं । तेनैकत्रैव द्वाभ्यांस्थातव्यमितिध्वनितं ॥ ४ ॥ **शि०** यदिति । यत् यस्माद्धेतोः । विनशी रिपुसूदनः । त्वं अस्यां सहायरहितायांअवस्थायां भ्रातरंरामंनाभिपत्स्यसे तस्माद्धेतोः हेलक्ष्मण मत्कृते मद्रक्षार्थं । अन्तं स्वविनाशं । इच्छसि इत्यनुमीयतइतिशेषः । एतेनास्मिन्समये रामसमीपगमनमन्तरा ते महत्यपकीर्तिर्भवितेतिव्यञ्जितं ॥ मत्कृते मद्रक्षार्थंयो लोभः मयिगते इमांकोरक्षिष्यतीतिवैचित्यं तस्माद्धेतोः राघवंनानुगच्छसिचेत्तर्हि अप्रियंव्यसनं अपवादरूपदुःखं । भ्रातरि ते स्नेहोनास्तीतिचाहंमन्ये । **स०** लोभात् गार्ध्यात् । मत्कृते अहंकृताशिक्षितायेन समत्कृतः तस्मिन्भ्रातरीत्यन्वयः । व्यसनं रामदुःखं ॥ ५—७ ॥ **ति०** तस्मिन् रामे संशयमापन्नेसति मयातिष्ठन्त्या त्वद्रक्षणेनजीवन्त्या । किंकर्तव्यं भवेत् । तदभावे मरणमेवश्रेयः । अत्रायंध्वनिः—राक्षससंहाररूपप्रधानकार्यकरणायागतस्यतव त्वद्भ्रातुर्वा तस्मिन्कार्ये इहमदवस्थित्यासंशयमापन्ने इहजीवन्त्यामयाकिंकार्यंभवेत् । सर्वत्रोत्पत्तिस्थितिसंहारेषु तवभ्रातुरहमेवसहकारिणी । प्रकृतश्चसंहारोत्र मत्स्थित्या न निर्वर्ततइति ॥ **स०** संशयं सम्यग्राक्षसहस्तमापन्ने इतिवा । हिसंशयं गतसंशयंयथाभवतितथा तस्मिन् रामे आपत् न । यतोऽहं ई साक्षाल्लक्ष्मीः ततो मया आपत् प्राप्तेतिशेषः । नभवेत् इतिमानसिकोभावोपिज्ञेयः ॥ ८ ॥ **ति०** एवंबोधिततत्वोपि मानुष्यनाटनेनलोकव्यवहारानुसाराल्लक्ष्मणोऽवददित्याह—**अब्रवीदिति** ॥ ९ ॥ **ति०** तव त्वया ॥ १५ ॥ **ति०** दैवतः

[पा०] १ ङ. झ. ट. क्षुभिता. २ ट. यत्त्वं. ३ ङ. झ. ट. लोभात्तुमत्कृते. ४ ख. रामं. ५ ख. लक्ष्मण. ६ ङ. झ. ट. विस्रब्धंतं. ७ ङ. झ. ट. एवं. ८ ङ. झ. ट. समन्वितां. ९ च. देवमानव. ङ. ङ. झ. ट. देवदानव. १० च—ट. सेश्वरैस्सामरैरपि. ११ छ. झ. ञ. ट. त्यज्यतांतव. १२ ग—ट. नस. झ. नकश्चिदपिदैवतः.

न्यासभूतासि वैदेहि न्यस्ता मयि महात्मना ॥ रामेण त्वं वरारोहे न त्वां त्यक्तुमिहोत्सहे ॥१७॥
कृतवैराश्च [1]वैदेहि वयमेतैर्निशाचरैः ॥ खरस्य [2]निधनादेव जनस्थानवधं प्रति ॥ १८ ॥
राक्षसा विविधा वाचो [3]विसृजन्ति महावने ॥ हिंसाविहारा वैदेहि न चिन्तयितुमर्हसि ॥ १९ ॥
लक्ष्मणेनैवमु[4]क्ता सा क्रुद्धा संरक्तलोचना ॥ अब्रवीत्परुषं वाक्यं लक्ष्मणं सत्यवादिनम् ॥ २० ॥
[5]अनार्याकरुणारम्भ नृशंस कुलपांसन ॥ अहं तव प्रियं मन्ये रामस्य व्यसनं महत् ॥ २१ ॥
रामस्य व्यसनं दृष्ट्वा तेनैतानि प्रभाषसे ॥ २२ ॥
नैत[6]च्चित्रं सपत्नेषु पापं लक्ष्मण यद्भवेत् ॥ त्वद्विधेषु नृशंसेषु नित्यं प्रच्छन्नचारिषु ॥ २३ ॥
सुदुष्टस्त्वं वने राममेकमेकोऽनुगच्छसि ॥ मम हेतोः प्रतिच्छन्नः प्रयुक्तो भरतेन वा ॥ २४ ॥
तन्न सिध्यति सौमित्रे [7]तव वा भरतस्य वा ॥ कथमिन्दीवरश्यामं [8]पद्मपत्रनिभेक्षणम् ॥
उपसंश्रित्य भर्तारं [9]कामयेयं पृथग्जनम् ॥ २५ ॥

वस्तुतस्तु मारीचस्यैवेयं मायेत्याह—गन्धर्वेति । तस्य रक्षसः मृगीभूतस्य रक्षसः । सा स्वरः । मायापेक्षया स्त्रीत्वं । गन्धर्वनगरप्रख्या गन्धर्वनगरतुल्या माया । यद्वा सा मृगरूपं । गन्धर्वनगरं नाम मेघादावारोपितं प्रासादवनादिकं । तत्कदाचिद्दृश्यते तद्यथा व्यामोहजनकं तथा चित्रवस्तुरूपा परव्यामोहजनिका काचिच्छक्तिर्माया सा तस्य रक्षसः मारीचस्यास्ति । यया मुह्यसीत्यर्थः । "गन्धर्वनगरं प्रोक्तमिन्द्रजालं मनीषिभिः" इत्यप्याहुः ॥ १६ ॥ न्यासभूतासि निक्षेपरूपासि । केन निक्षिप्तेत्यत आह—रामेणमयि न्यस्येति ॥१७॥ खरस्य स्वामिनो निधनात् जनस्थाने वधो यः तं प्रति वयमेतैर्निशाचरैः कृतवैराः एते अस्मासु वैरमाचरितवन्त इत्यर्थः ॥ १८ ॥ किं तत इत्यत्राह—राक्षसा इति । वाचो विसृजन्ति अस्मन्मोहनार्थमिति शेषः ॥ १९—२० ॥ अनार्य दुःशील । अकरुणारम्भ दयाप्रसक्तिरहित । तत्र युक्तिमाह—रामस्येति । तेन अनार्यत्वादिकारणेन । रामस्य व्यसनं दृष्ट्वा एतानि पूर्वोक्तवचनानि प्रभाषसे ॥२१—२२॥ प्रच्छन्नचारिषु त्वद्विधेषु सपत्नेषु पापं भवेदिति यत् एतन्न चित्रं । नृशंसत्वादिकमत्र हेतुत्वेनोपात्तं ॥ २३ ॥ प्रयुक्तः प्रेषितः ॥ २४ ॥ पृथग्जनं

अशरीरदेवतासंबन्धीकश्चित्स्वरइत्यपिनेत्यर्थः ॥ १६ ॥ **ति०** खरस्यनिधने रामेणकृतेसति जनस्थानवधं जनस्थानवर्तिखपरिकरक्षोवधंप्रतिलक्ष्य कृतवैराइत्यन्वयः ॥ १८ ॥ व्याहरन्ति अस्मद्व्यामोहनार्थं । अतस्त्वांत्यक्तुंनोत्सहे ॥ १९ ॥ **ति०** अनार्यकरुणारम्भ अनार्ययाकुत्सितयाकरुणया रामव्यसनेपिमद्विषयारम्भोमद्रक्षणारम्भोयस्य तत्संबोधनं ॥ **शि०** अनार्यकरुणारम्भ अनार्येषुक्षुद्रराक्षसेषु करुणायाआरम्भोयस्यतत्सदृशः तत्संबोधनं । अतएव नृशंसकुलपां राक्षससमूहपालकानां सनो रचयितेव तत्संबोधनं सन । रामस्यमहद्व्यसनंतवप्रियं त्वत्प्रीतिविषयीभूतंमन्ये । तेनहेतुना रामस्यव्यसनं सहायाभावप्रयुक्तदुःखाभासंदृष्ट्वा ज्ञात्वा । एतानि गमनाभावबोधकवचनानि प्रभाषसे । आचारक्किपासदृशलाभः ॥ **वि०** अकार्यकरणारम्भ अशोभनकृत्यकरणोद्युक्त ॥ **स०** आर्ये करुणारम्भोयस्य सनभवतीत्यनार्यकरुणारम्भः ॥ २१ ॥ **ति०** तेन रामव्यसनप्रियत्वेन । अत्ररामव्यसनं रामस्य प्रतिज्ञातार्थस्यसर्वरक्षोवधरूपस्यहानिस्तत्प्रियत्वेनेति गूढंतात्पर्यं । अतएषा मद्विषयाकरुणा अनार्या कुत्सिता । प्रधानकार्यविरोधित्वादितिबोध्यं ॥ २२ ॥ **शि०** त्वद्विधेषु अस्मद्वारणाभिन्नविविधधारणावत्सु । अतएव नृशंसेषु क्रूरेषु । अतएव नित्यंप्रच्छन्नचारिषु दुर्ज्ञेयाचरणविशिष्टेषुसपत्नेषु यत्पापं पापकर्मभवेत् । तत् नैवचित्रं । एतेन राक्षसानांविश्वासो न कार्यइतिध्वनितं ॥ २३ ॥ **शि०** शोभनाः दुष्टाः यस्मात्सः दुष्टध्वंसकइत्यर्थः । अतएव एकंरामं एकएवानुगच्छसि । अतएव हेतोः रामगमनकारणीभूतस्यमृगस्य भरतेन शोभानिरीक्षणरतिमता प्रयुक्तः अत्रसंस्थापितस्त्वं यदिप्रतिच्छन्नः राक्षसभियानिलीनः । नगच्छसीत्यर्थः ॥ तर्हि हेसौमित्रे ममतवच भरतस्य मृगशोभानिरीक्षणरतस्यरामस्यच तत् इहागमनप्रयोजनंनसिध्यति । रामस्यप्रयोजनं मुनिरिपुध्वंसः । आवयोःप्रयोजनं तत्सेवा । तयोस्सिद्धिर्नस्यादित्यर्थः । एतेन रागादर्शनासहिष्णुत्वंसीतायाव्यञ्जितं ॥ एको वा यद्यर्थे अपरोहेतौ । सार्धश्लोकएकान्वयी ॥ २४ ॥ **शि०** ननु रक्षकरहितांत्वांविहाय गन्तुमशक्यतया मत्कर्तृकगमनस्यावश्य-

[पा०] १ क. च—ट. कल्याणि. २ झ. निधनेदेवि. ३ झ. व्याहरन्ति. ङ—ट. ४ मुक्तातु. ५ च. छ. ज. ञ. अकार्यकरणारम्भ. ख. अनार्यकृपणारम्भ. ६ झ. ट. नैवचित्रं. ७ ख. च. छ. ज. ट. तवापि. ८ क. झ. रामंपद्मनिभेक्षणं. ९ च. छ. ज. ञ. कामयेन्यं. क. ग. कामयेप्राकृतंजनं.

समक्षं तव सौमित्रे [1]प्राणांस्त्यक्ष्ये न संशयः ॥ रामं विना क्षणमपि [2]नै हि जीवामि भूतले ॥२६॥
इत्युक्तः परुषं वाक्यं सीतया रोमहर्षणम् ॥ अब्रवील्लक्ष्मणः सीतां [3]प्राञ्जलिर्विजितेन्द्रियः ॥ २७ ॥
उत्तरं नोत्सहे वक्तुं दैवतं भवती मम ॥ वाक्यमप्रतिरूपं तु न चित्रं स्त्रीषु मैथिलि ॥ २८ ॥
स्वभावस्त्वेष [4]नारीणामेवं लोकेषु दृश्यते ॥ विमुक्तधर्माश्चपलास्तीक्ष्णा भेदकराः स्त्रियः ॥ २९ ॥
न सहे हीदृशं वाक्यं वैदेहि जनकात्मजे ॥ श्रोत्रयोरुभयोर्मेऽद्य तप्तनाराचसन्निभम् ॥ ३० ॥
उपशृण्वन्तु मे[5] सर्वे [6]साक्षिभूता वनेचराः ॥ न्यायवादी [7]यथाऽन्यायमुक्तोऽहं परुषं त्वया ॥ ३१ ॥
धिक्त्वामद्य [8]प्रणश्य त्वं यन्मामेवं विशङ्कसे ॥ [9]स्त्रीत्वं दुष्टं स्वभावेन गुरुवाक्ये व्यवस्थितम् ॥३२॥
[10]गमिष्ये यत्र काकुत्स्थः स्वस्ति तेऽस्तु वरानने ॥ रक्षन्तु त्वां विशालाक्षि समग्रा वनदेवताः ॥३३॥
[11]निमित्तानि हि घोराणि यानि प्रादुर्भवन्ति मे ॥ अपि त्वां सह रामेण पश्येयं पुनरागतः ॥
[न वेत्येतन्न जानामि वैदेहि जनकात्मजे] ॥ ३४ ॥
लक्ष्मणेनैवमु[12]क्ता सा [13]रुदन्ती जनकात्मजा ॥ प्रत्युवाच ततो वाक्यं तीव्रं बाष्पपरिप्लुता ॥ ३५ ॥
गोदावरीं प्रवेक्ष्यामि [14]विना रामेण लक्ष्मण ॥ आबन्धिष्येऽथवा त्यक्ष्ये विषमे देहमात्मनः ॥ ३६॥
[15]पिबाम्यहं विषं तीक्ष्णं प्रवेक्ष्यामि हुताशनम् ॥ न त्वहं राघवादन्यं पदाऽपि पुरुषं स्पृशे ॥ ३७॥

क्षुद्रपुरुषं ॥ २५—२६ ॥ इत्युक्तःपरुषं वाक्यमिति "अप्रधाने दुहादीनां-" इति कर्मण्यप्रधाने द्वितीया । सीतापारुष्येणप्रतिपारुष्यादिराहित्यंसूचयति--विजितेन्द्रिय इति ॥ २७ ॥ अप्रतिरूपं अत्यन्तानुचितं ॥ २८ ॥ विमुक्तधर्माः परित्यक्तविनयादिधर्माः । चपलाः चञ्चलचित्ताः । तीक्ष्णाः क्रूरहृदयाः । भेदकराः परस्परस्नेहकार्यविच्छेदकराः ॥ २९—३० ॥ मे साक्षिभूताः वनेचराः । न्यायवादी अहं त्वया अन्यायं परुषं । यथा उक्तः तथा उपश्रृण्वन्तु ॥ ३१ ॥ धिक्त्वामिति "उभसर्वतसोः—" इत्यादिना धिग्योगे द्वितीया ॥ ३२—३५ ॥ आबन्धिष्ये उद्बन्धनं करिष्यामि । विषमे भृग्वादिविषमस्थले । पातेनेति शेषः ॥ ३६ ॥ स्पृशे स्पृशामि

कतयाच युगपद्वयोर्विरोधेन त्वामयोध्यांशीघ्रंप्रापय्य रामसंनिधावहंगमिष्यामीत्यतआह—**कथमिति** । जनं साक्षाद्ब्रह्मादिद्वाराच सर्वेषांजनयितारं । भर्तारंरामं उपसंश्रित्य वनेसहागत्य । पृथक् तंविना कां सुखस्वरूपामप्ययोध्यां । कथं अयेयं रामंविहायगन्तुंनसमर्थेत्यर्थः । अतः हेसौमित्रे तवसमक्षं प्राणांस्त्यक्ष्यामि । असंशयं अत्रसंशयोन । तत्रहेतुः रामंविना भूतलेक्वचिदपिस्थले क्षणमपिनैवजीवामि ॥ अर्धचतुष्टयमेकान्वयि ॥ २५ ॥ २६ ॥ अत्रनशेर्नाशेच्छाऽर्थः । तेनराक्षसकुलस्यनाशेच्छावतींत्वांधिक् । यतोयदर्थंमामेवंविशङ्कसे वदसि इतिगूढं ॥ यद्वा विनश्यन्तीं शक्तितयाप्रतिक्षणंपरिणामरूपेणविनश्यन्तींत्वां धिक् । यन्मां त्वदस्पृष्टंत्वदाक्रमणायोग्यं एवंविशङ्कसे । त्वदाक्रान्तेषुकिलैवंसंभावनेति । ति० पुनर्वैषानुसारेणाह—**स्त्रीत्वादिति** । स्त्रीत्वाद्दुष्टस्वभावेनक्रौर्येणयुतात्वं गुरुवाक्ये ज्येष्ठनियोगे स्थितंमां एवंब्रूषेइतिशेषः । अतोयत्र काकुत्स्थः तत्रगच्छामि गमिष्यामि । तेस्वस्त्यस्तु सर्वतइतिशेषः ॥ ३२ ॥ ३३ ॥ ति० सर्वथाकर्तव्यमाह—प्रवेक्ष्यामिहुताशनं । अतएवात्र वाशब्दानुक्तिः । अनेन साक्षाद्रावणगृहंनगमिष्यामि किन्त्वहंस्वरूपेणाग्नौस्थित्वा माययैव तद्गृहंतंगमिष्यामीतिध्वनितं । तदुक्तं कूर्मपुराणे—"रामस्यसुभगांभार्यां रावणोराक्षसेश्वरः । सीतांविशालनयनां चकमेकालनोदितः । गृहीत्वामाययावेषं चरन्तींविजनेवने । समाहर्तुं मनश्चक्रे तापसःकिलकामिनीं । विज्ञायसाचतद्भावं स्मृत्वादाशरथिंपतिम् । " तद्भावं लङ्कायामेवहृदिकृतं । तापसोभूत्वा हरिष्यामीतिभावमित्यर्थः । " जगामशरणंवह्निमावसथ्यंशुचिस्मिता । प्रपद्येपावकंदेवं साक्षिणंविश्वतोमुखम् । आत्मानंदीप्तवपुषं सर्वभूतहृदिस्थितम् । " इत्याद्यष्टश्लोकानुक्त्वा "इतिवन्ह्यष्टकंजप्त्वा रामपत्नीयशस्विनी । ध्यायन्तीमनसातस्थौ राममुन्मीलितेक्षणा । अथावसथ्याद्भगवान्हव्यवाहोमहेश्वरः । आविरासीत्सुदीप्तात्मा तेजसानिर्दहन्निव । सृष्ट्वामायामयींसीतां सरावणवधेच्छ-

[पा०] १ ङ. झ. ट. स्त्यक्ष्याम्यसंशयं. २ ङ. झ. ट. नैवजीवामि. ख. नजीवामीह. ३ ङ. झ. ट. प्राञ्जलिस्स. छ. प्राञ्जलिश्च. ४ क. ङ. छ.–ट. मेषुलोकेषु. ५ ख. तेसर्वे. ६ झ. ट. साक्षिणोहि. ७ क. ख. ग. ङ—ट. यथावाक्यं. ८ झ. विनश्यन्तीं. ९ झ. स्त्रीत्वाद्दुष्टस्वभावेन. १० ङ. झ. ट. गच्छामि. ११ ख. निमित्तानिच. क. घ. निमित्तानीह. १२ क. ग. ङ. झ. ट. मुक्तातु. १३ ङ. झ. ट. रुदती. १४ ङ. झ. ट. हीनारामेण. १५ क. ङ—ढ. पिबामिवा.

इति लक्ष्मणमाक्रुश्य[1] सीता दुःखसमन्विता[2] ॥ पाणिभ्यां रुदती दुःखादुदरं प्रजघान ह ॥ ३८ ॥

तामार्तरूपां विमना रुदन्तीं सौमित्रिरालोक्य[3] विशालनेत्राम् ॥
आश्वासयामास न चैव भर्तुस्तं भ्रातरं किंचिदुवाच सीता ॥ ३९ ॥
ततस्तु सीतामभिवाद्य लक्ष्मणः कृताञ्जलिः किंचिदभिप्रणम्य च ॥
अन्वीक्षमाणो बहुशश्च[4] मैथिलीं जगाम रामस्य समीपमात्मवान् ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

षट्चत्वारिंशः सर्गः ॥ ४६ ॥

सीताचोदनयालक्ष्मणेरामंप्रतियातेलब्धावकाशेनरावणेनसंन्यासिवेषपरिग्रहेणसीतासमीपंप्रत्यागमनम् ॥ १ ॥ सीतया स्वसौन्दर्यप्रशंसनपूर्वकं स्ववनागमनकारणादिकंपृच्छतेरावणायपाद्यादिनापरिपूजनम् ॥ २ ॥

तया परुषमुक्तस्तु कुपितो राघवानुजः ॥ स विकाङ्क्षन्भृशं रामं प्रतस्थे नचिरादिव[5] ॥ १ ॥

॥ ३७ ॥ आक्रुश्य विनिन्द्य ॥ ३८ ॥ भर्तुर्भ्रातरंन किंचिदुवाचेति आश्वासनव्याजेनगमनविलम्बंकरोतीति कोपेनेति शेषः ॥ ३९ ॥ किंचिदिति कोपमिश्रत्वात् किंचित्प्रणामः । बहुशोऽन्वीक्षमाण इति कथमेनामेकाकिनींत्यक्त्वा गमिष्यामीत्यनुशयेन बहुशोन्वीक्षणं । आत्मवान् धैर्यवान् । अस्मिन्सर्गे सार्धचत्वारिंशच्छ्लोकाः ॥ ४० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चचत्वारिंशः सर्गः ॥४५॥

अथ सीतायाः लक्ष्मणविषयपरुषभाषणफलं दर्शयत्येकादशभिः सर्गैः । रावणप्रलोभनमाह षट्चत्वारिंशे—तया परुषमित्यादिना । विकाङ्क्षन् अनिच्छन्नेव । राममुद्दिश्य प्रतस्थे । नचिरादिव अविलम्बितमेव । इवशब्दो वाक्यालङ्कार इति वा । यद्वा नचिरादिव सीतात्यागासहिष्णुतया पादौ पश्चादा-

या । सीतामादायरामेष्टां पावकोन्तरधीयत । कृत्वातुरावणवधं रामोलक्ष्मणसंयुतः । समादायाभवत्सीतां शङ्काकुलितमानसः । साप्रत्ययायभूतानां सीतामायामयीपुनः । विवेशपावकंदीप्तं ददाहज्वलनोपिताम् । दग्ध्वामायामयींसीतां भगवानुग्रदीधितिः । रामायादर्शयत्सीतां पावकोसौसुरप्रियः। एतत्पतिव्रतानांवै माहात्म्यंकथितंमया । स्त्रीणांसर्वाघशमनं प्रायश्चित्तमिदंस्मृतम् ।" इत्युत्तरखण्डे चतुस्त्रिंशेऽध्याये । अनेन स्त्रीणांजातिभ्रंशकरापदि अग्निप्रवेशोनदोषाय सर्वप्रायश्चित्तंचेतिध्वनितं । कदाप्यन्यंपुरुषंनस्पृशे इत्यन्वयः ॥ अत्र पत्यसांनिध्यइतिशेषः । तेन विराधस्पर्शेपिनहानिः । तदा पतिसंनिधानात् । किंच साक्षाद्भगवतीस्पर्शे रावणोविराधवत्तत्क्षणादेवम्रियेत । एवंच सर्वराक्षसवधोनस्यादिति मायासीतारचना । किंचास्यकार्यं हनुमत्पुच्छाग्निनालङ्कादाहः । अन्यथा रावणवशेनलोकपालाग्निना कथं तन्नगरदाहस्स्यात् । एतच्छक्तिप्रवेशेनतु तत्कार्यसामर्थ्यंतस्येतिमन्तव्यं । किंचैवंप्रतिज्ञाय रावणस्पर्शेजगन्मातुःप्रतिज्ञाभङ्गस्स्यात् ॥ **स०** स्पृशे स्पर्शनंचपतित्वेनस्वीकरणं ॥ ३७ ॥ **ति०** आश्रुत्य लक्ष्मणंप्रतिप्रतिज्ञाय । दुःखात् सकलकरणतापादिव । उदरंप्रजघानेत्यनेन सर्वरक्षोमरणंविना नमेउदरपूर्तिरितिसूचितं । अन्यथा शोके वक्षआघातस्यैवस्त्रीषुप्रसिद्ध्याऽसंगतिस्स्यात् ॥ ३८ ॥ **ति०** अभिवाद्य मनसेतिशेषः । किंचिदभिप्रणम्येतिकायिकस्सउक्तः । अत्रकिंचिदित्यनेन कोपस्सूचितः । यद्यपि कोपेपि यथोचितव्यवहारत्यागोलक्ष्मणस्यानुचितः । तथापि प्रतिज्ञोत्तरंतथैव स्वच्छायांसंदर्श्य तस्याअग्निप्रवेशोद्यमेनच्छायाबुद्ध्याकिंचित्प्राञ्जलित्वं किंचिदेवनमनमित्यनेनसूचितं । कथमेनांरामेणविनात्यक्ष्यामीति बहुशोऽवेक्षमाणः अग्निप्रविष्टानवेतिचवीक्षमाणः ॥ ४० ॥ इतिपञ्चचत्वारिंशस्सर्गः ॥ ४५ ॥

ति० नचिरादिव शीघ्रमेवेत्यर्थः । विकाङ्क्षन् विशेषेणकाङ्क्षमाणः तत्सविधगमनमिच्छन्नित्यर्थः । काङ्क्षिरशङ्कायामपि । तेन रामंविरुद्धंशङ्कमानः । शीघ्रमितोऽनपसरणे कार्यनाशाद्रामोपि विरुद्धस्स्यादितिशङ्कमानः शीघ्रंजगामेतिव्यङ्ग्यं । अतएव व्यवहितपूर्वसर्गान्ते मारीचस्य तथाशब्दोत्तरं सीताविषयांमहतींचिन्तामुक्त्वा ततः पुनरपिमांसार्थमितर-

[**पा०**] १ ङ. झ. ट. माश्रुत्य. २ ङ. झ. ट. शोकसमन्विता. ३ क. ख. ग. रालक्ष्य. ४ ङ—ट. बहुशस्समैथिलीं. क. ग. बहुशश्चजानकीं. ५ घ. चिरादिह.

तदासाद्य दशग्रीवः क्षिप्रमन्तरमास्थितः ॥ अभिचक्राम वैदेहीं परिव्राजकरूपधृत् ॥ २ ॥
श्लक्ष्णकाषायसंवीतः शिखी छत्री उपानही ॥ वामे चांसेऽवसज्याथ शुभे [1]यष्टिकमण्डलू ॥
परिव्राजकरूपेण वैदेहीं[2] समुपागमत् ॥ ३ ॥
ताम[3]ाससादातिबलो भ्रातृभ्यां रहितां वने ॥ रहितां [4]चन्द्रसूर्याभ्यां सन्ध्यामिव महत्तमः ॥ ४ ॥
तामपश्यत्ततो बालां [5]रामपत्नीं यशस्विनीम् ॥ रोहिणीं शशिना हीनां ग्रहवद्भृशदारुणः ॥ ५ ॥
[6]तमुग्रतेजःकर्माणं [7]जनस्थानरुहा द्रुमाः ॥ [8]समीक्ष्य न प्रकम्पन्ते न [9]प्रवाति च मारुतः ॥ ६ ॥
शीघ्रस्रोताश्च तं दृष्ट्वा वीक्षन्तं रक्तलोचनम् ॥ [10]स्तिमितं गन्तुमारेभे भयाद्गोदावरीनदी ॥ ७ ॥
रामस्य [11]त्वन्तरप्रेप्सुर्द[12]शग्रीवस्तदन्तरे ॥ उपतस्थे च वैदेहीं भिक्षुरूपेण रावणः ॥ ८ ॥
अभव्यो भव्यरूपेण भर्तारमनुशोचतीम् ॥ अभ्यवर्तत वैदेहीं चित्रामिव शनैश्चरः ॥ ९ ॥
[13]स पापो भव्यरूपेण तृणैः कूप इवावृतः ॥ अतिष्ठत्प्रेक्ष्य वैदेहीं रामपत्नीं यशस्विनीम् ॥ १० ॥
[[14]तिष्ठन्संप्रेक्ष्य च तदा पत्नीं रामस्य रावणः] ॥ शुभां रुचिरदन्तोष्ठीं पूर्णचन्द्रनिभाननाम् ॥
आसीनां पर्णशालायां बाष्पशोकाभिपीडिताम् ॥ ११ ॥

कर्षतः रामप्राप्तित्वरा तु पुरतः कर्षतीतीवशब्दस्य भावः ॥ १ ॥ आस्थितः अवकाशं प्रतीक्षमाणस्स्थितो दशग्रीवः । तदेव अन्तरं अवकाशं । आसाद्य वैदेहीं अभिचक्राम आभिमुख्येनाजगाम । परिव्राजको भिक्षुः । तस्य रूपं लिङ्गं धारयतीति परिव्राजकरूपधृत् ॥ २ ॥ परिव्राजकलिङ्गान्याह—श्लक्ष्णेति । शिखी अदन्तत्वाभावेपि व्रीह्यादित्वादिनिः । छत्रीत्यत्र वाक्यसंधेरनित्यत्वेन यणभावः । उपानहीत्यत्र इनिरार्षः । यष्टिः त्रिदण्डं । शिखीत्यनेन साहचर्यात् । अत्र धर्मप्रधानजनककुलनन्दिन्याः सीताया विश्वासाय धृतत्वादित्थमेव यतिलिङ्गमिति दर्शितं । तथाहाङ्गिराः "यतेर्लिङ्गं प्रवक्ष्यामि येनासौ लक्ष्यते यतिः । ब्रह्मसूत्रं त्रिदण्डं च वस्त्रं जन्तुनिवारणं ॥ शिक्यं पात्रं बृसी चैव कौपीनं कटिवेष्टनम् । यस्यैतद्विद्यते लिङ्गं स यतिर्नेतरो यतिः" इति । परिव्राजकरूपेणेत्यनेन ब्रह्मसूत्रादिकमुक्तं । समुपागमदिति प्रतिपाद्यार्थभेदात्पुनःपुनः क्रियापदप्रयोगः ॥ ३ ॥ भ्रातृभ्यां रामलक्ष्मणाभ्यां । महत्तम इत्यभूतोपमा । सन्ध्यायां महतस्तमसोसंभवात् ॥ ४ ॥ ग्रहः अङ्गारकः शनैश्चरो वा । स रोहिणीमिव भृशदारुणो रावणस्तामपश्यत् । यथा रोहिण्याःक्रूरग्रहवीक्षणंलोकानर्थकरं तथा रावणस्यसीतावीक्षणमिति भावः ॥ ५ ॥ दारुणत्वं प्रकटयति—तमुग्रमिति ॥ ६ ॥ शीघ्रस्रोताः शीघ्रप्रवाह । वीक्षन्तं वीक्षमाणं । स्तिमितमिति क्रियाविशेषणं ॥ ७ ॥ रामस्यान्तरप्रेप्सुः विश्लेषान्वेषी । तदन्तरे तस्मिन्नवकाशे । प्रथमं सीतामुद्दिश्य गमनं अथाश्रमसमीपगमनं ततः सीतादर्शनं ततः सन्निकर्षगमनमिति क्रमः ॥ ८ ॥ अथाभिमुखगमनमाह—अभव्यइति । अभव्यः दुर्जनः । भव्यरूपेण सुजनरूपेण । अनुशोचतीमिति आगमशासनस्यानित्यत्वान्नुमभावः ॥ ९ ॥ पापः अन्तःपापात्मा । भव्यरूपेण बाह्याकारेणोपलक्षितः ॥ १० ॥ बाष्पशो-

---

मृगवधप्रवृत्तिरुक्ता । सा विलंबायैव ॥ १ ॥ **स०** तेनैव रक्षोरूपेणाऽऽगमने न प्रत्यानयनं-सीतायास्स्यादिति वेषान्तरेणागमनंचेद्गृहस्थवेषेण कुतो नागतिरितिचेन्न । मध्येसंवादं रामागतौ समरसमारंभोभवेदितिमतिमान् अयं यतिवेषस्तदनारंभकइति तमदीधरदितिसंभवात् । हन्ततर्हि रामरूपंकुतोनदधारेति परमवशिष्यतेशङ्केतिचेन्न । इदानीन्तना अपि यद्यद्वेषमिषेणायान्तस्तत्तदाचाराइति रामरूपग्रहणे नान्यकामिनीकामस्स्यादिति तत्त्यागइतिसंभवात् ॥ २ ॥ **ति०** शिखीति । अनेन त्रिदण्डिसंन्यासिविशेषस्सूचितः । तदुक्तं भारते—"रावणस्तुयतिर्भूत्वा मुण्डः कुण्डीत्रिदण्डधृक्" इति । तत्रमुण्डइत्यनेन जटिलव्यावृत्तिः । यष्टिस्त्रिदण्डात्मिका ॥ ३ ॥ **ति०** भ्रातृभ्यां परस्परभ्रातृभ्यां ॥ ४ ॥ **ति०** बाष्पैः

[पा०] १ घ. दण्डकमण्डलू. २ ङ. झ. ट. वैदेहीमन्ववर्तत. क. घ. ञ. वैदेहीमन्वपद्यत. ३ क. च. छ. ज. ञ. मासससादतद्रक्षो. ४ झ. सूर्यचन्द्राभ्यां. ५ क. ख. ङ—ट. राजपुत्रीं. ६ ङ. झ. ट. तमुग्रंपापकर्माणं. ७ ङ—ट. जनस्थानगताः. ८ ङ. झ. ञ. ट. संदृश्य. ९ क. प्रवातिस्म. १० क. स्तिमिता. ११ ख. ङ. झ. ट. त्वन्तरंप्रेप्सुः. १२ ख. दशग्रीवो महाबलः. १३ झ. ट. सहसाभव्य. १४ इदमर्धं क. ख. ग. ङ. झ. पाठेषुदृश्यते.

स तां पद्मपलाशाक्षीं[1] पीतकौशेयवासिनीम् ॥ अभ्यगच्छत वैदेहीं दुष्टचेता[2] निशाचरः ॥ १२ ॥
स[3] मन्मथशराविष्टो ब्रह्मघोषमुदीरयन् ॥ अब्रवीत्प्रश्रितं वाक्यं रहिते राक्षसाधिपः ॥ १३ ॥
तामुत्तमां स्त्रियं[4] लोके पद्महीनामिव श्रियम् ॥ विभ्राजमानां वपुषा रावणः प्रशशंस ह ॥ १४ ॥
का त्वं काञ्चनवर्णाभे[5] पीतकौशेयवासिनि ॥ कमलानां शुभां मालां पद्मिनीव हि बिभ्रती ॥ १५ ॥
ह्रीः [6]कीर्तिः श्रीः शुभा लक्ष्मीरप्सरा वा शुभानने[7] ॥ [8]भूतिर्वा त्वं वरारोहे रतिर्वा स्वैरचारिणी ॥ १६ ॥
समाः शिखरिणः स्निग्धाः पाण्डुरा दशनास्तव ॥ विशाले विमले नेत्रे रक्तान्ते कृष्णतारके ॥ १७ ॥
विशालं जघनं पीनमूरू करिकरोपमौ[9] ॥ १८ ॥
एतावुपचितौ वृत्तौ संहतौ[10] संप्रवल्गितौ ॥ पीनोन्नतमुखौ कान्तौ स्निग्धौ[11] तालफलोपमौ ॥
मणिप्रवेकाभरणौ रुचिरौ[12] ते पयोधरौ ॥ १९ ॥
चारुस्मिते चारुदति चारुनेत्रे विलासिनि ॥ मनो हरसि मे कान्ते[13] नदीकूलमिवाम्भसा ॥ २० ॥

काभिपीडितां रामार्तस्वरश्रवणेन बाह्याभ्यन्तरास्वास्थ्यवतीं । पीतकौशेयं वस्ते इति पीतकौशेयवासिनीं । णिन्यन्तात् ङीप् । अभ्यगच्छत पूर्वस्मादपि सन्निकर्षं प्राप्तः ॥ ११—१२ ॥ ब्रह्मघोषं "उपनिषदमावर्तयेत्" इत्युक्तपरिव्राजकोचितवेदघोषं । प्रश्रितं विनयान्वितं । रहिते विजनप्रदेशे ॥१३॥ लोके उत्तमां स्त्रियमित्यन्वयः । प्रश्रितं वाक्यमब्रवीदित्यस्यैव विवरणं—प्रशशंसेति ॥ १४ ॥ काञ्चनवर्णाभे काञ्चनतुल्यवर्णे । कमलानां मालां बिभ्रती पद्मिनीव स्थिता । पद्मतुल्यमुखनयनपाणिपादविशिष्टत्वादिति भावः ॥ १५ ॥ ह्रीः विष्णुपत्नी भूमिः । "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति श्रुतेः । श्रीः कमला । लक्ष्मीः कान्त्यधिष्ठानदेवता । रतिः मन्मथस्त्री । स्वैरचारिणी स्वतन्त्रा ॥ १६ ॥ समाः वैषम्यरहिताः । शिखराणि अग्राणि प्रशस्तानि सन्तीति शिखरिणः । प्रशंसायामिनिः । कुन्दकुड्मलवत्प्रशस्ताग्रा इत्यर्थः । स्निग्धाः मसृणाः । रक्तान्ते रक्तरेखायुक्तान्ते । जघनं कटिपुरोभागः । "पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः" इत्यमरः ॥ १७—१८ ॥ उपचितौ उन्नतौ । वृत्तौ वर्तुलौ । संहतौ अन्योन्यसंश्लिष्टौ । सम्यक् प्रकृष्टं वल्गितं चलनं ययोस्तौ संप्रवल्गितौ गुरुत्वौन्नत्याभ्यां किंचिच्चलन्ताविव स्थिताविव्यर्थः । पीनोन्नतमुखौ क्वचित्स्तनयोः पीनत्वेप्यग्रे औन्नत्यं पीनत्वं च न स्तः तथा न भवत इमौ किंतु पीनं उन्नतं च मुखं ययोस्तौ । कान्तौ काम्यमानौ । मणिप्रवेकाभरणौ मणिप्रवेकाः मणिश्रेष्ठाः । "प्रवेकानुत्तमोत्तमाः" इत्यमरः । ते मालात्मकाः आभरणं ययोस्तौ । रुचिरौ शोभमानौ । सूक्ष्मतरकौशेयोत्तरीयचलनवशेन हठाद्दृष्टः प्रकारो दुरात्मना वर्ण्यते ॥ १९ ॥ चारवो दन्ता यस्याः सा चारुदती । आर्षो दन्तस्य दत्रादेशः । छन्दोवद्भावेन "छन्दसि च" इति सूत्रेण समासान्तो दन्तस्य दत्रादेशो वा "उगितश्च" इति ङीप् । समा इत्यादिना पूर्वोक्तस्य सामान्योक्तिरियं चारुस्मितत्वनिर्वाहाय । विलासोऽम्भ-

ोकेनचाभिपीडितां । स्वयमग्नौप्रविश्य मांरक्षसे दत्तवतीति शोकबाष्पौ । रामव्यसनशङ्कयेत्यापाततोर्थः ॥ ११ ॥ शि० अब्रवीत् प्रशंसितुमैच्छत् । अतएववक्ष्यमाणेन नपौनरुक्त्यं ॥ १३ ॥ टीका० कालमित्यादिप्रश्नस्तयासह सँल्लापार्थः नत्वज्ञातज्ञार्थः । ति० रौप्यकाञ्चनं उत्तमकाञ्चनं ॥१५॥ शि० श्रीः शोभासंपत्तिः । लक्ष्मीरैश्वर्यसंपत्तिरिति नपौनरुक्त्यं ॥ ति० ह्रीः ारी । श्रीः ऐश्वर्यप्रधानाभगवच्छक्तिः । भूतिरणिमादिसिद्धिः ॥१६॥ ति० संप्रगल्भितौ आलिङ्गनादौ संजातप्रागल्भ्यौ । संप्रल्गितावितिपाठे आलिङ्गनोद्यतावित्यर्थः ॥ १९ ॥ स० हेरामे हेसीते । नदीतिकर्तृनिर्देशः । नदी स्वांभोलक्षणकरणे नकूलं

[पा०] १ ख. विशालाक्षीं. २ च. छ. ज. ञ. दुष्टचित्तो. ग. दुष्टरूपो. ३ ग. ङ. झ. ट. दृष्ट्वाकामशराविद्धो. ४ क.—ट. त्रिलोकानां. ५ ङ. झ. ट. रौप्यकाञ्चन. ६ क. ङ—ट. श्रीःकीर्तिः. ७ च. छ. ज. ञ. वरानने. ८ क. ख. ूमिर्वा. ९ ग. गजकरोपमौ. १० क. ख. घ. ङ—ज. सहितौ. झ. संप्रगल्भितौ. ११ च. छ. ज. ञ. श्रेष्ठौ. क. ङ. . ट. स्निग्धताल. १२ ङ. झ. ट. रुचिरौतौ. १३ छ. झ. ञ. ट. रामे.

करान्तमितमध्यासि सुकेशी संहतस्तनी ॥२१॥
नैव देवी न गन्धर्वी न यक्षी नच किन्नरी ॥ नैवंरूपा मया नारी दृष्टपूर्वा महीतले ॥ २२ ॥
रूपमग्र्यं च लोकेषु सौकुमार्यं वयश्च ते ॥ इह वासश्च कान्तारे चित्तमुन्मादयन्ति मे ॥ २३ ॥
सा प्रतिक्राम भद्रं ते न त्वं वस्तुमिहार्हसि ॥ राक्षसानामयं वासो घोराणां कामरूपिणाम् ॥२४॥
प्रासादाग्राणि रम्याणि नगरोपवनानि च ॥ संपन्नानि सुगन्धीनि युक्तान्याचरितुं त्वया ॥ २५ ॥
वरं माल्यं वरं भोज्यं वरं वस्त्रं च शोभने ॥ भर्तारं च वरं मन्ये त्वद्युक्तमसितेक्षणे ॥ २६ ॥
का त्वं भवसि रुद्राणां मरुतां वा वरानने ॥ वसूनां वा वरारोहे देवता प्रतिभासि मे ॥ २७ ॥
नेह गच्छन्ति गन्धर्वा न देवा न च किन्नराः ॥ राक्षसानामयं वासः कथं नु त्वमिहागता ॥ २८ ॥
इह शाखामृगाः सिंहा द्वीपिव्याघ्रमृगास्तथा ॥ ऋक्षास्तरक्षवः कङ्काः कथं तेभ्यो न बिभ्यसि ॥२९॥
मदान्वितानां घोराणां कुञ्जराणां तरस्विनाम् ॥ कथमेका महारण्ये न बिभेषि वरानने ॥ ३० ॥
कासि कस्य कुतश्चित्त्वं किंनिमित्तं च दण्डकान् ॥ एका चरसि कल्याणि घोरान्राक्षससेवितान् ॥ ३१ ॥
इति प्रशस्ता वैदेही रावणेन दुरात्मना ॥ द्विजातिवेषेण हितं दृष्ट्वा रावणमागतम् ॥
सर्वैरतिथिसत्कारैः पूजयामास मैथिली ॥ ३२ ॥
उपनीयासनं पूर्वं पाद्येनाभिनिमन्त्र्य च ॥ अब्रवीत्सिद्धमित्येव तदा तं सौम्यदर्शनम् ॥ ३३ ॥

स्थानीयः । अतो न न्यूनोपमा ॥ २० ॥ करान्तेति करान्तेन करतलाङ्गुष्ठप्रदेशिनीचक्रमानेन मितं परिच्छिन्नं मध्यं यस्याः सा । संहतस्तनीति पूर्वं संहतावित्युक्तकल्पेपि पुनरुक्तिर्दुर्लभलक्षणत्वविस्मयेन ॥ २१ ॥ एवंरूपा देवी देवस्त्री । देवलोके न दृष्टा । एवमुत्तरत्रापि योज्यं । नारी मनुष्यस्त्री ॥ २२ ॥ लोकेष्वग्र्यं श्रेष्ठं । रूपं लावण्यं । रूपादीनि कान्तारवासश्च उन्मादयन्ति परस्परविरुद्धत्वात् । किमत्र तवागमनमिति निर्णयबुद्धिं न जनयन्तीत्यर्थः ॥२३॥ प्रतिक्राम प्रतिनिवर्तस्व । निलयमिति शेषः । वस्तुं स्थातुं ॥ २४ ॥ संपन्नानि समृद्धानि । आचरितुं संचरितुम् ॥ २५ ॥ वरं श्रेष्ठं । माल्यादि त्वद्युक्तं तव योग्यं मन्ये । नतु यादृशतादृशं । एवमुत्तरत्रापि । यद्वा माल्यादिकं त्वद्युक्तं त्वत्संबद्धं सत् वरं प्रशस्तं भवतीति मन्ये ॥ २६ ॥ त्वं मे देवता देवस्त्रीति प्रतिभासि । तत्र कात्वं किं रुद्राणां संबन्धिनी उत मरुतां आहोस्विद्वसूनां संबन्धिनी । वाकारःसमुच्चयार्थः । तेन किमादित्यानामित्यपि सिध्यति ॥ २७ ॥ तत्रापि संशयनिवृत्तिमाह—नेहेति ॥ २८ ॥ भयहेत्वन्तरमाह—इहेति । शाखामृगाः वानराः । द्वीपं चर्म तद्योगात् द्वीपिनो बालव्याघ्राः । व्याजिघ्रन्तीति व्याघ्राः द्वीप्यपेक्षया किञ्चिन्महान्तोऽमी । तरक्षवो मृगादनामहाव्याघ्राः । न बिभ्यसि न बिभेषि । कङ्काः मांसादा भयंकराकृतयःपक्षिविशेषाः ॥ २९ ॥ पञ्चम्यर्थे षष्ठी । तरस्विनां बलवतां ॥ ३० ॥ कासि किंनामधेयासि । कस्य संबन्धिनी । कुतः कस्माद्देशादागतासि ॥ ३१ ॥ द्विजातिवेषेण संन्यासिवेषेण हितं सहितं । सत्क्रियते एभिरिति सत्काराः पूजाद्रव्याणि तैः ॥ ३२ ॥ उक्तं विवृणोति—उपनीयेति । पाद्येन पादोदकेन । अभिनिमन्त्र्य सत्कृत्य । तदा पाद्यप्रदानानन्तरं सिद्धमि-

---

यथा तथेत्यर्थः । तैश्चारुस्मितादिभिर्मनोहरसीत्यर्थः । अरामे इतिच्छेदः । रामरहितदेशेवा ॥ २० ॥ ति० प्रतिक्राम निर्गच्छ । रामचन्द्राधिष्ठितस्थाने राक्षसपराक्रमासंभवादेवंवचनं ॥ २४ ॥ ति० द्वीपिव्याघ्रौ सबिन्दुनिर्बिन्दू ॥ २९ ॥ ति० द्विजातिवेषेण तमागतंदृष्ट्वा द्विजातिवेषोऽयंरावणइतिज्ञात्वापि । अतिथिसत्कारैः अतिथियोग्यसत्कारैः ॥ ३२ ॥

[पा०] १ ख. रूपमप्रतिमंलोके. २ क. ख. घ. संप्रतिक्राम. ३ ङ. झ. ट. गन्धं. ४ क. ग. ङ—ट. शुचिस्मिते. ख. शुभानने. ५ क. ख. ङ. च. ज. ञ. नेहागच्छन्ति. ६ ङ. झ. ट. मृगावृकाः. ७ क—ट. बिभ्यसे. ८ ङ. झ. ट. महात्मना. ९ ख—ङ. झ. ट. उपानीय. १० क. सौम्यदर्शना.

द्विजातिवेषेण समीक्ष्य मैथिली समागतं पात्रकुसुम्भधारिणम् ॥
अशक्यमुद्वेष्टुमुपायदर्शनं न्यमन्त्रयद्ब्राह्मणवत्तदाऽङ्गना ॥ ३४ ॥
इयं बृसी ब्राह्मण काममास्यतामिदं च पाद्यं प्रतिगृह्यतामिति ॥
इदं च सिद्धं वनजातमुत्तमं त्वदर्थमव्यग्रमिहोपभुज्यताम् ॥ ३५ ॥
निमन्त्र्यमाणः प्रतिपूर्णभाषिणीं नरेन्द्रपत्नीं प्रसमीक्ष्य मैथिलीम् ॥
प्रसह्य तस्या हरणे धृतं मनः समार्पयत्स्वात्मवधाय रावणः ॥ ३६ ॥
ततः सुवेषं मृगयागतं पतिं प्रतीक्षमाणा सहलक्ष्मणं तदा ॥
विवीक्षमाणा हरितं ददर्श तन्महद्वनं नैव तु रामलक्ष्मणौ ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

त्येवाब्रवीत् पकान्नं सिद्धमित्यब्रवीत् ॥३३॥ उक्तमर्थं सर्गान्तश्लोकाभ्यां विवृणोति द्विजातीति । द्विजातिवेषेण समागतं प्राप्तं । अलाबुप्रभृतिष्वेकं कुसुम्भं महारजताख्यरञ्जकद्रव्यविशेषरक्तं वस्त्रं । "तेन रक्तं—" इति प्राप्तस्याणो लोप आर्षः । यद्वा कुसुम्भः कमण्डलुः । "स्यान्महारजते क्लीबं कुसुम्भं करके पुमान्" इत्यमरः । तदुभयधारिणं । अपाये अपहरणे अनर्थकरणे वा दर्शनं बुद्धिर्यस्य तं । अत एव उद्वेष्टुं भोजयितुमशक्यं तं समीक्ष्य मैथिली ब्राह्मणवत् ब्राह्मणेन सदृशं यथा भवति तथा । न्यमन्त्रयत् ब्राह्मणातिथिवन्निमन्त्रितवतीत्यर्थः । यद्वा ब्राह्मणवत् ब्राह्मणार्हं । "तदर्हं" इति वतिः । यद्वा मैथिली जनककुलजाततया तद्व्यवहारपरिपाटीविज्ञातकपटवेषापि संन्यासिवेषधारणमात्रेण उद्वेष्टुं द्वेषं कर्तुं । अशक्यं तं न्यमन्त्रयत् । "काषायदण्डमात्रेण यतिः पूज्यो न संशयः" इति वचनादिति भावः ॥ ३४ ॥ सत्कारप्रकारमाह—इयमिति । इयं बृसी मुनीनामासनं । आस्यतां त्वदर्थं सिद्धं पक्वं । इदं वनजातं कन्दमूलफलादिकं । इह स्थले अव्यग्रमुपभुज्यतां । इतिकरणस्य उत्तरश्लोकेऽन्वयः ॥ ३५ ॥ इति प्रतिपूर्णभाषिणीं सर्वं संपन्नमित्यतिथये वक्तव्यंवचनंभाषमाणां । धृतं धीरं यथा तथा मनोविशेषणं वा । तस्या हरणे मनः समार्पयत् निहितवान् ॥ ३६ ॥ सुवेषं शोभनाकारं मृगयागतं मृगयार्थंगतं पतिं प्रतीक्षमाणा प्रतिपालयन्ती । हरितं यत्र गतौ तौ तां दिशं विवीक्षमाणा विविधं पश्यन्ती । महद्वनमेव ददर्श रामलक्ष्मणौ तु न ददर्श ॥३७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षट्चत्वारिंशः सर्गः ॥ ४६ ॥

ति० उपायानांब्राह्मणत्वप्रतिपत्त्यैरावणेनकृतानांकाषायवस्त्रब्रह्मघोषदण्डादीनांदर्शनात् । उद्वेष्टुंउपेक्षितुंअशक्यमितिविचार्येतिशेषः । तथागतं ब्राह्मणवेषेणागतं । रावणं ब्राह्मणवदेव न्यमन्त्रयत् । पाठान्तरंत्वत्राशक्तकल्पितं । अयमेवरक्षस्संहारोपाय इतिदर्शनादित्यपि गूढमत्र ॥ ३४ ॥ **टीका०** "यतीनांपूजनंकार्यं स्त्रियावापुरुषेणवा" इत्युक्तत्वात्सीता तमपूजयदितिभावः ॥ ३५ ॥ **वि०** मनस्समर्पयित्वात्मवधायेतिपाठे हरणेधृतंनिश्चितंमनस्समर्पयित्वा दत्वास्थितइत्यर्थः ॥ ३६ ॥ **रामानु०** हरितं श्यामं ॥ ३७ ॥ **ती०** फलश्रुतिस्स्कान्दे—"सीतारावणसंवादं येशृण्वन्तिनरोत्तमाः । नतेषांपापराशिभ्यः पीडालोकेभविष्यति" इति ॥ ३८ ॥ इतिषट्चत्वारिंशस्सर्गः ॥ ४६ ॥

[**पा०**] १ क. च. छ. ज. ञ. तमागतं. २ क. घ. च. छ. ज. मुपायदर्शनं. क. ङ. झ. ञ. ट. मुपायदर्शनान्न्यमन्त्रयत. ३ ङ. झ. ट. त्वथागतं. ४ ङ. झ. ञ. ट. समर्पयामासवधाय. च. छ. ज. समर्पयित्वाऽऽत्मवधाय. क. ख. समर्पयन्नात्मवधाय. ५ ङ—ञ. निरीक्षमाणा. ग. समीक्षमाणा.

सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

सीतयारावणंप्रतिशापभीत्या स्वयाथात्म्येनसहवनागमनकारणकथनपूर्वकंतद्याथात्म्यप्रश्नः ॥ १ ॥ लब्धावकाशेनरावणेन सीतांप्रतिस्वस्यरावणत्वाविष्करणेनस्ववैभवप्रशंसनपूर्वकंस्वकलत्रीभवनप्रार्थना ॥ २ ॥ सीतयारावणंप्रतिरामगुणानुवर्णनेन स्वस्यतदन्यकामनाऽभावनिवेदनपूर्वकंसदृष्टान्ताभिधानंरामरावणयोस्तारतम्यप्रतिपादनेनबहुधातद्गर्हणम् ॥ ३ ॥

रावणेन तु वैदेही [1]तथा पृष्टा [2]जिहीर्षता ॥ परिव्राजक[3]लिङ्गेन शशं[4]सात्मानमङ्गना ॥ १ ॥
ब्राह्मणश्चा[5]तिथिश्चायमनुक्तो हि शपेत माम् ॥ इति ध्यात्वा मुहूर्तं तु सीता वचनमब्रवीत् ॥ २ ॥
दुहिता जनकस्याहं मैथिलस्य महात्मनः ॥ सीता नाम्नाऽस्मि भद्रं ते [6]रामभार्या द्विजोत्तम ॥ ३ ॥
उषित्वा द्वादश समा इक्ष्वाकूणां निवेशने ॥ भुञ्जानान्मानुषान्भोगान्सर्वकामसमृद्धिनी ॥ ४ ॥
[7]ततस्त्रयोदशे वर्षे राजाऽमन्त्रयत प्रभुः ॥ अभिषेचयितुं रामं [8]समेतो राजमन्त्रिभिः ॥ ५ ॥
तस्मिन्संभ्रियमाणे तु [9]राघवस्याभिषेचने ॥ कैकेयी नाम [10]भर्तारमार्या सा याचते वरम् ॥ ६ ॥
[11]प्रतिगृह्य तु कैकेयी श्वशुरं [12]सुकृतेन मे ॥ [13]मम प्रव्राजनं भर्तुर्भरतस्याभिषेचनम् ॥
द्वावयाचत भर्तारं सत्यसन्धं नृपोत्तमम् ॥ ७ ॥

अथ मैथिली आर्जवेन स्वस्वरूपमुक्त्वा रावणानार्जवदर्शनेन स्वपातिव्रत्यानुरूपं तमुपालभते—रावणेन त्वित्यादिना। जिहीर्षता हर्तुमिच्छता। तेन कापट्येन पृष्टापि यतिचिह्नं पुरस्कृत्य स्वयाथात्म्यमुक्तवतीति भावः ॥ १ ॥ यतिवेषंप्रत्यात्मवंशं सा किमर्थमुक्तवतीत्यत्राह—ब्राह्मणश्चेति ॥ २ ॥ कासीत्यस्योत्तरमाह—दुहितेति। कस्येत्यस्योत्तरमाह—रामेति ॥ ३ ॥ कुतश्चिदित्यादेरुत्तरमाह–उषित्वेत्यादिना। विवाहानन्तरं इक्ष्वाकूणां निवेशने अयोध्यायां। द्वादशसमाः द्वादशवत्सरानुषित्वा तत्र सर्वकामसमृद्धिनी काम्यन्त इति कामाः भोगोपकरणस्रक्चन्दनादीनि तेषां समृद्धं समृद्धिः भावे निष्ठा। तद्वती सती मानुषान्भोगान् रतिक्रीडाः। अग्राम्यत्वाय मानुषानित्युक्तं। वस्तुतः स्वयं दिव्यभोगपरतया मानुषानित्यवशमुक्तवती। यद्वा मानुषान् मनुष्यत्वेनावतीर्णरामकृतान् भोगान्। अमानुषानिति वा छेदः। मनुष्यदुर्लभान् दिव्यान्भोगानित्यर्थः। भुञ्जाना अभवमिति शेषः। सर्वकामसमृद्धिनि इति सप्तम्यन्तपाठे सर्वकामसमृद्धिनि इक्ष्वाकूणां इक्ष्वाकुवंश्यस्य रामस्य। पूजायां बहुवचनं। व्रीडया भर्तृनामाग्रहणं। निवेशने गृहे। द्वादश समाः द्वादश वत्सरान्। अत्यन्तसंयोगे द्वितीया। अमानुषान्भोगान् भुञ्जाना अनुभवन्ती सती उषित्वा उषितवत्यस्मि। व्यत्ययेन त्वाप्रत्ययः ॥ ४ ॥ राजा दशरथः। अमन्त्रयत् अकथयत्। राजमन्त्रिभिः मन्त्रिराजैः मन्त्रिश्रेष्ठैरिति यावत्। राजदन्तादित्वात्परनिपातः ॥ ५ ॥ तस्मिन् रामाभिषेचने। संभ्रियमाणे आरभ्यमाणे सति। आर्या पूज्या मम श्वश्रूरित्यर्थः। सा प्रसिद्धा कैकेयी वरं याचते अयाचत ॥ ६ ॥ कं वरं कमयाचतेत्यत्राह—प्रतिगृह्येति। सार्धश्लोक एकान्वयः। कैकेयी मे श्वशुरं स्वस्य भर्तारं। सत्यसन्धं सत्यप्रतिज्ञं। नृपोत्तमं दशरथं सुकृतेन प्रतिगृह्य धर्मेणशापयित्वा। यद्वा। सुकृतेनोपकारेण प्रतिगृह्य वशीकृत्य। स्वकृतप्राणप्रदानोपकारस्मारणेन राजानं वशीकृत्येत्यर्थः। मम भर्तुः प्रव्राजनं भरतस्याभिषेचनमित्येवंरूपौ द्वौ

ति० ननु पूजामात्रंकर्तव्यं किं प्रतिवचनेनेत्यत्राह—**ब्राह्मणश्चेति**। एषअनुक्तइत्यार्षोसन्धिः ॥ अनुक्तः अनुक्तप्रतिवचनः ॥ २ ॥ **ति०** ममार्या ममपूज्याश्वश्रूः। अनार्येतिक्वचित्पाठः ॥ ६ ॥

[पा] १ ङ. छ. झ. ञ. ट. तदा. २ च. ज. जिहीर्षया. ङ. झ. ञ. ट. जिहीर्षुणा. ३ ङ—ट. रूपेण. ४ क. ख. घ. ङ. छ. ञ. ट. त्मानमात्मना. ५ क. ख. च. छ. ज. ञ. श्चातिथिश्चैवह्यनुक्तो. घ. ङ. झ. ट. श्चातिथिश्चैषअनुक्तो. ६ ख. घ. रामस्यमहिषीद्विज. ङ. झ. ट. रामस्यमहिषीप्रिया. ७ क—ट. तत्रत्रयोदशे. ८ ख. सर्वेषांमतमास्थितः. ९ ख. मध्यमामहिषीविभोः. १० ङ—ट. भर्तारंममार्यायाचते. ख. भर्तारमनार्यायाचते. ११ ख. ग. ङ. छ. झ. ट. परिगृह्य. १२ च. छ. ज. ञ. सुकृतेनवै. १३ ख. विवासनंचमे.

नाद्य भोक्ष्ये न च स्वप्स्ये न पास्ये च [1]कथंचन ॥ एष मे जीवितस्यान्तो रामो [2]यद्यभिषिच्यते ॥ ८ ॥
इति ब्रुवाणां कैकेयीं श्वशुरो मे स [3]मानदः ॥ अयाचतार्थैरन्वर्थैर्न च याञ्चां चकार सा ॥ ९ ॥
मम भर्ता महातेजा वयसा पञ्चविंशकः ॥ अष्टादश हि वर्षाणि मम जन्मनि गण्यते ॥ १० ॥
रामेति प्रथितो लोके गुणवान्सत्य[4]वाञ्शुचिः ॥ विशालाक्षो महाबाहुः सर्वभूतहिते रतः ॥ ११ ॥
[5]कामार्तस्तु [6]महातेजाः पिता दशरथः स्वयम् ॥ कैकेय्याः प्रियकामार्थं तं रामं नाभ्यषेचयत् ॥ १२ ॥

वरावयाचत ॥ ७ ॥ पास्य इत्यात्मनेपदमार्षम् । एषः अभिषेकः ॥ ८ ॥ मानदः बहुमानप्रदः । अन्वर्थैः अर्थानुगतैः सप्रयोजनैरिति यावत् । उपभोगक्षमैरित्यर्थः । अर्थैः सुवर्णरत्नादिभिः । कैकेयीमयाचत वरद्वयप्रतिनिधित्वेनैतानर्थान्प्रतिगृहाणेति प्रार्थयामासेत्यर्थः । सा तां याञ्चां न चकार नाङ्गीचकार ॥ ९ ॥ वस्तुतो मम भर्ता प्रव्राजनायोग्यः बालत्वाद्गुणवत्त्वाच्चेत्याह—मम भर्तेति । पञ्चोत्तरा विंशतिः पञ्चविंशतिः वयसा पञ्चविंशतिवर्षाण्यर्हतीति पञ्चविंशकः । "विंशतित्रिंशद्भ्यां ड्वुनसंज्ञायां" इत्यार्हीयो ड्वुन्प्रत्ययः । "संख्यापूर्वपदानां तदन्तग्रहणमलुकि" इति तदन्तविधिः । पञ्चविंशतिवर्ष इत्यर्थः । वयःपरिमाणं वननिर्गमनकालिकं । मम जन्मनि सति वर्षाण्यष्टादशेति गण्यते । रामस्य जन्मारभ्य द्वादशे वर्षे विश्वामित्रागमनं । तदनन्तरं वैदेह्या सह नगरे द्वादशवर्षाणि वासं कृतवान् । ततः परं त्रयोदशे वर्षे यौवराज्याभिषेकारम्भः । ततश्च वनप्रवेशसमये रामः पञ्चविंशतिवर्षार्हः । ततो मुनीनामाश्रमेषु दश वत्सराः पञ्चवट्यां त्रयः वनवासस्य चतुर्दशे वर्षे सीताहरणं । सीतायाश्च भूगर्भादाविर्भावानन्तरं मिथिलायां षट् संवत्सराः ततो विवाहानन्तरमयोध्यायां द्वादश इत्येवमष्टादश वर्षा गता वनवासारम्भ इत्युक्तं । विस्तरेणायमर्थः "ऊनषोडशवर्षो मे" इत्यत्र प्रत्यपादि । इदानीं तु रामः अष्टत्रिंशद्वर्षः मम त्वेकत्रिंशद्वर्षाः गताः । इदानीं तु द्वात्रिंशो वर्षो वर्तते । अस्मिञ्श्लोके मम भर्तेत्यत्र भकारो गायत्र्याः नवमाक्षरं । अष्टसहस्रश्लोका गताः ॥ १० ॥ एवं वनवासायोग्यं वय इत्युक्त्वा गुणवत्तया प्रव्राजनानर्हत्वमाह—रामेतीति । गुणवान् सौशील्यवान् ॥ ११ ॥ एवंभूतस्य प्रव्राजनं दशरथदोषकृतमित्याह—कामार्त इति । नाभ्यषेचयत् कैकेयीसंमतिं विनेति शेषः । तत्र हेतुः—प्रियकामार्थमिति । प्रियकरणकामाय प्रतिज्ञातकैकेयीप्रियकरणनिर्वाहायेत्यर्थः । तव प्रियं करिष्यामीति प्रथमप्रतिज्ञाकरणे हेतुः—कामार्त इति । कामार्ततया प्रथमं तव यत्प्रियं तत्करिष्यामीति प्रतिज्ञाय पश्चाद्रामप्रव्राजनेतया वृते

ति० वयसापञ्चविंशकः । वननिर्गमनकालइतिशेषः । नन्विदमयुक्तं—ऊनषोडशवर्षोयमिति विश्वामित्रंप्रतिदशरथोक्तेः उषित्वाद्वादशसमाइत्यत्रोक्तेश्चेतिचेन्न । अल्पान्तरत्वात् । अतितरुणावस्थायामपिराज्यंत्यक्तवानित्यर्थेतात्पर्येणास्थयातथोक्तेः । यद्वाऽतिक्रान्तपञ्चविंशकइत्यर्थः । ममभर्तावयसा महातेजाः । अतितरुणइत्यर्थः । पञ्चविंशकः साङ्ख्यसिद्धंपञ्चविंशतत्वंचैतन्यंसोयमेव । एतच्चैत्यन्येनैवजगद्व्याप्तं । नततोऽधिकंकिञ्चिदस्तीतिसूचयितुंतथोक्तिरितितत्वं । ममजन्मतोवनप्रवेशसमयेअतीतानीत्यर्थः । गण्यतइत्यार्षमेकत्वं । ममपञ्चतन्मात्रपञ्चमहाभूतपञ्चेन्द्रियाहङ्कारबुद्धिमनोरूपाण्यष्टादशवर्षाणिपर्वाणि जन्मनि कार्येगण्यन्तइति तन्मूलीभूता प्रकृतिरहमितिसूचितम् । **स०** वयसापञ्चविंशकः तदानीं । यदत्रवक्तव्यंतदुक्तमयोध्याकाण्डे । एतज्जन्मनि ममवर्षाण्यष्टादशेति गण्यते गण्यन्ते । यद्वा जन्मेतिद्वितीयान्तं । आरभ्येतिशेषः । जन्मारभ्य ममवर्षाण्यष्टादशेत्यन्वयः । लोकेयोरामेतिप्रथितोनिगण्यते प्रथमतश्शरेषुयश्चगुणवान् इति यच्छब्दाध्याहारेण एतच्छ्लोकस्य कैकेय्याःप्रियकामार्थंराममित्यत्रत्यतच्छब्देनान्वयः । एतादृशगुणवन्तमपिरामंकामार्तस्सन्नाभ्यषेचयदिति स्तोतुंरामं प्रवृत्तत्वादनयोश्श्लोकयोर्नासंगतिरिति बोध्यं ॥ **शि०** वयसापञ्चविंशकः पञ्चविंशेनयुक्ताः काः त्रयोयस्यसः अष्टाविंशतिवार्षिकइत्यर्थः । अयोध्यातोनिर्गमनसमये इतिशेषः । अतएव "ऊनषोडशवर्षोमे रामोराजीवलोचनः" इतिविश्वामित्रंप्रतिदशरथोक्त्या "उषित्वाद्वादशसमा इक्ष्वाकूणां निवेशने" इति रावणंप्रतिसीतोक्त्याच सिद्धस्य वनप्रवेशसमये अष्टाविंशतिवार्षिकत्वस्य नापलापः । निरूपितंचैतत् "ऊनषोडशवर्षोमे" इत्यत्रत्यव्याख्याने । ममजन्मनि प्रादुर्भावेसतितु अष्टादशवर्षाणिगण्यन्ते । अयोध्यातोनिर्गमनसमयेअष्टादशवर्षाणिमेत्यतीतानीत्यर्थः ॥ १० ॥ **शि०** कामार्तः कामेनकिञ्चिद्विषयकेच्छयाआर्तोयुक्तः ॥ १२ ॥

[पा०] १ क. ख. ग. ङ. च. ज—ट. कदाचन. २ ङ. झ. ट. यदभिषिच्यते. ३ ङ. झ. ट. पार्थिवः. ४ ङ. झ. ट. सत्यवाञ्शीलवाञ्शुचिः. ५ च. छ. ज. ञ. कामार्तश्च. ख. कामार्थंच. ६ ङ. झ. ट. महाराजः. ख. महाबाहुः.

अभिषेकाय तु पितुः समीपं राममागतम् ॥ कैकेयी मम भर्तारमित्युवाच [1]धृतं वचः ॥ १३ ॥
तव पित्रा समाज्ञप्तं ममेदं शृणु राघव ॥ भरताय प्रदातव्यमिदं राज्यमकण्टकम् ॥ १४ ॥
[2]त्वया हि खलु वस्तव्यं नव वर्षाणि पञ्च च ॥ वने प्रव्रज काकुत्स्थ पितरं [3]मोचयानृतात् ॥ १५ ॥
[4]तथेत्युक्त्वा च तां रामः कैकेयीमकुतोभयः ॥ चकार [5]तद्वचस्तस्या [6]मम भर्ता दृढव्रतः ॥ १६ ॥
दद्यान्न प्रतिगृह्णीयात्सत्यं ब्रूयान्न चानृतम् ॥ एतद्ब्राह्मण रामस्य [7]ध्रुवं व्रतमनुत्तमम् ॥ १७ ॥
तस्य भ्राता तु [8]द्वैमात्रो लक्ष्मणो नाम वीर्यवान् ॥ रामस्य पुरुषव्याघ्रः सहायः समरेऽरिहा ॥ १८ ॥
[9]स भ्राता लक्ष्मणो नाम [10]धर्मचारी दृढव्रतः ॥ अन्वगच्छद्धनुष्पाणिः प्रव्रजन्तं मया सह ॥ १९ ॥
जटी तापसरूपेण मया सह सहानुजः ॥ प्रविष्टो दण्डकारण्यं [11]धर्मनित्यो [12]जितेन्द्रियः ॥ २० ॥
ते वयं प्रच्युता राज्यात्कैकेय्यास्तु कृते त्रयः ॥ [13]विचराम द्विजश्रेष्ठ वनं गम्भीरमोजसा ॥ २१ ॥
समाश्वस मुहूर्तं तु शक्यं वस्तुमिह त्वया ॥ आगमिष्यति मे भर्ता वन्यमादाय पुष्कलम् ॥
[[14]रुरून् गोधान्वराहांश्च हत्वाऽऽदा[15]यामिषान्बहून्] ॥ २२ ॥
स त्वं नाम च गोत्रं च [16]कुलं चाचक्ष्व तत्त्वतः ॥ एकश्च द[17]ण्डकारण्ये किमर्थं चरसि द्विज ॥ २३ ॥
एवं ब्रुवन्त्यां सीतायां [18]रामपत्न्यां महाबलः ॥ प्रत्युवाचोत्तरं तीव्रं रावणो [19]राक्षसाधिपः ॥ २४ ॥

प्रतिज्ञाभङ्गं कर्तुमक्षमो नाभ्यषेचयदित्यर्थः ॥ १२ ॥ सामान्यतआह्वानेनाभिषेकाय भवितुमर्हति मदाह्वानमित्यागतमित्यर्थः । धृतं धैर्ययुक्तमिति क्रियाविशेषणं ॥ १३ ॥ तवेत्यादिश्लोकद्वयमेकान्वयं । त्वद्विषये पित्रा समाज्ञप्तं समाज्ञापनं । मम मत्तः । शृणु । इदं राज्यं भरताय प्रदातव्यं तदर्थं त्वया नवपञ्चच वर्षाणि चतुर्दशवर्षाणीत्यर्थः । वने वस्तव्यं तदर्थं प्रव्रज अनृतात् प्रतिज्ञाभङ्गरूपात् ॥ १४—१५ ॥ अकुतोभयः राज्यत्यागवनवासाभ्यां भयरहितः ॥१६॥ दृढव्रत इत्युक्तमुपपादयति—दद्यादिति । ध्रुवं निश्चलं । अनुत्तमं अवश्यपरिपालनीयं ॥ १७ ॥ द्वयोर्मात्रोरपत्यं पुमान् द्वैमात्रः । अण् प्रत्ययः । "मातुरुत्सङ्ख्या—" इत्युदादेशाभाव आर्षः । गुर्वक्षरं च छान्दसम् । अरिहेतिछन्दोवद्भावात् "बहुलं छन्दसि" इति सूत्रेण ब्रह्मादिभिन्नेप्युपपदे क्विप् । अन्येभ्योपि दृश्यते" इत्यत्र दृशिग्रहणस्य विध्यन्तरोपसंग्रहार्थत्वाद्वा क्विप् ॥ १८ ॥ मया सह अन्वगच्छदित्यन्वयः ॥ १९ ॥ तापसरूपस्यानेकरूपत्वाज्जटीति विशेषयति ॥ २० ॥ कृते प्रयोजनाय । क्रियते संपाद्यत इति कृत् । संपदादित्वात् क्विप् । गम्भीरं दुष्प्रवेशं । ओजसा बलेन । "ओजो दीप्तौ बले—"इत्यमरः ॥ २१ ॥ समाश्वस समाश्वसिहि विश्रान्तिं कुर्वित्यर्थः । वस्तुं स्थातुं । शक्यं पवित्रदेशत्वादिति भावः । पुष्कलं समग्रं ॥ २२ ॥ स त्वं एवं समाश्वस्तस्त्वं । कुलं गृहं । "कुलमन्वयसंघातगृहपर्याश्रमेष्वपि—" इति निघण्टुः । ननु संन्यासिनं प्रति कुलगोत्रप्रश्नोनुपपन्नः एकाकितयारण्ये संचारश्च यतेर्धर्म एव अतोसङ्गत इव प्रतिभातीति चेत् उच्यते । पूर्वाश्रमनामगोत्रप्रश्नोयं । "भिक्षार्थं ग्रामं प्रविशेत्" इति श्रुत्या भिक्षोर्ग्रामसमीपारण्ये वस्तव्यं नतु ग्रामप्रसङ्गरहितेरण्य इति कथं भवान् भिक्षाप्रदजनरहितेचरतीति प्रश्न उपपद्यते ॥ २३ ॥ आत्मवै-

---

तनि० दद्यादित्यनेन अर्थिनांयावदपेक्षितंदानंविवक्षितं । नप्रतिगृह्णीयादित्यनेनावाप्तसमस्तकामत्वंव्यज्यते ॥ १७ ॥ **ती०** द्वैमात्रः द्वयोर्मात्रोरपत्यं सापत्नीकमातुःपुत्रइत्यर्थः ॥ **ति०** वैमात्रः शुभ्रादिषुविमातृशब्दपाठेप्यार्षोऽण् । असहोदरोभ्रातेत्यर्थः । विभिन्नायामातुरपत्यंवैमात्रः ॥ १८ ॥ **स०** वन्यंफलाद्यादाय आमिषमादायेति वैलक्षण्यद्योतनायद्विवारमुक्तिः ॥

[पा०] १ क. ग. च. छ. ज. ञ. दृढं. ख. ङ. झ. ट. द्रुतं. २ क—ट. लयातु. ३ ग. मोचयत्नृणात्. ४ ङ. झ. ट. तथेत्युवाच. ५ च. छ. ज. ञ. वचनंतस्या.. ङ. झ. ट. तद्वचश्शुला. ६ क. ख. ग. ङ. झ. ट. भर्तामम. ७ ख. घ—ज. ञ. ट. व्रतंध्रुवं. झ. व्रतंधृतं. ८ ङ. झ—ठ. वैमात्रो. ९ च. छ. ज. ञ. तद्भ्राता. १० ङ. झ. ट. ब्रह्मचारी. ११ क. धर्मयुक्तो. १२ ग. ङ—ट. दृढव्रतः. १३ ख. ग. विचरामो. १४ इदमर्धं ख. ङ. झ. ट. पाठेषुदृश्यते. १५ ख. ङ. झ. ट. यामिषंबहु. १६ ख. ग. ङ. झ. ट. कुलमाचक्ष्व. १७ च. छ. ज. दण्डकारण्यं. १८ ङ. राजपत्न्यां. १९ ख. राक्षसेश्वरः.

येन:वित्रासिता लोकाः सदेवासुरपन्नगाः ॥ अहं तु रावणो नाम सीते रक्षोगणेश्वरः ॥ २५ ॥
त्वां तु काञ्चनवर्णाभां दृष्ट्वा कौशेयवासिनीम् ॥ रतिं स्वकेषु दारेषु नाधिगच्छाम्यनिन्दिते ॥ २६ ॥
बह्वीनामुत्तमस्त्रीणामाहृतानामितस्ततः ॥ सर्वासामेव भद्रं ते ममाग्रमहिषी भव ॥ २७ ॥
लङ्का नाम समुद्रस्य मध्ये मम महापुरी ॥ सागरेण परिक्षिप्ता निविष्टा [3]नगमूर्धनि ॥ २८ ॥
तत्र सीते मया सार्धं वनेषु [4]विहरिष्यसि ॥ न [5]चास्यारण्यवासस्य स्पृहयिष्यसि भामिनि ॥ २९ ॥
[6]पञ्च दास्यः सहस्राणि सर्वाभरणभूषिताः ॥ सीते परिचरिष्यन्ति भार्या भवसि मे यदि ॥ ३० ॥
रावणेनैवमुक्ता तु कुपिता जनकात्मजा ॥ प्रत्युवाचानवद्याङ्गी तमनादृत्य राक्षसम् ॥ ३१ ॥

भवप्रकटनावसरप्रतीक्षकतया तीव्रं झटितीत्युक्तं ॥ २४ ॥ लोकाः जनाः ॥ २५ ॥ काञ्चनवर्णाभां स्वर्णवर्णतुल्यकान्तिं ॥ २६ ॥ उत्तमस्त्रीणामिति निर्धारणे षष्ठी ॥ २७ ॥ समुद्रमध्ये वर्तमाने नगमूर्धनि गिरिशृङ्गप्रदेशे । निविष्टा कृतनिवेशा । सागरेण सगरनिर्मितेनसमुद्रेण । परिक्षिप्ता परिवृता । पुरी मम अस्तीति शेषः ॥ २८ ॥ वनेषु उद्यानेषु । अरण्यवासस्येति चतुर्थ्यर्थे षष्ठी ॥ २९ ॥ पञ्च सहस्राणि दास्यस्त्वां परिचरिष्यन्ति ॥३०॥ तुशब्देन पूर्वोक्तोपचारवचनविलक्षणवचना ॥ ३१ ॥

यद्वा अदभक्षणइत्यस्माद्भावेघञि आदाय भक्षणार्थमित्यर्थोबोध्यः ॥ २२ ॥ **ती०** वस्तुतस्तु त्वां ममेष्टदेवतामित्यर्थः । दृष्ट्वा स्वकेषुपुत्रमित्रादिषुदारेषुच । रतिं इच्छां । नाधिगच्छामि । ममेष्टदेवतायास्तवदर्शनेनानन्दपूर्णोऽहं सर्वतोनिवृत्तोऽस्मीतिभावः ॥ २६ ॥ **ती०** किंच पञ्चेति । पञ्चसहस्राणिदास्यो मेमयासार्धं परिचरिष्यन्ति यदि । तदेतिशेषः । तदा भार्या भया कान्त्या आर्या पूज्याभवसीतिसंबन्धः ॥३०॥ **ति०** पञ्चेत्यादि । रक्षोयोनौतमोगुणप्रधानायांजातत्वादुद्रिक्ततमसा भगवन्मायया ज्ञानाच्छादनादेवमुक्तिः । सर्वथा तत्वज्ञोरावणः कथमेवंवदेदितितु श्रद्धाजाड्यमेव । तत्वज्ञचिह्नानुपलंभात् । सीतारामौ सर्वेश्वरावित्येतन्मात्रज्ञानं रावणस्यास्त्येवेत्यपि श्रद्धाजाड्यमेव । विष्णुपुराणादिविरोधात् । तथाचोक्तंविष्णुपुराणे—मैत्रेयउवाच "हिरण्यकशिपुत्वेच रावणत्वेचविष्णुना । अवापनिहतो भोगानप्राप्यानमरैरपि । नलयंतत्रतेनैव निहतस्सकथंपुनः । संप्राप्तश्शिशुपालत्वे सायुज्यंशाश्वतेहरौ । एतदिच्छाम्यहंश्रोतुं सर्वधर्मभृतांवर । कौतूहलपरेणैतत्पृष्टोमे वक्तुमर्हसि । पराशरउवाच । दैत्येश्वरस्यतुवधायाखिललोकोत्पत्तिस्थितिविनाशकारिणा पूर्वांतनुंगृह्णता नृसिंहरूपमाविष्कृतं । तत्र हिरण्यकशिपोर्विष्णुरयमित्येवं नमनस्यभूत् । निरतिशयपुण्यजातसंभूतमेतत्सत्वमिति रजउद्रेकप्रेरितैकाग्रमतिस्तद्भावनायोगात्ततोवाप्तवधहैतुकीं निरतिशयामेवाखिलत्रैलोक्याधिक्यधारिणीं दशाननत्वे भोगसंपदमवाप । नातस्तस्मिन्ननादिनिधने परब्रह्मभूते भगवत्यनालंबनीकृते मनसस्तत्रलयम् । दशाननत्वेप्यनङ्गपराधीनतया जानकीसमासक्तचेतसो दाशरथिरूपधारिणस्तद्रूपदर्शनमेवासीत् । नायमच्युतइत्यासक्तिर्विपद्यतोन्तःकरणस्य मानुषबुद्धिरेवकेवलमभूत् । विपद्यतइति विपद्यतोपीत्यर्थः । तस्मिन्नपिसमये विष्णुत्वबुद्धिर्नासीदितिभावः । पुनरच्युतविनिपातनमात्रफलमखिलभूमण्डलश्लाघ्यचेदिराजकुलजन्माव्याहतंचैश्वर्यं शिशुपालत्वेचावाप । तत्रत्वखिलान्येव भगवन्नामकारणान्यभवन् । नामानि गोविन्दादीनि । कारणानि गवांरक्षणादीनीत्यर्थः । ततश्च तत्कारणकृतानांतेषामशेषाणामेवाच्युतनाम्नामनवरतमनेकजन्मसंवर्धितविद्वेषानुबन्धिचित्तो विनिन्दन्संतर्जनादिषूच्चारणमकरोत् । तच्च रूपमुत्फुल्लपद्मदलामलाक्षमत्युज्ज्वलपीतवस्त्रधार्यनलकिरीटकेयूरकटकोपशोभितमुदारपीवरचतुर्बाहु शङ्खचक्रगदाधरमतिप्रौढवैरानुभावादटनभोजनस्नानासनशयनादिष्ववस्थान्तरेषु नैवापययावस्यात्मचेतसः । ततस्तमेवानुक्रोशेषूच्चारयंस्तमेवहृदयेधारयन्नात्मवधाय भगवदस्त्रचक्रांशुमालोज्ज्वलमक्षय्यतेजस्स्वरूपं परमब्रह्मस्वरूपमपगतरागद्वेषादिदोषं भगवन्तमद्राक्षीत् । तावच्च भगवच्चक्रेणाशुव्यापादितः । तेन तत्स्मरणदग्धाखिलाघसंचयो भगवतैवान्तमुपनीतस्तस्मिन्नेवलयमुपययौ । एतत्तवाभिहितं । भगवानिहकीर्तितः संस्मृतश्च द्वेषानुबन्धेनाप्यखिलसुरासुरादिदुर्लभंफलंप्रयच्छति किमुतसम्यग्भक्तिमन्तं " इति । लोकदृष्ट्यातु सीतासादृश्यात्सीताबुद्ध्याहरणाच्चाततायित्वसंपत्त्या तद्वधेभगवतःप्रवृत्तिः । एवंचेदृशोक्तीनां यद्वातद्वाप्रकारेणान्यथायोजनप्रयासस्तीर्थादीनां विफलएव । विष्णुपुराणोक्तरीत्यैवभागवतउक्तं—" एतेचांशकलाःपुंसः कृष्णस्तुभगवान्स्वयम् " इति । एतइत्यनेन पूर्वोक्ताअवतारा ऋष्यादयश्च परामृश्यन्ते । पुंसः परमेश्वरस्य । तत्रावतारा अंशाः । ऋष्यादयः कलाः । यद्यपि कृष्णोप्यंशएव । तत्रैव दशमे " तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणिशंस नः " इत्याद्युक्तेः । " उज्जहारात्मनःकेशौ सितकृष्णौमहामुने । " इति विष्णुपुराणाद्युक्तेः । द्वितीये-

[पा०] १ ङ. झ. ट. मानुषाः. २ क. ख. ग. ङ—ट. अहंस. ३ क. ग. ङ. ट. गिरिमूर्धनि. ४ ङ.—ट. विचरिष्यसि. ५ ङ—ट. चास्यवनवासस्य. ६ ख. ग. दासीसहस्राणि.

महागिरिमिवाकम्प्यं महेन्द्रसदृशं[1] पतिम् ॥ महोदधिमिवाक्षोभ्यमहं राममनुव्रता ॥ ३२ ॥
सर्वलक्षणसंपन्नं न्यग्रोधपरिमण्डलम् ॥ सत्यसन्धं महाभागमहं[2] राममनुव्रता ॥ ३३ ॥
महाबाहुं महोरस्कं सिंहविक्रान्तगामिनम् ॥ नृसिंहं सिंहसंकाशमहं राममनुव्रता ॥ ३४ ॥
पूर्णचन्द्राननं रामं[3] राजवत्सं[4] जितेन्द्रियम् ॥ पृथुकीर्तिं महात्मानमहं[5] राममनुव्रता ॥ ३५ ॥
त्वं पुनर्जम्बुकः सिंहीं मामिच्छसि[6] सुदुर्लभाम् ॥ नाहं शक्या त्वया स्प्रष्टुमादित्यस्य प्रभा यथा ॥ ३६ ॥
पादपान्काञ्चनान्नूनं बहूपश्यसि मन्दभाक् ॥ राघवस्य प्रियां भार्यां[7] यस्त्वमिच्छसि रावण[8] ॥ ३७ ॥
क्षुधितस्य[9] हि सिंहस्य मृगशत्रोस्तरस्विनः ॥ [आस्यं[10] प्रविश्य तरसा जिह्वामाहर्तुमिच्छसि ॥
वल्मीकान्ताद्विनिस्सृत्य प्रत्याशां वीक्षितस्यच ॥]आशीविषस्य वदनाद्[11]दंष्ट्रामादातुमिच्छसि ॥ ३८ ॥

महेन्द्रसदृशं पतिं पतित्वे स्वामित्वे महेन्द्रतुल्यमित्यर्थः । अनुव्रता अनुकूलं व्रतं यस्याः सा राममुद्दिश्यानुव्रता ॥३२॥ न्यग्रोधपरिमण्डलं वटवृक्षमिव महापरिणाहं । यद्वा न्यग्रोधवत् बहुशाखबन्धुस्तोमं । तद्वत्सर्वसमाश्रयणीयमितिवा । यद्वा " कूपोदकं वटच्छाया युवतीनां स्तनद्वयम् । शीतकाले भवत्युष्णमुष्णकाले च शीतलं " इत्युक्तरीत्या सर्वकालेपि सर्वजनानुकूलमित्यर्थः ॥ ३३ ॥ सिंहवद्विक्रान्तं पराक्रमयुक्तं सगर्वमिति यावत् । तथा गच्छतीति सिंहविक्रान्तगामिनं । सिंहसंकाशं पराक्रमे सिंहतुल्यं । नृसिंहं पुरुषश्रेष्ठं ॥ ३४ ॥ राजवत्सं राजकुमारं ॥ ३५ ॥ एवं स्वभर्तुरतिशयमुक्त्वा तस्य हीनत्वमाह—त्वमित्यादिना । त्वं तु जम्बुकः गोमायुः । निगीर्याध्यवसानं । तथा सिंहीमित्यत्रापि । आदित्यस्य प्रभेव रामस्याविनाभूताहं त्वया स्प्रष्टुं न शक्येत्यर्थः ॥ ३६ ॥ आसन्नमरणाः वृक्षान् स्वर्णमयान्पश्यन्तीति प्रसिद्धिः । मन्दभाक् मन्दभाग्यः । यद्वा मन्दं क्षीणं आयुरादिकं भजतीति मन्दभाक् । मदभिलाषयुक्तस्त्वं सद्यो मरिष्यसीति भावः ॥ ३७ ॥ सर्वात्मना आदानस्याशक्यत्वज्ञापनाय विशेषणानि । आशीविषस्य सर्पस्य । चकारो द्रष्टव्यः । क्षुधितस्य तरस्विन इति चाशीविषस्यापि विशेषणं । अत्र सदृशयोर्वाक्यार्थयोरैक्या-

---

भागवतेप्येवमेव । भारतेप्येवमेव । एतेन " तत्रांशेनावतीर्णस्य " इत्यादिदशमस्थलोकव्याख्यानमपास्तं । तथापि तत्तत्कारणक्ल्तनाम्नां तत्रलाभाद्बहुशोऽज्ञानकार्यनाटनाच्च । शङ्खचक्रादीनां प्रत्यक्षतोदर्शनाच्च स्वयंभगवानित्युक्तिः । नैतावता रामाद्यवताराणां ततोन्यूनत्वमितिभ्रमःकार्यः । श्रीधरोपि–मत्स्याद्यवताराणांसर्वज्ञत्वसर्वशक्तिमत्त्वेपि यावदुपयोगमेवज्ञानशक्त्याविष्कारः । अज्ञानाविष्कारश्चबहुशः । कृष्णत्वेन्त्योल्पः । यथाऽभिमन्युमरणे नाहं तत्रसंनिहितआसं अतस्तस्यमरणमिति । यथा द्रौपद्यास्सभायांनयनकाले नाहंद्वारकायांसंनिहितः किंतु सौभवधार्थंगतोतोभवतामयंक्लेशइति । सौभवधेच मायिकं मृतवसुदेवशरिरंदृष्ट्वा मोहइत्याद्यज्ञाननाट्यमल्पं । रामावतारेपि ज्ञानाविष्कारस्तत्रतत्रदर्शितोदर्शयिष्यतेच । अवताराश्चेमे विराजएवांशाः । भागवतेप्रथमे तृतीयेऽध्याये–" जगृहेपौरुषंरूपं भगवान्महदादिभिः । संभूतंषोडशकलमादौ लोकसिसृक्षया " इत्यादिनावैराजंरूपमुक्त्वा " एतन्नानावताराणां निधानंबीजमव्ययम् । यस्यांशांशेनसृज्यन्ते देवतिर्यङ्नरादयः" इत्युक्तेः । एतदुक्तंवैराजनिधानं कार्यावसानेप्रवेशस्थानं । बीजंउद्गमकारणं अव्ययं स्वयंचिरस्थायि । नकेवलमवताराणामेवबीजं किंतु सर्वेषामित्याह—**यस्येति**। यद्यपि विराट्जीवएव तथापि तदन्तर्यामिणस्तथोपासानायैवमुक्तं । सितकृष्णकेशोद्धारेणच तेषांमूर्धन्यत्वेन मुख्यत्वात्तद्वन्मुख्ययोःप्रधानयोर्मदंशयोस्तत्वज्ञयोस्तद्वर्णयोर्वैकुण्ठस्थभूतलस्थयोर्विष्णुशेषयोरवतारइति सूचितम् । अतएवान्ते कृष्णंप्रति देवदूतेन । त्वांविनास्वर्गोनशोभतेऽतस्त्वमागच्छेति निवेदितमिति स्पष्टंपुराणेषु । अत्र रामंप्रत्यपितथैवोक्तं । अंशत्वंचैषामौपाधिकं । मायायास्सांशत्वादित्यलम् ॥३१॥ **स०** न्यग्रोधपरिमण्डलं न्यग्रोधोव्यामः तत्परिमण्डलं तत्परिमाणं । " व्यामोबाह्वोस्सकरयोस्ततयोस्तिर्यगन्तरम् " इत्यभिधानं । 'व्यामोवटश्चन्यग्रोधौ' इत्यनरसिंहः । यत्तु न्यग्रोधवृक्षवद्विशालं बहुजनाश्रयइतियावदिति नागोजिभट्टादिव्याख्यानं तदभिधानज्ञानदारिद्र्यमूलमित्युपेक्ष्यं ॥ ३३ ॥ **ति०** नृसिंहमित्यस्य हिरण्यकशिपुहन्तृत्वंव्यङ्ग्यम् ॥३४॥ **शि०** आदित्यस्यप्रभेव त्वयास्प्रष्टुं रामात्पृथक्कृत्यनेतुं नाहंशक्या । एतेनस्वस्यरामतेजोरूपवह्निनाऽऽवृतत्वं सूचितं । अतएवलक्ष्मणप्रेषणसमये अग्निंवा-

[पा०] १ क. ख. घ. च. छ. ज. ञ. सदृशद्युतिं. २ ख. घ. महाबाहुमहं. ३ ख. ग. घ. वीरं. ४ घ. राजीवाक्षं. ५ ग. ङ—ट. महाबाहुमहं. ख. महावीर्यमहं. ६ क. ख. घ. ङ—ट. मामिहेच्छसिदुर्लभां. ७ ग. भार्यांसत्त्वं. छ. ञ. भार्यामधिगन्तुत्वमिच्छसि. ८ ङ. झ. ट. राक्षस. ९ क. घ. ङ. च. ज—ट. क्षुधितस्यच. ख. ग. क्षुधितस्येव. १० इदमर्धद्वयं. ख. पुस्तकेदृश्यते. ११ क. घ. तुमुखात्.

न्दरं पर्वतश्रेष्ठं पाणिना हर्तुमिच्छसि ॥ कालकूटं विषं पीत्वा स्वस्तिमान्गन्तुमिच्छसि ॥ ३९ ॥
अक्षि सूच्या प्रमृजसि जिह्वया लेक्षि च क्षुरम् ॥ राघवस्य प्रियां भार्यां योऽधिगन्तुं त्वमिच्छसि ॥४०॥
अवसज्य शिलां कण्ठे समुद्रं तर्तुमिच्छसि ॥ सूर्याचन्द्रमसौ चोभौ पाणिभ्यां हर्तुमिच्छसि ॥
यो रामस्य प्रियां भार्यां प्रधर्षयितुमिच्छसि ॥ ४१ ॥
अग्निं प्रज्वलितं दृष्ट्वा वस्त्रेणाहर्तुमिच्छसि ॥ कल्याणवृत्तां रामस्य यो भार्यां हर्तुमिच्छसि ॥ ४२ ॥
अयोमुखानां शूलानामग्रे चरितुमिच्छसि ॥ रामस्य सदृशीं भार्यां योऽधिगन्तुं त्वमिच्छसि ॥४३॥

यदन्तरं सिंहसृगालयोर्वने यदन्तरं स्यन्दिनिकासमुद्रयोः ॥
सुराग्र्यसौवीरकयोर्यदन्तरं तदन्तरं वै तव राघवस्य च ॥ ४४ ॥
यदन्तरं काञ्चनसीसलोहयोर्यदन्तरं चन्दनवारिपङ्कयोः ॥
यदन्तरं हस्तिबिडालयोर्वने तदन्तरं दाशरथेस्तवैव च ॥ ४५ ॥
यदन्तरं वायसवैनतेययोर्यदन्तरं मद्गुमयूरयोरपि ॥
यदन्तरं सारसगृध्रयोर्वने तदन्तरं दाशरथेस्तवैव च ॥ ४६ ॥
तस्मिन्सहस्राक्षसमप्रभावे रामे स्थिते कार्मुकबाणपाणौ ॥
हृताऽपि तेहं न जरां गमिष्ये वज्रं यथा मक्षिकयाऽवगीर्णम् ॥ ४७ ॥

रोपान्निदर्शनालङ्कारः ॥ ३८ ॥ मन्दरमिति अत्रापि राघवस्य भार्यां यस्त्वमिच्छसीत्यनुषज्यते। स्वस्तिमान् सुखित इत्यर्थः॥ ३९॥ स्वाक्षि प्रमृजसि प्रकर्षेण मार्जनं करोषि। लेक्षि लेहनं करोषि। लिह आस्वादन इत्यस्माल्लुग्विकरणस्थाद्धातोर्लटि मध्यमपुरुषैकवचनं। क्षुरं तीक्ष्णधारं शस्त्रं। अधिगन्तुं प्राप्तुं ॥ ४० ॥ अवसज्येति सार्धश्लोक एकान्वयः। अवसज्य बद्ध्वा ॥ ४१ ॥ कल्याणवृत्तां शुभाचारां॥ ४२ ॥ अयोमुखानां अयोमयाग्राणां। शूलानामग्रे शूलाग्रपङ्क्तिषु। संचरितुमिच्छसीत्यर्थः ॥ ४३ ॥ उक्तं रामोत्कृष्टत्वं रावणनिकृष्टत्वं च सदृष्टान्तमाह—यदन्तरमित्यादिना। सिंहसृगालयोः। "सृगालो वञ्चकः क्रोष्टा" इत्यमरः। यत् अन्तरं भेदः तारतम्यमिति यावत्। "अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये। छिद्रात्मीयविनाबहिरवसरमध्येन्तरात्मनि च" इत्यमरः। वने जले विषये। "जीवनं भुवनं वनं" इत्यमरः। स्यन्दिनिका स्यन्दितुं प्रस्रवितुं शीलमस्या अस्तीति स्यन्दिनिका। ताच्छिल्ये णिनिः। अल्पार्थे कप्रत्ययः। केण इति ह्रस्वः। क्षुद्रनदी स्यन्दिनिका। सुराग्र्यं श्रेष्ठमद्यं। सौवीरकं काञ्चिकं। "आरनालकसौवीरकुल्माषाभिषुतानि च। अवन्तीसोमधान्याम्लकुञ्जलानि च काञ्चिकं" इत्यमरः॥ ४४ ॥ काञ्चनसीसलोहयोरित्यत्र लोहशब्दः प्रत्येकमभिसम्बध्यते। काञ्चनस्यापि नवलोहेषु परिगणनात्। चन्दनवारि चन्दनपङ्कः। बिडालो मार्जारः ॥४५॥ मद्गुः जलवायसः। सारसो हंसविशेषः॥४६॥ तस्मिन रामे स्थिते सति जरां जीर्णतां। मक्षिकया अवगीर्णं ग्रस्तं। वज्रं हीररत्नं। मक्षिकया तण्डुलखण्डभ्रान्त्या ग्रस्तं हीररत्नमित्यर्थः। यथा न जीर्णं भवति। यद्वा मक्षिकया सहावगीर्णं भुक्तं वज्रं आज्यं "वज्रो वा आज्यं" इति श्रुतेः। यथा न जीर्णं भवतीत्यर्थः। तथा अहं त्वया हृतापि ते जीर्णतां न गमिष्ये न गमिष्यामि।

वेक्ष्यामि अन्यंपुरुषं नप्रक्ष्यामीति तत्कृतप्रतिज्ञाया न हानिः ॥ ३६ ॥ ति० लेढि लेक्षि ॥ ४० ॥ ति० जरां जीर्णावस्थां। मक्षिकयाऽवगीर्णं भुक्तं आज्यं यथा तां नाशयति तद्वत् ॥ ४७ ॥ स० भयकारणार्थं भयरूपंयत्कारणं स्ववशीकरणकारणं दर्थं ॥ ती० फलश्रुतिस्स्कान्दे-" यदन्तरेत्यादिवाक्यश्रवणादघनाशनम् " इति ॥ ४९ ॥ इतिसप्तचत्वारिंशस्सर्गः ॥ ४७ ॥

[पा०] १ ग. पाणिभ्यां. २ ग. घ. झ. ञ. कालकूटविषं. ३ क—ट. लेढि. ४ ख. ग. ङ—ट. भार्यामधिगन्तुं. ग. दीप्तं. घ. स्पृष्ट्वा. ६ ङ. झ. योभार्यांरामस्याहर्तुं. ७ ङ. झ. ट. शूलानांमध्ये. ८ च. छ. ज. योऽभिगन्तुं. ९ ख. ङ. झ. ञ. ट. तदन्तरंदाशरथेस्तवैवच. १० ङ. झ. ट. हंसकगृध्रयोः. ११ ङ—झ. ट. आज्यंयथा.

इतीव तद्वाक्यमदुष्टभावा [1]सुधृष्टमुक्त्वा रजनीचरं तम् ॥
गात्र[2]प्रकम्पव्यथिता बभूव वातोद्धता सा कदलीव तन्वी ॥ ४८ ॥
तां वेपमानामुपलक्ष्य सीतां स रावणो मृत्युसमप्रभावः ॥
कुलं बलं नाम च [3]कर्म च स्वं समाचचक्षे भयकारणार्थम् ॥ ४९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

सीतयानिन्दितेनरावणेनपुनस्तांप्रतिस्वकुलप्रतापसंपत्प्रशंसनेनसहरामेदोषारोपपूर्वकं स्वभजनप्रार्थना ॥ १ ॥ सीतयातं प्रतिसक्रोधगर्हणंस्वकामनायाआत्मविनाशहेतुत्वोक्तिः ॥ २ ॥

एवं ब्रुवन्त्यां सीतायां [4]संरब्धः परुषं वचः ॥ ललाटे [5]भ्रुकुटीं कृत्वा रावणः प्रत्युवाच ह ॥ १ ॥
भ्राता वैश्रवणस्याहं [6]सापत्न्यो वरवर्णिनि ॥ रावणो नाम भद्रं ते दशग्रीवः प्रतापवान् ॥ २ ॥
यस्य देवाः सगन्धर्वाः [7]पिशाचपतगोरगाः ॥ विद्रवन्ति [8]भयाद्भीता मृत्योरिव सदा प्रजाः ॥ ३ ॥
येन वैश्रवणो [9]राजा द्वैमात्रः कारणान्तरे ॥ द्वन्द्वमासादितः क्रोधाद्रणे विक्रम्य निर्जितः ॥ ४ ॥
[10]यद्भयार्तः परित्यज्य स्वमधिष्ठानमृद्धिमत् ॥ कैलासं पर्वतश्रेष्ठमध्यास्ते नरवाहनः ॥ ५ ॥
यस्य तत्पुष्पकं नाम विमानं कामगं शुभम् ॥ [11]वीर्यादेवार्जितं भद्रे येन यामि विहायसम् ॥ ६ ॥
मम सञ्जातरोषस्य मुखं [12]दृष्ट्वैव मैथिलि ॥ विद्रवन्ति परित्रस्ताः सुराः शक्रपुरोगमाः ॥ ७ ॥

प्रत्युत तवैव मरणं प्रापयिष्यामीत्यर्थः ॥४७॥ इतीव उक्तप्रकारसदृशं तद्वाक्यं । सुधृष्टं यथा तथा उक्त्वा सा सीता वातोद्धता वाताहता कदलीव गात्रप्रकम्पव्यथिता शरीरकम्पेन पीडिता बभूव ॥४८॥ वेपमानां कम्पमानां । उपलक्ष्य तत्कम्पेन तद्भयमुपलक्ष्य भूयो भयजननेन एषा स्ववशीकर्तुं शक्येति मत्वा भयकारणार्थं भयोत्पादनार्थं । स्वं स्वकीयं कुलादिकमाचचक्षे । कर्म पौरुषं ॥ ४९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

एवं ब्रुवन्तीं सीतां रावणो भर्त्सयति—एवमित्यादिना । संरब्धः कुपितः संभ्रमाविष्टो वा ॥ १ ॥ वैश्रवणस्य सपत्न्या मातुरपत्यं पुमान् सापत्नः सापत्न एव सापत्न्यः । स्वार्थे ष्यञ् ॥ २ ॥ यस्य संबन्धिनो भयात् देवादयः मृत्योर्भीताः प्रजा इव विद्रवन्ति ॥ ३ ॥ द्वयोर्मात्रोरपत्यं द्वैमात्रः सपत्नीमातृपुत्र इत्यर्थः । कारणान्तरे कस्मिंश्चित्कारणावकाशे । द्वन्द्वं युद्धं । "द्वन्द्वं कलहयुग्मयोः" इत्यमरः ॥ ४ ॥ स्वमधिष्ठानं स्वां पुरीं । कैलासमध्यास्ते प्रबलावष्टम्भार्थमिति भावः । "अधिशीङ्स्थासां कर्म" इत्यधिकरणस्य कर्मसंज्ञा । नरवाहनः कुबेरः ॥५॥ तत् प्रसिद्धं कामेन गच्छतीति कामगं अधिष्ठातृकामानुरूपं गच्छतीत्यर्थः । येन पुष्पकेन विहायसं आकाशं । एतादृशविशेषणविशिष्टो यो रावणो नाम रावण इति प्रसिद्धः सोहमितिपूर्वेणान्वयः ॥ ६ ॥ विद्रवन्ति

ति० परुषं क्रोधावेशेन वर्णानां चर्वणेनैवोच्चारणाच्छ्रुतिकट्वक्षरमित्यर्थः ॥ १ ॥ **स०** द्वितीयामाता द्विमाता तस्याअयं द्वैमात्रः । आर्षमनुत्वं । यद्वा पूरणार्थकतीयप्रत्ययान्तार्थबोधकत्वाद्द्विशब्दस्य केवलसंख्यार्थत्वाभावान्नोत्वमितिकेचित् । वैमात्रइतिपाठोवा ॥ कारणान्तरे मन्मातृवाक्यपरिपालनरूपकारणान्तरे ॥ ४ ॥ **ति०** वीर्यादावर्जितं आच्छिद्यगृहीतं । मयेतिशेषः ॥

[**पा०**] १ क. घ—ट. सुदुष्टं. ग. सुदुःखं. २ ग—च. ज. ट. प्रकंपाद्व्यथिता. ३ क—ट. कर्मचात्मनः. ४ ग. ञ. संरब्धपरुषाक्षरं. च. छ. ज. संरब्धःपरुषाक्षरं. ५ छ. भ्रुकुटीकृत्य. ६ ङ. झ. ञ. सापत्नो. ७ च. छ. ज. ञ. पिशाचाः पन्नगोरगाः. ८ ङ. झ. ट. सदाभीताः. ९ ख. ग. ङ. झ. ट. भ्राता. १० क—ङ. झ. ञ. ट. मद्भयार्तः. च. छ. ज. मद्भयात्तत्परि. ११ ग. वीर्यादपिजितं. ख. वीर्येणचार्जितं. ङ. छ. झ. ञ. ट. वीर्यादावर्जितं. १२ ख. दृष्ट्वाथ.

यत्र तिष्ठाम्यहं तत्र मारुतो वाति शङ्कितः ॥ तीव्रांशुः[1] शिशिरांशुश्च भयात्संपद्यते रविः[2] ॥ ८ ॥
निष्कंपपत्रास्तरवो नद्यश्च स्तिमितोदकाः ॥ भवन्ति यत्र यत्राहं[3] तिष्ठामि विचरामि च[4] ॥ ९ ॥
मम पारे समुद्रस्य लङ्का नाम पुरी शुभा ॥ संपूर्णा राक्षसैर्घोरैर्यथेन्द्रस्यामरावती ॥ १० ॥
प्राकारेण परिक्षिप्ता पाण्डुरेण विराजता ॥ हेमकक्ष्या पुरी रम्या वैडूर्यमयतोरणा ॥ ११ ॥
हस्त्यश्वरथसंबाधा तूर्यनादविनादिता ॥ [शतयोजनविस्तीर्णा[5] त्रिंशद्योजनमायता ॥]
सर्वकालफलै[6]र्वृक्षैः संकुलोद्यानशोभिता[7] ॥ १२ ॥
तत्र त्वं वसती[8] सीते राजपुत्रि मया सह ॥ न स्मरिष्यसि नारीणां मानुषीणां मनस्विनी ॥ १३ ॥
भुञ्जाना मानुषान्भोगान्दिव्यांश्च वरवर्णिनि ॥ न स्मरिष्यसि रामस्य मानुषस्य गतायुषः ॥ १४ ॥
स्थापयित्वा प्रियं पुत्रं राज्ञा[9] दशरथेन यः ॥ मन्दवीर्यः[10] सुतो ज्येष्ठस्ततः प्रस्थापितो ह्ययम्[11] ॥ १५ ॥

विद्रवेयुः ॥ ७ ॥ यत्र देशे तीव्रांशुश्च तीक्ष्णांशुरपि । रविः मद्भयात् शिशिरांशुः शीतलांशुः संपद्यते ॥ ८ ॥ निष्कंपेति पत्राण्यपि न चलन्तीत्यर्थः ॥ ९ ॥ पारे पारसदृशे त्रिकूटे । समुद्रस्य मध्य इति पूर्वमुक्तत्वात् । यथेन्द्रस्यामरावती तथा मम लङ्का पुरी असाधारणेत्यर्थः । अस्तीति शेषः ॥ १० ॥ लङ्कां वर्णयति—प्राकारेणेति । रजतमयत्वात्पाण्डुरेण । हेममय्यः कक्ष्याः हर्म्याङ्गणादयो यस्याः सा । "कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने" इत्यमरः । तोरणो बहिर्द्वारं । संबाधा संकुला । तूर्यनादेन वाद्यशब्देन विनादिता । सर्वः कालो येषां तानि सर्वकालानि सर्वकालसंभवानीत्यर्थः । तादृशानि फलानि येषां तैः सर्वकालफलैः । संकुलोद्यानैः व्याप्तोद्यानैः शोभिता एतादृशी सा पुरी रम्येत्यन्वयः ॥ ११—१२ ॥ वसती वसन्ती । अनित्यमागमशासनमिति नुमभावः । नारीणामिति "अधीगर्थ—" इति षष्ठी । मनस्विनी तत्समासक्तेत्यर्थः ॥ १३ ॥ मानुषान् मनुष्यलोकसंभवान् । दिव्यान् स्वर्गसंभवान् । गतायुषः गतप्रायायुषः । अल्पायुष इत्यर्थः । अनेन "भुञ्जाना मानुषान्भोगान्" इति पूर्वं सीतोक्तस्य परिहार उक्तः ॥ १४ ॥ अथ रामस्य स्वापेक्षया उत्कमतिशयं प्रतिवक्ति—स्थापयित्वेत्यादिना । श्लोकद्वयमेकान्वयं । प्रियं पुत्रं भरतं । राज्ये स्थापयित्वा ततो राज्यात् प्रव्राजितः । ज्येष्ठत्वेपि प्रव्राजनान्मन्दवीर्यत्वं सिद्धमित्याह—तेनेति । तेन मन्दवीर्येण । गतचेतसा कर्तव्याकर्तव्यमूढमनसा । तापसेन "भग्नाः कृषेर्भागवता भवन्ति" इति न्यायेन अशूरेण । तपस्विना शोच्येन । "तपस्वी तापसः

॥ ६ ॥ **ती०** तत्रत्वंवसतीसीतेत्यारभ्य तवभाग्येनसंप्राप्तंभजस्ववरवर्णिनीत्यन्तस्यग्रन्थसंदर्भस्य प्रातीतिकार्थस्स्पष्टः । वस्तुतस्तु तत्र लङ्कायां वसती त्वं मयाभृत्येन समर्पितानितिशेषः । मानुषान्दिव्यांश्चभोगान् सह एकदैव भुञ्जानासती । मानुषीणांनारीणामिति द्वितीयार्थे षष्ठी । नस्मरिष्यसि । किंच मानुषस्य मनुष्यत्वेनावतीर्णस्य । गतायुषः गतंप्राप्तमङ्गीकृतं एकादशसहस्रवत्सरायुर्येन तस्यरामस्य भगवतः श्रीमन्नारायणस्य संबन्धिनइतिशेषः । नः अस्मान् स्मरिष्यसि । स्थापयित्वेति । यः मन्दवीर्यः तमप्रियमपिपुत्रंभरतं अन्तर्यामिप्रेरितेनराज्ञा स्थापयित्वा । राज्यइतिशेषः । ततस्तेनैवप्रेरितेनराज्ञा । ज्येष्ठः श्रीमन्नारायणश्श्रीरामः । "ज्येष्ठश्श्रेष्ठःप्रजापतिः" इतिसहस्रनामोक्तेः । सर्वराक्षससंहाराय वनंप्रस्थापितः । तेनेति । भ्रष्टराज्येन भ्रष्टमरीणांराज्यंयेनतेन । गतचेतसा मायोपाधिकेश्वरस्यश्रीरामस्यान्तःकरणाभावाद्गतचेतस्कत्वं । "नतस्यकार्यंकरणंचविद्यते" इतिश्रुतेः । तापसेनतपस्विना तापसानामिनस्तापसेनः सचासौतपस्वीच तेनश्रीरामेणसह करिष्यसिकिं । अयमस्मदीयइति विज्ञापनामितिशेषः ॥ **सर्वेति** । सर्वराक्षसभर्तारं । प्रतिशब्दइवार्थे । कामात् तवभृत्योभविष्यामीतिमनोरथात् । आगतंमांमन्मथशराविष्टंजनमिव । स्वयं ममेष्टदेवतात्वमेवमाख्यातुंवक्तुंनार्हसीत्यर्थः ॥ **प्रत्याख्यायेति** । कामुकंपुरूरवसमुर्वशी चरणेनाभिहत्य पश्चात्तापमगमदिति यत्तद्युक्तं । अकामुकंभृत्यंमां ममातृरूपात्वं चरणेनाभिहत्य तिरस्कृत्येत्यर्थः । परितापंगमिष्यसीत्येतदयुक्तमित्यर्थः । उर्वशीपुरूरवसंचरणेनाभिहत्यपश्चात्तापंगतेतिपुराणेषुयथाप्रसिद्धं तथापश्चात्तापंगमिष्यसि । रामंविनालङ्कांप्रत्यागन्तुमनिच्छन्तीं प्रत्याह—अङ्गुल्येति । युद्धेयस्याङ्गुल्यासमःकोपिनास्ति । कुतः यस्सरामः श्रीमन्नारायणएव मानुषः मनुष्यरूपेणावतीर्णः । तं मम

[पा०] १ क. ख. घ. तीव्रांशुरमृतांशुश्च. २ ङ. झ. ट. दिवि. ३ क—ट. तत्राहं. ४ क—ट. तिष्ठामिचचरामिच. ५ इदमर्धं घ. च. छ. ज. पाठेषुदृश्यते. ६ क. ग. ङ—ट. कामफलैः. ७ ङ. झ. ट. भूषिता. ८ ग. झ. वसहेसीते. ९ ग. झ. राज्ये. १० ग. च. ज—ट. वीर्यस्ततोज्येष्ठस्सुतः. ११ क.–ट. वनं.

तेन किं भ्रष्टराज्येन रामेण गतचेतसा ॥ करिष्यसि विशालाक्षि तापसेन तपस्विना ॥ १६ ॥
[1]सर्वराक्षसभर्तारं कामात्स्वयमिहागतम् ॥ न मन्मथशराविष्टं प्रत्याख्यातुं त्वमर्हसि ॥ १७ ॥
प्रत्याख्याय हि[2] मां भीरु [3]परितापं गमिष्यसि ॥ चरणेनाभिहत्येव पुरूरवसमुर्वशी ॥ १८ ॥
अङ्गुल्या न समो रामो मम युद्धे स मानुषः ॥ तव भाग्येन संप्राप्तं भजस्व वरवर्णिनि ॥ १९ ॥
एवमुक्ता तु वैदेही क्रुद्धा संरक्तलोचना ॥ अब्रवीत्परुषं वाक्यं रहिते राक्षसाधिपम् ॥ २० ॥
कथं वैश्रवणं देवं [4]सर्वभूतनमस्कृतम् ॥ भ्रातरं व्यपदिश्य त्वमशुभं कर्तुमि[5]च्छसि ॥ २१ ॥
अवश्यं विनशिष्यन्ति सर्वे रावण राक्षसाः ॥ येषां त्वं कर्कशो राजा दुर्बुद्धिरजितेन्द्रियः ॥ २२ ॥
अपहृत्य शचीं भार्यां शक्यमिन्द्रस्य जीवितुम् ॥ [6]न च रामस्य भार्यां [7]मामपनीयास्ति जीवितम् ॥ २३ ॥

जीवेच्चिरं वज्रधरस्य [8]हस्ताच्छचीं प्रधृष्याप्रतिरूपरूपाम् ॥
न मादृशीं राक्षस [9]दूषयित्वा पीतामृतस्यापि तवास्ति मोक्षः ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

शोच्यः" इति विश्वः । अनेन इतः परं राज्यं साधयिष्यतीत्याशा न कर्तव्येत्युक्तं ॥ १५—१६ ॥ सर्वराक्षसभर्तारं त्वया प्रार्थनीयमित्यर्थः । स्वयं कामात् अर्थितया इहागतं । प्रत्याख्यातुं निराकर्तुं । स्वयमागमने हेतुः—मन्मथेति ॥ १७ ॥ प्रत्याख्यानफलमाह—प्रत्याख्यायेति । भीरु इत्यनेन रामाद्भीतिः प्रत्याख्यानमूलमिति मम मन इति व्यज्यते । परितापं पश्चात्तापं । पुरूरवसं राजानं चरणेनाभिहत्य । उर्वशीव उरून् महतो वशीकरोतीत्युर्वशी । वश कान्तौ । पृषोदरादित्वादुकारलोपः । गौरादित्वात् ङीष् । एवं ह्रस्वादिस्तालव्यान्तश्च । तथाच माघयमकं "दधत्युरोजद्वयमुर्वशीतलं भुवो गतेव स्वयमुर्वशी तलं" इति । नारायणस्य ऊरौ वसतीति व्युत्पत्तावपि पृषोदरादित्वाद्वर्णलोपादिना ह्रस्वादिस्तालव्यान्त एव च युक्तः । उर्वशी किल स्वयमेव प्रार्थयन्तं पुरूरवसं प्रथमं निरस्य पश्चात्तापेन पुनस्तमागतेति पौराणिकी कथा ॥ १८ ॥ अङ्गुल्या अङ्गुलिबलेन । न समः न समबलः । संप्राप्तं मामिति शेषः ॥ १९ ॥ संरक्तेति कोपातिशयो द्योत्यते । रहिते निर्जने वने । "रागं विविक्ताइति वर्धयन्तीः" इति रागजननौचित्येपि परुषमब्रवीत् । हन्त सीतायाः पातिव्रत्यमेतदिति ऋषिर्विस्मयते ॥२०॥ कथमिति पुण्यात्मनःकुबेरस्य भ्राता-सन् कथं पापकर्मणि प्रवर्तस इत्यर्थः ॥२१॥ कर्कशः क्रूरः ॥ २२ ॥ अपनीय स्थितस्य तवेति शेषः ॥ २३ ॥ क्रोधातिशयेनोक्तमेव पुनराह—जीवेदिति । अप्रतिरूपं अनुपमं रूपं यस्यास्तां मादृशीं । अश्लीलत्वपरिहाराय न मामित्यनुक्तिः । मोक्षः मरणादिति शेषः । अमतमपि न त्वद्रक्षणसमर्थमित्यर्थः ॥ २४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

भाग्येनतत्रैवसंप्राप्तं तव पतिमितिशेषः । भजस्वेतिसंबन्धः ॥ १३—१९ ॥ स० तापसानामयंतापसः तद्वेषः तेन । तपस्विना तद्वद्व्रियमानेन ॥ १६ ॥ ति० रक्ष पालय ॥ १७ ॥ ति० ईदृशवंश्यस्येदृशंकृत्यमनुचितमिति मिथ्यैवान्यवंशं स्ववंशत्वेन कथयसीतिव्यङ्ग्यं ॥ २१ ॥ ति० अत्रसर्गेरावणोक्तौ—"सप्तसप्तकवेत्ताहमष्टाष्टकविभूषितः । पञ्चपञ्चकतत्वज्ञो रावणोहंभजस्व माम्" इतिश्लोकः क्वचित्पठ्यते । तमेवंव्याचक्षते—सप्तसप्तकं षडङ्गसहितवेदोपवेदसहितचतुर्दशविद्यारूपं तद्वेत्ता । अष्टाष्टकविभूषितः चतुष्षष्टिकलाभूषितः । पञ्चपञ्चकतत्वज्ञः पञ्चविंशतितत्वस्वरूपवेत्ता । नित्यानित्यवस्तुविवेकवानितियावत् । इति । स कतकाद्यव्याख्यातत्वात्प्रक्षिप्तइति ज्ञायते । आद्यपादेऽर्थासंगतिरपि । परपादपर्यालोचनया तृतीयपादोक्तज्ञानवतईदृशेकर्मणिप्रवृत्तिरप्यनुचितेतिभाति ॥ इत्यष्टचत्वारिंशस्सर्गः ॥ ४८ ॥

[पा०] १ क.—घ. यक्षराक्षस. ङ. झ. ट. रक्षराक्षस. २ च. छ. ज. ञ. तुमां. ३ ग. घ. ङ. झ. ट. पश्चात्तापं. ४ ङ. झ. ट. सर्वदेव. ५ ग. मर्हसि. ६ क.—घ. च. छ. ज. ञ. ट. नतु. ङ. झ. नहि. ७ ङ. झ. ट. मामानीयस्वस्तिमान्भवेत्. ८ ङ. झ. ट. पश्चाच्छचीं. ९ ख. ङ.—ट. धर्षयित्वा.

एकोनपञ्चाशः सर्गः ॥ ४९ ॥

भिक्षुरूपपरित्यागेननिजरूपधारिणारावणेनसान्त्वोक्त्यासीतायाः केशग्रहणेनरथारोपणपूर्वकंलङ्कांप्रतिप्रस्थानम् ॥ १ ॥ गिरितरुगोदावरीप्रभृतीन्प्रतिरामायस्ववृत्तान्तनिवेदनप्रार्थनापूर्वकंबहुधाक्रन्दन्त्यास्यन्दनस्थयासीतयामार्गेदृष्टंजटायुषंप्रत्युच्चैराक्रन्दनेनरामायस्ववृत्तान्तनिवेदनप्रार्थना ॥ २ ॥

सीताया वचनं श्रुत्वा दशग्रीवः प्रतापवान् ॥ हस्ते हस्तं [1]समाहत्य चकार सुमहद्वपुः ॥ १ ॥
स मैथिलीं पुनर्वाक्यं बभाषे च ततो भृशम् ॥ नोन्मत्तया श्रुतौ मन्ये मम वीर्यपराक्रमौ ॥ २ ॥
उद्वहेयं भुजाभ्यां तु मेदिनीमम्बरे स्थितः ॥ [3]आपिबेयं समुद्रं च [4]हन्यां मृत्युं रणे स्थितः ॥ ३ ॥
अर्कं [5]रुन्ध्यां [6]शरैस्तीक्ष्णैर्विभिन्द्यां हि महीतलम् ॥ [7]कामरूपिणमुन्मत्ते पश्य मां [8]कामदं पतिम् ॥४॥
एवमुक्तवतस्तस्य [9]सूर्यकल्पे शिखिप्रभे ॥ क्रुद्धस्य हरिपर्यन्ते रक्ते नेत्रे बभूवतुः ॥ ५ ॥
सद्यः सौम्यं परित्यज्य [10]भिक्षुरूपं [11]स रावणः ॥ [12]स्वं रूपं [13]कालरूपाभं भेजे वैश्रवणानुजः ॥ ६ ॥
संरक्तनयनः श्रीमांस्तप्तकाञ्चन[14]कुण्डलः ॥ क्रोधेन महताऽविष्टो नीलजीमूतसन्निभः ॥
[15]दशास्यः कार्मुकी बाणी बभूव क्षणदाचरः ॥ ७॥

यश्चिन्तनीयः सततमापत्सु परमासु च। नान्योस्ति चिन्तनीयस्तं सीतापतिमुपास्महे ॥ हस्ते हस्तं समाहत्य संयोज्य । अयं च कोपाकृतिविशेषः ॥ १ ॥ स इत्यादिश्लोकत्रयमेकान्वयं । ततः रूपकरणानन्तरं । उन्मत्तया त्वयेति शेषः । वीर्यपराक्रमौ पूर्वोक्ताविति शेषः। उद्वहेयं उद्धरेयं। विभिन्द्यां विदारयेयं। महद्वपुरित्युक्तं दर्शयति—कामेति ॥ २—४ ॥ अथ सीतापहारोपयोगिरूपान्तरपरिग्रहमाह—एवमित्यादिना । सूर्यकल्पे शिखिप्रभे इति तेजस्यौष्ण्ये चोपमाद्वयं । हरिपर्यन्ते पिङ्गलवर्णपर्यन्ते । "यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषुहरिर्नाकपिलेत्रिषु" इत्यमरः ॥ ५ ॥ स्वं स्वासाधारणं । कालरूपाभं मृत्युशरीराभं । वैश्रवणानुज इत्यनेन जन्मकारणे तुल्येपि हन्तान्यतरस्य क्रौर्यमित्युच्यते ॥ ६ ॥ सार्धश्लोक एकान्वयः । श्रीमान् विचित्रशक्तिसंपन्नः । क्षणदाचरः संरक्तनयनत्वादिविशिष्टो

ती० महापुण्यस्यपरमभागवताग्रगण्यस्य श्रीहनुमतोपि रूपान्तरस्वीकरणसमये आग्रहपूर्वकत्वस्यश्रूयमाणत्वेनाग्रहंविना क्रूररूपस्वीकारायोगाद्रावणोपि देवीनिकटेकपटमनुचितमितिमत्वा देव्यैस्वरूपंदर्शयितुं स्वसामर्थ्यप्रशंसापूर्वकंनिजरूपंस्वीकरोति । सीतायाइत्यारभ्य वसनाभरणोपेतामित्यन्तस्यप्रकृतार्थस्स्पष्टः । वास्तवार्थस्तु—वीर्यपराक्रमौ वीर्यंसमरेऽभीरुत्वं । पराक्रमः पराभिभवनसामर्थ्यं । उन्मत्तया मत्तजनानुद्गताउन्मत्ता उन्मत्तभिन्ना । तादृश्यापि नश्रुतौ । योऽहमेतादृग्विशेषणविशिष्टस्तं । कामरूपिणं कामदं। पतिं रक्षसामिति शेषः। मांपश्येतिबभाषेइतिपूर्वेणान्वयः॥ ४ ॥ एवमिति । अस्मिञ्श्लोके पूर्वश्लोकस्थमुन्मत्तइतिपदमाकृष्य श्लोकोयोजनीयः । तथासत्येवंयोजना । एवमुक्तवतोरावणस्य क्रुद्धस्य उन्मत्ते हरिपर्यन्ते हरिःपिङ्गलवर्णौ पर्यन्तयोरुपान्तयोर्ययोस्ते । शिखिप्रभे अग्निसदृशे । नेत्रे बभूवतुः ॥७॥ **ति०** हस्तेहस्तं समाहन्य समाहत्येत्यर्थः । विनिष्पीड्येतियावत् । महिषादयः स्त्रियैवहताः तथा कदाचिदेषा हरणसमयेक्रौर्यंकुर्यादितिशङ्कया क्रूरस्वीयमहारूपाङ्गीकारः । यद्वा कपटेनापि शान्तस्वभावयतिवेषधारणात्तद्वेषस्वाभाव्येनहरणे स्वस्यप्रतिबद्धतांदृष्ट्वा स्वरूपग्रहणं । ममरावणस्याप्ययंवेषः क्रौर्यप्रतिबन्धकइत्यतश्च हस्तेहस्ताघातइतिबोध्यं ॥ १ ॥ **शि०** अ इत्यव्ययं। तदत्र त्वर्थे ।एवंच रणेस्थितोऽहंतु मृत्युंहन्यां ।**स०**अपिबेयमिति पाठेआर्षोऽडागमः। **वि०** अपिबेयमिति। अ इतिपृथक् विस्मयार्थेद्रष्टव्यं॥३॥ **ति०** कामेन चित्तजेन रूपेणच । उन्मत्ते इत्यर्थः। **स०** तुद्यां व्यथायुक्तंकरोमि ॥ **शि०** कामरूपेण स्वेच्छाचारेण उपलक्षिते । अतएव हेउन्मत्ते कामरूपिणं स्वेच्छारूपधारिणं ।

[पा०] १ झ. समाहन्य. २ ङ.—ट. बभाषेवाक्यकोविदः. ३ ख. ग. छ. ञ. ट. अपिबेयं. ४ क. ख. ग. ङ.—ट. मृत्युंहन्यां. ५ झ. ट. तुद्यां. ६ घ. च. ज. ञ. विनिर्भिन्ध्यांमहीतलं. ७ ङ. झ. ट. कामरूपेणउन्मत्ते. ८ ङ. झ. ट. कामरूपिणं. ९ क. ग. ङ.—ट. रावणस्यशिखि. १० ङ. झ. तीक्ष्णरूपं. ११ क. ख. घ. च. संमतं. १२ क.—ज. ञ. ट. स्वरूपं. १३ च. छ. ज. ञ. कालसंकाशं. १४ ङ. झ. ट. भूषणः. १५ ङ. झ. ट. दशास्योविंशतिभुजो.

स परिव्राजकच्छद्म महाकायो विहाय तत् ॥ [1]प्रतिपद्य स्वकं रूपं रावणो राक्षसाधिपः ॥ ८ ॥
संरक्तनयनः क्रोधाज्जीमूतनिचयप्रभः ॥ रक्ताम्बरधरस्तस्थौ स्त्रीरत्नं [2]प्रेक्ष्य मैथिलीम् ॥ ९ ॥
[3]स तामसितकेशान्तां भास्करस्य प्रभामिव ॥ वसनाभरणोपेतां मैथिलीं [4]रावणोऽब्रवीत् ॥ १० ॥
त्रिषु लोकेषु [5]विख्यातं यदि भर्तारमिच्छसि ॥ मामाश्रय वरारोहे तवाहं सदृशः पतिः ॥ ११ ॥
मां भजस्व चिराय त्वमहं [6]श्लाघ्यः प्रियस्तव ॥ [7]नैवं चाहं क्वचिद्भद्रे करिष्ये तव विप्रियम् ॥१२॥
त्यज्यतां मानुषो भावो मयि भावः प्रणीयताम् ॥ राज्याच्च्युतमसिद्धार्थं रामं परिमितायुषम् ॥१३॥
कैर्गुणैरनुरक्तासि मूढे पण्डितमानिनि ॥ यः स्त्रिया वचनाद्राज्यं विहाय ससुहृज्जनम् ॥ १४ ॥
अस्मिन्व्यालानुचरिते वने वसति दुर्मतिः ॥ १५ ॥
इत्युक्त्वा मैथिलीं वाक्यं प्रियार्हां प्रियवादिनीम् ॥ अभिगम्य सुदुष्टात्मा [8]राक्षसः [9]काममोहितः ॥
जग्राह रावणः सीतां बुधः खे रोहिणीमिव ॥ १६ ॥

बभूव ॥ ७ ॥ उक्तानुवादपूर्वकं क्रौर्यान्तरमाह द्वाभ्यां । परिव्राजकच्छद्म परिव्राजकरूपं । परिव्राजकरूपेण परिवृतं मां प्रेक्ष्य तस्थौ । किमेवंरूपं दृष्ट्वापि मां भजिष्यतीति प्रत्याशयेति भावः ॥ ८—९ ॥ असितकेशान्तां नीलकेशाग्रां । केशाग्रे पैङ्गलं दुर्लक्षणं । भास्करस्यप्रभामित्यनेन दुष्प्रसहत्वमुच्यते । वसनेत्यादिना दुस्त्यजत्वमुच्यते ॥ १० ॥ वरारोहे वरजघने ॥ ११ ॥ पुनस्त्यागशङ्कां मा कार्षीरित्याह —मामिति । क्वचित् कापीत्यर्थः ॥ १२ ॥ सार्धश्लोकद्वयमेकान्वयं । मानुषः मनुष्यरामविषयः । भावः स्नेहबन्धः । व्यालाः हिंस्राः । तमिति पूर्वेणान्वयः ॥ १३—१५ ॥ इतीत्यादिसार्धश्लोक एकान्वयः ।

मांपश्य । एतेन पृथिवीपरिमितरूपस्यापि धारणसामर्थ्यमप्यस्तीतिसूचितं ॥ ४ ॥ **ती०** परिव्राजकच्छद्म मायात्मकं यतिवेषं ॥८॥ **स०** असितकेशान्तां कृष्णकेशान्तां । आदित्यप्रभायाअसितत्वंच "असौवाआदित्यःपिङ्गलः एषशुक्लः एषनीलः" इत्यादिच्छान्दोग्यवाक्यसिद्धं ॥ १० ॥ **स०** पण्डितामात्मानंमन्यतइति पण्डितमानिनी तस्यास्संबुद्धिः । रामःपण्डितइति ज्ञानिनीतिवा ॥ १४ ॥ **ती०** त्रिषुलोकेषुविख्यातमित्यादिसार्धश्लोकचतुष्टयस्य प्रातीतिकार्थस्स्पष्टः । कुलकं । वस्तुतस्तु— भर्तारं शुश्रूषादिनास्वामिनंबिभर्तीतिभर्ता भृत्यइत्यर्थः । पतिः रक्षसामितिशेषः । यद्यप्यहंरक्षसांपतिः तथापि तवसदृशः अनुरूपःकिं । भृत्यइतिशेषः । अनुरूपोभृत्योनभवामि । तथापि भृत्यमिच्छसियदि त्रिषुलोकेपुविख्यातं यथाभवतितथा मामाश्रय भृत्यत्वेनाङ्गीकुरु । कुतः चिराय चिरकालादारभ्य । तव श्लाघ्यः प्रियः प्रीणयतिशुश्रूषादिनास्वामिनमितिप्रियोभृत्यः । जयस्यैवरावणरूपेणोत्पन्नत्वात् । अतोमांभृत्यइति भजस्व जानीहीत्यर्थः । अतएव नैवाहमितिमानुषेभावस्त्यज्यतां । मनुष्यएवरक्षणीयइत्यभिप्रायस्त्यज्यतामित्यर्थः । किंतु प्राचीनकृपया मूढे पण्डितमानिन्यपि राक्षसेभृत्येमयि भावःप्रणीयतां । अयमपिरक्षणीयइत्यनुसन्धीयतामित्यर्थः । किंच राज्याच्च्युतं तुच्छीकृतराज्यभोगमित्यर्थः । कुतः असिद्धार्थं अश्चासौसिद्धार्थश्चासिद्धार्थस्तं अवाप्तसमस्तकामंविष्णुमित्यर्थः । परिमितायुषं परिगतंत्यक्तं मितमल्पमायुर्येनतं अपरिमितायुषमित्यर्थः । किंच कैर्गुणैः अनिर्वचनीयैर्गुणैः अनन्तकल्याणगुणैरित्यर्थः । युक्तमितिशेषः । अनुरक्तासि । कुतएवं दुर्मतिः दुष्टेष्वपिमतिः अनुग्राहिकायस्यसः । अतएवहि स्त्रियावचनात्सुहृज्जनंराज्यंविहाय वनेवसति । तादृशंत्वमनुरक्तासियतः अतस्सर्वोत्तमा लक्ष्मीस्त्वं । अतएव मांभृत्यत्वेनाङ्गीकुर्विँतितात्पर्यं ॥ १५॥ **ती०** वस्तुतस्तु रावणः अन्यत्र सुदुष्टात्मा काममोहितश्चयद्यपि तथाप्यत्रनतथा । अतएव बुधःरोहिणीमिवजग्राह । बुधस्स्वमातरंयथापूजार्थंगृह्णाति तथा रावणोपि सीतां जग्राह । स्वगृहेसंस्थाप्य स्वेष्टदेवताबुद्ध्यापूजयितुमेवेत्यर्थः । " जग्राहरावणस्सीतां बुधःखेरोहिणीमिव" इति । नन्वत्र नलकूबरवेदवतीशापाद्बलात्कथंपरदारस्पर्शइतिचेत्सत्यं । रावणस्सीतांसाक्षान्नजग्राह नस्पृष्टवान् । परंतु जानुकेशादिच्छायामेवजग्राह । राक्षसानां छायाग्राहित्वात् । तदुक्तंस्कान्दे—"छायाग्राहित्वमप्यस्ति सर्वविद्याविशारदे । केशच्छायांपरामृश्य जानुच्छायांतथैवच । गृहीत्वाजानकीं हृष्टो लङ्कांप्रायात्सरावणः । सीतापहरणंचैव येश्शृण्वन्तिनरोत्तमाः । नतेषामशुभंदेवि भविष्यतिकदाचन" । इति ॥ **ति०** सीतया सद्योमरणपर्यवसायिशापादानंतु समूलनाशनस्य वेदवत्यंशेनप्रतिज्ञातस्यनिर्वाहाय ऋषीणांदेवानामग्रे रामप्रतिज्ञातस्यचनिर्वा-

[पा०] १ ख. ग. ङ. झ. ट. प्रतिपेदे. २ घ. ङ. प्रेत्य. ३ ख. घ. च. छ. ज. सीतां. ४ ख. वाक्यमब्रवीत्. ५ ख. भर्तारंयदिविख्यातं. च. छ. ज. ञ. विख्यातंभर्तारंत्वंयदिच्छसि. ६ क. ख. ग. च. ज. ञ. श्लाघ्यस्तवप्रियः. ङ. झ. ट. श्लाघ्यःपतिस्तव. ७ छ. ञ. नैवाहंतु. ८ क. ङ.—ञ. रावणः. ९ ग. कालचोदितः.

वामेन सीतां पद्माक्षीं मूर्धजेषु करेण सः ॥ ऊर्वोस्तु दक्षिणेनैव परिजग्राह पाणिना ॥ १७ ॥
तं दृष्ट्वा [2]मृत्युसंकाशं तीक्ष्णदंष्ट्रं महाभुजम् ॥ प्राद्रवन्[1]गिरिसंकाशं भयार्ता वनदेवताः ॥ १८ ॥
स च मायामयो दिव्यः खरयुक्तः खरस्वनः ॥ प्रत्यदृश्यत हेमाङ्गो रावणस्य महारथः ॥ १९ ॥
ततस्तां परुषैर्[3]वाक्यैर्भर्त्सयन्स महास्वनः ॥ [4]अङ्केनादाय वैदेहीं रथम[5]आरोपयत्तदा ॥ २० ॥
सा गृहीता विचुक्रोश रावणेन यशस्विनी ॥ रामेति सीता दुःखार्ता रामं दूरगतं वने ॥ २१ ॥
[7]तामकामां स कामार्तः पन्नगेन्द्रवधूमिव ॥ विवेष्टमानामादाय उत्पपाताथ रावणः ॥ २२ ॥
[6]ततः सा राक्षसेन्द्रेण ह्रियमाणा विहायसा ॥ भृशं चुक्रोश मत्तेव भ्रान्तचित्ता यथाऽऽतुरा ॥ २३ ॥
हा लक्ष्मण महाबाहो गुरुचित्तप्रसादक ॥ ह्रियमाणां न जानीषे रक्षसा [8]माममर्षिणा ॥ २४ ॥
जीवितं [9]सुखमर्थांश्च धर्महेतोः परित्यजन् ॥ ह्रियमाणामधर्मेण मां राघव न पश्यसि ॥ २५ ॥
ननु नामाविनीतानां विनेताऽसि परंतप ॥ कथमेवंविधं पापं न त्वं [10]शास्सि हि रावणम् ॥ २६ ॥
ननु सद्यो ऽविनीतस्य दृश्यते कर्मणः फलम् ॥ कालोप्यङ्गीभवत्यत्र सस्यानामिव पक्तये ॥ २७ ॥

प्रियार्हत्वे हेतुः—प्रियवादिनीमिति । अत्र मुहूर्तं तिष्ठ भूयः सत्करिष्यामीति प्रियभाषिणीं मैथिलीं । इत्युक्त्वा एवं परुषमुक्त्वा । तत्र हेतुः—सुदुष्टात्मेति । बुधः खे रोहिणीमिवेत्यभूतोपमा । बुधः स्वपितृपत्नीत्वेन मातरं खे आकाशे सुखेनसंचरन्तींरोहिणींयदि गृह्णीयात् तत्तुल्यमिदं पापमित्यर्थः ॥ १६ ॥ शापकृतदोषो भविष्यतीति मूर्धजेपूर्वोश्च ग्रहणं ॥ १७ ॥ तमिति गृह्णन्तमित्यर्थः ॥ १८ ॥ सः पूर्वं गुप्तः । मायामयः अन्तर्धानाद्यर्हतया आश्चर्यमयः । खरयुक्तः अश्वतरयुक्तः । हेमाङ्गः स्वर्णमयचक्रः । चक्रं हि रथाङ्गमित्युच्यते ॥ १९ ॥ अङ्केन ऊरुभागेन ॥ २० ॥ वनेदूरगतं राममुद्दिश्य रामेति विचुक्रोश । क्रुश आह्वाने रोदने च ॥ २१ ॥ अकामां विरागिणीं । विवेष्टमानां रथोपरिस्थले लुठन्तीं । आदाय पुनरङ्केनादाय । उत्पपात रथेन सहित इति शेषः ॥ २२ ॥ आतुरा सा मत्तेव मदयुक्तेव । भ्रान्तचित्ता यथा भ्रान्तचित्तेव च चुक्रोश ॥ २३ ॥ अमर्षिणा खरवधकृतामर्षवता ॥ २४ ॥ धर्महेतोः आश्रितसंरक्षणरूपधर्महेतोः । जीवितं सुखमर्थांश्च परित्यजन् जीवितादिपरित्यागशीलः ॥ २५ ॥ ननु नामेति प्रसिद्धौ । अविनीतानां दुर्जनानां । विनेता शिक्षकः । पापं पापिष्ठं । कथं न शास्सि न शिक्षयसि ॥ २६ ॥ अशासने स्वयमेव हेतुमुन्नयति—नन्विति । अविनीतस्य दुर्जनस्य । कर्मणः पापस्य । सद्यः फलं न

हाय ॥ **स०** प्रियः स्वप्रियोरामः तस्यैवार्हा । अतएव तमेववदतीति प्रियवादिनी तां ॥ १६ ॥ **ती०** मूर्धजेषुकरेण मूर्धजाः श्रेष्ठाः इषवःयस्मिंस्तेनकरेण दक्षिणेन वामेनच ऊर्वोः पादयोः परिजग्राह । पादौगृहीत्वा लङ्कांप्रत्यागन्तव्यमितिप्रार्थितवानिति भावः ॥ **स०** अत्रानुक्तं मायासीताकृतिनिर्माणमित्यादिकं पुराणान्तरादवगन्तव्यं । तथाचोक्तं कूर्मपुराणेचतुस्त्रिंशेऽध्याये—"सृष्ट्वामायामयींसीतां सरावणवधेच्छया । सीतामादायरामेष्टां पावकोन्तरधीयत ।" इत्यादि । तथा आग्नेयपुराणे षट्सप्ततितमाध्याये "इत्युक्त्वास्वप्रभावेन प्रतिबिंबमनोमयं । यथारूपंयथावेषं कल्पयित्वातिसुन्दरम् । वह्नावाच्छादयन्ती स्वसद्मावेव समास्थिता । अथमायामयीसीता" इत्याद्युक्तं । एतच्च द्वारप्रदर्शनपरं महाभारततात्पर्यनिर्णयादौ कैलासगमनोक्तेः । **ति०** वामेनेति अननुरक्ततया शापदानभिया स्ववामाङ्गासनत्वनिवारणायैवंग्रहणमित्याहुः ॥ १७ ॥ **स०** दिव्यः आकाशगामी ॥१९॥ **ती०** वस्तुतस्तु–परुषैर्वाक्यैः यदिमां भृत्यत्वेननाङ्गीकरोषि तर्हि तवाग्रतःप्राणांस्त्यक्ष्यामीत्यादिवाक्यैः । भर्त्सयन् भीतिमुत्पादयन् रथमारोपयत् ॥ २० ॥ **ती०** सागृहीतेत्यादीनांवास्तवार्थेसीतायादैन्यवत्प्रतीयमानानिवाक्यानिसर्वाणि सीतया लौकिकरीतिमनुसृत्योक्तानीति द्रष्टव्यानि । **ति०** अतिचुक्रोशेत्यादि तच्छायायाअपि मनुष्यभावनाढ्यं ॥ २१ ॥ **ति०** अत्र इवयथाभ्यां सर्वचेष्टानांनाट्यत्वंसूचितं ॥ २३ ॥ **ति०** नशाधि प्राप्तकालंशासनं नकरोषि । हिर्वाक्यालङ्कारे । शोकातुरत्वाद्वाऽधिकपदं

[**पा०**] १ च. छ. ज. ञ. गिरिसंकाशं. क. ग. ङ. झ. ट. गिरिशृङ्गाभं. २ क. ग. ङ—ट. न्मृत्युसंकाशं. घ. गिरिशृङ्गाभं. ३ क. ङ. झ. ट. वाक्यैरभितर्ज्य. च. छ. ज. ञ. वाक्यैस्तर्जयित्वा. ४ ग. ङ.—ज. ञ. अङ्केनोद्यम्य ५ क.–घ. च.—ञ. मारोहयत्. ६ ख. ततः. ७ च. छ. ज. ञ. रामकामां. ट. तामकामांच. ८ क. ङ.—ट. कामरूपिणा. ९ ख. ङ.—ट. मर्थंच. १० झ. शाधि.

[1]स कर्म कृतवानेतत्कालोपहतचेतनः ॥ जीवितान्तकरं घोरं रामाद्व्यसनमाप्नुहि ॥ २८ ॥
हन्तेदानीं [2]सकामाऽस्तु कैकेयी [3]सह बान्धवैः ॥ [4]ह्रिये यद्धर्मकामस्य धर्मपत्नी यशस्विनः ॥ २९ ॥
आमन्त्रये जनस्थाने कर्णिकारान्सुपुष्पितान् ॥ क्षिप्रं रामाय शंसध्वं सीतां हरति रावणः ॥ ३० ॥
[5]माल्यवन्तं शिखरिणं वन्दे प्रस्रवणं गिरिम् ॥ क्षिप्रं रामाय [6]शंस त्वं सीतां हरति रावणः ॥ ३१ ॥
[7]हंसकारण्डवाकीर्णां वन्दे गोदावरीं नदीम् ॥ क्षिप्रं रामाय [8]शंस त्वं सीतां हरति रावणः ॥ ३२ ॥
दैवतानि च यान्यस्मिन्वने विविधपादपे ॥ नमस्करोम्यहं तेभ्यो भर्तुः शंसत मां हृताम् ॥ ३३ ॥
यानि कानि चिदप्यत्र सत्त्वानि [9]निवसन्त्युत ॥ सर्वाणि शरणं यामि मृगपक्षिगणानपि ॥ ३४ ॥
ह्रियमाणां प्रियां भर्तुः प्राणेभ्योपि गरीयसीम् ॥ विवशाऽपहृता सीता रावणेनेति शंसत ॥ ३५ ॥
[10]विदित्वा मां महाबाहुरमुत्रापि महाबलः ॥ आनेष्यति पराक्रम्य वैवस्वतहृतामपि ॥ ३६ ॥
सा [11]तदा करुणा वाचो विलपन्ती सुदुःखिता ॥ वनस्पतिगतं गृध्रं ददर्शायतलोचना ॥ ३७ ॥
[12]सा तमुद्वीक्ष्य सुश्रोणी रावणस्य वशं गता ॥ समाक्रन्दद्भयपरा [13]दुःखोपहतया गिरा ॥ ३८ ॥
जटायो पश्य मामार्य ह्रियमाणामनाथवत् ॥ अनेन राक्षसेन्द्रेण करुणं पापकर्मणा ॥ ३९ ॥
[14]नैष वारयितुं शक्यस्[15]त्वं क्रूरो निशाचरः ॥ सत्त्ववाञ्जितकाशी च सायुधश्चैव दुर्मतिः ॥ ४० ॥

दृश्यते । कुतः अत्र फलदर्शने । कालोप्यङ्गीभवति सहकारिकारणं भवति । अभूततद्भावे च्विः । पक्तये पाकाय ॥ २७ ॥ सः त्वमित्यर्थः । व्यसनं भ्रंशं । " व्यसनं विपदि भ्रंशे " इत्यमरः ॥ २८ ॥ वने राक्षसादिभिर्हृता भवेदिति मां कैकेयी वनं प्रेषितवतीति वैदेह्या हृदये सर्वदास्थितं । तदिदानीं " सुप्तप्रमत्तकुपितानां भावज्ञानं दृष्टं " इति न्यायेनोद्घाटयति—हन्तेति । अत्र हेतुमाह—ह्रिये यदिति ॥ २९ ॥ अथ चित्तविभ्रमातिरेकादचेतनानपि रामायाख्यातेत्यभ्यर्थयते—आमन्त्रय इत्यादिभिः सप्तश्लोकैः । आमन्त्रये संबोधयामि । जनस्थाने स्थितानितिशेषः । कर्णिकारान् परिव्याधाख्यान्पुष्पवृक्षान् । रावणः सीतां हरतीति यत् एतच्छंसध्वं कथयत । एवमुत्तरत्रापि योज्यं ॥ ३० ॥ माल्यवन्तं पुष्पवन्तं । शिखरिणं प्रशस्तशिखरं । प्रस्रवणं प्रस्रवणाख्यं ॥ ३१ ॥ संघुष्टाः हंसाः सारसाश्च यस्यां सा हंससारससंघुष्टा । कर्तरि क्तः । हंसकारण्डवाकीर्णामिति शुद्धः पाठः ॥ ३२ ॥ तेभ्यः युष्मभ्यमिति शेषः ॥ ३३ ॥ यानीत्यादिश्लोकद्वयमेकान्वयं । सत्त्वानि जन्तवः । उतेति संबोधने समुच्चये वा । ह्रियमाणां प्राणेभ्योपि गरीयसीं प्रियां मां सीता रावणेन हृतेति भर्तुः शंसत । रावणान्न भेतव्यं तत्त्वं कथयतेति भावः ॥ ३४—३५ ॥ कथने किं प्रयोजनं तत्राह—विदित्वेति । भवदुक्तप्रकारेण मां विदित्वा अमुत्र स्वर्गलोके गतामपि वैवस्वतहृतामपि पराक्रम्यानेष्यति । तस्मादवश्यं शंसतेति भावः ॥३६॥ करुणाः दीनाः । तात्कालिकहर्षं सूचयति—आयतलोचनेति ॥ ३७ ॥ समाक्रन्दत् क्रदि आह्वाने रोदने च । दुःखोपहतया दुःखगद्गदया ॥ ३८ ॥ आर्येति श्वशुरवत्संबोधनं । करुणं यथा तथा ह्रियमाणां ॥ ३९ ॥ अशक्यत्वे हेतुः—सत्त्ववानित्यादिकं । जितकाशी

नदोषाय ॥ २६ ॥ **ति०** सकामातु जातेतिशेषः । यतइत्यादिः ॥ २९ ॥ **स०** सीतांरावणोहरतीतिपारोक्ष्योक्त्या आकृतेरेव ग्रहणमिति सूचयति ॥ ३० ॥ **शि०** वन्दे तत्प्रयोजनमाह । क्षिप्रंरामायशंसध्वं । अत्र वन्द्यमानयोरुद्भूतावयवविवक्षया बहुवचनं । एवमुत्तरत्रापि ॥ ३१ ॥ **शि०** वनस्पतिगतं वृक्षेस्थितं । **स०** करुणयन्तीतिकरुणाः ॥ ३७ ॥ इत्येकोनपञ्चाशस्सर्गः ॥ ४९ ॥

[पा०] १ क. ङ.—ट. त्वंकर्म. २ झ. ञ. ट. सकामातु. ३ क. ख. ग. ङ.—ट. बान्धवैस्सह. ४ क.—ट. ह्रियेयधर्म. ५ अयंश्लोको झ. पाठेनदृश्यते. ६ ग. घ. छ. ट. शंसध्वं. ७ ख.—ट. हंससारससंघुष्टां. ८ ख. ट. घ. झ. ट. शंसध्वं. ९ ङ. झ. ट. विविधानिच. १० ङ. झ. ट. विदित्वातु. ११ क.—घ. च. छ. ज. ञ. तथा. १२ च. छ. ज. ञ. वशानुगा. १३ घ. छ. ञ. शब्दोपहतया. १४ क. ङ.—ञ. नैव. १५ क. च. छ. ज. ञ. स्त्वयाह्येष. ङ. झ. ट. स्त्वयाक्रूरो.

रामाय तु यथातत्त्वं जटायो हरणं मम ॥ लक्ष्मणाय च तत्सर्वमाख्यातव्यमशेषतः ॥ ४१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

पञ्चाशः सर्गः ॥ ५० ॥

सीतासमाक्रन्दनश्रवणात्स्वापादुद्बुद्धेनजटायुषासीतारावणयोर्दर्शनम् ॥ १ ॥ तथास्वनामकीर्तनादिपूर्वकंरावणंप्रति सीतामोचनयाचनेपितेनतदकरणे सगर्हणंसक्रोधंयुद्धायतत्प्रतिरोधनम् ॥ २ ॥

तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे ॥ निरीक्ष्य रावणं क्षिप्रं वैदेहीं च ददर्श सः ॥ १ ॥
ततः पर्वतकूटाभस्तीक्ष्णतुण्डः खगोत्तमः ॥ वनस्पतिगतः श्रीमान्व्याजहार शुभां गिरम् ॥ २ ॥
दशग्रीव स्थितो धर्मे पुराणे सत्यसंश्रयः ॥ [भ्रातस्त्वं निन्दितं कर्म कर्तुं नार्हसि सांप्रतम्] ॥
जटायुर्नाम नाम्नाऽहं गृध्रराजो महाबलः ॥ ३ ॥
राजा सर्वस्य लोकस्य महेन्द्रवरुणोपमः ॥ लोकानां च हिते युक्तो रामो दशरथात्मजः ॥ ४ ॥
तस्यैषा लोकनाथस्य धर्मपत्नी यशस्विनी ॥ सीता नाम वरारोहा यां त्वं हर्तुमिहेच्छसि ॥ ५ ॥
कथं राजा स्थितो धर्मे परदारान्परामृशेत् ॥ रक्षणीया विशेषेण राजदारा महाबल ॥ ६ ॥
निवर्तय मतिं नीचां परदाराभिमर्शनात् ॥ न तत्समाचरेद्धीरो यत्परोऽस्य विगर्हयेत् ॥
यथाऽऽत्मनस्तथाऽन्येषां दारा रक्ष्या विमर्शिता ॥ ७ ॥

जयावहः । दुर्मतिः कूटयोधी ॥ ४० ॥ तर्हि मया किं कर्तव्यं तत्राह—रामाय त्विति । तत् अस्य दुर्जयत्वादेव हेतोः ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकोनपञ्चाशः सर्गः ॥ ४९ ॥

अथ स्वामिविषये दासेन यावच्छक्ति शेषवृत्तिरवश्यं कर्तव्येत्यमुमर्थं लोके प्रवर्तयितुं जटायुवृत्तान्तमुपक्षिपति सर्गद्वयेन । अत्र प्रथमं जटायुः सान्त्वनभर्त्सनाभ्यां रावणमनुकूलयितुमिच्छतीत्याह—तं शब्दमित्यादिना । अवसुप्तः ईषत्सुप्तो जटायुः । अथ सीतावचनानन्तरं । तं शब्दं शुश्रुवे । आत्मनेपदमार्षम् । ततः प्रथमं महाशरीरतया रावणं निरीक्ष्य सः वैदेहीं ददर्श ॥ १ ॥ तीक्ष्णतुण्डः तीक्ष्णमुखः । "वक्त्रास्ये वदनं तुण्डं" इत्यमरः । श्रीमान् कैङ्कर्यश्रीसमृद्धः । शुभां रावणस्य शोभनावहां ॥ २ ॥ पुराणे सनातने । धर्मे दास्यवृत्तावित्यर्थः । स्थितः तदेकपरायणः । सत्यं "सत्यं ज्ञानमनन्तं ब्रह्म" इत्युक्तः परमात्मा संश्रयः आलम्बनं यस्य सः भगवदेकोपायनिष्ठ इत्यर्थः । नाम्ना जटायुर्नाम जटायुरिति प्रसिद्धः । तथाच मयि दासे स्थिते तव सीतापहरणं न युक्तमिति भावः ॥ ३ ॥ स्वस्वरूपमुक्त्वा स्वामिस्वरूपमाह—राजेति । महेन्द्रवरुणोपमत्वमेकदेशसाम्यात् । सर्वलोकस्य राजा स्वामी भवतोपि स्वामीत्यर्थः ॥ ४ ॥ तथाच राजदारापहारो न युक्त इत्याह—तस्येति । सहधर्मचारिणीति धर्मपत्नीशब्दार्थः ॥ ५ ॥ मा भूत्तव रामे स्वामित्वबुद्धिः मनुष्यमात्रबुद्धिं राजबुद्धिं वा कृत्वा सीतां परिहरेत्याह—कथमिति । राजा भवानिति शेषः ॥ ६ ॥ राजत्वबुद्धिस्तव रामे मा भूत् तथापि परदाराभिमर्शनं न कार्यमित्याह—निवर्त-

---

ति० अहं सत्यसंश्रवः सत्यप्रतिज्ञः । सीतारक्षणेऽहंसहायइत्युक्तत्वादितिभावः । नाम्नाजटायुरिति प्रसिद्धः । अतो मत्समक्षमीदृशंकर्म कर्तुंनार्हसि । भ्रातरितिसामप्रयोगः । यद्येवंनत्यक्ष्यसि तदा सत्यप्रतिज्ञत्वान्मयासहयुद्धंभावीति दण्डप्रयोगश्चव्यञ्जचः ॥ ३ ॥ ती० रक्षणीयाविशेषेणराजदाराः इत्यनेन राजदारापहरणस्य गुरुतल्पसमत्वादितिभावः ॥ ६ ॥

[पा०] १ ख. माख्यातव्यंविशेषतः. २ ग. जटायुरपि. ३ क. ग. घ. छ. झ. ठ. निरैक्षद्रावणं. ४ क. च. छ. ज. ञ. यशस्विनीं. ५ ख. च. छ. ज. ञ. संकाशः. झ. शृङ्गाभः. ६ च. छ. ज. ञ. खगेश्वरः. ७ ङ. झ. ट. सत्यसंश्रवः. ८ इदमर्धं ङ. झ. ट. पाठेषुदृश्यते. ९ ग. रक्ष्यादाराः. १० क. घ. विमर्शता. ङ.—ट. विमर्शनात.

[1]अर्थं वा यदि वा कामं शिष्टाः शास्त्रेष्वनागतम् ॥ [2]व्यवस्यन्ति न राजानो धर्मं पौलस्त्यनन्दन ॥८॥
राजा धर्मश्च कामश्च [3]द्रव्याणां चोत्तमो निधिः ॥ धर्मः शुभं वा [4]पापं वा राजमूलं प्रवर्तते ॥ ९ ॥
पापस्वभावश्चपलः कथं त्वं रक्षसांवर ॥ [5]ऐश्वर्यमभिसंप्राप्तो विमानमिव दुष्कृतिः ॥ १० ॥
कामं स्वभावो [6]यो यस्य न [7]शक्यः परिमार्जितुम् ॥ न हि दुष्टात्मनामार्यमावसत्यालये चिरम् ॥ ११ ॥
विषये वा पुरे वा ते [9]यदा रामो महाबलः ॥ नापराध्यति धर्मात्मा कथं तस्यापराध्यसि ॥ १२ ॥
यदि शूर्पणखाहेतोर्जनस्थानगतः खरः ॥ अतिवृत्तो हतः पूर्वं रामेणाक्लिष्टकर्मणा ॥ १३ ॥
[10]अत्र ब्रूहि यथातत्त्वं को रामस्य व्यतिक्रमः ॥ यस्य त्वं लोकनाथस्य [11]भार्यां हृत्वा गमिष्यसि ॥१४॥
क्षिप्रं विसृज वैदेहीं मा [12]त्वां घोरेण चक्षुषा ॥ दहे[13]द्दहनभूतेन वृत्रमिन्द्राशनिर्यथा ॥ १५ ॥
सर्पमाशीविषं बद्ध्वा वस्त्रान्ते नावबुध्यसे ॥ ग्रीवायां [14]प्रतिमुक्तं च कालपाशं न पश्यसि ॥ १६ ॥

येति । परदाराभिमर्शनान्मतिं निवर्तय । तद्विषयमतिं न कुर्वित्यर्थः । नीचत्वमेवाह—नेति । धीरः धीमान् । तत्कर्म नसमाचरेत् । अस्य धीरस्य यत् कर्म । परो विगर्हयेत् निन्देत् । विपश्चिता विवेकिना ॥ ७ ॥ शिष्टाः सन्तः । राजानः शास्त्रेष्वनागतमनुपदिष्टं धर्ममर्थंवा यदिवाकामं कामं वा न व्यवस्यन्ति नेच्छन्तीत्यर्थः । लोके यथातथावा भवतु राज्ञस्तव सुतरां नेदमुचितमिति भावः ॥ ८ ॥ नकेवलंस्वार्थं लोकानुग्रहार्थं चेदं परिहर्तव्यमित्याह—राजेति । अत्रधर्मादिशब्दौ धर्मादिप्रवर्तकपरौ । द्रव्याणामर्थानामुत्तमो निधिराश्रयः । यस्मादेवं तस्मात् धर्मः धर्मादिः । राजमूलंयथातथाप्रवर्तते । शुभं शुभाचारः । पापं वा राजमूलं प्रवर्तते । राजानुसारेण लोकाः धर्माधर्मादिषु प्रवर्तन्ते । अतोराज्ञा पापं विहाय धर्मादिकमेव कर्तव्यमित्यर्थः ॥ ९ ॥ परदाराभिमर्शनमैश्वर्याद्भ्रंशकं चेत्याह—पापस्वभाव इति । पापं स्वभावःसहजधर्मो यस्य स पापस्वभावः । अतएव चपलः विषयप्रवणः । त्वं दुष्कृतिः । विमानं देवार्हं विमानमिव । ऐश्वर्यमभि ऐश्वर्यंप्रति । कथं संप्राप्तः योग्यः । एवं विषयचपलश्चेदैश्वर्याद्भ्रष्टो भविष्यसीति भावः ॥ १० ॥ एवं बहुसान्त्वनेपि सीताविसर्जनाकरणात् भवादृशे उपदेशो निरर्थक इत्याह—काममिति । यो यस्य स्वभावः औत्पत्तिकः । स धर्मः कामं अत्यन्तं । परिमार्जितुं न शक्यः । उपदेशेन निवर्तयितुं न शक्य इत्यर्थः । तथाहि आर्यं सदुपदेशः । दुष्टात्मनां आलये हृदये । चिरं नावसति न तिष्ठति ॥ ११ ॥ शत्रुभार्यापहरणं मम स्वभाव इत्याशङ्क्य शात्रवप्रसक्तिरत्र नास्तीत्याह—विषये वेति । विषये राज्ये । यदा नापराध्यति तदा तस्य कथमपराध्यसि ॥ १२ ॥ खरवध एव ममापराध इत्याशङ्क्याह द्वाभ्यां । वृत्तं मर्यादामतिक्रान्तोतिवृत्तः । अत्र हननविषये । यस्येति तस्येति पूर्वशेष ॥ १३—१४ ॥ प्रकृतमुपसंहरति—क्षिप्रमिति । अत्र राम इत्यध्याहार्यं । चक्षुषेत्यनेन दर्शनमात्रेण वधो लक्ष्यते । अशनिः वज्रं ॥ १५ ॥ सीताग्रहणमवश्य मृत्युकरमित्याह—सर्पमित्यादिना । आशीविषं आशीविषाख्यं । प्रतिमुक्तं आमुक्तं । यथा वस्त्रबद्ध सर्पोऽवश्यं नाशयति तद्वदियं सीता गृहीता त्व

ति० शास्त्रेष्वनागतं शास्त्रेष्वनवगतं परमसूक्ष्मत्वाच्छास्त्रतोनवगतमप्यर्थंवा राजानमनुसृत्य व्यवस्यन्ति । शास्त्रेऽस्फुटमि राज्ञआचरणंदृष्ट्वाप्रजाआचरन्ति । तस्माद्राज्ञोऽधर्मप्रवृत्तिरनुचितेतितात्पर्यं । नव्यवस्यन्तिराजानइतिपाठे शास्त्रेष्वनागतं तत्राप्रतिपादितंधर्मं राजानोनव्यवस्यन्ति नेच्छन्तीत्यर्थः । तस्माच्छास्त्रानुसारिधर्मेएव मतिंकुर्यादित्याशयः ॥ ८ ॥ **स०** कार्यगौरवादार्येति रावणसंबोधनं । दुष्टात्मनामालये मालक्ष्मीः चिरंबहुकालं नवसति । किंतु आर्यमा ज्येष्ठलक्ष्मीर्वसति । पूर्वत्र मा वसतीतिच्छेदः ॥ ११ ॥

[पा०] १ च. छ. ज. ञ. धर्ममर्थंचकामंच. २ ङ. झ. ट. व्यवस्यन्त्यनुराजानं. क. च. छ. ज. ञ. नव्यवस्यन्ति ३ च. छ. ज. ञ. द्रव्याणामुत्तमो. ४ क. च. छ. ज. कामोवा. ५ घ. ऐश्वर्यमिह. ६ ङ. झ. ट. यस्सोसौ. ७ ङ. झ. शक्यःसंप्रमार्जितुं. घ. शक्यःपरिवर्जितुं. ८ घ. मार्याह्यावसन्त्यालये. ९ ख. ग. यथा. ग. यदि. १० ख. च. छ. ज तत्रब्रूहियथासत्यं. ११ क. ख. ग. ङ.—ट. हत्वाभार्यां. १२ च. छ. ज. ञ. त्वां. १३ क. ख. च. छ. ज. ञ. दहनकल्पेन १४ घ. प्रतिसक्तं. छ. प्रतियुक्तं.

स भारः सौम्य भर्तव्यो यो नरं नावसादयेत् ॥ तदन्नमपि भोक्तव्यं जीर्यते यदनामयम् ॥१७॥
यत्कृत्वा न भवेद्धर्मो न कीर्तिर्न यशो भुवि ॥ शरीरस्य भवेत्खेदः कस्तत्कर्म समाचरेत् ॥ १८ ॥
षष्टिर्वर्षसहस्राणि मम जातस्य रावण ॥ पितृपैतामहं राज्यं यथावदनुतिष्ठतः ॥ १९ ॥
वृद्धोऽहं त्वं युवा धन्वी सशरः कवची रथी ॥ तथाऽप्यादाय वैदेहीं कुशली न गमिष्यसि ॥२०॥
न शक्तस्त्वं बलाद्धर्तुं वैदेहीं मम पश्यतः ॥ हेतुभिर्न्यायसंयुक्तैर्ध्रुवां वेदश्रुतीमिव ॥ २१ ॥
युध्यस्व यदि शूरोसि मुहूर्तं तिष्ठ रावण ॥ शयिष्यसे हतो भूमौ यथा पूर्वं खरस्तथा ॥ २२ ॥
असकृत्संयुगे येन निहता देवदानवाः ॥ नचिराच्चीरवासास्त्वां रामो युधि वधिष्यति ॥ २३ ॥

नाशयिष्यतीति भावः । व्याजस्तुतिरलंकारः ॥ १६ ॥ भारः भारद्रव्यं । नावसादयेत् न पीडयेत् । अनामयं व्याध्यनुत्पादकं । अत्रापिपूर्ववद्व्याजस्तुतिः ॥ १७ ॥ यत्कार्यं कृत्वा स्थितस्य न धर्मो भवेत् । कीर्तिः ऐश्वर्यादिजनिता प्रथावा । न भवेत् । यशः भोगित्वकृतप्रथावा । न भवेत् । प्रत्युत शरीरदुःखमेव भवेत् । तत्कर्म कः समाचरेत् । मूढ एवाचरेत् । तथाविधकर्मकरणाद्भवान्मूढ एवेति भावः ॥१८॥ मयि वृद्धत्वेनावमतिं मा कृथा इत्याशयेनाह द्वाभ्यां । षष्टिर्वर्षसहस्राणि गतानीति शेषः । जातस्येत्यनेन वयसा जीर्णत्वमुच्यते । राज्यं यथावत् अनुतिष्ठतः पालयत इत्यनेन कर्मणा जीर्णत्वमुक्तं । अहं धनुराद्युपकरणरहितः ॥१९—२०॥ एतदेव दृष्टान्तमुखेन द्रढयति—न शक्त इति । मम पश्यतः मयि पश्यति सति । सीतां बलाद्धर्तुं नशक्तः न समर्थः । कथमिव । न्यायसंसिद्धैः न्यायशास्त्रसंसिद्धैः । हेतुभिः अनुमानैः । ध्रुवां निश्चलां । अविचाल्यप्रामाण्यामिति यावत् । वेदश्रुतीमिव वेदश्रुतिमिव । दीर्घ आर्षः । वेदयतीति वेदः । स्वतःप्रमाणभूतां श्रुतिमित्यर्थः । यथा वेदविदग्रसरे पश्यति सति हैतुकैः न्यायसिद्धैर्हेतुभिः श्रुतिः अन्यथा अन्यपरा नेतुं न शक्यते तद्वदिति भावः । अन्यपरार्थवादादिव्यावृत्त्यर्थो वेदशब्दः । यथा तामन्यथा कुर्वन्स्वयमेव विनश्यति न वेदश्रुतेः कापि हानिः । एवं सीतामपहरंस्त्वमेव नशिष्यसि । न तु सीतायाः कापि हानिरित्याकूतं । यथा वेदविदग्रेसरो वेदश्रुतिमन्यथा नीयमानामवलोकयन् तदसहमानो यावच्छक्ति निवर्तयति । तथाऽहमपि त्वया बलान्नीयमानामपि सीतां यावच्छक्ति निवर्तयिष्यामीत्यर्थः ॥ २१ ॥ यदि शूरोसि मुहूर्तं तिष्ठ मा पलायस्व मयायुध्यस्व । युद्धे मया हतस्त्वं पूर्वरामेण हतः खर इव भूमौ शयिष्यसे । यद्वा यदि शूरोसिं तदा मया युध्यस्व । अथवा रामागमनपर्यन्तं मुहूर्तं तिष्ठ तेन हतः शयिष्यस इति । यद्वा यदि शूरोसि मुहूर्तं तिष्ठ स्थित्वा तेन युध्यस्व ॥ २२ ॥ न केवलं स्वापराधप्रतीकारः किन्तु "देवानां दानवानां च सामान्यमधिदैवतं" इत्युक्तस्य रामस्य स्वकीयापराधप्रतीकारोपि भविष्यती-

ति० मेवैदेहीं दशरथमित्रत्वान्ममस्नुषांवैदेहीमादाय नकुशलीगमिष्यसीत्यर्थः ॥२०॥ **ती०** यथा नसुरांपिबेदित्यादिकां ध्रुवांनित्यां निरपेक्षलक्षणांश्रुतिं—सुरापेया द्रवद्रव्यत्वात्क्षीरवदित्यादिभिः न्यायसंयुक्तैः तर्कसहितैःहेतुभिः हर्तुंबाधितुं पुमान्नशक्नेति । किंतु श्रुत्यैवहेतवः कालात्ययापदिष्टाभवन्ति । तथैव हेतुशक्तिसमानमायाबलसंपन्नस्त्वं श्रुतिसदृशींसीतां हर्तुंनशक्तः । किंतु तयैव नश्यसीत्यर्थः । **स०** न्याययुक्तैः आपाततः । हेतुभिः हेत्वाभासैः । श्रुतीमित्यत्र दीर्घआर्षः । यद्वा श्रुतिः क्तिन्प्रत्ययान्तोऽयं । ततश्च "कृदिकारात्—" इतिङीष् ॥ **शि०** न्यायसंयुक्तैः न्याय्यत्वेनप्रतीयमानैः हेतुभिः नास्तिकादियुक्तिभिः ईश्वरोनास्ति अदृश्यत्वादित्यादिहेत्वाभासैः ध्रुवां क्षित्यङ्कुरादिकंसकर्तृकं कार्यत्वादित्याद्यनुमानेन "यतोवाइमानिभूतानिजायन्ते" इत्यादिशब्देनच "दृश्यतेत्वग्र्यायाबुद्ध्या" इत्याद्युक्त्या प्रत्यक्षेणच कप्यासंपुण्डरीकमिवेत्याद्युक्त्योपमानेनच सिद्धां । वेदश्रुतीं वेदानांसामादीनां श्रुतयः तात्पर्यवृत्त्या यस्यांपरदेवतायां तामिव । दीर्घआर्षः ॥ २१ ॥ **स०** नचिरात् अल्पकाले । **ति०** संयुगे रामेणेति

[पा०] १ ङ. झ. ट. ध्रुवं. २ घ. नतत्कर्म. ३ ङ.—ञ. षष्टिवर्षं. ४ ख. ङ.—ट. जातस्यमम. ५ क. ख. ग. ङ. छ. झ. ञ. ट. सरथःकवचीशरी. ६ ङ. झ. ट. नचाप्यादायकुशलीवैदेहींमे. ख. नचाप्यादायवैदेहींकुशलीमे. ७ च. छ. ज. ञ. मागमिष्यसि. ८ झ. दैत्य.

किंनु शक्यं मया कर्तुं गतौ दूरं नृपात्मजौ ॥ क्षिप्रं त्वं नश्यसे नीच तयोर्भीतो न संशयः ॥२४॥
नहि मे जीवमानस्य नयिष्यसि शुभामिमाम् ॥ सीतां कमलपत्राक्षीं रामस्य महिषीं प्रियाम् ॥२५॥
अवश्यं तु मया कार्यं प्रियं तस्य महात्मनः ॥ जीवितेनापि रामस्य तथा दशरथस्य च ॥ २६ ॥
तिष्ठतिष्ठ दशग्रीव मुहूर्तं पश्य रावण ॥ युद्धातिथ्यं प्रदास्यामि यावत्प्राणं निशाचर ॥ २७ ॥
वृन्तादिव फलं त्वां तु पातयेयं रथोत्तमात् ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

एकपञ्चाशः सर्गः ॥ ५१ ॥

जटायुषासहयुध्यतारावणेन तेननिजरथादिभञ्जनेभूमौनिपतनम् ॥ १ ॥ किंचित्परिश्रान्तेजटायुषि लब्धावकाशेनरावणेन पुनःसीतामादायपलायनम् ॥ २ ॥ पुनरमर्षात्तदनुधाविनाजटायुषा खरतरनखैस्तत्पृष्ठविदारणपूर्वकंतुण्डेनतदीयभुजमण्डलखण्डनम् ॥ ३ ॥ पुनःप्ररूढभुजमण्डलेनतेनसीताविसर्जनपूर्वकंमुहूर्तंनियुध्यखड्गेनजटायुषःपक्षपादच्छेदनम् ॥ ४ ॥ सीतयाभूशायिनोमन्दजीवितस्यजटायोरालिङ्गनेनपरिदेवनम् ॥ ५ ॥

इत्युक्तस्य यथान्यायं रावणस्य जटायुषा ॥ क्रुद्धस्याग्निनिभाः सर्वा रेजुर्विंशतिदृष्टयः ॥ १ ॥
संरक्तनयनः कोपात्तप्तकाञ्चनकुण्डलः ॥ राक्षसेन्द्रोऽभिदुद्राव पतगेन्द्रममर्षणः ॥ २ ॥
स संप्रहारस्तुमुलस्तयोस्तस्मिन्महावने ॥ बभूव वातोद्धतयोर्मेघयोर्गगने यथा ॥ ३ ॥
तद्बभूवाद्भुतं युद्धं गृध्रराक्षसयोस्तदा ॥ सपक्षयोर्माल्यवतोर्महापर्वतयोरिव ॥ ४ ॥
ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः ॥ अभ्यवर्षन्महाघोरैर्गृध्रराजं महाबलः ॥ ५ ॥

त्याह—असकृदिति ॥ २३ ॥ एवमुक्तेपि पुनः पलायमानंप्रत्याह—किंन्विति । किंनु शक्यंकिंवा शक्यं। नश्यसे अदर्शनं प्राप्नोषि । तयोः ताभ्यां ॥ २४ ॥ तथापि त्वां नाहं गमयामीत्याह—नहीति । जीवमानस्य जीवतः । मयि जीवतीत्यर्थः ॥२५॥ त्वया किं कर्तुं शक्यमित्यत्राह—अवश्यमिति । जीवितेनापि जीवितव्ययेनापि ॥ २६ ॥ यथाप्राणं यथाबलं ॥ २७ ॥ वृन्तादित्यर्धमेकान्वयं । “ वृन्तं प्रसवबन्धनं ” इत्यमरः ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चाशः सर्गः ॥ ५० ॥

अथ स्वामिकार्याय प्राणत्यागमकरोज्जटायुरित्याह—इतीत्यादिना ॥१॥ अमर्षणः असहनः ॥२॥ सः युध्यस्वेति पूर्वप्रवर्तितः । संप्रहारः युद्धं । वा ताभ्यां प्रतिकूलवायुभ्यां उद्धतयोः प्रेरितयोः । मेघपक्षे संप्रहारः संघट्टनमात्रं ॥ ३ ॥ सपक्षयोः पक्षसहितयोः । माल्यवतोः माल्यवन्नामानौ द्वौपर्वतौ एको दण्डकारण्ये पूर्वमुक्तः “माल्यवन्तं शिखरिणं”इति । अन्यः किष्किन्धासमीपे । वक्ष्यति वर्षावर्णने ॥ ४ ॥ नालीकैः नालमात्रशरैः । नाराचैः आयसशरैः । विक-

---

शेषः। नवधिष्यति अपितु वधिष्यतीत्यर्थः। अनेन रामस्येश्वरत्वंव्यङ्ग्यं ॥२३॥ **स०** अल्पकालव्यवधानमपि कुतइत्यतआह—किंनुशक्यमिति । तयोः ताभ्यां ॥ २४ ॥ इतिपञ्चाशस्सर्गः ॥ ५० ॥

ति० माल्यवतोः द्वौमाल्यवन्तौ एको दण्डकारण्ये । अपरोमेरुपार्श्वे । यद्वा यद्यर्थोक्ता कल्पनेयं । यदिद्वौमाल्यवन्तौ सपक्षौयुध्येयातां तदा तत्सदृशमिदमिति । तेनानुपमलंफलति ॥ ४ ॥ **स०** नालीकाः अव्यर्थीभवन्तश्चते नाराचाश्चतैः । रूढोवा

[पा०] १ ख. ग. ङ. च. छ. ट. किंतु. २ ग. क्षिप्रंच. ३ च. छ. ज. ञ. नमेत्वं. ४ युद्धातिथ्यं. वृन्तादिवेत्यनयोरर्धयोःपौर्वापर्यं ङ.—ट. पाठेषुदृश्यते. ५ क.—ट. यथाप्राणं. ६ घ. फलंपक्वं. ७ ग. घ. ङ. झ. ञ. ट. इत्युक्तः क्रोधताम्राक्षस्तप्त. ८ क. च. ज. क्रोधात्. ९ ख. भूषणः. १० ङ.—ट. महामृधे. ११ ङ. झ. वातोद्धुतयोः. १२ ङ. च. ज. झ. ट. महाबलं.

स तानि शरजालानि गृध्रः पत्ररथेश्वरः ॥ जटायुः प्रतिजग्राह रावणास्त्राणि संयुगे ॥ ६ ॥
तस्य तीक्ष्णनखाभ्यां तु [1]चरणाभ्यां महाबलः ॥ चकार बहुधा गात्रे व्रणान्[2]पतगसत्तमः ॥ ७ ॥
अथ [3]क्रोधाद्दशग्रीवो जग्राह दश मार्गणान् ॥ मृत्युदण्डनिभान्घोराञ्[4]शत्रुमर्दनकाङ्क्षया ॥ ८ ॥
स तैर्बाणैर्महावीर्यः पूर्णमुक्तैरजिह्मगैः ॥ बिभेद निशितैस्तीक्ष्णैर्गृध्रं घोरैः शिलीमुखैः ॥ ९ ॥
स [5]राक्षसरथे पश्यञ्जानकीं बाष्पलोचनाम् ॥ अचिन्तयित्वा [6]तान्बाणान्राक्षसं समभिद्रवत् ॥ १० ॥
ततोस्य सशरं चापं मुक्तामणिविभूषितम् ॥ चरणाभ्यां महातेजा बभञ्ज [7]पतगेश्वरः ॥ ११ ॥
ततोन्यद्धनुरादाय रावणः क्रोधमूर्च्छितः ॥ ववर्ष शरवर्षाणि शतशोथ सहस्रशः ॥ १२ ॥
शरैरावारितस्तस्य संयुगे पतगेश्वरः ॥ कुलाय[8]मुपसंप्राप्तः [9]पक्षीव प्रबभौ तदा ॥ १३ ॥
स तानि [10]शरवर्षाणि पक्षाभ्यां [11]च विधूय च ॥ चरणाभ्यां महातेजा बभञ्जास्य महद्धनुः ॥ १४ ॥
तच्चाग्निसदृशं दीप्तं रावणस्य [12]शरावरम् ॥ [13]पक्षाभ्यां स [14]महवीर्यो [15]व्याधुनोत्पतगेश्वरः ॥ १५ ॥
काञ्चनोरश्छदान्दिव्यान्पिशाचवदनान्खरान् ॥ तांश्चास्य जवसंपन्नाञ्जघान समरे बली ॥ १६ ॥
वरं त्रि[16]वेणुसंपन्नं कामगं पावकार्चिषम् ॥ [17]मणिहेमविचित्राङ्गं [18]बभञ्ज च महारथम् ॥ १७ ॥
पूर्णचन्द्रप्रतीकाशं छत्रं च व्यजनैः सह ॥ पातयामास वेगेन ग्राहिभी राक्षसैः सह ॥ १८ ॥
सारथे[19]श्चास्य वेगेन [20]तुण्डेनैव महच्छिरः ॥ [21]पुनर्व्यपाहरच्छ्रीमान्पक्षिराजो महाबलः ॥ १९ ॥
[22]स भग्नधन्वा विरथो हताश्वो हतसारथिः ॥ अङ्केनादाय वैदेहीं पपात भुवि रावणः ॥ २० ॥
दृष्ट्वा निपतितं भूमौ रावणं भग्नवाहनम् ॥ साधुसाध्विति भूतानि गृध्रराजमपूजयन् ॥ २१ ॥

र्णिभिः अङ्कुशाग्रशरैः ॥ ५ ॥ पत्ररथेश्वरः पक्षीश्वरः। प्रतिजग्राह सेहे । रावणास्त्राणि रावणप्रयुक्तास्त्राणि ॥ ६ ॥ तस्य रावणस्य गात्रे ॥ ७ ॥ मार्गणान् बाणान् ॥ ८ ॥ पूर्ण आकर्णाकृष्टं यथा तथा मुक्तैः अजिह्मगैः ऋजुगामिभिः । निशितैः शाणोल्लीढैः । अतएव तीक्ष्णैः घोरैः भयङ्करैः । शिलीमुखैः शिली शल्यं मुखे येषां तैः बाणैः । गृध्रं बिभेद ॥ ९ ॥ समभिद्रवत् समभ्यद्रवत् ॥ १० ॥ सशरं संहितशरं ॥ ११ ॥ क्रोधमूर्छितः क्रोधेन व्याप्तः ॥ १२ ॥ आवारितः आसमन्ताद्व्याप्तः । कुलायं नीडं । प्राप्तः पक्षीव बभौ ॥ १३ ॥ तानि च पक्षाभ्यां विधूय चरणाभ्यां धनुर्बभञ्ज चेत्यन्वयः ॥ १४ ॥ शरावरं कवचं पक्षाभ्यां पक्षवातेन। व्याधुनोत् प्राच्यावयत् ॥ १५ ॥ काञ्चनोरश्छदान् स्वर्णमयकवचयुक्तान् । "उरश्छदः कङ्कटको जागरः कवचोस्त्रियां" इत्यमरः । बली जटायुः ॥ १६ ॥ त्रिवेणुः युगन्धरः । कामं यथेच्छं गच्छतीति कामगं ॥ १७ ॥ ग्राहिभिः छत्रचामरादिग्राहकैः । "नन्दिग्रहि—"इत्यादिना णिनिः ॥ १८ ॥ व्यपाहरत् खण्डितवान् । पुनरित्यनेन छत्रादिखण्डनं तुण्डेनेति सूच्यते ॥ १९ ॥ भग्नधन्वा "धनुषश्च" इत्यनङ् ॥ २० ॥ अपूजयन् मनसेति शेषः ॥ २१ ॥

नालीकशब्दः । शरविशेषस्तदर्थः ॥ ५ ॥ **ति०** रावणास्त्राणिरावणक्षिप्तानीतिशरजालविशेषणं । अस्यतेरौणादिकस्त्रन् । रावणास्त्रानीतिपाठस्तुसुगमएव ॥ ६ ॥ **ती०** बाणाजिह्मगशब्दौ गुणवचनौ । बाणयन्तिरोषयन्तिशत्रुमितिबाणाः ॥ ९ ॥ **ति०** शरासनमितिपाठे शरप्रक्षेपकारणं । तच्च द्वितीयंधनुश्च बभञ्जेत्यन्वयः ॥ व्यधुनोत् कंपयतिस्म । रावणमितिशेषः ॥ १५ ॥ **ति०** अङ्केन कटिभागेन ॥ २० ॥

[पा०] १ ग. चरणाभ्यामपोथयत्. २ च. छ. ज. न्विहगसत्तमः. ३ घ. क्रुद्धोदशग्रीवो. ४ ङ.—ट. शत्रोर्निधन. ५ ट. रावणरथे. ६ ङ.—ट. बाणांस्तान्. ७ ङ.—ट. पतगोत्तमः. ८ ग. ङ.—ट. मभिसंप्राप्तः. ९ ङ. झ. ट. पक्षिवच्चबभौ. ख. ग. च. छ. ज. ञ. पक्षीवसबभौ. १० ङ. झ. ट. शरजालानि. ११ ग. घ. च. ज.—ट. तुविधूयह. १२ ख. च. ज. शरासनं. १३ क.—ट. पक्षाभ्यांच. १४ ङ. झ. ञ. ट. महातेजाः. १५ झ. व्यधुनोत्. १६ ङ. झ. ट. अथत्रिवेणु. १७ ङ. झ. मणिसोपानचित्राङ्गं. १८ ख. च. छ. ज. ञ. बभञ्जाथ. १९ घ. स्तस्य. २० ङ. झ. ट. तुण्डेनच. २१ ग. ञ. छ. झ. व्यपहनत्. २२ घ. भग्नधन्वास.

परिश्रान्तं तु तं दृष्ट्वा जरया पक्षियूथपम् ॥ उत्पपात पुनर्हृष्टो मैथिलीं गृह्य रावणः ॥ २२ ॥
तं प्रहृष्टं निधायाङ्के [1]गच्छन्तं जनकात्मजाम् ॥ गृध्रराजः समुत्पत्य [2]समभिद्रुत्य रावणम् ॥
[3]समावार्य महातेजा जटायुरिदमब्रवीत् ॥ २३ ॥
वज्रसंस्पर्शबाणस्य भार्यां रामस्य रावण ॥ अल्पबुद्धे हरस्येनां वधाय खलु रक्षसाम् ॥ २४ ॥
समित्रबन्धुः सामात्यः सबलः सपरिच्छदः ॥ विषपानं पिबस्येतत्पिपासित इवोदकम् ॥ २५ ॥
अनुबन्धमजानन्तः कर्मणामविचक्षणाः ॥ शीघ्रमेव विनश्यन्ति यथा त्वं विनशिष्यसि ॥ २६ ॥
बद्धस्त्वं कालपाशेन क्व गतस्तस्य मोक्ष्यसे ॥ वधाय बडिशं गृह्य सामिषं जलजो यथा ॥ २७ ॥
न हि जातु दुराधर्षौ काकुत्स्थौ तव रावण ॥ धर्षणं चाश्रमस्यास्य क्षमिष्येते तु राघवौ ॥ २८ ॥
यथा त्वया कृतं कर्म भीरुणा लोकगर्हितम् ॥ तस्कराचरितो मार्गो नैष वीरनिषेवितः ॥ २९ ॥
युध्यस्व यदि शूरोसि मुहूर्तं तिष्ठ रावण ॥ शयिष्यसे हतो भूमौ यथा भ्राता खरस्तथा ॥ ३० ॥
परेतकाले पुरुषो यत्कर्म प्रतिपद्यते ॥ विनाशायात्मनोऽधर्म्यं प्रतिपन्नोसि कर्म तत् ॥ ३१ ॥
पापानुबन्धो वै यस्य कर्मणः [4]कर्म को नु तत् ॥ कुर्वीत लोकाधिपतिः स्वयंभूर्भ[5]गवानपि ॥ ३२ ॥
एवमुक्त्वा शुभं वाक्यं जटायुस्तस्य रक्षसः ॥ निपपात भृशं पृष्ठे दशग्रीवस्य वीर्यवान् ॥ ३३ ॥
तं गृहीत्वा नखैस्तीक्ष्णैर्वि[6]रराद समन्ततः ॥ अधिरूढो गजारोहो यथा स्याद्दुष्टवारणम् ॥ ३४ ॥

गृह्य गृहीत्वा ॥ २२ ॥ तमित्यादिसार्धश्लोक एकान्वयः । समुत्पत्य ऊर्ध्वं गत्वा । समभिद्रुत्य अभिमुखं गत्वा । समावार्य सम्यगवरुध्य ॥ २३ ॥ वज्रसंस्पर्शाः वज्रसमस्पर्शाः बाणाः यस्य ॥ २४ ॥ पीयत इति पानं पानकरसादि । विषयुक्तं पानमिति मध्यमपदलोपिसमासः । यद्वा । विषस्य पानं विषपानं । एतत्सीताहरणरूपं विषपानं पिबसि करोषि । ओदनपाकं पचतीतिवत्प्रकृतेः प्रत्ययोपस्थानमात्रं प्रयोजनं ॥ २५ ॥ अनुबध्यत इत्यनुबन्धः फलं । अविचक्षणाः असमर्थाः । कर्मणां आत्मना क्रियमाणानां । फलमजानन्तः शीघ्रं विनश्यन्ति । तत्रोदाहरणं भवानित्याह—यथेति ॥ २६ ॥ कालपाशेन बद्धस्त्वं क्व देशे गतः सन् तस्य तस्मात्कालपाशान्मोक्ष्यसे सहानुवर्तमानाद्बन्धात्कथं ते मुक्तिर्भविष्यतीत्यर्थः । सामिषं मांससहितं । बडिशं मत्स्यबन्धनं । "बडिशं मत्स्यबन्धनं" इत्यमरः । आमिषलोभेन गृह्य गृहीत्वा । जलजो मत्स्यो यथा देशान्तरं गतोपि न जीवति बडिशामोक्षणात् तद्वत् ॥ २७ ॥ आश्रमकर्मकं त्वत्कर्तृकं धर्षणं परिभवं । आश्रमशब्देन आश्रमस्था सीतोच्यते । मञ्चाः क्रोशन्तीतिवत् ॥ २८ ॥ लोकगर्हितं कर्म भीरुणा त्वया यथा कृतं तथा तस्कराचरितो मार्गः । तस्करकृत्यतुल्यं त्वत्कृत्यमित्यर्थः । तस्मादेष मार्गः वीरनिषेवितो न भवतीत्यर्थः ॥ २९ ॥ युध्यस्वेति पूर्वसर्गान्ते व्याख्यातोयं ॥ ३० ॥ परेतकाले मृत्युकालइत्यर्थः । यत्कर्म यादृशं कर्म । पुरुषः आत्मविनाशाय प्रतिपद्यते प्राप्नोति । अधर्म्यं अधर्मादनपेतं । तत्कर्म सीताहरणरूपं प्रतिपन्नोसि । एतादृशकर्मकरणादवश्यमविलम्बितं मृत्युं प्राप्नोषीत्यर्थः ॥ ३१ ॥ यस्य कर्मणः पापानुबन्धः पापफलसंबन्धो भवति तत्कर्म लोकाधिपतित्वादिविशिष्टोपि को नु कुर्वीत ॥३२॥ पृष्ठ इत्यनेन जटायुषमनादृत्य रावणस्य पलायमानत्वं गम्यते ॥ ३३ ॥ तं गृहीत्वा बलान्निवर्त्याधिरूढः सन् जटायुः गजारोहो यन्ता दुष्टवारणं पलायितं अङ्कुशैर्निरुध्य यथाविदारयति तथा नखैः

ति० सबलः सचतुरङ्गबलः । परिच्छदः दासीदासादि । निदर्शनालङ्कारोत्र । तत्सहितो नशिष्यसीतितात्पर्यम् ॥ २५ ॥ ति० दुष्टवारणमधिरूढो गजारोहो हास्तिपको गजविषयेयथास्यात् यादृशव्यापारोभवेत् गजक्षतकरणव्यापारोभवेत् तथा ॥ ३४ ॥

[पा०] १ ङ. झ. ट. रावणंजनकात्मजां. एतदनन्तरं. गच्छन्तंखङ्गशेषंच प्रनष्टहतसाधनं, इत्यर्धमधिकंदृश्यते. २ ङ.—ट. रावणंसमभिद्रवत्. ३ क. ङ.—ज. ञ. तमावार्य. ४ ङ.—ट. कोनुतत्पुमान्. ५ ग. भगवानिव. ६ ख. ग. च.—ट. विददार.

वि[1]रराद नखैरस्य तुण्डं पृष्ठे समर्पयन् ॥ केशांश्चोत्पाटयामास नखपक्षमुखायुधः ॥ ३५ ॥
स तथा गृध्रराजेन क्लिश्यमानो मुहुर्मुहुः ॥ अमर्षस्फुरितोष्ठः सन्प्राकम्पत स[3] रावणः ॥ ३६ ॥
स[4] परिष्वज्य वैदेहीं वामेनाङ्केन रावणः ॥ तलेनाभिजघा[5]नाशु जटायुं क्रोधमूर्च्छितः ॥ ३७ ॥
जटायु[6]स्तमभिक्रम्य तुण्डेनास्य खगाधिपः ॥ वामबाहून्दश तदा व्यपाहरदरिंदमः ॥ ३८ ॥
संच्छिन्नबाहोः स[7]द्यैव बाहवः सहसाऽभवन् ॥ विषज्वालावलीयुक्ता वल्मीकादिव पन्नगाः ॥३९॥
ततः क्रोधाद्दशग्रीवः सीतामुत्सृज्य रावणः ॥ मुष्टिभ्यां चरणाभ्यां च गृध्रराजमपोथयत् ॥ ४० ॥
ततो मुहूर्तं संग्रामो बभूवातुलवीर्ययोः ॥ राक्षसानां च मुख्यस्य पक्षिणां प्रवरस्य च ॥ ४१ ॥
तस्य व्यायच्छमानस्य रामस्यार्थे स रावणः ॥ पक्षौ पार्श्वौ च पादौ च खड्गमु[11]द्धृत्य सोच्छिनत् ॥४२॥
स च्छिन्नपक्षः सहसा रक्षसा रौद्र[12]कर्मणा ॥ निपपात ह[13]तो गृध्रो धरण्यामल्पजीवितः ॥ ४३ ॥
तं दृष्ट्वा पतितं भूमौ क्षतजार्द्रं जटायुषम् ॥ अभ्यधावत वैदेही स्वबन्धुमिव दुःखिता ॥ ४४ ॥

तं नीलजीमूतनिकाशकल्पं सुपाण्डुरोरस्कमुदारवीर्यम् ॥
ददर्श लङ्काधिपतिः पृथिव्यां जटायुषं शान्तमिवाग्निदावम् ॥ ४५ ॥
ततस्तु तं पत्ररथं महीतले निपातितं रावणवेगमर्दितम् ॥
पु[14]नः परिष्वज्य शशिप्रभानना रुरोद सीताजनकात्मजा तदा ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

विरराद । स्यादिति संभावनायां ॥ ३४ ॥ नखपक्षमुखायुधो गृध्रः अस्य रावणस्य पृष्ठे नखैः सह तुण्डं समर्पयन् व्यापारयन्सन् । विरराद व्यदारयदित्यर्थः । केशांश्चोत्पाटयामास ॥३५॥ अमर्षेण क्रोधेन । स्फुरितोष्ठः चलितोष्ठः । प्राकम्पत प्रहारार्थं प्रदक्षिणं प्राचलदित्यर्थः॥३६॥ अङ्केन ऊरुभागेन । जटायुं जटायुरित्युकारान्तोप्यस्ति ॥ ३७ ॥ अभिक्रम्य अभितोगत्वा । अवसरंप्रतीक्ष्येत्यर्थः । अस्य वामबाहून् यैःसीतापरिष्वक्ता तानित्यर्थः । व्यपाहरत् अच्छिनत् ॥ ३८ ॥ संछिन्नबाहोः रावणादिति शेषः । सद्यैवेत्यार्षे सलोपे वृद्धिः । अभवन् प्रादुरभवन् । विषज्वालेत्युपमानविशेषणाद्बाहूनांसायुधत्वं गम्यते ॥ ३९ ॥ अपोथयत् अताडयत् ॥ ४० ॥ संग्रामो युद्धं ॥ ४१ ॥ व्यायच्छमानस्य व्यायामं कुर्वतः । "आङोयमहनः" इत्यात्मनेपदं "शरीरायासजनकं कर्मव्यायामउच्यते" इति वाग्भटः । युद्धं कुर्वतः इत्यर्थः । पार्श्वौ पक्षमूले ॥ ४२ ॥ अल्पजीवितः द्वित्रिक्षणावस्थानोचितप्राण इत्यर्थः ॥ ४३ ॥ क्षतजं शोणितं ॥ ४४ ॥ नीलजीमूतनिकाशकल्पं नीलमेघप्रकाशतुल्यं । अग्निदावं दावाग्निं ॥ ४५ ॥ परिष्वज्य बाहुभ्यामिति शेषः ॥ ४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकपञ्चाशः सर्गः ॥ ५१ ॥

स० अग्निदावं अग्निषुदावं दावाग्निमिव ॥ ३५ ॥ **ती०** सर्गफलश्रुतिःस्कान्दे—श्रुत्वाखगेश्वरस्यापि रक्षसामीश्वरस्यच । आयोधनमृणान्मुक्तो भृत्यस्स्वामिकृताद्भवेत् ॥ इत्येकपञ्चाशस्सर्गः ॥ ५१ ॥

[**पा०**] १ ख. च. छ. ज. ञ. विददारनखैस्तुण्डंतस्य. घ. ङ. झ. ट. विंददार. २ तदा. ३ ख. ट. च. राक्षसः. ४ ख. परिष्वज्यच. क. घ. ङ. च. ज.—ट. संपरिष्वज्य. ५ क.—ट. जघानार्तो. ६ क. ख. ङ. झ. ञ. ट. मतिक्रम्य. ७ क. घ. ङ. छ. झ. ञ. ट. सद्योवै. ८ क. ख. ङ.—ट. वीर्यवान्. ९ ख. च. छ. ज. ञ. स्यार्थेऽथ. १० ङ. छ. झ. ट. पादौच. पार्श्वौच. ११ घ. मुद्यम्य. १२ च. छ. ज. ञ. घोरकर्मणा. १३ ङ. झ. ट. महागृध्रो. छ. ततोगृध्रो. १४ ङ. झ. ट. पुनश्चसंगृह्य.

द्विपञ्चाशः सर्गः ॥ ५२ ॥

जटायुंप्रतिरामलक्ष्मणयोः स्ववृत्तान्तनिवेदनावधिप्राणधारणरूपवरदानपूर्वकं तदङ्गपरामर्शेन परिदेवयमानांसीतामेत्य रावणेनपुनःकेशग्रहणेन तदपहरणपूर्वकं गगनमार्गेणगमनम् ॥ १ ॥ तदानीं हरिणादिप्राणिगणैरावणगर्हणपूर्वकं दुःखात्परिदेवनम् ॥ २ ॥ रावणस्यगतेर्वेगात्सीताङ्गेभ्योहारनूपुराद्याभरणानांधरणीतलेपरिभ्रंशनम् ॥ ३ ॥

[१]तमल्पजीवितं [२]गृध्रं स्फुरन्तं राक्षसाधिपः ॥ ददर्श [३]भूमौ पतितं समीपे राघवाश्रमात् ॥ १ ॥
सा तु ताराधिपमुखी रावणेन समीक्ष्य तम् ॥ गृध्रराजं विनिहतं विललाप सुदुःखिता ॥ २ ॥
आलिङ्ग्य गृध्रं निहतं रावणेन बलीयसा ॥ विललाप सुदुःखार्ता सीता शशिनिभानना ॥ ३ ॥
निमित्तं [४]लक्षणज्ञानं शकुनिस्वरदर्शनम् ॥ अवश्यं सुखदुःखेषु नराणां [५]प्रतिदृश्यते ॥ ४ ॥
नूनं राम न जानासि महद्व्यसनमात्मनः ॥ धावन्ति नूनं [६]काकुत्स्थं मदर्थं मृगपक्षिणः ॥ ५ ॥
अयं हि [७]पापचारेण मां त्रातुर्[८]मभिसंगतः ॥ शेते विनिहतो भूमौ ममाभाग्याद्विहंगमः ॥ ६ ॥
[[९]रावणेन हृतां मां हि कथयित्वा विहंगम ॥ राघवाभ्यां यथातत्त्वमथो हास्यसि जीवितं ॥ ७ ॥
आदेहपातं पक्षीश युध्यता रावणेन यत् ॥ त्वया विदर्शितस्नेहौ श्वशुरे मम राघवौ ॥ ८ ॥
जटायो हरणं यावन्मम रामाय वक्ष्यसि ॥ तावच्छरीरे ते प्राणाः संचरिष्यन्ति धीरपि ॥ ९ ॥
इति पक्षिं समालिङ्ग्य स्मृत्वा श्वशुरमेव च ॥ उच्चैस्स्वरेण चुक्रोश हा राघव न पश्यसि] ॥ १० ॥
त्राहि मामद्य काकुत्स्थ लक्ष्मणेति वराङ्गना ॥ सुसंत्रस्ता समाक्रन्दच्छृण्वतां तु यथाऽन्तिके ॥११॥
तां क्लिष्टमाल्याभरणां विलपन्तीमनाथवत् ॥ अभ्यधावत वैदेहीं रावणो राक्षसाधिपः ॥ १२ ॥

जटायुर्युद्धकाले विसृष्टायाः सीतायाः पुनरपि रावणेन हरणप्रकारमाह । राघवाश्रमादित्यवधित्वात्पञ्चमी ॥ १ ॥ रावणेन विनिहतं समीक्ष्येत्यन्वयः ॥ २ ॥ विशेषान्तरं वक्तुं पुनरनुवदति—आलिङ्ग्येति । कराभ्यांसंस्पृश्येत्यर्थः ॥ ३ ॥ लक्षणानि अक्षिस्पन्दनादीनि तेषां ज्ञानं । शकुनीनां पिङ्गल्यादीनां स्वरस्य दर्शनं ज्ञानं । नराणां सुखदुःखेषु निमित्तं ज्ञापकं प्रतिदृश्यते ॥ ४ ॥ ततःकिमित्यत्राह—नूनमिति । हे राम आत्मनो महद्व्यसनं न जानासि किमिति काकुः । जानास्येव । यस्मान्मदर्थं मदपहरणसूचनप्रयोजनमुद्दिश्य । मृगपक्षिणः काकुत्स्थं त्वामभिधावन्ति । नूनं संप्रतिमद्व्यसनसूचका मृगपक्षिणः काकुत्स्थंत्वामभिधावन्ति । तेन निमित्तेन मद्व्यसनं जानास्येवेत्यर्थः ॥ ५ ॥ व्यसनमेवाह—अयं हीति । अयं विहङ्गमः । पापचारेण रावणेन । विनिहतः शेते ॥ ६—१० ॥ शृण्वतामन्तिकेयथा शृण्वतां समीप इव । दूरस्थितं रामं लक्ष्मणं च रामेति लक्ष्मणेति च संबोध्य आक्रन्दत् ॥ ११ ॥ क्लिष्टमाल्याभरणां मृदितमाल्याभरणां । क्षणंविश्रान्तः अभ्यधावत

ती० अन्येतु—निमित्तंलक्षणंज्ञानमितिपाठमङ्गीकृत्यएवंव्याचक्षते । निमित्तं गोमाय्वादिकं । लक्षणं अङ्गस्पन्दनादिकं । ज्ञानं यदृच्छयातथाप्रतिभासः ॥ **ति०** नराणांसुखदुःखेषुनिमित्तं सूचनं वामदक्षिणाङ्गस्पन्दनादिरूपंलक्षणं चिह्नं । तथाजलादर्शादावात्मनोशिरसोदर्शनंचलक्षणं । स्वप्नं "स्वप्नेयःपुरुषंकृष्णंकृष्णदन्तंप्रपश्यति । सएनंहन्ति"इत्यादिस्वप्नाध्यायोपदिष्टं । तथाशकुनीनां वामदक्षिणगमनविशेषदर्शनं । तथातेषांस्वराणांदर्शनमनुभवः । एतत्सर्वंयथायोगंपरिदृश्यतेसर्वेण । लक्षणज्ञानमिति पाठे अङ्गस्फुरणादिज्ञानमित्यर्थः । शकुनिग्रहणंमृगाद्युपलक्षणं ॥ ४ ॥ **ति०** मदर्थंमृगपक्षिणोशुभसूचनमार्गेणधावन्ति । त्वंतु तैस्सूचितमपिस्वस्यमहद्व्यसनंनजानासिनूनं । जानीथाश्चेन्नोपेक्षेथाइतितात्पर्यमितिलोकाभिनयेनरामोपालंभः ॥ ५ ॥ **ति०** यथान्तिकेनिकटस्थितानांशृण्वतांश्रवणंभवेत्तथासमाक्रन्दत् नतूच्चैः । शीघ्रंरामागमनंमाभूदितितात्पर्येण ॥ ११ ॥

[**पा०**] १ अत्रत्यौप्रथमतृतीयौश्लोकौ झ. ञ. ट. पुस्तकेषुनदृश्येते. २ क. ख. च. छ. ज. ञ. भूमौ. ३ क. ख. च. छ. ज. ञ. गृध्रं. ४ झ. लक्षणंस्वप्नं. ५ क. च.—ञ. संप्रदृश्यते. झ. ट. परिदृश्यते. ६ झ. ञ. ट. काकुत्स्थ. ७ क. ग. ञ. ट. पापाचारेण. ख. ङ. झ. कृपयाराममांत्रातुं. ८ ख. ङ. झ. ट. मिहसंगतः. ९ इदंश्लोकचतुष्टयं ख. पाठेदृश्यते.

तां लतामिव वेष्टन्तीमालिङ्गन्तीं महाद्रुमान् ॥ मुञ्चमुञ्चेति बहुशः प्र[1]वदन्राक्षसाधिपः ॥ १३ ॥
क्रोशन्तीं रामरामेति रामेण रहितां वने ॥ जीवितान्ताय केशेषु जग्राहान्तकसन्निभः ॥ १४ ॥
प्रधर्षितायां सी[2]तायां बभूव सचराचरम् ॥ जगत्सर्वममर्यादं तमसाऽन्धेन संवृतम् ॥ १५ ॥
न वाति मारुतस्तत्र निष्प्रभोऽभूद्दिवाकरः ॥ १६ ॥
दृष्ट्वा सी[3]तां परामृष्टां दी[4]नां दिव्येन चक्षुषा ॥ कृतं कार्यमिति श्रीमान्व्याजहार पितामहः ॥ १७ ॥
प्रहृष्टा व्यथिताश्चासन्सर्वे ते परमर्षयः ॥ दृष्ट्वा सीतां परामृष्टां दण्डकारण्यवासिनः ॥
रावणस्य विनाशं च प्राप्तं बुद्ध्वा यदृच्छया ॥ १८ ॥
स तु तां रामरामेति रुदन्तीं लक्ष्मणेति च ॥ [6]जगामादाय चाकाशं रावणो राक्षसेश्वरः ॥ १९ ॥
तप्ताभरणव[7]र्णाङ्गी पीतकौशेयवासिनी ॥ रराज राजपु[8]त्री तु विद्युत्सौदामिनी यथा ॥ २० ॥
उद्धूतेन च वस्त्रेण तस्याः पीतेन रावणः ॥ अधिकं प्र[9]तिबभ्राज गिरिर्दीप्त इवाग्निना ॥ २१ ॥
तस्याः परमकल्याण्यास्ताम्राणि सुरभीणि च ॥ पद्मपत्राणि वैदेह्या अ[10]भ्यकीर्यन्त रावणम् ॥ २२ ॥
तस्याः कौशेयमुद्धूतमाकाशे कनकप्रभम् ॥ बभौ चादित्यरागेण ताम्रमभ्रमिवातपे ॥ २३ ॥
तस्या[11]स्तत्सुनसं वक्त्रमाकाशे रावणाङ्कगम् ॥ न रराज विना रामं विनालमिव पङ्कजम् ॥ २४ ॥
बभूव जलदं [12]नीलं भित्त्वा चन्द्र इवोदितः ॥ सुललाटं सुकेशान्तं पद्मगर्भाभमव्रणम् ॥ २५ ॥

अभ्यधावत् ॥ १२ ॥ तामित्यादि द्वावेकान्वयौ । लतामिव भूतले वेष्टन्तीं वेष्टमानां ॥ १३—१४ ॥ अमर्यादं भिन्नसत्त्वप्रकृतिकं । अन्धेन गाढेन । तमसा अज्ञानान्धकारेण । तदा जगत्सर्वं संवृतं विमूढं चासीदित्यर्थः ॥ १५ ॥ न वातीत्यर्धमेकं वाक्यं ॥ १६ ॥ परामृष्टां अपहृतां । दिव्येन चक्षुषा ज्ञानेन । दृष्ट्वा ज्ञात्वा । कार्यं बालकाण्डे विष्णुना प्रतिज्ञातं । कृतमिति व्याजहार । प्रीत्यतिशयेन पुरुषान्तरासन्निधानेप्युदाहरत् ॥ १७ ॥ प्रहृष्टाइति रावणवधस्य सिद्धप्रायत्वेन हर्षः । तादात्विकसीतादशावलोकनेन व्यथा । सीतां परामृष्टां दृष्ट्वा । यदृच्छया दैवगत्या । रावणस्य प्राप्तं सन्निहितं विनाशं च बुद्ध्वा व्यथिताः प्रहृष्टाश्चासन्नित्यन्वयः ॥ १८ ॥ सत्विति तुशब्देन ऋष्यादिभ्यो व्यावृत्तिः ॥ १९ ॥ तप्ताभरणं तप्तं काञ्चनाभरणं तत्तुल्यवर्णाङ्गी । विद्युत् विशेषेण द्योतमाना । सौदामिनी तटित् । अनेन तटिद्यथा मेघे क्षण तिष्ठति तथा रावणे सीतेति सूचितम् ॥ २० ॥ उद्धूतेति । अत्रापि सीताग्रहणेन रावणस्य संतापो भविष्यतीत्यलंकारेण वस्तुध्वनिः ॥ २१ ॥ रावणमभ्यकीर्यन्त रावणाङ्के पतितानीत्यर्थः । अत्र रावणैश्वर्यं क्षणाद्विशीर्णं भविष्यतीति वस्तुना वस्तुध्वनिः ॥ २२ ॥ आतपे मध्याह्ने । आदित्यरागेण ताम्रं अरुणमभ्रमिव बभौ । अनेन रावणविनाशपिशुनोत्पातः सूचितः ॥ २३ ॥ "उपसर्गाच्च" इति नासिकाशब्दान्ताद्बहुव्रीहेरच्समासान्तः । नासिकाशब्दस्य नसादेशश्च । अत्र सीताया मुखविवर्णत्वोक्त्या खेदातिशय उच्यते ॥ २४ ॥ अथ त्वरितगमनमाह—बभूवेति । अत्र मुखमिति शेषः । जलदं भित्त्वा उदितः प्रकाशमानश्चन्द्र इव । मेघरन्ध्रे भासमान इत्यर्थः । अत्र प्रतिचन्द्रदर्शनरूपोत्पातः सूच्यते । पद्मगर्भाभं विकसितपद्माभमित्यर्थः ।

ति० वेष्टन्तीं लतामिववृक्षानालिङ्गन्तीं मामुञ्चमुञ्चेति बहुशोवृक्षान्वदन्तीमितिशेषः । मोचयमोचयेत्यर्थोवा । प्राप इतस्ततोधावन्तीं समीपगतआसीत् ॥ १३ ॥ ति० जीवितान्ताय अनेन परस्त्रीकेशस्पर्शो यस्यकस्यापि जीवितापहारीतिबोधितं ॥ १४ ॥ ति० सुदाम्नोबहुरत्नादिमत्त्वात्तद्भवाविद्युदतिप्रकाशमानाभवति तद्वत्सीतेत्यर्थः ॥ २० ॥ ती० तरुप्रवालरत्नेतिपाठे प्रवालसदृशरत्ना ॥ २१ ॥

[पा०] १ ङ. झ. ट. प्रापतांराक्षसाधिपः. २ क. ख. ग. ङ.—ट. वैदेह्यां. ३ क. ख. दीनां. घ. हितां. ४ क. ख. घ. मीतां. ङ. छ. झ. ञ. ट. देवोदिव्येन. ५ ग. दृष्ट्वा. ६ क. ख. ग. च. छ. ज. ञ. जगामाकाशमादाय. ७ क.—घ. च. ज. ञ. सर्वाङ्गी. ८ क. पुत्रीसा. ९ क. ख. ग. ङ.—ट. परिबभ्राज. १० ग. च. छ. ञ. अवाकीर्यन्त. ११ क. ख. ग. ङ.—ट. स्तद्विमलं. १२ च. छ. ज. भित्त्वानीलं.

शुक्लैः सुविमलैर्दन्तैः प्रभावद्भिरलंकृतम् ॥ तस्यास्त[1]द्विमलं वक्त्रमाकाशे रावणाङ्कगम् ॥ २६ ॥
रुदितं व्यपमृष्टास्रं चन्द्रवत्प्रियदर्शनम् ॥ [2]सुनासं [3]चारु ताम्रोष्ठमाकाशे हाटकप्रभम् ॥ २७ ॥
[4]राक्षसेन समाधूतं तस्यास्तद्वदनं शुभम् ॥ शुशुभे न विना रामं दिवा चन्द्र इवोदितः ॥ २८ ॥
सा हेमवर्णा नी[5]लाङ्गं मैथिली राक्षसाधिपम् ॥ शुशुभे काञ्चनी काञ्ची नीलं [6]मणिमिवाश्रिता ॥ २९ ॥
सा [7]पद्मगौरी हेमाभा रावणं जनकात्मजा ॥ विद्युद्घनमिवाविश्य शुशुभे तप्तभूषणा ॥ ३० ॥
[8]तरुप्रवालरक्ता सा नीलाङ्गं राक्षसेश्वरम् ॥ प्राशोभयत वैदेही गजं कक्ष्येव काञ्चनी ॥ ३१ ॥
तस्या भूषणघोषेण वैदेह्या [9]राक्षसाधिपः ॥ [10]बभौ सचपलो नीलः सघोष इव तोयदः ॥ ३२ ॥
[11]उत्तमाङ्गाच्च्युता तस्याः पुष्पवृष्टिः समन्ततः ॥ सीताया ह्रियमाणायाः पपात [12]धरणीतले ॥ ३३ ॥
सा तु रावणवेगेन पुष्पवृष्टिः समन्ततः ॥ समाधूता दशग्रीवं पुनरे[13]वाभ्यवर्तत ॥ ३४ ॥
अभ्यवर्तत पुष्पाणां धारा वैश्रवणानुजम् ॥ नक्षत्रमाला विमला [14]मेरुं नगमिवोन्नतम् ॥ ३५ ॥
चरणान्नूपुरं भ्रष्टं वैदेह्या रत्नभूषितम् ॥ विद्युन्मण्डलसङ्काशं पपात [15]मधुरस्वनम् ॥ ३६ ॥

अव्रणं निर्दोषं ॥ २५ ॥—शुक्लैरिति । न शुशुभ इति वक्ष्यमाणमनुषज्यते । रावणाङ्कगं सत् न शुशुभे । अननुरूपत्वादिति भावः ॥ २६ ॥ रुदितं रोदनवत् । अतएव व्यपमृष्टास्रं अनिवृत्ताश्रुकं । हाटकप्रभं हिरण्यप्रभं "हिरण्यं हेम हाटकं"इत्यमरः । पूर्वं मनोज्ञं मुखं इदानीं रुदितादिमत्त्वान्नशुशुभ इति भावः ॥२७॥ राक्षसेन निमित्तेन समाधूतं भयकम्पितं ॥ २८ ॥ राक्षसाधिपमाश्रिता सा सीता नीलं मणिमाश्रिता काञ्चनी काञ्चनमयी । काञ्ची मेखलेव शुशुभे । रजतमेव नीलरत्नस्य परभागकरमिति प्रसिद्धिः । तेन काञ्चनस्य नीलमणिशोभातिरस्कारकत्वात् शुशुभ इति व्यतिरेकोक्त्या न शुशुभ इत्यर्थः । नेत्यनुषङ्गो वा ॥ २९ ॥ पद्मगौरी पद्मवत्पीतवर्णा । अनेन सुकुमारवर्णतोक्ता । हेमाभेत्यनेन स्थिरवर्णतोक्ता । तप्तभूषणा तपनीयभूषणा । विद्युदिव सीता तस्मिन् क्षणं स्थितापि सौहृदं नाकाङ्क्षतेत्यर्थः ॥ ३० ॥ तरुविशेषप्रवालवत् रक्ता पीतवर्णा । " तेन रक्तं रागात् " इत्यत्र रागशब्दोहि वर्णमात्रे प्रयुक्तः । कक्ष्या इभबन्धनी । यथा कक्ष्या गजगता गजं यन्तुर्निग्राह्यं करोति तथेयं रावणं प्राप्य रामनिग्राह्यमकरोदिति भावः ॥ ३१ ॥ सचपलः सविद्युत् । यथा सगर्जितो मेघ आशु निस्सारो भविष्यति तथेति भावः ॥ ३२ ॥ उत्तमाङ्गात् शिरसः ॥३३॥ सा पुष्पवृष्टिः रावणवेगेन रावणवेगजनितवातेन । समाधूता पुनर्दशग्रीवमेव अभ्यवर्तत अभितः प्रावर्तिष्ट । अनेन रावणस्य त्वरितगमनमुक्तम् ॥ ३४ ॥ उक्तां पुष्पवृष्टिं वर्णयति—अभ्यवर्ततेति । धारा पङ्क्तिः ॥ ३५ ॥ चरणादिति वामचरणादित्यर्थः । भ्रष्टं शिथिलं पपात ॥ ३६ ॥

ति० अभूत्सचपलोनीलइतिपाठे चपला विद्युत् । तयासहितोघोषवान्मेघइवाभूदित्यर्थः ॥ ३२ ॥ **ति०** उत्तमाङ्गेति । मातस्त्वय संपादितोस्मन्मनोरथइति हर्षाद्देवैः क्रियमाणापुष्पवृष्टिस्तदुत्तमाङ्गाच्च्युता तत्कालेभूमौपपातेतिकतकः । वस्तुतोरावणसंनिधौ देवानांतथावीर्यासंभवात् उत्तमाङ्गे धृतपुष्पाणां तद्वेगेन ततश्च्युत्या उत्तमाङ्गाच्च्युतेत्युक्तं । अतएवाग्रे भूमौपुष्पयुतंमार्गंदृष्ट्वा रामोवक्ष्यति— " अभिजानामिपुष्पाणितानीमानीहलक्ष्मण । अपिनद्धानिवैदेह्यामयादत्तानिकानने" इति ॥ ३३ ॥

[पा०] १ क. ख. ग. च. छ. ज. ञ. स्तत्सुनसं. ङ. झ. ट. स्सुनयनं. २ क. ग. सुनेत्रं. ३ ख. च. छ. ज. ञ. चारुदन्तोष्ठं. ४ क.—ट. राक्षसेन्द्रसमा. ५ ख. नीलाभं. ६ ङ. च. छ. झ. ञ. ट. गजमिवा. ७ ङ. झ. ट. पद्मपीता. ग. पद्मगौरा. ८ अयंश्लोकः क.—ट. पुस्तकेषु. चरणान्नूपुरमितिश्लोकात्परं तांमहोल्कामितिश्लोकात्पूर्वंदृश्यते. ९ क. ख. ग. ङ.—ट. राक्षसेश्वरः. १० क. ख. ङ.—ट. बभूवविमलो. ११ ग. ङ.—झ. ट. उत्तमाङ्गच्युता. १२ ख. पृथिवीतले. १३ ख. रेवाभ्यधावत. घ. रेवाभ्यवर्षत. १४ च. छ. ज. ञ. मेरुशृङ्गमिवोत्तमं. ख. ग. ङ. झ. ट. मेरुंनगमिवोत्तमं. १५ ङ. झ. ट. धरणीतले. ख. ञ. मधुरस्वरं.

तां महोल्कामिवाकाशे दीप्यमानां स्वतेजसा ॥ जहाराकाशमाविश्य सीतां वैश्रवणानुजः ॥ ३७ ॥
तस्यास्तान्यग्निवर्णानि भूषणानि महीतले ॥ [1]सघोषाण्यवकीर्यन्त क्षीणास्तारा इवाम्बरात् ॥ ३८ ॥
तस्या[2]स्स्तनान्तराद्भ्रष्टो हारस्ताराधिपद्युतिः ॥ वैदेह्या निपतन्भाति गङ्गेव [3]गगनाच्च्युता ॥ ३९ ॥
[4]उत्पन्नवाताभिहता नानाद्विजगणायुताः ॥ मा भैरिति विधूताग्रा व्याजह्रुरिव पादपाः ॥ ४० ॥
नलिन्यो ध्वस्तकमलास्त्रस्तमीनजलेचराः ॥ सखीमिव [5]गतोच्छ्वासामन्वशोचन्त मैथिलीम् ॥ ४१ ॥
समन्तादभिसंपत्य सिंहव्याघ्रमृग[6]द्विजाः ॥ अन्वधावं[7]स्तदा रोषा[8]त्सीतां छायानुगामिनः ॥ ४२ ॥
जलप्रपातास्रमुखाः शृङ्गै[9]रुच्छ्रितबाहवः ॥ सीतायां ह्रियमाणायां विक्रोशन्तीव पर्वताः ॥ ४३ ॥
ह्रियमाणां तु वैदेहीं दृष्ट्वा दीनो दिवाकरः ॥ [10]प्रतिध्वस्तप्रभः श्रीमानासीत्पाण्डरमण्डलः ॥ ४४ ॥
नास्ति धर्मः कुतः सत्यं नार्जवं नानृशंसता ॥ [11]यत्र रामस्य वैदेहीं [12]भार्यां हरति रावणः ॥
इति [13]सर्वाणि भूतानि गणशः पर्यदेवयन् ॥ ४५ ॥
[14]वित्रस्तका दीनमुखा रुरुदुर्मृगपोतकाः ॥ उद्वीक्ष्योद्वीक्ष्य नयनै[15]रास्रपाताविलेक्षणाः ॥ ४६ ॥
सुप्रवेपितगात्राश्च बभूवुर्वनदेवताः ॥ विक्रोशन्तीं दृढं सीतां दृष्ट्वा [16]दुःखं तथा गताम् ॥ ४७ ॥
तां तु लक्ष्मण रामेति क्रोशन्तीं [17]मधुरस्वरम् ॥ अवेक्षमाणां बहुशो वैदेहीं [18]धरणीतलम् ॥ ४८ ॥
[19]स तामाकुलकेशान्तां विप्रमृष्टविशेषकाम् ॥ जहारात्मविनाशाय [20]दशग्रीवो मनस्विनीम् ॥ ४९ ॥

उत्पातसूचकातारा महोल्का ॥ ३७ ॥ भूषणानि उपात्तनूपुरादिभिन्नानि ॥ ३८ ॥ भाति भातिस्म ॥ ३९ ॥ उत्पन्नेति रावणवेगोत्पन्नेत्यर्थः । वातकम्पिताग्रत्वात् । पक्षिगणरववत्त्वाच्च विधूताग्राः आश्वासनाय चलितशिरसः सन्तः । मा भैरिति व्याजह्रुरिव ॥ ४० ॥ गतोच्छ्वासां गतप्राणां मूर्च्छितामिति यावत् । तादृशीं सखीमिव मैथिलीमुद्दिश्य अशोचन्त अशोचन् । ध्वस्तकमलाः कान्तिहीना इत्यर्थः । त्रस्ताः भीताः मीनाः मत्स्याः जलेचराः नक्रादयश्च यासु ताः । त्रस्तेत्यादिना आकुलनेत्रत्वादिकमुच्यते ॥ ४१ ॥ तदा व्याघ्रादयः समन्तान्नानादेशात् अभिसम्पत्य आगत्य । रावणे रोषाच्छायानुसारिणः सन्तोऽन्वधावन् ॥४२॥ जलप्रपातरूपाण्यस्राणि मुखे येषां ते उच्छ्रितबाहवः उन्नतबाहवः । विक्रोशन्तीव व्याक्रोशन्निव ॥ ४३ ॥ श्रीमान् प्राप्तविषयशोक एव श्रीः ॥ ४४ ॥ नास्तीति सार्धश्लोक एकान्वयः । अनृशंसता दया । यत्र यस्मात् । गणशः संघशः । पर्यदेवयन् व्यलपन् ॥४५॥ वित्रस्तका इति स्वार्थे कः । मृगपोतकाः मृगशाबाः । आविलं कलुषं ॥ ४६ ॥ सुप्रवेपितेत्यादिश्लोकद्वयमेकान्वयं । तथा वाचामगोचरं दुःखं । धरणीतलं बहुशोऽवेक्षमाणां रामलक्ष्मणप्रत्याशयेति भावः ॥ ४७—४८ ॥ विप्रमृष्टं विलुलितं विशेषकं तिलकं यस्यास्तां । "तमालपत्रतिलकचित्रकाणिविशेषकं" इत्यमरः । मनस्विनीं दृढमनस्कां पतिव्रतामित्यर्थः

ति० तांसीतामित्यन्वयः । अत्रप्रकरणेवारंवारंवैश्रवणानुजत्वोक्त्याईदृशक्रियायाअत्यनौचित्यप्रदर्शनेनशीघ्रफलदत्वंसूचयति ॥ ३७ ॥ इतिद्विपञ्चाशस्सर्गः ॥ ५२ ॥

[पा०] १ ख. ङ. झ. ण्यवशीर्यन्त. २ ख. ग. ङ. ट. स्तनान्तरभ्रष्टो. ३ ङ. झ. ट. गगनच्युता. ४ ख. ग. ङ.—ट. उत्पातवाताभि. ५ क. ख. ग. ङ. झ. ट. गतोत्साहांशोचन्तीवस्म. च. छ. ज. गतोच्छ्वासांशोचन्तीहस्म. ६ ख. द्विपाः. ७ च. छ. ज. ञ. स्ततोरोषात्. ८ ख. सीतांचाथानु. ङ. छ. झ. ञ. ट. सीताच्छायानु. ९ घ. ङ. झ. ट. बाहुभिः. १० क. ख. ग. ङ.—ट. प्रविध्वस्त. ११ ख. प्रियांरामस्य. १२ ङ.—ट. सीतां. १३ ङ.—ट. भूतानिसर्वाणि. १४ क. ख. घ. वित्रस्ताङ्गा. १५ च. छ. ज. ञ. रश्रु. ङ. झ. ट. भयादिवविलक्षणैः. १६ क. दुःखसमाहतां. १७ क. ङ.—ट. मधुरस्वरां. १८ छ. ज. धरणीतले. १९ ख. छ. सीतामाकुल. २० क. दशग्रीवस्तपस्विनीं. ख. दशग्रीवोयशस्विनीं.

ततस्तु सा चारुदती शुचिस्मिता विनाकृता बन्धुजनेन मैथिली ॥
अपश्यती राघवलक्ष्मणावुभौ विवर्णवक्त्रा भयभारपीडिता ॥ ५० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

त्रिपञ्चाशः सर्गः ॥ ५३ ॥

रावणेनगगनमार्गेणनीयमानयासीतयामध्येमार्गंबहुधातद्गर्हणम् ॥ १ ॥

खमुत्पतन्तं तं दृष्ट्वा मैथिली जनकात्मजा ॥ दुःखिता परमोद्विग्ना भये महति वर्तिनी ॥ १ ॥
रोषरोदनताम्राक्षी भीमाक्षं राक्षसाधिपम् ॥ रुदन्ती करुणं सीता ह्रियमाणेदमब्रवीत् ॥ २ ॥
न व्यपत्रपसे नीच कर्मणाऽनेन रावण ॥ ज्ञात्वा विरहितां यन्मां चोरयित्वा पलायसे ॥ ३ ॥
त्वयैव नूनं दुष्टात्मन्भीरुणा हर्तुमिच्छता ॥ ममापवाहितो भर्ता मृगरूपेण मायया ॥ ४ ॥
यो हि मामुद्यतस्त्रातुं सोप्ययं विनिपातितः ॥ गृध्रराजः पुराणोऽसौ श्वशुरस्य सखा मम ॥ ५ ॥
परमं खलु ते वीर्यं दृश्यते राक्षसाधम ॥ विश्राव्य नामधेयं हि युद्धेनास्मि जिता त्वया ॥ ६ ॥
ईदृशं गर्हितं कर्म कथं कृत्वा न लज्जसे ॥ स्त्रियाश्च हरणं नीच रहिते तु परस्य च ॥ ७ ॥
कथयिष्यन्ति लोकेषु पुरुषाः कर्म कुत्सितम् ॥ सुनृशंसमधर्मिष्ठं तव शौण्डीर्यमानिनः ॥ ८ ॥
धिक्ते शौर्यं च सत्त्वं च यत्त्वं कथितवांस्तदा ॥ कुलाक्रोशकरं लोके धिक्ते चारित्रमीदृशम् ॥ ९ ॥

॥ ४९ ॥ शुचिस्मितेति भूतपूर्वाभिप्रायेण स्वाभाविकहसितत्वाद्वा । विवर्णवक्त्रा बभूवेतिशेषः ॥ ५० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्विपञ्चाशः सर्गः ॥ ५२ ॥

अथ सीता रावणस्य चौर्यवृत्त्यादिकं बहुशो निन्दति—खमित्यादिना । दुःखिता बभूवेति शेषः । परमोद्विग्ना कम्पिता । ओविजी भयचलनयोरित्यस्मान्निष्ठा । वर्तिनी वर्तमाना ॥ १ ॥ रोषवद्रोदनमपि रक्तिमहेतुः ॥ २ ॥ नीचेति संबोधनं । न व्यपत्रपसे न लज्जसे। विरहितां रामलक्ष्मणाभ्यामिति शेषः ॥३॥ हर्तुमामिति शेषः । अपवाहितः अपनीतः । मृगरूपेण मायया मायारूपमृगेणेत्यर्थः ॥ ४ ॥ पुराणो वृद्ध इतिव्यङ्ग्योक्तिः । अतिवृद्धं हत्वा शूरोहमिति मन्यस इतिभावः ॥ ५ ॥ परममिति सोल्लुण्ठनं वचनं अतिनीचमित्यर्थः । तत्रहेतुमाह—विश्राव्येति । हि यस्मात्स्वनामधेयं विश्राव्य अहं रावणोस्मीति स्वनाम प्रख्याप्य युद्धेनास्म्यहं जितेति व्यतिरेकोक्तिः । यद्वा ते परमं अवीर्यं क्लीबत्वं हि । यस्माद्युद्धे न जितास्मि ॥ ६ ॥ रहिते स्वामिरहितप्रदेशे । परस्यस्त्रियाः हरणरूपमीदृशं गर्हितं निन्दितं कर्म कृत्वा कथं नलज्जसे ॥ ७ ॥ शौण्डीर्यमानिनः तव कर्म कुत्सितं सुनृशंसं अधर्मिष्ठं च कथयिष्यन्तीत्यन्वयः ॥ ८॥ तदा हरणकाले। यच्छौर्यं सत्त्वं बलं च कथितवानसि तद्धिक् । “ उद्वहेयं भुजाभ्यां तु मेदिनीमम्बरे स्थितः” इत्यादि त्वदुक्तमनृतप्रलपनमित्यर्थः । कुलाक्रोशकरं कुलनि-

---

ति० वर्तिनीत्यसुप्यपिणिनिरार्षः । स० अभयेरामेसदावर्तिन्यपिइदानींपरमोद्विग्नासतीदुःखिताभूत् । यद्वा महतिभयेअपरमोद्विग्नापि इदानींदुःखिता । यद्वा अमेनगत्याहतौ रामवियोगेवर्ततइतितथा । एतत्पक्षेणिनेरार्षत्वं नकल्पनीयं ॥ १ ॥ स० नीचेति कर्मविशेषणंसंबुध्यन्तंच ॥ ३ ॥ ति० स्त्रियाहरणमेवगर्हितं । राक्षसादिविवाहानांशास्त्रेगर्हितत्वात् । तत्रापिपरस्य विवाहितायाः ।

[पा०] १ ख. सीतारुदती. २ ख. घ. ह्यपत्रपसे. ३ ख. भर्त्राविरहितां. ४ ख. ग. ङ.—ट. योमां. ५ ख. यत्त्वयैवहि. ६ ख. युद्धेनापहृता. ७ क. घ. ङ. झ. ट. स्त्रियाश्चाहरणं. ८ क. ख. ग. ङ. छ. झ. ञ. ट. रहितेच. घ. रहितेहि. ९ च. छ. ज. ञ. वीर्यंचशौर्यंच. १० ख. यत्त्वयाकथितंमम. ङ. झ. ट. यत्त्वयाकथितंतदा.

किं कर्तुं[1] शक्यमेवं हि य[2]ज्जवेनैव धावसि ॥ [त्व[3]यैव नूनं दुष्टात्मन्यद्वीर्यं कथितं मम ॥]
मुहूर्त[4]मपि तिष्ठस्व न जीवन्प्रतियास्यसि ॥ १० ॥
न हि चक्षुष्पथं प्राप्य तयोः पार्थिवपुत्रयोः ॥ ससैन्योपि समर्थस्त्वं [5]मुहूर्तमपि जीवितुम् ॥ ११ ॥
न त्वं तयोः शरस्पर्शं सोढुं शक्तः कथंचन ॥ वने प्रज्वलितस्येव स्पर्शमग्नेर्विहङ्गमः ॥ १२ ॥
साधु कृत्वाऽऽत्मनः पथ्यं साधु मां मुञ्च रावण ॥ १३ ॥
[6]मत्प्रधर्षणरुष्टो हि भ्रात्रा सह पतिर्मम ॥ विधास्यति विनाशाय त्वं मां यदि न मुञ्चसि ॥ १४ ॥
येन त्वं व्यवसायेन बलान्मां हर्तुमिच्छसि ॥ व्य[7]वसायः स ते नीच भविष्यति निरर्थकः ॥ १५ ॥
न ह्यहं तमपश्यन्ती भर्तारं वि[8]बुधोपमम् ॥ उत्सहे शत्रुवशगा प्राणान्धारयितुं चिरम् ॥ १६ ॥
न नूनं चात्मनः श्रेयः[9] पथ्यं वा स[10]मवेक्षसे ॥ मृत्युकाले यथा मर्त्यो विपरीतानि सेवते ॥ १७ ॥
[11]मुमूर्षूणां हि सर्वेषां यत्पथ्यं तन्न रोचते ॥ प[12]श्याम्यद्य हि कण्ठे त्वां कालपाशावपाशितम् ॥ १८ ॥
यथा चास्मिन्भयस्थाने न बिभेषि द[13]शानन ॥ व्यक्तं हि[14]रण्मयान्हि त्वं संपश्यसि महीरुहान् ॥ १९ ॥
नदीं वैतरणीं घोरां रुधिरौघनि[15]र्वाहिनीम् ॥ [16]असिपत्रवनं चैव भीमं पश्यसि रावण ॥ २० ॥

न्दाकरं ॥ ९ ॥ यत् यदा । एवं जवेनैव धावसि तदा रामेण त्वयि किं कर्तुं शक्यं । तर्हि कदाशक्यमित्यत आह—मुहूर्तमिति । मुहूर्तमपि मुहूर्तमेव । तिष्ठस्व तिष्ठ । तदा जीवन्सन् न प्रतियास्यसि मृतो भविष्यसीत्यर्थः ॥ १० ॥ उक्तमुपपादयति—न हीति ॥ ११ ॥ दर्शनप्राप्तिमात्रेण कथं जीवितुमशक्यत्वं तत्राह—न त्वमिति ॥ १२ ॥ अथ कर्तव्यमुपदिशति—साध्विति । अर्धश्लोक एकान्वयः । आत्मनः पथ्यं हितं । साधु कृत्वा विचार्य । कृतिर्हि नानार्थो धातुवृत्तिकृतोक्तः । यथा उरसिकृत्वा मनसिकृत्वेति । मां साधु सम्यक् आर्जवपूर्वकं मुञ्च ॥ १३ ॥ अमोचने बाधकमाह—मदिति । त्वं मां यदि न मुञ्चसि तदा मम पतिः मत्प्रधर्षणेन मत्परिभवेन । रुष्टः सन् भ्रात्रासह त्वद्विनाशाय यत्नं विधास्यति ॥ १४ ॥ अहमपि सफलयत्नो भविष्यामीत्याशङ्क्याह—येनेति । व्यवसायेन भोगव्यवसायेनेत्यग्राम्योक्तिः ॥ १५ ॥ नैरर्थक्यमेवाह—न हीति । इदानीं कथं धारयसीत्यत्रपरिहारः—चिरमिति ॥ १६ ॥ किंच त्वमात्मनः श्रेयः प्रियं । पथ्यं हितं वा । न समवेक्षसे न पर्यालोचयसि । किन्तु मृत्युकालेमर्त्योयथा विपरीतानि सेवते तथा त्वमपिविपरीतानिसेवस इत्यर्थः ॥ १७ ॥ त्वां कण्ठे कालपाशावपाशितं कालपाशेन बद्धं पश्यामि ॥ १८ ॥ किंच येन प्रकारेण नबिभेषि तेनप्रकारेण महीरुहान् हिरण्मयान् संपश्यसीति मन्य इति योजना ॥ १९ ॥ रुधिरौघैःरक्तौघैःसह निवहति प्रवहतीति तथा । असिपत्रवनं असिमयपत्रयुक्तवनमिति नरकविशेषस्य नाम ।

तत्रापि रहिते पतिरहितेकालेदेशेचेत्यतिनिन्द्यंतेकर्मेतिभावः ॥ ७ ॥ **ती०** भयेनधावसीतियत् एवंकर्तुंशक्यंकिं । नशक्यमित्यर्थः । श्रीरामभयेनत्वयापलायनं क्रियते तदेतन्मयानिवारयितुंनशक्यं । स्त्रीत्वादितिभावः । यद्वाइहभयेनधावसीतियत् एवंकर्तुंशक्यंनशक्यं । शक्त्यभिमानपलायनयोरन्योन्यविरोधादित्यर्थः । तिष्ठस्व यदिशूरइतिशेषः ॥१०॥ **शि०** प्राणान् तेजीवनं । चिरंधारयितुंनोत्सहे । एतेन शीघ्रमेवरामस्त्वांहनिष्यतीतिसूचितं ॥ १६ ॥ **ती०**पथ्यं सुखोदर्कंश्रेयः । वासं लङ्कारूपंनिवासंच नावेक्षसे उभयंत्यक्तुमिच्छसीत्यर्थः ॥ १७ ॥ **स०** सुवर्णवृक्षादिदर्शनस्यमृतिसूचकत्वं "स्वर्णप्रतीतिर्वृक्षेषु" इतिपूर्वार्धभागवते स्पष्टं ॥ १९ ॥ इतित्रिपञ्चाशस्सर्गः ॥ ५३ ॥

[**पा०**] १ ख. ग. ङ.—ट. शक्यंकर्तुमेवं. २ ख. ग. यज्जवेनेह. ३ इदमर्धं क. पुस्तकेदृश्यते. ४ ख. मुपतिष्ठत्वं. क. ङ.—ट. मपितिष्ठत्वं. ५ ख. मुहूर्तमिह. ६ क. मद्धर्षणप्ररुष्टोहि. ङ. झ. ट. मत्प्रधर्षणसंक्रुद्धो. ७ ङ. झ. ट. व्यवसायस्तु. ग. व्यवसायश्च. ८ क. च. छ. ज. ञ. वासवोपमं. ९ च. छ. पथ्यंवासंवा. १० ख. नसमीक्षसे. क. समुदीक्षसे. ११ ख. ग. ङ.—ट. मुमूर्षूणांतु. १२ क. ङ. घ. छ. ञ. पश्यामेत्वहि. झ. ट. पश्यामीहहि. ख. ग. पश्यामीवहि. १३ ग. कदाचन. ङ. च. छ. झ. ञ. ट. निशाचर. १४ ङ—ट. हिरण्मयांस्त्वंहि. १५ ख. प्रवाहिनीं. ङ. झ. ट. विवाहिनीं. १६ क. ख. घ.—ट. खड्गपत्र.

तप्तकाञ्चनपुष्पां च वैडूर्यप्रवरच्छदाम् ॥ द्रक्ष्यसे शाल्मलीं तीक्ष्णामायसैः कण्टकैश्चिताम् ॥ २१ ॥
न हि त्वमीदृशं कृत्वा तस्यालीकं महात्मनः ॥ धरितुं शक्ष्यसि चिरं विषं पीत्वेव निर्घृणः ॥२२॥
बद्धस्त्वं कालपाशेन दुर्निवारेण रावण ॥ क गतो लप्स्यसे शर्म भर्तुर्मम महात्मनः ॥ २३ ॥
निमेषान्तरमात्रेण विना भ्रात्रा महावने ॥ राक्षसा निहता येन सहस्राणि चतुर्दश ॥ २४ ॥
स कथं राघवो वीरः सर्वास्त्रकुशलो बली ॥ न त्वां हन्याच्छरैस्तीक्ष्णैरिष्टभार्यापहारिणम् ॥ २५ ॥
एतच्चान्यच्च परुषं वैदेही रावणाङ्कगा ॥ भयशोकसमाविष्टा करुणं विललाप ह ॥ २६ ॥
तथा भृशार्ता बहु चैव भाषिणीं विलापपूर्वं करुणं च भामिनीम् ॥
जहार पापः करुणं [10] विवेष्टतीं नृपात्मजामागतगात्रवेपथुम् ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

रावणेनगगनेनीयमानयासीतयाऋश्यमूकशिखरे दृष्टानांसुग्रीवादिवानराणां मध्ये रावणाविदितमाभरणगर्भनिजकौशेयोत्तरीयप्रक्षेपणम् ॥ १ ॥ रावणेनत्वरयालङ्कामेत्य निजान्तःपुरेसीतास्थापनपूर्वकं रामवृत्तान्तपरिज्ञानायजनस्थानंप्रति निजभटाष्टकप्रेषणम् ॥ २ ॥

ह्रियमाणा तु वैदेही कंचिन्नाथमपश्यती ॥ ददर्श गिरिशृङ्गस्थान्पञ्च वानरपुङ्गवान् ॥ १ ॥
तेषां मध्ये विशालाक्षी कौशेयं कनकप्रभम् ॥ उत्तरीयं वरारोहा शुभान्याभरणानि च ॥
मुमोच यदि रामाय शंसेयुरिति [12] मैथिली ॥ २ ॥

पश्यसीति वर्तमानसामीप्ये वर्तमाननिर्देशः ॥ २० ॥ पारदारिकस्यासाधारणनरकानुभवं दर्शयति—तप्तेति । तप्तानि सद्योग्निनिष्टप्तानि काञ्चनमयानि पुष्पाणि यस्यास्तां । स्वर्णस्य तप्तत्वेऽतीवौष्ण्यं भवति । वैडूर्यप्रवराः वैडूर्यमणिश्रेष्ठमयाः छन्दाः पर्णानि यस्यास्तां । अत्रापि तप्तेति विशेषणं बोध्यं । शाल्मलीं पारदारिकालिङ्ग्यत्वेन यमलोकोत्पन्नां शाल्मलीवृक्षाकारस्थूणां । द्रक्ष्यसे द्रक्ष्यसि । आलिङ्गितुमिति शेषः ॥ २१ ॥ भवत्वेवं कालान्तरे सद्यो लब्धंहि सुखमित्यत्राह—न हीति । तस्य अलीकमप्रियं कृत्वा । "अलीकं त्वप्रियेऽनृते" इत्यमरः । धरितुं जीवितुं ॥ २२ ॥ त्वामादाय देशान्तरं गमिष्यामि तदा न मे रामभयं तत्राह—बद्ध इति । भर्तुरिति हेतौ पञ्चमी । तस्माद्धेतोः क गतः सन् शर्म लप्स्यसे नकचिदपीत्यर्थः ॥ २३ ॥ कथं तस्य तादृशी शक्तिरित्यत्राह द्वाभ्यां । निमेषान्तरमात्रेण निमेषावकाशमात्रेण । भ्रात्रा विना एकाकिनेत्यर्थः ॥ २४—२५ ॥ एतच्चान्यच्च वचनं करुणं परुषं च यथा भवति तथा विललाप परिदेवनमकरोत् ॥२६॥ सीतोक्तं सर्वं पापिष्ठस्य तस्य समुद्रघोषतुल्यमासीदित्याह—तथेति । तथेति वाचामगोचरत्वोक्तिः । विलापपूर्वं करुणं च यथा तथा भाषिणीं करुणं यथा तथाविवेष्टन्तीं विवेष्टमानां । आगतगात्रवेपथुं उत्पन्नशरीरकम्पां ॥२७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥

अथसीताया अशोकवनिकायां स्थापनमाह । नाथं रक्षकं ॥ १ ॥ तेषामित्यादिसार्धश्लोक एकान्वयः । उत्तरीयं उत्तरीयभूतं कौशेयं । आभरणानि कौशेये बद्ध्वा मुमोचेत्यर्थः । किमर्थं मुमोचेत्यत्राह—यदिरामायशंसेयुरिति । यदृच्छया दृष्टाय रामाय स्वस्य रावणापहरणं कथयेयुरिति प्रत्याशयेत्यर्थः । "आशंसा-

[पा०] १ क. चित्रांच. २ ग. तीक्ष्णैरायसैः. ३ क. ग. घ. चरितुं. झ. धारितुं. ४ क. ग. ङ. च. झ. ट. ममभर्तुः. ५ क. ग. ङ. च. ज.—ट. भ्रातरमाहवे. ६ ग. ङ. झ. ट. कथंस. ७ च. छ. ञ. स्तीक्ष्णैर्दुष्टभार्या. ८ क. च. छ. ञ. बहुरूप. ९ ग. ङ. झ. ट. पापस्तरुणीं. १० ख.—ञ. विचेष्टतीं. ११ ख. ग. ङ. झ. वेपथुः. १२ ङ. झ. ट. भामिनी.

वस्त्रमुत्सृज्य तन्मध्ये नि[1]क्षिप्तं सहभूषणम् ॥ संभ्रमात्तु दशग्रीवस्तत्कर्म न[2] स बुद्धवान् ॥ ३ ॥
पिङ्गाक्षास्तां विशालाक्षीं नेत्रैरनिमिषैरिव ॥ विक्रोशन्तीं त[3]था सीतां ददृशुर्वानरर्षभाः ॥ ४ ॥
स च पम्पामतिक्रम्य लङ्कामभिमुखः पुरीम् ॥ जगाम रु[4]दतीं गृह्य [5]वैदेहीं राक्षसेश्वरः ॥ ५ ॥
तां जहार सुसंहृष्टो रावणो मृत्युमात्मनः ॥ उत्सङ्गेनैव भुजगीं तीक्ष्णदंष्ट्रां महाविषाम् ॥ ६ ॥
वनानि सरितः शैलान्सरांसि च विहायसा ॥ स क्षिप्रं समतीयाय शरश्चापादिव च्युतः ॥ ७ ॥
तिमिनक्रनिकेतं तु वरुणालयमक्षयम् ॥ सरितां शरणं गत्वा समतीयाय सागरम् ॥ ८ ॥
संभ्रमात्परिवृत्तोर्मी रुद्धमीनमहोरगः ॥ वैदेह्यां ह्रियमाणायां बभूव वरुणालयः ॥ ९ ॥
अन्तरिक्षगता वाचः ससृजुश्चारणास्त[7]दा ॥ एतदन्तो दशग्रीव इति सिद्धास्तदाऽब्रुवन् ॥ १० ॥
स तु सीतां [8]विवेष्टन्तीमङ्केनादाय रावणः ॥ प्रविवेश पुरीं लङ्कां रूपिणीं मृत्युमात्मनः ॥ ११ ॥
सोभिगम्य पुरीं लङ्कां सु[9]विभक्तमहापथाम् ॥ सं[10]रूढकक्ष्याबहुलं स्वमन्तःपुरमाविशत् ॥ १२ ॥
तत्र तां[11]मसितापाङ्गीं शोकमोह[12]परायणाम् ॥ निदधे रावणः सीतां मयो मायामिव[13] स्त्रियम् ॥ १३ ॥
अब्रवीच्च दशग्रीवः पिशाचीर्घोरदर्शनाः ॥ यथा नेमां पुमान्स्त्री वा सीतां पश्यत्यसंमतः ॥ १४ ॥

वचने लिङ्" इति लिङ् ॥ २ ॥ सहभूषणं भूषणान्तरितं वस्त्रं । उत्सृज्य उन्मुच्य । तन्मध्ये सीतया निक्षिप्तमिति यत् तत्कर्म। संभ्रमात्सीतापहारजनितक्षोभात् न बुद्धवान् । यदि बुध्येत गृह्णीयादेवेति भावः ॥ ३ ॥ पिङ्गाक्षाः वानराः । न केवलं वानराः अपि तु वानरर्षभाः वानरश्रेष्ठाः । अनिमिषैरिव निमेषरहितैरिव । तथा विक्रोशन्तीं राम रामेति विक्रोशन्तीमित्यर्थः ॥ ४ ॥ पम्पां पम्पोपर्याकाशं । लङ्कामभिमुख इत्यनेन एतावत्पर्यन्तं रामाश्रमदत्तदृष्टिर्गतः ततः स्वच्छन्दं गतवानिति गम्यते । अतएव सुसंहृष्ट इति वक्ष्यते ॥ ५ ॥ उत्सङ्गेनेत्यस्य उभयत्राप्यन्वयः । मृत्युं मृत्युहेतुभूतां ॥ ६ ॥ विहायसा आकाशमार्गेण ॥ ७ ॥ तिमीति तिमयो मत्स्यविशेषाः नक्राः ग्राहाः तेषां निकेतं वासस्थानं । वरुणस्य आलयं वासः । शरणं प्राप्यं । गत्वा प्राप्य । क्रमेण सागरं समतीयाय ॥ ८ ॥ संभ्रमात् रावणदर्शनक्षोभात् परिवृत्तोर्मिः । रुद्धमीनमहोरगः बहिःसंचाररहितमत्स्यसर्पः ॥ ९ ॥ अन्तरिक्षगताश्चारणाः दशग्रीवः एतदन्तः एतत्सीतापहरणावसानइति वाचः ससृजुः ऊचुरित्यर्थः । अन्तरिक्षगताःसिद्धाश्च एतदन्तो दशग्रीव इत्यब्रुवन् ॥ १० ॥ आत्मनः रूपिणीं रूपवतींमृत्युमिति सीताविशेषणं ॥ ११ ॥ संरूढाः जनाकीर्णाः कक्ष्याः द्वारप्रकोष्ठाः ताभिः बहुलं निबिडं ॥ १२ ॥ तत्र अन्तःपुरे शोकमोहपरायणां शोकमोहपरतन्त्रां । निदधे स्थापितवान् । मयस्त्रिपुराधिपतिः । मायां मायामयीं आश्चर्यशक्तियुक्तामित्यर्थः । स्त्रियं स्वयंप्रभां बिले यथानिदधे तथेत्यर्थः ॥१३॥ पिशाचीः पिशाच्याकाराः राक्षसीः । यथेमां स्त्री वा पुमान्वा असंमतः अननुज्ञातः । नपश्यति तथाऽब्रवीत् । एनामन्यो न पश्येदित्यब्रवीदित्यर्थः

ति० वस्तुतोऽयंयदिशब्दः"वेदाःप्रमाणंयदिस्युः" इतिवत् ॥ **स०** संभ्रमात् रामआगच्छेदितिमनश्चाञ्चल्यात् । **शि०** सहभूषणंवस्त्रमुत्सृज्यविद्यमानायास्सीतायाः संभ्रमात् तदुक्तिहेतुकोद्वेगाद्धेतोः । निक्षिप्तं निक्षेपरूपं । तत्कर्मदशग्रीवोनबुद्धवान् ॥ ३ ॥ **ति०** सुसंहृष्टः मृत्योस्तत्त्वेनाज्ञानात् । केचित्तु—लब्धंरामहस्तान्मृत्युद्वारमितिसंहृष्टः । विनाचोत्कटंपापंपुण्यक्षयाभावेननमृत्युस्संनिहितःस्यादितितमोगुणावृतस्सन्मातर्यपिविरुद्धशब्दव्यवहारंकृतवानितिवदन्ति । तेषामेतत्सर्गान्तेवक्ष्यमाणं"बभूवमोहान्मुदितः" इत्यसङ्गतंस्यात् । तथा "आत्मानंबुद्धिवैक्लब्यात्कृतकृत्यममन्यत" इत्युत्तरसर्गादिस्थंचासंगतंस्यात् ॥६॥ **ति०** संरूढकक्ष्यां बहुजनाकीर्णद्वारां । बहुलां विपुलां । संरूढकक्ष्याबहुलामितिपाठे तादृशबहुतरद्वारवत्इत्यन्तःपुरविशेषणं ॥ १२ ॥

[पा०] १ क. ख. ग. विनिक्षिप्तंसभूषणं. २ घ.—ट. चनबुद्धवान्. क. ख. ग. नचबुद्धवान्. ३ ख. ग. ङ. झ. ट. तदा. ४ ङ. छ. ज. झ. मैथिलींगृह्यरुदतीं. च. ञ. ट. मैथिलींगृह्यरुदन्तीं. ५ क. ख. ग. मैथिलीं. ६ क. ग. च. छ. ज. रम्यं. ७ ङ. झ. ट. स्तथा. ८ ख. प्रवेष्टन्तीं. ङ.—ट. विचेष्टन्तीं. ९ ख. सुसंरुद्ध. १० क. ङ. छ. झ. ट. संरूढकक्ष्यांबहुलां. ११ क. ङ.—ट. मसितापाङ्गीं. १२ ङ. झ. ट. मोहसमन्वितां. १३ क.—ट. मिवासुरीं.

मुक्तामणिसुवर्णानि वस्त्राण्याभरणानि च ॥ यद्यदिच्छेत्तदेवास्या देयं मच्छन्दतो यथा ॥ १५ ॥
या च वक्ष्यति वैदेहीं वचनं किंचिदप्रियम् ॥ अज्ञानाद्यदि वा ज्ञानान्न तस्या जीवितं प्रियम्॥१६॥
तथोक्त्वा राक्षसीस्तास्तु राक्षसेन्द्रः प्रतापवान् ॥ निष्क्रम्यान्तःपुरात्तस्मात्किं कृत्यमिति चिन्तयन् १७
ददर्शाष्टौ महावीर्यान्राक्षसान्पिशिताशनान् ॥ १८ ॥
स तान्दृष्ट्वा महावीर्यो वरदानेन मोहितः ॥ उवाचैतानिदं वाक्यं प्रशस्य बलवीर्यतः ॥ १९ ॥
नानाप्रहरणाः क्षिप्रमितो गच्छत [1]सत्वराः ॥ जनस्थानं हतस्थानं भूतपूर्वं खरालयम् ॥ २० ॥
[2]तत्रोष्यतां जनस्थाने शून्ये निहतराक्षसे ॥ पौरुषं बलमाश्रित्य त्रासमुत्सृज्य दूरतः ॥ २१ ॥
[3]बलं हि सुमहद्यन्मे जनस्थाने निवेशितम् ॥ सदूषणखरं युद्धे [4]हतं रामेण सायकैः ॥ २२ ॥
[5]तत्र क्रोधो ममामर्षाद्धैर्यस्योपरि वर्तते ॥ वैरं च सुमहज्जातं रामं प्रति सुदारुणम् ॥ २३ ॥
निर्यातयितुमिच्छामि [6]तच्च वैरमहं रिपोः ॥ [7]न हि लप्स्याम्यहं निद्रामहत्वा संयुगे रिपुम् ॥ २४ ॥
तं त्विदानीमहं हत्वा खरदूषणघातिनम् ॥ रामं शर्मोपलप्स्यामि धनं लब्ध्वेव निर्धनः ॥ २५ ॥
जनस्थाने वसद्भिस्तु भवद्भी राममाश्रिता ॥ प्रवृत्तिरुपनेतव्या किङ्करोतीति तत्त्वतः ॥ २६ ॥
अप्रमादाच्च गन्तव्यं [8]सर्वैरपि निशाचरैः ॥ कर्तव्यश्च सदा यत्नो राघवस्य वधं प्रति ॥ २७ ॥
[9]युष्माकं च [10]बलज्ञोऽहं बहुशो रणमूर्धनि ॥ अतश्चास्मिञ्जनस्थाने मया यूयं [11]नियोजिताः ॥ २८ ॥
[12]ततः प्रियं वाक्यमुपेत्य राक्षसा महार्थमष्टा[13]वभिवाद्य रावणम् ॥
विहाय लङ्कां सहिताः प्रतस्थिरे यतो जनस्थानमलक्ष्यदर्शनाः ॥ २९ ॥

॥ १४ ॥ एषा यद्यदिच्छेत्तत्तद्देयं यथामच्छन्दतः मदिच्छानुसारेण । यथा मह्यं दीयंते तद्वद्देयमित्यर्थः ॥ १५ ॥ जीवितं न प्रियं मारयेयमित्यर्थः ॥ १६ ॥ चिन्तयन् महावीर्यान्राक्षसान् ददर्श अपश्यत् ॥१७—१८ ॥ वरदानेन ब्रह्मवरदानेन । तानेतानित्यन्वयः ॥ १९ ॥ नानेति "आयुधं तुप्रहरणं" इत्यमरः । हतस्थानं शून्यसन्निवेशं । खरालयं भूतपूर्वं पूर्वं खरालयमित्यर्थः । "भूतपूर्वे चरट्" इति निर्देशात्समासः ॥ २० ॥ पौरुषं बलं न केवलं नीतिबलमित्यर्थः ॥ २१ ॥ पौरुषबलाश्रयणे हेतुमाह—बलं हीति । यत् बलं सैन्यं निवेशितं तद्धतमित्यन्वयः ॥ २२ ॥ तत्र वधनिमित्तं । अमर्षात् असहनात् ॥ २३ ॥ निर्यातयितुं अवसितुं ॥ २४ ॥ शर्म सुखं । उपलप्स्यामि प्राप्स्यामि ॥ २५ ॥ प्रवृत्तिर्वार्ता । रामः किं करोतीति तत्त्वतो वार्ता मत्सकाशमुपनेतव्येत्यर्थः ॥२६॥ अप्रमादादिति अवधानादित्यर्थः ॥ २७ ॥ खरादिस्थाने अस्माभिः कथं स्थातुं शक्यं तत्राह—युष्माकं चेति ॥ २८ ॥ महानर्थोभिधेयो यस्य तं महार्थं प्रियं श्लाघारूपं वाक्यं । उपेत्य लब्ध्वा । रावणतः स्तुतिं प्राप्येत्यर्थः । यतो यत्र जनस्थानं तद्वनमुद्दिश्य प्रतस्थिरे । अलक्ष्यदर्शनाः वेगातिशयेन दुष्प्रेक्षस्वरूपाः

ति० मायामिवासुरीमित्यनेन मायारूपैवैषासीतायालङ्कामागतेतिध्वनितं । मुख्यसीताल्वाग्निंप्रविष्टेतिपूर्वमेवध्वनितं । अत एवरावणस्यवहनीयैषाजाता । मायात्वादेवरावणस्यतदज्ञानं ॥ १३ ॥ ति० मच्छन्दतइत्यस्यमद्वशप्राप्तिसिद्ध्यर्थमित्यर्थइति कतकः ॥ १५ ॥

[पा०] १ घ. राक्षसाः. २ ङ. झ. ट. तत्रास्यतां. ३ क. ङ.—ट. बहुसैन्यंमहावीर्यं. ४ क. ख. ङ. च. छ. झ. ञ. ट. निहतंरामसायकैः. ५ ख. ङ.—ट. ततःक्रोधोममापूर्वोधैर्यस्योपरिवर्धते. क. ततःक्रोधोमयापूर्वोधैर्येणपरिवर्धते. ६ घ. ङ.—ट. तच्चवैरंमहारिपोः. ख. वैरंममरिपोर्वधात्. ७ क. नाभिगच्छाम्यहं. ख. च. छ. ज. नाभिपत्स्याम्यहं. घ. नैवलप्स्याम्यहं. ८ क.—ट. सर्वैरेव. ९ ग. युष्माकंहि. ङ. छ. झ. ट. युष्माकंतु. १० ङ. झ. ट. बलंज्ञातं. ११ क. ख. ग. ङ.—ट. निवेशिताः. १२ घ. अतः. १३ च. छ. ज. ञ. वभिवन्द्य.

ततस्तु सीतामुपलभ्य [1]रावणः सुसंप्रहृष्टः [2]परिगृह्य मैथिलीम् ॥
प्रसज्य रामेण च वैरमुत्तमं बभूव मोहान्मुदितः स [3]राक्षसः ॥ ३० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

रावणेनसीतासमीपमेत्यबलात्तस्यास्तत्रतत्रसमानयनेनविचित्रतरभवनप्रासादोद्यानादिप्रदर्शनपूर्वकं तत्प्रलोभनेच्छयाबहुधाचाटुवचनोपन्यासः ॥ १ ॥

संदिश्य राक्षसान्घोरान्रावणोष्टौ महाबलान् ॥ आत्मानं बुद्धिवैक्लव्यात्कृतकृत्यममन्यत ॥ १ ॥
स चिन्तयानो वैदेहीं काम[4]बाणसमर्पितः ॥ [5]प्रविवेश गृहं रम्यं सीतां द्रष्टुमभित्वरन् ॥ २ ॥
[6]स प्रविश्य तु तद्वेश्म रावणो [7]राक्षसाधिपः ॥ अपश्यद्राक्षसीमध्ये सीतां शो[8]कपरायणाम् ॥ ३ ॥
अश्रुपूर्णमुखीं दीनां शोक[9]भाराभिपीडिताम् ॥ वायुवेगैरिवाक्रान्तां मज्जन्तीं नावमर्णवे ॥ ४ ॥
मृगयूथपरिभ्रष्टां मृगीं श्वभिरिवावृताम् ॥ [10]अधोमुखमुखीं [11]सीतामभ्येत्य च निशाचरः ॥ ५ ॥
तां तु [12]शोकपरां दीनामवशां [13]राक्षसाधिपः ॥ [14]स बलाद्दर्शयामास गृहं देवगृहोपमम् ॥ ६ ॥
हर्म्यप्रासादसंबाधं स्त्रीसहस्रनिषेवितम् ॥ नानापक्षिगणैर्जुष्टं नानारत्न[15]समन्वितम् ॥ ७ ॥
[16]काञ्चनैस्तापनीयैश्च स्फाटिकै [17]राजतैरपि ॥ वज्रवैडूर्यचित्रैश्च [18]स्तम्भैर्दृष्टिमनोहरैः ॥ ८ ॥

॥ २९ ॥ सर्गार्थं संगृह्य दर्शयति—ततस्त्विति । उपलभ्य दृष्ट्वा । सुसंप्रहृष्टः कामविकारवान् । परिगृह्य गृहीत्वा । रामेण वैरं प्रसज्य प्राप्यापि । मोहान्मुदितो बभूव । अत्र त्रिंशच्छ्लोकाः ॥ ३० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

पूर्वं स्वप्रभावकथनमुखेन प्रलोभनं कृतवान् अथ भोगोपकरणप्रदर्शनमुखेन रावणः सीतां प्रलोभयति पञ्चपञ्चाशे । बुद्धिवैक्लव्यात् बुद्धिदौर्बल्यात् अकृतबुद्धित्वादित्यर्थः ॥ १ ॥ समर्पितः पीडित इत्यर्थः । अभित्वरन् अभित्वरमाणः ॥ २ ॥ वेश्म अन्तःपुरं ॥३॥ अश्रित्यादिश्लोकत्रयमेकं वाक्यं । अधोमुखमवनतं मुखं यस्यास्तां । "स्यादवाङ्प्यधोमुखः" इत्यमरः । शोकभाराभिपीडितामभ्येत्य शोकपरां दर्शयामासेति क्रियाभेदादपुनरुक्तिः । अवशां दर्शनमनिच्छन्तीं ॥ ४—६ ॥ गृहं वर्णयति द्वाभ्यां । हर्म्येत्यादि । हर्म्यैः ह्रस्वविमानैः । प्रासादैः उन्नतविमानैश्च संबाधं निबिडं । काञ्चनैः स्वर्णमयैः । तापनीयैः तप्तस्वर्णमयैः । स्तम्भैरुपलक्षितं ॥ ७—८ ॥

ति० मोहान्मुदितः खरहन्तुर्वधोममसुकरः स्त्रीवियोगेनातिखिन्नस्येतिहर्षितः ॥ ती० वस्तुतस्तुरावणस्यश्रीरामेणसहवैरंलोकदृष्ट्याऽनर्थवत्प्रतीयमानमपिसीताहरणद्वाराश्रीरामहस्तात्स्ववधस्येष्टतमत्वाद्रामेणवैरंप्राप्यमुमुदइतिभावः । सर्गश्रवणफलं—"सीतापहारमारभ्यलङ्कायांस्थापनावधि । श्रवणाच्छास्त्रविहिताज्ज्येष्ठादेवीविनश्यति" इतिस्कान्दे ॥ ३० ॥ इतिचतुष्पञ्चाशस्सर्गः ॥ ५४ ॥

ति० शोकोवायुस्थाने । अश्रुचार्णवजलस्थाने । अनेनाश्रुवेगातिशयउक्तः ॥ ४ ॥ ती० अधोमुखमुखीं अधोमुखे अधःप्रदेशे

[पा०] १ च. छ. ज. ञ. मैथिलीं. २ च. छ. ज. ञ. प्रतिगृह्यरावणः. क. सनिगृह्य. ३ ङ. झ. ट. रावणः. ४ ङ. ङ. झ. ञ. ट. बाणैःप्रपीडितः. क. च. ज. बाणावपीडितः. ५ ग. सविवेश. ६ ख. संप्रविश्य. ७ क. च. छ. ज. ञ. राक्षसेश्वरः. ८ ङ. झ. ट. दुःखपरायणां. ९ क. घ.—छ. झ. ञ. ट. भारावपीडितां. १० ङ. झ. ट. अधोगतमुखीं. ११ च. ज. दीनांतामभ्येत्य. ग. दीनामभ्येत्यस. ख. दीनांसीतामभ्येत्य. १२ क. ग. च. छ. ज. ञ. ट. शोकवशां. ङ. झ. शोकवशाद्दीनां. १३ ख. सनिशाचरः. क. राक्षसेश्वरः. १४ ग. विविधंदर्शयामास. ख. स्वबलंदर्शयामास. १५ ग. विभूषितं. १६ ङ. झ. ञ. ट. दान्तकैः. १७ ग. ङ. च. छ. झ. ञ. ट. राजतैस्तथा. १८ क. स्तम्भैर्जुष्टंमनोहरं. ख. ङ.—ट. स्तम्भैर्दृष्टिमनोरमः.

दिव्यदुन्दुभिनिर्ह्रादं तप्तकाञ्चनतोरणम् ॥ सोपानं काञ्चनं चित्रमारुरोह तया सह ॥ ९ ॥
दान्तिका राजताश्चैव गवाक्षाः प्रियदर्शनाः ॥ हेमजालावृताश्चासंस्तत्र प्रासादपङ्क्तयः ॥ १० ॥
सुधामणिविचित्राणि भूमिभागानि सर्वशः ॥ दशग्रीवः स्वभवने प्रादर्शयत मैथिलीम् ॥ ११ ॥
दीर्घिकाः पुष्करिण्यश्च नानावृक्षसमन्विताः ॥ रावणो दर्शयामास सीतां शोकपरायणाम् ॥ १२ ॥
दर्शयित्वा तु वैदेह्याः कृत्स्नं तद्भवनोत्तमम् ॥ उवाच वाक्यं पापात्मा सीतां लोभितुमिच्छया ॥१३॥
दश राक्षसकोट्यश्च द्वाविंशतिरथापराः ॥ तेषां प्रभुरहं सीते सर्वेषां भीमकर्मणाम् ॥ १४ ॥
वर्जयित्वा जरावृद्धान्बालांश्च रजनीचरान् ॥ सहस्रमेकमेकस्य मम कार्यपुरस्सरम् ॥ १५ ॥
यदिदं राजतन्त्रं मे त्वयि सर्वं प्रतिष्ठितम् ॥ जीवितं च विशालाक्षि त्वं मे प्राणैर्गरीयसी ॥ १६ ॥
बहूनां स्त्रीसहस्राणां मम योऽसौ परिग्रहः ॥ तासां त्वमीश्वरा सीते मम भार्या भव प्रिये ॥ १७॥
साधु किं तेऽन्यथाबुद्ध्या रोचयस्व वचो मम ॥ भजस्व माऽभितप्तस्य प्रसादं कर्तुमर्हसि ॥१८ ॥

दिव्यदुन्दुभिनिर्ह्रादं निर्ह्रादवत्। अर्शआद्यच् । यद्वा दिव्यदुन्दुभेरिव निर्ह्रादः शब्दो यस्य तत् । आरोहणकाले दुन्दुभिवत् ध्वनतीति भावः । तोरणो बहिर्द्वारं । चित्रं आश्चर्यभूतं । "आलेख्याश्चर्ययोश्चित्रं" इत्यमरः । तया सहारुरोह तामादायारुरोहेत्यर्थः ॥ ९ ॥ वक्ष्यमाणभूभागदर्शनसाधनान्याह— दान्तिका इति । दान्तिकाः दन्तविकृताः । तत्र सोपानमार्गे । गवाक्षा आसन् तदुपरि हेममयैः जालैः जालकैः आवृताःप्रासादपङ्क्तयश्चासन् ॥ १० ॥ सुधावलेपनेन मणिभिश्च विचित्राणि भूमिभागानीति क्लीबत्वमार्षं । प्रादर्शयत् प्रदर्शयामास । तैर्गवाक्षैरिति शेषः ॥ ११ ॥ दीर्घिकाः वाप्यः । पुष्करं जलमासामस्तीति पुष्करिण्यः । द्वितीयार्थे प्रथमा । "पुष्करादिभ्यो देशे" इति इनिप्रत्ययः । शोकपरायणामित्यनेन तस्या असह्यत्वं द्योत्यते ॥ १२ ॥ लोभितुं लोभयितुं । अन्तर्भावितण्यर्थोयं ॥ १३ ॥ दशेति । दश द्वाविंशतिश्चेति द्वात्रिंशत्कोटयः तेषां द्वात्रिंशत्कोटिराक्षसानां । गुणीभूतानामपि राक्षसानां तच्छब्देन परामर्शः । "अथशब्दानुशासनं । केषां शब्दानां" इत्यादौतथा दर्शनात् ॥ १४ ॥ —वर्जयित्वेति । बालवृद्धान्विना ममैकस्य पुरः सरतीति पुरःसरं परिचारकजातं । एकसहस्रमस्ति ॥ १५ ॥ मम यदिदं राजतन्त्रं राजपरिकरः । तत्सर्वं त्वयि प्रतिष्ठितं त्वदधीनं मम जीवितं च त्वदधीनं । त्वयि प्रतिष्ठितं । त्वं मे मम । प्राणैः प्राणेभ्यः गरीयसी ॥ १६ ॥ अन्तःपुरचारिणां स्त्रीसहस्राणां मध्ये योसौ मम परिग्रहः या भार्येत्यर्थः । "परिग्रहः कलत्रे स्यात्" इति शाश्वतः । नियतपुँल्लिङ्गः । जात्यभिप्रायेणैकवचनं । तासामित्यत्र स्त्रीणामित्यभिप्रायेण स्त्रीलिङ्गनिर्देशः । मम भार्यासती तासामीश्वरा स्वामिनी भव । "स्थेशभासपिसकसोवरच्" इति वरच् । ततष्टाप् ॥ १७ ॥ मम वचो रोचयस्व मदुक्तं स्वीकुरु ।

मुखंयस्यास्तां ॥५॥ **स०** बालान्वृद्धाञ्जनान्वर्जयित्वाद्वात्रिंशत्संख्याकेषुराक्षसेषुमध्येएकैकस्यकार्यपुरस्सरंकार्यकरंएकैकसहस्रंतिष्ठति । एतच्चरावणगृहमध्येपरिचारसङ्ख्यानं । एतदतिरिक्ताश्चबहवश्शूरास्सन्ति । अतोनाशीतिकोटियूथपमित्यादिविरोधः ॥१५॥ **ती०** योममपरिग्रहः याममभार्याइत्यर्थः । परिग्रहशब्दोनियतपुल्लिङ्गः । अत्रायंजात्येकवचनेयोसौपरिग्रहइतिनिर्दिश्यतासामितिस्त्रीलिङ्गेनस्त्रीणांनिर्देशः । परमार्थतःपरिग्रहशब्दवाच्यानांस्त्रीत्वादितिज्ञेयं । मेममभार्यासतीतासामीश्वरास्वामिनीभवेत्यन्वयः । वस्तुतस्तु अभवप्रियेइतिच्छेदः । मोक्षप्रिये । भार्येत्यत्रभा आर्येतिच्छेदः । भा चिद्रूपिणी आर्याश्रेष्ठा त्वंममतासांचईश्वराभवेतियोजना । **स०** हेप्रियेतासांयःपरिग्रहः मूलं असौत्वमेवेतियोजना । "परिग्रहःस्वीकारमूलयोः"इतिविश्वः ॥ १७ ॥ **ती०** वस्तुतस्तु— कामाभितप्तस्य कामेनलब्धृत्योभविष्यामीत्येवंरूपेणमनोरथेन । अभितप्तस्येत्यर्थः ॥ **शि०** ननुरामंविनाऽहंनस्थास्यामीत्यतआह ।

[पा०] १ ङ.—ट. निर्घोषं. २ ङ. च. छ. ज. ञ. भूषणं. ३ क. ग. ङ. झ. ट. दान्तकाः. ४ क. ग. विचित्रांश्च भूमिभागान्सहस्रशः. ५ ङ.—ट. पुष्पसमावृताः. ग. वृक्षसमावृताः. ६ ख. ग. ङ. च. छ. झ. ञ. ट. वैदेहीं. ७ क. ग. च. छ. ज. रावणोजनकात्मजां. ८ क. कोट्यस्तु. ९ क. ख. ग. च. छ. ज. येषां. १० ङ. छ.—ट. जनान्वृद्धान्. ११ च.—ट. राज्यतन्त्रं. १२ ङ.—ट. बह्वीनामुत्तमस्त्रीणां. १३ ख. ङ.—ट. मीश्वरी. १४ ख. भार्याभवमम. १५ क. ग. ज. तेऽन्यया. १६ च. छ. भजकामाभितप्तस्य. क. भजस्वमेऽभितप्तस्य.

परिक्षिप्ता सहस्रेण[1] लङ्केयं शतयोजना ॥ नेयं धर्षयितुं शक्या सेन्द्रैरपि सुरासुरैः ॥ १९ ॥
न देवेषु न यक्षेषु न गन्धर्वेषु[2] पक्षिषु[3] ॥ अहं पश्यामि लोकेषु यो मे वीर्यसमो भवेत् ॥ २० ॥
राज्यभ्रष्टेन दीनेन तापसेन गतायुषा[4] ॥ किं करिष्यसि रामेण मानुषेणाल्पतेजसा[5] ॥ २१ ॥
भजस्व सीते मामेव भर्ताऽहं सदृशस्तव ॥ यौवनं ह्यध्रुवं[6] भीरु रमस्वेह मया सह ॥ २२ ॥
दर्शने मा कृथा बुद्धिं राघवस्य वरानने ॥ काऽस्य शक्तिरिहागन्तुमपि[7] सीते मनोरथैः ॥ २३ ॥
न शक्यो वायुराकाशे पाशैर्बद्धुं महाजवः[8] ॥ दीप्यमानस्य वाऽप्यग्नेर्[9]ग्रहीतुं विमला[10] शिखा ॥ २४ ॥
त्रयाणामपि लोकानां न तं पश्यामि शोभने ॥ विक्रमेण नयेद्यस्त्वां मद्बाहुपरिपालिताम्[11] ॥ २५ ॥
लङ्कायां[12] सुमहद्राज्यमिदं त्वमनुपालय ॥ त्वत्प्रेष्या मद्विधाश्चैव देवाश्चापि चराचराः[13] ॥ २६ ॥
अभिषेकोदकक्लिन्ना[14] तुष्टा च रमयस्व माम् ॥ २७ ॥

इदं साधु समीचीनं । ते अन्यथाबुद्ध्या किं । रामविषया बुद्धिर्मा भूदित्यर्थः । तस्मात् मा मां । भजस्व । अभितप्तस्य कामाभितप्तस्य । मे प्रसादं कर्तुमर्हसि । अर्हसि किं नार्हसीत्यपि ध्वनिः ॥ १८ ॥ रामागमनप्रसक्तिरेव नास्तीत्याशयेनाह—परिक्षिप्तेति । "शतं सहस्रमयुतं सर्वमानन्त्यवाचकं" इति वचनात् सहस्रेण अनेकराक्षसैः । परिक्षिप्ता परिवृता । इयं लङ्का शतयोजना शतयोजनपरिमिता । तस्मान्नेयं धर्षयितुं शक्या ॥ १९ ॥ माभूत्पुरस्य दुर्धर्षता मम पुनर्वीर्यं शृण्वित्याह—न देवेष्विति । मे वीर्ये यःसमोभवेत् तं देवेषु न पश्यामि । यक्षेषु न पश्यामि । गन्धर्वेषु न पश्यामि । पक्षिषु च न पश्यामि ॥२०॥ गतायुषा अल्पायुषेत्यर्थः ॥ २१॥ इह भवने ॥ २२॥ राघवस्य दर्शने बुद्धिं मा कृथाः । तद्दर्शनं च दुर्लभमित्यर्थः । तदेव स्पष्टयति—कास्येति । अत्र आगन्तुं मानसिकव्यापारोपि नशक्यः किंपुनः कायिकइत्यर्थः ॥ २३ ॥ अशक्यत्वे दृष्टान्तमाह—न शक्य इति । विमला निर्धूमा । शिखा ज्वाला ॥ २४ ॥ लोकानामिति निर्धारणे षष्ठी ॥ २५ ॥ त्वत्प्रेष्याः त्वत्परिचारिकाः । भविष्यन्तीति शेषः ॥ २६ ॥ अभिषेकेत्यर्धमेकं वाक्यं । अभिषेकोदकेन पट्टमहिषी-

---

साध्विति । साधु स्वहितंममवचोरोचयस्व । अन्यथारामविषयिण्याबुद्ध्यातेकिं नकिमपीत्यर्थः । अतएव स्वमा ममनित्यमाता । त्वंभज सेवांकारय । अभितप्तस्य भ्रात्रादिवधेनपीडितस्यममप्रसादंप्रसन्नतांकर्तुंत्वमर्हसि ॥ १८ ॥ **ती०** राज्यभ्रष्टेनेत्यादिश्लोकद्वयस्यवाक्यार्थस्स्पष्टः । वस्तुतस्तु–राज्यभ्रष्टेन राज्याद्भ्रष्टाः रिपवोयस्मात्तेन । दीनेनतापसेनगतायुषेत्यन्तमेकंपदं । दीनानामिनः । तापसानामिनः । दीनेनश्चासौतापसेनश्चदीनेनतापसेनः । तादृशस्सन् । गतंप्राप्तंआयुःएकादशसहस्रवत्सरपरिमितंयेनतेन । दीनजनानांतापसानांचरक्षणार्थमवतीर्णेनेत्यर्थः । मानुषेण मनुष्यरूपेणावतीर्णेन । अल्पतेजसा अल्पमितरेषांतेजोयस्मात्तेन । "तमेवभान्तमनुभातिसर्वंतस्यभासासर्वमिदंविभाति" इतिश्रुतेः । रामेणकिं एतादृशंपरमपुरुषमुद्दिश्यकिमर्थंविलापःक्रियतइति भावः ॥—॥ भजस्वेति । मामेअवेतिच्छेदः । यौवनं यौवनशब्देनसर्वाअवस्थालक्ष्यन्ते । ताभिस्सर्वमायुर्लक्ष्यते । तथाचयतःमे मम । त्वत्सेवानुकूलंसर्वमायुरध्रुवं । भर्ता बिभर्तिशुश्रूषादिनास्वामिनमितिभर्ताभृत्यः । सदृशः अनुरूपः । यतस्तवाहमनुरूपोभृत्यः अतोमा मांभजस्व भृत्यत्वेनाङ्गीकुरु । अव रक्षच । तदर्थमिहलङ्कायांमयासहराज्यलक्ष्म्यासह रमस्व ॥ २१–२२ ॥ **शि०** रामविषयकविरक्तिमुत्पादयन्नाह—**राज्येति** । राज्यभ्रष्टेन अतएव अल्पतेजसा रामेण किंकरिष्यसि । एतेन रामकर्तृकराज्यप्राप्त्यनन्तरंतत्संगमःकर्तव्यइतिव्यञ्जितं ॥२१॥ **ती०** दर्शनइत्यादिश्लोकत्रयस्यप्रातीतिकार्थस्स्पष्टः । वस्तुतस्तु—यथावायुर्बद्धुंनशक्यते अग्नेश्शिखाग्रहीतुंयथानशक्यते । एवंमनोरथैरपिइहलङ्कांप्रत्यागन्तुंकस्यशक्तिः नकस्यापि ॥ रामंविनेतिशेषः । तथामद्बाहुपरिपालितांत्वांयोहरेत् तंनपश्यामि । रामं विनेतिशेषः । श्रीरामश्चेदागन्तुंशक्नुयात्त्वामाहर्तुंचशक्नुयात् । अतस्सएवागत्यत्वांप्राप्स्यति । त्वंतुश्रीरामंकदाद्रक्ष्यामीत्युत्कण्ठांमाकुर्वित्यर्थः ॥ २३—२५ ॥ **ती०** लङ्कायामित्यारभ्यअलंव्रीडेनेत्यन्तश्लोकानांप्रातीतिकार्थस्स्पष्टः । वस्तुतस्तु—कुलदेवतायैदेव्यैरावणस्स्वात्मात्मीयसमर्पणंकरोति लङ्कायामित्यादिश्लोकद्वयेन । मद्विधाइत्यनेनात्मसमर्पणं । लङ्कायांराज्यमनुपालयेत्यनेनात्मीयसमर्पणमितिज्ञेयम् ॥ २६—२७ ॥

[पा०] १ क.—ट. समुद्रेण. २ क. च. छ. ज. ञ. गन्धर्वेषूरगेषुच. ३ ग. ङ. झ. ट. नर्षिषु. ४ ङ. छ. झ. ट. पदातिना. ५ ख. चेतसा. ६ ङ. झ. ट. ह्यध्रुवं. ७ ख. रथागन्तुं. ८ ख. मनोजवः. ९ क. ख. च. छ. ज. चाप्यग्नेः. १० ङ. झ. ट. विमलाःशिखाः. ११ क. ख. बलपालितां. १२ ङ. झ. ञ. लङ्कायाः. १३ ङ. झ. ञ. ट. चराचरं. १४ ङ. झ. ट. अभिषेकजलक्लिन्ना.

दुष्कृतं यत्पुरा कर्म वनवासेन तद्गतम् ॥ [१]यश्च ते सुकृतो धर्मस्तस्येह फलमाप्नुहि ॥ २८ ॥
इह [२]माल्यानि सर्वाणि दिव्यगन्धानि मैथिलि ॥ भूषणानि च मुख्यानि [३]सेवस्व च मया सह ॥२९॥
पुष्पकं नाम सुश्रोणि भ्रातुर्वैश्रवणस्य मे ॥ विमानं सूर्यसंकाशं तरसा [४]निर्जितं [५]मया ॥ ३० ॥
विशालं रमणीयं च त[६]द्विमानमनुत्तमम् ॥ [७]तत्र सीते मया सार्धं विहरस्व यथासुखम् ॥ ३१ ॥
वदनं पद्मसंकाशं विमलं चारुदर्शनम् ॥ शोकार्तं तु वरारोहे न भ्राजति वरानने ॥ ३२ ॥
एवं वदति तस्मिन्सा वस्त्रान्तेन वराङ्गना ॥ पिधायेन्दुनिभं सीता [८]मुखमश्रूण्यवर्तयत् ॥ ३३ ॥
ध्यायन्तीं तामिवास्वस्थां [९]दीनां चिन्ताहतप्रभाम् ॥ उवाच वचनं [१०]पापो रावणो [११]राक्षसेश्वरः ॥ ३४ ॥
अलं व्रीडेन वैदेहि धर्मलो[१२]पकृतेन च ॥ आर्षोयं दैवनि[१३]ष्यन्दो यस्त्वामभिगमिष्यति ॥ ३५ ॥
एतौ पादौ [१४]मयास्निग्धौ शिरोभिः परिपीडितौ ॥ प्रसादं कुरु मे क्षिप्रं वश्यो दासोऽहमस्मि ते ॥३६॥

त्वेनाभिषेकोदकेन क्लिन्ना सिक्ता ॥ २७ ॥ पुरा पूर्वजन्मनि । यद्दुष्कृतं कर्मास्ति तत् वनवासेन वनवासक्लेशेन । दत्तफलत्वात् गतं नष्टं ॥ २८ ॥ भूषणानि च मुख्यानि सेवस्व धारयेत्यर्थः ॥ २९ ॥ तरसा बलेन ॥ ३० ॥ विशालं वेशनयोग्यं । "वेः शालच्छङ्कटचौ" इत्यनेन शालच् प्रत्ययः । असंकोचन्यायाद्यावदुपवेशेष्वसंभावनमुपवेशार्हमित्यर्थः ॥ ३१ ॥ न भ्राजति न भासते ॥ ३२ ॥ वदतीति सतिसप्तमी । पिधाय आच्छाद्य ॥ ३३ ॥ इवशब्दोऽवधारणे । यद्वा अस्वस्थामिव भूताविष्टामिवेत्यर्थः ॥ ३४ ॥ हे वैदेहि धर्मलोपकृतेन व्रीडेनालं व्रीडा माभूदित्यर्थः । कुत इत्यत्राह—आर्ष इति । यो दैवनिष्यन्दः दैवकृतसंबन्धः । त्वामभिगमिष्यति । अयं संबन्धः आर्षः ऋषिप्रोक्तः । न त्वधर्म्य इत्यर्थः । अत्र नारदः—"परपूर्वाःस्त्रियस्त्वन्याः सप्त प्रोक्ताः स्वयंभुवा । पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्विधा ॥ कन्याक्षतयोनिर्वा पाणिग्रहणदूषिता । पुनर्भूः प्रथमा प्रोक्ता पुनःसंस्कारकर्मणा ॥ देशधर्मानपेक्ष्य स्त्री गुरुभिर्या प्रदीयते । उत्पन्नसाहसाऽन्यस्मै सा द्वितीया प्रकीर्त्यते ॥ मृते भर्तरि तु प्राप्ता देवरादीनपास्य या । उपगच्छेत्परं कामात्सा तृतीया प्रकीर्तिता ॥ प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा च या । तवाहमित्युपगता सा चतुर्थी प्रकीर्तिता" इति ॥ ३५ ॥ एतावि‌ति

शि० अभिषेकजलक्लिन्ना अभिषेकजलैःस्नानोदकैः क्लिन्ना स्नाता । तुष्टा लङ्काराज्यप्राप्त्याप्राप्तसंतोषाचत्वंमां लङ्कासंपत्तिं । रमयस्वयथेच्छंपालय । एतेनापहरणसमयादारभ्यतावत्कालपर्यन्तंस्नानं तयानकृतमितिसूचितम् ॥ २७ ॥ **ती०** सुकृतफलमपिसमर्पयति—**दुष्कृतमिति** । वनवासेन वनं जलं । जलमध्यस्थलङ्काद्वीपवासिना । मयेति शेषः । पुरायद्दुष्कृतं कर्म कृतमितिशेषः । तद्गतं नष्टं । मदिष्टदेवतायास्तवदर्शनमात्रेणेतिशेषः । पुरामयासुकृतोयोधर्मस्तस्यफलंतेतुभ्यंनिवेदयामि । आप्नुहि गृहाणेत्यर्थः ॥ २८ ॥ **ती०** इहेति । मयासमर्पितानीतिशेषः । सह एकदैव ॥ २९ ॥ **ती०** पुष्पकमित्यादिश्लोकद्वयमेकंवाक्यं । अत्रपुष्पके मयासमर्पितेपुष्पकइत्यर्थः । सार्धं । सर्वसंपद्भिरितिशेषः । विहरस्व ॥ ३०—३४ ॥ **ती०** अलंव्रीडेनेति । वैदेहि धर्मलोपकृतेनालं । व्रीडामाभूदित्यर्थः । कुतइति चेत् । दैवनिष्यन्दः दैवनिपातः यस्संबन्धःत्वामभिगमिष्यति सोयं दैवनिष्यन्दः आवयोर्निष्कारणस्संबन्धइतियावत् । आर्षः ऋषिदृष्टः । अनादिसिद्धइतियावत् । वस्तुतस्तु अलंव्रीडेनेति । भृत्यलक्षणविषयेव्रीडानोचितेत्यर्थः । कोवातोधर्मलोपोभविष्यति । कुतःयोदैवनिष्यन्दः आवयोर्दैवेनसंपादितदासदासवद्भावः अयंसंबन्धः आर्षः अनादिसिद्धः । सएवत्वामभिगमिष्यति नतुनवीनः । अतोव्रीडामाभूदित्यर्थः ॥ **ति०** हेदेवि त्वामभि त्वामुद्दिश्य । मयाक्रियमाणोनिष्पन्दः स्नेहबन्धः प्रार्थनारूपः । यश्चाग्रेभविष्यति सोयमार्षः ऋषिदृष्टएव । क्षत्रियाणामुचितत्वेनवेदोक्तएव । "बलात्कारेणराक्षसः"इतिविवाहेषुस्मृत्यागणनात् । एवमुक्तिरपितमोगुणप्राधान्येनैव । कन्यायाबलात्कारे-

[**पा०**] १ ङ.—ट. यच्चतेसुकृतंकर्मतस्येह. २ क.—ट. सर्वाणिमाल्यानि. ३ ङ. च. छ. झ. ञ. ट. तानिसेव. क. निषेवय. ४ ख. चार्जितं. ५ ङ. झ. ञ. ट. रणे. ६ ख. ङ—ट. द्विमानंमनोजवं. ७ च. छ. पुष्पकेऽत्रमया. ८ ख.—ङ. झ. ट. मन्दमश्रूणि. ९ ङ. झ. ट. सीतांचिन्ता. क. च. छ. ज. दीनचित्तां. १० क. च. छ. ज. ञ. सीतांरावणो. ग. ङ. झ. ट. वीरोरावणो. ११ ख. ग. ङ.—ट. रजनीचरः. १२ ख. लोपेनतेनते. क. ग. ङ.—ट. लोपकृतेनते. १३ झ. देविनिष्पन्दो. १४ ख. ग. ङ—ट. मयास्निग्धौ.

[1]इमाः [2]शून्या मया वाचः शुष्यमाणेन भाषिताः ॥ न चापि रावणः कांचिन्मूर्ध्ना स्त्रीं प्रणमेत ह ॥३७॥
एवमुक्त्वा दशग्रीवो मैथिलीं जनकात्मजाम् ॥ कृतान्तवशमापन्नो ममेयमिति मन्यते ॥ ३८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मिकीये आदिकाव्ये आरण्यकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

षट्पञ्चाशः सर्गः ॥ ५६ ॥

रावणप्रलोभनैरविकृतमानसयासीतया तृणमन्तरतःकृत्वा तंप्रतिबहुधोपालंभपूर्वकं रामप्रभाववर्णनेन तेनतद्वधस्यावश्यंभावित्वोक्त्या पश्चात्तूष्णींभावः ॥ १ ॥ रावणेनसीतांप्रति तदादित्रयोदशमासादर्वाक्तनकाले स्वभजनाभावे हननप्रतिज्ञानपूर्वकं राक्षसीःप्रति सीतायाअशोकवनप्रापणेनतत्र तर्जनप्रलोभनाद्युपायैर्वशीकरणचोदना ॥ २ ॥ राक्षसीभिः सीतायाअशोकवनप्रापणेनाप्रमादेनपरिरक्षणं ॥ ३ ॥

सा तथोक्ता तु वैदेही निर्भया शोककर्शिता ॥ तृणमन्तरतः कृत्वा रावणं प्रत्यभाषत ॥ १ ॥
राजा दशरथो नाम धर्मसेतुरिवाचलः ॥ सत्यसन्धः परिज्ञातो यस्य पुत्रः स राघवः ॥ २ ॥
रामो नाम स धर्मात्मा त्रिषु लोकेषु विश्रुतः ॥ दीर्घबाहुर्विशालाक्षो दैवतं हि[3] पतिर्मम ॥ ३ ॥
इक्ष्वाकूणां कुले जातः सिंहस्कन्धो महाद्युतिः ॥ लक्ष्मणेन सह भ्रात्रा यस्ते प्राणान्[4]हरिष्यति ॥ ४ ॥
प्रत्यक्षं यद्यहं तस्य [5]त्वया स्यां धर्षिता बलात् ॥ शयिता त्वं हतः संख्ये जनस्थाने यथा खरः ॥ ५ ॥
[6]ये एते राक्षसाः प्रोक्ता घोररूपा महाबलाः ॥ राघवे निर्विषाः सर्वे सुपर्णे पन्नगा यथा ॥ ६ ॥
तस्य ज्याविप्रमुक्तास्ते शराः काञ्चनभूषणाः ॥ शरीरं विधमिष्यन्ति गङ्गा कूलमिवोर्मयः ॥ ७ ॥
असुरैर्वा [7]सुरैर्वा त्वं यद्यवध्योसि रावण ॥ उत्पाद्य [8]सुमहद्वैरं जीवंस्तस्य न मोक्ष्यसे ॥ ८ ॥

तवेति शेषः ॥ ३६ ॥ शुष्यमाणेन अनङ्गेनतप्यमानेन मया । इमाः शून्याः नीचाः वाचो भाषिताः । कुतः यस्माद्रावणः स्त्रीं न प्रणमेत न प्रणमेत् । अदृष्टपूर्वत्वात्स्वस्यापि नीचोक्तिर्विस्मयावहा जातेति भावः ॥३७॥ मन्यते अमन्यत ॥३८॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

तथैतच्छ्रुत्वा परुषं भाषमाणायाः सीतायाः पुनरशोकवनिकानयनं षट्पञ्चाशे । अन्तरतो मध्ये । पतिव्रतायाः परपुरुषं प्रत्यभिमुखतया भाषणायोगात् ॥ १ ॥ धर्मसेतुः धर्मस्य सेतुरिव । मर्यादास्थापक इत्यर्थः । अचलः स्थिरः । परिज्ञातः प्रसिद्धः । कथमेतादृशकुलं प्राप्ताऽतिचरेदिति भावः ॥ २ ॥ सः दशरथपुत्रः । दैवतं सर्वलोकानामिति शेषः । य एवंभूतः स मे पतिरिति योजना । कथमेवंभूतभर्तृकातिचरेदिति भावः ॥ ३ ॥ इक्ष्वाकूणामिति । त्वद्वधार्थमेव भ्रात्रा सह इक्ष्वाकुकुलेऽवतीर्ण इति भावः । तथाच न मे त्वत्तो भयमितिभावः ॥ ४ ॥ तर्हि कथमिदानीं स तूष्णीं स्थित इत्याशङ्क्याह— प्रत्यक्षमिति । प्रत्यक्षं यथातथा यदिधर्षितास्यां तदा त्वं हतः सन् युद्धे शयिता म्रियेथा इत्यर्थः ॥ ५ ॥ निर्विषाः निर्वीर्या इति राक्षसपक्षे ॥ ६ ॥ विधमिष्यन्ति ध्मास्यन्ति निपातयिष्यन्तीत्यर्थः । गङ्गेत्यविभक्तिकनिर्देशः । गङ्गाया ऊर्मय इत्यर्थः ॥ ७ ॥ त्वं सुरासुरैर्यद्यप्यवध्यः तथापि तस्य रामस्य । सुमह-

---

णग्रहणस्यैवराक्षसविवाहपदार्थादितिबोध्यं ॥ ३५ ॥ **ति०** इमाः दासोहमित्यन्ताः । शुष्यमाणेन कामपीडितेनमया । भाषिताः उक्तावाचः । शून्यायथानभवन्ति तथाकुर्वितिशेषः ॥ ३७ ॥ इतिपञ्चपञ्चाशस्सर्गः ॥ ५५ ॥

ति० निर्भया स्त्रियाबलादुपभोगे "मूर्धातेनिपतिष्यति" इत्यप्सरसो रावणंप्रति शापंचित्तेविज्ञायनिर्भया । बलात्कारेयोगवशाददृश्याऽस्पृश्याच भविष्यामीतिधियानिर्भयावा ॥ **स०** तृणमन्तरतः मध्येकृत्वा । प्रत्यभाषतेत्यर्थः । अनेनरावणस्याभाष्यत्वं द्योत्यते । वायसासुरशासनंतृणेनैवममपत्याकृतं तवापिदशानन दशातथास्यादितिद्योतयितुमितिवा ॥ १ ॥

[पा०] १ क. ख. च. छ. ज. ञ. नेमाः. २ झ. शून्यमयाः. ३ क.—ट. सपतिः. ४ ङ. छ.—ट. म्वधिष्यति. ५ ङ. झ. ट. लयावै. ६ ख. एतेते. ७ ङ. सुरैर्वापि. ८ ग. सुमहावैरं.

स ते जीवितशेषस्य राघवोऽन्तकरो बली ॥ पशोर्यूपगतस्येव जीवितं तव दुर्लभम् ॥ ९ ॥
यदि पश्येत्स रामस्त्वां रोष[1]दीप्तेन चक्षुषा ॥ रक्षस्त्वमद्य निर्दग्धो [2]गच्छेः सद्यः पराभवम् ॥ १० ॥
यश्चन्द्रं नभसो भूमौ पातयेन्नाशयेत वा ॥ सागरं शोष[3]येद्वाऽपि स सीतां मोचयेदिह ॥ ११ ॥
[4]गतायुस्त्वं गतश्रीको गतसत्त्वो गतेन्द्रियः ॥ लङ्का वैधव्यसंयुक्ता त्वत्कृतेन भविष्यति ॥ १२ ॥
[5]न ते पापमिदं कर्म [6]सुखोदर्कं भविष्यति॥ याहं नीता विनाभावं पतिपार्श्वात्त्वया [7]वने ॥ १३ ॥
[8]स हि [9]दैवतसंयुक्तो मम भर्ता महाद्युतिः ॥ निर्भयो वीर्यमाश्रित्य शून्ये वसति दण्डके ॥ १४ ॥
स ते [10]दर्पं बलं वीर्यमुत्सेकं च तथाविधम् ॥ [11]अपनेष्यति गात्रेभ्यः शरवर्षेण संयुगे ॥ १५ ॥
यदा विनाशो भूतानां दृश्यते कालचोदितः ॥ तदा कार्ये प्रमाद्यन्ति नराः कालवशं गताः ॥ १६ ॥
मां प्रधृष्य स ते कालः प्राप्तोऽयं राक्षसाधम ॥ आत्मनो राक्षसानां च वधायान्तःपुरस्य च ॥ १७ ॥
न शक्या यज्ञमध्यस्था वेदिः स्रुग्भाण्डमण्डिता ॥ द्विजाति[12]मन्त्रपूता च चण्डाले[13]नावमर्दितुम् ॥ १८ ॥
तथाऽहं धर्मनित्यस्य धर्मपत्नी [14]पतिव्रता ॥ त्वया स्प्रष्टुं न [15]शक्याऽस्मि राक्षसाधम पापिना ॥ १९ ॥
क्रीडन्ती राजहंसेन पद्मषण्डेषु [16]नित्यदा ॥ हंसी सा [17]तृणषण्डस्थं कथं [18]पश्येत मद्गुकम् ॥ २० ॥

द्वैरं कोपमुत्पाद्य स्थितस्त्वं जीवन्सन् तच्छरपातान्न मोक्ष्यसे नमुक्तोभविष्यसीत्यर्थः ॥ ८ ॥ स राघवः। ते जीवितशेषस्य अन्तकरः नाशं कर्तुं समर्थः। तस्मात् यूपगतस्यपशोरिव रामापराधिनस्तव । जीवितं दुर्लभं ॥ ९ ॥ हे रक्षः स रामः त्वां रोषदीप्तेनचक्षुषा यदिपश्येत् तदा त्वं निर्दग्धःसन् सद्यः पराभवं गच्छेः। निर्दग्धशब्देनातीव पीडितत्वमुच्यते ॥१०॥ नभसः आकाशात् । पातयेत् नाशयेतवा अदर्शनं प्रापयेद्वा । सागरमपि शोषयेत् । सः सीतांमोचयेदिति किमुत ॥ ११ ॥ त्वत्कृतेन परदाराभिमर्शनरूपपापेन। त्वं आयुरादिहीनोभविष्यसि । लङ्काच वैधव्यसंयुक्ता अनाथत्वयुक्ता भविष्यति । "आयुर्बलं यशो लक्ष्मीः परदाराभिमर्शनात् । सद्यएव विनश्यन्ति"इति स्मृतेः ॥ १२ ॥ याऽहं वने पतिपार्श्वात् विनाभावं वियोगं । नीता। तस्यां मयि ते इदं पापं कर्म सुखोदर्कंनभविष्यति । किंतु दुःखोदर्कमेव भविष्यतीत्यर्थः ॥ १३ ॥ दैवतसंयुक्तः दैवबलसंयुक्तः। दीनस्तापसो रामो मां किं करिष्यतीति पूर्वं रावणेनोक्तस्य परिहारोयम् ॥ १४ ॥ दर्पं मदं। उत्सेकं उल्लङ्घ्य कार्यकारित्वं। गात्रेभ्य इत्युक्तिर्दर्पादीनां देहविशिष्टगुणत्वात् ॥१५॥ लोकन्यायमाह—यदेति । कालचोदितो दैवकृतः विनाशोयदा दृश्यते सन्निहितो भवतीत्यर्थः । तदा कार्ये कृत्ये। प्रमाद्यन्ति वैपरीत्यं प्राप्नुवन्ति ॥ १६ ॥ उक्तं लोकन्यायं प्रकृते योजयति—मामिति । मां प्रधृष्य स्थितस्यतव कालोप्ययमेव वर्तमानएव नतुचिरायेत्यर्थः। आत्मनो राक्षसानामन्तःपुरस्य च वधाय प्राप्तः ॥ १७ ॥ न शक्येत्यादिश्लोकद्वयमेकान्वयं । यज्ञो यज्ञपुरुषः तन्मध्यस्था गार्हपत्याहवनीयमध्यगता । वेदिः ऐष्टिकीमहावेदिः । स्रुग्भाण्डमण्डिता स्रुगाद्युपकरणालंकृता । द्विजातिमन्त्रैः उद्धननादिमन्त्रैः । पूता शुद्धा यथा चण्डालेनावमर्दितुं पादेनाक्रमितुं। न शक्या नार्हा। तथाहं धर्मनित्यस्य नित्यधर्मस्य यज्ञस्थानीयस्य । धर्मपत्नी पतिव्रता । त्वयास्प्रष्टुं न शक्या ॥ १८—१९ ॥ नित्यदा नित्यं ।

ती० त्वत्कृतेन त्वन्नाशनिमित्तेन ॥ १२ ॥ **शि०** तेन रामस्यातिसामर्थ्यविशिष्टत्वेनहेतुना इदमपहरणरूपं पापंकर्मदुःखोदर्कं भविष्यति । नतेइतिपाठे काकुर्बोध्या । अतएव याहंपतिपार्श्वात्विनाभावं पतिसेवाराहित्यं । बलात् हठात् नीता प्रापिता । तां मां रामोनेष्यतीतिशेषः ॥१३ ॥ **ति०** देवरसंयुक्तः लक्ष्मणसंयुतः । सः खरादिहन्ता ॥१४॥ **ति०** स्वमरणेनवैधव्यमेवान्तःपुरवधः ॥ १७ ॥ **ति०** द्रक्ष्येत पश्येत् ॥ २० ॥

[पा०] १ ख. रोषाद्दीप्तेन. २ ङ. झ. ट. यथारुद्रेणमन्मथः. ३ ख. च. छ. ञ. शोषयेच्चापि. ४ ङ. छ. झ. ञ. ट. गतासुस्त्वं. ५ ङ. ट. तेन. ६ ङ. ट. दुःखोदर्कं. ७ क. ख. ग. च. ञ. वनात्. ङ. छ. झ. ट. बलात्. ८ क. योहि. ९ ङ. झ. ञ. ट. देवरसंयुक्तो. १० ङ. च. छ. झ. ञ. ट. वीर्यंबलंदर्पं. ११ ङ. झ. ट. व्यपनेष्यति. १२ ख. च. छ. ज. ट. मन्त्रसंपूता. १३ ख. नाभिमर्शितुं. १४ ङ.—ट. दृढव्रता. ग. यशस्विनी. १५ ख. शक्यासा. ग. ङ. झ. शक्याहं. १६ क. ङ. छ.—ट. नित्यशः. १७ क. ङ. छ.—ट. तृणमध्यस्थं. १८ क. ग. ङ.—ट. द्रक्ष्येत.

इदं शरीरं निस्संज्ञं बन्ध वा खादयस्व वा ॥ नेदं शरीरं रक्ष्यं[1] मे जीवितं वाऽपि[2] राक्षस ॥ २१ ॥
न तु शक्ष्याम्युपक्रोशं[3] पृथिव्यां दातुमात्मनः ॥ २२ ॥
एवमुक्त्वा तु वैदेही क्रोधात्सुपरुषं[4] वचः ॥ रावणं मैथिली[5] तत्र पुनर्नोवाच किंचन ॥ २३ ॥
सीताया वचनं[6] श्रुत्वा परुषं रोमहर्षणम् ॥ प्रत्युवाच[7] ततः सीतां भयसंदर्शनं वचः ॥ २४ ॥
शृणु मैथिलि मद्वाक्यं मासान्द्वादश भामिनि ॥ कालेनानेन नाभ्येषि यदि मां चारुहासिनि ॥
ततस्त्वां प्रातराशार्थं सूदाश्छेत्स्यन्ति लेशशः ॥ २५ ॥
इत्युक्त्वा परुषं वाक्यं रावणः शत्रुरावणः ॥ राक्षसीश्च ततः[8] क्रुद्ध इदं वचनमब्रवीत् ॥ २६ ॥
शीघ्रमेव हि राक्षस्यो विकृता[9] घोरदर्शनाः ॥ दर्पमस्या[10] विनेष्यध्वं मांसशोणितभोजनाः ॥ २७ ॥
वचनादेव तास्तस्य सुघोरा[11] राक्षसीगणाः[12] ॥ कृतप्राञ्जलयो[13] भूत्वा मैथिलीं[14] पर्यवारयन् ॥ २८ ॥
स ताः[15] प्रोवाच राजा[16] तु रावणो घोरदर्शनः ॥ प्रचाल्य[17] चरणोत्कर्षैर्दारयन्निव मेदिनीम् ॥ २९ ॥
अशोकवनिकामध्ये मैथिली नीयतामियम्[18] ॥ तत्रेयं रक्ष्यतां गूढं युष्माभिः परिवारिता ॥ ३० ॥

नित्यशब्दस्य सर्वैकादिष्वपाठेप्यार्षोदाप्रत्ययः । सा प्रसिद्धा । तृणषण्डस्थं जलजनडादितृणकदम्बमध्यस्थं । मद्गुकं जलकाकं ॥ २० ॥ निःसंज्ञं निश्चेष्टं । बन्ध बधान । खादयस्व भक्षय ॥ २२ ॥ न त्वित्यर्धमेकं वाक्यं । आत्मनः उपक्रोशं अपवादं । पृथिव्यां दातुं नशक्ष्यामि ॥ २२ ॥ तत्र तद्विषये । क्रियाभेदात्पुनर्मैथिलीशब्दप्रयोगः ॥ २३ ॥ रोमहर्षणं क्रोधावहत्वाद्रोमाञ्चकरं । भयसंदर्शनं भयोत्पादकं ॥ २४ ॥ शृण्वित्यादिसार्धश्लोक एकान्वयः । द्वादश मासानित्यत्यन्तसंयोगे द्वितीया । प्रतीक्ष इति शेषः । प्रातराशार्थं प्रातर्भक्षणार्थं । सूदाः पाचकाः "सूदाऔदनिका गुणाः" इत्यमरः । सीताहरणं चैत्रमास इत्यवगन्तव्यं । संवत्सरान्ते रावणवधकरणात् । तेन त्रीन्वर्षान्पञ्चवट्यां रामःस्थित इति गम्यते । हेमन्तवर्णनं तु रामतपोविशेषज्ञापनाय नशूर्पणखागमनज्ञापनाय ॥ २५ ॥ शत्रून् रावयति क्रोशयतीति शत्रुरावणः ॥ २६ ॥ विनेष्यध्वं विनयध्वं । व्यत्ययेन स्यादेशः ॥ २७ ॥ कृतप्राञ्जलयः रावणवाक्याङ्गीकारे कृतप्रकृष्टाञ्जलयः ॥ २८ ॥ चरणोत्कर्षैः चरणाघातैः । मेदिनीं भुवं । दारयन्निव भिन्दन्निव । प्रचाल्य गत्वा उत्थायवा ताः प्रोवाच ॥ २९ ॥ युष्माभिःपरिवारिता युष्माभिः रक्ष्य-

---

ति० निस्संज्ञं स्वतोजडं ॥ २१ ॥ **ती०** वस्तुतस्तु हेवैदेहि मेवाक्यंशृणु । तत्किं द्वादशमासान् द्वादशमासपर्यन्तं । प्रतीक्षइतिशेषः । अनेनकालेननाभ्येषि । द्वादशमासपर्यन्तं भृत्यानुग्रहार्थंअत्रस्थातुंनाङ्गीकरोषियदीत्यर्थः । ततस्त्वामुद्दिश्य प्रातराशार्थं प्रातः प्रातरेव आशार्थं आशासुस्थितगृध्राद्यर्थं । सूदाः मांछेत्स्यन्ति । मदाज्ञयैवेतिशेषः । देवि मांभृत्यत्वेननाङ्गीकरोषियदि अहमितःपरं जीवितुंनेच्छामि । मांशस्त्रैश्छित्वाकाकगृध्राद्यर्थंप्रयच्छतेतिममाज्ञयैवसूदास्तथाकरिष्यन्तीतिभावः । **ति०** यत्तुपाद्मे—"दशमासात्परंसीतेयदिमांनभजिष्यसि । तदाहन्मि" इत्युक्तं तत्तु पुनस्सीतासविधगमनकालिकंवचइतिनविरोधः । नाभ्येषि स्वारस्येनेतिशेषः ॥ **स०** पद्मपुराणे "दशमासात्परंसीते" इत्येवकथनात् द्वादशमासानन्तर्यस्यापिदशमासानन्तर्यसंभवान्नविरोधः । यद्वा दशचमासौचतेषांसमाहारः । दशपदार्थेमासपदार्थस्यबुद्ध्याविवेकेनान्वयः । अतोद्वादशमाससंपत्तिरितिनविरोधः ॥ २५ ॥ **ती०** वस्तुतस्तु हेराक्षस्यः मांसशोणितभोजनाः घोरदर्शनाश्चयूयंशीघ्रमविकृताः अविरूपाभूत्वा । दर्पंविनाअस्यास्समीपे इष्यध्वं सेवार्थंस्थातुमिच्छतेत्यर्थः । छादेशाभावादिरार्षः ॥ २७ ॥

[**पा०**] १ घ. रक्षिष्ये. २ च. छ. ज. ञ. चापि. ३ ख. ङ. छ. ट. शक्ष्याम्यपक्रोशं. झ. शक्यमपक्रोशं. ४ क. ख. त्सपरुषं. ५ ङ. छ. झ. ट. जानकी. ६ घ. परुषंश्रुत्वावचनं. ७ ख. रावणःपरमःक्रुद्धइदंवचनमब्रवीत्. ८ ख. तदा. ९ ङ. च. छ. झ. ञ. ट. विरूपाः. १० ङ.—ट. मस्यापनेष्यन्तु. क. ग. मस्याविनेष्यन्तु. ख. मस्यापनेष्यध्वं. ११ क. ग. च. छ. ज. ञ. विकृताः. १२ क. ग. ङ.—ट. घोरदर्शनाः. १३ ख. ततःप्राञ्जलयो. १४ क. च. छ. ज. ञ. जानकीं. १५ ग. ताश्चोवाच. १६ ख. ङ. झ. ट. राजासौ. १७ ङ. झ. ट. प्रचल्य. च. छ. ज. प्रचार्य. १८ ग. ङ. झ. ट. मिति. ख. घ. मिनः.

तत्रैनां तर्जनैर्घोरैः पुनः सान्त्वैश्च मैथिलीम् ॥ आ[1]नयध्वं वशं सर्वा वन्यां गजवधूमिव ॥ ३१ ॥
इति प्रतिसमादिष्टा राक्षस्यो रावणेन ताः ॥ अशोकवनिकां जग्मुर्मैथिलीं प्र[2]तिगृह्य तु ॥ ३२ ॥
सर्व[3]कालफलैर्वृक्षैर्नानापुष्पफलैर्वृ[4]ताम् ॥ सर्वका[5]लमदैश्चापि द्विजैः समुपसेविताम् ॥ ३३ ॥
सा तु शोकपरीताङ्गी मैथिली जनकात्मजा ॥ राक्षसीवशमापन्ना व्याघ्रीणां हरिणी यथा ॥३४॥
शोकेन महता ग्र[6]स्ता मैथिली जनकात्मजा ॥ न शर्म लभते भीरुः पाशबद्धा मृगी यथा ॥ ३५॥
न विन्दते तत्र तु शर्म मैथिली विरूपनेत्राभिरतीव तर्जिता ॥
पतिं स्मरन्ती दयितं च[7] दैवतं विचेतनाऽभूद्भयशोकपीडिता ॥ ३६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

अथ प्रक्षिप्तसर्गः ।

[8]प्रवेशितायां सीतायां लङ्कां प्रति पितामहः ॥ तदा प्रोवाच देवेन्द्रं परितुष्टं शतक्रतुम् ॥ १ ॥
त्रैलोक्यस्य हितार्थाय रक्षसामहिताय च ॥ लङ्कां प्रवेशिता सीता रावणेन दुरात्मना ॥ २ ॥
पतिव्रता महाभागा नित्यं चैव सुखैधिता ॥ अपश्यन्ती च भर्तारं पश्यन्ती राक्षसीजनम् ॥ ३ ॥
राक्षसीभिः परिवृता भर्तृदर्शनलालसा ॥ निविष्टा हि पुरी लङ्का तीरे नदनदीपतेः ॥ ४ ॥

तां ॥ ३० ॥ अत्यन्तभयेन प्राणवियोगो माभूदिति पुनः सान्त्वैरित्युक्तं ॥३१॥ प्रतिगृह्य आदाय ॥३२॥ सर्वस्मिन्नपि काले फलानि येषां ते सर्वकालफलाः तैः। एवमुत्तरत्रापिजग्मुरिति पूर्वेणान्वयः॥३३॥ राक्षसीत्वविभक्तिकनिर्देशः। राक्षसीनामित्यर्थः ॥३४॥ लभते अलभत ॥ ३५ ॥ तत्र अशोकवनिकायां । दयितं प्राणवल्लभं । ननु सीता लक्ष्म्याअवतार इति सिद्धं । वक्ष्यति हि "सीतालक्ष्मीर्भवान्विष्णुः" इति । विष्णुपुराणे चोक्तं "राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनि"इति । एवंभूतांसीतां समरसीमनिजनितमूर्च्छालक्षणंलक्ष्मणमप्युद्धर्तुमसमर्थो रावणः कथं बलात्करोति स्म । वक्ष्यति हि "हिमवान्मन्दरो मेरुस्त्रैलोक्यंवासहामरैः । शक्यं भुजाभ्यामुद्धर्तुं न संख्ये भरतानुजः" इति । उच्यते । वेदवतीरूपपूर्वजन्मनि देवी तथा संकल्पितवती । उक्तं ह्युत्तरकाण्डे "यस्मात्तु धर्षिता चाहं त्वया पापात्मना वने । तस्मात्तव वधार्थं वै उत्पत्स्येहं महीतले" इति ॥ देवकार्यनिर्वाहाय स्वयमेव स्वधर्षणमङ्गीचकार । प्रजायां कूपपतितायां यथा माता स्वयंतदुपरिपतति वात्सल्यातिशयेन तथा रावणबन्दीकृतदेवस्त्रीरक्षणाय स्वयं तत्रस्वगमनमनुमतवती । वक्ष्यति सुन्दरकाण्डे "नापहर्तुमहं शक्या तस्य रामस्य धीमतः । विधिस्तव वधार्थाय विहितो नात्र संशयः" इति ॥ तर्हि सीता प्रलापादिकं किमर्थं कृतवतीति चेत् शृणु । पतिविरहे पतिव्रतयैवं वर्तितव्यमिति लोकहितप्रवर्तनाय प्रलापादिकमकरोदिति ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षट्पञ्चाशः सर्गः ॥ ५६ ॥

ती० घोरैस्तर्जनैः विनेतिविशेषः।पुनस्सान्त्वैरेववशमानयध्वं ॥ ३१ ॥ **शि०** सर्वकामफलैः सर्वान्कामान्फलन्तितैर्वृक्षैः कल्पतरुभिः ॥ ३३ ॥ **ती०** सर्गश्रवणफलंस्कान्दे—"सीतारावणसंवादं राक्षसीनांचतर्जनम् । सीताप्रत्युक्तिकथनं येश्शृण्वन्तिनरोत्तमाः । विधूतपापास्तेयान्तिब्रह्मलोकंसनातनम्"इति ॥ ३६ ॥ इतिषट्पञ्चाशस्सर्गः ॥ ५६ ॥

[**पा०**] १ च. छ. ज. ञ. आनयध्वंहिविवशां. २ ग. ङ. झ. ट. परिगृह्यतु. ञ. परिगृह्यतां. च. छ. ज. परिगृह्यताः. ३ ग.—ट. कामफलैः. ४ घ. युतां. ५ क. कामप्रदैश्चापि. ६ क. ङ.—ञ. त्रस्ता. ७ ख. ङ. झ. ट. चदेवरं. ग. च. छ. ज. ञ. सलक्ष्मणं. क. चराघवं. ८ अयंप्रक्षिप्तस्सर्गः ङ. झ. पुस्तकयोर्दृश्यते.

कथं ज्ञास्यति तां रामस्तत्रस्थां तामनिन्दिताम् ॥ दुःखं संचिन्तयन्ती सा बहुशः परिदुर्लभा ॥५॥
प्राणयात्रामकुर्वाणा प्राणांस्त्यक्ष्यत्यसंशयम् ॥ स भूयस्संशयो जातः सीतायाः प्राणसंक्षये ॥ ६ ॥
स त्वं शीघ्रमितो गत्वा सीतां पश्य शुभाननाम् ॥ प्रविश्य नगरीं लङ्कां प्रयच्छ हविरुत्तमम् ॥ ७ ॥
एवमुक्तोथ देवेन्द्रः पुरीं रावणपालिताम् ॥ आगच्छन्निद्रया सार्धं भगवान्पाकशासनः ॥ ८ ॥
निद्रां चोवाच गच्छ त्वं राक्षसान्संप्रमोहय । सा तथोक्ता मघवता देवी परमहर्षिता ॥
देवकार्यार्थसिद्ध्यर्थं प्रामोहयत राक्षसान् ॥ ९ ॥
एतस्मिन्नन्तरे देवस्सहस्राक्षः शचीपतिः ॥ आससाद वनस्थां तां वचनं चेदमब्रवीत् ॥ १० ॥
देवराजोस्मि भद्रं ते इह चास्मि शुचिस्मिते ॥ अहं त्वां कार्यसिद्ध्यर्थं राघवस्य महात्मनः ॥ ११ ॥
साहाय्यं कल्पयिष्यामि मा शुचो जनकात्मजे ॥ मत्प्रसादात्समुद्रं स तरिष्यति बलैस्सह ॥ १२ ॥
मयैवेह च राक्षस्यो मायया मोहिताश्शुभे ॥ तस्मादन्नमिदं सीते हविष्यान्नमहं स्वकम् ॥ १३ ॥
स त्वां संगृह्य वैदेहि आगतः सह निद्रया ॥ एतदत्स्यसि मद्धस्तान्न त्वां बाधिष्यते शुभे ॥ १४ ॥
क्षुधा तृषा च रंभोरु वर्षाणामयुतैरपि ॥ एवमुक्ता तु देवेन्द्रमुवाच परिशङ्किता ॥ १५ ॥
कथं जानामि देवेन्द्रं त्वामिहस्थं शचीपतिम् ॥ देवलिङ्गानि दृष्टानि रामलक्ष्मणसंनिधौ ॥ १६ ॥
तानि दर्शय देवेन्द्र यदि त्वं देवराट् स्वयम् ॥ सीताया वचनं श्रुत्वा तथा चक्रे शचीपतिः ॥१७॥
पृथिवीं न पृशत्पद्भ्यामनिमेषेक्षणानि च ॥ अरजोऽम्बरधारी च नम्लानकुसुमस्तथा ॥ १८ ॥
तं ज्ञात्वा लक्षणैः सीता वासवं परिहर्षिता ॥ उवाच वाक्यं रुदती भगवद्राघवं प्रति ॥ १९ ॥
सह भ्रात्रा महाबाहुर्दिष्ट्या मे श्रुतिमागतः ॥ यथा मे श्वशुरो राजा यथा च मिथिलाधिपः ॥ २० ॥
तथा त्वामद्य पश्यामि सनाथो मे पतिस्त्वया ॥ तवाज्ञया च देवेन्द्र पयोभूतमिदं हविः ॥
अशिष्यामि त्वया दत्तं रघूणां कुलवर्धनम् ॥ २१ ॥
इन्द्रहस्ताद्गृहीत्वा तत्पायसं सा शुचिस्मिता ॥ न्यवेदयत भर्त्रे सा लक्ष्मणाय च मैथिली ॥ २२ ॥
यदि जीवति मे भर्ता सह भ्रात्रा महाबलः ॥ इदमस्तु ततोभक्त्या तदाश्नात्पायसं स्वयम् ॥२३॥

इतीव तत्प्राश्य हविर्वरानना जहौ क्षुधादुःखसमुद्भवं च तम् ॥
इन्द्रात्प्रवृत्तिमुपलभ्य जानकी काकुत्स्थयोः प्रीतमना बभूव ॥ २४ ॥
स चापि शक्रस्त्रिदिवालयं तदा प्रीतो ययौ राघवकार्यसिद्धये ॥
आमन्त्र्य सीतां स ततो महात्मा जगाम निद्रासहितः स्वमालयम् ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे प्रक्षिप्तः सर्गः ॥

सप्तपञ्चाशः सर्गः ॥ ५७ ॥

मारीचमारणानन्तरं स्वकण्ठरवानुकारिमारीचकण्ठरवश्रवणाद्दुर्निमित्तदर्शनाच्च सीताया विपदाशङ्कया त्वरितमागच्छता रामेण मध्येमार्गं लक्ष्मणदर्शनं ॥ १ ॥ तथा लक्ष्मणंप्रति विजनेसीतात्यागेनागमस्यानौचित्योक्त्योपालंभपूर्वकं दुर्निमित्तप्रदर्शनेन सीताया राक्षसैर्हरणमारणादिसंभावना ॥ २ ॥

राक्षसं मृगरूपेण चरन्तं कामरूपिणम् ॥ निहत्य रामो मारीचं तूर्णं पथि निंवर्तते ॥ १ ॥

एवमियता ग्रन्थसंदर्भेण सीताहरणवृत्तान्तमुपवर्ण्य | अथ रामस्य मृगानुसरणकथाशेषं दर्शयितुमारभते—

स० राक्षसमिति । प्रवेशितायामित्यादिर्मध्ये एकःसर्गः प्रक्षिप्तः क्वचित्पुस्तकेदृश्यते । सचमूलकोशेष्वदर्शनान्नव्याख्यातः
[पा०] १ क. च.—ट. न्यवर्तत.

तस्य संत्वरमाणस्य द्रष्टुकामस्य मैथिलीम् ॥ [1]क्रूरस्वनोथ गोमायुर्विननादास्य पृष्ठतः ॥ २ ॥
[2]स तस्य स्वरमाज्ञाय दारुणं रोमहर्षणम् ॥ [3]चिन्तयामास गोमायोः स्वरेण परिशङ्कितः ॥ ३ ॥
अशुभं बत मन्येहं गोमायुर्वाश्यते यथा ॥ स्वस्ति [4]स्यादपि वैदेह्या राक्षसैर्भक्षणं विना ॥ ४ ॥
मारीचेन तु विज्ञाय [5]स्वरमालम्ब्य मामकम् ॥ विक्रुष्टं मृगरूपेण लक्ष्मणः शृणुयाद्यदि ॥ ५ ॥
स सौमित्रिः स्वरं श्रुत्वा तां च [6]हित्वा च मैथिलीम् ॥ तयैव प्रहितः क्षिप्रं मत्सकाशमिहैष्यति ॥ ६ ॥
राक्षसैः सहितैर्नूनं सीताया ईप्सितो वधः ॥ काञ्चनश्च मृगो भूत्वा व्यपनीयाश्रमात्तु माम् ॥ ७॥
दूरं [7]नीत्वा तु मारीचो राक्षसोऽभूच्छराहतः॥ हा लक्ष्मण हतोसीति यद्वाक्यं [8]व्याजहार च ॥ ८ ॥
अपि स्वस्ति [9]भवेत्ताभ्यां [10]रहिताभ्यां [11]महावने ॥ जनस्थाननिमित्तं हि कृतवैरोसि राक्षसैः ॥ ९ ॥
निमित्तानि च घोराणि [12]दृश्यन्तेऽद्य बहूनि च ॥ इत्येवं चिन्तयन्रामः श्रुत्वा गोमायुनिस्स्वनम् ॥१०॥
[[13]निवर्तमानस्त्वरितो जगामाश्रममात्मवान् ॥]
[14]आत्मनश्चापनयनान्मृगरूपेण रक्षसा ॥ आजगाम जनस्थानं राघवः परिशङ्कितः ॥ ११ ॥
तं [15]दीनमनसो दीनमासेदुर्मृगपक्षिणः ॥ सव्यं कृत्वा महात्मानं घोरांश्च ससृजुः स्वरान् ॥ १२ ॥
तानि दृष्ट्वा निमित्तानि महाघोराणि राघवः ॥ न्यवर्ततथ त्वरितो जवेनाश्रममात्मनः ॥ १३ ॥
[16]स तु सीतां वरारोहां लक्ष्मणं च महाबलम् ॥ आजगाम जनस्थानं चिन्तयन्नेव राघवः ॥ १४ ॥

राक्षसमित्यादिना । निवर्तते न्यवर्तत ॥ १ ॥ द्रष्टुकामस्य । तदर्थंत्वरमाणस्येति संबन्धः । गोमायुः क्रोष्टा । एकस्य गोमायोः पृष्ठतः क्रूरस्वरकरणं दुर्निमित्तमिति भावः ॥ २ ॥ भयंकरत्वेन रोमहर्षणमित्युच्यते । पूर्वमेव मारीचस्वरेण परिशङ्कितः संजातशङ्कः । स रामः तस्य गोमायोः स्वरं आज्ञाय श्रुत्वा । चिन्तयामास ॥ ३ ॥ चिन्तामेवाह— अशुभमित्यादिना । गोमायुः यथा येन प्रकारेण । वाश्यते शब्दायते । तेन प्रकारेणाशुभं मन्ये । अपिः संभावनायां ॥ ४ ॥ मारीचेनेत्यादिश्लोकद्वयमेकान्वयं । मृगरूपेण मारीचेन मामकं मदीयं । स्वरंविज्ञाय मामकं स्वरं आलम्ब्य अनुसृत्य । विक्रुष्टं हा सीते लक्ष्मणेत्याह्वानेनोद्घोषितंस्वरं । लक्ष्मणः शृणुयाद्यदि तदा स सौमित्रिर्मामकं स्वरं श्रुत्वा तं स्वरं श्रुतवत्या तया सीतया च प्रेषितः सन् इहदेशे मत्सकाशं मत्समीपं एष्यति ॥ ५—६ ॥ राक्षसैरित्यादिश्लोकद्वयमेकान्वयं । यद्यस्मान्मारीचः काञ्चनः मृगो भूत्वा मामाश्रमाद्व्यपनीय दूरं नीत्वा मया हतःसन् राक्षसोभूत् लक्ष्मण हतोस्मीति वाक्यं व्याजहार च तस्मात्कचित्सहितैः राक्षसैः सीताया वधः ईप्सितः । नूनं ॥ ७—८ ॥ जनस्थाननिमित्तं जनस्थानवासनिमित्तेन । निमित्तकारणहेतूनां सर्वासामिष्टिः ॥ ९ ॥ निमित्तानीत्यादिश्लोकद्वयमेकान्वयं । गोमायुनिस्वनं श्रुत्वा मृगरूपेण रक्षसाऽऽत्मनः अपनयनात् आश्रमादपकर्षणाच्च । परिशङ्कितः सन् जनस्थानं आजगाम ॥ १०—११ ॥ सव्यंकृत्वा अप्रदक्षिणंकृत्वा आसेदुः ॥ १२ ॥ त्वरितः मानसिकत्वरासहितः । जवेन कायिकत्वरया ॥ १३ ॥ सीतां लक्ष्मणं च

॥१॥ शि० तस्यगोमायोःस्वरं दारुणं दारुणकर्मसूचकं । आज्ञाय निश्चित्य । स्वरेण स्वशब्दानुकारकमारीचस्वनेन । परिशङ्कितः ॥ ३ ॥ ति० मारीचेन मामकस्वरं विज्ञाय मामकस्वरध्वनिंज्ञात्वा । आलक्ष्य मदपकारोपायमवधार्य । यन्मृगरूपेणतेनाक्रुष्टं हासीतेलक्ष्मणेतिच । तद्यदिलक्ष्मणःश्रृणुयात् ॥ ५ ॥

[पा०] १ क.—घ. छ. ञ. स्वरोथ. २ क. ग. तस्यसस्वरं. च. छ. ज. ञ. तस्यस्वरमथालक्ष्य. क. तस्यसस्वरमालक्ष्य. ३ ङ. झ. शङ्कयामास. ख. च. छ. ज. ञ. रामःप्रोवाचगोमायोः. ४ ख. घ. छ. ज. ञ. स्यादथ. ५ क.—ट. मालक्ष्य. ६ क. ङ. च. ज.—ट. हित्वाथ. घ. छ. हित्वातु. ७ ङ. झ. ट. नीत्वाथ. ८ क.—ट. व्याजहारह. ९ ङ. झ. ट. भवेद्वाभ्यां. १० घ. राक्षसानां. ११ क. ख. ग. ङ.—ट. मयावने. १२ क. च. छ. ज. ञ. दृश्यन्तेत्र. १३ इदमर्धं ख.—ट. पाठेषु दृश्यते. १४ क. ग. ङ.—ट. श्चापनयनंमृगरूपेण. १५ ख. ग. ङ. झ. ञ. ट. दीनमानसं. १६ क. घ. सीतांसतु.

ततो लक्ष्मणमायान्तं ददर्श विगतप्रभम् ॥ १५ ॥
ततोऽविदूरे रामेण समीयाय स लक्ष्मणः ॥ विषण्णः सु[1]विषण्णेन दुःखितो दुःखभागिना ॥१६॥
सञ्जगर्हेथ तं भ्राता [2]ज्येष्ठो लक्ष्मणमागतम् ॥ विहाय सीतां विजने वने राक्षससेविते ॥ १७ ॥
गृहीत्वा च करं [3]सव्यं लक्ष्मणं रघुनन्दनः ॥ उवाच मधुरोदर्कमिदं परुषम[4]ार्तिमत् ॥ १८ ॥
अहो लक्ष्मण गर्ह्यं ते कृतं [5]यस्त्वं विहाय ताम् ॥ सीतामिहागतः सौम्य कच्चित्स्वस्ति [6]भवेदिह ॥ १९ ॥
न मेऽस्ति संशयो वीर सर्वथा जनकात्मजा ॥ विनष्टा भक्षिता वापि राक्षसैर्वनचारिभिः ॥
अशुभान्येव भूयिष्ठं यथा प्रादुर्भवन्ति मे ॥ २० ॥
अपि लक्ष्मण सीतायाः सा[7]मग्र्यं [8]प्राप्नुयावहे ॥ जीवन्त्यः पुरुषव्याघ्र सुताया जन[9]कस्य वै ॥२१॥
यथा वै मृगसंघाश्च गोमा[10]युश्चैव भैरवम् ॥ वाश्यन्ते शकुनाश्चापि प्रदीप्तामभितो दिशम् ॥ २२ ॥
अपि स्वस्ति [11]भवेत्तस्या राजपुत्र्या महाबल ॥ २३ ॥

इदं हि रक्षो मृगसन्निकाशं प्रलोभ्य मां दूरमनुप्रयान्तम् ॥
हतं कथंचिन्महता श्रमेण स राक्षसोभून्म्रियमाण एव ॥ २४ ॥
मनश्च मे दीनमिहाप्रहृष्टं चक्षुश्च सव्यं कुरुते विकारम् ॥
असंशयं लक्ष्मण नास्ति सीता हृता मृता वा पथि वर्तते वा ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

चिन्तयन्नेवाजगाम ॥ १४ ॥ तत इत्यर्धमेकं वाक्यं ॥ १५ ॥ ततो दर्शनानन्तरं । अविदूरे समीपे । समीयाय संगतः । दुःखभागिनेत्यर्थः "संपृच—"इत्यादिसूत्रेण घिनुण्प्रत्ययः ॥ १६ ॥ विजने स्वजनरहिते ॥ १७ ॥ सव्यं करं गृहीत्वा लक्ष्मणमुवाच । कथं परुषं अथ मधुरोदर्के मधुरोत्तरं । आर्तिमत् आर्तियुक्तं । सर्वमिदं क्रियाविशेषणं । अहो इत्यादि परुषं । लक्ष्मणेत्यादि मधुरं ॥१८॥ ते त्वया । इत्युवाचेत्यन्वयः ॥ १९ ॥ केनापिहेतुना विनष्टा वा राक्षसैर्भक्षिता वा । उक्तार्थे हेतुमाह—अशुभानीत्यर्धेन । भूयिष्ठं बहुलं यथा तथा ॥ २० ॥ अपिः प्रश्ने । सामग्र्यं अक्षतत्वं । क्षेममिति यावत् । हे लक्ष्मणेति सम्बन्धः ॥ २१ ॥ सामग्र्यप्राप्तिसंशये कारणमाह—यथेति । प्रदीप्तां दिशं सूर्याधिष्ठिता तत्पार्श्वद्वयदिशौ च प्रदीप्ता तामभिमुखं वाश्यन्ते नदन्ति । तेन वायसादिपक्षिणां श्रृगालादीनां कृष्णसारादिमृगाणां च सूर्याधिष्ठितदिशि कूजनं दुःखसूचकमित्युक्तं ॥ २२ ॥ चिन्तातिशयेन पुनरप्याह—अपि स्वस्तीति । अर्धमेकान्वयं ॥ २३ ॥ लक्ष्मणाय दर्शयति—इदमिति । मृगसन्निकाशं पूर्वं मृगवद्भातं । इदं रक्षः महता श्रमेण उपलक्षितं मां प्रलोभ्य कथंचिद्धतं । कथंचिदित्यनेन चिरं लक्ष्यवधाप्राप्तिर्द्योत्यते । मृगत्वं कुतो गतमित्यत्राह—स इति । सः म्रियमाणः सन् राक्षस एवाभूदित्यर्थः ॥ १४ ॥ निमित्तान्तरेणापि सीताहानिमनुमिनोति—मनश्चेति । इह सीतावियोगविषये । अप्रहृष्टं विकारं स्फुरणं । नास्तीति आश्रम इति शेषः ॥ २५ ॥ इति श्रीगोवि-

---

ति० यद्वा मधुरोदर्कं तात्पर्यतोमधुरं । आपाततःपरुषं ॥ १८ ॥ शि० जनकस्यसुतायास्सीतायाः सामग्र्यं अविच्छिन्नावयवत्वं । प्राप्नुयामहेअपि । अपिस्संभावनार्थकः ॥ २१ ॥ स० कथंचित् महताश्रमेणेतिलोकानुकरणं ॥ २४ ॥ शि० सीतानास्ति अभावप्रतियोगिनी । ननुनित्यायाःकथमभावप्रतियोगित्वमित्यतआह । अमृता नित्यापिसीता असंशयंयथाभवतितथाहृतासतीपथ्येववर्तते । एकोवाशब्दोप्यर्थे द्वितीयएवार्थे ॥ २५ ॥ इतिसप्तपञ्चाशस्सर्गः ॥ ५७ ॥

[पा०] १ ङ. झ. सन्विषण्णेन. ख. घ. सविषण्णेन. २ क. ग. ङ.—ट. दृष्ट्वा. ३ ख. तस्य. ४ ख. घ. ङ. छ. झ. ञ. ट. मार्तवत्. ५ क. च. छ. ज. ञ. यत्तु. यत्त्वं. ६ ख. ग. ङ. च. झ. ञ. ट. भवेदिति. ७ ख. ग. घ. सकाशं. ८ ङ.—ट. प्राप्नुयामहे. ९ ख. जनकस्यच. १० च. छ. ज. ञ. गोमायुश्चाथ. क. ख. गोमायुश्चापि. ११ च. छ. ज. ञ. भवेदस्याः.

अष्टपञ्चाशः सर्गः ॥ ५८ ॥

रामेण लक्ष्मणंप्रति सीतागुणानुवर्णनपूर्वकं तद्वियोगे स्वस्य दुर्जीवत्वोक्त्या बहुधाशोचनं ॥ १ ॥ तथा मारीचाक्रोशनश्रवणात्सीतया लक्ष्मणप्रेषणसंभावनापूर्वकं स्वकृतखरवधप्रतिचिकीर्षया राक्षसैः सीताहननसंभावना ॥ २ ॥

स[1] दृष्ट्वा लक्ष्मणं दीनं[2] शून्ये[3] दशरथात्मजः ॥ पर्यपृच्छत धर्मात्मा वैदेहीमागतं विना ॥ १ ॥
प्रस्थितं दण्डकारण्यं या मामनुजगाम ह ॥ क्व सा लक्ष्मण वैदेही यां हित्वा त्वमिहागतः ॥ २ ॥
राज्यभ्रष्टस्य दीनस्य दण्डकान्परिधावतः ॥ क्व सा दुःखसहाया मे वैदेही तनुमध्यमा ॥ ३ ॥
यां विना नोत्सहे वीर मुहूर्तमपि जीवितुम् ॥ क्व सा प्राणसहाया मे सीता सुरसुतोपमा ॥ ४ ॥
पतित्वममराणां[4] वा पृथिव्याश्चापि लक्ष्मण ॥ तां[5] विना तपनीयाभां[6] नेच्छेयं जनकात्मजाम् ॥ ५ ॥
कच्चिज्जीवति वैदेही प्राणैः प्रियतरा मम ॥ कच्चित्प्रव्राजनं सौम्य[7] न मे मिथ्या भविष्यति ॥ ६ ॥
सीतानिमित्तं सौमित्रे मृते मयि गते त्वयि ॥ कच्चित्सकामा सुखिता कैकेयी सा भविष्यति ॥ ७ ॥
सपुत्रराज्यां[8] सिद्धार्था मृतपुत्रा तपस्विनी ॥ उपस्थास्यति कौसल्या कच्चित्सौम्य[9] न केकयीम् ॥ ८ ॥
यदि जीवति वैदेही गमिष्याम्याश्रमं पुनः[10] ॥ सुवृत्ता[11] यदि वृत्ता सा प्राणांस्त्यक्ष्यामि लक्ष्मण ॥ ९ ॥
यदि मामाश्रमगतं वैदेही नाभिभाषते ॥ पुनः[12] प्रहसिता सीता विनशिष्यामि लक्ष्मण ॥ १० ॥
ब्रूहि लक्ष्मण वैदेही यदि जीवति वा न वा ॥ त्वयि प्रमत्ते रक्षोभिर्भक्षिता वा तपस्विनी ॥ ११ ॥

न्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्तपञ्चाशः सर्गः ॥५७॥

अथ सीताप्राप्तिसंदेहकृतशोकप्रलापोऽष्टपञ्चाशे । शून्ये वने वैदेहीं विना आगतं वैदेहीं विसृज्यागतं । लक्ष्मणं पर्यपृच्छत पर्यपृच्छत् ॥ १ ॥ प्रश्नस्वरूपमाह—प्रस्थितमित्यादिना । दण्डकारण्यं प्रति प्रस्थितं ॥ २ ॥ दुःखसहाया समानदुःखेत्यर्थः ॥ ३ ॥ सुरसुता सुरस्त्री ॥ ४ ॥ तपनीयं स्वर्णं । इच्छेयं इच्छामि ॥५॥ प्राणैः प्राणेभ्यः । प्रव्राजनं चतुर्दशवर्षवनवासः । मिथ्या असत्यं । न भविष्यतीति कच्चित् । चतुर्दशवर्षासमाप्तावेव सीतावियोगजं जीववियोगं किं प्राप्स्यामीत्यर्थः ॥६॥ सीतानिमित्तं सीताविनाशनिमित्तं । त्वयिगते अयोध्यामिति शेषः । सकामेत्यनेन रामस्य हृदये कैकेयी स्वविनाशार्थमेव वनं प्रेषितवतीति सदा वर्तते । तदिदानीं " सुप्तप्रमत्तकुपितानां भावज्ञानं दृष्टं" इति न्यायेन व्यक्तीकृतं ॥ ७ ॥ तपस्विनी शोच्या ॥ ८ ॥ वृत्ता परेता । सुवृत्ता स्वाचारा ॥९॥ प्रहसिता प्रहसितमुखी ॥ १० ॥ यदि जीवति तदा ब्रूहि वद । वैदेही जीवतिवा नवा । न

ति० शून्यं संतोषादिहीनचित्तं ॥ **स०** यादुःखसहाया कष्टकालेपिसहायभूता ॥ ३ ॥ **ति०** प्राणसहाया तांविनाअसहायाः प्राणाः कथंस्थास्यन्तीतिभावः ॥ ४ ॥ **शि०** ममप्राणैः प्रियतरावैदेही कच्चिज्जीवति । मेप्रव्राजनं प्रव्राजनसंबन्धिव्रतं । नगरप्रवेशाभावादि मिथ्या असत्यंकच्चिन्नभविष्यति । एतेन यदिनगरमध्येएवसीताऽपहृत्यसंस्थापिता तर्हितदानयनं नगरप्रवेशमन्तरा कथंसंभवेदितिरामविचारस्सूचितः । तेनापहृतापिनगराद्बहिः संस्थापिताचेच्छोभनमितितदभिप्रायोव्यञ्जितः ॥ ६ ॥ **शि०** हेसौमित्रे सीतानिमित्तं मयित्वयिच मृते राक्षसमृतत्वे । गते प्रापितेसति । सकामा राक्षसवधविषयकेच्छावतीकैकेयी सुखिताकच्चिद्भविष्यति ॥ ७ ॥ **शि०** सपुत्रराज्यांमद्विषयकातिप्रीतिपुत्रशोभासहितां । सिद्धार्था सिद्धोर्थः राक्षसवधरूपंप्रयोजनंयस्यास्तां कैकेयीं । मृतःराक्षसघातकः पुत्रोयस्यास्सा कौसल्या कच्चिदुपस्थास्यति प्रशंसिष्यति ॥ **ती०** सौम्येन विनयेन ॥ ८ ॥ **शि०** आश्रमगतंमां प्रहसितावैदेही यदिपुनर्नाभिभाषते नाभिभाषिष्यते राक्षसकृतपीडाजनितमूर्छादिनायदिकिंचिन्नवक्ष्यतीत्यर्थः । तर्हिविनशिष्यामि राक्षसान्विनाशयिष्यामि ॥ १० ॥

[**पा०**] १ ग. दृष्ट्वातु. २ घ. दीनः. ३ ग. ङ. झ. ट. शून्यं. ४ ङ. झ. ट. ममराणांहि. क. च. छ. ज. ञ. ममराणांच. ५ ग. ङ.—ट. विनातां. ६ क. तपनीयाङ्गीं. ७ ङ. झ. ट. वीर. ८ ख. च. छ. ञ. तांपुत्रराज्यसिद्धार्थां. ९ च. छ. सौम्येन. १० ख. ङ. ट. प्रति. ११ झ. संवृत्ता. १२ झ. पुरः.

सुकुमारी च बाला च नित्यं [1]चादुःखदर्शिनी ॥मद्वियोगेन वैदेही व्यक्तं शोचति [2]दुर्मनाः ॥ १२ ॥
सर्वथा रक्षसा तेन जिह्मेन सुदुरात्मना ॥ वदता लक्ष्मणेत्युच्चैस्तवापि जनितं भयम् ॥ १३ ॥
[3]श्रुतस्तु शङ्के वैदेह्या [4]स स्वरः सदृशो मम ॥ त्रस्तया प्रेषितस्त्वं च [5]द्रष्टुं मां शीघ्रमागतः ॥ १४ ॥
सर्वथा तु कृतं कष्टं सीतामुत्सृजता वने ॥ प्रतिकर्तुं नृशंसानां रक्षसां दत्तमन्तरम् ॥ १५ ॥
दुःखिताः खरघातेन राक्षसाः पिशिताशनाः ॥ तैः सीता निहता घोरैर्भविष्यति न संशयः ॥१६॥
[6]अहोस्मिन्व्यसने मग्नः सर्वथा [7]शत्रुसूदन ॥ [8]किंन्विदानीं करिष्यामि शङ्के प्राप्तव्यमीदृशम् ॥ १७॥
इति सीतां वरारोहां [9]चिन्तयन्नेव राघवः ॥ आजगाम जनस्थानं त्वरया सहलक्ष्मणः ॥ १८ ॥

विगर्हमाणोनुजमार्तरूपं क्षुधा [10]श्रमाच्चैव पिपासया च ॥
विनिःश्वसञ्शुष्कमुखो [11]विवर्णः प्रतिश्रयं प्राप्य समीक्ष्य शून्यम् ॥ १९ ॥
स्वमाश्रमं संप्रविगाह्य [12]वीरो विहारदेशाननुसृत्य कांश्चित् ॥
एतत्तदित्येव निवासभूमौ प्रहृष्टरोमा व्यथितो बभूव ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे अष्टपञ्चाशस्सर्गः ॥ ५८ ॥

वेत्यस्य विवरणं—त्वयीति । प्रमत्ते अनवहिते ॥११॥ दुःखं पश्यतीति दुःखदर्शिनी सा नभवतीत्यदुःखदर्शिनी । शोचति अशोचत् । वनवास इति शेषः । दुर्मनाः चिन्ताकुलेति यावत् ॥ १२ ॥ जिह्मेन कपटेन । तवापि अतिशूरस्यापि ॥ १३ ॥ मम स्वरेण यस्मादागतः तस्मात् सः स्वरो वैदेह्या श्रुतः त्रस्तया तया त्वं प्रेषितश्चेति शङ्के इति योजना ॥ १४ ॥ कष्टमेवाह—प्रतीति । प्रतिकर्तुं मत्कृतापकारस्य प्रत्यपकारं कर्तुं । अन्तरं अवकाशो दत्तः ॥ १५ ॥ प्रतीकारमेवाह—दुःखिता इति । पिशिताशनत्वं निहनने हेतुः ॥ १६ ॥ अहोस्मिन्निति संधिरार्षः । ईदृशं व्यसनमज्जनं प्राप्तव्यमिति शङ्के ॥ १७ ॥ वरारोहामितिचिन्ता हेतुसौन्दर्यातिशयोक्तिः ॥ १८ ॥

विगर्हमाण इत्यादिश्लोकद्वयमेकान्वयं वक्ष्यमाणानेकसर्गार्थसंग्रहरूपं । श्रमात् बहुदूरधावनात् । प्रतिश्रयं स्वाश्रमप्रदेशं । शून्यं सीतारहितं । प्रतिश्रयमित्यनुषज्यते । अनन्तरं स्वाश्रमं संप्रविगाह्य प्रविश्य । तमपि शून्यं समीक्ष्येति शेषः । तदनु सीतायाः कांश्चिद्विहारदेशाननुसृत्य विचित्य । तानपि शून्यान्समीक्ष्य तत्रत्यनिवासभूमौ क्रीडास्थाने तदेतदिति तादृशमेतादृशमिति विहारविशेषं स्मृत्वा प्रहृष्टरोमा सन् शोकेन व्यथितो बभूव ॥ १९—२०॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने अष्टपञ्चाशः सर्गः ॥ ५८ ॥

ति० तवापि ज्ञातमद्बलवीर्यादिमतोपि ॥ १३ ॥ **ति०** जनस्थानं तद्वर्तिस्वाश्रमं ॥ १८ ॥ **ति०** प्रतिश्रयं आश्रमसमीपदेशं ॥ १९ ॥ प्रतिश्रयंप्रेक्ष्यानन्तरंस्वाश्रमंप्रविगाह्य ॥ २० ॥ इत्यष्टपञ्चाशस्सर्गः ॥ ५८ ॥

[पा०] १ घ. सादुःखदर्शिनी· वादुःखदर्शिनी. ङ. झ. चादुःखभागिनी. ख. चादुःखकर्शिनी. २ क. दुःखिता. ३ ङ. झ. ट. श्रुतश्चमन्ये. क.—घ. च. छ. ज. ञ. श्रुतश्चशङ्के. ४ घ. स्वरस्स. ५ च. छ. ज. ञ. त्रातुं. ६ क. ग. ङ.—ट. अहोस्मिव्यसने. ७ ख. ग. ङ.—ट. रिपुनाशन. क. रिपुकर्शन. ८ ख.—ट. किन्त्विदानीं. क. किंचेदानीं. ९ घ. चिन्तयामास. १० ङ. झ. ट. श्रमेणैव. ११ ख. ग. ङ.—ट. विषण्णः. १२ घ. धीरो.

एकोनषष्टितमः सर्गः ॥ ५९ ॥

रामेणलक्ष्मणंप्रति सीतात्यागेनागमनेकारणप्रश्नः ॥ १ ॥ लक्ष्मणेनतंप्रति मारीचाक्रोशनश्रवणेनविषीदन्तींसीतांप्रति स्वकृतसान्त्वनप्रकारस्य स्वंप्रतितस्याःपरुषभाषणप्रकारस्यचानुवादपूर्वकं तद्वचनस्यतत्कारणत्वोक्तिः ॥ २ ॥ रामेणतंप्रति सक्रोपंतदागमनस्यानौचित्योक्तिपूर्वकं स्वानुसृतमायामृगवृत्तान्तकथनं ॥ ३ ॥

[1]अथाश्रमादुपावृत्तमन्तरा रघुनन्दनः ॥ परिपप्रच्छ सौमित्रिं रामो [2]दुःखार्दितं पुनः ॥ १ ॥
तमुवाच किमर्थं त्वमागतोपास्य मैथिलीम् ॥ यदा सा तव विश्वासाद्वने विरहिता मया ॥ २ ॥
दृष्ट्वैवाभ्यागतं त्वां मे मैथिलीं त्यज्य लक्ष्मण ॥ शङ्कमानं महत्पापं यत्सत्यं व्यथितं मनः ॥ ३ ॥
स्फुरते नयनं सव्यं बाहुश्च हृदयं च मे ॥ दृष्ट्वा लक्ष्मण दूरे त्वां [3]सीताविरहितं पथि ॥ ४ ॥
एवमुक्तस्तु सौमित्रिर्लक्ष्मणः शुभलक्षणः ॥ भूयो दुःखसमाविष्टो दुःखितं राममब्रवीत् ॥ ५ ॥
[4]न स्वयं कामकारेण तां त्यक्त्वाहमिहागतः ॥ प्रचोदित[5]स्तयैवोग्रैस्त्वत्सकाशमिहागतः ॥ ६ ॥
आर्येणेव [6]पराक्रुष्टं [7]हा सीते लक्ष्मणेति च ॥ परित्राहीति यद्वाक्यं [8]मैथिल्यास्तच्छ्रुतिं गतम् ॥ ७ ॥
सा तमार्तस्वरं श्रुत्वा तव स्नेहेन मैथिली ॥ गच्छ गच्छेति मामाह [9]रुदन्ती भय[10]विह्वला ॥ ८ ॥
प्रचोद्यमानेन मया गच्छेति बहुश[11]स्तया ॥ प्रत्युक्ता मैथिली वाक्यमिदं त्वत्प्रत्ययान्वितम् ॥ ९ ॥
न तत्पश्याम्यहं रक्षो यदस्य भय[12]मावहेत् ॥ निर्वृता भव नास्त्येतत्केनाप्ये[13]वमुदाहृतम् ॥ १० ॥
विगर्हितं च नीचं च कथमार्योभिधास्यति ॥ त्राहीति वचनं सीते यस्त्रायेत्त्रिदशानपि ॥ ११ ॥

एवं संग्रहेणोक्तमर्थं पुनर्विस्तरेण वक्तुमुपक्रमते—अथेत्यादि । अन्तरा मध्येमार्गं । दुःखार्दितमिति क्रियाविशेषणं । मारीचवधस्थानात्स्वाश्रमं गच्छन्मध्ये पप्रच्छेत्यर्थः ॥ १ ॥ तं सौमित्रिमुवाच । तत्र प्रश्नप्रकारमाह—किमर्थमिति । यदा तु त्वया रक्षितायाः का हानिरिति विश्वासात् मया विरहिता कृता तदा तामपास्य विहाय किमर्थमागतः ॥ २ ॥ उवाचेत्युक्तार्थमाह—दृष्ट्वेति । त्वां दृष्ट्वा पापं सीतानिष्टरूपं । शङ्कमानं मे मम मनः व्यथितमिति यत् तत्सत्यं ॥३॥ एतच्च कथं निश्चीयत इत्यत्राह—स्फुरत इति । बाहुः सव्य इत्यनुषज्यते । हृदयं वक्षोमध्यं ॥ ४ ॥ भूयो दुःखेन बहुतरदुःखेन समाविष्टः पूर्वं सीतावचनादुःखाक्रान्तः सम्प्रति रामेण त्वया अकृत्यं कृतमित्युच्यमानत्वात् भूयोदुःखसमाविष्टत्वं ॥ ५ ॥ कामकारेण स्वेच्छाकरणेन । स्वयमित्यस्य विवरणमिदं । उग्रैः वचोभिरित्यर्थसिद्धं ॥ ६ ॥ हा सीते लक्ष्मणेति परित्राहीतिच यद्वाक्यं आर्येणेव भवतेव । केनचित्पराक्रुष्टं आह्वानपुरःसरं घोषितं तत् । मैथिल्याः श्रुतिं गतं ॥ ७ ॥ तव स्नेहेन त्वयि स्नेहेन ॥ ८ ॥ त्वत्प्रत्ययान्वितं त्वयि प्रत्ययः दुराधर्षत्वदैन्यराहित्यविषयो विश्वासः तेनान्वितं । इदं वक्ष्यमाणलक्षणं वाक्यं । मैथिली प्रत्युक्ता ॥ ९ ॥ निर्वृता सुखिता भव । नास्त्येतत् रामवाक्यत्वेन यच्छङ्कितं एतत् रामवाक्यं न भवति ॥ १० ॥ रामवचनत्वेऽनुपपत्तिमाह—विगर्हितमिति । विगर्हितं दैन्यावहत्वान्महाकुलप्रसूतस्य निन्दितं । नीचं आपत्काले स्त्रीसमाह्वानस्य क्षुद्रकृतत्वात्कुत्सितं । वचनं कथमभिधास्यति । यस्त्रिदशानपि त्रायेत् कथं सः सीते

स० कामकारेण स्वेच्छया । अहंतां त्यक्त्वा इहनागतः । किंतुतयासीतया उग्रैः प्रचोदितः इहत्वत्सकाशमागतः । प्रलापकालइति त्रिवारमहमित्युक्तिः द्विवारमिहेत्युक्तिश्चसंभवतः । त्रिवारंकामकारेणनेतिवक्तुं त्रिरहमित्युक्तिः । "जहिहि जहाहि जहीहि रामभार्यां" इतिवत् ॥ ६ ॥

[पा०] १ ग. छ. ञ. तथा. २ ङ. झ. ट. दुःखादिदंवचः. क.––घ. दुःखादिदंपुनः. ञ. दुःखार्दितंवचः. ३ घ. मैथिलीरहितं. च. छ. ज. ञ. तयाविरहितं. ४ ङ. ट. ठ. नह्यहंकामचारेण. ५ ङ. ट. स्तयैवाहंत्वत्सकाशं. ६ क. ख. ङ. झ. परिक्रुष्टं. ७ ङ. झ. ट. लक्ष्मणेतिसुविस्वरं. ८ क. च. छ. ज. ञ. वैदेह्याः. ९ ग. ङ. झ. रुदती. १० ख. ङ. च. ज.— ट. विक्लबा. ११ ख. स्तदा. १२ क. च. छ. ज. ञ. मानयेत्. १३ क. ख. ङ. झ. ट. प्येतदुदाहृतं.

किंनिमित्तं तु केनापि भ्रातुरालम्ब्य मे स्वरम् ॥ राक्षसेनेरितं वाक्यं [1]त्राहित्राहीति शोभने ॥ १२ ॥
विस्वरं व्याहृतं वाक्यं लक्ष्मण त्राहि मामिति ॥ न भवत्या व्यथा कार्या कुनारीजनसेविता ॥ १३ ॥
अलं [2]वैक्लब्यमालम्ब्य स्वस्था भव निरुत्सुका ॥ [3]न सोस्ति त्रिषु लोकेषु पुमान्वै राघवं रणे ॥
जातो वा जायमानो वा संयुगे यः पराजयेत् ॥ १४ ॥
[4]न जय्यो राघवो युद्धे देवैः शक्रपुरोगमैः ॥ १५ ॥
एवमुक्ता तु वैदेही परिमोहितचेतना ॥ उवाचाश्रूणि मुञ्चन्ती दारुणं मामिदं वचः ॥ १६ ॥
भावो मयि तवात्यर्थं [5]पाप एव निवेशितः ॥ विनष्टे भ्रातरि प्राप्तुं न च त्वं [6]मामवाप्स्यसि ॥ १७ ॥
संकेताद्भरतेन त्वं रामं समनुगच्छसि ॥ क्रोशन्तं हि [7]यथात्यर्थं नैनमभ्यवपद्यसे ॥ १८ ॥
रिपुः प्रच्छन्नचारी त्वं मदर्थमनुगच्छसि ॥ राघव[8]स्यान्तरप्रेप्सुस्तथैनं नाभिपद्यसे ॥ १९ ॥
[9]एवमुक्तो हि वैदेह्या संरब्धो रक्तलोचनः ॥ क्रोधात्प्रस्फुरमाणोष्ठ आश्रमादभिनिर्गतः ॥ २० ॥
एवं ब्रुवाणं सौमित्रिं रामः सन्तापमोहितः ॥ अब्रवीद्दुष्कृतं सौम्य तां विना [10]यत्त्वमागतः ॥ २१ ॥
जानन्नपि समर्थं मां [11]रक्षसां विनिवारणे ॥ अनेन क्रोधवाक्येन मैथिल्या [12]निःसृतो भवान् ॥ २२ ॥
नहि ते परितुष्यामि त्यक्त्वा [13]यद्यासि मैथिलीम् ॥ क्रुद्धायाः परुषं श्रुत्वा [14]स्त्रियाश्च त्वमिहागतः ॥ २३ ॥

त्राहीति वचनमभिधास्यति ॥ ११ ॥ किं निमित्तं किमपि प्रयोजनमुद्दिश्य । केनापि दुर्जनेन राक्षसेन मे भ्रातुः स्वरं स्वरसदृशं स्वरं । आलम्ब्य अवलम्ब्य । त्राहि त्राहीति वाक्यं ईरितं उक्तं । शोभने इति सीतासंबोधनं ॥ १२ ॥ विस्वरमिति स्वरप्रकारविशेषशोधनेऽपि नायं रामस्वर इत्यर्थः ॥ १३ ॥ अलमित्यादिसार्धश्लोक एकान्वयः । वैक्लब्यं विक्लबत्वं । " विक्लबो विह्वलस्तथा " इति हलायुधः । निरुत्सुका मत्प्रस्थापनोद्योगरहिता भव । नास्ति नविद्यते ॥ १४ ॥ नेत्यर्धमेकं वाक्यं । पूर्वमेकैकेनाजय्यत्वमुक्तं संप्रति मिलितैरिति विशेषः ॥ १५ ॥ परिमोहितचेतना कलुषितबुद्धिः ॥ १६ ॥ भ्रातरि विनष्टे सति मां प्राप्तुं पापः कुत्सितः । भावः मयि तव त्वया निवेशित एव । त्वं च मां नावाप्स्यसि ॥ १७ ॥ भरतेन कृतात्संकेतात् कुतश्चिदवकाशे राममवश्यं हनिष्यामीत्येवंरूपात् । रामं समनुगच्छसि न तु रामभक्त्या । अत्र हेतुमाह—क्रोशन्तमिति । क्रोशन्तमेनं यथा नाभ्यवपद्यसे न प्राप्नोषि । तेन प्रकारेण संकेतादनुगच्छसीत्यन्वयः ॥ १८ ॥ अन्तरप्रेप्सुः रन्ध्रान्वेषी । येन प्रकारेण एनमनुगच्छसि तथा नाभिपद्यसे इत्यन्वयः ॥ १९ ॥ क्रोधादिति काकाक्षिन्यायेनोभयत्रान्वेति ॥ २० ॥ तां विना त्वमागत इति यत् तद्दुष्कृतं अकृत्यं ॥ २१ ॥ उक्तं विवृणोति —जानन्नपीति ॥ २२ ॥ अनेनेत्युक्तं विशदयति— नहीति । स्त्रिया इत्यविवेकसंभावनासूचनं । स्त्रीष्वपि विशेषज्ञापनाय क्रुद्धाया इति । यस्त्वं क्रुद्धायाः

ति० किंनिमित्तं कुत्सितंकिंचिन्निमित्तमाश्रित्य केनापिरक्षसेरितं ॥ १२ ॥ ति० जायमानइत्यनेन जनिष्यमाणइत्यर्थकेनभाविनोपिवारणं । अतःसंयुगइत्यस्यनपौनरुक्त्यं ॥ १४ ॥ शि० संकेतात् संकेतंप्राप्य । यथा यथावत् । नसमनुगच्छसि । तर्हिभरते भरतसमीपेपि । त्वंनाभ्यवपद्यसे नस्थास्यसि । भरतो निस्सारयिष्यतीतितात्पर्यं ॥ १८ ॥ ती० सीताप्रेरणयामयिराक्षससंहारसामर्थ्याभावमाशङ्क्यागतोसिवा सीतापरुषवाक्यैस्त्वलोकगर्हिताभविष्यतीतिवा परुषवाक्यासहनमात्रेणवा समागतोसीतित्रेधाविकल्प्याद्यं पराकरोति दुष्कृतमित्यादि ॥ २१ ॥

[पा०] १ ङ. झ. ट. त्रासात्राहीति. २ ग. ङ. झ. ट. विक्लबतांगन्तुं. च. ज. विक्लबमालंब्य. क. विक्लबमागन्तुं. ३ क. ख. ग. ङ. च. ज.—ट. नचास्ति. घ. सनास्ति. ४ क. ख. ङ. झ. ञ. ट. अजेयो. घ. अजय्यो. ५ क. च. छ. ज. ञ. पापाचारनिवेशितः. ख. पापभाव. ६ ङ.—ट. मथाप्स्यसे. ७ ख. तथात्यर्थं. घ. यदत्यर्थं. ८ छ. झ. ञ. ट. स्यान्तरप्रेप्सुः. ९ ख. मुक्तोस्मि. ङ. झ. ट. मुक्तस्तु. १० ख. ङ. झ. ञ. ट. त्वमिहागतः. ११ ङ. झ. ट. रक्षसामपवारणे. १२ क. ङ. च. झ. ट. निर्गतो. ञ. गर्हितो. १३ ङ. झ. ञ. ट. यदसि. १४ ग.—च. ज. झ. ट. विहायत्वमिहागतः. क. ञ. स्त्रियायस्त्वमिहागतः.

सर्वथा [1]त्वपनीतं ते सीतया यत्प्रचोदितः ॥ क्रोधस्य [2]वशमापन्नो नाकरोः शासनं मम ॥ २४ ॥
असौ हि राक्षसः शेते शरेणाभिहतो मया ॥ मृगरूपेण येनाहमाश्रमादपवाहितः ॥ २५ ॥

विकृष्य चापं [3]परिधाय सायकं [4]सलीलबाणेन च ताडितो मया ॥
मार्गीं तनुं [5]त्यज्य सविक्लबस्वरो बभूव केयूरधरः स राक्षसः ॥ २६ ॥
शराहतेनैव तदाऽऽर्तया गिरा स्वरं [6]समालम्ब्य सुदूरसंश्रवम् ॥
उदाहृतं तद्वचनं सुदारुणं त्वमागतो येन विहाय मैथिलीम् ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

षष्टितमः सर्गः ॥ ६० ॥

रामेणदुर्निमित्तदर्शनात्सीतायाविपदाशङ्कयात्वरितं लक्ष्मणेनसहस्वपर्णशालाप्रवेशः ॥ १ ॥ तथा सीताविहारार्हस्थलेष्वन्वेषणेपि तददर्शनाद्दुःखेन तरुमृगादीन्प्रति सीतादर्शनप्रश्नः ॥२॥ तथा सीतायाःक्काप्यदर्शने राक्षसैर्भक्षणादिनानाप्रकारविकल्पपूर्वकं बहुधा विलापेन पुनःपुनस्तदन्वेषणाय वनेपरिभ्रमणं ॥ ३ ॥

भृ[7]शमाव्रजमानस्य तस्याधोवाममलोचनम् ॥ प्रास्फुरच्चास्खलद्रामो वेपथुश्चा[8]स्यजायत ॥ १ ॥

स्त्रियाःपरुषं श्रुत्वा इहागतः तस्य ते मैथिलीं त्यक्त्वा यासीति यत्तत्कर्म न परितुष्यामि॥२३॥ नाकरोःशासनंममेतियत्तत्सर्वथा ते अपनीतं अपनयः। क्रुद्धया स्त्रिया यत्किंचित्परुषमुक्तं चेत्तत्सोढव्यं । कथंचिदसहने बहिरागत्यान्तर्हितो भूत्वा तत्परिपालनं कर्तव्यं । केवलमागमनं तवापनीतिरेवेति भावः ॥ २४ ॥ अपनीतिमेवोपपादयितुं स्वरान्यथाभावं दर्शयति—असावित्यादिश्लोकत्रयेण ॥ २५ ॥ परिधाय संधाय। सलीलबाणेन लीलार्थबाणेन। मार्गीं मृगसंबन्धिनीं। त्यज्य त्यक्त्वा। सविक्लबस्वरः सदीनस्वरः। केयूरधरः अङ्गदधरः। आसीदित्यनेन दुरातीतत्वं गम्यते ॥ २६ ॥ तदेति च्छेदः। सुदूरे संश्रवः श्रवणं यस्य तं। मम स्वरं मत्स्वरसदृशं स्वरं। आलम्ब्य आश्रित्य। आर्तया गिरा दीनया वाचा। शराहतेन तेनैव तदा तस्मिन्काले। सुदारुणं तद्वचनमुदाहृतं। येन वचनेन श्रुतेन मैथिलीं विहाय आगतोसि। अस्मिन्सर्गे सप्तविंशतिश्लोकाः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकोनषष्टितमः सर्गः ॥ ५९ ॥

एवमियता प्रबन्धेन संभोगश्रृङ्गारो वर्णितः। अथ विप्रलम्भश्रृङ्गारमासुवेलारोहणाद्वर्णयितुमारभते। तदङ्गत्वेन रसान्तराणि दर्शितानि । “ संयुक्तयोस्तु संभोगो विप्रलम्भो वियुक्तयोः ” इति लक्षणात्। तत्र “ अभिलाषमनःसङ्गौ संकल्पो गणसंस्तुतिः प्रद्वेषः। तापाभिमतत्यागावुन्मादो मूर्छना च मृतिः ” इत्युक्तविप्रलम्भावस्थास्वष्टमीं दशामाह—सर्गत्रयेण। आव्रजमानस्य आगच्छतः। अधोवामलोचनं वामनेत्रस्याधःपक्ष्म प्रास्फुरत्। “ अधोवामदृशः स्फूर्तौ बह्वनिष्टो भवेत्पुमान् ” इति लक्षणात्। स्वयमस्खलत्। “ प्रयाणकाले स्खलनं करोतीष्टस्य भञ्जनं ”

ती० सर्गश्रवणफलंस्कान्दे—“सीतादुरुक्तिकथनं लक्ष्मणस्यमुखाच्युतम् । श्रुत्वानजातुपीडास्यादभिशापकृतेमहत्” इति ॥ २७ ॥ इत्येकोनषष्टितमस्सर्गः ॥ ५९ ॥

शि० यद्यपिसीतावियोगस्यसंभोगश्रृङ्गारपोषकत्वेनानिष्टत्वाभावाद्दुर्निमित्तानुभवोनसंभवति तथापि तात्कालिकवियोगजनित-

[पा०] १ ख. त्वांविनिन्दन्ते. घ. च. ज. त्वविनीतं. २ क. ग. ङ.—ट. वशमागम्य. ख. वशमागत्य. ३ क. ख. प्रणिधाय. ४ क. सएषबाणेन. ५ क. ग. ङ.—ट. त्यज्यच. ६ घ. समालम्ब्य. ७ ख. व्रजमानस्य तस्याधोवामलोचनमस्फुरत्। प्रास्खलच्चासकृत्पादेवेपथुश्चास्यजायत. ८ घ. ङ. ञ. श्चास्यजायत. क. च. ज. झ. ट. श्चास्यजायते.

उ[1]पालक्ष्य निमित्तानि सोऽशुभानि मुहुर्मुहुः ॥ अपि [2]क्षेमं नु सीताया इ[3]ति वै व्याजहार च ॥ २ ॥
त्वरमाणो जगामाथ सीतादर्शनलालसः ॥ शून्यमावसथं दृष्ट्वा बभूवोद्विग्नमानसः ॥ ३ ॥
उद्भ्रमन्निव वेगेन विक्षिपन्रघुनन्दनः ॥ त[4]त्रतत्रोटजस्थानम[5]भिवीक्ष्य समन्ततः ॥ ४ ॥
ददर्श पर्णशालां च र[6]हितां सीतया तदा ॥ श्रिया विरहितां ध्वस्तां हेम[7]न्ते पद्मिनीमिव ॥ ५ ॥
रुदन्तमिव वृक्षैश्च म्लानपुष्पमृगद्विजम् ॥ श्रिया विहीनं विध्वस्तं सं[8]त्यक्तवनदेवतम् ॥ ६ ॥
विप्रकीर्णाजिनकुशं वि[9]प्रविद्धबृसीकटम् ॥ दृष्ट्वा शू[10]न्यं निजस्थानं वि[11]ललाप पुनःपुनः ॥ ७ ॥
हृता मृता वा[12] नष्टा वा भक्षिता वा भविष्यति ॥ निलीनाऽप्यथवा भीरु[13]रथवा वनमाश्रिता ॥ ८ ॥
गता विचेतुं पुष्पाणि फलान्यपि च[14] वा पुनः ॥ अथवा पद्मिनीं याता जलार्थं वा नदीं गता ॥ ९ ॥
यत्नान्मृगयमाणस्तु नाससाद वने प्रियाम् ॥ शोकरक्तेक्षणः शो[15]कादुन्मत्त इव लक्ष्यते ॥ १० ॥

इति प्रसिद्धिः । वेपथुः कम्पः ॥ १ ॥ अशुभानि अशुभसूचकानि ॥ २ ॥ लालसः साभिलाषः । आवसथं गृहं । "स्थानावसथवास्तु च" इत्यमरः ॥ ३ ॥ श्लोकद्वयमेकान्वयं । वेगेन उद्भ्रमन्निव उत्पतन्निव । विक्षिपन् हस्तादीनवयवानितस्ततः क्षिपन् ॥ ४—५ ॥ श्लोकद्वयमेकान्वयं । वृक्षैः रुदन्तमिव स्थितं हीनस्वरभृङ्गवत्त्वादिति भावः । पुष्पाणि सीतया पूर्वमपचितानि । द्विजाः पक्षिणः । म्लानाः पुष्पमृगद्विजाः यस्मिंस्तत् तथोक्तं । श्रिया कान्त्या । विहीनं विध्वस्तं विशीर्णं । रावणसंन्यासिने दत्तत्वेन विप्रकीर्णाः अयथास्थानस्थिताः अजिनकुशाः यस्मिन् तत्तथा । ग्रहणकाले सीताया अवलम्बितत्वेन विप्रविद्धबृसीकटं विपर्यस्तमुन्यासनास्तरणं । शून्यं सीतारहितं । विललाप पर्यदेवयत् ॥ ६—७ ॥ विलापमाह द्वाभ्यां । हृता अपहृता । नष्टा यादृच्छिकमदर्शनं गता । निलीना विनोदाय व्यवहिता । अथवा निर्जनतया भीरुः सती गूढं वनमागता । पद्मिनीं याता स्नानार्थमिति शेषः । नदीं गतेत्यन्तरमितिकरणं द्रष्टव्यं ॥ ८—९ ॥ शोकाद्धेतोः उन्मत्त इव लक्ष्यते अल-

दुःखाभासस्यावश्यंभावित्वाद्दुर्निमित्तदर्शनंसंभवत्येवेतिदिक् ॥ १ ॥ **ति०** रुदन्तमित्यादेराश्रमोविशेष्यः । वर्णनीयमयीभावेन कवेरपिसंनिहितैवपरीत्यं । **स०** रुदन्तमित्यार्षपुंल्लिङ्गत्वं ॥६॥ **शि०** विप्रकीर्णाजिनकुशमित्यनेन भूकंपादिर्जातइतिध्वनितं ॥७॥ **ति०** नष्टा अदर्शनंगता । स्वयोगशक्त्यापुनरलभ्यदर्शनाजातेतितात्पर्यं ॥ ८ ॥ **ति०** नदींगतेत्यादिसंतर्क्य तत्रतत्रयत्नान्मृगयमाणोपिनाससाद । उन्मत्तइवेत्ययमिवशब्दो मृगयमाणःप्रधावन्बभ्रामेत्यादौसर्वत्रसंबध्यः । एतत्सर्वलोकव्यवहारनटनं भगवतश्चित्स्वरूपस्य लोकेसर्वतो भार्याप्रियतमेतिबोधयितुं । अतएव मातापितृवियोगोनैतावच्छोककारणं । तदुक्तंभागवते—"समनुजोऽजभवार्चिताङ्घ्रिरलङ्घ्यवीर्यः" इत्यादिनाविशिष्टंराममुपक्रम्य "रक्षोऽधमेनवृकवद्विपिनेऽसमक्षं वैदेहराजदुहितर्यपवाहितायाम् । भ्रात्रावनेकृपणवत्प्रिययावियुक्तः स्त्रीसङ्गिनांगतिमितिप्रथयंश्चचार" इति "नेदंयशोरघुपतेस्सुरयाच्ञयात्तलीलातनोरधिकसाम्यविमुक्तधाम्नः । रक्षोवधोजलधिबन्धनमस्त्रपूगैर्यत्तस्यशत्रुहननेकपयःसहायाः" इतिच । यद्यथासुग्रीवाद्याश्रयणवदिदमपिलीलैवेतिनतत्तस्यस्तुतिरितितदर्थः । लीलाप्रयोजनंचतच्छ्रवणेनलोकोद्धारः । एतन्नवमेएकादशाध्यायस्थेपद्ये । तथापञ्चमेपि— 'मर्त्यावतारस्त्विहमर्त्यशिक्षणंरक्षोवधायैवनकेवलंविभोः । कुतोऽन्यथास्यूरमतःस्वआत्मन्सीताकृतानिव्यसनानीश्वरस्य" इति ॥ **ती०** वस्तुतस्तुनतादृशः श्रीरामइत्यर्थः । अतएवसीतादीन्प्रतिविलापादिकं । सीतान्वेषणसमयेसीतामुद्दिश्यवृक्षमृगादीन्प्रतिप्रश्नादिकंसर्वंश्रीरामेणलोकशिक्षार्थंनटनंकृतमितिप्रदर्शयितुमेवसर्वज्ञेनभगवताश्रीवाल्मीकिना उद्भ्रमन्निव उन्मत्तइवेत्यादौतत्रतत्रेवशब्दःप्रयुक्तः । अतएवश्रीशुकोप्याह "रक्षोधमेनवृकवद्विपिनेसमक्षंवैदेहराजदुहितर्यपयापितायां । भ्रात्रावनेकृपणवत्प्रिययावियुक्तः स्त्रीसङ्गिनांगतिमितिप्रथयंश्चचार ॥ मर्त्यावतारस्त्विहमर्त्यशिक्षणंरक्षोवधायैवनकेवलंविभोः । कुतोन्यथास्यूरमतस्स्वआ-

[पा०] १ क. ख. च. ज. ञ. उपलक्ष्य. २ क.—ट. क्षेमंतु. ३ ख. च. ज. ञ. व्याजहारपुनःपुनः. ग. ङ. झ. ट. इतिचव्याजहारह. ४ ख. च. ज. ञ. तत्रतत्रजनस्थानं. ५ च. ज. मनुवीक्ष्य. ६ घ. ङ. च. ज.–ट. सीतयारहितां. ७ घ. हिमान्ते. ८ क. ङ. च. ज.—ट. संत्यक्तंवनदैवतैः. ९ क. ख. प्रविध्वस्तबृसी. ग. विप्रकीर्णबृसी. १० ग. ङ. च. ज —ट. शून्योटजस्थानं. ११ ग. सुदुःखितः. १२ ग. च. ज. ञ. विनष्टावा. १३ घ. भीरुर्गहनंवासमाश्रिता. १४ ख. हिवा. १५ ङ. च. ज.—ट. श्रीमानुन्मत्तइव.

वृक्षाद्वृक्षं प्रधावन्स गिरे[1]श्चाद्रिं नदान्नदीम् ॥ [2]बभूव विलपन्रामः [3]शोकपङ्कार्णवाप्लुतः ॥ ११ ॥
[4]अपि कच्चित्त्वया दृष्टा सा कद[5]म्बप्रिया प्रिया ॥ कदम्ब यदि जानीषे शंस सीतां शुभाननाम् ॥ १२ ॥
स्निग्धपल्लवसं[6]काशा पीतकौशेयवा[7]सिनी ॥ शंसस्व [8]यदि वा दृष्टा बिल्व बिल्वोपमस्तनी ॥ १३ ॥
अथवाऽर्जुन शंस[9] त्वं प्रियां तामर्जुनप्रियाम् ॥ जनकस्य सुता [10]भीरुर्यदि जीवति वा न वा ॥ १४ ॥
ककुभः [11]ककुभोरूं तां व्यक्तं जानाति मैथिलीम् ॥ [12]यथा पल्लवपुष्पाढ्यो भाति ह्येष वनस्पतिः ॥ १५ ॥
भ्रमरैरुपगीतश्च [13]यथा द्रुमवरो ह्ययम् ॥ एष व्यक्तं विजानाति तिलकस्तिलकप्रियाम् ॥ १६ ॥
अशोक शोकापनुद शोकोपहत[14]चेतसम् ॥ त्वन्नामानं कुरु क्षिप्रं प्रिया[15]संदर्शनेन माम् ॥ १७ ॥
यदि ताल त्वया दृष्टा पक्वता[16]लफलस्तनी ॥ कथयस्व वरारोहां कारुण्यं यदि ते मयि ॥ १८ ॥

क्ष्यतेत्यर्थः ॥ १० ॥ नदात् पश्चिमप्रवाहात् । शोकपङ्कार्णवाप्लुतो बभूव ॥ ११ ॥ अथ शोकमोहातिरेकेणाचेतनेषु चेतनबुद्ध्या तान्प्रतिभाषते—अपीत्यादिना । कदम्बानि कदम्बपुष्पाणि प्रियाणि यस्याः सा कदम्बप्रिया । प्रिया मत्कान्ता । अपिः प्रश्ने । एवं प्रश्नेऽपि प्रतिवचनादानमनादरकृतमिति मत्वाह—कदम्बेति । शुभाननामिति चिह्नकीर्तनं । कदम्बप्रियेत्यनेन दर्शनसंभावनोच्यते ॥ १२ ॥ स्निग्धपल्लवसंकाशेत्यनेन कोमलाङ्गित्वमुक्तं । बिल्वोपमस्तनीत्यनेन पद्मिनीजातिरुक्ता । तदुक्तं रतिरहस्ये पद्मिनीलक्षणे "स्तनयुगमपि यस्याः श्रीफलश्रीविडम्बि" इति ॥ १३ ॥ बिल्वेनानुक्तौ अयं मत्सरान्न कथयतीत्यर्जुनवृक्षं पृच्छति । यदि ज्ञातं यदीत्यर्थः ॥ १४ ॥ प्रतिवचनादानेनायं न जानातीति मत्वा वृक्षान्तरे तज्ज्ञानं संभावयति—ककुभ इति । ककुभोऽर्जुनविशेषः । स च स्त्रीणामूरुतुल्यो भवति अत एवमुच्यते—ककुभोरूमिति । केचित्करभोरूमिति वदन्ति तत्प्रकृतशैलीविरुद्धम् । कदम्ब कदम्बप्रिया बिल्व बिल्वोपमस्तनीत्येवं ह्युच्यते । ज्ञाने हेतुमाह—यथेति । अनेन परिचयसंभावनोक्ता । जानाति कथंनकथयतीत्यर्थसिद्धं । एवमुत्तरत्रापि श्लोके द्रष्टव्यं ॥१५॥ उप समीपे गीतः कृतवेदघोष इति ध्वन्यते । यथा येन कारणेन । एवंभूतो द्रुमवरोऽयं । तेन कारणेनमन्ये एष जानातीतिलोकः ॥१६॥ स्ववचनकरणाय स्तौति—शोकापनुदेति । पचाद्यच् । गुणाभाव आर्षः । त्वन्नामानं कुरु अशोकं कुरु । संदर्शनेन ज्ञापनेन । शोकनिवृत्त्यर्थं प्रियां संदर्शयेत्यर्थः ॥१७॥ पक्वतालेति

त्मन्सीताकृतानिव्यसनानीश्वरस्य । सवैनआत्मात्मवतामधीश्वरःसक्तस्त्रिलोक्यांभगवान्वासुदेवः । नस्त्रीकृतंकश्मलमश्नुवीतनलक्ष्मणंचापिविहातुमिच्छति । "इति । तथाचस्कान्दे उमासंहितायां देवान्प्रतिविष्णुवचनं—"अहंदाशरथिर्भूत्वा हन्मिरावणमाहवे । श्रीमद्रामावतारेऽस्मिन्नज्ञवत्क्रियतेमया । तत्रशङ्कानकर्तव्यासर्वज्ञेनापिमायया । मन्मायामोहितंरक्षो मनुष्यंमामवेक्ष्यति । अन्यथातस्यसानूनं नभवेद्यत्रकुत्रचित्"इति । किंच बहुविधदुःखप्रलापस्यदेहादावात्मबुद्धिपूर्वकत्वात्तद्बुद्धेरज्ञानमूलकत्वात् स्वकृतलीलाश्रवणद्वारासर्वलोकानांमुक्तिप्रदानाय । नृपरूपेणावतीर्णस्यसच्चिदानन्दघनविग्रहस्यपरमात्मनः श्रीरामस्यमायाधिष्ठातुःपरमेश्वरस्यभृगुशापादिनाप्यज्ञानगन्धोप्यस्तीतिवक्तुमशक्यत्वादेतद्विधविलापादिकंसर्वंश्रीरामेणलोकशिक्षार्थमेवकृतमितिवेदितव्यं । अन्यत्राप्येतादृशस्थलेष्वेवमेवाऽर्थोऽनुसन्धेयः॥१०॥ नदीनदं नदीसंबन्धिनंनदं । जातावेकवचनं । नाराइतिलोकप्रसिद्धं । नदाः पश्चिमप्रवाहाइति कतकः । पश्चिमप्रवाहायाअपिनर्मदायानदत्वव्यवहाराभावाच्चिन्त्यंतत् ॥ **स०** नद्यश्चनदाश्चतेषांसमाहारः । "जातिरप्राणिनां" इत्येकवद्भावोवा । नदीसहितश्चासौनदश्चेतिवा ॥ ११ ॥ **ति०** उपसमीपेगीतः क्रियमाणझङ्कारइत्यर्थः । तथा द्रुमवरोह्यसीतिस्तौति । ततउत्तरमलब्ध्वाऽन्यंप्रत्याह—एषइति । तत्प्रियत्वात्तज्ज्ञेयत्वसंभावना ॥ १६ ॥ **तनि०** शोकोयस्मान्नभवतिस अशोकइतिव्युत्पत्तिमभिप्रेत्यशोकापनुदेत्युक्तिः । त्वन्नामानं शोकरहितमित्यर्थः ॥ १७ ॥

[पा०] १ ङ. झ. ञ. ट. गिरींश्चापिनदीनदं. २ क. ङ. झ. ट. बभ्रामविलपन्रामः. च. ज. ञ. बभ्रामविलपन्दीनः. ३ क. ख. शोकार्णवपरिप्लुतः. ४ ग. ङ. झ. ञ. ट. अस्तिकच्चित्. ५ च. ज. ञ. कदंबवनप्रिया. क. ख. कदम्बप्रियाप्रियामम. ६ ग.—च. ज.—ट. संकाशां. ७ ग.—च. ज.—ट. वासिनीं. ८ ङ. झ. यदिसा. ९ ख. ग. ञ. शंसस्व. १० ङ. झ. ट. तन्वीयदि. क. सीतायदि. ११ ख. ग. घ. करभोरूं. १२ ख.—ट. लतापल्लव. १३ ङ.—ट. तथाद्रुमवरोह्यसि. १४ ट. हृतचेतनं. ङ. झ. हृतचेतनं. १५ ग. च. छ. ज. ञ. संदर्शनाद्धिमां. १६ क. ग. ङ. झ. ट. तालोपमस्तनी.

यदि दृष्टा त्वया [1]सीता जम्बु जम्बुफलोपमाम् ॥ प्रियां यदि [2]विजानीषे निःशङ्कं कथयस्व मे ॥ १९ ॥
अहो त्वं [3]कर्णिकाराद्य [4]सुपुष्पैः शोभसे भृशम् ॥ कर्णिकार[5]प्रियां साध्वी शंस दृष्टा [6]प्रिया यदि ॥२०॥
चूतनीपमहासालान्पनसान्[7]कुरवान्धवान् ॥ [8]दाडिमानसनान्गत्वा दृष्ट्वा रामो महायशाः ॥ २१ ॥
[9]मल्लिका माधवीश्चैव चम्पकान्केतकीस्तथा ॥ [10]पृच्छन्रामो वने भ्रान्त उन्मत्त इव लक्ष्यते ॥ २२ ॥
अथवा मृगशावाक्षीं मृग जानासि मैथिलीम् ॥ मृगविप्रेक्षणी कान्ता मृगीभिः सहिता भवेत् ॥२३॥
गज सा गजनासोरूर्यदि दृष्टा त्वया भवेत् ॥ तां मन्ये विदितां तुभ्यमाख्याहि वरवारण ॥ २४ ॥
शार्दूल [11]यदि सा दृष्टा प्रिया [12]चन्द्रनिभानना ॥ मैथिली मम [13]विस्रब्धं कथयस्व न ते भयम् ॥ २५ ॥
किं धावसि प्रिये [14]नूनं दृष्टाऽसि कमलेक्षणे ॥ [15]वृक्षैराच्छाद्य चात्मानं किं मां [16]न प्रतिभाषसे ॥२६॥
तिष्ठतिष्ठ वरारोहे न तेऽस्ति करुणा मयि ॥ नात्यर्थं हास्यशीलाऽसि किमर्थं मामुपेक्षसे ॥ २७ ॥
पीतकौशेयके[17]नासि सूचिता वरवर्णिनि ॥ धावन्त्यपि मया दृष्टा तिष्ठ यद्यस्ति सौहृदम् ॥ २८ ॥
नैव सा नूनमथवा हिंसिता [18]चारुहासिनी ॥ कृच्छ्रं [19]प्राप्तं न मां नूनं [20]यथोपेक्षितुमर्हति ॥ २९ ॥

संबन्धोक्तिः ॥ १८ ॥ जम्बु "अम्बार्थनद्योर्ह्रस्वः" इति ह्रस्वत्वं । "एङ्ह्रस्वात्सम्बुद्धेः" इति सुलोपः । स्निग्धताकारेण जम्बुफलौपम्यं । विजानीषे चिह्नत इति शेषः ॥ १९ ॥ सुपुष्पैरिति धार्मिकत्वोक्तिः ॥ २० ॥ श्लोकद्वयमेकान्वयं । क्रियाभेदाद्रामपदद्वयं । नीपः कदम्बः । कुरवान् कुरवकान् । रामः चूतादीन् गत्वा दृष्ट्वा पृच्छन् आधावनेन सर्वत्र भ्रान्तः कृतभ्रमणःरामः उन्मत्तः चित्तविभ्रमवानिव । लक्ष्यते अलक्ष्यत ॥२१—२२ ॥ इति वृक्षान्पृष्ट्वा मृगान्पृच्छति—अथेति । वृक्षा मा कथयन्तु त्वं तु कथयेत्याशयेनाथवाशब्दप्रयोगः । मृगशावस्य मृगबालस्याक्षिणी इवाक्षिणीयस्यास्तां । मृगस्य सीताज्ञाने योग्यतामाह—मृगेति । मृगवद्विविधं प्रेक्षत इति मृगविप्रेक्षणी । सहिता भवेदिति संभावनायां लिङ् ॥ २३ ॥ गजनासोरूः करिकरोरूः । वरवारण वारणश्रेष्ठ । हे गज तां सीतां । तुभ्यं तव । विदितां मन्ये शङ्के । गजनासोरूः सा त्वया यदि दृष्टा भवेत्तदाख्याहि ॥ २४ ॥ शार्दूलेति । अत्र तुल्यगतित्वरूपः संबन्धो बोध्यः । न ते भयं शूरस्यतव भयं नास्ति । एतेन पूर्वोक्ताः सर्वे भीत्या न प्रत्यूचुरिति रामस्याशयः ॥ २५ ॥ पुनरवस्थाविशेषं दर्शयति—किं धावसीति । प्रिये किमर्थं धावसि धावन्ती दृष्टासि नूनं । अथादर्शनादाह—वृक्षैरिति । इदं च पूर्वापेक्षयातिरिक्तं दर्शनान्तरं ॥ २६—२७ ॥ अन्तर्हितापि पीतकौशेयेन सूचितासि । इदमपि प्रत्ययान्तरं । पुनरपि प्रत्ययान्तरमाह—धावन्त्यपीति ॥२८॥ अथ सर्वात्मनादर्शनाभावात्प्रकारान्तरमुत्प्रेक्षते—नैवेति । अथवा सात्र नैव विद्यते किंतु हिंसिता । अत्र हेतुमाह—कृच्छ्रमिति । कृच्छ्रं दुःखं । प्राप्तंमां यथा येन कारणेन । उपेक्षितुं नार्हति नूनं । तेन कारणेन हिंसितैव

शि० उन्मत्तइवलक्ष्यते । इवेनविप्रलंभदशायाउन्मादाद्वैलक्षण्यंसूचितं ॥ २२ ॥ ति० पुनर्बोधावस्था । नूनंसानैवयादृष्टा । तर्हिंसाकेत्यत्राह । अथवाहिंसिता रक्षोभिः । तत्रहेतुः—यथा । एवंप्रकारेण । कृच्छ्रंनूनं मां प्राप्तं सापेक्षितुमर्हति । नापक्षते तस्मान्नैवसेत्यर्थः । उपेक्षितुमितिपाठेकाकुः ॥ २९ ॥

[पा०] १ ङ. झ. ञ. ट. जंबोजांबूनदसमप्रभा. ख. ग. घ. सीताजंबुजांबूनदप्रभा. च. ज. जंबोजांबूफलप्रिया. छ. जंबुजांबूफलप्रिया. २ ख. हिजानीषे. ङ. झ. ट. विजानासि. ३ ख. कर्णिकाराङ्ग. ४ ङ. झ. पुष्पितः. ग. सुपुष्पैरुपशोभितः. ५ ग. ङ.—ट. प्रियांसाध्वीं. ६ ङ. झ. ट. यदिप्रिया. ७ क. ख. ग. ङ. छ. ज. ञ. ट. कुरवांस्तथा. ८ च. ज. दाडिमान्पनसान्. ख. ङ. झ. ट. दाडिमानपितान्गत्वा. ९ ग. घ. ङ. छ. झ. ञ. ट. बकुलानथपुन्नागांश्चन्दनान्केतकांस्तथा. च. ज. बकुलानथपुन्नागांश्चपंकान्केतकांस्तथा. १० ङ. ट. गच्छन्रामो. ११ क. ख. यदिवा. १२ च. छ. ज. ञ. चन्द्रसमानना. १३ क. ङ. च. छ. झ. ञ. ट. विस्रब्धः. १४ ख. मेऽद्य. १५ क. ख. ग. वृक्षेणाच्छिद्य. १६ ग. प्रतिनभाषसे. १७ घ. नापि. १८ च. छ. ज. चारुवर्णिनी. १९ क. ख. घ.—ट. प्राप्तंहि. ग. प्राप्तंतु. २० घ. ङ. झ. यथापेक्षितुं.

व्यक्तं सा भक्षिता बाला राक्षसैः पिशिताशनैः ॥ [1]विभज्याङ्गानि सर्वाणि मया विरहिता प्रिया ॥३०॥
नूनं तच्छुभदन्तोष्ठं सुनासं [2]चारुकुण्डलम् ॥ पूर्ण[3]चन्द्रमिव ग्रस्तं मुखं निष्प्रभतां गतम् ॥ ३१ ॥
सा हि चम्पकवर्णाभा ग्रीवा ग्रैवेय[4]शोभिता ॥ कोमला विलपन्त्यास्तु कान्ताया भक्षिता [5]शुभा ॥३२॥
नूनं विक्षिप्यमाणौ तौ बाहू पल्लवकोमलौ ॥ भक्षितौ वेपमानाग्रौ स[6]हस्ताभरणाङ्गदौ ॥ ३३ ॥
मया विरहिता बाला रक्षसां भक्षणाय वै ॥ [7]सार्थेनेव परित्यक्ता भक्षिता बहुबान्धवा ॥ ३४ ॥
हा लक्ष्मण महाबाहो [8]पश्यसि त्वं प्रियां क्वचित् ॥ हा प्रिये क्व गता भद्रे हा सीतेति पुनःपुनः ॥३५॥
इत्येवं विलपन्रामः [9]परिधावन्वनाद्वनम् ॥ क्वचिदुद्भ्रमते वेगात्क्वचिद्विभ्रमते बलात् ॥
क्वचिन्मत्त इवाभाति कान्तान्वेषणतत्परः ॥ ३६ ॥
स वनानि नदीः शैलान्गिरिप्रस्रवणानि च ॥ काननानि च वेगेन [10]भ्रमत्यपरिसंस्थितः ॥ ३७ ॥
[11]तथा स गत्वा विपुलं महद्वनं परीत्य सर्वं त्वथ मैथिलीं प्रति ॥
[12]अनिष्ठिताशः स चकार मार्गणे पुनः प्रियायाः परमं परिश्रमम् ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे षष्टितमः सर्गः ॥ ६० ॥

नूनं ॥ २९ ॥ एतदेव द्रढयति—व्यक्तमिति ॥ ३० ॥ वक्ष्यमाणदशामनुसंधाय प्रलपति—नूनमिति । पूर्णचन्द्रमिव ग्रस्तं राहुग्रस्तं पूर्णचन्द्रमिव स्थितमित्यर्थः । एवंभूतं मुखं निष्प्रभतां गतं । नूनमित्यन्वयः ॥ ३१ ॥ ग्रैवेयकं कण्ठभूषणं । या उक्तविशेषणा ग्रीवा सा भक्षिता भवेदित्यन्वयः ॥ ३२ ॥ हस्ताभरणं कटकं ॥ ३३ ॥ भक्षणाय विरहितासीदिति पूर्वार्धेऽन्वयः । सार्थेन पथिकसमुदायेन ॥ ३४ ॥ लक्ष्मणमामन्त्र्य पृच्छति—हा लक्ष्मणेति । पश्यसि पश्यसिकिं । हा सीत इति वक्तव्ये हा सीतेति सन्धिरार्षः । इतिकरणस्य सर्गारम्भस्थेन विललापेत्यनेनान्वयः ॥ ३५ ॥ इत्येवमिति सार्धश्लोक एकान्वयः । प्रथमार्धं पूर्वानुवादरूपं । क्वचित् अधिष्ठाने सादृश्याभावेपि वेगात् शोकवेगादेव । उद्भ्रमते सीताप्रतीतिरूपं भ्रमं प्राप्नोति । क्वचित् लतादौ । बलात् सादृश्यबलात् । विभ्रमते तत्प्रतीतिभ्रमं लभते । मत्त इवाभाति मत्तवत्परिभ्रमतीत्यर्थः ॥ ३६ ॥ सुगमानि वनानि । दुर्गमाणि काननानि । गिरेरुद्भूतानिप्रस्रवणानि गिरिप्रस्रवणानि । " उत्सः प्रस्रवणं वारिप्रवाहः " इत्यमरः । अपरिसंस्थितः अप्रतिष्ठितः ॥ ३७ ॥ सरामः तथा क्वचिदुद्भ्रमत इत्यादिरीत्या । विपुलं विशालं महत् निरन्तरं । वनं गत्वा सर्वं वनस्यसर्वप्रदेशं परीत्य पुनःपुनश्चरित्वा अथ मैथिलीं प्रति मैथिलीलाभं प्रति । अनिष्ठिताशः अनिष्पन्नाशः सन् । पुनरपि प्रियाया मार्गणे परमं परिश्रमं चकार ॥ ३८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

शि० आविरहिता आविभिः स्वजनरूपरक्षकैः रहिता शून्यासालं राक्षसैर्यदिभक्षिता तर्हि अङ्गानि राक्षसावयवान् विभज्य भङ्क्त्वा मय मां प्राप्नुहि ॥ ३० ॥ इतिषष्टितमस्सर्गः ॥ ६० ॥

[पा०] १ ग. विभिन्याङ्गानि. २ क. ग. ङ.—ट. शुभकुण्डलं. ३ क. ख. ग. च. ज.—ट. चन्द्रनिभं. ४ ङ. झ. ट. ग्रैवेयकोचिता. ५ ख. बलात्. ६ च. छ. ज. ञ. सहस्राभरणौगतौ. ७ ग. सावनेस्मिन्परित्यक्ता. क. सावनेस्मिन्परिक्षिप्ता. ख. सावनेऽस्मिन्परिभ्रष्टा. ८ क. ख. ङ.—ट. पश्यसे. ९ ख. पर्यधावत्. १० च. छ. ज. ञ. भ्रमन्विपरि. ११ ङ. झ. ट. तदा. १२ च. छ. ज. ञ. अधिष्ठिताशः.

एकषष्टितमः सर्गः ॥ ६१ ॥

पर्णशालादावन्वेषणेपिसीतायाअलाभाद्बहुधाविलापेन शोचन्तंरामंप्रतिलक्ष्मणेनससान्त्वनंसमग्रवनभागेषुपुनरन्वेषणस्य कर्तव्यत्वोक्तिः ॥ १ ॥ पुनर्वनगिरिदर्यादिषुगवेषणेपिसीतामलब्धवतारामेणलक्ष्मणेनसान्त्वनेपिशोकात्सीतांप्रत्याक्रोशनं ॥ २ ॥

दृष्ट्वाऽऽश्रमपदं शून्यं रामो दशरथात्मजः ॥ रहितां पर्णशालां च [1]विध्वस्तान्यासनानि च ॥ १ ॥
अदृष्ट्वा तत्र वैदेहीं सन्निरीक्ष्य च [2]सर्वशः ॥ उवाच रामः प्राक्रुश्य [3]प्रगृह्य रुचिरौ भुजौ ॥ २ ॥
क नु लक्ष्मण वैदेही [4]कं वा देशमितो गता ॥ केना[5]हृता वा सौमित्रे [6]भक्षिता केन वा प्रिया ॥ ३ ॥
वृक्षेणा[7]च्छाद्य यदि मां सीते हसितुमिच्छसि ॥ अलं ते हसितेनाद्य मां भजस्व सुदुःखितम् ॥ ४ ॥
यैः [8]सह क्रीडसे सीते विश्वस्तैर्मृगपोतकैः ॥ एते हीनास्त्वया [9]सौम्ये [10]ध्यायन्त्यास्राविलेक्षणाः ॥५॥
सीतया रहितोऽहं वै नहि जीवामि लक्ष्मण ॥ ६ ॥
मृतं शोकेन महता सीताहरणजेन माम् ॥ परलोके महाराजो नूनं द्रक्ष्यति मे पिता ॥ ७ ॥
कथं प्रतिज्ञां संश्रुत्य मया त्वम[11]भियोजितः ॥ अपूरयित्वा तं कालं मत्सकाशमि[12]हागतः ॥ ८ ॥
कामवृत्तम[13]नार्यं मां मृषावादिनमेव च ॥ धिक्त्वामिति परे लोके [14]व्यक्तं वक्ष्यति मे पिता ॥ ९ ॥
विवशं शोकसंतप्तं दीनं भग्नमनोरथम् ॥ मामिहोत्सृज्य करुणं कीर्तिर्नरमिवानृजुम् ॥ १० ॥
क गच्छसि वरारोहे [15]मां नोत्सृज सुमध्यमे ॥ त्वया विरहितश्चाहं [16]मोक्ष्ये जीवितमात्मनः ॥११॥
[17]इतीव विलपन्रामः सीतादर्शनलालसः ॥ न ददर्श सुदुःखार्तो राघवो जनकात्मजाम् ॥ १२ ॥

अथ रामस्य नवमीमवस्थां दर्शयत्येकषष्टितमे । दृष्ट्वेत्यादिश्लोकद्वयमेकान्वयं । शून्यं सीतारहितं । रहितां सीतयेति शेषः । विध्वस्तानि रावणाक्रान्तत्वादिति भावः। सर्वशः सर्वत्र । तत्र वनप्रदेशे । वैदेहीं संनिरीक्ष्य विचित्य । तत्रादृष्ट्वा पुनरपि रामग्रहणं क्रियाभेदात् । प्राक्रुश्य सीतामुच्चैराहूय उवाच । भुजग्रहणं शोककृतविकारविशेषः । प्रगृह्य उत्क्षिप्य ॥ १—२ ॥ क नु अत्र वने कुत्र प्रदेशे वर्तते । कं वा देशान्तरं गता ॥ ३ ॥ आच्छाद्य स्वमिति शेषः। हसितुं अन्तर्हितां मां ज्ञातुमसमर्थोसीत्येवं परिहसितुं। अद्य शोककाले ॥ ४ ॥ क्रीडसे क्रीडसि । विश्वस्तैः चिरोपलालनेन विश्वासं प्राप्तैः । मृगपोतकैः बालमृगैः । "पोतः पाकोऽर्भको डिम्भः" इत्यमरः। ध्यायन्ति त्वामिति शेषः । किमपि ध्यायन्तीति वा ॥५॥ सीतयेति इदमर्धमेकं वाक्यं॥६॥ परलोके स्वर्गे॥७॥ श्लोकद्वयमेकान्वयं । प्रतिज्ञां चतुर्दशवर्षवनवासप्रतिज्ञां । संश्रुत्य अङ्गीकृत्य । मया अभियोजितः नियुक्तस्त्वं तं कालमपूरयित्वा कथमागतः । कामवृत्तं यथेष्टाचारं। अनार्यं दुर्जनं मां धिक्त्वामिति वक्ष्यति । अहमुपालम्भयोग्य एव कामवृत्तत्वादिति भावः ॥८—९॥ विवशमित्यादश्लोकद्वयं । विवशं अस्वाधीनं त्वत्परतन्त्रमित्यर्थः। करुणं यथा भवति तथा उत्सृज्य त्यागकालेऽपि तव दयास्त्येवेति भावः । अनृजुं कपटाचारं । मां नोत्सृज सुमध्यमे इदं मदुत्सर्जनं त्वल्लक्षणस्याननुरूपमिति भावः । उत्सर्जने को दोष इत्यत्राह—त्वयेति ॥१०—११॥ इतीवेति । एवंप्रकारेणेत्यर्थः ।

ति० प्राक्रुश्य हाइतिशब्दंकृत्वा ॥ २ ॥

[पा०] १ ङ.—ट. प्रविद्धान्यासनानिच. ख. ग. विप्रविद्धासनानिच. २ ग. च. ज. ञ. सर्वतः. ३ ट. परिगृह्यशुभौ भुजौ. ४ ज. क्वयादिशं. ५ क. ख. ग. नाहृताच. ६ च. छ. ञ. केनवाभक्षिता. ७ क.—ट. वृक्षेणावार्य. ८ ङ. झ. ठ. पर्यक्रीडसे. ९ च. छ. ज. ञ. सीते. १० ग. ङ. झ. ञ. ट. ध्यायन्त्यस्राविले. क. च. ज. धावन्त्यस्राविले. ११ क. ख. ग. मभिचोदितः. १२ ख. मितोगतः. १३ ङ. झ. मनार्यंवा. १४ ग. नूनं. १५ ग. झ. ञ. ट. मामोत्सृज. क. घ. मामुत्सृज्य. १६ ङ. झ. ट. त्यक्ष्ये. १७ क. ङ.—ज. ञ. इत्येवं.

अनासादयमानं तं सीतां [1]दशरथात्मजम् ॥ पङ्कमासाद्य विपुलं सीदन्तमिव कुञ्जरम् ॥
लक्ष्मणो राममत्यर्थमुवाच हितकाम्यया ॥ १३ ॥
मा [2]विषादं [3]महाबाहो कुरु यत्नं मया सह ॥ [4]इदं च हि वनं [5]शूर बहुकन्दरशोभितम् ॥ १४ ॥
प्रियकाननसंचारा वनोन्मत्ता च मैथिली ॥ [6]सा वनं वा प्रविष्टा स्यान्नलिनीं वा सुपुष्पिताम् ॥ १५ ॥
सरितं वाऽपि संप्राप्ता मीनवञ्जुलसेविताम् ॥ स्नातुकामा निलीना स्याद्धासकामा वने क्वचित् ॥१६॥
वित्रासयितुकामा वा लीना स्यात्कानने क्वचित् ॥ जिज्ञासमाना वैदेहीं त्वां मां च पुरुषर्षभ ॥ १७ ॥
[7]तस्या ह्यन्वेषणे श्रीमन्क्षिप्रमेव [8]यतावहै ॥ १८ ॥
वनं सर्वं विचिनुवो यत्र सा जनकात्मजा ॥ मन्यसे यदि काकुत्स्थ मा स्म शोके मनः कृथाः ॥१९॥
[9]एवमुक्तस्तु सौहार्दाल्लक्ष्मणेन समाहितः ॥ सह सौमित्रिणा रामो विचेतुमुपचक्रमे ॥ २० ॥
तौ वनानि गिरींश्चैव सरितश्च सरांसि च ॥ निखिलेन [10]विचिन्वानौ सीतां दशरथात्मजौ ॥२१॥
तस्य शैलस्य सानूनि [11]गुहाश्च शिखराणि च ॥ निखिलेन [12]विचिन्वानौ नैव [13]तामभिजग्मतुः॥२२॥
विचित्य सर्वतः शैलं रामो लक्ष्मणमब्रवीत् ॥ नेह पश्यामि सौमित्रे वैदेहीं पर्वते शुभाम् ॥ २३ ॥
ततो दुःखाभिसंतप्तो लक्ष्मणो वाक्यमब्रवीत् ॥ विचरन्दण्डकारण्यं भ्रातरं दीप्ततेजसम् ॥ २४ ॥

लालसः साभिलाषः ॥ १२ ॥ अनासादयमानमित्यादिसार्धश्लोक एकान्वयः । अप्राप्नुवन्तमित्यर्थः । अत्यर्थं हितकाम्ययेत्यन्वयः ॥ १३ ॥ विषादं मा कुरु अन्वेषणे यत्नं कुर्वित्युभयत्रान्वयः । अन्वेषणयोग्यतामाह—इदं हीति । बहुकन्दरैः कन्दरतुल्यलतागृहैः शोभितं ॥ १४ ॥ प्रियः काननसंचारो यस्याः सा । वनोन्मत्ता च । वनं जलं "जीवनं भुवनं वनं" इत्यमरः । वनेनवनदर्शनेन उन्मादवती अतिप्रियसलिलेत्यर्थः । यथाक्रमं तत्कार्यमाह—सेति ॥ १५ ॥ वञ्जुलो वेतसः । सरितं स्नातुकामा संप्राप्ता स्यात् । हासकामा परिहासकामा । क्वचिद्वने निलीना स्याद्वा ॥१६॥ वित्रासयितुकामेति । पूर्वं हासार्थं गूढेति शङ्का अत्र वित्रासनार्थमिति भिदा । मां त्वां च जिज्ञासमाना आवयोरन्वेषणादिसामर्थ्यं जिज्ञासमानेत्यर्थः ॥१७॥ तस्या इत्यर्धं पृथक् । श्रीमन् भार्यावियोगलक्षणं ते नास्तीति भावः ॥१८॥ यदि मन्यसे यदीच्छसि । तदा विचिनुवः त्वं शोके मनो मा कृथाः ॥१९॥ लक्ष्मणेनैवमुक्तः अत एव समाहितः कृतचित्तसमाधानः । विचेतुं अन्वेष्टुं ॥२०॥ वनानि स्वल्पानि महान्ति च पुष्पापचयव्यग्रात्र सन्निहिता भवेदिति । गिरीन् विचित्रधातुसंग्रहसक्ताऽत्र भवेदिति । सरितः हंसकारण्डवादिललितपुलिनतया तदवलोकनकुतुकिनी भवेदिति । सरांसि च फुल्लकमलषण्डमण्डिततया तद्विहारपरात्र भवेदिति । निखिलेन भावप्रधानो निर्देशः । कात्स्न्र्येन विचिन्वानौ । सीता न लब्धेति त्यक्तव्यापारौ न भवतः । तौ दशरथात्मजौ न दृष्टेति तूष्णीं तिष्ठन्तौ न भवतः । मृदुप्रकृतिकत्वात् । नैव तामभिजग्मतुरिति वक्ष्यमाणमत्राप्यनुषज्यते ॥२१॥ तस्य शैलस्य प्रस्रवणगिरेः । सानूनि प्रस्थान् । शिखराणि शृङ्गाणि ॥ २२ ॥ शैलं सर्वतः सर्वत्र शैले । "उभसर्वतसोः—"इति द्वितीया । अन्त इतिकरणं ॥ २३ ॥ दीप्ततेजसमिति वक्ष्यमाणसीतालाभहेतुलक्षणोक्तिः

ती० वनोन्मत्ता वनसंचारकोविदा ॥ ति० वनोन्मत्ता वनस्यपुष्पितत्वदर्शनादुन्मत्ता हर्षवती ॥ १५ ॥ शि० असकामा अन्यत्रवासविषयकेच्छाभाववत्यपिवैदेही । मां त्वां चजिज्ञासमाना आवयोरन्वेषणसामर्थ्यज्ञानेच्छावतीसती वनेक्वचिदवलीना निलीना स्याद्वा । तत्र वञ्जुलोवेतसः ॥ १६ ॥

[पा०] १ ङ. झ. ट. शोकपरायणं. २ च. ज. माविषीद. ३ ङ. झ. ट. महाबुद्धे. ४ ङ. ञ. ट. इदंगिरिवनं. ५ क. ङ.—ज. ञ. ट. वीर. ६ क. च. छ. ज. ञ. काननंवा. ७ क. ग. अस्याः. ८ क.ट. यतावहे. ९ ङ. झ. ट. मुक्तस्स. १० क. ग. ङ.—ट. विचिन्वन्तौ. ११ ङ. झ. ट. शिलाश्च. १२ क. ग. ङ.—ट. विचिन्वन्तौ. १३ घ. मधिजग्मतुः.

[1]प्राप्स्यसि त्वं महाप्राज्ञ मैथिलीं जनकात्मजाम् ॥ यथा विष्णुर्महाबाहुर्बलिं बद्ध्वा महीमिमाम् ॥२५॥
एवमुक्तस्तु [2]सौहार्दाल्लक्ष्मणेन स राघवः ॥ उवाच दीनया वाचा दुःखाभिहतचेतनः ॥ २६ ॥
वनं [3]सर्वं सुविचितं पद्मिन्यः फुल्लपङ्कजाः ॥ गिरिश्चायं महाप्राज्ञ बहुकन्दरनिर्झरः ॥ २७ ॥
न हि पश्यामि वैदेहीं प्राणेभ्योपि गरीयसीम् ॥ २८ ॥
एवं स विलपन्रामः सीताहरणकर्शितः ॥ दीनः शोकसमाविष्टो मुहूर्तं विह्वलोऽभवत् ॥ २९ ॥
[4]संतप्तो ह्यवसन्नाङ्गो गतबुद्धिर्विचेतनः ॥ [5]निषसादातुरो दीनो [6]निश्श्वस्याशीत[7]मायतम् ॥ ३० ॥
[8]बहुलं स तु निश्श्वस्य रामो राजीवलोचनः ॥ हा प्रियेति विचुक्रोश बहुशो बाष्पगद्गदः ॥३१॥
[9]तं ततः सान्त्वयामास लक्ष्मणः [10]प्रियबान्धवः ॥ बहुप्रकारं [11]धर्मज्ञः [12]प्रश्रितं प्रश्रिताञ्जलिः ॥३२॥
अनादृत्य तु तद्वाक्यं लक्ष्मणोष्ठ[13]पुटाच्च्युतम् ॥ अपश्यंस्तां प्रियां सीतां प्राक्रोशत्स पुनःपुनः ॥३३॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

द्विषष्टितमः सर्गः ॥ ६२ ॥

सीतामपश्यतारामेणलक्ष्मणंप्रतिसंबोधनेनबहुधाविलापः ॥ १ ॥

सीतामपश्यन्धर्मात्मा [14]कामोपहतचेतनः ॥ विललाप महाबाहू रामः कमललोचनः ॥ १ ॥
[15]पश्यन्निव स तां सीतामपश्यन्[16]मदनार्दितः ॥ उवाच राघवो वाक्यं [17]विलापाश्रयदुर्वचम् ॥ २ ॥

॥२४॥ प्राप्स्यसीति । सीताहर्तारं बद्ध्वेति शेषः ॥२५॥ दुःखाभिहतचेतनः दुःखोपहतहृदय इत्यर्थः॥२६॥ पद्मिन्य इत्यादौ सुविचिताः सुविचित इति विपरिणामः कार्यः ॥२७॥ न हीत्यर्धमेकं वाक्यं ॥२८॥ विह्वलः परवशः ॥ २९ ॥ अवसन्नाङ्गः कृशाङ्गः । गतबुद्धिः निस्संज्ञः । विचेतनः निश्चेष्टः । अशीतं उष्णं आयतं दीर्घमितिनिश्श्वासक्रियाविशेषणं ॥ ३० ॥ विचुक्रोश उच्चैस्स्वरेणाहूतवान् ॥ ३१ ॥ प्रश्रितं सविनयमिति क्रियाविशेषणं । प्रश्रिताञ्जलिः बद्धाञ्जलिः ॥ ३२ ॥ लक्ष्मणोष्ठपुटाच्च्युतं लक्ष्मणोक्तमित्यर्थः । पुनः प्राक्रोशत् उद्घोषेणाहूतवान् ॥३३॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकषष्टितमः सर्गः ॥ ६१ ॥

अथ रामस्य "दृङ्मनःसङ्गसङ्कल्पा जागरः कृशताऽरतिः । ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश" इत्युक्तावस्थासु रतिं नाम षष्ठीमवस्थां प्रदर्शयति द्विषष्टितमे । धर्मात्मा कामोपहतचेतन इत्याभ्यां धर्माविरुद्धकामस्यानिन्द्यत्वमुक्तं । महाबाहुरित्यूर्ध्वबाहुत्वमुच्यते । कमललोचन इत्यनेन समधुपद्मसाम्यादश्रुकालुष्यमुच्यते । कामेन सीताविप्रलम्भजनितव्यामोहेन उपहता अप्रकृतिस्था चेतना चैतन्यं यस्य स तथा ॥ १ ॥ पुरोवर्तित्वाभावेन सीतामप-

---

स० हाप्रिये अतीतिच्छंदः । तस्य विचुक्रोशेत्यनेनान्वयः । इतीतिशेषः ॥ २९ ॥ इत्येकषष्टितमस्सर्गः ॥ ६१ ॥
शि० मन्मथार्दितः स्वप्रेर्यशिवद्वारान्मन्मथार्दकोराघवः ॥ २ ॥

[पा०] १ ङ. झ. ञ. ट. प्राप्स्यसे. २ ङ. झ. ट. वीरेणलक्ष्मणेन. ३ ङ. ञ. ट. सुविचितंसर्वं. च. ज. सर्वंतुविचितं. ४ संतप्तोह्यवसन्नाङ्गो. बहुलंसतुनिश्श्वस्य. इत्यनयोःश्लोकयोःपौर्वापर्यं च. छ. ज. पाठेषुदृश्यते. ख. ङ.—ट. सविह्वलितसर्वाङ्गो. ५ ङ.—ट. विषसादातुरो. ६ ख. निश्श्वसंश्चमुहुर्मुहुः. क. निश्श्वस्याधिकं. ७ ङ.—ज. मारुतं. घ. मारुतः. ८ क.—ट. बहुशः. ९ ङ.—ट. तंसान्त्वयामासततो. ख. ग. तंसान्त्वयामासतदा. १० झ. प्रियबान्धवं. ११ घ. ङ. झ. ञ. ट. शोकार्तः. १२ क.—ङ. झ. ञ. ट. प्रश्रितः. १३ ङ. छ. झ. ञ. ट. पुटच्युतं. १४ क. ङ.—ट. शोकोपहतं. १५ क.—ट. पश्यन्निवच. १६ ङ. झ. ट. न्मन्मथार्दितः. १७ घ. विरहाश्रय.

त्वमशोकस्य शाखाभिः पुष्पप्रियं[1]तया प्रिये ॥ आवृणोषि शरीरं ते मम शोकविवर्धनी ॥ ३ ॥
कदलीकाण्ड[2]सदृशौ कदल्या संवृतावुभौ ॥ ऊरू पश्यामि ते देवि नासि शक्ता निगूहितुम् ॥ ४ ॥
कर्णिकारवनं भद्रे हसन्ती देवि सेवसे ॥ [3]अलं ते परिहासेन मम बाधावहेन वै ॥ ५ ॥
परिहासेन किं सीते परिश्रान्तस्य मे प्रिये ॥ [4]अयं स परिहासोपि साधु देवि न रोचते ॥ ६ ॥
विशेषेणाश्रमस्थाने हासोऽयं न प्रशस्यते ॥ अवगच्छामि ते[5] शीलं परिहासप्रियं प्रिये ॥ ७ ॥
आगच्छ त्वं विशालाक्षि शून्योऽयमुटजस्तव ॥ ८ ॥
सुव्यक्तं राक्षसैः सीता भक्षिता वा हृताऽपि वा ॥ नहि सा विलपन्तं मामुपसंप्रैति लक्ष्मण ॥ ९ ॥
एतानि मृगयूथानि साश्रुनेत्राणि लक्ष्मण ॥ शंसन्तीव हि [6]वैदेहीं भक्षितां रजनीचरैः ॥ १० ॥
हा ममार्ये क्व यातासि हा साध्वि वरवर्णिनि ॥ हा सकामा[7] त्वया [8]देवी कैकेयी सा भविष्यति ॥ ११ ॥
सीतया सह निर्यातो विना सीतामुपागतः ॥ कथं नाम प्रवेक्ष्यामि शून्यमन्तःपुरं पुनः[8] ॥ १२ ॥
निर्वीर्य इति [9]लोको[10] मां निर्दयश्चेति वक्ष्यति ॥ कातरत्वं प्रकाशं हि सीतापनयनेन मे ॥ १३ ॥
निवृत्तवनवासश्च जनकं मिथिलाधिपम् ॥ कुशलं [11]परिपृच्छन्तं कथं शक्ष्ये निरीक्षितुम् ॥ १४ ॥
विदेहराजो नूनं मां दृष्ट्वा विरहितं [12]तया ॥ [13]सुतास्नेहेन संतप्तो मोहस्य वशमेष्यति ॥
[[14]तात एव कृतार्थः स तत्रैव वसताद्गतः ॥ १५ ॥]

श्यन्नपि मदनार्दितो मदनपरवशः तां पश्यन्निव संबोध्योवाच । तद्वाक्यं विलापाश्रयत्वेन दुर्वचं गद्गदकण्ठत्वादिति भावः । यद्वा विलापसंबन्धादस्माभिर्वक्तुमशक्यं अनुवदितुमशक्यमित्यर्थः ॥ २ ॥ पश्यन्निवेत्युक्तमुपपादयति—सार्धैस्त्वमित्यादिपञ्चभिः । त्वं अशोकस्य शाखाभिः पुष्पिततया स्वर्णसदृशीभिः स्वयं पुष्पप्रियतया स्वशरीरं मम शोकविवर्धनी सती आवृणोषि । किंतेनावरणेन । मया दृष्टत्वादिति भावः ॥ ३ ॥ कदलीकाण्डसदृशौ कदलीदण्डतुल्यत्वेन कदल्यासंवृतावपि ते ऊरू पश्यामि तेन तौ निगूहितुं आच्छादितुं । नशक्तासि दृष्टस्याच्छादनासंभवादिति भावः ॥ ४ ॥ हसन्ती हासार्थं कर्णिकारवनं सेवसे ॥ ५ ॥ हे सीते परिहासेन किं किं प्रयोजनं । हि यस्मात् परिश्रान्तस्य मे मह्यं । सः पूर्वं प्रियः । अयं परिहासः साधु सम्यक् । न रोचते ॥ ६ ॥ शीलं स्वभावः । परिहासेन प्रीणातीति परिहासप्रियं । "इगुपधज्ञाप्रीकिरः कः" इति कः ॥ ७ ॥ आगच्छेत्यर्धमेकं वाक्यं ॥ ८ ॥ हिर्हेतौ । उपसंप्रैति उपेक्षत इत्यर्थः ॥ ९ ॥ शंसनप्रकारः साश्रुनेत्राणीति ॥ १० ॥ मम मदीये । आर्ये पूज्ये । लोकैरिति शेषः । सकामा स्वाभीष्टास्मन्मरणसिद्धेरिति भावः ॥ ११ ॥ सीतां विनाऽऽगतत्वाच्छून्यं ॥ १२ ॥ कातरत्वं अधीरत्वं । जीवितधारणाशक्तेरिति भावः ॥ १३ ॥ निवृत्तवनवासः समाप्तवनवासः । "समाप्तौ वृत्त इत्यदः" इति शब्दार्णवे । निरीक्षितुं प्रतिवक्तुं सुतरामिति भावः ॥ १४ ॥ तया

शि० हेप्रिये यद्यपिपरिहासप्रियंतेशीलं स्वभावं । अवगच्छामि जानामि । तथापि आश्रमस्थाने विशेषश्रमस्थित्यर्थं विशेषेणायंतेपरिहासः नप्रशस्यते । यद्यपीत्यध्याहृतं ॥ ७ ॥ **ति०** उपसंप्रैति हासरसेनोपेक्षते ॥ ९ ॥ **शि०** मेदेवी माता । अद्यसकामा तदीप्सितराक्षसवधस्यसंनिहितत्वात्प्राप्तमनोरथाभविष्यति । **स०** अममार्येइतिपदं । निर्ममाधिके ॥ ११ ॥ **स०** कातरत्वं अवीरत्वं । प्रकाशं प्रकाशतइतितथा । प्रकटं अभूदिति शेषः ॥ १३ ॥ **ति०** "तत एवकृतार्थः सतत्रैववसतादिति" इत्यर्धमधिकं कतकपाठे । ततोदशरथएवकृतार्थः । वसतादितिलोड्व्यत्ययेन । यतस्तत्रैवस्वर्गएववसति । नतुजीवन्तीकौसल्ये-

[पा०] १ ङ. झ. प्रियतरा. २ ग. च. छ. ज. ञ. स्कन्धसदृशौ. क. स्तंभसदृशौ. ३ ख. अलंतेबाधयाभीरुपश्याम्यसितलोचने. ४ क. अलंतेपरिहासेन. ५ क. शीलंते. ६ ङ.—ट. मेदेवीं. ७ क. ख. सकामाद्यकैकेयीदेवीमेसा. च. छ. ज. सकामाद्यकैकेयीदेवीसाद्य. ग. सकामाद्यकैकेयीसापिदेवी. ङ. झ. ट. सकामाद्यकैकेयीदेवीमेऽद्य. ञ. सकामाथकैकेयीदेवीसाद्य. ८ घ. सीते. ९ ङ. झ. ट. मम. १० घ. च. छ. ञ. लोकोयं. क. मांलोको. ११ ख. ममपृच्छन्तं. १२ ख. ग. च. छ. त्वया. १३ क. ख. ग. च. छ. ज. दुहितृस्नेहसंतप्तो. ङ. झ. ट. सुताविनाशसंतप्तो. १४ इदमर्धं ख. पाठेदृश्यते.

अथवा न गमिष्यामि पुरीं भरतपालिताम् ॥ [1]स्वर्गोपि सीतया हीनः शून्य एव मतो मम ॥ १६ ॥
[2]मामिहोत्सृज्य हि वने गच्छायोध्यां पुरीं शुभाम् ॥ [3]न त्वहं तां विना सीतां जीवेयं हि कथंचन ॥१७॥
गाढमाश्लिष्य भरतो वाच्यो मद्वचनात्त्वया ॥ अनुज्ञातोसि रामेण पालयेति वसुंधराम् ॥ १८ ॥
अम्बा च मम कैकेयी सुमित्रा च त्वया विभो ॥ कौसल्या च यथान्यायमभिवाद्या ममाज्ञया ॥१९॥
रक्षणीया प्रयत्नेन भवता [4]सोक्तकारिणा ॥ २० ॥
सीतायाश्च विनाशोयं मम चामित्र[5]कर्शन ॥ विस्तरेण जनन्या मे विनिवेद्यस्त्वया भवेत् ॥ २१ ॥

इति विलपति [6]राघवे सुदीने वनमुपगम्य तया विना सुकेश्या ॥
भयविकल[7]मुखस्तु [8]लक्ष्मणोपि व्यथितमना भृशमातुरो बभूव ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

त्रिषष्टितमः सर्गः ॥ ६३ ॥

सीतामपश्यतारामेणलक्ष्मणंप्रतिसंबोधनेनतस्याराक्षसैर्नानादुरवस्थासंपादनसंभावनापूर्वकं तांप्रतिशोचनं ॥ १ ॥ लक्ष्मणेनोन्मत्तवद्बहुधाप्रलापेनशोचन्तंरामंप्रतिसमाश्वासनं ॥ २ ॥

स राजपुत्रः प्रियया विहीनः [9]कामेन शोकेन च पीड्यमानः ॥
विषादयन्भ्रातरमार्तरूपो भूयो विषादं प्रविवेश तीव्रम् ॥ १ ॥
स लक्ष्मणं शोकवशाभिपन्नं शोके निमग्नो [10]विपुले तु रामः ॥
उवाच वाक्यं व्यसनानुरूपमुष्णं विनिश्श्वस्य रुदन्[11]सशोकम् ॥ २ ॥

सीतया ॥ १५ ॥ भरतपालितां सुसमृद्धामपीत्यर्थः ॥ १६ ॥ कथंचन त्वत्कृताश्वासनेनापीत्यर्थः ॥१७ ॥ पालयेति वाच्य इत्यन्वयः ॥ १८ ॥ अम्बेति प्रथमोक्तिः शोकजाग्रहात् ॥ १९ ॥ रक्षणीयेत्यर्धं । सा कौसल्या ॥ २० ॥ मम विनाशः भावीतिशेषः ॥ २१ ॥ तया विनाकृतं वनमुपगम्येत्यर्थः । सुकेश्येति विलापहेतुः । भयेन विकलमुखः विवर्णमुखः । आतुरः तप्तशरीरः ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्विषष्टितमः सर्गः ॥ ६२ ॥

अथ तापाख्यां मदनावस्थां दर्शयति त्रिषष्टितमे— स राजपुत्र इत्यादि । कामेन प्रियास्मरणजन्येन । शोकेन प्रियाविरहजन्येन । भ्रातरं भूयो विषादयन् । आर्तरूपः पीडितशरीरः । सः रामः । तीव्रं विषादं प्रविवेश स्वशोकलक्ष्मणशोकाभ्यामधिकतरं शोकं गत इत्यर्थः ॥ १ ॥ विपुले शोके निमग्नः लक्ष्मणशोकदर्शनजशोकेन विपुले शोके सीताशोके निमग्नः । व्यसनानुरूपं लोकवद्दुःखप्रसङ्गोचितं । उष्णं यथा तथा विनिश्श्वस्य रुदन् सशोकं वाक्यमुवाच ॥ २ ॥

त्यर्थः ॥ स० तत्रैवस्वर्गएववसतात् । मयासाकमितिशेषः । इति उक्त्वागतः ततोदशरथः कृतार्थः । स्नुषादर्शनं तत्रैवजातमितिकृतार्थ इतिभावः ॥१५॥ इतिद्विषष्टितमस्सर्गः ॥ ६२ ॥

ति० इष्टवियोगजः शोकः । कामजंचित्तविवशत्वं मोहः ॥ १ ॥ स० सशोपि ससुखोपि अकं असुखंयथाभवतितथा ।

[पा०] १ क. च. छ. ज. ञ. स्वर्गोपिचतया. ख. ग. ङ. झ. ट. स्वर्गोपिहितया. २ घ. तामिहोत्सृज्य. ङ. झ. त्वन्मामुत्सृज्य. ३ क. नह्यहं. ४ क. ख. ग. च. छ. ज. ञ. युक्तकारिणा. घ. सूक्तकारिणा. ङ. झ. ट. सूक्तचारिणा. ५ ख. ङ.—ट. सूदन. ६ ङ. झ. ट. राघवेतुदीने. ७ च. छ. ज. ञ. मुखश्च. ८ ग. लक्ष्मणोवै. ९ घ. ङ. झ. ट. शोकेनमोहेन. ग. ख. ञ. कामेनशोकेनच. ज. शोकेनकामेनच. १० च. छ. ञ. विपुलेहि. ११ क. छ. ज. न्सशोकः.

न मद्विधो दुष्कृत[1]कर्मकारी मन्ये द्वितीयोस्ति वसुंधरायाम् ॥
[2]शोकेन शोको हि परम्पराया मामेति भिन्दन्हृदयं मनश्च ॥ ३ ॥
पूर्वं मया नूनमभीप्सितानि पापानि [3]कर्माण्यसकृत्कृतानि ॥
तत्रायमद्यापतितो विपाको दुःखेन दुःखं यदहं विशामि ॥ ४ ॥
राज्यप्रणाशः स्वजनैर्वियोगः पितुर्विनाशो जननीवियोगः ॥
सर्वाणि मे लक्ष्मण शोकवेगमापूरयन्ति प्रविचिन्तितानि ॥ ५ ॥
सर्वं तु दुःखं मम लक्ष्मणेदं शान्तं शरीरे वनमेत्य शून्यम् ॥
सीतावियोगात्पुन[5]रप्युदीर्णं काष्ठैरिवाग्निः [6]सहसा प्रदीप्तः ॥ ६ ॥
सा नूनमार्या मम राक्षसेन [7]बलाद्धृता [8]खं समुपेत्य भीरुः ॥
[9]अपस्वरं [10]सस्वरविप्रलापा भयेन विक्रन्दितवत्यभीक्ष्णम् ॥ ७ ॥
तौ लोहितस्य प्रियदर्शनस्य सदोचितावुत्तमचन्दनस्य ॥
वृत्तौ स्तनौ शोणितपङ्कदिग्धौ नूनं प्रियाया मम नाभिभातः ॥ ८ ॥

द्वितीयो मद्विधो दुष्कृतकर्मकारी पापकर्मकारी । वसुंधरायां नास्तीति मन्ये । शोकेनेति । नमद्विधः इत्यादिनोक्तमनेनार्धेन स्पष्टीक्रियते । परम्परायाः परम्परारूपेणागतः । शोकेन शोकः शोकाच्छोकः । हृदयं मनश्च भिन्दन् मामेति । मनोऽधिष्ठानं हृदयं ॥ ३ ॥ एवं शोकपारम्पर्ये हेतुमुत्प्रेक्षते—पूर्वमिति । पूर्वं पूर्वजन्मनि । अभीप्सितानि प्रार्थितानि । तत्र तेषु पापेषु । विपाकः कार्योन्मुख्यं । आपतितः प्राप्तः ॥ ४ ॥ दुःखानिपरिगणयति—राज्येति । राज्यप्रणाशो राज्यभ्रंशः । स्वजनैः बन्धुभिः । सर्वाणीति सामान्ये नपुंसकं । शोकवेगं शोकराशिं । प्रविचिन्तितानि स्मृतानि ॥ ५ ॥ शून्यं निर्जनं वनमेत्य स्थितस्य मम शरीरे शान्तं शरीरक्लेशेन विस्मृतमित्यर्थः । उदीर्णं उद्रिक्तं । प्रदीप्तोग्निः पुनः काष्ठैरिव ॥ ६ ॥ मम संबन्धिनी आर्या सा राक्षसेन केनचित् बलाद्धृता सती खमाकाशमुपेत्य भीरुतया सस्वरविप्रलापा सती उच्चैर्ध्वनियुक्तविप्रलापा सती । भयेन अपस्वरं अपगतनिजस्वरं यथा तथा । अभीक्ष्णमत्यर्थं आक्रन्दितवती उद्घोषितवतीत्युत्प्रेक्षा ॥ ७ ॥ लोहितस्य लोहिताख्यस्य उत्तमचन्दनस्य । "रक्तं तु चन्दनं विद्याल्लोहितं हरिचन्दनं" इति । यद्वा कुङ्कुमादिना रक्तस्य उत्तमचन्दनस्य सदा उचितौ योग्यौ । वृत्तौ वर्तुलौ । मम प्रियायाः स्तनौ शोणितपङ्कदिग्धौ राक्षसेन भक्षणाय विशसनादिति भावः । एवंभूतौ सन्तौ नाभिभातः न प्रकाशेते । वर्तमानसामीप्ये वर्तमानवत्प्रयोगः । मम नाभिपात इति पाठान्तरे

रुदन्नुवाचेत्यन्वयः ॥ २ ॥ **ति०** शोकमनुप्रवृत्तः शोकः शोकानुशोकः । सः । परंपरायाः तृतीयार्थेषष्ठी । परंपरया । अविच्छेदेन । ह्रियतो मां हृदयं तदधिष्ठानमात्मानंमनश्चभिन्दन् एति प्राप्नोति ॥ ३ ॥—**शि०** असकृत् वारंवारं कृतानि राक्षसैराचरितानि । पापानि कर्माणि । पूर्वं स्वाप्राकट्यसमयेतत्रसाकेतेविद्यमानेनमया । यत् यस्मात् । अभीप्सितानि मदिच्छाविषयीभूतानि । तस्मादयंविपाकः इच्छामात्रजनितफलं । अद्यापतितः । अतएवदुःखेनदुःखं अहं विशामि । एतेन यदिमदिच्छानस्यात्तर्हिराक्षसानां ब्रह्मादिप्रेरितदुष्कृतकर्मप्रवृत्तिर्नस्यादितिसूचितं । तेनसकलजनकर्तृत्वादीनांस्वायत्तत्वंध्वनितं । तथाचश्रुतिः " कर्तृत्वंकरणत्वंचस्वभावश्चेतनाधृतिः । यत्प्रसादादिमेसन्ति नसन्ति यदुपेक्षया " इति ॥ **स०** दुःखेनदुःखं तत्परंपरामित्यर्थः ॥ ३ ॥ **ति०** वनमेत्य शरीरेक्लेशमनुभूयापि । सीतासंनिधानात्सर्वशान्तं । अद्यसीतावियोगात्पुनरुदीर्णं वृद्धिंप्राप्तं । प्रियावियोगएव दुस्सह इतिभावः ॥ **स०** एत्यक्लेशमितिगुर्वक्षरोक्त्या क्लेशातिशयोद्योत्यते ॥ ६ ॥ **स०** अनूनमार्या पूर्णसंपत्स्वामिनी । " अर्यः स्वामिवैश्ययोः " इतिनिपातनात् ॥ ७ ॥

[**पा०**] १ ग. घ. कामकारी. २ ख. ङ.—ट. शोकानुशोको. ३ घ. सर्वाण्यसकृत्. ४ ङ. झ. ट. क्लेशं. ५ ख. घ. ङ. झ. ञ. ट. रभ्युदीर्णं. ६ क. ख. च. झ. ञ. ट. सहसोप्रदीप्तः. ७ ख. घ. ङ. झ. ञ. ट. ह्यभ्याहृता. क. च. छ. बालाहृता ८ ज. दुःखमपेत्य. ९ झ. अप्यस्वरं. १० क.—ज. ञ. ट. सुस्वर.

तच्छ्लक्ष्णसुव्यक्तमृदुप्रलापं तस्या मुखं कुञ्चितकेशभारम्[1] ॥
रक्षोवशं नूनमुपागताया न भ्राजते राहुमुखे यथेन्दुः ॥ ९ ॥
तां हारपाशस्य सदोचिताया[2] ग्रीवां प्रियाया मम सुव्रतायाः ॥
रक्षांसि नूनं परिपीतवन्ति[3] विभिद्य[4] शून्ये रुधिराशनानि[5] ॥ १० ॥
मया विहीना विजने वने[6] या रक्षोभिराहृत्य[7] विकृष्यमाणा ॥
नूनं विनादं कुररीव दीना सा मुक्तवत्यायतकान्तनेत्रा ॥ ११ ॥
अस्मिन्मया सार्धमुदारशीला शिलातले पूर्वमुपोपविष्टा[8] ॥
कान्तस्मिता लक्ष्मण जातहासा त्वामाह[9] सीता बहुवाक्यजातम् ॥ १२ ॥
गोदावरीयं सरितां वरिष्ठा प्रिया प्रियाया मम नित्यकालम् ॥
अप्यत्र गच्छेदिति चिन्तयामि नैकाकिनी याति हि सा कदाचित् ॥ १३ ॥
पद्मानना पद्मविशालनेत्रा[10] पद्मानि वाऽनेतुमभिप्रयाता ॥
तदप्ययुक्तं न हि सा कदाचिन्मया विना गच्छति पङ्कजानि ॥ १४ ॥

एवमपि मम देहपातो न जायत इत्यर्थः ॥ ८ ॥ तत् पूर्वमनुभूतं श्लक्ष्णो मधुरः सुव्यक्तः अर्थव्यक्तियुक्तः मृदुः अपरुषः प्रलापो यस्य तत् ॥ ९ ॥ हारपाशस्य हारमालायाः । सदोचितायाः सुव्रतायाः मदन्यं स्प्रष्टुमनिच्छन्त्याः । मम प्रियायाः ग्रीवां शून्ये एकान्ते । विभिद्य रुधिररूपाणि अशनानि पानानि परिपीतवन्ति । नूनं ॥ १० ॥ या विजने वने मया विहीना सा कुररीव क्रौञ्चीव । विनादं मुक्तवती । आयतकान्तनेत्रेत्यनेन तत्काले मदागमनमार्गव्यग्रतोक्ता ॥ ११ ॥ पूर्वं गोदावर्यां सीतया सह सरसलीलाविहारो यस्मिन्कृतस्तस्मिन्प्रदेशे गत्वा तद्दर्शनेन जातपूर्वस्मरणो लक्ष्मणं प्रत्याह । अस्मिन् एवं शून्यतया स्थिते प्रदेशे हि मया पूर्वं निधिर्लब्धः । मया सार्धं प्रणयधारायामहं पण्डितमानी तादृशोहमप्यप्रधानोऽभवं तदीयविदग्धव्यवहारेषु । उदारशीला पूर्वं नगरवासे श्वश्र्वादिसन्निधानेन सङ्कुचितविहारा स्थिता । सीतया सार्धमिति ह्युक्तं । साम्प्रतं तु एकान्तस्थलतया सरसभोगेषु सर्वस्वदानं कृतवती । शिलातले पूर्वमुपोपविष्टा गोदावरीसलिले चिरं सलिलविहारे प्रवृत्ते । खिन्नो रामः प्रदेशान्तरे निस्तरणायोगात् केनचिच्छिलातलमार्गेण निर्गन्तुमालोकितवान् । सीता तु "प्रेक्षितज्ञास्तु कोसलाः" इति न्यायेन कान्तस्य प्रेक्षणातिशयमवगम्य तं पुनः क्लेशयितुं तच्छिलातलं पूर्वमधिरूढा उपोपविष्टा । तत्र यं यं कोणमवलम्ब्योत्थातुमिच्छति तत्तदाक्रम्य मुखे सलिलमभिषिञ्चन्ती स्थिता । वीप्सयैवमवगम्यते । कान्तस्मिता सहजमधुरहासवती । जातहासा स्वविजयकृतहर्षेण संजातहासा । त्वामाह इतःपूर्वं कुत्रापि पराजयाभावात् अधुना स्त्रीतोऽभिनवपराजयाद्रामो लज्जानम्रवदनोऽभूत् । तं विहाय भ्रातरं बहुधा प्रशंसन्तं लक्ष्मणं प्रत्युक्तवती बहुवाक्यजातं । युवां संकल्पितं सर्वं निर्वार्तितवन्तौ हि युवामतिबलपराक्रमशालिनौ पुरुषधौरेयौ वयमबलाजनाः युवां मृगयायै शत्रुहत्यायै चाभियातारौ वयं गृहादनिर्गच्छन्त्यः । युवयोः संकल्पितं सर्वं कर्तुं शक्यं युष्मदग्रजो जितवान्हि इत्येवं बहुमुखं वचनमवोचत् ॥ १२ ॥ नित्यकालं सर्वकालं । अत्र गोदावर्यां । चिन्तयामि तन्न युक्तमिति शेषः ॥ १३ ॥ अभिप्रयाता गोदावरीमिति शेषः । पङ्कजानीत्यत्राप्यानेतुमित्यनुषज्यते ॥ १४ ॥

शि० आयतकान्तनेत्रा आयतेविस्तृते कान्ताय पत्यन्वेषणायनेत्रेयस्यास्स्या ॥ ११ ॥

[पा०] १ ध. केशपाशं. २ ङ. झ. ट. सदोचितांतां. ३ ङ. ट. रुधिरंपिबन्ति. च. छ. ज. ञ. परिपीडयन्ति. ४ क.—ट. शून्येहिभित्त्वा. ५ घ. पिशिताशनानि. ६ क. ख. ङ.—ट. वनेसा. ७ क. ङ.—ट. रात्र्य. ८ ख. घ. मिहोपविष्टा. ९ क. घ. च. छ. झ. ञ. ट. मामाह. १० क. ङ.—ट. पद्मपलाशनेत्रा.

कामं त्विदं पुष्पितवृक्षषण्डं नानाविधैः पक्षिगणैरुपेतम् ॥
वनं प्रयाता नु तदप्ययुक्तमेकाकिनी [1]सोऽतिबिभेति भीरुः ॥ १५ ॥
आदित्य भो लोककृताकृतज्ञ लोकस्य सत्यानृतकर्मसाक्षिन् ॥
मम प्रिया सा क्व गता हृता वा शंसस्व मे [2]शोकवशस्य [3]नित्यम् ॥ १६ ॥
लोकेषु सर्वेषु [4]च नास्ति किंचिद्यत्ते न नित्यं विदितं भवेत्तत् ॥
शंसस्व वायो [5]कुलशालिनीं तां [6]हृता मृता वा पथि वर्तते वा ॥ १७ ॥
[7]इतीव तं शोकविधेयदेहं रामं विसंज्ञं विलपन्त[8]मेवम् ॥
उवाच सौमित्रिरदीनसत्त्वो न्याये स्थितः [9]कालयुतं च वाक्यम् ॥ १८ ॥
शोकं [10]विमुञ्चार्य धृतिं भजस्व सोत्साहता [11]चास्तु विमार्गणेऽस्याः ॥
उत्साहवन्तो हि नरा न लोके सीदन्ति [12]कर्मस्वतिदुष्करेषु ॥ १९ ॥
इतीव सौमित्रिमुदग्रपौरुषं ब्रुवन्त[13]मार्तो [14]रघुवंशवर्धनः ॥
न चिन्तयामास धृतिं विमुक्तवान्पुनश्च दुःखं [15]महदभ्युपागमत् ॥ २० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

अतिबिभेति अत्यन्तं बिभेति ॥१५॥ भो इत्यादित्यस्य संबोधनं । लोकस्य कृताकृते जानातीति तथा । सत्यानृतयोः पुण्यपापयोः कर्मणोः साक्षिन् । "कर्मसाक्षी जगच्चक्षुः" इत्युक्तेः । मम प्रिया क्वगता अथवा हृता केनचिदपहृतेति शंसस्व शंस ॥ १६ ॥ ते नित्यं यन्न विदितं तत् सर्वेषु लोकेषु नास्ति तस्माच्छंसेति ॥१७॥ शोकविधेयः शोकपरवशः । कालयुतं कालोचितं । अदीनसत्त्वः अदीनधृतिः । एवमुवाचेत्यन्वयः॥१८॥ अस्याः सीतायाः । विमार्गणे अन्वेषणे ॥ १९ ॥ उदग्रपौरुषं श्रेष्ठपराक्रमं । इतीव ब्रुवन्तं सौमित्रिं न चिन्तयामास तद्वचनं नादृतवानित्यर्थः । धृतिं च मुक्तवान् ॥ २० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रिषष्टितमः सर्गः ॥ ६३ ॥

ति० लोककृताकृतज्ञेत्यादिना तादृशसूक्ष्मज्ञानवतस्तज्ज्ञानंसर्वथाऽस्तीतिभावः ॥ **स०** लोककृताकृतज्ञ बहिःप्रकाशद्वाराकृताकृतज्ञानिन् । लोकस्यसत्यानृतकर्मसाक्षिन् अन्तः । मूलपुरुषत्वादादित्यंप्रत्युक्तिर्युक्तेतिभावः ॥ १६ ॥ **ति०** कुलपालिनीमित्यनेन तस्यामहत्त्वात्तज्ज्ञानंममनेति वक्तुमशक्यमितिसूचितं ॥ **स०** उत्तरत्रत्वदभिमानिनामरुतैव सर्वकार्यंसाधयिष्यामीति वायुंपृच्छति ॥ १७ ॥ **ति०** इतीवातीवशब्दौपर्यायौ ॥ १८ ॥ इतित्रिषष्टितमस्सर्गः ॥ ६३ ॥

[पा०] १ क.—घ. सातु. २ ङ. झ. ट. शोकहतस्य. ३ ङ. झ. ट. सर्वं. क. ग. च. छ. ज. ञ. सत्यं. ४ क. ङ. च. छ. ञ. ट. नचास्ति. ५ ङ. झ. ट. कुलपालिनीं. ६ ङ. झ. ट. मृताहृतावा. ख. ग. हृताहृतावा. ७ च. छ. ज. ञ. अतीव. ८ घ. ङ. छ.—ट. मेव. ९ क. च. छ. ज. कालहितं. १० ङ. झ. ट. विसृज्याद्य. च. छ. ज. ञ. चमुञ्चार्य. ११ च. छ. ज. वास्तु. १२ ग. च. छ. ज. कर्मस्वपि. १३ ङ. झ. ञ. ट. मार्तं. १४ ङ. झ. ट. रघुवंशसत्तमः. १५ घ. भृशमभ्युपागमत्. च. छ. ज. ञ. महदप्युपागतः. ङ. झ. ट. महदप्युपागमत्.

चतुःषष्टितमः सर्गः ॥ ६४ ॥

रामेणसीतायाः पद्मानयनार्थंगोदावरींप्रतिगमनसंभावनया गोदावरीमेत्यसीतादर्शनप्रश्नः ॥ १ ॥ तथा रावणभयात्सीतावृत्तान्तानभिधानं ॥ २ ॥ ततोनिर्विण्णेनरामेण मृगाणामिङ्गितविज्ञानेनतान्प्रतिप्रश्नः ॥ ३ ॥ तथा तच्चेष्टया नैर्ऋतदिशिसीतागमनंनिर्धारितवतालक्ष्मणेनसह तदाभिमुख्येनगमनं ॥ ४ ॥ तथा मार्गपतितांसंततधारांपुष्पपरंपरांदृष्टवतातेनतेषु लीलापुष्पत्वप्रत्यभिज्ञानं ॥ ५ ॥ तथा भूमौसीतारावणचरणाङ्कानां जटायुभग्नरथसारथिकवचकार्मुकादीनांचावलोकनं ॥ ६ ॥ तथा देवादिभिःकैरपि सीतावृत्तान्तानिवेदने कोपात्सकलभुवनभस्मीकरणप्रतिज्ञानेन धनुषिशरारोपणं ॥ ७ ॥

[1]स दीनो दीनया वाचा लक्ष्मणं वाक्यमब्रवीत् ॥ १ ॥
शीघ्रं लक्ष्मण जानीहि गत्वा गोदावरीं नदीम् ॥ अपि गोदावरीं सीता पद्मान्यानयितुं गता ॥२॥
एवमुक्तस्तु रामेण लक्ष्मणः परवीरहा ॥ नदीं गोदावरीं रम्यां जगाम लघुविक्रमः ॥ ३ ॥
तां लक्ष्मणस्तीर्थवतीं विचित्वा राममब्रवीत् ॥ ४ ॥
नैनां पश्यामि तीर्थेषु क्रोशतो न शृणोति मे ॥ कं नु सा देशमापन्ना वैदेही क्लेशनाशिनी ॥
न[3] ह्यहं वेद तं देशं यत्र सा जनकात्मजा ॥ ५ ॥
लक्ष्मणस्य वचः श्रुत्वा दीनः सन्तापमोहितः ॥ रामः समभिचक्राम स्वयं गोदावरीं नदीम् ॥ ६ ॥
स तामुपस्थितो रामः क्व सीतेत्येवमब्रवीत् ॥ ७ ॥
भूतानि राक्षसेन्द्रेण वधार्हेण हृतामपि ॥ न तां शशंसू रामाय तथा गोदावरी नदी ॥ ८ ॥
ततः प्रचोदिता भूतैः शंसास्मै[6] तां प्रियामिति ॥ न तु साऽभ्यवदत्सीतां पृष्टा रामेण शोचता ॥ ९ ॥

अथ चिह्नविशेषैः सीताहरणनिश्चयश्चतुष्षष्टितमे । लोके कश्चिद्दीनोपि दीनां वाचं न व्याहरति । इदमर्धमेकं वाक्यं ॥ १—२ ॥ लघुविक्रमः त्वरितपदविन्यासः ॥३॥ तीर्थवतीं अवतारवतीं । क्रोशतः आह्वयतः । मे मत्तः । न शृणोति । सेति शेषः ॥ ४—५ ॥ वेद जानामि स तामित्यर्धमेकं वाक्यम् ॥ ६ ॥ भूतानि वन्यानि सत्त्वानि । दृष्टान्तार्थमिदं । यथा पूर्वं पृच्छ्यमानानि भूतानि न शशंसुः तथा गोदावरी च न शशंसेत्यर्थः ॥७–८॥ स्वयं न शशंस । भूतैः प्रचोदितापि न शशंसेत्यर्थः । अस्मत् अस्मदर्थं । पञ्चमी

स० दीनयावाचासहितंलक्ष्मणं सरामोदीनः सन्वाक्यमब्रवीत् । ति० एवंशोककरणं चारद्वाराश्रवणेनरावणस्यमनुष्यत्वबुद्धिदार्ढ्यपूर्वकंस्ववध्यत्वसंपादनायेतिबोध्यं । तदुक्तंब्रह्माण्डपुराणे—"स्त्रीपुंमलानुषङ्गात्मा देहोनास्यविजायते । किंतुनिर्दोषचैतन्यं सुखनित्यांस्वकांतनुम् । प्रकाशयतिसैवेयं जनिर्विष्णोर्नचापरा । तथाप्यसुरमोहार्थं परेषांचक्वचित्क्वचित् । दुःखाज्ञानश्रमादींश्च दर्शयेच्छुद्धसद्गुणः । व्रणादिक्वचाज्ञानंस्वतन्त्राचिन्त्यसद्गुणे । मोक्षाभावायतेषांतुदर्शयेत्तानजोहरिः । कृष्णोह्यत्यक्तदेहोपि त्यक्तदेहस्य देहवत् । लोकानांदर्शयामास स्वरूपसदृशाकृतिम् " इति । एतेन रावणस्येश्वरत्वबुद्धिप्रतिबन्धेनमोक्षाभावोपिशोकफलमित्युक्तं । एवंरावणद्वारासीताहरणमपितत्पुण्यातिशयनाशेनवध्यतासंपादनाय । तथाचकेदारखण्डेउक्ताऽऽख्यायिका । " महतातपसालब्धबलोरावणस्तदधिकतपोबलंविनाजेतुमशक्यः । देवाश्चस्वयंतदधिकंतपःकर्तुमक्षमाः । अतस्तेषांकार्यमत्यन्तानुचितसीतानुरागमोहानुवृत्तिसंपादनेनरावणस्य तपोवीर्यभ्रंशंसंपाद्यकर्तव्यमितिलक्ष्म्यासहविचार्यतदर्थंविष्णुः सीतयाब्रह्मविद्ययासहावतीर्णः "

[पा०] १ सदीनोदीनयावाचा लक्ष्मणंवाक्यमब्रवीत् इतिपादद्वयमध्ये. संशुष्कवदनोभृशम् । अभिराममिदंरामोविललापाकुलेन्द्रियः । त्रिलोकाधिपतिं देवंशक्रं त्वां वेदयाम्यहं । पुरंदर विहारार्हप्रिया भार्याजहातिमाम् । यस्मिन्कालेस्त्रियंकामी लब्ध्वाभूयोपि नन्दति । तस्मिन्सुखोदये काले प्रिया भार्या जहाति माम् । निर्वीर्यइवमातङ्गः परिवृत्तइवोत्सवः । प्रतिभात्ययमावासो गतध्वजइवाहवः । रतिंनैवचविन्दामि तांविनापद्मलोचनाम् । नाशयत्येव सर्वस्वमनुशोचामि भामिनीम् । इतिशोकसमाविष्टो. इतिपादद्वयसहिताइमेश्लोकाः ख. पाठेदृश्यन्ते. २ क. ख. ग. ङ. च. छ. झ. ञ. ट. पुनरेवहि. ३ ङ. च. छ. झ. ञ. ट. नहितंवेद्मिवैरामयत्रसातनुमध्यमा. ४ घ. कर्शितः. ५ छ. ज. तत्रैवस्थितो. च. तत्रावस्थितो. ६ ग. झ. शंसचास्मै. क. ख. घ.—ज. ञ. शंसास्मैतां. ७ क. ङ.—ट. नचसाह्यवदत्. ख. ग. नचसाभ्यवदत्.

रावणस्य च तद्रूपं [1]कर्माणि च दुरात्मनः ॥ ध्यात्वा भयात्तु वैदेहीं सा नदी न [2]शशंस ताम् ॥ १० ॥
निराशस्तु तया नद्या सीताया दर्शने कृतः ॥ उवाच रामः सौमित्रिं सीताऽदर्शनकर्शितः ॥ ११ ॥
एषा गोदावरी सौम्य किंचिन्न प्रतिभाषते ॥ किंनु लक्ष्मण वक्ष्यामि समेत्य जनकं वचः ॥
मातरं चैव वैदेह्या विना तामहमप्रियम् ॥ १२ ॥
या मे राज्यविहीनस्य वेन वन्येन जीवतः ॥ सर्वं [3]व्यपनयेच्छोकं वैदेही क नु सा गता ॥ १३ ॥
[4]ज्ञातिपक्षविहीनस्य [5]राजपुत्रीमपश्यतः ॥ मन्ये दीर्घा भविष्यन्ति रात्रयो मम जाग्रतः ॥ १४ ॥
मन्दाकिनीं [6]जनस्थानमिमं प्रस्रवणं गिरिम् ॥ [7]सर्वाण्यनुचरिष्यामि यदि सीता हि दृश्यते ॥ १५ ॥
एते [9]मृगा महावीर्या मामीक्षन्ते [10]मुहुर्मुहुः ॥ वक्तुकामा इव हि मे इङ्गितान्युपलक्षये ॥ १६ ॥
तांस्तु दृष्ट्वा नरव्याघ्रो राघवः प्रत्युवाच ह ॥ क सीतेति निरीक्षन्वै [11]बाष्पसंरुद्धया [12]दृशा ॥ १७ ॥
एवमुक्ता नरेन्द्रेण ते मृगाः सहसोत्थिताः ॥ दक्षिणाभिमुखाः सर्वे दर्शयन्तो नभःस्थलम् ॥ १८ ॥
मैथिली ह्रियमाणा सा दिशं [13]यामन्वपद्यत ॥ तेन मार्गेण [14]धावन्तो निरीक्षन्ते नराधिपम् ॥ १९ ॥
येन मार्गं च भूमिं च निरीक्षन्ते स्म ते मृगाः ॥ [15]पुनश्च मार्गमिच्छन्ति लक्ष्मणेनोपलक्षिताः ॥ २० ॥
तेषां वचनसर्वस्वं लक्षयामास चेङ्गितम् ॥ उवाच लक्ष्मणो [16]ज्येष्ठं धीमान्भ्रातरमार्तवत् ॥ २१ ॥
क सीतेति त्वया पृष्टा [17]यथेमे सहसोत्थिताः ॥ दर्शयन्ति क्षितिं चैव दक्षिणां च दिशं मृगाः ॥ २२ ॥
साधु गच्छावहे देव [18]दिशमेतां हि नैर्ऋतिम् ॥ यदि [19]स्यादागमः कश्चिदार्या वा साऽथ लक्ष्यते ॥ २३ ॥

॥ ९ ॥ अकथने हेतुमाह—रावणस्येति ॥ १० ॥ निराशः कृत इत्यन्वयः ॥ ११—१२ ॥ वन्येन फलादिना ॥ १३ ॥ ज्ञातयश्च ते पक्षाः सहायाश्च तैर्विहीनस्य ॥ १४—१५ ॥ बाष्पसंरुद्धया दृशा निरीक्षन् निरीक्षमाणः सन् । क सीतेत्युवाच ॥ १६ ॥ उक्ताः पृष्टाः । नभःस्थलं दर्शयन्तः आकाशावलोकनेङ्गितेन सीतागमनमार्गं दर्शयन्तइत्यर्थः । उत्थिताः प्रस्थिताः आकाशमार्गेण दक्षिणां दिशं गता सीतेत्यसूचयन्निति भावः ॥ १७—१८ ॥ अमुमेवार्थं स्पष्टयति—मैथिलीति । ह्रियमाणा सा मैथिली यां दिशमन्वपद्यत प्राप । तेन मार्गेण तयादिशा । धावन्तः सन्तः नराधिपं निरीक्षन्ते ॥ १९ ॥ येन कारणेन । मार्गं आकाशमार्गं । भूमिं दक्षिणां भूमिं च । निरीक्षन्ते स्म । पुनश्च मार्गं दक्षिणमार्गं । इच्छन्ति स्म । गन्तुमिति शेषः । तेन कारणेन मृगाः उपलक्षिताः गृहीतचेष्टार्था आसन् ॥ २० ॥ उक्तमनुवदन्नाह—तेषामिति । वचनसर्वस्वं तत्सदृशमिङ्गितमित्यर्थः । लक्षयामास मृगचेष्टार्थं वचनोक्तमिव ज्ञातवानित्यर्थः । उवाचेत्यन्वयः । आर्तवत् आर्तमिति क्रियाविशेषणं । क्तवतुप्रत्ययः ॥ २१ ॥ केत्यादिश्लोकद्वयमेकान्वयं । यथा येन प्रकारेण दर्शयन्ति तथा गच्छावहै इत्यन्वयः । आर्षमात्मनेपदं । नैर्ऋतिं दक्षिणपश्चिमां राक्षसाधिष्ठितां । तस्याश्चदक्षिणैकदेशत्वाद्दक्षिणां दिशमिति व्यपदेशः । आगमः सीतादर्शनोपायः ॥ २२—

इति ॥ १ ॥ ति० मन्दाकिनी नाम काचिन्नदी ॥ १५ ॥ तनि० अत्ररामाशयाभिज्ञैर्मृगैः सीतागमनदिक्सूचकचेष्टाकरणात्सूक्ष्मालङ्कारः । "सूक्ष्मंपराशयाभिज्ञेतरसाकूतचेष्टितं ।" इतिलक्षणात् ॥ १८ ॥ ति० पुनश्चमार्गंदर्शयितुमिच्छन्तोलक्ष्मणेनोपलक्षिताः तेषामिङ्गितंलक्ष्मणोलक्षयामासेत्यर्थः । आकाशमार्गेणगत्वादक्षिणदिशिदूरेस्थापितासीता दक्षिणदिशिगच्छतेत्येवं तदिङ्गितं तेषांचवचनसर्वस्वभूतंस्वयंलक्षयामास ॥ १९ ॥ ती० तस्यागमः तस्या आगमइत्यर्थः । आर्षोदीर्घः । ज्ञापकंवस्तुदृश्ये-

[पा०] १ ङ. झ. ट. कर्मापिच. २ ङ.—ट. शशंसह. ३ ग. घ. ङ. झ. ञ. ट. व्यपानयच्छोकं. ४ ङ. झ. ज्ञातिवर्ग. ५ ङ. झ. वैदेहीमप्यपश्यतः. ६ घ. जनस्थानंतथाप्रस्रवणं. ७ छ. ज. ञ. संहृष्टोविचरिष्यामि. ८ ङ. झ. लभ्यते. ९ ङ. झ. ट. महामृगावीराः. १० ङ. झ. ट. पुनःपुनः. ११ ख. संदिग्धया. १२ ख. ङ. झ. ट. गिरा. १३ झ. ट. यामभ्यपद्यत. १४ ङ. झ. ट. गच्छन्तो. १५ ट. पुनर्नदन्तोगच्छन्ति. क.—घ. च.—ञ. पुनश्चमार्गमिच्छन्तो. १६ ङ. ट. धीमाञ्ज्येष्ठंभ्रातरं. १७ घ. ङ. झ. ट. यदिमे. क. च. छ. ञ. यथैते. १८ ङ. च. झ. ञ. ट. मेतांच. १९ ङ. झ. ट. तस्यागमः.

बाढमित्येव काकुत्स्थः प्रस्थितो दक्षिणां दिशम् ॥ लक्ष्मणानुगतः श्रीमान्वीक्षमाणो वसुंधराम् ॥२४॥
एवं संभाषमाणौ तावन्योन्यं भ्रातरावुभौ ॥ वसुंधरायां पतितं पुष्पमार्गमपश्यताम् ॥ २५ ॥
तां पुष्पवृष्टिं पतितां दृष्ट्वा रामो महीतले ॥ उवाच लक्ष्मणं वीरो दुःखितो दुःखितं वचः ॥२६॥
अभिजानामि पुष्पाणि तानीमानीह लक्ष्मण ॥ पि[3]नद्धानीह वैदेह्या मया दत्तानि कानने ॥ २७ ॥
मन्ये सूर्यश्च वायुश्च मेदिनी च यशस्विनी ॥ अभिरक्षन्ति पुष्पाणि [4]प्रकुर्वन्तो मम प्रियम् ॥ २८ ॥
एवमुक्त्वा [5]महाबाहुं लक्ष्मणं पुरुषर्षभः ॥ उवाच रामो धर्मात्मा गिरिं [6]प्रस्रवणाकुलम् ॥ २९ ॥
कच्चित्क्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी ॥ [7]रामा रम्ये [8]वनोद्देशे मया विरहिता त्वया ॥ ३० ॥
क्रुद्धोऽब्रवीद्गिरिं तत्र सिंहः क्षुद्रमृगं यथा ॥ ३१ ॥
तां हेमवर्णां [9]हेमाभां सीतां दर्शय पर्वत ॥ यावत्[10]सानूनि सर्वाणि न ते विध्वंसयाम्यहम् ॥ ३२ ॥
एवमुक्तस्तु रामेण पर्वतो मैथिलीं प्रति ॥ [11]शंसन्निव ततः सीतां नादर्शयत राघवे ॥ ३३ ॥
ततो दाशरथी राम उवाच च शिलोच्चयम् ॥ ३४ ॥
मम [12]बाणाग्निनिर्दग्धो भस्मीभूतो भविष्यसि ॥ [13]असेव्यः संततं चैव निरस्तृणद्रुमपल्लवः ॥ ३५ ॥
इमां वा सरितं [14]चाद्य शोषयिष्यामि लक्ष्मण ॥ यदि नाख्याति मे सीता[15]मार्यां चन्द्रनिभाननाम् ॥३६॥
एवं [16]स रुषितो रामो दिधक्षन्निव चक्षुषा ॥ ददर्श भूमौ निष्क्रान्तं राक्षसस्य [17]पदं महत् ॥ ३७ ॥

२३ ॥ श्रीमान् सीताधिगमनहेतुदर्शनश्रीमान् ॥२४॥ एवं साध्वित्याद्युक्तरीत्या । पुष्पमार्गं पुष्पयुक्तमार्गं । मध्यमपदलोपिसमासः ॥ २५ ॥ वीरः दर्शनोपायमात्रे ज्ञाते तांलब्धुंसमर्थः ॥ २६ ॥ तानीमानि पुष्पाणि मया दत्तानि वैदेह्या केशपाशे पिनद्धानि बद्धानीत्यभिजानामि ॥ २७ ॥ अम्लानीकरणात्सूर्यः अनुत्क्षेपणाद्वायुः धारणाद्भूमिश्च रक्षन्तीति भावः ॥ २८ ॥ महाबाहुमित्यनेन बलवत्सहायत्वं । पुरुषर्षभ इत्यनेन स्वतः पराक्रमशालित्वमुक्तं । तथापि धर्मात्मा सहसा गिरेरविनाशकरणात् ॥२९॥ रामा स्त्री ॥ ३० ॥ अदर्शनादाह—क्रुद्ध इति । एकमर्धं ॥ ३१ ॥ हेमवर्णां हेमप्रतिमासदृशीं । हेमाभां स्वर्णतुल्यकान्तिं ॥ ३२ ॥ शंसन्निव प्रतिध्वनिना कथयन्निव । स्वपृष्टस्यैवानुवादेनानादरोक्तिं रामोऽमन्यतेति भावः । ततः अनादरोक्त्या । राघवे विषये सीतां नादर्शयत । "णिचश्च" इत्यात्मनेपदम् ॥ ३३ ॥ दाशरथिरिति हेतुगर्भं । शिलोच्चयं पर्वतं । इदमर्धमेकं ॥ ३४—३५ ॥ इमामिति इयमपि पृष्टा चेन्न वक्ष्यतीति मत्वेति भावः ॥ ३६ ॥ निष्क्रान्तं प्रादुर्भूतं ।

त्यर्थः ॥ २३ ॥ तनि० क्षितिभृतांनाथ पर्वतश्रेष्ठ । सर्वाङ्गसुन्दरी प्रत्यवयवशोभायुक्ता । मयाविरहितारामा रम्येवनोद्देशे त्वयादृष्टाकच्चित् । अस्यैवप्रश्नस्यावृत्त्यायोजने इदमेवोत्तरं । क्षितिभृतांनाथ क्षत्रियश्रेष्ठ । त्वयाविरहिता मयादृष्टेतिकच्चित् । कच्चित्कामप्रवेदने । मयादृष्टेतीदमेवममाप्यत्यन्ताभिमतमित्यर्थः । अत्रैकस्यैववाक्यस्यप्रश्नोत्तररूपत्वाच्चित्रालङ्कारध्वनिः । "कृतप्रश्नोत्तराभिन्नमुत्तरंचित्रमुच्यते ।" इतिलक्षणात् ॥ ३० ॥ ती० हेमाभामित्यनेन लावण्यनिर्देशः । हरिद्रादौहेमवर्णसद्भावेपिलावण्याभावादुभयनिर्देशः ॥ ३२ ॥ तनि० शंसन्निवप्रतिशब्देनकथयन्निव । अत्रप्रतिध्वनिव्यपदेशेनरामंप्रतिसीतादर्शनकथनंव्यज्यते । नादर्शयतेतिरावणाद्भयंव्यज्यते । शि० सीतांदर्शयन् जानन्नपि । राघवे (राघव)समीपे । नादर्शयत नाबोधयत् । एतेन ज्ञापनसमये रावणस्मृतिर्भवतीतिध्वनितं । तेनरावणभीतेरतिप्राबल्यंव्यञ्जितं ॥ ३३ ॥ ति० दिधक्षन्निव ।

[पा०] १ क. च. छ. ञ. लक्ष्मणानुचरः. २ ङ. झ. ट. पुष्पवृष्टिंनिपतितां. ३ क. ङ.—ट. अपिनद्धानिवैदेह्या. ४ ख. प्रकुर्वाणा. ५ क.—ट. महाबाहुर्लक्ष्मणंपुरुषर्षभं. ६ क. च. छ. ञ. प्रस्रवणाभिधं. ७ च. सीता. ८ च. छ. ज. ञ. नैलस्मिन्मया. क. ख. ग. वनेह्यस्मिन्मया. ९ क. च. छ. ज. ञ. सुमुखीं. ङ. झ. ट. हेमाङ्गीं. १० क. ग. घ. च. छ. ज. ञ. त्सर्वाणिसानूनि. ११ ङ. झ. ट दर्शयन्निवतांसीतां. १२ ख. ग. बाणास्त्रनिर्दग्धो. १३ ट. असेव्यःपर्वतश्चैव. क. च. छ. ञ. असेव्यस्त्वंततश्चैव. ङ. झ. असेव्यस्सर्वतश्चैव. १४ च. छ. ज. चैव. १५ क. ग. छ. ज. ञ. ट. सीतामद्य. १६ ङ. झ. ट. प्ररुषितो. १७ च. ज. ञ. महत्पदं.

त्रस्ताया रामकाङ्क्षिण्याः प्रधावन्त्या इतस्ततः ॥ राक्षसेना[1]नुवृत्ताया मैथिल्याश्च[2] पदान्यथ ॥ ३८ ॥
स समीक्ष्य परिक्रान्तं सीताया राक्षसस्य च ॥ भग्नं धनुश्च तूणी च विकीर्णं बहुधा रथम् ॥
संभ्रान्तहृदयो रामः शशंस भ्रातरं प्रियम्[3] ॥ ३९ ॥
पश्य लक्ष्मण वैदेह्या शीर्णाः[4] कनकबिन्दवः ॥ भूषणानां हि सौमित्रे माल्यानि विविधानि च ॥४०॥
तप्तबिन्दुनिकाशैश्च चित्रैः क्षतजबिन्दुभिः ॥ आवृतं पश्य सौमित्रे सर्वतो धरणीतलम् ॥ ४१ ॥
मन्ये लक्ष्मण वैदेही राक्षसैः कामरूपिभिः ॥ भित्त्वाभित्त्वा विभक्ता[5] वा भक्षिता वा भविष्यति ॥४२॥
तस्या निमित्तं वैदेह्या[6] द्वयोर्विवदमानयोः ॥ बभूव युद्धं सौमित्रे घोरं राक्षसयोरिह ॥ ४३ ॥
मुक्तामणिमयं[7] चेदं तपनीय[8]विभूषितम्[9] ॥ धरण्यां पतितं सौम्य कस्य भग्नं महद्धनुः ॥
[राक्षसानामिदं[10] वत्स सुराणामथवाऽपिवा] ॥ ४४ ॥
तरुणादित्यसंकाशं वैडूर्यगुलिकाचितम् ॥ विशीर्णं पतितं भूमौ कवचं कस्य काञ्चनम् ॥ ४५ ॥
छत्रं शतशलाकं च दिव्यमाल्योपशोभितम् ॥ भग्नदण्ड[11]मिदं कस्य भूमौ सम्यङ्[12]निपातितम् ॥४६॥
काञ्चनोरश्छदाश्चेमे पिशाचवदनाः खराः ॥ भीमरूपा महाकायाः कस्य वा निहता रणे ॥ ४७ ॥
दीप्तपावकसंकाशो द्युतिमान्समरध्वजः ॥ अपविद्धश्च भग्नश्च कस्य सांग्रामिको रथः ॥ ४८ ॥
रथाक्षमात्रा विशिखास्तपनीयविभूषणाः[13] ॥ कस्येमेऽभिहता[14] बाणाः प्रकीर्णा घोरकर्मणः[15] ॥ ४९ ॥

इतःपूर्वमदर्शनादेवमुक्तं ॥ ३७ ॥ त्रस्तायाः रावणाद्भीतायाः । रामकाङ्क्षिण्याः रामाश्रमं प्रयातुमुद्युक्तायाः । अतएव राक्षसेनानुवृत्तायाः अनुगतायाः । अतएवेतस्ततो धावन्त्याः । ददर्शेत्यनुवर्तते ॥ ३८॥ स समीक्ष्येति सार्धश्लोक एकान्वयः । परिक्रान्तं परिक्रमं पदन्यासमिति यावत् ॥३९॥ कनकबिन्दवः स्वर्णशकलानि ॥४०॥ तप्तं स्वर्णं ॥ ४१ ॥ मन्य इति । इति मन्य इति योज्यं ॥४२॥ तस्या निमित्तं सुन्दोपसुन्दवत्परिग्रहार्थमित्यर्थः। विवदमानयोः वैमत्यं प्राप्तयोः । "भासनोपसंभाषा–" इत्यादिना आत्मनेपदं ॥ ४३ ॥ मुक्तामणिमयं मुक्तामणिप्रचुरं ॥ ४४॥ वैडूर्यगुलिकाचितं वैडूर्यमणिखचितं ॥४५॥ सम्यक् शतधा भग्नदण्डमित्यन्वयः ॥ ४६ ॥ काञ्चनमयाः उरश्छदाः तनुत्राणि येषां ते । खराः अश्वतराः रासभविशेषा वा ॥ ४७ ॥ द्युतिमत्त्वादेव दीप्तपावकसंकाशः समरे नायकसूचको ध्वजः समरध्वजः । अपविद्धः रथश्च भग्न इति संबन्धः । सांग्रामिकः समरोचितः ॥ ४८ ॥ रथस्याक्षः आधारदण्डः तन्मात्राः तद्वद्दीर्घप्रमाणाः । प्रमाणे मात्रच् । विशिखाः विगतशिखाः मुण्डाग्रा इत्यर्थः । विगतफलभागा इति वा । अभिहताः भग्नाः । प्रकीर्णाः इतस्ततो विप्रकी-

---

सर्वंजगदितिशेषः ॥ दिधक्षन्निव नतुवास्तवीदिधक्षेतिभावः ॥ ३७ ॥ अनुसृप्तायाः अनुगम्यमानायाः । जटायुयुद्धसमयेसीतायारावणेनभूमौविसृज्यपुनर्ग्रहणादेवमुक्तिः ॥ ३८ ॥ **शि०** हेलक्ष्मण कामरूपिभिःराक्षसैः भित्वाभित्वाविभक्तासतीभक्षिता अनैवभविष्यतीतिमन्ये । एकोवाएवार्थे । अपरइत्यर्थे । एतेनतस्यानित्यत्वंसूचितं ॥ ४२ ॥ **शि०** द्वयोः राक्षसयोरिहयुद्धं बभूव । एतेनतयोरन्यतरशरीरजमितिव्यञ्जितं । बलवत्त्वेनराक्षससदृशपरैकराक्षसशब्देनैकशेषान्नमृषावाचित्वसंसर्गः ॥ ४३ ॥ **ती०** रथाक्षमात्राः चतुश्शताङ्गुलपरिमिताः । तदुक्तंशिल्पिप्रश्ने " अष्टाशीतिशतमीषातिर्यगक्षश्चतुश्शतः ।" इति ॥ ४९ ॥

[पा०] १ क. नाभितप्तायाः. ङ.—ट. नानुसृप्तायाः. २ ङ.—ट. वैदेह्याश्चपदानितु. घ. वैदेह्याश्चपदान्यपि. ३ क. प्रति. ४ ङ. झ. ट. कीर्णाः. ५ क. च. छ. ज. ञ. विभक्ताङ्गं. ६ ङ.—ट. सीतायाः. ७ क. च. छ. ज. मणिविचित्रंच. ख.—ङ. झ. ञ. ट. मणिचितंचेदं. ८ ङ. झ. रमणीयं. ९ ङ.—ज. विभूषणं. १० इदमर्धं ङ. झ. ञ. ट. पाठेषुदृश्यते. ११ ङ. झ. ट. मिदंसौम्य. १२ क.—घ. च. छ. ज. ञ. सौम्यनिपातितं. ङ. झ. ट. कस्यनिपातितं. १३ क. छ. ज. ञ. विभूषिताः. १४ क. ङ.—ज. ञ. कस्येमेविहताः. ख. घ. झ. ट. कस्येमेनिहताः. १५ घ. भीमकर्मणः. ङ. झ. ट. घोरदर्शनाः.

शरावरौ शरैः पूर्णौ विध्वस्तौ पश्य लक्ष्मण ॥ प्रतोदाभीषुहस्तो वै कस्यायं सारथिर्हतः ॥
[सारथिं हतवान्को वा महाबलपराक्रमः] ॥ ५० ॥
कस्येमौ पुरुषव्याघ्र शयाते निहतौ युधि ॥ चामरग्राहिणौ सौम्य सोष्णीषमणिकुण्डलौ ॥ ५१ ॥
पदवी पुरुषस्यैषा व्यक्तं कस्यापि रक्षसः ॥ वैरं शतगुणं पश्य ममेदं जीवितान्तकम् ॥ ५२ ॥
सुघोरहृदयैः सौम्य राक्षसैः कामरूपिभिः ॥ हृता मृता वा सीता सा भक्षिता वा तपस्विनी ॥ ५३ ॥
न धर्मस्त्रायते सीतां ह्रियमाणां महावने ॥ ५४ ॥
भक्षितायां हि वैदेह्यां हृतायामपि लक्ष्मण ॥ के हि लोकेऽप्रियं कर्तुं शक्ताः सौम्य ममेश्वराः ॥ ५५ ॥
कर्तारमपि लोकानां शूरं करुणवेदिनम् ॥ अज्ञानादवमन्येरन्सर्वभूतानि लक्ष्मण ॥ ५६ ॥
मृदुं लोकहिते युक्तं दान्तं करुणवेदिनम् ॥ निर्वीर्य इति मन्यन्ते नूनं मां त्रिदशेश्वराः ॥ ५७ ॥
मां प्राप्य हि गुणो दोषः संवृत्तः पश्य लक्ष्मण ॥ अद्यैव सर्वभूतानां रक्षसामभवाय च ॥ ५८ ॥
संहृत्यैव शशिज्योत्स्नां महान्सूर्य इवोदितः ॥ संहृत्यैव गुणान्सर्वान्मम तेजः प्रकाशते ॥ ५९ ॥

र्णाः ॥ ४९ ॥ शरानावृणुत इति शरावरौ निषङ्गौ । प्रतोदः तोत्रं । अभीषवः रश्मयः । "अभीषुः प्रग्रहे रश्मौ" इति शाश्वतः ॥ ५० ॥ उष्णीषः शिरोवेष्टनं ॥ ५१ ॥ एषा पदवी मार्गः । पुरुषस्य जघनभागनिम्नत्वाद्यभावात् । तत्रापि रक्षसः पदवी विषमरूपत्वात् । एवं च मम राक्षसैः सह इदं वैरं शतगुणं सत्तेषां जीवितमन्तयति विनाशयतीति जीवितान्तकं संपन्नं पश्य । एतावत्पर्यन्तं राक्षसैस्तीव्रवैराकरणात्तदपराधःसोढः संप्रति तान्समूलं नाशयिष्यामीति भावः ॥ ५२ ॥ मृता मारिता ॥ ५३ ॥ अस्यामवस्थायामरक्षकत्वाद्धर्मेपि रोषो जात इत्याह—न धर्म इति । इदमर्धमेकं ॥ ५४ ॥ न केवलं धर्मे तत्फलप्रददेवेषु च रोषो जात इत्याह—भक्षितायामिति । के वा ईश्वराः मम अप्रियं कर्तुं शक्ता इत्यन्वयः । आद्यो हिः पादपूरणे । द्वितीयः प्रसिद्धौ ॥ ५५ ॥ तर्हीदानीं कथमप्रियं तैः कृतमित्यत्राह—कर्तारमिति। लोकानांकर्तारमपि शूरमपि संहारकरणसमर्थमपि । करुणवेदिनं कारुण्यपरंपुरुषं । सर्वभूतानि अज्ञानादवमन्येरन् नाद्रियेरन् । लोकस्वभावोऽयमितिभावः ॥ ५६ ॥ विशिष्य गर्विता देवाः मां नाद्रियेरन्नित्याह—मृदुमिति । लोकहिते युक्तं सक्तं । अतएव मृदुं कोमलहृदयं । अतएव करुणवेदिनं दान्तं विषयचापलरहितंमां निर्वीर्यं मन्यन्ते । अज्ञत्वाविशेषादिति भावः ॥ ५७ ॥ गुणः कारुण्यादिः । मां प्राप्य दोषःसंवृत्तः अनिष्टसाधनत्वेनसंवृत्तः । तस्मादस्मदवमानहेतुतया दोषरूपेण गुणेन किं प्रयोजनमित्यर्थः । यद्वा सर्वभूतानां रक्षसां च अभवाय नाशाय । गुणः दोषःसंवृत्तः । दयांत्यक्त्वाक्रोधंकरिष्यामीत्यर्थः ॥ ५८ ॥ यथा उदितःसूर्यः शशिज्योत्स्नां शीतलचन्द्रचन्द्रिकां । संहृत्यैव प्रकाशते । तथा ममतेजः गुणान् मृदुत्वादीन् । संहृत्यैव निरस्यैव प्रकाशते

शि० यतः अमृता मरणधर्मरहिता । अतएव नभक्षितावैदेही हृतैव । महावनेह्रियमाणांसीतां । धर्मं एवत्रायते ॥ ५३ ॥ शि० भक्षितायां रुद्रादिद्वारासकललोकसंहारकर्त्र्यां । वैदेह्यां हृतायांसत्यां ममप्रियंकर्तुंलोकेकेईश्वराः । ब्रह्मविष्णुमहेशाद्यन्यतमाः समर्थाः नकेपीत्यर्थः । अत्ररुद्रादिद्वारासकललोकसंहारकर्त्र्यां हृतायामित्युक्त्याऽपहरणमपिकस्यैचिन्निमित्ताय तदिच्छयैवजातमितिसूचितं । तेनापहरणकर्तुस्तत्परिकरवर्तित्वंसूचितं । भक्षिताशब्दः कर्तृनिष्ठान्तः । कर्मणोऽविवक्षितत्वेनाकर्मकत्वात् ॥ ५५ ॥ शि० करुणवेदिनं करुणोदयालुरेववेदीदयालुत्वसमानाधिकरणसकलविषयकज्ञानवन्तमित्यर्थः । ति० करुणवेदिनं करुणंयथातथावेदितुंशीलमस्यतं । दयादृष्ट्यातूष्णींस्थितं अज्ञानात् तद्दौर्भवाज्ञानात् अवमन्येरन् किमयंकुपितोऽपिकरिष्यतीतिनगणयन्तीत्यर्थः ॥ ५६ ॥ तनि० सर्वभूतानां राक्षसानुकूलतयायानिभूतानिप्रवर्तन्ते तेषां । रक्षसांच अभवाय नाशाय ॥ ५८ ॥ तनि० शशिज्योत्स्नामित्युपलक्षणं । उदितोमहान्सूर्यः अनायासेन शशिज्योत्स्नादीनितेजांस्यपहृत्ययथाप्रका-

[पा०] १ ङ. झ. ट. हस्तोयंकस्यवा. २ इदमर्धं घ. पाठेदृश्यते. ३ च. छ. ज. ञ. पापैर्ममासीत. ४ ख. ग. घ. साघोर. ५ ख. ग. घ. सीतापि. क. च. छ. ज. सीता हि. ङ. झ. ञ. ट. वैदेही. ६ क. सीतायां. ७ क. वादिनं.

नैव यक्षा न गन्धर्वा न पिशाचा न राक्षसाः ॥ किन्नरा वा मनुष्या वा सुखं प्राप्स्यन्ति लक्ष्मण ॥६०॥
ममास्त्रबाणसंपूर्णमाकाशं पश्य लक्ष्मण ॥ [1]निःसंपातं करिष्यामि ह्यद्य त्रैलोक्यचारिणाम् ॥ ६१ ॥
सन्निरुद्धग्रहगणमावारितनिशाकरम् ॥ विप्रनष्टानलमरुद्भास्कर[2]द्युतिसंवृतम् ॥ ६२ ॥
विनिर्मथितशैलाग्रं शुष्यमाणजलाशयम् ॥ ध्वस्तद्रुमलतागुल्मं [3]विप्रणाशितसागरम् ॥
त्रैलोक्यं तु करिष्यामि संयुक्तं काल[4]धर्मणा ॥ ६३ ॥
[5]न तां कुशलिनीं सीतां प्रदास्यन्ति [6]ममेश्वराः ॥ अस्मिन्मुहूर्ते सौमित्रे मम द्रक्ष्यन्ति विक्रमम् ॥६४॥
नाकाशमुत्पतिष्यन्ति सर्वभूतानि लक्ष्मण ॥ मम [7]चापगुणोन्मुक्तैर्बाणजालैर्निरन्तरम् ॥ ६५ ॥
[8]अर्दितं मम नाराचैर्ध्वस्तभ्रान्तमृगद्विजम् ॥ समाकुलममर्यादं जगत्[9]पश्यार्य लक्ष्मण ॥ ६६ ॥
आकर्णपूर्णैरिषुभिर्जीवं[10]लोकं दुरावरैः ॥ करिष्ये मैथिलीहेतोरपिशाचमराक्षसम् ॥ ६७ ॥
मम [11]रोषप्रयुक्तानां [12]सायकानां बलं सुराः ॥ [13]द्रक्ष्यन्त्यद्य विमुक्ताना[14]मतिदूरातिगामिनाम् ॥ ६८ ॥
नैव देवा [15]न दैतेया न पिशाचा न राक्षसाः ॥ भविष्यन्ति मम क्रोधात्त्रैलोक्ये विप्रणाशिते ॥६९॥
देवदानवयक्षाणां लोका ये रक्षसामपि ॥ बहुधा [16]नभविष्यन्ति बाणौघैः शकलीकृताः ॥ ७० ॥
निर्मर्यादा[17]निमाँल्लोकान्[18]करिष्याम्यद्य सायकैः ॥ हृतां मृतां वा सौमित्रे न दास्यन्ति [19]ममेश्वराः॥७१॥
[20]तथारूपां हि वैदेहीं न दास्यन्ति यदि प्रियाम् ॥ नाशयामि जगत्सर्वं त्रैलोक्यं सचराचरम् ॥७२॥

॥ ५९ ॥ देवविषयःकोपस्तत्संबन्धिष्वपि प्रवर्ततामित्याह—नैवेति ॥ ६० ॥ अस्त्राणि ब्रह्मास्त्रादीनि । पश्य उत्तरक्षणइतिशेषः । त्रैलोक्यचारिणां निःसंपातं बाणप्रचारतोऽशक्यसंचारं ॥ ६१ ॥ सन्निरुद्धेत्यादिसार्धश्लोकद्वयमेकान्वयं । सन्निरुद्धः ग्रहगणः ग्रहगणसंचारः यस्य ।आवारितः आच्छादितः । विप्रनष्टानलमरुत् नष्टाग्निवातं । भास्करद्युतिसंवृतं संवृतभास्करद्युति । आहिताग्न्यादित्वान्निष्ठायाःपरनिपातः । कालसाध्योधर्मः कालधर्मः विनाशः तेन कालधर्मणा । अनिजार्षः ॥ ६२—६३ ॥ न तामिति । तस्मादस्मिन्मुहूर्त इत्युपस्कार्यं । कुशलिनीं क्षेमयुक्तां। अक्षतामित्यर्थः ॥ ६४ ॥ गुणो मौर्वी ॥ ६५ ॥ अर्दितं हिंसितं । समाकुलं सम्यग्व्यग्रं । अमर्यादं त्यक्तस्वस्वप्रकृत्यवस्थानं ॥ ६६ ॥ दुरावरैः दुर्वारैः । जीवलोकं ब्रह्माण्डं ॥ ६७ ॥ रोषप्रयुक्तानां रोषसंप्रयुक्तानां । ममेति शेषः । अतिदूरातिगामिनां अतिदूरातिपातिनां ॥ ६८ ॥ नभविष्यन्ति नशिष्यन्तीत्यर्थः । पूर्वं दुःखप्राप्तिरेवोक्ता ॥ ६९ ॥ बहुधा शकलीकृता इत्यन्वयः ॥ ७० ॥ निर्मर्यादान् स्वस्वव्यवस्थारहितान् । न दास्यन्ति न दास्यन्ति यदि ॥७१॥ हृतां मृतां वेत्यत्र सूचितमाह—तथारूपामिति । जगत्सर्वं सर्वं जनमित्यर्थः । अन्यथा त्रैलोक्यमित्य-

---

शते तद्वन्ममतेजः सकलवस्तुगुणान् संहृत्यप्रकाशते॥ ५९ ॥ **ती०** 'विप्रनष्टाखिलमहद्भास्करद्युति' इत्यपिपाठः । तस्यायमर्थः । विप्रनष्टाः अखिलमहतां भास्करस्यचद्युतयोयस्मिंस्तत् । अतएवसंवृतं । तमसेतिशेषः । कालकर्मणा विनाशेन । संयुक्तंकरिष्यामीत्यन्वयः ॥ ६२ ॥ **शि०** अमर्षात् राक्षसकृतबहुदुष्कृतासहनाद्धेतोः । रोषप्रयुक्तानां क्रोधात्त्यक्तानां । विमुक्तानां विशेषेण मुक्तंसंसारान्मोक्षोयैस्तेषां । दूरगामिनां विशिखानांबाणानांबलं सुराद्रक्ष्यन्ति । एतेन सुरकार्यार्थमेवायमुद्योगइतिध्वनितं ॥ ६८॥ **ति०** अत्रनदास्यन्तीतिपौनरुक्त्यं क्रोधातिशयान्नदोषाय ॥ ७१ ॥ ७२ ॥

[पा०] १ ङ. झ. ट. असंपातं. २ ख. द्युतिवर्जितं. ३ ख. संप्रणाशित. ४ ङ. ज. झ. ट. कालकर्मणा. ५ ङ. झ. ट. नते. ६ क. ग. यदीश्वराः. ख. महेश्वराः ७ ङ—ट. चापमुखान्मुक्तैः. क. ख. घ. ज. चापगुणान्मुक्तैः. च. चापगुणैर्मुक्तैः. ८ ख.—ज. ञ. ट. मर्दितं. ९ क. ख. ग. ङ.—ट. पश्याद्य. १० ङ. छ—ट. लोकदुरावारैः. ११ ख. ग. रोषप्रमुक्तानां. १२ ङ. झ. ट. विशिखानां. १३ क. च. छ. ज. ञ. द्रक्ष्यन्तिज्याविमुक्तानां. १४ क. च छ. ज. ञ. ममर्षाद्दूरपातिनां. ख. ग. ङ. झ. ट. ममर्षाद्दूरगामिनां. १५ क. नगन्धर्वाः. १६ क. ख. ङ. छ.—ट. निपतिष्यन्ति. १७ क. ख. ग. च. छ. ज. ञ. नहंलोकान्. १८ क. च. छ. ज. ञ. करिष्येमम. १९ ख. यदीश्वराः. २० क. ग. घ. च. छ. ञ. यथारूपां.

इत्युक्त्वा रोषताम्राक्षो रामो निष्पीड्य कार्मुकम् ॥ शरमादाय संदीप्तं घोरमाशीविषोपमम् ॥७३॥
[1]सन्धाय धनुषि श्रीमान्रामः परपुरञ्जयः ॥ [2]युगान्ताग्निरिव क्रुद्ध इदं वचनमब्रवीत् ॥ ७४ ॥
यथा जरा यथा मृत्युर्यथा कालो यथा विधिः ॥ [3]नित्यं न प्रतिहन्यन्ते सर्वभूतेषु लक्ष्मण ॥
तथाऽहं क्रोधसंयुक्तो न [4]निर्वार्योस्मि सर्वथा ॥ ७५ ॥

पुरेव मे चारुदतीमनिन्दितां दिशन्ति सीतां यदि नाद्य मैथिलीम् ॥
सदेवगन्धर्वमनुष्यपन्नगं जगत्सशैलं परिवर्तयाम्यहम् ॥ ७६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

पञ्चषष्टितमः सर्गः ॥ ६५ ॥

सीताहरणकोपेन सकललोकसंहरणसमुद्युक्तंरामंप्रति लक्ष्मणेन सयुक्तिकवचनोपन्यासेनपरिसान्त्वनम् ॥ १ ॥

तप्यमानं तथा रामं सीताहरणकर्शितम् ॥ लोकानाम[5]भवे युक्तं सं[6]वर्तकमिवानलम् ॥ १ ॥
वीक्षमाणं धनुः सज्यं निःश्वसन्तं [7]पुनःपुनः ॥ [8]दग्धुकामं जगत्सर्वं [9]युगान्ते तु यथा हरम् ॥ २ ॥

नेन पुनरुक्तिः । सचराचरमित्यनुवादः ॥७२॥ इत्युक्त्वेतिश्लोकद्वयमेकान्वयं । निष्पीड्य दृढमुष्टिबलेन गृहीत्वा ॥ ७३—७४ ॥ यथेत्यादिःसार्धश्लोकः । विधिः अदृष्टं । जरादयो यथा न प्रतिहन्यन्ते तथाहं न निवार्यः । अन्ये यथाशब्दाः पादपूरणार्थाः । यद्वा बहुवचनमविवक्षितं । प्रतिहन्यत इति प्रत्येकमन्वयः ॥ ७५ ॥ पुरेव मे चारुदतीं मायामृगंप्रतिगमनात्पूर्वं कान्तंमांप्रति इमंमृगं गृहीत्वामह्यं देहीतिहर्षेण यत् स्मितं कृतवती । तेन सहैव न दास्यन्ति चेत् अनिन्दितां तामलब्ध्वा जगदुपसंहारंकरिष्यामि चेदपि इदंनिन्दितमिति न केपि वक्ष्यन्तीति भावः । वक्ष्यते हि "यदि रामः समुद्रान्तां मेदिनीं परिवर्तयेत्। अस्या हेतोर्विशालाक्ष्या युक्तमित्येव मे मतिः" इति सर्वज्ञेन हनुमता । चारुदतीमित्यत्र "छन्दसि" इति सूत्रेण दन्तशब्दस्य दत्रादेशः । "अग्रान्त–" इति सूत्रस्थचकारेण वा दत्रादेशः । सीतां अयोनिजतया मत्तोप्यतिशयितां । मैथिलीं वीरश्रेष्ठजनकचक्रवर्तिपुत्रीत्वेन मत्सदृशीं । सदेवेत्यादि सर्वलोकस्य संभूतमरणमेव करिष्यामीति भावः । परिवर्तयामि नाशयामि अन्यथाकरिष्यामीति वा । अस्मिन्सर्गे सार्धपञ्चसप्ततिश्लोकाः ॥७६॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुःषष्टितमः सर्गः ॥६४॥

एवं जगदुपसंहारक्रोधकलुषं रामं लक्ष्मणःसन्धुक्ष(सान्त्व)यति पञ्चषष्टितमे । तप्यमानमित्यादिश्लोकत्रयमेकान्वयं । तप्यमानं तपन्तं । तथातप्यमानमित्यनेन पूर्वोक्तजगदुपसंहारवाचस्तप्रत्वक्तृताः नतुसंकल्प-

---

तनि० अनेनाप्रतिहतसंकल्पत्वंपरैरनभिभवनीयत्वंचकथितं । अत्रयथेतिपदावृत्त्यानप्रतिहन्यन्तइत्यप्रतिक्रिया स्वरूपावृत्तिः । दीपकालङ्कारः ॥ **ति०** नन्वेवंविधःक्रोधः कथमस्य किमर्थंचेतिचेच्छृणु—मनुष्यदेहधारणेनतद्व्यवहारनटनमेवैतत् । किंचईदृशदुःखकालेऽस्यक्रोधाभावेरावणोमनुष्यबुद्धिंकुर्यात् । तथाचतद्वधोशक्यःस्यादित्येतदर्थंचसः । मृत्युंमरणधर्मेणयोजयामीत्यादिवचोपिरावणवचोवदेव ॥ आरोपितक्रोधमूलकत्वात् । अतएवशरैर्विधमिष्यामीत्युक्तिः। लक्ष्मणस्तुतत्वज्ञोपितद्वदेवातत्वज्ञइवतन्मायामोहितोवाप्रलयकालिकरौद्रशक्त्यावेशंसंभाव्यानुनयतिस्म । किंचास्यक्रोधस्यारोपितत्वाभावेऽद्यसीतायाअलाभेसर्वजगत्परिवर्तनंप्रतिज्ञायकथं लक्ष्मणप्रार्थनयापितामन्यथयेत् । अन्यथाकैकेय्यग्रेकृतां वनवासप्रतिज्ञांकथंकौसल्यावचसानत्यक्तवान् । तस्मात्सायथार्था । इयंत्वारोपितेत्येवसारं । अनेनव्यवहारेणक्रोधादिकालेकृतायाअयुक्तायाअपिप्रतिज्ञायाअपालनेऽत्यन्तदोषाभावइत्यपिसूचितं ॥ ७५ ॥ इतिचतुष्षष्टितमःसर्गः ॥ ६४ ॥

[पा०] १ क. ग. ङ.—ट. संदधे. २ घ. युगान्ताग्निसमः. ३ घ. ननित्यं. ४ ङ. छ. ज. झ. ट. निवार्योस्म्यसंशयं. ग. निवार्योस्मिसंयुगे. ५ घ. महिते. ६ ञ. ट. सांवर्तक. घ. संवर्तइवचानलं. ७ क. ग. मुहुर्मुहुः. ८ क. ख. ग. च. छ. ज. हन्तुकामंपशुंरुद्रंकुद्धंदक्षक्रतौयथा. ९ ङ. झ. ञ. ट. युगान्तेच.

अदृष्टपूर्वं संक्रुद्धं दृष्ट्वा रामं तु लक्ष्मणः ॥ अब्रवीत्प्राञ्जलिर्वाक्यं मुखेन परिशुष्यता ॥ ३ ॥
पुरा भूत्वा मृदुर्दान्तः सर्वभूतहिते रतः ॥ न क्रोधवशमापन्नः प्रकृतिं हातुमर्हसि ॥ ४ ॥
चन्द्रे लक्ष्मीः प्रभा सूर्ये गतिर्वायौ भुवि क्षमा ॥ एतच्च नियतं सर्वं त्वयि चानुत्तमं यशः ॥५॥
एकस्य नापराधेन लोकान्हन्तुं त्वमर्हसि ॥ न तु जानामि कस्यायं भग्नः सांग्रामिको रथः ॥
केन वा कस्य वा हेतोः सायुधः सपरिच्छदः ॥ ६ ॥
खुरनेमिक्षतश्चायं सिक्तो रुधिरबिन्दुभिः ॥ देशो निर्वृत्तसंग्रामः सुघोरः पार्थिवात्मज ॥ ७ ॥
एकस्य तु विमर्दोयं न द्वयोर्वदतां वर ॥ न हि वृत्तं हि पश्यामि बलस्य महतः पदम् ॥ ८ ॥
नैकस्य तु कृते लोकान्विनाशयितुमर्हसि ॥ युक्तदण्डा हि मृदवः प्रशान्ता वसुधाधिपाः ॥ ९ ॥
सदा त्वं सर्वभूतानां शरण्यः परमा गतिः ॥ को नु दारप्रणाशं ते साधु मन्येत राघव ॥ १० ॥
सरितः सागराः शैला देवगन्धर्वदानवाः ॥ नालं ते विप्रियं कर्तुं दीक्षितस्येव साधवः ॥ ११ ॥
येन राजन्हृता सीता तमन्वेषितुमर्हसि ॥ मद्द्वितीयो धनुष्पाणिः सहायैः परमर्षिभिः ॥ १२ ॥
समुद्रं च विचेष्यामः पर्वतांश्च वनानि च ॥ गुहाश्च विविधा घोरा नदीः पद्मवनानि च ॥ १३ ॥
देवगन्धर्वलोकांश्च विचेष्यामः समाहिताः ॥ यावन्नाधिगमिष्यामस्तव भार्यापहारिणम् ॥ १४ ॥
न चेत्साम्ना प्रदास्यन्ति पत्नीं ते त्रिदशेश्वराः ॥ कोसलेन्द्र ततः पश्चात्प्राप्तकालं करिष्यसि ॥ १५ ॥

पूर्वाइत्युच्यते । रामंदृष्ट्वा राममब्रवीदिति क्रियाभेदान्नपुनरुक्तिदोषः । अभवे विनाशे । युक्तं उद्युक्तं । संवर्तकं संहारकं । अदृष्टपूर्वमिति क्रोधनक्रियाविशेषणं । परिशुष्यता लोकविनाशभयेनेति भावः ॥ १—३ ॥ क्रोधवशमापन्नःसन् प्रकृतिं मृदुत्वादिनिजस्वभावं । न हातुमर्हसि ॥ ४ ॥ लक्ष्म्यादिकमेकैकस्य प्रतिनियतं त्वयितु एतत्सर्वंच यशश्च प्रतिनियतमित्यर्थः ॥ ५ ॥ मम दान्ततयैवैतादृशीदशाजाता अधुनापियदिक्रोधोनस्यात् कोवाममवित्रस्येत् कथंचसीताप्राप्तिरित्याशङ्क्याह—एकस्येति । अर्धत्रयमेकान्वयं । अयंभावः । एकोरथोदृश्यते एकस्यैवपदंप्रतीयते । तेन एक एवापराधीतिनिश्चीयते । एकस्यचापराधेन सर्वान् हन्तुंनार्हसि । तर्हिकोवाऽपराधीत्यत्राह—नत्विति । केन प्रतिपक्षिणा कस्य प्रयोजनस्य हेतोः । "षष्ठी हेतुप्रयोगे" इति षष्ठी । प्रकृतादन्यस्माद्वा निमित्तादिति न जानामि । तच्चिन्तनीयमित्यर्थः । सपरिच्छदः सपरिकरः ॥ ६ ॥ खुरेति अश्वानां खुरैः रथनेमिभिः रथाङ्गैश्च क्षतः । निर्वृत्तसंग्रामः दृश्यत इति शेषः ॥ ७ ॥ विमर्दः संप्रहारः । तत्र हेतुमाह—नहीति । वृत्तं संक्रान्तं ॥ ८ ॥ वक्तव्यमुक्त्वा प्रकृतमाह—नैकस्येति । युक्तदण्डाः अपराधोचितशिक्षणप्रवर्तकाः ॥ ९ ॥ विशिष्य तवायं धर्म इत्याह—सदेति । शरण्यः शरणार्हः । परमा गतिः परमप्राप्यः । देवादिकृतोऽयमपराधो नेत्याह—को न्विति ॥१०॥ दीक्षितस्य उपक्रान्तयज्ञानुष्ठानस्य । साधवः ऋत्विजः ॥ ११ ॥ परमर्षिभिः एतद्वनस्थैः ॥ १२ ॥ विचेष्यामः अन्वेषिष्यामहे ॥ १३—१४ ॥ प्राप्तश्चतुर्थोपायकालोय-

स० अदृष्टपूर्वमितिविशेष्येणस्वरसान्वयिसत् विशेषणीभूतेक्रोधेऽन्वेति । ततश्चादृष्टपूर्वक्रोधवन्तमित्यर्थः ॥ ३ ॥ **तनि०** अत्रयशश्शब्देन"नतस्येशेकश्चनतस्यनाममहद्यशः" इत्युक्तनिस्सीमाभ्यधिकत्वादिगुणाः प्रतिनियताइत्युपलक्ष्यन्ते ॥ ५ ॥ **शि०** एकस्यराक्षसस्यापराधेन लोकान्सर्वजनान् हन्तुंत्वंनार्हसि । एतेनविभीषणकर्मकविघातजनितभीतिमत्त्वंलक्ष्मणस्यसूचितं ॥ ६ ॥ **स०** बलस्य सैन्यस्य । वृत्तं भुविकृतचिह्नं ॥ ८ ॥ **ती०** युक्तदण्डाः यथापराधदण्डाः ॥ ९ ॥ **ती०** दीक्षितस्य प्रक्रान्तयज्ञानुष्ठानस्य । साधवः ज्ञानसंपन्ना ऋत्विजः । विप्रियं शापाद्यपचारं । कर्तुंनसमर्थाः । "नैनंशप्तंनाभिचरितमागच्छति" इत्यादिश्रुतिबलादितिभावः ॥ ११ ॥ **स०** पर्वताश्चअनिनश्चतत्रत्याः प्राणिनश्च वनानिचेत्येतानि ॥१३॥ **ति०** यद्यस्मात्

[पा०] १ क. ङ.—ट. सलक्ष्मणः. २ ङ. झ. ट. नित्यंत्वयि. ३ ङ. च. छ. ज. ञ. लोकांस्त्वंहन्तुमर्हसि. ४ ङ. झ. संयुगः. ५ ख. च. छ. ज. ञ. रथनेमि. ६ क. सिक्तःशोणितबिन्दुभिः. ग. सिक्तःक्षतजबिन्दुभिः. ७ क. च. छ. ज. ञ. मन्वेष्टुंत्वमर्हसि. ८ ठ. पर्वतानिवनानिच. ९ ङ. झ. ट. पद्मिन्योविविधास्तथा. क. ख. च. छ. ज. ञ. नलिनीःपार्वतीश्चह. १० क. च. छ. ज. ञ. पश्चाद्बाणमोक्षं. ११ घ. विधास्यति.

[1]शीलेन साम्ना विनयेन सीतां नयेन न प्राप्स्यसि चेन्नरेन्द्र ॥
ततः [2]समुत्पादय हेमपुङ्खैर्महेन्द्रवज्रप्रतिमैः शरौघैः ॥ १६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

षट्षष्टितमः सर्गः ॥ ६६ ॥

लक्ष्मणेन सीतावियोगेनशोचन्तंरामंप्रति वसिष्ठादिदृष्टान्तप्रदर्शनेन कर्मफलभोगस्यावश्यंभावित्वोक्त्यासमाश्वासनपूर्वकं लोकसंहरणोद्यमनिवृत्त्या सीतापहारिणोनिर्धारणेन तदसुहरणकरणोक्तिः ॥ १ ॥

तं तथा [3]शोकसंतप्तं विलपन्तमनाथवत् ॥ मोहेन [4]महताऽऽविष्टं परिद्यूनम[5]चेतनम् ॥ १ ॥
ततः सौमित्रिराश्वास्य [6]मुहूर्तादिव लक्ष्मणः ॥ रामं संबोधयामास चरणौ चाभिपीडयन् ॥ २ ॥
महता [7]तपसा राम महता चापि कर्मणा ॥ राज्ञा दशरथेनासि लब्धोऽमृतमिवामरैः ॥ ३ ॥
तव चैव गुणैर्बद्धस्त्वद्वियोगान्महीपतिः ॥ राजा देवत्वमापन्नो भरतस्य यथा श्रुतम् ॥ ४ ॥
यदि [8]दुःखमिदं प्राप्तं काकुत्स्थ न सहिष्यसे ॥ प्राकृतश्चाल्पसत्त्वश्च इतरः कः सहिष्यति ॥ ५ ॥
[9]दुःखितो हि भवाँल्लोकांस्तेजसा यदि धक्ष्यते ॥ आर्ताः प्रजा नरव्याघ्र क्व नु यास्यन्ति निर्वृतिम् ॥६॥
[[10]आश्वसिहि नरश्रेष्ठ प्राणिनः कस्य नापदः ॥ संस्पृशन्त्यग्निवद्राजन्क्षणेन व्यपयान्ति च ॥७॥]

स्मिन्कर्मणितत्तथा ॥१५॥ एतदेव स्पष्टयति—शीलेनेति । समुत्पादय विवक्षितकार्यमितिशेषः । समुत्सादयेतिपाठे लोकानितिशेषः । एवं लक्ष्मणप्रसादनेन रामकोपशान्तिप्रपञ्चनाद्रावणाराधिततत्पक्षपातिरुद्रसंकल्पाद्रामकोपो भग्न इति वदन् मूर्ख इत्यवगन्तव्यः ॥ १६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चषष्टितमः सर्गः ॥ ६५ ॥

एवं लक्ष्मणो राममाश्वास्य पुनर्वक्तव्यांशं ज्ञापयति षट्षष्टितमे । तं तथेत्यादिश्लोकद्वयमेकान्वयं । परिद्यूनं परिदेवनंप्राप्तं परिशोचन्तमित्यर्थः । "च्छ्वोः शूडनुनासिकेच" इत्यूठ् । "दिवोऽविजिगीषायां" इति निष्ठानत्वं । अचेतनं अस्वस्थचित्तं । संबोधयामास ज्ञापयामास । अभिपीडयन् उपसंगृह्णन् ॥१—२॥ महता तपसा कायक्लेशेन व्रतोपवासादिना । महता चापि कर्मणा अश्वमेधपुत्रकामेष्टिप्रभृतिकर्मणा । राज्ञा दशरथेन । राजा लोकस्य रञ्जनात् । अनेन मन्त्रद्रव्यक्रियालोपाभावेनाधिकारिणा कृतत्वमुच्यते । अमृतमिव तद्वत् भोग्यत्वं यत्नसाध्यत्वं चोच्यते । अमरैः अनेकसुरकृतयत्नः एकेनकृत इति गम्यते ॥३॥ एवकारेण इतरपुत्रव्यावृत्तिः । तवैव गुणैर्बद्धः त्वद्गुणैकपरवशः । महीपतिः राजा न तु जातिमात्रेण राजा । देवत्वमापन्नः । तत्र किं प्रमाणं तत्राह—भरतस्येति । भरतादित्यर्थः । पञ्चम्यर्थे षष्ठी । तथैव मयोक्तमिति शेषः ॥ ४ ॥ काकुत्स्थेत्यनेनाप्राकृतत्वं महासत्त्वत्वं च सिद्धं । सहिष्यति सहिष्यते ॥ ५ ॥ धक्ष्यते धक्ष्यति ॥६—७॥ प्रसङ्गात् दैविकावर्थानर्था-

---

विचयनेनाशक्यातत्प्राप्तिः स्यात् । ततः परंदेवाःसर्वज्ञाः यदितेपत्नींपत्नीवार्तांनदास्यन्ति ततः पश्चात्प्राप्तकालंचतुर्थोपायंदण्डंतेषुकरिष्यसि ॥ **शि०** त्रिदशेश्वराः तदुपलक्षितनिश्चितदारापहारिणः । प्राप्तकालं प्राप्तः कालोयस्मिंस्तंदण्डं ॥ १५ ॥ इतिपञ्चषष्टितमस्सर्गः ॥ ६५ ॥

स० देवत्वमापन्नइति यथा यथावत् । भरतस्यमुखाच्छ्रुतं ॥ ४ ॥ **ति०** इतरः कइति । "यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः" इत्युक्तेः "मर्त्यावतारस्त्विहमर्त्यशिक्षणं" इतिभागवतोक्तरीत्यालोकशिक्षणार्थमपित्वदवतारादितिभावः ॥ ५ ॥ **ति०** आश्वसिहीति । "नहवैशरीरस्यसतः प्रियाप्रिययोरपहतिरस्ति" इतिश्रुतेः ॥ ७ ॥

[**पा०**] १ क. ख. घ. ज. शिवेन. २ ख. घ. समुत्पाटय. ङ.—ट. समुत्सादय. ३ च. छ. ज. ञ. शोकसंतप्तंपरिद्यूनमचेतसम् । मोहेनमहताऽऽविष्टंविलपन्तमनाथवत्. ४ ङ. झ. ट. महतायुक्तं. ५ क. ङ. झ. ट. मचेतसं. ६ घ. मुहूर्तादेव. ७ ङ. झ. ट. तपसाचापि. ८ घ. दुःखमिव. ९ अयंश्लोकः झ. पाठेनदृश्यते. १० अयंश्लोकः क. ङ.—ट. पाठेपुदृश्यते.

लोकस्वभाव एवैष ययातिर्नहुषात्मजः ॥ गतः [1]शक्रेण सालोक्य[2]मनयस्तं तमः स्पृशत् ॥ ८ ॥
महर्षिर्यो वसिष्ठस्तु यः पितुर्नः पुरोहितः ॥ अह्ना पुत्रशतं जज्ञे तथैवास्य पुनर्हतम् ॥ ९ ॥
या चेयं [3]जगतां माता [4]देवी लोकनमस्कृता ॥ अस्याश्च चलनं भूमेर्दृश्यते [5]सत्यसंश्रव ॥ १० ॥
[6]यौ धर्मौ [7]जगतां नेत्रौ यत्र सर्वं प्रतिष्ठितम् ॥ आदित्यचन्द्रौ ग्रहणमभ्युपेतौ महाबलौ ॥ ११ ॥
सुमहान्त्यपि भूतानि देवाश्च पुरुषर्षभ ॥ न दैवस्य प्रमुञ्चन्ति सर्वभूतादिदेहिनः ॥ १२ ॥
शक्रादिष्वपि देवेषु वर्तमानौ नयानयौ ॥ श्रूयेते नरशार्दूल न त्वं [8]शोचितुमर्हसि ॥ १३ ॥
[9]नष्टायामपि वैदेह्यां हृतायामपि [10]चानघ ॥ शोचितुं नार्हसे वीर यथाऽन्यः प्राकृतस्तथा ॥ १४ ॥
त्वद्विधा [11]न हि शोचन्ति सततं [12]सत्यदर्शिनः ॥ सुमहत्स्वपि कृच्छ्रेषु रामानिर्विण्णदर्शनाः ॥ १५ ॥
तत्त्वतो हि [13]नरश्रेष्ठ बुद्ध्या समनुचिन्तय ॥ बुद्ध्या युक्ता महाप्राज्ञा विजानन्ति शुभाशुभे ॥ १६ ॥
अदृष्टगुणदोषाणा[14]मधृतानां च कर्मणाम् ॥ नान्तरेण क्रियां तेषां फल[15]मिष्टं प्रवर्तते ॥ १७ ॥

वन्ये महान्तोपि प्राप्नुवन्तीति दृष्टान्तमुखेन प्रतिपादयितुमाह—लोकस्वभाव इत्यादिना। एषलोकस्वभाव इति वक्ष्यमाणेषु सर्वत्र योज्यं। अनयः अनयमूलं दुःखमित्यर्थः। तमः अज्ञानं। स्पृशत् अस्पृशत्। स हि स्वर्गगतोपि इन्द्रेणासूयाकलुषेण भवद्राज्ये को वा श्रेष्ठ इति पृष्टः सत्यवादितयाऽहमेवेत्युक्तवान्। इन्द्रेणात्मश्लाघी त्वं न स्वर्गार्ह इति पातित इति पुराणप्रसिद्धिः। नहुषात्मजइत्यनेन नहुषानीतिरपिव्यज्यते । स च सप्तर्षीन्स्ववाहकान् शचीस्मरणेन सर्पसर्पेत्युक्तवान् । सर्पो भवेत्यगस्त्यशप्तश्चिरं तथाभूतस्तस्थौ ॥८॥ अह्ना पुत्रशतं हतं विश्वामित्रकोपेन युगपत्पुत्रशतनाशदुःखमनुभूतमितिभावः ॥ ९ ॥ माता सर्वोपादानत्वात्। देवी देवस्य विष्णोः पत्नी । अतएव लोकनमस्कृता । सत्यसंश्रवेति त्वयैव हि पूर्वं मह्यमेवमुपदिष्टमिति भावः ॥ १० ॥ धर्मौ धर्मप्रवर्तकौ । सर्वधर्मसाक्षित्वात् । नेत्रौ नेतारौ । कालपरिच्छेदादिमुखेनजगतः प्रवर्तकौ । "नेत्रो नेतरि भेद्यवान्" इति विश्वः । सर्वेषामर्थप्रकाशकत्वेन नेत्रभूतौ वा । लिङ्गव्यत्ययश्छान्दसः । यत्र ययोः । सर्वं जगत् । प्रतिष्ठितं यदधीनस्वरूपस्थितिप्रवृत्तिकाःसर्वे जना इत्यर्थः । सूर्यस्यवर्षहेतुत्वात् चन्द्रस्यौषधिहेतुत्वाच्चेतिभावः । "आदित्याज्जायते वृष्टिस्ततोऽन्नमभिजायते" इतिवचनात् । ग्रहणं राहुकेतुभ्यां ग्रासं॥११॥ किं बहुना संग्रहेणोच्यत इत्याह—सुमहान्तीति । सुमहान्तिभूतानि मान्धातृनलप्रभृतिमहाजना अपि। सर्वभूतादिदेहिनः सर्वभूतानिआदिदेहोस्यास्तीति तथा। सर्वभूतान्तर्यामिण इत्यर्थः । दैवस्य परमात्मनः । पञ्चम्यर्थे षष्ठी। न प्रमुञ्चति सर्वेपितत्संकल्पंनातिक्रामन्तीत्यर्थः ॥१२॥ उपसंहरति—शक्रादिष्वपीति। नयानयौ तन्मूलसुखदुःखे । अतोनत्वं शोचितुमर्हसीत्यर्थः ॥ १३ ॥ उक्तं विवृणोति—नष्टायामपीति । नार्हसे नार्हसि ॥१४॥ सत्यदर्शिनः यथार्थदर्शिनः । कृच्छ्रेषु दुःखेषु । अनिर्विण्णं अविनाशि दर्शनं कृत्याकृत्यविवेकोयेषां ते तथा ॥ १५ ॥ तत्त्वतो बुद्ध्या अबाधितबुद्ध्या । समनुचिन्तय शुभाशुभे इति शेषः । महाप्राज्ञाः बुद्ध्या तात्कालिक्या युक्ताःसन्तः शुभाशुभे भाविनी विजानन्ति ॥ १६॥ इदानींफलानुभवःपूर्वकर्मसाध्यः अतस्तत्रनशोचनीयमित्याह—अदृष्टेति । अदृष्टगु-

---

ति० एषः औपाधिकदुःखसंबन्धः । लोकस्य शरीरिणः । स्वभावएव । तदेवाह—**ययातिरिति** । अनयः अनयमूलंदुःखं । तच्चस्वर्गाद्भ्रंशरूपं । समस्पृशदित्यनेनाचिरस्थितिकस्पर्शमात्रार्थकेनपुनरविलंबेनैवदौहित्रप्रयुक्तसुखोत्तरकालिकदुःखनिवृत्तिरप्यस्यसूचिता ॥ ८ ॥ **ति०** दैवस्य कर्मणः । वशंनप्रमुञ्चन्तीत्यर्थः । किंपुनर्वक्तव्यं देहिनस्सर्वभूतानि देहवन्तिसर्वभूतानिनमुञ्चन्तीति । पुंस्त्वमार्षं ॥ ९ ॥ **ती०** अदृष्टाः शास्त्रैकसमधिगम्यतयाप्रत्यक्षतोद्रष्टुमशक्याः गुणदोषाः सुखदुःखरूपायेषां

[पा०] १ क. ख. ग. शक्रस्य. २ ख. ग. मनयस्तंचसंस्पृशत्. क. मपतत्ससतमःस्पृशन्. ३ क. ङ.—ट. जगतो. ४ ङ. झ. ञ. ट. सर्वलोक. ५ ङ. झ. ञ. ट. कोसलेश्वर. क. छ. ज. सत्यसंश्रय. ६ क. घ. ज. छ. ज. यौचेमौ. ७ ग. ङ. झ. ट. जगतो. ८ ग. ङ. च. झ. ञ. ट. व्यथितुं. ९ ङ. झ. ट. मृतायामपिवैदेह्यांनष्टायामपिराघव. १० क. ख. छ. वानघ. ११ क.—घ. हिनशोचन्ति. १२ ङ. झ. ट. सर्वदर्शनाः. ग. सत्यदर्शनाः. घ. समदर्शनाः. १३ क. ङ.—ज. ञ. महात्मानो. १४ ङ. झ. ट. मध्रुवाणांतु. ख. ग. मधृतानांतु. घ. मश्रुतानांतु. १५ ङ. छ.—ट. मिष्टंचवर्तते.

[3]त्वमेव हि पुरा [2]राम [1]मामेवं बहुशोऽन्वशाः ॥ [4]अनुशिष्याद्धि को नु [5]त्वामपि साक्षाद्बृहस्पतिः ॥ १८ ॥
बुद्धिश्च ते महाप्राज्ञ [6]देवैरपि दुरन्वया ॥ शोकेनाभिप्रसुप्तं ते ज्ञानं संबोधयाम्यहम् ॥ १९ ॥
दिव्यं च मानुषं [7]चैं त्वमात्मनश्च पराक्रमम् ॥ इक्ष्वाकुवृषभावेक्ष्य यतस्व द्विषतां वधे ॥ २० ॥
किं ते सर्वविनाशेन कृतेन पुरुषर्षभ ॥ [8]तमेव त्वं रिपुं पापं विज्ञायोद्धर्तुमर्हसि ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

सप्तषष्टितमः सर्गः ॥ ६७ ॥

लक्ष्मणेनसमाश्वासनात्कोपत्यागपूर्वकं तेनसह पुनःसीतांविचिन्वतारामेण जटायुदर्शनं ॥ १ ॥ तथा तस्मिन्रक्षोबुद्ध्या तेनसीताहननसंभावनया तद्वधोद्यमः ॥ २ ॥ तेनरामंप्रति रावणेनसीताहरणनिवेदनपूर्वकं युद्धे स्वेनतदीयरथादिविध्वंसननिवेदनेनसह वृद्धत्वाद्युद्धश्रान्तस्यस्वस्य तेनखड्गेनपक्षच्छेदनपूर्वकं पुनर्वैदेह्यानयनेन वैहायसमार्गगमननिवेदनम् ॥ ३ ॥ रामेणपितृसुहृत्त्वस्नेहाज्जटायुषःपरिष्वङ्गपूर्वकंविलापेनदुःखाद्भूमौपतनं ॥ ६३ ॥

पूर्वजो[9]प्युक्तमात्रस्तु लक्ष्मणेन सुभाषितम् ॥ सारग्राही महासारं प्रतिजग्राह राघवः ॥ १ ॥
[10]संनिगृह्य महाबाहुः [11]प्रवृत्तं कोपमात्मनः ॥ अवष्टभ्य धनुश्चित्रं रामो लक्ष्मणमब्रवीत् ॥ २ ॥

णदोषाणां प्रत्यक्षतोद्रष्टुमशक्यसुखदुःखरूपगुणदोषाणां । अधृतानां पुरा एवंकर्म कृतमिति निश्चेतुमशक्यानां । तेषां प्रसिद्धानां पूर्वकृतानामित्यर्थः । कर्मणां इष्टं फलं क्रियां अनुष्ठानमन्तरेण न प्रवर्तते । पूर्वकर्मानुष्ठानं विना इदानीं फलं नोत्पद्यते । अतः पूर्वकर्मफले इदानींप्रवृत्ते कात्रपरिदेवनेति भावः ॥१७॥ अन्वशाः अनुशासितवानसि ॥ १८ ॥ दुरन्वया दुर्लभा । प्रसुप्तं स्तिमितं । संबोधयामि उत्थापयामि ॥१९॥ दिवि भवंदिव्यं । प्राणिजातं देवगन्धर्वादिकं। तच्च सात्त्विकं वधानर्हं । मानुषं मनुष्यलोकोद्भवं ब्राह्मणादिकं तदपि वधानर्हं । सर्वलोकसंहारसमर्थं आत्मनःपराक्रमं च अवेक्ष्य विचार्य द्विषतामेव वधे यतस्व ॥ २० ॥ उद्धर्तुं नाशयितुं ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने षट्षष्टितमः सर्गः ॥ ६६ ॥

अथ लक्ष्मणवाक्यप्रतिष्ठापितधैर्यो रामो युद्धभूमेर्दक्षिणतः किंचिद्दूरे गृध्रराजं दृष्ट्वा रोदिति सप्तषष्टितमे । राघवः पूर्वजोपि लक्ष्मणेन कनिष्ठेन सुभाषितं युक्तियुक्ततयोक्तं वाक्यं । उक्तमात्रस्तु उक्तमात्र एव जग्राह । "बालादपि सुभाषितं" इति स्मृतेः । स्वयमुपदेष्टा कथमन्योक्तं जग्राहेत्यत्राह—सारग्राहीति । किमस्य वाक्यस्य सारवत्त्वं तत्राह—

तेषां । अतएवाध्रुवाणां अनिश्चितफलानां । सत्कर्मानुष्ठानेदुःखमित्यन्वयव्यतिरेकसूचकप्रत्यक्षप्रमाणेनानिश्चितफलानामित्यर्थः ॥ १७ ॥ ति० इयंचबुद्धिस्त्वद्दत्तैवमे अतस्त्वोपदेशेकिंसामर्थ्यमिति नवाच्यमित्याह—मामिति । अकारणेक्रोधवशमापन्नमिति शेषः । बहुशोक्तवानितिसन्धिरार्षः ॥ स० बहुशोक्तवानितिपाठे बहुशेतिसंबोधनं । बहुश पूर्णसुख ॥ साक्षाद्बृहस्पतिरपि नानुशिष्यात् ॥ १८ ॥ ति० देवैरपिदुरन्वयाअन्वेतुमनुगन्तुमशक्या । त्वज्ज्ञानपरिच्छेदोदेवानामप्यशक्यइतिभावः । अनेनेश्वरतासूचिता ॥ १९ ॥ ति० दिव्यं देवोचितं मानुषं मनुष्योचितं । एवमुभयविधपराक्रमाश्रयत्वमात्मनोऽवेक्ष्य । तत्राद्यः परशुरामविषयः । अन्त्योरक्षोविषयः ॥ एवंच देवोचितपराक्रमस्यायं नावसरइतिभावः ॥२०॥ इतिषट्षष्टितमस्सर्गः ॥ ६६ ॥

[पा०] १ ख. ग. घ. मामेव. क. ङ. झ. ट. मामेवं. २ क. ख. ग. ङ.—ट. वीर. ३ क. ख. ङ. झ. ट. ठ. त्वमेवबहुशोक्तवान्. ग. त्वमेवबहुधोक्तवान्. घ. त्वमेवबहुशोऽन्वशाः. च. छ. ज. ञ. ह्यनुशिष्यसिराघव. ४ क. च. छ. ज. अनुशिष्यति. घ. अनुशिष्यात्तु. ५ ख. त्वांसाक्षादपिबृहस्पतिः. ६ क. ग. च. छ. ज. ञ. लोकैरेतैर्दुरन्वया. ७ ङ.—ठ. चैवमात्मनश्च. घ. रूपमात्मनश्च. ८ ङ. झ. ट. तमेवतु. च. त्वमेवतं. ९ ङ. झ. ट. प्युक्तवाक्यस्तु. १० क. ङ.—ट. संनिगृह्य. ११ घ. ङ. झ. ट. प्रवृद्धंरोषमात्मनः. च. छ. ज. ञ. प्रवृद्धंक्रोधमात्मनः.

किं करिष्यावहे वत्स [1]क्व वा गच्छाव लक्ष्मण ॥ केनोपायेन [2]पश्येयं सी[3]तामिति विचिन्तय ॥ ३॥
तं तथा परितापार्तं लक्ष्मणो [4]राममब्रवीत् ॥ ४ ॥
इदमेव जनस्थानं [5]त्वमन्वेषितुमर्हसि ॥ राक्षसैर्बहुभिः कीर्णं नानाद्रुमलतायुतम् ॥ ५ ॥
सन्तीह गिरिदुर्गाणि निर्दराः कन्दराणि च ॥ गुहाश्च विविधा घोरा नानामृगगणाकुलाः ॥ ६ ॥
आवासाः किन्नराणां च गन्धर्वभवनानि च ॥ तानि युक्तो मया सार्धं [5]त्वमन्वेषितुमर्हसि ॥ ७ ॥
त्वद्विधा बुद्धिसंपन्ना महात्मानो नरर्षभ ॥ आपत्सु न प्रकम्पन्ते वायुवेगैरिवाचलाः ॥ ८ ॥
इत्युक्तस्तद्वनं [6]सर्वं विचचार सलक्ष्मणः ॥ क्रुद्धो रामः शरं घोरं सन्धाय धनुषि क्षुरम् ॥ ९ ॥
ततः पर्वतकूटाभं [7]महाभागं द्विजोत्तमम् ॥ ददर्श पतितं भूमौ क्षतजार्द्रं जटायुषम् ॥
तं दृष्ट्वा गिरिशृङ्गाभं रामो लक्ष्मणमब्रवीत् ॥ १० ॥
अनेन [8]सीता वैदेही भक्षिता नात्र संशयः ॥ गृध्ररूपमिदं [9]रक्षो व्यक्तं भवति कानने ॥ ११ ॥
भक्षयित्वा विशालाक्षीमास्ते सीतां यथासुखम् ॥ एनं वधिष्ये [10]दीप्तास्यैर्घोरैर्बाणैरजिह्मगैः ॥ १२ ॥
इत्युक्त्वा[11]ऽभ्यपतद्गृध्रं सन्धाय धनुषि क्षुरम् ॥ क्रुद्धो रामः [12]समुद्रान्तां कम्पयन्निव मेदिनीम् ॥ १३ ॥
तं [13]दीनं दीनया वाचा सफेनं रुधिरं वमन् ॥ अभ्यभाषत पक्षी [14]तु रामं दशरथात्मजम् ॥ १४॥
यामोषधिमिवायुष्मन्नन्वेषसि महावने ॥ सा देवी मम च प्राणा रावणेनोभयं हृतम् ॥ १५ ॥
त्वया विरहिता देवी लक्ष्मणेन च राघव ॥ ह्रियमाणा मया दृष्टा रावणेन बलीयसा ॥ १६ ॥
सीतामभ्यवपन्नोऽहं रावणश्च रणे [15]मया ॥ विध्वंसित[16]रथश्चात्र [17]पातितो धरणीतले ॥ १७ ॥

महासारमिति ॥ १—२ ॥ पश्येयं पश्येव ॥ ३ ॥ तमित्यर्धमेकंवाक्यं ॥ ४—५ ॥ इह जनस्थाने । गिरिगतानि दुर्गाणि गन्तुमशक्यप्रदेशा इत्यर्थः । निर्दराः विदीर्णपाषाणाः । कन्दराणि पाषाणसन्धयः । गुहाः देवखातबिलानि । युक्तः संनद्धः ॥६—७॥ न प्रकम्पन्ते न चञ्चलचित्ता भवन्तीत्यर्थः ॥ ८ ॥ क्षुरं क्षुरप्राख्यं शरं । सीताया अदर्शनात्क्रोधः ॥ ९ ॥ कूटः शृङ्गं । महाभागं महाभाग्यं । स्वाम्यर्थे त्यक्तशरीरत्वात् । द्विजोत्तमं पक्षिश्रेष्ठं । "दन्तविप्राण्डजा द्विजाः" इत्यमरः । क्षतजं रुधिरं ॥ १० ॥ भक्षिता रुधिरार्द्रत्वादिति भावः। गृध्रेति। गृध्रस्य रूपमिव रूपं यस्य तत्तथा ॥११॥ अजिह्मं अकुण्ठं अवक्रं वा गच्छन्तीत्यजिह्मगाः तैः ॥१२॥ अभ्यपतत् अभिमुखं गतः। समुद्रान्तां समुद्रपर्यन्तां ॥ १३ ॥ दशरथात्मजमिति संबन्धोक्तिः॥१४॥ यथा महौषध्यन्वेषिणः प्रतिवनमन्वेषन्ते तथा यामस्मिन्विस्तीर्णे वनेऽन्वेषसि । एषृ गतावित्यस्माद्व्यत्ययेन परस्मैपदं । नित्यंप्राणसमेत्युक्ता सा देवी मम प्राणाश्च उभयं रावणेन हृतं । मम प्राणान्हृतप्रायान्कृत्वा सीतां रावणो हृतवानित्यर्थः । खरवधादिना रामबलंज्ञात्वाप्यस्थानेभयशङ्कितया रामस्यायुः प्रार्थयते—आयुष्मन्निति ॥ १५—१६ ॥ अभ्यवपन्नः आभिमुख्येन गतः । ह्रियमाणांसीतामवलोक्य तदभिमुखमागत इत्यर्थः । रावणश्च विध्वंसितरथःसन् अत्र धरणीतले पातितः रथाद्भ्रंशित

शि० क्रुद्धः क्रुधंजहातिसः त्यक्तकोपोरामः ॥ ९ ॥ शि० इदंगृध्ररूपंवस्तु यदिरक्षः राक्षसः तर्हि अनेनरक्षसाभक्षितासीता अत्र अस्योदरे भ्रमति भ्रमेत् । संशयोन । यदीत्यध्याहृतं । भ्रमतीत्यनेन तस्याः नित्यत्वंसूचितं तेनैतदुदरान्निर्गच्छेदितिसंभा-

[पा०] १ च. छ. ज. ञ. क्वगच्छावच. २ घ. झ. पश्यावः. ३ ङ. झ. ट. सीतामिह. क. सीतांसुरसुतोपमां. ४ घ. ङ. झ. ट. वाक्यमब्रवीत्. ५ घ.—ट. समन्वेषितुं. ६ ख. घोरं. ७ च. छ. ज. महाकायं. ८ च. छ. ज. ञ. किल. ९ ग. ङ.—ट. व्यक्तंरक्षोभ्रमतिकाननं. १० क. ग. ङ.—ट. दीप्ताग्रैःशरैर्घोरैरजिह्मगैः. ११ ङ. झ. ट. भ्यपतद्द्रष्टुं. १२ ख. च. छ. ज. ञ. सुसंभ्रान्तश्चालयन्निव. क. ग. घ. ङ. झ. ट. समुद्रान्तांचालयन्निव. १३ ख. च. दीनो. ङ. झ. ञ. दीनदीनया. १४ ङ. झ. ट. सरामं. १५ ङ. झ. ट. प्रभो. १६ क.—ट. रथच्छत्रः. १७ ख.—ट. पतितो.

एतत्[1]दस्य धनुर्भग्नमेतत्[2]दस्य शरावरम् ॥ अयमस्य [3]रथो राम भग्नः सांग्रामिको [4]मया ॥ १८ ॥
अयं तु सारथिस्तस्य मत्पक्षनिहतो युधि ॥ १९ ॥
परिश्रान्तस्य मे पक्षौ छित्त्वा ख[5]ड्गेन रावणः ॥ सीतामादाय वैदेहीमुत्पपात विहायसम् ॥ २० ॥
रक्षसा निहतं पूर्वं न[6] मां हन्तुं त्वमर्हसि ॥ २१ ॥
रामस्तस्य तु विज्ञाय बाष्पपूर्णमुखस्तदा ॥ द्विगुणीकृततापार्तः सीतासक्तां प्रि[7]यां कथाम् ॥ २२ ॥
[8]गृध्रराजं परिष्वज्य परित्यज्य महद्धनुः ॥ निपपातावशो भूमौ रुरोद सहलक्ष्मणः ॥
[द्वि[9]गुणीकृततापार्तो रामो धीरतरोपि सन्] ॥ २३ ॥
एकमेकायने [10]दुर्गे निःश्वसन्तं कथंचन ॥ समीक्ष्य [11]दुःखिततरो रामः सौमित्रिमब्रवीत् ॥ २४ ॥
[12]राज्याद्भ्रंशो वने वासः सीता नष्टा [13]द्विजो हतः ॥ ईदृशीयं [14]ममालक्ष्मीर्निर्दहेदपि पावकम् ॥ २५ ॥
संपूर्णमपि चेद[15]द्य प्रतरेयं महोदधिम् ॥ सोपि नूनं ममालक्ष्म्या विशुष्येत्सरितां पतिः ॥ २६ ॥

इत्यर्थः ॥ १७ ॥ भग्नमेतद्धनुः अस्य रावणस्य संबन्धि । एवमुत्तरत्रापि योज्यं । शरावरं वर्म तूणीरं वा ॥ १८ ॥ अयंत्वित्यर्धमेकं ॥ १९ ॥ वैदेहीं जनकेन सम्यक्परिपोषितां ॥ २० ॥ रक्षसेत्यर्धमेकं ॥ २१ ॥ तस्य गृध्रस्यसंबन्धिनीं । सीताविषयकथां विज्ञाय श्रुत्वा । द्विगुणीकृतेन गृध्रवधेनद्विरावर्तितेन तापेन आर्तः पीडितः । अभूदिति शेषः ॥ २२ ॥ अवशः मूर्च्छित इत्यर्थः । रुरोद क्रमादिति शेषः ॥ २३ ॥ एकं असहायं सहायरहितं दययासंरक्षकपथिकजनरहितमित्यर्थः । एकायने एकस्य मार्गे । "अयनं वर्त्म मार्गाध्व—" इत्यमरः । एकपद्यामित्यर्थः । दुर्गे इतः परमपिकेनचिद्गन्तुमशक्ये इति दुःखहेत्वतिरेकोक्तिः । निःश्वसन्तं गृध्रराजमितिशेषः ॥ २४ ॥ राज्यादिति । यद्यपि "न चास्य महतीं लक्ष्मीं राज्यनाशोपकर्षति" "वनवासो महोदयः" इति अभिमततमतया प्रोक्तौ राज्यनाशवनवासौ तथापि संप्रतिसीताविश्लेषकारित्वाज्जटायुवियोगफलकत्वाच्च तावेवानर्थकरौ जाताविति भावः । राज्याद्भ्रंशः हठात् लब्धराज्यस्यविच्युतिः । वनेवासः राज्यभ्रंशेपि राज्येभिक्षुकवृत्त्यापिस्थातुंशक्यं तदपि नलब्धं । सीता नष्टा वनवासेप्यभिमतजनविश्लेषाभावे सुखेनावस्थातुं शक्यं तदपि नास्ति । हतो द्विजः अभिमतजनविश्लेषेपि बन्धुजनसन्निधौ शोको निर्वापयितुं शक्यः स च निवृत्तः । ईदृशी एतादृशदुःखपर्यवसायिनी । मम अलक्ष्मीः दौर्भाग्यं । पावकमपि निर्दहेत् सर्ववस्तुदाहकमपिदहेत् । सदा विश्लेषप्रसक्तिशून्यं लक्ष्मणमपि विश्लेषयेदिति भावः

वनाव्यञ्जिता ॥ ११ ॥ **ती०** तस्यजटायुषः । विज्ञाय स्वरूपमितिशेषः । सीतासक्तां सीताविषयां कथां श्रुत्वेतिशेषः ॥ २२ ॥ रामोरुरोदेत्यस्यायमभिप्रायः । परमेश्वरस्यश्रीरामस्यभक्तपक्षपातित्वेन भक्तंजटायुषमापन्नंदृष्ट्वा परमप्रियांसीतांरावणेनहृतांचश्रुत्वा " व्यसनेषुमनुष्याणांभृशंभवतिदुःखितः " इत्युक्तेः भक्तापदं दृष्ट्वारुरोदेति । द्विगुणीकृततापार्तः बभूवेतिशेषः । सीताऽदर्शनजस्तापः निजभक्तजटायुवधजनिततापश्च । एवंतापस्यद्विगुणत्वं ॥ २३ ॥ **ति०** एकंअसहायं । एकस्मिन् ऊर्ध्वतालक्षणे अयने श्वासमार्गे । अतएव कृच्छ्रे मुहुर्मुहुर्निश्वसन्तमितिकतकसंमतपाठेऽर्थः ॥ २४ ॥ **शि०** राज्यं राज्याभिषेकः । वनेवासः जात-इतिशेषः । या पावकमपिदहेत् ईदृशी ममालक्ष्मीः मस्यमधुसूदनस्यमा लक्ष्मीः तस्याअपिलक्ष्मीः । इयं बुद्धिस्था सीता नष्टा अपहरणेनादृश्यत्वंप्राप्ता । द्विजः सहायकः पक्षी । मृतः मृतप्रायः । " मोयमेसमयेपिस्याद्विषेचमधुसूदने । " इतिमेदिनी ॥ २५ ॥ **शि०** पतिः सर्वेषांनियन्ता अहं संपूर्णां सरितं नदीं संपूर्णमहोदधिंसमुद्रंच । ममालक्ष्या मधुसूदनलक्ष्मीलक्ष्म्या सहितः । अत् निरन्तरंवनपर्यटनशीलोहं चेत् यदि इच्छामि तदा प्रतरेयं विशुष्ये शोषयामिच । अतः येनरक्षसाहेतुभूतेन

[**पा०**] १ घ. एतत्तस्य. २ ङ. झ. ट. मेतेचास्यशरास्तथा. घ. मेतत्तस्य. ३ क. ग. ङ.—ट. रणे. ४ क. ङ.—ट. रथः. ५ क. घ. च. छ. खस्थस्स. ६ क. च. छ. ज. नमांत्वंहन्तुमर्हसि. ङ. झ. ट. मांनहन्तुंत्वमर्हसि. ७ घ. छ. ज. कथांप्रियां. ८ अतःपूर्वं 'श्रुत्वाजटायुषोवाक्यंरामःसौमित्रिणासह.' इत्यर्धं घ. पाठेअधिकंदृश्यते. ९ इदमर्धं. ङ. झ. ट. पाठेषुदृश्यते. १० ख. ङ. झ. ट. कृच्छ्रेनिश्वसंतंमुहुर्मुहुः. ११ क. ख. ग. ङ.—ट. दुःखितोरामःसौमित्रिमिदमब्रवीत्. १२ ङ. छ.—ट. राज्यंभ्रष्टं. क. राज्यभ्रंशो. १३ ङ.—ट. मृतोद्विजः. ग. घ. हतोद्विजः. क. द्विजोमृतः. १४ क. ममालक्ष्मीर्दहेदपिच. ङ. झ. ट. ममालक्ष्मीर्दहेदपिहि. १५ क. पाथोभिःप्रतरेयं. च. छ. ज. ञ. चेदद्यप्रविशेयं.

नास्त्यभाग्यतरो लोके मत्तोस्मिन्सचराचरे ॥ येनेयं महती प्राप्ता मया व्यसनवागुरा ॥ २७ ॥
अयं पितृवयस्यो मे गृध्रराजो [1]जरान्वितः ॥ शेते विनिहतो भूमौ मम भाग्यविपर्ययात् ॥ २८ ॥
इत्येवमुक्त्वा बहुशो राघवः सहलक्ष्मणः ॥ जटायुषं च पस्पर्श पितृस्नेहं [2]विदर्शयन् ॥ २९ ॥
निकृत्तपक्षं रुधिरावसिक्तं [3]स गृध्रराजं [4]परिरभ्य रामः ॥
क्व मैथिली प्राणसमा [5]ममेति विमुच्य [6]वाचं निपपात भूमौ ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

अष्टषष्टितमः सर्गः ॥ ६८ ॥

रामेण सीताहरणवृत्तान्तस्ययाथातथ्यंपृष्टेनजटायुषा तंप्रतितत्कथनपूर्वकं सीताहरणकालस्य विन्दनामकमुहूर्तत्वोक्त्या तन्मुहूर्तमहिम्ना पुनःसीतालाभस्यभावित्वोक्त्या समाश्वासनं ॥ १ ॥ तथा तंप्रति रावणवृत्तान्तंकथयतोजटायोरर्धोक्तावेव शरीरात्प्राणानांविनिर्गमः ॥ २ ॥ तंप्रतिशोचतारामेण तस्यविष्णुलोकगमनानुग्रहपूर्वकं तच्छरीरदहनेनतंप्रतिपिण्डोदकदानं ॥ ३ ॥

रामः [7]संप्रेक्ष्य तं गृध्रं भुवि रौद्रेण पातितम् ॥ सौमित्रिं मित्रसंपन्नमिदं वचनमब्रवीत् ॥ १ ॥
ममायं नूनमर्थेषु यतमानो विहङ्गमः ॥ राक्षसेन हतः संख्ये प्राणां[8]स्त्यक्ष्यति दुस्त्यजान् ॥ २ ॥
[9]अयमस्य शरीरेस्मिन्प्राणो लक्ष्मण [10]विद्यते ॥ [11]तथाहि स्वरहीनोऽयं [12]विक्लबः समुदीक्षते ॥ ३ ॥
जटायो यदि शक्नोषि वाक्यं व्याहरितुं पुनः ॥ सीतामाख्याहि भद्रं ते वधमाख्याहि चात्मनः ॥४॥
[13]किंनिमित्तोऽहरत्सीतां रावणस्तस्य किं मया ॥ [14]अपराधं तु यं दृष्ट्वा रावणेन हृता प्रिया ॥ ५ ॥

॥२५॥ प्रतरेयं तापशान्तयेप्लवेयं चेत् ॥२६॥ व्यसनं वागुरेव व्यसनवागुरा । "वागुरा मृगबन्धिनी" इत्यमरः ॥ २७ ॥ पितुर्वयस्यः सखा ॥ २८ ॥ पितरीव स्नेहः पितृस्नेहः ॥ २९ ॥ रामः वाचं विमुच्य उक्त्वेत्यर्थः ॥ ३० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्तषष्टितमः सर्गः ॥ ६७ ॥

अथभगवत्कार्यार्थत्यक्तशरीरस्यगृध्रराजस्यमोक्षपदप्रापणमष्टषष्टितमे । रौद्रेण रावणेन । मित्रसंपन्नं सर्वजनमित्रमित्यर्थः । यद्वा परनिपातः । संपन्नमित्रं अत्यन्तरामविषयसौहार्दयुक्तमित्यर्थः ॥ १ ॥ अर्थेष्विति निमित्तसप्तमी । मम प्रयोजनार्थमित्यर्थः । संख्ये युद्धे ॥ २ ॥ अयंप्राणः सूक्ष्मप्राणः । स्वरहीनः हीनस्वरः । विक्लबः विह्वलः ॥ ३ ॥ व्याहरितुं व्याहर्तुं । वधं वधप्रकारं ॥४॥ किंनिमित्तः किंनिमित्तं

महती इयंव्यसनवागुरा दुःखरूपमृगादिबन्धनजालं । मयाकर्त्रा प्राप्ताप्रापिता । तस्मान्मत्तः उन्मत्तः अभाग्यतरश्च लोकेनास्ति । एतेन सशीघ्रंध्रुवंनङ्क्ष्यतीतिसूचितं । श्लोकद्वयमेकान्वयि ॥२६—२७॥ **शि०** तदेवद्रढयन्नाह—**अयमिति**। मेपितुर्वयस्यः सखा निहतः निहतप्रायः । अयंगृध्रराजः भाग्यविपर्ययात् हननकर्तुर्भाग्यवैपरीत्यादेव ममाग्रेशेते ॥ २८ ॥ **स०** वाचंविमुच्य क्वगतेति वाचंविमुच्यभूमौनिपपात ॥ ३० ॥ इतिसप्तषष्टितमः सर्गः ॥ ६७ ॥

स० मित्रसंपन्नं मित्रत्वेनसंप्रतिपन्नं ॥१॥ **स०** तस्य रावणस्य । आर्यां जगन्मातरं । तस्यकिमपराद्धमितितस्येत्युभयत्रान्वेति

[पा०] १ ङ. झ. ट. महाबलः. २ ङ.—ट. निदर्शयन्. ३ ख. ङ.—ट. तंगृध्रराजं. ४ ङ. झ. ट. परिगृह्यराघवः. ५ ङ. ट. गतेति. ६ ख. बाष्पं. ७ क. ग. ङ.—ट. प्रेक्ष्यतु. ८ क. घ. च. ञ. ट. स्त्यजति. ङ. झ. स्त्यजतिमत्कृते. घ. स्त्यजतिदुःखितान्. ९ ङ. झ. ञ. ट. अतिखिन्नःशरीरे. १० च. छ. ज. दृश्यते. ११ ङ.—ट. तथास्वरविहीनोयं. ख. तथापिस्वरहीनोयं. १२ च. छ. ज. विक्लबंसमुदैक्षत. ङ. झ. ञ. ट. विक्लबंसमुदीक्षते. १३ ख. ग. किंनिमित्तंहरेत्. ङ. झ. ट. किंनिमित्तोजहारार्यां. १४ ख. ङ.—ट. अपराद्धंतु.

कथं तच्चन्द्रसंकाशं मुखमासीन्मनोहरम् ॥ सीतया कानि चोक्तानि तस्मिन्काले द्विजोत्तम ॥ ६ ॥
कथंवीर्यः कथंरूपः किंकर्मा स च राक्षसः ॥ क्व चास्य भवनं तात ब्रूहि मे परिपृच्छतः ॥ ७ ॥
[1]तमुद्वीक्ष्याथ दीनात्मा[2] विलपन्त[3]मनन्तरम् ॥ वाचाऽतिसन्नया [4]रामं जटायुरिदमब्रवीत् ॥ ८ ॥
[5]हृता सा राक्षसेन्द्रेण रावणेन वि[6]हायसा ॥ मायामास्थाय विपुलां वातदुर्दिनसंकुलाम् ॥ ९ ॥
परि[7]श्रान्तस्य मे तात पक्षौ छित्त्वा [8]स राक्षसः ॥ सीतामादाय वैदेहीं प्रयातो [9]दक्षिणां दिशम् ॥१०॥
उपरुध्यन्ति मे प्राणा दृष्टिर्भ्रमति राघव ॥ पश्यामि वृक्षान्सौवर्णानुशीरकृतमूर्धजान् ॥ ११ ॥
येन [10]यातो मुहूर्तेन सीतामादाय रावणः ॥ विप्रनष्टं धनं क्षिप्रं तत्स्वामी प्रतिपद्यते ॥ १२ ॥
विन्दो नाम [11]मुहूर्तोऽयं [12]स च काकुत्स्थ नाबुधत् ॥ त्वत्प्रियां जानकीं हृत्वा रावणो राक्षसेश्वरः ॥
झषवद्बडिशं गृह्य क्षिप्रमेव विनश्यति ॥ १३ ॥
न च त्वया व्यथा कार्या जनकस्य सुतां प्रति ॥ वैदेह्या[13] रं[14]स्यसे क्षिप्रं हत्वा तं [15]राक्षसं रणे ॥ १४॥
असंमूढस्य गृध्रस्य रामं प्रत्यनुभाषतः ॥ आस्यात्सुस्राव रुधिरं म्रियमाणस्य सामिषम् ॥ १५ ॥

यस्यासौ किंनिमित्तः । केन हेतुना अहरदित्यर्थः । किं भोगार्थं उत अपकारप्रतीकारार्थमित्यर्थः । चरमपक्षे तत्स्वरूपं पृच्छति—तस्येति । यं अपराधं ॥ ५ ॥ कथं कीदृशप्रकारं । कानि वाक्यानि ॥ ६ ॥ तात पितृतुल्य ॥ ७ ॥ दीनात्मा दीनमनाः । अतिसन्नया अतिकार्श्यं प्राप्तया ॥ ८ ॥ किंकर्मेत्यस्योत्तरमाह—हृता सेति । वातेन दुर्दिनेन च संकुलां । "मेघच्छन्नेह्नि दुर्दिनं" इत्यमरः । मायया महावातंमेघच्छादनंचोत्पाद्य हृतवानित्यर्थः ॥ ९ ॥ वधमाख्याहीत्यस्योत्तरमाह—परिश्रान्तस्येति । युद्धपरिश्रान्तस्येत्यर्थः ॥ १० ॥ प्रश्नान्तरे प्रत्युत्तरकथनाशक्तिमाह—उपरुध्यन्तीति । उपरुध्यन्ति उपरुध्यन्ते । मरणवेदनया पीड्यन्त इत्यर्थः । सौवर्णान् मरणकालेतथाप्रतीयन्त इतिप्रसिद्धं । उशीरैः लामज्जकैः कृताः कल्पिताः मूर्धजाः केशाः येषांते तथा ॥ ११ ॥ किमिह बहुनोक्तेन सर्वथा सीता पुनर्लप्स्यत इत्याह—येनेति । येनमुहूर्तेन निमित्तभूतेन । रावणः सीतामादाय यातिस्म । तन्मुहूर्तबलेन स्वामी धनस्वामी । विप्रनष्टं धनं क्षिप्रं अचिरेण । पुनः प्रतिपद्यते प्राप्नोति ॥ १२ ॥ कोसौ मुहूर्त इत्यत्राह—विन्द इति । नष्टं धनं विन्दति लभतेऽस्मिन्निति विन्दः । स रावणस्तु नाबुधत् नाबुध्यत । विकरणव्यत्ययश्छान्दसः । तस्मात् बडिशं गृह्य गृहीत्वा । झषवत् मत्स्यइव विनश्यति । वर्तमानसामीप्येवर्तमानवत् । "बडिशं मत्स्यवेधनं" इत्यमरः ॥ १३ ॥ फलितमाह—न चेति ॥ १४ ॥ असंमूढस्येति एतावत्पर्यन्तमिति शेषः । अनुभाषतः उत्तरं भाषमाणस्य ।

ति० यमपराधंदृष्ट्वातु प्रियासीताहृता सोपराधस्तस्यमयाकिंकृतः अपितुन । अतः किं निमित्तं हृदि यस्यसआर्याजहार ॥ ५ ॥ **स०** कानि किंप्रकाराणि ॥ **शि०** चन्द्रसंकाशंचन्द्रस्यापिप्रकाशकं ॥ ६ ॥ **शि०** अनन्तरं अन्तररहितं निरन्तरमित्यर्थः । विलपन्तं विविधंपृच्छन्तं ॥ ८ ॥ **ती०** येनमुहूर्तेन यस्मिन्मुहूर्ते रावणस्सीतामादाययातः असौमुहूर्तो विन्दोनाम । तत्रनष्टं धनं पुनरायास्यति । तदेतत्सरावणोनाबुधत् नाबुध्यत । सीतामोहितत्वात् । विन्दतेऽनेन नष्टंधनमिति विन्दः । विद्लृलाभे इतिधातुः । सचैकादशोमुहूर्तः । मुहूर्तलक्षणंतूक्तंपुराणे—"रौद्रःश्वेतश्चमैत्रश्चतथासारभटःस्मृतः । सावित्रोवैश्वदेवश्चगान्धर्वः कुतपस्तथा । रौहिणस्तिलकश्चैवविजयोनैर्ऋतस्तथा । शंबरोवारुणश्चैवभगःपञ्चदशःस्मृतः" इति । एते अह्निमुहूर्ताः । अत्रविजयस्यैवनामान्तरंविन्दइतिज्ञेयं । यद्वा विन्दः घटिका । नकेवलंमुहूर्तमहिम्नासीतारूपेष्टप्राप्तिः । अपित्वनिष्टरूपरावणविनाशोपीत्याह । विनश्यति सीतापहर्तेतिशेषः ॥ १२—१३ ॥ **ति०** असंमूढस्य मृतिकालेप्यभ्रान्तस्य ॥ १५ ॥

[पा०] १ ङ. झ. ट. मुद्वीक्ष्यस. २ ङ.—ट. धर्मात्मा. ३ ख. च. छ. ज. ञ. मनाथवत्. ४ ख. घ.—ट. राममिदं वचनमब्रवीत्. ५ घ. च. ज.—ट. साहृता. ६ ङ. झ. ट. दुरात्मना. ७ ङ. झ. क्रान्तस्य. ८ क. ख. ग. ङ.—ट. निशाचरः. ९ क. ख. ग. ङ.—ट. दक्षिणामुखः. १० क. ख. ग. ङ.—ट. याति. ११ क. ग. ङ. छ.—ट. मुहूर्तोसौ. १२ ङ. झ. ट. नचकाकुत्स्थसोबुधत्. १३ ग. झ. वैदेह्यां. १४ ख. योक्ष्यसे. १५ ङ. झ. ट. रणमूर्धनि. च. छ. ज. ञ. रावणंरणे.

पुत्रो विश्रवसः साक्षाद्भ्राता वैश्रवणस्य च ॥ इत्युक्त्वा दुर्लभान्प्राणान्मुमोच पतगेश्वरः ॥ १६ ॥
ब्रूहि ब्रूहीति रामस्य ब्रुवाणस्य कृताञ्जलेः ॥ त्यक्त्वा शरीरं गृध्रस्य [१]जग्मुः प्राणा विहायसम् ॥१७॥
स निक्षिप्य शिरो भूमौ प्रसार्य चरणौ [२]तदा ॥ [३]विक्षिप्य च शरीरं स्वं पपात धरणीतले ॥ १८ ॥
तं गृध्रं प्रेक्ष्य ताम्राक्षं गतासुमचलोपमम् ॥ रामः सुबहुभिर्दुःखैर्दीनः सौमित्रिमब्रवीत् ॥ १९ ॥
बहूनि रक्षसां वासे वर्षाणि वसता सुखम् ॥ [[४]पक्षिराजेन वृद्धेन तातमित्रेण नस्सुखम्] ॥
अनेन दण्डकारण्ये विशीर्णमिह पक्षिणा ॥ २० ॥
अनेक[५]वार्षिको यस्तु चिरकालसमुत्थितः ॥ सोयमद्य हतः शेते कालो हि दुरतिक्रमः ॥ २१ ॥
पश्य लक्ष्मण गृध्रोऽयमुपकारी हतश्च मे ॥ सीता[६]मभ्यवपन्नो वै रावणेन बलीयसा ॥ २२ ॥
गृध्रराज्यं परित्यज्य पितृपैतामहं महत् ॥ मम हेतोरयं प्राणान्मुमोच पतगेश्वरः ॥ २३ ॥
सर्वत्र खलु दृश्यन्ते साधवो धर्मचारिणः ॥ शूराः शरण्याः सौमित्रे तिर्यग्योनिगतेष्वपि ॥२४॥
सीताहरणजं दुःखं न मे सौम्य तथागतम् ॥ यथा विनाशो गृध्रस्य मत्कृते च परंतप ॥ २५ ॥
राजा दशरथः श्रीमान्यथा मम महायशाः ॥ पूजनीयश्च मान्यश्च तथाऽयं पतगेश्वरः ॥ २६ ॥

सामिषं मांससहितं रुधिरं ॥ १५ ॥ अथ रावणवंशं वक्तुमुपक्रमते—पुत्र इति । साक्षात्पुत्रः औरस इत्यर्थः । अस्योत्तरार्धे "अध्यास्ते नगरीं लङ्कां रावणो राक्षसेश्वरः" इति बोध्यम् । उत्तरत्र संपातिवचने इदमेव पूर्वार्धमुपादाय अस्योत्तरार्धस्य कथनादिति लोकाचार्योक्तम् । इत्युक्त्वा एतावन्मात्रमुक्त्वा । भवनादिकथनात्पूर्वमित्यर्थः । दुर्लभान् ब्रूहिब्रूहीति पृच्छते रामाय साकल्येन विज्ञापनपर्यन्तं प्राणा न स्थिताः हन्तेति ऋषिःशोचति ॥ १६ ॥ ब्रुवाणस्य ब्रुवाणे सति । प्राणः सूक्ष्मशरीरेन्द्रियप्राणसहित आत्मेत्यर्थः ॥ १७ ॥ निक्षिप्य मरणवेदनयेति भावः । विक्षिप्य विधूय । पपातेत्युक्तिरौपचारिकी ॥ १८ ॥ ताम्राक्षं अधःशिरस्कतया पतनजक्षोभात् ॥ १९ ॥ रक्षसां वासे दण्डकारण्ये । बहूनिवर्षाणि निर्भयतया सुखं वसताऽनेन पक्षिणा विशीर्णं देहविशरणं प्राप्तं इहैवसुखं वसित्वा इहैव मृतमनेनेति भावः । विचीर्णमिति पाठे अत्रैव वसता अनेन अत्रैव सुखं विचीर्णं अनुभूतमित्यर्थः ॥ २० ॥ एतदेव विवृणोति—अनेकेति । अनेकवार्षिकः बहुवयःप्राप्तः । चिरकालमभ्युदयं प्राप्तः ॥२१॥ पश्येति । अनेन मोक्षप्रदानोचितं तदीयसुकृतविशेषं दर्शयति । सीतामभ्यवपन्नो मे उपकारी सन्हतः ॥ २२ ॥ गृध्रराज्यं परित्यज्येति प्राप्याभासपरित्याग उक्तः । महदिति स्वकीयेक्ष्वाकुराज्यव्यावृत्तिः । एकमुखत्वात् । ममेत्यादिना उपायानुष्ठानोक्तिः । पतगेश्वरः पितुर्मरणात् इतःपरमस्य पक्षानाश्रित्य सुखं स्थास्यामीति स्थितोहं अयं तातवन्मत्कृते प्राणत्यागं कृतवानिति भावः ॥ २३ ॥ सर्वत्रेति सर्वजातिष्वपीत्यर्थः । तिर्यग्योनिगतस्यास्य कथमेतादृशीबुद्धिरिति नमन्तव्यमितिभावः ॥ २४ ॥ मत्कृते च मत्कृत एव । यथाऽस्य विनाशःप्राप्तः तथा सीताहरणजं दुःखं नागतं न प्राप्तं । अत्र विनाशशब्देन तज्जं दुःखमुच्यते ॥ २५ ॥ अथ संस्कारयोग्यतामाह—राजेति । पूजनीयः पैतृकविधिना अर्चनी-

ती० ननु रावणहतस्यजटायोरेतावन्तंकालंप्राणधारणंकथमितिचेत् तस्यास्सीतायाअनुग्रहवशादित्यनुसन्धेयं । उक्तंचस्कान्दे—"देवीमांप्राहराजेन्द्रयावत्संभाषणंमम । भवतस्तावदासन्मे प्राणाइत्याहजानकी ।" इति ॥ १८ ॥ **ति०** सीतामभ्यवपन्नः सीतांमोचयितुंप्रवृत्तः ॥ २२ ॥ **ति०** सीताहरणजदुःखाद्गृध्रविनाशजंदुःखमधिकमितिभावः । तस्याः पुनःप्राप्तिसंभावनासत्त्वादस्यतदभावाच्चेतितात्पर्यं ॥ २५ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. प्राणाजग्मुः. २ क. ख. ग. ङ.—ट. तथा. ३ क. ख. ग. विनिक्षिप्य. ४ इदमर्धं घ. पाठेदृश्यते. ५ क. वार्षिकोवीरश्चिरकालसमृद्धिमान्. ६ च. छ. ज. ञ. मभ्यवपन्नोयं. ङ. झ. ट. मभ्यवपन्नोहि. घ. मभ्यवपन्नोवै.

सौमित्रे हर काष्ठानि निर्मथिष्यामि पावकम् ॥ गृध्रराजं दि[1]धक्षामि मत्कृते निधनं गतम् ॥ २७ ॥
[2]नाथं पतगलोकस्य चि[3]तामारोप्य राघव ॥ इमं धक्ष्यामि सौमित्रे हतं रौद्रेण रक्षसा ॥ २८ ॥
या गतिर्यज्ञशीलानामाहिताग्नेश्च या गतिः ॥ अपरावर्तिनां या च या च भूमिप्रदायिनाम् ॥ २९ ॥

यः । मान्यः श्लाघ्यः ॥ २६ ॥ दिधक्षामि दग्धुमिच्छामि । दहेस्सन्नन्तात् घत्वभष्भावौ ॥ २७ ॥ चितां काष्ठभारं ॥ २८ ॥ या गतिरित्यादिश्लोकद्वयमेकान्वयं । गम्यत इति गतिः लोकः । यज्ञशीलानां यज्ञाः शीलं सद्वृत्तं येषां ते तथा सदायज्ञानुष्ठानपराणांगृहस्थानामित्यर्थः । आहिताः परितःस्थापिताः अग्नयः पञ्चाग्नयो यस्य सतथा सर्वदातपःशीलस्य वानप्रस्थस्येत्यर्थः । अग्न्याधानस्य पूर्वेणैव सिद्धत्वात् पृथक्फलाभावाच्च । अपरावर्तिनां "अरण्यमियात्ततो नपुनरेयात्" इत्युक्तानांसंन्यासिनामित्यर्थः । रणादपलायितानामित्यर्थवर्णने जटायोस्तादृशत्वेन तत्फलस्य स्वतःसिद्धत्वेनानुज्ञातव्यत्वाभावात् । मुक्तानां धर्मप्रकरणे उक्त्यसंभवात् । भूमिप्रदायिनां भूमिभोगत्यागिनां नैष्ठिकानामित्यर्थः । ता गतीरिति यत्तदोर्नित्यसंबन्धात्सिद्धम् । ता गतीः "प्राजापत्यं गृहस्थानां ब्राह्मं संन्यासिनां स्मृतं" इत्याद्युक्तस्थानानि । यद्वा यज्ञदानतपःसंन्यासिनामित्यर्थः । तेषां या या गतिः शास्त्रविहिता तां मया संस्कृतो व्रज । मया समनुज्ञातस्तु अनुत्तमान् सर्वश्रेष्ठान् । लोकान् "अथ यदतः परोदिवो ज्योतिर्दीप्यते विश्वतःपृष्ठेषु सर्वतःपृष्ठेष्वनुत्तमेषूत्तमेषु" इत्यादिश्रुतिप्रसिद्धान्विष्णुलोकान् गच्छ अवयवबहुत्वाद्बहुवचनं । अन्यथा गतिशब्देन पौनरुक्त्यमनन्वयश्च । समनुज्ञातःसंस्कृतश्चेति पदद्वयानर्थक्यं च । ननु मानुषभावंभावयतः श्रीरामस्य कथं मुक्तिप्रदानं तस्यपरत्वासाधारणचिह्नत्वादिति चेत् "सत्येनलोकाञ्जयति" इत्युक्तरीत्या स्वार्जितधर्मविशेषेण स्वाधीनसर्वलोकत्वाविरोधात् । केचित्तु मया संस्कृतस्ततोऽनुज्ञातस्त्वं यज्ञशीलादीनां या गतयः ताँल्लोकान्गच्छ सर्वान्ते मांव्रज । "सोश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता" इत्युक्तरीत्या मुक्तभोगं प्राप्नुहि । न च निर्हेतुकमुक्तिप्रदानेतिप्रसङ्गः स्वकार्यमुद्दिश्य प्राणत्यागस्यैव हेतुत्वात् । अतएव नृसिंहपुराणे "मत्कृतेनिधनंयस्मात्त्वया प्राप्तं द्विजोत्तम । तस्मान्मम प्रसादेन विष्णुलोकमवाप्स्यसि" इत्युक्तं ।

ति० दिधक्ष्यामि सद्गतिसिद्धये ॥२७॥ **तनि०** गम्यतइतिगतिर्लोकः । तिरश्चांकर्माधिकाराभावेप्यकृतसंस्काराणां परलोकाभावात्त्वं मयासंस्कृतस्सन् मदनुज्ञयैव अनुत्तमान् लोकान् गच्छ । अपरावर्तिनां पुनरावृत्तिरहितानां मुक्तानामित्यर्थः । "नसपुनरावर्तते" इति श्रुतेः । लोकानितिपूजायांबहुवचनं । यद्वा विश्वतःपृष्ठेषुसर्वतःपृष्ठेष्वनुत्तमेषूत्तमेष्वित्यत्र परमव्योमस्थितावान्तरलोकापेक्षयाबहुवचननिर्देशवदत्रापि बहुवचननिर्देशः । यज्ञशीलानां यज्ञशीलादिलोकमार्गेणापरावर्तिनां लोकंप्राप्नुहीत्यर्थः । तथा च नृसिंहपुराणे—'मत्कृतेमरणंयस्मात्' इत्यादि । ननु भगवतारामेण तिरश्चोगतायुषः संस्कारकरणंकथमितिचेत् 'नशूद्राभगवद्भक्ताः' इत्यत्र शूद्रशब्दस्योपलक्षणार्थत्वाद्भगवद्भक्तानांसर्वप्राणिनांमोक्षाधिकारस्यगम्यमानत्वाच्च युक्तमेवेदमितिज्ञेयं । नन्वेवंसति जटायुषोमोक्षप्रदत्वाद्रामस्यपरमात्मत्वंप्रतीयते । 'त्वंगतिः परमादेव' इत्यादिना बालकाण्डे 'सहिदेवैरुदीर्णस्य' इत्यादिना युद्धकाण्डे 'सीतालक्ष्मीर्भवान्विष्णुः' इत्यादिना श्रीभागवते च श्रीरामस्यपरमात्मत्वंस्फुटमुक्तं । एवं समस्तकल्याणगुणाकरस्य श्रीमन्नारायणस्य रावणादिवधरूपलोकहितार्थं स्वयमेवदशरथभवनेऽवतीर्णस्य सीतामुद्दिश्यविलापःकथमितिचेत् सत्यं । तथापि नदोषः । 'व्यसनेषुमनुष्याणांभृशंभवतिदुःखितः ।—निश्चिताऽपि हिमेबुद्धिर्वनवासेदृढव्रता । भरतस्नेहसंतप्ता बालिशीक्रियते पुनः । सीताहरणजंदुःखं नमेसौम्यतथागतम् । यथाविनाशोगृध्रस्य मत्कृतेचपरंतप ।' इत्यनेनप्रकारेण सर्वेश्वरस्याप्याश्रितवत्सलत्वात् दुःखितानाश्रितानाकलय्य दुःखेनस्वयमपिदुःखितइवभाति तेषांदुःखमपनयतिचेति ऋषेरभिप्रायइतिवेदितव्यं । शुकादयस्तु 'मर्त्यावतारस्त्विहमर्त्यशिक्षणं रक्षोवधायैवनकेवलंविभोः' इत्यादिप्रकारेण श्रीरामस्यदुःखाभावमेववर्णयन्ति । एवमन्यत्राप्येवंविधविषयेपरिहारोद्रष्टव्यः ॥ **ति०** अपरावर्तिनां । संग्रामेइतिशेषः । गम्यतइतिगतिर्लोकः । यज्ञशीलानांलोकान्क्रमेणप्राप्य मदनुज्ञातस्सन् अनुत्तमान् येभ्यः परेउत्तमानसन्ति तांल्लोकान् ब्रह्मणो लोकान् क्रममुक्तिदान् गच्छ । अनेन संकल्पमात्रात्कर्मानधिकृततिरश्चः साधनहीनस्यापि तल्लोकदानेन भगवान्रामः स्वस्वरूपांशेमाययावृतज्ञानइतिप्रलपतांमुखंध्वस्तं । शोकादितु नटनमित्युक्तमेवासकृत् । तदुक्तं—" संस्कारमकरोत्तस्य रामोब्रह्मविधानतः । स्वपदंचददौतस्मै सोपिरामप्रसादतः । हरेस्सामान्यरूपेण प्रययौपरमंपदम् ।' इतिजटायुषंप्रक्रम्य पाद्मे । एतेन तिरश्चामपिस्नेहादिना दाहादियुक्तमितिध्वनितं ।

[पा०] १ क. घ. हिधक्ष्यामि. २ घ. देहंपतगराजस्य. ३ क. ख. ग. चितामारोपयाम्यहं. च. छ. झ. ञ. ट. चितिमारोपयाम्यहं.

मया त्वं समनुज्ञातो गच्छ लोकाननुत्तमान् ॥ गृध्रराज महासत्त्व संस्कृतश्च मया व्रज ॥ ३० ॥
एवमुक्त्वा चितां दीप्तामारोप्य पतगेश्वरम् ॥ ददाह रामो धर्मात्मा स्वबन्धुमिव दुःखितः ॥ ३१ ॥
रामोथ सहसौमित्रिर्वनं गत्वा स वीर्यवान् ॥ स्थूलान्हत्वा महारोहीननु तस्तार तं द्विजम् ॥३२॥
रोहिमांसानि चोत्कृत्य पेशीकृत्य महायशाः ॥ शकुनाय ददौ रामो रम्ये हरितशाद्वले ॥ ३३ ॥
यत्तत्प्रेतस्य मर्त्यस्य कथयन्ति द्विजातयः ॥ तत्स्वर्गगमनं तस्य पित्र्यं रामो जजाप ह ॥ ३४ ॥
ततो गोदावरीं गत्वा नदीं नरवरात्मजौ ॥ उदकं चक्रतुस्तस्मै गृध्रराजाय तावुभौ ॥ ३५ ॥
शास्त्रदृष्टेन विधिना जले गृध्राय राघवौ ॥ स्नात्वा तौ गृध्रराजाय उदकं चक्रतुस्तदा ॥ ३६ ॥

"कर्मणैवहिसंसिद्धिमास्थिता जनकादयः" इतिहि कर्मणोपि मुक्तिहेतुत्वमुक्तं । "नान्यः पन्थाः" इति श्रुतिः परमात्मनोऽन्यत्र साक्षान्मुक्तिहेतुत्वं निषेधति। तस्यैवप्राधान्येन प्रकृतत्वादित्याहुः । यद्वा हे गृध्रराज महासत्त्व मया संस्कृतस्त्वं मयानुज्ञातो भूत्वा अनुत्तमांल्लोकान् मल्लोकानित्यर्थः । गच्छ आनुषङ्गिकतया यज्ञशीलादीनां या या गतयस्ता अपि गच्छ । गम्यत इति गतिः लोकः । आहिताग्नेः गार्हपत्याहवनीयदक्षिणाग्निनिरतस्य । या गतिः "अग्नयो वै त्रयीविद्या" इत्यारभ्य "तस्मादग्नीन्परमंवदन्ति" इत्याहिताग्नित्वस्यापि पृथग्धर्मत्वश्रवणात् । अपरावर्तिनां युद्धादपरावर्तमानानां । या गतिः दृष्टान्तार्थमिदमुक्तं । जटायोस्तादृशत्वेन तत्फलस्येदानीमदेयत्वात् । तिरश्चां यज्ञाद्यधिकाराभावेन तत्फलमात्रस्य देयत्वात् । यथाऽपरावर्तिनां गतिं प्राप्स्यसि तथा यज्ञशीलादीनां लोकानपि । ब्रह्मप्राप्तौ वसुत्वादिकमिव प्राप्नुहीत्यर्थः । अस्मिन्कल्पे भूमिप्रदायिनामित्यस्य प्रतीयमानार्थकत्वमेव । व्रज एवं गच्छ । यद्वा मया प्रथमं संस्कृतः अथ " तृतीयेन ज्योतिषा संविशस्व" इत्यादिमन्त्रेणानुज्ञातो मया त्वं यज्ञाधिकारिणां लोकान् गच्छ । ब्रह्ममेधसंस्कारबलेन प्राप्नुहीत्यर्थः । इदं च फलं संस्कारोत्तरक्षण एवानुतिष्ठतीत्युच्यते । संस्कृतो व्रजेति । गृध्रराज महासत्त्व संस्कृतश्च महात्रतेति पाठे संस्कृतश्च भवेति वार्थः ॥ २९—३० ॥ दीप्तां दीपनार्हां । स्वबन्धुमिवेत्यनेन मन्त्रपूर्वकत्वं दाहस्योच्यते ॥ ३१ ॥ महारोहीन् महामृगान् । तं द्विजमनु जटायुषमुद्दिश्य । हत्वा तस्तार पिण्डदानार्थं दर्भानास्तृतवान् ॥३२॥ उत्कृत्य उद्धृत्य । पेशीकृत्यपिण्डीकृत्य । हरितशाद्वले नवीनतृणास्तृतप्रदेशे । शकुनाय पक्षिणे । ददौ ॥ ३३ ॥ प्रेतस्य मर्त्यस्य मनुष्यस्य । यत्तत् प्रसिद्धं मन्त्रजातं । स्वर्गगमनं स्वर्गोगम्यतेनेनेति स्वर्गगमनं स्वर्गप्रापकं वदन्ति । पित्र्यं पितृदेवताकं । तज्जजाप याम्यसूक्तादिकं जजापेत्यर्थः ॥३४॥ चक्रतुरिति लक्ष्मणस्यकर्तृत्वं सहकारितया । उदकं उदकदानमित्यर्थः ॥३५॥ उक्तस्यैवार्थस्यस्नानपूर्वकत्वविधिपूर्वकत्वप्रदर्शनायपुनरप्याह—शास्त्रेति । तदा तौराघवौ शास्त्रदृष्टेन विधिना गृध्राय गृध्रमुद्दिश्य । जलेस्नात्वा गृध्रराजायोदकं चक्रतुरित्यन्वयः । अयमत्र क्रमः । गृध्रराजंदग्ध्वा स्वर्गगमनसूक्तंजप्त्वा गोदावरींगत्वा स्नात्वा उदकंदत्त्वा रोहिमांसपिण्डंददाविति। ननु वैदिकोत्तमोरामः कथंहीनजातिंतिर्यञ्चं वैदिकेन कर्मणासंस्कृतवान् । मैवं । तस्यात्यन्तभक्तत्वेन जातेरपगमात् । "न शूद्रा भगवद्भक्ता विप्रा भागवताः स्मृताः । सर्ववर्णेषु ते शूद्रा ये ह्यभक्ता जनार्दने" इत्युक्तेः। न चेदं वचनं "अपशवोवाअन्येगोअश्वेभ्यः" इतिवत्प्रशंसापरमितिवक्तुंशक्यं । बाधकाभावात् । ब्राह्मणत्वादिजातिर्हिशास्त्रैकसमधिगम्या नतु गोत्वादिवदाकृतिगम्या । येन तत्तुल्यत्वमाशङ्क्येत । अतएव विश्वामित्रस्यापि क्षत्रियत्वजातिरपनीता उपनीताचब्राह्मणत्वजातिरित्युपपादितं बालकाण्डे । अयमर्थ उपपादयिष्यतेच श्रमणीवृत्तान्ते । इदंच द्रौपदीविवाहादिवदैतिहासिकविलक्षणव्यक्तिविशेषनियतमितिच

सारूप्यमुक्तिलाभश्चोक्तः । मया मद्रूपेण सामान्यहरिरूपेण ॥ २९ ॥ ३० ॥ शि० जलं जलाशयं । प्राप्येतिशेषः ॥ ३६ ॥

[पा०] १ घ. द्विज. २ ङ.—ट. रामोपि. ३ क. ख. ग. ङ.—ट. यात्वा. ४ ख. हत्वाऽपरात्रोहीननु. ५ क. ख. ङ.—ट. पेशीकृत्वा. ६ क. ख. शकुनीनां. ७ च. छ. ज. ञ. मन्त्रंच. ८ च. छ. ज. ञ. क्षिप्रंयाम्यसूक्तंजजापह. ङ. झ. ट. क्षिप्रंतस्यरामो. ९ क. ख. ग. तथा. १० क. ङ.—ज. ट. जलं.

स गृध्रराजः कृतवान्यशस्करं सुदुष्करं कर्म रणे निपातितः ॥
महर्षिकल्पेन च संस्कृतस्तदा जगाम पुण्यां गतिं[1]मात्मनः शुभाम् ॥ ३७ ॥
कृतोदकौ तावपि पक्षिसत्तमे स्थिरां च बुद्धिं प्रणिधाय जग्मतुः ॥
प्रवेश्य सीताधिगमे [2]ततो मनो वनं सुरेन्द्राविव विष्णुवासवौ ॥ ३८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे अष्टषष्टितमः सर्गः ॥ ६८ ॥

एकोनसप्ततितमः सर्गः ॥ ६९ ॥

जटायुषेजलदानानन्तरं सुदूरंनैर्ऋतदिग्भागंगताभ्यां रामलक्ष्मणाभ्यां मध्येवनं कस्याश्चिद्राक्षस्या निरीक्षणं ॥ १ ॥ लक्ष्मणेनायोमुखीतिस्वनामनिर्देशपूर्वकं भोगायाह्वानेनोपगूहनोद्यतायास्तस्याः स्तनकर्णनासच्छेदः ॥ २ ॥ दुश्शकुनदर्शनेनानिष्टसंभावनया सावधानंचरद्भ्यांराघवाभ्यां कबन्धसदृशशरीरतयाकबन्धनाम्नोमहाराक्षसस्य निरीक्षणम् ॥ ३ ॥ तेन योजनायतनिजभुजाभ्यां राघवयोर्ग्रहणे भयाद्विषीदतोलक्ष्मणस्य रामेणसमाश्वासनं ॥ ४ ॥ अत्रान्तरे कबन्धेन तौप्रति वनागमनप्रयोजनादिप्रश्नपूर्वकं स्वेनतयोर्भक्षणप्रतिज्ञाने लक्ष्मणंप्रतिरामेण महतामपिशोकादिहेतुत्वहेतुना कालस्यबलीयस्त्वोक्त्याशोचनं ॥ ५ ॥

कृत्वैवमुदकं तस्मै प्रस्थितौ [3]रामलक्ष्मणौ ॥ [4]अवेक्षन्तौ वने सीतां [5]पश्चिमां जग्मतुर्दिशम् ॥ १ ॥
[6]तौ दिशं [7]दक्षिणां गत्वा शरचापासिधारिणौ ॥ अविप्रहतमैक्ष्वाकौ [8]पन्थानं प्रतिपेदतुः ॥ २ ॥
गुल्मैर्वृक्षैश्च बहुभिर्लताभिश्च प्रवेष्टितम् ॥ आवृतं सर्वतो दुर्गं गहनं घोरदर्शनम् ॥ ३ ॥
[9]व्यतिक्रम्य तु वेगेन [10]व्यालसिंहनिषेवितम् ॥ सुभीमं तन्महारण्यं व्यतियातौ महाबलौ ॥ ४ ॥

नातिप्रसङ्गावकाशः ॥ ३६ ॥ उक्तमर्थमादरातिशयेनपुनःसंगृह्णाति—सइति । रणे सीतानिमित्तं दुष्करं कर्म प्राणविनाशपर्यन्तंव्यापारं कृतवान् । सगृध्रराजः रावणेननिपातितः महर्षिकल्पेन महर्षितुल्येनरामेण । संस्कृतश्च तदा तदुत्तरक्षणएव । पुण्यां पुण्यफलभूतां । आत्मनः सुखावहांगतिं लोकं जगाम ॥ ३७ ॥ कृतोदकाविति । इदं पिण्डदानस्याप्युपलक्षणं । पक्षिसत्तमे स्थिरां बुद्धिंप्रणिधाय सीतामवश्यं प्राप्स्यसीत्युक्तंतद्वचनं विश्वस्येत्यर्थः । सीताधिगमेमनः प्रवेश्य वनं जग्मतुः । सुरेन्द्रौविष्णुवासवाविव स्थिताविल्यनेन सीतान्वेषणंभावनामात्रमितिसूच्यते । अस्मिन्सर्गे सार्धाष्टत्रिंशच्छ्लोकाः ॥ ३८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने अष्टषष्टितमः सर्गः ॥ ६८ ॥

अथायोमुखीविरूपकरणपूर्वकं कबन्धदर्शनमेकोनसप्ततितमे । अवेक्षन्तौ अवेक्षमाणौ । पश्चिमां दक्षिणपश्चिमामित्यर्थः ॥ १ ॥ दक्षिणांदिशमिति दक्षिणपश्चिमाद्युभयथा व्यवहर्तुंशक्या । अविप्रहतं अक्षुण्णं । ऐक्ष्वाकौ । "दाण्डिनायन—" इत्यादिसूत्रेनिपातितः । प्रतिपेदतुः प्रतिपेदाते ॥ २ ॥ गुल्मैरित्यादिश्लोकद्वयमेकान्वयं । गुल्मैः कीचकप्रभृतिभिः वृक्षैश्च । प्रवेष्टितं लताभिश्चावृतं । दुर्गं विषमं । गहनं दुष्प्रवेशं । घोरदर्शनं अतएव सुभीमं तत् महारण्यं दण्डकारण्यं । व्यतिक्रम्य

स० महर्षीणां ब्रह्मादीनां कल्पेन कल्पपादपवद्विद्यमानेन ॥ ३७ ॥ **ती०** सर्गश्रवणफलंस्कान्दे—" जटायोःसंस्कृतिंश्रुत्वास्वर्लोकंयातिमानवः ॥" इति ॥ ३८ ॥ इत्यष्टषष्टितमःसर्गः ॥ ६८ ॥

शि० अवेक्षन्तौ अन्वेषन्तौ॥१॥ **शि०** पश्चिमांदक्षिणां पश्चिमदक्षिणदिगन्तरालदिशंजग्मतुः । तांदिशंगत्वा अविप्रहतं जनै-

[**पा०**] १ छ. ज. मात्मनस्तदा. २ घ. तदा. ३ क.—ट. राघवौतदा. ४ क. च. छ. ज. ञ. अन्वेषन्तौ. ५ ङ.—ट. जग्मतुःपश्चिमांदिशं. ६ ट. पश्चिमांदक्षिणांगत्वा. झ. ञ. तांदिशं. ७ क. ग. च. छ. ज. दक्षिणांगृह्य. घ. पश्चिमांगत्वा. ८ क. घ. च. छ. ज. ञ. पन्थानंप्रतिजग्मतुः. ग. पन्थानमभिजग्मतुः. ९ च. छ. ज. ञ. अतिक्रम्य. १० क. ख. ग. ङ.—ट. गृहीत्वादक्षिणांदिशं.

ततः परं [1]जनस्थानात्रिक्रोशं गम्य राघवौ ॥ क्रौञ्चारण्यं विविशतुर्गहनं तौ [2]महौजसौ ॥ ५ ॥
नानामेघघनप्रख्यं प्रहृष्टमिव सर्वतः ॥ [3]नानापक्षिगणैर्जुष्टं नानाव्यालमृगैर्युतम् ॥ ६ ॥
दिदृक्षमाणौ वैदेहीं तद्वनं तौ वि[4]चिक्यतुः ॥ तत्रतत्रावतिष्ठन्तौ सीताहरण[5]कर्शितौ ॥ ७ ॥
ततः पूर्वेण तौ [6]गत्वा त्रिक्रोशं भ्रातरौ तदा ॥ क्रौञ्चारण्य[7]मतिक्रम्य मतङ्गाश्रम[8]मन्तरे ॥ ८ ॥
[9]दृष्ट्वा तु तद्वनं घोरं बहुभीममृगद्विजम् ॥ [10]नानासत्त्वसमाकीर्णं सर्वं गहनपादपम् ॥ ९ ॥
ददृशाते [11]तु तौ तत्र दरीं दशरथात्मजौ ॥ पातालसमगम्भीरां तमसा नित्यसंवृताम् ॥ १० ॥
[12]आसाद्य तौ नरव्याघ्रौ दर्यास्तस्याविदूरतः ॥ [13]ददृशाते महारूपां राक्षसीं वि[14]कृताननाम् ॥ ११ ॥
भयदामल्पसत्त्वानां बीभत्सां रौद्रदर्शनाम् ॥ लम्बोदरीं तीक्ष्णदंष्ट्रां [15]करालां परुषत्वचम् ॥ १२ ॥
भक्षयन्तीं मृगान्भीमान्विकटां मुक्तमूर्धजाम् ॥ प्रै[16]क्षेतां तौ [17]ततस्तत्र भ्रातरौ रामलक्ष्मणौ ॥ १३ ॥
सा समासाद्य तौ वीरौ व्रजन्तं भ्रातुरग्रतः ॥ एहि रंस्यावहेत्युक्त्वा समालम्बत लक्ष्मणम् ॥ १४ ॥
उवाच [18]चैनं वचनं सौमित्रि[19]मुपगुह्य सा ॥ १५ ॥
अहं त्वयोमुखी [20]नाम लाभस्ते त्वमसि प्रियः ॥ नाथ [21]पर्वतकूटेषु नदीनां पुलिनेषु च ॥
[22]आयुःशेषमिमं वीर त्वं मया सह रंस्यसे ॥ १६ ॥
एवमुक्तस्तु कुपितः [23]खड्गमुद्धृत्य लक्ष्मणः ॥ [24]कर्णनासौ स्तनौ [25]चास्या नि[26]चकर्तारि[27]सूदनः ॥ १७ ॥

अतीत्य व्यतियातौ गतौ॥३–४॥ततःपरं गमनानन्तरं । जनस्थानात् त्रिक्रोशं गम्य गत्वा । क्रौञ्चारण्याख्यं गहनं वनं । विविशतुः । "गहनं काननं वनं" इत्यमरः ॥ ५ ॥ नानेत्यादिश्लोकद्वयमेकान्वयं । नानामेघघनप्रख्यं नानावर्णमेघसमूहसदृशं । प्रहृष्टमिव पुष्पोद्गमादिभिःसन्तुष्टमिव । व्यालमृगैः सर्पैः मृगैश्च । तद्वनं क्रौञ्चारण्यं । तत्रतत्र वृक्षमूले । विश्रान्त्यै तिष्ठन्तौसन्तौ । विचिक्यतुः मृगयामासतुः ॥ ६ ॥ ॥ ७ ॥ तत इत्यादिश्लोकत्रयमेकान्वयं । ततः क्रौञ्चारण्यमतिक्रम्य । मतङ्गाश्रमं पूर्वेण मतङ्गाश्रमपूर्वदिग्भागे । "एनपाद्वितीया" इति द्वितीया । त्रिक्रोशं गत्वा अन्तरे मतङ्गाश्रमक्रौञ्चारण्ययोर्मध्ये । तद्वनं मतङ्गाश्रमसंबन्धि किंचिद्वनं । दृष्ट्वा तत्र दरीं ददृशाते ददृशतुः । अत्रोपरिष्टाच्च कर्तरिलिड्व्यात्मनेपदमार्षं ॥ ८—१० ॥ तस्याविदूरत इत्यार्षःसन्धिः । महारूपां महाशरीरां ॥ ११ ॥ सामान्यतो दर्शनमुक्त्वा विशेषतो दर्शनमाह—द्वाभ्यां ॥१२—१३॥ रंस्यावहेत्युक्त्वेत्यत्र सन्धिरार्षः । समालम्बत हस्ते गृहीतवती ॥ १४ ॥ उवाचेत्यर्धं । उपगुह्य आलिङ्ग्य ॥ १५ ॥ अहमित्यादिसार्धश्लोकः । अयोमुखीत्यन्वर्थनामा । हयमुखीत्यपि पाठः । ते लाभः लाभभूता । त्वमपि मम प्रियोसि आयुःशेषमित्यत्यन्तसंयोगेद्वितीया ॥ १६ ॥ कर्णनासावित्यत्र एकवद्भावाभाव आर्षः । नासाशब्दस्य पुल्लिङ्गताचार्षी ॥ १७ ॥

रक्षुण्णंपन्थानंप्रतिपेदतुः प्रापतुः । पश्चिमदक्षिणशब्दौभाक्तौ । श्लोकद्वयमेकान्वयि ॥ १—२ ॥ **ती०** प्रहृष्टमिवसर्वतः वनगतपुष्पविकासादिना तद्गतमृगादिहर्षेणच वनस्यप्रहृष्टत्वव्यपदेशः ॥ ६ ॥ **शि०** नानासत्वानां अनेकविधमृगादीनां समाकीर्णभक्षणायराक्षसादिकर्तृकापक्षेपोयस्मिंस्तत् ॥ ९ ॥ **ति०** कर्णनासस्तनमितिसमाहारद्वन्द्वः । कर्णनासं प्राण्यङ्गत्वाद्द्वंद्वैकवद्भावः ॥१७॥

[पा०] १ ख. जनस्थानंहित्वावेगेनराघवौ. २ च. छ. ज. ञ. महाजवौ. ३ क. ख. ग. ङ.—ट. नानावर्णैःशुभैःपुष्पैर्मृगपक्षिगणैर्युतं. ४ क. विचेरतुः. ५ क. ख. ग. ङ—ट. दुःखितौ. ६ क. च. छ. ज. गम्य. ७ घ. ण्यंव्यतिक्रम्य. ८ ख. च. ञ. मन्तरा. ९ च. छ. ज. ञ. दृष्ट्वाथ. १० ङ. झ. नानावृक्षसमाकीर्णं. च. छ. नानासत्वमृगाकीर्णं. ११ ङ. झ. ट. गिरौतत्र. क. चतौतत्र. १२ क. ख. ङ.—ट. आसाद्यच. १३ क.—ट. ददर्शतुर्महा. १४ क.—घ. विकृतेक्षणां. १५ क.—ट. करालीं. १६ ङ. झ. ट. अवैक्षेतांतुतौतत्र. १७ क.—घ. च. छ. ज. ञ. तदातत्र. १८ क. चैनंसौमित्रिमुपगृह्यमहौजसं. १९ ङ. झ. ट. मुपगृह्यच. ख. ग. घ. छ. मुपगृह्यसा. २० ख. नाम्नालब्धोमे. २१ क. ख. ग. ङ.—ट. पर्वतदुर्गेषु. २२ क.—घ. आयुःशिष्टमिदं. ङ.—ट. आयुश्चिरमिदं. २३ ख. मुद्यम्य. क. मुद्गृह्य. २४ क. ख. कर्णनासे. ङ. झ. ञ. ट. कर्णनासस्तनं. २५ क.—ट. तस्याः. २६ ट. सचकर्तारि. २७ च. छ. ज. मर्दनः.

कर्णनासे निकृत्ते तु [१]विस्वरं सा विनद्य च ॥ यथागतं प्रदुद्राव राक्षसी [२]भीमदर्शना ॥ १८ ॥
तस्यां गतायां गहनं [३]विशन्तौ वनमोजसा ॥ आसेदतुरमित्रघ्नौ भ्रातरौ रामलक्ष्मणौ ॥ १९ ॥
[४]लक्ष्मणस्तु महातेजाः [५]सत्त्ववाञ्छीलवाञ्छुचिः ॥ अब्रवीत्प्राञ्जलिर्वाक्यं भ्रातरं दीप्ततेजसम् ॥२०॥
स्पन्दते मे दृढं बाहुरुद्विग्नमिव मे मनः ॥ प्रायशश्चाप्यनिष्टानि निमित्तान्युपलक्षये ॥ २१ ॥
तस्मात्सज्जीभवार्य त्वं कुरुष्व वचनं [६]हितम् ॥ [७]ममैव हि निमित्तानि [८]सद्यः शंसन्ति [९]संभ्रमम् ॥२२॥
एष वञ्चुलको [१०]नाम पक्षी परमदारुणः ॥ आवयोर्विजयं युद्धे शंसन्निव विनर्दति ॥ २३ ॥
[११]तयोरन्वेषतोरेवं सर्वं तद्वनमोजसा ॥ संजज्ञे विपुलः शब्दः प्रभञ्जन्निव तद्वनम् ॥ २४ ॥
संवेष्टितमिवात्यर्थं [१२]गगनं मातरिश्वना ॥ [१३]वनस्य तस्य शब्दोऽभूद्[१४]दिवमापूरयन्निव ॥ २५ ॥
तं शब्दं काङ्क्षमाणस्तु [१५]रामः कक्षे सहानुजः ॥ ददर्श [१६]सुमहाकायं राक्षसं [१७]विपुलोरसम् ॥ २६ ॥
[१८]आसेदतुस्ततस्तत्र तावुभौ प्रमुखे स्थितम् ॥ विवृद्धमशिरोग्रीवं कबन्धमुदरेमुखम् ॥ २७ ॥
रोमभिर्निचितैस्तीक्ष्णैर्महागिरिमिवो[१९]च्छ्रितम् ॥ [२०]नीलमेघनिभं रौद्रं मेघस्तनितनिःस्वनम् ॥ २८ ॥
अग्निज्वालानिकाशेन ललाटस्थेन दीप्यता ॥ महापक्ष्मेण पिङ्गेन विपुलेनायतेन च ॥ २९ ॥
एकेनोरसि घोरेण नयनेनाशुदर्शिना ॥ महादंष्ट्रोपपन्नं तं लेलिहानं महामुखम् ॥ ३० ॥

कर्णेति एकवद्भावे सप्तमी ॥ १८ ॥ गहनं दुष्प्रवेशं । वनं विशन्तौ वनमध्यं गच्छन्तौ । आसेदतुः वक्ष्यमाणनिमित्तानीति शेषः ॥ १९ ॥ महातेजा इत्यदीनतोक्तिः । सत्त्ववान् निर्मलमनस्कः । शीलवान् सद्वृत्तवान् । शुचिः कायशुद्धियुक्तः । एभिर्विशेषणैर्भ्रातृभक्तिरुक्ता ॥ २० ॥ बाहुः वामइतिशेषः । उद्विग्नं कम्पितं । अनिष्टानि अनिष्टसूचकानि ॥२१॥ मम वचनमित्यन्वयः । संभ्रमं भयं ॥ २२ ॥ वञ्चुलकः कर्णवालाख्यःपक्षिविशेषः । "वञ्चुलः कर्णवालः स्यात्" इतिनिघण्टुः । विनर्दति कूजति ॥ २३ ॥ एवं एतादृशोक्तिपूर्वकं । अन्वेषतोः अन्वेषमाणयोः । प्रभञ्जन् प्रभञ्जयन् ॥ २४ ॥ मातरिश्वना वायुना । संवेष्टितं पूरितं । अयमुत्पातविशेषः । शब्दः पूर्वोक्तः । तस्य वनस्य संबन्धिनीं । दिवं आकाशं । आपूरयन्निवाभूत् ॥ २५ ॥ तं काङ्क्षमाणः किमस्योत्पत्तिमूलमिति ज्ञातुमिच्छन् । गत्वेति शेषः । कक्षे गुल्मे । ददर्श दूरादितिशेषः ॥ २६ ॥ आसेदतुरित्यादिसार्धषट्च्छ्लोकी । प्रमुखे अग्रे । विवृद्धं उन्नतं । अशिरोग्रीवं । अदृश्यमानशिरोग्रीवं । अतएव कबन्धं अन्वर्थकबन्धनामकं । उदरेमुखं "अमूर्धमस्तकात्स्वाङ्गादकामे" इति लुक् । रोमभिरुपलक्षितं निचितैः निबिडैः । अग्निज्वालानिकाशेन तत्सदृशेन । महापक्ष्मेण महापक्ष्मणा । अदन्तत्वमार्षं । विपुलेन विस्तीर्णेन । आयतेन दीर्घेण । उरसि उरोन्तर्गतशिरस्कत्वेन उरसिदृश्यमानेनेत्यर्थः । लेलिहानं पुनःपुनर्जिह्वयालेहनं कुर्वन्तं महामुखं विपुलास्यरन्ध्रं । विकुर्वाणं व्यापारयन्तं । योजनमिति अध्ववाचित्वादत्यन्तसंयोगे द्वितीया । आकर्षन्तं आभिमुख्येन कर्षन्तं । विकर्षन्तं । विशेषेण कर्षन्तं मृगयूथपानिति मृगविशेषणं । प्रपन्नयोः समीपंप्राप्तयोः

शि० मेममबाहुः बाहुद्वयं दृढंस्पन्दतेप्रस्फुरति । अतएवमेमनः उद्विग्नमिव उद्विग्नसदृशं । सदृशमित्युक्त्या वस्तुतउद्विग्नत्वाभावस्सूचितः । तेन दक्षिणस्यापिभुजस्यप्रस्फुरणात् यथाकथंचित्प्राप्तस्यविघ्नस्य विध्वंसोभविष्यतीति निश्चयस्सूचितः । विनिगमनाविरहाद्बाहुशब्देन बाहुद्वयग्रहणं । एकवचनंतु जात्यभिप्रायेण ॥ २१ ॥ ति० एषइति । अनेन युद्धमवश्यंभाविजयश्चेत्युभयंसूचितं ॥ २३ ॥ ति० उच्यमानविशेषणेन ललाटस्थेनैकेननयनेन उरःप्रदेशान्तर्गतशिरस्त्वात् उरसि उरःप्रदेशे

[पा०] १ क. ख. ग. ङ.—ट. विस्वरंविननादसा. २ ङ—ट. घोरदर्शना. ३ ङ. झ. ञ. ट. व्रजन्तौ. ४ ख. ग. लक्ष्मणश्च. ५ ख. ङ. ञ. सत्यवान्. ६ ङ. झ. ट. मम. ७ क. ममैवच. ८ छ. ज. सदा. ९ ग. विभ्रमं. १० ट. राम. ११ क. घ. ततस्त्वन्वेषतोः. १२ क. ङ. च. छ. झ. ञ. ट. गहनं. १३ ख. गंभीरस्तस्य. १४ क. ख. ङ. झ. ट. वनमापूरयन्निव. १५ ङ. झ. ट. रामःखड्गी. क. च. छ. ज. ञ. रामस्तस्थौ. १६ ट. समहाकायं. १७ ख. विपुलोदरं. १८ ख. आजग्मतुस्तत्र. ङ. झ. ट. आसेदतुश्चतत्रक्षस्तावुभौ. १९ घ. मित्रोन्नतं. २० घ. भीममेघनिभं.

भक्षयन्तं महाघोरानृक्षसिंहमृग[1]द्विपान् ॥ घोरौ भुजौ विकु[2]र्वाणमुभौ योजनमायतौ ॥ ३१ ॥
कराभ्यां विविधान्गृह्य ऋक्षान्पक्षि[3]गणान्मृगान् ॥ आकर्षन्तं विकर्षन्तमनेकान्मृगयूथपान् ॥
स्थितमावृत्य पन्थानं तयोर्भ्रात्रोः प्रपन्नयोः ॥ ३२ ॥
अथ [4]तौ समभिक्रम्य क्रोश[5]मात्रे ददर्शतुः ॥ महान्तं दारुणं [6]भीमं कबन्धं भुजसंवृतम् ॥
कबन्धमिव संस्थानादतिघोरप्रदर्शनम् ॥ ३३ ॥
स महाबाहुरत्यर्थं प्रसार्य विपुलौ भुजौ ॥ जग्राह स[7]हितावेव राघवौ पीडयन्बलात् ॥ ३४ ॥
खड्गिनौ दृढधन्वानौ तिग्मतेजोवपुर्धरौ ॥ भ्रातरौ विवशं प्राप्तौ कृष्यमाणौ महाबलौ ॥ ३५ ॥
तत्र[9] धैर्येण शूरस्तु राघवो नैव विव्यथे ॥ बाल्यां[10]दनाश्रयत्वाच्च लक्ष्मणस्त्वे[11]वतिविव्यथे ॥
उवाच च विषण्णः सन्राघवं राघवानुजः ॥ ३६ ॥
पश्य मां वीर वि[12]वशं राक्षसस्य वशं गतम् ॥ [13]मयैकेन विनिर्युक्तः परिमुञ्चस्व राघव ॥
मां हि भूतबलिं दत्त्वा पलायस्व यथासुखम् ॥ ३७ ॥
अधिगन्ताऽसि वैदेहीमचिरेणेति मे मतिः ॥ ३८ ॥
प्रतिलभ्य च काकुत्स्थ पितृपैतामहीं महीम् ॥ तत्र मां राम राज्यस्थः स्मर्तुमर्हसि सर्वदा ॥ ३९ ॥
[14]लक्ष्मणेनैवमुक्तस्तु रामः सौमित्रिमब्रवीत् ॥ मा स्म त्रासं कृथा वीर न हि त्वादृग्विषीदति ॥४०॥

॥ २७—३२ ॥ अथेति सार्धश्लोक एकान्वयः । अथ आसादनानन्तरं । समभिक्रम्य आभिमुख्येनगत्वा । क्रोशमात्रे समीपे । ददर्शतुः ददृशतुः । दारुणं भीमं अतिशयेन भीमं भुजाभ्यां मृगान् संवृणोतीति भुजसंवृतं । संस्थानात् देहस्थित्या । कबन्धमिव सर्वदाअशिरस्कत्वलक्षणकबन्धवत्स्थितं ॥३३॥ सहितावेव नैकमपि मुक्त्वेत्यर्थः ॥३४॥ तिग्मं खरं तेजो यस्यतत्तथा तादृशवपुर्धरौ विवशं पारवश्यं । प्राप्तौ ॥३५॥ तत्र तस्यामवस्थायां । बाल्यात् बालबुद्धित्वात् । रामवदप्रौढबुद्धित्वादित्यर्थः ।अन्नाश्रयत्वात् धैर्यानालम्बनात् । अतिविव्यथे अत्यन्तं खिन्नोऽभूत् उवाच च ॥३६॥ राक्षसस्य वशं गतत्वेन विवशमिति योजना । विनिर्युक्तः वियुक्तः । एतस्यैवविवरणं मामिति । भूतबलिं भूतस्य कबन्धस्य बलिं ॥३७॥ अधीत्येकार्थं ॥३८॥ तत्र मह्यां ॥३९—

अन्तरुपलभ्यमानेननयनेनोपलक्षितंमुखंलेलिहानं ॥ ३० ॥ **ति०** तिग्मतेजौ तिग्मतेजसौ ॥ ३५ ॥ **ति०** अनाश्रयात् धैर्यस्येतिशेषः । धैर्यानालंबनादित्यर्थः । तत्रहेतुर्बाल्यं बालबुद्धित्वं । शुद्धसत्त्वाप्रधानत्वं । अनाश्रयत्वादितिपाठे आश्रयभूतस्यरामस्यापि कबन्धभुजावृतत्वादितिभावः ॥ ३६ ॥ **ति०** निर्युक्तः निर्योजितरक्षोबलिस्सन्स्त्वं किंचित्स्ववशमात्मानंपरिमुञ्चस्व । पलायनेनेतिशेषः ॥ **शि०** मांभूतबलिंदत्वा पिशाचाकारराक्षसायसमर्प्येत्यर्थः । एकेनमयानिर्युक्तः वियुक्तस्त्वं पलायस्व राक्षसमितिशेषः । अतएव यथासुखंपरिमुञ्चस्व । आत्मानमितिशेषः । मांभूतबलिंदत्वेत्यनेनमांप्राप्य संतोषप्राप्त्यापराक्रमाद्राक्षसोनिवर्तिष्यतइति सूचितं । तेन सीतान्वेषणेविलंबोनकार्यइतिध्वनितं । तेन लक्ष्मणस्यसीताविषयकप्रेमातिशयोव्यञ्जितः ॥ ३७ ॥

[पा०] १ ख. च. छ. ज. ञ. रुरुद्विपान्. ङ. झ. ट. मृगद्विजान्. २ ट. विकुर्वन्तमुभौ. ३ घ. गणान्बहून्. ४ च. छ. ज. ञ. ट. तत्समतिक्रम्य. ख. ग. घ. झ. तंसमतिक्रम्य. ५ घ. ङ. छ. झ. ञ. ट. क्रोशमात्रं. ६ च. छ. ज. ञ. भूतं. ७ ङ. झ. ट. सहितावेष. ८ घ.—ट. तिग्मतेजौमहाभुजौ. ख. तिग्मतेजौधनुर्धरौ. ९ ख. च. छ. ज. ञ. ट. तत्रधैर्याच्च. १० झ. दनाश्रयाच्चैव. ११ ख. ञ. ट. स्त्वभिविव्यथे. १२ ङ.—ट. विवशंवीर. १३ क.—घ. च. छ. ज. ञ. मयैकेनतुनिर्युक्तः. १४ प्रतिलभ्यचकाकुत्स्थेतिश्लोकात्परं एतस्मिन्नन्तरे इतिश्लोकात्पूर्वं लक्ष्मणेनैवमुक्तस्त्वितिश्लोकस्यस्थाने क. च. छ. ज. पाठेषु. नहिमेत्वत्समोबन्धुः कश्चनानघविद्यते । नमातुश्चममाख्येयोविनाशश्चकथंचन । विषीदत्यतिमात्रंहिप्रियपुत्राहिसाभृशम् ॥ १ ॥ तंतुसंपन्नयावाचापरितापार्तमातुरम् । आश्वासहेतोर्वचनमिदमाहपरंतपः ॥ २ ॥ पुत्रोदशरथस्यासीद्द्वितीयोममचानुजः । सप्राकृतइवोदारःकथंनामविषीदसि ॥ ३ ॥ मांसराशिमयःपापोरूपमात्रंहिभीषणम् । मासंत्रासंकृथावीरनहित्वादृग्विषीदति ॥ ४ ॥ ततःसत्वानितद्रक्षःक्षुधयाह्यग्रसत्तदा ॥ ५ ॥ खड्गिनौदृढधन्वानौतिग्मबाणौधनुर्धरौ । भ्रातरावरणींप्राप्यकृष्यमाणौददर्शतुः ॥ ६ ॥ महाजगरसंकशौखड्गरोमभिरावृतौ । तीक्ष्णरोमनखौबाहूपश्चास्याविवपन्नगौ ॥ ७ ॥ ताभ्यांतुकृष्यमाणौतौबाणपातमिवागतौ । कृच्छ्रेणदूरतस्तस्यतत्रदृष्ट्वाव्यवस्थितौ ॥ ८ ॥ इत्यष्टौश्लोकादृश्यन्ते.

[1]एतस्मिन्नन्तरे क्रूरो भ्रातरौ रामलक्ष्मणौ ।। [2]पप्रच्छ घननिर्घोषः कबन्धो दानवोत्तमः ।। ४१ ।।
कौ युवां वृषभस्कन्धौ महाखड्गधनुर्धरौ ।। घोरं दे[3]शमिमं प्राप्तौ [4]मम भक्षावुपस्थितौ ।। ४२ ।।
वदतं कार्यमिह वां किमर्थं [5]चागतौ युवाम् ।। इमं देशमनुप्राप्तौ क्षुधार्तस्येह तिष्ठतः ।। ४३ ।।
[6]सबाणचापखड्गौ च तीक्ष्णशृङ्गाविवर्षभौ ।। [7]भमास्यमनुसंप्राप्तौ दुर्लभं [8]जीवितं पुनः ।। ४४ ।।
तस्य तद्वचनं श्रुत्वा कबन्धस्य [9]दुरात्मनः ।। उवाच लक्ष्मणं रामो मुखेन परिशुष्यता ।। ४५ ।।
कृच्छ्रात्कृच्छ्रतरं प्राप्य दारुणं सत्यविक्रम ।। व्यसनं जीवितान्ताय प्राप्तमप्राप्य तां प्रियाम् ।।४६।।
कालस्य सुमहद्वीर्यं सर्वभूतेषु लक्ष्मण ।। त्वां च मां च नरव्याघ्र व्यसनैः पश्य मोहितौ ।। ४७ ।।
[10]नातिभारोस्ति दैवस्य सर्वभूतेषु लक्ष्मण ।। शूराश्च बलवन्तश्च कृतास्त्राश्च [11]रणाजिरे ।।
[12]कालाभिपन्नाः सीदन्ति यथा वालुकसेतवः ।। ४८ ।।
इति ब्रुवाणो दृढसत्यविक्रमो [13]महायशा दाशरथिः प्रतापवान् ।।
अवेक्ष्य सौमित्रि[14]मुदग्रपौरुषं स्थिरां तदा स्वां मतिमात्मनाऽकरोत् ।। ४९ ।।
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकोनसप्ततितमः सर्गः ।। ६९ ।।

४०।। एतस्मिन्नन्तरे लक्ष्मणाश्वासनावसरे ।। ४१ ।। भक्षौ आहारौ ।।४२।। इह वने । वां युवयोः । कार्यं वदतं । लोण्मध्यमपुरुषद्विवचनं । वामिह वने किं कार्यं किं कर्तव्यं । किमर्थं कस्य प्रयोजनाय । आगतौ न किमप्यस्त्यत्रवां प्रयोजनं । प्रत्युतास्मत्प्रयोजनमेव सिद्धमित्याह—इममिति । इह तिष्ठतः ममेति शेषः । क्षुधार्तस्य मम संबन्धिनमिमं देशमनुप्राप्तावित्यनेन मम क्षुन्निवृत्त्यर्थमेव वामागमनमिति भावः।। ४३ ।। आगमने आवयोःकाहानिरित्यत्राह—सबाणेति ।।४४।। मुखेन उपलक्षित इति शेषः ।। ४५ ।। कृच्छ्रात्कृच्छ्रतरं राज्यभ्रंशवनवाससीताहरणपर्यन्तं प्राप्यावस्थितयोः पुनश्चतां प्रियामप्राप्यैव आवयोर्जीवितान्ताय दारुणं व्यसनं दुःखं प्राप्तं ।। ४६ ।। अत्र हेतुमाह—कालस्येति । सर्वभूतेष्वपि कालस्य वीर्यं सुमहत् अनर्गलमित्यर्थः । त्वां च मां च महाबलपराक्रमावपि व्यसनैर्मोहितौ करोति पश्य ।। ४७ ।। उक्तमर्थमुपपादयति—नातीति । सार्धश्लोकएकान्वयः । वालुकसेतवः सिकतामयसेतवः ।। ४८ ।। सौमित्रिं दीनमवेक्ष्य स्वांमतिं आत्मनैव स्थिरामकरोत् ।। ४९ ।। इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे

शि० दानवोत्तमइत्युक्त्यादनुवंशोद्भवत्वेपिकर्मणाराक्षसत्वादन्यत्रराक्षसत्वोक्तिर्नविरुध्यते ।। ४१ ।। **शि०** जीवितान्ताय अवध्यतिक्रमणहेतुकायोध्यावासिजीवनविध्वंसाय व्यसनं राक्षसग्रहजनितदुःखं प्राप्तम् ।। ४६ ।। **ती०** सर्ववाक्यंसावधारणं इतिन्यायेनात्रैवकारोद्रष्टव्यः । अस्यार्थः—सर्वभूतेषुमध्ये कालस्यैवसुमहद्वीर्यं । अस्तीतिशेषः । कुतः त्वांत्वादृशं । मांमादृशंच । व्यसनैः कालकृतैरितिशेषः । मोहितौपश्येत्यर्थः ।। ४७ ।। **ती०** नातीति । दैवस्यकालस्यसर्वभूतेषुविषये । यद्वा सर्वभूतेषु सर्वभूतानां संहारइतिशेषः । नातिभारोस्ति नप्रयाससाध्यइत्यर्थः । कुतः । शूराश्चेति । समहाबाहुरित्यारभ्य 'तत्रमांराम राज्यस्थः' इत्यन्तस्यवास्तवार्थेऽयमर्थः । सकबन्धस्तौजग्राहयद्यपि । तथापि तौविवशं। विवेतिनिपातौपादपूरणार्थौ । शंसुखंप्राप्तौ । यद्वा विवशं वेःपक्षिणःगरुत्मतः वशंप्राप्तौ गरुडारूढावित्यर्थः । तौसजग्राहेतिपूर्वेणसंबन्धः । तत्र लक्ष्मणस्यमनुष्यनाट्यं दर्शयति—तत्रेति । तुइवार्थे । अभिविव्यथइव ।। कृच्छ्रात्कृच्छ्रतरमित्यादेर्वास्तवार्थस्तु दारुणंकृच्छ्रतरंप्राप्यापि तांप्रियामप्राप्य जीवितान्ताय व्यसनंप्राप्तमित्यादि लोकरीतिमनुसृत्य सीतादर्शनव्याजेनोक्तिः ।। ४८ ।। इत्येकोनसप्ततितमः सर्गः ।। ६९ ।।

[**पा०**] १ एतस्मिन्नन्तरेइतिश्लोकस्यस्थाने ख. पाठे. ततःपिपासाविक्षिप्तः क्षुधयानिभृतस्तदा । विक्षिप्तांसबाहुभ्यांमृगैःसहमहावने । भ्रातरौनिकटंप्राप्य कृष्यमाणौददर्शह । तावुवाचमहाबाहुःकबन्धोदानवोत्तमः । इतिश्लोकादृश्यते. २ ङ.—ट. तावुवाचमहाबाहुः. ३ घ. मनुप्राप्तौ. ४ ङ. झ. ट. दैवेनममचाक्षुषौ. ५ च. छ. ज. चागतावुभौ. ६ घ. च. छ. ज. ञ. सचापबाणखड्गौच. ख. ट. सचापबाणखड्गेन. ७ ङ. झ. मांतूर्णमनुसंप्राप्तौ. ८ ङ. झ. ट. जीवितंहिवां. ९ च. छ. ज. महात्मनः. १० ङ. झ. ञ. नहिभारोस्ति. ११ च. छ. ज. ञ. महारणे. १२ क. ख. ग. कालावपन्नाः. १३ घ. महारथो. १४ ख. ग. च. छ. ज. मुदारविक्रमं. ङ. झ. ञ. मुदारविक्रमः.

सप्ततितमः सर्गः ॥ ७० ॥

लक्ष्मणेनरामंप्रतिकबन्धस्यप्रतियोधनाक्षमतयामारणाकरणेनभुजच्छेदनमात्रस्यकर्तव्यत्वोक्तिः ॥ १ ॥ तद्वचनश्राविणाकबन्धेनतयोर्भक्षणोद्यमेताभ्यांतद्भुजयोश्छेदनं ॥२॥ ततोभुविपतितेनतेन तौप्रतितत्त्वप्रश्ने लक्ष्मणेनतंप्रतिसीताहरणान्तनिजवृत्तान्तकथनपूर्वकं तत्स्वरूपप्रश्नेनसहकबन्धसादृश्यप्राप्तिकारणप्रश्नः ॥ ३ ॥

[1]तौ तु तत्र [2]स्थितौ दृष्ट्वा भ्रातरौ रामलक्ष्मणौ ॥ बाहुपाशपरिक्षिप्तौ कबन्धो वाक्यमब्रवीत् ॥ १ ॥
[3]तिष्ठतः किंनु मां दृष्ट्वा क्षुधार्तं क्षत्रियर्षभौ ॥ आहारार्थं तु संदिष्टौ दैवेन [4]गतचेतसौ ॥ २ ॥
तच्छ्रुत्वा लक्ष्मणो वाक्यं प्राप्तकालं हितं तदा ॥ उवाचार्तिं समापन्नो विक्रमे [5]कृतलक्षणः ॥ ३ ॥
त्वां च मां च पुरा तूर्णमादत्ते राक्षसाधमः ॥ तस्मादसिभ्यामस्याशु बाहू छिन्दावहे गुरू ॥ ४ ॥
भीषणोयं [6]महाकायो राक्षसो भुजविक्रमः ॥ लोकं [7]ह्यतिजितं कृत्वा ह्यावां हन्तुमिहेच्छति ॥ ५ ॥
निश्चेष्टानां वधो राजन्कुत्सितो [8]जगतीपतेः ॥ क्रतुमध्योपनीतानां पशूनामिव राघव ॥ ६ ॥
एतत्सञ्जल्पितं श्रुत्वा तयोः [9]क्रुद्धस्तु राक्षसः ॥ विदार्यास्यं [10]तदा रौद्रस्तौ भक्षयितुमारभत् ॥ ७ ॥
ततस्तौ देशकालज्ञौ खड्गाभ्यामेव राघवौ ॥ अच्छिन्दतां [11]सुसंहृष्टौ बाहू तस्यांसदे[12]शतः ॥ ८ ॥
दक्षिणो दक्षिणं बाहुमसक्तमसिना ततः ॥ चिच्छेद रामो वेगेन सव्यं [13]वीरस्तु लक्ष्मणः ॥ ९ ॥

रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकोनसप्ततितमः सर्गः ॥ ६९ ॥

अथ कबन्धस्य बाहुच्छेदेन पूर्वजन्मस्मृतिरुच्यते सप्ततितमे । परिक्षिप्तौ परिवेष्टितौ ॥ १ ॥ क्षुधार्तं मांदृष्ट्वा भीतौ किंनुतिष्ठतः व्यर्थमेव नतुजीवितापत्परिहारइत्यर्थः । यतो गतचेतसौयुवां मे दैवेनाहारार्थं संदिष्टौ ॥ २ ॥ कृतलक्षणः कृतोद्योगः ॥ ३ ॥ पुरा आदत्ते आदास्यतीत्यर्थः ॥ ४ ॥ भुजयोरेव विक्रमो यस्य स तथा । लोकं जनं । अतिजितं अत्यन्तजितं ॥ ५ ॥ भुजच्छेदनमात्रंकर्तव्यंनतुमारणमित्याह— निश्चेष्टानामिति । निश्चेष्टानां प्रतीकाराशक्तानां । जगतीपतेः क्षत्रियस्य । क्रतुमध्योपनीतानां निश्चेष्टानामित्यस्मिन्नर्थे प्रयुक्तं । "पर्यग्निकृतानारण्यानुत्सृजन्त्यहिंसायै" इत्युक्तरीत्या अश्वमेधक्रतावुपनीतानामारण्यपशूनां वधः कुत्सित एव ॥ ६ ॥ तयोरेतत् संजल्पितं श्रुत्वा भक्षयितुमारभत् हस्ताभ्यामाकृष्टवानित्यर्थः ॥ ७ ॥ सुसंहृष्टौ कदलीकाण्डवत्सुखच्छेदनादिति भावः ॥ ८ ॥ दक्षिणः समर्थः । असक्तं अप्रतिबन्धं यथाभवतितथा । रामदक्षिणपार्श्वेगमनं लक्ष्मणस्य । अत उभयोर्दक्षिणसव्यपार्श्वप्राप्तिः ॥९॥

ती॰ वस्तुतस्तु—हेक्षत्रियर्षभौ युवांदैवेनाहारार्थंसंदिष्टौकिं । ममेतिशेषः । गतचेतसौकिं तादृशौनभवतः । अतः क्षुधार्तं मांदृष्ट्वा किंतिष्ठतः । गच्छतमितिशेषः । इत्यब्रवीदितिपूर्वेणसंबन्धः । **शि॰** क्षुधार्तंमांदृष्ट्वादैवेनाहारार्थंसंदिष्टौ । अतःकिमर्थंतिष्ठतः ॥ २ ॥ **ती॰** अस्यहननमेवयुक्तमित्याकांक्षायामाह—निश्चेष्टानामिति । निश्चेष्टानां अकृतविक्रमाणां । वधः कुत्सितः अयुक्तइत्यर्थः । क्रतुमध्यापनीतानां क्रतुमध्यादन्यत्रनीतानां । क्रतुबाह्यानां क्रत्वनङ्गभूतानामितियावत् ॥ **ति॰** क्रतुमध्यंप्राप्तानां पशूनांवधइव । सयथास्वर्गफलदोपि शास्त्रविहितोपि कुत्सितः । साङ्ख्यपातञ्जलाद्युक्तरीत्या धर्मजनकत्वाल्लोकदृष्ट्याचकुत्सितः । एतेन तद्वधस्यापीषत्पापफलदता सूचिता । केचित्तु क्रतुमध्यापनीतानामितिपाठं श्रद्धाजाड्येनकल्पयित्वा क्रतुमध्यादन्यत्रनीतानामितिव्याचक्षते ॥ **स॰** क्रतुमध्योपनीतानां पशूनांवधः कलिकाले प्रायस्तद्विधानाज्ञत्वाल्लोकानांयथाकुत्सितः पिष्टपशोरेवहिंस्यत्वेन भारताद्युक्तेः । अथवा क्रतुमध्ये तद्धननाकृप्तदिने ॥ ६ ॥ **ति॰** दक्षिणः समर्थः दक्षिणपार्श्वस्थोवा ॥ ९ ॥

[पा॰] १ क. सतौतत्र. २ ख. ङ. झ. ट. स्थितो. ३ ङ. तिष्ठतं. ४ ङ. झ. हतचेतसौ. च. ट. हतचेतनौ. घ. छ. ज. गतचेतनौ. ५ घ. ङ. झ. ट. कृतनिश्चयः. ६ ख. ग. महाबाहूराक्षसो. ७ ख. ह्यपजितं. ८ ख. ग. घ. च. छ. ज. ञ. जगतीपते. ९ क. क्रुद्धस्स. १० ख. ततौरौद्रः. ग. ङ—ट. ततोरौद्रंतं. ११ ट. तुसंहृष्टौ. १२ ख. ग. ङ.—ट. देशयोः. १३ च. छ. ज. धीरस्तु.

स पपात महाबाहुश्छिन्नबाहुर्महास्वनः ॥ खं च गां च दिशश्चैव नादयञ्जलदो यथा ॥ १० ॥
सं[1] निकृत्तौ भुजौ दृष्ट्वा शोणितौघपरिप्लुतः ॥ दीनः पप्रच्छ तौ वीरौ कौ युवामिति दानवः ॥११॥
इति तस्य ब्रुवाणस्य लक्ष्मणः शुभलक्षणः ॥ शशंस राघवं[2] तस्य कबन्धस्य महात्मनः ॥ १२ ॥
अयमिक्ष्वाकुदायादो रामो नाम जनैः श्रुतः ॥ [3]अस्यैवावरजं विद्धि भ्रातरं मां च लक्ष्मणम् ॥१३॥
[[4]मात्रा प्रतिहृते राज्ये रामः प्रव्राजितो वनम् ॥ मया सह चरत्येष भार्यया च महद्वनम्] ॥१४॥
अस्य देवप्रभावस्य वसतो विजने वने ॥ राक्षसाऽपहृता पत्नी[5] यामिच्छन्ताविहागतौ ॥ १५ ॥
त्वं तु को वा किमर्थं वा कबन्धसदृशो वने ॥ आस्येनोरसि दीप्तेन भग्नजङ्घो विवेष्टसे[6] ॥ १६ ॥
एवमुक्तः कबन्धस्तु लक्ष्मणेनोत्तरं[7] वचः ॥ उवाच [8]परमप्रीतस्तदिन्द्रवचनं स्मरन् ॥ १७ ॥
स्वागतं वां नरव्याघ्रौ दिष्ट्या पश्यामि चाप्यहम्[9] ॥ दिष्ट्या चेमौ निकृत्तौ मे युवाभ्यां बाहुबन्धनौ ॥१८॥
विरूपं यच्च मे रूपं प्राप्तं ह्यविनयाद्यथा ॥ तन्मे शृणु नरव्याघ्र[10] तत्त्वतः शंसतस्तव ॥ १९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

एकसप्ततितमः सर्गः ॥ ७१ ॥

कबन्धेनश्रीरामंप्रति सामस्त्येननिजवृत्तान्तनिवेदनपूर्वकं कुत्सितनिजराक्षसशरीरदाहेसति विज्ञानप्रतिबन्धकशापनिवृत्त्यानिजरूपप्राप्तौ सीतान्वेषणसहकारिणो निवेदनप्रतिज्ञानम् ॥ १ ॥

पुरा राम महाबाहो महाबलपराक्रम[11] ॥ रूपमासीन्ममाचिन्त्यं त्रिषु लोकेषु विश्रुतम् ॥
यथा सोमस्य[12] शक्रस्य सूर्यस्य च यथा वपुः ॥ १ ॥
सोहं रूपमिदं कृत्वा लोकवित्रासनं महत् ॥ ऋषीन्वनगतान्राम त्रासयामि ततस्ततः ॥ २ ॥

गां भूमिं ॥ १० ॥ पूर्वमदत्तोत्तरत्वात्पुनः प्रश्नः ॥११॥ क्रियाभेदात्पुनस्तच्छब्दः ॥ १२ ॥ इक्ष्वाकुदायादः दशरथपुत्रः । “दायादौ सुतबान्धवौ” इत्यमरः ॥१३—१४॥ इच्छन्तौ अन्वेषमाणावित्यर्थः ॥१५॥ विवेष्टसे लुठसीति यावत् ॥ १६ ॥ प्रीतः शापमोक्षकालप्रत्यभिज्ञानात् । तदिन्द्रवचनं उत्तरसर्गप्रतिपाद्यं ॥ १७ ॥ बाह्वोर्बन्धनं ययोस्तौ बाहुबन्धनौ अंसावित्यर्थः ॥ १८ ॥ विरूपं विषमरूपं । यथा येनकारणेन । प्राप्तं तत्कारणं तत्त्वतस्तव शंसतो मे सकाशाच्छृणु । अस्मिन्सर्गे अष्टादश श्लोकाः ॥१९॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने सप्ततितमः सर्गः ॥ ७० ॥

अथ कबन्धः स्ववृत्तान्तकथनपूर्वकं स्वशापमोक्षाय स्वशरीरदहनमर्थयते एकसप्ततितमे । पुरेत्यादिसार्धश्लोक एकान्वयः। अचिन्त्यं अचिन्त्यवैभवं ॥१॥ सोहमिति । सुन्दररूपोहं । रूपं शरीरं लोकवित्रासनं क्रूरं।

शि० इति ब्रुवाणस्यकबन्धस्यसमीपे तस्यरामस्यप्रेरितोलक्ष्मणः काकुत्स्थंरामंशशंस ॥ १२ ॥ **स०** यां सीतां । इच्छन्तौ आवां ॥ १५ ॥ **ति०** यथाऽविनयात्यादृशाविनयात्प्राप्तंतच्छृण्वित्यन्वयः ॥ १९ ॥ इतिसप्ततितमः सर्गः ॥ ७० ॥

स० अचिन्त्यं अचिन्त्यमिव । सोमस्यचन्द्रस्य । रुद्रस्येत्यप्यर्थः । यथातेषांवपुः तथाममापिरूपमासीदितिपूर्वेणसंबन्धः ॥ १ ॥ सोहंएतादृशोप्यहं लोकवित्रासनं इदंरूपं राक्षसरूपं वैभवेनकृत्वा ऋषींस्त्रासयामीतिसंबन्धः ॥ २ ॥

[पा०] १ घ. सन्निकृत्तौ. २ क. ख. ग. ङ.—ट. तस्यकाकुत्स्थंकबन्धस्यमहाबलः ३ ङ. झ. ञ. ट. तस्यैवावरजं. ४ अयंश्लोकः घ.—ट. पाठेषुदृश्यते. ५ ख. ङ.—ट. भार्या. ६ ख. ट. विचेष्टसे. ७ ग. च. च. छ. ज. ट. नोत्तमं. ८ ङ.—ट. वचनंप्रीतः. ९ ङ. झ. ट. वामहं. १० ख. ग. नरश्रेष्ठ. ११ ख. ग. ङ. झ. ट. पराक्रमं. १२ क. ख. ग. ङ.—ट. सूर्यस्यसोमस्यशक्रस्यच.

ततः स्थूलशिरा नाम महर्षिः कोपितो मया ॥ संचिन्वन्विविधं वन्यं रूपेणानेन धर्षितः ॥ ३ ॥
तेनाहमुक्तः प्रेक्ष्यैवं घोरशापाभिधायिना ॥ एतदेव नृशंसं ते रूपमस्तु विगर्हितम् ॥ ४ ॥
स मया याचितः क्रुद्धः शापस्यान्तो भवेदिति ॥ अभिशापकृतस्येति तेनेदं भाषितं वचः ॥ ५ ॥
यदा छित्त्वा भुजौ रामस्त्वां दहेद्विजने वने ॥ तदा त्वं प्राप्स्यसे रूपं स्वमेव विपुलं शुभम् ॥ ६ ॥
श्रिया विराजितं पुत्रं दनोस्त्वं विद्धि लक्ष्मण ॥ इन्द्रकोपादिदं रूपं प्राप्तमेवं रणाजिरे ॥ ७ ॥
अहं हि तपसोग्रेण पितामहमतोषयम् ॥ दीर्घमायुः स मे प्रादात्ततो मां विभ्रमोऽस्पृशत् ॥ ८ ॥
दीर्घमायुर्मया प्राप्तं किं मे शक्रः करिष्यति ॥ इत्येवं बुद्धिमास्थाय रणे शक्रमधर्षयम् ॥ ९ ॥
तस्य बाहुप्रमुक्तेन वज्रेण शतपर्वणा ॥ सक्थिनी चैव मूर्धा च शरीरे संप्रवेशितम् ॥ १० ॥
स मया याच्यमानः सन्नानयद्यमसादनम् ॥ पितामहवचः सत्यं तदस्त्विति ममाब्रवीत् ॥ ११ ॥
अनाहारः कथं शक्तो भग्नसक्थिशिरोमुखः ॥ वज्रेणाभिहतः कालं सुदीर्घमपि जीवितुम् ॥ १२ ॥
एवमुक्तस्तु मे शक्रो बाहू योजनमायतौ ॥ प्रादादास्यं च मे कुक्षौ तीक्ष्णदंष्ट्रमकल्पयत् ॥ १३ ॥
सोऽहं भुजाभ्यां दीर्घाभ्यां संकृष्यास्मिन्वनेचरान् ॥ सिंहद्विपमृगव्याघ्रान्भक्षयामि समन्ततः ॥ १४ ॥
स तु मामब्रवीदिन्द्रो यदा रामः सलक्ष्मणः ॥ छेत्स्यते समरे बाहू तदा स्वर्गं गमिष्यसि ॥ १५ ॥

कृत्वा परिगृह्य ततस्ततः तत्रतत्र। ऋषीन् त्रासयामि अत्रासयं ॥२॥ विविधं वन्यं संचिन्वन् स्थूलशिराः धर्षितः अपहृतवन्यः । तेन कोपितश्च ॥ ३ ॥ एवंविधं मे रूपं प्रेक्ष्य घोरशापाभिधायिना तेन ऋषिणा नृशंसं गर्हितं एतदेव रूपं ते अस्त्वित्यहमुक्तः ॥ ४ ॥ अभिशापशब्देन तन्निमित्तंधर्षणंलक्ष्यते । मद्धर्षणकृतस्य शापस्यान्तोभवेदिति स मया याचितः प्रार्थितः इति हेतोः तेन मयैवं याचितेन । इदं वक्ष्यमाणं । वचो भाषितं ॥ ५ ॥ तदेवाह—यदेति ॥ ६ ॥ तर्हि कबन्धरूपप्राप्तिः केन हेतुनेत्यत्राह—श्रियेति। मामिति शेषः । एवं एवंविधं । रणाजिरे रणाङ्गणे ॥ ७ ॥ इन्द्रेणयोद्धुंतव कुतःसामर्थ्यं तत्राह—अहं हीति । ऋषिदत्तघोराकारप्राप्त्यनन्तरं उग्रेण तपसा पितामहमतोषयं। स्वकुलशत्रोरिन्द्रस्य जयायेत्यर्थः। विभ्रमः अज्ञानं ॥८॥ तदेवाह—दीर्घमिति ॥ ९ ॥ शतपर्वणा शतधारेण । सक्थिनी पृष्ठास्थिफलके शरीरे मध्यदेहे उदरभागे सक्थ्नोः प्रवेशनं उरोभागे मूर्ध्नः प्रवेशनं। संप्रवेशितमित्यत्र " नपुंसकमनपुंसकेन— " इति नपुंसकपरिशेषत्वमेकवद्भावश्च ॥ १० ॥ याच्यमानः मारयेति प्रार्थ्यमानः। यमसादनं नानयत् मृतिं न प्रापितवान् । कुत इत्यत्राह—पितामहेति। तत् पूर्वोक्तं दीर्घायुर्विषयकं पितामहवचः सत्यमस्त्विति मम मह्यं। अब्रवीत् न त्वां मारयामीत्यब्रवीदित्यर्थः॥११॥ अनाहार इत्यादिश्लोकद्वयमेकान्वयं। अनाहारः सन् सुदीर्घं कालं कथं जीवितुं शक्तः । भग्नसक्थिशिरोमुखत्वमनाहारत्वे हेतुः । बाहू प्रादात् आस्यमकल्पयत् ॥१२–१३॥ संकृष्य आकृष्य ॥१४॥ स मामित्यनेन

स० अभिशापकृतस्य मत्कृतप्रधर्षणादिनिमित्तकस्य शापस्यान्तःपरिहारोभवेदिति । समयायाचितइत्येकंपदं । समये शापानन्तरकाले आयाचितोयस्तेनेदंवचोभाषितमित्यन्वयः ॥ ५ ॥ **ति०** तदास्वं विपुलं उत्तमं श्रियाविराजितंरूपंप्राप्स्यसेइति तेनभाषितमितिसंबन्धः । एवंवृत्तं मांदनोःपुत्रं विद्धीत्यन्वयः । 'श्रियाविराजितंपुत्रंदनुंत्वंविद्धिलक्ष्मण' इतिपाठान्तरं । तदा श्रियाः श्रीनाम्नोदानवस्य पुत्रं दनुनामानमित्यर्थः ॥ **ती०** श्रियइति । श्रियः श्रिया विराजितं दनोःपुत्रंविद्धि । यद्वा दनोः दनुवंशजस्य । श्रियः श्रीनाम्नःपुत्रं विद्धि । मामितिशेषः । " दनुर्नामश्रियःपुत्रः शापाद्राक्षसतांगतः " इतिकिष्किन्धाकाण्डे वक्ष्यमाणत्वात् ॥ ७ ॥

[**पा०**] १ ङ.—ट. इन्द्रशापात्. २ ख. प्रादान्मानोमांचतदाऽस्पृशत्. ३ ख. विमुक्तेन. च. छ. ज. प्रयुक्तेन. ४ ख. नतपर्वणा. ५ ग. ङ.—ट. सक्थिनीचशिरश्चैव. ६ घ. भग्नस्कन्धशिरोधरः. छ. ञ. भग्नस्कन्धशिरोमुखः. ७ ख. ङ. झ. ञ. ट. तदाचास्यंच. ८ घ. च. छ. ज. ञ. समाकृष्यवनेचरान्. ङ. झ. ट. संक्षिप्यास्मिन्. ख. विकृष्यास्मिन्. ९ ङ. झ. ञ. ट. सिंहद्वीपि.

अनेन वपुषा [1]राम वनेऽस्मिन्[2]राजसत्तम ॥ यद्यत्पश्यामि [3]सर्वस्य ग्रहणं साधु रोचये ॥ १६ ॥
अवश्यं ग्रहणं रामो मन्येऽहं [4]समुपैष्यति ॥ इमां बुद्धिं पुरस्कृत्य देहन्यासकृतश्रमः ॥ १७ ॥
स त्वं रामोसि भद्रं ते नाहमन्येन राघव ॥ शक्यो हन्तुं यथातत्त्वमे[5]वमुक्तं महर्षिणा ॥ १८ ॥
अहं हि मतिसाचिव्यं करिष्यामि नरर्षभ ॥ मित्रं चैवोपदेक्ष्यामि युवाभ्यां संस्कृतोऽग्निना ॥ १९ ॥
एवमुक्तस्तु धर्मात्मा दनुना तेन राघवः ॥ इदं जगाद वचनं [6]लक्ष्मणस्योपशृण्वतः ॥ २० ॥
रावणेन हृता [7]भार्या मम सीता यशस्विनी ॥ निष्क्रान्तस्य जनस्थानात्सह भ्रात्रा यथासुखम् ॥ २१ ॥
नाममात्रं तु जानामि न रूपं तस्य रक्षसः ॥ निवासं वा प्रभावं वा वयं तस्य न विद्महे ॥ २२ ॥
शोकार्तानामनाथानामेवं विपरिधावताम् ॥ कारुण्यं सदृशं कर्तु[8]मुपकारे च वर्तताम् ॥ २३ ॥
काष्ठान्[9]यादाय [10]शुष्काणि काले भग्नानि कुञ्जरैः ॥ धक्ष्यामस्त्वां वयं वीर श्वभ्रे महति कल्पिते ॥ २४ ॥
स त्वं सीतां समाचक्ष्व येन वा यत्र वा हृता ॥ कुरु कल्याणमत्यर्थं यदि जानासि तत्त्वतः ॥ २५ ॥
एवमुक्तस्तु रामेण वाक्यं दनुरनुत्तमम् ॥ प्रोवाच कुशलो वक्तुं वक्तारमपि राघवम् ॥ २६ ॥
दिव्यमस्ति न मे ज्ञानं नाभिजानामि मैथिलीम् ॥ यस्तां [11]ज्ञास्यति तं वक्ष्ये दग्धः स्वं रूपमास्थितः ॥
[[12]योभिजानाति तद्रक्षस्तं वक्ष्ये राम तत्परम्] ॥ २७ ॥
[13]अदग्धस्य तु विज्ञातुं शक्तिरस्ति न मे प्रभो ॥ [14]राक्षसं तं महावीर्यं सीता येन हृता तव ॥ २८ ॥
विज्ञानं हि [15]मम भ्रष्टं शापदोषेण राघव ॥ स्वकृतेन मया प्राप्तं रूपं लोकविगर्हितम् ॥ २९ ॥
किंतु यावन्न यात्यस्तं सविता श्रान्तवाहनः ॥ तावन्मामवटे क्षिप्त्वा दह राम यथाविधि ॥ ३० ॥

बलात्कारो लक्ष्यते ॥ १५ ॥ अनेनवपुषा उपलक्षितोहं यद्यत्पश्यामि तस्यग्रहणंरोचये नत्वभक्ष्यबुद्ध्या किंचित्त्यजामीत्यर्थः ॥ १६ ॥ महर्षिवाक्यविश्वासात् अवश्यं रामो ग्रहणं समुपैष्यतीति मन्ये । इमांबुद्धिंपुरस्कृत्य देहन्यासेकृतश्रमो भवामि विकृतदेहत्यागेकृतोद्योगो भवामि । देहत्यागेकृतबुद्धितया रामोऽवश्यंग्रहणमुपैष्यतीति सर्वग्रहणंरोचयइतिभावः ॥ १७ ॥ रामत्वेयुक्तिमाह—नाहमिति । एवं यथातत्त्वं यथार्थमेव । महर्षिणोक्तं ॥ १८ ॥ मतिसाचिव्यं बुद्धिसाहाय्यं । करिष्यामि । किंच तद्विषये मित्रं चोपदेक्ष्यामि । युवाभ्यामग्निना संस्कृतश्चेद्भवेयं ॥ १९ ॥ दनुना दनुवंश्येन । औपचारिकस्तद्वंश्ये तच्छब्दः ॥ २० ॥ जनस्थानाद्यथासुखं निष्क्रान्तस्य निर्गतस्य मे भार्या हृता ॥ २१ ॥ नाममात्रं तु जानामि आप्तवाक्यादिति शेषः । न विद्महे अहं मत्पुरीजनाश्चेत्यर्थः ॥ २२ ॥ उपकारे परोपकारे । वर्ततां प्रवर्तमानानां । अस्माकं विषये कारुण्यंकर्तुं सदृशं युक्तं ॥ २३ ॥ उपकारमेवाह—काष्ठानीति । कल्पिते सज्जे । श्वभ्रे अवटे ॥ २४ ॥ कल्याणं तत्त्वकथनरूपं ॥ २५ ॥ वक्तारमपिराघवं वक्तुं कुशलः ॥ २६ ॥ मैथिलीं तदपहर्तारंचेति द्रष्टव्यं । तर्हि किंवा मतिसाचिव्यं करिष्यसीत्यत्राह—य इति । तर्हि तंवाब्रूहीत्यत्राह—दग्ध इति ॥ २७ ॥ इदमेव व्यतिरेकमुखेनाह—अदग्धस्येति ॥ २८ ॥ कुत इत्यत्राह—विज्ञानं हीति । विज्ञानं अतीन्द्रियविषयकं । स्वकृतेन पापेनेति शेषः ॥ २९ ॥ अवटे श्वभ्रे । यथाविधि यथा

ति० कबेरिन्द्रस्यचवाक्यविश्वासात् अवश्यरामोममहस्तेग्रहणमेष्यतीतिमन्ये मन्यमानस्तिष्ठामि—ममदेहन्यासे देहत्यागेकृतश्रमः कृतयत्नः रामोममहस्तेग्रहणमेष्यतीतिमांबुद्धिंपुरस्कृत्यसर्वस्यग्रहणंसाधुरोचये । अयमेवरामोभवेदितिबुद्ध्याकिमपिनत्यजामीत्याशयः ॥ १७ ॥ स० मतिसाचिव्यं बुद्ध्यासाहाय्यं ॥ १९ ॥ ति० दनुना दनुनाम्ना ॥ २० ॥ स० 'वयमिति अस्मदो द्वयोश्च' इतिबहुवचनं ॥ २२ ॥ ति० तत्परं दाहात्परं ॥ २७ ॥ इत्येकसप्ततितमःसर्गः ॥ ७१ ॥

[पा०] १ क.—ट. तात. २ ख. प्रभुसत्तम. ३ ख. सर्वत्र. ४ च. समुपैष्यसि. ५ ख. ग. च. छ. ज. मेतदुक्तं. ६ ङ. झ. ट. लक्ष्मणस्यचपश्यतः. ७ क. ख. ग. सीताममभार्या. ङ.—ट. भार्यासीताामम. ८ ङ.—ट. मुपकारेण. ९ ख. ग. ङ.—ट. न्यानीय. १० ख. ङ. झ. ट. भग्नानिकालेशुष्काणि. ११ घ. ङ. झ. ट. वक्ष्यति. १२ इदमर्धं ङ. छ. झ. ञ. ट. पाठेपुदृश्यते. १३ ख. घ. ट. अदग्धस्यहि. १४ ङ.—ट. राक्षसंतु. १५ ङ. झ. ट. महद्भ्रष्टं. घ. परिभ्रष्टं.

दग्धस्त्वयाऽहमवटे न्यायेन रघुनन्दन ॥ वक्ष्यामि तमहं वीर[1] यस्तं ज्ञास्यति राक्षसम् ॥ ३१ ॥
तेन सख्यं च कर्तव्यं न्यायवृत्तेन राघव ॥ कल्पयिष्यति ते प्रीतः साहाय्यं लघुविक्रमः ॥ ३२ ॥
न हि तस्यास्त्यविज्ञातं त्रिषु लोकेषु राघव ॥ सर्वान्परिसृतो[2] लोकान्पुरा[3]ऽसौ कारणान्तरे ॥ ३३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे एकसप्ततितमः सर्गः ॥ ७१ ॥

द्विसप्ततितमः सर्गः ॥ ७२ ॥

रामलक्ष्मणाभ्यां कबन्धदेहस्यगर्तेचितारोपणपूर्वकमग्निनादहनं ॥ १ ॥ ततश्चितामध्यात्समुत्पत्यनभसिहंसयुक्तविमानमधिरूढेनकबन्धेनरामंप्रतिसुग्रीववृत्तान्तनिवेदनपूर्वकं ऋश्यमूकमेत्यतेनसहसख्यकरणे तेनस्वानुचरवानरैः सीतान्वेषणकरणोक्तिः ॥ २ ॥

एवमुक्तौ तु तौ वीरौ कबन्धेन नरेश्वरौ ॥ गिरिप्रदर[4]मासाद्य पावकं विससर्जतुः ॥ १ ॥
लक्ष्मणस्तु महोल्काभिर्ज्वलिताभिः समन्ततः ॥ चितामादीपयामास सा प्रजज्वाल सर्वतः ॥ २ ॥
तच्छरीरं कबन्धस्य घृतपिण्डोपमं महत् ॥ मेदसा पच्यमानस्य[5] मन्दं दहति पावकः ॥ ३ ॥
स विधूय चितामाशु विधूमोऽग्निरिवोत्थितः ॥ अरजे वाससी बिभ्रन्मालां[6] दिव्यां महाबलः ॥४॥
ततश्चिताया वेगेन भास्वरो विमलाम्बरः[7] ॥ उत्पपाताशु संहृष्टः सर्वप्रत्यङ्गभूषणः ॥ ५ ॥
विमाने भास्वरे तिष्ठन्हंसयुक्ते यशस्करे ॥ प्रभया च महातेजा दिशो दश विराजयन् ॥ ६ ॥
सोन्तरिक्षगतो रामं[8] कबन्धो वाक्यमब्रवीत् ॥ शृणु राघव तत्त्वेन यथा सीतामवाप्स्यसि ॥ ७ ॥
राम षड्युक्तयो लोके याभिः सर्वं विमृश्यते ॥ ८ ॥
परिमृष्टो दशान्तेन दशाभागेन सेव्यते॥दशाभागगतो हीनस्त्वं[9] हि रामः सलक्ष्मणः ॥

सम्यग्दग्धंभवति तथेत्यर्थः ॥ ३० ॥ न्यायेन सम्यक्त्वेन ॥ ३१ ॥ न्यायवृत्तेन नीतिमच्चरित्रेण ॥ ३२ ॥ कारणान्तरे भ्रातृविरोधरूपनिमित्तान्तरे । अयं रावणमेव न जानाति सुग्रीवं तु जानाति । किंतु तन्नाम न कथितवान् दाहात्पूर्वकथने कुत्सितशरीरदहनेरामोवैमनस्यं कुर्यादिति । अस्मिन्सर्गे सार्धत्रयस्त्रिंशच्छ्लोकाः ॥ ३३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने एकसप्ततितमः सर्गः ॥ ७१ ॥

अथ संस्कृतः कबन्धः स्वरूपं प्रत्यापन्नो मित्रमुपदिशति द्विसप्ततितमे । प्रदरं श्वभ्रं । आसाद्य प्रापय्य कबन्धमिति शेषः ॥ १ ॥ महोल्काभिः निर्गतज्वालकाष्ठैः॥२॥ मेदसा मांसेन । पच्यमानस्य अभिवृद्धस्य कबन्धस्य शरीरं ॥ ३ ॥ अरजे निर्मले । अदन्तत्वमार्षं ॥ ४ ॥ चिताया उत्पपात । सर्वेषु प्रत्यङ्गेष्वङ्गुल्यादिष्वपि भूषणानि यस्य स तथा ॥ ५ ॥ हंसयुक्त इत्यनेन रामदग्धतया ब्रह्मलोकप्राप्तिः सूच्यते । विराजयन् अभूदिति शेषः॥ ६॥ तत्त्वेन परमार्थतः । शृण्विति वाक्यमब्रवीदिति संबन्धः ॥ ७ ॥ हेराम लोके षड्युक्तयः सन्ति । युक्तयः उपायाः । ते च सन्धिविग्रहयानासनद्वैधीभावसमाश्रयाः । याभिर्युक्तिभिः सर्वं राज्ञां कृत्यं विमृश्यते ताः सन्तीति ॥ ८ ॥ ततः किमित्यपेक्षायां संधिविषयं दर्शयति—

ती० यद्वाषड्युक्तयइति । तत्रयुक्तयः प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यभावप्रमाणानि । पार्थसारथिमिश्रैः शास्त्रदीपिकायां युक्तिशब्दस्यप्रमाणपरतयाव्याख्यातत्वात् । अस्यार्थः । हेराम लोके षड्युक्तयः षट्प्रमाणानिसन्ति । याभिःप्रत्यक्षादिभिः सर्ववस्तु विमृश्यते ज्ञाप्यते ॥ ८ ॥ अत्र सर्वप्रमाणैः क्षीणःपुरुषः क्षीणेनपुरुषेण सेव्यतइतिफलितार्थः । तत्रान्वयव्यतिरेकमूलं

[पा०] १ ङ. झ. ञ. ट. वीर. २ ङ. झ. ञ. ट. परिवृतो. ३ ख. ङ.—ट. पुरावै. ४ ग. घ. ज. प्रवरं. ५ ख. दह्यमानस्य. ६ ग. झ. ञ. न्माल्यंदिव्यं. ७ ख. झ. ट. विरजांबरः. घ. विरजोंबरः. ८ ख. ङ.—ट. वाक्यंकबन्धोरामं. ९ ख. झ. स्त्वंतु. क. च. छ. ज. ञ. स्त्वंरामसहलक्ष्मणः.

यत्कृते व्यसनं प्राप्तं त्वया दारप्रधर्षणम् ॥ ९ ॥
तदवश्यं त्वया कार्यः स सुहृत्सुहृदां वर ॥ अकृत्वा हि न ते सिद्धिमहं पश्यामि चिन्तयन् ॥१०॥
श्रूयतां राम वक्ष्यामि सुग्रीवो नाम वानरः ॥ भ्रात्रा निरस्तः क्रुद्धेन वालिना शक्रसूनुना ॥ ११ ॥
ऋश्यमूके गिरिवरे पम्पापर्यन्तशोभिते ॥ निवसत्यात्मवान्वीरश्चतुर्भिस्सह वानरैः ॥ १२ ॥
वानरेन्द्रो महावीर्यस्तेजोवानमितप्रभः ॥ सत्यसन्धो विनीतश्च धृतिमान्मतिमान्महान् ॥ १३ ॥
दक्षः प्रगल्भो द्युतिमान्महाबलपराक्रमः ॥ भ्रात्रा विवासितो राम राज्यहेतोर्महाबलः ॥ १४ ॥
स ते सहायो मित्रं च सीतायाः परिमार्गणे ॥ भविष्यति हि ते राम मा च शोके मनः कृथाः ॥१५॥
भवितव्यं हि यच्चापि न तच्छक्यमिहान्यथा ॥ कर्तुमिक्ष्वाकुशार्दूल कालो हि दुरतिक्रमः ॥ १६ ॥
गच्छ शीघ्रमितो राम सुग्रीवं तं महाबलम् ॥ वयस्यं तं कुरु क्षिप्रमितो गत्वाऽद्य राघव ॥
अद्रोहाय समागम्य दीप्यमाने विभावसौ ॥ १७ ॥
स च ते नावमन्तव्यः सुग्रीवो वानराधिपः ॥ कृतज्ञः कामरूपी च सहायार्थी च वीर्यवान् ॥१८॥
शक्तौ ह्यद्य युवां कर्तुं कार्यं तस्य चिकीर्षितम् ॥ कृतार्थो वाऽकृतार्थो वा कृत्यं तव करिष्यति ॥१९॥
स ऋक्षरजसः पुत्रः पम्पामटति शङ्कितः ॥ भास्करस्यौरसः पुत्रो वालिना कृतकिल्बिषः ॥ २० ॥

परिमृष्ट इति । दशा नाम दौस्थ्यरूपावस्था तस्या अन्तः परिपाकः तेन । परिमृष्टः संस्पृष्टः पुरुषः दशाभागेन दशायाः भागः परिपाकलक्षणोंशो यस्य तेन । सेव्यते संधीयते । अस्तुप्रकृतेकिमायातंतत्राह—दशाभागगत इति । हे राम सलक्ष्मणस्त्वं दशाभागगतः दुर्दशापन्नः । अतएव हीनश्च । कुतः यत्कृते येन कारणेन । दारप्रधर्षणं नाम व्यसनं प्राप्तं तेन त्वं दशाभागगतः ॥ ९ ॥ ततोपि किमित्यत्राह—तदिति । दशाभागेन त्वया सः दशाभागगतःकश्चित् सुहृत् कार्यः । अवश्यमित्यत्र हेतुमाह—अकृत्वेति । सुहृदं अकृत्वा असम्पाद्य । सिद्धिं सीतालाभं । चिन्तयन्नपि न पश्यामि ॥ १० ॥ स पुनः क इत्यपेक्षायामाह । श्रूयतामित्यादिश्लोकद्वयमेकान्वयं ॥ ११—१२ ॥ स च त्वत्सदृशगुणकत्वाद्दशाभागगतत्वाच्च ते मित्रतामर्हतीत्याह त्रिभिः—वानरेन्द्र इति । तेजोवान् तेजस्वी । द्युतिमान् कान्तिमान् ॥ १३—१५ ॥ शोकापनोदनाय लोकन्यायमाह—भवितव्यमिति श्लोकेन ॥ १६ ॥ गच्छेत्यादिसार्धश्लोक एकान्वयः । इतो गत्वेत्यनुवादः । समागम्य सुग्रीवेणसंयुज्य । अद्रोहाय परस्परद्रोहाभावाय । विभावसौ अग्नौ । दीप्यमाने सति । अग्निसाक्षिकमित्यर्थः । तं सुग्रीवं वयस्यं कुरु ॥ १७ ॥ स च सुग्रीवः ते त्वया । नावमन्तव्यः अयंतिर्यक् किमनेनेति तस्मिन्नावमतिः कार्या । तत्र हेतुमाह—कृतज्ञ इति ॥ १८ ॥ तस्य सुग्रीवस्य । चिकीर्षितं युवां कर्तुं शक्तौ । अतः सः कृतार्थः कृतस्वप्रयोजनः । अकृतार्थः करिष्यमाणस्वप्रयोजनो वा । तव कृत्यं करिष्यति ॥ १९ ॥ स कस्यपुत्रःकुत्रतिष्ठतीत्यत्राह—स इति । सन्धिरार्षः ।

प्रत्यक्षंदर्शयति—दशाभागगतोहीनस्त्वमिति । 'यत्कृतेव्यसनंप्राप्तं त्वयादारप्रधर्षणं' इत्यनुमानंदर्शयति । 'अकृत्वा नहिते सिद्धिमहंपश्यामि चिन्तयन्' इत्यर्थापत्तिंदर्शयति । 'वयस्यंतं कुरुक्षिप्रमितोगत्वाद्य राघव' इति शब्दप्रमाणंदर्शयति ॥ ति० परिभ्रष्टइतिपाठे दशान्तेन दुर्दशापरिपाककालेनार्थाद्भ्रंशितइत्यर्थः ॥ शि० दशा सर्वदंशकेन । अन्तेनकालेन परिमृष्टःव-शंप्राप्तःपुरुषः दशाभागेन दशांशेन दुर्दशयेत्यर्थः । सेव्यतेप्राप्यते । दशान्तेनकालेनहीनः तद्वशत्वानाक्रान्तोपि सलक्ष्मणस्त्वं दशाभागगतः भार्यापहरणेनकुदशांप्राप्तइव । हिरिवार्थे । आश्चर्यमेतदितितात्पर्यम् ॥ ९ ॥ शि० तेजस्वी प्रतापवान् । अमितप्रभः अनियतबुद्धिविशेषविशिष्टः ॥ १३ ॥ ति० तेइत्यादीनांपुनरुक्तिस्तु रामदुःखेनतस्यापिदुःखितचित्तत्वान्नदोषाय ॥ १५ ॥ इतिद्विसप्ततितमःसर्गः ॥ ७२ ॥

[पा०] १ ग. ङ.—ट. नहितेसिद्धिं. ख. नहितेवृद्धिं. २ ख. संक्रुद्धोवालिना. ३ घ. ट. तेजस्वीचामितप्रभः. ख. तेजसाचाप्यमितप्रभः. ४ क. ख. ग. ङ.—ट. वीर. ५ ङ. झ. ट. महात्मना. ६ क. ख. च.—ट. वीर. ७ क.—ट. सचतेसोवमन्तव्यः. ८ ख. यच्च. ९ क. ङ. झ. ट. तवकृत्यं.

सन्निधायायुधं क्षिप्रमृश्यमूकालयं कपिम् ॥ कुरु राघव सत्येन वयस्यं वनचारिणम् ॥ २१ ॥
स हि स्थानानि [1]सर्वाणि कार्त्स्न्येन [2]कपिकुञ्जरः॥नरमांसाशिनां लोके नैपुण्यादधिगच्छति ॥२२॥
न तस्याविदितं लोके किंचिदस्ति हि राघव ॥ यावत्सूर्यः प्रतपति [3]सहस्रांशुररिन्दम ॥ २३ ॥
स नदीर्विपुलाञ्छैलान्गिरिदुर्गाणि कन्दरान्॥[4]अन्वीक्ष्य वानरैः सार्धं पत्नीं तेऽधिगमिष्यति ॥२४॥
वानरांश्च [5]महाकायान्प्रेषयिष्यति राघव ॥ दिशो विचेतुं तां सीतां त्वद्वियोगेन शोचतीम् ॥
[6]स यास्यति वरारोहां [7]निर्मलां रावणालये ॥ २५ ॥

स मेरुशृङ्गाग्रगतामनिन्दितां प्रविश्य पातालतलेऽपि वाऽऽश्रिताम् ॥
प्लवङ्गमानां प्रवरस्तव प्रियां निहत्य रक्षांसि पुनः प्रदास्यति ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे द्विसप्ततितमः सर्गः ॥ ७२ ॥

त्रिसप्ततितमः सर्गः ॥ ७३ ॥

कबन्धेनरामंप्रति मार्गस्थपंपावनादिवर्णनपूर्वकमृश्यमूकमार्गप्रदर्शनं ॥ १ ॥ तथा मार्गेशबर्याश्रमस्यगन्तव्यत्वनिवेदनं ॥ २ ॥ तथामतङ्गमहर्षितपःप्रभावजऋश्यमूकगिरिमहिमातिशयवर्णनपूर्वकं तद्गुहायांसुग्रीवस्यावस्थानकथनं ॥ ६ ॥ रामलक्ष्मणाभ्यांकबन्धंप्रतिनिजलोकगमनाभ्यनुज्ञानं ॥ ४ ॥

[10]निर्दर्शयित्वा रामाय सीतायाः प्रतिपादने ॥ वाक्यमन्वर्थमर्थज्ञः कबन्धः पुनरब्रवीत् ॥ १ ॥
एष राम [11]शिवः पन्था यत्रैते पुष्पिता द्रुमाः ॥ प्रतीचीं दिशमाश्रित्य प्रकाशन्ते मनोरमाः ॥ २ ॥
जम्बूप्रियाल[12]पनसप्लक्षन्यग्रोधतिन्दुकाः ॥ अश्वत्थाः कर्णिकाराश्च चूताश्चान्ये च पादपाः ॥ ३ ॥

ऋक्षरजास्तन्मातेत्याहुः । पम्पामटति तत्तीरे पर्यटति शङ्कितः वालिनिमित्तमिति शेषः । कृतकिल्बिषः कृतवैरः ॥ २० ॥ सख्यं च न केवलमग्निसाक्षिकं किं त्वायुधमपि सन्निधाप्य कर्तव्यमित्याह—सन्निधायेति । सत्येन शपथेन ॥ २१ ॥ नरमांसाशिनां राक्षसानां । अधिगच्छति ज्ञास्यति ॥ २२ ॥ यावत्सूर्यः प्रतपति तावति लोक इत्यन्वयः ॥ २३ ॥ अधिगमिष्यति ज्ञास्यति ॥ २४ ॥ वानरांश्चेति सार्धश्लोकः । शोचतीं शोचन्तीं ॥ २५ ॥ प्रविश्य रक्षांसि निहत्येत्यन्वयः । अनिन्दितामिति सीतायाः शुद्धत्वप्रतिज्ञा ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने द्विसप्ततितमः सर्गः ॥ ७२ ॥

अथकबन्धः सुग्रीवस्थानमार्गं दर्शयित्वा गत इत्याह त्रिसप्ततितमे । सीतायाः प्रतिपादने प्रापणे निमित्ते निदर्शयित्वा प्रदर्श्य "क्त्वाच च्छन्दसि" इति क्त्वाप्रत्ययः । पूर्वोक्तमुपायमिति शेषः ॥ १ ॥ ऋश्यमूकमार्गं सचिह्नं दर्शयति—एष इति । शिवः शोभनः शोभनत्वमेवाह—यत्रेति ॥ २ ॥ द्रुमान् विशेषयति सार्धद्वयेन । प्रियालाः धनुःपटाख्या वृक्षाः । प्लक्षा वटभेदाः । तिन्दुकाः स्फूर्जकाख्या वृक्षाः । धन्वना धवाः । नागवृक्षाः नागकेसराः । तिलकाः क्षुरकवृक्षा

[पा०] १ ङ. झ. ट. कार्त्स्न्येनसर्वाणि. २ क. ख. ग. च. छ. ज. ञ. कपिपुङ्गवः. ३ ङ. झ. ट. सहस्रांशुःपरंतप ४ क. च. ज.—ट. अन्विष्य. ५ क. ख. च. छ. ज. ञ. महाभागान्. ६ ङ. झ. ट. अन्वेष्यति. क. ख. ग. च. छ. ज ञ. गमिष्यति. ७ ख. ङ. झ. ट. मैथिलीं. ८ च. छ. ञ. चाश्रितां. ९ क. ङ.—ट. प्लवङ्गमानामृषभः. ख. प्लवङ्गमानामधिपः १० घ. ङ. झ. दर्शयित्वातु. ११ च. छ. ज. गिरेःपन्थाः. घ. पुनःपन्थाः. १२ ङ. च. छ. झ. ञ. ट. पनसान्यग्रोधप्लक्ष क. ग. पनसाः प्लक्षन्यग्रोध.

न्वना नागवृक्षाश्च तिलका नक्तमालकाः ॥ नीलाशोकाः कदम्बाश्च करवीराश्च पुष्पिताः ॥
[1]अग्निमुख्या [2]अशोकाश्च सुरक्ताः पारिभद्रकाः ॥ ४ ॥
तानारुह्याथवा भूमौ पातयित्वा [3]च तान्बलात् ॥ फलान्यमृतकल्पानि [4]भक्षयन्तौ गमिष्यथः ॥ ५ ॥
दतिक्रम्य काकुत्स्थ वनं पुष्पितपादपम् ॥ नन्दनप्रतिमं [5]चान्यत्कुरवो ह्युत्तरा इव ॥ ६ ॥
सर्व[6]कामफला वृक्षाः [7]पादपास्तु मधुस्रवाः ॥ सर्वे च ऋतवस्तत्र वने चैत्ररथे यथा ॥ ७ ॥
फलभ[8]ारानतास्तत्र महाविटपधारिणः ॥ शोभन्ते [9]सर्वतस्तत्र [10]मेघपर्वतसन्निभाः ॥ ८ ॥
तानारुह्याथवा भूमौ [11]पातयित्वा यथासुखम् ॥ फलान्यमृतकल्पानि लक्ष्मणस्ते प्रदास्यति ॥ ९ ॥
चङ्क्रमन्तौ वरान्देशाञ्शैलाच्छैलं वनाद्वनम् ॥ ततः पुष्करिणीं वीरौ पम्पां नाम गमिष्यथः ॥ १० ॥
अशर्करामविभ्रंशां समतीर्थामशैवलाम् ॥ राम सञ्जातवालूकां कमलोत्पल[12]शालिनीम् ॥ ११ ॥
तत्र हंसाः प्लवाः क्रौञ्चाः कुरराश्चैव राघव ॥ वल्गुस्वना निकूजन्ति पम्पा[13]सलिलगोचराः ॥ १२ ॥
नोद्विजन्ते नरान्दृष्ट्वा [14]वधस्याकोविदाः [15]शुभाः ॥ घृतपिण्डोपमान्स्थूलांस्तान्द्विजान्भक्षयिष्यथः ॥ १३ ॥
[16]रोहितान्वक्रतुण्डांश्च [17]नडमीनांश्च राघव ॥ पम्पायामिषुभिर्[18]मत्स्यांस्तत्र राम [19]वरान्हतान् ॥ १४ ॥

नक्तमालकाः चिरिबिल्वाख्याः । करवीराः प्रतिहासाख्यावृक्षाः । अग्निमुख्याः भल्लातकीवृक्षाः । सुरक्ताः रक्तचन्दनाः । पारिभद्रकाः निम्बाः ॥ ३—४ ॥ पातयित्वा नमयित्वा । तानारुह्य अथवा भूमौ तान् पातयित्वा वेत्यन्वयः ॥ ५ ॥ तद्वनमतिक्रम्य नन्दनप्रतिममन्यद्वनं पश्यतमिति शेषः । उत्तरकुरुसाम्यं सर्वकामसमृद्ध्या ॥६॥ तद्वनं वर्णयति त्रिभिः । मधु पुष्परसं स्रवन्तीति मधुस्रवाः । सर्वैः काम्यमानानि फलानि येषां ते सर्वकामफलाः।ऋतवः षट् ऋतवः वसन्तीति शेषः। चैत्ररथे कुबेरोद्याने। तत्र वने। महाविटपधारिणः। "विस्तारो विटपोऽस्त्रियां" इत्यमरः। पादपा इत्यनुषङ्गः । तत्र मेघपर्वतसन्निभाः तत्रविद्यमानाः मेघपर्वताइवस्थिताइत्यर्थः ॥ ७—९ ॥ श्लोकद्वयमेकं वाक्यं । चङ्क्रमन्तौ चङ्क्रममाणौ पुनः पुनः गच्छन्तौ। पुष्करिणीं सरसीं। अशर्करां शर्करारहितां। अविभ्रंशां अशिथिलतटां। समतीर्थां अवतारस्थलेऽतिनिम्नत्वात्यगाधत्वरहितां।सञ्जातवालूकां अपङ्कतया संहतसिकतां दीर्घ आर्षः ॥ १०—११ ॥ प्लवाः मण्डूकाः हंसभेदा वा । कुरराः कौञ्चभेदाः । वल्गुस्वराः रम्यस्वनाः । सलिलगोचराः सलिलचारिणः । गोचरः सञ्चारः ॥ १२ ॥ वधस्याकोविदाः वधमजानानाः । नोद्विजन्ते न बिभ्यति । द्विजा इति शेषः । तानित्यनुवादात् ॥ १३ ॥ रोहितानित्यादिश्लोकद्वयं । रोहितान् पितृप्रियमत्स्यभेदान् । वक्रतुण्डान् वक्रमुखमत्स्यान् । नडमीनान् नडाख्यतृणविशेषस्तम्बसञ्चारशीलान्मत्स्यान् । वरान् श्रेष्ठान् । अयस्तप्तान् अयःशूलाग्रप्रो-

ति० बलात्तान्वृक्षान्भूमौपातयित्वा शाखांधृत्वाभूमिपर्यन्तंसंनाम्य ॥ ५ ॥ **स०** उत्तरकुरवइवपुष्पितपादपं ॥ **शि०** यत्रवने उत्तराःकुरवइव पादपाः मधुस्रवाः मधुच्युतः सर्वकालफलाश्च सन्तीतिशेषः ॥ सार्धश्लोकएकान्वयी ॥ ६ ॥ **ती०** सर्वकामफलाः सर्वकामान्कामितान्पदार्थान्फलन्तीतितथा ॥ ७ ॥ **शि०** इषुभिः बाणाग्रभागैः । निस्त्वक्पक्षान् निर्गतवल्कलपरिग्रहणान् । अतएव नएकोपिकण्टकोयेषुतान् । अतएव घृतपिण्डोपमान् अकृशान् ।अशुष्कानित्यर्थः । अयस्तप्तान् अयसा वह्नौबाणाग्रभागप्रहीनेन तप्तान्परिपक्वान् यान्भक्ष्यान् मूलफलसमूहान् । तवभक्त्यासमायुक्तोलक्ष्मणः तवतुभ्यं संप्रदास्यति तान्स्थूलान्द्विजान् पक्षिणः तान्प्रसिद्धान् वरान्श्रेष्ठान् रोहितादींश्च । हप्रसिद्धं । भक्षयिष्यथः । सार्धश्लोकत्रयमेकान्वयं ॥ **ती०** अकुशानेकक-

[पा०] १ ख. अग्निमुख्यास्त्वशोकाश्च. २ ग. अशोकास्त्वतिमुक्ताश्चसुभद्राःपारिभद्रकाः. ३ घ. चतान्बहून—ङ. झ. ततान्बलात्. ४ ङ. झ. भक्षयित्वा. ५ क. ह्यन्यत्. ङ. झ. ट. त्वन्यत्. ६ ङ. च. छ. झ. ञ. ट. कालफलायत्र. ७ ङ. झ. ट. पादपामधुरस्वराः. ८ ग. घ. च. छ. ज. ञ. भारानताश्चैव. ९ च. छ. ज. ञ. तरवस्तत्र. १० क. च. छ. ज. ञ. महापर्वत. ११ ङ. झ. पातयित्वाऽथवा. १२ क. ख. ङ.—ट. शोभितां. घ. मालिनीं. १३ ख. सलिलवासिनः. १४ घ. भयस्याकोविदाः. १५ ङ. झ. ट. पुरा. १६ ग. ङ.—ट. रोहितांश्चक्रतुण्डांश्च. १७ क. ग. घ. च. छ. ज. ट. नलमीनांश्च. १८ क. मत्स्यान्हत्वाचादग्ध्वतान्वरान्. च. छ. ज. ञ. मत्स्यान्हत्वाचादायनित्यशः. घ. मत्स्यान्हत्वावारिचरान्वरान्. १९ ख. वराङ्गकान्.

निस्त्वक्पक्षानयस्तप्तान[1]कृशानेककण्टकान् ॥ तव भक्त्या समायुक्तो ल[2]क्ष्मणः संप्रदास्यति ॥ १५ ॥
भृशं ते[3] खादतो मत्स्यान्पम्पायाः पुष्प[4]संचये ॥ पद्मगन्धि शिवं वारि सु[5]खशीतमनामयम् ॥ १६ ॥
उद्धृत्य स[6]तताक्लिष्टं रौप्य[7]स्फाटिकसन्निभम् ॥ [8]असौ पुष्करप[9]र्णेन लक्ष्मणः पाययिष्यति ॥ १७ ॥
स्थूलान्गिरिगुहाशय्यान्व[10]राहान्वनचारिणः ॥ अपां लोभादुपावृत्तान्वृ[11]षभानिव नर्दतः ॥
[12]रूपान्वितांश्च पम्पायां द्रक्ष्यसि त्वं नरोत्तम ॥ १८ ॥
सायाह्ने विचरन्राम वि[13]टपीन्माल्यधारिणः ॥ [14]शीतोदकं च प[15]म्पाया दृष्ट्वा शोकं विहास्यसि ॥ १९ ॥
[16]सुमनोभिश्चितांस्तत्र तिलकान्नक्तमालकान् ॥ उत्पलानि च फुल्लानि पङ्कजानि च राघव ॥ २० ॥
न तानि कश्चिन्माल्यानि [17]तत्रारोपयिता नरः ॥ न च वै म्लानतां यान्ति न च शीर्यन्ति राघव ॥ २१ ॥
मतङ्गशिष्या[18]स्तत्रासन्नृषयः सुसमाहिताः ॥ तेषां [19]भाराभितप्तानां वन्यमाहरतां गुरोः ॥ २२ ॥
ये [20]प्रपेतुर्महीं तूर्णं शरीरात्स्वेदबिन्दवः ॥ तानि [21]जातानि माल्यानि मुनीनां तपसा तदा ॥
स्वेदबिन्दुसमुत्थानि न विनश्यन्ति राघव ॥ २३ ॥
ते[22]षामद्यापि तत्रैव दृश्यते परिचारिणी ॥ श्रमणी शबरी नाम काकुत्स्थ चिरजीविनी ॥ २४ ॥
त्वां तु [23]धर्मे स्थिता नित्यं सर्व[24]भूतनमस्कृतम् ॥ दृष्ट्वा देवोपमं राम [25]स्वर्गलोकं गमिष्यति ॥ २५ ॥

ततया पक्वान् । कृशाश्चानेककण्टकाश्च ते न भवन्तीत्यकृशानेककण्टकाः तान् ॥ १४—१५ ॥ भृशमित्यादिद्वावेकान्वयौ । पुष्पसंचये पुष्पसमूहे वर्तमानं । अतएव सुगन्धि शिवं पापापहं सुखशीतं नातिशीतमित्यर्थः । अनामयं अव्याधिकरमित्यर्थः । एवंभूतं वारि पुष्करपर्णेन पद्मपत्रेण । पम्पाया उद्धृत्य पाययिष्यति ॥ १६—१७ ॥ स्थूलानित्यादिसार्धश्लोक एकान्वयः । गिरिगुहायां शय्या येषां तान् । रूपान्वितान् सौन्दर्यवतः ॥ १८ ॥ विटपीन् विटपिनः । इनिप्रत्ययस्य नलोप आर्षः । माल्यधारिणः पुष्पधारिणः । पुष्पविकासहेतुत्वात्सायाह्न इत्युक्तं ॥ १९ ॥ सुमनोभिः चितान् निरन्तरान् । उत्पलानि इन्दीवराणि । दृष्ट्वा शोकं विहास्यसीत्यत्राप्यनुषज्यते ॥२०॥ आरोपयिता गृहीत्वाग्रथिता । वनविस्तारात्पुष्पबाहुल्याच्च तानि म्लानतां न यान्ति। न शीर्यन्ति न शीर्यन्ते । शीर्णदलानि न भवन्तीत्यर्थः । मतङ्गशिष्यप्रभावाद्वाऽनारोपणं ॥ २१ ॥ अग्राह्यत्वाम्लानत्वादौ निमित्तमाह—मतङ्गेति । सार्धश्लोकद्वयमेकान्वयं । मतङ्गोनाम महाप्रभावो महर्षिः। तत्र पम्पातीरे। सुष्ठु समाहितं समाधिर्येषां ते तथा । वन्यमाहरतां अतएव भाराभितप्तानां । तानीति विधेयापेक्षया नपुंसकत्वं । स्वेदबिन्दुसमुत्थानीति हेतुगर्भविशेषणं। स्वेदबिन्दवो वायुना वृक्षोपरिनीता माल्यानिजातानीत्याशयः ॥ २२—२३ ॥ तेषां मतङ्गशिष्याणां । परिचारिणी श्रमणी संन्यासिनी । शबरीतिनाम शबरीतिप्रसिद्धा ॥२४॥ धर्मे गुरुपरिचरणधर्मे ॥२५॥

ण्टकान् कुशाः कुशवत्तीक्ष्णाः अनेककण्टकाः येषांनविद्यन्ते तेतथोक्ताः ॥ १४—१५ ॥ **शि०** अनामयंरोगनिवर्तकं ॥ १६ ॥ **ति०** पीतान् जलपानंकुर्वतः ॥ १८ ॥ **ति०** विटपीन् विटपिनः । आर्षमेकत्वं । प्रथमान्तत्वं ॥ १९ ॥ **ती०** देवोपमं हेदेव उपमं उप समीपे मा लक्ष्मीर्यस्यतं विष्णुंत्वामित्यर्थः ॥ स्वर्गलोकं स्वःगीयतइतिस्वर्गः स्वर्गश्चासौलोकश्च तं वैकुण्ठमित्यर्थः । कुतः नित्यंधर्मे उपासनात्मकेस्थिता । " विद्ययादेवलोकः " इतिश्रुतेः ॥ **स०** " स्वर्गःसुषुप्तिरित्याख्यामुक्तेरपिसमा ' इति

[पा०] १ च. छ. ज. ञ. नकुशानेक. २ क. लक्ष्मणस्तवदास्यति. ३ ङ. झ. ञ. ट. तान्खादतो. ४ क. पुष्पसंयुतं. ५ क. च. छ. ज. ञ. स्वादुशीत. ६ क. च. छ. ज. सितमक्लिष्टं. घ. चतदाक्लिष्टं. ख. ङ. झ. ञ. ट. सतदाक्लिष्टं. ७ ख. रूपस्फटिक. क. ग.—ट. रूप्यस्फटिक. ८ क.—ट. अथपुष्कर. ९ ग. च. ट. पत्रेण. १० ङ. झ. ट. न्वानरान्वनचारिणः. ११ ग. न्वृषभान्महिषांस्तथा. १२ ग. ङ. झ. ट. स्थूलान्पीतांश्चपंपायां. १३ क. ख. ग. ङ.—ट. विटपीमाल्य. १४ ङ. झ. शिवोदकं. १५ ख. ग. ङ.—ट. पंपायां. १६ क. ख. ग. ङ. झ. ट. सुमनोभिश्चितास्तत्रतिलकानक्तमालकाः. १७ च. तत्रगोपयिता. १८ क. ग. स्तत्रासन्मुनयः. १९ ख. भारावतप्तानां. २० ख. प्रपेतुर्महीरेणौ. २१ क. ख. ग. ङ.—ट. माल्यानिजातानि. २२ ङ. झ. ञ. ट. तेषांगतानामद्यापिदृश्यते. २३ च. छ. ज. धर्मस्थिता. २४ ख. लोकनमस्कृतं. २५ ग. देवलोकं.

[1]ततस्तद्राम पम्पायास्तीर[2]माश्रित्य पश्चिमम् ॥ आश्रमस्थानमतुलं गुह्यं काकुत्स्थ पश्यसि ॥ २६ ॥
न तत्राक्रमितुं नागाः शक्नुवन्ति [3]तमाश्रमम् ॥ विविधास्तत्र वै नागा वने तस्मिंश्च पर्वते ॥ २७ ॥
ऋषेस्तस्य मतङ्गस्य वि[4]धानात्तच्च काननम् ॥ [[5]मतङ्गवनमित्येव विश्रुतं रघुनन्दन] ॥ २८ ॥
तस्मिन्नन्दनसंकाशे देवारण्योपमे वने ॥ नानाविहगसंकीर्णे रंस्यसे राम निर्वृतः ॥ २९ ॥
[6]ऋश्यमूकश्च पम्पायाः पुरस्तात्पुष्पितद्रुमः ॥ सुदुःखारो[7]हणो नाम शिशुनागाभिरक्षितः ॥ ३० ॥
[[8]महात्मभिर्महायज्ञैः स्तोत्रमन्त्रैर्द्विजातिभिः ॥] उदारो ब्रह्मणा चैव पूर्व[9]काले विनिर्मितः ॥ ३१ ॥
शयानः पुरुषो राम तस्य शैलस्य मूर्धनि ॥ [10]यंत्स्वप्ने लभते वित्तं तत्प्रबुद्धोऽधिगच्छति ॥ ३२ ॥
[11]न त्वेनं विषमाचारः पापकर्माऽधिरोहति ॥ ३३ ॥
[12]यस्तु तं विषमाचारः पापकर्माऽधिरोहति ॥ तत्रैव प्रहरन्त्येनं सुप्तमादाय राक्षसाः ॥ ३४ ॥
[13]तत्रापि शिशुनागानामाक्रन्दः श्रूयते महान् ॥ क्रीडतां राम पम्पायां [14]मतङ्गारण्यवासिनाम् ॥ ३५ ॥
[15]सिक्ता रुधिरधाराभिः [16]संहृत्य परमद्विपाः ॥ प्रचरन्ति पृथक्कीर्णा मेघवर्णास्तरस्विनः ॥ ३६ ॥
ते तत्र पीत्वा पानीयं विमलं [17]शीतमव्ययम् ॥ [[18]अत्यन्तसुखसंस्पर्शं सर्वगन्धसमन्वितम्] ॥
निर्वृताः संविगाहन्ते वनानि वनगोचराः ॥ ३७ ॥

तत् शबर्यावासभूतं । गुह्यं इतरैरदर्शनीयं पश्यसि द्रक्ष्यसि ॥ २६ ॥ तस्मिन्वने वक्ष्यमाणे ऋश्यमूकपर्वते च । विविधाः नागाः गजाः सन्ति । तथापि तमाश्रमं तत्र प्रदेशे स्थिताः नागाः नाक्रमितुं शक्नुवन्ति ॥ २७ ॥ अनाक्रमणे हेतुमाह—ऋषेरिति । तस्य पूर्वोक्तस्य । विधानात् निर्माणात् । तत् काननं जातमिति शेषः ॥ २८ ॥ देवारण्यं चैत्ररथादि । निर्वृतः निवृत्तदुःख इत्यर्थः ॥ २९ ॥ एवमनुग्रहार्थं शबर्याश्रमंगत्वा पुनःपम्पायाःपुरस्तादृश्यमूकोगन्तव्यइत्याह सार्धश्लोकेन । ऋश्याः मृगविशेषाः मूकाः निःशब्दा भवन्ति यस्मिन् सः ऋश्यमूकः । सुदुःखमारोहणं यस्य स तथा । तत्र हेतुः—शिशुनागाभिरक्षितइति । अत्र नागाः गजा एव । " विविधास्तत्र वैनागाः" इतिपूर्वमुक्तत्वात् ॥ ३० ॥ उदारः प्रशस्तः । पूर्वकाले ब्रह्मणा उदारः प्रशस्तोनिर्मितः । कुत्रचिन्निमित्ते अयं प्रशस्तोभवत्वित्यनुगृहीतइत्यर्थः ॥ ३१ ॥ प्राशस्त्यमाह—शयानइति ॥ ३२—३३ ॥ अतिशयान्तरमाह—यस्त्विति ॥ ३४ ॥ शिशुनागानां कलभानां । तत्रापीत्यत्रापिशब्दात्पम्पादिकंसमुच्चीयते । अनेन ऋश्यमूकस्य पम्पासामीप्यमुक्तं ॥ ३५ ॥ संहृत्य अन्योन्यं प्रहृत्य । रुधिरधाराभिः सिक्ताः अतएव पृथक्कीर्णाश्चरन्ति ॥ ३६ ॥ संविगाहन्ते प्रविशन्ति

बृहदारण्यकभाष्योक्तेः मुक्तिमितिवा ॥ २५ ॥ **स०** नन्दनसंकाशे इन्द्रवनतुल्ये । देवारण्योपमे इतरदेवविहारस्थलसदृशे ॥ **शि०** नन्दनसंकाशे नन्दनेन फलपुष्पसंवृद्ध्या संकाशः अतिशोभायस्य तस्मिन् । देवारण्योपमे नन्दनचैत्ररथादिसदृशे ॥ २९ ॥ **स०** शिशुनागःकश्चनसर्पः । भागवतेद्वादशस्कन्धेकूर्मपुराणेचतथैवोक्तेः ॥ ३० ॥ **ति०** सुदुःखारोहणः अत्युच्चत्वात् । हेत्वन्तरमप्याह । शिशुभिर्नागैःसर्पैः अभिरक्षितः । उदारः दाता । ब्रह्मणापूर्वकाले सृष्टिकालेनिर्मितः विद्यौदार्यतपःप्राधान्येननिर्मितः ॥ ३१ ॥ **ति०** औदार्यमेवदर्शयति—शयानइति ॥ **स०** यः सः । स्वप्नस्तुसत्यएव तथापि तत्कालएवफलोपलंभइत्यतिशयइति महत्त्वमितिभावः ॥ ३२ ॥ **ति०** रुधिरधाराभिः ईषद्रक्तमदधाराभिः । सक्ताः संबद्धाः । संहत्य संभूय ॥ ३६ ॥

[पा०] १ ज. ततस्त्वंराम. ग. तस्यास्तद्राम. २ ग. मासाद्य. ३ ख. च. छ. ज. तदाश्रमं. ङ. झ. ञ. ट. तदाश्रमे. ४ क. प्रभावाच. ५ ख. घ. ङ. झ. ट. पाठेष्विदमर्धंदृश्यते. ६ क.—ट. ऋश्यमूकस्तु. ७ ङ. झ. ञ. ट. रोहणश्चैव. ८ इदमर्धं क. पाठेदृश्यते. ९ ङ. झ. ट. कालेऽभिनिर्मितः. १० घ. ङ. झ. ट. यःस्वप्ने. ११ इदमर्धं झ. ञ. ट. पाठेषुनदृश्यते. १२ ङ. झ. ञ. ट. यस्त्वेनं. १३ क. घ.—ट. ततोपि. १४ ङ. झ. ट. मतङ्गाश्रमवासिनां. १५ ङ. झ. ञ. ट. सक्तारुधिर. १६ ख.—ट. संहत्य. १७ ङ. झ. ट. चारुशोभनं. क. च. छ. ज. ञ. शीतलंसुखं. १८ इदमर्धं ङ. झ. ट. पाठेषुदृश्यते.

ऋक्षांश्च द्वीपिनश्चैव नीलकोमलकप्रभान् ॥ [1]रुरूनपेतापजयान्दृष्ट्वा शोकं [2]जहिष्यसि ॥ ३८ ॥
राम तस्य तु शैलस्य [3]महती [4]शोभते गुहा ॥ शिलापिधाना काकुत्स्थ दुःखं [5]चास्याः प्रवेशनम् ॥३९॥
[6]तस्या गुहायाः [7]प्राग्द्वारे महाञ्शीतोदको ह्रदः ॥ [8]फलमूलान्वितो रम्यो [9]नानामृगसमावृतः ॥४०॥
तस्यां वसति [10]सुग्रीवश्चतुर्भिः सह वानरैः ॥ कदाचिच्छिखरे तस्य [11]पर्वतस्यावतिष्ठते ॥ ४१ ॥
कबन्धस्त्वनुशास्यैवं तावुभौ रामलक्ष्मणौ ॥ स्रग्वी भास्करवर्णाभः खे व्यरोचत वीर्यवान् ॥४२॥
तं तु खस्थं [12]महाभागं [13]कबन्धं रामलक्ष्मणौ ॥ [14]प्रस्थितौ त्वं व्रजस्वेति वाक्यमूचतु[15]रन्तिके ॥ ४३ ॥
गम्यतां कार्यसिद्ध्यर्थमिति ताव[16]ब्रवीत्स च ॥ सुप्रीतौ तावनुज्ञाप्य कबन्धः प्रस्थितस्तदा ॥ ४४ ॥

स तत्कबन्धः प्रतिपद्य रूपं वृतः श्रिया [17]भास्करतुल्यदेहः ॥
निदर्शय[18]न्राममवेक्ष्य खस्थः सख्यं कुरुष्वेति तदाऽभ्युवाच ॥ ४५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

॥ ३७ ॥ द्वीपिनः व्याघ्रान् । नीलकोमलकप्रभान् नीलरत्नवन्मनोज्ञप्रभान् । रुरून् मृगविशेषान् । अपेतापजयान् जयशीलानित्यर्थः । जहिष्यसि त्यक्ष्यसि ॥ ३८ ॥ शिला अपिधानमाच्छादनं यस्याः सा । अस्या गुहायाः प्रवेशनं दुःखं दुःखकरं । उन्नतस्थानस्थितत्वादिति भावः ॥ ३९ ॥ महान् विशालः । अस्तीतिशेषः । फलमूलान्वितः फलमूलान्विततीरः ॥४०॥ तस्यामिति । कदाचिद्भूमाविति सिद्धं ॥४१॥ अनुशास्य उपदिश्य । स्रगस्यास्तीति स्रग्वी । "अस्मायामेधास्रजोविनिः" इतिविनिप्रत्ययः । भास्करवर्णाभः सूर्यप्रभातुल्यप्रभः । खेव्यरोचत रामानुज्ञानार्थंक्षणमतिष्ठदित्यर्थः ॥ ४२ ॥ प्रस्थितौ सन्तौ सुखं व्रजस्व व्रज । इति अन्तिके ऊचतुः अन्तिके प्रस्थिताविति कबन्धसमीपमागत्योचतुरित्यर्थः ॥ ४३ ॥ प्रस्थितः स्वर्गमिति शेषः ॥ ४४ ॥ उक्तमर्थं सर्गान्ते संगृह्णाति—स इति । तत् पूर्वोक्तं । रूपं शरीरं । रामं प्रति निदर्शयन् । सख्यं कुरुष्व सुग्रीवेणेति शेषः । अस्मिन्सर्गे पञ्चचत्वारिंशच्छ्लोकाः ॥ ४५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने त्रिसप्ततितमः सर्गः ॥ ७३ ॥

ति० अपेतान् मनुष्यंदृष्ट्वापलायितान् अजयान् प्राणिजयहीनान् । अनेनाक्रूरता ॥ ३८ ॥ **ती०** ऋश्यमूकस्यासाधारणचिह्नमाह—**रामेति** । शिलापिधानेति गुहानामेतिज्ञातव्यं । **ति०** शिलापिधानेति गुहानामेतितीर्थः । विशेषणमित्यन्ये ॥ ३९ ॥ **ति०** प्रस्थितौ आवांसुग्रीवसमीपंप्रस्थितौ । त्वंव्रजस्व पुण्यलोकमितिशेषः । अन्तिके वर्तमानं ॥ ४३ ॥ **स०** भास्वरसर्वदेहः प्रकाशमानसमग्राङ्गः । भास्वरः प्रकाशितः सर्वो भूभागादिर्येन सदेहोयस्यसइतिवा ॥ **ति०** निदर्शयन् मार्गादिकमितिशेषः । **ती०** सर्गश्रवणफलंस्कान्दे—'कबन्धरामसंवादं येश्शृण्वन्तिसदादरात् । विप्रावमानजनितस्तापःक्षिप्रंविनश्यति ।' इति ॥ ४५ ॥ इतित्रिसप्ततितमःसर्गः ॥ ७३ ॥

[पा०] १ घ. रुरून्गतभयांश्चैवदृष्ट्वाशोकंत्यजिष्यति. ङ. झ. ञ. ट. रुरूनपेतानजयान्. २ ङ. झ. ञ. ट. प्रहास्यसि. ३ ख. महतः. ४ ग. शोभना. ५ च. छ. ज. तस्याःप्रवेशने. ६ ख. ग. तस्यांगुहायां. ७ ग. वृद्धायां. क. च. छ. ज. ञ. प्राग्भागे. ८ क. ख. घ.—ट. बहुमूलफलो. ९ च. छ. ज. ञ. नानानागसमावृतः. ङ. झ. ट. नानानगसमाकुलः. घ. नानामृगसमाकुलः. क. नानामृगगणायुतः. ख. नानानगसमावृतः. १० ङ. झ. ट. धर्मात्मासुग्रीवःसह. ११ घ. ङ. झ. ञ. ट. पर्वतस्यापितिष्ठति. ख. सुग्रीवःपरितिष्ठति. १२ क. महाबाहुं. १३ ङ. झ. ट. तावुभौ. १४ च. छ. ज. प्रस्थितस्त्वं. क. प्रस्थितौतं. १५ क. ख. ग. च. छ. ज. रन्तिकात्. १६ ख. वब्रवीचसः. १७ ङ.—ट. भास्वरसर्वदेहः. क. ख. भास्करवर्णदेहः. १८ ग. त्राममुदारवीर्यसख्यं.

चतुःसप्ततितमः सर्गः ॥ ७४ ॥

रामलक्ष्मणाभ्यांकवन्धप्रदर्शितमार्गेणपंपापश्चिमतीरे शबर्याश्रमगमनं ॥ १ ॥ शबर्या चिरसंचितमधुरतरफलमूलादिनासादरंरामलक्ष्मणयोरर्चनं ॥ २ ॥ तथारामचोदनयावनप्रदेशेषुमतङ्गमहर्षेस्तच्छिष्याणांचतपःप्रभावव्यापकतत्तद्विशेषप्रदर्शनपूर्वकंश्रीरामानुज्ञयाहुताशनेदेहत्यागाद्दिव्यरूपपरिग्रहेणस्वाचार्यमहर्ष्यध्युषितदिव्यलोकगमनं ॥ ३ ॥

तौ कबन्धेन तं मार्गं पम्पाया दर्शितं वने ॥ [1]प्रतस्थतुर्दिशं गृह्य प्रतीचीं नृवरात्मजौ ॥ १ ॥
तौ शैले[2]ष्वाचितानेका[3]न्क्षौद्रकल्पफलान्द्रुमान् ॥ [4]वीक्षन्तौ जग्मतुर्द्रष्टुं सुग्रीवं रामलक्ष्मणौ ॥ २ ॥
[5]कृत्वा च शैल[6]पृष्ठे तु तौ वासं [7]रामलक्ष्मणौ ॥ पम्पायाः पश्चिमं [8]तीरं राघवावुपतस्थतुः ॥ ३ ॥
[9]तौ पुष्करिण्याः पम्पायास्तीरमासाद्य पश्चिमम् ॥ अपश्यतां ततस्तत्र [10]शबर्या रम्यमाश्रमम् ॥ ४ ॥
तौ [11]तमाश्रममासाद्य द्रुमैर्बहुभिरावृतम् ॥ सुरम्यमभिवीक्षन्तौ शबरीमभ्युपेयतुः ॥ ५ ॥
[12]तौ च दृष्ट्वा तदा सिद्धा समुत्थाय कृताञ्जलिः ॥ [13]रामस्य पादौ जग्राह लक्ष्मणस्य च धीमतः ॥
पाद्य[14]माचमनीयं च सर्वं प्रादाद्यथाविधि ॥ ६ ॥
तामुवाच ततो रामः श्रमणीं [15]शंसितव्रताम् ॥ ७ ॥
कच्चित्ते निर्जिता विघ्नाः कच्चित्ते वर्धते तपः ॥ कच्चित्ते [16]नियतः क्रोध आहारश्च तपोधने ॥ ८ ॥
कच्चित्ते नियमाः प्राप्ताः कच्चित्ते मनसः सुखम् ॥ कच्चित्ते गुरुशुश्रूषा सफला चारुभाषिणि ॥ ९ ॥
रामेण तापसी पृष्टा सा सिद्धा सिद्धसंमता ॥ शशंस शबरी वृद्धा रामाय [17]प्रत्युपस्थिता ॥ १० ॥
अद्य प्राप्ता तपःसिद्धिस्तव सन्दर्शनान्मया ॥ अद्य मे सफलं [18]तप्तं गुरवश्च सुपूजिताः ॥ ११ ॥
अद्य मे सफलं [19]जन्म [20]स्वर्गश्चैव भविष्यति ॥ त्वयि देववरे राम पूजिते पुरुषर्षभ ॥ १२ ॥
[21]चक्षुषा तव सौम्येन पूताऽस्मि रघुनन्दन ॥ गमिष्याम्यक्षयाँल्लोकांस्त्वत्प्रसादादरिन्दम ॥ १३ ॥

एवमेतावत्पर्यन्तं भगवत्कैङ्कर्यतत्फले दार्शिते । अथार्याभिमाननिष्ठा तत्फले दर्शयति चतुःसप्ततितमे । प्रतीचींदिशं गृह्य गृहीत्वा । कबन्धेन दर्शितं पम्पाया मार्गमुद्दिश्य प्रतस्थतुः प्रतस्थाते ॥ १ ॥ शैलेष्वाचितान् प्ररूढान् अनेकांश्च क्षौद्रकल्पफलान् मधुतुल्यफलयुक्तान् । वीक्षन्तौ वीक्षमाणौ ॥ २ ॥ वासं तस्यांरात्र्यामिति शेषः । उपतस्थतुः उपतस्थाते प्रापतुरित्यर्थः । रात्र्यन्तइतिशेषः ॥ ३—४ ॥ आश्रममासाद्य तं अभिवीक्षन्तौ अभिवीक्षमाणौ ॥ ५ ॥ तौ चेति सार्धश्लोक एकान्वयः । सिद्धा सिद्धयोगा ॥ ६—७ ॥ विघ्नाः तपोविघ्नाः कामादयः । नियतः निगृहीतः । आहारश्चेत्यत्रापि नियत इत्यनुषज्यते । "तपो नानशनात्परं" इति श्रुतेः ॥ ८ ॥ नियमाः व्रतानि । मनसः सुखं मनःसन्तोषः । चारुभाषिणीति साध्वीसंबोधनप्रकारः । इति तामुवाचेति संबन्धः ॥ ९ ॥ रामाय प्रत्युपस्थितेति तादर्थ्ये चतुर्थी ॥ १० ॥ तपःसिद्धिः तपःपरिपाकः । तप्तं तपः ॥ ११ ॥ अद्येत्यस्यार्थं विवृणोति—त्वयीति । देववरे विष्णौ । अनेन शबर्याः परमार्थज्ञानंवृत्तमितिसूच्यते ॥ १२ ॥ एवमुपचारवादानुक्त्वा स्वप्रयोजनमाह—चक्षुषेति । तेन सौम्येन

[पा०] १ क.—ट. आतस्थतुः. २ क. ष्वाचितान्वृक्षान्. ३ ङ. झ. ट. न्क्षौद्रपुष्पफलद्रुमान्. क. न्क्षौद्रकल्पफलान्बहून्. ४ ख. ग. पश्यन्तौ. ५ क. घ. ङ. झ. कृत्वातु. ६ क. पृष्ठेषु. ग. पृष्ठेच. ७ क. ख. ङ.—ट. रघुनन्दनौ. ८ ग. देशंराघवांसमुपस्थितौ. क. ख. तीरमुपयातौचराघवौ. घ. तीरंराघवावुपजग्मतुः. ९ ग. पुष्करिण्यास्तु. १० ग. शबरीमाश्रमस्थितां. ११ घ. तदाश्रम. १२ क.—घ. तौतु. ङ. च. झ. ञ. ट. तौदृष्ट्वातु. १३ क. ङ. झ. ट. पादौजग्राहरामस्य. १४ च. ञ. माचमनीयंतु. १५ ङ. झ. ट. धर्मसंस्थितां. १६ ख. निर्जितःकोपः. क. ग.—ट. नियतःकोपः. १७ ङ. छ. ज. ञ. ट. प्रत्यवस्थिता. क. प्रयतास्थिता. १८ ख. ग. ङ.—ट. जन्म. १९ ख. ग. ङ.—ट. तप्तं. २० ख. स्वर्गश्चेह. २१ घ. ङ. झ. तवाहंचक्षुषासौम्यपूतासौम्येनमानद. क. च. छ. ज. ञ. तवाहंचक्षुषारामपूतासौम्येनमानद. ग. तवाहंचक्षुषाराजन्पूतासौम्येनमानद. ख. त्वयाहंचक्षुषासौम्यपूतासौम्येनमानद.

चित्रकूटं त्वयि प्राप्ते विमानैरतुलप्रभैः ॥ इतस्ते दिवमारूढा यानहं पर्यचारिषम् ॥ १४ ॥
तैश्चाहमुक्ता धर्मज्ञैर्महाभागैर्म[1]हर्षिभिः ॥ आगमिष्यति ते रामः सुपुण्यमिममाश्रमम् ॥ १५ ॥
स[2] ते प्रतिग्रहीतव्यः सौमित्रिसहितोऽतिथिः ॥ तं च दृष्ट्वा वराँल्लोकानक्षयांस्त्वं गमिष्यसि ॥१६॥
मया तु [3]विविधं वन्यं संचितं पुरुषर्षभ ॥ तवार्थे पुरुषव्याघ्र पम्पायास्तीरसंभवम् ॥ १७ ॥
एवं[4]मुक्तः स धर्मात्मा शबर्या शबरीमिदम् ॥ राघवः प्राह विज्ञाने तां नित्यमबहिष्कृताम् ॥१८॥
दनोः सकाशात्तत्त्वेन प्रभावं ते म[5]हात्मनः ॥ श्रुतं प्रत्यक्षमिच्छामि संद्रष्टुं यदि मन्यसे ॥ १९ ॥
एतत्तु वचनं श्रुत्वा रामवक्त्राद्विनिःसृतम् ॥ शबरी दर्शयामास तावुभौ तद्वनं महत् ॥ २० ॥
पश्य मेघघनप्रख्यं मृगपक्षिस[6]माकुलम् ॥ मतङ्गवनमित्येव विश्रुतं रघुनन्दन ॥ २१ ॥
इह ते भावितात्मानो गुरवो मे म[7]हाद्युते ॥ जुहवांचक्रिरे [8]तीर्थं मन्त्रवन्मन्त्रपूजितम् ॥ २२ ॥

चक्षुषा निर्हेतुककटाक्षेण पूतास्मि । अनेन पूर्वाघविनाश उक्तः । अरिन्दमेत्यनेन उत्तराघाश्लेष उच्यते । त्वत्प्रसादात् "धातुः प्रसादान्महिमानमात्मनः" इत्युक्तत्वादाचार्यप्रसादोपबृंहितात्त्वत्प्रसादात् । अक्षयान् लोकान् गमिष्यामि पुनरावृत्तिरहितं परमपदं प्राप्स्यामीत्यर्थः ॥ १३ ॥ तर्हि त्वदाचार्यैरेवसहकिमर्थं न गतासीत्यत्राह—चित्रकूटमिति । ते मतङ्गशिष्या मदाचार्याः ॥ १४ ॥ धर्मज्ञैः योगरूपभगवत्प्राप्त्युपायाभावेप्याचार्यप्रसादकृतभगवत्प्रसादात् सद्गतिमियं प्राप्स्यतीत्येतद्धर्मज्ञैः । महाभागैः भविष्यत्तद्वृत्तान्तज्ञानोचितभाग्यवद्भिः । सुपुण्यमित्यागमनार्हत्वमुच्यते । प्रतिग्रहीतव्यः आतिथ्यकरणेनसत्करणीयः। दृष्ट्वा तेन दर्शनेन निमित्तेन । अक्षयान् लोकान् गमिष्यसि वरानिति कैवल्यव्यावृत्तिः । गमिष्यसीति तैरहमुक्तेत्यन्वयः। अनेन आचार्यशुश्रूषणं भगवत्प्रसादद्वारा मोक्षहेतुरित्युक्तंभवति॥१५—१६॥ आचार्योक्तिश्रद्धामात्मनः सूचयति—मया त्विति । तीरसंभवं विविधं वन्यं संचितं।वन्यशब्देन फलमूलादिकमुच्यते। विविधमित्यनेन फलमूलादिभेद उच्यते । संचितमित्यनेन रामस्य चित्रकूटागमनात्प्रभृति संपादितत्वमादरेण गुप्तत्वं च तत्तत्फलजातीयमाधुर्यं परीक्ष्य स्थापितमिति संप्रदायः ॥१७॥ विज्ञानेविषये । अबहिष्कृतां अन्तरङ्गभूतां । जात्याहीनामप्याचार्यप्रसादलब्धब्रह्मज्ञानामितिभगवताप्यादरणीयत्वोक्तिः ॥ १८ ॥ दनोःसकाशात् दनुतइत्यर्थः । पञ्चम्यर्थे सकाशशब्दंप्रयुञ्जते । तत्त्वेन याथार्थ्येन । ते महात्मनः त्वत्संबन्धिनो महात्मनः मतङ्गस्येत्यर्थः । महात्मनामिति पाठे त्वदाचार्याणामित्यर्थः। श्रुतं प्रभावं प्रत्यक्षं संद्रष्टुमिच्छामि। यदि मन्यसे दर्शयितुमिति शेषः ॥ १९ ॥ विनिःसृतं निर्गतं ॥ २० ॥ मेघघनप्रख्यं घनमेघसदृशं । विश्रुतं वनमिति शेषः॥२१॥ भावितात्मानः चिन्तितात्मानः । ते प्रसिद्धाः । मे गुरवः ।मन्त्रवन्मन्त्रपूजितं मन्त्रवतांमन्त्रैःपूजितं । तीर्थं गङ्गादिपुण्यसलिलं । इहप्रदेशे जुहवांचक्रिरे आहूत-

ति॰ एवमुक्ताऽहं यतः अतो मयात्वदर्थं वन्यंसम्यक्परीक्ष्य माधुर्ययुतं संचितमित्यर्थः । तदुक्तंपाद्मेशबरींप्रस्तुत्य—"प्रत्युद्गम्यप्रणम्याथ निवेश्यकुशविष्टरे । पादप्रक्षालनंकृत्वा तत्तोयंपापनाशनम् । शिरसाधार्यपीत्वाच वन्यैःपुष्पैरथार्चयत् । फलानि चसुपक्वानि मूलानिमधुराणिच । स्वयमास्वाद्यमाधुर्यं परीक्ष्यपरिभक्ष्यच । पश्चान्निवेदयामास राघवाभ्यांदृढव्रता । फलान्यास्वाद्यकाकुत्स्थस्तस्यैमुक्तिंपरांददौ ॥" इति ॥ १७ ॥ **स॰** विज्ञाने तद्विषये अबहिष्कृतां सर्वदाविज्ञानसंपन्नामितियावत् ॥ **कतक॰** विज्ञानेब्रह्मविद्यायां मैत्रेय्यादिवदबहिष्कृतां तत्राप्यधिकारिणीमित्यर्थः ॥ **ति॰** विशिष्टंज्ञानंयेषां तेषांसंबन्धोयस्यास्तत्संबोधनं हेविज्ञाने इतिसंबोध्य । तां नित्यमबहिष्कृतां भोजनादिव्यवहारादितिशेषः । तद्दत्तमाहारायङ्गीकृत्येतिचशेषइत्यन्ये ॥ १८ ॥ **ति॰** मेघोवर्षुकोयोघनस्तद्वन्नीलं । मिह सेचने । बाहुलकाद्घत्वं ॥ २१ ॥ **ती॰** मन्त्रवतांमुनीनां मन्त्रैः पूजितं पालितं तीर्थयज्ञं । 'तीर्थंमन्त्राद्युपाध्याययज्ञेष्वंभसिपावके' इतिरत्नाकरे। **ति॰** मन्त्रपूजितं मन्त्रस्य गायत्र्याः जपेनपूजितं अतिशुद्धं । नीडं

[**पा॰**] १ क. महात्मभिः. २ सतइतिश्लोकानन्तरं. मयात्वितिश्लोकात्पूर्वं. एवमुक्तामहाभागैस्तदाहंपुरुषर्षभ इत्यर्धं क. ङ.—ट. पाठेषुदृश्यते. ३ ङ.—ञ. संचितंवन्यंविविधं. ४ क. ख. ग. छ. ज. एवमुक्तस्तु. ५ ङ. च. झ. ट. महात्मनां. ६ धं. गणाकुलं. ७ क. ख. महामते. ८ क. ख. देहान्मन्त्रविन्मन्त्रपूजितान्. ग. झ. नीडं.

इयं प्रत्यक्स्थली वेदिर्यत्र ते मे[1] सुसत्कृताः ॥ पुष्पोपहारं कुर्वन्ति श्रमादुद्वेपिभिः करैः ॥ २३ ॥
[2]तेषां तपःप्रभावेन पश्याद्यापि [3]रघूद्वह ॥ [4]द्योतयन्ति दिशः सर्वाः श्रिया [5]वेद्योतुलप्रभाः ॥ २४ ॥
अशक्नुवद्भिस्तैर्गन्तुमुपवासश्रमालसैः ॥ [6]चिन्तितेऽभ्यागतान्पश्य सहितान्सप्त सागरान् ॥ २५ ॥
कृताभिषेकैस्तैर्न्यस्ता वल्कलाः पादपेष्विह ॥ अद्यापि [7]नावशुष्यन्ति प्रदेशे रघुनन्दन ॥ २६ ॥
देवकार्याणि कुर्वद्भिर्यानीमानि कृतानि वै ॥ पुष्पैः [8]कुवलयैः सार्धं [9]म्लानत्वं नोपयान्ति वै ॥ २७ ॥
[10]कृत्स्नं वनमिदं दृष्टं श्रोतव्यं च श्रुतं त्वया ॥ तदिच्छाम्यभ्यनुज्ञाता त्यक्तुमेतत्कलेवरम् ॥ २८ ॥
तेषामिच्छाम्यहं गन्तुं समीपं भावितात्मनाम् ॥ मुनीना[11]माश्रमो येषामहं च परिचारिणी ॥ २९ ॥
[12]धर्मिष्ठं तु वचः श्रुत्वा राघवः सहलक्ष्मणः ॥ प्रहर्षमतुलं लेभे आश्चर्यमिति[13] तत्त्वतः ॥ ३० ॥
तामुवाच ततो रामः [14]श्रमणीं संशितव्रताम् ॥ अर्चितोऽहं त्वया [15]भक्त्या गच्छ कामं [16]यथासुखम् ॥ ३१ ॥

वन्तः । महाद्युते इत्यनेन मुनिप्रभावश्रवणेसन्तोषवत्त्वंव्यज्यते ॥ २२ ॥ प्रत्यक्स्थली प्रत्यक्प्रदेशे स्थलीभूता । प्राक्प्रदेशेपश्चिमाभिमुखविष्णुस्थानत्वेन प्रत्यङ्निम्नेत्यर्थः । वेदिः देवपूजास्थानं । इयं अवलोक्यतामिति शेषः । यत्र वेद्यां । मे मया सुसत्कृतास्ते गुरवः श्रमात् वृद्धताकृतयापुष्पधारणाशक्त्या उद्वेपिभिः उत्कम्पिभिः । करैः पुष्पोपहारं पुष्पैरर्चनं कुर्वन्ति अकुर्वन् । अत्र वेदिरिति जात्येकवचनं उत्तरश्लोके बहुवचनप्रयोगात् बहूनां बहुवेदिसंभवाच्च ॥ २३ ॥ तेषां अस्मदाचार्याणां प्रभावेन अतुलप्रभाः इमाः वेद्यः । अद्यापि तेषामसन्निधानेपि । सर्वा दिशः द्योतयन्ति प्रकाशयन्ति । अनेन आचार्याभिमतो देशस्तदसन्निधानेप्युद्देश्य इत्युक्तं ॥ २४ ॥ पुनर्वैभवान्तरमाह—अशक्नुवद्भिरिति । उपवासश्रमेण अलसैः मन्दैः । अतएव सप्तसागरान् गन्तुमशक्नुवद्भिः मे गुरुभिः चिन्तिते चिन्तितमात्रे । अभ्यागतान् अभिमुखमागतान् । सप्तसागरान् पश्य ॥ २५ ॥ अद्भुतान्तरमाह—कृतेति । इह प्रदेशे सागरप्रदेशे । कृताभिषेकैः कृतस्नानैः । तैर्गुरुभिः पादपेषु न्यस्ताः आर्द्रवल्कलाः अद्यापिनावशुष्यन्ति नशुष्काभवन्ति । तदङ्गसम्पर्कवैभवादितिभावः ॥ २६ ॥ देवकार्याणि देवार्चनानि । कुर्वद्भिः तैः कुवलयैः सह पुष्पैः पुष्पान्तरैः । यानीमानि माल्यानिकृतानि तानि म्लानत्वं नोपयान्ति भक्त्यतिशयेनसमर्पितत्वादिति भावः । एतावता ग्रन्थसंदर्भेण "गुरुं प्रकाशयेद्धीमान्" इत्युक्तरीत्या आचार्यवैभवप्रकटनंकर्तव्यमितिसूचितं ॥ २७ ॥ उपसंहरति—कृत्स्नमिति । अभ्यनुज्ञाता त्वयेतिशेषः ॥ २८ ॥ त्यक्त्वाकिंकरिष्यसीत्यत्राह—तेषामिति । समीपं पादमूलं । गमिष्यामि । "यानहं पर्यचारिषं" इत्यन्यत्रोक्तेः । आश्रमः अयमिति शेषः । येषामाश्रमोऽयं येषामहं च परिचारिणी तेषां समीपं गन्तुमिच्छामीतिसंबन्धः ॥ २९ ॥ वचः आचार्यवैभवप्रदर्शनादिरूपं । तत्त्वतः मायांविना । आश्चर्यमिति मत्वा ॥ ३० ॥ अथ शबरीमनोरथंपूरयति—तामिति । शंसितव्रतां आचार्यपरिचर्यानिष्ठामित्यर्थः । अर्चितः तव गुरुवृत्तिसंदर्शनेनैवेतिशेषः । भक्त्या वन्यसंपादनमात्रेण वा । अयमेवार्थःसंक्षेपे "शबर्या पूजितः सम्यक्" इत्युक्तः ।

देहपञ्जरं । तीर्थमितिपाठे सएवार्थः । मन्त्रवत् तद्धोममन्त्रवत् । जुहवांचक्रिरे हुतवन्तः ॥ २२ ॥ **ती०** दृष्टं त्वया मयादर्शितं । श्रुतं त्वया मयाश्रावितं ॥ २८ ॥ **शि०** भावितात्मनां परिशीलितपरमात्मनां ॥ २९ ॥

[पा०] १ क. च. छ. ज. पुरुषर्षभाः. २ ख. ग. तेषामेवंप्रभावेन. ३ क.—ट. रघूत्तम. ४ क. ङ.—ट. द्योतयन्ती. ५ क. ङ.—ट. वेद्यतुलप्रभा. ६ च. छ. ज. ञ. चिन्तितेनागतान्सप्तसहितान्पश्य. क. चिन्तितैरागतान्पश्य. ख. ग. चिन्तितेनागतान्पश्यसमेतान्सप्त. ७ ख. घ.—ट. नविशुष्यन्ति. क. नैवशुष्यन्ति. ८ क. घ. झ. किसलयैः. ९ ख. ग. ङ. झ. ट. म्लानत्वंनतुयान्तिवै. क. नग्लानिमुपयान्तिच. १० क. कदावासंवनंदृष्टं. ११ ख. च. छ. ज. माश्रमे. १२ च. छ. ज. धर्मिष्ठायावचः. ग. धर्मिष्ठंतद्वचः. १३ ङ. झ. ट. मितिचाब्रवीत्. १४ ङ. झ. ट. शबरीं. १५ ख. घ.—ट. भद्रे. १६ ग. तपोधने.

[1]इत्युक्त्वा जटिला वृद्धा चीरकृष्णाजिनाम्बरा ॥ तस्मिन्मुहूर्ते शबरी [2]देहं जीर्णं जिहासती ॥ ३२॥
अनुज्ञाता तु रामेण हुत्वाऽऽत्मानं हुताशने ॥ ज्वलत्पावकसंकाशा स्वर्गमेव ज[3]गाम सा ॥ ३३ ॥
दिव्याभरणसंयुक्ता दिव्यमाल्यानुलेपना ॥ दिव्याम्बरधरा तत्र बभूव प्रियदर्शना ॥
[4]विराजयन्ती तं देशं विद्युत्सौदामिनी यथा ॥ ३४ ॥
यत्र ते सुकृतात्मानो विहरन्ति महर्षयः ॥ तत्पुण्यं शबरीस्थानं जगामात्मसमाधिना ॥ ३५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये आरण्यकाण्डे चतुःसप्ततितमः सर्गः ॥ ७४ ॥

पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

मतङ्गादिमहर्षिमहिमप्रशंसनपूर्वकं निर्वर्तितपुण्यतीर्थावगाहनाह्निकेनरामेण लक्ष्मणेनसहशबर्याश्रमान्निर्गत्यपंपांप्रतिगमनं ॥ १ ॥

दिवं तु तस्यां यातायां शबर्यां [5]स्वेन तेजसा ॥ लक्ष्मणेन सह भ्रात्रा चिन्तयामास राघवः ॥ १ ॥
[6]स चिन्तयित्वा धर्मात्मा प्रभावं तं महात्मनाम् ॥ हितकारिणमेकाग्रं लक्ष्मणं राघवोऽब्रवीत् ॥२॥
[7]दृष्टोऽयमाश्रमः सौम्य [8]बह्वाश्चर्यः कृतात्मनाम् ॥ विश्वस्तमृगशार्दूलो नानाविह[9]गसेवितः ॥ ३ ॥
सप्तानां च [10]समुद्राणामेषु तीर्थेषु लक्ष्मण ॥ उपस्पृष्टं च विधिवत्पितरश्चापि तर्पिताः ॥ ४ ॥
प्रनष्टमशुभं [11]तत्तत्कल्याणं समुपस्थितम् ॥ [12]तेन तत्त्वेन हृष्टं मे मनो लक्ष्मण संप्रति ॥ ५ ॥

कामं काम्यमानंलोकं ॥ ३१ ॥ इतीति श्लोकद्वयमेकान्वयं। जिहासती हातुमिच्छन्ती । स्वर्गमेवेत्यवधानंद्योतयति ॥ ३२—३३ ॥ दिव्येतिसार्धश्लोकः । तत्र स्वर्गगमनारम्भे । विद्युत् विशेषेणद्योतमाना । सौदामिनी तटित् ॥ ३४ ॥ ते गुरवः सुकृतात्मानः सुकृतधैर्यवन्तः । आत्मसमाधिना आत्मविषययोगेन । एतत्सर्गवृत्तान्तेन मतङ्गशिष्योपदिष्टसमाधिकाशबरी गुर्वनुज्ञयारामागमनपर्यन्तंस्थित्वा ततोरामानुज्ञयास्वसमाधिबलेनस्वगुरुगतंस्वर्गविशेषंप्राप्तेत्यत्रगम्यते । स्त्रियाअपि विदुरादेरिवयोगाधिकारःसंभवति । तदङ्गयज्ञादिकर्मस्थाने गुरुशुश्रूषा । स्वर्गश्च आदौअक्षयानित्युक्त्या पुनरावृत्तिरहितंपरमपदमित्यवगम्यते । "एवमेवामुत्रपुण्यचितोलोकःक्षीयते" इतिश्रुत्याकेवलस्वर्गस्यक्षयित्वावगमात् । अस्मिन्सर्गेसार्धपञ्चत्रिंशच्छ्लोकाः ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने चतुःसप्ततितमः सर्गः ॥ ७४ ॥

अथ पम्पागमनंपञ्चसप्ततितमे । स्वेनतेजसा उपलक्षितायामितिशेषः ॥ १ ॥ एकाग्रं एकचित्तं ॥२॥ बह्वाश्चर्यः अत्यद्भुतपुष्पफलादिसंपत्तिसकलतीर्थसमागमादिनाआश्चर्ययुक्तः । विश्वस्ताः विश्वासंप्राप्ताः परस्परहिंसकत्वरहिताः मृगाः शार्दूलाश्चयस्मिंस्तथा ॥ ३ ॥ उपस्पृष्टं स्नातं। अनेन पुण्यतीर्थप्राप्तौ स्नानश्राद्धादिकंकर्तव्यमित्युक्तं ॥ ४ ॥ तत्तदशुभं प्रनष्टं । कल्याणं शुभं । तेन अशुभनिवृत्तिपूर्वकशुभप्राप्त्या

ती० सर्गश्रवणफलंस्कान्दे—'शबर्यासत्कृतिंश्रुत्वा साध्वीनांलोकगोभवेत्'इति ॥ ३५ ॥ इतिचतुस्सप्ततितमःसर्गः ॥ ७४ ॥
शि० चिन्तयामास मुनिप्रभावंप्रशंसयामासेत्यर्थः ॥ १ ॥

[पा०] १ ङ. झ. ट. इत्येवमुक्ताजटिला. २ क. ख. ग. जीर्णदेहंविहायतत्. च. छ. ज. ञ. देहंजीर्णविहायतत्. ३ ग. ङ. झ. ट. जगामह. ४ विराजयन्तीत्येतदर्धात्परं. क. ख. घ. च. छ. ज. ञ. पाठेषु. प्रणम्यशिरसारामंस्वर्गतासुप्रभानना. इत्यर्धमधिकंदृश्यते. ५ क. घ. कर्मणा. ६ ङ.—ट. चिन्तयित्वातु. ७ ग.—ट. दृष्टोमयाऽऽश्रमः. ८ घ. बह्वाश्चर्यो महात्मनां. ९ च. छ. ज. ञ. विहगशोभितः. १० ग. झ. समुद्राणामेषां. ११ ख. ग. घ. च. छ. ज. यत्तत्कल्याणं. क. ङ. झ. ञ. ट. यन्नःकल्याणं. १२ क. ङ. च. छ. झ. ञ. ट. तेनत्वेतत्प्रहृष्टं. ख. तेनचापिप्रहृष्टं.

[1]हृदये हि नरव्याघ्र [2]शुभमाविर्भविष्यति ॥ ६ ॥
तदागच्छ गमिष्यावः पम्पां तां प्रियदर्शनाम् ॥ ऋश्यमूको [3]गिरिर्यत्र नातिदूरे प्रकाशते ॥ ७ ॥
यस्मिन्वसति धर्मात्मा सुग्रीवोंऽशुमतः सुतः ॥ नित्यं वालिभया[4]त्त्रस्तश्चतुर्भिः सह वानरैः ॥ ८ ॥
[5]अभित्वरे च तं द्रष्टुं सुग्रीवं वानरर्षभम् ॥ तदधीनं हि मे[6] सौम्य सीतायाः परिमार्गणम् ॥ ९ ॥
[7]एवं ब्रुवाणं [8]तं धीरं रामं सौमित्रिरब्रवीत् ॥ गच्छावस्त्वरितं तत्र ममापि [9]त्वरते मनः ॥ १० ॥
आश्रमात्तु ततस्तस्मा[10]न्निष्क्रम्य स विशांपतिः ॥ आजगाम ततः पम्पां लक्ष्मणेन [11]सहाभिभूः ॥११॥
[12]स ददर्श ततः पुण्यामुदारजनसेविताम् ॥ नानाद्रुमलताकीर्णां पम्पां पानीयवाहिनीम् ॥ १२ ॥
पद्मैः सौगन्धिकैस्ताम्रां शुक्लां कुमुदमण्डलैः ॥ नीलां [13]कुवलयोद्घाटैर्बहुवर्णां कुथामिव ॥ १३ ॥
स तामासाद्य वै रामो [14]दूरादुदकवाहिनीम् ॥ मतङ्गसरसं नाम ह्रदं समवगाहत ॥ १४ ॥
अरविन्दोत्पलवतीं पद्मसौगन्धिकायुताम् ॥ पुष्पिताम्रवणोपेतां बर्हिणोद्घुष्टनादिताम् ॥ १५ ॥

॥ ५ ॥ हृदय इत्यर्धमेकं । शुभं शुभस्मरणं ॥ ६ ॥ तदित्यादिश्लोकद्वयं । अंशुमतः सूर्यस्य ॥ ७—८ ॥ मे सीताया इत्यन्वयः ॥ ९ ॥ धीरं कृतधैर्यमित्यर्थः ॥१०॥ ततः अनन्तरं । विशां प्रजानां पतिः । ततः तत्र मार्गे । अभिभवतीत्यभिभूः अभिभावक इत्यर्थः । शत्रूणामित्यर्थसिद्धं । प्रभुरित्यपिपाठः ॥ ११ ॥ सददर्शततःपुण्यामित्यादी द्वौ श्लोकौ । उदारजनाः श्रेष्ठजनाः मुनिप्रभृतयः । पानीयवाहिनीं पानार्हशीतलस्वादुजलवतीमित्यर्थः । सौगन्धिकैः कह्लारैः। कुवलयोद्घाटैः कुवलयसमूहैः । कुथा चित्रकम्बलं ददर्श दूरादिति बोध्यं । अग्र इत्यनुवादात् ॥ १२—१३ ॥ उदकवाहिनींतां दूरादासाद्य मतङ्गसरसंनाम मतङ्गसरसमिति प्रसिद्धं । “ अनोश्मायःसरसांजातिसंज्ञयोः” इति टच् समासान्तः । ह्रदं पम्पासमीपस्थं सरः । समवगाहत सस्नौ । पुण्यतीर्थत्वादिति भावः ॥१४॥ दूरतः पम्पादर्शनमनुवदंस्तत्तीरवनदर्शनमाह षड्भिः । अरविन्दं रक्ताब्जं । पद्मैः सितपद्मैः । आम्रवणं चूतवनं। बर्हिणोद्घुष्टं मयूरशब्दः तेन नादितां संजातनादां। तिलकैः क्षुरकवृक्षैः। बीजपूरैः दाडिमैः । धवैः धवाख्यैर्वृक्षविशेषैः । शुक्लद्रुमैः अर्जुनवृक्षैः। करवीरैः प्रसिद्धैः। पुन्नागैः तुङ्गवृक्षैः। मालतीति मालतीगुल्मैः कुन्दगुल्मैश्चेत्यन्वयः । भाण्डीरैः वटैः। निचुलैः वञ्जुलैः। सप्तपर्णैः विषमच्छदवृक्षैः। अतिमुक्तकैः नेमिवृक्षैः । भूषितां शोभितां । अतएव प्रमदामिव स्थितां । सर्वतः चतुर्दिक्प्रदेशेपि । कोयष्टिकैः टिट्टिभाख्यैःपक्षिविशेषैः । अर्जुनकैः पक्षिविशेषैः । शतपत्रैः दार्वाघाटैः । कीरकैः शुकैः । अव्यग्रौ सुसमाहितौ व्याकुलत्वरहितौ । प्रत्युत सावधानौ चेत्यर्थः । राघवौ अरविन्दोत्पलवतीमित्यादिविशेषिताम् । तिलकादिभिर्वृक्षैर्भूषितां अतएव प्रमदामिव स्थितां पम्पां सर्वतःसमीक्षमाणौ ततः पुष्पाढ्यं सर्वतो विपुलद्रुमं कोयष्टिकादिभिर्विहगैर्नादितं अन्यैःशकुनैश्चयुतं सरसः पम्पायाःसंबन्धि तद्वनंच पश्यन्तावेव सन्तौ अव्यग्रौ सुसमाहितौ च

स० वालिनोभयं आतयतिगमयतीति वालिभयात् अहं अभित्वरे ॥ ८—९ ॥ **ति०** पानीयवाहिनीं पानार्हातिमधुरसुशीतनिर्मलजलवाहिनीं । अनेन पंपा नदीतिलभ्यते । वाहिनीमित्यस्य धारिणीमित्यर्थोवा । मतङ्गसरसमित्यकारान्तः । तच्च पंपायामेवप्रदेशभेदो गङ्गायांमणिकर्णिकेव ॥ १४ ॥

[पा०] १ घ. हृदयेऽपि. च. छ. ज. ञ. निश्चितंहिनरव्याघ्र. घ. ङ. झ. ट. हृदयेमे. २ छ. ज. ञ. शुभमाशुभविष्यति. ३ ग. घ. गिरिर्यस्या. ४ ख. छ. भयत्रस्तः. ५ ङ. झ. ट. अहंत्वरे. ६ ङ. झ. ट. मेकार्यं. ग. यत्सौम्य. ७ क. ख. घ.—ट. इति. ८ क. ङ. झ. ट. तंवीरंसौमित्रिरिदमब्रवीत्. च. छ. ज. ञ. काकुत्स्थंसौमित्रिरिदमब्रवीत्. घ. तंरामंसौमित्रिरिदमब्रवीत्. ग. तंवीरंरामं. ९ ग. त्वरितं. १० ग. निर्गत्यच. ११ ख. ग. ङ. ज.—ट. सहप्रभुः. १२ सददर्शततःपुण्यामिति श्लोकमारभ्य आसर्गसमाप्तिविद्यमानेषुश्लोकेषुकेषांचित्पौर्वापर्यं. केषांचिदानुपूर्वीभेदः. केषांचिन्न्यूनाधिकभावश्च. झ. ञ. ट. पाठेषुदृश्यते. १३ ग. छ. ज. कुवलयजातैः. १४ ङ. झ. ञ. ट. दूरात्पानीयवाहिनीं. ख. आरादुदक.

तिलकैर्बीजपूरैश्च [1]धवैः शुक्लद्रुमैस्तथा ॥ पुष्पितैः करवीरैश्च पुन्नागैश्च सुपुष्पितैः ॥ १६ ॥
मालतीकुन्दगुल्मैश्च भाण्डीरैर्निचुलैस्तथा ॥ अशोकैः सप्तपर्णैश्च केतकैरतिमुक्तकैः ॥ १७ ॥
अन्यैश्च विविधैर्वृक्षैः प्रमदामिव भूषिताम् ॥ [2]समीक्षमाणौ [3]पुष्पाढ्यं सर्वतो विपुलद्रुमम् ॥ १८ ॥
[4]कोयष्टिकैश्चार्जुनकैः शतपत्रैश्च [5]कीरकैः ॥ एतैश्चान्यैश्च [6]विहगैर्नादितं [7]तु वनं महत् ॥ १९ ॥
[8]ततो जग्मतुरव्यग्रौ [9]राघवौ सुसमाहितौ ॥ तद्वनं चैव सरसः पश्यन्तौ शकुनैर्युतम् ॥ २० ॥
स ददर्श ततः पम्पां [10]शीतवारिनिधिं शुभाम् ॥ प्रहृष्टनानाशकुनां पादपैरुपशोभिताम् ॥
तिलकाशोकपुन्नागबकुलोद्दालकाशिनीम् ॥ २१ ॥
स रामो विविधान्वृक्षान्सरांसि विविधानि च ॥ पश्यन्कामाभिसंतप्तो जगाम परमं ह्रदम्॥ २२ ॥
पुष्पितोपवनोपेतां सालचम्पकशोभिताम् ॥ षट्पदौघसमाविष्टां श्रीमतीमतुलप्रभाम् ॥ २३ ॥
स्फटिको[11]पमतोयाढ्यां श्लक्ष्णवालुकसंतताम् ॥ स तां दृष्ट्वा पुनः पम्पां पद्मसौगन्धिकैर्युताम् ॥
इत्युवाच [12]तदा वाक्यं लक्ष्मणं [13]सत्यविक्रमः ॥ २४ ॥
[14]अस्यास्तीरे तु पूर्वोक्तः पर्वतो धातुमण्डितः ॥ ऋश्यमूक इति ख्यातः [15]पुण्यः पुष्पितपादपः ॥ २५ ॥
[16]हरेरृक्षरजोनाम्नः पुत्रस्तस्य महात्मनः ॥ अध्यास्ते तं महावीर्यः सुग्रीव इति विश्रुतः ॥ २६ ॥
सुग्रीव[17]मभिगच्छ त्वं वानरेन्द्रं नरर्षभ ॥ [18]इत्युवाच पुनर्वाक्यं लक्ष्मणं सत्यविक्रमम् ॥ २७ ॥
राज्यभ्रष्टेन [19]दीनेन तस्यामासक्तचेतसा ॥ कथं मया विना [20]शक्यं सीतां लक्ष्मण जीवितुम् ॥२८॥
इत्येवमुक्त्वा मदनाभिपीडितः स लक्ष्मणं वाक्य[21]मनन्यचेतसम् ॥
विवेश पम्पां नलिनीं [22]मनोहरां रघूत्तमः शोकविषादयन्त्रितः ॥ २९ ॥

सन्तौ । तद्वनं जग्मतुरिति संबन्धः । अतो न वनशब्दद्वयदोषः ॥ १५—२० ॥ समीपतःपम्पादर्शनमाह—स ददर्शेति ॥ २१ ॥ अथ पम्पाप्राप्तिमाह—स राम इति । परमंह्रदं पम्पाख्यं सरः ॥ २२॥ प्राप्त्यनन्तरं पम्पां दृष्ट्वा लक्ष्मणं प्रत्याह—पुष्पितेत्यादिसार्धश्लोकद्वयं । सालाः सर्जकवृक्षाः । चम्पकाः चाम्पेयवृक्षाः ॥ २३—२४ ॥ पूर्वोक्तः कबन्धेनेति शेषः ॥ २५ ॥ हरेः वानरस्य । तस्य प्रसिद्धस्य । तं ऋश्यमूकं ॥ २६ ॥ अभिगच्छेत्यनन्तरमित्युक्त्वेति शेषः । इति वक्ष्यमाणप्रकारेण । सुग्रीवमभिगच्छेत्युक्त्वा लक्ष्मणंपुनरित्युवाचेत्यन्वयः ॥२७॥ राज्यभ्रष्टेन अतएव दीनेन सर्वदैन्यपरिहारार्थं तस्यां सीतायां । आसक्तचेतसा मया सीतांविना कथंजीवितुं शक्यं ॥ २८॥ अनन्यचेतसं स्ववाक्यश्रवणेसावधानं । विवेश स्नानायेति शेषः । नलिनीं सरसीं । शोकः दुःखं विषादःतत्कृतःकार्यकरणापाटव-

शि० अनन्यचेतनः न अन्यस्मिन् सीतातिरिक्तवस्तुनि चेतनंचित्तं यस्यसः । रघूत्तमः सरामः ॥ २९ ॥

[पा०] १ ख. घ. च. छ. वरैः. २ क.—ङ. झ. ञ. ट. समीक्षमाणः. ३ ख. पुष्पाढ्यांफलपुष्पसमाकुलां. ४ ङ. झ. कोयष्टिभिश्चा. ५ झ. कीचकैः. ख. घ. किंशुकैः. ६ क. ख. घ. च. ञ. विविधैः. ङ. झ. ट. बहुभिः. ७ क. ख. घ.—ट. तद्वनं. ८ च. छ. ज. ट. समाजग्मतुः. ङ. झ. ञ. तत्रजग्मतुः. ९ ङ. झ. ञ. राघवौहि. १० ख. वारिधरां. ११ क. ख. ञ. तोयांतां. १२ ख. ग. झ. ट. पुनर्वाक्यं. १३ ख. च. छ. ज. ट. सत्यविक्रमं. १४ ख. तस्यास्तीरेतु. ग. अस्यास्तुतीरे. १५ क. ख. घ. ङ. चित्रपुष्पितकाननः. ङ. झ. ट. चित्रपुष्पितपादपः. ग. सदापुष्पितपादपः. च. छ. ज. ञ. सदापुष्पितकाननः. १६ क. ख. हरिर्ऋक्ष. १७ ग. मभिगच्छावो. १८ घ. च.—झ. इत्युक्त्वाच. १९ घ. हीनेन. २० क. ख. ग. ङ. ज.—ञ. सीतांशक्यं. २१ ङ. झ. ञ. ट. मनन्यचेतनः. क. मदीनचेतसं. च. छ. ज. मदीनसत्वः. २२ क. घ. च. छ. झ. ञ. ट. मनोरमां.

ततो महद्वर्त्म सुदूरसंक्रमः क्रमेण गत्वा प्रतिकूलधन्वनम् ॥
ददर्श पम्पां शुभदर्शकाननामनेकनानाविधपक्षिजालकाम् ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशत्सहस्रिकायां संहितायां आरण्यकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

श्रीमदारण्यकाण्डपठनश्रवणयोः फलं ब्रह्माण्डपुराणे सप्तचत्वारिंशदुत्तरशततमे अध्याये—
आरण्यकं तु यः काण्डमतिभक्तिसमन्वितः । पठेद्वा शृणुयाद्वापि सोमसायुज्यमाप्नुयात् ॥

इति आरण्यकाण्डः समाप्तः ॥ ३ ॥

रूपशरीरावसादः ताभ्यांयन्त्रितः नियमितः । तत्परवशइत्यर्थः ॥ २९ ॥ सर्गार्थंसंगृह्णाति—तत इति । सुदूरं संक्रमः गमनं यस्य स तथा दूरादागत इत्यर्थः। प्रतिकूलधन्वनं पथिकजनप्रतिकूलभूतमरुकान्तारंकबन्धवनमित्यर्थः । क्रमेण अनेकविघ्ननिवृत्तिपूर्वकंगत्वा शुभः शोभनः दर्शः दर्शनंयस्य तादृशं काननं यस्यास्तां । अनेके नानाजातीयाः बहवो वा नानाविधाः नानासंस्थानाःपक्षिणः शुकशारिकाकोकिलप्रभृतयः तेषांजालकानि समूहाः यस्यां तां । यद्वा अनेकानि नानाविधपक्षिजालकानि यस्यां तां । काननद्वारापक्षिजालवत्त्वं । तादृशीं पम्पां ददर्श । अस्मिन्सर्गे त्रिंशच्छ्लोकाः। न्यूनातिरेकसद्भावस्तु कोशेषु बहुधा दृश्यते ॥३०॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे रत्नमेखलाख्याने आरण्यकाण्डव्याख्याने पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

इत्थं कौशिकदिव्यवंशकलशीवाराशिराकाशशी पादाम्भोजमरन्दभोगरसिकः श्रीमच्छठारेर्गुरोः ॥
आलोक्याखिलदेशिकोत्तमकृतव्याख्यानशैलीश्रियं व्याचख्यौ तदरण्यकाण्डमखिलं गोविन्दराजाभिधः १

ती० फलस्तुतिस्स्कान्दे "आरण्यकाण्डमाहात्म्यं येश्शृण्वन्ति महीतले । श्रीरामस्यप्रसादेन विष्णुलोकंव्रजन्तिते ॥ " इति ॥ ३० ॥ इतिपञ्चसप्ततितमःसर्गः ॥ ७५ ॥

[पा०] १ क. ख. घ. छ. द्वत्मैवदूरसंक्रमं. २ ख.—ङ. झ. ञ. ट. प्रविलोकयन्वनं. क. च. छ. सविलोकयन्वनं. ३ क. नानामृग. ४ क. —ट. संकुलां.

इदं आरण्यकाण्डम् कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागरमुद्रायन्त्रे मुद्रापितम् । शकाब्दाः १८३४ सन १९१२.

SRIMAD VĀLMĪKI RĀMĀYAṆA

A CRITICAL EDITION

With the commentary of Sri Govindaraja

AND

Extracts from many other commentaries and Readings.

KISHKINDHĀKĀṆDA 4.

EDITED AND PUBLISHED

BY

T. R. Krishnacharya,

Proprietor, Madhva Vilâs Book Depot, Kumbakonam.

Printed by B. R. Ghanekar for the proprietor,

at the "Nirnaya-sagar" Press, 23, Kolbhat Lane,

BOMBAY.

1912.

॥ श्रीः ॥

श्रीमद्वाल्मीकिरामायणम् ।

श्रीमद्गोविन्दराजीयव्याख्यानसमलंकृतम् ।

तथा

तिलकप्रभृत्यनेकापूर्वव्याख्यानोद्धृतैः
गोविन्दराजीयानुक्तापूर्वविषयैश्च संवलितम् ।

किष्किंधाकाण्डम् ४.

एतच्च

कुम्भघोणस्थेन श्रीमन्मध्वविलासपुस्तकालयाधिपतिना

टी. आर्. कृष्णाचार्येण

अनेकेषां विदुषां साहाय्येन नानादेशीयकोशानुसारेण

संशोध्य

मुंबापुर्यां

तुकाराम जावजी इत्येतेषां निर्णयसागरमुद्रणयन्त्रे मुद्रयित्वा प्रकाशितम् ।

शाके १८३४ परिधाविनामसंवत्सरे ।

॥ श्रीः ॥

श्रीमद्वाल्मीकिरामायणम् ।

श्रीमद्गोविन्दराजीयव्याख्यासमलंकृतम् ।

किष्किन्धाकाण्डम् ४

श्रीरामचन्द्राय नमः ॥

प्रथमः सर्गः ॥ १ ॥

पंपामुपागतेनरामेण लक्ष्मणसंबोधनेन पंपायास्तत्तीरवनादेश्च रामणीयकानुवर्णनपूर्वकमुद्दीपनसामग्रीसमुद्दीपितशोकतया सीतानुशोचनेनबहुधापरिदेवनम् ॥ १ ॥ सचिवैस्साकमृश्यमूकवासिनासुग्रीवेण पंपापरिसरचारिणोरामलक्ष्मणयोर्दर्शनम् ॥ २ ॥

स तां पुष्करिणीं गत्वा पद्मोत्पलझषाकुलाम् ॥ रामः [1]सौमित्रिसहितो विललापाकुलेन्द्रियः ॥ १ ॥

॥ श्रीरामचन्द्रायनमः ॥ काहं मन्दमतिर्गभीरमधुरं रामायणं तत्कच व्याख्यानेऽस्य परिभ्रमन्नहमहो हासास्पदं धीमताम् । को भारोऽत्र मम स्वयं कुलगुरुः कोदण्डपाणिः कृपाकूपारो रचयत्यदः सपदि मज्जिह्वाग्रसिंहासनः ॥ श्रीरामायणराजस्य समर्प्य मणिमेखलाम् । सारोद्धारमिमं हारमर्पयिष्यामि संप्रति ॥ एवं पूर्वस्मिन्काण्डे दीनजनसंरक्षणरूपो धर्मोऽनुष्ठापितः । अथ किष्किन्धाकाण्डे मित्रसंरक्षणरूपो धर्मोऽनुष्ठाप्यते । तथा पूर्वस्मिन्काण्डे मोक्षप्रदत्वरूपं परतत्त्वचिह्नमुपदर्शितं । अत्रासंख्येयकल्याणगुणाकरत्वं प्रतिपाद्यते । वस्तुतस्तु प्रथमेकाण्डे श्रीमत्त्वं श्रीमत्पदोदीरितमुक्तं । द्वितीये सर्वजनव्यामोहविषयत्वोक्त्या नारायणशब्दार्थः । तृतीये पञ्चवटीवासपर्यन्तवृत्तान्तेन मुनिजनकृतकैङ्कर्योक्त्या चतुर्थ्यर्थ उक्तः । खरादिवधवृत्तान्तेन नमःशब्दार्थउक्तः । अथ मारीचदर्शनवृत्तान्तमारभ्य चेतनोज्जीवनप्रकारःप्रदर्श्यते । तत्र मारीचदर्शनवृत्तान्तेन भगवन्नित्यानुभवयोग्यस्य चेतनस्याप्राप्तविषयप्रावण्यं । तेन रावणरूपमहामोहाक्रमणं । जटायुव्यापारेण रावणानिवृत्तिकथनात् केवलकर्मणा संसारस्यानिवर्त्यत्वम् । लङ्काप्रवेशेन सांसारिकशरीरप्रवेशः । एकाक्ष्येककर्णीप्रभृति व्यापारैस्तापत्रयाभिहतिः । रामान्वेषणेन भगवतश्चेतनोज्जीवनोपायचिन्तनं चोक्तमारण्यकाण्डे । अथाचार्यमुखेन चेतनस्य स्वविषयभक्त्युत्पादनकृते तदन्वेषणमुच्यते किष्किन्धाकाण्डे ॥ तत्र प्रथमे सर्गे नित्यकैङ्कर्यपरनित्यसूरिदर्शनेन एतत्तुल्यभोगस्य प्राप्ताजीववर्गः किमिति न मां प्राप्त इति भगवतः क्लेशातिशयं दर्शयति । स

तनि० पद्मेतिसीतायामुखानुस्मरणं । उत्पलेतिनेत्रानुस्मरणं । झषेतिनेत्रचाञ्चल्यानुस्मरणं । सौमित्रेइतितस्यदुःखाविष्करणपात्रत्वंचव्यज्यते ॥ **ती०** सः विराधखरत्रिशिरोदूषणकबन्धादीनामयत्नसंहारप्रसिद्धपराक्रमयुक्तःश्रीरामः । तां चिकीर्षितरावणवधोपयोगिसुग्रीवाधिष्ठितऋश्यमूकसमीपवर्तिनीं । पुष्करिणीं पंपां । आकुलेन्द्रियः पुष्करिणीदर्शनजनितसीताविरहशोकातिशयेनक्षुभितसर्वेन्द्रियस्सन् विललाप परिदेवयामास ॥ **टीका०** अस्मिन्किष्किन्धाकाण्डेतदेवसुग्रीवसख्यंवक्तुमनाःप्रसङ्गात्पुरुषधौरेयाणामपीष्टजनवियोगिनांकामोद्दीपकदर्शनेनचित्तविभ्रमोभवतीतिसूचनायपंपावर्णनमुखेनरामस्यचित्तविभ्रमंदर्शयितुमुपक्रमते—**सतामिति** ॥ **ति०** पुष्करिणीं पंपानद्यन्तरगतंपंपाख्यं मतङ्गाख्यंवा सरोविशेषः ॥ **सत्य०** यद्वा सतामेवोपभोग्यांपुष्करिणीं ॥ १ ॥

[पा०] १ क. ग. सौमित्रिणासार्धं.

तस्य दृष्ट्वैव तां हर्षादिन्द्रियाणि चकम्पिरे ॥ स कामवशमापन्नः सौमित्रिमिदमब्रवीत् ॥ २ ॥
सौमित्रे शोभते पम्पा वैडूर्यविमलोदका ॥ फुल्लपद्मोत्पलवती शोभिता विविधैर्द्रुमैः ॥ ३ ॥
सौमित्रे पश्य पम्पायाः काननं शुभदर्शनम् ॥ यत्र राजन्ति शैलाभा द्रुमाः सशिखरा इव ॥ ४ ॥
मां तु शोकाभिसंतप्तं माधवः पीडयन्निव ॥ भरतस्य च दुःखेन वैदेह्या हरणेन च ॥ ५ ॥
शोकार्तस्यापि मे पम्पा शोभते चित्रकानना ॥ व्यवकीर्णा बहुविधैः पुष्पैः शीतोदका शिवा ॥६॥
नलिनैरपि संछन्ना ह्यत्यर्थं शुभदर्शना ॥ सर्पव्यालानुचरिता मृगद्विजसमाकुला ॥ ७ ॥
अधिकं प्रतिभात्येतन्नीलपीतं तु शाद्वलम् ॥ द्रुमाणां विविधैः पुष्पैः परिस्तोमैरिवार्पितम् ॥ ८ ॥

एकाकी न रमेतेति ह्युक्तं । सतामित्यादि । पद्मोत्पलझषैः कमलेन्दीवरमत्स्यैः आकुलां । तां पम्पाख्यां । पुष्करिणीं सरसीं । गत्वा । मुखनयनकटाक्षवत्याः कान्तायाः स्मारकत्वेन व्याकुलेन्द्रियः मोहं प्रसादं च प्राप्तः । स रामः तादृशधैर्यविशिष्टोपि । सौमित्रिसहितः आश्वासकान्तरङ्गपुरुषसहितोऽपि विललाप ॥ १ ॥ आकुलेन्द्रिय इत्येतद्विवृण्वन्नाह—तस्येति ॥ दृष्ट्वा स्थितस्य तस्य । इन्द्रियाणि हर्षाच्चकम्पिरे च्युतानीत्यर्थः ॥ २ ॥ प्रलापप्रकारमाह—सौमित्रे इत्यादिना ॥ अनेन भक्तिद्रुतहृदयस्तत्सूचकमुखप्रसादः सपरिकरः पुरुष उच्यते ॥ ३ ॥ यत्र कानने । सशिखरा इव उन्नताग्रशाखाभिः सशृङ्गा इव स्थिताः । अतएव शैलाभाः । अनेन भगवद्दयारसोपजीविन आचार्याः तदुपजीविनोऽन्तेवासिनश्चोच्यन्ते । " अत्र परत्र चापि " इति न्यायेन नित्यविभूतावपि शिष्यवत्त्वं सिद्धं ॥ ४ ॥ भरतस्य दुःखेन नगराद्बहिर्व्रतोपवासादिनियमकृतदुःखेन । वैदेह्याः हरणेन च पूर्वमेव संतप्तं मां । माधवो वसन्तः । तु विशेषेण पीडयन्निवभवतीत्यर्थः । वस्तुतः पीडाभावादिवशब्दः । अनेन संसारतो जीवस्य दुःखेन दुःखितत्वमुक्तं ॥ ५ ॥ सर्वेषुमद्भक्तेषु सुखं वसत्सु किमर्थमेते संसारिणः क्लिश्यन्तीत्यभिप्रायेणाह—शोकार्तस्येत्यादिना ॥ शोकार्तस्यापि मे मयि शोकार्तेपि । शोभते । व्यर्थेयं शोभेति भावः ॥ ६ ॥ अपिशब्देन कुमुदादिकं समुच्चीयते । व्यालोऽजगरः । सर्पव्याला एवानुचराः ते अस्य संजाता इति सर्पव्यालानुचरिता । सर्पव्यालानुचरितत्वेपि नलिनसंछन्नत्वादत्यर्थं शुभदर्शना भवतीत्यर्थः । अनेन ज्ञानिनो यःकश्चिद्दोषोऽपि नतस्यहेयतापादक इत्युक्तं । "तेषां तेजोविशेषेण प्रत्यवायो न विद्यते" इति स्मृतेः ॥७॥ एतदिति परिसरप्रदेशमङ्गुल्या निर्दिशति । नीलपीतमिति । मयूरकण्ठवर्ण इत्युच्यते । परिस्तोमैः कुथैः ।

ति० चकंपिरे उद्रिक्तविकाराणीवाभूवन् । कामवशमापन्नइव ॥ **शि०** हर्षात् सीतावयवसदृशपङ्कजादिदर्शनजनितप्रमोदात् । इन्द्रियाणि चकंपिरे चञ्चलतांप्रापुः । अतएव कामवशं सीतादर्शनविषयकातीच्छाहेतुकतदन्वेषणजनितविविधचेष्टोपलक्षितशोभाविशेषं ॥ २ ॥ **ति०** वैडूर्यवत् तत्प्रभावत् निर्मलोदका । पंपा तदाख्यसरोवरावच्छिन्नापंपानदी । तज्जलस्यौपाधिकश्यामलप्रतिभासाद्वैडूर्यप्रभासादृश्यं । उपाधिमाह—**फुल्लेति** । द्रुमादिच्छाययातथाभानं ॥ ३ ॥ **ति०** पंपायाःकाननं तत्परिसरवर्तिकाननं । यत्र कानने । सशिखराइव उन्नताग्रशाखाभिःसशृङ्गाइवद्रुमाः शैलावा शैलाइव राजन्ति ॥ **स०** शैलानां प्रत्यन्तपर्वतानां आभायैस्तेशैलाभाः महापर्वताः । सशिखराः महापर्वतवद्वियमानाः ॥ ४ ॥ **रामानु०** भरतस्यदुःखेन प्रार्थनाभङ्गजनितभरतसंबन्धिदुःखेन । माधवः पीडयन्निव वर्ततइतिशेषः । इवशब्दोवाक्यालङ्कारे । आधयः पीडयन्तिवैइतिपाठे वक्ष्यमाणवसन्तवर्णनस्वारस्यंनास्ति ॥ **स०** भरतस्यचदुःखेन तद्वियोगजनितेन ॥ **ति०** शोकाभिसंतप्तं राज्यभ्रंशसीतावियोगादिनाशोकतप्तं । आधयःपीडयन्तीत्युक्तं । तानाधीनाह—**भरतस्येति** । दुःखेन जटावल्कलादिदुःखस्मरणेन ॥ **शि०** भरतस्यदुःखेन मद्वियोगजनितभरतक्लेशस्मरणेन ॥ ५ ॥ पंपा शोकार्तस्यापिमेशोभते । एतेन सीतावयवसदृशकमलादिदर्शनेनसीतैवदृश्यत इतिस्वसंभावनासूचिता ॥ **रामानु०** शोभते अतिरमणीयतयाहृदयङ्गमाभवतीत्यर्थः ॥ ६ ॥ **ति०** व्यालाः श्वापदाः ॥ **स०** व्यालाः वनगजाः सर्पाश्च । सर्पन्तोव्यालाइतिवा । **ती०** सर्पाः बहुफणाः । तदन्ये व्यालाः ॥ ७ ॥ **ति०** द्रुमाणामुच्छ्रितैरितिपाठे उच्छ्रितगन्धैः । यद्वा परिस्तोमैः परिस्तोमभूतैः राशीभूतैरिवस्थितैःपुष्पैः अर्पितंयुक्तं ॥ **शि०** विविधैः पुष्पैः अर्पितं

[**पा०**] १ च. ज. तस्यदृष्टवतो. छ. झ. तत्रदृष्ट्वैव. २ ङ. च. छ. झ. ट. शैलावा. ३ घ. मांहि. ४ क. ख. ग. ङ.—ट. व्याधयःपीडयन्तिवै. ५ ख. शोकेन. ६ ख. प्रविकीर्णा. ७ ङ. शीतोदकैः. ८ ङ. च. ज. ञ. संकीर्णा. ९ क. ङ. च. ज. ञ. ह्यत्यन्तशुभ. झ. ट. ह्यत्यर्थशुभ. ग. अत्यन्तंशुभ. १० क. ग. ङ.—ज. ञ. ट. प्रविभात्येतत्.

पुष्पभारसमृद्धानि शिखराणि समन्ततः ॥ लताभिः पुष्पिताग्राभिरुपगूढानि सर्वतः ॥ ९ ॥
सुखानिलोऽयं सौमित्रे कालः प्रचुरमन्मथः ॥ गन्धवान्सुरभिर्मासो जातपुष्पफलद्रुमः ॥ १० ॥
पश्य रूपाणि सौमित्रे वनानां पुष्पशालिनाम् ॥ सृजतां पुष्पवर्षाणि [1]तोयं तोयमुचामिव ॥ ११ ॥
प्रस्तरेषु च रम्येषु विविधाः काननद्रुमाः ॥ वायुवेगप्रचलिताः पुष्पैरवकिरन्ति गाम् ॥ १२ ॥
पतितैः पतमानैश्च पादपस्थैश्च मारुतः ॥ कुसुमैः पश्य सौमित्रे क्रीडन्निव[2] समन्ततः ॥ १३ ॥
विक्षिपन्विविधाः शाखा न[3]गानां [4]कुसुमोत्कचाः ॥ मारुतश्चलितस्थानैः षट्पदैरनुगीयते ॥ १४ ॥
मत्तकोकिलसन्नादैर्नर्तयन्निव पादपान् ॥ शैलकन्दरनिष्क्रान्तः [5]प्रगीत इव चानिलः ॥ १५ ॥
तेन विक्षिपताऽत्यर्थं पवनेन समन्ततः ॥ अमी संसक्तशाखाग्रा ग्रथिता इव पादपाः ॥ १६ ॥
स[6] एष सुखसंस्पर्शो वाति चन्दनशीतलः ॥ गन्धम[7]भ्यावहन्पुण्यं श्रमापनयनोऽनिलः ॥ १७ ॥

"परिस्तोमःकुथोद्वयोः" इत्यमरः । अनेन नानागुरुमुखलब्धज्ञानतया भगवद्दासयोग्यः पुरुष उच्यते ॥ ८ ॥ शिखराणि वृक्षाग्राणि । समन्ततः सर्वत्रप्रदेशे । आमूलाग्रं उपगूढानि शोभन्तइतिशेषः । अनेन गार्हस्थ्येऽपि निरवधिकबोधा उच्यन्ते ॥ ९ ॥ सुखेति अनेन जनकादिवदैश्वर्ये सत्यपि भगवज्ज्ञानरत उच्यते ॥१०॥ तोयं सृजतां तोयमुचां रूपाणीवेति पूर्णोपमा । अनेन परोपदेशप्रवृत्ता आचार्या उच्यन्ते ॥११॥ प्रस्तरेषु पाषाणेषु । गां भूमिं प्रस्तरभूमिमित्यर्थः । अनेन कठिनहृदयेष्वपि दयावशात् ज्ञानवर्षिणउच्यन्ते ॥ १२ ॥ पतमानैः पतद्भिः । अनेन सर्वगुरुप्रेरणैकलीलःसर्वान्तर्याम्युच्यते ॥ १३ ॥ कुसुमोत्कचाः कुसुमोत्कटाः । विक्षिपन् कम्पयन् । मारुतः चलितस्थानैः स्वस्थानकुसुमोच्चालितैः । षट्पदैः अनुगीयते । अनेन "ज्ञानीत्वात्मैवमेमतं" इत्याप्तभूतज्ञानिनां भक्तिवृद्धये भगवति भुवमवतीर्णे "इमाँल्लोकान्कामान्नीकामरूप्यनुसंचरन् । एतत्साम गायन्नास्ते" इत्युक्तरीत्या तमनुगच्छन्भक्तलोक उच्यते ॥ १४ ॥ मत्तकोकिलसन्नादैः मुखवाद्यस्थानीयैः । पादपान्नर्तयन् । शैलकन्दरनिष्क्रान्ततया तन्निष्क्रमणध्वनियुक्ततया । प्रगीतइव गातुमुपक्रान्त इव । "आदिकर्मणि क्तःकर्तरिच" इति कर्तरि निष्ठा । यद्वा पादपान् नर्तयन् नर्तयितुमिवं । "लक्षणहेत्वोः—" इतिशतृप्रत्ययः । मत्तकोकिलसन्नादैः प्रगीतः प्रहृष्टगीतः सन् । शैलकन्दरात् नैपथ्यस्थानान्निष्क्रान्तः । अनेन वेदप्रवर्तनमुखेन लोकस्य भक्त्युत्पादनाय वैकुण्ठादवतीर्णो भगवानित्युच्यते ॥ १५ ॥ विक्षिपता विविधं प्रेरयता । पवनेन । अत्यर्थं समन्ततः संसक्तशाखाग्रा अमी पादपाः ग्रथिताः मालावन्निबद्धाइवभान्ति । अनेन भगवत्कृपया परस्परमनुरक्ताभागवताउच्यन्ते ॥ १६ ॥ मन्दमारुतं वर्णयति —स एष इति ॥ स्पार्शनप्रत्यक्षत्वादेष इत्युक्तिः ।

युक्तं । अतएवनीलपीतं एतत् शाद्वलं अधिकमेवप्रविभाति । इवएवार्थे ॥ ८ ॥ **स०** उपगूढानीत्यनेन स्वस्यसीतालिङ्गनजसुखाभावंसूचयति ॥ ९ ॥ **ति०** अयंकालः वसन्तः । प्रचुरमन्मथः कामोद्दीपकः । अतएव गन्धवान् गर्ववान् । "गन्धोगन्धकआमोदेलेशेसंबन्धगर्वयोः" इति । सुरभिर्मासः मधुमासः । जातानिपुष्पफलानियत्रतादृग्द्रुमः ॥ **स०** प्रचुरः उद्दीपितः मन्मथोयस्मिन्सः ॥ **शि०** अयंमासः चैत्रइत्यर्थः । कालः वियुक्तानांचित्तविक्षेपहेतुः अस्तीतिशेषः । क्षेपणार्थककलधातुप्रकृतिकणिजन्तप्रकृतिकोच् ॥ १० ॥ **ति०** प्रस्तरेषु समशिलातलेषु ॥ १२ ॥ **शि०** पश्य "पश्यमृगोधावति" इतिवत्प्रयोगः ॥ १३ ॥ **रामानु०** षट्पदैरिवनीयतइतिपाठः । नीयतइवपुष्परसोत्कण्ठयास्तूयतइव । अनुगीयतइतिपाठे अनुसृत्य गीयतइत्यर्थः ॥ **कतक०** कुसुमोत्कचाइतिपाठे कुसुमैरुद्भूतकचाः संजातकेशाइवेत्यर्थः । **स०** चलितस्थानैः वायुवेगेनशाखादिषुइतस्ततोगतेषुसत्सुचलितस्थानैःभ्रमरैः अनुगीयतइवदृश्यते ॥ **शि०** शाखाः विक्षिपन्चालयन्मारुतः चलितस्थानैः कुसुमेभ्यः कुसुमान्तराणिप्राप्तैः षट्पदैःअनुगीयते गानेनप्रशस्यतइवेत्यर्थः ॥ १४ ॥ **रामानु०** अत्रवायोर्नर्तकगायकसाधर्म्यमुच्यते । नर्तयितुंमुखवाद्यस्थानीयैर्मत्तकोकिलसंनादैः पादपान्नर्तयन्निव ॥ **श०** प्रगीयते गानंकरोति ॥ **ति०** अत्रवायोर्गानकर्तृत्वेननर्तकाचार्यसाधर्म्यमुच्यते ॥ १५ ॥ **टीका०** विक्षिपता द्रुमाग्राणीतिशेषः ॥ १६ ॥ **रामानु०** पूर्वश्लोकेविक्षिपतेतिपठितं वायोस्तीव्र-

[पा०] १ क. ग. छ. झ. ट. वर्षं. २ क. ग. ङ.—ट. क्रीडतीव. ३ क. ग. द्रुमाणां. ४ ङ. छ. ट. कुसुमोत्कटाः. च. कुसुमोत्कराः. ५ ट. प्रगीयतइवानिलः. ६ झ. ञ. ट. सएव. ७ ख. ग. ङ.—ट. मभ्यवहन्पुण्यं.

अमी पवन[1]निक्षिप्ता वि[2]नदन्तीव पादपाः ॥ षट्पदै[3]रनुकूजन्तो वनेषु मधुगन्धिषु ॥ १८ ॥
गिरिप्रस्थेषु र[4]म्येषु पुष्पवद्भिर्मनोरमैः ॥ संसक्तशिखराः शैला वि[5]राजन्ते महाद्रुमैः ॥ १९ ॥
पुष्पसंछन्नशिखरा मारुतोत्क्षेपचञ्चलाः ॥ अमी मधुकरोत्तंसाः प्रगीता इव पादपाः ॥ २० ॥
[6]पुष्पिताग्रांस्तु पश्येमान्कर्णिका[7]रान्समन्ततः ॥ हाटकप्रतिसंछन्नान्नरान्पीताम्बरानिव ॥ २१ ॥
अयं वसन्तः सौमित्रे नानाविहगनादितः ॥ सीतया विप्रहीणस्य शोकसंदीपनो मम ॥ २२ ॥
मां हि शोकसमाक्रान्तं सन्तापयति मन्मथः ॥ [8]हृष्टः [9]प्रवदमानश्च मां[10]माह्वयति कोकिलः ॥ २३ ॥
एष नत्यूहको हृष्टो रम्ये मां वननिर्झरे ॥ प्रणदन्मन्मथाविष्टं शोचयिष्यति लक्ष्मण ॥ २४ ॥
श्रुत्वैतस्य पुरा शब्दमाश्रमस्था मम प्रिया ॥ मामाहूय प्रमुदिता परमं प्रत्यनन्दत ॥ २५ ॥

चन्दनशीतलः मलयगतचन्दनेनशीतलः दक्षिणमारुतइत्यर्थः । चन्दनवच्छीतलोवा । गन्धं पुष्पगन्धं । पुण्यं रम्यं । सुखसंस्पर्श इत्यनेन मान्द्यमुक्तं । एवं शैत्यमान्द्यसौरभ्यवान् । अतएव श्रमापनयनः। अनेन "सर्वगन्धःसर्वरसः—" इत्युक्तस्य भगवतो भक्तेषु सान्निध्यमुक्तं॥१७॥ अमीइति ॥ अनेन भगवदनुभवबलात्कारेण "एतत्सामगायन्नास्ते" इत्युक्तसामगानरसिकाउच्यन्ते ॥ १८ ॥ गिरिप्रस्थेषु निजप्रस्थेष्वित्यर्थः । तदुत्पन्नैर्द्रुमैः संसक्तशिखराः परस्परसंश्लिष्टाग्राः । शैलाभान्ति महान्तः पुष्पराशयइवभान्तीत्यर्थः । अनेन सर्वेषां ज्ञानिनामेककण्ठत्वमुक्तं ॥ १९ ॥ मधुकरा एव उत्तंसाः शेखराणि येषां ते । "पुंस्युत्तंसावतंसौ द्वौ कर्णपूरेपि शेखरे" इत्यमरः । पुष्पावृतशिखोपरिनीलोष्णीषधारिणः सगीतिकंनृत्यन्तइवभान्तीत्यर्थः । अनेन भगवद्भक्त्यानर्तनपरा गम्यन्ते ॥ २० ॥ पुष्पिताग्रान् पुष्पितोपरिप्रदेशान् । अतएव हाटकसंच्छन्नान् पीताम्बरांश्च नरानिवपश्य । पुष्पिताग्राः कर्णिकाराः सुवर्णवस्त्राभरणवन्तइवभान्तीत्यर्थः । अनेन भगवत्सारूप्यं गताउच्यन्ते ॥ २१ ॥ एवं मद्भक्तेषु सर्वेषु मदनुभवतृप्तेषु बद्धा मांदुःखीकुर्वन्तीत्याह—अयमिति ॥ इदानींवसन्तवर्णनेन नगरनिर्गममारभ्य त्रयोदशवत्सरागताइतिगम्यते ॥ २२ ॥ एवं वासन्तपुष्पसमृद्धिं वर्णयित्वा तथैवोद्दीपनभूतपक्षिरवानह—मामित्यादिना ॥ पूर्वार्धं स्पष्टं । मां शोकिनंमां । हृष्टः कोकिलः प्रवदमानः प्रवदन् विजयघोषं कुर्वन्सन् । आह्वयति स्पर्धतइवेतिगम्योत्प्रेक्षा । ज्ञानैकवत्सलं मामविज्ञाय केवलं कर्मठा मांस्पर्धन्तइतिभावः ॥ २३ ॥ नत्यूहकः कुक्कुटभेदः । वननिर्झरे प्रणदन्नित्यन्वयः । अनेन केवलजपपराउच्यन्ते। ज्ञानभक्तयोरेव भगवतः सद्यःप्रीत्यावहत्वात् साधनान्तरपरो नातिप्रिय इतिरहस्यं । "ज्ञानी त्वात्मैव मे मतं" "भक्तिक्रीतो जनार्दनः" इत्यादिवचनात् ॥ २४ ॥ किमयं सर्वदेत्थं शोकावहः नेत्यह—श्रुत्वेति ॥ श्रुत्वा प्रमुदिता प्रिया

गतिलंनिवारयति—**सएषइति** । अचक्षुर्विषयेत्वनिले एषइतिनिर्देशस्तदानींतनानांसान्द्रपरागदर्शनात् ॥ १७ ॥ **रामानु०** गिरिप्रस्थेष्विति । अत्राविवक्षितसंबन्धप्रस्थेष्वित्यर्थः ॥ तत्रोत्पन्नैर्महाद्रुमैः संसक्तशिखराइतिसंबन्धः । अनेनद्रुमाणामौन्नत्यंसूचितं ॥ १९ ॥ **टीका०** हाटकप्रतिसंछन्नाः अत्रहाटकशब्देनतन्मयान्याभरणानि ॥ **वि०** हाटकसंछन्नान् पीतांबरांश्चनरानिवपश्य । पुष्पिताग्राःकर्णिकाराः सुवर्णवस्त्राभरणाइवभान्तीत्यर्थः ॥ २१ ॥ **ति०** हृष्टंयथातथाप्रवदमानः समाह्वयति स्पर्धयेवेत्यर्थः ॥ **शि०** शोकसमाक्रान्तंमांमन्मथः मन्निष्टमदापहारित्वंसंतापयति सीतापहर्तृविज्ञानमन्तराऽवस्थितिंनलभतइत्यर्थः ॥ हृष्टंयथाभवतितथाप्रवदमानःकोकिलः समाह्वयति प्रिययासंयोक्तुंप्रेरयतीवेत्यर्थः॥२३॥ **ती०** नत्यूहः जलकुक्कुटः ॥ **ति०** हृष्टः कामावेशेन ॥ **शि०** हृष्टएषदात्यूहकः जलकुक्कुटः । प्रणदन्सन् मन्मथाविष्टं मदापहारकत्वविशिष्टंमां शोषयिष्यति प्रियापहारिणोविशेषज्ञानाभावात्तन्मदापहरणस्याशक्यतयाशोकएवतिष्ठतीत्यर्थः ॥ २४ ॥ **ति०** मामाहूय प्रदर्शनार्थमितिशेषः ॥ २५ ॥

[**पा०**] १ क.—ट. विक्षिप्ता. २ च. छ. ज. विचरन्तीव. ३ क. ग. छ—ट. रनुकूजद्भिः. ४ ख. संरूढैः. ५ ग.—ट. विराजन्ति. ६ क. ख. छ. झ. ट. सुपुष्पितांस्तुपश्यैतान्. घ. ङ. च. ज. ञ. सुपुष्पितांस्तु. ७ क. ग. कारानेकशः. ८ ङ. छ.—झ. ञ. ट. हृष्टं. ९ घ. प्रयतमानश्च. १० क. छ. ज. ञ. ट. समाह्वयति.

एवं वि[1]चित्राः पतगा नानारावविराविणः ॥ वृक्षगुल्मलताः पश्य संपतन्ति ततस्ततः ॥ २६ ॥
विमिश्रा वि[2]हगाः पुंभिरात्मव्यूहाभिन[3]न्दिताः ॥ भृ[4]ङ्गराजप्रमुदिताः सौमित्रे म[5]धुरस्वराः ॥ २७ ॥
[अ[6]स्याः कूले प्रमुदिताः संघशः शकुनास्त्विह ॥] न[7]त्यूहरुतविक्रन्दैः पुंस्कोकिलरुतैरपि ॥
स्वनन्ति पादपाश्चेमे ममानङ्गप्रदी[8]पनाः ॥ २८ ॥
अशोकस्तबकाङ्गारः षट्पदस्वननिःस्वनः ॥ मां हि पल्लवताम्रार्चिर्वसन्ताग्निः प्रधक्ष्यति ॥ २९ ॥
न हि तां सूक्ष्मपक्ष्माक्षीं सुकेशीं मृदुभाषिणीम् ॥ अपश्यतो मे सौमित्रे [9]जीवितेऽस्ति प्रयोजनम् ॥ ३० ॥
अयं हि द[10]यितस्तस्याः कालो रुचिरकाननः ॥ कोकिलाकुलसीमान्तो दयिताया ममानघ ॥ ३१ ॥
मन्मथायाससंभूतो वसन्तगुणवर्धितः ॥ अयं मां धक्ष्यति क्षिप्रं शो[11]काग्निर्नचिरादिव ॥ ३२ ॥
अपश्यतस्तां [12]दयितां पश्यतो [13]रुचिरद्रुमान् ॥ ममायमात्मप्रभवो भूयस्त्वमुपयास्यति ॥ ३३ ॥
अदृश्यमाना वैदेही शोकं [14]वर्धयते मम ॥ दृश्यमानो वसन्तश्च स्वेदसंसर्गदूषकः ॥ ३४ ॥
[15]मां ह्यद्य मृगशावाक्षी चिन्ताशोकबलात्कृतम् ॥ सन्तापयति सौमित्रे [16]क्रूरश्चैत्रो वनानिलः ॥ ३५ ॥

मामाहूय परमं प्रकामं प्रत्यनन्दत । नत्यूहरवाकर्णनोद्दीपिता मामाहूय विविधं क्रीडारसमनुभूतवतीत्यर्थः । अनन्यप्रयोजनस्य जपः प्रीत्यावहइतिभावः ॥ २५—२६ ॥ विहगाः स्त्रियः । पुंभिः पुंविहगैः । विमिश्राः आश्लिष्टाःसत्यः । आत्मव्यूहाभिनन्दिताः अनुरूपेण कान्तेन सहितासीत्येवंसजातीयैःश्लाघिताः । भृङ्गराजप्रमुदिताः भृङ्गराजझङ्कारश्रवणसन्तुष्टाः । तदुद्दीपनेन मधुरस्वराः रम्यरतिकूजिताः । वर्तन्ते एतान्पश्येति शेषः । अनेनाचार्यपरतन्त्राःसामगानपरा उच्यन्ते॥२७॥ विक्रन्दैः शब्दैः । स्वनन्ति स्वनन्तीव । अनेन नानाविधभगवन्नामकीर्तनपराः श्लाघ्यन्ते ॥ २८ ॥ षट्पदस्वननिःस्वन इति । अग्नेः निःस्वनवत्त्वं ज्वलनावस्थायां दृष्टं । अनेन स्वप्रेमजनकभक्तियुक्ता उच्यन्ते ॥ २९ ॥ नहीति । एतेष्वेवं मत्प्रेमपरतन्त्रेषु संसारिचेतनो दुःखमनुभवतीत्येतन्ममासह्यमिति भावः ॥ ३० ॥ अयं कालो मम दयितायाः रुचिरोहि प्रियतरोहीत्यर्थः । यदीहेदानींदयितास्यात्तदातीव तुष्येदितिभावः । कोकिलाकुलसीमान्तः कोकिलरवाकुलचतुःसीम इत्यर्थः ॥ ३१ ॥ मन्मथायाससंभूतः मदनपीडाजनितः । वसन्तस्य गुणेन रामणीयकेन वर्धितः । क्षिप्रं धक्ष्यति नतुचिरात् । इवशब्दोवाक्यालंकारे ॥ ३२ ॥ आत्मप्रभवः मन्मथः । भूयस्त्वं प्रवृद्धत्वं ॥ ३३ ॥ दृश्यमानः पुष्पादिद्वारा । स्वेदसंसर्गदूषकः मलयमारुतद्वारास्वेदसंबन्धनिवर्तकः । रतिश्रान्तिहरइत्यर्थः ॥३४॥ क्रूरः मन्मथोद्दीपकत्वात् । अत्र चकारोद्रष्टव्यः ॥ ३५ ॥

स० वृक्षगुल्मलताइतिद्वितीयाबहुवचनं ॥ २६ ॥ **ति०** यद्वा भृङ्गराजसंबन्धेन**प्रमुदिताः**मधुरस्वराभृङ्ग्यश्चात्रसन्तीतिशेषः ॥ २७॥ **ति०** दात्यूहानांरतिसंबन्धिनोविक्रन्दाः दात्यूहरतिविक्रन्दास्तैः । **शि०** दात्यूहानां रतिविक्रन्दैः प्रीत्युत्पादकशब्दविशेषैः ॥ **ति०** दात्यूहरुतविक्रन्दैः दात्यूहगदितविरावैः ॥ २८ ॥ **ती०** नचिरादिवेत्यस्योत्तरश्लोकेनसंबन्धः ॥ **शि०** मन्मथायाससंभूतः मन्मथेनस्वनिष्ठमदमथनसामर्थ्यनिरोधेनयआयासः तन्निरोधजनितश्रमः तस्मात्संभूतः ॥ ३२ ॥ **शि०** मम आत्मप्रभवःमनोजनितः । चिन्तेत्यर्थः ॥ ३३ ॥ **ति०** स्वेदसंसर्गः कामविकारजः तेनदूषयति मलिनीकरोतितादृशः । यद्वा तंदूषयति नाशयति । मलयानिलसंबन्धात्तादृशः ॥ ३४ ॥ **ति०** चिन्ताशोकाभ्यांबलात्कृतं बलात्कृतपीडं ॥ **ती०** चिन्ताशोकबलात्कृतं संततस्मरणाद्दुःखपरवशमित्यर्थः ॥ **शि०** चिन्ताशोकबलात्कृतं चिन्ताशोकबलहेतुकविविधकृतिमन्तं । अविवक्षितकर्मकत्वेनाकर्मकत्वात्कर्तरिनिष्ठा ॥ ३५ ॥

[पा०] १ क. च. छ. ज. ञ. विचित्राविहगाः. २ च. विहगैः. ३ च. नादिताः. ४ भृङ्गराजप्रमुदिताइत्यर्धात्पूर्वं. कं. ग. पाठयोः. विचित्राविहगामत्ताःप्रवदन्तिमनस्सुखम्. इत्यर्धंदृश्यते. ५ च. ज. ञ. मधुरस्वनाः. ६ इदमर्धं घ.—छ. झ. ट. पाठेषुदृश्यते. ७ ङ. ज.—ट. दात्यूहरति. ८ ङ.—ट. प्रदीपकाः. ९ च. ज. ञ. जीवितंनिष्प्रयोजनं. १० घ.—झ. ट. रुचिरस्तस्याः. ११ ङ. च. ज. झ. ञ. शोकाग्निरचिरादिव. १२ क. ग. च.—ट. वनितां. १३ ग. घ. ङ. छ.—ट. रुचिरान्द्रुमान. १४ च. छ. ज. ञ. ट. वर्धयतीहमे. १५ क. ग. ङ.—ट. मांहिसा. घ. मांह्यसौ. १६ घ. ङ. छ. ञ. ट. श्चैत्रवनानिलः.

अमी मयूराः शोभन्ते प्रनृत्यन्तस्ततस्ततः ॥ स्वैः पक्षैः पवनोद्धूतैर्गवाक्षैः स्फाटिकैरिव ॥ ३६ ॥
शिखिनीभिः परिवृतास्त एते मदमूर्च्छिताः ॥ [1]मन्मथाभिपरीतस्य मम मन्मथवर्धनाः ॥ ३७ ॥
पश्य लक्ष्मण नृत्यन्तं मयूरमुपनृत्यति ॥ शिखिनी मन्मथार्तैषा भर्तारं गिरि[2]सानुषु ॥ ३८ ॥
तामेव [3]मनसा रामां मयूरो[4]ऽप्युपधावति ॥ वितत्य रुचिरौ पक्षौ रुतै[5]रुपहसन्निव ॥ ३९ ॥
मयूरस्य वने नूनं रक्षसा न हृता प्रिया ॥ तस्मान्नृत्यति रम्येषु वनेषु सह कान्तया ॥ ४० ॥
मम त्वयं विना वासः पुष्पमासे सुदुःसहः ॥ ४१ ॥
पश्य लक्ष्मण सं[6]रागं तिर्यग्योनिगतेष्वपि ॥ [7]यदेषा शिखिनी कामा[8]द्भर्तारं रमतेऽन्तिके ॥ ४२ ॥
[9]मामप्येवं विशालाक्षी जानकी जातसंभ्रमा ॥ मदनेनाभिवर्तेत यदि नापहृता भवेत् ॥ ४३ ॥
पश्य लक्ष्मण पुष्पाणि निष्फलानि [10]भवन्ति मे ॥ पुष्पभार[11]समृद्धानां वनानां शिशिरात्यये ॥ ४४ ॥
रुचिराण्यपि पुष्पाणि पादपानामतिश्रिया ॥ निष्फलानि महीं यान्ति समं मधुकरोत्करैः ॥ ४५ ॥

ततस्ततः तत्रतत्र प्रदेशे । पवनोद्धूतैः अतएव स्पष्टदृष्टशुभ्रनालजालत्वात् स्फाटिकैर्गवाक्षैरिव स्थितैः । यद्वा स्फाटिकैः स्फटिकप्रधानैः चन्द्रार्कपरम्परायास्तत्तुल्यत्वादितिभावः । अनेन भगवत्कृपाप्रवर्तितविविधकर्मपराउच्यन्ते ॥३६॥ शिखिनीभिः मयूरस्त्रीभिः । परिवृताः अतएव मदमूर्छिताः मदव्याप्ताः । त एते पूर्वश्लोकोक्ता एते शिखिनः। मन्मथाभिपरीतस्य पूर्वमेव मन्मथाभिव्याप्तस्य । मम पुनर्मन्मथवर्धनाः । अन्यरतिदर्शनस्योद्दीपनत्वादिति भावः । सशिष्यभक्तदर्शनं मे सर्वत्रभक्त्युत्पादनव्यामोहंजनयतीत्यर्थः ॥ ३७ ॥ पश्येत्यादिश्लोकद्वयमेकान्वयं । नृत्यन्तं स्वयंलीलारसप्रवृत्तं भर्तारं प्रति मन्मथार्ता रत्यर्थंतमाक्रष्टुकामा । शिखिनी उपनृत्यति । तामेव रामां कान्तां । मनसा उपधावति । समीपमागन्तुमिच्छतीत्यर्थः । उपधावनंचरत्यर्थमितिद्योतयति—वितत्येति। रुतैः रतिकूजितैः । उपलक्षितः । पक्षविस्तारणंचरत्यर्थव्यापारः । उपहसन्निव प्रसन्नमुख इत्यर्थः । यद्वा कान्ताविरहिणंमामुपहसन्निवेत्युत्प्रेक्षा । अत्र शिष्याचार्ययोरन्योन्यप्रावण्यमुच्यते ॥ ३८—३९ ॥ वने उपभोगयोग्ये देशेरावणः सीतां हृतवान् । नतु नगर इति हार्दो भावः । न हृता अस्यभाग्यवशादिति भावः । तस्मादित्यादि । एतादृशरम्यदेशकालेषु धन्याः कान्ताभिः क्रीडन्तीति भावः ॥ ४० ॥ अमुमेवाशयमुद्घाटयति—मम त्विति ॥ विना सीतयेति शेषः ॥ ४१ ॥ सम्यग्रागः संरागः तं कान्तानुरागमित्यर्थः । तिर्यग्योनिगतेषु तिर्यग्योनिजातेषु । लोके स्त्रियं पुमाननुवर्तते नतु स्त्री पुरुषं । अतोतीवास्याः कामः । अहो वसन्तवैभवइतिभावः ॥ ४२ ॥ विशालाक्षी मदवलोकनविस्फारितेक्षणा । जातसंभ्रमा जातत्वरा । यदि नापहृता भवेत् तदा मामेवाभिवर्तेत । अत्र चापलं नाम संचारीभावः ॥ ४३ ॥ शिशिरात्यये वसन्ते । पुष्पभारसमृद्धानां पुष्पाणि अमितानि पुष्पाणीत्यर्थः । संसारिदुःखं पश्यतो मे ज्ञानिलाभोऽकिंचित्करइव भातीत्यर्थः ॥ ४४ ॥ उक्तमर्थं विशिष्य दर्शयति—रुचिराण्यपीति ॥ अतिश्रिया अत्यन्तकान्त्या । रुचिराण्यपि । अस्मदनुप्रयोजनान्निष्फलानि भवन्ति । निर्भरमकरन्दभरिततया मधुकरसमूहैः समं महीं यान्ति ॥४५॥

रामानु० पक्षैःबर्हैः । बर्हाणांस्फाटिकगवाक्षसाम्यं नर्तनावस्थायां अन्तरान्तराविततोर्ध्वशुभ्रनालतया ॥ ३६ ॥ **ति०** अनुधावति नृत्यप्रसङ्गेनाग्रेगतां॥३९॥**रामानु०** ममेति अस्यश्लोकस्यममाप्येवमित्यतच्छ्लोकानन्तरावस्थानमुचितं । वनदुर्गवर्णनप्रकरणस्वारस्यात् ॥ **ती०** मयूरस्येतिश्लोकानन्तरंमामप्येवमितिश्लोकः ॥४०॥ **ति०** नन्वेतावान्रागस्तवानुचितस्तत्राह—**पश्येति** । संरागः अतिशयितोरागः ॥ ४२ ॥ **ति०** वन्यानिपुष्पाणि मेसीतावियोगाद्भोगसाधनत्वाभावान्निष्फलानिभवन्ति ॥ ४४ ॥

[**पा०**] १ क.—घ. मन्मथाभि. २ छ. झ. ट. सानुनि. ३ क. तरसाकामात्. ४ घ. च. छ. झ. ञ. ट. प्यनुधावति. क. ख. ग. प्यभिधावति. ५ ख. रपहसन्निव. ६ क. च. छ. ज. संयोगं. झ. ट. संरागः. ७ झ. अधुनाशिखिनी कामाद्भर्तारमभिवर्तते. ८ क. ग. घ. च. ज. ञ. ट. द्भर्तारमभिवर्तते. ९ ट. ममाप्येवं. १० च. छ. ज. भवन्तिहि. ११ च. छ. ज. समूहानां.

वदन्ति[1] रावं[2] मुदिताः शकुनाः संघशः[3] कलम् ॥ आह्वयन्त[4] इवान्योन्यं कामोन्मादकरा मम ॥ ४६ ॥
वसन्तो यदि तत्रापि यत्र मे वसति प्रिया ॥ नूनं परवशा सीता साऽपि शोचत्यहं यथा ॥ ४७ ॥
नूनं न तु[5] वसन्तोऽयं[6] देशं स्पृशति यत्र सा ॥ कथं ह्यसितपद्माक्षी वर्तयेत्सा मया विना ॥ ४८ ॥
अथवा वर्तते तत्र वसन्तो यत्र मे प्रिया ॥ किं करिष्यति सुश्रोणी सा तु[7] निर्भर्त्सिता परैः ॥ ४९ ॥
श्यामा पद्मपलाशाक्षी[8] मृदुपूर्वाभिभाषिणी[9] ॥ नूनं वसन्तमासाद्य परित्यक्ष्यति जीवितम् ॥ ५० ॥
दृढं हि हृदये बुद्धिर्मम संप्रति[10] वर्तते ॥ नालं वर्तयितुं सीता साध्वी मद्विरहं गता ॥ ५१ ॥
मयि भावस्तु[11] वैदेह्यास्तत्त्वतो विनिवेशितः ॥ ममापि भावः सीतायां सर्वथा[12] विनिवेशितः ॥ ५२ ॥
एष पुष्पवहो वायुः सुखस्पर्शो हिमावहः ॥ तां विचिन्तयतः कान्तां पावकप्रतिमो मम ॥ ५३ ॥
सदा सुखमहं मन्ये यं पुरा सह सीतया ॥ मारुतः स विना सीतां शोकं[13] वर्धयते मम ॥ ५४ ॥
तां विना[14] स विहङ्गो यः पक्षी प्रणदितस्तदा ॥ वायसः पादपगतः प्रहृष्टमभिनर्दति[15] ॥ ५५ ॥
एष वै तत्र वैदेह्या विहगः प्रतिहारकः ॥ पक्षी[16] मां तु विशालाक्ष्याः समीपमुपनेष्यति ॥ ५६ ॥

शकुनाः मम कामोन्मादकराःसन्तः अन्योन्यमाह्वयन्त इव । कलं मधुरं । रावं वदन्ति शब्दं कुर्वन्तीत्यर्थः । मम कामोन्मादकरणार्थसंघीभवितुमन्योन्यमाह्वयन्त इवेत्युत्प्रेक्षा । अनेन स्वदयोत्तम्भकज्ञानिव्यापारउक्तः ॥ ४६ ॥ शोचति शोचेत् ॥ ४७ ॥ गूढदेशप्रापणेन तद्देशे वसन्तप्रसङ्गाभावान्न तस्याः शोकप्रसक्तिरित्याशङ्क्य वसन्ताभावेपि मां विना न जीवितं धारयिष्यतीत्याह—नूनमिति ॥ ४८ ॥ वसन्तप्राप्तिमङ्गीकृत्याह—अथवेति ॥ ४९ ॥ श्यामा यौवनमध्यस्था ॥ ५० ॥ उक्तमर्थं सहेतुकं द्रढयति—दृढं हीति ॥ अस्यान्ते इतिकरणंद्रष्टव्यं । वर्तयितुं जीवितुं । नालं नसमर्था ॥ ५१ ॥ अत्र हेतुमाह—मयीति ॥ भावोऽनुरागः । तत्त्वतः एकतत्त्वतया । सर्वथा “ न चास्य माता न पिता न चान्यः स्नेहाद्विशिष्टोऽस्तिमया समो वा ” इत्युक्तप्रकारेण । अनेन स्वस्य जीवसंबन्धः स्वाभाविक उक्तः ॥ ५२ ॥ एवं वसन्तोद्दीपनतामुक्त्वा मलयमारुतोद्दीपनतामाह—एष इत्यादिना ॥ पुष्पवहः पुष्पगन्धवहः । अनेन सौरभ्यमुक्तं । सुखस्पर्श इत्यनेन मान्द्यं । हिमावहः हिमवत्त्वावह इति शैत्यं । “ तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः” इत्यमरः । तां विचिन्तयतः विरहिण इत्यर्थः।पावकप्रतिमः संतापकरइत्यर्थः॥५३॥ उक्तमर्थं विवृणोति—सदेति॥आभ्यां संसारिण्यकिंचित्करी स्वदया स्वस्याप्यसह्येत्युच्यते ॥५४॥ मध्ये यत्किंचिदाश्वसनं दृष्टमनुवदति द्वाभ्यां तदा प्रथमदर्शनकाले।सीताया वियोगपूर्वकाले वा । वायसः पक्षी। विहङ्गः आकाशगतःसन्। यः प्रणदितः परुषं वाशितवान्। सः इदानीं तांविना तद्विरहावस्थायां। पादपगतःसन् प्रहृष्टं यथा तथा अभिनर्दति। पूर्वमाकाशगतःसन् परुषनादेन तद्विश्लेषं सूचितवान्। इदानीं पादपगतःसन् प्रहृष्टनादेनास्याः संश्लेषंसूचयतीत्यर्थः ॥५५॥ एतदेव विवृणोति—एष इति ॥ तत्र तदानीं।

ति० अथवावर्तते तत्रवसन्तः तथापिपरैःशत्रुभिःपीडितायतःसा । अतस्तस्यावसन्तःकिंकरिष्यति । परकृतपीडासत्त्वेकामपीडानवकाशादितिभावइतिप्राञ्चः ॥ परेतु तत्रवसन्तोनास्त्येव। तत्सत्त्वेमयाविनासाकथंतत्रतिष्ठेत् । आगतैवस्यादित्यर्थः । तदेवसूचयन्नाह—**अथवेति**। परनिर्भर्त्सनवशान्नायातीत्याशयइत्याहुः ॥४९॥ **रामानु०** साध्वीविरहंगतेतिचविशेषणद्वयंहेतुगर्भितं ॥ **ति०** साध्वीसीता मद्विरहंगता संप्राप्ता वसन्तस्यसत्त्वेऽसत्त्वेवासर्वथा वर्तयितुं जीवितुं । नालं नसमर्था ॥ **शि०** मद्विरहंगता सीता अलंवर्तयितुं शोभनतयास्थातुं । नशक्ष्यतीतिशेषः ॥ ५१ ॥ **कतक०** पक्षीप्रणदितस्तथेति विहगःप्रीतिकारक-

[पा०] १ छ. झ. ट. नदन्ति. २ च. छ. झ. ञ. ट. कामंशकुनामुदिताः. ३ घ. सर्वशः. ४ ज. ञ. आह्वयन्तीवचान्योन्यं. ५ ङ. ज. ञ. ननूनंतु. ६ क. ग.—ट. वसन्तस्तं. ७ घ. सापि. ङ. च. ज. ञ. साविनिर्भर्त्सिता. ८ ख. पद्मविशालाक्षी. ९ च. छ. झ. ञ. ट. मृदुभाषाचमेप्रिया. क. मृदुभाषीचमेप्रिया. ङ. ज. ञ. विनाभूतामयाप्रिया. १० ङ.—ट. संपरिवर्तते. ११ क. ख. घ.—ट. भावोहि. ग. भावोपि. १२ क. सर्वश्चापिनिवेशितः. १३ क. ग.—ट. शोकसंजननोमम. १४ क.—घ. छ.—ट. विनाश्चविहङ्गोयो. १५ छ. झ. ट. मभिकूजति. १६ घ. पतिंसांतु.

[1]पश्य लक्ष्मण सन्नादं वने मदविवर्धनम् ॥ पुष्पिताग्रेषु वृक्षेषु द्विजानामु[2]पकूजताम् ॥ ५७ ॥
विक्षिप्तां पवनेनैतामसौ तिलकमञ्जरीम् ॥ षट्पदः सहसाऽभ्येति मदोद्धूतामिव प्रियाम् ॥ ५८ ॥
कामिनामयमत्यन्तमशोकः शोकवर्धनः ॥ स्तबकैः पवनोत्क्षिप्तैस्तर्जयन्निव मां स्थितः ॥ ५९ ॥
अमी लक्ष्मण दृश्यन्ते चूताः कुसुमशालिनः ॥ विभ्रमोत्सिक्तमनसः सा[3]ङ्गरागा नरा इव ॥ ६० ॥
सौमित्रे पश्य पम्पायाश्चित्रासु वनराजिषु ॥ किन्नरा नरशार्दूल विचरन्ति [4]ततस्ततः ॥ ६१ ॥
इमानि शुभगन्धीनि पश्य लक्ष्मण सर्वशः ॥ नलिनानि प्रकाशन्ते जले तरुणसूर्यवत् ॥ ६२ ॥
एषा प्रसन्नसलिला पद्मनीलोत्पलायुता ॥ हंसकारण्डवाकीर्णा पम्पा सौग[5]न्धिकायुता ॥ ६३ ॥
जले तरुणसूर्याभैः षट्पदाहतकेसरैः ॥ पङ्कजैः शोभते पम्पा समन्तादभिसंवृता ॥ ६४ ॥
चक्रवाकयुता नित्यं चि[6]त्रप्रस्थवनान्तरा ॥ मा[7]तङ्गमृगयूथैश्च शोभते सलिलार्थिभिः ॥ ६५ ॥
प[8]वनाहितवेगाभिरूर्मिभिर्विमलेऽम्भसि ॥ पङ्कजानि विराजन्ते ताड्यमानानि लक्ष्मण ॥ ६६ ॥

प्रतिहारकः वियोजकःसन्। आभ्यां यादृच्छिकप्रासङ्गिकसुकृतदर्शनमुक्तं ॥५६॥ पश्येति । अनेन परमपदे ज्ञानप्रधाने सामगायिनां नित्यमुक्तानां स्थितिरुक्ता ॥५७॥ पवनेन विक्षिप्तां कम्पितां । प्रियामिव स्थितां तिलकमञ्जरीं षट्पदः भृङ्गोऽभ्येति । अनेन भगवद्याविषयभूतस्योत्तरक्षणे द्वयप्राप्तिर्भवितेत्युच्यते ॥५८॥ कामिनां विरहिणां । शोकवर्धनः दुःखवर्धनस्वभावः । स्वभावतो दुष्टप्रकृतिरित्यर्थः । अशोकः पवनोत्क्षिप्तैः वायुना पत्राणां बहिश्चालितैः । स्तबकैः मां तर्जयन्निव स्थितः । त्वत्संहारार्थमिमे तप्तबाणाः पञ्चबाणेन स्थापिता इति भीषयन्निव स्थित इत्युत्प्रेक्षा । संसारिणमनुज्जीवयन्तं मां ज्ञानिनो लज्जितं कुर्वन्तीत्यर्थः ॥ ५९ ॥ पुनरपि ज्ञानिनां समृद्धिं दर्शयन्वर्णयति—अमी इत्यादिना ॥ कुसुमशालिनः अतएव साङ्गरागाः । विभ्रमोत्सिक्तमनसः विलासगर्वितमनसः । रागिण इति यावत् । नरा इव भान्ति ॥ ६०—६१ ॥ नलिनानि रक्तोत्पलानि । जले तरुणसूर्यवत् प्रतितरङ्गं प्रतिफलितबालसूर्यवत् ॥६२॥ विरजादृष्ट्यापम्पां वर्णयति—एषेत्यादिभिश्चतुर्भिः॥ "सौगन्धिकंतुकल्हारं"इत्यमरः। शोभत इति शेषः ॥ ६३ ॥ पङ्कजैरभिसंवृतेत्यन्वयः ॥ ६४ ॥ चित्रप्रस्थवनान्तरा चित्रतीरवनपरिधाना । अन्तरं परिधानं ॥ ६५ ॥ पवनाहितवेगाभिः पवनोत्पादितवेगाभिः । ताडयमानानि कशाभिस्ताड्यमानानीव

इतिचप्राचीनःपाठः । असौपक्षी तथा अतिसुखंयथाभवतितथा विहगःसन् आकाशगः । प्रणदितः नादंकृतवान् । अस्यपूर्वमिति शेषः । तत्संयोगकालइतिशेषः । अथेदानींतांविना तद्वियोगकाले । अन्यथेतिशेषः । दुःखनादइत्यर्थः । अथकंचिच्छकुनमाह । पादपगतोवायसः प्रहृष्टंयथाकूजति । एषविहगः एवंनादविशिष्टोविहगोवायसः यत्रसीतातिष्ठतितत्रतस्याः प्रीतिकारकः अतिपीडाभावसूचकः। मांतु मांच । तस्यास्समीपंतत्समीपगमनद्वारं । उपनेष्यति उपस्थापयिष्यतीत्यर्थः॥ **स०** प्रतिहारकः द्वारपालकः । द्वारपालकोयथास्वनाथंप्रतिनेष्यतितथाऽयमपिसीतायास्समीपमुपनेष्यति ॥ ५६ ॥ **रामानु०** संनादंपश्य शब्दंश्रृण्वित्यर्थः । **शि०** पश्य जानीहि ॥ ५७ ॥ **ति०** मदोद्धतां मदेनस्खलन्तीं ॥ ५८ ॥ **ति०** विचरन्ति किंनरीभिस्सहेतिशेषः । स्वनायिकासहितनायकान्तरदर्शनमुद्दीपनं ॥ ६१ ॥ **शि०** जलेतरुणसूर्यवत् उदयकालिकसूर्यइव । इमानिनलिनानि अरुणकमलानि । प्रकाशन्ते अभूतोपमैषा ॥ **स०** शुभगन्धीनि शुभश्चासौगन्धश्च । सएषामस्तीतिशुभगन्धीनि । यद्वा गन्धोयेषामस्तितानिगन्धीनि । शुभानिचतानिगन्धीनिच । शुभत्वंतु " दीप्तानलार्कद्युतिमप्रमेयं " इत्यत्राप्रमेयत्वंद्युताविवविशेषणेऽन्वेति । प्रथमे "नञानिर्दिष्टमनित्यं"इति द्वितीये"रसादिभ्यश्च"इतिप्रायिकंइतिचएकदेशिनेत्यादिनारूपीघटइत्यादिनाचावसेयं । एतेन उदादिपूर्वकत्वाभावात्कथमित्त्वमितिशङ्कानिरस्ता ॥ ६२ ॥ **ति०** पद्मनीलोत्पलैरासमन्ताद्युता ॥ ६३ ॥ **ति०** षट्पदाहतकेसरैः जलेभ्रमरपातितपुष्पधूलिभिः । अभिसंवृता व्याप्ता । **स०** तरुणसूर्याभैः तरुणसूर्यकाभैः ॥ ६४ ॥ **ति०** चित्रप्रस्थानि चित्रप्रदेशानि वनान्तराणियस्यास्सा ॥ ६५ ॥ **शि०** पवनेन आहताः वेगाःयासांताभिः ॥ ६६ ॥

[पा०] १ क.—च. ज. ञ. शृणु. २ क. ङ. च. झ. ञ. ट. मवकूजतां. ३ ग. साङ्गरागाङ्गनाइव. ४ ङ.—ट. यतस्ततः. ख. समन्ततः. ५ क. सौगन्धिकान्विता. ६ ङ. च. ज. ञ. चित्रस्थल. ७ क. ख. मातङ्गैर्मृग. ८ क. ख. ग. ङ.—ट. पवनाहत.

पद्मपत्रविशालाक्षीं सततं [1]पङ्कजप्रियाम् ॥ अपश्यतो मे वैदेहीं जीवितं नाभिरोचते ॥ ६७ ॥
अहो कामस्य वामत्वं यो गतामपि दुर्लभाम् ॥ स्मारयिष्यति कल्याणीं कल्याणतरवादिनीम् ॥६८॥
शक्यो धारयितुं कामो भवेदद्यागतो मया ॥ यदि भूयो वसन्तो मां न हन्यात्पुष्पितद्रुमः ॥६९॥
यानि स्म [2]रमणीयानि तया सह भवन्ति मे ॥ तान्येवारमणीयानि जायन्ते मे तया विना ॥ ७० ॥
पद्मकोशपलाशानि [3]दृष्ट्वा दृष्टिर्हि मन्यते ॥ सीताया नेत्रकोशाभ्यां सदृशानीति लक्ष्मण ॥ ७१ ॥
पद्मकेसरसंसृष्टो वृक्षान्तरविनिःसृतः ॥ निःश्वास इव सीताया वाति वायुर्मनोहरः ॥ ७२ ॥

॥६६॥ एवं पम्पादर्शनजकामोद्रेकमरत्यवस्थया दर्शयति—पद्मेति। "स एकाकी न रमेत" इतिवद्विरजातीरवासो मे न रोचत इति लक्ष्मणायाभिव्यनक्ति ॥६७॥ वामत्वं वक्रत्वं । गतां दूरगतां । स्मारयिष्यति स्मारयति । कल्याणतरवादिनीं शुभतरवचनशीलां । मृगमाहरेति चरमश्रुतमेव वाक्यमस्य हृदये वर्तते ॥६८॥ अद्यागतः इदानीं वर्तमानः । पुष्पिताः द्रुमाः येन स पुष्पितद्रुमः । सर्वथा कामो दुःसह इत्युच्यते ॥ ६९ ॥ भोग्यस्य वसन्तस्य कुतो बाधकत्वं तत्राह—यानीति ॥ ७० ॥ नेत्रकोशाभ्यां नेत्रदलाभ्यां । सीतानेत्रे स्मारयित्वा सन्तापयन्तीत्यर्थः ॥ ७१ ॥ सर्वप्राणिनां प्राणहेतुर्वायुरेवास्मत्सर्वस्वापहारं कुरुत इत्याह—पद्मकेसरेति ॥ पद्मकेसरसंसृष्टः । धूलीकरणं वायुकार्यं । तथाच सर्वप्राणहेतुरेव सर्वधूलीकरणप्रवृत्तः। सर्वसंहारप्रवृत्त इत्यर्थः। यद्वा पद्माविरहात् पद्मकेसराणि प्रतिकूलानिसन्ति वायोःसाहाय्यंकुर्वन्ति। पादारुन्तुदमेवपङ्कजरजइति स्वजनसहजबाधकं कथंनास्मद्बाधकं । राजसप्रकृतित्वादस्मानपिबाधितुमुपक्रमते । केसरशब्देन तत्स्थरजसोऽत्रविवक्षितत्वात्। किञ्जल्कानामानयनायोगात् । एतन्मूलंकण्टकिसंसर्गः । पद्मकेसरसंसृष्टः । नायं वातः किंतु केसरी । सिंहइत्यपिध्वनिः । यद्वा पद्मकेसरैः संसृष्टः स्वयमेवसंहारक्षमः । तदुपरि ससहायः । यद्वा रूपवान्ह्यसहायशूरः रूपरहितोयंकथं न सहायमपेक्षेत । रूपवान् दृढशरीरइत्यपिध्वनिः । वायुर्बाधकश्चेत्त्वया पूर्वमेवपरिहृत्यवर्तितव्यं तत्राह। वृक्षान्तरविनिःसृतः। दूरे दृष्ट्वापरिहर्तुं शक्यते । वृक्षषण्डे पूर्वमात्मानंसङ्गोप्यस्थित्वाझटितिनिर्गतः । यद्वा यथाराजकुमारः सौकुमार्येण छायामार्गेणागच्छति तथायमपीत्यर्थः । यद्वा मन्मथतापेन विश्रमाय तरुच्छायमपिनाश्रयितुं क्षमते । यदि तेऽहं बाधकः तर्हि दूरादपसरेत्यत्राह । निःश्वास इवसीतायाः पूर्वपरिचितवदवभासमानतया परिहर्तुमपि नशक्नोमि । यद्वा सीतानिःश्वासतुल्यतया सात्र किं वृक्षमूले निलीना समागच्छतीति चापलातिशयेनान्यत्र न चलितुं शक्नोमि । "सुरभिणि श्वसितेदधतस्तृषं" इति निःश्वासस्य सौरभ्यं कविभिरुक्तं। यद्वा नकेवलमनिलः सपरिकर एवबाधते। किंतु स्मारकतयापिवाति नकदाचिदायाति । सर्वदायाति । सकलमपि काननंसविलासंसंचरति । यद्वा वाति "वा गतिगन्धनयोः" स्वार्जितगन्धेन सर्वान्परवशीकरोति। एतादृशबाधकोपि न यःकश्चिदित्याह। वायुः सर्वोज्जीवनहेतुः । यद्वा "भीषास्माद्वातः पवते" इति मत्तो भीतो मां भर्त्सयति। बाधनप्रकारमाह। मनोहरः आन्तरमपि पदार्थमपहरति। पद्मकेसरसंसृष्ट इत्यनेन शैत्यमुक्तं । वृक्षान्तरविनिःसृतइत्यनेन मांद्यं । निःश्वासइवसीताया इति सौरभ्यं । यद्वा पद्मकेसरसंसृष्टइत्यनेन चोरसमाधिरुच्यते । स्वस्वरूपापरिज्ञानाय भीरुजनभीषणायच भस्मोद्धूलितवदनः समायाति । वृक्षान्तरविनिःसृतः पथिकानांस्वसमीपागमनपर्यन्तं गूढतयास्थित्वा तेषुसमीपमागतेषु सपदिसमुत्तिष्ठन्नि-

ति० अपश्यतोमे आत्मनेइतिशेषः। यद्वा कर्तुश्शेषत्वविवक्षायांमेइतिषष्ठी ॥६७॥ ति० दुर्लभां अद्याप्राप्यां । स्मारयिष्यति स्मारयतीत्यर्थः। चित्तवैकल्यबोधनद्वाराऽन्यथाप्रयोगोविरहपरिपोषाय ॥६८॥ ति० कामः कामकृततापः ॥६९॥ रामानु० पद्मकोशपलाशानि पद्ममुकुलोपरिदलानि । नेत्रकोशाभ्यां नेत्रकोशशब्देननेत्रपिधानभूतपक्ष्मप्रदेशउच्यते ॥ ति० पद्मकोशस्यपलाशानि दलानि । कामोद्दीपकान्यपि तन्नेत्रकोशाभ्यांतन्नेत्रपुटाभ्यांसदृशानीतिद्रष्टुंदृष्टिर्मन्यतइत्यर्थः ॥ शि० पद्मकोशपलाशानीत्युभयान्वयि । एकत्रशाब्दः अपरत्रार्थः ॥ ७१ ॥ ति० पद्मकेसरेत्यादिनाशैत्यसौरभ्ये । वृक्षान्तरेत्यादिनामान्द्यं ॥ ७२ ॥

[पा०] १ ख- घ. छ. झ. ट. प्रियपङ्कजां. क. ग. प्रियदर्शनां. २ क. ग. संरमणीयानि. ३ क. ग. ग. ज. ज.—ट. द्रष्टुंदृष्टिर्हि. ख. द्रष्टुंदृष्टिर्विमन्यते.

सौमित्रे पश्य पम्पाया दक्षिणे गिरिसानुनि ॥ पुष्पितां कर्णिकारस्य यष्टिं परमशोभनाम् ॥ ७३ ॥
अधिकं शैलराजोऽयं धातुभिः सुविभूषितः ॥ विचित्रं सृजते रेणुं वायुवेगविघट्टितम् ॥ ७४ ॥
गिरिप्रस्थास्तु सौमित्रे सर्वतः संप्रपुष्पितैः ॥ निष्पत्रैः सर्वतो रम्यैः प्रदीप्ता इव किंशुकैः ॥ ७५ ॥
पम्पातीररुहाश्चेमे संसक्ता मधुगन्धिनः ॥ मालतीमल्लिकाषण्डाः करवीराश्च पुष्पिताः ॥ ७६ ॥
केतक्यः सिन्धुवाराश्च वासन्त्यश्च सुपुष्पिताः ॥ माधव्यो गन्धपूर्णाश्च कुन्दगुल्माश्च सर्वशः ॥ ७७ ॥
चिरिबिल्वा मधूकाश्च वञ्जुला बकुलास्तथा ॥ चम्पकास्तिलकाश्चैव नागवृक्षाः सुपुष्पिताः ॥ ७८ ॥

वभाति । निःश्वासइवसीतायाः चिरपरिचितइवसरससँल्लापविशेषैः कस्तेग्रामः किंतेनामेतिसंभाषमाणइवस्थितः वाति । धनस्य हस्तगतिपर्यन्तं निःस्पृहतया ततस्ततःसंचरन्निव स्थितः । वायुः चौर्यदृष्टाकेनचिद्ग्रहीतुमुद्युक्तं चेल्लाघवेन हस्तग्रहणानर्हः। मनोहरः नापाततोपाहरत् । अपितुसुगुप्तमपि । अनेन निर्हेतुकहरिदयाप्रवाह उपवर्ण्यते । पद्मकेसरसंसृष्टः "ङ्यापोःसंज्ञाछन्दसोः" इति ह्रस्वः। पद्मायाः केसरैः तत्तुल्यानुरागैःसंसृष्टः पुरुषकारभूतलक्ष्मीप्रणयप्रवृत्त इत्यर्थः । "पितेव त्वत्प्रेयाञ्जननिपरिपूर्णागसि जने हितस्रोतोवृत्त्या भवति च कदाचित्कलुषधीः। किमेतन्निर्दोषः क इह जगतीति त्वमुचितैरुपायैर्विस्मार्य स्वजनयसि माता तदसि नः ॥" वृक्षान्तरविनिःसृतः " ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययं" इति वृक्षत्वेनोक्ते संसारमण्डले प्रवृत्तः । निःश्वास इव सीतायाःस्त्रीप्रायमितरत्सर्वमिति परतन्त्रतया स्त्रीतुल्यानां लोकानामाश्वासको धारकश्चेत्यर्थः । वाति अनवरतं प्रवहति । वायुः सार्वत्रिकः मनोहरः मानसिकसकलकल्मषहरः। द्रविडोपनिषद्व्याख्याकारैर्व्याख्यातोयंश्लोकः ॥ ७२ ॥ अथ विरजाया अर्वाक्प्रदेशवर्तिनां राजसतामससात्त्विकभेदभिन्नानां चेतनानां स्वरूपं स्वकटाक्षविषयभूतं दर्शयति—सौमित्र इत्यादिना ॥ दक्षिण इत्यनेन पम्पादक्षिणतीरं क्रमेण प्रविष्ट इत्यवगम्यते । अनेन कर्णिकारवर्णनेन सत्यलोकादिषु जृम्भमाणा राजसी वृत्तिरुच्यते । यष्टिं लतां ॥७३॥ अधिकमिति । अनेन ऋश्यमूकसमीपगमनं द्योतितं । रजोवर्धक लोक उक्तः ॥ ७४ ॥ प्रदीप्ताः ज्वलिताः ॥ ७५ ॥ पम्पेत्यादिसार्धसप्तश्लोकाः । इमे उपशोभन्त इत्यन्वयः । तदुपरि दृश्यन्त इत्यन्वयः । संसक्ताः अविरलाः । मधुगन्धिन इति सर्वविशेषणं । लिङ्गवचनविपरिणामः कार्यः । एवं पुष्पितपदमपि । पम्पातीररुहा इमे मालत्यादयः पदार्था उपशोभन्ते इत्येकोन्वयः । मालती जातिः । मल्लिकाषण्डाः मल्लिकासमूहाः । करवीराः प्रसिद्धाः । सिन्धुवाराः निर्गुण्ड्यः । वासन्त्यः पीतवर्णपुष्पालताः । " अत्र पीतायां वासन्ती हेमपुष्पिका" इति वैजयन्ती । माधव्यः अतिमुक्तलताः । गन्धेन पूर्णाः गन्धपूर्णाः । कुन्दानां गुल्माः कक्षाः कुन्दगुल्माः । चिरिबिल्वाः नक्तमालाः । मधूकाः मधुद्रुमाख्यावृक्षाः । वञ्जुलाः वेतसाः । बकुलाः प्रसिद्धाः । तिलकाः क्षुरकाः । नागवृक्षाः नागकेसराः । नीपाः जलकदम्बाः । वरणाः वरणवृक्षाः । खर्जूराः प्रसिद्धाः । पद्मकाः पद्मपर्ण्याख्या वृक्षविशेषाः । लोध्राः शाबरवृक्षाः। सिंहकेसरपिञ्जराः सिंहकेसरवर्णा इत्यर्थः । अङ्कोलाः निकोचकाः। कुरण्टाः पीतवर्णपुष्पा महासहाख्यागुल्माः । पूर्णकाः शाल्मलिभेदावृक्षविशेषाः । पारिभद्रकाः निम्बाः । पाटलयः इकारान्त आर्षः । कोविदाराः युगपत्रकाख्या वृक्षाः । मुचुलिन्दाः नारङ्गवृक्षाः । अर्जुनाः ककुभवृक्षाः । केतकानि हेमवर्णपुष्पाणि इति पूर्वस्माद्विशेषः । उद्दालकाः श्लेष्मातकवृक्षाः । शिरीषाः कपीतनाख्या वृक्षाः । शिंशुपाः भस्मगर्भाख्यावृक्षाः । धवाः मधुराख्यावृक्षविशेषाः । कुरवकाः रक्तवर्णपुष्पामहासहाख्या गुल्माः । रक्तपदं विस्पष्टार्थं । तिनिशाः नेमिद्रुमाः । नक्तमालाः चिरिबिल्वभेदाः । चन्दना प्रसिद्धाः ।

ति० संसिक्ताः तज्जलसेकेनवर्धिताः ॥ ७६ ॥

[पा०] १ ख. झ. सानुषु. २ क. ख. ग. ङ—ट. शोभितां. ३ ङ—ट. धातुभिस्तु. ख. धातुभिरस. ४ घ. ग. ताश्चेमे. ५ झ. संसिक्ताः. ६ छ. झ. ट. पद्मकरवीराश्च. ७ ज.—ट. मातुलिङ्गाश्चपूर्णाश्च. ८ क. ख. घ. छ.—ट. वृक्षाश्चपुष्पिताः.

नीपाश्च वरणाश्चैव खर्जूराश्च सुपुष्पिताः ॥ [1]पद्मकाश्चोपशोभन्ते नीलाशोकाश्च पुष्पिताः ॥ ७९ ॥
लोध्राश्च गिरिपृष्ठेषु सिंहकेसरपिञ्जराः ॥ अङ्कोलाश्च कुरण्टाश्च [2]पूर्णकाः पारिभद्रकाः ॥ ८० ॥
[3]चूताः पाटलय[4]श्चैव कोविदाराश्च पुष्पिताः ॥ मुचुलिन्दार्जुनाश्चैव दृश्यन्ते गिरिसानुषु ॥ ८१ ॥
केतकोद्दालकाश्चैव शिरीषाः शिंशुपा धवाः ॥ शाल्मल्यः किंशुकाश्चैव रक्ताः कुरवकास्तथा ॥
[5]तिनिशा नक्तमालाश्च चन्दनाः [6]स्पन्दनास्तथा ॥ [[7]हिन्तालास्तिलकाश्चैव नागवृक्षाश्च पुष्पिताः]॥८२॥
पुष्पितान्पुष्पिताग्राभिर्[8]लताभिः परिवेष्टितान् ॥ द्रुमान्पश्येह सौमित्रे पम्पाया रुचिरान्बहून् ॥८३॥
वातविक्षिप्त[9]विटपान्यथासन्नान्द्रुमानिमान् ॥ [10]लताः समनुवर्तन्ते मत्ता इव [11]वरस्त्रियः ॥ ८४ ॥
पादपात्पादपं गच्छञ्शैलाच्छैलं वनाद्वनम् ॥ [12]वाति नैकरसास्वादः संमोदित इवानिलः ॥ ८५ ॥
केचित्पर्याप्तकुसुमाः पादपा मधुगन्धिनः ॥ [13]केचिन्मुकुलसंवीताः श्यामवर्णा इवाबभुः ॥ ८६ ॥
इदं मृष्टमिदं स्वादु प्रफुल्लमिदमित्यपि ॥ [14]रागमत्तो मधुकरः [15]कुसुमेष्ववलीयते ॥ ८७ ॥
[16]निलीय पुनरुत्पत्य सहसाऽन्यत्र गच्छति ॥ मधुलुब्धो मधुकरः पम्पातीरद्रुमेष्वसौ ॥ ८८ ॥
इयं कुसुमसंघातैरुपस्तीर्णा सुखाकृता ॥ स्वयं निपतितैर्भूमिः शयनप्रस्तरैरिव ॥ ८९ ॥
विविधा विविधैः पुष्पैस्तैरेव नगसानुषु ॥ [17]विकीर्णैः पीतरक्ता हि सौमित्रे प्रस्तराः कृताः ॥९०॥

स्पन्दनाः वृक्षविशेषाः ॥ ७६—८२ ॥ पम्पायाः संबन्धिनइतिशेषः ॥ ८३ ॥ वातविक्षिप्तविटपान् वायुविधूतशाखानितितात्कालिककान्तिविशेषोक्तिः । यथासन्नान् यथासंस्प्रष्टुंशक्यते तथा आसन्नान् । समीपवर्तिनइत्यर्थः । इयताग्रन्थेन विषयान्तरप्रवणाः प्राकृताउक्ताः ॥ ८४ ॥ पादपात्पादपमिति । कच्छात्कच्छमित्यपिज्ञेयं । नैकरसास्वादः अनेकमधुरसकबलनेन संमोदितः संजातसंमोद इव ॥ ८५ ॥ पर्याप्तकुसुमाइत्यनेन मुकुलाल्पत्वं । मुकुलसंवीताः मुकुलैःसमन्तात्वेष्टिताइत्यनेन विकसितपुष्पस्वल्पत्वंचावगम्यते । श्यामवर्णाः वृन्तवर्णेनेति भावः । आबभुः आभान्ति । लडर्थेलिट् ॥८६॥ मृष्टं रम्यं । स्वादु रसवत् । रागमत्तः अभिनवपुष्पकुतूहलाकुल इत्यर्थः । अवलीयते सक्तोभवति ॥ ८७ ॥ पुनर्मधुकरस्य चापलं दर्शयति—निलीयेति ॥ निलीय क्वचित्पुष्पेक्षणमात्रंस्थित्वा । पुष्पान्तरेभूयसीमिवमधुसमृद्धिं दृष्ट्वा तत्क्षणादन्यत्र पुष्पे गच्छति । एवं सर्वत्रेति ज्ञापयितुं पम्पातीरद्रुमेष्वित्युक्तं ॥८८॥ इयं भूमिः। स्वयं निपतितैः अतिसुकुमारैरित्यर्थः । कुसुमसंघातैः उपस्तीर्णा व्याप्ता सती । शयनप्रस्तरैः शयनास्तरणैरिव । सुखाकृता सुखावहाकृता ॥८९ ॥ नगसानुषु विकीर्णैः विविधैः इतस्ततःस्वयं पतितैः पुष्पैः । विविधाः प्रस्तराः कृताहीत्युत्प्रेक्षा । विविधाइत्यस्यविवरणं —पीतरक्ताइति । इदमुपलक्षणं । नानावर्णाइत्यर्थः । क्वचित्पीतवर्णचम्पकादिपुष्पाणि पतितानि हेममयपर्यङ्का इव भान्ति। क्वचिद्रक्तवर्णकार्णिकारादिपुष्पाणिपतितानिपट्टवस्त्ररचिततलिमानीव । इत्येवं नानावर्ण-

---

रामानु० पुष्पात्पुष्पान्तरंगच्छन्तंमधुकरंविलोक्योत्प्रेक्षते—**इदमिति** ॥८७॥ **ति०** शयनप्रस्तरैः शयनार्थतल्पप्रसरणैरिव । सुखाकृता सुखकरी । " सुखप्रियादानुलोम्ये " इतिडाच् ॥ ८९ ॥

[पा०] १ ख. पद्मकाश्चानु. क. ङ.—ट. पद्मकाश्चैव. २ ख. छ. झ. ट. चूर्णकाः. ३ क. चूताश्चपाटलाश्चैव. ४ छ. झ. ट. श्चापि. ५ क.—च. ज. तिमिशाः. ६ छ. ज. झ. स्यन्दनास्तथा. ७ इदमर्धं क. ङ.—ट. पाठेषुदृश्यते. क. ङ. ज. ञ. हिन्तालाश्चैवपनसानाग. ८ क. लताभिरनुवेष्टितान्. ९ क. ख. ग. विटपान्पंपासन्नान्द्रुमाँल्लताः. १० क. ग. वृताः संपरिवर्तन्ते. ख. एताःसमनुवेष्टन्ते. ११ क. ग. पतिंस्त्रियः. १२ ख. याति. १३ ख. केचित्कुसुम. १४ ङ. च. ज. झ. ञ. रागरक्तो. ट. रागयुक्तो. १५ छ. ज. झ. कुसुमेष्वेव. क. ग. कुसुमेषुनिलीयते. १६ घ. निपीय. १७ छ. झ. ट. विस्तीर्णाः पीतरक्ताभाः. ख. ग. ङ. ञ. विशीर्णैःपीतरक्ताभाः. च. ज. विशालैःपीतरक्ताभाः.

हिमान्ते पश्य सौमित्रे वृक्षाणां पुष्पसंभवम् ॥ ९१ ॥
पुष्पमासे हि तरवः संघर्षादिव पुष्पिताः ॥ आह्वयन्त इवान्योन्यं नगाः षट्पदनादिताः ॥
कुसुमोत्तंसविटपाः शोभन्ते बहु लक्ष्मण ॥ ९२ ॥
एष कारण्डवः पक्षी विगाह्य सलिलं शुभम् ॥ रमते कान्तया सार्धं काममुद्दीपयन्मम ॥ ९३ ॥
मन्दाकिन्यास्तु यदिदं रूपमेवं मनोहरम् ॥ स्थाने जगति विख्याता गुणास्तस्या मनोरमाः ॥९४॥
यदि दृश्येत सा साध्वी यदि चेह वसेमहि ॥ स्पृहयेयं न शक्राय नायोध्यायै रघूत्तम ॥ ९५ ॥
न ह्येवं रमणीयेषु शाद्वलेषु तया सह ॥ रमतो मे भवेच्चिन्ता न स्पृहाऽन्येषु वा भवेत् ॥ ९६ ॥
अमी हि विविधैः पुष्पैस्तरवो रुचिरच्छदाः ॥ काननेऽस्मिन्विना कान्तां चित्तमुन्मादयन्ति मे ॥९७॥
पश्य शीतजलां चेमां सौमित्रे पुष्करायुताम् ॥ चक्रवाकानुचरितां कारण्डवनिषेविताम् ॥
प्लवैः क्रौञ्चैश्च संपूर्णां वराहमृगसेविताम् ॥ ९८ ॥
अधिकं शोभते पम्पा विकूजद्भिर्विहङ्गमैः ॥ ९९ ॥
दीपयन्तीव मे कामं विविधा मुदिता द्विजाः ॥ श्यामां चन्द्रमुखीं स्मृत्वा प्रियां पद्मनिभेक्षणाम् ॥१००॥

नानाशय्या इवभान्तीतिभावः ॥ ९० ॥ हिमान्त इत्यर्धं । हिमान्ते वसन्ते । वृक्षाणां पुष्पसंभवं पुष्पसमृद्धिं । वक्ष्यमाणस्य संक्षेपेणोक्तिः ॥ ९१ ॥ पुष्पमासे वसन्ते । संघर्षात् पुष्पिता अमी तरवः षट्पदनादिताःसन्तः परस्परमाह्वयन्त इव । यूयं वयमिव न पुष्पिता इत्यन्योन्यं भृङ्गरवेण व्याजेन वदन्तीवेत्युत्प्रेक्षा । अर्धत्रयमेकान्वयं वा । आह्वयन्त इवेत्युक्त्वा कुसुमोत्तंसविटपाः पूर्वोक्तास्तरवः। बहु अधिकं। शोभन्त इति ॥ ९२ ॥ काममुद्दीपयन् अन्यरतिदर्शनस्योद्दीपकत्वादिति भावः ॥ ९३ ॥ यदिदं पम्पायाः रूपं एवं मन्दाकिन्याश्च मनोहरं रूपं । कथमेतत्सादृश्यं तस्या इत्यत्राह—स्थान इति । मनोरमाः जगति विख्याताः तस्या गुणाः स्थाने युक्ताः ॥ ९४ ॥ ननु परपुरुषेणापहृता कथं रतये प्रार्थ्यते तत्राह—साध्वीति । वसेमहि "भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते । अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते" इत्युक्तवता त्वया सह वसेमेत्याशयेन बहुवचनं । शक्राय शक्रत्वाय । ऐश्वर्येइन्द्रत्वस्य प्राथमिकत्वात्तथोक्तं । "रुच्यर्थानां प्रीयमाणः" इति चतुर्थी । उत्तमं पुरुषं प्रति नासत्यमुच्यत इत्याशयेन रघूत्तमेत्युक्तिः ॥ ९५ ॥ उक्तेर्थे हेतुमाह—नहीति ॥ रमतः रममाणस्य । हि यस्मात् । चिन्ता न भवेत् अयोध्यायाः अलाभकृताचिन्ता न स्यात् । अन्येषु शक्रत्वादिषु । रहस्यप्येवंविधमानुषत्वभावनानुरूपंवचनं योगिनोबुध्येरन्निति ॥ ९६ ॥ विना वर्तमानस्येतिशेषः ॥ ९७ ॥ पश्येत्यादिसार्धश्लोकः । पुष्करैः पद्मैः आयुतां व्याप्तां । कारण्डवाः जलकाकाः । प्लवैः जलकुक्कुटैः । वराहेति तीर इति शेषः ॥ ९८ ॥ अधिकमित्यर्धं । विहङ्गमैः उक्तभिन्नैः ॥ ९९ ॥ स्मृत्वा वर्तमानस्येति शेषः ॥ १०० ॥

रामानु० हिमान्ते शिशिरादौ । वृक्षाणांयःपुष्पसंभवोस्ति तं । अस्मिन्कालेपश्येत्यर्थः । **ति०** हिमान्ते शिशिरान्ते ॥९१॥ **ति०** मन्दाकिन्याः तत्सदृशपंपायाः । अतिशयोक्तिरत्र ॥ **ती०** मन्दाकिन्याः चित्रकूटपर्वतपरिसरवर्तिन्याः ॥९४॥ **रामानु०** यदिचेहवसेन्मयि । मयि मत्समीपे ॥ ९५ ॥ **स०** मेइत्येतच्चतुर्थ्यन्तमपि । तथाचमे मह्यंस्पृहायस्याः तयासीतयारमतः मे अन्येषुविषयेषुचिन्ताभवेत्किं नभवेदेवेत्यर्थः । यद्वा स्पृहधातुयोगेचतुर्थ्यभावआर्षः ॥ ९६ ॥ **ति०** स्मृत्वा स्मारयित्वा ॥१००॥

[**पा०**] १ क. ख. ङ. च. ज. ञ. पुष्पसंचयं. २ ख. षट्पदनिस्स्वनैः ३ ख. भुवि. ४ घ. एकः. ५ क. ङ. झ. ञ. ट. मुद्दीपयन्निव. ६ क. घ. ङ. च. ज. ञ. यदितद्रूपं. ७ ज. झ. ट. मेतन्मनोहरं. ८ ख. वसेन्मम. ९ झ. ञ. ट. विविधच्छदाः. १० छ. झ. ट. चिन्तामुत्पादयन्ति. ११ ङ. च. ज. ञ. संकीर्णा. १२ छ. झ. ट. महामृगनिषेवितां. १३ च. दीपयन्तिच. १४ घ. स्मृत्वामन्मथोवर्धतेहिमे. १५ ङ. चन्द्रनिभेक्षणां.

पश्य सानुषु चित्रेषु मृगीभिः सहितान्मृगान् ॥ मां पुनर्मृगशावाक्ष्या वैदेह्या विरहीकृतम् ॥१०१॥
व्यथयन्तीव मे चित्तं संचरन्त[1]स्ततस्ततः ॥ अस्मिन्सानुनि रम्ये[2] हि मत्तद्विजगणायुते[3] ॥ १०२ ॥
पश्येयं यदि तां कान्तां ततः स्वस्ति भवेन्मम ॥ १०३ ॥
जीवेयं खलु सौमित्रे मया सह सुमध्यमा ॥ सेवते[4] यदि वैदेही पम्पायाः पवनं सुखम्[5] ॥ १०४ ॥
पद्मसौगन्धिकवहं शिवं शोकविनाशनम् ॥ धन्या लक्ष्मण सेवन्ते पम्पोपवनमारुतम्[6] ॥ १०५ ॥
श्यामा पद्मपलाशाक्षी प्रिया विरहिता मया ॥ कथं धारयति[7] प्राणान्विवशा जनकात्मजा ॥१०६॥
किंनु वक्ष्यामि राजानं[8] धर्मज्ञं सत्यवादिनम् ॥ सीताया[9] जनकं पृष्टः कुशलं जनसंसदि ॥ १०७ ॥
या मामनुगता मन्दं पित्रा प्रव्राजितं[10] वनम् ॥ सीता सत्पथ[11]मास्थाय क्व नु सा[12] वर्तते प्रिया ॥१०८॥
तया विहीनः कृपणः कथं लक्ष्मण धारये ॥ या मामनुगता राज्याद्भ्रष्टं विगत[13]चेतसम् ॥ १०९ ॥
तच्चार्वञ्चितपक्ष्माक्षं[14] सुगन्धि शुभमव्रणम् ॥ अपश्यतो मुखं तस्याः सीदतीव मनो[15] मम ॥ ११० ॥

पुनस्त्वर्थः । विरहीकृतं विरहिणमित्यर्थः । मृगीभिः सहितान् मृगान् पश्य । वैदेह्या विरहीकृतंमां पुनः पश्येत्यन्वयः । एतेषु सकलत्रेषु सुखं संचरत्सु ममैकस्याहो कष्टावस्थेति भावः ॥ १०१ ॥ संचरन्तः मृगादयइतिशेषः ॥ १०२ ॥ पश्येयमित्यर्धं ॥ ततः तदा । स्वस्ति शुभं ॥ १०३—१०४ ॥ पद्मेति ॥ पद्मकह्लारगन्धवहमितिलक्षणयार्थः । धन्याः सकान्ताः । पदप्रयोजनंत्वाचार्या ऊचुः । पद्मं च सौगन्धिकं च पद्मसौगन्धिके ते वहति प्रापयतीति पद्मसौगन्धिकवहं । अत्र पद्मसौगन्धिकयोर्वहनानुपपत्तेस्तद्गन्धो लक्ष्यते । लक्षणायाश्च प्रयोजनेन भवितव्यं । यथा गङ्गायां घोष इत्यत्र पावनत्वादि तथात्र प्रयोजनं । यथा पद्मस्यैव घ्राणसमीपानयनेपिउपरिस्थितःपरिमलः शीतलोगृह्यते । नान्तःस्थित उष्णमिश्रः । तथायं वायुरपि उपरिस्थशीतलपरिमलमादाय समागच्छतीत्यर्थः । यद्वा पद्मकेसरसंसृष्ट इत्यनुक्तेः पद्मसौगन्धिकोपरिवर्तिपरिमलावह इत्यर्थः । गुणगुणिनोरभेदविवक्षया पद्मसौगन्धिकेत्युक्तिः । उभयोक्त्या नानापुष्पग्रथितमालिकाधारिण इव नानापुष्पपरिमलं वहतीत्युच्यते । शिवं शुद्धं । तथा चान्यासंस्पर्शितोक्त्या प्राथमिकमलयमारुत इत्युच्यते । शोकविनाशनं । विरहिणो दक्षिणपवनः शोकवर्धनः नतु शोकविनाशनः । तथाच जीवतो हि शोकं कुर्यात् जीवितापायकरणेन शोकधर्म्यभावाच्छोकविनाशनं । धन्याः एवंविधे मलयानिले वातिसति एकान्तस्थलमन्वेष्यशयनपराः केचन सन्ति हि। सेवन्ते कदा समागमिष्यत्ययं पवन इत्यवसरप्रतीक्षा भवन्ति। सेवाह्यवसरप्रतीक्षा । पम्पोपवनमारुतं आकरादागताग्निमिव स्थितं । समुद्रादुत्थितवडवानलमिवेत्यर्थः । प्रत्येकश्लोकव्याख्यानेप्ययमेवाभिप्राय उक्तः ॥ १०५॥ विवशा प्राणत्यागेपि न स्वतन्त्रेत्यर्थः ॥ १०६ ॥ किंन्विति ॥ सीतया सह मम कुशलं पृष्ट इत्यर्थः ॥ १०७ ॥ मन्दं भाग्यरहितं । "मूढाल्पापटुनिर्भाग्या मन्दाः स्युः" इत्यमरः । सत्पथं पतिव्रतामार्गं आस्थाय अनुगतेत्यन्वयः ॥ १०८ ॥ धारये जीवामि । विगतचेतसं विकलहृदयं ॥ १०९ ॥ अञ्चितपक्ष्माक्षं अञ्चितानि पूजितानि स्निग्धानीति । यावत् । पक्ष्माणि ययोस्ते । अञ्चितपक्ष्मणी अक्षिणी

रामानु० पुनश्शब्दोप्यर्थे । मामपिपश्येतिसंबन्धः ॥ विरहीकृतं विरहः अर्शआद्यजन्तः । अविरहः विरहभिन्नः विरहत्वेनकृतस्तंमांपश्येत्यत्र च्विर्विरहस्यावास्तवत्वंद्योतयति ॥ १०१ ॥ **ति०** संचरन्तः मृगीभिस्सहितामृगाइतिशेषः ॥ १०२ ॥ **ति०** पृष्टासीताक्वेतियेनतं । **वि०** सीतयासहितस्यतव कुशलमितिपृष्टः ॥ १०७ ॥

[पा०] १ क. चरन्तइतस्ततः. २ क. ङ. रम्येऽहं. ३ ङ.—ट. गणाकुले. ४ ङ. छ. झ. ट. सेवेत. ५ छ. झ. ट. शुभं. ६ च.—झ. ट. पंपायावनमारुतं. ख. पंपाविपिनमारुतं. ७ ङ. च. ज. ञ. धारयते. ८ क. ग. ङ.—ट. धर्मज्ञंराजानं. ९ छ. झ. ट. जनकंप्रष्टसीतंतं. ख. सीतयाजनकं. क. ग. ङ. च. ज. ञ. जनकंसीतया. १० छ. झ. ट. प्रस्थापितं. ११ छ. झ. ट. धर्ममास्थाय. १२ ग. संवर्तते. १३ छ. झ. ट. विहृतचेतसं. ङ. च. ज. ञ. विगतचेतनं. १४ क. ख. ग. ङ.—ट. पद्माक्षं. १५ छ. झ. मतिर्मम.

[1]स्मितहास्यान्तर[2]युतं गुणवन्मधुरं हितम् ॥ वैदेह्या वाक्यमतुलं कदा श्रोष्यामि लक्ष्मण ॥ १११ ॥
[3]प्राप्य दुःखं वने श्यामा [4]सा मां मन्मथकर्शितम् ॥ नष्टदुःखेव हृष्टेव साध्वी [5]साध्वभ्यभाषत ॥११२॥
किंनु [6]वक्ष्यामि कौसल्यामयोध्यायां नृपात्मज ॥ क सा स्नुषेति पृच्छन्तीं कथं चातिमनस्विनीम्॥११३॥
गच्छ लक्ष्मण पश्य त्वं [7]भरतं भ्रातृवत्सलम् ॥ नह्यहं जीवितुं शक्तस्तामृते जनकात्मजाम् ॥११४॥
[[8]इति रामस्तु विलपन्हतनौरिव सागरे ॥ न ददर्श तदा पारं शोकस्य पुरुषर्षभ] ॥ ११५ ॥
इति रामं महात्मानं विलपन्तमनाथवत् ॥ उवाच लक्ष्मणो भ्राता वचनं [9]युक्तमव्ययम् ॥ ११६ ॥
संस्तम्भ राम भद्रं ते मा शुचः [10]पुरुषोत्तम ॥ नेदृशानां मतिर्मन्दा भवत्यकलुषात्मनाम् ॥११७॥
स्मृत्वा वियोगजं दुःखं त्यज स्नेहं प्रिये जने ॥ अतिस्नेहपरिष्वङ्गाद्वर्तिरार्द्रापि दह्यते ॥ ११८ ॥
यदि गच्छति पातालं ततो ह्यधिकमेव वा ॥ सर्वथा [11]रावणस्तावन्नभविष्यति राघव ॥ ११९ ॥
प्रवृत्तिर्लभ्यतां तावत्तस्य पापस्य रक्षसः ॥ ततो [12]हास्यति वा सीतां निधनं वा गमिष्यति ॥१२०॥

यस्य तत् । शुभं शोभमानं । अव्रणं । निर्दोषमित्यर्थः । व्रणकिणरहितं वा ॥ ११० ॥ स्मितहास्यान्तरयुतं "कान्तस्मिता लक्ष्मण जातहासा "इत्युक्तरीत्या स्मितेन नैसर्गिकस्मितेन हास्यान्तरेण आगन्तुकहास्येन च युक्तं । गुणवत् स्ववचनापेक्षया उत्कर्षवत् । मधुरं हितं प्रियहितं । अतुलं "प्रियवादि च भूतानां" इत्युक्तरामवचनमप्यस्य न सदृशमित्यर्थः । संसारादुत्तीर्णस्यचेतनस्य "एतत्साम गायन्नास्ते" इत्युक्तसामध्वनिं कदा श्रोष्यामीति व्यञ्जयति ॥ १११ ॥ स्वयं दुःखं प्राप्य स्थितापि स्वदुःखमप्रकाशयन्ती हर्षं भावयन्ती । साधु मन्मथार्तिनिवर्तकं वचनमभ्यभाषत । पूर्वमितिशेषः । अनादिकालं ममकैङ्कर्ययोग्योजीवइत्यर्थः ॥ ११२ ॥ सा स्नुषा क कथं कीदृक्प्रकारेतिपृच्छन्तींकौसल्यां किंवक्ष्यामि । अतिमनस्विनीमित्यनेन यथार्थं वक्ष्यामि चेत्तदानीमेव वात्सल्यातिशयान्नश्येदित्युच्यते ॥११३॥ किमत्रयुक्तं तत्राह्–गच्छेति ॥ ऋते विना ॥११४—११५ ॥ अव्ययं युक्तिभिरविनाश्यं ॥ ११६ ॥ संस्तम्भ संस्तम्भस्व । धैर्यमवलम्बस्वेत्यर्थः । अकलुषात्मनां सधैर्यहृदयानां । ईदृशानां त्वादृशानां । मन्दा अल्पा । कलुषितेत्यर्थः ॥ ११७ ॥ वियोगजं दुःखं भवतीत्येतल्लोकवृत्तं स्मृत्वा तद्धेतुभूतं प्रियजनविषयातिस्नेहं त्यजेत्यर्थः । तत्र श्लेषगर्भमर्थान्तरं न्यस्यति—अतीति । स्नेहः प्रीतिः तैलं च । अतः वात्सल्यप्रवृत्तिं विहाय चेतनसंतरणोपायं चिन्तयेत्यर्थः ॥ ११८ ॥ नभविष्यति विनशिष्यतीत्यर्थः ॥ ११९ ॥ प्रवृत्तिः वार्ता ॥ १२० ॥

ति० धारये प्राणानितिशेषः ॥ १०९ ॥ **शि०** मनःसीदत्येव । इवशब्दएवार्थे ॥ ११० ॥ **ति०** स्मितेन ईषद्धास्येनविनोदवचनेन अन्तरे मध्येएवयुतं नत्वोष्ठप्रदेशाद्बहिरितिपतिव्रतालक्षणसूचनं ॥ **ती०** स्मितहास्यान्तरयुतं प्रसन्नहास्यविशेषेणयुक्तं । यद्वास्मितंमन्दहासः । हास्यं प्रकटहासः । अन्तरं अवसरः । यथावसरंतद्युक्तमित्यर्थः । गुणवत् उपचारवत् ॥ **स०** हास्यशब्दसमभिव्याहारात्स्मितशब्दस्यमान्द्यमात्रमर्थः । तथाच स्मितहास्योत्तरयुतं मन्दहासोपेतवचनमित्यर्थः । एतादृशं यन्महावाक्यंतत्कदाश्रोष्यामि ॥ १११ ॥ **रामानु०** नह्यहंजीवितुंशक्तस्तामृतेजनकात्मजामित्यस्यानन्तरं इतिरामस्तुविलपन्नित्यादयःकेचनश्लोकाःकतिपयकोशेषुदृश्यन्ते । तेबहुकोशेष्वदृष्टत्वाद्वाल्मीकिपाकाप्रतीतेश्चतैर्विनाकथासंगत्युपपत्तेश्चनव्याख्याताः ॥ ११४ ॥ **स०** अतिस्नेहकरणे कदाचिद्वियोगेनदुःखंभवति । अतोवियोगजंदुःखंस्मृत्वाप्रियेजनेस्नेहंत्यज । तदेवदृष्टान्तेनाह **—अतीति** । आर्द्रापीत्यनेनविरोधाभासस्सूच्यते । लोकेआर्द्रवस्तुनोदाहाभावात् ॥ ११८ ॥ **ति०** तावत् प्रथमं । प्रवृत्तिः वासवृत्तान्तः ॥ १२० ॥

[पा०] १ ख. मितहास्यान्तर. ठ. स्मितहास्योत्तरयुतं. २ ग. गतं. ३ ङ. च. ज. ञ. प्राप्तदुःखं. ४ छ. झ. ट. मांमन्मथविकर्शितं. ५ ङ. च. ज. ञ. सालभ्यभाषत. ६ छ. झ. ट. धक्ष्याम्ययोध्यायांकौसल्यांहि. ७ ग. भ्रातरं. ८ अयं श्लोकः ङ. च. ज. पाठेषुदृश्यते. ९ क. ख. व्यक्तमव्ययं. १० ख. पुरुषर्षभ. ११ ङ. झ.—ट. रावणस्तातनभविष्यति. ख. रावणस्तातविनशिष्यति. १२ क. ग. हास्यतिवै.

यदि [१]यात्यदितेर्गर्भं रावणः सह सीतया ॥ तत्राप्येनं [२]हनिष्यामि न चे[३]द्दास्यति [४]मैथिलीम् ॥१२१॥
स्वास्थ्यं भद्रं भजस्वार्य त्यज्यतां कृपणा मतिः॥ अर्थो हि [५]नष्टकार्यार्थै[६]रयत्नेनाधिगम्यते ॥१२२॥
उत्साहो बलवानार्य नास्त्युत्साहात्परं बलम्॥ सो[७]त्साहस्यास्ति लोकेस्मिन्न किंचिदपि दुर्लभम् ॥१२३॥
उत्साहवन्तः पुरुषा नावसीदन्ति कर्मसु ॥ उत्साहमात्रमाश्रित्य [८]सीतां प्रति लभेमहि ॥ १२४ ॥
त्यज्यतां [९]कामवृत्तत्वं शोकं सं[१०]न्यस्य पृष्ठतः॥ महात्मानं कृतात्मानमात्मानं [११]नावबुध्यसे ॥ १२५ ॥
एवं [१२]संबोधितस्तत्र शोकोपहतचेतनः ॥ [१३]न्यस्य शोकं च मोहं च [१४]ततो धैर्यमुपागमत् ॥ १२६ ॥
सोभ्यतिक्रामदव्यग्रस्तामचिन्त्यपराक्रमः ॥ रामः पम्पां सुरुचिरां रम्यपारिप्लवद्रुमाम् ॥ १२७ ॥

निरीक्षमाणः सहसा महात्मा सर्वं वनं निर्[१५]झरकन्दरांश्च ॥
उद्विग्नचेताः सह लक्ष्मणेन विचार्य दुःखोपहतः प्रतस्थे ॥ १२८ ॥
तं मत्तमातङ्गवि[१६]लासगामी गच्छन्तमव्यग्र[१७]मना महात्मा ॥
सलक्ष्मणो [१८]राघवमप्रमत्तो ररक्ष धर्मेण बलेन चैव ॥ १२९ ॥

अदितेः इन्द्रस्यमातुः ॥ १२१ ॥ स्वास्थ्यं धैर्यं । नष्टकार्यार्थैः नष्टकार्यरूपप्रयोजनैः पुरुषैः। अयत्नेन यत्नाभावेन ॥१२२॥ अतो यत्नः कर्तव्य इत्याह—द्वाभ्यामुत्साह इत्यादिभ्यां ॥ १२३—१२४ ॥ कामे वृत्तो व्यापारो यस्य स तथा तस्यभावस्तत्त्वं । पृष्ठतः संन्यस्य तिरस्कृत्येत्यर्थः । आत्मानं कृतात्मानं शिक्षितमनस्कं । महात्मानं महाधैर्यं । नावबुध्यसे । तस्मात्त्यज्यतामित्यन्वयः । किं वात्सल्येनतप्यसे । साधुकारीसाधुर्भवति पापकारी पापी भवतीति भवद्भिरेव कृतांशास्त्रमर्यादां किं नावबुध्यसइत्यर्थः ॥ १२५ ॥ एवमिति । अत्र शोकमोहशब्दाभ्यां दयावात्सल्येउच्येते । तयोस्त्यागोनाम शास्त्रमर्यादानुसारेणचेतनरक्षणोद्योगः ॥ १२६ ॥ अभ्यतिक्रामत् अनित्यत्वादडभावः । पारिप्लवद्रुमां चञ्चलद्रुमां । अनेन भगवतः संसारिमण्डलाभिमुख्यंसूचितं ॥ १२७ ॥ सर्गार्थपुनःसंग्रहेणदर्शयति—द्वाभ्यां । विचार्य सीतामन्विष्येत्यर्थः ॥ १२८ ॥ मत्तगजवत् विलासेनगन्तुं शीलमस्यास्तीति तथा । अनेन वनदुर्गप्रदेशेपिनिर्भयसंचारित्वमुच्यते । अव्यग्रमनाः अचञ्चलचित्तः । अप्रकम्प्यरामविषयप्रेमभारइत्यर्थः । महात्मा अप्रच्युतधैर्यः । अप्रमत्तः गमनसौन्दर्यानुभवेष्यसक्तः । सः "रामे प्रमादं मा कार्षीः पुत्र भ्रातरि गच्छति" इति सुमित्रया संदिष्टः लक्ष्मणः कैङ्कर्यलक्ष्मीयुक्तः । तं सीतावियोगार्तं । गच्छन्तंमत्तमातङ्गगामिनमित्युक्तरीत्या गमनचारुतया सर्वान्वशीकुर्वन्तं राघवं । धर्मेण संस्तम्भेत्यादिराजनीतिकथनेन । बलेन तत्राप्येनंहनिष्यामीति स्वबलकथनेन च । ररक्ष निर्दुःखमक-

ति० दितेः असुरमातुः ॥ १२१ ॥ **रामानु०** स्वास्थ्यं स्वभावावस्थानं धैर्यमितियावत् ॥ १२२ ॥ **ति०** उत्साहमात्रं शत्रुसंहारेपौरुषं ॥ १२४ ॥ **ति०** कामवृत्तत्वं कामपरतन्त्रत्वं । शोकंपृष्ठतस्संन्यस्य कामजशोकसेवनेकामस्यवृद्धेस्तत्सेवनंपृष्ठतः कृत्वेत्यर्थः । महात्मानं रजस्तमोमलास्पृष्टचित्तं निरतिशयशौर्यधैर्यादिस्वभावचित्तंच । कृतात्मानं श्रुतिस्मृत्यादिषुगुरुभिश्शिक्षितस्वरूपं । किंनाववुध्यसे । यद्यपीश्वरस्यलोकवद्धर्माधर्माश्रयंचित्तंनास्ति । तथापि मायिकंतदाश्रयंतदस्ति । तत्स्वीकारेबाधकाभावात् ॥ १२५ ॥ **ति०** मोहः कामजः । मोहजश्चशोकः ॥ १२६ ॥ **ति०** विचार्य लक्ष्मणोक्तेर्युक्तत्वमितिशेषः ॥ १२८ ॥ **शि०** इष्टचेष्टः इष्टेरघुनाथेच्छाविषयीभूतेचेष्टाव्यापारोयस्य रामेप्सितसाधकइत्यर्थः ॥ **स०** बलेनरक्षणंचनिद्राद्यवन्योपद्रवपरिहारेण ॥ १२९ ॥

[पा०] १ क.—ट. यातिदितेर्गर्भं. २ क. ख. घ. वधिष्यामि. ३ क. ख. घ. ङ. च. ज.—ट. चेद्दास्यति. ४ ग. जानकीं. ५ ख. घ. विनष्ट. ग. विनष्टधैर्यार्थैः. ६ छ. झ. ट. रयत्नेनाधिगम्यते. क. ग. र्यत्नेनापिनगम्यते. ७ क. ग.—ट. सोत्साहस्यहिलोकेषुन. ख. सोत्साहस्यच. ८ क.—घ. छ. झ. ट. प्रतिलप्स्यामजानकीं. ङ. च. ज. प्रतिलप्स्यसिजानकीं. ९ च. ज. कामवृत्तित्वं. १० ग. संत्यज्य. ११ क. ग. ङ. च. ज. ञ. किंनबुध्यसे. १२ क. ङ.—ट. संबोधितस्तेन. १३ छ. झ. ट. त्यज्य. १४ क. ग. ङ.—ट. रामो. १५ क. ग. निर्दरकन्दरंच. घ. च.—ट. निर्झरकन्दरंच. ङ. वैगिरिकन्दरंच. १६ ङ.—ज. ञ. विलासगामिनं. १७ घ. ङ. मनोमहात्मा. १८ क. ग. च.—ट. राघवमिष्टचेष्टो.

तावृश्यमूकस्य समीपचारी चरन्ददर्शाद्भुतदर्शनीयौ ॥
शाखामृगाणामधिपस्तरस्वी वितत्रसे नैव चिचेष्ट किंचित् ॥ १३० ॥
स तौ महात्मा गजमन्दगामी शाखामृगस्तत्र चिरं चरन्तौ ॥
दृष्ट्वा विषादं परमं जगाम चिन्तापरीतो भयभारमग्नः ॥ १३१ ॥
तमाश्रमं पुण्यसुखं शरण्यं सदैव शाखामृगसेवितान्तम् ॥
त्रस्ताश्च दृष्ट्वा हरयोऽभिजग्मुर्महौजसौ राघवलक्ष्मणौ तौ ॥ १३२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे प्रथमः सर्गः ॥ १ ॥

द्वितीयः सर्गः ॥ २ ॥

रामलक्ष्मणदर्शिनासुग्रीवेण तयोर्वालिप्रेषितत्वबुद्ध्या सचिवैःसहभील्या गूढस्थानान्तरगमनम् ॥ १ ॥ हनुमता सयुक्तिकंसुग्रीवसमाश्वासनम् ॥ २ ॥ सुग्रीवेण रामलक्ष्मणभावपरीक्षणाय तौप्रतिहनुमत्प्रेषणम् ॥ ३ ॥

तौ तु दृष्ट्वा महात्मानौ भ्रातरौ रामलक्ष्मणौ ॥ वरायुधधरौ वीरौ सुग्रीवः शङ्कितोऽभवत् ॥ १ ॥
उद्विग्नहृदयः सर्वा दिशः समवलोकयन् ॥ न व्यतिष्ठत कस्मिंश्चिद्देशे वानरपुङ्गवः ॥ २ ॥
नैव चक्रे मनः स्थाने वीक्षमाणो महाबलौ ॥ कपेः परमभीतस्य चित्तं व्यवससाद ह ॥ ३ ॥

रोत् ॥ १२९ ॥ अथ सीताप्राप्तिबीजमुपक्षिपति—ताविति ॥ ऋश्यमूकस्य ऋश्यमूकाख्यपर्वतस्य । समीपचारी समीपसंचरणशीलः । वालिभयादिति शेषः । चरन् कदाचित्पम्पोपान्तेपर्यटन् । अद्भुतं यथा भवति तथा दर्शनीयौ । शाखामृगाणां वानराणां अधिपः सुग्रीवः । तरस्वी बलवान् । वितत्रसे तत्रास । व्यत्ययेनात्मनेपदं । भीतोऽभूत् । न चिचेष्ट न चिचेष्टे । व्यत्ययेन परस्मैपदं । स्तब्धोऽभूदित्यर्थः ॥ १३० ॥ तत्र पम्पावने । विषादचिन्ताभयहेतव उत्तरसर्गे व्यक्तीभविष्यन्ति ॥ १३१ ॥ न केवलं सुग्रीव एव त्रस्तः तत्सचिवा अपीत्याह—तमिति ॥ आश्रमं मतङ्गाश्रमं । पुण्यं धर्मवर्धकं । सुखं सुखकरं । शरण्यं मुनिजनवासयोग्यं । सदैव वानरसेवितान्तं । वानरसेवितमध्यमिति दुष्प्रवेशत्वोक्तिः । तौ दृष्ट्वा । हरयः वानराः । वित्रस्ताः मुनिवेषेणवालिप्रेरितौसमागताविति शङ्कयेति भावः । हरयः तौदृष्ट्वात्रस्ताःसन्तः आश्रममभिजग्मुरित्यन्वयः ॥ १३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने प्रथमः सर्गः ॥ १ ॥

अथ सुग्रीवेण हनुमत्प्रेषणं द्वितीये—तौ त्वित्यादि ॥ महात्मानौ महाशरीरौ । भद्राकृती इत्यर्थः । वरायुधधरौ अतएव वीरौ ॥ १ ॥ उद्विग्नहृदयः भीतमनस्कः ॥ २ ॥ स्थाने स्वस्थाने । निश्चलत्वइति यावत् । व्यवससाद दुःखितमभूत् ॥ ३ ॥

ति० वितत्रसेवितत्रास । वाल्यानीतत्वशङ्कयात्रासः ॥ विश्रान्तिमत्तस्यबभूवचित्तंइत्याधुनिकपाठे तस्यसुग्रीवस्यचित्तं तद्दर्शनेनविश्रान्तिमत् भयवद्बभूवेत्यर्थः ॥ १३० ॥ **ति०** भयभारभग्नः भयभारेणभग्नोत्साहः ॥ १३१ ॥ **ती०** तमाश्रमं मतङ्गशापाद्वालिनोदुष्प्रवेशत्वेनप्रसिद्धंमतङ्गाश्रमं । अयंश्लोकः उत्तरसर्गार्थसंग्राहकः । एवमेवान्येषुपुराणेषुपंपादर्शनेनरामस्यकामार्तत्वंप्रतिपादितं । अतएवरामोविरहभरेणभ्रमरादीञ्शशापेत्युक्तंस्कान्दे । "वैमुख्यंगन्धफल्यास्तुभ्रमरानशपत्प्रभुः । कोकान्निशीथेविश्लेषं पिकमन्यविवर्धनम् । चन्दनंसर्पनिलयंवायुंसर्पाशनंतथा । ज्योत्स्नांकलङ्कसंछन्नांशशापरघुनन्दनः ।" इति ॥ **रामानु०** हरयः सुग्रीवादयः । बहुवचनप्रयोगस्तुसचिवापेक्षया । एतदुपरितनसर्गेव्यक्तीभविष्यति ॥ १३२ ॥ इतिप्रथमस्सर्गः ॥ १ ॥

[पा०] १ क. ख. ग. ङ. च. ज. ञ. विश्रान्तिमत्तस्यबभूवचित्तं. २ छ. ज. झ. ट. चेष्टं. ३ घ. ततोमहात्मा. ४ ख.—ङ. छ.—ट. चरंश्चरन्तौ. ५ छ. ज. झ. ट. हरयोविजग्मुः. ६ ग. व्यतिष्ठत. ७ छ. झ. ट. स्थातुं.

चिन्तयित्वा स धर्मात्मा विमृश्य गुरुलाघवम् ॥ सुग्रीवः परमोद्विग्नः सर्वैरनुचरैः सह ॥ ४ ॥
ततः स सचिवेभ्यस्तु सुग्रीवः प्लवगाधिपः ॥ शशंस परमोद्विग्नः पश्यंस्तौ रामलक्ष्मणौ ॥ ५ ॥
एतौ वनमिदं दुर्गं वालिप्रणिहितौ ध्रुवम् ॥ छद्मना चीरवसनौ प्रचरन्ताविहागतौ ॥ ६ ॥
ततः सुग्रीवसचिवा दृष्ट्वा परमधन्विनौ ॥ जग्मुर्गिरितटात्तस्मादन्यच्छिखरमुत्तमम् ॥ ७ ॥
ते क्षिप्रमधिगम्याथ यूथपा यूथपर्षभम् ॥ हरयो वानरश्रेष्ठं परिवार्योपतस्थिरे ॥ ८ ॥
एकमेकायनगताः प्लवमाना गिरेर्गिरिम् ॥ प्रकम्पयन्तो वेगेन गिरीणां शिखराण्यपि ॥ ९ ॥
ततः शाखामृगाः सर्वे प्लवमाना महाबलाः ॥ बभञ्जुश्च नगांस्तत्र पुष्पितान्दुर्गसंश्रितान् ॥१०॥
आप्लवन्तो हरिवराः सर्वतस्तं महागिरिम् ॥ मृगमार्जारशार्दूलांस्त्रासयन्तो ययुस्तदा ॥ ११ ॥
ततः सुग्रीवसचिवाः पर्वतेन्द्रं समाश्रिताः ॥ संगम्य कपिमुख्येन सर्वे प्राञ्जलयः स्थिताः ॥ १२ ॥
ततस्तं भयसंविग्नं वालिकिल्बिषशङ्कितम् ॥ उवाच हनुमान्वाक्यं सुग्रीवं वाक्यकोविदः ॥ १३ ॥
संभ्रमस्त्यज्यतामेष सर्वैर्वालिकृते महान् ॥ मलयोऽयं गिरिवरो भयं नेहास्ति वालिनः ॥ १४ ॥
यस्मादुद्विग्नचेतास्त्वं प्रद्रुतो हरिपुङ्गव ॥ तं क्रूरदर्शनं क्रूरं नेह पश्यामि वालिनम् ॥ १५ ॥

धर्मे राजधर्मे आत्मा मतिर्यस्य स धर्मात्मा । अनुचरैः मन्त्रिभिः सह चिन्तयित्वा । गुरुलाघवं विमृश्य स्थाने पलायने च गुरुलाघवं विमृश्य च । परमोद्विग्नोऽभवत् ॥ ४ ॥ रामलक्ष्मणौ तत्स्वभावं शशंस ॥ ५ ॥ प्रणिहितौ चारौ । छद्मना ऋषिवेषव्याजेन ॥ ६ ॥ जग्मुः सुग्रीववचने हितत्वबुद्ध्येति शेषः ॥ ७ ॥ अधिगम्य नानादिक्षुपलायिताएकत्र समागम्य ॥ ८ ॥ पुनरपि गिरेर्गिरिं प्लवमानाः गिरीणां शिखराण्यपि प्रकम्पयन्तः । एकायनगताः क्रमेणैकस्थानगताः सन्तः । एकं एकाकिनं सुग्रीवमुपतस्थिर इत्यनुषङ्गः । एवमेकायनगता इति पाठे एवं उक्तरीत्या । एकायनगतास्ते प्रकम्पयन्तोभवन्निति योजना ॥ ९ ॥ दुर्गं गिरिः ॥१०॥ आप्लवन्तो ययुः न तु मन्दं ययुरित्यर्थः ॥ ११ ॥ पर्वतेन्द्रं ऋश्यमूकं । पर्यन्तपर्वतेषु तत्रतत्रगत्वा पुनस्तमेव ऋश्यमूकं ययुरित्यर्थः ॥ १२ ॥ वालिकिल्बिषेण वालिकपटेन शङ्कितं । वालिना प्रेषिताविमाविति शङ्कितमित्यर्थः ॥ १३ ॥ वालिकृते वालिनिमित्तं संभ्रमस्त्यज्यतां । मलय इतिपर्वतमात्रस्य नाम । अयंमलयः अयंपर्वतः । गिरिवरः ऋश्यमूक इत्यर्थः ॥ १४ ॥ वाली वेषान्तरधारी समागत इति भ्रमं वारयति—यस्मादित्यादिना ॥ यस्मात् वालिनः । क्रूरं क्रूरकर्मा-

स० गुरु गुरुकार्यं । लाघवं लघुकार्यं । स्वार्थिकोऽण् । यद्वा गुर्विति भावप्रधानः । तथाच कार्यगौरवंलाघवंचविमृश्य । अथवा अत्रावस्थानविषये गुरुलाघवं अतिलाघवंविमृश्येत्यर्थः ॥ **शि०** चिन्तयित्वा वालिबलंसंस्मृत्य । गुरुलाघवं तद्बलस्यगुरुत्वंस्वबलस्यलाघवंलघुत्वंच । विमृश्य निश्चित्य । वानरैस्सहपरमोद्विग्नआसेतिशेषः ॥ ४ ॥ **ति०** ततोविचारानन्तरंप्रस्थानेच्छयासचिवेभ्यश्शशंस । भयहेतुमितिशेषः ॥ ५ ॥ **ति०** जग्मुः सुग्रीवेणसहेतिशेषः । अन्यंशिखरमितिपाठे पुंस्त्वमार्षं ॥ ७ ॥ **रामानु०** अपिशब्दोभिन्नक्रमः । एवमेकायनगताअपि पूर्वोक्तप्रकारेणैकस्थानगताअपि । गिरीणांशिखराणिप्रकंपयन्तः गिरेर्गिरिंप्लवमानाः जग्मुरितिशेषः । अत्रगिरिशब्दोगिर्येकदेशवाची । एकमेकायनगताइतिपाठे एकं पलायनेनैकाकिनंयूथपर्षभंसुग्रीवमधिगम्य अतएवएकायनगताः एकस्थानगताः । परिवार्योपतस्थिरइतिपूर्वेणसंबन्धः ॥ **ति०** उक्तमेवविवृणोति—**एवमिति** । उक्तरीत्यास्थितिगतिभयाभयसुखदुःखादावेकायनंएकमार्गसमानत्वंगताः ॥ ९ ॥ **ति०** वालिकिल्बिषात् वालिप्रवर्तनयाकिल्बिषात् वधात् शङ्कितं ॥ **शि०** वालिकिल्बिषशङ्कितं वालिनिभासमानस्वापराधेनभीतं । अतएवभयसंत्रस्तं भयाभ्यांवालिप्रेषिताविमावितिसंभावनयाभयहेतुभ्यांसंत्रासवन्तंसुग्रीवं ॥ भयसंत्रस्तं भयसाधनेनभीतं ॥ १३ ॥ **शि०** यतः अयंगिरिर्मलयः मस्य भवद्विघातकवालिनः लयःऋषिशापाद्विध्वंसोयस्मिन्सः । अतइहवालिनोभयंनास्ति ॥ १४ ॥ **रामानु०** मलयोयंऋश्यमूकावयवःपर्वतः । “ पर्वतादृश्यमूकात्तुपुप्लुवेयत्रराघवौ ” इतिमलयस्यैवऋश्यमूकशब्देनवक्ष्यमाणत्वात् ॥ १४ ॥ **शि०** वालिनं

[पा०] १ क. ग. चिन्तयित्वातु. २ छ. झ. ट. सर्वैस्तैर्वानरैस्सह. ३ ख. ग. ङ. छ. झ. ञ. ट. एवमेकायन. च. एकायनगतास्तेपिधावमानाः. ४ ङ.—ट. शिखराणिच. ५ ङ.—ट. दुर्गमाश्रितान्. ६ छ. झ. ट. पर्वतेन्द्रेसमाहिताः. ७ क. ग. ङ.—ट. ततस्तूभयसंत्रस्तं. ८ ङ. ज. ञ. वाक्यकोविदं. ९ क. ग. ङ. ज. ञ. वालिकृतो. १० ङ. छ.—ट. विद्रुतो.

यस्मात्तव भयं सौम्य पूर्वजात्पापकर्मणः ॥ स नेह वाली दुष्टात्मा न[1] ते पश्याम्यहं भयम् ॥ १६ ॥
अहो शाखामृगत्वं ते व्यक्तमेव प्लवङ्गम ॥ लघुचित्ततयाऽऽत्मानं न स्थापयसि यो[2] मतौ ॥ १७ ॥
बुद्धिविज्ञानसंपन्न इङ्गितैः सर्वमाचर ॥ न ह्यबुद्धिं गतो राजा सर्वभूतानि शास्ति हि ॥ १८ ॥
सुग्रीवस्तु शुभं वाक्यं श्रुत्वा सर्वं हनूमतः ॥ ततः शुभतरं वाक्यं हनूमन्तमुवाच ह ॥ १९ ॥
दीर्घबाहू विशालाक्षौ शरचापासिधारिणौ ॥ कस्य न स्याद्भयं दृष्ट्वा ह्येतौ सुरसुतोपमौ ॥ २० ॥
वालिप्र[3]णिहितावेतौ शङ्केऽहं पुरुषोत्तमौ ॥ राजानो बहुमित्राश्च विश्वासो नो[4]त्र हि क्षमः ॥ २१ ॥
अरयश्च मनुष्येण विज्ञेयाश्[5]छन्नचारिणः ॥ विश्वस्तानाम[6]विश्वस्ता रन्ध्रेषु प्रहरन्ति हि ॥ २२ ॥
कृत्येषु वाली मेधावी राजानो बहु[7]दर्शनाः ॥ भवन्ति परहन्तारस्ते ज्ञेयाः प्राकृतैर्नरैः ॥ २३ ॥
तौ त्वया प्रा[8]कृतेनैव गत्वा ज्ञेयौ प्लवङ्गम ॥ इङ्गितानां प्रकारैश्च [9]रूपव्याभाषणेन च ॥ २४ ॥
[10]लक्षयस्व तयोर्भावं प्रहृष्टमनसौ यदि ॥ विश्वासयन्प्रशंसाभिरिङ्गितैश्च पुनःपुनः ॥ २५ ॥
ममैवाभिमुखं स्थित्वा पृ[11]च्छ त्वं हरिपुङ्गव ॥ प्रयोजनं प्रवेशस्य वनस्यास्य धनुर्धरौ ॥ २६ ॥
शुद्धात्मानौ यदि त्वेतौ जानीहि त्वं प्लवङ्गम ॥ [12]व्याभाषितैर्वा विज्ञेयौ[13] स्याद्दुष्टादुष्टता तयोः ॥ २७ ॥

णं ॥ १५ ॥ पापकर्मणः अनुजभार्यापहारिणः । भयं भयहेतुं ॥ १६ ॥ मतौ सम्यग्विचारे ॥ १७ ॥ बुद्धिः सामान्यतो ज्ञानं । विशेषतो ज्ञानं विज्ञानं । इङ्गितं अभिप्रायसूचको व्यापारः । सर्वं कार्यं । अबुद्धिं अबुद्ध्यादिकं ॥ १८ ॥ ततः शुभतरं तद्वाक्यादत्यन्तशुभं ॥ १९ ॥ दीर्घा बाहवो ययोस्तौ दीर्घबाहू । इत्येवं सर्वत्र समासः ॥ २० ॥ वालिप्रणिहितौ नाहं वाली समागत इतिबिभेमि किंतु तत्प्रेषिताविति मत्वेतिभावः । एतादृशतदीयपुरुषस्य का प्रसक्तिस्तत्राह—राजान इति । अत्र राजविषये ॥ २१ ॥ छन्नचारिणोऽरयः मनुष्येण शत्रुमता ज्ञेयाः । कुत इत्यत्राह—विश्वस्तानामिति । विश्वस्तानां शत्रूणां रन्ध्रेषु प्रमादेषुसत्सु । स्वयमविश्वस्ताः सन्तः प्रहरन्ति हि ॥ २२ ॥ कृत्येषु कर्तव्यकार्येषु । वाली मेधावी दूरदर्शी । स्वभावश्चायं राज्ञामित्याह—राजान इति । राजानः बहुदर्शनाः बहूपायज्ञाः । परहन्तारो भवन्ति । ते प्राकृतैः दीनवेषधरैः । नरैः ज्ञेयाः ॥ २३ ॥ प्राकृतेन प्राकृतवेषेण । इङ्गितानां भावसूचककायिकव्यापाराणां । प्रकारैः अवान्तरभेदैः । रूपेण सौम्यासौम्यलक्षणेन । व्याभाषणेन अन्योन्यसंभाषणेन च । तौ ज्ञेयौ ॥ २४ ॥ यदि प्रहृष्टमनसौ यदि शुद्धभावौ । तदा प्रशंसाभिः तदनुकूलेङ्गितैश्च पुनः पुनः विश्वासयन् ममैवाभिमुखं अनुकूलं यथा भवति तथा । स्थित्वा स्थापयित्वा । धनुर्धरौ धनुर्धरतयात्र वने प्रवेशस्य प्रयोजनं

इहनपश्यामि तस्येहागमनंनसंभावयामीत्यर्थः ॥ १५ ॥ **रामानु०** मतौ सम्यग्विचारविषयबुद्धौ ॥ १७ ॥ **ति०** ननुततोभयाभावेपितत्प्रेरिताद्भयंतत्राह—**बुद्धीति** ॥ १८ ॥ **टीका०** सुरसुतः सुरराजः तदुपमौ । "पार्थिवेतनयेसुतः" इत्यमरः ॥ २० ॥ **ति०** ननुवनचारिणावानरेणवालिनाकुतोऽनयोःप्रवर्तनातत्राह—**राजानइति** । बहुमित्राः जात्यन्तरेष्वपिमित्रवन्तः । यथा दशरथोगृध्रराजेनमित्रवान् । एवंवालिनापिनरमैत्र्यंसंभावितमितिभावः । **ति०** राजानोबहुमित्राः वेषान्तरधारिभिर्मित्रैः शत्रून्घातयिष्यन्तीतिभावः ॥ २१ ॥ **ती०** विज्ञेयाः शोधनीयाः ॥ २२ ॥ **ति०** प्राकृतेनेव उदासीनेनेव । व्याभाषणेन तत्तत्प्रसङ्गेदीयमानोत्तरेणच ॥ २४ ॥ **ति०** तयोर्मनुष्ययोः । यदित्वयिसमीपस्थिते प्रहृष्टमनसौ उत्तरप्रत्युत्तरादौसंतुष्टमनसौ । तदा तयोरभिमुखंस्थित्वा ममैवप्रशंसाभिः तद्बोधकवाक्यैः । इङ्गितैः मामकाभिप्रायबोधनैः । मयितौविश्वासयन्नस्यवनस्यप्रवेशस्यप्रयोजनं पृच्छ । यद्वा ममैवाभिमुखंयथातथास्थित्वाप्रशंसाभिः तयोस्स्तुतिभिः । इङ्गितैः स्वीयैः । तवात्मनिमयिचविश्वासयन्पृच्छेत्यन्वयः । स्वाभिमुखस्थितिकथनमन्यादृशवचनकथनसंभावनयातन्निरासायेतिबोध्यं ॥ २५—२६ ॥ **ति०** प्रश्नावसरंदर्शयति—**शुद्धेति** ।

[पा०] १ ख. नेह. २ ग. च. ज. मेमतौ. ३ छ. झ. प्रणिहितावेव. ४ घ. नास्तिहिक्षमः. ५ छ. झ. ञ. ट. श्छद्मचारिणः. ६ छ. झ. मविश्वस्ताश्छिद्रेषु. ७ क. ख. घ.—ट. बहुदर्शिनः. ८ च. झ. प्राकृतेनेव. ९ ख. घ. रूपेणाभाषणेनच. १० ज. लक्षयंश्च. ११ ख. विद्धित्वं. १२ ग. संभाषणैर्वा. क. व्याभाषणैर्वा. १३ छ. ज. झ. ट. रूपैर्वाविज्ञेयादुष्टतानयोः.

इत्येवं कपिराजेन संदिष्टो मारुतात्मजः ॥ चकार गमने बुद्धिं यत्र तौ रामलक्ष्मणौ ॥ २८ ॥
तथेति संपूज्य वचस्तु तस्य तत्कपेः सुभीमस्य दुरासदस्य च ॥
महानुभावो हनुमान्ययौ तदा स यत्र रामोतिबलश्च लक्ष्मणः ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे द्वितीयः सर्गः ॥ २ ॥

तृतीयः सर्गः ॥ ३ ॥

हनुमता भिक्षुवेषपरिग्रहेण श्रीरामलक्ष्मणवुपेत्य सप्रणामंसप्रशंसनंच तदीययाथात्म्यप्रश्नः ॥ १ ॥ तथा तयोःसुग्रीववृत्तान्तादिनिवेदनपूर्वकं तस्यतत्सख्याकाङ्क्षानिवेदनम् ॥ २ ॥ हनुमतोव्यवहारचातुरीतुष्टेनरामेण लक्ष्मणे हनुमतःसाङ्गसकलवेदवेत्तृत्वनिवेदनपूर्वकं तच्छ्लाघनम् ॥ ३ ॥ लक्ष्मणेन रामचोदनया हनुमन्तंप्रति रामस्यापिसुग्रीवसख्यापेक्षानिवेदनम् ॥ ४ ॥

वचो विज्ञाय हनुमान्सुग्रीवस्य महात्मनः ॥ पर्वतादृश्यमूकात्तु पुप्लुवे यत्र राघवौ ॥ १ ॥
कपिरूपं परित्यज्य हनुमान्मारुतात्मजः ॥ भिक्षुरूपं ततो भेजे शठबुद्धितया कपिः ॥ २ ॥
ततः स हनुमान्वाचा श्लक्ष्णया सुमनोज्ञया ॥ विनीतवदुपागम्य राघवौ प्रणिपत्य च ॥
आबभाषे तदा वीरौ यथावत्प्रशशंस च ॥ ३ ॥

पृच्छ ॥ २५—२७ ॥ यद्येतौ शुद्धात्मानौ तदा पुनरपि जानीहि । किं तेनेत्यत्राह—व्याभाषितैरिति । वाकारश्चार्थः । अदुष्टतेति च्छेदः । सुग्रीववचनं समीचीनममन्यतेत्याह—इतीति ॥ २८ ॥ संपूज्य श्लाघयित्वा । सुभीमस्य दुरासदस्येत्येताभ्यांसुनीतित्वं सूचितं । महानुभावः वेषान्तरधारणसमर्थः । सः हनुमान् । यत्ररामोलक्ष्मणश्च तंदेशंययावित्यन्वयः ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने द्वितीयः सर्गः ॥ २ ॥

प्रथमे सर्गे वैकुण्ठवासिनो भगवतः स्वीयेषु केषांचित्स्वपरत्वेवर्तमाने केषांचिद्विषयान्तरप्रावण्यमवलोक्यदूयमानमानसस्य दयावृत्तिविशेषःप्रतिपादितः । द्वितीये चेतनस्य भगवदपराधदण्डभीतस्य तस्मिन्नाभिमुख्यमुक्तं । अथ तल्लाभहेत्वाचार्यकृत्यं दर्शयति तृतीये—वच इत्यादि ॥ १ ॥ रूपान्तरपरिग्रहसामर्थ्यमुच्यते मारुतात्मजइति । शठबुद्धितया वञ्चकबुद्धितया । भिक्षुरूपं संन्यासिवेषं । " भिक्षुःपरिव्राट्कर्मन्दी पाराशर्यपि मस्करी " इत्यमरः ॥ २ ॥ तत इति सार्धः ॥ विनीतवत् सविनयं । उपागम्य प्रणिपत्य नमस्कृत्य । श्लक्ष्णया अपरुषया । सुमनोज्ञया अर्थतोतिरम्यया । वाचा आबभाषे । यथावत्परमार्थतया प्रशशंस च । अत्रभिक्षुरूपस्यहनुमतःप्रणामादन्यत्रापि भिक्षोर्गृहस्थादिविषये प्रणामः कर्तव्यएवेतिविज्ञायते । संन्यासिनो गृहस्थादिप्रणामनिषेधवच-

---

यद्येतौशुद्धात्मानौ अस्मासुद्वेषरहितौजानीहि ज्ञास्यसि तर्ह्येव तदभिमतंप्रयोजनंपृच्छ । उपसंहरति—**व्याभाषितैरिति**। दुष्टता-अदुष्टताचेतितन्त्रेणपदच्छेदः ॥ २७ ॥ **रामानु०** ताविल्यादि । रूपव्याभाषणेनचतयोर्भावंलक्षयस्व । यदिप्रदुष्टमनसौ प्रशंसाभिरिङ्गितैश्चपुनःपुनर्विश्वासयन् ममैवाभिमुखंयथाभवतितथास्थित्वा स्थापयित्वा । अस्यवनप्रवेशस्यप्रयोजनंपृच्छ । धनुर्धरावेतौशुद्धात्मानौयदि तदानीमपिपूर्वोक्तप्रकारेणतौमदीयौकृत्वा आगमनप्रयोजनंजानीहि ॥ २४—२७ ॥ इतिद्वितीयःसर्गः ॥ २ ॥

ति० विज्ञाय तात्पर्यतोज्ञात्वा ॥ १ ॥ **टीका०** भिक्षुरूपं नैष्ठिकब्रह्मचर्यरूपं ॥ **शि०** अशठबुद्धितया वानरत्वसूचितशठबुद्धित्वाभावेनोपलक्षितः । एतेन वानरत्वसूचितशठबुद्धिंमांविज्ञाय रामोनसंभाषेतेतिहनुमत्संभावनासूचिता । रूपान्तरमगृहीत्वा भिक्षुरूपंभेजइत्यनेन इमौदीनदयालूइतिहनुमताज्ञातमितिव्यञ्जितं । तेनतद्बुद्धेः प्रभावातिशयोव्यक्तः ॥ २ ॥ **ति०** यथावत्प्रश-

[**पा०**] १ क. ग. ञ. हरिराजेन. २ छ. झ. ट. तत्कपिः. ३ क. ख. ग. ङ.—ट. सुभीतस्य. ४ घ. छ. झ. ट. बलीसलक्ष्मणः. ५ ज. दृश्यमूकात्स. ६ च. भिक्षुवद्ब्रह्मचारीचरामदर्शनलालसः. ज. भिक्षुवद्ब्रह्मचारीचरामदर्शनलालसः. ७ क. ख. घ. छ. झ. ट. आबभाषेचतौवीरौ. ङ. च. ज. ञ. आबभाषेहितौ. ग. आबभाषेथतौ.

संपूज्य विधिवद्वीरो[1] हनुमान्मारुतात्मजः[2] ॥ उवाच कामतो वाक्यं[3] मृदु सत्यपराक्रमौ ॥ ४ ॥
राजर्षिदेवप्रतिमौ तापसौ संशितव्रतौ ॥ देशं कथमिमं प्राप्तौ भवन्तौ वरवर्णिनौ ॥ ५ ॥
त्रासयन्तौ मृगगणानन्यांश्च वनचारिणः ॥ पम्पातीररुहान्वृक्षान्वीक्षमाणौ समन्ततः ॥ ६ ॥
इमां नदीं शुभजलां शोभयन्तौ तपस्विनौ[4] ॥ धैर्यवन्तौ सुवर्णाभौ कौ युवां चीरवाससौ ॥ ७ ॥
निःश्वसन्तौ वरभुजौ पीडयन्ताविमाः प्रजाः ॥ सिंहविप्रेक्षितौ वीरौ सिंहातिबलविक्रमौ[5] ॥ ८ ॥
शक्रचापनिभे चापे गृहीत्वा शत्रुसूदनौ[6] ॥ श्रीमन्तौ रूपसंपन्नौ वृषभश्रेष्ठविक्रमौ ॥ ९ ॥

नान्यज्ञविषयाणीतिमन्तव्यानि । यदिहिज्ञानाधिकं दृष्ट्वा कर्ममात्रेणाधिको यतिर्नप्रणमेत् तर्हि " विप्राणांज्ञानतोज्यैष्ठ्यं " इति मनुवचनं विरुध्येत । नहि तत्प्रणामनिषेधकं मनुवचनं किंचिद्दृश्यते । किंत्वनारभ्याधीतमदृष्टाकरं यत्किंचिद्यतिप्रणामनिषेधवचनं किंवदन्तीसिद्धं । तस्य च विषयोऽज्ञगृहस्थादिरूपः । यत्तु कैश्चिदुक्तं [रामानुजीयं] अत्यद्भुतरामलक्ष्मणरूपदर्शनसंजातातिविस्मयस्सन्नङ्गीकृतं भिक्षुरूपं विस्मृत्य " अवशाःप्रतिपेदिरे " इतिवत्प्रणनामेति नविरोध इति । तन्न । उपक्रमविरोधात् । इङ्गितवचनादिभिःपरहृदयज्ञानार्थं हि प्रेषितोयं । नहि तथानियुक्तःसुनिपुणमतिःसचिवधुरंधरः स्वकार्यविरोधकरं परिगृहीताकारविरुद्धमविस्रम्भहेतुत्वेन परेङ्गिताताविष्कारहेतुभूतं कार्यंकुर्यात् । यदप्युक्तं [रामानु० तीर्थीयं] " रूपमेवास्यैतन्महिमानंव्याचष्टे " इति न्यायेन दर्शनमात्रेणैतौसुग्रीवविरोधिनिरसनदक्षाविति निश्चित्य परिगृहीतवेषान्तरस्य स्वस्य चारत्वंप्रकटयितुंनमस्कारं कृतवानिति न दोषइति । तदपिन । तथासति सुग्रीवोनामेत्यादिवक्ष्यमाणमेव प्रथमंकथयेत् । केचित्तु [टीका०] भिक्षुर्ब्रह्मचारी । अतो न दोष इत्याहुः । तन्न । तादृशभिक्षुकत्वस्यपूर्वमेव सिद्धत्वेन इदानीमपरिग्राह्यत्वात् । अपरे तु [रामानु०] सर्वथा कपिरूपं परित्यज्येत्युपक्रमात् उपरिष्टात्प्रच्छन्नत्वोक्त्या च मानुषरूपाङ्गीकारावश्यंभावात्तद्रूपविशिष्टं ब्रह्मचर्यमेवात्र भिक्षुशब्देनोच्यतइतिनविरोध इत्यूचिरे । तत्पक्षेतु पूर्वोक्तयादिशादूषणंचिन्त्यं ॥ ३ ॥ कामतः भक्त्या । पूर्वोक्तप्रशंसा भक्तिकृता नतु केवलपरीक्षाकृतेति भावः ॥ ४ ॥ राजर्षीत्यादिश्लोकद्वयं । मृगगणान् अन्यान्वनचारिणश्च । त्रासयन्तौ समन्ततः पम्पातीररुहान्वृक्षान् वीक्षमाणौ च भवन्तौ वरवर्णिनौ स्निग्धरूपवन्तौ । कर्मधारयादपि मत्वर्थीयो दृष्टचरः । अतएव राजर्षिदेवप्रतिमौ । संशितव्रतौ तीक्ष्णव्रतौ । अतएव तापसौ तपस्विवेषौ भूत्वा । इमं दुर्गमं देशं कथं प्राप्तौ ॥ ५–६ ॥ इमामित्यादिसार्धश्लोकत्रयमेकान्वयं । पम्पायाःसरस्त्वेपि स्वल्पतयापूर्वापरप्रवाहवत्त्वेन नदीत्वमविरुद्धं । शोभयन्तौ । स्वतेजसेति शेषः । सुवर्णाभौ रामस्य श्यामत्वेपि लक्ष्मणस्य पीतवर्णत्वाच्छत्रिन्यायात्सुवर्णकान्तित्वं । निःश्वसन्तौ वनसञ्चारायासात् । वरभुजौ सुन्दरभुजौ । हस्तिहस्तेत्यनेन दैर्घ्यपीवरत्वयोर्वक्ष्यमाणत्वात् । इमाः प्रजाः पक्षिमृगादीन् । पीडयन्तौ । अपूर्वदर्शनेन विद्रावकावित्यर्थः । सिंहस्येवविप्रेक्षितं वीक्षणं ययोस्तौ । सिंहातिबलविक्रमौ सिंहातिशायिबलपराक्रमौ । शक्रचापनिभेइन्द्रधनुस्तुल्ये चापे गृहीत्वा । शत्रुसूदनौ शत्रुसंहारकौ । नीलभेदपरभागतयाधनुषोराभरणत्वं शत्रुसंहारकत्वेनायुधकोटिप्रविष्टत्वंचदर्शितमाभ्यांविशेषणाभ्यां । श्रीमन्तौ कान्तिमन्तौ । रूपसंपन्नौ सौन्दर्ययुक्तौ । वृषभश्रेष्ठविक्रमौ वृषभश्रेष्ठगमनौ । द्युतिमन्तौ तेजस्विनौ । तेजस्तु श्रियोभिन्नमिति न पुनरुक्तिः । एवंभूतौ युवां कावि-

शंस नतुमिथ्यास्तुतिरित्यर्थः ॥ ३ ॥ **रामानु०** कामतः सुग्रीवोपदेशाविरुद्धस्वेच्छातः ॥ **शि०** कामतः सुग्रीवेच्छानुसारात् ॥ ४ ॥ **रामानु०** वर्णिनौ प्रशस्तवर्णौ । वरौचतौवर्णिनौचेतिविग्रहः ॥ **ति०** वरवर्णिनौ ब्रह्मचारिश्रेष्ठौ ॥ ५ ॥ **ति०** समन्ततोवीक्षमाणौ किंचिद्वस्त्वन्वेषमाणाविवेत्यर्थः ॥ ६ ॥ **ति०** इमांनदीमिति सरस्यपिविस्तृतत्वेननदीत्वोपचारइतिकेचित् । नद्येवेत्यन्ये ॥ **शि०** द्रुतसुवर्णस्यश्यामत्वेनदृश्यमानत्वात् अद्रुतस्यचगौरवर्णत्वेनदृश्यमानत्वात्सुवर्णाभावितिनविरुद्धं । सुवर्णशब्दे-

[पा०] १ क. ख. घ.—ट. द्वीरौ. २ छ. झ. ट. न्वानरोत्तमः. ३ ख. वाग्भिर्मृद्वीभिस्सत्यविक्रमौ. ४ क—ट. तरस्विनौ. ५ झ. महाबलपराक्रमौ. ६ ङ.—ट. शत्रुनाशनौ. क. ग. घ. शत्रुनाशने.

हस्तिहस्तोपमभुजौ द्युतिमन्तौ नरर्षभौ ॥ १० ॥
प्रभया पर्वतेन्द्रोऽयं युवयोरवभासितः ॥ ११ ॥
राज्यार्हावमरप्रख्यौ कथं देशमिहागतौ ॥ पद्मपत्रेक्षणौ वीरौ जटामण्डलधारिणौ ॥ १२ ॥
अन्योन्यसदृशौ वीरौ देवलोकादिवागतौ ॥ यदृच्छयेव संप्राप्तौ चन्द्रसूर्यौ वसुन्धराम् ॥ १३ ॥
विशालवक्षसौ वीरौ मानुषौ देवरूपिणौ ॥ सिंहस्कन्धौ महोत्साहौ समदाविव गोवृषौ ॥ १४ ॥
आयताश्च सुवृत्ताश्च बाहवः परिघोपमाः ॥ सर्वभूषणभूषार्हाः किमर्थं न विभूषिताः ॥ १५ ॥
उभौ योग्यावहं मन्ये रक्षितुं पृथिवीमिमाम् ॥ ससागरवनां कृत्स्नां विन्ध्यमेरुविभूषिताम् ॥ १६ ॥
इमे च धनुषी चित्रे श्लक्ष्णे चित्रानुलेपने ॥ प्रकाशेते यथेन्द्रस्य वज्रे हेमविभूषिते ॥ १७ ॥
संपूर्णा निशितैर्बाणैस्तूणाश्च शुभदर्शनाः ॥ जीवितान्तकरैर्घोरैः श्वसद्भिरिव पन्नगैः ॥ १८ ॥
महाप्रमाणौ विस्तीर्णौ तप्तहाटकभूषितौ ॥ खड्गावेतौ विराजेते निर्मुक्ताविव पन्नगौ ॥ १९ ॥
एवं मां परिभाषन्तं कस्माद्वै नाभिभाषथः ॥ २० ॥
सुग्रीवो नाम धर्मात्मा कश्चिद्वानरयूथपः ॥ वीरो विनिकृतो भ्रात्रा जगद्भ्रमति दुःखितः ॥ २१ ॥

त्यन्वयः ॥ ७–१० ॥ प्रभयेत्यर्धं ॥ ११ ॥ राज्येत्यादित्रय एकान्वयाः । अमरप्रख्यौ देवतुल्यपराक्रमौ । देवलोकादागतौ वीराविवस्थितौ । यदृच्छया दैवात् । वसुन्धरांप्राप्तौ चन्द्रसूर्याविव स्थितौ । देवरूपिणौ देवतुल्यरूपिणौ । वीरौ मानुषौ युवां राज्यार्हावपि राज्यं त्यक्त्वा वीरौ जटामण्डलधारिणौ अविच्छिन्नजटामण्डलधारिणौ भूत्वा । इहदेशं वनदेशं । कथं किमर्थं । आगतौ । समस्तराजलक्षणलक्षितयोर्युवयोः राज्यभोगएवोचितः । नतु वनवास इतिभावः ॥ १२–१४ ॥ आयताः आजानुविलम्बिनः । सुवृत्ताः भुजगभोगवद्वृत्ताः । बाहवः रामस्यदक्षिणोबाहुरितिलक्ष्मणस्य रामबाहुत्वात्तद्बाहुभ्यां बहुवचनं । यद्वा हनुमतो भक्तत्वेन तस्य चतुर्भुजवेषेण दृश्योऽभवत् । यद्वा द्वयोर्बाहुचतुष्टयवत्त्वाद्बहुवचनं । परिघोपमाः परिघोगदाविशेषः तदुपमाः । स्वसौन्दर्यानुभवपराणां समस्तविरोधिनिवर्तनक्षमा इत्यर्थः । सर्वभूषणभूषार्हाः "आभरणस्याभरणं" इत्युक्तरीत्या भूषणान्यपि भूषयितुमर्हाः । किमर्थंनविभूषिताः इमान् भूषणैरलंकृत्य आभरणाभरणत्वं किमितिनप्रकाशितमित्यर्थः । यद्वा दृष्टिदोषपरिहाराय एतादृशबाहुसौन्दर्यमाच्छादयितव्यं । तत्किमर्थं नाच्छादितमितिभावः । यद्वा आभरणच्छन्नसौन्दर्यमेवालमस्मद्वशीकरणाय । अधिकं निरावरणसौन्दर्यप्रदर्शनमितिभावः । यद्वा राजकुमाराणां क्षणमात्रं ताम्बूलाभावेम्लानतावत्क्षणमात्रविरहेपि स्थातुमनर्हा भूषाःकिमर्थं विश्लेषिताइतिभावः । यद्वा एवं भूषणविरहःकस्यवा शत्रोर्मूलघातायेतिभावः । अनेन अप्रतिहतसंकल्पत्वेपि नित्यसूरीन्विहाय चतुर्धावतरणे को हेतुरित्युक्तं ॥ १५ ॥ विन्ध्यमेरुविभूषितामिति दृष्टान्तार्थः—यथा विन्ध्यमेरू भूरक्षकौ तथा भवन्तावपीति ॥ १६ ॥ चित्रे लोकेएतादृशधनुषोरदर्शनादद्भुतावहे । वज्रे इत्यभूतोपमा ॥ १७ ॥ तूणा इतिबहुवचनं एकैकस्य पार्श्वद्वयेपि तूणीरद्वयसत्त्वात् ॥ १८ ॥ महाप्रमाणाविति दीर्घत्वं । विस्तीर्णाविति विशालता । तप्तहाटकं द्रुतकनकं । निर्मुक्तौ निर्मुक्तत्वचौ ॥ १९ ॥ परिभाषन्तं पुनःपुनर्भाषमाणं । नाभिभाषतः नाभिभाषेथे । व्यत्यय आर्षः ॥ २० ॥ एवं स्ववाक्सौष्ठवेन तूष्णींभूतौदृष्ट्वास्वका-

नावस्थाद्वयापन्नयोर्ग्रहणेबाधकाभावात् ॥ **ति०** शोभनोवर्णआभाकान्तिश्चययोस्तौ ॥ ७ ॥ **ती०** एकत्वेनप्रसिद्धस्यापिवज्रायुधस्यानेकत्वकल्पनमुपमेयानेकत्वनिबन्धनमित्यविरुद्धं ॥ **स०** अनेकेन्द्रापेक्षयावज्रेइत्युक्तिः ॥ १७ ॥ **ति०** ननुकस्त्वंकस्यवा यस्या-

[पा०] १ छ. झ. ट. पर्वतेन्द्रोसौ. २ ङ. च. ज. ञ. देशमुपागतौ. ३ ङ.—ट. दिहागतौ. ४ घ. ङ. च. ज. ञ. यदृच्छयेह. ५ क. ख. घ. च. ज. ञ. महासत्वौ. ६ ग. सुधनुषी. ७ छ. झ. ट. संपूर्णाश्चशितैः. ८ ख. स्तूण्यश्च. ९ क. ख. ङ.—ट. ज्वलद्भिरिव. ग. ज्वलद्भिरिवपावकैः. १० क. ख. ग. ङ. च. छ. झ. ञ. ट. विपुलौ. घ. विवृतौ. ११ ज. झ. ट. भूषणौ. १२ ग. ङ.—ट. निर्मुक्तभुजगाविव. क. निर्मुक्तौभुजगाविव. १३ क. ख. ग. कस्मान्नैवाभिभाषतः. १४ छ. झ. ट. द्वानरपुङ्गवः.

प्राप्तोऽहं प्रेषितस्तेन सुग्रीवेण महात्मना ॥ राज्ञा वानरमुख्यानां हनूमान्नामवानरः[१] ॥ २२ ॥
युवाभ्यां [२]सह धर्मात्मा सुग्रीवः सख्यमिच्छति ॥ तस्य मां सचिवं [३]वित्तं वानरं पवनात्मजम् ॥२३॥
भिक्षुरूप[४]प्रतिच्छन्नं सुग्रीवप्रियकां[५]म्यया ॥ ऋश्यमूकादिह प्राप्तं कामगं [६]कामरूपिणम् ॥ २४ ॥
एवमुक्त्वा तु हनुमांस्तौ वीरौ रामलक्ष्मणौ ॥ [७]वाक्यज्ञौ वाक्य[८]कुशलः पुनर्नोवाच किंचन ॥२५॥
[९]एतच्छ्रुत्वा वचस्तस्य रामो लक्ष्मणमब्रवीत् ॥ प्रहृष्टवदनः श्रीमान्भ्रातरं पार्श्वतः स्थितम् ॥ २६ ॥
सचिवोऽयं कपीन्द्रस्य सुग्रीवस्य महात्मनः ॥ तमेव काङ्क्षमाणस्य ममान्तिक[१०]मुपागतः ॥ २७ ॥
[११]तमभ्यभाष सौमित्रे सुग्रीवसचिवं कपिम् ॥ वाक्यज्ञं मधुरैर्वाक्यैः स्नेहयुक्त[१२]मरिंदम ॥ २८ ॥
नानृग्वेदविनीतस्य नायजुर्वेदधारिणः ॥ नासामवेदविदुषः शक्यमेवं [१३]प्रभाषितुम् ॥ २९ ॥
नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् ॥ बहु व्याहरताऽनेन न किंचिदपशब्दितम् ॥ ३० ॥

र्थमावेदयति—सुग्रीव इत्यादिना । विनिकृतः वञ्चितः ॥ २१ ॥ महात्मना महाबुद्धिना ॥ २२ ॥ वित्तं विदेर्लोटि मध्यमपुरुषद्विवचनं ॥ २३ ॥ तर्हि कथं भिक्षुरसीत्यत्राह—भिक्ष्विति ॥ २४ ॥ नोवाच । तद्वचनश्रवणेच्छयेतिभावः ॥ २५ ॥ एतदिति । हनुमन्तंस्तोतुंलक्ष्मणं प्रत्युक्तिः ॥ २६ ॥ उपागतः । स एव सचिवद्वारेति शेषः ॥ २७ ॥ स्नेहयुक्तं । मयि सुग्रीवेचप्रीतियुक्तमित्यर्थः । अभ्यभाष अभिभाषस्व । अडागमपरस्मैपदे आर्षे । मन्त्रिणा स्वामिनो वचनं न नीतिरिति सौमित्रिं नियोजयति ॥ २८ ॥ अथ चेतनोज्जीवनस्याचार्यमुखमन्तरेणासंभवादाचार्यलाभं दर्शयति—नानृग्वेदेत्यादिना ॥ " आचार्यो वेदसंपन्नो विष्णुभक्तो विमत्सरः । मन्त्रज्ञो मन्त्रभक्तश्च सदा मन्त्रार्थदः शुचिः ॥ गुरुभक्तिसमायुक्तःपुराणज्ञोविशेषतः । एवंलक्षणसंपन्नो गुरुरित्यभिधीयते " इत्युक्तमाचार्यलक्षणंदर्शयति । ऋग्वेदेषु विनीतस्य शिक्षितस्य । विनयधारणवेदनानि सर्वत्रवेदेषुयोज्यानि । यद्वा प्रतिवर्णस्वरभूयस्त्वेनमनोनियमनेन सावधानोच्चार्यत्वादृग्वेदविनीतस्येत्युक्तिः । एकैकानुवाकेअनुवाकान्तरवाक्यासाङ्कर्येणधारणस्यदुष्करत्वाद्यजुर्वेदधारिणइत्युक्तं । ऊहरहस्यादिगर्भितगानविशेषाणांदुर्विज्ञेयत्वात् सामवेदविदुष इति । आथर्वणस्याध्ययनादिनियमाभावादनुक्तिः । एवं प्रभाषितुं । देशं कथमिमं प्राप्तावित्यारभ्य उक्तरीत्या व्यक्तंवक्तुं न शक्यमिति । अनृग्वेदविनीतस्य एवं प्रभाषितुंन शक्यं । अयजुर्वेदधारिण एवंप्रभाषितुं नशक्यं । असामवेदविदुषः एवंप्रभाषितुं नशक्यमिति प्रत्येकमन्वयः । प्रत्येकं नञ्प्रयोगात् दार्ढ्यार्थव्यतिरेकमुखेनोक्तिः । अनृग्वेदविनीतस्य " उभौ योग्यावहं मन्ये रक्षितुं पृथिवीमिमाम् " इत्यादिनोक्तसृष्टिस्थितिसंहारकर्तृत्वं वक्तुं नशक्यं । ऐतरेयके हि " ब्रह्मवा इदमेक एवाग्र आसीत् " इत्यादिना तथात्वंप्रथमतः प्रतिपाद्यते । अयजुर्वेदधारिणः " मानुषौ देवरूपिणौ " इत्यादिना " अजायमानो बहुधा विजायते " इत्युक्तावताररहस्यं वक्तुं न शक्यं । असामवेदविदुषः "सुवर्णाभौ पद्मपत्रेक्षणौ " इत्येवं भाषितुं न शक्यते । छान्दोग्येहि " अथ य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यते " इत्यारभ्य " तस्य यथाकप्यासं पुण्डरीकमेवमक्षिणी " इत्याम्नायते ॥ २९ ॥ न केवलं वेदाध्ययनं अङ्गाध्ययनंच कृतमित्याह—नूनमिति ॥ तत्र हेतुमाह—बह्विति । अपशब्दितं अपकृष्टं नशब्दितं । अत्रादौ यदित्यध्याहार्यं । व्याकरणं

स्माभिःप्रत्युत्तरंदेयंतत्राह—**सुग्रीवइति** । सुग्रीवस्याक्षुद्रत्वबोधनायतत्स्तुतिपूर्वकमुक्तिः । विनिकृतः निरस्तः ॥२१॥ **ति०** ननुत्वद्राजेनास्मत्समीपेप्रेषणंकिमर्थं । तत्राह—**युवाभ्यामिति** ॥२३॥ **ति०** ननुवानरराजसचिवस्यमानुषंरूपंकुतस्तत्राह—**भिक्षुरूपेति** । अनेनशुद्धंवानररूपत्वमेवनेत्यपिबोध्यं ॥ २४ ॥ **शि०** वाक्यज्ञः वाक्यतात्पर्यज्ञाता । वाक्यकुशलः वाक्यप्रयोगेनिपुणः ॥ २५ ॥ **रामानु०** नकिंचिदपशब्दितमित्यनेन संस्कृतभाषयैवव्यवहृतवानित्यवगम्यते ॥ **ति०** ननुवेदमात्राध्यायिनान किंचिद्राजमन्त्रादिज्ञातुंशक्यंतत्राह—**नूनमिति** । कृत्स्नं पदतदर्थस्वरूपनिर्णयोपयोगिन्यायसहितं । व्याकरणबोध्यसाधुत्वस्या-

[पा०] १ ख. हनूमान्मारुतात्मजः. २ झ. ट. सहि. ३ क. ग.—च. ज. ट. विद्धि. ४ घ. परिच्छन्नं. ५ क. ग. ङ.—ट. कारणात्. ६ छ. ज. झ. कामचारिणं. ७ ट. वाक्यज्ञो. ८ ख. वाक्यकुशलौ. ९ ङ. च. ज. ञ. तच्छ्रुत्वावचनंतस्य. ख. एतच्छ्रुत्वाशुभंवाक्यं. १० छ. झ. ट. मिहागतः. ११ ख. घ. अभिभाषस्व. १२ छ. झ. मरिन्दमं. १३ छ. झ. विभाषितुं.

न मुखे [1]नेत्रयोर्वाऽपि ललाटे च भ्रुवोस्तथा ॥ अन्येष्वपि च [2]गात्रेषु दोषः संविदितः क्वचित् ॥३१॥
[3]अविस्तरमसंदिग्धमविलम्बित[4]मद्रुतम् ॥ उरःस्थं कण्ठगं वाक्यं [5]वर्तते मध्यमे स्वरे ॥ ३२ ॥
संस्कारक्रमसंपन्ना[6]मद्रुतामविलम्बिताम् ॥ उच्चारयति कल्याणीं वाचं हृदय[7]हारिणीम् ॥ ३३ ॥
अनया चित्रया वाचा त्रिस्थानव्यञ्जनस्थया ॥ कस्य नाराध्यते चित्तमुद्यतासेररेरपि ॥ ३४ ॥
एवंविधो यस्य दूतो न भवेत्पार्थिवस्य तु ॥ सिध्यन्ति हि कथं तस्य कार्याणां गतयोऽनघ ॥३५॥

श्रुतं । अतो नापशब्दितं । कृत्स्नं श्रुतम् । अतो न किंचिदपशब्दितं । प्रकृतिप्रत्ययसमाससन्ध्यादिषु किंचिदपि नापभ्रंशितमित्यर्थः । बहुधा श्रुतंएकवारश्रवणे क्वचिदन्यथाभावोपि स्यात् ॥ ३० ॥ शिक्षा चानेन श्रुतेत्याह चतुर्भिर्न मुख इत्यादिभिः ॥ लोके केषांचिद्व्यवहारदशायां मुखादिषु सर्वत्र यत्र कुत्रापिवा विकारोदृश्यते न तथात्रेति भावः । दोषः विकृतिः । न संविदित इत्यनेन स्वेन सूक्ष्ममवलोकितमिति गम्यते । तदुक्तं शिक्षायां । "गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः । अनर्थज्ञोल्पकण्ठश्च षडेते पाठकाधमाः ॥ न शिरः कम्पयेद्गात्रं भ्रुवौ चाप्यक्षिणी तथा । तैलपूर्णमिवात्मानं तत्तद्वर्णे प्रयोजयेत् " इति ॥ ३१ ॥ एवमुच्चारणशक्तिरुक्ता । अथवाक्यप्रयोगचातुरीं दर्शयति—अविस्तरमिति ॥ अविस्तरं शब्दप्रपञ्चरहितं । " प्रथनेवावशब्दे " इति घञोनिषेधात् " ऋदोरप् " इत्यप्प्रत्ययः । असंदिग्धं पदवर्णसंदेहरहितं । अविलम्बितं विलम्बितत्वे स्वाशक्तिःप्रकटिता स्यात् । अद्रुतं द्रुतोच्चारणे परप्रत्यायनं न स्यात् । उरःस्थं मन्द्रं । कण्ठगं मध्यमं । तादृशं वाक्यं मध्यमे स्वरे वर्तते । न मन्द्रं न मध्यमं न द्रुतं न विलम्बितं चेत्यर्थः । इदं चतुर्दशदोषाभावानामुपलक्षणं । तथाह शिक्षाकारः " शङ्कितं भीतमुद्घृष्टमव्यक्तमनुनासिकम् । काकुस्वरं शीर्षगतं तथा स्थानविवर्जितम् ॥ विस्वरं विरसं चैव विश्लिष्टं विषमान्वितम् । व्याकुलं तालुभिन्नं च पाठदोषाश्चतुर्दश " इति ॥ अन्यत्राप्युक्तं " उपांशुदष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम् । निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं नतु सानुनास्यम् ॥ ३२ ॥ एवं पाठदोषा उक्ताः । अथ तद्गुणानाह—संस्कारेति । संस्कारो व्याकरणकृता शब्दशुद्धिः व्यक्तपदत्वमिति यावत् । क्रमः वर्णानांक्रमिकता । व्यक्ताक्षरत्वमिति यावत् । कल्याणीं इतरगुणवतीं । हृदयहारिणीं मधुरां । वाणीं उच्चारयति उच्चरति । तदिदमुक्तं शिक्षायां । " माधुर्यमक्षरव्यक्तिः पदच्छेदस्तथाऽत्वरा। धैर्यं लयसमत्वं च षडेतेपाठकागुणाः " इति ॥ ३३ ॥ माधुर्यपराकाष्ठामाह—अनयेति॥ चित्रया आश्चर्यावहया । त्रिस्थानानि उरःकण्ठशिरांसि । व्यज्यन्ते एषु वर्णाइतिव्यञ्जनानि । त्रिस्थानरूपव्यञ्जनेषु तिष्ठतीति तथा । तथात्वं च न तदुत्पन्नत्वं । शिरस्यत्वस्य निषिद्धत्वात् । शीर्षगतं तथेति ह्युदाहृतं । किंतु उदात्तानुदात्तस्वरितवत्त्वं । तथोक्तं शिक्षायां " अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः । स्वरितः कण्ठमूलीयः पार्श्वास्ये प्रचयस्य तु " इति ॥ नाराध्यते न तोष्यते । कस्येत्यस्य विवरणं उद्यतासेररेरपीति । उद्यतासेः छेत्तुमुद्धृतासेरित्यतिक्रूरतोक्तिः । अनेन हनुमदादिभी रामादीनां संस्कृतभाषयैव व्यवहार इति गम्यते ॥ ३४ ॥ एवं हनुमतो वाक्चातुरीमभिनन्द्य बुद्धिचातुरीमभिनन्दति—एवंविध इति ।

र्थघटितत्वात् । अनेनसर्वज्ञत्वंसूचितं । तथाश्रवणेहेतुमाह—**बह्विति** ॥ ३० ॥ इङ्गितैरप्यसौविश्वासयोग्यइत्याह—**नमुखइति** । दोषःसंविदितः । व्यवहारकालेइतिशेषः ॥ ३१ ॥ **ति०** अव्यथं नविद्यतेश्रोतृश्रुतेर्व्यथायस्मात्तादृशं ॥ तेनाश्रुतिकटुवर्णमित्यर्थः । उरस्स्थं मध्यमारूपेण । कण्ठगं वैखरीरूपेण । कण्ठविवराच्छ्रोतृश्रोत्रंगतं । अतएवमध्यमस्वरं नात्युच्चैः नातिनीचैः ॥ ३२ ॥ **ति०** संस्कारक्रमसंपन्नां संस्काराणांक्रमे क्रमेणजनने संपन्नांसमर्थां । "विशिष्टानुपूर्वीविशेषरूपेणपदादीनांग्रहणायक्रमवत्तत्तद्वर्णाकारसंस्कारानन्तःकरणउत्पाद्यतत्क्रमेणक्रमवद्वर्णावभासपदवाक्यज्ञानं " इतिवाक्यप्रदीपादौस्पष्टं । तेनमध्यमवृत्त्योच्चारणंसूचितं । तदाह—**अद्रुतामविलंबितामिति** । अतएवहृदयहर्षिणीं ॥ ३३ ॥ **ति०** कार्याणांगतयः परिपाकाः ॥ ३५ ॥

[पा०] १ छ. झ. ट. नेत्रयोश्चापि. २ क. ग. ङ.—ट. सर्वेषु. ३ घ. अविस्वरं. ४ क. ग. ङ.—ज. मव्ययं. ख. झ. ब. ट. मव्यथं. ५ ङ. च. ज. ञ. मध्यमेवर्ततेस्वरे. छ. झ. ट. वर्ततेमध्यमस्वरं. ख. वर्ततेमध्यमस्वरे. ६ क. मन्यूनाधिकविस्तरां. ७ घ.—ट. हर्षिणीं.

एवं गुण[1]गणैर्युक्ता यस्य स्युः कार्यसाधकाः ॥ तस्य सिद्ध्यन्ति सर्वा[2]ऽर्था [3]दूतवाक्यप्रचोदिताः ॥३६॥
एवमुक्तस्तु सौमित्रिः सुग्रीवसचिवं कपिम् ॥ अभ्यभाषत वाक्यज्ञो वाक्यज्ञं पवनात्मजम् ॥ ३७ ॥
विदिता नौ गुणा विद्वन्सुग्रीवस्य महात्मनः ॥ तमेव चावां मार्गावः सुग्रीवं प्लवगेश्वरम् ॥ ३८ ॥
यथा ब्रवीषि हनुमन्सुग्रीववचनादिह ॥ तत्तथा हि करिष्यावो वचनात्तव सत्तम ॥ ३९ ॥

तत्तस्य वाक्यं निपुणं निशम्य प्रहृष्टरूपः पवनात्मजः कपिः ॥
मनः समाधाय जयोपपत्तौ सख्यं तदा कर्तुमियेष ताभ्याम् ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः ॥ ४ ॥

हनुमता श्रीरामंप्रति पंपासंप्राप्तिहेतुप्रश्नः ॥ १ ॥ लक्ष्मणेन रामचोदनयातंप्रति सीतावियोगान्तरामवृत्तान्तकथनपूर्वकं कबन्धवचनानुवादेन रामागमनस्य सुग्रीवसख्यसंपादनफलकत्वोक्तिः ॥ २ ॥ हनुमता रामलक्ष्मणौप्रति सुग्रीवस्य समानदुःखतानिवेदनेन रामप्रसादापेक्षितया तेनसीतान्वेषणेसाहाय्यकरणोक्त्यानिजरूपपरिग्रहणपूर्वकंतयोःस्वस्कन्धारोपणेनऋश्यमूकप्रापणम् ॥ ३ ॥

ततः [5]प्रहृष्टो हनुमान्कृत्यवानिति तद्वचः ॥ श्रुत्वा [6]मधुरसंभाषं सुग्रीवं मनसा गतः ॥ १ ॥
[7]भव्यो राज्यागमस्तस्य सुग्रीवस्य महात्मनः ॥ [8]यदयं कृत्यवान्प्राप्तः कृत्यं चैतदुपागतम् ॥ २ ॥
ततः परमसंहृष्टो हनुमान्[9]प्लवगर्षभः ॥ प्रत्युवाच ततो [10]वाक्यं रामं [11]वाक्यविशारदः ॥ ३ ॥

एवंविधः एवंप्रष्टा । अस्मत्प्रशंसाव्याजेन कुलगोत्रनामधेयराज्यत्यागकारणादीनां प्रष्टा । गतयः सिद्धयः ॥ ३५ ॥ उक्तमर्थमन्वयमुखेनापि दर्शयति—एवमिति ॥ दूतवाक्यप्रचोदिताः । दूतवाक्यमूलाएवसिद्ध्यन्ति । नप्रधानापेक्षा इतिभावः ॥ ३६ ॥ वाक्यज्ञो वाक्यज्ञमित्युक्त्या यथारीत्या हनुमतोक्तं तथैवसौमित्रिणापीत्युच्यते ॥ ३७ ॥ विद्वन्निति हनुमत्संबोधनं ॥ ३८ ॥ यथेति अनेन ये तावदाचार्याभिमाननिष्ठाः तेषां कार्यं तद्वचनादेव करिष्यामीति भगवतःप्रतिज्ञासूचिता ॥ ३९ ॥ जयोपपत्तौ वालिजयोपपत्तिनिमित्तं ॥ ४० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने तृतीयः सर्गः ॥ ३ ॥

अथाचार्यमुखेन चेतनलाभश्चतुर्थे—तत इत्यादि ॥ मधुरसंभाषं मधुरभाषणं । तद्वचः श्रुत्वा कृत्यवान् कार्यवान् रामः इति प्रहृष्टःसन् सुग्रीवंमनसा गतः । "तमेव चावां मार्गावः"इति वचनभावतया रामस्य कृत्यवत्त्वज्ञानं ॥ १ ॥ मनसा गत इत्येतद्दर्शयति—भव्य इति ॥ यदस्मादयं कृत्यवान्प्राप्तः । तस्मात् महात्मनः महाभाग्यस्य । तस्य सुग्रीवस्य राज्यागमः भव्यः भावी । एतत्कृत्यं राज्यागमनरूपकार्यं । उपागतं समीपे आगतं । निष्पन्नप्रायमित्यर्थः ॥ २ ॥ अस्मिञ्श्लोकेप्लवगर्षभ इत्यत्र गकारो गायत्र्या दशमाक्षरं । नवसहस्रश्लोका गताः ॥ ३ ॥

ति० नौ आवयोः । तमेव सुग्रीवमेव । मार्गावः मार्गयावः ॥३८॥ यथाब्रवीषि सख्यमिच्छतीतियदवादीः । तत्तथैवकरिष्यावइत्यर्थः ॥ ३९ ॥ **ति०** ताभ्यां रामसुग्रीवाभ्यां ॥ **स०** ताभ्यां रामलक्ष्मणाभ्यां ॥ **टीका०** "सुग्रीवोमारुतिंतत्रप्रेषयामास राघवम् । मारुतिप्रेषणंश्रुत्वासद्गुरुंलभतेनरः । राममारुतिसंवादश्रवणाद्राज्यमाप्नुयात्" इतिस्कान्दे ॥४०॥ इतितृतीयस्सर्गः ॥३॥

ती० एतदितिषष्ठी । एतस्यरामस्येत्यर्थः । कृत्यंच उपागतं उपसमीपेआगतं निष्पन्नप्रायमितियावत् ॥ **शि०** कृत्यंतत्प्रयोजनं च एतदुपागतं एतंसुग्रीवंउपागतं सुग्रीवसाध्यत्वेननिश्चितमित्यर्थः ॥ २ ॥ **शि०** ततः सुग्रीवराज्यप्राप्तिनिश्चयाद्धेतोः परम-

[पा०] १ ज. ञ. गणैर्युक्तोयस्यस्यात्कार्यसाधकः. २ छ. झ. ट. सर्वेर्थाः. ३ छ. हितवाक्य. ४ क. ग. च. ज. ञ. मधुरं. ५ ख. सहृष्टो. ६ क.—ज. ञ. मधुरभाषंच. झ. ट. मधुरभावंच. ७ च. छ. झ. ट. भाव्यो. ८ क. यद्रामः. ९ झ. न्प्लवगोत्तमः. १० ङ. च. छ. ज. ञ. रामंवाक्यं. ११ क. छ. ज. झ. ट. वाक्यविशारदं. ग. वाक्यविदांवरं.

[1]किमर्थं त्वं वनं [2]घोरं पम्पाकाननमण्डितम् ॥ आगतः सानुजो [3]दुर्गं नानाव्यालमृगायुतम् ॥ ४ ॥
तस्य तद्वचनं श्रुत्वा लक्ष्मणो रामचोदितः ॥ आचचक्षे महात्मानं रामं दशरथात्मजम् ॥ ५ ॥
राजा दशरथो नाम द्युतिमान्धर्मवत्सलः ॥ चातुर्वर्ण्यं स्वधर्मेण नित्यमे[4]वाभ्यपालयत् ॥ ६ ॥
न द्वेष्टा विद्यते तस्य [5]नच स द्वेष्टि कंचन ॥ [6]स च [7]सर्वेषु भूतेषु पितामह इवापरः ॥
अग्निष्टोमादिभिर्यज्ञैरिष्टवानाप्तदक्षिणैः ॥ ७ ॥
तस्यायं पूर्वजः पुत्रो रामो नाम जनैः श्रुतः ॥ शरण्यः सर्वभूतानां पितुर्निर्देशपारगः ॥ ८ ॥
[8]वीरो दशरथस्यायं पुत्राणां [9]गुणवत्तमः ॥ राजलक्षणसंपन्नः संयुक्तो राजसंपदा ॥ ९ ॥
राज्याद्भ्रष्टो [10]वने वस्तुं मया सार्धमिहागतः ॥ भार्यया च [11]महातेजाः सीतयाऽनुगतो वशी ॥
दिनक्षये महातेजाः प्रभयेव दिवाकरः ॥ १० ॥
अहमस्यावरो भ्राता गुणैर्दास्यमुपागतः ॥ कृतज्ञस्य बहुज्ञस्य लक्ष्मणो नाम नामतः ॥ ११ ॥
सुखार्हस्य महार्हस्य सर्वभूतहितात्मनः ॥ ऐश्वर्येण [12]च हीनस्य [13]वनवासाश्रितस्य च ॥ १२ ॥
रक्षसाऽपहृता भार्या रहिते कामरूपिणा ॥ तच्च न ज्ञायते रक्षः पत्नी येनास्य [14]सा हृता ॥ १३ ॥
दनुर्नाम [15]दितेः पुत्रः शापाद्राक्षसतां गतः ॥ आख्यातस्तेन सुग्रीवः [16]समर्थो [17]वानरर्षभः ॥ १४ ॥

पम्पाकानने पम्पोपवने मण्डितं वनं दण्डकारण्यं । दण्डकारण्येप्येतत्प्रदेशं किमर्थमागत इति भावः । अनुजत्वमाकारसाम्यात्तमभ्यभाषेति नियोजनाश्चेति ॥ ४ ॥ महात्मत्वेन दशरथात्मजत्वेन चाचचक्ष इत्यर्थः ॥ ५—६ ॥ सर्वेषु भूतेषु मध्ये पितामह इव श्रेष्ठ इत्यर्थः ॥ ७—८ ॥ पुत्राणां पुत्राणां मध्ये ॥ ९ ॥ ऐश्वर्यभ्रंशदशायामप्यनुवर्तनद्योतनाय दिनक्षय इत्युक्तं ॥ १० ॥ भवानस्य कइत्याकाङ्क्षायामाह—अस्यावरो भ्राता एतदभिप्रायेणभ्रातास्मि । अहंतु गुणैर्दास्यमुपागतः गुणवशीकृतहृदयःसन् तस्य दासोस्मि । यद्यपि परवानस्मीत्यादौ स्वरूपप्रयुक्तदास्यमुक्तं तथापि योग्यताप्रकर्षाद्गुणोत्तम्भितंतद्दास्यमितितदविरोधोद्रष्टव्यः । उपेत्यनेन सर्वदेशसर्वकालसर्वावस्थोचितसर्वविधकैङ्कर्यप्राप्तइत्युच्यते । इदमपि कैङ्कर्यं तन्मुखोल्लासार्थं न तु मदर्थमित्याह—कृतज्ञस्य बहुज्ञस्येति । अल्पमपि कृतं बहुतया जानत इत्यर्थः । इदमपि कैङ्कर्यं सहजमित्याशयेनाह—नाम्ना लक्ष्मणो नामेति । स्वनामतः कैङ्कर्यलक्ष्मीसंपन्न इतिप्रसिद्धः ॥ ११ ॥ सुखेत्यादिश्लोकद्वयमेकान्वयं । यद्वा प्रथमश्लोकस्य पूर्वेणान्वयः । सहजत्वमुपपादयति—सुखेति । महार्हस्य ऐश्वर्यसंपन्नस्य । वनवासाश्रितस्य दुःखितस्येत्यर्थः । तथाच समृद्धिदशायामसमृद्धिदशायां च दास्योक्त्या सहजत्वमुपपादितं । सहजमेवकैङ्कर्यं । गुणास्तुतद्वर्धकाइतिभावः ॥ १२ ॥ रहिते आवाभ्यांरहितदेशे ॥ १३ ॥ दनुः दनुवंशजः कबन्धः । दितेः पुत्रः पुत्रप्रायः । तेनसुग्रीवः समर्थ

संहृष्टः ॥ **ति०** एवंसुहृदयत्वमवगत्यस्वस्वाम्युक्तंपृच्छति—**ततइति** ॥ ३ ॥ **ती०** सामान्याकारेणावगतकार्यवत्त्वंविशेषतः पृच्छति—**किमर्थमित्यादिना** ॥ **स०** पंपाकाननमण्डितं पंपाया यान्युदकानि तेषामनेनचेष्टया मण्डितमितिवा ॥ ४ ॥ **ति०** रामचोदितः इङ्गितेनेतिशेषः ॥ ५ ॥ **ति०** पितामहइव पालकत्वेनेत्यर्थः ॥ **स०** द्वेष्टेतितृजन्तं । तेनषष्ठ्युपपत्तिः ॥ ७॥ **ति०** निर्देशः नियोगः तत्पारगः तस्यसमाप्तकल्पत्वादेवमुक्तं ॥ **शि०** निर्देशपारगः निर्देशपाराय आज्ञापितसमाप्तयेगच्छतिसः ॥ ८ ॥ **ति०** संयुक्तः संयुज्यमानः ॥ ९ ॥ **रामानु०** दिवाकरप्रभया=दिवाकरानुगमनस्यसायंकालएवसम्यक्प्रतीयमानत्वाद्दिनक्षयपदोपादानं ॥ **ती०** सीतायाःप्रभासाम्यंसर्वावस्थास्वपिनित्यसंनिहितत्वात् ॥ १० ॥ **तनि०** अस्यावरोभ्राता अहंतुदास्यंगतः । सर्वदेशसर्वकालादिषुअविश्लेषेणकैङ्कर्यकारित्वंद्योतयितुमुपपदं । सहजसिद्धदास्यव्रतसंबन्धिनोपिभोग्यतमत्वमाह—**गुणैरिति** ॥ ११ ॥ **ति०** नज्ञायते विशिष्येतिशेषः ॥ **स०** संहृतेत्यत्र समः नज्ञायतइत्यनेनान्वयः ॥ येनास्यचाहृतेतिपाठे नकाप्य-

[**पा०**] १ क. ग. झ. ञ. ट. किमर्थंच. २ ख. दुर्गं. ३ ख. घोरं. ४ क. ग. झ. मेवाभिपालयन्. ५ छ. झ. ट. सतुद्वेष्टिनकंचन. घ. सचनद्वेष्टिकंचन. ६ छ. झ. ट. सतु. ७ घ. लोकेषु. ८ झ. ट. ज्येष्ठो. ९ क.—ङ. झ. ञ. ट. गुणवत्तरः. १० छ. झ. ट. मयावस्तुंवने. ११ छ. झ. ट. महाभाग. १२ ख. ङ.—झ. ट. विहीनस्य. १३ छ. झ. ट. वनवासेरतस्यच. १४ ठ. संहृता. झ. वाहृता. छ. ट. चाहृता. १५ क. ख. च. श्रियःपुत्रः. १६ ङ. च. ज. ञ. सामात्यो. १७ क. ग. ङ. छ. झ. ट. वानराधिपः.

स[1] ज्ञास्यति महावीर्यस्तव भार्यापहारिणम् ॥ एवमुक्त्वा दनुः स्वर्गं भ्राजमानो गतः[2] सुखम्॥१५॥
एतत्ते सर्वमाख्यातं याथातथ्येन पृच्छतः ॥ १६ ॥
अहं चैवं[3] हि रामश्च सुग्रीवं शरणं गतौ ॥ १७ ॥
एष दत्त्वा च वित्तानि प्रा[4]प्य चानुत्तमं यशः ॥ लोकनाथः पुरा भूत्वा सुग्रीवं नाथमिच्छति ॥१८॥
पि[5]ता यस्य पुरा ह्यासीच्छरण्यो धर्मवत्सलः ॥ तस्य पुत्रः श[6]रण्यश्च सुग्रीवं शरणं गतः ॥ १९ ॥
सर्वलोकस्य धर्मात्मा शरण्यः शरणं पुरा ॥ गुरुर्मे राघवः सोयं सुग्रीवं शरणं गतः ॥ २० ॥
[इ[7]क्ष्वाकूणां कुले जातो रामो दशरथात्मजः । धर्मे निगदितश्चैव पितृनिर्देशपालकः ॥ २१ ॥
तस्यास्य वसतोऽरण्ये नियतस्य महात्मनः ॥ रावणेन हृता भार्या सुग्रीवं शरणं गतः ॥ २२ ॥]
यस्य प्रसादे सततं प्रसीदेयुरिमाः प्रजाः ॥ स रामो वानरेन्द्रस्य प्रसादमभिकाङ्क्षते ॥ २३ ॥
येन सर्वगुणोपेताः पृथिव्यां सर्वपार्थिवाः ॥ मानिताः सततं रा[8]ज्ञा सदा दशरथेन वै ॥ २४ ॥
तस्यायं पूर्वजः पुत्रस्त्रिषु लोकेषु विश्रुतः ॥ सुग्रीवं वानरेन्द्रं तु रामः शरणमागतः ॥ २५ ॥
शोकाभिभूते रामे तु शोकार्ते शरणं गते ॥ कर्तुमर्हति सुग्रीवः प्रसादं ह[9]रियूथपः ॥ २६ ॥
एवं ब्रुवाणं सौमित्रिं करुणं सा[10]श्रुलोचनम् ॥ हनुमान्प्रत्युवाचेदं वाक्यं वाक्यविशारदः ॥ २७ ॥

इत्याख्यातः ॥ १४—१५ ॥ ते तुभ्यं याथातथ्येनाख्यातं ॥ १६ ॥ अहमित्यर्धम् ॥ १७ ॥ परत्वसौशील्ये दर्शयति—एष इति । त्रैलोक्यनाथत्वमेव सुग्रीवनाथत्वेच्छायां हेतुः । परत्वं विनासौशील्यस्यागुणत्वात् । इच्छति लप्स्यते नवा स्वयमभिलषति । अपर्यनुयोज्याहिस्वतन्त्राइतिभावः । चकारेण लब्धा चेत्युच्यते । अनुत्तमं परत्वापेक्षयावतारप्रयुक्तातिशयवत् । लोकनाथः सर्वलोकैर्याच्यमानःसर्वस्वामीच । "नाथृ नाधृ याच्ञोपतापैश्वर्याशीष्षु" धातुः ॥ १८ ॥ तदेव सौशील्यं प्रकारान्तरेणाह—पितेति । शरण्यः प्राप्यः । शरणं रक्षकं ॥ १९ ॥ शरण्य इत्युक्तं विशेषयति—सर्वलोकस्येति ॥ गुरुः अग्रजः ॥ २०—२२ ॥ इमाःप्रजाःसततं प्रसीदेयुः तत्प्रसादलब्धसकलपुरुषार्थतयासर्वदाप्रसन्नचित्ताभवेयुः । वानरेन्द्रस्य स्वप्रसाद्यप्रजैकदेशक्षुद्रतरजनस्य । प्रसादमभिकाङ्क्षते । स्वतन्त्रेच्छस्य नियन्तुमशक्यत्वादिति भावः ॥ २३ ॥ येनेत्यादिश्लोकद्वयमेकान्वयं । येन सततं सर्वगुणोपेताः सर्वोपचारोपेतायथा भवन्ति तथा सदा मानिताः । वानरेन्द्रं वनमात्रप्रसिद्धशाखामृगमिति सौशील्यातिशयध्वनिः ॥ २४—२५ ॥ शोकेनाभिभूते शोकपरतन्त्रे । शोकार्ते शोकपीडिते । कर्मपरतन्त्रं शोकाकुलं स्वजनमालोक्य स्वयं शोकाकुलस्याचार्यमुखं विनोभयशोकानुद्धारादिति भावः ॥२६॥ साश्रुलोचनमिति रामदुःखदर्शनाद्दुःखितत्वमुच्य-

---

नुपपत्तिः ॥१३॥ **ति०** स्वर्गगन्तुं दिवमाकाशं गतः उत्पतितः ॥ **स०** यद्वा सदादिवंगतएव इदानींतुशापान्मुक्तःस्वर्गगतः ॥१५॥ **शि०** रामेरक्षणसामर्थ्यमस्तीतिसुग्रीवविश्वासंद्रढयितुंरामगुणान्पुनःपुनर्वर्णयति—एषइत्यादिभिः ॥ नाथं रक्षाकामं । सुग्रीवमिच्छति रक्षकत्वेनप्राप्तुंवाञ्छतीत्यर्थः ॥ १८ ॥ **शि०** शरणं रक्षाकामं सुग्रीवं गतः प्राप्तः ॥ २० ॥ **ति०** सर्वगुणोपेताः मूर्धाभिषिक्ताइतियावत् । सदा प्रतिदिनं । सततं अनुक्षणं ॥ **शि०** मानिताः स्वसेवकत्वेनसत्कृताः ॥ २४ ॥ **स०** शोकः अभिभूतोयेनस शोकाभिभूतः । वस्तुतस्तादृशेपि इदानींशोकार्ते इवविद्यमाने ॥ **शि०** सुग्रीवःहरियूथपैस्सहप्रसादंप्रसन्नतांकर्तुमर्हति ॥ एतेनइतःप्रभृतिसुग्रीवेभयंनप्राप्स्यतीतिसूचितं ॥ २६ ॥ **ति०** साश्रुपातनं अस्माकमप्यन्यशरणापेक्षेत्यश्रुपातनसहितं ॥ २७ ॥

[पा०] १ ख. संज्ञास्यति. २ छ. झ. ञ. ट. दिवंगतः. ३ ग. ङ.—ट. चैवच. ४ क. ग. ङ.—ज. ञ. प्राप्तवानुत्तमं. ५ छ. झ. ट. सीतायस्यस्नुषाचासीत्. ६ क. ग.—ट. शरण्यस्य. ख. शरण्यस्सन्सुग्रीवं. ७ इदंश्लोकद्वयं क. पाठेदृश्यते. ८ घ. प्राज्ञाः. ९ छ. झ. ट. सहयूथपैः ग. हरियूथपैः. १० क.—घ. छ. झ. ट. साश्रुपातनं. ङ. च. ज. ञ. साश्रुभाषितं.

ईदृशा बुद्धिसंपन्ना जितक्रोधा जितेन्द्रियाः ॥ द्रष्टव्या वानरेन्द्रेण दिष्ट्या दर्शनमागताः ॥ २८ ॥
स हि रा[1]ज्यात्परिभ्रष्टः कृतवैरश्च वालिना ॥ हृतदारो वने [2]त्यक्तो भ्रात्रा विनिकृतो भृशम् ॥२९॥
[3]करिष्यति स साहाय्यं युवयोर्भास्करात्मजः ॥ सुग्रीवः सह चास्माभिः सीतायाः परिमार्गणे ॥३०॥
इत्येवमुक्त्वा हनुमाञ्श्लक्ष्णं मधुरया गिरा ॥ बभाषे [4]सोभिगच्छेम सुग्रीवमिति राघवम् ॥ ३१ ॥
एवं [5]ब्रुवाणं [6]धर्मात्मा हनुमन्तं स लक्ष्मणः ॥ प्रतिपूज्य यथान्यायमिदं प्रोवाच राघवम् ॥ ३२ ॥
कपिः कथयते हृष्टो यथाऽयं मारुतात्मजः ॥ कृत्यवान्सोपि संप्राप्तः कृतकृत्योसि राघव ॥ ३३ ॥
प्रसन्नमुखवर्णश्च व्यक्तं [7]हृष्टश्च भाषते ॥ नानृतं वक्ष्यते वीरो हनुमान्मारुतात्मजः ॥ ३४ ॥
ततः स [8]तु महाप्राज्ञो हनुमान्मारुतात्मजः ॥ जगामादाय तौ वीरौ हरिराजाय राघवौ ॥ ३५ ॥
भिक्षुरूपं परित्यज्य वानरं रूपमास्थितः ॥ पृष्ठमारोप्य तौ वीरौ जगाम कपिकुञ्जरः ॥ ३६ ॥

स तु विपुलयशाः कपिप्रवीरः पवनसुतः [9]कृतकृत्यवत्प्रहृष्टः ॥
गिरिवरमुरुविक्रमः प्रयातः [10]सुशुभमतिः सह रामलक्ष्मणाभ्याम् ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे चतुर्थः सर्गः ॥ ४ ॥

ते ॥ २७ ॥ द्रष्टव्याः अन्वेषितव्याः ॥ २८ ॥ विनिकृतः वञ्चितः ॥ २९ ॥ करिष्यतीति परिमार्गणे साहाय्यं करिष्यति । ततःपरंभवतोरग्रे का शत्रुवार्तेतिभावः ॥ ३० ॥ बभाषे पुनरपीति शेषः ॥ ३१ ॥ यथान्यायं दूतानुरूपं ॥ ३२ ॥ अयं हृष्टः सन् यथा यथार्थं कथयते । यथार्थकथने हृष्टत्वं हेतुः । सीतापरिमार्गणं करिष्यतीति यथार्थमेव । सोपि सुग्रीवः कृत्यवान् प्राप्तः जातः । तस्मात् कृतकृत्योसि ॥३३॥ हृष्टपदसूचितं विवृणोति—प्रसन्नेति ॥ वक्ष्यते वक्ष्यति । अनृतं न वदेदित्यर्थः ॥३४॥ हरिराजाय वानरराजाय ॥ ३५ ॥ उक्तं विवृणोति—भिक्ष्विति ॥ ३६ ॥ विपुलयशाः सर्वदेववरप्रसादेन विशालकीर्तिः । कपिप्रवीरः सुग्रीवमपि नियन्तुं समर्थः । अनेनभगवल्लाभआचार्याधीनइत्युक्तं ॥३७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चतुर्थः सर्गः ॥ ४ ॥

स० दर्शनमागताइतिबहुवचनंगौरवात् ॥ २८ ॥ **स०** वालिनेत्येतद्देहलीदीपन्यायेनोभयत्रान्वेति ॥ २९ ॥ **ति०** यदेवं अतः परिमार्गणेसाहाय्यंकरिष्यतीत्यन्वयः ॥ ३० ॥ **रामानु०** अत्रेतिकरणंद्रष्टव्यं । राघव संप्राप्तोऽयंकपिर्मारुतात्मजः हृष्टः मद्वाक्यश्रवणात्संजातहर्षः । सोपि सुग्रीवोपि । कृत्यवानितियथावत्कथयते अतःकृतकृत्योसीतियोजना ॥ **ति०** सोपित्वयाकृत्यवानितियथाकथयतेतथाजाने एनंदेशंसंप्राप्तस्त्वंकृतकृत्योसीत्यर्थः ॥ संप्राप्तः इहागतस्त्वंकृतकृत्यः सिद्धप्रयोजनोसि । एतेन नष्टाश्वदग्धरथन्यायेनद्वयोस्सख्यमेवद्वयोःकार्यसाधकंभवितेतिध्वनितं ॥ ३३ ॥ **रामानु०** हनुमदुक्तवाक्यस्ययाथार्थ्यंसमर्थयते—**प्रसन्नेति** ॥ ३४ ॥ **शि०** हरिराजाय सुग्रीवायजगाम । "गत्यर्थकर्मणि—" इतिकर्मणिचतुर्थी ॥ ३५ ॥ **ति०** वानरं वानरस्येदं । आर्षोऽण् ॥ ३६ ॥ **स०** किंचिद्व्यवधानात्कृतकृत्यवदित्युक्तिः ॥ ३७ ॥ इतिचतुर्थस्सर्गः ॥ ४ ॥

[पा०] १ क. छ. झ. ट. राज्याच्चविभ्रष्टः. २ क. ग. ङ.—झ. ट. त्रस्तो. ३ ख. करिष्यतिहि. घ. करिष्यतिच. ४ ङ.—ट. साधुगच्छामः. ग. सौम्यगच्छामः. ५ च. छ. ज. ञ. ट. ब्रुवन्तं. ६ घ. धर्मज्ञं. ७ क. ग. हृष्टंच. ८ छ. झ. ट. सुमहाप्राज्ञो. ९ ग. कृतकृत्यवान्प्रहृष्टः. १० ख. ङ.—ट. सशुभमतिः. क. ग. सशुभमुखः.

पञ्चमः सर्गः ॥ ५ ॥

हनुमता मलयस्थंसुग्रीवमेत्य स्वेनराघवयोः ऋश्यमूकप्रापणनिवेदनपूर्वकं सामस्त्येनरामवृत्तान्तनिवेदनम् ॥ १ ॥ सुग्रीवेण सहर्षमानुषवेषस्वीकारेण राममेत्य तंप्रति सप्रशंसनं स्वपाणिप्रसारणपूर्वकं मर्यादाबन्धाय तत्पाणिनास्वपाणिग्रहणप्रार्थना ॥ २ ॥ रामेण सुग्रीवपाणिग्रहणपूर्वकं तत्परिष्वङ्गः ॥ ३ ॥ रामसुग्रीवाभ्यामग्निसाक्षिकं सख्यकरणम् ॥ ४ ॥ सुग्रीवेण स्ववृत्तान्तनिवेदनपूर्वकं वालिवधंप्रार्थितेनरामेण तंप्रतितत्प्रतिज्ञानम् ॥ ५ ॥

ऋश्यमूकात्तु हनुमान्गत्वा तुं[1] मलयं गिरिम् ॥ आचचक्षे तदा वीरौ कपि[2]राजाय राघवौ ॥ १ ॥
अयं रामो महाप्राज्ञः संप्राप्तो दृढविक्रमः ॥ लक्ष्मणेन सह भ्रात्रा रामो[3]ऽयं सत्यविक्रमः ॥ २ ॥
इक्ष्वाकूणां कुले जातो रामो दशरथात्मजः ॥ धर्मे निगदितश्चैव पितुर्निर्दे[4]शपारगः ॥ ३ ॥
तस्या[5]स्य वसतोऽरण्ये नियतस्य महात्मनः ॥ रावणेन[6] हृता भार्या स त्वां शरणमागतः ॥ ४ ॥
राजसूयाश्वमेधैश्च वह्निर्येनाभितर्पितः ॥ दक्षिणाश्च तथोत्सृष्टा गावः शतसहस्रशः ॥ ५ ॥
तपसा सत्यवाक्येन वसुधा येन[7] पालिता ॥ स्त्रीहेतोस्तस्य पुत्रोऽयं रामस्त्वां[8] शरणं गतः ॥ ६ ॥
भवता सख्यकामौ तौ भ्रातरौ रामलक्ष्मणौ ॥ प्रतिगृह्या[9]र्चयस्वै[10]तौ पूजनीयतमावुभौ ॥ ७ ॥
श्रुत्वा हनुमतो वाक्यं सुग्रीवो[11] हृष्टमानसः ॥ भयं[12] च राघवाद्घोरं प्रजहौ विगतज्वरः ॥ ८ ॥
स कृत्वा मानुषं रूपं सुग्रीवः प्लवगर्षभः[13] ॥ दर्शनीयतमो भूत्वा प्रीत्या[14] प्रोवाच राघवम् ॥ ९ ॥
भवान्धर्मविनीतश्च विक्रान्तः[15] सर्व[16]वत्सलः ॥ आख्याता वायुपुत्रेण तत्त्वतो मे भवद्गुणाः ॥ १० ॥
तन्ममै[17]वैष सत्कारो लाभश्चैवोत्तमः प्रभो ॥ यत्त्वमिच्छसि सौहार्दं वानरेण मया सह ॥ ११ ॥
रोचते यदि[18] वा सख्यं बाहुरेष प्रसारितः ॥ गृह्यतां पाणिना पाणिर्मर्यादा बध्यतां ध्रुवा[19] ॥ १२ ॥
एतत्तु वचनं श्रुत्वा सुग्रीवेण[20] सुभाषितम् ॥ स[21] प्रहृष्टमना हस्तं[22] पीडयामास पाणिना ॥ १३ ॥

अथपापभीतस्यकर्मानुरूपंफलंदिशतोभगवतोपित्रस्तस्य आचार्यमुखाद्भगवद्गुणाञ्श्रुत्वा तदेकोपायनिष्ठासूच्यतेपञ्चमे—ऋश्यमूकात्त्वित्यादि। रामलक्ष्मणदर्शनभीतःसुग्रीवः ऋश्यमूकादुत्प्लुत्य गहनं मलयाख्यमृश्यमूकपर्यन्तपर्वतं गतः । हनुमान् रामलक्ष्मणौ तत्रप्रतिष्ठाप्य सुग्रीवंतत्रानीतवानिति बोध्यम् ॥ १ ॥ अयं रामः संप्राप्तः । अयं रामः सत्यविक्रमः त्वच्छत्रुनिबर्हणक्षम इत्यर्थः ॥ २ ॥ निगदितः प्रसिद्धः ॥ ३—८ ॥ राघवं प्राप्येति शेषः ॥ ९—११ ॥ मर्यादा व्यवस्था ॥ १२ ॥ एतत्त्विति राम इति

ति० अयंरामः मलयस्थसुग्रीवदृष्टिपथवर्तित्वादेवंनिर्देशः । पुनराहादराद्रामोयमिति ॥ शि० सत्यविक्रमः सत्याय सत्यपरिपालनाय विक्रमः पादन्यासोयस्यसः ॥ आरामः सर्वाभिरामदाता । अरामः अरं अतिप्रकाशं अमतिप्राप्नोतिसः । अयंरामः अयं शापवशेनवालिनाप्राप्तुमशक्यंऋश्यमूकंसंप्राप्तः ॥ श्लोकद्वयमेकान्वयि ॥ स० सत्यविक्रमः सति बलेसत्यपि अविक्रमः इदानीमप्रदर्शितविक्रमः । भ्रात्रारामः भ्रातुः तवभ्रातुर्वालिनः आसम्यक् अरामोदुःखंयस्मात्सतथा संप्राप्तइत्यन्वयः ॥ २ ॥ स० धर्मे धर्मविषये । रामएवेतिनिगदितः लोकैः ॥ ति० धर्मे स्वसत्यपरिपालनरूपधर्मनिमित्तं । निगदितः प्रेरितः । पित्रेतिशेषः ॥ ३ ॥ ति० प्रगृह्य दर्शनाकाङ्क्षिणोर्दर्शनंदत्वा । ती० प्रतिगृह्य प्रत्युद्गम्य ॥ ७ ॥ ती० वानरेण तिरश्चा । असमानेनेत्यर्थः ॥ ११ ॥ ति० ध्रुवामर्यादा अनुल्लङ्घनीयोऽन्योन्यकार्यसंपादनविषयोनिश्चयः । बध्यतां बुद्ध्याविचार्यप्रतिज्ञायतां

[पा०] १ क.—ट. तंमलयं. २ च. हरिराजाय. ३ घ. शूरोयं. ४ ङ.—ट. कारकः. ५ अयंश्लोकः झ. पाठे. तपसासत्यवाक्येनेतिश्लोकानन्तरंदृश्यते. ६ क. ग. रक्षसापहृता. ७ छ. झ. ट. तेन. ८ छ. झ. ट. रामोरण्यंसमागतः. क. ग. ङ. च. ज. ञ. रामःशरणमागतः. ९ च. ज—ट. प्रगृह्यचार्चयस्व. १० ख. स्वेमौ. ११ ङ. छ. झ. ञ. वानराधिपः. १२ भयंचराघवाद्घोरं. सकृत्वामानुषंरूपं. इत्यर्धद्वयं झ. पाठेनदृश्यते. क. ख. घ. ङ. च. ञ. ट. भयंस. १३ ग. ङ च. ज. ञ. ट. प्लवगाधिपः. १४ क. ग.—छ झ. ट. प्रीत्योवाचच. १५ ग. छ. झ. ट. सुतपाः. क. सुप्रियः. १६ ङ. च. ज. ञ. सत्यविक्रमः. १७ च. तन्ममैवच. १८ ङ.—ट. यदिमे. १९ क. ङ.—ज. ञ. ध्रुवं. २० क. ङ. छ.—ट. सुग्रीवस्य. २१ क. ख. घ. ङ. छ. झ. ञ. ट. संप्रहृष्ट. २२ क. ग. च. ज. पाणिं.

[1]हृद्यं सौहृदमालम्ब्य पर्यष्वजत पीडितम् ॥ १४ ॥
ततो हनूमान्संत्यज्य भिक्षुरूपमरिंदमः ॥ काष्ठयोः स्वेन रूपेण जनयामास पावकम् ॥ १५ ॥
दीप्यमानं ततो वह्निं पुष्पैरभ्यर्च्य [2]सत्कृतम् ॥ तयोर्मध्येऽथ सुप्रीतो [3]निदधे सुसमाहितः ॥ १६ ॥
ततोऽग्निं दीप्यमानं तौ चक्रतुश्च प्रदक्षिणम् ॥ सुग्रीवो राघवश्चैव वयस्यत्वमुपागतौ ॥ १७ ॥
ततः सुप्रीतमनसौ तावुभौ हरिराघवौ ॥ अन्योन्यमभिवीक्षन्तौ न तृप्तिमु[4]पजग्मतुः ॥ १८ ॥
त्वं वयस्योसि मे[5] हृद्यो ह्येकं दुःखं सुखं च नौ ॥ [6]सुग्रीवो राघवं वाक्यमित्युवाच प्रहृष्टवत् ॥१९॥
ततः स[7] पर्णबहुलां छित्त्वा शाखां सुपुष्पिताम् ॥ सालस्यास्तीर्य सुग्रीवो निषसाद सराघवः ॥२०॥
लक्ष्मणायाथ संहृष्टो [8]हनुमान्प्लवगर्षभः ॥ शाखां चन्दनवृक्षस्य ददौ परमपुष्पिताम् ॥ २१ ॥
ततः प्रहृष्टः सुग्रीवः श्लक्ष्णं मधुरया गिरा ॥ प्रत्युवाच [10]तदा रामं हर्षव्याकुललोचनः ॥ २२ ॥
अहं विनिकृतो [11]राम चरामीह भयार्दितः ॥ हृतभार्यो वने त्रस्तो दुर्गमेतदुपाश्रितः ॥ २३ ॥
सोहं त्रस्तो वने भीतो वसाम्युद्भ्रान्तचेतनः ॥ वालिना निकृतो भ्रात्रा कृतवैरश्च राघव ॥ २४ ॥
वालिनो मे महाभाग भयार्तस्याभयं कुरु ॥ कर्तुमर्हसि काकुत्स्थ भयं मे न भवेद्यथा ॥ २५ ॥
एवमुक्तस्तु तेजस्वी धर्मज्ञो धर्मवत्सलः ॥ प्रत्यभाषत काकुत्स्थः सुग्रीवं प्रहसन्निव ॥ २६ ॥
उपकारफलं मित्रं विदितं मे महाकपे ॥ वालिनं तं वधिष्यामि तव भार्यापहारिणम् ॥ २७ ॥
अमोघाः सूर्यसंकाशा [12]ममैते निशिताः शराः ॥ तस्मिन्वालिनि दुर्वृत्ते निपतिष्यन्ति वेगिताः ॥२८॥
कङ्कपत्र[13]प्रतिच्छन्ना महेन्द्राशनिसन्निभाः ॥ तीक्ष्णाग्रा ऋजुपर्वाणः [14]सरोषा भुजगा इव ॥ २९ ॥
तमद्य वालिनं पश्य [15]क्रूरैराशीविषोपमैः ॥ शरैर्विनिहतं भूमौ [16]विकीर्णमिव पर्वतम् ॥ ३० ॥

शेषः ॥ १३ ॥ हृद्यमित्यर्धं । पीडितं दृढं ॥ १४॥ मर्यादा बध्यतामिति वदतः सुग्रीवस्याशयं विदित्वाचरति—तत इति ॥ भिक्षुरूपंसंत्यज्येत्यनेन सुग्रीवविश्वासार्थं "तौत्वयाप्राकृतेनैवगत्वाज्ञेयौ प्लवङ्गम" इतितदुक्तप्रकारेणपुनर्भिक्षुरूपेणैवतदन्तिकं गतइत्यवगम्यते । स्वेन रूपेण वानररूपेण । काष्ठयोः अरणिभूतशमीकाष्ठयोः । सप्तम्यन्तंपदं ॥ १५ ॥ सत्कृतमित्यभ्यर्च्येत्यस्यानुवादः । तयोः रामसुग्रीवयोः ॥१६॥ प्रदक्षिणंचक्रतुः अन्योन्यं पाणिंगृहीत्वेति शेषः । उपागतौ अग्निसाक्षिकमिति शेषः ॥ १७ ॥ अभिवीक्षन्तौ अभिवीक्षमाणौ ॥ १८ ॥ एकं समानं । त्वद्दुःखेन मम दुःखंभवतु त्वत्सुखेनममसुखंभवत्वित्यर्थः । अनेन परसाम्यापत्त्यभ्यर्थनंसूचितं ॥ १९ ॥ सराघव इत्यनेन एकासनत्वमुक्तं ॥ २०—२१ ॥ प्रत्युवाच तदा राममिति पाठः ॥२२—२३॥ त्रस्तः भीतः उत्तरोत्तरं भीतः । यद्वा वालित्रस्तोहमस्मिन्वने अभीतो वसामीत्यर्थः ॥ २४ ॥ अभयं भयाभावं कुरु । आर्त्यतिशयेनदार्ढ्यायपुनरुच्यते—कर्तुमित्यर्धेन । मे भयं यथानभवेत्तथाकर्तुमर्हसीत्यन्वयः ॥ २५ ॥ प्रहसन्निव कियन्मात्रमेतदितिहसित्वा । इवशब्दो मन्दस्मितत्वे ॥ २६—२८ ॥ कङ्कपत्रप्रतिच्छन्नाः कङ्कपत्रैर्बद्धाइत्यर्थः ॥ २९ ॥ अद्य पश्येत्यनेन क्रिया-

॥ १२ ॥ **ती०** काष्ठयोरितिसप्तम्यन्तं । अत्र हनुमतापावकोत्पादनंरामाभ्यनुज्ञयैव । अग्निसाक्षिकंस्नेहंकुर्वितिकबन्धेनोक्तत्वात् ॥ १५ ॥ **ति०** प्रहृष्टवत् प्रहृष्टस्सन् ॥ १९ ॥ **ति०** एतावत्पर्यन्तंसम्यग्विश्वासाभावात्सुग्रीवः पृथगासनस्थएवासीदितिज्ञायते । तदाह—**ततस्सुपर्णेति** ॥२०॥ **ति०** लक्ष्मणायविषादपरिहारार्थंचन्दनशाखास्तरणदानं ॥२१॥ **रामानु०** त्रस्तः चकितः । अत्रस्तइतिवा ॥ २३ ॥ **ति०** अभयंकुरु अभयप्रतिज्ञांकुरु ॥ २५ ॥ **स०** वालिसंहर्तुर्बाणस्यैकत्वेप्यनेकबाणसाध्यमहाकार्यकर्तृ-

[**पा०**] १ छ. झ. ञ. ट. हृष्टः. २ ख. पूजितं. ३ छ. झ. ट. निदधौ. ख. निदधेस्स. ४ ख. घ.—ट. मभिजग्मतुः. ५ क. ख. ग. ङ.—ट. हृद्योमे. ६ ग.—ज. ञ. सुग्रीवंराघवो. ख. सुग्रीवोराघवश्चैवमूचतुस्तौप्रहृष्टवत्. ७ क. ग. ङ.—ट. सुपर्णबहुलां. ८ क. ख. ग. ङ.—ट. भङ्क्त्वा. ९ ङ.—ट. हनूमान्मारुतात्मजः. १० ख. ततो. ११ ङ. ज. ञ. भ्रात्रा. १२ क. ग. च.—ट. ममेमे. १३ क. घ. छ. परिच्छन्नाः. १४ ख. गरोषाइवपन्नगाः. १५ ङ.—ट. तीक्ष्णैः. १६ च. झ. ट. प्रकीर्णमिव.

स तु तद्वचनं श्रुत्वा राघवस्यात्मनो हितम् ॥ सुग्रीवः परमप्रीतः सुमहद्वाक्यमब्रवीत् ॥ ३१ ॥
तव प्रसादेन नृसिंह राघव प्रियां च राज्यं च समाप्नुयामहम् ॥
तथा कुरु त्वं नरदेव वैरिणं यथा निहंस्यद्य रिपुं ममाग्रजम् ॥ ३२ ॥
सीताकपीन्द्रक्षणदाचराणां राजीवहेमज्वलनोपमानि ॥
सुग्रीवरामप्रणयप्रसङ्गे वामानि नेत्राणि समं स्फुरन्ति ॥ ३३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे पञ्चमः सर्गः ॥ ५ ॥

षष्ठः सर्गः ॥ ६ ॥

सुग्रीवेण रामंप्रति हनुमत्सकाशात्स्वस्यतदीयवृत्तान्तपरिज्ञाननिवेदनपूर्वकं सीतान्वेषणप्रतिज्ञानम् ॥ १ ॥ तथा गगने रावणेननीयमानायाःसीतायाः स्वैरवलोकननिवेदनेनसह स्वेषुतयासोत्तरीयस्वाभरणोत्सर्जननिवेदनपूर्वकं तदाभरणप्रदर्शनम् ॥ २ ॥ रामेण लक्ष्मणेनसह तदाभरणानांसीतासंबन्धित्वप्रत्यभिज्ञानेन परिदेवनपूर्वकं सुग्रीवंप्रतिरावणयाथात्म्यप्रश्नः ॥ ३ ॥

पुनरेवाब्रवीत्प्रीतो राघवं रघुनन्दनम् ॥ १ ॥
अयमाख्याति मे राम सचिवो मन्त्रिसत्तमः ॥ हनुमान्यन्निमित्तं त्वं निर्जनं वनमागतः ॥ २ ॥
लक्ष्मणेन सह भ्रात्रा वसतश्च वने तव ॥ रक्षसाऽपहृता भार्या मैथिली जनकात्मजा ॥ ३ ॥
त्वया वियुक्ता रुदती लक्ष्मणेन च धीमता ॥ अन्तरप्रेप्सुना तेन हत्वा गृध्रं जटायुषम् ॥
[भार्यावियोगजं दुःखं प्रापितस्तेन रक्षसा] ॥ ४ ॥
भार्यावियोगजं दुःखमचिरात्त्वं विमोक्ष्यसे ॥ अहं तामानयिष्यामि नष्टां वेदश्रुतीमिव ॥ ५ ॥

ज्ञाटित्युक्तं ॥ ३०—३१ ॥ कुरु यतस्वेत्यर्थः । वैरिणं रिपुमितिद्विरुक्त्या वैरकृतंशात्रवं नतुजात्येत्युक्तं ॥ ३२ ॥ प्रसङ्गात्कविराह—सीतेति ॥ सीतानेत्रं राजीवोपमं । वालिनेत्रं हेमोपमं । पिङ्गाक्षत्वात् । रावणनेत्राणि ज्वलनोपमानि । पुरुषस्य वामनेत्रस्फुरणमनर्थकरं स्त्रियास्तु शोभनमिति निमित्तशास्त्रविदः ॥ ३३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चमः सर्गः ॥ ५ ॥

एवंरामेण वालिवधेप्रतिज्ञाते सुग्रीवेणापि रामकार्यसिद्धिः प्रतिज्ञायते षष्ठे—पुनरेवेत्यादि ॥ राघवमिति नाम । सुग्रीव इति शेषः ॥ १ ॥ त्वं यन्निमित्तं वनमागतः तदाख्याति स्म ॥२॥ लक्ष्मणेनेत्यादिश्लोकद्वयं । तेन पूर्वमविज्ञातेन ॥ ३—४ ॥ विमोक्ष्यसे

त्वाद्वहुत्वेनोक्तिः ॥२८॥ **स०** सीतायावामनेत्रस्फुरणं त्रिकालदर्शिनाऋषिणादृष्ट्वैवोक्तमितिवक्तव्यं ॥३३॥ इतिपञ्चमःसर्गः ॥५॥

स० राघवं रघुकुलोत्पन्नं । रघूणां नन्दयतीतितथा तं ॥ १ ॥ **रामानु०** आख्याति आख्यातवान् । " वर्तमानसामीप्ये वर्तमानवद्वा" इतिभूतेलट् ॥ **शि०** मेसेवकोऽयंहनुमान् मेआख्याति ॥ २ ॥ **ती०** अन्तरप्रेप्सुना तवानवस्थानंप्राप्तुमिच्छता । वैदेहीअपहृतेतिहनुमानाख्यातीत्यब्रवीदितिपूर्वेणसंबन्धः ॥ **ति०** तेनरक्षसामैथिलीहृता । त्वंभार्यावियोगजंदुःखंप्रापितइतिचाख्यातवान् ॥ **स०** अन्तरमवकाशं ॥४॥ **ती०** वेदश्रुतीमिव श्रूयतइतिश्रुतिरितिव्युत्पत्त्या श्रुतित्वंवेदशास्त्रसाधारणं । तद्व्यावृत्त्यर्थं वेदश्रुतीमित्युक्तं । मधुकैटभाभ्यांपातालेगुप्तंवेदजातंमत्स्याकृतिर्हरिर्यथाऽऽनीतवान् तद्वत्सीतामानयिष्यामि आनेष्यामीत्यर्थः ॥

[पा०] १ ख. राघवस्यमनोहितं. २ ङ.—ट. परमंवाक्यं. ३ क. ख. ग. ङ.—ट. वीर. ४ ङ. च. ज. ञ. निहन्म्यद्य. छ. झ. ट. नहिंस्यात्सपुनर्ममाग्रजं. ५ ख. मेवीर. झ. तेराम. ६ छ. झ. ट. सेवको. ७ ङ. ज. ञ. वैदेही. ८ छ.—ट. अन्तरं. ९ क. ग. गृध्रंहत्वा. १० इदमर्धं ङ. छ. झ. ञ. ट. पाठेषुदृश्यते. ११ छ. झ. दुःखंनचिरात्त्वं. १२ क. ग. वेदश्रुतिंयथा. झ. देवश्रुतीमिव.

रसातले वा वर्तन्तीं वर्तन्तीं वा नभस्तले ॥ अहमानीय दास्यामि तव भार्यामरिंदम ॥ ६ ॥
इदं तथ्यं मम वचस्त्वमवेहि च राघव ॥ न शक्या सा जरयितुमपि सेन्द्रैः[1] सुरासुरैः ॥ ७ ॥
तव भार्या महाबाहो भक्ष्यं विषकृतं यथा ॥ ८ ॥
त्यज शोकं महाबाहो तां[2] कान्तामानयामि ते ॥ अनुमानात्तु जानामि मैथिली सा न संशयः ॥ ९ ॥
ह्रियमाणा मया दृष्टा रक्षसा क्रूर[3]कर्मणा ॥ क्रोशन्ती रामरामेति लक्ष्मणेति च विस्वरम् ॥
स्फुरन्ती रावणस्याङ्के पन्नगेन्द्रवधूर्यथा[4] ॥ १० ॥
आत्मना पञ्चमं मां हि दृष्ट्वा शैलतटे[5] स्थितम् ॥ उत्तरीयं तया त्यक्तं शुभान्याभरणानि च ॥ ११ ॥
तान्यस्माभिर्गृहीतानि निहितानि च राघव ॥ आनयिष्याम्यहं तानि प्रत्यभिज्ञातुमर्हसि ॥ १२ ॥
तमब्रवीत्ततो रामः सुग्रीवं प्रियवादिनम्[6] ॥ आनयस्व सखे शीघ्रं किमर्थं प्रविलम्बसे[7] ॥ १३ ॥
एवमुक्तस्तु सुग्रीवः शैलस्य गहनां गुहाम् ॥ प्रविवेश ततः शीघ्रं राघवप्रियकाम्यया[8] ॥ १४ ॥
उत्तरीयं गृहीत्वा[9] तु शुभान्याभरणानि[10] च ॥ इदं पश्येति रामाय दर्शयामास वानरः ॥ १५ ॥
ततो गृहीत्वा तद्वासः[11] शुभान्याभरणानि च ॥ अभवद्बाष्पसंरुद्धो नीहारेणेव चन्द्रमाः ॥ १६ ॥
सीतास्नेहप्रवृत्तेन स तु बाष्पेण दूषितः ॥ हा प्रियेति रुदन्धैर्यमुत्सृज्य न्यपतत्क्षितौ ॥ १७ ॥
हृदि कृत्वा[12] तु बहुशस्तमलंकारमुत्तमम् ॥ निशश्वास भृशं सर्पो बिलस्थ इव रोषितः ॥ १८ ॥
अविच्छिन्नाश्रुवेगस्तु सौमित्रिं वीक्ष्य[13] पार्श्वतः ॥ परिदेवयितुं दीनं रामः समुपचक्रमे ॥ १९ ॥
पश्य लक्ष्मण वैदेह्या[14] संत्यक्तं ह्रियमाणया ॥ उत्तरीयमिदं भूमौ शरीराद्भूषणानि च ॥ २० ॥
शाद्वलिन्यां ध्रुवं भूम्यां सीतया ह्रियमाणया ॥ उत्सृष्टं भूषणमिदं तथारूपं हि दृश्यते ॥ २१ ॥

त्यक्ष्यसि । नष्टां मधुकैटभापहृतां । वेदश्रुतीं श्रूयतइति श्रुतिः शब्दः । वेदरूपश्रुतीमिव वेदगिरमिव । दीर्घ आर्षः ॥ ५ ॥ वर्तन्तीं वर्तमानां ॥ ६ ॥ जरयितुं आत्मसात्कर्तुं । विषकृतं विषेण पक्वम् ॥ ७—८ ॥ अनुमानात् योग्यतया । या दृष्टा सा मैथिली न संशयः । अनुमानात्तुजानामीत्यस्यैव विवरणमिदम् ॥ ९—१० ॥ आत्मना मया पञ्चमम् ॥ ११ ॥ प्रत्यभिज्ञातुं स्मर्तुं ॥ १२—१४ ॥ उत्तरीयमाभरणानि च उत्तरीयबद्धानीत्यर्थः ॥ १५—१७ ॥ अलंकारमिति जात्येकवचनं । रोषितः संजातरोषः ॥ १८ ॥ परिदेवयितुं प्रलपितुं । दीनमिति क्रियाविशेषणं ॥ १९ ॥ शरीरात् अपनीयेति शेषः ॥ २० ॥ अत्र शाद्वलशब्देन हरिततृणान्युच्यन्ते । स्वार्थे वलजार्षः । तद्वत्यां भूमौ मृदुस्थले

ति० देवस्य धर्मस्य ब्रह्मणश्च ज्ञानसाधनभूताश्रुतिःत्रयी तामिव ॥ ५ ॥ **शि०** ननुतस्याःस्थितिरेवनविज्ञायते इतिकथमानेष्यसीत्यतआह—**रसातलइति** ॥ ६ ॥ **शि०** जरयितुं गोपयितुमित्यर्थः ॥ ७ ॥ **ति०** विषकृतं विषमिश्रितं ॥ **शि०** भार्या भार्याहरणं ॥ ८ ॥ **रामानु०** मैथिलीत्यत्र इतिकरणंद्रष्टव्यं । **ति०** यादृष्टासामैथिलीत्यनुमानात् त्वद्भार्यात्वानुमापकाद्रामेत्याक्रोशाल्लिङ्गात् जानामीत्यन्वयः । **शि०** अनुमानप्रकारस्तु—इयंनैतत्संबन्धिनी एतत्स्पर्शभीतत्वात् चण्डालस्पर्शभीतब्राह्मणवत् । इयंसीता निरन्तरंराममनस्कत्वात्यन्नैवंतन्नैवं । इयंराममनस्का असकृत्तत्प्रार्थनाबोधकशब्दवत्त्वात् शंभुवदिति ॥ ९ ॥ **वि०** आत्मनापञ्चमं मन्त्रिचतुष्टयसहितंमामित्यर्थः ॥ **स०** आत्मनास्वेनपञ्चमंपञ्चत्वसंख्यापूरकंमांदृष्ट्वेत्यनेन इतरेषांदर्शनकर्मत्वाभावे अस्यपञ्चत्वसंख्यापूरकत्वमेवनभवतीतिभावः ॥ ११ ॥ **ती०** निहितानि निगूढानि विधिवद्रक्षितानीत्यर्थः । **ति०** आनयिष्यामि आनेष्यामि । दृष्ट्वेत्यत्र प्रमाणप्रदर्शनमिदं ॥ १२ ॥ **ति०** गहनां दुष्प्रवेशां ॥ १४ ॥ **ति०** हाप्रियेतीत्यत्रसंधिरार्षः । **स०** हाप्रियेअतिरुदन्निति च्छेदः । इतिशब्दोऽध्याहार्यः । प्रियेतिलक्ष्मणसंबोधनंवा । **शि०** बाष्पेणदूषितः व्याप्तः ॥ १७ ॥ **ति०** हृदीति प्रियासंबन्धेनप्रीत्यतिशयात् ॥ १८ ॥

[**पा०**] १ क. ग. च. जरयितुंसेन्द्रैरपि. २ ज. कान्तांतां. ३ छ. झ. ट. रौद्रकर्मणा. ४ ख. वधूरिव. ५ छ. झ. ट. शैलतले. ६ ङ. ज. ञ. प्रियदर्शनं. ७ क. त्वंविलंबसे. ८ ज. प्रतिकाम्यया. ९ ङ. गृहीत्वास. १० झ. ट. सतान्याभरणानिच. ११ क. छ. झ. ट. वासस्तु. १२ छ.—ट. कृत्वास. १३ ङ.—ट. प्रेक्ष्य. १४ ख. संत्यक्तंवैदेह्या.

एवमुक्तस्तु रामेण लक्ष्मणो वाक्यमब्रवीत् ।। नाहं जानामि केयूरे नाहं जानामि कुण्डले ।।
नूपुरे त्वभिजानामि नित्यं पादाभिवन्दनात् ।। २२ ।।
ततः[1] स राघवो दीनः सुग्रीवमिदमब्रवीत् ।। २३ ।।
ब्रूहि सुग्रीव कं देशं ह्रियन्ती लक्षिता त्वया ।। रक्षसा रौद्ररूपेण मम प्राणैः[2] प्रिया प्रिया ।। २४ ।।
क्व वा वसति तद्रक्षो महद्व्यसनदं मम ।। यन्निमित्तमहं[3] सर्वान्नाशयिष्यामि राक्षसान् ।। २५ ।।
हरता मैथिलीं येन मां च रोषयता भृशम्[4] ।। आत्मनो जीवितान्ताय मृत्युद्वारमपावृतम् ।। २६ ।।
मम दयिततरा[5] हृता वनान्ताद्[6]रजनिचरेण विमथ्य येन सा ।।
कथय मम रिपुं त्वमद्य[7] वै प्लवगपते यमसादनं[8] नयामि ।। २७ ।।
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे षष्ठः सर्गः ।। ६ ।।

सप्तमः सर्गः ।। ७ ।।

सुग्रीवेण रामंप्रति स्वस्यरावणकुलनिलयाद्यपरिज्ञाननिवेदनपूर्वकं सीतान्वेषणप्रतिज्ञानेन समाश्वासनम् ॥ १ ॥ सुग्रीवसमाश्वासनविगतशोकेनरामेण सुग्रीवप्रशंसनपूर्वकं सशपथं वालिवधप्रतिज्ञानम् ॥ २ ॥

एवमुक्तस्तु सुग्रीवो रामेणार्तेन वानरः ।। अब्रवीत्प्राञ्जलिर्वाक्यं सबाष्पं बाष्पगद्गदः[9] ।। १ ।।
न जाने निलयं तस्य सर्वथा पापरक्षसः ।। सामर्थ्यं विक्रमं वाऽपि[10] दौष्कुलेयस्य वा[11] कुलम् ।। २ ।।

उत्सृष्टत्वात् तथारूपं अविकलरूपं दृश्यते।। २१—२३ ।। कं देशं कां दिशं प्रति । ह्रियन्ती ह्रियमाणेत्यर्थः । प्राणैः प्राणेभ्यः ।।२४।। अपावृतं उद्घाटितं येन तत्क वसतीत्यन्वयः ।। २५—२६ ।। ममेति विषमवृत्तं ।। २७ ।। इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षष्ठः सर्गः ।। ६ ।।

एवमाभरणदर्शनव्याजेन चेतनस्य यादृच्छिकप्रासङ्गिकसुकृतदर्शनेन तल्लाभत्वरा भगवत उच्यते सप्तमे—एवमुक्त इत्यादि ।। बाष्पगद्गदः रामबाष्पदर्शनेन स्वयमपि बाष्पगद्गदः । एकं दुःखं सुखं च नावित्यस्य प्रथमोदाहरणमिदं ।। १ ।। दौष्कुलेयस्य । दुष्कुले भवोदौष्कुलेयः। “ दुष्कुलाड्ढक् ” इति ढक् । तस्यपापरक्षसः परदारापहरणरूपपापकृतो राक्षसस्य। निलयं वासस्थानं । सामर्थ्यं शक्तिं । विक्रमं वा । सर्वथा न जाने । किंचिदपि नजानामीत्यर्थः । नन्विदं वक्ष्यमाणेन विरुध्यते । वक्ष्यति वानरप्रेषणावसरे—“ द्वीपस्तस्यापरे पारे शतयोजनमायतः । अगम्यो मानुषैर्देवैस्तं मार्गध्वं समन्ततः ।। सहि

ति० नाहमिति ऊर्ध्वदृष्ट्यापरस्त्रीत्वेनकदाप्यदर्शनादितिभावः ॥ २२ ॥ **ती०** कंदेशं अत्यन्तसंयोगेद्वितीया । कस्मिन्देशेलक्षितेत्यर्थः ॥ **ति०** प्राणप्रिया प्राणेभ्योपीष्टा । प्राणसंबन्धस्यतदधीनत्वादितिभावः ॥ २४ ॥ **ति०** यन्निमित्तं प्रियापहारि तन्निमित्तं । **स०** महदितिभिन्नं ॥ २५ ॥ **रामानु०** अस्मिन्सर्गान्तेममदयिततरेत्ययंश्लोकोबहुषुकोशेषुनदृश्यते ॥ २७ ॥ इति षष्ठःसर्गः ॥ ६ ॥

ति० नजानइति । सर्वप्रकारेणनजाने किंचिज्ज्ञानामीत्यर्थः । उत्तरत्रसीतान्वेषाणार्थहनुमदादिवानरप्रेषणसमये “सहिदेशस्तुवध्यस्यरावणस्यदुरात्मनः । राक्षसाधिपतेर्वासः सहस्राक्षसमद्युतेः” इतिवचनेनरावणावासस्यसुग्रीवावगतत्वप्रतीतेरेवंव्याख्यातं ॥ **ति०** पापरक्षसः पापंकृतवतोरक्षसः । निलयं निलयस्थानं गुप्तवासस्थानं । सर्वथानजाने । नहीदृशंपापंकर्मकृत्वाराजधान्यांवस्तुमर्हतीतिभावः । सामर्थ्यं शौर्यादि । विक्रमं विशेषेणक्रामतिपादविक्षेपंकरोतियत्रतद्वासनगरं । दौष्कुलेयस्येत्यनेन रक्षःकुलजत्वंध्वनितं । तज्जाने एवेतिशेषः । वाशब्दस्त्वर्थे । अतएवलङ्काद्वीपंनिर्दिश्य “ सहिदेशस्तुवध्यस्य—”इतिहनुमदादिप्रेषण-

[पा०] १ झ. ट. ततस्तुराघवोवाक्यं. २ छ. झ. ञ. प्राणप्रियाहृता. ख. ग. ङ. ट. प्राणप्रियाप्रिया. ३ ङ. च. ज. ञ. यन्निमित्तमिमान्सर्वान्. ४ छ. झ. ट. ध्रुवं. ५ छ. झ. ट. दयिततमा. ६ ग. घ. छ. झ. वनाद्रजनिचरेण. ७ क.—घ. छ. झ. ट. तमद्यवै. ८ क.—ट. यमसंनिधिं. ९ ख. बाष्पगद्गदं. १० ञ. चापि. ११ छ. वैकुलं.

सत्यं[1] ते प्रतिजानामि त्यज शोकमरिन्दम ॥ करिष्यामि तथा यत्नं यथा प्राप्स्यसि मैथिलीम् ॥३॥
रावणं सगणं हत्वा परितोष्यात्मपौरुषम् ॥ तथाऽस्मि कर्ता नचिराद्यथा प्रीतो भविष्यसि ॥ ४ ॥
अलं वैक्लब्यमालम्ब्य धैर्यमात्मगतं स्मर ॥ त्वद्विधानामसदृशमीदृशं[2] विद्धि[3] लाघवम् ॥ ५ ॥

देशस्तु वध्यस्य रावणस्य दुरात्मनः । राक्षसाधिपतेर्वासः सहस्राक्षसमद्युतेः " इति । तत्र हि रावणस्य निलयसामर्थ्यपराक्रमाः सुग्रीवेण स्पष्टमवगता इति गम्यते । सत्यं । तथापि स्वकार्ये प्रथमं प्रवर्तयितुमेवमुक्तवान्सुग्रीवः । अतएव " ब्रूहि सुग्रीव कं देशं ह्रियन्ती लक्षिता त्वया " इत्यस्यापि प्रतिवचनंनोक्तवान् । कथंगमनदेशमपिन जानीयात् । य एवमाह " ह्रियमाणा मया दृष्टा " इति । न चैवमादावेव मित्रद्रोहः कृतःस्यादिति वाच्यं । दूरदर्शिना सुग्रीवेणैवं मनसि कृतं । यदि मया 'रावणवृत्तान्तो मया ज्ञात' इत्युक्तः स्यात् । तदातिव्यसनी रामोयं सीतान्वेषणे प्रथमं मां प्रवर्तयेत् । तच्चायुक्तं । वानराणां वालिवशंवदत्वेनास्मदधीनत्वाभावात् । कथंचित्केषांचिद्वशीकरणेपि रावणेनकृतसख्यो वाली चास्मन्मनोरथानुरूपां प्रवृत्तिं कथंसहेत । तथा चोभयकार्यभङ्ग इत्यज्ञानमभिनीतवान्सुमतिःसुग्रीवः । न चैवंसति वानरप्रेषणकालिकसुग्रीववचनेन कथमिव रामोनाशङ्कतेति वाच्यं । तारोक्तलक्ष्मणवचनश्रवणेनरामस्यन शङ्कावकाशः । पूर्वमयंनजानाति पश्चात्तारावचनैर्ज्ञातवानितिरामस्यापिप्रतिपत्तिर्भवेत् । एवं ह्याह लक्ष्मणंप्रतितारा " शतकोटिसहस्राणि लङ्कायांकिलराक्षसाः । अयुतानिचषट्त्रिंशत्सहस्राणि शतानि च ॥ अहत्वा तांश्च दुर्धर्षान्राक्षसान्कामरूपिणः । नशक्योरावणोहन्तुं येनसामैथिली हृता " इत्यादि । किंच कथंवालोकालोकपर्यन्तं पर्यटतस्तदपरिज्ञानं । अतएवहि रामबलपरीक्षासमये दुन्दुभ्यादिधर्षणकथनप्रसङ्गेवक्तव्यमपिरावणजयवृत्तान्तं नोक्तवान् । नन्वेवमिदानीं परमार्थतो न विजानातिसुग्रीवः पश्चात्तारया ज्ञातवानिति किंन विकल्प्यतइतिचेन्न । तारादर्शनात्प्रभृति कामपरवशेन सुग्रीवेण तारया सह रामकार्यपर्यालोचनाप्रसक्तेः । यदिचसुग्रीवः सर्वथा नजानीयात् तदा सीताक्रोशादिना स्फुटमवगतांदिशंवदेदेव । यच्च कैश्चिदुक्तं । निलयं नजानामीत्यस्य इदानींतदवस्थानदेशं नजानामीत्यर्थइति । तन्न । सर्वात्मना रावणवृत्तान्तमपरिज्ञायकियदपितत्स्वरूपज्ञानं भवत्वितितात्पर्येण क वावसति तद्रक्ष इतिपृष्टवन्तंप्रतिज्ञातांशमात्रमप्यनुक्त्वा इदानींतदवस्थानभूमिं न जानामीत्युत्तरस्य छलत्वापत्तेः । तद्वासमात्रज्ञानेतद्धञ्जनेसस्वयमेवेहागमिष्यतीतिहि रामाभिप्रायः । किंच इदानीं निलयापरिज्ञानेपि सामर्थ्यपराक्रमौवा वक्तव्यौ स्यातां । इतरदिशः प्रतिवानराणांप्रेषणं तान्प्रति—"रावणःसहवैदेह्यामार्गितव्यस्ततस्ततः " इतिवचनंच बहुकालविलम्बेन यत्रकुत्रापि सीतां स्थापयेत्तिष्ठेद्वेतिसंगच्छते । एतेनेदमपिनिरस्तं । सर्वथा सर्वप्रकारेणापितन्निलयंनजानामीतिविशिष्टाभावोर्थः । तथाचाग्रे केनचित्प्रकारेण तन्निलयज्ञानाविरोधइति । वानरान्प्रति यावन्मात्रमुच्यतेतावतआदावपिवक्तव्यत्वात् । यदपि केनचिदुन्नीतं । संवत्सरपर्यन्तं सीतादुःखकरणाभावे रावणकृतशिवपूजाफलं नभवेदितिदैवप्रतिबन्धवशात्तदानीं सुग्रीवस्याज्ञानमिति । तत्तुच्छं । दृष्टे संभवत्यदृष्टकल्पनाया अन्याय्यत्वात् । सम्यक्च परदारधर्षणं शिवपूजाफलमिति । तस्माद्यथोक्तएवार्थोग्राह्यः ॥ २–३ ॥ सगणं सपरिवारं । रावणं हत्वा भवन्तं परितोष्य आत्मपौरुषं तथाकर्तास्मि । यथा प्रीतोभविष्यसीतिसंबन्धः ॥ ४ ॥ वैक्लब्यं दैन्यं ॥ ५ ॥

कालिकसुग्रीववचसानविरोधः ॥ **शि०** दौष्कुलेयस्येति । तत्कुलस्यदुष्कुलत्वंतुतन्मातूराक्षसीत्वेन । आकुलं चञ्चलचित्तत्वं तत्कारणंचेत्यर्थः ॥ २ ॥ **ति०** यद्यप्येतावज्जानामि तथापितदुपवर्णनंनिष्फलं । तावन्मात्रज्ञानेपितद्वधासंभवात् ॥ क्वचिद्गुप्तेस्थितिसंभवात् । एतावत्त्ववगम्यतामित्याह—**सत्यंत्विति** । **ति०** परितोष्यं भवतःपरितोषार्हं । आत्मनः सपरिवारस्यमम पौरुषं । अवलंब्येतिशेषः । **स०** अपरितोष्यं आत्मपौरुषंयस्यतंरावणं ॥ **शि०** आत्मपौरुषं सेनामित्यर्थः । परितोष्य संतोष्य ॥ ४ ॥

[पा०] १ क. ग. ङ.—ट. सत्यंतु. २ क. ग. ङ. च. झ. ञ. ट. त्वद्विधानांनसदृशं. ३ क.—ङ. छ.—ट. बुद्धिलाघवं.

मयाऽपि व्यसनं प्राप्तं [1]भार्याहरणजं महत् ॥ [2]न चाहमेवं शोचामि [3]न च धैर्यं परित्यजे ॥ ६ ॥
[4]नाहं तामनुशोचामि प्राकृतो वानरोपि सन् ॥ महात्मा च विनीतश्च किं पुनर्धृतिमान्[5]भवान् ॥७॥
बाष्पमापतितं धैर्यान्निग्रहीतुं त्वमर्हसि ॥ मर्यादां सत्त्वयुक्तानां धृतिं नोत्स्रष्टुमर्हसि ॥ ८ ॥
व्यसने वाऽर्थकृच्छ्रे वा भये वा [6]जीवितान्तके ॥ [7]विमृशन्वै स्वया बुद्ध्या धृतिमान्नावसीदति ॥ ९ ॥
बालिशस्तु नरो नित्यं वैक्लब्यं [8]योऽनुवर्तते ॥ स मज्जत्यवशः शोके भाराक्रान्तेव नौर्जले ॥ १० ॥
एषोञ्जलिर्मया बद्धः प्रणयात्त्वां प्रसादये ॥ पौरुषं श्रय शोकस्य नान्तरं [9]दातुमर्हसि ॥ ११ ॥
ये शोकमनुवर्तन्ते न तेषां विद्यते सुखम् ॥ तेजश्च [10]क्षीयते तेषां न त्वं शोचितुमर्हसि ॥ १२ ॥
शोकेनाभिप्रपन्नस्य जीविते [11]चापि संशयः ॥ स शोकं त्यज राजेन्द्र धैर्यमाश्रय केवलम् ॥ १३ ॥
हितं वयस्यभावेन ब्रूमि [12]नोपदिशामि ते ॥ वयस्यतां पूजयन्मे न त्वं शोचितुमर्हसि ॥ १४ ॥
मधुरं सान्त्वितस्तेन सुग्रीवेण स राघवः ॥ मुखमश्रुपरिक्लिन्नं वस्त्रान्तेन [13]प्रमार्जयत् ॥ १५ ॥
प्रकृतिस्थस्तु काकुत्स्थः सुग्रीववचनात्प्रभुः ॥ संपरिष्वज्य सुग्रीवमिदं वचनमब्रवीत् ॥ १६ ॥
कर्तव्यं यद्वयस्येन स्निग्धेन च हितेन च ॥ अनुरूपं च युक्तं च कृतं सुग्रीव [14]त्वया ॥ १७ ॥
एष च प्रकृतिस्थोऽहमनुनीतस्त्वया सखे ॥ दुर्लभो हीदृशो बन्धुरस्मिन्काले विशेषतः ॥ १८ ॥
किंतु यत्नस्त्वया कार्यो मैथिल्याः परिमार्गणे ॥ राक्षसस्य च रौद्रस्य रावणस्य दुरात्मनः ॥ १९ ॥
मया च यदनुष्ठेयं विस्रब्धेन तदुच्यताम् ॥ वर्षास्विव च सुक्षेत्रे सर्वं संपद्यते [15]मयि ॥ २० ॥
मया च यदिदं वाक्यमभिमानात्समीरितम् ॥ तत्त्वया हरिशार्दूल तत्त्वमित्युपधार्यताम् ॥ २१ ॥
अनृतं नोक्तपूर्वं मे नच वक्ष्ये कदाचन ॥ एतत्ते प्रतिजानामि सत्येनैव [16]च ते शपे ॥ २२ ॥
ततः प्रहृष्टः सुग्रीवो वानरैः सचिवैः सह ॥ राघवस्य वचः श्रुत्वा प्रतिज्ञातं विशेषतः ॥ २३ ॥
एवमेकान्तसंपृक्तौ ततस्तौ [17]नरवानरौ ॥ उभावन्योन्य[18]सदृशं [19]सुखं दुःखं प्रभाषताम् ॥ २४ ॥

परित्यजे परित्यजामि ॥ ६ ॥ प्राकृतः हीनः । विनीतः वृद्धैःसुशिक्षितः ॥ ७ ॥ सत्त्वयुक्तानां व्यवसायवतां । " द्रव्यासुव्यवसायेषु सत्त्वमस्त्रीतुजन्तुषु " इत्यमरः । मर्यादां व्यवस्थारूपांधृतिं ॥ ८ ॥ अर्थकृच्छ्रे धननाशे ॥ ९–१० ॥ अन्तरं अवकाशं ॥ ११–१३ ॥ ब्रूमि ब्रवीमि । वयस्यतां मित्रत्वं ॥ १४ ॥ प्रमार्जयत् । स्वार्थे णिच् । " अनित्यमागमशासनं " इत्यडभावः ॥ १५–१६ ॥ अनुरूपं मित्रत्वानुरूपं । युक्तं शोकनिवारणयोग्यं । कृतं उक्तमित्यर्थः ॥ १७–१९ ॥ विस्रब्धेन स्निग्धेन ॥ २० ॥ अभिमानात् शौर्याभिमानात् । त्वय्यभिमानाद्वा । तत्त्वं यथार्थं ॥ २१—२३ ॥ एकान्तसं-

ति० व्यसने इष्टवियोगजे । भये चोरव्याघ्रादिजे । जीवितान्तगे जीवितनाशप्रापके । विमृशन् प्रारब्धवेगमितिशेषः । **ती०** व्यसने विपदि । अर्थकृच्छ्रे कार्यसंकटे ॥ ९ ॥ **शि०** पौरुषं स्वैकनिष्ठपरमपुरुषत्वंश्रय स्मरेत्यर्थः ॥११॥ **ती०** प्रकृतिस्थः स्वभावस्थः दुःखरहितइत्यर्थः ॥ १६ ॥ **शि०** स्निग्धेन स्नेहविशिष्टेन । युक्तं युक्तिविशिष्टं ॥ १७ ॥ **ति०** अस्मिन्काले व्यसनकाले ॥ १८ ॥ **ति०** रावणस्य संहारेचेतिशेषः ॥ **स०** रावणस्यच परिमार्गणे ॥ १९ ॥ **ति०** यदनुष्ठेयं तवेतिशेषः ॥ वर्षास्विवसुक्षेत्रे उप्तंबीजमितिशेषः । संपद्यते सफलंभविष्यतीत्यर्थः । शैघ्र्यप्रत्यायनायवर्तमानप्रयोगः ॥ **स०** विस्रब्धेन विश्वस्तेनमया यत्कर्तव्यंतदुच्यतां । अनन्तरंच वर्षासुतत्रापिचसुक्षेत्रे उप्तंयथासंपद्यते तथातवसर्वंसंपद्यते ॥ २० ॥ **ती०** इदंवाक्यं

[पा०] १ छ. झ. ट. भार्याविरहजं. २ छ. झ. ट. नाहमेवंहि. ३ ग. छ. झ. ट. धैर्यंनच. ४ ग. अहंतावन्नशोचामि. ङ. ञ. नाहंत्वमिवशोचामि. ५ छ. झ. ट. न्महान्. ६ ख. ग. घ. छ.—ट. जीवितान्तगे. ७ च. छ. झ. ज. ट. विमृशंश्च. ८ क. ग. योनुगच्छति. ९ क. ग. गन्तुमर्हसि. १० छ. झ. क्षयते. ११ ख. वापि. १२ क. नोपदिशाम्यहं. १३ क. प्रमार्जितं. ख. ममार्जतत्. १४ क. ग. मेत्वया. १५ क. ग. ङ. च. छ. झ. ञ. ट. तव. १६ छ. झ. ट. शपाम्यहं. क.—च. ज. ञ. शपामिते. १७ ज. हरिवानरौ. १८ क. ग. सदृशौ. १९ ख. ङ. च. झ. ञ. ट. सुखंदुःखमभाषतां. ज. सुसुखंप्रत्यभाषतां.

महानुभावस्य वचो निशम्य [1]हरिर्नराणामृषभस्य तस्य ॥
कृतं स मेने हरिवीरमुख्यस्तदा स्वकार्यं हृदयेन विद्वान् ॥ २५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे सप्तमः सर्गः ॥ ७ ॥

अष्टमः सर्गः ॥ ८ ॥

रामेण सहैकशाखाऽऽसनगतेनसुग्रीवेण रामंप्रति स्वस्मिन्वालिकृतापकारनिवेदनपूर्वकमभययाचना ॥ १ ॥ तथा रामेण वालिवधप्रतिज्ञाने विस्तरेणभार्याहरणादिरूपवाल्यपकारनिवेदनेन तद्वधप्रार्थना ॥ २ ॥ रामेण सुग्रीवंप्रति वालिनासह तादृशविरोधकारणप्रश्नः ॥ ३ ॥ सुग्रीवेण तंप्रति तत्कथनोपक्रमः ॥ ४ ॥

परितुष्टस्तु सुग्रीवस्तेन वाक्येन [2]वानरः ॥ लक्ष्मणस्या[3]ग्रतो राममिदं वचनमब्रवीत् ॥ १ ॥
सर्वथाऽहमनुग्राह्यो दे[4]वतानामसंशयः ॥ उपपन्नगुणोपेतः सखा यस्य भवान्मम ॥ २ ॥
शक्यं खलु भवेद्राम सहायेन त्वयाऽनघ ॥ सुरराज्यमपि प्राप्तुं स्वराज्यं किं[5] पुनः प्रभो ॥ ३ ॥
सोहं सभाज्यो बन्धूनां सुहृदां चैव राघव ॥ यस्याग्निसाक्षिकं मित्रं लब्धं राघववंशजम् ॥ ४ ॥
अहमप्यनुरूपस्ते वयस्यो ज्ञास्यसे शनैः ॥ नतु वक्तुं समर्थोऽहं स्व[6]यमात्मगतान्गुणान् ॥ ५ ॥
महात्मनां तु भूयिष्ठं त्वद्विधानां कृतात्मनाम् ॥ निश्चला भवति प्रीतिर्धैर्य[7]मात्मवतामिव ॥ ६ ॥
रजतं वा सुवर्णं वा व[8]स्त्राण्याभरणानि च ॥ अविभक्तानि साधूनामवगच्छन्ति साधवः ॥ ७ ॥
आढ्यो वाऽपि दरिद्रो वा दुःखितः सुखितोपि वा ॥ निर्दो[9]षो वा सदोषो वा वयस्यः परमा गतिः ॥ ८ ॥
धनत्यागः सुखत्यागो दे[10]हत्यागोपि वा पुनः ॥ वयस्यार्थे प्रवर्तन्ते स्नेहं दृष्ट्वा तथाविधम् ॥ ९ ॥

प्रवृत्तौ एकान्ते रहसि संयुक्तौ एकान्तंनियतं यथातथा संयुक्तौवा । प्रभाषतां । व्यत्ययेन परस्मैपदमडभावश्च ॥ २४—२५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने सप्तमः सर्गः ॥ ७ ॥

अथ सुग्रीवस्य स्वशोकमूलविज्ञापनमष्टमे—परितुष्ट इत्यादि ॥ १ ॥ देवतानामनुग्राह्यः दयनीयोऽभवं । यस्य मे भवान् सखाऽऽसीत् । कीदृशः सखा । उपपन्नगुणोपेतः राजयोग्यशौर्यवीर्यादिसर्वगुणोपपन्नः ॥ २ ॥ शक्यमित्यादि चतुश्चत्वारिंशत् ॥ ३ ॥ सभाज्यः पूज्यः ॥ ४—५ ॥ भूयिष्ठं अतिशयेन । आत्मवतां आत्मज्ञानिनां ॥ ६ ॥ साधूनां मित्राणां । साधवो मित्राणि ॥ ७—८ ॥ तथाविधं स्वस्नेहसदृशं स्नेहंदृष्ट्वास्थितस्य वयस्यस्य वयस्यार्थे धनत्यागादयःप्रवर्तन्तइतियोजना । अनया सुग्रीववचनभङ्ग्या

वालिनंवधिष्यामीतिवाक्यं ॥ २१ ॥ **ती॰** स्वकार्यं वालिवधरूपकार्यं ॥ सर्गश्रुतिफलमुक्तंस्कान्दे—“रामसुग्रीवसँल्लापंश्रुत्वा दुःखाद्विमुच्यते ” इति ॥ २५ ॥ इतिसप्तमःसर्गः ॥ ७ ॥

ति॰ तेनवाक्येन अनृतंनोक्तपूर्वंमेइत्यादिवाक्येन ॥ **स॰** तुष्टं तोषः । भावेक्तः । परि उपरतं तुष्टंयस्यसपरितुष्टः । तुरप्यर्थे । तादृशोपि तेनरामेणवाक्येनहर्षितः । “ परिस्यात्सर्वतोभावइत्यारभ्य—दोषाख्यानेप्युपरमेव्याप्तौनिवसनेपिच ।” इतिविश्वः ॥ १ ॥ **शि॰** उपपन्नः स्वाभाविकसकलसंपत्तिविशिष्टः । गुणोपेतः सकलसद्गुणयुक्तः ॥ २ ॥ **ति॰** अनुरूपः योग्यः । ज्ञास्यसे आनुरूप्यमितिशेषः । नतुवक्तुंसमर्थः । “ आत्मप्रशंसामरणं ” इतिन्यायात् ॥ ५ ॥ **ती॰** महात्मनां विमलान्तःकरणानां । आत्मवतां प्रशस्तबुद्धीनां । **स॰** कृतात्मनां शिक्षितमनस्कानां ॥ ६ ॥ **ती॰** अविभक्तानि स्वेनतुल्यानि ॥ ७ ॥

[पा॰] १ ख. ङ. छ. झ. ञ. ट. हरिर्नृपाणामधिपस्य. २ ङ. च. छ. झ. ञ. ट. हर्षितः. ३ क. ग. ङ. च. छ. झ. ञ. ट. स्याग्रजंशूरमिदं. ज. स्याग्रतस्त्वमिदं. ४ ङ. च. छ. झ. ट. देवतानांनसंशयः. ५ छ. झ. ट. किमुतप्रभो. ६ छ. झ. त्वयिआत्मगतान्. ७ छ. झ. मात्मवतांवरा. ८ ङ. च. झ. ट. शुभान्याभरणानिच. ९ ङ.—ञ. निर्दोषश्चसदोषश्च. क. ग. निर्दोषश्चाक्षमश्चैव. १० ङ. च. छ. झ. ञ. ट. देशत्यागोपिवाऽनघ.

तत्तथेत्यब्रवीद्रामः सुग्रीवं प्रियवादिनम् ॥ लक्ष्मणस्याग्रतो लक्ष्म्या वासवस्येव धीमतः ॥ १० ॥
ततो रामं स्थितं दृष्ट्वा लक्ष्मणं च महाबलम् ॥ सुग्रीवः सर्वतश्चक्षुर्वने लोलमपातयत् ॥ ११ ॥
स ददर्श ततः सालमविदूरे हरीश्वरः ॥ सुपुष्पमीषत्पत्राढ्यं भ्रमरैरुपशोभितम् ॥ १२ ॥
तस्यैकां पर्णबहुलां भङ्क्त्वा शाखां सुपुष्पिताम् ॥ सालस्यास्तीर्य सुग्रीवो निषसाद सराघवः ॥१३॥
तावासीनौ ततो दृष्ट्वा हनूमानपि लक्ष्मणम् ॥ सालशाखां समुत्पाट्य विनीतमुपवेशयत् ॥ १४ ॥
सुखोपविष्टं रामं तु प्रसन्नमुदधिं यथा ॥ फलपुष्पसमाकीर्णे तस्मिन्गिरिवरोत्तमे ॥ १५ ॥
ततः प्रहृष्टः सुग्रीवः श्लक्ष्णं मधुरया गिरा ॥ उवाच प्रणयाद्रामं हर्षव्याकुलिताक्षरम् ॥ १६ ॥
अहं विनिकृतो भ्रात्रा चराम्येष भयार्दितः ॥ ऋश्यमूकं गिरिवरं हृतभार्यः सुदुःखितः ॥ १७ ॥
सोहं त्रस्तो भये मग्नो वसाम्युद्भ्रान्तचेतनः ॥ वालिना निकृतो भ्रात्रा कृतवैरश्च राघव ॥ १८ ॥
वालिनो मे भयार्तस्य सर्वलोकाभयंकर ॥ ममापि त्वमनाथस्य प्रसादं कर्तुमर्हसि ॥ १९ ॥
एवमुक्तस्तु तेजस्वी धर्मज्ञो धर्मवत्सलः ॥ प्रत्युवाच स काकुत्स्थः सुग्रीवं प्रहसन्निव ॥ २० ॥
उपकारफलं मित्रमपकारोऽरिलक्षणम् ॥ अद्यैव तं हनिष्यामि तव भार्यापहारिणम् ॥ २१ ॥
इमे हि मे महावेगाः पत्रिणस्तिग्मतेजसः ॥ कार्तिकेयवनोद्भूताः शरा हेमविभूषिताः ॥ २२ ॥
कङ्कपत्रप्रतिच्छन्ना महेन्द्राशनिसन्निभाः ॥ सुपर्वाणः सुतीक्ष्णाग्राः सरोषा भुजगा इव ॥ २३ ॥
भ्रातृसंज्ञममित्रं ते वालिनं कृतकिल्बिषम् ॥ शरैर्विनिहतं पश्य विकीर्णमिव पर्वतम् ॥ २४ ॥

आवाभ्यामेवं वर्तितव्यमितिव्यवस्थाद्योत्यते ॥ ९ ॥ लक्ष्म्या कान्त्या वासवस्येव स्थितस्य लक्ष्मणस्याग्रत इतिसंबन्धः । अनेनोक्तार्थे लक्ष्मणानुमतिर्द्योतिता ॥ १० ॥ स्थितं भूषणग्रहणकालात्प्रभृतितिष्ठन्तमित्यर्थः । लोलंचक्षुरपातयदिति । समीचीनशाखालाभार्थं सर्वत्रोन्मेषयामासेत्यर्थः ॥ ११ ॥ ईषत्पत्राढ्यमिति पल्लवप्रचुरमित्यर्थः ॥ १२ ॥ पर्णबहुलां पल्लवबहुलां ॥ १३ ॥ विनीतं । एकासने स्थितिमनङ्गीकुर्वन्तमित्यर्थः । उपवेशयत् उपावेशयत् ॥ १४ ॥ सुखोपविष्टमित्यादिश्लोकद्वयमेकान्वयं । द्वितीयरामपदमभिरामार्थकं । प्रसन्नमुदधिं यथा तद्वत्प्रसन्नं गम्भीरमित्यर्थः ॥ १५—१८ ॥ हे सर्वलोकाभयंकर । वालिनः सकाशात् भयार्तस्य मे ममापि अत्यन्तभाग्यहीनस्यापि । प्रसादं कर्तुमर्हसि ॥ १९ ॥ प्रहसन्निव पूर्वमेव प्रतिज्ञातेपि चापलातिशयात्पुनः प्रार्थयत इति मन्दस्मितवानित्यर्थः ॥ २० ॥ अरिलक्षणमित्यनन्तरं अत इत्युपस्कार्यं ॥ २१ ॥ पत्रिणः प्रशस्तपत्रिणः । तिग्मतेजसः क्रूरतेजसः । कार्तिकेयवनोद्भूताः शरवणोद्भूताः । कङ्कपत्रप्रतिच्छन्ना इति पत्रिण इत्युक्तं विशेष्यते । महेन्द्रपदेनाशनेस्तत्सन्निहितत्वातिशय उच्यते । इमे मे शराः महावेगत्वादिविशिष्टाहि । अतः एतैः शरैर्वालिनं विनिह-

रामानु० लक्ष्मणः तेजोविशेषेणवासवसदृशइत्यर्थः ॥ १० ॥ **स०** ततः परदिने । अतोनपौनरुक्त्यं ॥ ११ ॥ **रामानु०** आस्तीर्येति । पुनरासनप्रदानकथनेनायंपरेद्युर्वृत्तान्तइत्यवगम्यते ॥ १३ ॥ **शि०** गिरिवरोत्तमे गिरिवरस्योत्तमप्रदेशे ॥ रामं ददर्शेतिशेषः ॥ १५ ॥ **रामानु०** अत्रद्वितीयोरामशब्दोऽभिरामवचनः । क्रियाविशेषणंवा ॥ १५—१६ ॥ **स०** अहमित्यादिपुनःपुनर्वचनं स्वप्रमेयदार्ढ्याय ॥ **ति०** अहंविनिकृतइतिपूर्वदिवसोक्तार्थस्मारणं तदर्थस्यावश्यानुष्ठेयत्वाभिप्रायेण ॥ १८ ॥ **रामानु०** सर्वलोकाभयंकर अतएवममाप्यभयंकर । वालिनोभयार्तस्यमेप्रसादंकर्तुमर्हसि । सखित्वेनमह्यंविशेषतःप्रसादःकर्तव्यइत्यभिप्रायः ॥ **स०** आपिनोभावः आपित्वं प्राप्तिरित्यर्थः । मम ममतया आपित्वंयस्य तंप्रसादं । मे मत्संबन्धिनोवालिन इतिवा ॥ १९ ॥ **शि०** कार्तिकेयवनोद्भूताः स्कन्दोत्पत्तिभूमिकाननप्रादुर्भूतकाण्डकाः । एतेनतेषामभेद्यत्वंबोधितं । तदुद्भूतशराणामभेद्यत्वेनप्रसिद्धत्वात् ॥ २२ ॥ **ति०** भ्रातरं अमित्रमप्येकोदरजन्ममात्रेणतथाव्यवहृतं । पश्य द्वित्रैर्दिवसैरितिशेषः ॥२४॥

[पा०] १ ङ.—झ. ट. प्रियदर्शनं. ञ. प्रियदर्शनः. २ क. च. ज. ञ. त्पर्णाढ्यं. ३ ङ.—ट. शाखांभङ्क्त्वासुशोभनां. ४ क.—ट. रामस्यास्तीर्य. ५ च. ज. रामंतं. ६ ग. छ. झ. ट. सालपुष्पावसंकीर्णे. ७ क. ग.—ट. श्लक्ष्णयाशुभयागिरा. ८ ग. चराम्येव. ९ क. ग. ङ. च. छ. झ. ञ. ट. वनेसंभ्रान्तचेतनः. १० ख. वानरोत्तमं. ११ ङ.—ट. वधिष्यामि. १२ च. झ. ट. महाभाग. १३ ङ. ज. ञ. इवपन्नगाः. १४ ङ.—ट. वालिसंज्ञं. १५ ङ.—ट. भ्रातरं.

राघवस्य वचः श्रुत्वा सुग्रीवो [1]वाहिनीपतिः ॥ प्रहर्षमतुलं लेभे साधुसाध्विति चाब्रवीत् ॥ २५ ॥
राम शो[2]काभिभूतोऽहं शोकार्तानां भवान्गतिः ॥ वयस्यइति कृत्वा हि त्वय्यहं परिदेवये ॥ २६ ॥
त्वं हि पाणिप्रदानेन वयस्यो मेऽग्नि[3]साक्षिकम् ॥ कृतः [4]प्राणैर्बहुमतः [5]सत्येनापि शपामि ते ॥ २७ ॥
वयस्यइति कृत्वा च वि[6]स्रब्धं प्रवदाम्यहम् ॥ दुःखमन्तर्गतं [7]यन्मे मनो [8]हरति नित्यशः ॥ २८ ॥
एतावदुक्त्वा वचनं बाष्पदूषितलोचनः ॥ [9]बाष्पोपहतया वाचा [10]नोच्चैः शक्नोति भाषितुम् ॥ २९ ॥
बाष्पवेगं तु सहसा नदीवेगमिवागतम् ॥ धारयामास धैर्येण सुग्रीवो रामसन्निधौ ॥ ३० ॥
सन्निगृह्य तु तं बाष्पं प्रमृज्य नयने शुभे ॥ विनिःश्वस्य च तेजस्वी राघवं [11]वाक्यमब्रवीत् ॥ ३१ ॥
पुराऽहं वालिना राम राज्यात्स्वादवरोपितः ॥ परुषाणि च संश्राव्य निर्धूतोस्मि बलीयसा ॥ ३२ ॥
हृता भार्या च मे तेन प्राणेभ्योपि गरीयसी ॥ सुहृदश्च मदीया ये संयता बन्धनेषु ते ॥ ३३ ॥
यत्नवांश्च सुदुष्टात्मा मद्विनाशाय राघव ॥ [12]बहुशस्तत्प्रयुक्ताश्च वानरा निहता मया ॥ ३४ ॥
शङ्कया त्वेतया चेह दृष्ट्वा त्वामपि राघव ॥ नोपसर्पाम्यहं भीतो भये सर्वे हि बिभ्यति ॥ ३५ ॥
केवलं हि सहाया मे हनुमत्प्रमुखास्त्विमे ॥ अतोऽहं धारयाम्यद्य प्राणान्कृच्छ्रगतोपि सन् ॥ ३६ ॥
एते हि कपयः स्निग्धा मां रक्षन्ति [13]समन्ततः ॥ सह गच्छन्ति गन्तव्ये नित्यं तिष्ठन्ति [14]च स्थिते ३७
सङ्क्षेपस्त्वेष [15]ते राम किमुक्त्वा वि[16]स्तरं हि ते ॥ स मे ज्येष्ठो रिपुर्भ्राता वाली विश्रुतपौरुषः ॥ ३८ ॥
[17]तद्विनाशाद्धि मे दुःखं प्रनष्टं स्या[18]दनन्तरम् ॥ सुखं मे जीवितं चैव तद्विनाशनिबन्धनम् ॥ ३९ ॥

तंपश्येतिसंबन्धः ॥ २२—२४ ॥ वाहिनीपतिः वानरसेनाधिपतिः ॥ २५ ॥ वयस्य इति । वयस्य इतिचेत्यर्थः । त्वयि त्वत्समीपे ॥ २६—२८ ॥ एतावदुक्त्वा पुराहं वालिनेत्यादि वक्तुकामस्तदुपोद्घातत्वेन " दुःखमन्तर्गतं यन्मेमनो हरतिनित्यशः " इत्येतावदुक्त्वा । शक्नोति अशक्नोत् ॥ २९ ॥ रामसन्निधाविति । मांप्रत्युपदिश्य स्वयंनशक्नोतीति रामो मन्येतेति भियाधारयामासेतिभावः ॥ ३०—३१ ॥ स्वाद्राज्यात् यौवराज्यात् । निर्धूतः निरस्तः ॥ ३२ ॥ बन्धनेषु कारागृहेषु ॥ ३३—३४ ॥ एतयाशङ्कया वालिप्रयुक्तत्वशङ्कया । भीतःनोपसर्पामि नोपासर्पं । भये भयनिमित्ते ॥ ३५ ॥ केवलं अद्वितीयंयथातथा ॥ ३६ ॥ केवलत्वमुपपादयति—एतेहीति ॥ गन्तव्ये । मयिगच्छतीत्यर्थः ॥ ३७ ॥ संक्षेपइत्यादिद्वयं ॥

॥ २४ ॥ **वि०** दुःखातिशयात्पुनराह—**रामेत्यादि** । शोकार्तगतित्वाद्वयस्यत्वाच्च त्वयिपरिदेवनं ॥२६॥ **ति०** अवक्तव्यमपिवयस्यइतिकृत्वाविस्रब्धः विश्वस्तः । वदामि । हरति क्षीणंकरोति ॥ २८ ॥ **रामानु०** अत्रपुनश्शब्दोऽध्याहर्तव्यः । एतावदुक्त्वा वचनं " रामशोकाभिभूतोऽहं " इत्यारभ्य " मनोहरतिनित्यशः " इत्येतदन्तंवचनजातंपुनरुक्त्वा ॥ २९ ॥ **स०** अवरोपितः अपहृताधिकारः । परुषाणि निष्ठुरवचांसि । संश्राव्य श्रावयित्वा । निर्धूतोस्मि ॥ ३२ ॥ **रामानु०** बन्धनेषु बध्यतेऽस्मिन्निति बन्धनंकारगारं ॥ ३३ ॥ **रामानु०** परमकारुणिकंत्वामपि ॥ **ति०** भये यत्किंचिद्भयप्राप्तौ । बिभ्यति सर्वतएवेतिशेषः ॥३५॥ **शि०** सः मद्वधविषयकयत्नवान् । अतएवरिपुः । वाली अस्तीतिशेषः ॥ ३८ ॥ **रामानु०** सख्यकरणादिना लब्धमपिसुखादिकंनलब्धप्रायमितिभावः ॥ **ति०** यद्यपिभ्रातृनाशोदुःखाय । तथाप्यनन्तरं संप्रतिविद्यमानंमेदुःखं तद्विनाशेएवप्रमृष्टंस्यात् ।

[पा०] १ घ. वानराधिपः. २ घ. शोकाभितप्तोहं. ३ क. ख. ङ.—ज. ञ. साक्षिकः. ४ क. ग. च. ज. ञ. प्राणैःप्रियतमः. ५ क. ग. ङ.—ट. सत्येनचशपाम्यहं. ख. घ. सत्येनापिशपाम्यहं. ६ ख.—ट. विस्रब्धः. ७ ङ. छ.—ट. तन्मे. ८ क. ख. दहति. ९ ग. ङ. छ.—ट. बाष्पदूषितया. १० ख. नचशक्तोऽभिभाषितुं. ११ क. ख. ग. पुनरब्रवीत्. ङ.—ट. पुनरूचिवान्. १२ क. ग. बहवः. १३ घ. सदोद्यताः. १४ झ. चास्थिते. १५ क. ङ. छ. ज. झ. ट. मेराम. १६ ख. बहुविस्तरैः. १७ छ. झ. ट. तद्विनाशेपि. ङ. च. ज. ञ. तद्विनाशेन. १८ ज. ञ. दनन्तकं.

[1]एष मे राम शोकान्तः शोकार्तेन निवेदितः ॥ [2]दुःखितः सुखितो वाऽपि सख्युर्नित्यं सखा गतिः॥४०॥
[3]श्रुत्वैतद्वचनं रामः सुग्रीवमिदमब्रवीत् ॥ किंनिमित्तमभूद्वैरं श्रोतुमिच्छामि तत्त्वतः ॥ ४१ ॥
सुखं हि कारणं श्रुत्वा वैरस्य तव वानर ॥ [4]आनन्तर्यं विधास्यामि संप्रधार्य बलाबलम् ॥ ४२ ॥
[5]बलवान्हि ममामर्षः श्रुत्वा त्वामवमानितम् ॥ [6]वर्तते हृदयोत्कम्पी प्रावृड्वेग इवाम्भसः ॥ ४३ ॥
हृष्टः कथय विस्रब्धो यावदारोप्यते धनुः ॥ [7]सृष्टश्च हि मया बाणो निरस्तश्च रिपुस्तव ॥ ४४ ॥
एवमुक्तस्तु सुग्रीवः काकुत्स्थेन महात्मना ॥ प्रहर्षमतुलं लेभे चतुर्भिः सह वानरैः ॥ ४५ ॥
ततः प्रहृष्टवदनः सुग्रीवो लक्ष्मणाग्रजे ॥ वैरस्य कारणं [8]तत्त्वमाख्यातुमुपचक्रमे ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे अष्टमः सर्गः ॥ ८ ॥

नवमः सर्गः ॥ ९ ॥

दुन्दुभेरग्रजेन मायाविनाम्नामयसुतेन स्त्रीनिमित्तकवैरादर्धरात्रेकिष्किन्धामेत्य युद्धाय वालिनःसमाह्वानम् ॥ १ ॥ किष्किन्धातो निर्गतयोर्वालिसुग्रीवयोरवलोकनेन भयाद्गुहांप्रविष्टेमायाविनि वालिना सुग्रीवंप्रति स्वागमनावधि गुहामुखेऽवस्थाननियोजनपूर्वकमसुरवधाय गुहाप्रवेशः ॥ २ ॥ वत्सरान्तं वाल्यागमनप्रतीक्षया गुहाद्वारितिष्ठता तावदवधि तदागमनमपश्यता पश्यताच गुहामुखात्सफेनरुधिरधारानिस्सरणमुपशृण्वताचासुरकण्ठकोलाहलं सुग्रीवेण वालिनोनिधननिर्धारणेन महत्याशिलया बिलद्वारपिधानेन तस्मै जलदानपूर्वकं किष्किन्धाप्रवेशः ॥ ३ ॥ बलान्मन्त्रिभीराज्येऽभिषेचितेन सुग्रीवेण रिपुहननपूर्वकं प्रत्यागतवतः कोपाद्भर्त्सयतोवालिनःप्रसादनाय तदभिवादनम् ॥ ४ ॥

[[9]श्रूयतां राम यद्वृत्तमादितःप्रभृति त्वया ॥ यथा वैरं समुद्भूतं यथा चाहं निराकृतः] ॥ १ ॥

तद्विनाशादनन्तरं मे दुःखं प्रनष्टं स्यात् । मेसुखं मेजीवितं चैव तद्विनाशनिबन्धनमित्येषसङ्क्षेपइत्यन्वयः ॥ ३८—४१ ॥ तव वैरस्य कारणं श्रुत्वा बलाबलं संप्रधार्य वैरकारणं वा वैरं वा बलवदिति विचार्य । आनन्तर्यम् अनन्तरम् । स्वार्थे ष्यञ् । तव सुखं विधास्यामि । स्वल्पापराधेप्रबलवैरंतेनकृतंचेत्तमद्यैव हत्वा तवसुखंविधास्यामि । अनल्पापराधेस्वल्पवैरंचेत्समाधानमुखेन सुखं विधास्यामीतिभावः ॥ ४२ ॥ अपराधस्वल्पत्वपक्ष आह—बलवानिति ॥ प्रावृषि वेगः प्रावृड्वेगः ॥ ४३ ॥ वालिवैरस्वल्पत्व आह—हृष्ट इति ॥ हृष्टइत्यनेन वालिहननानन्तरं शोकं माकुर्वित्यर्थः । क्रमेण तत्काले वक्ष्यत इत्यत्राह—सृष्ट इति । यदा बाणो विसृष्टस्तदैव रिपुर्नष्ट इत्यवेहीत्यर्थः ॥४४—४५॥ लक्ष्मणाग्रज इति निमित्तसप्तमी । तन्निमित्तमित्यर्थः ॥ ४६ ॥ श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने अष्टमः सर्गः ॥ ८ ॥

अपिरेवार्थे । तदेवाह—**सुखमिति** ॥ ३९ ॥ **स०** वैरं उभयोरितिशेषः ॥४१॥ **रामानु०** संप्रधार्य बलाबलंगुणदोषौविचार्य । आनन्तर्यं अनन्तरप्राप्तंकर्म । तवसुखंयथाभवतितथा विधास्यामिहि विधास्याम्येव । गर्हितमगर्हितंवा तवाभिमतंकरिष्याम्येवेत्यर्थः ॥ **ति०** तवतेनवैरस्यकारणंश्रुत्वा युवयोर्बलाबलंचश्रुत्वा आनन्तर्यात् तदनन्तरोत्पन्नविमर्शात् । संप्रधार्य निश्चित्य हि निश्चयेन । तवसुखं त्वत्सुखसाधनंवालिवधं । विधास्यामि ॥ ४२ ॥ **शि०** अवमानितंश्रुत्वेत्यनेन तदपराधाभावेतंनहन्तास्मीति व्यञ्जितं । तेनरामस्यमर्यादापालकत्वंव्यक्तं । अमर्षोवर्धतइत्यनेन कोपोद्गममन्तरावधस्याशक्यत्वंसूचितं ॥ ४३ ॥ **ति०** यावदारोप्यते आरोपयिष्यामि । सृष्टः विसृष्टः । रिपुर्निरस्तश्च । समुच्चयालङ्कारः व्यङ्ग्यातिशयोक्तिश्च ॥ ४४ ॥ **स०** विरसस्यभावः वैरस्यं तत्कारणं वैरस्ययत्कारणंतदितिवा ॥ ४६ ॥ इत्यष्टमःसर्गः ॥ ८ ॥

[**पा०**] १ घ. एषरामसशोकान्तः. ख. ग. एषमेरामशोकाग्निः. २ क. ग. घ. दुःखितोऽदुःखितो. ३ क. ग. ङ. छ—ट. श्रुत्वैतच्चवचो. ४ ङ. छ.—ट. आनन्तर्याद्विधास्यामि. ५ ख. बलवान्वै. ६ क. घ.—ट. वर्धते. ७ क. च. ज. ञ. सृष्टश्चेद्धि. ८ ख. तस्मादाख्यातुं. ९ अयंश्लोकः घ. पाठे दृश्यते.

वाली नाम मम भ्राता ज्येष्ठः [1]शत्रुनिषूदनः ॥ पितुर्बहुमतो नित्यं [2]ममापि च तथा पुरा ॥ २ ॥
पितर्यु[3]परतेऽस्माकं ज्येष्ठोऽयमिति मन्त्रिभिः ॥ कपीनामीश्वरो राज्ये कृतः [4]परमसंमतः ॥ ३ ॥
राज्यं प्रशासतस्तस्य पितृपैतामहं महत् ॥ अहं सर्वेषु कालेषु प्रणतः प्रेष्यवत्स्थितः ॥ ४ ॥
मायावी नाम तेजस्वी पूर्वजो दुन्दुभेः सुतः ॥ तेन तस्य महद्वैरं [5]स्त्रीकृतं विश्रुतं पुरा ॥ ५ ॥
स तु [6]सुप्तजने रात्रौ किष्किन्धाद्वारमागतः ॥ नर्दति स्म सुसंरब्धो वालिनं चाह्वयद्रणे ॥ ६ ॥
प्रसुप्तस्तु मम भ्राता [7]नर्दितं भैरवस्वनम् ॥ श्रुत्वा न ममृषे वाली निष्पपात जवात्तदा ॥ ७ ॥
स तु वै [8]निःसृतः क्रोधात्तं हन्तुमसुरोत्तमम् ॥ वार्यमाणस्ततः स्त्रीभिर्मया च प्रणतात्मना ॥ ८ ॥
स तु निर्धूय [9]सर्वान्नो निर्जगाम महाबलः ॥ ततोऽहमपि सौहार्दान्निःसृतो वालिना सह ॥ ९ ॥
स तु मे भ्रातरं दृष्ट्वा मां च दूरादवस्थितम् ॥ असुरो जातसंत्रासः प्रदुद्राव [10]ततो भृशम् ॥ १० ॥
तस्मिन्द्रवति संत्रस्ते ह्यावां द्रुततरं गतौ ॥ प्र[11]काशश्च कृतो मार्गश्चन्द्रेणोद्गच्छता तदा ॥ ११ ॥
स तृणैरावृतं दुर्गं धरण्या विवरं महत् ॥ प्रविवेशासुरो वेगादावामासाद्य विष्ठितौ[12] ॥ १२ ॥
तं प्रविष्टं रिपुं दृष्ट्वा बिलं रोषवशं गतः ॥ मामुवाच [13]तदा वाली वचनं क्षुभितेन्द्रियः ॥ १३ ॥
इह [14]त्वं तिष्ठ सुग्रीव बिलद्वारि समाहितः ॥ [15]यावत्तत्र प्रविश्याहं निहन्मि [16]सहसा रिपुम् ॥ १४ ॥
मया त्वेतद्वचः श्रुत्वा याचितः स परंतपः ॥ शापयित्वा [17]तु मां पद्भ्यां प्रविवेश बिलं [18]महत् ॥ १५ ॥
तस्य प्रविष्टस्य बिलं साग्रः संवत्सरो गतः ॥ स्थितस्य च [19]मम द्वारि स [20]कालो व्यत्यवर्तत ॥ १६ ॥
अहं तु नष्टं [21]ज्ञात्वा तं स्नेहादागतसंभ्रमः ॥ भ्रातरं [22]नैच पश्यामि पापाशङ्कि च मे मनः ॥ १७ ॥

अथ वाल्यपराधवृत्तान्तो नवमे । वालीनामेत्यादि-षड्विंशतिश्लोकाः ॥१–२॥ अयं ज्येष्ठः अतः कपीनामीश्वरइति राज्ये कृतः स्थापितः ॥ ३ ॥ पितृपैतामहं स्वपितुः ऋक्षरजसः पित्राब्रह्मणातस्मैदत्तत्वात् ॥ ४ ॥ दुन्दुभेः पूर्वजः अग्रजः । सुतः मयस्येति शेषः । वक्ष्यत्युत्तरकाण्डे मयः "मायावी प्रथमस्तात दुन्दुभिस्तदनन्तरः" इति । तेन मायाविना । तस्य वालिनः । स्त्रीकृतं स्त्रीनिमित्तं । महद्वैरमस्तीति पुरा विश्रुतं ॥ ५ ॥ सुप्तजने सुप्तः जनोयस्मिन्रात्र्यंशे स सुप्तजनः । अर्धरात्र इत्यर्थः ॥ ६ ॥ भैरवस्वनं भैरवस्वनरूपं । नार्दितं गर्दितं ॥७—१०॥ उद्गच्छता उदयमानेन ॥ ११ ॥ आसाद्य बिलद्वारमिति शेषः ॥ १२—१४ ॥ याचितः सहप्रवेशनमिति शेषः । पद्भ्यां स्वपदाभ्यां । "श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः "इतिचतुर्थी ॥ १५ ॥ तस्यप्रविष्टस्य तस्मिन्प्रविष्टे । साग्रः संपूर्णः । स कालः संवत्सरः । ममापि संवत्सरो गत इत्यर्थः ॥ १६ ॥ अहंतंनष्टं ज्ञात्वा साग्रसंवत्सरमदृष्टंबुद्ध्वा । स्नेहादागतसंभ्रमो-

ति० पितुः क्षेत्रिणः । मात्रैक्याच्चभ्रातृत्वंभीमार्जुनादिवत् ॥ **स०**पुरा कलहात् ॥२॥ **ति०**पितृपैतामहं आर्षत्वादुत्तरपदवृद्धिः ॥४॥ **ति०** मायावीत्यन्वर्थनाम । पूर्वजः ज्येष्ठः । स्त्रीकृतं स्त्रीनिमित्तं । अयमितिहासः क्वचित्पुराणेशोधनीयोबहुदर्शिभिः ॥५॥ **ति०** तृणैरावृतं छन्नं । विवरं बिलं । आसाद्य प्राप्य । विष्ठितौ स्थितौ ॥ १२ ॥ **स०** क्षुभितेन्द्रियः परिवृत्तनेत्रादिः ॥ १३ ॥ **ती०** याचितः वालिनासहबिलप्रवेशनमितिशेषः । शापयित्वातुमांपद्भ्यामिति बिलद्वार्येवतिष्ठामिनानुव्रजामीतिस्वपादस्पर्शनपूर्वकंशपथंमयाकारयित्वेत्यर्थः ॥१५॥ **स०** पापशङ्कि पापजन्यमरणशङ्कि । **शि०** पापशङ्कि पापात् पापिनोमायाविनः शङ्कते स्वभ्रातृकर्मकवधंसंभावयतितच्छीलं । मेमनोजातमितिशेषः । अतएव तंभ्रातरंनष्टं हिंसितंज्ञात्वा स्नेहात् तद्विषयकातिप्रीतेर्हेतोः ।

[पा०] १ क. ग. शत्रुनिबर्हणः. ख. शक्रनिषूदनः. २ क. ग. ङ. च. छ. झ. ञ. ट. ममचापि. ३ छ. झ. ट. स्तेतस्मिन्. ४ ङ. परमसत्तमः. ५ झ. ट. वालिनःस्त्रीकृतंपुरा. ६ झ. ट. सुप्तेजने. ७ ङ. झ. ञ. ट. नर्दतो. ८ ख. निर्गतः. ९ क. ग. ङ.—ट. तास्सर्वान्निर्जगाम. १० ग. ङ.—ट. तदा. ११ छ. झ. ट. प्रकाशोपि. क. ङ. प्रकाशोहि. १२ ज. तिष्ठतौ. १३ ख. घ. ङ. च. ज.—ट. ततो. १४ घ.—ट. तिष्ठाद्य. १५ क. ग. ङ.—ट. यावदत्र. १६ क. ख. ङ.—ट. समरे. १७ छ.—ट. समां. ख. ङ. चमां. १८ ङ.—ट. ततः. १९ छ. झ. ट. बिलद्वारि. २० ख. घ. ज. कालोप्यत्यवर्तत. २१ क. ङ. छ.—ट. तंज्ञात्वा. २२ क. ग. ङ. छ.—ट. नप्रपश्यामि. ख. नहिपश्यामि. घ. तुनपश्यामि.

अथ दीर्घस्य कालस्य बिलात्तस्माद्विनिःसृतम् ॥ सफेनं रुधिरं [1]रक्तमहं दृष्ट्वा सुदुःखितः ॥ १८ ॥
नर्दतामसुराणां च ध्वनिर्मे श्रोत्रमागतः ॥ [2]निरस्तस्य च संग्रामे [3]क्रोशतो निःस्वनो गुरोः ॥ १९ ॥
अहं त्ववगतो बुद्ध्या चिह्नैस्तैर्भ्रातरं [4]हतम् ॥ पिधाय च बिलद्वारं शिलया गिरिमात्रया ॥
शोकार्तश्चोदकं कृत्वा किष्किन्धामागतः सखे ॥ २० ॥
गूहमानस्य मे तत्त्वं यत्नतो मन्त्रिभिः श्रुतम् ॥ ततोऽहं तैः समागम्य [5]सम्मतैरभिषेचितः ॥ २१ ॥
राज्यं प्रशासतस्तस्य [6]न्यायतो मम राघव ॥ आजगाम रिपुं हत्वा [7]वाली तमसुरोत्तमम् ॥ २२ ॥
अभिषिक्तं तु मां दृष्ट्वा [8]वाली संरक्तलोचनः ॥ मदीयान्मन्त्रिणो बद्ध्वा परुषं वाक्यमब्रवीत् ॥ २३ ॥
[9]निग्रहेऽपि [10]समर्थस्य तं पापं प्रति राघव ॥ न प्रावर्तत मे बुद्धि[11]र्भ्रातुगौरवयन्त्रिता ॥ २४ ॥
हत्वा शत्रुं स मे भ्राता प्रविवेश पुरं तदा ॥ मानयंस्तं महात्मानं यथावच्चाभ्यवादयम् ॥ २५ ॥
[12]उक्ताश्च नाशिषस्तेन [13]संतुष्टेनान्तरात्मना ॥ २६ ॥
नत्वा पादावहं तस्य मुकुटेनास्पृशं प्रभो ॥ अपि [14]वाली मम क्रोधान्न प्रसादं चकार सः ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे नवमः सर्गः ॥ ९ ॥

ऽभवं । भ्रातरं च न पश्यामि नापश्यं । ततः मे मनः । पापाशङ्कि तन्मरणाशङ्कि जातं ॥ १७ ॥ रक्तं रक्तवर्णं ॥ १८—१९ ॥ चिह्नैः मरणकालिकस्वरैः ॥ २० ॥ तत्त्वं यथार्थं । वालिमरणं गूहमानस्य प्रच्छादयतः । मे मत्तः । यत्नतः बहुयत्नेन । स्वविषयशापादिना श्रुतमासीत् ॥ २१—२३ ॥ पापं अज्ञानकृतमिति सान्त्वनेपि धिक्करणात् पापिष्ठं । तं प्रति निग्रहेसमर्थस्य प्रकृतिबलसंपन्नत्वादिति भावः । यन्त्रिता नियमिता ॥ २४ ॥ प्रविवेश पुरमित्युक्तया मन्त्रिबन्धनादिकं पुराद्बहिरिति ज्ञेयं ॥ २५—२६ ॥ मम क्रोधात् मयि कोपात् ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने नवमःसर्गः ॥ ९ ॥

आगतसंभ्रमः प्राप्तोद्वेगः आसमितिशेषः ॥ १७ ॥ **वि०** संग्रामेरतस्य निरतस्य । क्रोशतोपिगुरोःस्वनोनश्रोत्रमागतइत्यनुकर्षः ॥ १९ ॥ **ती०** गिरिमात्रया पर्वतप्रमाणया ॥ **ति०** चिह्नैः बिलद्वारिरुधिरनिस्सरणासुरीयसंग्रामक्रोशनादिभिः । भ्रातरंहतं अवगतः ज्ञातवान् । पिधाय राक्षसनिर्गमशङ्कया ॥ **स०** अहंअवगतः कर्तरिक्तः ज्ञातवान् । गिरिमात्रया गिरिप्रमाणया । यद्यपि‘‘टिड्ढाण—’’इत्यादिनाटापोपवादकेनङीपाभवितव्यं । तथाप्यार्षत्वाट्टाप् । यद्वा नायंमात्रच्प्रत्ययः । किंतु‘‘मात्रापरिच्छदे’’इत्यमरोक्तेः परिमाणवाचीमात्राशब्दः । अतोनपूर्वोक्तदोषः ॥ २० ॥ **शि०** तत्वं वालिवधं । यत्नतः अनेकविधोपायैः । गूहमानस्य शत्र्वाक्रमणादिशङ्कयागोपयमानस्य । मेमन्त्रिभिः अमात्यैः । श्रुतं तेषांसंनिधौमयाकथितमित्यर्थः । ततः तस्माद्धेतोः । समेतैः तैर्मन्त्रिभिः अहमभिषेचितः ॥ २१ ॥ **शि०** निग्रहे तत्परुषवाक्यादिनिरोधे ॥ **स०** मेममनिग्रहेसमर्थस्यापिवालिनः तंपापंमांप्रति तादृशीबुद्धिर्नप्रावर्तत । तत्रहेतुः **भ्रातृगौरवेत्यादि** । भ्राता ज्येष्ठभ्राताऽहं किंकनिष्ठभ्रातृबन्धनेनेतिभ्रातृगौरवयन्त्रितासती नप्रावर्तत । एतेनसुग्रीवस्यवालिनिग्रहेसामर्थ्याभावात्कथंनिग्रहेचसमर्थस्येतिवचनमितिशङ्कापरास्ता ॥ २४ ॥ **ति०** उक्तानुवादपूर्वमवशिष्टव्यापारकथनं **हत्वेत्यादि** ॥ २५ ॥ **ति०** अपि तथापीत्यर्थः ॥ २७ ॥ इतिनवमःसर्गः ॥ ९ ॥

[पा०] १ छ. झ. ट. दृष्ट्वाततोहंभृशदुःखितः. २ छ. झ. ञ. नरतस्यच. ३ ख. घ. च.—ट. क्रोशतोपिस्वनो. ४ ख. गतं. ५ क. ङ.—ट. समेतैरभि. ६ ङ. च. ज. ञ. न्यायेन. ७ क. ग. ङ. छ. झ. ञ. ट. दानवंसतुवानरः. ८ क.—ङ. झ. ञ. ट. क्रोधात्संरक्त. ९ ग. ङ. छ. झ. ञ. ट. निग्रहेच. १० ङ. समर्थंहि. ११ क.—ट. भ्रातृगौरव. १२ ङ.—ञ. नोक्ताममाशिषस्तेन. च. ज. नोक्तामेचाशिषस्तेन. १३ छ. झ. ट. प्रहृष्टेन. १४ क. ग. रामगम.

दशमः सर्गः ॥ १० ॥

सुग्रीवेण वालिनंप्रति राज्येस्वाभिषेचनस्य भ्रमान्मन्त्रिकृतत्वनिवेदनपूर्वकं पुनाराज्यप्रत्यर्पणोक्त्या सप्रणामं क्षमापणम् ॥ १ ॥ वालिना पौराद्यानयनेन तेषु स्वकृतशत्रुवधवृत्तान्ताभिधानपूर्वकं सुग्रीवेदोषारोपणेन क्रोधात्तस्य नगरान्निर्वासनम् ॥ २ ॥ एवं सुग्रीवेणोभयोर्वैरकारणंनिवेदितेनरामेण तंप्रति वालिवधप्रतिज्ञानेन समाश्वासनम् ॥ ३ ॥

ततः [1]क्रोधसमाविष्टं संरब्धं तमुपागतम् ॥ अहं प्रसादयांचक्रे भ्रातरं [2]प्रियकाम्यया ॥ १ ॥
दिष्ट्याऽसि [3]कुशली प्राप्तो [4]निहतश्च त्वया रिपुः ॥ अनाथस्य हि मे नाथस्त्वमेकोऽनाथनन्दनः ॥ २ ॥
इदं बहुशलाकं ते पूर्णचन्द्रमिवोदितम् ॥ छत्रं सवालव्यजनं प्रतीच्छस्व [5]मयोद्यतम् ॥ ३ ॥
[6]आर्तश्चाथ बिलद्वारि स्थितः संवत्सरं नृप ॥ [7]दृष्ट्वाऽहं शोणितं द्वारि बिलाच्चापि समुत्थितम् ॥ ४ ॥
[8]शोकसंविग्नहृदयो भृशं व्याकुलितेन्द्रियः ॥ [9]अपिधाय बिलद्वारं [10]शैलशृङ्गेण [11]तत्तथा ॥
तस्माद्देशादपाक्रम्य किष्किन्धां प्राविशं पुनः ॥ ५ ॥
विषादात्त्विह मां दृष्ट्वा पौरैर्मन्त्रिभिरेव च ॥ अभिषिक्तो न कामेन तन्मे [12]त्वं क्षन्तुमर्हसि ॥ ६ ॥
त्वमेव राजा मानार्हः सदा चाहं [13]यथापुरम् ॥ [14]राजभावनियोगोऽयं [15]मया त्वद्विरहात्कृतः ॥ ७ ॥
सामात्यपौरनगरं स्थितं निहतकण्टकम् ॥ न्यासभूतमिदं राज्यं तव निर्यातयाम्यहम् ॥ ८ ॥
मा च रोषं कृथाः सौम्य [16]मयि शत्रुनिबर्हण ॥ याचे त्वां शिरसा राजन्मया बद्धोऽयमञ्जलिः ॥ ९ ॥
बलादस्मि समागम्य मन्त्रिभिः पुरवासिभिः ॥ राजभावे नियुक्तोऽहं शून्यदेशजिगीषया ॥ १० ॥
स्निग्धमेवं ब्रुवाणं मां स [17]तु निर्भर्त्स्य वानरः ॥ धिक्त्वामिति च मामुक्त्वा [18]बहु तत्तदुवाच ह ॥ ११ ॥

अथवालिदोषदर्शनेनरामस्य दृढतरावालिवधप्रतिज्ञा दशमे—तत इत्यादि ॥ १ ॥ अनाथान् नन्दयतीत्यनाथनन्दनः ॥ २ ॥ उद्यतं अर्पितं । प्रतीच्छस्व प्रतीच्छ ॥ ३ ॥ संवत्सरं बिलद्वारिस्थितः । अहं च बिलद्वारिसमुत्थितंशोणितंदृष्ट्वा आर्तश्चास्मि ॥ ४ ॥ शोकसंविग्नहृदयः शोककम्पितहृदयः । तद्बिलद्वारं तथा त्वयादृष्टप्रकारेण । अपिधाय प्रच्छाद्य । प्राविशं ॥ ५ ॥ इह विषादादागतं मां दृष्ट्वा । विषादात् राज्यनाशविषादात् ॥ ६ ॥ अहं यथापुरं पूर्ववद्युवराजोभवामीत्यर्थः । राजभावनियोगः राजत्वेन राज्यशासनं ॥ ७—९ ॥ शून्यदेशजिगीषया राजशून्यदेशवशीकरणेच्छया ॥ १० ॥ तत् परुषभाषणं । अश्ली-

---

शि० क्रोधेनसमाविष्टं संयुक्तं । अतएवसंरब्धं क्रोधसूचकचेष्टावन्तं । हितकाम्यया स्वकल्याणवाञ्छया । अहंप्रसादयांचक्रे ॥ १ ॥ **स०** दिष्ट्येति प्राप्तेनेव निहतेनाप्यन्वेति ॥ २ ॥ **ति०** राजभावे राज्ये । अयंममनियोगः मन्त्रिभिस्त्वद्विरहात्कृतः । अमात्यपौरसहितंनगरं निहतकण्टकं अराजत्वप्रयुक्तदोषरहितं । कर्तुमितिशेषः । तच्चेदंत्वदीयराज्यं मयिन्यासभूतंस्थितं । अहंतवनिर्यातयामिप्रत्यर्पयामि । मारोषंकृथाइत्यन्वयः ॥ ७—८ ॥ **रामानु०** शून्यदेशजिगीषया देशस्यराजशून्यत्वापनिनीषयेत्यर्थः ॥ **वि०** शून्यदेशस्यराजहीनदेशस्ययापरेषांजिगीषातया तन्निवृत्तिहेतुना । "मशकार्थोधूमः" इतिवदयंप्रयोगः ॥ शून्यदेशजिगीषया । शून्येतिभावप्रधानं । शून्यत्वंददतीतिशून्यदाः तेचतेईशाश्चद्विषन्तोराजानः तज्जिगीषया तज्जयेच्छया । यद्वा शून्योदेशइतियाजिगीषा प्राप्तीच्छातया । जिरत्रप्राप्त्यर्थकोधनजितइत्यादिवत् । स्निग्धं स्नेहपूर्वं ॥ **शि०** शून्यदेशजिगीषया राज-

[पा०] १ ङ. च. ज. ञ. क्रोधसमायुक्तं. २ छ.—ट. हितकाम्यया. ३ ज. कुशलं. ४ ङ. ञ. दिष्ट्यासंनिहतोरिपुः. च. ज. दिष्ट्याचनिहतोरिपुः. ५ छ. झ. ञ. ट. मयाधृतं. ६ झ. आर्तस्तस्य. ङ.—ज. ञ. ट. आर्तस्तत्र. ७ क. ख. ग. ङ.—ट. दृष्ट्वाच. ८ ख. शोकसंरक्तनयनो. ९ क. पिधायच. १० ग. गिरिशृङ्गेण. ११ क. ख. ङ.—ट. तत्तदा. १२ ङ.—ट. क्षंतुंत्वमर्हसि. १३ क.—ङ. छ.—ट. यथापुरा. १४ ङ. छ.—ट. राजभावे. १५ ङ. छ.—ट. मम. १६ ङ. च. छ. झ. ट. ममशत्रुनिषूदन. १७ क. ङ.—ट. विनिर्भर्त्स्य. १८ ङ. बहुनातदुवाचह.

प्रकृतीश्च समानीय मन्त्रिणश्चैव संमतान् ॥ मामाह सुहृदां मध्ये वाक्यं परमगर्हितम् ॥ १२ ॥
विदितं वो यथा रात्रौ मायावी स महासुरः ॥ मां समाह्वयत क्रूरो[1] युद्धकाङ्क्षी[2] सुदुर्मतिः[3] ॥ १३ ॥
तस्य तद्वचनं[4] श्रुत्वा निःसृतोहं नृपालयात् ॥ अनुयातश्च मां तूर्णमयं[5] भ्राता सुदारुणः ॥ १४ ॥
स तु दृष्ट्वैव मां रात्रौ सद्वितीयं महाबलः ॥ प्राद्रवद्भयसंत्रस्तो वीक्ष्यावां तमनुद्रुतौ[6] ॥ १५ ॥
अनुद्रुतश्च[7] वेगेन प्रविवेश[8] महाबिलम् ॥ १६ ॥
तं प्रविष्टं विदित्वा तु सुघोरं सुमहद्बिलम् ॥ अयमुक्तोथ मे भ्राता मया तु क्रूरदर्शनः ॥ १७ ॥
अहत्वा नास्ति मे शक्तिः प्रतिगन्तुमितः पुरीम् ॥ बिलद्वारि प्रतीक्ष त्वं यावदेनं निहन्म्यहम् ॥ १८ ॥
स्थितोयमिति मत्वा[9] तु प्रविष्टोहं दुरासदम् ॥ [10]तं च मे मार्गमाणस्य गतः संवत्सरस्तदा ॥ १९ ॥
स तु दृष्टो मया शत्रुरनिर्वेदाद्भयावहः ॥ निहतश्च मया[11] तत्र सोसुरो बन्धुभिः सह ॥ २० ॥
[12]तस्यास्यात्तु प्रवृत्तेन रुधिरौघेण तद्बिलम् ॥ पूर्णमासीद्दुराक्रामं स्तनतस्तस्य भूतले ॥ २१ ॥
सूदयित्वा तु तं शत्रुं विक्रान्तं[13] दुन्दुभेः सुतम् ॥ निष्क्रामन्नैव[14] पश्यामि बिलस्य पिहितं मुखम् ॥ २२ ॥
विक्रोशमानस्य तु मे सुग्रीवेति पुनः पुनः ॥ यदा[15] प्रतिवचो नास्ति ततोऽहं भृशदुःखितः ॥ २३ ॥
पादप्रहारैस्तु मया बहुभिस्[16]तद्विदारितम् ॥ ततोऽहं तेन निष्क्रम्य पथा[17] पुरमुपागतः[18] ॥ २४ ॥
अत्रानेनास्मि[19] संरुद्धो राज्यं प्रार्थयता[20]ऽऽत्मनः ॥ सुग्रीवेण नृशंसेन विस्मृत्य भ्रातृसौहृदम् ॥ २५ ॥
एवमुक्त्वा तु मां तत्र वस्त्रेणैकेन वानरः ॥ निर्वासयामास[21] तदा वाली विगतसाध्वसः ॥ २६ ॥
तेनाहमपविद्धश्च हृतदारश्च राघव ॥ तद्भयाच्च मही[22] कृत्स्ना क्रान्तेयं सवनार्णवा ॥ २७ ॥

लतया विशिष्य नोक्तं ॥ ११ ॥ प्रकृतीरिति मामुद्दिश्य प्रकृत्यादीनाहेत्यर्थः ॥ १२—१९ ॥ अनिर्वेदात् अक्लेशात् ॥२०॥ भूतले भूविवरे । स्तनतः गर्जतः । तत् पूर्वोक्तं । तस्य बिलं स्तनतः तस्य आस्यात्प्रवृत्तेन रुधिरौघेण पूर्णसत् दुराक्रममासीदितियोजना ॥ २१ ॥ दुन्दुभेः सुतं भ्रातरमित्यर्थः । यद्वा नायं मायावी मयपुत्रः किंतु दुन्दुभिपुत्रोऽन्यइति बोध्यम् । "पूर्वजो दुन्दुभेःसुतः" इतिहिपूर्वमप्युक्तं । पिहितमिति हेतुगर्भं । पिहितत्वान्मुखं न पश्यामि ॥ २२ ॥ विक्रोशमानस्य आह्वयतः । "क्रुश आह्वाने रोदने च" इति धातुः ॥ २३ ॥ तत् बिलं । विदारितं क्वचित्सरन्ध्रीकृतं । तेनपथा रन्ध्रमार्गेण ॥ २४ ॥ अत्र बिले ॥ २५—२६ ॥ अप-

रहितदेशकर्तृकोत्कर्षप्राप्तीच्छया । शत्र्वाक्रमणनिवारणायेत्यर्थः ॥ १० ॥ **ति०** आपुरा युद्धाकाङ्क्षातिपूरकेणमया युद्धाकाङ्क्षी महासुरःमायावी मांसमाह्वयत । तत् वोयुष्माकंविदितं ॥ १३ ॥ **शि०** दुरासदं असुरातिरिक्तैःप्रवेष्टुमशक्यंविवरं । अहंप्रविष्टः ॥ १९ ॥ **रामानु०** भूतले भुवोऽधस्तले । " अधस्स्वरूपयोरस्त्रीतलं" इत्यमरः । तत् प्रसिद्धं ॥ २१ ॥ **ती०** अत्रैकस्तच्छब्दःप्रसिद्धपरः ॥२२॥ **स०** "प्राचां" इतियोगविभागा "दूराद्धूतेच" इत्यादेर्वैकल्पिकत्वेननसुग्रीवेत्यत्रश्रुतिसंप्रयुक्तप्रकृतिभावः ॥ नास्ति नासीत् ॥ २३ ॥ **ती०** यथाशब्दोवाक्यालङ्कारे ॥ २४ ॥ **शि०** सर्वांमहींक्रान्तवान् अस्मीतिशेषः । एतेन

[पा०] १ झ. क्रुद्धो. २ क. छ. झ. ट. युद्धाकाङ्क्षी. ३ क. ख. छ. झ. ट. तदापुरा. ४ क. ख. छ. झ. ट. तद्भाषितं. घ. ङ. च. ज. ञ. तद्गर्जितं. ५ ग. तूर्णभ्राताह्येष. ६ ङ.—ट. समुपागतौ. ख. ग. घ. समनुद्रुतौ. क. समभिद्रुतौ. ७ क. ङ.—ट. अभिद्रुतस्तु. ८ क. ङ.—ट. विवेशसमहाबिलं. ९ ङ.—ट. मत्वाहंप्रविष्टस्तु. १० क. ख. छ. झ. ञ. ट. तंमेमार्गयतस्तत्र. ११ ङ.—ट. मयासयःससर्वैःसहबन्धुभिः. १२ छ. झ. तस्यैवच. १३ क. ङ. छ. झ. ट. विक्रान्तंतमहंसुखं. च. ज. विक्रामन्तंमहासुरं. ख. ग. बलिनंदुन्दुभेः. ङ. ञ. विक्रान्तंचमहासुरं. १४ च.—ट. निष्क्रामन्नेह. १५ ख. ङ. छ. झ. ट. यतः. १६ ग. ङ. च. ज. ञ. बहुशस्तद्विदारितं. क. ख. बहुभिस्सविदारितः. छ. झ. ट. बहुभिःपरिपातितं. १७ ख. यत्नात्. च. यथा. १८ ख.—च. ज. ञ. पुनरुपागतः. क. पुनरिहागतः. १९ क. ख. घ.—ट. तत्रानेन. २० छ. झ. ट. मृगयतात्मनः. घ. ङ. च. ज. ञ. मार्गयतात्मनः. २१ क. ङ.—ट. तदानिर्वासयामास. २२ छ. झ. ट. महींसर्वांक्रान्तवान्सवनार्णवां. ङ. च. ञ. महीसर्वा.

ऋश्यमूकं गिरिवरं भार्याहरणदुःखितः ॥ प्रविष्टोस्मि दुराधर्षं [1]वालिनः कारणान्तरे ॥ २८ ॥
एतत्ते सर्वमाख्यातं वैरानुकथनं महत् ॥ अनागसा मया प्राप्तं व्यसनं पश्य राघव ॥ २९ ॥
[2]वालिनस्तु भयार्तस्य [3]सर्वलोकाभयंकर ॥ कर्तुमर्हसि मे वीर प्रसादं तस्य निग्रहात् ॥ ३० ॥
एवमु[4]क्तस्तु तेजस्वी धर्मज्ञो [5]धर्मसंहितम् ॥ वचनं वक्तुमारेभे सुग्रीवं प्रहसन्निव ॥ ३१ ॥
अमोघाः सूर्यसंकाशा [6]ममैते निशिताः शराः ॥ तस्मिन्वालिनि दुर्वृत्ते नि[7]पतिष्यन्ति वेगिताः ॥ ३२ ॥
यावत्तं [8]नाभिपश्यामि तव भार्यापहारिणम् ॥ [9]तावत्स जीवेत्पापात्मा वाली चारित्रदूषकः ॥ ३३ ॥
आत्मानुमानात्पश्यामि [10]मग्नं त्वां शोकसागरे ॥ त्वामहं तारयिष्यामि [11]कामं प्राप्स्यसि पुष्कलम् ॥ ३४ ॥
तस्य तद्वचनं श्रुत्वा [12]राघवस्यात्मनो हितम् ॥ सुग्रीवः परमप्रीतः सुमहद्वाक्यमब्रवीत् ॥ ३५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे दशमः सर्गः ॥ १० ॥

एकादशः सर्गः ॥ ११ ॥

सुग्रीवेण रामबलपरीक्षणाय वालिबलप्रकारकथनोपक्रमः ॥ १ ॥ महिषाकृतिना दुन्दुभिनाम्नामहासुरेण वीर्योत्सेकाद्युद्धायवालिनः समाह्वानम् ॥ २ ॥ वालिना बाहुयुद्धेन तन्मारणपूर्वकं तद्गात्रस्य मतङ्गाश्रमपरिसरेवेगात्क्षेपणम् ॥ ३ ॥ दूरात्पतनवेगेन महिषमुखोद्गतैरक्तबिन्दुभिराकीर्णे निजाश्रमे रुष्टेन मतङ्गमहर्षिणा वालिनस्तदीयानांच स्वाश्रमप्रवेशक्रमेण प्राणवियोजनशैलीभवनप्रयोजकशापदानम् ॥ ४ ॥ सचिवमुखादृषिशापप्रकारं ज्ञातवतावालिना तदाप्रभृति ऋश्यमूकप्रवेशवर्जनम् ॥ ५ ॥ एवं वालिबलवर्णनेनसह तेनदुष्प्रवेशत्वादृश्यमूकस्य स्वेनशरणीकरणोक्तिपूर्वकं वालिवधे संदिहानंसुग्रीवंप्रति लक्ष्मणेन रामेवालिवधशक्तिप्रत्यायकनिवेदनचोदना ॥ ६ ॥ सुग्रीवेण प्रत्यायकंनिवेदितेनरामेण दुन्दुभिशरीरास्थ्नो निजपादाङ्गुष्ठेन दशयोजनानन्तरदेशेक्षेपणम् ॥ ७ ॥ तावताप्यपरितुष्टेनसुग्रीवेण सालसप्तकप्रदर्शनेन तेषुवालिबलप्रकारनिवेदनपूर्वकमेकबाणेनतेष्वेकतमविदारणस्य स्वप्रत्यायकत्वोक्तिः ॥ ८ ॥

रामस्य वचनं श्रुत्वा हर्षपौरुषवर्धनम् ॥ सुग्रीवः पूजयांचक्रे राघवं प्रशशंस च ॥ १ ॥
असंशयं प्रज्वलितैस्तीक्ष्णैर्मर्मातिगैः शरैः ॥ त्वं दहेः कुपितो लोकान्युगान्त इव भास्करः ॥ २ ॥

विद्धः ताडितः ॥ २७ ॥ कारणान्तरे मतङ्गशापनिमित्तेसति । वालिनो दुराधर्षं दुराक्रमं ॥ २८ ॥ वैरानुकथनं वैरकारणाख्यानं ॥ २९ ॥ वालिनइति पञ्चमी ॥३०—३३॥ आत्मानुमानात् "आत्मवत्सर्वभूतानि" इतिन्यायादित्यर्थः । तारयिष्यामि शोकसागरादितिशेषः ॥ ३४—३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने दशमः सर्गः ॥ १० ॥

अथ सुग्रीवो वालिवधक्षमं रामबलं परीक्षितुकामस्तद्बलं दर्शयत्येकादशे—रामस्येत्यादि ॥ पूजयांचक्रे अञ्जलिबन्धादिना । प्रशशंस तुष्टाव ॥ १–२ ॥

निर्वासितेपिसुग्रीवेऽनेकविधविघातयत्नंकृतवानितिव्यक्तं । तेनतस्यमहानपराधोव्यञ्जितः ॥ २७ ॥ **शि०** प्रहसन्निव प्रहसन्नेव ॥ ३१ ॥ **ति०** चारित्रदूषकः निषिद्धानिषिद्धज्ञानवत्त्वेसतिजीवतोभ्रातुर्भार्यापहारात् । **स०** चारित्रं सदाचारः ॥ ३३ ॥ **ती०** पुष्कलं सर्वं। पुष्कलं श्रेष्ठमित्यर्थः ॥ **ति०** आत्मानुमानात् अयंशोकाब्धिमग्नः रिपुहृतदारत्वात् मद्वत्इत्यनुमानं बाढं प्राप्स्यसि भार्यां पुष्कलं राज्यंच ॥ ३४ ॥ **स०** आत्मनोहितमिति रामदर्शनक्षणएव हितं स्वस्मैस्वसंबन्धिजनायचजातप्रायमितिषष्ठ्यास्पष्टयति । अन्यथा चतुर्थीश्रूयेतेतिज्ञेयं । यद्वा आत्मनास्वेन ऊहितं एवंरामोवदिष्यतीतितार्कितंवचःश्रुत्वा ॥ ३५ ॥ इतिदशमःसर्गः ॥ १० ॥

स० युगान्ते प्रलये । दहेः । दहेदितिपाठे युष्मद्योगेपिप्रथमपुरुषः । "त्वंदेवशक्त्यांगुणकर्मयोनौरेतस्त्वजायांकविरादधेऽजः"

[पा०] १ ख. घ. वालिना. २ झ. ट. वालिनश्च. ३ क. ख. छ. सर्वभूतभयापह. छ. झ. ट. सर्वलोकभयापह. ४ क. छ. झ. ट. मुक्तस्स. ५ ख. धर्मवत्सलः. ६ ङ. छ. ज. झ. ट. निशितामेशराइमे. क. ख. च. ज. ममेमे. ७ क. ङ. छ.—ट. पतिष्यन्तिरुषान्विताः. घ. पतिष्यन्तिरुतान्विताः. ८ क. ङ.—ट. नहिपश्येयं. ग. घ. नहिपश्यामि. ९ ग. तावज्जीवेत्सपापीयान्वाली. १० ङ.—ट. मग्नस्त्वं. ११ छ. झ. ट. बाढं. ख. ङ. च. ज. ञ. सुखं. १२ ङ. छ. झ. ट. हर्षपौरुषवर्धनं. क. ख. राघवस्यमनोहितं.

वालिनः पौरुषं यत्तद्यच्च वीर्यं धृतिश्च या ॥ तन्ममैकमनाः श्रुत्वा विधत्स्व [1]यदनन्तरम् ॥ ३ ॥
समुद्रात्पश्चिमात्[2]पूर्वं दक्षिणादपि चो[3]त्तरम् ॥ क्रामत्यनुदिते सूर्ये वाली व्यपगतक्लमः ॥ ४ ॥
अग्राण्यारुह्य शैलानां शिखराणि महान्त्यपि ॥ ऊर्ध्व[4]मुत्क्षिप्य तरसा प्रतिगृह्णाति वीर्यवान् ॥ ५ ॥
बहवः सारवन्तश्च वनेषु विविधा द्रुमाः ॥ वालिना तरसा भग्ना [5]बलं प्रथयताऽऽत्मनः ॥ ६ ॥
[[6]शृणु चापि रघुश्रेष्ठ विस्तरेण कथामिमाम्] ॥ ७ ॥
महिषो दुन्दुभिर्नाम कैला[7]सशिखरप्रभः ॥ [[8]यथा संनिहितः पापो वालिना क्रूरकर्मणा] ॥ ८ ॥
आसीन्महासुरः कश्चिद्दुन्दुभिर्नाम नामतः ॥ बलं नागसहस्रस्य धारयामास वीर्यवान् ॥ ९ ॥
वीर्यो[9]त्सेकेन दुष्टात्मा वरदानाच्च मोहितः ॥ जगाम सुमहाकायः समुद्रं सरितां पतिम् ॥ १० ॥
ऊर्मिमन्तमतिक्रम्य सागरं रत्नसंचयम् ॥ [10]मह्यं युद्धं प्रयच्छेति तमुवाच महार्णवम् ॥ ११ ॥
ततः समुद्रो धर्मात्मा समुत्थाय महाबलः ॥ अब्रवीद्वचनं राजन्नसुरं कालचोदितम् ॥ १२ ॥
समर्थो नास्मि ते दातुं युद्धं युद्धविशारद ॥ श्रूयतां [11]चाभिधास्यामि यस्ते युद्धं प्रदास्यति ॥ १३ ॥
शैलराजो महारण्ये तपस्विशरणं परम् ॥ शङ्करश्वशुरो नाम्ना हिमवानिति विश्रुतः ॥ १४ ॥
[12]गुहाप्रस्रवणोपेतो बहुकन्दरनिर्दर[13]ः ॥ स समर्थस्तव प्रीतिमतुलां [14]कर्तुमाहवे ॥ १५ ॥
तं भीत इति विज्ञाय समुद्रमसुरोत्तमः ॥ हिमवद्वनमा[15]गच्छच्छरश्चापादिव च्युतः ॥ १६ ॥
ततस्तस्य [16]गिरेः श्वेता ग[17]जेन्द्रविपुलाः शिलाः ॥ चिक्षेप बहुधा भूमौ दुन्दुभिर्वि[18]ननाद च ॥ १७ ॥
ततः श्वेताम्बुदाकारः सौम्यः प्रीतिकराकृतिः ॥ हिमवानब्रवीद्वाक्यं स्व एव शिखरे स्थितः ॥ १८ ॥

पौरुषं बलं । अनन्तरं यत्कर्तव्यं तद्विधत्स्व ॥ ३ ॥ समुद्रादिति । " ब्राह्मे मुहूर्ते उत्थाय " इति ब्राह्ममुहूर्तस्य सन्ध्याकर्मकालत्वेन तस्मिन्नुत्थाय अनुदिते सूर्येसन्ध्याकर्मकरणार्थं पश्चिमात्समुद्रात्पूर्वसमुद्रं दक्षिणात्समुद्रादुत्तरं समुद्रंचव्यपगतक्लमःसन्क्रामति। इदं व्यक्तमुत्तरकाण्डे । तारः–"चतुर्भ्योपिसमुद्रेभ्यः सन्ध्यामन्वास्यरावण । इमं मुहूर्तमायातिवाली तिष्ठ मुहूर्तकं " इति ॥ ननु कथं चतुर्ष्वप्येकसन्ध्याकरणं । उच्यते । एकस्मिंस्तटाकेपार्श्वभेदइव स्नानाचमनार्घ्यप्रदानजपानां कर्तुं शक्यत्वात् ॥ ४ ॥ अग्राणीति । कंतुकानीवेति भावः ॥ ५ ॥ बहव इति । मक्षिकोत्सारणरीत्येति भावः । सारवन्तः स्थिरांशवन्तः । " सारोबलेस्थिरांशेच " इत्यमरः ॥ ६ ॥ कैलासशिखरप्रभः । तदाकार इत्यर्थः ॥ ७–९ ॥ वीर्योत्सेकेन वीर्यगर्वेण । दुष्टात्मा दुर्बुद्धिः । अतिक्रम्यजगाम । पूर्वकालोनविवक्षितः । आक्रामन् जगामेत्यर्थः ॥ १०—११ ॥ समुत्थाय पुरुषवेषेणोत्थाय ॥ १२–१३ ॥ परं तपस्विशरणं तपस्विनांपरमावासस्थानं । नित्यनपुंसकं ॥ १४ ॥ प्रस्रवणं

इतिवत्संभवति । विस्तृतंचैतत्प्राक् ॥ २ ॥ **स०** अनुभूतभ्रातृप्रभावस्यकपेर्ममचाल्पतोविज्ञप्तिंश्श्ण्विति भ्रातृपराक्रमंकथयति—**वालिनइति** । पौरुषं शारीरबलं । ममसकाशात् । **ति०** वीर्यं परसंहारशक्तिः । धृतिः रणेधैर्यं ॥ ३ ॥ **रामानु०** अनुदितेसूर्येइत्युत्तरावधिरभिहितः । पूर्वावधिस्तु—"ब्राह्ममुहूर्तेउत्थाय"इत्यनुष्ठानाङ्गत्वेनविहितःकालः ॥ ४ ॥ **ति०** महिषः तद्रूपधरः ॥८॥ **शि०** नागसहस्रस्य गजसहस्रस्य ॥९॥ **वि०** समुद्रमतिक्रम्य अविगणय्य । तं तदधिष्ठातृदेवतां ॥ **स०** रत्नानांसंचयोयस्मिन्सः । अथवा रत्नानिसंचीयन्तेऽनेनेतिरत्नसंचयस्तं ॥११॥ **स०** प्रीतिकराकृतिः नम्रतादिभिःप्रीतिकृदाकारः ॥ १८ ॥

[**पा०**] १ क. ङ. च. ज. ञ. ट. तदनन्तरं. २ ख. घ. त्पूर्वात्. ३ ख. घ. चोत्तरात्. ४ छ. झ. ट. मुत्पात्य. ५ क. बलंदर्शयतात्मनः. ज. बलजिज्ञासयात्मनः. ६ इदमर्धं ज. पाठेदृश्यते. ७ ज. वीर्यवान्सुमहाबलः. ८ कुण्डलितमिदमर्धद्वयं ज. पाठेदृश्यते. ९ क. ख. ग. झ. ट. सवीर्योत्सेकदुष्टात्मा. घ. सवीर्योत्सिक्तदुष्टात्मा. १० क. ख. ग. ङ.—ट. मम. ११ झ. ट. त्वभिधास्यामि. १२ छ. झ. ट. महाप्रस्रवणो. १३ ग. घ. ङ. छ. ज. झ. ट. निर्झरः. १४ ख. दातुमाहवे. छ. झ. ट. कर्तुमर्हति. १५ छ. झ. मागम्यशरः. १६ च. छ. ज. गिरेश्चैव. १७ झ. ट. गजेन्द्रप्रतिमाः. च. ज. नरेन्द्रविपुलाः. १८ ग. ननादह.

क्रेष्टुमर्हसि मां न त्वं दुन्दुभे धर्मवत्सल ॥ रणकर्मस्वकुशल[1]स्तपस्वि[2]शरणं ह्यहम् ॥ १९ ॥
[3]तस्य तद्वचनं श्रुत्वा गिरिराजस्य धीमतः ॥ उवाच दुन्दुभिर्वाक्यं [4]रोषात्संरक्तलोचनः ॥ २० ॥
यदि युद्धेऽसमर्थस्त्वं मद्भयाद्वा निरुद्यमः ॥ [5]तमाचक्ष्व प्रदद्यान्मे [6]योऽद्य युद्धं युयुत्सतः ॥ २१ ॥
हिमवानब्रवीद्वाक्यं श्रुत्वा वाक्यविशारदः ॥ अनुक्तपूर्वं धर्मात्मा क्रोधात्त[7]मसुरोत्तमम् ॥ २२ ॥
वाली नाम महाप्राज्ञः [8]शक्रतुल्यपराक्रमः ॥ अध्यास्ते वानरः श्रीमान्किष्किन्धाम[9]तुलप्रभाम् ॥२३॥
स समर्थो महाप्राज्ञस्तव युद्धविशारदः ॥ द्वन्द्वयुद्धं [10]महद्दातुं नमुचेरिव वासवः ॥ २४ ॥
तं शीघ्रमभिगच्छ त्वं यदि युद्धमिहेच्छसि ॥ स हि [11]दुर्धर्षणो नित्यं शूरः [12]समरकर्मणि ॥ २५ ॥
श्रुत्वा हिमवतो वाक्यं [13]क्रोधाविष्टः स दुन्दुभिः ॥ जगाम तां पुरीं तस्य किष्किन्धां वालिनस्तदा ॥२६॥
धारयन्माहिषं [14]रूपं तीक्ष्णशृङ्गो भयावहः ॥ प्रावृषीव महामेघस्तोयपूर्णो नभस्तले ॥ २७ ॥
[15]ततस्तद्द्वार[16]मागम्य किष्किन्धाया महाबलः ॥ ननर्द कम्पयन्भूमिं दुन्दुभिर्दुन्दुभिर्यथा ॥ २८ ॥
[17]समीपस्थान्द्रुमान्भञ्जन्वसुधां दारयन्खुरैः ॥ विषाणेनोल्लिखन्दर्पात्तद्द्वारं द्विरदो यथा ॥ २९ ॥
अन्तःपुरगतो वाली श्रुत्वा शब्दममर्षणः ॥ निष्पपात सह स्त्रीभिस्ताराभिरिव चन्द्रमाः ॥ ३० ॥
मितं व्यक्ताक्षरपदं [18]तमुवाचाथ दुन्दुभिम् ॥ हरीणामीश्वरो वाली सर्वेषां वनचारिणाम् ॥ ३१ ॥
किमर्थं नगरद्वारमिदं रुद्ध्वा [19]विनर्दसि ॥ दुन्दुभे विदितो मेऽसि रक्ष प्राणान्महाबल ॥ ३२ ॥
तस्य तद्वचनं श्रुत्वा वानरेन्द्रस्य धीमतः ॥ उवाच दुन्दुभिर्वाक्यं [20]रोषात्संरक्तलोचनः ॥ ३३ ॥
[21]न त्वं स्त्रीसन्निधौ वीर वचनं [22]वक्तुमर्हसि ॥ मम युद्धं [23]प्रयच्छाद्य ततो ज्ञास्यामि ते बलम् ॥ ३४ ॥
अथवा धारयिष्यामि क्रोधमद्य निशामिमाम् ॥ गृह्यतामुदयः स्वैरं कामभोगेषु वानर ॥ ३५ ॥

निर्झरः । निर्दराः विदीर्णपाषाणरन्ध्राणि ॥१९-२०॥ त्वं युद्धासमर्थो यदि यदि वा समर्थोपि मद्भयान्निरुद्यमः उभयथापिनत्वांयोत्स्यामीत्यर्थः । युयुत्सतः योद्धुमिच्छतः ॥ २१ ॥ अनुक्तपूर्वं इतःपूर्वकेनाप्यनुक्तंवाक्यं । अतएवक्रोधात् ॥ २२-२३ ॥ दातुं समर्थ इत्यन्वयः ॥ २४—२७ ॥ तद्द्वारं किष्किन्धाद्वारं । विषाणेन उल्लिखन् उद्भिन्दन् ॥ २८—२९ ॥ सहस्त्रीभिरिति । मदातिरेकादितिभावः ॥ ३० ॥ व्यक्तान्यक्षराणियेषु तानि व्यक्ताक्षराणि पदानि यस्मिन्कर्मणि तव्द्यक्ताक्षरपदमितिक्रियाविशेषणं । वनचारिणां भल्लूकादीनां ॥ ३१—३३ ॥ स्त्रीसन्निधौ वचनं । स्त्रीजनभ्रामकंवचनमित्यर्थः ॥ ३४ ॥ उदयः सूर्योदयः । गृह्यतां अवधित्वेन गृह्यतां ॥३५॥

स०शरणगन्तृत्वेनशरणवान् । अर्शआद्यच् । शरणागतइतियावत् । तपस्विशरणइत्येकपदत्वेनक्वचित्पाठः ॥ **शि०** तपस्विशरणः तपस्विनएवशरणानिरक्षकायस्यसोहमस्मि ॥ १९ ॥ **ति०** अनुक्तपूर्वं इतःपूर्वंनोक्तःयुद्धदातायस्यतमसुरं ॥ अनुक्तपूर्वं अन्यंगच्छेतिकदाप्यनुक्तं । क्रोधआत्तः स्वीकृतोयेनसक्रोधात्तस्तं ॥२२॥ **ति०**एकस्सशब्दःप्रसिद्धपराक्रमार्थकः ॥२४॥ **ति०**मेविदितोसि मयाज्ञातबलोसि । अतःप्राणान्रक्षस्व ॥**शि०** विदितोसीत्यनेन तत्पराक्रमस्याल्पत्वंध्वनितं ॥३२॥**ती०** गृह्यतां अवधित्वेनगृह्यतां । सूर्योदयपर्यन्तंस्त्र्यादिभोगाननुभवेतिभावः ॥ **ति०** स्त्रीसमूहगतोयुद्धायनाह्वातव्यइतिस्मृत्वापक्षान्तरमाह—**अथवेति** ॥ ३५ ॥

[**पा०**] १ ठ. स्तपस्वी. २ ङ—ट. शरणोह्यहं. ३ ज. ततस्तद्वचनं. ४ ग. ङ. झ. ञ. ट. क्रोधात्संरक्त. ज. क्रोधसंरक्त. छ. क्रोधात्माक्रोधवत्सलः. क. कोपात्संरक्त. ५ घ. ममाचक्ष्व. ६ झ. ट. योहि. ७ ट. मसुरेश्वरं. ८ ख. ङ. छ.—ट. शक्रपुत्रः प्रतापवान्. ९ ख. ज. मतुलप्रभः. १० छ. झ. ञ. ट. सदातुंते. ११ क. च.—झ. ट. दुर्मर्षणो. १२ ङ. च. ज. ञ. संग्रामकर्मणि. १३ ङ.—ट. कोपाविष्टः. १४ क. ख. ङ.—ट. वेषं. १५ क. ख. ङ.—ञ. ततस्तुद्वारं. १६ ट. मागत्य. १७ क. ग. ङ. च. ज.—ट. समीपजान्. १८ क. ख. ङ.—ट. तमुवाचस. १९ छ. झ. ट. विनर्दसे. २० क. कोपात्संरक्त. ख. घ.—ट. क्रोधात्संरक्त. ग. क्रोधसंरक्त. २१ ख. ङ. च. ञ. किंत्वं. २२ क. ख. ङ. च. ञ. वक्तुमिच्छसि. २३ क. ख. च. म. प्रयच्छत्वं.

दीयतां संप्रदानं च परिष्वज्य च वानरान् ॥ सर्वशाखामृगेन्द्रस्त्वं [१]संसादय सुहृज्जनान् ॥ ३६ ॥
[२]सुदृष्टां कुरु किष्किन्धां कुरुष्वात्मसमं पुरे ॥ क्रीडस्व च सह स्त्रीभिरहं ते दर्पनाशनः ॥ ३७ ॥
यो हि मत्तं प्रमत्तं वा [३]सुप्तं वा रहितं भृशम् ॥ हन्यात्स भ्रूणहा लोके त्वद्विधं मदमोहितम् ॥३८॥
स प्रहस्याब्रवीन्मन्दं क्रोधात्त[४]मसुरोत्तमम् ॥ विसृज्य ताः स्त्रियः सर्वास्ताराप्रभृतिकास्तदा ॥ ३९ ॥
[५]मत्तोऽयमिति मा मंस्था यद्यभीतोसि संयुगे ॥ मदोयं संप्रहारेऽस्मिन्वीरपानं समर्थ्यताम् ॥ ४० ॥
तमेवमुक्त्वा संक्रुद्धो मालामुत्क्षिप्य काञ्चनीम् ॥ पित्रा दत्तां महेन्द्रेण युद्धाय व्यवतिष्ठत॥४१॥
विषाणयोर्गृहीत्वा तं दुन्दुभिं गिरिसन्निभम् ॥ आविध्यत तदा वाली वि[६]नदन्कपिकुञ्जरः ॥ ४२ ॥
वा[७]ली व्यापातयाञ्चक्रे ननर्द च महास्वनम् ॥ श्रोत्राभ्यामथ रक्तं तु [८]तस्य सुस्राव पात्यतः॥४३॥
तयोस्तु क्रोधसंरम्भात्परस्परजयैषिणोः ॥ युद्धं समभवद्धोरं दुन्दुभेर्वानरस्य च ॥ ४४ ॥
[९]अयुध्यत [१०]तदा वाली शक्रतुल्यपराक्रमः ॥ मुष्टिभिर्जानुभिश्चैव शिलाभिः पादपैस्तथा ॥ ४५ ॥
परस्परं घ्नतोस्तत्र वानरासुरयोस्तदा ॥ [११]आसीददसुरो युद्धे शक्रसूनुर्व्यवर्धत ॥ ४६ ॥
व्यापारवीर्यधैर्यैश्च [१२]परिक्षीणं पराक्रमैः ॥ तं तु दुन्दुभि[१३]मुत्पाद्य धरण्यामभ्यपातयत् ॥ ४७ ॥
युद्धे प्राणहरे तस्मिन्निष्पिष्टो दुन्दुभिस्तदा ॥ [[१४]स्रोतोभ्यो बहुरक्तं तु तस्य सुस्राव पात्यतः ॥]
पपात च [१५]महाकायः क्षितौ पञ्चत्वमागतः ॥ ४८ ॥
[[१६]तस्मिन्पञ्चत्वमापन्ने वाली क्रोधेन चान्वितः ॥ तत्कायं लोष्ठवत्क्षेप्तुमारब्धो वीर्यवांस्तदा ॥४९॥]

संप्रदानं देयद्रव्यं । वानरान् बन्धून् । परिष्वज्य तेभ्यः संप्रदानं दीयतां । चरमकालदानंदीयतामित्यर्थः । संसादय कंचिदपिकालंसंगच्छस्व । आत्मसमं राजानमित्यर्थः । क्रीडस्व क्रीड । अद्येतिशेषः । दर्पनाशनः । पश्चादिति शेषः ॥ ३६—३७ ॥ मत्तं मधुपानादिना मत्तं । प्रमत्तं अनवहितं । रहितं आयुधादिशून्यं । त्वद्विधं त्वामिवस्त्रीमध्यगतं । मदमोहितं मदनमोहितं । यो हन्यात्सः भ्रूणहा गर्भवधकृत् ॥ ३८ ॥ मन्दंप्रहस्य धर्मान्वितवाक्यत्वादिति भावः । ताः विसृज्याब्रवीत् ॥ ३९ ॥ संयुगे यद्यभीतोसि तदा अयं मत्त इति मा मंस्थाः । अयं मदः । अस्मिन् संप्रहारे युद्धे । वीरपानं समर्थ्यतां वीरपानं कृतमिति मन्यतां । वीरपानंनाम युद्धोपक्रमे उत्साहवर्धनायवीरैःक्रियमाणं पानं ॥४०॥ उत्क्षिप्य अंसयोरुपरि विन्यस्य । एतत्काञ्चनमालाधारणकालेयःपुरो युद्धायागच्छति तस्यबलंसर्वं तवैव भविष्यतीति महेन्द्रेण दत्तामित्यर्थः । व्यवतिष्ठत व्यवातिष्ठत ॥४१॥ आविध्यत अभ्रामयत् ॥ ४२ ॥ व्यापातयांचक्रे भूमौपातयामास । अथ पात्यतः पात्यमानस्य श्रोत्राभ्यांरक्तंसुस्राव । श्रोत्रमूलविषाणपीडनादितिभावः ॥ ४३ ॥ क्रोधसंरम्भात् क्रोधवेगात् ॥ ४४—४५ ॥ घ्नतोः सतोः ॥ ४६—४७ ॥ प्राणहरे तस्मिन्युद्धे निष्पिष्टो दुन्दुभिः । पञ्चत्वं भूतानां पृथग्भावं । मरणमिति यावत् । आगतः प्राप्तः । पपात

ति० संसाधय आमन्त्रयस्व । ती०संप्रदानं युद्धं ॥ स० क्रीडस्वेतिपदव्यत्ययेन पुनःक्रीडांकुर्यामित्याशानाशासनीयेतिद्योत्यते ॥३६॥ ति० सुदृष्टां पुनर्दर्शनासंभवात् । आत्मसमं पुत्रादिकं ॥ ३७ ॥ रामानु० मदमोहितं स्त्रीभोगार्थमधुपानमदादितिकर्तव्यतामूढं ॥३८॥ स० व्यापादयाञ्चक्रे संहृतवान्। एध्यन्निश्चयेनेयमुक्तिः॥ यद्वा व्यापादनं पाश्चात्यपादपूर्वकंयापनं ॥४३॥ ति० हीनः हीनबलः ॥४६॥ ति० उद्यम्य हस्ताभ्यामूर्ध्वीकृत्य । उत्साद्येतिपाठे उत्पाटितविषाणंकृत्वेत्यर्थः ॥४७॥ ति० स्रोतोभ्यः

[पा०] १ घ.—ट. ससाधयसुहृज्जनं. २ क. घ. च. ज. ञ. सुहृष्टां. ३ छ. झ. भग्नंवा. घ. स्त्रीभोगरहितं. ख. सुप्तंवाव्यथितं. ४ झ. ठ. मसुरेश्वरं. ५ ङ. च. ज. ञ. मत्तोहमिति. ६ क. ख. ङ. च. ज. ञ. विनर्दन्. ७ क. ग. छ. झ. वालीव्यापादयांचक्रे. ८ ङ. च. ज. ञ. बहुसुस्राव. ९ ग. आविध्यत. १० घ. ततो. ११ क.—ज. ञ. ट. आसीद्दीनोसुरो. झ. आसीद्धीनोसुरो. १२ ख. परिक्षीणपराक्रमं. १३ झ. मुद्यम्य. १४ इदमर्धं क. ग. घ. छ. झ. ट. पाठेषुदृश्यते. १५ छ. झ. महाबाहुः. १६ अयंश्लोकः ख. पाठेदृश्यते.

[1]तं तोलयित्वा बाहुभ्यां गतसत्त्वम[2]चेतनम् ॥ चिक्षेप [3]बलवान्वाली वेगेनैकेन योजनम् ॥ ५० ॥
तस्य वेगप्रविद्धस्य [4]वक्रात्क्षतजबिन्दवः ॥ प्रपेतुर्मारुतोत्क्षिप्ता मतङ्गस्याश्रमं प्रति ॥ ५१ ॥
[5]तान्दृष्ट्वा पतितां[6]स्तस्य मुनिः शोणितविप्रुषः ॥ [7]क्रुद्धस्तत्र महाभागश्चिन्तयामास को न्वयम् ॥ ५२ ॥
ये[8]नाहं सहसा स्पृष्टः शोणितेन दुरात्मना ॥ कोयं दुरात्मा दुर्बुद्धिरकृतात्मा [9]च बालिशः ॥ ५३ ॥
इ[10]त्युक्त्वाथ विनिष्क्रम्य [11]ददर्श मुनिपुङ्गवः ॥ महिषं पर्वताकारं गतासुं पतितं भुवि ॥ ५४ ॥
स तु विज्ञाय तपसा [12]वानरेण कृतं हि तत् ॥ उत्ससर्ज [13]महाशापं क्षेप्तारं [14]वालिनं प्रति ॥ ५५ ॥
इह तेनाप्रवेष्टव्यं प्रविष्टस्य वधो भवेत् ॥ वनं [15]मत्संश्रयं येन दूषितं रुधिरस्रवैः ॥
सं[16]भग्नाः पादपाश्चेमे क्षि[17]पतेहासुरीं तनुम् ॥ ५६ ॥
[18]समन्ताद्योजनं पूर्णमाश्रमं मामकं यदि ॥ [19]आगमिष्यति दुर्बुद्धिर्व्यक्तं स नभविष्यति ॥ ५७ ॥
ये [20]चापि सचिवास्तस्य संश्रिता मामकं [21]वनम् ॥ न च तैरिह वस्तव्यं श्रुत्वा यान्तु यथासुखम् ॥ ५८ ॥
[22]यदि तेपीह तिष्ठन्ति शपिष्ये तानपि ध्रुवम् ॥ वनेऽस्मिन्मामके नित्यं पुत्रवत्[23]परिरक्षिते ॥
पत्राङ्कुरविनाशाय फलमूलाभवाय च ॥ ५९ ॥
दिवसश्चा[24]स्य मर्यादा यं द्रष्टा श्वोस्मि वानरम् ॥ बहुवर्षसहस्राणि स वै शैलो भविष्यति ॥ ६० ॥
ततस्ते वानराः श्रुत्वा गिरं मुनिसमीरिताम् ॥ निश्चक्रमुर्वनात्तस्मात्तान्दृष्ट्वा वालिरब्रवीत् ॥ ६१ ॥
किं भवन्तः समस्ताश्च मतङ्गवनवासिनः ॥ मत्समीपमनुप्राप्ता अपि स्वस्ति वनौकसाम् ॥ ६२ ॥
ततस्ते कारणं सर्वं [25]तदा शापं च वालिनः ॥ शशंसुर्वानराः सर्वे वालिने हेममालिने ॥ ६३ ॥

॥ ४८—४९ ॥ तोलयित्वा चालयित्वा । एकेनवेगेन एकप्रयत्नेन ॥ ५० ॥ वेगप्रविद्धस्य वेगेनक्षिप्तस्य ॥ ५१ ॥ शोणितविप्रुष इति पुँल्लिङ्गत्वमार्षं । तत्र शोणितबिन्दुविषये । क्रुद्धःसन् कोन्वयमिति चिन्तयामास ॥ ५२ ॥ कोन्वयमित्येतद्विवृणोति—येनेति ॥ स्पृष्टः अन्तर्भावितण्यर्थः । दुरात्मा दुःस्वभावः । अतएव दुर्बुद्धिः । अकृतात्मा अवशीकृतान्तःकरणः । बालिशः मूर्खः ॥ ५३—५४ ॥ तपसा तपोमाहात्म्येन ॥ ५५ ॥ अप्रवेष्टव्यं न प्रवेष्टव्यमित्यर्थः । संभग्ना इति । आसुरींतनुमिह क्षिपतेत्यन्वयः ॥ ५६ ॥ स नभविष्यति नश्यतीत्यर्थः ॥ ५७ ॥ तस्य वालिनः ॥ ५८ ॥ अस्मिन्वने पत्राङ्कुरविनाशाय फलमूलाभवायच यदीहतिष्ठन्तीत्यन्वयः ॥५९॥ अस्य शापस्य । एकोयं दिवसो मर्यादा । श्वः परेद्युः । यं द्रष्टास्मि सः शैलो भविष्यति ॥ ६० ॥ गिरं शापं ॥ ६१ ॥ वनौकसां वानरेभ्यः ॥ ६२ ॥ कारणं

नासादिद्वारेभ्यः ॥ ४८ ॥ **ति०** तोलयित्वा हस्तग्रहणेनभारंज्ञात्वा । योजनंतावद्दूरं ॥ **शि०** एकेन अल्पेन । वेगेन योजनंचिक्षेप ॥ ५० ॥ **ति०** तस्यविप्रुषःकर्तारं कोन्वयमितिचिन्तयामास ॥ **स०** विप्रुषइतिषष्ठी । तत्संबन्धिनः तान्बिन्दून् । यद्वा बिन्दवोत्रकिञ्चिद्घनाः । विप्रुषस्त्वल्पीयांसः ॥ ५२ ॥ **ति०** शापमेवहेतूपन्यासपूर्वमाह—**वनेइति** । फलाद्यभावाय तन्नाशाय ।

[पा०] १ ख. सतोलयित्वा. २ क. मचेतसं. ३ ख. ग. च.—ट. वेगवान्वाली. ४ क. मुखात्क्षतज. ५ तान्दृष्ट्वेत्यर्धानन्तरं क. ङ. च. ज. पाठेषु. मतङ्गश्चमहाप्राज्ञःक्रुद्धःकस्येतिचाब्रवीत्. इत्यर्धंदृश्यते. ६ ख. ङ.—ट. स्तत्र. ७ ङ.—ट. क्रुद्धस्तस्य. ८ ख. ग. येनायमाश्रमस्स्पृष्टः. ९ ग. सबालिशः. १० छ. झ. ट. इत्युक्त्वास. क. ङ. च. ज. ञ. इत्युक्त्वाच. ख. इत्युक्त्वाथाभि. ११ क.—ट. ददर्शमुनिसत्तमः. १२ ख. वानरेन्द्रकृतंमहत्. ङ. च. ज. ञ. वानरेन्द्रकृतंहि. छ. वानरेणहतंहि. १३ ग. तदाशापं. १४ छ. झ. ट. वानरं. १५ ग. मत्संश्रितं. ङ. ज. ञ. महत्स्वकं. १६ छ. झ. ट. क्षिपतापादपाश्चेमेसंभग्नाश्चासुरीं. १७ क. ङ. च. ज. ञ. क्षिपताद्यासुरीं. १८ छ. झ. ट. समन्तादाश्रमंपूर्णयोजनं. १९ ग. ङ. छ. झ. ञ. ट. आक्रमिष्यति. २० क. ख. ङ.—ट. चास्यसचिवाःकेचित्. २१ ञ. यदि. २२ छ. झ. ट. तेपिवायदि. ङ. च. ज. ञ. यदितेचेह. २३ ख. ग. त्परिपालिते. २४ क. ग. छ. झ. ञ. ट. श्चाद्य. ङ. च. ज. श्चात्र. २५ ङ. छ. झ. ट. तथा.

एतच्छ्रुत्वा तदा वाली वचनं वानरेरितम् ॥ [1]स महर्षिं [2]तदासाद्य याचते स्म कृताञ्जलिः ॥ ६४ ॥
महर्षिस्तमनादृत्य [3]प्रविवेशाश्रमं [4]तदा ॥ [5]शापधारणभीतस्तु वाली विह्वलतां गतः ॥ ६५ ॥
ततः शापभयाद्भीत ऋश्यमूकं महागिरिम् ॥ प्रवेष्टुं नेच्छति हरिर्द्रष्टुं वापि नरेश्वर ॥ ६६ ॥
तस्याप्रवेशं ज्ञात्वाऽहम[6]िदं राम महावनम् ॥ विचरामि सहामात्यो विषादेन [7]विवर्जितः ॥ ६७ ॥
एषोस्थिनिचयस्तस्य दुन्दुभेः [9]संप्रकाशते ॥ वीर्योत्सेकान्निरस्तस्य गिरि[8]कूटोपमो महान् ॥ ६८ ॥
इमे च विपुलाः सालाः सप्त शाखावलम्बिनः ॥ यत्रैकं घटते वाली निष्पत्रयितुमोजसा ॥ ६९ ॥
एतदस्यासमं वीर्यं मया राम प्रकीर्तितम् ॥ कथं तं वालिनं हन्तुं समरे शक्ष्यसे नृप ॥ ७० ॥
तथा ब्रुवाणं सुग्रीवं प्रहसँल्लक्ष्मणोऽब्रवीत् ॥ कस्मिन्कर्मणि निर्वृत्ते श्रद्दध्या वालिनो [10]वधम् ॥ ७१ ॥
तमुवाचाथ सुग्रीवः सप्त सालानिमान्पुरा ॥ एवमेकैकशो वाली [11]विव्याधाथ स चासकृत् ॥ ७२ ॥
[12]रामोपि दारयेदेषां बाणेनैकेन [13]चेद्द्रुमम् ॥ वालिनं निहतं मन्ये दृष्ट्वा रामस्य विक्रमम् ॥ ७३ ॥
हतस्य महिषस्यास्थि पादेनैकेन लक्ष्मण ॥ [14]उद्यम्याथ प्रक्षिपेच्चेत्तरसा द्वे धनुःशते ॥ ७४ ॥

दुन्दुभिपतनं ॥ ६३—६४ ॥ विह्वलतां गत इति । जगामेतिशेषः ॥ ६५—६७ ॥ अस्थिनिचयः शुष्ककायइतियावत् ॥ ६८ ॥ विपुलाः स्थूलाः । शाखावलम्बिनः लम्बितशाखाः । शाखावृतत्वेन दुर्ज्ञेयलक्ष्या इत्यर्थः । यत्र सालेषु एकं सालं । ओजसा नतुधनुषा । निष्पत्रयितुं निर्गतशरपत्रंकर्तुं । घटते शक्नोति । एकंसालंभित्त्वा शरोनिष्पत्रं यथातथा वृक्षान्तरासक्तमूलंगच्छति तथावेद्धुंसमर्थइत्यर्थः । धनुर्विना केवलबाणेन एकंसालंविध्यतीत्यर्थः । यद्वा वेद्धुंशक्तः नतु कदाचित्तथाकृतवानिति घटतइतिपदेनव्यज्यते । एवमुत्तरत्रापि योज्यं । यद्वा स्वजातिविरुद्धत्वेनयुद्धे धनुर्ग्रहणाभावेपि लीलार्थं धनुरस्तीतिध्येयम् ॥ ६९—७० ॥ कस्मिन्निति । मुहूर्तेनचतुःसमुद्रगमने उत्क्षिप्तपर्वतशिखरग्रहणे दुन्दुभिकायोत्क्षेपणे सालभेदनेवेत्यर्थः ॥ ७१ ॥ पुरा वाली इमान् सप्त सालान् । विव्याध । अथच अनन्तरमपि । एवमेकैकशः असकृद्विव्याधेतियोजना । यद्वा सवाली एवंविधानिमान्सप्त सालान् एकैकशः पुरा विव्याध । अनन्तरमप्यसकृद्विव्याध । एषां मध्ये एकं द्रुमं एकेन बाणेन यदि विदारयेत् तदा तादृशं विक्रमं दृष्ट्वा वालिनं निहतंमन्ये । उद्यम्य अङ्गुष्ठेनोत्क्षिप्य । द्वे धनुःशते धनुःशतद्वयदूरं । धनुर्नाम चतुर्हस्तमानं ।

जायन्तेयतः अतःशपिष्यामि ॥ ५९ ॥ **वि०** याचतेस्म अयाचत । शापमोक्षमितिशेषः ॥ ६४ ॥ **ति०** शापधारणेन शापविषयदोषज्ञानेन । **स०** शापकारणभीतः शापकारणस्वदोषभीतः ॥ ६५ ॥ **स०** शापेनभयमातयतिप्रापयतीतिशापभयात् मुनिः तस्माद्भीतः शापभयाद्भीतः ॥ ६६ ॥ **ति०** विपुलाः विशालमूलस्कन्धाः । शाखावलंबिनः प्रशस्तबहुशाखावन्तः । यत्र येषु । एकं एककालमेव । वाली ओजसा ओजोयुक्तकंपनेन । सर्वान्निष्पत्रयितुं पत्रहीनान्कर्तुं घटते चेष्टते । तइमेसप्तसालाइत्यर्थः । अनेनवायोरप्यधिकंबलंसूचितं । नहिवायोर्युगपत्कंपनेनसकलार्द्रपत्रपातनंक्वचिदृष्टं । कश्चित्तु निष्पत्रयितुं निष्पत्रीकर्तुमित्यर्थः । एकंसालं शरेणभित्त्वा शरोनिष्पत्रंयथागच्छतितथाकर्तुं अतिव्यथयितुमितियावत् । " सपत्रनिष्पत्रादतिव्यथने " इति शास्त्रात् । अप्राकृतकपित्वाच्चबाणव्यापारस्यापिसंभवइतिव्याचख्यौ ॥ ६९ ॥ प्रहसन् भगवद्वीर्याज्ञानादेवंवादइतिहासः ॥ ७१ ॥ **ती०** पुरा सवाली इमान् पुरतःस्थितान् सप्तसालान् एकैकशः एकमेकंविव्याध । अथच अनन्तरं । एवं पूर्वोक्तप्रकारेणासकृद्विव्याधेति संबन्धः । एतेषुसालेषु एकंपूर्वंभित्त्वा तत्रखानितंशरं समुद्धृत्यतस्मिन्रन्ध्रेपुनरन्यंशरंनिधाय तमपिसमुद्धृत्य तथाऽन्यंविध्वा एवमसकृदेताञ्छिद्रीकृतवानितिवाक्यार्थः ॥ **ति०** एवमुक्तप्रकारेण एकैकशः एकैकस्मिन्काले सप्तापि सः वाली । असकृद्विव्याध पीडितवान् । आर्षपरस्मैपदं ॥ सकृत्कृतेःकाकतालीयत्वन्युदासायासकृदिति । विव्याधेतिपाठान्तरं ॥ ७२ ॥ **ति०** एकेनबाणेन एषामेकंद्रुममपिचेन्निर्दारयेत् तदापि वालिनंहतंमन्ये । तद्वधयोग्यतासंभावनयेतिभावः ॥ पादेन अस्थ्नोहस्तेनस्पर्शायोग्यत्वात् ।

[पा०] १ ग. ट. तंमहर्षिं. २ क. ख. च. तमासाद्य. छ.—ञ. समासाद्य. ३ ख. प्रविवेशस्वमाश्रमं. ४ ङ. छ.—ट. प्रति. ५ ठ. शापकारण. ६ क. मिमंराममहागिरिं. ७ क. ख. घ. चवार्जितः. ८ क. ख. ङ.—ट. कूटनिभो. ९ छ. झ. ट. प्रकाशितं. १० छ. वधे. ११ झ. विव्याधाथ. १२ ग. घ. झ. ट. रामोनिर्दारयेदेषां. १३ क. ख. ग. च. छ. झ. ट. चद्रुमं. १४ ङ.—ट. उद्यम्यप्रक्षिपेच्चापि.

एवमुक्त्वा तु सुग्रीवो रामं [1]रक्तान्तलोचनम् ॥ ध्यात्वा मुहूर्तं काकुत्स्थं [2]पुनरेव वचोऽब्रवीत् ॥ ७५ ॥
[3]शूरश्च शूरघाती च प्रख्यातबलपौरुषः ॥ बलवान्वानरो वाली संयुगेष्वपराजितः ॥ ७६ ॥
दृश्यन्ते चास्य कर्माणि दुष्कराणि सुरैरपि ॥ यानि संचिन्त्य भीतोऽहमृ[4]श्यमूकं समाश्रितः ॥७७॥
तमजय्यमधृष्यं च वानरेन्द्रममर्षणम् ॥ वि[5]चिन्तयन्न मुञ्चामि ऋश्यमूक[6]महं त्विमम् ॥ ७८ ॥
उद्विग्नः [7]शङ्कितश्चापि विचरामि महावने ॥ अनुरक्तैः सहामात्यैर्हनुमत्प्रमुखैर्वरैः ॥ ७९ ॥
उपलब्धं च मे श्लाघ्यं सन्मित्रं मित्रवत्सल ॥ त्वामहं पुरुषव्याघ्र हिमव[8]न्तमिवाश्रितः ॥ ८० ॥
किंतु तस्य बलज्ञोऽहं दुर्भ्रातुर्बलशालिनः ॥ अप्रत्यक्षं तु मे वीर्यं समरे तव राघव ॥ ८१ ॥
न खल्वहं त्वां तुलये नावमन्ये न भीषये ॥ कर्मभिस्तस्य [9]भीमैस्तु कातर्यं जनितं मम ॥ ८२ ॥
कामं [10]राघव ते वाणी प्रमाणं धैर्यमाकृतिः ॥ सूचयन्ति परं तेजो भस्मच्छन्नमिवानलम् ॥ ८३ ॥
[[11]स्निग्धानां प्रीतियुक्तानां सुहृदां सुहृदं प्रति ॥ कातरं हृदयं राम प्रत्ययं नाधिगच्छति ॥ ८४ ॥
यदि बाणेन भेत्ता त्वं सालान्सप्ताद्य राघव ॥ वालिनं समरे हन्तुं समर्थः स्यात्ततो भवान् ॥ ८५ ॥]
तस्य तद्वचनं श्रुत्वा सुग्रीवस्य महात्मनः ॥ स्मितपूर्वमथो रामः प्रत्युवाच [12]हरिं प्रभुः ॥ ८६ ॥
यदि न प्रत्ययोऽस्मासु विक्रमे तव वानर ॥ प्रत्ययं [13]समरे श्लाघ्यमहमुत्पादयामि ते ॥ ८७ ॥
एवमुक्त्वा तु सुग्रीवं [14]सान्त्वं लक्ष्मणपूर्वजः ॥ राघवो दुन्दुभेः कायं पादाङ्गुष्ठेन [15]लीलया ॥
[16]तोलयित्वा महाबाहुश्चिक्षेप दशयोजनम् ॥ ८८ ॥
असुरस्य तनुं [17]शुष्कं पादाङ्गुष्ठेन वीर्यवान् ॥ क्षिप्तं दृष्ट्वा [18]ततः कायं [19]सुग्रीवः पुनरब्रवीत् ॥ ८९ ॥

" किष्कुःस्यादवटोहस्तश्चतुर्विंशतिरङ्गुलाः । चतुर्हस्तोधनुर्दण्डोधनुर्धन्वन्तरंयुगं " इतिवैजयन्ती । एवं सुग्रीवस्तमुवाचेति पूर्वेणान्वयः ॥ ७२—७४ ॥ एवमविश्वासकरणे सुहृद्दुर्मनायेतेत्यालोच्य यथा रामः संतुष्यति तथावदति एवमुक्त्वेत्यादिना ॥७५—७८॥ उद्विग्नः भीतः ॥ ७९—८२ ॥ वाणी एकरूपंवचनं । प्रमाणं बुद्धिः । धैर्यं अचञ्चलता । आकृतिर्वेषश्च भस्मच्छन्नमनलमिवस्थितं । तेपरं तेजः कामं अतिशयेन सूचयन्ति । अथापि मे कातर्यं जनितमिति पूर्वेणान्वयः ॥ ८३—८६ ॥ विक्रमे विषये । प्रत्ययं विश्वासं । समरे विषये ॥ ८७ ॥ सान्त्वमित्यनेन प्रत्ययप्रश्नेन सुग्रीवस्य दुःखितत्वं द्योत्यते । पादाङ्गुष्ठेन अनुद्धृतेन । तोलयित्वा चालयित्वा ॥८८॥ तनुं

तरसा बलेन । प्रक्षिपेदपिचेत् तदापि रामस्यविक्रमंदृष्ट्वा वालिनंहतंमन्यइतिसंबन्धः ॥ ७३—७४ ॥ **ति०** ध्यात्वा रामवीर्यस्याप्रत्यक्षत्वाद्रामेणवालिवधः शक्योनवेतिसंचिन्त्य ॥ ७५ ॥ **शि०** शूरः अतएवशूरमानी शूरकर्तृकसत्कारवान् । बलवान् प्रशस्तसेनाविशिष्टः । वाली अस्तीतिशेषः ॥ ७६ ॥ **ति०** वाणी वालिवधविषया । प्रमाणं विश्वसनीया । यतः धैर्यं अकातर्येणनृणीकृत्यवादः । आकृतिः अनुभवसिद्धोदिव्यविग्रहः । एतेद्वे परंतेजः सकलजगत्संहारकंतेजः । कामं अतिशयेन । सूचयन्ति सूचयतः । भस्मच्छन्नानलोपमयागुप्तावस्थितिमहाशक्तिमत्त्वंसूचितं ॥ ८३ ॥ **शि०** दुन्दुभेःकायं पादाङ्गुष्ठेनतोलयित्वा शुष्कांतनुं पादाङ्गुष्ठेनलीलयादशयोजनंचिक्षेप । कर्मणः करणस्यचपुनरुपादानमुभयत्रशाब्दान्वयविवक्षया ॥ ८८—८९ ॥

[**पा०**] १ छ. झ. लोचनः. २ क. पुनरेवाब्रवीद्वचः. ३ छ. झ. ट. शूरश्चशूरमानीच. क. ख. ङ. च. ञ. शूरश्चासुरघातीच. ४ छ. झ. ट. मृश्यमूकमुपाश्रितः. ५ ख. चिन्तयन्नविमुञ्चामि. ६ ख. ग. ङ. च. ज.—ट. ममुंत्वहं. घ. महंगिरिं. ७ क.—ट. शङ्कितश्चाहं. ८ ग. मिहाश्रितः. ९ च. छ. झ. ञ. ट. भीमैश्च. १० क. ख. रामभवद्वाणी. ११ इदंश्लोकद्वयं क. ङ. च. ज. पाठेषुदृश्यते. १२ ङ. छ.—ट. हरिंप्रति. क. गिरिंप्रभुः. १३ ख. ग. ङ. समरश्लाघ्यं. १४ ङ. छ. झ. ञ. ट. सान्त्वयँल्लक्ष्मणाग्रजः. १५ क. ङ. ञ. तोलयन्. च. ज. लोलयन. १६ क. ङ. च. ज. ञ. पुनश्चलीलयारामश्चिक्षेप. १७ क. ख. ङ.—ट. शुष्कां. १८ क. पुनः. १९ क. झ. सुग्रीवोराममब्रवीत्.

[1]लक्ष्मणस्याग्रतो राममिदं वचनमब्रवीत् ॥ ९० ॥
आर्द्रः समांसः प्रत्यग्रः क्षिप्तः [2]कायः पुरा सखे ॥ [3]लघुः संप्रति निर्मांसस्तृणभूतश्च राघव ॥ ९१ ॥
परिश्रान्तेन मत्तेन भ्रात्रा मे वालिना तदा ॥ [4]क्षिप्तमेवंप्रहर्षेण भवता रघुनन्दन ॥
नात्र शक्यं बलं ज्ञातुं तव वा तस्य वाऽधिकम् ॥ ९२ ॥
आर्द्रं शुष्कमिति ह्येतत्सुमहद्राघवान्तरम् ॥ स एव संशयस्तात तव तस्य च [5]यद्बले ॥ ९३ ॥
सालमेकं [6]तु निर्भिन्द्या [7]भवेद्व्यक्तिर्बलाबले ॥ ९४ ॥
[8]कृत्वेदं कार्मुकं सज्यं हस्तिहस्त[9]मिवाततम् ॥ आकर्णपूर्णमायम्य विसृजस्व महाशरम् ॥ ९५ ॥

इमं हि सालं [10]संहितस्त्वया शरो न [11]संशयोत्रास्ति विदारयिष्यति ॥
अलं विमर्शेन [12]मम प्रियं ध्रुवं कुरुष्व [13]राजात्मज शापितो मया ॥ ९६ ॥
यथा हि तेजस्सु वरः सदा रविर्यथा हि शैलो हिमवान्महाद्रिषु ॥
यथा चतुष्पात्सु च केसरी वरस्तथा नराणामसि विक्रमे वरः ॥ ९७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकादशः सर्गः ॥ ११ ॥

पूर्वापेक्षया स्वल्पं । कायं शरीरं ॥८९॥ कथं कमित्यत्राह—लक्ष्मणस्येति ॥९०॥ आर्द्रः सरक्तः । प्रत्यग्रः यत्किंचित्प्राणचेष्टायुक्तः । लघुत्वंसदृष्टान्तमाह—तृणभूत इति ॥ ९१ ॥ एवं प्रक्षेपेप्यवैषम्यमुक्त्वा प्रक्षेप्तृतारतम्यमाह—परिश्रान्तेनेति ॥ एवंप्रहर्षेण एवंविधप्रहर्षवता । अत्र दुन्दुभिकायक्षेपकर्मणि । तववा तस्यवा अधिकंबलमिति ज्ञातुंनशक्यं॥ ९२ ॥ पुनःसंग्रहेणाह—आर्द्रमिति ॥ आर्द्रं शुष्कमित्येतत्सुमहत् अन्तरं तारतम्यं यद्यस्मादस्ति । अतस्तवच तस्यच बले युवयोर्बलतारतम्ये । सएव संशयोवर्तते । संशयोननिवृत्तइत्यर्थः ॥ ९३ ॥ निर्भिन्द्याः भञ्जय । व्यक्तिः विशेषज्ञानं ॥ ९४—९५ ॥ पुनर्निर्बन्धेन कुपितोभवेदितिसान्त्वयति—इममिति ॥ सहितः संहितः । "समोवा हिततयोः" इतिमलोपः । शरो विदारयिष्यति । विमर्शेन पुनःकिमर्थं प्रत्ययोत्पादनमिति विमर्शेन । ममप्रियं नतुत्वत्परीक्षार्थं ॥ ९६ ॥ तेजस्सु तेजस्विषु । विक्रमे । स्थितानामितिशेषः ॥ ९७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकादशः सर्गः ॥ ११ ॥

ती॰ प्रत्यग्रः अभिनवः ॥ ९१ ॥ **ति॰** मत्तेन भोगार्थपीतमदेन ॥ ९२ ॥ **ति॰** यद्बलं तत्रेतिशेषः । यद्बले इतिपाठेयदित्यव्ययं । यःसंशयोऽस्थिप्रक्षेपात्प्राग्बलविषये आसीत् सोऽद्याप्यस्त्येवेत्यर्थः ॥ ९३ ॥ **ती॰** एकंसालं विनिर्भिद्य बलाबले प्रथमाद्विवचनं ॥ व्यक्तेभवेत् भवेतामित्यर्थः । एकसालभेदनेकृते त्वंबलाधिकइत्यहंज्ञास्यामीत्यर्थः ॥ ९४ ॥ **ति॰** मया सख्या । संप्रतिशापितः शपथपूर्वनियुक्तः । अतोममप्रियंध्रुवंकुरुष्वेत्यर्थः ॥ ९६ ॥ **ती॰** सर्गफलं—"विद्याबलंदैवबलंज्ञानबन्धुबलं तथा । सेनाबलंभवेत्तस्यवालिनोबलकीर्तनात् ॥" इतिस्कान्दे ॥ ९७ ॥ इत्येकादशः सर्गः ॥ ११ ॥

[पा॰] १ एतदर्धस्यप्रतिनिधितया क.—ट. पाठेषु. लक्ष्मणस्याग्रतोरामंतपन्तमिवभास्करम् । हरीणामग्रतोवीरमिदं वचनमर्थवत्. इत्येकःश्लोकोदृश्यते. २ घ. कायस्तदा. ३ लघुःसंप्रतिनिर्मांसः. परिश्रान्तेनमत्तेन. इत्यनयोरर्धयोःपौर्वापर्यं ङ. च. ज. झ. ञ. पाठेषुदृश्यते. ४ ग. झ. क्षिप्तएवं. क. ङ. च. ज. ञ. ट. क्षिप्तएव. ५ ङ.—ट. यद्बलं. ६ ङ.—ट. विनिर्भिद्य. ७ च. भवेद्व्यक्तेबलाबले. ८ च.—ट. कृत्वैतत्कार्मुकं. ९ छ. झ. ट. मिवापरं. क. घ. ङ. च. ञ. मिवायतं. १० क. ख. घ.—ट. प्रहितस्त्वया. ११ ङ. च. ज. ञ. संशयोह्यत्र. १२ क. तवप्रियं. १३ छ. झ. ट. राजन्प्रतिशापितो. ङ. च. ज. ञ. राजंस्त्वयिशापितो.

द्वादशः सर्गः ॥ १२ ॥

सुग्रीवविस्रंभाय राममुक्तैनैकेनैवबाणेन युगपत्सालसप्तकरसातलादिभेदनपूर्वकं पुनःस्वतूणीप्रवेशः ॥ १ ॥ तदद्भुतावलोकनविस्मितेनसुग्रीवेण सप्रणामं प्रशंसनपूर्वकं रामंप्रति वालिवधप्रार्थना ॥ २ ॥ रामेण सुग्रीवंप्रति समरायवालिसमाह्वानचोदनपूर्वकं लक्ष्मणादिभिःसह वृक्षमूलेनिलीयावस्थानम् ॥ ३ ॥ सुग्रीवेण निजाह्वानमसहमानेनवालिना नियुद्धे निजबलभञ्जने वालिसुग्रीवयोःस्वराकारादिसादृश्याद्विशेषानुपलब्ध्या रामेण वालिनि शरामोचने सुग्रीवेण पुनर्ऋश्यमूकंप्रति पलायनम् ॥ ४ ॥ सर्वैःसह सुग्रीवसमीपमुपागतेनरामेण तंप्रति वालिवधाकरणे कारणाभिधानेन समाश्वासनपूर्वकं पुनर्वालिनासह नियुद्धचोदना ॥ ५ ॥ लक्ष्मणेन रामचोदनया प्रत्यभिज्ञानाय सुग्रीवग्रीवायां सपुष्पगजपुष्पीलताबन्धनम् ॥ ६ ॥

एतच्च वचनं श्रुत्वा [1]सुग्रीवेण सुभाषितम् ॥ प्रत्ययार्थं महातेजा रामो जग्राह कार्मुकम् ॥ १ ॥
स गृहीत्वा धनुर्घोरं [2]शरमेकं च मानदः ॥ सालमुद्दिश्य चिक्षेप [3]ज्यास्वनैः पूरयन्दिशः ॥ २ ॥
स विसृष्टो बलवता [4]बाणः स्वर्णपरिष्कृतः ॥ भित्त्वा सालान्गिरि[5]प्रस्थे सप्त भूमिं विवेश ह ॥ ३ ॥
[6]प्रविष्टश्च मुहूर्तेन [7]धरां भित्त्वा [8]महाजवः ॥ [9]निष्पत्य च पुनस्तूर्णं [10]स्वंतूर्णीं प्रविवेश ह ॥ ४ ॥
तान्दृष्ट्वा सप्त निर्भिन्नान्सालान्वानरपुङ्गवः ॥ रामस्य शरवेगेन विस्मयं परमं गतः ॥ ५ ॥
स मूर्ध्ना न्यपतद्भूमौ प्रलम्बीकृतभूषणः ॥ सुग्रीवः परमप्रीतो राघवाय कृताञ्जलिः ॥ ६ ॥
इदं चोवाच धर्मज्ञं कर्मणा तेन [11]हर्षितः ॥ रामं सर्वास्त्रविदुषां श्रेष्ठं शूरमवस्थितम् ॥ ७ ॥
सेन्द्रानपि सुरान्सर्वांस्त्वं बाणैः पुरुषर्षभ ॥ समर्थः समरे हन्तुं किं पुनर्वालिनं प्रभो ॥ ८ ॥

अथ प्रत्ययपूर्वकं वालिवधाय गमनं द्वादशे—एतच्चेत्यादि ॥ १—२ ॥ सः एकसालोद्देशेन विसृष्टः । स्वर्णपरिष्कृतः स्वर्णपट्टालंकृतः । अनेन सर्वोत्तमत्वमुक्तं । सप्त सालान् भित्त्वा । गिरिप्रस्थे गिरिप्रस्थमार्गेण भूमिं विवेश । इत्थंह्युक्तमभियुक्तैः । "सालांश्च सप्त सगिरीन्सरसातलान् " इति । संक्षेपेच "गिरिं रसातलंचैव" इति । अन्यस्त्वपपाठः ॥३॥ धरां भित्त्वा प्रविष्टः स शरः महाजवत्वान्मुहूर्तेन । निष्पत्य निर्गत्य । पुनस्तां तूणीं प्रविवेश । मन्त्रप्रभावेनाचेतनस्यापिपुनरागमनं ॥ ४ ॥ दृष्ट्वेत्यनेनाल्पज्ञत्वात्सुग्रीवः सालानेवभिन्नान्ददर्श । सप्तभूमिप्रवेशंत्वहमेवधर्मवीर्येण पश्यामीतिभावः ॥ ५ ॥ ससुग्रीवः परमप्रीतः सन् राघवायकृताञ्जलिः मूर्ध्नाभूमौन्यपतत् । शिरसा भूमिं स्पृष्ट्वा प्रणनामेत्यर्थः । प्रलम्बीकृतभूषणइत्यनेन उदरास्पर्शउक्तः । अनेनभगवद्विषयेप्रणा-

ती० मानंबहुमानंददातीतिमानदः ॥२॥ ती० सप्तसालान् गिरिप्रस्थेच भित्त्वा भूमिंविवेश। सप्तसालान्भित्त्वा गिरिप्रस्थंपर्वतमपिभित्त्वा भूमिंप्रविश्यतामपिभित्त्वा रसातलंगत्वेतिद्रष्टव्यं ॥ गिरिंरसातलंचेत्युक्तत्वात् । तथाचस्कान्दे—"सप्तभूमीःसप्तगिरीन्सप्तसालान्महाबलान् । सबाणोवेगसंपन्नोभित्त्वातूणीरमाविशत्" इति ॥ शि० सालान् गिरिप्रस्थं तदाश्रयीभूतगिरिखण्डंच सप्तभूमिं अधस्सप्तलोकावरकांश्चभित्त्वाविवेश उद्देश्यातिरिक्तभेदनस्यसामर्थ्यसूचकत्वान्नप्रयोक्तृनैपुण्यहानिः । उपलक्षणतयाऽन्यस्याप्युद्देश्यतावा ॥ ३ ॥ ति० निष्पत्य रसातलपर्यन्तंगत्वा । तत्रत्यासुरान्हत्वा तमेवतूणं पूर्वाधारंतूणं । अनेनरामबाणानांचेतनपरशक्तिमद्देवताऽधिष्ठितत्वंसूचयति । तदुक्तं—"युगपत्सप्ततालांश्चरघुनाथोबिभेदह ।पातालदानवान्हत्वापुनस्तूणंविवेशच"इति ॥ ४ ॥ ति० प्रलंबीकृतभूषणः साष्टाङ्गप्रणामवशाल्लंबमानावस्थापन्नोरःकण्ठादिवर्तिसकलभूषणः । कृताञ्जलिः उत्थानानन्तर-

[पा०] १ छ.—ट. सुग्रीवस्य. २ घ. मेकंतु. ३ क. ग. ङ. छ. ज. झ. ट. पूरयन्सरवैर्दिशः. ४ ङ. च. छ. ज. ञ. बाणोहेमविभूषितः. ५ छ.—ट. प्रस्थं. ६ ख. छ. झ. ट. सायकस्तुमुहूर्तेन. ग. प्रविश्यच. क. सप्रविष्टो. च. ज. ञ. प्रविष्टस्तु. ७ छ. झ. ट. सालान्भित्त्वा. क. घ. ङ. च. ज. ञ. रसांभित्त्वा. ८ च. ज. महाशरः. ९ क. निपत्यच. १० छ. झ. तमेवप्रविवेशह. ख. ग. स्वतूर्णीपुनराविशन्. घ. स्वतूर्णींतामुपाविशत्. ११ घ. तोषितः.

येन सप्त महासाला गिरिर्भूमिश्च दारिताः ॥ बाणेनैकेन काकुत्स्थ स्थाता ते को रणाग्रतः ॥ ९ ॥
अद्य मे विगतः शोकः प्रीतिरद्य [1]परा मम ॥ सुहृदं त्वां समासाद्य महेन्द्रवरुणोपमम् ॥ १० ॥
तमद्यैव प्रियार्थं मे वैरिणं भ्रातृरूपिणम् ॥ वालिनं जहि काकुत्स्थ मया बद्धोऽयमञ्जलिः ॥ ११ ॥
ततो रामः परिष्वज्य सुग्रीवं प्रियदर्शनम् ॥ प्रत्युवाच महाप्राज्ञो [2]लक्ष्मणानुमतं वचः ॥ १२ ॥
अस्माद्[3]गच्छेम किष्किन्धां क्षिप्रं गच्छ त्वमग्रतः ॥ गत्वा चाह्वय सुग्रीव वालिनं भ्रातृगन्धिनम् ॥१३॥
सर्वे ते त्वरितं गत्वा किष्किन्धां वालिनः पुरीम् ॥ वृक्षैरात्मानमावृत्य [4]व्यतिष्ठ[5]न्गहने वने ॥ १४ ॥
[6]सुग्रीवो व्यनदद्घोरं वालिनो ह्वानकारणात् ॥ गाढं परिहितो वेगान्नादैर्भिन्दन्निवाम्बरम् ॥ १५ ॥
तं श्रुत्वा निनदं भ्रातुः क्रुद्धो वाली महाबलः ॥ [7]निश्चक्राम सुसंरब्धो भास्करोस्ततटादिव ॥ १६ ॥
ततः सुतुमुलं युद्धं वालिसुग्रीवयोरभूत् ॥ गगने ग्रहयोर्घोरं बुधाङ्गारकयोरिव ॥ १७ ॥
तलैरशनिकल्पैश्च वज्रकल्पैश्च मुष्टिभिः ॥ जघ्नतुः समरेऽन्योन्यं भ्रातरौ क्रोधमूर्छितौ ॥ १८ ॥
ततो रामो धनुष्पाणिस्तावुभौ [8]समुदीक्ष्य तु ॥ अन्योन्यसदृशौ वीरावुभौ देवाविवाश्विनौ ॥१९॥
[9]यन्नावगच्छत्सुग्रीवं वालिनं वा[10]ऽपि राघवः ॥ ततो न कृतवान्बुद्धिं मोक्तुमन्तकरं शरम् ॥ २० ॥
एतस्मिन्नन्तरे भग्नः सुग्रीवस्तेन वालिना ॥ अपश्यन्राघवं नाथमृश्यमूकं प्रदुद्रुवे ॥ २१ ॥

मप्रकारः शिक्षितोभवति ॥ ६—११ ॥ लक्ष्मणानुमतमिति क्रियाविशेषणं । भ्रातृगन्धिनं भ्रातृहिंसकं । “ गन्धनावक्षेपण—” इत्यत्र तथा प्रयोगात् । इति रामः सुग्रीवं प्रत्युवाचेतिपूर्वेणान्वयः ॥ १२—१३ ॥ आत्मानं स्वंस्वमित्यर्थः ॥ १४ ॥ ह्वानं आह्वानं । गाढं परिहितः बलवृद्ध्येदृढबद्धपरिधानः ॥ १५ ॥ भास्करोस्ततटादिवेति । यथा सूर्योस्ततटादवतरन्नदृष्टरश्मिर्भवति तथेदानींकिष्किन्धानिर्गमनं वालिनोल्पकाले-

ननाशहेतुरितिद्योतनार्थमस्ततटादित्युक्तं । अस्मद्देशोदयगिरिः प्रदेशान्तरापेक्षया अस्तगिरिरित्युक्तमित्यप्याहुः ॥ १६ ॥ बुधाङ्गारकाख्ययोर्ग्रहयोरिव ॥१७॥ अशनिः मेघज्योतिः ॥ १८ ॥ तत इत्यादिश्लोकद्वयमेकान्वयं । उभावश्विनौदेवाविवस्थितौ तावुभौसमुदीक्ष्य सुग्रीवं वालिनंवा विशेषतोयन्नावगच्छत् । ततः तस्मात् रामः शरं मोक्तुं बुद्धिं न कृतवानित्य-

---

मितिशेषः ॥ **रामानु०** प्रलंबगतभूषणइतिपाठान्तरं प्रलंबगतभूषणः प्रलंबत्वंप्राप्तभूषणइत्यर्थः ॥ ६ ॥ **ति०** भूमिश्च । चात् सप्तपातालास्तद्वर्तिनोसुराश्च ॥ ९ ॥ **टीका०** भ्रातृगन्धिनं गन्धःसंबन्धः । भ्रातृत्वमात्रेणसंबन्धी नतुदानमानादिनेतिभावः ॥ १३ ॥ **ति०** वेगात् नादकारणप्राणवेगात् । उत्पन्नैरितिशेषः ॥ १५ ॥ **ति०** भास्करोस्ततटादतिदूरमप्युदयपर्वतमल्पल्पेन कालेनयाति । एवमदृश्यस्थानतयातत्तुल्यगुहातःक्षणेनबहिरागतइत्यर्थः । यत्तु अस्तपदेनोदयगिरिलक्षणं यदपिमेरूत्तरवासिनोऽधिकृत्येयमुक्तिरितिव्याख्यानं तत्क्लिष्टमसंगतंचेतिस्पष्टंसुधियां ॥ **रामानु०** अस्माकमुदयपर्वतः सिद्धपुरवासिनामस्तगिरिरितितदपेक्षयाऽस्ततटादित्युक्तं । “ उदयोयोलङ्कायांसोस्तमयःसवितुरेवसिद्धपुरे”इत्यार्यभटोक्तेः ॥ **ती०** मेरोरुत्तरवासिनोऽधिकृत्येदमुच्यते । अस्माकमस्तमयपर्वतोमेरोरुत्तरपार्श्वस्थानामुदयगिरिः । तेषामस्तगिरिरस्माकमुदयगिरिः । अतोस्तगिरेरपिभानोर्निर्गमनंसंभवति ॥ **स०** अस्ततटात् । ल्यब्लोपनिमित्तापञ्चमी । अस्तंतटमुद्दिश्ययथानिष्पतति तथावाल्यपिनिष्पपात । उदयगिरेरित्यनुक्त्वाऽस्ततटादितिकथनेनवालिनोल्पकालशेषोद्योत्यते । प्राचीनेचैतच्छ्लोकव्याख्यानेसंगतेअसंगतेवासुधियोविभावयन्तु ॥१६॥ **ति०** बुधाङ्गारकयोरिव । “ वज्रगोकर्णयोर्यथा”इतिपाठान्तरं । वज्रगोकर्णौ तदाख्यपर्वतौ । यथा तथेतिशेषः ॥ १७ ॥ **ति०** अशनिः दंभोलिः । वज्रं वज्रायुधं ॥ १८ ॥ **शि०** यत् यस्माद्धेतोः राघवः नावगच्छत् मिलितत्वात्समानाकारत्वाच्चविविच्यबोद्धुंनैच्छत् ततः तस्माद्धेतोः । अन्तकरंशरंमोक्तुं बुद्धिं निश्चयं । नकृतवान् । एतेन वालिनिरामस्यस्नेहः सूचितः । तेनसुग्रीवविषयकस्नेहस्यपराकाष्ठाव्यञ्जिता । तेनेदानीमपियदिद्वयोर्मैत्रीस्यात्तर्हि नहनिष्यामीतिरामाभिप्रायोव्यक्तः ॥ २० ॥ **स०** स्तेनश्चासौ

[पा०] १ क. पराहिमे. २ ङ. छ.—ट. लक्ष्मणानुगतं. ३ क. छ. झ. ञ. ट. द्गच्छाम. ङ. च. ज. द्गच्छाव. ४ ख. ङ. छ. झ. ट. ह्यतिष्ठन्. ५ च. ज. न्गहनेतुते. ६ ग. ङ. छ. ज. झ. ट. सुग्रीवोप्यनदत्. ७ क. ख. ङ.—ट. निष्पपात. ८ छ. झ. ञ. ट. समुदैक्षत. ९ ख. यन्नाध्यगच्छत्. १० घ. च. छ. ज. ञ. चापि.

क्रान्तो रुधिरसिक्ताङ्गः प्रहारैर्जर्झरीकृतः ॥ वालिनाऽभिद्रुतः क्रोधात्प्रविवेश महावनम्[1] ॥ २२ ॥
तं प्रविष्टं वनं दृष्ट्वा वाली शापभयार्दितः[2] ॥ मुक्तो ह्यसि त्वमित्युक्त्वा संनिवृत्तो[3] महाद्युतिः ॥
[निवृत्तः[4] स्वपुरीं प्राप क्रोधाविष्टो महाबलः ॥ २३ ॥]
राघवोपि सह भ्रात्रा सह[5] चैव हनूमता ॥ तदेव वनमागच्छत्सुग्रीवो यत्र वानरः ॥ २४ ॥
तं समीक्ष्यागतं रामं सुग्रीवः सहलक्ष्मणम् ॥ ह्रीमान्दीनमुवाचेदं वसुधामवलोकयन् ॥ २५ ॥
आह्वयस्वेति मामुक्त्वा दर्शयित्वा च विक्रमम् ॥ वैरिणा घातयित्वा च किमिदानीं त्वया कृतम् ॥२६॥
तामेव वेलां वक्तव्यं त्वया राघव तत्त्वतः ॥ वालिनं न[6] निहन्मीति ततो नाहमितो व्रजे ॥
[किंतु[7] तत्कारणं येन शक्तेन हि न हन्यते ॥ २७ ॥]
तस्य चैवं ब्रुवाणस्य सुग्रीवस्य महात्मनः ॥ करुणं दीनया वाचा राघवः पुनरब्रवीत् ॥ २८ ॥
सुग्रीव श्रूयतां तात क्रोधश्च व्यपनीयताम् ॥ कारणं येन बाणोऽयं न मया स विसर्जितः ॥ २९ ॥
अलंकारेण वेषेण प्रमाणेन गतेन च ॥ त्वं च सुग्रीव वाली च सदृशौ स्थः परस्परम् ॥ ३० ॥
स्वरेण वर्चसा[8] चैव प्रेक्षितेन च वानर ॥ विक्रमेण च वाक्यैश्च व्यक्तिं वो नोपलक्षये ॥
ततोऽहं रूपसादृश्यान्मोहितो वानरोत्तम ॥ ३१ ॥
नोत्सृजामि महावेगं शरं शत्रुनिबर्हणम् ॥ जीवितान्तकरं घोरं सादृश्यात्तु विशङ्कितः ॥
मूलघातो न नौ स्याद्धि द्वयोरपि[9] कृतो मया ॥ ३२ ॥

न्वयः ॥ १९—२१ ॥ जर्झरीकृतः परुषत्वक्कृतः ॥ २२—२४ ॥ वसुधामवलोकयन्निति लज्जानुभावः ॥ २५ ॥ दर्शयित्वाचविक्रममिति व्यतिरेकोक्तिः । त्वया किंकृतं किंचिन्तितमित्यर्थः । कृतिरनेकार्थः ॥ २६ ॥ तामेववेलामिति । अत्यन्तसंयोगे द्वितीया । वालिनंजहि काकुत्स्थेतिप्रार्थनवेलायामित्यर्थः । ततः तथोक्तंचेत् ॥ २७ ॥ करुणं सदयं अब्रवीत् ॥ २८॥ येनकारणेन बाणो नविसर्जितः तत्कारणं श्रूयतां श्रुत्वा क्रोधश्चापनीयतामितियोजना ॥ २९ ॥ वेषेण आकारेण । प्रमाणेन औन्नत्येन । गतेन गमनेन ॥ ३० ॥ वर्चसा तेजसा । प्रेक्षितेन वीक्षणेन । वाक्यैः भाषणैः । व्यक्तिं विशेषं । मोहितः संजातमोहः । विशेषानभिज्ञइत्यर्थः ॥ ३१ ॥ नोत्सृजामीत्यादिसार्धश्लोक एकान्वयः । अन्ते इतिकरणं द्रष्टव्यं । द्वयोरपि नौ मया मूलघातो न कृतःस्यादितिहि शरंनोत्सृजामि नोत्सृष्टवानस्मीति योजना । ननु काञ्चनमालारूपो वालिनोविशेषोस्ति । सत्यं । तस्मिन्दिने तन्नधृत्वागतवानितिज्ञेयं । यद्यप्यत्र मत्तत्वभोगचिह्नाश्रान्तत्वपुरनिर्गतत्वादिकं वाल्यसाधारणमस्ति । समीपस्थाहनुमदादयश्चप्रष्टुंशक्याः स्वयंचसू-

---

वालीचतेनेत्यप्यर्थः । भार्यापहर्त्रेत्यभिप्रायः ॥ २१ ॥ **स०** विक्रमंदर्शयित्वा सालभेदनादिनेतिशेषः ॥ **ति०** किंकृतं अनुचितमेवकृतमित्यर्थः ॥ २६ ॥ **शि०** हेसुग्रीव त्वंवालीच अलङ्कारादिनास्वरादिनाचपरस्परंसदृशौस्थः । अतः व्यक्तिं द्वयोर्विभिन्नलोकप्राप्तिं । नोपलक्षये नानुमिनोमि । वालिनिमृते त्वमपितत्स्नेहान्मरिष्यसीतितात्पर्यं । वाक्यैः वचनरचनाविशेषैः । अतएववचसेत्यनेननपौनरुक्त्यं ॥ ३०—३१ ॥ **ति०** मोहितइति । नन्विदमनुचितंयद्भगवतोमोहः । अमोहेमोहइत्यनृतकथनंच । किंचपलायनसमयेऋश्यमूकाभिमुखधावनेनव्यक्तिरस्त्येवेतिचेन्न । वालिनआयुर्दायासमाप्त्यातथाकरणेपिसुग्रीवसंतोषायस्वस्मिन्मानुष्यबुद्ध्यनुत्पादायचात्मनिमोहोत्प्रेक्षयासमाधानादक्षतेः । मोहितइत्यस्यइवेतिशेषः । ईदृशेविषयेएवंविधानृतवचनंन दोषायेत्यप्यनेनध्वनितं । नोत्सृजामि नोदसृजं ॥ **शि०** ततः तस्मात्रूपसादृश्याद्धेतोः । मोहितः मा न ऊहितं तर्कितंयेनसोहं शरंनोत्सृजामि । ननुममापिमरणेतवकाक्षतिरित्यतआह । सादृश्यात् तन्मूलकात्तवापिमरणादित्यर्थः । हेतोःनौ आवयोर्द्वयोः । मूलघातः मूलयोः राज्यप्राप्तिस्त्रीप्राप्तिरूपहेत्वोः विघातोविनाशोनस्यात् इतिविशङ्कितोहमभवमितिशेषः । सदृशभ्रातृमरणेतज्जनित-

[पा०] १ क. ग. महद्वनं. २ क. च. छ. झ. ञ. ट. भयात्ततः. ३ क. ग. ङ. छ. झ. सनिवृत्तोमहाबलः. ञ. ट. संनिवृत्तोमहाबलः. ४ इदमर्धं क. पाठेदृश्यते. ५ क. सचिवैश्च. ६ ग. ङ. च. ञ. तंनहन्मीति. ख. नहिहन्मीति. ७ इदमर्धं क. ङ. च. ज. ञ. पाठेषुदृश्यते. ८ घं. छ. ट. वचसा. ९ छ. झ. ट. द्वयोरिति.

त्वयि वीरे विपन्ने हि अज्ञानाल्लाघवान्मया ॥ मौढ्यं च मम बाल्यं च ख्यापितं [1]स्याद्धरीश्वर ॥३३॥
दत्ताभयवधो नाम पातकं [2]महदुच्यते ॥ ३४ ॥
अहं च लक्ष्मणश्चैव सीता च वरवर्णिनी ॥ त्वदधीना वयं सर्वे वनेऽस्मिञ्शरणं भवान् ॥ ३५ ॥
तस्माद्युध्यस्व भूयस्त्वं [3]मां मा शङ्कीश्च वानर ॥ [4]एतन्मुहूर्ते सुग्रीव पश्य वालिनमाहवे ॥
निरस्तमिषुणैकेन वेष्टमानं महीतले ॥ ३६ ॥
अभिज्ञानं कुरुष्व त्वमात्मनो [5]वानरेश्वर ॥ येन त्वामभिजानीयां द्वन्द्वयुद्धमुपागतम् ॥ ३७ ॥
गजपुष्पीमिमां फुल्लामुत्पाट्य शुभलक्षणाम् ॥ कुरु लक्ष्मण कण्ठेऽस्य सुग्रीवस्य महात्मनः ॥ ३८ ॥
ततो गिरितटे [6]जातामुत्पाट्य [7]कुसुमाकुलाम् ॥ लक्ष्मणो गजपुष्पीं तां तस्य कण्ठे [8]व्यसर्जयत् ॥ ३९॥
स तया शुशुभे [9]श्रीमाँल्लतया कण्ठसक्तया ॥ [10]विपरीत इवाकाशे सूर्यो नक्षत्रमालया ॥ ४० ॥
मालयेव बलाकानां [11]ससन्ध्य इव तोयदः ॥ विभ्राजमानो वपुषा रामवाक्यसमाहितः ॥
जगाम सह रामेण किष्किन्धां [12]वालिपालिताम् ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे द्वादशः सर्गः ॥ १२ ॥

क्ष्मज्ञः " प्रेक्षितज्ञास्तुकोसलाः " इत्युक्तेः । तथापि " त्वया मया च कुन्त्या च" इति न्यायेनसाधारण्यं परिहर्तुं दृष्टहेतून्कांश्चिदुक्तवान्राम इति ज्ञेयं ॥ ३२—३५ ॥ मा मा शङ्कीरिति । मा मां प्रति । मा शङ्कीः शङ्कां मा कुरु । व्यत्ययेनपरस्मैपदं ॥३६॥ अभिज्ञानं चिह्नं ॥ ३७ ॥ गजपुष्पीं नागपुष्पींनाम लतां ॥ ३८ ॥ व्यसर्जयत् अमोचयत् बद्धवान् ॥३९॥ विपरीत इवेत्याद्युपरि विव्रीयते ॥४०॥ ससन्ध्य इवतोयदइति । सुग्रीवस्यहेमपिङ्गलत्वादितिभावः ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने द्वादशः सर्गः ॥ १२ ॥

दुःखेनयदिसुग्रीवमृतिस्स्यात् तर्हितद्राज्यप्राप्तिविघातःस्यात् अतस्तद्व्यापारसाध्यसीताप्राप्तिविरहोभवेदितितात्पर्यं । अतएवमया कृतःप्रक्षेपाभावइतिशेषः ॥ ३१—३२ ॥ **ति०** दत्तमभयमस्मै सदत्ताभयः तस्यवधोमहत्पातकमितिनाम प्रसिद्धं ॥ ३४ ॥ स्वमूलघातमप्याह—**अहमिति** ॥३५॥ **ति०** मामाशङ्कीरित्याबाधायांद्विलं ॥ ३६ ॥ **शि०** अभिज्ञानमिति । येन द्वन्द्वयुद्धमुपागतंत्वां अहमभिजानीयां भ्रातृमरणजनितं महद्दुःखमस्मिन्नभविष्यतीतिनिश्चिनुयां । तत् आत्मनोऽभिज्ञानं । अतिशोकानुत्पत्त्यभिज्ञापकचिह्नंकुरुष्व ॥ ३७ ॥ **ति०** शुभंसम्यग्लक्षयतीतिशुभलक्षणा तां ॥ **शि०** हेलक्ष्मण शुभलक्षणां अतिशोकानुत्पादकत्वेनशुभप्रापिकां गजपुष्पीं । सुग्रीवस्यकण्ठेकुरु । एतेनगजपुष्पीनिबद्धानामतिशोकोनभवतीतिसूचितं ॥ ३८ ॥ **टीका०** मुत्पाट्यशुभदारुजामितिपाठः । शुभदारुजां देवदारुद्रुमाश्रितां । " भद्रदारुद्रुकिलिमंदेवदारुच " इत्यमरः ॥ ३९ ॥ **स०** सतयेत्यर्धानन्तरं "विपरीतइवाकाशेसूर्योनक्षत्रमालयेतिपाठःक्वचिद्दृश्यतेचेत्तस्यायमर्थः । विपरीते रात्रौ । "विपरीतंतुशर्वरी" इत्यभिधानात् । सूर्यः राकामध्यगतश्चन्द्रः । " राकामध्यगतश्चन्द्रःसूर्यइत्यभिधीयते"इत्युक्तेः ॥ नक्षत्रमालयासूर्यइवायमपिशुशुभइतिविपरीतः अभूतोदृष्टान्तइतिवा ॥ ४० ॥ इतिद्वादशःसर्गः ॥ १२ ॥

[पा०] १ क.—ट. स्यात्कपीश्वर. २ झ. ट. महदद्भुतं. ३ ञ. मामां. ख. ग. माशङ्कांगन्तुमर्हसि. क. निश्शङ्कोवानरेश्वर. ४ क.—ङ. एतन्मुहूर्तंतुमया. च.—ट. एतन्मुहूर्तेतु. त. ५ ग. वानरोत्तम. ६ क. जातांसमुत्पाट्यसुपुष्पितां. ७ ङ.—ट. कुसुमायुतां. ८ क. ङ. च. ज. समार्पयत्. ख. न्यवेशयत्. घ. न्यसर्जयत्. ९ ङ. च. ज. ञ. श्रीमान्मालया. १० इदमर्धं झ. ठ. पाठयोर्नदृश्यते. ११ क. सन्ध्याताम्रोवलाहकः, १२ झ. पुनरापसः, छ. पुनरागतः.

त्रयोदशः सर्गः ॥ १३ ॥

रामेणवालिवधायसुग्रीवादिभिःसहकिष्किन्धांप्रतिप्रस्थानम् ॥ १ ॥ तथासुग्रीवंप्रतिमध्येमार्गंदृष्टस्यसप्तजनाश्रमस्यतत्त्वप्रश्नः ॥ २ ॥ सुग्रीवेणतंप्रतितत्रदुश्चरतपश्चर्ययासशरीरंदिवंगतानांसप्तर्षीणांतपःप्रभावेनतदाश्रमस्यसुरादिदुरधिगमत्वादिमहिमानुवर्णनपूर्वकंश्रेयःप्राप्तयेलक्ष्मणेनसहतन्महर्षिनमनचोदना ॥ ३ ॥ रामेणमुनिनमनपूर्वकंसुग्रीवादिभिःसहकिष्किन्धागमनम् ॥ ४ ॥

ऋश्य[1]मूकात्स धर्मात्मा किष्किन्धां लक्ष्मणाग्रजः ॥ जगाम सहसुग्रीवो वालिविक्रमपालिताम् ॥ १ ॥
समुद्यम्य महच्चापं रामः काञ्चन[2]भूषितम् ॥ शरांश्चादित्यसंकाशान्गृहीत्वा रणसाधकान् ॥ २ ॥
अग्रतस्तु ययौ तस्य राघवस्य महात्मनः ॥ सुग्रीवः संहतग्रीवो लक्ष्मणश्च[3] महाबलः ॥ ३ ॥
पृष्ठतो हनुमान्वीरो नलो नीलश्च वानरः[4] ॥ तारश्चैव महातेजा हरियूथपयूथपः ॥ ४ ॥
ते वीक्षमाणा वृक्षांश्च पुष्पभारावलम्बिनः ॥ प्रसन्नाम्बुवहाश्चैव सरितः सागरंगमाः ॥ ५ ॥
कन्दराणि च शैलांश्च निर्दराणि गुहास्तथा ॥ शिखराणि च मुख्यानि दरीश्च प्रियदर्शनाः ॥ ६ ॥
वैडूर्यविमलैः[5] पर्णैः पद्मैश्चाकोशकुड्मलैः ॥ शोभितान्सजलान्मार्गे तटाकांश्च[6] व्यलोकयन् ॥ ७ ॥
कारण्डैः सारसैर्हंसैर्वञ्जुलैर्जलकुक्कुटैः ॥ चक्रवाकैस्तथा चान्यैः शकुनै[7]रुपनादितान् ॥ ८ ॥
मृदुशष्पाङ्कुराहारा[8]न्निर्भयान्वनगोचरान् ॥ चरतः सर्वतो[9][10]ऽपश्यन्स्थलीषु हरिणा[11]न्स्थितान् ॥ ९ ॥
तटाकवैरिणश्चापि शुक्लदन्तविभूषितान् ॥ घोरानेकचरान्वन्यान्द्विरदान्कूलघातिनः ॥ १० ॥
मत्तान्गिरितटोत्कृष्टा[12]न्पर्वतानिव जङ्गमान् ॥ वारणा[13]न्वारिदप्रख्यान्महीरेणु[14]समुक्षितान् ॥ ११ ॥
वने वनचरांश्चान्यान्खेचरांश्च विहङ्गमान् ॥ पश्यन्तस्त्वरिता जग्मुः सुग्रीववशवर्तिनः ॥ १२ ॥
तेषां तु गच्छतां तत्र त्वरितं रघुनन्दनः ॥ द्रुमषण्डं वनं दृष्ट्वा रामः सुग्रीवमब्रवीत् ॥ १३ ॥

अथ पुनः कीष्किन्धाप्रवेशस्त्रयोदशे—ऋश्यमूकादित्यादि ॥ १—२ ॥ संहतग्रीवः निबिडकण्ठ इत्यर्थः । इदं स्वरूपकीर्तनं गजपुष्पीबन्धनेन वा ॥ ३—४ ॥ अथ कार्यसिद्धिसूचकपदार्थानुभवविशेषं दर्शयति—ते वीक्षमाणा इत्यादिना ॥ ५ ॥ कन्दराणि गृहाकारगुहाविशेषान् । निर्दराणि स्फुटितशैलरन्ध्रविशेषान् । गुहाः देवखातबिलानि । दरीः गुहाविशेषान् ॥ ६ ॥ आकोशकुड्मलैः ईषद्विकसितमुकुलैः ॥ ७ ॥ कारण्डैः । "कारण्डको महापक्षी" इति वैजयन्ती । सारसैः सरोनिवासैःशकुनैरुपनादितान् तटाकान् व्यलोकयन्निति पूर्वेणान्वयः॥८॥ चरतः स्थितांश्चापश्यन् ॥९॥ तटाकवैरिणः कलुषीकरणात् । एकचरान् एकाकिनः । द्विरदाः द्विदन्ताइति चतुर्दन्तव्यावृत्तिः । गिरितटोत्कृष्टान् उल्लिखितगिरितटान् ॥ १०—१२ ॥ द्रुमषण्डंवृक्षषण्डमयमिति

स० आदित्यसंकाशान् आदित्यं प्रागादित्यंसुग्रीवं सम्यक्प्रकाशयन्तीतितथातान् ॥ २ ॥ **ति०** हरियूथपानामपियूथंपाति तादृशः ॥ ४ ॥ **रामानु०** "कन्दराणिगुहाश्चैवशैलांस्तानिवनानिच" इतिबहुकोशेषुपाठः । कन्दराणि मन्दिराकाराकारितशिलाविवरविशेषान् । गुहाः देवखातबिलानि । दरीः स्फुटितशैलरंध्रविशेषान् ॥ ६ ॥ अकोशकुड्मलैः अकोशैः विकसितैः । कुड्मलैः मुकुलैः ॥ ७ ॥ **टी०** कारण्डः कारण्डवः नामैकदेशेनामग्रहणं । एतैरुपलक्षितांस्तटाकानपश्यन्नित्यन्वयः ॥ ८ ॥ **शि०** पश्यन् पश्यन्तः ॥ ९ ॥ **रामानु०** द्विरदवारणशब्दयोस्तत्तत्स्थलावस्थितव्यक्तिभेदवाचकत्वेननपौनरुक्त्यं । गिरितटा-

[पा०] १ घ. ऋश्यमूकात्तु. २ क. कनकभूषितं. ३ छ. झ. ट. लक्ष्मणस्य. ४ छ. ज. झ. ट. वीर्यवान्. ५ छ.—ट. विमलैस्तोयैः. ६ क. ग. ङ. छ.—ट. श्चावलोकयन्. ७ क. ख. ग. ङ. छ.—ट. शकुनैःप्रतिनादितान्. ८ क. ख. ग. हारान्मृगपोतांश्चनिर्भयान्. ९ ङ. छ. ञ. ट. न्वनचारिणः. १० च. ज. पर्वतेपश्यन्. ङ. ञ. ट. सर्वतःपश्यन्. ११ ग. हरिणान्मृगान. क. हरिणांस्तथा. १२ ङ. छ. झ. ट. तटोद्घुष्टान्. ग. तटोत्कृष्टाञ्जङ्गमानिवपर्वतान. १३ छ. झ. ट. वानरान्द्विरदप्रख्यान्. १४ ग. रेणुसुभूषितान्.

एष मेघ इवाकाशे वृक्षषण्डः प्रकाशते ॥ मेघसंघातविपुलः पर्यन्तकदलीवृतः ॥ १४ ॥
किमेतज्ज्ञातुमिच्छामि सखे कौतूहलं हि मे ॥ कौतूहलापनयनं कर्तुमिच्छाम्यहं त्वया ॥ १५ ॥
तस्य तद्वचनं श्रुत्वा राघवस्य महात्मनः ॥ गच्छन्नेवाचचक्षेऽथ सुग्रीवस्तन्महद्वनम् ॥ १६ ॥
एतद्राघव विस्तीर्णमाश्रमं श्रमनाशनम् ॥ उद्यानवनसंपन्नं स्वादु मूलफलोदकम् ॥ १७ ॥
अत्र सप्तजना नाम मुनयः संशितव्रताः ॥ सप्तैवासन्नधःशीर्षा नियतं जलशायिनः ॥ १८ ॥
सप्तरात्रकृताहारा वायुना वनवासिनः ॥ दिवं वर्षशतैर्याताः सप्तभिः सकलेवराः ॥ १९ ॥
तेषामेवंप्रभावानां द्रुमप्राकारसंवृतम् ॥ आश्रमं सुदुराधर्षमपि सेन्द्रैः सुरासुरैः ॥ २० ॥
पक्षिणो वर्जयन्त्येतत्तथाऽन्ये वनचारिणः ॥ विशन्ति मोहाद्येऽत्र निवर्तन्ते न ते पुनः ॥ २१ ॥
विभूषणरवास्तत्र श्रूयन्ते सकलाक्षराः ॥ तूर्यगीतस्वनाश्चात्र गन्धो दिव्यश्च राघव ॥ २२ ॥
त्रेताग्नयोपि दीप्यन्ते धूमो ह्येष प्रकाशते ॥ वेष्टयन्निव वृक्षाग्रान्कपोताङ्गारुणो घनः ॥ २३ ॥
एते वृक्षाः प्रकाशन्ते धूमसंसक्तमस्तकाः ॥ मेघजालप्रतिच्छन्ना वैडूर्यगिरयो यथा ॥ २४ ॥
कुरु प्रणामं धर्मात्मंस्तान्समुद्दिश्य राघव ॥ लक्ष्मणेन सह भ्रात्रा प्रयतः संयताञ्जलिः ॥ २५ ॥
प्रणमन्ति हि ये तेषां मुनीनां भावितात्मनाम् ॥ न तेषामशुभं किंचिच्छरीरे राम दृश्यते ॥२६॥
ततो रामः सह भ्रात्रा लक्ष्मणेन कृताञ्जलिः ॥ समुद्दिश्य महात्मानस्तानृषीनभ्यवादयत् ॥ २७ ॥
अभिवाद्य तु धर्मात्मा रामो भ्राता च लक्ष्मणः ॥ सुग्रीवो वानराश्चैव जग्मुः संहृष्टमानसाः ॥२८॥

लतागुल्मव्यावृत्तिः॥१३॥ मेघ इवेति नीलवर्णे उपमा ॥ १४—१८ ॥ सप्तरात्रकृताहाराः वायुना सप्तरात्रस्य एकवारंकृताहाराः । सप्तभिर्वर्षशतैरित्यन्वयः ॥ १९ ॥ ये मोहादत्राश्रमे विशन्ति न ते निवर्तन्ते किंतु तत्रैव नश्यन्तीत्यर्थः ॥ २०—२१ ॥ दिवं गताःशरीरान्तरेण पुनरत्रागत्याप्सरोभिः क्रीडन्तीत्याशयेनाह—विभूषणेत्यादिना ॥ भूषणरवेण नृत्तमुपलक्ष्यते । सकलाक्षराइति गीतस्वनविशेषणं । तूर्यशब्दोत्र गीतभिन्नवाद्यपरः ॥ २२ ॥ त्रेताग्निदीपने लिङ्गमाह—धूमो हीति । घनः निबिडः ॥ २३—२४ ॥ समुद्दिश्य किंचित्फलमुद्दिश्य । तेषां प्रणामं कुरु ॥२५॥ शरीरे अशुभं व्याध्यादिकं ॥२६॥ महात्मानः महात्मनः॥२७॥ अभिवाद्येति । अनेन सर्वेषामभिवादनमनूद्यते । अत्राभिवादनं नमस्कारः । तेषां परोक्षत्वात् । अनेन सज्जनप्रणामो विजयावह इत्ययमर्थः सूचितः । तदिदं द्योत्यते उप-

नुत्कर्षन्तीतिगिरितटोत्कृष्टाः तान् । कर्तरिक्तः ॥ **स०** गिरितटोत्कृष्टान् गिरितटापेक्षयाउत्कृष्टान् ॥ ११ ॥ **ती०** गच्छन्नेवेति शतृप्रत्ययेन कार्यत्वरासूचिता ॥ १६ ॥ **शि०** सप्तजननाम्निनिमित्तंबोधयन्नाह—**सप्तेति** । सप्तरात्रेव्यतीतेसतीतिशेषः । वायुनाकृताहाराः । अचलवासिनः निश्चलनिवसनशीलाः ॥ १९ ॥ **ति०** एतदाश्रमं । अर्धर्चादिराश्रमशब्दः । **स०** नपुंसकत्वमार्षं । “संबन्धमनुवर्तिष्यते”इतिमहाभाष्यानुसारेण “घञजपाः—”इत्यस्यप्रायिकत्वाद्वानदोषः ॥ २० ॥ **शि०** वर्जयन्ति अतितेजोदर्शनजनितभियानगच्छन्तीत्यर्थः ॥ २१ ॥ **ति०** सकलाक्षराः कलाक्षराभिर्मधुराक्षराभिर्वाग्भिःसहिताः । भूषणरवाः अप्सरसामितिशेषः ॥२२॥ **ति०** तेषामुद्दिश्य तानुद्दिश्येतियावत् ॥२५॥ **शि०** हेराम भावितात्मनां परिशीलितपरमात्मनां । ऋषीणांयेप्रणमन्ति तेषांशरीरे अशुभं शुभविरोधि शोकादिकमित्यर्थः । नविद्यते नभवति ऋषीणामित्यत्रसंबन्धसामान्यविवक्षयाषष्ठी ॥ २६ ॥ **ति०** वानराः हनुमदादयः । एतत्कथाप्रश्नादिकं वाल्यायुस्समाप्तिकाललाभाय ॥ २८ ॥

[**पा०**] १ क. ङ.—ट मम. ख. ग. महत्. २ क. ग. स्तन्महावनं. ङ. च. ज. ञ. स्तद्वनंमहत्. ३ क. ङ. नियताः. ४ छ. झ. ट. वायुनाचलवासिनः. ५ क. छ. झ. ट. तेषामेतत्प्रभावेण. ६ च. झ. मोहाद्येप्यत्र. ७ झ. ट. ननिवर्तन्ते. ८ क. ख. घ. ङ. च. ज.—ट. रवाश्चात्र. ९ ङ. ज.—ट. स्वनाश्चापि. घ. स्वराश्चात्र. १० क. ङ. छ.—ट. ह्येषप्रदृश्यते. च. ह्यत्रप्रदृश्यते. ख. ह्ययप्रकाशते. ११ क. धूमसंरक्तसच्छदाः. १२ क.—ङ. छ.—ट. तेषामुद्दिश्य. १३ क.—ङ. ज. झ. ट. तेषामृषीणां. १४ ख. ङ. ज. ट. विद्यते. १५ ङ. छ.—ट. अभिवाद्यच.

ते गत्वा दूरमध्वानं तस्मात्सप्तजनाश्रमात् ॥ ददृशुस्तां दुराधर्षां किष्किन्धां वालिपालिताम् ॥२९॥
ततस्तु रामानुजरामवानराः प्रगृह्य शस्त्राण्युदिताग्र्यतेजसः ॥
पुरीं सुरेशात्मजवीर्यपालितां वधाय शत्रोः पुनरागताः सह ॥ ३० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

चतुर्दशः सर्गः ॥ १४ ॥

रामादिभिःकिष्किन्धासमीपवनेवृक्षैरात्माच्छादनेनावस्थानम् ॥ १ ॥ सुग्रीवेणरामंप्रति वालिवधप्रतिज्ञायाःसफलीकरणप्रार्थना ॥ २ ॥ रामेणसुग्रीवंप्रतिप्रत्ययोत्पादनपूर्वकंवालिवधप्रतिज्ञानेनतदाह्वानचोदना ॥ ३ ॥ सुग्रीवेणसगर्जनंयुद्धाय-वाल्याह्वानम् ॥ ४ ॥

सर्वे ते त्वरितं गत्वा किष्किन्धां वालिपालिताम् ॥ वृक्षैरात्मानमावृत्य व्यतिष्ठन्गहने वने ॥ १ ॥
विचार्य सर्वतो दृष्टिं कानने काननप्रियः ॥ सुग्रीवो विपुलग्रीवः क्रोधमाहारयद्भृशम् ॥ २ ॥
ततः स निनदं घोरं कृत्वा युद्धाय चाह्वयत् ॥ परिवारैः परिवृतो नादैर्भिन्दन्निवाम्बरम् ॥
गर्जन्निव महामेघो वायुवेगपुरस्सरः ॥ ३ ॥
अथ बालार्कसदृशो दृप्तसिंहगतिस्तदा ॥ दृष्ट्वा रामं क्रियादक्षं सुग्रीवो वाक्यमब्रवीत् ॥ ४ ॥
हरिवागुरया व्याप्तां तप्तकाञ्चनतोरणाम् ॥ प्राप्ताः स्म ध्वजयन्त्राढ्यां किष्किन्धां वालिनः पुरीम् ॥५॥
प्रतिज्ञा या त्वया वीर कृता वालिवधे पुरा ॥ सफलां तां कुरु क्षिप्रं लतां काल इवागतः ॥ ६ ॥
एवमुक्तस्तु धर्मात्मा सुग्रीवेण स राघवः ॥ तमथोवाच सुग्रीवं वचनं शत्रुसूदनः ॥ ७ ॥
कृताभिज्ञानचिह्नस्त्वमनया गजसाह्वया ॥ लक्ष्मणेन समुत्पाट्य यैषा कण्ठे कृता तव ॥ ८ ॥

रितनश्लोके उदिताग्र्यतेजसइति । प्रणामेनेतिभावः ॥ २८—२९ ॥ सह युगपत् ॥ ३० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रयोदशः सर्गः ॥ १३ ॥

अथ वाल्याह्वानभीतं सुग्रीवं निश्वासयति रामश्चतुर्दशे—सर्व इत्यादि ॥ १—२ ॥ वायुवेगपुरःसरः वायुवेगान्मेघे अधिको ध्वनिरिति प्रसिद्धिः । यतः वायुवेगपुरस्सरः अतएव गर्जन्महामेघइव स्थितः । परिवारैः परिवृतः सः नादैरम्बरं भिन्दन्निव घोरं निनदं कृत्वा युद्धायाह्वयत् । वालिनमितिशेषः ॥ ३—४ ॥ हरिवागुरया हरय एव वागुरा मृगग्रहणपाशः तया व्याप्तां इतरदुष्प्रवेशामित्यर्थः । यद्वा हरिवागुरया हरिगृहैः । जात्येकवचनं । “ वागुरा मृगशालिका ” इति वैजयन्ती ॥ ५ ॥ आगतः कालः फलकालः ॥ ६—७ ॥ अभिज्ञापकंचिह्नं अभिज्ञानचिह्नं । कृतमभिज्ञानचिह्नं यस्य स तथा । गजपुष्प्यामेव गजसाशब्दः । यद्वा गजेन समा आह्वा आख्या यस्याः सा गजसाह्वा तया शोभस इति । अत्राहुः—विपरीते रात्रौ । सूर्यः पूर्णचन्द्रः । “ परीतं तु दिवा प्रोक्तं विपरीतं तु शर्वरी ” “ राकामध्यगतश्चन्द्रः सूर्य इत्यभिधीयते ” इति वचनात् । यद्वा नक्षत्रमालया विपरीतः विशेषेण

ति० शस्त्राणि वानराणांशस्त्रं शिलादि ॥ ३० ॥ इतित्रयोदशःसर्गः ॥ १३ ॥
ति० बालार्कसदृशः वर्णेनप्रतापेनच ॥ ४ ॥ ति० ध्वजैर्यन्त्रैः प्राकारयुद्धापेक्षितैः । आढ्यां ॥ ५ ॥
[पा०] १ क. ङ. छ.—ट. ण्युदितोग्रतेजसः. २ ज. सज्जाः. ३ छ. झ. ञ. ट. रागतास्त्विह. ४ क. ख. ग. ङ.—ट. वालिनःपुरीं. ५ क.—ट. विसार्य. ६ ज. झ. ट. ततस्तु. ७ ख. ङ.—ट. स्ततः. ८ क. ग. ङ. च. ज.—ट. भूषणां. ९ ग. वालिपालितां. १० ख. याप्रतिज्ञा. छ. झ. ञ. ट. प्रतिज्ञायाकृतावीरत्वया. ११ छ. झ. ट. कुरुतां. १२ घ. सुग्रीवेणहि. १३ क. ग. तमेवोवाच. छ. झ. ट. तमेवोवाचवचनंसुग्रीवं. ङ. च. ज. ञ. तदेवोवाचवचनंसुग्रीवं. १४ घ. छ. ज. झ. ट. एषा.

शोभसे ह्यधिकं वीर लतया कण्ठसक्तया ॥ विपरीत इवाकाशे सूर्यो नक्षत्रमालया ॥ ९ ॥
अद्य वालिसमुत्थं ते भयं वैरं च वानर ॥ एकेनाहं प्रमोक्ष्यामि बाणमोक्षेण संयुगे ॥ १० ॥
मम दर्शय सुग्रीव वैरिणं भ्रातृरूपिणम् ॥ [1]वाली विनिहतो यावद्वने पांसुषु वेष्टते ॥ ११ ॥
यदि दृष्टिपथं प्राप्तो जीवन्स विनिवर्तते ॥ ततो दोषेण माऽऽगच्छेत्सद्यो गर्हेच मा भवान् ॥१२॥
प्रत्यक्षं सप्त ते साला मया बाणेन दारिताः ॥ [2]तेनावेहि बलेनाद्य वालिनं निहतं [3]मया ॥ १३ ॥
अनृतं नोक्तपूर्वं मे वीर [4]कृच्छ्रेऽपि तिष्ठता ॥ धर्मलोभपरीतेन न च वक्ष्ये कथंचन ॥ १४ ॥
सफलां च करिष्यामि प्रतिज्ञां जहि संभ्रमम् ॥ [5]प्रसूतं कलमं क्षेत्रे वर्षेणेव शतक्रतुः ॥ १५ ॥
तदाह्वाननिमि[6]त्तं त्वं वालिनो हेममालिनः ॥ सुग्रीव कुरु तं शब्दं निष्पतेद्येन वानरः ॥ १६ ॥
[7]जितकाशी बलश्लाघी त्वया चाधर्षितः [8]पुरा ॥ निष्पतिष्यत्यसङ्गेन वाली स प्रियसंयुगः ॥ १७ ॥

परिवृतः । सूर्यइव चन्द्रइव । अन्यशब्देनान्यस्याभिधानं कथमिति चेत् । " नवो नवो भवति " इति श्रुतौ अह्नां केतुः सूर्यः चन्द्राप्यायकत्वाचन्द्रमाइत्युच्यते । तद्वचन्द्रोपिसूर्यकिरणानुप्रवेशायत्तप्रकाशविशेषवत्त्वात्सूर्यशब्देनाभिधीयतइति । यद्वा विशेषेणपरीतो विपरीतः नक्षत्रावृतः । सूर्य इवेत्यभूतोपमा । विपरीतइत्यनेन तात्कालिकतेजोवत्त्वमुच्यते । यद्वा विपरीते विपरीतकाले । सूर्यो नक्षत्रमालयेवानया लतयाशोभसे । उत्पातकालेहि मध्याह्ने नक्षत्राणिदृश्यन्तइत्युच्यते ज्योतिश्शास्त्रे । " रात्राविन्द्रधनुर्दर्शे दिवानक्षत्रदर्शने । तद्राष्ट्रनाथनाशःस्यादितिगर्गस्यभाषितम् " इति । अतः भाविवालिवधरूपफलानुसारेण तेजसा ज्वलन्सुग्रीवः शुभ्रपुष्पावलीशोभमानगजपुष्पीमालया उत्पातकाले नक्षत्रमालया सूर्यइव बभावित्यस्मदाचार्योक्तम् ॥८–९॥

प्रमोक्ष्यामि प्रमोचयिष्यामि । अनिट्त्वमार्षं ॥१०॥ यावद्वेष्टते वेष्टिष्यते । " यावत्पुरानिपातयोर्लट् " इति लट् ॥ ११ ॥ सवाली दृष्टिपथं प्राप्तः सन् पुनर्जीवन्यदि विनिवर्तते । ततः तदा । दोषेणोपलक्षितं । मा मां । आगच्छेत् । सद्यो मा मां । भवान् गर्हेच गर्हेतच । यदि दृष्टमात्रेण तं नहन्यां तदामत्समीपमागच्छ मां गर्हस्वचेत्यर्थः ॥ १२–१३ ॥ मे मया । "तेमयावेकवचनस्य" इत्येतत्तृतीयायामप्यार्षे दृश्यते । अतस्तद्विशेषणेपि तृतीयाप्रयोगः । धर्मलोभपरीतेन । लोभोलब्धस्य त्यागासहिष्णुता । धर्महान्यसहिष्णुनेत्यर्थः ॥ १४ ॥ संभ्रमं संशयकृतचाञ्चल्यं । पराक्रमेण प्रतिज्ञासफलत्वकरणे दृष्टान्तमाह—प्रसूतमिति ॥ कलमं सस्यं ॥ १५ ॥ तत् तस्मात् ॥ १६ ॥ जितेन जयेन काशते प्रकाशत इति जितकाशी । ताच्छील्ये णिनिः । असङ्गेन अविलम्बेन ॥ १७ ॥

रामानु० चन्द्रसूर्यकिरणानुप्रवेशप्रकाशवत्त्वंविष्णुपुराणेप्रसिद्धं । " क्षीणंसोमंसुरैःपीतमाप्याययतिदीप्तिमान् । मैत्रेयैककलं सन्तंरश्मिनैकेनभास्करः ॥" इति **ती०** सुवतिप्रेरयतीतिसूर्यइतिव्युत्पत्त्या नक्षत्रमण्डलपरिवृतत्वविशेषणेनचचन्द्रएवसूर्यशब्देनोच्यते । यद्वा अभूतोपमेयं । आकाशेनक्षत्रमालयाविपरीतःविशेषेणपरिवृतःसूर्यइवत्वंशोभसे । यद्वा विपरीतइतिसप्तम्यन्तं । विपरीते रात्रौ । सूर्यः पौर्णमासीचन्द्रः । "परीतंतुदिवाप्रोक्तंविपरीतंतुशर्वरी । पौर्णमासीगतश्चन्द्रःसूर्यइत्यभिधीयते" इतिवचनात् । रात्रावाकाशेपूर्णचन्द्रोनक्षत्रमालयायथाशोभते तथाकण्ठसक्तमालयात्वंशोभसइति । गजसाह्वया गजेनसमाआह्वाआख्यायस्याास्साकुन्दलतेतियावत् । तया ॥ **ति०** नक्षत्रमालया आकाशेविपरीतःविशेषेणवेष्टितःसूर्यइव । कविविकल्पितोपमाऽलीकोपमा । तेनतादृशस्सूर्योयदिभवेत्तदा तरुणार्कवर्णस्यकण्ठसक्तशुक्लपुष्पमालस्योपमास्यादितित्यशयोक्तिरत्रव्यङ्ग्या ॥ ९ ॥ **स०** एकेनबाणमोक्षेणेत्यनेन तस्यैवबाणस्यद्वितीयवारंमोचनमपिनास्तीतिसूचितं । प्रमोक्ष्यामि अन्तर्णीतण्यर्थः ॥ १० ॥ **स०** दृशेर्ण्यन्तत्वदशायां द्विकर्मकत्वेनमामितिवक्तव्येममेत्युक्तिः स्वतस्सर्वज्ञत्वाद्रामस्यदर्शयेत्युक्तिरौपचारिकीतिदर्शयितुं । वालीविनिहतस्सन्यावद्वनेवेष्टते तावन्ममदर्शय । यावद्वनेसमग्रवनइतिवा ॥ ११ ॥ **शि०** कृच्छ्रे अत्याज्यपितृगुर्वादिपरस्परविरुद्धोक्तिसंशयजनितकष्टे ॥ १४ ॥ **ति०** जितकाशी जितश्वासोजितभयोवा ॥ **ति०** ननुकृतेप्याह्वानेरुच्यादिसक्तोननिष्पतिष्यतितत्राह—**निपतिष्यतीति** । अस-

[पा०] १ च. ज. क्षिप्रंविनिहतोयावच्चेष्टतेपांसुलुण्ठितः. २ क. ख. ग. छ. झ. ञ. ट. ततोवेत्सि. ३ छ.—ञ. रणे. ४ ख. कृच्छ्रेमहति. ५ ख. प्रभूतकलमंक्षेत्रं. छ. झ. ञ. ट. प्रसूतंकलमक्षेत्रं. ६ छ. झ. ट. निमित्तंच. ७ ग. च.—ट. जयश्लाघी. ८ छ. झ. ञ. ट. पुरात्.

रिपूणां धर्षणं शूरा मर्षयन्ति न संयुगे ॥ जानन्तस्तु स्वकं वीर्यं स्त्रीसमक्षं विशेषतः ॥ १८ ॥
स तु रामवचः श्रुत्वा सुग्रीवो हेमपिङ्गलः ॥ ननर्द क्रूरनादेन विनिर्भिन्दन्निवाम्बरम् ॥ १९ ॥
तस्य शब्देन वित्रस्ता गावो यान्ति हतप्रभाः ॥ राजदोषपरामृष्टाः कुलस्त्रिय इवाकुलाः ॥ २० ॥
द्रवन्ति च मृगाः शीघ्रं भग्ना इव रणे हयाः ॥ पतन्ति च खगा भूमौ क्षीणपुण्या इव ग्रहाः ॥२१॥
ततः स जीमूतगणप्रणादो नादं व्यमुञ्चत्त्वरया प्रतीतः ॥
सूर्यात्मजः शौर्यविवृद्धतेजाः सरित्पतिर्वाऽनिलचञ्चलोर्मिः ॥ २२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

पञ्चदशः सर्गः ॥ १५ ॥

सुग्रीवगर्जनश्रवणजरोषेणयुद्धायनिर्गच्छन्तंवालिनंप्रति तारयासपरिष्वङ्गंयुक्त्युपन्यासेन अङ्गदवचनानुवादेनरामसाहाय्योक्त्याचसुग्रीवस्यबलीयस्त्वोक्त्या श्रीरामगुणानुवर्णनेनतच्चरणशरणीकरणपूर्वकंसुग्रीवेणसख्यकरणप्रार्थना ॥ १ ॥

अथ तस्य निनादं तु सुग्रीवस्य महात्मनः ॥ शुश्रावान्तःपुरगतो वाली भ्रातुरमर्षणः ॥ १ ॥
श्रुत्वा तु तस्य निनदं सर्वभूतप्रकम्पनम् ॥ मदश्चैकपदे नष्टः क्रोधश्चापतितो महान् ॥ २ ॥
स तु रोषपरीताङ्गो वाली संध्यातपप्रभः ॥ उपरक्त इवादित्यः सद्यो निष्प्रभतां गतः ॥ ३ ॥

स्त्रीसमक्षमित्यनेन तदानीं सायंकाल इत्यवगम्यते । " प्रातर्मूत्रपुरीषाभ्यां मध्याह्ने क्षुत्पिपासया । सायं कामेनपीड्यन्ते जन्तवो निशि निद्रया " इति वचनात् ॥ १८—१९ ॥ हतप्रभाः भीतिविकृतमुखकान्तयः । गावइत्यनेन गवांपुरप्रवेशकालसूचनात्तत्कालस्य सायंतनत्वंगम्यते । राजदोषपरामृष्टाः राजदोषेण अराजकत्वरूपदोषेण परामृष्टाः परैः परपुरुषैः आमृष्टाः केशेषु गृहीताः । कुलस्त्रियइव आकुलाः गन्तव्यप्रदेशाभावेनाकुलाः ॥ २०—२१ ॥ प्रतीतः नादमोचने प्रसिद्धः । सरित्पतिर्वा समुद्रइव ॥२२॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चतुर्दशः सर्गः ॥ १४ ॥

अथ ताराबुद्धिः पञ्चदशे—अथ तस्येत्यादि ॥ महात्मनः महाधैर्यस्य ॥ १ ॥ श्रुत्वेति स्थितस्येति शेषः । एकपदे एकस्मिन्नेव स्थाने । सद्यइत्यर्थः । आपतितः उत्पन्न इत्यर्थः ॥ २ ॥ रोषेण परीताङ्गः विपरीताङ्गः विकृतवेष इत्यर्थः । अतएव सन्ध्यातपप्रभः कोपपावकयावकिताननइतिप्रयोगात्कोपरक्तदेहत्वात्सन्ध्यातपप्रभत्वं । किंच उपरक्तः समीपरक्तः । कृतपरिवेष इत्यर्थः । परिवेषयुक्तोहिसूर्योनिष्प्रभोदृश्यते । उप-

---

ङ्गेन स्त्र्यादिसंगपरित्यागेनेत्यर्थः । यतः प्रियसंयुगः । नमर्षयन्तीत्यस्यशूराइतिशेषः ॥ **स०** जितेन जयेन श्लाघीस्तुत्यः । **शि०** जयश्लाघीस्वविजयविषयकश्लाघावान् ॥ १७ ॥ **वि०** विशेषतः नमर्षयन्तीत्यनुषङ्गः ॥ १८ ॥ **ती०** राजदोषपरामृष्टाः राजदोषव्याप्ताः । राजाज्ञाभावेबलाधिकजारभीत्यांकुलस्त्रियोयथानिष्प्रभायान्ति तथागावोयान्तीत्यर्थः ॥ **ति०** गावः महान्तोवृषभाः । हतप्रभाः हतशक्तयः ॥ २० ॥ **स०** ग्रहाः देवाः ॥ २१ ॥ **ति०** जीमूतवत्कृतप्रणादः । प्रतीतः रामेइतिशेषः । शौर्यैपराक्रमकरणेविवृद्धंतेजोयस्य ॥ २२ ॥ इतिचतुर्दशःसर्गः ॥ १४ ॥

टीका० एकपदे तत्काले । " एकंपदंस्यात्तत्कालेपदव्यामेकपद्यपि " इतिविश्वः ॥ **शि०** तस्यनिनादंश्रुत्वाविद्यमानस्यवालिनः एकपदे तस्मिन्क्षणे । मदः मत्तस्सर्वेबिभ्यतीतिगर्वः । नष्टः । क्रोध आपादितः संप्राप्तः ॥ २ ॥ **ति०** कनकप्रभस्यक्रो-

[पा०] १ ङ.—ट. धर्षितंश्रुत्वा. क. ग. धर्षणंवीरा. २ घ. छ. धैर्यं. ३ ट. तेन. झ. तत्र. ४ ङ.—ज. ञ. गतप्रभाः. ५ घ. पतगाभूमौ. ६ ङ.—ज. ञ. ग्रहाइव. ७ ङ.—ट. कृतप्रणादो. ८ ग. ङ. च. ज. ञ. विमुञ्चंस्त्वरया. ९ ख.—ट. निनादंतं. १० ख. घ. ङ. छ. झ. ञ. ट. श्चापादितो. ११ छ. झ. ट. ततो. १२ झ. ट. सकनकप्रभः. छ. कनकसप्रभः.

वाली दंष्ट्राकरालस्तु क्रोधाद्दीप्ता[1]ग्निसन्निभः ॥ भात्युत्पतितपद्माभः समृणाल इव ह्रदः ॥ ४ ॥
शब्दं दुर्मर्षणं श्रुत्वा निष्पपात ततो हरिः ॥ वेगेन [2]चरणन्यासैर्दारयन्निव मेदिनीम् ॥ ५ ॥
तं तु तारा परिष्वज्य स्नेहाद्दर्शितसौहृदा ॥ उवाच [3]त्रस्तसंभ्रान्ता हितोदर्कमिदं वचः ॥ ६ ॥
साधु क्रोधमिमं वीर नदीवेगमिवागतम् ॥ शयनादुत्थितः काल्यं त्यज भुक्तामिव स्रजम् ॥ ७ ॥
काल्यमेतेन संग्रामं करिष्यसि च वानर ॥ वीर ते शत्रुबाहुल्यं फल्गुता वा न विद्यते ॥ ८ ॥
सहसा तव निष्क्रामो मम तावन्न रोचते ॥ [4]श्रूयतां चाभिधास्यामि यन्निमित्तं नि[5]वार्यसे ॥ ९ ॥
पूर्वमापतितः क्रोधात्स त्वामाह्वयते युधि ॥ निष्पत्य च नि[6]रस्तस्ते हन्यमानो दिशो गतः ॥ १० ॥
त्वया तस्य निरस्तस्य पीडितस्य विशेषतः ॥ इहैत्य पुनराह्वानं शङ्कां जनयतीव मे ॥ ११ ॥
दर्पश्च व्यवसायश्च यादृशस्तस्य नर्दतः ॥ नि[7]नादश्चापि संरम्भो नैतदल्पं हि कारणम् ॥ १२ ॥
नासहायमहं मन्ये सुग्रीवं तमिहागतम् ॥ अवष्टब्धसहायश्च [8]यमाश्रित्यैष गर्जति ॥ १३ ॥
प्रकृत्या निपुणश्चैव बुद्धिमांश्चैव वानरः ॥ [9]अपरीक्षितवीर्येण सुग्रीवः [10]सह नैष्यति ॥ १४ ॥

रक्तो राहुग्रस्तो वा ॥ ३ ॥ दंष्ट्राकरालः दंष्ट्रादन्तुरः । "करालौदन्तुरेतुङ्गे" इत्यमरः । क्रोधाद्धेतोः दीप्ताग्निसन्निभः अतएवोत्पतितपद्मः विकसितरक्तोत्पलः । उत्पतितपद्माभइतिपाठे उत्पतिता स्वोपरिप्रसृता पद्मानामाभा यस्मिन्स इत्यर्थः । समृणालो ह्रद इव भाति बभौ ॥ ४–५ ॥ परिष्वज्य स्ववचनश्रवणाभिमुख्यायालिङ्ग्य । स्नेहात् परिष्वज्येत्यन्वयः । दर्शितसौहृदा यथाभवति तथोवाचेत्यर्थः । संभ्रान्ता त्वरिता । "संभ्रमस्त्वरा" इत्यमरः । हितोदर्कं हितफलकं ॥ ६ ॥ काल्यं प्रातः शयनादुत्थितः पुरुषः भुक्तां स्रजमिव । नदीवेगमिव आगतं अप्रतिबद्धं क्रोधं । साधु निःशेषं त्यज ॥ ७ ॥ काल्यं प्रातःकाले । एतेन युद्धं करिष्यसि । तेन फल्गुता लाघवं वा शत्रुबाहुल्यं शत्रुगौरवं वा न विद्यते । अतः किमर्थमद्यैवनिर्गच्छसीत्यर्थः ॥ ८ ॥ सहसानिर्गमे कोदोष इत्यत्राह—सहसेति ॥ ९ ॥ प्रथमं युक्तिमाह—पूर्वमित्यादिश्लोकद्वयमेकान्वयं ॥ पूर्वमापतितः ते त्वया । क्रोधान्निष्पत्य योयुधि निरस्तः । हन्यमानो दिशो गतश्च । सत्वामाह्वयते । पुनरेत्य स्थितस्य तस्यैतदाह्वानं । मेशङ्कां सहायसहितत्वशङ्कांजनयतीतियोजना । इवशब्दो वाक्यालंकारे । अव्ययानामनेकार्थत्वादवधारणे वा ॥ १०—११ ॥ अवधारणे हेत्वन्तरमप्याह—दर्पश्चेति । नर्दतस्तस्य दर्पश्च व्यवसायश्च यत्नश्च निनादश्च संरम्भश्च यादृशः । अस्य एतत्कारणमल्पं नभवतीतियोजना ॥ १२ ॥ फलितमाह—नासहायमिति ॥ अवष्टब्धसहायश्च परिगृहीतसहायएव । कुतः । एषः यमाश्रित्यगर्जति तादृशगर्जनहेतुसहायाश्रित एषइत्यर्थः ॥ १३ ॥ सहायस्या-

---

धादतिरक्तलेसहजप्रभानाशेनोपरक्तादित्योपमेयता । एतदादीन्यासन्नमृत्युलक्षणानि ॥ ३ ॥ **रामानु०** दीप्ताग्निसंनिभोवाली । क्रोधाद्दंष्ट्राकरालः । उत्पतितपद्माभः गजादिभिरुद्धृतपद्माभः । समृणालोह्रदइवभातीतियोजना । दंष्ट्रामृणालस्थानीया । **ती०** दीप्ताग्निसंनिभत्वंकालुष्यकषायवर्णप्राकट्याय ॥ ४ ॥ **ती०** शत्रुबाहुल्यं शत्रोर्बाहुल्यं गौरवं वा । नविद्यते शत्रुविषयबलाबलविषयशङ्कातवनास्तीतिभावः । यद्यप्येवंतथापि ॥ ८ ॥ **स०** तंसुग्रीवं । असहायंनमन्ये । वष्टब्धसहायः परिगृहीतसमानलाभः सन भवतीत्यवष्टब्धसहायः अपरिगृहीतसमानराज्योऽयंसुग्रीवः यमाश्रित्यगर्जति तमपि सुग्रीवन्तं सुग्रीववदाचरन्तं सुग्रीववत्सामाद्युपायेनाभेद्यंमन्यइत्यावर्तितेनान्वयः ॥ अहमिहागतंसुग्रीवं असहायंनमन्ये । भवतुसहायःकश्चित्तमप्यहंहनिष्यामीत्यतआह—**अवष्टब्धसहायश्चेति** । अवष्टब्धःपरिगृहीतःसहायोयेनसएषः यमाश्रित्यगर्जति तंराममपि असहायं असहायशूरंमन्येइतिवा । अमेनतारायारामविषयकंज्ञानमस्तीतिसूचितं । तच्चानुपदंस्पष्टीभविष्यति ॥ १३ ॥ **ती०** अस्तुसोपिसहायःसुग्रीवतुल्यएवेत्यत

[पा०] १ ङ. चं. छ. झ. ञ. ट. द्दीप्ताग्निलोचनः. २ ङ.—झ. ट. चपदन्यासैः. ३ क. ख. ङ. च. ज. ञ. त्रासंभ्रान्ता. ४ क. ङ.—ट. श्रूयतामभिधास्यामि. ख. ग. श्रूयतांत्वभि. ५ झ. निवार्यते. ६ ख. निरस्यस्ते. ७ ख. निनदस्यच. क. ग. च.—झ. ट. निनादस्यच. ८ घ. ड. माश्रित्यैव. ९ छ. झ. ञ. ट. नापरीक्षितवीर्येण. १० छ. झ. ञ. ट. सख्यमेष्यति.

पूर्वमेव मया[1] वीर श्रुतं कथयतो वचः ॥ अङ्गदस्य कुमारस्य वक्ष्यामि[2] त्वा हितं वचः ॥ १५ ॥
अङ्गदस्तु कुमारो[3]ऽयं वनान्तमुपनिर्गतः ॥ प्रवृत्तिस्तेन कथिता चारैराप्तैर्[4]निवेदिता ॥ १६ ॥
अयोध्याधिपतेः पुत्रौ शूरौ समरदुर्जयौ ॥ इक्ष्वाकूणां कुले जातौ प्रथितौ[5] रामलक्ष्मणौ ॥
सुग्रीवप्रियकामार्थं प्राप्तौ तत्र दुरासदौ ॥ १७ ॥
तव[6] भ्रातुर्हि विख्यातः सहायो रण[7]कर्कशः ॥ रामः परबलामर्दी युगान्ताग्निरिवोत्थितः ॥ १८ ॥
निवासवृक्षः साधूनामापन्नानां परा गतिः ॥ आर्तानां संश्रयश्चैव यशसश्चैकभाजनम् ॥ १९ ॥
ज्ञानविज्ञानसंपन्नो निदेशे निरतः पितुः ॥ धातूनामिव शैलेन्द्रो गुणानामाकरो महान् ॥ २० ॥

तिशये किंमानमित्यतआह—प्रकल्येति ॥ १४ ॥ न केवलं युक्त्यायंनिर्णयः वचनाच्चेत्याह—पूर्वमिति । वचः यत् प्रासङ्गिकंकथयतोङ्गदस्य वचः मयाश्रुतं तत् हितं वचः त्वांप्रति वक्ष्यामि ॥ १५॥ वनान्तमुपवनान्तमभि निर्गतः विहारार्थं गतः । प्रवृत्तिर्वार्ता । "वार्ता प्रवृत्तिर्वृत्तान्तः" इत्यमरः । तत्र ऋश्यमूके । दुरासदावित्यनन्तरमितिकरणं बोध्यं । प्राप्ताविति प्रवृत्तिस्तेनकथितेतिसंबन्धः ॥ १६—१७ ॥ तौ कीदृशावित्यपेक्षायामेकस्य स्वरूपकथनेनान्यस्य स्वरूपमप्यर्थादुक्तंभवतीतिमत्वा प्रधानभूतरामस्वरूपमाह—तवेत्यादिनाश्लोकत्रयेण ॥ रामः उक्तविशेषणविशिष्टइत्यन्वयः । तत्त्वस्थितिं सूचयन्त्याह—निवासेति । यथा सुग्रीवस्यसहायः एवं ममापि कुतोनस्यादित्यत्राह—साधूनामिति । स्वच्छायापेक्षिणामनुकूलानां निवासवृक्षः । वृक्षइत्यभेदाध्यवसायेन सर्वथासादृश्यमुच्यते । यथावृक्षःप्रथमंतापमपहृत्य पुष्पफलप्रदानादिना सर्वेन्द्रियतर्पणः तथाऽयमित्यर्थः। निवासइतिविशेषणेन कादाचित्कच्छायकतरुव्यावृत्तिः । "वासुदेवतरुच्छाया नातिशीतानघर्मदा । नरकाङ्गारशमनी साकिमर्थंनसेव्यते" इत्युक्तत्वात् । सुग्रीवद्रोहकरणेन नास्माकंसाधुत्वलेशइत्याशयः । साधूनामेवं आपन्नानां तु परागतिः । "योगक्षेमं वहामि" इत्युक्तरीत्या आश्रितविषयेउपायदशाप्रभृतिफलपर्यन्तसर्वकार्यकरइत्यर्थः । तत्राप्यार्तानांसंश्रयश्चैव आश्रितेष्वप्यार्तानांतुसर्वदासमीचीनाश्रयः । सर्वकार्यनिर्वाहकइत्यर्थः । भवत्वेवं । ममापि कश्चिदाश्रयोभविष्यतीत्यत्राह—यशसश्चैकभाजनमिति । एवंविधरक्षको लोकेऽन्योनास्तीत्यर्थः । अत्र "चतुर्विधाभजन्तेमां जनाःसुकृतिनोर्जुन । आर्तोजिज्ञासुरर्थार्थी ज्ञानीचभरतर्षभ" इत्युक्ताश्चतुर्विधाधिकारिण उच्यन्ते । साधूनां जिज्ञासूनां । कैवल्यकामानामित्यर्थः । आपन्नानां अपूर्वैश्वर्यकामानां । आर्तानां भ्रष्टैश्वर्यकामानां । यशसः "ज्ञानी त्वात्मैव मे मतं" इत्युक्तयशोयुक्तस्य । एकवचनेन तस्य सुदुर्लभत्वमुक्तं । एकभाजनं अद्वितीयाश्रयः । यद्वा साधूनामुपासकानां । आपन्नानां "सकृदेवप्रपन्नाय" इत्युक्तरीत्या ईषत्प्रपन्नानां । आर्तानां आर्तप्रपन्नानां । "आर्तोवायदिवादृप्तः परेषांशरणागतः" इतिवक्ष्यमाणत्वात् । यशसश्चैकभाजनमित्यनेन एवंभूतोन्यो नास्तीत्युच्यते । आश्रितफलप्रदानोपयोगिज्ञानसंपत्तिमाह—ज्ञानविज्ञानसंपन्न इति ॥ ज्ञानं लौकिकज्ञानं । विज्ञानं शास्त्रजन्यज्ञानं । ताभ्यांसंपन्नः । यद्वा विज्ञानेन धर्मभूतेन संपन्नः । ज्ञानश्चासौ विज्ञानसंपन्नश्चेतिकर्मधारयः । ज्ञानस्वरूपोज्ञानगुणकश्चेत्यर्थः । ज्ञानसंपत्तिमुक्त्वानुष्ठानसंपत्तिमाह—निदेशेनिरतःपितुरिति । प्रधानत्वात्पितृवचन-

आह—अपरीक्षितेति । अपरीक्षितवीर्येण सहायेनेतिशेषः । अपरीक्षितंवीर्यंयस्येतिविग्रहः ॥१४॥ स० कथयतोङ्गदस्यवचः श्रुतं । तद्वचोयवक्ष्यामि । हेअवचइतिसंबोधनं । तूष्णींभूतवालिन्नितितदर्थः ॥ १५ ॥ ति० वनान्तं वनमध्यं । यातस्सैचारैर्निवेदिताप्रवृत्तिरासीत् । प्रवृत्तिःसुग्रीववृत्तान्तः । सातेनममकथिता ॥ १६ ॥ रामानु० "स्वरक्षणेप्यशक्तस्यकोहेतुःपररक्षणे" इतिन्यायेनराज्याद्विनाशितोरामःसुग्रीवंकथंरक्षितुंशक्तः । शक्तोवासदृशंमांविहायदुर्बलंसुग्रीवंकथमवलंबतइत्याशङ्कायामाह—तवभ्रातुरित्यादिना ॥१८॥ रामानु०आर्तानां नष्टैश्वर्यकामानां ॥१९॥ रामानु० ज्ञानविज्ञानसंपन्नःज्ञानं ब्रह्मविषयकंज्ञानं ।

[पा०] १ घ. महावीर. २ ङ.—ट. वक्ष्याम्यद्य. क. ख. ग. वक्ष्यामित्वां. ३ क. ख. ग. कुमारोसौ. ४ छ. झ. ट. रासीन्निवेदिता. ५ ङ.—ट. प्रस्थितौ. ६ छ. झ. ट. सतेभ्रातुर्हि. ७ छ. झ. ट. रणकर्मणि.

[1]तत्क्षमं न विरोधस्ते सह तेन महात्मना ॥ दुर्जयेनाप्रमेयेन रामेण रणकर्मसु ॥ २१ ॥
शूर वक्ष्यामि ते किंचिन्न चेच्छाम्यभ्यसूयितुम् ॥ श्रूयतां क्रियतां चैव तव वक्ष्यामि यद्धितम् ॥२२॥
यौवरा[2]ज्येन सुग्रीवं तूर्णं साध्वभिषेचय ॥ वि[3]ग्रहं मा कृथा वीर भ्रात्रा रा[4]जन्बलीयसा ॥ २३ ॥
अहं हि ते क्षमं मन्ये तेन रामेण सौहृदम् ॥ सुग्रीवेण च संप्रीतिं वैरमुत्सृज्य दूरतः ॥ २४ ॥
लालनीयो हि ते भ्राता यवीयानेष वानरः ॥ तत्र वा सन्निहस्थो वा सर्वथा बन्धुरेव ते ॥ २५ ॥
न हि तेन समं बन्धुं भुवि पश्यामि कंचन ॥ दानमानादिसत्कारैः कुरुष्व प्रत्यनन्तरम् ॥ २६ ॥
वैरमेतत्समुत्सृज्य तव पार्श्वे स तिष्ठतु ॥ सुग्रीवो वि[5]पुलग्रीवस्तव बन्धुः सदा मतः ॥ २७ ॥
भ्रा[6]तुः सौहृदमा[7]लम्ब नान्या गतिरिहास्ति ते ॥ २८ ॥
यदि ते मत्प्रियं कार्यं यदि चावैषि मां हिताम् ॥ याच्यमानः [8]प्रयत्नेन साधु वाक्यं कुरुष्व मे ॥ २९ ॥
प्रसीद पथ्यं शृणु जल्पितं हि मे न रोषमेवानुविधातुमर्हसि ॥
क्षमो हि ते कोसलराजसूनुना न विग्रहः शक्रसमानतेजसा ॥ ३० ॥

परिपालनत्वमुक्तं । इदमुपलक्षणं धर्मान्तराणां । अनेन सौलभ्यंचोक्तं । समस्तकल्याणगुणसमृद्धिमाह—गुणानामाकरइति । बहुवचनेनासङ्ख्येयत्वमुक्तं । आकरइत्यनेन गुणातिरिक्तत्वंगुणिनउक्तं । महानित्यनेन गुणानामप्युत्कर्षावहंगुणिस्वरूपमुच्यते । धातूनामित्यनेन गुणानांज्ञानशक्तिबलैश्वर्यादिभेदेन नानाविधत्वमुक्तं । शैलेन्द्रो हिमवान् । अनेनाप्रकंप्यत्वमुक्तं ॥ १८—२० ॥ रणकर्मसु दुर्जयेनेत्यन्वयः ॥ २१ ॥ ते अभ्यसूयितुंनेच्छामि त्वद्विषयेअभ्यसूयां दोषाविष्करणं कर्तुंकदाचिदपिनेच्छामीत्यर्थः । यद्वा मया वक्ष्यमाणे हिते त्वया अभ्यसूयानकार्येत्यर्थः ॥ २२ ॥ यौवराज्येनाभिषेचय यौवराज्येनोपलक्षितो यथाभवति तथाभिषिञ्चेत्यर्थः ॥ २३—२५ ॥ प्रत्यनन्तरं त्वदनन्तरं । समीपवर्तिनं वा कुरुष्व ॥ २६—२७ ॥ भ्रातुरित्यर्धं ॥ आलम्ब आलम्बस्व ॥ २८ ॥ अवैषि जानासि । प्रयत्नेन बहुप्रयत्नेन ॥ २९ ॥ स्ववचनाश्रवणेबाधकंसूचयन्त्याह—प्रसीदेति ॥ प्रसीद त्यक्तरोषो भव । पथ्यं हितं । जल्पितं वचनं । भावे क्तः ।

विज्ञानं शिल्पशास्त्रयोर्ज्ञानं । "मोक्षेधीर्ज्ञानमन्यत्रविज्ञानंशिल्पशास्त्रयोः" इत्यमरः । यद्वा ज्ञानं सामान्यज्ञानं । विज्ञानं विशेषज्ञानं ॥२०॥ **तनि०** साधूनां संसारतापतप्तानां । निवासवृक्षः विश्रामस्थानं । "वासुदेवतरुच्छायानातिशीतानघर्मदा" इत्युक्तत्वात् । साधूनां " साधवस्त्वभिगन्तव्याः " इत्युक्त्याअभिगन्तव्यतयायेप्रसिद्धास्तेषामावासवृक्षः अभिगन्तव्यस्थानं । साधूनां ज्ञानिनां । आवासवृक्षः प्राप्यदेशइतिच । आपन्नानां आकिञ्चन्यात्सङ्गपुरस्कारेणशरणंगतानांदृप्तानां । सदागतिः अपुनरावृत्तिप्राप्यस्थानं । अभ्युपगमप्रारब्धसहिष्णुतयादेहस्थितिकालेपिगतिरितिच । आर्तानां प्रारब्धदेहेनार्दितानां संश्रयः इतरवैलक्षण्येनाश्रयणीयः । यद्वा साधूनां भगवत्प्राप्तिकामानां । आपन्नानां कैवल्यनिष्ठानां । आर्तानां ऐश्वर्यकामानां । इतरवैलक्षण्येनाश्रयणीयः । यशसश्च यशसएव नायशसः । एकभाजनं अनितरसाधारण्येनाश्रयः । सुप्रतिष्ठितत्वपरिपूर्णत्वादिद्योतनायभाजनग्रहणं । अत्रयशश्शब्देन औदार्यप्रतापजनितकीर्तिर्लोकप्रसिद्धा । " नतस्येशेकश्चनतस्यनाममहद्यशः " इत्युक्तवैदिकप्रसिद्धाचकीर्तिःकथिता ॥१९–२०॥ **ति०** दुर्जयेनेत्यस्याद्यर्धपूर्वान्वयि ॥ २१ ॥ किंचिद्वक्ष्यमाणंत्वयाऽभ्यसूयितुंनेच्छामि । कथमियंमांप्रतिवदतीतिमदसूयानकर्तव्येत्यर्थः । आर्षत्वादसमानकर्तृत्वेपितुमुन् ॥ २२ ॥ **शि०** सुग्रीवं दानादिभिः प्रत्यनन्तरं प्राप्तान्तररहितं अन्तरङ्गमित्यर्थः । कुरुष्व । अतएवससुग्रीवःपार्श्वेतिष्ठतु ॥ २६ ॥ **स०** भ्रातृसौहृदमालंब्य आलंब्यैवगतिर्नान्यातेऽस्ति । आलंब्यस्थितस्येतिशेषोवा । " यदोर्वंशंनरःश्रुत्वा । सेतुंदृष्ट्वासमुद्रस्य " इत्यादौसमानकर्तृकत्वाभावस्यदर्शनात्तादृशनियमस्यप्रायिकत्वाद्वानदोषः । विस्तृतंचैतच्छेषवाक्यार्थचन्द्रिकायांतत्रतत्र ॥ २८ ॥ इतिपञ्चदशःसर्गः ॥ १५ ॥

[पा०] १ ख. छ.—ट. तत्क्षमो. २ ख. घ. राज्येतु. क. ग. राज्येच. ३ ङ. च. ञ. विरोधं. ४ ङ.—ठ. राजन्यवीयसा. ५ छ. झ. ट. विपुलग्रीवोमहाबन्धुर्मतस्तव. ६ क. ख. ग. ङ. च. ज.—ट. भ्रातृसौहृदं. ७ क. ख. ग. ङ.—ट. मालम्ब्य. ८ छ. झ. ट. प्रियत्वेन.

तदा हि तारा हितमेव वाक्यं तं वालिनं पथ्यमिदं बभाषे ॥
न रोचते तद्वचनं हि तस्य कालाभिपन्नस्य विनाशकाले ॥ ३१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

षोडशः सर्गः ॥ १६ ॥

वालिनासनिर्भर्त्सनंतारानिवर्तनपूर्वकंयुद्धायनिर्गमः ॥ १ ॥ वालिसुग्रीवाभ्यांसवीरवादंनियुद्धप्रवर्तनम् ॥ २ ॥ ततोयुद्धेवालिनिवर्धमानेसुग्रीवेचहीयमानेश्रीरामेणवालिवक्षसिशरविमोक्षणम् ॥ ३ ॥ वक्षस्स्रवद्रुधिरोक्षितेनवालिनानिश्चेष्टंक्षितौपतनम् ॥ ४ ॥

तामेवं ब्रुवतीं तारां ताराधिपनिभाननाम् ॥ वाली निर्भर्त्सयामास वचनं चेदमब्रवीत् ॥ १ ॥
गर्जतोस्य [1]च संरम्भं भ्रातुः शत्रोर्विशेषतः ॥ [2]मर्षयिष्याम्यहं केन कारणेन वरानने ॥ २ ॥
अधर्षितानां शूराणां [3]समरेष्वनिवर्तिनाम् ॥ धर्षणामर्षणं भीरु मरणादतिरिच्यते ॥ ३ ॥
सोढुं न च समर्थोऽहं युद्धकामस्य संयुगे ॥ सुग्रीवस्य च संरम्भं हीनग्रीवस्य [4]गर्जतः ॥ ४ ॥
न च कार्यो विषादस्ते राघवं प्रति मत्कृते ॥ धर्मज्ञश्च कृतज्ञश्च कथं पापं करिष्यति ॥ ५ ॥
निवर्तस्व सह स्त्रीभिः कथं [5]भूयोऽनुगच्छसि ॥ [6]सौहृदं दर्शितं [7]तारे मयि [8]भक्तिः कृता त्वया ॥ ६ ॥
प्रतियोत्स्याम्यहं गत्वा सुग्रीवं जहि संभ्रमम् ॥ [9]दर्पमात्रं विनेष्यामि न च प्राणैर्वि[10]मोक्ष्यते ॥ ७ ॥
[11]अहं ह्याजिस्थितस्यास्य करिष्यामि [12]यथेप्सितम् ॥ वृक्षैर्मुष्टिप्रहारैश्च पीडितः प्रतियास्यति ॥ ८ ॥
[13]न मे गर्वितमायस्तं सहिष्यति दुरात्मवान् ॥ कृतं तारे सहायत्वं [14]सौहृदं दर्शितं मयि ॥ ९ ॥

शक्रसमानतेजसा शक्रतेजस्तुल्यतेजसा । अनेन वालिनो रामस्याधिक्यमुक्तं ॥ ३० ॥ तदा वक्तव्यकाले । वालिनंप्रतीतिशेषः । भाषतेर्द्विकर्मकत्वात् । तस्य तस्मै । चतुर्थ्यर्थेषष्ठी । "रुच्यर्थानां—" इतिहिस्मृतिः । विनाशकालत्वेहेतुः कालाभिपन्नस्येति । मृत्युनागृहीतस्येत्यर्थः ॥ ३१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चदशःसर्गः ॥ १५ ॥

अथ वालिवधः षोडशे—तामेवमित्यादि ॥१—२॥ धर्षणामर्षणं धर्षणस्य आमर्षणं सहनमितिवा । धर्षणायाः तिरस्कारस्य मर्षणमितिवार्थः ॥ ३ ॥ हीनग्रीवस्येतिपरुषोक्तिः ॥ ४ ॥ पापं निरपराधवधं ॥५॥ निवर्तने क्रियमाणेपि भूयः । सौहृदं सुहृत्कर्तव्यं । हितोपदेशइति यावत् । भक्तिः कृता प्रकाशितेत्यर्थः ॥ ६ ॥ सुग्रीवं प्रतियोत्स्यामि ॥ ७ ॥ संप्रहारव्याकुलेन त्वया कथं तस्य प्राणरक्षणं कर्तुं शक्यं तत्राह—अहं हीति ॥ यथेप्सितं ईप्सितं तत्प्राणरक्षणमनतिक्रम्य । आजौ युद्धे स्थितस्य ॥ ८ ॥ गर्वितं गर्वं । आयस्तं आयासं । प्रयत्नमिति यावत् । सहि-

---

वि० सुसंरब्धं स्वार्थेनिष्ठा । सुसंरंभमित्यर्थः ॥ सुसंरंभमितिपाठः सुगमः ॥ २ ॥ स० मद्गमनेनग्रीवाहीनोभवतीतिमत्वाहीनग्रीवस्येत्युक्तवान् ॥ शि० इनग्रीवस्यइनाश्रेष्ठाविपुलेत्यर्थः । ग्रीवायस्यतस्य । संरंभं गर्वंगर्जितंचसोढुंनैव समर्थः । हिशब्दएवार्थे । अतएवविपुलग्रीवइत्यनेनेनविरुध्यते ॥ ४ ॥ ति० राघवंप्रति राघवनिमित्तभयमालक्ष्य । मत्कृतेत्वयाविषादोन कार्यः । यतोधर्मज्ञत्वादिगुणःसः ॥ ५ ॥ शि० यदुक्तंदानमानादिसत्कारैरितितस्यप्रत्युत्तरमाह—**नेति** । गर्वितं सामानाधिकर-

[पा०] १ छ. झ. ञ. ट. सुसंरब्धं. ख. ङ. ज. तुसंरंभं. २ ख. च. छ. झ. ट. मर्षयिष्यामिकेनापि. ३ ख. संयुगेषु. ४ ङ. छ. झ. ञ. ट. गर्जितं. ५ ङ. च. ज. ञ. मामनुगच्छसि. ६ क. ग. दर्शितंसौहृदं. ७ क. ग. च.—ट. तावन्मयि. ८ ङ.—ट. भक्तिस्त्वयाकृता. ९ ख. घ.—ट. दर्पंचास्य. क. ग. दर्पंचास्यापनेष्यामि. १० ख. ङ. छ.—ट. र्वियोक्ष्यते. च. र्वियोज्यते. ११ ङ. च. ज. ञ. अहमाजि. १२ ङ. झ. ट. यदीप्सितं. १३ ङ. च. ज. ञ. नाहंगर्वितमायस्तंसहिष्यामिदुरात्मनः. १४ क. ख. घ.—ट. दर्शितंसौहृदं.

शापिताऽसि मम प्राणैर्निवर्तस्व [1]जयेन च ॥ [2]अहं जित्वा निवर्तिष्ये [3]तमहं भ्रातरं रणे ॥ १० ॥
तं तु तारा परिष्वज्य वालिनं प्रियवादिनी ॥ चकार रुदती मन्दं दक्षिणा सा प्रदक्षिणम् ॥ ११ ॥
ततः स्वस्त्ययनं कृत्वा [4]मन्त्रवद्विजयैषिणी ॥ अन्तःपुरं सह स्त्रीभिः प्रविष्टा शोकमोहिता ॥ १२ ॥
प्रविष्टायां तु तारायां सह स्त्रीभिः स्वमालयम् ॥ [5]नगरान्निर्ययौ क्रुद्धो महासर्प इव श्वसन् ॥ १३ ॥
[6]स निःश्वस्य [7]महातेजा वाली परमरोषणः ॥ सर्वतश्चारयन्दृष्टिं शत्रुदर्शनकाङ्क्षया ॥ १४ ॥
स ददर्श ततः श्रीमान्सुग्रीवं हेमपिङ्गलम् ॥ सुसंवीतमवष्टब्धं दीप्यमानमिवानलम् ॥ १५ ॥
[9]स तं दृष्ट्वा महावीर्यं सुग्रीवं [10]पर्यवस्थितम् ॥ गाढं परिदधे वासो वाली [11]परमरोषणः ॥ १६ ॥
स वाली गाढसंवीतो मुष्टि[12]मुद्यम्य वीर्यवान् ॥ सुग्रीवमेवाभिमुखो ययौ योद्धुं कृतक्षणः ॥ १७ ॥
[13]श्लिष्टमुष्टिं समुद्यम्य संरब्धतरमागतः ॥ सुग्रीवोपि [14]तमुद्दिश्य वालिनं हेममालिनम् ॥ १८ ॥
तं वाली [15]क्रोधताम्राक्षः सुग्रीवं [16]रणपण्डितम् ॥ आपतन्तं महावेगमिदं वचनमब्रवीत् ॥ १९ ॥
एष [17]मुष्टिर्मया बद्धो गाढः [18]संनिहिताङ्गुलिः ॥ [19]मया वेगविमुक्तस्ते प्राणानादाय यास्यति ॥ २० ॥
एवमुक्तस्तु सुग्रीवः क्रुद्धो वालिनमब्रवीत् ॥ [20]तवैव चाहरन्प्राणान्मुष्टिः पततु मूर्धनि ॥ २१ ॥
ताडितस्तेन संक्रुद्धः [21]समभिक्रम्य [22]वेगितः ॥ अभवच्छोणितोद्गारी [23]सोत्पीड इव पर्वतः ॥ २२ ॥
[24]सुग्रीवेण तु [25]निःसङ्गं सालमुत्पाट्य तेजसा ॥ गात्रेष्वभिहतो वाली वज्रेणेव महागिरिः ॥ २३ ॥

ष्यतीति परस्मैपदमार्षं । सहायत्वं बुद्धिसाहाय्यं ॥ ९—१० ॥ दक्षिणा स्वस्मिन्परस्मिंश्च तुल्यहिता ॥ ११ ॥ मन्त्रवत् स्वस्त्ययनमन्त्रवत् । मन्त्रश्च वैदिकादन्य इति ज्ञेयः ॥ १२—१३ ॥ चारयन् प्रस्थित इति शेषः ॥ १४ ॥ सुसंवीतं वाससा सुष्ठु परिवीतं । अवष्टब्धं युयुत्सया भूमिमाक्रम्य स्थितं ॥ १५ ॥ पर्यवस्थितं समीपे अवस्थितं ॥ १६ ॥ कृतक्षणः कृतोत्सवः । लब्धावसरो वा । "निर्व्यापारस्थितौ कालविशेषोत्सवयोःक्षणः" इत्यमरः ॥ १७—२० ॥ पततु मूर्धनीत्यनन्तरमितिकरणंद्रष्टव्यं ॥ २१ ॥ तेन वालिना ताडितः । अतएव संक्रुद्धः । वेगितः संजातवेगः । पुनः प्रहारायेतिशेषः । अत्रसुग्रीवइत्यध्या-

---

ण्यसंबन्धेनस्वबलवत्त्वादिजनितगर्वविशिष्टं । मेआयस्तं प्रवृत्तिं । नसहिष्यति । एतेनतस्यमद्वशवर्तित्वंनभविष्यतीतिसूचितं ॥ ९ ॥ **रामानु०** जवेनेतिपाठः । जवेन मनोजवेन । यद्वा जयेनेतिपाठः । जयाशिषेत्यर्थः । चोवधारणे ॥ **ती०** अहंजित्वाअहंनिवर्तिष्यइत्यहंशब्दद्वयस्यनिर्वाहः ॥ **ति०** जनेन स्वपरिवारजनेनालं । जित्वा जयमात्रंकृत्वा । निवर्तिष्ये नतुवधमित्यर्थः । अहंजित्वेतिपाठस्त्वसांप्रदायिकः ॥ **स०** तं भ्रातरं सुग्रीवं । अलंजित्वानिवर्तिष्ये । अहंजित्वेतिपाठे तमहमित्येकंपदं । "तमंतुतमसासमं" इत्युक्तेः तमं हन्तीतितमहस्तंसूर्यावतारं । बाहुलकाड्डः ॥ १० ॥ **शि०** तं स्वोक्तस्वीकाराभाववन्तं वालिनं ॥ ११ ॥ **ति०** मन्त्रवित् स्वस्त्ययनमन्त्रवेत्री । देवांशत्वाद्वेदनं ॥ १२ ॥ **शि०** कृतक्षणः प्रकटितयुद्धोत्सवः ॥ १७ ॥ **शि०** सुनियताङ्गुलिः सुनियताः यथोचितंनिवेशिताअङ्गुलयोयस्मिन्सएषमहान्मुष्टिः ॥ २० ॥ **ती०** तेन वालिना । सोत्पीडइव सनिर्झरइव । समतिक्रम्य धीरसमयमितिशेषः । तथाचोक्तं—"धीरंप्रवर्ततेपूर्वंधिक्कर्तातदनन्तरम् । समयोऽयंद्वन्द्वयुद्धे" इति ॥ वेगितः संजातचलनः ॥ २२ ॥ **ति०** निश्शङ्कं शोणितोद्गारजदुःखसंबन्धरहितंयथातथाऽभिहतोवालीसागरेनौरिववि-

[पा०] १ क. ग. ङ. च. छ. झ. ञ. ट. जनेनच. २ ङ. छ. झ. ञ. ट. अलंजित्वा. ३ ख. तमलं. ४ झ. मन्त्रवित्. ५ क. ख. घ. ङ. छ.—ट. नगर्यान्निर्ययौ. ६ ख. समुत्पत्य. ७ ङ.—ट. महारोषो. क.—घ. महावेगो. ८ घ. परममर्षणः. ङ.—ट. परमवेगवान्. ९ छ. झ. ट. तंसदृष्ट्वामहाबाहुः. क. ङ. च. ज. ञ. तंसदृष्ट्वामहाबाहुं. ग. तंसदृष्ट्वामहावीर्यः. १० ङ. ज. ञ. समुपस्थितं. ११ छ. झ. ट. परमकोपनः. घ. परममर्षणः. ङ. ज. ञ. समरदुर्मदः. १२ ङ. च. ज. ञ. मुद्यम्यदक्षिणं. १३ घ. ङ. क्लिष्टमुष्टिं. च. छ. झ. ञ. ट. श्लिष्टंमुष्टिं. १४ क. ख. घ.—ट. समुद्दिश्य. १५ क. घ.—ट. ताम्राक्षं. १६ छ. झ. ट. रणकोविदं. घ. च. ज. ञ. रणकर्कशं. १७ छ. झ. ट. महान्बद्धो. १८ क. ङ. छ. झ. ट. सुनियताङ्गुलिः. १९ ख. सतुवेगविमुक्तस्तु. २० छ.—ट. तवचैषहरन्. क. ख. ग. तवचैवहरन्. २१ ख. समतिक्रम्य. ङ. च. ज. ञ. समभिद्रुत्य. २२ ग. घ. छ. झ. ट. वेगतः. २३ छ. झ. ट. सापीडइव. २४ क. ग. सुग्रीवेणापि. २५ छ. झ. ञ. ट. निश्शङ्कं.

[1]स तु वाली प्रचलितः सालताडनविह्वलः ॥ [2]गुरुभारसमाक्रान्तो नौ[3]सार्थ इव सागरे ॥ २४ ॥
तौ भीमबलविक्रान्तौ [4]सुपर्णसमवेगिनौ ॥ [5]प्रवृद्धौ घोरवपुषौ चन्द्रसूर्याविवाम्बरे ॥
परस्परममित्रघ्नौ छिद्रान्वेषणतत्परौ ॥ २५ ॥
ततोऽवर्धत वाली तु बलवीर्यसमन्वितः ॥ सूर्यपुत्रो महावीर्यः सुग्रीवः [6]परिहीयते ॥ २६ ॥
वालिना [7]भग्नदर्पस्तु सुग्रीवो मन्दविक्रमः ॥ वालिनं प्रति सामर्षो दर्शयामास [8]लाघवम् ॥ २७ ॥
वृक्षैः सशाखैः [9]सशिखैर्वज्रकोटिनिभैर्नखैः ॥ मुष्टिभिर्जानुभिः पद्भिर्बाहुभिश्च पुनः पुनः ॥
तयोर्युद्धमभूद्घोरं वृत्रवासवयोरिव ॥ २८ ॥
तौ [10]शोणिताक्तौ युध्येतां वानरौ वनचारिणौ ॥ मेघाविव महाशब्दै[11]स्तर्जयानौ परस्परम् ॥ २९ ॥
[12]हीयमानमथोऽपश्यत्सुग्रीवं वानरेश्वरम् ॥ [13]वीक्षमाणं दिशश्चैव राघवः स मुहुर्मुहुः ॥ ३० ॥
ततो रामो महातेजा आर्तं दृष्ट्वा हरीश्वरम् ॥ [14]शरं च वीक्षते वीरो वालिनो [15]वधकारणात् ॥ ३१ ॥
ततो धनुषि संधाय शरमाशीविषोपमम् ॥ पूरयामास तच्चापं कालचक्रमिवान्तकः ॥ ३२ ॥
तस्य ज्यातलघोषेण त्रस्ताः पत्ररथेश्वराः ॥ प्रदुद्रुवुर्मृगाश्चैव युगान्त इव मोहिताः ॥ ३३ ॥
मुक्तस्तु वज्रनिर्घोषः [16]प्रदीप्ताशनिसन्निभः ॥ राघवेण महाबाणो वालिवक्षसि पातितः ॥ ३४ ॥
ततस्तेन महातेजा [17]वीर्योत्सिक्तः कपीश्वरः ॥ वेगेनाभिहतो वाली निपपात महीतले ॥ ३५ ॥

हार्यं । सोत्पीडः सनिर्झरः ॥ २२—२३ ॥ नौः पोतः ॥ २४ ॥ विक्रान्तौ विक्रमवन्तौ भीमबलौ च तौ विक्रान्तौ चेति कर्मधारयः । सुपर्णसमवेगिनौ गरुडवेगतुल्यवेगवन्तौ । कर्मधारयान्मत्वर्थीयः । चन्द्रसूर्याविव पौर्णमासीचन्द्रसूर्याविव । प्रवृद्धावभूतामित्यर्थः ॥ २५ ॥ अवर्धत । तेजसेति शेषः । परिहीयते पर्यहीयतेत्यर्थः ॥ २६ ॥ लाघवं शैघ्र्यं । "लघु माधुर्यशीघ्रयोः" इतिनिघण्टुः ॥२७—२८॥ युध्येतां अयुध्येतां । तर्जयानाविति । उभयत्रागमशासनस्यानित्यत्वादडभावः मुमभावश्च ॥२९—३०॥ शरं वीक्षते । वालिवधोचितं शरं पर्यालोचयदित्यर्थः ॥ ३१ ॥ कालचक्रं यमस्यायुधविशेषः ॥ ३२ ॥ पत्ररथेश्वराः पक्षिश्रेष्ठाः ॥ ३३ ॥ वज्रस्येव निर्घोषोयस्यतथा । प्रदीप्ताशनिसन्निभः प्रदीप्तविद्युत्तुल्यः । "अशनिस्तु द्वयोर्वज्रे सौदामिन्यां" इतिदर्पणः ॥ ३४ ॥ तत इत्यादिश्लोकद्वयमेकान्वयं ॥ उद्धूतः पातितः । आश्वयुक्समये आश्वयुक्समयरूपे । मासि पौर्णमास्यां । महीतलेपातितइत्यन्वयः

ह्लोऽभवत् ॥ २३ ॥ **ती०** सार्थनौः संघसहितानौरिव । सार्थाः व्यावहारिकावा ॥ २४ ॥ **ति०** चन्द्रसूर्याविवेति । यद्यर्थातिशयोक्तिरेषा ॥ **शि०** भीमबलविक्रान्तौ बलेनविक्रान्तौ कृतपादन्यासौ । अतएवभीमौ भयंकरौ । भीमौचतौबलविक्रान्तावितिकर्मधारयः । भयंकरबलेनकृतपादन्यासावित्यर्थोवा । सुपर्णसमवेगितौ गरुडसमवेगंप्राप्तौ । प्रयुद्धौ प्रवृद्धयुद्धविशिष्टौ । तौवालिसुग्रीवौ अंबरेचन्द्रसूर्याविवदृश्येतेइतिशेषः । **स०** सुपर्णवद्बलवेगविशिष्टौ ॥२५॥ **ति०** परिहीयत अडभावआर्षः ॥२६॥ **शि०** राघवंदर्शयामास बोधयामास । स्वहानिंवालिनोवृद्धिंचेतिशेषः ॥२७॥ **ती०** सशिखैःसाग्रैः ॥ **शि०** सिंहावलोकनन्यायेन

[**पा०**] १ क. च. ज.—ट. सतुवृक्षेणनिर्भग्नः. ग. ङ. सतुवृक्षेणनिर्भिन्नः. २ ङ. च. ज.—ट. गुरुभारभराक्रान्तानौस्ससार्थेवसागरे. क.—घ गुरुभारभराक्रान्तासागरेनौरिवाभवत्. ३ च. सार्थनौरिव. ४ क. ख. ग. सुपर्णानिलवेगितौ. ङ. छ. ञ. सुपर्णबलवेगितौ. घ. सुपर्णसमतेजसौ. छ. झ. ट. सुपर्णसमवेगितौ. ५ ट. प्रयुद्धौ. ६ छ. झ. ञ. ट. परिहीयत. ७ घ. भिन्नदर्पस्तु. ८ क. छ. झ.ट. राघवं. ९ क. ख. ङ.—ट. शिखरैः. १० ख. शोणिताक्षौ. ११ ख. ङ. झ. ञ. ट. स्तर्जमानौ. १२ छ. ज. झ. ट. हीयमानमथापश्यत्. ख. हीयमानंततोपश्यत्. १३ क. ख. ग. ङ.—ट. प्रेक्षमाणं. १४ ख. ग. घ. छ. झ. ञ. ट. सशरंवीक्षते. क. च. ज. सज्यंचक्रेधनुर्वीरो. १५ छ. झ. ट. वधकाङ्क्षया. १६ ङ. प्रदीप्तानलसंनिभः. १७ क. ग. छ.—ट. वीर्ययुक्तः.

इन्द्रध्वज इवोद्भूतः पौर्णमास्यां महीतले ॥ आश्वयुक्समये मासि गतश्रीको विचेतनः ॥
[बाष्पसंरुद्धकण्ठस्तु वाली चार्तस्वरः शनैः] ॥ ३६ ॥
नरोत्तमः कालयुगान्तकोपमं शरोत्तमं काञ्चनरूप्यभूषितम् ॥
ससर्ज दीप्तं तममित्रमर्दनं सधूममग्निं मुखतो यथा हरः ॥ ३७ ॥
अथोक्षितः शोणिततोयविस्रवैः सुपुष्पिताशोक इवानलोद्धतः ॥
विचेतनो वासवसूनुराहवे विभ्रंशितेन्द्रध्वजवत्क्षितिं गतः ॥ ३८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे षोडशः सर्गः ॥ १६ ॥

सप्तदशः सर्गः ॥ १७ ॥

रामबाणेनहृदयविदारणेपि इन्द्रदत्तकाञ्चनमालाधारणेनप्राणान्धारयतावालिना स्वसमीपमागतंरामंप्रतिस्वमारणस्यान्याय्यत्वोक्त्यागर्हणम् ॥ १ ॥

ततः शरेणाभिहतो रामेण रणकर्कशः ॥ पपात सहसा वाली निकृत्त इव पादपः ॥ १ ॥
स भूमौ न्यस्तसर्वाङ्गस्तप्तकाञ्चनभूषणः ॥ अपतद्देवराजस्य मुक्तरश्मिरिव ध्वजः ॥ २ ॥
तस्मिन्निपतिते भूमौ वानराणां गणेश्वरे ॥ नष्टचन्द्रमिव व्योम न व्यराजत भूतलम् ॥ ३ ॥

॥ ३५—३६ ॥ उक्तमर्थं वृत्तान्तरेण संगृह्णाति—नरोत्तम इत्यादिश्लोकद्वयेन ॥ कालयुगान्तकोपमं । युगान्तकालोपममित्यर्थः । स्वार्थे कप्रत्ययः । युगान्तकालो युगान्तमृत्युः । काञ्चनरूप्यभूषितं परभागाय स्वर्णरजताभ्यामलंकृतं । सधूममित्यनेन ज्वालोन्मुखत्वमुच्यते । हरः प्रलये संहर्ता । नन्वत्र एकवचनादेकेन बाणेन वाली हत इत्युक्तं । इदमुत्तरत्र तारावाक्येन "रामेण प्रहितै रौद्रैर्मार्गणैर्दूरपातिभिः" इत्यनेन बहुबाणहतत्ववचनेन विरुध्यते । मैवं व्याकुलवचनत्वात्तस्य । यतस्तारा एकबाणहतं श्रुत्वाप्येवमाह । वक्ष्यति हि—"तं भार्या बाणमोक्षेण रामदत्तेन संयुगे । हतं प्लवगशार्दूलं तारा शुश्राव वालिनं" इति ॥ सर्गोपक्रमेच "निजघान च तत्रैनं शरेणैकेन राघव" इत्यत्रैकशब्दःप्रयुक्तः । "प्रतिज्ञातंचरामेण तथावालिवधंप्रति" इति प्रतिज्ञानिर्वाहाय छद्मनापि वालिवधःकृतः ॥ ३७—३८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षोडशः सर्गः ॥ १६ ॥

अथ रामंप्रति वालिनिन्दा सप्तदशे—ततः शरेणेत्यादि ॥ आरम्भणार्थोयमनुवादः ॥ १ ॥ रश्मिः

तयोर्युद्धमेववर्णयति—**वृक्षैरित्यादिभिः** ॥ २८ ॥ **ती०** इन्द्रध्वजइति । गौडदेशेकस्मिंश्चिदुत्सवेआश्वयुक्पौर्णमास्यामिन्द्रमुद्दिश्यध्वजंसंस्थाप्य उत्सवानन्तरंध्वजंपातयन्तितद्वद्वालीपातितइत्यर्थः ॥ **ति०** आश्वयुक्समयेमासिपौर्णमास्यामिन्द्रध्वजोत्सवान्ते उद्धूतः उत्क्षिप्तः । इन्द्रध्वजोयथाभूमौपपात तद्वद्वालीग्रीष्मान्तेपतितइत्यर्थः । अतएवसुग्रीवाभिषेकसमयेश्रावणोमासोऽभ्युनावर्ततइतिवचनेननविरोधः ॥ **शि०** आश्वयुजः अश्विनीयुक्तपौर्णमास्याः सम्यकुअयःप्राप्तिर्यस्मिंस्तस्मिन् । आश्विनेइत्यर्थः ॥ **स०** आश्वयुगितिसमयः संकेतोयस्यतस्मिन् ॥ ३६ ॥ **ती०** कालयुगान्तकोपमं अन्तयतीत्यन्तकः । युगानांकृतत्रेतादीनां अन्तकः युगान्तकः । कालश्चासौयुगान्तकश्चेतिविशेष्यपूर्वपदः कर्मधारयः । विशेषणविशेष्यभावस्यकामचारित्वात् । सउपमायस्यतं ॥ **वि०** मुखतः मुखस्थललाटनेत्रेणेत्यर्थः ॥ ३७ ॥ **ती०** फलश्रुतिस्स्कान्दे—"गिरीणांभेदनंचैवकिष्किन्धागमनंतथा । वालिसुग्रीवयोर्युद्धंश्रुत्वाविजयपूर्वकम् । युद्धेविजयमाप्नोतिवालिनोविजयंयथा" इति ॥ ३८ ॥ इतिषोडशःसर्गः ॥ १६ ॥

[पा०] १ ङ.—ट. गतसत्वो. २ इदमर्धं च.—ञ. ट. पाठेषुदृश्यते. ३ क. ग. ङ.—झ. कालइवान्तकोपमं. ४ झ. रूपभासितं. ङ. च. ज. ञ. ट. रूपभूषितं. ५ क. कर्शनं. ६ क. ङ.—ट. प्रपुष्पिता. ७ ङ. छ. झ. इवाचलोद्धतः. च. इवाचलोत्थितः. ट. इवानिलोद्धतः. ख. इवातिलोहितः. ८ ख.—ट. प्रभ्रंशितेन्द्र. ९ झ. अस्मिन्निपतिते. १० क. ख. ङ. ज.—ट. हर्यृक्षाणां. ११ झ. ट. मेदिनी.

भूमौ निपतितस्यापि तस्य देहं महात्मनः ॥ न श्रीर्जहाति न प्राणा न तेजो न पराक्रमः ॥ ४ ॥
शक्रदत्ता वरा माला काञ्चनी [1]वज्रभूषिता ॥ दधार [2]हरिमुख्यस्य प्राणांस्तेजः श्रियं च सा ॥ ५ ॥
स तया मालया वीरो हैमया हरियूथपः ॥ स[3]न्ध्यानुगतपर्यन्तः पयोधर इवाभवत् ॥ ६ ॥
तस्य माला च देहश्च मर्मघाती च यः शरः ॥ त्रिधेव रचिता लक्ष्मीः [4]पतितस्यापि शोभते ॥ ७ ॥
तदस्त्रं तस्य वीरस्य स्वर्गमार्गप्रभावनम् ॥ रामबाणासनक्षिप्तमावहत्परमां गतिम् ॥ ८ ॥
तं [5]तदा पतितं संख्ये गतार्चिषमिवानलम् ॥ [6]बहुमान्य च तं वीरं वीक्षमाणं शनैरिव ॥ ९ ॥
ययातिमिव पुण्यान्ते देवलो[7]कात्परिच्युतम् ॥ आदित्यमिव कालेन युगान्ते भुवि पातितम् ॥१०॥
महेन्द्रमिव [8]दुर्धर्षं महेन्द्रमिव दुःसहम् ॥ महेन्द्रपुत्रं पतितं वालिनं हेममालिनम् ॥ ११ ॥
[9]सिंहोरस्कं महाबाहुं दीप्तास्यं हरिलोचनम् ॥ [10]लक्ष्मणानुगतो रामो ददर्शोपससर्प च ॥ १२ ॥
[[11]तं तथा पतितं वीरं गतार्चिषमिवानलम् ॥ [12]बहुमान्य च तं वीरं वीक्षमाणं शनैरिव ॥
उपयातौ महावीर्यौ भ्रातरौ रामलक्ष्मणौ ॥] १३ ॥
तं [13]दृष्ट्वा राघवं वाली लक्ष्मणं च महाबलम् ॥ [14]अब्रवीत्प्रश्रितं वाक्यं परुषं धर्मसंहितम् ॥ १४ ॥
[[15]बाष्पसंरुद्धकण्ठस्तु वाली सार्तस्वरं शनैः ॥ स भूमावल्पतेजोसुर्निहतो नष्टचेतनः ॥ १५ ॥
अर्थसंहितया वाचा गर्वितं [16]रणगर्वितः ॥ उवाच रामं संप्रेक्ष्य पङ्कलग्न इव द्विपः ॥ १६ ॥]

बन्धनरज्जुः ॥ २—३ ॥ तेजः प्रतापः ॥ ४ ॥ उक्तेऽर्थे हेतुमाह—शक्रेति ॥ ५ ॥ हैमयेति ङीबभाव आर्षः ॥ ६ ॥ लक्ष्मीः तेजः ॥ ७ ॥ स्वर्गमार्गस्य प्रभावनं प्रापकं । "भू, प्राप्तौ" इत्यस्माल्लुट् । अतएव परमां गतिं आवहत् । संपादयामासेत्यर्थः ॥ ८ ॥ तं तदेत्यादिचत्वारः ॥ संख्ये युद्धे । तं वीरं रामं बहुमान्य साधुबाणं पातितवानसीति श्लाघयित्वा । स कुत्र स्थित इति शनैः वेदनातिशयान्मन्दं वीक्षमाणं । इवशब्दो वाक्यालंकारे । ययातिमिव । कालेन दैवेन । "कालः श्यामलदिष्टयोः" इति दर्पणः । महेन्द्रमिव दुःसहं आभिमुख्येन स्थातुमशक्यं । दीप्तास्यं दीप्तमुखं । हरिलोचनं कपिलनेत्रं ॥ ९—१३ ॥ प्रश्रितं विनयान्वितं ॥ १४—१६ ॥

ति० त्रिधारचितेव त्रिधाविभक्तेव । मालादेहशररूपालक्ष्मीरितियावत् ॥ ७ ॥ **ती०** स्वर्गमार्गः प्रभवत्यस्मादितिस्वर्गमार्गप्रभावनं । आवहत् संपादयामास । वालिनोमुक्तिरभूदित्यर्थः ॥ **ति०** बाणाअस्यन्तेऽनेनेतिबाणासनं धनुः ॥ **स०** अस्त्रमत्रबाणः । बाणासनं धनुः । स्वर्गमार्गप्रभावनमितियतः अतः परमांगतिमावहत् ॥ ८ ॥ **स०** तंतथेतिश्लोकस्थद्वितीयान्तानांचतुर्थश्लोकस्थयाददर्शेतिक्रिययाऽन्वयः ॥ ९ ॥ **ति०** महेन्द्रं उपेन्द्रस्यैववृत्रवधोत्तरमिदंनामेत्येके । महेन्द्रः आजानदेवः । उपेन्द्रः कर्मदेवइत्यन्ये ॥ **स०** महेन्द्रमिवदुर्धर्षमित्यादि पूर्वमेवबोध्यं । अतोगतार्चिषमित्यादिनानविरोधः ॥ ११ ॥ **शि०** हरिलोचनं पीतनेत्रं । हरिच्छब्दःपीतपर्यायः । "हरिद्राभःपालाशोहरितोहरित्" इतिकोशः । आर्षस्तलोपः इतिभट्टाः । वस्तुतस्तु हरिशब्दस्यापिपीतवाचकत्वं । "स्वर्णवर्णोहरिःस्मृतः" इत्यनेकार्थः ॥ १२ ॥ **ति०** बहुमान्य संमान्य । शनैरेवोपयातौ समीपंगतौ ॥ **शि०** संख्येतथापतितं वीरपरिपाट्यासंग्रामभुविलुण्ठितं । अतएवबहुमान्यं अधिकंसत्करणीयं । वीक्ष्यमाणं दृष्टिपथंप्राप्तं । वीरंतं प्राप्तमोक्षंतंवालिनं । शनैरुपयातौ । "तश्वोरामृतपुच्छेषु" इतिकोशः ॥ १३ ॥ **ति०** अल्पंतेजोसवश्चयस्यसः । नष्टचेतनः नष्टचेष्टः । गर्वितं गर्वोपेतंयथाभवतितथारणगर्वितं रामं अर्थयुक्तयावाचापरुषमब्रवीदित्यन्वयः ॥

[पा०] १ ङ.—ट. रत्नभूषिता. २ क. हरिराजस्य. ३ क, ख. ग. सन्ध्यानुरक्त. ४ छ. पतितस्याभि. ङ. च. ज. पतितस्याव. ५ क.—ट. तथा. ६ इदमर्धं झ. ट. पाठयोर्नदृश्यते. ७ ग. ङ—ज. ञ. लोकादवच्युतं. झ. ट. लोकादिहच्युतं. ८ छ. झ. ञ. ट. दुर्धर्षमुपेन्द्रमिव. ९ ङ. च. छ. झ. ट. व्यूढोरस्कं. १० ख. ङ.—ट. लक्ष्मणानुचरो. ११ ग. ङ.—ट. पाठेष्विदमर्धत्रयंदृश्यते. १२ ट. बहुमान्यंच. १३ घ. सदृष्ट्वा. १४ ङ—ट. अब्रवीत्परुषंवाक्यंप्रश्रितं. १५ इदंश्लोकद्वयं क. ख. ग. ङ.—ज. ञ. पाठेपुदृश्यते. झ. ट. पाठयोस्तु बाष्पसंरुद्धकण्ठस्तु उवाचरामंसंप्रेक्ष्येत्यर्धद्वयवर्जंदृश्यते. १६ झ. ट. रणगर्वितं.

[1]त्वं नराधिपतेः पुत्रः प्रथितः प्रियदर्शनः ॥ [2]कुलीनः सत्त्वसंपन्नस्तेजस्वी चरितव्रतः ॥ १७ ॥
पराङ्मुखवधं कृत्वा [3]को नु प्राप्तस्त्वया गुणः ॥ यदहं युद्धसं[4]रब्धः शरेणोरसि ताडितः ॥ १८ ॥
रामः करुणवेदी च प्रजानां च हिते रतः ॥ सानुक्रोशो जि[5]तोत्साहः समयज्ञो दृढव्रतः ॥
[6]इति ते सर्वभूतानि कथयन्ति यशो भुवि ॥ १९ ॥
दमः शमः क्षमा धर्मो धृतिः [7]सत्यं पराक्रमः ॥ पार्थिवानां गुणा राजन्दण्डश्चाप्यपराधिषु ॥ २० ॥
तान्गुणान्संप्रधार्याहमग्र्यं चाभिजनं तव ॥ तारया [9]प्रतिषिद्धोपि सुग्रीवेण समागतः ॥ २१ ॥
न मामन्येन सं[10]रब्धं प्रमत्तं [11]योद्धुमर्हति ॥ [12]इति मे बुद्धिरुत्पन्ना बभूवादर्शने तव ॥ २२ ॥
न त्वां विनिहतात्मानं धर्मध्वजमधार्मिकम् ॥ जाने पापसमाचारं तृणैः कूपमिवावृतम् ॥ २३ ॥
सतां वेषधरं पापं प्रच्छन्नमिव पावकम् ॥ नाहं त्वामभिजानामि धर्मच्छद्माभिसंवृतम् ॥ २४ ॥
विषये वा पुरे वा ते यदा [13]नापकरोम्यहम् ॥ न च [14]त्वामवजाने च कस्मात्त्वं हंस्यकिल्बिषम् ॥ २५ ॥
फलमूलाशनं नित्यं [15]वानरं वनगोचरम् ॥ मामिहाप्रतियुध्यन्तमन्येन च समागतम् ॥ २६ ॥
लिङ्गमप्यस्ति ते राजन्दृश्यतेऽधर्मसंहितम् ॥ कः क्षत्रियकुले जातः श्रुतवान्नष्टसंशयः ॥
धर्मलिङ्गप्रतिच्छन्नः क्रूरं कर्म समाचरेत् ॥ २७ ॥

प्रश्रितं वचनमाह—त्वमित्यादिना ॥ प्रियदर्शनः प्रियं दर्शनं शास्त्रं यस्य सः । "दर्शनं दृशि शास्त्रे स्यात्" इति दर्पणः । पराङ्मुखवधं परयुद्धासक्तवधं । गुणः उत्कर्षः । युद्धसंरब्धः अन्ययुद्धपराङ्मुख इत्यर्थः ॥ १७—१८ ॥ करुणवेदी कारुण्यज्ञः । सानुक्रोशः सदयः । समयज्ञः आचारज्ञः । ते यश इत्यन्वयः ॥ १९ ॥ दम इति । "शमश्चित्तप्रशान्तिःस्याद्दम इन्द्रियनिग्रहः" ॥ २० ॥ अभिजनं आभिजात्यं । समागतः युद्धंकृतवानस्मीत्यर्थः ॥ २१ ॥ प्रमत्तं युद्धपरवशं । अर्हति । उक्तगुणो राम इति शेषः । अदर्शने तव । दर्शने त्वेवमभूदितिभावः ॥ २२ ॥ विनिहतात्मानं विशेषेण निहतबुद्धिं । धर्मध्वजं धर्मलिङ्गं । वस्तुतो धर्मरहितमित्यर्थः ॥ २३ ॥ एतदेव स्पष्टयति—सतामिति ॥ धर्मच्छद्माभिसंवृतं धर्मव्याजयुक्तं ॥ २४ ॥ यदा नापकरोमि यस्मान्नापाकरवं । त्वां नावजाने । त्वय्यवमानं नाकरवमित्यर्थः । तस्मादकिल्बिषं मां किमर्थं हंसीति संबन्धः ॥ २५ ॥ फलेत्यस्य श्लोकस्य पूर्वेण संबन्धः ॥ २६ ॥ हे राजन् अधर्मसंहितं अधर्मकृतं । लिङ्गमपि ते अस्ति दृश्यतेच स्पष्टमवगम्यते चेत्यर्थः । कुत इत्यत्राह क

॥ १५ ॥ १६ ॥ **शि०** चरितव्रतः चरितानिकृतानिव्रतानिवेदोक्तकर्माणियेनसः ॥ १७ ॥ **ती०** समयज्ञः उचितानुचितसमयज्ञइत्यर्थः । करुणवेदी विचारादिसामग्रीसमेतस्सन् आश्रयान् रक्ष्यत्वेनवेत्तीतिकरुणवेदी ॥ **शि०** करुणवेदी करुणं दयावन्तंवेत्तिस्वकीयत्वेनजानातितच्छीलः । प्रजानांहितेइष्टसाधनेरतः । समयज्ञः समयंकार्योचितकालंजानातिसः । दृढव्रतः अप्रच्युतसंकल्पः रामोस्तीत्येतत्तवयशः भुविसर्वभूतानिसर्वेप्राणिनः कथयन्ति । श्लोकचतुष्टयमेकान्वयि ॥ १९ ॥ **ति०** क्षमा शक्यप्रतिक्रियापकारसहिष्णुता ॥ २० ॥ **वि०** अन्येनसंयुक्तं अतएव ते त्वयि प्रमत्तं असावधानं मां नवेद्धुमर्हसीति बुद्धिः तवादर्शने तवदर्शनात्प्रागुत्पन्ना ॥ २२ ॥ **रामानु०** विनिहतात्मानं गूढात्मानं ॥ **वि०** विनिहतात्मानं अधर्माचरणान्नष्टात्मानं ॥ **शि०** विनिहतात्मानं विनिहतः घातितः आत्मा ममदेहोयेनतं ॥ २३ ॥ **ति०** यदा यस्मात् । पापंनकरोमि । नेत्यस्यानुकर्षः । **तनि०** अविभाव्यंकलहनिमित्तमित्याह—विषये देशे । पुरे पट्टणेवा । ते तुभ्यं । नापकरोमि भूतेलट् । त्वांनावजाने त्वयिविषयेअवज्ञांनाकरवं । आवयोस्सामन्तत्वाद्यभावात्सीमाविवादोवाजलविवादोवागोभूम्यादिविवादोवाकुलगत-

[पा०] १ इदमर्धं झ. ट. पाठयोर्नदृश्यते. २ इदमर्धं यदहंयुद्धसंरब्धइत्यर्धात्परं झ. ट. पाठयोर्दृश्यते. ३ छ. झ. ट. कोत्र. ४ छ. ज. झ. ट. संरब्धस्त्वत्कृतेनिधनंगतः. ५ क. ख. ग. ङ.—ट. महोत्साहः. ६ छ. झ. ट. इत्येतत्सर्वं. ७ छ. झ. ट. सत्त्वं. ८ क.—छ. झ. ट. प्यपकारिषु. ९ ख. झ. ट. प्रतिषिद्धस्सन्सुग्रीवेण. १० ङ. च. ज. संयुक्तं. ११ छ. झ. वेद्धुमर्हसि. क. ज. ट. वेद्धुमर्हति. १२ छ. झ. इतिते. १३ ङ. झ. ट. पापंकरोम्यहं. १४ ख. घ. ङ च. ज. ञ. त्वांप्रतियुध्येहंकस्मान्मां. क. झ. ट. मवजानेहं. घ. त्वांप्रतियोत्स्यामि. १५ ङ. च. ज. ञ. राजानंचवनौकसां.

राम[1] राजकुले जातो धर्मवानिति विश्रुतः ॥ अभव्यो भव्यरूपेण किमर्थं [2]परिधावसि ॥ २८ ॥
साम दानं क्षमा धर्मः सत्यं धृतिपराक्रमौ ॥ पार्थिवानां गुणा राजन्दण्डश्चा[3]प्यपराधिषु ॥ २९ ॥
वयं वनचरा राम मृगा मूल[4]फलाशनाः ॥ एषा प्रकृतिरस्माकं पुरुषस्त्वं [5]नरेश्वरः ॥ ३० ॥
भूमिर्हिरण्यं [6]रूप्यं च विग्रहे कारणानि च ॥ [7]अत्र कस्ते वने [8]लोभो मदीयेषु फलेषु वा ॥ ३१ ॥
नयश्च विनयश्चोभौ निग्रहानुग्रहावपि ॥ राजवृत्तिरसंकीर्णा न नृपाः कामवृत्तयः ॥ ३२ ॥
त्वं तु कामप्रधानश्च [9]कोपनश्चानवस्थितः ॥ [10]राजवृत्तैश्च संकीर्णः शरासनपरायणः ॥ ३३ ॥
न तेऽस्त्यपचितिर्धर्मे नार्थे बुद्धिरवस्थिता ॥ इन्द्रियैः कामवृत्तः सन्कृष्यसे मनुजेश्वर ॥ ३४ ॥
हत्वा बाणेन काकुत्स्थ मामिहानपराधिनम् ॥ किं वक्ष्यसि सतां मध्ये [11]कर्म कृत्वा [12]जुगुप्सितम् ॥ ३५ ॥
राजहा ब्रह्महा गोघ्नश्चोरः प्राणिवधे रतः ॥ नास्तिकः परिवेत्ता च सर्वे निरयगामिनः ॥ ३६ ॥
सूचकश्च कदर्यश्च मित्रघ्नो गुरुतल्पगः ॥ [13]लोकं पापात्मनामेते गच्छन्ते नात्र संशयः ॥ ३७ ॥
अधार्यं चर्म मे सद्भी रोमाण्यस्थि च वर्जितम् ॥ अभक्ष्याणि च मांसानि त्वद्विधैर्धर्मचारिभिः ॥ ३८ ॥
पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्रेण राघव ॥ शल्यकः श्वाविडो गोधा शशः कूर्मश्च पञ्चमः ॥ ३९ ॥

इति ॥ २७ ॥ अभव्यः क्रूरः । भव्यरूपेण सौम्यरूपेण । परिधावसि चरसि ॥ २८ ॥ साम सान्त्वनं ॥ २९ ॥ लोके कस्यचिद्वधे अपराधस्तदर्थलाभेच्छा वा हेतुर्भवेत् । तत्र नाद्य इत्याह—वयमिति । पुरुषः मनुष्यः । नच केवलमनुष्यः अपितु नरेश्वरः ॥३०॥ द्वितीयोपि नेत्याह—भूमिरिति ॥ लोके भूम्यादीनि कलहे कारणानि भवन्ति । अत्र अन्येषु वा मदीयेषु फलेषु ते को लोभः किं विषयेच्छा वर्तते ॥ ३१ ॥ नयोनुग्रहश्च सद्राजधर्मौ । विनयो विपरीतनयः निग्रहश्च कुराजधर्मौ । इत्येषा राजवृत्तिरसङ्कीर्णा ग्राह्या । तथाच नृपाः कामवृत्तयो नस्युः । स्वेच्छया नयो विनयश्च निग्रहोनुग्रहश्च राजभिर्नकार्या इत्यर्थः ॥ ३२ ॥ अनवस्थितः अमर्यादः । राजवृत्तैः राजचरितैः हेतुभिः संकीर्णः । संकीर्णराजवृत्त इत्यर्थः । शरासनपरायणः यदृच्छयायं हन्तुमिच्छसि तं हंसीत्यर्थः ॥ ३३ ॥ अपचितिः पूजा । धर्मश्रद्धा नास्तीत्यर्थः । अवस्थिता व्यवस्थिता । परद्रव्याभिलाषिणीत्यर्थः । कामे च न व्यवस्थेत्याह—इन्द्रियैरिति ॥ ३४ ॥ मां हत्वा स्थितः त्वं जुगुप्सितं कर्म कृत्वा सतां साधुकर्मकारिणां मध्ये किं वक्ष्यसि ॥ ३५ ॥ परिवेत्ता ज्येष्ठेऽनूढे दारपरिग्रहकृत् । “परिवेत्तानुजोनूढे ज्येष्ठे दारपरिग्रहात्” इत्यमरः । निरयगामिनः नरकगामिनः ॥ ३६ ॥ सूचकः पिशुनः । कदर्यः लुब्धः । गच्छन्ते गच्छन्ति ॥ ३७ ॥ किमेवं निन्दसि मृगयायां मृगवधस्यादोषत्वादित्यत्राह–अधार्यमिति ॥ मृगचर्मवत् मे चर्म न धार्यं । मे रोमाणि ऊर्णादिवन्नास्तरणार्हाणि । मे अस्थि च गजास्थिवन्न स्पृश्यं। मांसानि च न भक्ष्याणि । अतः किमर्थं मां हतवानसि ॥ ३८ ॥ अभक्ष्यता कुत इत्यत्राह—पञ्चेति ॥ शल्यकः श्वाविडः गोधा शशः कूर्मश्चेति पञ्चनखाः

वैरंवा स्वयंवरादौनार्यादिविषयकविवादोवानास्तीतिभावः ॥ २५ ॥ **स०** भव्यरूपेण मङ्गलरूपेण । संहारकर्तृत्वेनभव्यरूपेण रुद्ररूपेणेत्यप्यर्थः ॥ २८ ॥ **तनि०** वयंवनचराः भवन्तः पुरचराः । वयंमृगाः भवन्तोमनुष्याः । वयंमूलफलाशनाः यूयंराजान्नभोजनाः । नरेश्वरस्त्वं वयंपरिचारकाः ॥ ३० ॥ **ति०** रूपं रूप्यं ॥ ३१ ॥ **ति०** शरासनपरायणः यत्रक्वापिशराणामसनंत्यागः तत्परायणः ॥ ३३ ॥ **वि०** परिवेत्ता ज्येष्ठेअकृतदारेऽकृताग्निहोत्रेच कृतदारःकृताग्निहोत्रोऽनुजः ॥ ३६ ॥ **स०** गच्छन्तइतिपदव्यत्यासेन रामस्यतदनर्हत्वंसूचयति ॥ ३७ ॥ **ती०** शल्यवाञ्शल्यः । अर्शआदित्वादच् । शल्यएवशल्यकः । शुक्तिकाकारशल्यावृतसर्वाङ्गोजन्तुविशेषः । श्वाविधः कण्टकाकारदीर्घरोमभिः श्वानंविध्यतीति श्वाविधः । **टी०** पञ्चनखत्वात्कथमयोग्यमित्याशंक्ययोग्यान्पञ्चनखान्संपरिचष्टे—**पञ्चेति** ॥ **स०** ब्रह्मक्षत्रेणेत्यत्र समाहारउत्तरपदलोपीवासमासः ॥ **शि०**

[पा०] १ छ. झ. त्वंराघवकुले. २ छ. झ. ट. परिधावसे. ३ क.—ट. प्यपकारिषु. ४ च. छ. झ. ट. फलाशिनः. ५ क. घ. च. छ. झ. नरेश्वर. ६ रूपंच. ७ च. छ. झ. ट. तत्र. ८ ख. ग. ङ. ज. ञ. लाभः. ९ ङ. च. ज. ञ. कोपी चाप्यनवस्थितः. १० झ. ट. राजवृत्तेषु. च. राजवृत्तेसमुत्तीर्णः. ज. राजवृत्तंसमुत्तीर्णः. ञ. राजवृत्तेश्चसंकीर्णः. ११ ङ. ज. कृत्वाकर्म. १२ ख. सुदुष्करं. १३ ट. लोके.

चर्म चास्थि च मे राजन्[1] स्पृशन्ति मनीषिणः ॥ अभक्ष्याणि च मांसानि सोऽहं पञ्चनखो हतः ॥४०॥
तारया वाक्यमुक्तोऽहं सत्यं सर्वज्ञया हितम् ॥ तदतिक्रम्य मोहेन कालस्य वशमागतः ॥ ४१ ॥
त्वया नाथेन काकुत्स्थ न सनाथा वसुन्धरा ॥ प्रमदा शीलसंपन्ना[2] धूर्तेन[3] पतिना यथा ॥ ४२ ॥
शठो नैकृतिकः क्षुद्रो मिथ्याप्रश्रितमानसः ॥ कथं दशरथेन त्वं जातः पापो महात्मना ॥ ४३ ॥
छिन्नचारित्रकक्ष्येण सतां धर्मातिवर्तिना ॥ त्यक्तधर्माङ्कुशेनाहं निहतो राम हस्तिना ॥ ४४ ॥
अशुभं चाप्ययुक्तं च सतां चैव विगर्हितम् ॥ वक्ष्यसे चेदृशं कृत्वा सद्भिः सह समागतः ॥ ४५ ॥
उदासीनेषु योऽस्मासु विक्रमस्ते[4] प्रकाशितः ॥ अपकारिषु [5]तं राजन्न हि पश्यामि विक्रमम् ॥ ४६ ॥
दृश्यमानस्तु युध्येथा मया यदि[6] नृपात्मज ॥ अद्य वैवस्वतं देवं पश्येस्त्वं निहतो मया ॥ ४७ ॥
त्वयाऽदृश्येन तु रणे निहतोऽहं दुरासदः ॥ प्रसुप्तः पन्नगेनेव नरः पानवशं[7] गतः ॥ ४८ ॥
मामेव यदि पूर्वं त्वमेतदर्थमचोदयः ॥ मैथिलीमहमेकाह्ना[8] तव चानीतवान्भवेत् ॥
[राक्षसं[9] च दुरात्मानं तव भार्यापहारिणम् ॥ ४९ ॥]
सुग्रीवप्रियकामेन यत्कृते[10]ऽसि हतस्त्वया ॥ कण्ठे बद्ध्वा[11] प्रदद्यां ते निहतं रावणं रणे ॥ ५० ॥

पञ्च भक्ष्याः । पञ्चनखेषु जन्तुषु एते पञ्चैव भक्ष्याः । नान्य इत्यर्थः । परिसंख्याविधिरयं । ब्रह्मक्षत्रेणेत्युपलक्षणं । त्रैवर्णिकेनेत्यर्थः । शलतीति शल्यः । "शल—श्वल्ल, आशुगमने" इत्यस्माद्धातोः "सानसिवर्णसिपर्णसितण्डुलाङ्कुशचषालेल्वलधिष्ण्यशल्याः" इति निपातनाद्यत्प्रत्ययः । ततः स्वार्थे कः । यद्वा शल्यं शङ्कुः । "वा पुंसि शल्यं शङ्कुर्ना" इत्यमरः । तत्सदृशानि रोमाणि शल्यानि तद्वान् शल्यः । अर्शआद्यजन्तः । ततः स्वार्थे कः । श्वानं विध्यतीति श्वाविधः । पचाद्यच् । "अन्येषामपि" इति दीर्घः । पृषोदरादित्वाड्डुकारः (?) । इमौ वराहविशेषौ ॥ ३९ ॥ उपसंहरति—चर्म चेति ॥ सोहं अभक्ष्यपञ्चनखान्तर्भूतोहं ॥ ४०—४१ ॥ पतिना पत्या शठः गूढविप्रियकृत् । निकृत्या अपकारेण जीवतीति नैकृतिकः । क्षुद्रः क्षुद्रकर्मकारी । मिथ्याप्रश्रितमानसः मिथ्याशान्तमनस्कः ॥ ४२—४३ ॥ छिन्ना चारित्रमेव कक्ष्या इभबन्धनं येन स तथा । सतां धर्मातिवर्तिना सतां धर्माः पूर्वोक्ताः सामदानसापराधजनदण्डनादयः । तानतीत्य वर्तत इति तथा । गजविषये अतिक्रान्तमर्यादेनेत्यर्थः ॥ ४४ ॥ ईदृशं कृत्वा स्थितस्त्वं सद्भिः ईदृशं अशुभत्वादिविशिष्टं वक्ष्यसे । अशुभकारीत्येवं वक्ष्यसीत्यर्थः ॥ ४५ ॥ अपकारिषु रावणादिषु ॥ ४६—४७ ॥ अदृश्येनेति च्छेदः ॥ ॥ ४८ ॥ एतदर्थं मैथिल्यानयनार्थं । भवेत् भवेयम् । पुरुषव्यत्यय आर्षः ॥ ४९ ॥ यत्कृते यस्य रावणस्यकृते हतोसि । तं कण्ठे बद्ध्वा ते प्रदद्यामिति

पञ्चनखाःशल्यकादयः पञ्चैवभक्ष्याः । परिसंख्याविधिरयं । रागादन्यत्रापिभक्षणस्यप्राप्तत्वात् । अतएवैवकारलाभः । तथाच मीमांसा—" विधिरत्यन्तमप्राप्तौनियमःपाक्षिकेसति । तत्रचान्यत्रचप्राप्तौपरिसंख्येतिगीयते " इति ॥ ३९ ॥ **स०** पञ्चमीं विहायदशरथेनेतितृतीयाप्रयोगेण नसाक्षाज्जनिर्विवक्षिता किंतुप्रादुर्भावरूपैवेतिसूचयति ॥ ४३ ॥ **ती०** चकारःकिमित्यर्थकः । किंवक्ष्यसे वक्ष्यसि ॥ ४५ ॥ **शि०** दृशीति । हेनृपात्मज, दृशी सर्वद्रष्टा अतएव अमानः सर्वद्रष्टृत्वादिगर्वरहितः । किंच नमानः पूजावान् यस्मात्सः सर्वपूज्यइत्यर्थः । त्वंयदिमयासहयुधियुध्येथाः तदा अद्यैवमयानिहतः ताडितएवत्वं स्वतं अतिविस्तृतं । देवं मद्युद्धोत्साहजनितकान्तिं । त्वंपश्येः । एतेनसुग्रीवस्याल्पबलत्वान्ममातीवयुद्धोत्साहोनजातइतिध्वनितं । तुशब्दोयद्यर्थे । वैवशब्दौएवार्थे ॥ ४७ ॥ **ति०** अतस्त्वंपापवशंगतइत्यर्थः । **टीका०** ननुवालिसुग्रीवयोर्युद्धेरामस्त्वदृश्योभूत्वाकथंवालिनंहतवानिति चेत्सत्यं—" आहूयवालिनंब्रह्माददौवरमनुत्तमम् । प्रतीपवर्तिनोभूयादर्धंबलमरिंदम " इतिवरप्रदानान्नाभिमुख्येनयुद्धकरणं ॥ ४८ ॥ **स०** एकेतिरामसंबोधनं प्रधानत्वाद्भार्यारहितत्वाद्वा । " राजाहस्सखिभ्यः—" इतिसमासान्तविधेरनित्यत्वाद्वा एका-

[**पा०**] १ ङ.—ट. रामनस्पृशन्ति. २ छ. झ. ञ. ट. शीलसंपूर्णा. ३ क. ख. ग. ङ.—ट. पत्येवचविधर्मणा. ४ क. ङ.—ट. विक्रमोयं. ५ क. ग. ङ. च. छ. झ ञ. ट. तेरामनैवपश्यामि. ६ ङ. झ. ट. युधि. ७ क. ग. च.—ञ. पापवशं. ८ ख. त्वानयिष्याम्यसंशयं. ९ इदमर्धं घ. च.—ञ. पाठेषुदृश्यते. १० क. ङ. ज.—ट. यदहंनिहतस्त्वया. ११ क. ङ. बध्वादशग्रीवंदद्यांते.

न्यस्तां सागरतोये वा पाताले वाऽपि मैथिलीम् ॥ आनयेयं तवादेशाच्छ्वेतामश्वतरीमिव ॥ ५१ ॥

योजना । सुग्रीवसख्यनिमित्तभूतं मैथिल्यानयनं च तारया पूर्वनिवेदितमिति ज्ञेयं ॥ ५० ॥ श्वेता- मश्वतरीमिव मधुकैटभाभ्यां पाताले निरुद्धां श्वेताश्वतरीरूपां श्रुतिं हयग्रीव इवेत्यर्थः ॥ ५१ ॥

हेतिसाधु ॥ ४९ ॥ **ती०** आनयेयमिति । ननूक्तरीत्यावालिनस्सीतानयनसामर्थ्यंज्ञात्वावालिनस्सख्यंनरामेणकिमितिकृतमिति चेत् तत्रसुग्रीवंप्रतिवालिवधस्यप्रतिज्ञातत्वाद्वैत्वन्तरसद्भावाच्च । तथाचस्कान्दे—" अभयेवालिनेदत्तेप्रतिज्ञापरिहीयते । रावणस्यसखावालीरावणेपित्रजेत्तुमाम् । रावणस्यवधाभावादवतारफलंनहि " इति । " तंदृष्ट्वाराघवंवालीलक्ष्मणंचमहाबलं " इत्यारभ्यसर्गसमाप्तिपर्यन्तस्यवास्तवार्थोऽयमर्थः । वालिनिश्रीरामनिष्ठुरभाषणेप्रवृत्तेऽपिवालिवाणीश्रीराममीश्वरंमत्वास्तौति । दृष्ट्वेत्यादि । परुषं बाह्यदृष्ट्यापरुषवत्प्रतीयमानं । वस्तुतःप्रश्रितं धर्मसंयुतं अगर्वितंवाक्यमब्रवीदित्यन्वयः । तदेवाह पराङ्मुखेत्यादि । पराङ्मुखवधंपराङ्मुखस्यविषयलोलुपस्यममवधंकृत्वात्वयाकोनुगुणः निर्वक्तुमशक्यस्सद्गुणःप्राप्तः । यतः यस्मात्कारणात् । युद्धसंरंभोऽहंत्वत्कृतेनिधनंगतः त्वत्कृते त्वन्निमित्तं । त्वयानिधनंगतइत्यर्थः । अतोमयापीतिशेषः । सुगुणःप्राप्तइतियोजना । "राजात्वशासन्पापस्यतदवाप्नोतिकिल्बिषं " इतिवचनात्मद्दण्डनेनतत्परिहाररूपगुणस्त्वयाप्राप्तः । "राजभिर्धृतदण्डास्तुकृत्वापापानिमानवाः । निर्मलाःस्वर्गमायान्तिसन्तःसुकृतिनोयथा "इतिवचनात्मयापिनिष्कल्मषत्वरूपगुणःप्राप्तइतिभावः । ममसुग्रीवसख्यंश्रुत्वापियुद्धायागत्यमयाकिमर्थंहतोसीत्याशङ्क्य सुग्रीवहस्तवधान्ममदैवादुत्कृष्टमुक्तिकारणत्वद्धस्तवधोजातइत्याह—**कुलीनइत्यादिश्लोकपञ्चकेन** । कुलीनत्वादींस्तवगुणाञ्श्रुत्वा शमदमादिराजधर्ममपिविचार्यतवाग्र्यमभिजनंचसंप्रधार्ययुद्धायनगन्तव्यमिति तारयाप्रतिषिद्धोपिअन्येनसंसक्तंवेद्धुंनार्हतीतितवादर्शनेसतिमेबुद्धिरुत्पन्नाबभूवेतिकृत्वासुग्रीवेणसमागतः । तथापि त्वंतुप्रमत्तंमांहतवान् । अतोममत्वद्धस्तहननमङ्गलंजातमित्यन्तेनवाक्यशेषेणयोजना । अतएवत्वामेवंमन्यइत्याह—**नत्वामित्यादिना** । त्वांविनिहतात्मत्वधर्मध्वजत्वाधार्मिकत्वपापसमाचारत्वादिविशेषणविशिष्टंनजाने । किंचसतांवेषधरत्वादिविशेषणविशिष्टंचनजानामि । किंत्वपहतपाप्मत्वादिगुणकमीश्वरमेवजानामीत्यर्थः । नन्वनपराधिनस्तवघातुकस्यममेश्वरत्वंदोषराहित्यंवाकुतइत्यतआह—**विषयइत्यादिना** । त्वमप्यकिल्बिषंनहंसि । अहमपितेविषयेदेशेपुरेवायदानापकरोमि अपकारंनकृतवान् । त्वांनावजानेच । तथापिफलमूलाशिनंवानरमप्रतियुध्यन्तमन्येनसमागतंमांहंसि । तत् तस्मात् मयिदोषसद्भावादेवेत्यर्थः । किंच क्षत्रियकुलेऽवतीर्यलोकानुग्रहार्थंजगन्मर्यादांपालयतःपरमकरुणाशालिनस्तवसुतरामन्यायाचरणंनसंभविष्यतीत्याशयेनाह—**धर्मलिङ्गेत्यादिसार्धश्लोकेन** । हेराम राजकुलेजातःधर्मवानितिविश्रुतस्सन् अर्थं प्रयोजनमुद्दिश्याभव्यस्सन् भव्यरूपेणपरिधावसिकिं । क्रूरकर्मसमाचारःकिं । उभयमपितवनघटतइतिभावः । राजनीतौविचार्यमाणायां मद्वधस्तवयुक्तएवेत्याशयेनाह—**सामदानमिति** । अपकारिषुपापिषु वैरबुद्ध्या हतवन्तंमांकथमेवंस्तौषीत्याशङ्क्यविचार्यमाणेतवममचवैरप्रसक्तिरेवनास्तीत्याशयेनाह—**वयमिति** । कानितर्हिवैरकारणानीत्याकाङ्क्षायामाह—**भूमिरिति** । तवममचैतादृशकारणानिनसन्तीतिभावः । किंच**नयश्चेति** । नृपाअपिकामवृत्तयोनभवन्ति किमुतेश्वरस्त्वमितिभावः । रागद्वेषादियुक्तस्येन्द्रियपरवशस्यमर्त्यस्यममेश्वरत्वंकुतइत्याकाङ्क्षायांनिर्गुणेश्वरत्वमेवप्रतिपादयति—**त्वमित्यादिश्लोकद्वयेन** । तुकिमित्यर्थे । मनुजेश्वर मनुजश्चासावीश्वरश्चेतितथा । मनुष्यत्वेनावतीर्णेश्वरइत्यर्थः । कामप्रधानः कामस्यप्रधानः निर्जितकामइत्यर्थः । कोपनः शत्रुसंहारविषयइतिशेषः । तत्संहारार्थमनवस्थितः तत्रतत्रसंचरमाणः । राजवृत्तेश्चसंकीर्णः त्यक्तराजधर्मइत्यर्थः । वानप्रस्थधर्मयुक्तत्वादितिभावः । तेधर्मे सामान्यधर्मेपिअपचितिः पूजा आदरइत्यर्थः । कास्ति मनुष्याधिकारिकत्वाच्छास्त्रस्येतिभावः । तेबुद्धिः अर्थेपिनावस्थिता । लक्ष्मीपतित्वात् । अतएवैतादृशविशेषणविशिष्टस्त्वंकामवृत्तस्सन् इन्द्रियैः कृष्यसेकिं नकृष्यसएवअतएवत्वमीश्वरइतिभावः ॥ तथाप्यनपराधित्वद्वधजनितदुष्कृतकर्माऽहंसतांकिमुत्तरंवक्ष्यामीत्यतआह—**हत्वेति** । बाणेनानपराधिनंमांहत्वादुष्कृतंकर्मकृत्वासतांमध्येवक्ष्यसिकिं । किंत्वनपराधिनमेवमांहत्वा अतएवंसुकृत्वासतांमध्येवक्ष्यसीत्यर्थः । किंचापराधिनोवानरस्यममवधेनतवदोषशङ्कैवनास्तीत्याशयेनाह—**राजहेत्यादिश्लोकद्वयेन** । एतादृशानामेवनरकः अपराधिनोममघातुकस्यतत्र तुनास्तीतिभावः । किंचानुपयोगिचर्मादियुक्तमद्वधएवममदोषसद्भावद्योतकइत्याशयेनाह—**अधार्यंचर्मेत्यादिश्लोकत्रयेण** । तारयानिवारितोपित्वद्धस्तवधकाङ्क्षयैवयुद्धायागतोस्मीत्याशयेनाह—**तारयेति** । सर्वज्ञयापितारयाभर्तृमोहेनाहितमुक्तस्संस्तदतिक्रम्यकालस्येश्वरस्यतववशंपार्श्वेदत्वमागतः । सत्यं नसंदेहः । त्वयेति । विधर्मणापत्याशीलसंपन्नाप्रमदा यथा सनाथा तथा तादृशेन तादृशनाथेनत्वया पृथिवीसनाथानकिंतुदुष्टनिग्रहादिरूपपरमकल्याणगुणसनाथेनत्वयासनाथेत्यर्थः । ममकपटयुद्धकारणहेतुनाशठत्वादिगुणयुक्तत्वादेतादृशेनपृथिवीसनाथाकथंभवतीत्याशंक्याह—**शठइत्यादि** । यतोमहात्मना दशरथेनत्वंजातः ततः " कारणगुणपूर्वकत्वात्कार्यगुणस्य " इतिन्यायेनसकलकल्याणगुणयुक्तस्त्वंकथंशठः कथंनैकृतिकः कथंपापइत्येवंयोजना । तादृशोनभवसीतिभावः । ईश्वरेणत्वयानिहतोऽहंकृतार्थइत्याशयेनश्रीरामेस्वतन्त्रेश्वरगुणान्प्रकटयति—**छिन्नचारित्रेत्यादि** । रामहस्तिनानिहतोऽहं कृतार्थइतिशेषः । रामस्येश्वरत्वादेवछिन्नचारित्रादियुक्तत्वमितिभावः । मयाहतस्यनवकथंकृतार्थत्वमतआह—अशुभमिति । समागतइत्यत्र सः मा गतः इतिच्छेदः । शुभमयुक्तंसतांविगर्हितंवमामि-

युक्तं यत्प्राप्नुयाद्राज्यं सुग्रीवः स्वर्गते मयि ॥ अयुक्तं यदधर्मेण त्वयाऽहं निहतो रणे ॥ ५२ ॥
काममेवंविधं लोकः कालेन विनियुज्यते ॥ क्षमं चेद्भवता प्राप्तमुत्तरं साधु चिन्त्यताम् ॥ ५३ ॥
इत्येवमुक्त्वा परिशुष्कवक्त्रः शराभिघाताद्व्यथितो महात्मा ॥
समीक्ष्य रामं रविसन्निकाशं तूष्णीं बभूवामरराजसूनुः ॥ ५४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे सप्तदशः सर्गः ॥ १७ ॥

अष्टादशः सर्गः ॥ १८ ॥

रामेणवालिनंप्रतिसुग्रीवेजीवतिस्नुषातुल्यतद्भार्याहरणरूपतदपराधादिहेतुभिस्तद्वधस्यधर्म्यत्वसमर्थनम् ॥ १ ॥ श्रीरामगर्हणानुतप्तेनवालिनारामक्षमापणपूर्वकमङ्गदपालनप्रार्थना ॥ २ ॥ रामेणाङ्गदपालनादिप्रतिज्ञानेनवालिसमाश्वासनम् ॥३॥

इत्युक्तः प्रश्रितं वाक्यं धर्मार्थसहितं हितम् ॥ परुषं वालिना रामो निहतेन विचेतसा ॥ १ ॥

राज्यार्थं सुग्रीवो मां हतवानित्येतद्युक्तं । त्वं तु मां हतवानित्येतत्त्वयुक्तमित्यर्थः । ज्ञातीनामेवंविधकृत्यस्य स्वाभाविकत्वादिति भावः ॥ ५२ ॥ लोकः एवंविधे मरणरूपे कर्मणि विनियुज्यते । जातस्य मरणं स्वभाव इत्यर्थः । भवता प्राप्तं अदृश्यतया प्रहरणं क्षमं चेत् तत्र साधूत्तरं चिन्त्यतामित्यर्थः ॥ ५३ ॥ परिशुष्कवक्त्रः बहुभाषणक्लेशादिति भावः ॥ ५४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने सप्तदशः सर्गः ॥ १७ ॥

अथ रामस्योत्तरमष्टादशे—इत्युक्त इत्यादि ॥

तिशेषः । यादृशंकृत्वा हत्वेत्यर्थः । सवाली मा मांगतः मत्पार्षदत्वंप्राप्तइतित्वंसद्भिस्सहवक्ष्यसे । एतादृशत्वत्कथनमेवममकृतार्थत्वसूचकमितिभावः। निरुपाधिककरुणामृतसागरस्यतवमहिमानंकोवावर्णयितुंशक्तइत्याशयेनाह—**उदासीनेष्विति**। हेराम अपकारिष्वस्मासु त्वद्भक्तसुग्रीवायकृतापकारएव तस्मैकृतापकारइतिकृत्वाऽपकारिष्वित्युक्तिः । अस्मास्विति बहुवचनं ताराङ्गदाद्यभिप्रायेण । एतादृशापकारिष्वस्मासुतेजोविक्रमःब्रह्मादीनामपिदुर्लभःपदारविन्दविन्यासःप्रकाशितः । पादारविन्दंप्रदर्शितमित्यर्थः । उदासीनेषुसर्वतोनिवृत्तेषुमुनिषु तंविक्रमंपादारविन्दविन्यासंनपश्यामीतियोजना । अतोऽहंकृतकृत्यइतिभावः । पादारविन्दप्रदर्शनंतु “ बहुमान्यचतंवीरंवीक्षमाणंशनैरिव । उपयातौमहावीरौभ्रातरौरामलक्ष्मणौ ” इत्युक्तेः । रामस्यपादारविन्दप्रदर्शनार्थमेवासन्नमरणवालिसमीपागमनमित्यवगन्तव्यं । त्वयादृश्यमानः त्वत्प्रतियोद्धाजीवितुंनशक्नोतीतिशङ्कयाऽहमदृश्यएवत्वांहतवानित्याशङ्कायांसत्यां तथात्वंत्वदन्येषामेवतवतुनास्तीत्याशयेनाह—**दृश्यमानइत्यादि**। यदिःकिमित्यर्थे । हेनृपात्मज अद्यमयादृश्यमानस्सन्युध्येथाअपि मयाहतस्सन्नैवस्वतंदेवंपश्येःकिं नपश्येरित्यर्थः । ईश्वरस्यतवमरणशङ्कानास्तीतिभावः । समक्षंरामेणसहप्रतियुध्य बालीनिहतइतिकीर्तिर्मयानलब्धेतिदुःखितआह । त्वयाऽदृश्येनेति । पापवशंगतोऽहंअदृश्येनत्वयानिहतइतिसंबन्धः । त्वदाज्ञाकरणरूपसेवाभाग्यंमयानलब्धमित्याशयेनखिद्यति । सुग्रीवप्रियकामेनेत्यादि । पूर्वंराज्यस्थंसुग्रीवंकिमर्थंनिष्कासितवानित्यतआह—**युक्तमिति**। अधर्मेण मन्नाशनिमित्तबिलद्वारपिधानरूपाधर्मेण । सुग्रीवः राज्यंप्राप्नुयादितियत् तदयुक्तं । अहंत्वयारणेनिहतः । इतःपरंमयिस्वर्गतेसतिसुग्रीवोराज्यंप्राप्नुयादितियत् तद्युक्तमितिसंबन्धः । अधर्मतोराज्यस्वीकारान्निष्कासितइतिभावः । एतादृशंकिमर्थंहतवानस्मीतिचिन्ताक्रान्तंप्रत्याह—**काममिति**। एवंविधोलोकः क्षत्रियवृत्तिमाञ्जनः । यद्वा लोकएवंविधश्चेत् मादृशाधर्मचारीजनश्चेदित्यर्थः । कामंकालेनविनियुज्यते । अतोहेतोः राम भवताप्राप्तंमद्वधरूपंउत्तरं उत्तमं । क्षमंयुक्तंउत्तमंयथातथाचिन्त्यतां । मयाकृतपापप्रायश्चित्तरूपत्वान्मद्वधस्ययुक्तत्वमुत्तमत्वंचेतिभावः ॥ ५१ ॥ **स०** एवंविधोलोकःकालेनअदृष्टप्रेरकश्रीहरिणावियुज्यतइतिहेतोःकाममेतद्भवतु । भवताक्षमंचप्राप्तं । उत्तरं उत्तरत्रक्रियमाणंत्वत्कार्यंसाधुयथातथाचिन्त्यतां ॥ ५२ ॥ **स०** सूर्यसंकाशमित्यनेन वैरिसादृश्योक्त्यातन्निरीक्षणंतद्वदेवेतिसूचयति ॥ **ति०** अस्यसर्गस्यतीर्थेनरामस्तुतिपरतयायद्योजनंतन्नकविनिबद्धस्यवक्तुर्वालिनस्तात्पर्यविषयभूतं । “ यदयुक्तंमयापूर्वंप्रमादाद्वाक्यमप्रियम् । तत्रापिखलुमेदोषंकर्तुंनार्हसिराघव ” इत्यग्रेवाल्युक्तेः । नापिवाल्मीकेः तस्यदुरुक्त्यनुवादकत्वात् । अतात्पर्यविषयमपिबुद्धिवैभवादक्षरार्थत्वेनवर्ण्यतइतिचेत्काव्यान्तरमेवभगवतस्स्तावकंक्रियतांकिमनेनप्रयासेनेतिदिक् ॥ ५४ ॥ इतिसप्तदशःसर्गः ॥ १७ ॥

रामानु० इत्युक्तइतिश्लोकस्स्वतन्त्रंवाक्यं । अन्यथारामशब्दोतिरिच्यते ॥ **ती०** वालिनारामःपरुषमुक्तः अधिक्षिप्तइत्यादेर-

[पा०] १ झ. एवंविधो. २ झ. बभौवानरराजसूनु० बभूवामरराजसूनुरित्यनन्तरं क. ग. पाठयोः तमुक्तवन्तंप्रवरंहरीणामथोत्तरंवाक्यमुवाचरामः । हितंचतत्त्वंवचनंप्रसक्तंसमस्तधर्मार्थसमाहितंच ॥ इतिश्लोकोदृश्यते.

तं निष्प्रभमिवादित्यं मुक्ततोयमिवाम्बुदम् ॥ उक्तवाक्यं हरिश्रेष्ठमुपशान्तमिवानलम् ॥ २ ॥
धर्मार्थगुणसंपन्नं हरीश्वरमनुत्तमम् ॥ अधिक्षिप्तस्तदा रामः पश्चाद्वालिनमब्रवीत् ॥ ३ ॥
धर्ममर्थं च कामं च समयं चापि लौकिकम् ॥ अविज्ञाय कथं बाल्यान्[1]मामिहाद्य विगर्हसे ॥ ४ ॥
अपृष्ट्वा बुद्धि[2]संपन्नान्वृ[3]द्धानाचार्यसंमतान् ॥ सौम्य वानरचाप[4]ल्यात्किं मां वक्तुमिहेच्छसि ॥ ५ ॥
इक्ष्वाकूणामियं भूमिः सशैलवनकानना ॥ मृगपक्षिमनुष्याणां निग्र[5]हप्रग्रहावपि ॥ ६ ॥
तां पालयति धर्मात्मा भरतः सत्यवागृजुः ॥ धर्मकामार्थतत्त्वज्ञो निग्रहानुग्रहे रतः ॥ ७ ॥
नयश्च विनयश्चोभौ[8] यस्मिन्सत्यं च सुस्थितम् ॥ विक्रमश्च यथादृष्टः स राजा देशकालवित् ॥ ८ ॥
[6]तस्य धर्मकृतादेशा वयमन्ये च पार्थिवाः ॥ चरामो[9] वसुधां कृत्स्नां धर्म[7]सन्तानमिच्छवः ॥ ९ ॥
तस्मिन्नृपतिशार्दूले भरते धर्मवत्सले ॥ पालयत्यखिलां भू[10]मिं कश्चरेद्धर्मनि[11]ग्रहम् ॥ १० ॥
[12]ते वयं [13]धर्मविभ्रष्टं स्वधर्मे परमे स्थिताः ॥ भरताज्ञां पुरस्कृत्य नि[14]गृह्णीमो यथाविधि ॥ ११ ॥

वालिना इत्युक्त इत्यन्वयः । विचेतसेत्यनेन परुषवचनमज्ञानकृतमित्युच्यते ॥ १ ॥ तमित्यादि द्वौ ॥ तदा पूर्वं । अधिक्षिप्तो रामः धर्मार्थगुणसंपन्नं अनुत्तमं यथाभवतितथा पश्चाद्वालिनमब्रवीदिति योजना ॥२—३॥ समयं आचारं । "समयाः शपथाचारकालसिद्धान्तसंविदः" इत्यमरः । बाल्यात् अज्ञानात् ॥ ४ ॥ अपृष्ट्वा धर्मादिकमितिशेषः । वानरचापल्यात् वानरत्वकृतचापल्यात् ॥ ५ ॥ इयं जम्बूद्वीपात्मिका । लोके कस्यचिद्भूमेः स्वत्वेपि शैलवनादिकमाक्रम्यान्ये भूमिं पीडयन्ति तद्व्यावृत्त्यर्थमाह—सशैलेति । काननं महारण्यं । मृगादिनिग्रहानुग्रहावपि इक्ष्वाकूणामेव । कृत्यमिति शेषः ॥ ६ ॥ तां भूमिं ॥ ७ ॥ नयो नीतिः । विनयः शिक्षा । तावुभौ सत्यं च यथादृष्टः शास्त्रविहितः विक्रमश्च । एतत्सर्वं यस्मिन्सुस्थितं देशकालवित् स भरतो राजेतियोजना ॥ ८ ॥ धर्मकृतादेशाः धर्मकृतनियोगाः । कथं कनिष्ठेन ज्येष्ठनियोग इत्यपेक्षायां राजधर्मोयमित्याशयेनोक्तं धर्मपदं । धर्मसन्तानं धर्मवृद्धिं । यद्यपि भरतेन नादेशः कृतः तथापि नेदमसत्यं । यथाकथंचिद्भरतेन राज्यभरणस्य स्वीकृतत्वात्तदन्येषां तत्कुलीनानां तदादिष्टत्वं सिद्धमिति हृदयं । अत एवायोध्याकाण्डे दर्शितं—त्वं राजेति ॥ ९ ॥ धर्मनिग्रहं धर्महानिं ॥ १० ॥ धर्मविभ्रष्टं जनमितिशेषः ॥ ११ ॥

यमाशयः । यद्यपिवालिनोवाणीराममस्तौषीत् । वालीतंराममंपरुषमुक्तवानितिकृत्वा वालिनारामःपरुषमुक्तइत्याद्युक्तिः । अतएवश्रीरामोपिवालिपरुषोक्तिमनुसृत्यैवोत्तरंवक्ति " धर्ममर्थंचकामंच " इत्यादिना ॥ **ति०** प्रश्रितं प्रश्रयाभासोपेतं । एवंधर्मार्थसहितत्वंचाभासरूपमेव । तत्र " मामेवयदिपूर्वं " इत्यादिहिताभासोर्थाभासश्च । धर्माभासोराजहेत्यादि । परुषत्वंतुमुख्यमेव । निहतेनविरुद्धेन ॥ **स०** निहतेन बाणेनेत्यर्थः ॥ १ ॥ **शि०** अनुत्तमं अनुजदारग्रहणरूपाधर्मकर्मणाऽधमं ॥ ३ ॥ **तनि०** धर्मे वैदिकपुरुषार्थे । लौकिकंसमयं लौकिकाचारं । तेनद्वयोरेकभार्यत्वेपिमाससंवत्सरादिप्रतिनियतकालसंकेतः ॥ ४ ॥ **तनि०** विषयेवापुरेवातेकलहनिमित्तंनास्तीत्यस्योत्तरं । त्वदुपभुक्तवनगिर्युपवनपत्तनान्यस्मदीयानिनभवन्तिकिं । ज्ञातिभावोप्यस्ति । " त्वंवयस्यश्चहृद्योमे " " एकंदुःखंसुखंचनौ " इतिसुग्रीवसखस्यममभवान्ज्ञातिर्नभवतिकिं । " तेनाहंप्रतिषिद्धश्चहृतदारश्चराघव " इतितेनमांप्रतिनोक्तंकिं । " वस्त्रेणैकेनवानरः " इत्युक्तरीत्याएकवस्त्रस्सननिर्वासितःकिं । सुग्रीवगृहदारभूजलादिकंत्वयानगृहीतंकिं । स्त्रीविवादश्च " भ्रातुर्वर्तसिभार्यायां " इत्यनेनदर्शितः ॥ ६ ॥ **तनि०** ममतवचपरस्परज्ञानंपरिचयश्चनास्ति । ममगृहमागत्यानपराधिनंहतवानसीत्यस्योत्तरमाह । " तांपालयतिधर्मात्मा " इत्यारभ्य " कामतन्त्रप्रधानश्चनस्थितोराजवर्त्मनि " इत्यन्तं । त्वंसापराधएवेत्यर्थः ॥ ७ ॥ **ति०** यथादृष्टः अपरोक्षानुभवसिद्धः । सराजा अस्मिन्काले । सर्वभूमेरितिशेषः ॥ **स०** यथादृष्टः शास्त्रेक्षत्रियस्ययोविक्रमोदृष्टस्सइत्यर्थः ॥ ८ ॥ **ती०** धर्मकृतादेशाः धर्मइत्यधर्मस्याप्युपलक्षणं । धर्माधर्मकृतनियोगाः

[पा०] १ ख. न्मांधर्षयितुमिच्छसि. २ क. ग. संपन्नानाचार्यान्धर्मसंहितान्. ३ ङ. च. ज. ञ. नाचारसंमतान. ४ क. ख. ग. ङ.—ट. चापल्यात्त्वं. ५ ङ. च. छ. झ. ञ. ट. निग्रहानुग्रहेष्वपि. क. निग्रहप्रग्रहेष्वपि. ज. निग्रहानुग्रहावपि. ६ ङ. च. भरतस्यकृतादेशाः. ७ ख. धर्मसंस्थानं. ८ झ. यस्मिन्. ९ क. ख. सत्यविक्रमे. १० ङ.—ट. पृथ्वीं. ११ ङ.—ट. विप्रियं. १२ च. ज. नवयंमार्गविभ्रष्टाः. १३ क. ख. ग. छ. झ. ञ. ट. मार्गविभ्रष्टं. १४ ङ.—ट. चिन्तयामो.

त्वं तु [1]संक्लिष्टधर्मा च कर्मणा च विगर्हितः ॥ कामतन्त्रप्रधानश्च न स्थितो राजवर्त्मनि ॥ १२ ॥
ज्येष्ठो भ्राता पिता[2] चैव यश्च विद्यां प्रयच्छति ॥ त्रयस्ते पितरो ज्ञेया [3]धर्मे पथि हि वर्तिनः ॥ १३ ॥
[4]यवीयानात्मनः पुत्रः शिष्यश्चापि [5]गुणोदितः ॥ पुत्रवत्ते त्रयश्चिन्त्या [6]धर्मश्चेदत्र कारणम् ॥ १४ ॥
सूक्ष्मः पर[7]मदुर्ज्ञेयः सतां धर्मः प्लवङ्गम ॥ हृदिस्थः सर्वभूतानामात्मा वेद [8]शुभाशुभम् ॥ १५ ॥
चपलश्चपलैः सार्धं वानरैरकृतात्मभिः ॥ जात्यन्ध इव जात्यन्धैर्मन्त्रयन्[9]द्रक्ष्यसे नु किम् ॥ १६ ॥
अहं तु व्यक्ततामस्य वचनस्य ब्रवीमि ते ॥ न हि मां केवलं रोषात्त्वं विगर्हितुमर्हसि ॥ १७ ॥
तदेतत्कारणं पश्य यदर्थं त्वं मया हतः ॥ भ्रातुर्वर्तसि [10]भार्यायां त्यक्त्वा धर्मं सनातनम् ॥ १८ ॥
अस्य त्वं धरमाणस्य सुग्रीवस्य महात्मनः ॥ रुमायां वर्तसे [11]कामात्स्नुषायां पापकर्मकृत् ॥ १९ ॥

संक्लिष्टधर्मा धर्मविलोपकृत् । कर्मणा च विगर्हित इति अकृत्यकारीत्यर्थः ॥ १२—१३ ॥ आत्मन इति त्रिष्वप्यन्वेति । गुणोदित इति च । ते त्रयः पुत्रवच्चिन्त्याः । पुत्रशब्दोत्र दृष्टान्तार्थः । यथा पुत्रे पुत्रवद्वर्तते तथान्ययोरपि वर्तितव्यमित्यर्थः । पुत्रे पुत्रवद्वृत्तिर्नाम सम्यक् स्नेहः । " गगनं गगनाकारं " इतिवत् । एवं चिन्त्यत्वे किं प्रमाणं तत्राह—धर्मश्चेदिति । अत्र अस्मिन्नर्थे । धर्मः कारणं व्यवस्थापकं चेत् यदि धर्मो नानुवर्तनीयः तदा नैवं द्रष्टव्यं । अनुवर्तनीयश्चेत् अवश्यमेवं द्रष्टव्यमिति चेच्छब्दस्य भावः ॥ १४ ॥ सूक्ष्मः अतीन्द्रियः । अतएव सतामपि परमदुर्ज्ञेयः किमुत भवादृशस्येति भावः । यद्वा जनस्य धर्माधर्मकरणं न कोपि वेत्तुमर्हति । तर्हि को वेत्तीत्यत्राह—हृदिस्थ इति । सर्वभूतानां हृदिस्थः सर्वान्तर्यामी । अलुक् । आत्मा परमात्मा । शुभाशुभं शुभाशुभकरणं वेत्तीत्यर्थः । सूक्ष्मं धर्मं परमात्मना मया विना को वेत्तुं दक्ष इति भावः ॥ १५ ॥ त्वया तु न शक्य इत्याह—चपल इति ॥ किं नु द्रक्ष्यसे न किमपि द्रक्ष्यसीत्यर्थः ॥ १६ ॥ अस्य वचनस्य यवीयानात्मन इति पूर्वोक्तवचनस्य ॥ १७ ॥ वर्तसि वर्तसे ॥ १८ ॥ धरमाणस्य जीवितं धारयतः । अनेन जीवतो भ्रातुर्भार्या भ्रात्रा न ग्राह्या । मृतस्यतु

धर्माधर्मविचारार्थंनियुक्ताइत्यर्थः ॥ ९ ॥ **वि०** कामतन्त्रं कामरूपःपुरुषार्थः । सएवप्रधानोमुख्योयस्यसः ॥ १२ ॥ **ति०** अत्रचिन्तनेतथाधर्मः धर्मज्ञानमेवकारणं ॥ १४ ॥ **ति०** तच्चनसर्वेषांसुलभमित्याह—**सूक्ष्मइति** । सतांसूक्ष्मोयोधर्मःस परा सद्गुरूपदेशादिजा मा शोभायेषां तैरेवविज्ञेयः । अन्यैः परं अत्यर्थं । अविज्ञेयएव । किंच ईश्वरएवतज्ज्ञइत्याह—हृदिस्थइति । सर्वभूतानामात्मा तत्वभूतोव्यापकश्च । अतएवसर्वप्राणिहृदिस्थःसः सर्वभूतानां सर्वप्राणिनां शुभाशुभंवेद । एवंचान्तर्यामित्वात्तवपापमहंजानइतिव्यङ्ग्यमत्र ॥ **स०** परमैर्ज्ञानिभिर्विज्ञेयः ॥ १५ ॥ **ति०** जात्यन्धोजात्यन्धैरिव चपलैः अकृतात्मभिः आचार्याशिक्षितैर्वानरैस्सह । मन्त्रयन् निश्चिन्वन् । किंनु कथंनु । प्रेक्षसे ज्ञास्यसि । धर्ममितिशेषः । " रक्षसेनुकिं " इतिपाठे रक्षणीयप्रजाजातंकिंनुरक्षसि नकिमपि । अतोधर्मभ्रष्टोराजदण्ड्यस्त्वमितिभावः ॥ १६ ॥ **ति०** अस्यवचनस्य चपलश्चपलैरितिवचनस्य । व्यक्ततां व्यक्तोर्थोस्येत्यर्शआद्यजन्तंव्यक्तपदं । तद्भावोव्यक्तता तदर्थस्तंब्रवीमि ॥ **स०** हेव्यक्ततामस्य व्यक्ततमोगुण । तेवचनस्य " कस्मात्त्वंहंस्यकिल्बिषं " इत्यस्य । ब्रवीमि इत्युत्तरमितिशेषः । स्वार्थेतल्वा । व्यक्तं । अस्यवचनस्य ज्येष्ठइत्यादिवचनस्य । ब्रवीमि अर्थमितिशेषः ॥ १७ ॥ **ति०** धरमाणस्येति । सुग्रीवस्तुतवजीवननिश्चयाभावात्त्वत्पत्न्यांतारायांप्रागवर्तिष्ट । अतःपरंवर्त्स्यतिच । किंच त्रैवर्णिकेष्वपिदेवरस्यमृतभ्रातृस्त्रियामपुत्रायांवृत्तिदर्शनात्तिर्यग्योनिषुतस्यांवृत्तिर्नदोषः । तथावृत्तौचमरणज्ञानमेवप्रयोजकंतिर्यक्ष्वितिभगवदाशयः । अनेनत्रैवर्णिकेतरस्त्रीणांमृतभर्तृकाणांतरुणीनांस्वजातीयपुरुषाङ्गीकारोनाधर्मइतिसूचितं । दृश्यतेचतथाव्यवहारःशूद्रादिजातौ । नचमनुष्याधिकारस्यनिषेधादिशास्त्रस्यकथंतिर्यक्षुप्रवृत्तिरितिवाच्यं । तिर्यग्योनेरपिमनुष्यवद्राजादिव्यवहारदर्शनेनमनुष्यतुल्यज्ञानवत्त्वादस्त्येवायंदोषइत्याशयात् । किंचधर्मेऽनधिकारिणामपीन्द्रादीनांवृत्रवधादौब्रह्महत्यादिदोषस्मरणेननिषेधेषुतदतिक्रमप्रायश्चित्तादौचदेवानामधिकारवदेषामप्यधिकारेबाधकाभावः । किंच देवादीनांस्वयजनीयेन्द्रान्तराभावादनधिकारइतिपूर्वमीमांसायांनिर्णीतं । एवंचतदनपेक्षदानादिधर्मेषुब्रह्मविद्यायांचाधिकारोस्त्येवेत्युत्तरमीमांसायांस्पष्टं । तद्वदी-

[**पा०**] १ ख. संकीर्णधर्मश्च. क. छ. झ. संक्लिष्टधर्मश्च. २ छ. झ. पितावापि. ङ. च. ज. ञ. ट. पिताचापि. ३ क. धर्मवर्त्मानुगच्छता. घ. धर्मेहिपथि. ङ.—ट. धर्मेचपथि. ४ क. ख. यवीयान्सोदरःपुत्रः. ५ क. गुणान्वितः. ६ ङ.—ट. धर्मश्चैवात्र. ७ च.—ट. परमविज्ञेयः. ८ ख.—ज. शुभाशुभे. ९ छ.—ट. न्प्रेक्षसे. १० ङ. च. ज. ञ. भार्यायांदण्डोयं प्रतिपादितः. ११ च. कामंस्नुषायां.

तद्व्यतीतस्य ते धर्मात्कामवृत्तस्य वानर ॥ [1]भ्रातृभार्यावमर्शेऽस्मिन्दण्डोऽयं प्रतिपादितः ॥ २० ॥
नहि [2]धर्मविरुद्धस्य लोकवृत्तादपेयुषः ॥ दण्डाद[3]न्यत्र पश्यामि निग्रहं हरियूथप ॥ २१ ॥
न[4] हि ते मर्षये पापं क्षत्रियोऽहं [5]कुलोद्भवः ॥ २२ ॥
औरसीं भगिनीं [6]वापि भार्यां [7]वाऽप्यनुजस्य यः ॥ [8]प्रचरेत नरः कामात्तस्य दण्डो वधः स्मृतः ॥२३॥
भरतस्तु महीपालो वयं [9]त्वादेशवर्तिनः ॥ [10]त्वं तु धर्मादतिक्रान्तः कथं [11]शक्य उपेक्षितुम् ॥ २४ ॥
[12]गुरुर्धर्मव्यतिक्रान्तं प्राज्ञो धर्मेण पालयन् ॥ भरतः काम[13]वृत्तानां निग्रहे पर्यवस्थितः ॥ २५ ॥

ग्राह्येति तत्कुलधर्म इतिप्रतीयते । अतएवहि वालिनो बिलगमनानन्तरं मन्त्रिभिरभिषिक्तस्य सुग्रीवस्यतारापरिग्रहं रामो ननिन्दितवान् । अतएव प्रायोपवेशेऽङ्गदोवक्ष्यति "भ्रातुर्ज्येष्ठस्ययोभार्यां जीवतो महिषीं प्रियाम् । धर्मेणमातरंयस्तुस्वीकरोतिजुगुप्सितः" इति ॥ १९—२१ ॥ तर्हिशिक्षैव कर्तव्या किमर्थमवधीस्तत्राह—न हीति ॥ २२ ॥ औरसीं पुत्रीं । प्रचरेत गच्छेत् ॥ २३—२४ ॥ भरतस्तुमहीपाल इत्युक्तं विवृणोति—गुरुरिति ॥ धर्मव्यतिक्रान्तं धर्मव्यतिक्रमणं । पालयन् परामृशन् । गुरुः भरतश्च निग्रहेपर्यवस्थितः । वयं च तदादेशं विधिं शास्त्रंकृत्वा । नियन्तुं पर्यवस्थिताः । अतः कथं शक्य उपेक्षितु-

---

दृशानांज्ञानवतांतिरश्चामप्यधिकारेबाधकाभावः । किंच सर्वदेवतावाचकपदानामन्तर्यामीश्वरवाचकत्वेनसर्वत्रदेवानामधिकारोऽस्त्येव । नचब्राह्मणत्वाद्यभावात्तेषामनधिकारः । तेषामपिक्षत्रियत्वाद्वैवस्वतमन्वादेरिव । अतएवचन्द्रवरुणादीनांयज्ञस्स्मर्यतेपुराणेषु । तत्रतत्रकर्मण्यर्थवादतःफलकल्पनवत्पुराणस्यार्थवादैस्तदधिकारस्यापिकल्पयितुंयुक्तत्वात् । किंच "त्रैवर्णिकस्याधिकारः" इत्यत्रवेदतदर्थज्ञानवत्परं । अतोदेवादीनांतदधिकारस्सिद्धइतिभगवतोव्यासवाल्मीकिप्रभृतीनांचाशयः । जैमिनेस्त्वेतदंशेऽज्ञानमेव । अतएवतद्दूरीकरणार्थंमार्कण्डेयेनात्मानंप्रतिधर्मान्पृच्छतोजैमिनेर्विन्ध्यारण्यवासितत्वज्ञपक्षिमुखेनधर्मबोधनंकृतं । तेनहिपक्षिणांज्ञानानधिकारइतिस्वोक्तेस्तस्याविश्वासेजातेऽन्यत्रापिव्यासादिविरुद्धेस्वोक्तेऽर्थेतस्याप्रामाण्यग्रहोभविष्यतीतितदाशयइत्यन्यत्र विस्तरः । अतएवगृध्रराजस्यभगवतादाहादिकृतं । अग्रेचसंपातिनातद्भ्रात्राकरिष्यमाणमुदकदानादि नासंगतमितिदिक् ॥ **स०** धरमाणस्य प्राणान्धारयतः । जीवतइतियावत् । वर्तसे प्रवर्तसे । ननुवालिनःस्वस्मादधमसुग्रीवभार्यापहारित्वेनाल्पदोषत्वात् सुग्रीवस्यतुस्वोत्तमवालिभार्यास्वीकारित्वेनमहादोषित्वात्तदाच्छाद्यवालिवधे कथंभगवतादोषाविष्करणंक्रियतइतिचेत् । उच्यते । वालिनोल्पपापत्वात्तस्मैएतज्जन्मनिमरणलक्षणमल्पपापफलंददौ । सुग्रीवायतुस्वोच्चदारग्रहणलक्षणमहापातकस्यफलीभूतांमुक्तावानन्दोन्हाह्रप्राप्तिंश्रीकृष्णावतारेसहस्रवर्मनामकासुराविष्टतयाजनिकारणीभूतदोषोत्पादकवालिमारणंनिमित्तीकर्तुंचनतंजघानभगवान्रामः । तदुक्तंभगवत्पादैरनुव्याख्यानश्रीमन्महाभारततात्पर्यनिर्णययोः । "चन्द्रसुग्रीवयोश्चैवस्वोच्चदारपरिग्रहात् । प्राप्तहानिरभून्नैवकृप्तहानिः कथंचन" इति । "पुरासवालिमारणप्रभूतदोषकारणात् । सहस्रवर्मनामिनाऽसुरेणवेष्टितोऽजनि" इति मरणस्याल्पपापफलत्वात्तन्मात्रेणपापंनचरितार्थंचक्रइत्यर्थः ॥ **शि०** ननु "हृद्यपेक्षयातुमनुष्याधिकारत्वात्" इतिसूत्रभाष्यादौ मनुष्यमात्रस्यैव शास्त्रनियम्यत्वमितिसिद्धान्तितत्वाद्वालिविषयेधर्माधर्मविचारःसर्वज्ञेनपरमात्मनारामेणकथंकृतइतिचेन्न । "तदुपर्यपिबादरायणः" इतितदुत्तरसूत्रभाष्यादौगन्धर्वादीनामपिशास्त्रनियम्यत्वस्यसिद्धान्तितत्वेनवालिनोदेवपुत्रत्वाद्देवत्वेनादोषात् । अतएवभगवत्पार्श्ववर्तिनांनन्दीश्वरगरुडकाकभुशुण्डादीनांवेदाधिकारोनविरुध्यते । अतएव सर्वज्ञपरमात्मरामकृताजटायुषःप्रमीतक्रिया तद्भ्रात्रासंपातिनाकरिष्यमाणोदकदानादिचसंगच्छते । नचब्राह्मणाद्युद्देशेनकर्मबोधकप्रवृत्तेर्देवादीनांतदभावात्कथंतद्विषयत्वमितिवाच्यं । तेषामपिकश्यपादिजन्यत्वादिनाब्राह्मणादित्वादितिदिक् ॥१९॥ **ति०** उपसंहरति **तदिति** । तत् तस्मात् । धर्माद्व्यतीतस्य धर्मभ्रष्टस्य । एवंचेदृशेव्यवहारेप्राणान्तोदण्डइतिसूचितं ॥ २० ॥ **ति०** लोकवृत्तात् लोकव्यवहारमर्यादातः । अपेयुषः अपगतवतः । दण्डादन्यत्र ततोऽन्यमित्यर्थः । केचित्तु अनेनतिर्यग्योनिव्यवहारमर्यादाप्येषैवेतिध्वनितं । दृश्यतेचगृहेपाल्यमानेषुपारावतादिष्वन्यंस्वभार्यासहितंदृष्ट्वत्सुपरस्परंयुद्धं । भार्यायाबहुप्रकारताडनादिदण्डइत्याहुः । **स०** अन्यत्र स्वार्थेत्रल् ॥ २१ ॥ **ति०** गुरुः महान् । योधर्मः तंव्यतिक्रान्तं तत्प्रच्युतं । निघ्नन्नितिशेषः । प्राज्ञोविद्वान् । धर्मेणपालयन् । धर्मयुक्तमितिशेषः ॥ **रामानु०** धर्मव्यति-

[पा०] १ ख. घ. च. ज. भ्रातुर्भार्या. ग. ङ. छ.—ट. भ्रातृभार्याभिमर्शे. २ ङ.—ट. लोकविरुद्धस्य. ३ ख. दन्यद्विपश्यामि. ४ क.—छ. झ. ञ. ट. नचते. ज. नचेदमर्थयेपापं. ५ क. ङ. च. ज.—ट. कुलोद्गतः. ६ क. ख. घ.—ज. ञ. चापि. ७ घ.—ज. ञ. चाप्यनुजस्य. ट. वाप्यनुजस्यच. ८ ङ. च. ज. ञ. प्रचरेद्वानरः. ख. योव्रजेतनरः. ९ ख. चादेशवर्तिनः. १० क. ङ.—ज. ञ. ट. त्वांचधर्मादतिक्रान्तं. ग. झ. त्वंच. ११ क. ख. ग. ङ.—ट. शक्यमुपेक्षितुं. १२ ख. गुरुवृत्तानतिक्रान्तः. १३ छ. झ. ट. कामयुक्तानां.

वयं तु [1]भरतादेशं विधिं कृत्वा हरीश्वर ॥ त्वद्विधान्भिन्नमर्यादान्[2]नियन्तुं पर्यवस्थिताः ॥ २६ ॥
सुग्रीवेण च मे सख्यं लक्ष्मणेन [3]यथा तथा ॥ दारराज्यनिमित्तं च निःश्रेय[4]सि रतः स मे ॥ २७ ॥
प्रतिज्ञा च मया दत्ता तदा [5]वानरसन्निधौ ॥ [6]प्रतिज्ञा च कथं शक्या [7]मद्विधेनानवेक्षितुम् ॥ २८ ॥
तदेभिः कारणैः सर्वैर्महद्भिर्धर्म[8]संहितैः ॥ शासनं तव यद्युक्तं तद्भवाननुमन्यताम् ॥ २९ ॥
सर्वथा धर्म इत्येव द्रष्टव्यस्तव निग्रहः ॥ ३० ॥
वय[9]स्यस्यापि कर्तव्यं धर्ममेवानु[10]पश्यतः ॥ शक्यं त्वयाऽपि [11]तत्कार्यं धर्ममे[12]वानुपश्यता ॥ ३१ ॥
श्रूयते मनुना गीतौ श्लोकौ चारित्रवत्सलौ ॥ गृहीतौ धर्म[13]कुशलैस्तत्तथा चरितं [14]हरे ॥ ३२ ॥

मिति पूर्वेण संबन्धः ॥ २५—२६ ॥ एवं निरपराधवधदोषशङ्कायाः परिहारमुक्त्वा " मामेव यदि पूर्वं त्वमेतदर्थमचोदयः " इत्युक्तस्य परिहारमाह—सुग्रीवेणेति ॥ सुग्रीवेण यत्सख्यं तल्लक्ष्मणसख्यतुल्यं तद्वदपरिहार्यं । दारराज्यनिमित्तं च दारराज्यफलकं च । स च मे निःश्रेयसि रतश्च । अतः कथमुपेक्षितुं शक्य इत्यन्वयः ॥ २७ ॥ हेत्वन्तरमप्याह—प्रतिज्ञा चेति ॥ तदा सख्यकरणकाले । अनवेक्षितुं उपेक्षितुमिति यावत् ॥ २८ ॥ तत्तस्मात् उपेक्षितुमशक्यत्वात् । एभिः भ्रातृभार्यापहरणादिकारणैः । तव भ्रातृभार्याविमर्शकस्य यच्छासनं कृतं तद्युक्तं शास्त्रविहितमिति भवाननुमन्यतां ॥ २९ ॥ पुनर्हेत्वन्तराणि वक्तुं पीठिकामारचयति—सर्वथेति ॥ ३० ॥ शत्रुवद्धर्ममेवानुपश्यतो वयस्यस्यापि स्वमित्रशत्रुनिरसनं कर्तव्यं । धर्ममेवानुपश्यता त्वयापि तत्कार्यं आत्मनिग्रहरूपं शक्यं । प्रायश्चित्तत्वेनानुमन्तुं योग्यमित्यर्थः ॥ ३१ ॥ स्वेनावश्यं हन्तव्यत्वे वालिनावश्यमनुमन्तव्यत्वे च संवादं दर्शयति—श्रूयत इति ॥ चारित्रवत्सलौ

क्रान्तं व्यतिक्रान्तधर्माणं ॥ **स०** अतिक्रान्तोनभवतीतिव्यतिक्रान्तः गुरुधर्मेणव्यतिक्रान्तः गुरुधर्मव्यतिक्रान्तस्तं । भावेवानिष्ठाप्रत्ययः । गुरुधर्मव्यतिक्रमणंपालयन्परामृशन् विचारयन् ॥ **शि०** किंच गुरुधर्मव्यतिक्रान्तंपालयन् दण्डपूर्वकशुद्ध्यारक्षन् । भरतः कामयुक्तानांनिग्रहे अन्वेषणेपर्यवस्थितः । वयंतु अवधिं कालनियमंकृत्वाभरतादेशाः भरतेआदेशःप्रजापालनाज्ञायेषांतेसन्तोवने चरामइतिशेषः । देशावधिमित्यत्र । " नमुने " इतिसूत्रेनेतियोगविभागेनक्वचित्त्रिपाद्याअसिद्धत्वाभावज्ञापनात्संहिता । भागुरिमतेअवाकारलोपेन वधिशब्दोप्यवधिवाचकोवा । भरतकर्तृकाज्ञायाअवधिंकृत्वेत्यर्थोवा । अत्रपक्षेसमासप्रयुक्तषष्ठ्यालुप्तत्वान्नसंहितायांसंदेहः । भरताज्ञप्ताइत्यर्थस्तुनयुक्तः । रामकर्मकभरताज्ञायाअप्रसिद्धत्वादयोग्यत्वाच्चक्लिष्टकल्पनायांप्रमाणाभावाच्च । सार्धश्लोकएकान्वयी ॥ २५ ॥ **ती०** भरतादेशविधिं भरताज्ञाकरणं । " औरसींभगिनींवापिभार्यांवाप्यनुजस्ययः । प्रचरेत्सनरः कामात्तस्यदण्डोवधःस्मृतः" इत्युक्तप्रकारेणामार्गवर्तिनस्तववधेदुष्टनिग्राहकशिष्टपरिपालकसार्वभौमभरतस्याज्ञाकारिणोममदोषोनास्तीति ॥ **ति०** भरतादेशावधिंकृत्वा भरतादेशंतदाज्ञां अवधिं प्रमाणंकृत्वा । ननुभरतेनरामंप्रत्याज्ञायाअकृतत्वान्मृषोक्तिरेषेतिचेन्न । अस्मादेवभगवद्वाक्यात्तथाभरतोक्तेरनुमानेनाक्षतेः । यद्वा राज्यमूलप्रभौपर्यवस्थिते सर्वेषांतदीयानांदण्ड्यदण्डनादावनुक्तापितदाज्ञासिद्धेवेतिनदोषः । अपिच स्वराज्येभगवताभरतस्यपालनाज्ञायांदत्तायामर्थात्स्वस्मिन्प्रधानराजपुरुषत्वसिद्धौतदाज्ञाऽर्थसिद्धैवेतिनदोषः ॥ २६ ॥ **ति०** एभिरुक्तैःकारणैः एकैकमेवतववधेपर्याप्तं किंपुनर्मिलितानि । तस्माद्यत्तवमयाशासनमिदंकृतंतद्युक्तंशास्त्रसंमतमितिभवानप्यनुमन्यतां चिन्तयतु । तवभ्रातृभार्यापहारकत्वेनदण्ड्यत्वात्सखिकार्यस्यस्वकार्यत्वात्क्षत्रियस्यतत्प्रतिज्ञाहानौ चमहतोऽधर्मस्यश्रवणात्तद्वधोमेआवश्यकोधर्मश्चेत्याशयः ॥२९॥ **रामानु०** वयस्यस्यापीत्ययंश्लोकोबहुषुकोशेषुनदृष्टः । **विषम०** किंचधर्ममेवानुपश्यताजानता मित्रस्योपकर्तव्यं । मित्रोपकारकरणमपिधर्मएवेतिसुग्रीवोपकाररूपत्वाद्वधस्यधर्मत्वमितिभावः । किंचानुतापादिनाधर्ममनुवर्तता एतद्दुष्कर्मप्रायश्चित्तरूपधर्मानुवृत्तिंकुर्वतात्वयापितत्कार्यमत्कृतनिग्रहरूपंकार्यंशक्यं राजप्रार्थनापूर्वंकारयितुंशक्यं । सत्यनुतापेत्वयाप्रार्थनापूर्वमयंदण्डःस्वस्यकारणीयएवेति त्वत्करणीयस्यैवमयाकृतत्वान्नात्रक्षोभःकार्यइतिभावः ॥३१॥

[**पा०**] १ छ. झ. ट. भरतादेशावधिं. ग. भरतादेशंहृदिकृत्वा. २ छ. झ. ञ. निग्रहीतुंव्यवस्थिताः. घ. निहन्तुं. ख. नियन्तुंकृतनिश्चयाः. ३ ङ. च. ज. ञ. यथापुरा. ४ ङ. च. छ. झ. ञ. ट. निश्श्रेयसकरः. ख. ग. घ. निश्श्रेयसरतः. ५ ङ. च. ञ. पावकसंनिधौ. ६ ग. प्रतिज्ञातु. ७ ख. ङ. च. ज. ञ. मद्विधानामुपेक्षितुं. ग. मद्विधेनानपेक्षितुं. ८ छ. झ. ट. धर्मसंश्रितैः. ९ छ. झ. ट. वयस्यस्योपकर्तव्यं. १० ग. ङ.—ञ. पश्यता. ख. वर्ततः. ११ ग. ङ. च. ज. कर्तव्यं. १२ ग. छ. झ. ञ. ट. मेवानुवर्तता. ङ. च. ज. मेवानुवर्तिना. १३ क. कुशलैस्तथाविचरितं. छ. झ. ट. कुशलैस्तथातच्चरितं. १४ क. ख. ङ. च. ज. विभो. छ. झ. ट. मया. ग. परैः.

राजभिर्धृतद[1]ण्डास्तु कृत्वा पापानि मानवाः ॥ निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ॥ ३३॥
शासनाद्वा[2] विमोक्षाद्वा स्तेनः स्तेया[3]द्विमुच्यते ॥ राजा त्व[4]शासन्पापस्य तदवाप्नोति किल्बिषम् ॥ ३४ ॥
आर्येण मम मान्धात्रा व्यसनं घोरमीप्सितम् ॥ श्रमणेन कृते पापे यथा पापं कृ[5]तं त्वया ॥ ३५॥
अन्यैरपि कृतं पापं प्रमत्तैर्वसुधाधिपैः ॥ प्रायश्चित्तं च कुर्वन्ति तेन तच्छाम्यते रजः ॥ ३६ ॥
तदलं परितापेन धर्मतः परिकल्पितः ॥ व[6]धो वानरशार्दूल न वयं स्ववशे स्थिताः ॥ ३७ ॥
शृणु चाप्यपरं भूयः कारणं हरिपुङ्गव ॥ य[7]च्छ्रुत्वा हेतुमद्वीर न मन्युं कर्तुमर्हसि ॥ ३८ ॥
न मे तत्र मनस्तापो न मन्युर्हरिर्यूथप ॥ वागुराभिश्च पाशैश्च कूटैश्च [9]विविधैर्नराः ॥ ३९ ॥
प्रतिच्छन्नाश्च दृश्याश्च गृह्णन्ति सुबहून्मृगान् ॥ प्र[10]धावितान्वा वित्रस्तान्विस्र[11]ब्धांश्चापि निष्ठितान् ॥४० ॥
[12]प्रमत्तांनप्रमत्तान्वा नरा [13]मांसार्थिनो भृशम् ॥ विध्यन्ति विमुखांश्चापि न च दोषोत्र विद्यते ॥ ४१ ॥

आचारैकपरौ। गृहीतौ धृतौ। तत् श्लोकद्वयोक्तं ॥३२॥ श्लोकौ पठति—राजभिरित्यादिना ॥ ३३ ॥ शासने परस्याभ्युदयमुक्त्वा अशासने राज्ञोनभ्युदयमाह—शासनादिति ॥ राज्ञा शासने मोचने वा स्तेनश्चोरो मुच्यत एव पापात्। पापस्य पापिष्ठस्याशासनाद्राजा तत्किल्बिषं पापमाप्नोति ॥ ३४ ॥ न केवलं वचनं आचारश्चास्मिन्नर्थेस्तीत्याह—आर्येणेति ॥ यथा त्वया पापं कृतं तथाश्रमणेन क्षपणकेन केनचित्पापे कृते मम आर्येण वृद्धप्रपितामहेन मान्धात्रा । घोरं व्यसनं दण्डनं। ईप्सितं प्रयुक्तमिति यावत् ॥ ३५ ॥ प्रमत्तैर्वसुधाधिपैर्हेतुभिः । अन्यैरपि जनैः पापं कृतं ते वसुधाधिपाः विगतानवधानाः सन्तः कर्मपरामर्शवेलायां पापीनां प्रायश्चित्तं वधादिकं। कुर्वन्ति । तेन प्रायश्चित्तेन। तद्रजः तत्पापं। शाम्यति अद्यापीतिशेषः ॥ ३६ ॥ न स्ववशे स्थिताः न स्वतन्त्राः शास्त्रवश्याइत्यर्थः । अनेन पराङ्मुखवधस्यदोषत्वमपि परिहृतं । प्रायश्चित्तस्य यथाकथंचित्कर्तव्यत्वात्। पञ्चमहापातकादिप्रायश्चित्तस्य मरणान्तिकत्वाद्बलादेवहिकार्यंभवति नान्यथा ॥ ३७ ॥ एवं सन्ध्योपासनराज्यपालनादिकं नियमेनानुतिष्ठतोवालिनः शास्त्रवश्यत्वमवलम्ब्योक्तं। अथ शाखामृगत्वमवलम्ब्याह—शृणुचेत्यादिना ॥ ३८ ॥ "दृश्यमानस्तु युध्येथामया यदि नृपात्मज । अद्य वैवस्वतं देवं पश्येस्त्वं निहतो मया" इति ॥ "त्वया दृश्येन तु रणे निहतोहं दुरासदः । प्रसुप्तः पन्नगेनेव नरः पानवशंगतः" इति च वालिनायदुक्तं तदुभयस्योत्तरमाह—न मे तत्र मनस्ताप इति ॥ तत्र यमसदनप्रापणोक्तिप्रच्छन्नवधनिन्दोक्तिविषये। मे मन्युर्नास्ति। शाखामृगस्य तवालक्ष्यत्वादितिभावः। मनस्तापाभावश्च मृगविषये प्रच्छन्नवेदनस्यराज्ञांस्वभावतयादोषाभावादितिभावः। तदेवोपपादयति वागुराभिरित्यादिना। कूटैः कपटव्यापारैः विस्रब्धान् विश्वस्तान्। यद्यपि प्रकृतेनमांसार्थिता

ति० त्वयापिप्रार्थनापूर्वमयमर्थःकारणीयःस्यादित्यर्थप्रतिपादकंश्लोकमाह—**शासनाद्वेति** । पापोऽहंमेदण्डंकुर्वितिप्रार्थनयास्वसमीपमागतस्यपापिनःशासनाद्दण्डकरणाद्वामोक्षाद्ययाविसर्जनाद्वा । स्तेनइतिपापोपलक्षणं । तत्रद्वितीयःपक्षोराज्ञोदोषायेत्याह—**राजात्विति**। राजातुपापस्याशासन्पापनिग्रहमकुर्वन् । अनेनत्वद्दण्डकरणमस्मादृशामावश्यकमितिध्वनितं ॥ **वि०** राजातु पापस्येत्यर्थः । अशासनात् निग्रहाकरणात् । तत्किल्बिषंपापं अवाप्नोति । अतस्त्वदण्डआवश्यकइतिभावः । **ती०** पापस्य पापकारिणः । किल्बिषं दुरितं ॥ ३४ ॥ **रामानु०** कुर्वन्तिशाम्यतइत्येतदुभयमपिभूतार्थेलट् ॥ **स०** नकेवलमस्मत्पूर्वजैरेव अन्यैरपिकृतमित्याह—**अन्यैरिति**। अन्यैरपिप्रमत्तैः पापंकृतं। वसुधाधिपैःकृतं शासनमितिशेषः। यद्वा एतादृशैःपापंकृतं राजानश्चतत्प्रायश्चित्तंचनकुर्वन्ति । तेनेति ॥ ३६ ॥ **तनि०** वागुराभिरिति । प्रयोजनान्तराभावेपिजनपदहिंसापरिहारार्थंनिघ्नन्तीतिभावः । " विध्यन्तिविमुखांश्चापिनचदोषोत्रविद्यते । यान्तिराजर्षयश्चात्रमृगयांधर्मकोविदाः । " तेनमृगयासक्तिर्नदोषायेतिसूचितं ॥ ३९ ॥ **शि०** ननुशिष्टाचारेणग्रहणेदोषाभावःप्रतीयते नतुवधे । अत्रतुवधइत्यतआह—**प्रमत्तानिति** । मांसार्थिनः अनराः

[**पा०**] १ ङ.—ट. दण्डाश्च. २ ख. छ. झ. ञ. ट. द्वापिमोक्षाद्वा. ३ छ. झ. ट. पापात्प्रमुच्यते. ञ. पापाद्विमुच्यते. ४ क. ग.—च. ज. ञ. त्वशासनात्पापंतदेवा. ५ ङ. च. ज. ञ. त्वयाकृतं. ६ ख. वधस्तेहरिशार्दूल. ७ छ. झ. ट. तच्छ्रुत्वा हिमद्वीर. ८ छ. झ. ट. पुङ्गव. ९ छ. विविधानराः. १० च. ज. प्रधावितांश्च. क. विस्रब्धांश्चाप्यविस्रब्धान्विनिघ्नन्तितथैवच. ११ निस्रब्धानतिविष्ठितान. १२ ङ. च. ज. प्रमत्तान्वाऽप्रमत्तान्वा. क. प्रसुप्तानप्रसुप्तांश्च. १३ छ. झ. मांसाशिनोभृशं.

यान्ति राजर्षयश्चात्र मृगयां धर्मकोविदाः ॥ तस्मात्त्वं निहतो युद्धे मया बाणेन वानर ॥
अयुध्यन्प्रतियुध्यन्वा यस्माच्छाखामृगो ह्यसि ॥ ४२ ॥
दुर्लभस्य च धर्मस्य जीवितस्य शुभस्य च ॥ राजानो वानरश्रेष्ठ प्रदातारो न संशयः ॥ ४३ ॥
तान्न हिंस्यान्न चाक्रोशेन्नाक्षिपेन्नाप्रियं वदेत् ॥ देवा [1]मनुष्यरूपेण चरन्त्येते महीतले ॥ ४४ ॥
त्वं तु धर्ममविज्ञाय केवलं रोषमास्थितः ॥ [2]प्रदूषयसि मां धर्मे पितृपैतामहे स्थितम् ॥ ४५ ॥
एवमुक्तस्तु रामेण वाली [3]प्रव्यथितो भृशम् ॥ न दोषं राघवे दध्यौ [4]धर्मेऽधिगतनिश्चयः ॥
प्रत्युवाच ततो रामं प्राञ्जलिर्वानरेश्वरः ॥ ४६ ॥
यत्त्वमात्थ नरश्रेष्ठ [5]तदेवं नात्र संशयः ॥ प्रतिवक्तुं प्रकृष्टे हि [6]नाप्रकृष्टस्तु शक्नुयात् ॥ ४७ ॥
[7]यदयुक्तं मया पूर्वं [8]प्रमादादुक्तमप्रियम् ॥ तत्रापि खलु मे [9]दोषं कर्तुं नार्हसि राघव ॥ ४८ ॥
त्वं हि दृष्टार्थतत्त्वज्ञः प्रजानां च हिते रतः ॥ कार्यकारणसि[10]द्धौ ते प्रसन्ना बुद्धिरव्यया ॥ ४९ ॥
[11]मामप्यगतधर्माणं व्यतिक्रान्तपुरस्कृतम् ॥ धर्मसंहितया वाचा धर्मज्ञ परिपालय ॥ ५० ॥

तथापि पराङ्मुखवधान्नदोषइतितात्पर्यम् ॥ ३९—४२ ॥ परपीडाकरो राज्ञां व्यापारो निष्फल इत्याशङ्क्य व्रणचिकित्सान्यायेन स श्रेयस्कर एवेत्याह—दुर्लभस्येति ॥ जीवितस्य जीवनस्य ॥४३॥ न हिंस्यात् न पीडयेत् । तेष्वनर्थकरत्वबुद्धिं न कुर्यादित्यर्थः । नाक्रोशेत् ननिन्देत् । नाक्षिपेत् नोक्तिखण्डनं कुर्यात् । नाप्रियं वदेत् परुषं नवदेदित्यर्थः । तत्रहेतुमाह—देवाइति । एते पूर्वोक्ता राजानः । देवाः अष्टौ लोकपालाः । “अष्टाभिर्लोकपालानांमात्राभिः कल्पितो नृपः” इति वचनात् । मनुष्यरूपेण मनुष्यशरीरेण । उपलक्षिताश्चरन्ति ॥ ४४ ॥ पितृपैतामहे पितृपितामहप्राप्ते । नन्वेवमपि कथंचित्परिहार्यं “ वरतनुहतिं वालिद्रोहं मनागपसर्पणं ” इत्याद्यपवादकरं छन्नवेधनं समर्थोपि किमर्थंकृतवान् । तदवहितमनाःशृणु । यदि रामो वालिनःपुरतस्तिष्ठेत्तदा विदिततदीयप्रभावतया वालीप्रह्वोभवेत् । तदा तद्वधो न युक्तः । प्रतिज्ञा च व्याहन्येत । तद्द्वारा तन्मित्रं रावणोपि शरणं व्रजेत् । देवकार्यं च लुप्येत् । अतः प्रच्छन्नो वालिनमवधीत् ॥ ४५ ॥ प्रव्यथितः अज्ञानाद्राममधिक्षिप्तवानस्मीत्यनुतप्तः ॥ ४६ ॥ प्रकृष्टे विषये ॥ ४७ ॥ कर्तुं चिन्तयितुं ॥ ४८ ॥ दृष्टार्थश्चासौ तत्त्वज्ञश्च दृष्टार्थतत्त्वज्ञः । यद्वा ज्ञः पण्डितः । दृष्टार्थतत्वश्चासौ ज्ञश्चेति समासः । कार्यकारणसिद्धौ कार्यं दण्डनं कारणं तद्धेतुभूतं पापं तयोः सिद्धौ परिज्ञाने । बुद्धिः अन्तःकरणं ॥ ४९ ॥ अगतधर्माणं कृत्याकरणवन्तं । व्यतिक्रान्तपुरस्कृतं पुरस्कृतव्यतिक्रमं अकृत्यकारिणमित्यर्थः ।

नरसदृशाः राजानस्तुप्रमत्तानप्रमत्तान्वाविमुखान्पलायितान्वामृगान् विध्यन्ति घ्नन्ति । अत्र वधे दोषः मनुष्यवधवत्पापं । नविद्यते । एतेन मृगवधजनितपापस्याल्पत्वात्प्रायश्चित्तस्यसुकरत्वान्नतद्वधेभीतिरितिसूचितं ॥ यदिचमांसार्थेत्वंयागार्थमित्युच्यतेतदानदोष इत्यस्यदोषसंसर्गाभावोबोध्यइतिदिक् ॥ ४१ ॥ **ति०** प्रतियुध्यन् अन्येनयुद्धंकुर्वन् । मांसादिलोभाभावेपिक्षत्रियस्वाभाव्यात्तववधो मयाकृतः इतरव्याघ्रादितिर्यग्जन्तुवत् । तत्रमेनकश्चिन्महान्दोषः । अल्पस्तुप्राणायाममात्रापनेयइतिभावः ॥ ४२ ॥ **ति०** आक्रोशोनिन्दा । आक्षेपोऽवमाननं । अप्रियवादः प्रतिकूलवचनं । त्वंतुनतादृशोराजेतिभावः । एतेनराज्ञोवधाद्दौब्रह्मवधादिदोषइतिसूचितं ॥ ४४ ॥ **ती०** “नाविष्णुःपृथिवीपतिः” इतिस्मरणात् देवतारूपाणांराज्ञामधिक्षेपस्त्वनयुक्तइत्याशयेनाह—**दुर्लभस्येत्यादिश्लोकद्वयेन** ॥ **शि०** जीवितस्यप्रदातारइत्यनेनयदित्वयिजीवितेच्छा तर्हित्वांजीवयिष्यामीतिसूचितं ॥ ४३–४४ ॥ **टीका०** प्रकृष्टः श्रेष्ठः । सर्वज्ञइत्यर्थः । अपकृष्टः किञ्चिज्ज्ञः ॥ ४७ ॥ **ति०** धर्मादेवव्यतिक्रान्तानां पुरस्कृतं अग्रेसरं । अवगतं अग्रेसरत्वेनप्रसिद्धं । वाचापरिपालय उत्तमलोकान्प्राप्नुहीतिवाचानुगृहाणेत्यर्थः ॥ **स०** सुग्रीवंपुरस्कृतस्त्वं व्यतिक्रान्तोयेनसव्यति-

[पा०] १ ग. घ. छ. झ. ञ. ट. मानुषरूपेण. २ ङ. छ.—झ. ट. विदूषयसि. च. त्वंदूषयसि. ३ ग. प्रव्यथितेन्द्रियः. ट. प्रमथितो. ४ क. ग. धर्मार्थकृतनिश्चयः. ५ झ. ट. तत्तथैवनसंशयः. ६ क. छ.—ट. नापकृष्टस्तु. ७ ख. छ. झ. ट. यदयुक्तं. क. ग. च. यदुक्तंते. ८ क. ग. छ. झ. ट. प्रमादाद्वाक्यं. ९ ङ. च. ज. ञ. रोषं. १० क. ग. छ.—ट. सिद्धौच. ङ. च. शुद्धौच. ११ ग. ङ. छ. झ. ञ. ट. मामप्यवगतंधर्मात्. क.—थ. मामप्यपगतं.

[[1]बाष्पसंरुद्धकण्ठस्तु वाली सार्तस्वरं शनैः ॥ उवाच रामं संप्रेक्ष्य पङ्कलग्न इव द्विपः ॥ ५१ ॥]
न [2]त्वात्मानमहं शोचे न तारां [3]न च बान्धवान् ॥ यथा पुत्रं [4]गुणश्रेष्ठमङ्गदं कनकाङ्गदम् ॥ ५२ ॥
स ममादर्शनाद्दीनो बाल्यात्प्रभृति लालितः ॥ तटाक इव पीताम्बु[5]रुपशोषं गमिष्यति ॥ ५३ ॥
बालश्चाकृतबुद्धिश्च एकपुत्रश्च मे प्रियः ॥ तारेयो राम भवता रक्षणीयो [6]महाबलः ॥ ५४ ॥
सुग्रीवे चाङ्गदे चैव विधत्स्व मतिमुत्तमाम् ॥ त्वं हि [7]शास्ता च गोप्ता च कार्याकार्यविधौ स्थितः ॥५५॥
या ते नरपते [8]वृत्तिर्भरते लक्ष्मणे च या ॥ सुग्रीवे चाङ्गदे राजंस्तां [9]त्वमाधातुमर्हसि ॥ ५६ ॥
मद्दोषकृतदोषां तां यथा तारां तपस्विनीम् ॥ सुग्रीवो [10]नावमन्येत तथाऽवस्थातुमर्हसि ॥ ५७ ॥
त्वया ह्यनुगृहीतेन [11]राज्यं शक्यमुपासितुम् ॥ त्वद्वशे वर्तमानेन तव चित्तानुवर्तिना ॥ ५८ ॥
शक्यं दिवं चार्जयितुं वसुधां चापि [12]शासितुम् ॥ ५९ ॥
त्वत्तोऽहं वधमाकाङ्क्षन्वार्यमाणोपि तारया ॥ सुग्रीवेण सह भ्रात्रा द्वन्द्वयुद्धमुपागतः ॥ ६० ॥
इत्युक्त्वा [13]सन्नतो रामं विरराम हरीश्वरः ॥ ६१ ॥
स तमाश्वासयद्रामो वालिनं [14]व्यक्तदर्शनम् ॥ [15]सामसंपन्नया वाचा [16]धर्मतत्त्वार्थयुक्तया ॥ ६२ ॥
न संतापस्त्वया कार्य एतदर्थं प्लवङ्गम ॥ ६३ ॥
न वयं भवता चिन्त्या [17]नाप्यात्मा हरिसत्तम ॥ वयं भवद्विशेषेण धर्मतः कृतनिश्चयाः ॥ ६४ ॥

वाचा परिपालय सर्वं मया क्षान्तमितिवदेत्यर्थः ॥ ५०—५१ ॥ कार्यान्तरमप्यर्थयते—न त्वित्यादिना ॥ नात्मानंप्रतिशोचे त्वयादत्तसम्यग्गतिकत्वात् । नापि तारादिकान्प्रति सुग्रीवस्यविद्यमानत्वात् । पुत्रं " अङ्गादङ्गात्संभवसि " इत्युक्तरीत्या स्वानतिरिक्तं । गुणश्रेष्ठं पितृशुश्रूषादिगुणैः श्रेष्ठं । कनकाङ्गदं दर्शनीयमित्यर्थः ॥ ५२—५४ ॥ मतिं तुल्यामितिशेषः ॥ ५५ ॥ वृत्तिः प्रीतिरिति यावत् ॥ ५६ ॥ नावमन्येत पुत्रनिर्वासनेनेति भावः । अवस्थातुं व्यवस्थापयितुं ॥ ५७ ॥ उपासितुं मयेतिशेषः । न केवलं मद्राज्यं । अन्यच्चेत्याह—शक्यमिति ॥ ५८—५९ ॥ तर्हि तथा किं न कृतं तत्राह—त्वत्त इति। आकाङ्क्षन् आकाङ्क्षमाण इवेत्यर्थः ॥६०—६१॥ व्यक्तदर्शनं विशदज्ञानं । साम सान्त्वनं ॥ ६२ ॥ एतदर्थं पुत्रपालनार्थं ॥ ६३ ॥ वयं न चिन्त्याः अकृत्यकारिण इतिशेषः । नाप्यात्मा निवृत्तपापत्वात् । कुत इत्यत्राह—वयमिति । भवद्विशेषेण भवतो कृत्यरूपविशेषेण हेतुना । धर्मतः प्रायश्चित्तरूपे धर्मे ।

कान्तपुरस्कृतस्त्वं ॥ ५० ॥ ति० उवाच पुत्रादिमायाकृष्टस्सन्नुवाचेत्यर्थः ॥ ५१ ॥ **वि०** पीतांबुः सस्याद्युपयोजितांबुः ॥ **शि०** पीतांबुः सूर्यकिरणशोषितजलः ॥ ५३ ॥ **ति०** मतिमुत्तमां । " मरणान्तानिवैराणि " इतिन्यायेनेतिभावः । सुग्रीवेचतत्रैवेत्यर्थः । भ्रातृस्नेहोद्बोधेनवातत्राप्यनुग्रहप्रार्थनं । कार्यविधौगोप्ता अकार्यविधौशास्ता ॥ ५५ ॥ **ती०** मद्दोषकृतदोषां सुग्रीवायमत्कृतापराधेनकृतापराधां । अवस्थातुं अवस्थापयितुं ॥ ५७ ॥ **ति०** शक्यमिति । स्वाराज्यमपित्वत्प्रसादलभ्यमितिभावः ॥ ५९ ॥ अहंत्वदुपदेशतस्त्वद्दर्शनतश्चेदानींक्षीणपापस्त्वत्तोवधं उत्तमलोकराज्यफलकं आकांक्षन् अपेक्षमाणः । इदानीमस्मि । अतस्तारयावार्यमाणोपि यद्भ्रात्रायुद्धमुपागतः तत्पूर्वकृतपुण्यपरिपाकेनेतिशेषः । **शि०** ननुतवेच्छाचेत्त्वांजीवयामिराज्यंकुर्वित्यतआह—**त्वत्तइति** । एतेनवालिनोजीवनेच्छाभावस्सूचितः ॥ ६० ॥ **ती०** व्यक्तदर्शनं अभिव्यक्तसर्वेश्वरस्वरूपज्ञानं ॥ ६२ ॥ **ती०** वयंभवतानचिन्त्याः नविचार्याः । पराङ्मुखस्यमेवधंप्रच्छन्नंकृत्वा एषपापमार्जितवान् उतपुण्यमितिभवतानविचार्याइत्यर्थः । नाप्यात्माचिन्त्यः भ्रातृभार्याहरणादिकंकृत्वागतोहंकिंभविष्यदिति त्वंच त्वयानविचार्यः । कुतः वयं भवद्विशेषेण भवतोविशेषेण । धर्मतः धर्मे । कृतनिश्चयाः । अस्यवधःकिंधर्मःउताधर्मइतिविशेषेणविचार्यधर्मेनिश्चयंकृतवन्त

[पा०] १ अयंश्लोकः. ङ. छ. झ. ट. पुस्तकेषु दृश्यते. २ छ. झ. ट. नचात्मानं. ३ क. ग. छ.—ट. नापि. ४ ङ.—ट. गुणज्येष्ठं. ५ झ. रुदशोषं. ६ ग. महाबल. ७ छ. झ. ट. गोप्ताचशास्ताच. ८ ग. घ. वृत्तिर्लक्ष्मणेभरतेचया. ९ क. ग. ङ. च. ज.—ट. तांचिन्तयितुमर्हसि. १० ख. नाभिमन्येत. ११ ग. ङ.—ट. शक्यंराज्यं. १२ ग. शाश्वतीं. १३ छ. झ. ञ. ट. वानरो. १४ क. व्यक्तविक्रमं. ख. व्यक्तदर्शनः. १५ ङ.—ट. साधुसंमतया. १६ क. धर्महेत्वर्थयुक्तया. १७ ख. नापित्वं.

दण्डचे यः पातयेद्दण्डं दण्ड्यो यश्चापि दण्ड्यते ॥ कार्यकारणसिद्धार्थावुभौ तौ नावसीदतः ॥६५॥
तद्भवान्दण्डसंयोगादस्माद्विगत[१]कल्मषः ॥ गतः स्वां प्रकृतिं धर्म्यां [२]धर्मदृष्टेन वर्त्मना ॥ ६६ ॥
त्यज शोकं च मोहं च [३]भयं च हृदये स्थितम् ॥ त्वया विधानं हर्यग्र्य न शक्यमतिवर्तितुम् ॥ ६७ ॥
यथा त्वय्यङ्गदो नित्यं वर्तते वानरेश्वर ॥ तथा [४]वर्तेत सुग्रीवे मयि चापि न संशयः ॥ ६८ ॥

स तस्य वाक्यं मधुरं महात्मनः समाहितं धर्मपथानुवर्तिनः ॥
निशम्य रामस्य रणावमर्दिनो वचः [५]सुयुक्तं निजगाद वानरः ॥ ६९ ॥
शराभितप्तेन विचेतसा मया [६]प्रदूषितस्त्वं यदजानता [७]प्रभो ॥
इदं महेन्द्रोपम[८]भीमविक्रम प्रसादितस्त्वं क्षम मे [९]नरेश्वर ॥ ७० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे अष्टादशः सर्गः ॥ १८ ॥

एकोनविंशः सर्गः ॥ १९ ॥

वालिमरणश्रवणेनशोकात्तारयाकिष्किन्धातस्तत्समीपंप्रतिनिर्गमनम् ॥ १ ॥ रामभयात्पलायमानैर्वानरैर्मध्येमार्गमागच्छन्तींतारांप्रतिरामेणवालिमारणनिवेदनपूर्वकंभयोत्पादनेननगररक्षणाङ्गदाभिषेचनचोदनेनसहनगरंप्रतिनिवर्तनचोदनम् ॥ २ ॥ तन्निराकरणपूर्वकंशोकादापतन्त्यातारयारणाङ्कणशायिनोवालिनोरामादीनांचावलोकनम् ॥ ३ ॥

स [१०]वानरमहाराजः शयानः [११]शरविक्षतः ॥ प्रत्युक्तो हेतुमद्वाक्यैर्नोत्तरं [१२]प्रत्यपद्यत ॥ १ ॥
अश्मभिः [१३]प्रविभिन्नाङ्गः [१४]पादपैराहतो भृशम् ॥ रामबाणेन [१५]च क्रान्तो जीवितान्ते मुमोह सः ॥ २ ॥

सप्तम्यर्थे तसिः । कृतनिश्चयाः अतो वयं न चिन्त्या इत्यादि पूर्वेणान्वयः ॥ ६४ ॥ उक्तं विवृणोति—दण्डय इति ॥ कार्यकारणसिद्धार्थौ दण्ड्यत्वदण्डयितृत्वाभ्यां निष्पन्नप्रयोजनावित्यर्थः ॥ ६५ ॥ धर्मदृष्टेन धर्मशास्त्रदृष्टेन । वर्त्मना दण्डसंयोगात् विगतकल्मषः सन् । धर्म्यां धर्मादनपेतां । स्वां प्रकृतिं यथावस्थितशुद्धस्वरूपं गतः ॥ ६६ ॥ हेत्वन्तरेणाश्वासयति—त्यजेति ॥ विधानं विधिः प्रारब्धंकर्मेतियावत् ॥ ६७—६८ ॥ उक्तमर्थं सर्गान्ते श्लोकाभ्यांपुनः संगृह्णाति—सतस्येति ॥ समाहितं समाधानरूपं ॥ ६९ ॥ प्रदूषित इति यत् इदं मे अपचरितं । क्षम क्षमस्व ॥ ७० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्कन्धाकाण्डव्याख्याने अष्टादशः सर्गः ॥ १८ ॥

तारागमनमेकोनविंशे—सवानरमहाराजइत्यादि॥ विक्षतः विशेषेण क्षतः । जीवितान्ते जीवितान्त-

---

इत्यर्थः । यद्वा भवद्विशेषेण भवदकृत्यविशेषेणहेतुना । धर्मतः प्रायश्चित्तरूपधर्मे । वयंकृतनिश्चयाः । अतोवयंभवताऽचिन्त्याः अकृत्यंकृतवन्तइतिनविचार्याः । नाप्यात्मा ममपरलोकप्रतिबन्धकमस्तीतिभवानपिनविचार्यइत्यर्थः । “ राजभिर्धृतदण्डास्तुकृत्वापापानिमानवाः । निर्मलाःस्वर्गमायान्ति संतःसुकृतिनोयथा । शासनाद्वाविमोक्षाद्वास्तेनःस्तेयाद्विमुच्यते । राजात्वशासन्पापस्यतदवाप्नोतिकिल्बिषं ” इतिमनुवचनानुसारेणोभयोरपिदोषाभावइतिभावः ॥ ६४ ॥ ति० दण्डदिष्टेन दण्डबोधकशास्त्रोक्तेन ॥६६॥ ति० भयं भ्रातृभार्याहरणजनितनरकभयं मद्दूषणनिमित्तपरलोकभयंच । दण्डेनकर्मणोनाशान्मद्दूषणस्यमयाक्षान्तत्वाच्च । शोकमोहौ तारातारेयविषयौ । विधानं प्राग्भवीयंकर्म । अत्रान्तेदण्डस्यैवसंहारात्तिरश्चामपिज्ञानवतांशास्त्रार्थेऽधिकारोदृढः कृतइतिबोध्यं ॥ ६७ ॥ स० इदं परुषभाषणं । क्षम क्षमस्व । क्षमेत्युक्त्यारामस्यकोपलेशोपिनास्तीतिसूचयति ॥ ७० ॥ इत्यष्टादशःसर्गः ॥ १८ ॥

[पा०] १ घ. किल्बिषः. २ ङ.—ट. दण्डदिष्टेन. ३ क. ख. मन्युंच. ४ छ. झ. वर्तितं. ५ ङ. च. सयुक्तं. ६ छ. झ. ट. प्रभाषितस्त्वं. ७ ङ.—ट. विभो. ८ ग. वीर्यविक्रम. ९ ग. च. छ. ज. ञ. महीश्वर. ङ. ट. महेश्वर. १० क. ग. च. ज. वानरोमहातेजाः. ११ ङ.—ट. शरपीडितः. ख. क्षतविक्षतः. १२ ङ. छ. ज. ञ. ट. प्रतिपद्यते. १३ क. ङ.—ट. परिभिन्नाङ्गः. १४ क. ग. पादपेनाहतो. १५ क. ङ.—ट. चाक्रान्तो.

तं भार्या बाणमोक्षेण [1]रामदत्तेन संयुगे ॥ हतं प्लवगशार्दूलं तारा शुश्राव वालिनम् ॥ ३ ॥
सा सपुत्राऽप्रियं श्रुत्वा वधं भर्तुः सुदारुणम् ॥ निष्पपात [2]भृशं त्रस्ता विविधाद्गिरिगह्वरात् ॥ ४ ॥
ये त्वङ्गदपरीवारा [3]वानरा भीमविक्रमाः ॥ ते सकार्मुकमालोक्य रामं त्रस्ताः प्रदुद्रुवुः ॥ ५ ॥
सा ददर्श ततस्त्रस्तान्हरीनापततो [4]भृशम् ॥ यूथादिव परिभ्रष्टान्मृगान्निहतयूथपान् ॥ ६ ॥
तानुवाच समासाद्य दुःखितान्दुःखिता सती ॥ रामवित्रासितान्सर्वान[5]नुबद्धानिवेषुभिः ॥ ७ ॥
वानरा राजसिंहस्य यस्य यूयं पुरःसराः ॥ तं विहाय [6]सुसंत्रस्ताः कस्माद्द्रवथ दुर्गताः ॥ ८ ॥
राज्यहेतोः स चेद्भ्राता भ्रात्रा [7]रौद्रेण पातितः ॥ रामेण [8]प्रहितै रौद्रैर्मार्गणैर्दूरपातिभिः ॥ ९ ॥
कपिपत्न्या वचः श्रुत्वा कपयः कामरूपिणः ॥ प्राप्तकाल[9]मविक्लिष्टमूचुर्वचनमङ्गनाम् ॥ १० ॥
जीवपुत्रे निवर्तस्व पुत्रं रक्षस्व चाङ्गदम् ॥ अन्तको रामरूपेण हत्वा नयति वालिनम् ॥ ११ ॥
क्षिप्तान्वृक्षान्समाविध्य विपुलाश्च [10]शिलास्तथा ॥ वाली वज्र[11]समैर्बाणै रामेण विनिपातितः ॥ १२ ॥
[12]अभिद्रुतमिदं सर्वं विद्रुतं [13]प्रसृतं बलम् ॥ [14]अस्मिन्प्लवगशार्दूले हते शक्रसमप्रभे ॥ १३ ॥
रक्ष्यतां [15]नगरद्वारमङ्गदश्चाभिषिच्यताम् ॥ पदस्थं वालिनः पुत्रं भजिष्यन्ति प्लवङ्गमाः ॥ १४ ॥
[16]अथवाऽरुचितं स्थानमिह ते रुचिरानने ॥ [17]आविशन्ति हि दुर्गाणि [18]क्षिप्रमन्यानि वानराः ॥ १५ ॥

काले ॥ १—३ ॥ अप्रियमिति च्छेदः । विविधात् नानाकक्ष्यात् । गिरिगह्वराद्गिरिगुहातः । गुहारूपा हि किष्किन्धेत्युक्तं ॥ ४ ॥ ये त्वित्यादिश्लोकद्वयमेकान्वयं ॥ ५—६ ॥ पूर्वं सामान्यतो विदितवृत्तान्तापि विशेषजिज्ञासया पृच्छति तानिति ॥ ७ ॥ वानराइत्यानिश्लोकद्वयमेकान्वयं । दुर्गताः अगतिकाः । राज्यलोभाय सुग्रीवेण वाली हतश्चेद्भवतांकिंभयमित्यर्थः । मार्गणैरिति बहुवचनं संभावनयोक्तं ॥ ८—९ ॥ अविक्लिष्टं सयुक्तिकमितियावत् ॥ १० ॥ जीवपुत्रे इति अपुत्रायाः खलु मृतभर्त्रनुगमनमितिभावः । नयति लोकान्तरमिति शेषः ॥ ११—१२ ॥ विद्रुतं पूर्वं किष्किन्धातो निर्गतमिदं बलं प्रसृतं प्रकीर्णं सत् । अभिद्रुतं किष्किन्धाभिमुख्येन द्रुतं ॥ १३—१४ ॥ हे रुचिरानने ते इह किष्किन्धायां । स्थानं अवस्थानं । अरुचितं अनभिमतं । अत्र स्थातुं अस्माकं नरोचते इत्यर्थः । हि यस्मात्कारणात् वानराः शत्रु-

---

रामानु॰ विविधात् विचित्रान्तःप्रदेशात् ॥ ४ ॥ इषुभिरनुबद्धानिव अनुसृतानिवविध्यमानान् ॥ रामवित्रासितान् रामाद्वित्रस्तान् ॥ ७ ॥ **वि॰** भ्राता प्रयोजककर्ता । रामःप्रयोज्यकर्ता । बाणाःकरणं । दूरात् दूरेस्थित्वामार्गणैःपातितश्चेत्किंयुष्माभिः पलायितमितिशेषः । तत्सेवयैवभवज्जीवनसंभवादितिभावः । वालिविषयबहुबाणप्रयोगसंभावनयामार्गणैरितिबहुवचननिर्देशः ॥९॥ **ती॰** अविश्लिष्टं एकरूपं । **स॰** ननुकथंकपिपत्न्याइति "पत्युर्नोयज्ञसंयोगे" इतियज्ञसंयोगएवपत्नीत्वविधानात् वालिनश्चतिर्यग्जातीयत्वेनयज्ञाधिकाराभावादितिचेन्न । तस्यदेवत्वेनदेवानांचदेवताधिकरणेऽधिकारस्यसमर्थितत्वात्परिदृश्यमानकपित्वंनयज्ञाधिकारविलोपकमितिभावः । अधिकारनिषेधस्तुप्रसिद्धपामरतिर्यग्विषयइतिभावः ॥ १० ॥ **स॰** जीवन्पुत्रोयस्यास्सातथा तस्यास्संबुद्धिः । जीवेत्युक्तिविषयःपुत्रोयस्यास्सेतिवा ॥ ११ ॥ **शि॰** वज्रेण वज्रिणेव । रामेणेतिशेषः । वज्रशब्दअर्शआद्यजन्तः । **स॰** क्षिप्तान् स्वेनेतिशेषः । बाणैस्समाविध्यनिपातितः रामेणेतिशेषः । वालीपरमसमर्थःकथमेकेनबाणेननिपतेदितिवालिसामर्थ्यंजानद्भिः अजानद्भिश्चरामसामर्थ्यं बाणैरित्याद्युक्तमित्यदोषः । 'मार्गणैर्दूरपातिभिः' इतिपूर्वश्लोकेप्येवमेवार्थोबोध्यः ॥ १२ ॥ **ति॰** वानरं वानराणामिदं ॥ १३ ॥ **ति॰** अथवेति । सरामेसुग्रीवेकिष्किन्धामागच्छतिअभिषिक्तेनाप्यङ्गदेनास्मत्पालनमशक्य-

[पा॰] १ ज. रामहस्तेन. २ छ. झ. ट. भृशंतस्मादुद्विग्नागिरिकन्दरात्. क. ग. भृशायत्तारम्याद्गिरिगुहान्तरात्. ङ. च. ज. ञ. भृशंतस्माद्विविधाद्गिरिकंदरात्. ३ क. ग. ङ. ट. वानराहिमहाबलाः. ४ क. घ. च.—ट. द्रुतं. ५ क. ख. ग. विद्धानिवेषुभिः. ६ क. ग. ङ.—ट. सुवित्रस्ताः. ७ ङ.—ञ. क्रूरेण. ८ क. ग. प्रहितैर्दूरान्मार्गणैः. ख. ङ.—ट. प्रसृतैर्दूरान्मार्गणैः. घ. प्रभृतरौद्रैर्बाणैर्दूरातिपातिभिः. ९ छ.—ट. मविश्लिष्टं. १० च.—ट. तथाशिलाः. ११ क. घ. च. छ. झ. ञ. ट. बाणैर्वज्रेणेवनिपातितः. ग. बाणैर्वज्रेण. ज. बाणैरिन्द्रेणेवनिपातितः. १२ छ. झ. ट. अभिभूतमिदं. १३ छ. झ. ट. वानरंबलं. १४ च. ज. ञ. तस्मिन्प्लवग. १५ नगरीशूरैरङ्गदश्चा. क. ख. ग. च. नगरंशूरैरङ्गदश्चा. १६ ग. ङ. च. ज. ञ. अथवाऽरुचिरं. १७ क. ग. छ. झ. ट. आविशन्तिच. ज. ञ. आविशन्तिह. १८ क. ख. ग. छ. झ. ट. क्षिप्रमद्यैव. घ. ज. ञ. क्षिप्रमद्यच.

[1]अभार्याश्च सभार्याश्च सन्त्यत्र वनचारिणः ॥ लुब्धेभ्यो [2]विप्रयुक्तेभ्यस्तेभ्यो [3]नस्तुमुलं भयम् ॥ १६ ॥
अल्पान्तरगतानां तु श्रुत्वा वचनमङ्गना ॥ आत्मनः प्रतिरूपं सा बभाषे चारुहासिनी ॥ १७ ॥
पुत्रेण मम किं कार्यं [4]किं राज्येन किमात्मना ॥ कपिसिंहे महाभागे तस्मिन्भर्तरि नश्यति ॥ १८ ॥
पादमूलं गमिष्यामि तस्यैवाहं महात्मनः ॥ योसौ रामप्रयुक्तेन शरेण विनिपातितः ॥ १९ ॥
एवमुक्त्वा प्रदुद्राव रुदन्ती [5]शोककर्शिता ॥ शिरश्चोरश्च बाहुभ्यां दुःखेन समभिघ्नती ॥ २० ॥
[6]आव्रजन्ती ददर्शाथ पतिं निपतितं भुवि ॥ हन्तारं दानवेन्द्राणां समरेष्वनिवर्तिनाम् ॥ २१ ॥
क्षेप्तारं पर्वतेन्द्राणां वज्राणामिव वासवम् ॥ [7]महावातसमाविष्टं महामेघौघनिःस्वनम् ॥ २२ ॥

भूताः । दुर्गाणि किष्कन्धायाः दुष्प्रवेशस्थलानि । आविशन्ति आक्रमिष्यन्ति । अन्यानि अस्मदावासस्थलभिन्नानीत्यर्थः ॥ १५ ॥ अस्त्वाक्रमणं ततः किमित्यत्राह—अभार्या इति ॥ अभार्याः भार्याविरहिताः । सभार्याः समानभार्याः साधारणभार्याइत्यर्थः । ये वालिना विप्रवासिताः वनचारिणः सन्ति तेभ्यः विप्रयुक्तेभ्यः स्वभार्याविरहिभ्यः । लुब्धेभ्यः साधारणभार्यान्तराभिलाषिभ्यः । स्वेभ्यः ज्ञातिभ्यः सुग्रीवादिभ्यः । नः अस्माकं । अत्र किष्कन्धास्थाने । तुमुलं निरन्तरं । भयं भवति । अनेन भाविसुग्रीवव्यापारःसूचितः । रुचिरानन इत्यादिसंबोधनात्तस्याः सहमरणसाहसंद्योत्यते ॥ १६ ॥ अल्पान्तरगतानां किंचिदवकाशं प्राप्तानां । संभाषणाय कियन्मात्रावकाशं प्राप्तानामित्यर्थः । आत्मनः प्रतिरूपं स्वबुद्ध्यनुगुणं । यद्वा आन्तरं बुद्धिः अल्पबुद्धीनामित्यर्थः ॥ १७—१९ ॥ बाहुभ्यां हस्ताभ्यामित्यर्थः ॥ २० ॥ दानवेन्द्राणां मायाविप्रभृतीनां । वज्राणामिति प्रयोगबाहुल्यापेक्षया बहुवचननिर्देशः । महावातसमाविष्टं समाविष्टमहावातमिव स्थितं । समावेशः संघीभावः । यद्वा समाविष्टमिति भावे निष्ठा । महावातसमावेशमिव स्थितं । पराक्रान्तं पराक्रमः । नर्दतां मध्ये भीमं नर्दन्तं । शार्दूलेन सिंहेन । “ सिंहोमृगेन्द्रः पञ्चास्यो हर्यक्षः श्वेतपिङ्गलः । व्यादीर्णास्यो महानादः शार्दूलोतुलविक्रमः ” इतिवैजयन्ती । यद्वा असंभावितत्वद्योतनाय शार्दूलहिंसितसिंहमिवेत्यभूतोपमा । अर्चितमिति । अत्र भागवताद्युक्तकालीयनागप्रहरणवेलायां बलिस्थानं चैत्यमप्युन्मथितमित्यवगन्तव्यमित्याहुः । सर्वलोकस्य सर्वलोकेन । अर्चितं सपताकं अलंकृतमित्यर्थः । सवेदिकं श्रमहरवेदिकासंपन्नं । एवं वर्तमानमपि तत्र निगूढनागग्रहणाय गरुडोन्मथितं चैत्यमिव स्थितमित्यर्थः । शौर्यादिसंपन्नोपि भ्रातृभार्यापहरणपापवत्त्वेन हत इत्यत्र दृष्टान्तोयं । ऊर्जितं दृढं । धनुरवष्टभ्य तिष्ठन्तं । अनेनाकर्षकाकार उच्यते । चकारेण तादृशसंस्थानविशेषेणाकर्षकता कथ्यते । भर्तारं हतवन्तं रामं तत्साहाय्यकृतं तदनुजं तेन संहारयितारं सुग्रीवं च ददर्श । शुभा तत्र शत्रुत्वबुद्धिं विहाय शुभहृदया बभूव । न रामस्य दोषोस्ति । किंतु वालिन एव । पानीयपानाय तटाके खाते तत्र कण्ठे गुर्वीं शिलां बद्ध्वा पतित्वा म्रियमाणस्यैवहि दोषः । अयमप्यनुकूलश्चेत्कथमेनं न रक्षेत् । किंच “ मम प्राणा हि पाण्डवाः ” इत्युक्तरीत्या स्वप्राणभूते स्वाश्रिते हिंसां कुर्वन्तं कथं मृष्येत् । अतएव हि प्रथमयुद्धे न हिंसितवान् । किंतु स्वाश्रितापराधं दृष्ट्वैव पुनर्युद्धे वालिनं हतवानित्यमन्यतेति भावः

मेवेतिनेहस्थातुंयोग्यमितिशेषः । हेरुचिरानने यद्यपीदंस्थानं तेतुभ्यंरुचितं अभीष्टं । तथापि इह किष्किन्धायांविद्यमानानिदुर्गाणि अद्यैववानराः सुग्रीवहनुमदादयः आविशन्ति । वर्तमानसामीप्येलट् । लुब्धेभ्यः राज्यादिविषये । विप्रलब्धेभ्यःपूर्वमस्माभिर्वञ्चितेभ्यः । अस्माकं तुमुलं महत् । भयमस्ति । यतइतिशेषः । केचित्तुइहतेस्थानंअस्माकंअरुचितं अनभिमतं । इतरत्पूर्ववदित्याहुः । **स०** येसभार्याःसुग्रीवाद्याःतेअभार्याःविरहितभार्याःकृताः ॥ १५–१६ ॥ **ती०** अल्पान्तरगतानां नातिदूरवर्तिनां । आत्मनः प्रतिरूपं आत्मानुरूपं । अल्पान्तरगतानांएवंभयेनकिंचिद्भेदंप्राप्तानामितिवा । **ति०** अवान्तरगतानामितिपाठे मध्येमार्गमागतानामित्यर्थः ॥ **स०** चारुहासिनी पूर्वं ॥१७॥ **ती०** महावातसमाविष्टं । भावेनिष्ठा । महावातस्येवसमाविष्टंसमावेशनंयस्यसतथो-

[पा०] १ क. घ. छ. झ. ट. अभार्यास्सहभार्याश्च. २ छ. झ. ञ. विप्रलब्धेभ्यः. ट. विप्रलुब्धेभ्यः. ३ छ. झ. ट. नस्सुमहद्भयं. ४ च. छ. झ. ट. राज्येनापिकिमात्मना. ग. ङ. राज्येनचकिमात्मना. ५ ङ.—ट. शोकमूर्च्छिता. ६ च.—ट. सात्रजन्ती. क. ग. आविशन्ती. ७ ख. महाबलसमाविष्टं.

शक्रतुल्यपराक्रान्तं वृष्ट्वेवोपरतं घनम् ॥ नर्दन्तं नर्दतां भीमं शूरं शूरेण पातितम् ॥ २३ ॥
शार्दूलेनामिषस्यार्थे [१]मृगराजं यथा हतम् ॥ २४ ॥
अर्चितं सर्वलोकस्य सपताकं सवेदिकम् ॥ नागहेतोः सुपर्णेन चैत्यमुन्मथितं यथा ॥ २५ ॥
अवष्टभ्य च तिष्ठन्तं ददर्श धनुरूर्जितं ॥ रामं रामानुजं चैव [२]भर्तुश्चैवानुजं शुभा ॥ २६ ॥
तानतीत्य समासाद्य भर्तारं निहतं रणे ॥ [३]समीक्ष्य व्यथिता भूमौ संभ्रान्ता निपपात ह ॥ २७ ॥
सुप्त्वैव पुनरुत्थाय [४]आर्यपुत्रेति क्रोश[५]ती ॥ रुरोद [६]सा पतिं दृष्ट्वा [७]संदितं मृत्युदामभिः ॥ २८ ॥
तामवेक्ष्य तु सुग्रीवः क्रोशन्तीं कुररीमिव ॥ विषादमगमत्कष्टं दृष्ट्वा चाङ्गदमागतम् ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

विंशः सर्गः ॥ २० ॥

तारया वाल्यालिङ्गनपूर्वकं सकरुणं बहुधाविलापेन प्रायोपवेशाध्यवसायः ॥ १ ॥

रामचापविसृष्टेन शरेणान्त[८]करेण तम् ॥ दृष्ट्वा विनिहतं भूमौ तारा [९]ताराधिपानना ॥
[१०]सा समासाद्य भर्तारं पर्यष्वजत भामिनी ॥ १ ॥
इषुणाऽभिहतं दृष्ट्वा वालिनं कुञ्जरोपमम् ॥ [११]वानरेन्द्रं [१२]महेन्द्राभं [१३]शोकसंतप्तमानसा ॥
तारा तरुमिवोन्मूलं [१४]पर्यदेवयदातुरा ॥ २ ॥
रणे दारुणविक्रान्त प्रवीर प्लवतां वर ॥ [१५]किं दीनामपुरोभागामद्य त्वं नाभिभाषसे ॥ ३ ॥

॥ २१—२६ ॥ तमिममर्थं व्यञ्जयन्नाह—तानिति॥ अतीत्येति नातिक्रम उच्यते । सर्वेषां समीपस्थत्वात् । किंतु तत्र दोषबुद्धिमकृत्वेत्यर्थः । भर्तारं समासाद्येति उपसर्गेण स्वाज्ञानेनायं हत इति बुद्धवतीति ज्ञाप्यते ॥ २७ ॥ संदितं बद्धं । मृत्युदामभिः मृत्युपाशैः । आसन्नप्राणमित्यर्थः ॥२८॥ कष्टं विषादं । अत्यन्तविषादमित्यर्थः ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकोनविंशतिः सर्गः ॥ १९ ॥

अथ ताराप्रलापो विंशे—रामेत्यादिःसार्धश्लोकः । सा तारा तं दृष्ट्वा पर्यष्वजत॥ १ ॥ इषुणेत्यादिःसार्धः ॥ २ ॥ अपुरोभागां दोषदर्शनरहितां अनपराधामि-

---

क्तः । तं । युद्धेमहावातसदृशवेगमित्यर्थः ॥ **रामानु०** वज्राणामिति । किंकरवज्रादिभेदविवक्षयाबहुवचननिर्देशः ॥ **ति०** रणेष्वितिशेषः । रणभेदमपेक्ष्यवज्राणामितिबहुवचनप्रयोगः ॥ २२ ॥ **ति०** मृगराजं प्रभूतमांसादिमत्त्वेनमृगश्रेष्ठं । शार्दूलोव्याघ्रः ॥ २३ ॥ **ति०** चैत्यं चतुष्पथवर्तिवल्मीकं । नागहेतोः अन्तर्विद्यमाननागभक्षणार्थंसुपर्णेनगरुडेनयथोन्मथितंतथासुग्रीवस्यराज्यभोगहेतोः रामेणोन्मथितमित्यर्थः ॥ २५ ॥ **रामानु०** संदितं बद्धं । " बद्धेसंदानितंमूतमुद्दितंसन्दितंसितं " इत्यमरः ॥ २८ ॥ इत्येकोनविंशःसर्गः ॥ १९ ॥

रामानु० रामचापेति । एतदनन्तरं सा समासाद्येतिश्लोकःकतिपयकोशेषुप्रमादाल्लिखितोवर्तते । अयमुपरि "दुर्लभंदर्शनंतस्यतववत्सभविष्यति " इत्यनन्तरंद्रष्टव्यः । तारा उच्चैस्स्वरा । अतोनपुनरुक्तिः । **स०** ताराधिपानना प्राक् । यद्वा मुखस्य कलङ्कितत्वेनतथोक्तिः ॥ १ ॥ **शि०** दारुणंविक्रान्तंविक्रमोयस्यतत्संबोधनं । पुरोभागां अग्रेस्थितां ॥ **ति०** इदानींपुरोभागां एत-

[पा०] १ छ. झ. ञ. ट. मृगराजमिवाहतं. २ च. ज.—ट. भर्तुश्चैवतथानुजं. ३ ग. सासमीक्ष्याथतंभूमौ. ४ क. ख. ह्यार्यपुत्रेति. ५ ङ.—ट. वादिनी. घ. शोचती. ६ ङ. च. ज. ञ. पतितंदृष्ट्वा. ७ छ. झ. ट. संवीतं. क. ग. ङ. च. ज. ञ. स्यन्दितं. ८ ङ. करेणच. ९ क. ख. ग. तारतरस्वना. १० सासमासाद्यभर्तारं. इषुणाभिहतं. इत्यर्धद्वयंरामानुजीयपाठेअत्रनदृश्यते. उत्तरत्रदुर्लभंदर्शनंवत्सेत्यर्धात्परंदृश्यते. ख. घ. समासाद्यच. ११ छ. झ. ट. वानरंपर्वतेन्द्राभं. १२ ग. महाभागं. १३ क. ग. शोकसंविग्नमानसा. ख. शोकसंतापकर्शिना. १४ घ. छ. झ. ट. पर्यदेवयतातुरा. १५ छ. झ. ञ. ट. किमिदानीं रोभागां. क. ग. किंदीनामनुरक्तांमामद्य.

उत्तिष्ठ हरिशार्दूल भजस्व शयनोत्तमम् ॥ नैवंविधाः शेरते हि भूमौ नृपतिसत्तमाः ॥ ४ ॥
अतीव खलु ते कान्ता वसुधा वसुधाधिप ॥ गतासुरपि यां[1] गात्रैर्मां विहाय निषेवसे ॥ ५ ॥
व्यक्त[2]मन्या त्वया वीर धर्मतः संप्रवर्तिता[3] ॥ किष्किन्धेव पुरी रम्या स्वर्गमार्गे विनिर्मिता ॥ ६ ॥
यान्यस्माभिस्त्वया सार्धं[4] वनेषु मधुगन्धिषु ॥ विहृतानि त्वया काले तेषामुपरमः कृतः ॥ ७ ॥
निरानन्दा निराशाऽहं निमग्ना शोकसागरे ॥ त्वयि पञ्चत्वमापन्ने महायूथपयूथपे ॥ ८ ॥
हृदयं सुस्थिरं[5] मह्यं[6] दृष्ट्वा विनिहतं[7] पतिम् ॥ यन्न शोकाभिसंतप्तं स्फुटतेऽद्य सहस्रधा ॥ ९ ॥
सुग्रीवस्य त्वया भार्या हृता स च विवासितः ॥ यत्तु[8] तस्य त्वया व्युष्टिः प्राप्तेयं प्लवगाधिप ॥ १० ॥
निःश्रेयसपरा मोहात्त्वया चाहं विगर्हिता ॥ यैषाऽब्रवं हितं वाक्यं वानरेन्द्र हितैषिणी ॥ ११ ॥
रूपयौवनदृप्तानां दक्षिणानां च मानद ॥ नूनमप्सरसामार्य चित्तानि प्रमथिष्यसि ॥ १२ ॥
कालो निःसंशयो नूनं जीवितान्तकरस्तव ॥ बलाद्येनावपन्नोसि सुग्रीवस्यावशो वशम्[9] ॥ १३ ॥
[अस्थाने[10] वालिनं हत्वा युध्यमानं परेण च ॥ न संतप्यति काकुत्स्थः कृत्वा कर्म सुगर्हितम् ॥ १४ ॥]
वैधव्यं शोकसंतापं कृपणं[11] कृपणा सती ॥ अदुःखोपचिता पूर्वं वर्तयिष्याम्यनाथवत् ॥ १५ ॥
लालितश्चाङ्गदो वीरः सुकुमारः सुखोचितः ॥ वत्स्यते कामवस्थां मे पितृव्ये क्रोधमूर्च्छिते ॥ १६ ॥

ति यावत् ॥ ३—५ ॥ हे वीर अत्र निर्मिता किष्किन्धेवान्या पुरी स्वर्गमार्गे त्वया धर्मतःप्रवर्तिता। अतः खल्विमां त्यक्त्वा गन्तुमुद्यतोसीति भावः॥ ६ ॥ अस्माभिरिति इतरव्यपेक्षया बहुवचनं । अस्माभिः सह त्वया यानि विहृतानि विहाराः । कृतानीत्यध्याहारः । तेषां त्वया उपरमः विरामः कृतः ॥ ७ ॥ अद्य निरानन्दा । निराशा कालान्तरे आनन्दो भविष्यतीत्याशारहिताऽहं शोकसागरे निमग्ना अस्मीति शेषः । पञ्चत्वं मरणं ॥ ८ ॥ मह्यं मम ॥ ९ ॥ व्युष्टिः फलं । "व्युष्टिः फले समृद्धौ च" इत्यमरः। विवासित इति यत्तस्य व्युष्टिरित्यन्वयः ॥ १० ॥ निःश्रेयसपरा श्रेयस्कामा ॥ ११ ॥ दक्षिणानां अनङ्गतन्त्रे कुशलानां । प्रमथिष्यसि वशीकरिष्यसीतिभावः । वीरस्य स्वर्गसिद्धेरितिभावः ॥ १२ ॥ वशं अवपन्नः प्राप्तः ॥ १३—१४ ॥ अहं पूर्वं अदुःखोपचिता अकृपणाचसती संप्रति कृपणाभूत्वा वैधव्यं शोककृतसंतापंच वर्तयिष्यामि धारयिष्यामि ॥ १५ ॥ मे मया लालितः अङ्गदः पितृव्ये पितृभ्रातरि । क्रोधमूर्च्छिते सति कामवस्थां वत्स्यते

स्मिन्कालेकृतापराधांमत्वाऽद्यनाभिभाषसेकिमित्यन्वयः ॥ ३ ॥ **ति०** हेवीर धर्मतःसंप्रवर्तेता धर्मेणयुद्धमाचरतात्वयाऽद्यस्वर्गमार्गे स्वर्गसाधनरणभूमौकिष्किन्धेवाऽन्यारम्यापुरीनिर्मिता । नोचेत्कथंकिष्किन्धांविहायात्रशेषेइत्यर्थः । **कतक०** धर्मतःप्रवर्तिता रक्षिता । किष्किन्धेवान्यापिस्वर्गमार्गे स्वर्गरूपदेशेनिर्मिता ॥ **स०** अन्यापुरी वीरस्वर्गलक्षणा ॥ ६ ॥ **स०** नकालःअकालःअयस्यअदृष्टस्यअकालः अयाकालः । घटानधिकरणमितिवत् ॥ ७ ॥ **ति०** सविवासितइतियत् तत्प्रसिद्धंकर्म तस्यकर्मण इयंव्युष्टिःपरिपाकःप्राप्तइत्यर्थः ॥ १० ॥ **ति०** प्राप्तदिव्यदेहेनाप्सरसांकाममोहजननेनेतिशेषः ॥ **शि०** त्वद्वियोगेममैवदुःखं तवतुतत्रापिसुखमित्याह—**रूपेति** ॥ १२ ॥ **स०** नूनमित्यस्यवशमभिपन्नोसीत्यनेनान्वयादपौनरुक्त्यम् ॥ १३ ॥ **ति०** नसंतप्यति तत् अस्थाने अयुक्तं ॥ **शि०** अस्थाने अप्रसङ्गे स्वभार्यासुविद्यमानास्वित्यर्थः । सुगर्हितं अतिनिन्दितं कर्म अनुजवधूपरिग्रहंकृत्वापरेणसुग्रीवेणयुध्यमानंवालिनंहत्वाकाकुत्स्थोनसंतप्यतिसंतापहेतोरवध्यवधस्याभावादितिभावः ॥ १४ ॥ **ति०** कृपणाकृपणा अतिशयेनकृपणा । आबाधायांवाद्वित्वं । पूर्वमदुःखोपचिता अदुःखं दुःखरहितंयथाभवतितथा उपचिता वर्धिता ॥ १५ ॥

[**पा०**] १ झ. ट. तांगात्रैः. २ छ.—ट. व्यक्तमद्य. ३ छ. झ. ट. संप्रवर्तेता. च. ज. परिवर्तिना. ४ ख. ग. वीर. ५ छ. झ. ट. सुस्थितं. ६ क. ग. ङ. च. ज. मन्ये. ७ क. ग. घ. विनिहतंभुवि. च.—ट. निपतितंभुवि. ८ च.—ट. यत्तत्तस्य. क. यत्तस्यहि. ग. यत्तस्यच. ९ झ. वशी. १० अयंश्लोकः ङ.—ट. पाठेषुदृश्यते. ११ ग. छ. झ. ञ. ट. कृपणाकृपणा.

कुरुष्व पितरं पुत्र सुदृष्टं धर्मवत्सलम् ॥ [1]दुर्लभं दर्शनं वत्स तव तस्य भविष्यति ॥ १७ ॥
समाश्वासय पुत्रं त्वं संदेशं [2]संदिशस्व च ॥ मूर्ध्नि चैनं [3]समाघ्राय प्रवासं प्रस्थितो ह्यसि ॥ १८ ॥
रामेण हि महत्कर्म कृतं त्वामभिनिघ्नता ॥ [4]आनृण्यं च गतं तस्य सुग्रीवस्य प्रतिश्रवे ॥ १९ ॥
सकामो भव सुग्रीव रुमां त्वं प्रतिपत्स्यसे ॥ भुङ्क्ष्व राज्यमनुद्विग्नः [5]शस्तो भ्राता रिपुस्तव ॥ २० ॥
किं मामेवं [6]विलपतीं [7]प्रेम्णा त्वं नाभिभाषसे ॥ इमाः पश्य वरा [8]बह्वीर्भार्यास्ते वानरेश्वर ॥ २१ ॥
तस्या विलपितं श्रुत्वा [9]वानर्यः सर्वतश्च ताः ॥ परिगृह्याङ्गदं [10]दीनं दुःखार्ताः [11]परिचुक्रुशुः ॥२२ ॥

किमङ्गदं साङ्गदवीरबाहो विहाय [12]यास्यद्य चिरप्रवासम् ॥
न युक्तमेवं गुणसन्निकृष्टं विहाय पुत्रं [13]प्रियपुत्र गन्तुम् ॥ २३ ॥
[14]किमप्रियं ते प्रियचारुवेष मया कृतं नाथ सुतेन वा ते ॥
सहाङ्गदां मां स विहाय वीर यत्प्रस्थितो दीर्घमितः प्रवासम् ॥ २४ ॥
यद्यप्रियं किंचिदसंप्रधार्य कृतं मया स्यात्तव दीर्घबाहो ॥
क्षमस्व मे तद्धरिवंशनाथ व्रजामि मूर्ध्ना तव वीर पादौ ॥ २५ ॥
तथा तु तारा करुणं रुदन्ती भर्तुः समीपे सह वानरीभिः ॥
व्यवस्यत [15]प्रायमुपोपवेष्टुमनिन्द्यवर्णा भुवि यत्र वाली ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे विंशः सर्गः ॥ २० ॥

वर्तयिष्यति । नश्यत्येवेतिभावः ॥ १६ ॥ कुरुष्वेति अनेन तदानीमङ्गदः समागत इति द्योत्यते ॥ १७—१८ ॥ महत् अन्यैरशक्यं । कर्म कृतं । आनृण्यंच गतं प्राप्तं । प्रतिश्रवे प्रतिज्ञाविषये ॥ १९ ॥ सुग्रीवं प्रत्याह—सकाम इति ॥ शस्तः हिंसितः ॥ २० ॥ वालिनं प्रत्याह—किमिति ॥ २१ ॥ विलपितं विलापं ॥ २२ ॥ साङ्गदौ वीरौ वीर्यवन्तौ बाहू यस्य स तथोक्तः । गुणसन्निकृष्टं गुणैः प्रत्यासन्नं । गुणैस्तव सदृशमित्यर्थः । हे प्रियपुत्रेति संबुद्धिः । प्रियः पुत्रो यस्य सः प्रियपुत्रइति । इयं स्त्रीजनप्रलापपरिपाटी ॥ २३—२४॥ असंप्रधार्य अविज्ञाय ॥२५॥ प्रायमुपोपवेष्टुं प्रायोपवेशंकर्तुमित्यर्थः । "प्रसमुपोदः पादपूरणे" इति द्विर्वचनं ॥ २६ ॥ अत्र सर्गे श्लोकव्यत्यासो लेखककृतः । अस्मिन्सर्गे षड्विंशतिश्लोकाः ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने विंशः सर्गः ॥ २० ॥

स० विगतःईरःकंपोययोस्तौवीरौ । ततस्त्रिपदगर्भबहुव्रीहिः ॥ **शि०** वीरः मानिवीरविध्वंसकत्वेनवीरत्वविशिष्टोबाहुर्यस्यतत्संबोधनं ॥ २३ ॥ **ती०** प्रायमुपोपवेष्टुं प्रायोपवेशंकर्तुं अनशनदीक्षांकर्तुमित्यर्थः ॥ २६ ॥ इतिविंशस्सर्गः ॥ २० ॥

[पा०] १ दुर्लभंदर्शनंवत्सेत्यर्धादनन्तरं रामानुजीयपाठे सासमासाद्यभर्तारंपर्यष्वजतभामिनी । इषुणाभिहतंदृष्ट्वावालिनं कुञ्जरोपमम । इतिश्लोकोदृश्यते । रामानुजार्येणव्याख्यातश्च । साअङ्गदंप्रतितथोक्तवतीति. २ ङ. छ.—ट. संदिशस्वमे. ३ क. समाजिघ्रन्प्रवासं. ४ क.—च. ज.—ट. आनृण्यंतु. ५ च. मृतोभ्राता. ६ छ. झ. ट. प्रलपतीं. ७ ङ.—ट. प्रियांत्वं. ८ छ. झ. ट. बह्वयोभार्याः. ९ झ. वानर्याः. १० छ. झ. ट. दीनाः. ११ ङ. च. ज. ञ. संप्रचुक्रुशुः. छ. झ. ट. प्रतिचुक्रुशुः. १२ ङ.—ञ. यातोसिचिरंप्रवासं. १३ छ. झ. ञ. प्रियचारुवेषं. १४ अयंश्लोकः झ. ट. पाठयोर्नदृश्यते. ञ. तवाप्रियंकान्त मयाकचित्किंप्राज्यंकृतंनाथ. १५ ख. ग. घ. च.—ट. प्रायमनिन्द्यवर्णाउपोपवेष्टुंभुवि.

एकविंशः सर्गः ॥ २१ ॥

हनुमताशोचन्तींतारांप्रति शास्त्रार्थकथनेन समाश्वासनपूर्वकमङ्गदेनवालिनऔर्ध्वदैहिकविधानचोदनेन सहाङ्गदाभ्युदयावलोकनेन शोकनिर्हरणोक्तिः ॥ १ ॥ तारया तंप्रति स्वस्याङ्गदाभ्युदयापेक्षया मृतभर्तृपार्श्वशयनस्यैव सुखसाधनत्वोक्तिः ॥ २ ॥

ततो निपतितां तारां च्युतां तारामिवाम्बरात् ॥ शनैराश्वासयामास हनुमान्हरियूथपः ॥ १ ॥
गुणदोषकृतं जन्तुः स्वकर्मफलहेतुकम् ॥ अव्यग्रस्तदवाप्नोति [1]सर्वं प्रेत्य शुभाशुभम् ॥ २ ॥
शोच्या शोचसि कं शोच्यं दीनं दीनाऽनुकम्पसे ॥ [2]कस्य को वाऽनुशोच्योस्ति देहेस्मिन्बुद्बुदोपमे ॥ ३ ॥
अङ्गदस्तु कुमारोऽयं द्रष्टव्यो जीवपुत्रया ॥ [3]आयत्यां च विधेयानि समर्थान्यस्य चिन्तय ॥ ४ ॥
जानास्यनियतामेवं भूतानामागतिं गतिम् ॥ तस्माच्छुभं हि कर्तव्यं प[4]ण्डितैनैहलौकिकम् ॥ ५ ॥
यस्मिन्हरिसहस्राणि [5]प्रयुतान्यर्बुदानि च ॥ वर्तयन्ति कृतांशानि सोयं दिष्टान्तमागतः ॥ ६ ॥
यदयं न्यायदृष्टार्थः सामदानक्षमापरः ॥ गतो [6]धर्मजितां भूमिं नैनं शोचितुमर्हसि ॥ ७ ॥
[7]सर्वे हि हरिशार्दूलाः पुत्रश्चायं तवाङ्गदः ॥ इदं [8]हर्यृक्षराज्यं च त्वत्सनाथमनिन्दिते ॥ ८ ॥

अथ हनुमत्समाश्वासनमेकविंशे—तत इत्यादि ॥ तारां तारकां ॥ १ ॥ जन्तुः गुणदोषकृतं ज्ञानाज्ञानाभ्यांकृतं । स्वकर्मफलं स्वकर्मवासना हेतुर्यस्य तत्तथोक्तं । यत् कर्मास्ति तत् तस्य शुभाशुभं फलभूतंसुखदुःखं । प्रेत्य लोकान्तरंप्राप्य । अव्यग्रः एकाग्रः सन् । अवाप्नोति । अत्रकृतंशुभाशुभरूपं कर्म लोकान्तरे फलदानाय सहैव गच्छतीत्यर्थः । सुग्रीवेणायं मारित इति न मन्तव्यं । किंतु स्वकर्मणैवहतः । निमित्तमात्रं सुग्रीवइतिभावः ॥ २ ॥ नायंशोचनीयः स्वकर्मानुरूपेणगतत्वात् । किंतु स्वात्मैवशोच्यः केनकर्मणा कंलोकंगमिष्यामीति । तद्दर्शयति—शोच्येति ॥ स्वयंशोच्या त्वं कंप्रति शोचसि । स्वयंदीना कं दीनं अनुकम्पसे दयसे। बुद्बुदोपमे जलबुद्बुदवदस्थिरे देहे । निमित्तसप्तमी । कस्य कोवानुशोच्योस्ति । सर्वेषामप्यस्थिरत्वाविशेषात् । स्वयं स्थिर एव ह्यस्थिरं शोचेदिति भावः ॥ ३ ॥ द्रष्टव्यः परिपालनीयः । आयत्यां उत्तरकाले । समर्थानि हितानि ॥ ४ ॥ अनियतामागतिं गतिं अस्थिरतामितियावत् । शुभं और्ध्वदैहिकं । ऐहलौकिकं रोदनादिकं ॥ ५ ॥ यस्मिन् विषये । हरीत्यविभक्तिकनिर्देशः । हरीणामित्यर्थः । कृतांशानि कृतविभागानि सन्ति वर्तयन्ति जीवनं कुर्वन्ति। सोयं दिष्टान्तं दिष्टस्य दैवकल्पितकालस्य अन्तं समाप्तिं । "कालो दिष्टोप्यनेहापि" इत्यमरः। बहून्स्वजनाञ्जीवयित्वा गतः स्वसुकृतफलं प्राप्तुं गतः । अतः स न शोच्य इतिभावः ॥६॥ न्यायदृष्टार्थः शास्त्रदृष्टतत्त्वार्थः । साम दुःखितानां स्वजनानां सान्त्वनं । दानं अभीष्टार्थदानं । क्षमा तत्कृतापराधसहनं । एतासु परः सक्तः अयं । धर्मजितां स्वाधीनधर्माधर्मकाणां । भूमिं लोकं । यत् यस्मात् गतः । तस्मान्नैनं शोचितुमर्हसि ॥७॥ हरीणां ऋक्षाणां च । राज्यं त्वत्सनाथं त्वया सनाथं ॥ ८ ॥

स० गुणदोषकृतं गुणदोषजन्यं । स्वकर्मफलहेतुकं सुष्टुअकर्मफलंयस्यसःस्वकर्मफलोविष्णुः तद्धेतुकंशुभं स्वर्गनरकादिकं जन्तुः प्रेत्य अव्यग्रस्सन्प्राप्नोतीतियोजना ॥ **शि०** अव्यग्रोजन्तुः प्राणी गुणदोषकृतं गुणेनधर्मबुद्ध्या । दोषेण पापबुद्ध्या । कृतं निष्पादितं । फलहेतुकंशुभाशुभफलकारणीभूतंयत्स्वकर्मतत् तस्यस्वकर्मणःशुभाशुभंफलं । प्रेत्यप्राणांस्त्यक्त्वा । अवाप्नोति । एतेन पूर्वोपार्जितकर्मफलमेवत्वयाप्राप्तमितिसूचितं ॥ २ ॥ **स०** आयत्या प्रयत्नेन । अस्य वालिनः । विधेयानिकार्याणिसमर्थानि सुगतिप्रापकाणीत्यर्थः । चिन्तय कारयेतियावत् ॥ ४ ॥ **ति०** हेपण्डिते इह पतिपित्रादिवियोगकाले । लौकिकं बहुरोदनादि । नकर्तव्यं प्रीतिमात्रबोधकतयामृतेष्टासाधनत्वेनचतस्यलौकिकत्वं। **स०** अनियतां अव्यवस्थितांभगवन्नियतामित्यप्यर्थः । नियतामितिपाठेतुस्फुटोर्थः । पण्डितेनेत्येकंवापदं । अङ्गदेनेत्यर्थः । लौकिकं ऊर्ध्वलोकप्रापकं । कर्तव्यं त्वयाकारयितव्यंच ॥ ५ ॥ **रामानु०**

[पा०] १ ङ. च. ज. ञ. स्वयं. २ क. ग. घ. च. छ. झ. ञ. ट. कश्चकस्यानु. ३ ट. आयत्याच. ४ क. ख. ङ.—ट. पण्डितेनेह. ५ क. ख. ग. छ. झ. शतानिनियुतानिच, च. ज. ट. प्रयुक्तान्यर्बुदानिच. ६ ज. धर्मकृतां. ७ ग. ङ.—ट. सर्वेच. क. सर्वेतु. ८ क. घ.—ट. हर्यृक्षपतिराज्यं.

तावि[1]मौ शोकसंतापौ शनैः प्रेरय भामिनि ॥ त्वया परिगृहीतोऽयमङ्गदः शास्तु मेदिनीम् ॥ ९ ॥
संततिश्च यथा दृष्टा कृत्यं यच्चापि सांप्रतम् ॥ राज्ञस्तत्क्रियतां [2]तावदेष कालस्य निश्चयः ॥ १० ॥
संस्कार्यो [3]हरिराजश्च अङ्गदश्चाभिषिच्यताम् ॥ सिंहासनगतं पुत्रं पश्यन्ती शान्तिमेष्यसि ॥ ११ ॥
सा तस्य वचनं श्रुत्वा भर्तृव्यसनपीडिता ॥ अब्रवीदुत्तरं तारा हनुमन्तमवस्थितम् ॥ १२ ॥
अङ्गदप्रतिरूपाणां पुत्राणामेकतः शतम् ॥ [4]हतस्याप्यस्य वीरस्य गात्रसंश्लेषणं वरम् ॥ १३ ॥
न चाहं [5]हरिराजस्य प्रभवा[6]म्यङ्गदस्य वा ॥ पितृव्यस्तस्य सुग्रीवः सर्वकार्येष्वनन्तरः ॥ १४ ॥
न ह्येषा बुद्धिरास्थेया हनुमन्नङ्गदं प्रति ॥ पिता हि बन्धुः पुत्रस्य न माता हरिसत्तम ॥ १५ ॥

न हि मम हरिराजसंश्रयात्क्षमतरमस्ति परत्र [7]चेह वा ॥
अभिमुखहतवीरसेवितं शयनमिदं मम सेवितुं क्षमम् ॥ १६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकविंशः सर्गः ॥ २१ ॥

द्वाविंशः सर्गः ॥ २२ ॥

वालिनाकनिष्ठमपिसुग्रीवंप्रतिस्वापकारक्षमापणपूर्वकं ताराबुद्धिप्रशंसनेन तद्वचनसंमाननचोदनेन सहाङ्गदपालनराम-कार्यकरणयोश्चोदना ॥ १ ॥ तथा सुग्रीवाय स्वकण्ठस्थकाञ्चनमालादानपूर्वकमङ्गदंप्रति हितमुपदिशतिसतिवालिनि सहसा तत्प्राणैस्तच्छरीरादुत्क्रमणं ॥ २ ॥ वानरगणेषु वालिनोऽद्भुतापदानप्रशंसनपूर्वकमुच्चैः परिदेवयमानेषु तारया सहसा वालिपरिरंभणपूर्वकं भूमौनिपतनं ॥ ३ ॥

वीक्षमाणस्तु मन्दासुः सर्वतो मन्दमुच्छ्वसन् ॥ [8]आर्दावेव तु सुग्रीवं [9]ददर्श त्वात्मजाग्रतः ॥ १ ॥

तावि‌मौ शोकसंतापौ शोकतत्कृततापौ । शनैः क्रमेण । प्रेरय निवर्तय । भर्तृमरणशोकस्य सद्यो दुस्त्यजत्वा-दिति भावः ॥ ९ ॥ संततिश्च यथा दृष्टा यत्प्रयोज-नकः संतानोलब्धः । सांप्रतं इदानीं । यच्च कृत्यं कर्तुं योग्यं तत्सर्वं राज्ञः क्रियतां । एष निश्चयोस्य कालस्य योग्य इति शेषः । नतु शोक इति भावः । पुत्रोत्पादनफलमौर्ध्वदैहिकं क्रियतामित्यर्थः ॥ १० ॥ उक्तमर्थं वाचा दर्शयति—संस्कार्य इति । शान्तिं दुःख-शमं ॥११—१२॥ अङ्गदप्रतिरूपाणां अङ्गदतुल्यानां । पुत्राणां सत्पुत्राणां शतं एकतः एकत्र एकतुलायामस्तु । हतस्याप्यस्य गात्रसंश्लेषणं गाढालिङ्गनं । एकतो-स्तु । तयोर्मध्ये भर्तृसंश्लेषणमेव वरमित्यर्थः ॥ १३ ॥ संस्कार्य इत्यस्योत्तरमाह—न चेति ॥ हरिराजस्य न प्रभवामि तस्य संस्कारकरणे न समर्थास्मि । अङ्गदस्य वा न प्रभवामि तस्य राज्याभिषेककरणे न प्रभवा-मीत्यर्थः ॥ १४ ॥ नास्थेया नादर्तव्या । नकर्तव्येत्य-र्थः । पिता पितृव्यः ॥ १५ ॥ परत्र परलोके । इह अस्मिँल्लोके । शत्र्वभिमुखतया हतः अभिमुखहतः स चासौ वीरश्च तेन सेवितं ॥ १६ ॥ इति श्रीगोविन्द-राजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकविंशः सर्गः ॥ २१ ॥

एवममोघरामशराभिघातेन मोहसमाविष्टं वालिनं मृतं निश्चित्य संस्कारादिकरणाय त्वरमाणे हनुमति

हर्यृक्षपतिराज्यंचेतिपाठः । अन्यथावक्ष्यमाणाङ्गदाभिषेकवचनविरोधःस्यात् ॥ ८ ॥ **रामानु०** त्वयेति । अङ्गदाभिषेचनं तारा-दुःखशान्तयेदर्शितं ॥ **ति०** ताविमौ सुग्रीवाङ्गदौ शनैःप्रेरय उत्तरकार्यकरणायेतिशेषः ॥ ९ ॥ **शि०** ननुत्वत्कर्तृकाभिषेकाप्रवृ-त्तौत्वद्विषयकाङ्गदप्रीतिर्विनङ्क्ष्यतीत्यतआह—**नहीति**। हेहनुमन् पिता तदुपलक्षितपितृव्यादिश्चपुत्रस्यबन्धुः। मातातु न एषाबुद्धिः अङ्गदंप्रतिआस्थेया प्रापणीया । किंचमातैवबन्धुः पित्रादिस्तुनेतिबुद्धिर्नास्थेया । पितृव्येपिबन्धुत्वंबोधनीयमित्यर्थः । एतेनेदृग्बुद्ध्य-नुत्पत्तौसुग्रीवविद्वेषेऽङ्गदविध्वंसोभविष्यतीतिव्यञ्जितं ॥ १५ ॥ इत्येकविंशःसर्गः ॥ २१ ॥

[**पा०**] १ ख. च. छ. ज. ञ. ट. शोकसंतप्तौ. २ क. ख. ग. ङ. ज.—ट. सर्वमेषकालस्य. च. सर्वमेषकार्यस्य. ३ घ. च.—ञ. ट. हरिराजस्तु. ४ ख. हतस्यास्यप्रवीरस्य. ५ ग. राजसिंहस्य. ६ क. च. म्यङ्गदस्यच. ७ ज. ञ. चेहच. ८ क. आरादेवतु. ९ ख. ङ. च. छ. झ. ञ. ट. ददर्शानुजमग्रतः. ज. ददर्शानुजमग्रजः.

तं प्राप्तविजयं वाली सुग्रीवं प्लवगेश्वरः[1] ॥ आभाष्य[2] व्यक्तया वाचा सस्नेहमिदमब्रवीत् ॥ २ ॥
सुग्रीव दोषेण न मां गन्तुमर्हसि किल्बिषात् ॥ कृष्यमाणं भविष्येण बुद्धिमोहेन मां बलात् ॥ ३ ॥
युगपद्विहितं तात न मन्ये सुखमावयोः ॥ सौहार्दं भ्रातृयुक्तं हि तदिदं[3] तात नान्यथा ॥ ४ ॥
प्रतिपद्य त्वमद्यैव राज्यमेषां वनौकसाम् ॥ मामप्यद्यैव गच्छन्तं विद्धि वैवस्वतक्षयम् ॥ ५ ॥
जीवितं च हि राज्यं च श्रियं च विपुलाम्[4] इमाम् ॥ प्रजहाम्येष वै तूर्णं[5] महच्चागर्हितं यशः ॥ ६ ॥
अस्यां त्वहमवस्थायां वीर वक्ष्यामि यद्वचः ॥ यद्यप्यसुकरं राजन्कर्तुमेव तदर्हसि[6] ॥ ७ ॥
सुखार्हं सुखसंवृद्धं बालमेनम्[7] अबालिशम् ॥ बाष्पपूर्णमुखं पश्य भूमौ पतितमङ्गदम् ॥
मम प्राणैः प्रियतरं पुत्रं पुत्रमिवौरसम् ॥ ८ ॥
मया हीनमहीनार्थं सर्वतः परिपालय ॥ त्वमेवास्य[8] हि दाता च परित्राता च[9] सर्वतः ॥
भयेष्वभयदश्चैव यथाऽहं प्लवगेश्वर ॥ ९ ॥
एष तारात्मजः श्रीमांस्त्वया तुल्यपराक्रमः ॥ रक्षसां[10] तु वधे तेषामग्रतस्ते भविष्यति ॥ १० ॥

दैवात्किंचित्समाश्वस्तो वाली कर्तव्यभागं नियच्छति द्वाविंशे—वीक्षमाण इत्यादि ॥ मन्दासुः अल्पप्राणः ॥ १ ॥ आभाष्य संबोध्य ॥ २ ॥ किल्बिषात् राज्यविवासनदारहरणरूपकिल्बिषाद्धेतोः । मां दोषेण गन्तुं दोषसहितं ज्ञातुं नार्हसि । किंतु भविष्येण भाविफलेन हेतुनाजातेन बुद्धिमोहेन बलात्कृष्यमाणं मां गन्तुमर्हसि ॥ ३ ॥ आवयोः भ्रात्रोः । भ्रातृयुक्तं भ्रातृत्वप्रयुक्तं । सौहार्दं सुखं राज्यसुखं च । एतदुभयं दैवेन युगपन्नविहितं । मन्ये ध्रुवं । अव्ययमेतत् । तदिदं दैवकृतं युगपदविधानं । अन्यथा न हि अन्यप्रकारं न भवतिहि ॥ ४ ॥ प्रतिपद्य पालयेति-शेषः । यद्वा प्रतिपद्यप्राप्नुहि । ल्यबन्तोयं । वैवस्वतक्षयं यमगृहं ॥ ५ ॥ अगर्हितं यशः केनाप्यवध्यो वालीति प्रसिद्धं यशः ॥ ६ ॥ अस्यामवस्थायां चरमावस्थायां । यद्वचो वक्ष्यामि एतद्यद्यप्यसुकरं तथाप्यवश्यं कतुमर्हसि । मदुक्तरीत्या राजाभवेत्यर्थः ॥ ७ ॥ वयसा बालमप्यबालिशं बालबुद्धिरहितं । प्राणैः प्राणेभ्यः । मम पुत्रं त्वं औरसं पुत्रमिव पश्येति संबन्धः ॥ ८ ॥ अस्य अङ्गदस्य । दाता वस्त्राभरणादीनामिति शेषः । सर्वतः

ति० हेसुग्रीव मांकिल्बिषात् प्राग्भवीयदुष्कृतवशात् । भविष्येण भविष्यताऽवश्यंभाविनाबुद्धिमोहेन त्वयिशत्रुबुद्धिरूपेण बलात्कृष्यमाणंमांज्ञात्वा त्वंदोषेण स्वापकारदोषवत्त्वेन । मांगन्तुं अवगन्तुं । नार्हसि ॥ ३ ॥ **स०** मन्येइत्येतदव्ययमितिकश्चित् तन्मूलंचिन्त्यं । **ति०** कार्यानुमितंकर्मप्राबल्यंदर्शयति—**युगपदिति** । भ्रातृयुक्तं भ्रात्रोर्युक्तंउचितं । सौहार्दं सुखंचराज्यसुखंच आवयोःकर्मणायुगपन्नविहितमितिमन्ये । यतस्तदिदमुचितमपिसौहार्दसुखंचान्यथाजातंविघटितमित्यर्थः ॥ ४ ॥ **ति०** अथरामशरक्षीणपापत्वात्प्राप्तदिव्यप्रकृतिःस्वयमेवसुग्रीवायस्वानन्तरंप्राप्तंराज्यंददाति—**प्रतिपद्येति** । प्रतिपद्यस्वेत्यर्थः । ननुराजनिमृतेतत्पुत्रएवराज्याधिकारी नतुतत्कनीयान्भ्रातेतिचेन्न । पुत्रस्यबालत्वेनराज्यरक्षणासामर्थ्याद्बलवदाश्रितत्वाच्चपुत्रनाशोमाभूदिततथोक्तेः । भगवतारामेणापिराज्यरक्षणासामर्थ्येनाङ्गदस्यसुग्रीवोऽभिषिक्तो यौवराज्येचाङ्गदः । सुग्रीवानन्तरंत्वङ्गदस्यैवराज्याधिकारो नतुसुग्रीवपुत्राणांअज्येष्ठपुत्रत्वादित्याहुः ॥ **स०** अद्यैवगच्छन्तमित्यनेन नमज्जीवनभयंतवेतिद्योतयति ॥ **शि०** ननुराजपुत्रसत्त्वेभ्रातूराज्यानौचित्यात्कथमेवमुक्तमितिचेन्न । बिलप्रविष्टवालिमरणनिश्चयेतदानींवालिपुत्रस्याभावात्सुग्रीवस्यप्राप्तराज्यत्वेननवीनराज्यत्वाभावेनादोषात् ॥५॥ **ति०** अगर्हितंयशः वालीकेनाप्यवध्यइत्येवंरूपं । प्रजहामि एकेनैवशरेणरामहतत्वादितिप्राञ्चः । अन्येतुचस्त्वर्थे यशइत्युत्तरंबोध्यः । अगर्हितंयशस्तुप्राप्नोमीतिशेषः । वालीभगवतारामेणच्छन्नेनहतइत्येवंरूपंचयशइत्याहुः ॥ ६ ॥ **ति०** अस्यामवस्थायां चरमदशायां । यद्यप्यसुकरं मयाऽत्यन्तमपकृतत्वात् । तथापिकर्तुमर्हस्येवेतियोजना । सात्विकत्वात्सात्विकसमाश्रयणाच्चेत्याशयः । स्वयंराज्यस्यदत्तत्वाद्राजन्नितिसंबोधनं ॥ ७ ॥ **वि०** सर्वतः सर्वत्रदेशेकालेच । पालय स्वानन्तरमस्यैवराज्यंदेही-

[पा०] १ घ.—ञ. प्लवगेश्वरं. २ क. ग. ङ. च. ञ. आभाष्याव्यक्तया. ३ च.—ट. जातमन्यथा. ४ छ. झ. ञ. ट. विपुलांतथा. ५ ग. सौम्य. ङ. च. ज. तूर्णमहंवाऽगर्हितं. क. छ. झ. ञ. ट. तूर्णमहंचागर्हितं. ६ ङ.—ट. त्वमर्हसि. ७ ख. बालमत्यन्तबालिशं. ८ छ. झ. ट. त्वमप्यस्यपितादाता. ख. त्वमप्यमितदाताच. ङ. च. ज. ञ. त्वमस्यहितदाताच. क. ग. घ. त्वमप्यस्यहिदाताच. ९ घ. हिसर्वशः. क. तुसर्वशः. ख. ग. ङ.—ट. चसर्वशः. १० ङ.—ट. रक्षसांच.

अनुरूपाणि [1]कर्माणि विक्रम्य बलवान्रणे ॥ करिष्यत्येष [2]तारेयस्तरस्वी तरुणोऽङ्गदः ॥ ११ ॥
सुषेणदुहिता चेयमर्थसूक्ष्मविनि[3]श्चये ॥ औत्पातिके च विविधे सर्वतः परिनिष्ठिता ॥ १२ ॥
यदेषा साध्विति ब्रूयात्कार्यं तन्मुक्तसंशयम् ॥ नहि तारामतं किंचिदन्यथा परिवर्तते ॥ १३ ॥
राघवस्य च ते कार्यं कर्तव्यमविशङ्कया ॥ स्यादधर्मो ह्यकरणे त्वां च हिं[4]स्याद्विमानितः ॥ १४ ॥
इमां च मालामाधत्स्व दिव्यां सुग्रीव काञ्चनीम् ॥ उदारा श्रीः स्थिता ह्यस्यां संप्रजह्यान्मृते मयि ॥१५॥
इत्येवमुक्तः सुग्रीवो वालिना भ्रातृसौहृदात् ॥ हर्षं त्यक्त्वा पुनर्दीनो ग्रहग्रस्त इवोडुराट् ॥ १६ ॥
[5]तद्वालिवचनाच्छान्तः कुर्वन्युक्तमतन्द्रितः ॥ जग्राह सो[6]ऽभ्यनुज्ञातो मालां तां चैव काञ्चनीम् ॥ १७॥
तां मालां काञ्चनीं दत्त्वा [7]वाली दृष्ट्वाऽऽत्मजं स्थितम् ॥ संसिद्धः प्रेत्यभावाय स्नेहादङ्गदमब्रवीत् ॥ १८॥
देशकालौ भजस्वाद्य क्षममाणः प्रियाप्रिये ॥ सुखदुःखसहः काले सुग्रीववशगो भव ॥ १९ ॥
यथा हि त्वं महाबाहो लालितः सततं मया ॥ न तथा वर्तमानं त्वां सुग्रीवो [8]बहु मंस्यते ॥ २०॥
[9]मास्यामित्रैर्गतं गच्छेर्मा शत्रुभिररिंदम ॥ भर्तुरर्थपरो दान्तः सुग्रीववशगो भव ॥ २१ ॥
न चातिप्रणयः कार्यः कर्तव्योऽप्रणयश्च ते ॥ उभयं हि [10]महान्दोषस्तस्मादन्तरदृग्भव ॥ २२ ॥

शत्रुभ्यः परित्राता । भयेष्वभयदः शत्रुपुत्रत्वेन स्थानान्निष्कासनादिभयहेतुषु विषये अभयदः ॥ ९—११ ॥ अर्थसूक्ष्मविनिश्चये सूक्ष्मार्थविनिश्चये । औत्पातिके उत्पातविषयज्ञाने च । परिनिष्ठिता संजातनिष्ठा । समर्थेतियावत् ॥ १२ ॥ न परिवर्तते न भवतीत्यर्थः ॥ १३ ॥ विमानितः राघव इति शेषः ॥ १४ ॥ संप्रजह्यान्मृतेमयि मृते सति श्रीरिमां काञ्चनीं मालां संप्रजह्यात् । ततः पूर्वमेव मयि जीवति गृहाणेति भावः ॥ १५ ॥ दीनः अभूदिति शेषः । ग्रहग्रस्तः राहुग्रस्तः ॥ १६॥ तत् तदनन्तरं । शान्तः त्यक्तवैरः ॥ १७ ॥ प्रेत्यभावाय मरणाय । संसिद्धः कृतनिश्चयः ॥ १८ ॥ अद्य मत्प्रयाणानन्तरं । देशकालौ भजस्व । गत्यर्था ज्ञानार्थाः । देशकालौ जानीहि । अस्मिन्देशे अस्मिन्काले च एवं वर्तितव्यं एवं न वर्तितव्यमिति विवेचयेत्यर्थः । प्रियाप्रियेक्षममाणः । प्रभोः प्रियवचनवदप्रियवचनमपि सोढव्यमित्यर्थः । काले सुखदुःखसहः दुःखकाले सुखं सुखकाले दुःखं च सहमान इत्यर्थः । सुग्रीववशो भव सुग्रीवपरतन्त्रोभव ॥ १९—२० ॥ अस्य सुग्रीवस्यामित्रैर्गतं प्राप्तं पुरुषं मा गच्छेः । अस्य शत्रुमित्रं न भजेरित्यर्थः । शत्रुभिः सह च मा गच्छेः ॥ २१ ॥ अतिप्रणयः अतिस्नेहः अप्रणयः स्नेहाभावश्च ।

तिव्यङ्ग्यं ॥ ९ ॥ स० अनुरूपाणि मदनुरूपाणि त्वदनुरूपाणिवा ॥ ११ ॥ ती० ननुसमुद्रसंजातायास्तारायास्सुषेणदुहितृत्वंकथमितिचेत् तत्रक्षीराब्धिमथनसमयोत्पन्नांतारांदृष्ट्वासुषेणोवामंकरमग्रहीत् । वालीतुतारायादक्षिणंकरमगृह्णात् । तदाऽन्योन्यंविवादेसति देवैस्सुषेणदुहितृत्वंतारायावालिनोजायात्वंचनिश्चितं । तदुक्तंस्कान्दे—" देवैस्सुषेणकलहेपुत्रीतिप्रतिपादिता । सुषेणोदुहितुस्तस्याःस्वयंवरमकल्पयत् । इत्थमूढाकपीन्द्रेणतारासर्वाङ्गसुन्दरी । सुग्रीवमेकदारात्रौरूपसादृश्यमोहिता । प्रार्थयामासकामार्तारन्तुंरतिमतीप्रभुम् । नममायोनिजातायागमनंलोकगर्हितम् ।" इति ॥ ति० तारारक्षणंततउपकारमादर्श्यसूचयति—**सुषेणेति** । तद्दुहिता तारा । अर्थानांमध्येसूक्ष्मःपरमदुर्ज्ञेयोयोर्थस्तस्यनिश्चये औत्पातिकेविविधेनानाप्रकारोत्पातसूचितापत्कालिकानुष्ठेयनिश्चयेसर्वतऐहिकामुष्मिकनिश्चयेच । परिनिष्ठिता अतिसमर्था ॥१२॥ ति० नहीति । मदनुभवसिद्धमेतदितिभावः । अनेनत्रैवर्णिकेतरत्वेनतरुणत्वेनावश्यंकर्तव्यपुरुषान्तरस्वीकारायास्तारायादेवरत्वात्सुग्रीवस्यस्वीकारोप्यनुमतइतिगम्यते ॥ १३ ॥ **रामानु०** संप्रजह्याः संप्रजहि । शत्रूनितिशेषः ॥ १५ ॥ ति० विपक्षेबाधकमाह—**यथाहीति** । बालतयाकेवलंलालितः यथासेवोचितकालेपिसेवारहितोऽवर्तिष्ट तथा सेवाराहित्येनवर्तमानंत्वां सुग्रीवोनबहुमन्येत । अतस्सेवांकुर्वित्युपदेशः ॥ २० ॥ स० अस्य माशत्रुभिः मित्रैस्सह गच्छेः ॥ २१ ॥ ति० नातिप्रणयः पुत्रत्वात् अप्रणयश्चनकार्यः । अस्मद्वधादिनान्तरदृक् 'अत्यासत्तिर्वि-

[पा०] १ ग. कार्याणि. २ ख. ङ.—ट. तारेयस्तेजस्वी. ३ क. ग. विनिर्णये. ४ ङ.—ट. हिंस्यादमानितः. ५ क. ग. वालिनोवचनाच्छान्तः. ६ घ. चाभ्यनुज्ञातः. ७ ङ.—ट. दृष्ट्वाचैवात्मजंस्थितं. ८ क. ग.—ट. बहुमन्यते. ९ ख. छ. झ. ञ. ट. नास्यामित्रैः. १० ग. घ. छ. झ. ञ. ट. महादोषंतस्मात. क. ङ. च. ज. महादोषः.

इत्युक्त्वाऽथ विवृत्ताक्षः शरसंपीडितो भृशम् ॥ विवृतैर्दशनैर्भीमैर्बभूवोत्क्रान्तजीवितः ॥ २३ ॥
ततो विचुक्रुशुस्तत्र वानरा हरियूथपाः ॥ परिदेवयमानास्ते सर्वे प्लवगपुङ्गवाः ॥ २४ ॥
किष्किन्धा ह्यद्य शून्यासीत्स्वर्गते वानराधिपे ॥ उद्यानानि च शून्यानि पर्वताः काननानि च ॥
हते प्लवगशार्दूले निष्प्रभा वानराः कृताः ॥ २५ ॥
यस्य वेगेन महता काननानि वनानि च ॥ पुष्पौघेणानुबध्यन्ते करिष्यति तदद्य कः ॥ २६ ॥
येन दत्तं महद्युद्धं गन्धर्वस्य महात्मनः ॥ गोलभस्य महाबाहोर्दश वर्षाणि पञ्च च ॥ २७ ॥
नैव रात्रौ न दिवसे तद्युद्धमुपशाम्यति ॥ ततस्तु षोडशे वर्षे गोलभो विनिपातितः ॥ २८ ॥
हत्वा तं दुर्विनीतं तु वाली दंष्ट्राकरालवान् ॥ सर्वाभयकरोऽस्माकं कथमेष निपातितः ॥ २९ ॥

हते तु वीरे प्लवगाधिपे तदा प्लवङ्गमास्तत्र न शर्म लेभिरे ॥
वनेचराः सिंहयुते महावने यथा हि गावो निहते गवांपतौ ॥ ३० ॥
ततस्तु तारा व्यसनार्णवाप्लुता मृतस्य भर्तुर्वदनं समीक्ष्य सा ॥
जगाम भूमिं परिरभ्य वालिनं महाद्रुमं छिन्नमिवाश्रिता लता ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

अन्तरद्दग्भव । मध्यमभावमवलम्बस्वेत्यर्थः ॥ २२ ॥ विवृत्ताक्षः भ्रामितनेत्रः । विवृतैः प्रकाशितैः । अतएव भीमैः । दशनैः दन्तैरुपलक्षितः । उत्क्रान्तजीवितः उद्गतप्राणः ॥ २३ ॥ परिदेवयमानाः रुदन्त इत्यर्थः । प्लवगपुङ्गवाः बलेन श्रेष्ठाः । पुनश्च हरियूथपाः यूथस्य निर्वोढारः । वानराः वानरजातयः ॥ २४ ॥ परिदेवनमेवाह—किष्किन्धेत्यादिना ॥ शून्या शून्यप्राया ॥ २५ ॥ वेगेन पराक्रमेण । काननानि अरण्यानि । वनानि जलानि । सरांसीत्यर्थः। पुष्पौघेण अनुबध्यन्ते संबध्यन्ते । सदा पुष्पितानि भवन्तीत्यर्थः । तत् पुष्पानुबन्धनम् । अद्यतु वालिमरणानन्तरकाले । यद्वा । वनानि क्षुद्रारण्यानि । यस्मिन् वालिनि गच्छति सति तदूरुवेगेनाविशेषेण सर्वाणि वनानि पुष्पैः सहानुगच्छन्तीत्यर्थः ॥ २६ ॥ गोलभस्य गोलभाख्यस्य । उपशाम्यति उपाशाम्यत् । भूते लट् । दंष्ट्राकरालवान् करालदंष्ट्रावान्। परनिपातः॥ २७—२९ ॥ शर्म सुखं । सिंहयुत इति । सिंहस्थानीयो रामः ॥ ३० ॥ व्यसनार्णवे आप्लुता मग्नेति यावत् ॥ ३१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने द्वाविंशः सर्गः ॥ २२ ॥

नाशायत्वतिदूरंतुनिष्फलं । सेवामध्यमभावेनराजवह्निगुरुस्त्रियाम्' इतिन्यायेनमध्यममार्गमवलंबस्वेत्याशयः ॥ २२ ॥ **स०** षोडशमे असंख्यादेरिति नञानिर्दिष्टत्वेनानित्यत्वाद्वा संख्यापूरकमप्रत्ययाङ्गीकाराद्वाऽयंशब्दःसाधुः ॥ २८ ॥ **रामानु०** दंष्ट्राकरालवान् । भावप्रधानोनिर्देशः । दंष्ट्राभ्यांकरालवान् ॥ **ति०** दंष्ट्राकरालवान् आर्षःस्वार्थेमतुप् । दंष्ट्राकरालइत्यर्थः । अस्माकंसर्वाभयंकरः सर्वेभ्योऽभयंकरः ॥ २९ ॥ **स०** आवने सम्यग्रक्षके । नन्द्यादित्वाल्ल्युः । वालिनि हतेसति अचराः जडप्रायास्सन्तः। शर्म नलेभिरे । द्वितीयवनेचरशब्दोवानरपरः । गवांपतौ गोपाले । अलुक्समासत्वाद्वापतिरित्याख्यातइत्यादिरीत्यावासाधुरयं शब्दः ॥ ३० ॥ इतिद्वाविंशःसर्गः ॥ २२ ॥

[पा०] १ ङ.—ट. प्लवगसत्तमाः. २ क. ख. ग. शून्येयंस्वर्गते. ङ.—ट. शून्याचस्वर्गते. ३ ङ.—ट. वानरेश्वरे. ४ ख. वानरानिष्प्रभाःकृताः. ५ छ.—ट. ततःषोडशमे. ६ क.—ट. तंहत्वा. ७ छ. झ. ट. वनेचरास्तत्र. ८ क. ख. भर्तुर्व्यसनंसमाश्रिता. ग. च. ज. भर्तुर्वदनंसमाश्रिता. घ. भर्तुर्व्यसनंसमीक्ष्यसा.

त्रयोविंशः सर्गः ॥ २३ ॥

वालिवदनाघ्राणपूर्वकं विविधं विलपन्त्यांतारायां तदङ्गालिङ्गनाक्षमायां नीलेन वालिहृदयाद्रामबाणोन्मूलनं ॥ १ ॥ अङ्गदेन ताराप्रेरणया वालिचरणयोश्चरमप्रणामः ॥ २ ॥

ततः समुपजिघ्रन्ती कपिराजस्य तन्मुखम् ॥ पतिं लोका[1]च्युतं तारा मृतं वचनमब्रवीत् ॥ १ ॥
शेषे त्वं विषमे दुःखमकृत्वा वचनं मम ॥ उपलोपचिते वीर सुदुःखे वसुधातले ॥ २ ॥
मत्तः प्रियतरा [2]नूनं वानरेन्द्र मही तव ॥ शेषे हि तां परिष्वज्य मां च न प्रतिभाषसे ॥ ३ ॥
सुग्रीवस्य वशं प्राप्तो विधिरेष भव[3]त्यहो ॥ सुग्रीव एव विक्रान्तो वीर[4] साहसिकप्रिय ॥ ४ ॥
ऋक्षवानरमुख्यास्त्वां [5]बलिनः पर्युपासते ॥ [6]एषां वि[7]लपितं कृच्छ्रमङ्गदस्य च शोचतः ॥
मम चे[8]मां गिरं श्रुत्वा [9]किं त्वं न प्रतिबुध्यसे ॥ ५ ॥
इदं [10]तद्वीरशयनं यत्र शेषे हतो युधि ॥ शायिता निहता यत्र त्वयैव रिपवः पुरा ॥ ६ ॥
विशुद्धसत्त्वाभिजन प्रिययुद्ध मम प्रिय ॥ मामनाथां विहायैकां गतस्त्वमसि मानद ॥ ७ ॥
शूराय न प्रदातव्या कन्या खलु विपश्चिता ॥ शूरभार्यां हतां पश्य सद्यो मां विधवां कृताम् ॥ ८ ॥
अवभग्नश्च मे मानो भग्ना मे शाश्वती गतिः ॥ अगाधे च निमग्नाऽस्मि विपुले शोकसागरे ॥ ९ ॥
अश्मसारमयं नूनमिदं मे हृदयं दृढम् ॥ भर्तारं निहतं दृष्ट्वा यन्नाद्य शतधा [11]गतम् ॥ १० ॥
[12]सुहृच्चैव हि [13]भर्ता च [14]प्रकृत्या मम च प्रियः ॥ [15]आहवे च पराक्रान्तः शूरः पञ्चत्वमागतः ॥ ११ ॥
पतिहीना तु या नारी कामं भवतु पुत्रिणी ॥ [16]धनधान्यैः सुपूर्णापि विधवेत्युच्यते जनैः ॥ १२ ॥

अथ मरणानन्तरं ताराविलापस्त्रयोविंशे—ततः समुपजिघ्रन्तीत्यादि ॥ लोकाच्च्युतं अस्माल्लोकाच्च्युतं स्वर्गतमित्यर्थः ॥ १ ॥ दुःखमित्येतत्क्रियाविशेषणं । सुदुःखे सुतरां दुःखकरे ॥ २—३ ॥ त्वं सुग्रीवस्य त्वत्तो बहुशः कान्दिशीकस्य । वशं प्राप्तः । सुग्रीव एव विक्रान्त इत्येषः । विधिः दैवव्यापारः । अहो आश्चर्यकरो भवति ॥ ४ ॥ कृच्छ्रं दुःखं ॥ ५ ॥ युधि हतो यत्र शेषे पुरा त्वया निहता रिपवो यत्र शायिताः तदिदं वीरशयनमित्यन्वयः । युद्धपरायणस्य तवयुद्धेनैव मरणं प्राप्तं खल्विति भावः ॥ ६ ॥ विशुद्धसत्त्वाभिजनेति कूटयुद्धाभावाद्विशुद्धबल । सत्कुलप्रसूतत्वाद्विशुद्धकुल ॥ ७ ॥ अप्रदातव्यत्वे हेतुमाह—शूरभार्यामिति ॥ ८ ॥ गतिः पतिशुश्रूषेत्यर्थः । यद्वा गम्यत इति गतिः सुखमित्यर्थः ॥ ९ ॥ अश्मसारमयत्वे हेतुः—दृढमिति ॥ १० ॥ हृदयभेदने हेतुमाह—सुहृदिति ॥ पञ्चत्वं मरणं ॥ ११—१२ ॥

स० लोकात् देहात् च्युतं । लोकश्रुतेतिपाठे श्रुता प्रसिद्धेत्यर्थः ॥ १ ॥ **वि०** उपलैः पाषाणैः । उपचिते व्याप्ते । सुदुःखे सुतरांदुःखकरे ॥ २ ॥ **ति०** एषविधिः रामरूपः । सुग्रीवस्यवशंप्राप्तोभवति । अहोइत्याश्चर्ये । नतुत्वद्वशंप्राप्तः । येनाद्यैवभार्यायायोजितस्स्यादितिभावः । अतःसुग्रीवएवविक्रान्तोत्रराज्येभवितेतिशेषः । साहसिकं साहसकर्म ॥ **शि०** हेसाहसिकप्रिय यस्सुग्रीवः विक्रान्तः त्वयाबहुवारंपराभूतः तस्यसुग्रीवस्यवशंत्वंप्राप्तः । अतःएषः वशप्रापकरामरूपः । विधिः अहोआश्चर्यंभवति ॥४॥ **ति०** मानः राजपत्नीत्वाभिमानः । शाश्वती स्थिरा । गतिः सुखप्राप्तिः ॥ ९ ॥ **ति०** प्रहारे रणे । पराक्रान्तः परेणाक्रान्तोऽभिभूतः । पञ्चत्वमागतः । एतद्दृष्ट्वापियद्धृदयंनभिन्नंअतोदृढमितिपूर्वेणान्वयः ॥ ११ ॥ **ति०** ननुसपुत्रायाःकस्तेशोकःअतआह—

[पा०] १ छ. झ. ट. लोकश्रुता. ग. ङ. च. ञ. लोकच्युतं. २ ग. नित्यं. ३ क. ग. ट. भवत्यसौ. ४ ख. धीर. ५ क.—घ. छ. झ. ञ. ट. बलिनं. ६ ङ.—ट. तेषां. ७ क. प्रलापितं. ८ ङ. च. ञ. चैतागिरः. छ. झ. ट. चेमागिरः. ९ क. ग. किंचनप्रति. घ. किंचिन्नप्रति. १० क. ग. घ. तच्छूरशयनं. ११ क. ग. ङ.—ट. कृतं. १२ क. ग. ज. झ. ट. सुहृच्चैवच. १३ क. ग. भर्ताहि. १४ क. च.—ट. प्रकृत्याचमम. १५ च. ज. प्रहारेचपरिक्रान्तः. छ. झ. ञ. ट. प्रहारेचपरा. १६ च.—ट. धनधान्यसमृद्धापि.

स्वगात्रप्रभवे वीर शेषे रुधिरमण्डले ॥ कृमिरागपरिस्तोमे [1]त्वमात्मशयने यथा ॥ १३ ॥
रेणुशोणितसंवीतं गात्रं तव समन्ततः ॥ परिरब्धुं न शक्नोमि भुजाभ्यां प्लवगर्षभ ॥ १४ ॥
कृतकृत्योद्य सुग्रीवो वैरेऽस्मिन्नतिदारुणे ॥ यस्य रामविमुक्तेन हृतमेकेषुणा भयम् ॥ १५ ॥
शरेण हृदि लग्नेन गात्रसंस्पर्शने तव ॥ [2]वार्यामि त्वां निरीक्षन्ती त्वयि पञ्चत्वमागते ॥ १६ ॥
उद्बबर्ह शरं नीलस्तस्य गात्रगतं तदा ॥ गिरिगह्वरसंलीनं दी[3]प्तमाशीविषं यथा ॥ १७ ॥
तस्य निष्कृष्यमाणस्य बाणस्य च बभौ द्युतिः ॥ अस्तमस्तकसंरुद्धो रश्मिर्दिनकरादिव ॥ १८ ॥
पेतुः क्षतजधारास्तु व्रणेभ्यस्तस्य [4]सर्वशः ॥ ताम्रगैरिकसंपृक्ता धारा इव धराधरात् ॥ १९ ॥
अवकीर्णं विमार्जन्ती भर्तारं रणरेणुना ॥ आस्रैर्नयनजैः शूरं सिषेचास्त्रसमाहतम् ॥ २० ॥
रुधिरोक्षितसर्वाङ्गं दृष्ट्वा विनिहतं पतिम् ॥ उवाच तारा पिङ्गाक्षं पुत्रमङ्गदमङ्गना ॥ २१ ॥
अवस्थां पश्चिमां पश्य पितुः पुत्र सुदारुणाम् ॥ संप्रसक्तस्य वैरस्य गतोन्तः पापकर्मणा ॥ २२ ॥
बाल[5]सूर्योदयतनुं प्रयान्तं यमसादनम् ॥ अभिवादय राजानं पितरं पुत्र मानदम् ॥ २३ ॥
एवमुक्तः समुत्थाय जग्राह चरणौ पितुः ॥ भुजाभ्यां पीनवृत्ताभ्यामङ्गदोऽहमिति ब्रुवन् ॥ २४ ॥
अभिवादयमानं त्वामङ्गदं त्वं यथा पुरा ॥ दीर्घायुर्भव पुत्रेति किमर्थं नाभिभाषसे ॥ २५ ॥
अहं पुत्रसहाया त्वामुपासे [6]गतचेतसम् ॥ सिंहेन नि[7]हतं सद्यो गौः सवत्सेव गोवृषम् ॥ २६ ॥
इष्ट्वा संग्रामयज्ञेन [8]रामप्रहरणांभसि ॥ [9]अस्मिन्नवभृथे स्नातः कथं पत्न्या मया विना ॥ २७ ॥
या दत्ता देवराजेन तव तुष्टेन संयुगे ॥ [10]शातकुम्भमयीं मालां [11]तां ते पश्यामि नेह किम् ॥ २८ ॥
राजश्रीर्न जहाति त्वां गतासुमपि मानद ॥ सूर्यस्यावर्तमानस्य शैलराजमिव प्रभा ॥ २९ ॥

न मे वचः पथ्यमिदं त्वया कृतं न चास्मि [12]शक्ता विनिवारणे तव ॥

कृमेः इन्द्रगोपस्य राग इव रागो यस्मिन् स कृमिरागः परिस्तोमः आस्तरणं यस्मिन् स तथा ॥ १३—१५ ॥ वार्यामि वारितास्मीत्यर्थः ॥ १६ ॥ उद्बबर्ह उद्धृतवान्। नीलः सुग्रीवसेनापतिः ॥ १७ ॥ निष्कृष्यमाणस्य तस्य द्युतिः अस्तमस्तकसंरुद्धः अस्ताद्रिशिखरनिरुद्धः । दिनकरादुद्गच्छन् रश्मिरिव बभौ । पूर्वश्लोकोक्तसर्पसाम्यापेक्षया चशब्दः ॥ १८ ॥ व्रणेभ्यः इति बहुवचनं पाशाधिकरणन्यायेनावयवबहुत्वात्। यद्वा शिलापादपप्रहारकृतव्रणानि एतावत्पर्यन्तं शोणितनिर्गमशून्यतयास्थितानि इदानीं शरव्रणाच्छोणितनिर्गमकाले सर्वेभ्योपि शोणितानि सुस्रुवुरित्यर्थः । इदानीं रुधिरनिर्गमादेतावत्पर्यन्तं सर्वात्मना प्राणो नं गत इतिगम्यते ॥ १९—२१॥ पापकर्मणा पापरूपकर्मणा। संप्रसक्तस्येति संबन्धः ॥ २२—२४ ॥ त्वामभिवादयमानमित्यन्वयः ॥ २५—२६ ॥ रामप्रहरणांभस्येवावभृथ इतिव्यस्तरूपकं ॥ २७—२८ ॥ शैलराजं मेरुं। आवर्तमानस्य अस्तं गच्छत इत्यर्थः ॥ २९ ॥ पथ्यं हितं वचः। न

पतिहीनेत्यादि ॥ १२ ॥ **ति०** कृमिरागः लाक्षारागः । 'कृमिरागंवदन्त्यार्यालाक्षिकंप्रियदर्शनं' इत्युत्पलमालाकोशादित्यन्ये ॥ १३ ॥ **ति०** मालामिहनपश्यामि किंतु सुग्रीवायमालादानस्यादर्शनं शोकवशादृष्टस्यापिविस्मरणंचेत्येवमुक्तिः ॥ २८ ॥ **वि०** पथ्यमिदंवचइतिस्मृतिसंनिहितस्यप्रागुपदिष्टस्यपरामर्शः ॥ ३० ॥ इतित्रयोविंशःसर्गः ॥ २३ ॥

[पा०] १ क. ग. त्वंपुराशयने. ख. छ. झ. ट. स्वकीयेशयने. घ. च. त्वमेवशयने. ङ. ञ. स्वएवशयने. २ क. ख. ग. निरीक्षन्ती. ३ घ. माशीविषोपमं. ४ ग. सर्वतः. ५ बालसूर्योज्ज्वलतनुं. ६ घ. छ. झ. ट. गतचेतनं. ७ छ. झ. ट. पातितं. ८ घ. रामबाणमहांभसि. ख. छ. झ. ञ. ट. रामप्रहरणांभसा. क. ग. ङ. च. ज. नानाप्रहरणांभसा. ९ क. ख. छ. झ. ट. तस्मिन्. १० क. ख. ग. ङ. च. छ. झ. ट. शातकौम्भीप्रियां. ११ क. तांतु. १२ ग. छ. झ. ट. शक्ताहि निवारणे. ख. शक्तापिनिवारणे.

हता सपुत्राऽस्मि हतेन संयुगे सह त्वया श्रीर्विजहाति मा[1]मिह ॥ ३० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

चतुर्विंशः सर्गः ॥ २४ ॥

ताराविलापश्रवणसमुद्बुद्धदुःखान्निर्वेदमुपगतवति सुग्रीवे रामंप्रति वालिश्लाघनात्मनिन्दनपूर्वकमङ्गदादिभिः सीतान्वेषणनिवेदनेन स्वस्याग्निप्रवेशाभ्यनुज्ञानमर्थयति रामेणापिशोकान्मुहूर्तं विमनीभवनं ॥१॥ रामसमीपमेत्य भक्त्या तत्स्तवनपूर्वकं जीवितत्यागोन्मुखींतारांप्रति रामेणाङ्गदाभ्युदयाद्युपपादनेनसमाश्वासनं ॥ २ ॥

[2]तां चाश्रुवेगेन दुरासदेन त्वभिप्लुतां शोकमहार्णवेन ॥
पश्यंस्तदा वाल्यनुजस्तरस्वी भ्रातुर्वधेनाप्रतिमेन तेपे ॥ १ ॥
स बाष्पपूर्णेन मुखेन वीक्ष्य[3] क्षणेन निर्विण्णमना मनस्वी ॥
जगाम रामस्य शनैः समीपं भृत्यैर्वृतः सं[4]परिदूयमानः ॥ २ ॥
स तं समासाद्य गृहीतं[5]चापमुदात्तमाशीविषतुल्यबाणम् ॥
यशस्विनं लक्षणलक्षिताङ्गमवस्थितं राघवमित्युवाच ॥ ३ ॥
यथाप्रतिज्ञातमिदं नरेन्द्र कृतं त्वया दृष्टफलं च कर्म ॥
ममाद्य भोगेषु [6]नरेन्द्रपुत्र मनो निवृत्तं [7]सह जीवितेन ॥ ४ ॥
अस्यां महिष्यां तु भृशं रुदन्त्यां पुरे च विक्रोशति दुःखतप्ते ॥
[8]हतेऽग्रजे संशयितेऽङ्गदे च न राम राज्ये रमते मनो मे ॥ ५ ॥
क्रोधादमर्षादतिविप्रधर्षाद्भ्रातुर्वधो मेऽनुमतः पुरस्तात् ॥
हते त्विदानीं [9]हरियूथपेऽस्मिन्[10]सुतीव्रमि[11]क्ष्वाकुकुमार तप्स्ये ॥ ६ ॥

कृतं नानुष्ठितं ॥ ३० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रयोविंशः सर्गः ॥ २३ ॥

अथ ताराप्रलापश्रवणदुःखितसुग्रीवनिर्वेदप्रदर्शनपूर्वकं तारायाः रामे प्रतिपत्तिं दर्शयति चतुर्विंशे— तामित्यादि ॥ अश्रुवेगेनच दुरासदेन दुष्प्रापेण । शोकमहार्णवेनच । अभिप्लुतां व्याप्तां । तां तारां पश्यन् तेन भ्रातुर्वधेन च । तेपे दुःखितोभूत् ॥ १ ॥ मुखेन उपलक्षितः सः । वीक्ष्य तारामितिशेषः ॥ २ ॥ उदात्तं श्रेष्ठं । क्षणेन सुलक्षणेन लक्षिताङ्गं ॥ ३ ॥ यथाप्रतिज्ञातं प्रतिज्ञातमनतिक्रम्य । दृष्टफलं दृष्टराज्यफलकं । कर्म त्वया कृतं । जीवितेन सह स्थितेषुभोगेषु जीवितेभोगेषु च । मनो निवृत्तमित्यर्थः ॥ ४ ॥ पुरे पुरस्थजने । संशयिते पितृमरणदुःखेन जीवति वा न वेति संशयविषयीभूतेसति । राज्ये मनः न रमते रतिं न प्राप्नोति ॥ ५ ॥ क्रोधात् निर्निमित्तनिर्वासनकृतात् । अमर्षात् परुषभाषणाक्षमया । अतिविप्रधर्षात् अत्य-

---

वि० अप्रतिमेन असदृशेन । आत्मनइतिशेषः ॥ १ ॥ टी० इदं वालिवधरूपंकर्म । यथाप्रतिज्ञातं तथैवकृतं । तर्हितथैवराज्यमनुभूयतामित्याशङ्क्याह—**ममाद्येति** ॥ ४ ॥ टी० तर्हिवालिवधप्रयत्नःकिमर्थंकृतइत्याह—**क्रोधादिति** । पुरस्तात् आदौ· अतिविप्रधर्षात् अत्यन्ततिरस्कारात् । तन्निमित्तादमर्षादसहनात् तदुत्पन्नात्क्रोधात्मनःप्रज्वलनात् भ्रातुर्वधोमेऽनुमतइत्यन्वयः ।

[पा०] १ छ. झ. मामपि. २ ख. ञ. ट. तामश्रुवेगेन. छ. झ. तामाशुवेगेन. ३ छ. झ. ट. पश्यन्क्षणेन. ४ ङ. संपरिदृश्यमानः. ५ च. ज. चापंतदातमाशीविष. ६ च.—झ. ट. नरेन्द्रसूनो. ७ छ. झ. ट. हतजीवितेन. ८ छ. झ. ट. हतेनृपे. ९ ख. हरिपुङ्गवेस्मिन्. १० ग. छ. झ. ट. सुतीक्ष्णं. ११ झ. ट. मिक्ष्वाकुवराव.

श्रेयोऽद्य मन्ये मम शैलमुख्ये तस्मिन्निवासश्चिरमृश्यमूके ॥
यथातथा वर्तयतः स्ववृत्त्या नेमं निहत्य त्रिदिवस्य लाभः ॥ ७ ॥
न त्वां जिघांसामि चरेति यन्मामयं महात्मा मतिमानुवाच ॥
तस्यैव तद्राम वचोनुरूपमिदं पुनः कर्म च मेऽनुरूपम् ॥ ८ ॥
भ्राता कथं नाम महागुणस्य भ्रातुर्वधं राघव रोचयेत ॥
राज्यस्य दुःखस्य च वीर सारं न चिन्तयन्कामपुरस्कृतः सन् ॥ ९ ॥
वधो हि मे मतो नासीत्स्वमाहात्म्याव्यतिक्रमात् ॥ ममासीद्बुद्धिदौरात्म्यात्प्राणहारी व्यतिक्रमः ॥१०॥
द्रुमशाखावभग्नोऽहं मुहूर्तं परिनिष्टनन् ॥ सान्त्वयित्वा त्वनेनोक्तो न पुनः कर्तुमर्हसि ॥ ११ ॥
भ्रातृत्वमार्यभावश्च धर्मश्चानेन रक्षितः ॥ मया क्रोधश्च कामश्च कपित्वं च प्रदर्शितम् ॥ १२ ॥
अचिन्तनीयं परिवर्जनीयमनीप्सनीयं स्वनवेक्षणीयम् ॥
प्राप्तोस्मि पाप्मानमिमं नरेन्द्र भ्रातुर्वधात्त्वाष्ट्रवधादिवेन्द्रः ॥ १३ ॥
पाप्मानमिन्द्रस्य मही जलं च वृक्षाश्च कामं जगृहुः स्त्रियश्च ॥
को नाम पाप्मानमिमं क्षमेत शाखामृगस्य प्रतिपत्तुमिच्छन् ॥ १४ ॥

न्तमाक्रमणाच्च ॥ ६ ॥ यथातथा कथंचित् । स्ववृत्त्या वानरजात्युचितवृत्त्या । तस्मिन् शैलमुख्ये ऋश्यमूके । निवासः श्रेयस्करः । इमं वालिनं निहत्य त्रिदिवस्य स्वर्गस्य लाभोपि न श्रेय इत्यर्थः ॥ ७ ॥ महात्मा महास्वभावः । मतिमान् कर्तव्याकर्तव्यविवेकशीलः । अयं वाली । त्वां न जिघांसामि न मारयितुमिच्छामि । चर यथेष्टं गच्छेति मामुवाचेतियत् तद्वचः तस्यैव अनुरूपं सदृशं तद्बुद्धिशीलतुल्यं । इदं भ्रातृवधरूपं कर्मतु । मे दुरात्मनो दुर्मतेरनुरूपं ॥ ८ ॥ राज्यस्य भ्रातृवधसाध्यस्य । दुःखस्य वधानन्तरभाविदुःखस्य च । सारं उत्कर्षं । नचिन्तयन् उभयोस्तारतम्यमचिन्तयन्नित्यर्थः ॥९॥ महात्मेत्युक्तं विशदयति—वध इति । अस्य वालिनः । स्वमाहात्म्यस्य स्वमहत्वस्य अव्यतिक्रमात् अनतिक्रमणात् । मे वधः मन्निधनं । मतो नासीत् । ममतु बुद्धिदौरात्म्यात् बुद्धेर्दुःस्वभावात् । प्राणहारी भ्रातृवधकारी । व्यतिक्रमः अमर्यादा आसीत ॥ १० ॥ मतो नासीदित्युक्तं विशदयति—द्रुमेति ॥ परिनिष्टनन् आर्तरवं कुर्वन् । नपुनःकर्तुमर्हसि युद्धमिति शेषः । अत्रेतिकरणं द्रष्टव्यं ॥ ११—१२ ॥ अचिन्तनीयं अपरिच्छेद्यमित्यर्थः । परिवर्जनीयं साधुभिस्त्यक्तव्यं । अनीप्सनीयं अनभिलषणीयं । कदाचिदपि इच्छाया अयोग्यमित्यर्थः । स्वनवेक्षणीयं सुतरामदर्शनीयं । जुगुप्सितमित्यर्थः । त्वष्टुःपुत्रः त्वाष्ट्रः विश्वरूपः । तं हत्वा इन्द्रो महान्तं पाप्मानमगमदिति कथा ॥ १३ ॥ इन्द्रस्य परमैश्वर्यसंपन्नस्य । पाप्मानं मह्यादयः ऊषरफेननिर्यासऋतुरूपेण जगृहुः । खातपूरणादिवरप्रदत्वात् । मम तु शाखामृगस्य कस्याप्यनुपकारस्य । पाप्मानं प्रतिपत्तुं किंचिद्वरं प्राप्तुमिच्छन् को नाम क्षमेत । ग्रहीतुमितिशेषः । यद्यपि विश्वरूपाख्यायिकायां त्वाष्ट्रशिरस्त्रयच्छेदकृत-

---

इदानींतुसुतीव्रं अत्यन्तंतप्स्ये । वैरस्यमरणान्तत्वादितिभावः ॥ **स०** अतिविप्रधर्षात् भार्यायाः ॥ ६ ॥ **टी०** वालिनंप्रशंसन्नात्मानंनिन्दति—**नत्वामिति** ॥ ८ ॥ **ति०** मांहन्तुंतस्यमतिर्नासीदित्यर्थः । तत्रहेतुःस्वमाहात्म्यव्यतिक्रमात् अनुचितकर्मकारीवालीत्ययशःप्रसङ्गभयात् ॥ १० ॥ **स०** अचिन्तनीयमनीप्सनीयमनवेक्षणीयमित्यभ्यासोभ्रातृवधस्याकार्यत्वेतात्पर्यद्योतकः । ज़हिहिजहाहीत्यादिवत् । इदंपाप्मानमितितु इदमधिकमित्यत्रेवव्याख्येयं ॥ १३ ॥ **ती०** प्रतिहर्तुं परिहर्तुं । कोवाइच्छेत् कोवा सहेतेतिसंबन्धः ॥ **स०** पुराणान्तरेवह्निप्रथमज्वालादिरूपेणविभागस्तु कल्पान्तरविवक्षयेतिबोध्यं । "भूम्यंबुद्रुमयोषिद्भ्यः"

[पा०] १ च. छ. झ. ञ. ट. वचःकर्मच. क. पुनःकर्मतु. २ ङ.—ट. रामविरोचयेत. ३ ख. छ. झ. ट. विचिन्तयन्. ङ. च. ञ. नाचिन्तयन्. ४ झ. ट. पुरस्कृतोपि. ५ ग. ङ.—ट. स्वमाहात्म्यव्यतिक्रमात्. ६ क. ग. बुद्धिसंमोहात्. ७ ज. सान्त्वयित्वेतियेनोक्तो. ८ च. झ. धर्माश्चानेनरक्षिताः. ९ छ. ज. झ. मिदंवयस्य. क. ट. मिमंवयस्य. ग. महंवयस्य. १० च.—ट. सहेत. ११ च. प्रतिहर्तुं. १२ क. ग. ङ.—ट. मिच्छेत्.

नार्हामि [1]संमानमिमं प्रजानां न यौवराज्यं कुत एव राज्यम् ॥
अधर्मयुक्तं कुलनाशयुक्तमेवंविधं राघव कर्म कृत्वा ॥ १५ ॥
पापस्य कर्ताऽस्मि विगर्हितस्य क्षुद्रस्य [2]लोकापकृतस्य [3]चैव ॥
शोको महान्मामभिवर्ततेऽयं वृष्टेर्यथा निम्नमिवाम्बुवेगः ॥ १६ ॥
सोदर्यघातापरगात्रवालः संतापहस्ताक्षिशिरोविषाणः ॥
एनोमयो मामभिहन्ति हस्ती दृप्तो नदीकूलमिव प्रवृद्धः ॥ १७ ॥
अंहो बतेदं [4]नृवराविषह्यं निवर्तते मे हृदि साधुवृत्तम् ॥
[5]विवर्णमग्नौ परितप्यमानं किट्टं यथा राघव जातरूपम् ॥ १८ ॥
महाबलानां हरियूथपानामिदं कुलं राघव मन्निमित्तम् ॥
अस्याङ्गदस्यापि च [6]शोकतापादर्धस्थित[7]प्राणमितीव मन्ये ॥ १९ ॥

ब्रह्महत्यात्रितयं पृथिवीवनस्पतिस्त्रिय एव जगृहुरित्युक्तं । तथापि शाखान्तरानुरोधेन जलेनापि कश्चिदंशोगृहीत इत्यवगन्तव्यं ॥ १४ ॥ कुलनाशयुक्तं कुलनाशफलकं । वालिविनाशेनाङ्गदादेरजीवनादिति भावः । एवंविधं भ्रातृवधरूपं कर्म कृत्वा । प्रजानां संमानं प्रजाकर्तृकराजसंमानं नार्हामि । अतएव यौवराज्यमेव नार्हामि । कुतो महाराज्यमितिभावः ॥ १५ ॥ क्षुद्रस्य दुष्टस्य । विगर्हितस्य विशेषेण शिष्टैर्निन्दितस्य । लोकापकृतस्य सर्वलोकैस्त्यक्तस्य । पापस्य कर्तास्मि । एतादृशपापस्योत्तरपापहेतुत्वज्ञापनाय तृच्प्रत्ययः । वृष्टेरुत्पन्नोम्बुवेगो यथा तादृशशोको मां निम्नमिवाभिवर्तते । उभयत्राप्युपमावाचकप्रयोगो महाकविनिबन्धनेष्वस्त्येव ॥ १६ ॥ सोदर्यस्य भ्रातुः घात एवापरगात्रवालौ अपरकायपुच्छौ यस्य स तथा । संताप एव हस्तादीनि यस्य स तथा । वधादपि संतापस्य प्राधान्यादूर्ध्वकायत्वरूपणं । वधप्रकारवैविध्यात्संतापवैविध्याच्च नानावयवत्वेन रूपणं । एनोमय इतिस्वार्थे मयट् । पापमेव हस्ती । एनसो दृप्तत्वमुत्कटत्वं । तस्य प्रवृद्धत्वं महत्त्वं गजस्योन्नतत्वं ॥ १७ ॥ हे नृवर राघव । मे हृदि इदं साधुवृत्तं अंहः स्वेन सहवर्तमानं पापं अविषह्य असोढ्वा । निवर्तते निर्गच्छति । कथमिव । विवर्णं जातरूपं अग्नौ परितप्यमानं सत् किट्टं यथा ऋजीषांशमविषह्य निवर्तते । किट्टाद्वियुज्यत इत्यर्थः । बतेति विषादे ॥ १८ ॥ अपिचेति समुच्चयः पूर्वश्लोकोक्तदोषापेक्षया । मन्निमित्तं मत्तो निमित्तात् । अस्याङ्गदस्य शोकतापात् महाबलानां हरियूथपानां इदं परिदृश्यमानं कुलं यूथं । अर्धस्थितप्राणमिव भवतीति मन्ये । " सजातीयैः कुलं यूथं

इतिश्रीमद्भागवतोक्तेरत्रोक्तएवैतत्कल्पीयइतिध्येयं ॥ १४ ॥ **शि०** ननुराज्यप्राप्त्यनन्तरंयागादिनाशुद्धिर्भवितेत्यतआह—**नेति** । एवंविधं भ्रातृविनाशनंकर्मकृत्वाप्रजानांसंमानंप्रजाकर्तृकसत्कारंनार्हामि । अतएव यौवराज्यंनार्हामि । राज्यंकुतः राज्यप्राप्तेर्नसंभावनेत्यर्थः ॥ १५ ॥ **शि०** लोकापकृतस्य राजापकृतिद्वारासर्वजनापकारस्य । कर्तास्मि ॥ **वि०** लोकापकृतस्य परलोकेपरमानर्थसाधनस्यपापस्यकर्तास्मि । अतोमहाञ्शोकःमां इव तथा अभिवर्तते । इवशब्दस्तथाशब्दार्थे ॥ १६ ॥ **ति०** हेनृवर इदमंहः पापं । बत खेदे । अविषह्यं सोढुमशक्यं । प्राप्यमेहृदिस्थितं । साधुवृत्तं जन्मार्जितपुण्यंनिवर्तते । विवर्णं अतएवाग्नौ परितप्यमानंजातरूपं । अविषह्यं अशक्यसहावस्थानं । प्राप्यकिट्टं मलंयथानिवर्तते तथेत्यर्थः । यथाबलवतोत्तमेनाधमःस्थातुंन शक्नोति तथा बलवताऽधमेनसहोत्तमोपीत्याशयः । एवंचानेनपापेनसर्वपुण्यक्षयोजातइतितात्पर्यं । केचित्तु अग्नौपरितप्यमानंजातरूपं स्वर्णं । यथाविवर्णं विवर्णताकारकं । किट्टं दाहकक्षारद्रव्यं । प्राप्यनिवर्तते भस्मभवति तथेत्यर्थइत्याहुः ॥१८॥ **शि०** हरियूथपानामिदंकुलं मन्निमित्तं मदभिन्ननिमित्तात् । अङ्गदस्यातीवशोकसंतापाद्धेतोः अर्धस्थितप्राणंमन्ये । यद्वा मन्निमित्तं अहंनिमित्तं यस्मिन् वालिवधजनितदुःखे । तत्प्राप्य अतीव अत्यन्तं । अङ्गदस्यशोकतापात् शोकतापंविज्ञायविद्यमानमिदंकुलं अर्धस्थिताः

[पा०] १ क. ग. ङ. च. ज. संमानमर्हं. २ ङ. च. ज. ञ. लोकेपरिनिन्दितस्य. क.—घ. लोकावमतस्य. ३ छ. झ. ट. लोके. ४ क. ख. घ.—छ. झ. ञ. ट. नृवराविषह्यं. ५ छ. झ. ट. अग्नौविवर्णं. ६ क. ग. शोकभावात्. ७ ख. घ. ट. प्राणमतीव.

सुतः सुलभ्यः सुजनः सुवश्यः[1] कुतः[2] सुपुत्रः सदृशोऽङ्गदेन ॥
न चापि विद्येत स वीर देशो यस्मिन्भवेत्सोदरसंनिकर्षः ॥ २० ॥
यद्यङ्गदो[3] वीरवरार्ह जीवेज्जीवेच्च माता परिपालनार्थम् ॥
विना तु पुत्रं परितापदीना तारा[4] न जीवेदिति निश्चितं मे ॥ २१ ॥
सोहं प्रवेक्ष्याम्यतिदीप्तमग्निं भ्रात्रा च पुत्रेण च सख्यमिच्छन् ॥
इमे विचेष्यन्ति हरिप्रवीराः सीतां निदेशे तव[5] वर्तमानाः ॥ २२ ॥
कृत्स्नं तु ते सेत्स्यति कार्यमेतन्मय्यप्रतीते मनुजेन्द्रपुत्र ॥
कुलस्य हन्तारमजीवनार्हं रामानुजानीहि कृतागसं माम् ॥ २३ ॥
इत्येवमार्तस्य रघुप्रवीरः श्रुत्वा वचो वाल्यनुजस्य[6] तस्य ॥
संजातबाष्पः परवीरहन्ता रामो मुहूर्तं विमना बभूव ॥ २४ ॥
तस्मिन्क्षणेऽभीक्ष्णमवेक्ष्यमाणः क्षितिक्षमावान्भुवनस्य गोप्ता ॥
रामो रुदन्तीं व्यसने निमग्नां समुत्सुकः सोथ ददर्श ताराम् ॥ २५ ॥
तां चारुनेत्रां कपिसिंहनाथं[7] पतिं समाश्लिष्य[8] तदा शयानाम् ॥

तिरश्चां पुन्नपुंसकं " इत्यमरः ॥ १९ ॥ सुजनः सौजन्यवान् । सुवश्यः सुतरां वश्यः स्वाधीनः सुतः । सुलभ्यः लोके सुखेन लब्धुं योग्यः । अङ्गदेन तुल्यः पुत्रस्तु कुतो हेतोः सुलभ्यः । दुर्लभ इत्यर्थः । सोदरसन्निकर्षोपि दुर्लभ इत्याह—न चापीति । संनिकर्षः संनिधानं ॥ २० ॥ अङ्गदो यदि जीवेत्तदा तारापि जीवेत् अन्यथा नेत्याह—यदीति ॥ २१ ॥ अङ्गदमरणं निश्चित्याह—सोहमिति ॥ पुत्रेण अङ्गदेन । " भ्रातृणामेकजातानां यद्येकः पुत्रवान्भवेत् । तेन पुत्रेण ते सर्वे पुत्रिणो मनुरब्रवीत् " । इति स्मृतिः । तन्मरणे मरणं हि स्नेहस्य पराकाष्ठा । निदेशे त्वदाज्ञायां ॥ २२ ॥ अप्रतीते अप्रकाशे मृत इति यावत् । मां विनापि त्वं सर्वं कार्यं कर्तुं क्षम इत्यर्थः ॥ २३ ॥ अथ रामस्याश्रितकार्यमेव स्वकार्यं नतु स्वतःकिंचिदस्ति । अतएव मम शत्रुर्वालीति सुग्रीवेणोक्ते तं निहत्य तस्मिन्नश्रूणि मुक्त्वा शोचतिसति स्वयमपि तथा शोचति स्मेत्याह—इत्येवमिति ॥ यद्वा सर्वेश्वरस्य कुत्रचिद्विषयीकारस्तत्संतानपर्यन्तः घण्टाकर्णमालाकारादिष्विवेत्याह—इत्येवमिति ॥ रघुप्रवीर इत्यनेन स्वस्य वानरेण संबन्धान्तरप्रसक्तिर्नास्तीत्युच्यते । वाल्यनुजस्य आर्तस्य वाल्यनुजे आर्ते सतीत्यर्थः । वचः श्रुत्वा तद्वचनं च श्रुत्वा संजातबाष्पः तदार्तिनिमित्तकार्तिक इत्यर्थः । परवीरहन्ता आश्रितविरोधिनिरसनशीलः । ताच्छील्ये तृन् । सुग्रीववचनात्कृतवालिवधत्वेन तच्छोचनादशोचदित्यर्थः । अनेन रामस्य क्रोधशोकावाश्रितक्रोधशोकायत्तावित्ययमर्थःसूचितः ॥ २४ ॥ तस्मिन्क्षणे तस्मिन्नवसरे । अभीक्ष्णं पुनः पुनः । अवेक्ष्यमाणः तारयेतिशेषः । अनेन तारायाः रामविषयमानुकूल्यमुक्तं । क्षितिक्षमावान् क्षितेर्यादृशी क्षमा तादृशक्षमावान् । क्षमावत्त्वभुवनगोप्तृत्वगुणौ तारया चिन्तितौ कविनोक्तौ । रुदन्तीमित्यादिना ताराया दयनीयतोक्ता । समुत्सुकः शोकापनयने कृतादरः ॥२५॥ रामागमनमालोक्य मन्त्रिणस्तामुत्था-

---

प्राणायस्मिंस्तत् अहंमन्ये ॥ १९ ॥ **टीका०** पितृवियोगादङ्गदेनष्टेपुत्रःकथंसुसंपादनीयइत्याह—**सुतइति** । सुलभ्यःसुतमात्रस्सुलभएवेत्यर्थः । किंतु सुजनःसुवश्यः अङ्गदेनसदृशःपुत्रः कुतः अतिदुर्लभइत्यर्थः । किंचसोदरसङ्गःकुत्रापिनास्तीत्याह—**नचेति** । **स०** लोकेसुजनःसुवंश्यःसुतःसुलभ्यः । परंतु अङ्गदेनसदृशःसुपुत्रःकुतः ॥ २० ॥ **स०** भुवनस्यगोप्ता श्रुत्यनुवादः । समुत्सुकः समाधानोत्सुकः ॥ २५ ॥ **ति०** कपिसिंहनाथां कपिसिंहानांस्वामिनीं ॥ **स०** कपिसिंहेनसुग्रीवेणनाथस्तापोयस्यास्सातां ॥२६॥

[पा०] १ क. ज. सुवंश्यः. २ ख. ग. ङ.—ट. कुतस्तुपुत्रः. ३ च. ज.—ट. अद्याङ्गदो. ४ च.—झ. ट. सानैवजीवेदिति. ५ ख. घ.—ट. परिवर्तमानाः. ६ क.—ट. वालिजघन्यजस्य. ७ क. ग. घ. च. झ. ञ. ट. सिंहनाथां. ८ क. ग. समालिङ्ग्य.

उत्थापयामासुरदीनसत्त्वां मन्त्रिप्रधानाः [1]कपिवीरपत्नीम् ॥ २६ ॥
सा विस्फुरन्ती परिरभ्यमाणा भर्तुः [2]सकाशादपनीयमाना ॥
ददर्श रामं शरचापपाणिं स्वतेजसा सूर्यमिव ज्वलन्तम् ॥ २७ ॥
सुसंवृतं पार्थिवलक्षणैश्च [3]तं चारुनेत्रं मृगशावनेत्रा ॥
अदृष्टपूर्वं पुरुषप्रधानमयं स काकुत्स्थ इति प्रजज्ञे ॥ २८ ॥
तस्येन्द्रकल्पस्य दुरासदस्य महानुभावस्य समीपमार्या ॥
आर्ताऽतितूर्णं [4]व्यसनाभिपन्ना जगाम तारा परिविह्वलन्ती ॥ २९ ॥
[5]सा तं समासाद्य [6]विशुद्धसत्त्वा शोकेन संभ्रान्तशरीरभावा ॥
मनस्विनी वाक्यमुवाच तारा रामं रणोत्कर्षणलब्ध[7]लक्ष्मम् ॥ ३० ॥
त्वमप्रमेयश्च दुरासदश्च जितेन्द्रियश्चोत्तम[8]धार्मिकश्च ॥
[9]अक्षय्यकीर्तिश्च विचक्षणश्च क्षितिक्षमावान्क्षतजोपमाक्षः ॥ ३१ ॥

पयामासुरित्याह्—तामिति ॥ २६—२७ ॥ पार्थिवलक्षणैः राजलक्षणैः । सुसंवृतं । अन्यूनतया युक्तमित्यर्थः । चारुनेत्रं पुण्डरीकाक्षं । मृगशावनेत्रा "विद्वानेव विजानाति विद्वज्जनपरिश्रमं" इति न्यायेन स्वयं चारुनेत्रतया तत्रैव प्रथमं दृष्टिं न्यधादिति भावः । अदृष्टपूर्वं इतः पूर्वं कुत्राप्यदृष्टचरं । योगं विना अदृष्टमित्यर्थः । पुरुषप्रधानं पुरुषोत्तमं । अयं स इति विजज्ञे । यः पूर्वं भर्तारं हतवान् सोयमिति ज्ञातवती । यद्वा यः पूर्वमङ्गदाच्छ्रुतः । यद्वा यः पूर्वं पुण्डरीकाक्षत्वादिगुणविशिष्टतया महाजनेभ्यः श्रुतः स एवायमित्यर्थः । अतएव वक्ष्यति—त्वमप्रमेयश्चेति ॥ २८ ॥ तस्येति व्यसननिवर्तनक्षमागुणा उच्यन्ते । परिविह्वलन्ती मूर्छन्तीत्यर्थः ॥ २९ ॥ रणे उत्कर्षणेन उत्कर्षेण लब्धं लक्ष्मं शरव्यं यस्य तथा । एकेनशरेण स्वभर्तृहन्तारमित्यर्थः । तं रामं । शोकेन संभ्रान्तः अयथाभूतः शरीरभावः शरीरकृतभावः यस्याः सा कुपितेत्यर्थः । मनस्विनी मत्प्रियहन्तारं यावच्छक्ति परुषाणि वदेयमिति कृताध्यवसाया । समासाद्य विशुद्धसत्त्वा रामसंनिधिमाहात्म्येन निवृत्तकालुष्यतया समुन्मिषितशुद्धसत्त्वा । तारा वाक्यमुवाच । परुषभाषणोद्युक्तयैव वाचा अस्तौषीदित्यर्थः ॥ ३० ॥ एवं पुरुषोत्तमत्वपुण्डरीकाक्षत्वादिभिरनुसंहितं परत्वं ताराऽनुसंधत्ते—त्वमप्रमेयश्चेति । त्वं वक्ष्यमाणकल्याणगुणानुगुणधार्मिवैलक्षण्ययुक्तः । अप्रमेयः "वेदाहमि"त्युपक्रम्य "महान्तं क इत्था वेदे" ति वेदैरप्यपरिच्छेद्यः । अप्रमेयः "सो अङ्ग वेद यदि

स० परिरभ्यमाणा इतरस्त्रीभिः ॥ २७ ॥ **शि०** किंच नदृष्टःपौर्वकालिकदर्शनकर्मीभूतभिन्नःसचासौपूर्वःसर्वेषामादिः ॥ २८ ॥ **ति०** परिविह्वलन्ती कष्टेनस्खलनपूर्वंगच्छन्ती ॥ **शि०** इन्द्रकल्पस्य इन्द्रादिनिर्माणेसमर्थस्य ॥ २९ ॥ **तनि०** विशुद्धसत्वा तत्संनिधिमाहात्म्येनसमुन्मिषितसत्वा । परुषभाषणोद्युक्तापि सत्वनिष्पन्नपरमज्ञानतयानिवृत्तकोपकलुषासान्त्वमुक्तवती ॥ **ती०** रणोत्कर्षणलब्धलक्ष्यं रणेउत्कर्षणमुत्कर्षःयेषांतेतथोक्तास्तैः । प्रथमगणनायांवीराग्रणीरितिलक्ष्यत्वेनलब्धमित्यर्थः ॥ **शि०** संभ्रान्तः विस्मृतःशरीरभावःराजस्त्रीत्वादिर्ययासा । रणेषु युद्धेषु । उत्कर्षणेनसर्वाधिकोत्कर्षेणलब्धंलक्ष्यंवेध्यंयेन सर्वतोधिकवेध्यवेधकइत्यर्थः ॥ **स०** संभ्रान्तशरीरभावा अपगतशरीराभिमाना ॥ **शि०** विशुद्धसत्वं प्राकृतविलक्षणसत्वविशिष्टं ॥ ३० ॥ **तनि०** त्वमप्रमेयः रावणदुन्दुभिनिग्रहीतारंवालिनंहत्वा अकिंचित्कुर्वन्निवस्थितस्त्वं वालिभयप्राप्तगिरिवरस्यसुग्रीवस्यापिजयंदत्तवान् । शापायोद्यतांमांस्तोतुंघटयिता । त्वमप्रमेयः । त्वत्स्वरूपमस्मत्स्वरूपंचविचार्यस्तोतुमुद्युक्ताऽहंत्वमप्रमेयःवेदैरप्यपरिच्छेद्योसि । अतोऽहंकथंस्तोतुंशक्नोमि । त्वमप्रमेयः पुरतोविद्यमानोप्यपरिच्छेद्यश्चक्षुषामनसाऽप्रमेयः । 'नचक्षुषागृह्यतेमनसातुविशुद्धेन' इतिश्रुतेः । त्वमप्रमेयः धनुष्पाणिसुलभस्त्वंशङ्खचक्रगदादिधरोनारायणोसि । त्वमप्रमेयः परत्वमपरिच्छेद्यमितिस्थितं । सौलभ्यंचापरिच्छेद्यंजातं । त्वमप्रमेयः एकाकीसन्नपिपरिकरपरीतइवाप्रधृष्योसि । त्वमप्रमेयः तापसइवस्थितोपिविराधादिदुष्टनिग्रहंकृत्वाशिष्यान्परिपालितवान् ॥ **स०** क्षितेःक्षमाक्षितिक्षमा । सा दातृतासंबन्धेनास्यास्तीतिक्षितिक्षमावान् । अनेनभूम्याअपिक्षमादानंयदा

[पा०] १ क.—घ. च.—ञ. कपिराजपत्नीं. २ च.—ञ. समीपात्. ३ क. ग. सातंसुनेत्रं. ४ ङ.—ट. व्यसनंप्रपन्ना. ५ ङ.—ट. तंसा. ६ क. ग.—ट. विशुद्धसत्वं. ७ ग. छ.—ट. लक्ष्यं. ८ छ. झ. ट. धर्मकश्च. ९ ङ.—ट. अक्षीणकीर्तिश्च.

वा न वेद" इति स्वेनापि परिच्छिद्य ज्ञातुमशक्यः । त्वमप्रमेयः प्रत्यक्षगम्योपि मनसा दुर्विभाव्यस्वभावः । त्वमप्रमेयः शरचापधरोपि त्वं शङ्खचक्रधरोसि । त्वमप्रमेयः सौलभ्यदशैव न परिच्छेत्तुं शक्यते । त्वमप्रमेयः परिकररहितोपि प्रतापातिशयेन निरवधिकपरिकरपरिगत इव दुरवगाहोसीत्येकवचनस्यभावः । एवमन्तःकरणेन दुष्प्रापोपि किं बाह्यकरणैः सुप्रापः नेत्याह—दुरासदश्च । मनसापि दुरासदः कथं प्रकारान्तरेण स्वासद इति भावः । दुरासदश्च "महाजनो येन गतः स पन्थाः" इत्युक्तं सन्मार्गं विना पथस्खलितेन दुष्प्राप इत्यर्थः । दुरासदश्च " षद्लृ विशरणगत्यवसादनेषु" इति धातुपाठोक्तार्थत्रयमपि तत्रत्रेणोच्यते । नित्यत्वान्न विशरणार्हः । विभुत्वान्न विचालनार्हः । नित्यानन्दत्वान्नावसादमापादयितुं शक्य इत्यर्थः । दुरासदश्च वालिवधकुपितानां प्रतीकाराय सन्निधानमपि गन्तुमशक्य इत्यर्थः । दुरासदश्च बाह्यकुदृष्टिभिरुक्त्याभासैरप्रकम्प्यवैभव इत्यर्थः । एवमप्रमेयत्वदुर्धर्षत्वाभ्यां सुदृप्तोपिन परदारराज्यपरिग्रहलुब्ध इत्याह—जितेन्द्रियश्च । निस्पृहतया सुग्रीवाय दत्तराज्य इत्यर्थः । जितेन्द्रियश्च । यः कोपिपुरुषः कांचिद्योषितमालक्ष्य निर्वर्णयति त्वं तु न तथा । " न रामः परदारान्वै चक्षुर्भ्यामपि पश्यति " इत्युक्तेः । जितेन्द्रियश्च " पश्यत्यचक्षुः स शृणोत्यकर्णः । अपाणिपादो जवनो ग्रहीता"इत्याद्युक्तरीत्या सर्वेन्द्रियैर्विनापि सर्वं सर्वत्र सर्वदा जानन्नित्यर्थः । जितेन्द्रियः " दुर्ग्रहं मनसाऽप्यन्यैरिन्द्रियैरपि दुर्जयैः " इत्युक्तरीत्या वाङ्मनसागोचरः । त्वं जितेन्द्रियः त्वमेव जितेन्द्रियः । सर्वं वाक्यं सावधारणं । अब्भक्षो वायुभक्ष इतिवत् । " अहल्यायै जारः सुरपतिरभूदात्मतनयां प्रजानाथोऽयासीदभजत गुरोरिन्दुरबलां " इत्युक्तरीत्या त्वद्व्यतिरिक्ताः सर्वेपि विषयचपलाः । त्वमेको जितेन्द्रिय इत्यर्थः । एवं विरक्तोप्ययमस्मद्धिंसया अधार्मिक इति मयास्थितं । न तथेत्याह—उत्तमधार्मिकश्च । स्वाश्रितसंरक्षणार्थमेवंविधव्यापारकारितया परमधार्मिकः । स्वार्थकर्मकारी अधमधार्मिकः । स्वपरसाधारणकर्मकारी मध्यमधार्मिकः । परार्थमेव प्रवर्तमान उत्तमधार्मिकः । यद्वा वर्णाश्रमाचारसमाराध्यो धार्मिकः । उत्तमधार्मिको भक्तिमार्गभजनीयः । यद्वा उत्तमधार्मिकः शरणागतसंरक्षकः । यद्वा " उपायो गुरुरेवस्यात्तेनानुगृहीतो ब्रह्मलोकं गच्छति " इत्युक्तधर्मवानुत्तमधार्मिकः । यद्वा " आनृशंस्यं परो धर्मः " इत्युक्तधर्मवान् धार्मिकः । स्वाश्रितानामापत्सु स्ववक्षोलक्षीकुर्वन्नुत्तमधार्मिकः । यद्वा आर्तसुग्रीवरक्षणाद्धार्मिकः । अकृत्यकरणेन नारकिणं वालिनं निहत्य तस्य पूतत्वकरणादुत्तमधार्मिकः । प्रच्छन्नवेधितया निरपराधवधेन च कथमस्य धार्मिकत्वमित्याशङ्क्याह—अक्षय्यकीर्तिश्च । आश्रितापराधितया तिर्यक्षु मृगयान्यायेन पराङ्मुखवधस्यादोषत्वात्तिर्यग्भिराभिमुख्येन युद्धकरणस्य सार्वभौमस्यावद्यावहत्वाच्च तव कीर्तिर्न दूषयितुं शक्येत्यर्थः । अक्षय्यकीर्तिश्च " तस्य नाम महद्यशः " इत्युक्तरीत्या परत्वप्रथायुक्तः । विचक्षणश्च दूरदृष्टितया युक्तायुक्तविचारपूर्वकं सर्वकार्यकृत् । अतएव हि निरपराधवधो मा भूदिति कदाचिद्वालितः पराभवं प्रापितवान् । लक्ष्यवैपरीत्यपरिहाराय गजपुष्पीं धारितवान् । एवं शत्रुसंहर्तापि " सपुत्रपौत्रं सामात्यं समित्रज्ञातिबान्धवम् । हत्वा " इत्युक्तरीत्या अङ्गदादिष्वकिंचित्करतया प्रशस्तक्षमावानसीत्याह—क्षितिक्षमावान् । स्वाश्रितापराधकारिविषये तव सान्वयविनाशकरणे प्राप्तेपि तत्क्षमणं तवातिश्लाघ्यमित्यर्थः । क्षितिक्षमावान् " क्षमया पृथिवीसमः " इत्युक्तरीत्या पञ्चाशत्कोटिविस्तीर्णायाः पृथिव्या यावती क्षमा तावती तवैकस्यास्तीति भावः । नित्ययोगे मतुप् । तेन कदाचिदप्यस्याक्षमाप्रसङ्गोपि नास्तीतिद्योत्यते । क्षतजोपमाक्षः वालिविषये कोपातिशयेनाद्यापि शोणीकृतनयनोपि तदीयेषु क्षमावान् । यद्वा रक्तास्यनेत्रपाणिः त्रिताम्रः इत्यदिसामुद्रिकोक्तरीत्या रक्तान्तनेत्रः । " रामो रक्तान्तलोचनः " इति ह्युक्तिः । अत्र प्रतिपदं चकारप्रयोगः एकैकएव गुणः परत्वे पर्याप्तं लिङ्गमिति द्योतयितुं । क्षमावानित्यत्र चकाराप्रयोगस्तु रामेण क्षान्ते सर्वैरपि क्षान्तमेव । अतोन्यत्रापि संभवेन निरपेक्षत्वाभावाच्चकाराप्रयोगः । क्षतजोपमाक्ष इत्यत्र तु विग्रहगुणत्वेन भिन्नाधिकरणत्वात्समुच्चयाभावः । क्षतजोपमाक्षेति संबुद्ध्यन्तं वा । यद्वा अप्रमेयः अनाश्रितानां दुर्ज्ञेयः । चकारादाश्रितानां सुप्रमेयः । " नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते

त्वमात्तबाणासनबाणपाणिर्महाबलः संहननोपपन्नः ॥
मनुष्यदेहाभ्युदयं विहाय दिव्येन देहाभ्युदयेन युक्तः ॥ ३२ ॥
येनैकबाणेन[1] हतः प्रियो मे तेनैव[2] मां त्वं जहि सायकेन ॥
हता गमिष्यामि समीपमस्य न मामृते[3] राम रमेत वाली ॥ ३३ ॥
स्वर्गेपि पद्मामलपत्रनेत्रः समेत्य संप्रेक्ष्य[4] च मामपश्यन् ॥
न ह्येष उच्चावचताम्रचूडा विचित्रवेषाप्सरसोभजिष्यत् ॥ ३४ ॥
स्वर्गेऽपि शोकं च विवर्णतां च मया विना प्राप्स्यति वीर वाली ॥
रम्ये नगेन्द्रस्य तटावकाशे विदेहकन्यारहितो यथा त्वम् ॥ ३५ ॥
त्वं वेत्थ यावद्वनिता[5]विहीनः प्राप्नोति दुःखं पुरुषः कुमारः ॥
तत्त्वं प्रजानञ्जहि मां न वाली दुःखं ममादर्शनजं भजेत ॥ ३६ ॥
यच्चापि मन्येत भवान्महात्मा स्त्रीघातदोषो[6] न भवेत्तु मह्यम् ॥
आत्मेयमस्येति च मां जहि त्वं न स्त्रीवधः स्यान्मनुजेन्द्रपुत्र[7] ॥
शास्त्रप्रयोगाद्विविधाच्च वेदादात्मा[8] ह्यनन्यः पुरुषस्य दाराः ॥ ३७ ॥

तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वां " इति श्रुतेः । " नमोनमो वाङ्मनसातिभूमये नमोनमो वाङ्मनसैकभूमये " इत्युक्तेश्च । एवमनाश्रितानां दुरासदो दुष्प्रापः । चकारादाश्रितानां सुलभः । जितेन्द्रियः चकारादाश्रितविषये चपलः । उत्तमधार्मिकः चकाराद्दूरीकृताधर्मः । अक्षय्यकीर्तिः तदनुरूपकृत्यश्चशब्दार्थः । विचक्षणः चकारादाश्रितविषयत्यागाशक्तश्च । " मित्रभावेन संप्राप्तं न त्यजेयं " इत्यशक्तिर्ह्युच्यते । अत्रत्यचकारः देहलीदीपन्यायेनोभयत्रान्वेति । तेन दयादिकं समुच्चीयते ॥ ३१ ॥ त्वमिति अनेनाप्राकृतविग्रहत्वमुच्यते । संहननेन समीचीनावयवसंस्थानेन उपपन्नः युक्तः । मनुष्यदेहाभ्युदयं मानुषशरीरपरिग्रहं । विहाय । दिव्येन देहाभ्युदयेन देहसौभाग्येन युक्तः ॥ ३२ ॥ एवं रामस्य दिव्यतेजोविशेषदर्शनेन विस्मिता क्षणंविस्मृतशोका तद्वैभवंवर्णयित्वा स्वप्रकृत्यनुसारेण प्रलपति —येनेत्यादिना ॥ ३३ ॥ पद्मामलपत्रनेत्रो वाली स्वर्गेपि अप्सरोभिः समेत्य ताः संप्रेक्ष्य च मामपश्यन् उच्चावचताम्रचूडाः विविधताम्रकुसुमैः कृतशेखराः विचित्रवेषाप्सरसः । नाभजिष्यत् न भजिष्यति । लडर्थे लङ् ॥ ३४ ॥ नगेन्द्रस्य ऋश्यमूकस्य ॥ ३५ ॥ कुमारः युवा । तत् वनिताविरहदुःखं । प्रजानन् त्वं मां जहि । वाली ममादर्शनजं दुःखं नभजेत ॥ ३६ ॥ यच्चापीत्यादिसार्धश्लोकः ॥ मह्यं

तदाऽस्यतदपेक्षयाऽधिकक्षमास्तीतिकिमुवक्तव्यमितिकैमुत्यंसूचितंभवति ॥ ३१ ॥ **तनि०** महाबलत्वेहेतुमाह—संहननोपपन्न इति । महावीर्यत्वनिमित्तान्तस्साराभिव्यञ्जकशरीरसंस्थानविशेषइत्यर्थः । अयंचप्राकृतशरीरेषुनसंभवतीत्याह—**मनुष्येति** । महाराजलक्षणशौर्यादिगुणाभिव्यञ्जकमनुष्यशरीरसंस्थानविशेषेष्वपिनैतादृशइतिद्योतयितुमभ्युदयपदप्रयोगः । दिव्येन 'त्रिपादस्यामृतंदिवि ' इत्यादिप्रमाणसिद्धाप्राकृतलोकस्थितदिव्यमङ्गलविग्रहसंनिवेशेनेत्यर्थः ॥ **स०** आत्तबाणासनश्चासौबाणपाणिश्चेतिवा आत्तौबाणासनबाणौयाभ्यांतादृशौपाणीयस्येतिवा । संहननोपपन्नः ।सिंहस्कन्धःममप्रियोवालीहतस्सन् । मनुष्यदेहाभ्युदयं मनुष्यसदृशमपिराज्यसौभाग्यंविहायदिव्येनविभवेनदेहाभ्युदयेन सौभाग्येनयुक्तः । अथवा दिविभवंदिव्यं देवजातंतस्येनःस्वामीइन्द्रः तस्यदेहाख्याभ्युदयेनयुक्तोभूत् । तेनैवबाणेनमांजहि संहर । इहि गच्छ । मांहत्वागच्छेतिलौकिकवाग्रीतिरियं । जहि इहीतिच्छेदः ॥ ३२ ॥ **ति०** कुमारः सुन्दरःपुरुषः । यद्वा दुःखहेतुमाह—**कुमारइति** । कुत्सितोमारोयस्य मारकत्वेनमदनस्यप्रसिद्धेः । अथवाकुत्सितोमारोमरणंयस्य । मरणादपिदुःखजनकत्वादेवमुक्तिः । भावेघञ् ॥ **शि०** कुमारः निस्संकुमारत्वेनप्रतीयमानस्त्वं वेत्थ ॥ ३६ ॥ **ति०** महात्मेत्यनेन ताटकावधादिकृतवतःस्त्रीवधोकिंचित्करइत्यपिसूचितं ॥ ३७ ॥

[पा०] १ क.—ट. येनैवबाणेन. २ ङ—ट. तेनैवबाणेनहिमांजहीहि. ३ च.—ट. मांविनावीररमेत. ४ क. संप्रेक्ष्यतु. ५ ङ.—ट. तावद्वनिता. ६ ङ.—ञ. स्त्रीघातदोषस्तुभवेन्नमह्यं. ७ छ. सूनो. ८ ङ.—ट. वेदादनन्यरूपाःपुरुषस्य.

दारप्र[1]दानान्न हि दानमन्यत्प्रदृश्यते ज्ञानवतां हि लोके ॥ ३८ ॥
त्वं चापि मां तस्य मम प्रियस्य प्रदास्यसे धर्ममवेक्ष्य वीर ॥
अनेन दानेन न लप्स्यसे त्वमधर्मयोगं मम वीरघातात् ॥ ३९ ॥
आर्तामनाथामपनीयमानामेवंविधाम[2]र्हसि मां निहन्तुम् ॥
अहं हि मातङ्गविलासगामिना प्लवङ्गमानामृषभेण धीमता ॥
विना वरार्होत्तमहेममालिना चिरं न शक्ष्यामि नरेन्द्र जीवितुम् ॥ ४० ॥
इत्येवमुक्तस्तु विभुर्महात्मा तारां समाश्वास्य हितं बभाषे ॥ ४१ ॥
मा वीरभार्ये विमतिं कुरुष्व लोको हि सर्वो विहितो विधात्रा ॥
तं चैव सर्वं सुखदुःखयोगं लोकोऽब्रवीत्तेन कृतं विधात्रा ॥ ४२ ॥
[3]त्रयो हि लोका विहितं वि[4]धानं नातिक्रमन्ते वशगा हि तस्य ॥
प्रीतिं परां प्राप्स्यसि तां तथैव [5]पुत्रस्तु ते प्राप्स्यति यौवराज्यम् ॥
धात्रा विधानं विहितं तथैव न शूरपत्न्यः परिदेवयन्ति ॥ ४३ ॥
आश्वासिता ते[6]न तु राघवेण प्रभावयुक्तेन परंतपेन ॥

स्त्रीघातदोषोभवेदिति भवान् यन्मन्येत तन्न युक्तं । इयं तारा । अस्य वालिनः । आत्मा इति मत्वा मां जहि । तेन ते स्त्रीवधः स्त्रीवधदोषो नस्यात् । आत्मेत्येतदुपपादयति—शास्त्रेति । “ अर्धो वा एषआत्मनः यत्पत्नी, आत्मा हि दाराः ” इत्यादिरूपात् विविधात् वेदात् वेदरूपात् शास्त्रप्रयोगादित्यन्वयः । यद्वा वेदात् शास्त्रप्रयोगात् धर्मशास्त्रप्रयोगाच्चेति वार्थः ॥ ३७ ॥ सुकृतमप्यस्तीत्याह—दारेति ॥ ३८ ॥ न केवलं पापनिवृत्तिसुकृते प्रायश्चित्तंचेदमित्याह—त्वंचापीति । वीरघातादित्येतत्सुग्रीवदुःखदुःखितरामहृदयानुसारेणोक्तं । त्वमुत्तमधार्मिकश्चेति पूर्वमुक्तत्वात् ॥ ३९ ॥ अपनीयमानां वालिनावञ्चिताम् ॥ ४०—४१ ॥ हितवचनमेवाह—मावीरेति ॥ विमतिं जीवितुं नशक्ष्यामीत्यादिविरुद्धमतिं । सर्वो लोकः विधात्रा ब्रह्मणा । विहितो निर्मितः । हिः प्रसिद्धौ । तं सुखदुःखयोगंच । विधात्रा कृतमिति लोकः पण्डितः पामरश्चाब्रवीत् ॥ ४२ ॥ वस्तुस्थितिश्च तथेत्याह—त्रय इति ॥ लोकाः लोकस्थजनाः । विहितं विधानं ब्रह्मकल्पितं प्रकारं । नातिक्रमन्ते । हि यस्मात्तस्य वशगाः । तां वालिसंभोगसदृशभोगमिति द्योतयति ॥ ४३ ॥ प्रभावयुक्तेन अङ्गदयौवराज्यप्रदानसमर्थेन । परंतपेन तद्विरोधिनिरसनसमर्थेन । आश्वासिता अतएव ध्वनता शब्दायमानेन मुखेनोपलक्षिता । सुवेषरूपेत्यनेन समाश्वासनकृता-

ति॰ स्त्रीणांपुरुषात्मत्वमेवसाधयति—**शास्त्रेति** । शास्त्रेशास्त्रीययागाद्यनुष्ठाने । प्रकर्षेणसहैवयोगात् अधिकारात् । नकेवलं दोषाभावमात्रं अपितुस्त्रीदानफलमपीत्याह—**दारेति** ॥ ३८ ॥ **ति॰** ममवीरस्यपत्युश्छलेनघातात्प्राप्तमधर्मसंबन्धंनलप्स्यसे । किंच ततएवमच्छापतःप्राप्तमधर्मयोगमधर्मफलयोगंस्त्रीवियोगरूपंनलप्स्यसे । ममावधेतु लप्स्यसएव । अतएवक्वचित्पठ्यते—‘अचिरेणैवकालेनत्वयावीर्यबलाहृता । सासीताममशापेननचिरात्त्वयिवत्स्यति’ इति ॥ ३९ ॥ **शि॰** अपनीयमानां पत्यालिङ्गनाद्बहिष्कृतां ॥ ४० ॥ **ति॰** विमतिं मरणविषयांविरुद्धमतिं । सर्वोलोकोविधात्राविहितः । अहरादौसृष्टः तंलोकं सुखदुःखाभ्यामवर्ज्याभ्यांयोगोस्यतं तेनैवविधात्राकृतं । लोक्यतेऽनेनेतिलोकोवेदः अब्रवीत् । ‘ नहवैसशरीरस्यसतःप्रियाप्रिययोरपहतिरस्ति ’ इतिश्रुतेः ॥ ४२ ॥ **ति॰** त्रयोपिलोकाः लोकत्रयवासिनोपिजनाः । विधातृविहितंविधानंनातिक्रमन्ते । हियतः तस्यवशगाः ब्रह्मादिस्थावरान्ताः । वालीपरांप्रीतिं त्वत्संबन्धजांप्राप्स्यति मत्सङ्कल्पात् । किंच भवत्यपिवालिसंबन्धजांप्रीतिंसुग्रीवसंबन्धात्प्राप्स्यति । तेपुत्रोयौवराज्यंप्राप्स्यतिच्च । चेनाहमपिशापंप्राप्स्याम्येवेति ॥ **टीका॰** ममाज्ञाकरणेन फलमस्तीत्याह—**प्रीतिमिति** । जीवतिवालिनियादृशीप्रीतिस्तादृशीमित्यर्थः ॥ ४३ ॥ इतिचतुर्विंशःसर्गः ॥ २४ ॥

[**पा॰**] १ ग.—ट. प्रदानाद्धिनदानं. २ क. ग. ङ.—ट. मेवंगतांनार्हसिमामहन्तुं. ३ ज. प्रायोहि. छ. झ. ट. त्रयोपि. ४ ख. घ. ज. ञ. विधातुर्नाति. ५ ख.—ट. पुत्रश्च. ६ क. ग. ङ.—ट. तेनमहात्मनातु.

सा वीरपत्नी ध्वनता मुखेन सुवेषरूपा विरराम तारा ॥ ४४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

पञ्चविंशः सर्गः ॥ २५ ॥

रामेणसुग्रीवादिसमाश्वासनानन्तरं लक्ष्मणेनसुग्रीवंप्रति वालिसंस्करणायकाष्ठादिसंभारसज्जीकरणचोदनपूर्वकंतारंप्रति शिबिकानयनचोदना ॥ १ ॥ सुग्रीवेणरामाज्ञयाऽङ्गदेनसह वालिशरीरस्यतारानीतशिबिकारोपणपूर्वकं सर्वैःसहगिरिनदीमेत्य पुलिनेवानरैः शिबिकावतारणपूर्वकंचितानिर्मापणम् ॥ २ ॥ वालिशिरसःस्वाङ्कसमारोपणेनबहुधाविलपन्त्यास्ताराया वानरीभिःसमाश्वासनम् ॥ ३ ॥ अङ्गदेनसुग्रीवेणसह वालिशरीरस्यचितारोपणेन यथाविधिसंस्करणम् ॥ ४ ॥ सुग्रीवेणाङ्गदपुरस्कारेण वानरैःसहवालिनेजलदानपूर्वकं रामसमीपगमनम् ॥ ५ ॥

सुग्रीवं चैव तारां च साङ्गदं सह लक्ष्मणः ॥ समानशोकः काकुत्स्थः सान्त्वयन्निदमब्रवीत् ॥ १ ॥
न शोकपरितापेन श्रेयसा युज्यते मृतः ॥ यदत्रानन्तरं कार्यं तत्समाधातुमर्हथ ॥ २ ॥
लोकवृत्तमनुष्ठेयं कृतं वो बाष्पमोक्षणम् ॥ न कालादुत्तरं [2]किंचित्कर्म शक्यमुपासितुम् ॥ ३ ॥
नियतिः कारणं लोके नियतिः कर्मसाधनम् ॥ नियतिः सर्वभूतानां नियोगेष्विह कारणम् ॥ ४ ॥

न्तरहर्षवत्त्वं सूचितं । स्वलंकारयुक्तशरीरेत्यर्थः ॥४४॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चतुर्विंशः सर्गः ॥ २४ ॥

अथ रामः सर्वसान्त्वनपूर्वकं वालिनः संस्कारं कारयति पञ्चविंशे—सुग्रीवमित्यादि ॥ साङ्गदमिति सुग्रीवविशेषणं । समानशोकः ताराङ्गदादिभिस्तुल्यशोकः ॥ १ ॥ शोकपरितापेन शोककृतपरितापेन । युष्मदीयेनेतिशेषः । मृतो वाली श्रेयसा नयुज्यते । अत्रवालिनि विषये । अनन्तरं मरणानन्तरं । यत् श्रेयस्करं कार्यं और्ध्वदैहिकरूपं । तत्समाधातुं कर्तुं । अर्हथ ॥ २ ॥ लोकवृत्तं लोकाचारसिद्धं । अतएव सर्वैरनुष्ठेयं बाष्पमोक्षणं । वः युष्माभिः । कृतं । बाष्पमोक्षणादतिरिक्तं किमपि न युष्माभिःकर्तुं शक्यमित्याह—कालादिति ॥ कालादुत्तरं कालं विनेत्यर्थः । किंचित्कर्म उपासितुं कर्तुं । न शक्यं देवाज्ञामुल्लङ्घ्य स्वातत्र्येण किंचिदपि कर्मकर्तुं न शक्यमित्यर्थः ॥ ३ ॥ तदेतदुपपादयति—नियतिरिति ॥ नियम्यतेनेनेति नियतिः ईश्वरः । लोकेविषये कारणं सर्वलोककर्तेत्यर्थः । क्रियत इति कर्म कार्यं तस्य साधनं सहकारीत्यर्थः । सर्वभूतानां नियोगेषु प्रेरणेषु । नियतिः कारणं । सर्वप्रवर्तकोपीश्वर इत्यर्थः । "तेन विना तृणाग्रमपि न चलति" इति न्यायात् । ईश्वरपरतन्त्रतया लोकः कर्म करोति न तु स्वात-

---

रामानु० कालात् विहितात्कालात् । उत्तरं उत्तरस्मिन्काले । "कालाध्वनोरत्यन्तसंयोगे" इतिद्वितीया ॥ **स०** यद्वा बाष्पमोक्षणं बाष्पाणांपतनंयथानभवेत्तथाकरणं भवदभिलषितकरणेनकृतं । मयेतिशेषः । यद्वा उक्षणंसेचनं तदभावोमोक्षणं । बाष्पैर्मोक्षणं मयावःकृतं । करणनिश्चयात्तथाव्यपदेशः । कालात्उत्तरं उत्तमं । किञ्चित्कर्मउपसितुंनशक्यं । कर्मउपासितुमित्यत्र "वाक्येतुसाविवक्षामपेक्षते" इत्युक्तेस्संध्यभावः । कर्मशक्यमुपासितुमितिपाठे नकाचिदनुपपत्तिः ॥ **ति०** लोकवृत्तं लोकाचारोप्यनुष्ठेयएव । तच्चबाष्पमोक्षणरूपंकृतं युष्माभिरितिशेषः । यद्वा कृतंपर्याप्तं । बाष्पमोक्षणमितिद्वितीयातृतीयार्थे । यतः कालात् तत्तत्कर्मणिविहितात्कालात् । उत्तरंपरं तस्मिन्नतिक्रान्तेइतियावत् । किञ्चिदपिपरंकर्म विहितंकर्म । उपासितुं कर्तुं । अशक्यं । कालस्योपादेयकारणत्वात् । अकालेकृतस्याकृतप्रायत्वादितिभावः ॥ ३ ॥ **ति०** कालस्यमुख्यत्वंदर्शयति—**नियतिरिति** । नियम्यतेऽनयेतिनियतिः कालः । कालकृताव्यवस्था निमेषादिपरार्धान्ता । कालस्त्वीश्वरएव । लोके लोकसृष्ट्यादिव्यवहारे । कर्मणोलौकिकालौकिककर्मप्रवृत्तेर्दिनादिरूपेणकारणंकालएव । सर्वभूतानां नियोगाधिकृतप्राणिमात्रस्य । नियोगेषु ज्योतिष्टोमादिषु । नियतिः वसन्तादिःकारणं

[पा०] १ ङ. च. ज. ञ. सुरूपचेष्टा. २ ङ. झ. किंचित्परंकर्मउपासितुं.

न कर्ता कस्यचित्कश्चिन्नियोगे चापि नेश्वरः ॥ स्वभावे वर्तते लोकस्तस्य कालः परायणम् ॥ ५ ॥
न कालः कालमत्येति न कालः परिहीयते ॥ स्वभावं च समासाद्य न कश्चिदतिवर्तते ॥ ६ ॥
न कालस्यास्ति बन्धुत्वं न हेतुर्न पराक्रमः ॥ न मित्रज्ञातिसंबन्धः कारणं नात्मनो वशः ॥ ७ ॥

त्र्येणेत्यर्थः ॥ ४ ॥ एवमन्वयमुखेन ईश्वराधीनत्वमुक्त्वा व्यतिरेकमुखेन दर्शयति—न कर्तेति ॥ कश्चित्पुरुषः कस्यचित्कर्मणः न कर्ता न स्वातन्त्र्येण कर्ता। नियोगे कस्यचित्प्रेरणे च । नेश्वरः । किंतु स्वभावे वर्तते स्वभावाधीनो वर्तते लोकः । तत्रहेतुमाह—तस्येति । कालः तस्य परायणं गतिः । अत्र स्वभावनियतिकालादिशब्दैरीश्वरएवाभिधीयते । अन्यथानेकराजत्वापत्तेः । श्वेताश्वतरश्रुतिश्च—" स्वभावमेके कवयो वदन्ति " इत्यादिकैवमाह ॥ ५ ॥ कालः ईश्वरः । कालं आत्मानं । नात्येति नातिक्रामति । सः स्वाधीन एव नतु लोकवत्कस्यचित्परतन्त्रः । " न चास्य कश्चिज्जनिता न चाधिपः " इतिश्रुतेः । न कालः परिहीयते न नश्यति । इदमुपलक्षणं । षड्भावविकाररहित इत्यर्थः । " अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः । वर्जितःशक्यते वक्तुं यः सदास्तीति केवलं " इति ह्युक्तं । स्वस्मिन् भवतीति स्वभाव ईश्वरः । वाशब्दोऽवधारणे । स्वभावमासाद्यैव वर्तते नतु कश्चित्तमतिवर्तते । निरङ्कुशः स्वतन्त्रः । स्वकृतां व्यवस्थां स्वयमपि नातिवर्तते । तत्परतन्त्रोनीशः किमुतेतिभावः ॥ ६ ॥ पुनरपीश्वरस्य स्वातन्त्र्यमुपपादयति—न कालस्येति ॥ कालस्येश्वरस्य । बन्धुत्वं नास्ति पक्षपातो नास्तीत्यर्थः । हेतुश्च नास्ति । वशीकरणोपायश्च नास्ति । तत्प्रसादं विना स्वयत्नेन वशीकर्तुं न शक्यते इत्यर्थः । न पराक्रमः तज्जयहेतुपराक्रमोपिनास्ति । पुरुषपराक्रमस्य स नबिभेतीति भावः । न मित्रज्ञातिसंबन्धः न सुहृत्सगोत्रसंबन्धः । अपराधिषु दण्डधरत्वमुक्तं । " एष सेतुर्विधरण एषां लोकानामसंभेदाय " इति श्रुतेः । अतः कारणमीश्वरः । आत्मनो जीवस्य । न वशः न परतन्त्रः ।

शि० नियम्यते तत्तत्कर्मणिप्रवर्त्यतेऽनयेति । किंच नितरांयतिः ऐहिकभोगान्निवृत्तिर्यया सानियतिः ॥ ४ ॥ **ति०** कालातिरिक्तंनसाक्षात्प्रवर्तकमित्याह—**नकर्तेत्यादि** । कस्यचित् कृष्यादेः । कश्चित्कर्तान नियतिनिरपेक्षःकर्तान । तथा नियोगे नियोगानुष्ठानेपि । नियतिनिरपेक्षःकश्चिदीश्वरोन नियतिनैरपेक्ष्येणसमर्थोन । यतोलोकोलोकव्यवहारः स्वभावे ईश्वरसहितेप्राकृतस्वकर्मणि वर्तते तदधीनोवर्तते । तस्यचस्वभावस्य कालःपरायणं सहकारीत्यर्थः । तदुक्तंसूतसंहितायांशिववाक्येन " स्वभावादेव संभूतंसमस्तमितिकेचन । तन्नसिध्यतिविप्रेन्द्रादेशकालाद्यपेक्षणात् । मत्तःकर्मादिरूपेणजगज्जन्मादिजायते । एषस्वभावोविप्रेन्द्राइतिवेदार्थनिर्णयः । नमयाकेवलेनापिनचकेवलकर्मणा । प्राणिनांकर्मपाकेनमयाचमुनिसत्तमाः । जगतःसंभवोनाशःस्थितिश्चभवति द्विजाः " इति ॥ **ती०** किमनयाकालादृष्टकल्पनया प्राणिनएवान्योन्यंकर्तारःकारयितारश्चभवन्तीत्यतआह—**नकर्तेति** । **स०** कश्चित् जीवादिः । नेश्वरः नसमर्थः । स्वः स्वतन्त्रोविष्णुः । तल्लक्षणेभावेपदार्थेसर्वोलोकोवर्तते । तस्य लोकस्य । कालः परायणं पराश्रयः ॥ ५ ॥ **ती०** कालः महाकालः । कालं प्राणिनांसुखदुःखप्रापकत्वेनदिवसपक्षमासत्वादिरूपमौपाधिकंकालं । नात्येति नातिक्रामति । यस्मिन्कालेजन्तुनासुखंदुःखंवाभोक्तव्यं तमतिक्रम्यकालान्तरेणभोजयितुंनसमर्थइत्यर्थः । नकालःपरिहीयते नन्यूनतांप्राप्नोति । स्वभावंकालंसमासाद्य कश्चिन्नातिवर्तते । वाशब्दोऽवधारणे । निरङ्कुशस्वतन्त्रःकालःस्वकृतांव्यवस्थांस्वयमपिनातिक्रामति । तत्परतन्त्रोऽन्यःकिमुतेतिभावः ॥ **ति०** कालात्माभगवानेवसर्वकर्मप्रवर्तकइत्याह—**नकालइति** । कालः भगवानीश्वरः । कालं स्वकृतांकालव्यवस्थां जन्ममरणादिरूपां । नात्येति नातिक्रामति । सभगवान्कालोनपरिहीयते । अनुक्षणं जगद्धानिकरस्यहानिकारणाभावात् । स्वभावं उक्तलक्षणंसमासाद्य किंचिदत्युत्कृष्टमपिजीवजातंनातिवर्तते उत्पत्तियोग्यमुत्पद्यते नश्वरंनश्यत्येवेत्यर्थः ॥ **स०** कालः प्रसिद्धःकालः । कालं कालनियामकं तच्छब्दवाच्यंभगवन्तं । नात्येति । कालः प्रसिद्धः । नपरिहीयते नत्यज्यते । भगवतेतिशेषः । तत्रदृष्टान्तः**स्वभावंवेति** । कश्चित्पुमान् भगवन्तंवायथानातिवर्तते तथास्वभावंनात्येतीत्यर्थः ॥ ६ ॥ **ति०** सचभगवान्नपक्षपातस्वभावइत्याह—**नकालस्येति** । नकालस्यबन्धुत्वमस्ति । प्राप्तकालंवस्तुसर्वथासंहरत्येव । नतुपक्षपातेनकिमपित्यजतीत्यर्थः । नहेतुः स्वसृज्येस्वनाश्येवास्वकृतव्यवस्थातिरिक्तकारणनिरपेक्षइत्यर्थः । यद्वा प्राप्तकालसंहारनिवर्तनेनकश्चिदपिहेतुर्मन्त्रतन्त्रौषधादिःप्रभवतीत्यर्थः ॥ तस्यैवप्रपञ्चः । नपराक्रमः महापराक्रमवतामपिकालेप्राप्ते संहारोभवत्येव । नमित्रज्ञातिसंबन्धः नबहुमित्रतानबहुज्ञातिताप्राप्तकालसंहारनिवर्तनेहेतुः । सोपिभगवानात्मनःप्रत्यग्वर्गस्यजीवजातस्य नवशः तदिच्छाधीनोन । किंतु परमस्वतएव । तेनचभगवताकालेनक्रियमाणोनियत्यधीनःस्वस्वकर्मपरिणामएवसर्वसुख-

[पा०] १ क. छ. झ. ट. नापिचेश्वरः. २ क. ग. ङ. छ. ज. ञ. स्वभावंवा. ख. स्वभावंहि. ३ झ. ट. किंचिदतिवर्तते.

किं तु कालपरीणामो द्रष्टव्यः साधु पश्यता ॥ धर्मश्चार्थश्च कामश्च कालक्रमसमाहिताः ॥ ८ ॥
इतः स्वां प्रकृतिं वाली गतः प्राप्तः क्रियाफलम् ॥ धर्मा[1]र्थकामसंयोगैः पवित्रं प्लवगेश्वरः ॥ ९ ॥
स्वधर्मस्य च संयोगाज्जितस्तेन महात्मना ॥ स्वर्गः परि[2]गृहीतश्च प्राणानपरिरक्षता ॥ १० ॥
एषा वै नियतिः श्रेष्ठा यां गतो हरियूथपः ॥ तदलं परितापेन प्राप्तकालमुपास्यताम् ॥ ११ ॥
[3]वचनान्ते तु रामस्य लक्ष्मणः परवीरहा ॥ अवदत्प्रश्रितं वाक्यं सुग्रीवं गतचेतसम् ॥ १२ ॥
कुरु त्वमस्य सुग्रीव प्रेतकार्यमनन्तरम् ॥ १३ ॥
ताराङ्गदाभ्यां सहितो वालिनो दहनं प्रति ॥ समाज्ञापय काष्ठानि शुष्काणि च बहूनि च ॥
[4]चन्दनादीनि दिव्यानि वालिसंस्कारकारणात् ॥ १४ ॥
समाश्वासय चैनं त्वमङ्गदं दीनचेतसम् ॥ मा[5] भूर्बालिशबुद्धिस्त्वं त्वदधीनमिदं पुरम् ॥ १५ ॥
अङ्गदस्त्वानयेन्माल्यं वस्त्राणि विविधानि च ॥ घृतं तैलमथो गन्धा[6]न्यच्चात्र समनन्तरम् ॥ १६ ॥
त्वं तार शिबिकां शीघ्रमादायागच्छ संभ्रमात् ॥ त्वरा गुणवती युक्ता ह्यस्मिन्काले विशेषतः ॥ १७ ॥
सज्जीभवन्तु प्लवगाः शिबिका[7]वहनोचिताः ॥ समर्था बलिनश्चैव निर्हरिष्यन्ति वालिनम् ॥ १८ ॥

तत्तत्कर्मानुगुणमेव ईश्वरः सर्वं वर्तयतीत्यर्थः ॥ ७ ॥ तर्ह्यनीशेन जन्तुना किं कर्तव्यं तत्राह—किं त्विति ॥ साधु सम्यक् । पश्यता शास्त्रनिष्कर्षमवगच्छतेत्यर्थः । कालस्य ईश्वरस्य परिणामः चेतनकर्मानुगुणप्रवृत्तिविशेषः द्रष्टव्यः ईश्वरकृतव्यापारेषु न शोकः कर्तव्यः । यद्विहितं तत्करिष्यतीति स्थातव्यमिति भावः । धर्मार्थकामास्तु कालक्रमेण ईश्वरमर्यादया समाहिताः समर्पिता भवन्ति । धर्मादिषु यत् प्राप्तव्यं तत् प्रापयतीश्वर एवेतिभावः । अत्र नियतिकालस्वभावपदैः व्यामिश्रतयोक्तिस्तदानीं रहस्यस्य वक्तुमनर्हत्वादितिबोध्यम् ॥ ८ ॥ एवमर्थस्थितिमुक्त्वा तां प्रकृते संगमयति—इत इति ॥ स्वां प्रकृतिं गतः मद्बाणवेधकृतप्रायश्चित्ततया स्वकीयं शुद्धभावं प्राप्तः सन् । प्लवगेश्वरो वाली । इतः अस्माल्लोकात् । धर्मार्थकामसंयोगैः विहितकालानुष्ठितधर्मार्थकामसंबन्धैः । पवित्रं क्रियाफलं स्वर्गं प्राप्तः । सामदानार्थसंयोगैरितिपाठे नीतिशास्त्रानुष्ठानैरित्यर्थः ॥ ९ ॥ केन स्वां प्रकृतिं प्राप्त इत्यपेक्षायामुक्तं विशदयति—स्वधर्मस्य चेति ॥ स्वधर्मस्य संयोगात् स्वविहितधर्मानुष्ठानात् । रणे प्राणानपरिरक्षतेत्यनेन शौर्यकृतधर्मोप्युक्तः । उभाभ्यां जितः पूर्वं स्ववशीकृतः स्वर्गः इदानीं परिगृहीतश्च ॥ १० ॥ हरियूथपः यां नियतिं गतः सा नियतिर्गतिः श्रेष्ठा । तत्तस्मात्कारणात् । परितापेनालं । सद्गतिं प्राप्तं प्रति शोको न कार्यः । प्राप्तकालं एतत्कालोचितं । उपास्यतां अनुष्ठीयतां ॥ ११ ॥ गतचेतसं दुःखितमिति यावत् ॥ १२ ॥ कुरु त्वमस्येत्यर्धमेकं वाक्यं ॥ १३ ॥ वालिनो दहनं प्रति ताराङ्गदाभ्यां सहितः सन् । वालिसंस्कारकारणात् वालिसंस्कारार्थं । चन्दनादीनि काष्ठानि समाज्ञापय ॥ १४—१५ ॥ यच्चात्र समनन्तरं मरणानन्तरं यदानेतव्यमस्ति तत्सर्वमङ्गदः समानयेदित्यर्थः ॥ १६ ॥ त्वरा गुणवती अस्मिन्काले विशेषतोयुक्ता ॥ १७ ॥ ये निर्हरिष्यन्ति ते सज्जीभवन्त्विति योजना । निर्हारः

दुःखादिलाभइत्येवसाधुपश्यतासुमतिनाविवेकवताद्रष्टव्यः ज्ञातव्यः । नतुविषादहर्षौकर्तव्यौ नापिस्वसामर्थ्यनिन्देतिभावः । एवं धर्मादयोपि चादधर्मादयोपिकालक्रमेणैवसमाहिताः संपादिताभवन्ति ॥ ७–८ ॥ **ती०** धर्मश्चार्थश्चकालश्चकालक्रमसमाहिताः । पूर्वाह्णमध्याह्नापराह्णकालक्रमायत्ताः यस्मिन्कालेयत्कर्मकर्तव्यंसकालोऽनुल्लङ्घनीयइतिभावः ॥ ८ ॥ **ति०** प्रकृतमाह—**इतइति** । सामदानाभ्यामर्जितैः अर्थसंयोगैः ऐश्वर्यैः । पवित्रं शुभं । क्रियाफलं भोगं । इहलोकेप्राप्तवान्वालीइतोलोकाद्देहाच्च गतः अपगतः । स्वांप्रकृतिं गतः प्राप्तः । कार्याणांकारणेलयात् । एवंचेन्द्रलोकंगतोवालीतिसूचितं ॥ ९ ॥ **शि०** नियतिः मृतिः । प्राप्तकालं एतत्कालोचितं ॥ ११ ॥ **ति०** दहनंप्रति दहननिमित्तं । यतस्त्वेतिशेषः ॥ १४ ॥

[पा०] १ घ. ज. धर्मकामार्थसंयोगैः. ख. ग. दानमानार्थसंयोगैः. क. छ. झ. ट. सामदानार्थसंयोगैः. २ क. ग. झ. प्रतिगृहीतश्च. ३ क. ग. वचनादेवरामस्य. घ. वचनात्तस्यरामस्य. ४ क. ग. ङ.—ट. चन्दनानिच. ५ ख. माभूत्तेबालिशबुद्धिः. ६ ङ. च. ज. ञ. ट. गन्धानन्यच्च. ७ क. ग.—ट. वाहनोचिताः.

एवमुक्त्वा तु सुग्रीवं सुमित्रानन्दवर्धनः ॥ तस्थौ भ्रातृसमीपस्थो लक्ष्मणः परवीरहा ॥ १९ ॥
लक्ष्मणस्य वचः श्रुत्वा तारः संभ्रान्तमानसः ॥ प्रविवेश गुहां शीघ्रं [1]शिबिकासक्तमानसः ॥ २० ॥
आदाय शिबिकां [2]तारः स तु पर्यापतत्पुनः ॥ २१ ॥
वानरैरूह्यमानां तां शूरै[3]रुद्वहनोचितैः ॥ दिव्यां भद्रासनयुतां शिबिकां स्यन्दनोपमाम् ॥ २२ ॥
पक्षिकर्मभिराचित्रां [4]द्रुमकर्मविभूषिताम् ॥ [5]आचितां [6]चित्रपत्तीभिः सुनिविष्टां समन्ततः ॥ २३ ॥
विमानमिव सिद्धानां [7]जालवातायनावृताम् ॥ सुनियुक्तां विशालां च [8]सुकृतां विश्वकर्मणा ॥ २४ ॥
दारुपर्वतकोपेतां चारुकर्मपरिष्कृताम् ॥ वराभरणहारैश्च चित्रमाल्योपशोभिताम् ॥ २५ ॥
गुहागहनसंछन्नां रक्तचन्दन[9]रूषिताम् ॥ [10]पुष्पौघैः [11]समभिच्छन्नां पद्ममालाभिरेव च ॥
तरुणादित्य[12]वर्णाभिर्भ्राजमानाभिरावृताम् ॥ २६ ॥
ईदृशीं शिबिकां दृष्ट्वा रामो लक्ष्मणमब्रवीत् ॥ क्षिप्रं विनीयतां वाली प्रेतकार्यं विधीयताम् ॥ २७ ॥
ततो वालिनमुद्यम्य सुग्रीवः शिबिकां तदा ॥ आरोपयत विक्रोशन्नङ्गदेन सहैव तु ॥ २८ ॥
आरोप्य शिबिकां चैव वालिनं [13]गतजीवितम् ॥ अलंकारैश्च विविधैर्माल्यैर्वस्त्रैश्च [14]भूषितम् ॥ २९ ॥
आज्ञापयत्तदा राजा सुग्रीवः प्लवगेश्वरः ॥ और्ध्वदैहिकमार्यस्य क्रियताम[15]नुरूपतः ॥ ३० ॥
विश्राणयन्तो रत्नानि विविधानि [16]बहून्यपि ॥ अग्रतः प्लवगा यान्तु [17]शिबिकासमनन्तरम् ॥ ३१ ॥

शववहनं ॥ १८—१९ ॥ गुहां किष्किन्धां ॥ २०—२१ ॥ भद्रासनयुतां राजासनयुक्तां । पक्षिकर्मभिराचित्रां कृत्रिमपक्षिभिः समन्तादाश्चर्यभूतां । क्रियत इति कर्म प्रतिकृतिः द्रुमकर्मभिः द्रुमप्रतिकृतिभिः विभूषितां । आचितां चित्रपत्तीभिः चित्रलेखाभिः । पदातिभिरित्येके । आर्षो दीर्घः । सुनिविष्टां शोभनसंनिवेशवतीं । जालवातायनावृतां सूक्ष्मरन्ध्रसमूहो जालं गोनयनाकृतिरन्ध्रसमूहो गवाक्षं तदावृतां । सुनियुक्तां सुश्लिष्टां । सुकृतां सुष्ठुकृतां । यत्नेन कृतामित्यर्थः । दारुपर्वतकोपेतां दारुनिर्मितक्रीडापर्वतयुक्तां । चारुकर्मणा उत्तेजनेन परिष्कृतां अलंकृतां । वराभरणैः हारैश्च युक्तामिति शेषः । गुहागहनसंछन्नां कृत्रिमैर्गुहागहनैः गुहाभिः काननैश्च संछन्नां । पुष्पौघैः मुक्तकपुष्पनिचयैः आस्तरणार्थैः । समभिच्छन्नां व्याप्तां । चतुर्दिक्षु पुष्पसरोपेतत्वेऽप्यन्तरान्तरा पद्ममालाभिः पद्मपङ्क्तिभिर्युक्तामित्यर्थः ॥ २२—२६ ॥ ईदृशीं शिबिकामिति पुनरुक्तिर्व्यवहितानुस्मरणार्था ॥२७॥ ततः लक्ष्मणं प्रति वाली विनीयतामित्युक्तिश्रवणानन्तरमित्यर्थः । यद्वा । लक्ष्मणं प्रत्युक्तिः स्वमुद्दिश्यैवेति ज्ञात्वेत्यर्थः । आरोपयत आरोपयत् ॥ २८—२९॥ आर्यस्य ज्येष्ठस्य । देहादूर्ध्वं कर्तव्यं और्ध्वदैहिकं उत्तरक्रिया । शिबिकासमनन्तरं आसन्दीसमीपे । अत्रेतिकरणं द्रष्टव्यं । इत्याज्ञा-

शि० दिव्यां देवलोकात्प्राप्तां । भद्रासनयुतांकल्याणकारकासनयुतां अतएवशिबिकां आरोहकाणांकल्याणप्रदां । उदीचामितीत्वं ॥ २२ ॥ **ती०** जालवातायनान्वितां जालैर्वातायनैरन्वितां । कुड्योपरितिर्यगवस्थितफलकनिर्मितविविधसंनिवेशरन्ध्राणि जालानि । वातायनानि वायुप्रवेशार्थगवाक्षाकाररन्ध्राणि ॥ २४ ॥ **ति०** गुहागहनशब्देन शिबिकोपरिप्रसार्यमाणपञ्जरमुच्यते ॥ २६ ॥ **रामानु०** क्षिप्रंप्रेतकार्यंविधीयतामितिलक्ष्मणोद्देशेनोक्तार्थस्यसुग्रीवेणक्रियमाणत्वाल्लक्ष्मणेनसुग्रीवोप्याज्ञप्तइत्यवगम्यते ॥ २७ ॥ **स०** अनुकूलतः कूलमनुसृत्य ॥ ३० ॥ **शि०** विश्राणयन्तः प्रक्षेपेणददतः । प्लवगाअग्रतोयान्तु । तदनन्तरं शिबिकायातु ॥ ३१ ॥

[पा०] १ क. ख. ग. ङ. च. ज. ञ. शिबिकागतमानसः. २ ख. शीघ्रंतारःपर्यापतत्. ३ ङ. च. ज. रुद्वहनोचितां. ४ ख. द्रुमकर्मभिरावृतां. ५ ख. ग. घ. आस्थितां. ६ क. ग. घ. च. ज. चित्रपङ्क्तीभिः. ७ क. ख. ग. झ. ट. वातायनायुतां. च. वातायनान्वितां. ८ क.—च. झ. ञ. ट. शिल्पिभिःकृतां. ९ ङ. छ. झ. ट. भूषितां. १० ङ. छ. झ. ट. पुष्पाढ्यैः. ११ घ. संपरिच्छन्नां. १२ घ. वर्णाभिर्लम्बमानाभिः. १३ ख. गतचेतसं. १४ ग. शोभितः. १५ ख.—ट. मनुकूलतः. १६ क. ग.—ट. बहूनिच. १७ क. ङ.—ट. शिबिकातदनन्तरं.

[1]राज्ञामृद्धिविशेषा हि दृश्यन्ते भुवि यादृशाः ॥ [ता[2]दृशीमिह कुर्वन्तु वानरा भर्तृसत्क्रियाम्] ॥
ता[3]दृशं वालिनः क्षिप्रं प्राकुर्वन्नौर्ध्वदैहिकम् ॥ ३२ ॥
अङ्गदं प[4]रिगृह्याशु ता[5]रप्रभृतयस्तदा[6] ॥ क्रोशन्तः प्रययुः सर्वे वानरा हतबान्धवाः ॥ ३३ ॥
ततः प्र[7]णिहिताः सर्वा वा[8]नर्योऽस्य वशानुगाः ॥ चुक्रुशुर्वीर[9]वीरेति भूयः क्रोशन्ति ताः स्त्रियः ॥ ३४ ॥
ताराप्रभृतयः सर्वा वानर्यो ह[10]तयूथपाः ॥ अनु[11]जग्मुर्हि भर्तारं क्रोशन्त्यः करुणस्वनाः ॥ ३५ ॥
तासां रु[12]दितशब्देन वानरीणां वनान्तरे ॥ वनानि गिर[13]यः सर्वे विक्रोशन्तीव सर्वतः ॥ ३६ ॥
पुलिने गिरिनद्यास्तु विविक्ते जलसंवृते ॥ चितां चक्रुः सुबहवो वा[14]नराः शोककर्शिताः ॥ ३७ ॥
अवरोप्य ततः स्कन्धाच्छिबिकां व[15]हनोचिताः ॥ तस्थुरेकान्तमाश्रित्य सर्वे शोक[16]समन्विताः ॥ ३८ ॥
ततस्तारा पतिं दृष्ट्वा शिबिकातलशायिनम् ॥ आरोप्याङ्के शिरस्तस्य विललाप सुदुःखिता ॥ ३९ ॥
हा वानर म[17]हाराज हा नाथ मम वत्सल ॥ हा महार्ह महाबाहो हा मम प्रिय पश्य माम् ॥
जनं न पश्यसीमं त्वं कस्माच्छोकाभिपीडितम् ॥ ४० ॥
प्रहृष्टमिव ते वक्त्रं गतासोरपि मानद ॥ अस्तार्कसमवर्णं च ल[18]क्ष्यते जीवतो यथा ॥ ४१ ॥
एष त्वां रामरूपेण कालः कर्षति वानर ॥ येन स्म विधवाः सर्वाः कृता एकेषुणा व[19]ने ॥ ४२ ॥
इमास्तास्तव राजेन्द्र वा[20]नर्यो वल्लभाः सदा ॥ पादैर्विकृष्टमध्वानमागताः किं न बुध्यसे ॥
तवेष्टा ननु ना[21]मैता भार्याश्चन्द्रनिभाननाः ॥ ४३ ॥
इदानीं नेक्षसे क[22]स्मात्सुग्रीवं प्ल[23]वगेश्वरम् ॥ एते हि सचिवा राजंस्तारप्रभृतयस्तव ॥ ४४ ॥
पु[24]रवासी जनश्चायं प[25]रिवार्याऽऽसतेऽनघ ॥ वि[26]सर्जयैतान्प्लवगान्य[27]थोचितमरिन्दम ॥
ततः क्रीडामहे सर्वा वनेषु मदनोत्कटाः ॥ ४५ ॥
एवं विलपतीं तारां पतिशोकप[28]रिप्लुताम् ॥ उत्थापयन्ति स्म तदा वानर्यः शोककर्शिताः ॥ ४६ ॥

पयदिति पूर्वेण संबन्धः ॥ ३०—३१ ॥ ऋद्धिविशेषाः ऋद्धिविशेषानुरूपाः । यादृशा और्ध्वदैहिकक्रियाप्रकारा दृश्यन्ते तादृशमौर्ध्वदैहिकं क्षिप्रं प्राकुर्वन् ॥ ३२ ॥ तारप्रभृतयो वानरा इति सम्यक् ॥ ३३ ॥ प्रणिहिताः आप्ताः ॥ ३४—३७ ॥ वहनोचिताः वाहकाः ॥ ३८—४२ ॥ विकृष्टं विप्रकृष्टं । अध्वानं पादैरागताः ॥ ४३—४४ ॥ मदनोत्कटाः उत्कटमदनाः ॥ ४५ ॥ विलपतीं विलपन्तीं ॥ ४६ ॥

शि० हताःराजविघातेनहतप्रायाबान्धवायेषांते हतबान्धवाः ॥ ३३ ॥ **रामानु०** प्रणिहिताः अत्यन्ताप्ताइत्यर्थः । **स०** अस्य वालिनः । क्रोशन्तीति लटाक्रोशस्यविरामोनास्तीतिध्वन्यते ॥ ३४ ॥ **ती०** विविक्ते पूते । "विविक्तौपूतविजनौ" इत्यमरः ॥ ३७ ॥ **ति०** अप्लवगाः प्लुतगतिमजानन्त्यः । विकृष्टं दूरं ॥ ४३ ॥ **स०** यथापुरं यथापूर्वंक्रीडामहे । पदव्यत्ययः । यद्वा हेनाथ वयंक्रीडामेतिलोडुत्तमबहुवचनं । जीवतीतिभ्रान्त्यावचनमिदं ॥ ४५ ॥

[**पा०**] १ क. ग. ङ. च. ज. ञ. राज्ञामृद्धिर्विशिष्टाहिदृश्यतेभुवियादृशी. २ इदमर्धं क. ग. ङ.—ट. पाठेषुदृश्यते. तादृशैरिह. ३ घ. तादृशाः. ४ ङ. छ.—ट. परिरभ्याशु . ५ क.—घ. च. ज. ताराप्रभृतयः. ६ ङः.—ञ. स्तथा. ७ क. प्रणादिताः. ८ छ. ज. वानरस्य. ९ ङ.—ट. प्रियं. १० क. ङ. च. ज.—ट. हतबान्धवाः. ११ ङ. झ. ञ. ट. जग्मुश्च. १२ ग. क्रन्दितशब्देन. १३ ङ.—ट. गिरयश्चैव. क. गिरयोवृक्षाःक्रोशन्तीवचसर्वशः. १४ क. ग. ङ.—ट. वानरावनचारिणः. १५ छ. झ. ट. वानरोत्तमाः. क. ग. ङ. ज. ञ. वाहनोचिताः. १६ ङ.—ट. शोकपरायणाः. १७ क. महावीर. १८ ङ.—ट. दृश्यते. १९ ख. छ. झ. ट. रणे. २० ङ.—ट. वानर्यौप्लवगास्तव. क. वानर्योत्यन्तवल्लभाः. २१ छ. झ. ट. चैवेमाभार्याः. २२ क. कस्मादनाथाः. २३ क. च.—ट. प्लवगेश्वर. २४ ग. ज.—ट. पुरवासिजनः. २५ ङ.—ट. परिवार्यविषीदति. २६ ङ.—ट. विसर्जयैतान्सचिवान्. ग. च. विसर्जयैनान्. २७ ठ. न्यथापुर. २८ ङ.—ट. शोकपरीव्रतां.

सुग्रीवेण ततः [1]सार्धमङ्गदः पितरं रुदन् ॥ चितामारोपयामास शोकेना[2]भिहतेन्द्रियः ॥ ४७ ॥
ततोऽग्निं विधिवद्दत्त्वा सोपसव्यं चकार ह ॥ पितरं दीर्घमध्वानं प्रस्थितं व्याकुलेन्द्रियः ॥ ४८ ॥
संस्कृत्य वालिनं [3]ते तु विधि[4]पूर्वं प्लवङ्गमाः ॥ आजग्मुरुदकं कर्तुं नदीं शीत[5]जलां शि[6]वाम् ॥ ४९ ॥
ततस्ते सहितास्त[7]त्र ह्यङ्गदं स्थाप्य चाग्रतः ॥ सुग्रीवतारासहिताः सिषिचुर्वा[8]लिने जलम् ॥ ५० ॥
सु[9]ग्रीवेणैव दीनेन दीनो भूत्वा महाबलः ॥ समानशोकः काकुत्स्थः प्रेतकार्याण्यकारयत् ॥ ५१ ॥
[10]ततस्तु तं वालिनमग्र्यपौरुषं प्रकाशमिक्ष्वाकुवरेषुणाहतम् ॥
प्रदीप्य दीप्ताग्निसमौजसं तदा सलक्ष्मणं राममुपेयिवान्हरिः ॥ ५२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

षड्विंशः सर्गः ॥ २६ ॥

हनुमताकिष्किन्धाप्रवेशंप्रार्थितेनरामेण तंप्रति स्वस्यपितृनियोगानुरोधेनग्रामनगराप्रवेशनिवेदनपूर्वकं सुग्रीवंप्रतितस्य राज्येऽभिषेकचोदनेनसहाङ्गदस्ययौवराज्येऽभिषेचनचोदना ॥ १ ॥ तथा वर्षाकालावसानपर्यन्तंलक्ष्मणेनसहस्वस्यगिरिगुहायांनिवासोक्तिपूर्वकं तदनन्तरंसीतान्वेषणप्रयतनविधानम् ॥ २ ॥ सुग्रेवण रामाज्ञयानगरमेत्य यथाविधिवानरवरैराज्ये स्वाभिषेचनपूर्वकमङ्गदस्ययौवराज्येऽभिषेचनम् ॥ ३ ॥

ततः शोकाभिसंतप्तं सुग्रीवं क्लि[11]न्नवाससम् ॥ शाखामृगम[12]हामात्राः परिवार्योपतस्थिरे ॥ १ ॥
[13]अभिगम्य महाबाहुं राममक्लिष्टकारिणम् ॥ स्थिताः प्राञ्जलयः सर्वे पितामहमिवर्षयः ॥ २ ॥
ततः काञ्चनशैलाभस्तरुणार्कनिभाननः ॥ अब्रवीत्प्राञ्जलिर्वाक्यं हनुमान्मारुतात्मजः ॥ ३ ॥

पितरं पितृशरीरं ॥४७॥ अपसव्यं अप्रदक्षिणं ॥४८॥ वालिनं वालिशरीरं । उदकं कर्तुं जलतर्पणं कर्तुं । नदीं किष्किन्धासमीपवर्तिनीं ॥ ४९ ॥ सुग्रीवतारासहिताइति तारयाप्युदकदानं कुलाचारः ॥५०॥ सुग्रीवेणेति ॥ अनेन रामः सहैवागत इत्यवगम्यते ॥५१॥ प्रकाशं प्रसिद्धं । प्रदीप्य दग्ध्वा । हरिः सुग्रीवः । अन्येपुरं प्रविविशुरित्यर्थसिद्धं । यद्यपि तिर्यगधिकरणरीत्या तिरश्चां न शास्त्रविहितसंस्काराधिकारः । तथापि देवांशसंभूतानां तिर्यगवस्थामात्रभाजां वेदाध्ययनसंयोगाद्देवक्षत्रजातत्वात्संस्कारार्हतास्तीति बोध्यं ॥५२॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकण्डव्याख्याने पञ्चविंशः सर्गः ॥ २५ ॥

अथ सुग्रीवाभिषेकः षड्विंशे—तत इत्यादि ॥ क्लिन्नवाससं आर्द्रवस्त्रं । सद्यः स्नानादितिभावः । शाखामृगमहामात्राः वानररूपामन्त्रिणः ॥ १ ॥ सर्वे

ति० विधिवत् देवांशत्वेनस्वयंज्ञातवेदत्वाज्ज्ञानवत् । तिर्यग्देहोचितविधिवदित्यर्थः । विधिवत् अग्निहोत्रविधिनेत्यर्थइत्यन्ये ॥ ४९ ॥ **शि०** वालिनः वालिने ॥ ५० ॥ **रामानु०** समानशोकःकाकुत्स्थइत्यनेन समानसुखदुःखित्वंसखित्वमित्येतत्प्रकटितंभवति ॥ **ती०** सुग्रीवेणैवाकारयत् तत्प्रामुख्येनैवाकारयदित्यर्थः ॥ ५१ ॥ **ती०** गतसर्गाणांफलश्रुतिः । " ताराप्रलापमाकर्ण्यवालिनोनिधनंतथा । कपीन्द्रसंस्कृतिंनारीश्रुत्वाह्यविधवाभवेत् । दीर्घायुष्यंभवेद्भर्तुःपुत्रिणीसंभविष्यति " इतिस्कान्दे ॥ ५२ ॥ इतिपञ्चविंशःसर्गः ॥ २५ ॥

[**पा०**] १ ङ. ज.—ट. सार्धसोङ्गदः. २ छ.—ट. नाभिप्लुतेन्द्रियः. ३ ङ.—ट. तंतु. ४ ङ.—ट. विधिवत्प्लवगर्षभाः. ५ क. ङ. छ.—ट. शुभजलां. ख. शिवजलां. ६ क. ख. घ. शुभां. ७ ङ. ज. ञ. स्तस्थुरङ्गदं. क. ग. च. छ. झ. ट. स्तत्रअङ्गदं. ८ छ. झ. वानराजलं. क.—च. ञ. ट. वालिनो. ९ ग. ङ.—ज. ञ. सुग्रीवेणच. घ. सुग्रीवेणतु. १० ग. ङ.—ट. ततोथतं. ११ ख. क्लिन्नमानसं. १२ क. घ. ङ. ज. महामात्याः. १३ ख. घ. अभिवाद्य.

भवत्[1]प्रसादात्सुग्रीवः पितृपैतामहं महत् ॥ [2]वानराणां सुदुष्प्रापं प्राप्तो राज्यमिदं प्रभो ॥ ४ ॥
भवता समनुज्ञातः प्रविश्य नगरं शुभम् ॥ संविधास्यति कार्याणि सर्वाणि [3]ससुहृज्जनः ॥ ५ ॥
स्नातोयं विविधैर्गन्धैरौषधैश्च यथाविधि ॥ अर्चयिष्यति [4]रत्नैश्च माल्यैश्च त्वां विशेषतः ॥ ६ ॥
इमां गिरिगुहां रम्यामभि[5]गन्तुमितोर्हसि ॥ कुरुष्व स्वामिसंबन्धं वानरान्[6]संप्रहर्षयन् ॥ ७ ॥
एवमुक्तो हनुमता राघवः परवीरहा ॥ प्रत्युवाच हनूमन्तं बुद्धिमान्वाक्यकोविदः ॥ ८ ॥
चतुर्दश समाः सौम्य ग्रामं वा यदि वा पुरम् ॥ न प्रवेक्ष्यामि हनुमन्पितुर्निर्देश[7]पालकः ॥ ९ ॥
सुसमृद्धां गुहां [8]रम्यां सुग्रीवो वानरर्षभः ॥ प्रविष्टो विधिवद्वीरः क्षिप्रं राज्येऽभिषिच्यताम् ॥ १० ॥
एवमुक्त्वा हनूमन्तं रामः सुग्रीवमब्रवीत् ॥ वृत्तज्ञो वृत्तसंपन्नमुदारबलविक्रमम् ॥ ११ ॥
इममप्यङ्गदं [9]वीरं यौवराज्येऽभिषेचय ॥ [10]ज्येष्ठस्य स सुतो ज्येष्ठः सदृशो [11]विक्रमेण ते ॥
अङ्गदोऽयमदीनात्मा यौवराज्यस्य भाजनम् ॥ १२ ॥
पूर्वोऽयं वार्षिको मासः श्रावणः सलिलागमः ॥ प्रवृत्ताः सौम्य चत्वारो मासा वार्षिकसंज्ञिकाः ॥ १३ ॥
नायमुद्योगसमयः प्रविश त्वं पुरीं शुभाम् ॥ अस्मिन्वत्स्याम्यहं सौम्य पर्वते सहलक्ष्मणः ॥ १४ ॥
इयं गिरिगुहा रम्या विशाला युक्तमारुता ॥ प्रभूतसलिला सौम्य प्रभूतकमलोत्पला ॥ १५ ॥
कार्तिके समनुप्राप्ते त्वं रावणवधे यत ॥ एष नः समयः सौम्य प्रविश त्वं स्वमालयम् ॥ १६ ॥

सुग्रीवादयः ॥ २—३ ॥ वानराणां राज्यमित्यन्वयः ॥ ४—५ ॥ अतिनिपुणतया हनुमान् प्रथमं संग्रहेण विज्ञाप्य तच्छृण्वति रामे पुनर्विशदमाह—स्नात इति ॥ ६ ॥ गिरिगुहां किष्किन्धां । वानराणां स्वामिना संबन्धं कुरु सुग्रीवंवानरराजंकुर्वित्यर्थः ॥ ७—११ ॥ भाजनं योग्यमित्यर्थः ॥ १२ ॥ अस्त्वभिषेकः सीतान्वेषणरावणवधादिकं प्रत्युद्योगः क्रियत इत्याशङ्क्याह—पूर्व इत्यादि ॥ पूर्वः वर्षर्त्वपेक्षयाप्रथमः । वर्षाः वर्षर्तुः । “ स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षाः ” इत्यमरः । तत्र भवो वार्षिकः । “ द्वौ द्वौ मार्गादिमासौ स्यादृतुः ” इति श्रावणभाद्रपदौ वर्षर्तुः । तदेकदेशत्वाच्छ्रावणोवार्षिक इत्युच्यते । “ वर्षाभ्यष्ठक् ” इति ठक्प्रत्ययः । वार्षिकसंज्ञिकाश्चत्वारोमासा इति । आश्वयुजाषाढाभ्यां चतुष्ट्वमिति ज्ञेयं । छत्रिन्यायात् । वर्षमुखत्वाद्वर्षानन्तरकालत्वाच्च चत्वारोपि युद्धयोग्या न भवन्ति । कश्चित्तु—“पक्षा वैमासाः ” इति श्रुतिपक्षमाश्रित्य चत्वारो वार्षिका मासा इत्युक्तम् । श्रावणः प्रथमो मास इत्यत्रापि प्रथमः पक्ष इत्यर्थः । “ चत्वारो वार्षिका मासा गता वर्षशतोपमाः ” इत्युपसंहारादित्याह ॥ १३—१५ ॥ कार्तिके मासि समनुप्राप्ते समीपंप्राप्ते । आश्वयुजान्तइत्यर्थः । यत यतस्व । सेनासंनहनंकुरु । कार्तिकशब्दस्य आश्वयुजान्तपरत्वं स्वयमेव वक्ष्यति—“वयमाश्वयुजे मासिपिङ्गाक्षप्रतिचोदिताः ” इति । प्रचोदनं संनहनं नतुनिर्गमः । निर्गमस्तु मार्गशीर्षे । स्वसंकेतितकार्तिकातिक्रमादेव रामस्य सुग्रीवे कोपो लक्ष्मणप्रेषणं च । स्वयंप्रभाबिलनिर्गमनानन्तरं “द्रुमान्वासन्तिकान्दृष्ट्वा ” इत्येतद्वसन्तपुष्पोद्गमोपक्रमभूतपत्रविगलनहेतुफाल्गुनापेक्षया । पक्षान्तरे फाल्गुनचैत्रयोर्वसन्तत्वोक्तेर्वा । अयमत्र क्रमोऽनुसन्धेयः । उत्तरस्यादिना पूर्वस्यावधिं जानीयादिति न्यायेन उत्तरस्योत्तरस्य ग्रहणात् पूर्वपूर्वकालसंख्याज्ञापनं वाल्मीकेः शैली । तथा च चैत्रे रामस्य साकेतान्निर्गमः । अगस्त्याश्रमागमनात्पूर्वं दश संवत्सरा गता इत्युक्तं ।

टीका० औषधैः अभिषेकद्रव्यैः ॥ ६ ॥ **स०** स्वामिसंबन्धं सुग्रीवस्यराज्याभिषेकेणस्वामित्वसंबन्धं ॥ ७ ॥ **स०** ग्रामं अल्पजनाधिष्ठितं ॥ ९ ॥ **टी०** प्रवृत्ताः प्रवर्तितुमुपक्रान्ताः ॥ **स०** सलिलानामागमः आगमनंयस्मिन्सतथा ॥ १३ ॥

[**पा०**] १ क. ग. छ. झ. ट. त्प्रसादात्काकुत्स्थ. २ वानराणामित्यर्धस्थाने छ. झ. ट. पाठेषुवानराणांसुदंष्ट्राणांसंपन्नबलशालिनाम् । महात्मनांसुदुष्प्रापंप्राप्तंराज्यमिदंप्रभो । इत्यर्धद्वयंदृश्यते. ३ क. ङ.—ट. ससुहृद्गणः. ४ छ.—ट. माल्यैश्चरत्नैश्च. ५ ङ.—ञ. गन्तुंत्वमर्हसि. ६ ग. न्प्रतिहर्षयन्. ७ ङ. छ.—ट. पारगः. ८ क. ग.—च. ज.—ट. दिव्यां. ९ घ.—ट. वीरं. १० क. ख. ङ. छ.—ट. ज्येष्ठस्यहि. घ. ज्येष्ठस्यतु. ११ ग. विक्रमेणहि. ख. घ.—ट. विक्रमेणच.

[1]अभिषिक्तः स्वराज्ये च सुहृदः सं[2]प्रहर्षय ॥ १७ ॥
इति रामाभ्यनुज्ञातः सुग्रीवो [3]वानराधिपः ॥ प्रविवेश पुरीं रम्यां किष्किन्धां वालिपालिताम् ॥ १८ ॥
तं वानरसहस्राणि प्रविष्टं वानरेश्वरम् ॥ अभिवाद्य [4]प्रविष्टानि सर्वतः [5]पर्यवारयन् ॥ १९ ॥
ततः प्रकृतयः सर्वा दृष्ट्वा हरिगणेश्वरम् ॥ प्रणम्य मूर्ध्ना पतिता वसुधायां समाहिताः ॥ २० ॥
सुग्रीवः प्रकृतीः सर्वाः संभाष्योत्थाप्य वीर्यवान् ॥ भ्रातुरन्तःपुरं सौम्यं प्रविवेश महाबलः ॥ २१ ॥
[6]प्रविश्य त्वभिनिष्क्रान्तं सुग्रीवं [7]प्लवगेश्वरम् ॥ अभ्यषिञ्चन्त सुहृदः सहस्राक्षमिवामराः ॥ २२ ॥
तस्य पाण्डुरमाजह्रुश्छत्रं हेमपरिष्कृतम् ॥ शुक्ले च वालव्यजने हेमदण्डे यशस्करे ॥ २३ ॥
तथा [8]सर्वाणि रत्नानि [9]सर्वबीजौषधैरपि ॥ सक्षीराणां च वृक्षाणां प्ररोहान्कुसुमानि च ॥ २४ ॥
शुक्लानि चैव वस्त्राणि श्वेतं चैवानुलेपनम् ॥ सुगन्धीनि च माल्यानि स्थलजान्यम्बुजानि च ॥ २५ ॥
चन्दनानि च दिव्यानि गन्धांश्च विविधान्बहून् ॥ अक्षतं जातरूपं च प्रियङ्गुमधुसर्पिषी ॥
दधि चर्म च वैयाघ्रं [10]वाराही चाप्युपानहौ ॥ २६ ॥
[11]समालम्भनमादाय रो[12]चनां समनःशिलाम् ॥ आजग्मुस्तत्र मुदिता वराः [13]कन्यास्तु षोडश ॥ २७ ॥
[14]ततस्ते वानर[15]श्रेष्ठं यथाकालं यथाविधि ॥ रत्नैर्वस्त्रैश्च भक्षैश्च तोषयित्वा द्वि[16]जर्षभान् ॥ २८ ॥

अथ पञ्चवट्यां वर्षत्रयानन्तरं चैत्रे प्राप्ते शूर्पणखानासिकाच्छेदनखरवधादिकं कृतमित्यवगम्यते । रावणेन च मारीचवचनादिना किंचिद्विलम्ब्य तस्मिन्नेव चैत्रे सीता हृता । सीताविरहेण दूयमानस्य रामस्य वसन्तवर्णने चैत्रवनानिल इत्युक्तेः । लङ्कायां सीतायाः संवत्सरवासोक्तेश्च । पुनः फाल्गुने हि रावणवधः । आषाढे वालिवधः । शरदि सेनासंनहनं । मार्गशीर्षे वानरप्रस्थापनं । स्वयंप्रभाबिले बहुकालयापनं । “ कालश्च नो महान्यातः ” इत्युक्तेः । बहिर्निर्गमनानन्तरं फाल्गुनशुद्धत्रयोदश्यां हनुमतः समुद्रतरणं । चतुर्दश्यां पुनरागमनं (?) । पौर्णमास्यां दण्डयात्रेत्यादि । अन्यद्युद्धकाण्डे वक्ष्यते । समयः संकेतः ॥ १६—१९ ॥ मूर्ध्ना प्रणम्य वसुधायांपतिताः । समाहिताः अनन्यमनस्काः ॥ २० ॥ भ्रातुरन्तःपुरं प्रविवेशेति । तारां संमान्य स्ववशीकरणार्थमितिभावः ॥ २१—२२ ॥ प्ररोहान् पल्लवान् । अनुलेपनं कर्पूरादि । गन्धाः अगरुप्रभृतयः । अक्षतं जातरूपं अक्षततण्डुलं हरिद्रामिश्रं । प्रियङ्गुः सूक्ष्मधान्यविशेषः । वाराही वराहचर्मविकृती । “ सुपां सुलुक् ” इत्यादिना पूर्वसवर्णदीर्घः ॥ २३—२६ ॥ समालम्भनं अनुलेपनविशेषः । “ समालम्भो विलेपनं ” इत्यमरः । रोचनां गोरोचनां । समनःशिलां । शैलधातुविशेषसंहितं तिलकसाधनं मनःशिला ॥ २७ ॥ ततस्ते वानरश्रेष्ठमित्यारभ्य वसवो वासवं यथेत्यन्तमेकं वाक्यं ॥ यथाकालं विहितकालमनतिक्रम्य । यथाविधि यथाक्रमं । द्विजर्षभान् याजनार्थमाहूतान् । समिद्धं ज्वलितं । जातवेदसं अग्निं । मन्त्रविदः वानरपुरोहि-

ति० प्रविश्यत्वभिनिष्क्रान्तमितिपाठे प्रविश्य अन्तःपुरगतशोकादिकंदृष्ट्वा अभिषेकायतुपुनःनिष्क्रान्तंप्रतिनिवृत्तं सभामागतमित्यर्थः ॥२२॥ **स०** यशस्करे सुग्रीवे । पाण्डुरंछत्रं आजहुः । तस्यसुहृदइतितस्येत्यस्यपूर्वेणान्वयः । यशस्करेइतिवालव्यजनविशेषणंच ॥ २३ ॥ **टीका०** श्वेतमनुलेपनं कर्पूरद्रवः ॥ २५ ॥ **टीका०** प्रियङ्गुः फलिनीपुष्पं । “प्रियङ्गुःफलिनीफली” इत्यमरः । यद्वा “प्रियङ्गुःसिद्धार्थःसमौ” इतिविश्वप्रकाशः ॥ **स०** गन्धान् गन्धद्रव्याणि । जातरूपं रौप्यं । प्रियङ्गुसहितंमधु प्रियङ्गुमधु । अनन्तरंद्वन्द्वः । अतोनद्विवचनानुपपत्तिः ॥ २६ ॥ **ती०** द्विजर्षभान् वानरजातीयद्विजर्षभान् ॥ २८ ॥

[**पा०**] १ क. ग. छ. ज. झ. ट. अभिषिञ्चस्व. २ ग. संप्रचोदय. ३ क. ग. छ.—ट. वानरर्षभः. ४ क.—घ. च. ज. ञ. ट. प्रहृष्टानि. ५ ङ. छ.—ञ. प्लवगेश्वरं. ६ ङ.—ञ. प्रविष्टंभीमविक्रान्तंसुग्रीवंवानरर्षभं. ७ क.—घ. वानरर्षभं. ८ ङ.—ट. रत्नानिसर्वाणि. ९ क.—ट. सर्वबीजौषधानिच. १० क. ग. घ. ज. ञ. वराहौ. ङ. छ. झ. ट. पराध्यौं. ११ क. समालेपन. १२ झ. गोरोचनंमनःशिलां. छ. ट. गोरोचनमनःशिलां. ङ. ञ. गोरोचनमनःशिलाः. घ. च. ज. रोचनांसुमनःशिलाः. ख. रोचनांसुमनःशिलां. ग. रोचनांचमनःशिलां. १३ ख. ङ. छ. झ. ञ. ट. कन्याश्च. १४ ख.—ङ. ज. ञ. ततस्तं. १५ ङ. झ. ट. श्रेष्ठमभिषेक्तुं. १६ ग. ङ. द्विजोत्तमान्.

ततः कुशपरिस्तीर्णं समिद्धं जातवेदसम् ॥ मन्त्रपूतेन हविषा हुत्वा मन्त्रविदो जनाः ॥ २९ ॥
ततो हेमप्रतिष्ठाने वरास्तरणसंवृते ॥ प्रासादशिखरे रम्ये चित्र[1]माल्योपशोभिते ॥ ३० ॥
प्राङ्मुखं विविधैर्मन्त्रैः स्थापयित्वा वरासने ॥ नदीनदेभ्यः संहृत्य तीर्थेभ्यश्च समन्ततः ॥ ३१ ॥
आहृत्य च समुद्रेभ्यः सर्वेभ्यो वानरर्षभाः ॥ अपः कनककुम्भेषु निधाय [2]विमलाः शुभाः ॥ ३२ ॥
[3]शुभैर्वृषभशृङ्गैश्च [4]कलशैश्चापि काञ्चनैः ॥ शास्त्रदृष्टेन विधिना महर्षिविहितेन च ॥ ३३ ॥
गजो गवाक्षो गवयः शरभो गन्धमादनः ॥ मैन्दश्च द्विविदश्चैव हनुमाञ्[5]जाम्बवान्नलः ॥ ३४ ॥
अभ्यषिञ्चन्त सुग्रीवं प्रसन्नेन सुगन्धिना ॥ सलिलेन सहस्राक्षं वसवो वासवं यथा ॥ ३५ ॥
अभिषिक्ते तु सुग्रीवे सर्वे वानरपुङ्गवाः ॥ [6]प्रचुकुशुर्महात्मानो [7]हृष्टास्तत्र सहस्रशः ॥ ३६ ॥
[8]रामस्य तु वचः कुर्वन्सुग्रीवो [9]हरिपुङ्गवः ॥ अङ्गदं संपरिष्वज्य यौवराज्येऽभ्यषेचयत् ॥ ३७ ॥
अङ्गदे चाभिषिक्ते तु सानुक्रोशाः प्लवङ्गमाः ॥ साधु साध्विति सुग्रीवं महात्मानो[10]ऽभ्यपूजयन् ॥ ३८ ॥
[11]रामं चैव महात्मानं लक्ष्मणं च पुनः पुनः ॥ प्रीताश्च तुष्टुवुः सर्वे तादृशे तत्र [12]वर्तति ॥ ३९ ॥
हृष्टपुष्ट[13]जनाकीर्णा पताकाध्वजशोभिता ॥ बभूव नगरी रम्या किष्किन्धा गिरिगह्वरे ॥ ४० ॥
निवेद्य रामाय तदा महात्मने महाभिषेकं कपिवाहिनीपतिः ॥
रुमां च [14]भार्यां प्रतिलभ्य वीर्यवानवाप राज्यं त्रिदशाधिपो यथा ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे षड्विंशः सर्गः ॥ २६ ॥

ताः । हैमप्रतिष्ठाने हेममयपादयुक्ते । वरासनविशेषणमेतत् । नदीनदेभ्यस्तीर्थेभ्यः समुद्रेभ्यश्च अपः आहृत्य आनीय । संहृत्य संमिश्रीकृत्य । तद्विमलं जलं कनककुम्भेषु निधाय तेभ्यो वृषभशृङ्गादिभिरुद्धृत्य । शास्त्रदृष्टेन विधिना क्रमेण । महर्षिविहितेन कल्पसूत्रविहितेन च विधिना । अभ्यषिञ्चन्त ॥२८—३७॥ सानुक्रोशाः अङ्गदे सदयाः ॥ ३८ ॥ तादृशे सुग्रीवाङ्गदाभिषेकरूपोत्सवे । वर्तति वर्तमाने सति ॥ ३९ ॥ पताकाध्वजयोर्भेद उक्तः ॥ ४० ॥ निवेद्य रामसमीपमागत्य निवेद्येत्यर्थः ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षड्विंशः सर्गः ॥ २६ ॥

ति० ततःकुशेति । अनेनाग्निसाध्यकर्माधिकारंतेषांदर्शयति । मनुष्यसदृशसर्वव्यवहाराद्वेदज्ञत्वाच्च ॥ २९ ॥ **ति०** मन्त्रैस्स्थापयित्वा " वसवस्त्वागायत्रेणच्छन्दसा " इत्यादिमन्त्रैरासनेस्थापयित्वेत्यर्थः ॥ **स०** नदीनदेभ्यः अविवक्षितत्वान्नैकशेषः ॥ ३१ ॥ **स०** अपः नविद्यते पःपालकोयस्यसोपः । अस्यगजोगवाक्षइत्यादिनापृथगन्वयः । तेननजलशब्देनपौनरुक्त्यं ॥ **ति०** अपआहृत्यमिलिताःकृत्वाविमलंजलंकुंभेषुनिधायेतिसंबन्धः ॥ ३२ ॥ **ति०** तादृशेतत्रवार्तिनि अभिषिक्तेसुग्रीवेऽङ्गदेच । तत्र किष्किन्धायां । वार्तिनि वर्तमानेसतीत्यर्थः ॥ ३९ ॥ **ती०** फलश्रुतिः । " अभिषेकंच तारायारुमायाःप्राप्तिमुत्तमाम् । सुग्रीवस्यसदाश्रुत्वाराज्यलाभंसगच्छति " इति ॥ ४१ ॥ इतिषड्विंशःसर्गः ॥ २६ ॥

[**पा०**] १ ग. माल्यानुशोभिते. २ क. ग. झ. ट. विमलंजलं. ङ. च. ञ. विधिवज्जलं. ३ क. शुभैर्हिरण्यशृङ्गैश्च. ४ छ. झ. ट. कलशैश्चैव. ख. सुकुशैश्चापि. ५ ङ. छ. झ. ट. जांबवांस्तथा. ६ क. प्रतुष्टुवुः. ७ ङ. छ.—ट. हृष्टाःशतसहस्रशः. ८ ग. रामस्यवचनं. ९ छ. झ. ट. वानरेश्वरः. १० ङ. छ.—ट. ह्यपूजयन्. ११ ग. रामंचलक्ष्मणंचैवप्रशशंसुःपुनःपुनः. १२ ङ. झ. वर्तिनि. १३ घ. समाकीर्णा. १४ घ.—ट. भार्यामुपलभ्य.

सप्तविंशः सर्गः ॥ २७ ॥

रामेण प्रस्रवणगिरिगुहामेत्यलक्ष्मणंप्रति तद्गुहायाःस्ववासानुगुणगुणसमृद्धिवर्णनपूर्वकं लक्ष्मणेनसहतत्रनिवासः ॥ १ ॥ लक्ष्मणेन चन्द्रदर्शनादिनासमुद्दीपितशोकंरामंप्रति बहुधासमाश्वासनम् ॥ २ ॥ रामेण लक्ष्मणप्रशंसनपूर्वकंशरत्प्रतीक्षया तत्रनिवासः ॥ ३ ॥

अभिषिक्ते तु सुग्रीवे प्रविष्टे वानरे गुहाम् ॥ आजगाम सह भ्रात्रा रामः प्रस्रवणं गिरिम् ॥ १ ॥
शार्दूलमृगसंघुष्टं सिंहैर्भीमरवैर्वृतम् ॥ नानागुल्मलतागूढं बहुपादपसंकुलम् ॥ २ ॥
ऋक्षवानरगोपुच्छैर्मार्जारैश्च निषेवितम् ॥ मेघराशिनिभं शैलं नित्यं शुचिजलाश्रयम् ॥ ३ ॥
तस्य शैलस्य शिखरे महतीमायतां गुहाम् ॥ प्रत्यगृह्णत वासार्थं रामः सौमित्रिणा सह ॥ ४ ॥
कृत्वा च समयं सौम्यः सुग्रीवेण सहानघः ॥ कालयुक्तं महद्वाक्यमुवाच रघुनन्दनः ॥
विनीतं भ्रातरं भ्राता लक्ष्मणं लक्ष्मिवर्धनम् ॥ ५ ॥
इयं गिरिगुहा रम्या विशाला युक्तमारुता ॥ अस्यां वसाव सौमित्रे वर्षरात्रमरिंदम ॥ ६ ॥
गिरिशृङ्गमिदं रम्यमुन्नतं पार्थिवात्मज ॥ श्वेताभिः कृष्णताम्राभिः शिलाभिरुपशोभितम् ॥ ७ ॥
नानाधातुसमाकीर्णं दरीनिर्झरशोभितम् ॥ विविधैर्वृक्षषण्डैश्च चारु चित्रलतावृतम् ॥ ८ ॥
नानाविहगसंघुष्टं मयूररवनादितम् ॥ मालतीकुन्दगुल्मैश्च सिन्धुवारकुरण्टकैः ॥ ९ ॥
कदम्बार्जुनसर्जैश्च पुष्पितैरुपशोभितम् ॥ १० ॥
इयं च नलिनी रम्या फुल्लपङ्कजमण्डिता ॥ नातिदूरे गुहाया नौ भविष्यति नृपात्मज ॥ ११ ॥
प्रागुदक्प्रवणे देशे गुहा साधु भविष्यति ॥ पश्चाच्चैवोन्नता सौम्य निवातेयं भविष्यति ॥ १२ ॥
गुहाद्वारे च सौमित्रे शिला समतला शुभा ॥ श्लक्ष्णा चैवायता चैव भिन्नाञ्जनचयोपमा ॥ १३ ॥
गिरिशृङ्गमिदं तात पश्य चोत्तरतः शुभम् ॥ भिन्नाञ्जनचयाकारमम्भोधरमिवोत्थितम् ॥ १४ ॥

अथ रामस्यैकान्तवाससमुद्भूतसीताविरहशोकप्रशमनं लक्ष्मणेन क्रियते सप्तविंशे—अभिषिक्त इत्यादि ॥ १—२ ॥ शैलं शिलामयमिति मृच्छिलोभयमयगिरिभ्यो व्यावृत्तिः । अतो न गिरिं शैलमिति पुनरुक्तिः ॥ ३—४ ॥ कालयुक्तं तत्कालोचितं ॥ ५ ॥ युक्तमारुता उचितमारुता यावदपेक्षमारुतेत्यर्थः । वसाव लोडुत्तमद्विवचनं । वर्षरात्रमिति अच् समासान्त आर्षः । जात्येकवचनं ॥ ६—८ ॥ कदम्बाः अर्जुनाः नदीसर्जाः ॥ ९ ॥ नातिदूरे भविष्यतीत्यनेन वर्षाकालस्य प्रवृत्तत्वाद्भाविजलसमृद्ध्या समीपवर्तिनी भविष्यतीत्यर्थः ॥ १०—११॥ प्रागुदक्प्रवणे देशे वर्तमाना गुहा साधु भविष्यति । प्रागुदक्प्रवणे देशे वर्तमानत्वाभिधानाद्गुहाया नैर्ऋत्यभिमुखद्वारत्वमुक्तं । अतएव पौरस्त्यवर्षप्रवेशाभावेन साधुत्वमुक्तं भवति । इयं पश्चादुन्नता पश्चाद्भागोन्नता । अतएव पुरोवातनिरोधकत्वान्निवाता च भविष्यति ॥ १२ ॥ गुहाद्वारेचेति । अस्मिन् श्लोके वर्ततइतिशेषः ॥ १३ ॥ श्वेतमिव रूप्यमिव । " दुर्वर्णं रजतं रूप्यं खर्जूरं

ति० प्रस्रवणं तदाख्यं ॥ १ ॥ **स०** गोपुच्छैः नीलमुखवानरविशेषैः ॥ ३ ॥ **स०** ङीबन्तलक्ष्मीशब्दोप्यस्तीतिलक्ष्मिवर्धनमित्येतत्साधु ॥ " द्रागलक्ष्मिभर्तृगुणान् " इत्यादिप्रयोगात् ॥ **शि०** अनघः शरणागतानामघनिवर्तकः ॥ ५ ॥ **स०** नदीदर्दुरसंयुतं नद्यांविद्यमानमण्डूकसदृशमहामण्डूकोपेतं ॥ ७ ॥ **स०** प्रागुदक्प्रवणे पूर्वोत्तरभागयोर्निम्नभूते ॥ ११ ॥

[पा०] १ ङ. च. ञ. संयुक्तं. २ क. ख. घ. ङ. च. ज. ञ. भीमतरैर्वृतं. ३ ख. नानाद्रुम. ४ ङ.—ट. शुचिकरंशिवं. ख. शुचिजलंशिवं. क. शुचिकरंशुभं. ५ क. ग. ङ.—ट. रामः. ६ छ. झ. ञ. ट. वत्स्याम. ख.—च. ज. वत्स्यामि. क. वत्स्याव. ७ ख. सौम्यमुन्नतं. क. ङ.—ट. रम्यमुत्तमं. ८ ग. र भिशोभितं. ९ ङ.—ट. नदीदर्दुरसंयुतं. १० ख. घ. द्वारिचित्र. ११ च. ज. झ. ट. सिन्धुवारैःशिरीषकैः. ख. सिन्धुवारैश्चशोभितैः. १२ च. ज. ञ. संघैश्च. क. संकीर्णैः. ख. वंशैश्च. १३ ङ. छ. झ. ट. कृष्णाचैव. १४ ग. घ. ङ. छ. ञ. ट. गिरेःशृङ्गं. १५ ङ. झ. ञ. ट. मिवोदितं. घ. मिवोन्नतं.

दक्षिणस्यामपि दिशि स्थितं श्वेत[1]मिवापरम् ॥ कैलासशिखरप्रख्यं नानाधातु[2]विभूषितम् ॥ १५ ॥
प्राचीनवाहिनीं चैव नदीं भृशमकर्दमाम् ॥ गुहायाः [3]पूर्वतः पश्य त्रिकूटे जाह्नवीमिव ॥ १६ ॥
[4]चम्पकैस्तिलकैस्तालैस्तमालैरतिमुक्तकैः ॥ पद्मकैः सरलैश्चैव [5]अशोकैश्चैव शोभिताम् ॥ १७ ॥
[6]वानीरैस्तिनिशैश्चैव [7]बकुलैः [8]केतकैर्धवैः ॥ हिन्तालैस्तिरिटैर्[9]नीपैर्[10]वेत्रकैः कृतमालकैः ॥ १८ ॥
तीरजैः शोभिता भाति नानारूपैस्ततस्ततः ॥ वसनाभरणोपेता प्रमदेवाभ्यलङ्कृता ॥ १९ ॥
शतशः पक्षिसङ्घैश्च नाना[11]नादैर्विनादिता ॥ एकैकमनुरक्तैश्च चक्रवाकैरलङ्कृता ॥ २० ॥
पुलिनैरतिरम्यैश्च हंससार[12]ससेवितैः ॥ प्रहसन्तीव भात्येषा [13]नारी सर्वविभूषिता ॥ २१ ॥
क्वचिन्नीलोत्पलच्छन्ना भाति रक्तोत्पलैः क्वचित् ॥ क्वचिदाभाति शुक्लैश्च दिव्यैः कुमुदकुड्मलैः ॥ २२ ॥
पारिप्लवशतैर्जुष्टा [14]बर्हिणक्रौञ्चनादिता ॥ रमणीया नदी सौम्य [15]मुनिसङ्घैर्निषेविता ॥ २३ ॥
पश्य चन्दनवृक्षाणां पङ्क्तीः [16]सुरचिता इव ॥ ककुभानां च दृश्यन्ते मनसेवोदिताः समम् ॥ २४ ॥
अहो सुरमणीयोयं देशः शत्रुनिषूदन ॥ [17]इदं रंस्याव सौमित्रे साध्वत्र निवसावहे ॥ २५ ॥
इतश्च नातिदूरे सा किष्किन्धा चित्रकानना ॥ सुग्रीवस्य पुरी रम्या भविष्यति नृपात्मज ॥ २६ ॥
गीतवादित्रनिर्घोषः श्रूयते जयतां वर ॥ [18]नर्दतां वानराणां च [19]मृदङ्गाडम्बरैः सह ॥ २७ ॥
लब्ध्वा भार्यां कपिवरः प्राप्य राज्यं सुहृद्वृतः ॥ ध्रुवं नन्दति सुग्रीवः संप्राप्य महतीं श्रियम् ॥ २८ ॥
[20]इत्युक्त्वा न्यवसत्तत्र राघवः सहलक्ष्मणः ॥ बहुदृश्यदरीकुञ्जे तस्मिन्प्रस्रवणे गिरौ ॥ २९ ॥

श्वेतं " इत्यमरः । अपरं शृङ्गं पश्येति पूर्वेणान्वयः ॥ १४—१५ ॥ अतिमुक्तकैः पुण्ड्रकैः । पद्मकैः पद्मपर्णाख्यवृक्षविशेषैः । सरलैः यूपसरलैः । तिनिशैः स्यन्दनैः । " तिनिशे स्यन्दनो नेमिः " इत्यमरः । धवैः धुन्धुरैः । हिंतालैः लताङ्कुराख्यवृक्षैः । " अथ स्याल्लताङ्कुरः । हिन्तालस्तृणराजश्च" इति वैजयन्ती । तिरिटैः तिल्ववृक्षैः । " तिरीटस्तिल्वमार्जनौ " इत्यमरः । वेत्रकैरिति सम्यक् ॥ १६—१९ ॥ एकैकमनुरक्तैः अन्योन्यानुरागयुक्तैः ॥ २०—२२ ॥ पारिप्लवैः जलोपरिसंचारिपक्षिविशेषैः ॥ २३ ॥ सुरचिता इव मालारूपेण ग्रथिता इव । ककुभानां अर्जुनवृक्षाणां । दृश्यन्ते पङ्क्तय इति शेषः । मनसेवोदिताः सममिति मनसा संकल्पेन । समं युगपत् । उदिता इव स्थिताः ॥ २४ ॥ रंस्याव रंस्यावहे । अतः अत्र गिरौ । निवसावहै निवसाव ॥ २५ ॥ अत्र वासे क्रियमाणे किष्किन्धा च समीपवर्तिनीभविष्यतीत्याह—इतश्चेति ॥ २६ ॥ मृदङ्गाडम्बरैः सह नर्दतां वानराणां निर्घोषः श्रूयत इत्यन्वयः ॥ २७—२८ ॥ तत्र गुहायां । कुञ्जः लतागृहं

ति० श्वेतमिवांबरं श्वेतवस्त्रमिवस्थितं ॥ १५ ॥ ति० जाह्नवीपदेन तत्रत्याजाह्नवीसदृशीमन्दाकिन्याख्यानदी ॥ १६ ॥ टीका० सममनसाउदिताइव एकोच्छ्रायविस्ताराउद्भवामइतिसंकल्प्योत्थिताइवेत्युत्प्रेक्षा ॥ शि० मनसा मदिच्छया । समं उदिताः जाताइव । चन्दनवृक्षाणांककुभानां अर्जुनवृक्षाणांचयाःपङ्क्तयोदृश्यन्ते ताःसुरुचिराःपङ्क्तीःपश्य ॥२४॥ ति० बहूनिदृश्यान्युत्तमवस्तूनियत्र तादृशःकुञ्जाश्रयस्मिन्नितिगिरिविशेषणं ॥ २९ ॥

[पा०] १ झ. ट. मिवांबरं. क. मिवांबुदं. २ ख. घ.—झ. ट. विराजितं. ३ झ. परतः. छ. ट. पुरतः. ४ ङ. छ. झ. ट. चन्दनैस्तिलकैस्सालैः. ५ ख. अङ्कोलैश्चैव. घ. अशोकैरुप. ङ. च. ज. ञ. अशोकैरपि. क. अङ्कोलैरपि. ६ क. ग. ङ. च. ज. ञ. नीवारैः. झ. वानीरैस्तिमिदैश्चैव. ७ क. ख. वञ्जुलैः. ८ छ. झ. ट. केतकैरपि. ९ झ. स्तिनिशैर्नीपैः. ङ. च. ज. ञ. रर्जुनैर्नीपैः. १० क. छ. झ. ट. वेंतसैः. ११ क. ख. ङ. छ.—ट. नादविनादिता. घ. निनदनादिता. १२ ङ.—ट. सेविता. १३ ङ. छ.—ट. नानारत्नसमन्विता. क. ख. नानारत्नविभूषिता. १४ झ. बर्हिक्रौञ्चविनादिता. १५ घ. ऋषिसंघैः. झ. ट. मुनिसंघनिषेविता. १६ क. सुरुचिराभुवि. १७ क. ख. घ. इह. १८ छ. झ. ट. नदतां. १९ ख. घ. ट. मृदङ्गाडम्बरः. २० इत्युक्त्वेत्यर्धस्यस्थाने क. पाठे. एवमुक्त्वामहातेजालक्ष्मणंशुभलक्षणम् । न्यवसत्तत्रधर्मज्ञोराघवःसहलक्ष्मणः । इत्यधिकःश्लोकोदृश्यते.

[1]सुसुखेऽपि बहुद्रव्ये [2]तस्मिन्हि धरणीधरे ॥ वसतस्तस्य रामस्य रतिरल्पाऽपि नाभवत् ॥
हृतां हि भार्यां स्मरतः प्राणेभ्योपि गरीयसीम् ॥ ३० ॥
[3]उदयाभ्युदितं दृष्ट्वा शशाङ्कं [4]च विशेषतः ॥ आविवेश न तं निद्रा निशासु शयनं गतम् ॥ ३१ ॥
तत्समुत्थेन शोकेन बाष्पोपहत[5]चेतसम् ॥ तं शोचमानं काकुत्स्थं नित्यं शोकपरायणम् ॥
तुल्यदुःखोऽब्रवीद्भ्राता लक्ष्म[6]णोऽनुनयन्वचः ॥ ३२ ॥
अलं वीर व्यथां गत्वा न त्वं शोचितुमर्हसि ॥ [7]शोचतो [8]व्यवसीदन्ति [9]सर्वार्था विहितं हि ते ॥ ३३ ॥
भवान्क्रियापरो लोके भवान्दैवपरायणः ॥ आस्तिको धर्मशीलश्च व्यवसायी च राघव ॥ ३४ ॥
न ह्यव्यवसितः शत्रुं राक्षसं तं विशेषतः ॥ समर्थस्त्वं रणे हन्तुं [10]विक्रमैर्जिह्मकारिणम् ॥ ३५ ॥
समुन्मूलय शोकं त्वं व्यवसायं [11]स्थिरं कुरु ॥ ततः सपरिवारं तं निर्मूलं [12]कुरु राक्षसम् ॥ ३६ ॥
पृथिवीमपि काकुत्स्थ ससागरवनाचलाम् ॥ परिवर्तयितुं शक्तः [13]किमङ्ग पुन रावणम् ॥ ३७ ॥
शरत्कालं प्रतीक्षस्व प्रावृट्कालोऽयमागतः ॥ ततः सराष्ट्रं सगणं रावणं त्वं वधिष्यसि ॥ ३८ ॥
अहं तु खलु ते वीर्यं प्रसुप्तं प्रतिबोधये ॥ [14]दीप्तैराहुतिभिः काले भस्मच्छन्नमिवानलम् ॥ ३९ ॥
[15]लक्ष्मणस्य तु तद्वाक्यं प्रतिपूज्य हितं शुभम् ॥ राघवः सुहृदं स्निग्धमिदं वचनमब्रवीत् ॥ ४० ॥
वाच्यं यदनुरक्तेन स्निग्धेन च हितेन च ॥ सत्यविक्रमयुक्तेन तदुक्तं लक्ष्मण त्वया ॥ ४१ ॥
एष शोकः परित्यक्तः सर्वकार्यावसादकः ॥ विक्रमेष्वप्रतिहतं तेजः प्रोत्साहयाम्यहम् ॥ ४२ ॥
शरत्कालं प्रतीक्षिष्ये स्थितोस्मि वचने तव ॥ सुग्रीवस्य नदीनां च प्रसादमनुपालयन् ॥ ४३ ॥

॥ २९ ॥ बहुद्रव्ये बहुपुष्पफलादिधने ॥ ३० ॥ उदयाभ्युदितं उदयपर्वतादुद्गतं ॥ ३१ ॥ लक्ष्मणोऽनुनयन्वचइतिपाठः ॥ ३२—३३ ॥ क्रियापरइत्यनेन कार्यसिद्धिहेतुभूतपुरुषकारवत्त्वमुक्तं । दैवपरायण इत्यनेन कार्यसिद्धिहेतुभूतदेवतानिष्ठतोक्ता ॥ ३४ ॥ अव्यवस्थितः धैर्यरहितइत्यर्थः । रणे विक्रमैर्हन्तुं नसमर्थइत्यन्वयः ॥ ३५—३६ ॥ परिवर्तयितुं अधरो त्तरं कर्तुं । अङ्गेति संबोधनं । पुनरित्यत्रदीर्घाभावआर्ष ॥ ३७—३८ ॥ दीप्तैः ज्वलनकैः । उद्बोधकैः वाक्यै रितिशेषः ॥ ३९—४० ॥ अनुरक्तेन अनुरागयुक्तेन स्निग्धेन तत्कालोचितप्रियपरेण । हितेन हितपरेण सत्यविक्रमयुक्तेन अमोघविक्रमयुक्तेन । यद्वाच

स० बहुद्रव्ये अनेकद्रव्योत्पत्तिस्थाने ॥ ३० ॥ **स०** उदयाभ्युदितं उदयपर्वतेऽभ्युदितं । सविशेषतः द्वितीयान्तत्वात्तसिः सविशेषं पूर्णत्वादिविशेषसहितं । शशाङ्कं चन्द्रं दृष्ट्वास्थितं । शयनं शय्यां प्राप्तंतरामंनिद्राविवेश । यद्वासविशेषशशाङ्कउदयाभ्यु दितंउदयपर्वतगतंसूर्यमिवदृष्ट्वास्थितमित्यादियोजना ॥ ३१ ॥ **टीका०** तत्समुत्थेनसीतास्मरणसमुत्थेन । **ति०** अनुनयं अनुनयव ॥ ३२ ॥ **स०** हेवीरव्यथांगत्वाअलं व्यथांनकुर्वित्यर्थः । "अलंखल्वोःप्रतिषेधयोःप्राचांक्त्वा" इतिप्रतिषेधार्थकालंशब्दयोगे मानकर्तृकत्वाभावेपिक्त्वाप्रत्ययः । यद्वा अलमत्यन्तंव्यथांगत्वा मानसिकदुःखविशेषंप्राप्य शोचितुंनार्हसीत्येकमेववाक्यं । शोच पुरुषस्यसर्वार्थाः अवसीदन्ति अवसन्नाभवन्ति नश्यन्तीतियावत् ॥ **शि०** सर्वथा अत्यन्तंशोचन्तोजनाअवसीदन्तिइतितेविदि ॥ ३३ ॥ **टीका०** दैवपरायणः भाग्यसंपन्नः उभयत्रहेतुः ॥ **ति०** क्रियापरः नित्यकर्मानुष्ठाता ॥ **शि०** देवपराय देवपराणांदेवतृप्तिकारकाणांअयनआश्रयः भवानेव । अतएव आस्तिकादिर्भवानेव । एतेनत्वत्सावधानतामात्रेणसर्वकार्यसेत्स तीतिसूचितं ॥ **स०** आस्तिकः अस्तिपरलोकइतिज्ञानी । धर्मशीलः धर्मेधनुषिशीलंस्वभावोयस्य सदाधनुर्धारीतियावत् ॥ अ धानंतूक्तंपूर्वं । व्यवसायी उद्योगवान् ॥ ३४ ॥ **रामानु०** विक्रमेजिह्मकारिणं विक्रमविषयेछद्मकारिणं ॥ **ति०** अव्यवसि शोकेनोद्यमहीनस्त्वं हन्तुंनसमर्थः । विक्रमे विक्रमस्थानेरणे जिह्मकारिणं कुटिलं ॥ ३५ ॥ **ति०** काले होमकाले ॥ ३९

[**पा०**] १ ङ. छ. ट. सुसुखेहि. २ घ. ङ. च. ज. तस्मिन्प्रस्रवणेगिरौ. ३ च. उदयाभ्युदयं. ४ क. घ. ट. सविशेषत ५ ङ. ज. झ. चेतनं. ६ झ. लक्ष्मणोनुनयंवचः ७ ट. शोचन्तो. ८ ख. ग. छ.—ट. ह्यवसीदन्ति. ९ ट. सर्वथा. १० ग.—ट. विक्रमेजिह्मकारणं. ख. विक्रमोजयकारणं. ११ छ. ज. झ. ट. स्थिरीकुरु. १२ छ. झ. ट. तंराक्षसंहन्तुमर्ह १३ झ. किंपुनस्तंहिरावणं. छ. ट. किंपुनस्त्वंहि. ग. किंपुनारावणंरणे. ञ. किमङ्गयुधिरावणं. १४ क राहुतिसंघातैर्भ १५ छ. झ. ट. लक्ष्मणस्यहि.

उपकारेण वीरस्तु प्रतिकारेण युज्यते ॥ अकृतज्ञोऽप्रतिकृतो हन्ति सत्त्ववतां मनः ॥ ४४ ॥
अथैवमुक्तः प्रणिधाय लक्ष्मणः कृताञ्जलिस्तत्प्रतिपूज्य भाषितम् ॥
उवाच रामं स्वभिरामदर्शनं प्रदर्शयन्दर्शनमात्मनः शुभम् ॥ ४५ ॥
यथोक्तमेतत्तव सर्वमीप्सितं नरेन्द्र कर्ता नचिराद्धरीश्वरः ॥
शरत्प्रतीक्षः क्षमतामिमं भवाञ्जलप्रपातं रिपुनिग्रहे धृतः ॥ ४६ ॥
नियम्य कोपं प्रतिपाल्यतां शरत्क्षमस्व मासांश्चतुरो मया सह ॥
वसाचलेऽस्मिन्मृगराजसेविते संवर्धयञ्शत्रुवधे समुद्यमम् ॥ ४७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

अष्टाविंशः सर्गः ॥ २८ ॥

रामेणलक्ष्मणंप्रतिवर्षाकालवर्णनम् ॥ १ ॥

स तथा वालिनं हत्वा सुग्रीवमभिषिच्य च ॥ वसन्माल्यवतः पृष्ठे रामो लक्ष्मणमब्रवीत् ॥ १ ॥
अयं स कालः संप्राप्तः समयोऽद्य जलागमः ॥ संपश्य त्वं नभो मेघैः संवृतं गिरिसन्निभैः ॥ २ ॥

तत्सर्वं त्वयोक्तमितिसंबन्धः ॥ ४१—४३ ॥ तुशब्दोऽवधारणे । उपकारेण युक्तो वीरः प्रतिकारेण युज्यतएव । प्रत्युपकारंकरोत्येवेत्यर्थः । अप्रतिकृतः अकृतप्रत्युपकारः पुरुषः । सत्त्ववतां सात्त्विकानां मनः । हन्ति पीडयति । सात्त्विकास्तमजस्रं निन्दन्तीत्यर्थः । सज्जनापवादभीतः सुग्रीवोस्माकं प्रत्युपकारंकरोत्येवेति भावः ॥ ४४ ॥ प्रणिधाय भाविकार्यमालोच्य । दर्शनं मतं । प्रणिधानेनदृष्टार्थमित्यर्थः ॥ ४५ ॥ नचिरात् अविलम्बितं । जलानि प्रपात्यन्तेस्मिन्निति जलप्रपातो वर्षाकालः । भवान् क्षमतां त्वं क्षमस्व । वर्षाकालकृतविरहवेदनां मा कुर्वित्यर्थः । रिपुनिग्रहे धृतः धैर्ययुक्तः ॥ ४६ ॥ सुग्रीवः प्रत्युपकारं करोतुवा मा वा सद्यः शत्रुवधः कर्तव्यइति पुनः संजातकोपंरामं प्रत्याह—नियम्येति ॥ चतुरोमासान् आषाढश्रावणभाद्रपदाश्वयुजान् । शरत् कार्तिकमासः । शत्रुवधेसमुद्यमं उत्साहं । संवर्धयन् अभिवर्धयन् । समुद्यतइतिपाठे संवर्तयन् मृगराजादीन्नाशयन् ॥ ४७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने सप्तविंशः सर्गः ॥ २७ ॥

अथ रामः स्वस्याश्रितविश्लेषासहिष्णुत्वमन्यापदेशेन लक्ष्मणाय प्रदर्शयन् वर्षर्तुवर्णनमारभतेऽष्टाविंशे—स तथेत्यादि ॥ यत्किंचिद्विरोधिनिरसनाश्रितसंरक्षणलाभेप्यसत्कल्पमेतन्मन्यमानः । माल्यवतः पूर्वं प्रस्रवणाख्यतयोक्तस्य गिरेः । पृष्ठे उपरि । वसन् सर्वजनोज्जीवनाय सन्निहित इत्यर्थः ॥ १ ॥ समयः सुग्रीवस्य स्थानावधित्वेन संकेतितः । सोयं जलागमः

ती० सुग्रीवस्त्ववश्यमस्माकंप्रत्युपकारंकरिष्यतीत्याशयेनाह—**उपकारेणेति** ॥ **शि०** अकृतज्ञः विस्मृतोपकारः । अतएव अप्रतिकृतः प्रत्युपकाररहितःजनः । सत्त्ववतां महात्मनां । मनः ईप्सिताज्ञां धर्मशास्त्रमित्यर्थः । हन्ति नमन्यते । एतेनशास्त्रानुसारित्वात्सुग्रीवोमदुपकृतिंनविस्मरिष्यतीतिसूचितं ॥ ४४ ॥ **ति०** तदेव रामवाक्यमेव । युक्तं प्रणिधायनिश्चित्य । आत्मनः शुभंदर्शनं शुभांबुद्धिं । प्रदर्शयन्नुवाच ॥ ४५ ॥ **रामानु०** संवर्तयन् कालंयापयन् ॥ ४७ ॥ इतिसप्तविंशःसर्गः ॥ २७ ॥

टीका० वर्षर्तोर्धर्मोविरहिभिर्दुस्सहइतिहृदिनिधायतल्लक्षणमाह—अयमिति ॥ **स०** जलागमः जलानामागमआगमनंयस्मिन्स्तथा । **शि०** जलागमः वृष्टिप्रापकःअतएवकालः सर्वस्थित्युपदेशकः । कालइत्युपदेशार्थककालधातुप्रकृतिककर्त्रजन्तः । अत-

[**पा०**] १ ङ. छ. झ. ञ. ट. तदेवयुक्तं. च. ज. तदैवमुक्तं. २ छ. झ. ट. नचिरात्तुवानरः. ३ ख. शोकं. ४ छ. झ. ट. परिपाल्यतां. ५ क. घ.—ट. संवर्तयन्. ६ छ. झ. ट. समर्थः. ग. घ. च. ज. ञ. समुद्यतः. ७ क.—ङ. छ. झ. ञ. ट.सतदा. ङ. च. ज. तथाहि. ८ ग. मभिषिच्यतु.

नवमासधृतं गर्भं भास्करस्य गभस्तिभिः ॥ पीत्वा रसं समुद्राणां द्यौः प्रसूते रसायनम् ॥ ३ ॥
शक्यमम्बरमारुह्य मेघसोपानपङ्क्तिभिः ॥ कुटजार्जुनमालाभिरलंकर्तुं [1]दिवाकरम् ॥ ४ ॥
सन्ध्या[2]रागोत्थितैस्ता[3]म्रैरन्तेष्वधिकपाण्डरैः ॥ स्निग्धैरभ्रपटच्छेदैर्बद्धव्रणमिवाम्बरम् ॥ ५ ॥
मन्दमारुतनिश्वासं सन्ध्याचन्दनरञ्जितम् ॥ आपाण्डुजलदं भाति कामातुरमिवाम्बरम् ॥ ६ ॥
एषा घर्मपरिक्लिष्टा नववारिपरिप्लुता ॥ सीतेव शोकसन्तप्ता मही बाष्पं विमुञ्चति ॥ ७ ॥
मेघोदरविनिर्मुक्ताः [4]कह्लारसुखशीतलाः ॥ शक्यमञ्जलिभिः पातुं वाताः [5]केतकिगन्धिनः ॥ ८ ॥
एष फुल्लार्जुनः शैलः केतकै[6]रधिवासितः ॥ सुग्रीव इव शान्तारिर्धाराभिरभिषिच्यते ॥ ९ ॥

कालः वर्षाकालः । अद्य संप्राप्तः संप्रवृत्तः ॥ २ ॥ द्यौः भास्करस्य गभस्तिभिः किरणैः । समुद्राणां रसं पीत्वा नवमासधृतं कार्तिकाद्याषाढपर्यन्तनवमासधृतं । रसायनं षड्रसानां कारणं । गर्भं जलं । प्रसूते जनयति । भास्करस्य गभस्तिभिरित्यनेन " याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति " इति श्रुतिः सूच्यते । समुद्राणां रसमित्यनेन हंसस्य क्षीरनीरविभागचातुर्यवत् नीरलवणविभागसामर्थ्यं द्योत्यते । अत्र प्रस्तुतद्योवर्षवृत्तान्तेनाप्रस्तुतस्यानेकनायकाहितवीर्यगर्भं भस्त्रिकाभिर्धृत्वा काले प्रेमास्पदसुतप्रसवकृद्वधूवृत्तान्तस्य प्रतीतेः समासोक्तिरलंकारः । यदि सीता सन्निहिता सापीदानीं नवप्रसूतिःस्यादिति राममनोरथो गम्यते ॥ ३ ॥ मेघा एव सोपानानि तेषां पङ्क्तिभिरम्बरमारुह्य । कुटजार्जुनानां वार्षिकपुष्पाणां मालाभिः । दिवाकरं अस्मत्कुलगुरुभूतसूर्यमध्ये सदा ध्येयं विष्णुं । " अलंकारप्रियो विष्णुः " इति न्यायेनालंकर्तुं शक्यं । लिङ्गसामान्ये नपुंसकं । " सह पत्न्या विशालाक्ष्या नारायणमुपागमत् " इत्युक्तरीत्या सीतया सहाराधनं न लब्धमित्युत्कण्ठा द्योत्यते ॥ ४ ॥ सन्ध्यारागोत्थितैः उत्थितसन्ध्यारागैः । आहिताग्न्यादित्वात्परनिपातः । वस्त्रखण्डपक्षे उत्थितसन्ध्यातुल्यरागैः अतएव ताम्रैः । अन्तेषु प्रान्तेषु । अधिकपाण्डरैः अत्यन्तशुभ्रैः । स्निग्धैः आर्द्रैः । अभ्रपटच्छेदैः अभ्राणि मेघा एव पटच्छेदाः वस्त्रखण्डाः तैः । बद्धव्रणमिवाम्बरं भाति । उपमालंकारः ॥ ५ ॥ मन्दमारुत एव निश्वासो यस्य तत् तथा । अनेन निरंतरनिश्वासवत्त्वमुच्यते । सन्ध्या सन्ध्यारागः स एव चन्दनं तेनरञ्जितं आलिप्तं । अनेन तापशान्तिकरशीतोपचार उक्तः । आपाण्डुजलदमित्यनेन विरहपाण्डुतोक्ता । अतएव कामातुरं । कान्ताविरहपीडितमिवेत्युत्प्रेक्षा रूपकानुप्राणिता ॥ ६ ॥ घर्मेण ग्रीष्मसंतापेन । सीतापक्षे विरहतापेन परिक्लिष्टा । नववारिभिः परिप्लुतासिक्ता । सीतापक्षे अश्रुक्लिन्ना । बाष्पं ऊष्म अश्रुजलं च । विमुञ्चति । प्रथमजलनिपाते हि भूमेरूष्मा समुदञ्चति । श्लेषालंकारः ॥७॥ मेघेत्यादिना मान्द्यमुक्तं । कह्लारेत्यादिना शैत्यसौरभ्ये । एवंगुणत्वात् वाताः आदरातिशयेन अञ्जलिभिरादाय पातुं शक्यं । अतिशयोक्तिरलंकारः ॥ ८ ॥ फुल्लार्जुन इत्यनेन मालालंकृतत्वमुच्यते । केतकैरधिवासित इत्यनेन चन्दनादिमत्त्वं च सुग्रीवस्य सूच्यते । शान्तारिरित्यनेन शैलस्य निस्तापत्वमुक्तं । बिम्बप्रतिबिम्बभावेन साम्यप्रतिपादनादुपमालंकारः ॥ ९ ॥

एवनपौनरुक्त्यं ॥ २ ॥ **स०** कुटजो गिरिमल्लिका ॥ ४ ॥ **तनि०** अंबरस्य व्रणसंबन्धासंभवादतिशयोक्तिरलङ्कारः ॥ **टीका०** व्रणगोपनायनिहितेनघृतादिनेत्यर्थः ॥ प्रतीयतइतिशेषः ॥ ५ ॥ **ति०** घर्मेण रवितेजसा । परिक्लिष्टा संतप्ता ॥ ७ ॥ **तनि०** अञ्जलिभिःपातुंशक्यमिति वातावयवानामतिप्रश्लिष्टावयवत्वमतिशीतलत्वंच व्यञ्जितं ॥ **ती०** शक्यमञ्जलिभिःपातुमित्यनेन शैत्यमान्द्यसौरभ्यभूयस्त्वादादरातिशयेनाञ्जलिभिरादाय पातुंशक्यतइत्युच्यते ॥ **स०** मेघोदरविनिर्मुक्ताइत्यनेन बहुदूरागमनेन मान्द्यं सूचयति । कह्लारदलवच्छीतलाः । केतक्यागन्धइव गन्धएषामस्तीति केतकिगन्धिनः । एतादृशावाता अनेकवारं अञ्जलिभिरादाय पातुं शक्यं शक्याः । " मुखनासिकावचनः—" सूत्रभाष्यकैयटादिदिशा " शक्यंक्षुदपहन्तुं " इतिवच्छक्यमित्युपपन्नै पदसंस्कारपक्षइतिज्ञेयं ॥ ८ ॥ **ति०** अत्र शैलस्यारिर्वनदाहकलाद्दावाग्निः ॥ ९ ॥

[**पा०**] १ छ. झ. ट. दिवाकरः. २ ग. कालोत्थितैः. ३ रन्तेष्वपिचपाण्डुभिः. ग. ङ. च. छ. ज. रन्तेष्वधिकपाण्डुभिः. ४ ङ.—ट. कर्पूरदलशीतलाः. ५ क. ख. ग. ङ.—ट. केतकगन्धिनः. ६ ङ.—ट. रभिवासितः.

मेघकृष्णाजिनधरा धारायज्ञोपवीतिनः ॥ मारुतापूरितगुहाः प्राधीता इव पर्वताः ॥ १० ॥
कशाभिरिव हैमीभिर्विद्युद्भिरिव ताडितम् ॥ अन्तः स्तनितनिर्घोषं सवेदनमिवाम्बरम् ॥ ११ ॥
नीलमेघाश्रिता विद्युत्स्फुरन्ती प्रतिभाति मा ॥ स्फुरन्ती रावणस्याङ्के वैदेहीव तपस्विनी ॥ १२ ॥
इमास्ता मन्मथवतां हिताः प्रतिहता दिशः ॥ अनुलिप्ता इव घनैर्नष्टग्रहनिशाकराः ॥ १३ ॥
क्वचिद्बाष्पाभिसंरुद्धान्वर्षागमसमुत्सुकान् ॥ कुटजान्पश्य सौमित्रे पुष्पितान्गिरिसानुषु ॥
मम शोकाभिभूतस्य कामसंदीपनान्स्थितान् ॥ १४ ॥

रजः प्रशान्तं सहिमोऽद्य वायुर्निदाघदोषप्रसराः प्रशान्ताः ॥
स्थिता हि यात्रा वसुधाधिपानां प्रवासिनो यान्ति नराः स्वदेशान् ॥ १५ ॥
संप्रस्थिता मानसवासलुब्धाः प्रियान्विताः संप्रति चक्रवाकाः ॥
अभीक्ष्णवर्षोदकविक्षतेषु यानानि मार्गेषु न संपतन्ति ॥ १६ ॥

मेघा एव कृष्णाजिनानि तेषां धराः । नीलवर्णतया तद्रूपणं । शुभ्रत्वेन धाराया उपवीतत्वरूपणं । धारा निर्झरधाराः । मारुतापूरितगुहा इत्यनेन शब्दहेतुवायुमत्कण्ठत्वमुच्यते । प्राधीताः प्रकर्षेणाध्येतुमुपक्रान्ताः । आदिकर्मणि क्तः । रूपकानुप्राणित उपमालंकारः ॥ १० ॥ विद्युद्भिरेव हैमीभिः कशाभिः । व्यस्तरूपकं । ताडितमिव स्थितं । स्तनितमेव निर्घोषो यस्य तत् । अतएव अन्तः सवेदनमिवाम्बरं भाति । कशाभिघातेन उच्चैरधीयानसखेदमाणवकसाम्यमुच्यते । उपमोत्प्रेक्षारूपकाणामङ्गाङ्गिभावेन सङ्करः ॥ ११ ॥ स्फुरन्ती चलन्ती । तपस्विनी शोच्या ॥ १२ ॥ घनैरनुलिप्ता इव स्थिताः । नष्टग्रहनिशाकराः अदृष्टशुक्रादिग्रहचन्द्राः । "णश अदर्शने" इत्यस्मान्निष्ठा । यद्वा नष्टग्रहः ग्रहणरहितः अदृश्यमान इत्यर्थः । तादृशश्चन्द्रो यासु ताः । अतएव प्रतिहताः अज्ञातप्राच्युदीच्यादिदिशाविभागाः । ता इमाः दिशः । मन्मथवतां सस्त्रीकाणां । हिताः सुखकराः । विरहिणां तु दुःखकरा इत्यर्थः । यद्वा मन्मथवतां अभिसारिकजनानां । हिताः ॥ १३ ॥ क्वचिदित्यादिसार्धश्लोक एकान्वयः । बाष्पाभिसंरुद्धान् अभिनवजलकणसेचनसमुत्थनिदाघोष्मसमावृतान् । कामुकपक्षे आनन्दबाष्पवतः । वर्षागमेन समुत्सुकान् आप्यायितान् । अन्यत्र स्त्रीसङ्गमसन्तुष्टान् । गिरिसानुषु पुष्पितान् । अन्यत्र सहासान् । अतएव मम शोकाभिभूतस्य कामसंदीपनान् । अन्यरतिदर्शनस्योद्दीपनत्वादिति भावः । अनेन केषुचिदस्मदीयेषु ब्रह्मानुभवसंतुष्टेषु सत्सु केषांचिदस्मदनुभवाभावो ममातीव दुःसहइत्युक्तं ॥ १४ ॥ अथ भगवत्कटाक्षफलमन्यापदेशेन दर्शयति—रज इत्यादिना । रज इत्युपलक्षणं । रजस्तमसी प्रक्रान्ते । वायुशब्देन सततसंसारगतिर्जन उच्यते । सहिम इति शीतलहृदयत्वं । निदाघेत्यादिना आध्यात्मिकादितापशान्तिः । यात्रा संसारगतिः । स्वदेशान् स्वप्राप्यभूतपरमपदं । स्वभावार्थस्तु स्पष्टएव ॥ १५ ॥ मानसवासलुब्धाः हंसाः संप्रस्थिताः वर्षभीततया क्वचिल्लीनाः । परमहंसाख्यानां संन्यासिनां चातुर्मास्यतया संचारनिवृत्तिर्द्योत्यते । चक्रवाकाः कामोद्रेकेण प्रियासमन्विता भवन्ति । यानासंपतने हेतुः अभीक्ष्णेति । यानानि शकटरथादीनि । संप्रस्थिता इत्यनेन कृतवैराग्यत्वमुच्यते । प्रियान्विताइति भगवद्भक्तिः ।

तनि० अन्तस्संनिहितशब्देन प्राधीयमानवेदानांमाणवकानां कशाघातजनितरुदितं गुरूच्चारणानूच्चारणशब्दमिश्रमित्युच्यते ॥ ११ ॥ स० अस्यापत्यं इः चतुर्मुखः । तं रावयतीति इरावणः । "सभाषामकरोत्" इतिश्रुतेः । एतादृशस्य मे अङ्के स्फुरन्ती तपस्विनीवैदेहीव प्रतिभाति । स्वस्य नीलमेघसदृशत्वादितिभावः ॥ १२ ॥ स० मन्मथवतांहितामितिषष्ठीप्रयोगेण स्वस्य तत्कृतबाधा नास्तीति सूचयति ॥ १३ ॥ स० ममच शोकश्च ममशोकौ । ताभ्यामभिभूतस्यपुरुषस्य स्थितान् अचञ्चलान् ॥ १४ ॥ रामानु० सहिमः सशीकरः । स्थिता निवृत्ता स्थिता यान्तीतिच सिद्धवन्निर्देशः वर्षाकाले संभावितत्वात्कृतः ॥ १५ ॥ टीका० नसंपतन्ति नभ्रमन्ति ॥ १६ ॥

[पा०] १ क. ग. च.—ट. भातिमे. २ ख. संनद्धान्.

क्वचित्प्रकाशं क्वचिदप्रकाशं नभः प्रकीर्णाम्बुधरं विभाति ॥
क्वचित्क्वचित्पर्वतसन्निरुद्धं रूपं यथा शान्तमहार्णवस्य ॥ १७ ॥
व्यामिश्रितं सर्जकदम्बपुष्पैर्नवं जलं पर्वतधातुताम्रम् ॥
मयूरकेकाभिरनुप्रयातं[1] शैलापगाः शीघ्रतरं वहन्ति ॥ १८ ॥
रसाकुलं षट्पदसन्निकाशं प्रभुज्यते जम्बुफलं प्रकामम् ॥
अनेकवर्णं पवनावधूतं भूमौ पतत्याम्रफलं विपक्वम्[2] ॥ १९ ॥
विद्युत्पताकाः सबलाकमालाः शैलेन्द्रकूटाकृतिसन्निकाशाः ॥
गर्जन्ति मेघाः समुदीर्णनादा मत्ता गजेन्द्रा इव संयुगस्थाः ॥ २० ॥
वर्षोदकाप्यायितशाद्वलानि प्रवृत्तनृत्तोत्सवबर्हिणानि ॥
वनानि निर्वृष्टबलाहकानि पश्यापराह्णेष्वधिकं विभान्ति ॥ २१ ॥
समुद्वहन्तः सलिलातिभारं बलाकिनो वारिधरा नदन्तः ॥
महत्सु शृङ्गेषु महीधराणां विश्रम्य[3]विश्रम्य पुनः प्रयान्ति ॥ २२ ॥
मेघाभिकामा परिसंपतन्ती संमोदिता भाति बलाकपङ्क्तिः ॥
वातावधूता वरपौण्डरीकी लम्बेव माला रुचिताम्बरस्य[4] ॥ २३ ॥

अभीक्ष्णेत्यादिना भगवत्कटाक्षेण निवृत्तकर्मत्वमुच्यते ॥ १६ ॥ प्रकीर्णाम्बुधरं विप्रकीर्णमेघं । अतएव क्वचित्प्रकाशं क्वचिदप्रकाशं नभः । क्वचित्क्वचित् पर्वतसन्निरुद्धं । शान्तमहार्णवस्य निस्तरङ्गसमुद्रस्य । रूपं स्वरूपमिव भाति । अनेनमन्दाज्ञानेन प्रकाशाप्रकाशं ब्रह्मस्वरूपमुच्यते ॥ १७ ॥ सर्जैः असनपुष्पैः । कदम्बपुष्पैश्च व्यामिश्रितं संमिलितं । पर्वतधातुताम्रमित्यनेन नदीनां पर्वतादुत्पत्तिरुक्ता । मयूराणां केकाभिः केकारवैः । अनुप्रयातं अनुस्यूतं । नवं जलं वहन्ति । अत्र सात्विकराजसज्ञानमिश्रं भगवद्विषयानुरागयुक्तं भक्तिप्रेरितस्तुतिरवमुखरितपरिसरं हृदयं वहन्तो भक्ताः कथ्यन्ते ॥१८॥ रसाकुलं माधुर्यव्याप्तं । षट्पदसन्निकाशं भृङ्गवन्नीलं । जम्बू जम्ब्वाख्यं फलं । "जम्बूःस्त्री जम्बु जाम्बवं" इत्यमरः । प्रकामं अतिशयेन प्रभुज्यते । जनैरिति शेषः । अनेकवर्णं रक्तहरिताद्यनेकरूपं । आम्रफलं चूतफलं । अनेन भगवत्कृपया जीवफलभोग उच्यते ॥ १९ ॥ नक्षत्रमालास्थानीया बलाकमाला । शैलेन्द्रस्य कूटानां शृङ्गाणामाकृतेः संस्थानस्य सन्निकाशास्तुल्याः । अनेन सर्वलोकप्रसिद्धाः सकलवावदूकाः वेदमार्गप्रतिष्ठापका उक्ताः ॥ २० ॥ निर्वृष्टाः वर्षुकाः बलाहकाः मेघाः येषु तानि । कर्तरि क्तः । अत्र दिव्यदम्पत्योः स्वकरोद्धृतकुम्भजलसिक्तालवालकलितोद्यानतुल्या लोकाः सर्वे भगवत्कृपावर्षेण संपन्नार्थकामा इत्युच्यते ॥ २१ ॥ समुद्वहन्तइति सगर्भस्त्रीजनाः पर्वतमारोहन्त इव महत्सु शृङ्गेषु पुनःपुनर्विश्रम्य प्रयान्ति । अनेन "हृदयेनोद्वहन्हरिं" इत्युक्तरीत्या भगवद्ध्यानेन युक्ताः विशदज्ञानाः सन्ततस्तुतिशीलाः पूर्वाघोत्तराघक्लेशं क्रमेणोत्तीर्य परां कोटिमापन्नाः प्रतिपाद्यन्ते ॥ २२ ॥ गर्भधारणार्थं मेघमभिकामयत इति मेघा-

स० प्रकीर्णांबुधरंनभः । क्वचित्प्रकाशमित्यादि क्रियाविशेषणं । विभाति । पर्वतैःसंनिरुद्धं संवृतं शान्तंमहार्णवस्वरूपमिव दृश्यते । अभूतोपमेयं ॥ रामेश्वरे जलस्तंभस्योत्तरत्र करिष्यमाणत्वात् ॥१७॥ शि० रसाकुलं रसैर्व्याप्तं । षट्पदसंनि षट्पदैःसंनीयते रसपानार्थंप्राप्यते । तत् अनेकवर्णं पवनावधूतं वायुनाकंपितं विपक्वं जंबुफलं आम्रफलंच भूमौपतति ।अतएव काशं सुखव्याप्तंयथाभवतितथा प्रकामं भुज्यतेजन्तुभिरितिशेषः ॥ १९ ॥ टीका० लोकेभारभृतामयंस्वभावइतिभावः ॥ स० सलिलातिभारं सलिलानांअत्यन्तभारंसमुद्वहन्तः । बलाकिनः बलाकाएषांसन्तीतिशिखादित्वादिनिः । "बलाकादयश्च" इतिनिपातनात्साधुः । "बलाकाबिसकण्ठिका" इत्यमरः । यद्वा पूर्वमत्रोत्तरत्रचबलाकशब्दोबकवाचीपुँल्लिङ्गोबोध्यः । अतएवोक्तं "बलाकादयश्चे"तिसूत्रव्याख्यानावसरेमनोरमायां । "बलाकाबकपङ्क्तिःस्याद्बलाकाबिसकण्ठिका । बलाकाकामुकीप्रोक्ताबलाकश्चबकोमतः" इतितत्वसुबोधि-

[पा०] १ क. ख. ग. ङ. च. ज. ञ. रुतानुयातं. २ ख. विपक्कं. ३ क. ख. विमृद्यविश्रम्य. ४ छ. झ. ट. रुचिरांबरस्य.

बालेन्द्रगोपान्तरचित्रितेन विभाति भूमिर्नवशाद्वलेन ॥
गात्रानुवृत्तेन शुकप्रभेण नारीव लाक्षोक्षितकम्बलेन ॥ २४ ॥
निद्रा शनैः केशवमभ्युपैति द्रुतं नदी सागरमभ्युपैति ॥
हृष्टा बलाका घनमभ्युपैति कान्ता सकामा प्रियमभ्युपैति ॥ २५ ॥
जाता वनान्ताः शिखिसंप्रनृत्ता जाताः कदम्बाः सकदम्बशाखाः ॥
जाता वृषा गोषु समानकामा जाता मही सस्यवनाभिरामा ॥ २६ ॥
वहन्ति वर्षन्ति नदन्ति भान्ति ध्यायन्ति नृत्यन्ति समाश्वसन्ति ॥
नद्यो घना मत्तगजा वनान्ताः प्रियाविहीनाः शिखिनः प्लवङ्गाः ॥ २७ ॥
प्रहर्षिताः केतकपुष्पगन्धमाघ्राय हृष्टा वननिर्झरेषु ॥
प्रपातशब्दाकुलिता गजेन्द्राः सार्धं मयूरैः समदा नदन्ति ॥ २८ ॥
धारानिपातैरभिहन्यमानाः कदम्बशाखासु विलम्बमानाः ॥
क्षणार्जितं पुष्परसावगाढं शनैर्मदं षट्चरणास्त्यजन्ति ॥ २९ ॥

भिकामा परिसंपतन्ती मेघंप्राप्तुमागच्छन्तीत्यर्थः । संमोदिता संजातसंमोदा । पुण्डरीकाणां सितपद्मानां विकारः पौण्डरीकी वरा चासौ पौण्डरीकीचेति कर्मधारयः । लम्बा रचिता लम्बमानतया कृता । अनेन भगवन्तं कालमेघश्यामं प्राप्तुं प्रवृत्ता भक्तिरूपापन्नधीर्भवति सत्पुरुषस्येति द्योत्यते ॥ २३ ॥ बालेन्द्रगोपैः अन्तरेषुचित्रितेन नानावर्णीकृतेन । नवशाद्वलेन उपलक्षिता भूमिः । शुकप्रभेण प्राचुर्येण शुकवर्णेन । लाक्षोक्षितकम्बलेन मध्येमध्ये लाक्षारसरञ्जितेन कम्बलेन नारीवभाति । अत्र भगवत्कटाक्षवर्षेण किंचिदुदञ्चितभक्तिका उच्यन्ते ॥ २४ ॥ निद्रेति । आषाढे स्वापारम्भः । श्रावणे निद्राशक्तिरुच्यते । अत्र तुल्ययोगितालंकारः । लोकोज्जीवनप्रवृत्त्या हरेस्तदेकचित्तत्वं शेषभूतानां शेषिपारतन्त्र्यसिद्धिश्च द्योतिता ॥ २५ ॥ शिखिभिः संप्रनृत्तं येषु ते तथोक्ताः । कदम्बशब्देन कदम्बपुष्पमुच्यते । सकदम्बपुष्पशाखा इत्यर्थः । सस्यवनेन सस्यसमूहेन । अभिरामा रम्या । अनेन सर्वानुकूल्यमुक्तं ॥ २६ ॥ वहन्तीति यथासंख्यमलंकारः । प्लवङ्गाः वानराः । समाश्वसन्ति । एकत्रैवबहुभक्ष्यलाभेन अचलचित्ता भवन्तीत्यर्थः ॥ २७ ॥ हृष्टाः पूर्वमेव संतुष्टाः । केतकगन्धमाघ्राय प्रहर्षिताः प्रकर्षेण संतुष्टाः । वननिर्झरेषु यः प्रपातशब्दः पतनकृतशब्दः तेनाकुलिताः ॥ २८ ॥ क्षणार्जितं तत्क्षणसंपादितं । पुष्परसेनावगाढं उत्पन्नं मदं । धारानिपातैः अभिहन्यमानाः अतएव पुष्पं विहायकेवलं शाखासु लम्बमा-

न्यामप्येवमेवबोध्यं । विश्रम्यविश्रम्यभारवहत्वादितिभावः ॥ २२ ॥ **स०** निद्रा निद्रामुद्रा । केशवं नारायणं । आषाढशुक्लैकादश्यांहरेःस्वापोक्तेः ॥ २५ ॥ **शि०** नदीप्रभृतयःयथाक्रमंवहनादिकुर्वन्ति । तत्रप्लवङ्गाः वानराः । समाश्वसन्ति इदानींनकस्माच्चित्तेभयमितिबोधयन्तीत्यर्थः । समाह्वयन्तीतिपाठान्तरं । तत्र हर्षेणेतस्ततोगच्छन्तीत्यर्थः ॥ **स०** वहन्तीत्यादेर्यथाक्रममन्वयः ॥ २७ ॥ प्रहर्षिताः हृष्टाः । स्वार्थिकेडन्तत्वादिडुपपद्यते । केतकिगन्धं केतकीनांगन्धआमोदस्तं । अगन्धद्रव्यवचनत्वादेकवचनंयुज्यते । केतकिगन्धमित्यत्र "ङ्यापोःसंज्ञाछन्दसोः—"इत्युक्तेःकेतकीतिसंज्ञात्वाद्ध्रस्वइतिबोध्यं । प्रपातशब्दाकुलिताः प्रपातशब्दाः उन्नतप्रदेशान्नतप्रदेशेजलपातजनितध्वनयः । तैराकुलिताःयेप्रहृष्टास्तैर्मयूरैःतेष्वेवमेघबुद्धिभिर्बर्हिभिःसार्धंनदन्तीत्यन्वयः । एतेन मेघदर्शनाभावान्मयूरसाहित्यवर्णनमयुक्तं । प्रहर्षिताइतिपूर्वमुक्तिःउत्तरत्रप्रहृष्टाइतिवचनंचतदिवेतिनिरस्तं । यद्वा प्रहर्षिताः संतोषकारणवस्तुभिस्तोषिताः । प्रहृष्टाः स्वयंतुष्टाइतिमन्तव्यं । आघ्रायमत्ताइतिपाठे समदाःससंतोषाइत्यर्थोऽवसेयः ॥ २८ ॥ **स०** क्षणार्जितंएकेनक्षणेनैवार्जितंसंपादितं । पुष्परसावगाढं पुष्पमकरन्दोन्नद्धं । मदं गर्वं । धारानिपातैरभिहन्यमानास्त्यजन्तीतियोजना । जलधारापातेनकदंबशाखावलंबनं । तेनपुनःपुष्पान्तरार्जनाभावः आर्जितस्यापित्यागः । क्षणार्जितंपुष्परसावगाढंमदमित्यनेन मदनिर्भरताद्योत्यतइतिज्ञेयं । क्षणेनोत्सवेनार्जितमितिव्याख्यानेबहुदिनार्जितत्वस्यापिशक्योक्तित्वान्माहात्म्यातिशयालाभ-

[पा०] १ क. झ. ट. गात्रानुपृक्तेन. ख. ङ. ज. ञ. गात्रानुषक्तेन. छ. गात्रानुसक्तेन. २ ग. वराभिरामा. ३ क. झ. ञ. प्लवङ्गमाः. ४ क. गन्धानाघ्राय. ५ घ. विलीयमानाः.

अङ्गारचूर्णोत्करसन्निकाशैः फलैः सुपर्याप्तरसैः समृद्धैः ॥
जम्बूद्रुमाणां प्रविभान्ति शाखा निर्लीयमाना[1] इव षट्पदौघैः ॥ ३० ॥
तटित्पताकाभिरलङ्कृतानामुदीर्णगम्भीरमहारवाणाम् ॥
विभान्ति रूपाणि वलाहकानां रणोद्यतानामिव[2] वारणानाम् ॥ ३१ ॥
मार्गानुगः शैलवनानुसारी संप्रस्थितो मेघरवं निशम्य ॥
युद्धाभिकामः[3] प्रतिनागशङ्की[4] मत्तो गजेन्द्रः प्रतिसन्निवृत्तः ॥ ३२ ॥
क्वचित्प्रगीता[5] इव षट्पदौघैः क्वचित्प्रनृत्ता इव नीलकण्ठैः ॥
क्वचित्प्रमत्ता इव वारणेन्द्रैर्विभान्त्यनेकाश्रयिणो वनान्ताः ॥ ३३ ॥
कदम्बसर्जार्जुनकन्दलाढ्या वनान्तभूमिभिर्नववारिपूर्णा[6] ॥
मयूरमत्ताभिरुतप्रनृत्तैरापानभूमिप्रतिमा विभाति ॥ ३४ ॥
मुक्तासंकाशं[7] सलिलं पतद्वै सुनिर्मलं पत्रपुटेषु लग्नम् ॥
हृष्टा विवर्णच्छदना विहङ्गाः सुरेन्द्रदत्तं तृषिताः पिबन्ति ॥ ३५ ॥
षट्पादतन्त्रीर्मधुराभिधानं[8] प्लवङ्गमोदीरितकण्ठतालम् ॥
आविष्कृतं मेघमृदङ्गनादैर्वनेषु संगीतमिव प्रवृत्तम् ॥ ३६ ॥
क्वचित्प्रनृत्तैः[9] क्वचिदुन्नदद्भिः[10] क्वचिच्च वृक्षाग्रनिषण्णकायैः ॥
व्यालम्बबर्हाभरणैर्मयूरैर्वनेषु संगीतमिव प्रवृत्तम् ॥ ३७ ॥

नाः । षट्चरणाः भृङ्गाः । त्यजन्ति । कदम्बपुष्पेषु रसबाहुल्यात्क्षणेन मदः क्षणेन तद्धानिश्च भवतीत्यर्थः ॥ २९ ॥ अङ्गारचूर्णानां इङ्गालचूर्णानां उत्करैः समूहैस्तुल्याः अङ्गारचूर्णोत्करसन्निकाशाः तद्वन्नीला इत्यर्थः ॥ ३० ॥ तटिदिति विद्युत्पताका इति श्लोकोक्तमेवार्थमादरातिशयेन भङ्गयन्तरेणोक्तवान् ॥ ३१ ॥ मार्गानुगः सन्मार्गचारी वेदमार्गानुसारी । दिग्जयाय प्रवृत्तः प्रतिवादिशब्दं श्रुत्वा वादाहवकाङ्क्षी प्रतिसन्निवृत्तः पुरुषधौरेयोत्र गम्यते ॥ ३२ ॥ प्रकृष्टं गीतं येषां ते प्रगीताः एवमुत्तरत्रापि योज्यं । अनेकाश्रयिणः गीतनृत्तमदाश्रयिणः ॥ ३३ ॥ कदम्बैः सर्जैः बन्धूकैः कन्दलैः भूतालपुष्पैश्चाढ्या । मयूराणां मत्ताभिरुतैः प्रनृत्तैश्च । आपानभूमिप्रतिमा मद्यपानस्थलीतुल्या विभाति । सा हि संस्कारपुष्पाढ्या मद्यपूर्णा उन्मादनृत्तवत्पुरुषयुक्ता च भवति ॥ ३४ ॥ विवर्णच्छदनाः विविधवर्णपक्षाः । विहङ्गाः चातकाः । सुरेन्द्रदत्तं देवेन्द्रदत्तं । चातकाः भूस्थं जलं न पिबन्ति किंतु सद्यो वर्षदेवताभूतेन्द्रदत्तमेव पिबन्तीति प्रसिद्धिः ॥ ३५ ॥ षट्पादा भृङ्गा एव तन्त्री तस्या मधुराभिधानं मधुरनादः यस्मिंस्तत् । प्लवङ्गमोदीरितं मण्डूकनादएव कण्ठतालो यस्मिंस्तत् । मेघाएव मृदङ्गा मर्दलाः तेषांनादैराविष्कृतं प्रकटीकृतं संगीतं वनेषु प्रवृत्तमिव संबभूवेतियोजना ॥ ३६ ॥ संगीतविषये केचिन्नृत्यन्ति केचिद्गायन्ति केचित्प्रधाना अनुभवन्ति तत्सर्वं वनेपि दर्शयति । नृत्यन्तो मयूराः नर्तकस्थानीयाः । नदन्तो मयूराः

इतिज्ञेयं ॥ २९ ॥ **रामानु०** अत्राङ्गारशब्दः शान्ताङ्गावाची । अन्यथा षट्पदौघसाम्यंनस्यात् ॥ **ति०** अङ्गारः शान्ताग्निः । तच्चूर्णस्ययउत्करस्तत्समैः । अनेनफलानामतिमहत्त्वंसूचितं । अत्युक्तिरत्रालङ्कारः ॥ ३० ॥ **स०** उदीर्णः उच्चः । गंभीरः उच्चतरः । महान् उच्चतमः । रवोयेषांतेषां । रूपाणि आकाराः ॥ ३१ ॥ **ती०** स्वनिवासभूमिशैलवनानुसारी । मार्गानुगः मार्गानुगमनेनसंप्रस्थितःपृष्ठतोमेघरवंनिशम्य प्रतिनिवृत्तइतिसंबन्धः ॥ **ति०** प्रतिनादशङ्की शत्रुभूतगजान्तरनादशङ्की ॥ ३२ ॥ **टी०** मुक्ताभिःसमानःकाशःप्रकाशोयस्यतत्तथोक्तं ॥ ३५ ॥

[**पा०**] १ ङ.—ट. निपीयमानाइव. २ घ.—छ. झ. ञ. ट. रणोत्सुकानामिव. ३ ख. युद्धाभिरामः. ४ ख. झ. ट. प्रतिनादशङ्की ५ ग. क्वचिच्चमत्ताइव. ६ ङ. ज. झ. ट. भूमिर्मधुवारि. ७ क. निकाशं. छ. झ. ट. समाभं. ङ. च. ज. ञ. समानं. ८ क. ङ. च. ज. ञ. मधुराभिनादं. ९ क. त्प्रमत्तैः. १० क. दुन्नमद्भिः.

स्वनैर्घनानां प्लवगाः[1] प्रबुद्धा विहाय निद्रां चिरसन्निरुद्धाम् ॥
अनेकरूपाकृतिवर्णनादा नवाम्बुधाराभिहता नदन्ति ॥ ३८ ॥
नद्यः समुद्वाहित[2]चक्रवाकास्तटानि शीर्णान्य[3]पवाहयित्वा ॥
दृप्ता नवप्राभृत[4]पूर्णभोगा द्रुतं स्वभर्तारमुपोपयान्ति ॥ ३९ ॥
नीलेषु नीलाः[5] प्रविभान्ति सक्ता मेघेषु मेघा नववारिपूर्णाः ॥
दवाग्निदग्धेषु दवाग्निदग्धाः शैलेषु शैला इव बद्धमूलाः ॥ ४० ॥
प्रहृष्ट[6]सन्नादितबर्हिणानि सशक्रगोपाकुलशाद्वलानि ॥
चरन्ति नीपार्जुनवासितानि गजाः सुरम्याणि वनान्तराणि ॥ ४१ ॥
नवाम्बुधाराहतकेसराणि द्रुतं[7] परित्यज्य सरोरुहाणि ॥
कदम्बपुष्पाणि सकेसराणि नवानि[8] हृष्टा भ्रमराः पतन्ति[9] ॥ ४२ ॥
मत्ता गजेन्द्रा मुदिता गवेन्द्रा[10] वनेषु विश्रान्त[11]तरा मृगेन्द्राः ॥

गायकस्थानीयाः । वृक्षाग्रनिषण्णकायाः मयूराः अनुभवितृस्थानीयाः । अतस्तैः संगीतं प्रवृत्तमिव ॥ ३७ ॥ प्लवगाः मण्डूकाः । घनानां स्वनैः चिरसन्निरुद्धां चिरकालव्यापारनिरोधिकां । निद्रां विहाय प्रबुद्धा इति संबन्धः ॥ ३८ ॥ अथ नदीनां स्वभर्तृसङ्गमभिच्छन्तीभिरुत्कटमन्मथाभिर्युवतिभिः साम्यमुच्यते । समुद्वाहितचक्रवाकाः वारिपूरोन्नमितचक्रवाकाः स्तनस्थानीयाः । अपवाहयित्वेत्येतन्नवोढोचितलज्जातिलङ्घनस्थानीयं । नवप्राभृतपूर्णभोगाः । प्राभृतं फलाद्युपहारः । भोगश्चन्दनकर्पूरकुसुमताम्बूलादिः । स्वभर्तारं समुद्रं । उपोपयान्ति उपयान्तीत्यर्थः ॥ ३९ ॥ दवाग्निदग्धेषु बद्धमूला दवाग्निदग्धाः शैला इव नीलेषु मेघेषु सक्ता नववारिपूर्णाः नीला मेघाः प्रविभान्ति । बद्धमूलत्वस्थाने नववारिपूर्णा इत्युक्तं । उभयत्र स्थायित्वमर्थः ॥ ४० ॥ वनान्तराणि वनमध्यानि चरन्ति । वनमध्येषु चरन्तीत्यर्थः ॥ ४१ ॥ कदम्बकेसराणामहतत्वे हेतुः—नवानीति ॥ ४२ ॥ मृगेन्द्राः सिंहाः । नगेन्द्राः पर्वतश्रेष्ठाः । रम्याः पल्लवपुष्पाङ्कु-

---

ति० अनेकरूपाकृतिःसंस्थानं वर्णःनीलपीतादिः नादश्चयेषां ॥ ३८ ॥ ती० तटानिशीर्णान्यपवाहयित्वेत्येतत् वृद्धपरिजनातिक्रमस्थानीयं नवोढोचितलज्जातिलङ्घनस्थानीयंवा ॥ स० समुद्वाहितचक्रवाकाः उत्थापितचक्रवाकपक्षिण्यः । अन्यत्रोपमानपदेनोपमेयस्तनानांग्रहणं । यद्वाहितचक्रवाकेत्यनेनसद्योवेदीकृतस्तनत्वेनतारुण्यंद्योत्यते । तटानिप्रवाहवेगतोविशीर्णानि अवहापयित्वा त्याजयित्वा । अनेनचोद्वेलप्रसर्पणंसूचितंभवति । अन्यत्रजरत्यादीनांत्याजनंज्ञेयं । नवंनूतनंप्राभृतःप्रगतमाभृतमावरणंयस्यसः । सचासौपूर्णःस्वस्वमनोनुसारः भोगोयासांतास्तथा । अन्यत्रनदीपक्षेवप्रेषुतटेषुआभृताश्चतेपूर्णाःपुष्टाभोगाःनागाङ्गानिप्रवृत्तपूर्णभोगानविद्यन्तेतेयासांताः । तीव्रप्रवहनेनानधिगततटस्वान्तः । सरत्सरीसृपशरीराइतिभावः । अवहापयित्वेतिल्यबभावआर्षः । यद्वा "छन्दसिपरेव्यवहिताश्च" इत्युक्तेरवेत्यस्यशीर्णपदेनान्वयेहापयित्वेतिसाधुः । स्वभर्तारं समुद्रं । अन्यत्रपतिं । "वप्रस्तुरेणौचरोधसि" इतित्रिकाण्डशेषः । "वप्रःप्राकाररोधसोः" इतिविश्वः । अथवा नवप्राभृतेषु नूतनप्रावरणेषु स्वकञ्चुकेषुपूर्णा भोगाःशरीराणियेषांसर्पाणांतेतथा । दृप्ताः आसम्यक्प्रवृत्तपूर्णभोगायासांताः । उपोपयन्ति "प्रसमुपोदःपादपूरणे" इत्युपोपसर्गाद्वित्वं । वप्राभृतः रेणुरूषितोनभवतीतिनवप्राभृतः सचासौपूर्णः तटद्वितयसंबन्धोभोगोविलासोयासांताः । वप्रैरेणुभिः आभृतं आवरणं तैःपूर्णारेणुरूषितास्तेनभवन्तीतितथातेभोगायासांतावा । स्वभर्तारमुपोपयन्ति । दृप्ताइत्यादिनास्मरपारवश्यंप्राग्विटघटनाच सूचितेइतिज्ञातव्यं । नदीपक्षेकांश्चननदान्मध्येऽध्वनस्संगम्यस्वभर्तारंसमुद्रमुपोपयान्तीत्यर्थः ॥ ३९ ॥ स० सशक्रगोपाकुलशाद्वलानि शक्रगोपैः तन्नामककीटविशेषैः आकुलैःशाद्वलैःसहितानि । नीपैरर्जुनैश्चवासितानिसुरभीकृतानिवनान्तराणिवनमध्यानि । वनविशेषानुद्दिश्यगजाश्चरन्ति संचरन्ति । बहुनैबिड्येनान्तर्झटितिगन्तुमशक्ताश्चरन्तीतिभावः । "सप्तसुप्रथमा" इत्युक्तेर्वनान्तरेषुसंचरन्तीतिवा । अथवाघनान्तराणि । द्वितीयाबहुवचनं । चरन्ति भक्षयन्ति ॥ ४१ ॥ टीका० निभृताः निश्चलाः । दण्डया-

[पा०] १ च. छ. ज. ञ. विहगाः. २ छ. समुत्थापित. ३ ठ. न्यवहापयित्वा. ४ ङ. ज.—ट. प्राभृत. ५ क.—ट. नीलानववारिपूर्णामेघेषुमेघाःप्रतिभान्तिसक्ताः. ६ ङ.—ट. प्रमत्तसंनादित. ७ ङ.—ज. ञ. ट. ध्रुवं. ८ क. वनेषु. ९ क. ग. ङ.—ट. पिबन्ति. १० ङ. च. ज. ञ. वृषेन्द्राः. ११ छ. झ. ट. विक्रान्ततराः.

रम्या नगेन्द्रा निभृता नरेन्द्राः प्रक्रीडितो वारिधरैः सुरेन्द्रः ॥ ४३ ॥
मेघाः [1]समुद्भूतसमुद्रनादा महाजलौघैर्गगनावलम्बाः ॥
नदीस्तटाकानि सरांसि वापीर्महीं च कृत्स्नाम[2]पवाहयन्ति ॥ ४४ ॥
[3]वर्षप्रवेगा विपुलाः पतन्ति प्रवान्ति वाताः [4]समुदीर्णघोषाः ॥
प्रनष्टकूलाः प्रवहन्ति शीघ्रं नद्यो [5]जलैर्विप्रतिपन्नमार्गाः ॥ ४५ ॥
नरैर्नरेन्द्रा इव पर्वतेन्द्राः [6]सुरेन्द्रदत्तैः पवनोपनीतैः ॥
घनाम्बुकुम्भैरभिषिच्यमाना रूपं श्रियं स्वामिव दर्शयन्ति ॥ ४६ ॥
घनोपगूढं गगनं [7]सतारं न भास्करो दर्शनमभ्युपैति ॥
नवैर्जलौघैर्धरणी [8]विसृप्ता तमोविलिप्ता न दिशः प्रकाशाः ॥ ४७ ॥
महान्ति कूटानि महीधराणां [9]धाराभिधौतान्यधिकं विभान्ति ॥
महाप्रमाणैर्विपुलैः प्रपातैर्मुक्ताकलापैरिव लम्बमानैः ॥ ४८ ॥
शैलोपलप्रस्खलमानवेगाः शैलोत्तमानां विपुलाः प्रपाताः ॥
गुहासु सन्नादितबर्हिणासु हारा [10]विकीर्यन्त [11]इवाभिभान्ति ॥ ४९ ॥
[12]शीघ्रप्रवेगा विपुलाः प्रपाता निर्धौतशृङ्गोपतला गिरीणाम् ॥
मुक्ताकलापप्रतिमाः पतन्तो महागुहोत्सङ्ग[13]तलैर्ध्रियन्ते ॥ ५० ॥
सुरतामर्दविच्छिन्नाः स्वर्गस्त्रीहारमौक्तिकाः ॥ [14]पतन्तीवाकुला दिक्षु तोयधाराः समन्ततः ॥ ५१ ॥
निलीयमानैर्विहगैर्निमीलद्भिश्च पङ्कजैः ॥ विकसन्त्या च मालत्या गतोऽस्तं ज्ञायते रविः ॥ ५२ ॥
वृत्ता यात्रा नरेन्द्राणां सेना [15]प्रतिनिवर्तते ॥ वैराणि चैव मार्गाश्च सलिलेन समीकृताः ॥ ५३ ॥

रादिमत्त्वादिति भावः । प्रक्रीडित इति कर्तरि निष्ठा ॥ ४३ ॥ अपवाहयन्ति परिवाहयन्ति ॥ ४४ ॥ वर्षप्रवेगाः अतिवेगा वृष्टय इत्यर्थः । विपुलाः निरन्तराः । नद्यो जलैः विप्रतिपन्नमार्गाः विरुद्धं प्राप्तमार्गाः ॥ ४५ ॥ अभिषिक्ताः नरेन्द्राः स्वां श्रियमिव अभिषिच्यमानाः पर्वताः स्वं रूपं दर्शयन्ति। नैर्मल्यादिनेति भावः ॥ ४६ ॥ तमोविलिप्ता दिशः न प्रकाशाः ॥ ४७ ॥ प्रपातैः निर्झरैः ॥ ४८ ॥ शैलोत्तमानां विपुलाः प्रपाताः निर्झराः । शैलोपलप्रस्खलमानवेगाः सन्तः । सन्नादितबर्हिणासु गुहासु विकीर्यन्तः विकीर्यमाणाः । हारा इव अवभान्ति ॥ ४९ ॥ निर्धौतानि निर्मलीकृतानि शृङ्गोपतलानि शृङ्गसमीपतलानि यैस्ते तथा । गुहोत्सङ्गतलैः गुहामध्यतलैः ॥ ५० ॥ तोयधाराः मौक्तिका इव पतन्तीति स्वरूपोत्प्रेक्षा ॥ ५१ ॥ निलीयमानैः नीडेषु गच्छद्भिः ॥ ५२ ॥ वृत्ता निवृत्ता । अतोऽग्रे गता सेना प्रतिनिवृत्ता । सलिलेन वैराणि समीकृतानि । सलिलप्रतिरोधाद्वैराणि शान्तानीत्यर्थः । मार्गाश्च समीकृताः

त्रादिव्यापाररहिताइत्यर्थः ॥ ४३ ॥ **रामानु०** अपवाहयन्ति वर्षन्ति ॥ **शि०** अपवाहयन्ति पूरयन्तीत्यर्थः ॥ **ति०** अपवाहयन्ति प्रवहज्जलानिकुर्वन्ति ॥ ४४ ॥ **ति०** वितृप्ता जामितांप्राप्ता ॥ ४७ ॥ **टीका०** स्वर्गस्त्रीहारमौक्तिकाः । मौक्तिकशब्दः पुँल्लिङ्गोप्यस्ति । " मुक्तास्त्रीमौक्तिकोस्त्रियां " इत्युक्तेः ॥ ५१ ॥

[पा०] १ क. ग. घ. च. छ. झ. ञ. ट. समुद्भूत. २ ख. मभिपूरयन्ति. ख. ङ. च. ज. मभितर्पयन्ति. ३ ख. ग. वर्षप्रयोगाः. ४ छ. झ. ट. समुदीर्णवेगाः. ५ ख. ग. छ. झ. ट. जलंविप्रतिपन्न. ६ घ. झ. सुरेन्द्रनीतैः. ७ छ. झ. ञ. ट. नतारा. ८ क. ग. ङ. च. छ. झ. ञ. ट. वितृप्ता. ९ छ. झ. ट. धाराविधौतानि. १० क. विशीर्यन्त. घ. विकीर्णाइवभान्तितासु. ११ ख. ङ. झ. ञ. ट. इवावभान्ति. १२ झ. शीघ्रंप्रवेगाः. ङ. सुशीघ्रवेगाः. १३ ख. वनैः. १४ झ. ट. पतन्ति चातुला. १५ छ. झ. ट. पथ्येववर्तते.

मासि [1]प्रोष्ठपदे ब्रह्म ब्राह्मणानां विवक्षताम् ॥ अयमध्यायसमयः सामगानामुपस्थितः ॥ ५४ ॥
निवृत्तकर्मायतनो नूनं संचितसंचयः ॥ आषाढीमभ्युपगतो भरतः कोसलाधिपः ॥ ५५ ॥
नूनमापूर्यमाणायाः सरय्वा वर्धते रयः ॥ मां समीक्ष्य समायान्तमयोध्याया इव स्वनः ॥ ५६ ॥
इमाः स्फीतगुणा वर्षाः सुग्रीवः सुखमश्नुते ॥ विजितारिः सदारश्च राज्ये महति च स्थितः ॥ ५७ ॥
अहं तु हृतदारश्च राज्याच्च महतश्च्युतः ॥ नदीकूलमिव क्लिन्नमवसीदामि लक्ष्मण ॥ ५८ ॥
शोकश्च मम विस्तीर्णो व[2]र्षाश्च भृशदुर्गमाः ॥ रावणश्च महाञ्शत्रुर[3]पारं प्रतिभाति मे ॥ ५९ ॥
अयात्रां चैव दृष्ट्वेमां मार्गांश्च भृशदुर्गमान् ॥ प्रणते चैव सुग्रीवे न मया किंचिदीरितम् ॥ ६० ॥
अपि [4]चातिपरिक्लिष्टं चिराद्दारैः समागतम् ॥ आत्मकार्यगरीयस्त्वाद्वक्तुं नेच्छामि वानरम् ॥ ६१ ॥
[5]स्वयमेव हि विश्रम्य ज्ञात्वा कालमुपागतम् ॥ उपकारं च सुग्रीवो वेत्स्यते नात्र संशयः ॥ ६२ ॥
तस्मात्कालप्रतीक्षोऽहं स्थितोऽस्मि शुभलक्षण ॥ सुग्रीवस्य नदीनां च प्रसादमनु[6]पालयन् ॥ ६३ ॥
उपकारेण [7]वीरो हि प्रतिकारेण युज्यते ॥ अकृतज्ञोऽप्रतिकृतो हन्ति सत्त्ववतां मनः ॥ ६४ ॥

[8]तमेवमुक्तः प्रणिधाय लक्ष्मणः कृताञ्जलिस्तत्प्रतिपूज्य भाषितम् ॥
उवाच रामं स्वभिरामदर्शनं प्रदर्शयन्दर्शनमात्मनः शुभम् ॥ ६५ ॥

जलेन मार्गामार्गविवेको नासीदित्यर्थः ॥ ५३ ॥ अनेन भाद्रपदो मासः संप्रवृत्त इति सूचयति । ब्रह्म वेदं । विवक्षतां अध्येतुमिच्छतां । अध्यायसमयः वेदारम्भसमयः ॥ ५४ ॥ निवृत्तं कर्म यस्य तन्निवृत्तकर्म आयतनं गृहं यस्य सः निवृत्तकर्मायतनः । उपरतसकलगृहोपकरणसंपादन इत्यर्थः । संचितसंचयः संपादितधननिचयः । आषाढीं आषाढमाससमाप्तिपौर्णमासीं । अभ्युपगतः व्रताङ्गत्वेन स्वीकृतवान् । अनेन चत्वारोवार्षिका मासा इति पूर्वोक्तमासानां आषाढः प्राथमिक इति सूचितम् ॥ ५५ ॥ अयोध्यायाः अयोध्यावासिजनस्य ॥ ५६ ॥ वर्षा इत्यत्यन्तसंयोगे द्वितीया ॥ ५७ ॥ अहं त्विति अजितारिश्चेत्यपि ज्ञेयं । क्लिन्नं आर्द्रं ॥ ५८ ॥ मम शोकश्च विस्तीर्णः । वर्षाश्च भृशदुर्गमाः अत्यन्तं दुरत्ययाः । रावणश्च महाञ्शत्रुः । अतश्च एतत्रितयं अपारं दुस्तरं प्रतिभाति ॥ ५९ ॥ अयात्रां राज्ञामेतत्कालोचितदण्डयात्राभावं । प्रणते चैव इदानीमेव सीतान्वेषणरावणनिरसनोद्योगः कर्तव्य इति प्रार्थनापूर्वकं प्रह्वीभूते सत्यपीत्यर्थः ॥ ६० ॥ आत्मकार्यगरीयस्त्वात् अस्मत्प्रयोजनस्यातिमहत्त्वात् । अल्पयत्नेन अल्पकालेनचासाध्यत्वादित्यर्थः । वक्तुं नियोक्तुं । नेच्छामीति भूतार्थे लट् ॥ ६१ ॥ कालं शरत्कालं ॥ ६२ ॥ उक्तोपपत्तिभिः पूर्वसर्गोक्तं द्रढयति—तस्मादित्यादिना ॥ ६३ ॥ अकृतज्ञः कृतोपकारानभिज्ञः पुरुषः । अप्रतिकृतः प्रत्युपकारमकुर्वन् । सत्त्ववतां महात्मनां । मनो हन्ति क्षोभयति । वीरः प्रत्युपकारसमर्थः । उपकारेण हेतुना प्रतिकारेण प्रत्युपकारेण युज्यते हि युज्यत एव । सुग्रीवोप्येवंविधत्वात्प्रत्युपकारं करिष्यतीतिभावः । अनेन प्रत्युपकारं कारयित्वा लोके प्रत्युपकारधर्मं प्रवर्तयिष्यामीत्याशयः ॥ ६४ ॥ अस्य

शि० ब्रह्म वेदंविवक्षतां पठितुमिच्छतां सामगानां । प्रौष्ठपदे भाद्रेमासि । अयंशुक्लतृतीयातिथिः । अध्यायसमयः उपाकरणकालः । उपस्थितः प्राप्तः ॥ ५४ ॥ **ती०** निवृत्तकर्मायतनः निवृत्तंकर्मयस्यतत् निवृत्तकर्म आयतनंगृहंयस्यतथोक्तः । उपरतगृहव्यापारइत्यर्थः । आषाढींआषाढमासपरिसमाप्तिपौर्णमासीं अभ्युपगतः व्रताङ्गत्वेनस्वीकृतवान् । तदुक्तंमहाभारते—" आषाढेतुसितेपक्षएकादश्यामुपोषितः । चातुर्मास्यव्रतंकुर्याद्यत्किंचित्प्रयतोनरः । वार्षिकांश्चतुरोमासान्व्रतंकिंचित्समापयेत् । असंभवे तुलार्केपिकर्तव्यंतत्प्रयत्नतः " इति ॥ ५५ ॥ **रामानु०** अपिचातिपरिक्लिष्टश्चिराद्दारैःसमागतः" इतिप्रथमान्तपाठेइतिकरणं द्रष्टव्यं ॥ ६१ ॥ इत्यष्टाविंशःसर्गः ॥ २८ ॥

[पा०] १ ङ. च. ञ. भाद्रपदे. २ ख. मार्गाश्च. ३ क. ख. ग. ङ.—ट. रपारः. ४ झ. ट. चापि. घ. वाति. ५ ख. अयमेव. ६ ङ. छ. झ. ट. मभिकाङ्क्षयन्. क. मभिपालयन्. ७ क. ख. युक्तोहि. ८ घ. छ. झ. ट. अथैवमुक्तः.

[1]यथोक्तमेतत्तव सर्वमीप्सितं नरेन्द्र कर्ता नचिराद्धरीश्वरः ॥
शरत्प्रतीक्षः क्षमतामि[2]मं भवाञ्जलप्रपातं रिपुनिग्रहे धृतः ॥ ६६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे अष्टाविंशः सर्गः ॥ २८ ॥

एकोनत्रिंशः सर्गः ॥ २९ ॥

शरदागमेपि विषयासक्ततयाविस्मृतरामकार्यंसुग्रीवंप्रतिहनुमता श्रीराममहिमानुवर्णनपूर्वकंतदुपकारस्मारणेन सीतान्वेषणार्थंसकलवानरानयनायदूताज्ञापनचोदना ॥ १ ॥ सुग्रीवेणनीलंप्रति सकलवानरसैन्यानयनाय दूतप्रेषणचोदना ॥२॥

समीक्ष्य विमलं व्योम गतविद्युद्बलाहकम् ॥ [3]सारसारवसंघुष्टं रम्यज्योत्स्नानुलेपनम् ॥ १ ॥
समृद्धार्थं च सुग्रीवं मन्दधर्मार्थसंग्रहम् ॥ [4]अत्यर्थमसतां मार्गमेकान्तगतमानसम् ॥ २ ॥
निर्वृत्तकार्यं सिद्धार्थं प्रमदाभिरतं सदा ॥ प्राप्तवन्तमभिप्रेतान्सर्वानेव मनोरथान् ॥ ३ ॥
स्वां च पत्नीमभिप्रेतां तारां [5]चापि समीप्सिताम् ॥ विहरन्तमहोरात्रं कृतार्थं विगतज्वरम् ॥ ४ ॥
क्रीडन्तमिव देवेशं [6]नन्दनेऽप्सरसांगणैः ॥ मन्त्रिषु न्यस्तकार्यं च [7]मन्त्रिणामनवेक्षकम् ॥ ५ ॥
[8]उत्सन्नराज्यसन्देशं कामवृत्तम[9]वस्थितम् ॥ निश्चितार्थोर्थतत्त्वज्ञः कालधर्मविशेषवित् ॥ ६ ॥
प्रसाद्य [10]वाक्यैर्मधुरैर्हेतुमद्भिर्मनोरमैः[11] ॥ वाक्यविद्वाक्य[12]तत्त्वज्ञं हरीशं मारुतात्मजः ॥ ७ ॥

रामवचनस्य पूर्वसर्गान्तोत्तरमाह—तमिति ॥ तं राममित्यन्वयः । दर्शनं मतं ॥ ६५ ॥ कर्ता करिष्यति । लुट् ॥ ६६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने अष्टाविंशः सर्गः ॥ २८ ॥

अथ हनुमान् रामभक्तोपि स्वस्वाम्यनुज्ञाभावेन तं ध्यायन् सुग्रीवसमीप एव स्थितः स्वस्वामिना सर्वस्वामिहितानुगुणं कार्यमारब्धवानित्याहैकोनत्रिंशे—समीक्ष्येत्यादि हनुमान्वाक्यमब्रवीदित्यन्तमेकं वाक्यं ॥ हनुमान् उक्तगुणविशिष्टं व्योम उक्तगुणविशिष्टं सुग्रीवं च समीक्ष्य । हरीशं प्रसाद्य हरीश्वरमुपागम्य प्रणयाद्वाक्यमब्रवीदितिसंबन्धः । विमलमित्यादिना सेनासन्नाहस्य प्राप्तकालत्वमुक्तं । समृद्धार्थमित्यादिना समयातिक्रमहेतवः प्रदर्श्यन्ते । समृद्धार्थं संपूर्णरत्नवस्त्राभरणादिकं । मन्दः अल्पः धर्मार्थयोः संग्रहः संपादनं यस्य तं । एकान्तगतमानसं एकस्मिन् कामपुरुषार्थे अन्तं निश्चयं गतं मानसं यस्य तथोक्तं । यद्वा असतां कामुकानां मार्गं एकान्तगतं अत्यन्तगतं मानसं यस्य स तथा । "तीव्रैकान्तनितान्तानि" इत्यमरः । निर्वृत्तकार्यं निष्पन्नवालिवधरूपकार्यं । सिद्धार्थं प्राप्तराज्यं । अभिप्रेतान् ईप्सितान् । मनोरथान् राज्यप्राप्त्यनन्तरमेवं करिष्यामीति संकल्पविषयीभूतानर्थान् । तारां च प्राप्तवन्तमिति संबन्धः । कृतार्थं निष्पन्नधनं । मन्त्रिणामनवेक्षकं मन्त्रिकृतकार्यापरामर्शकं । उत्सन्नराज्यसन्देशं नष्टराज्यनियमनं । कामवृत्तं कामव्यापारं । अवस्थितं कामव्यापारपरतन्त्रतयावस्थितमित्यर्थः । निश्चितार्थः निश्चितकर्तव्यः । अत्र हेतुः—अर्थतत्त्वज्ञ इति । कालोचितो धर्मः कालधर्मः तद्विशेषवित् । वाक्यवित् तदुचितव्यवहारवित् । हितं उदर्कसुखक-

---

ती० मन्दौस्वल्पौधर्मार्थौसंगृह्णातीतितथा ॥ स० अत्यर्थंअत्यन्तंअसतांमार्गोयस्यसः । अलुक्समासोयं । एकान्तेअन्तःपुरेगतं आसक्तंमानसंयस्यसतथातं ॥ २ ॥ ति० उच्छिन्नराज्यसन्देहं मन्त्रिसौष्ठवेननष्टराज्यपालनसन्देहं ॥ ६ ॥

[पा०] १ छ. झ. ट. यदुक्तमेतत्. २ घ. ङ. छ. झ. ञ. मिदं. ३ क. ग. ङ.—ट. सारसाकुल. ४ छ. झ. ट. अत्यर्थंचासतां. ५ क. चैव. ख. चसमभीप्सितां. ६ छ. झ. ट. गन्धर्वाप्सरसांगणैः. ७ क. ख. घ. ङ. ञ. मन्त्राणां. ग. मन्त्राणामनवेक्षणं. ८ ख.—ङ. छ.—ट. उच्छिन्नराज्यसंदेहं. ९ ज. झ. मिवस्थितं. १० झ. ट. वाक्यैर्विविधैः. ङ. च. ञ. विविधैर्वाक्यैः. ज. मधुरैर्वाक्यैः. ११ ख. ग. र्मनोहरैः. ज. ञ. र्मनोनुगैः. १२ ङ. ज. तत्वज्ञो.

हितं तत्त्वं च पथ्यं च सामधर्मार्थनीतिमत् ॥ प्रणयप्रीतिसंयुक्तं विश्वासकृतनिश्चयम् ॥
हरीश्वरमुपागम्य हनुमान्वाक्यमब्रवीत् ॥ ८ ॥
राज्यं प्राप्तं यशश्चैव कौली श्रीरभिवर्धिता ॥ मित्राणां संग्रहः शेषस्तं भवान्कर्तुमर्हति ॥ ९ ॥
यो हि मित्रेषु कालज्ञः सततं साधु वर्तते ॥ तस्य राज्यं च कीर्तिश्च प्रतापश्चाभिवर्धते ॥ १० ॥
यस्य कोशश्च दण्डश्च मित्राण्यात्मा च भूमिप ॥ समवेतानि सर्वाणि स राज्यं महदश्नुते ॥ ११ ॥
तद्भवान्वृत्तसंपन्नः स्थितः पथि निरत्यये ॥ मित्रार्थमभिनीतार्थं यथावत्कर्तुमर्हति ॥ १२ ॥
सन्त्यज्य सर्वकर्माणि मित्रार्थे योनुवर्तते ॥ संभ्रमाद्धि कृतोत्साहः सोनर्थैर्नावरुध्यते ॥ १३ ॥
यस्तु कालव्यतीतेषु मित्रकार्येषु वर्तते ॥ स कृत्वा महतोप्यर्थान्न मित्रार्थेन युज्यते ॥ १४ ॥
यदिदं वीर कार्यं नो मित्रकार्यमरिंदम ॥ क्रियतां राघवस्यैतद्वैदेह्याः परिमार्गणम् ॥ १५ ॥
तदिदं वीर कार्यं ते कालातीतमरिंदम ॥ १६ ॥
न च कालमतीतं ते निवेदयति कालवित् ॥ त्वरमाणोपि सन्प्राज्ञस्तव राजन्वशानुगः ॥ १७ ॥

रं । तत्त्वं यथार्थं । पथ्यं नीतिमार्गादनपेतं । सामधर्मार्थनीतिमत् साम च धर्मश्च अर्थश्च नीतिश्च सामधर्मार्थनीति तदस्यास्तीति सामधर्मार्थनीतिमत् । प्रणयप्रीतिसंयुक्तं प्रणयः समानविषयस्नेहः । प्रीतिः न्यूनविषयः । विश्वासकृतनिश्चयं आप्तवाक्यत्वविश्वासे विषये कृतनिश्चयं ॥ १—८ ॥ कौली कुलक्रमागता । श्रीः संपत् । अभिवर्धिता । अप्रतिद्वन्द्वत्वादिति भावः । मित्राणां संग्रहः तत्कार्यकारणं । शेषः अवशिष्टो भवति । इदमेव वचनं प्रसाद्य वाक्यैरित्यादिना पूर्वं प्रशंसितं ॥ ९ ॥ मित्रकार्यस्यावश्यकर्तव्यत्वमाह—यो हीति ॥ कालज्ञः मित्रसंग्रहकालज्ञः । तत्कालातिक्रमे विपरीतं भवतीत्यर्थः । मित्रेषु वर्तते मित्राधीनो भवतीत्यर्थः ॥१०॥ दण्ड्यतेनेनेति दण्डः सेनाविशेषः । आत्मा प्रभुरित्यर्थः । समवेतानि समुदितानि । एकन्यूनत्वे महाराज्यहानिरिति भावः ॥ ११ ॥ निरत्यये अविनाशिनि । पथि सन्मार्ग इत्यर्थः । मित्रार्थं मित्रकार्यं । अभिनीतार्थं प्रापितप्रयोजनं यथा भवति तथा । यथावत् यथाप्रतिज्ञमिति यावत् ॥ १२ ॥ सर्वकर्माणि स्वभोगसाधनानि सन्त्यज्य । कृतोत्साहः सन् संभ्रमात् आदरात् मित्रार्थे विषये । यःअनुवर्तते अनुस्यूततया तिष्ठति । सोनर्थैर्नावरुध्यते न संबध्यते ॥ १३॥ एवं कर्तव्यं मित्रकार्यमुचितकाले कर्तव्यमित्याह—यस्त्विति ॥ कालव्यतीतेषु अतिक्रान्तकालेषु ॥ १४ ॥ हेवीर । नः अस्माभिः । यदिदं मित्रकार्यं कर्तव्यं एतत् वैदेह्याः परिमार्गणं क्रियतामिति संबन्धः ॥ १५ ॥ तेकार्यं त्वया कर्तव्यं । इदं मित्रकार्यं ॥ १६ ॥ कालवित् रामइतिशेषः । त्वरमाण इत्यर्थे

स० कुलपरंपराप्राप्ताश्रीःकौली । शेषःशिष्टः । सचउक्तगुणश्चासौभवांश्च तद्भवान् । तदित्यव्ययंदोषपरामर्शकमितिवा ॥ ९ ॥ **रामानु०** दण्डःदण्डयतेऽनेनेतिदण्डःसैन्यविशेषः। तथाहकामन्दकः—"पितृपैतामहोवंशसंभवोदत्तवेतनः । विख्यातपौरुषोजन्येकुशलःकुशलैर्वृतः । नानाप्रहरणोपेतोनानायुद्धविशारदः । नानायोधसमाकीर्णोविराजितहयद्विपः । प्रवास्यचसुदुःखेषुयुद्धेषुचकृतश्रमः । अद्वैध्यःक्षत्रियप्रायोदण्डोदण्डविदांमतः ।" इति ॥ **ति०** समानि स्ववशत्वेनसमत्वं । समवेतानीतिपाठे मिलितानीत्यर्थः । नत्वेकमपिपृथग्भूतमितिभावः ॥ ११ ॥ **ति०** अभिनीतार्थं प्रतिज्ञातार्थं ॥ **शि०** निरत्यये ध्वंसरहिते । पथि रामाश्रयणरूपेमार्गेस्थितः ॥ १२ ॥ **ति०** संभ्रमात् त्वरया । विशेषेणकृतोत्साहः । अन्यत्रकर्मणीतिशेषः ॥ **शि०** विपक्षेदोषमाह । समिति । योजनःसर्वकर्माणिसंत्यज्य मित्रार्थे मित्रप्रयोजनसिद्धये । संभ्रमात् उद्वेगात् । नवर्तते सजनः कृतःछिन्नःउत्साहो यस्यसंसन् । अनर्थेनावरुध्यतेनप्राप्यतइत्यर्थः । कृतोत्साहः जातोत्साहविशिष्टस्सन् नवर्ततइतिवायोजना॥ १३ ॥

[**पा०**] १ घ. पथ्यंचतत्त्वंच. ख. ग. ङ. च. ज.—ट. तथ्यंचपथ्यंच. छ. पथ्यंचतथ्यंच. २ ख. घ. प्राप्तंराज्यं. ३ क. ख. ग. च. ज. ञ. श्रीरपि. ४ क. ग. घ. च. ज.—ट. शेषस्तद्भवान्. ५ क. ख. झ. ट. प्रतापश्चापि. ६ झ. ट. समान्येतानि. ७ ख. घ. ङ. च. ज. ञ. सर्वकार्याणि. ८ ख. ङ. झ. ट. योनवर्तते. ९ झ. संभ्रमाद्विकृतोत्साहः. १० ग. झ. ट. सोनर्थेनावरुध्यते. ङ. च. ज. सोयंनैवावरुध्यते. ११ छ. झ. ट. योहि. १२ ख. मित्रार्थंयोनुवर्तते. १३ ट. मित्रार्थेहि. १४ झ. तदिदंमित्रकार्यंनःकालातीतमरिंदम. ज. तदिदंवीर. १५ झ. ञ. ट. सप्राज्ञः.

कुलस्य [1]हेतुः स्फीतस्य [2]दीर्घबन्धुश्च राघवः ॥ अप्रमेयप्रभावश्च स्वयं चाप्रतिमो गुणैः ॥ १८ ॥
तस्य त्वं कुरु वै कार्यं पूर्वं तेन कृतं तव ॥ हरीश्वर [3]हरिश्रेष्ठानाज्ञापयितुमर्हसि ॥ १९ ॥
न हि तावद्भवेत्कालो व्यतीतश्चोदनादृते ॥ चोदितस्य हि कार्यस्य भवेत्कालव्यतिक्रमः ॥ २० ॥
अकर्तुरपि कार्यस्य भवान्कर्ता हरीश्वर ॥ किं पुनः प्रतिकर्तुस्ते राज्येन च धनेन च ॥ २१ ॥
[4]शक्तिमानपि विक्रान्तो वानरर्क्षगणेश्वर ॥ कर्तुं दाशरथेः प्रीतिमाज्ञायां किं न सज्जसे ॥ २२ ॥
कामं खलु शरैः शक्तः सुरासुरमहोरगान् ॥ वशे दाशरथिः कर्तुं [5]त्वत्प्रतिज्ञां तु काङ्क्षते ॥ २३ ॥
प्राणत्यागाविशङ्केन कृतं तेन [6]तव प्रियम् ॥ तस्य मार्गाम वैदेहीं पृथिव्यामपि चाम्बरे ॥ २४ ॥
[7]न देवा न च गन्धर्वा नासुरा न मरुद्गणाः ॥ न च यक्षा भयं तस्य कुर्युः [8]किमुत राक्षसाः ॥ २५ ॥
तदेवं शक्तियुक्तस्य पूर्वं [9]प्रियंकृतस्तव ॥ रामस्यार्हसि पिङ्गेश कर्तुं सर्वात्मना प्रियम् ॥ २६ ॥
नाधस्तादवनौ नाप्सु गतिर्नोपरि चाम्बरे ॥ कस्य [10]चित्संसज्जतेऽस्माकं कपीश्वर तवाज्ञया ॥ २७ ॥
[11]तदाज्ञापय [12]कः किं ते [13]कृते कुत्र व्यवस्यतु ॥ हरयो ह्यप्रधृष्यास्ते सन्ति [14]कोट्यग्रतोऽनघाः ॥ २८ ॥
तस्य तद्वचनं श्रुत्वा काले साधु [15]निवेदितम् ॥ सुग्रीवः [16]सत्त्वसंपन्नश्चकार मतिमुत्तमाम् ॥ २९ ॥
[17]स संदिदेशाभिमतं नीलं नित्यकृतोद्यमम् ॥ दिक्षु सर्वासु सर्वेषां सैन्यानामुपसंग्रहे ॥ ३० ॥
यथा सेना समग्रा मे यूथपालाश्च सर्वशः ॥ [18]समागच्छन्त्यसङ्गेन [19]सेनाग्राणि तथा कुरु ॥ ३१ ॥

पूर्वेणान्वेति । कालवित् प्राज्ञो रामः त्वरमाणोपि सन् वैदेहीसमानयनाय त्वरमाणोपि सन् । न निवेदयतीति संबन्धः ॥ १७ ॥ स्वयं चेति । त्वमपि गुणैरप्रतिम इत्यर्थः ॥ १८ ॥ आज्ञापयितुं वानरसेनामानेतुमिति शेषः ॥ १९ ॥ इदानीं वानरानयनेपि कालव्यतिक्रमस्तुल्य इत्याशङ्क्याह—न हीति ॥ चोदनादृते रामप्रेरणं विना । कालो न व्यतीतो भवेत् । रामचोदनानन्तरं कार्यं क्रियते चेत्तदाकालातिक्रमः । तच्चोदनात्पूर्वमस्माभिः कार्यप्रवर्तने न कालातिक्रमदोष इतिभावः ॥ २० ॥ अकर्तुः अनुपकर्तुः ॥ २१ ॥ प्रीतिं कर्तुं आज्ञायां आज्ञापने । न सज्जसे नोद्योगं करोषि ॥ २२—२३ ॥ प्राणत्यागाविशङ्केनेत्यनेन उपकारमहत्त्वं द्योतितं ॥ २४—२६ ॥ कस्यचिदिति । अस्माकं मध्ये कस्यचिद्गतिर्न सज्जते न मन्दीभवति ॥ २७ ॥ अप्रधृष्याः कोट्यग्रतः कोट्यधिकाः । हरयः ते सन्ति तेषां मध्ये कः । ते कृते त्वदर्थे । किं करोत्विति शेषः । कुत्र कुत्र कार्ये व्यवस्यतु व्यवसायं करोतु । तदाज्ञापय ॥ २८—३० ॥ सेनाग्राणि सेनाग्रेसरान् । सेनानेतॄनित्यर्थः ।

ति० यद्यपिरामस्यनसहायापेक्षा । तथापिसपरिवारोऽहंसीतामन्वेषयिष्यामीतित्वत्प्रतिज्ञामवेक्षते । सत्याऽसत्यावेतिपरीक्षतइत्यर्थः ॥ **शि०** त्वत्प्रतिज्ञामवेक्षते । एतेनत्वदनुग्रहार्थमेवरामस्त्वामाश्रितइतिसूचितं ॥ २३ ॥ **ति०** प्राणत्यागाविशङ्केन अनपकारिवालिप्राणत्याजनेतदनौचित्यशङ्कारहितेन मित्रकृत्यंस्वकृत्यमेवेतिबुद्ध्यातवप्रियंकृतं । मार्गाम अन्वेषयाम ॥ **स०** प्राणत्यागाविशङ्केनकथंचिद्वालिदर्शनेरामस्यजीवनेसंशयःस्यादितिसुग्रीवंप्रतिरामोपकारवर्णनं । **ति०** प्रतिकृतः कृतोपकारस्य । पिङ्गेश कपिराज ॥ २६ ॥ **ति०** आज्ञापनीयासेनाकियत्यस्तितत्राह—**हरयइति** । कोट्यग्रतः कोटिघटितसंख्यायान्यर्बुदस्याग्रेउपरियासंख्यासमुद्राख्यातयासंख्ययेत्यर्थः ॥ २८ ॥ **ति०** असङ्गेन अविलंबेन । सेनाग्र्येण सेनानाथेन । सहेतिशेषः ॥ ३१ ॥

[पा०] १ ङ. च. ज. हेतुभूतःसन्. क. केतुभूतःसन्. ख. ग. केतुःस्फीतश्च. २ ग. दीर्घबाहुश्च. घ. दीर्घबन्धुस्स. ३ झ. ट. कपिश्रेष्ठान्. ४ ङ. च. ज.—ट. शक्तिमानति. क. ग. शक्तिमानसि. ५ झ. ट. त्प्रतिज्ञामवेक्षते. ६ झ. ट. महत्प्रियं. ७ ङ.—ट. देवदानवगन्धर्वाअसुरास्समरुद्गणाः. क. देवदानवगन्धर्वानासुरा. ८ ङ.—ट. किमिव. ९ ङ. छ.—ट. प्रतिकृतस्तथा. घ. प्रियकृतस्तथा. १० ज. ट. सज्जतेऽस्मासु. ११ ग. ङ. ञ. तथाज्ञापय. ख. तमाज्ञापय. १२ ङ. नःकिंते. १३ ख. झ. ट. कुतोवापिव्यवस्यतु. ग. ङ. ञ. कृतेवसतुकुत्रचित्. १४ ख. घ. ङ. च. ज. ञ. ट. कोट्यग्रशो. १५ ङ. च. ज.—ट. निरूपितं. १६ घ सत्यसंपन्नः. १७ ङ. च. ज.—ट. संदिदेशातिमतिमान्नीलं. क. ससंदिदेशातिबलं. १८ [illegible] ज. समागच्छन्तिवेगेन. १९ छ. झ. ट. सेनाग्र्येण.

ये त्वन्तपालाः [1]प्लवगाः शीघ्रगा व्यवसायिनः ॥ समानयन्तु ते[2] सैन्यं त्वरिताः शासनान्मम ॥
[3]स्वयं चानन्तरं सैन्यं भवानेवानुपश्यतु ॥ ३२ ॥
त्रिपञ्चरात्रादूर्ध्वं यः [4]प्राप्नुयान्नेह वानर ॥ तस्य प्राणान्तिको दण्डो नात्र कार्या विचारणा ॥ ३३ ॥
हरींश्च [5]वृद्धानुपयातु साङ्गदो भवान्ममाज्ञामधिकृत्य निश्चि[6]ताम् ॥
इति व्यवस्थां हरिपुङ्गवेश्वरो विधाय वेश्म प्रविवेश वीर्यवान् ॥ ३४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

त्रिंशः सर्गः ॥ ३० ॥

लक्ष्मणे शरदागमेचन्द्रदर्शनादिनासमुद्दीपितशोकतया सीताचिन्तयाबहुधाविलपतोरामस्य समाश्वासनम् ॥ १ ॥ रामेणलक्ष्मणंप्रति शरद्वर्णनम् ॥ २ ॥ शरदागमेपिसुग्रीवानुद्योगकुपितेनरामेणलक्ष्मणंप्रति सुग्रीवे स्वकोपनिवेदनपूर्वकं तेनस्वकार्योद्यमनचोदना ॥ ३ ॥

[7]गुहां प्रविष्टे सुग्रीवे विमुक्ते गगने घनैः ॥ [8]वर्षरात्रोषितो रामः कामशोकाभिपीडितः ॥ १ ॥
पाण्डुरं गगनं दृष्ट्वा विमलं चन्द्रमण्डलम् ॥ शारदीं रजनीं चैव दृष्ट्वा ज्योत्स्नानुलेपनाम् ॥ २ ॥
कामवृत्तं च सुग्रीवं नष्टां च जनकात्मजाम् ॥ [9]बुद्ध्वा कालमतीतं च मुमोह परमातुरः ॥ ३ ॥
स तु संज्ञामुपागम्य मुहूर्तान्[10]मतिमान्पुनः ॥ मनःस्थामपि वैदेहीं चिन्तयामास राघवः ॥ ४ ॥
[11]आसीनः पर्वतस्याग्रे हेमधातुविभूषिते ॥ शारदं गगनं दृष्ट्वा जगाम मनसा प्रियाम् ॥ ५ ॥
[12]दृष्ट्वा च विमलं व्योम गतविद्युद्बलाहकम् ॥ सारसारवसंघुष्टं वि[13]ललापार्तया गिरा ॥ ६ ॥

तथा कुरु तथा आज्ञापय ॥ ३१ ॥ अन्तपालाः सेनापर्यन्तपालकाः ॥ ३२ ॥ त्रिपञ्चरात्रादूर्ध्वं पञ्चदशरात्रादनन्तरदिवसे ॥ ३३ ॥ वृद्धान् जाम्बवत्प्रभृतीन् ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकोनत्रिंशः सर्गः ॥ २९ ॥

अथ शरत्समागमेपि सुग्रीवस्यानुद्योगाद्रामकोपश्लिशे—गुहामित्यादि ॥ सुग्रीवे गुहां प्रविष्टे वर्षरात्रोषितो रामः कामशोकाभिपीडितः सन् । क्रमेण गगने घनैर्विमुक्ते । पाण्डुरं निर्मलं । गगनं दृष्ट्वा परमातुरः वर्षाकालिकशोकादधिकं शोकं प्राप्तः सन् मुमोह । एतावत्पर्यन्तं कस्यचिदवधेर्विद्यमानतया कथंचिद्धृतवान् । संप्रतितदभावान्मुमोहेत्यर्थः ॥ १—३ ॥ मनःस्थामपि वैदेहीं चिन्तयामास । पुनःपुनर्विशेषतश्चिन्तितवानित्यर्थः ॥ ४ ॥ मनसा जगाम । चिन्तयामासेति यावत् ॥ ५ ॥ गिरा स्वरेण ॥ ६ ॥

ति० समानयन्तु समागच्छन्तु ॥ ३२ ॥ रामानु० त्रिपञ्चरात्रादूर्ध्वंयःप्राप्नुयादिहवानरइतिपाठे पञ्चदशरात्रादर्वागेवागन्तव्यमितिभावः ॥ ति० त्रिपञ्चरात्रात् पञ्चदशदिनादूर्ध्वंयआगच्छेत् तस्यदण्डः । तेनपक्षमध्येसर्वैरागन्तव्यमितिभावः । कार्तिकशुक्लादावियमाज्ञेतिबोध्यं ॥३३॥ ति० वृद्धान्हरीन्साङ्गदोभवानुपयातु । संमाननार्थमितिशेषः ॥३४॥ इत्येकोनत्रिंशःसर्गः ॥२९॥
ती० सुग्रीवेविमुक्तइत्यत्रअविमुक्तइतिच्छेदः । सुग्रीवे गुहां किष्किन्धां प्रविष्टे गगने घनैरविमुक्ते आवृतेसति । वर्षरात्रोषितोरामः पाण्डुरंगगनंदृष्ट्वामुमोहेत्युत्तरत्रसंबन्धः ॥ १–२ ॥ शि० कामशोकाभिपीडितः कामेनजानकीप्राप्तिविषयकोत्कटेच्छया शोकेन तत्प्राप्त्यभावजनितचिन्तया अभिपीडितः व्याप्तः आसीदितिशेषः ॥ १ ॥ रामानु० सलिलेति ॥ अस्माच्छ्लोकात्परतः
[पा०] १ ख. सबलाः. २ ङ.—ट. तेशीघ्रं. ३ ज. तेषांचानन्तरंकार्यं. च. छ. झ. ट. स्वयंचानन्तरंकार्यं. क. यदत्रानन्तरंकार्यंभवान्समनुपश्यतु. ४ क. ग. छ. झ. ट. प्राप्नुयादिहवानरः. ५ क. ख. सर्वान्. ६ झ. निश्चितं. ७ छ. झ. गृहं. ८ छ. झ. वर्षरात्रेस्थितो. ९ ङ.—ट. दृष्ट्वा. १० क. ख. मतिमान्नरः च. ज. ञ. मतिमांस्ततः. छ. झ. ट. मतिमान्नृपः. ११ अयंश्लोकः ट. पुस्तकेनदृश्यते. १२ ख. दृष्ट्वास. १३ च. ञ. विललापाकुलेन्द्रियः.

सारसारवसन्नादैः [1]सारसारवनादिनी ॥ याऽश्रमे रमते बाला साऽद्य मे रमते कथम् ॥ ७ ॥
पुष्पितांश्चासनान्दृष्ट्वा काञ्चनानिव निर्मलान् ॥ कथं सा रमते बाला पश्यन्ती मामपश्यती ॥ ८ ॥
या पुरा कलहंसानां [2]स्वरेण कलभाषिणी ॥ बुध्यते चारुसर्वाङ्गी [3]साऽद्य मे [4]बुध्यते कथम् ॥ ९ ॥
निःस्वनं चक्रवाकानां निशम्य सहचारिणाम् ॥ पुण्डरीक[5]विशालाक्षी कथमेषा भविष्यति ॥ १० ॥
सरांसि सरितो वापीः काननानि वनानि च ॥ तां विना मृगशावाक्षीं [6]चरन्नाद्य सुखं लभे ॥ ११ ॥
अपि तां मद्वियोगाच्च सौकुमार्याच्च भामिनीम् ॥ [7]न दूरं पीडयेत्कामः शरद्गुणनिरन्तरः ॥ १२ ॥
एवमादि नरश्रेष्ठो विललाप नृपात्मजः ॥ विहङ्ग इव सारङ्गः सलिलं त्रिदशेश्वरात् ॥ १३ ॥
[8]ततश्चञ्चूर्य रम्येषु फलार्थी गिरिसानुषु ॥ ददर्श पर्युपावृत्तो [9]लक्ष्मीवाँल्लक्ष्मणोऽग्रजम् ॥ १४ ॥

तं [10]चिन्तया दुःसहया परीतं विसंज्ञमेकं विजने मनस्वी ॥
भ्रातुर्वि[11]षादात्परितापदीनः समीक्ष्य सौमित्रिरुवाच [12]रामम् ॥ १५ ॥
किमार्य कामस्य वशंगतेन किमात्मपौरुष्यपराभवेन ॥
अयं [13]सदा संह्रियते समाधिः किमत्र योगेन निवर्तितेन ॥ १६ ॥

सारसारवसन्नादैः सारसारावोत्थितध्वनिभिः ॥ ७ ॥ पश्यन्ती मद्दिदृक्षया इतस्ततो दृष्टिं निक्षिपन्ती ॥ ८—९ ॥ पुण्डरीकविशालाक्षी चक्रवाकनिनदश्रवणस्यासह्यतया नायकागमपथं सलीलमवलोकयन्तीत्यर्थः । कथं भविष्यति कथं सत्तां धारयिष्यतीत्यर्थः ॥ १० ॥ वापीः कृत्रिमसरांसि । काननानि महावनानि ॥ ११ ॥ शरद्गुणनिरन्तरः शरद्गुणैः साधनैः निरन्तरः पूर्णः । कामः । सौकुमार्यात् मद्वियोगाच्च हेतोः । तां भामिनीं दूरं आमरणं । न पीडयेत् । अपिः संभावनायां । पीडयेदेवेत्यर्थः ॥ १२ ॥ त्रिदशेश्वरात् सलिलमुद्दिश्य सारङ्गश्चातक इव विललापेति संबन्धः ॥ १३ ॥ चञ्चूर्य कुटिलं चरित्वा । फलाभिलाषेण कुटिलमार्गेण चरित्वा । "नित्यं कौटिल्ये गतौ" इति यङ् ॥ १४—१५ ॥ वशंगतेन मनसेति शेषः । पौरुष्यं पौरुषं स्वार्थे ष्यञ् । अयं वर्तमानः । समाधिः चित्तसमाधानं । सदा तत्र तत्र काले । संह्रियते संपाद्यते । अत्र अस्मिन्काले । निवर्तितेन योगेन किं । अयं यदा संह्रियते समाधिरिति पाठान्तरं । यदा यस्मिन्काले । अयं समाधिः चित्तसमाधानं । संह्रियते संपाद्यते । अत्रास्मिन्काले

आसीनःपर्वतस्याग्रे इतिश्लोकः । अस्माच्चपरतः दृष्ट्वाचविमलंव्योमइतिश्लोकः । व्यत्यासस्तुलेखकप्रमादकृतः ॥ ४ ॥ **ति०** सारसनादसदृशनादवती या सारसानामारावाय परस्परसमाह्वानाय । कृतैर्नादैर्या रमतेआश्रमे ॥ ७ ॥ **ति०** काननवनयोःकान्तारोपवनात्मनाभेदः ॥ ११ ॥ **ति०** ततः तत्रकाले । रम्येषुगिरिसानुषुचञ्चूर्य भ्रातृदुःखेनगर्हितंचरित्वा । यङ्लुगन्तादार्षोसमासेल्यप् । पर्युपावृत्तोलक्ष्मणः अग्रजंरामंददर्श ॥ १४ ॥ **ती०** आर्य यदा यस्मिन्काले समाधिश्चित्तसमाधानं संपादनीयं । अत्र अस्मिन्काले । अयंकिंसंह्रियते किमर्थंसंह्रियते । कामस्यवशंगतेनकिं कामवशंगमनेनकिं । द्वितीयायाअलुगार्षः । भावेनिष्ठा । आत्मपौरुष्यपराभवेनकिं पौरुषमेवपौरुष्यं । निवर्तितेनयोगेनकिं । योगः संनहनं उद्योगइत्यर्थः ॥ **ति०** अथलक्ष्मणःकर्मयोगज्ञानयोगावेवपौरुषवृद्धयेदुःखशान्तयेचानुतिष्ठेतिस्मारयति **किमार्येत्यादि** । हेआर्य कामस्यवशंगतेनत्वया किंकर्मकृतंस्यात् । अपिचैवंकामवशत्वेनआत्मपौरुषस्यस्वपौरुषस्यअभिभवेनकिंप्रयोजनंसाधितंस्यात् । तस्मात्कामवशत्वंत्यक्त्वा कर्मयोगंकुरु । किंच स्नानादिकर्मयोगोत्तरकालमवसरप्राप्तोयंसमाधिः ब्रह्मानुसंधानं । ह्रियाहरतीतिह्रीःशोकः तेनकिमर्थंसंह्रियते । अत्र अस्यामवस्थायां योगेन समाधिना । सर्वंदुःखमितिशेषः । किंननिवर्तते अपितुनिवर्ततएवेत्यर्थः । एवमेवपाङ्कःपाठइतिकतकक्कृत् । पाठान्तरंत्वस्ययोजना-

[पा०] १ क. ख. घ.—छ. झ. ञ. ट. सारसाराव. २ झ. ट. कलेन. ३ ट. साद्यवै. ४ छ. रमतेकथं. ५ क. पलाशाक्षी. ६ ग. चिरंनाद्य. ७ छ. झ. सुदूरं. घ. ननूनं. ८ क. ख. ततस्संचार्य. ङ. च. ज. ञ. अतःसंचार्यकुटिलं. ९ ख. लक्ष्मणोलक्ष्मणाग्रजं. १० छ. झ. ट. सचिन्तया. ११ ङ.—ट. त्वरितोतिदीनः. १२ ख. ङ.—ट. दीनं. १३ क. ग. ज. यदा. ख. छ. झ. ट. ह्रिया. घ. ङ. ञ. यथा.

क्रियाभियोगं मनसः प्रसादं समाधियोगानुगतं च कालम् ॥
सहायसामर्थ्यमदीनसत्त्व स्वकर्महेतुं च कुरुष्व हेतुम् ॥ १७ ॥
न जानकी मानववंशनाथ त्वया सनाथा सुलभा परेण ॥
न चाग्निचूडां ज्वलितामुपेत्य न दह्यते वीरवरार्ह कश्चित् ॥ १८ ॥
सलक्षणं लक्ष्मणमप्रधृष्यं स्वभावजं वाक्यमुवाच रामः ॥
हितं च पथ्यं च नयप्रसक्तं ससाम धर्मार्थसमाहितं च ॥ १९ ॥
निःसंशयं कार्यमवेक्षितव्यं क्रियाविशेषो ह्यनुवर्तितव्यः ॥
ननु प्रवृत्तस्य दुरासदस्य कुमार कार्यस्य फलं न चिन्त्यम् ॥ २० ॥
अथ पद्मपलाशाक्षीं मैथिलीमनुचिन्तयन् ॥ उवाच लक्ष्मणं रामो मुखेन परिशुष्यता ॥ २१ ॥
तर्पयित्वा सहस्राक्षः सलिलेन वसुन्धराम् ॥ निर्वर्तयित्वा सस्यानि कृतकर्मा व्यवस्थितः ॥ २२ ॥

निर्वर्तितेन योगेन सन्नहनेन उत्साहेन किमित्यर्थः ॥ १६ ॥ क्रियाभियोगं कार्योद्योगम् । मनसः प्रसादं समाधियोगानुगतं धैर्योपायाभ्यामनुबद्धं । कालं च । सहायसामर्थ्यं सुग्रीवादिसहायसामर्थ्यं । स्वकर्म देवतोपासनात्मकं तदेव हेतुः तं च हेतुं कुरुष्व । क्रियाभियोगादिकं सर्वं स्वकार्यसिद्धौ हेतुं कुरुष्वेत्यर्थः । अत्र प्रकरणे लक्ष्मणेन रामस्याश्रितरक्षणत्वरा संदीप्यत इति स्वोपदेशः सुलभः ॥ १७ ॥ सुलभा लब्धुमर्हा । अग्निचूडां अग्निज्वालां ॥ १८ ॥ रामः अप्रधृष्यं युक्तिभिरविचाल्यं । स्वभावजं स्वभावसिद्धं । हितं उदर्कसुखकरं । पथ्यं तत्कालसुखकरं । नयप्रसक्तं राजनीतियुक्तं । ससाम सान्त्वयुक्तं धर्मार्थसमाहितं च वाक्यमुक्तवन्तं सलक्षणं लक्ष्मणमुवाचेति योजना । यद्वा अप्रधृष्यत्वादिविशेषणविशिष्टं वाक्यं राम उवाच । लक्ष्मणोक्तानुवादरूपत्वाद्रामवाक्यस्यापि तथात्वमिति बोध्यं ॥ १९ ॥ कार्यं सीतान्वेषणादिकं । निःसंशयं यथाभवतितथा अवेक्षणीयं । तदनुरूपं धैर्यं कर्तव्यमित्यर्थः । क्रियाविशेषः उत्साहादिः । अनुवर्तितव्यः अनुवर्तितव्य एव । हे कुमार प्रवृत्तस्य दुरासदस्य कार्यस्य फलं सीताप्राप्तिरूपं । न चिन्त्यं ननु चिन्त्यमेव ॥ २० ॥ एवं लक्ष्मणसमाश्वासनेन प्रतिष्ठापितधैर्योपि सीताविषयकामानुवृत्त्यापुनः शरदं वर्णयति—अथेत्यादिना ॥ २१ ॥ निर्वर्तयित्वा परिपक्वानि कृत्वा । कृतकर्मा

शक्त्याकल्पितमितिचसः ॥ १६ ॥ **ति०** उक्तमेवविवृणोति—**क्रियाभियोगमिति** । क्रियाणांशौचस्नानादीनां अभितःकात्स्न्र्येनयोगं अनुष्ठानं । मनसःप्रसादंचास्थाय । कालं सर्वकालं समाधियोगानुगतं तेनसंबद्धमेवकुरुष्व । तथा अदीनसत्वः अक्षीणसत्वसन् । स्वकर्महेतुं पौरुषवृद्धेःकारणं । सहायसामर्थ्यं तद्घटनरूपंस्वकर्मदेवार्चनादिरूपकर्मयोगंचकुरुष्व । अनेनयावत्फलंनिदिध्यासनजातकर्मसमुच्चयउक्तः ॥ **स०** क्रियाभियोगं सन्ध्यावन्दनाद्युद्योगंकुरुष्व । समाधियोगं चित्तैकाग्र्यरूपमुपायं अनुगतोयः कालस्तंचकुरुष्व । सहायसामर्थ्यं सुग्रीवादिसहायघटनां । हे अदीनसत्त्व स्वकर्महेतुं स्वकार्यसाधकं । एतच्चसहायसामर्थ्यस्यविशेषणं ॥ १७ ॥ **ति०** अतो या नीता सातत्प्रतिकृतिरेव । सातुत्वदुपासिताम्नावितिव्यङ्ग्यं ॥ १८ ॥ **वि०** रामः अप्रधृष्यं युक्तिभिरविचाल्यं । स्वभावजं स्वभावसिद्धंवाक्यमुक्तवन्तं लक्षणसहितंलक्ष्मणमुवाच । हेलक्ष्मण यत्त्वयाप्रयुक्तंवाक्यं तद्धितं तत्कालसुखं । पथ्यं कालान्तरेपिसुखं। नयप्रसक्तं राजनीतियुक्तं । सामसहितधर्मार्थाभ्यांसमाहितं संगतं ॥ **रामानु०** एतच्छ्लोकोक्ताप्रधृष्यत्वादिधर्माणांपूर्वोक्तलक्ष्मणवाक्येषुविद्यमानत्वादुपरिष्टाद्रामेलक्ष्मणोक्तस्यास्यैवानूद्यमानत्वादुक्तवन्तमितिपदमध्याहर्तव्यं ॥ **स०** सलक्ष्मणं लक्षणसहितं । "लक्ष्मणंनाम्निचिह्नेचरामभ्रातरिलक्ष्मणः" इतिविश्वः ॥ १९ ॥ **ति०** तस्मात्त्वदुक्तंनिस्संशयंकार्यं त्वद्वाक्यार्थोनुष्ठेयएव । अनुष्ठेयमाह—अवेक्षितव्यं समाधियोगेनभगवत्तत्वंद्रष्टव्यं । क्रियाविशेषः कर्मयोगः । सोप्यनुवर्तितव्यः अनुष्ठेयः । हेकुमार नतुकर्मज्ञानयोगौहित्वाप्रकर्षेणवृद्धिंप्राप्तस्य । अतएव दुरासदस्य । वीर्यस्य वीर्यवतःकर्मणः फलंच फलमेव ।

[पा०] १ ङ. च. ज. महीन. २ छ. झ. ट. तात. ङ. च. ञ. योगं. ४ ख. सलक्ष्मिवाँल्लक्ष्मणं. ५ ङ. च. ञ. वचःप्रयुक्तं. ६ ङ. च. ज. धर्मसमाहितार्थं. ७ ग. मवेक्षणीयं. ८ ग. घ. ङ. झ. ट. विशेषोप्यनुवर्तितव्यः. ९ झ. ट. नतुप्रवृद्धस्य. घ. नचप्रवृत्तस्य. ग. ज. नतुप्रवृत्तस्य. १० झ. ट. वीर्यस्य. ११ घ. च. झ. ट. फलंच. १२ ग. वैदेहीमनु.

स्निग्धगम्भीरनिर्घोषाः शैलद्रुमपुरोगमाः ॥ विसृज्य सलिलं मेघाः परिश्रान्ता नृपात्मज ॥ २३ ॥
नीलोत्पलदलश्यामाः श्यामीकृत्वा दिशो दश ॥ विमदा इव मातङ्गाः शान्तवेगाः पयोधराः ॥ २४ ॥
जलगर्भा महावेगाः कुटजार्जुनगन्धिनः ॥ चरित्वा विरताः सौम्य वृष्टिवाताः समुद्यताः ॥ २५ ॥
घनानां वारणानां च मयूराणां च लक्ष्मण ॥ नादः प्रस्रवणानां च प्रशान्तः सहसाऽनघ ॥ २६ ॥
अभिवृष्टा महामेघैर्निर्मलाश्चित्रसानवः ॥ अनुलिप्ता इवाभान्ति गिरयश्चित्रदीप्तिभिः ॥ २७ ॥
दर्शयन्ति शरन्नद्यः पुलिनानि शनैः शनैः ॥ नवसङ्गमसंव्रीडाजघनानीव योषितः ॥ २८ ॥

शाखासु सप्तच्छदपादपानां प्रभासु तारार्कनिशाकराणाम् ॥
लीलासु चैवोत्तमवारणानां श्रियं विभज्याद्य शरत्प्रवृत्ता ॥ २९ ॥
संप्रत्यनेकाश्रयचित्रशोभा लक्ष्मीः शरत्कालगुणोपनीता ॥
सूर्याग्रहस्तप्रतिबोधितेषु पद्माकरेष्वभ्यधिकं विभाति ॥ ३० ॥
सप्तच्छदानां कुसुमोपगन्धी षट्पादवृन्दैरनुगीयमानः ॥
मत्तद्विपानां पवनोनुसारी दर्पं वनेष्वभ्यधिकं करोति ॥ ३१ ॥
अभ्यागतैश्चारुविशालपक्षैः सरःप्रियैः पद्मरजोवकीर्णैः ॥
महानदीनां पुलिनोपयातैः क्रीडन्ति हंसाः सह चक्रवाकैः ॥ ३२ ॥

कृतकृत्यः ॥ २२ ॥ शैलद्रुमपुरोगमाः शैलद्रुमाणामग्रे गच्छन्तः । अत्र प्रकरणे सर्वत्र विषये प्रवृत्तिः रामावतारकृता सूच्यते ॥ २३—२४ ॥ वृष्टिकरा वाता वृष्टिवाताः पुरोवाता इत्यर्थः ॥ २५—२६ ॥ चित्रदीप्तिभिः नानावर्णकान्तिभिः ॥२७॥ दर्शयन्तीति । अनेन चिरकालानुवर्तनेन गुरूणां शिष्येभ्यो रहस्यार्थप्रकाशनं सूच्यते ॥ २८ ॥ सप्तच्छदानाम शरत्पुष्पावृक्षाः । शरत् कर्त्री । श्रियं स्वसमृद्धिं । विभज्य त्रेधाविभज्य । सप्तच्छदशाखादिषु प्रवृत्ता सप्तच्छदेषु पुष्पविकासरूपाश्रीः । तारादिप्रभासुनिर्मलतारूपा । गजलीलासु उन्मस्तकतारूपा ॥ २९ ॥ अनेकाश्रयचित्रशोभा सितरक्तनीलपङ्कजादिरूपानेकाश्रयतया चित्रशोभा नानावर्णकान्तिः । शरत्कालगुणोपनीता शरत्कालोत्कर्षेण प्रापिता । लक्ष्मीः समृद्धिः । सूर्यस्याग्रहस्तैः प्राथमिककिरणैः । हस्तशब्देन करा लक्ष्यन्ते । भगवत्कटाक्षबोधितेषु पुरुषेषु नानारूपसंवित्प्रकाश उच्यते ॥ ३० ॥ अनुसारी अनुसृत्य वर्तमानः। अविच्छेदेनैव प्रवर्तमान इत्यर्थः । मत्तद्विपानां दर्पकरोति । मदवृद्धिहेतुत्वादिति भावः ॥ ३१ ॥ अभ्यागतैरिति । मिथुनतया आभिमुख्येन संगतैः । चारु यथा तथा विशालपक्षैः हर्षेण विस्तृतपक्षैरित्यर्थः । क्रीडन्ति हंसाः सह चक्रवाकैः हंसाश्च क्रीडन्ति

चिन्त्यं अपेक्षणीयं । अनेनयावत्फलंनिदिध्यासनकर्मसमुच्चयउक्तः ॥ २० ॥ **ति०** शैलद्रुमपुरइति द्वितीयाबहुवचनान्तं । तान्गच्छन्तितथाभूत्वासलिलंविसृज्यपरिशान्ताः ॥ **शि०** दीर्घः गंभीरः निर्घोषोयेषांतेगमाः गगनमागतामेघाः सलिलं शैलद्रुमपुरः विसृज्य प्रापय्य परिशान्ताअभवन्नितिशेषः । शैलद्रुमपुरोगमाइत्येकंपदंवा । तदर्थस्तु शैलद्रुमाणांपुरः अग्रभागेगच्छन्तीति ॥२३॥ **ति०** नीलोत्पलदलश्यामाइतिपयोधरविशेषणं । अहंत्वशान्तकामवेगइतिव्यङ्ग्यं ॥ २४ ॥ **स०** मयूराणामिववारणानामपि वर्षाकालएवसंतोषातिशयइतिसंप्रदायः ॥ २६ ॥ **स०** अनुसारीशरत्कालानुगुणः मत्तद्विपानांदर्पंविनेष्यन् क्रीडासाधनजलापहारेणवा मदगन्धसदृशसप्तच्छदगन्धभ्रमरादिसाहित्येनवेतिज्ञेयं । **ती०** सप्तच्छदानामितिकर्मणिषष्ठी ।ताननुसारी अनुसृत्यवर्तमानः पवनः मत्तद्विपानांदर्पंकरोतीतिसंबन्धः ॥ **ति०** पवनमनुसरतितच्छीलः । विनेष्यन् जलंशोषयन् । शरत्कालइतिशेषः ॥ ३१ ॥ **रामनु०** क्रीडन्तिहंसास्सहचक्रवाकैरिति । हंसचक्रवाकाः परस्परंवैरिणोपिशरद्गुणसंजातहर्षपरवशाद्वैरंविस्मृत्यविहरन्तीतिनवि-

[पा०] १ ग. ङ.—ट. दीर्घगंभीर. २ च. छ. झ. ञ. परिशान्ता. ३ क.—ट. गिरयश्चन्द्ररश्मिभिः. ४ ग. क्रीडासु. ५ ज.—ट. गुणोपपन्ना. ६ ज. ञ. सूर्याग्रपाद. ७ ङ. च. छ. झ. ञ. ट. पवनानुसारी. ८ ङ.—ट. दर्पंविनेष्यन्नधिकंविभाति. ९ छ. झ. ट. स्मरप्रियैः.

[1]मदप्रगर्भेषु च वारणेषु गवां समूहेषु च दर्पितेषु ॥
प्रसन्नतोयासु च निम्नगासु विभाति लक्ष्मीर्बहुधा विभक्ता ॥ ३३ ॥
नभः समीक्ष्याम्बुधरैर्विमुक्तं विमुक्तबर्हाभरणा वनेषु ॥
[2]प्रियास्वसक्ता विनिवृत्तशोभा गतोत्सवा ध्यानपरा मयूराः ॥ ३४ ॥
मनोज्ञगन्धैः प्रियकै[3]रनल्पैः [4]पुष्पातिभारावनताग्रशाखैः ॥
सुवर्णगौरैर्नयनाभिरामैरुद्योतितानीव वनान्तराणि ॥ ३५ ॥
प्रियान्वितानां नलिनीप्रियाणां [5]वने रतानां [6]कुसुमोद्धतानाम् ॥
मदोत्कटानां मदलालसानां गजोत्तमानां गतयोऽद्य मन्दाः ॥ ३६ ॥
[7]व्यभ्रं नभः शस्त्रविधौतवर्णं कृशप्रवाहानि नदीजलानि ॥
कह्लारशीताः पवनाः प्रवान्ति तमोविमुक्ताश्च दिशः प्रकाशाः ॥ ३७ ॥
सूर्यातपक्रामणनष्टपङ्का [8]भूमिश्चिरोद्घाटितसान्द्ररेणुः ॥
अन्योन्य[9]वैरामर्षायुतानामुद्योगकालोऽद्य नराधिपानाम् ॥ ३८ ॥
शरद्गुणाप्यायितरूपशोभाः प्रहर्षिताः पांसुसमुत्क्षिताङ्गाः ॥
मदोत्कटाः संप्रति युद्धलुब्धा वृषा गवां मध्यगता नदन्ति ॥ ३९ ॥
[10]समन्मथं तीव्रगतानुरागाः कुलान्विता [11]मन्दगतिं करिण्यः ॥
[12]मदान्वितं संपरिवार्य [13]यान्तं वनेषु भर्तारमनु[14]प्रयान्ति ॥ ४० ॥
त्यक्त्वा वराण्यात्म[15]विभूषणानि बर्हाणि तीरोपगता नदीनाम् ॥
निर्भर्त्स्यमाना इव सारसौघैः प्रयान्ति दीना [16]विमदा मयूराः ॥ ४१ ॥
वित्रास्य कारण्डवचक्रवाकान्महारवैर्भिन्नकटा [17]गजेन्द्राः ॥
सरस्सु बुद्धाम्बुजभूषणेषु विक्षोभ्य विक्षोभ्य जलं [18]पिबन्ति ॥ ४२ ॥

चक्रवाकाश्च क्रीडन्तीत्यर्थः ॥ ३२—३३ ॥ गतोत्सवाः नष्टहर्षा इत्यर्थः । बभूवुरिति शेषः ॥ ३४ ॥ प्रियकैः बन्धूकैः । "सर्जकासनबन्धूकपुष्पप्रियकजीवकाः" इत्यमरः ॥ ३५ ॥ कुसुमोद्धतानां सप्तच्छदकुसुमाघ्राणेन मत्तानां । मदोत्कटानां मदेन उद्भिन्नकटानां ॥ ३६ ॥ व्यभ्रं विगतमेघं । शस्त्रविधौतवर्णं विधौतशस्त्रवर्णं । कृशप्रवाहानि संकुचितप्रवाहानि ॥ ३७ ॥ चिरोद्घाटितसान्द्ररेणुः चिरात् इषत् उत्पादितनिबिडरेणुः । स्थूलरेणुरित्यर्थः । अन्योन्यवैरामर्षायुतानामित्यत्र वृत्तभङ्ग आर्षः । वैरं विरोधः । अमर्षः असहिष्णुता । ताभ्यां आयुतानां आसमन्ताद्युतानां । वैरामर्षपूर्णानामित्यर्थः ॥३८॥ रूपशोभाः शरीरशोभाः ॥ ३९ ॥ कुलान्विताः सजातीयसमूहेन युक्ताः ॥४०॥ सारसौघैः हंससमूहैः ॥४१॥ महारवैः वित्रा-

रोधः ॥ ३२ ॥ **शि०** ध्यानपराः मेघचिन्तनरताः बभूवुरितिशेषः ॥३४॥ **ति०** कुसुमोद्गतानां सप्तच्छदकुसुमाघ्राणप्रवृत्तानां । उद्गतानामित्येवपाङ्कःपाठः । उद्धतानामितिकल्पितइतिकतकक्कतः । मदोत्कटाः अधिकमदाः । अतएवमदलालसाः । मदशब्देन तज्जन्यःकामभोगः तत्रेच्छावन्तः ॥ ३६ ॥ **ति०** सूर्यातपस्यक्रामणंसंबन्धः । चिरेणोद्घाटितः प्रकाशितःसान्द्रोरेणुर्यया । अनेनशरदुत्तरार्धकालोयमितिज्ञायते ॥ ३८ ॥ **ति०** समन्मथत्वादिविशेषणचतुष्टयंकरेण्वाः । करेणूरितिदीर्घत्वमार्षं ॥ ४० ॥ **ति०** विभूषितं विभूषणं । विमनामयूराः । मनःपर्यायोमनशब्दोकारान्तोपि द्विरूपकोशात् ॥ ४१ ॥ **ति०** बुद्धांबुजानि विकसित-

[पा०] १ ग. मत्तप्रगल्भेषु. ख. घ. मदप्रगल्भेष्वपि. २ ङ. झ. ट. प्रियास्वरक्ता. ३ घ. रनेकैः. ४ च. छ. झ. ट. पुष्पाग्रभारा. ५ ङ. ज.—ट. वनप्रियाणां. घ. वनेचराणां. ६ क. ङ. च. छ. झ. ञ. ट. कुसुमोद्गतानां. ७ झ. ट. व्यक्तं. ८ क. ग. घ. भूमिःसमुत्पादित. ट. भूमिःखुरोद्घाटित. ९ ङ.—ट. वैरेणसमायुतानां. ख. वैरादमर्षायुतानां. १० क. ख. घ.—ट. समन्मथातीव्रतरानुरागा. ११ क. मन्दगताःकरिण्यः. छ. झ. ञ. ट. मन्दगतिःकरेणूः. १२ ग. मदान्विता. १३ ख. कान्तं. १४ छ. झ. ट. प्रयाति. १५ ग.—ट. विभूषितानि. १६ ङ.—ट. विमनाः. १७ घ. गजाधिपाः. १८ ग. क्षिपन्ति.

व्यपेतपङ्कासु सवालुकासु प्रसन्नतोयासु सगोकुलासु ॥
[1]ससारसा राव[2]विनादितासु नदीषु [3]हृष्टा निपतन्ति हंसाः ॥ ४३ ॥
[4]नदीघनप्रस्रवणोदकानामतिप्रवृद्धानिलबर्हिणानाम् ॥
प्लवङ्गमानां च [5]गतोत्सवानां [6]द्रुतं रवाः संप्रति संप्रनष्टाः ॥ ४४ ॥
अनेकवर्णाः सुविनष्टकाया [7]नवोदितेष्वम्बुधरेषु नष्टाः ॥
क्षुधार्दिता घोरविषा बिलेभ्यश्चिरोषिता विप्रसरन्ति सर्पाः ॥ ४५ ॥
चञ्चच्चन्द्रकरस्पर्शहर्षोन्मीलिततारका ॥ अहो रागवती सन्ध्या जहाति स्वयमम्बरम् ॥ ४६ ॥
रात्रिः शशाङ्कोदितसौम्यवक्त्रा तारागणोन्मीलितचारुनेत्रा ॥
ज्योत्स्नांशुकप्रावरणा विभाति नारीव शुक्लांशुकसंवृताङ्गी ॥ ४७ ॥
विपक्वशालिप्रसवानि भुक्त्वा प्रहर्षिता सारसचारुपङ्क्तिः ॥
नभः समाक्रामति शीघ्रवेगा वातावधूता ग्रथितेव माला ॥ ४८ ॥
सुप्तैकहंसं [8]कुसुमैरुपेतं महाह्रदस्थं सलिलं विभाति ॥
घनैर्विमुक्तं निशि पूर्णचन्द्रं तारागणाकीर्णमिवान्तरिक्षम् ॥ ४९ ॥
प्रकीर्णहंसाकुलमेखलानां प्रबुद्धपद्मोत्पलमालिनीनाम् ॥
वाप्युत्तमानामधिकाऽद्य लक्ष्मीर्वराङ्गनानामिव भूषितानाम् ॥ ५० ॥
[9]वेणुस्वनव्यञ्जिततूर्यमिश्रः प्रत्यूषकालानिलसं[10]प्रवृद्धः ॥
संमूर्छितो [11]गर्गरगोवृषाणामन्योन्यमापूरयतीव शब्दः ॥ ५१ ॥

स्येति संबन्धः । भिन्नकटाः मदेनेति शेषः ॥ ४२ ॥ सवालुकासुससिकतासु । ससारसा इति पदच्छेदः । रावविनादितासु निजशब्देन संजातशब्दासु ॥ ४३ ॥ नद्यश्च घनप्रस्रवणानि च तेषां उदकानां । प्लवङ्गमानां मण्डूकानां ॥ ४४ ॥ अनेकवर्णाः कृष्णपीतादिवर्णाः । सुविनष्टकायाः अत्यन्तकृशशरीराः । नष्टाः लीनाः ॥ ४५ ॥ चञ्चच्चन्द्रकरस्पर्शेन यो हर्षः तेन उन्मीलिततारका निर्मलनक्षत्रा । रागवती आरुण्यवती सन्ध्या । अम्बरं आकाशं । स्वयं जहाति । अत्र कान्तकरस्पर्शेन हर्षविस्फारितनेत्रकनीनिका उत्तेजितानुरागा स्वयमेव रतये अम्बरं त्यजन्ती कामुकी प्रतीयत इति समासोक्तिः । सन्ध्यारागः प्रायेण शरद्येव भवतीत्येवमुक्तं ॥४६॥ शशाङ्कोदितसौम्यवक्त्रा उदितशशाङ्करम्यवक्त्रा । तारागणोन्मीलितचारुनेत्रा उन्मीलिततारागणचारुनेत्रा ॥ ४७ ॥ भुक्त्वा मुखाग्रे गृहीत्वा । माला नानावर्णपुष्पमाला ॥ ४८ ॥ सुप्तैकहंसमिति इदं चन्द्रस्थाने । महाह्रदस्थमिति गाम्भीर्यकृतनैर्मल्यातिशयेन आकाशसाम्याय । घनैर्विमुक्तमिति परिपूर्णत्वायोक्तं ॥ ४९—५० ॥ वेणूनां सुषिरवंशानां स्वनेन व्यञ्जितं यत्तूर्यं गीतवाद्यं तेन

कमलानि ॥ यद्वा विक्षोभ्यजलं अगाधजलंपिबन्तीत्यर्थः ॥ ४२ ॥ **ती॰** ससारसारावविनादितासु ससारसाश्चतेषामारावविनादिताश्चेतितथा । तासु ॥ ४३ ॥ **स॰** सुनिविष्टकायाः वल्मीकेषुसम्यङ्निवेशितदेहाः । अंबुधरेषुनवोदितेषुसत्सु नष्टाः अदर्शनंगताः । विप्रसरन्ति बहिर्निर्गच्छन्ति ॥ इतःपरंचञ्चच्चन्द्रकरेत्यादिश्लोकःक्वचित्पुस्तकेदृश्यते । सचमूलबहुपुस्तकेष्वदर्शनात्प्रक्षिप्त इतिनव्याख्यायते ॥ ४५ ॥ **स॰** शशाङ्कात्मकंउदितंसौम्यवक्त्रंयस्यास्सा । ज्योत्स्नैवांशुकप्रावरणंयस्यास्सा ॥ ४७ ॥ **ति॰** शालिप्रसवाः व्रीहयः ॥ ४८ ॥ **तनि॰** महाह्रदशब्देनागाधत्वमुक्तं । तेनातिनीलाश्रयस्थतयाहंसस्यातिधावल्यंप्रकाश्यते ॥ ४९ ॥ **ति॰** गह्वराणां गिरिगह्वराणांगोवृषाणांचवनवर्तिनांशब्दः । अन्योन्यमापूरयतीव वर्धयतीव । गह्वरगोवृषशब्दाः साजात्यात्परस्परवर्धकाइत्यर्थः । गह्वरगोवृषाणामितिपाठः ॥ **स॰** प्रत्यूषः ऊष रुजायां । प्रत्यूषतिरजनीमितिप्रत्यूषकालः प्रातःकालः तस्मिन् ।

[पा॰] १ ख. ग. सुसारसा. २ घ. विरावितासु. ञ. निनादितासु. ३ ङ. च. ज.—ट. हंसानिपतन्तिहृष्टाः. ४ घ. नदीजल. ५ ग. हतोत्सवानां. ६ ङ. च. ज.—ट. ध्रुवं. ७ घ. नवोदकेषु. ८ ग. घ. च. ज.—ट. कुमुदैरुपेतं. ९ क. झ. वेणुस्वर. १० ग. छ. ज. झ. ट. संप्रवृत्तः. ११ झ. ट. गह्वर.

नवैर्नदीनां [1]कुसुमप्रभासैर्व्याधूयमानैर्मृदु मारुतेन ॥
धौतामलक्षौमपटप्रकाशैः कूलानि काशैरुपशोभितानि ॥ ५२ ॥
वनप्रचण्डा मधुपानशौण्डाः प्रियान्विताः षट्चरणाः प्रहृष्टाः ॥
वनेषु मत्ताः पवनानुयात्रां कुर्वन्ति पद्मासनरेणुगौराः ॥ ५३ ॥
जलं प्रसन्नं कुमुदं प्रभासं [2]क्रौञ्चस्वनः शालि[3]वनं विपक्वम् ॥
मृदुश्च वायुर्विमलश्च चन्द्रः शंसन्ति वर्षव्यपनीतकालम् ॥ ५४ ॥
मीनोपसंदर्शितमेखलानां नदीवधूनां गतयोऽद्य मन्दाः ॥
कान्तोपभुक्तालसगामिनीनां प्रभातकालेष्विव कामिनीनाम् ॥ ५५ ॥
सचक्रवाकानि सशैवलानि काशैर्दुकूलैरिव संवृतानि ॥
सपत्रलेखानि सरोचनानि वधूमुखानीव [4]नदीमुखानि ॥ ५६ ॥
प्रफुल्लबाणासनचित्रितेषु प्रहृष्टषट्पादनिकूजितेषु ॥
गृहीतचापोद्यत[5]चण्डदण्डः [6]प्रचण्डचारोद्य वनेषु कामः ॥ ५७ ॥
लोकं सुवृष्ट्या परितोषयित्वा नदीस्तटाकानि च पूरयित्वा ॥
निष्पन्नसस्यां वसुधां च कृत्वा त्यक्त्वा नभस्तोयधराः [7]प्रनष्टाः ॥ ५८ ॥
प्रसन्नसलिलाः सौम्य कुररीभिर्विनादिताः ॥ चक्रवाकगणाकीर्णा विभान्ति सलिलाशयाः ॥ ५९॥
[8]असनाः सप्तपर्णाश्च कोविदाराश्च पुष्पिताः ॥ दृश्यन्ते बन्धुजीवाश्च श्यामाश्च गिरिसानुषु ॥ ६० ॥
हंससारसचक्राह्वैः कुररैश्च समन्ततः ॥ पुलिनान्यवकीर्णानि नदीनां पश्य लक्ष्मण ॥ ६१ ॥

मिश्रः । प्रत्यूषकालानिलेन प्रातःकालवायुना संप्रवृद्धः अभिवृद्धः । संमूर्छितः अभिव्याप्तः । गर्गरगोवृषाणां गर्गराणां दधिमथनभाण्डानां गवां वृषाणां च शब्दः । अन्योन्यमापूरयतीव परस्परमभिवर्धयतीव । प्रातःकालिकदधिमथनघोषः वत्सोत्सुकानां गवां पुष्ट्या कामातुराणां वृषाणां च शब्दः गोपालवेणुस्वनैः प्राभातिकवायुभिश्चाभिवृद्धो जायत इत्यर्थः ॥ ५१ ॥ कुसुमैः प्रभासन्त इति कुसुमप्रभासाः तैः । पटप्रकाशैः पटतुल्यैः । काशैः शुभ्रपुष्पदर्भविशेषैः । नदीनां कूलानि तटानीत्युक्त्या स्त्रीणां जघनोपमा सूच्यते ॥ ५२ ॥ वने प्रचण्डाः निरङ्कुशगतयः । मधुपाने शौण्डाः धूर्ताः । पद्मानामसनानां च रेणुभिः गौराः । षट्चरणाः भृङ्गाः । वनेषु पवनानुयात्रां वातानुगमनं । कुर्वन्ति परिमलानुसारादिति भावः ॥ ५३ ॥ प्रभासत इति प्रभासं । पचाद्यच् । विकस्वरमित्यर्थः । वर्षव्यपनीतकालं वर्षात्ययकालं । शरत्कालमिति यावत् ॥ ५४ ॥ कामिनीनां वारस्त्रीणामित्यर्थः ॥ ५५ ॥ चक्रवाकशैवलकाशाः रोचनापत्रलेखावकुण्ठनदुकूलस्थानीयाः ॥ ५६ ॥ बाणाः बाणवृक्षाः । असनाः सर्जकाः । गृहीतचापेन उद्यतः प्रयुक्तः चण्डदण्डः तीक्ष्णदण्डनं येन स तथा । यद्वा गृहीतचापश्चासौ उद्यतचण्डदण्डश्च । दण्डः शरविशेषः । "दण्डादयः काण्डभेदाः स्युः" इति हलायुधः । प्रचण्डचारः उग्रसंचारः ॥ ५७ ॥ लोकं जनं ॥५८॥ कुररीभिः क्रौञ्चीभिः । सलिलाशयाः सरांसि ॥ ५९ ॥ बन्धुजीवाः श्यामाश्च लताविशेषाः ॥ ६०—६१ ॥

संमूर्छितः समूर्जितः । गर्गरः हस्तिहस्तः । तस्यगोवृषाणांचशब्दः । गर्गरशब्दस्यहस्तिहस्तार्थकत्वंतुकर्मनिर्णयटीकारीत्याज्ञेयं । मीनभेदोवा । " गर्गरोमीनभेदेस्यात् " इतिविश्वः ॥ ५१ ॥ **स०** मीनाएवउपसंदर्शितामेखलायासांतासां । शरत्कालएवमीनदर्शनं स्वच्छत्वादुदकस्य ॥ कान्तोपभुक्ताश्चताअलसगामिन्यश्च । यद्वा भावेक्तः । तेनालसगामिन्यः ॥ ५५ ॥ **ति०** प्रचण्ड-

[पा०] १ ख. ग. ङ. छ. झ. ट. कुसुमप्रहासं. च. ज. कुसुमं. २ क. ग. घ. च.—झ. ट. क्रौञ्चस्वनं. ३ क. वनंच पक्वं. ४ क. सरोमुखानि. ५ घ. छ. झ. ट. दण्डचण्डः. ६ ङ. छ. झ. ञ. ट. प्रचण्डचापोद्य. ७ ग. प्रयाताः. ८ असनाः सप्तपर्णाश्चेत्यादीनांचतुर्णांश्लोकानांपौर्वापर्यं. छ. झ. ञ. ट. पाठेपुदृश्यते.

अन्योन्यबद्धवैराणां जिगीषूणां नृपात्मज ॥ उद्योगसमयः सौम्य पार्थिवानामुपस्थितः ॥ ६२ ॥
इयं सा प्रथमा यात्रा पार्थिवानां नृपात्मज ॥ न च पश्यामि सुग्रीव[1]मुद्योगं वा तथाविधम् ॥ ६३ ॥
चत्वारो वार्षिका मासा गता वर्षशतोपमाः ॥ मम शोका[2]भिभूतस्य सौ[3]म्य सीतामपश्यतः ॥ ६४ ॥
चक्रवाकीव भर्तारं पृष्ठतोनुगता वनम् ॥ विषमं दण्डकारण्यमुद्यानमिव [4]याऽऽगता ॥ ६५ ॥
प्रियाविहीने दुःखार्ते हृतराज्ये विवासिते ॥ कृपां न कुरुते राजा सुग्रीवो मयि लक्ष्मण ॥ ६६ ॥
अनाथो हृतराज्योऽयं रावणेन च धर्षितः ॥ दीनो दूरगृहः कामी मां चैव शरणं गतः ॥ ६७ ॥
इत्येतैः कारणैः सौम्य सुग्रीवस्य दुरात्मनः ॥ अहं वानरराजस्य परिभूतः परन्तप ॥ ६८ ॥
स कालं परिसंख्याय सीतायाः परिमार्गणे ॥ कृतार्थः समयं कृत्वा दुर्मतिर्नावबुध्यते ॥ ६९ ॥
[5]त्वं प्रविश्य च किष्किन्धां ब्रूहि वानरपुङ्गवम् ॥ मूर्खं ग्रा[6]म्यसुखे सक्तं सुग्रीवं वचनान्मम ॥ ७० ॥
अर्थिना[7]मुपसन्नानां पूर्वं चाप्युपकारिणाम् ॥ आशां संश्रुत्य यो हन्ति स लोके पुरुषाधमः ॥ ७१ ॥
शुभं वा यदि वा पापं [8]यो हि वाक्यमुदीरितम् ॥ सत्येन परिगृह्णाति स[9] वीरः पुरुषोत्तमः ॥ ७२ ॥
कृतार्था ह्यकृतार्थानां मित्राणां न भवन्ति ये ॥ तान्मृतानपि क्रव्यादाः कृतघ्नान्नोपभुञ्जते ॥ ७३ ॥
नूनं काञ्चनपृष्ठस्य विकृष्टस्य मया रणे ॥ द्रष्टुमिच्छति चापस्य रूपं विद्युद्गणोपमम् ॥ ७४ ॥
घोरं ज्यातलनिर्घोषं क्रुद्धस्य मम संयुगे ॥ निर्घोषमिव वज्रस्य पुनः संश्रोतुमि[10]च्छति ॥ ७५ ॥
काममेवंगतेप्यस्य परिज्ञाते पराक्रमे ॥ त्वत्सहायस्य मे वीर न चिन्ता स्यान्नृपात्मज ॥ ७६ ॥

हे नृपात्मज जिगीषूणां पार्थिवानामित्यन्वयः ॥ ६२ ॥ यात्रा उपस्थितेतिशेषः ॥ ६३ ॥ चत्वारः आषाढाद्याः । केचिदाहुः श्रावणाद्या इति । " पूर्वोयं वार्षिकोमासः श्रावणः सलिलागमः " इत्युपक्रमोक्तेः । आश्वयुजकार्तिकयोर्वर्षानुवृत्त्या वार्षिकत्वं । " कार्तिके समनुप्राप्ते त्वं रावणवधे यत " इति पूर्वोक्तवचनेतु कार्तिके समनुप्राप्त इत्यस्य समाप्तेइत्यर्थइत्याहुः ॥ ६४—६७ ॥ सुग्रीवस्य परिभूत इति " क्तस्य च वर्तमाने " इति षष्ठी । कृपां न कुरुत इत्यादिकं सुग्रीवाभिमानमनुसृत्योक्तं ॥ ६८—६९ ॥ त्वं प्रविश्य चेत्यादि ॥ यः उदीरितं वाक्यं सत्येन परिगृह्णाति सत्यत्वेन स्वीकरोति । यथोक्तमनुतिष्ठतीत्यर्थः । मित्राणां न भवन्ति मित्राणामुपकाराय न भवन्तीत्यर्थः । अस्य श्लोकस्य अन्ते इतिकरणं द्रष्टव्यं । इति सुग्रीवं ब्रूहीतिपूर्वेणसंबन्धः ॥ ७०—७४ ॥ घोरमिति ॥ निर्घोषमिव वज्रस्य पुनः संश्रोतुमिच्छतीति पाठः ॥ ७५ ॥ वीर नृपात्मज । त्वत्सहायस्य मे एवंगते सालगिरिभूदलनादिषु इत्थमप्रतिहते पराक्रमे कामं परिज्ञातेसत्यपि अस्य सुग्रीवस्य चिन्ता समयव्यतिक्रमे मामपि हनिष्यतीति विचारः

श्वापोयस्यसः । इदंहेतुगर्भं ॥ ५७ ॥ चत्वारइति । यद्यपिचतुर्थोमासोविद्यतएवतथापितत्रोद्योगाभावेनतस्यापिगतप्रायत्वाद्गता इत्युक्तिः ॥६४॥ **ति०** कृपायाअकरणेहेतुमुन्नयति—**अनाथइति** । दूरग्रहइतिपाठे दूरवर्तिस्त्रीविषयोग्रहोरावणोऽभिनिवेशोवा यस्येत्यर्थः । **शि०** ननुस्वयंसमर्थत्वात्सुग्रीवापेक्षाकिमर्थंक्रियतइत्यतआह—अनाथइति । रावणेन रावणसदृशेनवालिना धर्षितः । अतएव अनाथः रक्षकरहितः । अतएवदीनः कामी अयंसुग्रीवः मांशरणंगतइत्येतैः कारणैः वानरराजस्यसुग्रीवस्य सुग्रीवेणपरिभूतः वशीकृतःअहमस्मीतिशेषः । **स०** दूरगृहः दूरेअयोध्यायांगृहंयस्य ॥ ६७ ॥ **ति०** वानरराजस्य वानरराजेन । शेषेषष्ठी ॥ ६८ ॥ **ति०** उपपन्नानां बलवीर्यादियुक्तानां । आशां अभिमतार्थविषयां । संश्रुत्य प्रतिज्ञाय ॥ ७१ ॥ **स०** वालिसंहारात्पूर्वमेकदाज्यातलशब्दश्रवणात्पुनरित्युक्तं । श्रोतुमिच्छसीत्यतःपरंइतिशब्दस्याध्याहृतस्य इतिवानरपुङ्गवंब्रूहीत्यन्वयः ॥ ७५ ॥ **स०** नन्वेवंसुग्रीवहननेकथंत्वत्कार्यनिष्पत्तिरितिलक्ष्मणशङ्कांपरिहरति—**काममिति** । एवं पूर्वोक्तप्रकारेण । मत्कोपेनसुग्रीवे गतेपि नष्टेपि । अस्यमे कामंयथातथा त्वयाज्ञातेसति । तत्रापित्वत्सहायस्यमेचिन्ताआगामिकार्येनस्यात् । यद्वा त्वत्सहायस्यमे

[पा०] १ छ. झ. ञ. ट. मुद्योगंच. २ क. ग.—ट. शोकाभितप्तस्य. ३ छ. झ. ट. तथा. ४ क. ङ.—ट. चाङ्गना. घ. ज. चागता. ५ क. ङ.—ट. सकिष्किन्धांप्रविश्यत्वं. ग. किष्किन्धांसंप्रविश्यत्वं. ६ क. ग्राम्यसुखैर्युक्तं. ७ झ. मुपपन्नानां. ८ क. ख. ज. येनवाक्यं. ९ क. ज. सलोके. १० ङ.—ट. मिच्छसि.

यदर्थमयमारम्भः कृतः परपुरञ्जय ॥ समयं नाभिजानाति कृतार्थः प्लवगेश्वरः ॥ ७७ ॥
वर्षासमयकालं तु प्रतिज्ञाय हरीश्वरः ॥ व्यतीतांश्चतुरो मासान्विहरन्नावबुध्यते ॥ ७८ ॥
सामात्यपरिषत्क्रीडन्पानमेवोपसेवते ॥ शोकदीनेषु नास्मासु सुग्रीवः कुरुते दयाम् ॥ ७९ ॥
उच्यतां गच्छ सुग्रीवस्त्वया वत्स महाबल ॥ मम रोषस्य यद्रूपं ब्रूयाश्चैनमिदं वचः ॥ ८० ॥
न च संकुचितः पन्था येन वाली हतो गतः ॥ समये तिष्ठ सुग्रीव मा वालिपथमन्वगाः ॥ ८१ ॥
एक एव रणे वाली शरेण निहतो मया ॥ त्वां तु सत्यादतिक्रान्तं हनिष्यामि सबान्धवम् ॥ ८२ ॥
तदेवं विहिते कार्ये यद्धितं पुरुषर्षभ ॥ तत्तद्ब्रूहि नरश्रेष्ठ त्वर कालव्यतिक्रमः ॥ ८३ ॥

कुरुष्व सत्यं मयि वानरेश्वर प्रतिश्रुतं धर्ममवेक्ष्य शाश्वतम् ॥
मा वालिनं प्रेत्य गतो यमक्षयं त्वमद्य पश्ये मम चोदितैः शरैः ॥ ८४ ॥
स पूर्वजं तीव्रविवृद्धकोपं लालप्यमानं प्रसमीक्ष्य दीनम् ॥
चकार तीव्रां मतिमुग्रतेजा हरीश्वरे मानववंशनाथः ॥ ८५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे त्रिंशः सर्गः ॥ ३० ॥

मा भूदित्यर्थः ॥ ७६ ॥ अयमारम्भः सख्यकरणवालिनिरसनरूपः । यदर्थं यस्मै सीतान्वेषणप्रयोजनाय कृतः । समयं तद्विषयसंकेतं । प्लवगेश्वरो नाभिजानातीति संबन्धः ॥ ७७ ॥ वर्षासमयकालं वर्षा एव समयकालः संकेतकालः तं । वर्षाशब्देन चत्वारो मासा उपलक्ष्यन्ते ॥ ७८ ॥ सामात्यपरिषत् सामात्यबान्धवः ॥ ७९ ॥ मम रोषस्य यद्रूपं तत्सुग्रीव उच्यतां । एनमिदं वक्ष्यमाणं वचश्च ब्रूयाः ॥ ८० ॥ हतो वाली येन पथा गतः स पन्थाः । परलोक इत्यर्थः । न संकुचितः न नष्ट इत्यर्थः । समये मर्यादायां तिष्ठ । वालिपथं वालिगतं मार्गं ॥ ८१—८२ ॥ कार्ये एवं विहिते एवमवस्थिते सति । यद्धितं तद्ब्रूहि । कालव्यतिक्रमः माभूदिति शेषः । अतः त्वर त्वरस्वेतिसंबन्धः ॥ ८३ ॥ उक्तमर्थं पुनः संक्षेपेण सर्गान्ते दर्शयति—कुरुष्वेति ॥ मयि विषये प्रतिश्रुतं सत्यं कुरु । शाश्वतं धर्ममवेक्ष्य प्रतिश्रुतकरणमक्षयो धर्म इत्यवेक्ष्य ॥ ८४ ॥ सः लक्ष्मणः । हरीश्वरे सुग्रीवे । तीव्रां मतिं निग्रहबुद्धिमित्यर्थः । लालप्यमानं प्रलपन्तं ॥ ८५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रिंशः सर्गः ॥ ३० ॥

पराक्रमेअस्यसुग्रीवस्यएवंगतेकालेपरिज्ञातेपिचिन्तानस्यादितिकामं आश्चर्यं । **तीο** वीर नृपात्मज त्वत्सहायस्यमे एवंगते सालगिरिभूविदलनादिष्वित्थमप्रतिहतेपराक्रमे । कामंपरिज्ञातेसत्यपि अस्यसुग्रीवस्यचिन्तानस्यात् । समयव्यतिक्रमेपिहनिष्यतीतिविचारोनाभूदित्यर्थः । यद्वा सुग्रीवव्यामोहातिशयंप्रतिविस्मयवचनमेतत् । एवंगते त्वत्सहायस्यमेपराक्रमेकामंपरिज्ञातेपि अस्यसुग्रीवस्यचिन्ता मयिबुद्धिर्नस्यात् नभवेत् । अहोविस्मयइत्यर्थः ॥ ७६ ॥ **सο** चतुरोमासान् व्यतीतान्तत्प्रायान् । कार्तिकस्यभोक्ष्यमाणत्वेनाल्पावशिष्टत्वात् ॥ **शिο** वर्षासमयकालं वर्षस्य वृष्टिसमयस्य आसमयःसम्यग्गमनंयस्मिन् तंकालं हरीश्वरः प्रतिज्ञाय विहरन्सन् व्यतीतांश्चतुरोमासान्नावबुध्यते ॥ ७८ ॥ **तिο** प्रेतगतः प्रेतत्वंप्राप्तः ॥ ८४ ॥ इतित्रिंशःसर्गः ॥ ३० ॥

[**पाο**] १ क. सहरीश्वरः. २ झ. वर्षाःसमय. क. ग. घ. वर्षसमय. ३ ङ. छ. झ. ट. वीर. ४ क. च. ज. ञ. वधिष्यामि. ५ झ. ट. यदेवं. ६ ङ. च. ज. चिन्तितं. ७ च. झ. ञ. ट. ममवा. ८ ख.—छ. झ. ट. प्रेतगतो. ९ क. ङ.—ञ. यमक्षये. १० क. पश्येर्निहतोमयाशरैः. ११ झ. ञ. ट. चोदितः. १२ क. घ.—ट. वंशवर्धनः.

एकत्रिंशः सर्गः ॥ ३१ ॥

रामेण सुग्रीवेआपातजकोपोदितस्वपरुषभाषणश्रवणमात्रेणसुग्रीववधंप्रतिजानमानंलक्ष्मणंप्रति सान्त्वोक्त्यातत्कोपापनोदनपूर्वकं साम्नैवसुग्रीवेव्यवहारचोदना ॥ १ ॥ सशरचापपाणिनालक्ष्मणेन कोपाटोपेनकपिकुलभीषणपूर्वकमङ्गदंप्रति सुग्रीवेस्वागमननिवेदनचोदना ॥ २ ॥ साभिवादनमङ्गदेन लक्ष्मणागमननिवेदनेऽपिमदनमदपरवशतयातदबुद्धवतिसुग्रीवे लक्ष्मणसंत्रस्तकपिकुलकिलकिलाकोलाहलश्रवणसमुद्बुद्धेसति तंप्रति मन्त्रिवराभ्यां लक्ष्मणागमननिवेदनपूर्वकंतत्प्रसादनचोदना ॥ ३ ॥

स कामिनं दीनमदीनसत्त्वं शोकाभिपन्नं [1]समुदीर्णकोपम् ॥
नरेन्द्रसूनुर्नरदेवपुत्रं रामानुजः पूर्वजमित्युवाच ॥ १ ॥
न वानरः स्थास्यति साधुवृत्ते न [2]मंस्यते [3]कर्मफलानुषङ्गान् ॥
न भोक्ष्यते वानरराज्यलक्ष्मीं तथाहि [4]नाभिक्रमतेऽस्य बुद्धिः ॥ २ ॥
मतिक्षयाद्ग्राम्यसुखेषु सक्तस्तव [5]प्रसादाप्रतिकारबुद्धिः ॥
हतोऽग्रजं पश्यतु [6]वीरं तस्य न राज्यमेवंविगुणस्य देयम् ॥ ३ ॥
न धारये कोपमुदीर्णवेगं निहन्मि सुग्रीवमसत्यमद्य ॥
हरिप्रवीरैः सह वालिपुत्रो [7]नरेन्द्रपत्न्या विचयं करोतु ॥ ४ ॥
तमात्तबाणासनमुत्पतन्तं निवेदितार्थं रणचण्डकोपम् ॥
उवाच रामः परवीरहन्ता [8]स्ववेक्षितं सानुनयं च वाक्यम् ॥ ५ ॥
न हि वै त्वद्विधो लोके पापमेवं समाचरेत् ॥ [9]पापमार्येण यो हन्ति स वीरः पुरुषोत्तमः ॥ ६ ॥
[10]नेदमद्य त्वया [11]ग्राह्यं साधुवृत्तेन लक्ष्मण ॥ तां प्रीतिमनुवर्तस्व पूर्ववृत्तं च सङ्गतम् ॥ ७ ॥

अथाङ्गदेन लक्ष्मणकोपकथनं सुग्रीवायैकत्रिंशे–स कामिनमिति ॥ कामिनं अधिककामं । अतएव दीनं । तथाप्यदीनसत्त्वं । एतेन वस्तुतः अदीनसत्त्वोपि दैन्यं भावयतीति गम्यते । शोकाभिपन्नं शोकंप्राप्तं । समुदीर्णकोपं अभिवृद्धकोपं । अस्मिञ्श्लोके नरदेवपुत्रमित्यत्र देकारो गायत्र्या एकादशाक्षरं । दशसहस्रश्लोका गताः ॥ १ ॥ साधुवृत्ते साधूनां मित्रसमानसुखदुःखानां सुहृदां वृत्ते आचारे । नस्थास्यति । कर्मफलानुषङ्गान् अग्निसाक्षिकसख्यरूपकर्मणा वालिनिरसनराज्यदारलाभरूपफलानुबन्धान् । नमंस्यते । वानरराज्यलक्ष्मीं न भोक्ष्यते । तथाह्यस्य बुद्धिः नाभिक्रमते अस्मत्प्रयोजनाभिमुख्ये न वर्तत इति योजना ॥ २ ॥ मतिभ्रमात् बुद्धिविपर्यासात् । तव प्रसादाप्रतिकारबुद्धिः प्रसादस्य राज्यप्रदानादिरूपस्य अप्रतिकारबुद्धिः प्रत्युपकारबुद्धिरहितः । अतएव हतःसुग्रीवः अग्रजं वालिनं । पश्यतु । एवंविगुणस्य तस्य राज्यं नदेयं । वालिनमिति क्वचित्पाठः । तत्र वृत्तमुपजातिः ॥ ३ ॥ नधारये अकार्यकरं धर्तुं न क्षम इत्यर्थः । असत्यं सत्यवचनरहितं । नरेन्द्रपत्न्याः सीतायाः । विचयं अन्वेषणं ॥ ४ ॥ मम अहृदयवचनमात्रेण अयं तं हन्यादेवेत्यनुतप्तो रामः प्राहस्म । परवीरहन्ता नतुस्वाश्रितहन्ता । स्ववेक्षितं सुष्ठुनिरूपितं ॥ ५ ॥ पापं मित्रहननाध्यवसायरूपं । आर्येण सम्यग्विवेकेन ॥ ६ ॥ इदं मित्रहननाध्यवसायरूपं

स० तव प्रतिकारबुद्धिः प्रत्युपकारबुद्धिः । नेत्यत्राप्यन्वेति । नवर्ततइत्यर्थः । हेवीर एवंगुणस्यत्वया प्रसादाद्राज्यंनदेयं ॥ **ति०** नदेयं दत्तं नानुपालनीयमित्यर्थः ॥ **रामानु०** वीरवालिनमित्यत्रवृत्तभङ्गआर्षः ॥ ३ ॥ **रामानु०** सानुनयं सप्रसादं ॥ **शि०** स्ववीक्षितं स्वेननिश्चितंवाक्यमुवाच । किंच स्ववीक्षितमितिलक्ष्मणविशेषणं । स्वस्मिन्वीक्षितंवीक्षणंयस्येत्यर्थः ॥ ५ ॥

[पा०] १ छ.—ट. समुदीर्णकामं. २ झ. ञ. नमन्यते. ३ क. फलानुषङ्गं. ४ ङ. छ. झ. ट. नातिक्रमते. ५ ग. घ छ. झ. ट. प्रसादात्प्रतिकार. क. च. ज. ञ. प्रसादात्प्रतिपन्नराज्यः. ६ झ. ञ. ट. वीरवालिनं. ७ क. घ. छ.—ट. नरेन्द्रपुत्र्याः. ८ ङ. च. छ. ट. स्ववीक्षितं. ९ ङ. झ. ट. कोपमार्येण. १० छ. झ. ट. नेदमत्र. ११ घ. कार्यं.

सामोपहितया वाचा रूक्षाणि परिवर्जयन् ॥ वक्तुमर्हसि सुग्रीवं व्यतीतं कालपर्यये ॥ ८ ॥
सोग्रजेनानुशिष्टार्थो यथावत्पुरुषर्षभः ॥ प्रविवेश पुरीं वीरो लक्ष्मणः परवीरहा ॥ ९ ॥
ततः शुभमतिः प्राज्ञो भ्रातुः प्रियहिते रतः ॥ लक्ष्मणः प्रतिसंरब्धो जगाम भवनं कपेः ॥ १० ॥
शक्रबाणासनप्रख्यं धनुः [1]कालान्तकोपमः ॥ प्रगृह्य गिरिशृङ्गाभं मन्दरः सानुमानिव ॥ ११ ॥
यथोक्तकारी वचनमुत्तरं चैव सोत्तरम् ॥ बृहस्पतिसमो बुद्ध्या मत्वा रामानुज[2]स्तथा ॥ १२ ॥
कामक्रोधसमु[3]त्थेन भ्रातुः [4]कोपाग्निना वृतः ॥ प्रभञ्जन [5]इवाप्रीतः प्रययौ लक्ष्मण[6]स्तदा ॥ १३ ॥
सालतालाश्वकर्णांश्च तरसा पातयन्[7]बहून् ॥ पर्यस्यन्गिरि[8]कूटानि द्रुमानन्यांश्च [9]वेगतः ॥ १४ ॥
शिलाश्च शकलीकुर्वन्पद्भ्यां गज इवाशुगः ॥ दूरमेकपदं त्यक्त्वा ययौ कार्यवशाद्द्रुतम् ॥ १५ ॥
तामपश्यद्बलाकीर्णां हरिराजमहापुरीम् ॥ दुर्गामिक्ष्वाकुशार्दूलः किष्किन्धां [10]गिरिसंकटे ॥ १६ ॥
रोषात्प्रस्फुरमाणोष्ठः सुग्रीवं प्रति लक्ष्मणः ॥ ददर्श वानरान्भीमान्[11]किष्किन्धाया बहिश्चरान् ॥ १७ ॥
तं दृष्ट्वा वानराः सर्वे लक्ष्मणं पुरुषर्षभम् ॥ शैलशृङ्गाणि शतशः प्रवृद्धांश्च महीरुहान् ॥
जगृहुः कुञ्जरप्रख्या वानराः पर्वतान्तरे ॥ १८ ॥
तान्गृहीत[12]प्रहरणान्हरीन्दृष्ट्वा तु लक्ष्मणः ॥ बभूव [13]द्विगुणं क्रुद्धो बह्विन्धन इवानलः ॥ १९ ॥
[14]तं ते भयपरीताङ्गाः [15]क्रुद्धं दृष्ट्वा प्लवङ्गमाः ॥ काल[16]मृत्युयुगान्ताभं शतशो विद्रुता दिशः ॥ २० ॥
ततः सुग्रीवभवनं प्रविश्य हरिपुङ्गवाः ॥ क्रोधमागमनं चैव लक्ष्मणस्य न्यवेदयन् ॥ २१ ॥
तारया सहितः कामी सक्तः [17]कपिवृषो रहः ॥ न तेषां [18]कपिवीराणां [19]शुश्राव वचनं तदा ॥ २२ ॥
ततः [20]सचिवसंदिष्टा हरयो रोमहर्षणाः ॥ गिरिकुञ्जरमेघाभा [21]नगर्या निर्ययुस्तदा ॥ २३ ॥

पापं । पूर्ववृत्तं च सङ्गतं पूर्वकृतं सख्यरूपं बान्धवं च ॥ ७ ॥ कालपर्यये कालक्रमेविषये । व्यतीतं व्यतिक्रान्तवन्तं सुग्रीवं । रूक्षाणि परुषाणि । परिवर्जयन् । सामोपहितया सान्त्वयुक्तया वाचा । वक्तुमर्हसि ॥ ८—९ ॥ प्रतिसंरब्धः प्रतिनिवृत्तहननाध्यवसायः ॥ १० ॥ सोग्रजेनेत्यादिश्लोकद्वयोक्तं विस्तरेणाह—शक्रेत्यादिना ॥ धनुः प्रगृह्य सानुमान् पर्वत इवस्थितः ॥ ११ ॥ यथोक्तं रामोक्तमनतिक्रम्य करोतीति यथोक्तकारी लक्ष्मणः । वचनंसुग्रीवं प्रति स्वेन वक्तव्यं वचनं । यथोक्तकारीति विशेषणाद्रामोपदिष्टं वचनमिति सिद्धं । उत्तरं च स्ववचनस्य सुग्रीवेण वक्ष्यमाणमुत्तरं च । सोत्तरं स्वेन वक्ष्यमाणोत्तरसहितं । मत्वा आलोच्य । प्रययावितिसंबन्धः । एकपदं पौरस्त्यपदं । दूरं त्यक्त्वा दूरे क्षिप्त्वा । अनेन द्रुतगमनं सूचितं । द्रुतं गच्छन्हि पुरुषः पुरःपादं दूरे क्षिपति ॥ १२—१५ ॥ गिरिसङ्कटे निबिडगिरिमध्ये । अनेन पूर्वोक्तगुहाशब्दो विवृतः ॥ १६—१७ ॥ वानराः

स० अनुशिष्टः शिक्षितः अर्थोयस्मैसः ॥ ९ ॥ **शि०** सोत्तरं दास्यमानसुग्रीवप्रत्युत्तरसहितं । उत्तरं सुग्रीवप्रत्युत्तरानन्तरकालिकदास्यमानस्वप्रत्युत्तरंवचनं । किंच उत्तरं उत्कृष्टं । सोत्तरं उत्तरत्वसहितंउत्तरमित्यर्थः ॥१२॥ **ति०** एकपदं एकैकपदं ॥ १५ ॥ **ति०** क्रुद्धलक्ष्मणदर्शनेनभीत्या शैलशृङ्गादिग्रहोवानराणां ॥ १८ ॥ **ति०** द्विगुणंक्रुद्धः मांदृष्ट्वेमेप्रणामंत्यक्त्वाप्रहरणंगृह्णन्तीतिकोपद्वैगुण्यं ॥ १९ ॥ **स०** सचिवैः सुग्रीवामात्यैः संदिष्टाः भीषयध्वमित्याज्ञप्ताः ॥ **ति०** सचिवसंदिष्टाः सुग्रीवं बोधयित्वातदनुमत्या लक्ष्मणोस्माभिर्यावत्प्रवेश्यते तावद्धठाल्लक्ष्मणप्रवेशंनिरुन्धानास्तिष्ठत इत्येवंसचिवैःहनुमदादिभिःसंदिष्टाहरयोनगरान्निर्ययुः ॥ २३ ॥

[पा०] १ क. ङ.—ट. कालान्तकोपमं. २ क.—ट. स्तदा. ३ घ. समृद्धेन. ४ घ.—ट. क्रोधाग्निना. ५ क. इवाविष्टः. ६ क. ङ.—ट. स्ततः. ७ ङ. छ. झ. ट. न्बलात्. ८ ग. शृङ्गाणि. ९ क. ख. ग. छ. झ. ञ. ट. वेगितः. १० ग. गिरिगह्वरे. ११ घ. झ. किष्किन्धायां. १२ क. ख. ङ. छ.—ट. प्रहरणान्सर्वान्. १३ ज. परमक्रुद्धः. १४ क. ग. ततोभय. १५ ङ.—ट. क्षुब्धं. १६ ट. मृत्युंसमायान्तं. क. मृत्युमिवायान्तं. १७ छ. झ. ट. कपिवृषस्तदा. ग. कपिवरो. १८ ङ. छ.—ट. कपिसिंहानां. १९ घ. जग्राह. २० ख. सुग्रीवसंदिष्टाः. २१ क. ग. ङ. छ.—ट. नगरान्निर्ययुः.

नखदंष्ट्रायुधा [1]घोराः सर्वे [2]विकृतदर्शनाः ॥ सर्वे [3]शार्दूलदर्पाश्च सर्वे च [4]विकृताननाः ॥ २४ ॥
दशनागबलाः केचित्केचिद्दशगुणोत्तराः ॥ केचिन्नागसहस्रस्य बभूवु[5]स्तुल्यविक्रमाः ॥ २५ ॥
[[6]सन्ति चौघबलाः केचित्केचिद्वायुबलोत्तराः ॥ अप्रमेयबलाः केचित्तत्रासन्हरिपुङ्गवाः ॥ २६ ॥
प्रतिपूर्णमिवाकाशं संछन्नमिव तद्वनम् ॥ तेन वानरसैन्येन सुग्रीवस्य महात्मनः ॥ २७ ॥
ततो द्वाराणि सर्वाणि अङ्गदो राजशासनात् ॥ पर्यधावत दुर्धर्षो नक्षत्राणीव चन्द्रमाः] ॥ २८ ॥
[7]कृत्स्नां हि कपिभिर्व्याप्तां द्रुमहस्तैर्महाबलैः ॥ अपश्यल्लक्ष्मणः क्रुद्धः किष्किन्धां [8]तां दुरासदाम् ॥२९॥
ततस्ते हरयः सर्वे प्राकारपरिघान्तरात् ॥ निष्क्रम्योदग्रसत्त्वास्तु तस्थु[9]राविष्कृतं तदा ॥ ३० ॥
सुग्रीवस्य प्रमादं च पूर्वजं [10]चार्तमात्मवान् ॥ [11]बुद्ध्वा कोपवशं वीरः पुनरेव [12]जगाम सः ॥ ३१ ॥
स दीर्घोष्ण[13]महोच्छ्वासः कोपसंरक्तलोचनः ॥ बभूव नरशार्दूलः सधूम इव पावकः ॥ ३२ ॥
[[14]बाणासनमहावीर्यो लक्ष्मणः परवीरहा ॥ प्रविवेश दुराधर्षां पुरीं सुग्रीवपालिताम् ॥ ३३ ॥
ततो नीलाभ्रसंकाशं तप्तकाञ्चनवेदिकम् ॥ श्रीमद्विमानमासाद्य रमणीयं मनोरमम् ॥
शुश्राव परमस्त्रीणां सोत्कृष्टहसितस्वनम्] ॥ ३४ ॥
बाणशल्यस्फुरज्जिह्वः सायकासनभोगवान् ॥ स्वतेजोविष[15]संघातः पञ्चास्य इव पन्नगः ॥ ३५ ॥
तं दीप्तमिव कालाग्निं नागेन्द्रमिव कोपितम् ॥ समासाद्याङ्गदस्त्रासाद्विषाद[16]मगमद्भृशम् ॥ ३६ ॥
सोऽङ्गदं रोषताम्राक्षः सन्दिदेश महायशाः ॥ [17]सुग्रीवः कथ्यतां वत्स ममागमनमित्युत ॥ ३७ ॥
एष रामानुजः प्राप्तस्त्वत्सकाशमरिन्दमः ॥ भ्रातुर्व्यसनसंतप्तो द्वारि तिष्ठति लक्ष्मणः ॥ ३८ ॥
तस्य [18]वाक्ये यदि रुचिः क्रियतां साधु वानर ॥ इत्युक्त्वा शीघ्रमागच्छ वत्स [19]वाक्यमरिन्दम ॥३९॥
लक्ष्मणस्य वचः श्रुत्वा शोकाविष्टोऽङ्गदोऽब्रवीत् ॥ पितुः समीपमागम्य सौमित्रिरयमागतः ॥४०॥

पूर्वोक्ता बहिश्चराः ॥ १८—२९ ॥ प्राकारपरिघान्तरान्निष्क्रम्य आविष्कृतं प्रकाशं यथा भवति तथा तस्थुः ॥ ३० ॥ आर्तं कामपीडितं ॥ ३१—३४ ॥ बाणशल्यं बाणाग्रमेव स्फुरन्ती जिह्वा यस्य स तथा । सायकासनं धनुः तदेव भोगः फणा तद्वान् बभूवेति पूर्वेणसंबन्धः ॥ ३५—३६ ॥ वत्स अरिन्दमः एष रामानुजः त्वत्सकाशं प्राप्त इति ममागमनं सुग्रीवः कथ्यतां । भ्रातृव्यसनसंतप्तः स लक्ष्मणः द्वारि तिष्ठति । तस्य वाक्ये तव यदि रुचिः तर्हि साधु युक्तं । तत्र तव गमनं वा अत्रैव तस्यानयनं वा क्रियतां । इत्येतद्वाक्यमुक्त्वा शीघ्रमागच्छ इति सोऽङ्गदं सन्दिदेशेति संबन्धः ॥ ३७—३९ ॥ अयमागतमित्यनन्तरमितिकरणं बोध्यं ॥ ४० ॥

स० विवृतदर्शनाः प्रकटीभूताइत्यर्थः । दशगुणोत्तराः शतनागबलाः । नागसहस्रस्यतुल्यवर्चसः सहस्रगजबलाभिव्यञ्जकवर्चोविशेषवन्तइत्यर्थः ॥ २५ ॥ **ति०** प्रमादंच । चाद्वानरप्रतिरोधंच ॥ **शि०** सुग्रीवस्यप्रमादं समीपानागमनानुमितानवधानतां । क्रोधवशं कोपकान्तिं ॥ ३१ ॥ **ति०** स्वतेजोरूपविषेणसंभूतः व्याप्तः ॥ **स०** बाणस्ययच्छल्यं अग्रस्थितमयोमयं तदेवस्फुरन्ती जिह्वायस्य ॥ ३५ ॥ **ति०** विषादमगमत् एतावत्पर्यन्तंरामकार्येनचिन्तितमितिविषादः ॥ ३६ ॥ **ति०** इदमुक्तंममवाक्यंतस्मै इति उक्तप्रकारेण । उक्त्वा सवानरःसुग्रीवः साधु साधुकारीयथाभवतितथाक्रियतां । अनन्तरंतस्यास्मासुयदिरुचिर्भवति तदा

[पा०] १ क. ङ.—ज. ञ. वीराःसर्वे. झ. ट. सर्वेवीराः. २ ठ. विवृतदर्शनाः. ३ ङ. छ.—ट. शार्दूलदंष्ट्राश्च. ४ छ. झ. विवृतदर्शनाः. ५ ङ.च. ज. झ. ञ. स्तुल्यवर्चसः. ६ इदंश्लोकत्रयं ख. घ. ज. पाठेषुदृश्यते. ७ छ. झ. ञ. ट. ततस्तैः कपिभिः. ८ क. सुदुरासदां. ९ ङ. च. राविष्कृतास्तदा. क. ख. राविष्कृतायुधाः. १० छ. झ. ञ. ट. पूर्वजस्यार्थमात्मवान्. ख. ङ. च. ज. पूर्वजस्योक्तमात्मवान्. ११ ङ.—ट. दृष्ट्वाक्रोधवशं. १२ ग. जगामह. १३ क. ग. महाश्वासः. १४ इदं श्लोकद्वयं क. पाठेदृश्यते. १५ ज.—ट. संभूतः. १६ ङ.—ट. मगमत्परं. १७ च. सुग्रीवेकथ्यतां. १८ क. ग. घ. झ. वाक्यंयदि. १९ क. ङ. छ. ज. ञ. ट. वाक्यमिदंमम.

अथाङ्गदस्तस्य वचो निशम्य संभ्रान्तभावः परिदीनवक्त्रः ॥
निपत्य तूर्णं नृपतेस्तरस्वी ततः कुमारश्चरणौ ववन्दे ॥ ४१ ॥
संगृह्य पादौ पितुरग्र्यतेजा जग्राह मातुः पुनरेव पादौ ॥
पादौ रुमायाश्च निपीडयित्वा निवेदयामास ततस्तमर्थम् ॥ ४२ ॥
स निद्रामदसंवीतो वानरो न विबुद्धवान् ॥ बभूव मदमत्तश्च मदनेन च मोहितः ॥ ४३ ॥
ततः किलकिलां चक्रुर्लक्ष्मणं प्रेक्ष्य वानराः ॥ प्रसादयन्तस्तं क्रुद्धं भयमोहितचेतसः ॥ ४४ ॥
ते महौघनिभं दृष्ट्वा वज्राशनिसमस्वनम् ॥ सिंहनादं समं चक्रुर्लक्ष्मणस्य समीपतः ॥ ४५ ॥
तेन शब्देन महता प्रत्यबुध्यत वानरः ॥ मदविह्वलताम्राक्षो व्याकुलस्रग्विभूषणः ॥ ४६ ॥
अथाङ्गदवचः श्रुत्वा तेनैव च समागतौ ॥ मन्त्रिणौ वानरेन्द्रस्य संमतौ दारदर्शिनौ ॥ ४७ ॥
प्लक्षश्चैव प्रभावश्च मन्त्रिणावर्थधर्मयोः ॥ वक्तुमुच्चावचं प्राप्तं लक्ष्मणं तौ शशंसतुः ॥ ४८ ॥
प्रसादयित्वा सुग्रीवं वचनैः सामनिश्चितैः ॥ आसीनं पर्युपासीनौ यथा शक्रं मरुत्पतिम् ॥ ४९ ॥
सत्यसन्धौ महाभागौ भ्रातरौ रामलक्ष्मणौ ॥ वयस्यभावं संप्राप्तौ राज्यार्हौ राज्यदायिनौ ॥ ५० ॥
तयोरेको धनुष्पाणिर्द्वारि तिष्ठति लक्ष्मणः ॥ यस्य भीताः प्रवेपन्तो नादान्मुञ्चन्ति वानराः ॥ ५१ ॥
स एष राघवभ्राता लक्ष्मणो वाक्यसारथिः ॥ व्यवसायरथः प्राप्तस्तस्य रामस्य शासनात् ॥ ५२ ॥

उक्तं विस्तृणाति—अथेति ॥ ४१ ॥ मातुः पुनरेवेत्यनेन मातुः पृथग्वन्दनमुच्यते ॥ ४२ ॥ मदमत्तः पानकृतमदमत्तः ॥ ४३ ॥ किलकिलेति वानराणां शब्द उच्यते ॥ ४४ ॥ महौघनिभं महाप्रवाहतुल्यं लक्ष्मणं । समं युगपत् ॥ ४५—४६ ॥ तेनैव समागतौ तदाह्वानेन समागतौ । मन्त्रिणौ प्रशस्तमन्त्रौ । अर्थधर्मयोर्विषये उच्चावचं वक्तुं प्राप्तं लक्ष्मणं शशंसतुः ॥४७—४८॥ सामनिश्चितैः सान्त्वविषये निश्चितैः । ऊचतुरिति शेषः ॥ ४९ ॥ यस्य भीतः यस्मात् भीताः ॥ ५०—५१ ॥ वाक्यसारथिः रामवाक्यप्रेरित इत्यर्थः । कथमिदं दुर्गमेकः प्रविष्टवानित्यत्राह—व्यवसायरथ इति । प्रतिपक्षनिरासाध्यवसायरथः

तस्यवाक्यंश्रुत्वा शीघ्रमागच्छ ॥ ३९ ॥ **ति०** लक्ष्मणस्येतिश्लोकेनसंक्षिप्योक्तस्यार्थस्यविस्तरः—**अथेति** । संभ्रान्तभावः संभ्रान्तचित्तः । परदीनवक्त्रः परंअतिशयेनदीनंवक्त्रंयस्यसः । परिदीनेतिपाठान्तरं । निर्गत्य लक्ष्मणसंनिहितदेशात्परावृत्त्येत्यर्थः । पूर्वंनृपतेः ततोरुमायाः । इदमुपलक्षणं । तारायाश्चरणावित्यन्वयः ॥ ४१ ॥ **रामानु०** जग्राहमातुःपुनरेवपादावित्यत्रपुनश्शब्दः पितृनमस्कारापेक्षयाप्रयुक्तः ॥ **स०** कार्यस्यात्यावश्यकताद्योतनाय पुनःप्रणमति—**संगृह्येति** । मातुः तारायाः । तदर्थं लक्ष्मणागमनरूपं ॥ ४२ ॥ **शि०** किलकिलां दीनतासूचकस्वजातीयशब्दं ॥ ४४ ॥ **स०** महौघनिभं महाप्रवाहवदागच्छन्तं लक्ष्मणं दृष्ट्वा समं युगपत् । चक्रुः । सुग्रीवबोधनार्थमितिशेषः ॥ ४५ ॥ **ती०** दारदर्शिनौ अन्तःपुरप्रवेशयोग्यौ ॥ **ति०** संमतौचतावुदारदर्शनौच संमतोदारदर्शनौ । संमतं उदारं उत्कृष्टंदर्शनंययोस्तौ । तेनाङ्गदेन सहागतौमन्त्रिणौचदृष्ट्वा प्लक्षप्रभावसंज्ञकौमन्त्रिणौ अर्थधर्मयोर्विषये उच्चावचं उत्कृष्टापकृष्टं धर्मं वक्तुंप्राप्तंलक्ष्मणंशशंसतुः ॥ ४७ ॥ **रामानु०** । भवसत्यप्रतिश्रवइत्यन्तमेकंवाक्यं । अत्रशशंसतुरित्यनुषज्यते । **ति०** सार्थनिश्चितैः अर्थनिश्चयसहितैः वचनैः प्रसादयित्वाशशंसतुरित्यन्वयः ॥४९॥ **ति०** राज्यार्हौ त्रिलोकीराज्यार्हौ । राज्यदायिनौ तवेतिशेषः । मनुष्यभावंप्राप्तावित्यनेन वस्तुतोनमनुष्यावितिसूचितं ॥ ५० ॥ **रामानु०** यस्यभीताः यस्माद्भीताः ॥ ५१ ॥ इत्येकत्रिंशःसर्गः ॥ ३१ ॥

[**पा०**] १ छ. झ. ट. स्तस्यसुतीव्रवाचा. २ ङ. छ. झ. ञ. ट. निर्गत्यपूर्वं. घ. च. ज. निपत्यपूर्वं. क. निर्गत्यतूर्णं. ३ घ.—ट. ततोरुमायाश्चरणौ. ४ ङ. ज. ञ. पुनरुग्रतेजाः. ५ ज. झ. ततस्तदर्थं. ६ ख. घ. झ. ट. निद्राक्लान्तसंवीतो. ग. निद्राग्लानिसंवीतो. च. ज. निद्रयासमुसंवीतो. ञ. निद्रायाससंवीतो. ७ ङ. च. ज. ञ. नावबुद्धवान्. ८ ग.—ज. किलिकिलां. ९ क. लक्ष्मणंसमुपस्थितं. १० घ. मत्तेभनिभं. क. महेन्द्रनिभं. ११ झ. संमतोदारदर्शिनौ. ख. ग. घ. ज. संमतौदूरदर्शिनौ. १२ छ. झ. यक्षश्चैव. १३ क. ग. ङ. च. ज. झ. ञ. प्रभासश्च. १४ ङ. च. ज.—ट. सार्थनिश्चितैः. १५ आसीनमित्यर्धात्पूर्वं क. पाठे. सुग्रीवसचिवाःसर्वेमन्त्रार्थेसमुपाविशन् । विनदश्चसुषेणश्चनीलोथनलएवच । अङ्गदोवालिसूनुश्चहनुमांश्चैवबुद्धिमान् । एतेसर्वेमहात्मानःसुग्रीवंवानरोत्तमाः । इतिश्लोकद्वयंदृश्यते. १६ क. पर्युपासीनाः. १७ छ. झ. ट. मनुष्यभावं.

अयं च [1]दयितो राजंस्तारायास्तनयोऽङ्गदः ॥ लक्ष्मणेन सकाशं ते प्रेषितस्त्वरयाऽनघ ॥ ५३ ॥
सोयं [2]रोषपरीताक्षो द्वारि तिष्ठति वीर्यवान् ॥ वानरान्वानरपते चक्षुषा निर्दहन्निव ॥ ५४ ॥
तस्य मूर्ध्ना [3]प्रणम्य त्वं सपुत्रः [4]सह बन्धुभिः ॥ गच्छ शीघ्रं [5]महाराज [6]रोषो ह्यस्य निवर्त्यताम् ॥ ५५ ॥
[7]यदाह रामो [8]धर्मात्मा तत्कुरुष्व समाहितः ॥ राजंस्तिष्ठ स्वसमये भव सत्यप्रतिश्रवः ॥ ५६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

द्वात्रिंशः सर्गः ॥ ३२ ॥

अङ्गदादिमुखतोलक्ष्मणकोपश्रवणेनत्रस्ततरंसुग्रीवंप्रतिहनुमता तत्कोपस्यसांकेतिककालातिक्रमहेतुकरामप्रणयकोपाधीन-त्वकथनेन सप्रणामंलक्ष्मणप्रसादनचोदना ॥ १ ॥

अङ्गदस्य वचः श्रुत्वा सुग्रीवः सचिवैः सह ॥ लक्ष्मणं कुपितं श्रुत्वा मुमोचासनमात्मवान् ॥ १ ॥
[9]सचिवानब्रवीद्वाक्यं निश्चित्य गुरुलाघवम् ॥ [10]मंत्रज्ञान्मन्त्रकुशलो मन्त्रेषु [11]परिनिष्ठितान् ॥ २ ॥
न मे दुर्व्याहृतं किंचिन्नापि मे दुरनुष्ठितम् ॥ लक्ष्मणो राघवभ्राता क्रुद्धः किमिति चिन्तये ॥ ३ ॥
असुहृद्भिर्ममामित्रैर्नित्यमन्तरदर्शिभिः ॥ [12]मम दोषानसंभूताञ्श्रावितो राघवानुजः ॥ ४ ॥
अत्र [13]तावद्यथाबुद्धि सर्वैरेव यथाविधि ॥ भावस्य [14]निश्चयस्तावद्विज्ञेयो निपुणं शनैः ॥ ५ ॥
न खल्वस्ति मम त्रासो लक्ष्मणान्नापि राघवात् ॥ मित्रं त्वस्थानकुपितं जनयत्येव संभ्रमम् ॥ ६ ॥

॥ ५२—५४ ॥ तस्य तस्मै ॥ ५५ ॥ स्वसमये स्वमर्यादायां । सत्यप्रतिश्रवः सत्यप्रतिज्ञो भव ॥ ५६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्यान एकत्रिंशः सर्गः ॥ ३१ ॥

अथ हनुमता हितोपदेशो द्वात्रिंशे—अङ्गदस्येत्यादि ॥ अङ्गदस्य प्राधान्यादङ्गदस्य वचः श्रुत्वेत्युक्तं । आसनं मुमोच । भयेनासनादुदतिष्ठदित्यर्थः ॥१॥ मन्त्रकुशलः मन्त्रप्रयोगकुशलः ॥ २ ॥ दुर्व्याहृतं परुषभाषणं । दुरनुष्ठितं अपकारः । किं किमर्थं ॥३॥ असुहृद्भिः अशोभनहृदयैः ॥ ४ ॥ तावत् प्रथमं । यथाविधि यथाक्रमं । भावस्य चेष्टायाः । निश्चयः अध्यवसायः ॥ ५ ॥ निजभयकृतमासनचलनमपह्नुते—न खल्वि-

---

शि० गुरुलाघवं गुरुत्वलघुत्वे रामेगुरुत्वंस्वस्मिंल्लघुत्वंचेत्यर्थः । निश्चित्य मन्त्रेषुपरिनिष्ठितः तद्विषयकातिज्ञानवान् ॥ २ ॥ **ति०** दुर्व्याहृतं अनुचितवचनं उक्तं । दुरनुष्ठितं अनुचितंकृत्यं । कृतमितिशेषः ॥ ३ ॥ **ति०** कोपकारणमुन्नयति—**असुहृद्भिरिति** असुहृदः शत्रवः । अमित्राः अपकारिणः । अन्तरं छिद्रं । असंभूतान् अनुत्पन्नान् । श्रावितः नूनमितिशेषः ॥ **स०** असुहृद्भिः प्राणहरैः । अमित्रैः अरिभिः ॥ ४ ॥ **ति०** अत्र लक्ष्मणकोपविषये । यथा तत्वात्मिकाबुद्धिः ज्ञानंयस्मिन्निश्चयेसः । भावस्य कोपस्य । निश्चयः तात्विककोपनिमित्तस्यनिश्चयः । विज्ञेयः कर्तव्यः । **शि०** लक्ष्मणस्यनिश्चयोऽभिप्रायः यथाबुद्धि स्वस्वबुद्ध्यनुरूपं निपुणंयथाभवतितथा सर्वैर्भवद्भिः तावत् मत्संगमात्पूर्वमेव । शनैर्विज्ञेयः ॥ ५ ॥ **ति०** त्रासः मदपराधमूलइतिशेषः । कुतस्तर्हित्रासोतआह—**मित्रमिति** । अस्थाने अकाण्डे । वास्तवापराधाभावेपिरिपुकृतमिथ्योपजापेनकुपितं संजातकोपंमित्रं । संभ्रमं भयं । जनयत्येव ॥ **शि०** राघवात् रामात् । न ममत्रासः । अतएव लक्ष्मणादपिनत्रासः । अस्थानकुपितं अपराधाभावेन अनवसरकोपविशिष्टंमित्रंतु । संभ्रमं भयंजनयत्येव । एतेनायंमित्रद्रोहीतिलोकोक्तेर्बिभेमीतिसूचितं । नत्रासइत्यनेन अपराधेपि राघवःशरणागतं नत्यजतीतिसुग्रीवनिश्चयस्सूचितः । " कथंचिदुपकारेणकृतेनैकेनतुष्यति । नस्मरत्यपकाराणांशतमप्यात्मवत्तया"

[पा०] १ क. ख. ग. ङ.—ट. तनयोराजंस्तारायादयितो. २ क. रोषपरीतात्मा. ३ क. ङ.—ट. प्रणामंत्वं. ४ च.—ट. सहबान्धवः. ५ घ. महाभाग. ६ ङ—ट. रोषोह्यस्योपशाम्यतां. क. रोषश्चाप्युपशाम्यतां. ७ ङ. छ.—ट. यथाहि. ८ ज. शान्तात्मा. ९ ख. घ.—ट. सचतानब्रवीत्. १० ग. ज. मन्त्रज्ञोमन्त्रकुशलो. ११ छ.—ट. परिनिष्ठितः. १२ ज. गुणदोषान्. १३ झ. तावद्यथाबुद्धिः. १४ घ. निश्चयस्तस्यविज्ञेयो.

सर्वथा सुकरं मित्रं दुष्करं परिपालनम् ॥ अनित्यत्वाच्च चित्तानां प्रीतिरल्पेऽपि भिद्यते ॥ ७ ॥
अतोनिमित्तं त्रस्तोऽहं रामेण तु महात्मना ॥ यन्ममोपकृतं शक्यं प्रतिकर्तुं न तन्मया ॥ ८ ॥
सुग्रीवेणैवमुक्तस्तु हनुमान्हरिपुङ्गवः ॥ उवाच स्वेन तर्केण मध्ये वानरमन्त्रिणाम् ॥ ९ ॥
सर्वथा नैतदाश्चर्यं यस्त्वं हरिगणेश्वर ॥ न विस्मरसि सुस्निग्धमुपकारकृतं शुभम् ॥ १० ॥
राघवेण तु वीरेण भयमुत्सृज्य दूरतः ॥ त्वत्प्रियार्थं हतो वाली शक्रतुल्यपराक्रमः ॥ ११ ॥
सर्वथा प्रणयात्क्रुद्धो राघवो नात्र संशयः ॥ भ्रातरं संप्रहितवाँल्लक्ष्मणं लक्ष्मिवर्धनम् ॥ १२ ॥
त्वं प्रमत्तो न जानीषे कालं कालविदां वर ॥ फुल्लसप्तच्छदश्यामा प्रवृत्ता तु शरच्छिवा ॥ १३ ॥
निर्मलग्रहनक्षत्रा द्यौः प्रनष्टबलाहका ॥ प्रसन्नाश्च दिशः सर्वाः सरितश्च सरांसि च ॥ १४ ॥
प्राप्तमुद्योगकालं तु नावैषि हरिपुङ्गव ॥ त्वं प्रमत्त इति व्यक्तं लक्ष्मणोऽयमिहागतः ॥ १५ ॥
आर्तस्य हृतदारस्य परुषं पुरुषान्तरात् ॥ वचनं मर्षणीयं ते राघवस्य महात्मनः ॥ १६ ॥
कृतापराधस्य हि ते नान्यत्पश्याम्यहं क्षमम् ॥ अन्तरेणाञ्जलिं बद्ध्वा लक्ष्मणस्य प्रसादनात् ॥१७॥
नियुक्तैर्मन्त्रिभिर्वाच्यो ह्यवश्यं पार्थिवो हितम् ॥ अत एव भयं त्यक्त्वा ब्रवीम्यवधृतं वचः ॥१८॥

ति ॥ ६ ॥ मित्रस्यास्थानकोपसंभावनायां लोकन्यायमाह—सर्वथेति ॥ अल्पे वैषम्य इतिशेषः ॥ ७ ॥ महात्मना रामेण मम यदुपकृतं तन्मया प्रतिकर्तुं न शक्यं । अतोनिमित्तं अस्मान्निमित्तात् । त्रस्तोहमिति संबन्धः ॥ ८ ॥ तर्केण ऊहेन ॥ ९ ॥ उपकारकृतं उपकारकारिणं ॥ १०—१५ ॥ पुरुषान्तरात् लक्ष्मणात् । आगतमितिशेषः । अत्र मर्षणीयत्वे बहवो हेतव उपन्यस्यन्ते । हृतदारस्य परुषवचनं मर्षणीयं । एवमार्तस्येत्यादौ । राघवस्य महात्मनः परमात्मनः सर्वस्वामिन इत्यर्थः ॥ १६ ॥ अथापराधप्रायश्चित्तं विदधाति—कृतेति ॥ कृतापराधस्य न त्वारब्धापराधस्य । अपराधारम्भकाले सानुतापो यदि लघुप्रायश्चित्तेन तदा तस्य परिहारः स्यात् । न तथाभूः किंतु निश्चयेन कृतापराधोसि । तेन अञ्जलिं बद्ध्वा लक्ष्मणस्य प्रसादनादन्तरेण प्रसादनंविना । अन्यत् क्षमं अपराधपरिहारक्षमं साधनं । न पश्यामि । "अञ्जलिः परमा मुद्रा क्षिप्रं देवप्रसादिनी" इतिशास्त्रात् । लक्ष्मणस्येत्यनेन तदीयंप्रत्यञ्जलिरेव भगवदपचारपरिहारक इत्युक्तं । त्वदङ्घ्रिमुद्दिश्येतिवत् । ते इत्यनेनात्राधिकारिनियमो नास्तीत्युच्यते । अञ्जलिमित्येकवचनेन सकृत्करणमेवालमित्युक्तं । बद्ध्वेत्यनेन देशकालनियमाभावः सूचितः । बद्ध्वा लक्ष्मणस्य प्रसादनादित्यनेन क्षिप्रं देवप्रसादिनीत्यस्यार्थ उक्तः ॥ १७ ॥ किमेवं मां प्रति हीनवृत्तमुपदिष्टवानसीत्य-

---

इत्यादिवचनमत्रानुसन्धेयं ॥ ६ ॥ ति० रिपुजोपजापपरिहारेणसख्यपालनंदुष्करमित्याह—**सर्वथेति** । अल्पेपि उपजापेइतिशेषः ॥ ७ ॥ ति० अतोनिमित्तं अस्मान्निमित्तात् । अथस्वदोषशङ्कानिवृत्तयेकृतज्ञतांमन्त्रिभ्योदर्शयति—रामेणत्विति ॥ ८ ॥ —ति० अथमुख्यमन्त्रीहनुमान्कोपनिमित्तंनिश्चित्याह—**सुग्रीवेणेति** ॥ **स०** तर्केण ऊहेन । हनुमतोऽद्यापि लक्ष्मणदर्शनाभावादितिभावः ॥ ९ ॥ **ति०** अथनिश्चयंविवक्षुःस्वस्यगुणग्राहित्वरूपंमन्त्रिलक्षणंप्रकटयति—**सर्वथेति** ॥ १० ॥ **ति०** उपकारमेवाह—**राघवेणेति** । भयं वालिपराक्रमजं । वालिनश्छलेनवधकृतं लोकापवादजंवा ॥ ११ ॥ **ति०** प्रणयात्क्रुद्धः नतुत्वद्रिपूपजापतइत्यर्थः ॥ १२ ॥ **ति०** प्रणयकोपस्यापिनिमित्ताभासंदर्शयति—**त्वमिति** । कालं प्रतिज्ञातंसीतान्वेषणकालं । प्रवृत्ता प्रकर्षेणवृत्ता । गतप्रायेतियावत् ॥ १३ ॥ **ति०** व्यक्तं ज्ञात्वेतिशेषः ॥ १५ ॥ **तनि०** लक्ष्मणज्याघोषंश्रुत्वाकृतकापेयचेष्टेनसुग्रीवेणतादृशावस्थायांकर्तव्यंकिमितिप्रश्नेकृतेसुग्रीवंप्रतिहनुमानाह—**कृतापराधस्येति** । अपराधारंभएवानुतापोयदिलघुप्रायश्चित्तेनपरिहारस्स्यात् । इदानींनतावन्मात्रेणपरिहर्तुंशक्यते । किंतु सान्त्वनंकार्यं । ततश्चाञ्जलिःकर्तव्यः । अनेनभगवदपचारेतदीयप्रसादनंप्रायश्चित्तमितिव्यञ्जितं । "अनुतप्तस्तुतापेनक्षामयेन्नान्यथाशमः । भगवत्यपचारेपिनैषाशक्तिरनुत्तमा"इतिस्मरणात् ॥१७॥ **ति०** नियुक्तैः हितोपदेशइतिशेषः । भयंत्यक्त्वाब्रवीमि राजानमपिकार्यवशात्परस्माअञ्जलिंकुर्वितिवचोऽवधृतं निश्चितंवदामि ॥

[पा०] १ घ. छ. झ. ट. अनित्यत्वात्तु. ङ. च. ज. ञ. अनित्यत्वाद्धि. २ क. ख. घ.—ट. मुक्तेतु. ३ च. ज. ञ. हनूमान्मारुतात्मजः. ग. हनूमान्हरियूथपः. ४ ङ. ज.—ट. नविस्मरस्यविस्रब्धं. क. नविस्मरस्यमुंस्निग्धं. ५ क. ग. ङ.—झ. ट. मुपकारंकृतं. ६ ख. घ. शूरेण. ७ ङ.—ट. शरच्छुभा. ८ ग. च. सुप्रसन्नाश्चसरितःप्रसन्नानिसरांसिच. ९ ङ. ज.—ट. इतएव

अभिक्रुद्धः समर्थो हि चापमुद्यम्य राघवः ॥ सदेवासुरगन्धर्वं वशे स्थापयितुं जगत् ॥ १९ ॥
न स क्षमः कोपयितुं यः प्रसाद्यः पुनर्भवेत् ॥ पूर्वोपकारं स्मरता कृतज्ञेन विशेषतः ॥ २० ॥
तस्य मूर्ध्ना प्रणम्य त्वं सपुत्रः ससुहृज्जनः ॥ राजंस्तिष्ठ स्वसमये भर्तुर्भार्येव तद्वशे ॥ २१ ॥
न रामरामानुजशासनं त्वया कपीन्द्र युक्तं मनसाप्यपोहितुम् ॥
मनो हि ते ज्ञास्यति मानुषं बलं सराघवस्यास्य सुरेन्द्रवर्चसः ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

अङ्गदादिभिःकिष्किन्धांप्रवेशितेन राजमार्गेऽद्भुततमनानाभवनादिकमवलोकयतासता सुग्रीवगृहंप्रविष्टेनलक्ष्मणेनान्तःपुरस्त्रीणांमञ्जीरादिशिञ्जितश्रवणजलज्जयाज्यास्वनेनसकलदिग्वलयपूरणपूर्वकं कुत्रचिदेकान्तदेशेऽवस्थानम् ॥१॥ ज्याघोषश्रवणचकितेनसुग्रीवेण लक्ष्मणसंनिधिंप्रेषितयातारया सकलवानरसेनासमानयनायसुग्रीवकृतनीलनियोजननिवेदनादिना क्षमापणपूर्वकंलक्ष्मणप्रसादनम् ॥ २ ॥ तारासान्त्वनेन किंचिच्छान्तरुषालक्ष्मणेन तदनुमत्याऽन्तःपुरप्रवेशेन सुग्रीवदर्शनम् ॥ ३ ॥

अथ प्रतिसमादिष्टो लक्ष्मणः परवीरहा ॥ प्रविवेश गुहां घोरां किष्किन्धां रामशासनात् ॥ १ ॥
द्वारस्था हरयस्तत्र महाकाया महाबलाः ॥ बभूवुर्लक्ष्मणं दृष्ट्वा सर्वे प्राञ्जलयः स्थिताः ॥ २ ॥
निःश्वसन्तं तु तं दृष्ट्वा क्रुद्धं दशरथात्मजम् ॥ बभूवुर्हरयस्त्रस्ता न चैनं पर्यवारयन् ॥ ३ ॥
स तां रत्नमयीं श्रीमान्दिव्यां पुष्पितकाननाम् ॥ रम्यां रत्नसमाकीर्णां ददर्श महतीं गुहाम् ॥ ४ ॥

त्राह—नियुक्तैरिति ॥ १८ ॥ कथमिदं हितं तत्राह—अभिक्रुद्ध इति ॥ १९ ॥ हेत्वन्तरमाह—न स इति ॥ २० ॥ अञ्जलिं बद्ध्वेत्युक्तं विवृणोति—तस्येति ॥ स्वसमये तिष्ठ तद्वशे च तिष्ठ ॥ २१ ॥ सुरेन्द्रवर्चसः सराघवस्य सलक्ष्मणस्य । अस्य रामस्य । मानुषंबलं दिव्यास्त्रादिबलमन्तरेण केवलं स्वाभाविकं बलं । ते मनो ज्ञास्यतिहि जानात्येव । सालगिरिभेदनादौ दृष्टचरत्वादितिभावः ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने द्वात्रिंशः सर्गः ॥ ३२ ॥

अथान्तःपुरं प्रविष्टस्य लक्ष्मणस्य तारया प्रसादनं त्रयस्त्रिंशे—अथेत्यादि ॥ प्रतिसमादिष्टः प्रत्याहूतः । अङ्गदेनेतिशेषः ॥ १—२ ॥ न चैनं पर्यवारयन् भयेन लक्ष्मणमुपगन्तुं नाशक्नुवन्नित्यर्थः ॥ ३ ॥ रत्नमयीं रत्ननिर्मितां । रत्नसमाकीर्णां आपणस्थरत्नैः समाकीर्णां । हर्म्याः धनिनां वासाः । प्रासादाः देव-

---

शि० नियुक्तैः युक्तार्थबोधनेनियोजितैः । पार्थिवोऽवश्यंहितंवाच्यः । इतएवभयंत्यक्त्वाऽवधृतं हितत्वेननिश्चितं । वचोब्रवीमि ॥ १८ ॥ **स०** यः पुमान्पुनःप्रसाद्योभवेत्सकोपयितुंनक्षमः । विशेषतस्तु पूर्वोपकारंस्मरता कृतज्ञेन कार्यज्ञेन । अकृतज्ञेनतुकोपयितुंक्षमइत्यपिबोधयितुंस्मरताकृतज्ञेनेत्युक्तिः ॥ २० ॥ **ती०** तद्वशइतिप्रथमान्तपाठःसाधुः । सप्तम्यन्तपाठे स्वसमयइत्यत्रवर्तमानइतिशेषः॥२१॥ **ति०** अपोहितुं उपेक्षितुं । सराघवस्य सलक्ष्मणस्य । अस्य रामस्य । मानुषंमनुष्यमतिक्रान्तंबलं। तेमनोज्ञास्यति जानात्येव । वालिवधादिनेतिभावः ॥ **शि०** सराघवस्य रामसहितस्य । अस्य लक्ष्मणस्य । मानुषं मः इयत्तायाः अनु षः विध्वंसःयस्मिंस्तद्बलंतेमनोज्ञास्यति ॥ २२ ॥ इतिद्वात्रिंशःसर्गः ॥ ३२ ॥

शि० रत्नसमाकीर्णां रत्नैः अनेकविधोत्तमपदार्थैर्व्याप्तां ॥ ४ ॥

[पा०] १ ग. सहबन्धुभिः. २ ग. शक्यं. ३ क. सलक्ष्मणस्यास्य. ४ घ. शुभां. ५ क. घ.—ट. रम्यां. ६ ग. ङ. छ.—ट. दिव्यांश्रीमान्.

हर्म्यप्रासादसंबाधां [1]नानापण्योपशोभिताम् ॥ सर्वकामफलैर्वृक्षैः पुष्पितै[2]रुपशोभिताम् ॥ ५ ॥
देवगन्धर्वपुत्रैश्च वानरैः कामरूपिभिः ॥ दिव्यमाल्याम्बरधरैः शोभितां प्रियदर्शनैः ॥ ६ ॥
चन्दनागरुपद्मानां गन्धैः सुरभि[3]गन्धिनाम् ॥ मैरेयाणां मधूनां च संमोदितमहापथाम् ॥
[[4]विन्ध्यमेरुगिरिप्रख्यैः प्रासादैर्नैकभूमिभिः ॥ ७ ॥]
ददर्श गिरिनद्यश्च विमलास्तत्र राघवः ॥ ८ ॥
अङ्गदस्य गृहं रम्यं मैन्दस्य द्विविदस्य च ॥ गवयस्य गवाक्षस्य [5]गजस्य शरभस्य च ॥ ९ ॥
विद्युन्मालेश्च संपातेः सूर्याक्षस्य हनूमतः ॥ वीरबाहोः सुबाहोश्च [6]नलस्य च महात्मनः ॥ १० ॥
कुमुदस्य सुषेणस्य तारजाम्बवतोस्तथा ॥ दधिवक्त्रस्य नीलस्य सुपाटलसुनेत्रयोः ॥ ११ ॥
एतेषां कपिमुख्यानां राजमार्गे महात्मनाम् ॥ ददर्श गृहमुख्यानि महासाराणि लक्ष्मणः ॥ १२ ॥
पाण्डुराभ्रप्रकाशानि [7]दिव्यमाल्ययुतानि च ॥ प्रभूतधनधान्यानि स्त्रीरत्नैः शोभितानि च ॥ १३ ॥
पाण्डुरेण तु [8]सालेन परिक्षिप्तं दुरासदम् ॥ वानरेन्द्रगृहं रम्यं महेन्द्रसदनोपमम् ॥ १४ ॥
शुक्लैः प्रासादशिखरैः कैलासशिखरोपमैः ॥ [9]सर्वकामफलैर्वृक्षैः पुष्पितैरुपशोभितम् ॥ १५ ॥
महेन्द्रदत्तैः श्रीमद्भिर्नीलजीमूतसन्निभैः ॥ दिव्यपुष्पफलैर्वृक्षैः शीतच्छायैर्मनोरमैः ॥ १६ ॥
हरिभिः संवृतद्वारं बलिभिः शस्त्रपाणिभिः ॥ दिव्यमाल्यावृतं शुभ्रं तप्तकाञ्चनतोरणम् ॥ १७ ॥
सुग्रीवस्य गृहं रम्यं प्रविवेश महाबलः ॥ अवार्यमाणः सौमित्रिर्महाभ्रमिव भास्करः ॥ १८ ॥
स सप्त कक्ष्या धर्मात्मा [10]नानाजनसमाकुलाः ॥ [11]प्रविश्य सुमहद्गुप्तं ददर्शान्तःपुरं महत् ॥ १९ ॥
हैमराजतपर्यङ्कैर्बहुभिश्च वरासनैः ॥ महार्हास्तरणोपेतैस्त[12]त्रत्रोपशोभितम् ॥ २० ॥
प्रविशन्नेव स ततं शुश्राव मधुर[13]स्वरम् ॥ तन्त्रीगीतसमाकीर्णं [14]समगीतपदाक्षरम् ॥ २१ ॥

गृहाः । पद्मानां आलेपविशेषाणां । गिरिनद्यः गिरिनदीः । व्यत्ययेन द्वितीया ॥४—११॥ महासाराणि अतिदृढानि ॥ १२—१३ ॥ पाण्डुरेण सालेन सुधाधवलितप्राकारेण । दिव्यपुष्पफलैर्वृक्षैरित्यनेन इन्द्रदत्ताःस्वर्गीयावृक्षा उच्यन्ते । पूर्वमुक्तावृक्षा भौमा इत्यवगन्तव्यं। पूर्वं वानरेन्द्रगृहं रम्यमित्युक्तस्यानेकविशेषणव्यवधानेन सुग्रीवस्यगृहंरम्यमिति पुनर्निर्गमनं । स्वरूपतोरम्यं उक्तविशेषणैश्च रम्यमितिरम्यपदद्वयनिर्वाहः । यद्वा वानरेन्द्रगृहं वानरेन्द्रयोः ऋक्षरजोवालिनोः गृहभूतं । इदानीं सुग्रीवस्य गृहं प्रविवेशेतिसंबन्धः ॥ १४—२० ॥ सः लक्ष्मणः । ततं वीणादिवाद्यजातं । मधुरस्वरं मधुरश्रुतियुक्तं । तन्त्रीशब्देन तन्त्रीध्वनिर्लक्ष्यते । तद्रूपैर्गीतैः समाकीर्णं । समगीतपदाक्षरं समतया तन्त्रीगीतसमतया गीतानि कण्ठैर्गीतानि पदान्यक्षराणि

स० सुरभिश्चासौगन्धश्चसयेषांतेषां । मधूनां पुष्परसानां । "मधुःपुष्परसः" इतिविश्वः ॥ ७ ॥ **ति०** पाण्डुरेणशैलेनपरिक्षिप्तं स्फटिकशिलामयवप्रेणवेष्टितं ॥१४॥ **शि०** सर्वेकामाः मनोरथायेभ्यस्तानिफलानियेषांतैः । किंच सर्वान्कामान्फलन्ति निष्पादयन्ति तैर्वृक्षैश्च ॥ १५ ॥ **शि०** यानासनसमावृताः यानैः विमानादिभिः । आसनैः चित्रकंबलाद्यास्तरणविशिष्टपर्यङ्कादिभिः । किंच यानानांविमानादीनांआसनानि चित्रकंबलादीनितैःसमावृताः पूर्णाः । सप्तकक्ष्याः द्वारःप्रविश्य सुमहद्गुप्तं वानरैरत्यन्तंसंरक्षितं । अन्तःपुरं धर्मात्मालक्ष्मणोददर्श ॥ १९ ॥

[पा०] १ ङ.—ञ. नानारत्नोपशोभितां. २ क. रतिशोभितां. ३ छ. ज. झ. ट. गन्धितां. ४ इदमर्धं क. घ. ङ.—ञ. पाठेपुदृश्यते. ५ ङ. शरभस्यगजस्यच. ६ च. ज. बलस्यच. ग. नलस्यपनसस्यच. ७ ग. छ. झ. ट. गन्धमाल्य. ८ क. ग.—ट. शैलेन. ९ ङ. च. ञ. सर्वकालफलैः. १० क. ङ. च. ज.—ट. यानासनसमावृताः. ख. ग. यानासनसमाकुलाः. ११ च. छ. झ. ददर्शसुमहद्गुप्तं. ग. प्रविश्यबलिभिर्गुप्तं. १२ तत्रसमावृतं. १३ क. ग.—ट. मधुरस्वनं. १४ क. ख. ङ.—ट. समतालपदाक्षरं.

बह्वीश्च विविधाकारा रूपयौवनगर्विताः ॥ स्त्रियः सुग्रीवभवने ददर्श स[1] महाबलः ॥ २२ ॥
दृष्ट्वाभिजनसंपन्नाश्चित्र[2]माल्यकृतस्रजः ॥ फल[3]माल्यकृतव्यग्रा भूषणोत्तमभूषिताः ॥ २३ ॥
नातृप्तान्नापि[4] चाव्यग्रान्नानुदात्तपरिच्छदान् ॥ सुग्रीवानुचरांश्चापि लक्षयामास लक्ष्मणः ॥ २४ ॥
कूजितं नूपुराणां च काञ्चीनां निनदं[5] तथा ॥ संनिशम्य[6] ततः श्रीमान्सौमित्रिर्लज्जितोऽभवत् ॥ २५ ॥
रोषवेगप्र[7]कुपितः श्रुत्वा चाभरणस्वनम् ॥ चकार ज्यास्वनं वीरो दिशः शब्देन पूरयन् ॥ २६ ॥
चारित्रेण महाबाहुरपकृष्टः स लक्ष्मणः ॥ तस्थावेकान्तमाश्रित्य रामशोक[8]समन्वितः ॥ २७ ॥
तेन चापस्वनेनाथ सुग्रीवः प्लवगाधिपः ॥ विज्ञायाऽऽगमनं त्रस्तः संचचाल वरासनात् ॥ २८ ॥
अङ्गदेन यथा मह्यं पुरस्तात्प्रतिवेदितम् ॥ सुव्यक्तमेष संप्रा[9]प्तः सौमित्रिर्भ्रातृवत्सलः ॥ २९ ॥
अङ्गदेन सं[10]माख्यातं ज्यास्वनेन च वानरः ॥ बुबुधे लक्ष्मणं प्राप्तं मुखं चा[11]स्य व्यशुष्यत ॥ ३० ॥
ततस्तारां हरिश्रेष्ठः सुग्रीवः प्रियदर्शनाम् ॥ उवाच हितमव्यग्रस्त्राससंभ्रान्तमानसः ॥ ३१ ॥
किंनु तत्[12]कारणं सुभ्रु प्रकृत्या मृदुमानसः ॥ सरोष इव संप्राप्तो येनायं राघवानुजः ॥ ३२ ॥
किं पश्यसि कुमारस्य रोषस्थानमनिन्दिते ॥ न खल्वकारणे कोपमाहरे[13]न्नरसत्तमः ॥ ३३ ॥
यदस्य कृतमस्माभिर्बुध्यसे किंचिदप्रियम् ॥ तद्बुद्ध्या संप्रधार्याशु क्षिप्र[14]मर्हसि भाषितुम् ॥ ३४ ॥
अथवा स्वयमेवैनं द्रष्टुमर्हसि [15]भाषितुम् ॥ वचनैः सान्त्वयुक्तैश्च प्रसादयितुमर्हसि ॥ ३५ ॥
[16]त्वद्दर्शनविशुद्धात्मा [17]न स कोपं करिष्यति ॥ न हि स्त्रीषु महात्मानः क्वचित्कुर्वन्ति दारुणम् ॥ ३६ ॥
त्वया सान्त्वैरुपक्रान्तं प्रसन्नेन्द्रियमानसम् ॥ ततः कमलपत्राक्षं द्रक्ष्याम्यहमरिन्दमम् ॥ ३७ ॥

च यस्य । यद्वा समानि अन्यूनातिरिक्तानि गीतसंबन्धीनि पदान्यक्षराणि च यस्य ॥२१—२२॥ फलमाल्यकृतव्यग्राः फलमाल्यार्थं व्यग्रा इत्यर्थः ॥ २३ ॥ नानुदात्तपरिच्छदान् उत्कृष्टवस्त्राभरणादिकान् ॥ २४ ॥ लज्जितोभवत् उपरिसुरतद्योतकत्वादिति भावः ॥ २५ ॥ रोषवेगप्रकुपितः रोषप्रवृद्धः । प्रकोपशब्दो ह्यभिवृद्धवाची ॥ २६ ॥ रामशोकसमन्वितः रामविषयशोकसमन्वितः । एकान्तं स्त्रीप्रसङ्गरहितप्रदेशं ॥ २७ ॥ सौमित्रिःसंप्राप्त इत्यागमनं विज्ञायेति संबन्धः । संचचाल वरासनात् लाङ्गूलचलनमाल्यच्छेदनादिकापेयव्यापारानकरोदित्यर्थः ॥ २८—३० ॥ अव्यग्रः कार्यांश इति शेषः ॥ ३१—३६ ॥ त्वया सान्त्वैः प्रसन्नेन्द्रियमानसमिति संबन्धः । उपक्रान्तं उपागतं ॥ ३७ ॥

ति० अभिजनसंपन्नाः आभिजात्ययुक्ताः । वरमाल्यकृतव्यग्राः वरमाल्यानांउत्तमस्रजांकृतंकरणंतत्रव्यग्राः ॥२३॥ **ति०** लज्जितोऽभवत् अयोध्यातोप्यधिकसौभाग्यदर्शनाल्लज्जा । परस्त्रीदर्शनकृतालज्जेत्यन्ये ॥२५॥ **ति०** आभरणस्वनंश्रुत्वा स्त्रीणांततोनिवृत्तयेज्यास्वनंचकार ॥ **शि०** आभरणस्वनंश्रुत्वा रोषवेगप्रचलितः रोषवेगःप्रचलितोनिवृत्तोयस्यसः तिरोहितकोपइत्यर्थः । ज्यास्वनं चकार सुग्रीवानवधानतानिवृत्तयेइतिशेषः ॥२६॥ **ति०** तदेवाह—चारित्रेणेति । चारित्रेण स्त्रीगोष्ठ्यांप्रवेष्टुंनोचितमित्याचारपर्यालोचनया । अपकृष्टोनिवर्तितान्तःपुरप्रवेशःसन् । एकान्तमाश्रित्य रामकोपसमन्वितः रामकार्याप्रवृत्तिदर्शनजकोपेनसमन्वितस्तस्थौ ॥ **ती०** रामकोपसमन्वितः बुद्धिस्थरामकोपइत्यर्थः । चारित्रेणापकृष्टः सच्चरित्रयुक्ततयापरस्त्रीदर्शनेनस्त्रीनूपुरशब्दश्रवणेनचलज्जयोदासीनस्सन् । एकान्तेस्थितवानितिभावः ॥२७॥ **ति०** उपशुष्यत उपाशुष्यत ॥३०॥ **ति०** निर्निमित्तकोपासंभवान्निमित्तंचानिर्णीयस्वस्यसमीपगमनमनुचितमितिपक्षान्तरंगृह्णाति—**अथवेति**। स्वयमेव मांविहायेत्यर्थः ॥३५॥ **ति०** विशुद्धात्मा

[पा०] १ क. ङ. ज. सुमहाबलः. २ छ. झ. ट. संपन्नास्तत्र. ३ ङ. च. छ. झ. ञ. ट. वरमाल्य. ४ घ. छ. झ. ट. न्नापिचाव्यग्रान्. च. न्नापिवाव्यग्रान्. ५ छ. झ. ट. निस्वनं. ६ ख. ग. ङ. सनिशम्य. ७ च. ज. ञ. ट. प्रचलितः. क. प्रकटितं. ८ क. ग. ङ.—ट. रामकोपसमन्वितः. ९ क. मांप्राप्तः. १० क. ग. ङ.—ट. समाख्यातो. ११ क. छ. झ. चास्योपशुष्यत. ख. ङ. च. ज. ञ. ट. चास्योपशुष्यते. १२ च.—ट. किंनुरुत्तारणं. ङ किंतारेकारणं. १३ ङ. छ.—ट. न्नरपुङ्गवः. १४ ङ.—ट. क्षिप्रमेवाभिधीयतां. १५ क. ग.—ट. भामिनि. १६ छ. झ. त्वद्दर्शने. १७ क. ख. घ.—ट. नस्मकोपं.

सा प्रस्खलन्ती मदविह्वलाक्षी प्रलम्बकाञ्चीगुणहेमसूत्रा ॥
[1]सलक्षणा लक्ष्मणसन्निधानं जगाम तारा नमिताङ्गयष्टिः ॥ ३८ ॥
स तां समीक्ष्यैव हरीशपत्नीं तस्थावुदासीनतया महात्मा ॥
अवाङ्मुखोऽभून्मनुजेन्द्रपुत्रः स्त्रीसं[2]निकर्षाद्विनिवृत्तकोपः[3] ॥ ३९ ॥
सा [4]पानयोगाद्विनिवृत्तलज्जा दृष्टि[5]प्रसादाच्च नरेन्द्रसूनोः ॥
उवाच तारा प्रणयप्रगल्भं वाक्यं महार्थं परि[6]सान्त्वपूर्वम् ॥ ४० ॥
किं कोपमूलं मनुजेन्द्रपुत्र कस्ते न संतिष्ठति वाङ्निदेशे ॥
कः शुष्कवृक्षं वनमापतन्तं द[7]वाग्निमासीदति निर्वि[8]शङ्कः ॥ ४१ ॥
स तस्या वचनं श्रुत्वा सान्त्वपूर्वमसंशयम् ॥ भूयः प्रणयदृष्टार्थं लक्ष्मणो वाक्यमब्रवीत् ॥ ४२ ॥
किमयं [9]कामवृत्तस्ते लुप्तधर्मार्थसंग्रहः ॥ भर्ता भर्तृहिते युक्ते न चैनमवबुध्यसे ॥ ४३ ॥
न चिन्तयति राज्यार्थं ना[10]स्माञ्शोकपरायणान् ॥ [11]सामात्यपरिषत्तारे पानमेवोपसेवते ॥ ४४ ॥
स मासांश्चतुरः कृत्वा प्रमाणं प्लवगेश्वरः ॥ व्यतीतांस्तान्मदे[12]व्यग्रो विहरन्नावबुध्यते ॥ ४५ ॥
न हि धर्मार्थसिद्ध्यर्थं [13]पानमेवं प्रशस्यते ॥ पानादर्थश्च [14]धर्मश्च कामश्च परिहीयते ॥ ४६ ॥

सा कान्तसंश्लेषं विनापिरमणीयगमनसौन्दर्या । प्रस्खलन्ती संश्लेषकृतायासेन पदे पदं कृत्वागच्छन्ती। मदविह्वलाक्षी भोगसंवर्धकमधुपानमदेनविह्वलनेत्रा । प्रलम्बे काञ्चीगुणहेमसूत्रे यस्याः सा प्रलम्बकाञ्चीगुणहेमसूत्रा । ईषच्छिथिलदुकूलतया शयने यथा स्थिता तथैव समागतेत्यर्थः । सलक्षणा व्यक्तैः संभोगलक्षणैः समागता । लक्ष्मणसन्निधानं जगाम । किं मातुरपि गोप्यमस्तीत्यागता । नमिताङ्गयष्टिः द्रवीभावावस्थायां नमितं नार्जवमर्हति । अतः नम्रतैव यथा निरूपकंभवति तथा स्थितेत्यर्थः ॥ ३८ ॥ उदासीनतया तत्कान्तिनिर्वर्णनानादरतया ॥ ३९ ॥ नरेन्द्रसूनोः धार्मिकस्य लक्ष्मणस्य। दृष्टिप्रसादाद्धेतोः। प्रणयप्रगल्भं स्नेहदृष्टं ॥ ४० ॥ चतुरोमासान् राजपुत्रौ विद्युत्स्तनितसात्कृत्य स्वयं भोगप्रवणा स्थिता तज्जानन्त्यपि किं कोपमूलमित्याह । तत्कृपारसविशेषज्ञतया दृष्टिप्रसादादिति ह्युक्तं। मनुजेन्द्रपुत्र । षष्टिवर्षसहस्राणि राज्यं परिपाल्य प्रजापराधं क्षान्तवतो दशरथस्य पुत्रस्त्वं अपराधिजनानां शिरश्छेदनं करिष्यामीति संप्रति समागतोसि सम्यश्ची भवतो गतिः। कस्ते न संतिष्ठति वाङ्निदेशे यस्ते वाङ्निदेशे न तिष्ठति सकः । अशास्त्रवश्यस्य दृष्टेवस्तुनि सपदिचापलं कृत्वा निवर्तितुमक्षमस्य तिर्यग्जनस्य च्युतान्भोगान्स्वयमेव दत्त्वा स्वाज्ञां कुर्वन्तं हिंसितुमिच्छसि । क इत्यादि । दवाग्नौ पतन् चपलः शलभः किलेतिभावः । तद्वच्चपलोयमित्येवं दृष्टान्तः । संतिष्ठतीत्यार्षपरस्मैपदं ॥ ४१ ॥ असंशयं निःसंशयं । अकुटिलमितियावत् । प्रणयदृष्टार्थं स्नेहसंदर्शितप्रयोजनं ॥ ४२ ॥ अतीवायुक्तं तव भर्तुर्विषयप्रावण्यमित्याह—किमयमित्यादिना ॥ युक्ते सक्ते इति संबुद्धिः । अयं कामवृत्त इति एनं नावबुध्यसेकिमिति संबन्धः ॥ ४३ ॥ राज्यार्थं राज्यरूपप्रयोजनं ॥ ४४ ॥ प्रमाणं मर्यादां ॥ ४५ ॥ धर्मार्थसिद्ध्यर्थं यतमानस्येतिशेषः

गतक्रोधचित्तः ॥ ३६ ॥ **रामानु०** "येनैवबाणेनगतःप्रियोमेतेनैवमांत्वंजहिसायकेन । हतागमिष्यामिसमीपमस्यनमामृतेरामरमेतवाली " इतियारामंप्रत्युक्तवतीसेत्यर्थः । यद्वा " स्वयमेवैनंद्रष्टुमर्हसिभामिनि " इतिसुग्रीवेणोक्तासातारा ॥ **स०** हेमात्मकानिसूत्राणि तन्तवोयस्मिन्वस्त्रे तद्धेमसूत्रं । प्रलंबेकाञ्चीगुणहेमसूत्रेयस्यास्सा । नमिताङ्गयष्टिः विनयेनेतिवा स्तनादिभारेणेतिवाभावोबोध्यः ॥ ३८ ॥ **ति०** परिसान्त्वरूपं परितःसान्त्वरूपं । पतिसान्त्वेतिपाठस्सुगमः ॥ ४० ॥ **ति०** राज्यार्थं

[**पा०**] १ क. सुलक्षणा. २ क. ग. सन्निकर्षाच्चनिवृत्त. ३ घ. रोषः. ४ क. ख. घ.—ट. पानयोगाच्चनिवृत्त. ५ ख. ग. प्रसाराच्च. क. प्रचाराच्च. ६ छ. झ. ट. सान्त्वरूपं. ७ छ.—ट. दावाग्निं. ८ क. ख. ग.—ट. मशङ्कितः. ९ ङ. च. ज. ञ. कामवृत्तश्च. १० झ. ट. सोस्मान्. ११ झ. ट. सामान्यपरिषत्. १२ छ. झ. ट. न्मदोदग्रो. १३ ग. ङ.—ट. पानमेव. १४ ग. ङ.—ट. कामश्चधर्मश्च.

धर्मलोपो महांस्तावत्कृते ह्यप्रतिकुर्वतः ॥ अर्थलोपश्च मित्रस्य नाशे गुणवतो महान् ॥ ४७ ॥
मित्रं ह्यर्थगुणश्रेष्ठं सत्यधर्मपरायणम् ॥ तद्द्वयं तु परित्यक्तं न तु धर्मे व्यवस्थितम् ॥ ४८ ॥
तदेवं प्रस्तुते कार्ये कार्यमस्माभिरुत्तरम् ॥ यत्कार्यं कार्यतत्त्वज्ञे तदुदाहर्तुमर्हसि ॥ ४९ ॥

सा तस्य धर्मार्थसमाधियुक्तं निशम्य वाक्यं मधुरस्वभावम् ॥
तारा गतार्थे मनुजेन्द्रकार्ये विश्वासयुक्तं तमुवाच भूयः ॥ ५० ॥
न कोपकालः क्षितिपालपुत्र न चातिकोपः स्वजने विधेयः ॥
त्वदर्थकामस्य जनस्य तस्य प्रमादमप्यर्हसि वीर सोढुम् ॥ ५१ ॥
कोपं कथं नाम गुणप्रकृष्टः कुमार कुर्यादपकृष्टसत्त्वे ॥
कस्त्वद्विधः कोपवशं हि गच्छेत्सत्त्वावरुद्धस्तपसः प्रसूतिः ॥ ५२ ॥
जानामि रोषं हरिवीरबन्धोर्जानामि कार्यस्य च कालसङ्गम् ॥
जानामि कार्यं त्वयि यत्कृतं नस्तच्चापि जानामि यदत्र कार्यम् ॥ ५३ ॥
तच्चापि जानामि यथाऽविषह्यं बलं नरश्रेष्ठ शरीरजस्य ॥
जानामि यस्मिंश्च जनेऽवबद्धं कामेन सुग्रीवमसक्तमद्य ॥ ५४ ॥

॥ ४६ ॥ कृते उपकारविषये । अप्रतिकुर्वतः महान् धर्मलोपो भवेत् । प्रत्युपकाराकरणाद्गुणवतो मित्रस्य नाशे सति महानर्थलोपोभवेत् । चकारात्कामलोपश्च ॥४७॥ उक्तमर्थमुपपादयति—मित्रं हीति । सत्यधर्मपरायणं मित्रं अर्थगुणश्रेष्ठं हि । अत्र गुणशब्दः कामवाची । अर्थकामयोर्मूलत्वान्मित्रं ताभ्यां श्रेष्ठं हि । तादृशं मित्रं त्यजता सुग्रीवेण तद्द्वयं अर्थकामद्वयं । परित्यक्तं तु परित्यक्तमेव । धर्मेतुनव्यवस्थितं । धर्मोपि परित्यक्तइत्यर्थः ॥ ४८ ॥ तत् तस्मात् । कार्यतत्त्वज्ञे कार्ये धर्मार्थकामविलोपहेतुभूते मित्रपरित्यागलक्षणे कार्ये । एवं प्रस्तुते सति यदुत्तरं कार्यमस्माभिः कार्यं कर्तव्यं । तत् उदाहर्तुं वक्तुं अर्हसि ॥ ४९ ॥ धर्मार्थयोः समाधिना संबन्धेन युक्तं । गतार्थे प्रयोजनयुक्ते । नरेन्द्रकार्ये विषये विश्वासयुक्तं ॥ ५० ॥ न कोपकालः सुग्रीवस्य कामार्तत्वादितिभावः । त्वदर्थकामस्य । त्वत्प्रयोजनपरस्य । जनस्य सुग्रीवस्य ॥ ५१ ॥ गुणप्रकृष्टः उत्कृष्टवीर्यगुणः । अपकृष्टसत्त्वे हीनबले । सत्त्वावरुद्धः व्यवसाययुक्तः । " द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु " इत्यमरः । तपसः शान्तिरूपस्य । प्रसूतिः उत्पत्तिस्थानं ॥ ५२ ॥ मद्रोषमेव जानासि नतु तद्धेतूनित्यत्राह—जानामीति ॥ हरिवीरबन्धोः रामस्य । रोषं जानामि रोषममोघस्वरूपं जानामीत्यर्थः । कार्यस्य च कालसङ्गं उद्योगरूपकार्यस्य कालविलम्बनं च जानामि । जानामि कार्यं त्वयि यत्कृतं नः । यत् वालिवधरूपं कार्यं । नः अस्माकं कृतं त्वयि विद्यमानं तदपि जानामि । यदत्र कार्यं अस्मिन्नुपकारे अस्माभिर्यत्सीतान्वेषणादिकं कर्तव्यं तच्चापि जानामि ॥ ५३ ॥ हे नरश्रेष्ठ शरीरजस्य कामस्य बलं यथा अविषह्यं तच्चापिजानामि । अद्य

राज्यस्थैर्यार्थं । सामान्यापरिषत्यस्यतादृशः । भूत्वेतिशेषः ॥ ४४ ॥ **शि०** अर्थगुणैः अर्थसाधनीभूतवात्सल्यादिभिःश्रेष्ठं सर्वोत्कृष्टं । सत्यधर्मपरायणं सत्यस्यधर्माणांवेदविहितकर्मणांच परायणं परमाश्रयः । तत्तत्फलादिदातेत्यर्थः । तत् मित्रं त्वद्भ्रात्रापरित्यक्तं । अतएवधर्मे नैवव्यवस्थितं । सनातनोधर्मस्त्यक्तइत्यर्थः । तत् तस्माद्धेतोः । द्वयं उभयलोकसुखंपरित्यक्तं । परित्यक्तमित्युभयान्वयि ॥ ४८ ॥ **ति०** धर्मार्थसमाधियुक्तं तत्संबन्धयुक्तं । अगतार्थे भ्रष्टप्रयोजने । मनुजेन्द्रकार्ये तद्विषये । विश्वासयुक्तंयथातथा भूयः पुनः । उवाच ॥ ५० ॥ **ति०** अपकृष्टसत्वे हीने । सत्त्वावरुद्धः सहजसत्त्वगुणावरुद्धविपरीतव्यापारः । सत्त्वाविरुद्धइतिपाठे सहजगुणाविरुद्धव्यापारः । अतएव तपसःप्रसूतिः ॥ **ती०** सत्त्वावरुद्धः रजस्तमसोरननुप्रवेशायसत्त्वगुणेन निरुद्धः ॥ **शि०** सत्त्वावरुद्धः विशुद्धसत्त्वमयः । अतएवतपसोविचारस्यप्रसूतिः ॥ ५२ ॥ **ती०** कामेन असक्तं सुग्रीवं । अद्य

[**पा०**] १ क. कृत्येष्वप्रति. २ क. झ. ट. तत्कार्यं. ३ ङ. ञ. मधुरस्वभावा. ४ क. कृतार्था. ङ.—ज. ञ. ट. गतार्था. ५ क, घ.—झ. ट. नचापि. ६ ख. ग. ङ. च. छ. झ. ञ. ट. कोपं. ७ ङ. छ. ज. जनेऽनुरुद्धं.

न कामतन्त्रे तव बुद्धिरस्ति त्वं वै यथा मन्युवशं प्रपन्नः ॥
न देशकालौ हि न[1] चार्थधर्मावपेक्षते कामरतिर्मनुष्यः ॥ ५५ ॥
तं कामवृत्तं मम सन्निकृष्टं कामाभियोगाच्च [2]निर्वृत्तलज्जम् ॥
क्षमस्व तावत्परवीरहन्तस्त्वद्भ्रातरं वानरवंशनाथम् ॥ ५६ ॥
महर्षयो धर्म[3]तपोभिकामाः कामानुकामाः प्रतिबद्धमोहाः ॥
अयं प्रकृत्या चपलः कपिस्तु कथं न सज्जेत सुखेषु राजा ॥ ५७ ॥
इत्येवमुक्त्वा वचनं महार्थं सा वानरी लक्ष्मणमप्रमेयम् ॥
पुनः स[4]खेलं मदविह्वलं च भर्तुर्हितं वाक्यमिदं बभाषे ॥ ५८ ॥

उद्योगस्तु चिराज्ञप्तः सुग्रीवेण नरोत्तम ॥ कामस्यापि विधेयेन तवार्थप्रतिसाधने ॥ ५९ ॥
आगता हि महा[5]वीर्या हरयः कामरूपिणः ॥ कोटीशतसहस्राणि नानानगनिवासिनः ॥ ६० ॥
[6]तदागच्छ महाबाहो चारित्रं रक्षितं त्वया ॥ अच्छलं मित्रभावेन सतां दारावलोकनम् ॥ ६१ ॥
तारया चाभ्यनुज्ञातस्त्वरया चापि चोदितः ॥ प्रविवेश महाबाहुरभ्यन्तरमरिन्दमः ॥ ६२ ॥
ततः सुग्रीवमासीनं काञ्चने परमासने ॥ महार्हास्तरणोपेते ददर्शादित्यसन्निभम् ॥ ६३ ॥
दिव्याभरणचित्राङ्गं दिव्यरूपं यशस्विनम् ॥ दिव्यमाल्याम्बरधरं [7]महेन्द्रमिव दुर्जयम् ॥ ६४ ॥
दिव्याभरणमा[8]ल्याभिः प्रमदाभिः [9]समावृतम् ॥ सं[10]रब्धतररक्ताक्षो बभूवान्तकसन्निभः ॥ ६५ ॥

सुग्रीवं यस्मिन् जने कामेन असक्तं अनवरतं अवबद्धं जानामि । तं च स्त्रीजनं जानामीतियोजना ॥ ५४ ॥ लक्ष्मणसंरम्भोपशमनाय स्वप्रागल्भ्येन लोकस्थितिं दर्शयति—न कामतन्त्रे इत्यादिना ॥ त्वं यथा येन कारणेन । मन्युवशं प्रपन्नः तेन कारणेन । कामतन्त्रे रतिक्रीडादौ । तव बुद्धिर्नास्ति । कामतन्त्राभिज्ञश्चेत्तादृशं न द्विष्या इति भावः । किं कामतन्त्रप्रवणः किमपि न जानातीत्यत्राह—न देशकालाविति ॥५५॥ मम सन्निकृष्टं समीपस्थं । अतएव कामवृत्तं कामव्यापारमिति क्रमेण योजना ॥ ५६ ॥ महर्षयोपि कामवशाः किमुत पृथग्जन इत्याह—महर्षय इति ॥ धर्मतपसी अभिकामयन्त इति धर्मतपोभिकामाः । कामस्याभिलाषस्य अनु पश्चात् कामो येषां ते कामानुकामाः । प्रतिबद्धमोहाः नियतस्त्रीव्यामोहाः ॥५७॥ सखेलं सलीलं ॥ ५८—६० ॥ चारित्रं रक्षितं त्वया अन्तःपुरस्त्र्यवलोकनमनुचितमिति बहिरेव तिष्ठता त्वया सदाचारः सम्यगनुष्ठित इत्यर्थः । शरणागतरक्षणाचारस्त्वया सम्यगनुष्ठित इति वा । अच्छलं अदोषावहं॥६१॥ तारयेत्यादिश्लोकचतुष्टयमेकं वाक्यं। समावृतं परिवृतं । संरब्धतरः कुपिततरः । अतएव

यस्मिञ्जने अवबद्धंजानामीति स्त्रीजनंजानामीतिवायोजना ॥ ५४ ॥ **ति०** ममसंनिकृष्टं स्वभार्यायाममसमीपेकामवशाद्वर्तमानं । कामाभियोगः कामावेशः । क्षमस्वेति । परवशप्रवृत्तापराधत्वात्स्वभ्रातृत्वाच्चक्षमैवात्रयोग्यानतुकोपइत्याशयः ॥ **स०** कामवृत्तं स्वेच्छाचारिणं । अतएवममसंनिकृष्टं मच्छय्यासक्तं । त्वद्भ्रातरं सखित्वात् । एतादृशंसुग्रीवमुद्दिश्यक्षमस्व ॥५६॥ **ति०** कामवशत्वंनास्यैवेत्याह—**महर्षयइति ।** कामे कामभोगे अनुकामोऽभिलाषोयेषांते ।अतएवस्त्रीषुप्रतिबद्धमोहाः । कपिः तत्रापिराजा ॥ ५६ ॥ **ति०** चारित्रंरक्षितंझटित्यन्तःपुरगमनेन । अच्छलं छलमधर्मः । सनेत्यर्थः । मित्रभावेननतुविकारेण ॥ **शि०** यतः चारित्रं सखाप्रबोधनीयइतिमर्यादा । त्वयारक्षितं । तत् तस्मात् । आगच्छ अन्तःप्रविश । ननुतत्प्रवेशेअनुचितपरस्त्रीदर्शनंभविष्यतीत्यतआह—मित्रभावेनदारावलोकनं सतां अच्छलं नाधर्मः ॥ ६१ ॥ **ती०** प्रमदाभिः समं इतिच्छेदः । प्रमदाभिस्समंसुग्रीवंददर्श । ततः संरब्धतररक्ताक्षोबभूवेतिसंबन्धः ॥ ६५ ॥ इतित्रयस्त्रिंशःसर्गः ॥ ३३ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. यथार्थधर्मावेक्षते. २ क. ख. ङ.—ट. विमुक्तलज्जं. ३ छ. झ. ट. तपोभिरामाः. ४ छ. झ. ट. सखेदंमदविह्वलाक्षी. ञ. सखेलंमदविह्वलाक्षी. ५ घ. महावीर्याःकपयः. ६ घ. अथागच्छ. ७ ख. महेन्द्रवरुणोपमं. ग. महेन्द्रसदृशद्युतिं. ८ ग. झ. ट. मालाभिः. ९ क. घ. ङ. छ.—ट. समंततः. १० ग. तंदृष्ट्वाक्रोधताम्राक्षः.

रुमां तु वीरः परिरभ्य गाढं वरासनस्थो वरहेमवर्णः ॥
ददर्श सौमित्रिमदीनसत्त्वं विशालनेत्रः सुविशालनेत्रम् ॥ ६६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

चतुस्त्रिंशः सर्गः ॥ ३४ ॥

लक्ष्मणेनसुग्रीवंप्रति रामप्रत्युपकारानुद्यमहेतुनाकृतघ्नताप्रतिपादनपूर्वकं तदकरणेरामबाणेन तस्यवालिमार्गानुसरणोक्तिः ॥ १ ॥

तमप्रतिहतं क्रुद्धं प्रविष्टं पुरुषर्षभम् ॥ सुग्रीवो लक्ष्मणं दृष्ट्वा बभूव व्यथितेन्द्रियः ॥ १ ॥
क्रुद्धं निःश्वसमानं तं प्रदीप्तमिव तेजसा ॥ भ्रातुर्व्यसनसंतप्तं दृष्ट्वा दशरथात्मजम् ॥ २ ॥
उत्पपात हरिश्रेष्ठो हित्वा सौवर्णमासनम् ॥ महान्महेन्द्रस्य यथा स्वलंकृत इव ध्वजः ॥ ३ ॥
उत्पतन्तमनूत्पेतू रुमाप्रभृतयः स्त्रियः ॥ सुग्रीवं गगने पूर्णचन्द्रं तारागणा इव ॥ ४ ॥
संरक्तनयनः श्रीमान्विचचाल कृताञ्जलिः ॥ बभूवावस्थितस्तत्र कल्पवृक्षो महानिव ॥ ५ ॥
रुमाद्वितीयं सुग्रीवं नारीमध्यगतं स्थितम् ॥ अब्रवील्लक्ष्मणः क्रुद्धः सतारं शशिनं यथा ॥ ६ ॥
सत्त्वाभिजनसंपन्नः सानुक्रोशो जितेन्द्रियः ॥ कृतज्ञः सत्यवादी च राजा लोके महीयते ॥ ७ ॥
यस्तु राजा स्थितोऽधर्मे मित्राणामुपकारिणाम् ॥ मिथ्या प्रतिज्ञां कुरुते को नृशंसतरस्ततः ॥ ८ ॥
शतमश्वानृते हन्ति सहस्रं तु गवानृते ॥ आत्मानं स्वजनं हन्ति पुरुषः पुरुषानृते ॥ ९ ॥
पूर्वं कृतार्थो मित्राणां न तत्प्रतिकरोति यः ॥ कृतघ्नः सर्वभूतानां स वध्यः प्लवगेश्वर ॥ १० ॥
गीतोऽयं ब्रह्मणा श्लोकः सर्वलोकनमस्कृतः ॥ दृष्ट्वा कृतघ्नं क्रुद्धेन तं निबोध प्लवङ्गम ॥ ११ ॥
ब्रह्मघ्ने च सुरापे च चोरे भग्नव्रते तथा ॥ निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥ १२ ॥
अनार्यस्त्वं कृतघ्नश्च मिथ्यावादी च वानर ॥ पूर्वं कृतार्थो रामस्य न तत्प्रतिकरोषि यत् ॥ १३ ॥

रक्ताक्षश्च ॥ ६२—६६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

अथ सुग्रीवं प्रति रामसंदेशकथनं चतुस्त्रिंशे—तमप्रतिहतमित्यादि ॥ १ ॥ महेन्द्रस्य ध्वज इव उत्पपात । स्वलंकृत इत्युभयविशेषणं ॥ २—३ ॥ अनूत्पेतुः पश्चादुत्पेतुः ॥ ४ ॥ संरक्तनयनः मदेनेति-शेषः ॥ ५—७ ॥ अधर्म इति च्छेदः ॥ ८ ॥ पुरुषः अश्वानृते अश्वविषयानृते । शतं हन्ति शताश्वहननदोषभाग्भवेदित्यर्थः । एवं गवानृते गोविषयानृते । सहस्रं हन्ति सहस्रगोहननदोषभाग्भवेत् । पुरुषानृते आत्मानं स्वजनं हन्ति । आत्मस्वजनहननदोषभाग्भवेदित्यर्थः । महापुरुषरामविषयानृते तु सर्वहननदोषभाग्भवेदिति भावः ॥ ९ ॥ तत् मित्रकार्यं न प्रतिकरोति पुनर्न करोति ॥ १० ॥ ब्रह्मणा स्वायंभुवमनुना ॥ ११ ॥ निष्कृतिः प्रायश्चित्तं

रामानु० महेन्द्रस्यध्वजोयथास्वलङ्कृतः तथास्वलङ्कृतःहरिश्रेष्ठः सौवर्णमासनंहित्वा महाध्वजइवोत्पपातेतिसंबन्धः ॥ ३ ॥ **ति०** संचचार संमुखमाजगाम । अवस्थितोबभूवेत्यस्य लक्ष्मणइतिशेषः । कल्पवृक्षोपमयासर्वहितत्वंव्यज्यं ॥ ५ ॥ **ति०** प्रथममात्मानंहन्ति आत्मघातदोषभाक् । निजंपुण्यलोकंनाशयतिवा । तथास्वजनस्यपित्रादेःपुण्यलोकंचनाशयति ॥ ९ ॥ **ति०** ब्रह्मणा हिरण्यगर्भेण । अयंश्लोकः पूर्वोक्तः । सर्वलोकनमस्कृतः ब्रह्मवदेवसर्वस्मर्तृसंमतइत्यर्थः ॥ ११ ॥

[पा०] १ क. ङ. ज.—ट. सविशाल. २ ङ. ञ. उत्पतन्तंसमुत्पेतुः. ३ क. घ.—ट. पूर्ण. ख. तूर्ण. ४ ङ.—ट. श्रीमान्संचचार. ख. श्रीमान्मदलोलः. ५ ग. घ. सहस्रंच. ६ क. ग.—ट. गोघ्नेचैवसुरापे. ७ छ. झ. ञ. चौरे.

ननु नाम कृतार्थेन त्वया रामस्य वानर ॥ सीताया मार्गणे यत्नः कर्तव्यः कृतमिच्छता ॥ १४ ॥
स[1] त्वं ग्राम्येषु भोगेषु सक्तो मिथ्याप्रतिश्रवः ॥ न त्वां रामो विजानीते सर्पं मण्डूकराविणम् ॥१५॥
महाभागेन रामेण पापः करुणवेदिना ॥ हरीणां प्रापितो राज्यं त्वं दुरात्मा महात्मना ॥ १६ ॥
कृतं[2] चेन्नाभिजानीषे रा[3]मस्याक्लिष्टकर्मणः ॥ सद्यस्त्वं निशितैर्बाणैर्हतो द्रक्ष्यसि वालिनम् ॥ १७ ॥
न च संकुचितः पन्था येन वाली हतो गतः ॥ समये तिष्ठ सुग्रीव मा वालिपथमन्वगाः ॥ १८ ॥

न नूनमिक्ष्वाकुवरस्य का[4]र्मुकच्युताञ्शरान्पश्यसि वज्रसन्निभान् ॥
ततः सुखं नाम निषेवसे सुखी न रामकार्यं मनसाऽप्यवेक्षसे ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

पञ्चत्रिंशः सर्गः ॥ ३५ ॥

तारया सुग्रीवायक्रुध्यतो लक्ष्मणस्य हेतूक्त्यापुनःसान्त्वनम् ॥ १ ॥

तथा ब्रुवाणं सौ[5]मित्रिं प्रदीप्तमिव तेजसा ॥ अब्रवील्लक्ष्मणं तारा ताराधिपनिभानना ॥ १ ॥
नैवं[6] ल[7]क्ष्मण वक्तव्यो नायं परुषमर्हति ॥ हरीणामीश्वरः श्रोतुं तव वक्राद्विशेषतः ॥ २ ॥
नैवाकृतज्ञः सुग्रीवो न शठो नापि दारुणः ॥ नैवानृतकथो वीर न जिह्मश्च कपीश्वरः ॥ ३ ॥
उपकारं कृ[8]तं वीरो नाप्ययं विस्मृतः कपिः ॥ रामेण वीर सुग्रीवो यदन्यैर्दुष्करं रणे ॥ ४ ॥
रामप्र[9]सादात्कीर्तिं च कपिराज्यं च शाश्वतम् ॥ प्राप्तवानिह सुग्रीवो रुमां मां च परन्तप ॥ ५ ॥
सु[10]दुःखं शयितः पूर्वं प्राप्येदं सुखमुत्तमम् ॥ प्राप्तकालं न जानीते विश्वामित्रो य[11]था मुनिः ॥ ६ ॥
घृताच्यां किल संसक्तो दश वर्षाणि लक्ष्मण ॥ अहोऽमन्यत धर्मात्मा विश्वामित्रो महामुनिः ॥७॥

॥ १२—१३ ॥ कृतमिच्छता उपकारंस्मरता ॥१४॥ मण्डूकराविणं मण्डूकग्रहणार्थं मण्डूकवद्रौतीति तमिव वञ्चकं त्वां न जानातीत्यर्थः ॥ १५—१८ ॥ रामसन्दिष्टं वाक्यमभिधाय प्रकृतकार्योचितं स्ववाक्यमाह—न नूनमिति ॥ इक्ष्वाकुवरस्य कार्मुकच्युतान् बाणान् वज्रसन्निभान् न पश्यसि नाद्राक्षीः । नूनं ततो नाम तस्मात्खलु । सुखं निषेवसे सुखी सन् रामकार्यं मनसापि नावेक्षस इति योजना ॥१९॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चतुस्त्रिंशःसर्गः ॥३४॥

अथ पुनस्तारया लक्ष्मणसान्त्वनं पञ्चत्रिंशे—तथा ब्रुवाणमित्यादि ॥ १ ॥ वक्तव्यः परुषमितिशेषः ॥ २ ॥ जिह्मः कुटिलः ॥ ३ ॥ विस्मृत इति कर्तरि निष्ठा । अन्यैर्दुष्करं तं उपकारं न विस्मृत इति योजना ॥ ४—६ ॥ विश्वामित्रो घृताच्यामासक्तो

ति० मण्डूकराविणं स्वगृहीतस्वमुखस्थमण्डूकशब्देनशब्दवन्तंसर्पं यथाजनोऽनवलोकनान्मण्डूकमेवजानीतेनतुसर्पं तथातव स्वरूपं रामोनाज्ञासीदितिभावः । कश्चित्तु मण्डूकग्रहणार्थंसर्पोमण्डूकवद्रौति । तेनस्वरेणस्वगणइतिविस्रब्धः स्वसमीपमागतो मण्डूकस्तेनगृह्यते । एवंवञ्चकंत्वांनाज्ञासीदित्यर्थइत्याह । तत्तुतथालोकाप्रसिद्ध्योपेक्ष्यं ॥ १५ ॥ शि० किंच समये सम्यक्शुभावहकार्येतिष्ठ कुर्वित्यर्थः ॥ १८ ॥ इतिचतुस्त्रिंशः सर्गः ॥ ३४ ॥

स० कृतमुपकारंजानातीतिकृतज्ञः सनभवतीत्यकृतज्ञः । तादृशोनैव । शठः गूढद्वेषी । अनृतकथः मृषावादी । जिह्मः कुटिलः ॥ ३ ॥ स० यत् यस्मात् । अन्यैर्दुष्करंरामेणकृतं उपकारमुद्दिश्य यंवीरःसुग्रीवः । विस्मृतः भावेक्तः । विगतंस्मृतं यस्यसतथा । विस्मरणवानितियावत् । नापि नैवभवतीत्यर्थः । अतोपिनकृतघ्नइत्यर्थः ॥ ४ ॥ ति० यद्यपि पूर्वंबालकाण्डेमेनका-

[पा०] १ ज. यस्त्वं. २ ङ. च. ज. कृतंत्वंनाभि. झ. कृतंचेन्नाति. ३ ङ—ट. राघवस्यमहात्मनः. ४ घ. ङ. च. ज. ञ. कार्मुकाच्युतान्. क. ग. ट. कार्मुकाच्छरांश्च्युतान्. झ. कार्मुकाच्छरांश्चतान्. ५ क. काकुत्स्थं. ६ ज. मैवं. ७ क. हरीश्वरः. ८ क. कृतंपूर्वं. ९ ख. प्रसादात्सौमित्रे. १० ङ. छ.—ञ. सुदुःखशयितः. ११ क. ङ. च. ज. ञ. मुनिर्यथा.

स हि प्राप्तं न जानीते कालं कालविदांवरः ॥ विश्वामित्रो महातेजाः किं पुनर्यः पृथग्जनः ॥ ८ ॥
[१]देहधर्मं गतस्यास्य परिश्रान्तस्य लक्ष्मण ॥ अवितृप्तस्य कामेषु [२]कामं क्षन्तुमिहार्हसि ॥ ९ ॥
न च रोष[३]वशं तात गन्तुमर्हसि लक्ष्मण ॥ [४]निश्चयार्थमविज्ञाय सहसा प्राकृतो यथा ॥ १० ॥
[५]सत्त्वयुक्ता हि पुरुषास्त्वद्विधाः पुरुषर्षभ ॥ अविमृश्य न रोषस्य सहसा यान्ति वश्यताम् ॥ ११ ॥
प्रसादये त्वां धर्मज्ञ [६]सुग्रीवार्थे समाहिता ॥ महान्रोषसमुत्पन्नः संरम्भस्त्यज्यतामयम् ॥ १२ ॥
रुमां [७]मां कपिराज्यं च धनधान्यवसूनि च ॥ रामप्रियार्थं सुग्रीवस्त्यजेदिति मतिर्मम ॥ १३ ॥
समानेष्यति सुग्रीवः सीतया सह राघवम् ॥ शशाङ्कमिव रोहिण्या [८]निहत्वा रावणं रणे ॥ १४ ॥
शतकोटिसहस्राणि लङ्कायां किल [९]राक्षसाः ॥ अयुतानि च षट्त्रिंशत्सहस्राणि शतानि च ॥ १५ ॥
अहत्वा तांश्च दुर्धर्षान्राक्षसान्कामरूपिणः ॥ [१०]न शक्यो रावणो हन्तुं येन सा मैथिली हृता ॥ १६ ॥
ते [११]न शक्या रणे हन्तुमसहायेन लक्ष्मण ॥ रावणः क्रूरकर्मा च सुग्रीवेण विशेषतः ॥ १७ ॥
एवमाख्यातवान्वाली [१२]स ह्यभिज्ञो हरीश्वरः ॥ आगमस्तु न मे व्यक्तः [१३]श्रवात्तस्माद्ब्रवीम्यहम् ॥ १८ ॥
त्वत्सहाय[१४]निमित्तं वै प्रेषिता हरिपुङ्गवाः ॥ आनेतुं वानरान्युद्धे सुबहून्[१५]हरियूथपान् ॥ १९ ॥
[१६]तांश्च प्रतीक्षमाणोऽयं विक्रान्तान्सुमहाबलान् ॥ राघवस्यार्थसिद्ध्यर्थं [१७]न निर्याति हरीश्वरः ॥ २० ॥

दश वर्षाणि अहोऽमन्यत दिनममन्यत। घृताचीशब्देनात्र मेनकैवोच्यते । मेनकासङ्गस्य बालकाण्डेभिधानात् ॥ ७—८ ॥ देहधर्मं गतस्य शरीरस्वभावं प्राप्तस्य । कामं कामवर्तनं ॥ ९ ॥ अपराधमङ्गीकृत्य सान्त्वयित्वा इदानीं विचार्यमाणे अपराधएव नास्तीत्याह—नचेति ॥ निश्चयार्थं निश्चयरूपमर्थं सुग्रीवाभिप्रायमिति यावत् ॥ १०—११ ॥ संरम्भः अभिनिवेशः ॥ १२ ॥ धनधान्येत्यत्र धनशब्दो हस्तिरथाश्वादिपरः । वसुशब्दो रत्नपरः ॥ १३ ॥ समानेष्यति घटयिष्यति । निहत्वेत्यत्रल्यबभाव आर्षः ॥ १४—१६ ॥ ते न शक्या इति च्छेदः । ते राक्षसाः । हन्तुं न शक्याः । रावणो विशेषेणासहायेन सुग्रीवेण हन्तुं न शक्यः ॥ १७ ॥ तर्हि रावणवृत्तान्तः सर्वोप्याख्यायतामित्यत्राह—एवमिति ॥ आगमः स्वयमवगमः । श्रवात् श्रवणात् । अत्र सुग्रीवेण युद्धाय निर्गमकाले तारयाङ्गदोक्तरामसुग्रीवसख्यकरणेभिहिते एतादृशो रावणः सुग्रीवो दुर्बलः तं कथं रामोवलम्बत इति वालिनोक्तमिति ज्ञेयं ॥ १८—२० ॥

संबन्धउक्तः । तथाप्येतद्वचनात् घृताचीसंबन्धोपितस्यज्ञेयइत्याहुः ॥ ७ ॥ **ति०** देहधर्माः आहारनिद्रामैथुनानि । पशुधर्मइति पाठेप्ययमेवार्थः ॥ ९ ॥ **ति०** कथमयंरावणंहनिष्यतीत्यत्रतत्साहाय्यकसाध्यत्वात्तद्वधस्येत्याह—**शतेति** । एषासंख्याविवक्षितैव दशकोटिःसमुद्रः शतकोटिर्मध्यं । मध्यानांसहस्रं तथाषष्टिसहस्राधिकत्रिलक्षाणि । तदुपरिषट्त्रिंशत्सहस्राणि । तदुपरितावन्ति शतानीत्यर्थः ॥ १५ ॥ **शि०** कामरूपिणइत्यनेन लङ्कायामुक्तसंख्याकराक्षसस्थित्यसंभवाभावःसूचितः ॥ तेनकार्यवशादेवतच्छरीराणांमहत्त्वमितिव्यक्तं ॥ १६ ॥ **ति०** तावतांवधेपरमशूरस्यापिसहायापेक्षास्तीत्याह—**तेइति** । यस्मादसहायेनरामेण ते हन्तुमशक्याः यस्माद्रावणश्चक्रूरकर्मा क्रूरपराक्रमः । तस्माद्विशेषतः सुग्रीवेणसहायेनप्रयोजनमस्ति । तत्समप्रतिसेनाघटनस्यसुग्रीवाधीनत्वात्सर्वेषांमनुष्यावध्यत्वाच्चेतिभावः । यत्तुतीर्थः सुग्रीवेणसहायेनतेराक्षसाहन्तुमशक्याः रावणश्चहन्तुमशक्यइत्यन्वयंकृत्वा वालीकिलोक्तवान्रावणवधाय सुग्रीवंवृथाप्रार्थयतेरामः तस्यासावशक्यइतिकथांचकल्पयति तदपार्थकं । रामस्यसहायापेक्षासमर्थनस्यैवप्रस्तुतत्वात् ॥ १७ ॥ **ति०** नन्वेषारक्षस्संख्यात्वयाकथंज्ञातातत्राह—एवमिति । आगमस्तुनमेव्यक्तः रावणस्यैवंबलप्राप्तिप्रकारस्तु नमयाज्ञातः । संख्यामात्रं प्रसंगात्पूर्वंश्रुतं । तस्यश्रवणात्तन्मुखतोवाक्यश्रवणात् ॥ १८ ॥

[पा०] १ ख. ग. ङ. झ. ट. देहधर्मंगतस्य. क. पशुधर्मंगतस्य. २ क. ख. ङ.—ञ. रामःक्षन्तुमिहार्हति. ३ ख. रोषवशात्तात. ४ क. लोकयात्रामविज्ञाय. ५ क. सत्वयुक्ताश्च. ङ. च. ज. ञ. सत्ववन्तोहि. ६ ङ—ट. सुग्रीवार्थं. ७ छ. झ. ट. मांचाङ्गदंराज्यं. ८ छ. झ. ट. हत्वातंराक्षसाधमं. क. ङ. च. ज. ञ. हत्वातंरावणं. ग. हत्वारावणमाहवे. ९ ख.—ट. रक्षसां. १० क.—घ. नशक्यंरावणं. च—ट. अशक्यंरावणं. ङ. अशक्योरावणो. ११ ङ. च. ज. नशक्यो. १२ ङ. सत्वभिज्ञः. १३ क. ख. श्रवणात्तद्ब्रवीम्यहं. ङ. च. ज. ञ. श्रवणात्तुब्रवीम्यहं. ग. छ. झ. ट. श्रवात्तस्यब्रवीम्यहं. १४ च.—ट. निमित्तंहि. १५ क. ङ.—ट. हरिपुङ्गवान्. १६ ग. तांस्तु. १७ क. सिद्ध्यर्थंनौदासीन्यंगतोहरिः.

[1]कृताऽत्र संस्था सौमित्रे सुग्रीवेण यथा पुरा ॥ [2]अद्य तैर्वानरैः सर्वैरागन्तव्यं महाबलैः ॥ २१ ॥
ऋक्षकोटिसहस्राणि गोलाङ्गूलशतानि च ॥ अद्य त्वामुपयास्यन्ति जहि कोपमरिन्दम ॥
कोट्योनेकास्तु काकुत्स्थ [3]कपीनां दीप्ततेजसाम् ॥ २२ ॥
तव हि मुखमिदं निरीक्ष्य कोपात्[4]क्षतजनिभे नयने निरीक्षमाणाः ॥
हरिवरवनिता न यान्ति शान्तिं प्रथमभयस्य हि शङ्किताः स सर्वाः ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

षट्त्रिंशः सर्गः ॥ ३६ ॥

तारापरिसान्त्वनेन प्रसन्नमनसंलक्ष्मणंप्रतिसुग्रीवेण राममहिमप्रशंसनपूर्वकं स्वापराधक्षमापणम् ॥ १ ॥ लक्ष्मणेनापि सुग्रीवंप्रति स्वपरुषभाषणक्षमापणपूर्वकं सत्वरंरामसमीपमेत्य सान्त्वनचोदना ॥ २ ॥

इत्युक्तस्तारया वाक्यं प्रश्रितं धर्मसंहितम् ॥ मृदुस्वभावः सौमित्रिः प्रतिजग्राह तद्वचः ॥ १ ॥
तस्मिन्प्रतिगृहीते तु वाक्ये हरिगणेश्वरः ॥ [5]लक्ष्मणात्सुमहत्रासं वस्त्रं क्लिन्नमिवात्यजत् ॥ २ ॥
ततः कण्ठगतं माल्यं चित्रं बहुगुणं महत् ॥ चिच्छेद विमदश्चासीत्सुग्रीवो वानरेश्वरः ॥ ३ ॥
स लक्ष्मणं भीमबलं सर्ववानरसत्तमः ॥ अब्रवीत्प्रश्रितं वाक्यं सुग्रीवः संप्रहर्षयन् ॥ ४ ॥
प्रनष्टा श्रीश्च कीर्तिश्च कपिराज्यं च शाश्वतम् ॥ रामप्रसादात्सौमित्रे पुनः प्राप्तमिदं मया ॥ ५ ॥
कः शक्तस्तस्य देवस्य ख्यातस्य स्वेन कर्मणा ॥ [6]तादृशं विक्रमं वीर प्रतिकर्तुमरिन्दम ॥ ६ ॥
सीतां प्राप्स्यति धर्मात्मा वधिष्यति च रावणम् ॥ सहायमात्रेण मया राघवः स्वेन तेजसा ॥ ७ ॥

अत्र सीतान्वेषणकार्यविषये । सुग्रीवेण पुरा त्वदागमनात्पूर्वमेव । संस्था व्यवस्था त्रिपञ्चरात्रादूर्ध्वं नागन्तव्यमित्येवंरूपा। यथा येन प्रकारेण कृता तथा । अद्य अस्मिन्दिने । तैरागन्तव्यं ॥ २१—२२ ॥ हिशब्दः पादपूरणे । सर्वाः हरिवरवनिताः तवेदं मुखं निरीक्ष्य प्रथमभयस्य शङ्किताः वालिवधजनितभयशङ्किताः सत्यः । रोषाद्धेतोः क्षतजसमे नयने निरीक्षमाणाः शान्तिं न यान्तिहि न यान्त्येव । प्रथमभयस्य शङ्किता इति कर्मणि षष्ठी । " न लोकाव्यय-" इत्यादिना षष्ठीप्रतिषेधेपि तत्प्रयोग आर्षः ॥ २३ ॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चत्रिंशः सर्गः ॥ ३५ ॥

अथ लक्ष्मणसुग्रीवसौहृदभाषणं षट्त्रिंशे—इत्युक्त इत्यादि ॥ १ ॥ सुमहत्रासमिति " आन्महत—" इत्याकाराभाव आर्षः । क्लिन्नं आर्द्रं ॥ २ ॥ बहुगुणं बहुविधभोगप्रदं । महत् दिव्यं ॥ ३—४ ॥ इदं पूर्वोक्तं सर्वं ॥ ५ ॥ तादृशंविक्रमं प्रतिकर्तुं तादृशस्य विक्रमस्य प्रतिकर्तुमित्यर्थः ॥ ६ ॥ सहायमात्रेणमयेत्युप-

---

शि० गोलाङ्गूलशतानि अनन्तसंख्याकगोलाङ्गूलदैर्घ्यसदृशदैर्घ्यविशिष्टलाङ्गूलविशिष्टवानरविशेषाश्चेत्यर्थः ॥ २२ ॥ इति पञ्चत्रिंशः सर्गः ॥ ३५ ॥

स० धर्मसंहितंप्रश्रितंवचः अवाक्यंयथाभवतितथाप्रतिजग्राह । प्रत्युत्तरंनोक्तवानितियावत् । इतिवाक्यं उक्तः श्रावित इतिवा ॥ १ ॥ सुमहात्रासं अतिमहाभयं । सुमहत्रासमितिपाठे सुमहदितिव्यस्तांसद्वस्त्रपदेनान्वेति ॥ **रामानु०** सुमहत् सुमहान्तं ॥ २ ॥ **शि०** देवस्य नित्यप्रमोदवतः ॥ **ति०** स्वेनकर्मणा धनुर्भङ्गवालिवधादिना । तादृशं तज्जनितोपकारसदृशं ॥ ६ ॥

[**पा०**] १ छ. झ. ट. कृतासुसंस्था. क. ख. ग. ङ. च. ज. ञ. कृतातुसंस्था. २ ट. उद्यतैर्वानरैः. ३ ग. हरीणां. ४ ङ. च. ज.—ट. रक्षतजसमे. ५ ज. लक्ष्मणोत्थमहत्. ६ छ. झ. ट. तादृशंप्रतिकुर्वीतअंशेनापिनृपात्मज.

सहायकृत्यं किं तस्य येन सप्त महाद्रुमाः ॥ शैलश्च वसुधा चैव बाणेनैकेन दारिताः ॥ ८ ॥
धनुर्विस्फारयाणस्य यस्य शब्देन लक्ष्मण ॥ सशैला कम्पिता भूमिः सहायैस्तस्य किंनु वै ॥ ९ ॥
अनुयात्रां नरेन्द्रस्य करिष्येऽहं नरर्षभ ॥ गच्छतो रावणं हन्तुं वैरिणं सपुरस्सरम् ॥ १० ॥
यदि किंचिदतिक्रान्तं विश्वासात्प्रणयेन वा ॥ प्रेष्यस्य क्षमितव्यं मे न कश्चिन्नापराध्यति ॥ ११ ॥
इति तस्य ब्रुवाणस्य सुग्रीवस्य महात्मनः ॥ अभवल्लक्ष्मणः प्रीतः प्रेम्णा चैवमुवाच ह ॥ १२ ॥
सर्वथा हि मम भ्राता सनाथो वानरेश्वर ॥ त्वया नाथेन सुग्रीव प्रश्रितेन विशेषतः ॥ १३ ॥
यस्ते प्रभावः सुग्रीव यच्च ते शौचमार्जवम् ॥ अर्हस्त्वं कपिराज्यस्य श्रियं भोक्तुमनुत्तमाम् ॥ १४ ॥
सहायेन च सुग्रीव त्वया रामः प्रतापवान् ॥ वधिष्यति रणे शत्रूनचिरान्नात्र संशयः ॥ १५ ॥
धर्मज्ञस्य कृतज्ञस्य संग्रामेष्वनिवर्तिनः ॥ उपपन्नं च युक्तं च सुग्रीव तव भाषितम् ॥ १६ ॥
दोषज्ञः सति सामर्थ्ये कोऽन्यो भाषितुमर्हति ॥ वर्जयित्वा मम ज्येष्ठं त्वां च वानरसत्तम ॥ १७ ॥
सदृशश्चासि रामस्य विक्रमेण बलेन च ॥ सहायो दैवतैर्दत्तश्चिराय हरिपुङ्गव ॥ १८ ॥
किं तु शीघ्रमितो वीर निष्क्राम त्वं मया सह ॥ सान्त्वय स्ववयस्यं त्वं भार्याहरणकर्शितम् ॥ १९ ॥
यच्च शोकाभिभूतस्य श्रुत्वा रामस्य भाषितम् ॥ मया त्वं परुषाण्युक्तस्तच्च त्वं क्षन्तुमर्हसि ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

लक्षणे तृतीया । स्वयमेवार्थसाधकः । अहंतु तस्यपरिकरमात्रमितिभावः ॥ ७–१० ॥ अतिक्रान्तं अतिक्रमणं । क्षमितव्यं क्षन्तव्यं ॥ ११—१५ ॥ उपपन्नं अर्हं । युक्तं युक्तियुक्तं ॥ १६ ॥ दोषज्ञः स्वदोषज्ञः । लोके हि समर्थः पुरुषः स्वदोषमपह्नुते नतुप्रकाशयति । न तथात्वमिति भावः ॥ १७—१९ ॥ स्वोक्तपरुषवा-

---

ति० सहायकृत्यं सहायसाध्यंकृत्यं । चेन पातालानितत्स्थदैत्याश्च ॥ ८ ॥ **तनि०** इदंकृतापराधस्येतिपूर्वोपदिष्टार्थस्यानुष्ठानं । किंचिदिति । अधिकातिक्रमणस्यप्रसादनेनानिवर्त्यत्वं । यदीति स्वल्पस्याप्यसंभावनाचद्योत्यते । विश्वासादिति बुद्धिपूर्वापराधव्यावृत्तिः । प्रणयेनेति अतिक्रमस्याभासत्वात् । प्रेष्यस्येति बुद्धिपूर्वकवास्तवापराधेपिक्षन्तव्यमितिव्यञ्जितं । क्षमितव्यमित्युक्त्या अक्षमणेप्रत्यवायोपिव्यञ्जितः । नकश्चिन्नापराध्यतीति विश्वासप्रणयपात्रभूतस्य स्वल्पापराधत्वेअयमपराधः सर्वत्रवर्जनीयइतिभावः । **शि०** प्रणयेन भृत्यविषयकस्वाभाविकस्नेहेन । क्षमितव्यं । कश्चिन्नापराध्यतीतिन । सर्वोपियत्किंचिदपराध्यतीत्यर्थः । तेनापराधंदृष्ट्वा तवक्षमायाअभावेतवभृत्यस्नेहोनिर्विषयोभविष्यतीतिव्यञ्जितं ॥ ११ ॥ **शि०** प्रश्रितेन स्नेहयुक्तेन । अतएवनाथेन अभिलाषप्रापकेणत्वयाममभ्राता सर्वथासनाथः अभिलाषप्रापकसहितोऽभवदितिशेषः ॥ १३ ॥ **ति०** शौचं इन्द्रियनिग्रहः । **स०** शौचं शुद्धान्तःकरणता ॥ १४ ॥ **ती०** दोषज्ञः विद्वान् । "विद्वान्विपश्चिद्दोषज्ञः" इत्यमरः ॥ १७ ॥ **तनि०** शोकाभिभूतस्येत्यनेन रामःस्वभावतःपरुषभाषणंनवक्तीतिव्यज्यते । "उच्यमानोपिपरुषंनोत्तरंप्रतिपद्यते" इतिप्रसिद्धेरितिभावः । तादृशस्यरामस्यभाषणंश्रुत्वा मयात्वमुक्तइत्यनेन उक्तानुवादस्यादोषत्वंव्यञ्जितं । तच्चेति । सूचनस्यापि यद्भवेदित्यनुवादिताप्रयुक्तमित्यर्थः ॥ अत्रेदंवेदितव्यं । कार्याभिसन्धिसद्भावेजाप्रतिस्वामिनः श्रीरामस्यसंनिधिंप्रतिगन्तव्यत्वरांविस्मृत्यभोगप्रसंगसंगेनान्यपरत्वात्समयातिलङ्घनापराधंकृतवतिमहाराजे लक्ष्मणक्रोधवेगंनिरीक्ष्य मित्रश्रेष्ठेनहनुमता "कृतापराधस्यहितेनान्यंपश्याम्यहंक्षमम् । अन्तरेणाञ्जलिंबद्ध्वालक्ष्मणस्यप्रसादनात्" इतिमहाराजायहितोपदेशेकृतेसति महाराजोपिबुध्वा "यदिकिंचिदतिक्रान्तंविश्वासात्प्रणयेनवा । प्रेष्यस्यक्षमितव्यंमेनकश्चिन्नापराध्यति" इतिकथनेनभगवद्विषयेकृतापराधेनापि भागवतक्षमापणेकृतेसतितन्मुखेन भगवानपराधान्क्षमयते । ततोभगवदपचाररहितस्सन् तत्कैंकर्ययोग्योभवतीत्येनमर्थंविशदीचकार । तदनन्तरं "यच्चशोकाभिभूतस्यक्रोधाद्रामस्यभाषितम् । मयात्वंपरुषाण्युक्तस्तच्चत्वंक्षन्तुमर्हसि" इतिलक्ष्मणस्तावदात्मीयपरुषवाक्यानांशोकविवशराम-

[पा०] १ ङ.—ट. गिरिश्च. २ ङ.—ट. सहायैःकिंनुतस्य. ३ क. यात्रांतुरामस्य. ४ क. ङ. छ. झ. ट. चेदमुवाचह. ख. ज. ञ. चैनमुवाचह. ५ ङ. छ. झ. ट. शौचमीदृशं. क. ग. घ. ज. ञ. शौचमुत्तमं. च. शौर्यमुत्तमं. ६ ङ. छ.—ठ. सहायेन. ७ घ. सदृशश्चापि. ८ छ. झ. ट. रामेण. ९ ख. निष्क्रमस्व. १० क. ख. ग. च.—ट. स्ववयस्यंच. ११ क. ग. ङ.—ट. हरणदुःखितं. १२ ङ.—ट. स्तत्क्षमस्वसखेमम.

सप्तत्रिंशः सर्गः ॥ ३७ ॥

सुग्रीवेण हनुमन्तंप्रति सकलदिगन्तपर्यन्तावस्थितसर्ववानरनिकरसमानयनाय दूतप्रेषणचोदना ॥ १ ॥ तैस्तैर्वानरैः सुग्रीवसंदेशश्रवणमात्रेणसत्वरंस्वस्वस्थानेभ्यः सुग्रीवसमीपंप्रत्यागमनम् ॥ २ ॥ पूर्वमेवनीलप्रेषितदूतैः सुग्रीवंप्रति नानाफलमूलाद्युपायनसमर्पणपूर्वकं सर्ववानरागमननिवेदनम् ॥ ३ ॥

[1]एवमुक्तस्तु सुग्रीवो लक्ष्मणेन महात्मना ॥ हनुमन्तं स्थितं पार्श्वे सचिवं त्विदमब्रवीत् ॥ १ ॥
महेन्द्रहिमवद्विन्ध्यकैलासशिखरेषु च ॥ मन्दरे पाण्डुशिखरे पञ्चशैलेषु ये स्थिताः ॥ २ ॥
तरुणादित्यवर्णेषु भ्राजमानेषु [2]सर्वतः ॥ पर्वतेषु समुद्रान्ते [3]पश्चिमायां तु ये दिशि ॥ ३ ॥
आदित्यभवने चैव गिरौ सन्ध्याभ्रसन्निभे ॥ [4]पद्मतालवनं भीमं [5]संश्रिता हरिपुङ्गवाः ॥ ४ ॥
अञ्जनाम्बुदसंकाशाः [6]कुञ्जरप्रतिमौजसः ॥ अञ्जने पर्वते चैव ये [7]वसन्ति प्लवङ्गमाः ॥ ५ ॥
[8]मनःशिलागुहावासा वानराः [9]कनकप्रभाः ॥ मेरुपार्श्व[10]गताश्चैव ये [11]धूम्रगिरिसंश्रिताः ॥ ६ ॥
तरुणादित्यवर्णाश्च पर्वते [12]च महारुणे ॥ पिबन्तो मधु मैरेयं भीमवेगाः प्लवङ्गमाः ॥ ७ ॥
वनेषु च सुरम्येषु सुगन्धिषु महत्सु च ॥ [13]तापसानां च रम्येषु वनान्तेषु समन्ततः ॥ ८ ॥
[14]तांस्तान्समानय क्षिप्रं पृथिव्यां सर्ववानरान् ॥ सामदानादिभिः [15]कल्पैराशु प्रेषय वानरान् ॥ ९ ॥
प्रेषिताः प्रथमं ये च मया [16]दूता महाजवाः ॥ त्वरणार्थं तु भूयस्त्वं हरीन्संप्रे[17]षयापरान् ॥ १० ॥
ये प्रसक्ताश्च कामेषु दीर्घसूत्राश्च वानराः ॥ इहानयस्व [18]तान्सर्वाञ्शीघ्रं [19]तु मम शासनात् ॥ ११ ॥

क्यानां रामोक्तत्वशङ्का मा भूदिति स्वेनैवोक्तत्वमुपपादयन् स्वापराधं शमयति—यच्चेति ॥ भाषितं सीतोद्देशेन श्रवणासह्यं विलापं ॥ २० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षट्त्रिंशः सर्गः ॥ ३६ ॥

अथ सर्ववानरसमानयनं सप्तत्रिंशे—एवमित्यादि ॥ १ ॥ महेन्द्रादय एव पञ्चशैलाः । पश्चिमायां दिशि ये स्थिताः तेषु ये वानराः स्थिताइतियोजना । अस्तगिरिपर्यन्तपर्वतेष्वित्यर्थः । आदित्यभवने उदयगिरौ । पद्माः चन्दनविशेषाः मनःशिलागुहावासाः मनःशिलामयगुहावासाः । महारुणे महारुणाख्ये । यत्र यच्छब्दो नास्ति तत्राध्याहर्तव्यः । कल्पैः उपायैः । समानय तदर्थं प्रेषय ॥ २—९ ॥ प्रेषितदूतत्वरणार्थोक्तिः स्वस्य प्रकृतकार्ये पूर्वमेव सावधानतां लक्ष्मणाय द्योतयितुं ॥ १० ॥ दीर्घसूत्राः चिरक्रियाः उद्योगं कुर्वाणा इव कालयापका इत्यर्थः ॥ ११ ॥

क्रोधमवेक्ष्यतदनुरूपाणिवाक्यान्युक्तानीतिसोपाधिकत्वमुपपाद्यसोपाधिकस्वापराधनिवृत्तयेसुमित्रात्मजस्सुग्रीवंप्रसादयन्सापराधेषु श्रीवैष्णवेषुपश्चात्तापेनकृतप्रायश्चित्तेष्वपराधान्निवृत्तेषुचसत्सु सापराधत्वदशायांस्वाचरितानामपचाराणांव्युदासार्थंतेप्रसादनीया इतिशास्त्रार्थंप्रकटनंकृतवानितिभावः ॥ २० ॥ इतिषट्त्रिंशः सर्गः ॥ ३६ ॥

स० पाण्डुशिखरेमन्दरे । इतिपञ्चशैलेषु ॥ २ ॥ **ति०** पश्चिमस्यामित्यार्षं ॥ ३ ॥ **ती०** आदित्योस्मिन्भवतिप्रादुर्भवतीत्यादित्यभवनमुदयाद्रिः ॥ **ति०** आदित्यभवनेगिरौ उदयाचलास्ताचलयोरित्यर्थः ॥ पद्माचलोगिरिविशेषः ॥ ४ ॥ **ति०** तापसाश्रमरम्येषु रम्यतापसाश्रमेषु । यद्वा तैरम्येष्वितिवनविशेषणं ॥ ८ ॥ **ति०** क्षिप्रमानयेत्युक्तेकिंमयैवगन्तव्यमित्याशङ्क्याह—**सामदानादिभिरिति** । आदिना दुष्टेदण्डः । कल्पैः उपायैः ॥ **कतक०** आनय आनाययेत्यर्थः ॥ ९ ॥ **शि०** दीर्घसूत्राः

[पा०] १ ङ.—ट. वचनंचेदमब्रवीत्. क. ख. सचिवंवाक्यमब्रवीत्. २ ङ.—ट. नित्यशः. क. ग. घ. सर्वशः. ३ ग. घ. पश्चिमस्यांच. क. ङ.—ट. पश्चिमस्यांतु. ४ ङ. च. छ. झ. ञ. ट. पद्माचलवनं. ५ घ. येश्रिताः. ६ छ. झ. ट. कुञ्जरेन्द्रमहौजसः. ७ ग. येचसन्ति. ८ क. ङ.—ट. महाशैलगुहा. ९ घ. काञ्चनप्रभाः. १० क. गतायेच. ११ क. ग. ङ. च. ज.—ट. येचधूम्रगिरिंश्रिताः. छ. येचधूम्रगिरिस्थिताः. १२ क. ङ.—ट. येमहारुणे. १३ ङ.—ट. तापसाश्रमरम्येषु. १४ क. ग. छ. झ. ट. तांस्तांस्त्वमानय. १५ ङ. छ. ञ. ट. कल्पैर्वानरैर्वेगवत्तरैः. ग. कल्पैराशुप्रेरय. १६ ङ. छ. झ. ट. ज्ञाताः. १७ छ. झ. ट. संप्रेषयहरीश्वरान्. ख. ङ. च. ज. ञ. हरीन्प्रेषयचापरान्. १८ छ. झ. ट. ताञ्शीघ्रंसर्वानेवकपीश्वरान्. १९ ग. त्वंमम.

अहोभिर्दशभिर्ये[1] हि नागच्छन्ति ममाज्ञया ॥ हन्तव्यास्ते दुरात्मानो राजशासनदूषकाः ॥ १२ ॥
शतान्यथ [2]सहस्राणां कोट्यश्च मम शासनात् ॥ प्रयान्तु कपिसिंहानां दिशो [3]मम मते स्थिताः ॥१३॥
मेघपर्वतसंकाशाश्छादयन्त इवाम्बरम् ॥ घोररूपाः कपिश्रेष्ठा यान्तु मच्छासनादितः ॥ १४ ॥
ते गतिज्ञा गतिं [4]गत्वा पृथिव्यां सर्ववानराः ॥ आनयन्तु हरीन्सर्वांस्त्वरिताः शासनान्मम ॥ १५॥
तस्य वानरराजस्य श्रुत्वा वायुसुतो वचः ॥ दिक्षु सर्वासु विक्रान्तान्प्रेषयामास वानरान् ॥ १६ ॥
ते पदं विष्णुविक्रान्तं पतत्रिज्योतिरध्वगाः ॥ प्रयाताः प्रहिता राज्ञा [5]हरयस्तत्क्षणेन वै ॥ १७ ॥
ते समुद्रेषु गिरिषु वनेषु च सरस्सु च ॥ वानरा वानरान्सर्वान्रामहेतोरचोदयन् ॥ १८ ॥
मृत्युकालोपमस्याज्ञां [6]राजराजस्य वानराः ॥ [7]सुग्रीवस्यायुः श्रुत्वा सुग्रीव[8]भयदर्शिनः ॥ १९ ॥
ततस्तेऽञ्जनसंकाशा गिरेस्तस्मान्महा[9]जवाः ॥ तिस्रः कोट्यः प्लवङ्गानां निर्ययुर्यत्र राघवः ॥ २० ॥
अस्तं गच्छति यत्रार्कस्तस्मिन्गिरिवरे स्थि[10]ताः ॥ [11]तप्तहेममहाभासस्तस्मात्कोट्यो दश च्युताः ॥ २१ ॥
कैलासशिखरेभ्यश्च सिंहकेसरवर्चसाम् ॥ ततः कोटिसहस्राणि [12]वानराणामुपागमन् ॥ २२ ॥
फलमूलेन जीवन्तो हिमवन्तमुपाश्रिताः ॥ तेषां कोटिसहस्राणां सहस्रं समवर्तत ॥ २३ ॥
[13]अङ्गारकसमानानां भीमानां भीमकर्मणाम् ॥ विन्ध्याद्वानरकोटीनां [14]सहस्राण्यपतन्द्रुतम् ॥ २४ ॥
क्षीरोदवेलानिलयास्तमालवनवासिनः ॥ नारिकेलाशनाश्चैव तेषां संख्या न वि[15]द्यते ॥ २५ ॥
वनेभ्यो गह्वरेभ्यश्च [16]सरिद्भ्यश्च महाजवाः ॥ आगच्छद्वानरी सेना पिबन्तीव दिवाकरम् ॥ २६ ॥
ये तु त्वरयितुं याता वानराः सर्ववानरान् ॥ ते वीरा हि[17]मवच्छैलं ददृशुस्तं महाद्रुमम् ॥ २७ ॥
तस्मिन्गिरिवरे [18]रम्ये यज्ञो माहेश्वरः पुरा ॥ सर्वदेव[19]मनस्तोषो [20]बभौ दिव्यो मनोहरः ॥ २८ ॥
अन्ननिष्यन्दजातानि मूलानि च फलानि च ॥ [21]अमृतास्वादकल्पानि ददृशुस्तत्र वानराः ॥ २९ ॥
तदन्नसंभवं दिव्यं [22]फलं मूलं मनोहरम् ॥ यः कश्चित्सकृदश्नाति मासं भवति तर्पितः ॥ ३० ॥

शतानीति बहुसंख्याभिधानं लक्ष्मणाय वानरासंख्येयत्वद्योतनार्थं ॥१२—१४॥ गम्यत इति गतिः वासस्थानं । पृथिव्यां सर्वान्हरीन् आनयन्तु इति संबन्धः ॥ १५—१६ ॥ पतत्रिज्योतिरध्वगाः पक्षिनक्षत्रमार्गगाः सन्तः । विष्णुविक्रान्तं पदं आकाशं । प्रयाताः ॥ १७—१९ ॥ यत्र येन हेतुनाराघवो वर्तते ततः तस्माद्धेतोः । तस्माद्गिरेः अञ्जनगिरेः । निर्ययुः ॥ २०—२४ ॥ अत्रापतन् द्रुतमित्यनुषज्यते । संख्या न विद्यतइति उत्तरत्र संख्याकीर्तनं प्रधानाभिप्रायेण ॥२५—२६॥ तुशब्दो हनुमत्प्रेरितवानरव्यावर्तकः । नीलेन पूर्वं प्रेरिता इत्यर्थः । तेषामेव लक्ष्मणसन्निधाने समागमनं । सद्यो हनुमत्प्रेरितानां तदसंभवात् । तं

स्वभावतोविलंबेनकार्यकारिणः । तान्शीघ्रमिहानय ॥ ११ ॥ **रामानु०** आनेतृबहुसंख्याभिधानमानेतव्यानामसंख्यातत्वंलक्ष्मणायद्योतयितुं ॥ १३ ॥ **शि०** गतिज्ञाः तत्तत्स्थानाभिज्ञाः । गतिं तत्तन्निवासं । गत्वा । गतिशब्दःकर्मसाधनः ॥ १५ ॥ **ति०** मृत्युकालोपमस्य निग्रहविषयेइतिशेषः ॥ १९ ॥ **कतक०** माहेश्वरोयज्ञः महेश्वरदेवत्यः । दिव्योश्वमेधः । सर्वदेवानांमनस्तोषोयत्रसः ॥ २८ ॥ **ती०** अन्ननिष्यन्दजातानि होमद्रव्याज्यादिस्रवणाज्जातानि । तत्र यज्ञायतने ॥ २९ ॥ इतिसप्तत्रिंशः सर्गः ॥ ३७ ॥

[**पा०**] १ क. ख. ग. ङ.—ट. यैंच. २ छ. ज. झ. ट. सहस्राणि. ३ छ. झ. ट. निदेशेममयेस्थिताः. ४ ग. ङ. च. ज. ञ. ज्ञात्वा. ५ छ. झ. ट. हरयस्तुक्षणेनवै. ६ घ. कपिराजस्य. ७ घ. सुग्रीवस्यवचःश्रुत्वा. ८ ङ—ट. भयशंकिताः. ९ ङ.–ट. महाबलाः. १० क. ग. छ. ट. रताः. ११ ङ.—ट. संतप्तहेमवर्णाभाः. १२ ङ.—ट. वानराणांसमागमन्. १३ ङ. च. ज. ञ. अङ्गारसमवर्णानां. ख. अङ्गारनिकराभाणां. १४ क. ग. ङ. च. ज. सहस्राण्यापतन्. १५ घ. शक्यते. १६ क. ग. वानराश्चमहौजसः. ङ.—ट. सरिद्भ्यश्चमहाबलाः. १७ छ. ज. झ. ट. हिमवच्छैले. १८ क. ङ. च. छ. झ. ञ. ट. पुण्ये. १९ क. सर्वदेवप्रियकरो. २० ङ.—ट. बभूवसुमनोरमः. २१ क. ग. ङ—ट. अमृतस्वादुकल्पानि. २२ क. छ. झ. ट. फलमूलं.

तानि मूलानि दिव्यानि फलानि च फलाशनाः ॥ औषधानि च दिव्यानि [1]जगृहुर्हरि[2]यूथपाः ॥३१॥
[3]तस्माच्च यज्ञायतनात्पुष्पाणि सुरभीणि च ॥ आनिन्युर्[4]वानरा गत्वा सुग्रीवप्रियकारणात् ॥ ३२ ॥
ते तु सर्वे हरिवराः पृथिव्यां सर्ववानरान् ॥ संचोदयित्वा [5]त्वरिता यूथानां जग्मुरग्रतः ॥ ३३ ॥
ते [6]तु तेन मुहूर्तेन [7]यूथपाः शीघ्रगामिनः ॥ किष्किन्धां त्वरया प्राप्ताः सुग्रीवो यत्र वानरः ॥ ३४॥
ते गृहीत्वौषधीः सर्वाः [8]फलं मूलं च वानराः ॥ तं प्रतिग्राहयामासुर्वचनं चेदमब्रुवन् ॥ ३५ ॥
सर्वे [9]परिगताः शैलाः [10]समुद्राश्च वनानि च ॥ पृथिव्यां वानराः सर्वे शासनादुपयान्ति ते ॥ ३६ ॥
[11]एवं श्रुत्वा ततो हृष्टः सुग्रीवः प्लवगाधिपः ॥ प्रति[12]जग्राह तत्प्रीतस्तेषां सर्वमुपायनम् ॥ ३७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे सप्तत्रिंशः सर्गः ॥ ३८ ॥

अष्टत्रिंशः सर्गः ॥ ३८ ॥

सुग्रीवेण सौमित्रिणासहशिबिकारोहणेन रामसमीपमेत्यतत्पादयोःप्रणामः ॥ १ ॥ रामेणपरिष्वङ्गपूर्वकंस्वाज्ञयासमुपविष्टंसुग्रीवंप्रति संग्रहेणराजनीतिप्रदर्शनपूर्वकमुद्योगसमयसंप्राप्तिनिवेदनेन स्वकार्योद्यमनचोदना ॥ २ ॥ सुग्रीवेणश्रीरामंप्रति स्वविषयकतत्प्रसादप्रशंसनपूर्वकं स्वोद्यमसूचकनानादेशसमागतासंख्येयकपिसेनासमागमननिवेदनेन तत्परितोषणम् ॥ ३ ॥

प्रतिगृह्य च तत्सर्वमुपायनमुपाहृतम् ॥ वानरान्सान्त्वयित्वा च सर्वानेव व्यसर्जयत् ॥ १ ॥
विसर्जयित्वा स हरीञ्शूरांस्तान्कृतकर्मणः ॥ मेने कृतार्थमात्मानं राघवं च महाबलम् ॥ २ ॥
स लक्ष्मणो भीमबलं सर्ववानरसत्तमम् ॥ अब्रवीत्प्रश्रितं वाक्यं सुग्रीवं संप्रहर्षयन् ॥
[13]किष्किन्धाया विनि[14]ष्क्राम यदि ते सौम्य रोचते ॥ ३ ॥
तस्य तद्वचनं श्रुत्वा लक्ष्मणस्य सुभाषितम् ॥ सुग्रीवः परमप्रीतो वाक्यमेतदुवाच ह ॥ ४ ॥
एवं भवतु [15]गच्छावः स्थेयं त्वच्छासने मया ॥ ५ ॥
तमेवमुक्त्वा सुग्रीवो लक्ष्मणं शुभलक्षणम् ॥ विसर्जयामास तदा [16]तारामन्याश्च योषितः ॥ ६ ॥
[17]एतेत्युच्चैर्हरि[18]वरान्सुग्रीवः समुदाहरत् ॥ ७ ॥
तस्य तद्वचनं श्रुत्वा हरयः शीघ्रमाययुः ॥ बद्धाञ्जलिपुटाः सर्वे ये [19]स्युः स्त्रीदर्शनक्षमाः ॥ ८ ॥
तानुवाच ततः प्राप्तान्राजार्कसदृशप्रभः ॥ उपस्थापयत क्षिप्रं शिबिकां मम वानराः ॥ ९ ॥
श्रुत्वा तु वचनं तस्य हरयः शीघ्रविक्रमाः ॥ समुपस्थापयामासुः शिबिकां प्रियदर्शनाम् ॥ १० ॥
तामुपस्थापितां दृष्ट्वा शिबिकां वानराधिपः ॥ लक्ष्मणारुह्यतां [20]शीघ्रमिति सौमित्रिमब्रवीत् ॥ ११ ॥

प्रसिद्धं ॥ २७—३७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने सप्तत्रिंशः सर्गः ॥ ३७ ॥

अथ रामेण सुग्रीवसमागमोऽष्टत्रिंशे—प्रतिगृह्येत्यादि ॥ उपायनं उपदा ॥ १—६ ॥ एत आगच्छत ॥ ७—११ ॥—

ति० विनिष्क्रामेति । प्रार्थनेलोट् ॥ ३ ॥

[पा०] १ ग. ददृशुः. २ झ. हरिपुङ्गवाः. ३ ग. तस्मात्सु. ४ ग. वानरश्रेष्ठाः. ५ क.—ट. त्वरितं. क. ङ. च. ज. ञ. त्वरितंयूथपाः. ग. त्वरितमागच्छन्नग्रतस्तदा. ६ च. तेनतेनमुहूर्तेन. ७ ङ. च. झ. ञ. ट. कपयःशीघ्रचारिणः. ८ घ. ङ. छ.—ट. फलमूलंच. ग. फलमूलानि. ९ ङ.—ट. परिहृताः. १० ज. परितश्चवनानिच. ङ. च. छ. झ. ञ. ट. सरितश्चवनानिच. ११ क. तच्छ्रुत्वातुततो. ख. एतच्छ्रुत्वावचोहृष्टः. ञ. पूर्वंश्रुत्वा. १२ ग. घ. छ. झ. ट. जग्राहचप्रीतः. क. च. ज. ञ. जग्राहसुप्रीतः. १३ घ. किष्किन्धातोऽभि. १४ ग. ङ—ज. ट. विनिष्क्रामो. १५ ङ.—ट. गच्छामः. १६ ङ. छ. झ. ञ. ट. ताराद्याश्चैव. १७ छ. झ. ट. एहीत्युच्चैः. १८ ग. घ. हरिवरःसुग्रीवः. १९ घ. येच. २० घ. शीघ्रंसौमित्रिमिदमब्रवीत्.

इत्युक्त्वा काञ्चनं यानं सुग्रीवः सूर्यसन्निभम् ॥ [1]बृहद्भिर्हरिभिर्युक्तमारुरोह सलक्ष्मणः ॥ १२ ॥
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ॥ शुक्लैश्च वालव्यजनैर्धूयमानैः समन्ततः ॥ १३ ॥
शङ्खभेरीनिनादैश्च [2]हरिभिश्चाभिनन्दितः ॥ निर्ययौ प्राप्य सुग्रीवो राज्यश्रियमनुत्तमाम् ॥ १४ ॥
स वानर[3]शतैस्तीक्ष्णैर्बहुभिः शस्त्रपाणिभिः ॥ परिकीर्णो ययौ तत्र यत्र रामो व्यवस्थितः ॥ १५ ॥
स तं देशमनुप्राप्य श्रेष्ठं रामनिषेवितम् ॥ अवातरन्महातेजाः शिबिकायाः सलक्ष्मणः ॥ १६ ॥
[4]आसाद्य च ततो रामं कृताञ्जलिपुटोभवत् ॥ कृताञ्जलौ स्थिते तस्मिन्वानराश्चाभवंस्तथा ॥ १७ ॥
तटाकमिव [5]तंदृष्ट्वा रामः कुड्मलपङ्कजम् ॥ वानराणां महत्सैन्यं सुग्रीवे प्रीतिमानभूत् ॥ १८ ॥
पादयोः पतितं मूर्ध्ना तमुत्थाप्य हरीश्वरम् ॥ प्रेम्णा च बहुमानाच्च राघवः परिषस्वजे ॥ १९ ॥
परिष्वज्य च धर्मात्मा निषीदेति ततोऽब्रवीत् ॥ तं [6]निषण्णं ततो दृष्ट्वा क्षितौ [7]रामोऽब्रवीद्वचः ॥ २० ॥
धर्ममर्थं च कामं च [8]यस्तु काले निषेवते ॥ विभज्य सततं वीर स राजा हरिसत्तम ॥ २१ ॥
हित्वा धर्मं [9]तथार्थं च कामं यस्तु निषेवते ॥ स वृक्षाग्रे यथा सुप्तः [10]पतितः प्रतिबुध्यते ॥ २२ ॥
अमित्राणां वधे युक्तो मित्राणां संग्रहे रतः ॥ त्रिवर्गफलभोक्ता [11]तु राजा धर्मेण युज्यते ॥ २३ ॥
उद्योगसमयस्त्वेष प्राप्तः [12]शत्रुविनाशन ॥ संचिन्त्यतां हि पिङ्गेश हरिभिः सह मन्त्रिभिः ॥ २४ ॥
एवमुक्तस्तु सुग्रीवो रामं वचनमब्रवीत् ॥ २५ ॥
प्रनष्टा श्रीश्च कीर्तिश्च कपिराज्यं च शाश्वतम् ॥ त्वत्प्रसादान्महाबाहो पुनः प्राप्तमिदं मया ॥
तव देव प्रसादाच्च भ्रातुश्च जयतां वर ॥ २६ ॥
कृतं न प्रतिकुर्याद्यः [13]पुरुषाणां स दूषकः ॥ २७ ॥
एते वानरमुख्याश्च शतशः शत्रुसूदन ॥ प्राप्ताश्चादाय बलिनः पृथिव्यां सर्ववानरान् ॥ २८ ॥
[14]ऋक्षाश्चावहिताः शूरा गोलाङ्गूलाश्च राघव ॥ कान्तारवनदुर्गाणामभिज्ञा घोरदर्शनाः ॥ २९ ॥
देवगन्धर्वपुत्राश्च वानराः कामरूपिणः ॥ स्वैः स्वैः परिवृताः सैन्यैर्वर्तन्ते पथि राघव ॥ ३० ॥

हरिभिः वाहकहरिभिः ॥ १२—१६ ॥ तथाऽभवन् कृताञ्जलिपुटा अभवन् ॥ १७—१८ ॥ पूर्वं दूराद्ञ्जलिः कृतः संप्रति समीपे पादयोः पतनं ॥ १९—२२ ॥ त्रिवर्गफलभोक्ता यथाकालं धर्मार्थकामरूपफलभोक्ता । अयथाकालानुष्ठानवैषम्यं द्योतयति तुशब्दः । धर्मेण राजधर्मेण ॥ २३—२५ ॥ प्रनष्टेत्यादिसार्धश्लोकमेकं वाक्यं । देव त्वत्प्रसादात्तवभ्रातुः प्रसादाच्च कपिराज्यादिकं पुनश्च प्राप्तं ॥ २६—२७ ॥ आदाय आहूय ॥ २८—३० ॥—

स० एत आगच्छत । इत्युच्चैःसमुदाहरत् । लक्ष्मणसंवादकालेदूरस्थत्वादितिभावः ॥ **ति०** एहि एतेत्यर्थः ॥ **ति०** स्त्रीदर्शनक्षमाः स्त्रीसमूहेपिराजदर्शनक्षमाः । अत्याप्ताइतियावत् ॥ **स०** स्त्रीदर्शनक्षमाइत्यनेन तारादिविसर्जनंनैतद्दर्शनाभावार्थं किंतुरामंप्रतिगमनार्थमेवेतिसूचयति ॥ **स०** राज्यश्रियंप्राप्यनिर्ययौ । अनेन नपूर्ववच्चतुर्भिर्जगामेतिसूचयति ॥ १४ ॥ **ति०** वानराश्चतथाभवन् कृताञ्जलिपुटाअभवन्नित्यर्थः ॥ १७ ॥ **ति०** आह्लादकत्वात्तटाकोपमा । तदुपमेयं वानराणांमहत्सैन्यं ॥ **स०** कुद्मलपङ्कजं कुट्मलात्मकानिपङ्कजानियस्मिंस्तादृशतटाकमिवस्थितंतत्सैन्यंदृष्ट्वासुग्रीवेप्रीतिमानभूत् । निश्शब्दत्वात्तटाकसाम्योक्तिः । संपुटाकारत्वात्कुद्मलपङ्कजमित्युक्तिः ॥ १८ ॥ **ति०** वृक्षाग्रेसुप्तःपतितःसन्यथाप्रतिबुध्यते तथाकामपरोराज्यभ्रष्टःसन्प्रतिबुध्यतइत्यर्थः ॥ २२ ॥ **शि०** कृतमुपकारंयोनप्रतिकुर्यात् सपुरुषाणांमहात्मनांदूषकः महात्मविघातदोषंलभतइत्यर्थः ॥ **ति०** पुरुषाणांमध्येसएवदूषकः धर्मनाशकइत्यर्थः ॥ २७ ॥

[**पा०**] १ ङ.—ट. बहुभिः. ग. महद्भिः. २ घ. ङ.—ट. बन्दिभिश्चाभि. ३ घ. शतैर्भीमैः. ४ ग. आसाद्यतु. ५ ग. घ. ङ. छ.—ट. तंदृष्ट्वा. च. संदृष्ट्वा. ६ ङ. ज.—ट. निषण्णंतं. ७ ङ. च. ज.—ट. रामोऽब्रवीत्ततः.ग. रामस्ततोऽब्रवीत्. ८ क. ग. ङ. च. ज.—ट. कालेयस्तु. ९ ख. ततोर्थंच. १० क. पतन्नप्रतिबुध्यते. ११ ग. झ. ट. भोक्ताच. १२ ङ.—ट. शत्रुनिषूदन. ख. शत्रुनिबर्हण. १३ छ. झ. ट. पुरुषाणांहि. १४ ग. छ. झ. ट. ऋक्षाश्चवानराः. ख. ऋक्षाश्चवानराघोराः. ङ. च. ज. ञ. ऋक्षाश्चप्रहिताः. क. घ. ऋक्षाश्चावाहिताः.

शतैः शतसहस्रैश्च [1]कोटिभिश्च प्लवङ्गमाः ॥ अयुतैश्चावृता वीराः शङ्कुभिश्च परन्तप ॥ ३१ ॥
[2]अर्बुदैरर्बुदशतैर्मध्यैश्चान्तैश्च वानराः ॥ [3]समुद्रैश्च परार्धैश्च [4]हरयो हरियूथपाः ॥ ३२ ॥
आगमिष्यन्ति ते राजन्महेन्द्रसमविक्रमाः ॥ [5]मेरुमन्दरसंकाशा विन्ध्यमेरुकृतालयाः ॥ ३३ ॥
ते [6]त्वामभिगमिष्यन्ति राक्षसं ये [7]सबान्धवम् ॥ निहत्य रावणं [8]संख्ये ह्यानयिष्यन्ति मैथिलीम् ॥३४॥
[9]ततस्तमुद्योगमवेक्ष्य [10]बुद्धिमान्हरिप्रवीरस्य निदेशवर्तिनः ॥
बभूव हर्षाद्वसुधाधिपात्मजः प्रबुद्धनीलो[11]त्पलतुल्यदर्शनः ॥ ३५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे अष्टत्रिंशः सर्गः ॥ ३८ ॥

एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

रामसुग्रीवयोर्मिथः सहर्षसंभाषमाणयोःसतोः शतबलिप्रमुखैरनेकैर्वानरसेनापतिभिः नानादेशनिवासिभिर्नानाजाति-संख्याबलवर्णविशिष्टैर्धरणीतलचालकनिजचरणाभिघातसमुत्थितरेणुभिः सूर्यच्छायामाच्छादयद्भिः स्वस्वसैन्यैःसह रामसुग्रीवसमीपमेत्यचरणप्रणामः ॥ १ ॥

इति ब्रुवाणं सुग्रीवं रामो धर्मभृतां वरः ॥ बाहुभ्यां संपरिष्वज्य प्रत्युवाच कृताञ्जलिम् ॥ १ ॥
यदिन्द्रो वर्षते वर्षं न तच्चित्रं भवेत्[12]किंचित् ॥ आदित्यो वा सहस्रांशुः कुर्याद्वितिमिरं नभः ॥ २ ॥
चन्द्रमा [13]रश्मिभिः कुर्यात्पृथिवीं सौम्य निर्मलाम् ॥ त्वद्विधो वाऽपि मित्राणां [14]प्रतिकुर्यात्परंतप ॥३॥
[15]एवं त्वयि न तच्चित्रं भवेद्यत्सौम्य शोभ[16]नम् ॥ जानाम्यहं त्वां सुग्रीव सततं प्रियवादिनम् ॥ ४ ॥
त्वत्सनाथः सखे संख्ये जेतास्मि सकलानरीन् ॥ [17]त्वमेव मे सुहृन्मित्रं साहाय्यं कर्तुमर्हसि ॥ ५ ॥

शतैरित्यादि । अत्र केचित्पदमध्याहर्तव्यं । केचित् प्लवङ्गमाः शतैः कपिशतैः । आवृता आगमिष्यन्ति । केचिच्छतसहस्रैरावृता आगमिष्यन्ति । केचित्कोटिभिरावृता आगमिष्यन्ति केचिदयुतैरावृता आगमिष्यन्ति । केचिच्छङ्कुभिः । केचिदर्बुदैः । केचिन्मध्यैः । केचिदन्तैरावृता आगमिष्यन्ति । केचिद्धरयः समुद्रैरावृता आगमिष्यन्ति । केचित्परार्धैरावृता आगमिष्यन्तीति योजना । संख्यालक्षणमुक्तं ज्योतिःशास्त्रे—“ एकं दशशतमस्मात्सहस्रमयुतं ततः परं लक्षम् । प्रयुतं कोटिमथार्बुदवृन्दे खर्वं निखर्वं च ॥ तस्मान्महासरोजं शङ्कुं सरितांपतिं त्वन्तम् । मध्यं परार्धमाहुर्यथोत्तरं दशगुणं तथा ज्ञेयं ॥ हरियूथपा इत्येतत्प्रथमान्तविशेषणत्वेन सर्वत्र संबध्यते ॥ ३१—३४ ॥ प्रबुद्धनीलोत्पलतुल्यदर्शनः विकसितनीलोत्पलदर्शनीयवर्णः ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने अष्टत्रिंशः सर्गः ॥ ३८ ॥

अथ सर्ववानरसेनासमागम एकोनचत्वारिंशे—इति ब्रुवाणमित्यादि ॥ १ ॥ त्वद्विधः त्वादृशः सत्पुरुषः । मित्राणां प्रतिकुर्यात् प्रत्युपकारं कुर्यात् । न तच्चित्रमिति संबन्धः । शोभनं प्रत्युपकाररूपं । सुहृत

ती० शतसहस्रंलक्षं । शतलक्षंकोटिः । अयुतं दशसहस्रं । कोटिलक्षं शङ्कुः । शङ्कुसहस्रमर्बुदं । अर्बुदाद्दशगुणंमध्यं । अस्माद्दशगुणोन्तः । अस्माद्विंशतिगुणःसमुद्रः । अस्मात्रिंशद्गुणःपरार्धः ॥ ३१ ॥ ३२ ॥ इत्यष्टत्रिंशःसर्गः ॥ ३८ ॥

[पा०] १ छ. झ. ट. वर्तन्तेकोटिभिस्तथा. २ क. अर्बुदैर्न्यर्बुदशतैः. ३ छ. झ. समुद्राश्चपरार्धाश्च. ४ ग. हरिभिर्हरि. क. येचान्येहरि. ५ ङ.—ट. मेघपर्वतसंकाशामेरुविन्ध्यकृतालयाः. ६ ग. ज. त्वामनु. ७ छ. झ. राक्षसंयोद्धुमाहवे. ८ छ. झ. ट. युद्धे. ९ क.—ट. ततस्समुद्योगं. १० च.—ट. वीर्यवान्. ११ ङ. च. ज. नीलोत्पलदर्शनस्तदा. १२ ङ.—ट. भविष्यति. क. ग. भवेद्भुवि. १३ ङ. छ. झ. ट. रजनींकुर्यात्प्रभयासौम्य. १४ क. ग. छ. झ. ट. प्रीतिंकुर्यात्. १५ क. एतत्त्वयि. १६ ग. निर्मलं. १७ त्वमेवमेइत्यर्धस्थाने क. पाठे. त्वंमेभ्रातासखाचत्वंप्रियःसौम्यसुहृच्चमे । त्वंमेसुग्रीववैदेह्याःसाहाय्यंकर्तुमर्हसि । इत्येकःश्लोकोदृश्यते.

जहारात्मविनाशाय [1]वैदेहीं राक्षसाधमः ॥ वञ्चयित्वा तु पौलोमीमनुह्लादो यथा [2]शचीम् ॥ ६ ॥
[3]नचिरात्तं [4]हनिष्यामि रावणं निशितैः शरैः ॥ पौलोम्याः पितरं दृप्तं शतक्रतु[5]रिवाहवे ॥ ७ ॥
एतस्मिन्नन्तरे [6]चैव रजः समभिवर्तत ॥ [7]उष्णां तीव्रां सहस्रांशोश्छादयद्गगने प्रभाम् ॥ ८ ॥
दिशः पर्याकुला[8]श्चासन्रजसा तेन [9]मूर्छता ॥ चचाल च मही सर्वा सशैलवनकानना ॥ ९ ॥
ततो नगेन्द्रसंकाशैस्तीक्ष्णदंष्ट्रैर्महाबलैः ॥ कृत्स्ना सं[10]छादिता भूमिरसंख्येयैः प्लवङ्गमैः ॥ १० ॥
निमेषान्तरमात्रेण ततस्तैर्हरियूथपैः ॥ कोटी[11]शतपरीवारैः [12]कामरूपिभिरावृता ॥ ११ ॥
नादेयैः [13]पार्वतीयैश्च सामुद्रैश्च महाबलैः ॥ हरिभिर्मे[14]घनिर्ह्रादैरन्यैश्च [15]वनचारिभिः ॥ १२ ॥
तरुणादित्यवर्णैश्च शशिगौरैश्च वानरैः ॥ पद्मकेसरवर्णैश्च श्वेतैर्मे[16]रुकृतालयैः ॥ १३ ॥
कोटी[17]सहस्रैर्दशभिः श्रीमान्परिवृतस्तदा ॥ वीरः शतबलिर्नाम वानरः प्रत्यदृश्यत ॥ १४ ॥
ततः काञ्चनशैलाभस्ताराया वीर्यवान्पिता ॥ [18]अनेकैर्दशसाहस्रैः कोटिभिः प्रत्यदृश्यत ॥ १५ ॥
[19]तथापरेण कोटीनां सहस्रेण समन्वितः ॥ पिता रुमायाः संप्राप्तः सुग्रीव[20]श्वशुरो विभुः ॥ १६ ॥
पद्मकेसरसंकाशस्तरुणार्कनिभाननः ॥ बुद्धिमान्वानरश्रेष्ठः सर्ववानरसत्तमः ॥ १७ ॥
अनीकैर्बहुसाहस्रैर्वानराणां समन्वितः ॥ पिता हनुमतः श्रीमान्केसरी प्रत्यदृश्यत ॥ १८ ॥
[21]गोलाङ्गूलमहाराजो गवाक्षो भीमविक्रमः ॥ वृतः कोटि[22]सहस्रेण वानराणामदृश्यत ॥ १९ ॥
ऋक्षाणां भीमवेगानां धूम्रः शत्रुनिबर्हणः ॥ वृतः कोटिसहस्राभ्यां द्वाभ्यां समभिवर्तत ॥ २० ॥
[23]महाचलनिभैर्घोरैः पनसो नाम यूथपः ॥ आजगाम [24]महावीर्यस्तिसृभिः कोटिभिर्वृतः ॥ २१ ॥
नीलाञ्जनचयाकारो नीलो [25]नामाथ यूथपः ॥ अदृश्यत महाकायः कोटिभिर्दशभिर्वृतः ॥ २२ ॥
ततः काञ्चनशैलाभो गवयो नाम यूथपः ॥ आजगाम महावीर्यः [26]कोटिभिः पञ्चभिर्वृतः ॥ २३ ॥

शोभनहृदयः ॥ २—५ ॥ जहारेति इन्द्रेण ईप्सितां पौलोमीं तत्पितुः पुलोमस्यानुमत्यानुह्लादो जहार । इन्द्रस्त्वनुमन्तारं पुलोमं हत्वा तां पुनरानीयोदवहदिति पौराणिकी कथा ज्ञेया ॥ ६—७ ॥ समभिवर्तत समभ्यवर्तत । मूर्छता व्याप्नुवता ॥ ८—९ ॥ अथ सेनासमुदायव्याप्तिमाह—तत इति ॥ ततः रजोव्याप्त्यनन्तरं ॥ १० ॥ ततः सेनासमुदायव्याप्त्यनन्तरं । नादेयैः नदीतीरवनभवैः । पार्वतीयैः पर्वतोत्पन्नैः । वनचारिभिः आवृतेति पूर्वेणान्वयः ॥ ११—१४ ॥ तारायाः पिता सुषेणः ॥१५॥ रुमायाः पिता तारः ॥ १६—२० ॥ कोटिभिः कोटिसंख्याकैः ॥ २१—

ति० य आत्मविनाशायमैथिलींजहार मारीचेनमांवञ्चयित्वा तंनचिरात् शीघ्रं । अरिहा इन्द्रइववधिष्यामि । पौलोम्याःपितरमिवेत्यनेन रावणकृतोजानक्यतिक्रमाभावःसूचितः ॥ ६ ॥ **स०** शशिगौरैः चन्द्रवद्धवलैः । तस्यापिकलङ्कित्वात्तदपेक्षयाधावल्यंवक्तुंश्वेतैरित्युक्तं ॥ **ति०** हेमा हेमाचलः ॥ १३ ॥ **शि०** महाबलनिभैः महाबलेनप्रकाशमानैः ॥ २१ ॥ **रामानु०** सुग्रीवंसमुपस्थितमितिपाठः ॥ **शि०** दरीमुखोयूथपः सुग्रीवंसमुपस्थितःसन् अभ्याययौ ॥ २३ ॥

[पा०] १ ग. छ. झ. ट. मैथिलीं. २ च. ज. ञ. दिवि. ३ ख. अचिरात्तं. ४ क. ख. ग. ङ.—ट. वधिष्यामि. ५ क. ग.—ज. ञ. ट. रिवारिहा. ६ ग. भीमंरजः. ७ घ.—ञ. उष्णंतीव्रं. झ. उष्णतीव्रां. ८ छ. झ. ट. श्चासंस्तमसातेन. ९ ग. च.—झ. मूर्च्छिताः. १० घ. वसुमती. ११ ङ. च. ज. ञ. शतवृतैश्चान्यैः. ख. शतवृतैश्चैवप्रच्छन्नाकामरूपिभिः. १२ छ. झ. ट. वानरैर्हरियूथपैः. १३ क. ग. च.—ट. पार्वतेयैश्च. १४ ग. मेघसंकाशैर्ऋक्षैश्च. घ. मेघसंकाशैरन्यैश्च. १५ क. ख. ग. ङ.—ट. वनवासिभिः. १६ छ. झ. ट. हेमकृतालयैः. १७ ग. सहस्रैर्बहुभिः. १८ ङ.—ट. अनेकैर्बहुसाहस्रैः. १९ ग. तथाशतेन. २० घ. श्वशुरःप्रभुः. ख. श्वशुरोमहान्. २१ ङ. च. ज. ञ. गोलाङ्गूलाधिपःश्रीमान्. ग. गोलाङ्गूलोमहावीर्यः. २२ ग. कोटिसहस्राणांशतेनसमदृश्यत. २३ ङ. छ.—ट. महाबलनिभैः. २४ ग. महावीर्यःपञ्चभिः. २५ ङ.—ट. नामैषयूथपः. ख. नामाथवीर्यवान्. २६ क. घ. पञ्चभिःकोटिभिः.

[1]दरीमुखश्च बलवान्यूथपोभ्याययौ तदा ॥ वृतः कोटिसहस्रेण सुग्रीवं [2]समुपस्थितः ॥ २४ ॥
मैन्दश्च द्विविदश्चोभावश्विपुत्रौ महाबलौ ॥ कोटिकोटिसहस्रेण वानराणामदृश्यताम् ॥ २५ ॥
गजश्च बलवा[3]न्वीरः कोटिभिस्तिसृभिर्वृतः ॥ आजगाम महातेजाः सुग्रीवस्य समीपतः ॥ २६ ॥
ऋक्षराजो महातेजा जाम्बवान्नाम नामतः ॥ कोटिभिर्द[4]शभिः प्राप्तः सुग्रीवस्य वशे स्थितः ॥ २७ ॥
[5]रुमण्वान्नाम विक्रान्तो वानरो [6]वानरेश्वरम् ॥ [7]आययौ बलवांस्तूर्णं कोटीशतस[8]मावृतः ॥ २८ ॥
ततः कोटिसहस्राणां सहस्रेण शतेन च ॥ पृष्ठतोऽनुगतः प्राप्तो हरिभिर्गन्धमादनः ॥ २९ ॥
ततः पद्मसहस्रेण वृतः शङ्कुशतेन च ॥ युवराजोङ्गदः प्राप्तः पि[9]तृतुल्यपराक्रमः ॥ ३० ॥
ततस्ताराद्युतिस्तारो हरिभि[10]र्भीमपराक्रमः ॥ पञ्चभिर्हरिकोटीभिर्दूरतः [11]प्रत्यदृश्यत ॥ ३१ ॥
[12]इन्द्रजानुः कपिर्वीरो यूथपः प्रत्यदृश्यत ॥ एकादशानां कोटीनामी[13]श्वरस्तैश्च संवृतः ॥ ३२ ॥
ततो [14]रम्भस्त्वनुप्राप्तस्तरुणादित्यसन्निभः ॥ अयुतेनावृतश्चैव सहस्रेण शतेन च ॥ ३३ ॥
ततो यूथपतिर्वीरो दुर्मुखो नाम वानरः ॥ प्रत्यदृश्यत कोटिभ्यां द्वाभ्यां परिवृतो बली ॥ ३४ ॥
कैलासशिखराकारैर्वानरैर्भीमविक्रमैः ॥ वृतः कोटिसहस्रेण हनुमान्प्रत्यदृश्यत ॥ ३५ ॥
नलश्चापि महावीर्यः सं[15]वृतो द्रुमवासिभिः ॥ कोटीशतेन संप्राप्तः सहस्रेण शतेन च ॥ ३६ ॥
[16]ततो [17]दधिमुखः श्रीमान्कोटिभिर्दशभिर्वृतः ॥ संप्राप्तोभि[18]मतस्तस्य सुग्रीवस्य महात्मनः ॥ ३७ ॥
शरभः कुमुदो वह्निर्वानरो रंह एव च ॥ एते चान्ये च बहवो वानराः कामरूपिणः ॥ ३८ ॥
आवृत्य पृथिवीं सर्वां पर्वतांश्च वनानि च ॥ यूथपाः समनुप्राप्तास्ते[19]षां संख्या न विद्यते ॥ ३९ ॥
[20]आगताश्च विशिष्टाश्च पृथिव्यां सर्ववानराः ॥ ४० ॥
आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः ॥ अभ्यवर्तन्त सुग्रीवं सूर्यमभ्रगणा इव ॥ ४१ ॥
कुर्वाणा [21]बहुशब्दांश्च प्रहृष्टा [22]बाहुशालिनः ॥ शिरोभिर्वानरेन्द्राय सुग्रीवाय न्यवेदयन् ॥ ४२ ॥

२३ ॥ सुग्रीवं समुपस्थितः प्राप्तः ॥ २४ ॥ अदृश्यतां अदृश्येतां ॥ २५—२७ ॥ रुमण्वान्नाम विक्रान्तो वानरो वानरेश्वरमाययौ ॥ २८—३० ॥ ताराद्युतिः नक्षत्रतुल्यप्रभः । तारः रुमायाः पितुरन्योयं ॥ ३१—३४ ॥ कोटिसहस्रेणोपलक्षितैर्वानरैर्वृत इति संबन्धः ॥ ३५ ॥ कोटिशतेनेत्याद्युपलक्षणे तृतीया ॥ ३६—३९ ॥ पृथिव्यां विशिष्टाश्च अप्राकृताः । देवयोनय इत्यर्थः । सर्ववानराश्च प्राकृतवानराश्च । आगता एव ॥ ४० ॥ आप्लवन्तः लङ्घयन्तः । अभ्रगणाः मेघगणाः ॥ ४१ ॥ न्यवेदयन् आत्मानमिति

शि० कोटिसहस्राणांवानराणां शतेनसहस्रेण लक्षेणेत्यर्थः । वृतः । पृष्ठतोनुगतः पश्चाच्चलितः । किंच पृष्ठतोनुगताअनुचरा यस्यसगन्धमादनः प्राप्तः ॥ २९ ॥ शि० आप्लवन्तः वृक्षादीन्समुल्लङ्घयन्तः । प्लवन्तः शाखादीनुल्लङ्घयन्तः ॥ ३१ ॥ ति० शिरोभिर्न्यवेदयन् बहुसंमर्दाद्दूरेस्थित्वानमस्कारेणैवात्मानंन्यवेदयन्नित्यर्थः । स० न्यवेदयन् स्वनामोत्कीर्तनपूर्वकंस्वरूपंनिवेदितवन्तः ॥ ३२ ॥ ति० धर्मज्ञः राजधर्मज्ञः ॥ ३३ ॥ ति० योबलज्ञः बलतत्वज्ञः । प्रतिपत्तुं कआगतः कोनागत इतिज्ञातुं । ईष्टे ईशोभवेत् । लिङर्थेलट् ॥ ३५ ॥ इत्येकोनचत्वारिंशः सर्गः ॥ ३९ ॥

[पा०] १ घ. दधीमुखश्च. २ ङ.—ट. समवस्थितः. ३ क. ग. ङ.—ट. वीरस्तिसृभिःकोटिभिः. ४ ङ.—ट. दशभिर्व्याप्तः. ५ छ. झ. ञ. रुमणोनामतेजस्वीविक्रान्तैर्वानरैर्वृतः. ङ. च. ज. रुमण्वान्नामतेजस्वीविक्रान्तैर्वानरैर्वृतः. ट. रुमण्वान्नामतेजस्वीविक्रान्तोवानरेश्वरं. ६ घ. वानरेश्वरः. ७ च.—ट. आगतोबलवान्. ८ ख. घ. समन्वितः. ९ क. ङ.—ट. पितुस्तुल्य. १० क. ङ.—ट. हरिभिर्भीमविक्रमैः. ११ ङ. झ. ञ. ट. पर्यदृश्यत. १२ ङ.—ज. ट. इन्द्रभानुः. १३ ज. मीश्वरैस्तैः. ख. घ. मीश्वरस्तैःसमावृतः. १४ ग. रंभश्चसंप्राप्तः. १५ ङ. च. ज. ञ. संवृतःशैलवासिभिः. १६ ग. घ. तथा. १७ छ. झ. दरीमुखः. १८ ग. संप्राप्तोमातुलस्तस्य. छ. झ. ट. संप्राप्तोऽभिनदंस्तस्य. क. ङ. च. ज. संप्राप्तोऽभिरतस्तस्य. ञ. संप्राप्तोहरिभिस्तस्य. १९ ग. ङ.—ट. प्राप्तायेषां. २० क. ङ.—ट. आगताश्चनिविष्टाश्च. घ. आगताश्चावशिष्टाये. ग. आगताविनिविष्टाश्च. २१ क. बहुशःशब्दान्. २२ छ. झ. प्रकृष्टाबाहुशालिनः. ट. प्रकृष्टबलशालिनः. ख. प्रहृष्टाबलशालिनः.

अपरे वानरश्रेष्ठाः संयम्य च यथोचितम् ॥ सुग्रीवेण समागम्य स्थिताः प्राञ्जलयस्तदा ॥ ४३ ॥
सुग्रीवस्त्वरितो रामे सर्वांस्तान्वानरर्षभान् ॥ निवेदयित्वा धर्मज्ञः[1] स्थितः प्राञ्जलिरब्रवीत् ॥ ४४ ॥
यथासुखं पर्वत[2]निर्झरेषु वनेषु सर्वेषु च वानरेन्द्राः ॥
निवेशयित्वा विधिवद्बलानि बलं बलज्ञः प्रतिपत्तुमीष्टे ॥ ४५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९॥

चत्वारिंशः सर्गः ॥ ४० ॥

सुग्रीवेण रामाज्ञयाविनतनामकसेनापतिंप्रति प्राच्यांदिशिसूर्यसंचारार्हदेशावधि तत्तत्स्थलीयविशेषनिवेदनपूर्वकं तत्रतत्रस्वसैन्यैःसहसीतान्वेषणचोदनेनसह मासातिक्रमेदण्ड्यत्वोक्तिः ॥ १ ॥

अथ राजा समृद्धार्थः सुग्रीवः प्लवगेश्वरः[3] ॥ उवाच नरशार्दूलं रामं परबलार्दनम् ॥ १ ॥
आगता[4] विनिविष्टाश्च बलिनः कामरूपिणः[5] ॥ वानरा वारणेन्द्राभा[6] ये मद्विषय[7]वासिनः ॥ २ ॥
त इमे बहुविक्रान्तैर्हरिभिर्भीमविक्रमैः[8] ॥ आगता वानरा घोरा[9] दैत्यदानवसन्निभाः ॥ ३ ॥
ख्यातकर्मापदानाश्च[10] बलवन्तो जितक्लमाः ॥ पराक्रमेषु[11] विख्याता व्यवसायेषु[12] चोत्तमाः ॥ ४ ॥
पृथिव्यम्बुचरा[13] राम नानानगनिवासिनः ॥ कोट्यग्रश[14] इमे प्राप्ता वानरास्तव किङ्कराः ॥ ५ ॥
निदेशवर्तिनः सर्वे सर्वे गुरुहिते रताः[15] ॥ अभिप्रेतमनुष्ठातुं तव शक्ष्यन्त्यरिन्दम ॥ ६ ॥
त इमे बहुसाहस्रैरनीकैर्भीमविक्रमैः[16] ॥ यन्मन्यसे नरव्याघ्र प्राप्तकालं तदुच्यताम् ॥
त्वत्सैन्यं त्वद्वशे युक्तमाज्ञापयितुमर्हसि ॥ ७ ॥

शेषः ॥ ४२ ॥ संयम्य वस्त्रादिकं संकुचितं कृत्वा सन्नम्येति च पाठः ॥ ४३ ॥ सुग्रीवः प्राञ्जलिस्त्वरितः सन् सर्वान् रामे निवेदयित्वा स्थितः तानब्रवीच्च । तदेवाह—यथेति । भो वानरेन्द्राः पर्वतादिषु स्वानि बलानि यथासुखं निवेशयित्वा । बलज्ञो यूथपः । स्वं बलं प्रतिपत्तुं ज्ञातुं । ईष्टे ईशो भवेत् । लिङर्थे लट् । यद्वा रामे निवेदयित्वा तदधीनं कृत्वा । अब्रवीत् तत्तत्स्वरूपमब्रवीत् । यथेति वानरेन्द्र इति च पाठः । सुग्रीवः बलं प्रतिपत्तुमीष्टे स्म ॥ ४४—४५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

अथ सीतान्वेषणाय पूर्वस्यां दिशि सुग्रीवेण विनतप्रेषणं चत्वारिंशे—अथ राजेत्यादि ॥ १ ॥ मद्विषयवासिनः मदवगतदेशवासिनः । "विषयो यस्य यो ज्ञातस्तत्र शब्दादिकेष्वपि" इत्यमरः । यद्वा मद्राज्यवासिनः ॥ २—३ ॥ ख्यातकर्मापदानाः कर्म दूरलङ्घनाधिक्रिया अपदानं पूर्ववृत्तं विस्मयनीयशत्रुनिरसनं ख्याते कर्मापदाने येषां ते तथा ॥ ४ ॥ कोट्यग्रश इति बहुसंख्योपलक्षणं ॥ ५ ॥ गुरुहिते स्वामिहिते ॥ ६ ॥ बहुसाहस्रैर्भीमविक्रमैरनीकैः सहिताः । त इम इत्यङ्गुल्या निर्देशः । प्राप्तकालं

स० ख्यातोधर्मोयेषांते । पदाताः यानंविनापादैर्विगमनशीलाः । व्यवसायोनिश्चयबुद्धिः । मत्वर्थीयप्रत्ययान्तत्वात्तद्वत्सूत्तमाः ॥ ४ ॥ ति० अंबुचराः समुद्रमध्यद्वीपचराः ॥ ५ ॥

[पा०] १ ख. धर्मज्ञस्ततः. २ ग. पर्वतकन्दरेषु. ख. घ. छ. पर्वतनिर्दरेषु. ३ क. ग. प्लवगाधिपः. ४ ख. आगताश्चविशिष्टाश्च. ५ छ. झ. ट. कामचारिणः. ६ च.—ट. वानरेन्द्रामहेन्द्राभाः. क. ङ. वानरेन्द्रामहाभागाः. ७ मेविषय. ८ ङ.—ट. विक्रान्तैर्बलिभिः. ख. विक्रान्तैरनेकैर्भीमदर्शनैः. ९ ग. वानरश्रेष्ठाः. १० ठ. ख्यातकर्मपदाताश्च. ११ ख. पराक्रमेच. १२ ख. व्यवसायेपि. १३ ग. पृथिव्यंबरसंचाराः. १४ ग. कोट्योघैस्तइमे. ख. कोट्यग्रतइमे. क. कोट्यग्रगाइमे. छ. झ. ट. कोट्योघाश्चइमे. १५ च. छ. ज. ञ. ट. स्थिताः. १६ ग. छ. झ. ट. रनेकैर्बहुविक्रमैः. ङ. ज. ञ. रनेकैर्भीमविक्रमैः.

[1]काममेषामिदं कार्यं विदितं [2]मम तत्वतः ॥ तथापि तु [3]यथातत्त्वमाज्ञापयितुमर्हसि ॥ ८ ॥
[4]इति ब्रुवाणं सुग्रीवं रामो [5]दशरथात्मजः ॥ बाहुभ्यां संपरिष्वज्य इदं वचनमब्रवीत् ॥ ९ ॥
ज्ञायतां [6]मम वैदेही यदि जीवति वा न वा ॥ सच देशो महाप्राज्ञ[7] यस्मिन्वसति रावणः ॥ १० ॥
अधिगम्य तु वैदेहीं निलयं रावणस्य च ॥ प्राप्तकालं विधास्यामि तस्मिन्काले सह त्वया ॥ ११ ॥
नाहमस्मिन्प्रभुः कार्ये [8]वानरेश न लक्ष्मणः ॥ [9]त्वमस्य हेतुः कार्यस्य प्रभुश्च प्लवगेश्वर ॥ १२ ॥
त्वमेवाज्ञापय विभो मम कार्यविनिश्चयम् ॥ त्वं हि जानासि [10]यत्कार्यं मम वीर न संशयः ॥ १३ ॥
सुहृद्द्वितीयो विक्रान्तः [11]प्राज्ञः कालविशेषवित् ॥ भवानस्मद्धिते युक्तः [12]सुकृतार्थोऽर्थवित्तमः ॥ १४ ॥
एवमुक्तस्तु सुग्रीवो विनतं नाम यूथपम् ॥ अब्रवीद्रामसान्निध्ये लक्ष्मणस्य च धीमतः ॥
शैलाभं [13]मेघनिर्घोषमूर्जितं [14]प्लवगेश्वरः ॥ १५ ॥
सोम[15]सूर्यात्मजैः सार्धं वानरैर्वानरोत्तम ॥ देशकालनयैर्युक्तः [16]कार्याकार्यविनिश्चये ॥ १६ ॥
वृतः शतसहस्रेण वानराणां तरस्विनाम् ॥ अधिगच्छ दिशं पूर्वां सशैलवनकाननाम् ॥ १७ ॥
[17]तत्र सीतां च वैदेहीं निलयं रावणस्य च ॥ मार्गध्वं गिरि[18]शृङ्गेषु वनेषु च [19]नदीषु च ॥ १८ ॥
नदीं भागीरथीं रम्यां सरयूं कौशिकीं तथा ॥ कालिन्दीं यमुनां रम्यां यामुनं च महागिरिम् १९
सरस्वतीं च सिन्धुं च शोणं मणिनिभोदकम् ॥ महीं कालमहीं [20]चैवं शैलकाननशोभिताम् ॥२०॥
ब्रह्ममालान्विदेहांश्च मालवान्काशिकोसलान् ॥ मागधांश्च महाग्रामान्[21]पुण्ड्रान्वङ्गांस्तथैव च ॥
[22]पत्तनं कोशकाराणां भूमिं च रजताकराम् ॥ २१ ॥

कालोचितं ॥ ७ ॥ एषां कार्यं एभिः कर्तव्यं । मम विदितं मया विदितं ॥ ८—१३ ॥ सुहृद्भिर्नीत इति च पाठः ॥ १४—१५ ॥ कार्याकार्यविषये विनिश्चये देशकालनयैः देशोचितनीतिभिः कालोचितनीतिभिश्चेत्यर्थः । देशकालानुगुणनयप्रवर्तनं कर्तव्यमित्यर्थः ॥ १६—१८ ॥ नदीमित्यादि रजताकरामित्यन्तमेकंवाक्यं । प्राप्येति शेषः । ततस्ततः सीतां मृगयद्भिर्भवद्भिः भागीरथ्यादिकं प्राप्य एतत् पूर्वोक्तं सर्वं । विचेतव्यमिति संबन्धः । अत्रेदमवधेयं । शरावती नाम काचिन्नदी हिमवद्विन्ध्यमध्यदेशे वलयाकारेण प्रवहति । तदपेक्षया प्राचीदिगिदानीं विचेयत्वेनोच्यते नतु किष्किन्धापेक्षया नापि मेर्वपेक्षयेति । यामुनं महागिरिं यमुनासंबन्धिनंपर्वतं । मह्यादयो देशविशेषाः । मागधान् मगधदेशान् । महाग्रामान्

स० रावणनिवासउपलब्धश्चेत्तत्रकिंकार्यं किंरावणोहन्तव्यउतेहानेतव्यइत्यतआह—**अधिगम्येति** । अधिगम्य विज्ञाय । अनन्तरंतत्कालोचितंविधास्यामि ॥ ११ ॥ **शि०** यस्मिन्देशेरावणोवसतिसदेशः वैदेहीजीवतिनवाइतिचयदियस्मिन्कालेज्ञायतांतस्मिन्कालेवैदेहीमभिगम्यरावणस्यनिलयंप्राप्तकालंविध्वंसाश्रयमित्यर्थः । श्लोकद्वयमेकान्वयि ॥ १०—११ ॥ **ती०** सुहृद्द्वितीयः सुहृल्लक्ष्मणापेक्षयाद्वितीयत्वं ॥ ननुमेरोःपूर्वदिगवस्थितोदयाचलपर्यन्तमन्वेष्टुंप्रेषितान्वानरान्प्रतिमेरोर्दक्षिणदिगवस्थितभागीरथ्यादिनदीपर्वताद्यन्वेषणविधानंकथमुपपद्यतइतिचेत् हेमाचलविन्ध्यमध्यदेशवर्त्यार्यावर्तापेक्षयाप्राच्यादिविभागोविवक्षितः । नतुमेर्वपेक्षया । स्वावस्थितमाल्यवदपेक्षयावेतिनदोषः ॥ १४ ॥ **ति०** विज्ञः त्वमितिशेषः ॥ १६ ॥ **ति०** निलयंरावणस्यनिलयंस्थानं । यद्वा चतुर्दिक्षुरावणवासस्थानमनेनसूचितं ॥ १८ ॥ **ति०** मार्गध्वमितिसामान्यतोनियोगः । विशेषेणाह—नदीमित्यादि द्वितीयान्तानांप्राप्येतिशेषः ॥ यामुनो गिरिःयमुनोत्पत्तिस्थानभूतःकालिन्दगिरिः ॥ १९ ॥ **ति०** महीकालमह्यौनद्यौ ॥ २० ॥ **ति०** कोशकाराणांभूमिं कौशेयकतन्तूत्पादकजन्तूत्पत्तिस्थानभूतांभूमिं । रजताकरां रजतखनिं ॥ २१ ॥

[पा०] १ च. झ. ञ. काममेवमिदं. २ क. ख. घ. वीर. ३ क. ङ.—ट. यथायुक्तं. ४ क. ख. ङ.—ट. तथा. ५ ग. बुद्धिमतांवरः. ६ क. ग.—ट. सौम्य. ७ ख. वीर. ८ ग. ङ.—ट. वानरेन्द्र. ९ ख. त्वमेव. १० छ. झ. मेकार्यं. ११ ख. छ. प्राप्तकाल. १२ ग. सकृतार्थो. छ. झ. सुहृदाप्तो. १३ क. ङ. च. ज. मेघनिर्घोषंजीमूतं. १४ ख. छ. झ. ञ. ट. प्लवगेश्वरं. १५ छ. झ. ञ. ट. सूर्यनिभैः. १६ छ. झ. ट. विज्ञःकार्ये. १७ ङ. च. ज. ञ. ततः. १८ ख. च.—ट. दुर्गेषु. १९ ङ. नदेषुच. २० क. घ.—छ. झ. ञ. ट. चापि. २१ ङ. छ. झ.ञ. ट. न्पुण्ड्रांस्त्वङ्गांस्तथैवच. ख. न्पुण्ड्रान्वङ्गाश्चसर्वशः. २२ छ. झ.ट. भूमिंच.

[1]सर्वमेतद्विचेतव्यं [2]मार्गयद्भिस्ततस्ततः ॥ रामस्य [3]दयितां भार्यां सीतां [4]दशरथस्नुषाम् ॥ २२ ॥
समुद्रमवगाढांश्च पर्वतान्पत्तनानि च ॥ [5]मन्दरस्य च ये कोटिं संश्रिताः [6]केचिदायताम् ॥ २३ ॥
कर्णप्रावरणाश्चैव तथा चाप्योष्ठकर्णकाः ॥ घोरलोहमुखाश्चैव [7]जवनाश्चैकपादकाः ॥ २४ ॥
अक्षया बलवन्तश्च [8]पुरुषाः पुरुषादकाः ॥ [9]किराताः कर्णचूडाश्च [10]हेमाङ्गाः प्रियदर्शनाः ॥ २५ ॥
आममीनाशना[11]स्तत्र किराता द्वीपवासिनः ॥ अन्तर्जलचरा घोरा नरव्याघ्रा इति श्रुताः ॥
एतेषा[12]मालयाः सर्वे विचेयाः [13]काननौकसः ॥ २६ ॥
गिरिभिर्ये च गम्यन्ते [14]प्लवनेन प्लवेन च ॥ [15]रत्नवन्तं यवद्वीपं सप्तराज्योपशोभितम् ॥
[16]सुवर्णरूप्यकं चैव [17]सुवर्णाकरमण्डितम् ॥ २७ ॥
यवद्वीपमतिक्रम्य शिशिरो नाम पर्वतः ॥ दिवं स्पृशति शृङ्गेण देवदानवसेवितः ॥ २८ ॥
एतेषां गिरिदुर्गेषु [18]प्रपातेषु वनेषु च ॥ मार्गध्वं सहिताः सर्वे रामपत्नीं यशस्विनीम् ॥ २९ ॥
ततो [19]रक्तजलं शोणमगाधं शीघ्र[20]गामिनम् ॥ गत्वा [21]पारं समुद्रस्य सिद्धचारणसेवितम् ॥ ३० ॥

महाग्रामयुक्तान् । कोशकाराणां राजविशेषाणां ॥१९—२२ ॥ समुद्रं अवगाढान् प्रविष्टान् । पर्वतान् । मन्दरस्य आयतां कोटिं च संश्रितायेकर्णप्रावरणादयः एतेषामालयाः सर्वे विचेयाइतिसंबन्धः । काननौकस इति संबोधनं । कर्णप्रावरणाः आच्छादितकर्णाः । निष्कर्णाइत्यर्थः । ओष्ठे कर्णौ येषां ते ओष्ठकर्णकाः । लोहमुखाः लोहतुल्यमुखाः । कर्णेषु चूडा येषां ते कर्णचूडाः । आममीनाशना इति पूर्वोक्तकिराता व्यावर्त्यन्ते । द्वीपवासिनः द्वीपान्तरेवसन्तो मन्दरेपि वसन्तीत्यर्थः । नरव्याघ्राः अर्धनररूपा व्याघ्ररूपाश्चेत्यर्थः ॥ २३—२६ ॥ एवं जम्बूद्वीपान्वेषणं विधाय द्वीपान्तरान्वेषणं विधत्ते–गिरिभिरित्यादि । रामपत्नीं यशस्विनीमित्यन्तमेकं वाक्यं ॥ ये द्वीपाः गिरिभिर्गम्यन्ते । प्लवनेन लङ्घनेन च ये गम्यन्ते । प्लवेन उडुपेन ये गम्यन्ते । तान्द्वीपान् । सप्तराज्योपशोभितं सप्तख-ण्डोपशोभितं । यवद्वीपं च गच्छत । तं यवद्वीपमतिक्रम्य यः शिशिरोनाम पर्वतःशृङ्गेण दिवं स्पृशति तं गच्छत । एतेषां द्वीपादीनां गिरिदुर्गेषु वनेषु च । प्रपातेषु निर्झरेषु च । रामपत्नीं मार्गध्वमिति संबन्धः । यवद्वीपसुवर्णरूप्यकावपि लङ्काद्वीपवत् समुद्रान्तर्वर्तिनौ द्वीपविशेषौ ॥ २७—२९ ॥ एवं जम्बूद्वीप लवणसमुद्रं चोक्त्वा प्लक्षद्वीपप्रदेशानाह—तत इत्यादिना ॥ समुद्रस्य पारं लवणसमुद्रापरपारस्थं । रक्तजलं अगाधं शीघ्रगामिनं सिद्धचारणसेवितं शोणं शोणाख्यं नदं । गत्वा । तस्य तीर्थेषु अवतारेषु । वनेषु च वैदेह्यासह रावणोमार्गितव्यः । केवलं रावणं केवलं सीतां च दृष्ट्वा नागन्तव्यं । रावणहननाय सीतानयनाय च उभावपि दृष्ट्वा आगन्तव्यमितिभावः

सकर्णप्रावरणाः कर्णपुटस्यैवप्रावरणवस्त्रवद्विस्तृतत्वेनतथोक्तिः । तथा ओष्ठकर्णिकाः ओष्ठपर्यन्तंलंबमानकर्णाः । लोहमुखाः ताम्रमुखाः । चर्मपादुकाः जानुपर्यन्तंविद्यमानचर्ममयपादत्राणाः । एकपादकाइत्यपिक्वचित्पाठः ॥ २४ ॥ **शि०** अक्षयाः नाशरहिताः गृहरहितावा ॥ **ति०** अक्षयाः अक्षयसन्तानाः । एतेउक्ताःपुरुषाः । तथैवपुरुषादकाः रक्षोभेदाः । तीक्ष्णसूच्यग्रसदृशतैक्ष्ण्यवतीचूडाकेशपाशोयेषां ॥ २५ ॥ **ति०** आममीनाशनाः अपक्कमत्स्यभुजः ॥२६॥ **ती०** यवद्वीपं यवकोटिपर्युपलक्षितद्वीपं अस्तीतिशेषः । **ति०** ततःपरंयत्नवन्तोभूत्वा । सप्तराज्योपशोभितंयवद्वीपं तथासुवर्णद्वीपंरूप्यकद्वीपंविचेतव्यमितिशेषः । सुवर्णाकरमण्डितं सुवर्णकुर्वन्तियेतैःशोभितं ॥ २७ ॥ **ति०** ततोनित्यजलमितिपाठे नित्यजलमितितस्यसंज्ञा ॥ ३० ॥

[पा०] १ च. झ. ट. सर्वंचतद्विचेतव्यं. ग. सर्वमेतद्विचिन्वध्वं. २ क. ख. घ.—ट. मृगयद्भिः. ग. मृगयन्तः. ३ छ. ज. भार्यांदयितां. ङ. दक्षिणांभार्यां. ४ क. स्नुषांदशरथस्यच. ५ ख. मन्दरस्यचकोटीश्चयेकिंचित्संश्रिताजनाः. ६ क. ङ.—ट. केचिदालयाः. ७ ख. ट. यवनाश्चैक. ठ. जवनाश्चर्मपादुकाः. ८ ङ. छ. झ. ट. तथैव. ९ ख. ङ. छ. झ. ञ. ट. किरातास्तीक्ष्णचूडाश्च. १० छ. झ. ट. हेमाभाः. ११ ग. ङ. च. ज. श्चात्र. छ. झ. ञ. ट. श्चापि. क. श्चैव. १२ छ. झ. ट. माश्रयाः ङ. मालयाःकामं. १३ क. कामरूपिणः. १४ च. ज. लङ्घनेन. ङ. च. लङ्घनैःसुप्लवेनच. १५ झ. यत्नवन्तोयवद्वीपं. १६ ङ. सुवर्णद्वीपकंचैव. ख. सुवर्णकुड्यकंचैव. छ. झ. ट. सुवर्णरूप्यकद्वीपं. १७ छ. झ. ञ. ट. सुवर्णकरमण्डितं. १८ क. ग. प्रभूतेषु. १९ छ. झ. ट. रक्तजलंप्राप्यशोणाख्यंशीघ्रवाहिनं. २० क. ग. ज. शीघ्रवाहिनं. २१ क. समुद्रपारस्थं.

तस्य तीर्थेषु रम्येषु विचित्रेषु वनेषु च ॥ रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ३१ ॥
पर्वतप्रभवा नद्यः [1]सुरम्या बहुनिष्कुटाः ॥ मार्गितव्या दरीमन्तः पर्वताश्च वनानि च ॥ ३२ ॥
ततः समुद्रद्वीपांश्च सुभीमान्द्रष्टुमर्हथ ॥ ३३ ॥
ऊर्मिमन्तं [2]समुद्रं च क्रोशन्तमनिलोद्धतम् ॥ ३४ ॥
तत्रासुरा महाकायाश्छायां गृह्णन्ति नित्यशः ॥ ब्रह्मणा समनुज्ञाता दीर्घकालं बुभुक्षिताः ॥ ३५॥
तं [3]कालमेघप्रतिमं महोरगनिषेवितम् ॥ [4]अभिगम्य महानादं तीर्थेनैव महोदधिम् ॥ ३६ ॥
ततो रक्तजलं भीमं लोहितं नाम सागरम् ॥ [5]गता [6]द्रक्ष्यथ तां चैव [7]बृहतीं कूटशाल्मलीम् ॥ ३७॥
गृहं च वैनतेयस्य नाना[8]रत्नविभूषितम् ॥ तत्र कैलाससंकाशं विहितं विश्वकर्मणा ॥ ३८ ॥
तत्र शैलनिभा [9]भीमा मन्देहानाम राक्षसाः ॥ [10]शैलशृङ्गेषु लम्बन्ते नानारूपा भयावहाः ॥ ३९ ॥
ते पतन्ति जले नित्यं सूर्यस्योदयनं प्रति ॥ [11]निहता ब्रह्मतेजोभिरहन्यहनि राक्षसाः ॥
[12]अभितप्ताश्च सूर्येण लम्बन्ते स्म पुनः पुनः ॥ ४० ॥
ततः [13]पाण्डुरमेघाभं क्षीरोदं नाम सागरम् ॥ [14]गता द्रक्ष्यथ दुर्धर्षा मुक्ताहारमिवोर्मिभिः ॥ ४१ ॥
तस्य मध्ये महाञ्श्वेत ऋषभो नाम पर्वतः ॥ दिव्यगन्धैः कुसुमितै राजतैश्च नगैर्वृतः ॥ ४२ ॥

॥ ३०—३१ ॥ प्लक्षद्वीपपर्वतादीनाह—पर्वतेति ॥ निष्कुटाः उद्यानविशेषाः ॥ ३२ ॥ अथेक्षुसमुद्रद्वीपानाह—तत इति ॥ ३३ ॥ इक्षुसमुद्रविशेषं वक्तुमाह—ऊर्मिमन्तमित्यर्धं ॥ ऊर्मिमन्तं समुद्रं इक्षुसमुद्रमित्यर्थः । अभिगच्छतेति शेषः । " लवणेक्षुसुरासर्पिर्दधिदुग्धजलैः समं " इति समुद्रक्रमः ॥ ३४ ॥ इक्षुसमुद्रस्य दुर्गमत्वंदर्शयति—तत्रेति ॥ तत्र इक्षुसमुद्रे ॥ ३५ ॥ तीर्थेनाभिगम्य उपायेनाभिगम्य । " तीर्थं मन्त्राद्युपाध्यायशास्त्रेष्वम्भसि पावने । पात्रोपायावतरणेषु " इति वैजयन्ती ॥ छायाग्राहिपरिहारेण गन्तव्यमित्यर्थः । यद्वा तीर्थेनावतरणेन गन्तव्यं नान्येन । तेन छायाग्राहिपरिहारो भविष्यतीति भावः ॥३६॥ ततो गताः इक्षुसमुद्रान्निर्गताः । तां कूटशाल्मलीं लोहितं नाम सागरं मधुसमुद्रं च । द्रक्ष्यथ ॥ ३७ ॥ तत्र शाल्मलिद्वीपे ॥ ३८ ॥ तत्र मधुसमुद्रे ॥ सूर्यस्योदयनं प्रतीत्यतः परं निहता इत्यर्धं । ततः परं अभितप्ताश्चेत्यर्धं । लम्बन्ते वर्तन्त इत्यर्थः । ब्रह्मतेजोभिः गायत्रीप्रभावैः ॥३९–४०॥ ततः पाण्डुरेति । अत्र मधुसमुद्रानन्तरं सर्पिर्दधिसमुद्रयोः कुशक्रौञ्चद्वीपयोश्च वक्तव्यत्वेपि तान्विहाय क्षीरोदप्राप्त्यभिधानं तदुभयप्राप्तिमन्तरेण क्षीरोदप्राप्तेरसंभवात् । अतः अनुक्तावपि तावुक्तावेव समुद्रौ द्वीपौ चेति बोध्यं । यद्वा लवणसमुद्रं तन्मध्यद्वीपांश्चोक्त्वा प्लक्षद्वीपशाल्मलिद्वीपकुशद्वीपक्रौञ्चद्वीपान् इक्षुसुरासर्पिर्दधिसमुद्रांश्च तत्रेण दर्शयति—ततः समुद्रद्वीपांश्च सुभीमान्द्रष्टुमर्हथेति ॥ ततः ऊर्मिमन्तमित्यादिना इक्षुसमुद्रस्य विशेषणमुक्त्वा ततो रक्तजलमित्यादिना सुरासमुद्रस्य स्वरूपमुक्त्वा ततः शाल्मलिद्वीपवृत्तान्तं प्रदर्श्य अन्यत्र विशेषाभावात् क्षीरसमुद्रगमनं निर्दिशति—ततः पाण्डुरमेघाभमित्यादिना ॥ ऊर्मिभिर्मु-

शि० सुभीमबहुनिष्कुटाः भयङ्करानेकावनप्रदेशयुक्ताः ॥३२॥ ति० समनुज्ञाताः समनुज्ञातच्छायाद्वारकग्रहणसामर्थ्यादिमन्तः। छायागृहीतप्राणिभक्षणानुमतिकाश्च ॥ ३५ ॥ ति० सूर्यस्योदयनंप्रति । सूर्योदयंप्राप्योर्ध्वमुखाःसूर्येणयुध्यमानाः सूर्येणाभितप्ताः । तन्मण्डलब्रह्मतेजोभितप्ताः । ब्रह्मतेजोभिरहन्यहनित्रैवर्णिकप्रवर्तितैर्ब्रह्मविद्यातेजोभिर्निहताःसन्तः सुरोदजलेपतन्ति । ततः पुनरुज्जीविताल्लंबन्तेस्म । शैलशृङ्गेष्वितिशेषः ॥ कतक० शैलशृङ्गेषुलंबन्तइत्यादिश्लोकद्वयंप्रक्षिप्तं । "तानिरक्षांसिमन्देहारुणेद्वीपेप्रक्षिपन्ति " इतिश्रुतावरुणद्वीपेतत्प्रक्षेपोक्तेरत्रारुणद्वीपप्रसक्त्यभावात्प्राचीनपुस्तकेष्वदर्शनाच्च ॥ ४० ॥ कतक० ततःपाण्डुरेति ।

[पा०] १ छ. झ. ट. सुभीमबहु. २ ग.—ट. महारौद्रं. ३ ग. कालमेघप्रतिनिभं. ४ ग. अतिक्रम्य. घ. अधिगम्य. ५ क. ङ.—ट. गत्वा. ६ छ. झ. प्रेक्ष्यथ. ७ ग. महतीं. ८ ख. रत्नोपशोभितं. ९ क. घोराः. १० ङ. तेषुशृङ्गेषु. ११ निहता ब्रह्मतेजोभिः. अभितप्ताश्चसूर्येण. इत्यनयोरर्धयोःपौर्वापर्यं ग. ङ.—ट. पाठेषुदृश्यते. ग. रहिताः. १२ ङ.—ट. अभितप्ताःस. १३ क. पाण्डरसंघातं. १४ ङ.—ट. गत्वा. क. ततो.

सरश्च राजतैः पद्मैर्[1]ज्वलितैर्हेमकेसरैः ॥ नाम्ना सुदर्शनं नाम राजहंसैः[2] समाकुलम् ॥ ४३ ॥
विबुधाश्चारणा यक्षाः किन्नराः[3] साप्सरोगणाः ॥ हृष्टाः [4]समभिगच्छन्ति नलिनीं तां रिरंसवः[5]॥४४॥
क्षीरोदं समतिक्रम्य [6]ततो द्रक्ष्यथ वानराः ॥ जलोदं [7]सागरश्रेष्ठं सर्वभूतभयावहम् ॥ ४५ ॥
तत्र तत्कोपजं तेजः कृतं हयमुखं महत् ॥ [8]अस्याहुस्तन्महावेगमोदनं सचराचरम् ॥ ४६ ॥
तत्र विक्रोशतां नादो भूतानां [9]सागरौकसाम् ॥ श्रूयते [10]च समर्थानां दृष्ट्वा तद्बडबामुखम् ॥ ४७ ॥
[11]स्वादूदस्योत्तरे [12]देशे [13]योजनानि त्रयोदश ॥ जातरूपशिलो नाम [14]महान्कनकपर्वतः ॥ ४८ ॥
तत्र चन्द्रप्रतीकाशं पन्नगं धरणीधरम् ॥ पद्मपत्रविशालाक्षं ततो द्रक्ष्यथ वानराः ॥ ४९ ॥
आसीनं पर्वतस्याग्रे सर्व[15]भूतनमस्कृतम् ॥ सहस्रशिरसं देवमनन्तं नीलवाससम् ॥ ५० ॥
त्रिशिराः काञ्चनः केतुस्तालस्तस्य महात्मनः ॥ स्थापितः पर्वतस्याग्रे विराजति सवेदिकः ॥ ५१ ॥
पूर्वस्यां दिशि निर्माणं कृतं तत्रिदशेश्वरैः ॥ ५२ ॥
ततः परं हेममयः श्रीमानुदयपर्वतः ॥ तस्य कोटिर्दिवं स्पृष्ट्वा शतयोजनमायता ॥ ५३ ॥
जातरूपमयी दिव्या विराजति सवेदिका ॥ सालैस्तालैस्तमालैश्च कर्णिकारैश्च पुष्पितैः ॥
जातरूपमयैर्दिव्यैः शोभते सूर्यसन्निभैः ॥ ५४ ॥
तत्र योजनविस्तारमुच्छ्रितं दशयोजनम् ॥ शृङ्गं सौमनसं नाम जातरूपमयं ध्रुवम् ॥ ५५ ॥
तत्र पूर्वं पदं कृत्वा पुरा विष्णुस्त्रिविक्रमे ॥ द्वितीयं शिखरे मेरोश्चकार पुरुषोत्तमः ॥ ५६ ॥

क्ताहारं मुक्ताहारयुक्तमिव स्थितं ॥ ४१—४२ ॥ नाम्ना सुदर्शनं सर इत्यन्वयः ॥ ४३—४४ ॥ जलोदं शुद्धजलसमुद्रं ॥ ४५ ॥ तत्र शुद्धोदके । कृतं निक्षिप्तं । कोपजलं और्वकोपजं । हयमुखं तत् प्रसिद्धं । महत्तेजः वर्तत इति शेषः । अस्य तेजसः । सचराचरं महावेगं तत् जलमितिशेषः । ओदनमाहुः संहारवेलायामिन्धनमाहुरित्यर्थः ॥ ४६ ॥ समर्थानामपि बडबामुखं तत्तेजो दृष्ट्वा विक्रोशतां नादः श्रूयते ॥ ४७ ॥ स्वादूदस्य शुद्धजलसमुद्रस्य । उत्तरे देशे अपरे पारे ॥ ४८—५१ ॥ पूर्वस्यां दिशि तन्निर्माणं कृतं । पूर्वदिगवधित्वेन तालरूपः केतुः कल्पित इत्यर्थः ॥ ५२—५४ ॥ तत्र उदयपर्वतकोटौ ॥ ५५ ॥ विष्णुः त्रिविक्रमे त्रिविक्रमप्रस्तावे । तत्र सौमनसशृङ्गे । पूर्वं पदं कृत्वा द्वितीयं पदं मेरोः पश्चिमदिगवधिभूतस्य सावर्णिमेरोः शिखरे चकार । पूर्वपश्चिमदिगवधिभूतयोरुदयाचलसावर्णिमेर्वोर्विष्णोः पदविन्यासः बलेः कृत्स्नराज्यग्रहणार्थः । भूमध्यस्थमेरौ पदविन्यासे कृत्स्नाक्रमणं न लभ्येत । वस्तुवस्तु

अत्रसुराक्षीरोदयोर्मध्येसर्पिर्दधिसमुद्रयोर्विचयनानुक्तिस्तत्रविचेतव्यदुर्गस्थलाभावात् ॥ ४१ ॥ **स०** क्षीरोदमित्यादौक्षीरादीनामुदकत्वेनव्यवहारदर्शनादत्रापिजलान्यस्यैवजलत्वेनोत्प्रेक्षानभवतीतिद्योतयितुंजलोदमित्युक्तं ॥ ४५ ॥ **स०** तत्कोपजं । तच्छब्देनबुद्धिस्थऔर्वःपरामृश्यते । उक्तंचभारतेआदिपर्वणिऔर्वे—“ततस्तंक्रोधजंतातऔर्वाग्निंवरुणालये । उत्ससर्जसचैवापउपभुङ्क्तेमहोदधौ । महद्धयशिरोभूत्वायत्तंवेदविदोविदुः । तमग्निमुद्वमन्वक्त्रात्पिबत्यापोमहोदधौ ।” इति । **स०** अस्यतेजसः । सचराचरं जगत् । ओदनंवदन्ति । ज्ञानिनइतिशेषः । चराचरमोदनमितिचराचरात्तृत्वकथनेनास्यतेजसोभगवद्रूपत्वंप्रतीयते । “अत्ताचराचरग्रहणात्” इतिसूत्रात् । तथाआचार्यैरपि “ अश्वंनत्वावारवन्तंवन्दध्या ” इतिऋचि “ वारवान्बडबामुखः ” इत्यादिनास्पष्टमुक्तेश्च ॥ ४६ ॥ **स०** तद्बडबामुखं दृष्ट्वास्थितानांअसमर्थानां तत्प्राप्यजीवितुंसामर्थ्यरहितानां । सागरौकसांनादः आर्तस्वरः । श्रूयतेच । **ति०** असमर्थानां । चात्समर्थानामपि ॥ ४७ ॥ **ति०** त्रिशिराः शिरःप्रदेशवर्तित्रिस्कन्धवान् । सवेदिकः आधा-

[पा०] १ ग. ज्वलद्भिर्हेम. २ ङ. च. ज. ञ. हंसैर्निषेवितं. ३ ख. छ. झ. ट. किन्नराश्चाप्सरोगणाः. ४ ङ.—ट. समधिगच्छन्ति. ५ ङ.—ज. ञ. रिरंसया. ६ छ. झ. ट. तदा. ङ. च. गत्वा. ज. ञ. गताद्रक्ष्यथ. ७ छ. झ. ट. सागरंशीघ्रं. ख.—च. ज. सागरंश्रेष्ठं. ८ ङ. च. ज. अत्यद्भुतंमहा. ख. ग. घ. छ. झ. ञ. ट. अस्याद्भुतंमहा. ९ ख. सलिलौकसां. १० घ. छ. झ. ञ. ट. चासमर्थानां. ११ ख. ङ. च. ज. ञ. जलदस्योत्तरे. १२ ग. घ. छ. झ. ट. तीरे. १३ ख. योजनानां. १४ छ. झ. ट. सुमहान्कनकप्रभः. ङ. ञ. महाकनकपर्वतः. १५ ख. ङ.—ट. देवनमस्कृतं.

उत्तरेण परिक्रम्य जम्बूद्वीपं दिवाकरः ॥ दृश्यो भवति भूयिष्ठं शिखरं तन्महोच्छ्रयम् ॥ ५७ ॥
तत्र वैखानसा नाम वालखिल्या महर्षयः ॥ प्रकाशमाना दृश्यन्ते सूर्यवर्णास्तपस्विनः ॥ ५८ ॥
अयं सुदर्शनो द्वीपः पुरो यस्य प्रकाशते ॥ यस्मिंस्तेजश्च चक्षुश्च सर्वप्राणभृतामपि ॥ ५९ ॥
शैलस्य तस्य शृङ्गेषु कन्दरेषु वनेषु च ॥ रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ६० ॥
काञ्चनस्य च शैलस्य सूर्यस्य च महात्मनः ॥ आविष्टा तेजसा संध्या पूर्वा रक्ता प्रकाशते ॥६१॥
पूर्वमेतत्कृतं द्वारं पृथिव्या भुवनस्य च ॥ सूर्यस्योदयनं चैव पूर्वा ह्येषा दिगुच्यते ॥ ६२ ॥
तस्य शैलस्य पृष्ठेषु निर्झरेषु गुहासु च ॥ रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ६३ ॥
ततः परमगम्या स्यादिक्पूर्वा त्रिदशावृता ॥ रहिता चन्द्रसूर्याभ्यामदृश्या तिमिरावृता ॥ ६४ ॥
शैलेषु तेषु सर्वेषु कन्दरेषु वनेषु च ॥ ये च नोक्ता मया देशा विचेया तेषु जानकी ॥ ६५ ॥
एतावद्वानरैः शक्यं गन्तुं वानरपुङ्गवाः ॥ अभास्करममर्यादं न जानीमस्ततः परम् ॥ ६६ ॥
अधिगम्य तु वैदेहीं निलयं रावणस्य च ॥ मासे पूर्णे निवर्तध्वमुदयं प्राप्य पर्वतम् ॥ ६७ ॥
ऊर्ध्वं मासान्न वस्तव्यं वसन्वध्यो भवेन्मम ॥ सिद्धार्थाः सन्निवर्तध्वमधिगम्य च मैथिलीम् ॥६८॥

मेरोरेव शिखरे द्वितीयं पदं न्यस्तं । मेरुशिखरस्य स्वर्गत्वात् । भूमावेकं स्वर्गे द्वितीयं तृतीयं ब्रह्मलोक इति पौराणिकीगाथा ॥ ५६ ॥ दिवाकरःजम्बूद्वीपमुत्तरेण जम्बूद्वीपोत्तरभागे । "एनपा द्वितीया" इति द्वितीया । परिक्रम्य महोच्छ्रयं तत् सौमनसं शिखरं प्राप्येति शेषः । दृश्यो भवति मेरोर्दक्षिणपार्श्ववर्तिनां दृश्यो भवतीत्यर्थः ॥ ५७ ॥ वैखानसाः ब्रह्मनखोत्पन्नाः । वालखिल्याः ब्रह्मरोमोत्पन्नाः "ये नखास्ते वैखानसाः । येवालास्ते वालखिल्याः" इति श्रुतेः ॥ ५८ ॥ अयं उदयपर्वतपार्श्वस्थो द्वीपः सुदर्शनो नाम । सुदर्शनसंज्ञान्वर्थेत्याह—यस्येति । यस्य तेजसः । पुरः सन्निधौ । सर्वप्राणभृतामपि चक्षुः प्रकाशते विषयग्रहणशक्तं भवति । तत्तेजः सूर्याख्यं यस्मिन् द्वीपे प्रकाशते । अयं द्वीपः सुदर्शनो नामेति योजना ॥ ५९ ॥ शैलस्य उदयशैलस्येत्यर्थः ॥ ६०—६१ ॥ हि यस्मादेतदुदयपर्वतः । द्वारशब्दापेक्षया नपुंसकत्वं । पृथिव्याः भुवनस्य च पूर्वं द्वारं कृतं प्रथमद्वारत्वेन ब्रह्मणः सृष्ट्यादौ कल्पितं । सूर्यस्य परितो भ्रमणाय प्रथमं एतदुदयनं च कृतमुदयस्थानं कल्पितं । तस्मादेषा पूर्वा दिगुच्यते ॥ ६२ ॥ तस्येत्यादि ॥ सम्यगन्वेषणाय पुनरुक्तिः ॥ ६३ ॥ त्रिदशावृता त्रिदशाधिष्ठिता । दिक् उदयाचलप्रदेशरूपा । ततः परं उदयाद्रेः परं । अगम्या ॥ ६४ ॥ उपसंहरति—शैलेष्विति ॥ ये मया नोक्तास्तेषु शैलादिषु विचेया ॥ ६५ ॥ अमर्यादं ग्रामनगरादिमर्यादारहितं । केवलान्धकारभूतमित्यर्थः ॥६६—६८ ॥

रवेदिबन्धसहितः ॥ ५१ ॥ ति० अस्तानन्तरमुत्तरेणजंबूद्वीपंपरिक्रम्य तन्महोच्छ्रयं शिखरंसौमनसाख्यंप्राप्यस्थितोदिवाकरोजंबूद्वीपवर्तिनांभूयिष्ठंदृश्योभवति । सौमनसेशिखरेइत्यर्थः ॥ इदंसत्ययुगाभिप्रायं । त्रेतायांक्षीरसागरमध्यगस्यद्वापरेसुरोदमध्यगस्य कलौलङ्कामध्यगस्यजंबूद्वीपस्थमनुष्यदृश्यतायाअन्यत्रोक्तत्वात् ॥ ५७ ॥ ती० अयंसुदर्शनोद्वीपः शोभनदर्शनोऽयंद्वीपःप्रकाशते । अयमितिश्ङ्गग्राहिकयानिर्देशाज्जंबूद्वीपउच्यते । यद्वासुदर्शनाकारत्वात्सुदर्शनशब्देनजंबूद्वीपउच्यते ॥ स० सुदर्शनः तन्नामकसरोवरचिह्नितोद्वीपःप्रकाशते ॥ ५९ ॥ ति० चोहेतौ । यतोभुवनस्यप्रकाशनहेतोःसूर्यस्योदयनमवेक्ष्यपूर्वं प्रथमं । पृथिव्याएतद्वारं ऊर्ध्वस्थानांपृथिवीप्रवेशस्यद्वारं । पृथ्वीस्थानांभुवनस्य ब्रह्मभुवनस्यप्रवेशद्वारं । एतत् उदयगिरिरूपंकृतं । अतएषापूर्वादिगुच्यते ॥ ६२ ॥ इतिचत्वारिंशःसर्गः ॥ ४० ॥

[पा] १ ख. घ. न्महोच्छ्रितं. २ ख. घ. ज. तस्यशैलस्य. ३ क. ख. घ. ङ. च. ज. ञ. कुञ्जेषु. छ. झ. ट. पृष्ठेषु. ४ क. ज. तस्यपूर्वासन्ध्या. ५ क. ख. सापूर्वादिक्. च. छ. ज. ट. सादिक्पूर्वा. ग. दिक्पूर्वाहि. ६ ख. ङ.—ट. तमसावृता. ७ ङ. च. ज.—ट. नदीषु च. ८ ज. येयेचोक्ता. ट. येचनोक्तामयोद्देशाः. ९ क. एतच्चवानरैः. १० ज. सिद्धार्थाश्चनिवर्तध्वं.

महेन्द्रकान्तां वनषण्डमण्डितां दिशं चरित्वा निपुणेन वानराः ॥
अवाप्य सीतां रघुवंशजप्रियां ततो निवृत्ताः सुखिनो भविष्यथ ॥ ६९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

एकचत्वारिंशः सर्गः ॥ ४१ ॥

सुग्रीवेण दक्षिणदिशितत्तद्देशीयविशेषाभिधानपूर्वकंसीतान्वेषणाय हनुमन्नीलाङ्गदादिप्रेषणम् ॥ १ ॥

ततः प्रस्थाप्य सुग्रीवस्तन्महद्वानरं बलम् ॥ दक्षिणां प्रेषयामास वानरानभिलक्षितान् ॥ १ ॥
नीलमग्निसुतं चैव हनुमन्तं च वानरम् ॥ पितामहसुतं चैव जाम्बवन्तं महाबलम् ॥ २ ॥
सुहोत्रं च शरारिं च शरगुल्मं तथैव च ॥ गजं गवाक्षं गवयं सुषेणमृषभं तथा ॥ ३ ॥
मैन्दं च द्विविदं चैव विजयं गन्धमादनम् ॥ उल्कामुखमसङ्गं च हुताशनसुतावुभौ ॥ ४ ॥
अङ्गदप्रमुखान्वीरान्वीरः कपिगणेश्वरः ॥ वेगविक्रमसंपन्नान्संदिदेश विशेषवित् ॥ ५ ॥
तेषामग्रेसरं चैव महद्बलमसङ्गगम् ॥ विधाय हरिवीराणामादिशद्दक्षिणां दिशम् ॥ ६ ॥
ये केचन समुद्देशास्तस्यां दिशि सुदुर्गमाः ॥ कपीशः कपिमुख्यानां स तेषां तानुदाहरत् ॥ ७ ॥
सहस्रशिरसं विन्ध्यं नानाद्रुमलतायुतम् ॥ नर्मदां च नदीं दुर्गां महोरगनिषेविताम् ॥ ८ ॥
ततो गोदावरीं रम्यां कृष्णवेणीं महानदीम् ॥ वरदां च महाभागां महोरगनिषेविताम् ॥ ९ ॥
मेखलामुत्कलां चैव दशार्णनगराण्यपि ॥ अश्ववन्तीमवन्तीं च सर्वमेवानुपश्यत ॥ १० ॥

महेन्द्रकान्तां इन्द्रप्रियां । निपुणेन नैपुण्येन ॥ ६९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चत्वारिंशः सर्गः ॥ ४० ॥

अथ दक्षिणदिशि वानरप्रेषणमेकचत्वारिंशे—ततः प्रस्थाप्येत्यादि ॥ अभिलक्षितान् दृष्टापदानान् ॥ १ ॥ नीलमित्यादि । अत्रोक्तः सुषेणस्तारापितुरन्यः । वेगविक्रमसंपन्नप्रेषणे हेतुमाह—विशेषविदिति ॥२—५ ॥ असङ्गं अविलम्बगामि । वेगवदितियावत् । बलं सैन्यं । अग्रेसरं अग्रचरं । विधाय ॥ ६ ॥ तान् समुद्देशान् ॥ ७ ॥ सहस्रशिरसमित्यादि । पूर्ववन्मध्यदेशापेक्षया विन्ध्यस्य दक्षिणत्वव्यपदेशः ॥८—१०॥

ति० अभिलक्षितान् कार्यसमर्थत्वेननिर्णीतान् ॥ १ ॥ ति० हुताशनसुताविति । अग्नित्वव्याप्यंहुताशनत्वमित्यग्निहुताशनयोर्भेदः ॥ स० हुताशनसुतौ अग्निपुत्रौ । नीलस्यसेनानीत्वेनपृथगुक्तिः ॥ ४ ॥ ति० विशेषवित् अन्वेष्टव्यदेशविशेषवित् ॥ स० विशेषवित् कपिगतपराक्रमविशेषाभिज्ञः ॥ ५ ॥ ति० अग्रेसरं मुख्यं । असंग्रहंइतिपाठे असंकोचप्रभुमित्यर्थः ॥ ६ ॥ रामानु० सहस्रशिरसमित्यादिनापूर्वभागस्थान्देशानुपदिशति ॥ स० अत्रदिक्कल्पनाचजंबूद्वीपमध्यदेशमारभ्येतिज्ञेयं । तेनकथंकिष्किन्धादक्षिणदेशस्थत्वंविन्ध्यादीनामितिशङ्कापरास्ता ॥ तस्यानागकन्यात्वात्तत्रतेषांसंचारोयुक्तः ॥ ति० अत्राप्यार्यावर्तापेक्षयादक्षिणत्वं तदाह सहस्रशिरसं सहस्रशिखरं ॥ ८ ॥ ति० गोदावरीं विन्ध्यपूर्वप्रदेशवर्तिगोदावरीं ॥ ९ ॥ मेखलादयोदेशभेदाः ॥ १० ॥

[पा०] १ क. सुरेन्द्रकान्तां. २ ङ.—ट. महौजसं. ३ ख. ग. शरभं. ङ.—ट. सुषेणं. ४ छ. झ. ट. मनङ्गंच. ५ क. ग. महाबलमथाङ्गदं. ङ.—ट. बृहद्बलमथाङ्गदं. ६ क. कपिवीराणां. ७ ङ. च. ज. ञ. मादिदेशाथदक्षिणां. ८ ङ. ज. ञ. सुदारुणाः. ९ ङ.—ट. रम्यां. १० ग. भोगावतीं. ११ क. ञ. वरारोहां. ज. महारोहां. १२ क. च. अब्रुवन्तींब्रुवन्तींच. ङ. ञ. ट. अब्रुवन्तीमवन्तींच. ख. ग. अवन्तीमब्रुवन्तींच. छ. झ. आब्रवन्तीमवन्तींच.

विदर्भा[1]नृषिकांश्चैव रम्यान्माहिषकानपि ॥ तथा [2]वङ्गान्कलिङ्गांश्च कौशि[3]कांश्च [4]समन्ततः ॥ ११ ॥
[5]अन्वीक्ष्य दण्डकारण्यं सपर्वतनदीगुहम् ॥ नदीं गोदावरीं चै[6]वं सर्वमेवानुप[7]श्यत ॥
त[8]थैवान्ध्रांश्च पुण्ड्रांश्च चोलान्पाण्ड्यान्सकेरलान् ॥ १२ ॥
[9]अयोमुखश्च गन्तव्यः पर्वतो धातुमण्डितः ॥ विचित्रशिखरः श्रीमांश्चित्र[10]पुष्पितकाननः ॥ १३ ॥
[11]सचन्दनवनोद्देशो मार्गितव्यो महागिरिः ॥ १४ ॥
ततस्तामापगां दिव्यां प्रसन्न[12]सलिलां शिवाम् ॥ तत्र द्रक्ष्यथ कावेरीं विहि[13]तामप्सरोगणैः ॥ १५ ॥
तस्यासीनं नगस्याग्रे मलयस्य [14]महौजसम् ॥ द्रक्ष्यथादित्यसंकाशमगस्त्यमृषिसत्तमम् ॥ १६ ॥
ततस्तेनाभ्यनुज्ञाताः प्रसन्नेन महात्मना ॥ ताम्रपर्णीं [15]ग्राहजुष्टां तरिष्यथ महानदीम् ॥ १७ ॥
सा चन्दनव[16]नैर्दिव्यैः [17]प्रच्छन्ना द्वीपशालिनी ॥ कान्तेव [18]युवतिः कान्तं समुद्रमवगाहते ॥ १८ ॥
[20]ततो हेममयं दिव्यं मुक्ता[19]मणिविभूषितम् ॥ युक्तं कवाटं पाण्ड्यानां [2]गता द्रक्ष्यथ वानराः ॥ १९ ॥
तत[…]समुद्रमासाद्य संप्रधार्यार्थनिश्चयम् ॥ अगस्त्येनान्तरे तत्र सागरे विनिवेशितः ॥ २० ॥
[21]…नानगः श्रीमा[22]न्महेन्द्रः पर्वतोत्तमः ॥ जातरूपमयः श्रीमानवगाढो महार्णवम् ॥ २१ ॥
न[…]धैर्नगैः [23]सर्वैर्लताभिश्चोपशोभितम् ॥ दे[24]वर्षियक्षप्रवरैरप्सरोभिश्च [25]सेवितम् ॥ २२ ॥
[26]…चारणसङ्घैश्च प्रकीर्णं [27]सुमनोहरम् ॥ [28]तमुपैति सहस्राक्षः सदा पर्वसु पर्वसु ॥ २३ ॥

तत्र सर्वमेवानुपश्यतेत्यन्तेन विन्ध्यस्य पश्चिमभागस्थांस्तद्दक्षिणपार्श्वस्थांश्च नदीनगरदेशानुपदिशति—विदर्भानित्यादिना । पूर्वभागस्थान्देशानुपदिशति—नदींगोदावरीमिति । दण्डकारण्यवर्तिगोदावरीखण्डमित्यर्थः ॥११—१२॥ अयोमुखः सह्यः ॥ १३—१४॥ अप्सरोगणैः विहितां पूजितामित्यर्थः ॥ १५ ॥ तस्य प्रसिद्धस्य ॥१६—१८॥ पाण्ड्यानां पाण्ड्यराजानां । युक्तं योग्यं । कवाटं । अनेन नगरं लक्ष्यते । मुक्तारूपैर्मणिभिः रत्नैः भूषितं । तदुत्पत्तिदेशत्वादितिभावः ॥ १९ ॥ अथ महेन्द्रं वर्णयति—तत इत्यादिना ॥ मार्गितव्या विशेषत इत्यन्तमेकान्वयं । ततः पाण्ड्यनगरात् । समुद्रमासाद्य अर्थनिश्चयं कर्तव्यसमुद्रलङ्घनाद्यर्थनिश्चयं । संप्रधार्य कृत्वा । अगस्त्येन तत्र सागरे अन्तरे अवकाशे निवेशितः । श्रीमान् पुष्पफलादिसमृद्धिमान् । श्रीमान् कान्तिमान् । महेन्द्रोऽस्ति । तं पर्वतं । पर्वसु पर्वसु समुद्रस्नानायागच्छति । तस्यापरे पारे अन्तरालिकतीरे द्वीपोऽस्ति तं मार्गध्वं । तत्र सर्वात्मना सर्वप्रयत्नेन विशेषतः सीता मार्गित-

ति० मत्स्यांश्चकलिङ्गांश्चतान् ॥ ११ ॥ स० अत्रनदींगोदावरीमिति दण्डकारण्यस्थितगोदावरीप्रदेशग्रहणं । एतच्च तत्रैवसीतायागमनाद्विशेषतस्तत्रान्वेषणार्थं ॥ १२ ॥ स० अयोमुखइति मलयस्यनामान्तरं । सुचन्दनवनोद्देशइतितच्चिह्नदर्शनात् “ तस्यासीनंनगस्याग्रेमलयस्य” इतिवक्ष्यमाणत्वाच्च ॥ १३ ॥ स० अप्सरोगणैर्विहृतां विहृतंविहरणंअस्याअस्तीतिमत्वर्थीयप्रत्ययान्तोयं । ततश्चअप्सरोगणकर्तृकंयद्विहरणं तद्वतीमित्येकदेशेनान्वयोबोध्यः ॥ १५ ॥ ति० अगस्त्यमिति । यद्यपिपञ्चवटीतउदग्भागेअगस्त्याश्रमःपूर्वमुक्तः तथाप्यत्रापिबोध्यः वाल्मीकेरनेकदेशेष्वाश्रमवत् । समाननामाऽन्यएवायमित्यन्ये ॥ १६ ॥ ति० चन्दनैःप्रच्छन्नानिद्वीपानिवारिचयस्यास्साप्रच्छन्नद्वीपवारिणी । प्रच्छन्नशरीरेतियावत् ॥ स० युवती कान्ता लज्जयायथादिव्यदुकूलैःप्रच्छन्नसर्वस्वावयवासतीस्वकान्तंगच्छति तद्वदियमपिदिव्यदुकूलस्थानीयैश्चन्दनैश्चित्रैःप्रच्छन्नद्वीपजलादिसर्वावयवासती स्वकान्तंसमुद्रमवगाहते ॥ १८ ॥ ति० सहस्राक्षउपैतीत्यनेन महेन्द्राधिष्ठितत्वादन्वर्थनामकत्वंमहेन्द्रस्यसूचितं ॥ २३ ॥

[पा०] १ ङ. छ. झ. ट. नृष्टिकांश्चैव. २ क. ख. वङ्गकलिङ्गांश्च. ङ. छ. झ. ञ. ट. मत्स्यकलिङ्गांश्च. घ. च. ज. वत्सकलिङ्गांश्च. ३ क.—घ. काशिकांश्च. ४ ख. तथैवच. ५ ख. अन्विष्य. ६ ख. चेति. ७ ग. ङ. च. ज. ञ. पश्यथ. ८ ग. च—ट. पाण्ड्यांश्चकेरलान्. ९ क. अधोमुखश्च. १० ख. पुष्पितपादपः. ११ घ.—ट. सुचन्दन. १२ झ. ट. सलिलाशयां. घ. सलिलांशुभां. १३ ख.—ट. विहृतामप्सरो. १४ क.—ट. महौजसः. १५ ख. ग. महाग्राहां. १६ ङ.—ट. वनैश्चित्रैः. १७ छ. झ. प्रच्छन्नद्वीपवारिणी. ट. प्रच्छन्नद्वीपमालिनी. १८ ख. ग. ङ.—ट. युवतीकान्तं. १९ क. मणिनिषेवितं. २० ङ.—ज. ञ. ततो. २१ ङ. च. ज. ञ. ट. चित्रसानुगतः. झ. चित्रसानुनगः. ग. चित्रनानावनः. २२ घ. श्रीमान्नगेन्द्रः. २३ क.—ट. फुल्लैः. २४ ख. ग. गन्धर्वयक्ष. २५ घ.—ट. शोभितं. २६ क. चारणगन्धर्वैः. २७ ङ. ज.—ट. सुमनोरमं. २८ ख. समुपैति.

द्वीपस्तस्यापरे पारे शतयोजनम्[1]आयतः ॥ अगम्यो [2]मानुषैर्दीप्तस्तं मार्गध्वं समन्ततः ॥
तत्र सर्वात्मना सीता मार्गितव्या विशेषतः ॥ २४ ॥
स हि देशस्तु वध्यस्य रावणस्य [3]दुरात्मनः ॥ राक्षसाधिपतेर्वासः सहस्राक्षसमद्युतेः ॥ २५ ॥
दक्षिणस्य समुद्रस्य [4]मध्ये तस्य तु राक्षसी ॥ अङ्गारकेति विख्याता [5]छायामाकृष्य भोजनी ॥ २६ ॥
एवं निःसंशयान्कृत्वा संशयान्नष्टसंशयाः ॥ मृगयध्वं नरेन्द्रस्य पत्नीममिततेजसः ॥ २७ ॥
तमतिक्रम्य लक्ष्मीवान्समुद्रे शतयोजने ॥ गिरिः पुष्पितको नाम सिद्धचारणसेवितः ॥ २८ ॥
चन्द्रसूर्यांशुसंकाशः [6]सागराम्बुसमावृतः ॥ भ्राजते विपुलैः शृङ्गैरम्बरं विलिखन्निव ॥ २९ ॥
तस्यैकं काञ्चनं शृङ्गं सेवते यं दिवाकरः ॥ श्वेतं [7]राजतमेकं च सेवते यं निशाकरः ॥ ३० ॥
न तं कृतघ्नाः पश्यन्ति न नृशंसा न नास्तिकाः ॥ प्रणम्य शिरसा शैलं तं विमार्गत वानराः ॥ ३१ ॥
तमतिक्रम्य [8]दुर्धर्षाः सूर्यवान्नाम पर्वतः ॥ अध्वना दुर्विगाहेन योजनानि चतुर्दश ॥ ३२ ॥
ततस्तमप्यतिक्रम्य वैद्युतो नाम पर्वतः ॥ सर्वकामफलैर्वृक्षैः सर्वकाल[9]मनोहरैः ॥ ३३ ॥
तत्र भुक्त्वा [10]वरार्हाणि मूलानि च फलानि च ॥ मधूनि पीत्वा [11]मुख्यानि परं गच्छत वानराः ॥ ३४ ॥
तत्र नेत्रमनःकान्तः कुञ्जरो नाम पर्वतः ॥ अगस्त्यभवनं यत्र निर्मितं विश्वकर्मणा ॥ ३५ ॥
तत्र योजन[12]विस्तारमुच्छ्रितं दशयोजनम् ॥ शरणं काञ्चनं दिव्यं नानारत्नविभूषितम् ॥ ३६ ॥
तत्र भोगवती नाम सर्पाणामालयः पुरी ॥ [13]विशालकक्ष्या दुर्धर्षा सर्वतः परिरक्षिता ॥

व्येत्यर्थः ॥ २०—२४ ॥ एवं रावणालयावगमेऽपि इतरदिक्षु वानरप्रेषणं स्थानान्तरे सीतामादाय किं गच्छेदिति शङ्कयेति बोध्यम् ॥ २५—२६ ॥ ननु पूर्वं "न जाने निलयं तस्य सर्वथा पापरक्षसः" इत्युक्तं । संप्रति "स हि देशस्तु वध्यस्य रावणस्य दुरात्मनः" इत्युच्यते । अतो विरुद्धमिदमित्याशङ्क्य परिहरति—एवमिति ॥ एवं मदुक्तरीत्या । संशयान् संशयविषयभूतान्देशान् । निःसंशयान् संशयाविषयीभूतान् । निश्चितसदसद्भावान्कृत्वा नष्टसंशयाः सन्तः अमिततेजसो नरेन्द्रस्य पत्नीं मृगयध्वं । यदृच्छादर्शनापरिस्फुटज्ञातमर्थं कथं निश्चयेन कथयामीति न जान इति पूर्वमुक्तं । इदानीं तथाविधमप्यर्थमन्वेषणगौरवाय निश्चयेन ब्रवीमीतिभावः ॥ २७ ॥ तमतिक्रम्येति "परावरयोगे च"ति क्त्वाप्रत्ययः । एवं पूर्वत्रापरत्र च बोध्यं ॥ २८—२९ ॥ तस्यैकमिति दक्षिणायन इति शेषः ॥ ३०—३१ ॥ हे दुर्धर्षाः सूर्यवान्नाम पर्वतः वर्तत इति शेषः । दुर्विगाहेनाध्वना उपलक्षितः । योजनानि चतुर्दश पुष्पितकसूर्यवतोरन्तराल इति शेषः ॥ ३२—३३ ॥ वराणां श्रेष्ठानामर्हाणीति वरार्हाणि । परं ततः परं देशं ॥ ३४—३५ ॥ अगस्त्यभवनं विशेषयति—तत्र

अपरेपारे अपरेपरतीरे । अपरशब्दोविशेषवाची परतीरविशेषेप्रतिष्ठितइतिशेषः । द्वीपइति । उत्तरभागेदक्षिणेलवणसमुद्रइति तस्यद्वीपत्वं । सगरखातोप्येकदेशेनोदग्भागेचसमुद्रसंबद्धः ॥ २४ ॥ **ति०** समुद्रसंबद्धत्वात्सागरोपिसमुद्रत्वेनसमुद्रश्चसागरत्वेनव्यवह्रियतइत्यविरोधः ॥ २६ ॥ **स०** एवं पूर्वोक्तप्रकारेण । संशयान् संशयविषयान् समुद्रतरणच्छायाग्रहनिवारणादीन्प्रति । निस्संशयान् निर्गतः संशयोयेषांतान्मयापरंतीरंप्राप्यतेवानवा । छायाग्रहोनिवार्यतेवानवेत्यादिसंशयरहितानितियावत् । कृत्वा-नियोज्य तत्कार्यकरणायतादृशानेवनियोज्येत्यर्थः । नष्टसंशयास्सन्तोमृगयध्वमित्यर्थः । एवमर्थाकरणेपूर्वोक्तच्छायाग्रहनिस्तरणोपायाकथनेनासांगत्यापत्तिः ॥ २७ ॥ **ति०** तत्र कुञ्जरपर्वते । अगस्त्यभवनवर्णनं । योजनेत्यादि । इदंतृतीयमगस्त्यस्थानं ॥ शरणं गृहं । अगस्त्यस्येतिशेषः ॥ ३६ ॥ तत्र कुञ्जरपर्वतएव । आलयशब्दोनित्यंपुँल्लिङ्गः । यद्यपिभोगवतीरसातलेप्रसिद्धातथापि

[पा०] १ क. ख. ग. ङ.—ट. विस्तृतः. २ ज. मानुषैर्वापि. ३ ग. महात्मनः. ४ क. मध्येवसति. ५ क. ख. ग. ङ.—ट. छायामाक्षिप्य. ६ ज. सागरान्तसमाश्रयः. ङ. च. छ. झ. ञ. ट. सागरांबुसमाश्रयः. ७ क. रजतशृङ्गंच. ८ क. ख. ङ.—ज. ञ. दुर्धर्षः. ९ क. मनोरमैः. १० क.—घ. महार्हाणि. ११ च.—झ. ट. जुष्टानि. १२ क. विस्तीर्णं. १३ क. ग. च.—ट. विशालरथ्या.

रक्षिता पन्नगैर्घोरैस्तीक्ष्णदंष्ट्रैर्महाविषैः ॥ ३७ ॥
सर्पराजो [1]महाप्राज्ञो यस्यां वसति वासुकिः ॥ निर्याय मार्गितव्या च सा च भोगवती पुरी ॥३८॥
[2]तत्र चानन्तरा देशा ये केचन [3]सुसंवृताः ॥ ३९ ॥
[4]तं च देशमतिक्रम्य [5]महानृषभसंस्थितः ॥ सर्वरत्नमयः श्रीमानृषभो नाम पर्वतः ॥ ४० ॥
[6]गोशीर्षकं पद्मकं च हरिश्यामं च चन्दनम् ॥ दिव्यमुत्पद्यते यत्र तच्चैवाग्निसमप्रभम् ॥ ४१ ॥
[7]न तु तच्चन्दनं दृष्ट्वा [8]स्प्रष्टव्यं च [9]कदाचन ॥ रोहिता नाम गन्धर्वा [10]घोरां रक्षन्ति तद्वनम् ॥ ४२ ॥
तत्र गन्धर्वपतयः पञ्च सूर्यसमप्रभाः ॥ शैलूषो ग्रामणीः [11]शिग्रुः [12]शुभ्रो बभ्रुस्तथैव च ॥ ४३ ॥
रविसोमाग्निवपुषां निवासः पुण्यकर्मणाम् ॥ अन्ते पृथिव्या दुर्धर्षा[13]स्तत्र स्वर्गजितः स्थिताः ॥ ४४ ॥
[14]ततः परं न वः [15]सेव्यः पितृलोकः सुदारुणः ॥ राजधानी यमस्यैषा कष्टेन तमसा वृता ॥ ४५ ॥
एतावदेव युष्माभिर्वीरा वानरपुङ्गवाः ॥ शक्यं विचेतुं गन्तुं वा नातो गतिमतां गतिः ॥ ४६ ॥
सर्वमेतत्समालोक्य यच्चान्यदपि दृश्यते ॥ गतिं विदित्वा वैदेह्याः सन्निवर्तितुमर्हथ ॥ ४७ ॥
फलमू[illegible]गसान्निवृत्तोऽग्रे दृष्टा सीतेति वक्ष्यति ॥ मत्तुल्यविभवो भोगैः सुखं स विहरिष्यति ॥ ४८ ॥
न [illegible][17]प्रियतरो नास्ति मम प्राणाद्विशेषतः ॥ कृतापराधो बहुशो मम बन्धुर्भविष्यति ॥ ४९ ॥

अमितबलपराक्रमा भवन्तो विपुलगुणेषु कुलेषु च प्रसूताः ॥
मनुजपतिसुतां [18]यथा लभध्वं [19]तदधिगुणं पुरुषार्थमारभध्वम् ॥ ५० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

योजनेति ॥ शरणं गृहं । ३६—३७ ॥ निर्याय अगस्त्यभवनान्निर्गत्य ॥ ३८ ॥ ये अनन्तराः अव्यवहिता देशाः । तेमार्गितव्या इति शेषः ॥ ३९ ॥ तं च देशमतिक्रम्य तस्माद्देशात्परत इत्यर्थः । ऋषभसंस्थितः ऋषभतुल्यसंस्थानः ॥ ४० ॥ गोशीर्षकं गोरोचनासदृशवर्णं । पद्मकं पद्मदलसवर्णं । हरिश्यामं तमालदलवर्णं । अग्निसमप्रभं अग्निसदृशवर्णं । एवंविधं दिव्यं चन्दनं यत्रोत्पद्यते स ऋषभः पर्वतो वर्तत इतिपूर्वेणान्वयः ॥ ४१—४८ ॥ ततः तस्मात्पुरुषात् । प्रियतरो नास्ति । मम प्राणाद्विशेषतः सः प्रियतर इतिशेषः ॥ ४९ ॥ तदधिगुणं तदनुगुणं । पुरुषार्थं पुरुषव्यापारं । अत्र संयमिनीपर्यन्तमभिधानात् सप्तद्वीपसागरगमनमर्थसिद्धं । एवमुत्तरसर्गयोरपिबोध्यं ॥ ५० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकचत्वारिंशः सर्गः ॥ ४१ ॥

रावणस्यजनस्थानवत्सर्पाणामपिभोगवत्याख्यपुरंभूमावप्यस्तीतिवासुकेर्भुवउपर्यपियोगवैभवात्स्थितिरितिचेतएवावगन्तव्यं । यथागस्त्यस्यकुञ्जरपर्वतावच्छिन्नेविश्वकर्मनिर्मितभवनेनक्षत्रपदेमलये पञ्चवटीदक्षिणभागेचवासस्तथेतिध्येयं ॥ ३७ ॥ **स०** गोशीर्षकं गोमेदमणिः । पद्मकं पद्मरागमणिः । हरिश्यामं इन्द्रनीलमणिः । चन्दनं चेत्येतावत्पदार्थजातंतथा अग्निसमप्रभंमाणिक्यंच यत्रोत्पद्यतेतच्चैवेतिपूर्वोक्तरत्नापेक्षयाऽस्यविशेषंसूचयति ॥ यद्वा गोशीर्षादयस्सर्वेचन्दनप्रभेदाः ॥ ४१ ॥ **स०** मत्तुल्यविभवस्सन् सुखंयथाभवतितथाविहरिष्यति । तस्मैमदर्धराज्याधिपत्यंदास्यामीत्यभिप्रायः ॥ ४८ ॥ इत्येकचत्वारिंशः सर्गः ॥ ४१ ॥

[पा०] १ क. ग.—ट. महाघोरो. २ क. घ. ततश्चानन्तरं. ग. छ. झ. ततश्चानन्तरोद्देशाः. ३ छ. झ. ट. समावृताः. ४ ग. तांश्चदेशानतिक्रम्य. ५ च. ज. नृषभपर्वतः. ग. नृषभसंज्ञकः. छ. झ. ट. नृषभसंस्थितिः. ६ ख. घ. गोशीर्षकंचपद्मंच. ७ ङ. च. ज. झ. ञ. नच. ८ च.—ट. स्प्रष्टव्यंतु. ९ ख. कथंचन. १० छ. झ. ट. घोरं. ११ क. ख. झ. ट. शिक्षः. ङ. च. ज. ञ. भिक्षुः. १२ ङ.—ट. शुक्रो. ग. घ. शुभो. १३ क. ख. ङ.—ट. स्ततः. १४ ङ. च. ज. ञ. नातःपरंनरैः सेव्यः. घ. ततःपरंनगन्तव्यः. १५ क. ग. ङ. च. ज. ञ. सेव्याःपितृलोकाःसुदारुणाः. १६ क. ख. ङ.—ट. यश्च. १७ ख. घ. प्रियतमो. १८ च. ज. यथोपलभ्य. १९ ख. ङ. च. ज. ञ. ट. तदनुगुणं.

द्विचत्वारिंशः सर्गः ॥ ४२ ॥

सुग्रीवेणपश्चिमदिशिसीतान्वेषणायसुषेणादिप्रेषणम् ॥ १ ॥

[1]अथ प्रस्थाप्य [2]सुग्रीवस्तान्हरीन्दक्षिणां दिशम् ॥ अब्रवीन्मेघसंकाशं सुषेणं नाम [3]यूथपम् ॥ १ ॥
तारायाः पितरं राजा श्वशुरं भीमविक्रमम् ॥ अब्रवीत्प्राञ्जलिर्वाक्यमभिगम्य प्रणम्य च ॥ २ ॥
[4]मरीचिपुत्रं मारीचमर्चिष्मन्तं महाकपिम् ॥ वृतं कपिवरैः शूरैर्महेन्द्रसदृशद्युतिम् ॥ ३ ॥
बुद्धिविक्रमसंपन्नं वैनतेयसम[5]द्युतिम् ॥ मरीचिपुत्रान्मारीचा[6]नर्चिर्मालान्महाबलान् ॥
ऋषिपुत्रांश्च तान्सर्वान्[7]प्रतीचीमादिशद्दिशम् ॥ ४ ॥
द्वाभ्यां शतसहस्राभ्यां [8]कपीनां कपिसत्तमाः ॥ सुषेणप्रमुखा यूयं वैदेहीं परि[9]मार्गत ॥ ५ ॥
[10]सुराष्ट्रान्सह[11]बाह्लीकाञ्शूरान्भीमांस्तथैव च ॥ स्फीताञ्जनपदान्रम्यान्विपुलानि पुराणि च ॥ ६ ॥
पुन्नागगहनं कुक्षिं वकुलोद्दालकाकुलम् ॥ तथा केतकषण्डांश्च मार्गध्वं [12]हरियूथपाः ॥ ७ ॥
प्रत्यक्[13]स्रोतोगमाश्चैव नद्यः शीतजलाः शिवाः ॥ तापसानामरण्यानि [14]कान्तारा गिरयश्च ये ।
[15]ततः स्थलीं मरुप्रायाम[16]त्युच्चशिरसः शिलाः ॥ गिरिजालावृतां दुर्गां [17]मार्गित्वा पश्चिमां दिशम् ॥९॥
[18]ततः पश्चिमम[19]आसाद्य समुद्रं द्रष्टुमर्हथ ॥ तिमि[20]नक्रायुतजलमक्षोभ्यमथ वानराः ॥ १० ॥
ततः केतकषण्डेषु तमालगहनेषु च ॥ कपयो विहरिष्यन्ति नारिकेलवनेषु च ॥ ११ ॥
तत्र सीतां [21]च मार्गध्वं निलयं रावणस्य च ॥ [22]वेलातटनिविष्टेषु पर्वतेषु वनेषु च ॥ १२ ॥

अथ पश्चिमदिशिवानरयोजनं द्विचत्वारिंशे—अथेत्यादि ॥ १ ॥ प्राञ्जलित्वादिकथनार्थमब्रवीदिति। अतो न पौनरुक्त्यं ॥ २ ॥ मारीचपदमन्वर्थसंज्ञेति द्योतयितुं मरीचिपुत्रमित्युक्तिः। मरीचिपुत्रान्मारीचानित्यत्रापि तथा । मारीचमिति ज्येष्ठ उक्तः । मारीचा इति तदनुजा उच्यन्ते । अर्चिर्मालान् अर्चिष्मतः ॥ ३—६ ॥ पुन्नागगहनं पुन्नागवनं । कुक्षिः मध्यदेशविशेषः । उद्दालकाः वृक्षविशेषाः । केतकषण्डान् केतकवनानि । प्रत्यक् स्रोतो गच्छन्तीति प्रत्यक्स्रोतोगमाः । शिवाः पावनाः । कान्ताराः दुर्गममार्गाः । तान्मार्गध्वमिति पूर्वेण संबन्धः ॥ ७—८ ॥ ततः स्थलीमित्यादिश्लोकद्वयमेकान्वयं । स्थल्यादिकं मार्गित्वा ततः तस्माद्देशात् । पश्चिमं समुद्रमागम्य तिमिनक्रायुतमक्षोभ्यंतं द्रष्टुमर्हथ ॥ ९—१० ॥ कपयो भवदीयाः ॥ ११ ॥ वेलातटनिविष्टेषु वेलायां अम्बुविकृतौ तटे च स्थितेषु । “ अब्ध्यम्बुविकृतौ वेला कालमर्यादयोरपि ” इत्यमरः ॥१२॥

स० अब्रवीदितिपुनर्वचनमादरसूचनार्थं ॥ २ ॥ **स०** महर्षिपुत्रंमारीचमित्यत्र महर्षिरूपोयोमरीचिस्तत्पुत्रमितिबुद्ध्याविवेकेनान्वयः ॥ महेन्द्रसदृशद्युतिं महेन्द्रद्युतिसदृशद्युतिं । यद्वा महेन्द्रस्यसदृशीयोग्याद्युतिर्यस्येति ॥ **ती०** अर्चिष्मन्तं तदाख्यं । अयंतेषुप्रधानः । अर्चिर्माल्याख्याअन्येपिमरीचिपुत्राः ॥ ३ ॥ **ति०** मारीचशब्दस्यव्युत्पत्त्यन्तरसंभवान्मरीचिपुत्रानित्युक्तं ॥ ४ ॥ **ती०** कुक्षिमित्यादिनाकेतुमालप्रदेशानुपदिशति ॥ ७ ॥ **ति०** कान्तारगिरयः कान्तारयुक्तागिरयः ॥ ८ ॥ स्थली

[पा०] १ ख. ततः. २ च.—ट. सहरीन्सुग्रीवोदक्षिणां. ३ ङ.—ट. वानरं. ४ घ.—ट. महर्षिपुत्रं. ५ क. समंजवे. ६ छ. झ. ट. नर्चिर्माल्यान्. ख. नर्चिर्ज्वालान्. ७ ख. घ. प्रतीचींदिशमादिशत्. ८ च. ज. सुग्रीवःकपिसत्तमः. क. ङ. कपीनांकपिसत्तमः. ९ क. ग.—ट. मार्गथ. १० ङ.—ट. सौराष्ट्रान्. ख. सौराष्ट्रान्बाह्लिकांश्चैव. घ. सुराष्ट्रानथ. ११ ङ.—ट. बाह्लीकांश्चन्द्रचित्रांस्तथैवच. १२ ग. ङ.—ट. हरिपुङ्गवाः. १३ च.—ट. क्स्रोतोवहाश्च. १४ क. ग. ङ.—ट. कान्तारगिरयः. १५ छ. झ. ञ. ट. तत्रस्थलीर्मरुप्राया । अत्युच्चशिशिराः. क. ग. तत्र. १६ क. मत्युग्रशिखराः. १७ ख. घ. मार्गध्वं. १८ क. तत्र. १९ क. ग. ङ.—ट. मागम्य. २० क. ख. ग. मीननक्रायुत. ङ. च. छ. ञ. ट. तिमिनक्राकुलजलं. ज. झ. तिमिनक्राकुलजलंगलाद्रक्ष्यथ. २१ क. विमार्गध्वं. २२ च.—ञ. वेलातल.

मुरचीपत्तनं[1] चैव रम्यं चैव जटीपुरम्[2] ॥ अवन्तीमङ्गलोपां[3] च तथा[4] चालक्षितं वनम् ॥
राष्ट्राणि च विशालानि पत्तनानि ततस्ततः ॥ १३ ॥
सिन्धुसागरयोश्चैव संगमे तत्र पर्वतः ॥ महान्हेमगिरिर्नाम[5] शतशृङ्गो महाद्रुमः ॥ १४ ॥
तस्य[6] प्रस्थेषु रम्येषु सिंहाः पक्षगमाः[7] स्थिताः ॥ तिमिमत्स्यगजांश्चैव[8] नीडान्यारोपयन्ति ते ॥ १५ ॥
तानि नीडानि सिंहानां गिरिशृङ्गगताश्च[9] ये ॥ दृप्तास्तृप्ताश्च मातङ्गास्तोयदस्वननिःस्वनाः ॥
विचरन्ति[10] विशालेऽस्मिंस्तोयपूर्णे समन्ततः ॥ १६ ॥
तस्य शृङ्गं दिवस्पर्शं काञ्चनं चित्रपादपम् ॥ सर्वमाशु विचेतव्यं कपिभिः कामरूपिभिः ॥ १७ ॥
कोटिं तत्र समुद्रे[11] तु काञ्चनीं शतयोजनाम् ॥ दुर्दर्शां पारियात्रस्य गत्वा[12] द्रक्ष्यथ वानराः ॥ १८ ॥
कोट्यस्तत्र चतुर्विंशद्[13] गन्धर्वाणां तरस्विनाम् ॥ वसन्त्यग्निनिकाशानां घोराणां[14] कामरूपिणाम्[15] ॥ १९ ॥
पावकार्चिःप्रतीकाशाः[16] समवेताः[17] सहस्रशः[18] ॥ नात्यासादयितव्यास्ते[19] वानरैर्भीमविक्रमैः ॥ २० ॥
नादेयं च फलं तस्माद्देशात्[20] किंचित्प्लवंगमैः ॥ दुरासदा हि ते वीराः सत्त्ववन्तो महाबलाः ॥ २१ ॥
फलमूलानि ते तत्र रक्षन्ते[21] भीमविक्रमाः ॥ तत्र यत्नश्च कर्तव्यो मार्गितव्या च जानकी ॥
न हि तेभ्यो भयं किंचित्कपित्वमनुवर्तताम् ॥ २२ ॥
तत्र वैडूर्यवर्णाभो वज्रसंस्थानसंस्थितः ॥ नानाद्रुमलताकीर्णो वज्रो नाम महागिरिः ॥
श्रीमान्समुदितस्तत्र योजनानां शतं समम् ॥ २३ ॥

पूर्वस्यां दिश्यवन्त्यन्या । इयं चान्या । यत्र प्रविष्टा वननैरन्तर्येण न लक्ष्यन्ते तदलक्षितं नाम । मार्गध्वमित्यनुषङ्गः ॥ १३ ॥ सिन्धुर्नदविशेषः । तत्र पश्चिमदिशि । पक्षैर्गच्छन्तीति पक्षगमाः । सपक्षा इति विशेषणं । नीडानि वृक्षाग्रस्थस्वावासस्थानानि । अतएव महाद्रुम इति पूर्वमुक्तं ॥ १४—१५ ॥ तानीत्याद्यर्धत्रयं ॥ समन्ततस्तोयपूर्णेऽस्मिन् स्थले ये गजाः सन्ति गिरिशृङ्गगताश्च ये ते गजास्तानि नीडानि विचरन्ति । सिंहनीडाश्रयसानुषु विचरन्तीत्यर्थः । बाधकस्थानगमने हेतुमाह—दृप्ता इति ॥ १६ ॥ कपिभिः भवद्भिरिति शेषः ॥ १७ ॥ तत्र समुद्रे । गतां पारियात्रस्य कोटिं शृङ्गं ॥ १८—१९ ॥ नात्यासादयितव्याः नातिसमीपं प्राप्तव्याः ॥ २० ॥ नादेयं न स्वीकार्यं । तर्हि ते गन्धर्वा अस्मान्हनिष्यन्तीत्यत्राह—तत्रेति । यत्नः फलचापलनिवृत्तौ यत्नः कर्तव्यः । विशालत्वादन्वेषणे यत्नो वा । न किंचिद्भयं कपिसंचारस्य वनमात्रधर्मत्वादितिभावः । अनुवर्ततां अनुवर्तमानानां ॥ २१—२२ ॥ तत्र वैडूर्ये-

---

अक्षश्रिमाभूः ॥ ९ ॥ ति० सिंहाः तदाख्याः । पक्षगमाः पक्षिणः स्थिताः । तेपक्षिणः तिमिमत्स्यगजान् नीडानि स्ववासस्थानानि । आरोपयन्ति प्रापयन्ति ॥ १५ ॥ स० सिंहानांयानितानिनीडानि । तेषुविचरन्तियेगजाः । दृप्तत्वादेवसिंहनीडसंचारित्वं । ति० बाधकबाहुल्येपिसंचारात्पर्वतस्यातिरमणीयत्वमवगम्यते ॥ १६ ॥ ति० घोराणां अतएवपापकर्मणांसंहर्तृणां ॥ १९ ॥ ती० नात्यासादयितव्याः नद्रष्टव्याः नापराद्धव्यावा ॥ २० ॥ ति० ननुपापकारित्वात्तदनासादनेकथंतत्रमार्गणसंभवः अतआह—नहितेभ्यइति । तद्देशेमृगपक्ष्यादिवत्प्राकृतमृगस्वभावेतिष्ठतामित्यर्थः । अतएवनापराद्धव्याइतिपूर्वव्याख्यातं ॥ शि० ननुगन्धर्वाणामतिप्राबल्यात्कथमन्वेषणसिद्धिरित्यतआह । कपित्वं स्वाभाविकचाञ्चल्यं । अनुवर्ततां युष्माकंतेभ्यः गन्धर्वेभ्यः । किंचिद्भयंन । एतेन स्वाभाविकगमनव्याजेनैवान्वेषणंकर्तव्यमितिव्यञ्जितं ॥ स० कपित्वमनुवर्ततां विजातीयानांभवतांतेभ्योभयंकिंचिदपिनभव-

[पा०] १ ङ.—ज. ट. मुरवीपत्तनं. २ ग. नदीपुरं. च.—ञ. जलापुरं. ३ ग. झ. ञ. मङ्गलेपांच. ४ घ. तथैवालक्षितं. क. तथाचारुक्षितं. ५ छ. झ. ट. महान्सोमगिरिः. ६ ङ.—ट. तत्र. ७ ख. पक्षिमृगाः. ८ ख. ग. मत्स्यान्गजांश्चैव. ९ ख. गताश्चते. १० क. विहरन्ति. ११ छ. झ. ञ. ट. समुद्रस्य. ख.—च. ज. समुद्रेथ. क. समुद्रेच. १२ ङ.—ट. गत्वा. १३ क. चतुस्त्रिंशत्. १४ क. महतां. १५ छ. झ. पापकर्मणां. १६ क. पाकशासनसंकाशाः. १७ ङ. झ. ज. ञ. समेताश्च. १८ छ. झ. ट. समन्ततः. १९ च. ज. नान्यैस्तेदर्शितव्यास्तैर्वानरैः. २० क. सर्वतस्माद्देशात्प्लवङ्गमैः. २१ ख. रक्षन्तो.

गुहास्तत्र विचेतव्याः प्रयत्नेन प्लवङ्गमाः ॥ २४ ॥
चतुर्भागे समुद्रस्य चक्रवान्नाम पर्वतः ॥ [1]तत्र चक्रं सहस्रारं निर्मितं विश्वकर्मणा ॥ २५ ॥
तत्र पञ्चजनं हत्वा हयग्रीवं च दानवम् ॥ आजहार ततश्चक्रं शङ्खं च पुरुषोत्तमः ॥ २६ ॥
[2]तस्य सानुषु [3]चित्रेषु विशालासु गुहासु च ॥ रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ २७ ॥
[4]योजनानां ततः षष्टिर्वराहो नाम पर्वतः ॥ सुवर्णशृङ्गः [5]सुश्रीमानगाधे वरुणालये ॥ २८ ॥
तत्र प्राग्ज्योतिषं नाम जातरूपमयं पुरम् ॥ [6]यस्मिन्वसति दुष्टात्मा नरको नाम दानवः ॥ २९ ॥
तत्र सानुषु [7]चित्रेषु [8]विशालासु गुहासु च ॥ रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ३० ॥
तमतिक्रम्य शैलेन्द्रं काञ्च[9]नान्तरनिर्दरः ॥ पर्वतः सर्वसौवर्णो [10]धाराप्रस्रवणायुतः ॥ ३१ ॥
तं गजाश्च वराहाश्च सिंहा[11] व्याघ्राश्च सर्वतः ॥ अभिगर्जन्ति सततं तेन शब्देन दर्पिताः ॥ ३२ ॥
[12]यस्मिन्हरिहयः श्रीमान्महेन्द्रः पाकशासनः ॥ अभिषिक्तः सुरै राजा मे[13]घवान्नाम पर्वतः ॥ ३३ ॥
तमतिक्रम्य शैलेन्द्रं महेन्द्रपरिपालितम् ॥ षष्टिं गिरिसहस्राणि काञ्चनानि गमिष्यथ ॥ ३४ ॥
तरुणादित्यवर्णानि भ्राजमानानि [14]सर्वतः ॥ जातरूपमयैर्वृक्षैः शोभितानि सुपुष्पितैः ॥ ३५ ॥
तेषां [15]मध्ये स्थितो राजा मेरुरुत्तरपर्वतः ॥ आदित्येन प्रसन्नेन शैलो दत्तवरः पुरा ॥ ३६ ॥
तेनैवमुक्तः शैलेन्द्रः सर्व एव त्वदाश्रयः ॥ मत्प्रसादाद्भविष्यन्ति दिवा रात्रौ च काञ्चनाः ॥३७॥
त्वयि ये चापि वत्स्यन्ति दे[16]वगन्धर्वदानवाः ॥ ते भविष्यन्ति [17]रक्ताश्च प्रभया [18]काञ्चनप्रभाः ॥ ३८ ॥
[19]विश्वेदेवाश्च [20]मरुतो वसवश्च दिवौकसः ॥ [21]आगम्य पश्चिमां सन्ध्यां मेरु[22]मुत्तरपर्वतम् ॥ ३९ ॥
आदित्यमुपतिष्ठन्ति तैश्च सूर्योऽभिपूजितः ॥ अदृश्यः सर्वभूतानामस्तं गच्छति पर्वतम् ॥ ४० ॥

त्यादि सार्धश्लोक एकान्वयः । योजनानां शतं समं यथा भवति तथा समुदितः समुन्नतः ॥ २३—२४॥ चतुर्भागे चतुर्थभागे । समुद्रस्य लवणसमुद्रस्य ॥२५॥ तत्र चक्रवत्पर्वते । पुरुषोत्तमो विष्णुः । "श्रीपतिः पुरुषोत्तमः" इत्यमरः । चक्ररक्षकं हयग्रीवाख्यं दानवं हत्वा चक्रं पञ्चजनाख्यं दानवं हत्वा तदस्थिभूतं पाञ्चजन्याख्यं शङ्खं च जग्राह । कृष्णः पञ्चजनं हत्वा पाञ्चजन्यं जग्राहेत्युच्यते । तद्विष्णववतारेऽप्यस्तीति ज्ञेयं ॥ २६—२८ ॥ तत्र वराहपर्वते ॥ २९—३० ॥ तमतिक्रम्य तस्मात्परत इत्यर्थः । काञ्चनान्तरनिर्दरः सौवर्णमयान्तरप्रदेशवत्कन्दरः । अन्तर्बहिश्च सौवर्णकन्दर इत्यर्थः ॥ ३१ ॥ तं तेन शब्देन स्वशब्देन । दर्पिता गजादयस्तं पर्वतमभिगर्जन्ति ॥ ३२ ॥ हरिहयः श्यामवर्णाश्वयुक्तः । राजाभिषिक्तः राजत्वेनाभिषिक्तः ॥ ३३—३६ ॥ वरमेवाह—तेनैवमिति ॥ प्रभया रक्ता भविष्यन्तीत्यन्वयः ॥ ३७—३८॥ पश्चिमां सन्ध्यां "अत्यन्तसंयोगे द्वितीया" । मेरुसदृशत्वान्मेरुं । मेरुमागम्य आदित्यमुपतिष्ठन्ति पूजयन्ति । मन्त्रकरणाभावात्परस्मैपदं । अस्तगिरिसमीपस्थसावर्णिमेरोरभिधानात्स-

तीत्यर्थः ॥ २२ ॥ **स०** पञ्चजनं तन्नामकंशङ्खाकृतिमन्तंदानवं । तथाहयग्रीवनामकंदानवंचहत्वाक्रमात्शङ्खंचक्रंचआजहारेतिमूले व्युत्क्रमेणान्वयः ॥ २६ ॥ **ति०** काञ्चनान्तरदर्शनं काञ्चनगर्भाअन्तरानिर्दरायस्मिंस्तस्यदर्शनं । भविष्यतीतिशेषः ॥ **स०** काञ्चनान्तरदर्शनं काञ्चनस्यपदार्थस्यखण्डनेतद्गर्भस्ययथात्यन्तदर्शनीयत्वं तथादर्शनंयस्येत्यर्थः ॥ ३१ ॥ **स०** मेरुःसावर्णिमेरुनामकोऽयमन्योमेरुः ॥ ३६ ॥ **रामानु०** पश्चिमांसन्ध्यां अस्मदपेक्षयापश्चिमसन्ध्यायां । उत्तमपर्वतंमेरुमासाद्यवर्तमानमादित्यमु-

[**पा०**] १ ख. यत्र. २ ङ.—ज. ञ. ट. तत्र. ३ छ. झ. ट. रम्येषु. ४ क. ग. ङ.—ज. ञ. ट. योजनानिचतुष्षष्टिः. ५ ङ.—ज. ञ. ट. सुमहान्. क. ग. घ. सश्रीमान्. ६ क. ग.—ज. ञ. ट. तस्मिन्. ७ क. छ. झ. ट. रम्येषु. ८ क. काननेषु. ९ नान्तरदर्शनं. ग. नान्तरनिर्दरं. १० क. ग. घ. ङ. नानाप्रस्रवणायुतः. ११ क. ग. च. छ. ज. ञ. सिंहव्याघ्राश्च. १२ ख. घ. तस्मिन्हरि. १३ ग. ङ.—ट. मेघोनामसपर्वतः. १४ क.—ट. सर्वशः. १५ ख. ग. मध्यस्थितो. १६ ग. गन्धर्वसेविताः. १७ छ. झ. ट. भक्ताश्च. ङ. च. ज. ञ. रत्नानांप्रभया. १८ क. ख. काञ्चनाइव. १९ ख. आदित्यावसवोरुद्रामरुतश्चदिवाकराः. २० क. ग. ङ.—ट. वसवोमरुतश्च. २१ क. ख. ङ.-ट. आगत्य. २२ क.—घ. छ. झ. ट. मुत्तमपर्वतं.

योजनानां सहस्राणि [1]दश तानि दिवाकरः ॥ [2]मुहूर्तार्धेन तं शीघ्र[3]मभियाति शिलोच्चयम् ॥ ४१ ॥
शृङ्गे तस्य महद्दिव्यं भवनं सूर्यसन्निभम् ॥ प्रासादगणसंबाधं विहितं विश्वकर्मणा ॥ ४२ ॥
शोभितं तरुभिश्चित्रैर्नानापक्षिसमाकुलैः ॥ [4]निकेतं पाशहस्तस्य वरुणस्य महात्मनः ॥ ४३ ॥
अन्तरा [5]मेरुमस्तं च तालो दशशिरा महान् ॥ जातरूपमयः श्रीमान्भ्राजते चित्रवेदिकः ॥ ४४ ॥
तेषु सर्वेषु दुर्गेषु सरस्सु च सरित्सु च ॥ रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ४५ ॥
[6]यत्र तिष्ठति धर्मज्ञस्तपसा स्वेन [7]भावितः ॥ मेरुसावर्णि[8]रित्येव ख्यातो वै ब्रह्मणा समः ॥ ४६ ॥
प्रष्टव्यो मेरुसावर्णिर्महर्षिः सूर्यसन्निभः ॥ प्रणम्य शिरसा भूमौ प्रवृत्तिं मैथिलीं प्रति ॥ ४७ ॥
एतावज्जीवलोकस्य भास्करो रजनीक्षये ॥ कृत्वा वितिमिरं सर्वमस्तं गच्छति पर्वतम् ॥ ४८ ॥
एतावद्वानरैः शक्यं गन्तुं वानरपुङ्गवाः ॥ अभास्करममर्यादं न जानीमस्ततः परम् ॥ ४९ ॥
[9]अधिगम्य तु वैदेहीं निलयं रावणस्य च ॥ [10]अस्तपर्वतमासाद्य पूर्णे मासे निवर्तत ॥
ऊर्ध्वं मासान्न वस्तव्यं [11]वसन्वध्यो भवेन्मम ॥ ५० ॥
सहैव शूरो युष्माभिः श्वशुरो मे गमिष्यति ॥ श्रोतव्यं सर्वमेतस्य भवद्भिर्दिष्टकारिभिः ॥ ५१ ॥
गुरुरेष महाबाहुः श्वशुरो मे महाबलः ॥ भवन्तश्चापि विक्रान्ताः प्रमाणं सर्वकर्मसु ॥ ५२ ॥
प्रमाणमेनं संस्थाप्य पश्यध्वं पश्चिमां दिशम् ॥ [[12]भवन्तः परिपश्यन्तु यथा दृश्येत जानकी] ॥ ५३ ॥
दृष्टायां तु नरेन्द्रस्य पत्न्याममिततेजसः ॥ कृतकृत्या भविष्यामः कृतस्य प्रतिकर्मणा ॥ ५४ ॥
अतोन्यदपि [13]यत्कार्यं कार्यस्यास्य [14]हितं भवेत् ॥ संप्रधार्य भवद्भिश्च देशकालार्थसंहितम् ॥ ५५ ॥
ततः सुषेणप्रमुखाः [15]प्लवङ्गाः सुग्रीववाक्यं निपुणं निशम्य ॥
आमन्त्र्य सर्वे [16]प्लवगाधिपं ते जग्मुर्दिशं तां वरुणाभिगुप्ताम् ॥ ५६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

र्वेपि समुद्रद्वीपादयोपि मार्गितव्यत्वेनोक्ताः ॥ ३९—४७ ॥ भास्करः रजनीक्षये जीवलोकस्य एतावत् उदयास्तादिमध्यं । वितिमिरं कृत्वा अस्तं गच्छतीति योजना ॥ ४८—५० ॥ दिष्टकारिभिः आदिष्टकारिभिः ॥ ५१—५२ ॥ प्रमाणमेनं संस्थाप्य पश्यध्वं पश्चिमां दिशमिति पाठः । प्रमाणं व्यवस्थापकं । पश्यध्वं पश्यत । आत्मनेपदमार्षं ॥ ५३—५४ ॥ अस्य कार्यस्य सीतान्वेषणरूपस्य । अन्यदपि यद्धितं भवेत् देशकालार्थसंहितं तत्संप्रधार्य भवद्भिः कार्यमित्यन्वयः ॥ ५५—५६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने द्विचत्वारिंशः सर्गः ॥ ४२ ॥

पतिष्ठन्ति पूजयन्ति ॥ ३९ ॥ **ती०** अन्तरामेरुमस्तंच सावर्णिमेरोरस्ताचलस्यचमध्ये ॥ ४४ ॥ **शि०** सर्वकर्मसु निखिलक्रियासु । भवन्तोयद्यपि प्रमाणं व्यवस्थापकाः । तथाप्येनंसुषेणंप्रमाणंसंस्थाप्य व्यवस्थापकत्वेननिश्चित्य । पश्चिमांदिशंपश्यध्वं । बहूनांस्वातन्त्र्येणकार्यव्यवस्थापकत्वेकार्यंनसिध्यतीतितात्पर्यं ॥ ५२ ॥ अस्यकार्यस्येति रावणवधान्तरामकार्यस्येत्यर्थः ॥ ५५ ॥ इतिद्विचत्वारिंशःसर्गः ॥ ४२ ॥

[पा०] १ ख. छ. शतानिच. क. समतीत्यदिवाकरः. २ ख. निमेषान्तरमात्रेणदेवोयातिशिलोच्चयं. ग. निमेषान्तरमात्रेणनंगच्छति. ३ क. मस्तंयाति. ४ क. ख. घ. ङ. च. ज. निकेतः. ५ ख. मेरुमद्रिंच. ६ क. ग. तत्र. ७ ज. भूषितः. ८ ङ. च. ज.—ट. रित्येष. ९ ङ.—ट. अवगम्यतु. ग. अभिगम्यतु. १० घ.—ट. अस्तंपर्वतं. ११ घ. वसेद्वध्यः. १२ इदमर्धं ख. ग. घ. पाठेषुदृश्यते. १३ क. ख. घ. यत्किंचित्. ङ. च. ज. यत्कार्यमस्माकंचप्रियंभवेत्. १४ छ. झ. ञ. ट. प्रियंभवेत्. १५ क. घ.—ट. प्लवङ्गमाः. १६ ख. ग. ङ.—ट. प्लवगाधिपास्ते.

त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

सुग्रीवेणोत्तरदिशिसीतापरिमार्गणायशतबलिप्रमुखकपिबलप्रेषणम् ॥ १ ॥

ततः संदिश्य सुग्रीवः श्वशुरं पश्चिमां दिशम् ॥ वीरं शतबलिं नाम वानरं [1]वानरर्षभः ॥ १ ॥
उवाच राजा [2]धर्मज्ञः सर्ववानर[3]सत्तमम् ॥ वाक्यमात्महितं चैव रामस्य च हितं तथा ॥ २ ॥
वृतः शतसहस्रेण [4]त्वद्विधानां वनौकसाम् ॥ वैवस्वतसुतैः सार्धं [5]प्रतिष्ठस्व स्वमन्त्रिभिः ॥ ३ ॥
दिशं ह्युदीचीं [6]विक्रान्तां हिमशैलावतंसकाम् ॥ सर्वतः परिमार्गध्वं राम[7]पत्नीमनिन्दिताम् ॥ ४ ॥
अस्मिन्[8]कार्ये विनिर्वृत्ते कृते दाशरथेः प्रिये ॥ ऋणान्मुक्ता भविष्यामः कृतार्थार्थविदां वराः ॥ ५ ॥
कृतं हि प्रियमस्माकं राघवेण महात्मना ॥ तस्य चेतत्प्रतिकारोऽस्ति सफलं जीवितं भवेत् ॥ ६ ॥
अर्थिनः कार्यनिर्वृत्तिमकर्तुरपि यश्चरेत् ॥ तस्य स्यात्सफलं जन्म किं पुनः पूर्वकारिणः ॥ ७ ॥
एतां [9]बुद्धिमवस्थाय दृश्यते जानकी यथा ॥ तथा भवद्भिः कर्तव्यमस्मत्प्रियहितैषिभिः ॥ ८ ॥
अयं हि सर्वभूतानां मान्यस्तु नरसत्तमः ॥ अस्मासु चागतप्रीती रामः परपुरंजयः ॥ ९ ॥
इमानि वनदुर्गाणि नद्यः शैलान्तराणि च ॥ भवन्तः परिमार्गन्तु बुद्धिविक्रमसंपदा ॥ १० ॥
तत्र म्लेच्छान्पुलिन्दांश्च शूरसेनांस्तथैव च ॥ प्रस्थलान्भरतांश्चैव कुरूंश्च सह मद्रकैः ॥ ११ ॥
[10]काम्बोजान्यवनांश्चैव [11]शकानारट्टकानपि ॥ [12]बाह्लीकानृषिकांश्चैव पौरवानथ [13]टङ्कणान् ॥ १२ ॥
चीनान्परमचीनांश्च [14]नीहारांश्च पुनःपुनः ॥ [15]अन्वीक्ष्य दरदांश्चैव हिमवन्तं [16]तथैव च ॥ १३ ॥
लोध्रपद्मकषण्डेषु देवदारुवनेषु च ॥ रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ १४ ॥
ततः सोमाश्रमं गत्वा देवगन्धर्वसेवितम् ॥ कालं नाम महासानुं [17]पर्वतं तु गमिष्यथ ॥ १५ ॥
महत्सु तस्य [18]शैलस्य निर्दरेषु गुहासु च ॥ [19]विचिनुध्वं महाभागां [20]रामपत्नीं ततस्ततः ॥ १६ ॥
तमतिक्रम्य शैलेन्द्रं हेमगर्भं महागिरिम् ॥ ततः सुदर्शनं नाम [21]गन्तुमर्हथ पर्वतम् ॥ १७ ॥

अथोत्तरदिशि शतबलिप्रेषणं त्रिचत्वारिंशे—ततः संदिश्येत्यादि ॥ १—३ ॥ हिमशैलावतंसकां हिमशैलालङ्कारां ॥ ४ ॥ कृतार्थाश्चार्थविदश्च कृतार्थार्थविदः तेषां वराः ॥ ५—९ ॥ इमानि वक्ष्यमाणानि । नद्यः नदीः ॥ १० ॥ भरतान् इन्द्रप्रस्थादिप्रदेशान् । कुरून् दक्षिणकुरून् । हिमवदन्तान् पुनः पुनरन्विष्य परिमार्गन्त्विति पूर्वेण संबन्धः ॥ ११—१३ ॥ पद्मकाश्चन्दनविशेषाः । साहचर्यात् ॥ १४—१६ ॥ तमतिक्रम्येति ॥ तं कालंनाममहागिरिं अतिक्रम्य । ततः तस्मात् । सुदर्शनं पर्वतं

ति० सर्वज्ञः देशवृत्ताभिज्ञः ॥ २ ॥ **शि०** प्रतिष्ठस्व समानकार्यकारित्वेनैकीभव ॥ ३ ॥ **ति०** विक्रान्तेतिशतबलस्यसंबुद्धिः ॥ ४ ॥ **ती०** कृतार्थार्थविदांवराइत्यत्रसवर्णदीर्घआर्षः ॥ ५ ॥ **रामानु०** लोध्रपद्मकषण्डेष्वित्यत्र पद्मकशब्दश्चन्दनव्यतिरि-

[पा०] १ घ. वानराधिपः. क. ग. ङ. च. वानरर्षभं. छ. झ. ट. वानरेश्वरः. २ ख. ग. छ. झ. ञ. ट. सर्वज्ञः. च. ज. मन्त्रज्ञः. ३ क. ख. ग. ङ.—ट. सत्तमः. ४ च. मद्विधानां. ५ छ. झ. ट. प्रविष्टःसर्वमन्त्रिभिः. क. ग. च. ज. ञ. प्रतीक्षस्वस्वमन्त्रिभिः. ६ झ. विक्रान्त. ७ छ. झ. ट. पत्नींयशस्विनीं. ८ क. ख. ग. कार्येहिनिर्वृत्ते. ९ ख. बुद्धिंपुरस्कृत्ययथादृश्येतजानकी. क. घ. च.—ट. बुद्धिंसमास्थाय. १० छ. झ. कांबोजयवनांश्चैव. ङ. कांबोजान्पर्वतांश्चैव. ११ छ. झ. ञ. ट. शकानांपत्तनानिच. १२ घ. बाह्लीकान्निषधांश्चैव. १३ क. ग. घ. कङ्कणान्. ङ. च. ज. ञ. कोङ्कणान्. १४ क. ग. नगरांश्च. १५ घ. अन्विष्यबर्बरांश्चैव. ङ.—ट. अन्वीक्ष्यवरदांश्चैव. क. अन्विष्य. १६ ख. छ. झ. ट. विचिन्वथ. १७ क.—ट. पर्वतंतं. १८ ङ.—ट. शैलेषुपर्वतेषु. १९ क. ख. ग. ङ. छ. ज. झ. ट. विचिन्वत. २० ङ.—ट. रामपत्नीमनिन्दितां. २१ क. ख. ग. ङ.—ट. पर्वतंगन्तुमर्हथ.

ततो देवसखो नाम पर्वतः पतगालयः ॥ नानापक्षि[1]गणाकीर्णो विविधद्रुमभूषितः ॥ १८ ॥
तस्य [2]काननषण्डेषु [3]निर्झरेषु गुहासु च ॥ रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ १९ ॥
तमतिक्रम्य चाकाशं सर्वतः शतयोजनम् ॥ अपर्वतनदीवृक्षं सर्वसत्त्वविवर्जितम् ॥ २० ॥
तं तु शीघ्रमतिक्रम्य कान्तारं रोमहर्षणम् ॥ कैलासं पा[4]ण्डुरं शैलं प्राप्य हृष्टा भविष्यथ ॥ २१ ॥
तत्र पाण्डुरमेघाभं जाम्बूनद[5]परिष्कृतम् ॥ कुबेरभवनं दि[6]व्यं निर्मितं विश्वकर्मणा ॥ २२ ॥
विशाला नलिनी यत्र प्रभूतकमलोत्पला ॥ हंसकारण्डवाकीर्णा ह्यप्सरोगणसेविता ॥ २३ ॥
तत्र वैश्रवणो राजा [7]सर्वभूतनमस्कृतः ॥ धनदो रमते श्रीमान्गुह्यकैः सह यक्षराट् ॥ २४ ॥
तस्य[8] चन्द्रनिकाशेषु पर्वतेषु गुहासु च ॥ रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ २५ ॥
[9]क्रौञ्चं तु गिरिमासाद्य बिलं तस्य सुदुर्गमम् ॥ अप्रमत्तैः प्रवेष्टव्यं दुष्प्रवेशं हि तत्स्मृतम् ॥ २६ ॥
[10]वसन्ति हि महात्मानस्तत्र सूर्यसमप्रभाः ॥ देवै[11]रप्यर्चिताः [12]सम्यग्देवरूपा महर्षयः ॥ २७ ॥
[13]क्रौञ्चस्य तु गुहाश्चान्याः सानूनि शिखराणि च ॥ निर्द[14]राश्च नितम्बाश्च विचेतव्यास्ततस्ततः ॥ २८ ॥
क्रौञ्चस्य शिखरं चापि [15]निरीक्ष्य च ततस्ततः ॥ अवृक्षं कामशैलं च मानसं विहगालयम् ॥ २९ ॥
न गतिस्तत्र भूतानां देवदानवरक्षसाम् ॥ स च सर्वैर्विचेतव्यः [16]ससानुप्रस्थभूधरः ॥ ३० ॥
क्रौञ्चं गिरिमतिक्रम्य मैनाको नाम पर्वतः ॥ मयस्य भवनं य[17]त्र दानवस्य स्वयं कृतम् ॥ ३१ ॥
मैनाकस्तु विचेतव्यः ससानुप्र[18]स्थकन्दरः ॥ स्त्रीणाम[19]श्वमुखीनां च निकेतास्तत्र तत्र तु ॥ ३२ ॥
तं देशं समतिक्रम्य आश्रमं सिद्धसेवितम् ॥ सिद्धा वै[20]खानसास्तत्र वालखिल्याश्च तापसाः ॥ ३३ ॥

गन्तुमर्हथ ॥ १७ ॥ पतगालयः पक्षिणामावासभूतः । पक्षिणां वैविध्यमाह—नानापक्षिसमाकीर्ण इति ॥ १८—१९ ॥ तमतिक्रम्य तस्मादेवसखाख्यपर्वतात्परं । अपर्वतनदीवृक्षं शून्यारण्यस्थलं । वर्तत इति शेषः ॥ २० ॥ कैलासमिति यद्यपि कैलासो हिमवदेकदेश इति पुराणान्तरोक्तं तथापि तदविरुद्धं ज्ञेयं । मध्ये शून्यप्रदेशेपि तावत्पर्यन्तं हिमवानिति ॥ २१ ॥ तत्र कैलासे । नलिनी मानसाख्यसरसी ॥ २२—२३ ॥ तत्र कैलासे ॥ २४ ॥ तस्यकैलासस्य । पर्वतेषु पर्यन्तपर्वतेषु ॥ २५ ॥ बिलं स्कन्दशक्तिकृतं ॥ २६—२८ ॥ शिखरं च प्रधानभूतं शिखरं च । अवृक्षं अवृक्षाख्यं प्रत्यन्तपर्वतं । विहगालयं मानसं मानसाख्यं गिरिं च निरीक्ष्य ते विचेतव्या इति पूर्वेण संबन्धः ॥ २९ ॥ तत्र मानसाख्ये पर्वते । ससानुप्रस्थभूधरः सानवः उपत्यकाः । प्रस्था मध्यतटाः । भूधरा अधित्यकाः ॥ ३० ॥ क्रौञ्चं गिरिमतिक्रम्य क्रौञ्चगिरेः परतः । मैनाको नाम पर्वतः । वर्तत इति शेषः ॥ ३१ ॥ अश्वमुखीनां किंपुरुषस्त्रीणां ॥ ३२ ॥ आश्रमं सिद्धसेवितं । अस्तीति शेषः

कवृक्षविशेषवाची । अकालेवनद्रव्यभूतलोध्रादिसहपाठात् ॥ १४ ॥ **रामानु०** ' ततोदेवसखोनामपर्वतःपर्वतालयाः ' इतिपाठः । पर्वतालयाइतिवानराणांसंबोधनं ॥ १८ ॥ **ति०** कामशैलं कामतपस्स्थानशैलं ॥ **शि०** अवृक्षं वृक्षरहितं । कामशैलं दर्शनमात्रेणकामनापूरकक्रौञ्चशैलशिखरं । विहगालयं विहगानांपक्षिगतीनांआसमन्ताद्भावेनलयःअभावोयस्मिंस्तत् । मानसंचशिखरमस्तीतिशेषः ॥ २९ ॥ **ति०** तत्र मानसे । भूतादीनांगतिर्न शून्यत्वेनप्रयोजनाभावाद्भूतादयस्तत्रनगच्छन्तीत्यर्थः ॥ **ती०** सानुपर्वतपार्श्वसमतलः प्रस्थस्तु विषमतलः ॥ **स०** तत्र मानसे । अयंमानसोमानसोत्तरभिन्नः ॥ ३० ॥ **ति०** मैनाकोऽयं समु-

[पा०] १ ङ. च. छ. झ. ञ. ट. समाकीर्णो. २ क. ङ.—ट. काञ्चनखण्डेषु. ३ क. ग. ङ.—ट. निर्दरेषु. ४ च.—ञ. ट. पाण्डुरंप्राप्यहृष्टायूयंभविष्यथ. ५ ख. परिच्छदं. ६ ग. च.—झ. ट. रम्यं. ७ ङ.—ट. सर्वलोक. ८ घ. तत्र. ९ ज. क्रौञ्चाख्यं. १० क. वसन्तिच. ११ ङ.—ट. रभ्यर्थिताः. १२ क. सम्यग्दिव्यरूपाः. १३ क. घ. क्रौञ्चस्यास्य. १४ ग. निर्झराश्च. क. झ. दर्दराश्च. च. दर्यश्चैव. ट. दर्दुराश्च. १५ क. संनिरीक्ष्य. १६ ख. पर्वतोबहुकन्दरः. क. ग. ज. ससानुप्रस्थकंदरः. १७ ख.—ट. तत्र. १८ ख. प्रस्थभूतलः. १९ क.—घ. च. छ. झ. ट. मश्वमुखीनांतु. २० ङ.—ट. वैखानसायत्र.

[1]वन्द्यास्ते तु तपःसिद्धास्तपसा वीतकल्मषाः ॥ प्रष्टव्या चापि सीतायाः प्रवृत्तिर्विनयान्वितैः ॥३४॥
हेमपुष्कर[2]संछन्नं [3]तस्मिन्वैखानसं सरः ॥ तरुणादित्यसंकाशैर्हंसैर्विचरितं शुभैः ॥ ३५ ॥
औपवाह्य कुबेरस्य सार्वभौम इति [4]स्मृतः ॥ गजः पर्येति तं देशं सदा [5]सह करेणुभिः ॥ ३६ ॥
तत्सरः समतिक्रम्य नष्टचन्द्रदिवाकरम् ॥ [6]अनक्षत्रगणं व्योम निष्पयो[7]दमनादितम् ॥ ३७ ॥
गभस्तिभिरिवार्कस्य स तु देशः प्रकाशते ॥ विश्राम्यद्भिस्तपःसिद्धैर्देवकल्पैः स्वयंप्रभैः ॥ ३८ ॥
तं तु देशमतिक्रम्य शैलोदा नाम निम्नगा ॥ ३९ ॥
उभयोस्तीरयोस्तस्याः कीचका नाम वेणवः ॥ [8]ते नयन्ति परं तीरं सिद्धान्प्रत्यानयन्ति च ॥४०॥
उत्तराः कुरवस्तत्र कृतपुण्यप्रतिश्रयाः ॥ ४१ ॥
ततः काञ्चनपद्माभिः पद्मिनीभिः कृतोदकाः ॥ नीलवैडूर्य[9]पत्राभिर्नद्यस्तत्र सहस्रशः ॥ ४२ ॥
रक्तोत्पलवनै[10]श्चात्र मण्डिताश्च हिरण्मयैः ॥ तरुणादित्य[11]सदृशैर्भान्ति तत्र जलाशयाः ॥ ४३ ॥
महार्ह[12]मणिपत्रैश्च काञ्चनप्रभकेसरैः ॥ [13]नीलोत्पलवनैश्चित्रैः स देशः सर्वतो वृतः ॥ ४४ ॥
निस्तुलाभिश्च मुक्ताभिर्मणिभिश्च महाधनैः ॥ [14]उद्भूतपुलिनास्तत्र [15]जातरूपैश्च निम्नगाः ॥ ४५ ॥

॥ ३३ ॥ तपःसिद्धाः अणिमाद्यष्टैश्वर्यसिद्धियुक्ताः ॥ ३४—३५ ॥ औपवाह्यः राजार्हं वाहनं । "राजार्हस्त्वौपवाह्यः" इत्यमरः ॥ ३६ ॥ अथ महामेरुपर्यन्तेलावृतप्रदेशानुपदिशति—तत्सर इति ॥ उत्तरत्र "हिमवन्तं च मेरुं च समुद्रं च तथोत्तरं" इति वक्ष्यमाणत्वादत्र मेरुकीर्तनप्रसक्तिरेव नास्तीति न भ्रमितव्यं । व्योम वर्तत इति शेषः । व्योम्नो नष्टचन्द्रदिवाकरादित्वं नियतमार्गवर्तिनां चन्द्रसूर्यादीनां मेरुनिकटे किरणसंचाराभावात् । तदुक्तं विष्णुपुराणे "यावत्पुरस्तात्तपति तावत्पृष्ठे च पार्श्वयोः । ऋते हेमगिरिर्मेरोरुपरि ब्रह्मणः सभां" इति ॥ ३७ ॥ स देशः अर्कस्य गभस्तिभिरिव स्थितैः स्वयंप्रभैः स्वतःसिद्धज्ञानैः तपःसिद्धैः प्रकाशते ॥ ३८ ॥ निम्नगा वर्तत इति शेषः ॥ ३९ ॥ तस्याः शैलोदायाः । उभयोस्तीरयोः कीचका नाम वेणवः सन्ति । ते उभयतीरजाः कीचकाः । अन्योन्यसंग्रथिततया गमनसाधनभूताः सन्तः सिद्धान् परं तीरं नयन्ति प्रत्यानयन्ति च ॥ ४० ॥ उत्तराः कुरवः उत्तरकुरुसंज्ञिकाः देशाः । वर्तन्त इति शेषः । कृतपुण्यानां प्रतिश्रयाः आश्रयभूताः आवासभूताः ॥ ४१ ॥ ततः कृतपुण्यप्रतिश्रयत्वाद्धेतोः । कृतपुण्यभोग्यभूमित्वात् उक्तविशेषा नद्यः सन्तीति भावः । पद्मिनीभिः पद्मलताभिः । कृतोदकाः पर्याप्तोदकाः । "युगपर्याप्तयोः कृतं" इत्यमरः ॥ ४२ ॥ रक्तेत्यविभक्तिकनिर्देशः । रक्तैरुत्पलवनैर्हिरण्मयैरुत्पलवनैः । तरुणादित्यसदृशैरुत्पलवनैश्चेत्यर्थः । तत्रात्र तेष्वेतेषु कुरुष्वित्यन्वयः ॥ ४३ ॥ महार्हमणयो नीलरत्नानि तत्तुल्यपत्रैः ॥ ४४ ॥ निस्तुलाभिः वर्तुलाभिः । "वर्तुलं निस्तुलं वृत्तं" इत्यमरः । महाधनैः बहुमूल्यैः । उद्भूतपुलिनाः उन्नतपुलिनाः । निम्नगाः

द्रमम्नादन्यः ॥ ३१ ॥ **ति०** वैखानसं वैखानसानामिदं ॥ ३५ ॥ **ति०** तत्सरोतिक्रम्यवर्तमानं व्योम । कियानवकाशः चन्द्रादिसर्वज्योतिर्गणप्रकाशरहितः । **शि०** अनादिमत् आदिरहितं । नित्यमित्यर्थः ॥ ३७ ॥ **ति०** नापिसान्धकारमित्याह—गभस्तिभिरिवेति । चन्द्रादिज्योतींष्यभिभूयार्कगभस्तिसदृशैःस्वीयैर्गभस्तिभिःप्रकाश्यते । केते यैर्गभस्तिभिःप्रकाश्यतेतत्राह—विश्राम्यद्भिरिति । सुखोपविष्टैःस्वतपस्सिद्धैः । अतएवदेवकल्पैः सूर्यादिदेवतुल्यैःस्वयंप्रभैश्चसूर्यादिवत्सदेशःप्रकाश्यते । यत्तु तत्रचन्द्रादीनांसंचाराभावएवेतितन्न । अग्रेसुप्रसिद्धचन्द्रादिसंचारवदुत्तरकुरूणांतदूर्ध्वमुपदेशानुपपत्तेः ॥ ३८ ॥ **ती०** कृतपुण्यप्रतिश्रयाः पुण्यानांप्रतिश्रयाः आश्रयभूताःज्योतिष्टोमादयः तेकृतायैस्तेकृतपुण्यप्रतिश्रयाः ॥ ४१ ॥ **ति०** कृतोदकाः कृतोदककार्याः ॥ ४२ ॥

[पा०] १ ङ. च. झ. ञ. ट. वन्दितव्यास्ततःसिद्धाः. क. ग. वन्द्यास्तुते. २ ञ. संपन्नं. ३ क. ग. ङ.—ट. तत्रवैखानसं. ४ ख. घ. श्रुतः. ५ ख. हस्तिकरेणुभिः. ६ ख. अनक्षत्रगतं. ७ ख. घ.—ज. ञ. ट. अनादिमत्. ८ ख. ग. घ. तैश्चयान्तिपरैस्तीरंसिद्धाःप्रत्यानयन्तिच. ९ ख. ङ. छ. झ. ट. पत्राढ्याः. ग. पद्माभाः. च. ज. ञ. पद्माढ्याः. १० ख. श्चारु. घ. श्चापि. ११ घ. झ. ट. संकाशाभान्ति. ख. च. ज. संकाशैः. १२ छ. झ. ट. मणिरत्नैश्च. १३ ख. नीलनीरजषण्डैश्च. १४ क. ख. घ. छ. ज. उद्धूतपुलिनाः. १५ ग. जातरूपमयाःशुभाः.

सर्वै[1]रत्नमयैश्चित्रैरवगाढा नगोत्तमैः ॥ जातरूपमयैश्चापि हुताशनसमप्रभैः ॥ ४६ ॥
नित्यपुष्प[2]फलास्तत्र नगाः पत्ररथाकुलाः ॥ दिव्यगन्धरसस्पर्शाः सर्व[3]कामान्स्रवन्ति च ॥ ४७ ॥
[4]नानाकाराणि वासांसि फलन्त्यन्ये नगोत्तमाः ॥ ४८ ॥
मुक्तावैडूर्यचित्राणि भूषणानि तथैव च ॥ स्त्रीणां चा[5]प्यनुरूपाणि पुरुषाणां तथैव च ॥
सर्वर्तुसुखसेव्यानि फलन्त्यन्ये नगोत्तमाः ॥ ४९ ॥
[6]महार्हाणि च चित्राणि है[7]मान्यन्ये नगोत्तमाः ॥ शयनानि प्रसूयन्ते चित्रास्तरणवन्ति च ॥ ५० ॥
मनःकान्तानि माल्यानि [8]फलन्त्यत्रापरे द्रुमाः ॥ [9]पानानि च महार्हाणि भक्ष्याणि विविधानि च ॥ ५१ ॥
स्त्रियश्च गुणसंपन्ना रूपयौवनलक्षिताः ॥ गन्धर्वाः किन्नराः सिद्धा नागा विद्याधरास्तथा ॥
रमन्ते [10]संहितास्तत्र नारीभि[11]र्भास्करप्रभाः ॥ ५२ ॥
[12]सर्वे सुकृतकर्माणः सर्वे रतिपरायणाः ॥ सर्वे कामार्थसहिता वसन्ति सहयोषितः ॥ ५३ ॥
गीतवादित्रनि[13]र्घोषः सो[14]त्कृष्टहसित[15]स्वनः ॥ श्रूयते सततं तत्र सर्वभूत[16]मनोहरः ॥ ५४ ॥
त[17]त्र नाप्रमुदितः कश्चिन्नास्तिकश्चिदसत्प्रियः ॥ अहन्यहनि वर्धन्ते गुणास्तत्र मनोरमाः ॥ ५५ ॥
[18]समतिक्रम्य तं देशमुत्तरः पयसां निधिः ॥ ५६ ॥
तत्र सो[19]मगिरिर्नाम मध्ये हेममयो महान् ॥ इन्द्रलोकगता ये च ब्रह्मलोकगताश्च ये ॥
देवास्तं समवेक्षन्ते गिरिराजं दिवं [20]गताः ॥ ५७ ॥
स तु देशो विसूर्योऽपि तस्य भासा प्रकाशते ॥ [21]सूर्यलक्ष्म्याभिविज्ञेयस्तपतेव विवस्वता ॥ ५८ ॥
[22]भगवानपि विश्वात्मा शंभुरेकादशात्मकः ॥ ब्रह्मा वसति देवेशो ब्रह्मर्षिपरिवारितः ॥ ५९ ॥

भान्तीति शेषः ॥ ४५ ॥ नगोत्तमैः पर्वतश्रेष्ठैः । अवगाढाः प्रविष्टा इति निम्नगाविशेषणं ॥ ४६ ॥ पत्ररथाकुलाः पक्षिभिराकुलाः । सर्वकामान् सर्वाभीष्टान् ॥ ४७—४८ ॥ सर्वर्तुसुखसेव्यानि हेमन्ताद्यृतुष्वपि सुखेन सेवितुं योग्यानि ॥ ४९—५२ ॥ सहयोषितः योषित्सहिताः ॥५३॥ सोत्कृष्टहसितस्वनः उत्कृष्टहासशब्दसहितः ॥ ५४ ॥ असत्प्रियः अविद्यमानाङ्गनः । गुणाः सुखादयः ॥ ५५ ॥ पयसां निधिः लवणसमुद्रः । अस्तीति शेषः ॥ ५६ ॥ तत्र लवणसमुद्रे । मध्ये मध्ये देशे । ये दिवं गता इत्यनुषज्यते ॥ ५७ ॥ स देशः विसूर्योऽपि रात्रौ विगतसूर्योऽपि । तस्य सोमगिरेर्भासा प्रकाशते । कथमिव । सूर्यलक्ष्म्या अभिविज्ञेयः ज्ञातव्यपदार्थको देशः । तपता विवस्वतेव ॥ ५८ ॥ विश्वात्मा विश्वशरीरकः । भगवान् षाड्गुण्यपरिपूर्णो वासुदेवः । “ एवमेव महाञ्शब्दो मैत्रेय भगवानिति । परमब्रह्मभूतस्य वासुदेवस्य

कतक० दिव्यगन्धेति ॥ इतउत्तरंकेचिच्छ्लोकाः “ रमन्तेसततंतत्रनारीभिर्भास्वरप्रभाः ” इत्यन्ताःप्रक्षिप्ताः । प्राचीनपुस्तकेष्वनुपलंभात् ॥ ४७ ॥ रामानु० नगोत्तमाः वृक्षश्रेष्ठाः ॥ ४८ ॥ शि० कामार्थसहिताः इच्छाविषयीभूतार्थैर्विद्यमानास्सन्तः रतिपरायणाः भवन्तीतिशेषः ॥ ५३ ॥ स० तत्रेत्यनेन बुद्धिसंनिहितत्वादत्रेत्युक्तिः । अव्ययानामनेकार्थत्वादत्रेत्यस्यतत्रेत्यर्थकत्वंद्रष्टव्यं । अत्रेवेतिलुप्तोपमानंवा । अत्र किष्किन्धायां । असत्प्रियोयथानास्ति तथेत्यर्थः । ति० असत् अविद्यमानं प्रियंयस्यताशः ॥ शि० असत्प्रियः असत्कर्मविषयकप्रीतिविशिष्टः । अत्र उत्तरकुरुषु ॥ ५५ ॥ ति० अत्रसुमेर्वन्वेषणंनोक्तं । तत्ररक्षसांतासांसंभवादित्याहुः । मध्ये उत्तरसमुद्रमध्ये ॥ ५७ ॥ रामानु० ब्रह्मर्षिपरिवारितइत्येतच्चभगवाञ्शंभुरित्यत्राप्यभिसंबध्यते ।

[पा०] १ क. रत्नमयैर्दिव्यैः. २ ग. फलाश्चात्र. ३ च. छ. ज. ञ. सर्वान्कामान्. ४ क. ख. ग. नानारूपाणि. ५ क. च.—ट. यान्यनुरूपाणि. ६ क. च.—ट. महार्हमणिचित्राणि, ७ ङ. छ. झ. ट. फलन्त्यन्ये. ८ ख. फलन्त्यन्येनगोत्तमाः. . फलन्त्यत्रवनेद्रुमाः. ९ ग. फलानिच. १० झ. ट. संततंतत्र. ११ च.—झ. ट. भास्वरप्रभाः. १२ ग. सर्वेचकृत. १३ ग. च. . निर्घुष्टाःसोद्घुष्टहसितस्वराः । श्रूयन्तेसततंतत्रसर्वभूतमनोरमाः. १४ ख. घ. सोद्घुष्ट. १५ झ. स्वरैः. ञ. स्वरः. १६ झ. . ट. मनोरमः. १७ ङ.—झ. ट. त्वात्र. १८ ङ.—ट. तमतिक्रम्यशैलेन्द्रमुत्तरः. १९ ख. हेमगिरिर्नाम. २० क.—च. . ञ. ट. गतं. २१ ग. स्वयालक्ष्म्याहि. ख. सूर्यलक्ष्म्याहि. २२ क. ग. च.—ट. भगवांस्तत्र.

[1]न कथंचन गन्तव्यं कुरूणां[2]मुत्तरेण वः ॥ अन्येषामपि भूतानां [3]नातिक्रामति वै गतिः ॥ ६० ॥
स हि [4]सोमगिरिर्नाम देवानामपि दुर्गमः ॥ तमालोक्य ततः क्षिप्रमुपावर्तितुमर्हथ ॥ ६१ ॥
एतावद्वानरैः शक्यं गन्तुं [5]वानरपुङ्गवाः ॥ अभास्करममर्यादं न जानीमस्ततः परम् ॥ ६२ ॥
सर्वमेतद्विचेतव्यं यन्मया परिकीर्तितम् ॥ यदन्यदपि नोक्तं च तत्रापि क्रियतां मतिः ॥ ६३ ॥

ततः कृतं दाशरथेर्महत्प्रियं [6]महत्तरं चापि ततो मम प्रियम् ॥
कृतं भविष्यत्यनिलानलोपमा विदेहजादर्शनजेन कर्मणा ॥ ६४ ॥
ततः कृतार्थाः सहिताः सबान्धवा मयार्चिताः सर्वगुणैर्मनोरमैः ॥
चरिष्यथोर्वीं प्रतिशान्त[7]शत्रवः सहप्रिया भूतधराः प्लवङ्गमाः ॥ ६५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

नान्यगः " इत्युक्तेः । नचेदमपि शंभुविशेषणं । एकादशात्मकत्वविरोधात् । नहि विश्वात्मकत्वमेकादशात्मकत्वं चैकत्र संभवति । एकादशात्मकः एकादशमूर्तिः । शंभुः रुद्रः । देवेशो ब्रह्मा । ब्रह्मर्षिपरिवारितः तत्र वसति । इयं च क्रिया सर्वत्रापि संबध्यते । यद्यत्र कश्चित् प्रकरणाभावाद्विष्णुरत्र नोच्यत इति कथयेत् तर्हि रुद्रोपि नोच्यते । कथमिति चेत् शं भावयतीति शम्भुरिति व्युत्पत्त्या " शम्भू ब्रह्मत्रिलोचनौ " इति कोशकारवचनाच्च सर्वाण्यपि विशेषणानि ब्रह्मपराणि भवेयुरिति ॥ ५९ ॥ कुरूणामुत्तरेण " षष्ठ्यपीष्यते " इत्यनेनैनपा योगे षष्ठी । अन्येषामपि शक्तिविशेषविशिष्टदैत्यादीनामपि । वः युष्माभिः । न गन्तव्यं ॥ ६०—६१ ॥ एतावत् उत्तरकुरुदेशपर्यन्तं । ततः परं उत्तरकुरुदेशात्परं समुद्रद्वीपादिकं । अभास्करममर्यादं च प्रदेशं न जानीमः । ततः परस्य देशस्य सर्वैर्गन्तुमशक्यत्वेन मयापि अनवगतत्वादिति भावः ॥ ६२ ॥ यदन्यदपि नोक्तं च तत्रापि क्रियतां मतिः । गम्यत्वेनोक्तप्रदेशानां यत्पार्श्वादिकमनुक्तं तत्रापि अन्वेषणे मतिः कर्तव्येत्यर्थः ॥ ६३ ॥ ततः अन्वेषणानन्तरं । विदेहजादर्शनजेन कर्मणा दाशरथेर्महत्प्रियं कृतं भविष्यति । मम चापि ततः दाशरथिप्रियात् । महत्तरं प्रियं कृतं भविष्यतीति योजना ॥ ६४ ॥ भूतधराः प्राणिभृतः प्राणिभिरुपजीव्या इति यावत् ॥ ६५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

अन्यथा तस्यसंनिहितब्रह्ममात्रसंबन्धेआद्ययोरेकैकविशेषणत्वंतृतीयस्यद्विविशेषणत्वमितिवैरूप्यंस्यात् ॥ **ती०** भगवान्नारायणः । रूढनामेदं । सहिभगवच्छब्देनझटितिप्रतीयते ॥ **ति०** विश्वमततिव्याप्नोतीतिविश्वात्मा व्यापकः । तेनविष्णुरूपः । विष्लृव्याप्तावित्यनुसारात् । सएवशंभुः शंभवत्यस्मात्सः । सएवैकादशात्मकः एकादशानुवाकार्थैकादशरुद्रात्मकः । सएवब्रह्मा बृंहणत्वात्जगत्स्रष्टृत्वात् एवंरूपत्रयात्माभगवान् तत्रसोमगिरौ । कार्यब्रह्मलोकत्वाद्वसतीत्यर्थः ॥ **स०** भगवान् स्वोचितैश्वर्यादिगुणः । विश्वात्मा समस्तमनोनियामकः । एकादशात्मकः तद्गणस्वामी । शंभुः तत्रवसति । अनेनात्रभगवच्छब्दस्यश्रवणात्तस्यनारायणेरूढत्वात्सएवात्रतेनग्राह्यइतिनिरस्तं । " एतस्यांसाध्विसन्ध्यायांभगवान्भूतभावनः । परीतोभूतपार्षद्भिः " इत्यादौभागवतादौभवेपि भगवच्छब्दप्रयोगात् । " अन्यतमोमुकुन्दात्कोनामलोकेभगवत्पदार्थः " इतितुनिरवधिकैश्वर्यादिमद्बोधकभगवच्छब्दविवक्षया प्रवृत्तमितिनतद्विरोधः । ब्रह्माचवसति ॥ ५९ ॥ **ति०** नानुक्रामतिवैगतिः । तस्यकार्यब्रह्मलोकत्वेनब्रह्मर्षिव्यतिरिक्तस्यतत्रागतेः । ब्रह्मर्षिपदेनदहरादिमार्गेणब्रह्मोपासकाऋषयउच्यन्ते ॥ ६० ॥ **स०** भूतधराः धरन्तीतिधराः भूतस्यधराः सीतालाभेनयथार्थवचनधराः न्यायमार्गधरावा । " भूतंक्ष्मादौपिशाचादौन्याय्येसत्योपमानयोः " इतिविश्वः ॥ **शि०** सहिताः हितसहिताः ॥ ६५ ॥ इतित्रिचत्वारिंशःसर्गः ॥ ४३ ॥

[पा०] १ ख. घ. कथंचनन. २ ङ. ज. ञ. मुत्तरेणच. ३ ग. च. ज.—ट. नानुक्रामति. ४ ख. हेमगिरिर्नाम. ५ ग. वानरसत्तमाः. ६ छ. झ. ट. महत्प्रियं. ७ ङ. छ. ज. ट. शात्रवाः.

चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

हनूमतिकार्यसाधकतांनिश्चितवतासुग्रीवेणतंप्रतितत्पराक्रमप्रशंसनपूर्वकंविशेषतःसीतान्वेषणचोदनं ॥ १ ॥ तेन हनूमति र्यसाधकतामनुमिमानेनरामेणसीताप्रत्ययायतस्मिन्नभिज्ञानत्वेननिजनामाङ्किताङ्गुलीयकदानम् ॥ २ ॥ हनूमता रामचरण-गामपूर्वकंवानरसेनयासहसीतान्वेषणार्थप्रस्थानम् ॥ ३ ॥

विशेषेण तु सुग्रीवो हनुमत्यर्थमुक्तवान् ॥ सहि तस्मिन्हरिश्रेष्ठे निश्चितार्थोऽर्थसाधने ॥ १ ॥
अब्रवीच्च हनूमन्तं विक्रान्तमनिलात्मजम् ॥ सुग्रीवः परमप्रीतः प्रभुः सर्ववनौकसाम् ॥ २ ॥
न भूमौ नान्तरिक्षे वा नाम्बरे नामरालये ॥ नाप्सु वा गतिसङ्गं ते पश्यामि हरिपुङ्गव ॥ ३ ॥
सासुराः सहगन्धर्वाः सनागनरदेवताः ॥ विदिताः सर्वलोकास्ते ससागरधराधराः ॥ ४ ॥
गतिर्वेगश्च तेजश्च लाघवं च महाकपे ॥ पितुस्ते सदृशं वीर मारुतस्य महौजसः ॥ ५ ॥
तेजसा वापि ते भूतं समं भुवि न विद्यते ॥ तद्यथा लभ्यते सीता तत्त्वमेवोपपादय ॥ ६ ॥
त्वय्येव हनुमन्नस्ति बलं बुद्धिः पराक्रमः ॥ देशकालानुवृत्तिश्च नयश्च नयपण्डित ॥ ७ ॥
ततः कार्यसमासङ्गमवगम्य हनूमति ॥ विदित्वा हनुमन्तं च चिन्तयामास राघवः ॥ ८ ॥
सर्वथा निश्चितार्थोयं हनूमति हरीश्वरः ॥ निश्चितार्थकरश्चापि हनुमान्कार्यसाधने ॥ ९ ॥

अथ निश्चितकार्यसाधनसामर्थ्याय हनुमते अङ्गुलीयकदानं चतुश्चत्वारिंशे—विशेषेणत्वित्यादि ॥ हनुमति विषये । अर्थं वक्ष्यमाणार्थं । उक्तवान् । विशेषार्थकथनेहेतुमाह्—स हीति । अर्थसाधने विषये निश्चितार्थः ॥ १ ॥ संग्रहेणोक्तमर्थं विस्तरेण दर्शयति —अब्रवीच्चेत्यादिना ॥ २ ॥ भूमौ सजातीयप्रतिपक्षबहुलायां । अन्तरिक्षे निरालम्बे मेघादिसंचारमार्गे । अम्बरे वातचक्राक्रान्तप्रदेशे । अमरालये प्रबलाधिष्ठिते मार्गे । अप्सु तिर्यक्संचारानर्हासु वा । गतिसङ्गं गतिविलम्बं । नपश्यामि ॥ ३—४ ॥ गतिः अप्रतिहतगतिः ॥ ५ ॥ भूतं जन्तुः । तत् तस्मात्कारणात् । तत् सीतान्वेषणं । उपपादय संपादय ॥ ६ ॥ नयपण्डितेत्यनन्तरमितिकरणंबोध्यं । इत्यब्रवीदिति पूर्वेणान्वयः ॥ ७ ॥ ततः सुग्रीववचनात् । हनूमति कार्यसमासङ्गं कार्यविषयासक्तिं । अवगम्य अस्मिन् सुग्रीवेण स्वकार्यभारो निक्षिप्त इति ज्ञात्वेत्यर्थः । स्वयमपि हनुमन्तं कार्यसाधकं विदित्वाचिन्तयामास ॥ ८ ॥ चिन्ताप्रकारमाह—सर्वथेत्यादिना श्लोकद्व-

रामानु॰ हनुमत्यर्थमुक्तवान् निक्षिप्तवान् । धातूनामनेकार्थत्वात्कर्माधिकरणवाचिपदसमभिव्याहृतोवचिर्निक्षेपेवर्तते ॥ ती॰ र्थे प्रयोजनं । उक्तवान् निक्षिप्तवानित्यर्थः । " वायुपुत्रसमीपंतुगत्वातंवाक्यमब्रवीत् । शृणुमद्वचनंवीरहनुमन्मारुतात्मज । अयक्ष्वाकुदायादोराजारामःप्रतापवान् । सर्वात्मासर्वलोकेशोविष्णुर्मानुषरूपधृत् " इति । अत्रहेतुमाह—सहीति । यस्मात्कारत् सुग्रीवः अर्थसाधनेविषये तस्मिन्हरिश्रेष्ठेनिश्चितार्थः । अयंभावः । सीतान्वेषणायसर्वास्वपिदिक्षुवानरान्नियुज्य हनुमतस्सत्तमत्वादनेनैवकार्यसिद्धिर्भविष्यतीतिनिश्चित्यतत्प्रशंसापूर्वकंतंप्रत्यर्थमुक्तवानिति ॥ १ ॥ ती॰ अन्तरिक्षे पतत्रिमेघसंचारप्रशे । अंबरे तदुपरिसिद्धविद्याधरादिसंचरणप्रदेशे ॥ स॰ गतिसङ्गंगमनव्यवधानकरं । अन्तरिक्षं पक्षिमार्गः । अंबरं व्योम । मरालयः स्वर्गः । यद्वा अंबरे अमरालयेइतिसामानाधिकरण्येनान्वयः । अथवा अप्सुआलये सर्वप्रलये । हेअमर अविनान् । गतिसङ्गं ज्ञानप्रतिबन्धं । " प्रलयकालेपिप्रतिभातपरावरः " इत्युक्तेः । ना पुमान् अहं नपश्यामीतिभावः ॥ ३ ॥ स॰ तुः वायोः । गत्या गतिःसदृशी । वेगेनवेगः । तेजसातेजः । लाघवेनलाघवंचेत्यन्वयोद्रष्टव्यः ॥ ५ ॥ ति॰ ततः एवंसुग्रीववनात् । कार्यसमासङ्गं कार्यसिद्धिसंबन्धं । अवगम्य स्वयंचतत्सामर्थ्याद्यनुभवेनतस्मिन्कार्यसाधकत्वंविदित्वा । चात्तद्गम्यदेशसीतांविदित्वा चिन्तयामास । अस्मिन्स्वकर्तव्यसमर्पणंयुक्तमितिविचारयामास ॥ शि॰ अवगम्यहनूमति अवगम्यः सर्वकाधकत्वेनसर्वैर्ज्ञातव्यः । सचासौहनुमानितिकर्मधारयः । तस्मिन् । हनुमन्तंचिन्तयामास तद्गुणान्सस्मारेत्यर्थः ॥ ८ ॥ ॰ हनुमान् निश्चितार्थतरः । इदंच "अत्यन्तमन्तरङ्गत्वात्प्रधानाङ्गंहिमारुतिः" इत्युक्तेःप्रधानाङ्गत्वाद्युक्तमितिभावः ।

[पा॰] १ ङ. च. ज. ञ. सविशेषेण. २ ङ. छ. ज. ञ. न्हरिश्रेष्ठो. ३ ज. गतिभङ्गं. ४ घ. सामराः. च. ज. ससुराः. क. सनागहरिदेवताः. छ. सनागोरगदेवताः. ६ ङ. च. झ. ञ. ट. नसमंभुवि. ७ ग. ङ. च. छ. ञ. ट. तत्वमेवानुचिय. ८ क. ग. छ. झ. ट. हनुमन्नस्ति. ङ. च. ज. ञ. हनुमन्सन्ति. ९ ङ. च. ज. ञ. विदित्वाचहनूमन्तं. १० ग. छ. झ. निश्चितार्थतरश्चापि. क. निश्चितार्थतरश्चायं.

तदेवं प्रस्थितस्यास्य परिज्ञातस्य कर्मभिः ॥ भर्त्रा परिगृहीतस्य ध्रुवः कार्यफलोदयः ॥ १० ॥
तं समीक्ष्य महातेजा व्यवसायोत्तरं हरिम् ॥ कृतार्थ इव संवृत्तः प्रहृष्टेन्द्रियमानसः ॥ ११ ॥
ददौ तस्य ततः प्रीतः स्वनामाङ्कोपशोभितम् ॥ अङ्गुलीयमभिज्ञानं राजपुत्र्याः परंतपः ॥ १२ ॥
अनेन त्वां हरिश्रेष्ठ चिह्नेन जनकात्मजा ॥ मत्सकाशादनुप्राप्तमनुद्विग्नानुपश्यति ॥ १३ ॥
व्यवसायश्च ते वीर सत्त्वयुक्तश्च विक्रमः ॥ सुग्रीवस्य च संदेशः सिद्धिं कथयतीव मे ॥ १४ ॥
स तं गृह्य हरीश्रेष्ठः स्थाप्य मूर्ध्नि कृताञ्जलिः ॥ वन्दित्वा चरणौ चैव प्रस्थितः प्लवगोत्तमः ॥१५

स तत्प्रकर्षन्हरिणां बलं महद्बभूव वीरः पवनात्मजः कपिः ॥
गताम्बुदे व्योम्नि विशुद्धमण्डलः शशीव नक्षत्रगणोपशोभितः ॥ १६ ॥
अतिबल बलमाश्रितस्तवाहं हरिवरविक्रम विक्रमैरनल्पैः ॥
पवनसुत यथाभिगम्यते सा जनकसुता हनुमंस्तथा कुरुष्व ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

येन ॥ अन्ते इतिकरणं बोध्यं । कार्यसाधने विषये निश्चितार्थः निश्चितकार्यसाधकः । हनुमानपि निश्चितार्थकरः ॥ ९ ॥ अस्य कार्यफलोदयः अस्य संबन्धिनी कार्यसिद्धिः । ध्रुवः निश्चितः ॥ १० ॥ व्यवसायोत्तरं व्यवसायेन उत्तरं श्रेष्ठं । कृतार्थः संवृत्त इव । अमन्यतेतिशेषः ॥ ११ ॥ राजपुत्र्याः अभिज्ञानं अभिज्ञायतेनेनेत्यभिज्ञानं । ननु त्यक्तसकलधनस्य वन्यवृत्त्या वर्तमानस्य कुतोङ्गुलीयकमिति चेत् इदमेकमेतत्कार्यार्थं रक्षितवान् । अतएवाङ्गुलीयमुन्मुच्येति नोक्तं । यद्वा रामनामाङ्कितमङ्गुलीयकं सीतायाः कदाचिद्रावणागमनात्पूर्वं प्रणयपरत्वेन रामेण स्वीकृतमिति बोध्यम् । यद्वा भार्यास्नेहेन कनिष्ठिकायां सदा मुद्रिका धार्यत इति देशाचारः । यद्वा विवाहकाले जनकेन दत्तमिदं वरालङ्कारत्वेन । "गृहीत्वा प्रेक्षमाणा सा भर्तुः करविभूषणं" इत्युक्तेः ॥ १२ ॥ भवद्वचनमेवालं किमर्थमेतदीय तत्राह—अनेनेति ॥ पश्यति द्रक्ष्यति ॥ १३ हनुमन्तं प्रशंसति—व्यवसाय इति ॥ सत्त्वयु विक्रमः बलं च विक्रमश्चेत्यर्थः ॥ १४—१५ ॥ प्रकर्ष नयन् । हरिणामित्यत्र दीर्घाभावआर्षः ॥ १६ पुनरपि गच्छन्तंप्रति रामवचनं—अतिबलेति अतिबलेति संबुद्धिः । हरिवरविक्रम सिंहश्रेष्ठविक्र सुग्रीवतुल्यविक्रमेति वा । श्लोकान्ते इति रामोऽब्रवी दित्यध्याहार्यं ॥ १७ ॥ इति श्रीगोविन्दराजविरचि श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाक ण्डव्याख्याने चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

शि० कार्यसाधने निश्चितः अर्थतरः अत्युपायोयेनसः । योहनूमान् तस्मिन्हनूमति सर्वथा सर्वप्रकारेण । निश्चितः अर्थोजानकीदर्श येनसः हरीश्वरः सुग्रीवः । अस्तीतिशेषः । एतेनसुग्रीवस्ययाथार्थ्यवेदितृत्वंव्यञ्जितं ॥ किंच हरीश्वरोहनुमतिनिश्चितार्थोस्ति । हनूम स्तुनिश्चितार्थतरः । एतेनहनुमतोज्ञानाधिकत्वंसूचितं । पूर्वकल्पे त्वरार्थस्याविवक्षयानेयंव्यञ्जनेतिबोध्यं ॥ ९ ॥ **ति०** प्रस्थित भर्त्राप्रस्थापितस्य । परिज्ञातस्य परीक्षितस्य । परिगृहीतस्य श्रेष्ठतयेतिशेषः । कार्यस्यफलोदयः सीतादर्शनप्राप्तिरूपः । स ध्रु निश्चितार्थः ॥ १० ॥ **ति०** ततः निश्चितकार्यसाधकत्वादेवहेतोः ॥ **स०** अभिज्ञानं प्रत्यभिज्ञानद्वाराविश्वासजनकं ॥ १२ **ति०** तत् अभिज्ञानपदार्थं ॥ १५ ॥ **स०** हरिणां हरीणां ॥ यद्वा हरः मनःयेषामस्तितेहरिणः मनस्विनः तेषां । जन्यज कयोरभिमन्यमानाभिमानिनोः "ब्रह्मादिकंमुखं" "महतश्चतुर्मुखात्" इत्यादिवदैक्यव्यपदेशात् हरिणांमनस्विनामित्यर्थस्संभ तीतिज्ञेयं ॥ १६ ॥ **ति०** कतकेनतुचतुस्त्रिंशत्संख्यश्लोकःसर्गोऽयमुक्तः ॥ १७ ॥ इतिचतुश्चत्वारिंशःसर्गः ॥ ४४ ॥

[**पा०**] १ ग. छ. झ. ट. तदेव. २ छ. झ. ट. संहृष्टः. ३ क. ग. छ. झ. ट. सतद्गृह्य. ४ ङ. च. छ. झ. ञ. कृत्वा. ५ क. चरणावेव. ६ क. ग. ङ. छ.—ट. प्लवगर्षभः. ७ च.—झ. ट. महद्बलंबभूव.

पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

विनतादिभिश्चतुर्भिस्सेनाधिपैर्हर्षोत्कर्षात्सवीरवादंगर्जद्भिः स्वस्वसैन्यैःसह सुग्रीवोद्दिष्टस्वस्वदिगभिप्रस्थानम् ॥ १ ॥

सर्वांश्चाहूय सुग्रीवः प्लवगान्प्लवगर्षभः ॥ [1]समस्तानब्रवीद्भूयो रामकार्यार्थसिद्धये ॥
एवमेतद्विचेतव्यं [2]यन्मया परिकीर्तितम् ॥ १ ॥
तदुग्रशासनं भर्तुर्विज्ञाय हरिपुङ्गवाः ॥ शलभा इव संछाद्य मेदिनीं संप्रतस्थिरे ॥ २ ॥
रामः प्रस्रवणे [3]तस्मिन्न्यवसत्सहलक्ष्मणः ॥ प्रतीक्षमाणस्तं मासं [4]यः सीताधिगमे कृतः ॥ ३ ॥
[5]उत्तरां तु दिशं [6]रम्यां गिरिराजसमावृताम् ॥ प्रतस्थे सहसा वीरो हरिः शतबलिस्तदा ॥
पूर्वां दिशं प्रति ययौ विनतो [7]हरियूथपः ॥ ४ ॥
[8]ताराङ्गदादिसहितः [9]प्लवगो मारुतात्मजः ॥ [10]अगस्त्यचरितामाशां दक्षिणां हरियूथपः ॥ ५ ॥
[11]पश्चिमां तु भृशं घोरां सुषेणः प्लवगेश्वरः ॥ प्रतस्थे हरिशार्दूलो दिशं वरुणपालिताम् ॥ ६ ॥
ततः सर्वा दिशो [12]राजा चोदयित्वा [13]यथातथम् ॥ [14]कपिसेनापतीन्मुख्यान्मुमोद सुखितः सुखम् ॥ ७ ॥
एवं [15]संबोधिताः सर्वे राज्ञा [16]वानरयूथपाः ॥ [17]स्वां स्वां दिश[18]मभिप्रेत्य त्वरिताः संप्रतस्थिरे ॥ ८ ॥
[19]आनयिष्यामहे सीतां हनिष्यामश्च रावणम् ॥ नदन्तश्चोन्नदन्तश्च गर्जन्तश्च प्लवङ्गमाः ॥
[20]क्ष्वेलन्तो धावमानाश्च [21]विनदन्तो महाबलाः ॥ ९ ॥

अथ प्रेषितानां वानराणां सन्नाह उच्यते पञ्चचत्वारिंशे—सर्वांश्चेत्यादि ॥ सर्वानाहूय ततः समस्तान् संघीभूतान् प्लवगान् अब्रवीत् । यद्वा सम इति च्छेदः । समः सर्वत्र पक्षपातरहितः । एतत् पूर्वोक्तं । एवं अस्मदुक्तप्रकारेण । इत्यब्रवीदिति संबन्धः ॥१॥ शलभा इति बहुत्वमात्रेदृष्टान्तः ॥ २ ॥ सीताधिगमे सीताधिगमनिमित्तं । कृतः कृतसंकेतः ॥ ३ ॥ प्रतस्थे प्रस्थातुमुद्युक्तः । सर्गान्ते सुग्रीवसन्निधौ सन्नाहकथनात् ॥ ४—६ ॥ मुमोद सुखितः सुखमिति । पूर्वं राज्यलाभेन सुखितो राजा सुखं यथा भवति तथा मुमोद । उत्तरोत्तरं सुखं प्राप्तेत्यर्थः ॥ ७ ॥ स्वांस्वांदिशं स्वांशभूमण्डलं ॥ ८ ॥ आनयिष्यामह इत्यत्र इतिकरणं द्रष्टव्यं । आनयिष्यामह इति नदन्त इत्यन्वयः । नदन्तः शब्दं कुर्वन्तः । उन्नदन्तः पुनः संतोषातिशयेन उच्चैर्नदन्तः । गर्जन्तः आत्मश्लाघां कुर्वन्तः । क्ष्वेलन्तः सिंहनादं कुर्वन्तः । विनदन्तः विविधान्विकृतान्वा नादान्कुर्वन्तः । संप्रतस्थिर इति

स० सर्वान् वैरिहिंसकान् । षर्व हिंसायमितिधातोः । यद्वा समस्तान् मासमध्येनायाताश्चेन्मच्छिक्षाविषयाइतिपूर्वंसम्यङ्निरस्तान् । रामकार्यार्थसिद्धये कार्यंसीतालाभश्चअर्थोमोक्षश्चतयोःसिद्ध्यर्थं । एवंच नार्थानर्थतेतिज्ञेयं ॥ १ ॥ स० अगस्त्यचरितां अगस्त्यस्य चरितंभावेक्तः । चरितंचरणंसंचारोयस्यास्सा । तां । अगस्त्यस्यचरितंचरित्रंयस्यामितिवा ॥ ६ ॥ शि० वानराणामनुकूलत्वेनसुखितोराजासुग्रीवः कपिसेनापतीन् यथातथं यथायोग्यं । सर्वादिशश्चोदयित्वा मुमोद दानसत्कारादिनाप्रमोदयामास ॥ स० सुखितः आज्ञानुसारिभिर्हरिभिःसुखंप्रापितः । सुखं सु शोभनानि खानि इन्द्रियाणियस्मिन्कर्मणितद्यथाभवतितथा मुमोद स्वयंतुतोष ॥ ७ ॥

[पा०] १ ङ.—ट. समस्तांश्चाब्रवीद्राजा. २ ङ.—ट. भवद्भिर्वानरोत्तमैः. ३ ग. तस्मिन्नुवाससह. ४ छ. झ. ट. सीताधिगमनेकृतः. ङ. च. ज. ञ. सीताभ्यधिगमेकृतः. ५ ख. सउत्तरां. क. उत्तरांच. ६ क. गम्यां. ७ ख. घ. नामयूथपः. ८ ग. ताराङ्गदाभ्यांसहितः. ९ क. ख. हनूमान्मारुतात्मजः. च.—ट. प्लवगःपवनात्मजः. ग. हनूमान्पवनात्मजः. १० झ. ट. अगस्त्याचरितां. ११ ग. ङ.—ट. पश्चिमांच. क. पश्चिमांतांदिशंवीरः. १२ क. ग. राजाप्रस्थाप्यविजयायतान्. १३ ख. यथाबलं. ङ. ज. यथायथं. १४ ङ.—ट. कपिसेनापतिर्वीरोमुमोद. १५ क.—ट. संचोदिताः. ग. संबोधितास्तेन. १६ क. ख. वानरपुङ्गवाः. १७ क. तांतां. १८ च. ज. ञ. मनुप्रेत्य. १९ आनयिष्यामहेइत्यर्धं ङ.—ट. पाठेषुक्ष्वेलन्तोधावमानाश्चेत्यर्धात्परतोदृश्यते. २० ङ.—ट. क्ष्वेडन्तो. २१ क. ख. ययुःप्लवगसत्तमाः.

अहमेको [1]हनिष्यामि प्राप्तं रावणमाहवे ॥ ततश्चोन्मथ्य सहसा हरिष्ये जनकात्मजाम् ॥ १० ॥
वेपमानां श्रमेणाद्य भवद्भिः स्थीयतामिह ॥ एक एवाहरिष्यामि पातालादपि जानकीम् ॥ ११ ॥
[2]विमथिष्याम्यहं [3]वृक्षान्पातयिष्याम्यहं [4]गिरीन् ॥ धरणीं दारयिष्यामि [5]क्षोभयिष्यामि सागरान् ॥१२॥
अहं योजनसंख्यायाः [6]प्लविता नात्र संशयः ॥ [7]शतं योजनसंख्यायाः शतं समधिकं [8]ह्यहम् ॥१३॥
भूतले सागरे [9]वापि शैलेषु च वनेषु च ॥ पातालस्यापि वा मध्ये न ममाच्छिद्यते गतिः ॥ १४ ॥
[10]इत्येकैकं तदा तत्र वानरा बलदर्पिताः ॥ ऊचुश्च वचनं [11]तत्र हरिराजस्य सन्निधौ ॥ १५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

षट्चत्वारिंशः सर्गः ॥ ४६ ॥

रामेणाखण्डभूमण्डलविज्ञानकारणं पृष्टेनसुग्रीवेण तंप्रति वालिदुन्दुभियुद्धादिकथनेन तन्मूलकस्वविषयकवालिविद्वेषादिनिवेदनादिपूर्वकं स्वस्य सकलभूवलयपरिवर्तनस्य तत्कारणत्वोक्तिः ॥ १ ॥

गतेषु वानरेन्द्रेषु रामः सुग्रीवमब्रवीत् ॥ कथं भवान्विजानीते सर्वं वै मण्डलं भुवः ॥ १ ॥
[12]सुग्रीवस्तु ततो राममुवाच प्रणतात्मवान् ॥ श्रूयतां सर्वमाख्यास्ये विस्तरेण [13]नरर्षभ ॥ २ ॥
[14]यदा तु दुन्दुभिं नाम दानवं महिषाकृतिम् ॥ [15]परिकालयते वाली मलयं [16]प्रति पर्वतम् ॥ ३ ॥
[17]तदा विवेश महिषो मलयस्य गुहां प्रति ॥ विवेश वाली तत्रापि मलयं तज्जिघांसया ॥ ४ ॥

पूर्वेणान्वयः ॥ ९ ॥ अहमित्यादि सागरानित्यन्तमेकान्वयं ॥ १०—१२ ॥ अहं योजनसंख्यायाः शतं प्लवितेत्येकस्य वचनं । योजनसंख्यायाः शतं समधिकमित्यन्यस्य । हिः प्रसिद्धौ ॥ १३—१५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

अथ रामाय सुग्रीवेण स्वस्य सर्वभूमण्डलज्ञानमूलकथनं षट्चत्वारिंशे—गतेष्वित्यादि ॥ १ ॥ प्रणतात्मवान् प्रणतदेहवान् ॥ २ ॥ केचिदत्र दुन्दुभिशब्देन उपचारान्मायाव्येवोच्यते । मायाविनो वृत्तान्तस्यानुवादादित्याहुः । तन्न । महिषाकृतिमित्यस्य विरोधात् । " तदा विवेशमहिषः, महिषो विनशेदिति " इति पुनःपुनरुक्तेश्च रामेण विदितवृत्तान्तश्च न वचनमर्हति । तर्हि कथमुपपत्तिरितिचेत् उच्यते । पूर्वं मायाविवृत्तान्ताभिधानादत्र महिषवृत्तान्ताभिधानाच्च तदानीमुभावप्यागताविति वेदितव्यं । तत्र महिषः कथंचित्स्वात्मानं गोपयित्वा वालिनि विनिर्गते पुनर्मत्तः कदाचिदागत्य वालिना हत इत्यविरोधः । वक्ष्यत्येवमन्यत्रापि विषये । रावणेन सीतोपप्लवे उद्युक्ते मन्दोदरीधान्यमालिन्यौ निवारिण्यौ । तत्रैका पूर्वमुक्ता अन्याः वानरसन्निधावनुवादे । तस्मादयमृषेः स्वभाव इति बोध्यम् । परिकालयते पलाययति । कलतेर्मितो वृद्धिरार्षी । तत्रापि गुहायामपि । तज्जि-

---

ति० एकैकः एकशइत्यर्थः ॥ १५ ॥ इतिपञ्चचत्वारिंशःसर्गः ॥ ४५ ॥

स० अव्ययानामनेकार्थत्वाद्वै इत्यर्थे । ततश्चइत्यब्रवीदित्यन्वयः ॥ १ ॥ स० प्रणतात्मवान् प्रणतश्चासावात्मादेहश्चसोस्यास्तीतिसतथा । एकदेशिनेत्यादिनिर्देशान्नकर्मधारयादितिनञानिर्देशाच्चमत्वर्थीयनिषेधोऽनित्यइतिप्रणतात्मवानितिसाधुः । आत्मामनोस्यास्तीत्यात्मवान् । प्रणतश्चासावात्मवांश्चेतिवा ॥ २ ॥ स० दुन्दुभिरितिजनकइत्यादिवत्कुलनाम । मायावीतितन्मात्रनामेति दुन्दुभेःपितृत्वात्कथंमायाविनिपुत्रेतन्नामेतिनिरस्तं । अथवा पितृनाम्नालक्षणयापुत्रोगृह्यते ॥ ति० अत्रदुन्दुभिशब्देनमहिषशब्दे-

[पा०] १ क. ग.—ट. वधिष्यामि. २ ङ. च. ज. ञ. निर्मथिष्याम्यहं. क.—घ. छ. झ. ट. विधमिष्याम्यहं. ३ क.—ङ. छ. ज. झ. ट. वृक्षान्दारयिष्याम्यहं. ४ ङ. च. ज. ञ. गिरिं. ५ ख. शोषयिष्यामि. ६ ङ.—ट. प्लवेयं. ७ क. ख. घ.—ट. शतयोजन. ८ क. तथा. ९ ज. चापि. १० क. ङ.—ट. इत्येकैकः. ११ ङ.—ट. तस्य. क. ग. घ. तस्मिन्हरि. १२ च.—ट. सुग्रीवश्च. १३ छ.—ट, वचोमम. १४ घ. यदाहि. १५ ङ.—ट, प्रतिकालयते. १६ क. ख. पर्वतंप्रति. १७ क. यदा.

ततोहं तत्र निक्षिप्तो गुहाद्वारि [1]विनीतवत् ॥ न च निष्क्रमते वाली तदा संवत्सरे गते ॥ ५ ॥
ततः क्षतजवेगेन आपुपूरे तदा बिलम् ॥ तदहं विस्मितो दृष्ट्वा [2]भ्रातृशोकविषार्दितः ॥
अथाहं [3]कृतबुद्धिस्तु सुव्यक्तं निहतो गुरुः ॥ ६ ॥
शिला पर्वतसंकाशा बिलद्वारि [4]मयाऽऽवृता ॥ अशक्नुवन्निष्क्रमितुं महिषो [5]विनशेदिति ॥ ७ ॥
ततो[6]हमागां किष्किन्धां निराशस्तस्य जीविते ॥ राज्यं च [7]सुमहत्प्राप्तं [8]तारया रुमया सह ॥ ८ ॥
मित्रैश्च [9]सहितस्तत्र वसामि [10]विगतज्वरः ॥ ९ ॥
आजगाम [11]ततो वाली हत्वा तं [12]दानवर्षभम् ॥ ततोऽहमददां राज्यं गौरवाद्भययन्त्रितः ॥ १० ॥
स मां जिघांसुर्दुष्टात्मा वाली प्रव्यथितेन्द्रियः ॥ परिकालयते [13]क्रोधाद्धावन्तं सचिवैः सह ॥११॥
ततोऽहं वालिना तेन [14]सानुबन्धः [15]प्रधावितः ॥ नदीश्च विविधाः पश्यन्वनानि [16]नगराणि च ॥ १२ ॥
आदर्शतलसंकाशा ततो वै पृथिवी मया ॥ अलातचक्रप्रतिमा दृष्टा [17]गोष्पदवत्तदा ॥ १३ ॥
पूर्वां दिशं ततो गत्वा पश्यामि विविधान्द्रुमान् ॥ पर्वतांश्च नदी रम्याः सरांसि विविधानि च ॥१४॥
उदयं तत्र पश्यामि पर्वतं धातुमण्डितम् ॥ क्षीरोदं सागरं [18]चैव नित्यमप्सरसालयम् ॥
[19]परिकालयमानस्तु वालिनाभि[20]द्रुतस्तदा ॥ १५ ॥
पुनरावृत्य सहसा प्रस्थितोऽहं तदा विभो ॥ पुनरावर्तमानस्तु वालिनाऽभिद्रुतो द्रुतम् ॥ १६ ॥
दिशस्त्वस्यास्ततो भूयः प्रस्थितोऽदक्षिणां दिशम् ॥ विन्ध्यपादपसंकीर्णां चन्दन[21]द्रुमभूषिताम् ॥१७॥

घांसया मलयं विवेश ॥ ३—४ ॥ विनीतवत् विनययुक्तमिति क्रियाविशेषणं ॥ ५ ॥ भ्रातृशोक एव विषं तेन अर्दितः । अभवमिति शेषः । अहं गुरुर्निहत इति कृतबुद्धिः अभवमिति शेषः ॥ ६ ॥ विनशेत् विनश्येदित्यर्थः ॥ ७—८ ॥ वसामि अवसं ॥ ९ ॥ दानवर्षभं मायाविनं। भययन्त्रितः भयपरवशः ॥१०॥ परिकालयते निरकासयत् ॥ ११ ॥ सानुबन्धः सामात्यः । नदीः पश्यन्नहं प्रधावित इत्यन्वयः ॥ १२—१३ ॥ पश्यामि अपश्यं ॥ १४ ॥ अप्सरसा अप्सरसां । पूर्वसवर्णदीर्घः । वालिनाभिद्रुतः परिकालयमानोहं द्रुमादिकमपश्यमिति पूर्वेणान्वयः ॥ १५ ॥ पुनरित्यादि श्लोकद्वयमेकान्वयं । अस्याः पूर्वस्या दिशः पुनरावृत्य प्रस्थितोस्मि । आवर्तमानोहं पुनर्वालिनाभिद्रुतोस्मि । विन्ध्यपादपेत्यनेन किष्कि-

नचतत्पुत्रोमायाविनामादानवउच्यते । पितुर्महिषाकारत्वात्तत्पुत्रस्यचतदाकारत्वमितिचबोध्यं ॥ ३ ॥ **स०** "वाक्येतुसाविवक्षामपेक्षते" इत्युक्तेः वेगेनआपुपूरेत्यत्रविवक्षाभावादसंधिः। **ति०** गतबुद्धिः प्राप्तबुद्धिः जातइतिशेषः ॥ ६ ॥ **ति०** परिकालयते सचिवैस्सहधावन्तमनुधावतिस्म ॥ **स०** वालीसचिवैस्सहधावन्तंमां अवालीति अवाली नविद्यतेवालीयस्येत्यवाली । अहंमृतइतिमत्वा एवंकृतवानित्यवालीसुग्रीवइतिमत्वा प्रतिकालयतइत्यन्वये नपुनरुक्तिः ॥ ११ ॥ **ति०** सोहं अनुबद्धः अनुद्रुतः ॥ १२ ॥ **ति०** ततोवै तदनुधावनहेतोः । मयागोष्पदवत्परिभ्राम्यमाणा इयंपृथिवी अलातचक्रप्रतिमा आदर्शतलसंकाशाचदृष्टा । गोष्पदवदित्यनेनलङ्घनेऽप्रयासउक्तः । अलातचक्रेत्यनेनस्वीयोभ्रमणवेगः । आदर्शतलेत्यनेनभूचक्रवर्तिपदार्थस्यस्पष्टमनुभवउक्तः ॥ १३ ॥ **ति०** परिकाल्यमानः परिकालयमानः । पलायमानइत्यर्थः । अकारलोपआर्षः । पुनरावृत्य उदयगिरिभुवः । **स०** अहमित्यहंकारवाच्यव्ययमेकं । तेन अहं गर्वितेनवालिनेत्यन्वये नपुनरुक्तिः ॥ १५–१६ ॥

[पा०] १ क. विनीतवान्. २ ङ.—ट. भ्रातुःशोक. ३ क. ग.—ट. गतबुद्धिस्तु. ४ क. ख. घ. कृतामया. ज. समावृता. ग. छ. झ. ञ. ट. मयाकृता. ५ ङ.—ट. विनशिष्यति. ६ ङ. हमायां. ७ ग. छ. झ. ट. सुमहत्प्राप्य. ८ क.—घ. च. छ. ज. ञ. ट. तारांच. ९ छ. झ. ञ. ट. स्तस्य. १० घ. गतविज्वरः. ११ ग. तदा. १२ ङ.—ट. वानरर्षभः. १३ ङ.—ठ. वालीधावन्तं. क. कोपाद्धावन्तं. १४ छ. झ. सोनुबद्धः. १५ ङ. च. ज. ञ. प्रधर्षितः. १६ घ. विविधानिच. १७ ङ. छ.—ट. गोष्पदवत्कृता. १८ क. ख. चापि. १९ छ. झ. ट. परिकाल्यमानस्तुतदावालिनाऽभिद्रुतोह्यहं. २० च. ज. ञ. द्रुतोह्यहं. २१ ङ. च. ज. ञ. द्रुमसेवितां. क.—घ. छ. झ. ट. द्रुमशोभितां.

[1]द्रुमशैलांस्ततः पश्यन्भूयो [2]दक्षिणतोऽपरान् ॥ [3]पश्चिमां तु दिशं प्राप्तो [4]वालिना समभिद्रुतः ॥
[5]संपश्यन्विविधान्देशानस्तं च गिरिसत्तमम् ॥ १८ ॥
[6]प्राप्य चास्तं गिरिश्रेष्ठमुत्तरां संप्रधावितः ॥ हिमवन्तं च मेरुं च समुद्रं च तथोत्तरम् ॥ १९ ॥
यदा न विन्[7]दं शरणं वालिना समभिद्रुतः ॥ [8]तदा मां बुद्धिसंपन्नो हनुमान्वाक्यमब्रवीत् ॥ २० ॥
इदानीं मे स्मृतं [9]राजन्यथा वाली हरीश्वरः ॥ मतङ्गेन तदा शप्तो ह्यस्मिन्नाश्रममण्डले ॥ २१ ॥
प्रविशेद्यदि वै वाली मूर्धाऽस्य शतधा भवेत् ॥ [10]तत्र वासः सुखोऽस्माकं निरुद्विग्नो भविष्यति ॥२२॥
ततः पर्वतमासाद्य ऋश्यमूकं नृपात्मज ॥ न विवेश तदा वाली मतङ्गस्य भयात्तदा ॥ २३ ॥
एवं मया तदा राजन्प्रत्यक्षमुपलक्षितम् ॥ पृथिवीमण्डलं [11]कृत्स्नं गुहामस्यागतस्[12]ततः ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

तत्रतत्रगवेषणेपि सीतामदृष्टवद्भिर्विनतादिभिर्मासादर्वागेवसरामंसुग्रीवमेत्यसाभिवादनंसीतायाअदर्शननिवेदनपूर्वकमनेकहेतूक्त्या सीतादर्शनस्य हनुमदेकसाध्यत्वोक्तिः ॥ १ ॥

दर्शनार्थं तु वैदेह्याः सर्वतः [13]कपियूथपाः ॥ व्यादिष्टाः कपिराजेन यथोक्तं जग्मुरञ्जसा ॥ १ ॥
[14]सरांसि सरितः [15]कक्षानाकाशं नगराणि च ॥ नदीदुर्गांस्तथा शै[16]लान्विचिन्वन्ति [17]समन्ततः ॥ २ ॥

न्धाया दक्षिणतोपि विन्ध्यपर्वतशेषोस्तीति गम्यते ॥ १६—१८ ॥ हिमवन्तमिति ॥ अपश्यमिति शेषः ॥ १९ ॥ शरणं रक्षणं । न विन्दं नाविन्दं ॥ २० ॥ राजन् अस्मिन्नाश्रममण्डले वाली प्रविशेद्यदि तदास्य मूर्धा शतधा भवेदिति मतङ्गेन पुरा हरीश्वरो यथाभिशप्तः तथा इदानीं मे स्मृतमिति योजना । निरुद्विग्नः निर्भयः । भावे निष्ठा । इति हनुमान् वाक्यमब्रवीदिति संबन्धः ॥ २१—२२ ॥ आसाद्य स्थितोहमिति शेषः॥२३—२४॥ अस्य ऋश्यमूकस्य । गुहां सीताभरणस्थानभूतां ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षट्चत्वारिंशः सर्गः॥४६॥

अथ दक्षिणेतरदिग्गतवानरागमनं सप्तचत्वारिंशे—दर्शनार्थं त्वित्यादि ॥ यथोक्तं देशं ॥ १ ॥ तदेव विवृणोति—सरांसीत्यादिना ॥ कक्षान् गुल्मान् । लतागृहानित्यर्थः । आकाशं वृक्षगुल्मादिरहितप्रदेशं ।

ति० द्रुमान्तरे शैलान्तरेच तद्व्यवहितंवालिनंपश्यन् अपरां पश्चिमांदिशं । समभिद्रुतइतिशेषः ॥ १८ ॥ **ती०** संपश्यन्नित्यनुषज्यते । हिमवन्तंचमेरुंचउत्तरसमुद्रंचसंपश्यन् उत्तरांदिशंसंप्रधावितइतिसंबन्धः । हिमवन्तंसंपश्यन्नित्यभिधानात्पश्चिमदेशोपिहिमवत्पर्यन्तंपुनरावृत्योत्तरांदिशंप्रधावितइत्यवगम्यते ॥ १९ ॥ **ति०** नविन्दे नलभे ॥ २० ॥ **स०** सुखमस्यास्तीतिसुखः “ त्रिषुद्रव्येपापपुण्यसुखादिच ” इत्यमरस्याप्ययमेवभावोविभावनीयः ॥ २२ ॥ **स०** मतङ्गस्यभयात् । षष्ठीअपादानत्वाविवक्षणात् । ततः पृथिवीभ्रमणात् ॥ २३ ॥ **स०** तदा गुहां ऋश्यमूकस्यगुहां । अतश्चतदेतिनपुनरुक्तं ॥ २४ ॥ इतिषट्चत्वारिंशःसर्गः ॥ ४६ ॥

[**पा०**] १ ङ.—ट. द्रुमशैलान्तरेपश्यन्. २ ङ.—ट. दक्षिणतोपरां. ३ छ. झ. ञ. ट. अपरांच. क.—घ. च. ज. पश्चिमांच. ४ ख. वालिनाऽभिद्रुतोभृशं. ५ ग. छ. झ. ट. सपश्यन्. ६ च. ज. ञ. प्राप्तश्चास्तं. ७ ख. छ. झ. ञ. ट. विन्दे. ८ क. ख. घ.—ट. ततो. ९ च. ज. यतो. १० ख. अत्र. ११ ङ.—ज. ञ. ट. सर्वं. ग. कृत्स्नंयथाह्यादर्शमण्डलं. १२ ख. स्तदा. १३ ङ.—ट. कपिकुञ्जराः. १४ क. ङ.—ट. तेसरांसिसरित्कक्षान्. ख. ग. सरांसिसरितोवृक्षान्. १५ घ. कक्षान्ग्रामांश्च. १६ छ. [illegible] देशान्. १७ ख. घ. ततस्ततः.

सुग्रीवेण [१]समाख्याताः सर्वे [२]वानरयूथपाः ॥ [३]प्रदेशान्प्रविचिन्वन्ति सशैलवनकाननान् ॥ ३ ॥
विचित्य दिवसं सर्वे सीताधिगमने धृताः ॥ समायान्ति स्म मेदिन्यां निशाकालेषु वानराः ॥ ४ ॥
[४]सर्वर्तुकामान्देशेषु वानराः [५]सफलान्द्रुमान् ॥ आसाद्य रजनीं शय्यां चक्रुः सर्वेष्वहस्सु ते ॥ ५ ॥
तदहः प्रथमं कृत्वा मासे [६]प्रस्रवणं गताः ॥ कपिराजेन संगम्य निराशाः [७]कपियूथपाः ॥ ६ ॥
[८]विचित्य तु दिशं पूर्वां यथोक्तां सचिवैः सह ॥ अदृष्ट्वा विनतः सीतामाजगाम [९]महाबलः ॥ ७ ॥
[१०]उत्तरां च दिशं [११]सर्वां विचि[१२]त्य स महाकपिः ॥ आगतः सह सैन्येन वीरः शतबलिस्तदा ॥ ८ ॥
सुषेणः पश्चिमामाशां विचित्य सह वानरैः ॥ समेत्य मासे [१३]संपूर्णे सुग्रीवमुपचक्रमे ॥ ९ ॥
तं प्रस्रवणपृष्ठस्थं समासाद्याभिवाद्य च ॥ आसीनं सह रामेण सुग्रीवमिदमब्रुवन् ॥ १० ॥
विचिताः पर्वताः सर्वे वनानि [१४]गहनानि च ॥ निम्नगाः [१५]सागरान्ताश्च सर्वे [१६]जनपदाश्च ये ॥ ११ ॥
गुहाश्च विचि[१७]ताः सर्वास्त्वया याः परिकीर्तिताः ॥ विचिताश्च महागुल्मा लताविततसंतताः ॥ १२ ॥
गहनेषु च देशेषु दुर्गेषु विषमेषु च ॥ सत्त्वान्यतिप्रमाणानि विचितानि हतानि च ॥ १३ ॥
[[१८]ये चैव गहना देशा विचितास्ते पुनःपुनः ॥]
उदारसत्त्वाभिजनो [१९]महात्मा स मैथिलीं द्रक्ष्यति वानरेन्द्रः ॥

नदीदुर्गान् नदीभिर्दुर्गमान् ॥ २—३ ॥ धृताः तत्पराः ॥ ४ ॥ विचित्येतिश्लोकोक्तं विवृणोति—सर्वेति ॥ सर्वर्तुकामान् काम्यन्त इति कामाः पुष्पफलादयः । सर्वर्तुसंभवफलपुष्पादियुक्तानित्यर्थः । सफलान् वानरैरुपभुज्यमानत्वेन सफलान् । द्रुमानासाद्य । सर्वेष्वहस्सु एकमासान्तर्गतसर्वदिनेषु । रजनीं रजन्यामेव । शय्यां चक्रुः । अनेनाहारविश्रमादिकमहस्सु नास्तीत्यवगम्यते ॥ ५ ॥ तदहः प्रस्थानदिनं । प्रथमं कृत्वा तदारभ्य मासे पूर्णे सति । निराशाः सीतान्वेषणे निरुत्साहाः सन्तः । कपिराजेन संगम्य तस्मै स्वागमनं निवेद्येत्यर्थः । प्रस्रवणं माल्यवन्तं । गताः ॥ ६ ॥ एवं सामान्येन वानरागमनमुक्त्वा प्रत्येकं च दर्शयति—विचित्येत्यादिना । सचिवैः सहायभूतैः ॥७—८॥ उपचक्रमे उपागतः ॥ ९ ॥ प्रस्रवणपृष्ठस्थं प्रस्रवणाग्रस्थं । रामेण सहासीनं । रामेण सहितमित्यर्थः ॥ १० ॥ वनानि क्षुद्रवनानि । गहनानि महावनानि । सागरान्ताः समुद्रतीराणि ॥ ११ ॥ लताविततसंतताः लताभिर्वितताः व्याप्ताः संतताः निरन्तरा इति महागुल्मविशेषणं ॥१२॥ गहनेषु दुष्प्रवेशेषु । नाना द्वीपेष्वित्यर्थः । दुर्गेषु दुःखेनगन्तव्येषु । निम्नोन्नतेष्वित्यर्थः । अतिप्रमाणानि अतिमात्रशरीराणि । विचितानि । किमयं रावणः उत नेतीति भावः ॥ १३ ॥ उदारसत्त्वः श्रेष्ठसत्त्वोऽभिजनो वंशो यस्य स उदारसत्त्वाभिजनः । महाबलवतः पुत्र इति सीतादर्शने

शि० सर्ववानराः दिवसंविचित्य पृथक्पृथग्गत्वाअन्वीक्ष्य । निशाकालेषुमेदिन्यां सर्वसंमतिविषयीभूतभूमौ । समायान्ति सङ्घीभूयप्राप्नुवन्ति ॥ ४ ॥ **ती०** तेवानराःसर्वेष्वहस्सु दिवसेषु । सीतांविचित्य सर्वर्तुकान् सार्वकालिकपुष्पफलयुक्तान् । सफलान् तत्तत्कालीनफलयुक्तांश्चद्रुमानासाद्य फलादिभक्षणार्थं ॥ **ति०** सर्वर्तुकान् नित्यसंनिहितसर्वर्तुयुक्तान् । तादृशवृक्षवत्त्वंच देशस्यरामप्रसादात् ॥ ५ ॥ **स०** महाबलइत्यनेन विनतगतदिशिनसीतास्तीतिसूचयति ॥ ७ ॥ **शि०** विविच्य विचित्य ॥ ८ ॥ **ति०** सागरान्ताः सागरमध्यवर्तिद्वीपाः ॥ ११ ॥ **ति०** लताविततैः लताप्रतानैः । संतताः समन्ताद्व्याप्ताः । तादृशामहागुल्माः लतागृहविशेषाः ॥ १२ ॥ **शि०** सत्वानि अन्वेषणप्रतिबन्धकीभूतप्राणिजातानि । हतानिविचितानिच ॥ १३ ॥ **स०** यांदिशं

[पा०] १ क. ख. घ. समाख्यातान्. २ क. ख. घ. वानरपुङ्गवाः. ३ क. च. छ. ज. ञ. ट. तत्रदेशान्विचिन्वन्ति. ४ ख.—ट. सर्वर्तुकांश्चदेशेषु. ५ ख. ग. छ.—ढ. सफलद्रुमान्. ६ ख. प्रस्रवणाचले. ७ ङ. च. ज. ञ. ट. कपिकुञ्जराः. ८ घ. विचित्यच. ९ घ. महाकपिः. १० ङ.—ट. दिशमप्युत्तरां. ख. उत्तरांतु. ११ क. ग. सीतां. १२ च.—झ. ट. विविच्य. १३ ङ. च. ज.—ट. पूर्णंतु. १४ ग. नगराणिच. १५ क. ग. सागराश्चैव. १६ ख. ग. जनपदास्तथा. १७ घ. विविधाः सर्वाःसशैलवनकाननाः. ग. ङ.—ट. विचितास्सर्वायाश्चतेपरिकीर्तिताः. क. विचितास्सर्वाःसशैलवनकाननाः. १८ इदमर्धं क.—ट. पाठेपुदृश्यते. १९ ञ.—ट. हनूमान्समैथिलींज्ञास्यति.

दिशं तु यामेव [1]गता तु सीता [2]तामास्थितो वायुसुतो हनूमान् ॥ १४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

हनुमता ताराङ्गदादिभिस्सह विन्ध्यगुहागहनादिषुतत्रतत्रसीतान्वेषणम् ॥ १ ॥ पुत्रनिधनपरिखिन्नकण्डुमुनिशापेन निर्जले निष्फलपुष्पादिवृक्षकेचक्कचन विजनदेशे पर्यटनपरिखिन्नैर्वानरैस्तत्र कस्यचिन्महाराक्षसस्यावलोकनम् ॥ २ ॥ अङ्गदेन मुष्टयुद्यमनपूर्वकं वानरान्प्रति साटोपमभ्यापततस्तस्य रावणबुद्ध्या तलघातेन हननम् ॥ ३ ॥ ततोगिरिगुहादिषुगवेषणेन परिश्रान्तैस्सर्वैर्वानरैः किंचिद्वृक्षमूलसमाश्रयणम् ॥ ४ ॥

सह ताराङ्गदाभ्यां तु [3]गत्वा स हनुमान्कपिः ॥ सुग्रीवेण यथोद्दिष्टं [4]तं देशमुपचक्रमे ॥ १ ॥
स तु दूरमुपागम्य सर्वैस्तैः कपिसत्तमैः ॥ [5]विचिनोति स विन्ध्यस्य गुहाश्च [6]गहनानि च ॥ २ ॥
[7]पर्वताग्रान्नदीदुर्गान्सरांसि [8]विपुलान्द्रुमान् ॥ वृक्षषण्डांश्च विविधान्पर्वतान्[9]घनपादपान् ॥ ३ ॥
[10]अन्वेषमाणास्ते सर्वे वानराः सर्वतोदिशम् ॥ न सीतां [11]ददृशुर्वीरा मैथिलीं जनकात्मजाम् ॥ ४ ॥
ते भक्षयन्तो मूलानि फलानि [12]विविधानि च ॥ [13]अन्वेषमाणा दुर्धर्षा [14]न्यवसंस्तत्र[15]तत्र ह ॥
[16]स तु देशो दुरन्वेषो गुहागहनवान्महान् ॥ ५ ॥
निर्जलं निर्जनं शून्यं गहनं रोम[17]हर्षणम् ॥ त्यक्त्वा तु तं [18]तदा देशं सर्वे वै हरियूथपाः ॥ ६ ॥
तादृशान्यप्यरण्यानि विचित्य भृशपीडिताः ॥ देशमन्यं दुराधर्षं विविशुश्चाकुतोभयाः ॥ ७ ॥
यत्र वन्ध्यफला वृक्षा विपुष्पाः पर्णवर्जिताः ॥ निस्तोयाः सरितो यत्र मूलं यत्र सुदुर्लभम् ॥ ८ ॥

प्रथमो हेतुः । महात्मा महाधैर्य इति द्वितीयः । दिशंत्वित्यादिना तृतीयो हेतुः । इत्यब्रुवन्वानरा इति पूर्वेणान्वयः ॥ १४ ॥ अस्मिन्सर्गे चतुर्दश श्लोकाः ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

अथ सीतान्वेषणाय दक्षिणां दिशं गतानामसुरनिरसनपर्यन्तोवृत्तान्तोष्टचत्वारिंशे—सह ताराङ्गदाभ्यामित्यादि ॥ १—२ ॥ पर्वताग्रान् विन्ध्याग्रप्रदेशान् । पर्वतान् पर्यन्तपर्वतान् ॥ ३—७ ॥ वन्ध्यफलाः

गतासीतेत्यनेन मनःपूर्वंरक्षःक्षयायैवगता नतुस्वासामर्थ्येननीतेतिध्वनयति । अन्यथा नीतेत्यवक्ष्यत् ॥ १४ ॥ इतिसप्तचत्वारिंशः सर्गः ॥ ४७ ॥

ती० पर्वतान् विन्ध्यस्यप्रत्यन्तपर्वतान् गोमन्तत्र्यंबकादीन् । घनपादपानितिसर्वत्रविशेषणं । **स०** पर्वताग्रनदीदुर्गान् पर्वताग्रस्थिताश्चतानद्यश्च ताभिर्दुर्गान् दुस्साध्यगमनान्स्थलविशेषान् । विपुलद्रुमान् । दुर्गविशेषणमेतत् । वृक्षषण्डानिति सकीचकैर्न्यायेनबोध्यं । घनाः मेघाः पादपेषुवृक्षेषुयेषु । एतेन मेघमण्डलपर्यन्तमौन्नत्यंपर्वतानांद्योत्यते ॥ ३ ॥ **ति०** भृशपीडिताः निर्जलारण्यान्वेषणेनक्षुत्पिपासाभ्यांपीडिताः । सदेशः निर्जलादिदेशःयद्यपिदुरन्वेष्यः अथापितंविचित्यततस्तंदेशंत्यक्त्वाऽन्यदेशंविविशुरित्यग्रिमेणान्वयः ॥ ६–७ ॥ **स०** वन्ध्यानि पुरोङ्कुरप्ररोहाहेतवः फलानियेषांते । वन्ध्यानि नीरसानिफलानियेषामितिवा ।

[पा०] १ क. घ. गताहि. २ ख. घ. तांप्रस्थितो. ३ ख. घ. सगत्वा. क. संगम्य. ङ.—ट. सहसा. ४ क. ख. ग. तंप्रदेशंप्रचक्रमे. ङ.—ट. गन्तुंदेशंप्रचक्रमे. घ. तंतंदेशंप्रचक्रमे. ५ ङ.—ट. ततोविचित्यविन्ध्यस्य. ६ ग. विपिनानिच. ७ ङ. च. छ. झ. ञ. ट. पर्वताग्रनदी. ८ क. ङ.—ट. विपुलद्रुमान्. ग. विपुलानिच. ९ क. ग. ङ. झ. ञ. ट. न्वनपादपान्. १० ख. अवेक्षमाणास्ते. ११ ख. ददृशुस्सर्वे. १२ ङ.—झ. ट. विविधान्यपि. १३ इदमर्धं क. ग. ङ.—ञ. पाठेषुनदृश्यते. १४ क. निवसन्तस्ततस्ततः. १५ ङ. च. ज. तत्रतु. ट. तत्रहि. १६ सतुदेशोदुरन्वेषो. निर्जलंनिर्जनं. त्यक्त्वातुतंतदा. तादृशान्यप्यरण्यानि. इत्यर्धचतुष्टयं क. ग. ङ.—ञ. पाठेषु. निर्जलंनिर्जनं. तादृशान्यप्यरण्यानि. सदेशश्चदुरन्वेषो. त्यक्त्वातुतंततो. इतिक्रमभेदेनदृश्यते. ङ. झ. ञ. सदेशश्चदुरन्वेष्यो. १७ ग. ङ.—ञ. घोरदर्शनं. १८ ग. झ. ञ. ट. ततो. क. तथा.

न सन्ति महिषा यत्र न मृगा न च हस्तिनः ॥ शार्दूलाः पक्षिणो वापि ये चान्ये वनगोचराः ॥
न यत्र वृक्षा नौषध्यो न [1]लता नापि वीरुधः ॥ ९ ॥
स्निग्धपत्राः स्थले यत्र पद्मिन्यः फुल्लपङ्कजाः ॥ प्रेक्षणीयाः सुगन्धाश्च [2]भ्रमरैश्चापि वर्जिताः ॥१०॥
कण्डुर्नाममहाभागः सत्यवादी तपोधनः ॥ महर्षिः परमामर्षी नियमैर्दुष्प्रधर्षणः ॥ ११ ॥
तस्य तस्मिन्वने पुत्रो [3]बालः षोडशवार्षिकः ॥ प्रनष्टो जीवितान्ताय [4]क्रुद्धस्तत्र महामुनिः ॥ १२ ॥
तेन धर्मात्मना शप्तं कृत्स्नं तत्र [5]महद्वनम् ॥ अशरण्यं दुराधर्षं [6]मृगपक्षिविवर्जितम् ॥ १३ ॥
तस्य ते [7]काननान्तांश्च गिरीणां कन्दराणि च ॥ [8]प्रभवानि नदीनां च विचिन्वन्ति समाहिताः ॥१४॥
तत्र चापि महात्मानो नापश्यञ्जनकात्मजाम् ॥ हर्तारं रावणं [9]वापि सुग्रीवप्रियकारिणः ॥ १५ ॥
ते [10]प्रविश्याशु तं भीमं लतागुल्मसमावृतम् ॥ [11]ददृशुः क्रूरकर्माणम[12]सुरं [13]सुरनिर्भयम् ॥ १६ ॥
तं दृष्ट्वा वानरा [14]घोरं स्थितं शैलमि[15]वापरम् ॥ गाढं परिहिताः सर्वे दृष्ट्वा तं पर्वतोपमम् ॥ १७ ॥
सोपि [16]तान्वानरान्सर्वान्नष्टाः स्थेत्यब्रवीद्बली ॥ अभ्यधावत संक्रुद्धो मुष्टिमुद्यम्य [17]संहितम् ॥ १८ ॥
तमापतन्तं सहसा वालिपुत्रोऽङ्गदस्तदा ॥ रावणोयमिति ज्ञात्वा तलेनाभिजघान ह ॥ १९ ॥
स वालिपुत्राभिहतो वक्त्राच्छोणितमुद्वमन् ॥ [18]असुरोऽभ्यपतद्भूमौ पर्यस्त इव पर्वतः ॥ २० ॥
[19]तेपि तस्मिन्निरुच्छ्वासे वानरा जितकाशिनः ॥ [20]व्यचिन्वन्प्रायशस्तत्र सर्वं [21]तद्गिरिगह्वरम् ॥२१॥

फलैर्वन्ध्याः । निष्फला इत्यर्थः ॥ ८—९ ॥ स्निग्धपत्रा इत्यादि । अत्रापि न सन्तीत्यनुषज्यत इति केचित् । तन्न । भ्रमरैश्चापि वर्जिता इत्यस्यानन्वयात् । किंतु भ्रमरैरप्यनुपभुक्तं स्थलपद्मिनीमात्रमित्यर्थः । सर्वेपि महातटाकाः स्थलपद्मिनीत्वंगता इतिभावः । अन्यं देशं विविशुरिति पूर्वेणान्वयः ॥ १० ॥ देशस्य तादृशत्वे निमित्तमृषिरित्याह—कण्डुरित्यादिना॥११॥ तत्र वने विषये । जीवितान्ताय तस्य नाशाय कुपितः ॥ १२ ॥ अशरण्यं अनाश्रयं । अभवदिति शेषः ॥ १३ ॥ नदीनां प्रभवानि गिरिगणमध्यप्रदेशाः ॥ १४—१५ ॥ सुरनिर्भयं सुरेभ्यो निर्भयं ॥ १६ ॥ गाढं परिहिताः दृढं परिहितवसनाः । अभवन ॥ १७॥ संहितं दृढमित्यर्थः ॥ १८—१९ ॥ पर्यस्तः पातितः ॥ २० ॥ तस्मिन् असुरे । निरुच्छ्वासे मृत इत्यर्थः । तस्मिन्नसुरे रावणभ्रान्त्या तत्समीपवने

अथवा वन्ध्यानांफलमिवफलंयेषांते । अनुत्पन्नफलाइतियावत् ॥८॥ **स०** वनगोचराः वनविषयाः । यद्वा वनगौः वनभूमिः तत्रचरन्तीतितथा । **स०** वल्ल्यः वृक्षालिङ्गिताः । वीरुधः स्थललताः ॥९॥ **स०** शापानन्तरमित्यत्र शापात्पूर्वमित्युत्तरत्र स्निग्धपत्राइत्यादौ चशेषोज्ञेयः । नेत्यनुकर्षकृत्वाव्याख्यानं पद्मिनीमहत्त्वकथनाननुगुणमित्यनादरणीयं । भ्रमरैश्च विवर्जिताः वर्जितविरुद्धाः विवर्जिताः अत्यक्ताइत्यर्थः । अथवागतैः एकप्रसूनरसपानतुन्दिलैरिन्दिन्दिरैर्विवर्जिताः सुगन्धाः सुगन्धयःसुगन्धाः सुगन्धद्रव्याणि । पृथग्विशेष्यं । अतो "गन्धस्येत्—" इतीत्वंकथंनेतिशङ्कानवकाशः ॥ १० ॥ **ति०** यत्रस्थले नेत्यनुकर्षः । भ्रमरैश्चविवर्जिताः विगतंवर्जितंयासुताः संयुक्ताइत्यर्थः । तादृशाःफुल्लपङ्कजाश्चयत्रनसन्ति । यत्रवनेकण्डुर्नाममहर्षिरासीत् ॥ ११ ॥ **शि०** जीवितान्ताय वनप्रध्वंसाय ॥ १२ ॥ **ती०** नदीशब्देननिस्तोयनदीप्रदेशाउच्यन्ते । " निस्तोयाःसरितोयत्र " इतिपूर्वमभिधानात् ॥ **विषम०** प्रभूतानि उत्पत्तिस्थानानि ॥ १४ ॥ **स०** सुरनिर्भयं निर्गताभीर्यस्यसतथा । सुरेभ्योनिर्भयःसुरनिर्भयस्तं । सुनिर्भयमितिपाठः स्फुटार्थः । नकेवलंकर्मणासुरप्रायत्वादसुरोऽयं । अपितुपितुरपितज्जातित्वमित्याह—**आसुरमिति** । असुरस्यायमासुरः "तस्येदं"

[पा०] १ क.—ट. वल्ल्यो. २ क. ख. ग. ङ.—ट. भ्रमरैश्चविवर्जिताः. ३ क.—ट. बालकोदशवार्षिकः. ४ छ. झ. ट. क्रुद्धस्तेन. ५ ग. महावनं. ६ ग. कृत्स्नंपक्षि. ७ ज. काननेतांतु. ख. काननंतत्तु. छ. झ. ञ. ट. काननान्तांस्तु. ८ च. ज. ञ. प्रभूतानि. ९ ङ. च. ज. ञ. ट. चापि. १० ख. ङ.—ट. प्रविश्यतु. ११ ङ.—ट. ददृशुर्भीमकर्माणं. १२ ठ. मासुरं. १३ क. ख. सुरमर्दनं. १४ क. घोराः. १५ ङ.—ट. मिवासुरं. १६ क. ख. मारीचतनयोनष्टाः. ग. तान्वानरान्दृष्ट्वातिष्ठतेत्यब्रवीत्. १७ ख. संस्थितान्. क. दक्षिणं. छ. झ. ट. संगतं. १८ क. ग.—झ. ट. असुरोन्यपतत्. १९ क. ख. ग. ङ.—ट. तेतु. २० ख. व्यचिन्वन्बहुशः. ग. विचिन्त्यप्रायशः. २१ ज.—ट. तेगिरिगह्वरं.

विचितं तु ततः कृत्वा सर्वे ते काननं पुनः ॥ अन्यदेवापरं घोरं विविशुर्गिरिगह्वरम् ॥ २२ ॥
ते विचित्य पुनः खिन्ना विनिष्पत्य समागताः ॥ एकान्ते वृक्षमूले तु निषेदुर्दीनमानसाः ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

एकोनपञ्चाशः सर्गः ॥ ४९ ॥

अङ्गदेन परिश्रान्तान्वानरान्प्रति सुग्रीवस्यचण्डशासनताया अन्वेषणकालातिपातस्यच निवेदनेननिद्रातन्द्रादिवर्जयथाशक्तिपुनरन्वेषणयत्नस्य साफल्यसंभावनोक्तिः ॥ १ ॥ गन्धमादनेन तदनुमोदनपूर्वकं तद्वचनस्यहितत्वोक्तौ सर्वैःपुनरुत्थानेन रजतगिरिगुहादिषुगवेषणम् ॥ २ ॥ पुनःसीतायाअदर्शनेन पिपासादिनाच परिश्रान्तैःसर्वैर्वृक्षमूलेकिंचिद्विश्रमपूर्वकं पुनरन्वेषणायप्रस्थानम् ॥ ३ ॥

अथाङ्गदस्तदा सर्वान्वानरानिदमब्रवीत् ॥ परिश्रान्तो महाप्राज्ञः समाश्वस्य शनैर्वचः ॥ १ ॥
वनानि गिरयो नद्यो दुर्गाणि गहनानि च ॥ दर्यो गिरिगुहाश्चैव विचितानि समन्ततः ॥ २ ॥
तत्रतत्र सहास्माभिर्जानकी न च दृश्यते ॥ तद्वा रक्षो हृता येन सीता सुरसुतोपमा ॥ ३ ॥
कालश्च वो महान्यातः सुग्रीवश्चोग्रशासनः ॥ तस्माद्भवन्तः सहिता विचिन्वन्तु समन्ततः ॥ ४ ॥
विहाय तन्द्रीं शोकं च निद्रां चैव समुत्थिताम् ॥ विचिनुध्वं यथा सीतां पश्यामो जनकात्मजाम् ॥५॥
अनिर्वेदं च दाक्ष्यं च मनसश्चापराजयः ॥ कार्यसिद्धिकराण्याहुस्तस्मादेतद्ब्रवीम्यहम् ॥ ६ ॥
अद्यापि तद्वनं दुर्गं विचिन्वन्तु वनौकसः ॥ खेदं त्यक्त्वा पुनः सर्वैर्वनमेतद्विचीयताम् ॥ ७ ॥
अवश्यं क्रियमाणस्य दृश्यते कर्मणः फलम् ॥ अलं निर्वेदमागम्य नहि नो मीलनं क्षमम् ॥ ८ ॥
सुग्रीवः कोपनो राजा तीक्ष्णदण्डश्च वानरः ॥ भेतव्यं तस्य सततं रामस्य च महात्मनः ॥ ९ ॥

चिरमन्वेषितवन्त इति बोध्यं ॥ २१ ॥ अपरं अदूरं । "परं दूरान्यमुख्येषु" इति वैजयन्ती । गिरिगह्वरं गिरिमध्यप्रदेशं ॥ २२ ॥ विनिष्पत्य विनिर्गत्य । समागताः संघीभूताः ॥२३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने अष्टचत्वारिंशः सर्गः ॥४८॥

अथ पुनः प्रदेशान्तरान्वेषणमेकोनपञ्चाशे—अथाङ्गद इत्यादि ॥ १—२ ॥ सह युगपत् ॥३—५॥ दाक्ष्यं उत्साहः । "दक्ष उत्साहे" इत्युक्तेः । मनसश्चापराजयः धैर्यमित्यर्थः ॥ ६ ॥ वनमेतत् । विचीयतां अन्विष्यतां ॥७ ॥ मीलनं नेत्रमीलनं । कर्तव्यमकृत्वा

इत्यर्थः ॥ १६ ॥ स० अपरं अनुत्तमं समीपवर्तिवा ॥ २२ ॥ इत्यष्टचत्वारिंशःसर्गः ॥ ४८ ॥

ति० रक्षः तद्रूपोपहर्तेत्याद्यर्थः ॥ स० रक्षस्सुराक्षसेषुतन्मध्यइतियावत् । अपहर्ताकश्चिद्राक्षसः । यद्वा रक्षः राक्षसः । अपहर्ता अन्यःकोपि । अत्रच अपहर्त्रितिविपरिणतमन्वेति । तथैवदुष्कृतिचेति ॥ ३ ॥ ति० अनिर्वेदं अखेदं ॥ दाक्ष्यं सामर्थ्यं अपराजयं कार्यापराङ्मुखत्वं ॥ स० अनिर्वेदं अभिसंधित्सितकार्यसाधनानौदासीन्यं ॥ ६ ॥ रामानु० विचयप्रकारमेवाह—खेदमिति । विचिन्वतामिति चिनोतेर्लोटिप्रथमपुरुषबहुवचनेरूपं । विचीयतामितिपाठे युष्माभिरितिशेषः ॥ स० पार्श्वद्वयस्थितान्कपीन्पृथक्पृथगन्वशासदित्याह—अद्यापीति । हेवनौकसोभवन्तः वनंसर्वमेवविचिन्वन्तु । पुनः। तदितरेभवन्तोपिसर्वमेववनं विचिन्वतां। "पुनरप्रथमेव्यावृत्तौ" इत्यभिधानात् ॥ शि० विचिन्वतां अन्वेषणसाधकानांकरचरणादीनां । खेदं श्रमं । त्यक्त्वा विस्मृत्य । अद्यापीदंवनंविचिन्वन्तु ॥७॥ ति० नोन्मीलनं अनुन्मीलनं अनुद्योगइतियावत् ॥८॥ इत्येकोनपञ्चाशः सर्गः ॥४९॥

[पा०] १ क. च.—ट. सर्वे. २ ङ.—ट. काननौकसः. ३ ख. घ. समाहिताः. ४ ख. ग. ङ.—ज. ञ. वृक्षमूलेषु. ५ ङ. च. ज. ञ. परिश्रान्तान्महाप्राज्ञान्. ६ क. ख. घ.—ट. समाश्वास्य. ग. समाश्वास्यचसर्वशः. ७ क. ख. ग. ङ.—ट. दरीगिरिगुहाः. ८ छ. झ. ट. ठ. तथारक्षोपहर्ताचसीतायाश्चैवदुष्कृती. ङ. ञ. तत्ररक्षो. ९ क. ख. ग. ङ.—ट. कालश्चनो. १० क्ष सहसा. ११ क. निद्रांचसमुपस्थितां. १२ च.—ट. तथा. १३ ग.—ट. मनसश्चापराजयं. क. मानसंचापराजितं. १४ क. ख. घ. च.—ट. अद्यापीदंवनं. ग. अद्यान्यद्वनं. १५ ख. घ.—ट. सर्ववनमेवविचिन्वतां. क. ग. सर्ववनमेतद्विचिन्वतां. १६ छ. झ. ट. परंनिर्वेदं. १७ ख. घ. च.—ट. नोन्मीलनं. १८ क. ङ.—ट. क्रोधनो. १९ क. ख. घ. छ. ज. झ. वानराः.

[1]हितार्थमेतदुक्तं वः क्रियतां यदि रोचते ॥ [2]उच्यतां वा क्षमं यन्नः सर्वेषामेव वानराः ॥ १० ॥
अङ्गदस्य वचः श्रुत्वा वचनं गन्धमादनः ॥ [3]उवाचाव्यक्तया वाचा पिपासाश्रमखिन्नया ॥ ११ ॥
सदृशं खलु वो वाक्यमङ्गदो यदुवाच ह ॥ हितं [4]चैवानुकूलं च क्रियतामस्य भाषितम् ॥ १२ ॥
पुनर्मार्गामहै शैलान्कन्दरांश्च [5]दरींस्तथा ॥ काननानि च शून्यानि गिरिप्रस्रवणानि च ॥ १३ ॥
यथोद्दिष्टानि सर्वाणि सुग्रीवेण महात्मना ॥ विचिन्वन्तु [6]वनं सर्वे गिरिदुर्गाणि [7]सर्वशः ॥ १४ ॥
ततः समुत्थाय पुनर्वानरास्ते महाबलाः ॥ विन्ध्यकानन[8]संकीर्णां विचेरुर्दक्षिणां दिशम् ॥ १५ ॥
ते शारदाभ्रप्रतिमं श्रीमद्रजतपर्वतम् ॥ शृङ्गवन्तं दरीमन्तमधिरुह्य च वानराः ॥ १६ ॥
तत्र [9]कोद्रवनं रम्यं सप्तपर्णवनानि च ॥ [10]व्यचिन्वंस्ते हरिवराः सीतादर्शनकाङ्क्षिणः ॥ १७ ॥
तस्याग्रमधिरूढास्ते श्रान्ता विपुलविक्रमाः ॥ न पश्यन्ति स्म वैदेहीं रामस्य महिषीं प्रियाम् ॥१८॥
ते तु दृष्टिगतं [11]कृत्वा तं शैलं बहुकन्दरम् ॥ [12]अवारोहन्त हरयो [13]वीक्षमाणाः समन्ततः ॥ १९ ॥
अवरुह्य ततो भूमिं [14]श्रान्ता विगतचेतसः ॥ [15]स्थित्वा मुहूर्तं तत्राथ वृक्षमूलमुपाश्रिताः ॥ २० ॥
ते मुहूर्तं [16]समाश्वस्ताः [17]किंचिद्भग्नपरिश्रमाः ॥ पुनरेवोद्यताः कृत्स्नां मार्गितुं दक्षिणां दिशम् ॥२१॥
हनुम[18]त्प्रमुखास्ते तु प्रस्थिताः प्लवगर्षभाः ॥ विन्ध्य[19]मेवादितस्तावद्विचे[20]रुस्ते ततस्ततः ॥ २२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

पञ्चाशः सर्गः ॥ ५० ॥

विन्ध्यगुहादीनांदुरन्वेषतया तत्रान्वेषणेसत्येव सुग्रीवसंकेतितसमयातिपाते क्षुत्पिपासार्दितैर्हनुमदादिभिः ऋक्षबिलाख्यस्यकस्यचिन्महाबिलस्यावलोकनम् ॥ १ ॥ बिलद्वारे आर्द्रपक्षनानापक्षिदर्शनाज्जलानुमानेन तद्बिलस्यगाढान्धकारावृतत्वेनदुष्प्रवेशतयाऽन्योन्यहस्तावलंबनेन तत्प्रवेशः ॥ २ ॥ तथा योजनपरिमितदेशातिक्रमे काञ्चनमयवृक्षादिभासाविद्योतमानेऽद्भुतदेशे कस्याश्चिन्महातपस्विन्या अवलोकनम् ॥ ३ ॥ हनुमता साभिवादनं तांप्रति तादृशदेशस्यतस्याश्चयाथातथ्यविवित्सयाप्रश्नः ॥ ४ ॥

सह ताराङ्गदाभ्यां तु संगम्य हनुमान्कपिः ॥ विचिनोति स्म विन्ध्यस्य गुहाश्च गहनानि च ॥ १ ॥
सिंहशार्दूल[21]जुष्टेषु [22]शिलाश्च सरितस्तथा ॥ विषमेषु नगेन्द्रस्य महाप्रस्रवणेषु च ॥ २ ॥
आसेदुस्तस्य शैलस्य कोटिं दक्षिणपश्चिमाम् ॥ तेषां तत्रैव वसतां स [23]कालो व्यत्यवर्तत ॥ ३ ॥

तूष्णींभाव इत्यर्थः ॥ ८—१२ ॥ कन्दरान् भेदान् ॥ १३ ॥ विचिन्वन्तु वनं सर्व इति । भवन्त इति शेषः ॥ १४—२२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकोनपञ्चाशः सर्गः ॥ ४९ ॥

अथ ऋक्षबिले स्वयंप्रभादर्शनं पञ्चाशे—सहेत्यादि ॥ १ ॥ नगेन्द्रस्य शार्दूलजुष्टेषु । विषमेषु विषमप्रदेशेषु । शिलाः । महाप्रस्रवणेषु सरितश्च विचिनोति स्मेति पूर्वेणान्वयः ॥ २ ॥ कलः सुग्रीवोक्तमासः । " मासः पूर्णो बिलस्थानां " इत्युत्तरत्राङ्गदवचनस्य

स० कोटिं अग्रभागं । " कोटिःस्यादग्रमात्रेपि " इतिकेशवः ॥ शि० दक्षिणपश्चिमां नैर्ऋत्यकोणस्थां । कोटिं शृङ्गं आसेदुः

[पा०] १ ग. यथार्थं. २ ग. च.—ट. उच्यतांहिक्षमंयत्तत्. ३ ख. ग. घ. छ. ज. झ. उवाचव्यक्तया. ४ ख. चैवानुरूपं. ५ छ. झ. ट. शिलास्तथा. ६ ट. वने. ७ छ. ज. ञ. ट. संगताः. ८ घ. संपूर्णां. ९ क.—ट. लोध्रवनं. १० ङ. छ.—ट. विचिन्वन्तो. क. ख. ग. विचिन्वन्तिस्महरयः. ११ ङ.—ज. ञ. ट. दृष्ट्वा. ग. गत्वा. १२ छ. झ. ट. अध्यारोहन्त. १३ ख. घ. वीक्षमाणास्ततस्ततः. १४ ङ—ञ. भ्रान्ताः. १५ ङ.—ज. ञ. ट. स्थितामुहूर्तं. १६ क. समायस्ताः. १७ क. किंचिद्गतपरिश्रमाः. १८ छ. झ. ञ. ट. त्प्रमुखास्तावत्. ख. त्प्रमुखास्तत्र. १९ ग. ङ.—ट. मेवादितःकृत्वा. २० ङ—ट. द्विचेरुश्चसमन्ततः. २१ ङ.—ट. जुष्टाश्च. २२ ङ. छ.—ट. गुहाश्चपरितस्तथा. च. गुहाश्चसरितस्तदा. २३ ग.—च. ज. कालोप्यत्यवर्तत.

स हि देशो दुरन्वेषो गुहागहनवान्महान् ॥ ४ ॥
तत्र वायुसुतः सर्वं विचिनोति स पर्वतम् ॥ परस्परेण [1]हनुमानन्योन्यस्याविदूरतः ॥ ५ ॥
गजो गवाक्षो गवयः शरभो गन्धमादनः ॥ मैन्दश्च द्विविदश्चैव [2]सुषेणो जांबवान्नलः ॥ ६ ॥
अङ्गदो युवराजश्च तारश्च वनगोचरः ॥ गिरिजालावृतान्देशान्मार्गित्वा दक्षिणां दिशम् ॥
विचिन्वन्तस्ततस्तत्र ददृशुर्विवृतं बिलम् ॥ ७ ॥
दुर्गमृक्षबिलं नाम दानवेनाभिरक्षितम् ॥ क्षुत्पिपासा[3]परीताश्च [4]श्रान्ताश्च सलिलार्थिनः ॥
अवकीर्णं लतावृक्षैर्ददृशुस्ते [5]महाबिलम् ॥ ८ ॥
तत[6]ः क्रौञ्चाश्च हंसाश्च सारसाश्चापि निष्क्रमन् ॥ जलार्द्राश्चक्रवाकाश्च रक्ताङ्गाः पद्मरेणुभिः ॥ ९ ॥
ततस्तद्बिलमासाद्य सुगन्धि दुरतिक्रमम् ॥ विस्मयव्यग्रमनसो बभूवुर्वानरर्षभाः ॥ १० ॥
संजातपरिशङ्कास्ते तद्बिलं प्लवगोत्तमाः ॥ [7]अभ्यपद्यन्नसंहृष्टास्तेजोवन्तो महाबलाः ॥ ११ ॥
[8]नानासत्वसमाकीर्णं दैत्येन्द्रनिलयोपमम् ॥ [9]दुर्दर्शमतिघोरं च [10]दुर्विगाहं च सर्वशः ॥ १२ ॥
ततः पर्वतकूटाभो हनुमा[11]न्पवनात्मजः ॥ अब्रवी[12]द्वानरान्सर्वान्कान्तारवने[13]कोविदः ॥ १३ ॥
गिरिजालावृतान्देशान्मार्गित्वा दक्षिणां दिशम् ॥ वयं सर्वे परिश्रान्ता न च पश्याम मैथिलीम् ॥१४॥
अस्माच्चापि बिलाद्धंसाः क्रौञ्चाश्च सह सारसैः ॥ जलार्द्राश्चक्रवाकाश्च निष्पतन्ति [14]स्म सर्वतः ॥१५॥
नूनं सलिलवानत्र कूपो वा यदि वा ह्रदः ॥ तथा चेमे [15]बिलद्वारे स्निग्धास्तिष्ठन्ति पादपाः ॥१६॥
इत्युक्त्वा तद्बिलं सर्वे विविशुस्तिमिरावृतम् ॥ अचन्द्रसूर्यं हरयो ददृशू रोमहर्षणम् ॥ १७ ॥

बिल एवान्यो मासो गत इत्यर्थो वक्ष्यते ॥ ३ ॥ ननु विचेतव्यप्रदेशेषु बहुषु विद्यमानेषु कथमत्रैव मासं क्षपितवन्त इत्याशङ्क्याह—स हीति ॥ ४ ॥ तत्रेति ॥ सङ्गमय्येत्यध्याहार्यं । वायुसुतः हनुमान् । अन्योन्यस्याविदूरतः परस्परेण संगमय्य सर्वं पर्वतं विचिनोति स्मेति संबन्धः ॥ ५ ॥ गज इत्यादि ॥ चकाराद्धनूमांश्च । गजादयः गिरिजालावृतान् देशान्मार्गित्वा ततो दक्षिणां दिशं विचिन्वन्तः तत्र विवृतं विस्तृतं । बिलं ददृशुरिति संबन्धः ॥ ६—७ ॥ दानवेन मयेन । ऋक्षबिलं नाम ऋक्षबिलमिति प्रसिद्धं । महाबिलं ददृशुरिति पुनरुक्तिर्गुणान्तरविधानाय ॥ ८ ॥ निष्क्रमन् निरक्रमन् ॥ ९ ॥ दुरतिक्रमं दुष्प्रवेशं ॥ १० ॥ संजातपरिशङ्काः किमिदं पातालं उतान्यन्मायामयमिति संदिहानाः । असंहृष्टाः सन्तः । अभ्यपद्यन् अभ्यपद्यन्त ॥ ११ ॥ नानेति श्लोको बिलविशेषणं ॥ १२ ॥ कान्तारे दुर्गमार्गे वने कोविदः समर्थः ॥ १३ ॥ गिरिजालावृतान् देशान् दक्षिणां दिशं । तादृशदेशरूपां दक्षिणां दिशमित्यर्थः ॥ १४—१५ ॥ नूनमिति । अस्तीति शेषः ॥ १६ ॥ इत्युक्त्वेति ॥ हनुमदुक्तप्रकारेण सर्वेष्युक्त्वा विविशुः । तिमिरावृतं ददृशुश्च । अचन्द्रसूर्यं चन्द्रसूर्यकिर-

---

तत्रैवश्रृङ्गेवसतांतेषां सः अमार्गणीयः कालः रात्रिसमयः । अत्यवर्तत व्यतीतोऽभवत् ॥ ३ ॥ **ती०** दुर्गं दुर्गमं । दानवेन मयेनबिलस्यविशिष्टतांद्योतयितुंददृशुरितिपुनरभिधानं ॥ **स०** बिलंसामान्यंददृशुः । महाबिलं तदन्तरसुसाधगमनंचददृशुः । अतोनपुनरुक्तिः ॥ ८ ॥ **ति०** संजातपरिशङ्काः संजातजलसंभावनाः । अतएवसंहृष्टाः । **स०** तेजोवन्तः तेजस्विनः । " अस्माया—" इतिविन्यभावआर्षः । यद्वा तेजः स्वसामर्थ्यं अवन्तीतितेतथा । स्वशक्तिसंरक्षकाइत्यर्थः । विस्तरस्तुसुधागतयशोवतेतिटिप्पणीतोऽवसेयः ॥ ११ ॥ **स०** दैत्येन्द्रनिलयोपमं बलिनिलयतुल्यं ॥ १२ ॥

[**पा०**] १ ङ. छ. झ. ञ. ट. रहिताअन्योन्यस्या. २ ख.—च. ज. ञ. हनूमाञ्जांबवान्नलः. छ. झ. ट. हनूमाञ्जांबवानपि. क. हनूमान्पवनात्मजः. ३ ख. ग. ङ.—ट. परीतास्तु. ४ घ. ङ.—ट. श्रान्तास्तु. ५ ख. महद्बिलं. ६ ख. ग. ङ—ट. तत्र. ७ क. ख. ग. ङ.—ट. अभ्यपद्यन्तसंहृष्टाः. ८ ङ. च. ज. ञ. महासर्पसमाकीर्णं. ९ छ. झ. ट. दुर्दर्शमिव. १० क. ग. ङ.—ट. दुर्विगाह्यंच. ११ क. ग. ङ.—ट. न्मारुतात्मजः. १२ छ. ज. झ. ट. द्वानरान्घोरान्. १३ च. कोविदान्. १४ ख. ग. ङ. च. ज. ञ. ट. चसर्वशः. क. छ. झ. स्मसर्वशः. १५ च. ञ. ट. बिलद्वारि.

निशाम्य तस्मात्सिंहांश्च तांस्तांश्च मृगपक्षिणः ॥ प्रविष्टा हरिशार्दूला बिलं तिमिरसंवृतम् ॥ १८ ॥
न तेषां सज्जते चक्षुर्न तेजो न पराक्रमः ॥ वायोरिव गतिस्तेषां दृष्टिस्तमसि वर्तते ॥ १९ ॥
ते प्रविष्टास्तु वेगेन तद्बिलं कपिकुञ्जराः ॥ प्रकाशमभिरामं च ददृशुर्देशमुत्तमम् ॥ २० ॥
ततस्तस्मिन्बिले दुर्गे नानापादपसंकुले ॥ अन्योन्यं संपरिष्वज्य जग्मुर्योजनमन्तरम् ॥ २१ ॥
ते नष्टसंज्ञास्तृषिताः संभ्रान्ताः सलिलार्थिनः ॥ परिपेतुर्बिले तस्मिन्कंचित्कालमतन्द्रिताः ॥ २२ ॥
ते कृशा दीनवदनाः परिश्रान्ताः प्लवङ्गमाः ॥ आलोकं ददृशुर्वीरा निराशा जीविते तदा ॥ २३ ॥
ततस्तं देशमागम्य सौम्यं वितिमिरं वनम् ॥ ददृशुः काञ्चनान्वृक्षान्दीप्तवैश्वानरप्रभान् ॥ २४ ॥
सालांस्तालांश्च पुन्नागान्ककुभान्वञ्जुलान्धवान् ॥ चंपकान्नागवृक्षांश्च कर्णिकारांश्च पुष्पितान् ॥२५॥
स्तबकैः काञ्चनैश्चित्रै रक्तैः किसलयैस्तथा ॥ आपीडैश्च लताभिश्च हेमाभरणभूषितान् ॥ २६ ॥
तरुणादित्यसंकाशान्वैडूर्यकृतवेदिकान् ॥ विभ्राजमानान्वपुषा पादपांश्च हिरण्मयान् ॥ २७ ॥
नीलवैडूर्यवर्णाश्च पद्मिनीः पतगावृताः ॥ महद्भिः काञ्चनैः पद्मैर्वृता बालार्कसन्निभैः ॥ २८ ॥
जातरूपमयैर्मत्स्यैर्महद्भिश्च सकच्छपैः ॥ नलिनीस्तत्र ददृशुः प्रसन्नसलिलावृताः ॥ २९ ॥
काञ्चनानि विमानानि राजतानि तथैव च ॥ तपनीयगवाक्षाणि मुक्ताजालावृतानि च ॥ ३० ॥
हैमराजतभौमानि वैडूर्यमणिमन्ति च ॥ ददृशुस्तत्र हरयो गृहमुख्यानि सर्वशः ॥ ३१ ॥
पुष्पितान्फलिनो वृक्षान्प्रवालमणिसन्निभान् ॥ काञ्चनभ्रमरांश्चैव मधूनि च समन्ततः ॥ ३२ ॥
मणिकाञ्चनचित्राणि शयनान्यासनानि च ॥ महार्हाणि च यानानि ददृशुस्ते समन्ततः ॥ ३३ ॥
हैमराजतकांस्यानां भाजनानां च संचयान् ॥ अगरूणां च दिव्यानां चन्दनानां च संचयान् ॥३४॥

णरहितं ॥ १७ ॥ तस्मान्निर्गच्छतः सिंहान् तांस्तान् नानाप्रकारान् मृगपक्षिणश्च ॥ १८ ॥ वर्तते अयत्नपूर्वं प्रवर्तत इत्यर्थः ॥ १९ ॥ प्रकाशं निस्तमस्कं ॥ २० ॥ संग्रहेणोक्तं प्रपञ्चयति—ततस्तस्मिन्नित्यादिना ॥ अन्योन्यं संपरिष्वज्य अन्योन्यं हस्तावलंबनं कृत्वा ॥ २१ ॥ परिपेतुः जग्मुः । कंचित्कालमित्यत्यन्तसंयोगे द्वितीया ॥ २२ ॥ आलोकं प्रकाशं ॥ २३—२५ ॥ आपीडैः शेखरैः लताभिश्च । उपशोभितानिति शेषः । हेमाभरणभूषितान् फलितहेमाभरणान् ॥ २६ ॥ पादपांश्च हिरण्मयान् रजतमयांश्च वृक्षान् ॥ २७ ॥ नीलवैडूर्येत्यादि श्लोकद्वयमेकान्वयं । उक्तविशेषणविशिष्टाः पद्मिनीः उक्तविशेषणयुक्ता नलिनीश्च ददृशुरित्यन्वयः । अतो न पुनरुक्तिः ॥ २८—२९ ॥ काञ्चनानीत्यादि ॥ हैमराजतभौमानीति

रामानु० तेजः प्रभावः । " तेजः प्रभावेदीप्तौच " इतिविश्वः ॥ ति० नसज्जते नप्रतिबध्यते । अन्येतु तेषांदृष्टिर्नसज्जते तत्रत्यपदार्थेष्वितिशेषः । तिमिरावृतत्वात् । अतएवतेजःपराक्रमयोरपिकुण्ठितगमनं । यद्यपिवायोरिवगतिः तथापियतोदृष्टिस्तमसिप्रतिबद्धावर्तते अतोवेगेनपरस्परहस्तग्रहणपूर्वकंप्रविष्टाइत्यर्थः । अतएव "गृह्यहस्तैःपरस्परं" इत्यग्रेहनुमदुक्तिरित्याहुः ॥ १९ ॥ ति० अन्योन्यंसंपरिष्वज्य तिमिरदेशविनिर्गमजसन्तोषवशादितिशेषः । यद्वा अन्योन्यंहस्तावलंबनंकृत्वा हस्तेनपरस्परस्योरआदिसम्यग्धृत्वेतियावत् ॥ २१ ॥ शि० ते वानराः तस्मिन्बिलेपरिपेतुः । अतएवकंचित्कालं अतन्द्रिताः अभवन्नितिशेषः ॥ २२ ॥ ति० आलोकमेवददृशुर्नतुजलं । जीवितेनिराशायदाबभूवुस्तदोच्यमानलक्षणंदेशमागम्य काञ्चनान्वृक्षांश्चददृशुः । यद्वाजीविते निराशाबभूवुः तदाभगवत्कृपयालोकंददृशुः उच्यमानविशेषणेदेशेकाञ्चनान्वृक्षान्ददृशुः ॥ २३ ॥

[पा०] १ ख. व्याघ्रांश्चमृग. २ ख. विद्यते. ३ छ. झ. ट. दृष्टिः. ४ ख. प्रविष्टास्स. ५ छ. झ. ट. प्रकाशंचाभिरामंच. ६ छ. झ. ट. भीमे. ७ ग. छ. झ. ट. यदा. ८ ङ. च. ज. ततस्ते. ९ ङ. च. ज. ञ. सर्वे. घ. छ. झ. ट. सौम्याः. १० ग. समं. ङ. च. ज. ञ. पुनः. ११ ग. काञ्चनान्दिव्यान्. १२ घ. दीप्तान्वैश्वानर. १३ ङ.—ट. स्तालांस्तमालांश्चपुन्नागान्. क. स्तालांश्चपुन्नागान्बकुलान. १४ घ. छ. न्बकुलान्धवान्. १५ ङ. च. ज. ञ. हैमभारविभूषितान्. १६ क.—ट. वैडूर्यमय. १७ छ. झ. ट. पतगैर्वृताः. ख. प्लवगैर्युताः. १८ ट. वृक्षैर्वृताः. १९ झ. ट. महद्भिश्चाथपङ्कजैः. २० क. ग. घ. झ. ट. सलिलायुताः. २१ ग. ङ. ज.—ट. विविधानिविशालानिददृशुः. २२ ङ. छ.—ट. राशयः.

शुचीन्य[1]भ्यवहार्याणि मूलानि च फलानि च ॥ महार्हाणि च [2]पानानि मधूनि रसवन्ति च ॥३५॥
दिव्यानामम्बराणां च महार्हाणां च संचयान् ॥ कम्बलानां च चित्राणामजिनानां च संचयान् ॥३६॥
तत्र तत्र च विन्यस्तान्दीप्तान्[3]वैश्वानरप्रभान् ॥ ददृशुर्वा[4]नराः शुभ्राञ्जातरूपस्य संचयान् ॥ ३७ ॥
[5]तत्र तत्र विचिन्वन्तो बिले [6]तस्मिन्महाबलाः ॥ ददृशुर्वानराः शूराः स्त्रियं कांचिददूरतः ॥ ३८ ॥
[7]तां दृष्ट्वा भृशसंत्रस्ताश्चीरकृष्णाजिनाम्बराम् ॥ तापसीं नियताहारां ज्वलन्तीमिव तेजसा ॥ ३९ ॥
विस्मिता हरयस्तत्र [9]व्यवातिष्ठन्त सर्वशः ॥ पप्रच्छ हनुमांस्तत्र काऽसि [10]त्वं कस्य वा बिलम् ॥ ४० ॥
ततो हनूमान्गिरिसन्निकाशः कृताञ्जलिस्तामभिवाद्य वृद्धाम् ॥
पप्रच्छ का त्वं भवनं बिलं च रत्नानि हे[11]मानि वदस्व कस्य ॥ ४१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

एकपञ्चाशः सर्गः ॥ ५१ ॥

स्वयंप्रभानाम्न्यातापस्या हनुमन्तंप्रति तद्बिलनिर्माणादिवृत्तान्तकथनेनसह फलादिभक्षणादिनाश्रमापनोदनचोदनपूर्वकं वानराणांवनागमनादिकारणप्रश्नः ॥ १ ॥

इत्युक्त्वा हनुमांस्तत्र पु[12]नः कृष्णाजिनाम्बराम् ॥ अब्रवीत्तां महाभागां तापसीं धर्मचारिणीम् ॥ १ ॥
इदं प्रविष्टाः सहसा बिलं तिमिरसंवृतम् ॥ क्षुत्पिपासापरिश्रान्ताः परिखिन्नाश्च सर्वशः ॥
महद्धरण्या विवरं प्रविष्टाः स्म पिपासिताः ॥ २ ॥
इमांस्त्वेवंविधान्भावान्विविधानद्भुतोपमान् ॥ दृष्ट्वा वयं प्रव्यथिताः संभ्रान्ता [13]नष्टचेतसः ॥ ३ ॥
[14]कस्यैते काञ्चना वृक्षास्तरुणादित्यसन्निभाः ॥ शुची[15]न्यभ्यवहार्याणि मूलानि च फलानि च ॥ ४ ॥
काञ्चनानि विमानानि राजतानि गृहाणि च ॥ तपनीयगवाक्षाणि मणिजालावृतानि च ॥ ५ ॥
पुष्पिताः फलवन्तश्च पुण्याः सु[16]रभिगन्धिनः ॥ इमे जांबूनदमयाः पादपाः कस्य तेजसा ॥ ६ ॥
काञ्चनानि च पद्मानि जातानि वि[17]मले जले ॥ कथं मत्स्याश्च [18]सौवर्णाश्चरन्ति सह कच्छपैः ॥ ७ ॥

शेषः । गृहमुख्यविशेषणं वा ॥ ३०—३६ ॥ शुभ्रान् निर्मलान् ॥ ३७—३८ ॥ व्यवातिष्ठन्त दूरे स्थिता इत्यर्थः ॥ ३९—४० ॥ पप्रच्छेत्यर्धस्य विवरणं—ततोहनुमानिति ॥ अस्मिन्सर्गे सार्धैकचत्वारिंशच्छ्लोकाः ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चाशः सर्गः ॥ ५० ॥

अथ स्वयंप्रभया ऋक्षबिलवृत्तान्तोक्तिरेकपञ्चाशे—इत्युक्त्वेत्यादि ॥ १ ॥ परिखिन्नाः अध्वश्रमखिन्नाः । क्षुत्पिपासापरिश्रान्तत्वेपि पिपासैव प्रवेशहेतुरित्याशयेनोक्तं—पिपासिता इति ॥ २ ॥ भावान् पदार्थान् । प्रव्यथिताः किमिदमसुरादिमायेति संजातव्यथाः । नष्टचेतसः कर्तव्यबुद्धिरहिताः ॥ ३—४ ॥ मणिजालावृतानि रत्नमयजालकानि । जालकगवाक्षयोर्भेद

ति० यानानि शिबिकादीनि ॥३५॥ स० वदस्व वद " भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषुवदः " इत्युक्तेरात्मनेपदता । प्रकाशमानासतीवदेत्यर्थः ॥ ४१ ॥ इतिपञ्चाशःसर्गः ॥ ५० ॥

[पा०] १ झ. ञ. ट. न्यभ्यवहाराणि. २ च. माल्यानि. ङ. ज. झ. ट. यानानि. ३ ख. न्वैश्वानरोपमान्. ४ ख. वानरास्तत्रजातरूपस्य. ५ ङ. च. ज. ञ. तेपितत्र. ६ क. वने. ७ छ. झ. ट. तत्रमहाप्रभाः. ङ. च. ज. ञ. तत्रमहाप्रभां. ८ छ. झ. तांचतेददृशुस्तत्रचीर. ख. तांदृष्ट्वाहरयस्तत्रचीर. क. ग. तांदृष्ट्वावानरास्तत्रचीर. ९ ख.—ज. ञ. ट. व्यवतिष्ठन्त. १० ग. कस्यचवा. ११ क. घ.—ट. चेमानि. ख. चैतानि. १२ छ. झ. ट. चीरकृष्णाजिनांबरां. १३ नष्टचेतनाः. १४ क. ख. ग. ङ. च. ज. ञ. कस्येमे. १५ ग. ङ. च. ज.—ट. न्यभ्यवहाराणि. १६ ङ.—ट. सुरभिगन्धयः. १७ क. ख. घ. विमलोदके. १८ छ. झ. ट. सौवर्णादृश्यन्ते. क. ग. घ. सौवर्णैश्चरन्ति. ङ. च. ज. ञ. सौवर्णैःसहतिष्ठन्ति.

[1]आत्मानमनुभावं च कस्य चैतत्तपोबलम् ॥ अजानतां नः सर्वेषां सर्वमाख्यातुमर्हसि ॥ ८ ॥
एवमुक्ता हनुमता तापसी धर्मचारिणी ॥ प्रत्युवाच हनूमन्तं सर्वभूतहिते [2]रता ॥ ९ ॥
मयो नाम महातेजा मायावी [3]दानवर्षभः ॥ तेनेदं निर्मितं सर्वं मायया काञ्चनं वनम् ॥ १० ॥
पुरा दानवमुख्यानां विश्वकर्मा बभूव ह ॥ येनेदं काञ्चनं दिव्यं निर्मितं भवनोत्तमम् ॥ ११ ॥
स तु वर्षसहस्राणि तपस्तप्त्वा [4]महावने ॥ पितामहाद्वरं लेभे सर्वमौशनसं धनम् ॥ १२ ॥
[5]वनं विधाय बलवान्सर्वकामेश्वरस्तदा ॥ उवास सुखितः कालं कंचिदस्मिन्महावने ॥ १३ ॥
तमप्सरसि हेमायां सक्तं [6]दानवपुङ्गवम् ॥ विक्रम्यैवाशनिं गृह्य [7]जघानेशः पुरन्दरः ॥ १४ ॥
इदं च ब्रह्मणा दत्तं हेमायै [8]वनमुत्तमम् ॥ शाश्वताः कामभोगाश्च गृहं चेदं हिरण्मयम् ॥ १५ ॥
दुहिता मेरुसावर्णेरहं [9]तस्याः स्वयंप्रभा ॥ इदं रक्षामि भवनं हेमाया वानरोत्तम ॥ १६ ॥
मम प्रियसखी हेमा [10]नृत्तगीतविशारदा ॥ तया दत्तवरा चास्मि रक्षामि [11]भवनोत्तमम् ॥ १७ ॥
किं कार्यं कस्य वा हेतोः कान्ताराणि [12]प्रपश्यथ ॥ कथं चेदं वनं दुर्गं युष्माभि[13]रुपलक्षितम् ॥ १८ ॥
[14]इमान्यभ्यवहार्याणि मूलानि च फलानि च ॥ भुक्त्वा [15]पीत्वा च पानीयं [16]सर्वं मे वक्तु[17]मर्हथ ॥ १९ ॥
[[18]एवमुक्ते शुभे वाक्ये तापस्या धर्मसंहिते ॥ हनुमान्हरिशार्दूलः प्रत्युवाच स्वयंप्रभाम् ॥ २० ॥
अर्थिनः स तदर्थे च चर धर्ममनुत्तमम् ॥ मृगमाणान्निराहारान्संजीवय तपोधने ॥ २१ ॥
तच्छ्रुत्वा वचनं तस्य तापसी धर्मचारिणी ॥ आदाय फलमूलानि विधिनोपजहार सा ॥ २२ ॥

उक्तः ॥ ५—७ ॥ आत्मानं त्वां । अनुभावं प्रभावं । कस्य चैतत्तपोबलं तच्चेत्यर्थः ॥ ८–९ ॥ मयो नाम त्रिपुराधिपतिः त्रिपुरे नष्टे स्वरक्षणार्थमिदं बिलं कृतवानिति मात्स्यपुराणे त्रिपुरदहनप्रस्तावेभिहितं । मायया विचित्रशक्त्या । मायावी मायायुक्तः । दानवर्षभ इत्यनेन नायमसुरतक्षा मय इति सूचितं ॥१०–१३॥ तं स्वपुत्रीं मन्दोदरीं रावणाय दत्तवन्तं । एकान्ते हेमायां सक्तं विदित्वा ईशः त्रैलोक्याधिपतिः । अशनिं वज्रं गृहीत्वा जघान ॥ १४॥ मयनाशानन्तरं इदं वनं ब्रह्मणा हेमायै दत्तं ॥ १५–१६ ॥ ममेति ॥ सेदानीं ब्रह्मसदनं गतेत्याशयेनाह—नृत्तेति ॥ १७ ॥ किं कार्यं किं प्रयोजनं । कस्य हेतोः कस्मात्प्रयोजनात्

ति० कोमयइत्याशङ्क्यतत्प्रसिद्धिमाह—पुरेति । विश्वकर्मा शिल्पी । ह प्रसिद्धं ॥ ११ ॥ **ती०** औशनसंधनं विचित्रनिर्माणप्रतिपादकशिल्पशास्त्रज्ञानं । शिल्पस्योशनसाप्रणीतत्वात्तद्धनत्वव्यपदेशः ॥ **ति०** वरं विचित्रसृष्टिसामर्थ्यरूपं ॥ **स०** महत् वने इतिच्छेदः । महावनइतिपाठे वनविशेषणं । महतोवनमितिवा । अथवा आदित्यादितएवनिर्देशादनित्यताऽऽत्त्वस्यज्ञापितेति । “ तस्यैवमहत्सुखत्वात्तेषां ” इत्यादिवदात्त्वाभावे ऐकपद्यंज्ञेयं ॥ १२ ॥ **शि०** तदा वरलाभसमये । सर्वकामेश्वरः सर्वविषयनिर्माणेस्वतन्त्रः ॥ १३ ॥ **ति०** दानवपुङ्गवं अशनिंगृह्य गृहीत्वा । विक्रम्यैव युद्धंकृत्वैव । पुरन्दरोजघान । यद्यप्यसुरशिल्पीमयोनित्यइतिकथंहननंतस्य । तथापि यएवासुरशिल्पीपदस्थःसर्वोपिमयाख्यइतिप्रवाहनित्यतैवतस्येन्द्रवदितिनदोषः ॥ १४ ॥ **ती०** विचित्रनिर्माणसामर्थ्यगुणयोगादत्रब्रह्मशब्दोदानवविश्वकर्ममयवाची ॥ **ति०** तस्मिंश्चहतेइदंवनं शाश्वतःकामभोगः इदंगृहंच मयभुक्तायैहेमायैन्यायप्राप्तत्वाद्भगवताब्रह्मणादत्तमित्यर्थः । एतेनात्रब्रह्मशब्दोमयदानवपरइत्यपास्तं । हतेनदानासंभवात् ॥ १५ ॥ **शि०** मेरुसावर्णेर्दुहिताऽहं । तस्याः हेमायाः । स्वयंप्रभा तदभिधंइदंभवनं । रक्षामि वाक्यार्थस्यकर्मतयान्वयान्नद्वितीया । स्वयंप्रभाशब्दस्यमेरुसावर्णिदुहितुर्नामत्वेतु भवनमितिद्वितीयान्तमेव ॥ १६ ॥ **ति०** अभ्यवहाराणि अभ्यवहार्याणि ॥ १९ ॥ इत्येकपञ्चाशःसर्गः ॥ ५१ ॥

[**पा०**] १ ग.—ट. आत्मनस्त्वनुभावाद्वाकस्यवैतत्. २ घ. रतं. ३ छ. झ. ट. वानरर्षभ. ४ झ. ठ. महद्वने. ५ ग. ङ. च. छ. झ. ञ. ट. विधायसर्वंबलवान्. ६ क.—च. ज. ञ. दानवसत्तमं. ७ ङ. च. ज. ञ. ट. जघानसपुरन्दरः. ८ ङ. च. ज. ञ. भवनोत्तमं. ९ क. ग. नाम्नास्वयंप्रभा. १० घ. गीतनृत्त. ११ ङ.—ट. भवनंमहत्. १२ क.—घ. च. ज.—ट. प्रपद्यत. १३ घ. रभिलक्षितं. १४ छ. ज. झ. ट. शुचीन्यभ्यवहाराणि. क. ख. ग. ङ. च. ञ. इमान्यभ्यवहाराणि. १५ ग. च. ज. ञ. पीत्वातु. १६ क. ख. ग. सत्यं. १७ झ. मर्हसि. १८ इमेषट्श्लोकाः क. ग. पाठयोरधिकादृश्यन्ते.

प्रतिगृह्य तु ते तस्यास्तथाऽऽतिथ्यं वनेचराः ॥ क्षुधार्ता भक्षयामासुः प्रशंसन्तस्तपोधनाम् ॥ २३ ॥
ते भक्षयित्वा तत्सर्वं पीत्वा सुरभि वारि च ॥ सर्वे ददृशुरालोकान्सर्वतो वानरा गुहाम् ॥ २४ ॥
प्रसन्नवदनाश्चासन्सर्वे संहृष्टमानसाः ॥ संजातं बलवीर्यं च तत्र तेषां वनौकसाम् ॥
तर्पिता विविधैर्मूलैः फलैः शीतेन वारिणा ॥ २५ ॥]

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

द्विपञ्चाशः सर्गः ॥ ५२ ॥

हनुमता स्वयंप्रभांप्रति रामवनप्रवेशप्रभृतिस्वस्वात्मीयगुहाप्रवेशावधिनिखिलवृत्तान्तनिवेदनपूर्वकं तत्कृतोपकारप्रशंसनं ॥ १ ॥

अथ तानब्रवीत्सर्वान्वि[1]क्रान्तान्हरिपुङ्गवान् ॥ इदं वचनमेकाग्रा तापसी धर्मचारिणी ॥ १ ॥
वानरा यदि वः खेदः प्रनष्टः फलभक्षणात् ॥ य[2]दि चैतन्मया श्राव्यं श्रोतुमिच्छामि क[3]थ्यताम् ॥२॥
तस्यास्तद्वचनं श्रुत्वा हनुमान्मारुतात्मजः ॥ आर्जवेन यथातत्त्वमाख्यतुमुपचक्रमे ॥ ३ ॥
राजा सर्वस्य लोकस्य महेन्द्रवरुणोपमः ॥ रामो दाशरथिः श्रीमान्प्रविष्टो दण्डकावनम् ॥
लक्ष्मणेन सह भ्रात्रा वैदेह्या[4] चापि भार्यया ॥ ४ ॥
तस्य भार्या जनस्थानाद्रावणेन हृता बलात् ॥ ५ ॥
वीरस्तस्य सखा राज्ञः सुग्रीवो नाम वानरः ॥ राजा वानरमुख्यानां येन प्रस्थापिता वयम् ॥ ६ ॥
अ[5]गस्त्यचरितामाशां दक्षिणां यमरक्षिताम् ॥ सहैभिर्वा[6]नरैर्घोरैरङ्गदप्रमुखैर्वयम् ॥ ७ ॥
रावणं सहिताः सर्वे राक्षसं कामरूपिणम् ॥ सीतया सह वैदेह्या मार्गध्वमिति चोदिताः ॥ ८ ॥
विचित्य तु व[7]यं सर्वे समग्रां दक्षिणां दिशम् ॥ बु[8]भुक्षिताः परिश्रान्ता वृक्षमूलमुपाश्रिताः ॥९॥
विवर्णवदनाः सर्वे स[9]र्वे ध्यानपरायणाः ॥ नाधिगच्छामहे पारं मग्नाश्चिन्तामहार्णवे ॥ १० ॥
चारयन्तस्ततश्चक्षुर्दृष्टवन्तो व[10]यं बिलम् ॥ लतापादपसं[11]छन्नं तिमिरेण समावृतम् ॥ ११ ॥
[12]अस्माद्धंसा ज[13]लक्लिन्नाः पक्षैः स[14]लिलविस्रवैः ॥ कुरराः सारसाश्चैव निष्पतन्ति पतत्रिणः ॥
साध्वत्र प्रविशामेति मया तू[15]क्ताः प्लवङ्गमाः ॥ १२ ॥

॥ १८—२५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकपञ्चाशः सर्गः ॥ ५१ ॥

अथ हनुमता स्वागमनहेतुरुच्यते द्विपञ्चाशे—अथेत्यादि ॥१—२॥ आर्जवेन अकपटेन ॥३—५॥ दक्षिणामाशां येन प्रस्थापिताः स राजास्तीति पूर्वेणा-

---

स० महेन्द्रवरुणोपमः महेन्द्रवरुणाभ्यांउपमा साम्यं शौर्यगांभीर्यादौ यस्यसतथा ॥ ४ ॥ शि० अङ्गदप्रमुखैःसहितावयं वयं घः रामसख्यरक्षणस्य अयः प्राप्तिर्यस्मिंस्तद्यथाभवतितथा दक्षिणांदिशंप्रस्थापिताः ॥ ६–७ ॥ ति० नाधिगच्छाम । हेइति स्वयंप्रभासंबोधनं । पारं चिन्तामहार्णवस्येतिशेषः ॥ १० ॥ ति० सलिलरेणुभिः सलिलपद्मरेणुयुक्तपक्षैरुपलक्षिताइत्यर्थः । निष्पतन्ति निष्पतिताः ॥ १२ ॥

[पा०] १ क. —ट. न्विश्रान्तान्हरियूथपान्. २ ग. यदिचैवंमया. ३ छ. झ. तांकथां. ४ ख. सीतयाचापि. क. ङ.—ट. वैदेह्यासह. ग. घ. वैदेह्याचैव. ५ घ. अगस्त्याचरितां. ६ क.—ट. वानरैर्मुख्यैरङ्गद. ७ झ. ट. वनंसर्वंसमुद्रं. छ. वनंसर्वंसमुद्रं. ङ. ज. ञ. वनंसर्वंसमग्रां. च. वनंसर्वंसमग्रं. ८ ग. छ. झ. ट. वयंबुभुक्षिताःसर्वेवृक्ष. ९ ख. सदाध्यान. १० ङ. —ट. महद्बिलं. ११ ङ.—ट. संपन्नं. १२ क. ख. ग. तस्मात्. १३ घ. जलैःक्लिन्नाः. ख. ग. ङ. च. ज. ञ. जलक्लिन्नानिर्यान्तिविवृताद्बिलात्. १४ क. छ. झ. ट. सलिलरेणुभिः. १५ ग. चोक्ताः.

तेषामपि हि सर्वेषामनुमानमुपागतम् ॥ गच्छाम प्रविशामेति भर्तृकार्यत्वरान्विताः ॥ १३ ॥
ततो गाढं निपतिता गृह्य हस्तौ परस्परम् ॥ इदं प्रविष्टाः सहसा बिलं तिमिरसंवृतम् ॥ १४ ॥
एतन्नः कार्यमेतेन कृत्येन वयमागताः ॥ त्वां चैवोपगताः सर्वे परिद्यूना बुभुक्षिताः ॥ १५ ॥
आतिथ्यधर्मदत्तानि मूलानि च फलानि च ॥ अस्माभिरुपभुक्तानि बुभुक्षापरिपीडितैः ॥ १६ ॥
यैस्त्वया रक्षिताः सर्वे म्रियमाणा बुभुक्षया ॥ ब्रूहि प्रत्युपकारार्थं किं ते कुर्वन्तु वानराः ॥ १७॥
एवमुक्ता तु सर्वज्ञा वानरैस्तैः स्वयंप्रभा ॥ प्रत्युवाच ततः सर्वानिदं वानरयूथपान् ॥ १८ ॥
सर्वेषां परितुष्टास्मि वानराणां तरस्विनाम् ॥ चरन्त्या मम धर्मेण न कार्यमिह केनचित् ॥ १९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

त्रिपञ्चाशः सर्गः ॥ ५३ ॥

हनुमत्प्रार्थनया स्वयंप्रभया स्वाज्ञानिमीलितलोचनानांकपीनां क्षणमात्रेणगुहोत्तारणं ॥ १ ॥ बिलाद्बहिर्गतेषुकपिषु वृक्षेषुपुष्पोद्गमदर्शनाच्छिशिरागमानुमानेनविषीदत्सु तान्प्रत्यङ्गदेन सुग्रीवस्य चण्डशासनत्वादकृतकार्याणां कालातिक्रमेण तत्समीपगमनेमरणनिर्धारणेन प्रायोपवेशस्यैवौचित्योक्तिः ॥ २ ॥ अङ्गदमातुलेनतारेण तद्वचनेनविषीदतोवानरान्प्रति स्वयंप्रभागुहायामेवनित्यवासे रामसुग्रीवभयाभावोपपादने सर्वैस्तदनुमोदनेन तथैवनिर्धारणम् ॥ ३ ॥

एवमुक्तः शुभं वाक्यं तापस्या धर्मसंहितम् ॥ उवाच हनुमान्वाक्यं तामनिन्दितचेष्टिताम् ॥ १ ॥
शरणं त्वां प्रपन्नाः स्मः सर्वे वै धर्मचारिणि ॥ यः कृतः समयोऽस्माकं सुग्रीवेण महात्मना ॥ २ ॥
स च कालो ह्यतिक्रान्तो बिले च परिवर्तताम् ॥ सा त्वमस्माद्बिलाद्घोरादुत्तारयितुमर्हसि ॥ ३ ॥
तस्मात्सुग्रीववचनादतिक्रान्तान्गतायुषः ॥ त्रातुमर्हसि नः सर्वान्सुग्रीवभयकर्शितान् ॥ ४ ॥
महच्च कार्यमस्माभिः कर्तव्यं धर्मचारिणि ॥ तच्चापि न कृतं कार्यमस्माभिरिहवासिभिः ॥ ५ ॥

न्वयः ॥ ६—१२ ॥ अनुमानमुपागतं । जलचरसत्त्वदर्शनेन जलबुद्धिर्जातेत्यर्थः । यद्वा भर्तृकार्यत्वरान्विताः सन्तोगच्छामः । बिलद्वारमिति शेषः । बिलं प्रविशाम इति अनुमानं अङ्गीकरणं ॥ १३—१४ ॥ परिद्यूनाः परिक्षीणाः ॥ १५—१८ ॥ सर्वेषामिति । संबन्धसामान्ये षष्ठी ॥ १९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने द्विपञ्चाशः सर्गः ॥ ५२ ॥

अथ बिलादुत्तीर्णानां वानराणां निर्वेदः त्रिपञ्चाशे —एवमुक्त इत्यादि ॥ १—२ ॥ बिलेचपरिवर्ततामित्यनेन बहुकालं वानरैर्बिले स्थितमिति गम्यते

स० आतिथ्यधर्मदत्तानि अतिथयइमानि आतिथ्यानिचतानि धर्मदत्तानिच । "अतिथेर्ञ्यः ।" "क्रमादातिथ्यातिथेये अतिथ्यर्थेऽत्रसाधुनि " इत्यमरः ॥ १६ ॥ **स०** " किंतेकुर्वन्तुवानराः" इतिपरोक्षनिर्देशोदेवत्वात्स्वस्यतस्याअपिदेवीत्वाद्युक्तः । "परोक्षप्रियाइवहिदेवाः" इतिश्रुतेः ॥ १७ ॥ **ति०** परितुष्टास्मि प्रत्युपचिकीर्षावचनेनैवेतिभावः । अत्र कतकस्तु द्विपञ्चाशसर्गसमाप्तिमाह ॥ १९ ॥ इतिद्विपञ्चाशःसर्गः ॥ ५२ ॥

[पा०] १ छ. झ. ट. अस्मिन्निपतितास्सर्वेऽप्यथकार्यं. २ क. गन्तुं. ३ झ. ञ. ट. हस्तैः. क. ग. हस्तान्परस्परं. ख. घ. हस्ते. ४ ङ.—ट. रुपयुक्तानि. ५ घ. येत्वया. ६ क. ग. घ. धर्मज्ञैर्वानरैः. ख. धर्मज्ञावानरैस्तु. ७ ख. घ. वानरपुङ्गवान्. ८ सर्वेषांपरितुष्टास्मीतिश्लोकात्परतः ङ. छ.—ट. पाठेषुद्विपञ्चाशसर्गसमाप्तिर्नदृश्यते किंतुएतत्कोशरीत्यादृश्यमानत्रिपञ्चाशसर्गे इत्युक्त्वातद्बिलंश्रीमत्प्रविवेशस्वयंप्रभेत्येतदनन्तरंदृश्यते. ९ छ. झ. मनिन्दितलोचनां. १० ट. सर्वेच. छ. सर्वेते. ११ क. झ. धर्मचारिणीं. १२ ङ.—ट. समयोऽस्मासु. १३ क. ख. ग. ङ.—ज. ञ. ट. सतु. १४ क. ख. ङ.—ट. व्यतिक्रान्तो. १५ क. बिलेऽस्मिन्. १६ छ. झ. ट. द्बिलादस्मानुत्तारयितुं. १७ ङ. अस्मान्सुग्रीव. १८ क.—ट. भयशंकितान्.

एवमुक्त्वा हनुमता तापसी वाक्यमब्रवीत् ॥ ६ ॥
[[1]इदं दैवतराजेन पुरा शक्रेण संयुगे ॥ असुरार्थं विमुक्तेन तदा वज्रेण पातितम् ॥ ७ ॥
दुर्धर्षं तु दुरासादं नानारत्नसमन्वितम् ॥ महाप्राज्ञेन रत्यर्थं निर्मितं विश्वकर्मणा ॥ ८ ॥
एवं दैवविसृष्टे तु बिलेऽस्मिन्वज्रदारिते ॥] जीवता दुष्करं मन्ये प्रविष्टेन निवर्तितुम् ॥ ९ ॥
तपसस्तु प्रभावेन नियमोपार्जितेन च ॥ सर्वानेव [2]बिलादस्मादुद्धरिष्यामि वानरान् ॥ १० ॥
[3]निमीलयत चक्षूंषि सर्वे वानरपुङ्गवाः ॥ नहि निष्क्रमितुं शक्यमनिमीलितलोचनैः ॥ ११ ॥
[4]ततः संमीलिताः सर्वे सुकुमाराङ्गुलैः करैः ॥ सहसापिदधुर्दृष्टिं हृष्टा [5]गमनकाङ्क्षया ॥ १२ ॥
वानरास्तु महात्मानो हस्तरुद्धमुखास्तदा ॥ निमेषान्तरमात्रेण बिलादुत्ता[6]रितास्तया ॥ १३ ॥
[7]ततस्तान्वानरान्सर्वांस्तापसी धर्मचारिणी ॥ [8]निस्सृतान्विषमात्तस्मात्समाश्वास्येदमब्रवीत् ॥ १४ ॥
एष विन्ध्यो गिरिः श्रीमान्नानाद्रुमल[9]ताकुलः॥ एष प्रस्रवणः शैलः सागरोऽयं महोदधिः ॥ १५ ॥
स्वस्ति वोऽस्तु गमिष्यामि भवनं [10]वानरर्षभाः ॥ इत्युक्त्वा तद्बिलं श्रीमत्प्रविवेश स्वयंप्रभा ॥१६॥
ततस्ते ददृशुर्घोरं सागरं वरुणालयम् ॥ अपारमभिगर्जन्तं घोरैरूर्मिभि[11]राव्रतम् ॥ १७ ॥
मयस्य मायाविहितं गिरिदुर्गं विचिन्वताम् ॥ तेषां मासो व्यतिक्रान्तो यो राज्ञा समयः कृतः॥१८॥
विन्ध्यस्य तु गिरेः पादे संप्रपुष्पितपादपे ॥ उपविश्य [12]महात्मानश्चिन्तामापेदिरे तदा ॥ १९ ॥
ततः पुष्पातिभाराग्राँल्लताशतसमावृतान् ॥ द्रुमान्वासन्तिकान्दृष्ट्वा बभूवुर्भयशङ्किताः ॥ २० ॥
ते वसन्तमनुप्राप्तं [13]प्रतिबुद्ध्वा परस्परम् ॥ नष्टसंदेश[14]कालार्था निपेतुर्धरणीतले ॥ २१ ॥
ततस्तान्कपि[15]वृद्धांस्तु शिष्टांश्चैव वनौकसः ॥ वाचा मधुरयाऽऽभाष्य यथावदनुमान्य च ॥ २२ ॥
स तु सिंहवृषस्कन्धः पीनायतभुजः कपिः ॥ युवराजो महाप्राज्ञ अङ्गदो वाक्यमब्रवीत् ॥ २३ ॥
शासनात्कपिराजस्य वयं सर्वे विनिर्गताः ॥ मासः पूर्णो बिलस्थानां हरयः किं न बुध्यते ॥ २४ ॥

॥ ३—१३ ॥ विषमात् संकटप्रदेशात् ॥१४—१८॥ पादे दक्षिणपार्श्वे । दक्षिणपश्चिमकोटावित्यर्थः । " हिमवद्विन्ध्यशैलाभ्यां प्रायो व्याप्ता वसुंधरा " इति भेषजकल्पोक्तिः ॥ १९ ॥ पुष्पातिभाराग्रान् पुष्पैरतिभाराणि अग्राणि येषां तान् । वासन्तिकान् वसन्तफलिनश्चूतादीन् । ये वसन्ते फलन्ति ते शिशिरे पुष्प्यन्ति। भयशङ्किताः सुग्रीवाद्भयविषयशङ्कावन्तः ॥ २० ॥ वसन्तं अनुप्राप्तं प्रत्यासन्नं। तदानीं हि शिशिरः । तथाहि । शरत्कालान्ते मार्गशीर्षे मासि सेनां सन्निधाप्य पौषमासमवधिं कृत्वा प्रस्थापितवान् । स पौषो माघश्चातीतः । फाल्गुन एव प्रवृत्त इति । तेन वसन्तः प्रत्यासन्न एव न प्राप्तः

स० अङ्गुलीनांसमूहाआङ्गुलानि । सुकुमाराणि आङ्गुलानियेषांतैः । एतेनादारुत्वादसंख्याव्ययादित्वात्कथंषजचावितिनिरस्तं ॥ १२ ॥ **रामानु०** धर्मचारिणी यान् बिलादुत्तारयामास तान् समाश्वास्य इदमब्रवीदितिसंबन्धः ॥ **शि०** तया स्वयंप्रभयैव । बिलादुत्तारिताः । उवाएवार्थौ । च अनन्तरं । धर्मचारिणी निस्सृतान्वानरान्समाश्वास्येदमब्रवीत् । श्लोकद्वयमेकान्वयि ॥१३–१४॥ **ति०** प्रस्रवणः किष्किन्धासमीपप्रस्रवणादन्योऽयमित्याहुः । अत्युच्चत्वात्ततोपितस्यदर्शनमित्यन्ये ॥ यत्रेच्छा तत्रगन्तव्यमितितात्पर्यं ॥ १५ ॥ **शि०** वासन्तिकान् वसन्तकालिकानिवद्रुमान् । वासन्तिकशब्द आचारक्विबन्तप्रकृतिककर्तृक्विबन्तः । एतेन तद्देशस्य प्रभावातिशयःसूचितः ॥ २० ॥ **ति०** नष्टः संदेशकाले राजसंदिष्टमासरूपेकाले अनुष्ठेयोऽर्थोयेषांते ॥ २१ ॥ **ति०** शिष्टान्

[**पा०**] १ इदमर्धपञ्चकं ग. पाठे. दृश्यते. २ ङ.—ट. बिलात्तस्मात्तारयिष्यति. ३ ङ. च. छ. ञ. निमीलयन्तु. ४ ङ. च. ज. ततस्तुमीलिताः. छ. झ. ञ. ट. ततोनिमीलिताः. ग. ततःसुमीलिताः. क. ततस्तेवानराःसर्वे. ५ क.—घ. गमनकाङ्क्षिणः. ६ ग. स्तदा. ७ च. ज. सर्वांस्तुतान्वानरांश्चतापसी. ङ. छ. झ. ट. उवाचसर्वांस्तांस्तत्रतापसी. ग. बिलादुत्तारयामाससर्वान्वैधर्मचारिणी. ञ. उत्तार्यसर्वांस्तांस्तत्रतापसी. ८ घ. निर्गतान्. ९ क. ख. ङ.—ट. लतायुतः. १० ख. वानरोत्तमाः. ११ क. ङ.—ट. राकुलं. १२ क.—ङ. ज. ञ. महाभागाः. १३ ख. घ. प्रतिबुद्धाः. ग. छ. झ. ञ. ट. प्रतिवेद्य. च. ज. प्रतिपद्य. क. प्रतिबुध्य. १४ क. कार्यार्थाः. १५ ङ.—ट. वृद्धांश्च.

वयमाश्वयुजे मासि कालसंख्याव्यवस्थिताः ॥ प्रस्थिताः सोऽपि चातीतः किमतः कार्यमुत्तरम् ॥२५॥
भवन्तः प्रत्ययं प्राप्ता नीतिमार्गविशारदाः ॥ हितेष्वभिरता भर्तुर्निसृष्टाः सर्वकर्मसु ॥ २६ ॥
कर्मस्वप्रतिमाः सर्वे दिक्षु विश्रुतपौरुषाः ॥ मां पुरस्कृत्य निर्याताः पिङ्गाक्षप्रतिचोदिताः ॥ २७ ॥
इदानीमकृतार्थानां मर्तव्यं नात्र संशयः ॥ हरिराजस्य संदेशमकृत्वा कः सुखी भवेत् ॥ २८ ॥
तस्मिन्नतीते काले तु सुग्रीवेण कृते स्वयम् ॥ प्रायोपवेशनं युक्तं सर्वेषां च वनौकसाम् ॥ २९ ॥
तीक्ष्णः प्रकृत्या सुग्रीवः स्वामिभावे व्यवस्थितः ॥ न क्षमिष्यति नः सर्वानपराधकृतो गतान् ॥३०॥
अप्रवृत्तौ च सीतायाः पापमेव करिष्यति ॥ तस्मात्क्षममिहाद्यैव प्रायोपविशनं हि नः ॥
त्यक्त्वा पुत्रांश्च दारांश्च धनानि च गृहाणि च ॥ ३१ ॥
ध्रुवं नो हिंसिता राजा सर्वान्प्रतिगतानितः ॥ वधेनाप्रतिरूपेण श्रेयान्मृत्युरिहैव नः ॥ ३२ ॥
न चाहं यौवराज्येन सुग्रीवेणाभिषेचितः ॥ नरेन्द्रेणाभिषिक्तोस्मि रामेणाक्लिष्टकर्मणा ॥ ३३ ॥

॥ २१—२४ ॥ वयमाश्वयुजे मासीति कालसंख्याव्यवस्थिताः कालसंख्यया नियमिताः । वयं आश्वयुजे मासि हनुमच्चोदितेन सुग्रीवेण पञ्चदशरात्रसंख्यया नियम्य समाहूताः । ततो मार्गशीर्षे लक्ष्मणचोदितेन तेन दशरात्रसंख्यया समाहूताः । ततः सीतान्वेषणे पौषमासमवधिं कृत्वा तेन प्रेषिताः । एवमाश्वयुजमासमारभ्य कालसंख्याव्यवस्थितानामस्माकं कालविस्मरणं न युक्तमित्यर्थः । अन्ये त्वाहुः—आश्वयुजे मासि दशम्यामुत्थितायामितिवत्सामीपिकाधिकरणविवक्षया सप्तमी। तेन "कार्तिके समनुप्राप्ते त्वं रावणवधे यत" इत्युक्तकालातिक्रमणप्रयुक्तरामकोपदर्शनात् कार्तिकान्तो विवक्षितः । सोपि चातीतः समार्गणावधिभूतमार्गशीर्षमासः । अपिचेत्याभ्यां पदाभ्यां तदनन्तरभूतौ पौषमाघौ समुच्चीयेते । अतश्च फाल्गुन एव प्राप्त इति भाव इत्याहुः। अत उत्तरं किं कार्यं॥२५॥ प्रत्ययं विश्वासं । नीतिमार्गे विशारदाः प्रगल्भाः । निसृष्टाः दक्षा इति यावत्॥ २६—२८ ॥ प्रायाय अन्तगमनाय उपवेशनं शयनं प्रायोपवेशनं ॥ २९ ॥ अप्रवृत्तौ अवार्तायां । प्रायोपविशनमिति गुणाभाव आर्षः ॥ ३०—३१ ॥ त्वां यौवराज्ये कृतवान्सुग्रीवः

वृद्धेभ्योऽन्यान् ॥ २२ ॥ **ति०** कालात्ययमेवाह—वयमिति । आश्वयुजे अतीतप्रायेइतिशेषः । " कार्तिकेसमनुप्राप्ते त्वंरावणवधे यत " इत्युक्तेः । ततःपञ्चदशरात्रकालसंख्यया प्रवर्तितदूतैः व्यवस्थिताः मिलिताः । एवंचामान्तमानेनाश्विनस्योत्तरे दीपोत्सवामायुतेपक्षे सर्वसेनागमनंकिष्किन्धायां । रामस्यक्रोधस्तु तत्रैवपक्षे कार्तिकसंनिधावपि तदुद्यमाभावकृतः । ततः कार्तिकेऽवधिरन्वेषणस्य । ततोमार्गशुक्लेइदंवचनं । प्रायस्तद्वर्षे पौषः क्षयमासः । " कार्तिकादित्रयेनान्यतः " इत्युक्तेः । अतो मार्गशुक्लएव आम्रादीनांपुष्पोद्गमः उत्पाततोवा । तादृशरीत्या पुष्पोद्गमंदृष्ट्वापि वसन्तासन्नतानुमानेन भयोपपत्तिः । कतकादयस्तु अन्वेषणेऽवधित्वेनदत्तःपौषोमासः । आश्वयुजइत्यस्य तत्प्रत्यासन्नकार्तिकान्तेइत्यर्थः । कालसंख्येति । कार्तिकोत्तरं पञ्चदशरात्रसंख्याकालेनावधिना वानरानयनायदूतप्रेषणं । ततःपूर्णिमान्तमानेन मार्गशुक्लेन सर्ववानरागमनं । ततःपौषाद्यदिने दिक्ष्वन्वेषणाय वानरप्रस्थानं । तत्रपौषे माघकृष्णीयकिंचिद्दिनसहितेऽतीते इदंवाक्यमित्याहुः । तेषां सीतानयनोत्तरं सीतांप्रति द्वादशमासाः रावणावधिरितिस्पष्टमेव । पंपायांचैत्रमासे आगमनमित्यस्योक्तत्वात् । ततःपूर्वफाल्गुनेसीतापहारइतिच स्पष्टमेव । एवंच माघकृष्णे तच्छुक्लादौवा हनूमतःसीतासमीपगमने हनूमन्तंप्रति " वर्ततेदशमोमासोद्वौतुशेषौप्लवङ्गम " इतिसीतोक्तिविरोधः । किंच हनूमतोलङ्काप्रवेशदिने प्रदोषसमयएव पूर्णकल्पचन्द्रोदयवर्णनंच विरोधइत्याहुः ॥ २५ ॥ **स०** सर्वकर्मसु कर्तव्यत्वेनोपस्थितेषु प्रत्ययं प्रभुविश्वासं । यस्मैहितेषु अभिरताः तस्माद्भर्तुर्निसृष्टाइति यत्तच्छब्दाध्याहारेणयोजनायां " चतुर्थीतदर्थार्थबलिहितसुखरक्षितैः " इत्यनुकूलितं भवति । यद्वा हनुमदितरेषां हिताभिरतेरभावमावेदयति भर्तुरितिषष्ठी ॥ २६ ॥ **ती०** प्रायोपविशनं । " प्रायश्चानशनेमृत्यौ " इतिकोशः ॥ **ति०** पुत्रादित्यक्त्वाप्रायोपवेशनं गन्तुंकर्तुंक्षमंयुक्तमित्यन्वयः ॥ ३१ ॥ **शि०** ननु "विषवृक्षोपिसंवर्ध्य स्वयंछेत्तुमसांप्रतं" इतिन्यायेन युवराजत्वेनाभिषेचितंत्वां सुग्रीवःकथंहनिष्यतीत्यतआह—नेति

[पा०] १ ञ. किमेतत्कार्यं. २ च. ञ. निर्विष्टाः. घ. निर्दिष्टाः. ३ ग. कर्मस्वप्रतिघाताश्च. क. ख. कर्मस्वप्रतिमाःशूराः. ४ क. ख. विश्रान्तपौरुषाः. ५ क. ख. पिङ्गाक्षेशप्रचोदिताः. ६ झ. ट. अस्मिन्नतीते. ७ ङ. च. ज. ञ. स्वयंकृते. ८ छ. झ. ट. गन्तुंप्रायोपवेशनं. ख. ग. ङ. च. ज. ञ. हितंप्रायोपवेशनं. क. प्रायोपविशनंहितम्. ९ क. ध्रुवंवो. ख. ग. यावन्नोघातयेद्राजा. १० घ.—ट. हिंसते.

स पूर्वं बद्धवैरो मां राजा दृष्ट्वा व्यतिक्रमम् ॥ घातयिष्यति दण्डेन तीक्ष्णेन कृतनिश्चयः ॥ ३४
किं मे सुहृद्भिर्व्यसनं पश्यद्भिर्जीवितान्तरे ॥ इहैव प्रायमासिष्ये पुण्ये सागररोधसि ॥ ३५ ॥
एतच्छ्रुत्वा कुमारेण युवराजेन भाषितम् ॥ सर्वे ते वानरश्रेष्ठाः करुणं वाक्यमब्रुवन् ॥ ३६ ॥
तीक्ष्णः प्रकृत्या सुग्रीवः [1]प्रियासक्तश्च राघवः ॥ [[2]समीक्ष्याकृतकार्यांस्तु तस्मिंश्च समये गते] ॥
[3]अदृष्टायां तु वैदेह्यां [4]दृष्ट्वा चैव समागतान् ॥ ३७ ॥
राघवप्रियका[5]मार्थं घातयिष्यत्यसंशयम् ॥ न क्षमं [6]चापराद्धानां गमनं स्वामिपार्श्वतः ॥ ३८ ॥
[[7]प्रधानभूताश्च वयं सुग्रीवस्य समागताः] ॥ इहैव सीता[8]मन्विष्य प्रवृत्ति[9]मुपलभ्य वा ॥
नो चेद्गच्छाम तं वीरं गमिष्यामो यमक्षयम् ॥ ३९ ॥

प्लवङ्गमानां तु भयार्दितानां श्रुत्वा वचस्तार इदं बभाषे ॥
अलं विषादेन बिलं प्रविश्य वसाम सर्वे यदि [10]रोचते वः ॥ ४० ॥
इदं हि मायाविहितं सुदुर्गमं प्रभूत[11]वृक्षोदकभोज्य[12]पेयकम् ॥
इहास्ति नो नैव [13]भयं पुरन्दरान्न राघवाद्वानरराजतोऽपि वा ॥ ४१ ॥
श्रुत्वाङ्गदस्यापि वचोनुकुलमूचुश्च सर्वे हरयः प्रतीताः ॥
यथा न [14]हिंस्येम तथा विधानमसक्तमद्यैव विधीयतां नः ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

चतुःपञ्चाशः सर्गः ॥ ५४ ॥

अङ्गदादिभिस्तारमतानुमोदने हनुमता इतरवानरभेदनपूर्वकमङ्गदंप्रतियुक्त्युपन्यासेनभीषणम् ॥ १ ॥ तथा सुग्रीवस्य शुभगुणत्वादिहेतूक्त्या ततोभयाभावाद्युपपादनपूर्वकं सुग्रीवसमीपंप्रति गमनचोदाना ॥ २ ॥

तथा ब्रुवति तारे तु ताराधिपतिवर्चसि ॥ अथ मेने हृतं राज्यं हनुमानङ्गदेन तत् ॥ १ ॥

कथं हिंस्यादित्यत्राह—न चाहमिति ॥ ३२—३४ ॥ मे जीवितान्तरे जीवितावधौ । व्यसनं पश्यद्भिः सुहृद्भिः किं सुहृदो मद्व्यसनप्रदर्शनेन क्लेशयित्वा मम किं प्रयोजनमित्यर्थः ॥ ३५—३८ ॥ सीतामन्विष्य तस्याः प्रवृत्तिं वृत्तान्तमुपलभ्य वीरं तं गच्छाम । नोचेदिहैव यमक्षयं यमगृहं गमिष्यामः ॥ ३९—४१ ॥ अङ्गदस्याप्यनुकूलं तारस्य वचनं श्रुत्वेत्यन्वयः । विधानं कार्यं । कर्मणि ल्युट् । असक्तं अविलम्बं ॥ ४२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥

अथ हनुमता अङ्गदमतभेदनपूर्वकमङ्गदस्य सुग्रीवसमीपगमनाय नियोजनं चतुःपञ्चाशे—तथेत्यादि ॥

॥ ३३ ॥ **शि०** जीवितान्तरे जीवनावधिमध्ये । मेव्यसनं राजहस्तान्मरणं । पश्यद्भिः सुहृद्भिःकिं कर्तव्यमितिशेषः । नकिमपीत्यर्थः । एतेन मत्सुहृदामप्यधिकःखेदोभविष्यतीति सूचितं ॥ ३५ ॥ **स०** पुरन्दरादित्युक्त्याकैमुत्यंसूच्यते ॥ ४१ ॥ इतित्रिपञ्चाशःसर्गः ॥ ५३ ॥

ति० ताराधिपतिवर्चसि तारे तथाब्रुवति । तुशब्दादङ्गदे प्रतिषेधाकरणात्तदनुमन्यमानेसति । अथ अनन्तरं । अङ्गदेन राज्यं

[पा०] १ क. ग. घ. छ. झ. ट. प्रियारक्तश्च. २ इदमर्धं. ङ.—ट. पाठेषुदृश्यते. ३ क. ख. ङ.—ट. अदृष्टायांच. ४ क. ख. ग. दृष्ट्वास्मांश्चसमागतान्. घ. दृष्ट्वाचास्मान्समागतान्. ५ ख. घ. ङ.—ट. कामाय. ६ ज. सापराधानां. ख. ग. घ. त्वपराद्धानां. ७ इदमर्धं. ङ.—ट. पाठेषुदृश्यते. ८ क. छ. झ. मन्वीक्ष्य. ९ ट. मुपलभ्यच. १० ङ. ज. रोचतेवचः. ११ ङ.—ट. पुष्पोदक. १२ क.—ट. पेयं. १३ ङ. च. ज. पुरंदराद्भयं. १४ क.—ट. हन्येम.

बुद्ध्या[1] ह्यष्टाङ्गया युक्तं चतुर्बलसमन्वितम् ॥ चतुर्दशगुणं मेने हनुमान्वालिनः सुतम् ॥ २ ॥
आपूर्यमाणं शश्वच्च तेजोबलपराक्रमैः ॥ शशिनं शुक्लपक्षादौ वर्धमानमिव श्रिया ॥ ३ ॥
बृहस्पतिसमं बुद्ध्या विक्रमे सदृशं पितुः ॥ शुश्रूषमाणं तारस्य शुक्रस्येव[2] पुरन्दरम् ॥ ४ ॥
भर्तुरर्थे[3] परिश्रान्तं सर्वशास्त्रविदां[4] वरम् ॥ अभिसंधातुमारेभे हनुमानङ्गदं ततः ॥ ५ ॥
स चतुर्णा[5]मुपायानां तृतीयमुपवर्णयन् ॥ भेदयामास तान्सर्वान्वानरान्वाक्यसंपदा ॥ ६ ॥
तेषु सर्वेषु[6] भिन्नेषु ततोऽभीषयदङ्गदम् ॥ भीषणैर्बहुभिर्वाक्यैः[7] कोपोपायसमन्वितैः ॥ ७ ॥
त्वं समर्थतरः पित्रा युद्धे तारेय वै धुरम्[8] ॥ दृढं धारयितुं शक्तः कपिराज्यं यथा पिता ॥ ८ ॥
नित्यमस्थिरचित्ता हि कपयो[9] हरिपुङ्गव ॥ नाज्ञाप्यं विसहिष्यन्ति पुत्रदारान्[10]विना त्वया ॥ ९ ॥
त्वां नैते ह्यनुयुञ्जेयुः[11] प्रत्यक्षं प्रवदामि ते ॥ यथायं[12] जाम्बवान्नीलः सुहोत्रश्च महाकपिः[13] ॥ १० ॥

राज्यं हृतं मेने राज्यं कर्तुं सामर्थ्यमस्तीति मेन इत्यर्थः ॥ १ ॥ अष्टाङ्गया "ग्रहणं धारणं चैव स्मरणं प्रतिपादनम् । ऊहोपोहोर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः" इत्युक्ताष्टाङ्गयुक्तया । चतुर्बलसमन्वितं बाहुबलमनोबलोपायबलबन्धुबलयुक्तं । चतुर्दशगुणं "देशकालज्ञता दार्ढ्यं सर्वक्लेशसहिष्णुता । सर्वविज्ञानिता दाक्ष्यमूर्जः संवृतमन्त्रता ॥ अविसंवादिता शौर्यं शक्तिज्ञत्वं कृतज्ञता । शरणागतवात्सल्यममर्षत्वमचापलम्" ॥ इत्युक्तचतुर्दशगुणयुक्तं ॥ २—३ ॥ तारस्य शुश्रूषमाणं । नटस्य शृणोतीतिवत्कारकशेषत्वात्षष्ठी । शुक्रस्येव पुरंदरमिति पुरंदरशब्दसन्निधानादत्र शुक्रशब्दो बृहस्पतिपरः । यद्वा कस्यांचिदवस्थायां हितमुपदिशतः शुक्रस्य वचनं पुरंदरः श्रुतवानित्यवगम्यते । गुरोरिव पुरंदरमिति क्वचित्पाठः ॥ ४ ॥ अभिसंधातुं अनुकूलयितुं ॥ ५ ॥ चतुर्णां सामादीनां । तृतीयं भेदं । "साम दानं च भेदश्च दण्डश्चेति यथाक्रमम्" इति क्रमनियमात् ॥ ६ ॥ कोपरूप उपायः कोपोपायः दण्डः तत्समन्वितैः ॥ ७ ॥ पित्रा पितुः ॥ ८ ॥ आज्ञाप्यं आज्ञापनं । भावे कृत्यप्रत्ययः । पुत्रदारान् पुत्रदारैर्विरहिताः । त्वयेति कर्तरि तृतीया । अस्य आज्ञाप्यमित्यनेन संबन्धः ॥ ९ ॥ अयं जाम्बवान्नीलः सुहोत्रश्च एते त्वां यथा नानुयुञ्जेयुः नानुवर्तेरन् । तथाहमपि नानुवर्ते हि । त इमे सर्वे सामादिभिः सुग्रीवादपक-

सुग्रीवीयंकपिराज्यं हृतमितिमेने । तद्राज्यं स्वयंप्रभाराज्यमित्यर्थइत्यन्ये ॥ १ ॥ **स०** शुक्लपक्षत्वेनादिः कृष्णपक्षस्य । समग्रःशुक्लपक्षइत्यर्थः । तस्मिन् ॥ ३ ॥ **ति०** शुक्रस्येवपुरन्दरं विपरीतोपदेशग्रहे उपमैषा ॥ **स०** शुश्रूषमाणं आकर्णयन्तं । तारस्यवचइतिशेषः । कदापि नैतद्धटतइति सूचयितुमभूतोपमितिमाह—**शुक्रस्येवपुरन्दरमिति** ॥ शुक्रस्यवाक्यंशुश्रूषमाणं पुरन्दरमिवेत्यन्वयः ॥ ४ ॥ **ति०** अभिसंधातुं तारादिभ्योभेदयितुं ॥ **शि०** अङ्गदंअभिसन्धातुं भर्तुरर्थेसंयोजयितुं ॥ ५ ॥ **ति०** वाक्यसंपदा भेदजननक्षमन्यायोपेतेन "हीनाश्रयोनकर्तव्यः कर्तव्योमहदाश्रयः" इत्यादिवाक्यसमूहेन ॥ **स०** चतुर्णां सामदानभेददण्डानां द्वितीयउपायो दानं । तमुपवर्णयन् हेतौशतृप्रत्ययः । रामकार्येसाधिते राज्यादिप्राप्तिर्भवतीतिवर्णयित्वा तान्अङ्गदानुवर्तिनोभेदयामास स्वानुकूलांश्चकारेतियावत् ॥ द्वितीयोभेदइति नागोजिभट्टीयव्याख्यानंतु "सामदानेभेददण्डावित्युपायचतुष्टयं" इति क्वचित्पुस्तकसंपुट्यां "भेददण्डौसामदाने" इत्युभयथाप्यमरपाठे भेदस्य द्वितीयत्वानुक्तिविरोधात् इहभेदयामासेति द्वितीयस्यभेदस्य भेदनहेतुत्वासंभवाच्चोपेक्ष्यं ॥ ६ ॥ **ति०** भीषणमेवस्तुतिपूर्वंकरोति—त्वमिति । त्वंपित्रासुग्रीवेणयुद्धेसमर्थतरः । यद्वा त्वं पित्रासदृशइतिशेषः । अतएव युद्धेसमर्थतरइत्यर्थः । दृढंधारयितुंशक्तः । अस्य यदिसर्वेकपयस्त्वामनुवर्त्स्यन्तीतिशेषः ॥ ८ ॥ **ति०** कपिराज्यं किष्किन्धायांवा ऋक्षबिलेवा । नचतदस्तीत्याह—नित्यमिति । स्वभावादितिभावः । अस्थैर्यकारणान्तरमप्याह—पुत्रदारंविनेति । पुत्रदाराणां किष्किन्धावर्तिनां सुग्रीवायत्तत्वात्त्वयासहबिलेऽवस्थाने तद्वियोगस्यस्पष्टत्वात् । निगृह्यस्थापनमप्यशक्यमित्याह—त्वयाज्ञाप्यं त्वत्कर्तृकमाज्ञापनं नसहिष्यन्ति । त्वत्तोप्यधिकबलत्वादिति-

[पा०] १ ग. बुद्ध्याप्यष्टाङ्गया. २ क. ख. गुरोरिव. ३ क. भर्तुरर्थपरिश्रान्तं. ४ क. ग. घ. च. ज. विशारदं ङ. छ. झ. ञ. ट. विशारदः. ५ ख. ङ.—झ. द्वितीयं. ६ क. ग. घ. भिन्नेषुसर्वेषु. ७ ङ.—ट. विविधैर्वाक्यैः. ८ क. ङ.—ट. ध्रुवं. ९ घ. हरयो. १० क.—झ. ट. पुत्रदारंविना. ञ. पुत्रदारैर्विना. ११ ङ. छ. झ. ञ. ट. ह्यनुरज्येयुः. ग. ह्यनुजीवेयुः. १२ ख. यथाच. १३ ङ. च. ज. ञ. महाबलः.

न ह्यहं [1]ते इमे सर्वे सामदानादिभिर्गुणैः ॥ [2]दण्डेन वा त्वया शक्याः सुग्रीवादपकर्षितुम् ॥ ११ ॥
विगृह्यासनमप्याहुर्दुर्बलेन [3]बलीयसः ॥ आत्मरक्षाकरस्तस्मान्न विगृह्णीत दुर्बलः ॥ १२ ॥
यां चेमां मन्यसे धात्रीमेतद्बिलमिति श्रुतम् ॥ एतल्लक्ष्मणबाणानामीषत्कार्यं [4]विदारणे ॥ १३ ॥
स्वल्पं हि कृतमिन्द्रेण क्षिपता ह्यशनिं पुरा ॥ लक्ष्मणो निशितैर्बाणैर्भिन्द्यात्पत्रपुटं यथा ॥ १४ ॥
[5]लक्ष्मणस्य तु नाराचा बहवः सन्ति तद्विधाः ॥ वज्राशनिसमस्पर्शा गिरीणामपि [6]दारणाः ॥१५॥
[7]अवस्थाने यदैव त्वमासिष्यसि परंतप ॥ तदैव हरयः सर्वे त्यक्ष्यन्ति कृतनिश्चयाः ॥ १६ ॥
स्मरन्तः पुत्रदाराणां नित्योद्विग्ना बुभुक्षिताः ॥ [8]खेदिता दुःखशय्याभिस्त्वां करिष्यन्ति पृष्ठतः॥१७॥
स त्वं हीनः सुहृद्भिश्च हितकामैश्च बन्धुभिः ॥ तृणादपि भृशोद्विग्नः स्पन्दमानाद्भविष्यसि ॥१८॥
[9]न च जातु न हिंस्युस्त्वां [10]घोरा लक्ष्मणसायकाः॥ [11]अपवृत्तं जिघांसन्तो महावेगा दुरासदाः ॥१९॥
अस्माभिस्तु गतं सार्धं विनीतवदुपस्थितम् ॥ आनुपूर्व्यात्तु सुग्रीवो राज्ये त्वां स्थापयिष्यति ॥२०॥
[12]धर्मकामः पितृव्यस्ते प्रीतिकामो दृढव्रतः ॥ शुचिः सत्यप्रतिज्ञश्च [13]न त्वां जातु जिघांसति॥ २१ ॥
प्रियकामश्च ते मातुस्तदर्थं चास्य जीवितम् ॥ [14]तस्यापत्यं च नास्त्यन्यत्तस्मादङ्गद गम्यताम्॥ २२॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे चतुःपञ्चाशः सर्गः ॥ ५४ ॥

र्षितुं न शक्याः ॥ १०—११ ॥ बलीयसः प्रबलस्य । दुर्बलेन समं विगृह्य आसनमप्यवस्थानमपि कर्तव्यमाहुः । नतु दुर्बलस्य बलीयसा । तस्मात् आत्मरक्षाकरः स्वक्षेमकाम इति यावत् । दुर्बलः बलीयसा न विगृह्णीत विगृह्य नासीत ॥ १२ ॥ स्वतो बलाभावेपि दुर्गबलमस्तीत्याशङ्क्याह—यां चेति ॥ यामिमां गुहां धात्रीं रक्षकां मन्यसे । एतद्बिलमिति ताराच्छ्रुतं । एतत् ऋक्षबिलं । विदारणे विषये लक्ष्मणबाणानामीषत्कार्यं अयत्नसाध्यमित्यर्थः ॥ १३ ॥ पुरा बिलवासिनं मयमुद्दिश्याशनिं वज्रं क्षिपतेन्द्रेण स्वल्पं कृतं द्वारमात्रं कृतं । लक्ष्मणस्तु निशितैर्बाणैः पत्रपुटमिव भिन्द्याद्धि ॥ १४ ॥ तद्विधाः तादृशाः । अपरिच्छिन्नवैभवा इति यावत् । गिरीणामपि दारणाः बिलस्य किमुतेति भावः ॥ १५ ॥ अवस्थाने बिले । यद्वा विगृह्यावस्थाने आसिष्यसि स्थास्यसि । विगृह्यावस्थानं यदाध्यवसिष्यसीत्यर्थः ॥ १६—१८ ॥ लक्ष्मणसायकाः अपवृत्तं वृत्तहीनं स्वकार्याकरमित्यर्थः । त्वां न हिंस्युरिति न हिंस्युरेवेत्यर्थः ॥ १९ ॥ आनुपूर्व्यात् क्रमप्राप्तेः ॥ २०—२२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चतुःपञ्चाशः सर्गः ॥ ५४ ॥

भावः ॥ ९ ॥ स० इमां गुहां । इमां स्वयंप्रभांवा । धात्रीं एकत्र रक्षयित्रीं । अपरत्र धारयित्रीं । एतत् परिदृश्यमानंबिलं । मन्यसे इतराशक्यस्थानंमन्यसे । एतत् विदारणं बुद्धिस्थंबिलविदारणं । लक्ष्मणबाणानां लक्ष्मणबाणैः । ईषत् कार्यमितिद्वेपदे । अल्पकार्यमित्यर्थः । तेननखल्पप्रसक्तिः । " स्वल्पंहिकृतं " इत्युत्तरग्रन्थानुकूलमिदंव्याख्यानं । खलभावआर्षइतिव्याख्यानमैकपद्याश्रयेणतस्यप्रतिकूलमितिमन्तव्यं ॥ १३ ॥ ति० पुरा पूर्वं । माययाभूतलान्तर्निर्मितैतत्पुरवर्तिमयवधार्थमशनिं तत्प्रदेशभुवि क्षिपतेन्द्रेण स्वल्पमेवकृतं मयवधमात्रंकृतं नतुपुरंभग्नं । लक्ष्मणस्तु निशितैर्बाणैरेतत्पुरमपिपत्रपुटमिवभिन्द्यात् ॥ स० स्वल्पं द्वारमात्रं । पत्रपुटं पुटति शब्दंकरोतीतितथा । पत्रंचतत्पुटंच । शुष्कपर्णमितियावत् । पुटपत्रमितिभाव्यमितितुदत्तोत्तरं । " बिलंवःशुष्कवर्णवत् " इतिसंग्रहरामायणोक्तेः ॥ १४ ॥ ति० तद्विधाइत्यस्यविवरणं वज्राशनीत्यादि । वज्रं इन्द्रकरस्थं । अशनिर्मेघस्थः । यद्वातद्विधाः वालिहन्तृबाणसदृशाः ॥ १५ ॥ ति० सर्वत्रात्रलक्ष्मणनामग्रहणंतस्यक्रूरस्वभावत्वात् । ईदृशानां रामालक्ष्यत्वाच्च ॥ १९ ॥ ति० धर्मराजःधर्ममार्गवर्तीराजा तथाप्रीतिकामएवत्वयि नतुत्वद्वधकामः ॥ शि० धर्मराजः सद्धर्मैः शोभमानः ॥ २१ ॥ इतिचतुःपञ्चाशःसर्गः ॥ ५४ ॥

[पा०] १ क. ग. नचतेसर्वे. २ क. ग. ङ.—ट. दण्डेनन. ख. घ. नदण्डेन. ३ च. छ. झ. ञ. ट. बलीयसा. ४ छ. झ. ञ. ट. विदारणं. ५ क. ङ.—ट. लक्ष्मणस्यच. ६ छ. झ. ट. दारकाः. ७ ङ. छ. झ. ट. अवस्थानं. ८ च. ज. दुःखाद्दुःखतरंगत्वाकिंकरिष्यन्तिदुर्गताः. ९ क. ग. ज. झ. अत्युग्रवेगानिशिताघोराः. १० ङ. रामलक्ष्मण. ११ च.—ञ. अपावृत्तं. १२ छ. झ. ट. धर्मराजः. १३ च.—झ. ट. सत्वांजातुननाशयेत्. १४ ट. तस्यापत्यंतु.

पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

हनुमदुक्तसुग्रीवस्यगुणवत्त्वमसहमानेनाङ्गदेन सुग्रीवेदोषोद्भावनेन तद्गर्हणपूर्वकं वानरान्प्रति स्वस्यप्रायोपवेशनाभ्यनुज्ञा-न प्रायोपवेशनम् ॥ १ ॥ तथाभूतेऽङ्गदे सबाष्पमोचनं सुग्रीवगर्हणपूर्वकं स्वयमपि प्रायोपविष्टैः सकलकपिवरैः रामवनप्र-शादिस्वप्रायोपवेशावधिकसर्ववृत्तान्तोद्घोषणेन गिरिदरीपरिपूरणम् ॥ २ ॥

श्रुत्वा हनुमतो वाक्यं प्रश्रितं धर्मसंहितम् ॥ स्वामिसत्कारसंयुक्तमङ्गदो वाक्यमब्रवीत् ॥ १ ॥
स्थैर्यमात्ममनःशौचमानृशंस्यमथार्जवम् ॥ विक्रमश्चैव धैर्यं च सुग्रीवे नोपपद्यते ॥ २ ॥
भ्रातुर्ज्येष्ठस्य यो भार्यां जीवतो महिषीं प्रियाम् ॥ धर्मेण मातरं यस्तु स्वीकरोति जुगुप्सितः ॥३॥
कथं स धर्मं जानीते येन भ्रात्रा महात्मना ॥ युद्धायाभिनियुक्तेन बिलस्य पिहितं मुखम् ॥ ४ ॥
सत्यात्पाणिगृहीतश्च कृतकर्मा महायशाः ॥ विस्मृतो राघवो येन स कस्य तु कृतं स्मरेत् ॥ ५ ॥
लक्ष्मणस्य भयाद्येन नाधर्मभयभीरुणा ॥ आदिष्टा मार्गितुं सीतां धर्ममस्मिन्कथं भवेत् ॥ ६ ॥
तस्मिन्पापे कृतघ्ने तु स्मृतिहीने चलात्मनि ॥ आर्यः को विश्वसेज्जातु तत्कुलीनो जिजीविषुः ॥ ७ ॥
राज्ये पुत्रः प्रतिष्ठाप्यः सगुणो निर्गुणोऽपि वा ॥ कथं शत्रुकुलीनं मां सुग्रीवो जीवयिष्यति ॥८॥
भिन्नमन्त्रोपराद्धश्च हीनशक्तिः कथं ह्यहम् ॥ किष्किन्धां प्राप्य जीवेयमनाथ इव दुर्बलः ॥ ९ ॥
उपांशुदण्डेन हि मां बन्धनेनोपपादयेत् ॥ शठः क्रूरो नृशंसश्च सुग्रीवो राज्यकारणात् ॥ १० ॥

अथ हरीणां प्रायोपवेशः पञ्चपञ्चाशे—श्रुत्वेत्यादि ॥ १ ॥ स्थैर्यं स्थिरबुद्धिता । आत्ममनःशौचं आत्मशुद्धिः मनसः शौचं अन्तःकरणशुद्धिश्चेत्यर्थः । धैर्यं गाम्भीर्यम् ॥ २ ॥ मनःशौचाभावमुपपादयति—भ्रातुरिति ॥ स कथं धर्मं जानीत इति वक्ष्यमाणमाकृष्यते । जीवत इत्यनेन भ्रातुर्मरणानन्तरं तद्भार्यापरिग्रहः कुलधर्म इत्यवगम्यते ॥ ३ ॥ आनृशंस्याभावमुपपादयति—युद्धायेति ॥ युद्धायाभिनियुक्तेन द्वारान्निर्गतस्य शत्रोः युद्धाय वालिना नियुक्तेनेत्यर्थः ॥ ४ ॥ आर्जवाभावमुपपादयति—सत्यादिति ॥ पाणिगृहीतः पाणौ गृहीतः ॥ ५ ॥ कथं तर्हि सेनामानीतवान्सुग्रीव इत्याशङ्क्याह—लक्ष्मणस्येति ॥ नाधर्मभयभीरुणा भयशब्दोत्र भयहेतुपरः । अधर्मरूपभयहेतोर्भीरुणा न च । किंतु लक्ष्मणस्य भयात् । लक्ष्मणदण्डनिमित्तभयादित्यर्थः ॥ ६—७ ॥ तव यौवराज्यस्थापनं किं विस्मृतोसीत्यत्राह—राज्य इति ॥ पुत्रः जनिष्यमाणः स्वपुत्रः ॥ ८ ॥ भिन्नमन्त्रः प्रकाशितविगृह्यावस्थानमन्त्रः । अपराद्धः कृतापराधः । यद्वा पितृहिंसनेन संजातापराधः ॥ ९ ॥ उपांशुदण्डेन रहस्यदण्डरूपेण । उपपादयेत् प्रापयेत् ॥ १० ॥

ति० ज्येष्ठस्यभ्रातुर्भार्यां धर्मेणमातरं धर्ममार्गेणवर्तमानांज्येष्ठभ्रातृपत्नींतांमातृतुल्यां । जीवतोममसमक्षं । अनेन "देवराच्चसुतोत्पत्तिं" इत्यतोपिधर्मत्वंवारितं । यद्वा जीवतोमहिषीमिति महिषयुद्धकालिकस्वीकारपरं । यःस्वीकरोति कथं स धर्मंजानीते इत्यन्वयः । एतेन हनूमदुक्तधर्मराजत्वंप्रत्याख्यातं । एतद्वचोऽङ्गदस्यकेवलरोषमूलं त्रैवर्णिकातिरिक्तधर्मास्मरणपूर्वकं ॥ **स०** धर्मेणमातरं ज्येष्ठभ्रातृपत्नीत्वरूपधर्मप्रयोज्यमातृत्ववतीं ॥ ३ ॥ **ति०** 'धर्ममस्मिन्' इतिपाठे धर्मं धर्मधीमूलंप्रवर्तनमित्यर्थः ॥ ६ ॥ **ति०** स्मृतिभिन्ने स्मृतिर्मन्वादीनां भिन्ना त्यक्ता येन । तत्कुलीनः तज्ज्ञातिकोटिप्रविष्टः ॥ ७ ॥ **ति०** सुग्रीवःसगुणो निर्गुणोवास्तु नमे तद्विचारेणकिंचित् । अपितु शत्रुकुलीनं मांपुत्रंराज्येप्रतिष्ठाप्य कथंसुग्रीवो जीवयिष्यति नकथमपीत्यर्थः ॥ **स०** शत्रुकुलीनं शत्रोर्वालिनःकुलंदेहः तत्रभवस्तस्मादुत्पन्नः । "कुलात्खः" । "कुलंगोत्रेदेहेपि" इतिविश्वः ॥ ८ ॥ **ति०** भिन्नोबिलप्रवेशरूपोमन्त्रोयस्यसः । एवंमन्त्रस्ययस्यकस्यापिमुखाच्छ्रवणेऽवश्यंभाविनिस्पष्टमपराद्धश्चभवामि । हीनशक्तिः सुग्रीवापेक्षयाहीनबलः । हनुमदुक्तरीत्यासहायबलहीनश्च ॥ ९ ॥ **स०** उपांशुदण्डेन लोकाविदितशिक्षया । बन्धनेन कारागारस्थापनादिना । शठोगूढद्वेषी । घोरः असह्यव्यापारः । नृशंसोघातकः । यद्यप्यर्थतएकताऽमीषां । तथापि त्रिवारंवदिष्यामीति हनूमतो

[पा०] १ क.—ट. दुरात्मना. २ ग. घ. ङ. च. ज. बिलस्यापिहितं. ३ च. ञ. कस्यसुकृतं. ४ ग. च.—ट. भयेनेह. ५ झ. धर्मस्तस्मिन्. ञ. ट. धर्मस्त्वस्मिन्. ६ छ. झ. स्मृतिभिन्ने. ७ ङ.—ट. विशेषतः. ८ ग. ङ.—ट. पुत्रंप्रतिष्ठाप्य. ९ ग. ङ. च. ज. ञ. सद्गुणो. १० ङ—ट. विगुणोपिवा. ११ ङ. च. ज. ञ. भिन्नमन्त्रोविरुद्धश्च. १२ क. बाधनेन.

बन्धनाद्वाऽवसादान्मे[1] श्रेयः प्रायोपवेशनम् ॥ अनुजानीत[2] मां सर्वे गृहं[3] गच्छन्तु वानराः ॥११॥
अहं वः प्रतिजानामि नागमिष्याम्यहं[4] पुरीम् ॥ इहैव प्रायमासिष्ये श्रेयो मरणमेव मे ॥ १२ ॥
अभिवादनपूर्वं[5] तु राघवौ[6] बलशालिनौ ॥ अभिवादनपूर्वं तु राजा कुशलमेव च ॥
वाच्यस्तातो यवीयान्मे सुग्रीवो वानरेश्वरः ॥ १३ ॥
आरोग्यपूर्वं कुशलं वाच्या[7] माता रुमा च मे ॥ मातरं चैव मे तारामाश्वासयितुमर्हथ ॥ १४ ॥
प्रकृत्या प्रियपुत्रा सा सानुक्रोशा तपस्विनी ॥ विनष्टमिह[8] मां श्रुत्वा व्यक्तं हास्यति जीवितम् ॥१५॥
एतावदुक्त्वा[9] वचनं वृद्धांस्तानभिवाद्य च ॥ विवेश[10] चाङ्गदो भूमौ रुदन्दर्भेषु दुर्मनाः[11] ॥ १६ ॥
तस्य संविशतस्तत्र रुदन्तो वानरर्षभाः ॥ नयनेभ्यः प्रमुमुचुरुष्णं वै वारि दुःखिताः ॥ १७ ॥
सुग्रीवं[12] चैव निन्दन्तः प्रशंसन्तश्च वालिनम् ॥ परिवार्याङ्गदं सर्वे व्यवसन्[13]प्रायमासितुम् ॥ १८ ॥
तं[14] तद्वालिपुत्रस्य विज्ञाय प्लवगर्षभाः ॥ उपस्पृश्योदकं तत्र[15] प्राङ्मुखाः समुपाविशन् ॥ १९ ॥
दक्षिणाग्रेषु दर्भेषु उदक्तीरं समाश्रिताः ॥ मुमूर्षवो हरिश्रेष्ठा एतत्क्षममिति स्म ह ॥ २० ॥
रामस्य वनवासं च क्षयं दशरथस्य च ॥ जनस्थानवधं चैव वधं चैव जटायुषः ॥ २१ ॥
हरणं चैव वैदेह्या वालिनश्च वधं रणे[16] ॥ रामकोपं च वदतां हरीणां भयमागतम् ॥ २२ ॥
स[17] संविशद्भिर्बहुभिर्महीधरो महाद्रिकूटप्रतिमैः प्लवङ्गमैः ॥
बभूव सन्नादितनिर्दरान्तरो[18] भृशं नदद्भिर्जलदैरिवोल्बणैः[19] ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

बन्धनाद्वावसादान्म इति वेति प्रसिद्धौ । बन्धनरूपावसादात् ॥ ११—१२ ॥ राघवौ कुशलं वाच्याविल्यनुषङ्गः ॥ १३—१४ ॥ तपस्विनी शोचनीया ॥ १५—१६ ॥ तस्य संविशतः तस्मिन् संविशति । संवेशः शयनं ॥ १७—१८ ॥ तत्र विन्ध्ये । उदक्तीरं समुद्रस्योत्तरतीरं । एतत् प्रायोपवेशनं क्षममिति मत्वेति शेषः ॥ १९—२० ॥ जनस्थानवधं जनस्थानस्थरक्षोवधं ॥ २१ ॥ आगतं भयं प्रायोपवेशनरूपभयनिमित्तं च । वदतां वदत्सु च । स महीधरो भृशं सन्नादितनिर्दरान्तरो बभूवेत्युत्तरेणान्वयः ॥ २२—२३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

निश्चयजननाय शठाद्युक्तिर्युक्ता ॥ १० ॥ **स०** अहमहमितिद्विरुक्तिः प्रतिजानामि गमिष्यामीत्याख्यातद्वययोगादुपपन्ना । यद्वा अहमिति मान्तमहङ्कारवद्वाच्यव्ययं । अहं अहन्तावान् अभिमानीतियावत् ॥ १२ ॥ **ति०** राजा सुग्रीवः । कुशलमेववाच्य इत्यनुकर्षः । नत्विदानीं दुःखवशादुक्तमित्यर्थः ॥ **ति०** अथमातुःकुशलविज्ञापनाशेषतयाऽऽरोग्यपूर्वकत्वविशेषाभिधित्सयाच पुनःसुग्रीवेकुशलविज्ञापनमाह—वाच्यस्तातइति ॥ १३ ॥ **ति०** निन्दन्तः । अङ्गदपक्ष्याइतिशेषः । व्यवसन् व्यवास्यन् ॥ **शि०** वालिनंप्रशंसन्तः वाली अतीवभाग्यवान् युद्धेरामसंमुखेमृतइतिवदन्तः ॥ १८ ॥ **ती०** उत्तरीयंसमाहिताइतिकर्तरिनिष्ठा । उत्तरीयंसंवसितवन्तइत्यर्थः । उदक्तीरंसमाश्रिताइतिचपाठः ॥ **ति०** हरिश्रेष्ठाअपि एतत्प्रायोपवेशनमेवास्माकमद्यक्षमं युक्तंइति मन्यन्ते स्मेतिशेषः । स्वामिनिम्रियमाणे तंपरित्यज्यास्माकंगमनमयुक्तमिति तत्क्षमत्वव्यवसायः ॥ २० ॥ **ती०** हरीणांभयमागतं संपातिरूपंभयनिमित्तंप्राप्तं । एतच्चानन्तरसर्गादौस्पष्टीभविष्यति ॥ **स०** रामकोपं सुग्रीवोपरि । हरीणांतेषांसुग्रीवादागतंभयं वदतामित्यन्वयः ॥ २२ ॥ **ती०** भयनिमित्तागमनेहेतुमाह—**ससंविशद्भिरिति** ॥ संनादितनिर्दरान्तरत्वस्य भयनिमित्तसंपात्यागमनहेतुत्वात् ॥ २३ ॥ इतिपञ्चपञ्चाशःसर्गः ॥ ५५ ॥

[पा] १ क. ख. ग. ङ.—ट. बन्धनाच्चा. २ ङ.—ट. अनुजानन्तु. ३ क.—घ. गृहान्. ४ ङ.—ट. नगमिष्याम्यहं. ५ क. घ. पूर्वंहि. ६ च.—ट. राजाकुशलमेवच । अभिवादनपूर्वंतुराघवौबलशालिनौ. ७ ङ. च. ज. ञ. वाच्यःपिता. ८ क.—च. ज. ञ. विनष्टंमामिहश्रुत्वा. ९ क. ख. घ. एतावद्वचनंचोक्त्वावृद्धानप्यभिवाद्यच. १० क.—घ. संविवेशाङ्गदो. ११ ङ.—ट. दुर्मुखः. १२ क. सुग्रीवंचापि. १३ क. ख. घ. छ. ञ. व्यवास्यन्. ग. व्यतिष्ठन्. १४ ख. झ. ट. तद्वाक्यं वालिपुत्रस्य. १५ ख. घ.—ट. सर्वेप्राङ्मुखाः. क. विन्ध्येप्राङ्मुखाः. १६ ङ.—ट. तथा. १७ क. ख. एवंवदद्भिर्बहुभिः. १८ ख. झ. निर्झरान्तरो. १९ ङ.—ट. रिवांबरं.

षट्पञ्चाशः सर्गः ॥ ५६ ॥

कपिकुलकोलाहलाद्विन्ध्यकन्दराद्विनिर्गतेनसंपातिना कपिकुलावलोकनेन चिरतराहारपरिकल्पनहर्षाद्विधिप्रशंसनपूर्वकं क्रमेण सर्ववानरभक्षणप्रतिज्ञानम् ॥ १ ॥ तदाकर्णनखिन्नेनाङ्गदेन हनूमन्तंप्रति रामकार्याकरणेन प्राणविमोक्षणाद्रामोपकाराय रावणान्मारणाधिगमाच्च क्रमेणात्मगर्हणजटायुःप्रशंसनपूर्वकमेतावद्विपत्तिनिमित्तत्वोत्कीर्तनेन कैकेयीगर्हणम् ॥ २ ॥ तदाकर्णननिर्विण्णेनसंपातिनाऽङ्गदंप्रति स्वस्य जटायुरग्रजत्वनिवेदनेन तन्मरणप्रकारप्रश्नपूर्वकं स्वस्यसूर्यकिरणनिर्दग्धपक्षत्वोक्त्या पर्वतादवतारणप्रार्थना ॥ ३ ॥

[1]उपविष्टास्तु ते सर्वे यस्मिन्प्रायं गिरि[2]स्थले ॥ हरयो गृध्रराजश्च तं देशमुपचक्रमे ॥ १ ॥
संपातिर्नाम नाम्ना तु [3]चिरंजीवी विहङ्गमः ॥ भ्राता जटायुषः श्रीमान्प्र[4]ख्यातबलपौरुषः ॥ २ ॥
कन्दरादभिनिष्क्रम्य स विन्ध्यस्य महागिरेः ॥ उपविष्टान्हरीन्दृष्ट्वा हृष्टात्मा गिरमब्रवीत् ॥ ३ ॥
विधिः किल नरं लोके विधानेनानुवर्तते ॥ यथाऽयं विहितो भक्ष्यश्चिरान्मह्य[5]मुपागतः ॥ ४ ॥
परं पराणां भक्षिष्ये वानराणां मृतं मृतम् ॥ [6]उवाचेदं वचः पक्षी तान्निरीक्ष्य प्लवङ्गमान् ॥ ५ ॥
तस्य तद्वचनं श्रुत्वा भक्ष्यलुब्धस्य पक्षिणः ॥ अङ्गदः परमायस्तो हनुमन्तमथाब्रवीत् ॥ ६ ॥
पश्य [7]सीतापदेशेन साक्षा[8]द्वैवस्वतो यमः ॥ इमं देश[9]मनुप्राप्तो वानराणां विपत्तये ॥ ७ ॥
रामस्य [10]नं कृतं कार्यं [11]राज्ञो न च वचः कृतम् ॥ हरीणामियमज्ञाता विपत्तिः सहसाऽऽगता ॥ ८ ॥
वैदेह्याः प्रियकामेन कृतं कर्म जटायुषा ॥ गृध्रराजेन यत्तत्र श्रुतं वस्तदशेषतः ॥ ९ ॥
तथा सर्वाणि भूतानि तीर्यग्योनिगतान्यपि ॥ प्रियं कुर्वन्ति रामस्य त्यक्त्वा प्राणान्यथा वयम् ॥
अन्योन्यमुपकुर्वन्ति स्नेहकारुण्ययन्त्रिताः ॥ १० ॥
[12]तेन तस्यो[13]पकारार्थं त्यजतात्मानमात्मना ॥ प्रियं कृतं हि रामस्य धर्मज्ञेन जटायुषा ॥ ११ ॥

अथ संपातिसंवादः षट्पञ्चाशे—उपविष्टा इत्यादि ॥ उपचक्रमे प्राप्तुमुपक्रान्तः ॥ १ ॥ संपातिरित्यादि श्लोकद्वयमेकान्वयं ॥ २—३ ॥ विधिः दैवं । विधानेन योगक्षेमसंपादनेन । यथा यस्मात्कारणात् ॥ ४ ॥ पराणां वानराणां मध्ये मृतंमृतं परं वानरं भक्षिष्य इत्येवं वच उवाचेत्यन्वयः ॥ ५ ॥ परमायस्तः परमोद्विग्न इत्यर्थः ॥ ६—७ ॥ अज्ञाता अचिन्तिता ॥ ८—९ ॥ स्नेहकारुण्ययन्त्रिताः स्नेहकारुण्याभ्यां

स० विधिः दैवं कर्मफलंवा । विधानेनापूर्वकर्मानुरोधेन । नरमनुवर्तते । सामान्येनोक्तंस्वस्मिन्निगमयन्नवगमयति—**यथेति** । चिरादुपोषितायेतिशेषः । विहितोमह्यं मद्योग्यः । भक्ष्यः कपिपिशितरूपः । यद्वा मह्यमितिचतुर्थीद्वितीयार्थे । विहितोयोग्योभक्ष्योमामुपागतइत्यन्वयः ॥ ४ ॥ **रामानु०** पराणां श्रेष्ठानां । वानराणांमध्ये परं वानरं मृतंमृतं मारयित्वामारयित्वा भक्षिष्येइत्येवंवचउवाचेतिसंबन्धः ॥ पूर्वत्र " हरीणांभयमागतं " इतिवचनस्य परत्र " पश्यसीतापदेशेन " इत्याद्यङ्गदनिर्वेदवचनस्यच स्वयंमृतभक्षणेऽनुपपन्नत्वान्मारयित्वामारयित्वेति व्याख्यातं ॥ **ति०** यतः परंपराणां पङ्क्तिउपविष्टानांवानराणांमध्ये मृतंमृतंक्रमाद्भक्षिष्ये । तस्मादितिपूर्वेणसंबन्धः ॥ ५ ॥ **स०** सीतापदेशेन सीताव्याजेनप्राप्तप्रायोपवेशानामित्यर्थः । वानराणांविपत्तये साक्षाद्वैवस्वतोयमः अयंगृध्ररूपी इमंदेशमनुप्राप्तः । गृध्रापदेशेनेतिपाठे सुगमोर्थः । शनैश्चरव्यावृत्तये**यमइति** । यमलभ्रमभ्रंशाय **वैवस्वतइति** ॥ ७ ॥ **स०** पूर्वंपश्येति हनुमन्मात्रंसंबोध्योक्तमिति तइतिवक्तव्येवइत्युक्तिः अङ्गदस्याङ्गस्मरणाभावेनेतिज्ञेयं ॥ यद्वा पूर्वंपश्येत्युक्तिर्मुख्यत्वाच्छ्रोतृषुहनुमतःसंभवति । अत्रमुख्यामुख्योभयविवक्षयावइत्युक्तिः ॥ ९ ॥ **ति०** रामस्यप्रियंकुर्वन्तीत्यनेन तस्मिन्सर्वप्रेमास्पदत्वंसूचयतासर्वात्मत्वंसूचितं ॥ सार्वात्म्यमेवद्रढयति—**अन्योन्यमिति** । स्नेहकारुण्ययन्त्रिताः । रामेइतिशेषः । सर्वस्यरामत्वात्तदीयस्नेहेनैव परस्परोपकारकरणमित्यर्थः ॥ १० ॥ **शि०** तिर्यग्योनिगतानि जटायुःप्रभृतीनि । प्राणां-

[**पा०**] १ ख. उपविष्टांस्तुतान्सर्वांस्तस्मिन्प्रायंगिरेस्तटे । गृध्रराजोहरीन्प्रेक्ष्यप्रख्यातबलपौरुषः. २ घ. गिरेस्तटे. ३ ग.— ञ. चिरजीवी. ४ ङ.—ट. न्विख्यातबल. ५ क. ख. ग. मिहागतः. ६ ख. च. ज. झ. ञ. उवाचैतद्वचः. ग. घ. उवाचैवंवचः. ङ. छ. ट. उवाचतद्वचः. ७ ङ.—ज. ञ. ट. गृध्रापदेशेन. ८ ख. द्वैवस्वतंयमं. ९ ख. मनुप्राप्तं. १० छ. झ. ट. कार्यंनकृतंनकृतंराजशासनं. ११ ङ. च. छ. ञ. राज्ञश्चनवचः. १२ क. ग. च.—ट. ततस्तस्योप. १३ ङ. कारार्थे.

राघवार्थे परिश्रान्ता वयं संत्यक्तजीविताः ॥ कान्ताराणि प्रपन्नाः स्म न च पश्याम मैथिलीम् ॥ १२ ॥
स सुखी गृध्रराजस्तु रावणेन हतो रणे ॥ मुक्तश्च सुग्रीवभयाद्गतश्च परमां गतिम् ॥ १३ ॥
जटायुषो विनाशेन राज्ञो दशरथस्य च ॥ हरणेन च वैदेह्याः संशयं हरयो गताः ॥ १४ ॥
रामलक्ष्मणयोर्[2]वास अरण्ये सह सीतया ॥ राघवस्य च बाणेन वालिनश्च [3]तथा वधः ॥ १५ ॥
[4]रामकोपादशेषाणां [5]राक्षसानां तथा वधः ॥ कैकेय्या वरदानेन [6]इदं हि विकृतं कृतम् ॥ १६ ॥

तदसुखमनुकीर्तितं वचो भुवि पतितांश्च [7]समीक्ष्य वानरान् ॥
भृश[8]चलितमतिर्महामतिः कृपणमुदाहृतवान्स [9]गृध्रराट् ॥ १७ ॥

[10]तं तु श्रुत्वा [11]तदा वाक्यमङ्गदस्य मुखोद्गतम् ॥ अब्रवीद्वचनं गृध्रस्तीक्ष्णतुण्डो [12]महास्वनः ॥ १८ ॥
कोऽयं गिरा घोषयति प्राणैः [13]प्रियतमस्य मे ॥ जटायुषो वधं भ्रातुः कम्पयन्निव मे मनः ॥ १९ ॥
कथमासीज्जनस्थाने युद्धं राक्षसगृध्रयोः ॥ नामधेयमिदं भ्रातुश्[14]चिरस्याद्य मया श्रुतम् ॥
इच्छेयं गिरिदुर्गाच्च भवद्भिरवतारितुम् ॥ २० ॥
यवीयसो गुणज्ञस्य श्लाघनीयस्य विक्रमैः ॥ अतिदीर्घस्य कालस्य [15]तुष्टोऽस्मि परिकीर्तनात् ॥ २१ ॥
तदिच्छेयमहं श्रोतुं विनाशं वानरर्षभाः ॥ भ्रातुर्जटायुषस्तस्य जनस्थाननिवासिनः ॥ २२ ॥

बद्धाः । अन्योन्यं प्रत्येकं प्रत्येकं ॥ १०—१२ ॥ परमां गतिं मुक्तिमित्यर्थः ॥ १३—१४ ॥ रामलक्ष्मणयोरित्यादि ॥ रामवनवासमारभ्य प्रायोपवेशपर्यन्तं यदस्ति तत्सर्वमिदं विकृतं कैकेय्या वरदानेन कृतं हीति संबन्धः । इत्यङ्गदोब्रवीदितिसंबन्धः ॥ १५—१६ ॥ समीक्ष्य ज्ञात्वेत्यर्थः । ज्ञानं च वचनश्रवणं वानराणां दर्शनं च । अस्य श्लोकस्यानन्तरं सर्गसमाप्तिर्भवितुमर्हति ॥ १७ ॥ तीक्ष्णतुण्डः तीक्ष्णमुखः ।

स्त्यक्त्वापि यथारामस्यप्रियंकुर्वन्ति तथावयं करिष्यामइतिशेषः ॥ अन्योन्यमुपकुर्वन्ति शिष्टाः । ततस्तस्यरामस्योपकारार्थं आत्मना स्वस्वप्रयत्नेन आत्मानंदेहंत्यजत ॥ स० स्नेहयन्त्रिताः उत्तमेषुस्नेहो भक्तिः । मध्यमेषुस्नेहः प्रीतिः । अधमेषु कारुण्यं कृपा । त्यजतेतितृतीयान्तं जटायुषोविशेषणं ॥ आत्मानं शरीरं । आत्मना मनसा ॥ १०-११ ॥ ति० ननु प्राणत्यागेन कथंरामस्यसंतोषोतआह—प्रियमिति । ह्रियतः जटायुषा प्राणांस्त्यजता प्रियंकृतमिति रामस्य मतमितिशेषः । तथाऽस्मन्मरणेनापि रामस्तथा मंस्यतीतिभावः ॥ ११ ॥ स० सामान्यतस्तिर्यक्स्वामित्वंसुग्रीवस्येति सुग्रीवभयान्मुक्तइति जटायुषंप्रति वचनमुचितमितिभावः । यद्वा स्वेषांसुग्रीवाद्भयंयथा तथा सर्वेषामपि भयंतस्मादिति भ्रान्तिपरवशतयाऽङ्गदेनैवमुक्तमितिमंतव्यं ॥ सुग्रीवभयात् सुग्रीवस्य भयं स्वकार्याकरणे यस्मात्सतथा रामः तस्मात् । मुक्तः शरीरात् । परमांगतिंगतइत्यन्वयः । अनेन सुग्रीवोपि परतन्त्रइति भीतोस्मान्भीषयतीतिसूच्यते ॥ १३ ॥ ति० जटायुषोविनाशेन द्रागितिशेषः । यदिपुनर्मुहूर्तमपि युद्धेरावणंनिरुन्ध्यात्तदा रामदृग्गोचरोरावणः सीतां नहरेदितिभावः । राज्ञोदशरथस्यच द्राग्विनाशेन । यदि पक्षमात्रमपि राजजीवनं स्यात्तदा रामंप्रत्यानयेदेवेतिभावः । वैदेहीहरणंतु स्पष्टमेव वानराणांप्राणसंशयकारणं ॥ १४ ॥ रामानु० तदसुखमिति । श्रुत्वेतिशेषः । सगृध्रराडितिसम्यक् । अन्यथा वृत्तभङ्गःस्यात् । केषुचित्कोशेष्वस्यश्लोकस्यानन्तरं सर्गकरणंदृश्यते केषुचित्सूर्यांशुदग्धपक्षत्वादित्यस्यानन्तरंदृश्यते । प्रायेण सर्गसमाप्तिद्योतकवृत्तभेदसद्भावात्तदसुखमितिश्लोकानन्तरं सर्गकरणमुपपन्नमितिप्रतीयते ॥ १७ ॥ स० गृध्रस्य स्वानुजमरणश्रवणतोङ्गस्मरणं नास्तीतिसूचयितुं कविः पुनः तीक्ष्णतुण्डोवचनमब्रवीदितिवदति—तन्त्विति । यद्वा पूर्ववानरान्प्रत्युदाहृतवानिति अत्रतु अङ्गदस्यमुखोद्गतंश्रुत्वा वचनमब्रवीदित्युक्त्या राजपुत्रत्वेनाङ्गदमात्रंप्रत्युक्तिरिति नपुनरुक्तिः ॥ १८ ॥ ति० कोघोषयति समयाप्रष्टव्यइतिशेषः ॥ १९ ॥ स० रावणस्य ऋषिकुलजत्वेनाभ्यर्हितत्वाद्राक्षसगृध्रयोरितियुक्तं ॥ ति० अवतारितुमिच्छेयं । आत्मानमितिशेषः ॥ २० ॥ ति० अवतारणफलमाह—यवीयसइति कनिष्ठस्येत्यर्थः ॥ २१ ॥ ति० श्रोतुमिच्छेयं । युष्मत्समीपमागत्येतिशेषः ॥ २२ ॥ ति० तस्येति । अन्वयस्तुयस्यरामःप्रियःपुत्रः स दशरथो

[पा०] १ च. मरणेगताः. २ क. ख. घ.—ट. र्वासमरण्ये. ३ क. वधस्तथा. ४ क. रामकोपाच्चसर्वेषां. ५ ङ.—ट. रक्षसांच. ६ ङ. छ. झ. ट. इदंच. ७ ङ. च. छ. झ. ञ. ट. निरीक्ष्य. ८ छ. झ. ञ. ट. चकितमतिः. ९ ग. ङ.—ट. गृध्रराजः. १० च. ज. ततः. ग. इतिश्रुत्वा. ११ छ. झ. ट. तथा. १२ छ. ज. महाखगः. १३ क. ग. ङ.—ट. प्रियतरस्यमे. १४ ङ.—ज. ञ. चिरायाद्य. १५ क.—ट. परितुष्टोस्मिकीर्तनात्.

[1]तस्यैव च मम भ्रातुः सखा दशरथः कथम् ॥ यस्य रामः प्रियः पुत्रो ज्येष्ठो गुरुजनप्रियः ॥२३॥
सूर्यांशुदग्धपक्षत्वान्न [2]शक्नोम्युपसर्पितुम् ॥ इच्छेयं पर्वतादस्मा[3]दवतर्तुमरिन्दमाः ॥ २४ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकिये आदिकाव्ये किष्किन्धाकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अङ्गदेन संपातेःपर्वतादवतारणपूर्वकं तंप्रति रामवनप्रवेशादिस्वप्रायोपवेशान्तनिखिलवृत्तान्तनिवेदनम् ॥ १ ॥

शोकाद्भ्रष्टस्वरमपि [4]श्रुत्वा ते हरियूथपाः ॥ श्रद्दधुर्नैव तद्वाक्यं कर्मणा तस्य शङ्किताः ॥ १ ॥
ते प्रायमुपविष्टास्तु दृष्ट्वा गृध्रं प्लवङ्गमाः ॥ चक्रुर्बुद्धिं तदा [5]रौद्रां सर्वान्नो भक्षयिष्यति ॥ २ ॥
[6]सर्वथा प्रायमासीनान्यदि नो भक्षयिष्यति ॥ कृतकृत्या भविष्यामः क्षिप्रं सिद्धिमितो गताः ॥३॥
एतां बुद्धिं [7]ततश्चक्रुः सर्वे ते [8]वानरर्षभाः ॥ अवतार्य गिरेः शृङ्गाद्गृध्रमाहाङ्गदस्तदा ॥ ४ ॥
[9]बभूवर्क्षरजा नाम वानरेन्द्रः प्रतापवान् ॥ ममार्यः [10]पार्थिवः [11]पक्षिन्धार्मिकस्तस्य चात्मजौ ॥ ५ ॥
सुग्रीवश्चैव वाली च [12]पुत्रावोघबलावुभौ ॥ लोके विश्रुतकर्माभूद्राजा वाली पिता मम ॥ ६ ॥
राजा कृत्स्नस्य जगत इक्ष्वाकूणां [13]महारथः ॥ रामो दाशरथिः श्रीमान्प्रविष्टो दण्डकावनम् ॥ ७ ॥
लक्ष्मणेन सह भ्रात्रा वैदेह्या [14]चापि भार्यया ॥ पितुर्निदेशनिरतो धर्म्यं पन्थानमाश्रितः ॥
तस्य भार्या जनस्थानाद्रावणेन हृता बलात् ॥ ८ ॥
रामस्य तु पितुर्मित्रं जटायुर्नाम गृध्रराट् ॥ ददर्श सीतां वैदेहीं ह्रियमाणां विहायसा ॥ ९ ॥

" वक्त्रास्ये वदनं तुण्डं " इत्यमरः ॥ १८—२४ ॥ अत्र "कथमासीज्जनस्थाने युद्धं राक्षसगृध्रयोः" "सखा दशरथः कथं " इत्येवमनुवादात्पूर्वमिदमप्यङ्गदेनोक्तमिति ध्येयम् ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षट्पञ्चाशः सर्गः ॥ ५६ ॥

अथ संपातिप्रश्नोत्तरं सप्तपञ्चाशे—शोकादित्यादि॥ कर्मणा हिंसाकर्मणा ॥१॥ रौद्रां आत्मत्यागाध्यवसायरूपत्वेन क्रूरां ॥ २—४ ॥ आर्यः पितामहः । आत्मजौ औरसौ ॥ ५ ॥ ओघबलौ ओघसङ्ख्याकपुरुषबलौ । ओघसङ्ख्या च पूर्वोक्ता ॥६–८॥ रामस्य तु पितुर्मित्रमिति कथनात् मैत्रीप्रकारं तु न जानामीत्युक्तं भवति

ममभ्रातुस्तस्यैवजटायुषःसखा । अतस्तत्स्नेहात्प्रयतमानस्य तस्यजनस्थानवासिनः तस्य प्रसिद्धविक्रमस्य । जटायुषोविनाशः कथमभवदिति तस्यविनाशं श्रोतुमिच्छेयमिति । कथंसखा इत्यन्वयस्तुनोचितः । तदुत्तरस्याग्रेऽभावात् ॥ शि० यस्यरामःपुत्रः स ममभ्रातुःसखा दशरथः कथंलोकान्तरंगतइतिशेषः ॥ २२–२३ ॥ ति० अवतर्तुं अवतारयितुं ॥ स० अवतर्तुं अवतरितुं । आगमशासनमनित्यमितिवा तृ इतिह्रस्वान्तधातोरनिट्कत्वाद्वा तद्रूपं । विस्तृतंचैतत्तत्रताराथेत्यनुव्याख्यानव्याख्यासुधापरिमले । ततोनुसन्धेयमिति ॥ २४ ॥ इतिषट्पञ्चाशःसर्गः ॥ ५६ ॥

ति० भ्रष्टस्वरं भक्षणवचनस्वरापेक्षया भ्रष्टस्वरमित्यर्थः । तेनस्वरेण यद्यपि सनिश्चितशोकः परितुष्टोस्मीतिश्रद्धेयवचनोभवति । तथापि नश्रद्दधुः यतस्तस्यकर्मणाशङ्किताः । भक्षणार्थं वञ्चनमेवकरोतीति बुद्ध्येतिभावः ॥ स० कर्मणा मृतान्भक्षयिष्यामीतिव्याहरणेन ॥ १ ॥ ति० सिद्धिं मरणरूपां ॥ ३ ॥ ति० एतांबुद्धिं भक्षणाभीष्टत्वबुद्धिं ॥ ४ ॥ ति० पार्थिवः वानराणामितिशेषः ॥ ५ ॥ ति० घनबलौ बहुबलौ ॥ ६ ॥

[पा०] १ ख. तस्यचैव. २ क. ग. ङ. छ. झ. ञ. ट. शक्नोमिविसर्पितुं. ख. शक्नोम्यपसर्पितुं. घ. शक्तोस्मिविसर्पितुं. ३ घ. दवतर्तुंप्लवंगमाः. ४ क. ग. ङ.—ट. श्रुत्वावानरयूथपाः. ५ ग. क्रूरां. ६ च. सर्वांश्च. ७ ग. तदाचक्रुः. ८ ङ.—ट. हरियूथपाः. ९ क. ग. घ. च.—झ. ट. बभूवर्क्षरजोनाम. १० ग. पूर्वकः. ११ क. ख. ङ.—ट. पक्षिन्धार्मिकौतस्य. ग. ख्यातोधार्मिकः. १२ क. पुत्रौदेवबलौमतौ. ख. पुत्रौदेवबलान्वितौ. ग. पुत्रौतुल्यबलावुभौ. छ. झ. ट. पुत्रौघनबलावुभौ. १३ घ. महाबलः. १४ ग. ङ.—ट. सह.

रावणं विरथं कृत्वा स्थापयित्वा च मैथिलीम् ॥ परिश्रान्तश्च वृद्धश्च रावणेन हतो रणे ॥ १० ॥
एवं गृध्रो हतस्तेन रावणेन बलीयसा ॥ संस्कृतश्चापि रामेण [1]गतश्च गतिमुत्तमाम् ॥ ११ ॥
ततो मम पितृव्येण सुग्रीवेण महात्मना ॥ चकार राघवः सख्यं सोऽवधीत्पितरं मम ॥ १२ ॥
मम पित्रा [2]विरुद्धो हि सुग्रीवः सचिवैः सह ॥ निहत्य वालिनं रामस्ततस्तमभिषेचयत् ॥ १३ ॥
स राज्ये स्थापितस्तेन सुग्रीवो [3]वानराधिपः ॥ राजा वानरमुख्यानां [4]येन प्रस्थापिता वयम् ॥ १४॥
एवं राम[5]प्रयुक्तास्तु मार्गमाणास्ततस्ततः ॥ वैदेहीं नाधिगच्छामो रात्रौ सूर्यप्रभामिव ॥ १५ ॥
ते वयं [6]दण्डकारण्यं विचित्य सुसमाहिताः ॥ अज्ञानात्तु प्रविष्टाः स [7]धर्मिण्या विवृतं बिलम् ॥१६॥
मयस्य मायाविहितं तद्बिलं च विचिन्वताम् ॥ व्यतीतस्तत्र नो मासो यो राज्ञा समयः कृतः ॥१७॥
ते वयं कपिराजस्य सर्वे वचनकारिणः ॥ [8]कृतां संस्थामतिक्रान्ता भयात्प्राय[9]मुपासहे ॥ १८ ॥
क्रुद्धे तस्मिंस्तु काकुत्स्थे सुग्रीवे च सलक्ष्मणे ॥ गतानामपि सर्वेषां तत्र नो नास्ति जीवितम् ॥१९॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अष्टपञ्चाशः सर्गः ॥ ५८ ॥

अङ्गदंप्रतिसंपातिना परस्परबलपरीक्षणाय जटायुषासह सूर्यमण्डलसमीपगमने सौरातपसंतप्तस्यजटायुषःपरिरक्षणाय स्वेन तदुपरिस्वपक्षप्रसारणे स्वस्यसौरातपनिर्दग्धपक्षतया विन्ध्यगिरौ पतननिवेदनम् ॥ १ ॥ अङ्गदेन सीतावृत्तान्तपरिज्ञानंपृष्टेनतेन कदाचन रावणेननीयमानायाःकस्याश्चित्तरुण्याः स्वस्यपरिज्ञाननिवेदनेनसह तयारामनामोत्कीर्तनेन तस्याः सीतात्वनिर्धारणोक्तिः ॥ २ ॥ तथा तंप्रति स्वस्य दूरदर्शित्वोपपादनपूर्वकं लङ्कायाः शतयोजनोत्तरस्थत्वकथनेनसह तत्र तदानीं सीतायारावणस्यचावस्थाननिवेदनम् ॥ ३ ॥ संपातिना जटायुषेजलदानाय स्वस्य समुद्रप्रापणंप्रार्थितैर्वानरैस्तस्य समुद्रप्रापणेन पुनःपूर्वतनदेशं प्रत्यानयनम् ॥ ४ ॥

इत्युक्तः करुणं वाक्यं वानरैस्त्यक्तजीवितैः ॥ [10]संबाष्पो वानरान्गृध्रः प्रत्युवाच [11]महास्वनः ॥ १ ॥
यवीयान्मम स भ्राता जटायुर्नाम वानराः ॥ यमाख्यात हतं युद्धे रावणेन बलीयसा ॥ २ ॥
वृद्धभावादपक्षत्वाच्छृण्वंस्तदपि मर्षये ॥ न हि मे [12]शक्तिरस्त्यद्य भ्रातुर्वैरविमोक्षणे ॥ ३ ॥
पुरा वृत्रवधे वृत्ते [13]परस्परजयैषिणौ ॥ आदित्य[14]मुपयातौ स्वो ज्वलन्तं रश्मिमालिनम् ॥ ४ ॥

॥ ९–१३ ॥ अभिषेचयत् अभ्यषेचयत् ॥ १४–१७ ॥ संस्थां व्यवस्थां ॥ १८—१९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अथ संपातिना सीतास्थानकथनमष्टपञ्चाशे— इत्युक्त इत्यादि ॥ १ ॥ आख्यात भूते लोट् ॥ २—३ ॥ पुरेति परस्परवेगातिशयख्यापनपराविति त्यर्थः । आदित्यमुपयातौ सूर्यसमीपंगतौ स्वः ॥ ४ ॥

ति० स्थापयित्वा भूमाविति शेषः ॥ १० ॥ ति० निरुद्धः निरुद्धराज्यः ॥ १३ ॥ इतिसप्तपञ्चाशःसर्गः ॥ ५७ ॥

ती० सबाष्पंधारयन्क्रुद्धइतिपाठे क्रोधोरावणविषयः ॥ ति० त्यक्तजीवितैःत्यक्तजीवितनाशभयैः ॥ १ ॥ ति० आख्यात आख्यातवन्तः ॥ २ ॥ स० पूर्वंशक्तियुक्तस्यतवेदानीमशक्तिःकुतइत्यतोनिमित्तमाह—पुरेति । पुरावृत्रवधे इतिकालविशेषकथनार्थमेव नतुवृत्रवधस्यप्रकृतोपयोगकथनमिति मानसमायसनीयं । स्वइत्युत्तमपुरुषद्विवचनमेकत्र । अपरत्र स्मेतिपाठः । तस्यचावसीदतीत्यनेनान्वयः । ततोलङर्थकता । यदि बहुपुस्तकसंपुटीषुं स्वरितिवर्तेत तदा स्वरन्तरिक्षंगृह्यते । अन्तरिक्षादिपदमपरिक्षिपन्परिक्षि-

[पा०] १ ङ.—ट. जगाम. २ छ. झ. ञ. ट. निरुद्धोहि. ३ ख. घ.—ट. वानरेश्वरः. क. ग. प्लवगेश्वरः. ४ छ. झ. ट. तेन. ५ ख. प्रयुक्ताश्च. ६ घ. दण्डकारण्ये. ७ क. ख. घ.—ट. धरण्याविवृतं. ग. धरण्यांविवृतं. ८ ग. कृतसंस्थां. ९ ङ.—ज. ञ. मुपाश्रिताः. झ. ट. मुपासिताः. १० ख. घ. च. सबाष्पान्. क. सबाष्पनयनान्गृध्रः. ११ ग. महाबलः. १२ ख. घ. शक्तिरद्यास्ति. १३ क.—ट.सचाहंचजयैषिणौ. १४ ख. मुपयातौस्म.

आवृत्याऽऽकाशमार्गे[1] तु जवेन स[2] गतौ भृशम् ॥ मध्यं प्राप्ते[3] दिनकरे जटायुरवसीदति ॥ ५ ॥
तमहं भ्रातरं दृष्ट्वा सूर्यरश्मिभिरर्दितम् ॥ पक्षाभ्यां छादयामास[4] स्नेहात्परमविह्वलः[5] ॥ ६ ॥
निर्दग्धपक्षः[6] पतितो विन्ध्येऽहं[7] वानरर्षभाः[8] ॥ अहमस्मिन्वसन्भ्रातुः प्रवृत्तिं नोपलक्षये ॥ ७ ॥
जटायुषस्त्वेवमुक्तो भ्रात्रा संपातिना तदा ॥ युवराजो महाप्राज्ञः प्रत्युवाचाङ्गदस्तदा ॥ ८ ॥
जटायुषो यदि भ्राता श्रुतं ते गदितं मया ॥ आख्याहि यदि जानासि निलयं तस्य रक्षसः ॥ ९ ॥
अदीर्घदर्शनं[9] तं[10] वै रावणं राक्षसाधिपम्[11] ॥ अन्तिके यदि वा दूरे यदि जानासि शंस नः ॥ १० ॥
ततोऽब्रवीन्महातेजा ज्येष्ठो[12] भ्राता जटायुषः ॥ आत्मानुरूपं वचनं वानरान्संप्रहर्षयन् ॥ ११ ॥
निर्दग्धपक्षो गृध्रोऽहं हीनवीर्यः[13] प्लवङ्गमाः ॥ वाङ्मात्रेण[14] तु रामस्य करिष्ये साह्यमुत्तमम्[15] ॥ १२ ॥
जानामि वारुणाँल्लोकान्विष्णोस्त्रैविक्रमानपि ॥ महासुरविमर्दान्वाऽप्यमृतस्य च मन्थनम्[16] ॥ १३ ॥
रामस्य यदिदं[17] कार्यं कर्तव्यं प्रथमं मया ॥ जरया[18] च हृतं तेजः प्राणाश्च शिथिला मम ॥ १४ ॥

आवृत्त्या मण्डलगत्या । स्मशब्दस्य अवसीदतीत्यनेन संबन्धः ॥५॥ छादयामास आच्छादयं ॥ ६—९ ॥ अदीर्घदर्शनं आगाम्यनर्थानवेक्षकं ॥ १०—१२ ॥ वारुणान् लोकान् । अतलवितलादिलोकान् । त्रैवि-

---

पंश्च स्वःपदं कविरवगमयाञ्चकार भूम्यांमङ्गलं गगनगमनान्तरायापनुत्त्यै कृतमिति । स्वश्शब्दस्यमङ्गलार्थकत्वंतु स्वश्शब्दस्यमङ्ग-लार्थत्वादादौ स्वरव्ययमिति प्रयोगइत्यमरभानुदीक्षितव्याख्यातोऽवसेयं ॥ तत्पक्षे वसन्ददर्शेत्यादिवत्क्रियाप्रबन्धे लडिति लडेव लङर्थइतिबोध्यं । जयैषिणौ परस्परंस्पर्धयाराज्यंपणंकृत्वा वेगेनजयाभिलाषौ उपयातौ । प्रातरितिशेषः । भ्रातरंयवीयांसं परमवि-ह्वलः मरिष्यतीतिचञ्चलचेताः । स्नेहात्पक्षाभ्यामाच्छादयामासं । आच्छादयां आसं इतिपदद्वयं । नित्ययोगादामन्तेनास्तेराच्छादि-तवानिति तदर्थः ॥ यत्तु नागोजिभट्टेन पुरा पूर्वं वृत्रवधेवृतेसति जटायुरहंच जयैषिणौ वृत्रवधेनेन्द्रस्यातिप्रबलत्वंनिर्णीय तज्जयै-षिणौभूत्वा प्रथममाकाशमार्गेण स्वर्गंगतौ ततोगरुडवद्भृशं जवेन तंविजित्य प्रत्यावर्त्याऽऽदित्यंदर्पादुपयातौस्वः । अथ तमुपयात-योरावयोर्मध्ये जटायुस्सवितरिमध्यंप्राप्तेऽवसीदतिस्मेतिकतकः ॥ अन्येतु—जयैषिणौ परस्परजयैषिणौ येनोत्पत्य आदित्यःप्रथमं-प्राप्यते सआवयोःप्रबलइति प्रतिज्ञापूर्वमितिशेषइत्याहुः । तेषामावृत्येतिपदस्य इन्द्रप्रसङ्गस्यचासंगतिरित्युक्तं । तदिदमाभाणकंना-तिवर्तते “ गुणादोषायन्ते ” “आत्मदोषंनपश्यति” इति । कतकमतमेवतन्मतमितिभाति पुनःस्वमतानुपन्यासाददूषितत्वाच्च । तच्चसौवासौवसंमतप्रामाण्यकभारतविरुद्धं । तथाहि वनपर्वणिसंपातिवाक्ये— “संपातिर्नामतस्याहं ज्येष्ठोभ्राताजटायुषः । अन्यो-न्यस्पर्धयाऽऽरूढावावामादित्यसंसदम् । ततोदग्धाविमौपक्षौ नदग्धौतुजटायुषः ” इति । भारतानुयायिवाल्मीकिरामायणसंग्रह-रूपसंग्रहरामायणेच—“ अरुणस्यसुतावावां तरुणत्वे (ति)नगर्वितौ । निजराज्यंपणंकृत्वा पर्येक्षावहिवेगिताम् । आवामनुग-तौसूर्यमुदयन्तमथोदये । आमध्याह्नगतेः शौर्यात्ततो मोहोमहानभूत् । ” इत्युक्तेः । प्रत्यावर्तनंपतत्रिधर्मः । इन्द्रकथायाश्च कालविशेषप्रतिपत्तिजनकतामात्रेणोक्तिसंभवाद्दूषणस्यालग्नत्वादन्यपक्षएव श्रेयानितिदिक् । **शि०** छादयामास अतिशोकेनवि-क्षिप्तचित्तत्वात्परोक्षक्रियानिर्देशः ॥ ४—६ ॥ **स०** यदि जटायुषोभ्रातेतिगदितं तर्हि मयाश्रुतं । रामसेवानुबन्धिनस्तत्संभा-ष्यत्वेन तववचनस्यश्राव्यत्वमितिभावः । यदि तस्य तवयवीयसोभ्रातुर्घातकस्य रक्षसोनिलयंजानासि तर्ह्याख्याहीत्यन्वयः । आस्येत्युक्त्या नइवतवापि तत्स्थानंतद्वधश्च ईप्सितमीप्सितश्चेतिसूचयति ॥ ९ ॥ **स०** यदिद्वयस्य दूरेअन्तिकेइति पदद्वयेनान्व-यः ॥ १० ॥ **रामानु०** त्रैविक्रमान् त्रिविक्रममितान् । गोबलीवर्दन्यायेन त्रिविक्रमशब्द उपरितनलोकमात्रवाची ॥ **ति०** वारुणाँल्लोकान् जलप्रधानाँल्लोकान् । अमृतस्यमन्थनंच अनेनच ब्रह्माहरादिक्षणमारभ्यैतत्क्षणपर्यन्तंसर्ववृत्तान्तज्ञत्वं स्वस्यनिवे-दितं ॥ **स०** त्रयश्चते विक्रमाश्च त्रिविक्रमाः त्रयः पादविक्षेपाः तदाक्रान्ताः भूरादिलोकास्त्रैविक्रमाः । विष्णोर्वामनस्य । यद्वा

[**पा०**] १ घ. ङ. छ. झ. ट. मार्गेण. च. मार्गेतु. ख. मार्गेच. २ छ.—ट. स्वर्गतौ. ३ ग. प्राप्तेसवितरि. ख. प्राप्तेतुसू-र्ये. च. ङ.—ट. प्राप्तेतुसूर्येतु. ४ च. ज. छादयाम्येवं. ङ. ञ. छादयाम्येनं. ५ क. ख. ग. ङ.—ट. विह्वलं. ६ झ. निर्दग्ध-पत्रः. ७ ख. विन्ध्येस्मिन्. ८ क.—घ. वानरोत्तमाः. ९ च.—ट. अदीर्घदर्शिनं. १० क. ख. घ. ङ. तंवा. ग. तत्र. ११ क.—च. ज. ञ. राक्षसेश्वरं. छ. झ. ट. राक्षसाधमं. १२ क. ग. ङ. च. छ. झ. ञ. ट. भ्राताज्येष्ठो. १३ ग. ङ.—ट. हीनवीर्यः. १४ ङ.—ट. वाङ्मात्रेणापि. १५ ग. ङ. च. ज. ञ. प्रियमुत्तमं. १६ छ. झ. ट. देवासुरविमर्दांश्चह्यमृतस्य मन्थनं. ख. देवासुरविमर्दांश्चाप्यमृतस्य. ङ. च. ज. ञ. देवासुरविमर्दान्वाह्यमृतस्यापिमन्थनं. १७ ग. दयितं. १८ ग. जरयातु. क. ख. घ. जरयापहृतं.

तरुणी रूपसंपन्ना सर्वाभरणभूषिता ॥ ह्रियमाणा मया दृष्टा रावणेन दुरात्मना ॥ १५ ॥
क्रोशन्ती रामरामेति लक्ष्मणेति च भामिनी ॥ भूषणान्यपविध्यन्ती गात्राणि च विधून्वती ॥१६
सूर्यप्रभेव शैलाग्रे तस्याः कौशेयमुत्तमम् ॥ असिते राक्षसे भाति यथा वा तडिदम्बुदे ॥ १७ ॥
तां तु सीतामहं मन्ये रामस्य परिकीर्तनात् ॥ श्रूयतां मे कथयतो निलयं तस्य रक्षसः ॥ १८ ॥
पुत्रो विश्रवसः साक्षाद्भ्राता वैश्रवणस्य च ॥ अध्यास्ते नगरीं लङ्कां रावणो नाम राक्षसः ॥ १९
इतो द्वीपे[2] समुद्रस्य संपूर्णे शतयोजने ॥ तस्मिँल्लङ्कापुरी रम्या निर्मिता विश्वकर्मणा ॥ २० ॥
जाम्बूनदमयैर्द्वारैश्चित्रैः काञ्चनवेदिकैः[3] ॥ [[4]प्रासादैर्हेमवर्णैश्च महद्भिः सुसमा कृता] ॥
प्राकारेणार्कवर्णेन महता [5]सुसमावृता ॥ २१ ॥
तस्यां वसति वैदेही दीना कौशेयवासिनी ॥ रावणान्तःपुरे रुद्धा राक्षसीभिः सुरक्षिता ॥ २२ ॥
जनकस्यात्मजां [6]राज्ञस्तत्र द्रक्ष्यथ मैथिलीम् ॥ लङ्कायामथ गुप्तायां सागरेण समन्ततः ॥ २३ ॥
संप्राप्य [7]सागरस्यान्तं [8]संपूर्णं शतयोजनम् ॥ आसाद्य दक्षिणं [9]तीरं ततो द्रक्ष्यथ रावणम् ॥ २४ ॥
तत्रैव त्वरिताः क्षिप्रं विक्रमध्वं प्लवङ्गमाः ॥ ज्ञानेन खलु पश्यामि दृष्ट्वा प्रत्यागमिष्यथ ॥ २५ ॥
आद्यः पन्थाः कुलिङ्गानां ये चान्ये धान्यजीविनः ॥ द्वितीयो [10]बलिभोजानां ये च वृक्षफ[11]लाशिनः ॥२६
भासास्तृतीयं गच्छन्ति क्रौञ्चाश्च कुररैः सह ॥ श्येनाश्चतुर्थं गच्छन्ति गृध्रा गच्छन्ति पञ्चमम् ॥२७
बलवीर्योपपन्नानां रूपयौवनशालिनाम् ॥ षष्ठस्तु पन्था हंसानां वैनतेयगतिः परा ॥
वैनतेयाच्च नो जन्म सर्वेषां वानरर्षभाः ॥ २८ ॥

क्रमान् त्रिविक्रममितानुपरितनलोकानित्यर्थः । महासुरविमर्दान् देवासुरसंग्रामान् ॥ १३—१५ ॥ अपविध्यन्ती छेदयन्ती ॥ १६—१८ ॥ अध्यास्ते । " अधिशीङ्स्थासां कर्म " इति नगर्याः कर्मत्वं ॥ १९—२४ ॥ विक्रमध्वं । वेः पादविहरणे " इत्यात्मनेपदं । ज्ञानेन दिव्यज्ञानेन ॥ २५ ॥ दूरस्थदर्शनं भवतः कुतो जातं तत्राह—आद्य इत्यादिना ॥ कुलिङ्गानां भूमिप्रत्यासन्नगगनचारिणां । धान्यजीविनः पक्षिविशेषाः कुलिङ्गाः । ये चान्ये धान्यजीविन इ[...] वचनात् । बलिभोजानां काकानां ॥ २६ ॥ भास[...] जलवायसाः । " भासस्तु जलवायसः " इति नि[...]ण्टुः । श्येनविशेषा इत्यप्याहुः ॥ २७ ॥ वैनतेया[...] गरुडात् । नः अस्माकं । जन्मउत्पत्तिः । तेन त[...] या सप्तमी गतिः सैवास्माकमपीत्यर्थः । नन्वारण्[...] काण्डे—" द्वौ पुत्रौ विनतायास्तु गरुडोऽरुण ए[...] च । तस्माज्जातोहमरुणात्संपातिस्तु ममाग्रजः " इ[...]

विष्णोर्लोकान् श्रीभागातिरिक्तान् श्वेतद्वीपादीन् । त्रैविक्रमान् त्रिविक्रमाक्रान्तान् । अतोनैकदेशान्वयक्लेशः ॥ १३ ॥ **रामानु**[...] तस्याउत्तमंकौशेयं असितेराक्षसे शैलाग्रेसूर्यप्रभेवभाति । अंबुदइवासिते राक्षसे विद्युद्यथा तथाभातीतियोजना ॥ १७ ॥ **स**[...] रामस्य रामेतिनाम्नः । परिकीर्तनात् उच्चारात् । क्लेशसमये पतिनामग्रहणस्यादोषत्वात् । 'भार्या पतेरपि' इत्यस्य स्वस्थचे[...]स्कभार्यापरत्वात् । नित्यापरोक्षीकृताध्यक्षत्वेन ' दूराद्धूतेच ' इति प्रकृतिभावाभावाद्रामरामेतिसंभवति । अनेन प्रकृतिभावाभ[...]वेन सीताप्रकृतिभावाभावोपि ध्वन्यते । स्मृतिमात्रत्वेनानाह्वानरूपत्वाद्वा तच्छास्त्रागोचरत्वात्प्रकृतिभावाभावः । " त[...] तद्वन्तिके " इत्येकतरनिष्कर्षस्यदुष्करत्वाद्वा नप्रकृतिभावःप्रगृह्यसंज्ञायां " प्लुतप्रगृह्याः—" इत्यादिना ॥ १८ ॥ **स०** कुबेर[...]गरीत्वाद्विश्वकर्मनिर्माणं युक्तम् ॥ २० ॥ **स०** राक्षसीभिरिति । अनेनाधुनापि नमर्यादाविपर्यासइतिद्योत्यते ॥ २२ [...] **कतक०** लङ्कायामभिगुप्तायामित्यादिश्लोकद्वयं प्रक्षिप्तं ॥ २३—२४ ॥ **स०** ज्ञानेन ज्ञायतेऽनेनेतिज्ञानं दिव्यंचक्षुः । पश्या[...] जानामि । **ति०** देवयोनित्वेन दिव्यज्ञानेन यूयंतांदृष्ट्वा प्रत्यागमिष्यथेत्यपि पश्यामि । अतोनिस्संशयंगच्छतेतिशेषः ॥ २५ [...] **ति०** अथ स्वस्यदेवयोनित्वप्रदर्शनशेषतया पक्षिमार्गानाह—आद्यइति ॥ पन्थाः आकाशमार्गः ॥ २६ ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. यथाविद्युदिवांबरे. २ क. ख. ङ.—ट. द्वीपे. ३ ख. काञ्चनवेदिभिः. ४ ङ.—[...] पुस्तकेष्विदमर्धंदृश्यते. ५ ङ. च. ज.—ट. चसमन्विता. ग. सुसमाहिता. ६ ङ.—ट. राज्ञस्तस्यां. ७ ग. छ. ञ. सागरस्यान्ते. ८ ग. ङ. च. छ. ञ. ट. संपूर्णेशतयोजने. ९ क. ङ.—ज. ञ. ट. कूलं. १० ग. बलिपुष्टानां. ङ. च. [...] बलिभोज्यानां. ११ ङ.—ट. फलाशनाः.

इहस्थोऽहं प्रपश्यामि रावणं जानकीं तथा ॥ अस्माकमपि सौवर्णं दिव्यं चक्षुर्बलं तथा ॥ २९ ॥
तस्मादाहारवीर्येण निसर्गेण च वानराः ॥ आयोजनशतात्साग्राद्वयं पश्याम नित्यशः ॥ ३० ॥
अस्माकं विहिता वृत्तिर्निसर्गेण च दूरतः ॥ विहिता पादमूले तु वृत्तिश्चरणयोधिनाम् ॥ ३१ ॥
गर्हितं तु कृतं कर्म येन स पिशिताशिना ॥ प्रतीकार्यं च मे तस्य वैरं भ्रातुः कृतं भवेत् ॥ ३२ ॥
उपायो दृश्यतां कश्चिल्लङ्घने लवणाम्भसः ॥ अभिगम्य तु वैदेहीं समृद्धार्था गमिष्यथ ॥ ३३ ॥
समुद्रं नेतुमिच्छामि भवद्भिर्वरुणालयम् ॥ प्रदास्याम्युदकं भ्रातुः स्वर्गतस्य महात्मनः ॥ ३४ ॥
ततो नीत्वा तु तं देशं तीरं नदनदीपतेः ॥ निर्दग्धपक्षं संपातिं वानराः सुमहौजसः ॥ ३५ ॥
पुनः प्रत्यानयित्वा च तं देशं पतगेश्वरम् ॥ बभूवुर्वानरा हृष्टाः प्रवृत्तिमुपलभ्य ते ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे अष्टपञ्चाशः सर्गः ॥ ५८ ॥

एकोनषष्टितमः सर्गः ॥ ५९ ॥

जांबवता संपातिंप्रति रावणेन सीताहरणावगमप्रकारप्रश्नः ॥ १ ॥ स्वस्याहारानयनाय समुद्रंगतवता तत्रकेनचिद्रक्ष-नीयमानां कांचन काञ्चनप्रभांतरुणीं दृष्टवता पश्चान्महर्षिवचसा तयोःसीतारावणभावंज्ञातवता सुपार्श्वनाम्नास्वपुत्रेण स्मै एतद्वृत्तान्तनिवेदननिवेदनम् ॥ २ ॥

ततस्तदमृतास्वादं गृध्रराजेन भाषितम् ॥ निशम्य मुदिता हृष्टास्ते वचः प्लवगर्षभाः ॥ १ ॥

चनेन जटायुषोक्तेनेदं विरुद्धमिति चेन्न वैनतेया-देत्यस्य विनतापुत्रादरुणादित्यर्थ इत्यदोषात् । वैनते-गतिरित्यत्र वैनतेययोररुणगरुडयोर्गतिरित्यर्थः । अनेन दिव्यज्ञानहेतुर्जन्मोत्कर्ष उक्तः ॥ २८ ॥ न केवलं दिव्यज्ञानं दिव्यचक्षुरप्यस्तीत्याह—इहस्थ ति ॥ अपिशब्दो भिन्नक्रमः चक्षुरित्यनेन संबध्यते । सौवर्णमित्यनेन विशेषणेनातिदूरदर्शित्वमुक्तं ॥ २९ ॥ आहारवीर्येण चक्षुष्याहारबलेनेत्यर्थः । निसर्गेण सौवर्णत्वनिबन्धनस्वभावेन ॥ ३० ॥ वृत्तिः भक्ष्य-ग्रहणं । चरणयोधिनां कुक्कुटानां । पादमूले पादवि-स्तीर्णप्रदेशे । वृत्तिः जीवनं ॥ ३१ ॥ येन पिशिता-शिना गर्हितं कर्म सीतापहरणरूपं कृतं । मे भ्रातुर्हेतोः प्रतीकार्यं तस्य वैरं कृतं प्रतिकृतं भवेत् । भवद्भिरिति शेषः । अयं श्लोकः चरणयोधिनामित्यनन्तरं निवे-शनीयइत्याहुः ॥ ३२ ॥ एवं प्रासङ्गिकं परिसमाप्य प्रकृतमाह—उपाय इति ॥ गमिष्यथेत्यत्र किष्कि-न्धामितिशेषः ॥ ३३ ॥ नेतुमिच्छामि मामिति शेषः । भवद्भिरिति करणे तृतीया ॥ ३४ ॥ तीरं देशं तीर-प्रदेशमित्यर्थः । तं देशं संपात्यावासभूतं देशं । पुनः प्रत्यानयित्वा प्रवृत्तिं वृत्तान्तं । उपलभ्य ते वानराः हृष्टा बभूवुः ॥ ३५—३६ ॥ इति श्रीगोविन्दरा-जविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने अष्टपञ्चाशः सर्गः ॥५८॥

अथ ततस्तदमृतास्वादमित्यारभ्य पञ्च सर्गाः प्रक्षिप्ताः । सर्वकोशेष्वदर्शनात् तान्विनापि कथासं-

ति० ननु कथंलङ्कास्थासीतेति त्वयाज्ञातं तत्राह—इहस्थइति । सौपर्णं सुपर्णलिङ्गकचक्षुष्मतीविद्यासिद्धिजं । साचविद्या ऋचब्राह्मणे तृतीयपञ्चिकायामुक्ता ॥ शि० इहस्थोऽहंरावणंजानकींच प्रपश्यामि । तत्रहेतुः यथासौपर्णंचक्षुर्बलंचदिव्यंतथा-स्माकमपिदिव्यं ॥ २९ ॥ ति० साग्रात् किञ्चिदधिकात् योजनशतात् ॥ ३० ॥ ति० अस्माकंतु निसर्गेण जातिस्वभावेन । अतःदूरवर्तिदर्शनबलसंपादकेनभक्ष्यविशेषेण वृत्तिर्विहिता । धात्रेतिशेषः ॥ कुक्कुटादीनांतु स्वावासवृक्षमूलएव तावद्दूरदृष्टि-मात्रसंपादिकाच वृत्तिर्विहिता ॥ ३१ ॥ इत्यष्टपञ्चाशःसर्गः ॥ ५८ ॥

ति० तत् वदतः अनुवदन्तः । हृष्टाबभूवुरित्यर्थः ॥ वदतइत्यत्र नुमभावआर्षः ॥ स० अमृतस्वादं अमृतवन्मधुरं ।

[पा०] १ ख. ग. ङ.—ट. सौपर्णं. २ ङ. च. छ. झ. ञ. ट. वृक्षमूलेतु. ३ गर्हितंतुकृतंकर्मेतिश्लोकः क.—ठ पुस्तकेषु. इहस्थोहंप्रपश्यामीति २९ तमश्लोकात्पूर्वंदृश्यते. ४ झ. पिशिताशिनः. ५ घ. ङ. च. झ. ञ. ट. भ्रातृकृतं. ६ ट. न. ७ ख. अधिगम्यतु. ८ ख. च. छ. भविष्यथ. ९ क. ख. ग. ङ.—ट. तीरे. १० ज. वानरास्ते. ११ ङ.—ट. पुनःप्रापयित्वाचतंदेशं. १२ ङ. च. ज. ञ. तत्रसंहृष्टास्ते. घ. चाभवन्हृष्टास्ते. ग. छ. झ. ट. वदतोहृष्टास्ते.

जाम्बवान्वानरश्रेष्ठः सह सर्वैः प्लवङ्गमैः ॥ भूतलात्स[1]हसोत्थाय गृ[2]ध्रराजमथाब्रवीत् ॥ २ ॥
क सीता केन वा दृष्टा को वा ह[3]रति मै[4]थिलीम् ॥ तदाख्यातु भवान्सर्वं गतिर्भव वनौकसाम् ॥३
को दाशरथिबाणानां वज्रवेगनिपातिनाम् ॥ स्वयं लक्ष्मणमुक्तानां न चिन्तयति विक्रमम् ॥ ४
स हरीन्[5]प्रीतिसंयुक्तान्सीताश्रुतिसमाहितान् ॥ पुनराश्वासयन्प्रीत इदं वचनमब्रवीत् ॥ ५ ॥
श्रूयतामिह वैदेह्या यथा मे हरणं श्रुतम् ॥ येन चापि ममाख्यातं यत्र वा[6]ऽऽयतलोचना ॥ ६ ॥
अहमस्मिन्गिरौ दुर्गे बहुयोजनमायते ॥ चिरान्निपतितो वृद्धः क्षीणप्राणपराक्रमः ॥ ७ ॥
तं मामेवं ग[7]तं पुत्रः सुपार्श्वो नाम नामतः ॥ आहारेण यथाकालं बिभर्ति पततां वरः ॥ ८ ॥
तीक्ष्णकामास्तु गन्धर्वास्तीक्ष्णकोपा भुजङ्गमाः ॥ मृगाणां तु भयं तीक्ष्णं ततस्तीक्ष्णक्षुधा वयम् ॥९
स कदाचित्क्षुधार्तस्य म[8]माहाराभिकाङ्क्षिणः ॥ ग[9]तसूर्येऽहनि प्राप्तो मम पुत्रो ह्यनामिषः ॥ १० ॥
स मया वृद्धभावाच्च कोपाच्च परिभर्त्सितः ॥ क्षुत्पिपासापरीतेन कुमारः पततां वरः ॥ ११ ॥
स[10] मामाहारसंरोधात्पीडितं [11]प्रीतिवर्धनः ॥ अनुमान्य यथातत्त्वमिदं वचनमब्रवीत् ॥ १२ ॥
अहं तात यथाकालमा[12]मिषार्थी खमाप्लुतः ॥ महेन्द्रस्य गिरेर्द्वारमावृत्य च[13] समास्थितः ॥ १३ ॥
त[14]तः सत्त्वसहस्राणां सागरान्तरचारिणाम् ॥ पन्थानमेकोऽध्यवसं सन्निरोद्धुमवाङ्मुखः ॥ १४ ॥
तत्र कश्चिन्मया दृष्टः सूर्योदयसमप्रभाम् ॥ स्त्रि[15]यमादाय गच्छन्वै भिन्नाञ्जनच[16]यप्रभः ॥ १५ ॥

घट्टनात् पूर्वोक्तार्थविरोधस्फोरकत्वाच्च । तथापि ते | व्याख्यास्यन्ते—तत इत्यादि ॥ हृष्टाः रोमाञ्चाञ्चि

वदता उ इतिपदं । यस्यगृध्रराजस्य वदता वाग्मिता । ततः तेनगृध्रराजेनभाषितंवचः निशम्य तेप्लवगर्षभाः हृष्टाः । उ विस यइत्यर्थः । प्रायः प्रायोपवेशिनांहर्षोत्कर्षःक्कापिनावलोकितइतिदैवगतिर्विचित्रेति विसिस्मिरे इतिभावः । यद्वा वदतेतितृतीयैक चनं गृध्रराजपदेनान्वेति । निशम्यतत्रसंहृष्टाइतिपाठे नायासः । वदतइतिपदेवा वदशब्दात्तृतीयान्तात्तसिः । तस्य गृध्ररा नेत्यनेनान्वयः । वदतइति षष्ठीशेषेसती तृतीयार्थेवा ॥ १ ॥ **ति०** अब्रवीत् लङ्कायांसीतादर्शनं त्वदेकसाक्षिकमन्यसाक्षिक पिवेतिदार्ढ्यायापृच्छदित्यर्थः । भूतलादुत्थाय प्रायोपवेशंत्यक्त्वेत्यर्थः ॥ **शि०** वानरश्रेष्ठः वानरेभ्योऽधिकवयस्कः । गृध्र जानं समासान्तविधेरनित्यत्वाट्टजभावः ॥२॥ **रामानु०** अथजांबवान् लूनपक्षःकन्दरान्तर्गतःसन्संपातिर्दूरवृत्तं सीतापहरणावि केनप्रकारेणावगतवानिति मत्वा विशेषतोऽवगन्तुंपृच्छति—**क्कसीतेत्यादिना** ॥ **वि०** सीतांकोहरतिस्म । ह्रियमाणाच केनद त्वयाऽन्येनापिवा । हृताच क्कवावर्ततेइतिसर्वं भवानाख्यातु । सामान्यतःश्रुत्वा प्रायोपवेशादुत्थितानां विशिष्यवदत्वित्य ॥ ३ ॥ **स०** सीताप्रतिकृतिंनेताऽनङ्गस्मरणइत्याह—कइति । स्वयमिति दाशरथिबाणपदेनेव लक्ष्मणमुक्तपदेनाप्यन्वेति स्वयंदाशरथिः स्वेच्छयैवदाशरथिर्दशरथापत्यंरामः । तस्य बाणानामित्यत्रैवान्वयोवा । यद्वा दाशरथिपदेन रामरामानुजयोर्ग्रहण स्वयंलक्ष्मणमुक्तानांस्वयंलक्ष्मणं स्वस्वनाम रामेतिलक्ष्मणेतिच मुक्तंशिल्पिभिर्येषु तेतथा । “ लक्ष्मणंलाञ्छनेनाम्नि इतिविश्वः ॥ ४ ॥ **रामानु०** सीताश्रुतिसमाहितान् सीतावृत्तान्तश्रवणेनसमाहितान् ॥ **ति०** प्रतिसंमुक्तान् त्यक्तप्रायोप शान् । सीताश्रुतिसमाहितान् सीताविषयवृत्तान्तश्रवणेसावधानान् पुनराश्वासयन् अन्यसाक्षिकताप्रदर्शनेनभूयःस्वोक्तार्थप्रल पयन् ॥ ५ ॥ **ति०** वैदेह्याहरणंयथामेमयाश्रुतं येनचममाख्यातं यत्रसाऽऽयतलोचनावर्ततेइतिश्रुतं तदपि इह इदानीं श्रूयतां ॥ ६ ॥ **ति०** क्षीणःप्राणोबलंपराक्रमश्चयस्यसः ॥ ७ ॥ **स०** गन्धर्वाः चित्ररथाद्याः । तीक्ष्णकामाः तीक्ष्णः समयास यपरीक्षांविनाऽऽयास्यन्कामःस्त्रीवाञ्छायेषांतेतथा । “ स्त्रीकामावैगन्धर्वाः ” इतिब्राह्मणात् । ततः ततोप्याधिक्येन । तीक्ष् बहुवाराहारहेतुःक्षुधा क्षुत्येषांतेतथा ॥ टाबन्तःक्षुधाशब्दः ॥ ९ ॥ **रामानु०** क्षुधार्तस्यमम । समीपमितिशेषः ॥ **शि** अहनि अहोनिमित्तेसूर्ये आगतेसतीतिशेषः । सूर्योदयकालइत्यर्थः । गतः पुत्रः सायमनामिषः प्राप्तः आगतः ॥ १० ॥ **ति** यतएवं अतः स मम प्रीतिवर्धनः मया आहारसंरोधात्पीडितः दुर्वचनेनखेदंप्रापितःसन् । मामनुमान्य क्षमापयित्वा । यथात

[**पा०**] १ ख. घ. सहसोत्पत्य. २ क. ख. घ. ङ. छ. झ. ट. गृध्रराजानमब्रवीत्. ग. च. ज. ञ. गृध्रराजंतमब्रवी ३ ग. जानाति. ४ क. जानकीं. ५ छ. झ. ट. न्प्रतिसंमुक्तान्. ६ क. ख. ग. ङ. च. झ. ञ. ट. चायतलोचना. ७ घ. छ. ज. ञ. ट. गतःपुत्रः. ८ क.—च. ज. ञ. ममचाहारकाङ्क्षिणः. ९ क. ख. ङ.—ट. गतःसूर्ये. १० क. ग. ङ.— समयाहारसंरोधात्पीडितः. ११ ख. ग. प्रीतिवर्धनं. १२ ङ. मामिषार्थे. १३ ङ.—ट. सुसमाश्रितः. ग. चसमाश्रि १४ क. ख. घ.—ट. तत्रसत्व. १५ ग. नारीमादाय. १६ क.—ट. चयोपमः.

तोहम[1]भ्यवहारार्थी तौ दृष्ट्वा कृतनिश्चयः ॥ तेन साम्ना विनीतेन पन्थानम[2]भियाचितः ॥ १६ ॥
न हि सामोपपन्नानां प्रहर्ता विद्यते [3]क्वचित् ॥ नीचेष्वपि जनः कश्चित्किमङ्ग बत मद्विधः ॥ १७ ॥
स यातस्तेजसा व्योम संक्षिपन्निव वे[5]गतः ॥ अथाहं [6]खचरैर्भूतैरभिगम्य सभाजितः ॥ १८ ॥
दिष्ट्या जीव[7]सि तातेति [8]ह्यब्रुवन्मां महर्षयः ॥ कथंचित्सकलत्रोसौ गतस्ते स्वस्त्यसंशयम् ॥
एवमुक्तस्ततोऽहं तैः सिद्धैः परमशोभनैः ॥ १९ ॥
स च मे रावणो राजा रक्षसां प्रतिवेदितः ॥ [9]हरन्दाशरथेर्भार्यां रामस्य जनकात्मजाम् ॥ २० ॥
भ्रष्टाभरणकौशेयां शो[10]कवेगपराजिताम् ॥ रामलक्ष्मणयोर्नाम क्रो[11]शन्तीं मुक्तमूर्धजाम् ॥ २१ ॥
एष कालात्ययस्[12]तावदिति [13]कालविदां वरः ॥ ए[14]तमर्थं समग्रं मे [15]सुपार्श्वः प्रत्यवेदयत् ॥ २२ ॥
तच्छ्रुत्वाऽपि हि मे बुद्धिर्नासीत्काचित्पराक्रमे ॥ [16]अपक्षो हि कथं पक्षी कर्म किंचि[17]दुपक्रमे ॥ २३ ॥
यत्तु [18]शक्यं मया कर्तुं वाग्बुद्धि[19]गुणवर्तिना ॥ श्रूयतां तत्प्रवक्ष्यामि भवतां पौरुषाश्रयम् ॥ २४ ॥
वाङ्मतिभ्यां [20]तु सर्वेषां करिष्यामि प्रियं हि वः ॥ यद्धि दाशरथेः कार्यं मम तन्नात्र संशयः ॥ २५ ॥

ताः । बभूवुरिति शेषः ॥ १—१७ ॥ सभाजितः पूजितः ॥ १८ ॥ असौ सकलत्रः सरक्ष्यवर्गः । अतः कथंचित् गतः । अतस्ते स्वस्त्यासीत् असंशयं । इति मां महर्षयोऽब्रुवन्नितियोजना ॥ १९ ॥ मेमया । प्रतिवेदितः ज्ञातः । सुपार्श्ववचनमिदं ॥ २०—२१ ॥ कालात्ययः कालातिक्रमहेतुः । रावणदर्शनमितिभावः ॥ २२—२४ ॥ सर्वेषां वः युष्माकं । वाङ्मतिभ्यां प्रियं करिष्यामि हि । दाशरथेर्यत्कार्यं तन्ममैव

इदं वक्ष्यमाणं । वचनमब्रवीत् ॥ १२ ॥ **ति०** तौस्त्रीपुरुषौ । कृतनिश्चयः इमावेव हत्वा पितुरभ्यवहारार्थंनेष्यामीति कृतनिश्चयइत्यर्थः । ततस्तेनविनीतेनसता साम्नैव पन्थानमभियाचितोस्मि । अतएवासौत्यक्तइतिशेषः ॥ १६ ॥ **ति०** दिष्ट्याजीवतिसीतेतिपाठः । दिष्ट्यासीता त्वदृष्टिपथंप्राप्ता जीवतिस्म । त्वया तद्धननस्येषत्करत्वात् । एवं पूजयित्वा मांमहर्षयोऽब्रुवन् । असौत्वयादृष्टःपुरुषः सकलत्रःकथंचित्कुशलीगतः । अतोसंशयंतेस्वस्त्यस्तु इतिकतकः । अन्येतु दिष्ट्याजीवसितातेतिपाठः । हेतात त्वंदिष्ट्या रावणंप्राप्यापि जीवसीत्यब्रुवन् । यतोसौ सकलत्रः अतोसंशयं त्वां संशयमप्रापय्य गतः अतस्ते स्वस्तिजातमित्यर्थमाहुः ॥ **स०** हेतात वत्स असौ स्वस्ति क्षेमेण । कथंचित्रामोपेक्षितः गतः अधुनाऽध्वनिवर्ततइत्याहुः । सकलत्रइति । कलत्रेण दुर्गस्थानेनलङ्कयासहितः सकलत्रः । अभूदितिशेषः । कथंचित्रावणेनायुध्यतेतिवा । त्वंजीवसीतिमांप्रतिमहर्षयोऽब्रुवन् । इतिअब्रुवन्नित्येतत्सदृशाद्यसंहितनिर्देशाः विवक्षाभावात्साधवोज्ञेयाः । यद्वा कथंचित्सकलत्रः तेनस्वेनैवकलत्रत्वेसंमततत्कइत्यर्थोलभ्यते । 'उभयथापि महर्षयः' ' सिद्धैः परमशोभनैः ' इत्यत्रोत्तरत्रचोक्तेर्वक्ष्यमाणत्वान्महत्त्वादिमतांकथमेतेषांसीतायांरावणकलत्रत्वबुद्धिः परबोधनंचकथमितिनिरस्तं ॥ " कलत्रंश्रोणिभार्ययोः । दुर्गस्थानेनृपादीनां " इतिविश्वः ॥ १९ ॥ **ति०** अतोऽहं भ्रष्टाभरणत्वादिगुणांरामभार्यांपश्यन् स्थितइत्येषतावन्मेकालात्ययः कालातिपातहेतुरितिसमग्रंएतदर्थंवाक्यविदांवरःसुपार्श्वः मेप्रत्यवेदयत् ॥ २१—२२॥ **स०** पराक्रमंश्रुतवतोपिते कुतोनपराक्रमे मतिरुदितेत्यतआह—**अपक्षइति** । पूर्वंपक्षी इदानीमपक्षो हि यतः कथंचित्कर्मसमारभे प्रारंभंकुर्यां । आरभेदितिपाठे पारोक्षिकयुक्तिरितिमन्तव्यं । परस्मैपदितातु चान्द्री ॥ २३ ॥ **स०** वाग्बुद्धिगुणवर्तिना वाक्बुद्धिश्चतयोर्गुणायेषांतेआर्याःताननुवर्तितुंशीलमस्यास्तीति सतथा । तेनमयाकर्तुंयच्छक्यं तत्रतत् श्रूयतां । पौरुषाश्रयं पौरुषस्यपराक्रमस्यआश्रयोयस्मिंस्तत् । यद्वा वाग्बुद्धिगुणवर्तिना वाग्बुद्धिहेतुकोगुणउपकारः तन्मात्रानुवर्तिना । **शि०** वाग्बुद्धिगुणवर्तिना वचसाबुद्धिगुणेन समीचीनोपदेशादिनाचवर्तनशीलेनमया ॥ २४ ॥

[पा०] १ ग. ङ. छ. झ. ञ. ट. मभ्यवहारार्थं. २ ङ.—ट. मनुयाचितः. ३ ङ. च. ज. ञ. नच. ४ ङ.—ट. भुवि. ५ क.—ट. वेगितः. ६ क. ग. झ.—ट. खेचरैः. ७ क. ङ. छ. ट. जीवतिसीतेति. ८ क. ङ. च. छ. झ. ञ. ट. अब्रुवन्. ९ छ. झ. ञ. ट. पश्यन्दाशरथेः. १० च. सीतांशोकपरायणां. ज. सीतांशोकपराजितां. ११ ख. विक्रोशन्तींमुहुर्मुहुः. १२ छ. झ. ट. स्तातइति. च. ज. स्तावद्विद्धि. १३ क. ग. झ. ञ. ट. वाक्यविदांवरः. छ. वाक्यविशारदः. १४ क.—ट. एतदर्थं. १५ क. पुत्रणोक्तंवनौकसः. १६ ख. घ. अपक्षोहं. १७ ङ. छ. झ. ञ. ट. किंचित्समारभेत्. च. ज. किंचित्समारभे. १८ ग. कामंमयाशक्यं. १९ ख. वशवर्तिना. २० क. ङ.—ट. हिसर्वेषां.

[१]ते भवन्तो मतिश्रेष्ठा बलवन्तो [२]मनस्विनः ॥ [३]प्रेषिताः कपिराजेन देवैरपि दुरासदाः ॥ २६ ॥
रामलक्ष्मण[४]बाणाश्च [५]निशिताः कङ्कपत्रिणः ॥ त्रयाणामपि लोकानां [६]पर्याप्तास्त्राणनिग्रहे ॥ २७ ॥
कामं खलु दशग्रीवस्तेजोबलसमन्वितः ॥ भवतां तु समर्थानां न किंचिदपि दुष्करम् ॥ २८ ॥
तदलं कालसङ्गेन क्रियतां बुद्धिनिश्चयः ॥ न हि कर्मसु सज्जन्ते बुद्धिमन्तो भवद्विधाः ॥ २९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

षष्टितमः सर्गः ॥ ६० ॥

अङ्गदादीन्प्रतिसंपातिना स्वस्यसीतावृत्तान्तपरिज्ञानकारणनिवेदनारंभः ॥ १ ॥ सूर्यकिरणनिर्दग्धपक्षतया मोहाद्विन्ध शिखरेपतितेन षड्रात्रानन्तरं मोहादुत्तीर्णेनसंपातिना तस्यदेशस्य विन्ध्यगिरित्वप्रत्यभिज्ञानम् ॥ २ ॥ ततो गिरिशिख त्कथंचिच्चिरपरिचितस्य निशाकरनाम्नोमहर्षेराश्रममवतीर्य तच्चरणप्रणामिनं संपातिंप्रति महर्षिणा दग्धपक्षतया कथं त्संपातित्वप्रत्यभिज्ञानेन तत्पक्षदाहहेतुप्रश्नः ॥ ३ ॥

ततः कृतोदकं स्नातं [७]तं गृध्रं [८]हरियूथपाः ॥ उपविष्टा गिरौ [९]दुर्गे परिवार्य समन्ततः ॥ १ ॥
तमङ्गदमुपासीनं तैः सर्वैर्हरिभिर्वृतम् ॥ जनितप्रत्ययो हर्षात्संपातिः पुनरब्रवीत् ॥ २ ॥
कृत्वा निःशब्दमेकाग्राः शृण्वन्तु हरयो मम ॥ [१०]तत्त्वं संकीर्तयिष्यामि यथा जानामि [११]मैथिलीम् ॥३
[१२]अस्य विन्ध्यस्य शिखरे पतितोस्मि [१३]पुरा वने ॥ [१४]सूर्यातपपरीताङ्गो निर्दग्धः सूर्यरश्मिभिः ॥ ४ ॥
लब्धसंज्ञस्तु षड्रात्राद्विवशो विह्वलन्निव ॥ वीक्षमाणो दिशः सर्वा नाभिजानामि किंचन ॥ ५ ॥
ततस्तु सागराञ्शैलान्नदीः सर्वाः सरांसि च ॥ [१५]वनान्युदधिवेलां च [१६]समीक्ष्य मतिरागमत् ॥ ६

॥ २५—२८ ॥ कालसङ्गेन कालविलम्बेन ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकोनषष्टितमः सर्गः ॥ ५९ ॥

ततः कृतोदकमित्यादि ॥ १ ॥ जनितप्रत्ययः ज तविश्वासो यथा भवति तथाऽब्रवीदितियोजना वानरदर्शनरूपस्वकार्यतो जनितविश्वास इत्यथ ॥ २—४ ॥ विह्वलन्निव मूर्च्छन्निव ॥ ५—६

स० कपिराजेन सुग्रीवेण । प्रहिताः प्रेषिताः । देवैरपिदुरासदाः । अतोमनस्विनः सीतान्वेषणमानसाः । भवतेतिशेषः ॥२६ **स०** निशिताः शाणोल्लीढाः । विहिताइतिपाठेदधातेर्हिरितिहौ विहिताःकृताइत्यर्थः । विहिताः विशिष्टहितकराः विगतहिताश्च साध्वसाधूनामितिवा । त्राणेनसहितोनिग्रहः त्राणनिग्रहः तस्मिन् । यद्वा त्रयाणांलोकानांमध्येविहिताः द्वेषिणः लोकानामित्यावर्तते तेषांत्राणनिग्रहेपर्याप्ताः त्राणनिरोधेसमर्थाइतिवा ॥२७॥ **स०** भवतांतुसमर्थानामित्यत्र तुशब्देन स्वयंसमर्थानां तत्रापिरामानुगृह तानांदुष्करंनेतिविशेषंद्योतयति ॥२८॥ **ति०** सज्जन्ते अलसाभवन्ति ॥ **शि०** बुद्धिनिश्चयः । बुद्धिजनितनिश्चयविशिष्टः सीत दर्शनोद्योगइत्यर्थः ॥ क्रियतां । कालसङ्गेन कालविलंबेन । अलंनक्रियतामित्यर्थः ॥ २९ ॥ इत्येकोनषष्टितमःसर्गः ॥ ५९ ॥

शि० कृतंउदकं उदकक्रिया येनतं ॥ १ ॥ **ती०** जनितप्रत्ययः निशाकरमुनिनोक्तप्रकारेण रामदूतवानरागमनदर्शनात क्षप्ररोहाच्च निशाकरोक्तार्थेजनितविश्वासः ॥ २ ॥ **स०** निश्शब्दंकृत्वा नविद्यतेशब्दोयस्मिंस्तन्निश्शब्दंकरणं । तदुत्तरका त्वाप्रत्ययार्थः । ततश्चाशब्दाभिन्नकरणानन्तरकरणाश्रया भवन्तोभवन्त्विति ॥ **ती०** स्ववृत्तान्तकथनं सीतावृत्तान्तकथनोप क्तमितिद्योतयितुं यथाजानामिमैथिलीमित्युक्तं ॥ ३ ॥ **स०** कपिप्रवरत्वेनानघेत्यङ्गदमात्रसंबोधनं युक्तं ॥ ४ ॥ **ति०** विह्वलन्नि परमार्तएवसन् ॥ ५ ॥ **रामानु०** सागरानित्यत्र सागरमित्यर्थः । विन्ध्यप्रदेशपतितस्य सकलसागरदर्शनस्यानुपपन्नत्वात् मतिः प्रत्यभिज्ञा ॥ ६ ॥

[पा०] १ क. ग. ङ.—ट. तद्भवन्तो. २ ट. यशस्विनः. ३ क.—घ. सहिताः. ङ.—ट. प्रहिताः. ४ च. ज. बाणा ५ ङ.—ज. ञ. ट. विहिताः. ६ ग. पर्याप्ताःशत्रुनिग्रहे. ७ ङ. च. ज. ञ. गृध्रंच. ग. गृध्रंतं. ८ ग. हरिपुङ्गवाः. ९ ङ.— रम्ये. १० ङ.—ट. तथ्यं. ११ ख. जानकीं. १२ ख. अहं. १३ छ. झ. ट. पुराऽनघ. क. महावने. १४ ग. ङ.— सूर्यतापपरीताङ्गः. १५ ङ. च. ज. ञ. वनान्यपिचदेशांश्च. छ. झ. ट. वनानिचप्रदेशांश्च. १६ ङ.—ट. निरीक्ष्यमतिरागत

ष्टपक्षिगणाकीर्णः कन्दरान्तरकूटवान् ॥ दक्षिणस्योदधेस्तीरे विन्ध्योऽयमिति निश्चयः ॥ ७ ॥
ासीच्चात्राश्रमं पुण्यं सुरैरपि सुपूजितम् ॥ ऋषिर्निशाकरो नाम यस्मिन्नुग्रतपा भवत् ॥ ८ ॥
ष्टौ वर्षसहस्राणि तेनास्मिन्नृषिणा [3]विना ॥ वसतो मम [4]धर्मज्ञाः स्वर्गते तु निशाकरे ॥ ९ ॥
वतीर्य च विन्ध्याग्रात्कृच्छ्रेण विषमाच्छनैः ॥ तीक्ष्णदर्भां वसुमतीं दुःखेन पुनरागतः ॥ १० ॥
मृषिं द्रष्टुकामोस्मि दुःखेनाभ्यागतो भृशम् ॥ जटायुषा मया [6]चैवं बहुशोधिगतो हि सः ॥११॥
स्याश्रमपदाभ्याशे ववुर्वाताः सुगन्धिनः ॥ वृक्षो वाँऽपुष्पितः कश्चिदफलो वा न विद्यते ॥१२॥
उपेत्य चाश्रमं पुण्यं वृक्षमूलमुपाश्रितः ॥ द्रष्टुकामः [10]प्रतीक्षेहं भगवन्तं निशाकरम् ॥ १३ ॥
थापश्यमदूरस्थमृषिं ज्वलिततेजसम् ॥ कृताभिषेकं दुर्धर्षमुपावृत्तमुदङ्मुखम् ॥ १४ ॥
मृक्षाः सृमरा व्याघ्राः सिंहा [12]नागाः सरीसृपाः ॥ परिवार्योपगच्छन्ति [13]धातारं प्राणिनो यथा ॥१५॥
तः प्राप्तमृषिं ज्ञात्वा तानि सत्वानि वै ययुः ॥ प्रविष्टे राजनि यथा सर्वं सामात्यकं बलम् ॥१६॥
ऋषिस्तु दृष्ट्वा [14]मां प्रीतः प्रविष्टश्चाश्रमं पुनः ॥ मुहूर्तमात्रान्नि[15]ष्क्रम्य ततः कार्यमपृच्छत ॥ १७ ॥
ौम्य वैकल्यतां दृष्ट्वा रोम्णां ते नावगम्यते ॥ अग्निदग्धाविमौ [16]पक्षौ त्वक्चैव व्रणिता तव ॥१८॥
ृध्रौ द्वौ दृष्टपूर्वौ मे मातरिश्वसमौ जवे ॥ गृध्राणां चैव राजानौ भ्रातरौ कामरूपिणौ ॥ १९ ॥
ज्येष्ठो हि त्वं तु संपाते जटायुरनुजस्तव ॥ मानुषं [19]रूपमास्थाय गृह्णीतां चरणौ मम ॥ २० ॥
किं ते व्याधिसमुत्थानं पक्षयोः पतनं कथम् ॥ [20]दण्डो वायं [21]कृतः केन सर्वमाख्याहि पृच्छतः ॥२१॥
त्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे षष्टितमः सर्गः ॥ ६० ॥

निश्चयः अभूदिति शेषः ॥७॥ भवत् अभवत् ॥ ८ ॥ र्षसहस्राणि गतानीति शेषः ॥९—१७॥ विकल एव कल्यं । चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् । तस्य भावो कल्यता । व्रणिता संजातव्रणा । ते नावगम्यत इ- त्र त इति भिन्नं पदं । हे सौम्य ते रोम्णां वैकल्यतां दृष्ट्वा नावगम्यते । स्वरूपमिति शेषः । रोमविकलत्वहे- तुः—अग्निदग्धाविति । दृश्येते इति शेषः । व्रणितेत्यत्र दृश्यत इति शेषः ॥१८—२१॥ इति श्रीगोविन्दराज- विरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने कि- ष्किन्धाकाण्डव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

ति० कन्दराण्युदरेयस्य सचासौकूटवान् शृङ्गवान् ॥ ७ ॥ **स०** आश्रमं आश्रमः । "आश्रमोस्त्री" इत्यमरः । उग्रतपेतिलुप्त- थमाकप्रातिपदिकनिर्देशः । आगमशासनस्यानित्यत्वादडभावोवा संधिरार्षइतिवा । अथवा सुरैरपिपूजितं भवत्सत् आश्रममासी- त्यन्वयः । उग्रतपाऋषिर्यस्मिन्नासीदित्यावृत्त्यान्वयः ॥ ८ ॥ **ति०** तमृषिंद्रष्टुकामोस्मि द्रष्टुकामोऽभूवमित्यर्थः । अतएवदुःखेन दभ्याशमभ्यागतः । ननुतद्वासोत्रेतित्वयाकथंज्ञातमतआह—जटायुषेति । अधिगतः प्राप्तः सेवितइत्यर्थः ॥ ११ ॥ **स०** सुग- धिनः गन्धएषामस्तितेगन्धिनः । शोभनाश्चतेगन्धिनश्चेतिविग्रहः । योग्यतयाशोभनत्वंगन्धेज्ञेयं । एतेन कथमनित्यत्वंकर्मधारयाद्वे रितिशङ्काद्वयंपरास्तं ॥ १२ ॥ **ति०** उदङ्मुखमुपावृत्तं समुद्रेस्नात्वोदङ्मुखतयाप्रत्यावृत्तं ॥ १४ ॥ **ति०** तस्यस्वसेवायोग्यत्व- दर्शनायतिर्यग्योनिसेव्यत्वं तपोमहिमजंदर्शयति—**तमृक्षाइति** ॥ **ती०** धातारं पोषकं ययुः प्रापुः ॥ १५ ॥ **ति०** शरीरके ल्पेशरीरे ॥ प्राणाः चाद्विक्रमबलेअपि । तेदग्धकल्पाः ॥ १८ ॥ **ति०** अवितः ज्ञातः ॥ २० ॥ **ती०** किं कीदृशं । व्याधि- मुत्थानं षष्ठीतत्पुरुषः । अयंदण्डोव्रणकरःप्रहारः खेनधृतः केनकृतः । **स०** अथवा व्याधेःसमुत्थानंयस्मात्तत् रोगकारणं । अयं ण्डः पक्षक्षतिरूपः ॥ २१ ॥ इतिषष्टितमःसर्ग ॥ ६० ॥

[पा०] १ ङ. च. छ. झ. ञ. ट. कन्दरोदरकूटवान्. २ क. ख. ग. ङ.—ट. निश्चितः. ३ ङ. च. छ. झ. ञ. ट. गिरौ. वने. ४ च.—ट. धर्मज्ञे. ५ ग. अवतीर्यंतु. ६ ख. चापि. ७ क.—घ. च. छ. झ. ञ. ट. नापुष्पितः. ८ ग. दफलोत्र. कं.—ट. दृश्यते. १० क.—ट. प्रतीक्षेच. ११ ग. छ. ज. झ. ट. अथपश्यामिदूरस्थं. ङ. अथापश्यमहंरम्यं. १२ क. ङ. झ. ञ. ट. नानासरीसृपाः. १३ ख. ग. ङ. छ.—ट. दातारं. १४ क. ग. ङ. च. छ. झ. ञ. ट. मांतुष्टः. ख. मांतत्र. ङ. च. छ. झ. ञ. ट. निर्गम्य. १६ ङ.—ट. पक्षौप्राणाश्चापिशरीरके. १७ क. ङ. द्वौगृध्रौ. १८ छ. झ. ट. ज्येष्ठोऽवितस्त्वं. ञ. ज्येष्ठस्त्वंतुग. १९ क. ख. वपुरास्थाय. २० क. दण्डोयंवा. घ. दग्धोवायं. २१ ख. छ. झ. ट. धृतः. घ. हृतः.

एकषष्टितमः सर्गः ॥ ६१ ॥

संपातिना निशाकरमुनिंप्रति विस्तरेण स्वपक्षदाहकारणाभिधानपूर्वकं गिरिशिखराद्भुविपतनेन बलपक्षविहीनजर्झरनिजकलेवरविमोक्षणप्रतिज्ञानम् ॥ १ ॥

ततस्तद्दारुणं कर्म दुष्करं [1]साहसात्कृतम् ॥ आचचक्षे मुनेः सर्वं सूर्यानुगमनं [2]तदा ॥ १ ॥
भगवन्व्रणयुक्तत्वाल्लज्जया [3]व्याकुलेन्द्रियः ॥ परिश्रान्तो न शक्नोमि वचनं [4]प्रतिभाषितुम् ॥ २ ॥
अहं चैव जटायुश्च [5]संघर्षाद्दर्पमोहितौ ॥ [6]आकाशं पतितौ [7]वीरौ जिज्ञासन्तौ पराक्रमम् ॥ ३ ॥
कैलासशिखरे [8]बद्ध्वा मुनीनामग्रतः पणम् ॥ रविः स्यादनुयातव्यो यावदस्तं महागिरिम् ॥ ४ ॥
[9]अथावां युगपत्प्राप्तावपश्याव महीतले ॥ रथचक्रप्रमाणानि नगराणि पृथक्पृथक् ॥ ५ ॥
[10]क्वचिद्वादित्रघोषांश्च ब्रह्मघोषांश्च शुश्रुवः ॥ गायन्तीश्चाङ्गना बह्वीः पश्यावो रक्तवाससः ॥ ६ ॥
तूर्णमुत्पत्य चाकाशमादित्य[11]पथमाश्रितौ ॥ आवामालोकयावस्तद्वनं [12]शाद्वलसन्निभम् ॥ ७ ॥
उपलैरिव संछन्ना दृश्यते भूः शिलोच्चयैः ॥ आपगाभिश्च संवीता सूत्रैरिव वसुन्धरा ॥ ८ ॥
हिमवांश्चैव विन्ध्यश्च मेरुश्च [13]सुमहान्नगः ॥ भूतले संप्रकाशन्ते नागा इव जलाशये ॥ ९ ॥
तीव्रः स्वेदश्च खेदश्च भयं चासीत्तदावयोः ॥ समाविशति [14]मोहश्च तमो मूर्च्छा च दारुणा ॥ १० ॥
[15]न दिग्विज्ञायते याम्या [16]नाग्नेयी न च वारुणी ॥ युगान्ते नियतो लोको [17]हतो दग्ध इवाग्निना ॥ ११ ॥
मनश्च मे हतं भूयः सन्निवर्त्य तु संश्रयम् ॥ यत्नेन [18]महता ह्यस्मिन्[19]पुनः संधाय चक्षुषी ॥
यत्नेन महता भूयो [20]रविः समवलोकितः ॥ १२ ॥

ततस्तदित्यादि ॥ १—२ ॥ पतितौ प्राप्तौ ॥ ३—९ ॥ मोहः चित्तविभ्रमः । मूर्च्छा इन्द्रियैः सह मनस उपप्लवः । तमः अज्ञानं ॥ १० ॥ याम्येत्यादिकं दिगन्तराणामुपलक्षणं । नियतो लोकः नियतसन्निवेशो लोकः । युगान्ते अग्निना दग्धो हत इव । अदृश्यतेति शेषः ॥ ११ ॥ संश्रयं आश्रयभूतं

ति० तद्दारुणंकर्म इन्द्रेणयुद्धरूपं । अनेनदुष्करं सहसा दर्पात्कृतं प्रथममाचचक्षे । तथा तदनन्तरकृतंसूर्यानुगमनंसर्वं प्रकृतविन्ध्यपतनप्रयोजनत्वेनाचचक्षे ॥ स० दारुणंपर्णंनिधाय दर्पादुत्सर्पणरूपंक्रूरंकर्म । दुष्करं अनन्यसाध्यं ॥ १ ॥ ति० व्रणयुक्तत्वात् इन्द्रयुद्धवज्रप्रहारजव्रणयुक्तत्वात् परिश्रान्तः । तथापक्षनाशफलकानुचितकर्मकरणजलज्जयाआकुलेन्द्रियश्चाहं प्रतिभाषितुंनशक्नोमि । तथापि कथञ्चिद्ब्रवीमीतिशेषः ॥ स० व्रणयुक्तत्वात् । तपनतापनजनितव्रणयुक्तत्वात् । लज्जया अन्योन्यस्पर्धयेदंकार्यंकृतमितिलज्जया । वचनं सामान्यवचनमुद्दिश्यनशक्नोमि । परिभाषितुंव्यक्तंवक्तुंनशक्नोमीति किम्वित्यध्याहृतेनान्वयः ॥ परिभाषितुं सम्यग्वक्तुंनशक्नोमि । वचनंमन्दवचनं शृणुष्वेतिशेषोवा । उच्यतइतिवचनमभिप्रायस्तं परिभाषितुंनशक्नोमीतिवा ॥ २ ॥ ति० संघर्षात् पतनविषयस्पर्धातः । गर्वमोहितौ इन्द्रजयगर्वमोहितौ ॥ स० गर्वमोहितौ अहमहीनवेगइत्यहन्ताविष्टचित्तौ ॥३॥ शि० अस्तंमहागिरिंरविः यावत्स्यात् यायात् । तावदेव अनुयातव्यः आवाभ्यांप्राप्यः ॥ ४ ॥ शि० शाद्वलैः बालतृणैः । संवृतं आच्छादितमिववनमालोकयामः ॥ महातरवोदूर्वादलवद्दृश्यन्तेइत्यर्थः ॥७॥ स० उपलैः अल्पशिलाभिः । पर्वताअपिखर्वतयादृश्यन्तइतिभावः । सूत्रैः कटिसूत्रप्रायाभिः । आपगाभिः नदीभिः ॥ ८ ॥ स० नागाः गजाः । वक्रतया प्रायःस्थितेःसर्पाद ॥ ९ ॥ स० मोहोवैचित्यं । समाविशति आविशत् मां । ततः तंजटायुषं दारुणामूर्छाच आविशति आविशदित्यन्वयः । एवंच नपुनरुक्तिः तद्द्वयात्सामान्यविशेषभावाश्रयणंचनेतिज्ञेयं ॥ नकेवलंमां अपितु तंचेति चःसमुच्चये ॥ १० ॥

[पा०] १ क. घ. च.—ट. सहसाकृतं. २ ख. ग. घ. छ. झ. ञ. ट. तथा. ३ ग. झ. ञ. ट. चाकुलेन्द्रियः. क. ख. ङ. च. ज. त्वाकुलेन्द्रियः. ४ ख. ग. ङ.—ट. परिभाषितुं. ५ ङ.—ट. संघर्षाद्गर्वं. ६ ख. आकाशपतनात्. ७ छ. झ. ट. दूरात्. ८ घ. कृत्वा. ९ छ. झ. ञ. अप्यावां. १० ङ. च. छ. झ. ञ. ट. वादित्रघोषश्चक्वचिद्भूषणनिस्वनः । गायन्तीः स्माङ्गनाः. ११ क. च.—ट. पदमास्थितौ. ख.—ङ. पथमास्थितौ. १२ क. ख. घ. ञ. शाद्वलसंस्थितं. च. छ. ज. ट. शाद्वलसंवृतं. १३ ङ. च. ज.—ट. सुमहागिरिः. छ. सुमहान्गिरिः. १४ ख. घ. शोकश्चमोहोमूर्च्छाच. क. ङ. च. ज. ञ. शोकश्चमोहान्मूर्च्छाच. ग. शोकश्चमोहान्मूर्च्छाति. छ. झ. ट. मोहश्चततो. १५ छ. ट. नचदिग्ज्ञायते. १६ ङ—ट. नचाग्नेयी- नवारुणी. १७ ख हतदग्धइवा. १८ क. ग. च. ञ. महताप्यस्मिन्. ख. महतात्रह्मन्. १९ ङ.—ट. न्मनस्संधाय. २० ङ. च. ज. ट. भास्करः प्रति लोकितः.

तुल्यः पृथ्वीप्रमाणेन भास्करः प्रतिभाति नौ ॥ १३ ॥
जटायुर्मामनापृच्छ्य[1] निपपात महीं ततः[2] ॥ तं दृष्ट्वा तूर्णमाकाशादात्मानं मुक्तवानहम् ॥ १४ ॥
[3]पक्षाभ्यां च मया गुप्तो जटायुर्न [4]प्रदह्यते ॥ प्रमादात्तत्र निर्दग्धः पतन्वायुपथादहम् ॥ १५ ॥
आशङ्के तं निपतितं जनस्थाने जटायुषम् ॥ [5]अहं तु पतितो विन्ध्ये दग्धपक्षो जडीकृतः ॥ १६ ॥
[6]राज्येन हीनो भ्रात्रा च पक्षाभ्यां विक्रमेण च ॥ सर्वथा मर्तुमेवेच्छन्पतिष्ये शिखराद्गिरेः ॥ १७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

द्विषष्टितमः सर्गः ॥ ६२ ॥

संपातिना वानरान्प्रति निशाकरेण ध्यानादेष्यत्सीताहरणादिवृत्तान्तपरिज्ञानेन स्वंप्रति पुनःपक्षप्ररोहस्य भविष्यत्त्वाभिधानपूर्वकं वानरेभ्यः सीतावृत्तान्तनिवेदनाय स्वस्य देहत्यागप्रतिषेधननिवेदनम् ॥ १ ॥

एवमुक्त्वा मुनीश्रेष्ठमरुदं दुःखितो[7] भृशम् ॥ अथ ध्यात्वा [8]मुहूर्तं तु भगवानिदमब्रवीत् ॥ १ ॥
पक्षौ च ते प्रपक्षौ च पुनरन्यौ भविष्यतः ॥ [9]प्राणाश्च चक्षुषी चैव विक्रमश्च बलं च ते ॥ २ ॥
पुराणे सुमहत्कार्यं भविष्यति मया श्रुतम् ॥ दृष्टं मे तपसा चैव श्रुत्वा च [10]विदितं मम ॥ ३ ॥
राजा दशरथो नाम कश्चिदिक्ष्वाकु[11]नन्दनः ॥ तस्य पुत्रो महातेजा रामो नाम भविष्यति ॥ ४ ॥
अरण्यं च सह भ्रात्रा लक्ष्मणेन गमिष्यति ॥ [12]अस्मिन्नर्थे नियुक्तः सन्पित्रा सत्यपराक्रमः ॥ ५ ॥
नैर्ऋतो रावणो नाम तस्य भार्यां हरिष्यति ॥ राक्षसेन्द्रो [13]जनस्थानादवध्यः सुरदानवैः ॥ ६ ॥
[14]सा च कामैः प्रलोभ्यन्ती भक्ष्यैर्भोज्यैश्च मैथिली ॥ न भोक्ष्यति महाभागा [15]दुःखे मग्ना यशस्विनी ॥ ७ ॥

चक्षुरिन्द्रियं सन्निवर्त्य स्वेन विप्रयुज्य । भूयो भृशं हतं मे मनः महतायत्नेन अस्मिन् चक्षुषि पुनः संधाय महता यत्नेन भूयो रविः समवलोकित इति संबन्धः ॥१२—१३॥ निपपात महीं महीं प्रति निपपातेत्यर्थः । पतन्तं दृष्ट्वा अहमाकाशात् पूर्वाधिष्ठिताकाशप्रदेशात् । आत्मानं तूर्णं मुक्तवान् । जटायुषो रक्षणार्थं तदुपरि सत्वरमागच्छमित्यर्थः ॥ १४ ॥ प्रमादात् सूर्यो धक्ष्यतीति बुद्ध्यवधानाभावात् ॥ १५—१७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने एकषष्टितमः सर्गः ॥ ६१ ॥

अस्मिन्नर्थे अरण्यगमने ॥ १–६ ॥ काम्यन्त इति कामैः अपेक्षणीयैः । प्रलोभ्यन्ती प्रलोभ्यमाना ॥७॥

ति० पृथ्व्यत्र जंबूद्वीपावच्छिन्नाबोध्या ॥ १३ ॥ इत्येकषष्टितमःसर्गः ॥ ६१ ॥

ति० पक्षप्रपक्षौ सूक्ष्मपक्षमहापक्षौ ॥ प्राणाः पुष्टप्राणाः । चक्षुषी उद्भूतशक्तिके ॥२॥ ति० पुराणे नारदादिभिरुच्यमानेभविष्यरामचरितरूपेपुराणे ॥ श्रुत्वाविदितं तपसादृष्टंच ॥३॥ स० ॥ सुरदानवैः सुरैस्सहितादानवास्तैः । एतेन "येषां च विरोधः शाश्वतिकः" इत्येकवद्भावाभावःकथमितिनिरस्तं ॥ ६ ॥ स० प्रलोभ्यन्ती प्रलोभ्यमाना । प्रलोभयितुंयोग्याःप्रलोभ्याः तद्वदाचरन्ती । वस्तुतस्तु नप्रलोभनीयेत्यर्थः । अदुःखमग्ना भोज्याभावप्रयोज्यदुःखरहिता । नित्यतृप्तत्वात्तस्यदुरन्नत्वाद्वाऽभोजनमितिमन्तव्यं । भोक्ष्यति भोक्ष्यते ॥ ७ ॥

[पा०] १ घ. मनादृत्य. २ च. ज. प्रति. ३ ख. घ. पक्षाभ्यांतु. ४ क. ङ.—ट. प्रदह्यत. ५ क. अहंनिपतितो. ६ क. ग. ङ.—ट. राज्याच्च. ७ छ. झ. ट. भृशदुःखितः. ८ ङ. च. छ. ञ. ट. मुहूर्तंच. ९ ख. घ. छ. झ. ट. चक्षुषी चैवप्राणाश्च. क. चक्षुषीचैवतेप्राणाः. १० क. विदितंमया. ११ छ. झ. ट. वर्धनः. १२ ख.—ट. तस्मिन्नर्थे. १३ ख. छ. झ. ट. जनस्थानेअवध्यः. १४ क. साचप्रलोभितातेन. १५ छ. झ. दुःखभग्ना. क.—च. ज. ञ. ट. दुःखमग्ना.

[1]परमान्नं तु वैदेह्या ज्ञात्वा दास्यति वासवः ॥ यदन्नममृतप्रख्यं [2]सुराणामपि दुर्लभम् ॥ ८ ॥
तदन्नं मैथिली प्राप्य विज्ञायेन्द्रादिदं त्विति ॥ अग्रमुद्धृत्य रामाय भूतले निर्वपिष्यति ॥ ९ ॥
यदि जीवति मे भर्ता [3]लक्ष्मणेन सह प्रभुः ॥ देवत्वं गच्छतोर्वापि तयोरन्नमिदं त्विति ॥ १० ॥
[4]एष्यन्त्यन्वेषकास्तस्या रामदूताः प्लवङ्गमाः ॥ आख्येया [5]राममहिषी त्वया तेभ्यो विहङ्गम ॥ ११ ॥
[6]सर्वथा हि न गन्तव्यमीदृशः क्व गमिष्यसि ॥ देशकालौ प्रतीक्षस्व पक्षौ त्वं प्रतिपत्स्यसे ॥ १२ ॥
नो[7]त्सहेयमहं कर्तुमद्यैव त्वां सपक्षकम् ॥ इहस्थ[8]स्त्वं तु लो[9]कानां हितं कार्यं करिष्यसि ॥ १३ ॥
त्वयापि खलु त[10]त्कार्यं तयोश्च नृपपुत्रयोः ॥ ब्राह्मणानां [11]सुराणां च मुनीनां वासवस्य च ॥ १४ ॥
इच्छाम्यहमपि द्रष्टुं भ्रातरौ रामलक्ष्मणौ ॥ नेच्छे चिरं धारयितुं प्राणांस्त्यक्ष्ये कलेवरम् ॥
महर्षिस्त्वब्रवीदेवं दृष्टतत्त्वार्थदर्शनः ॥ १५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

ज्ञात्वा अनशनमितिशेषः ॥ ८–१३ ॥ नृपपुत्रयोः तत्प्रयोजनं त्वयापि कार्यं कर्तव्यं । ब्राह्मणादीनां च कार्यमिति संबन्धः ॥ १४–१५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने द्विषष्टितमः सर्गः ॥ ६२ ॥

ति॰ परमान्नं पायसं ॥ वासवोदास्यति । स्वपुरुषद्वारेतिशेषः ॥ इन्द्रात् इन्द्रपुरुषात् नतुरावणपुरुषादिति विज्ञाय अभूतलस्पर्शिलादिरूपैर्देवचिह्नैः । रामआगत्यैनंहत्वात्वांनयिष्यति । संवत्सरतृप्तिकरमिदमन्नंभुक्त्वा देवकार्यसिद्धये मनुष्यभावंधृतवत्या प्राणाधर्तव्याः । देवैरपि मनुष्यभावे आहारंविनाजीवितुंनशक्यतेइत्यादिवचनैश्चनिश्चितेत्यर्थः । निर्वपिष्यति दास्यति । ननु त्रेतायामस्थिप्राणवासस्योक्तत्वाज्जीवितुंशक्यतएवेतिचेन्न । तथासत्यपि क्षीणतायांदेहवैरूप्ये रावणस्यानुरागभङ्गेन तत्पुण्याक्षये तस्यवधोनस्यादिति रूपलावण्याद्यहानाय तद्दानेनादोषात् । रावणस्यतु तथैवरूपादिदर्शनेन मद्दत्ताहाराग्रहणेपि वन्यफलाद्याहारं करोतीतिबुद्ध्या तस्यां नामनुष्यत्वनिश्चयः । एतेनाहारंविनापि पूर्वरूपादिसत्वज्ञानेन तस्य तस्याममनुष्यत्वबुद्धौ तत्संबन्धाद्रामेपि तत्त्वबुद्धौ रामतोरावणवधोनस्यादित्यपास्तं ॥ **स॰** नित्यतृप्तापि वासवसेवांनलङ्घयाञ्चकारेत्याह—**परमान्नमिति** । ज्ञात्वा सेवाभवत्विविविज्ञात्वेतिशेषः । सर्वान्सुपर्वणोविहाय व्यवहारसिद्ध्यै इन्द्रस्यप्रतिकृतिप्रविष्टत्वात्पायसप्रदोवासवइति चोक्तिर्युक्तिमतीति वासवग्रहणेनद्योतयतिकविरित्यवधेयं । सीताप्रतिकृतित्वमात्रतएव सेवेत्यप्यवसेयं । तदन्नंप्राप्य । इन्द्रादितिपञ्चमी हेतौ । इन्द्रहेतुकमिदंदास्यतीतिप्रकृतंदानंविज्ञाय ज्ञात्वा निर्वपिष्यति ॥ ८–९ ॥ **ति॰** उत्सहेयं यदित्वयादेवकार्यायेहस्थातव्यंस्यादिति शेषः । पक्षवत्त्वेहिचापल्याद्गन्तव्यमेवेतोन्यत्रत्वयेतिभावः ॥ **शि॰** इहस्थस्त्वं लोकानांहितं सीतावृत्तान्तबोधनरूपं । कार्यंकरिष्यसि । एतेन पक्षप्राप्तौ तवनिश्चलास्थितिर्नभवितेति सूचितं ॥ १३ ॥ **ति॰** दृष्टतत्वार्थदर्शनः दृष्टंसिद्धं तत्वार्थदर्शनं यस्य समहर्षिरेवं भाव्यर्थमब्रवीत् । अतोहेतोरहमपि भ्रातरौरामलक्ष्मणौद्रष्टुमिच्छामि । यदि महर्षिरेवंमांप्रति नावक्ष्यत्तदा प्राणांश्चिरंधारयितुं नेच्छे नैच्छं । अपितुकलेवरंत्यक्ष्ये इत्येवैच्छमित्यर्थइतिकतकः । अन्येतु निशाकरवाक्यमेवेदं अहंपदार्थोपिसएवेत्याहुः ॥ १५ ॥ इतिद्विषष्टितमःसर्गः ॥ ६२ ॥

[**पा॰**] १ ङ. च. ज.—ट. परमान्नंच. २ ग. सुराणामति. ३ छ. झ. ट. लक्ष्मणोवापिदेवरः. क. ख. भ्रात्रासौमित्रिणासह. ४ ङ.—ट. एष्यन्तिप्रेषितास्तत्र. ५ ग. ङ. च. ज. ञ. रामभार्याहि. ६ क. ख. ग. च.—ट. सर्वथातु. ७ क. ग.—छ. झ. ञ. ट. उत्सहेयमहं. ८ ट. स्त्वंच. झ. स्त्वंहि. ९ क. ग. ङ. च. ज. ञ. लोकानामिदं. १० ङ. च. ज. ञ. कर्तव्यं. ११ छ. झ. ट. गुरूणांच.

त्रिषष्टितमः सर्गः ॥ ६३ ॥

वानरैःसह संभाषणसमयएव यथामुनिवचनं प्ररूढाभिनवपक्षेणसंपातिना वानरान्प्रति हर्षात्स्वपक्षप्ररोहप्रदर्शनपूर्वकं तस्यदृष्टान्तीकरणात्तत्कार्यसिद्धिनिवेदनेन गतिपरीक्षणाय नभसि समुड्डीनम् ॥ १ ॥ वानरैर्हर्षाद्दक्षिणसमुद्राभिमुख्येन प्रस्थानम् ॥ २ ॥

[1]एतैरन्यैश्च बहुभिर्वाक्यैर्वाक्य[2]विदां वरः ॥ मां प्रशस्याभ्यनुज्ञाप्य प्रविष्टः स [3]स्वमाश्रमम् ॥ १ ॥
कन्दरात्तु विसर्पित्वा पर्वतस्य शनैः शनैः ॥ अहं विन्ध्यं समारुह्य भवतः [4]प्रतिपालये ॥ २ ॥
अद्य त्वेतस्य कालस्य साग्रं वर्षशतं गतम् ॥ देशकालप्रतीक्षोस्मि हृदि कृत्वा मुनेर्वचः ॥ ३ ॥
महाप्रस्थानमासाद्य स्वर्गते तु निशाकरे ॥ मां निर्दहति संतापो वितर्कै[5]र्बहुभिर्वृतम् ॥ ४ ॥
[6]उत्थितां मरणे बुद्धिं मुनिवाक्यैर्निवर्तये ॥ बुद्धिर्या तेन मे दत्ता [7]प्राणानां रक्षणाय तु ॥
सा मेऽपनयते दुःखं दीप्तेवाग्निशिखा तमः ॥ ५ ॥
बुध्यता च मया वीर्यं रावणस्य दुरात्मनः ॥ पुत्रः संतर्जितो वाग्भिर्न त्राता मैथिलीं कथम् ॥ ६ ॥
तस्या विलपितं श्रुत्वा तौ च सीताविनाकृतौ ॥ न मे दशरथस्नेहात्पुत्रेणोत्पादितं प्रियम् ॥ ७ ॥
तस्य त्वेवं ब्रुवाणस्य संपातेर्वानरैः सह ॥ उत्पेततुस्तदा पक्षौ समक्षं वनचारिणाम् ॥ ८ ॥
स दृष्ट्वा स्वां तनुं [8]पक्षैरुद्गतै[9]ररुण[10]च्छदैः ॥ प्रहर्षमतुलं लेभे वानरांश्चेदमब्रवीत् ॥ ९ ॥
[11]ऋषेर्निशाकरस्यैव [12]प्रभावादमितात्मनः ॥ आदित्यरश्मिनिर्दग्धौ [13]पक्षौ मे पुनरुत्थितौ ॥ १० ॥
यौवने वर्तमानस्य ममासीद्यः पराक्रमः ॥ तमे[14]वाद्यानुगच्छामि बलं पौरुषमेव च ॥ ११ ॥
सर्वथा क्रियतां यत्नः सीतामधिगमिष्यथ ॥ पक्षलाभो ममायं वः सिद्धिप्रत्ययकारकः ॥ १२ ॥
इत्युक्त्वा स[15] हरीन्सर्वान्संपातिः [16]पतगोत्तमः ॥ उत्पपात गिरेः [17]शृङ्गाज्जिज्ञासुः खगमो गतिम् ॥ १३ ॥
तस्य तद्वचनं श्रुत्वा [18]प्रीतिसंहृष्टमानसाः ॥ बभूवुर्हरिशार्दूला विक्रमाभ्युदयोन्मुखाः ॥ १४ ॥

एतैरित्यादि ॥ १–२॥ पूर्वं निशाकरमुनिप्रयाणानन्तरं अष्टौ वर्षसहस्राणि व्यतीतानीत्युक्तवान् अतः साग्रं वर्षशतं गतमित्येतदष्टवर्षसहस्रोपलक्षणं ॥ ३ ॥ वितर्कैः विविधविचारैः ॥ ४–८ ॥ अरुण-

---

ति० मांप्रशस्य भाविदेवकार्यसाधकत्वेनस्तुत्वा । अभ्यनुज्ञाप्य आमन्त्र्य ॥ शि० अनुज्ञाप्य वृत्तान्तंबोधयितुं नियुज्य ॥ १ ॥ स० देशकालौप्रतीक्षतइति देशकालप्रतीक्षः । कर्मण्यण् । देशकालयोःप्रतीक्षायस्यसइतिवा ॥ ३ ॥ स० महाप्रस्थानं अनिवर्त्यमार्गं ॥ ति० संतापः पक्षादिहीनजीवनजः ॥ शि० संतापः मुनिवियोगजनितखेदः ॥ ४ ॥ स० निवर्तये क्रियासंबन्धेलट्सार्वकालिकइतिसंभवत्यतीतार्थता । न्यवर्तयमितितदर्थः ॥ ५ ॥ ति० रावणस्यवीर्यंबुध्यता मत्पुत्रवीर्यादल्पमितिजानता ॥ ६ ॥ स० यद्वा अरुणाश्चतेछदाश्च । तैः । पक्षैः विहायोगमनसहायैः । " पक्षःसहायेपि " इत्यमरः ॥ ९ ॥ स० निशाकरस्य तन्नामकस्य । राजर्षेः राजासन्नपिऋषिधर्मोपेतइतिसतथा । तस्य । यद्वा निशाकरस्यमुनेः राजर्षेः रामस्यच एतत्पक्षेअमितौजसइतिसमुचितार्थं पूर्वार्थेगौणंराजर्षेरित्यपीतिमन्तव्यं । राजभिःपूजितऋषिः राजर्षिस्तस्य । प्रसादात् उपदेशकथाकर्णनजनितात् ॥ १० ॥ ति० गतिंजिज्ञासुः उत्थितपक्षैःप्राग्वत्खगतिंविज्ञातुमिच्छुः । विक्रमसाध्येऽभ्युदये सीताधिगमनरूपे । उन्मुखाः ॥१४॥

[पा०] १ क. एतैश्चान्यैश्च. २ ख—ट. वाक्यविशारदः. ३ छ. झ. ट. स्वमालयं. ४ क. ख. प्रतिलक्षये. ५ ग. छ. विविधैः. ६ ङ.—ञ. उदितां. ७ ङ.—ट. प्राणसंरक्षणेमम. क. ग. घ. प्राणसंरक्षणायतु. ८ झ. संहतैः. ९ क. ग. पत्रैः. १० क. रुणप्रभैः. ११ ख. घ.—ट. निशाकरस्यराजर्षेः. ग. निशाकरस्यचमुनेः. क. निशाकरस्यमहर्षेः. १२ ग. ङ.—ट. प्रसादादमितौजसः. क. प्रभावादमितौजसः. १३ ङ.—ट. पक्षौपुनरुपस्थितौ. १४ ग. घ. च.—ट. वाद्यावगच्छामि. ख. वाद्यनुगच्छामि. क. वाद्याधिगच्छामि. १५ क.—घ. च. झ. ञ. ट. तान्हरीन्. १६ क. ख. घ. पततांवरः. १७ क. शृङ्गात्संपातिःखगतिस्तदा. १८ ग. प्रियसंहृष्ट.

अथ पवनसमानविक्रमाः प्लवगवराः प्रतिलब्धपौरुषाः ॥
[1]अभिजिदभिमुखा दिशं ययुर्जनकसुतापरिमार्गणोन्मुखाः ॥ १५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

चतुःषष्टितमः सर्गः ॥ ६४ ॥

दुस्तरसमुद्रदर्शनेन विषीदत्सुकपिषु अङ्गदेन कपिवीरसमुदायंप्रति योजनशतोल्लङ्घने सामर्थ्यप्रश्ने केनाप्युत्तराप्रदाने पुनस्तद्बलपराक्रमप्रशंसनपूर्वकं तान्प्रति प्लवने स्वस्वशक्तिनिवेदनचोदना ॥ १ ॥

आख्याता गृध्रराजेन समुत्पत्य प्लवङ्गमाः ॥ [2]संगम्य [3]प्रीतिसंयुक्ता [4]विनेदुः [5]सिंहविक्रमाः ॥ १ ॥
संपातेर्वचनं श्रुत्वा हरयो [6]रावणक्षयम् ॥ [7]हृष्टाः सागरमाजग्मुः सीतादर्शनकाङ्क्षिणः ॥ २ ॥
[8]अभिक्रम्य तु तं देशं ददृशुर्भीमविक्रमाः ॥ कृत्स्नं लोकस्य महतः प्रतिबिम्बमिव स्थितम् ॥ ३ ॥
दक्षिणस्य समुद्रस्य समासाद्योत्तरां दिशम् ॥ सन्निवेशं ततश्[9]चक्रुर्हरिवीरा महाबलाः ॥ ४ ॥
[10]सत्त्वैर्महद्भिर्[11]विकृतैः क्रीडद्भिर्[12]विविधैर्जले ॥ [13]व्यात्तास्यैः सुमहाकायैरूर्मिभिश्च समाकुलम् ॥ ५ ॥
प्रसुप्तमिव चान्यत्र क्रीडन्तमिव चान्यतः ॥ क्वचित्[14]पर्वतमात्रैश्च जलराशिभिरावृतम् ॥ ६ ॥
संकुलं दानवेन्द्रैश्च पातालतलवासिभिः ॥ रोमहर्षकरं दृष्ट्वा विषेदुः कपिकुञ्जराः ॥ ७ ॥
आकाशमिव दुष्पारं सागरं प्रेक्ष्य वानराः ॥ विषेदुः सहसा[15]सर्वे कथं कार्यमिति ब्रुवन् ॥ ८ ॥
[16]विषण्णां वाहिनीं दृष्ट्वा [17]सागरस्य निरीक्षणात् ॥ आश्वासयामास हरीन्भयार्तान्हरिसत्तमः ॥ ९ ॥
तान्विषादेन महता विषण्णान्वानरर्षभान् ॥ उवाच [18]मतिमान्काले वालिसूनुर्महाबलः ॥ १० ॥

च्छदैः अरुणबर्हिष्पत्रैः ॥ ९–१४ ॥ अभिजिदभिमुखाः अभिजिन्मुहूर्तप्रतीक्षकाः ॥ १५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने त्रिषष्टितमः सर्गः ॥ ६३ ॥

एवं प्रक्षिप्ताः पञ्च सर्गा गताः । एवं कृतोदर्कं संपातिं स्वस्थानमानीय प्रकृतकार्याय वानरा गता इत्याह—आख्याता इति ॥ समुत्पत्य हर्षेण तत्र लङ्घनं कृत्वा । संगम्य पुनरन्योन्यं समेत्य विनेदुः ॥ १ ॥ हरयः संपातेर्वचनं श्रुत्वा सीतादर्शनकाङ्क्षिणः सन्तः रावणक्षयं रावणनिलयभूतं लङ्काद्वीपमुद्दिश्य सागरं तन्मार्गभूतं सागरं । आजग्मुरिति संबन्धः ॥ २ ॥ प्रतिबिम्बमिव प्रतिनिधिमिव । इदं तटविशेषणं । सर्वलोकस्थसमस्तवस्तुसंपूर्णमित्यर्थः। "प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया। प्रतिकृतिरर्चा पुंसि प्रतिनिधिरुपमोपमानं स्यात्" इत्यमरः ॥ ३ ॥ सन्निवेशं स्थानं ॥ ४–९ ॥ विषादेन विषादकारणेन

ति० प्रतिलब्धंप्राप्तंपौरुषंपौरुषप्रवृत्तिकालोयैस्ते । अभिजिदभिमुखां अभिजिन्नक्षत्रसंमुखां । दिशं दक्षिणां । यद्वा अभिजित् बाहुलकात्कर्मणिक्विप् । अभिजेतव्योरावणः संमुखोयस्यांतांदिशं ॥ १५ ॥ इतित्रिषष्टितमःसर्गः ॥ ६३ ॥

ति० आख्याताः आख्यातसीतावृत्तान्ताः ॥ १ ॥ ति० रावणक्षयं रावणनाशंरावणगृहंचोद्दिश्योक्तंवचनंश्रुत्वा ॥ २ ॥ ति० यत्रमहतोलोकस्यसचन्द्रार्कग्रहस्य कृत्स्नंप्रतिबिंबंस्थितंतंसमुद्रंददृशुः । प्रतिबिंबमवस्थितंइतिप्राचीनःपाठः । प्रतिबिंबमिवस्थितमित्याधुनिकपाठोनयुक्तः । कृत्स्नलोकप्रतिबिंबभावाप्रसिद्धेः ॥ ३ ॥ ति० प्रसुप्तमिवचान्यत्र निस्तरङ्गप्रदेशे । अन्यतः अन्यत्र । पर्वतमात्रैः तत्सदृशैः । जलराशिभिः ऊर्मिभिः ॥ ६ ॥

[पा०] १ ग. छ.—ट. दभिमुखां. २ ङ.—ञ. संगताः. ३ ख. प्रीतिसंघुष्टाः. ४ ङ. ज. निनेदुः. ५ क. ख. ग. भीमविक्रमाः. ६ घ. रावणालयं. ७ ख. प्रहृष्टाःसागरंजग्मुः. ८ क. ख. ग. अतिक्रम्यतु. ङ.—झ. ट. अभिगम्यतु. ञ. अभिसंगम्य. ९ क. ग. घ. श्चक्रुःसहितावानरोत्तमाः. १० ङ. ञ. सर्पैः. ११ ख. घ. विविधैः. १२ ख. घ. विकृतैर्जले. १३ क. घ.—ज. व्यात्तास्यैः. १४ क. त्पर्वतसंकाशैः. १५ ङ. छ.—ट. सहिताःसर्वे. क. सर्वेदुद्रुवुश्चततस्ततः. १६ क. विद्रुतां. १७ क. सागरस्यचवीक्षणात्. १८ क. वचनंकाले.

न वि[1]षादे मनः कार्यं विषादो दो[2]षवत्तमः ॥ विषादो हन्ति पु[3]रुषं बालं क्रुद्ध इवोरगः ॥ ११ ॥
वि[4]षादो यं प्रसहते विक्रमे प[5]र्युपस्थिते ॥ तेजसा तस्य हीनस्य पुरुषार्थो न सिध्यति ॥ १२ ॥
तस्यां रात्र्यां व्यतीतायामङ्गदो वा[6]नरैः सह ॥ हरिवृद्धैः समागम्य पुनर्मन्त्रममन्त्रयत् ॥ १३ ॥
सा वानराणां ध्वजिनी परिवार्याङ्गदं बभौ ॥ वासवं परिवार्येव मरुतां वाहिनी स्थि[7]ता ॥ १४ ॥
कोऽन्यस्तां वानरीं सेनां श[8]क्तः स्तम्भयितुं भवेत् ॥ अन्यत्र वालितनयादन्यत्र च हनूमतः ॥ १५ ॥
ततस्तान्हरिवृद्धांश्च तच्च सैन्यमरिंदमः ॥ अनुमान्याङ्गदः श्रीमान्वाक्यमर्थवदब्रवीत् ॥ १६ ॥
क इदानीं महातेजा लङ्घयिष्यति सागरम् ॥ कः करिष्यति सुग्रीवं सत्यसंधमरिंदमम् ॥ १७ ॥
को वीरो योजनशतं लङ्घ[9]येच्च प्लवङ्गमाः ॥ इमांश्च यूथपान्सर्वान्मो[10]क्षयेत्को महाभयात् ॥ १८ ॥
कस्य प्र[11]भावाद्दारांश्च पुत्रांश्चैव गृहाणि च ॥ इतो निवृत्ताः प[12]श्येम सिद्धार्थाः सुखिनो वयम् ॥१९॥
कस्य प्रसादाद्रामं च लक्ष्मणं च महाबलम् ॥ अ[13]भिगच्छेम संहृष्टाः सुग्रीवं च म[14]हाबलम् ॥ २० ॥
यदि कश्चित्स[15]मर्थो वः सागरप्लवने हरिः ॥ स ददात्विह नः शीघ्रं पुण्यामभयदक्षिणाम् ॥ २१ ॥
अङ्गदस्य वचः श्रुत्वा न कश्चित्किंचिदब्रवीत् ॥ स्तिमितेवाभवत्सर्वा त[16]त्र सा हरिवाहिनी ॥ २२ ॥
पुनरेवाङ्गदः प्राह तान्हरीन्हरिसत्तमः ॥ सर्वे बलवतां श्रेष्ठा भवन्तो दृढविक्रमाः ॥ २३ ॥
व्य[17]पदेश्यकुले जाताः पूजिताश्चाप्यभीक्ष्णशः ॥ न हि वो गमने स[18]ङ्गः क[19]दाचित्कस्यचित्कचित् ॥
ब्रुवध्वं यस्य या शक्तिः प्ल[20]वने प्लवगर्षभाः ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

॥ १०—११ ॥ विषादो यं प्रसहते अभिभवति । न सिद्ध्यतीत्यनन्तरं इतिकरणंबोध्यं ॥ १२—२३ ॥ सङ्गः प्रतिहतिः । ब्रुवध्वमित्यार्षो निर्देशः ॥ २४ ॥

इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने चतुःषष्टितमः सर्गः ॥ ६४ ॥

ति० विषादंप्रसहते प्रसह्यविषादेप्रवर्तते । तेजसाहीनस्य विषादवशादितिभावः ॥ १२ ॥ ति० व्यपदेशकुले विगतोपदेशः कलङ्कोयस्मात्तादृशेकुलेपूजिताः राज्ञामहाबलत्वेनसत्कृताः ॥ २४ ॥ इतिचतुष्षष्टितमःसर्गः ॥ ६४ ॥

[पा०] १ क.—घ. विषादेननः. २ ङ. छ. झ. ञ. ट. दोषवत्तरः. ३ क. पुरुषान्भीमरूपइवोरगः. ४ क. ख. घ. च. झ. ट. योविषादंप्रसहते. ङ. ज. योविषादंनसहते. ञ. यंविषादोनसहते. ५ ङ.—ट. समुपस्थिते. ६ क. ग. हरिभिःसह. ख. वानरर्षभः. ७ क. यथा. ८ ङ. शक्तोभर्त्सयितुं. ९ क.—ज. ञ. ट. लङ्घयेत. १० च.—ट. मोचयेत्. ११ क. ख. ग. ङ. च. झ. ञ. ट. प्रसादाद्दारांश्च. १२ क. घ. ङ. पश्यामः. १३ क. अभिगच्छाम. १४ ङ.—ट. वनौकसं. १५ क. घ. समर्थोयः. १६ च.—ट. सातत्र. १७ झ. व्यपदेशकुले. १८ क. शक्तिः. १९ ख. घ. कदाचिदपिकस्यचित्. ङ. च. ज.—ट. कदाचित्कस्यचिद्भवेत्. ग. सर्वेषांचकदाकचित्. २० क. गमनेचप्लवङ्गमाः. ख. ग. घ. गमनेप्लवगर्षभाः.

पञ्चषष्टितमः सर्गः ॥ ६५ ॥

अङ्गदचोदनया गजादिजांबवदन्तयूथपेषु एकैकेनोत्तरोत्तरं दशयोजनाधिक्यक्रमेण दशयोजनादिनवतियोजनपर्यन्तं प्लवने स्वस्वशक्तिनिवेदनम् ॥ १ ॥ अङ्गदेन जांबवन्तंप्रति स्वस्य शतयोजनप्लवनेपि शक्तिनिवेदनपूर्वकं प्रतिनिवर्तनेशक्तिसंदेहकथनम् ॥ २ ॥ अङ्गदंप्रति जांबवता लौकिकरीत्यनुसारेण प्रतिनिवर्तनादिषु शक्तिकथनेन प्रशंसनपूर्वकं तस्य स्वामित्वोक्त्या भृत्यकार्यैप्रथतनस्यानौचित्योक्तिः ॥ ३ ॥ अङ्गदेन जांबवन्तंप्रति गत्यन्तराभावेनपुनःप्रायोपवेशनस्यैव शरणीकरणीयत्वोक्तिपूर्वकं प्रकृतकार्यसिद्ध्युपायचिन्तनप्रार्थने तेन तंप्रति तदङ्गीकारेण हनुमतश्चोदना ॥ ४ ॥

[1]ततोङ्गदवचः श्रुत्वा [2]सर्वे ते वानरोत्तमाः ॥ स्वं स्वं गतौ समुत्साहमाहु[3]स्तत्र यथाक्रमम् ॥ १ ॥
गजो गवाक्षो गवयः शरभो गन्धमादनः ॥ मैन्दश्च द्विविदश्चैव सुषेणो जांबवांस्तथा ॥ २ ॥
आबभाषे गजस्तत्र प्लवेयं दशयोजनम् ॥ गवाक्षो योजनान्याह गमिष्यामीति विंशतिम् ॥ ३ ॥
गवयो वानरस्तत्र वानरांस्तानुवाच ह ॥ [4]त्रिंशतं तु गमिष्यामि योजनानां प्लवङ्गमाः ॥ ४ ॥
[5]शरभस्तानुवाचाथ वानरान्वानरर्षभः ॥ चत्वारिंशद्गमिष्यामि योजनानां [6]प्लवङ्गमाः ॥ ५ ॥
[7]वानरस्तु महातेजा अब्रवीद्गन्धमादनः ॥ योजनानां गमिष्यामि पञ्चाशत्तु न संशयः ॥ ६ ॥
मैन्दस्तु वानरस्तत्र वानरांस्तानुवाच ह ॥ योजनानां परं षष्टिमहं प्लवितुमुत्सहे ॥ ७ ॥
ततस्तत्र महातेजा द्विविदः प्रत्यभाषत ॥ गमिष्यामि न संदेहः सप्ततिं योजनान्यहम् ॥ ८ ॥
सुषेणस्तु [8]हरिश्रेष्ठः प्रोक्तवान्कपिसत्तमान् ॥ अशीतिं [9]योजनानां तु प्लवेयं [10]प्लवंगेश्वराः ॥ ९ ॥
तेषां कथयतां तत्र सर्वांस्ताननुमान्य च ॥ ततो [11]वृद्धतमस्तेषां जांबवान्प्रत्यभाषत ॥ १० ॥
पूर्वमस्माकमप्यासीत्कश्चिद्गतिपराक्रमः ॥ ते वयं वयसः पारमनुप्राप्ताः स्म सांप्रतम् ॥ ११ ॥
किंतु नैवं गते शक्यमिदं कार्यमुपेक्षितुम् ॥ यदर्थं कपिराजश्च रामश्च कृतनिश्चयौ ॥ १२ ॥
[12]सांप्रतं कालभेदेन या गतिस्तां निबोधत ॥ नवतिं योजनानां तु गमिष्यामि न संशयः ॥ १३ ॥
[13]तांस्तु सर्वान्[14]हरिश्रेष्ठा[15]ञ्जाम्बवान्पुनरब्रवीत् ॥ न खल्वेतावदेवासीद्गमने मे पराक्रमः ॥ १४ ॥

गतौ गमनविषये । यद्यपि गजादयोपि शतयोजनलङ्घने शक्ताः । "भूतले सागरे वापि शैलेषु च वनेषु च । पातालस्यापिमध्ये वा न ममाच्छिद्यते गतिः" इति सुग्रीवसंनिधौ वानरयूथपैः स्वस्वशक्तेः ख्यापितत्वात् । "नहिवो गमने सङ्गः कदाचित्कस्यचित्क्वचित्" इति पूर्वमङ्गदोक्तेश्च । तथापि रावणाधिष्ठितलङ्काप्रवेशसीतान्वेषणादिकं दुष्करमन्येनेति तत्साधकहनुमत्प्रोत्साहनाय तथोक्तवन्त इति ध्येयम् ॥ १—९ ॥ तेषां कथयतां तेषु कथयत्सु सत्सु ॥ १०—१४ ॥

स० विंशतिंयोजनानि । "विंशत्याद्याः सदैकत्वे" इत्यमरादेकवचनोपपत्तिः । एवमुत्तरत्रापिज्ञेयं ॥ ३ ॥ स० तेषांकथयतांसतां । तेषामितिनिर्धारणेषष्ठी । तेषांवृद्धतमइति तेषांद्वयस्यान्वयः ॥ १ ॥ स० वयमिति । यद्यपि "अस्मदोद्वयोश्च" इत्यत्रसविशेषणत्वेतुप्रतिषेधइति बहुवचनप्रतिषेधोस्ति । तथापि विधेयविशेषणतावरणेन "शैवावयं—पञ्चाक्षरीजपपराः" इत्या-

[पा०] १ छ. झ. ट. अथाङ्गदवचः. ख. तदाङ्गदवचः. क. अङ्गदस्यवचः. २ ङ.—ट. तेसर्वेवानरर्षभाः. ३ ङ—ट. मूचुस्तत्र. ४ ङ.—ज. ञ. त्रिंशत्तुच. ५ क.—घ. छ. झ. ट. शरभोवानरस्तत्रवानरांस्तानुवाचह. ६ ङ.—ट. नसंशयः. ७ छ. झ. ञ. वानरांस्तु. क. वानरांस्तान्महा. ८ छ. झ. ट. महातेजाःसत्ववान्कपिसत्तमः. ङ. च. ज. ञ. महातेजाःप्रोक्तवान्कपिसत्तमः· क. ग. हरिश्रेष्ठःप्रोक्तवान्हरिसत्तमः. ९ ख. छ. झ. ट. प्रतिजानेहंयोजनानांपराक्रमे. १० ग. ङ. च. ज. ञ. वानर्षभाः. क. घ. प्लवगोत्तमाः. ११ ङ.—ज. ञ. वृद्धतरस्तेषां. ग. घ. वृद्धतमस्तत्र. १२ छ. झ. ट. सांप्रतंकालमस्माकं. ज. संप्राप्ता कालभेदेन. १३ क.—ट. तांश्च. १४ ख. घ. न्कपिश्रेष्ठान्. १५ क. छ. झ. ट. जांबवानिदमब्रवीत्.

[1]मया महाबलेश्चैव यज्ञे विष्णुः सनातनः ॥ प्रदक्षिणीकृतः पूर्वं क्रममाणस्[2]त्रिविक्रमम् ॥ १५ ॥
स [3]इदानीमहं वृद्धः प्लवने मन्दविक्रमः ॥ [4]यौवने च [5]तदासीन्मे बलमप्रतिमं [6]परैः ॥ १६ ॥
[7]संप्रत्येतावतीं शक्तिं गमने तर्कयाम्यहम् ॥ नैतावता च संसिद्धिः कार्यस्यास्य भविष्यति ॥ १७ ॥
अथोत्तरमुदारार्थमब्रवीदङ्गदस्तदा ॥ अनुमान्य [8]महाप्राज्ञं जांबवन्तं [9]महाकपिः ॥ १८ ॥
अहमेतद्गमिष्यामि योजनानां शतं महत् ॥ निवर्तने तु मे [10]शक्तिः स्यान्न वेति न [11]निश्चिता॥१९॥
तमुवाच [12]हरिश्रेष्ठं जांबवान्वाक्यकोविदः ॥ ज्ञायते गमने शक्तिस्तव [13]हर्यृक्षसत्तम ॥ २० ॥
कामं [14]शतं सहस्रं वा नह्येष विधिरुच्यते ॥ योजनानां भवाञ्शक्तो गन्तुं प्रतिनिवर्तितुम् ॥ २१ ॥
न हि प्रेषयिता [15]तात स्वामी प्रेष्यः कथंचन ॥ भवताऽयं जनः सर्वः प्रेष्यः प्लवगसत्तम ॥ २२ ॥
भवान्कलत्रमस्माकं स्वामिभावे व्यवस्थितः ॥ स्वामी कलत्रं सैन्यस्य गतिरेषा परंतप ॥
[16]तस्मात्कलत्रवत्तात प्रतिपाल्यः सदा भवान् ॥ २३ ॥
अपि[17]चैतस्य कार्यस्य भवान्मूलमरिंदम ॥ मूलमर्थस्य संरक्ष्यमे[18]ष कार्यविदां नयः ॥
मूले हि सति सिध्यन्ति [19]गुणाः पुष्पफलोदयाः ॥ २४ ॥
तद्भवानस्य कार्यस्य [20]साधने सत्यविक्रम ॥ बुद्धिविक्रमसंपन्नो हेतुरत्र परंतप ॥ २५ ॥
गुरुश्च गुरुपुत्रश्च त्वं हि नः कपिसत्तम ॥ भवन्तमाश्रित्य वयं समर्था ह्यर्थसाधने ॥ २६ ॥
उक्तवाक्यं [21]महाप्राज्ञं जांबवन्तं महाकपिः ॥ प्रत्युवाचोत्तरं वाक्यं वालिसूनुरथाङ्गदः ॥ २७ ॥
यदि नाहं गमिष्यामि [22]नान्ये वानरपुङ्गवाः ॥ पुनः खल्विदमस्माभिः कार्यं प्रायोपवेशनम् ॥२८॥

त्रयाणां विक्रमाणां समाहारः त्रिविक्रमं ॥ १५-१९ ॥ हर्यृक्षसत्तमेति । ऋक्षत्वं वानरावान्तरजातिः । अतः सुग्रीवादेः ऋक्षराजत्वमिति ॥ २० ॥ भवान् योजनानां शतं सहस्रं वा गन्तुं प्रतिनिवर्तितुंच कामं शक्तः । एष विधिः भृत्यैः स्वामिप्रस्थापनं । नोच्यते न विधीयते ॥ २१ ॥ तदेव विवृणोति—नहीति ॥ ॥ २२ ॥ कलत्रं रक्षणीयं वस्तु ॥ २३-३३ ॥

दिवत्समाधिरवधेयः ॥ ११ ॥ **स०** जांबवतोबलस्खलनहेतुस्त्रिविक्रमक्रमणमिव तत्क्रमणकालेमेरुसंताडनंजान्वोः पुराणान्तरोक्तमनुसंधेयमितिमन्दविक्रमइतिवदन्कविः सूचयामासेतिबोध्यं ॥ १५ ॥ **स०** महाकपिं महान्कपिर्यस्यसतथा नियामकत्वेनमहाकपिसुग्रीववानिति जांबवान्महाकपिरित्यर्थः ॥ १८ ॥ **ती०** हरिश्रेष्ठइतिजांबवतोव्यपदेशोहरिसाधर्म्यात् । अल्पमन्तरमृक्षाणांहरीणांच । अतएवासौहर्यृक्षसत्तमेत्यङ्गदंसंबोधयति । सजातीयस्यहिनिर्धारणंभवति । " ननिर्धारणे " इतिषष्ठीसमासस्यनिषेधेपि मुनिप्रयोगात्साधुत्वं । सप्तमीसमासोवा । **स०** हर्यक्षसत्तम हरिणीपिङ्गेअक्षिणीयेषांकपीनां तेषुसत्तमः । यद्वा हर्यक्षः सिंहइवसत्तमः श्रेष्ठः ॥ २० ॥ **ति०** भवान्कलत्रं कलत्रवद्दृढस्वीयत्वबुद्ध्यायावत्स्वप्राणबलंपरिपाल्यइत्यर्थः । स्वामिभावे स्वामित्वे । एतेन लोकेकलत्रस्यभर्तासंसारव्यवहारविषयेआज्ञाप्यस्तत्प्रभुत्वंचकलत्रस्येतिदर्शितं । तस्मात्स्वामी सैन्यस्यकलत्रवत्परिपाल्यः । स्वामिनाच कलत्रेणभर्तेवसैन्यमाज्ञाप्यं । एषागतिः लोकस्येतिशेषः ॥ **शि०** कलत्रं स्त्रीवद्रक्ष्यः । किंच कंसुखंलातिददातितदेव त्रं रक्षाकर्तृ । सुखदाता त्राताचेत्यर्थः । सामान्येनपुंसकं ॥ २३ ॥ **ति०** गुणाः गुणभूताः अप्रधानभूताइतियावत् ॥ २४ ॥

[**पा०**] १ छ. झ. ट. मयावैरोचनेयज्ञेप्रभविष्णुः. २ ङ. छ. झ. ञ. त्रिविक्रमः. ३ क. घ. ज. इदानींमहात्रुद्धः. ४ ट. यौवनंच. ५ क. ग. यदासीन्मे. घ. यथासीन्मे. ६ छ. झ. ट. परं. ७ छ. झ. ट. त्वेतावदेवाद्यशक्यंमेगमनेस्वतः. ग. ङ. च. त्वेतावतीशक्तिर्गमने. ८ क. ग. ङ.—ट. महाप्राज्ञो. ९ ङ.—ट. महाकपिं. १० क. शक्तिर्नस्यादितिमतिर्मम. ११ ख. ग. घ. छ. झ. ट. निश्चितं. १२ च. छ. हरिश्रेष्ठो. १३ ठ. हर्यक्षसत्तम. १४ क. ङ.—ट. शतसहस्रंवा. १५ च. ज. स्वामीप्रेष्यान्प्रेष्यःकथंचन. १६ घ. त्रस्तान्कलत्रवत्तत्र. क. ख. तस्मात्कलत्रवत्तत्र. ग. भवान्कलत्रवत्तत्र. ट. यस्मात्कलत्रवत्तात. तस्मात्कलत्रवत्तात. अपिचैतस्यकार्यस्य. इत्यनयोरर्धयोःपौर्वापर्यं क. ङ.—ट. पाठेषुदृश्यते. १७ छ. झ. ट. वैतस्य. १८ च. छ. ज. मेवं. १९ ङ.—ट. गुणाःसर्वे. क.—घ. गुणाःपुष्पफलादयः. २० क. ङ.—ट. साधनं. २१ ख. ग. ङ. च. ज. झ. ट. महाकपिं. २२ क. ख. घ.—ट. नान्योवानरपुङ्गवः.

न ह्यकृत्वा हरिपतेः संदेशं तस्य धीमतः ॥ तत्रापि गत्वा प्राणानां [1]पश्यामि परिरक्षणम् ॥ २९ ॥
स हि प्रसादे चात्यर्थं [2]कोपे च हरिरीश्वरः ॥ अतीत्य तस्य संदेशं विनाशो गमने भवेत् ॥ ३० ॥
[3]तद्यथा ह्यस्य कार्यस्य न भवत्यन्यथा गतिः ॥ तद्भवानेव दृष्टार्थः संचिन्तयितुमर्हति ॥ ३१ ॥
सोऽङ्गदेन [4]तदा वीरः प्रत्युक्तः प्लवगर्षभः ॥ जांबवानु[5]त्तरं वाक्यं प्रोवाचेदं ततोऽङ्गदम् ॥ ३२ ॥
[6]अस्य ते वीर कार्यस्य न किंचि[7]त्परिहीयते ॥ एष संचोदयाम्येनं यः कार्यं साधयिष्यति ॥ ३३ ॥
ततः [8]प्रतीतं प्लवतां वरिष्ठमेकान्तमाश्रित्य सुखोपविष्टम् ॥
संचोदयामास हरिप्रवीरो हरिप्रवीरं हनुमन्तमेव ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

षट्षष्टितमः सर्गः ॥ ६६ ॥

जांबवता हनुमन्तंप्रति तस्यवायोरञ्जनायांसंभवप्रकारनिरूपणेनसह हनुमन्नामलाभस्य ब्रह्मादिभ्योवरलाभस्यचनिरूपणेन तत्प्रभावप्रशंसनपूर्वकं कपिकुलविपदपनोदनाय जलधितरणचोदना ॥ १ ॥

अनेकशतसाहस्रीं विषण्णां हरिवाहिनीम् ॥ जांबवान्समुदीक्ष्यैवं हनुमन्तमथाब्रवीत् ॥ १ ॥
वीर वानरलोकस्य [9]सर्वशास्त्रविशारद ॥ [10]तूष्णीमेकान्तमाश्रित्य हनुमन्किं न जल्पसि ॥ २ ॥
हनुमन्हरिराजस्य सुग्रीवस्य समो ह्यसि ॥ रामलक्ष्मणयोश्चापि तेजसा च बलेन च ॥ ३ ॥
अरिष्टनेमिनः पुत्रो वैनतेयो महाबलः ॥ गरुत्मानिति विख्यात उत्तमः सर्वपक्षिणाम् ॥ ४ ॥
बहुशो हि मया दृष्टः सागरे स महाबलः ॥ [11]भुजगानुद्धरन्पक्षी [12]महावेगो महायशाः ॥ ५ ॥

प्रतीतं प्रख्यातं ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने पञ्चषष्टितमः सर्गः ॥ ६५ ॥

अनेकेत्यादि ॥ १-३ ॥ अरिष्टनेमिनः काश्यपस्य । नकारान्तत्वमार्षं ॥ ४-५ ॥

ति० यतोभवान्दृष्टार्थः बुद्धिमत्त्वाच्चिरवृद्धत्वाच्च अपरोक्षीकृतसमस्तकृत्याकृत्यतत्त्वार्थइत्यर्थः ॥ ३१ ॥ ति० एकान्तमाश्रित्येति । यूथाद्बहिःक्वचिदितिशेषः ॥ ३४ ॥ इतिपञ्चषष्टितमःसर्गः ॥ ६५ ॥

ति० वीरवानरेति । वानरलोकस्यवीरेत्यन्वयः । निर्धारणेषष्ठी । यद्वा हेवीरवानर लोकस्यकृत्यमुद्दिश्य किंनजल्पसीत्यन्वयः ॥ २ ॥ स० सुग्रीवस्यसमोसि । इतिसंमतमितिशेषः । नकेवलंममतत्समइतिसंमतं । किंतु रामलक्ष्मणयोश्चापीतिसमुच्चयः । रामस्योत्तमत्वेन लक्ष्मणस्याधमत्वेनात्युक्तिनैच्योक्तिप्रसक्तिर्नैवंव्याख्यान इतिमन्तव्यं । सुग्रीवस्यसमइति राजत्वेनबहुमानार्थमुक्तिः । स्तुतिसमयत्वाद्रामलक्ष्मणयोश्चापि समइत्युक्तिर्युक्तेतिवा ॥३॥ स० अरिष्टनेमिनः अरिष्टनेमेः कश्यपस्य । यद्यप्यरिष्टनेमिशब्दः प्रथमाष्टकषष्ठाध्यायषोडशवर्गीयप्रथमर्चद्वितीयार्धे "स्वस्तिनस्तार्क्ष्योऽरिष्टनेमिः" इति तथाऽष्टमाष्टकाष्टमाध्यायषट्त्रिंशत्प्रथमर्चतृतीयपादे "अरिष्टनेमिंपृतनाजमाशुं" इतिगरुडएवायंशब्दःश्रुतः । व्याख्यातंचैतदृग्द्वयं तथापरैः तथापि गरुडेतार्क्ष्यतार्क्ष्यपुत्रशब्दवदयं पितापुत्रयोरुभयोरपि वाचकइति कश्यपस्येत्युक्तिःसंभवति ॥ यद्वा अरिष्टोऽहिंसितश्चासौनेमःप्रकाशश्च सोस्यास्तीत्यरिष्टनेमी कश्यपस्तस्य । अतइनि । नकर्मधारयादितिसमाहितंप्राक् । "नेमःकीलेऽवधौगर्तेप्रकाशे" इतिविश्वः ॥ ४ ॥ ति० महाबलइति । एकत्र बलंशारीरं परत्राऽऽन्तरमितिभेदः ॥ स० महाबलः महत्बलं उड्डीनमितियावत् । यस्यसतथेत्यन्यतरस्यार्थः । तेन पुनरुक्तिरिव शारीरान्तरत्वाश्रयणंचनेतिज्ञेयं । महाबलः महारूपवान्महास्थौल्यवान्वा । "बलंचन्द्रेरसेरूपेस्थेमनिस्थौल्यसै-

[पा०] १ छ. झ. ञ. ट. नपश्ये. २ च. ज. कोपेपिचहरीश्वरः. ३ ङ. च. ज. ञ. तत्तदा. झ. ट. तत्तथा. ४ क. ग.—च. ज. ञ. तथा. ५ घ. ङ. च. ज. झ. ञ. नुत्तमं. ६ ङ.—ट. तस्य. ७ ङ. छ. झ. ञ. ट. त्परिहास्यते. ८ क. प्रवीरं. ९ ख. झ. ट. स्त्रविदांवर. १० ख. तूर्णमेकान्त. ११ क. ग.—च. ज. ञ. भुजङ्गान्. १२ ङ.—ट. महाबाहुर्महाबलः.

पक्षयोर्यद्बलं तस्य [1]तावद्भुजबलं तव ॥ विक्रमश्चापि [2]वेगश्च [3]न ते तेनावहीयते ॥ ६ ॥
बलं बुद्धिश्च तेजश्च सत्त्वं च [4]हरिपुङ्गव ॥ [5]विशिष्टं सर्वभूतेषु किमात्मानं न [6]बुध्यसे ॥ ७ ॥
[7]अप्सराऽप्सरसां श्रेष्ठा विख्याता पुञ्जिकस्थला ॥ अञ्जनेति परिख्याता पत्नी केसरिणो हरेः ॥ ८ ॥
विख्याता त्रिषु लोकेषु रूपेणाप्रतिमा भुवि ॥ [8]अभिशापादभू[9]त्तात वानरी कामरूपिणी ॥ ९ ॥
दुहिता वानरेन्द्रस्य कुञ्जरस्य महात्मनः ॥ कपित्वे चारुसर्वाङ्गी कदाचित्कामरूपिणी ॥ १० ॥
मानुषं विग्रहं कृत्वा [10]रूपयौवनशालिनी ॥ [11]विचित्रमाल्याभरणा [12]महार्हक्षौमवासिनी ॥
अचरत्पर्वतस्याग्रे प्रावृडम्बुदसन्निभे ॥ ११ ॥
तस्या वस्त्रं विशालाक्ष्याः [13]पीतं रक्तदशं शुभम् ॥ स्थितायाः पर्वतस्याग्रे [14]मारुतोपहरच्छनैः ॥ १२ ॥
स ददर्श [15]ततस्तस्या वृत्तावूरू [16]सुसंहतौ ॥ स्तनौ च पीनौ सहितौ [17]सुजातं चारु चाननम् ॥ १३ ॥
तां [18]विशालायतश्रोणीं तनुमध्यां [19]यशस्विनीम् ॥ दृष्ट्वैव शुभसर्वाङ्गीं पवनः काममोहितः ॥ १४ ॥
स तां भुजाभ्यां [20]दीर्घाभ्यां पर्यष्वजत मारुतः ॥ मन्मथाविष्टसर्वाङ्गो गतात्मा तामनिन्दिताम् ॥ १५ ॥
सा तु तत्रैव संभ्रान्ता [21]सुवृत्ता वाक्यमब्रवीत् ॥ एकपत्नीव्रतमिदं को नाशयितुमिच्छति ॥ १६ ॥
अञ्जनाया वचः श्रुत्वा मारुतः प्रत्यभाषत ॥ न त्वां हिंसामि सुश्रोणि माऽभूत्ते [22]शुभगे भयम् ॥ १७ ॥
[23]मनसाऽस्मि गतो यत्त्वां परिष्वज्य [24]यशस्विनीम् ॥ वीर्यवान्बुद्धि[25]संपन्नस्तव पुत्रो भविष्यति ॥ १८ ॥

पक्षयोरिति ॥ अत्र समानपदमध्याहार्यं । विक्रमादिकं तेन गरुत्मता समानं । नावहीयते न न्यूनं भवति । तेनेति पञ्चम्यर्थे तृतीया ॥ ६ ॥ विशिष्टं श्रेष्ठं ॥ ७ ॥ अप्सरेति निर्देश आर्षः ॥ ८—११ ॥ रक्तदशं रक्ताग्रं ॥ १२–१४ ॥ तां गतात्मा तद्गतचित्तः । तां पर्यष्वजतेति संबन्धः ॥ १५–१६ ॥ न हिंसामि पातिव्रत्यान्न प्रच्यावयामि ॥ १७ ॥ न केवलं पातिव्रत्यभङ्गाभावः श्रेयोपि भविष्यतीत्याह—वीर्यवानिति

न्ययोः" इतिविश्वः ॥ ५ ॥ ति० भुजवीर्यबलंतवेतिप्राचीनपाठे तस्यपक्षयोर्यद्बलं तवचयद्भुजवीर्यबलं उभयंतुल्यमितिशेषः ॥ ६ ॥ ति० विशिष्टमात्मानं अभिजनबलपराक्रमवैभवविशिष्टमात्मानं । किंनसज्जसेसमुद्रलङ्घनायकिंनसज्जीकरोषीत्यर्थः ॥ ७ ॥ ति० सुसंहतौ सुसंश्लिष्टौ । सहितौपरस्परसंसक्तौ ॥ १३ ॥ स० काममोहितत्वादिप्रदर्शनं देवकार्यार्थमेववायोरितिज्ञातव्यं ॥ १४ ॥ स० पर्यष्वजत आलिलिङ्ग । गतात्मा गर्भरूपेणतद्गतस्वांशः । सतां सद्भिःअनिन्दितां तामित्यन्वयः । कृद्योगलक्षणाषष्ठी । एतेन तामितिनपुनरुक्तमिव । तांगतात्मा तांपर्यष्वजतेति नक्लिष्टान्वयीत्यपिबोध्यं । सतीमितिवाक्वचित्पाठः ॥ ति० मन्मथाविष्टसर्वाङ्गः कामाक्रान्तकृत्स्नज्ञानकर्मेन्द्रियः । अतएव तांगतात्मा तद्गर्भप्रविष्टात्मतेजाबभूव । देवत्वाद्विनापियोनिसंबन्धं निजतेजःप्रवेशनमितिबोध्यं ॥ १५ ॥ ति० त्वांनहिंसामि योनिसंबन्धेन तावकमेकपत्नीव्रतं ननाशयामि । अनेन बलात्पर-

[पा०] १ क. भुजयोस्तद्बलं. झ. ट. भुजवीर्यबलं. २ क. ङ.—ट. तेजश्च. ३ ङ. ज. तेनतेनापहीयते. क. छ. झ. ञ. ट. नतेतेनापहीयते. ४ ख. ग. घ. हरिसत्तम. ५ क. ग. विशिष्टः. ६ ङ. च. छ. झ. ञ. ट. सज्जसे. ७ ख. घ. आसीदप्सरसां. ८ ज. अत्रिशापादभूत्. ९ च. छ. झ. ट. त्तातकपिले. क. ख. ग. ङ. ञ. त्तावद्वानरी. १० ग. यौवनोत्तमशालिनी. ११ विचित्रमाल्याभरणा. अचरत्पर्वतस्याग्रे. इत्यर्धयोःपौर्वापर्यं क.—घ. पाठेषुदृश्यते. १२ च.—ट. कदाचित्क्षौमधारिणी. ङ. कदाचित्कामचारिणी. १३ छ. ट. पीतरक्तदशं. १४ क.—घ. च. ज. ञ. ट. मारुतोपाहरत्. १५ ग. तदा तस्याः. १६ क. सुसंस्थितौ. १७ ङ. च. ज. ञ. सुजातौ. १८ झ. ट. बलादायतश्रोणीं. १९ च. ज. ञ. मनस्विनीं. २० क.—घ. पीनाभ्यां. २१ छ. ज. झ. सुव्रता. ञ. संवृता. २२ ङ.—ट. मनसोभयं. २३ क. ग. मारुतोस्मिगतोयस्त्वां. २४ ङ. छ. झ. ञ. ट. यशस्विनि. २५ क. ख. ग. संपन्नःपुत्रस्तव.

महासत्त्वो महातेजा महाबलपराक्रमः ॥ लङ्घने प्लवने चैव [1]भविष्यति मया समः ॥ १९ ॥
[2]एवमुक्ता ततस्तुष्टा जननी ते महाकपे ॥ गुहायां त्वां महाबाहो प्रजज्ञे [3]प्लवगर्षभम् ॥ २० ॥
[4]अभ्युत्थितं ततः सूर्यं बालो दृष्ट्वा महावने ॥ फलं चेति जिघृक्षुस्त्वमु[5]त्प्लुत्याभ्युद्गतो दिवम् ॥२१॥
शतानि त्रीणि गत्वाऽथ योजनानां महाकपे ॥ तेजसा तस्य निर्धूतो न विषादं [6]गतस्ततः ॥ २२॥
[7]तावदापततस्तूर्णमन्तरिक्षं महाकपे ॥ क्षिप्तमिन्द्रेण ते वज्रं [8]क्रोधाविष्टेन धीमता ॥ २३ ॥
तदा शैलाग्रशिखरे वामो हनुरभज्यत ॥ ततो हि नामधेयं ते हनुमानिति [9]कीर्त्यते ॥ २४ ॥
ततस्त्वां [10]निहतं दृष्ट्वा वायुर्गन्धवहः स्वयम् ॥ त्रैलोक्ये भृशसंक्रुद्धो न ववौ वै प्रभञ्जनः ॥ २५ ॥
संभ्रान्ताश्च सुराः सर्वे त्रैलोक्ये [11]क्षोभिते सति ॥ प्रसादयन्ति [12]संक्रुद्धं मारुतं भुवनेश्वराः ॥ २६ ॥
प्रसादिते च पवने ब्रह्मा तुभ्यं वरं ददौ ॥ अशस्त्रवध्यतां तात समरे सत्यविक्रम ॥ २७ ॥
वज्रस्य च निपातेन विरुजं त्वां समीक्ष्य च ॥ सहस्रनेत्रः प्रीतात्मा ददौ ते वरमुत्तमम् ॥
स्वच्छन्दतश्च मरणं ते[13] भूयादिति वै [14]प्रभो ॥ २८ ॥
स त्वं केसरिणः पुत्रः क्षेत्रजो भीमविक्रमः ॥ मारुतस्यौरसः पुत्रस्तेजसा चापि तत्समः ॥ २९ ॥
[[15]इदं हि ते तात वर्णयामः कथं बलम् ॥ कार्यं च लोकसंमान्यं कर्तुं शक्तस्त्वमेव हि ॥ ३० ॥
[16]भवाञ्जीवातवेऽस्माकमञ्जनागर्भसंभवः] ॥ त्वं हि वायुसुतो वत्स प्लवने [17]चापि तत्समः ॥ ३१ ॥
वयमद्य गतप्राणा [18]भवानस्त्रातु सांप्रतम् ॥ [19]दार्क्ष्यविक्रमसंपन्नः पक्षिराज इवापरः ॥ ३२ ॥
त्रिविक्रमे मया तात सशैलवनकानना ॥ त्रिस्सप्तकृत्वः पृथिवी परिक्रान्ता प्रदक्षिणम् ॥ ३३ ॥

॥ १८–२१ ॥ शतानि त्रीणि एतदनेकशतयोजनानामुपलक्षणं । " बहुयोजनसाहस्रं क्रामत्येषः " इत्युत्तरकाण्डे वक्ष्यमाणत्वात् ॥ २२–३२ ॥ पृथिवीत्यनेनाण्डकटाहमध्य उक्तः । तस्याः त्रिस्सप्तकृत्वः क्रमणं मध्यप्रदेशे । यद्वा यावती महाबलिभूमिः तावती पृथिवी अत्रविवक्षिता । तस्याः प्रदक्षिणं तद्बहिःप्रदेशेन संगच्छते । यद्वा क्रमणानन्तरं जाम्बवान् विजयघोषणार्थं पृथिवीमात्रप्रदक्षिणं कृतवानितिप्रसिद्धिः ।

पुरुषेणालिङ्गनादावपि नपातिव्रत्यभङ्गः किंतु योनिभोगेनैवेतिसूचितं ॥ १७ ॥ स० महासत्वः महत् शुद्धं सत्त्वंगुणोयस्यसतथा । चतुर्मुखात्मकत्वाद्युक्तंवायोःसत्वात्मकत्वं । लङ्घने समुद्रोपरिप्लवने । अप्लवने समुद्राद्युपर्यपिमन्दगमने ॥ १९ ॥ ति० ततस्तुष्टा मनसामहादैवततेजस्संक्रमकथनात् ॥ २० ॥ ति० उदयकालिकभास्करस्याम्रफलवद्रक्तवृत्तत्वात्फलबुद्धिविषयत्वं । यथा जातमात्राजादिबालानां प्राचीनवासनयास्तनपानादौप्रवृत्तिस्तथैवास्य जातमात्रस्य वानरोचितफलादानप्रवृत्तिरिति बोध्यं ॥ २१ ॥ ति० तस्य रवेः । तेजसा निर्धूतः क्षिप्तोपि । ततः वायुबलवत्त्वान्नविषादंगतः ॥ शि० योजनानांशतानित्रीणि "अङ्कानांवामतोगतिः " इति न्यायेन शताधिकत्रिसहस्राणिगत्वा । शतानित्रीणीत्यस्य त्रिशतपरत्वेनव्याख्यानंतु " बहुयोजनसाहस्रं " इत्युत्तरकाण्डेवक्ष्यमाणं विरुध्येत । अनेकशतयोजनानामुपलक्षणमिति भूषणोक्तिस्तु नयुक्ता । त्रीणीत्यस्यवैयर्थ्यापत्तेः ॥ २२ ॥ स० कोपाविष्टेन शरणागतराहुकार्यसाधनसंभृतकोपेन ॥ २३ ॥ स० हनुः गण्डाधोभागः । हनुमान् हनुर्हनूर्वाऽस्यास्तीति सतथा । " हनूमान्हनुमानपि " इति द्विरूपकोशः ॥ २४ ॥ स० गन्धवहः पुत्रघातेनस्वहिंसावहः । प्रभञ्जनः प्रकर्षेणभञ्जयति कोपेनेदानींजनानिति प्रगतंभञ्जनंयस्मादितिवासतथा । गन्धवहः पुत्रसंबन्धवहः । गन्धनंहिंसेत्युक्तेर्गन्धोपिहिंसा ॥२५॥ ति० वज्रस्यनिपातेन । चाद्रिरौनिपातेनच ॥ २८ ॥ स० क्षेत्रजःपुत्रः । औरसः आलिङ्गनसमये उरस्संबन्धेनजातः । " नमेहृषीकाणि-

[पा०] १ ख. घ. भविष्यतिहिमत्समः. २ ज. मुक्तातुसातुष्टा. ३ च.—ट. प्लवगर्षभ. ४ क. अभ्युद्यन्तं. ५ ट. मुत्पत्याभ्युत्थितोदिवं. ६ क. ख. ग. ङ. च. ज. ञ. ततोगतः. ७ छ. झ. ञ. त्वामप्युपगतंतूर्णं. ग. च. ज. ट. तत्राप्युपगतस्तूर्णं. ख. अथाप्युपगतस्तूर्णं. ८ ङ.—ज. ञ. ट. कोपाविष्टेनचेतसा. झ. कोपाविष्टेनतेजसा. ९ ङ.—ज. ञ. ट. कीर्तितं. १० च. ञ. विक्षतं. ११ क. ङ. च. छ. झ. ञ. ट. क्षुभिते. १२ ख. झ. तंक्रुद्धं. १३ च.—ट. तत्रस्यादिति. १४ ख. घ. विभो. १५ इदमर्धत्रयं ङ. च. ज. पाठेषुदृश्यते. १६ ङ. भवान्वीरतमोस्माकं. १७ ख. वापि. १८ ख. घ.—ञ. भवानस्मासु. क. वानराःसाधुसांप्रतं. १९ ङ. च. ज. ञ. दक्षोविक्रम. ख. ग. घ. तार्क्ष्यविक्रम.

[1]तथा चौषधयोऽस्माभिः संचिता देवशासनात् ॥ नि[2]ष्पन्नममृतं याभिस्तदा[3]सीन्नो [4]महद्बलम् ॥ ३४ ॥
[5]स इदानीमहं वृद्धः परिही[6]नपराक्रमः ॥ सांप्रतं [7]कालमस्माकं भवान्सर्व[8]गुणान्वितः ॥ ३५ ॥
तद्विजृम्भस्व विक्रान्तः प्लवतामुत्तमोह्यसि ॥ त्वद्वीर्यं [9]द्रष्टुकामेयं [10]सर्ववानरवाहिनी ॥ ३६ ॥
उत्तिष्ठ हरिशार्दूल लङ्घयस्व महार्णवम् ॥ परा हि सर्वभूतानां हनुमन्या गतिस्तव ॥ ३७ ॥
विषण्णा हरयः सर्वे हनूमन्किमुपेक्षसे ॥ विक्रमस्व [11]महावेगो वि[12]ष्णुस्त्रीन्विक्रमानिव ॥ ३८ ॥
[13]ततस्तु वै जांबवता प्रचोदितः प्रतीतवेगः पवनात्मजः कपिः ॥
प्रहर्षयंस्तां हरिवीरवाहिनीं चकार रूपं [14]महदात्मनस्तदा ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

अन्यत्सर्वमतिरोहितार्थं ॥ ३३—३९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने षट्षष्टितमः सर्गः ॥ ६६ ॥

पतन्त्यसत्पथे ” इति ब्रह्मणउक्तेर्वायोर्लोकानुकरणमिदमिति मन्तव्यं ॥ २९ ॥ **ति०** याभिः सागरेप्रक्षिप्यामृतंनिर्मथ्यं निर्मथनेनलभ्यं ॥ ३४ ॥ **ति०** सांप्रतंकालमितिसप्तम्यर्थेद्वितीया । अस्माकमितिनिर्धारणेषष्ठी । अस्मिन्कालेऽस्माकंमध्ये भवानेवसर्वगुणान्वितइत्यर्थः ॥ ३५ ॥ **स०** लङ्घयस्वमहार्णवं । स्वार्थेणिच् । णिचा महार्णवंव्यसनसमुद्रं कपीँल्लङ्घयस्वेति जांबवदाशयइतिसूचयति । या तवगतिः समुद्रतरणं सा नकेवलंकपिमोदनमात्रफला । अपितु सर्वभूतानां परा पूरयित्री । अभिमतस्येति शेषः । हेहनुमन् या तवगतिः रामाख्यादेवता साः सर्वभूतानांपरा हि यतोतस्तत्सेवार्थमुत्तिष्ठतियोजनावा ॥ ३७ ॥ **ति०** विषण्णाः अर्थस्यस्वासाध्यत्वाद्दीनाः । किमुपेक्षसे तानितिशेषः ॥ ३८ ॥ **ति०** कपीनामृषभेण । कपिशब्दोत्रच्छत्रिन्यायेन ऋक्षसाधारणः । रूपं समुद्रतरणोचितमहाविग्रहं । प्रकृतेस्तद्दृश्यत्वाद्रूपमहत्त्वस्वल्पत्वकरणं नानुपपन्नं । एवं जांबवताहनुमदभिजनपराक्रमादिज्ञापनं तस्यसहजबलाविर्भावाय । तथाज्ञापनंहि तस्यतदाविर्भावकारणमितिदैवकृतःसमयः । यद्यपीतरदिक्त्रयप्रेषितवानराणामपि सप्तसमुद्रपरवर्त्युदयास्ताचलादिपर्यन्तगमनमुपदिष्टं । तथापि तन्मार्गेसमुद्रमध्ये विंशतित्रिंशदादियोजनेषु पर्वतानांसत्त्वात्तदवलंबेनप्लवने नतथाकष्टं। इहतु निरवलबंशतयोजनप्लवनमन्यासाध्यमितिभावः । अत्रत्या मध्यपर्वतास्तु राक्षसैर्भङ्क्त्वा मज्जितादुर्गसिद्धये । प्लवाश्चमज्जिताः । अतएवात्र सुग्रीवेण ते नोक्ताः । अतएव चत्वारिंशेसर्गे पूर्वदिक्प्रेषितवानरान्प्रति समुद्रान्तरगतदेशमुपक्रम्य “ गिरिभिर्येचगम्यन्ते प्लवनेनच ” इत्युक्तं ॥ **स०** नकेवलंजांबवदुक्तिमात्रेण । किंतु कपीनामृषभेण सुग्रीवेणचोदितः । यद्वा ऋषभेण श्रेष्ठेन वृद्धत्वेनमाननीयेनचोदितः । कपीनां कपिःसुग्रीवः इनः स्वामी यस्यास्सातां कपिवीरवाहिनींप्रहर्षयन्नित्यन्वयः । पूर्वपद्यात् विष्णुः इवेतिचानुवर्तते । तेनच पवनः आत्मजःपुत्रोयस्यसः विष्णुः त्रिविक्रमः । रूपमिव रूपंचकारेति दृष्टान्तदार्ष्टान्तिकभावःकथितः पुनरुक्तिपरिहारोपि जातइत्यवसेयं ॥ “ अवर्धतोच्चैर्हनुमान्महाद्रौ ” इत्याद्युक्तेः रूपंमहच्चकार स्वीकृतवानित्यर्थः ॥ ३९ ॥ इतिषट्षष्टितमःसर्गः ॥ ६६ ॥

[**पा०**] १ क. ग.—च. ज.—ट. तदा. २ छ. झ. निर्मथ्यममृतं. ३ ङ. छ. झ. ञ. ट. तदानींनो. ४ क. ग. महाबलं. ५ ज. इदानीमस्म्यहंवृद्धः. ६ क. परिक्षीणपराक्रमः. ७ क. गतिरस्माकं. ८ ङ. च. ज. ञ. गुणाधिकः. ९ ङ.—ट. द्रष्टुकामाहि. १० क. ग. ङ.—ट. सर्वावानर. ११ छ. झ. ट. महावेग. १२ क. ख. ग. च. ज. यथाविष्णुस्त्रिविक्रमे. ञ. यथाविष्णुस्त्रिविक्रमः. १३ क. छ. झ. ट. ततःकपीनामृषभेणचोदितः. ग. ततस्तुवैजांबवताभिचोदितः. १४ ङ.—ट. पवनात्मजस्तदा.

सप्तषष्टितमः सर्गः ॥ ६७ ॥

जलधिलङ्घनाय पृथुतरशरीरंपरिगृहीतवताहनुमता वानरनिकरभयापसारणाय निजप्रभावप्रशंसनपूर्वकं महेन्द्रगिरिशिखरारोहणेन सागरतरणोद्यमनं ॥ १ ॥

तं दृष्ट्वा जृम्भमाणं ते क्रमितुं शतयोजनम् ॥ [1]वीर्येणापूर्यमाणं च सहसा वानरोत्तमम् ॥ १ ॥
सहसा शोकमुत्सृज्य प्रहर्षेण समन्विताः ॥ [2]विनेदुस्तुष्टुवुश्चापि हनुमन्तं महाबलम् ॥ २ ॥
प्रहृष्टा विस्मिताश्चैव [3]वीक्षन्ते स्म समन्ततः ॥ [4]त्रिविक्रमकृतोत्साहं नारायणमिव प्रजाः ॥ ३ ॥
संस्तूयमानो हनुमा[5]न्व्यवर्धत [6]महाबलः ॥ समाविध्य च लाङ्गूलं [7]हर्षाच्च बलमेयिवान् ॥ ४ ॥
तस्य संस्तूयमानस्य [8]वृद्धैर्वानरपुङ्गवैः ॥ तेजसापूर्यमाणस्य रूपमासीदनुत्तमम् ॥ ५ ॥
यथा विजृम्भते सिंहो [9]विवृद्धो गिरिगह्वरे ॥ मारुतस्यौरसः पुत्र[10]स्तथा संप्रति जृम्भते ॥ ६ ॥
अशोभत मुखं तस्य जृम्भमाणस्य धीमतः ॥ [11]अम्बरीषमिवादीप्तं विधूम इव पावकः ॥ ७ ॥
हरीणामुत्थितो मध्यात्संप्रहृष्टतनूरुहः ॥ अभिवाद्य हरी[12]न्वृद्धान्हनुमानिदमब्रवीत् ॥ ८ ॥
[13]अरुजत्पर्वताग्राणि हुताशनसखोऽनिलः ॥ बलवानप्रमेयश्च वायुराकाशगोचरः ॥ ९ ॥
तस्याहं शीघ्रवेगस्य शीघ्रगस्य महात्मनः ॥ मारुतस्यौरसः पुत्रः प्लवने नास्ति [14]मत्समः ॥ १० ॥

जृम्भमाणं वर्धमानं ॥१—६॥ आदीप्तमम्बरीषमिव स्थितं जृम्भमाणस्य तस्य मुखं विधूमः पावक इव अशोभत। अम्बरीषं भ्राष्ट्रं। "क्लीबेम्बरीषं भ्राष्ट्रो ना" इत्यमरः ॥७—८॥ अनिलः गमनशीलः। "अन प्राणने" इत्यस्मादौणादिक इलप्रत्ययः ॥९॥ शीघ्रवेगस्य शीघ्राः वैनतेयादयः तेषां वेग इव वेगो यस्य सः तस्य। तत्साम्यमसहमानस्ततोप्याधिक्यमाह—शीघ्रगस्येति। यद्वा शीघ्रवेगस्य अतएव शीघ्रगस्य ॥ १० ॥

ति० अथगृहीतमहाविग्रहस्यहनुमतोवानरबलाश्वासनाय निजबलप्रख्यापनपूर्वं समुद्रलङ्घनाय महेन्द्रपर्वतारोहणमाह—तमिति । **स०** जृंभमाणं एधमानकायं शतयोजनंक्रमितुं एकपातेनगन्तुं । वेगेनापूर्यमाणमित्यनेन वेगकर्तृकपूरणकर्मीभूतमित्यर्थउक्तः । तेन वेगस्यस्वाभाविकतयोद्बोधःसूचितोभवति । सहसेत्यनेनालोचनां सूचयति । तेन कपयः सहसाः हसेनहासेनसहिताइतिवा ॥ १ ॥ **स०** त्रिविक्रमं कृतोत्साहं कृते त्रिविष्टपादिव्यापनव्यापारे उत्साहोयस्यसतथातं ॥ ३ ॥ **स०** लाङ्गूलं वालं । समाविध्य विलोल्य । कपिजातिस्वभावोऽयं ॥ ४ ॥ **ति०** अंबरीषं भ्राष्ट्रं । तदुपमं । अतएव दीप्तं प्रज्वलत् । अङ्गारवर्णप्रतप्तभ्राष्ट्रोपममितियावत् ॥ **स०** अंबरीषोपमं अंबरीषेणसूर्येणोपमा यस्यसतथा । " अंबरीषः " इत्यौणादिकसूत्रेणनिपातितःशब्दः । " अंबरीषंरणेभ्राष्ट्रे क्लीबंपुंसिनृपान्तरे । नरकस्यप्रभेदेच किशोरेभास्करेपिच । आम्रातकेऽनुपातेच" इतिमेदिनी । " अंबरीषोनृपान्तरे। मार्ताण्डेखण्डपरशौ " इतिविश्वः ॥ भ्राष्ट्रमितिव्याख्या भाष्ट्रकालिम्नस्तदनुरूपत्वायोगाद्विशेषाभिधानानालोचनमूलेत्युपेक्ष्या ॥ **शि०** तस्य हनूमतः विधूमःपावकइव दीप्तंमुखं अंबरीषोपमं सूर्यसदृशंयथाभवतितथा अशोभत । अंबरीषशब्दार्थस्तु अंबरिणां आकाशवतांनक्षत्रगणानां ईषः तेजसापराभूतत्वंयस्मादिति अंबरिणः सर्वलोकानाकाशचारीणोवा ईषति स्वतेजसाप्राप्नोतीतिवा ॥ ७ ॥ **ति०** आरुजन् अत्यन्तंभिन्दमानः हुताशनस्यसखा उच्यमानगुणोयोवायुर्गमनशीलोऽनिलोस्ति ॥ **सं०** आकाशगोचरः आकाशरूपिण्यां गवि चरतीतिसतथा । अनिष्टत्यच् । आकाशोगोचरोविषयोगम्यत्वेनयस्यसतथा ॥ **शि०** ननिलीयतइत्यनिलः नित्यइत्यर्थः ॥९॥ **ति०** प्लवनेनगुणेनतत्समोस्मि ॥ **स०** शीघ्रवेगस्य शीघ्रंद्रुतंवेगःप्रवाहोयस्यसतथा । तस्य सरिदादेःसकाशात् शीघ्रगः शीघ्रंगच्छतीतिसतथा । " वेगो जवेप्रवाहेच " इतिविश्वः । यद्वा अहंशीघ्रवेगस्येत्येकंपदं । अहमित्यभिमन्यमानवाचिनाऽभिमानीगृह्यते । तथाच अहमा रुद्रेण शीघ्रवेगंमनः । तस्य सकाशाच्छीघ्रगस्तस्य ॥ १० ॥

[**पा०**] १ ङ.—ट. वेगेनापूर्यमाणं. २ च.—ट. विनेदुर्विस्मिताश्चापि. ३ क. ख. घ.—ज. ञ. ट. तेवीक्षन्ते. ४ च. ज. त्रिविक्रमे. छ. झ. ञ. ट. त्रिविक्रमं. ५ ङ. ञ. न्प्रावर्धत. ६ ग. महाकपिः. ७ ङ.—ट. हर्षाद्बलमुपेयिवान्. ८ ख. ग. सर्वैर्वानर. ९ घ. ङ. छ. झ. ञ. ट. विवृते. च. ज. वितते. १० ग. तथाऽजृंभतवीर्यवान्. क. तथाप्रतिविजृंभते. ११ क. ख. घ. छ. झ. अंबरीषोपमंदीप्तं. १२ क. कपीन्. ख. ततोवृद्धान्. १३ झ. आरुजन्पर्वताग्राणि. १४ ङ. छ. झ. ञ. ट. तत्समः.

[1]उत्सहेयं हि विस्तीर्णमालिखन्तमिवाम्बरम् ॥ मेरुं गिरिमसङ्गेन परिगन्तुं सहस्रशः ॥ ११ ॥
[2]बाहुवेगप्रणुन्नेन सागरेणाहमुत्सहे ॥ [3]समाप्लावयितुं लोकं सपर्वतनदीह्रदम् ॥ १२ ॥
ममोरुजङ्घवेगेन भविष्यति समुत्थितः ॥ [4]समुच्छ्रितमहाग्राहः समुद्रो वरुणालयः ॥ १३ ॥
पन्नगाशनमाकाशे पतन्तं [5]पक्षिसेविते ॥ वैनतेयमहं शक्तः परिगन्तुं सहस्रशः ॥ १४ ॥
उदयात्प्रस्थितं [6]वाऽपि ज्वलन्तं रश्मिमालिनम् ॥ अनस्तमितमादित्यम[7]भिगन्तुं समुत्सहे ॥ १५ ॥
ततो भू[8]मिमसंस्पृश्य पुनरागन्तुमुत्सहे ॥ प्रवेगेनैव महता भीमेन प्लवगर्षभाः ॥ १६ ॥
[9]उत्सहेयमतिक्रान्तुं सर्वानाकाशगोचरान् ॥ [10]सागरं शोषयिष्यामि दारयिष्यामि मेदिनीम् ॥ १७ ॥
[11]पर्वतांश्चूर्णयिष्यामि प्लवमानः प्लवङ्गमाः ॥ ह[12]रिष्याम्यूरुवेगेन प्लवमानो महार्णवम् ॥ १८ ॥
लतानां विविधं पुष्पं पादपानां च सर्वशः ॥ [13]अनुयास्यन्ति मामद्य प्लवमानं विहायसा ॥
भविष्यति हि मे पन्था [14]खातेः पन्था इवाम्बरे ॥ १९ ॥

विस्तीर्णमिति मेरुविशेषणं । वानरसेनाभयनिवृत्त्यर्थं स्वोत्कर्षमपि स्वयं निवेदयति ॥ ११—१३ ॥ पन्नगाशनं स्वोचिताहारलाभाय निरवधिकत्वरासंपन्नं । यद्वा आहारग्रहणत्वरया सर्वेषां भयावहं पतन्तं नतु वर्तमानं । आकाशे स्वोचितक्षेत्रे । पक्षिसेवित इति स्वपरिकरसंपत्तिरुच्यते । वैनतेयं विनतापुत्रं । अनेन कौमारावस्थायां बलवेगोत्कर्षः सूच्यते । अहं तस्यापिप्राणदातुः पुत्रः । परिगन्तुं परितोगन्तुं प्रदक्षिणीकर्तुं । सहस्रशः एकयत्नेन सहस्रशः । परिगन्तुं शक्तः आजानसिद्धसामर्थ्योस्मि ॥ १४ ॥ उदयात् प्रस्थितं उदयगिरेर्निर्गच्छन्तं । आदित्यं स्वस्थानात्प्राप्य तेन सह गन्तुं प्रारभ्य ततःपूर्वमेवास्तगिरिमासाद्यानस्तमितं ज्वलन्तं रश्मिमालिनमादित्यमभिगन्तुं प्रत्युद्गन्तुं । समुत्सहे । ज्वलन्तमित्यनेन मध्याह्न एवाभिगमनं सूच्यते ॥ १५ ॥ ततः सूर्यप्रत्युद्गमनानन्तरं । भूमिमसंस्पृश्य कुत्राप्यविश्रम्य । भीमेन महता प्रवेगेन प्रारब्धवेगेनैव पुनरागन्तुं पुनरप्येकवारं सूर्यमभिगन्तुमुत्सहइत्यर्थः । शतयोजनस्थां लङ्कां गन्तुं किमुतेति भावः ॥ १६ ॥ आकाशगोचरान् ग्रहनक्षत्रादीन् ॥ १७—१८ ॥ पुष्पमिति

ति० मेरुंगिरिमसङ्गेन मध्येविश्रामायकचित्क्षणमपि स्थितिराहित्येनैव सहस्रशः परिगन्तुमुत्सहे एकेनैववेगेनसहस्रवारंप्रदक्षिणंकर्तुं शक्नोमीत्याशयः ॥ ११ ॥ **ति०** समुत्थितः अतिक्रान्तवेलः ॥ **स०** वरुणालयः अब्धिः ॥ समुद्रः मुद्रया उत्तरणायकरिष्यमाणसेतुरेखाचिह्नेन सहवर्ततइति सतथा । तथाहिसंग्रहरामायणे—"सेतुंविधातुंहरिवाहिनीनां पुरैवकुर्वन्निव लक्ष्मरेखां" इति । एतेन नान्यतराधिक्यशङ्का वरुणालयइत्यस्य शुद्धयौगिकत्वाश्रयणेनपरिहारश्चास्वारस्यान्नयुक्तौ ॥ १३ ॥ सहस्रशःपरिगन्तुं । एतेन गम्यमुद्दिश्य तदेकपातवेगेन बहुवारं तत्प्रदेशंगत्वा पुनरायातुमहंक्षमइतिवैनतेयादाधिक्यंद्योतयति । "वैनतेयगतिःपरे"ति संपात्युक्तिस्तु पक्षिजात्यपेक्षयेति नतद्विरोधइतिज्ञेयं ॥ **ति०** पक्षिसेविते आकाशे वैनतेयगतिःपदेत्युक्तस्य पदेस्थित्वाततोऽधःपतन्तंपन्नगाशनंवैनतेयमुपर्यधोभ्रमणेनसहस्रशःपरिगन्तुंशक्तः । पन्नगाशनंपतन्तमितिपदद्वयेन आमिषार्थःपवनवेगातिशयःसूच्यते ॥ **ति०** पक्षिसेवितं पक्षिराजं । वैनतेयं आकाशेपतन्तमहमपि सहस्रशःपरिगन्तुंशक्तः । तस्यैकपातं यावदहंसहस्रवारंपतितुंशक्तइतियावत् ॥ १४ ॥ **स०** प्रवेगेन एकपातेन । भीमेन द्विषतां अभीमेनसतामित्यकारप्रश्लेषाप्रश्लेषाभ्यामर्थद्वयंज्ञेयं ॥ १६ ॥ **शि०** उत्सहेयमिति । आकाशगोचरान् अतिक्रान्तुंउत्सहे । सागरान्शोषयिष्यामि शोषयितुमुत्सहे । शोषणपूर्वकोत्साहोधात्वर्थः । एवमुत्तरत्रापि तत्तद्धात्वर्थपूर्वकउत्साहोर्थः । अतएव नशोषादिप्रतिज्ञावाक्यत्वमेतस्य ॥ १७ ॥ **ति०** लतानांविविधंपुष्पं पादपानांच पुष्पंहरिष्यामीत्यन्वयः । तच्चपुष्पं वायुवेगेनाहृतंमामनुयास्यति ॥ १९ ॥

[पा०] १ ङ. च. ज. ट. उत्सहेयंतु. २ घ. ङ. च. ज. ञ. बाहुवेग. ३ क. समंप्लावयितुं. ४ संमूर्च्छित. झ. ञ. ट. समुत्थित. ५ छ. झ. पक्षिसेवितं. ६ क.—च. ट. चापि. ७ ङ.—ट. महंगन्तुं. ८ ङ. छ. झ. ट. मसंस्पृष्ट्वा. ९ ख. उत्सहेयमभि. क. ङ. उत्सहेयमति. १० ङ.—ट. सागराञ्शोषयिष्यामि. क. ग. घ. सागरान्क्षोभयिष्यामि. ११ क. ग. घ. पर्वतान्कंपयिष्यामि. १२ क. ग. हरिष्येचोरुवेगेन. १३ क. ख. ग. छ. झ. ञ. ट. अनुयास्यति. १४ ख. ग. वायोः.

चरन्तं घोरमाकाशमुत्पतिष्यन्तं[1]मेव वा ॥ द्रक्ष्यन्ति निपतन्तं च सर्वभूतानि वानराः ॥ २० ॥
[2]महामेघप्रतीकाशं [3]मां च द्रक्ष्यथ वानराः ॥ दिवमावृत्य गच्छन्तं [4]ग्रसमानमिवाम्बरम् ॥ २१ ॥
विधमिष्यामि जीमूतान्कम्पयिष्यामि पर्वतान् ॥ सागरं [5]क्षोभयिष्यामि प्लवमानः समाहितः ॥ २२ ॥
[6]वैनतेयस्य सा शक्तिर्मम या मारुतस्य वा ॥ २३ ॥
[[7]महासंनहनोपेतौ महान्तौ पुरुषर्षभौ ॥ ऋश्यमूकं पुनः शैलं प्लवेयं रामलक्ष्मणौ ॥
नूनं नेष्यामि वैदेहीं रामस्य महिषीं प्रियाम् ॥ २४ ॥]
[8]ऋते सुपर्णराजानं मारुतं वा [9]महाजवम् ॥ [10]नं तद्भूतं प्रपश्यामि [11]यन्मां प्लुतमनुव्रजेत् ॥ २५ ॥
निमेषान्तरमात्रेण निरालम्बनमम्बरम् ॥ सहसा निपतिष्यामि घनाद्विद्युदिवोत्थिता ॥ २६ ॥
भविष्यति हि मे रूपं प्लवमानस्य [12]सागरे ॥ [13]विष्णोर्विक्रममाणस्य [14]पुरा त्रीन्विक्रमानिव ॥ २७ ॥
बुद्ध्या [15]चाहं प्रपश्यामि मनश्चेष्टा च मे तथा ॥ अहं द्रक्ष्यामि वैदेहीं प्रमोदध्वं प्लवङ्गमाः ॥ २८ ॥
मारुतस्य समो वेगे गरुडस्य समो जवे ॥ अयुतं योजनानां तु गमिष्यामीति मे मतिः ॥ २९ ॥
वासवस्य सवज्रस्य ब्रह्मणो वा स्वयंभुवः ॥ विक्रम्य सहसा हस्तादमृतं तदिहानये ॥
लङ्कां [16]वाऽपि समुत्क्षिप्य गच्छेयमिति मे मतिः ॥ ३० ॥

जात्येकवचनं ॥ १९ ॥ स्वातेःपन्थाः परिपूर्णतारा- | च्छायापथः ॥ २०—२२ ॥ मम या शक्तिः सा

ति० स्वातेःपन्थाइति । स्वातिपथश्छायापथइत्युच्यते । सतु प्रकीर्णबहुनक्षत्रः । ममपन्थाअपि प्रकीर्णबहुपुष्पकः । चरन्तंमार्गमध्येइत्याकाशंप्रत्युत्पतिष्यन्तमेव ॥ २० ॥ **ति०** निपतन्तं परेपारेइतिशेषः । द्रक्ष्यन्ति । अनेनोत्पतनपतनयोरेककालत्वोक्त्याऽतिवेगःसूचितः ॥ २१ ॥ **ति०** वैनतेयस्यवेति । त्रयाणामेवैषांसर्वभूतातिशायिनीशक्तिर्नान्यस्येतिभावः ॥ **स०** वैनतेयस्येति । साम्येन वायोरुक्तिरुचिता। वैनतेयस्यनैच्येपि पामरापेक्षया दृष्टान्तीकरणमितिज्ञेयं ॥ अत्रोत्तरत्रच मम मारुतस्य वायोरपिसकाशात् वैनतेयस्य । वावेति अप्यर्थे । गरुडस्यापि अशक्तिः शक्त्यभावएवेतिवा ॥ २३ ॥ सुपर्णराजानं समासान्तविधिरनित्यः । सुपर्णराजस्य अनाः चेष्टावा यस्मात्सतथा तंमारुतमृतइत्युभयत्र वायुरेकएव निदर्शनमित्यवसेयं ॥ ऋतेशब्दयोगे द्वितीयोपपत्तिस्तु—ज्ञानसूर्यमृतइत्यनुव्याख्यासुधातइव शब्देन्दुशेखरादितइवास्मत्कृततत्वसंख्यानटिप्पणीतोऽवसेया ॥ २५ ॥ **ति०** विद्युदुपमया शैघ्र्येणबहुदेशव्याप्तिर्ध्वन्यते । **स०** निरालंबनं निराधारंयथाभवतितथा निपतिष्यामि । यद्वा निरालंबनमंबरमिति गगनस्वरूपनिरूपणं ॥ घनाद्विद्युदिवेत्यनेन गगनस्थनीरदवन्नीलतां स्वस्यप्रकाशमानतांच सूचयामासेत्यवधेयं ॥ २६ ॥ **ति०** " सतांहिसन्देहपदेषुवस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः " इतिन्यायेनाह—बुद्ध्येति । निश्चयात्मकान्तःकरणेनेत्यर्थः । तथामे मनश्चेष्टा मनोव्यापारोऽनुमानरूपः । किंपश्यसि किंविषयाचतेमनश्चेष्टेत्यत्राह—**द्रक्ष्यामीति** ॥ **स०** अहंवैदेहींद्रक्ष्यामि । तथामे मम मनश्चेष्टा मनस्संबन्धिव्यापारोस्ति । अतः प्लवङ्गमाः प्रमोदध्वमित्यन्वयः । ननु मनः संशयंसंपादयति ननिश्चयं । अतःकथं प्रमोदध्वमित्युक्तिरित्यतआह—बुद्ध्येति । अहं बुद्ध्या निश्चयहेतुभूतान्तःकरणविशेषेण । प्रपश्यामि विजानामि । यथोक्तं तृतीयस्कन्धगतस्य "मनोबुद्धिरहङ्कारश्चित्तमित्यन्तरात्मनः । चतुर्धादृश्यतेभेदो वृत्त्यालक्षणरूपया" इति श्लोकस्यतात्पर्ये " बुद्धिरध्यवसानाय संशयंकुरुतेमनः । अभिमानेत्वहङ्कारश्चित्तंस्मरणकारणं " इतिस्कान्द इति । अहमहमिति द्विरभिधानं पृथक्पृथगन्वयाद्युक्तं । समाकर्षणान्वयेसुकरे द्विर्वचनेनाहमेवद्रक्ष्यामि नान्यस्तथाविधोस्तीतिसूच्यते ॥ २८ ॥ **ति०** वेगजवौ पर्यायौ । अयुतमित्यनेनाप्रमेयबलत्वंप्रकाश्यते नतु परिच्छेदः । वस्तुतस्तदभावात् । रावणोपिवक्ष्यति—" नमारुतेरस्तिगतिप्रमाणं " इति ॥ **ती०** वेगेमारुतस्यसमः । अहमितिशेषः । अमितबलपराक्रमशाली हनूमान्वस्तुतः स्वोक्तविशेषणविशिष्टोपि दुःखसागरमग्नवानरवाहिनीसंतोषार्थमेतादृशान्यौद्धत्यवचनान्युक्तवान् । " प्रहृष्टाहरयस्तत्र समुदैक्षन्तविस्मिताः " इतिवचनात् " ज्ञातीनांविपुलःशोकस्त्वयातात प्रणाशितः " इति जांबवद्वचनाच्चेत्यवगन्तव्यं ॥ २९ ॥ **ति०** वासवहस्तेस्वर्गिभोग्यममृतं ब्रह्मणोहस्तेच योगिभोग्यममृतं । तदानयनवचोत्युक्त्यलङ्कारपरं ॥ समुत्क्षिप्य स्वस्थानादुत्पाटनपूर्व-

[पा०] १ क. ग. च.—ट. मेवच. २ ख. घ. ट. महामेरु. ३ ख. घ.—ट. मांद्रक्ष्यध्वंप्लवंगमाः. ४ क. प्रसन्तमिवा. ५ च.—ट. शोषयिष्यामि. ६ ग.—छ. झ. ञ. वैनतेयस्यवा. ७ इदमर्धत्रयं ख. पाठेदृश्यते. ८ क. ग. जानेसुपर्णमात्मान. ९ क. ग.—ट. महाबलं. ख. महौजसं. १० ग. घ. नतुभूतं. क. ख. नहिभूतं. ११ क. ख. योमां. १२ क.—ट. सागरं. १३ ग. ङ.—झ. ट. विष्णोःप्रक्रममाणस्य. १४ क. ग. छ. झ. ञ. ट. तदा. १५ ङ. च. ज. ञ. त्वहं. १६ क. ग. घ. चापि.

तमेवं वानरश्रेष्ठं गर्जन्त[1]ममितौजसम् ॥ प्रहृष्टा हरयस्तत्र समुदैक्षन्त विस्मिताः ॥ ३१ ॥
[2]तस्य तद्वचनं श्रुत्वा ज्ञातीनां शोकनाशनम् ॥ उवाच परिसंहृष्टो जाम्बवान्[3]हरिसत्तमम् ॥ ३२ ॥
वीरकेसरिणः पुत्र [4]हनुमन्मारुतात्मज ॥ ज्ञातीनां विपुलः शोकस्त्वया तात [5]विनाशितः ॥ ३३ ॥
तव कल्याणरुचयः कपिमुख्याः [6]समागताः ॥ [7]मङ्गलं कार्यसिद्ध्यर्थं करिष्यन्ति समाहिताः ॥ ३४ ॥
ऋषीणां च प्रसादेन कपिवृद्धमतेन च ॥ गुरूणां च प्रसादेन [8]प्लवस्व त्वं महार्णवम् ॥ ३५ ॥
स्थास्यामश्चैकपादेन यावदागमनं तव ॥ त्वद्गतानि च सर्वेषां जीवितानि वनौकसाम् ॥ ३६ ॥
[9]ततस्तु हरिशार्दूलस्तानुवाच वनौकसः ॥ [10]नेयं मम मही वेगं लङ्घने धारयिष्यति ॥ ३७ ॥
एतानीह नगस्यास्य शिलासंकटशालिनः ॥ शिखराणि महेन्द्रस्य स्थिराणि च महान्ति च ॥ ३८ ॥
[11]एषु वेगं [12]करिष्यामि महेन्द्रशिखरेष्वहम् ॥ नानाद्रुमविकीर्णेषु धातुनिःष्यन्दशोभिषु ॥ ३९ ॥
एतानि [13]मम निष्पेषं पादयोः प्लवतां वराः ॥ प्लवतो धारयिष्यन्ति योजनानामितः शतम् ॥ ४० ॥
[14]ततस्तं मारुतप्रख्यः स हरिर्मारुतात्मजः ॥ आरुरोह [15]नगश्रेष्ठं महेन्द्रमरिमर्दनः ॥ ४१ ॥
वृतं [16]नानाविधैर्वृक्षैर्मृगसेवितशाद्वलम् ॥ लताकुसुमसंबाधं नित्यपुष्पफलद्रुमम् ॥ ४२ ॥
सिंह[17]शार्दूलचरितं मत्तमातङ्गसेवितम् ॥ मत्तद्विजगणोद्घुष्टं सलिलोत्पीडसंकुलम् ॥ ४३ ॥
महद्भि[18]रुच्छ्रितं [19]शृङ्गैर्महेन्द्रं स महाबलः ॥ विचचार हरिश्रेष्ठो महेन्द्रसमविक्रमः ॥ ४४ ॥

मारुतस्य वैनतेयस्य वेति संबन्धः ॥ २३—३५ ॥ स्थास्यामश्चैकपादेन।तथा सत्वराः स्मेत्यर्थः ॥३६–३७॥ शिलासंकटशालिनः शिलातुङ्गप्रदेशभूयिष्ठस्य । "संकटो दन्तुरे तुङ्गे विपद्रोगविशेषयोः" इति विश्वः ॥ ३८—४२ ॥ वृतमित्यादि ॥ सलिलोत्पीडैः सलिलप्रवाहैः संकुलम् ॥ ४३—४६ ॥

कंगृहीत्वा । यद्वाततःपरतोपिगच्छेयं ॥ स० सवज्रस्यवासवस्य इन्द्रस्य स्वयंभुवोब्रह्मणश्च हस्तात्सहसा झटिति । अमृतं देवान्नं । इह मह्यां । आनये आनेष्यामि । सवज्रस्येत्यनेन पूर्वंक्षिप्तंमदुपरिनकार्यकारिजातमितिस्मारयति । ब्रह्मणो हस्तात् विक्रम्य पराक्रमं कृत्वा । सहसाअमृतं स्वयं निस्सहायः । भुवः कर्मणिषष्ठी । भूमिमानये । इह एतत्काले भुवः भूप्रदेशानितिवा । बहुवचनमाद्यर्थे । भूम्यादिकंवा ॥ ३० ॥ ति० वेगवन्नितिसंबुद्धिः ॥ ३३ ॥ ति० त्वत्संबन्धिन्यांकल्याणवृद्धौ रुचिरभिलाषोयेषांते। यद्वा तवकल्याणंवाञ्छितारः ॥ स० अर्थसिद्ध्यर्थं रामरामासंदर्शनार्थसिद्ध्यर्थं। मङ्गलानि मङ्गलहेतून् ॥३४॥ स० ऋषीणां रावणोपद्रुततत्संहारकामानामृषीणां । कपिवृद्धाः कपिषुबहुवयस्काः तेषांमतेन तद्बोधितलग्नादिसंमत्या ॥ ३५ ॥ स० एकपादेन। अनेन तीव्रं त्वदागमनेनभाव्यमिति सूचयन्तीतिसूच्यते। त्वद्गतानि प्रेमविशेषादुक्तिर्लोके प्राणरूपत्वाद्धनूमतिवास्तविकीतिज्ञेयं ॥ ति० एकपादेनस्थास्यामः त्वरयाप्रियंश्रोतुमेकपादेनस्थित्वा तपश्चरिष्यामइत्यर्थः ॥ ३६ ॥ स० महेन्द्रस्य तन्नामपर्वतस्याग्रेषु महेन्द्रशिखरेषुवेगंगमिष्यामि तानिमहेन्द्रस्यशृङ्गाणिस्थिराणि महान्तिचेत्यन्वयः । महान्ति परिमाणतः । पूज्यानीतिवा । स्थिराणि मद्वेगसहनशक्तिमन्ति । औत्सुक्यातिशयवशेन महेन्द्रस्यशिखराणीत्युक्तिःपुनरितिज्ञेयं ॥ शिलासंकटशालिनः शिलानांसंकटाः उन्नतप्रदेशाः तैःशालन्तेशोभन्तइतितेतथा । "सङ्कटोदन्तुरेतुङ्गे" इतिनिघण्टुः । संकटं समूहोवा ॥ ३८—३९ ॥ ती० सलिलोत्पीडसंकुलं तत्रतत्रनिस्सृतनिर्झरसलिलसंकुलं ॥ ४३ ॥ ती० उच्छ्रितोमहाबलोहनूमान् महेन्द्रस्यमहद्भिश्शृङ्गैर्विचचार शृङ्गाच्छृङ्गान्तरंजगाम ॥ ४४ ॥

[पा०] १ छ. झ. ट. ममितप्रभं. २ क. ख. ग. ङ.—ट. तच्चास्यवचनंश्रुत्वा. घ. तच्छ्रुत्वावचनंतस्य. ३ ङ.—ट. न्प्लवगेश्वरः. क.—घ. न्हरिसत्तमः. ४ ख.—ट. वेगवन्मारुता. ५ क. ग. ङ.—ट. प्रणाशितः. ६ क. समाहिताः. ७ ख. छ. झ. ट. मङ्गलान्यर्थसिद्ध्यर्थं. ८ छ. झ. ट. संप्लवत्वं. ९ छ. झ. ततश्च. क. ततस्स. १० क. च.—झ. ट. कोपिलोकेनमेवेगं प्लवने. ११ ट. येषु. १२ ङ.—ट. गमिष्यामि. १३ ख. ङ.—ट. ममवेगंहिशिखराणिमहान्तिच. १४ ङ.—ट. ततस्तु. १५ क. गिरिश्रेष्ठं. १६ ख. ग. ङ.—ट. नानाविधैःपुष्पैः. १७ ङ.—ट. शार्दूलसहितं. १८ ङ. छ. झ. ञ. ट. रुच्छ्रितः. १९ ग. ङ. छ.—ट. महेन्द्रस्य.

[१]पादाभ्यां पीडितस्तेन महाशैलो [२]महात्मनः ॥ [३]रराज सिंहाभिहतो [४]महान्मत्त इव द्विपः ॥ ४५ ॥
मुमोच सलिलोत्पीडान्विप्रकीर्णशिलोच्चयः ॥ वित्रस्तमृगमातङ्गः प्रकम्पितमहाद्रुमः ॥ ४६ ॥
नागग[५]न्धर्वमिथुनैः पानसंसर्गकर्कशैः ॥ [६]उत्पतद्भिश्च विहगैर्विद्याधरगणैरपि ॥ ४७ ॥
त्यज्यमानमहासानुः [७]संनिलीनमहोरगः ॥ चलशृङ्गशिलोद्घातस्तदाभूत्स महागिरिः ॥ ४८ ॥
नि[८]:श्वसद्भिस्तदार्तैस्तु भुजङ्गैरर्धनिःसृतैः ॥ सपताक इवाभाति स तदा धरणीधरः ॥ ४९ ॥
ऋषिभिस्त्राससंभ्रान्तैस्त्यज्यमानः शिलोच्चयः ॥ सीद[९]न्महति कान्तारे सार्थहीन इवाध्वगः ॥ ५० ॥

स वेगवान्वेगसमाहितात्मा हरिप्रवीरः [१०]परवीरहन्ता ॥
[११]मनः समाधाय महानुभावो जगाम लङ्कां मनसा [१२]मनस्वी ॥ ५१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशत्सहस्रिकायां संहितायां
किष्किन्धाकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

इति किष्किन्धाकाण्डः समाप्तः ॥ ४ ॥

पानसंसर्गकर्कशैः पानसंसर्गदृढैः । "कर्कशं कठिनं क्रूरं कठोरं निष्ठुरं दृढं" इत्यमरः । पानप्रवृत्तौ दृढाभिनिवेशैरित्यर्थः ॥ ४७ ॥ उद्घातः समूहः ॥४८—४९॥ सार्थहीनः । अभूदिति शेषः ॥ ५० ॥ वेगसमाहितात्मा वेगविषये समर्पितमनाः । मनः समाधाय मनः समाहितं कृत्वा ॥५१॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे मुक्ताहाराख्याने किष्किन्धाकाण्डव्याख्याने सप्तषष्टितमःसर्ग ॥ ६७ ॥

इत्थं शठारिगुरुवर्यपदारविन्दसेवारसाधिगतसर्वरहस्यबोधः । गोविन्दराजविबुधः प्रमुदे बुधानां कैष्किन्धकाण्डविषयां विततान टीकाम् ॥ १ ॥

ति० ररास स्ववर्तिप्राणिशब्देनेतिशेषः ॥ ४५ ॥ **स०** पानेन संसर्गे परस्पररतौ कर्कशैः आसक्तैः ॥ **ति०** पानेसंसर्गेचकर्कशैः अत्यासक्तैः । गन्धर्वाणांतथात्वंच स्वभावः ॥ ४७ ॥ **शि०** धरणीधरः समहेन्द्रःनिश्वसद्भिः भीत्यानिश्वासंप्राप्नुवद्भिः । अतएवार्धनिस्सृतैः कथमिदंजातमितिदर्शनायनिस्सारितोर्ध्वभागैः । भुजगैः सपताकः पताकाभिस्सहितइवाभाति ॥ ४९ ॥ **ती०** सार्थहीनः सहायहीनः । अध्वगः पथिकइव । अभूदितिशेषः ॥ ५० ॥ इतिसप्तषष्टितमःसर्गः ॥ ६७ ॥

[पा०] १ ङ.—ट. बाहुभ्यां. २ क. ग. ङ.—ट. महात्मना. ३ क. ङ. झ. ट. ररास. ४ क. ख. ग. ङ.—ज. ञ. महामत्तइव. ५ ख. ङ. च. ज. झ. ञ. नानागन्धर्व. ६ क. च.—ट. उत्पतद्भिर्विहङ्गैश्च. ७ क. ख. स्कन्धलीनमहोरगः. ८ ख. निष्पतद्भिस्तदार्तैस्तु. ग. ङ.—ट. निश्वसद्भिस्तदार्तैस्तु. ९ क. आसीन्महति. १० ख. पवनात्मजःकपिः. ११ क. ततः. १२ ङ.—ज. हनूमान्.

इदं किष्किन्धाकाण्डम् कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागरमुद्रायन्त्रे मुद्रापितम् । शकाब्दाः १८३४ सन १९१२.

SRIMAD VĀLMĪKI RĀMĀYAṆA

A CRITICAL EDITION

With the commentary of Sri Govindaraja

AND

Extracts from many other commentaries and Readings.

SUNDARAKĀṆDA 5.

EDITED AND PUBLISHED

BY

T. R. Krishnacharya,

Proprietor, Madhva Vilâs Book Depot, Kumbakonam.

Printed by B. R. Ghanekar for the proprietor,

at the "Nirnaya-sagar" Press, 23, Kolbhat Lane.

BOMBAY.

1912.

॥ श्रीः ॥

श्रीमद्वाल्मीकिरामायणम् ।

श्रीमद्गोविन्दराजीयव्याख्यानसमलंकृतम् ।

तथा

तिलकप्रभृत्यनेकापूर्वव्याख्यानोद्धृतैः
गोविन्दराजीयानुक्तापूर्वविषयैश्च संवलितम् ।

सुन्दरकाण्डम् ५.

एतच्च

कुम्भघोणस्थेन श्रीमन्मध्वविलासपुस्तकालयाधिपतिना

टी. आर्. कृष्णाचार्येण

अनेकेषां विदुषां साहाय्येन नानादेशीयकोशानुसारेण

संशोध्य

मुंबापुर्यां

तुकाराम जावजी इत्येतेषां निर्णयसागरमुद्रणयन्त्रे मुद्रयित्वा प्रकाशितम् ।

शाके १८३४ परिधाविनामसंवत्सरे ।

श्रीः

श्रीमद्वाल्मीकिरामायणम् ।

श्रीमद्गोविन्दराजीयव्याख्यासमलंकृतम् ।

सुन्दरकाण्डम् ५

श्रीरामचन्द्राय नमः ॥

प्रथमः सर्गः ॥ १ ॥

सीतान्वेषणाय लङ्काजिगमिषया महेन्द्रगिरिशिखराज्जलधिमुल्लङ्घयताहनुमता मध्येसमुद्रं तच्चोदनया जलमध्यादभ्युद्गच्छतःस्वशिखरे स्वस्यविश्रममर्थयतोमैनाकगिरेः स्वकरतलसंस्पर्शनेन संमाननं ॥ १ ॥ तथा देवैः स्वबलपरीक्षणाय वरदानपूर्वकं प्रेषितया राक्षसरूपधारिण्यासुरसया स्वनिगरणाय बहुयोजनपरिमाणनिजवदनव्यादाने स्वतनुतनूकरणपूर्वकं तदुदरप्रवेशेन तदहिंसयैव बहिर्निर्गमनं ॥ २ ॥ तथा सिंहिकाख्ययामहाराक्षस्या स्वच्छायाग्रहणपूर्वकं स्वग्रसनाय बहुयोजनविस्तीर्णनिजमुखव्यादाने स्वशरीरसंकोचनपूर्वकं तन्मुखप्रवेशेन तदुदरविदारणेन तदसुहरणपूर्वकंबहिर्निर्गमनं ॥ ३ ॥ तथा राक्षसजनासंभ्रमाय स्वशरीरतनुकरणेन लङ्काबहिस्स्थलंबगिरिशिखरे निपतनं ॥ ४ ॥

ततो रावणनीतायास्सीतायाश्शत्रुकर्शनः ॥ इयेष पदमन्वेष्टुं चारणाचरिते पथि ॥ १ ॥

तत्त्वज्ञानसमुच्चयो घनदयासारस्य सारो महान्निष्कर्षः कमलानिवासचरणद्वन्द्वानुरागस्मृतेः ॥ अक्लेशः परिपाक एष जगतामक्षय्यपुण्यावलेरस्माकं निधिरक्षयो विजयते श्रीमाञ्शठारिर्गुरुः ॥ १ ॥ श्रीरामायणभूषायै प्रवृत्तो रामभक्तितः ॥ व्याख्यां सुन्दरकाण्डस्य तिलकं कलयाम्यहम् ॥ २ ॥ उक्तं परत्वासाधारणं समस्तकल्याणगुणाकरत्वं किष्किन्धाकाण्डे । अत्र सर्वसंहर्तृत्वमुच्यते । वक्ष्यति हि तत् " ब्रह्मा स्वयंभूः " इत्यादिना । यद्वा पूर्वस्मिन्काण्डे सर्वथा मित्रसंरक्षणं कार्यमित्युक्तं । अत्र दूतेन पतिव्रतया चैवं वर्तितव्यमित्यर्थः प्रतिपाद्यते । यद्वा पूर्वत्र सर्वरक्षणप्रवृत्तस्य विष्णोराचार्यरूपपुरुषकारलाभ उक्तः । अधुना आचार्यकृत्यमुच्यते । तत्र प्रथमे सर्गे शिक्षणीयशिष्यान्वेषणमुपपाद्यते । तत इत्यादि । ततः जाम्बवत्प्रोत्साहनानन्तरं । चारणाः सञ्चारिणो देवगायकाः तैराचरिते पथि आकाशे । रावणनीतायास्सीतायाः पदं स्थानमन्वेष्टुमियेष । शत्रुकर्शनः तदन्वेषणविरोधिनिरसनसमर्थः । यद्वा चारणाचरिते पथि गत्वा सीतायाः पदमन्वेष्टुमियेष । यद्वा यथापाङ्क्तमेवान्वयः । आकाशेपि पदन्यासान्वेषणसमर्थोयमिति बुद्धिचातुर्यातिशय उच्यते । अनेन शिष्यस्थानान्वेषणपरगुरुस्वरूपमुच्यते । ततः मुद्राप्रदानपूर्वकभगवदनुज्ञालाभानन्तरं शत्रुकर्शनः । " गुशब्दस्त्वन्धकारः स्याद्रुशब्दस्तन्निरोधकः । अन्धकारनिरोधित्वाद्गुरुरित्यभिधीयते " इत्युक्तरीत्या अज्ञाननिवर्तनशीलो गुरुः । चारयन्ति आचारयन्ति धर्मानिति चारणाः पूर्वाचार्याः तैराचरिते पथि । " महाजनो येन गतस्स पन्थाः " इत्युक्तसदाचारे स्थित इति शेषः । रावयति असत्प्रलापा-

---

श्रीरामोजयति ॥ **रामानु०** श्रीमत्सुन्दरकाण्डेव्याख्येयानिव्याक्रियन्ते । पूर्वस्मिन्काण्डेमनसागमनंकृतमित्युक्तं । इदानींकायेनाधिगमनंकर्तुमैच्छदित्याशयेनाह—ततइति ॥ अत्रगन्तुमितिपदमध्याहर्तव्यं । शत्रुकर्शनोहनुमान् रावणनीतायाःसीतायाः पदं निवासस्थानं अन्वेष्टुं चारणाचरितेपथि वर्त्मनि गन्तुमियेषेतियोजना । **शि०** चारणैः आचरिते अतिसंचारविशिष्टे ॥ १ ॥

दुष्करं निष्प्रतिद्वन्द्वं चिकीर्षन्कर्म वानरः ॥ समुदग्रशिरोग्रीवो गवांपतिरिवाऽऽबभौ ॥ २ ॥
अथ वैडूर्यवर्णेषु शाद्वलेषु महाबलः ॥ धीरस्सलिलकल्पेषु विचचार यथासुखम् ॥ ३ ॥
द्विजान्वित्रासयन्धीमानुरसा पादपान्हरन् ॥ मृगांश्च सुबहून्निघ्नन्प्रवृद्ध इव केसरी ॥ ४ ॥
नीललोहितमाञ्जिष्ठपत्रवर्णैस्सितासितैः ॥ स्वभावविहितैश्चित्रैर्धातुभिस्समलंकृतम् ॥ ५ ॥
कामरूपिभिराविष्टमभीक्ष्णं सपरिच्छदैः ॥ यक्षकिन्नरगन्धर्वैर्देवकल्पैश्च पन्नगैः ॥ ६ ॥
स तस्य गिरिवर्यस्य तले नागवरायुते ॥ तिष्ठन्कपिवरस्तत्र ह्रदे नाग इवाबभौ ॥ ७ ॥
स सूर्याय महेन्द्राय पवनाय स्वयंभुवे ॥ भूतेभ्यश्चाञ्जलिं कृत्वा चकार गमने मतिम् ॥ ८ ॥
अञ्जलिं प्राङ्मुखः कृत्वा पवनायात्मयोनये ॥ ततोभिववृधे गन्तुं दक्षिणो दक्षिणां दिशम् ॥ ९ ॥
प्लवङ्गप्रवरैर्दृष्टः प्लवने कृतनिश्चयः ॥ ववृधे रामवृद्ध्यर्थं समुद्र इव पर्वसु ॥ १० ॥
निष्प्रमाणशरीरस्सँल्लिलङ्घयिषुरर्णवम् ॥ [प्रगृह्य बलवान्बाहू लङ्कामभिमुखः स्थितः] ॥
बाहुभ्यां पीडयामास चरणाभ्यां च पर्वतम् ॥ ११ ॥

न्कारयतीति रावणः अविवेकः तेन नीतायाः स्ववशं प्रापितायाः सीतायाः अनादिभगवत्परतन्त्रचेतनस्य । सीताशब्देनायोनिजत्वोक्तेः । स्त्रीलिङ्गेन पारतन्त्र्योक्तेश्च । स्त्रीप्रायमितरत्सर्वमिति ह्युक्तं । पदं स्थानं संसारमण्डलमन्वेष्टुं । सात्त्विकसंभाषणादिचिह्नं वा । तथोक्तं " विष्णोः कटाक्षश्चाद्वेष आभिमुख्यं च सात्त्विकैः । संभाषणं षडेतानि ह्याचार्यप्राप्तिहेतवः " इति । यद्वा पदं व्यवसायमन्वेष्टुं कस्य चेतनस्य भगवत्प्राप्तावध्यवसाय इत्यन्वेष्टुं । इयेष । " पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु " इत्यमरः । अत्रैकादशसहस्रश्लोका गताः । द्वादशसहस्रस्यादिमोयं श्लोकः । अत्र गायत्र्याः द्वादशमक्षरं प्रयुक्तं । तदवलोकनीयं विद्वद्भिः ॥ १ ॥ निष्प्रतिद्वन्द्वं यथा भवति तथा दुष्करं चिकीर्षन् समुदग्रशिरोग्रीवः समुन्नतशिरोग्रीवः । गवां पतिः वृषभः ॥ २ ॥ शाद्वलानांसलिलकल्पत्वं वैडूर्यवर्णतया ॥ ३ ॥ केसरीव बभाविति शेषः ॥ ४ ॥ नीलेति अत्र यच्छब्दोध्याहार्यः यदेवंविधं तलं तत्र तिष्ठन्नित्यन्वयः । पत्रवर्णैः पत्रश्यामैः । " पलाशो हरितो हरित् " इति हलायुधः सितासितैः कल्माषैः । स्वभावविहितैः स्वतस्सिद्धै ॥ ५–७ ॥ स्वयंभुवे चतुर्मुखाय । भूतेभ्यः देवयोनिभ्य ॥ ८ ॥ आत्मयोनये स्वकारणभूताय । दक्षिणः समर्थः हनुमान् प्राङ्मुखःसन् आत्मयोनये पवनाय अञ्जलिं कृत्वा ततो दक्षिणां दिशं गन्तुं ववृध इत्यन्वयः । हिः पादपूरणे । अञ्जलिं प्राङ्मुखः कुर्वन्निति पाठस्त्वयुक्तः शतृप्रत्ययेन प्राङ्मुखत्वविशिष्टाञ्जलिकरणदक्षिणदिग्गमनोद्योगयोरेककालिकत्वप्रतीत्या विरोधात् । नहि प्राङ्मुखस्यैव सतो दक्षिणदिग्गमनोद्योगो युज्यते ॥ ९ ॥ रामवृद्ध्यर्थं रामप्रयोजनार्थं ॥ १० ॥ निष्प्रमाणशरीरः निर्मर्यादशरीरः । बाहु

रामानु० निष्प्रतिद्वन्द्वं प्रतिद्वन्द्वान्निष्क्रान्तं । प्रतिबन्धकरहितमित्यर्थः ॥ २ ॥ **रामानु०** वैडूर्यवर्णेषु हरितत्वसंवलितशौक्ल्यविशिष्टतयावैडूर्यवर्णत्वं । शाद्वलानांसलिलकल्पत्वं शैत्यमार्दवादिना ॥ ३ ॥ **स०** सूर्याय स्वस्यविद्योपदेष्टृत्वाल्लोकदृष्ट्या । महेन्द्राय व्यवहारसिद्ध्यर्थंप्रकृतसीताप्रतिकृतिसंनिहितत्वात् । यथोक्तंभगवत्पादैः—" तस्यास्तुतांप्रतिकृतिंप्रविवेशशक्रः " इत्यादि पवनाय पितृत्वात् । स्वयंभुवे सर्वगुरुत्वात्स्वस्यवरदानाद्वा । भूतेभ्यः विघ्ननिवारकेभ्योदेवेभ्यः । अञ्जलिं हस्तद्वयमेलनं ॥ ८ ॥ **स०** वृद्ध्यर्थंस्वपितृत्वोपाधिना पुनरपिवायुंप्रणमति । अञ्जलिमिति । स्वयोनये स्वकारणाय । अथवा आत्मैवयोनिःस्वोत्पत्तिकारणं यस्य तस्मैरामायेतिवा ॥ ९ ॥ **स०** रामवृद्ध्यर्थं रामयशोवृद्ध्यर्थं । योववृधे सप्लवङ्गप्रवरैर्दृष्टइत्यन्वयः । तेन नपौनरुक्त्यं अथवा अरामवृद्ध्यर्थमितिच्छेदः । अर्थस्तु नविद्यतेरामोयेषांस्वपक्षीयत्वेन तेअरामाः । यद्वा अरामाः रामविरुद्धाः । तेषांवृद्ध्यर्थं छेदनार्थं । ' वृधु हिंसायां ' इतिधातुव्याख्यानात् । यद्वा वृद्धिरभिवृद्धिः तस्याअर्थोनिवृत्तिस्तमुद्दिश्य । 'अर्थोऽभिधेयरैवस्तुप्रयो

[पा०] १ क. च. छ. ज. ञ. वीरः. २ क. च.—झ. न्भीमान्. ३ क. ङ. छ.—ट. पद्मवर्णैः. ४ ङ. झ. ञ. ट स्वभावसिद्धैर्विमलैः. ५ ङ. झ. ञ. ट. दैवकल्पैस्स. ६ क. तिष्ठन्हरिवरः. ७ झ. कुर्वन्. ८ ङ.—ट. ततोहि. ९ क. सिद्ध्यर्थं १० इदमर्धं च. छ. ज. पाठेषुदृश्यते.

स चचालाचल[1]श्चापि मुहूर्तं कपिपीडितः ॥ तरूणां पुष्पिताग्राणां सर्वं पुष्पमशातयत् ॥ १२ ॥
तेन पादपमुक्तेन पुष्पौघेण सुगन्धिना ॥ सर्वतः सं[2]वृतश्शैलो बभौ पुष्पमयो यथा ॥ १३ ॥
तेन चोत्तमवीर्येण पीड्यमानस्स पर्वतः ॥ [3]सलिलं संप्रसुस्राव [4]मदं मत्त इव द्विपः ॥ १४ ॥
पीड्यमानस्तु बलिना महेन्द्रस्तेन पर्वतः ॥ रीतीर्निर्वर्तयामास काञ्चनाञ्जनराजतीः ॥ १५ ॥
मुमोच च शिलाश्शैलो विशालास्समनश्शिलाः ॥ मध्यमेनार्चिषा जुष्टो धूमराजीरिवानलः ॥१६॥
गिरि[5]णा पीड्यमानेन पीड्यमानानि [6]सर्वतः ॥ गुहाविष्टानि [7]भूतानि विनेदुर्विकृतैस्स्वरैः ॥ १७ ॥
स [8]महासत्त्वसन्नादश्शैलपीडानिमित्तजः ॥ पृथिवीं पूरयामास दि[9]शश्चोपवनानि च ॥ १८ ॥
शिरोभिः [10]पृथुभिस्सर्पा व्यक्तस्वस्तिकलक्षणैः ॥ वमन्तः पावकं घोरं ददंशुर्दशनैश्शिलाः ॥ १९ ॥
तास्तदा सविषैर्दष्टाः कुपितैस्तैर्महाशिलाः ॥ जज्वलुः पावकोद्दीप्ता बिभिदुश्च सहस्रधा ॥ २० ॥
यानि चौषधजालानि तस्मिञ्जातानि पर्वते ॥ विषघ्नान्यपि नागानां न शेकुश्शमितुं विषम् ॥ २१ ॥
[[11]अपरे तु महाकाया वमन्तोऽग्निं स्वतेजसा ॥ कन्दरेभ्यो विनिष्पेतुः कपिपादनिपीडिताः ॥ २२ ॥
गिरेराक्रममाणस्य तरवस्तरुणाङ्कुराः ॥ मुमुचुः पुष्पवर्षाणि व्यक्तमुत्पलगन्धिनः ॥ २३ ॥
गैरिकाञ्जनसंजुष्टा हरितालसमावृताः ॥ व्यदीर्यन्त गिरेस्तस्य शिलास्ताः समनश्शिलाः ॥ २४ ॥
सचन्दनारुणस्ताम्रश्चित्रः काननधातुभिः ॥ क्षिप्तः शिखिनिभैर्दीप्तैर्दीप्तगैरिकधातुभिः] ॥ २५ ॥
भिद्यतेऽयं गिरिर्भूतैरिति मत्वा तपस्विनः ॥ २६ ॥
त्रस्ता विद्याधरास्तस्मादुत्पेतुः स्त्रीगणैस्सह ॥ पानभूमिगतं हित्वा हैमम[12]ासवभाजनम् ॥
पात्राणि च महार्हाणि करकांश्च हिरण्मयान् ॥ २७ ॥
लेह्यानुच्चावचान्भक्ष्यान्मांसानि विविधानि च ॥ आर्षभाणि च चर्माणि खड्गांश्च कनकत्सरून् ॥२८॥
कृतकण्ठगुणाः क्षीबा रक्तमाल्यानुलेपनाः ॥ रक्ताक्षाः पुष्कराक्षाश्च गगनं प्रतिपेदिरे ॥ २९ ॥

भ्यामित्युक्तिर्वानरस्य चतुर्भिः संचारात् ॥ ११ ॥ चापीत्येकमव्ययमप्यर्थकं । अशातयत् अगच्छत् । स्वार्थे णिच् ॥ १२–१४ ॥ रीतीः रेखाः । काञ्चनाञ्जनरजतगर्भासु शिलासु विदीर्यमाणासु दृश्यमानास्तास्ता भेदधारा इत्यर्थः ॥ १५ ॥ समनश्शिलाः धातुविशेषसहिताः । मध्यमेनार्चिषा मध्यमया ज्वालया । पार्श्वज्वाला हि न धूमनिवर्तिका ॥ १६ ॥ विकृतैः विकृतिमद्भिः दैन्यव्यञ्जकैरित्यर्थः ॥ १७ ॥ सत्त्वसन्नादः भूतसन्नादः ॥ १८ ॥ स्वस्तिकंनाम फणोपरि दृश्यमानार्धचन्द्रकं । ददंशुरिति दंशनं कोपव्यापारः ॥ १९ ॥ बिभिदुः भिन्नाः ॥ २० ॥ यानीति अत्र तानीत्यध्याहार्यं । शमितुं शमयितुं ॥ २१–२५ ॥ भिद्यत इत्यर्धमेकं ॥ उत्पेतुरित्यनुषज्यते ॥ २६ ॥ त्रस्ता इत्यादिसार्धश्लोकद्वयमेकान्वयं ॥ आसवभाजनं मद्यपात्रं । पात्राणि भोजनपात्राणि । आर्षभाणि चर्माणि ऋषभचर्मपिनद्धानि खेटकानि । त्सरुः मुष्टिबन्धनं ॥ २७–२८ ॥ कृतकण्ठगुणाः कृतकण्ठस्रजः । क्षीबाः मत्ताः । रक्ताक्षाः मधुपानात् । पुष्कराक्षाः स्वभावत इत्यर्थः ॥ २९ ॥

जननिवृत्तिषु ' इत्यमरः ॥ १० ॥ **रामानु०** अशातयत् अपातयदित्यर्थः । अत्राप्यचलःकर्ता । **ति०** अशातयत् पर्वतःकर्ता चलनंकरणं ॥ १२ ॥ **रामानु०** पुष्पौघेणेत्यत्र ' कुमतिच ' इतिणत्वं । पुष्पमयोयथा पुष्पमयइव ॥ १३ ॥ **ति०** मुमोच निपीडनात् । अतएव मध्यमेनमध्यभागेन अर्चिषाज्वालयाजुष्टोयोऽनलस्तस्यधूमराजिरिव बभावित्यर्थः । यस्येत्यध्याहारः ।

[**पा०**] १ ङ. झ. ञ. ट. श्चाशु. क. ख. च. छ. श्चारु. २ झ. सवृतः. ३ ज. सलिलंच. ४ ङ. च. ज.—ट. मदमत्तः. ५ ङ.—ट. हरिणा. ६ क. च. छ. ज. ञ. सर्वशः. ७ ट. सत्वानि. ८ ङ. च. छ. झ. ञ. ट. महान्सत्व. ९ क. शब्देनोपवनानिच. १० ङ. झ. ट. पृथुभिर्नागाः. ११ इमेचत्वारःश्लोकाः च. छ. ज. पाठेषुदृश्यन्ते. १२ क. ख. ङ. च. छ. झ. ञ. मासनभाजनं.

हारनूपुरकेयूरपारिहार्यधराः स्त्रियः ।। विस्मितास्सस्मितास्तस्थुराकाशे रमणैस्सह ।। ३० ।।
दर्शयन्तो महाविद्यां विद्याधरमहर्षयः ।। [1]संहितास्तस्थुराकाशे [2]वीक्षांचक्रुश्च पर्वतम् ।। ३१ ।।
शुश्रुवुश्च तदा शब्दमृषीणां भावितात्मनाम् ।। चारणानां च सिद्धानां स्थितानां विमलेऽम्बरे ।।३२।।
एष पर्वतसंकाशो हनुमान्मारुतात्मजः ।। [3]तितीर्षति महावेगस्समुद्रं [4]मकरालयम् ।। ३३ ।।
रामार्थं वानरार्थं च चिकीर्षन्कर्म दुष्करम् ।। समुद्रस्य परं पारं दुष्प्रापं [5]प्राप्तुमिच्छति ।। ३४ ।।
इति [6]विद्याधराः श्रुत्वा वचस्तेषां [7]महात्मनाम् ।। तमप्रमेयं ददृशुः पर्वते वानरर्षभम् ।। ३५ ।।
दुधुवे च स रोमाणि चकम्पे [8]चाचलोपमः ।। [9]ननाद सुमहानादं सुमहानिव तोयदः ।। ३६ ।।
[10]आनुपूर्व्येण [11]वृत्तं च लाङ्गूलं [12]रोमभिश्चितम् ।। उत्पतिष्यन्विचिक्षेप पक्षिराज इवोरगम् ।। ३७ ।।
तस्य लाङ्गूलमाविद्धम[13]ात्तवेगस्य पृष्ठतः ।। ददृशे गरुडेनेव [14]ह्रियमाणो महोरगः ।। ३८ ।।
बाहू संस्तम्भयामास महापरिघसन्निभौ ।। [15]ससाद च कपिः कट्यां चरणौ संचुकोच च ।। ३९ ।।
संहृत्य च भुजौ श्रीमांस्तथैव च शिरोधराम् ।। तेजस्सत्त्वं तथा वीर्यमाविवेश स वीर्यवान् ।। ४० ।।
मार्गमालोकयन्दूरादूर्ध्वं प्रणिहितेक्षणः ।। रुरोध हृदये प्राणानाकाशमवलोकयन् ।। ४१ ।।
पद्भ्यां दृढमवस्थानं कृत्वा स कपिकुञ्जरः ।। निकुञ्च्य कर्णौ हनुमानुत्पतिष्यन्महाबलः ।।
वानरान्वानरश्रेष्ठ इदं वचनमब्रवीत् ।। ४२ ।।
यथा राघवनिर्मुक्तश्शरश्श्वसनविक्रमः ।। गच्छेत्तद्वद्गमिष्यामि लङ्कां रावणपालिताम् ।। ४३ ।।
न हि द्रक्ष्यामि यदि तां लङ्कायां जनकात्मजाम् ।। अनेनैव हि वेगेन गमिष्यामि सुरालयम् ।।४४।।
यदि वा त्रिदिवे सीतां न [16]द्रक्ष्याम्यकृतश्रमः ।। बद्ध्वा राक्षसराजानमानयिष्यामि रावणम् ।। ४५ ।।

पारिहार्यं वलयं । तस्थुः तस्थुश्च ।। ३० ।। दर्शयन्तः प्रयोजयन्तः । महाविद्यां अणिमाद्यष्टमहासिद्धिं । विद्याधरमहर्षयः विद्याधराः महर्षय इवेत्युपमितसमासः । " उपमितंव्याघ्रादिभिःसामान्याप्रयोगे " इत्यनुशासनात् । विद्याधरश्रेष्ठा इत्यर्थः । विद्याधरा महर्षयश्चेति द्वन्द्वसमासो न युक्तः । इति विद्याधराः श्रुत्वेत्युपरितनश्लोके विद्याधराणामेवोपादानात् ।।३१।। सा पुनरत्राकाशस्थितिः । शुश्रुवुः विद्याधरा इति शेषः । इति विद्याधराः श्रुत्वेत्युपसंहारात् ।। ३२–३३ ।। समुद्रं तितीर्षतीत्युक्तं तस्य प्रयोजनकथनायोक्तमनुवदति—रामार्थमिति ।। ३४–३६ ।। आनुपूर्व्येण वृत्तं क्रमेण वृत्तं ।। ३७–३८ ।। लङ्घनोद्योगकालिकावस्थां वर्णयति बाहू इत्यादिना । बाहू संस्तम्भयामास निश्चलीचकार । कट्यां ससाद शरीरं संचुकोचेत्यर्थः । चरणौ संचुकोच च ।। ३९ ।। संहृत्य संकोच्य ।।४०।। प्राणान् उच्छ्वासरूपान् । प्राणनिरोधो व्योमोत्पतनार्थं ।। ४१–४३ ।। हिशब्दःपादपूरणे ।।४४।। अकृतश्रमः अप्राप्तश्रमः । राक्षसराजानमित्यत्र टजभावआर्षः ।

धूमराजिरिवेतिह्रस्वपाठः ॥ १६ ॥ **ति०** पारिहार्यशब्दः श्रेष्ठवाचीति । एतदग्रे ' दर्शयन्तइत्यादि विमलेंबरे ' इत्यन्तंश्लोकद्वयंप्रक्षिप्तंक्वचिदितिचकतकः ॥ ३० ॥ **शि०** महाविद्यांमहाविद्याजनितां निरवलंबनस्थितिरूपांस्वशक्तिंदर्शयन्तः । **स०** महाविद्याःअणिमाद्याः ॥ ३१ ॥ **रामानु०** महावेगमितिक्रियाविशेषणं ॥ ३३ ॥ **स०** परंपारं स्वगमनोद्दिष्टं ॥ ३४ ॥ **रामानु०** वीर्यवान्वीर्यमाविवेशेत्यभिधानात् पूर्वंविद्यमानमेववीर्यंविशेषतोऽधिष्ठितवानित्यवगम्यते । तेजस्सत्त्वयोरप्येवंद्रष्टव्यं । तेजः पराभिभवनसामर्थ्यं । सत्त्वं बलं । वीर्यं आकाशाद्यभिनिष्क्रमणसामर्थ्यं ॥४०॥ **रामानु०** राघवशरदृष्टान्तेनस्वस्याविलंबितत्वाप्रति-

[**पा०**] १ ख. सस्मितास्तस्थुः. ज. सभार्यास्तस्थुः. क. विस्मितास्तस्थुः. २ च. छ. ज. वीक्षमाणाश्च. ३ च. छ. तितीर्षुस्समहावेगं. ज. तितीर्षुस्सुमहावेगं. ४ ङ. झ. ञ. ट. वरुणालयं. ५ क. द्रष्टुमिच्छति. ६ ङ. झ. ञ. ट. विद्याधरावाचः श्रुत्वातेषां. ७ क. ङ.—ट. तपस्विनां. ८ ङ. झ. ट. चानलोपमः. ९ ङ. झ. ञ. ट. ननादच. १० ङ.—ट. आनुपूर्व्याच. ११ ङ. झ. ञ. ट. वृत्तंतल्लाङ्गूलं. १२ क. ङ. च. छ. झ. ञ. ट. लोमभिश्चितं. १३ क. ख. ङ.—ञ. मतिवेगस्य. १४ ख. ह्रियमाणइवोरगः. क. च. छ. ज. ह्रियमाणोयथोरगः. १५ ङ. छ. झ. ट. आससाद. १६ क. ख. ङ.—ट. द्रक्ष्यामिकृतश्रमः.

सर्वथा कृतकार्योऽहमेष्यामि सह सीतया ॥ आनयिष्यामि वा लङ्कां समुत्पाट्य सरावणाम् ॥ ४६ ॥
[1]एवमुक्त्वा तु हनुमान्[2]वानरान्वानरोत्तमः ॥ उत्पपाताथ वेगेन वेगवानविचारयन् ॥
सुपर्णमिव चात्मानं मेने स कपिकुञ्जरः ॥ ४७ ॥
समुत्पतति [3]तस्मिंस्तु वेगात्ते नगरोहिणः ॥ संहृत्य विटपान्सर्वान्समुत्पेतुः समन्ततः ॥ ४८ ॥
स मत्तको[4]यष्टिभकान्पादपान्पुष्पशालिनः ॥ उद्वहन्नूरुवेगेन जगाम विमलेऽम्बरे ॥ ४९ ॥
[5]ऊरुवेगोद्धता वृक्षा मुहूर्तं कपिमन्वयुः ॥ प्रस्थितं दीर्घमध्वानं स्वबन्धुमिव बान्धवाः ॥ ५० ॥
[6]तमूरुवेगोन्मथिताः सालाश्चान्ये [7]नगोत्तमाः ॥ अनुजग्मुर्हनूमन्तं सैन्या इव महीपतिम् ॥ ५१ ॥
सुपुष्पिताग्रैर्बहुभिः पादपैरन्वितः कपिः ॥ हनुमान्पर्वताकारो बभूवाद्भुतदर्शनः ॥ ५२ ॥
सारवन्तोऽथ ये वृक्षा न्यमज्जँल्लवणाम्भसि ॥ भयादिव महेन्द्रस्य पर्वता वरुणालये ॥ ५३ ॥
स नानाकुसुमैः कीर्णः कपिः साङ्कुरकोरकैः ॥ शुशुभे मेघसंकाशः खद्योतैरिव पर्वतः ॥ ५४ ॥
विमुक्तास्तस्य वेगेन मुक्त्वा पुष्पाणि ते द्रुमाः ॥ [8]अवशीर्यन्त सलिले निवृत्ताः [9]सुहृदो यथा ॥५५॥
लघुत्वेनोपपन्नं [10]तद्विचित्रं सागरेऽपतत् ॥ द्रुमाणां विविधं पुष्पं कपिवायुसमीरितम् ॥ ५६ ॥
ताराचितमिवाकाशं प्रबभौ स महार्णवः ॥ ५७ ॥
[11]पुष्पौघेणानुबद्धेन [12]नानावर्णेन वानरः ॥ बभौ मेघ [13]इवाकाशे विद्युद्गणविभूषितः ॥ ५८ ॥
तस्य वेगस[14]माधूतैः पुष्पैस्तोयमदृश्यत ॥ [15]ताराभिरभिरामाभिरुदिताभिरिवाम्बरम् ॥ ५९ ॥
तस्याम्बरगतौ बाहू ददृशाते प्रसारितौ ॥ पर्वताग्राद्विनिष्क्रान्तौ पञ्चास्याविव पन्नगौ ॥ ६० ॥

आनयिष्यामि आनेष्यामि ॥ ४५—४७ ॥ तस्मिन् हनुमति । वेगात्समुत्पततिसति नगरोहिणः शैलरुहाद्वृक्षाः । विटपान् संहृत्य आदाय समुत्पेतुरित्यर्थः ॥ ४८ ॥ संग्रहेणोक्तं विवृणोति—स मत्तेत्यादिना ॥ कोयष्टिभकः कोयष्टिः ॥ ४९—५० ॥ तमूरुवेगेति पाठः । ऊरुवेगेन उन्मथिताः सालाः सालवृक्षाः । अन्ये नगोत्तमाः अन्ये वृक्षश्रेष्ठाः । सैन्याः सेनायां समवेताः पुरुषाः । “ सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते ” इत्यमरः ॥ ५१—५२ ॥ सारवन्तः स्थिरांशवन्तः । “ सारो बले स्थिरांशे च ” इत्यमरः ॥ ५३ ॥ मेघसंकाशः स कपिरित्यन्वयः । खद्योतैः रात्राविति शेषः ॥ ५४ ॥ अवशीर्यन्त अवाशीर्यन्त। आगमशासनस्यानित्यत्वादडभावः। स्थितवन्त इत्यर्थः। निवृत्ताः बन्धूननुगम्य निवृत्ताः सुहृत्पक्षे सलिल इति सामीप्येसप्तमी । “ ओदकान्तात्स्निग्धो बन्धुमनुव्रजेत् ” इत्युक्तेः ॥ ५५ ॥ लघुत्वेनोपपन्नं लघुत्वेन युक्तं ॥ ५६ ॥ तारेत्यर्धमेकं वाक्यं ॥ ५७ ॥ अनुब-

---

हतत्वामोघत्वादिकंसूचितवान् ॥४३॥ **ति०** मत्ताःकोयष्टिभाःयेषुतान् । **स०** यद्वा कोयष्टिभिः भा शोभायस्यतत्कोयष्टिभं । तच्चतत्कं शिरःप्रदेशश्च । तेनसहितान् ॥ ४९ ॥ **रामानु०** तस्यवेगेनविमुक्ताःदूरगमनहेतुभूतवेगेनहेतुनाविमुक्ताःगतसंबन्धाः अवशीर्यन्त । आगमशासनस्यानित्यत्वादडभावः । पुष्पाणिमुक्त्वासलिलेअवशीर्यन्तेत्यनेनप्रस्थितेभ्यःसुहृद्भ्योनिवृत्तानामश्रुमोक्षणपूर्वकंशोकसागरेनिमग्नानांसुहृदांसमाधिर्ध्वन्यते ॥ ५५ ॥ **रामानु०** हनुमन्तमनुद्रुताःसारवन्तोवृक्षाःप्रथमंसागरेपतिताःअल्पसाराःततोप्यधिकंगत्वाजलेविशीर्णाइत्युक्त्वापुष्पाण्यप्यतिलघुत्ववत्तयामहद्दूरंगत्वापतितानीत्याह—लघुत्वेनेति ॥ ५६ ॥ **ति०** सर्ववर्णानां विद्युत्सुसत्त्वान्नानावर्णपुष्पौघानबद्धस्यसविद्युद्गणमेघोपमा ॥ ५८ ॥ **रामानु०** बाह्वोःपञ्चशाखत्वात्पञ्चास्यपन्नगदृष्टान्तः

[पा०] १ क. इत्येवमुक्त्वा. २ ख. वानरान्वानरर्षभः. झ. वानरोवानरोत्तमः. ३ ङ.—ट. वेगात्तु. ख. वेगेन. क. वेगात्तुतास्मिंस्ते. ४ ठ. कोयष्टिमकान्. ५ ङ.—ट. ऊरुवेगोत्थिताः. ६ क. तदूरु. ७ क. नगादयः. ८ ख. ङ.—ट. व्यवशीर्यन्त. ९ घ. च. छ. ज. बान्धवायथा. १० क. तन्निवृत्तं. ११ ङ.—ट. पुष्पौघेणसुगन्धेन. १२ ख. नानागन्धेन. १३ क. घ.—ट. इवोद्यन्वै. १४ ख. ङ.—ट. समुद्धतैः. १५ ङ. झ. ट. ताराभिरिवरामाभिः.

पिबन्निव बभौ [1]चापि सो[2]र्मिजालं महार्णवम् ॥ पिपासुरिव चाकाशं ददृशे स महाकपिः ॥ ६१ ॥
तस्य विद्युत्प्रभाकारे वायुमार्गानुसारिणः ॥ [3]नयने विप्रकाशेते पर्वतस्थाविवानलौ ॥ ६२ ॥
पिङ्गे पिङ्गाक्षमुख्यस्य बृहती परिमण्डले ॥ चक्षुषी संप्रकाशेते [4]चन्द्रसूर्याविवोदितौ ॥ ६३ ॥
मुखं नासिकया तस्य ताम्रया ताम्रमाबभौ ॥ सन्ध्यया समभिस्पृष्टं [5]यथा तत्सूर्यमण्डलम् ॥ ६४ ॥
लाङ्गूलं च समाविद्धं प्लवमानस्य शोभते ॥ अम्बरे वायुपुत्रस्य शक्र[6]ध्वज इवोच्छ्रितः ॥ ६५ ॥
[7]लाङ्गूलचक्रेण महान्[8]शुक्लदंष्ट्रोऽनिलात्मजः ॥ व्यरोचत महाप्राज्ञः परिवेषीव भास्करः ॥ ६६ ॥
स्फिग्देशे[9]नाभिताम्रेण रराज स महाकपिः ॥ महता दारितेनेव गिरिर्गैरिकधातुना ॥ ६७ ॥
तस्य वानरसिंहस्य प्लवमानस्य सागरम् ॥ कक्षान्तरगतो वायुर्जीमूत इव गर्जति ॥ ६८ ॥
[10]खे यथा निपतन्त्युल्का ह्युत्तरान्ताद्विनिस्सृता ॥ दृश्यते सानुबन्धा च तथा स कपिकुञ्जरः ॥६९॥
पतत्पतङ्गसंकाशो व्यायतः शुशुभे कपिः ॥ प्रवृद्ध इव मातङ्गः कक्ष्यया बध्यमानया ॥ ७० ॥
उपरिष्टाच्छरीरेण च्छायया चावगाढया ॥ सागरे मारुताविष्टा नौरिवासीत्तदा कपिः ॥ ७१ ॥
यंयं देशं समुद्रस्य जगाम स महाकपिः ॥ [11]स तस्योरुवेगेन सोन्माद इव लक्ष्यते ॥ ७२ ॥
सागरस्योर्मि[12]जालानामुरसा [13]शैलवर्ष्मणाम् ॥ [14]अभिघ्नंस्तु महावेगः पुप्लुवे स महाकपिः ॥ ७३ ॥
कपिवातश्च बलवान्मेघवातश्च [15]निःसृतः ॥ सागरं [16]भीमनिर्घोषं कम्पयामासतुर्भृशम् ॥ ७४ ॥
विकर्षन्नूर्मिजालानि बृहन्ति लवणाम्भसि ॥ पुप्लुवे [17]कपिशार्दूलो विकिरन्निव रोदसी ॥ ७५ ॥

द्धेन व्याप्तेन ॥ ५८—६० ॥ अर्णवं पिबन्निव आकाशं पिपासुरिवेत्याभ्यामस्य महानुद्योगस्सूच्यते । लङ्घनवेगेन सहसा क्षीयमाणे सागरविस्तारे स पीयमान इव भवति एवमंबरं च । ततोतिवेगेन गच्छन्स महार्णवं पिबन्निव बभौ तथा आकाशमपीत्याहुः ॥ ६१—६२ ॥ पिङ्गे पिङ्गलवर्णे । पिङ्गाक्षाणां वानराणां मुख्यस्य । परिमण्डले मण्डलाकारे । चन्द्रसूर्यावित्यभूतोपमा ॥ ६३ ॥ तत्सूर्यमण्डलं सन्ध्यासूर्यमण्डलं ॥ ६४ ॥ समाविद्धं उन्नतीकृतं ॥ ६५—६६ ॥ स्फिग्देशेन वालमूलप्रदेशेन ॥ ६७ ॥ गर्जति अगर्जत् ॥ ६८ ॥ सानुबन्धा सपुच्छा । उल्का हि पुच्छयुक्ता निपतति ॥ ६९ ॥ पतङ्गः सूर्यः । व्यायतो दीर्घः । प्रवृद्ध इव दीर्घ इव । कक्ष्यायां बध्यमानायां हि मातङ्गो दीर्घो भवति ॥ ७० ॥ नौर्जलावगाढेनाधोभागेन व्योमावगाढेन चोर्ध्वभागेन गच्छति । अयं च उपरिगतशरीरेणाधोजलावगाढच्छायया चैकाकारस्सन् मारुतपूरितकटा नौरिवासीत् ॥ ७१ ॥ सोन्माद इव समुद्धर्षइव समुद्धतजल इत्यर्थः ॥ ७२ ॥ शैलवर्ष्मणां शैलतुल्यानां । " वर्ष्मदेहप्रमाणयोः " इति सज्जनः ॥ ७३—७४ ॥ विकिरन्निव विभजन्निव ।

॥ ६० ॥ **ति०** विवृतवक्त्रत्वात्पिबन्निवेति । अधोवक्त्रत्वेइयमुत्प्रेक्षा । ऊर्ध्ववक्त्रत्वेआकाशंपिपासुरिवेति । **ती०** अर्णवसमीपगमनवेलायामुदधिंपिबन्निवबभौ । उपरिगमनावस्थायामाकाशंपिपासुरिवददृशे ॥ ६१ ॥ **स०** कक्षान्तरगतःबाहुमूलमध्यगतः । ' बाहुमूलेउभेकक्षौ ' इत्यमरः ॥ **ति०** जीमूतइतिसप्तम्यन्तमितिकतकः ॥ ६८ ॥ **रामानु०** उल्कापातोपमयारावणस्यभाव्यशुभंसूच्यते ॥ ६९ ॥ **रामानु०** कक्ष्या इभमध्यबन्धनं । ' कक्ष्याप्रकोष्ठेहर्म्यादेःकाञ्च्यांमध्येभबन्धने । ' इत्यमरः ॥ ७० ॥ **ती०** सोन्मादइव समुद्रःअपस्मारीवलक्ष्यते भ्रमणफेनजलोद्गमनघोषादिमत्त्वादियमुपमा ॥ ७२ ॥ **रामानु०** ऊर्मिजालानामित्यत्र ' नलोकाव्यय—'इतिषष्ठ्यानिषेधेपिऋषिप्रयोगात्साधुत्वं । उरसा । उरश्शब्देनोरोवेगजनितोवायुर्लक्ष्यते ॥ ७३ ॥ **स०**

[पा०] १ ख. श्रीमान्. २ क. ख. च. छ. ज. ञ. सोर्मिमालं. ३ घ. नयनेच. ४ च. छ. ज. चन्द्रसूर्याविवांबरे. क. घ. ङ. झ. ञ. ट. चन्द्रसूर्याविवस्थितौ. ५ ख. यथासूर्यस्यमण्डलं. ङ.—ट. यथास्यात्सूर्यमण्डलं. ६ घ. ङ. च. ज.—ट. ध्वजमिवोच्छ्रितं. छ. ध्वजमिवोत्थितं. ख. ध्वजइवोत्थितः. ७ ङ.—ट. लाङ्गूलचक्रोहनुमान्. ८ क. ञ्शुक्लदंष्ट्रोमहाकपिः. ९ ङ. झ. नातिताम्रेण. १० क. यथातु. ११ क. घ.—ट. सतुतस्याङ्गवेगेन. १२ घ. च. ज. ञ. जालानिउरसा. ख. मालानामुरसा. १३ क. घ. च.—ञ. शैलवर्ष्मणा. १४ क. अभिघ्नन्सुमहावेगः. १५ ङ.—ट. निर्गतः. १६ ङ.—ट. भीमनिर्ह्रादं. १७ क. हरिशार्दूलो.

मेरुमन्दरसंकाशा[1]नुद्धतान्स महार्णवे ॥ [2]अतिक्रामन्[3]महावेगस्तरङ्गान्गणयन्निव ॥ ७६ ॥
तस्य वेग[4]समुद्धूतं [5]जलं सजलदं तदा ॥ अम्बरस्थं [6]विबभ्राज शारदाभ्रमिवाततम् ॥ ७७ ॥
तिमिनक्रझषाः कूर्मा दृश्यन्ते [7]विवृतास्तदा ॥ वस्त्रापकर्षणेनेव शरीराणि शरीरिणाम् ॥ ७८ ॥
[8]प्लवमानं समीक्ष्याथ [9]भुजङ्गास्सागरालयाः ॥ व्योम्नि तं कपिशार्दूलं [10]सुपर्ण इति मेनिरे ॥ ७९ ॥
दशयोजनविस्तीर्णा त्रिंशद्योजनमायता ॥ छाया वानरसिंहस्य [11]जले [12]चारुतराऽभवत् ॥ ८० ॥
श्वेताभ्रघनराजीव वायुपुत्रानुगामिनी ॥ तस्य सा शुशुभे छाया [13]वितता लवणाम्भसि ॥ ८१ ॥
शुशुभे स महातेजा महाकायो महाकपिः ॥ वायुमार्गे निरालम्बे पक्षवानिव पर्वतः ॥ ८२ ॥
येनासौ याति बलवा[14]न्वेगेन कपिकुञ्जरः ॥ तेन मार्गेण सहसा द्रोणीकृत इवार्णवः ॥ ८३ ॥
[15]आपाते पक्षिसंघानां पक्षिराज इव व्रजन् ॥ हनुमान्मेघजालानि प्रकर्षन्मारुतो यथा ॥ ८४ ॥
पाण्डुरारुणवर्णानि नीलमाञ्जिष्ठकानि च ॥ कपिनाकृष्यमाणानि महाभ्राणि चकाशिरे ॥ ८५ ॥
प्रविशन्नभ्रजालानि निष्पतंश्च पुनः पुनः ॥ प्रच्छन्नश्च प्रकाशश्च चन्द्रमा इव [16]लक्ष्यते ॥ ८६ ॥
प्लवमानं तु तं दृष्ट्वा [17]प्लवङ्गं त्वरितं तदा ॥ [18]ववर्षुः पुष्पवर्षाणि देवगन्धर्वदानवाः ॥ ८७ ॥
तताप न हि तं सूर्यः प्लवन्तं [19]वानरोत्तमम् ॥ सिषेवे च तदा वायू रामकार्यार्थसिद्धये ॥ ८८ ॥
ऋषयस्तुष्टुवुश्चैनं प्लवमानं [20]विहायसा ॥ जगुश्च देवगन्धर्वाः प्रशंसन्तो [21]महौजसम् ॥ ८९ ॥
नागाश्च तुष्टुवुर्यक्षा रक्षांसि [22]विबुधाः खगाः ॥ [23]प्रेक्ष्य सर्वे कपिवरं सहसा विगतक्लमम् ॥ ९० ॥

रोदसी द्यावापृथिव्यौ ॥ ७५ ॥ अतिक्रामत् अत्यक्रामत् ॥ ७६ ॥ तस्य हनुमतः । वेगेन ऊरुवातेन । समुद्धूतं समुत्थापितं । सजलदं जलं जलदो जलं चोद्धूतमित्यर्थः ॥ ७७ ॥ तिमयो महामत्स्याः नक्राः ग्राहाः झषाः मकराः । विवृताः जलविभेदेन प्रकाशिताः ॥ ७८—७९ ॥ दशयोजनविस्तीर्णेति । ननु त्रिंशद्योजनायतत्वे चतुर्थपदेपि लङ्काप्राप्तिः स्यात् मैनाकसंवादसुरसासंवादादिकं च विरुध्येत । नहि बिम्बादधिकपरिमाणत्वं संभवतीति न शङ्कनीयं । छायाशब्दो हि नात्र प्रतिबिम्बपरः किन्त्वनातपपरः । प्रातरेव हि समुद्रतरणमुक्तं तदा तस्य छाया समुद्रे तथाप्रमाणा दृश्यतैव ॥ ८० ॥ अभ्रघनः अभ्रमूर्तिः ॥ ८१—८२ ॥ द्रोणी कटाहः ॥ ८३ ॥ आपाते मार्गे ॥ ८४—८७ ॥ रामकार्यं सीतान्वेषणं तदेवार्थः प्रयोजनं तस्य सिद्धये लाभाय तद्धेतुभूतहनुमच्छ्रमनिवर्तनायेत्यर्थः ॥ ८८—८९ ॥ रक्षांसि

मेरुमन्दरसंकाशान्स्थौल्यतारतम्येनतयोःसदृशान् । मेरुमन्दरइतिमहामेरोरवष्टंभपर्वतः । तत्सदृशान्वा ॥ ७६ ॥ **रामानु०** जलंसजलदमित्यनेनसमुद्धूतंजलंमेघमण्डलपर्यन्तमभूदित्यवगम्यते ॥ ७७ ॥ **ति०** छायाप्रमाणवर्णनेनतच्छरीरप्रमाणमपिवर्णितप्रायं । इयंमाध्याह्निकीच्छाया ॥८०॥ **ती०** श्वेताभ्रघनराजीव अत्रश्वेतशब्देनस्वच्छतोच्यते । घनशब्देनसान्द्रता । तथाचनिर्मलाभ्रसान्द्रपङ्क्तिरित्यर्थः ॥ **ति०** श्वेताभ्रघनराजीव श्वेताभ्रयुक्तमेघपङ्क्तिवत्तस्यच्छायाशुशुभे । शुक्लदंष्ट्रादिनानानावर्णत्वादुक्तोपमानिर्वाहः ॥ **स०** श्वेताभ्रघनराजीवशुभ्रमेघदीर्घपङ्क्तिरिव । छायाचसमुद्रेप्रतिफलितप्रतिबिंबः । नातपाभावः । तेनशौक्ल्यं संगच्छते । "घनःसान्द्रेदृढेदीर्घे" "छायास्यादातपाभावेप्रतिबिंबार्कयोषितोः" इत्युभयतोविश्वः ॥ ८१ ॥ **वि०** तस्य उपरीतिशेषः ॥ ८७ ॥ **स०** तत्रहनुमति । दानवाःसज्जनाः ॥ ८७ ॥ **रामानु०** सिषेवइत्यनेन पुत्रत्वेपिरामकार्यप्रवृत्तत्वात्पूज्यतैवद्योत्यते

[पा०] १ ङ. छ. झ. ट. नुद्धतान्सुमहार्णवे. २ क. घ. ङ. झ. ञ. ट. अत्यक्रामन्महा. ३ क. न्महावेगांस्तरङ्गान्. ४ क. ख. घ.—ट. समुद्धुष्टं. ५ ख. जलमध्येजलंतदा. ६ घ. ङ. छ. ज. ञ. ट. विबभ्राजे. ७ च. छ. विविधास्तदा. घ. विकृतास्तदा. ८ ङ. ज.—ट. क्रममाणं. ९ ङ. झ. ट. भुजगाःसागरंगमाः. क. च. छ. ज. भुजगाः. १० क. ङ.—ट. सुवर्णमिव. ११ ङ. झ. ट. जवे. १२ ज. वारिचरा. १३ ङ.—ट. पतिता. १४ घ. न्वेगवान्कपि. १५ ग. घ. च. आकाशे. १६ ङ.—ट. दृश्यते. १७ ग. घ. च.—ट. प्लवगं. १८ च. छ. ज. ञ. ववर्षुस्तस्यपुष्पाणि. झ. ट. ववर्षुस्तत्रपुष्पाणि. १९ क. ख. घ.—ट. वानरेश्वरं. २० ग. विहायसि. २१ ङ.—ट. वनौकसं. २२ क. ग. च. छ. ज. ञ. विविधाःखगाः. ङ. झ. ट. विविधानिच. २३ क. ख. ग. प्रेक्ष्याकाशे.

तस्मिन्प्लवगशार्दूले प्लवमाने हनूमति ॥ इक्ष्वाकुकुलमानार्थी चिन्तयामास सागरः ॥ ९१ ॥
साहाय्यं वानरेन्द्रस्य यदि नाहं हनूमतः ॥ करिष्यामि भविष्यामि सर्ववाच्यो विवक्षताम् ॥ ९२ ॥
अहमिक्ष्वाकुनाथेन [1]सगरेण विवर्धितः ॥ इक्ष्वाकुसचिवश्चायं [2]नावसीदितुमर्हति ॥ ९३ ॥
तथा मया विधातव्यं विश्रमेत यथा कपिः ॥ शेषं च मयि विश्रान्तस्[3]सुखेनातिपतिष्यति ॥ ९४ ॥
इति कृत्वा मतिं साध्वीं समुद्रश्छन्नमम्भसि ॥ हिरण्यनाभं मैनाकमुवाच गिरिसत्तमम् ॥ ९५ ॥
त्वमिहा[4]सुरसंघानां पातालतलवासिनाम् ॥ देवराज्ञा गिरिश्रेष्ठ परिघस्सन्निवेशितः ॥ ९६ ॥
त्वमेषां [5]जातवीर्याणां पुनरेवोत्पतिष्यताम् ॥ पातालस्याप्रमेयस्य द्वारमावृत्य तिष्ठसि ॥ ९७ ॥
तिर्यगूर्ध्वमधश्चैव शक्तिस्ते शैल वर्धितुम् ॥ तस्मात्[6]संचोदयामि त्वामुत्तिष्ठ [7]गिरिसत्तम ॥ ९८ ॥
स एष कपिशार्दूलस्त्वामुपर्येति वीर्यवान् ॥ हनूमान्रामकार्यार्थं[8] भीमकर्मा खमाप्लुतः ॥ ९९ ॥
[9]अस्य साह्यं मया कार्यमिक्ष्वाकु[10]कुलवर्तिनः ॥ [11]मम हीक्ष्वाकवः पूज्याः परं पूज्यतमास्तव ॥ १०० ॥
कुरु साचिव्यमस्माकं न नः कार्यमतिक्रमेत् ॥ [12]कर्तव्यमकृतं कार्यं सतां मन्युमुदीरयेत् ॥ १०१ ॥
सलिलादूर्ध्वमुत्तिष्ठ तिष्ठत्वेष कपिस्त्वयि ॥ अस्माक[13]मतिथिश्चैव पूज्यश्च प्लवतांवरः ॥ १०२ ॥
चामीकरमहानाभ देवगन्धर्वसेवित ॥ [14]हनुमांस्त्वयि विश्रान्तस्ततश्शेषं गमिष्यति ॥
स एष कपिशार्दूलस्त्वामुपर्येति वीर्यवान् ॥ १०३ ॥
काकुत्स्थस्यानृशंस्यं च मैथिल्याश्च विवासनम् ॥ श्रमं च प्लवगेन्द्रस्य समीक्ष्योत्थातुमर्हसि ॥ १०४ ॥

दिक्पालकरक्षस्सबन्धीनि ॥ ९० ॥ मानार्थी बहुमानार्थी । स्वयं सागरत्वादिति भावः ॥ ९१ ॥ सर्ववाच्यः सर्वप्रकारेण निन्द्यः । विवक्षतां वक्तुमिच्छतां ॥ ९२—९४ ॥ हिरण्यनाभं हिरण्यशृङ्गं । नाभिशब्दो ह्यध्यक्षवाची । शृङ्गं च पर्वतस्याध्यक्षमेव । " नाभिरध्यक्षकस्तूर्योः " इति दर्पणः ॥ ९५ ॥ परिघः अर्गलं । " परिघो मुद्गरेऽर्गले " इति दर्पणः ॥ ९६ ॥ परिघत्वमेवाह त्वमेषामिति ॥ ९७ ॥ शक्तिः अस्तीति शेषः ॥ ९८—९९ ॥ इक्ष्वाकोः कुले वंशे वर्तते शुश्रूषत इति इक्ष्वाकुकुलवर्ती तस्य । पूज्यतमास्तव मत्संबन्धादिति भावः । यद्वा त्वदुपकारकवायुपुत्रमुद्दिश्य ॥ १०० ॥ कार्यं प्रयोजनं विश्रान्त्यादि । कर्तव्यं कार्यमकृतं सतां मन्युं कोपं उदीरयेत् प्रेरयेत् उत्पादयेत् ॥ १०१—१०२ ॥ चामीकरमहानाभ स्वर्णमयमहाशृङ्ग ॥ १०३ ॥ काकुत्स्थस्यानृशंस्यं रामस्य सीताविषयां दयां ॥ १०४ ॥

॥ ८८ ॥ ती० सर्ववाच्यःसर्वनिन्दावाग्विषयः भविष्यामीत्यर्थः ॥ ९२ ॥ ति० सागरेणविवर्धितइत्युक्त्या कश्चिद्देशः सागरखातस्यापिएतत्संबद्धइतिज्ञायते ॥ ९३ ॥ ती० हिरण्यनाभं हिरण्यप्रधानं । हिरण्मयमित्यर्थः । ' नाभिःप्रधानेकस्तूर्यो ' इतिविश्वः । स० हिरण्यनाभं नाम्ना । मैनाकं मेनकाहिमवत्पर्वतभार्या । तत्पुत्रं ॥ ९५ ॥ ती० परिघःसंनिवेशितः आयुधविशेषत्वेनसंनिवेशितः । अनेन पक्षच्छेदभयात्समुद्रप्रवेशानन्तरं पातालस्थराक्षसनिरोधार्थं देवराजेनमैनाकःस्थापितइत्यवगम्यते ॥ स० देवराज्ञा देवराजेननिवेशितइवासि । देवराजभयात्क्षिप्तत्वात्तेनप्रक्षिप्तइत्युत्प्रेक्षा । अतो नोत्तरग्रन्थविरोधः ॥ ९६ ॥ ति० ज्ञातवीर्याणां देवराजेनेतिशेषः ॥ ९७ ॥ ति० शक्तिस्ते अस्तीतिशेषः । तस्मात्पिहितपातालमुखएवसन्वृद्धिशक्त्यावर्धमानस्सन्नूर्ध्वमुत्तिष्ठ ॥ ९८ ॥ ति० उपर्येति तवोपरिप्रदेशंप्राप्नोति । तस्माद्विश्रमायत्वमुत्तिष्ठेतिपूर्वेणान्वयः । एतदुत्तरं ' हनूमान्रामकार्यार्थंभीमकर्माखमाप्लुतः । श्रमंचप्लवगेन्द्रस्यसमीक्ष्योत्थातुमर्हसि ' इतिप्राचीनःपाङ्कःपाठः । अत्रखमाप्लुतइत्यनन्तरंकेचिच्छ्लोकाःप्रक्षिप्ताःपरैरितिकतकः ॥ ९९ ॥ रामानु० साहाय्यंसहायकर्म । सहकारित्वमितियावत् । ब्राह्मणादित्वात्ष्यञ् । ममइक्ष्वाकवःपूज्याहि ।

[पा०] १ झ. ट. सागरेण. २ ङ. झ. ट. तन्नार्हत्यवसादितुं. घ. नचार्हत्यवसादितुं. ३ ङ. ज.—ट. स्सुखीसोतितरिष्यति. च. स्सुखीसोतिगमिष्यति. घ. स्सुखेननिपतिष्यति. ४ ङ. झ. ट. सङ्घानांदेवराज्ञामहात्मना । पातालनिलयानांहिपरिघः संनिवेशितः. ५ ङ.—ट. ज्ञातवीर्याणां. ६ च. छ. ज. त्संबोधयामि. ७ क. ग. च. छ. ज. नगसत्तम. ख. त्वंनगोत्तम. ८ ङ. झ. ट. कार्यार्थी. ९ एतदादयः—'मैथिल्याश्चविवासनं' इत्येतदन्ताःपञ्चश्लोकाः झ. पुस्तकेनदृश्यन्ते. । ग. साहाय्यंतस्यकर्तव्यं. क. तस्यसाह्यं. १० क. वशवर्तिनः. ११ ज. ममचेक्ष्वाकवः. ग. मयाहीक्ष्वाकवः. १२ छ. ज. कर्तव्यंनतुयत्कार्यं. ग. घ. कर्तव्यंनकृतंकार्यं. १३ क. ग. मतिथिर्ह्येष. घ. मतिथिश्चैष. १४ क. हनूमांस्त्वेष.

[1]हिरण्यनाभो मैनाको निशम्य लवणाम्भसः ॥ [2]उत्पपात जलात्तूर्णं महाद्रुमल[3]तायुतः ॥ १०५ ॥
[4]स सागरजलं भित्त्वा [5]बभूवाभ्युत्थितस्तदा ॥ यथा जलधरं भित्त्वा दीप्तरश्मिर्दिवाकरः ॥ १०६ ॥
स महात्मा मुहूर्तेन पर्वतस्सलिलावृतः ॥ दर्शयामास शृङ्गाणि सागरेण नियोजितः ॥ १०७ ॥
[6]शातकुम्भनिभैश्शृङ्गैः सकिन्नरमहोरगैः ॥ आदित्योदय[7]संकाशैरालिखद्भिरिवाम्बरम् ॥ १०८ ॥
[8]तप्तजाम्बूनदैश्शृङ्गैः पर्वतस्य [9]समुत्थितैः ॥ आकाशं शस्त्रसंकाशमभवत्काञ्चनप्रभम् ॥ १०९ ॥
जातरूपमयैश्शृङ्गैर्भ्राजमानैः [10]स्वयंप्रभैः ॥ आदित्यशतसंकाशस्सोभवद्गिरिसत्तमः ॥ ११० ॥
तमुत्थितमसङ्गेन हनुमानग्रतः स्थितम् ॥ मध्ये लवणतोयस्य विघ्नोऽयमिति निश्चितः ॥ १११ ॥
स [11]तमुच्छ्रितमत्यर्थं महावेगो महाकपिः ॥ उरसा पातयामास जीमूतमिव मारुतः ॥ ११२ ॥
स [12]तदा पातितस्तेन कपिना पर्वतोत्तमः ॥ [13]बुद्ध्वा तस्य [14]कपेर्वेगं जहर्ष च [15]ननन्द च ॥ ११३ ॥
तमाकाशगतं वीरमाकाशे [16]समुपस्थितः ॥ [17]प्रीतो हृष्टमना [18]वाक्यमब्रवीत्पर्वतः कपिम् ॥
मानुषं धारयन्रूपमात्मनश्शिखरे स्थितः ॥ ११४ ॥
[19]दुष्करं कृतवान्कर्म त्वमिदं [20]वानरोत्तम ॥ निपत्य मम शृङ्गेषु वि[21]श्रमस्व यथासुखम् ॥ ११५ ॥
राघवस्य कुले जातैरुदधिः परिवर्धितः ॥ स त्वां [22]रामहिते [23]युक्तं प्रत्यर्चयति सागरः ॥ ११६ ॥
कृते च प्रतिकर्तव्यमेष धर्मस्सनातनः ॥ सोयं तत्प्रतिकारार्थी त्वत्तः संमानमर्हति ॥ ११७ ॥
त्वन्निमित्तमनेनाहं बहुमानात्प्रचोदितः ॥ तिष्ठ त्वं [24]कपिशार्दूल [25]मयि विश्रम्य गम्यताम् ॥ ११८ ॥

निशम्य वचनमितिशेषः ॥ १०५—१०७ ॥ शातकुम्भनिभैः स्वर्णसदृशैः । आदित्योदयसंकाशैः आदित्योदयतुल्यैरित्यर्थः । शृङ्गैरुपलक्षितः शृङ्गाणि दर्शयामासेति योजना ॥ १०८ ॥ शस्त्रसंकाशं नीलमित्यर्थः । "शस्त्रमायुधलोहयोः" इतिविश्वः ॥१०९—११०॥ निश्चितः निश्चितवान् । कर्तरिनिष्ठा ॥ १११—११२ ॥ जहर्ष विसिष्मिये ॥ ११३ ॥ प्रीतः प्रीतिद्योतकव्यापारः ॥ ११४—११६ ॥ कृते उपकारे । त्वत्प्रतिकारार्थी त्वदातिथ्यकरणापेक्षी त्वत्तः संमाननमर्हतीति त्वया तत्कृतातिथ्यपरिग्रह एवास्य संमाननमित्यर्थः ॥११७॥ चोदनाप्रकारमाह योजनानामिति ॥ प्रक्रमतामिति प्रचोदित इति पूर्वे-

---

मद्बुद्धिहेतुत्वात् । तवपरंपूज्यतमाः सगरविवृद्धमदन्तःप्रवेशसुखावस्थानादिफलभोक्तृत्वादितिभावः ॥ १०० ॥ **रामानु०** जीमूतइवमारुतइत्यनेनअनायासेनपर्वतंपातितवानितिद्योत्यते ॥ ११२ ॥ **रामानु०** जहर्षचननन्दचेतिपदद्वयेनकायमनसोर्विक्रतिरुच्यते । अस्यवेगेनग्लानिराहित्यंबुद्ध्वाहृष्टमनाबभूवेत्यर्थः । **ति०** सादितःअवसादितः अधःकृतइतियावत् । जहर्षचननादचेतिप्राचीनःपाठः । बलवैभवंदृष्ट्वाजहर्ष । स्वोत्थानप्रयोजनावेदनाय ननाद शब्दंकृतवान् । ननन्देतित्वाधुनिककल्पितःपाठः ॥ ११३ ॥ **रामानु०** प्रीतःसुखितः । हृष्टमनाः प्रसन्नमनाः ॥ ११४ ॥ **रामानु०** विश्रमस्वेति । श्रमिरात्मनेपदीकश्चिदस्ति । तथाचोक्तंभट्टमल्लेन— "विश्राम्यतीतिविश्रान्तौक्वचिद्विश्रमतेपिच" इति ॥ ११५ ॥ **रामानु०** त्वन्निमित्तमित्यादिश्लोकद्वयमेकंवाक्यं । एषकपिःयोजनानांशतंचापिसमाप्लुतःसमापतितुमुपक्रान्तः । तवसानुषुविश्रान्तःशेषंमार्गशेषंप्रक्रमतामितित्वन्निमित्तंअहमनेनसागरेणबहुमानात्प्रचोदितः । अतःकपिशार्दूल त्वंतिष्ठ । मयिविश्रम्यगम्यतामित्यन्वयः ।

[पा०] १ ङ. झ. ट. हिरण्यगर्भो. क. हिरण्यनाभस्तद्वाक्यंनिशम्य. २ क. उत्पपाताथवेगेनजलाद्रुम. ३ ङ. झ. ट. लतावृतः. ४ ग. च. छ. ज. ञ. सागरस्यजलं. ५ ङ. झ. ट. बभूवात्युच्छ्रितस्तदा. क. बभूवावस्थितस्तदा. ६ ख. घ.—ट. शातकुंभमयैः. ७ ङ. झ. ञ. ट. संकाशैरुल्लिखद्भिः. ८ क.—ट. तस्यजांबूनदैः. ९ क. च. समुच्छ्रितैः. १० ङ. झ. ञ. ट. महाप्रभैः. ख. स्वलंकृतैः. ११ झ. तमुत्थितं. १२ घ. च. छ. तथासादितस्तेन. ङ. झ. ञ. ट. तदासादितस्तेन. क. ख. ग. तथापातितः. १३ ज. बुद्ध्वास्यसुमहावेगं. १४ च. छ. महावेगं. ङ. झ. ञ. ट. हरेर्वेगं. १५ क. ग. ङ. झ. ञ. ट. ननादच. १६ च. छ. ज. समवस्थितं. ख. ग. घ. समवस्थितः. क. समुपस्थितं. १७ ग. प्रीतिहृष्टमनाः. १८ च. छ. ज. वाक्यं पर्वतःकपिमब्रवीत्. १९ ट. दुष्कृतं. २० क. वानरर्षभ. २१ ङ. झ. ट. सुखंविश्रम्यगम्यतां. २२ ग. रामहितार्थाय. २३ घ. युक्तमभ्यर्चयति. २४ क.—ज. ञ. हरिशार्दूल. २५ क. विश्रम्यमयि.

योजनानां शतं [1]चापि कपिरेष [2]समाप्लुतः ॥ [3]तव सानुषु विश्रान्तश्शेषं [4]प्रक्रमतामिति ॥ ११९ ॥
तदिदं गन्धवत्स्वादु कन्दमूलफलं बहु ॥ तदास्वाद्य हरिश्रेष्ठ [5]विश्रान्तोनुगमिष्यसि ॥ १२० ॥
अस्माकमपि संबन्धः कपिमुख्य त्वयाऽस्ति वै ॥ प्रख्यातस्त्रिषु लोकेषु महागुणपरिग्रहः ॥ १२१ ॥
वेगवन्तः [6]प्लवन्तो ये प्लवगा मारुतात्मज ॥ [7]तेषां मुख्यतमं मन्ये त्वामहं कपिकुञ्जर ॥ १२२ ॥
अतिथिः किल पूजार्हः प्राकृतोपि [8]विजानता ॥ धर्मं जिज्ञासमानेन किं पुनस्त्वादृशो महान्१२३
त्वं हि देववरिष्ठस्य मारुतस्य महात्मनः ॥ [9]पुत्रस्तस्यैव वेगेन सदृशः कपिकुञ्जर ॥ १२४ ॥
पूजिते त्वयि [10]धर्मज्ञ पूजां प्राप्नोति मारुतः ॥ तस्मात्त्वं पूजनीयो मे शृणु चाप्यत्र कारणम् ॥१२५॥
पूर्वं कृतयुगे तात पर्वताः पक्षिणोऽभवन् ॥ [11]ते हि जग्मुर्दिशः सर्वा [12]गरुडानिलवेगिनः ॥१२६॥
ततस्तेषु प्रयातेषु देवसङ्घाः [13]सहर्षिभिः ॥ भूतानि च भयं जग्मुस्तेषां पतनशङ्कया ॥ १२७ ॥
ततः क्रुद्धः सहस्राक्षः पर्वतानां [14]शतक्रतुः ॥ पक्षांश्चिच्छेद वज्रेण [15]तत्र तत्र सहस्रशः ॥ १२८ ॥
स [16]मामुपगतः क्रुद्धो वज्रमुद्यम्य देवराट् ॥ ततोऽहं सहसा क्षिप्तः श्वसनेन महात्मना ॥ १२९ ॥
अस्मिँल्लवणतोये च प्रक्षिप्तः प्लवगोत्तम ॥ [17]गुप्तपक्षसमग्रश्च तव पित्राऽभिरक्षितः ॥ १३० ॥
ततोऽहं मानयामि त्वां [18]मान्यो हि मम मारुतः ॥ त्वया मे [19]ह्येष संबन्धः कपिमुख्य महागुणः ॥१३१॥
[20]तस्मिन्नेवंगते कार्ये सागरस्य [21]ममैव च ॥ प्रीतिं प्रीतमनाः [22]कर्तुं त्वमर्हसि [23]महाकपे ॥ १३२ ॥
श्रमं मोक्षय [24]पूजां च गृहाण [25]कपिसत्तम ॥ प्रीतिं च [26]बहु मन्यस्व प्रीतोस्मि तव दर्शनात् ॥१३३॥
एवमुक्तः कपिश्रेष्ठस्तं नगोत्तममब्रवीत् ॥ प्रीतोस्मि कृतमातिथ्यं मन्युरेषोपनीयताम् ॥ १३४ ॥
त्वरते कार्यकालो मे अहश्चाप्यतिवर्तते ॥ प्रतिज्ञा च मया दत्ता न स्थातव्यमिहा[27]न्तरे ॥ १३५ ॥

णान्वयः ॥ ११८—११९ ॥ तत् प्रसिद्धं । कन्दः करहाटः । मूलं पादः । तत् तस्मात् ॥ १२० ॥ प्रख्यात इति संबन्धविशेषणं । महागुणानां परिग्रहो यस्मिन्स तथा ॥ १२१—१२५ ॥ संबन्धं विवृणोति पूर्वमित्यादिना ॥ पक्षिणः पक्षवन्तः । हिः पादपूरणे ॥ १२६—१२९ ॥ समग्रः समग्रपक्षः । गुप्तसमग्रपक्षश्च यथा भवामि तथा अभिरक्षितोस्मीत्यर्थः ॥ १३०—१३३ ॥ कृतमातिथ्यं तव दर्शनादिनेति भावः । मन्युः कोपः । मत्कृता पूजानगृहीतेति कोपो निरस्यतामित्यर्थः ॥ १३४ ॥ कार्यकालः त्वरते शीघ्रं गच्छेति मां प्रेरयति । अहश्चाप्यतिवर्तते अत्र विलम्बःक्रियते चेदिदमहोतिवर्तत इत्यर्थः । इह समुद्रे ।

॥ ११८—११९ ॥ **रामानु०** हनुमतःपूज्यतमत्वेहेत्वन्तरंदर्शयति—अस्माकमपीति । संबन्धः अतिथ्यतिथिमद्भावलक्षणः । महागुणपरिग्रहः परिगृह्यतइतिपरिग्रहः । महागुणानांसतांपरिग्रहःमहागुणपरिग्रहः ॥ **ती०** महागुणपरिग्रहःमहागुणेनवायुनापरिगृह्यतइतितथा ॥ १२१ ॥ **रामानु०** किंचातिथेस्तवपूजायांकाम्यार्थसिद्धिवद्वायोरपिप्रत्युपकारसिद्धिःस्यादित्याह—त्वंहीत्यादिना ॥ १२४ ॥ **रामानु०** मोक्षय मुञ्च । 'मोक्षनिरसने' इतिचौरादिकोधातुः ॥ **ति०** मान्यस्य वायुसंबन्धात्तवपूज्यस्यममप्रीतिं कुर्वितिशेषः ॥ १३३ ॥ **ती०** मन्युःपूजानङ्गीकारनिबन्धनंदैन्यं ॥ १३४ ॥ **रामानु०** कार्यकालइति । कार्यःकरणयो-

[पा०] १ च. छ. ज. ञ. वापि. २ ङ. झ. ट. खमाप्लुतः. ३ च. छ. ज. ञ. तवसानुनि. ४ ङ. छ. ज. ञ. विक्रमतामिति. ५ ङ. झ. ञ. ट. विश्रान्तोयगमिष्यति. क. ग. विश्रान्तोनूत्पतिष्यति. ६ ख. घ. ञ. ट. प्लवङ्गाः. ७ ग. तेषु. ८ छ. ज. विधानतः. ९ ङ.—ज. पुत्रस्त्वंतस्य. ख. पुत्रस्तस्यच. १० ङ.—ट. धर्मज्ञे. ११ ख.—ट. तेपि. १२ क. ङ. झ. ञ. ट. गरुडाइववेगिनः. १३ ङ.—ज. ञ. सहस्रशः. ख. महर्षिभिः, ग. सुरर्षिभिः. १४ च. छ. ज. ञ. क्षयायवै. १५ घ.—ट. ततःशतसहस्रशः. ग. शतशश्चसहस्रशः. १६ क. घ. झ. मामुपागतः. १७ क. च.—झ. गुप्तपक्षःसमग्रश्च. १८ ङ. झ. ट. मान्योसिममारुते. १९ ग. ङ. झ. ञ. ट. ममैष. २० क.—ट. अस्मिन्नेवं. २१ क.—घ. च. छ. ज. ममैवहि. २२ ख. ग. च. छ. ज. कर्तुमर्हसित्वं. २३ ङ. झ. ञ. ट. महामते. २४ क. पूजांत्वं. २५ ङ. ञ. ट. हरिसत्तम. घ. कपिकुञ्जर. २६ ङ. झ. ट. ममान्यस्य. २७ घ. ङ. झ. ञ. ट. मिहान्तरा.

इत्युक्त्वा पाणिना शैलमालभ्य हरिपुङ्गवः ॥ जगामाकाशमाविश्य वीर्यवान्प्रहसन्निव ॥ १३६ ॥
स पर्वतसमुद्राभ्यां बहुमानादवेक्षितः ॥ पूजितश्चो[1]पपन्नाभिराशीर्भि[2]रनिलात्मजः ॥ १३७ ॥
[3]अथोर्ध्वं दूरमुत्पत्य हित्वा शैलमहार्णवौ ॥ पितुः पन्थानमा[4]स्थाय जगाम विमलेऽम्बरे ॥ १३८ ॥
[5]भूयश्चोर्ध्वगतिं प्राप्य गिरिं तमवलोकयन् ॥ [6]वायुसूनुर्निरालम्बे जगाम वि[7]मलेऽम्बरे ॥ १३९ ॥
तद्द्वितीयं हनुमतो दृष्ट्वा कर्म सुदुष्करम् ॥ प्रशशंसुः सुराः सर्वे सिद्धाश्च परमर्षयः ॥ १४० ॥
देवताश्चाभवन्हृष्टास्तत्रस्थास्तस्य क[8]र्मणा ॥ काञ्चनस्य सुनाभस्य सहस्राक्षश्च वासवः ॥ १४१ ॥
उवाच वचनं धीमान्परितोषात्सगद्गदम् ॥ सुनाभं पर्वतश्रेष्ठं स्वयमेव शचीपतिः ॥ १४२ ॥
हिरण्यनाभ शैलेन्द्र परितुष्टोस्मि ते भृशम् ॥ अभयं ते [9]प्रयच्छामि ति[10]ष्ठ सौम्य यथासुखम् ॥१४३॥
साह्यं कृतं ते सुमहद्वि[11]क्रान्तस्य हनूमतः ॥ क्रमतो योजनशतं निर्भयस्य भये सति ॥ १४४ ॥
[12]रामस्यैष हि[13] दूत्येन याति [14]दाशरथेर्हरिः ॥ सत्क्रियां कुर्वता [15]तस्य तोषितोस्मि दृढं त्वया ॥१४५॥
[16]ततः प्रहर्षम[17]गमद्विपुलं [18]पर्वतोत्तमः ॥ देवतानां पतिं दृष्ट्वा परितुष्टं शतक्रतुम् ॥ १४६ ॥
स वै दत्तवरः शैलो बभूवावस्थितस्तदा ॥ हनुमांश्च मुहूर्तेन व्यतिचक्राम सागरम् ॥ १४७ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ [तं [19]प्रयान्तं समुद्वीक्ष्य ह्याकाशे मारुतात्मजम् ॥]
[20]अब्रुवन्सूर्यसंकाशां सुरसां नागमातरम् ॥ १४८ ॥
अयं वातात्मजः श्रीमान्प्लवते सागरोपरि ॥ हनुमान्नाम तस्य त्वं मुहूर्तं विघ्नमाचर ॥ १४९ ॥
राक्षसं रूपमास्थाय सुघोरं पर्वतोपमम् ॥ दंष्ट्राकरालं पिङ्गाक्षं वक्त्रं कृत्वा न[21]भस्समम् ॥ १५० ॥

अन्तरे मध्ये । मया नस्थातव्यमिति वानरसन्निधौ प्रतिज्ञा कृता ॥ १३५ ॥ प्रहसन्निव प्रसन्नमुख इवेत्यर्थः ॥ १३६—१३७ ॥ हित्वा शैलमहार्णवौ मूर्तिमन्तौ तौ हित्वेत्यर्थः । अनेन शैलवत्समुद्रोपि मूर्तिमत्तया तत्राद्दृश्यतेति सूचितं ॥ १३८—१३९ ॥ द्वितीयं समुद्रलङ्घनापेक्षया द्वितीयं तत्पर्वतजयरूपंकर्म ॥ १४०—१४३ ॥ भये सति समुद्रलङ्घनेस्य किं भवि-

---

ष्यःकालःकार्यकालः । त्वरतेत्वरयति । अहश्चाप्यतिवर्ततेलङ्काद्वीपप्रवेशयोग्यमहश्चातिवर्तते । प्रतिज्ञाचेति—' यथाराघवनिर्मुक्तः शरःश्वसनविक्रमः । गच्छेत्तद्वद्गमिष्यामिलङ्कांरावणपालिताम् ' इतिप्रतिज्ञादत्ता । तस्मादिहान्तरेनस्थातव्यं ॥ १३५ ॥ **ति०** प्रहसन्निवेति । एतावत्प्लवनेपिश्रममारोप्यवृथायंप्रयासएतयोरितिप्रहासः ॥ **रामानु०** आलभ्यस्पृष्ट्वा । प्रहसन्निवेत्यत्रेवशब्दोहासप्रकर्षस्यपारमार्थ्यपरःप्रीतिसूचकः । मन्दस्मितंकुर्वन्नित्यर्थः ॥ १३६ ॥ **ति०** भूयऊर्ध्वंततोपिबहूर्ध्वंतंगिरिंअधःप्रदेशवर्तिनमवलोकयन् ॥ १३९ ॥ **रामानु०** साह्यंसहायकर्मसहकारित्वमितियावत् । तेत्वयानिर्भयस्यभयेसतिअतिविस्तृतसमुद्रोपर्याकाशगमनेसमुद्रपतनादिभयनिमित्तसंभावनायामपिनिर्भयस्य ॥१४४॥ **रामानु०** बभूवावस्थितस्तदा तस्मिन्कालेस्वस्थोभूदित्यर्थः । प्रतिप्रयाणवेलायापि ' पर्वतेन्द्रंसुनाभंचसमुपस्पृश्यवीर्यवान् ' इतिमैनाकावस्थानाभिधानात् । सागरं मैनाकाधिष्ठितसागरप्रदेशं ॥ १४७ ॥ **रामानु०** श्रीमान्अत्रश्रीशब्देनातिदूरसमुद्रलङ्घनेप्युपर्युपरिबलाभिवृद्धिप्रयुक्तासुषमोच्यते ॥१४९॥ **स०** रक्षसामयंराक्षसस्तं । करालंक्रूरं। पिङ्गलवर्णयुक्तेअक्षिणीयस्यतं । वक्त्रं मुखं । अर्धर्चादिनिविष्टइतिवक्त्रशब्दःपुँल्लिङ्गः। अतोनभस्स्पृशमित्युपपन्नं । अतएवार्धर्चादिगणोक्तप्रपञ्चनपरे ' वक्त्रनेत्रारण्यगाण्डीवानिनपुंसकेच ' इतिलिङ्गानुशासने चशब्देनपुँल्लिङ्गत्वमप्यनुशिष्टं ।

[पा०] १ ख. श्चोपहाराभिः. २ घ. ङ. झ. ञ. ट. रभिनन्दितः. ३ च. छ. ज. अतऊर्ध्वंसमुत्पत्य. ग. ङ. झ. ञ. ट. अथोर्ध्वंदूरमाप्लुत्य. क. ख. अथोर्ध्वंदूरमुत्प्लुत्य. ४ ख. ङ—ट. मासाद्य. ५ ख. ग. घ. ततश्चोर्ध्वगतिं. झ. ततश्चोर्ध्वंगतिं. ६ ङ.—ट. वायुसूनुर्निरालंबो. ख. वायुपुत्रोनिरालंबो. ७ घ. ङ. झ. ट. कपिकुञ्जरः. ८ च. ज. कर्मणि. ९ घ. प्रदास्यामि. १० झ. ञ. ट. गच्छसौम्य. ११ ग. ङ. झ. द्विश्रान्तस्य. १२ क. च. छ. ज. रामस्यैव. १३ ङ. झ. ञ. ट. हितायैव. १४ ङ. झ. ञ. ट. दाशरथेःकपिः. १५ क. ग.—ट. शक्त्या. १६ ङ. झ. ट. सतत्प्रहर्षं. १७ क. ख. छ.—ट. मलभत्. १८ ञ. पर्वतोभृशं. १९ इदमर्धं च. छ. ज. पाठेषुदृश्यते. २० घ. अब्रुवन्देवसंकाशां. २१ ग.—झ. ट. नभस्स्पृशं. ञ. दिवस्पृशं.

बलमिच्छामहे ज्ञातुं भूयश्चास्य पराक्रमम् ॥ त्वां विजेष्यत्युपायेन विषादं वा गमिष्यति ॥ १५१ ॥
एवमुक्ता तु सा देवी दैवतैः[1]रभिसत्कृता ॥ समुद्रमध्ये सुरसा[2] बिभ्रती राक्षसं वपुः ॥ १५२ ॥
विकृतं च विरूपं च सर्वस्य च भयावहम् ॥ प्लवमानं हनूमन्तमावृत्येदमुवाच ह ॥ १५३ ॥
मम भक्ष्यः प्रदिष्टस्त्वमीश्वरैर्वानरर्षभ ॥ अहं त्वां भक्षयिष्यामि प्रविशेदं[3] ममाननम् ॥ १५४ ॥
[वरं[4] एष पुरा दत्तो मम धात्रेति सत्वरा ॥ व्यादाय वक्त्रं विपुलं स्थिता सा मारुतेः पुरः]॥१५५॥
एवमुक्तः सुरसया प्राञ्जलि[5]र्वानरर्षभः ॥ प्रहृष्टवदनः श्रीमा[6]निदं वचनमब्रवीत् ॥ १५६ ॥
रामो दाशरथि[7]र्नाम प्रविष्टो दण्डकावनम् ॥ लक्ष्मणेन सह भ्रात्रा वैदेह्या[8] चापि[9] भार्यया ॥१५७॥
अन्य[10]कार्यविषक्तस्य बद्धवैरस्य राक्षसैः ॥ तस्य[11] सीता हृता भार्या रावणेन यशस्विनी[12] ॥ १५८ ॥
तस्याः सकाशं दूतोऽहं गमिष्ये रामशासनात् ॥ कर्तुमर्हसि रामस्य साह्यं विषयवासिनी ॥ १५९ ॥
अथवा मैथिलीं दृष्ट्वा रामं चाक्लिष्टकारिणम् ॥ आगमिष्यामि ते वक्त्रं सत्यं प्रतिशृणोमि ते ॥१६०॥
एवमुक्ता हनुमता सुरसा कामरूपिणी ॥ अब्रवीन्ना[13]तिवर्तेन्मां कश्चिदेष वरो मम ॥ १६१ ॥
तं प्रयान्तं समुद्वीक्ष्य सुरसा वाक्यमब्रवीत् ॥ बलं जिज्ञाससमाना[14] वै नागमाता हनूमतः ॥ १६२ ॥

ष्यतीत्यस्माकं भये सतीत्यर्थः ॥ १४४–१५७ ॥ अन्यत्कार्यविषक्तस्य मारीचमृगग्रहणव्यासक्तस्य ॥ १५८ ॥ विषयवासिनी रामराज्यवासिनी ॥ १५९—१६० ॥ नातिवर्तेन्मां ममाननमप्रविश्य न गच्छेत् । अतिवर्तेदित्यत्र परस्मैपदमार्षं । अत्र इतिकरणं द्रष्टव्यं । " अब्रवीन्नातिवर्तेन्मां कश्चिदेष वरो मम " इत्यस्यानन्तरं " तद्दृष्ट्वा व्यादितं वक्त्रं वायुपुत्रः सुबुद्धिमान् " इत्यादिश्लोकाद्रष्टव्याः । मध्ये तं प्रयान्तमित्यादयः केचन श्लोकाः प्रक्षिप्ताः असङ्गताश्च । शतयोजनायतत्वे वानरैर्लङ्कावासिभिश्च ज्ञातः स्यादिति विरोधात् । त इमे प्रक्षिप्तश्लोकाः ॥ " तं प्रयान्तं समुद्वीक्ष्य सुरसा वाक्यमब्रवीत् । बलं जिज्ञासमाना वै नागमाता हनूमतः ॥ प्रविश्य वदनं मेद्य गन्तव्यं वानरोत्तम । वर एष पुरा दत्तो मम धात्रेति सत्वरा ॥ व्यादाय विपुलं वक्त्रं स्थिता सा मारुतेः पुरः । एवमुक्तः सुरसया क्रुद्धो वानरपुङ्गवः ॥ अब्रवीत्कुरु वै वक्त्रं येन मां विषहिष्यसे । इत्युक्त्वा सुरसां क्रुद्धो दशयोजनमायतः ॥ दशयोजनविस्तारो बभूव हनुमांस्तदा । तं दृष्ट्वा मेघसंकाशं दशयोजनमायतम् ॥ चकार सुरसा चास्यं विंशद्योजनमायतम् । हनूमांस्तु ततः क्रुद्धस्त्रिंशद्योजनमायतः ॥ चकार सुरसा वक्त्रं चत्वारिंशत्तथोच्छ्रितम् । बभूव हनुमान्वीरः पञ्चाशद्योजनोच्छ्रितः ॥ चकार सुरसा वक्त्रं षष्टियोजनमायतम् । तथैव हनुमान्वीरस्सप्ततीयोजनोच्छ्रितः ॥ चकार सुरसा वक्त्रमशीतीयोजनोच्छ्रितम् । हनुमानचलप्रख्यो नवतीयोजनोच्छ्रितः ॥ चकार सुरसा वक्त्रं शतयोजनमायतं" इति । प्रकृतं विलिख्यते—तद्दृष्ट्वा व्यादितं त्वास्यं वायुपुत्रः सुबुद्धिमान् । सुसं-

---

अथवा ' यथावाचानिशादिशा' इत्यादिवत्स्पृक्छब्दस्यहलन्तत्वाट्टाबन्तताामाश्रित्यनभसःस्पृशायस्यतदिति ॥१५०॥ **ति०** बलंज्ञानबलमुपायबलंच । पराक्रमंचज्ञातुमिच्छामहे । तदेवविवृणोति—त्वामितिभयस्यचभयावहमितिपाठेसर्वलोकभयस्यापीत्यर्थः ॥ **स०** बलंशारीरं । मैनाकाविश्रमेणैवज्ञातत्वाद्भूयइत्युक्तं । इच्छामहेइच्छामः । केनचिदुपायेनत्वांविजेष्यतिवाकिंवाविषादंदैन्यंगमिष्यतीतिविचारयामः । यद्वाबलं तुभ्यमस्मद्दत्तवरबलं अस्यहनुमतःपराक्रमंचज्ञातुमिच्छामः । यद्युपायेनत्वांविजेष्यतितर्हितत्पराक्रमोविज्ञातः । यदिविषादंगमिष्यतितदास्मद्वरबलंविज्ञातंभवेदिति ॥ १५१ ॥ **शि०** अन्यकार्यंविषक्तस्यदेवादिकार्यसाधनासक्तस्य ॥ १५८ ॥ **ती०** विषयवासिनि रामराज्यवासिनि । त्रैलोक्यनाथत्वाद्रामस्येतिभावः ॥ १५९ ॥

[पा०] १ ख. दैवतैश्चापि. घ. देवैस्तैरभि. च. छ. ज. देवैरपिच. २ क. सहसा. ३ क. प्रविशस्व. ४ ग. ङ.—ट. पाठेष्वयंश्लोकोदृश्यते. ५ ग. छ. ज. ञ. प्राञ्जलिःपवनात्मजः. ६ ख. श्रीमान्सुरसांवाक्यमब्रवीत्. ७ क. ख. दाशरथिः श्रीमान्. ८ च. छ. ज. ञ. सीतया. ९ चैव. ट. सह. १० ङ.—ञ. अस्यकार्ये. ११ ग. ततःसीता. घ. तस्यभार्याहृतादेवी. १२ क. तपस्विनी. १३ ग. न्नातिवर्तेथाः. च. छ. ज. न्नातिवर्तेत. १४ ङ.—ट. मानासा.

[1]प्रविश्य वदनं मेऽद्य गन्तव्यं वानरोत्तम ॥ वर एष पुरा दत्तो मम धात्रेति सत्वरा ॥
व्यादाय [2]वक्त्रं विपुलं स्थिता सा मारुतेः पुरः ॥ १६३ ॥
एवमुक्तः सुरसया क्रुद्धो वानरपुङ्गवः ॥ अब्रवीत्कुरु वै वक्त्रं येन मां [3]विषहिष्यसे ॥ १६४ ॥
इत्युक्त्वा सुरसां क्रुद्धो [4]दशयोजनमायतः ॥ दशयोजनविस्तारो [5]बभूव हनुमांस्तदा ॥ १६५ ॥
[6]तं दृष्ट्वा मे[7]घसंकाशं दशयोजनमायतम् ॥ चकार [8]सुरसा चास्यं विंशद्योजनमायतम् ॥ १६६ ॥
[9]तां दृष्ट्वा विस्तृतास्यां तु वायुपुत्रः सुबुद्धिमान् ॥ [10]हनूमांस्तु ततः क्रुद्धस्त्रिंशद्योजनमायतः ॥१६७॥
चकार [11]सुरसा वक्त्रं चत्वारिंशत्तथोच्छ्रितम् ॥ बभूव हनुमान्वीरः पञ्चाशद्योजनोच्छ्रितः ॥ १६८ ॥
चकार सुरसा वक्त्रं षष्टियोजन[12]मायतम् ॥ [13]तथैव हनुमान्वीरः सप्ततीयोजनोच्छ्रितः ॥ १६९ ॥
चकार सुरसा [14]वक्त्रमशीतीयो[15]जनायतम् ॥ हनुमान्[16]नचलप्रख्यो नवतीयोजनोच्छ्रितः ॥ १७० ॥
चकार सुरसा वक्त्रं शतयोजनमायतम् ॥ १७१ ॥
तद्दृष्ट्वा व्यादितं [17]त्वास्यं [18]वायुपुत्रः सुबुद्धिमान् ॥ दीर्घजिह्वं सुरसया [19]सुघोरं नरकोपमम् ॥
[20]सुसंक्षिप्यात्मनः कायं बभूवाङ्गुष्ठमात्रकः ॥ १७२ ॥
[21]सोऽभिपत्याशु तद्वक्त्रं निष्पत्य च [22]महाजवः ॥ अन्तरिक्षे स्थितः श्री[23]मानिदं वचनमब्रवीत् ॥१७३॥
प्रविष्टोऽस्मि हि ते वक्त्रं दाक्षायणि नमोऽस्तु ते ॥ गमिष्ये यत्र वैदेही [24]सत्यश्चासीद्वरस्तव ॥ १७४ ॥
तं दृष्ट्वा वदनान्मुक्तं चन्द्रं राहुमुखादिव ॥ अब्रवीत्सुरसा देवी स्वेन रूपेण [25]वानरम् ॥ १७५ ॥
अर्थसिद्ध्यै हरिश्रेष्ठ गच्छ सौम्य यथासुखम् ॥ [26]समानयस्व वैदेहीं राघवेण महात्मना ॥ १७६ ॥
तत्तृतीयं हनुमतो दृष्ट्वा कर्म सुदुष्करम् ॥ साधु साध्विति भूतानि प्रशशंसुस्तदा हरिम् ॥ १७७ ॥
स सागरमनाधृष्यमभ्येत्य वरुणालयम् ॥ जगामाकाशमाविश्य वेगेन [27]गरुडोपमः ॥ १७८ ॥
सेविते वारिधाराभिः पतगैश्च निषेविते ॥ चरिते कैशिकाचार्यैरैरावतनिषेविते ॥ १७९ ॥

क्षिप्यात्मनः कायं बभूवाङ्गुष्ठमात्रकः ॥१६१-१७३॥ | दक्षस्यापत्यं दाक्षायणी । तत्त्वं च पूर्वं वरप्रदा-

ति० विंशद्योजनमायतमित्यनन्तरं 'तद्दृष्ट्वाव्यादितंत्वास्यं' इतिप्राचीनःपाठः । 'तांदृष्ट्वा' इत्यादयः 'शतयोजनमायतं' इत्यन्ताःश्लोकास्तुप्रक्षिप्ताइतिकतकः ॥ १६६ ॥ **रामानु०** व्यादितं व्यात्तं । इडागमस्त्वार्षः । अतिविस्तृतंवक्त्रंसूक्ष्मरूपेणप्रविश्याक्लेशेन । निर्गन्तुमयंसमीचीनःसमयइति ज्ञानयोगात्सुबुद्धिमानिति विशेषणं ॥ १७२ ॥ **रामानु०** दाक्षायणीत्यनुवादात्स्ववरप्रदानकथनसमये हनुमन्तमुद्दिश्यस्वकीयंदाक्षायणीत्वमपितयैवकथितमित्यवगन्तव्यं । सत्यंचासीद्वरंतव त्वदास्यप्रविश्यनिर्गमनाद्ब्रह्मणादत्तोवरःसत्यआसीदित्यर्थः । वरशब्दस्य नपुंसकत्वमार्षं ॥ १७४ ॥ **रामानु०** समानयस्व संगमय ॥ १७६ ॥ **रामानु०** कैशिकंरागविशेषः तदाचार्यैः तुंबुरुप्रभृतिभिरित्यर्थः । ऐरावतनिषेविते ऐरावतमितिऋजुदीर्घमिन्द्रधनुरुच्यते । तेननिषेवितेयुक्ते । 'इन्द्रायुधंत्विन्द्रधनुस्तद्दीर्घमृजुरोहितम् । ऐरावतंचविद्युत्तुचञ्चलाचपला' इतिवैजयन्ती ॥ १७९ ॥

[**पा०**] १ ङ. झ. ट. निविश्य. २ घ.—ट. विपुलंवक्त्रं. ३ घ. ङ. झ. ञ. ट. विषहिष्यसि. ४ ङ. झ. ञ. ट. दशयोजनमायतां. घ. पञ्चयोजनमायतः. ५ ङ. झ. ञ. ट. हनूमानभवत्तदा. ६ इदमर्धं. झ. पाठेनदृश्यते. ७ च. छ. ज. गिरिसंकाशं. ८ क. ख. ङ.—ज. ट. सुरसाप्यास्यं. ९ तांदृष्ट्वाविस्तृतास्यांतुइत्यर्धमारभ्यनवार्धानि झ. पाठेनदृश्यन्ते. १० क. अतःपरंहनूमांस्तुत्रिंशद्योजनं. ११ घ. सुरसाचास्यं. क. सुरसाप्यास्यंचत्वारिंशत्तथायतं. १२ ग.—ज. ञ. ट. मुच्छ्रितं. १३ ङ. ञ. ट. तदैव. १४ क. वक्त्रंयोजनाशीतिमायतं. १५ घ. ञ. योजनोच्छ्रितं. १६ ङ. ञ. ट. ननलप्रख्यः. १७ ख. वक्त्रं. क. घ. चास्यं. १८ क. झ. वायुपुत्रस्स. ख. वायुपुत्रस्तु. १९ घ. सुघोरनरकोपमं. ङ.—झ. सुभीमं. २० ख.—ट. ससंक्षिप्यात्मनः. क. संक्षिप्यचात्मनः. घ. ङ. झ. ञ. ट. पाठेषु. सुसंक्षिप्यात्मनःकायमित्यर्धस्यस्थाने. ससंक्षिप्यात्मनःकायंजीमूतइवमारुतः । तस्मिन्मुहूर्तेहनुमान्बभूवाङ्गुष्ठमात्रकः. इत्येकःश्लोकोदृश्यते. २१ ङ.—ट. सोभिपद्याथ. ग. सन्निपत्याशु. २२ ङ.—ट. महाबलः. २३ क. ख. घ. श्रीमान्प्रहसन्निदमब्रवीत्. २४ ख. घ. सत्यंचास्तुवचस्तव. क. सत्यश्चास्तुवरस्तव. २५ ग. वातजं. २६ क. ग.—ट. समानयच. २७ घ. गरुडोयथा.

सिंहकुञ्जरशार्दूलपतगोरगवाहनैः ॥ [1]विमानैः संपतद्भिश्च विमलैः समलंकृते ॥ १८० ॥
वज्राशनि[2]समाघातैः [3]पावकैरुपशोभिते ॥ कृतपुण्यैर्महाभागैः स्वर्गजिद्भि[4]रलंकृते ॥ १८१ ॥
वहता हव्य[5]मत्यर्थं सेविते [6]चित्रभानुना ॥ ग्रहनक्षत्रचन्द्रार्कतारा[7]गणविभूषिते ॥ १८२ ॥
[8]महर्षिगणगन्धर्वनागयक्षसमाकुले ॥ [9]विविक्ते विमले विश्वे विश्वावसुनिषेविते ॥ १८३ ॥
देवराजगजाक्रान्ते चन्द्रसूर्यपथे शिवे ॥ विताने जीवलोकस्य वितते ब्रह्मनिर्मिते ॥ १८४ ॥
बहुशः सेविते वीरैर्विद्याधर[10]गणैर्वरैः ॥ जगाम [11]वायुमार्गे तु गरुत्मानिव [12]मारुतिः ॥ १८५ ॥
[[13]हनुमान्मेघजालानि प्राकर्षन्मारुतो यथा ॥ १८६ ॥
कालागरुसवर्णानि रक्तपीतसितानि च ॥ कपिनाऽऽकृष्यमाणानि महाभ्राणि चकाशिरे ॥ १८७ ॥
प्रविशन्नभ्रजालानि निष्पतंश्च पुनः पुनः ॥ प्रावृषीन्दुरिवाभाति निष्पतन्प्रविशंस्तदा] ॥ १८८ ॥
प्रदृश्यमानस्सर्वत्र हनुमान्मारुतात्मजः ॥ भेजेऽम्बरं निरालम्बं [14]लम्बपक्ष इवाद्रिराट् ॥ १८९ ॥
[15]प्लवमानं तु तं दृष्ट्वा सिंहिका नाम राक्षसी ॥ मनसा चिन्तयामास प्रवृद्धा कामरूपिणी ॥ १९० ॥
[16]अद्य दीर्घस्य कालस्य भविष्याम्यहमाशिता ॥ [17]इदं हि मे महत्सत्त्वं चिरस्य वशमागतम् ॥१९१॥
इति संचिन्त्य मनसा छायामस्य समाक्षिपत् ॥ छायायां [18]गृह्यमाणायां चिन्तयामास [19]वानरः ॥१९२॥
समाक्षिप्तोस्मि सहसा पङ्गूकृतपराक्रमः ॥ प्रतिलोमेन वातेन महानौरिव सागरे ॥ १९३ ॥
तिर्यगूर्ध्वमधश्चैव वीक्षमाण[20]स्ततः कपिः ॥ [21]ददर्श स महत्सत्त्वमुत्थितं लवणाम्भसि ॥ १९४ ॥

नकथनसमये तयैव कथितमित्यनुवादात्कल्प्यते ॥ १७४—१७८ ॥ आकाशगमनमतिदुष्करमित्यमुमर्थं कथयितुं आकाशस्वरूपं वर्ण्यते सेवित इत्यादिना श्लोकसप्तकेन ॥ कैशिकाचार्यैः कैशिके रागविशेषे आचार्यैः विद्याधरविशेषैरित्यर्थः ॥१७९–१८०॥ वज्राशनिसमाघातैः पावकैः वज्राशनिसमाघातैर्हेतुभिर्जातैः पावकैः ॥ १८१ ॥ हव्यं वहता देवेभ्यो हव्यवहनार्थं गतेन । चित्रभानुना वह्निना ॥ १८२ ॥ विश्वे विश्वगते व्यापक इत्यर्थः ॥ १८३ ॥ देवराजगजाक्रान्ते ऐरावतभिन्नदिग्गजाक्रान्ते । विताने वितानतुल्ये । वितत इति वितानविशेषणं ॥१८४—१९० ॥ दीर्घस्य कालस्य दीर्घकाले गते सति । अद्य आशिता आशित्री भुक्तवती । भविष्यामि ॥ १९१ ॥ समाक्षिपत् सम्यग्गृहीतवती ॥ १९२ ॥ पङ्गूकृतपराक्रमः कुण्ठितगतिः । प्रतिलोमेन प्रतिकू-

---

ति० पतगोरगाः पक्षिसर्पाः ॥ १८० ॥ **रामानु०** वज्राशनिसमाघातैःवज्राशन्योःसमःतुल्यःआघातःअभिघातःयेषांतैः ॥ १८१ ॥ **ती०** आकाशस्यैकोनपञ्चाशदग्निसंबन्धमुक्त्वातत्प्रधानभूतचित्रभानुसंबन्धमाह वहतेति ॥ **ति०** वज्राशनिसमस्पर्शैः तद्वत्प्राणहरैः । पावकैःपञ्चाग्निभिरिवस्वर्गजिद्भिरधिष्ठिते ॥ **स०** स्वर्गजिद्भिःप्राप्तस्वर्गैः । धनजिते स्वर्जितेइत्यादाविवजिधातुः प्राप्त्यर्थकः ॥ १८१ ॥ **स०** नक्षत्राणिपुंनक्षत्राणि । तारागणःअश्विन्यादिसमूहः ॥ १८२ ॥ **रामानु०** विविक्तइति । विश्वेविशतीति विश्वःव्यापकइत्यर्थः ॥ १८३ ॥ **रामानु०** वितानेउल्लोचभूते । 'अस्त्रीवितानमुल्लोचः' इत्यमरः । हनुमान्मेघजालानीत्यादिसार्धश्लोकद्वयंप्रमादाल्लिखितं ॥ १८४ ॥ **ति०** महानौर्यथापङ्गूकृतपराक्रमास्तब्धगतिःप्रतिलोमेनवातेनक्रियते । गम्यदेशगतिनिरोधएवात्रस्तब्धगतित्वं । यद्वातेनयथाविपरीतगतिवारणाययन्त्रैःस्तब्धगतिःकार्यतेतथाऽहंकेनचित्स्तब्धगतिःकृतः ॥ १९३ ॥

[पा०] १ ग. च. छ. ज. संपतद्भिश्चविमलैर्विमानैः. घ. विमानैर्निष्पतद्भिश्चविविधैः. २ झ. ट. समस्पर्शैः. ३ ङ. झ. ट. पावकैरिव. ४ ङ. झ. ट. रधिष्ठिते. च. छ. ज. ञ. रधिश्रिते. ५ क. ख. घ.—ट. मत्यन्तं. ६ घ. कृष्णवर्त्मना. ७ क. ख. घ. गणनिषेविते. ८ क. देवगन्धर्व. ९ ग. ङ.—ट. विमले. १० क. घ. ङ. झ. ञ. ट. गणैर्वृते. ११ ख. च. छ. ज. वायुमार्गेण. ङ. झ. ञ. ट. वायुमार्गेच. क. घ. वायुवेगेन. १२ क. वानरः. १३ इमानिपञ्चार्धानि क. ख. घ.—ट. पाठेषुदृश्यन्ते. १४ ङ—ट. पक्षयुक्तइवाद्रिराट्. १५ क. ग. प्लवमानंहि. १६ घ. अद्यैवदीर्घकालस्य. १७ ङ.—ट. इदंममहासत्वं. १८ क.—घ. संगृहीतायां. १९ क. मारुतिः. २० ङ. झ. ञ. ट. स्तदाकपिः. क. ग. घ. च. छ. ज. स्ततस्ततः. २१ ख. ददर्शच. ग. ददर्शसहसासत्वं.

तद्दृष्ट्वा चिन्तयामास मारुतिर्विकृताननम् ॥ [1]कपिराजेन कथितं सत्वमद्भुतदर्शनम् ॥
छायाग्राहि [2]महावीर्यं तदिदं नात्र संशयः ॥ १९५ ॥
स तां बुद्ध्वाऽर्थतत्वेन सिंहिकां मतिमान्कपिः ॥ व्यवर्धत महाकायः प्रावृषीव बलाहकः ॥१९६॥
तस्य सा कायमुद्वीक्ष्य वर्धमानं महाकपेः ॥ वक्त्रं प्रसारयामास [3]पातालान्तरसन्निभम् ॥ १९७ ॥
[4]घनराजीव गर्जन्ती वानरं समभिद्रवत् ॥ १९८ ॥
स ददर्श ततस्तस्या [5]विवृतं सुमहन्मुखम् ॥ कायमात्रं च मेधावी मर्माणि च महाकपिः ॥ १९९ ॥
स तस्या [6]विवृते वक्त्रे वज्रसंहननः कपिः ॥ संक्षिप्य [7]मुहुरात्मानं [8]निष्पपात महाबलः ॥ २०० ॥
आस्ये तस्या निमज्जन्तं ददृशुः सिद्धचारणाः ॥ [9]ग्रस्यमानं यथा चन्द्रं पूर्णं पर्वणि राहुणा ॥२०१॥
ततस्तस्या नखैस्तीक्ष्णैर्मर्माण्युत्कृत्य वानरः ॥ उत्पपाताथ वेगेन मनस्संपातविक्रमः ॥ २०२ ॥
तां तु दृष्ट्या च धृत्या च दाक्षिण्येन [10]निपात्य च ॥ [11]स कपिप्रवरो वेगाद्ववृधे पुनरात्मवान् ॥२०३॥
हृतहृत्सा हनुमता पपात [12]विधुरांभसि ॥ [[13]स्वयंभुवैव हनुमान्सृष्टस्तस्या निपातने] ॥ २०४ ॥
तां हतां [14]वानरेणाशु पतितां वीक्ष्य सिंहिकाम् ॥ भूतान्याकाशचारीणि तमूचुः [15]प्लवगोत्तमम् ॥२०५॥
[16]भीममद्य कृतं कर्म महत्सत्त्वं त्वया हतम् ॥ साधयार्थमभिप्रेतमरिष्टं प्लवतां वर ॥ २०६ ॥
यस्य त्वेतानि चत्वारि वानरेन्द्र यथा तव ॥ धृतिर्दृष्टिर्मतिर्दाक्ष्यं स्वकर्मसु न सीदति ॥ २०७ ॥

लेन ॥ १९३—१९४ ॥ तदिदं छायाग्राहि कपिराजेन कथितं नात्र संशय इति योजना ॥ १९५—१९७ ॥ समभिद्रवत् समभ्यद्रवत् ॥१९८॥ कायमात्रं देहप्रमाणं ॥ १९९ ॥ मुहुस्संक्षिप्य संनिकर्षानुगुणं संकुच्य ॥ २००—२०१ ॥ ततः तेन रूपेण मनस्संपातविक्रमः मनोवेगतुल्यगतिः ॥ २०२ ॥ दृष्ट्या दूरादेव दर्शनेन । धृत्या अस्य नियमनजननधाष्टर्येन । दाक्षिण्येन पाटवेन ॥ २०३ ॥ विधुरा आर्ता ॥ २०४—२०५ ॥ अरिष्टं शुभं यथा भवति तथा । यस्य सिंहिकारूपसत्त्वस्य । दृष्टिः आयतिक्षमसूक्ष्मेक्षणं । मतिः अर्थतत्त्वनिश्चयः । क्रियावत्त्वं दाक्ष्यं यथा तव तथा यस्य चत्वारि सन्ति तत्त्वया हतं । तान्येव चत्वार्याह—धृतिरिति । या धृतिः स्वकर्मसु स्वानुकूलकार्येषु नावसीदति । या दृष्टिर्नावसीदति । या मतिर्नावसीदति । यद्दाक्ष्यं नावसीदति एतानि चत्वारि यस्य सन्ति तत्त्वया हतमिति योजना

स० कायमात्रं कायस्य स्वदेहस्य मात्रा परिमाणं यस्यतत् । स्वशरीरकबलीकरणयोग्यमितियावत् । मर्माणि सन्धिस्थानानि ॥ १९९ ॥ **स०** आत्मानंआत्मीयंवपुः । कंपयतिशत्रूनितिकपिः । कंपेर्नलोपश्चेतिनलोपः । कुडिकेभ्यइतीलं ॥ २०० ॥ **रामानु०** अथवानरःमनस्संपातविक्रमःमनोगमनसमानगतिःसन्तीक्ष्णैर्नखैःतस्याममर्माण्युत्कृत्यततःआस्यात्वेगेनोत्पपात । आस्यविधानात्पूर्वमेवोत्पपातेत्यर्थः ॥ २०२ ॥ **ति०** ननुप्रथमप्रवृत्तवेगस्यसुरसादिःकुण्ठीभावेसतिकथंपुनराकाशगमनंतत्राह—आत्मवान् । वायोरिवस्वाधीनएवतद्गमनविषयोयत्नः । प्रथमंत्वाकाशमार्गप्राप्तिमात्रायमहेन्द्रपर्वतालंबनमितरजनप्रतारणायवेत्याहुः । अत्रकविरुत्प्रेक्षते—तस्याच्छायाग्रहणमात्रेणभक्षणादिशक्तिमत्याःसिंहिकायानिपातने निपातनिमित्तं रावणनाशायस्वात्मरूपरामवत्स्वस्वरूपोहनुमान्सृष्टः । **ति०** महत्सत्वं महाबलाराक्षसीरावणवदशक्यसंहारा । त्वयासंहृतेत्यर्थः । अरिष्टं बाधारहितं । 'रिष हिंसायां' ॥ २०६ ॥ **स०** यस्यपुरुषस्यदृष्टिःअपरोक्षज्ञानं । मतिःपरोक्षज्ञानं दाक्ष्यंदक्षत्वं ॥ २०७ ॥

[**पा०**] १ ङ.—ट. कपिराज्ञायथाख्यातं. क. ख. घ. कपिराज्ञायदाख्यातं. २ घ. महासत्वं. ३ ग.—च. झ. ञ. ट. पातालांबरसंनिभं. क. पातालतलसंनिभं. ४ घ. मेघराजीव. ५ ङ.—ट. विकृतं. ६ ग. ङ.—ट. विकृते. ७ क. च. छ. ज. पुनरात्मानं. ८ क. ङ. झ. ञ. ट. निपपातमहाकपिः. छ. ज. निष्पपातमहाकपिः. ९ क. गृह्यमाणं. १० च. छ. ज. निहत्यसः. ङ. झ. ट. निपात्यसः. ११ ङ. छ. ञ. ट. कपिप्रवीरोवेगेनववृधे. १२ ख. ग. लवणांभसि. १३ इदमर्धं ग.—ट. पाठेषुदृश्यते. १४ च. छ. ज. ञ. वानरेणाथ. ग. वानरेन्द्रेण. १५ क.—घ. छ. ज. प्लवगर्षभं. १६ च. छ. ज. भीममत्यद्भुतंकर्म. क. भीममद्यमहत्कर्म.

स तैः[1] संभावितः पूज्यः प्रतिपन्नप्रयोजनः ॥ जगामाकाशमाविश्य पन्नगाशनवत्कपिः ॥ २०८ ॥
प्राप्तभूयिष्ठपारस्तु सर्वतः प्रतिलोकयन्[2] ॥ योजनानां शतस्यान्ते वनराजिं ददर्श सः ॥ २०९ ॥
ददर्श च पतन्नेव विविधद्रुमभूषितम् ॥ द्वीपं शाखामृगश्रेष्ठो मलयोपवनानि च ॥ २१० ॥
सागरं सागरानूपं[3] सागरानूपजान्द्रुमान् ॥ सागरस्य च पत्नीनां मुखान्यपि[4] विलोकयन् ॥ २११ ॥
स महामेघसंकाशं समीक्ष्यात्मानमात्मवान्[5] ॥ निरुन्धन्तमिवाकाशं[6] चकार मतिमान्मतिम् ॥२१२॥
कायवृद्धिं प्रवेगं च मम[7] दृष्ट्वैव राक्षसाः ॥ मयि कौतूहलं कुर्युरिति मेने महाकपिः[8] ॥ २१३ ॥
ततः शरीरं संक्षिप्य तन्महीधरसन्निभम् ॥ पुनः प्रकृतिमापेदे वीतमोह इवात्मवान् ॥ २१४ ॥
तद्रूपमतिसंक्षिप्य[9] हनुमान्प्रकृतौ स्थितः ॥ त्रीन्क्रमानिव विक्रम्य बलिवीर्यहरो[10] हरिः ॥ २१५ ॥

स चारुनानाविधरूपधारी परं समासाद्य समुद्रतीरम् ॥
परैरशक्यः[11] प्रतिपन्नरूपः समीक्षितात्मा समवेक्षितार्थः ॥ २१६ ॥
ततस्स लम्बस्य गिरेस्समृद्धे विचित्रकूटे[12] निपपात कूटे ॥
सकेतकोद्दालकनालिकेरे[13] महाद्रिकूटप्रतिमो[14] महात्मा ॥ २१७ ॥
ततस्तु संप्राप्य समुद्रतीरं समीक्ष्य लङ्कां गिरिवर्यमूर्ध्नि ॥
कपिस्तु तस्मिन्निपपात पर्वते विधूय रूपं व्यथयन्मृगद्विजान् ॥ २१८ ॥

॥ २०६—२०७ ॥ संभावितः पूजितः । प्रतिपन्नप्रयोजनः प्राक्प्रतिभासितकार्यसारः । सच स्त्रीत्वे दोषे समानेपि सुरसाया जयप्रतिपत्तिः सिंहिकाया वधप्रतिपत्तिश्च ॥ २०८ ॥ प्राप्तभूयिष्ठपारः प्राप्तप्रायतीरः ॥ २०९ ॥ मलयोपवनानि लङ्कामलय इति दक्षिणतीरे स्थितमलयः तस्योपवनानि ॥ २१० ॥ सागरस्य पत्नीनां नदीनां त्रिकूटोत्पन्नानां आत्मानं स्वशरीरं । मतिं चकार मेन इति यावत् ॥ २११— ॥ २१२ ॥ कथं मेन इत्यत्राह कायवृद्धिमिति ॥ २१३ ॥ पुनः प्रकृतिमापेदे पुनर्निजाकारं प्राप्तवान् ॥ २१४ ॥ उक्तं शरीरसंक्षेपं दृष्टान्तार्थमनुवदति—तद्रूपमिति ॥२१५॥ प्रतिपन्नरूपः प्रतिपन्नस्वभावशरीरः । अभूदितिशेषः । समीक्षितात्मा समीक्षितदेहः । समवेक्षितार्थः निरूपितकार्यः । पूर्वोक्तोपसंहारश्लोक एषः ॥ २१६ ॥ लम्बस्य लम्बमानस्येव स्थितस्य अविज्ञाताग्रस्येत्यर्थः । विचित्रकूटे विविधाश्चर्यसमूहे । “ कूटस्त्वस्त्रियां पुञ्जपालयोः ” इति दर्पणः । उद्दालकाः श्लेष्मातकाः ॥ २१७ ॥ व्यथयन्मृगद्विजानित्यादिविशेषं वक्तुमुक्तमर्थमनुवदति—ततस्त्विति ॥ समुद्रतीरं तीरोपर्याकाशं । विधूय

स० प्राप्तभूयिष्ठपारः प्राप्तप्रायं भूयिष्ठपारं महालङ्काद्वीपतीरंयेनसः ॥ २०९ ॥ **ति०** पतन्नेवगच्छन्नेवमलयोपवनानि । अनेनोत्तरतीरइवदक्षिणतीरेपिमलयाख्यःपर्वतोस्तीतिगम्यते ॥ २१० ॥ **ती०** वीतमोहःनिवृत्ताविद्यः ॥ २१४ ॥ **रामानु०** चारुनानाविधरूपधारीतत्तत्कार्यानुगुण्येनपरिगृहीतरमणीयस्थूलसूक्ष्मादिरूपः । परैःसिंहिकादिभिः । अशक्यःअप्रधृष्यः । सःपरंसमुद्रतीरमासाद्यसमीक्षितात्मा समालोकितातिप्रमाणस्वशरीरः समवेक्षितार्थःसमालोचितकार्यः प्रतिपन्नरूपः अङ्गीकृतनिजशरीरः अभूदितिशेषः । **ती०** समवेक्षितार्थःआलोचितानन्तरकार्यः । प्रतिपन्नरूपःअङ्गीकृतप्रृषदंशदेहः ॥११६ ॥ इतिप्रथमःसर्गः ॥१॥

[पा०] १ क. संपूजितःपूज्यैः. क. ज.—झ. ट. संपूजितःपूज्यः. २ ङ. झ. ञ. ट. परिलोकयन्. च. प्रविलोकयन्. ३ क. ङ. च. छ. झ. ञ. ट. सागरानूपान्. ४ ख. ग. मुखान्यभि. ५ ख. मात्मना. ६ घ. संनिरुद्धमिवा. ७ घ. दृष्ट्वैवमम. ८ ङ. ट. महामतिः. ९ ग. च. छ. ज. तद्रूपमपि. १० घ. बलियज्ञहरो. क. बलवीर्याधिको. ११ ख. ङ. झ. ट. रशक्यं. १२ क. सचित्रकूटे. १३ ङ.—ट. नारिकेले. १४ ख.—छ. झ. ञ. ट. महाभ्रकूट.

स सागरं दानवपन्नगायुतं बलेन विक्रम्य महोर्मिमालिनम् ॥
निपत्य तीरे च महोदधेस्तदा ददर्श लङ्काममरावतीमिव ॥ २१९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे प्रथमः सर्गः ॥ १ ॥

द्वितीयः सर्गः ॥ २ ॥

हनुमता लङ्काया राक्षसगणरक्षणादिनिरीक्षणेनेतरदुराधर्षत्वादिचिन्तनपूर्वकं बिडालतुल्यपरिमाणकवपुषासता चन्द्रोदयसमये लङ्काप्रवेशनं ॥ १ ॥

स सागरमनाधृष्यमतिक्रम्य महाबलः ॥ त्रिकूटशिखरे लङ्कां स्थितां स्वस्थो ददर्श ह ॥ १ ॥
ततः पादपमुक्तेन पुष्पवर्षेण वीर्यवान् ॥ अभिवृष्टः स्थितस्तत्र बभौ पुष्पमयो यथा ॥ २ ॥
योजनानां शतं श्रीमांस्तीर्त्वाऽप्युत्तमविक्रमः ॥ अनिश्श्वसन्कपिस्तत्र न ग्लानिमधिगच्छति ॥ ३ ॥
शतान्यहं योजनानां क्रमेयं सुबहून्यपि ॥ किं पुनस्सागरस्यान्तं संख्यातं शतयोजनम् ॥ ४ ॥
स तु वीर्यवतां श्रेष्ठः प्लवतामपि चोत्तमः ॥ जगाम वेगवाँल्लङ्कां लङ्घयित्वा महोदधिम् ॥ ५ ॥
शाद्वलानि च नीलानि गन्धवन्ति वनानि च ॥ गण्डवन्ति च मध्येन जगाम नगवन्ति च ॥६॥
शैलांश्च तरुसंछन्नान्वनराजीश्च पुष्पिताः ॥ अभिचक्राम तेजस्वी हनुमान्प्लवगर्षभः ॥ ७ ॥
स तस्मिन्नचले तिष्ठन्वनान्युपवनानि च ॥ स नगाग्रे च तां लङ्कां ददर्श पवनात्मजः ॥ ८ ॥
सरलान्कर्णिकारांश्च खर्जूरांश्च सुपुष्पितान् ॥ प्रियालान्मुचुलिन्दांश्च कुटजान्केतकानपि ॥ ९ ॥
प्रियङ्गून्गन्धपूर्णांश्च नीपान्सप्तच्छदांस्तथा ॥ असनान्कोविदारांश्च करवीरांश्च पुष्पितान् ॥ १० ॥
पुष्पभारनिबद्धांश्च तथा मुकुलितानपि ॥ पादपान्विहगाकीर्णान्पवनाधूतमस्तकान् ॥ ११ ॥
हंसकारण्डवाकीर्णा वापीः पद्मोत्पलायुताः ॥ आक्रीडान्विविधान्रम्यान्विविधांश्च जलाशयान्॥१२॥

रूपं पूर्वरूपं विहाय । वृत्तमुपजातिः ॥२१८—२१९॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने प्रथमः सर्गः ॥ १ ॥

स सागरमित्यादि ॥ १—३ ॥ समुद्रलङ्घने कुतो ग्लानिं नाध्यगच्छदित्यत्राह—शतानीति ॥ ४—५॥ गण्डवन्ति स्थूलोपलवन्ति । नामैकदेशे नामग्रहणेन गण्डशब्देन गण्डशैल उच्यते ॥ ६—७ ॥ स तस्मिन्नित्यर्धे ददर्शेत्यपकृष्यते ॥ ८ ॥ सरलान् यूपसरलान् । कर्णिकारान्परिव्याधान् । खर्जूरान् कण्टकच्छदान् । प्रियालान् धनुःपटान् । मुचुलिन्दान् जम्बीरान् ॥ ९ ॥ प्रियङ्गून् फलिनः । गन्धपूर्णान् नीपान् असनान् । कोविदारान् चमरिकान् ॥१०—११ ॥ आक्रीडान् सर्वसाधारणक्रीडास्थानानि ॥१२॥

स० स्वस्थउत्तरत्रकथंकर्तव्यमितिचित्तवैक्लव्यरहितः ॥ १० ॥ **रामानु०** समुद्रलङ्घनेकुतःश्रमंनाध्यगच्छत्तत्राह—शतान्यहमिति । अहंसुबहून्यपियोजनानांशतानिक्रमेयं । शतयोजनसंख्याकंसागरस्यान्तंकिंपुनरित्यमन्यतेतिशेषः ॥ ४ ॥ **रामानु०** अत्र शैलशब्दःशृङ्गपरः । लंबाख्यगिरेरुपरितनस्योच्यमानत्वात् ॥ ७ ॥ वनानि स्वतएवजातवृक्षसमूहान् । उपवनानिस्थापितवृक्ष-

[पा०] १ क. घ. ङ. झ. ञ. ट. त्रिकूटस्यतटे. २ क. ग. घ. ङ. झ. ञ. ट. स्थितःस्वस्थो. ३ ग. ङ. झ. ञ. ट. अभिवृष्टस्ततस्तत्र. ४ ङ. झ. ञ. ट. हरिः. ५ च. छ. ज. शतंतीर्त्वातथाप्युत्तम. ६ क. ङ. झ. ञ. ट. मधुमन्तिच. ग. च. छ. गजवन्तिच. ७ घ. छ. तरुसंपन्नान्. ८ ग. ङ.—ट. स्थितांलङ्कां. ९ ग. बकुलान्मु. १० क. ख. न्सप्तच्छदानपि. ११ ग. पनसान्को. १२ छ. ज. भारपिनद्धांश्च. ग. भारातिभारांश्च. क. भारातिबद्धांश्च. १३ झ. ञ. ट. पद्मोत्पलावृताः.

संततान्[1]विविधैर्वृक्षैः सर्वर्तुफलपुष्पितैः ॥ उद्यानानि च रम्याणि ददर्श कपिकुञ्जरः ॥ १३ ॥
समासाद्य च लक्ष्मीवाँल्लङ्कां रावणपालिताम् ॥ परिघाभिः सपद्माभिः सोत्पलाभिरलंकृताम् ॥१४॥
सीतापहरणार्थेन रावणेन सुरक्षिताम् ॥ स[2]मन्ताद्विचरद्भिश्च राक्षसैरुग्रधन्विभिः ॥ १५ ॥
काञ्चनेनावृतां रम्यां प्राकारेण महापुरीम् ॥ गृहैश्च ग्र[3]हसंकाशैः शारदाम्बुदसन्निभैः ॥ १६ ॥
पाण्डुराभिः प्रतोलीभिरुच्चाभिरभिसंवृताम् ॥ अट्टालकशताकीर्णां[4] पताकाध्व[5]जमालिनीम् ॥ १७ ॥
तोरणैः काञ्चनैर्दिव्यैर्लतापङ्क्तिविचित्रि[6]तैः ॥ ददर्श हनुमाँल्लङ्कां [7]दिवि देवपुरीमिव ॥ १८ ॥
गिरिमूर्ध्नि स्थितां ल[8]ङ्कां पाण्डुरैर्भवनैः शुभैः ॥ द[9]दर्श स कपिश्रेष्ठः पु[10]रमाकाशगं यथा ॥ १९ ॥
पालितां राक्षसेन्द्रेण निर्मितां विश्वकर्मणा ॥ प्लवमानामिवाकाशे ददर्श ह[11]नुमान्पुरीम् ॥ २० ॥
वप्रप्राकारजघनां वि[12]पुलाम्बुनवाम्बराम् ॥ शतघ्नीशूलकेशान्तामट्टालकवतंसकाम् ॥
[13]मनसेव कृतां लङ्कां निर्मितां विश्वकर्मणा ॥ २१ ॥
द्वारमुत्तरमासाद्य चिन्तयामास वानरः ॥ २२ ॥
कै[14]लासशिखरप्रख्यामालिखन्तीमिवाम्बरम् ॥ डीयमानामि[15]वाकाशमुच्छ्रितैर्भवनोत्तमैः ॥ २३ ॥

उद्यानानि राजयोग्यानि । सर्वर्तुफलपुष्पितैः सर्वर्तुषु फलपुष्पाण्येषां संजातानि तैः ॥ १३ ॥ समासाद्य ददर्शेति क्रियाभेदाल्लङ्कापदावृत्तिः । लक्ष्मीवान् जयहेतुकान्तिमान् । उत्पलानि पद्मव्यतिरिक्तानि सरसिजानि ॥ १४ ॥ सीतापहरणं अर्थः प्रयोजनं यस्य तेन । सुरक्षितत्वे हेतुरयं । विचरद्भिश्चेत्यत्र चकारो भिन्नक्रमः । राक्षसैश्च सुरक्षितां ॥ १५ ॥ ग्रहसंकाशैः नवग्रहतुल्यैः ॥ १६ ॥ पाण्डुराभिः सुधालिप्तभूमिकत्वात्सिताभिः । प्रतोलीभिः वीथीभिः । अट्टालकाः अट्टाः । पताकाध्वजमालिनीं लतादिरेखाविचित्रितपटविशिष्टाः पताकाः । मत्स्यमकराद्याकारा ध्वजाः । व्रीह्यादित्वादिनिः ॥ १७ ॥ लतापङ्क्तयः लताकाररेखाः ॥ १८—२० ॥ वप्रेत्यादावपि ददर्श हनुमान्कपिरित्यनुवर्तते । वप्रं प्राकारमूर्तिकः । प्राकारः सालः । विपुलाम्बु परिघारूपं नवाम्बरं यस्यास्सा । शतघ्नी यन्त्रविशेषः । वतंसः अवतंसः । भागुरिमतेनाल्लोपः । वस्तुतो विश्वकर्मणा निर्मितां विचार्यमाणे केनापि मनसा निर्मितामिव स्थितामित्युत्प्रेक्षा ॥२१॥ उत्तरं द्वारमासाद्य । चिन्तयामास मनसा निरूपयामास । वैदेहीदर्शनोपायमिति शेषः ॥ २२ ॥ डीयमानां गच्छन्तीं । डीङ् विहायसागतौ इत्यस्मा-

षण्डानि । सनगंवृक्षसहितंयदग्रंतस्मिन्स्थितांलङ्कांचददर्श ॥ ८ ॥ **ती०** अट्टालकशताकीर्णां प्राकारवेदिकोपरियुद्धार्थंपरिकल्पितमन्नविशेषशतसंकुलां । ददर्शहनुमाँल्लङ्कामितिपुनर्दर्शनाभिधानंविशेषान्तरविवक्षयोपमानान्तरविवक्षयावा ॥ **स०** पताकासौभाग्यं तस्याध्वजः सूचकसचेलयष्टिविशेषः । तेनमालतेशोभतेसातथा ॥ अभिधानंतूक्तं । **ति०** गिरिमूर्धस्थत्वादेवाकाशेप्लवमानामिव । लङ्कांद्रष्टुर्हनूमतइवतद्वर्णनप्रसक्तस्यकवेरप्याश्चर्यमग्नतयाददर्शेतिपुनरुक्तिर्नदोषाय । विस्मयेनपुनःपुनर्ददर्शेतिवातात्पर्यं ॥१७—२०॥ **रामानु०** वप्रं चयः । प्राकाराधारवेदिकेतियावत् । ‘ स्याच्चयोवप्रमस्त्रियां ’ इत्यमरः । अट्टालकाःवतंसःकर्णाभरणंयस्यास्सातां । **ति०** विपुलांबुःसमुद्रोवनानिचांबरंवासोयस्यास्तां । **स०** विश्वकर्मणानिर्मितामपिमनसेवकृतां मनोमयसदृशीं ॥२१॥ **ति०** कैलासोनिलयःस्थानंयस्यअलकाद्वारस्यतत्प्रख्यंउत्तरद्वारं । उच्छ्रितैर्भवनोत्तमैःअंबरमालिखन्तमिव । आकाशंध्रियमाणमिवआकाशधारणं कुर्वदिव ॥ **स०** कैलासरूपोयोनिलयःरुद्रभवनंतत्प्रख्यंतत्सदृशं । यद्वाकैलासनिलयोभवस्तत्प्रख्यं हरस्यापिकेवलंशुभ्ररूपत्वात् । एतादृशंद्वारमासाद्येतिपूर्वेणान्वयः । आलिखन्तं आलिखत् । ‘तदशिष्यं’ इतिलिङ्गस्यातन्त्रत्वोक्तेः । **रामानु०** आलिखन्तमिति लिङ्गव्यत्ययः ॥ डीयमानामिवउद्गच्छन्तीमिव । डीयमानत्वादिविशेषणविशिष्टा या तस्यालङ्कायाःमहतींगुप्तिंसागरंचरावणंघोरं

[पा०] १ छ. ज. संततैर्विविधैः. २ ज. विहायसिचरद्भिश्च. ३ क.—ट. गिरिसंकाशैः. ४ च. ज. समाकीर्णां. ५ ङ. झ. ञ. ट. ध्वजशोभितां. घ. ध्वजशालिनीं. ६ ञ. ट. विराजितैः. ७ ङ. झ. ञ. ट. देवोदेवपुरीमिव. ८ क. ग. च. रम्यां. ९ ग. सददर्शकपिःश्रीमान्. क. ख. घ.—ट. ददर्शसकपिःश्रीमान्. १० ङ. ञ. ट. पुरीमाकाशगामिव. ११ घ.—ट. हनुमान्कपिः. १२ घ. विपुलांबुधरांबरां. ङ. झ. ञ. ट. विपुलांबुवनांबरां. १३ ग. मनसैवतदालङ्कां. १४ क. ख. ङ. च. छ. झ. ञ. ट. कैलासनिलयप्रख्यमालिखन्तमिवा. १५ ङ. झ. ट. ध्रियमाणमिवाकाशं. ख. पिबन्तीमिवचाकाशं.

संपूर्णां राक्षसैर्घोरैर्नागैर्भोगवतीमिव ॥ अचिन्त्यां सुकृतां स्पष्टां कुबेराध्युषितां पुरा ॥ २४ ॥
दंष्ट्रिभिर्बहुभिः शूरैः शूलपट्टिशपाणिभिः ॥ रक्षितां राक्षसैर्घोरैर्गुहामाशीविषैरिव ॥ २५ ॥
तस्याश्च महतीं गुप्तिं सागरं च निरीक्ष्य सः ॥ रावणं च रिपुं घोरं चिन्तयामास वानरः ॥ २६ ॥
आगत्यापीह हरयो भविष्यन्ति निरर्थकाः ॥ नहि युद्धेन वै लङ्का शक्या जेतुं सुरैरपि ॥ २७ ॥
इमां तु विषमां दुर्गां लङ्कां रावणपालिताम् ॥ प्राप्यापि स महाबाहुः किं करिष्यति राघवः ॥२८॥
अवकाशो न सान्त्वस्य राक्षसेष्वभिगम्यते ॥ न दानस्य न भेदस्य नैव युद्धस्य दृश्यते ॥ २९ ॥
चतुर्णामेव हि गतिर्वानराणां महात्मनाम् ॥ वालिपुत्रस्य नीलस्य मम राज्ञश्च धीमतः ॥ ३० ॥
यावज्जानामि वैदेहीं यदि जीवति वा नवा ॥ तत्रैव चिन्तयिष्यामि दृष्ट्वा तां जनकात्मजाम् ॥३१॥
ततः स चिन्तयामास मुहूर्तं कपिकुञ्जरः ॥ गिरिशृङ्गे स्थितस्तस्मिन्रामस्याभ्युदये रतः ॥ ३२ ॥
अनेन रूपेण मया न शक्या रक्षसां पुरी ॥ प्रवेष्टुं राक्षसैर्गुप्ता क्रूरैर्बलसमन्वितैः ॥ ३३ ॥
उग्रौजसो महावीर्या बलवन्तश्च राक्षसाः ॥ वञ्चनीया मया सर्वे जानकीं परिमार्गता ॥ ३४ ॥
लक्ष्यालक्ष्येण रूपेण रात्रौ लङ्कापुरी मया ॥ प्रवेष्टुं प्राप्तकालं मे कृत्यं साधयितुं महत् ॥ ३५ ॥
तां पुरीं तादृशीं दृष्ट्वा दुराधर्षां सुरासुरैः ॥ हनुमांश्चिन्तयामास विनिश्चित्य मुहुर्मुहुः ॥ ३६ ॥
केनोपायेन पश्येयं मैथिलीं जनकात्मजाम् ॥ अदृष्टो राक्षसेन्द्रेण रावणेन दुरात्मना ॥ ३७ ॥
न विनश्येत्कथं कार्यं रामस्य विदितात्मनः ॥ एकामेकश्च पश्येयं रहिते जनकात्मजाम् ॥ ३८ ॥
भूताश्चार्था विपद्यन्ते देशकालविरोधिताः ॥ विक्लवं दूतमासाद्य तमः सूर्योदये यथा ॥ ३९ ॥

च्छानच् ॥ २३—३० ॥ एवं विचार्य नायमेतद्विचारकाल इत्यनुशेते—यावदिति ॥ यावत् यदा । जीवति वा न वेति वैदेहीं जानामि । तत्रैव काले तां जनकात्मजां दृष्ट्वा चिन्तयिष्यामि । यद्वा यावच्छब्दोवधारणे । जानाम्येव जीवति वा नवेति जानाम्येव । यदि जीवति तदा तां जनकात्मजां दृष्ट्वा तत्रैव तत्काल एव । चिन्तयिष्यामीत्यन्वयः ॥ ३१ ॥ चिन्तयामास वैदेहीदर्शनोपायमिति शेषः ॥ ३२—३४ ॥ लक्ष्यालक्ष्येति लक्ष्यशरीरत्वे राक्षसा गृह्णीयुः । अलक्ष्यशरीरत्वे सर्वा लङ्का न विचेतुं शक्या । कृत्यं साधयितुं प्रवेष्टुं कृत्यसाधनाय प्रवेष्टुं । प्राप्तकालं युक्तं ॥३५॥ विनिश्चित्य सीतान्वेषणप्रकारं विनिश्चित्य । मुहुर्मुहुस्तमेव चिन्तयामासेत्यर्थः ॥३६—३७॥ एकश्च पश्येयमिति अत्रापि कथमित्यनुषञ्जनीयं । रहिते एकान्ते ॥३८॥ पण्डितेन मुहुर्मुहुर्विचार्य कार्याणि कर्तव्यानि नतु पण्डितमानिना सकृद्विचार्य कर्तव्यानि तथासति

रिपुंचनिरीक्ष्यज्ञात्वावानरश्चिन्तयामासेतिसंबन्धः ॥ २३ ॥ **रामानु०** आगत्यापीति । अत्रापिशब्देनदुस्तरसागरलङ्घनपूर्वकमागमनमेवदुर्घटमितिसूच्यते ॥ २७ ॥ **रामानु०** सःसालगिरिभूविदलनादिषुदृष्टपराक्रमइत्यर्थः ॥ **स०** राघवःकिंकरिष्यतीत्येतल्लङ्कास्तुत्यर्थं । नतुरामस्यासामर्थ्याभिप्रायं । **ति०** अविषमांनविद्यतेविषमायतस्तां ॥२८॥ **रामानु०** सान्त्वस्यावकाशाभाव आसुरप्रकृतित्वात् । दानस्यावकाशाभावोऽर्थोपचितत्वात् । भेदस्यावकाशाभावो बलदर्पितत्वात् । युद्धस्यावकाशाभावो बुद्धिपराक्रमयुक्तत्वात् ॥ २९ ॥ **स०** आगत्यापीति पूर्वमङ्गीकृत्य सर्वेषामागमनमुक्तं । वस्तुतस्तदपि नसंभवतीत्याह—चतुर्णामिति ॥३०॥ **ति०** रामस्याभ्युदयं तदभ्युदयरूपसीतान्वेषणोपायं ॥ ३२ ॥ **रामानु०** विनिश्चस्यमुहुर्मुहुरित्यनेन समुद्रलङ्घनादपि लङ्काप्रवेशस्यदुष्करत्वंद्योत्यते ॥ ३६ ॥ **ती०** पृषदंशकमात्रः पृषान्मूषिकान्दशतीतिपृषदंशोमार्जारः । ‘ ओतुर्बिडालोमार्जारःपृषदंशकआखुभुक् ’ इत्यमरः ॥ **शि०** वृषदंशकमात्रःवृषाणांमूषकाणांदंशकोमार्जारःतन्मात्रः । “ वृषोगव्याखुधर्मयोः ” इतिहैमः

[पा०] १ ट. राक्षसैर्वीरैः. २ घ. पुष्टां. ३ घ. शूलमुद्गरपाणिभिः. ४ ग. आगताश्चापि. ५ ग. सुरासुरैः. ६ ङ. झ. ञ. ट. इमांत्वविषमां. ७ क. ख. घ.—ट. लंकांदुर्गां. ८ ङ. च. छ. ञ. ट. सुमहाबाहुः. ९ सान्त्वस्तु. १० क. ग. ष्वधिगम्यते. ११ ङ. ञ. ट. तस्मिन्नां. १२ ञ. तदेव. १३ ख. ङ. झ. ञ. ट. गिरेःशृङ्गे. १४ च. छ. ज. स्थितःश्रीमान्. १५ ङ. झ. रामस्याभ्युदयंततः. १६ ङ.—ट. महौजसो. १७ झ. विनिश्चस्य. १८ क. रामस्याक्लिष्टकर्मणः. १९ झ. ञ. मेकस्तु. २० ग. च. ज. ञ. भूतार्थाश्च. २१ ङ. झ. विनश्यन्ति.

अर्थानर्थान्तरे बुद्धिर्निश्चिताऽपि न शोभते ॥ [1]घातयन्ति हि कार्याणि दूताः पण्डितमानिनः ॥४०॥
न विनश्येत्कथं कार्यं वैक्लब्यं न कथं भवेत् ॥ लङ्घनं च समुद्रस्य कथं नु [2]न वृथा भवेत् ॥ ४१ ॥
मयि दृष्टे तु रक्षोभी रामस्य विदितात्मनः ॥ भवेद्व्यर्थमिदं कार्यं रावणानर्थमिच्छतः ॥ ४२ ॥
न हि शक्यं क्वचित्स्थातुमविज्ञातेन राक्षसैः ॥ अपि राक्षसरूपेण किमुतान्येन केनचित् ॥ ४३ ॥
वायुरप्यत्र [3]न ज्ञातश्चरेदिति मतिर्मम ॥ न [4]ह्यस्त्यविदितं किंचिद्राक्षसानां बलीयसाम् ॥ ४४ ॥
इहाहं यदि तिष्ठामि स्वेन रूपेण संवृतः ॥ विनाशमुपयास्यामि भर्तुरर्थश्च [5]हीयते ॥ ४५ ॥
तदहं स्वेन रूपेण रजन्यां ह्रस्वतां गतः ॥ [6]लङ्कामधिपतिष्यामि राघवस्यार्थसिद्धये ॥ ४६ ॥
रावणस्य पुरीं [7]रात्रौ प्रविश्य सुदुरासदाम् ॥ विचिन्वन्भवनं सर्वं द्रक्ष्यामि जनकात्मजाम् ॥ ४७ ॥
इति संचिन्त्य हनुमान्सूर्यस्यास्तमयं [10]कपिः ॥ आचकाङ्क्षे तदा वीरो वैदेह्या दर्शनोत्सुकः ॥ ४८ ॥
सूर्ये चास्तं गते रात्रौ देहं संक्षिप्य मारुतिः ॥ वृषदंशक[11]मात्रः सन्बभूवाद्भुतदर्शनः ॥ ४९ ॥
प्रदोषकाले हनुमांस्तूर्ण[12]मुत्प्लुत्य वीर्यवान् ॥ प्रविवेश पुरीं रम्यां [13]सुविभक्तमहापथाम् ॥ ५० ॥
प्रासादमालाविततां स्तम्भैः [14]काञ्चनराजतैः ॥ शातकुम्भमयैर्जालैर्गन्धर्वनगरोपमाम् ॥ ५१ ॥
[15]सप्तभूमाष्टभूमैश्च स ददर्श महापुरीम् ॥ [16]तलैः स्फटिकसंकीर्णैः कार्तस्वरवि[17]भूषितैः ॥ ५२ ॥

दोषः स्यादित्याह—भूताश्चेति ॥ भूताश्चार्थाः सम्यगुपायप्रयोगान्निष्पन्नप्राया अप्यर्थाः । विक्लबं अधीरं अविमृश्यकारिणं । दूतमासाद्य देशकालविरोधितास्सन्तः । सूर्योदये तमो यथा तम इव तद्दूतस्याविमृश्यकारित्वेन सद्य एव विपद्यन्ते । नश्यन्तीत्यर्थः ॥ ३९ ॥ न केवलं कार्यहानिः किन्तु स्वाम्यादीनां बुद्धिशून्यतापि स्यादित्याह—अर्थेति ॥ अत्रापि विक्लबं दूतमासाद्येत्यनुवर्तते । अर्थानर्थान्तरे अर्थानर्थयोः प्रयोजनसाधनयोः कार्याकार्ययोः । अन्तरे विषये । निश्चिता राज्ञा सचिवैश्च निर्णीता । बुद्धिः । विक्लबं दूतमासाद्य न शोभते अनर्थकारिणी भवतीत्यर्थः । इदमेव समर्थयते—घातयन्तीति ॥ ४० ॥ प्रागुक्तदोषाः स्वस्मिन्कथं न स्युरिति चिन्तयति—न विनश्येदिति ॥ कार्यं रामकार्यं । कथं केनोपायेन न विनश्येत् । किमद्यापराह्ण एव लङ्काप्रवेष्टव्या उत रात्रौ । किमनेनैव महता रूपेण प्रवेष्टव्या उत ह्रस्वेन रूपेणेत्यर्थः । वैक्लब्यं ममापाण्डित्यं कथं न भवेत् ॥ ४१ ॥ अपराह्णे प्रवेशेदोषमाह—मयीति ॥ ४२ ॥ महता रूपेण प्रवेशं निराचष्टे—न हीति ॥ ४३—४४ ॥ स्वेन रूपेण स्वाभाविकमहता रूपेण ॥ ४५ ॥ परिशेषाद्रात्रौ ह्रस्वरूपेणैव प्रवेष्टव्यमित्याह—तदहमिति ॥ ४६—४८ ॥ स्वेन रूपेण वृषदंशकमात्रः बिडालप्रमाणः ॥ ४९ ॥ प्रविवेश प्रवेष्टुमुपक्रान्तः । चतुर्थे सर्गे प्रवेशस्य वक्ष्यमाणत्वात् । लङ्कादर्शनं तु त्रिकूटदर्शनस्थित्या ॥ ५० ॥ काञ्चनराजतैः स्तम्भैः शातकुम्भमयैर्जालैश्च उपलक्षितां । गन्धर्वनगरोपमामिति । गन्धर्वनगरं नाम नानारत्नमयगोपुरप्रासादादियुक्तनगरादिवद्भासमानमभ्रचित्रं तद्वदाश्चर्यावहामित्यर्थः । यथोक्तं " अनेन रत्नाकृति खे विराजते पुरं पताकाध्वजतोरणान्वितम् । यदा तदा हस्तिमनुष्यवाजिनां पिबत्यसृग्भूरि रणे वसुन्धरा" इति॥५१॥ सप्तभूमाष्टभूमैश्चेति । भूमिशब्देनआसनशयनादियो-

॥ ३९ ॥ **रामानु०** अभ्रंलिहत्वातिविचित्रत्वाभ्यांगन्धर्वनगरौपम्यं ॥ स्फटिकसंकीर्णैःकार्तस्वरविभूषितैश्चतलैरुपलक्षितैः सप्तभौमाष्टभौमाः भूमिषुभवन्तीतिभौमानिस्थलानि । सप्त भौमानियेषांतेसप्तभौमाः । एवमष्टभौमाः । सप्तभौमाश्चाष्टभौमाश्चतैः । प्रासादैरितिशेषः । तैरुपलक्षितांपुरींददर्शेतियोजना ॥ ५१—५२ ॥

[पा०] १ घ. ङ. झ. ट. घातयन्तीह. २ ख. घ. ङ. झ. ञ. ट. नभवेद्वृथा. ३ ग. ङ. च. छ. झ. ञ. नाज्ञातः. ४ ङ. झ. ट. ह्यत्राविदितं. ५ झ. ञ. ट. हास्यति. ६ क. ख. ग. ङ. च. ज. झ. ट. लङ्कामभि. ७ च. छ. ज. ञ. रम्यां. ८ ङ.—ट. प्रविश्यभवनं. ९ ङ. च. झ. ञ. ट. निश्चित्य. १० क. च. छ. ज. हरिः. ११ क. ङ. झ. ञ. ट. मात्रोथ. १२ क. घ. च.—ट. मुत्पत्य. १३ ङ. च. छ. ञ. ट. प्रविभक्त. १४ ङ. झ. ञ. ट. काञ्चनसंनिभैः. १५ झ. सप्तभौमाष्टभौमैश्च. १६ ङ.—ट. स्थलैः. १७ च. छ. ज. ञ. परिष्कृतैः.
छ. झ. ञ. ट. केल.

वैडूर्यमणिचित्रैश्च मुक्ताजालविभूषितैः ॥ [1]तलैः शुशुभिरे तानि [2]भवनान्यत्र रक्षसाम् ॥ ५३ ॥
काञ्चनानि विचित्राणि तोरणानि च रक्षसाम् ॥ लङ्कामुद्योतयामासुः सर्वतः समलङ्कृताम् ॥ ५४ ॥
अचिन्त्यामद्भुताकारां दृष्ट्वा लङ्कां महाकपिः ॥ आसीद्विषण्णो हृष्टश्च वैदेह्या दर्शनोत्सुकः ॥ ५५ ॥
स [3]पाण्डुरोद्विद्धविमानमालिनीं महार्हजाम्बूनदजालतोरणाम् ॥
यशस्विनीं रावणबाहुपालितां क्षपाचरैर्भीमबलैः [4]समावृताम् ॥ ५६ ॥
चन्द्रोपि साचिव्यमिवास्य कुर्वंस्तारागणैर्मध्यगतो विराजन् ॥
जोत्स्नावितानेन वितत्य लोकं[5]मुत्तिष्ठते नैकसहस्ररश्मिः ॥ ५७ ॥
शङ्खप्रभं क्षीरमृणालवर्णमुद्गच्छमानं व्यवभासमानम् ॥
ददर्श चन्द्रं स [6]हरिप्रवीरः पोप्लूयमानं सरसीव हंसम् ॥ ५८ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्वितीयः सर्गः ॥ २ ॥

तृतीयः सर्गः ॥ ३ ॥

लङ्काभिमानिन्यामहाराक्षस्या निशि लङ्कांप्रविशतोहनुमतः प्रत्यक्षीभूय साधिक्षेपंप्रतिषेधनपूर्वकं स्वपाणितलेन ताडनं ॥ १ ॥ ततोहनुमता नारीतिकरुणया वाममुष्टिनामन्दंताडने पतितविह्वलयातया तंप्रति कपिना स्वपराजयेसति लङ्काविनाशप्रतिपादकब्रह्मवचननिवेदनेन नगरान्तःप्रवेशाभ्यनुज्ञानं ॥ २ ॥

स लम्बशिखरे लम्बे लम्बतोयदसन्निभे ॥ सत्त्वमास्थाय मेधावी हनुमान्मारुतात्मजः ॥ १ ॥

ग्यं तलमुच्यते । सप्त भूमयो येषां ते सप्तभूमाः । "कृष्णोक्पाण्डुसंख्यापूर्वाया भूमेरजिष्यते" इत्यच् समासान्तः । एवमष्टभूमाः । सप्तभूमादिशब्देन तादृशाः प्रासादविशेषा उच्यन्ते । यद्वा प्रासादैरिति शेषः । तैरुपलक्षितां ॥ ५२—५४ ॥ विषण्णः हृष्टश्चेति । अचिन्त्या दुष्प्रवेशेति च विषण्णः । यतोद्भुताकारा अतो विस्मयनीयतया हृष्टः ॥ ५५ ॥ स इति पूर्वश्लोकेनायमेकान्वयः । सुधाधवलनिम्नोन्नतविमानाकारभवनमालिनीमित्यर्थः ॥ ५६ ॥ इदानीं चन्द्रोदयकाल इत्याह—चन्द्रोपीति ॥ मध्यगतः सन्निधानात्तारागणमध्यगतः । तारागणैरिति सहयोगे तृतीया । ज्योत्स्नावितानेन लोकं वितत्य व्याप्य । उत्तिष्ठते आविर्भवति स्म । "उदोनूर्ध्वकर्मणि" इत्यात्मनेपदं ॥ ५७—५८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्वितीयः सर्गः ॥ २ ॥

लम्बे लम्बाख्ये । लम्बशिखरे लम्बगिरिशिखरे इति

रामानु॰ सपाण्डुरेत्यस्यदृष्ट्वेति पूर्वेणसंबन्धः । पाण्डुरोद्विद्धविमानमालिनीं सुधाधौतोन्नतसप्तभूमगृहमालिनीं । "विमानोस्त्रीदेवयानेसप्तभूमेचसद्मनि" इतिवैजयन्ती ॥ ५६ ॥ **ति॰** मध्यगतःखमध्यगतः । अनेकसहस्रेत्यनेनपूर्णत्वं । अनेकेत्यस्यैवसहस्रेत्यनेनविवरणं । उत्तिष्ठते आर्षस्तङ् । ज्योत्स्नावितानेनलोकान्वितत्यआवार्यसम्यगवलोकनसाधनतयाअस्यहनूमतःसाचिव्यंसाहाय्यंकुर्वन्निव ॥ **ति॰** ननुखमध्यगतस्यप्रदोषेउदयोष्टम्यांनतदापूर्णत्वं । पूर्णस्यतुनखमध्यगतस्योदयइतिचेन्न । शुक्लैकादश्यांखमध्यसमीपगतत्वेनमध्यगतत्वोपचारात् । पूर्णत्वंचपूर्णकल्पत्वेनव्यवहृतं । यद्वानेकन्यूनाः सहस्रंरश्मयोयस्येतिमध्यमपदलोपितत्पुरुषगर्भोबहुव्रीहिः । अतएवरात्रिशेषेहनूमत्यशोकवनिकास्थेसीतासविधेरावणस्यागमनकालेदीपिकावर्णनंकृतं । तेनहितदाचन्द्रास्तानुमानं । साचेयंमार्गशीर्षस्य । फाल्गुनेलङ्कांप्रविष्टायाःसीतायाः "वर्ततेदशमोमासोद्वौतुशेषौप्लवङ्गम" इतिहनूमन्तंप्रतिवचनात् । हरणदिनएवचसीतायालङ्काप्रवेशनंरामभयादितिस्पष्टमेव । **रामानु॰** सागरमैनाकदिवाकरादिवच्चन्द्रोपिसाचिव्यंकुर्वन्प्रादुरभूदित्यपिशब्देनावगम्यते ॥ ५७ ॥ इतिद्वितीयःसर्गः ॥ २ ॥

रामानु॰ पूर्वसर्गोक्तलङ्काप्रवेशोपक्रमंविस्तरेणाह । सलंबशिखरइत्यादिना । सः सागराक्लेशतरणेनप्रसिद्धः । महासत्वःसमुद्र-

[पा॰] १ ङ. झ. ट. तम्लैःशुशुभिरे. २ घ. भवनान्यपि. ३ ङ. छ. ज. झ. ट. पाण्डराविद्ध. ४ झ. ट. सुपालितां. क. दुरासदां. ५ ङ.—ट. लोकानुत्तिष्ठते. ६ क.—ट. कपिप्रवीरः.

निशि लङ्कां महासत्त्वो विवेश कपिकुञ्जरः ॥ रम्यकाननतोयाढ्यां पुरीं रावणपालिताम् ॥ २ ॥
शारदाम्बुधरप्रख्यैर्भवनैरुपशोभिताम् ॥ सागरोपमनिर्घोषां सागरानिलसेविताम् ॥ ३ ॥
[1]सुपुष्टबलसंघुष्टां यथैव विटपावतीम् ॥ चारुतोरणनिर्यूहां [2]पाण्डुरद्वारतोरणाम् ॥ ४ ॥
भुजगाचरितां गुप्तां [3]शुभां भोगवतीमिव ॥ तां सविद्युद्घनाकीर्णां [4]ज्योतिर्मार्गनिषेविताम् ॥ ५ ॥
[5]मन्दमारुतसंचारां [6]यथेन्द्रस्यामरावतीम् ॥ शातकुम्भेन महता प्राकारेणाभिसंवृताम् ॥ ६ ॥
किङ्किणीजालघोषाभिः पताकाभिरलङ्कृताम् ॥ आसाद्य सहसा हृष्टः प्राकारमभिपेदिवान् ॥ ७ ॥
विस्मयाविष्टहृदयः पुरीमालोक्य सर्वतः ॥ ८ ॥
जाम्बूनदमयैर्द्वारै[7]र्वैडूर्यकृतवेदिकैः ॥ [8]वज्रस्फटिकमुक्ताभिर्मणि[9]कुट्टिमभूषितैः ॥
तप्तहाटकनिर्यूहै राजतामलपाण्डुरैः ॥ ९ ॥
वैडूर्यकृतसोपानैः स्फाटिकान्तरपांसुभिः ॥ चारुसंजवनोपेतैः खमिवोत्पतितैः शुभैः ॥ १० ॥
क्रौञ्चबर्हिणसंघुष्टे राजहंसनिषेवितैः ॥ तूर्याभरणनिर्घोषैः सर्वतः [10]प्रतिनादिताम् ॥ ११ ॥
वस्वोकसाराप्रतिमां [11]तां वीक्ष्य नगरीं ततः ॥ [12]खमिवोत्पतितुं कामां जहर्ष हनुमान्कपिः ॥ १२ ॥
तां समीक्ष्य पुरीं [13]रम्यां राक्षसाधिपतेः शुभाम् ॥ अनुत्तमा[14]मृद्धियुतां चिन्तयामास [15]वीर्यवान् ॥१३॥
नेयमन्येन नगरी शक्या धर्षयितुं बलात् ॥ रक्षिता रावणबलैरुद्यतायुध[16]धारिभिः ॥ १४ ॥
कुमुदाङ्गदयोर्वापि सुषेणस्य [17]महाकपेः ॥ प्रसिद्धेयं भवेद्भूमिर्मैन्दद्विविदयोरपि ॥ १५ ॥

चाहुः । यद्वा लम्बे लम्बमान इव स्थिते । लम्बशिखरे त्रिकूटशिखरे । सत्त्वं व्यवसायं । धैर्यमिति यावत् । विवेश प्राप ॥ १—३ ॥ विटपावतीं अलकां । निर्यूहो मत्तवारणः । पाण्डुरद्वारतोरणां पाण्डुरे द्वारतोरणे यस्यास्तां ॥४—७॥ विस्मयाविष्टहृदयः । अभूदिति शेषः ॥ ८ ॥ पुनर्हर्षहेतूनाह—जाम्बूनदमयैरित्यादिना॥ जाम्बूनदमयैर्द्वारैरित्यादौसहयोगे तृतीया। वज्रस्फटिकमुक्ताभिरित्यत्रापि कृतवेदिकैरिति संबध्यते । राजतामलपाण्डुरैः अवयवैः ॥९॥ स्फाटिकान्तरपांसुभिः स्फटिकमयाङ्गणपांसुभिः । संजवनं चतुश्शालं ॥ १०—११ ॥ वस्वोकसारा अलका । यद्वा वस्वोकसारा पूर्वदिगवस्थिताशक्रपुरी । " वस्वोकसारा शक्रस्य पूर्वस्यां दिशि वै पुरी " इतिपुराणवचनात् ॥ १२—१४ ॥ प्रसिद्धेयमिति । इयं लङ्का विदिता

लङ्घनादावप्रतिहतशक्तिः । हनुमान्‌लंबेलंबमानाकारे । लंबतोयदसंनिभेलंबशिखरे लंबपर्वतशिखरे । मेधावीतत्कालोचितकर्तव्यविषयप्रज्ञायुक्तःसन् । सत्वमास्थाय लङ्काप्राप्तिमात्रोपयुक्तलङ्घनशक्तिमास्थायनिशिविवेशेतिसंबन्धः ॥ **ति०** लंबशिखरेउन्नतशिखरेलंबेलंबाख्यपर्वते ॥ १—२ ॥ **रामानु०** सागरोपमनिर्घोषांसागरनिर्घोषोपमनिर्घोषां । विटपावतींअलकां । 'क्षयःपुण्यजनानांस्यादलकाविटपावती' इतिवचनात् । तोरणस्यनिर्यूहःतोरणनिर्यूहः । चारुःतोरणनिर्यूहोयस्यास्तां । प्राकारशब्देनप्राकारसमीपोलक्ष्यते । ' अद्वारेणमहाबाहुःप्राकारमभिपुप्लुवे ' इत्युपरिवक्ष्यमाणत्वात् ॥ २—८ ॥ **ति०** चण्डमारुतानांपरिवहादीनांशब्दोयस्यांतादृशींअमरावतीमिवस्थितां । अत्रामराःसन्त्यस्यामित्यमरावतीद्यौः । असंज्ञायामपि ' मतौबह्वचः ' इत्यार्षोदीर्घः । नत्विहेन्द्रपुर्यमरावती । उक्तलक्षणाभावात् । लङ्कायाउक्तसादृश्यंचसालङ्काररराक्षसवत्त्वाद्बलवद्घोषबाहुल्याच्चेतिकतकः ॥ **शि०** अमरावतींयथा संपत्त्याइन्द्रपुरीसदृशीं ॥ ६ ॥ **शि०** अन्येन रामभिन्नेनजनेन । बलात्पराक्रमात्धर्षयितुंनशक्या ॥ १४ ॥ **रामानु०** प्रसिद्धा दुष्प्रवेशत्वेनप्रसिद्धाइयंनगरीकुमुदाङ्गदयोःमहाकपेःसुषेणस्यापिमैन्दद्विविदयोरपिभूमिःविषयोभवेत् । **ति०**

[**पा०**] १ च. छ. ज. पाठेषु. सुपुष्टबलसंघुष्टामित्यर्धस्यस्थाने. सुपुष्टबलसंघुष्टांगुप्तांरक्षोगणैर्भृशं । वस्वोकसारप्रतिमांयथैव विटपावतीं । इत्येकःश्लोकोदृश्यते. ङ. झ. सुपुष्टबलसंपुष्टां. ग. सुदुर्गांराक्षसैर्गुप्तां. क. सुपुष्पफलसंयुक्तां. २ ञ. पाण्डुरध्वजतोरणां. ३ च. छ. ञ. गुहां. ४ ग. ङ.—ट. ज्योतिर्गण. ५ ख. ग. ङ.—ट. चण्डमारुतनिर्ह्रादां. ६ क. ङ. झ. ञ. ट. यथाचाप्यमरावतीं. ग. च. छ. ज. यथावदमरावतीं. ७ ञ. कृततोरणैः. ८ ख. ङ. झ. ञ. ट. मणिस्फटिक. ९ क. च. छ. ज. कुट्टिमवेदिकैः. १० ङ. झ. ट. परिनादितां. ११ क. ग.—ट. समीक्ष्य. १२ क. ख. ङ. छ. ट. खमिवोत्पतितांलङ्कां. १३ क. ख. ङ. झ. ञ. ट. लङ्कां. १४ क. ङ. झ. ञ. ट. मृद्धिमतीं. च. छ. ज. मृद्धियुक्तां. १५ क. वानरः. १६ ङ. झ. ट. पाणिभिः. १७ क. ख. महात्मनः.

विवस्वतस्तनूजस्य हरेश्च कुशपर्वणः ॥ ऋक्षस्य केतुमालस्य मम चैव गतिर्भवेत् ॥ १६ ॥
समीक्ष्य तु म[3]हाबाहू राघवस्य पराक्रमम् ॥ ल[4]क्ष्मणस्य च विक्रान्तमभवत्प्रीतिमान्कपिः ॥ १७ ॥
तां रत्नवसनोपेतां गोष्ठागा[5]रावतंसकाम् ॥ यन्त्रागारस्तनीमृद्धां प्रमदामिव भूषिताम् ॥ १८ ॥
तां नष्टतिमिरां [6]दीप्तैर्भास्वरैश्च म[7]हागृहैः ॥ नगरीं राक्षसेन्द्रस्य [8]ददर्श स महाकपिः ॥ १९ ॥
अथ सा हरिशार्दूलं प्रविशन्तं महाबलम् ॥ नगरी स्वेन रूपेण ददर्श पवनात्मजम् ॥ २० ॥
सा तं हरिवरं दृष्ट्वा लङ्का रावणपालिता ॥ स्वयमेवोत्थिता तत्र विकृताननदर्शना ॥ २१ ॥
पुं[10]रस्तात्कपिवर्यस्य वायुसूनोरतिष्ठत ॥ मुञ्चमाना महानादमब्रवीत्पवनात्मजम् ॥ २२ ॥
कस्त्वं केन च कार्येण इह प्राप्तो वनालय ॥ कथयस्वेह यत्तत्त्वं यावत्प्राणा धरन्ति ते ॥ २३ ॥
[11]न शक्यं खल्वियं लङ्का प्रवेष्टुं वानर त्वया ॥ रक्षिता रावणबलैरभिगुप्ता समन्ततः ॥ २४ ॥
अथ तामब्रवीद्वीरो हनुमानग्रतः स्थिताम् ॥ कथयिष्यामि ते[12] तत्त्वं यन्मां त्वं परिपृच्छसि ॥ २५ ॥
का त्वं विरूपनयना पुर[13]द्वारेऽवतिष्ठसि ॥ किमर्थं चापि मां [14]रुद्ध्वा निर्भर्त्सयसि [15]दारुणा ॥ २६ ॥
हनुमद्वचनं श्रुत्वा लङ्का सा कामरूपिणी ॥ उवाच वचनं क्रुद्धा परुषं पवनात्मजम् ॥ २७ ॥
अहं राक्षसराजस्य रावणस्य महात्मनः ॥ आज्ञाप्रतीक्षा दुर्धर्षा रक्षामि नगरीमिमाम् ॥ २८ ॥
न [16]शक्या मामवज्ञाय प्रवेष्टुं [17]नगरी त्वया ॥ अद्य [18]प्राणैः परित्यक्तः स्वप्स्यसे निहतो मया ॥ २९ ॥

भवेत् ॥ १५ ॥ गतिस्तु सुग्रीवस्य कुशपर्वणः केतुमालस्य मम चैव भवेत्। पूर्वं नीलादीनामेव गतिरुक्ता। अत्र त्वन्येषामित्युक्तिश्चिन्ताप्रकारविशेषः ॥ १६—१७ ॥ तां रत्नेत्यत्र ददर्शेत्यपकृष्यते। नत्वेकं वाक्यं श्लोकद्वयं तच्छब्दद्वयप्रयोगात्प्रथमे श्लोके स्त्रीसाम्योक्तेश्च ॥ १८—२३ ॥ अभिगुप्ता समावृतेत्यर्थः ।

प्रसिद्धाप्रकर्षेण सिद्धगतिका ॥ १५ ॥ **रामानु०** अत्रइयमित्यनुषज्यते । गतिः विषयः भवेत् । ममचेतिपश्चान्निर्देशेनसर्वोत्तरेणापिहनुमतास्वस्यनैच्यमनुसंहितमित्यवगम्यते ॥ **ति०** कुशपर्वणइति । कुशपर्वसदृशलोमवतइत्यर्थकमृक्षस्यविशेषणं । अतिदीर्घकठोरलोमावृतत्वात्कपिमुख्यस्येतिविशेषणंच । तस्यैवममचैवगतिः अस्मामितिशेषः ॥ १६ ॥ **रामानु०** विक्रान्तंविक्रमं । भावेनिष्ठा । प्रीतिमानभवत् । रामलक्ष्मणाभ्यामनायासेनजेतुंशक्येतिमत्वाप्रीतिमानभूदित्यर्थः ॥ **स०** सर्वेषामेषां विनारामावलंबेनेयंजेतुंनशक्येत्येतत्प्रसंगात्स्मारितंरामलक्ष्मणयोर्विक्रमंस्मृत्वातुतोषेत्याह—समीक्ष्येति ॥ १७ ॥ **रामानु०** तामिति । अत्रददर्शेत्यपकृष्यते । यद्वाएकस्यतच्छब्दस्यप्रसिद्धिपरत्वेनश्लोकद्वयमेकंवाक्यं ॥ **ति०** रत्नवसनोपेतां रत्नप्राकारवाससंच । गोष्ठान्यगाराणिचावतंसोयस्यास्तां । गोष्ठंगोशाला । इदंवाजिशालादेरप्युपलक्षणं । यन्त्राणिप्राकारोपरिस्थापितानिक्षेपण्यादीनि । तद्गृहस्तनीं ॥ १८ ॥ **ति०** तांप्रसिद्धांलङ्कांभास्वरैश्चमहाग्रहैः । चाचन्द्रकिरणैः ॥ १९ ॥ **रामानु०** स्वेनरूपेणअधिदेवतारूपेण ॥ २० ॥ **रामानु०** अतिष्ठततस्मैस्वात्मानंप्रदर्शितवती । ‘ प्रकाशनस्थेयाख्ययोश्च ’ इत्यात्मनेपदं ॥ २२ ॥ **रामानु०** तेतवप्राणाःयावद्धरन्तिध्रियन्तेतावत्यत्तत्वं तत्कथयस्वकथय । “धृङ्अवसाने” विकरणादिप्रत्ययआर्षः । यावत्प्राणान्हरामिते इतिवापाठः ॥ २३ ॥ **रामानु०** नशक्यमिति । लिङ्गसामान्येनपुंसकं । तथाचोक्तं भगवताभाष्यकारेण—‘ श्वमांसेनापिशक्यंक्षुदपहन्तुंइति । रावणबलैःसमन्ततःअभिगुप्तासमन्ततःसंवृता । अतएवरक्षिता ॥ **शि०** किंच अभितःचतुर्दिक्षुगुप्ताः राक्षसविजातीयनिरीक्षणार्थमलक्ष्यरूपेणस्थिताराक्षसायस्यास्सा ॥ **स०** त्वांहत्वाऽन्तर्गच्छेयमित्याशापितवमास्त्वितिवाह—अभिगुप्तेति । अहंअन्ततःमृत्योस्सकाशादभिगुप्ताआसंअस्मि । अतोनत्वयावध्या ॥ २४ ॥ **ति०** अथतयापृष्टोहनुमांस्तांप्रतितत्प्रश्नोत्तरकथनं प्रतिज्ञायसुरसावदेषापूज्यावासिंहिकावद्वध्यावेतिनिर्णेतुंपृच्छति—कात्वमिति ॥ २६ ॥ **रामानु०** आज्ञाप्रतीक्षा आज्ञानुवर्तिनी

[पा०] १ ङ. झ. ञ. ट. कपिमुख्यस्य. २ ङ.—ज. ञ. ट. समीक्ष्यच. ३ ङ. झ. ञ. ट. महाबाहोः. ४ च. छ. ज. लक्ष्मणस्यापि. ५ ङ. झ. ञ. ट. रावतंसिकां. ६ ख. ङ. झ. ञ. ट. दीपैः. च. छ. ज. दीप्तांभास्वरैः. क. दीप्तैर्भास्वरैर्भवनैः शुभैः. ७ झ. महाग्रहैः. ८ ङ.—ञ. सददर्श. क. घ. ददर्शहनुमान्कपिः. ९ ङ. झ. ञ. ट. महाकपिं. १० क.—ट. पुरस्तात्तस्यवीरस्य. ११ क.—ङ. नशक्या. ञ. अशक्यं. १२ ङ. ञ. ट. यत्तत्वं. क. तत्त्वेन. झ. तत्तत्वं. १३ क.—ट. द्वारेऽवतिष्ठसे. १४ क. ख. च. छ. ज. क्रुद्धा. ङ. ञ. ट. क्रोधान्निर्भर्त्सयसि. १५ क. ङ.—ट. दारुणे. १६ क. ग. ङ.—ञ. शक्यं. १७ ङ. ञ. ट. नगरीमिमां. क. वानरत्वया. १८ च. छ. ज. प्राणान्परित्यज्य.

अहं हि [1]नगरी लङ्का स्वयमेव प्लवंगम ॥ सर्वतः परिरक्षामि [2]ह्येतत्ते कथितं मया ॥ ३० ॥
लङ्काया वचनं श्रुत्वा [3]हनुमान्मारुतात्मजः ॥ [4]यत्नवान्स हरिश्रेष्ठः [5]स्थितः शैल इवापरः ॥ ३१ ॥
स तां स्त्रीरूपविकृतां दृष्ट्वा वानरपुङ्गवः ॥ आबभाषेऽथ मेधावी [6]सत्त्ववान्प्लवगर्षभः ॥ ३२ ॥
द्रक्ष्यामि नगरीं लङ्कां साट्टप्राकारतोरणाम् ॥ [[7]निर्विशङ्कमिमं लोकं पश्यन्त्यास्तव सांप्रतम्] ॥
[8]इत्यर्थमिह संप्राप्तः परं कौतूहलं हि मे ॥ ३३ ॥
वनान्युपवनानीह लङ्कायाः काननानि च ॥ सर्वतो गृहमुख्यानि द्रष्टुमागमनं हि मे ॥ ३४ ॥
तस्य तद्वचनं श्रुत्वा लङ्का सा कामरूपिणी ॥ [9]भूय एव पुनर्वाक्यं बभाषे परुषाक्षरम् ॥ ३५ ॥
मामनिर्जित्य दुर्बुद्धे राक्षसेश्वरपालिताम् ॥ न शक्य[10]मद्य ते द्रष्टुं पुरीयं वानराधम ॥ ३६ ॥
ततः स [11]कपिशार्दूलस्तामुवाच निशाचरीम् ॥ दृष्ट्वा पुरीमिमां भद्रे पुनर्यास्ये यथागतम् ॥ ३७ ॥
ततः कृत्वा महानादं सा वै लङ्का [12]भयावहम् ॥ तलेन वानरश्रेष्ठं ताडयामास वेगिता ॥ ३८ ॥
ततः स [13]कपिशार्दूलो लङ्कया ताडितो भृशम् ॥ ननाद सुमहानादं [14]वीर्यवान्पवनात्मजः ॥ ३९ ॥
ततः संवर्तयामास वामहस्तस्य सोऽङ्गुलीः ॥ मुष्टिनाऽभिजघानैनां हनुमान्क्रोधमूर्च्छितः ॥ ४० ॥
स्त्री चेति मन्यमानेन नातिक्रोधस्स्वयं कृतः ॥ ४१ ॥
सा तु तेन प्रहारेण विह्वलाङ्गी निशाचरी ॥ पपात सहसा भूमौ विकृताननदर्शना ॥ ४२ ॥
ततस्तु [15]हनुमान्प्राज्ञस्तां दृष्ट्वा विनिपातिताम् ॥ कृपां चकार तेजस्वी मन्यमानः [16]स्त्रियं तु ताम् ॥४३॥
ततो वै [17]भृशसंविग्ना लङ्का सा गद्गदाक्षरम् ॥ उवाच गर्वितं वाक्यं हनुमन्तं प्लवङ्गमम् ॥ ४४ ॥
प्रसीद सुमहाबाहो त्रायस्व हरिसत्तम ॥ समये सौम्य तिष्ठन्ति सत्त्ववन्तो महाबलाः ॥ ४५ ॥
अहं तु नगरी लङ्का स्वयमेव प्लवङ्गम ॥ निर्जिताऽहं त्वया वीर विक्रमेण महाबल ॥ ४६ ॥
[18]इदं तु [19]तथ्यं [20]शृणु वै ब्रुवन्त्या मे हरीश्वर ॥ [21]स्वयंभुवा पुरा दत्तं वरदानं यथा मम ॥ ४७ ॥

अतो न रक्षितेत्यनेन पुनरुक्तिः ॥ २४—३३ ॥ उपवनानि गृहोद्यानानि । काननानि शून्यारण्यानि ॥ ३४ ॥ भूयः अतिशयेन । परुषाक्षरमित्यन्वयः ॥ ३५ ॥ शक्यमित्येतदव्ययं । तदाह कालिदासः— " शक्यमरविन्दसुरभिः कणवाही मालिनीतरङ्गाणाम् । अङ्गैरनङ्गतप्तैरविरलमालिङ्गितुं पवनः " इति । पुरीरूपं वस्तु शक्यमिति शक्यपुर्योस्सामानाधिकरण्यं वा ॥ ३६ ॥ यास्ये यास्यामि । इत्युवाचेति संबन्धः ॥ ३७ ॥ वेगिता संजातवेगा ॥ ३८—३९ ॥ संवर्तयामास संकोचयामास ॥ ४०—४४ ॥ समये स्त्रीवधवर्जनव्यवस्थायां । सत्त्ववन्तः धैर्यवन्तः ॥ ४५ ॥ अहं त्वित्यर्धं भिन्नं वाक्यं । एकवाक्यत्वेऽ-

---

॥ २८ ॥ **रामानु०** स्वयमेवसर्वतःसर्वंपरिरक्षामीतिसंबन्धः ॥ ३० ॥ **रामानु०** इत्यर्थंएतदर्थं ॥ ३३ ॥ **स०** वानराधमेति संबोधितेनापि भद्रेइतिसंबोधनं समर्थेनसता कार्यतएवप्रतीकारःकार्यो नवाचेतिदर्शयितुं ॥ ३७ ॥ **स०** क्रोधःमूर्च्छितः मध्यमावस्थांप्राप्तोयस्मिन् । अनुद्रिक्तइतियावत् । एवंचेदेवपूर्वोत्तरग्रन्थस्वारस्यंभवति ॥ ४० ॥ **स०** कृपांचकार पुनर्नतताड ॥ ४४ ॥ **स०** सत्ववन्तः निश्चयवन्तः । ' सत्वमात्मत्वेव्यवसायेच ' इतिविश्वः ॥ ४५ ॥

[पा०] १ ङ. नगरींलङ्कां. २ ङ. छ.—ट. अतस्ते. ३ च. छ. ज. हनुमान्पवनात्मजः. घ. हनुमान्कपिकुञ्जरः. ४ घ. वीर्यवान्स. ५ घ. स्थितोगिरिरिवा. ६ घ. वीर्यवान्. ७ इदमर्धं. क. ग. च. छ. ज. ञ. पाठेषुदृश्यते. क. निर्विशङ्कमिमांलङ्कां. ८ ग. एतदर्थं. ९ क. भृशमेवपुनः. ख. ग. भूयएवहिसावाक्यं. १० ङ. ञ. ट. शक्याह्यद्य. ११ ङ.—ट. हरिशार्दूलः. १२ ङ. झ. ञ. ट. भयंकरं. क. च. छ. ज. भयानकं. १३ च.—ट. हरिशार्दूलो. १४ ङ. झ. ञ. ट. वीर्यवान्मारुतात्मजः. च. छ. ज. वीर्यवान्प्लवगर्षभः. १५ ङ. झ. ञ. न्वीरस्तां. १६ ख. च. ज.—ट. स्त्रियंच. ङ. स्त्रियंकपिः. ग. स्त्रियंत्विमां. १७ ग.—ट. भृशमुद्विग्ना. १८ ग. ङ. छ.—ट. इदंच. १९ ख. सत्यं. २० ग. ङ. छ. झ. ञ. ट. शृणुमेब्रुवन्त्यावै. २१ क. ग.—च. झ. ञ. ट. स्वयंस्वयंभुवादत्तं.

यदा त्वां वानरः कश्चिद्विक्रमाद्वशमानयेत् ॥ तदा त्वया हि विज्ञेयं रक्षसां भयमागतम् ॥ ४८ ॥
स हि मे समयस्सौम्य प्राप्तोऽद्य तव दर्शनात् ॥ स्वयंभूविहितस्सत्यो न तस्यास्ति व्यतिक्रमः ॥ ४९ ॥
सीतानिमित्तं राज्ञस्तु रावणस्य दुरात्मनः ॥ राक्षसां चैव सर्वेषां विनाशः समुपागतः ॥ ५० ॥
तत्प्रविश्य हरिश्रेष्ठ पुरीं रावणपालिताम् ॥ विधत्स्व सर्वकार्याणि यानि यानीह वाञ्छसि ॥ ५१ ॥

प्रविश्य शापोपहतां हरीश्वरः [1]शुभां पुरीं [2]राक्षसमुख्यपालिताम् ॥
यदृच्छया [3]त्वं जनकात्मजां सतीं विमार्ग सर्वत्र गतो यथासुखम् ॥ ५२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः ॥ ४ ॥

वामपादनिक्षेपपूर्वकमद्वारेणलङ्कांप्रविष्टवताहनुमता नगरान्तर्नानागीतवादित्रश्रवणेनसह विचित्रतरगृहाणां नानाविधायुधाकारधारिरावणमूलबलादीनांचावलोकनं ॥ १ ॥

स निर्जित्य पुरीं [4]श्रेष्ठां लङ्कां तां कामरूपिणीम् ॥ विक्रमेण महातेजा हनुमान्[5]कपिसत्तमः ॥
अद्वारेण [6]महाबाहुः [7]प्राकारमभिपुप्लुवे ॥ १ ॥
[[8]निशि लङ्कां महासत्वो विवेश कपिकुञ्जरः] ॥ प्रविश्य नगरीं लङ्कां कपिराजहितंकरः ॥
[9]चक्रेऽथ पादं सव्यं च [10]शत्रूणां स तु मूर्धनि ॥ २ ॥
प्रविष्टः सत्वसंपन्नो निशायां मारुतात्मजः ॥ स महापथमास्थाय [11]मुक्तापुष्पविराजितम् ॥ ३ ॥

हंशब्दस्य पुनरुक्तिः ॥ ४६–४७ ॥ वरदानस्वरूपमाह —यदेति ॥ अत्र रावणस्य दिग्विजये नन्दिकेश्वरादिभिर्लङ्कायाः सद्यो विनाशशापे दत्ते सा ब्रह्माणं गत्वा प्रार्थयामास । विनाशो मे माभूदिति । स च तस्यै वरमदात् । तव सद्यो विनाशो न भविष्यति । यदा तु वानरस्त्वामभिभविष्यति तदा तु विनाशो भविष्यतीति कथोन्नीयते ॥४८—५१॥ शापो नन्दिकेश्वरादिकृतः । यदृच्छयेत्यस्य गत इति संबन्धः । यदृच्छयाऽत्र प्राप्तस्त्वमित्यर्थः ॥ ५२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने तृतीयः सर्गः ॥३॥

अद्वारेणेत्यनेन लङ्कापरिभवो राक्षसैर्न ज्ञातुं शक्य इति द्योत्यते ॥ १ ॥ चक्र इति । शत्रुदेशप्रवेशे प्रथमं सव्यपादः कार्यः स तु शत्रोर्मूर्ध्नि कृतो भवेदिति राजशास्त्रं । अनेन प्रथमं सव्यं पादं लङ्कायां कृतवानित्यर्थः सिद्धः । तदाह बृहस्पतिः “ प्रयाणकाले च गृहप्रवेशे विवाहकालेपि च दक्षिणाङ्घ्रिम् । कृत्वाग्रतः

ती० रावणाधिक्षेपक्षुभितनन्दिकेश्वरशापात्सद्यःप्राप्तोपिविनाशः स्वयंभूवरप्रसादाद्वानरास्कन्दनपर्यन्तं प्रतिबद्धइति कथात्रानुसंधेया ॥ ४९ ॥ ति० शापोपहतां सत्यसंकल्पभगवद्वचनेन नन्दिकेश्वरशापेनचप्रापितनाशकालां हरीश्वरस्त्वंप्रविश्ययदृच्छया सर्वत्ररावणान्तःपुरपर्यन्तं यथासुखंगतःसन् सतीं अप्रच्युतपातिव्रत्यांजानकींविमार्ग अन्वेषय । अनेनचवचनेन सीताऽकल्मषाऽत्रपुरेवर्ततइत्युपदिष्टम् ॥ ५२ ॥ इतितृतीयः सर्गः ॥ ३ ॥

रामानु० “ग्रामंवानगरंवापिपत्तनंवापरस्यहि । विशेषात्समयेसौम्यनद्वारेणविशेन्नृपः” इत्युक्तप्रकारेणअद्वारेणप्रविष्टवान् ॥१॥ स० कपिराजहितंकरः कपीश्वरसुग्रीवायहितकारीत्यर्थः । हितशब्दोपपदात्करोतेः खश्विधायकाभावेपिप्रामाणिकप्रयोगानुसारेणतस्योह्यत्वात् । अतएवकाशिकायां भगंदरइतिरूपसिद्धये ‘भगेचदारेः’ इत्युक्तं ॥२॥ रामानु० महापथं आस्थाय गम्यत्वेना-

[पा०] १ क.—ट. पुरींशुभां. २ च. छ. ज. राक्षसराज. ३ क. ग. तां. ४ घ. ङ. झ. ञ. ट. लङ्कांश्रेष्ठां. ५ छ.—ट. न्कपिकुञ्जरः. क. न्मारुतात्मजः. ६ झ. ञ. ट. महावीर्यः. ङ. महाकायः. ७ ञ. प्राकारंचसपुप्लुवे. ग. ङ.—झ. ट. प्राकारमवपुप्लुवे. ८ ङ.—ट. पाठेऽयमर्धंदृश्यते. ९ छ. ज. चक्रेच. १० क. शत्रूणामपि. ११ क. घ. ङ. झ. ञ. ट. मुक्तपुष्प.

[[1]सेवितां राक्षसैर्भीमैर्बलिभिः शस्त्रपाणिभिः] ॥ ततस्तु तां पुरीं लङ्कां रम्यामभिययौ कपिः॥४॥
हसितोत्कृष्टनिनदैस्तूर्यघोष[2]पुरस्सरैः ॥ वज्राङ्कुशनिकाशैश्च वज्रजालविभूषितैः ॥
[3]गृहमेधैः पुरी रम्या बभासे द्यौरिवाम्बुदैः ॥ ५ ॥
प्रजज्वाल [4]तदा लङ्का रक्षोगणगृहैः शुभैः ॥ ६ ॥
सिताभ्रसदृशैश्चित्रैः पद्मस्वस्तिकसंस्थितैः ॥ वर्धमानगृहैश्चापि सर्वतः [5]सुविभूषिता ॥
गृहमुख्यैः पुरी [6]रम्या बभासे द्यौरिवाम्बुदैः ॥ ७ ॥
तां चित्रमाल्याभरणां कपिराजहितंकरः ॥ [7]राघवार्थं चरञ्श्रीमान्ददर्श च ननन्द च ॥ ८ ॥
भवनाद्भवनं गच्छन्ददर्श पवनात्मजः ॥ विविधाकृतिरूपाणि भवनानि ततस्ततः ॥ ९ ॥
शुश्राव [8]मधुरं गीतं त्रिस्थानस्वरभूषितम् ॥ स्त्रीणां [9]मदसमृद्धानां दिवि चाप्सरसामिव ॥ १० ॥
शुश्राव काञ्चीनिनदं नूपुराणां च निस्वनम् ॥ सोपाननिनदांश्चैव भवनेषु महात्मनाम् ॥
आस्फोटितनिनादांश्च क्ष्वेलितांश्च ततस्ततः ॥ ११ ॥
शुश्राव जपतां तत्र मन्त्रान्रक्षोगृहेषु वै ॥ १२ ॥
स्वाध्यायनिरतांश्चैव यातुधानान्ददर्श सः ॥ रावणस्तवसंयुक्तान्गर्जतो राक्षसानपि ॥ १३ ॥
राजमार्गं समावृत्य स्थितं [10]रक्षोबलं महत् ॥ ददर्श मध्यमे गुल्मे [11]रावणस्य चरान्बहून् ॥ १४ ॥
दीक्षिताञ्जटिलान्मुण्डान्गो[12]जिनाम्बरधारिणः ॥ दर्भमुष्टिप्रहरणानग्निकुण्डायुधांस्[13]तथा ॥ १५ ॥

शत्रुपुरप्रवेशे वामं निदध्याच्चरणं नृपालः ” इति ॥ २—४ ॥ तूर्यघोषपुरस्सरैः हसितोत्कृष्टनिनदैः हसितानामुत्कृष्टस्वरैः युक्तेत्यर्थः । वज्राङ्कुशनिकाशैः वज्रमङ्कुशो यस्य सः वज्राङ्कुशः ऐरावतः तत्तुल्यैः तद्वच्छुभ्रैरित्यर्थः । वज्राङ्कुशतुल्यसंस्थानैर्वा । वज्रजालविभूषितैः वज्रो रत्नविशेषः । गृहमेधैः गृहश्रेष्ठैः। “ उपमितं व्याघ्रादिभिः—” इत्युपमितसमासः ॥ ५—६ ॥ पद्मस्वस्तिकसंस्थितैः पद्मस्वस्तिकनामभ्यां संस्थानविशेषाभ्यां संस्थितैः । वर्धमानगृहैः वर्धमाननाम्ना संस्थानेन संस्थितैः गृहैः । तल्लक्षणानि वराहमिहिरसंहितायां व्यक्तानि विस्तरभयान्न लिख्यन्ते ॥ ७—९ ॥ त्रिस्थानस्वरभूषितं त्रिस्थानेषु उरःकण्ठशिरस्सु भवैः स्वरैर्भूषितं । ते च मन्द्रमध्यताराः ॥ १० ॥ सोपाननिनदांश्च मणिहेमकृतानां सोपानानां नूपुरादिताडनेन ये निनादाः संभवन्ति तान् । आस्फोटितनिनादान् व्यत्यस्तकरतलाभ्यां भुजाग्रास्फालनशब्दान् । क्ष्वेलितान् सिंहनादान् ॥ ११ ॥ मन्त्रान् ऋग्वेदादीन् ॥ १२ ॥ स्वाध्यायनिरतान् ब्रह्मभागपाठनिरतान् ॥ १३ ॥ मध्यमे गुल्मे नगरमध्यस्थितसैन्यसमाजे । चरान् स्वजनवृत्तान्तजिज्ञासया प्रधानप्रेरितान् प्रणिधीन् ॥ १४ ॥ गोजिनाम्बरधारिणः वृषभचर्मरूपवस्त्रधारिणः । दर्भमुष्टिप्र-

वलंब्यप्रविष्टइतिसंबन्धः ॥ ३ ॥ **रामानु०** हसितोद्घुष्टनिनदैः हसितोच्चध्वनिभिः । गृहमुख्यैरितिपाठः ॥५॥ **ति०** स्वस्तिकाख्यगृहाः आकृत्याचतुरश्राः । “ चतुश्शालाचतुर्द्वारासर्वतोभद्रसंज्ञिता । पश्चिमद्वाररहितामध्यावर्ताहयानना । दक्षिणद्वाररहितावर्धमाना धनप्रदा । प्राग्द्वाररहिता स्वस्तिकाख्यापुत्रधनप्रदा ’ इत्युक्तेः पद्मस्वस्तिकवर्धमानाख्यगृहाः प्रभुगृहभेदाइत्यर्थः ॥ ७ ॥ **ति०** दीक्षितजटिलमुण्डाः गृहिवनियतयः । गोजिनंगवाजिनं तद्वाससः । अंबरवाससः विवाससः । ननुलङ्कायाभारतखण्डाद्बहिर्भावेनकर्मभूमित्वाभावात्कथंतत्ररक्षसांदीक्षितत्वमितिचेन्न । नित्यकर्मस्वन्यदेशेप्यधिकारात् । रावणादेस्तपोमाहात्म्यात्तत्रकाम्यकर्मसिद्धिरपीत्यन्यत् । ‘यथात्वष्टुरमेन्द्रमेवसोममाजहे’ इत्यादिशतपथोक्तरीत्या । एतेनदेवानामीषद्विकृतानपियज्ञान्दर्शयतीतिभाष्यरीत्याचाङ्गवैकल्येप्यनुष्ठितात्कर्मणोवृत्रोत्पत्तिरूपकामनासिद्धिस्तथाप्रकृतेदेशरूपाङ्गवैकल्येपितत्सिद्धिः । रक्षसामपिदेवयो-

[पा०] १ इदमर्धं क. च. छ. ज. पाठेषु. २ ङ. छ.—ट. पुरस्कृतैः. ३ क. ग. घ. गृहमुख्यैः. ४ ख. पुरी. ५ क. ख. घ.—ट. विभूषितै. ६ क. घ. च. छ. ज. ञ. भूयो. ७ ख. ङ.—ज. ञ. ट. राघवार्थे. ८ ङ.—ज. ञ. ट. रुचिरं. ९ ङ.—झ. ट. मदनविद्धानां. १० क. ख. ग. ङ.—ज. ञ. ट. रक्षोगणं. ११ क. ख. ग. ङ.—ट. राक्षसस्य. १२ च. छ. झ. जिनांबरवाससः. १३ ख. स्तदा.

कूटमुद्गरपाणींश्च दण्डायुधधरानपि ॥ एकाक्षानेक[1]कर्णांश्च [2]लम्बोदरपयोधरान् ॥ १६ ॥
करालान्भुग्नवक्त्रांश्च विकटान्वामनांस्तथा ॥ धन्विनः खड्गिनश्चैव शतघ्नीमुसलायुधान् ॥ १७ ॥
परिघोत्तमहस्तांश्च विचित्रकवचोज्ज्वलान् ॥ नातिस्थूलान्नातिकृशान्नातिदीर्घातिह्रस्वकान् ॥ १८ ॥
[3]नातिगौरान्नातिकृष्णा[4]न्नातिकुब्जान्न वामनान् ॥ विरूपान्बहुरूपांश्च सुरूपांश्च सुवर्चसः ॥
[5]ध्वजीन्पताकिनश्चैव ददर्श विविधायुधान् ॥ १९ ॥
शक्तिवृक्षायुधांश्चैव पट्टिशाशनिधारिणः ॥ क्षेपणीपाशहस्तांश्च ददर्श स [6]महाकपिः ॥ २० ॥
[7]स्रग्विणस्त्वनुलिप्तांश्च वराभरणभूषितान् ॥ नानावेषसमायुक्तान्यथा[8]स्वैरगतान्बहून् ॥
तीक्ष्णशूलधरांश्चैव वज्रिणश्च महाबलान् ॥ २१ ॥
शतसाहस्रमव्यग्रमारक्षं मध्यमं कपिः ॥ रक्षोधिपतिनिर्दिष्टं ददर्शान्तःपुराग्रतः ॥ २२ ॥
स तदा तद्गृहं दृष्ट्वा महाहाटकतोरणम् ॥ राक्षसेन्द्रस्य विख्यातमद्रिमूर्ध्नि प्रतिष्ठितम् ॥ २३ ॥
पुण्डरीकावतंसाभिः [9]परिघाभिरलंकृतम् ॥ प्राकारावृतमत्यन्तं ददर्श स महाकपिः ॥ २४ ॥
त्रिविष्टपनिभं दिव्यं दिव्यनादवि[10]नादितम् ॥ वाजिहेषि[11]तसंघुष्टं नादितं [12]भूषणैस्तदा ॥ २५ ॥
रथैर्यानैर्विमानैश्च [13]तथा हयगजैः शुभैः ॥ वारणैश्च चतुर्दन्तैः श्वेताभ्रनिचयोपमैः ॥ २६ ॥

हरणात् । " यथा वज्रं हरेः पाणौ तथा विप्रकरे कुशः " इतिस्मरणादिति भावः । अग्निकुण्डायुधान् जयार्थं होमशीलान् ॥ १५ ॥ कूटमुद्गरपाणीन् कूटो नामायस्कारकूटसदृश आयुधविशेषः । " कूटोस्त्री पुञ्जमायाद्रिश्रृङ्गायोघनवेश्मसु । छले बाणान्तरे दम्भे भग्नश्रृङ्गवृषे तु ना " इति शब्दरत्नाकरे । मुद्गरो द्रुघणः । " मुद्गरो द्रुघणो घनः " इति वैजयन्ती ॥ १६ ॥ करालान् भीमान् । " करालो दन्तुरे तुङ्गे विशाले विकृतेऽपि च " इति भागुरिः । भुग्नवक्त्रान् कुटिलवक्त्रान् । " आविद्धं कुटिलं भुग्नं " इत्यमरः । विकटान् विषमाङ्गान् । शतघ्नी शतशङ्कुरयोगदा । " अयःकण्टकसञ्छन्ना शतघ्नी परिकीर्तिता " इति वैजयन्ती । मुसलं आयसोरत्निप्रमाणको दण्डः । "मुसलं त्वायसो दण्डो धार्योऽरत्निप्रमाणकः " इति शब्दरत्नाकरे ॥ १७ ॥ परिघः दण्डविशेषः । नातिदीर्घातिह्रस्वकानित्यत्र हकारोपरि ऋकारोच्चारणं वृत्तभङ्गपरिहाराय । एवं ध्वजिन इति वक्तव्ये ध्वजीनित्युक्तिश्च छन्दोभङ्गपरिहारायैव ॥ १८—१९ ॥ पट्टिशः तीक्ष्णधारो लोहदण्डः । " पट्टिशोऽयोदीर्घदण्डस्तीक्ष्णधारः क्षुरोपमः " इति निघण्टुः । क्षेपणी क्षेपणीयः ॥२०॥ वेषः अलङ्कारः। यथास्वैरगतान् यथेष्टचारिणः ॥ २१ ॥ शतसहस्रमेव शतसाहस्रं स्वार्थे अण् । आरक्षं गुल्मं । अन्तःपुराग्रतः अन्तर्नगराग्रतः । रक्षोधिपतिनिर्दिष्टं मध्यमगुल्मभूतं रावणमूलबलं ददर्शेत्यर्थः ॥ २२ ॥ स तदेत्यादिश्लोकद्वयमेकान्वयं ॥ सः कपिः । तत् आरक्षं दृष्ट्वा सः राक्षसेन्द्रस्य गृहं ददर्शेत्यन्वयः । क्रियाभेदात्तच्छब्दद्वयं ॥ २३—२४ ॥ त्रिविष्टपेत्यादि ॥ यानैः शिबिकादिभिः । विमानैः व्योमयानैः । हयगजैरित्यत्र गजशब्दः द्विदन्तगजपरः । अतो न वारणैरित्यनेन पुनरुक्तिः । मृगपक्षिभिश्च भूषितमित्यन्वयः। रक्षिभिर्यातुधानैर्गुप्तमिति संबन्धः। आविवेश जगाम । गृहप्रवेशस्य दूरे वक्ष्यमाणत्वात्

निखात् ॥ १५ ॥ **ती०** द्वितीयस्तच्छब्दःप्रसिद्धिपरः ॥ २३—२४ ॥ **ति०** विचित्रवर्णादिमत्त्वादद्भुतत्वंहयानां । हयगजैः हयाकारैर्गजैः । स्वल्पगजैरितियावत् । **स०** वाजिशब्दसमभिव्याहाराद्धेषितशब्दोध्वनिमात्रपरः ॥ २५—२६ ॥

[पा०] १ ङ. झ. वर्णांश्च. २ ख. ङ. झ. ट. चलदेकपयोधरान्. ग. च. छ. ज. ञ. लंबकर्णपयोधरान्. क. चललंबपयोधरान्. ३ अतिगौरान्महाकृष्णानतिकुब्जातिवामनान्. ४ ख. ग. घ. न्नातिकुब्जातिवामनान्. ५ क. च. छ. ज. ञ. पताकध्वजिनश्चैव. ख. ङ. झ. ञ. ट. ध्वजिनःपताकिनश्चैव. ग. खड्गिनःपाशिनश्चैव. ६ च. महान्कपिः. ७ क. च. छ. स्रग्विणस्स्वनु. ८ ख. ङ.—ट. स्वैरचरान्. घ. स्वैरंगतान्. ९ क. ख. घ.—ट. परिघाभिःसमावृतं. १० ग. विभूषितं. ११ ङ. झ. ट. संघुष्टमद्भुतैश्चहयैस्तथा. १२ च. छ. ज. ञ. भूषणस्वनैः. १३ च. छ. ज. ञ. तथाद्भुतहयैः.

भूषितं रुचिरद्वारं मत्तैश्च मृगपक्षिभिः ॥ रक्षितं सुमहावीर्यैर्यातुधानैः सहस्रशः ॥
राक्षसाधिपतेर्गुप्तमाविवेश महाकपिः ॥ २७ ॥
सहेमजाम्बूनदचक्रवालं महार्हमुक्तामणिभूषितान्तम् ॥
परार्ध्यकालागरुचन्दनाक्तं स रावणान्तःपुरमाविवेश ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुर्थः सर्गः ॥ ४ ॥

पञ्चमः सर्गः ॥ ५ ॥

सितकिरणे गगनाङ्गणमलङ्कुर्वाणेनानावस्थाकारगुणकराक्षसस्त्रीपुरुषकुलमवलोकयतोऽनवलोकयतश्च सतीसीतां हनुमतोदुःखोदयः ॥ १ ॥

ततः स मध्यं गतमंशुमन्तं ज्योत्स्नावितानं महदुद्वमन्तम् ॥
ददर्श धीमान्दिवि भानुमन्तं गोष्ठे वृषं मत्तमिव भ्रमन्तम् ॥ १ ॥
लोकस्य पापानि विनाशयन्तं महोदधिं चापि समेधयन्तम् ॥
भूतानि सर्वाणि विराजयन्तं ददर्श शीतांशुमथाभियान्तम् ॥ २ ॥
या भाति लक्ष्मीर्भुवि मन्दरस्था तथा प्रदोषेषु च सागरस्था ॥
तथैव तोयेषु च पुष्करस्था रराज सा चारुनिशाकरस्था ॥ ३ ॥
हंसो यथा राजतपञ्जरस्थः सिंहो यथा मन्दरकन्दरस्थः ॥
वीरो यथा गर्वितकुञ्जरस्थश्चन्द्रो विबभ्राज तथाऽम्बरस्थः ॥ ४ ॥

॥ २५—२७ ॥ हेम अन्यत्र जातं सुवर्णं । जाम्बूनदं जम्बूनद्यां जातं । चक्रवालं प्राकारमण्डलं । रावणान्तःपुरं रावणान्तर्नगरं ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुर्थः सर्गः ॥ ४ ॥

ततः स मध्यमित्यादि ॥ दिवि आकाशे । मध्यं गतं आकाशमध्यगतमित्यर्थः । लङ्काप्रवेशे चन्द्रोदयोक्तेः रावणनगरप्रवेशे अर्धरात्र इति सूच्यते । उत्तरश्लोके अभियान्तमित्यनेनाभिगमनमुच्यते । दक्षिणां दिशं गच्छतोभिमुखत्वासंभवात् । किन्तु गमनमात्रं । सप्तदशे सर्गेपि प्रजगाम नभश्चन्द्र इति प्रकर्षेण गमनवचनं नभोमध्यातीतत्वमाचष्टे । अंशुमन्तमिति चन्द्र एवोच्यते । भानुमन्तं दीप्तिमन्तं । वृषं श्वेतं । अस्मिन्सर्गे च्छेकानुप्रासः नतु यमकं अर्थभेदाभावात् । तदुक्तं काव्यप्रकाशे । "भिन्नार्थानां त्र्यादीनां वर्णानां विवृत्तिर्यमक"मिति ॥ १ ॥ पापानि दुःखानि ॥ २ ॥ भुवि मन्दरो लक्ष्मीवान् । प्रदोषेषु सागरः । तोयेषु पद्मं श्रीमत् । तद्वत्तदानीं चन्द्रो विशिष्टलक्ष्मीको बभूवेत्यर्थः । अत्रान्यस्यान्यत्रासंबन्धान्मन्दरादिलक्ष्मीरिवास्य लक्ष्मीरिति सादृश्याक्षेपान्निदर्शनालङ्कारः । तदुक्तं काव्यप्रकाशे निदर्शनायाम् "अभिमान्यस्तु संबन्ध उपमापरिकल्पक" इति ॥३॥ राजतपञ्जरस्थः गगनगर्भस्य ज्योत्स्नाक्षालितत्वात् ।

ती० सहेमेतिच्छेदः । हेमसहितंजांबूनदचक्रवालसहितंस्वर्णप्राकारमण्डलयुक्तं । स० हेम्ना पीतवर्णसुवर्णेनसहितंयज्जांबूनदं श्वेतवर्णसुवर्णं ॥ २८ ॥ इतिचतुर्थः सर्गः ॥ ४ ॥

ती० यद्वातारामध्यंगतं ॥ ति० ततः अन्तःपुरप्रवेशोत्तरं । रात्रेःप्रथमयामस्यसमाप्तकल्पत्वमत्रेतिबोध्यं ॥ स० ज्योत्स्नारूपं वितानमुद्वमन्तमितिविशेषणबलादंशुमन्तमित्यस्यसूर्येरूढस्यापियोगेनचन्द्रपरता । किंचतमेवचन्द्रंसीतायारामस्यवाभानुमन्तंसूर्यमिव । विरहितापकत्वगुणयोगेनददर्शेत्यर्थः । चन्द्रपक्षेभानुमन्तंदीप्तिमन्तमित्यर्थः ॥१॥ ती० पापशब्देनपापफलंदुःखमुच्यते । लो-

[पा०] १ ङ. झ. ट. भूषितैः. २ क.—ट. गृहंकपिः. ३ च. ज. ञ. चन्दनाङ्कितं. ङ. झ. ट. चन्दनार्हं. ४ घ. ङ. झ. ञ. ट. मुहुरुद्वमन्तं. ५ झ. ञ. ट. धीमान्भुवि. ६ ङ. झ. ट. यथा. ख. ञ. प्रदोषकालेषुच.

स्थितः ककुद्मानिव तीक्ष्णशृङ्गो महाचलः श्वेत इ[1]वोच्चशृङ्गः ॥
हस्तीव जाम्बूनदबद्धशृङ्गो [2]रराज चन्द्रः [3]परिपूर्णशृङ्गः ॥ ५ ॥
विनष्टशीताम्बुतुषारपङ्को महाग्रहग्राहविनष्टपङ्कः ॥
प्रकाशलक्ष्म्याश्रयनिर्मलाङ्को रराज चन्द्रो भगवाञ्शशाङ्कः ॥ ६ ॥
शिलातलं प्राप्य यथा मृगेन्द्रो महारणं प्राप्य यथा गजेन्द्रः ॥
राज्यं समासाद्य यथा नरेन्द्रस्तथाप्रकाशो विरराज चन्द्रः ॥ ७ ॥
प्रकाशचन्द्रोदयनष्टदोषः प्रवृद्धरक्षःपिशिताशदोषः ॥
रामाभिरामेरितचित्तदोषः स्वर्गप्रकाशो भगवान्प्रदोषः ॥ ८ ॥
तन्त्रीस्वनाः कर्णसुखाः प्रवृत्ताः स्वपन्ति नार्यः पतिभिर्[4]सुवृत्ताः ॥
नक्तंचराश्चापि तथा प्रवृत्ता विहर्तुमत्यद्भुतरौद्रवृत्ताः ॥ ९ ॥

मन्दरकन्दरस्थः तस्य श्वेतगिरित्वात् । गर्वितकुञ्जरस्थः नीलरूपस्य नभस उपर्यवस्थानात् । अत्र पुष्टत्वादीनां साधारणधर्माणामनुपादानाल्लुप्तोपमालङ्कारः॥४॥ परिपूर्णशृङ्गः परिपूर्णकलः। अत्र शृङ्गशब्दस्य विषाणाद्यर्थभेदेपि बिम्बप्रतिबिम्बभावेनौपम्यम् ॥५॥ शीताम्बु हिमाम्बु तुषाराः पृषताः पङ्कः तमः । विनष्टाः शीताम्बुतुषारा एव पङ्काः यस्मिंस्तथा । "तुषारः शीकरे हिमे" इति विश्वः । महाग्रहाणां शुक्रबृहस्पत्यादीनां ग्राहेण ग्रहणेन आच्छादनेन विनष्टः पङ्को मलं यस्य सः महाग्रहग्राहविनष्टपङ्कः । स्वतेजसा महाग्रहतिरस्कारेण व्यक्तनैर्मल्य इत्यर्थः । यद्वा महाग्रहः सूर्यः तस्य ग्राहेण किरणपरिग्रहेण विनष्टः विनाशितः पङ्कः तमः येन सः । तदा तरणिकिरणसंक्रमणेन देदीप्यमानमण्डल इत्यर्थः । तदुक्तं वराहमिहिरेण । "सलिलसमे शशिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम् । क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः" इति॥ प्रकाशलक्ष्म्याश्रयनिर्मलाङ्कः तेजस्समृद्धियोगात्स्पष्टकलङ्कः । अतिधवले चन्द्रे परभागयोगेन कलङ्कस्याप्यौज्वल्यं भवतीत्यर्थः । शशाङ्क इति । भूच्छायामयः शशरूपः अङ्कः यस्य स तथा । "लोकच्छायामयं लक्ष्म तवाङ्के शशसन्निभं" इति हरिवंशोक्तेः । भगवान् महाप्रभाववान् ॥ ६ ॥ प्रकाशः प्रकाशमानः ॥ ७ ॥ प्रकाशेन चन्द्रोदयेन नष्टः दोषः तिमिरं यस्मिन्सः । प्रवृद्धः रक्षसां पिशिताशनानां च दोषः सञ्चाररूपो यस्मिन्स तथा । रामाभिः अभिरामैः कान्तैश्च ईरितः त्यक्तः चित्तदोषः कोपाभिमानरूपः यस्मिन् । स्वर्गप्रकाशः स्वर्गतुल्यः । तद्वदानन्दावह इत्यर्थः । भगवान् श्रीमान् । "भगः श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु" इत्यमरः । प्रदोषः गत इति शेषः ॥ ८ ॥ तन्त्रीति स्पष्टम् ॥ ९ ॥

काह्लादकत्वाच्चन्द्रस्यदुःखविनाशकरत्वं । यद्वासूर्यचन्द्रादीनांलोकपावनत्वादितिभावः ॥२॥ **ती०** प्रवृत्तरक्षःपिशिताशदोषः प्रवृत्तःरक्षसांपिशितभक्षणरूपदोषोयस्मिन् ।पिशितभक्षणस्यदोषत्वमविहितजनहिंसाहेतुत्वात् । स्वर्गप्रकाशःसीतान्वेषणस्यानुकूलत्वेनानन्दहेतुतयाप्रदोषकालस्यस्वर्गसदृशत्वोक्तिः। अतएवभगवान् पूज्यः आदरणीयइतियावत् ॥**स०** भगवान् पूर्वोक्तरीत्यामाहात्म्यवान् प्रदोषः रात्रिकालः । स्वर्गप्रकाशः स्वर्गस्थानवत्सुखकरः । कीदृशः प्रकाशचन्द्रोदयनष्टदोषः प्रकाशायजातोयश्चन्द्रोदयस्तेननष्टोदोषः अन्धकाराख्यःयस्यसतथा । प्रवृद्धरक्षसांपिशिताशरूपःमांसभक्षणरूपोदोषो यस्मिन् । रामाभिःस्त्रीभिःअभिरामान्पतीन् प्रति ईरितेनवचनेनचित्तदस्यचित्तंद्यतिखण्डयतीतिव्युत्पत्त्यामन्मथस्य उषःदाहः निवृत्तिरितियावत् । यस्मिन् कान्तासुरतसँल्लापजनितमन्मथोत्सववानित्यर्थः । अथवारामाभिरामाणांपरस्परमीरितरूपप्रणयकलहाख्यचित्तदोषवानित्यर्थः ॥ उषदाहे । 'घञर्थेकविधानं' इतिकः ॥ **शि०** प्रदोषेचन्द्रनियन्तृत्वमारोप्याह—प्रकाशेति । प्रकाशविशिष्टचन्द्रस्योदयेननष्टोविनाशितः दोषः स्त्रीविषयकपुरुषदयाभावोयेनसः । रामस्याभिरामाय सीतयासहरमणाय ईरितः चन्द्रोदयनेनप्रापितः चित्तदोषः सीताविषयकराममनोल्यासक्तिरूपदोषः दोषाभासोयेन । अतएव स्वर्गस्यसुखविशेषस्य प्रकाशःधर्मात्मसुप्रापकः । अतएवभगवान्समर्थः ॥ ८ ॥ **ति०** सुपृक्ताःभेदग्रहाविषयाः । स्ववृत्ताइतिपाठेस्वंस्वीयंसहजपातिव्रत्यलक्षणंवृत्तंचारित्रंयासांताः । नक्तंचराः उलूकादयोराक्षसाश्चतथा-

[पा०] १ ङ. झ. ञ. ट. इवोर्ध्वशृङ्गः. २ ख. ग.—ट. विभाति. ३ ख. ग. घ. च. छ. प्रतिपूर्ण. ४ ङ. झ. ट. ससुपृक्ताः.

मत्तप्रमत्तानि समाकुलानि रथाश्वभद्रासनसंकुलानि ॥
वीरश्रिया चापि समाकुलानि ददर्श धीमान्स कपिः कुलानि ॥ १० ॥
परस्परं [1]चाधिकमाक्षिपन्ति भुजांश्च पीनानधिनि[2]क्षिपन्ति ॥
मत्तप्र[3]लापानधिकं क्षिपन्ति मत्तानि चान्योन्यमधिक्षिपन्ति ॥ ११ ॥
रक्षांसि वक्षांसि च विक्षिपन्ति गात्राणि [4]कान्तासु च विक्षिपन्ति ॥
रूपाणि चित्राणि च विक्षिपन्ति दृढानि चापानि च विक्षिपन्ति ॥ १२ ॥
ददर्श कान्ताश्च समालभन्त्य[5]स्तथापरास्तत्र पुनः स्वपन्त्यः ॥
सुरूपवक्त्राश्च तथा हसन्त्यः क्रुद्धाः पराश्चापि विनिश्श्वसन्त्यः ॥ १३ ॥
महागजैश्चापि तथा नदद्भिः सुपूजितैश्चापि तथा [6]सुसद्भिः ॥
रराज वीरैश्च [7]विनिश्श्वसद्भिर्ह्रदो भुजङ्गैरिव निश्श्वसद्भिः ॥ १४ ॥
बुद्धिप्रधानान्रुचिराभिधानान्सश्रद्दधानाञ्जगतः प्रधानान् ॥
नानाविधानान्रुचिराभिधानान्ददर्श तस्यां पुरि यातुधानान् ॥ १५ ॥
ननन्द [8]दृष्ट्वा स च तान्सुरूपान्नानागुणानात्मगुणानुरूपान् ॥
वि[9]द्योतमानान्स तदानुरूपान्ददर्श कांश्चिच्च पुनर्विरूपान् ॥ १६ ॥
ततो [10]वराहाः सुविशुद्धभावास्तेषां स्त्रियस्तत्र [11]महानुभावाः ॥
प्रियेषु पानेषु च सक्तभावा ददर्श तारा इव [12]सुप्रभावाः ॥ १७ ॥

मत्ताः मधुमदक्षीबाः । प्रमत्ताः प्रस्तुतकार्यविस्मारिणः । मत्तप्रमत्तजनयोगात्कुलान्यपि तथोच्यन्ते । कुलानि गृहाणि । समाकुलानि समाकुलजनानि । वीरश्रिया वीरलक्ष्म्या । वीर इति भिन्नं पदं वा कपिविशेषणं ॥ १० ॥ परस्परं चेत्यादिश्लोकद्वयमेकान्वयं ॥ ददर्शेति संबध्यते । आक्षिपन्तीत्यादीनि शत्रन्तानि रक्षोविशेषणानि । आक्षिपन्ति अपहसन्ति । अधिविक्षिपन्ति अन्योन्यस्योपरि दधति । अधिविक्षिपन्ति अधिकं मुञ्चन्ति । अधिक्षिपन्ति भर्त्सयन्ति । विक्षिपन्ति विवृण्वन्ति । चित्राणि रूपाणि विविधान्वेषान् । विक्षिपन्ति वितन्वन्ति । चापानि चापान् विक्षिपन्ति विस्फारयन्ति ॥ ११—१२ ॥ समालभन्त्यः अङ्गरागेणानुलिंपन्त्यः । समालपन्त्य इति च पाठः । सर्वत्र व्यत्ययेन द्वितीयार्थे प्रथमा ॥ १३ ॥ महागजैरिति ॥ सा पुरीति शेषः । सुसद्भिः सुतरां सद्भिः । विनिःश्वसद्भिः युद्धयोग्यवीरालाभात् ॥ १४ ॥ बुद्धिप्रधानान् बुद्ध्या श्रेष्ठान् प्रधानबुद्धीन्वा उत्तमबुद्धीनित्यर्थः । रुचिराभिधानान् शोभनव्यवहारान् सश्रद्दधानान् आस्तिकान् । नानाविधानान्नानाकारान् । रुचिराभिधानान् हृद्यनाम्नः ॥ १५ ॥ आत्मगुणानुरूपान् आत्मगुणानुरूपव्यवहारान् ॥ १६ ॥ वराणां श्रेष्ठानां अर्हाः वराहाः । सुविशुद्धभावाः कान्तेषु निर्मलहृदयाः । महानुभावाः पातिव्रत्यरूपमहाप्रभावाः । यद्वा महानुभावाः अनुभावाः कटाक्षभुज-

विहर्तुंप्रवृत्ताः ॥ ९ ॥ स० मत्ताः स्वभावतः । प्रमत्ताः मद्यादिना । तेचते अनिनःप्राणिनश्चतैःसमाकुलानि । चापिभिःधनुर्धारिभिःसमाकुलानीत्यप्यर्थः ॥ १० ॥ स० सुसद्भिः विभीषणादिभिः ॥ १४ ॥ स० जगतःस्थावरलोकस्यप्रधानंज्ञानंयेषांतेतथा तान् । अलुक्समासः । ‘प्रधानंस्यात्प्रज्ञायां’ इतिविश्वः । जगतः उक्तरूपस्यप्रधानान् प्रकृष्टाधानाःतदुपलक्षितजीवनोपायाःयैस्ते तान् । अतोनोभयत्रलिङ्गानुपपत्तिः ॥ १५ ॥ ति कांश्चित्पुनर्विरूपानपिविद्योतमानान्सुरूपानिवददर्शेत्यन्वयः ॥ स० सरूपान्

[पा०] १ क. चापिसमाक्षिपन्ति. २ क. ख. घ. —ट. विक्षिपन्ति. ३ ग. —ट. प्रलापानधिविक्षिपन्ति. क. प्रमत्तानधिविक्षिपन्ति. ४ क. गात्रेषुच. ५ छ. ज. स्पृधापराश्चापि. ६ क. च. छ. ज. ञ. सुहृद्भिः. ७ ङ. सुनिश्श्वसद्भिः. ८ ञ. दृष्ट्वास्वपतः. ९ ख. घ.—ट. विद्योतमानान्सचतान्सुरूपान्. क. ग. विद्योतयन्तीःसचताःसुरूपाददर्शकान्ताश्चपुनर्विरूपाः. १० क. महार्हाः. ११ क. विशुद्धभावाः. १२ ङ. छ.—ट. सुस्वभावाः.

श्रिया[1] ज्वलन्तीस्त्रपयोपगूढा निशीथकाले रमणोपगूढाः ॥
ददर्श काश्चित्प्रमोदपगूढा यथा विहङ्गाः[2] कुसुमोपगूढाः ॥ १८ ॥
अन्याः पुनर्हर्म्यतलोपविष्टास्तत्र प्रियाङ्केषु[3] सुखोपविष्टाः ॥
भर्तुः प्रिया[4] धर्मपरा निविष्टा ददर्श धीमान्मदनाभिविष्टाः[5] ॥ १९ ॥
अप्रावृताः काञ्चनराजिवर्णाः काश्चित्पराध्यास्तपनीयवर्णाः ॥
पुनश्च काश्चिच्छशलक्ष्मवर्णाः कान्तप्रहीणा रुचिराङ्गवर्णाः ॥ २० ॥
ततः प्रियान्प्राप्य मनोभिरामान्सुप्रीतियुक्ताः प्रसमीक्ष्य[6] रामाः ॥
गृहेषु हृष्टाः परमाभिरामा हरिप्रवीरः स ददर्श रामाः ॥ २१ ॥
चन्द्रप्रकाशाश्च हि वक्रमाला वक्राक्षिपक्ष्माश्च[7] सुनेत्रमालाः ॥
विभूषणानां च ददर्श मालाः शतह्रदानामिव चारुमालाः ॥ २२ ॥
न त्वेव सीतां परमाभिजातां पथि स्थिते राजकुले प्रजाताम् ॥
लतां प्रफुल्लामिव साधुजातां ददर्श तन्वीं मनसाऽभिजाताम् ॥ २३ ॥
सनातने वर्त्मनि संनिविष्टां रामेक्षणान्तां[8] मदनाभिविष्टाम् ॥
भर्तुर्मनः श्रीमदनुप्रविष्टां स्त्रीभ्यो[9] वराभ्यश्च सदा विशिष्टाम् ॥ २४ ॥
उष्णार्दितां सानुसृतास्रकण्ठीं पुरा वरार्होत्तमनिष्ककण्ठीम् ॥

क्षेपादयः सुप्रभावाः शोभनवैभवाः ॥ १७ ॥ प्रमदोपगूढाः हर्षोपगूढाः विहङ्गाः विहङ्गीः ॥ १८ ॥ निविष्टाः ऊढाः पाणिगृहीता इत्यर्थः । “ निवेशः शिबिरोद्वाहन्यासे ” इति विश्वः ॥ १९ ॥ अप्रावृताः अनवकुण्ठिताः। काञ्चनराजिवर्णाः कनकरेखाकाराः । तपनीयवर्णाः तप्तकाञ्चनवर्णाः । शशलक्ष्मवर्णाः चन्द्रपाण्डुराः । कान्तप्रहीणाः विरहिण्यः ॥ २० ॥ प्रियान्प्राप्य अभिसृत्य । सुप्रीतियुक्ताः मनोभिरामाः रामाः प्रसमीक्ष्य गृहेषु रामाश्च ददर्श । अभिसारिकाः कुलपालिकाश्च ददर्शेत्यर्थः ॥ २१ ॥ वक्रनेत्रदर्शनं मानुषीत्वराक्षसीत्वविवेकार्थं । आभरणदर्शनं स्वदृष्टसीताभरणतुल्याभरणदर्शनार्थं ॥२२॥ परमाभिजातां अत्यन्ताभिरामां । साधुजातां सुरूपां । मनसाभिजातां अयोनिजामित्यर्थः॥२३॥सनातने अविच्छिन्ने वर्त्मनि पातिव्रत्यधर्मे । रामेक्षणे अन्तो निश्चयो यस्यास्तां श्रीमत् सीताचिन्तनश्रीमत् । विशिष्टां उत्कृष्टां ॥ २४ ॥ सानुसृतास्रकण्ठीं अनुगतास्रेण अनुगतबाष्पेण कण्ठेन सह वर्तमानां । पुरा रामपार्श्वा-

समानरूपान् । आत्मगुणानांशौर्यादीनांअनुरूपान्अनुकूलाकृतिमतः । सुरूपान्सुन्दरान् ॥ १६ ॥ **ति०** यथाविहङ्गाःविहङ्गीरिवेत्यर्थः । इन्द्रनीलमणिमयोर्ध्वगेहेषुनीलतमस्सदृशेषुशयनात्तत्सादृश्यं ॥ **शि०** विहगेनपक्षिविशेषेणउपगूढाःविहङ्गाइवददर्श । अत्युन्नतप्रासादेषुशयनादीदृगुपमानोपमेयभावः ॥ **स०** प्रमदोपगूढाःविहगीभिरुपगूढाःविहङ्गायथाभवन्तितथाएताददर्श ॥१८॥ **रामानु०** वक्राणिअक्षिपक्ष्माणियासांताः। ‘डाबुभाभ्यामन्यतरस्यां’ इतिडाप् । सीतामन्वेषमाणस्यहनुमतःस्त्रीणांमुखनयनादिदर्शनंमानुषीत्वराक्षसीत्वविभागपरिज्ञानार्थं । आभरणदर्शनंरामोक्तसीताभरणस्वरूपनिरूपणार्थं । एतच्च “तांसमीक्ष्यविशालाक्षींराजपुत्रीमनिन्दिताम् । तर्कयामाससीतेतिकारणैरुपपादयन् । वैदेह्यायानिचाङ्गेषुतदारामोऽन्वकीर्तयत् । तान्याभरणजालानिशाखाशोभीन्यलक्षयत्’ इति । राजपुत्रीत्वविशालाक्षीत्वाभरणदर्शनैःसीतात्वनिर्णयस्योपरिवक्ष्यमाणत्वादवगम्यते ॥ **ती०** परमाभिरामाश्च ददर्शेतिसंबन्धः । पूर्वोक्ताःनियतभर्तृकाः । अभिसारिकासमभिव्याहारात्उत्तरार्धेनस्वगृहप्राप्तरमणावाराङ्गनाउच्यन्ते ॥ **ति०** वक्राक्षिपक्ष्माइतिपाठेऽक्षिपदमधिकं । वक्रपक्ष्माइत्येवोचितं । पक्ष्मसुवक्रत्वमपिकिमित्यपिचिन्त्यं ॥ २२ ॥ **रामानु०** साधुजातामित्येतल्लताविशेषणं । मनसाभिजातां ‘ यस्मात्तुधर्षिताचाहमपापाचाप्यनाथवत् । तस्मात्तववधार्थंवैउत्पत्स्येऽहंध्रुवंपुनः” इत्युत्तररामायणोक्तप्रकारेणस्वसंकल्पेनावतीर्णामित्यर्थः ॥ २३ ॥ **स०** मदनाभिविष्टां तामिवविद्यमानां । मदनोमन्मथःअभि-

[पा०] १ ङ. झ. श्रियोज्वलन्तीः. २ ङ. झ. ञ. ट. विहङ्गाविहगोपगूढाः. ३ झ. ञ. प्रियाङ्केसुसुखोप. ४ ङ. ट. पराः. ५ ङ. झ. ञ. ट. मदनोपविष्टाः. ६ झ. ञ. ट. सुमनोभिरामाः. ७ ङ. झ. ञ. ट. वक्राःसुपक्ष्माश्च. ८ ग. ङ झ. ट. रामेक्षणीतां. ९ ङ.—ञ. स्त्रीभ्योपराभ्यश्च. झ. ञ. ट. स्त्रीभ्यःपराभ्यश्च.

सुजातपक्ष्मामभिरक्तकण्ठीं वने प्रनृत्तामिव नीलकण्ठीम् ॥ २५ ॥
अव्यक्तरेखामिव चन्द्ररेखां पांसुप्रदिग्धामिव हेमरेखाम् ॥
क्षतप्ररूढामिव बाणरेखां वायुप्रभिन्नामिव मेघरेखाम् ॥ २६ ॥
सीतामपश्यन्मनुजेश्वरस्य रामस्य पत्नीं वदतां वरस्य ॥
बभूव दुःखाभिहतश्चिरस्य प्लवङ्गमो मन्द इवाचिरस्य ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चमः सर्गः ॥ ५ ॥

षष्ठः सर्गः ॥ ६ ॥

हनुमता पुनर्लङ्काभरणायमानाद्भुततररावणभवनमेत्य तत्समीपस्थप्रहस्तादिनानानामकराक्षसगृहेषु सीतान्वेषणपूर्वकं रावणगृहप्रवेशनं ॥ १ ॥

स निकामं विमानेषु विषण्णः कामरूपधृक् ॥ विचचार पुनर्लङ्कां लाघवेन समन्वितः ॥ १ ॥
आससादाथ लक्ष्मीवान्राक्षसेन्द्रनिवेशनम् ॥ प्राकारेणार्कवर्णेन भास्वरेणाभिसंवृतम् ॥ २ ॥

वस्थानकाले वराहोत्तमनिष्ककण्ठीं वरार्हः उत्तमश्चनिष्कः कण्ठे यस्याः तां उरःकण्ठसंबन्धी भूषणविशेषो निष्कः । अभिरक्तकण्ठीं स्निग्धकण्ठीम् ॥ २५ ॥ अव्यक्तरेखां अव्यक्तस्वरूपां चन्द्ररेखां चन्द्रकलामिव स्थितां । अत्यन्तकृशत्वे कान्तिहीनत्वे च दृष्टान्तोयं । पांसुप्रदिग्धां पांसुकलुषितां हेमरेखां कनकशलाकामिव स्थितां । स्वतःशुद्धस्वभावस्य आगन्तुकमालिन्ये दृष्टान्तोयं । क्षतप्ररूढां क्षतेन प्ररूढां औषधादिना समाहितां । अन्तःशल्यदोषवतीं बहिस्समाहितां । बाणरेखां बाणक्षतिमिव स्थितां । अन्तर्वेदनातिशये दृष्टान्तोयं । वायुप्रभग्नामिव मेघलेखां पुनरसमाधेयशैथिल्ये दृष्टान्तोयं ॥ २६ ॥ चिरस्यापश्यन् चिरकालं निरीक्ष्याप्यपश्यन् । अचिरस्य अचिरेण सपदीत्यर्थः । मन्दो मुग्ध इव दुःखाभिहतो बभूव । " मुग्धो मन्दो विवर्णश्च " इति हलायुधः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चमः सर्गः ॥ ५ ॥

स निकाममित्यादि ॥ विमानेषु विषण्णः विमानेषु सीतामदृष्ट्वा विषण्ण इत्यर्थः । लाघवेनवेगेन

निविष्टः उदरेयस्यास्तांमदनमातरं ॥ २४ ॥ **स०** उष्णार्दितां रामविरहतप्तां । अनुस्रतंअस्रंअश्रुयस्य सचासौकण्ठश्चतेनसहवर्ततइतितथातां । सानुस्रतास्रकण्ठीमित्यादिस्थानत्रयेपिङीबार्षः । यद्वा 'स्वाङ्गाच्च' इतिसूत्रस्थचशब्दसूचिता'ङ्गगात्रकण्ठेभ्यइतिवक्तव्यं' इतिवृत्तिकृदुक्तेर्ङीप् । नचभाष्यानुक्तेरप्रामाणिकाइतिप्रामाणिकाः 'अप्रामाणिकाएव' इतिभट्टोजिनागोजिभट्टोक्तेःकथमितिशङ्क्यं । अनुवृत्त्यैवङीषिसिद्धेचशब्दस्यवैयर्थ्यादेवमादिरूपाणांदुरुपपादनत्वावर्णनाच्च 'अप्रतिषिद्धमनुमतं' इत्युक्तेर्महाभाष्यकारस्यमतमितिसूचितत्वात्कवेर्महत्त्वाच्च । अश्रुकण्ठामितिवापाठइतिनागोजिभट्टोक्तिरनुप्रासभङ्गभीरुभिरनादरणीया ॥ अभिरक्तकण्ठींसुस्वरां । नीलकण्ठीं मयूरीं ॥ २५ ॥ इतिपञ्चमःसर्गः ॥ ५ ॥

स० विमानेषुसप्तभौमाष्टभौमादिप्रासादेषु।विचचार विचारयामास॥**रामानु०**सःलङ्कायामन्विष्टायामपिवैदेह्याअदर्शनेनविषण्णः। विचचारपुनर्लङ्कामितिसम्यक् । कपिर्लङ्कामितिपाठेपिवैदेह्याअन्वेषणेनविषण्णस्यहनुमतोऽन्वेषणकर्तृत्वाभिधानात्पुनरन्वेषणंकृतवानित्ययमर्थोलभ्यते॥१॥**रामानु०** आससादाथलक्ष्मीवान्राक्षसेन्द्रनिवेशनंइतिरावणभवनंप्रविष्टस्यहनुमतः पुनरपिरावणभवनप्राप्त्यभिधानान्मध्येलङ्कान्वेषणाभिधानाच्चपूर्वंरावणभवनंप्रविष्टोहनुमांस्तदानींजाग्रद्बहुरक्षस्संकीर्णतयासीतान्वेषणावसरोऽयंनभवतीतिम-

[पा०] १ ग. मभिराम. २ ख. ग. झ. ञ. ट. प्रवृत्तामिव. ३ क. ङ.—झ. ट. चन्द्रलेखां. ४ ङ. झ. ट. वर्णरेखां. ५ ग. घ. ङ. ट. प्रभग्नामिव. ञ. प्रभुग्नामिव. क. प्रणुन्नामिव. ६ ग. ङ. झ. ट. दुःखोपहतः ७ क. ग.—ट. विचरन्काम. १० क. महार्हाः. ११ के. ९ क. ङ. झ. ञ. ट. आससादच. घ. आससादस.

क्षितं [1]राक्षसैर्घोरैः सिंहैरिव महद्वनम् ॥ समीक्षमाणो भवनं चकाशे कपिकुञ्जरः ॥ ३ ॥
रूप्यकोपहितैश्चित्रैस्[2]तोरणैर्हेमभूषितैः ॥ विचित्राभिश्च कक्ष्याभिर्द्वारैश्च [3]रुचिरैर्वृतम् ॥ ४ ॥
[4]गजास्थितैर्महामात्रैः [5]शूरैश्च विगतश्रमैः ॥ उपस्थितमसंहार्यैर्[6]हयैः स्यन्दनयायिभिः ॥ ५ ॥
सिंहव्याघ्रतनुत्राणैर्दान्तकाञ्चनराजतैः ॥ घोषवद्भिर्विचित्रैश्च सदा विचरितं रथैः ॥ ६ ॥
बहुरत्नसमाकीर्णं परार्ध्यासन[7]भाजनम् ॥ महारथ[8]समावासं महारथ[9]महास्वनम् ॥ ७ ॥
दृश्यैश्च परमोदारैस्तैस्तैश्च मृगपक्षिभिः ॥ विविधैर्बहुसाहस्रैः [10]परिपूर्णं समन्ततः ॥ ८ ॥
विनीतैरन्तपालैश्च रक्षोभिश्च सुरक्षितम् ॥ मुख्याभिश्च वरस्त्रीभिः परिपूर्णं समन्ततः ॥ ९ ॥
मुदितप्रमदारत्नं राक्षसेन्द्रनिवेशनम् ॥ [11]वराभरणसंह्रादैः समुद्रस्वननिस्वनम् ॥ १० ॥
तद्राजगुणसंपन्नं [12]मुख्यैश्चागुरुचन्दनैः ॥ [13]महाजनैः समाकीर्णं सिंहैरिव महद्वनम् ॥ ११ ॥
भेरीमृदङ्गाभिरुतं शङ्खघोषनि[14]नादितम् ॥ नित्यार्चितं [15]पर्वहुतं पूजितं राक्षसैः सदा ॥ १२ ॥

॥ १—२ ॥ चकाशे जहर्षेत्यर्थः ॥ ३ ॥ रूप्यकोपहितैः रजतनिर्मितैः । कक्ष्याभिः प्रकोष्ठैः ॥ ४ ॥ असंहार्यैः अवध्यैः । स्यन्दनयायिभिः स्यन्दनवाहकैः ॥ ५ ॥ सिंहव्याघ्रतनुत्राणैः सिंहव्याघ्रचर्मपरिवृतैरित्यर्थः ॥ ६ ॥ महारथसमावासं महारथानां रक्षसामाकरं। महारथमहास्वनं महतां रथानां महान् स्वनः यस्मिन् ॥ ७—८ ॥ अन्तपालैः बाह्यरक्षिभिः ॥ ९ ॥ राक्षसेन्द्रनिवेशनं राक्षसेन्द्राः राक्षसश्रेष्ठाः निविशन्ते समीपे निवसन्त्यस्मिन्निति राक्षसेन्द्रनिवेशनमित्यर्थः। अन्यथा वक्ष्यमाणवेश्मपदेन पुनरुक्तिःस्यात्। संह्रादः शब्दः। समुद्रस्वनवन्निस्वनतीति समुद्रस्वननिस्वनम्। पचाद्यच् ॥ १० ॥ तत् प्रसिद्धं राजगुणसंपन्नं राजोपचारैर्धूपादिभिः संपन्नं । अगुरुचन्दनैरित्यत्रापि संपन्नमिति संबध्यते ॥ ११ ॥ पर्वसु हुतं होमो

त्राततोनिष्क्रम्यपुनर्लङ्कांविचित्यराक्षसेन्द्रनिवेशनमाससादेत्यवगम्यते ॥ २ ॥ **ती०** चकाशे विस्मयादुल्लासेत्यर्थः । चचारकपिकुञ्जरइतिपाठः । **रामानु०** भवनमितस्ततोनिरीक्षमाणस्सन्नर्कवर्णभवनप्राकारतेजस्संबन्धात्सप्रकाशोऽभूदित्यर्थः ॥ **स०** चकाशे भयाभावादितिभावः॥ ३॥ **ति०**चकाशे चन्द्रसाहित्याद्यक्तान्वेषणक्रियोबभूवेत्यर्थः॥ **स०**रूप्यस्ययत्कंउदकंतेनउपहितैःलिखितैः।रूप्यशब्देनाहतसुवर्णग्राह्यं । 'रूप्यंस्यादाहतेस्वर्णे' इतिविश्वः । कक्ष्याभिः प्रकोष्ठापरपर्यायरक्षकनिवासस्थानैः ॥४॥ **स०** महामात्रैः अंबष्ठैः । असंहार्यैःउपसंहर्तुमशक्यवेगैरितिहयविशेषणंवा ॥ **रामानु०** महामात्रैःप्रधानैः । 'महामात्राःप्रधानानि' इत्यमरः ॥ ५ ॥ **रामानु०** महारथसमावापमितिपाठेपिमहारथानांरथिकविशेषाणांआवापं आवासभूतमित्यर्थः ॥ **ति०** महतांरथानामावापःस्थानंसमन्ताद्यस्मिंस्तत् ॥ **स०** एकोदशसहस्राणियोधयेद्यस्तुधन्विनाम् । अस्त्रशस्त्र(शस्त्रशास्त्र)प्रवीणश्चसमहारथउच्यते ' इत्युक्तलक्षणानांयस्समावापः उपवेशनवेदिका सयस्मिन् । ' आवापःपरिक्षेपालवालयोः ' इतिविश्वः । महारथानांउक्तलक्षणानामपिशत्रूणां महत् असनं गतिनिवृत्तिर्यस्मिन् । ' असनंयात्रानिवृत्तिः ' इतिविश्वः ॥ ७ ॥ **रामानु०** दृश्यैः दर्शनीयैः । परमोदारैः अतिमहद्भिः । ' उदारोदातृमहतोः ' इत्यमरः ॥ ८ ॥ **रामानु०** राक्षसेन्द्रनिवेशनं राक्षसेन्द्राणांनिवेशनानियस्मिंस्तत् ॥ **स०** वराभरणनिर्ह्रादैःकरणैःसमुद्रस्वननिस्वनं तद्ध्वनिसदृशध्वनिमत् ॥ १० ॥ **रामानु०** राजगुणाः छत्रचामरादयःतैः संपन्नं समृद्धं ॥ ११ ॥ **ति०** पर्वसुसुतःसोमोयस्मिन्यज्ञार्थेतत्पर्वसुतं । राक्षसैःसदापूजितं स्वपूजनीयदेवताकं ॥ **रामानु०** नित्यार्चितं । गन्धपुष्पादिभिर्नित्यमार्चितं । पर्वसु हुतंहोमोयस्मिंस्तत्पर्वहुतं । रावणस्याहिताग्नित्वात्तद्गृहेदर्शपूर्णमासादिहोमसद्भावः । अस्याहिताग्नित्वंयुद्धकाण्डेप्रसिद्धं । पूजितंराक्षसैस्सदा स्वामिगृहत्वाद्राक्षसैस्सदानमस्कृतं । ' पूजानमस्यापचितिः ' इत्यमरः ।

[**पा०**] १ ग. घ. ङ. च. ज. ट. राक्षसैर्भीमैः. २ घ.—ट. तोरणैर्हेमभूषणैः. क. तोरणैस्सुविभूषितैः. ३ ङ. झ. रुचिरावृतं. ४ च. छ. ञ. गजस्थितैः. ५ ग. च. ज. शूरैश्चापगतश्रमैः. ६ ख. ग. घ. हयस्यन्दन. ७ ङ. झ. ञ. ट. भूषितं. ८ ख. घ. ङ. झ. ञ. ट. समावापं. ९ क.—च. ज.—ट. महासनं. १० क. परिकीर्णं. ११ ख. महाभरण. क. ग. च. छ. ज. महाभरणनिर्ह्रादैः. १२ क.—ङ. झ. ञ. ट. मुख्यैश्चवरचन्दनैः. १३ क. ग.—ट. महाजनसमाकीर्णं. १४ क. ख. ग. घ.— ट. विनादितं. १५ घ. ङ. झ. ट. पर्वसुतं.

समुद्रमिव गम्भीरं [1]समुद्रमिव निस्स्वनम् ॥ महात्मनो [2]महद्वेश्म महारत्नपरिच्छदम् ॥
महा[3]रत्नसमाकीर्णं ददर्श स महाकपिः ॥ १३ ॥
विराजमानं वपुषा गजाश्वरथसंकुलम् ॥ लङ्काभरणमित्येव सोमन्यत महाकपिः ॥ १४ ॥
चचार हनुमांस्तत्र रावणस्य समीपतः ॥ १५ ॥
गृहाद्गृहं राक्षसानामुद्यानानि [4]च वानरः ॥ वीक्षमाणो ह्यसंत्रस्तः प्रासादांश्च चचार सः ॥ १६ ॥
अ[5]वप्लुत्य महावेगः प्रहस्तस्य निवेशनम् ॥ ततोऽन्यत्पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान् ॥ १७ ॥
अथ मेघप्रतीकाशं कुम्भकर्णनिवेशनम् ॥ विभीषणस्य च [6]तदा पुप्लुवे स महाकपिः ॥ १८ ॥
महोदरस्य च [7]गृहं विरूपाक्षस्य चैव हि ॥ विद्युज्जिह्वस्य भवनं विद्युन्मालेस्तथैव च ॥
[8]वज्रदंष्ट्रस्य च तथा पुप्लुवे स महाकपिः ॥ १९ ॥
शुकस्य च [9]महोतजाः सारणस्य च धीमतः ॥ तथा चेन्द्रजितो वेश्म [10]जगाम हरियूथपः ॥ २० ॥
जम्बुमालेः सुमालेश्च जगाम हरिसत्तमः ॥ रश्मिकेतोश्च भवनं [11]सूर्य[12]शत्रोस्तथैव च ॥ २१ ॥
वज्रकायस्य [12]च तथा पुप्लुवे स महाकपिः ॥ धू[13]म्राक्षस्य च संपातेर्भवनं मारुतात्मजः ॥ २२ ॥
वि[14]द्युद्रूपस्य भीमस्य [15]घनस्य विघनस्य च ॥ २३ ॥
[16]शुकनासस्य [17]वक्रस्य शठस्य वि[18]कटस्य च ॥ [19]ब्रह्मकर्णस्य दंष्ट्रस्य रोमशस्य च रक्षसः ॥ २४ ॥
युद्धोन्मत्तस्य [20]मत्तस्य ध्वजग्रीवस्य [21]नादिनः ॥ वि[22]द्युज्जिह्वेन्द्रजिह्वानां तथा हस्तिमुखस्य च ॥ २५ ॥
करालस्य पि[23]शाचस्य शोणिताक्षस्य चैव हि ॥ [24]क्रममाणः क्रमेणैव हनुमान्मारुतात्मजः ॥ २६ ॥
तेषु तेषु महार्हेषु भवनेषु महायशाः ॥ तेषामृद्धिमतामृद्धिं ददर्श [25]स महाकपिः ॥ २७ ॥
सर्वेषां समतिक्रम्य भवनानि समन्ततः ॥ [26]आससादाथ लक्ष्मीवान्राक्षसेन्द्रनिवेशनम् ॥ २८ ॥
रावणस्योपशायिन्यो ददर्श हरिसत्तमः ॥ विचरन्हरिशार्दूलो राक्षसीर्वि[27]कृतेक्षणाः ॥
शूलमुद्गरहस्ताश्च शक्तितोमरधा[28]रिणीः ॥ २९ ॥

यस्मिंस्तत् पर्वहुतम् ॥ १२ ॥ समुद्रमिव निस्स्वनं निश्शब्दं । रावणभीत्या जनकोलाहलरहितमित्यर्थः । समुद्रस्वनमिति तु बाह्यकक्ष्यापेक्षया ॥ १३—१४ ॥ रावणस्य रावणगृहस्य ॥ १५—२४ ॥ विद्युज्जिह्वेन्द्रजिह्वानामिति बहुवचनं तन्नाम्नां बहूनां सत्त्वात् ॥ २५—२८ ॥ उपशायिन्यः पर्यायशायिनीः

नित्यार्चितंसर्वसुखमूर्जितमितिवापाठः । पर्वयुतमितिपाठेपर्वशब्देनोत्सवउच्यते ॥ १२ ॥ **रामानु०** समुद्रमिवनितरांस्वनतीति निस्वनं । पचाद्यच् ॥ **ति०** परिच्छदः अलङ्कारः ॥ १३ ॥ **स०** लङ्कायाआभरणरूपमिदमित्यमन्यत ॥ १४ ॥ **रामानु०** राक्षसानां रावणभ्रातृकुमारामात्यादीनांगृहाद्गृहं । उद्यानानिचचारेतियोजना ॥ १६ ॥ **ति०** विद्युज्जिह्वेन्द्रजिह्वानामितिबहुवचन-मार्षं । तयोरित्यर्थः ॥ २५ ॥ **स०** उपशायिन्यः शयनस्थानंपर्यायेणरक्षयित्र्योयास्ताइत्यर्थः । ' उपशायोविशायश्चपर्यायशय-

[पा०] १ क. घ. समुद्रस्वननिस्स्वनं. झ. समुद्रसमनिस्स्वनं. २ च. छ. ज. महावेश्म. ३ ख. महाजनसमाकीर्णं. ४ ङ. झ. ञ. ट. चसर्वशः. क. घ. वनानिच. ५ क. अवप्लुतो. ६ क. घ.—ट. तथा. ७ घ.—ट. तथा. ८ झ. बहुदंष्ट्रस्य. ९ क. ग.—ट. महावेगः. १० ग. पुप्लुवे. ११ घ. सूर्यकेतोः. १२ भवनं. १३ क. धूम्राक्षस्यैवसदनंसंपातेः. ख. घ. धूम्राक्षस्यापि. ग. ङ. छ. झ. ञ. ट. धूम्राक्षस्याथ. १४ ज. यूपनेत्रस्य. १५ क. प्रघसस्यघनस्यच. च. छ. ज. प्रघस्यप्रघसस्यच. १६ छ. शुभनाभस्य. क.—च. ज.—ट. शुकनाभस्य. १७ ङ. च. छ. झ. ट. चक्रस्य. ञ. शक्रस्य. ख. ग. वज्रस्य. १८ ङ. च. झ. ट. कपटस्यच. क. घ. विशठस्यच. १९ ख. ग. ङ. च. छ. झ. ट. ह्रस्वकर्णस्य. घ. ह्रस्वदंष्ट्रस्यकण्ठस्य. क. ह्रस्वकर्णस्यवीरस्य. २० घ. भवनं. २१ ङ. च. ज.—ट. सादिनः. २२ ङ. झ. ट. विद्युज्जिह्वद्विजिह्वानां. २३ च. —ट. विशालस्य. २४ च.—ट. प्लवमानः. २५ क. हनुमान्कपिः. २६ क. आससादच. २७ क. घ. विकृताननाः. २८ ग. ङ.— ट. धारिणः.

ददर्श [1]विविधान्गुल्मांस्तस्य रक्षःपतेर्गृहे ॥ राक्षसांश्च महाकायान्नाना[2]प्रहरणोद्यतान् ॥ ३० ॥
रक्ताञ्श्वेतान्[3]सितांश्चैव [4]हरींश्चापि महाजवान् ॥ कुलीनान्रूपसंपन्नान्गजान्परगजारुजान् ॥ ३१ ॥
[5]निष्ठितान्गजशिक्षायामैरावतसमान्युधि ॥ निहन्तॄन्परसैन्यानां गृहे तस्मिन्ददर्श सः ॥ ३२ ॥
क्षरतश्च यथा मेघान्स्रवतश्च यथा गिरीन् ॥ मेघस्तनितनिर्घोषान्दुर्धर्षा[6]न्समरे परैः ॥ ३३ ॥
सहस्रं [7]वाहिनीस्तत्र जाम्बूनदपरिष्कृताः ॥ [8]हेमजालपरिच्छन्नास्[9]तरुणादित्यसन्निभाः ॥
ददर्श राक्षसेन्द्रस्य रावणस्य निवेशने ॥ ३४ ॥
शिबिका विविधाकाराः स कपिर्मारुतात्मजः ॥ लतागृहाणि चित्राणि [10]चित्रशालागृहाणि च ॥ ३५ ॥
क्रीडागृहाणि चान्यानि दारु[11]पर्वतकानपि ॥ [12]कामस्य गृहकं [13]रम्यं दिवागृहकमेव च ॥
ददर्श राक्षसेन्द्रस्य रावणस्य निवेशने ॥ ३६ ॥
स [14]मन्दरगिरिप्रख्यं मयूरस्थानसंकुलम् ॥ ध्वजयष्टिभिराकीर्णं ददर्श भवनोत्तमम् ॥ ३७ ॥
[15]अनेकरत्नसंकीर्णं निधि[16]जालं समन्ततः ॥ धीरनिष्ठित[17]कर्मान्तं गृहं भूतपतेरिव ॥ ३८ ॥
अर्चिर्भिश्चापि रत्नानां तेजसा रावणस्य च ॥ वि[18]रराजाथ तद्वेश्म रश्मिवानिव रश्मिभिः ॥ ३९ ॥
जाम्बूनदमयान्येव शयनान्यासनानि च ॥ भाजनानि च [19]मुख्यानि ददर्श हरियूथपः ॥ ४० ॥
मध्वासवकृतक्लेदं मणिभाजनसंकुलम् ॥ [20]मनोरममसंबाधं कुबेरभवनं यथा ॥ ४१ ॥
नूपुराणां च [21]घोषेण काञ्चीनां निनदेन च ॥ मृदङ्ग[22]तलघोषैश्च घोषवद्भिर्वि[23]नादितम् ॥ ४२ ॥

रावणे शयाने जाग्रतीरित्यर्थः ॥ २९—३० ॥ सितान् बद्धान् । "षिञ् बन्धने" इत्यस्मात् क्तः । हरीन् अश्वान् । परगजानारुजन्ति पीडयन्तीति परगजारुजान् ॥ ३१—३२ ॥ क्षरतश्चेति श्लोकः पूर्वोक्तगजविशेषकः । क्षरतः किंचिद्वर्षतः । स्रवन्मदत्वे दृष्टान्तः । स्रवतः निर्झरिणः ॥ ३३ ॥ वाहिनीः सेनाः । पदातीनित्यर्थः । जाम्बूनदं जम्बूनदीप्रभवं स्वर्णं । हेम केवलस्वर्णं । उभयविधस्वर्णमयाभरणयुक्ता इत्यर्थः ॥ ३४ ॥ शिबिका इत्यादि ॥ दारुपर्वतकान् क्रीडापर्वतकान् । कामस्य गृहकं रतिगृहं । दिवागृहकं दिवाविनोदस्थानं । रावणस्य निवेशन इति पाठः ॥ ३५—३६ ॥ स इत्यादि ॥ मयूरस्थानं क्रीडामयूरविश्रमस्थानं । कपोतानामिव मयूराणामपि स्थानानि शिलाभिः कल्प्यन्त इति प्रसिद्धं । धीरनिष्ठितकर्मान्तं धीरैः कृतकल्पकर्मकं । भूतपतेः प्रमथाधिपस्य ॥ ३७—३८ ॥ रश्मिवान् सूर्यः ॥ ३९—४० ॥ मध्वासवकृतक्लेदं मध्वासवैः मधुविकारमद्यैः । कृतक्लेदं कृतसेकं ॥ ४१ ॥ घोषवद्भिः नादवद्भिः । नादश्च दीर्घशब्दस्य विराम-

नार्थकौ ' इत्यमरः ॥ २९ ॥ **रामानु०** गुल्मान् सेनाः । ' गुल्मारुक्स्तंबसेनाश्च ' इत्यमरः ॥ ३० ॥ **वि०** सहस्रंवाजिनः अनेकानश्वान् ॥ ३४ ॥ **वि०** हेमजालैरविच्छिन्नाः सर्वतोभूषिताइतिशिबिकाविशेषणं ॥ ३५ ॥ **ति०** दारुनिर्मिताःक्रीडापर्वताः दारुपर्वतकानि । क्लीबत्वमार्षं ॥ ३६ ॥ **शि०** भूतपतेःब्रह्मणः ॥ **ति०** निधिजालंनिधिजालवदित्यर्थः । धीरनिष्ठितकर्माङ्गं धीरैः निर्भयस्थिरचित्तैःनिष्ठितंनिर्वर्तितंकर्मणः निधिरक्षादिकर्मणःअङ्गंमहिषादिबलिरूपंयस्मिन् । कश्चित्तुकर्मान्तमितिपठित्वा । धीरैः निष्ठितस्यअनुष्ठितस्यकर्मणःतपोरूपस्यअन्तंफलरूपं इत्यर्थमाह । भूतपतेःमहेश्वरस्ययक्षेश्वरस्यवा ॥ ३८ ॥ इतिषष्ठःसर्गः ॥ ६ ॥

[**पा०**] १ ग. हनुमान्गुल्मान्राक्षसानांपतेर्गृहे. २ ङ. प्रहरणोदितान्. ३ क. ग.—ट. न्सितांश्चापि. ४ ग. हरीनश्वान्. घ. हारितांश्च. ५ ङ. झ. ट. शिक्षितान्. ६ ज. न्संगरे. ७ क. ग. च. छ. ज. ञ. वाजिनस्तत्रजांबूनदपरिष्कृतान्. ८ घ. ङ. झ. ञ. हेमजालैरविच्छिन्नाः. ट. हेमजालैःपरिच्छिन्नाः. ९ ग. च. छ. ज. स्तरुणादित्यवर्चसः. १० क. ग. घ. चन्द्रशाला. ११ ङ.—ट. पर्वतकानिच. क. ग. घ. पर्वतकान्यपि. १२ ख. ङ. झ. कामस्यचगृहं. १३ च. छ. ज. दिव्यं. १४ क. ग. ङ.—ज. ञ. ट. मन्दरतलप्रख्यं. झ. मन्दरसमप्रख्यं. १५ क.—ट. अनन्तरत्ननिचयं. १६ ग. जालनिरन्तरं. ख. जालसमावृतं. १७ ङ. झ. ञ. ट. कर्माङ्गं. १८ ङ.—ट. विरराजच. १९ क.—ट. शुभ्राणि. २० क. ग. मनोहरं. २१ च. छ. ज. नादेन. ङ. झ. ञ. ट. निस्वनेनच. २२ ग. तालघोषैश्च. ङ. च. छ. झ. ञ. ट. तलनिर्घोषैः. २३ क. निनादितं.

[1]प्रासादसंघातयुतं स्त्रीरत्नशतसंकुलम् ॥ सुव्यूढकक्ष्यं हनुमान्प्रविवेश [2]महागृहम् ॥ ४३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षष्ठः सर्गः ॥ ६ ॥

सप्तमः सर्गः ॥ ७ ॥

ग्रन्थकृतारावणभवनतद्गतपुष्पकविमानयोर्वर्णनं ॥ १ ॥

स वेश्मजालं बलवान्ददर्श व्यासक्तवैडूर्यसुवर्णजालम् ॥
यथा महत्प्रावृषि मेघजालं विद्युत्पिनद्धं सविहङ्गजालम् ॥ १ ॥
निवेशनानां विविधाश्च शालाः प्रधानशङ्खायुधचापशालाः ॥
मनोहराश्चापि पुनर्विशाला ददर्श वेश्माद्रिषु चन्द्रशालाः ॥ २ ॥
गृहाणि नानावसुराजितानि देवासुरैश्चापि सुपूजितानि ॥
सर्वैश्च दोषैः परिवर्जितानि कपिर्ददर्श स्वबलार्जितानि ॥ ३ ॥
तानि [3]प्रयत्नाभिसमाहितानि मयेन साक्षादिव निर्मितानि ॥
महीतले सर्वगुणोत्तराणि ददर्श लङ्काधिपतेर्गृहाणि ॥ ४ ॥
ततो [4]ददर्शोच्छ्रितमेघरूपं मनोहरं काञ्चनचारुरूपम् ॥
रक्षोधिपस्यात्म[5]बलानुरूपं गृहोत्तमं ह्यप्रतिरूपरूपम् ॥ ५ ॥

समयसंभवो ध्वनिः ॥ ४२ ॥ व्यूढकक्ष्यं विशालप्रकोष्ठं ॥ ४३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षष्ठः सर्गः ॥ ६ ॥

स वेश्मजालमित्यादि ॥ व्यासक्तवैडूर्यसुवर्णजालं वैडूर्यघटितसुवर्णमयजालकरन्ध्रं ॥ १ ॥ निवेशनानां शालाः । गृहान्तःशालाः । प्रधानैर्मुख्यैः शङ्खायुधचापैः शालन्ते प्रकाशन्त इति प्रधानशङ्खायुधचापशालाः । पचाद्यच् । वेश्मादिषु हर्म्यप्रासादादिषु । चन्द्रशालाः शिरोगृहाणि ॥ २ ॥ नानावसुराजितानि नानारत्न राजितानि ॥ ३ ॥ प्रयत्नाभिसमाहितानि प्रयत्नेन यथायोगं स्थापितानि । मयेनेति विश्वकर्मा लक्ष्यते महीतले निर्मितानि । इवशब्देन मयस्य निर्मातृत्वव्या जमात्रं । रावणप्रयत्नेनैव निर्मितानीत्यर्थः । यद्वा अन्यानि गृहाणि विश्वकर्मनिर्मितानि । इमानि तु मयं व्याजीकृत्य स्वयमुपायप्रदर्शनमुखेन निर्मितानीति पूर्वगृहेभ्यो विशेष उच्यते ॥ ४ ॥ तदन्तर्वर्तिपुष्पक विमानं दर्शयति—तत इति ॥ अप्रतिरूपरूपं अप्रति मसौन्दर्यं । प्रकीर्णं दैवाच्युतं । रजसा पुष्परजसा

रामानु० नानाविधानिकर्माणियासांताःनानाविधकर्माणःशालाश्चनानाविधकर्मशालाः । कक्ष्याश्चनानाविधकर्मशालाइत्यय पाठः । निवेशनानांविविधाश्चशालाइतिपाठेप्रधानभवनानांसंबन्धिनीःविविधाःशालाइत्यर्थः । प्रधानशङ्खायुधचापशालाः प्रधानै मुख्यैःशङ्खैरायुधैश्चापैश्चशालन्तइतिप्रधानशङ्खायुधचापशालाःताः । पचाद्यच् । वेश्मान्यद्रयइववेश्माद्रयस्तेषु । वेश्मादिष्वितिपाठे आदिशब्देनप्रासादादयउच्यन्ते । चन्द्रशालाःशिरोगृहाणि । ‘ चन्द्रशालाशिरोगृहं ’ इत्यमरः ॥ **ति०** चन्द्रशालाः चन्द्रकान्तम णिबद्धशालावा ॥ २ ॥ **ति०** वसु धनं । स्वबलेत्यत्रस्वशब्दोरावणवाची । कुबेराद्रावणेनलङ्कायाआच्छिद्यगृहीतत्वात् । यद्व स्वशब्दोहनुमद्वाची । स्वबलेनार्जितानिलब्धप्रवेशानि ॥ ३ ॥ **ति०** विश्वकर्मकृतान्यपिमाययाविचित्ररचनादक्षेणमयेननिर्मिता नीव ॥ **स०** प्रयत्नाभिसमाहितानि प्रयत्नेन विश्वकर्मणइतिशेषः ॥ ४ ॥ **रामानु०** वैश्रवणंनिर्जित्यगृहीतंपुष्पकंवर्ण्यतेततइत्या दिना । ततः गृहदर्शनानन्तरं । आत्मबलानुरूपं आत्मनोप्रतिबलस्यसदृशं । गृहोत्तममितिपुष्पकमुच्यते । पुष्पकस्यापिगृहलक्षण सद्भावात् । एतच्चपुष्पाह्वयमित्यनेनव्यक्तीभविष्यति । रजसा पुष्परजसा ॥ तटिद्भिरिवस्थितैर्नारीप्रवेकैःअंभोदवद्दीप्यमानमि स्थितमितिसंबन्धः । वाह्यमानं उह्यमानं । आर्षःस्वार्थेणिच् । अतएवसंप्रसारणाभावः । यद्वाहंसप्रवेकैर्वाह्यमानं स्वामिनेतिशेषः यथेति । युक्तीकृतमेघचित्रं समूहीकृतनानावर्णमेघचित्रमित्यर्थः ॥ **ति०** नानावर्णैरयुक्तोपितद्युक्तःकृतो युक्तीकृतः । सचासौच

[पा०] १ घ. प्रासादशतसंबाधं. २ क. गृहोत्तमं. ३ ग. च. छ. प्रयत्नेनसमाहितानि. ४ घ. ददर्शाद्भुतमेघ. ५ घ. गुणानुरूप

महीतले [1]स्वर्गमिव प्रकीर्णं श्रिया ज्वलन्तं बहुरत्नकीर्णम् ॥
नानातरूणां कुसुमावकीर्णं गिरेरिवाग्रं रजसावकीर्णम् ॥ ६ ॥
नारी[2]प्रवेकैरिव दीप्यमानं तडिद्भि[3]रम्भोदवदर्च्यमानम् ॥
हंसप्रवेकैरिव वाह्यमानं श्रिया युतं खे [4]सुकृतां विमानम् ॥ ७ ॥
यथा नगाग्रं [5]बहुधातुचित्रं यथा नभश्च ग्रहचन्द्रचित्रम् ॥
ददर्श [6]युक्तीकृतमेघचित्रं विमानरत्नं बहुरत्नचित्रम् ॥ ८ ॥
मही कृता पर्वतराजिपूर्णा शैलाः कृता [7]वृक्षवितानपूर्णाः ॥
वृक्षाः कृताः पुष्पवितानपूर्णाः पुष्पं कृतं [8]केसरपत्रपूर्णम् ॥ ९ ॥
कृतानि वेश्मानि च पाण्डुराणि तथा [9]सुपुष्पाण्यपि पुष्कराणि ॥
पुनश्च पद्मानि सकेसराणि [10]धन्यानि चित्राणि तथा वनानि ॥ १० ॥
पुष्पाह्वयं नाम विराजमानं रत्नप्रभाभिश्च वि[11]वर्धमानम् ॥
वेश्मोत्तमानामपि चोच्चमानं महाकपिस्तत्र महाविमानम् ॥ ११ ॥
कृताश्च वैडूर्यमया विहङ्गा रूप्यप्रवालैश्च तथा विहङ्गाः ॥
चित्राश्च नानावसुभिर्भुजङ्गा जात्यानुरूपास्तुरगाः शुभाङ्गाः ॥ १२ ॥
प्रवाल[12]जाम्बूनदपुष्पपक्षाः सलीलमावर्जितजिह्मपक्षाः ॥
कामस्य साक्षादिव भान्ति पक्षाः कृता विहङ्गाः सुमुखाः सुपक्षाः ॥ १३ ॥
[13]नियुज्यमानास्तु गजाः सुहस्ताः सकेसराश्चोत्पलपत्रहस्ताः ॥
बभूव देवी च कृता सुहस्ता लक्ष्मीस्तथा पद्मिनि पद्महस्ता ॥ १४ ॥

नारीप्रवेकैः नारीश्रेष्ठैः।"प्रवेकानुत्तमोत्तमा" इत्यमरः। इवशब्दो वाक्यालंकारे। अर्च्यमानं सर्वैरिति शेषः। हंसप्रवेकैर्वाह्यमानं सुकृतां पुण्यकृतां विमानमिव स्थितमित्यन्वयः। युक्तीकृतमेघचित्रं पुञ्जीकृतमेघचित्रं चित्रमेघसङ्घातसदृशमित्यर्थः। विमानरत्नं पुष्पकं ॥५—८॥ महीति॥ यत्रेति शेषः। यत्र विमाने। पर्वतराजिपूर्णामही कृता चित्ररूपेण लिखिता। एवमुत्तरत्रापि बोध्यं। अत्र पूर्वपूर्वं प्रत्युत्तरोत्तरस्य विशेषवत्त्वादधिकालङ्कारः ॥ ९ ॥ कृतानीति ॥ अत्रापि यत्रेत्यध्याहार्यं। पुष्कराणि पुष्करिण्यः ॥ १० ॥ पुष्पाह्वयं पुष्पकं। उच्चमानं अधिकमानं। सर्वत्र ददर्शेत्यन्वयः ॥ ११ ॥ यत्रेति शेषः। नानावसुभिः नानारत्नैः। जात्यानुरूपाः जात्या सदृशाः। स्पष्टजातिस्वभावा इत्यर्थः ॥ १२ ॥ प्रवालजाम्बूनदकृतानि पुष्पाणि पक्षेषु येषां ते प्रवालजाम्बूनदपुष्पपक्षाः। सलीलमावर्जितजिह्मपक्षाः सलीलमालम्बितवक्रपक्षाः। कामस्य पक्षा इव कामस्य सहाया इव ॥ १३ ॥ नियुज्यमानाः स्वयमेवात्मानं नियोजयन्तः। कर्मकर्तरि यक्। यत्र विमाने। पद्मिनि पद्माकरे। स्वयमेवोत्पलपत्राभिषेककर्मणि प्रवर्तमानाः। सुहस्ताः

रुमेघश्चतद्वद्विचित्रं ॥ ५—८ ॥ ति० यत्रपुष्पके मही अनेकजनानामाधारस्थानं पर्वतराज्यापूर्णं। पर्वतादयश्चात्रमणिस्वर्णादिनिर्मिताः। नत्विदंचित्ररूपमितिभ्रमितव्यं। अनन्तवानरसेनायानिर्बाधंतत्रावस्थानस्यवक्ष्यमाणत्वात्। किंचस्वामीच्छानुसारेण संकोचविकासौतस्यवक्ष्यतिस्वेच्छयाहनुमद्देहवत्। वितानंसमूहः। एकावल्यत्रालङ्कारः ॥ ९ ॥ रामानु० महीत्यादि। यत्रेति शेषः। ददर्शेत्यनुषज्यते। महीकृतेत्यारभ्यपद्मिनिपद्महस्तेत्यन्तमेकंवाक्यं। यत्रमह्यादयोलक्ष्म्यन्ताःपदार्थाःकृताःतत्पुष्पाह्वयंनाम

[पा०] १ च. छ. ज. स्वर्गमिवावतीर्णं. २ घ. प्रवेकैरभि. ३ ङ. झ. ञ. ट. रंभोधरमर्च्यमानं. ४ ग. ङ. छ.—ञ. सुकृतं. ५ क. बहुधाविचित्रं. ६ ङ—झ. ञ. ट. युक्तीकृतचारुमेघचित्रंविमानंबहु. ७ ग. वृक्षसमूहपूर्णाः. ८ ग. केसरजालपूर्णं. घ. केसररत्नपूर्णं. ९ क.—ट. सुपुष्पाअपिपुष्करिण्यः. १० ङ. झ. ञ. ट. वनानिचित्राणिसरोवराणि. च. छ. ज. वनानिचारूणितथापराणि. ग. वनानिचित्राणितथापराणि.. ११ ङ. झ. ञ. ट. विघूर्णमानं. १२ घ. जांबुनदजातपक्षाः. १३ क. ख. ग. ङ.—ट. नियुज्यमानाश्च.

इतीव तद्गृह[1]मभिगम्य शोभनं सविस्मयो नगमिव [2]चारुशोभनम् ॥
पुनश्च तत्परमसुगन्धि सुन्दरं हिमात्यये नगमिव चारुकन्दरम् ॥ १५ ॥
[3]ततः स तां कपिरभिपत्य [4]पूजितां चरन्पुरीं दशमुख[5]बाहुपालिताम् ॥
अदृश्य तां जनकसुतां सुपूजितां [6]सुदुःखितः पतिगुणवेगनिर्जिताम् ॥ १६ ॥
ततस्तदा बहुविधभावितात्मनः कृतात्मनो जनकसुतां सुवर्त्मनः ॥
अपश्यतोऽभवदतिदुःखितं मनः [7]सुचक्षुषः प्रविचरतो महात्मनः ॥ १७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तमः सर्गः ॥ ७ ॥

शोभनशुण्डादण्डाः । सकेसराः कृतजलावगाहत्वेनाङ्गलग्नकिञ्जल्काः । उत्पलपत्रहस्ताः उत्पलपत्रवर्षिणः । गजाश्च कृताः तदभिषिच्यमाना पद्महस्ता अतएव सुहस्ता लक्ष्मीश्च कृता बभूवेत्यर्थः ॥ १४ ॥ इवशब्दो वाक्यालंकारे । तद्गृहं तस्य रावणस्य गृहं । सविस्मयः अभूदिति शेषः । नगं पर्वतमिव स्थितं । शोभनं शोभमानं । चारुशोभनं चारुमङ्गलं । इतीवेत्येकनिपातो वा प्रकारार्थः । इतीव तद्गृहं अभिगम्य अभिगत्य । अद्भुतदर्शनात्पुनश्चाभिगम्य सविस्मयोभूदिति योजना । रुचिरावृत्तमिदं । "चतुर्ग्रहैरिह रुचिरा जभस्जगाः" इति लक्षणात् ॥१५॥ अदृश्य अदृष्ट्वा । ऋषिनिपातनान्नञ्पूर्वेपि ल्यप् । सुदुःखितः अभूदिति शेषः । पतिगुणवेगनिर्जितां भर्तृगुणजवेन वशीकृतां ॥ १६ ॥ बहुविधभावितात्मनः बहुविधं यथा भवति तथा चिन्तितात्मनः । कृतात्मनः निशितबुद्धेः । सुवर्त्मनः सदाचारसंपन्नस्य । सुचक्षुषः दूरसूक्ष्मादिदर्शनेषु अप्रतिहतनयनतेजसः । महात्मनः महाधैर्यस्य ॥ १७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तमः सर्गः ॥ ७ ॥

महाविमानंददर्शेतिसंबन्धः । महीकृता महीनिर्मिता । एवमुत्तरत्रापिकृतशब्दार्थः । वेश्मोत्तमानामितिपञ्चम्यर्थेषष्ठी । वेश्मोत्तमेभ्योप्युच्चमानं । यद्वापूर्वंगृहोत्तमंह्यप्रतिरूपरूपमितिपुष्पकस्यगृहोत्तमत्वप्रतिपादनेनसजातीयत्वान्निर्धारणेषष्ठी । तेषांमध्येउच्चमानं उन्नतमितियावत् । अपिचेतिनिपातसमुदायोविशेषणान्तरसमुच्चयपरः । जात्यानुरूपाः आरट्टजत्ववनायुजत्वादिविशिष्टाश्वाकारसदृशाः । प्रवालजांबूनदमयानिपुष्पाणिपक्षेषुयेषांतेतथोक्ताः । सलीलमावर्जितजिह्मपक्षाः सलीलमानमितवक्रपक्षाः । कामस्यसाक्षात्पक्षाइव मदनस्यसाक्षात्सहायाइव कामोद्दीपकाइतियावत् । नियुज्यमानाःस्वयमेवव्याप्रियमाणाः । कर्मकर्तरियक् । सकेसराः पद्माकरविहारिगजाकारनिर्माणात्सकेसरत्वं । पद्मिनि पद्माकरे ॥ १४ ॥ **स०** हिमात्ययेवसन्ते । हिमशब्देनतद्युक्तमासचतुष्टयग्रहणात् ॥ १५ ॥ **स०** दृश्यस्यभावोदृश्यता । नविद्यतेदृश्यतायस्यास्सातथा । तामुद्दिश्यदुःखितोऽभूदितिवा । पतिगुणवेगनिर्जितां पत्युःरामस्ययोगुणवेगःगुणप्रवाहःतेननिर्जितां । पत्यारामेणकर्त्रा गुणवेगेन ज्याकर्षणवेगेन धनुर्भङ्गद्वारानिर्जितांनितरां प्राप्तां ॥ १६ ॥ **रामानु०** बहुविधभावितात्मनः बहुविधभावितमनसः । बहुविधचिन्तान्वितस्येतियावत् । कृतात्मनःकृतप्रयत्नस्य । 'आत्मादेहेधृतौयत्नेस्वभावपरमात्मनोः' इतिवैजयन्ती । सुवर्त्मनःशोभननीतिमार्गवर्तिनइत्यर्थः । सुचक्षुषःसकृदालोकनेनद्रष्टव्यंसर्वंकरतलामलकवत्साक्षात्कर्तुंक्षमस्य ॥ **ति०** बहुविधभावितात्मनः नानाप्रकारेणसर्वजगत्पूजितस्वभावस्य । स्वभाववाच्यात्मशब्दः । कृतात्मनःशिक्षितान्तःकरणस्य । सचक्षुषः श्रुतिस्मृतिन्यायरूपचक्षुस्सहितस्य ॥ **स०** बहुविधभावितात्मनः बहुप्रकारंध्यातरामरूपस्वामिकस्य ॥ १७ ॥ इतिसप्तमःसर्गः ॥ ७ ॥

[**पा०**] १ ग. मुपगम्य. २ ङ. झ. ञ. ट. चारुकन्दरं. ३ ग. ततस्तां. ४ च. छ. ज. सूर्जितां. ५ क. घ.—ज. ट. बाहुनिर्जितां. ६ घ.—ट. सुदुःखितां. ७ ख. ङ. झ. ञ. ट. सचक्षुषः.

अष्टमः सर्गः ॥ ८ ॥

ग्रन्थकृताविस्तारेणपुनः पुष्पकविमानवर्णनं ॥ १ ॥

स तस्य मध्ये भवनस्य [1]संस्थितं महद्विमानं [2]मणिवज्रचित्रितम् ॥
प्रतप्तजाम्बूनद[3]जालकृत्रिमं ददर्श वीरः[4] पवनात्मजः कपिः ॥ १ ॥

[5]तदप्रमेयाप्रतिकारकृत्रिमं कृतं स्वयं साध्विति विश्वकर्मणा ॥
दिवं [6]गतं वायुपथप्रतिष्ठितं व्यराजतादित्यपथस्य [7]लक्ष्मवत् ॥ २ ॥

न तत्र किंचिन्न कृतं प्रयत्नतो न तत्र किंचिन्न [8]महार्हरत्नवत् ॥
न ते विशेषा नियताः सुरेष्वपि न तत्र किंचिन्न महाविशेषवत् ॥ ३ ॥

तपःसमाधानपराक्रमार्जितं मनःसमाधानविचा[9]रचारिणम् ॥
अनेकसंस्थानविशेषनिर्मितं ततस्ततस्तुल्यविशेषदर्शनम् ॥ ४ ॥

मनस्समाधाय तु शीघ्रगामिनं [10]दुरावरं मारुततुल्यगामिनम् ॥
महात्मनां पुण्यकृतां [11]महर्द्धिनां यशस्विनामग्र्यमुदामिवालयम् ॥ ५ ॥

पूर्वोक्तविमानवर्णनं विस्तृणीते—स तस्येत्यादि ॥ प्रतप्तजाम्बूनदजालकृत्रिमं निष्टप्तस्वर्णविशेषकृतकृत्रिमपक्ष्यादिकं ॥ १ ॥ अप्रतिमेयाप्रतिकारकृत्रिमं अपरिच्छेद्याप्रतिक्रियकृत्रिमं । तत्र हेतुमाह—कृतमिति ॥ स्वयं निर्मात्रा विश्वकर्मणा इदं साधु सुन्दरमिति श्लाघापूर्वं कृतं। सर्वत्राप्रतिहतसंचारं चैतदित्याह—दिवं गतं आकाशगतं । वायुपथप्रतिष्ठितं वायुमार्गभूतान्तरिक्षस्थितं । मध्ये भवनस्य संस्थितमिति पूर्वमुक्तत्वात् भूतलप्रत्यासन्नान्तरिक्षस्थितमित्यर्थः । आदित्यपथस्य लक्ष्मवत् । लक्ष्म लक्षणं व्यावर्तकं व्यराजत प्रचकाश इत्यर्थः ॥ २ ॥ ते विशेषाः तद्विमानस्थितविशेषाः । सुरेष्वपि सुरालयेष्वपि ॥ ३ ॥ तपस्समाधानेत्यादि पञ्चश्लोकी कुलकं ॥ सर्वत्र ददर्शेति संबन्धः । तपस्समाधानपराक्रमार्जितं तपस्समाधानेन तपोनुष्ठानेन पराक्रमेण च अर्जितं । मनस्समाधानविचारचारिणं समाधानमभिसंधानं । कर्मणि चैतत् । विचारो विविधा गतिः । मनोभिसंहितविविधगतिचारिणं । अनेकसंस्थानविशेषनिर्मितं अनेकैस्संस्थानविशेषैः विमानगोपुरादिसन्निवेशैः निर्मितं । ततस्ततस्तुल्यविशेषदर्शनं तत्र तत्र तुल्यं विशेषदर्शनं यस्मिन् ॥४॥ मनस्समाधाय मन एकाग्रीकृत्य। स्वयं मनस्वीति यावत् । दुरावरं दुर्वारं महर्द्धिनां महर्द्धीनां । "अपि माषं मषं कुर्याच्छन्दोभङ्गं न कारयेत्" इत्युक्तरीत्या वृत्तभङ्गभिया ह्रस्वोच्चारणं । अग्र्यमुदां इन्द्रादीनां

ति० मणिरत्नैः मणिश्रेष्ठैःचित्रितं । प्रतप्तजांबूनदजालानां तन्मयगवाक्षाणांकृत्रिमंकृतिःयस्मिंस्तत् ॥ १ ॥ ति० अप्रमेयप्रतिकारकृत्रिमं अप्रमेयैः अपरिच्छेद्यसौन्दर्यादिभिः प्रतिकारैःप्रतिमादिभिःकृत्रिमंनिर्वृत्तचित्रशोभं । पाठान्तरंत्वसांप्रदायिकमिति कतकः ॥ २ ॥ ती० तुल्यविशेषदर्शनं तुल्यानांरमणीयत्वेनसदृशानांविशेषाणांदर्शनंयस्मिंस्तत् । सर्वतोरमणीयमित्यर्थः ॥ स० मनस्समाधानविचारचारिणं । अन्तरुपविष्टानांमनस्समाधानंयथाभवतितथा विचारवत् पक्षिसंचारवत्चरतीतितथातं ॥ शि० तपस्समाधानाभ्यांकृच्छ्रचान्द्रायणादिदेवविशेषध्यानाभ्यांजातेनपराक्रमेणआर्जितं रावणेनप्राप्तं ॥ ४ ॥ ति० मनस्समाधाय स्वामिनोनुरुध्य तु शीघ्रगामित्वादिधर्मकं । दुरासदंपापिभिरितिशेषः । दुरावरमितिपाठे शत्रुभिर्दुर्निवारमित्यर्थः । महर्द्धिनां दीर्घाभावश्छान्दसः । एवंतुल्यगामिनमित्यत्रपुंस्त्वं । विमानशब्दोर्धर्चादिर्वा । अग्र्यमुदांमहासुखानांपुण्यकृतामेवआलयंआस्पदं ।

[पा०] १ क. ग. घ. ङ. झ. ञ. ट. संस्थितो. २ क. घ.—ट. मणिरत्नचित्रितं. ३ क. जालसन्ततं. ४ ङ. झ. ज. ट. श्रीमान्पवनात्मजः. ५ ग. ङ. झ. ञ. ट. तदप्रमेयप्रतिकार. ६ ङ. झ. ञ. ट. गतेवायुपथे. ७ ङ. झ. ट. लक्ष्मतत्. ८ ङ. ञ. महार्घरत्नवत्. ९ क. विशेषचारिणं. ङ. झ. ञ. ट. विशेषनिर्मितं. १० ङ. झ.—ञ. ट. दुरासदं. ११ च.—छ. महर्षिणामुदारमध्यंमहतामिवालयं घ. मनस्विनां. ज. महर्षिणां.

विशेषमालम्ब्य विशेषसंस्थितं विचित्रकूटं बहुकूटमण्डितम् ॥
मनोभिरामं शरदिन्दुनिर्मलं विचित्रकूटं शिखरं गिरेर्यथा ॥ ६ ॥
वहन्ति [1]यं कुण्डलशोभितानना महाशना व्योमचरा निशाचराः ॥
विवृत्तविध्वस्तविशाललोचना महाजवा भूतगणाः सहस्रशः ॥ ७ ॥
[2]वसन्तपुष्पोत्करचारुदर्शनं वसन्तमासादपि [3]कान्तदर्शनम् ॥
[4]स पुष्पकं तत्र विमानमुत्तमं ददर्श तद्वानरवीरसत्तमः ॥ ८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टमः सर्गः ॥ ८ ॥

नवमः सर्गः ॥ ९ ॥

सीतान्वेषणाय रावणगृहस्थात्यद्भुतपुष्पकविमानमारूढवताहनुमता तत्रप्रसुप्तनानावस्थापन्ननानाजातीयनारीनिकरावलोकनं ॥ १ ॥

तस्यालयवरिष्ठस्य मध्ये वि[5]पुलमायतम् ॥ ददर्श [6]भवनश्रेष्ठं हनुमान्मारुतात्मजः ॥ १ ॥
अर्धयोजनविस्तीर्णमायतं यो[7]जनं हि तत् ॥ भवनं राक्षसेन्द्रस्य बहुप्रासादसंकुलम् ॥ २ ॥
मार्गमाणस्तु वैदेहीं सीतामायतलोचनाम् ॥ सर्वतः परिचक्राम हनुमानरिसूदनः ॥ ३ ॥

॥ ५ ॥ विशेषमालम्ब्य विशेषसंस्थितं विशेषं गृहीत्वा विशेषेण संस्थितं । सविशेषविशेषणसंस्थितमिति यावत् । सविशेषसंस्थानविशेषविशिष्टमित्यर्थः । कूटानां विचित्रत्वबहुत्वे विशेषणद्वयेन दर्शयति—विचित्रेत्यादिना । विचित्रकूटं शिखरं गिरेर्यथा । कूटं अवान्तरशृङ्गं । शिखरं महाशृङ्गमिति प्रयोगादवधार्यते ॥ ६ ॥ यं यत् । आर्षो व्यत्ययः । महाशनाः । महाकाया इत्यर्थः । व्योमचाराः व्योमचरसदृशसंस्थानाः । विवृत्तविध्वस्तविशाललोचनाः विवृत्तानि वर्तुलानि विध्वस्तानि भुग्नानि विशालानि लोचनानि येषां ते तथा । महाजवाः महाजवा इव स्थिताः । भूतगणाः गोपुरवाहका इव प्रतिमारूपेण स्थिताः । अन्यथा रावणान्तःपुरे पुरुषसञ्चारायोगात् कामगस्य विमानस्य वहनासंभवाच्च । यद्वा शिबिकावाहका इव भूतगणा अधोभागे वहन्ति । तद्वारैणैव कामगत्वमपि । चेतनप्रेरणं विना अचेतनसंचारस्यात्यन्तमनुचितत्वाच्च ॥ ७ ॥ उत्करः समूहः ॥ ८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टमः सर्गः ॥ ८ ॥

तस्येत्यादि ॥ आलयवरिष्ठस्य पुष्पकस्य ॥ १ ॥ तद्भवनं कियत्प्रमाणमित्यत्राह—अर्धयोजनेति ॥ २ ॥ सर्वतः पुष्पकादन्यत्र सर्वत्र । पुष्पकारोहणस्य पश्चाद्व-

---

इवशब्दएवार्थे । अत्रतस्याचेतनत्वेपितदभिमानिदेवतायाश्चित्तज्ञत्वादितिबोध्यं ॥ ५ ॥ **रामानु०** वहन्तीत्यनेनश्लोकेनविमानस्यराक्षसवाह्यत्वंप्रतीयते । कामगस्यदिव्यस्यतन्नोपपद्यते । एतद्विरोधपरिहारार्थंवहतेर्धातोःरक्षणार्थत्वस्वीकारोपिनोपपद्यते । अन्तःपुरमध्येविमानरक्षणार्थंराक्षसावस्थानायोगात् । अतोत्रसमाधानंविद्वद्भिश्चिन्त्यं ॥ **ती०** वहन्ति वहन्तीव इवशब्दोत्राध्याहार्यः । तथाचविमानेनिर्मिताःनिशाचराकाराःप्रतिमाःवहन्तीवेत्यर्थः । अन्यथाकामगमस्यान्तःपुरेविद्यमानस्यराक्षसवहनरक्षणयोरयोगात् ॥ **स०** विवृत्तविध्वस्तविशाललोचनाः वि विरुद्धं स्वामिविरुद्धं वृत्तं चरित्रं विध्वस्तं येषां ते तथा । तेचतेविशाललोचनाश्चेतितथा ॥ ७ ॥ इत्यष्टमःसर्गः ॥ ८ ॥

रामानु० ‘ तस्यालयवरिष्ठस्य ’ ‘ सतस्यमध्येभवनस्यसंस्थितं ’ इतिपुष्पकाधारत्वेनप्रकृतस्वगृहश्रेष्ठस्य । भवनश्रेष्ठं पुष्पकाख्यं ॥ १ ॥ **रामानु०** सर्वतःपरिचक्राम रावणभवनपर्यन्तवर्तितद्भ्रातृकुमारामात्यादिभवनेषुपरितश्चचारेत्यर्थः । उत्तरश्लोके-

[पा०] १ च. झ. ञ. यत्कुण्डल. २ च. छ. ज. प्रतप्तचामीकरचारु. क. वसन्तपुष्पोद्गम. ३ ङ. झ. ञ. ट. चारुदर्शनं. ४ च. छ. ज. सुपुष्पकं. ५ च. छ. ज. ञ. विपुलमास्थितं. ङ. झ. ट. विमलमायतं. ६ च. ज. भवनं. ७ क. ग. ङ.—ट. योजनंमहत्.

उत्तमं [1]राक्षसावासं हनुमानवलोकयन् ॥ आससादाथ लक्ष्मीवान्राक्षसेन्द्रनिवेशनम् ॥ ४ ॥
चतुर्विषाणैर्द्विरदैस्त्रिविषाणैस्तथैव च ॥ परिक्षिप्तमसंबाधं रक्ष्यमाणमुदायुधैः ॥ ५ ॥
राक्षसीभिश्च पत्नीभी रावणस्य निवेशनम् ॥ आहृताभिश्च विक्रम्य राजकन्याभिरावृतम् ॥ ६ ॥
तन्नक्रमकराकीर्णं ति[2]मिङ्गिलझषाकुलम् ॥ वायुवेग[3]समाधूतं पन्नगैरिव सागरम् ॥ ७ ॥
यां[4] हि वैश्रवणे लक्ष्मीर्या चेन्द्रे हरिवाहने ॥ सा रावणगृहे स[5]र्वा नित्यमेवानपायिनी ॥ ८ ॥
या च राज्ञः कुबेरस्य यमस्य वरुणस्य च ॥ तादृशी तद्विशिष्टा वा ऋ[6]द्धी रक्षोगृहेष्विह ॥ ९ ॥
तस्य हर्म्यस्य मध्यस्थं वेश्म चान्यत्सुनिर्मितम् ॥ बहुनिर्यू[7]हसंकीर्णं ददर्श पवनात्मजः ॥ १० ॥
ब्रह्मणोर्थे कृतं दिव्यं [8]दिवि यद्विश्वकर्मणा ॥ विमानं पुष्पकं नाम स[9]र्वरत्नविभूषितम् ॥
[10]परेण तपसा लेभे यत्कुबेरः पितामहात् ॥ ११ ॥
कुबेरमोजसा जित्वा लेभे तद्राक्षसेश्वरः ॥ १२ ॥
ईहामृगसमायुक्तैः कार्तस्वरहि[11]रण्मयैः ॥ [12]सुकृतैराचितं स्तम्भैः प्रदीप्तमिव च श्रिया ॥ १३ ॥

क्ष्यमाणत्वात् ॥ ३ ॥ राक्षसेन्द्रनिवेशनं पुष्पकमध्यस्थालयादन्यन्मूलस्थानं । राक्षसीभिरित्यादिश्लोकद्वये आससादेति संबध्यते । रावणस्य निवेशनमिति पुनरुपादानमपूर्वविशेषणविवक्षया । नक्रः कुम्भीरः । तिमिङ्गिलः महामत्स्यः । झषः केवलमत्स्यः ॥४—९॥ तस्य हर्म्यस्येत्यादि॥ पूर्वमुक्तार्थस्यापि पुनरुपन्यासः पुष्पकस्य मध्ये रावणस्य निवासभवनमन्यदस्तीत्यस्यार्थस्य स्पष्टीभावार्थम् । निर्यूहः मत्तवारणः ॥ १० ॥ ब्रह्मणोर्थे कृतं यत्कुबेरस्तपसा लेभे तद्वेश्म ददर्शेति पूर्वेण संबन्धः ॥ ११ ॥ कुबेरमित्यादि ॥ ईहामृगसमायुक्तैः वृकप्रतिकृतियुक्तैः कार्तस्वरहिरण्मयैः कार्तस्वरं सुवर्णं । हिरण्यं रजतं । "कृताकृतं हेम रूप्यं हिरण्यमभिधीयते" इति रजतस्यापि हिरण्यत्वाभिधानात् । जालवातायनैः जालानि तिर्यगूर्ध्वविन्यस्तफलकघटितानि । वातायनानि केवलानि रन्ध्राणि । अर्थवैशद्यार्थमेकार्थे शब्दद्वयप्रयोगो वा । महानीलाः सिंहलद्वीपोद्भवनीलरत्नानि । महाधनैः महामूल्यैः । निस्तुलाभिः सुवृत्ताभिः । तलेन निर्मितेनेति शेषः । आदित्यतरुणोपमं तरुणादित्योपमं । एतदन्ते लेभे तद्राक्षसेश्वर इति संबध्यते । अन्यथा कूटागारै-

रावणगृहप्राप्तेरभिधानात् ॥ ३ ॥ **ती०** रावणस्यनिवेशनं निवेश्यन्तेपरिगृह्यन्तेपत्न्योत्रेतिनिवेशनं । रावणस्थानमित्यर्थः ॥ ६ ॥ **रामानु०** हनुमताप्राप्तरावणभवनस्यराक्षसभवनानांचसर्वोत्तरतांदर्शयितुंतत्समृद्धिमनुसंधत्ते—याहिवैश्रवणइत्यादिश्लोकद्वयेन । वैश्रवणेन्द्रयोर्ग्रहणमितरदिक्पालानामप्युपलक्षणं । 'रावणस्यगृहेसर्वा नित्यमेवानपायिनी' इत्यभिधानात् सर्वदिक्पालानामैश्वर्यमेकस्मिन्रावणभवनेसर्वदावर्ततइत्यवगम्यते ॥ **स०** हरिवाहने 'त्वक्केशवालरोमाणिसुवर्णाभानियस्यतु । हरिःसवर्णतोश्वस्तुपीतकौशेयसप्रभ'इतिशालिहोत्रोक्तलक्षणोपेतोयोश्वःसहरिरित्युच्यते । सवाहनंयस्यतस्मिन् । यद्वाहरिवाहनेसूर्ये । 'हरिवाहनइत्युक्तिः शचीपतिविवस्वतोः' इतिविश्वः । अनपायिनी अविश्लेषा ॥ ८ ॥ **रामानु०** तद्विशिष्टा ततोप्यधिका । रक्षोगृहेषुरावणभ्रातृपुत्रामात्यादिराक्षसगृहेषु । अत्रऋद्धेःसर्वशब्देनाविशेषितत्वात्कुबेराद्येकैकदिक्पालैश्वर्यंरक्षसांगृहेषुप्रत्येकंवर्ततइत्यर्थः ॥ ९ ॥ **ति०** वेश्म सस्त्रीकशयनगृहमितिकतकः । वेश्म पुष्पकाख्यमितितीर्थः । अत्रतीर्थव्याख्याज्यायसी ॥ १० ॥ **रामानु०** कुबेरमित्यारभ्यसर्वतस्समलङ्कृतमित्यन्तमेकंवाक्यं । अतोवक्ष्यमाणेनकूटागारशब्देननपौनरुक्त्यं । ईहामृगसमायुक्तैः कृत्रिमवृकयुक्तैः । कार्तस्वरहिरण्मयैः सुवर्णरजतमयैः । 'कृताकृतंहेमरूप्यंहिरण्यमभिधीयते' इतिरजतस्यापिहिरण्यत्वाभिधानात् । ज्वलनार्कप्रतीकाशमित्यारभ्य आरुरोहमहाकपिरित्यन्तमेकंवाक्यं । जालवातायनैर्युक्तं कुड्योपरिभागेऽलङ्कारार्थस्वस्तिकसर्वतोभद्राद्याकारेणयत्नवत्तयाकृतंजालं । वायुसंचारार्थंकृतोगवाक्षोवातायनं । इन्द्रनीलमहानीलेति । "क्षीरमध्येक्षिपेन्नीलंक्षीरंचेन्नीलतांव्रजेत् । इन्द्रनीलमितिख्यातमितिचागस्त्यभाषितम्' इतिरत्नशास्त्रोक्तलक्षणमिन्द्रनीलं । 'सिंहलाकारसंभूतामहानीलाइतिस्मृताः' इत्युक्ता महानीलाइतितयोर्भेदः । विद्रुमेणमहाधनैर्मणिभिःनिस्तुलाभिर्मुक्ताभिश्चकरणैःविचित्रेणतलेनाभिविराजितमितिसंबन्धः । आदि-

[पा०] १ च. छ. ज. राक्षसेन्द्रस्यह्यावासमवलोकयन्. २ ग. तिमिमीनसमाकुलं. ३ ङ. ञ. समाधूतैः. ४ क. याच. ५ ङ.—ट. रम्यानित्यं. क. लक्ष्मीर्नित्यं. ६ ग. लक्ष्मीरक्षोगृहेष्विह. ट. लक्ष्मीरक्षोगृहेष्वपि. ७ ङ. झ. ञ. ट. संयुक्तं. ८ ङ. च. छ. ज. विधिवद्विश्व. ९ घ. श्रेष्ठरत्न. १० क. वरेण. ११ क. ख. स्वरविभूषितैः. १२ ट. सुकृतंराजतस्तंभैः. क. ग. घ. च. ञ. सुकृतैराजतस्तंभैः.

मेरुमन्दरसंकाशैरुल्लिखद्भिरिवाम्बरम् ॥ कूटागारैः [1]शुभाकारैः सर्वतः समलंकृतम् ॥ १४ ॥
ज्वलनार्कप्रतीकाशं सुकृतं विश्वकर्मणा ॥ हेमसोपान[2]संयुक्तं चारुप्रवरवेदिकम् ॥ १५ ॥
जालवातायनैर्युक्तं काञ्चनैः स्फाटिकैरपि ॥ इन्द्रनीलमहानीलमणिप्रवरवेदिकम् ॥ १६ ॥
विद्रुमेण विचित्रेण मणिभिश्च महाधनैः ॥ [3]निस्तुलाभिश्च मुक्ताभिस्तलेनाभिविराजितम् ॥ १७ ॥
चन्दनेन च रक्तेन तपनीयनिभेन च ॥ सुपुण्यगन्धिना [4]युक्तमादित्यतरुणोपमम् ॥ १८ ॥
[5]कूटागारैर्वराकारैर्विविधैः समलंकृतम् ॥ विमानं पुष्पकं दिव्यमारुरोह महाकपिः ॥ १९ ॥
तत्रस्थः [6]स तदा गन्धं पानभक्ष्यान्नसंभवम् ॥ दिव्यं संमूर्च्छितं जिघ्रद्रूपवन्तमिवानिलम् ॥ २० ॥
स गन्धस्तं महासत्त्वं बन्धुर्बन्धुमिवोत्तमम् ॥ इत एहीत्युवाचेव तत्र यत्र स रावणः ॥ २१ ॥
[7]ततस्तां प्रस्थितः शालां ददर्श महतीं [8]शुभाम् ॥ रावणस्य मनःकान्तां कान्तामिव वरस्त्रियम् ॥२२॥
मणिसोपान[9]विकृतां हेमजाल[10]विभूषिताम् ॥ स्फाटिकैरावृततलां दन्तान्तरितरूपिकाम् ॥ २३ ॥
[11]मुक्ताभिश्च प्रवालैश्च रूप्यचामीकरैरपि ॥ विभूषितां मणिस्तम्भैः [12]सुबहुस्तम्भभूषिताम् ॥ २४ ॥
समैर्ऋजुभिरत्युच्चैः समन्तात्सुविभूषितैः ॥ स्तम्भैः पक्षैरिवात्युच्चैर्दिवं संप्रस्थितामिव ॥ २५ ॥
महत्या [13]कुथयाऽऽस्तीर्णां पृथिवीलक्षणाङ्कया ॥ पृथिवीमिव विस्तीर्णां [14]सराष्ट्रगृहमालिनीम् ॥ २६ ॥
नादितां मत्तविहगैर्दिव्यगन्धाधिवासिताम् ॥ परार्ध्यास्तरणोपेतां [15]रक्षोधिपनिषेविताम् ॥ २७ ॥
धूम्रामगरुधूपेन विमलां हंसपाण्डुराम् ॥ [16]चित्रां पुष्पोपहारेण कल्माषीमिव सुप्रभाम् ॥ २८ ॥
[17]मनःसंह्लादजननीं वर्णस्यापि प्रसाधिनीम् ॥ तां शोकनाशिनीं दिव्यां श्रियः संजननीमिव ॥२९॥
इन्द्रियाणीन्द्रियार्थैस्तु पञ्च पञ्चभिरुत्तमैः ॥ तर्पयामास मातेव तदा रावण[18]पालिता ॥ ३० ॥

रित्यनेन पुनरुक्तिः स्यात् ॥ १२--१९ ॥ जिघ्रत् अजिघ्रत् ॥ २०—२१ ॥ दन्तान्तरितरूपिकां दन्तैः व्यवहितरूपिकां । अन्तरान्तराकृतदन्तफलकामिति यावत्। सुबहुस्तम्भभूषितां अवान्तरबहुस्तम्भभूषितां। सुबहुस्तम्भभूषितैरिति पाठे सुबहुस्तम्भैः स्तम्भदार्ढ्यकारिपट्टैरलंकृतामित्यर्थः। अत्युच्चैः अत्यन्तोन्नतैः । दिवं आकाशं। कुथया आस्तरणेन। पृथिवीलक्षणाङ्कया सरित्समुद्रगिरिवनादिभिः पृथिवीलक्षणैरङ्कितया। कल्माषीं शबलवर्णां वसिष्ठधेनुमिव। सर्वकामप्रदत्वेन कल्माषीसादृश्यं। वर्णस्यापि प्रसाधिनीं वर्णोत्कर्षकरीमित्यर्थः । तां शोकनाशिनीमिति ततस्तामिति वर्तमाने पुनस्तच्छब्द उपसंहारार्थः तां प्रति प्रस्थितः ददर्शेति वासंबन्धः ॥ २२—२९ ॥ इन्द्रियाणीति ॥ हनुमत इति शेषः ॥ ३० ॥

त्यतरुणोपमं तरुणादित्योपमं । उपसर्जनस्यपरनिपातआर्षः ॥१२—१९॥ **ति०** यत्तु पुष्पकस्यैव साशाला । ततइत्यस्य तदनन्तरमित्यर्थइति तच्चिन्त्यं । प्रस्थितइतिपदास्वारस्यात् अर्धयोजनविस्तीर्णमित्यादिना मूलालयप्रदर्शनोपक्रमाच्च । मूलालयंदृष्ट्वा तद्बहिस्स्थंपुष्पकमन्विष्य तत्स्थएव रावणशयनगृहं तद्गृहवर्त्म्यनुमाय पुष्पकादवरुह्य तंप्रतिस्थितस्तांददर्शेत्येवन्याय्यमितिकतकः । यत्त्वित्यादिनोक्ताव्याख्यैवयुक्तेति ममभाति । ' अवतीर्यविमानाच्चहनुमान्मारुतात्मजः' इत्यग्रे उपसंहारात् ॥ २२ ॥ **ती०** सुबहुस्तंभभूषितामित्यत्रबहुत्वविधानायस्तंभानुवादान्नपौनरुक्त्यं ॥ **स०** बहूनांशत्रूणांस्तंभःजडीभावःतेनविभूषितां यदाशयाप्रवृत्तास्श-

[पा०] १ ङ. झ. ञ. ट. शुभागारैः. २ ङ. झ. युक्तंच. ३ ञ. वर्तुलाभिश्च. ४ क. ग. घ. युक्तंतरुणादित्यसंनिभं. ५ च. छ. ज. कूटागारैर्महागारैःसर्वतः. ६ ङ. झ. ञ. ट. सर्वतो. क. घ. सततं. ७ घ. ततःसंप्रस्थितः. ८ ङ.—ट. शिवां. ९ ख. सुकृतां. १० ग.—ट. विराजितां. क. समावृतां. ११ ङ.—ट. मुक्तावज्रप्रवालैश्च. १२ क. सुगन्धैःसुविभूषितां. च. बहुस्तंभविभूषितां. घ. सुबहुस्तंभशोभितां. १३ घ. च. छ. ज. ञ. कुथयाकीर्णां. १४ झ. ट. सराष्ट्रगृहशालिनीं. ग. सुराष्ट्रग्राममालिनीं. १५ च. छ. ज. रक्षोधिपतिसेवितां. १६ ङ. झ. ञ. ट. पत्रपुष्पोपहारेण. १७ ङ. झ. ञ. ट. मनसोमोदजननीं. १८ च. छ. ज. सेविता.

स्वर्गोयं दे[१]वलोकोऽयमिन्द्रस्येयं पुरी भवेत् ॥ सिद्धि[२]र्वेयं परा हि स्यादित्यमन्यत मारुतिः ॥ ३१ ॥
प्रध्यायत इवापश्यत्प्रदीपांस्तत्र काञ्चनान् ॥ धूर्तानिव महाधूर्तैर्देवनेन पराजितान् ॥ ३२ ॥
दीपानां च प्रकाशेन तेजसा रावणस्य च ॥ अर्चिर्भिर्भूषणानां च प्रदीप्तेत्यभ्यमन्यत ॥ ३३ ॥
ततोपश्यत्कुथासीनं [३]नानावर्णाम्बरस्रजम् ॥ सहस्रं वरनारीणां [४]नानावेषविभूषितम् ॥ ३४ ॥
परिवृत्तेऽर्धरात्रे तु पाननिद्रावशं गतम् ॥ क्रीडित्वोपरतं रात्रौ [५]सुष्वाप बलवत्तदा ॥ ३५ ॥
तत्प्रसुप्तं विरुरुचे निःशब्दान्तरभू[६]षणम् ॥ निःशब्दहंसभ्रमरं यथा पद्मवनं महत् ॥ ३६ ॥
तासां संवृतद[७]न्तानि [८]मीलिताक्षाणि मारुतिः ॥ अपश्यत्पद्मगन्धीनि वदनानि सुयोषिताम् ॥३७॥
प्रबुद्धानीव पद्मानि तासां भूत्वा [९]क्षपाक्षये ॥ पुनः संवृतपत्राणि रात्राविव बभुस्तदा ॥ ३८ ॥
इमानि मुखपद्मानि नियतं मत्तषट्पदाः ॥ अम्बुजानीव फुल्लानि प्रार्थयन्ति पुनःपुनः ॥ ३९ ॥
[१०]इति चामन्यत श्रीमानुपपत्त्या महाकपिः ॥ मेने हि गुणतस्तानि समानि सलिलोद्भवैः ॥ ४० ॥
सा तस्य शुशुभे शाला ताभिः स्त्रीभिर्विराजिता ॥ शारदीव प्रसन्ना द्यौस्ताराभिरभिशोभिता ॥४१॥
स च ताभिः परिवृतः शुशुभे राक्षसाधिपः ॥ यथा ह्युडुपतिः श्रीमांस्ताराभिरभिसंवृतः ॥ ४२ ॥
याश्च्यवन्तेम्बरात्ताराः पुण्यशेषसमावृताः ॥ इमास्ताः [११]संगताः [१२]कृत्स्ना इति मेने हरिस्तदा ॥ ४३ ॥
ताराणामिव सुव्यक्तं महतीनां शुभार्चिषाम् ॥ प्रभावर्णप्रसादाश्च विरेजुस्तत्र योषिताम् ॥ ४४ ॥

स्वर्गोयमिति ॥ सामान्यतः स्वर्गोयं । तत्रापि देवलोकः त्रयस्त्रिंशद्देवानां लोकः । तत्रापीन्द्रस्य पुरी अमरावती । परा सिद्धिः ब्रह्मणः स्थानमित्युत्तरोत्तरोत्कर्षः ॥ ३१ ॥ प्रध्यायत इव निश्चलतया प्रकृष्टध्यानयुक्तानिव । धूर्तान् अक्षधूर्तान् । देवनेन द्यूतेन ॥ ३२ ॥ प्रदीप्ता शाला दग्धेति अभ्यमन्यत ॥ ३३ ॥ कुथासीनं कुथशयितं । नानावर्णाम्बरस्रजमिति । हलन्तस्य स्रक्छब्दस्य भागुरिमतेन टाबन्तत्वादजन्तत्वोपपत्तिः ॥ ३४—३५ ॥ निःशब्दान्तरभूषणं निःशब्दविशेषाणि भूषणानि यस्य ॥ " अथान्तरं रन्ध्रेप्यपरव्यवधानयोः । अवकाशावसरयोरवसानविनार्थयोः । विशेषमध्यतादर्थ्येषु " इति दर्पणः ॥ अतिनिद्रापरवशत्वेन निश्चलाङ्गतया निःशब्दभूषणमित्यर्थः ॥ ३६—३७ ॥ अत्र वदनानीत्यनुषज्यते । तासां वदनानि क्षपाक्षये दिवसे पद्मानीव प्रबुद्धानि भूत्वा रात्रौ पुनः संवृतपत्राणि सङ्कुचितपत्राणि पद्मानीव बभुः ॥ ३८ ॥ प्रार्थयन्ति प्रार्थयेरन् । मधुरसलुब्धतया अत्र पुनःपुनः पतेयुरित्यर्थः । व्यत्ययेन परस्मैपदं । अनुदात्तत्वेनात्मनेपदत्वात् । नियतं नूनं । उपपत्त्या युक्त्या । उपपत्तिमेवाह—मेन इति । तानि मुखानि । गुणतः सौरभादिगुणैः । सलिलोद्भवैः पद्मैः ॥ ३९—४३ ॥ प्रभा कान्तिः ।

त्रत्रोजडीभवन्तीत्यर्थः । " स्तंभौस्थूणाजडीभावौ " इत्यमरः ॥ २४ ॥ **ती॰** प्रत्यायतइतिपाठेझटितिप्रकाशसंभारात्प्रत्यागच्छतइवस्थितान् । काञ्चनान् काञ्चनस्तंभगतानित्यर्थः ॥ ३२ ॥ **ति॰** प्रदीप्ता अग्निज्वालाज्वालिता । अनेनाग्निमोऽग्निदाहस्सूचितः ॥ ३३ ॥ **ति॰** निद्रितत्वात्संवृतानि संवृतपक्ष्माणि । तादृशानिचतानि दान्तानि ग्लानानि । मीलिताक्षीणि अतिसंवृतपक्ष्माणि । स्वर्गदेवलोकादेरिवसंवृतमीलितयोरपिभेदोबोध्यः । यद्वासंवृतदान्तानीत्यस्यैवव्याख्यानंनिमीलिताक्षीणीति । यद्वा संवृतत्वमोष्ठयोः

[पा॰] १ ङ. झ. ञ. ट. देवलोकोयमिन्द्रस्यापि. ग. देवलोकोयंगान्धर्वोयं. २ च. छ. ज. गान्धर्वीयंपरासिद्धिरित्यमन्यत. क. गान्धर्वीयंपुरीवास्यादित्यमन्यत. ग. इन्द्रस्येयंपुरीवास्यादित्यमन्यत. ३ च. नानाभरणभूषितं. छ. ज. वराभरणभूषितं. ४ क. नानारत्नविभूषितं. ५ ङ. झ. ञ. ट. प्रसुप्तं. ६ ङ. च. झ. ञ. ट. भूषितं. ७ ङ. झ. दान्तानि. ८ ङ. च. छ. झ. ट. मीलिताक्षीणि. ९ क. ञ. क्षपात्यये. १० घ.—छ. झ. ञ. ट. इतिवामन्यत. ११ क. संहताः. १२ घ. सर्वाइति.

[1]व्यावृत्तगुरुपीनस्रक्प्रकीर्णवरभूषणाः ॥ पानव्यायामकालेषु [2]निद्रापहृतचेतसः ॥ ४५ ॥
व्यावृत्ततिलकाः काश्चित्काश्चिदुद्भ्रान्तनूपुराः ॥ पार्श्वे गलितहाराश्च काश्चित्परमयोषितः ॥ ४६ ॥
[3]मुक्ताहारावृताश्चान्याः [4]काश्चिद्विस्रस्तवाससः ॥ [5]व्याविद्धरशनादामाः किशोर्य इव वाहिताः ॥ ४७ ॥
[6]सुकुण्डलधराश्चान्या [7]विच्छिन्नमृदितस्रजः ॥ गजेन्द्रमृदिताः फुल्ला लता इव महावने ॥ ४८ ॥
चन्द्रांशुकिरणाभाश्च हाराः कासांचि[8]दुत्कटाः ॥ हंसा इव बभुः सुप्ताः स्तनमध्येषु योषिताम् ॥ ४९ ॥
अपरासां च वैडूर्याः कादम्बा इव पक्षिणः ॥ हेमसूत्राणि चान्यासां चक्रवाका इवाभवन् ॥ ५० ॥
हंस[9]कारण्डवाकीर्णाश्चक्रवाकोपशोभिताः ॥ आपगा इव ता रेजुर्जघनैः पुलिनैरिव ॥ ५१ ॥
किङ्किणी[10]जालसंकोशास्ता [11]हैमविपुलाम्बुजाः ॥ भावग्राहा यशस्तीराः सुप्ता नद्य इवाबभुः ॥ ५२ ॥
[12]मृदुष्वङ्गेषु कासांचित्कुचाग्रेषु च संस्थिताः ॥ बभूवुर्भूषणानीव शुभा भूषण[13]राजयः ॥ ५३ ॥
अंशुकान्ताश्च कासांचिन्मुखमारुतकम्पिताः ॥ उपर्युपरि वक्त्राणां व्याधूयन्ते पुनःपुनः ॥ ५४ ॥
ताः पताका इवोद्धूताः पत्नीनां रुचिरप्रभाः ॥ नानावर्णसुवर्णानां वक्त्रमूलेषु रेजिरे ॥ ५५ ॥

वर्णः रूपं। प्रसादः प्रसन्नता ॥ ४४ ॥ पानव्यायामकालेषु पानानन्तरं भाविरतिव्यापारसमयेषु। व्यावृत्तगुरुपीनस्रक्प्रकीर्णवरभूषणाः विपर्यस्तगुरुपीनस्रजः प्रकीर्णवरभूषणाश्च सत्यः निद्रापहृतचेतसः विरेजुः ॥ ४५ ॥ व्यावृत्ततिलकाः उन्मृष्टतिलकाः। उद्भ्रान्तनूपुराः स्वस्थानानवस्थितनूपुराः ॥ ४६ ॥ मुक्ताहारावृताः मुक्ताहारैरावृताः। छिन्नमुक्ताहारा इत्यर्थः। व्याविद्धरशनादामाः छिन्नकाञ्चीगुणाः। किशोर्यः प्रथमवयस्काबडबाः। वाहिताः मार्गश्रमनिवृत्त्यर्थं भूमौ प्रवेष्टनं कारिताः। सर्वत्र रेजुरित्यन्वयः ॥ ४७—४८ ॥ चन्द्रांशुकिरणाभाः अंशुः सूर्यः। "अथांशुः स्यान्मयूखे सवितर्यपि" इति दर्पणः। चन्द्रसूर्ययोः किरणानामाभेवाभा येषां ते तथा। उत्कटाः स्थूलाः ॥४९—५१॥ अथासां नदीसमाधिं दर्शयति—किङ्किणीति॥ किङ्किणीजालसंकोशाः किङ्किणीजालान्येव संकोशा मुकुलानि यासां ताः। एतत्स्थाने सत्कोशा इति पाठान्तरदर्शनात्संकोशशब्दो मुकुलवाचीत्यवगम्यते। भावाः शृङ्गारचेष्टाः त एव ग्राहाः नक्रा यासां ताः। सुप्तिदशायामपि वासनावशाद्भावाभिव्यञ्जकसंस्थानवत्त्वाद्भावग्राहा इत्युक्तं। यशस्तीराः यशश्शब्देन यशोहेतुभूता पर्यन्तप्रसृतप्रभोच्यते। सैव तीरं यासां ताः॥५२॥ संस्थिताः लग्नाः भूषणराजयः। भ्रमराणीव भ्रमरा इव। व्यत्यय आर्षः। कामुका इव। बभूवुः। "भ्रमरः कामुके भृङ्गे" इति दर्पणः। केचित्तु भूषणानीति पाठं कल्पयित्वा भूषणराजयः भूषणविमर्दकृतरेखाः। विस्रस्तभूषणानामपि कासांचिद्भूषणानीव बभूवुरित्यर्थ इत्याहुः ॥ ५३ ॥ मुखमारुतकम्पिताः अंशुकान्ताः सूक्ष्मवस्त्रदशाः। उपर्युपरि वक्त्राणां वक्त्राण्युपर्युपरि। "धिगुपर्यादिषु त्रिषु। द्वितीयाम्रेडितान्तेषु" इति द्वितीयाभाव आर्षः। व्याधूयन्त इति श्यन्नार्षः। धूनातेः क्र्यादित्वात् ॥५४॥ ता इति विधेयत्वात्स्त्रीलिङ्गता। नानावर्णसुवर्णानां नानाविधशोभनवर्णानां ॥ ५५ ॥

स० पद्मगन्धीनि 'उपमानाच्च' इतीत्वं ॥ ३७ ॥ **ति०** व्यावृत्ताःकचाःपीनस्रजश्चयासांताश्च ॥ ४५ ॥ **ति०** अकुण्डलधराः कुण्डलधरणरहिताः गलितकुण्डलाइतियावत् ॥ विच्छिन्नाःआमृदिताश्चस्रजोयासांताः ॥ ४८ ॥ **ति०** अंशवःप्रभाः किरणास्तदाधाराः। अंशवःसूक्ष्मरश्मयः। किरणाःस्थूलरश्मयइत्यन्ये। **शि०** सुप्ताहंसाइवबभुः ॥ ४९ ॥ **ति०** किङ्किणीजालसंकाशाःतद्वन्मुकुलितनयनाः तत्स्थानेचनद्यांमुकुलितकुमुदानि। हेमविपुलांबुजत्वेनवक्त्रनिगरणं। उपमानेतुननिगरणं। किङ्किणीजालसंबाधा इतिपाठेकिङ्किणीजालसंबाधत्वमुभयत्रापिस्पष्टमेव। शब्दवत्त्वसाधर्म्यात्किङ्किणीशब्देनलहरीणामप्युक्तेः। भावाविलासाएवस्वाप्निकसुरतभावोवाग्राहोयासांताः। यशःअतिगुणवत्त्वकृतयशएवतीरंयासांताः। यशश्शब्देनलक्षणयाकान्तिरित्यन्ये। सुप्तानार्यो

[पा०] १ ङ. च. ञ. ट. व्यावृत्तकुचपीन. झ. व्यावृत्तकचपीन. २ ङ.—ट. निद्रोपहत. ३ ख. घ. ङ. झ. ञ. ट. मुक्ताहारवृताः. ४ क. ख. ग. ङ.—ट. काश्चित्प्रस्रस्त. घ. काश्चित्प्रहृत. ५ क. ग. व्यावृत्तरशना. ६ ङ. झ. ञ. ट. अकुण्डलधराः. ७ ङ.—ज. ञ. ट. विच्छिन्नामृदित. ८ ङ. झ. ञ. दुद्गताः. ९ ङ. झ. ञ. ट. कारण्डवोपेताः. १० च. छ. ज. जालसंबाधाः. ग. ङ. झ. ञ. ट. जालसंकाशाः. ११ क. वक्त्रकनकांबुजाः. १२ क. मृदुष्वंशेषु. १३ ङ. राशयः.

ववल्गुश्चात्र[1] कासांचित्कुण्डलानि शुभार्चिषाम् ॥ मुखमारुतसंसर्गान्मन्दं[2] मन्दं[3] सुयोषिताम् ॥५६॥
शर्करासवगन्धैश्च[4] प्रकृत्या सुरभिः सुखः ॥ तासां वदननिःश्वासः सिषेवे रावणं तदा ॥ ५७ ॥
रावणाननशङ्काश्च काश्चिद्रावणयोषितः ॥ मुखानि[5] स सपत्नीनामुपाजिघ्रन्पुनः पुनः ॥ ५८ ॥
अत्यर्थं सक्तमनसो रावणे ता वरस्त्रियः ॥ अस्वतन्त्राः सपत्नीनां प्रियमेवाचरंस्तदा ॥ ५९ ॥
बाहूनुपनिधायान्याः पारिहार्यविभूषितान् ॥ अंशुकानि[6] च रम्याणि प्रमदास्तत्र शिश्यिरे ॥ ६० ॥
अन्या वक्षसि चान्यस्यास्तस्याः काश्चित्पुनर्भुजम् ॥ अपरा त्वङ्कमन्यस्यास्तस्याश्चाप्यपरा भुजौ[7] ॥६१॥
ऊरुपार्श्वकटीपृष्ठमन्योन्यस्य समाश्रिताः ॥ परस्परनिविष्टाङ्ग्यो मदस्नेहवशानुगाः ॥ ६२ ॥
[[8]अन्योन्यस्याङ्गसंस्पर्शात्प्रीयमाणाः सुमध्यमाः ॥ एकीकृतभुजाः सर्वाः सुषुपुस्तत्र योषितः ॥६३॥]
अन्योन्यभुजसूत्रेण स्त्रीमाला ग्रथिता हि सा ॥ मालेव ग्रथिता सूत्रे शुशुभे मत्तषट्पदा ॥ ६४ ॥
लतानां माधवे मासि फुल्लानां वायुसेवनात् ॥ अन्योन्यमालाग्रथितं संसक्तकुसुमोच्चयम् ॥ ६५ ॥
व्यतिवेष्टित[9]सुस्कन्धमन्योन्यभ्रमराकुलम् ॥ आसीद्वनमिवोद्धूतं स्त्रीवनं रावणस्य तत् ॥ ६६ ॥
उचितेष्वपि सुव्यक्तं न तासां योषितां तदा ॥ विवेकः शक्य आधातुं भूषणाङ्गाम्बरस्रजाम् ॥ ६७ ॥
रावणे सुखसंविष्टे[10] ताः स्त्रियो विविधप्रभाः ॥ ज्वलन्तः काञ्चना दीपाः प्रैक्षन्तानिमिषा इव[11] ॥६८॥
राजर्षि[12]पितृदैत्यानां गन्धर्वाणां च योषितः ॥ राक्षसानां[13] च याः कन्यास्तस्य[14] कामवशं गताः ॥६९॥

ववल्गुरिति ॥ उपधानपरिसरे घनमणिखचिततया लम्बमानानि कुण्डलानि मन्दं मन्दं चेलुरित्यर्थः ॥५६—५८॥ रावणे अत्यर्थं सक्तमनसः । अस्वतन्त्राः पाननिद्रापरवशाः ताः सपत्नीभिराघ्रातमुखाः । वरस्त्रियः तदा मुखाघ्राणसमये सपत्नीनां प्रियमेवाचरन् रावणोऽजिघ्रदिति बुद्ध्या स्वयमप्यजिघ्रन्नित्यर्थः । अथवा कथं सपत्न्योपि सह स्वपन्तीत्याशङ्कयाह—अत्यर्थमिति ॥ ५९ ॥ पारिहार्यो वलयः । अंशुकानि च उपनिधायेत्यनुषज्यते ॥ ६० ॥ अन्या वक्षसि चान्यस्या इत्यादिश्लोकद्वये शिश्यिर इत्येतद्वचनविपरिणामेन यथायोगं संबध्यते उपनिधायेति च ॥ ६१—६३ ॥ मालेव पुष्पमालेव । मत्तषट्पदस्थानीयाः केशाः ॥ ६४ ॥ लतानामित्यादिश्लोकद्वयमेकान्वयं ॥ तद्रावणस्य स्त्रीवनं लतानां वनमिवासीदिति संबन्धः। विशेषणान्युभयत्र योज्यानि। वायुसेवनाद्धेतोः अन्योन्यमालाग्रथितं अन्योन्यमालारूपेण ग्रथितं सुखमुखमारुतसेवनादन्योन्यमालाग्रथितमिति स्त्रीपक्षे । संसक्तकुसुमोच्चयं । अन्योन्यसंसक्तनीवीकं संसक्तकुसुमसमूहं चेत्यर्थः । व्यतिवेष्टितसुस्कन्धं अन्योन्यपरिवेष्टितांसं अन्योन्यपरिवेष्टितप्रकाण्डं च । अन्योन्यं भ्रमरैश्चिकुरैराकुलं भ्रमरैः भृङ्गैराकुलं च । "भ्रमरश्चिकुरे भृङ्गे" इति विश्वः ॥ ६५—६६॥ उचितेषु स्थानेषु स्थितानामपि भूषणाङ्गाम्बरस्रजां साधारण्यादेकतामापन्नानामिति भावः । विवेकः सुव्यक्तमाधातुं न शक्यः । अन्योन्यसंग्रथितत्वेन सुप्तत्वात् । इमा अस्या भूषणाङ्गाम्बरस्रजः इमा अपरस्या इति विवेकः कर्तुं न शक्य इत्यर्थः ॥ ६७ ॥ सुखसंविष्टे सुखसुप्ते । काञ्चनाः काञ्चनदीपस्तम्भस्था दीपाः अनिमिषास्सन्तः प्रैक्षन्तेव । अनेन रावणस्य जाग्रद्दशायां दीपैरपि ताः स्त्रियो निश्चलं द्रष्टुमशक्या इति गम्यते ॥ ६८ ॥ अथ सीतयैकया अकाम्यत्वं वक्तुं सर्वस्त्रीकाम्यत्वमाह—

नद्यइवबभुः ॥ ५२ ॥ ति० शर्करासवः आसवविशेषः । तद्योगात्तद्गन्धः । प्रकृत्याचसुरभिः । यद्वाप्रकृत्याअसुरभिरपि वायुरिति शेषः । तासांवदननिश्श्वासःतद्युक्तः । अर्शआद्यजन्तं । अतएवशर्करासवगन्धःरावणंसिषेवे ॥ ५७ ॥ ति० राजर्षयोविप्रदैत्याश्च ।

[पा०] १ ग. श्चारु. क. स्तत्र. २ च. छ. ज. मारुतसंक्षोभात्. ग. घ. मारुतसंसर्गैर्मन्दं. क. ङ. झ. ञ. ट. मारुतसंकंपैर्मन्दं. ३ झ. ञ. ट. मन्दंच. क. च. छ. ज. मन्दंस. ४ क. घ.—ट. गन्धस्स. ग. गन्धाढ्यः. ५ ग. च.—झ. ट. मुखानिच. ६ क. अंशुकानीव. ७ ग. ङ.—ट. कुचौ. ८ अयंश्लोकः क.—ट. पाठेषुदृश्यते. ९ ङ.—ट. प्रतिवेष्टित. १० ङ. च. छ. ज. सुखसंसुप्ते. ११ ख. ङ. झ. ट. प्रेक्षन्तोऽनिमिषाइव. क. च. छ. ज. ञ. प्रेक्षन्तेऽनिमिषाइव. १२ ङ. झ. ट. राजर्षिविप्र. १३ क.—ट. रक्षसांचाभवन्कन्याः. १४ क. स्तथा.

युद्धकामेन ताः सर्वा रावणेन हृताः स्त्रियः ॥ समदा मदनेनैव मोहिताः काश्चिदागताः ॥ ७० ॥
न तत्र काश्चित्प्रमदाः प्रसह्य वीर्योपपन्नेन गुणेन लब्धाः ॥
न चान्यकामापि न चान्यपूर्वा विना वरार्हां जनकात्मजां ताम् ॥ ७१ ॥
न चाकुलीना न च हीनरूपा नादक्षिणा नानुपचारयुक्ता ॥
भार्याऽभवत्तस्य न हीनसत्त्वा न चापि कान्तस्य न कामनीया ॥ ७२ ॥
बभूव बुद्धिस्तु हरीश्वरस्य यदीदृशी राघवधर्मपत्नी ॥
इमा यथा राक्षसराजभार्याः सुजातमस्येति हि साधुबुद्धेः ॥ ७३ ॥

राजर्षीत्यादिना श्लोकत्रयेण ॥ तस्य कामवशं गताः तं प्रति यः कामः तस्य वशंगताः । तं कामयित्वा स्वयमेवागतास्ताः न तु तेन कामयित्वा हृता इत्यर्थः ॥ ६९ ॥ हृताश्च काश्चन श्रूयन्ते तत्र कथमित्यत्राह —युद्धेति ॥ तासु हृतासु तासां संबन्धिभिस्सह युद्धं भविष्यतीति युद्धं कामयित्वानेन हृताः नतु ताः कामयित्वा हृताः ॥ ७० ॥ अमुमेवार्थं विवृणोति— न तत्रेति ॥ तत्र तासु काश्चिदपि प्रमदाः प्रसह्य वीर्येण न लब्धाः । किंतु स्वसंवादेनैवेत्यर्थः । वीर्योपपन्नेन रावणेन न लब्धाः अपि तु गुणेन लब्धाः । अन्यकामा च काचित्तत्र नास्ति । अन्यपूर्वा च न । अन्यत्रासक्ता च न काचिदित्यर्थः ॥ ७१—७२ राघवधर्मपत्नी ईदृशी यदि स्वयंवरात्पूर्वमेवास्य धर्म पत्नी चेत् । अस्य सुजातं सुकृतं । इयमसाध्वी बुद्धि कापेयत्वप्रमादकृता न तु स्वयं तस्य बुद्धिरिति द्योतयि साधुबुद्धेरित्युक्तं । एवं प्रमादोपस्थितबुद्ध्या पश्चात्ताप भूदित्याह–पुनश्चेति । यद्वा इमाःराक्षसराजभार्याःयथ स्वभर्त्रा विशिष्टास्सकलभोगयुक्ताश्च तथा राघवधर्म पत्नी ईदृशी यदि स्वभर्त्रा सहिता भोगयुक्ता च यदि तदाऽस्य रावणस्य सुजातं शोभनं जन्मेति साधुबुद्धे परसमृद्धिपरस्य हरीश्वरस्य स्वयमाधिपत्यार्हस्य बुद्धिर्ब भूव । अयं रावणः राघवधर्मपत्नीं यदि प्रत्यर्पयेत्तदास्

अस्यब्रह्मराक्षसत्वादस्तिविप्रकन्याविवाहेऽधिकारः । कामवशंगतास्तस्यत्वस्तस्ययोषितोऽभवन् । अनेनतासामप्यनुरागःसूचित ॥ ६९ ॥ **तनि०** रावणःस्त्रीभिःसहयथासंततसंश्लेषेणतिष्ठति । एवंरामःसीतयासंश्लेषेणतिष्ठतिचेद्रावणस्यैश्वर्यमविच्छिन्नंस्यात् साधुबुद्धेः शत्रूणामपिहितमन्वेषयतः ॥ **स०** साधुबुद्धेःदेवावतारादिषुसम्यग्बुद्धिमतःहरीश्वरस्यहनुमतःइतिवक्ष्यमाणाबुद्धिर्बभूव तदेवव्यनक्ति—यदीति । इमाःपुरतस्सुप्ताःराक्षसराजभार्याःलङ्कायांयथावर्तन्ते तथाराघवधर्मपत्नीसीतापि यदीदृशी एतत्पुरगता त्तर्ह्यस्यअत्रसुप्तस्यरावणस्य सुजातंराक्षसत्वनिर्गमेनशोभनजन्म शिशुपालत्वावस्थायांभगवदङ्गप्रवेशकारणंजन्म हि प्रसिद्धं भवत त्यर्थः । युद्धेरामेणहतस्सन्शिशुपालत्वंप्राप्यजयोभवतीतिभावः। विस्तरस्तुतीर्थव्याख्यानेद्रष्टव्यः॥ **ती०** यद्वा राघवधर्मपत्नी य रावणेनबलादानीताइमाराक्षसराजभार्याः तथायदि सुग्रीवेणबलाद्धृतायदि तदा हरीश्वरस्यसुग्रीवस्य सुजातंहीतिसाधुबुद्धेः सन् न्त्रिबुद्धेः अस्यहनुमतः ईदृशीबुद्धिर्बभूवेत्यन्वयः । यद्वा इमाराक्षसराजभार्यायथारावणेनाहृताइत्यर्थः । राघवधर्मपत्नी ईदृशीय अनेनाहृतायदि तदा अस्य रावणस्य सुजातंकिं सम्यग्भविष्यतिकिं । नभविष्यत्येवेति हरीश्वरस्यबुद्धिर्बभूव । " मम दयितत हृतावनान्ताद्रजनिचरेण तदा विमथ्य सा । कथय मम रिपुं तमद्य वै प्लवगपते यमसादनं नयामि " इति रामवाक्याद्रावणस् सम्यग्भविष्यतीत्यर्थः । यद्वा इमाराक्षसराजभार्यायथामयादृष्टाइतिशेषः । राघवधर्मपत्नी ईदृशीयदि मयादृष्टायदीत्यर्थः । त अस्यमम सुजातंजन्मसफलमितिहरीश्वरस्यबुद्धिर्बभूव । "यश्चमासान्निवृत्तोग्रे दृष्टासीतेतिवक्ष्यति । मत्तुल्यविभवोभोगैः सुखंसविह ष्यति । ततःप्रियतरोनास्ति ममप्राणाद्विशेषतः " इतिसुग्रीववचनात् प्रभोःसुग्रीवस्य प्रियसंवादकत्वेन ममजन्म सफलमितिभाव यद्वा इमाराक्षसराजभार्याः यथामयादृष्टाः राघवधर्मपत्नी ईदृशीयदि दृष्टायदि अस्यसीतायाअदर्शनहेतुना सुग्रीवरामादिभयात्प्र योपवेशनायोद्युक्ताङ्गदादिवानरसमानस्येत्यर्थः । सुजातमितिबुद्धिर्बभूव । "अप्रवृत्तौचसीतायाः पापमेवकरिष्यति । तस्मात्क्षम हाद्यैव प्रायोपविशनंहिनः । त्यक्त्वापुत्रांश्चदारांश्च धनानिचगृहाणिच " इतिसीताऽदर्शनव्यथिताङ्गदादीनां पुनर्जीवितलाभा जातमितिभावः । यद्वा इमाराक्षसराजभार्या यथाजीवन्तीत्यर्थः । राघवधर्मपत्नी ईदृशी जीवतियदि तदा अस्य रामस्य सुजा मितिबुद्धिर्बभूव । " ज्ञायतांसौम्यवैदेही यदिजीवतिवानवा । नह्यहंजीवितुंशक्तस्तामृतेजनकात्मजां " इतिसीताजीवितसंशय थितस्यरामस्य सीताजीवितनिश्चयेसति स्वजीवितलाभात्सुजातमितिभावः । यद्वा हेराक्षसराज इमाःस्त्रियो यथाभार्याः एवं रा वधर्मपत्नी ईदृशीयदि अस्यतव सर्वसंपत्समृद्धियुक्तपुत्रपौत्रादिसहितस्यास्यतवेत्यर्थः । सुजातंहिकिंसम्यग्भविष्यतीति रावणस्य

[पा०] १ क. ग. दङ्गनाः. २ ग. घ. च.—ट. जनकात्मजांतु. ३ ङ. झ. ट. महाराक्षसराज.

पुनश्च सोऽचिन्तयदार्तरूपो ध्रुवं विशिष्टा गुणतो हि सीता ॥
अथायमस्यां कृतवान्महात्मा लङ्केश्वरः कष्टमनार्यकर्म ॥ ७४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे नवमः सर्गः ॥ ९ ॥

शोभनं जन्म स्यादिति बुद्धिर्जातेत्यर्थः ॥७३॥ किंच चिन्तान्तरमाह—पुनश्चेति ॥ अथ सः हनुमान् सीता गुणतः पातिव्रत्यादिगुणतः ध्रुवं विशिष्टा हि । अस्यां एतद्विषये । महात्मा महाकुलप्रसूतोपि अयं लङ्केश्वरः । अनार्यकर्म अपहरणरूपं कर्म कृतवान् । कष्टमिति । आर्तरूपः अत्यन्तमार्तः । "प्रशंसायां रूपप्" पुनश्चाचिन्तयत् । वैदेह्याः दृढव्रतत्वात्पातिव्रत्यभङ्गो न भवेदेव । अपि तु मिथ्यापवादमेवोत्पादितवानिति भृशं दुःखितस्सन् चिन्तितवानित्यर्थः । यद्वा बभूवेत्यादि । राक्षसराजपत्नीवत्सीता स्वभर्त्रा संगता चेत्सीतापहरणं न कृतवांश्चेत्तदास्य सुजातमित्युक्तं । तत्र निरतिशयसौन्दर्यादिशालिन्या मैथिल्याः रक्षस्स्त्रीसाम्यं चिन्तयता मया हीनोपमा कृतेति पश्चात्तापयुक्तस्सन् अचिन्तयत् । हि यस्मात्सीता गुणतः विशिष्टा अतः आर्तस्वरूपस्सन्नचिन्तयत् । मया हीनोपमैव कृतेत्यचिन्तयत् । अथ अथापि अस्यां सीतायां । अनार्यकर्म धर्षणरूपं कर्म । कृतवान् । कष्टं सर्वमिदं लङ्कैश्वर्यं भ्रष्टं भविष्यतीत्यचिन्तयच्चेत्यर्थः । यद्वा राघवधर्मपत्नी यथा रावणेन बलादानीता तथा राक्षसराजभार्याः बलात्सुग्रीवेण बन्दीकृताश्चेदस्य हरीश्वरस्य सुग्रीवस्य सुजातं हीति साधुबुद्धेः सन्मन्त्रिबुद्धेः अस्य हनुमतः बुद्धिर्बभूवेत्यर्थः । यद्वा । इमा राक्षसराजभार्याः यथा रावणेनुरक्ताः ईदृशी राघवधर्मपत्नी यदि एवमनुरक्ता चेत् अस्य सुजातमिति साधुबुद्धेरपि बुद्धिर्बभूव ऐश्वर्यातिशयदर्शनविस्मयादिति भावः । अतएव वक्ष्यति—अहो वीर्यमित्यादिना । एवंहठादुक्त्वानुशयितवानित्याह—पुनश्चेति ॥ हि यस्मात्सीता गुणतः पातिव्रत्येन विशिष्टा सर्वोत्कृष्टा अतः आर्तरूपः किं मया व्याहृतमित्यनुतप्तः सन् । अस्यामनार्यकर्म कृतवानित्यचिन्तयत् ॥ ७४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने नवमः सर्गः ॥ ९ ॥

तमुपदेष्टव्यमितिबुद्धिर्बभूव । "तद्भवान्दृष्टधर्मार्थस्तपःकृतपरिग्रहः । परदारान्महाप्राज्ञनोपरोद्धुंत्वमर्हसि" इतिहितोपदेशस्यवक्ष्यमाणत्वात् । यद्वा एतासांमध्ये सीतानास्तीतिनिश्चिनोति—बभूवेति । इमाराक्षसराजभार्याः यथा यादृग्रूपवत्यइत्यर्थः । यदि किमित्यर्थे । राघवधर्मपत्नी ईदृशी किं ईदृग्रूपवतीकिं । किंतुत्रिलोकसुन्दरीत्यर्थः । अतएवात्र नास्तीतिशेषः । इत्यस्यहरीश्वरस्यसुजातं निश्चितंयथातथाबुद्धिर्बभूव ॥ **ति०** अथ सीताप्येतत्त्स्र्यन्तर्गता नवेति विकल्प्याद्ये रावणस्यभद्रमेवेति बुद्धिर्हनुमतोजातेत्याह—बभूवेति । साधुबुद्धेर्हरीश्वरस्य इतिबुद्धिर्बभूव । इमामहाराक्षसराजभार्याःयथातद्भुक्ताः राघवधर्मपत्न्यपि ईदृशी एतदन्तर्गता एतद्भुक्ताचयदिस्यात् तदाऽस्य रावणस्यसुजातंभद्रमेवभवति । रावणभुक्तेति मयानिवेदितेसति सीतायांमृतायामिव राघवस्योपेक्षणाद्रावणवधयत्नाप्रसक्तेरितिभावः ॥ **शि०** इमाराक्षसराजभार्या यथा स्वपतिस्मरणादिषुनिरताः । ईदृशी तथारामस्मरणादिनिरता यदि राघवधर्मपत्नी । तत्स्मरणादीनांविघ्नोनकृतःस्यादित्यर्थः । तदा अस्य रावणस्यसुजातं कल्याणमेवेत्यर्थः । इतिसाधुबुद्धेर्हरीश्वरस्यबुद्धिः निश्चयोबभूव ॥ ७३ ॥ **ति०** यदीत्यनेन सूचितमस्यपक्षस्यात्यन्तासंभावितत्वमाह—पुनश्चेति । पक्षान्तरंचसोचिन्तयत् विचारेणनिश्चितवानित्यर्थः । चिन्ताप्रकारः हिप्रसिद्धमेतत् । यत्सीतादेवीगुणतःपातिव्रत्यादिगुणैर्विशिष्टा । अथ यतइत्यर्थे । यतोमहात्मामहाबलोलङ्केश्वरः । निरवधिकैश्वर्यवैशिष्ट्यमनेनसूचितं । ईदृशःअस्यांजानक्यांअनार्यकर्म अपहरणरूपंकर्म । आत्तरूपः परिगृहीतमायारूपःसन्कष्टं सक्लेशंयथाभवतितथाकृतवान् । यद्येषाऐश्वर्यादौसरागास्यात्तदाखरसतएवनयनंस्यात्नचतदस्ति । अस्माभिस्तद्विक्रोशनादेवरावणेनक्लेशपूर्वनयनस्यचानुभवादित्याशयः । आर्तरूपइतिपाठे आर्तसंजातपीडंरूपंयस्येत्यर्थ हनुमद्विशेषणं । आन्तरपीडासूचकरूपइत्यर्थः ॥ **स०** समहात्माहनूमान् पुनश्चैवमचिन्तयत् । हियस्मात् गुणतः पातिव्रत्यादिगुणैः सीता विशिष्टाश्रेष्ठा । अथ तस्मात् अस्यांसीतायांतद्विषये । अयं रावणः अनार्यकर्म अपहरणादिजुगुप्सितंकर्म कृतवान् । अतोमृत्वा आर्तरूपस्सन् ध्रुवंकदाप्यनिवर्त्यतयाशाश्वतंकष्टं पञ्चकष्टाख्यंतमः यातीतिशेषः । रावणदेहे जीवद्वयसमावेशात्सञ्जीवस्यपूर्वश्लोकगतिरुक्ता द्वितीयस्यत्वत्रेतिविवेकः ॥ ७४ ॥ इतिनवमस्सर्गः ॥ ९ ॥

[पा०] १ दात्तरूपो.

दशमः सर्गः ॥ १० ॥

हनुमता पुष्पकविमाने नानालङ्कारोपशोभितशयनोत्तमशायिनो नानाभरणादिविभूषितवपुषोरावणस्यावलोकनं ॥ १ ॥ तथातत्पादमूलेवीणावेणुमृदङ्गादिनानावाद्यैस्सहसंसुप्तनानावस्थापन्ननारीनिकरनिरीक्षणं ॥ २ ॥ तथा तासांमध्येऽद्भुतशय‍नशायिमन्दोदरींदृष्टवतातेन तदद्भुतरूपेणतस्यांसीतात्वबुद्ध्या हर्षेण पुच्छचुंबनादिकापेयचेष्टाविष्करणं ॥ ३ ॥

तत्र दिव्योपमं [1]मुख्यं स्फाटिकं रत्नभूषितम् ॥ अवेक्षमाणो हनुमान्ददर्श शयनासनम् ॥ १ ॥
दान्तकाञ्चनचित्राङ्गैर्वैडूर्यैश्च वरासनैः ॥ [2]महार्हास्तरणोपेतैरुपपन्नं महाधनैः ॥ २ ॥
[3]तस्य चैकतमे देशे [4]सोग्र्यमालाविभूषितम् ॥ ददर्श पाण्डुरच्छत्रं ताराधिपतिसन्निभम् ॥ ३ ॥
जातरूपपरिक्षिप्तं चित्रभानुसमप्रभम् ॥ अशोकमालाविततं ददर्श परमासनम् ॥ ४ ॥
वालव्यजनहस्ताभिर्वीज्यमानं समन्ततः ॥ गन्धैश्च विविधैर्जुष्टं वरधूपेन धूपितम् ॥ ५ ॥
परमास्तरणास्तीर्णमाविकाजिनसंवृतम् ॥ दामभिर्वरमाल्यानां समन्तादुपशोभितम् ॥ ६ ॥
तस्मिञ्जीमूतसंकाशं प्रदीप्तोत्तमकुण्डलम् ॥ लोहिताक्षं महाबाहुं महारजतवाससम् ॥ ७ ॥
लोहितेनानुलिप्ताङ्गं चन्दनेन सुगन्धिना ॥ सन्ध्यारक्तमिवाकाशे तोयदं सतडिद्गणम् ॥ ८ ॥
वृतमा[5]भरणैर्दिव्यैः सुरूपं कामरूपिणम् ॥ सवृक्षवनगुल्माढ्यं प्रसुप्तमिव मन्दरम् ॥ ९ ॥
क्रीडित्वोपरतं रात्रौ वराभरणभूषितम् ॥ प्रियं राक्षसकन्यानां राक्षसानां सुखावहम् ॥ १० ॥
पीत्वाऽप्युपरतं चापि ददर्श स महाकपिः ॥ भास्वरे शयने वीरं प्रसुप्तं राक्षसाधिपम् ॥ ११ ॥
निश्श्वसन्तं यथा नागं रावणं वानरर्षभः ॥ आसाद्य परमोद्विग्नः सोपासर्पत्सुभीतवत् ॥ १२ ॥

शयनासनं शयनस्यासनं खट्वामित्यर्थः । दान्तानि दन्तविकारभूतानि । काञ्चनानि काञ्चनमयानि च । अतएव चित्राणि नानावर्णानि अङ्गानि येषां तैः प्रान्ते दन्तमयैः ततः परं काञ्चनमयैः । सर्वत्र वैडूर्यनिर्मितैरित्यर्थः । महाधनैः महामूल्यैः वरासनैः शयनावरोहणकाले विश्रमाय स्थापितैः । उपपन्नं आवृतं ॥ १—२ ॥ एकतमे देशे शिरोभाग इत्यर्थः ॥ ३ ॥ उक्तमेवपर्यङ्कं पुनर्वर्णयन्नाह—जातरूपेत्यादिना ॥ चित्रभानोः सूर्यस्य ॥ ४—५ ॥ आवि काजिनं ऊर्णायुचर्म तेनपर्यङ्कस्योपरि फलका संधीय ते । वरमाल्यानां अशोकातिरिक्तपुष्पाणां ॥ ६ महारजतवाससं हेमचित्रितवाससं । महारजतं हेम महारजनवासससमिति पाठे कुसुम्भरागरञ्जितवस्त्रमि त्यर्थः ॥ ७—८ ॥ सवृक्षवनगुल्माढ्यं सवृक्षैर्वनै गुल्मैश्चाढ्यं प्रसुप्तं निश्चलमित्यर्थः ॥ ९—१२

रामानु० शयनासनं आस्यतेऽस्मिन्नित्यासनं । शयनासनंपर्यङ्काधारधिष्ण्यमितियावत् ॥ **ती०** शयनासनं शयनंचतदास नंच शयनासनंपर्यङ्कं । उभयोपकारादुभयव्यपदेशः । यद्वा आस्यतेअस्मिन्नित्यासनं । शयनस्यासनं शयनासनं । शयनगृहमि त्यर्थः ॥ १ ॥ **ति०** वरासनैः स्त्रीशयनपल्यङ्कैः ॥ २ ॥ **रामानु०** तत्रैवप्रदेशे परमासनंचददर्शेत्याह—जातरूपपरिक्षिप्तमि त्यादिनाश्लोकत्रयेण । परमासनंपर्यङ्कं ॥ **ति०** यद्वायत्सन्निधानेशोकाभावस्तादृशमालायुतं ॥ ४ ॥ **ति०** ननुसंभोगगृहेतत्रा निद्राणस्यकथंवालव्यजनवीजनं कथंचहनुमतस्ताभिरदर्शनमितिचेन्न । यन्त्रनिर्मितस्त्रीप्रतिमादिभिस्तत्रापितत्संभवात् ॥ ५ **ति०** रावणस्यतटित्स्थानीयंसौवर्णवासः ॥ ८ ॥ **ति०** सवृक्षवनगुल्माढ्यं पुष्पसहितवृक्षवनगुल्माढ्यंमन्दरमिवस्थितं । बाहव स्यवृक्षाः । नासादयोगुल्माः ॥ **स०** सुरूपिणंसुन्दरं । कथमस्येत्यतउक्तंकामरूपिणमिति ॥ ९ ॥ **ति०** परमोद्विग्नःअयंपा देवींहृतवानित्येतत्समीपेऽवस्थानमनुचितमितिमत्वाखिन्नचित्तःअपासर्पत् । सुभीतवत्सुभीतोयथाभयहेतोःपिशाचादेःसंमु स्थातुमशक्तोपसर्पतितद्वत् ॥ **स०** परमाःमहाबलाअपिउद्विग्नाःयेनसतथा । अतोभीतवदित्युपपन्नं ॥ **शि०** परमोद्विग्नःभविष्

[**पा०**] १ ग. च. छ. ज. रम्यं. २ क.—घ. च. छ. ज. महासंस्तरणोपेतैः. ३ तस्यचैकतमेदेशे. जातरूपपरिक्षि इतिश्लोकयोःपौर्वापर्यं क. ग. घ. पाठेषुदृश्यते. ४ झ. ञ. दिव्यमालोपशोभितं. ट. दिव्यमाल्योपशोभितं. च. छ. सोम्यमाल्य. ५ ग. राभरणैर्मुख्यैः.

अथारोहणमासाद्य वेदिकान्तरमाश्रितः[1] ॥ सुप्तं[2] राक्षसशार्दूलं[3] प्रेक्षते स महाकपिः ॥ १३ ॥
शुशुभे राक्षसेन्द्रस्य स्वपतः शयनोत्तमम्[4] ॥ गन्धहस्तिनि संविष्टे[5] यथा प्रस्रवणं महत् ॥ १४ ॥
काञ्चनाङ्गदनद्धौ च ददर्श स महात्मनः[6] ॥ विक्षिप्तौ राक्षसेन्द्रस्य भुजाविन्द्रध्वजोपमौ ॥ १५ ॥
ऐरावतविषाणाग्रैरापीडनकृतव्रणौ[7] ॥ वज्रोल्लिखितपीनांसौ विष्णुचक्रपरिक्षतौ ॥ १६ ॥
पीनौ समसुजातांसौ सङ्गतौ[8] बलसंयुतौ ॥ सुलक्षणनखाङ्गुष्ठौ[9] स्वङ्गुलीतललक्षितौ[10] ॥ १७ ॥
संहतौ[11] परिघाकारौ वृत्तौ करिकरोपमौ ॥ विक्षिप्तौ शयने शुभ्रे पञ्चशीर्षाविवोरगौ ॥ १८ ॥
शशक्षतजकल्पेन सुशीतेन सुगन्धिना ॥ चन्दनेन परार्ध्येन स्वनुलिप्तौ स्वलंकृतौ ॥ १९ ॥
उत्तमस्त्रीविमृदितौ[12] गन्धोत्तमनिषेवितौ[13] ॥ यक्षपन्नगगन्धर्वदेवदानवराविणौ ॥ २० ॥
ददर्श स कपिस्तस्य[14] बाहू शयनसंस्थितौ ॥ मन्दरस्यान्तरे सुप्तौ महाही रुषिताविव[15] ॥ २१ ॥
ताभ्यां स परिपूर्णाभ्यां[16] भुजाभ्यां राक्षसेश्वरः ॥ शुशुभेऽचलसंकाशः शृङ्गाभ्यामिव मन्दरः ॥२२॥
चूतपुन्नागसुरभिर्वकुलोत्तमसंयुतः ॥ मृष्टान्नरससंयुक्तः पानगन्धपुरस्सरः ॥ २३ ॥
तस्य राक्षससिंहस्य[17] निश्चक्राम महामुखात् ॥ शयानस्य विनिश्श्वासः पूरयन्निव[18] तद्गृहम् ॥ २४ ॥
मुक्तामणिविचित्रेण काञ्चनेन विराजितम्[19] ॥ मुकुटेनापवृत्तेन कुण्डलोज्ज्वलिताननम् ॥ २५ ॥
रक्तचन्दनदिग्धेन तथा हारेण शोभिना ॥ पीनायतविशालेन वक्षसाभिविराजितम्[20] ॥ २६ ॥

अथ अपसर्पणानन्तरं । आरोहणं सोपानं । आसाद्य अधिरुह्य । वेदिकान्तरं सोपानपर्वमध्यं ॥१३॥ यस्यगन्धेनान्ये हस्तिनोभीता भवन्ति स गन्धहस्ती । प्रस्रवणं निर्झरं ॥१४॥ निक्षिप्तौ प्रसारितौ ॥१५॥ विष्णुचक्रपरिक्षतौ । विष्णुः उपेन्द्रः ॥ १६ ॥ सङ्गतौ देहानुरूपौ ॥१७॥ संहतौ दृढसंधिबन्धौ । विक्षिप्तौ शयने निहितौ । पञ्चाङ्गुलिमत्तया पञ्चशीर्षावित्युक्तं । एतदन्तस्य ददर्शेत्यनेनान्वयः । अत्र द्विभुजत्वैकमुखत्वोक्तिः स्त्रीणां कामनीयत्वाय ॥ १८—१९ ॥ यक्षादीन् रावयितुं शीलमनयोरस्तीति तथा ॥ २० ॥ ददर्शेति पुनरभिधानं विशेषणान्तरविवक्षया ॥ २१ ॥ परिपूर्णाभ्यां दीर्घवृत्ताभ्यामित्यर्थः ॥ २२ ॥ निश्वासस्य चूतादिसुरभित्वं तदधिवासितरसावल्यादिमधुसेवनात् । मृष्टान्नरससंयुक्तः षड्रसपदार्थगन्धयुक्तः । पानगन्धपुरस्सरः पीयत इति पानं मधु तद्गन्धयुक्तः ॥ २३—२४॥ अपवृत्तेन स्थानात्किंचिच्चलितेन ॥२५—२६॥

देतदैश्वर्यध्वंसहेतुकोद्वेगविशिष्टःसन्नपासर्पत् । एतेनहनुमतोदयालुत्वातिशयःसूचितः ॥ १२ ॥ **रामानु०** आरोहणमासाद्यवेदिकान्तरमाश्रितः सोपानमार्गेणान्यवेदिकामारूढइत्यर्थः ॥ १३ ॥ **स०** गन्धहस्तिनिसंविष्टं गन्धहस्तिनामत्तगजेननितरांसंविष्टंअध्यारूढं प्रस्रवणंगिरिमिवस्थितं ॥ १४ ॥ कृतव्रणौ कृतव्रणकिणौ । वज्रचक्रयोरप्यसाध्यमृत्युरितिभावः ॥ **स०** विष्णुचक्रपरिक्षतौ विष्णोरुपेन्द्रस्ययच्चक्रंसैन्यंदेवगणस्तेनपरिक्षतौ विविधायुधजालेनपरिक्षतौ । तेनसुदर्शनस्यामोघत्वमक्षुण्णं । ‘ चक्रंसैन्यरथाङ्गयोः ’ इतिविश्वः । भगवच्चक्रादन्यदिदंवा ॥ १६ ॥ **शि०** रुषितौ क्रुद्धौ ॥ **ति०** ददर्श अत्यादरेणददर्श । नातःपुनरुक्तिः । महाही महासर्पौ ॥ अत्रद्विभुजत्वकथनायुद्धादिकालएवविंशतिभुजत्वंदशशीर्षत्वंचेतिबोध्यं ॥ २१ ॥ **ती०** भुजाभ्यामितिद्विभुजत्वं महामुखादितिवक्ष्यमाणमेकमुखत्वंचरावणस्यकामरूपत्वात्संगच्छते ॥ २२ ॥ **ति०** बकुलोत्तमसंयुतः उत्तमबकुलगन्धयुतः । अयंपुरुषविशेषश्वासधर्मइतिकतकः । पानंमधु । राक्षसत्वादेववामाचारेणपूजाकरणान्मधुपानं ॥ २३ ॥ **ति०** विराजतामुकुटेन । उपलक्षितमितिशेषः । शोभिनाहारेण शोभनहारवता वक्षसा उपलक्षितमितिशेषः ॥ २५—२६ ॥

[पा०] १ च. वेदिकांपरमांश्रितः. २ ङ. झ. ञ. ट. क्षीबं. ३ ख. च. छ. ज. राक्षसराजानं. ४ ङ. झ. ञ. ट. शयनंशुभं. ५ ङ. झ. ञ. ट. हस्तिनिसंविष्टं. ६ च. छ. ज. सुमहात्मनः. क. घ. समहाकपिः. ७ क. ग. घ. रापीडित. च. छ. ज. रुत्पीडन. ८ क. ग. घ. संहतौ. ९ ग. सलक्षण. १० क. ङ.—ट. स्वङ्गुलीयकलक्षितौ. ११ ङ. झ. ट. संवृतौ. १२ घ. संहतौपरिघाकारौ उत्तमस्त्रीविमर्दितौ । समौचविपुलौशुद्धौ गन्धोत्तमनिषेवितौ. १३ ग. विभूषितौ. १४ ग. च. छ. ज. स्तत्र. १५ ट. रुषिताविव. १६ ङ. झ. ट. पूर्णाभ्यामुभाभ्यां. १७ ङ—ट. राक्षसराजस्य. १८ क. पूरयामास. १९ क. ख. घ. ङ. झ. ञ. ट. विराजता. २० ङ. झ. ञ. ट. विराजता.

पाण्डरेणापविद्धेन क्षौमेण क्षतजेक्षणम् ॥ महार्हेण सुसंवीतं पीतेनोत्तमवाससा ॥ २७ ॥
माषराशिप्रतीकाशं निश्श्वसन्तं भुजङ्गवत् ॥ गाङ्गे महति तोयान्ते प्रसुप्तमिव कुञ्जरम् ॥ २८ ॥
चतुर्भिः काञ्चनैर्दीपै[1]र्दीप्यमानचतुर्दिशम् ॥ प्रकाशीकृतसर्वाङ्गं मेघं [2]विद्युद्गणैरिव ॥ २९ ॥
पादमूलगताश्चापि ददर्श सुमहात्मनः ॥ पत्नीः स प्रियभार्यस्य तस्य रक्षःपतेर्गृहे ॥ ३० ॥
शशिप्रकाशवदनाश्चारुकुण्डलभूषिताः ॥ अम्लानमाल्याभरणा ददर्श हरियूथपः ॥ ३१ ॥
नृत्तवादित्रकुशला राक्षसेन्द्रभुजाङ्कगाः ॥ वराभरणधारिण्यो निषण्णा ददृशे हरिः ॥ ३२ ॥
वज्रवैडूर्यगर्भाणि श्रवणान्तेषु योषिताम् ॥ ददर्श तापनीयानि कुण्डलान्यङ्गदानि च ॥ ३३ ॥
तासां चन्द्रोपमैर्वक्त्रैः शुभैर्ललितकुण्डलैः ॥ [3]विरराज विमानं तन्नभस्तारागणैरिव ॥ ३४ ॥
मदव्यायामखिन्नास्ता राक्षसेन्द्रस्य योषितः ॥ तेषु तेष्ववकाशेषु [4]प्रसुप्तास्तनुमध्यमाः ॥ ३५ ॥
अङ्गहारै[5]स्तथैवान्या कोमलैर्नृत्तशालिनी ॥ विन्यस्तशुभसर्वाङ्गी प्रसुप्ता वरवर्णिनी ॥ ३६ ॥
काचिद्वीणां परिष्वज्य प्रसुप्ता संप्रकाशते ॥ महानदीप्रकीर्णेव नलिनी पोतमाश्रिता ॥ ३७ ॥
अन्या कक्षगतेनैव मड्डुकेनासितेक्षणा ॥ प्रसुप्ता भामिनी भाति बालपुत्रेव वत्सला ॥ ३८ ॥
पटहं चारुसर्वाङ्गी पीड्य शेते शुभस्तनी ॥ चिरस्य रमणं लब्ध्वा परिष्वज्येव [6]भामिनी ॥ ३९ ॥
[7]काचिद्वंशं परिष्वज्य सुप्ता कमललोचना ॥ [8]रहः प्रियतमं [9]गृह्य [10]सकामेव च कामिनी ॥ ४० ॥
विपञ्चीं परिगृह्यान्या नियता नृत्तशालिनी ॥ निद्रावशमनुप्राप्ता सहकान्तेव [11]भामिनी ॥ ४१ ॥
अन्या [12]कनकसंकाशैर्मृदुपीनैर्मनोरमैः ॥ मृदङ्गं परिपीड्याङ्गैः प्रसुप्ता मत्तलोचना ॥ ४२ ॥
भुजपार्श्वान्तरस्थेन कक्षगेन [13]कृशोदरी ॥ पणवेन [14]सहानिन्द्या सुप्ता मदकृतश्रमा ॥ ४३ ॥
डिण्डिमं परिगृह्यान्या तथैवासक्तडिण्डिमा ॥ प्रसुप्ता तरुणं वत्स[15]मुपगूह्येव भामिनी ॥ ४४ ॥

अपविद्धेन पर्यस्तेन । क्षौमेण उत्तरीयरूपेण ॥ २७—२८ ॥ विद्युद्गणैरिव विद्युत्समूहैरिव । रावणं तस्य पत्नीश्च ददर्शेत्यन्वयः ॥ २९ ॥ रक्षःपतेर्गृह इति परशेषः ॥ ३०—३१ ॥ राक्षसेन्द्रस्य भुजं अङ्कं गच्छन्तीति राक्षसेन्द्रभुजाङ्कगाः । उत्सङ्गोपवेशनालिङ्गनाभ्यां लालिता इत्यर्थः । वराभरणधारिण्यइति द्वितीयार्थे प्रथमा । निषण्णाः शयानाः । ददृश इत्यात्मनेपदमार्षं ॥३२॥ श्रवणान्तेष्वङ्गददर्शनं बाहूनुपधाय शयनात् ॥ ३३—३५ ॥ अङ्गहारः नृत्तविशेषादङ्गविक्षेपविशेषः । तथोक्तं भरतशास्त्रे "अङ्गानां योग्यदेशेषु हरणेन यथोचितम् । अङ्गनिर्वर्तनीयत्वादङ्गहारस्तथोच्यते" इत्यादि । कोमलैः सुकुमारैः । नृत्तशालिनी सुषुप्त्यवस्थायामपि वासनाबलेन नृत्तसन्निवेशविशिष्टा स्थितेत्युच्यते ॥ ३६ ॥ महानदीप्रकीर्णा महानदीप्रसृता । नलिनी समूलनालदलपद्मजालकं । पोतं यानपात्रं । वीणां परिष्वज्य प्रसुप्ता काचित् नद्यां प्लवमाना यदृच्छया पोतसंयुक्ता नलिनीव प्रकाशत इत्यर्थः ॥ ३७ ॥ मड्डुकेन वाद्यविशेषेण ॥ ३८—३९ ॥ वंशं वेणुं ॥ ४० ॥ विपञ्ची सप्ततन्त्री । षट्तन्त्री वीणा ॥ ४१—४२ ॥ पणवेन मर्दलेन ॥ ४३ ॥ यथा पूर्वा तथैवासक्तडिण्डिमान्या तं डिण्डिमं परिगृह्य परिष्वज्य । प्रसुप्ता कथमिव । तरुणं वत्समुपगूह्येव । डिण्डिमः पणवभेदः । यद्वा अन्या भामिनी डिण्डिमं परिगृह्यावलम्ब्य

ति० विमानं मञ्चकविशेषः । पुष्पकमित्यन्ये । विराजत व्यराजत ॥ ३४ ॥ **ति०** मदव्यायामेन रतिजेन ॥ ३५ ॥ **ती०** विन्यस्तशुभसर्वाङ्गी विशेषेणन्यस्तंशुभंयेषुधात्रा तादृशानिसर्वाण्यङ्गानियस्यास्सा ॥ **शि०** विन्यस्तानि विधिनानिर्मितानि सं

[पा०] १ ङ. झ. ञ. ट. दीप्यमानं. २ ग. घ. च. छ. ज. विद्युल्लतैरिव. ३ ङ. झ. ञ. ट. विराजत. ४ घ. निषण्णाः. ५ ग. घ. स्तथाचान्याः. ६ क. ग.—ट. कामिनी. ७ ख. ङ. झ. ञ. ट. काचिद्वीणां. ८ ङ. झ. ञ. ट. वरंप्रियतमं. ९ क. लब्ध्वा. १० ग. ङ. ञ. ट. सकामेवहि. ११ क. घ. कामिनी. १२ घ. कनकवर्णाङ्गीमृदु. क. कनकवर्णाभैर्मृदु. १३ घ. शुभोदरी. १४ ग. च. छ. ज. सहैवान्या. १५ क. ख. मुपगृह्यैव.

काचिदाडम्बरं नारी भुजसंभोगपीडितम् ॥ कृत्वा कमलपत्राक्षी प्रसुप्ता मदमोहिता ॥ ४५ ॥
कलशीमपविध्यान्या प्रसुप्ता भाति भामिनी ॥ वसन्ते पुष्पशबला मालेव परिमार्जिता ॥ ४६ ॥
पाणिभ्यां च कुचौ काचित्सुवर्णकलशोपमौ ॥ उपगूह्याबला सुप्ता निद्राबलपराजिता ॥ ४७ ॥
अन्या कमलपत्राक्षी पूर्णेन्दुसदृशानना ॥ अन्यामालिङ्ग्य सुश्रोणीं प्रसुप्ता मदविह्वला ॥ ४८ ॥
आतोद्यानि विचित्राणि परिष्वज्य वरस्त्रियः ॥ निपीड्य च कुचैः सुप्ताः कामिन्यः कामुकानिव ॥४९॥
तासामेकान्तविन्यस्ते शयानां शयने शुभे ॥ ददर्श रूपसंपन्नामपरां स कपिः स्त्रियम् ॥ ५० ॥
मुक्तामणिसमायुक्तैर्भूषणैः सुविभूषिताम् ॥ विभूषयन्तीमिव तत्स्वश्रिया भवनोत्तमम् ॥ ५१ ॥
गौरीं कनकवर्णाङ्गीमिष्टामन्तःपुरेश्वरीम् ॥ कपिर्मन्दोदरीं तत्र शयानां चारुरूपिणीम् ॥ ५२ ॥
स तां दृष्ट्वा महाबाहुर्भूषितां मारुतात्मजः ॥ तर्कयामास सीतेति रूपयौवनसंपदा ॥ ५३ ॥
हर्षेण महता युक्तो ननन्द हरियूथपः ॥ [दृष्ट्वा सीतेति हृष्टोऽभूद्दीनश्चारित्रदर्शनात्] ॥ ५४ ॥

आस्फोटयामास चुचुम्ब पुच्छं ननन्द चिक्रीड जगौ जगाम ॥
स्तम्भानरोहन्निपपात भूमौ निंदर्शयन्स्वां प्रकृतिं कपीनाम् ॥ ५५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे दशमः सर्गः ॥ १० ॥

एकादशः सर्गः ॥ ११ ॥

युक्तिपर्यालोचनयामन्दोदर्यांसीतात्वबुद्धिविधूननपूर्वकं पानभूमिंगतवताहनुमता परितोरावणं प्रसुप्तानां नानावस्थायुक्तनानास्त्रीणामवलोकनेनसह नानाविधपानपात्राद्यवलोकनं ॥ १ ॥ तथा परदारदर्शनेन स्वस्य दुरिताशङ्कनपूर्वकंपुनः स्वस्य वशीकृतमनस्कत्वादिहेतुभिस्तत्पराकरणं ॥ २ ॥ तथापानभूमौ सीतायाअदर्शने ततोन्यत्र तदन्वेषणोपक्रमः ॥ ३ ॥

अवधूय च तां बुद्धिं बभूवावस्थितस्तदा ॥ जगाम चापरां चिन्तां सीतां प्रति महाकपिः ॥ १ ॥

तथैव आसक्तडिण्डिमा आलिङ्गितान्यडिण्डिमा तरुणं रमणमुपगूह्य वत्सं पुत्रं परिगृह्यैव प्रसुप्ता । यद्वा डिण्डिमं परिगृह्य वादनार्थं परिगृह्य। तथैव वादनकाल एव आसक्तडिण्डिमा अन्या तरुणं वत्समुपगूह्येव प्रसुप्ता ॥ ४४ ॥ आडम्बरं तूर्यभेदं । भुजसंभोगपीडितं भुजपरिणाहपीडितं भुजपरिश्लेषपीडितं वा ॥४५॥ अपविध्य पर्यस्य । अनेन सलिलसंबन्धः सूच्यते । परिमार्जिता सलिललवसंमार्जिता । अपविद्धकलशनिर्गलितगन्धोदकसिक्ता काचित् । वसन्ते म्लानिपरिहाराय सलिललवसमुक्षिता मालेव बभाविलर्थः । पुष्पशबलेत्यनेन कलशस्थजलस्य कुङ्कुमादिरससिक्तत्वमुच्यते । सर्वाभरणभूषितत्वं वा । इयं च रावणस्य करकधारिणीति गम्यते ॥ ४६—४८ ॥ आतोद्यानि । "ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् । वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् । चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकं" इत्यमरः ॥ ४९—५१ ॥ किमिव गौरीमित्यत्राह—कनकवर्णाङ्गीमिति । इष्टां रावणस्येति शेषः ॥ ५२—५३ ॥ हर्षेणेत्यर्धं ॥ हर्षेण युक्तः ननन्द उत्तरोत्तरमानन्दमवापेत्यर्थः ॥ ५४ ॥ तदेवोपपादयति—आस्फोटयामासेति ॥ चिक्रीड ननर्तेति यावत् । स्वां प्रकृतिं स्वासाधारणं चापल्यं ॥ ५५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने दशमः सर्गः ॥ १० ॥

तां बुद्धिं मन्दोदर्यां सीताबुद्धिं । अवस्थितो बभूव

स्थापितानिवाशुभाङ्गानियस्यास्सा ॥ ३६ ॥ ती० जगौ हर्षान्मन्दगानंकृतवानित्यर्थः ॥ ५५ ॥ इतिदशमः सर्गः ॥ १० ॥

[पा०] १ ङ. झ. ञ. ट. मथतां. २ क. ख. ग. ङ.—ट. चस्वश्रिया. ३ ख. ग. ङ.—झ. ट. कनकवर्णाभां. ४ ग. घ. तांदृष्ट्वास. ५ ग. हर्षेणचसमायुक्तो. ६ क. ननाद. ७ इदमर्धं ङ.—ज. ञ. ट. पाठेषुदृश्यते. ८ क. च. छ. ज. निदर्शयानः.

न रामेण वियुक्ता सा स्वप्तुमर्हति भामिनी ॥ न भोक्तुं नाप्यलंकर्तुं न पानमुपसेवितुम् ॥
नान्यं [1]नरमुपस्थातुं [2]सुराणामपि चेश्वरम् ॥ २ ॥
न हि रामसमः कश्चिद्विद्यते त्रिदशेष्वपि ॥ अन्येयमिति निश्चित्य [3]पानभूमौ चचार सः ॥ ३ ॥
क्रीडितेनापराः क्लान्ता गीतेन च तथा पराः ॥ नृत्तेन चापराः क्लान्ताः पानविप्रहतास्तथा ॥ ४ ॥
[4]मुरवेषु मृदङ्गेषु [5]पीठिकासु च संस्थिताः ॥ [6]तथास्तरणमुख्येषु संविष्टाश्चापराः स्त्रियः ॥ ५ ॥
अङ्गनानां सहस्रेण भूषितेन विभूषणैः ॥ रूपसँल्लापशीलेन युक्तगीतार्थभाषिणा ॥ ६ ॥
[7]देशकालाभियुक्तेन युक्तवाक्याभिधायिना ॥ [8]रताभिरतसंसुप्तं ददर्श हरियूथपः ॥ ७ ॥
तासां मध्ये महाबाहुः शुशुभे राक्षसेश्वरः ॥ गोष्ठे महति मुख्यानां गवां मध्ये यथा वृषः ॥ ८ ॥
स राक्षसेन्द्रः शुशुभे ताभिः परिवृतः स्वयम् ॥ करेणुभिर्यथाऽरण्ये परिकीर्णो महाद्विपः ॥ ९ ॥
सर्वकामैरुपेतां च पानभूमिं महात्मनः ॥ ददर्श हरिशार्दूलस्तस्य रक्षःपतेर्गृहे ॥ १० ॥
मृगाणां महिषाणां च वराहाणां च भागशः ॥ [9]तत्र न्यस्तानि मांसानि पानभूमौ ददर्श सः ॥ ११ ॥
रौक्मेषु च विशालेषु [10]भाजनेष्वर्धभक्षितान् ॥ ददर्श हरिशार्दूलो मयूरान्कुक्कुटांस्तथा ॥ १२ ॥
[11]वराहवार्ध्राणसकान्दधिसौवर्चलायुतान् ॥ [12]शल्यान्मृगमयूरांश्च हनुमानन्ववैक्षत ॥ १३ ॥

स्वस्थचित्तो बभूव ॥ १—२ ॥ त्रिदशेष्वपीत्यनन्तरं अन्येयमित्यर्धं ॥ पानभूमौ ततोन्यत्रेत्यर्थः ॥ ३ ॥ क्रीडितेनेत्याद्यपराः स्त्रिय इत्यन्तमेकं वाक्यं । ददर्शेत्यनुषज्यते । क्रीडितेन क्रीडया । भावे निष्ठा । विप्रहताः क्लान्ता इत्यर्थः॥४॥ संस्थिताः उपधानीकृत्य शयिताः । संविष्टाः सुप्ताः ॥५॥ तत्र सीताया अदर्शनात्पुनरपि रावणस्थानमागत्य ददर्शेत्याह—अङ्गनानामिति ॥ रूपसँल्लापशीलेन स्वसौन्दर्यवर्णनशीलेन । रावणविषयरूपप्रशंसाशीलेन वा। युक्तगीतार्थभाषिणा युक्तं उपपन्नं गीतार्थं भाषितुं शीलमस्येति युक्तगीतार्थभाषी तेन । देशकालाभियुक्तेन देशकालाभिज्ञेनेत्यर्थः। अङ्गनानां सहस्रेण रताभिरतसंसुप्तमित्यन्वयः । रतशब्देन बाह्यसुरतमुच्यते । अभिरतशब्देन करणबन्धादिकमुच्यते । रताभिरतश्चासौ संसुप्तश्च तथा । स्नातानुलिप्तादिवत्समासः । क्रीडाखेदेन सुप्तमित्यर्थः । रावणमिति शेषः ॥ ६—८ ॥ परिकीर्णपरिवृतः ॥ ९ ॥ पानभूमेः पुनर्दर्शनोक्तिस्तत्रत्यपदार्थकथनाय ॥ १० ॥ भागशः पिण्डशः ॥ ११ ॥ मयूरादिशब्दाः मयूरादिविकारमांसपराः ॥ १२ ॥ वार्ध्राणसाः छागविशेषाः । "त्रिपिबंत्विन्द्रियक्षीण

रामानु० अत्रपुनरपिपानभूमौ स्त्रीणांरावणस्यचदर्शनाभिधानात्क्षणमन्यत्रान्विष्य विशेषेणमार्गितुं पुनःपानभूम्यादिक दृष्टवानित्यवगम्यते ॥ ४ ॥ **ती०** युक्तगीतार्थभाषिणा युक्तं उपपन्नंयथातथा गीतस्य भरतशास्त्रस्यार्थभाषितुंशीलमस्येतितथ तेन । भरतशास्त्रार्थव्याख्यानचतुरेणेत्यर्थः ॥ ६ ॥ **रामानु०** मयूरान्कुक्कुटानितिस्वरूपेणनिर्देशात्तत्तदाकारविशिष्टतयातेपक्व इत्यवगम्यते ॥ १२ ॥ **ती०** वार्ध्राणसःपक्षिविशेषः । ' कृष्णग्रीवोरक्तशिराःश्वेतपक्षोविहङ्गमः । सवैवार्ध्राणसःपक्षी ' इति

[पा०] १ क. रामादुपस्थातुं. २ क. ग. नराणामपि. ३ ञ. पानभूमिंददर्शसः. ङ.—झ. ट. भूयस्तत्रचचारसः पानभूमौहरिश्रेष्ठःसीतासंदर्शनोत्सुकः इत्यर्धमधिकंचदृश्यते. ४ ग. ङ. ज.—ट. मुरजेषु. ५ झ. चेलिकासु. ६ ख. च. छ. ज तदास्तरण. ग. कुथास्तरण. ७ देशकालाभियुक्तेनेत्यर्धानन्तरं क. ग. ङ.—ट. पाठेषु रताधिकेनसंयुक्तां ददर्शहरियूथपः अन्यत्रापिवरस्त्रीणांरूपसँल्लापशायिनाम् । सहस्रंयुवतीनांतुप्रसुप्तंसददर्शह । देशकालाभियुक्तंतु युक्तवाक्याभिधायितत् इतिचत्वार्यर्धानिअधिकानिदृश्यन्ते. एषांतिलकव्याख्यानंचदृश्यते. तथाहि । देशकालाभियुक्तेन तद्विषयपरिज्ञानकुशलेन युक्तवाक्यस्यदेशकालोचितवाक्यस्याभिधानशीलेन । एतत्सर्वं निद्रोद्भ्रमवशादेवबोध्यं । रताधिकेन उत्तमक्रीडावता संयुक्तांपानभूमिं ददर्श । अन्यत्रापीत्यादिश्लोकद्वयंनव्याःप्रमादान्नपठन्ति । अन्यत्रापि पानभूमिभिन्नेरावणशयनगृहे । बहिस्स्थांपानभूमिं दृष्ट्वा पुनरभ्यन्तरे शयनस्थानआगत्यान्वेषणं । रूपविषयोयःसँल्लापो वर्णनं तत्पूर्वं शयानानां युवतीनांवरस्त्रीणां सहस्रमुच्यमानगुणंददर्श । तत् पूर्वदृष्टं. ८ क. ङ. झ. ट. रताविरतसंयुक्तं. ९ ञ. तथा. १० झ. ट. भोजनेष्वप्यभक्षितान्. ङ. भोजनेष्वथभक्षितान्. ११ ङ. झ. ञ. ट. वराहवार्ध्राणसकान्. ज. वराहयूथान्दयितान्. क. ग. वराहगृध्रान्सुकृतान्. १२ च. छ. ञ शल्यकान्मृगमायूरान्.

कारान्विविधान्सिद्धांश्चकोरानर्धभक्षितान् ॥ महिषानेकशल्यांश्च च्छागांश्च कृतनिष्ठितान् ॥
ह्यानुच्चावचान्पेयान्भोज्यानि विविधानि च ॥ १४ ॥
थाम्ललवणोत्तंसैर्विविधै रागषाडबैः ॥ हारनूपुरकेयूरैरपविद्धैर्महाधनैः ॥ १५ ॥
ानभाजनविक्षिप्तैः फलैश्च विविधैरपि ॥ कृतपुष्पोपहारा भूरधिकं पुष्यति श्रियम् ॥ १६ ॥
त्रतत्र च विन्यस्तैः सुश्लिष्टैः शयनासनैः ॥ पानभूमिर्विना वह्निं प्रदीप्तेवोपलक्ष्यते ॥ १७ ॥
हुप्रकारैर्विविधैर्वरसंस्कारसंस्कृतैः ॥ मांसैः कुशलसंयुक्तैः पानभूमिगतैः पृथक् ॥ १८ ॥
दिव्याः प्रसन्ना विविधाः सुराः कृतसुरा अपि ॥ शर्करासवमाध्वीकपुष्पासवफलासवाः ॥ १९ ॥
ासचूर्णैश्च विविधैर्दृष्टास्तैस्तैः पृथक्पृथक् ॥ सन्तता शुशुभे भूमिर्माल्यैश्च बहुसंस्थितैः ॥ २० ॥
हिरण्मयैश्च विविधैर्भाजनैः स्फाटिकैरपि ॥ जाम्बूनदमयैश्चान्यैः करकैरभिसंवृता ॥ २१ ॥

ूपस्याग्रचरं तथा । रक्तवर्णं च राजेन्द्र च्छागं ार्ध्राणसं विदुः " इति स्मृतेः ॥ पक्षिविशेषइत्यन्ये । खड्गमृगइत्यपरे । " वार्ध्राणसः खड्गमृगः " इतिहलायुधः । दधिसौवर्चलायुतान् दधिसौवर्चलाभ्यांसंस्कृतानित्यर्थः । सौवर्चलं रुचकाख्योलवणविशेषः । " सौवर्चलेक्षरुचके " इत्यमरः । शल्यान् श्वाविधः । " श्वावित्तुशल्यः " इत्यमरः । मृगमयूरादीनां पुनःकथनं प्रदेशभेदात् ॥ १३ ॥ क्रकरान् पक्षिविशेषान् । " कृकणक्रकरौ समौ " इत्यमरः । सिद्धान् पकान् । एकशल्यान् मत्स्यविशेषान् । कृतनिष्ठितान् पर्याप्तपकान् । "युगपर्याप्तयोः कृतं" इत्यमरः॥१४॥ आम्ललवणोत्तंसैः आम्लप्रधानैः लवणप्रधानैश्च । रागषाडबैः रागयुक्तैः षाडबैः । रागः श्वेतसर्षपः । "रागस्सिद्धार्थकोज्ञेयः " इतिसूदशास्त्रं । षाडवाः षड्रससंयोगकृताभक्ष्यविशेषाः । प्रदीपे त्वन्यथोक्तं " सितामध्वादिमधुरो द्राक्षादाडिमजो रसः । विरलश्चेत्कृतो रागस्सान्द्रश्चेत्षाडवः स्मृतः " इति ॥ १५—१७ ॥ कुशलसंयुक्तैः समर्थसूदसंयोजितैः ।एवंभूतैः मांसैः सह दृष्टा इति वक्ष्यमाणेनान्वयः ॥ १८ ॥ दिव्याः अमृतमथनोद्भूतवारुणीजातीयाः । प्रसन्नाः निष्कल्मषाः । कृतसुराः कृत्रिमसुराः । कृत्रिमसुरा एवाह—शर्करेति । शर्करासवाः शर्करया कृताः । माध्वीकाः मधुना कृताः । पुष्पासवाः पुष्पमकरन्दकृताः । फलासवाः फलरसकृताः । तथोक्तमर्णवे —" पानकं द्राक्षमाधूकं खार्जूरं तालमैक्षवम् । मधूत्थं शीधुमाध्वीकं मैरेयं नारिकेलजं " इति ॥ १९ ॥ वासचूर्णैः अधिवासचूर्णैः सह दृष्टाः हनुमतेतिशेषः । बहुप्रकारैर्मांसैः सह सुराः वासचूर्णैः सह हनुमता तत्र पानभूमौ दृष्टा इति संबन्धः । तैस्तैरित्याद्युत्तरशेषः । तैस्तैर्मांसविशेषैस्सुराविशेषैर्वासचूर्णैश्च पृथक्पृथक् संततेति संबन्धः । बहुसंस्थितैः बहुसंस्थानैः ॥ २० ॥ हिरण्मयैरिति अत्रापि संततेति पूर्वेणान्वयः । हिरण्मयैः रजतमयैः । " कृताकृतं हेमरूप्यं हिरण्यमभिधीयते " इति वचनात् । तैस्तैः पृथक्पृथक् संतता बहुसंस्थितैर्माल्यैर्हिरण्मयैः स्फाटिकैरपि

िष्णुधर्मोक्तेः । छागविशेषोवा ' त्रिपिबंत्विन्द्रियक्षीणंश्वेतंवृद्धमजापतिं । वार्ध्राणसंचतंप्राहुर्याज्ञिकाःश्राद्धकर्मणि ' इतिस्मरणात् ॥ त्रिपिबं पानकालेमुखपर्यन्तंकर्णयोर्लंबमानत्वात् त्रिभिः मुखेनकर्णाभ्यांचपिबतीतित्रिपिबं । खड्गमृगोवा । ' वार्ध्राणसःखड्गमृग' इतिहलायुधः ॥ १३ ॥ **ती०** कृसरानितिपाठेतिलादिमिश्रितौदनान् ॥ १४ ॥ **स०** संयुक्तैःसम्यग्रचितैः । दातृमयाक्षेमसंयुक्तैरितिवा । ' पर्याप्तिक्षेमपुण्येषुकुशलंशिक्षितेत्रिषु ' इत्यमरः ॥ दिव्याःमनोहराः । प्रसन्नाःदर्शनमात्रेपिपासाजनिकाः । सुराः स्वतएवसमुद्राद्युत्पन्नाः । कृतसुराःमादकरसैर्नूतनतयाकृताः ॥ **ती०** मार्द्वीकाइतिपाठे द्राक्षाफलविकारा । ' मृ-

[पा०] १ ङ. झ. ट. कृकलान्विविधाञ्छागान्शशकानर्ध. च. छ. ज. क्रकरान्विविधाञ्छागान्. २ छ. ज. ञ. रयांश्चानेक. ३ ङ. झ. ट. छेदाश्च. ४ ङ. झ. ञ. ट. भोज्यान्युच्चावचानिच. ५ च. छ. ज. विमलैर्विविधैरपि. ६ ङ. ज.—ट. अधिकां. ७ क. ख. ततस्तत्र. ८ ग. संश्लिष्टैः. झ. ञ. सुश्लिष्टशयनासनैः. ९ च. छ. ज. कृतसुरास्तथा. १० क. घ.—ट. माध्वीकाः. ११ क. वासचूर्णाश्चविविधाः. १२ ङ. झ. ञ. ट. कलशैर्भाजनैः. च. छ. ज. सुकृतैःकरकैः. क—घ. करकैर्भाजनैः.

राजतेषु च कुम्भेषु जाम्बूनदमयेषु च ॥ [१]पानश्रेष्ठं तदा भूरि कपिस्तत्र ददर्श सः ॥ २२ ॥
सोपश्यच्छातकुम्भानि शीधोर्मणिमयानि च ॥ [२]राजतानि च पूर्णानि भाजनानि महाकपिः ॥२३
[३]क्वचिदर्धावशेषाणि क्वचित्पी[४]तानि सर्वशः ॥ क्वचिन्नैव प्रपीतानि पानानि स ददर्श ह ॥ २४ ॥
क्वचिद्भक्ष्यांश्च विविधान्क्वचित्पा[५]नानि भागशः ॥ क्वचिद[६]न्नावशेषाणि पश्यन्वै विचचार ह ॥ २५
क्वचित्प्रभिन्नैः करकैः क्वचिदालोलितैर्घटैः ॥ क्वचित्संपृक्तमाल्यानि जलानि च फलानि च ॥२६
शयनान्यत्र नारीणां शुभ्रा[७]णि बहुधा पुनः ॥ परस्परं समाश्लिष्य का[८]श्चित्सुप्ता वराङ्गनाः ॥ २७
[९]काचिच्च वस्त्रमन्यस्याः [१०]स्वपन्त्याः परिधाय च ॥ [११]आहृत्य चाबलाः सुप्ता निद्राबलपराजिताः ॥ २८
तासामुच्छ्वासवातेन वस्त्रं माल्यं च गात्रजम् ॥ नात्यर्थं स्पन्दते चित्रं प्राप्य मन्दमिवानिलम् ॥२९
चन्दनस्य च शीतस्य शीधोर्मधुरसस्य च ॥ विविधस्य च माल्यस्य [१२]धूपस्य विविधस्य च ॥
बहुधा [१३]मारुतस्तत्र गन्धं विविधमुद्वहन् ॥ ३० ॥
[१४]रसानां चन्दनानां च धूपानां चैव मूर्छितः ॥ प्रववौ सुरभिर्गन्धो विमाने पुष्पके तदा ॥ ३१ ॥
श्यामा वदाता[१५]स्तत्रान्याः काश्चित्कृष्णा वराङ्गनाः॥ काश्चित्काञ्चनवर्णाङ्ग्यः प्रमदा राक्षसालये ॥३२
तासां निद्रावशत्वाच्च मदनेन विमूर्च्छितम् ॥ पद्मिनीनां प्रसुप्तानां रूप[१६]मासीद्यथैव हि ॥ ३३ ॥
एवं सर्वमशेषेण रावणान्तःपुरं कपिः ॥ ददर्श [१७]समहातेजा न ददर्श च जानकीम् ॥ ३४ ॥
निरीक्षमाणश्च तदा ताः स्त्रियः स महाकपिः ॥ जगाम महतीं चि[१८]न्तां धर्मसाध्वसशङ्कितः ॥३५

भाजनैस्संतता जाम्बूनदमयैरन्यैः करकैश्चाभिसंवृता भूमिः शुशुभ इति संबन्धः ॥ २१—२२ ॥ शीधोः मद्यस्य ॥ २३ ॥ पानानि पानपात्राणि ॥ २४ ॥ क्वचिद्भक्ष्यानित्यादिनिद्राबलपराजिता इत्यन्तमेकं वाक्यं ॥ क्वचित्प्रभिन्नैरित्यादिषु सहयोगे तृतीया हेतौतृतीया वा । प्रभिन्नत्वादालोलितत्वाच्च संपृक्तमाल्यानि माल्यमिश्राणीत्यर्थः । परस्परमित्यादि पश्यन्वै विचचारेति पूर्वेणान्वयः ॥ २५—२८ ॥ गात्रजं गात्रस्थं । मन्दमनिलं प्राप्येव अत्यर्थं न स्पन्द इत्यन्वयः ॥ २९ ॥ चन्दनस्येत्यादि उद्वहन् प्रववावि त्यपकृष्यते ॥ ३० ॥ रसादीनां सुरभिर्गन्धः विमा मूर्च्छितः व्याप्तः सन् प्रववौ चचार ॥ ३१ ॥ वदात अवदाताः । भागुरिमतेनाल्लोपः । शुभ्रा इत्यर्थ ॥ ३२ ॥ चकारोप्यर्थकः । निद्रापरवशानामपि तास रूपं प्रसुप्तानां पद्मिनीनां रूपमिव रम्यमासीदित्यर्थ ॥ ३३—३४ ॥ धर्मसाध्वसशङ्कितः धर्मलोपभय

द्वीकागोस्तनीद्राक्षा ' इत्यमरः ॥ **शि०** दिव्याःवृक्षकोटरादिद्वारावरुणादिप्रेषिताःसुराः ॥ १९ ॥ **ति०** शून्यानि पतिशून्यानि अतएवपरस्परंसमाश्लिष्येति ॥ २७ ॥ **ति०** अपहृत्य बलाद्गृहीला । उपगुह्य प्रावृत्य । उपगम्य तच्छयनस्थानंप्राप्य । तां पश्यन्विचचारेतिसंबन्धः ॥ २८ ॥ **रामानु०** चन्दनस्य अनुलेपनचन्दनस्य । धूपस्य गृहाधिवासार्थधूपस्य । स्नानानांचन्दनान स्नानार्हचन्दनानां । धूपानां केशाधिवासधूपानां । मारुतःएतेषांविविधंगन्धमुद्वहन्प्रववौ । अतएवसुरभिः घ्राणतर्पणः गन्धः विमानेपुष्पके । मूर्च्छितःव्याप्तइतिसंबन्धः ॥३१॥ **ति०** ततोनिरीक्षणानन्तरं । ' नेक्षेतनग्नांपरस्त्रियं ' इतिशास्त्रस्मरणादि शेषः । तदेवाह—धर्मेति । धर्मलोपनिमित्तंयत्साध्वसंभयंतेनशङ्कितःभीतइत्यर्थः ॥ ३५ ॥

[पा०] १ क. ङ. झ. ञ. ट. पानश्रेष्ठांतथाभूमिं. २ ञ. तानितानिच. ३ ख. क्वचिदल्पावशेषाणि. ४ ङ. झ. ञ. ट त्पीतान्यशेषतः. ५ ङ. झ. ट. त्पानंविभागतः. ञ. त्पानंविभागशः. च. छ. ज. त्पानानिसर्वशः. ६ ख. ङ.—ट. क्वचिदर्धा वशेषाणि. ७ क.—ट. शून्यानि. ८ क. सुप्ताःपुनःपुनः. ९ ङ. च. छ. झ. ञ. ट. काचिच्चवस्त्रमन्यस्याअपहृत्योपगुह्यच उपगम्याबलासुप्तानिद्राबलपराजिता. १० ग. घ. अपहृत्योपगूह्यतां. ११ ग. ज. उपगम्याबलाः. १२ क. ग. ङ. झ. ञ. ट पुष्पस्य. १३ क. ङ.—ट. मारुतस्तस्य. १४ ट. रसानांचधनानांच. क. ख. ग. ङ.—ञ. स्नानानांचन्दनानांच. ग. पानान चन्दनानांच. १५ क. स्तास्तत्र. १६ क. मासीत्तदद्भुतं. १७ ख. ङ. झ. ञ. ट. समहातेजाः. ग. चमहातेजाः. च. ज सुमहावीरः. १८ क. ख. ङ. झ. ञ. ट. शङ्कां.

रदारावरोधस्य प्रसुप्तस्य निरीक्षणम् ॥ इदं खलु ममात्यर्थं धर्मलोपं करिष्यति ॥ ३६ ॥
हि मे परदाराणां दृष्टिर्विषयवर्तिनी ॥ अयं चात्र मया दृष्टः परदारपरिग्रहः ॥ ३७ ॥
स्य प्रादुरभूच्चिन्ता पुनरन्या मनस्विनः ॥ निश्चितैकान्तचित्तस्य कार्यनिश्चयदर्शिनी ॥ ३८ ॥
ामं दृष्टा मया सर्वा विश्वस्ता रावणस्त्रियः ॥ नै हि मे मनसः किंचिद्वैकृत्यमुपपद्यते ॥ ३९ ॥
नो हि हेतुः सर्वेषामिन्द्रियाणां प्रवर्तने ॥ शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितम् ॥ ४० ॥
ान्यत्र हि मया शक्या वैदेही परिमार्गितुम् ॥ स्त्रियो हि स्त्रीषु दृश्यन्ते सदा संपरिमार्गणे ॥४१॥
स्य सत्त्वस्य या योनिस्तस्यां तत्परिमार्ग्यते ॥ न शक्या प्रमदा नष्टा मृगीषु परिमार्गितुम् ॥ ४२ ॥
दिदं मार्गितं तावच्छुद्धेन मनसा मया ॥ रावणान्तःपुरं सर्वं दृश्यते न च जानकी ॥ ४३ ॥
वगन्धर्वकन्याश्च नागकन्याश्च वीर्यवान् ॥ अवेक्षमाणो हनुमान्नैवापश्यत जानकीम् ॥ ४४ ॥
ामपश्यन्कपिस्तत्र पश्यंश्चान्या वरस्त्रियः ॥ अपक्रम्य तदा वीरः प्रध्यातुमुपचक्रमे ॥ ४५ ॥
भूयस्तु परं श्रीमान्मारुतिर्यत्नमास्थितः ॥ आपानभूमिमुत्सृज्य तं विचेतुं प्रचक्रमे ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकादशः सर्गः ॥ ११ ॥

छङ्कितः ॥ ३५ ॥ परदारावरोधस्य परदाररूपान्तः-रस्य ॥ ३६ ॥ मे दृष्टिः कदाचिदपि परदाराणां वेषयवर्तिनी नहि । परदारसंबन्धिविषयपरा नही-र्थः । तथाप्ययं परदारपरिग्रहः दृष्टः इदमसङ्गत-त्यर्थः ॥ ३७ ॥ निश्चितैकान्तचित्तस्य नियतैकरू-चित्तस्य ॥ ३८ ॥ वैकृत्यं विकारः । उपपद्यते त्पद्यते ॥ ३९ ॥ शुभाशुभास्ववस्थासु शुभकरणाशु-करणेपु विषये । इन्द्रियाणां प्रवर्तने मन एव हेतुः ्व्यवस्थितं न तदभिलाषि जातमित्यर्थः ॥ ४० ॥ ननु परदारदर्शनमपि परिहरणीयं तत्किमर्थं कृतं तत्राह—नान्यत्रेति ॥ अन्यत्र स्त्रीव्यतिरिक्ते । संपरिमार्गणे कर्तव्ये स्त्रीष्वेव हि स्त्रियो दृश्यन्ते ॥ ४१ ॥ योनिः जातिः । सजातीयइत्यर्थः ॥ ४२—४३ ॥ अपश्यत अपश्यत् ॥ ४४—४५ ॥ तत रावणान्तःपुरं ॥ ४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरका-ण्डव्याख्याने एकादशः सर्गः ॥ ११ ॥

ति० धर्मलोपंदर्शयति—परदारेति । परदारावरोधस्य । दारशब्दःस्त्रीसामान्यवाची । अवरोधशब्दःस्वधर्मयुक्तकुलस्त्रीवाची । सुप्तस्य । अनेननग्नप्रायत्वंसूचितं । तत्समयेवसनानांविपर्यासात् । किंचपरदाराएवपरिग्रहो भार्यायस्यसःअतिपापीरावणश्चदृष्टः । दृशदर्शनमपिधर्मलोपकारीतिभावः ॥ ३७ ॥ ति० अथपुनर्विचारेणतदलोपबुद्धिरप्युत्पन्नेत्याह—तस्येति । अन्याचिन्ता र्वचिन्ताविरोधिनी । निश्चितेप्रमाणप्रतिपन्ने । एकान्तेसिद्धान्तेतद्विषयज्ञानेचित्तं । अतएवसाचिन्ताकार्यनिश्चयदर्शिनी र्तव्याकर्तव्यनिर्णयसमर्था ॥ ८ ॥ इत्येकादशः सर्गः ॥ ११ ॥

[पा०] १ क. ग. घ. च. ज.—ट. ननु. २ घ. मूलं. ३ च. छ. स्त्रियाःसंपरिमार्गणे. ४ ख. ङ.—ट. शक्यं. ५ ग. ङ. च. छ. ज. नात्र. ख. नापि. ६ क. नैवपश्यति. ७ ख. ग. ङ.—ट. प्रस्थातुं. ८ ङ. छ.—ट. भूयस्सर्वतःश्रीमान्. . भूयस्तांपुरींश्रीमान्. घ. ज. भूयस्तत्परःश्रीमान्. ९ च. छ. ज. पानभूमिंसमुत्सृज्यविचेतुंचप्रचक्रमे. १० क. ग. घ. . ञ. ञ. ट. तांविचेतुं.

द्वादशः सर्गः ॥ १२ ॥

पुनरपिहनुमता रावणगृहे लतागृहचित्रगृहादिनानास्थानेष्वन्वेषणेपि सीतायाअदर्शनेन तस्यारावणेनप्रमापणादिसं भावनया स्वयत्नस्यवैफल्यशङ्कया अकृतकार्यतयासुग्रीवाद्यवलोकनस्यातिजुगुप्सितत्वशङ्कयाच निर्वेदाधिगमः ॥ १ ॥ तथ निर्वेदस्यानर्थसाधनत्वाध्यवसायेन अनिर्वेदस्यश्रेयस्साधनत्वनिर्धारणेनच पुनरप्यन्वेषणेसमुद्यमः ॥२॥ तथा चतुरङ्गुलदेश मात्रानवशेषीकरणेनपुनरन्वेषणेपि सीतायाअदर्शनेनविषादाधिगमः ॥ ३ ॥

स तस्य मध्ये भवनस्य मा[1]रुतिर्लतागृहांश्चित्रगृहान्निशागृहान् ॥
जगाम सीतां प्रति दर्शनोत्सुको न चैव तां पश्यति चारुदर्शनाम् ॥ १ ॥
स चिन्तयामास ततो महाकपिः प्रियामपश्यन्रघुनन्दनस्य ताम् ॥
ध्रु[2]वं हि सीता म्रियते यथा न मे विचिन्वतो दर्शनमेति मैथिली ॥ २ ॥
सा राक्षसानां प्रवरेण जा[3]नकी स्वशीलसंरक्षणतत्परा सती ॥
अनेन नूनं प्रतिदुष्टकर्मणा हता भवेदार्यपथे प[4]रे स्थिता ॥ ३ ॥
विरूपरूपा विकृता विवर्चसो महानना दीर्घविरूपदर्शनाः ॥
समीक्ष्य सा राक्षसराजयोषितो भयाद्विनष्टा जनकेश्वरात्मजा ॥ ४ ॥
सीतामदृष्ट्वा ह्यनवाप्य पौरुषं विहृत्य कालं सह वानरैश्चिरम् ॥
न मेस्ति सुग्रीवस[5]मीपगा गतिः सुतीक्ष्णदण्डो बलवांश्च वानरः ॥ ५ ॥
दृष्टमन्तःपुरं सर्वं दृष्टा रावणयोषितः ॥ न सीता दृश्यते साध्वी वृथा जातो मम श्रमः ॥ ६ ॥
किंतु मां वानराः सर्वे गतं वक्ष्यन्ति संगताः ॥ गत्वा तत्र त्वया वीर किं कृतं तद्वदस्व नः ॥
अदृष्ट्वा किं प्रवक्ष्यामि तामहं जनकात्मजाम् ॥ ७ ॥
ध्रुवं प्रायमु[6]पैष्यन्ति कालस्य व्यतिवर्तने ॥ ८ ॥

निशागृहान् रात्रिनिवासयोग्यगृहान्। "गृहाः पुंसि च भूम्न्येव" इति पुँल्लिङ्गत्वं। पश्यति अपश्यत् ॥ १ ॥ यथा यस्मात्कारणात् । विचिन्वतो मे मैथिली दर्शनं नैति तस्मात् म्रियते ममार । यद्वा अथवा नेति वाक्यं पठनीयं । तदा अपश्यन्निति हेतुगर्भं । अदर्शनान्मृता वा अथवा दर्शनं नैति । कुत्रचिद्गहने प्रदेशे स्थितावेत्यर्थः ॥२॥ प्रतिदुष्टकर्मणा अतिदुष्टकर्मणा । वीप्सायां प्रतिः । " प्रतिप्रतिनिधौ वीप्सालक्षणादौ " इत्यमरः । परे उत्कृष्टे । आर्यपथे सन्मार्गे ॥ ३ ॥ विरूपाणि न्यूनाधिकानि रूपाणि शरीरावयवाः यासां ताः । विकृताः विकृतवेषाः । विवर्चसोनिस्तेजस्काः। महाननाः अतिविशालमुखाः । दीर्घाणि विरूपाणि दर्शनानि चक्षूंषि यासां ताः । राक्षसराजयोषितः रावणस्याज्ञाकारिणीःस्त्रियः ॥४॥ पौरुषं शत्रुविषयपराक्रमं । चिरं कालं विहृत्य अतिक्रम्येत्यर्थः । एवंभूतस्य मे सुग्रीवसमीपगा तत्समीपगामिनी । गतिः मार्गः । नास्ति। सुग्रीवसमीपगतिः ममायोग्येत्यर्थः । तत्र हेतुमाह—सुतीक्ष्णेति । यत इति—शेषः ॥ ५—६ ॥ किंन्विति सामान्येन निर्वेदोक्तिः । विशेषतश्चाह—गत्वेति । इत्युक्त इति शेषः । वदस्व न इत्युक्तः किं प्रवक्ष्यामि । यद्वा किन्त्विति पाठः । पूर्ववदर्धत्रयमेकं वाक्यं । किन्त्विति पूर्वस्माद्विशेषोक्तिः । मां वानराः वदस्व न इति वक्ष्यन्ति तदा अदृष्ट्वा किं प्रवक्ष्यामीति योजना ॥ ७ ॥ तर्हि अत्रैव कालविलम्बः क्रियतां तत्राह—ध्रुवमिति ॥ कालस्य व्यतिवर्तने अस्मदागमनकालेऽ-

ति० नम्रियतेनजीवतिस्म । ध्रुवंनुसीताम्रियतेइतिक्वचित्पाठः । तत्रहेतुःयथेति । यतइत्यर्थः ॥ २ ॥

[पा०] १ ङ.—ट. संस्थितोलता. घ. संश्रितोलता. २ क. ग. घ. च. छ. ज. ध्रुवंतु. ङ. झ. ञ. ट. ध्रुवंनसीता म्रियते. ३ क. ग.—च. ज.—ट. बाला. ४ च. छ. प्रतिष्ठिता. ५ घ. समाजसंगतिः. ६ ङ. झ. ट. मुपासिष्ये. ख. मुपेष्यामि.

[1]किं वा वक्ष्यति वृद्धश्च जाम्बवानङ्गदश्च सः ॥ गतं पारं समुद्रस्य वानराश्च समागताः ॥ ९ ॥
अनिर्वेदः श्रियो मूलमनिर्वेदः परं सुखम् ॥ अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्तकः ॥ १० ॥
करोति सफलं जन्तोः कर्म [2]यत्तत्करोति सः ॥ तस्मा[3]दनिर्वेदकृतं यत्नं चेष्टेऽहमुत्तमम् ॥ ११ ॥
[4]भूयस्तावद्विचेष्यामि देशान्रावणपालितान् ॥ [5]भूयस्तत्र विचेष्यामि न यत्र विचयः कृतः ॥
आपानशाला [6]विचितास्तथा पुष्पगृहाणि च ॥ १२ ॥
चित्रशालाश्च विचिता भूयः क्रीडागृहाणि च ॥ निष्कुटान्तररथ्याश्च विमानानि च सर्वशः ॥ १३ ॥
इति संचिन्त्य भूयोपि विचेतुमुपचक्रमे ॥ भूमीगृहांश्चैत्यगृहान्गृहाति[7]गृहकानपि ॥ १४ ॥
उत्पतन्निपतंश्चापि तिष्ठन्गच्छन्[8]पुनः पुनः ॥ [9]अपावृण्वंश्च द्वाराणि कपाटान्य[10]वघाटयन् ॥ १५ ॥
प्रविशन्निष्पतंश्चापि प्रपतन्नु[11]त्पतन्नपि ॥ [12]सर्वमप्यवकाशं स विचचार महाकपिः ॥ १६ ॥
चतुरङ्गुलमात्रोपि नावकाशः स विद्यते ॥ रावणान्तःपुरे तस्मिन्यं कपिर्न जगाम सः ॥ १७ ॥
प्राकारान्तर[13]रथ्याश्च वेदिकाश्चैत्य[14]संश्रयाः ॥ [15]दीर्घिकाः पुष्करिण्यश्च सर्वं तेनावलोकितम् ॥ १८ ॥
राक्षस्यो विविधाकारा विरूपा विकृतास्तथा ॥ दृष्टा हनुमता तत्र न तु [16]सा जनकात्मजा ॥ १९ ॥
रूपेणाप्रतिमा लोके [17]वरा विद्याधरस्त्रियः ॥ दृष्टा हनुमता तत्र न तु राघवनन्दिनी ॥ २० ॥
[18]नागकन्या वरारोहा पूर्णचन्द्रनिभाननाः ॥ दृष्टा हनुमता तत्र न तु [19]सीता सुमध्यमा ॥ २१ ॥
प्रमथ्य राक्षसेन्द्रेण [20]नागकन्या [21]बलाद्धृताः ॥ दृष्टा हनुमता तत्र न सा जनकनन्दिनी ॥ २२ ॥

तीते । प्रायमुपैष्यन्ति । जाम्बवत्प्रभृतयइतिशेषः ॥ ८ ॥ सामान्येन निर्वेदं प्रतिवक्ति—किं वेति ॥ समुद्रलङ्घनरूपं महत्कर्म कृतवन्तं मां ते किं वक्ष्यन्ति । किमपि वक्ष्यन्ति । यद्वा मद्वृत्तान्तं प्रशंसन् जाम्बवान् तदुत्साहकोङ्गदस्तदुपश्रृण्वन्तोन्ये च मां किं वा जुगुप्सितं वक्ष्यन्ति । " किं पृच्छायां जुगुप्सने " इत्यमरः ॥ ९ ॥ चिरं निर्वेदे कार्यहानिः स्यादिति मत्वा अनिर्वेदमवलम्बते—अनिर्वेद इति ॥ १० ॥ अनिर्वेद उत्साहः तत्कृतं तत्प्रयुक्तं । यत्नं चेष्टे । करोमीत्यर्थः । यत्करोति जन्तुरिति सिद्धम् । जन्तोस्सम्बन्धि तत्सर्वं कर्म सः अनिर्वेद एव । सफलं करोतीत्यन्वयः ॥ ११ ॥ आपानेति । एता विचिताः अथापि पुनर्विचेष्यामीत्यनुषज्यते ॥ १२ ॥ निष्कुटाः गृहारामाः । अन्तररथ्याः अवान्तरवीथ्यः ॥ १३ ॥ भूमीगृहान् भूमीबिलगृहान् । चैत्यगृहान् चतुष्पथमण्डपान् । गृहातिगृहकान् गृहानतीत्य दूरे स्वैरविहारार्थं निर्मितान्गृहान् ॥ १४ ॥ उत्पतन्निपतन् पूर्वमुच्चस्थानान्यधिरुह्य ततोवरोहन् । अवघाटयन् पाटयन् ॥ १५ ॥ निष्पतन् निर्गच्छन् । प्रपतन्नुत्पतन् बिलगृहादीनि नीचस्थानानि प्रथममधिरुह्य ततःसमुद्गच्छन् ॥१६—१७॥ प्राकारान्तररथ्याः प्राकारमध्यवर्तिवीथ्यः । वेदिकाश्चैत्यसंश्रयाः चैत्यवृक्षमूलपीठिकाबन्धाः ॥ १८—२१ ॥ प्रमथ्य प्रसह्य । बलाद्धृता नागकन्या इत्यभिधानादत्र बन्दीकृतानां ग्रहणं । पूर्व-

ती० चैत्यगृहान् बुद्धायतनानि । गृहातिगृहकानपि गृहानतीत्यानतिदूरेस्वैरविहारार्थंनिर्मितगृहान् ॥ ति० गृहातिगृहकाःगृहोपरिगृहाइतिकतकः । स० भूमीगृहान् भूविवरस्थगृहान् । चैत्यगृहान् देवायतनानि । अपावृण्वन् अपगतावरणानिकुर्वन् ॥१४॥ चैत्यःचतुष्पथवृत्तिवृक्षः ॥ १८ ॥ स० राघवंनन्दयतीतिराघवनन्दिनीसीता ॥ २० ॥

[पा०] १ क. ग. किंमां. २ क. घ. ङ. झ. ट. यच्चकरोति. ख. यच्चकरोतिच. ३ क. ङ. दनिर्वेदकरं. ४ ख.—ट. अदृष्टांश्चविचेष्यामि. ५ क. घ.—ट. पाठेष्विदमर्धंदृश्यते. ६ क. विविधास्तथा. ७ ख. गृहकानिच. ८ क. ख. ग. ङ. ञ. पुनःक्वचित्. ९ च. छ. ज. अपावृतानि. १० क. ग.—ट. न्यवघट्टयन्. ११ ङ.—झ. ट. त्पतन्निव. १२ क. सर्वानप्यवकाशांश्च. १३ ङ.—झ. ट. वीथ्यश्च. १४ क. ग. संश्रिताः. १५ क.—ट. श्वभ्राश्च. १६ क. ग. सीतासुमध्यमा. १७ झ. ञ. परा:. १८ घ. राजकन्याः. १९ ङ.—ट. साजनकात्मजा. २० ग. देवकन्याः. ख. राजकन्याः. २१ च. छ. बलात्कृताः.

सोपश्यंस्तां महाबाहुः पश्यंश्चान्या वरस्त्रियः ॥ विषसाद मुहुर्धीमान्हनुमान्मारुतात्मजः ॥ २३ ॥
उद्योगं वानरेन्द्राणां प्लवनं सागरस्य च ॥ व्यर्थं वीक्ष्यानिलसुतश्चिन्तां पुनरुपागमत् ॥ २४ ॥
अवतीर्य विमानाच्च हनुमान्मारुतात्मजः ॥ चिन्तामुपजगामाथ शोकोपहतचेतनः ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्वादशः सर्गः ॥ १२ ॥

त्रयोदशः सर्गः ॥ १३ ॥

पुष्पकविमानात्प्राकारंपरिक्रान्तवताहनुमता प्रायस्सर्वत्रान्वेषणेपिसीतायाअदर्शने तत्रानेकहेतूत्प्रेक्षणपूर्वकं रामेतत्त्व निवेदनानिवेदनपक्षयोर्महानर्थोत्प्रेक्षणं ॥ १ ॥ तथा सीतानवलोकनशोकेन स्वप्राणविमोक्षणरावणमारणाद्यनेकविकल्पान्प रिकल्पयतातेनदैवादशोकवनिकावलोकनं ॥२ ॥ तथा स्वेनतस्याअनन्वेषितत्वनिर्धारणेन तत्रान्वेषणनिर्धारणपूर्वकं रामादी न्प्रति सकलसुरनिकरान्प्रतिच सप्रणामंस्वान्वेषणस्यसाफल्यसिद्धिप्रार्थनं ॥ ३ ॥

विमानात्तु सुसंक्रम्य प्राकारं हरियूथपः ॥ हनुमान्वेगवानासीद्यथा विद्युद्घनान्तरे ॥ १ ॥
संपरिक्रम्य हनुमान्रावणस्य निवेशनात् ॥ अदृष्ट्वा जानकीं सीतामब्रवीद्वचनं कपिः ॥ २ ॥
भूयिष्ठं लोलिता लङ्का रामस्य चरता प्रियम् ॥ न हि पश्यामि वैदेहीं सीतां सर्वाङ्गशोभनाम् ॥ ३ ॥
पल्वलानि तटाकानि सरांसि सरितस्तथा ॥ नद्योनूपवनान्ताश्च दुर्गाश्च धरणीधराः ॥
लोलिता वसुधा सर्वा न तु पश्यामि जानकीम् ॥ ४ ॥
इह संपातिना सीता रावणस्य निवेशने ॥ आख्याता गृध्रराजेन न च पश्यामि तामहम् ॥ ५ ॥
किंनु सीताऽथ वैदेही मैथिली जनकात्मजा ॥ उपतिष्ठेत विवशा रावणं दुष्टचारिणम् ॥ ६ ॥
क्षिप्रमुत्पततो मन्ये सीतामादाय रक्षसः ॥ बिभ्यतो रामबाणानामन्तरा पतिता भवेत् ॥ ७ ॥

श्लोके ऊढानां नागकन्यानामित्यपुनरुक्तिः ॥ २२–२५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्वादशः सर्गः ॥ १२ ॥

विमानादित्यादि । इदानीं विमानादवतरणोक्त्या मध्ये विमानमधिरूढ इत्यवगम्यते । वेगवत्त्वे दृष्टान्तमाह—विद्युदिति ॥ १ ॥ संपरिक्रम्य प्राकारमिति शेषः । अब्रवीत् स्वयमितिशेषः ॥२॥ लोलिता बहुशोन्विष्टेत्यर्थः॥३॥ सरितः क्षुद्रनद्यः। अनूपवनान्ता जलप्रायवनप्रदेशाः ॥ ४—५ ॥ सीता अयोनिजा वैदेही जन्मभूमिप्रयुक्तातिशयवती । मैथिली आचार प्रधानकुलोत्कर्षवती । अथशब्दस्समुच्चये । एवंभूत जनकात्मजा दुष्टचारिणं रावणं विवशा कामपरवश सती उपतिष्ठेत किंनु । नेत्यर्थः ॥६॥ अथास्या अदर्शने हेतूनुत्प्रेक्षते—क्षिप्रमित्यादिना ॥ रामबाणान

ति० अवतीर्य विमानएवैतत्सर्वदर्शनमितितत्त्वं ॥ २५ ॥ इतिद्वादशः सर्गः ॥ १२ ॥

रामानु० जनकात्मजेत्यनेन ‘ कर्मणैवहिसंसिद्धिमास्थिताजनकादयः ’ इतिप्रसिद्धजनकसंबन्धकृतवैशिष्ट्यं । एवंगुणविशिष्टादेवीदुष्टचारिणंरावणंउपतिष्ठेतकिंनु मित्रत्वेनप्राप्नुयात्किंनु । नप्राप्नुयादेवेत्यर्थः । “ उपाद्देवपूजासंगतिकरणमित्रकरणपथिष्विति वक्तव्यं ’ इत्यात्मनेपदं ॥ ६ ॥ तर्ह्यदर्शनंकुतः तत्रहेतूनुत्प्रेक्षते । क्षिप्रमिति । एतेपक्षाः दुःखातिशयात्संपातिवचनविस्मरणमूलकाः । बिभ्यतःकराद्भ्रष्टेतिशेषः । रामबाणानां । आघातादितिशेषः । शेषेषष्ठीवा । **स०** यद्यपिसंपातिनालङ्कायांसीतास्तीत्यभिधानादेवमाद्युत्प्रेक्षानशक्याकर्तुं । तथापिसंपात्युक्तरीत्याऽन्वेषणेपियतोनदृश्यतेअतस्तद्वचनमेवविचारणीयमितिमतिमतो

[पा०] १ ख. घ. ङ. झ. ञ. ट. विषसादमहाबाहुः. ग. विषादमगमद्वीरो. क. च. छ. ज. विषादमगमद्धीमान्. २ ङ.—ट. पुनरुपागतः. ३ क. विमानाग्राद्धनुमान्. ४ ख. सर्वाङ्गसुन्दरीं. ५ क.—ङ. झ. ञ. ट. नच. ६ ङ. झ. ट साद्दृश्यतेतुकिं. ७ ङ.—झ. ट. रावणेनहृताबलात्.

अथवा ह्रियमाणायाः पथि सिद्धनिषेविते ॥ मन्ये पतितमार्याया हृदयं प्रेक्ष्य सागरम् ॥ ८ ॥
रावणस्योरुवेगेन भुजाभ्यां [1]पीडितेन च ॥ तया मन्ये विशालाक्ष्या त्यक्तं जीवितमार्यया ॥ ९ ॥
उपर्युपरि वा नूनं सागरं क्रमतस्तथा ॥ विवेष्टमाना पतिता समुद्रे जनकात्मजा ॥ १० ॥
अहो क्षुद्रेण [2]वाऽनेन रक्षन्ती शीलमात्मनः ॥ अबन्धुर्भक्षिता सीता रावणेन तपस्विनी ॥ ११ ॥
अथवा राक्षसेन्द्रस्य पत्नीभिरसितेक्षणा ॥ अदुष्टा दुष्टभावाभि[3]र्भक्षिता सा भविष्यति ॥ १२ ॥
संपूर्णचन्द्रप्रतिमं पद्मपत्रनिभेक्षणम् ॥ रामस्य ध्यायती वक्त्रं पञ्चत्वं कृपणा गता ॥ १३ ॥
हा राम लक्ष्मणेत्येवं हायोध्ये चेति मैथि[4]ली ॥ विलप्य बहु वैदेही न्यस्तदेहा भविष्यति ॥ १४ ॥
[5]अथवा निहिता मन्ये रावणस्य निवेशने ॥ [6]नूनं [7]लालप्यते सीता पञ्जरस्थेव शारिका ॥ १५ ॥
जनकस्य [8]सुता सीता रामपत्नी [9]सुमध्यमा ॥ कथमुत्पलपत्राक्षी रावणस्य वशं व्रजेत् ॥ १६ ॥
विनष्टा वा प्रणष्टा वा मृता वा जनकात्मजा ॥ रामस्य प्रियभार्यस्य न निवेदयितुं क्षमम् ॥ १७ ॥
निवेद्यमाने दोषः स्याद्दोषः स्यादनिवेदने ॥ कथं नु खलु कर्तव्यं विषमं प्रतिभाति मे ॥ १८ ॥
अस्मिन्नेवं गते कार्ये प्राप्तकालं क्षमं च किम् ॥ भवेदिति [10]मतं भूयो हनुमान्[11]प्रविचारयत् ॥ १९ ॥
यदि सीतामदृष्ट्वाहं वानरेन्द्रपुरीमितः ॥ गमिष्यामि ततः को मे पुरुषार्थो भविष्यति ॥ २० ॥
ममेदं लङ्घनं व्यर्थं सागरस्य भविष्यति ॥ [12]प्रवेशश्चैव [13]लङ्काया राक्षसानां च दर्शनम् ॥ २१ ॥

रामबाणेभ्यः ॥ ७ ॥ सागरं प्रेक्ष्य भीतं हृदयं सागरे पतितमिति मन्ये । हृदयस्य भयस्थानत्वेन तन्मूलतया तच्छरीरं लक्ष्यते ॥ ८ ॥ पीडितेन पीडनेन ॥ ९ ॥ उपर्युपरि सागरं सागरस्य सन्निहितोपरिप्रदेशे । "उपर्यध्यधसस्सामीप्ये" इति द्विर्वचनं । "धिगुपर्यादिषु त्रिषु" इति द्वितीया ॥ १० ॥ अहो इति खेदे ॥ ११ ॥ दुष्टभावाभिः सापत्न्यप्रयुक्तक्रोधाभिः ॥ १२—१३ ॥ न्यस्तदेहा त्यक्तदेहा । भविष्यति भवेदित्यर्थः ॥१४॥ निहिता भूगृहादौ गूढं स्थापिता । लालप्यते मुहुर्मुहुः प्रलपति ॥ १५ ॥ एवं निरुध्यमानापि सीता रावणस्य वशं न व्रजेदित्याह—जनकस्येति ॥ कथं व्रजेत् । न व्रजेदेवेत्यर्थः ॥ १६ ॥

ननु किं चिन्तया गत्वा यथावृत्तं निवेद्यतामित्याशङ्क्य तदनुचितमित्याह—विनष्टेति ॥ विनष्टा भूगृहादौ स्थापनेनादर्शनं गता । "णश अदर्शने" इति धातोर्निष्ठा । प्रणष्टा समुद्रपतनादिना त्यक्तजीविता । "उपसर्गादसमासेपि णोपदेशस्य" इति णत्वं । मृता रामविरहदुःखासहिष्णुतया स्वयं मृता ॥ १७ ॥ निवेद्यमाने वक्ष्यमाणो दोषः स्यात् । दोषः स्यादनिवेदने । यथावृत्तानिवेदने स्वामिवञ्चनदोषः स्यात् । विषमं परस्परविरुद्धं ॥ १८ ॥ हनुमान् अस्मिन्कार्ये एवंगते एवं विषमत्वं प्राप्ते सति । किंप्राप्तकालं कालोचितं । क्षमं समर्थं च भवेदिति मतं पक्षं । भूयः प्रविचारयत् ॥ १९—२० ॥ पुरुषार्थाभाव-

हनुमतःसायुक्तेतिज्ञेयं ॥ ७ ॥ **ति०** रामपरोक्षंतथाभयायोगात्पक्षान्तरं—अथवेति । हृदयंपतितं मनउत्क्रान्तं । मनउत्क्रमणस्यैव मरणत्वात् ॥ ८ ॥ **स०** अबन्धुःअसंनिहितबन्धुः ॥ ११ ॥ **स०** रिपुभिर्योधयितुंशक्योयोध्यः । सनभवतीत्ययोध्यः । तस्य संबुद्धिः । हायोध्येत्युपपन्नं ॥१४॥ **ति०** नन्वनेनविचारेणालं यथानुभूतंनिवेद्यतां तत्राह—विनष्टेति । अस्यक्वचिद्गतैतइतिशेषः । 'णशअदर्शने' इतिधात्वनुसारादद्दष्टासतीक्वचिदस्तीतिवक्तुं अशक्यं अक्षमं । सर्वतोन्विष्टत्वात् प्रणष्टा प्रगतंनष्टंअदर्शनंयस्यास्सा दृष्टेत्यर्थः । एतदपिनवक्तुंक्षमं । स्वयमदृष्टत्वात् ॥ एवंमृतेत्यपिवक्तुंनशक्यं । तत्साधकदृढतरप्रमाणाभावात् । तस्माद्रामस्याग्रेकिमपिवक्तुंनशक्यं । दृश्यदेशेमाययाऽदर्शनंविनाशः । अदृश्यदेशेऽवस्थापनंप्रणाशइतितुतीर्थः ॥ १७ ॥ **ति०** प्राप्तकालं

[पा०] १ क. ख. ङ. पीडनेनच. २ ग. पापेन. ३ क. झ. ट. भक्षितावा. ४ ङ. ञ. ट. भामिनी. ५ ज. रहोवानिहिता. ६ ङ. झ. ट. भृशं. ७ ङ. झ. ट. लालप्यतेबाला. क. घ. च. छ. ञ. लालप्यतेमन्दं. ग. विलपतेमन्दं. ८ क. ग. ङ.—ट. कुलेजाता. ९ च. छ. ज. सुधार्मिका. १० ग. ङ.—ट. मतिं. ११ ग. ङ. ज. झ. ञ. न्प्रविचारयन्. ग. न्विचचारह. क. न्प्रव्यचारयत्. १२ च. छ. ज. प्रवेशश्चापि. १३ क. ञ. लङ्कायां.

किं[१] मां वक्ष्यति सुग्रीवो हरयो वा[२] समागताः ॥ किष्किन्धां[३] समनुप्राप्तं[४] तौ वा दशरथात्मजौ ॥२
गत्वा तु यदि काकुत्स्थं वक्ष्यामि परमप्रियम्[५] ॥ न दृष्टेति मया सीता ततस्त्यक्ष्यति जीवितम् ॥ २
परुषं दारुणं क्रूरं[६] तीक्ष्णमिन्द्रियतापनम् ॥ सीतानिमित्तं दुर्वाक्यं श्रुत्वा स नभविष्यति ॥ २४
तं तु कृच्छ्रगतं दृष्ट्वा पञ्चत्वगतमानसम् ॥ भृशानुरक्तो मेधावी नभविष्यति लक्ष्मणः ॥ २५ ॥
विनष्टौ भ्रातरौ श्रुत्वा भरतोपि मरिष्यति ॥ भरतं च मृतं दृष्ट्वा शत्रुघ्नो[७] नभविष्यति ॥ २६ ॥
पुत्रान्मृतान्समीक्ष्याथ नभविष्यन्ति मातरः ॥ कौसल्या च सुमित्रा च कैकेयी च न संशयः ॥२७
कृतज्ञः सत्यसन्धश्च सुग्रीवः प्लवगाधिपः ॥ रामं तथागतं दृष्ट्वा ततस्त्यक्ष्यति जीवितम् ॥ २८ ॥
दुर्मना व्यथिता दीना निरानन्दा तपस्विनी ॥ पीडिता भर्तृशोकेन रुमा त्यक्ष्यति जीवितम् ॥२९
वालिजेन[८] तु दुःखेन पीडिता शोककर्शिता[९] ॥ पञ्चत्वं[१०] च गते राज्ञि ताराऽपि नभविष्यति ॥ ३० ॥
मातापित्रोर्विनाशेन सुग्रीवव्यसनेन च ॥ कुमारोप्यङ्गदः[११] कस्माद्धारयिष्यति जीवितम् ॥ ३१ ॥
भर्तृजेन तु दुःखेन[१२] ह्यभिभूता[१३] वनौकसः ॥ शिरांस्यभिहनिष्यन्ति तलैर्मुष्टिभिरेव च ॥ ३२ ॥
सान्त्वेनानुप्रदानेन मानेन च यशस्विना ॥ लालिताः कपिराजेन[१४] प्राणांस्त्यक्ष्यन्ति वानराः ॥३३
न वनेषु न शैलेषु न[१५] निरोधेषु वा पुनः ॥ क्रीडामनुभविष्यन्ति समेत्य कपिकुञ्जराः ॥ ३४ ॥
सपुत्रदाराः सामात्या भर्तृव्यसनपीडिताः[१६] ॥ शैलाग्रेभ्यः पतिष्यन्ति समेत्य[१७] विषमेषु च ॥ ३५
विषमुद्बन्धनं वाऽपि प्रवेशं ज्वलनस्य वा ॥ उपवासमथो शस्त्रं प्रचरिष्यन्ति वानराः ॥ ३६ ॥
घोरमारोदनं मन्ये गते मयि भविष्यति ॥ इक्ष्वाकुकुलनाशश्च नाशश्चैव वनौकसाम् ॥ ३७ ॥
सोहं नैव गमिष्यामि किष्किन्धां नगरीमितः ॥ न[१८] च शक्ष्याम्यहं द्रष्टुं सुग्रीवं मैथिलीं विना ॥३८॥
मय्यगच्छति चेहस्थे धर्मात्मानौ महारथौ[१९] ॥ आशया तौ धरिष्येते वानराश्च मनस्विनः[२०] ॥ ३९ ॥
हस्तादानो मुखादानो नियतो वृक्षमूलिकः ॥ वानप्रस्थो भविष्यामि ह्यदृष्ट्वा[२१] जनकात्मजाम् ॥ ४० ॥
सागरानूपजे देशे बहुमूलफलोदके ॥ चितां[२२] कृत्वा प्रवेक्ष्यामि समिद्धमरणीसुतम्[२३] ॥ ४१ ॥

माह—ममेदमिति ॥ २१—२२ ॥ निवेद्यमाने दोषः स्यादित्येतदुपपादयति—गत्वेत्यादिना ॥ अप्रियमिति च्छेदः ॥ २३ ॥ परुषं श्रवणकटुकं । दारुणं भयंकरं । क्रूरं उग्रं । तीक्ष्णं असह्यम् । इन्द्रियतापनं इन्द्रियक्षोभकं । सीतानिमित्तं सीताविषयं ॥ २४ ॥ पञ्चत्वगतमानसं मरणे कृतनिश्चयं ॥ २५—३२ ॥ मानेन प्रत्युत्थानादिता ॥ ३३ ॥ निरोधेषु गृहादिसंवृतप्रदेशेषु ॥ ३४—३५ ॥ प्रचरिष्यन्ति करिष्यन्तीत्यर्थः । शस्त्रं शस्त्रपतनं ॥ ३६ ॥ आरोदनं आसमन्ताद्रोदनं ॥ ३७—३९ ॥ हस्तादानः हस्तपतितभोजी । मुखादानः मुखपतितभोजी । वृक्षमूलिकः वृक्षमूलवासी ॥ ४० ॥ बहुमूलफलोदक इति स्वरू-

कालोचितं किंक्षमं किंवक्तुंयुक्तंभवेदिति भूयोमतिं तद्विषयंपक्षंविचारयन्नभूदितिशेषः ॥ १९ ॥ **स०** सत्यसंधः प्रागि-तिशेषः । यद्वा मनसासीतांसंबोध्यवदति—सतीति । असंधः अनिष्पन्नस्वप्रतिज्ञः । अथवा अनुवादेन सीतायाअनानयनेप्रा-णांस्त्यक्ष्यामीतिवादऊह्यः । ततश्च सत्यसन्धइति यथावस्थितमन्वेति ॥ २८ ॥ **स०** हस्तादानः हस्तेयत्पतितंदैवात् तस्यादा-

[पा०] १ क.—ट. किंवा. २ ङ. झ. ञ. ट. वापिसंगताः. क. च. छ. ज. वामहाबलाः. ३ ङ. झ. ञ. ट. किष्किन्धामनुसंप्राप्तं. ४ क. ग. घ. च. छ. ज. समनुप्राप्तौ. ५ ङ. झ. ञ. ट. परुषंवचः. ६ ङ.—ट. तीक्ष्णंक्रूरमिन्द्रिय. ७ क. घ. शत्रुघ्नोपिमरिष्यति. ८ क. च. छ. ज. वालिनोमृतिदुःखेन. ९ क. ग. दुःखकर्शिता. १० ङ. झ. ञ. ट. पञ्चत्वमागताराज्ञी. क. च. छ. ज. पञ्चत्वंचगताराज्ञी. ११ ङ. झ. ञ. ट. प्यङ्गदस्तस्माद्विजहिष्यतिजीवितं. च. छ. ज. प्यङ्गदोबालस्तस्मात्सनभविष्यति. १२ घ. शोकेन. १३ ख.—ङ. झ. ञ. ट. अभिभूताः. १४ ङ.—ट. कपिनाथेन. १५ च. छ. ज. निरोधेषुचवानराः. १६ क. च. छ. ज. कर्शिताः. १७ ङ.—झ. समेषु. १८ क.—ट. नहि. १९ ग. महाबलौ. २० ङ. झ. ट. तरस्विनः. २१ ख. ग. ङ.—ट. अदृष्ट्वा. २२ ङ. झ. ञ. ट. चितिं. २३ घ. प्रदीप्तं.

उपविष्टस्य वा सं[1]म्यग्लिङ्गिनीं साधयिष्यतः ॥ शरीरं भक्षयिष्यन्ति वायसाः श्वापदानि च ॥ ४२ ॥
इदं[2] महर्षिभिर्दृष्टं निर्याणमिति मे मतिः ॥ सम्यगापः प्रवेक्ष्यामि न चेत्पश्यामि जानकीम् ॥ ४३ ॥
सुजातमूला सुभगा कीर्तिमाला यशस्विनी ॥ प्रभग्ना चि[3]रात्रीयं मम सीतामपश्यतः ॥ ४४ ॥
तापसो वा भविष्यामि नियतो वृक्षमूलिकः ॥ नेतः[4] प्रतिगमिष्यामि ता[5]मदृष्ट्वाऽसितेक्षणाम् ॥ ४५ ॥
यदीतः[6] प्रतिगच्छामि सीतामनधिगम्य ताम् ॥ अङ्गदः स[7]ह तैः सर्वैर्वानरैर्नभविष्यति ॥ ४६ ॥
विनाशे बहवो दोषा जीव[8]न्भद्राणि पश्यति ॥ तस्मात्[9]प्राणान्धरिष्यामि ध्रुवो[10] जीवितसंगमः ॥ ४७ ॥
एवं बहुविधं दुःखं मनसा धा[11]रयन्मुहुः ॥ नाध्यगच्छत्तदा पारं शोकस्य कपिकुञ्जरः ॥ ४८ ॥
[[12]ततो विक्रममासाद्य धैर्यवान्कपिकुञ्जरः ॥] रावणं वा वधिष्यामि दशग्रीवं महाबलम् ॥
[13]काममस्तु हृता सीता प्रत्याचीर्णं भविष्यति ॥ ४९ ॥
[14]अथ वैनं समुत्क्षिप्य उपर्युपरि सागरम् ॥ रामायोपहरिष्यामि पशुं पशुपतेरिव ॥ ५० ॥

...कथनं । अरणीसुतं अरण्युत्पन्नं ॥ ४१ ॥ उपविष्टस्य ...प्रायोपविष्टस्य । लिङ्गिनीं लिङ्गं संन्यासः अनशनं तद्वती लिङ्गिनी तां । साधयिष्यतः । लिङ्गिनमिति क्वचित्पाठः । तत्र लिङ्गं शरीरं तद्वान् लिङ्गी आत्मा तं साधयिष्यतः । शरीरादात्मानं मोचयिष्यत इत्यर्थः । श्वापदानि श्वापदाः व्याघ्रादयः ॥ ४२ ॥ ...न चैवमात्मत्यागे दोष इत्याह—इदमिति । निर्याणं मारणं । आपः अपः ॥ ४३ ॥ सुजातमूला । आदौ लङ्काधिदेवताजयेन शोभनप्रारम्भा । सुभगा चन्द्रोदयेन रम्या । कीर्तिमाला मम कीर्तिमयमाला । यशस्विनी हनुमतो लङ्काप्रवेशरात्रिरिति लोके विख्याता । चिररात्री जागरणेन दीर्घभूता रात्रिः । प्रभग्ना समाप्ता । एवं कल्याणीयं रात्रिः सीतामपश्यतो मे व्यर्थैव जातेत्यर्थः । "कृदिकारादक्तिन" इति दीर्घः ॥ ४४ ॥ आत्मत्यागापेक्षया तापसभाव एव ज्यायानित्याह—तापस इति ॥ वाशब्दोऽवधारणे । "वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये" इतिविश्वः ॥ ४५ ॥ मा भूत्सुग्रीवसमीपगमनं अङ्गदादिभिस्संयुज्यतामित्याशङ्क्याह—यदीत इति ॥ ४६ ॥ बहवो दोषाः पूर्वोक्तास्सर्वविनाशादयः । संगमः श्रेयस्संगमः ॥ ४७—४८ ॥ प्रत्याचीर्णं प्रत्याचरितं प्रतिकृतमिति यावत् ॥ ४९ ॥ पशुं पशुपतेरिवेति पशुपतेः अग्नेः ।

...नियस्यसः ॥ ४० ॥ **ति०** लिङ्गिनीमितिपाठे प्राणलिङ्गिनींचितिंचैतन्यमित्यर्थः ॥ **स०** लिङ्गिनंसाधयिष्यतः केवललिङ्गदेहविशिष्टमात्मानंकुर्वतः स्थूलदेहंत्यजतइतियावत् ॥ ४२ ॥ **ति०** सीतामपश्यतोमम यशस्विनी यशस्संपादिका । मृतस्यख्यातिनाशः । सुजातमूला सुजातकारणवती । कीर्तिरूपामाला । जीवतःसा कीर्तिः । चिररात्रायेत्यव्ययं । चिरायेत्यर्थः । चिरायभग्ना आत्यन्तिकलयंगतेत्यर्थः ॥ **ती०** सुभगा सीतान्वेषणसौकर्यापादकचन्द्रिकयामनोहरा । कीर्तिमाला कीर्तनंकीर्तिः सीतान्वेषणसहकारिणीति सर्वत्रक्रियमाणाकीर्तिरेव मालायस्यास्सा । यशस्विनी हनुमल्लङ्काप्रवेशरात्रिरिति ख्यातिमती । चिररात्रिः चिरकालविशिष्टारात्रिः । दीर्घरात्रिरितियावत् । अनेन रामकार्यसहायेच्छया रात्रिरपिवर्धितवतीत्यवगम्यते ॥ **शि०** चिररात्राय बहुकालंसीतामपश्यतोमम सुजातमूला सुजातं रामसुग्रीवसंबन्धहेतुकवार्ताहरत्वेननिष्पन्नं मूलंयस्यास्सा । सुभगा शोभनैश्वर्यदात्री । यशस्विनी मुद्रिकादानोपलक्षितरामप्रीतिपात्रत्वहेतुकातियशोविशिष्टाकीर्तिमाला प्रभग्ना । अतः तापसः विचारपरः भविष्यामि । तांसीतामदृष्ट्वा इतोनप्रतिगमिष्यामि ॥ श्लोकद्वयमेकान्वयि ॥ **स०** सुजातमूला सद्वंशप्रभवा सुभगा सुन्दरी यशस्विनी या सीता तांचिररात्राय बहुकालमपश्यतोममकीर्तिमालाप्रभग्ना ॥ ४४ ॥ **ति०** एवमगमनेऽनिश्चिते मरणजीवितयोःकिंश्रेयस्तत्राह—विनाशइति । दोषाबहवःप्रागुक्ताः । चिरंमदगमने सीताविनाशनिश्चयेन रामादयोनस्युरेव । आत्मघातादयश्च । जीवंस्तु ममात्मा भद्रकंप्राप्नोति वक्ष्यमाणनानाविधोपायाश्रयणेन । तस्मात्प्राणान्धरिष्यामि । यतोमयिजीवतिसति संगमः रामादीनांध्रुवः संभावितइत्यर्थः । काव्यलिङ्गमत्रालङ्कारः ॥ तीर्थस्तु अत्रजीवितसंगमइतिपाठंकल्पयामास । **स०** जीवितसंगमः

[पा०] १ ख. छ.—ञ. सम्यग्लिङ्गिनं. २ क. ग.—ट. इदमप्यृषिभिर्दृष्टं. ३ झ. ञ. ट. चिररात्राय. ४ क. च. छ. ज. नतुप्रति. ५ च. छ. ज. ञ. मदृष्ट्वायतेक्षणां. ६ क. ग. ङ.—ञ. यदितुप्रति. घ. यदिप्रतिगमिष्यामि. ७ ग. ङ. झ. ञ. ट. सहितस्सर्वैः. क. घ. च. छ. ज. सहितैः. ८ ङ. झ. ञ. ट. जीवन्प्राप्नोतिभद्रकं. ९ ग. घ. च. छ. ज. त्प्राणान्हिरक्ष्यामो. १० ख. झ. ञ. ट. ध्रुवोजीवति. क. ध्रुवंजीवति. ठ. श्रेयोजीवितसंगमः. ११ ङ. झ. ट. धारयन्बहु. १२ इदमर्धं ङ.—ट. पाठेषुदृश्यते. १३ क. घ. च. छ. ज. ञ. रामपत्नीहतायेनप्रत्याचीर्णं. १४ ख. घ. ञ. अथचैनं.

इति [1]चिन्तां समापन्नः सीतामनधिगम्य ताम् ॥ ध्यानशोकपरीतात्मा चिन्तयामास वानरः ॥ ५
याव[2]त्सीतां हि पश्यामि रामपत्नीं यशस्विनीम् ॥ तावदेतां पुरीं लङ्कां विचिनोमि पुनःपुनः ॥ ५
संपातिवचनाच्चापि रामं यद्यानयाम्यहम् ॥ अपश्यन्राघवो भार्यां निर्दहेत्सर्ववानरान् ॥ ५३ ॥
इहैव नियताहारो वत्स्यामि नियतेन्द्रियः ॥ न मत्कृते विनश्येयुः सर्वे ते नरवानराः ॥ ५४ ॥
अशोकवनिका [3]चेयं दृश्यते या महाद्रुमा ॥ [4]इमामधिगमिष्यामि न हीयं विचिता मया ॥ ५५
[5]वसुरुद्रांस्तथाऽऽदित्यानश्विनौ [6]मरुतोपि च ॥ नमस्कृत्वा गमिष्यामि रक्षसां शोकवर्धनः ॥ ५६
जित्वा तु [7]राक्षसान्सर्वानिक्ष्वाकुकुलनन्दिनीम् ॥ संप्रदास्यामि रामाय [8]यथा सिद्धिं तपस्विने ॥ ५
स मुहूर्तमिव ध्यात्वा [9]चिन्तावग्रथितेन्द्रियः ॥ उदतिष्ठन्[10]महातेजा हनूमान्मारुतात्मजः ॥ ५८ ॥

नमोस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै ॥
नमोस्तु रुद्रेन्द्रयमानिलेभ्यो [11]नमोस्तु [12]चन्द्रार्कमरुद्गणेभ्यः ॥ ५९ ॥

[13]स तेभ्यस्तु [14]नमस्कृत्य सुग्रीवाय च मारुतिः ॥ दिशः सर्वाः समालोक्य [15]ह्यशोकवनिकां प्रति ॥ ६
स गत्वा मनसा पूर्वमशोकवनिकां शुभाम् ॥ उत्तरं चिन्तयामास वानरो मारुतात्मजः ॥ ६१
ध्रुवं तु रक्षोबहुला भविष्यति वनाकुला ॥ अशोकवनिका [16]चिन्त्या सर्वसंस्कारसंस्कृता ॥ ६२ ॥
रक्षिणश्चात्र विहिता नूनं रक्षन्ति पादपान् ॥ भगवानपि [17]सर्वात्मा नातिक्षोभं [18]प्रवाति वै ॥ ६३

पशुं अजमिव । " इमं पशुं पशुपते ते अद्य बध्नाम्यग्ने " इति श्रुतेः । अनेन सुप्रापत्वमुक्तं ॥ ५० ॥ प्रथमं चिन्ता विचारः । ततो ध्यानं ज्ञातव्यविषयनिरंतरप्रत्ययः । ततश्चिन्तेति दुरन्तचिन्तोच्यते ॥५१॥ चिन्ताप्रकारमाह—यावदिति ॥ ५२ ॥ यदि पूर्वमेव संपातिवचनप्रामाण्येन रामोत्रानीयेत तदा महान्प्रमादः स्यादित्याह—संपातीति ॥ ५३—५६ ॥ सिद्धिं तपःफलं ॥ ५७—५८ ॥ " सर्वान्देवान्नमस्यन्ति रामस्यार्थे यशस्विनः " इत्युक्तरीत्या अभिमतलाभत्वरया सर्वान्नमस्करोति—नमोस्त्विति॥५९॥ स तेभ्यस्त्वित्यादिश्लोकद्वयमेकान्वयं ॥ नमस्कृत्यालोकनरूपक्रियाभेदात्तच्छब्दद्वयं । नमस्कृत्य अशोकवनिकां प्रति उद्दिश्य सर्वा दिशस्समालोक्य अशोक निकां परिच्छेत्तुं तस्यास्सर्वा दिशो दृष्ट्वा तां स मन गत्वा उत्तरं चिन्तयामासेति योजना । अशोकश संक्षेपेव्याख्यातः ॥ ६०—६१ ॥ रक्षोबहुला रक्ष राक्षसबहुला । वनाकुला जलावृता द्रुमषण्डमण्डि वा । सर्वसंस्कारैः कर्षणतृणनिरसनादिभिः संस्कृ कृतातिशयाधाना । अशोकवनिका ध्रुवं चिन्त्य भविष्यति । अवश्यमन्वेषणीया भवेदित्यर्थः ॥ ६२ अत्र अशोकवनिकायां । विहिताः नियुक्ताः । सर्वा सर्वमाप्नोतीति सर्वात्मा वायुः । सोपि नातिक्षो प्रवाति । अतिकम्पनपूर्वकं नात्र संचरतीत्यर्थः ॥६३

जीवितेनसंगमः श्रेयः श्रेयस्साधनं ॥ ४७ ॥ **ति०** चिन्तया विग्रथितानि संबद्धानि व्याकुलानि इन्द्रियाणियस्यसः ॥ ५८ **ती०** सुग्रीवायचेत्यत्र नमश्चक्रइति करोतेर्विपरिणामः । अशोकवनिकांगतः मनसेतिशेषः ॥ अशोकवनिकांप्रतीतिपाठे सम लोकयदित्यालोकयतेर्विपरिणामः । अन्यथा तच्छब्दोतिरिच्यते ॥ **ति०** स्वामित्वात्सूर्यांशत्वाच्च सुग्रीवनतिः ॥ **ति०** अ

[पा०] १ क. ग. ङ. च. झ. ञ. ट. चिन्तासमापन्नः. २ क. ख. ङ. झ. ञ. ट. त्सीतांन. ग. च. छ. ज. त्सीतां ३ क.—ट. चापिमहतीयंमहाद्रुमा. ४ ख. इमामभि. ५ क. ग.—ट. वसून्रुद्रान्. ६ क. ञ. मरुतोपिवा. ७ क ग.—ट. राक्षसान्देवीमिक्ष्वाकु. ८ घ.—ट. सिद्धीमिव. क. स्वसिद्धिमिवयोगिने. ९ क. ग. चिन्तयाग्रथिते. ख. ङ.— चिन्ताविग्रथिते. १० क. ग. ङ.—ट. न्महाबाहुः. ११ ग. घ. नमश्च. १२ ङ. झ. ञ. ट. चन्द्राग्नि. १३ ग. इतितेभ्यो ऽञ्जलिंकृत्वा. क. इतितेभ्यो. ञ. सतुतेभ्यो. १४ क. ख. ङ.—झ. ट. नमस्कृत्वा. १५ च. छ. ज. ञ. सोशोकवनिकांगत ख. घ. ङ. झ. ट. सोशोकवनिकांप्रति. १६ ङ.—ट. पुण्या. १७ ङ.—ट. विश्वात्मा. १८ घ. ञ. ट. प्रवात्यसौ ख. झ. प्रवायति.

क्षिप्तोऽयं मयाऽऽत्मा च रामार्थे रावणस्य च ॥ [1]सिद्धिं मे संविधास्यन्ति देवाः सर्षिगणास्त्विह ॥६४॥
ह्मा स्वयंभूर्भगवान्दे[2]वाश्चैव दिशन्तु मे ॥ सिद्धिमग्निश्च वायुश्च पुरुहूतश्च वज्रभृत् ॥ ६५ ॥
रुणः पाशहस्तश्च सो[3]मादित्यौ तथैव च ॥ अश्विनौ च महात्मानौ मरुतः [4]शर्व एव च ॥ ६६ ॥
सि[5]द्धिं सर्वाणि भूतानि भूतानां चैव यः प्रभुः ॥ दा[5]स्यन्ति मम [6]ये चान्ये ह्यदृष्टाः पथिगोचराः ॥ ६७ ॥
[7]तदुन्नसं पाण्डुरदन्तमव्रणं शुचिस्मितं पद्मपलाशलोचनम् ॥
द्रक्ष्ये तदार्यावदनं कदान्वहं प्रसन्नताराधिप[8]तुल्यदर्शनम् ॥ ६८ ॥
क्षुद्रेण [9]पापेन [10]नृशंसकर्मणा सुदारुणालङ्कृतवेषधारिणा ॥
बलाभिभूता ह्यबला तपस्विनी कथं नु मे दृष्टिपथेऽद्य सा भवेत् ॥ ६९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

चतुर्दशः सर्गः ॥ १४ ॥

अशोकवनिकाप्राकारावस्थानेन वनरामणीयकावलोकनपूर्वकं वनंप्रविष्टेन शाखाचालनात्पुष्पादिशातनेन वृक्षाद्वृक्षान्तरो त्प्लवनेन सर्वतः सीतांचिन्वताहनुमता मध्येवनं काञ्चनवेदिकामण्डलमध्यवर्तिन्याः काञ्चनवृक्षपरिवृतायाः कस्याश्चित्का ञ्चनमयशिंशुपाया दर्शनं ॥ १ ॥ तद्देशे रमणीयतरनदींप्रति सन्ध्योपास्त्याद्यर्थं सीतायाआगमनसंभावनेन तद्दिदृक्षया शिंशुपारोहणेन पर्णनिबिडविटपाग्रे निलीयावस्थानं ॥ २ ॥

स मुहूर्तमिव ध्यात्वा मनसा चाधिगम्य ताम् ॥ [11]अवप्लुतो महातेजाः प्राकारं तस्य वेश्मनः ॥ १ ॥
स तु संहृष्टसर्वाङ्गः प्राकारस्थो महाकपिः ॥ पुष्पिताग्रान्वसन्तादौ ददर्श विविधान्द्रुमान् ॥ २ ॥

एवंभूतप्रदेशे भवतः कथं गमनमित्याशङ्क्याह— संक्षिप्त इति ॥ मया अयमात्मा देहः । रामार्थे रामप्रयोजनसिद्ध्यर्थं । रावणस्य चार्थे रावणादृश्यत्वार्थं च । संक्षिप्तः अल्पीकृतः । एवं मया कार्यानुकूलो यत्नः कृतः कार्यसिद्धिं तु देवा विधास्यन्तीत्याह— सिद्धिमिति । संविधास्यन्ति ददत्वित्यर्थः ॥६४—६५॥ शर्वः रुद्रः ॥ ६६ ॥ उक्तमर्थं पुनः संग्रहेणाह— सिद्धिं सर्वाणि भूतानीति ॥ भूतानां प्रभुः उक्तब्रह्मरुद्राद्यधिपतिः । परिशेषाद्विष्णुरित्यवगम्यते । पन्थाः गोचरः येषां ते पथिगोचराः मार्गवर्तिनः ॥ ६७ ॥ तत् तस्मात्कारणात् । उन्नता नासिका यस्य तदुन्नसं । "उपसर्गाच्च" इति समासान्तोच्प्रत्ययः नसादेशश्च । अव्रणं अनवद्यं । तत् अभिज्ञातव्यत्वेन रामेण निवेदितं ॥ ६८ ॥ सुदारुणालंकृतवेषधारिणा सुदारुणत्वेऽप्यापातप्रसन्नवेषधारिणा ॥ ६९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रयोदशः सर्गः ॥ १३ ॥

इवशब्दो वाक्यालंकारे । प्राकारं अशोकवनिकाप्राकारं । तस्य वेश्मनः रावणस्य गृहात् । अवप्लुतः प्राप्तः ॥ १ ॥ संहृष्टसर्वाङ्गः पुलकितसर्वाङ्गः ।

ध्रुवंरक्षोबहुलेत्युत्प्रेक्षया चन्द्रास्तःसूचितः । अन्यथा तत्प्रकाशेन निश्चयएवस्यात् ॥ ६२ ॥ **शि०** रामार्थेरावणस्यवनिकायां अयंममात्मादेहःसंक्षिप्तः प्रवेशितः । मेसिद्धिंतु सर्षिगणादेवादिशंतु । किंच संक्षिप्तशब्दस्यलघूकृतइत्यर्थः । रावणस्य समासघटकीभूतार्थेन्वयः । सविशेषणानामित्यस्यतु नविषयः । अर्थस्यविशेष्यत्वात् । रावणसंबद्धार्थशब्दस्यविनाशपरत्वं । वनिकानिरीक्षणार्थमित्यध्याहारोवा ॥ **ति०** रावणस्य अर्थेइत्यनुकर्षः । रावणकर्तृकदर्शनपरिहारायेत्यर्थः ॥ ६४ ॥ **ति०** भूतानांप्रभुः प्रजापतिः । दास्यन्ति । तेषामप्यस्यार्थस्येष्टत्वादितिभावः । पूर्वंप्रार्थना इदानींतु तन्निश्चयः ॥ ६७ ॥ इतित्रयोदशः सर्गः ॥१३॥

स० मुहूर्तमिवध्यात्वा मुहूर्तंध्यात्वेव ॥ १ ॥ **शि०** वसन्तादौचैत्रे । किंच वसन्तआदीयते नित्यंप्रतीयते यस्यांतस्यांभूमौ ॥

[**पा०**] १ ङ. झ. ट. सिद्धिंदिशन्तुमेसर्वे. क. कार्यसिद्धिंप्रयच्छन्ति. २ ङ. झ. ञ. ट. न्देवाश्चैवतपस्विनः. क. च. छ. ज. न्वेदाश्चैव. ३ क. सोमसूर्यौ. ख. इन्द्रादित्यौ. ४ झ. ञ. सर्वएवच. ५ क. ग. च. छ. ज. दास्यन्तिसिद्धिं. ६ ग. च. छ. ज. येचान्येभूताश्च. घ. ङ. झ. ञ. येचान्येप्यदृष्टाः. ७ क. च. छ. ज. समुन्नसं. ८ ङ. झ. ञ. तुल्यवर्चसं. ९ ङ.—ट हीनेन. १० नृशंसमूर्तिना. ११ क. अवप्लुत्य.

सालानशोकान्भव्यांश्च चम्पकांश्च सुपुष्पितान् ॥ उद्दालकान्नागवृक्षांश्चूतान्कपिमुखानपि ॥ ३ ॥
[1]अथाम्रवणसंछन्नां लताशतसमावृताम् ॥ ज्यामुक्त इव नाराचः पुप्लुवे वृक्षवाटिकाम् ॥ ४ ॥
स प्रविश्य विचित्रां तां वि[2]हगैरभिनादिताम् ॥ राजतैः काञ्चनैश्चैव पादपैः सर्वतो वृताम् ॥ ५ ॥
विहगैर्मृगसङ्घैश्च विचित्रां चित्रकाननाम् ॥ उदितादित्यसंकाशां ददर्श ह[3]नुमान्कपिः ॥ ६ ॥
वृतां नानाविधैर्वृक्षैः पुष्पोपगफलोपगैः ॥ कोकिलैर्भृङ्गराजैश्च मत्तैर्नित्यनिषेविताम् ॥ ७ ॥
[4]प्रहृष्टमनुजे काले [5]मृगपक्षि[6]समाकुले ॥ मत्तबर्हिणसंघुष्टां नानाद्विजगणायुताम् ॥ ८ ॥
मार्गमाणो वरारोहां राजपुत्रीमनिन्दिताम् ॥ सुखप्रसुप्तान्विहगान्बोधयामास वानरः ॥ ९ ॥
उत्पतद्भिर्द्विजगणैः प[7]क्षैः सालाः [8]समाहताः ॥ अनेकवर्णा विविधा मुमुचुः पुष्पवृष्टयः ॥ १० ॥
पुष्पावकीर्णः शुशुभे हनुमान्मारुतात्मजः ॥ अशोकवनिकामध्ये यथा पुष्पमयो गिरिः ॥ ११ ॥
दि[9]शः सर्वाः प्रधावन्तं वृक्षषण्डगतं कपिम् ॥ दृष्ट्वा सर्वाणि भूतानि वसन्त इति मेनिरे ॥ १२ ॥
वृक्षेभ्यः पतितैः पुष्पैरवकीर्णा पृथग्विधैः ॥ रराज वसुधा तत्र प्रमदेव वि[10]भूषिता ॥ १३ ॥
तरस्विना ते तरवस्त[11]रसाऽभिप्रकम्पिताः ॥ कुसुमानि विचित्राणि ससृजुः [12]कपिना तदा ॥ १४ ॥
निर्धूतपत्रशिखराः शीर्ण[13]पुष्पफलद्रुमाः ॥ निक्षिप्तवस्त्राभरणा धूर्ता इव पराजिताः ॥ १५ ॥
हनूमता वेगवता कम्पितास्ते नगोत्तमाः ॥ [14]पुष्पपर्णफलान्याशु मुमुचुः पुष्पशालिनः ॥ १६ ॥
विहङ्गसङ्घैर्हीनास्ते स्कन्धमात्राश्रया द्रुमाः ॥ बभूवुरगमाः सर्वे मारुतेनेव निर्धुताः ॥ १७ ॥
[15]निर्धूतकेशी युवतिर्यथा मृदितवर्णका ॥ नि[16]ष्पीतशुभदन्तोष्ठी नखैर्दन्तैश्च विक्षता ॥ १८ ॥

वसन्तादौ “ पौर्णमास्या मासान् संपाद्य ” इति पक्षमनुसृत्य फाल्गुनपौर्णमासीप्रपूर्वदिनत्वेन वसन्तादावित्युक्तं ॥ २ ॥ सालान् सर्जकान् । भव्यान् शुभानित्यशोकविशेषणं । यद्वा भवं रुद्रमर्हन्तीति भव्यान् रुद्रप्रियपुष्पान् वृक्षविशेषान् । उद्दालकान् बहुवारकान् । नागवृक्षान् नागकेसरवृक्षान् । कपिमुखान् मर्कटकान् ॥ ३—४ ॥ काञ्चनैः काञ्चनमयैरिव स्थितैः ॥ ५ ॥ चित्रकाननां चित्रावान्तरवनां । चम्पकवनं चूतवनमित्येवंविधवनवतीं ॥ ६ ॥ पुष्पाण्युपगच्छन्तीति पुष्पोपगाः पुष्पसंपन्नाः तैः । फलोपगैः फलसंपन्नैः ॥ ७ ॥ प्रहृष्टमनुजे काले वसन्ते । वसन्तस्य प्रचुरमन्मथत्वात्प्रहृष्टमनुजत्वं ॥ ८—९ ॥ सालाः वृक्षाः । “ अनोकहः कुटस्सालः ” इत्यमरः । पुष्पवृष्टयः पुष्पवृष्टीः ॥ १०—१४ ॥ धूर्ताः अक्षधूर्ताः ॥ १५—१६ ॥ स्कन्धमात्राश्रयाः पुष्पादीनामनाश्रयाइत्यर्थः । अतएव अगमाः अगम्याः असेव्या इत्यर्थः । निर्धुताः कम्पिताः ॥ १७ ॥ मृदितवर्णका मृष्टाङ्गरागा । “अङ्गरा-

ति० वसन्तादौ वसन्तादिसर्वर्तुषु संनिहितैःपुष्पैःपुष्पिताग्रान् ॥ २ ॥ **ति०** कपिमुखान् कपिमुखाकारफलवतः । चूतविशेषणमेतत् ॥ ३ ॥ राजतैः रजतादिसंस्कृतैस्तद्वर्णैर्वा ॥ ५ ॥ **ति०** उदितादित्यसंकाशां पुष्पैरितिशेषः ॥ ६ ॥ **ति०** काले सर्वस्मिन् । मृगादीन्मदेनाकुलयति तां ॥ ७ ॥ **ति०** सर्वाभिधावन्तमिति संधिरार्षः । वसन्तइतिमेनिरइति अन्यस्येहवनेऽशक्यप्रवेशत्वाद्वसन्तएव वृक्षसंचारोचितंकपिरूपमास्थाय चरतीतिमेनिरइत्यर्थः । एतेन द्रष्टॄणांतस्मिन्विमतिनिवृत्तिरीश्वरानुग्रहादिति सूचितं ॥ **स०** वसन्तइतिमेनिरे सर्ववृक्षपत्रादिशातनात् ‘ वसन्तेसर्वसस्यानां जायतेपत्रशातनं ’ इतिवचनात् पुष्पावकीर्णइत्युक्तिस्वारस्यात् ॥ १२ ॥ **ति०** निपीतः शुभदन्तयुक्तओष्ठोयस्यास्सा । **स०** निष्पीताः अत्यन्तमन्तर्गमिताः आच्छादिताइति

[पा०] १ ख. झ. ञ. ट. तथाम्रवणसंपन्नाँल्लताशतसमन्वितान्. ङ. च. छ. ज. तथाम्रवणसंछन्नाँल्लतागृहसमावृतान्. २ ङ. च. ञ. ट. विहङ्गैः. ३ ङ. झ. ञ. ट. हनुमान्बली. ४ ङ. झ. प्रहृष्टमनुजां. ५ घ. बहुपक्षि. ख. मृगद्विजमदाकुलां. ६ ञ. समाकुलां. क. मदाकुले. ङ. झ. ट. मदाकुलां. ७ ङ. झ. ट. पक्षैर्वातैः. ८ ञ. समावृताः. ९ च. छ. ज. ञ. सर्वादिशोऽभिधावन्तं. ख. ग. सर्वादिशोविधावन्तं. घ. ङ. झ. ट. दिशः सर्वाभिधावन्तं. १० ग. सुभूषिता. ११ ङ. झ. ट. स्तरसाबहुकंपिताः. घ. स्तरसाहिप्रकंपिताः. १२ क. च. छ. ज. कपिनोद्धताः. १३ ग. जीर्णपत्रफल. ञ. शीर्णपत्र. १४ ङ. झ. ट. पुष्पपत्र. १५ ग. घ. ङ. झ. ञ. ट. विधूत. १६ ङ. झ. ञ. ट. निपीत.

ा लाङ्गूलहस्तैश्च[1] चरणाभ्यां च मर्दिता ॥ बभूवाशोकवनिका[2] प्रभग्नवरपादपा[3] ॥ १९ ॥
ालतानां दामानि व्यधमत्तरसा कपिः ॥ यथा प्रावृषि[4] विन्ध्यस्य मेघजालानि मारुतः ॥ २० ॥
तत्र मणिभूमीश्च राजतीश्च मनोरमाः ॥ तथा काञ्चनभूमीश्च ददर्श[5] विचरन्कपिः ॥ २१ ॥
ीश्च विविधाकाराः पूर्णाः परमवारिणा ॥ महार्हैर्मणिसोपानैरुपपन्नास्ततस्ततः ॥ २२ ॥
ाप्रवालसिकताः स्फाटिकान्तरकुट्टिमाः ॥ काञ्चनैस्तरुभिश्चित्रैस्तीरजैरुपशोभिताः ॥ २३ ॥
ुपद्मोत्पलवनाश्चक्रवाकोपकूजिताः[7] ॥ नत्यूहरुतसंघुष्टा हंससारसनादिताः ॥ २४ ॥
र्घाभिर्द्रुमयुक्ताभिः सरिद्भिश्च समन्ततः ॥ अमृतोपमतोयाभिः शिवाभि[8]रुपसंस्कृताः[9] ॥ २५ ॥
ाशतैरवतताः संतानकसमावृताः[10] ॥ नानागुल्मावृतघनाः[11] करवीरकृतान्तराः ॥ २६ ॥
ीऽम्बुधरसंकाशं प्रवृद्धशिखरं गिरिम् ॥ विचित्रकूटं कूटैश्च सर्वतः परिवारितम् ॥ २७ ॥
लागृहैरवततं नानावृक्षैः[12] समावृतम् ॥ ददर्श हरिशार्दूलो रम्यं जगति पर्वतम्[13] ॥ २८ ॥
र्श च नगात्तस्मान्नदीं निपतितां कपिः ॥ अङ्कादिव समुत्पत्य प्रियस्य पतितां प्रियाम् ॥ २९ ॥
े निपतिताग्रैश्च पादपैरुपशोभिताम् ॥ वार्यमाणामिव क्रुद्धां प्रमदां प्रियबन्धुभिः ॥ ३० ॥
राावृत्ततोयां[14] च ददर्श स महाकपिः ॥ प्रसन्नामिव कान्तस्य कान्तां पुनरुपस्थिताम् ॥ ३१ ॥
याादूरात्स पद्मिन्यो नानाद्विजगणायुताः[16] ॥ ददर्श हरिशार्दूलो हनुमान्मारुतात्मजः ॥ ३२ ॥
त्रिमां दीर्घिकां चापि[17] पूर्णां शीतेन वारिणा ॥ मणिप्रवरसोपानां मुक्तासिकतशोभिताम् ॥ ३३ ॥
विधैर्मृगसङ्घैश्च विचित्रां चित्रकाननाम् ॥ प्रासादैः सुमहद्भिश्च [18]निर्मितैर्विश्वकर्मणा ॥ ३४ ॥
ननैः कृत्रिमैश्चापि सर्वतः समलङ्कृताम् ॥ ३५ ॥
केचित्पादपास्तत्र पुष्पोपगफलोपगाः ॥ सच्छत्राः सवितर्दीकाः सर्वे सौवर्णवेदिकाः ॥ ३६ ॥

समालम्भो वर्णकश्च विलेपनं " इत्युक्तेः । निष्पी-
ुभदन्तोष्ठी निष्पीततयाशुभदन्ततुल्योष्ठी ॥ १८—
॥ लतानां दामानि प्रतानानि ॥ २०—२३ ॥
यूहाः दात्यूहाः ॥ २४—२५ ॥ संतानकाः
ल्पवृक्षास्तैस्समावृताः । घनाः निबिडाः । नानागु-
ावृताश्च ताः घनाश्चेति समासः । करवीरकृतान्त-
करवीरैः कृतविशेषाः ॥ २६—२७ ॥ जगति
के । रम्यं एतत्सदृशं रम्यं किंचिन्नास्तीत्यर्थः ।
नं ददर्शेत्यन्वयः ॥ २८ ॥ अथ नद्याः कुपितया
निर्गतया सखीसान्त्वनेन पुनरागतया साम्यं दर्शयति
—ददर्श चेति ॥ २९—३० ॥ पुनरावृत्ततोयां
वृक्षाग्रप्रतिहत्या पुनःपर्वताभिमुखतोयप्रवाहां । उप-
माने उपमेये चान्वयाय ददर्शेति पदद्वयं ॥ ३१ ॥
तस्य पर्वतस्य । पद्मिन्यः पद्मिनीः ॥ ३२ ॥ कृत्रिमां
क्रियया निर्वृत्तां निर्मितामित्यर्थः ॥ ३३—३५ ॥
सच्छत्राः सवितानाइत्यर्थः । सवितार्दिकाः सवेदिकाः ।
सौवर्णवेदिकाः वितर्दिकारोहणार्थं सुवर्णमयसोपान-

त् । शुभदन्ता याभ्यांतौ ओष्ठौयस्यास्सा ॥ १८ ॥ **रामानु०** जगतिपर्वतं । जगतीशब्दस्यह्रस्वभावआर्षः । जगती भूमिः
तियावत् । तत्प्राधान्याज्जगतिपर्वतमित्युक्तं । यद्वा जगतिपर्वतइतिसंज्ञा ॥ **ति०** जगति लोकेरम्यं सुन्दरवस्तुभ्योपि परम-
रं । तीर्थस्तु—जगतीपर्वतमित्यर्थः । मृत्पर्वतइतियावदितिव्याचक्षाण उपेक्ष्यएव । **शि०** पर्वतं पर्वभिः अनेकग्रन्थिभिः

[पा०] १ च.—ञ. हस्तैस्तु. २ ङ. झ. ञ. ट. तयैवाशोक. ३ ख. ङ. च. झ. ञ. ट. वनपादपा. ४ ङ. झ. ञ. ट.
पिवेगेन. च. छ. ज. प्रावृट्प्रवृद्धानि. ५ ख. ग. ङ. ञ. ट. विचरन्ददर्शकपिः. ६ ग. घ. ङ. झ. ञ. ट. बुद्धपद्मोत्पल.
.—ट. श्चक्रवाकोपशोभिताः. ८ ख. छ. ज. शुभाभिः. ९ क. रुपसंवृताः. घ. रभिसंस्कृताः. १० क.—घ. च. छ.
संतानकसमावृताः. ११ क. ग.—ट. वनाः. १२ ङ. झ. ञ. ट. वृक्षसमावृतं. १३ क. रजतपर्वतं. १४ घ. तोयांतां.
क. अदूरात्तत्र. १६ क. च. छ. ज. गणावृताः. १७ ङ.—ज. वापि. १८ ख. ञ. निर्मितांविश्व.

लताप्रतानै[1]र्बहुभिः पर्णैश्च बहुभिर्वृताम् ॥ काञ्चनीं शिंशुपामेकां ददर्श ह[2]नुमान्कपिः ॥
वृतां हे[3]ममयीभिस्तु वेदिकाभिः समन्ततः ॥ ३७ ॥
सोपश्यद्भूमिभागांश्च [4]गर्तप्रस्रवणानि च ॥ सुवर्णवृक्षानपरान्ददर्श शि[5]खिसन्निभान् ॥ ३८ ॥
तेषां द्रुमाणां प्रभया मेरोरिव दि[6]वाकरः ॥ अमन्यत तदा वीरः काञ्चनोस्मीति [7]वानरः ॥ ३९
[8]तां काञ्चनैस्तरुगणैर्मारुतेन च वीजिताम् ॥ किङ्किणीशतनिर्घोषां दृष्ट्वा विस्मय[9]मागमत् ॥ ४
स पुष्पिताग्रां [10]रुचिरां तरुणाङ्कुरपल्लवाम् ॥ तामारुह्य [11]महाबाहुः शिंशुपां पर्णसंवृताम् ॥ ४१ ॥
इतो द्रक्ष्यामि वैदेहीं रामदर्शनलालसाम् ॥ इतश्चेतश्च दुःखार्तां सं[12]पतन्तीं यदृच्छया ॥ ४२ ॥
अशोकवनिका चेयं दृढं रम्या दुरात्मनः ॥ [13]चम्पकैश्चन्दनैश्चापि बकुलैश्च विभूषिता ॥ ४३ ॥
इयं च नलिनी रम्या द्विजसङ्घनिषेविता ॥ इमां सा [14]राममहिषी नूनमेष्यति जानकी ॥ ४४ ॥
सा रामा [15]राममहिषी राघवस्य प्रिया [16]सती ॥ वनसंचारकुशला [17]नूनमेष्यति जानकी ॥ ४५ ॥
अथवा मृगशाबाक्षी वनस्यास्य विचक्षणा ॥ वनमेष्यति [18]सार्येह रामचि[19]न्तानुकर्शिता ॥ ४६ ॥
रामशोकाभिसंतप्ता सा देवी वामलोचना ॥ [20]वनवासे रता नित्यमेष्यते वनचारिणी ॥ ४७ ॥
वनेचराणां सततं नूनं स्पृहयते [21]पुरा ॥ रामस्य दयिता [22]भार्या जनकस्य सुता सती ॥ ४८ ॥
संध्याकालमनाः श्यामा [23]ध्रुवमेष्यति [24]जानकी ॥ नदीं चेमां शि[25]वजलां सन्ध्यार्थे वरवर्णिनी ॥४९
तस्याश्चाप्यनुरूपेयमशोकवनिका शुभा ॥ शुभा या पार्थिवेन्द्रस्य पत्नी रामस्य संमता ॥ ५० ॥
यदि जीवति सा देवी ताराधिपनिभानना ॥ आगमिष्यति साऽवश्यमिमां शि[26]वजलां नदीम् ॥५१

वेदिकायुक्ताः ॥ ३६—३९ ॥ काञ्चनैस्तरुगणैः उपलक्षितां तां शिंशुपां । किङ्किणीशतनिर्घोषां किङ्किण्यः क्षुद्रघण्टिकाः तासां निर्घोषो यस्याः । यद्वा किङ्किणीभिः शतमनन्ताः निर्घोषा यस्याः सा तां ॥ ४० ॥ स पुष्पिताग्रामित्याद्यासर्गसमाप्त्येकं वाक्यं ॥ ४१ ॥ इतो द्रक्ष्यामि इमामारुह्य द्रक्ष्यामि । ल्यब्लोपे पञ्चमी ॥ ४२ ॥ दुरात्मनः रावणस्य ॥ ४३—४५ ॥ अथवेति पक्षान्तरे । विचक्षणा तापापनोदनचतुरा । अस्य वनस्य अशोकवनस्य इह वनं नलिनीपरिसरवर्तिवनं । रामचिन्तानुकर्शि सती एष्यति । रामविश्लेषजनिततापापनोदनार्थमे द्वनप्रदेशमागमिष्यतीत्यर्थः । सा आर्येतिपदच्छे ॥ ४६ ॥ एष्यते एष्यति ॥ ४७ ॥ वनेचरा स्पृहयते वनेचरेभ्यस्स्पृहयते ॥ ४८ ॥ संध्याकाले म यस्यास्सा संध्याकालमनाः संध्योपासनतत्परेत्यर्थः संध्यार्थे एष्यति प्रतिदिनमितिशेषः ॥ ४९—५१

तन्यतेवर्ध्यते सतं ॥ २८ ॥ शि० मेरोरिव द्रुमाणांप्रभयोपलक्षितोमहाकपिः अहंकाञ्चनोस्मीत्यमन्यत ॥ ३९ ॥ ति० सन्ध दिनराञ्योःसन्धिरूपानुष्ठानकालोयस्यकर्मणस्तत्रमनोयस्यास्सातथा । सन्ध्यार्थे सन्ध्याकालक्रियमाणस्नानाद्यर्थे । पूर्ववदेवात्राप क्तस्यैवार्थस्यावृत्तिः । रात्रिशेषे हनुमतोस्यवचसःप्रवृत्तेः सन्ध्याशब्देनात्रप्रातःकालोविवक्षितः । तत्रकर्तव्यस्नानादौचास्त्येवस्त्री मप्यधिकारइति कथंस्त्रीणांसन्ध्यावन्दनमितिपरास्तंवेदितव्यं । किंच सम्यग्भगवद्ध्यानस्यैव सन्ध्यापदार्थत्वेनास्त्येव तत्रस्त्रियाअ कारः । गायत्रीमन्त्रेण तदर्थस्मरणपूर्वकध्यानेतु द्विजस्यैवाधिकारइत्यन्यत् ॥ ४९ ॥ इतिचतुर्दशः सर्गः ॥ १४ ॥

[पा०] १ घ. च. छ. ज. लतावितानैः. २ क. ङ.—ट. समहाकपिः. ३ च. हेममयीभिश्च. ४ ङ. झ. ञ. ट. नग स्रवणानिच. ५ घ. गिरिसंनिभान्. ६ क. घ. ङ. ट. महाकपिः. ७ ङ. झ. ट. सर्वतः. ८ ग. ङ. झ. ञ. ट. तान्काञ्चनान क्षगणान्मारुतेनप्रकंपितान् । किङ्किणीशतनिर्घोषान्दृष्ट्वा. ९ क. च. छ. ज. मागतः. १० क. च. छ. ज. हनुमांस्तरुणाङ्कु ११ क. ग.—ट. महावेगः. १२ झ. ञ. संतपन्तीं. १३ ग. ङ.—ट. चन्दनैश्चंपकैश्चापि. १४ क. ख. ग. ङ. च. छ. ञ. ट. राजमहिषी. १५ ङ.—ट. राजमहिषी. १६ ख.—ङ. ञ. ट. सदा. १७ घ.—ट. ध्रुवं. १८ ङ. झ. ञ. साध्येह. घ. साध्वीह. १९ ङ.—ट. सुकर्शिता. २० ख.—ढ. वनवासरता. २१ क. सदा. २२ ङ. झ. ञ. चार्या. २३ नूनं. २४ ग. मैथिली. २५ ख. घ.—ट. शुभजलां. क. शीतजलां. २६ ख. ग. ङ.—ट, शीतजलां.

एवं तु मत्वा हनुमान्महात्मा प्रतीक्षमाणो मनुजेन्द्रपत्नीम् ॥
अवेक्षमाणश्च ददर्श सर्वं सुपुष्पिते पर्णघने निलीनः ॥ ५२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

पञ्चदशः सर्गः ॥ १५ ॥

शिंशुपाविटपाग्रावस्थानेनैव सर्वतश्चक्षुषीचालयताहनुमताऽत्यद्भुताकारचैत्यप्रासादगताया ग्रन्थकृदुपवर्णितगुणावस्थो-
लक्षितायाःसीतायाअवलोकनं ॥ १ ॥ अथबहुहेतुभिस्तस्याःसीतात्वनिर्धारणं ॥ २ ॥

वीक्षमाणस्तत्रस्थो मार्गमाणश्च मैथिलीम् ॥ अवेक्षमाणश्च महीं सर्वां तामन्ववैक्षत ॥ १ ॥
न्तानकलताभिश्च पादपैरुपशोभिताम् ॥ दिव्यगन्धरसोपेतां सर्वतः समलङ्कृताम् ॥ २ ॥
ां स नन्दनसंकाशां मृगपक्षिभिरावृताम् ॥ हर्म्यप्रासादसंबाधां कोकिलाकुलनिस्वनाम् ॥ ३ ॥
ाञ्चनोत्पलपद्माभिर्वापीभिरुपशोभिताम् ॥ बह्वासनकुथोपेतां बहुभूमिगृहायुताम् ॥ ४ ॥
र्वर्तुकुसुमै रम्यां फलवद्भिश्च पादपैः ॥ पुष्पितानामशोकानां श्रिया सूर्योदयप्रभाम् ॥ ५ ॥
दीप्तामिव तत्रस्थो मारुतिः समुदैक्षत ॥ निष्पत्रशाखां विहगैः क्रियमाणामिवासकृत् ॥ ६ ॥
विनिष्पतद्भिः शतशश्चित्रैः पुष्पावतंसकैः ॥ आमूलपुष्पनिचितैरशोकैः शोकनाशनैः ॥ ७ ॥
ुष्पभारातिभारैश्च स्पृशद्भिरिव मेदिनीम् ॥ कर्णिकारैः कुसुमितैः किंशुकैश्च सुपुष्पितैः ॥ ८ ॥
 देशः प्रभया तेषां प्रदीप्त इव सर्वतः ॥ पुन्नागाः सप्तपर्णाश्च चम्पकोद्दालकास्तथा ॥
विवृद्धमूला बहवः शोभन्ते स्म सुपुष्पिताः ॥ ९ ॥
ातकुम्भनिभाः केचित्केचिदग्निशिखोपमाः ॥ नीलाञ्जननिभाः केचित्तत्राशोकाः सहस्रशः ॥ १० ॥
नन्दनं विविधोद्यानं चित्रं चैत्ररथं यथा ॥ अतिवृत्तमिवाचिन्त्यं दिव्यं रम्यं श्रिया वृतम् ॥ ११ ॥

र्णघने पर्णसमूहे । महात्मा स हनुमान् । पुष्पिता-त्यादिविशिष्टां तामारुह्य इतो द्रक्ष्यामीत्यारभ्य ागमिष्यति सावश्यमिमां शिवजलां नदीमित्यन्तेन ः प्रकार उक्तः एवमुक्तप्रकारेणमत्वा । मनुजेन्द्रपत्नीं तीक्षमाणः अवेक्षमाणः मार्गमाणः । सुपुष्पिते र्णघने निलीनश्च सन् सर्वं ददर्शेत्यन्वयः ॥ ५२ ॥ ति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे ृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुर्दशः र्गः ॥ १४ ॥

सः तत्रस्थः शिंशुपास्थः। मैथिलींमार्गमाणः मैथिली-ार्गणाद्धेतोः। "लक्षणहेत्वोः क्रियायाः" इति शानच् । ीक्षमाणः विविधं चक्षुर्विक्षिपन् । महीं चावेक्षमाणः सर्वां तां अशोकवनिकां अन्ववैक्षतेत्यन्वयः ॥ १—३ ॥ बह्वासनैः कुथैः आस्तरणैश्चोपेतां । भूमिगृहाणि बिलगृहाणि ॥ ४ ॥ सर्वर्तुकुसुमैः पादपैः रम्यामित्यन्वयः । सूर्योदयप्रभां उद्यत्सूर्यप्रभां ॥ ५ ॥ विहगैः निष्पत्रशाखां क्रियमाणामिव स्थितां । युगपत्पातिपक्षिपक्षविहतपत्रतया पत्ररहितशाखामिव स्थितामित्यर्थः ॥ ६ ॥ पुष्पावतंसकैः चञ्चुपुटलग्नपुष्पालंकृतैरित्यर्थः । आमूलेति आमूलं पुष्पैर्निचितैः व्याप्तैः । पुन्नागादौ तथा दृष्टं ॥ ७ ॥ पुष्पभारः पुष्पसमूहः स एवातिभारो येषां तैः । अशोकैरित्यादावुपलक्षणे तृतीया । अशोकादिभिरुपलक्षितां समुदैक्षतेति पूर्वेणान्वयः ॥ ८—१० ॥ पुनरशोकवनं विविधोपमानदर्शनेन वर्णयति—नन्दनमित्यादिना श्लोकच-

[पा०] १ झ. ञ. ट. गत्वा. २ ग. पुत्रीं. ३ घ. समीक्षमाणस्सर्वत्र. क. वीक्षमाणस्तुतत्रस्थो. ४ ग. ङ.—ट. रम्यैः. ङ. झ. ञ. ट. समूलंपुष्परचितैः. क. ग. च. छ. ज. समूलंपुष्पविचितैः. ख. आमूलपुष्पोपचितैः. ६ ङ. झ. ट. शिखप्रभाः. ख. ङ. झ. ञ. ट. विवुधोद्यानं. ८ ख. अभिवृद्धमिवा. ९ क. ग. ङ. झ. ञ. ट. श्रियायुतं.

[1]द्वितीयमिव चाकाशं पुष्पज्योतिर्गणायुतम् ॥ पुष्परत्नशतैश्चित्रं पञ्चमं सागरं यथा ॥ १२ ॥
सर्वर्तुपुष्पैर्निचितं पादपैर्मधुगन्धिभिः ॥ नानानिनादैरुद्यानं रम्यं मृग[2]गणैर्द्विजैः ॥ १३ ॥
अनेकगन्धप्रवहं पुण्यगन्धं [3]मनोरमम् ॥ शैलेन्द्रमिव गन्धाढ्यं द्वितीयं गन्धमादनम् ॥ १४ ॥
अशोकवनिकायां तु तस्यां वानरपुङ्गवः ॥ स ददर्शाविदूरस्थं चैत्यप्रासाद[4]मुच्छ्रितम् ॥ १५ ॥
मध्ये स्तम्भसहस्रेण स्थितं कैलासपाण्डुरम् ॥ प्रवालकृतसोपानं तप्तकाञ्चनवेदिकम् ॥ १६ ॥
मुष्णन्तमिव चक्षूंषि द्योतमानमिव श्रिया ॥ [5]विमलं प्रांशुभावत्वादुल्लिखन्तमिवाम्बरम् ॥ १७ ॥
ततो मलिनसंवीतां राक्षसीभिः समावृताम् ॥ उपवासकृशां दीनां निःश्वसन्तीं पुनः पुनः ॥
ददर्श शुक्लपक्षादौ [6]चन्द्ररेखामिवामलाम् ॥ १८ ॥
[7]मन्दं प्रख्यायमानेन रूपेण रुचिरप्रभाम् ॥ पिनद्धां धूमजालेन शिखामिव विभावसोः ॥ १९ ॥
पीतेनैकेन संवीतां क्लिष्टेनोत्तमवाससा ॥ सपङ्कामनलंकारां [8]विपद्मामिव पद्मिनीम् ॥ २० ॥
[9]व्रीडितां दुःखसंतप्तां [10]परिम्लानां तपस्विनीम् ॥ ग्रहेणाङ्गारकेणेव पीडितामिव रोहिणीम् ॥ २१ ॥
अश्रुपूर्णमुखीं दीनां कृशामनशनेन च ॥ शोकध्यानपरां दीनां [11]नित्यं दुःखपरायणाम् ॥ २२ ॥
प्रियं जनमपश्यन्तीं पश्यन्तीं राक्षसी[12]गणम् ॥ स्वगणेन मृगीं हीनां [13]श्वगणाभिवृतामिव ॥ २३ ॥
नीलनागाभया वेण्या जघनं [14]गतयैकया ॥ नीलया नीरदापाये वनराज्या महीमिव ॥ २४ ॥

तुष्टयेन ॥ उद्यानं अशोकवनं । अत्र ददर्शेत्यपकृष्यते । नन्दनं इन्द्रक्रीडावनं । विविधोद्यानं विविधवृक्षषण्डं । चैत्ररथं कुबेरक्रीडावनं । नन्दनमतिवृत्तमिव अतिक्रम्य स्थितमिव । चैत्ररथं यथा चैत्ररथमिव चित्रमित्यन्वयः ॥ ११ ॥ आकाशसाम्ये साधारणधर्ममाह—पुष्पेति । एवं सागरौपम्ये पुष्परत्नेति ॥१२—१४ ॥ चैत्यप्रासादं चैत्यं बुद्धमन्दिरं तदाकारं प्रासादं ॥१५—१६॥ प्रांशुभावत्वात् दीर्घस्वभावत्वात् ॥१७॥ मलिनसंवीतां मलिनवस्त्रेणावृतां मलिनैरङ्गैः संवीतां वा । शुक्लपक्षादावित्यनेन वर्धिष्णुत्वं द्योतितं ॥ १८ ॥ मन्दं प्रख्यायमानेन इदं तदिति कथंचित्प्रत्यभिज्ञायमानेन रूपेणोपलक्षितां । पिनद्धामिति मलिनसंवीतत्वे उपमा । पिनद्धां बद्धां ॥ १९ उत्तरीयराहित्यं द्योतयितुमेकेनेत्युक्तिः । सपङ्कां भू रावि‍र्भवन्तीमिव स्थितां । अनलंकारां पङ्कं निव अलंकुर्वतोसन्निधानादलंकाररहितां । रामागम प्ययमाश्रयो नोत्सादयितुमर्हतीत्येवं मन्यमानां विपद्मामिवपद्मिनीं पद्मरहितां सरसीमिव स्थि ॥ २० ॥ ग्रहेण क्रूरग्रहेण । द्वितीय इवशब वाक्यालंकारे ॥२१॥ कृशां दीनामिति पुनःपुनरुक्ति कार्श्यदैन्ययोरतिशयप्रदर्शनाय । अत्र उपवासकृ कृशामनशनेनेत्युक्त्या पूर्वकाण्डान्ते इन्द्रदत्तपायस शनवृत्तान्तः कल्पित इति तत्रैवोक्तं ॥ २२—२३ नीलनागाभया कृष्णसर्पतुल्यया । नीरदापाये शर

स० एकेनसंवीतां उत्तरीयवस्त्रस्यसुग्रीवसंनिधौप्रक्षिप्तत्वात् ॥ २० ॥ **शि०** अङ्गारकेणग्रहेणपीडितांरोहिणीमिवपीडितां **ति०** अङ्गारकेणेव तत्तुल्येनग्रहेणकेतुना पीडितांरोहिणीमिव ॥ २१ ॥ शोकध्यानपरां शोकेन रामविरहजन्येन ध्यानपरां रा ध्यानसक्तां ॥ २२ ॥ **स०** एकया अत्रिगुणितया ॥ **ति०** जघनं पृष्ठभागं गतया प्राप्तया । एकया हरणदिनकृतैकसंस्कारव यद्वा पुरोभागीयवेणीद्वयराहित्येन पृष्ठलंबया एकयावेण्या । नीलनागाभया नीलसर्पतुल्यया वेण्या उपलक्षितां । अनेन तत्प

[**पा०**] १ क. तद्द्वितीयमिवाकाशं. २ क. ङ.—ट. गणद्विजैः. ३ क. घ.—ट. मनोहरं. ४ ख. घ. ङ. झ. ञ. मूर्जितं. ग. च. छ. ज. मुत्तमं. ५ ङ. झ. ञ. ट. निर्मलं. ६ ग. चन्द्रलेखामिवावृतां. ७ क.—ट. मन्दप्रख्याय. ८ च. ज. पद्मिनीमिवश्रियं. ९ ङ.—ट. पीडितां. १० ङ. झ. ञ. ट. परिक्षीणां. ग. परिक्लिन्नां. घ. व्यसनानामकोविद ११ ग. घ. ङ. ट. नित्यदुःख. १२ क. ग. जनं. १३ ङ. झ. ञ. ट. श्वगणेनावृतामिव. ग. श्वगणेनसमावृतां. १४ प्रतिलंबया.

ुखार्हां दुःखसंतप्तां व्यसनानामकोविदाम् ॥ तां समीक्ष्य विशालाक्षीमधिकं मलिनां कृशाम् ॥
र्कयामास सीतेति कारणैरुपपादिभिः ॥ २५ ॥
ह्रियमाणा तदा तेन रक्षसा कामरूपिणा ॥ यथारूपा हि दृष्टा वै तथारूपेयमङ्गना ॥ २६ ॥
ूर्णचन्द्राननां सुभ्रूं चारुवृत्तपयोधराम् ॥ कुर्वन्तीं प्रभया देवीं सर्वा वितिमिरा दिशः ॥ २७ ॥
ां नीलकेशीं बिम्बोष्ठीं सुमध्यां सुप्रतिष्ठिताम् ॥ सीतां पद्मपलाशाक्षीं मन्मथस्य रतिं यथा ॥२८॥
ृष्टां सर्वस्य जगतः पूर्णचन्द्रप्रभामिव ॥ भूमौ सुतनुमासीनां नियतामिव तापसीम् ॥ २९ ॥
निश्श्वासबहुलां भीरुं भुजगेन्द्रवधूमिव ॥ शोकजालेन महता विततेन न राजतीम् ॥ ३० ॥
संसक्तां धूमजालेन शिखामिव विभावसोः ॥ तां स्मृतीमिव संदिग्धामृद्धिं निपतितामिव ॥ ३१ ॥
विहतामिव च श्रद्धामाशां प्रतिहतामिव ॥ सोपसर्गां यथा सिद्धिं बुद्धिं सकलुषामिव ॥
अभूतेनापवादेन कीर्तिं निपतितामिव ॥ ३२ ॥
रामोपरोधव्यथितां रक्षोहरणकर्शिताम् ॥ अबलां मृगशावाक्षीं वीक्षमाणां ततस्ततः ॥ ३३ ॥
बाष्पाम्बुपरिपूर्णेन कृष्णवक्राक्षिपक्ष्मणा ॥ वदनेनाप्रसन्नेन निश्श्वसन्तीं पुनः पुनः ॥ ३४ ॥
मलपङ्कधरां दीनां मण्डनार्हाममण्डिताम् ॥ प्रभां नक्षत्रराजस्य कालमेघैरिवावृताम् ॥ ३५ ॥
तस्य संदिदिहे बुद्धिर्मुहुः सीतां निरीक्ष्य तु ॥ आम्नायानामयोगेन विद्यां प्रशिथिलामिव ॥३६॥
दुःखेन बुबुधे सीतां हनुमाननलङ्कृताम् ॥ संस्कारेण यथा हीनां वाचमर्थान्तरं गताम् ॥ ३७ ॥

॥ २४ ॥ उपपादिभिः उपपादनशीलैः । मन्दप्रख्या-यमानेनेत्यारभ्य सीतां समीक्ष्य उपपादिभिः कारणैस्सीतेति तर्कयामासेत्यन्वयः ॥ २५ ॥ एवं लिङ्गैः सीतेति विचार्य प्रत्यभिज्ञयापि तथा तर्कयामासेत्याह —ह्रियमाणेति ॥ इति तर्कयामासेति शेषः ॥ २६ ॥ पूर्णचन्द्राननामित्यारभ्य विद्यां प्रशिथिलामिवेत्यन्तमेकं वाक्यं । सुभ्रूं सुभ्रुवं । उवङभाव आर्षः । कुर्वन्तीमिति दश मासान् स्नानेन विना मलिनापि प्रभया दिशः वितिमिराः कुर्वन्तीमिति प्रभातिशयोक्तिः ॥ २७ ॥ सुप्रतिष्ठितां सुप्रतिष्ठितपादतलां ॥ २८—२९ ॥ नराजतीं नराजन्तीं ॥ ३० ॥ तां प्रसिद्धां । स्मृतिं मन्वाद्युक्तिं । संदिग्धां संदिग्धार्थां । ऋद्धिं संपदं । निपतितां क्षीणां ॥ ३१ ॥ विहतां अविश्वासबहुलां । प्रतिहतां अलब्धकार्यां । सोपसर्गां सविघ्नां । सकलुषां सकालुष्यां । भावप्रधानो निर्देशः । अभूतेन असत्येन ॥ ३२ ॥ रामोपरोधव्यथितां रामप्राप्तिनिरोधेन व्यथितां ॥ ३३—३५ ॥ पुनः सीताशब्दोऽव्यवहितानुस्मरणार्थः । आम्नायानां वेदानां । अयोगेन असंबन्धेन । प्रशिथिलां अप्राप्तप्रतिष्ठां । विद्यां वेदबाह्यविद्यां । यद्वा आम्नायानां अभ्यासानामभावेन प्रशिथिलां अस्थिरपदां विद्यामिव सीतां निरीक्ष्य तस्य हनुमतो बुद्धिः संदिदिहे इत्यन्वयः । कार्श्यमालिन्यादिना तिरोहितरूपत्वादिति भावः ॥ ३६ ॥ संस्कारः शब्दव्युत्पत्तिः तेन हीनां अतएव विवक्षितादर्थान्तरंगतां विपरीतार्थामित्यर्थः । संस्कारहीनतया प्रतिपिपादयिषितार्थवक्तुमशक्नुव-

ऽन्यस्यमरणमेवेतिसूचितं ॥ शि० जघनं पृष्ठान्तदेशंगतया । एकया केशविन्यासाभावेनजटीभूतया ॥ २४ ॥ स० व्यसनानामकोविदां कदाप्यदृष्टव्यसनां ॥ २५ ॥ ति० नीलकण्ठीं सौभाग्यसूचकेन्द्रनीलमणिमयकण्ठस्थभूषणप्रभया तद्वर्णकण्ठां । सुप्रतिष्ठितां सुप्रतिष्ठितसर्वावयवसंस्थानां ॥ २८ ॥ ती० चन्द्रप्रभामिवेति सर्वानन्दकरत्वमुक्तं । भुजगेन्द्रवधूमिवेति दुष्प्रधर्षत्वं । शिखामिवविभावसोरिति पातिव्रत्यं ॥ २९ ॥ स० रामोपरोधव्यथितां रामाभिः राक्षसस्त्रीभिः यउपरोधः इतस्ततोगमनप्रतिबन्धस्तेनव्यथितां ॥ ३३ ॥ ति० दुःखबोध्यत्वेहेतुः अनलङ्कृतामिति । संस्कारेणेति स्नानानुलेपनादिरङ्गसंस्कारः । वाचो व्याकरणज्ञानादिजःसंस्कारः । देव्या अर्थान्तरगतत्वं देशान्तरगतत्वं । वाचस्तु विवक्षितार्थादन्यार्थबोधकत्वं । वाचोऽर्थो यथा-

[पा०] १ ङ. झ. ञ. ट. विलोक्य. २ ग. च. ज. ह्रियमाणातुसा. ३ घ. क्रूररूपिणा. ४ ञ. सादृष्टा. ङ. झ. ट. दृष्टासा. ५ ग. तेजसास्त्वेन. ६ झ. ट. नीलकण्ठीं. ७ ङ. झ. ट. रक्षोगणनिपीडितां. ८ घ. वीक्षमाणामितस्ततः. ९ घ. नीलमेघैः. १० ङ. झ. ञ. ट. बुद्धिस्तथा. ११ ग. निरीक्ष्यतां. ङ.—ट. निरीक्ष्यच.

तां समीक्ष्य विशालाक्षीं राजपुत्रीमनिन्दिताम् ॥ तर्कयामास सीतेति कारणैरुपपादिभिः ॥ ३
वैदेह्या यानि चाङ्गेषु तदा रामोऽन्वकीर्तयत् ॥ तान्याभरणजालानि शाखाशोभीन्यलक्षयत् ॥३
सुकृतौ कर्णवेष्टौ च श्वदंष्ट्रौ च सुसंस्थितौ ॥ मणिविद्रुमचित्राणि हस्तेष्वाभरणानि च ॥
श्यामानि चिरयुक्तत्वात्तथा संस्थानवन्ति च ॥ ४० ॥
तान्येवैतानि मन्येऽहं यानि रामोऽन्वकीर्तयत् ॥ ४१ ॥
तत्र यान्यवहीनानि तान्यहं नोपलक्षये ॥ यान्यस्या नावहीनानि तानीमानि न संशयः ॥ ४
पीतं कनकपट्टाभं स्रस्तं तद्वसनं शुभम् ॥ उत्तरीयं नगासक्तं तदा दृष्टं प्लवङ्गमैः ॥ ४३ ॥
भूषणानि च मुख्यानि दृष्टानि धरणीतले ॥ अनयैवापविद्धानि स्वनवन्ति महान्ति च ॥ ४४ ।
इदं चिरगृहीतत्वाद्वसनं क्लिष्टवत्तरम् ॥ तथाऽपि नूनं तद्वर्णं तथा श्रीमद्यथेतरत् ॥ ४५ ॥
इयं कनकवर्णाङ्गी रामस्य महिषी प्रिया ॥ प्रनष्टाऽपि सती याऽस्य मनसो न प्रणश्यति ॥ ४६
इयं सा यत्कृते रामश्चतुर्भिः परितप्यते ॥ कारुण्येनानृशंस्येन शोकेन मदनेन च ॥ ४७ ॥

न्तीमविवक्षितमर्थं बोधयन्तीं वाचमिव । सम्यग्व्युत्पत्त्यभावादर्थान्तरंगतां व्युत्पत्त्यनन्तरं स्वार्थं प्रतिपादयन्तीमिव स्थितामित्यर्थः ॥ ३७—३८ ॥ शाखायां शोभन्त इति शाखाशोभीनि भर्तृविरहकाले भूषणधारणस्यानुचितत्वात् स्वाङ्गेभ्य उन्मुच्य शाखायां न्यस्तानीत्यर्थः ॥ ३९ ॥ कर्णवेष्टौ कुण्डले । " कर्णिका तालपत्रं स्यात्कुण्डलं कर्णवेष्टनं " इति सज्जनः । श्वदंष्ट्रः त्रिकर्णकाख्यः पुष्पाकारःकर्णपार्श्वभूषणविशेषः । " त्रिकर्णकः श्वदंष्ट्रश्च " इत्यभिधानरत्नमाला । हस्तेषु हस्तावयवेषु । श्यामानि विरहतापौष्ण्यवशाच्छ्यामीभूतानि । तथा चिरयुक्तत्वात् चिरधृतत्वात् । संस्थानवन्ति हस्तेषु तत्तदाभरणसंस्थानानि दृश्यन्त इत्यर्थः ॥ ४० ॥ तान्येवेत्यर्धमेकं वाक्यं ॥ ४१ ॥ तत्र ऋश्यमूके । यान्यवहीनानि पतितानि तान्यहं नोपलक्षये । अत्रेति शेषः । अस्याः सीतायाः सकाशाद्यानि नावहीनानि न पतितानि । तानीमानि तत्तुल्यत्वात् ॥ ४२ ॥ प्लवङ्गमैः सुग्रीवादिप्लवङ्गमैः । यदुत्तरीयं दृष्टं यानि भूषणानि दृष्टानि सर्वाण्यनयैव अपविद्धानि पातितानि । नगा क्तमित्यनेन पतनदशायामुत्तरीयाग्रं वृक्षे किंचित् क्तमिति द्योत्यते ॥ ४३—४४ ॥ इतरत् उत्सृ तदुत्तरीयं यथा यादृशवर्णयुक्तं यथा श्रीमत् इदानीं धार्यमाणं । तद्वर्णं तथा श्रीमत् नूनमि योजना ॥ ४५ ॥ या रामस्य प्रिया सती महिषी कृत्वा प्रनष्टापि अस्य रामस्य मनसः सकाशात् प्रणश्यति सदा मनसा दृष्टा भवतीत्यर्थः । कनकवर्णाङ्गी इयं मया परिदृश्यमानेत्यर्थः ॥ ४६ रामः कारुण्यादिभिश्चतुर्भिः यत्कृते परितप्यते सेयं कारुण्यादीनां परितापहेतुत्वं विभज्य दर्शयति- स्त्रीति ॥ आपत्काले स्त्रियो रक्षणीयाः तन्न कृतमि कारुण्यात्परितप्यते । आनृशंस्यमक्रूरत्वं । आश्रित रक्षणैकस्वभावत्वमिति यावत् । तस्मात् आश्रिता रक्षितेति परितप्यते । " अर्धो वा एष आत्म यत्पत्नी " इत्युक्तरीत्या आत्मार्धभूता पत्नी नष्टे

व्याकरणाद्यभ्यासदुःखेनव्युत्पत्तिंसंपाद्यबुध्यते तद्वत्सीतांकष्टेनबुबुधे ॥ ३७ ॥ **स०** उपपादिभिः अनुमापकैः ॥ ३८ ॥ ति इदानीं सीतात्वोपपादकमाह—वैदेह्याइति । तदा स्वप्रस्थानसमये । गात्रशोभीनीतिपाठः कतकसंमतः । येष्वङ्गेषुयान्याभर जालान्यकीर्तयत् तान्याभरणजालानि तत्तद्गात्रशोभीन्यलक्षयदिति प्रत्यभिज्ञाप्रामाण्यंसिद्धं ॥ तीर्थस्तु—शाखाशोभीनि पाठंप्रकल्प्य रामविश्लेषसमये भूषणधारणस्यानुचितत्वाद्वैदेह्याभूषणानिस्वाङ्गेभ्यउन्मुच्यशाखायांन्यस्तानीतिगम्यतइतिव्याचख्यौ तत्तूत्तरश्लोकयोर्हस्तेष्विति तथा श्यामानिचिरयुक्तत्वादिति पदस्वरसविरुद्धं । किंचैवं तदङ्गेरामोक्ताभरणाभावादसीतात्वमेवस्य ॥ ३९ ॥ **ति०** अथकस्मिन्गात्रेकिमाभरणंदृश्यतेतत्राह—सुकृताविति । सुसंस्थितौ कर्णरूपाङ्गेषुप्रतिष्ठितौ उपलक्षयेइतिशेष यानिरामेणोक्तानि तथैवसुस्थितान्युपलक्षये ॥ ४० ॥ **ति०** चिरयुक्तत्वात्चिरकालमसंस्कृतदेहस्थितत्वेनश्यामान्यपि तथासंस्

[पा०] १ क. ङ. झ. ञ. ट. रुपपादयन्. २ घ. ङ. झ. ट. गात्रशोभीनि. क. च. छ. ज. शाखाशोभीनिलक्षये. ३ च. छ. ज. सुसंस्कृतौकर्णवेष्टौ. ४ क. च. छ. ज. ञ. श्वदंष्ट्रौचापिसंस्थितौ. ५ क. ग. च. ज. अनयैवप्रमुक्तानि. ६ तथाप्यनूनं. ग. च. छ. ज. ञ. तथाहिनूनं. ७ ग. घ. ङ. झ. ट. यस्य. ८ ङ. झ. ञ. ट. श्चतुर्भिरिहतप्यते.

स्त्री प्रनष्टेति कारुण्यादाश्रितेत्यानृशंस्यतः ॥ पत्नी नष्टेति शोकेन प्रियेति मदनेन च ॥ ४८ ॥
अस्या देव्या यथा रूपमङ्गप्रत्यङ्गसौष्ठवम् ॥ रामस्य च यथा रूपं तस्येयमसितेक्षणा ॥ ४९ ॥
अस्या देव्या मनस्तस्मिंस्तस्य चास्यां प्रतिष्ठितम् ॥ तेनेयं स च धर्मात्मा मुहूर्तमपि जीवति ॥५०॥
दुष्करं कृतवान्रामो हीनो यदनया प्रभुः ॥ धारयत्यात्मनो देहं न शोकेनावसीदति ॥ ५१ ॥
दुष्करं कुरुते रामो य इमां मत्तकाशिनीम् ॥ सीतां विना महाबाहुर्मुहूर्तमपि जीवति ॥ ५२ ॥
एवं सीतां तदा दृष्ट्वा हृष्टः पवनसंभवः ॥ जगाम मनसा रामं प्रशशंस च तं प्रभुम् ॥ ५३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

शोकेन परितप्यते। प्रिया नष्टेति मदनेन परितप्यत इति योजना ॥ ४७—४८ ॥ अथानयोरन्योन्याभिरूप्यानुगुण्यमाह—अस्या इति ॥ अस्याः सीतायाः। रूपं शरीरं अङ्गप्रत्यङ्गसौष्ठवं च यथा यथाविधं। तथाविधमेव रामस्यापि रूपं अङ्गप्रत्यङ्गसौष्ठवं च। तथा रामस्य रूपमङ्गप्रत्यङ्गसौष्ठवं च यथा यथाविधं। तथाविधमेवास्यारूपमङ्गप्रत्यङ्गसौष्ठवं च। अतः इयमसितेक्षणा तस्य योग्येति शेषः ॥ ४९ ॥ तथानयोरन्योन्यस्यानुरागमाह—अस्या इति ॥ अस्या देव्या मनस्तस्मिन्रामे प्रतिष्ठितं। तेन हेतुना इयं मुहूर्तमपि जीवति। तस्य च मनोऽस्यां प्रतिष्ठितं तेन कारणेन स मुहूर्तमपि जीवति। तयोरन्योन्यंमनोनिवेशनाभावे मुहूर्तजीवनमपि न घटत इति भावः ॥५०॥ माल्यवति शैले रामस्य सीताविरहक्लेशातिशयं निशाम्य हन्त वसिष्ठशिष्यः कस्याश्चित्स्त्रियाः कृते कथमेवमभूदिति विनिन्द्य परिहसितवान् स्वयं विरक्ततया। संप्रत्यस्या वैलक्षण्यातिशयदर्शनेन विशेषज्ञतया एतद्विरहे रामस्य देहधारणं सर्वात्मना अशक्यमित्याह—दुष्करमिति ॥ दुष्करं कृतवान्रामः। इमां वियुज्य समाधानपरो रामः प्रकाममशक्यं कृत्यमकरोत्। हीनो यदनया प्रभुः। अनया विना देहं धृत्वावस्थित इति यत्तदत्यन्तमशक्यं। प्रभुः गजाश्वादिकं शिक्षयितुं राज्यं पालयितुं च जानाति। न प्रणयधारायां प्रथमांशमपि भुक्तवान्। धारयत्यात्मनो देहं। किमिदं याचितकं शरीरं धारयति स्वस्यैव हि देहोयं देहं भोगायतनं हीदं न दुःखायतनं "दिह उपचये" इत्यस्माद्धातोः "इगुपधे"त्यादिना कः। तेनायमर्थो लभ्यते। सीताशरीरस्य परतन्त्रतया तत्त्यक्तुमयुक्तं नतु स्वाधीनशरीरस्य धारणं युक्तमितिभावः। विशेषज्ञेनापि कथमिदं त्यक्तुं शक्यं तत्राह—न शोकेनावसीदति ॥ ५१ ॥ उक्तमर्थं किंचिद्विशेषान्तरेण दर्शयति—दुष्करंकुरुतइति ॥ ५२ ॥ एवं दृष्ट्वा मलिनसंवीतत्वोपवासकृशत्वशोकध्यानपरायणत्वादिपतिव्रताधर्मयुक्तां सीतां दृष्ट्वा। हृष्टःसन् मनसा रामं जगाम सस्मार। तं प्रभुं बुद्धिस्थं रामं। प्रशशंस च। पुनः प्राग्युपयुक्तपतिव्रतोक्तधर्मनिष्ठत्वदर्शनात् भाग्योत्तरो रामइत्यस्तौषीत्। यद्वा एतादृशसौन्दर्यवतीं सीतांदृष्ट्वा एतद्विरहितस्यमहाञ्शोकः प्राप्तः अतः युक्तमेवकृतवान्राम इत्यस्तौषीत् ॥ ५३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चदशः सर्गः ॥ १५ ॥

भवन्ति रामोक्तसंनिवेशवन्ति ॥ ४१ ॥ स० अङ्गप्रत्यङ्गसौष्ठवं अङ्गानिहस्ताद्यवयवाः। प्रत्यङ्गानिअङ्गुल्यादीनि। तेषांसौष्ठवं सामीचीन्यं ॥ ४९ ॥ स० मुहूर्तशब्दएतावत्कालोपलक्षकः ॥ अन्यथानजीवेदित्याशयः ॥ ५२ ॥ इतिपञ्चदशः सर्गः ॥ १५ ॥

[पा०] १ म. विभुः. २ ग. घ. विनासीतां. ३ ट. तथा.

षोडशः सर्गः ॥ १६ ॥

हनुमता सीतायाः शुभशीलादिप्रशंसनेनसह खरविराधादिनिधनस्य तद्धेतुकत्वानुसन्धानपूर्वकं तद्दुरवस्थादर्शने परिशोचनं ॥ १ ॥

प्रशस्य तु प्रशस्तव्यां सीतां तां हरिपुङ्गवः ॥ गुणाभिरामं रामं च पुनश्चिन्तापरोऽभवत् ॥ १ ॥
स मुहूर्तमिव ध्यात्वा बाष्पपर्याकुलेक्षणः ॥ सीतामाश्रित्य तेजस्वी हनुमान्विललाप ह ॥ २ ॥
मान्या गुरुविनीतस्य लक्ष्मणस्य गुरुप्रिया ॥ यदि सीताऽपि दुःखार्ता कालो हि दुरतिक्रमः ॥३
रामस्य व्यवसायज्ञा लक्ष्मणस्य च धीमतः ॥ नात्यर्थं क्षुभ्यते देवी गङ्गेव जलदागमे ॥ ४ ॥
तुल्यशीलवयोवृत्तां तुल्याभिजनलक्षणाम् ॥ राघवोऽर्हति वैदेहीं तं चेयमसितेक्षणा ॥ ५ ॥

प्रशस्तव्यां प्रशंसितव्यां रामं सीतां च । प्रशस्येति अस्या देव्या इत्यादिनोभयोरपि प्रशंसितत्वात् ॥ १ ॥ सीतामाश्रित्य सीतां विषयीकृत्य ॥ २ ॥ गुरुविनीतस्य गुरुभिः शिक्षितस्य । गुरुप्रिया रामप्रिया । कालो हि दुरितक्रमः कालो दुरतिक्रमएवेत्ययमर्थः सिद्धोभवतीत्यर्थः । हिशब्दोऽवधारणे । अव्ययानामनेकार्थत्वात् । जगद्रक्षकरामलक्ष्मणगुप्तायास्सीताया अपि यदीदृशं दुःखं प्राप्तं तदा कालोदुरतिक्रमएवेतिभावः ॥ ३ ॥ व्यवसायज्ञा स्वयत्नं विहाय तद्व्यवसायमेव प्रेक्षमाणा "एतद्व्रतंमम अप्यहंजीवितं जह्यां" इत्येवं रामव्यवसायंजानन्तीत्यर्थः । लक्ष्मणस्य च धीमतः । रामे मायामृगानुसारिण्यपि मारीचोयमिति तदानीमपि निश्चितवतो लक्ष्मणस्य । यद्वा सर्वेश्वरादप्याश्रितसंरक्षणे समुद्युक्तस्य । नात्यर्थं क्षुभ्यते । अत्यर्थमिति क्षोभाभावविशेषणं । क्षोभविशेषणत्वे यत्किंचित्क्षोभः प्राप्तः स्यात् । सत्तानाश काले प्राप्तेपि क्षोभलेशरहितेत्यर्थः । देवी रामेण शिरस वोढव्यवाल्लभ्यवती । गङ्गेव जलदागमे । क्षोभहे सत्यपि यथा गङ्गा न क्षुभ्यतेतथेत्यर्थः ॥ ४ ॥ तुल्य शीलवयोवृत्तां शीलं स्वभावः । "अस्या देव्य मनस्तस्मिंस्तस्य चास्यां प्रतिष्ठितं" इति प्रक्रियय तुल्यस्वभावां । तुल्यवयस्कां षोडशवार्षिकस्य द्वादश वार्षिकी तुल्या । अन्यथा वैरस्यापत्तेः शास्त्रविरोधाच्च अतएव विष्णुः । "वर्षैरेकगुणां भार्यामुद्वहेत्त्रिगुण वरः । त्र्यष्टवर्षोष्टवर्षा वा वयोमात्रावरा च या इति । तुल्यवृत्तां । "दोषो यद्यपि तस्य स्यात्सतामेत दगर्हितं" इति रामवृत्तं । "पापानां वा शुभान वा वधार्हाणां प्लवंगम । कार्यं करुणमार्येण न कश्चि न्नापराध्यति" इत्युक्तवत्यास्सीताया वृत्तेन तुल्यां तुल्यशब्दोनुरूपपरः । रामानुरूपशीलवयश्चारित्राम

ति० चिन्तापरः सीताविषयदुःखेनेतिभावः ॥ **स०** सीतामयिकथंविश्वासेनवदेदितिध्यानपरः ॥ १ ॥ सीतामाश्रित्य सीत मुद्दिश्यतेजस्वी दर्शनानन्तरंकथंमैथिलींपश्येयमितिचिन्तारहितइतितेजस्वी ॥ **शि०** सीतां सीतादुःखं आश्रित्य अवलोक्य विललाप विविधमुवाच ॥ **ति०** लक्ष्मणस्यगुरुप्रिया । गुरोःरामस्यपत्नीत्वात्तद्वदेवपरमोपास्यत्वेनाभीष्टा । रामपत्न्यपियदिदुःखा तर्हि कालोदुरतिक्रमइति हि निश्चितमित्यर्थः । दुःखोपायघटकत्वस्य कालएवप्रसिद्धत्वादितिभावः । ननु नदुःखंसुखंवाकालमात्र जन्यं कर्मानुष्ठानवैफल्यापत्तेः । तत्सापेक्षकालजन्यत्वेपीश्वरावतारसीतारामयोः कर्माभावात्कथं दुःखमितिचेन्न । वस्तुतस्तु तयो र्दुःखाभावेपि लोकानुग्रहाय गृहीतमनुष्यदेहयोस्तेषांमनुष्यत्वाभावबुद्धिप्रतिबन्धाय नटवद्व्यवहारमभिनयतोः सुखदुःखादिकालि मुखविकासाद्यभिनयेन तन्मायामोहितस्यैव देवांशस्यहनुमतोऽभिनीतकार्यदर्शनेन तत्कारणानुमानाद्दुःखार्तत्वाद्युक्तेः सामञ्जस्यात यथाच परेणोद्बोधनंविना हनूमतःस्वबलपराक्रमांशेमोहः तथाऽनयोर्भगवत्स्वरूपत्वे इदानींतस्यमोहइति वक्तुंशक्यत्वात् । पश्चा भगवदिच्छयैव तस्यतयोःस्वरूपज्ञानेपि नकिंचिदवद्यं ॥ **स०** यद्वा गुरुविनीतस्य बहुनम्रस्य लक्ष्मणस्य गुरुप्रिया ज्येष्ठभ्रातृभा मान्या । यद्वा गुरुविनीतस्य ब्रह्मादेर्लक्ष्मणस्यचेति व्यधिकरणषष्ठ्यौ । सर्वमान्या यदिसीतादुःखार्ता सेवाभूत् । हि यतः । त कालोहिदुरतिक्रमः । देव्यादेवेनच स्वसमयावनाय कालोदुरतिक्रमः अनुल्लङ्घ्यस्वपराक्रमइव दर्शितइतिभावः । यद्वा सुखार्ह यद्दुःखार्तवदात्मानंदर्शयामास सहि ततः कालः रावणमृत्युः दुरतिक्रमः अनुल्लङ्घ्यः रावणेनेतिशेषः ॥ **शि०** सीतायदिदुःखा तर्हि कालः परमात्मसंकेतः दुरतिक्रमः ॥ ३ ॥ **ति०** नन्वेवंविधदुःखातिशये जीवनहानिरेवस्यादतआह—रामस्येति । स क्ष्मणोरामः एवंविधेदुर्गेस्थितामपिमां दिव्यास्त्रैः समुद्रमपियेनकेनाप्युपायेनोल्लङ्घ्यात्रायास्यतीति तस्यव्यवसायज्ञा पराक्रमज्ञा ॥ ४

[पा०] १ घ. मेधावी.

ां दृष्ट्वा नवहेमाभां लोककान्तामिव श्रियम् ॥ जगाम मनसा रामं वचनं चेदमब्रवीत् ॥ ६ ॥
स्या हेतोर्विशालाक्ष्या हतो वाली महाबलः ॥ रावणप्रतिमो वीर्ये कबन्धश्च निपातितः ॥ ७ ॥
वेराधश्च हतः सङ्ख्ये राक्षसो भीमविक्रमः ॥ वने रामेण विक्रम्य महेन्द्रेणेव शम्बरः ॥ ८ ॥
चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् ॥ निहतानि जनस्थाने शरैरग्निशिखोपमैः ॥ ९ ॥
वरश्च निहतः सङ्ख्ये त्रिशिराश्च निपातितः ॥ दूषणश्च महातेजा रामेण विदितात्मना ॥ १० ॥
ऐश्वर्यं वानराणां च दुर्लभं वालिपालितम् ॥ अस्या निमित्ते सुग्रीवः प्राप्तवाँल्लोकसत्कृतम् ॥११॥
सागरश्च मया क्रान्तः श्रीमान्नदनदीपतिः ॥ अस्या हेतोर्विशालाक्ष्याः पुरी चेयं निरीक्षिता ॥१२॥
यदि रामः समुद्रान्तां मेदिनीं परिवर्तयेत् ॥ अस्याः कृते जगच्चापि युक्तमित्येव मे मतिः ॥ १३ ॥
राज्यं वा त्रिषु लोकेषु सीता वा जनकात्मजा ॥ त्रैलोक्यराज्यं सकलं सीताया नाप्नुयात्कलाम् ॥१४॥
इयं सा धर्मशीलस्य मैथिलस्य महात्मनः ॥ सुता जनकराजस्य सीता भर्तृदृढव्रता ॥ १५ ॥
उत्थिता मेदिनीं भित्त्वा क्षेत्रे हलमुखक्षते ॥ पद्मरेणुनिभैः कीर्णा शुभैः केदारपांसुभिः ॥ १६ ॥
विक्रान्तस्यार्यशीलस्य संयुगेष्वनिवर्तिनः ॥ स्नुषा दशरथस्यैषा ज्येष्ठा राज्ञो यशस्विनी ॥ १७ ॥
धर्मज्ञस्य कृतज्ञस्य रामस्य विदितात्मनः ॥ इयं सा दयिता भार्या राक्षसीवशमागता ॥ १८ ॥
सर्वान्भोगान्परित्यज्य भर्तृस्नेहबलात्कृता ॥ अचिन्तयित्वा दुःखानि प्रविष्टा निर्जनं वनम् ॥१९॥
संतुष्टा फलमूलेन भर्तृशुश्रूषणे रता ॥ या परां भजते प्रीतिं वनेऽपि भवने यथा ॥ २० ॥

यर्थः । तुल्याभिजनलक्षणां अभिजनः कुलं लक्षणं सामुद्रिकं सार्वभौमलक्षणवतो भार्यायाः यैस्सामुद्रिकलक्षणैर्भाव्यं तैर्युक्तामित्यर्थः । एवंविधत्वाद्राघवो वैदेहीमर्हति वैदेही राघवमर्हति । लोके सौन्दर्यादिमतः सौन्दर्यादिसर्वसहिता न लभ्यते । सौन्दर्यादिमत्या न सौन्दर्यादिसर्ववान् । अनयोस्तु सर्वं संपन्नमिति विस्मयते । असितेक्षणेत्यधिकविशेषणदानाद्रामापेक्षया सीताया नयनसौन्दर्यमधिकमित्युच्यते । अतएव रामो वक्ष्यति । "न जीवेयंक्षणमपि विनामसितेक्षणां" इति ॥ ५—६ ॥ अस्या हेतोरिति " सर्वनाम्नस्तृतीया च " इति षष्ठी । अनया हेतुनेत्यर्थः ॥ ७—१० ॥ अस्या निमित्ते " निमित्तकारणहेतुषु सर्वासां प्रायदर्शनं " इतिषष्ठी सप्तम्यर्थे । अस्यां निमित्ते सत्यामित्यर्थः ॥ ११—१२ ॥ परिवर्तयेत् अधरोत्तरां कुर्यात् । अस्याः कृते एतदर्थं जगच्चापि न केवलं मेदिनीं सर्वलोकानपि परिवर्तयेदित्यर्थः ॥ १३ ॥ राज्यंवेति राज्यमुत्कृष्टं वा सीता उत्कृष्टा वा इति विचार्यमाण इति शेषः । कलां लेशं ॥ १४ ॥ भर्तृदृढव्रता भर्तरि दृढव्रता ॥ १५ ॥ केदारपांसुभिः यज्ञक्षेत्रपांसुभिः ॥ १६ ॥ आर्यशीलस्य श्रेष्ठस्वभावस्य ॥ १७—१८ ॥ सर्वान् भोगान् भुज्यन्ते इति भोगाः शुकसारिकाकन्तुकप्रभृतिभोगसाधनानि मातृप्रभृतींश्च । परित्यज्य परि विशेषेण पुनस्तत्राशालेशं विनैव त्यक्त्वा । अयं च परित्यागो न स्ववशेनेत्याह—भर्तृस्नेहबलात्कृता । अभिमतविषयस्नेहातिरेकस्तदितरमखिलमपि त्याजयति हि । त्यक्तेषु स्मरणाभावेपि गन्तव्यदेशीयदुःखं वा किं स्मरति नेत्याह—अचिन्तयित्वा दुःखानि । रामातिरिक्तवस्त्वनुभवे हि दुःखानुभवसंभावनेति भावः । प्रविष्टा निर्जनं वनं भोगस्यैकान्तस्थलमिति ह्यस्या हृदिलग्न-

स० शंबरोऽयंप्रद्युम्नहतादन्यएव । महेन्द्रपदेन तत्तुल्येप्रद्युम्नेलक्षणावा ॥ ८ ॥ ति० यच्छेषतया एवंप्राशस्त्यंदर्शितं तस्यकालस्य तिक्रमत्वमाह—इयंसेति । राक्षसीवशमागता । कालप्राबल्यादितिभावः ॥ १८ ॥ ति० भर्तृशुश्रूषणापरा । सन्नन्तात्स्वार्थे चि 'ण्यासश्रन्थ—' इतियुच् ॥ २० ॥

[पा०] १ घ. हेमाङ्गां. २ ग. च. छ. ज. वानरेन्द्राणां. ३ झ. ञ. ट. लोकविश्रुतः. ४ क. चेयमवेक्षिता. ५ ङ. झ. . ट. जनकस्य. ६ ङ. झ. ञ. ट. मैथिलराजस्य. ७ च. छ. ज. मनस्विनः. क. ग. यशस्विनः. ८ झ. ञ. ट. कष्टानि. ग. विजनं. १० ङ. झ. ट. शुश्रूषणापरा. ञ. शुश्रूषणेपरा.

सेयं कनकवर्णाङ्गी नित्यं सुस्मितभाषिणी ॥ सहते यातनामेतामनर्थानामभागिनी ॥ २१ ॥
इमां तु शीलसंपन्नां द्रष्टुमर्हति राघवः ॥ रावणेन प्रमथितां प्रपामिव पिपासितः ॥ २२ ॥
अस्या नूनं पुनर्लाभाद्राघवः प्रीतिमेष्यति ॥ राजा राज्यपरिभ्रष्टः पुनः प्राप्येव मेदिनीम् ॥
कामभोगैः परित्यक्ता हीना बन्धुजनेन च ॥ धारयत्यात्मनो देहं तत्समागमकाङ्क्षिणी ॥ २
नैषा पश्यति राक्षस्यो नेमान्पुष्पफलद्रुमान् ॥ एकस्थहृदया नूनं राममेवानुपश्यति ॥ २५ ॥
भर्ता नाम परं नार्या भूषणं भूषणादपि ॥ एषा तु रहिता तेन भूषणार्हा न शोभते ॥ २६
दुष्करं कुरुते रामो हीनो यदनया प्रभुः ॥ धारयत्यात्मनो देहं न दुःखेनावसीदति ॥ २७
इमामसितकेशान्तां शतपत्रनिभेक्षणाम् ॥ सुखार्हां दुःखितां दृष्ट्वा ममापि व्यथितं मनः ॥

क्षितिक्षमा पुष्करसंनिभाक्षी या रक्षिता राघवलक्ष्मणाभ्याम् ॥
सा राक्षसीभिर्विकृतेक्षणाभिः संरक्ष्यते संप्रति वृक्षमूले ॥ २९ ॥
हिमहतनलिनीव नष्टशोभा व्यसनपरम्परयाऽतिपीड्यमाना ॥
सहचररहितेव चक्रवाकी जनकसुता कृपणां दशां प्रपन्ना ॥ ३० ॥
अस्या हि पुष्पावनताग्रशाखाः शोकं दृढं वै जनयन्त्यशोकाः ॥
हिमव्यपायेन च मन्दरश्मिरभ्युत्थितो नैकसहस्ररश्मिः ॥ ३१ ॥

मितिभावः ॥ १९—२० ॥ यातनां तीव्रवेदनां । अनर्थानामभागिनी आपदामनर्हेत्यर्थः ॥ २१ ॥ प्रपां पानीयशालिकां । "प्रपा पानीयशालिका" इत्यमरः ॥ २२—२३ ॥ कामेति । काम्यन्त इति कामाः ते च ते भोगाश्च स्रक्चन्दनादयः तैः ॥ २४ ॥ नैषा पश्यति राक्षस्यः राक्षसीर्न पश्यति । नेमान् पुष्पफलद्रुमान् । रामविरहक्लेशातिशयेन राक्षसीदर्शनवत्सुपुष्पफलवतां द्रुमाणामपि दर्शनमस्या असह्यमित्यर्थः । एकस्थहृदया एकाग्रचित्ता । राममेवानुपश्यति ध्यायतीत्यर्थः । रामागमनसंभावनावती दिशोवलोकयतीति वार्थः । यद्वा निरन्तरेण रामानुभवेन परिसरवर्ती कोपि पदार्थो न दृष्टिपथं गच्छतीत्यर्थः ॥२५—२७॥ असितः केशान्तः यस्यास्तां । केशानामग्रे नैल्यं स्त्रीणां दुर्लभं । अतस्तदेवाह— असितकेशान्तां गुडालकावृतस्यापि व्यामोहकरीं । शतपत्रनिभेक्षणां । यद्यपीयमसितेक्षणा तथापि संस्थानविशेषे उपमेयं । कमलपत्राक्षस्यापि व्यामोहदायिनीं । सुखार्हां रामोत्सङ्गे स्थातुमर्हां । दुःखितां राक्षसीमध्ये स्थितां दृष्ट्वा ममापि व्यथितं मनः । शाखामृगस्य

ममापि मनो व्यथितं किमुत परमदयालो रा[illegible]
भावः । शोकहर्षयोरपदस्य ममापि मनो व्यथि[illegible]
पुनः कामिन इति वा ॥ २८—२९ ॥ हिम[illegible]
विशेषणेन नलिन्याः पूर्वं बहुकालशोभित[illegible]
तद्वन्नष्टशोभा द्वादशवर्षं निष्प्रतिबन्धं भोगान्[illegible]
नाया आगन्तुको हि विश्लेषः तेनहिनष्टशोभे[illegible]
व्यसनपरम्परया विरह इव संश्लेषोपि मध्येम[illegible]
गत्यनिवृत्तः व्यसनमेव नैरन्तर्येणवृत्तं । अति[illegible]
माना अतिक्रम्यपीड्यमाना । आश्रयाननुरूपं
नमनुभवतीत्यर्थः । सहचररहितेव चक्रवाकी
कालमवगम्य दुःखं सोढुमसमर्था । चक्रवाकी[illegible]
नायमर्थो लभ्यते । साहि रात्रिविरामकालं
दुःखं सोढुमदक्षेति प्रसिद्धं । जनकसुता एवं [illegible]
भविष्यतीति ज्ञात्वा न संवर्धिता केवलंसुखसं[illegible]
त्यर्थः । कृपणां दशां प्रपन्ना । पूर्वोक्तनलिन्[illegible]
नोपमानं भवितुमर्हति । किंचिदुक्तिमात्रं ।
नसापरिच्छेद्यां दुर्दशां प्राप्तेत्यर्थः ॥ ३० ॥ हि[illegible]
पायेन वसन्तेन । नैकसहस्ररश्मिरभ्युत्थितः ।
रश्मिः सूर्यापेक्षया मन्दकरः । चन्द्र इति य[illegible]

[पा०] १ ख. ग. ङ. झ. ञ. ट. द्रष्टुमिच्छति. २ ग. नूनमस्याःपुनः. ३ घ. ट. भार्याःशोभनं. ङ. झ. नार्याः [illegible] ख. नार्याभूषणादपिभूषणं. ४ क. घ.—ट. एषाहि. ५ क. ग. ङ.—ट. शोभनार्हा. ६ क. ग.—ज. ञ. ट. ज्ञात्वा. [illegible] झ. ट. संनिभेक्षणा.. ८ क. संरक्षिता. ९ क. ख. ग. ङ.—ट. निपीड्यमाना. १० ग. घ. दृढंसंजनयन्त्यशोकाः. [illegible] दिनव्यपायेन. च. छ. ज. हिमव्यपायेनतु. १२ ङ. झ. ञ. ट. शीतरश्मिः.

इत्येवमर्थं कपिरन्ववेक्ष्य सीतेयमित्येव निविष्टबुद्धिः ॥
संश्रित्य तस्मिन्निषसाद वृक्षे बली हरीणामृषभस्तरस्वी ॥ ३२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षोडशः सर्गः ॥ १६ ॥

सप्तदशः सर्गः ॥ १७ ॥

नभोमध्यंगतेचन्द्रे हनुमता परितःसीतामासीनानांघोरतरविकृतनानाकृतीनांराक्षसीनांदर्शनम् ॥ १ ॥ तथा तन्मध्य-
ायाःसीतायाअवलोकनजहर्षेण सबाष्पविमोचनं मनसारामलक्ष्मणयोःप्रणामपूर्वकं शिंशुपाग्रेगूढतयाऽवस्थानम् ॥ २ ॥

तः कुमुदषण्डाभो निर्मलो निर्मलं स्वयम् ॥ प्रजगाम नभश्चन्द्रो हंसो नीलमिवोदकम् ॥ १ ॥
ाचिव्यमिव कुर्वन्स प्रभया निर्मलप्रभः ॥ चन्द्रमा रश्मिभिः शीतैः सिषेवे पवनात्मजम् ॥ २ ॥
ददर्श ततः सीतां पूर्णचन्द्रनिभाननाम् ॥ शोकभारैरिव न्यस्तां भारैर्नावमिवाम्भसि ॥ ३ ॥
ृक्षमाणो वैदेहीं हनुमान्मारुतात्मजः ॥ स ददर्शाविदूरस्था राक्षसीर्घोरदर्शनाः ॥ ४ ॥
काक्षीमेककर्णां च कर्णप्रावरणां तथा ॥ अकर्णां शङ्कुकर्णां च मस्तकोच्छ्वासनासिकाम् ॥ ५ ॥
तिकायोत्तमाङ्गीं च तनुदीर्घशिरोधराम् ॥ ध्वस्तकेशीं तथाऽकेशीं केशकम्बलधारिणीम् ॥ ६ ॥
म्बकर्णललाटां च लम्बोदरपयोधराम् ॥ लम्बोष्ठीं चुबुकोष्ठीं च लम्बास्यां लम्बजानुकाम् ॥ ७ ॥
स्वदीर्घां तथा कुब्जां विकटां वामनां तथा ॥ करालां भुग्नवक्त्रां च पिङ्गाक्षीं विकृताननाम् ॥ ८ ॥

कं जनयतीतिवचनविपरिणामेन संबन्धः ॥ ३१-३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामाय-भूषणे शृङ्गारतिलकाख्याने सुन्दराकाण्डव्याख्याने डशः सर्गः ॥ १६ ॥

प्रजगाम प्रकर्षेण जगाम । आकाशपरभागं प्राप्त र्थः ॥ १—२ ॥ शोकभारैर्न्यस्तामिव आक्रान्ता-व स्थितां । अतएव भारैर्न्यस्तां नावमिव स्थितां ३—४ ॥ कर्णौ प्रावरणे शिरस आच्छादकौ स्याः सा कर्णप्रावरणा तां । शङ्कुवत्कर्णौ यस्यास्तां शङ्कुकर्णां । मस्तकोच्छ्वासनासिकां ऊर्ध्वमुखनासिका-मित्यर्थः ॥ ५ ॥ अतिकायोत्तमाङ्गीं । अत्रातिकायश-ब्देन महत्त्वमुच्यते । महाशिरस्कामित्यर्थः । ध्वस्त-केशीं स्वल्पकेशीं । अकेशीं अनुत्पन्नकेशीं । केशक-म्बलधारिणीं कम्बलरूपकेशधारिणीं ॥ ६ ॥ लम्बे कर्णललाटे यस्यास्सा लम्बकर्णललाटा तां । चुबुके ओष्ठः यस्याः सा चुबुकोष्ठी तां ॥ ७ ॥ ह्रस्वदीर्घां अधःकाये ऊर्ध्वकाये च कचित् ह्रस्वां कचिद्दीर्घामि-त्यर्थः । कुब्जां स्थगुमतीं । विकटां स्थूलजङ्घां । करालां दन्तुरां । “ करालो दन्तुरे तुङ्गे ” इत्यमरः ।

ति० तस्मिंश्शिंशुपावृक्षएव निषसाद । तद्रात्रिशेषंपरदिनंच स्थितइत्यर्थः । एवंच सरावणान्तःपुरा सर्वापिलङ्का यामत्रयेण नुद्रलङ्घनदिनरात्रावेव विचिता । तुर्ययामेऽशोकवनिकाप्रवेशइतिबोध्यं ॥ ३२ ॥ इतिषोडशः सर्गः ॥ १६ ॥

ति० नभसोनिर्मलत्वं स्वच्छनीलवर्णत्वं । नभसोनीलत्वंप्रतीत्या कविसंप्रदायेनचबोध्यं ॥ स० कुमुदषण्डाभः कुमुदानांश्वेतो-त्पलानांषण्डःसमूहः तस्याभेवाभायस्येतिवा तस्य आसम्यक् भा कान्तिर्यस्मादितिवा । “ सितेकुमुदकैरवे ” इत्यमरः । निर्मलं च्छं । नीलमिवोदकमित्यनेन गगनेनैल्यमपिध्वनितं । आकाशेनैल्यंच “ आकाशोनीलिमोदेति ” इतिश्रुतेः ॥ १ ॥ ति० तादर्शनादौप्रभया स्वकान्त्यासाचिव्यंसाहाय्यकमिव दिवाक्वचिदेकान्तप्रदेशेस्थितत्वान्निद्राव्याकुलत्वाच्चनसम्यग्राक्षसीनांसीता-श्वदर्शनं । रात्रौचन्द्रोदयेसतितुपुनस्समीपदेशआगत्यस्थितस्यसम्यक्सर्वदर्शनं ॥ २ ॥ ति० शोकभारैः न्यस्तां अधोनीतामिव मज्जमानामिव ॥ ३ ॥ शि० कर्णावेवप्रावरणौ शरीराच्छादकौयस्यास्तां ॥ ५ ॥ स० अतिकायोत्तमाङ्गीं कायं मध्यदेहं नेक्रम्यवर्तमानशीर्षोपेतां ॥ ६ ॥

[पा०] १ छ. इत्येवसर्वं. २ ट. सुजातबुद्धिः. ग. विनम्रबुद्धिः. ङ. झ. तुजातबुद्धिः. ३ क. च. छ. ज. ञ. निशीथे. झ. ञ. ट. निर्मलोदयः. ५ क. ग. अकर्णांशङ्कुकर्णांच. ६ ग. अतिदीर्घोत्तमाङ्गीं. ७ ग. लंबोरुं. ८ घ. लंबनासिकां. ९ झ. स्वांदीर्घां. १० क.—ट. दीर्घांचकुब्जांच. ११ ग. करालीं.

विकृताः पिङ्गलाः कालीः क्रोधनाः कलहप्रियाः ॥ कालायस[1]महाशूलकूटमुद्गरधारिणीः ॥ ९ ॥
वराहमृगशार्दूलमहिषाज[2]शिवामुखीः ॥ गजोष्ट्र[3]हयपादीश्च निखातशिरसोपराः ॥ १० ॥
एकहस्तैकपादाश्च [4]खरकर्ण्यः श्वकर्णिकाः ॥ गो[5]कर्णीर्हस्तिकर्णीश्च हरिकर्णीस्तथापराः ॥ ११ ॥
[6]अनासा अतिनासाश्च तिर्यङ्नासा विनासिकाः ॥ गजसन्निभनासाश्च ललाटोच्छ्वासनासिकाः ॥१२
हस्तिपादा महापादा गोपादाः पादचूडिकाः ॥ अतिमात्रशिरोग्रीवा अतिमात्र[7]कुचोदरीः ॥ १३
अतिमात्रास्यनेत्राश्च दीर्घजि[8]ह्वानखास्तथा ॥ अजामुखीर्हस्तिमुखीर्गोमुखीः सूकरीमुखीः ॥ १४ ॥
हयोष्ट्रखरवक्राश्च राक्षसीर्घोरदर्शनाः ॥ शूलमुद्गरहस्ताश्च क्रोधनाः कलहप्रियाः ॥ १५ ॥
[9]कराला धूम्रकेशीश्च राक्षसीर्विकृताननाः ॥ पिबन्तीः सततं पानं [10]सदा मांससुराप्रियाः ॥ १६ ॥
मांसशोणितदिग्धाङ्गीर्मांसशोणितभोजनाः ॥ ता ददर्श कपिश्रेष्ठो रोमहर्षणदर्शनाः ॥
स्कन्धवन्तमुपासीनाः परिवार्य वनस्पतिम् ॥ १७ ॥
तस्याधस्ताच्च [11]तां देवीं राजपुत्रीमनिन्दिताम् ॥ [12]लक्षयामास लक्ष्मीवान्ह[13]नुमाञ्जनकात्मजाम् ॥१८
निष्प्रभां शोकसंतप्तां मलसंकुलमूर्धजाम् ॥ क्षीणपुण्यां च्युतां भूमौ तारां निपतितामिव ॥ १९
चारित्रव्यपदेशाढ्यां भर्तृदर्शनदुर्गताम् ॥ भूषणैरुत्तमैर्हीनां भर्तृवात्सल्य[14]भूषणाम् ॥ २० ॥
राक्षसाधिपसंरुद्धां बन्धुभिश्च विनाकृताम् ॥ वियूथां सिंहसंरुद्धां बद्धां गजवधूमिव ॥ २१ ॥
चन्द्ररेखां पयोदान्ते शारदाभ्रैरिवावृताम् ॥ क्लिष्टरूपामसंस्पर्शादयुक्तामिव वल्लकीम् ॥ २२ ॥
[15]सीतां भर्तृवशे युक्तामयुक्तां [16]राक्षसीवशे ॥ अशोकवनिकामध्ये शोकसागरमाप्लुताम् ॥ २३ ॥
ताभिः परिवृतां तत्र सग्रहामिव रोहिणीम् ॥ ददर्श [17]हनुमान्देवीं [18]लतां कुसुमितामिव ॥ २४ ॥
सा मलेन च दिग्धाङ्गी वपुषा चाप्यलंकृता ॥ मृणाली पङ्कदिग्धेव [19]विभाति न विभाति च ॥२५

भुग्नवक्त्रां निम्नवक्त्रां । विकृताननां नासिकौष्ठविरहिताननामित्यर्थः । एतदन्तस्य पूर्वेण ददर्शेत्यनेनान्वयः ॥ ८ ॥ विकृता इत्यादेरुत्तरेण ददर्शेत्यनेनान्वयः । एता एकाक्ष्यादिराक्षसीभ्योन्याः । विकृताः विकृतवेषाः ॥ ९ ॥ निखातशिरसः गात्रान्तरवर्तिशिरसः ॥ १० ॥ हरिकर्णीः कपिकर्णीः ॥ ११—१२ ॥ पादे चूडिका यासां ताः पादचूडिकाः । “ शिखा चूडा केशपाशी” इत्यमरः ॥ १३—१५ ॥ राक्षसीर्विकृतानना इत्यत्र पुनः राक्षसीपदमविस्मरणार्थं ॥ १६—१७ ॥ लक्ष्मीवान् सीतादर्शनजनितशोभायुक्तः ॥ १८ ॥ च्युतां स्थानाच्चलितां ॥ १९ ॥ चारित्रव्यपदेशाढ्यां पतिव्रताधर्माचरणख्यातिसंपन्न भर्तृदर्शनेन दुर्गतां दरिद्रां । भर्तृदर्शनरहितामित्यर्थ भर्तृवात्सल्यभूषणां वात्सल्यपदमत्र स्नेहमात्रवा ॥ २०—२१ ॥ पयोदान्ते वर्षान्ते । चन्द्ररेखाय स्पष्टास्पष्टत्वद्योतनायेदं विशेषणं । असंस्पर्श उद्वर्तनादिसंस्काररराहित्यात् । अयुक्तां अनारोपित त्रीं । वल्लकीं वीणां ॥ २२ ॥ सीतामित्यादिपरशेषः राक्षसीवशे अयुक्तां अनवस्थितां । तद्वचनान्यशृण्वन्तीमित्यर्थः ॥ २३ ॥ लतां कुसुमितामिव तथाद

ति० पयोदान्ते वर्षान्ते । अनेन दुःखस्यात्यल्पावशिष्टत्वंसूच्यते ॥ २२ ॥ **ती०** लतामकुसुमामिव आभरणपरिहारादितिभावः ॥ २४ ॥

[पा०] १ क. महाप्रास. २ ग.—ट. शिवामुखाः. ३ घ. ङ. झ. ञ. ट. हयपादाश्च. च. छ. ज. शिववक्राश्च. क. हयवक्राश्च. ४ ग. घ. खरकर्णाश्वकर्णिकाः. ५ छ. ज. गोकर्णाहस्तिकर्णाश्चहरिकर्णास्तथा. ६ ङ. झ. ट. अतिनासाश्च श्चिच्चतिर्यक्श्वासाअनासिकाः. ७ ग. कृशोदरीः. ट. कुचोदराः. ८ ङ. छ. झ. ञ. ट. जिह्वाननास्तथा. ९ झ. ञ. ट. करा धूम्रकेशिन्यो. १० झ. ञ. ट. सुरामांससदाप्रियाः. ११ क. वैदेहीं. १२ क. दर्शयामास. १३ घ. ञ. हनूमान्मारुतात्म १४ क. ख. घ.—ट. भूषितां. १५ ङ. झ. ञ. ट. सतांभर्तृहिते. च. छ. ज. सतांपतिहिते. ग. सदाभर्तृहिते. १६ क. ग. ङ. झ. रक्षसांवशे. १७ ङ. झ. ञ. ट. हनुमांस्तत्र. १८ ङ. ट. लतामकुसुमामिव. १९ क. ग. ङ. झ. ट. विभातिचनभाति

लनेन तु वस्त्रेण परिक्लिष्टेन भामिनीम् ॥ संवृतां मृगशावाक्षीं ददर्श हनुमान्कपिः ॥ २६ ॥
देवीं दीनवदनाम[1]दीनां भर्तृतेजसा ॥ रक्षितां स्वेन शीलेन सीतामसितलोचनाम् ॥ २७ ॥
दृष्ट्वा हनुमान्सीतां मृगशावनिभेक्षणाम् ॥ मृ[2]गकन्यामिव त्रस्तां वीक्षमाणां स[3]मन्ततः ॥ २८ ॥
न्तीमिव निश्श्वासैर्वृक्षान्पल्लवधारिणः ॥ संघातमिव शोकानां दुःखस्योर्मिमिवोत्थिताम् ॥२९॥
क्षमां सुविभक्ताङ्गीं विनाभरणशोभिनीम् ॥ प्रहर्षमतुलं लेभे मारुतिः प्रेक्ष्य मैथिलीम् ॥ ३० ॥
जानि च[5] सोश्रूणि तां दृष्ट्वा मदिरेक्षणाम् ॥ मुमोच हनुमांस्तत्र नमश्चक्रे च राघवम् ॥ ३१ ॥
स्कृत्वा स रामाय लक्ष्मणाय च वीर्यवान् ॥ सीतादर्शनसंहृष्टो हनुमान्संवृतोऽभवत् ॥ ३२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तदशः सर्गः ॥ १७ ॥

अष्टादशः सर्गः ॥ १८ ॥

शिंशुपाविटपाग्रगेनहनुमता अपररात्रेप्रबुध्यमदनपरवशतयाप्रमदाशतेनसह सीतासमीपमागच्छतोरावणस्यावलोकनम् १ ॥ ततः सीतासमीपमागतस्यरावणस्यचेष्टादेःस्फुटावगमाय उच्चशाखाग्रादवरोहणेनाधश्शाखाग्रेनिगूढमवस्थानम् ॥२॥

था विप्रेक्षमाणस्य वनं पुष्पितपादपम् ॥ विचिन्वतश्च वैदेहीं किंचिच्छेषा निशाऽभवत् ॥ १ ॥
डङ्गवेदविदुषां क्रतुप्रवरयाजिनाम् ॥ शुश्राव ब्र[7]ह्मघोषांश्च विरात्रे ब्रह्मरक्षसाम् ॥ २ ॥
थ मङ्गलवादित्रैः शब्दैः श्रोत्रमनोहरैः ॥ प्रा[8]बुध्यत महाबाहुर्दशग्रीवो महाबलः ॥ ३ ॥
बुध्य तु य[10]थाकालं राक्षसेन्द्रः प्रतापवान् ॥ स्रस्तमाल्याम्बरधरो वैदेहीमन्वचिन्तयत् ॥ ४ ॥
शं नियुक्तस्तस्यां च मदनेन मदोत्कटः ॥ न[11] स तं राक्षसः कामं शशाकात्मनि गूहितुम् ॥ ५ ॥

यामित्यर्थः ॥ २४—२५ ॥ मलिनेनेत्यादिश्लोकद्व-
यंकं वाक्यं ॥ २६—२७ ॥ तामित्यादिश्लोकत्रयमेकं
क्यं ॥ २८—२९ ॥ क्षमां क्षमामिव स्थितां ।
गीर्याध्यवसानादभेदोक्तिः । तां दृष्ट्वा तां प्रेक्ष्येत्य-
योर्विशेषणविशेष्यभेदान्न पौनरुक्त्यं । दूरप्रयुक्त-
नुस्मरणार्थं वा पुनरुक्तिः ॥ ३० ॥ राघवं नम-
के । उपपदविभक्त्यपेक्षया कारकविभक्तेर्बलीय-
ान्नमस्करोति देवानित्यादाविव द्वितीया ॥ ३१ ॥
तः राक्षस्यदर्शनाय शिंशुपापर्णैर्गूढोऽभूत् ॥ ३२ ॥
त श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे
शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तदशः
सर्गः ॥ १७ ॥

विप्रेक्षमाणस्य विचिन्वतश्च विप्रेक्षमाणे विचि-न्वति च तस्मिन्नित्यर्थः । " यस्य च भावेन भावल-क्षणं " इत्यर्थे षष्ठी ॥ १ ॥ विरात्रे अपररात्रे " अहस्सर्वैकदेशसंख्यातपुण्याच्च रात्रेः " इत्यत्र चकारादव्ययादुत्तरस्य रात्रिशब्दस्य समासान्तोच् प्रत्ययः । ब्रह्मरक्षसां ब्राह्मणत्वविशिष्टरक्षसां । ब्रह्मघोषान् वेदघोषान् ॥ २—४ ॥ नियुक्तः प्रेरितः

ति० क्षामां कृशां ॥ ३० ॥ ती० अत्रतांतामितितच्छब्दावृत्त्यातत्तदवस्थाभेदस्यवर्णितत्वादपौनरुक्त्यं ॥ ३१ ॥ इति
दशः सर्गः ॥ १७ ॥

ती० वस्तुतस्तुमदनेसत्यपिमदोत्कटोन । अतएवतस्यांसीतायांनियुक्तः नितरांयुक्तः विनीतइत्यर्थः । अतएवराक्षसः तंकामं
मनिगूहितुंनशशाकेतिकाकुः ॥ ति० भृशंनियुक्तः गाढाभिनिवेशितचित्तः । कामं कामवेगं । ईदृशेषुतीर्थस्यान्यथायोजनं
त्येव । रक्षसस्तमोगुणाविष्टस्यभगवन्मायामोहितस्याकृत्येष्वेवप्रवृत्तेः । तथाक्रियमाणंभगवद्ध्यानमपिपापभोगोत्तरंजन्मान्तरेउत्त-
लायेतिबोध्यं । अतएवऋक्षाश्वमेधनाम्नोराज्ञोदानस्तावकऋङ्मन्त्रः " नयुष्मेवाजबन्धवनिनित्सुश्चनमर्त्यः । अवद्यमधिदीधरत् "

[पा०] १ ङ. महीनां. २ ग. नागकन्यामिव. ३ ग. ततस्ततः. ४ घ. ङ. झ. ञ. ट. तांक्षामां. क. च. छ. ज. तां-
ां. ग. सीतांसमविभक्ताङ्गीं. ५ क. च. छ. ज. तथाश्रूणि. ६ क. घ. च. ज.—ट. नमस्कृत्वाच. ७ ङ. ज. झ. ट. ब्रह्म-
वान्स. ८ घ. ङ. च. झ. ञ. ट. प्राबोध्यत. ९ ग. विबुध्यच. १० ङ. झ. ञ. ट. महाभागो. ११ ङ. झ. ट. नतु.

स सर्वाभरणैर्युक्तो बिभ्रच्छ्रियमनुत्तमाम् ॥ तां [1]नगैर्बहुभिर्जुष्टां सर्वपुष्पफलोपगैः ॥ ६ ॥
वृतां पुष्करिणीभिश्च नानापुष्पोपशोभिताम् ॥ सदा[2]मदैश्च विहगैर्विचित्रां [3]परमाद्भुताम् ॥ ७ ॥
ईहामृगैश्च [4]विविधैर्जुष्टां दृष्टिमनोहरैः ॥ वीथीः संप्रेक्षमाणश्च मणिकाञ्चन[5]तोरणाः ॥ ८ ॥
नानामृगगणाकीर्णां फलैः प्रपतितैर्वृताम् ॥ अशोकवनिकामेव प्राविशत्संततद्रुमाम् ॥ ९ ॥
[6]अङ्गनाशतमात्रं तु तं व्रजन्त[7]मनुव्रजत् ॥ महेन्द्रमिव पौलस्त्यं देवगन्धर्वयोषितः ॥ १० ॥
दीपिकाः [8]काञ्चनीः काश्चिज्जगृहुस्तत्र योषितः ॥ वालव्यजनहस्ताश्च तालवृन्तानि चापराः ॥११
[9]काञ्चनैरपि भृङ्गारैर्जह्रुः सलिलमग्रतः ॥ [10]मण्डलाग्रान्बृसीं चैव [11]गृह्यान्याः पृष्ठतो ययुः ॥ १२ ॥
काचिद्रत्नमयीं [12]स्थालीं पूर्णां पानस्य [13]भामिनी ॥ दक्षिणा दक्षिणेनैव [14]तदा जग्राह पाणिना ॥ १३
राजहंसप्रतीकाशं छत्रं पूर्णशशिप्रभम् ॥ सौवर्णदण्डमपरा गृहीत्वा पृष्ठतो ययौ ॥ १४ ॥
निद्रामदपरीताक्ष्यो रावणस्योत्तमाः स्त्रियः ॥ अनुजग्मुः पतिं वीरं घनं विद्युल्लता इव ॥ १५ ॥
व्याविद्धहारकेयूराः समामृदितवर्णकाः ॥ समागलितकेशान्ताः सस्वेद[15]वदनास्तथा ॥ १६ ॥
घूर्णन्त्यो मदशेषेण निद्रया च शुभाननाः ॥ स्वेदक्लिष्टाङ्गकुसुमाः [16]सुमाल्याकुलमूर्धजाः ॥ १७ ॥
प्रयान्तं नैर्ऋतपतिं नार्यो मदिरलोचनाः ॥ बहुमानाच्च कामाच्च [17]प्रियाः भार्यास्तमन्वयुः ॥ १८ ॥
स च कामपराधीनः पतिस्तासां महाबलः ॥ सीतासक्तमना मन्दो मदाञ्चितगतिर्बभौ ॥ १९ ॥
ततः काञ्चीनिनादं च नूपुराणां च निस्स्वनम् ॥ शुश्राव परमस्त्रीणां स कपिर्मारुतात्मजः ॥२०॥

॥ ५—७ ॥ वीथीः उद्यानवीथीः ॥ ८—९ ॥ महेन्द्रं देवगन्धर्वयोषितइव व्रजन्तं तं । अङ्गनाशतमात्रं अनुव्रजत् अन्वव्रजत् ॥ १० ॥ तालवृन्तानि व्यजनानि ॥ ११ ॥ भृङ्गारैः कनकालुकाभिः । " भृङ्गारः कनकालुका " इत्यमरः । मण्डलाग्रान् असिविशेषान् । " मण्डलाग्रो नतार्थकः " इति वैजयन्ती । बृसीं आस्तरणं । गृह्य गृहीत्वा ॥ १२ ॥ पानस्य पूर्णां पीयत इति पानं मधु तस्य पूर्णां ते पूर्णा । " पूरणगुण—" इत्यादिना सुहितार्थयो षष्ठीसमासनिषेधज्ञापकादत्र षष्ठी । स्थालीं पात्र ॥ १३—१५ ॥ व्याविद्धाः व्यत्यस्ततया न्यस्ताः समामृदितवर्णकाः संमृष्टानुलेपनाः । " अङ्गराग समालम्भो वर्णकश्च विलेपनं" इति निघण्टुः ॥१६- १८ ॥ मदेनाञ्चिता गतिर्यस्य स मदाञ्चितगति

इति । तस्यार्थः—वाजमित्यन्ननाम । अन्नदानेनयेसर्वेषांबन्धवःतेषांसंबोधनं । हेवाजबन्धवः युष्मेयुष्मास्वधि । सप्तम्यर्थानुवा धिः । निनित्सुश्चन निन्दनेच्छाशीलोपिमर्त्योऽवद्यं नदीधरत् नधारयति । भगवदनुसन्धानेनैवनिष्पापत्वादिति । एवंचभगव निन्दावरुद्धभावेनध्यानमपिनरकभोगोत्तरंजन्मान्तरेउत्तमफलाय । अतएवास्यमरणोत्तरंचतुर्थचतुर्युग्यांचेदिराजकुलेजन्म । च विंशतिचतुर्युग्यांरामावतारइतिहरिवंशोक्तेः । तावत्पर्यन्तंचैतत्पापफलभोगइत्यर्थायातमितिबोध्यं ॥ **शि०** मदनेन मादक राऽपानादिना मदोत्कटः उत्कटदैन्यविशिष्टोपिराक्षसः । यतस्तस्यांसीतायां । भृशं अत्यन्तं । नियुक्तः संस्थापितचित्तः । अतः सीतागोपनविषयकं कामं इच्छां । आत्मनि मनसि । गूहितुं नियमितुं । नशशाक ॥ **स०** मदनेन तस्यांसीतायांनियुक्तः प्रेरि पूर्वमेव । मदोत्कटः व्यक्तमदः । तं मदनं । गूहितुं निग्रहीतुं ॥ ५ ॥ **ति०** अङ्गनाः । शतमात्रमित्यवधारणेइतिकतकः देवादियोषितोमहेन्द्रमिव पौलस्त्यं अनुव्रजन् । अडभावआर्षः ॥ **स०** अङ्गनाशतमेवाङ्गनाशतमात्रं देवगन्धर्वयोषितोमहे मिवपौलस्त्यं अनुव्रजदभूत् ॥ १० ॥ **ती०** भृङ्गाराः धत्तूरकुसुमसदृशजलपात्राणि ॥ **ति०** मण्डलाग्रावृत्तपर्यन्ताः बृसीः आस विशेषान् । तपस्विनामिमेतृणादिना । अस्यतुस्वर्णेनेतिविशेषः ॥ **स०** बृसीः ऋषिपुत्रत्वाद्रावणस्यऋष्यासनवत्त्वं ॥ १२ ॥

[पा०] १ ग. ङ.—ट. नगैर्विविधैः. २ ग. ङ. ट. मत्तैश्च. ३ क. ङ. झ. ञ. ट. परमाद्भुतैः. ४ क. ग. घ. च.— विविधैर्वृतां. ५ ख. ङ. झ. ञ. ट. तोरणां. ६ ख. झ. ञ. ट. अङ्गनाःशतमात्रंतु. ७ ख. झ. ञ. ट. मनुव्रजन्. ८ काञ्चनीश्चापिजगृहुः. ९ ङ. झ. ञ. ट. काञ्चनैश्चैव. १० ग. ङ.—ट. मण्डलाग्राबृसीश्चैव. क. घ. मण्डलाग्रानसींश्चैव. ११ वहन्त्यःपृष्ठतो. १२ क.—ङ. छ. झ. ञ. ट. पात्रीं. १३ ङ. झ. ञ. ट. भ्राजतीं. १४ क. परिजग्राह. १५ च. ज. वदनांबुजाः. १६ ख. घ.—ञ. समाल्याकुल. १७ च.—ट. प्रियभार्याः.

चाप्रतिमकर्माणमचिन्त्यबलपौरुषम् ॥ द्वारदेशमनुप्राप्तं ददर्श हनुमान्कपिः ॥ २१ ॥
पिकाभिरनेकाभिः समन्तादवभासितम् ॥ गन्धतैलावसिक्ताभिर्ध्रियमाणाभिरग्रतः ॥ २२ ॥
ामदर्पमदैर्युक्तं जिह्मताम्रायतेक्षणम् ॥ समक्षमिव कन्दर्पमपविद्धशरासनम् ॥ २३ ॥
थितामृतफेनाभमरजो वस्त्रमुत्तमम् ॥ सलीलमनुकर्षन्तं विमुक्तं सक्तमङ्गदे ॥ २४ ॥
पत्रविटपे लीनः पत्रपुष्पघनावृतः ॥ समीपमिव संक्रान्तं निध्यातुमुपचक्रमे ॥ २५ ॥
वेक्षमाणस्तु ततो ददर्श कपिकुञ्जरः ॥ रूपयौवनसंपन्ना रावणस्य वरस्त्रियः ॥ २६ ॥
ाभिः परिवृतो राजा सुरूपाभिर्महायशाः ॥ तन्मृगद्विजसंघुष्टं प्रविष्टः प्रमदावनम् ॥ २७ ॥
ीबो विचित्राभरणः शङ्कुकर्णो महाबलः ॥ तेन विश्रवसः पुत्रः स दृष्टो राक्षसाधिपः ॥ २८ ॥
तः परमनारीभिस्ताराभिरिव चन्द्रमाः ॥ तं ददर्श महातेजास्तेजोवन्तं महाकपिः ॥ २९ ॥
वणोऽयं महाबाहुरिति संचिन्त्य वानरः ॥ [सोऽयमेव पुरा शेते पुरमध्ये गृहोत्तमे ॥]
वप्लुतो महातेजा हनुमान्मारुतात्मजः ॥ ३० ॥
तथाप्युग्रतेजाः सँन्निर्धूतस्तस्य तेजसा ॥ पत्रगुह्यान्तरे सक्तो हनुमान्संवृतोऽभवत् ॥ ३१ ॥
ं तामसितकेशान्तां सुश्रोणीं संहतस्तनीम् ॥ दिदृक्षुरसितापाङ्गामुपावर्तत रावणः ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टादशः सर्गः ॥ १८ ॥

१९—२०॥ द्वारदेशं अशोकवनद्वारदेशं ॥ २१ ॥ न्धतैलं गन्धवासिततैलं ॥ २२ ॥ समक्षं प्रत्यक्षं । पविद्धशरासनं अधृतशरासनं ॥ २३ ॥ मथितामृफेनाभं मथितं तक्रं अमृतं धारोष्णं तयोर्यत्फेनं दाभं । "निरम्बु बोलं मथितं धारोष्णं त्वमृतंपयः" त्युभयत्र वैजयन्ती । विमुक्तं स्वस्थानात्प्रचलितं । ङ्गदे सक्तं वस्त्रं सलीलं यथा भवति तथा अनुकर्षतमित्यन्वयः ॥ २४ ॥ पत्रविटपे पत्रवति विटपे । ीनः छन्नः । पत्रपुष्पघनावृतः पत्रपुष्पसमूहावृतः । वशब्दोवाक्यालंकारे । यद्वा दूरे समागतमपि ंजसा समीपे संक्रान्तमिव स्थितं । तं निध्यातुं ्रष्टुमुपचक्रमे । "निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणं " इत्यमरः ॥ २५—२६ ॥ प्रमदावनं अन्तःपुरोद्यानं ॥ २७ ॥ क्षीबः मत्तः । शङ्कुकर्णः गर्वेण स्तब्धकर्ण इत्यर्थः ॥ २८—२९ ॥ अवप्लुतः अवरूढः । रावणचेष्टास्सर्वा द्रष्टुं पूर्वस्थानादधःशाखां समाश्रित इत्यर्थः ॥ ३० ॥ सः हनुमान् । तथा पूर्वोक्तरीत्या । उग्रतेजास्सन्नपि । तस्य रावणस्य । तेजसा निर्धूतः सन् । पत्रगुह्यान्तरे पत्रगूढप्रदेशे । संवृतोऽभवत् गूढोऽभवत् ॥ ३१—३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टादशः सर्गः ॥ १८ ॥

ति० अपविद्धशरासनं त्यक्तेक्षुचापं । कन्दर्पमिवस्थितं ॥२३॥ ति० अमृतंपयः । मथितपयःफेनवच्छुक्लाआभायस्यतत् । सपुष्पं ्पमालासहितं । विमुक्तं विशिष्टमुक्तावन्तं । सपुष्पमवकर्षन्तमित्येवपाठः । तीर्थस्तु एतद्योजनाशक्त्यासलीलमवकर्षन्तमितिपा कल्पयति ॥ २४ ॥ स० क्षीबः मत्तः । शङ्कुकर्णः तन्नामकोयोवनपालस्तेनदृष्टः ॥ २८ ॥ स० सोयंरावणः पुरमध्ये प्रासादध्ये । " गृहोपरिगृहंपुरं " इतिविश्वः । शेतेपुरा अशेत ॥ ३० ॥ ति० यद्यपिससमुद्रलङ्घनकर्ता समारुतात्मजः उग्रतेजाः । थापि तस्यरावणस्यतेजसानिर्धूतः तस्यपुरोऽवस्थातुमशक्नुवन् पत्रे पत्रबहुले । अतएव गुह्यान्तरे शाखान्तरे । सक्तः स्थितः । त्राप्यत्यल्पशरीरतयासंवृतः गुप्तोऽभवत् । सर्वमायातिरस्कारकमायावतस्तस्यदृष्ट्यग्रेमाययाऽल्पशरीरादिमत्त्वेनस्थातुमशक्यत्वा ्वंकरणं ॥ ३१ ॥ इत्यष्टादशः सर्गः ॥ १८ ॥

[पा०] १ ङ. झ. ञ. ट. सपुष्पमवकर्षन्त. घ. च. छ. ज. सपुष्पमनु. २ ङ. च. ज.—ट. पुष्पशतावृतः. घ. पुष्पवावृतः. ३ क. ख. घ.—ट. मुपसंक्रान्तं. ४ घ. प्रध्यातुं. ङ. झ. ट. विज्ञातुं. ५ ङ.—ट. तदा. ६ इदमर्धं क. ङ.—ट. ाटेपुदृश्यते. ७ क. ख. ङ. ज. झ. ट. सनिर्धूतः. ८ ङ. झ. ञ. ट. पत्रेगुह्यान्तरे. ९ ङ.—ट. मतिमान्. १० क. च. ज. ीतां. ११ ङ.—ट. रसितापाङ्गीं.

एकोनविंशः सर्गः ॥ १९ ॥

ग्रन्थकृतानानावस्त्वौपम्येन बहुधोपवर्णितांसीतांप्रति रावणेनप्रलोभनोपक्रमः ॥ १ ॥

तस्मिन्नेव ततः काले राजपुत्री त्वनिन्दिता ॥ रूपयौवनसंपन्नं भूषणोत्तमभूषितम् ॥ १ ॥
ततो दृष्ट्वैव वैदेही रावणं राक्षसाधिपम् ॥ प्रावेपत वरारोहा प्रवाते कदली यथा ॥ २ ॥
आच्छाद्योदरमूरुभ्यां बाहुभ्यां च पयोधरौ ॥ उपविष्टा विशालाक्षी रुदन्ती वरवर्णिनी ॥ ३ ॥
दशग्रीवस्तु वैदेहीं रक्षितां राक्षसीगणैः ॥ ददर्श सीतां दुःखार्तां नावं सन्नामिवार्णवे ॥ ४ ॥
असंवृतायामासीनां धरण्यां संशितव्रताम् ॥ छिन्नां प्रपतितां भूमौ शाखामिव वनस्पतेः ॥ ५
मलमण्डनचित्राङ्गीं मण्डनार्हाममण्डिताम् ॥ मृणाली पङ्कदिग्धेव विभाति न विभाति च ॥ ६
समीपं राजसिंहस्य रामस्य विदितात्मनः ॥ संकल्पहयसंयुक्तैर्यान्तीमिव मनोरथैः ॥ ७ ॥
शुष्यन्तीं रुदतीमेकां ध्यानशोकपरायणाम् ॥ दुःखस्यान्तमपश्यन्तीं रामां राममनुव्रताम् ॥ ८ ॥
वेष्टमानां तथाऽऽविष्टां पन्नगेन्द्रवधूमिव ॥ धूप्यमानां ग्रहेणेव रोहिणीं धूमकेतुना ॥ ९ ॥
वृत्तशीलकुले जातामाचारवति धार्मिके ॥ पुनःसंस्कारमापन्नां जातामिव च दुष्कुले ॥ १० ॥
अभूतेनापवादेन कीर्तिं निपतितामिव ॥ आम्नायानामयोगेन विद्यां प्रशिथिलामिव ॥ ११ ॥
सन्नामिव महाकीर्तिं श्रद्धामिव विमानिताम् ॥ पूजामिव परिक्षीणामाशां प्रतिहतामिव ॥ १२ ॥
आयतीमिव विध्वस्तामाज्ञां प्रतिहतामिव ॥ दीप्तामिव दिशं काले पूजामपहृतामिव ॥ १३ ॥

तस्मिन्नित्यादिश्लोकद्वयमेकान्वयं ॥ ततः रावणागमनानन्तरं । तस्मिन्नेव काले तदागमनानन्तरकाल एव । भूषणोत्तमभूषितं रूपयौवनसंपन्नं रावणं ततो दृष्ट्वैव तत्र दूरदेश एव दृष्ट्वा प्रावेपतेतिसंबन्धः ॥ १–५ ॥ मलमण्डनचित्राङ्गीं मलरूपमण्डनेन चित्राङ्गीं । मलावृतामप्याश्चर्यावहदेहामित्यर्थः । मृणाली पङ्कदिग्धेवेत्यत्र येत्यध्याहार्यं ॥ ६—८ ॥ आविष्टां मणिमन्त्राद्यभिभूतां । धूप्यमानां संतप्यमानां । धूमः केतुरिव धूमकेतुः केतुना ग्रहेणेत्यर्थः । यद्वा ग्रहेण ग्राहकेण आच्छादकेनेति धूमकेतुर्विशिष्यते ॥ ९ ॥ वृत्तं दृढं शीलं स्वभावो यस्य तत् तच्च तत् कुलं च तस्मिन् । आचारवति समयाचारवति । धार्मिके यज्ञादिधर्मप्रधाने एवंभूते कुले जातां । संस्क मापन्नां विवाहरूपसंस्कारमापन्नां । अतः संस्क द्वारा दुष्कुले पुनर्जातामिव स्थितां । कुमाराणामुप यनमिव कुमारीणां विवाहो द्वितीयं जन्म । "वै हिको विधिः स्त्रीणामौपनायनिकः स्मृतः" इ स्मृतेः ॥ १०—११ ॥ सन्नां क्षीणां । श्रद्धामि विमानितां अवमानितामित्यर्थः । अवमाने हि अवमन्तरि श्रद्धा मन्दीभवति । पूजामिव परिक्षी स्वल्पपूजाद्रव्यामित्यर्थः । प्रतिहतां निष्फलां ॥ १२ आयतीं धनलाभं । विध्वस्तां मन्दीभूतां । प्रतिह अनुष्ठितां । दीप्तां दाहयुक्तां । काले उत्पातकाले पूजामपहृतामिव । अत्र पूजाशब्देन पूजाद्रव्यमुच्य

ति० मलेनमण्डनस्थानेषुदिग्धाङ्गीं रूषिताङ्गीं । चित्राङ्गीमितिपठित्वा मलरूपेणमण्डनेन चित्राङ्गीं कर्बुरामित्यर्थेतीर्थआह संन्यासित्वादुचितैवतस्यमलेपिमण्डनत्वबुद्धिः । ईदृशींयांददर्श सा पङ्कदिग्धामृणालीवविभातिनविभातिच ॥ स्वरूपशोभयाअति लावराच्चविभाति नविभातिचेत्यर्थः ॥ ६ ॥ ति० वृत्तमाचारः । शीलं सत्स्वभावः । तद्युते विहितकर्मानुष्ठानवतिचकुलेजात तादृशएवकुले पुनःसंस्कारं पाणिग्रहणसंस्कारमापन्नामपि दुष्कुलेजातां उत्पन्नां तत्रैवप्राप्तसंस्कारामिवचमलिनांस्थितां ॥ स धार्मिके एतादृशेपितृकुलेजाता । सैवदुष्कुले वृत्तादिरहितेविवाहाख्यसंस्कारेणपुनर्जाताचेत्सायथावर्तेत तथाविद्यमानां ॥ १०

[पा०] १ घ. ह्यनिन्दिता. २ क. ख. घ. ङ. छ.—ट. ऊरुभ्यामुदरंछाद्य. ३ क. घ.—ट. दीनां. ४ ख. ङ. झ. ट. मण्डनदिग्धाङ्गीं. ५ क. ख. विभातिचनभातिच. ६ क. शोकध्यानपरायणां. ७ क. ख. घ.—ज. ञ. ट. वेष्टमानाम ८ झ. ट. वृत्तशीलेकुले. ९ ख. विनाशितां. १० क. ख. ङ. ज. झ. ट. प्रज्ञामिव. ११ ङ.—ञ. पूजामपहृतामिव. पूजांप्रतिहृतामिव.

नीमिव विध्वस्तां हतशूरां चमूमिव ॥ प्रभामिव तमोध्वस्तामुपक्षीणामिवापगाम् ॥ १४ ॥
मिव परामृष्टां शान्तामग्निशिखामिव ॥ पौर्णमासीमिव निशां राहुग्रस्तेन्दुमण्डलाम् ॥ १५ ॥
त्कृष्टपर्णकमलां वित्रासितविहङ्गमाम् ॥ हस्तिहस्तपरामृष्टामाकुलां पद्मिनीमिव ॥ १६ ॥
शोकातुरां शुष्कां नदीं विस्राविताामिव ॥ परया मृजया हीनां कृष्णपक्षनिशामिव ॥ १७ ॥
मारीं सुजाताङ्गीं रत्नगर्भगृहोचिताम् ॥ तप्यमानामिवोष्णेन मृणालीमचिरोद्धृताम् ॥ १८ ॥
ीतामालितां स्तम्भे यूथपेन विनाकृताम् ॥ निःश्वसन्तीं सुदुःखार्तां गजराजवधूमिव ॥ १९ ॥
या दीर्घया वेण्या शोभमानामयत्नतः ॥ नीलया नीरदापाये वनराज्या महीमिव ॥ २० ॥
वासेन शोकेन ध्यानेन च भयेन च ॥ परिक्षीणां कृशां दीनामल्पाहारां तपोधनाम् ॥ २१ ॥
याचमानां दुःखार्तां प्राञ्जलिं देवतामिव ॥ भावेन रघुमुख्यस्य दशग्रीवपराभवम् ॥ २२ ॥
समीक्षमाणां रुदतीमनिन्दितां सुपक्ष्मताम्रायतशुक्ललोचनाम् ॥
अनुव्रतां राममतीव मैथिलीं प्रलोभयामास वधाय रावणः ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

विंशः सर्गः ॥ २० ॥

रावणेन सीतांप्रति प्रलोभनाय चाटुवचनोपन्यासपूर्वकंस्वाङ्गीकरणप्रार्थना ॥ १ ॥

तां पतिव्रतां दीनां निरानन्दां तपस्विनीम् ॥ साकारैर्मधुरैर्वाक्यैर्न्यदर्शयत रावणः ॥ १ ॥
दृष्ट्वा नागनासोरु गूहमाना स्तनोदरम् ॥ अदर्शनमिवात्मानं भयान्नेतुं त्वमिच्छसि ॥ २ ॥

१३ ॥ विध्वस्तां हिमादिहतां । तमोध्वस्तां तमः- तां । उपक्षीणां स्वल्पजलामित्यर्थः ॥ १४ ॥ मृष्टां शूद्रादिभिरितिशेषः ॥ १५ ॥ उत्कृष्टपर्णक- ां उद्धृतपत्रकमलां ॥ १६ ॥ विस्राविताां रोधोभ- दिना अन्यनिर्गमितजलामित्यर्थः । मृजया उद्वर्त- ाङ्गशोधनेन ॥ १७ ॥ सुजाताङ्गीं सुन्दराङ्गीं १८ ॥ आलितां बद्धां ॥ १९—२० ॥ अल्पाहारां मात्राहारामित्यर्थः । यद्वा अल्पाहारां मितभोजि- मित्युत्तमस्त्रीलक्षणमुच्यते ॥ २१ ॥ रघुमुख्यस्य ः दशग्रीवपराभवं भावेन मनसा । आयाचमानां प्रार्थयन्तीमिव स्थितां ॥ २२ ॥ समीक्षमाणां रक्षकं समीक्षमाणां । सुपक्ष्मेति । अन्ते ताम्रं मध्ये शुक्लम- स्या लोचनमित्युच्यते ॥ २३ ॥ इति श्रीगोविन्दरा- जविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनविंशः सर्गः ॥ १९ ॥

साकारैः सेङ्गितैः । "आकाराविङ्गिताकृती" इत्यमरः । न्यदर्शयत स्वाभिप्रायमिति शेषः । सीतायै स्वाभिप्रायं प्रकाशितवानित्यर्थः ॥ १ ॥ अद-

० परामृष्टां वेदवेदिरहितपतितैराक्रान्तां ॥ १५ ॥ ति० गृहीतां धृतां । पश्चात्स्तंभे लाडितां बद्धां ॥१९॥ ति० अल्पाहारां मात्राहारां । अन्नातयाऽन्नस्यग्रहीतुमशक्यत्वात् । देवराजतःपायसलाभेनतदनपेक्षणाच्च ॥ स० शोकेन रामविश्लेषजेन । नन पत्युः । भयेन रावणजन्येन । अल्पाहारां पत्युच्छिष्टंविनान्यस्यस्वीकारायोग्यत्वाच्छरीरयात्रार्थं नीरस्याशितानशितत्वो- ग्रहणस्यादोषत्वात् । पत्युर्नारायणावतारत्वेनतत्रतत्सांनिध्यविशेषात्तद्ग्रहोयुक्तः । उपेन्द्रावतारत्वाद्रामस्य इन्द्रस्यतदग्रजत्वात्त- ायसाशनंगौरवतःस्वान्नत्वाच्चभोजनंयुक्तमितिमन्तव्यं ॥ शि० अल्पः अतिसूक्ष्मः वायुरित्यर्थः । आहारोयस्यास्तां ॥ २१ ॥ य स्ववधार्थमेव । नतुतेनकिंचित्प्रयोजनमितिभावः ॥ २३ ॥ इत्येकोनविंशः सर्गः ॥ १९ ॥
ति० परिवृतां राक्षसीभिरितिशेषः ॥ १ ॥ ती० वस्तुतस्तु पुत्रसमभृत्यदर्शनविषयेभयादिकंनोचितमितिभावः । ति० नेतु-

[पा०] १ ङ. झ. ट. तमोग्रस्तेन्दु. २ क. घ. च.—ट. माकुलामिवपद्मिनीं. ३ क. घ. शोकाकुलां. ४ ख. ङ. झ. ट. तांलाडितां. क. गृहीतांबलिनास्तंभे. ५.क. सीतां. ६ ङ. झ. ञ. ट. परिवृतां.

कामये त्वां विशालाक्षि बहुमन्यस्व मां प्रिये ॥ सर्वाङ्गगुणसंपन्ने सर्वलोकमनोहरे ॥ ३ ॥
नेह केचिन्मनुष्या वा राक्षसाः कामरूपिणः ॥ व्यपसर्पतु ते सीते भयं मत्तः समुत्थितम् ॥
स्वधर्मो रक्षसां भीरु सर्वथैव न संशयः ॥ गमनं वा परस्त्रीणां हरणं संप्रमथ्य वा ॥ ५ ॥
एवं चैतदकामां तु न त्वां स्प्रक्ष्यामि मैथिलि ॥ कामं कामः शरीरे मे यथाकामं प्रवर्तताम्
देवि नेह भयं कार्यं मयि विश्वसिहि प्रिये ॥ प्रणयस्व च तत्त्वेन मैवं भूः शोकलालसा ॥ ७
एकवेणी धराशय्या ध्यानं मलिनमम्बरम् ॥ अस्थानेऽप्युपवासश्च नैतान्यौपयिकानि ते ॥ ८
विचित्राणि च माल्यानि चन्दनान्यगुरूणि च ॥ विविधानि च वासांसि दिव्यान्याभरणानि च
महार्हाणि च पानानि शयनान्यासनानि च ॥ गीतं नृत्तं च वाद्यं च लभ मां प्राप्य मैथिलि ॥
स्त्रीरत्नमपि मैवं भूः कुरु गात्रेषु भूषणम् ॥ मां प्राप्य हि कथं नु स्यास्त्वमनर्हा सुविग्रहे ॥ १
इदं ते चारु संजातं यौवनं व्यतिवर्तते ॥ यदतीतं पुनर्नैति स्रोतः शीघ्रमपामिव ॥ १२ ॥
त्वां कृत्वोपरतो मन्ये रूपकर्ता स विश्वसृक् ॥ न हि रूपोपमा त्वन्या तवास्ति शुभदर्शने ॥१

शनं अदृश्यत्वं ॥ २ ॥ मां दृष्ट्वा भीतिर्न कर्तव्येत्याह—कामय इति ॥ ३ ॥ अन्ये च भयहेतवोत्र न सन्तीत्याह—नेहेति ॥ ४ ॥ परदारेच्छा दोष इत्याशङ्क्याह—स्वधर्म इति ॥ संप्रमथ्य बलात्कृत्य ॥५॥ कामं अत्यन्तं । यथाकामं यथेच्छं ॥ ६ ॥ प्रणयस्व स्नेहंकुरु ॥ ७ ॥ एकवेणी असीमन्तितवेणी । धराशय्या भूशयनं । औपयिकानि युक्तानि । "युक्तमौपयिकं" इत्यमरः ॥ ८—१० ॥ मां प्राप्य हीहिः पादपूरणे अप्यर्थो वा । हे सुविग्रहे मां प्राप्य कथमनर्हा स्याः ॥ ११—१२ ॥ उपरतः निवृ अत्रेतिकरणं द्रष्टव्यं । उत्तरोत्तरं सातिशयं सिसृक्षुर्विधाता त्वां सृष्ट्वा इतः परं सातिशयं स्रष्टुं न शक्यत इति धिया सृष्टेरुपरत इति

मिच्छसि तत्किमितिशेषः ॥ २ ॥ ती० वस्तुतस्तु त्वांकामये ईश्वरीत्वेनेतिशेषः । अतोमांबहुमन्यस्व ॥ ३ ॥ ती० नेहे मनुष्याराक्षसावा । त्वद्भयकर्तारइतिशेषः । वस्तुतस्तु सर्वैश्वर्यास्त्वनकुत्रापिभयशङ्केतिभावः । ति० किमिदानींमदतिरिक्तपु न्तरजंतवभयं उतममस्पर्शेधर्महानिजं । नाद्यइत्याह—**नेहेति** । मत्तः मदागमनात्समुत्थितं पुरुषान्तरागमनसंभावनयाजातं व्यपसर्पतु । अन्येषामभावात् ॥४॥ ति० नान्त्यइत्याह—स्वधर्मइति । तंस्वधर्ममाह—गमनंवेति । आनुकूल्यंसंपाद्येतिशे संप्रमथ्य बलात्कृत्य । एवंस्वधर्मत्वान्ममनाधर्मः । बलात्कारेचास्वतन्त्रत्वात्स्त्रियाअपिनदोषइतिभावः ॥ ५ ॥ ती० यद्यपि दाराभिमर्शःस्वधर्मः तथापि नाहंत्वामकामयमानांस्प्रक्ष्यामीत्याह—**स्वधर्मइत्यादिश्लोकद्वयेन** । कामं अत्यर्थं । यथा यथेच्छं । मेशरीरेकामः । तवेतिशेषः । मयितवेच्छाप्रवर्ततामितिभावः । स्वधर्मइत्यादिश्लोकद्वयस्यवास्तवार्थस्तु—कामुक नविश्वसनीयइत्यतआह—स्वधर्मइत्यादि । यद्यपिरक्षसांपरदाराहरणादि स्वधर्मःस्वभावः । मेशरीरेकामं अत्यर्थं । यथा यथेच्छं कामःप्रवर्ततांनाम मन्मथविकारोस्तुनाम । तथाप्येतत्सर्वंममेष्टदेवतायांत्वयिनघटतइतिशेषः । अतएव अकामां भृत्यत्वकामनारहितां । यद्वा अकामां विष्णुकामांत्वां । नस्प्रक्ष्यामि त्वदाज्ञांविना पूजांकर्तुमपिबिभेमीतिशेषः ॥ ति० ए एवमपि । बलात्कारपक्षे तवममचदोषाभावेपितस्यपक्षस्यरसाभाससंपादकत्वात् । अतएवमकामां अनेनप्रकारेणमयिकामरहितां मद्भिन्नेच्छावतींच । नच नतु । स्प्रक्ष्यामि । एवंचैतदकामांत्वामितिपाठे एतत् रक्षोधर्मत्वं । एवंच एवमेव मदुक्तरीतिकमे तथाप्युक्तप्रकारेण त्वामकामां नस्प्रक्ष्यामीत्यर्थः । नन्वेवंसतिदुस्सहाकामपीडातवस्यात्तत्राह—**काममिति** । कामः मन्मथ यथाकामं यथेच्छं । कामं तद्विषयेच्छां । प्रवर्ततां प्रवर्तयत्वित्यर्थः ॥ ६ ॥ ती० वस्तुतस्तु विचित्राणीत्यादिश्लोकद्वयमेकंवाक मांप्राप्य भृत्यत्वेनेतिशेषः । माल्यादीनिलभ प्राप्नुहीतिसंबन्धः ॥ ९—१० ॥ ती० वस्तुतस्तु त्वत्पूजाक्षमंमदीयमायुर्व्य च्छतीतिखिद्यति—**इदंतइति** । ते तवभृत्यस्य । ममेतिशेषः । यौवनं दार्ढ्यावस्था । यत् यतः । भृत्यस्यममायुः व्यर्थंगच्छ

[पा०] १ ख. ङ. च. ज.—ट. सर्वदैव. २ च. ज. ञ. चैवमकामां. ङ. झ. ट. चैवमकामांत्वां. घ. त्वेतदका ३ ङ. झ. ट. नच. ४ ङ. अधश्शय्या. ५ क. ख. घ. यानानिशयनानिच. ६ क.—ट. स्त्रीरत्नमसि. ७ घ.—ट. कथं क. कथंस्यास्त्वमनाहारा. ८ ङ.—ट. स्रोतस्विनामिव. ९ ख. ङ. झ. ट. विश्वकृत्. १० क. ङ.—ट. ह्यन्या.

ां समासाद्य वैदेहि रूपयौवनशालिनीम् ॥ कः[1] पुमानतिवर्तेत साक्षादपि पितामहः ॥ १४ ॥
यत्पश्यामि ते गात्रं शीतांशुसदृशानने[2] ॥ तस्मिंस्तस्मिन्पृथुश्रोणि चक्षुर्मम निबध्यते ॥ १५ ॥
व मैथिलि भार्या[3] मे मोहमेनं[4] विसर्जय ॥ बह्वीनामुत्तमस्त्रीणामाहृतानामितस्ततः ॥
र्वासामेव भद्रं ते ममाग्रमहिषी भव ॥ १६ ॥
ोकेभ्यो यानि रत्नानि संप्रमथ्याहृतानि[5] वै ॥ तानि[6] मे भीरु सर्वाणि राज्यं चैतदहं[7] च ते ॥१७॥
जित्य पृथिवीं सर्वां नानानगरमालिनीम् ॥ जनकाय प्रदास्यामि तव हेतोर्विलासिनि ॥ १८ ॥
ह पश्यामि लोकेऽन्यं यो मे प्रतिबलो भवेत् ॥ पश्य मे सुमहद्वीर्यमप्रतिद्वन्द्वमाहवे ॥ १९ ॥
सकृत्संयुगे भग्ना मया विमृदितध्वजाः ॥ अशक्ताः प्रत्यनीकेषु स्थातुं मम सुरासुराः ॥ २० ॥
च्छया क्रियतामद्य प्रतिकर्म तवोत्तमम् ॥ २१ ॥
प्रभाण्यवसज्यन्तां तवाङ्गे भूषणानि[11] च ॥ साधु पश्यामि ते रूपं संयुक्तं[12] प्रतिकर्मणा ॥ २२ ॥
तिकर्माभिसंयुक्ता दाक्षिण्येन वरानने ॥ भुङ्क्ष्व भोगान्यथाकामं पिब भीरु रमस्व च ॥ २३ ॥
थेष्टं च प्रयच्छ त्वं पृथिवीं वा धनानि च ॥ ललस्व[13] मयि विस्रब्धा धृष्टमाज्ञापयस्व च ॥
त्प्रसादाल्ललन्त्याश्च ललन्तां[15] बान्धवास्तव ॥ २४ ॥
द्धिं ममानुपश्य त्वं श्रियं भद्रे यशश्च[16] मे ॥ किं करिष्यसि रामेण सुभगे चीरवाससा[17] ॥ २५ ॥
क्षिप्तविजयो रामो गतश्रीर्वनगोचरः ॥ व्रती स्थण्डिलशायी च शङ्के जीवति वा न वा ॥ २६ ॥

त्यर्थः ॥ १३ ॥ कः अतिवर्तेत न कोपीत्यर्थः ॥ १४—१९ ॥ विमृदितध्वजाः भग्नध्वजाः । प्रत्यनीकेषु त्रुषु मध्ये ॥ २० ॥ प्रतिकर्म अलंकारः । "प्रतिर्म प्रसाधनं" इत्यमरः ॥ २१ ॥ अवसज्यन्तां र्यन्तां । प्रतिकर्मणा संयुक्तं पश्यामि पश्येयं ॥ २२ ॥ दाक्षिण्येन सरलत्वेन । भुङ्क्ष्व अनुभव । "दक्षिणे सरलोदारौ" इत्यमरः ॥२३॥ ललस्व प्रीतिं कुरु । "लल ईप्सायाम्" इति धातुः ॥ २४ ॥ एवमात्मानं प्रशस्य रामं निन्दति—किं करिष्यसीत्यादिना ॥२५॥ निक्षिप्तविजयः त्यक्तविजय इत्यर्थः ।

तोमम तवपूजार्थमनुज्ञांदेहीतिशेषः ॥ १२ ॥ **ति०** कोनातिवर्तेत क्षुभ्येतेत्यर्थः । कःपुमानतिवर्तेतेतिपाठे कामवशतामतिक्रम्य वर्तेतेत्यर्थः ॥ **ती०** वस्तुतस्तु मदाराधनेतवबुद्धिःकथंस्यादतआह—त्वामिति । त्वां लक्ष्मीं । "सीतालक्ष्मीर्भवान्विष्णुः" तिवक्ष्यमाणत्वात् । समासाद्य साक्षात्पितामहोपिनातिवर्तेत अनाराधितुंनशक्नुयात् । पुमांस्तुकोवाऽतिवर्तेतेत्यर्थः ॥ १४ ॥ **०** यद्यदिति । गात्रं अवयवविशेषं । तस्मिंस्तस्मिन्नवयवविशेषेचक्षुर्निबध्यते । इष्टदेवतायास्तवदर्शनस्यमुक्तिसाधकत्वादिति वः ॥ १५ ॥ **ती०** वस्तुतस्तु मैथिलि भार्या भयाकान्त्या आर्याश्रेष्ठाभव । एनंमोहं मयिशत्रुत्वशङ्कां । विसर्जय । मेमम तमस्त्रीणांममयाअग्रमहिषीमन्दोदरी तस्याश्चममचभव ईश्वरीतिशेषः । **शि०** हे भवमैथिलि भवति भावयति नितरां स्वपातिं न्तयति सैवमैथिली । तत्संबोधनं । अग्रस्यसर्वोत्कृष्टस्यरामस्यमहिषीत्वं ममबह्वीनामुत्तमस्त्रीणां भार्या सेव्याभव । अतएव तं यमानं मेमोहं वैचित्यं । विसर्जय त्याजय ॥१६॥ **ती०** लोकेभ्यइत्यस्यवास्तवार्थस्तु इष्टदेवतायैदेव्यै रावणस्त्वात्मात्मीयसमर्पणं रोति—**लोकेभ्यइतिश्लोकद्वयेन** ।अहमित्यनेनात्मसमर्पणं । रत्नानीत्यादिनाऽऽत्मीयसमर्पणमिति ज्ञेयं ॥ १७ ॥ **ति०** च्छयेति । वस्तुतस्तु मां लक्ष्मींसंपदमित्यर्थः ॥२१॥ **ती०** वस्तुतस्तु मत्प्रसादात् मयिप्रसादोऽनुग्रहः । तस्मात् । तवललन्त्याः न्त्याः सत्याः बान्धवाश्चरमन्तामितिसंबन्धः ॥ २४ ॥ **रामानु०** ऋद्धिं संपदं । श्रियं भां ॥ २५ ॥ **ती०** ऋद्धिमित्यादीवास्तवार्थस्तु—सरामाऽहंतेअखिलसंपत्समृद्धिंददामि । मांरामेणसहसंयोजयेत्याशङ्क्यनाहंसंपदाद्यर्थी किंतुमोक्षकामी । अतो वन्मोक्षंत्वत्पादाब्जंनत्यजामीत्यभिप्रायेणाह—**ऋद्धिंममेत्यादिश्लोकचतुष्टयेन** । हेसुभगे ममऋद्ध्यादिकंपश्य । निक्षिविजयः स्वतस्सिद्धविजयइत्यर्थः । वनगोचरः वनंजलंगोचरंनिवासस्थानंयस्यसः । नारायणइत्यर्थः । अतएवगतश्रीः गताप्राप्ता

[**पा०**] १ ङ. झ. ट. कःपुनर्नातिवर्तेत. घ. च. छ. ञ. कःपुमान्नातिवर्तेत. २ ख. शीतांशुसमदर्शने. ३ क. मेभार्या. च. ज. झ. ट. मेतं. ५ ख. झ. ञ. ट. संप्रमथ्याहृतानिमे. क. ङ.—ज. संप्रमथ्यहृतानिमे. ६ ख. घ. ङ. झ. ट. निते. ७ झ. ट. चैवददामिते. ८ च. छ. ज. ञ. नैव. ९ क. ङ. च. ज. ट. इच्छमां. १० ङ. छ. झ. ञ. ट. सुप्रभाण्यव. छ. सुप्रसाण्यपि. ११ ङ.—ट. भूषणानिहि. १२ ङ.—ट. सुयुक्तं. १३ घ. रमस्व. १४ क. घ. मत्प्रभावात्. १५ ङ. ज. ञ. ललतांबान्धवस्तव. १६ ङ.—ट. यशस्विनि. १७ ङ. झ. ट. चीरवासिना.

न हि वैदेहि रामस्त्वां द्रष्टुं वाऽप्युपलप्स्यते ॥ पुरोबलाकैरसितैर्मेघैर्ज्योत्स्नामिवावृताम् ॥ २७
न चापि मम हस्तात्त्वां प्राप्तुमर्हति राघवः ॥ हिरण्यकशिपुः कीर्तिमिन्द्रहस्तगतामिव ॥ २८ ॥
चारुस्मिते चारुदति चारुनेत्रे विलासिनि ॥ मनो हरसि मे भीरु सुपर्णः पन्नगं यथा ॥ २९ ।
क्लिष्टकौशेयवसनां तन्वीमप्यनलङ्कृताम् ॥ त्वां दृष्ट्वा स्वेषु दारेषु रतिं नोपलभाम्यहम् ॥ ३० ॥
अन्तःपुरनिवासिन्यः स्त्रियः सर्वगुणान्विताः ॥ यावत्यो मम सर्वासामैश्वर्यं कुरु जानकि ॥ ३
मम ह्यसितकेशान्ते त्रैलोक्यप्रवराः स्त्रियः ॥ तास्त्वां परिचरिष्यन्ति श्रियमप्सरसो यथा ॥ ३
यानि वैश्रवणे सुभ्रु रत्नानि च धनानि च ॥ तानि लोकांश्च सुश्रोणि मां च भुङ्क्ष्व यथासुखम् ॥ ३
न रामस्तपसा देवि न बलेन न विक्रमैः ॥ न धनेन मया तुल्यस्तेजसा यशसाऽपि वा ॥ ३४

पिब विहर रमस्व भुङ्क्ष्व भोगान्धननिचयं प्रदिशामि मेदिनीं च ॥
मयि लल ललने यथासुखं त्वं त्वयि च समेत्य ललन्तु बान्धवास्ते ॥ ३५ ॥
कुसुमिततरुजालसंततानि भ्रमरयुतानि समुद्रतीरजानि ॥
कनकविमलहारभूषिताङ्गी विहर मया सह भीरु काननानि ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे विंशः सर्गः ॥ २० ॥

स्थण्डिलशायी भूतलशायी ॥२६॥ वाशब्दोऽवधारणे । द्रष्टुमपि नोपलप्स्यत एवेत्यर्थः । दर्शनमात्रफलमपि दर्शनं नप्राप्स्यसीत्यर्थः । पुरोऽग्रे बलाका येषां ते पुरोबलाकाः तैः । अनेन मेघानामतिविपुलतोच्यते । महामेघेष्वेव बलाकासंचारवर्णनात् ॥ २७ ॥ हिरण्यकशिपुः कीर्तिमिन्द्रहस्तगतामिवेति वैधर्म्यदृष्टान्तः । अत्र कीर्तिशब्देन भार्या लक्ष्यते । हिरण्यकशिपुरिन्द्रहस्तगतां भार्यां पुनः प्राप्तवानित्येतच्छ्रीभागवते प्रसिद्धम् । " व्यलुम्पन्राजशिबिरममरा राज्यकाङ्क्षिणः । इन्द्रस्तु राजमहिषीं मातरं म चाग्रहीत् " इत्यादिप्रह्लादवचनात् ॥ २८—३० ऐश्वर्यं अन्तःपुरैश्वर्यं । स्वामिनीत्वं कुरु प्राप्नुहीत्य ॥ ३१—३२ ॥ भुङ्क्ष्व स्वाधीनं कुरु ॥ ३३—३४ पिब मद्यमिति शेषः । विहर संचर । विहारशब्द संचारेपि प्रयोगात् ॥ ३५—३६ ॥ इति श्रीगो न्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलक ख्याने सुन्दरकाण्डव्याख्याने विंशः सर्गः ॥ २०

श्रीर्लक्ष्मीर्येन । अतएव प्रतिभक्तसंरक्षणव्रतशीलः । अतएव पितृवाक्यपरिपालनायस्थण्डिलशायीयोरामः । अचीरवासस च्छेदः । पीतांबरधारिणेत्यर्थः । एतादृशेनतेनरामेणसहवास्त्वं इदानींविद्यमानैश्वर्याद्यपेक्षयानकिमपिकरिष्यसीति शङ्के मन्ये अतोजीवतिमयिसतीतिशेषः । रामस्त्वांद्रष्टुमपिनोपलप्स्यते । नचममहस्तात्त्वांराघवःप्राप्तुमर्हति । मद्वधानन्तरंरामस्त्वांद्रष्टुमप पलप्स्यतेप्राप्तुमप्यर्हतीतिभावः ॥ **ति०** उपलभ्यते व्यत्ययेनश्यन्प्रत्ययः । समर्थोभवतीत्यर्थः । उपलप्स्यतइतिपाठे समर्थोभवि ष्यतीत्यर्थः ॥ २५—२७ ॥ **ती०** हिरण्यकशिपुरिति । पुराकिलहिरण्यकशिपोर्भार्याहृत्वानारदमुखेनप्रार्थितस्तस्यैपुनःप्रादादि भागवतेकथाऽस्ति । तथाच भार्याहरणमेवकीर्तिहरणमितिभावः ॥ **स०** हिरण्यकशिपुः इन्द्रहस्तगतां इन्द्राधीनांकीर्तिं । इन् स्वरिपुहिरण्यकशिपोर्भार्यामपहृतवानितिकीर्तिंयथानप्राप्तुमर्हति तथेत्यर्थः । इन्द्रनीतांकयाधूंहिरण्यकशिपुःपुनरपीन्द्रंनिर्जित्यानीत वानित्यप्रसिद्धेः । नारदएवतांतस्मैदत्तवानितिभावः ॥ २८ ॥ **शि०** अनलङ्कृतांत्वां त्वद्दुःखमित्यर्थः । दृष्ट्वा स्वेषुदारेषु । र प्रीतिं । नोपलभामि । अतिदुःखितंमनःक्वापिनप्रवर्ततइत्यर्थः । एतेन रावणस्यदयालुत्वंसूचितं ॥ **स०** अनलङ्कृतामपित्वांदृ स्वभार्यासुरतिं नोपलभामि नोपलभे । अलङ्कृतांपुनर्दृष्ट्वातत्ररतिंनोपलभइतिकिंवक्तव्यमित्यर्थः । एतेनसौन्दर्यातिशयोद्योत्यते **ती०** क्लिष्टकौशेयेत्यस्यवास्तवार्थस्तु त्वांममेष्टदेवतांदृष्ट्वा स्वेषुधनेषुदारेषुचरतिंनोपलभामि । इष्टदेवतायास्तवदर्शनमात्रेणानन्दपूर्ण ऽहंसर्वतोनिवृत्तोस्मीतिभावः ॥ ३० ॥ **ती०** नरामइत्यस्यवास्तवार्थस्तु—रामः तपआदिनामयातुल्योनभवति । किंतुनिरवधि कषड्गुणैश्वर्यसंपन्नोभगवाञ्श्रीरामोमत्तोप्यधिकएवेतिभावः ॥३४॥ **ती०** मयि लल रमस्व । वस्तुतस्तु मयिभृत्येसति लल ॥३५ **ती०** मयासह । वस्तुतस्तु सह एकदैव । मया संवर्धितानीतिशेषः । काननानिविहर ॥ ३६ ॥ इतिविंशः सर्गः ॥ २० ॥

[**पा०**] १ च. द्रष्टुमप्युपलप्स्यते. ङ. झ. ञ. ट. द्रष्टुंवाप्युपलभ्यते. क. ख. द्रष्टुंवाप्युपपद्यते. २ क. सर्वगुणोत्तरा ३ ङ. झ. ट. प्रवरस्त्रियः. ४ ङ. झ. ट. मया. ५ क. रूपेण. ङ. झ. ट. बलेनच. ६ क. ख. यशसापिच.

एकविंशः सर्गः ॥ २१ ॥

ीतयारावणंप्रति मध्येतृणप्रक्षेपेण सान्नाहितोपदेशपूर्वकं रामगुणानुवर्णनेनतस्मैस्वप्रत्यर्पणेन तेनसहमैत्रीविरोधसंपा-
ोः क्रमेणशुभाशुभफलहेतुत्वोक्तिः ॥ १ ॥

तद्वचनं श्रुत्वा सीता रौद्रस्य रक्षसः ॥ आर्ता दीनस्वरा दीनं प्रत्युवाच शनैर्वचः ॥ १ ॥
र्वार्ता रुदती सीता वेपमाना तपस्विनी ॥ चिन्तयन्ती वरारोहा पतिमेव पतिव्रता ॥
मन्तरतः कृत्वा प्रत्युवाच शुचिस्मिता ॥ २ ॥
र्तय मनो मत्तः स्वजने क्रियतां मनः ॥ न मां प्रार्थयितुं युक्तं सुसिद्धिमिव पापकृत् ॥ ३ ॥
ार्यं न मया कार्यमेकपत्न्या विगर्हितम् ॥ कुलं संप्राप्तया पुण्यं कुले महति जातया ॥ ४ ॥
मुक्त्वा तु वैदेही रावणं तं यशस्विनी ॥ राक्षसं पृष्ठतः कृत्वा भूयो वचनमब्रवीत् ॥ ५ ॥
हमौपयिकी भार्या परभार्या सती तव ॥ साधुधर्ममवेक्षस्व साधु साधुव्रतं चर ॥ ६ ॥
ा तव तथाऽन्येषां दारा रक्ष्या निशाचर ॥ आत्मानमुपमां कृत्वा स्वेषु दारेषु रम्यताम् ॥ ७ ॥
ुष्टं स्वेषु दारेषु चपलं चलितेन्द्रियम् ॥ नयन्ति निकृतिप्रज्ञं परदाराः पराभवम् ॥ ८ ॥
सन्तो न वा सन्ति सतो वा नानुवर्तसे ॥ तथाहि विपरीता ते बुद्धिराचारवर्जिता ॥ ९ ॥

तस्येत्यादि ॥ १ ॥ तृणमिति रावणस्य साक्षात्सं-षणानर्हत्वात्तृणव्यवधानकरणम् । प्रत्युवाचेति रभिधानं वचनप्रकारविशेषकथनार्थं । दुःखार्ता-अपि शुचिस्मितत्वाभिधानं वस्तुस्वभावेन सस्मित-प्रतीयमानत्वात् ॥२—३॥एकः पतिर्यस्यास्सा एक-ी तया। "नित्यं सपत्न्यादिषु" इति ङीप् ॥४॥ पृष्ठतः ा अनादृत्येत्यर्थः ॥ ५ ॥ सती अहं तव औपयिकी ा भार्या न किन्तु परिहार्या । साधूनां सतां धर्मं ुधर्मं । साधूनांव्रतं साधुव्रतं। साधु सम्यक् । चर ॥६॥ आत्मानमुपमां कृत्वा यथा तव दारा रक्ष्यास्त-थान्येषां दारा रक्ष्याः। तस्मात् स्वेषु दारेषु रम्यतां॥७॥ अतुष्टं अतृप्तं निकृतिप्रज्ञं निकृतौ शाठ्ये प्रज्ञा यस्य तं । पराभवं आयुरैश्वर्यादिक्षयरूपं ॥८॥ इह अतिविशा-लेपि दुर्जनसंकुले देशे। सन्तः त्वामनर्थान्निवारयन्तः । न सन्ति वा नसन्ति किं सन्त्येव । श्रीविभीषण-प्रभृतीनां संभवान्न सन्तीति कथं वक्तुं शक्यं । सतो वा नानुवर्तसे । "तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः"

तनि० तृणमन्तरतःकृत्वेति । परपुरुषमुखंनिरीक्ष्यवार्तानकर्तव्येतिमर्यादयावा तृणवदलक्षीकृत्यवा अस्मद्वक्ष्यमाणवचनंतृण-ानमित्ययंनलक्षीकरोतीतिबुद्ध्यावा " सश्लाघ्यःसगुणीधन्यःसकुलीनःसबुद्धिमान् । सशूरःसचविक्रान्तोयंत्वंदेविनिरीक्षसे " क्तकटाक्षपातार्होमाभूदितिवा स्वामिनातृणमादायकाकासुरनिरासवदनेनतृणेनैतन्निरासःकार्यइतिवा अचेतनंचेतनंकृत्वासंबो-नवाक्यंवदामीतिबुद्ध्यावा आसन्नस्यास्यव्यवधानेनभाव्यमितिबुद्ध्यावा पशुसमानस्यतवेदमेवभोग्यमितिबुद्ध्यावा रामविरोधेन ान्सानुबन्धोनशिष्यतीतिनिवेदनायवा तृणंमध्येस्थापयित्वा ॥ **स०** प्रत्युवाचेतिपूर्वंप्रतिज्ञातं । तत्रेत्थंकारमाह—तृणमन्तरतः॰ ाप्रत्युवाचेति । अतोनपुनर्वचनं ॥ २ ॥ **ति०** क्रुद्धोक्त्यामनःपदादेःपौनरुक्त्यंनदोषभाक् । वर्णनीयमयीभावाच्चकवेरपि शंनदोषाय ॥ **स०** युक्तः योग्यः । सिद्धिं मोक्षं ॥ ३ ॥ **स०** एकपत्न्या एकःपतिर्यस्यास्सा रामकृतयज्ञफलभोक्त्री । पति-तियावत् । तया । विगर्हितं विनिन्दितं । तर्हि कदापिगर्हितंत्वयानानुष्ठितंकिमित्यतस्तथैवेत्याह—**मयेति** । मयायदकारि ार्वं अं मत्पतिंविष्णुमुद्दिश्यैवाकारीतिविगर्हितंनकार्यमितिभावः ॥ ४ ॥ **ति०** पृष्ठतःकृत्वा परावृत्यस्थित्वा ॥ ५ ॥ **ती०** ुतस्तु अहंतव त्वया भार्या भर्तव्यान किंतुपरभार्या परेणरामेणभार्या भर्तव्या ॥ **स०** औपयिकी उपभोगयोग्यान । तत्रहेतुः **भार्येति** । तत्रापिनस्वैरिणीत्युदीरयति—**सतीति** । साधूनांसतांधर्मं धर्मशास्त्राद्याशंसितं । अवेक्षस्व । साधुव्रतं साधोः ्याःपतिव्रतायाममव्रतं परित्यजनंचर । " वोतोगुणवचनात् " इति साधुस्साधुः ॥ ६ ॥ **स०** दाराः रक्ष्याः शीलतःसंरक्ष-

[पा०] १ क. घ. ङ. छ.—ट. ततःशनैः. २ क. चिन्तयित्वा. ३ च. ज. क्रियतांहितत्. क. ख. घ. झ. प्रीयतांमनः. ४ ङ. घ. ङ. च. ज.—ट. युक्तस्त्वंसिद्धिमिव. ५ क. अनार्यं. ६ घ. तपस्विनी. ७ घ. ङ. च. ज.—ट. रावणं. ८ घ. ङ. ज.—ट. रक्ष्यादाराः. ९ ङ. झ. ट. चपलेन्द्रियं. १० ख. झ. ञ. ट. यथाहि.

वचो मिथ्याप्रणीतात्मा पथ्यमुक्तं विचक्षणैः ॥ राक्षसानामभावाय त्वं वा न प्रतिपद्यसे ॥
अकृतात्मानमासाद्य राजानमनये रतम् ॥ समृद्धानि विनश्यन्ति राष्ट्राणि [1]नगराणि च ॥ १
[2]तथेयं त्वां समासाद्य लङ्का रत्नौघसंकुला ॥ अपराधात्तवैकस्य नचिराद्विनशिष्यति ॥ १२ ॥
स्वकृतैर्हन्यमानस्य रावणादीर्घदर्शिनः ॥ अभिनन्दन्ति भूतानि विनाशे पापकर्मणः ॥ १३
एवं त्वां पापकर्माणं वक्ष्यन्ति निकृता जनाः ॥ दिष्ट्यैतद्व्यसनं प्राप्तो रौद्र इत्येव हर्षिताः ॥
शक्या लोभयितुं नाहमैश्वर्येण धनेन वा ॥ अनन्या राघवेणाहं भास्करेण [3]प्रभा यथा ॥ १५
उपधाय भुजं तस्य लो[4]कनाथस्य सत्कृतम् ॥ कथं नामोपधास्यामि भुजमन्यस्य कस्यचित् ॥ १
अहमौपयिकी भार्या [5]तस्यैव वसुधापतेः ॥ व्रतस्नातस्य धी[6]रस्य विद्येव विदितात्मनः ॥ १७ ॥

इत्युक्तरीत्या प्रणिपातमन्तरेण न ते उपदिशन्ति । त्वं च तत्पादेषु कदाचिदपि न प्रणतवानसि । कथमिदं भवती जानातीत्याशङ्क्याह—तथाहीति। तथाहि विपरीता ते बुद्धिः तव बुद्धिवैपरीत्यमेव तव शिष्टाननुवर्तनं सूचयतीत्यर्थः । परबुद्धेरप्रत्यक्षत्वात् कथं मदीया बुद्धिस्त्वया ज्ञायत इत्यत्राह—आचारवर्जितेति । आचारवर्जिता तव दुरनुष्ठानमेव तव बुद्धिं द्योतयतीति भावः ॥ ९ ॥ वच इति पूर्वश्लोके रावणस्याभाव उपन्यस्तः । अनेन राक्षसाभावपक्ष उपन्यस्यते । मिथ्याप्रणीतात्मा मिथ्यास्निग्धात्मा । स्नेहीति भावयन्निवेति यावत् । त्वं विचक्षणैस्साधुभिरुक्तं पथ्यं हितं वचः राक्षसानामभावाय न प्रतिपद्यसे नाङ्गीकरोषि वा । राक्षसेषु स्नेहं भावयन् तद्विनाशमेव हृदि कृत्वा साधु वचनं न शृणोषीत्यर्थः ॥ १०—१२ ॥ रावणादीर्घदर्शिन इत्यत्र रावणेति संबुद्धिः ॥ १३ ॥ निकृताः त्वया वञ्चिताः ॥ १४ ॥ शक्येति। अनेन रावणोक्तप्रलोभनानामुत्तरमुच्यते । ऐश्वर्येण अन्तःपुरस्त्रीणामीश्वरत्वेन । धनेन आभरणादिना वा । लोभयितुं वञ्चयितुं । अहं न शक्या। अत्र हेतुमाह—अनन्येति । अहं नित्यानपायिनी । राघवेण रघुकुलावतीर्णेन विष्णुना । अनन्या अवि-

भक्ता । यत्र यत्र कुले विष्णुरवतरति तत्र तत्राव लक्ष्मीरित्यर्थः । तृतीयया तत्परतन्त्रा चा द्योत्यते । न केवलं तस्य परतन्त्राहं प्रत्युत तस् तिशयावहेति दृष्टान्तेन द्योतयति—भास्करेण प्रभा हि भास्करस्याप्यतिशयमावहति तथैव मारीचो भवन्तं प्रति निवेदितवान् । "अप्रमे तत्तेजो यस्य सा जनकात्मजा" इति । किं तद्वि चनमपि मोहेन विस्मृतोसीति तत्त्वमाह ॥ १ लोकनाथस्य सर्वैर्ब्रह्मादिदेवगणैः स्वस्वपदप्र नाथ्यमानस्य याच्यमानस्य । "नाथृ याच्ञाय इति धातुः। तस्य रामस्य । सत्कृतं भुजं दक्षिणं मित्यर्थः । उपधाय उपधानीकृत्य । तेन तत्परिष्व गम्यते । एवं श्लाघिताहं अन्यस्य ततो भोगं य मानस्य कस्यचिदनामधेयस्य क्षुद्रस्य त्वादृशः । असत्कृतं कथं नामोपधास्यामि । नकथंचिदपीत ॥ १६ ॥ अहं तु शीलवयोवृत्ता तस्यैव तुल्यशी योवृत्तस्य वसुधापतेः औपयिकी उचिता भा "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति भूमिनाथ लक्ष्मीदेव्युचितेति हृदयम् । कथमिव । व्रतस्ना वेदव्रतैः स्नातस्य । धीरस्य धीमतः ब्राह्मणस्य । वि तात्मनः आत्मज्ञानवतः । विद्येव योगाभ्यासरू

णीयाः। आत्मानं स्वं। उपमां निदर्शनं । स्वदारधर्षणंदुर्मर्षणंममयथा तथाऽन्येषामित्यत्र ॥७॥ **स०** भुजमित्यनेन मत्परिरंभ मनयातवभुजानांछेदः " येभैष्म्याःपरिरंभणंचकमिरेतेषांभुजांश्चिच्छिदुः" इत्याद्युक्तेःभावीतिद्योतयति ॥१६॥ **ति०** औप योग्या । व्रतस्नातस्य ब्रह्मचर्यव्रतपूर्वकंकृतसमावर्तनस्य। यथाशास्त्रंमत्पाणिग्रहणंकृतवतः । विदितात्मनः ज्ञातस्वतत्वस्यज्ञातपुरु साधनस्यचतस्यैवाहंयोग्या । विप्रस्य विद्येव ब्रह्मविद्येव । ब्रह्मविद्यायथा ब्राह्मणस्यैवासाधारणंस्वंन्यायप्राप्तं तद्वत् । संन्यासे वाधिकाराद्ब्रह्मविद्यायांब्राह्मणस्यैवाधिकारइतिभावः । अन्येतु विप्रपदंत्रैवर्णिकपरं । त्रैवर्णिकस्यैवब्रह्मविद्यायामधिकारः । अ धीरस्येतिक्वचित्पाठइत्याहुः ॥ **स०** विदितात्मनः अवगतभगवत्तत्वस्य । व्रतस्नातस्य ब्रह्मचर्यादिव्रतसंकल्पपूर्वंस्नातस्य । अ क्तस्यविप्रस्य विद्येव उपनिषदादिविद्येव। विप्रस्येत्यनेनोत्तरवर्णद्वयापेक्षयापृथग्जातेरेवमुख्याधिकारः यथाऽहंतथामुख्यातस्यै

[पा०] १ क. घ. विविधानिच. २ ख. ङ. झ. ट. तथैव. ३ ङ. झ. ट. यथाप्रभा. ४ ख. लोककान्तस्य. ५ ङ ट. तस्यैवचधरापतेः. ६ ख. च. छ. ञ. विप्रस्य. घ. वीरस्य. ङ. झ. ट. विद्येवविप्रस्य.

धु रावण रामेण मां समानय दुःखिताम् ॥ वने वाशितया सार्धं करेण्वेव गजाधिपम् ॥ १८ ॥
त्रमौपयिकं कर्तुं रामः स्थानं परीप्सता ॥ वधं चानिच्छता घोरं त्वयाऽसौ पुरुषर्षभः ॥
दितः स हि धर्मज्ञः शरणागतवत्सलः ॥ १९ ॥
मैत्री भवतु ते यदि जीवितुमिच्छसि ॥ प्रसादयस्व त्वं चैनं शरणागतवत्सलम् ॥ २० ॥
चास्मै प्रयतो भूत्वा निर्यातयितुमर्हसि ॥ २१ ॥
हि ते भवेत्स्वस्ति संप्रदाय रघूत्तमे ॥ अन्यथा त्वं हि कुर्वाणो वधं प्राप्स्यसि रावण ॥ २२ ॥
येद्वज्रमुत्सृष्टं वर्जयेदन्तकश्चिरम् ॥ त्वद्विधं तु न संक्रुद्धो लोकनाथः स राघवः ॥ २३ ॥
स्य धनुषः शब्दं श्रोष्यसि त्वं महास्वनम् ॥ शतक्रतुविसृष्टस्य निर्घोषमशनेरिव ॥ २४ ॥

॥ १७ ॥ पथिचोरं पानीययाचकवद्रावणमर्थय-
—साध्विति ॥ साधु रावण मद्वियोगेन त्वत्क्रौर्य-
धिकंजातमितिभावः । एवमुत्कटक्रौर्यं प्रति याच-
त् स्वस्यातिशयोव्यज्यते । रामेण सर्वाङ्गसुन्दरेण
तस्यानन्यार्हां तद्वियोगे जीवितं धारयितुमशक्तां।
सीतेत्यादि । समानय संगमय । तत्र हेतुः—
खितामिति । करेण्वा गजवध्वा । वाशितया
वनं गतया । "वाशितायुवतिःप्रोक्ता कलभःकरि-
तकः" इतिवचनात् । यद्वा वासितयेतिपाठः । वने
सितया बद्धया । अत्र विभक्तिव्यत्यासःकार्यः ।
वासितां करेणुं गजाधिपेनेति । वस्तुतस्तु यथा-
स एवान्वेति । रामेणसंगमनंनाम रामाह्वानं ।
हि पुनरपि रामस्थानं तेन नेतुमीष्टे किंत्वत्र राममा-
समर्पणमेव । अतएव करेण्वा गजाधिपमित्युक्तं
१८ ॥ एवं रावणे जननीत्वप्रतिपत्तिं विहाय
निचिदसंगतानि जल्पति देवी खिन्ना सती कोय-
य स्वभावः कथमस्य कोप्युपदेष्टा सेत्स्यतीति इह
तो न वासन्तीत्यादिना विचिन्त्य दयावती स्वयमे-
प्रदिशति मातृत्वप्रयुक्तवात्सल्येन—मित्रमिति ॥
मं शरणं गच्छेत्युक्ते तत्र रावणस्सहेत दुर्मानितया
त्सद्बुद्ध्यनुसारेणमित्रमित्याह । किंच शरणागतं
स्याधीनं मन्यते देवी देवश्च । अतएव रामो
यति । "मित्रभावेन संप्राप्तं न त्यजेयं कथंचन"
। इमं च तथाह । मित्रमिति । रामः मित्रं कर्तुं

युक्तमित्यर्थः । मित्रशब्दापेक्षया औपयिकमिति
नपुंसकनिर्देशः । स्थानंपरीप्सता मार्गचोरस्यापि
भूमौ पदानि स्थापयित्वा चौर्यं कर्तव्यं । तवापि यदि
स्थानमभीप्सितं तर्हि तमेव भजेत्यर्थः । शरणागति-
दैन्यादपि मरणमेववरमितियदिमन्यसे तदानीं तद्भ-
जनंकर्तव्यमित्याह—वधं चानिच्छता घोरं तव
सम्यङ्मरणं न दास्यति । त्वां संस्थाप्य त्वत्समक्षं
त्वत्सन्तानजान् हिंसित्वा ततस्ते चित्रवधं करिष्यति
तं यदि नेच्छसि तदा प्रत्तव्य इत्यर्थः । त्वया तत्प्र-
तीकारावलोकनेन त्वयाऽवश्यं तच्छरणागतिः कर्त-
व्या । एवं स रक्षक इत्यत्र किं प्रमाणं तत्राह—असौ
निरन्तरप्रत्ययेनास्या रामः प्रत्यक्ष इवभासते । राव-
णस्यापि मायामृगानुसरणसमये तदाकारदर्शनजभ-
येन "वृक्षे वृक्षे च पश्यामि" इत्युक्तरीत्या पुरःस्थित
इव भासते । पुरुषर्षभः मत्कृतापराधेन कथं मामङ्गी-
करिष्यतीत्येवं त्वया नचिन्तनीयं । आनुकूल्यलेशे
सति सर्वमपराधं विस्मरिष्यति पुरुषधौरेयत्वात् ।
मित्रकरणप्रकारमाह—प्रसादयस्वेति । त्वं चेत्यनेना-
हमपि प्रसादयिष्यामीति सिद्धम् । प्रयतो भूत्वा
मनःकालुष्यंत्यक्त्वेत्यर्थः । निर्यातयितुं प्रत्यर्पयितुं
॥ १९—२१ ॥ संप्रदाय स्थितायेति शेषः ॥ २२ ॥
उत्सृष्टं इन्द्रमुक्तं वज्रं अन्तकश्च त्वद्विधं वर्जयेत् ।
राघवस्त्वद्विधं न वर्जयेदिति संबन्धः ॥ २३ ॥
महास्वनं महानादं । नादो नाम स्वरावयवविशेषः

नेसूचयति ॥ १७ ॥ ति० करेण्वासाकंगजाधिपमिव । उपमानोपमेयवाक्ययोर्वैषम्यंतुक्रुद्धविरहिण्युक्तित्वान्नदोषावहं । स०
पिनीधातुर्द्विकर्मकइतिरामंमांसमानयेतिवक्तव्यं । तथापि रामेणेतितृतीयया सहयोगःसार्वकालिकः त्वयासंमेलनंतु लोकदृष्ट्ये-
सूचयितुं । गजाधिपेनकरिणीमिवेतिदार्ष्टान्तिकानुगुण्यार्थंवक्तव्यं । तथापीत्थमुक्त्यातद्दांपत्यमकॢप्तमितिद्योतयति ॥ १८ ॥
[पा०] १ च. छ. ज. ञ. विदितस्तवधर्मात्मा. ङ. झ. ट. विदितःसर्वधर्मज्ञः. क. विदितस्सहिधर्मात्मा. २ क. ख. ग.
पयितुं. ३ ङ. झ. ट. कुर्वाणःपरांप्राप्स्यतिचापदं. ४ क. ग. ङ.—ट. नतु.

इह शीघ्रं सुपर्वाणो ज्वलितास्या इवोरगाः ॥ इषवो निपतिष्यन्ति रामलक्ष्मणलक्षणाः[1] ॥ २५
रक्षांसि परिनिघ्नन्तः[2] पुर्यामस्यां समन्ततः[3] ॥ असंपातं करिष्यन्ति पतन्तः कङ्कवाससः ॥ २६
राक्षसेन्द्रमहासर्पान्स रामगरुडो महान् ॥ उद्धरिष्यति वेगेन वैनतेय इवोरगान् ॥ २७ ॥
अपनेष्यति मां भर्ता त्वत्तः शीघ्रमरिन्दमः ॥ असुरेभ्यः श्रियं दीप्तां विष्णुस्त्रिभिरिव क्रमैः ॥
जनस्थाने हतस्थाने निहते रक्षसां बले ॥ अशक्तेन त्वया रक्षः कृतमेतदसाधु वै ॥ २९ ॥
आश्रमं तु तयोः शून्यं प्रविश्य नरसिंहयोः ॥ गोचरं गतयोर्भ्रात्रोरपनीता त्वयाऽधम ॥ ३०
न हि गन्धमुपाघ्राय रामलक्ष्मणयोस्त्वया ॥ शक्यं संदर्शने स्थातुं शुना शार्दूलयोरिव ॥ ३१
तस्य ते विग्रहे ताभ्यां युगग्रहणमस्थिरम् ॥ वृत्रस्येवेन्द्रबाहुभ्यां बाहोरेकस्य निग्रहः ॥ ३२ ॥
क्षिप्रं तव स नाथो मे रामः सौमित्रिणा सह ॥ तोयमल्पमिवादित्यः प्राणानादास्यते शरैः ॥३

गिरिं कुबेरस्य गतोपधाय[6] वा सभां गतो वा वरुणस्य राज्ञः ॥
असंशयं दाशरथेर्न[7] मोक्ष्यसे महाद्रुमः कालहतोशनेरिव ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकविंशः सर्गः ॥ २१ ॥

॥ २४ ॥ रामलक्ष्मणलक्षणाः रामलक्ष्मणनामाङ्काः ॥ २५ ॥ असंपातं अनवकाशं ॥ २६ ॥ राक्षसेन्द्रमहासर्पानिति रूपकोक्तमेवोपमयाप्याह—वैनतेय इति ॥ २७ ॥ न चापि मम हस्तात्त्वां प्राप्तुमर्हतीत्युक्तस्योत्तरमाह—अपनेष्यतीति ॥ २८ ॥ एतत् युद्धं विना चौर्येणापहरणं ॥ २९ ॥ गोचरं गतयोः बाह्यदेशं गतयोः ॥ ३०—३१ ॥ तस्य ते असमर्थतया चोरवृत्तेस्तव । ताभ्यां रामलक्ष्मणाभ्यां । विग्रहे सति युद्धे सति । युगग्रहणं संयुगे जयग्रहणं । अस्थिरं असंभावितं । यद्वा युगग्रहणं युद्धारम्भः अस्थिरं अध्रुवं किंतु ताभ्यां प्रसह्य वधस्ते सिद्ध इति दृष्टान्तेनाह—वृत्रस्येवेति । वृत्रस्य एकस्य बाहोर्द्वाभ्यामिन्द्रस्य बाहुभ्यां सह विग्रहे सति निग्रह इव जय इव । वृत्रस्यैकेन बाहुना इन्द्रस्य द्वयोर्बाह्वोरिव एकेन त्वया तयोर्द्वयोर्जयो न शक्य इत्यर्थः ॥ ३२ ॥ स: नाथ इति पदच्छेदः ॥ ३३ ॥ अपधाय अपक्रम्य । कुबेरस्य गिरिं कैलासं । "कैलासःस्थानमलका" इत्यमरः ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकविंशः सर्गः ॥ २१ ॥

ति० उद्धरणशैघ्र्येउपमा—**वैनतेयइति**। **स०** राक्षसेन्द्रमहासर्पान् रामलक्षणोगरुडउद्धरिष्यति। तत्रदृष्टान्तः। वैनतेयः विनतायामुत्पन्नःगरुडातिरिक्तःकश्चित्पक्षी उरगान् दुर्बलसर्पानिव ॥ २७ ॥ **ती०** कुबेरस्यगिरिं गन्धमादनं । अपधाय अतिक्रम्य । पुरीमितिपाठे कुबेरस्यपुरीमित्येतदुपरितनलोकानामुपलक्षणं । वरुणस्यसभामित्यनेनाधस्तनलोकानामुपलक्षणं । तत्वदृष्ट्याऽपरुषवचनंतंरावणमुद्दिश्यसीतयोक्तानांपरुषवाक्यानामयमाशयः । रावणेनदेवींप्रतितत्वदृष्ट्यासौम्यरूपाण्येववाक्यान्युक्तानियद्यपि. तथापि बाह्यदृष्ट्यापरुषवाक्यवत्प्रतीयमानत्वेनदेव्यपितत्वदृष्टिंसंगोप्य बाह्यदृष्टिमनुसृत्य परुषवाक्यैरेवतस्योत्तरमाहेति ॥ कालहतस्त्वंअशनेस्संबन्धान्महाद्रुमइवदाशरथेस्संबन्धात्विमोक्षसेप्राणानितिशेषः । विमोक्ष्यसइतिपाङ्गःपाठइतिकतकः ॥ ३४ ॥ इत्येकविंशः सर्गः ॥ २१ ॥

[पा०] १ क. ङ.—ट. लक्षिताः. २ ङ. ज. झ. ट. निहनिष्यन्तः. ३ ङ. झ. ट. नसंशयः. ४ घ. सुदूरं. ५ ग. स्तयोः. ६ क.—ट. गतोथवालयं. ७ ङ. झ. ट. दाशरथेर्विमोक्षसे.

संस्कृतनूतनपुस्तकानि ।

तर्कसंग्रहचन्द्रिका ।

तर्कसंग्रहसहिता ।

इयं व्याख्या गभीरार्थापि सुन्दरतरास्ति । अस्याः प्रणेता श्रीकाशीस्थः प्राच्यो विद्वान् महामहोपाध्यायप्रतिभो गाडेगिलोपाह्वः श्रीमुकुन्दशर्मासीदिति ज्ञायते । बालाल्पमतिदुरवबोधविषयचिख्यापयिषुणानेन व्याख्यात्रा महता परिश्रमेण व्यरचीयं टीका तथा विविधटिप्पणपरिष्कारपरिष्कृतास्तीति विद्यार्थिभिरादरणीया । मू. ।= ट. ८–

ऐतरेयब्राह्मणम् ।

(पञ्चिका ८)

अयं ग्रन्थ आमूलान्तं भाष्येण संवाद्य वैदिकसंप्रदायपाठान्मूले संस्थाप्य भाष्यादृतपाठान्पृष्ठाधो विनिवेश्य वैदिकद्वारा संशोधनेन संस्कृत्य मुद्रितोस्ति । मूल्यं १ रु. ट. ८=

मीमांसान्यायप्रकाशः ।

(आपोदेवी)

अयं पूर्वमीमांसाशास्त्रस्य सुप्रसिद्धः प्रकरणग्रन्थोऽध्येतॄणामध्यापकानां चातीवोपकारकोऽस्ति । अस्य प्राचीनानि हस्तलिखितानि मुद्रितानि च कतिपयपुस्तकानि संपाद्य पाठान्तरैः स्थलविशेषे विशेषटिप्पणैश्च सनाथीकृत्यायमङ्कितः. मू. ।I. ट. ८–

पाण्डवचरितम् ।

श्रीमलधारिदेवप्रभसूरिविरचितम् ।

ग्रन्थकृता महाशयेन श्रीमहाभारततात्पर्यं मनसिकृत्यात्र सर्वाण्यपि चरित्राणि विस्तृतै १८ रष्टादशसर्गैर्नातिसंक्षेपविस्तराणि मनोहरैः पद्यैरेव ललिततराणि गुम्भितानि सन्ति. मूल्यं ४। रु. ट. ।.

द्वाविंशः सर्गः ॥ २२ ॥

सीतयागर्हितेनरावणेन तांप्रति सकोपाटोपंस्वसंकेतितकालस्यमासद्वयात्मकशेषावसाने मारणोक्तिः ॥ १ ॥ ततोरावणस्त्रीभिर्वक्रनेत्रादिसंज्ञयासमाश्वासितयासीतया पुनर्बहुधारावणगर्हणम् ॥ २ ॥ ततोघोरतरविकृतनानाकृतीनामेकाक्ष्यादिराक्षसीनां तर्जनसान्त्वनादिनासीतावशीकरणनियोजनपूर्वकं पुनस्सरोषंसीतातर्जनोद्यतस्यरावणस्य धान्यमालिनीनामकतत्पत्न्या सपरिष्वङ्गंसान्त्वनपूर्वकमन्यतोपसरणम् ॥ ३ ॥ ततोरावणेन स्त्रीजनैस्सहनिजगृहप्रवेशनम् ॥ ४ ॥

सीताया वचनं श्रुत्वा परुषं राक्षसाधिपः ॥ प्रत्युवाच ततः सीतां विप्रियं प्रियदर्शनाम् ॥ १ ॥
यथायथा सान्त्वयिता वश्यः स्त्रीणां तथातथा ॥ यथायथा प्रियं वक्ता परिभूतस्तथातथा ॥ २ ॥
संनियच्छति मे क्रोधं त्वयि कामः समुत्थितः ॥ द्रवतोऽमार्गमासाद्य हयानिव सुसारथिः ॥ ३ ॥
वामः कामो मनुष्याणां यस्मिन्किल निबध्यते ॥ जने तस्मिंस्त्वनुक्रोशः स्नेहश्च किल जायते ॥४॥
एतस्मात्कारणान्न त्वां घातयामि वरानने ॥ वधार्हामवमानार्हां मिथ्याप्रव्रजिते रताम् ॥ ५ ॥
परुषाणीह वाक्यानि यानियानि ब्रवीषि माम् ॥ तेषुतेषु वधो युक्तस्तव मैथिलि दारुणः ॥ ६ ॥
एवमुक्त्वा तु वैदेहीं रावणो राक्षसाधिपः ॥ क्रोधसंरम्भसंयुक्तः सीतामुत्तरमब्रवीत् ॥ ७ ॥
द्वौ मासौ रक्षितव्यौ मे योवधिस्ते मया कृतः ॥ ततः शयनमारोह मम त्वं वरवर्णिनि ॥ ८ ॥
ऊर्ध्वं द्वाभ्यां तु मासाभ्यां भर्तारं मामनिच्छतीम् ॥ मम त्वां प्रातराशार्थमारभन्ते महानसे ॥९॥
तां तर्ज्यमानां संप्रेक्ष्य राक्षसेन्द्रेण जानकीम् ॥ देवगन्धर्वकन्यास्ता विषेदुर्विकृतेक्षणाः ॥ १० ॥

सीताया इत्यादि ॥ १ ॥ सान्त्वयिता अनुनेता ॥ २ ॥ संनियच्छति निरुणद्धि । द्रवतः धावतः । अमार्गमितिच्छेदः ॥ ३ ॥ वामः प्रतिकूलः । मनुष्याणां प्राणिनां । अनुक्रोशः कृपा । परिभवादिप्रदानेन मनुष्याणां प्रतिकूलः कामः यस्मिञ्जने निबध्यते तस्मिंस्त्वनुक्रोशः स्नेहश्च जायते किल ॥ ४ ॥ मिथ्याप्रव्रजिते कपटेन वन्यवृत्तिभाजि । रामे रतां सक्तां ॥ ५—६ ॥ क्रोधसंरम्भसंयुक्तः क्रोधप्रणयाभ्यां संयुक्तः ॥ ७ ॥ ते मया योऽवधिः कृतः "मासान्द्वादशभामिनि" इत्यारण्यकाण्डोक्तोद्वादशमासात्मकोऽवधिः कल्पितः । अत्र द्वौ मासाववशिष्टौ । तौ द्वौ मासौ । मे मया । रक्षितव्यौ प्रतीक्षणीयौ । ततः तस्मात्कारणात् । मम शयनमारोहेत्यन्वयः ॥८॥ प्रातराशार्थं मासद्वयान्तर्गतरात्रिसमाप्त्यनन्तरं हिंसायां कालविलम्बंविना प्रातःकालिकाशनार्थमित्यर्थः । आरभन्ते आलभन्ते । रलयोरभेदः । "आलम्भस्स्पर्शहिंसयोः" इत्यमरः । महानसे पाकशालायां

ती० सीतायाइत्यस्यवास्तवार्थस्तु राक्षसाधिपः सीतायाःपरुषं अतएवविप्रियंवचनंश्रुत्वा प्रत्युवाचेतिसंबन्धः ॥१॥ ती० वस्तुतस्तु इष्टदेवतायांसमुत्थितः कामः इच्छा समुत्पन्नाभक्तिरित्यर्थः । मेक्रोधं राक्षसजातेर्ममसर्वदाविद्यमानंनैजंक्रोधं । क्रोधशब्देनकामक्रोधाद्यरिषड्वर्गउच्यते । तंनियच्छतीतिसंबन्धः ॥ ३ ॥ ती० एतस्मादित्यादिश्लोकद्वयस्यवास्तवार्थस्तु ननुमद्वधोयुक्तः स्त्रीघातकश्चत्वंनसंभाष्यइत्यत्राह—एतस्मादिति । एतस्मात्कारणात् त्वद्भर्तृकारणात् । प्रव्रजिते मत्स्वामिनिरामेइतिशेषः । रतांत्वां ममेष्टदेवतांत्वां । नघातयाम्येव । वधार्हामवमानार्हामपिस्त्रियंघातयामीतिमिथ्येतिसंबन्धः ॥ ५–६ ॥ स० उत्तरं उत्तरत्रक्रियमाणं । यद्वा सीतामुत्तरं सीतायाः मुत् संतोषातिशयोयस्माद्वचनात् मासद्वयावधिप्रदात्तत् । "व्यवधानेनयद्दुःखंतद्दुःखंनैवचिन्तयेत्" इत्युक्तेरितिभावः ॥ ७ ॥ स० द्वौमासौरक्षितव्यौ । "वर्ततेदशमोमासोद्वौतुशेषौप्लवङ्गम" इतिसीतावचनाद्दशममासस्यतदावर्तमानत्वेपिमासत्वेनावशिष्टौतुद्वावेव । उर्वरितदिनानांतुमासत्वाभावादद्युक्तिः । सीतासंगौत्सुक्येनाल्पदिनानामगणनेनवा ॥ ८ ॥ ती० एवमुक्त्वेत्यादिश्लोकत्रयस्यवास्तवार्थस्तु क्रोधसंरंभसंयुक्तइत्यनेन राक्षसस्वभावोवर्णितः । पतिवियोगदुःखितांनिद्राहाररहितांप्रत्याह—द्वौमासावित्यादिश्लोकद्वयेन । हे मे लक्ष्मीस्सीते मयायोऽवधिःकृतः "मासान्द्वादशभामिनि । प्रतीक्षस्व" इतियःसमयःप्रार्थितः तन्मध्यतःपरंरक्षितव्यौ प्रतीक्षणीयौ द्वौमासावेव द्वाभ्यांमासाभ्यामूर्ध्वंन । ततः तदनन्तरं

[पा०] १ ङ.—ट. राक्षसेश्वरः. २ ङ. झ. ट. प्रव्रजने. क. प्रव्राजने. ३ क.—ट. द्वाभ्यामूर्ध्वंतु. ४ झ. ट. प्रातराशार्थंसूदाश्छेत्स्यन्तिखण्डशः. ५ ङ. झ. ट. भर्त्स्यमानां.

ओष्ठप्रकारैरपरा [1]वक्रनेत्रैस्तथाऽपराः ॥ सीतामाश्वासयामासुस्तर्जितां तेन रक्षसा ॥ ११ ॥
ताभिराश्वासिता सीता रावणं राक्षसाधिपम् ॥ उवाचात्महितं वाक्यं वृत्तशौण्डीर्यगर्वितम् ॥१
नूनं न ते जनः [2]कश्चिदस्ति निःश्रेयसे स्थितः ॥ निवारयति यो न त्वां कर्मणोस्माद्विगर्हितात् ॥१
मां हि धर्मात्मनः पत्नीं शचीमिव शचीपतेः ॥ त्वदन्यस्त्रिषु लोकेषु प्रार्थयेन्मनसाऽपि कः ॥१
राक्षसाधम रामस्य भार्याममिततेजसः ॥ उक्तवानसि [3]यच्छापं क्व गतस्तस्य मोक्ष्यसे ॥ १५ ॥
यथा दृप्तश्च मातङ्गः शशश्च [4]सहितो वने ॥ तथा द्विरदवद्रामस्त्वं नीच शशवत्स्मृतः ॥ १६ ॥
स त्वमिक्ष्वाकुनाथं वै क्षिपन्निह न लज्जसे ॥ [5]चक्षुषोर्विषयं तस्य न [6]तावदुपगच्छसि ॥ १७ ॥
इमे ते नयने क्रूरे [7]विरूपे कृष्णपिङ्गले ॥ क्षितौ न पतिते कस्मान्मामनार्य निरीक्षतः ॥ १८ ॥
तस्य धर्मात्मनः पत्नीं स्नुषां दशरथस्य च ॥ कथं व्याहरतो मां ते [9]न जिह्वा व्यवशीर्यते ॥ १९
असंदेशात्तु रामस्य तपसश्चानुपालनात् ॥ न त्वां कुर्मि दशग्रीव भस्म भस्मार्ह तेजसा ॥ २० ॥
नापहर्तुमहं शक्या [10]तस्य रामस्य धीमतः ॥ विधिस्तव वधार्थाय विहितो नात्र संशयः ॥ २१ ॥
शूरेण धनदभ्रात्रा बलैः समुदितेन च ॥ अपोह्य रामं [11]कस्माद्धि दारचौर्यं त्वया कृतम् ॥ २२ ॥
सीताया वचनं श्रुत्वा [12]रावणो राक्षसाधिपः ॥ विवृत्य नयने क्रूरे जानकीमन्ववैक्षत ॥ २३ ॥
नीलजीमूतसंकाशो महाभुजशिरोधरः ॥ [13]सिंहसत्त्वगतिः श्रीमान्दीप्त[14]जिह्वाग्रलोचनः ॥ २४ ॥

॥ ९—१० ॥ ओष्ठप्रकारैः रुरुदिषतामोष्ठेषु भङ्गस्फुरणादयो ये विकारास्ते ओष्ठप्रकाराः ओष्ठभङ्गादिरूपसंज्ञादिभिरित्यर्थः । एवं वक्रनेत्रैः वक्रनेत्रसंज्ञादिभिरित्यर्थः ॥ ११ ॥ वृत्तशौण्डीर्यगर्वितं वृत्तं पातिव्रत्यं तस्य शौण्डीर्यं बलं तेन गर्वितमिति क्रियाविशेषणं ॥ १२ ॥ ते निःश्रेयसे स्थितः कश्चिज्जनः नास्ति । यः अस्माद्विगर्हितात्कर्मणस्त्वां निवारयति स चापि नास्ति । नूनमिति योजना । तवेष्टप्रापकः अनिष्टनिवारकश्च नास्तीत्यर्थः ॥ १३—१४ ॥ तस्य मोक्ष्यसे तस्मान्मोक्ष्यसे ॥ १५ ॥ यथा मातङ्गः शशश्च । सहितः युयुत्सादिना संगतः । तथान्योन्यसंगतो रामस्त्वं च । अत्र रावणः स्वस्य मातङ्गसाम्यमुक्तमिति भ्राम्येदिति परिहरति—तथेति । तत्र गज इव रामः । शश इव त्वं ॥ १६ ॥ इक्ष्वाकुनाथं क्षिपन् मायामृगव्याजेन दूरं निस्सारयन् । इह स्वजनेषु न तावदुपगच्छसि । यद्युपगच्छसि तदा तत्प्रभावं वेत्स्यस
त्यर्थः ॥ १७—१९ ॥ रामस्य भर्तुः । असंदेश
अपकारिषु शपेथा इति संदेशाभावात् । तप
पातिव्रत्यरूपस्य । कुर्मि करोमि । उत्त्वविकरणप्रत्य
लोपावार्षौ । भस्मार्ह भस्मीकरणार्ह । तेजसा पाति
त्यप्रभावेन ॥ २० ॥ तस्य रामस्य तस्मात् रामात्
विधिः चौर्येणापहरणं । विहितः दैवेनेति शे
॥ २१ ॥ बलैस्समुदितेन बलेन सर्वश्रेष्ठेनेत्यर्थः
अपोह्य रामं मृगच्छद्मनापवाह्य ॥ २२ ॥ विवृ
विवर्त्य ॥ २३ ॥ सिंहस्येव बलगमने यस्या
सिंहसत्त्वगतिः । जिह्वाग्रं लोचने च दीप्तानि य
सोयं दीप्तजिह्वाग्रलोचनः । कोपेन चलं अग्रं य
तत् चलाग्रंचतत् मुकुटंच तेन प्रांशुः दीर्घः । चि
माल्यवत्त्वेपि रक्तमाल्यवत्त्वं तत्प्राचुर्यादुक्तं । तप्ता
दविभूषणः तप्तशब्देन तेजिष्ठत्वमुक्तं । मेचके

ते तव भर्तारं अनिच्छतींमामनङ्गीकुर्वाणां मममांमदीयराज्यलक्ष्मींचप्राप्स्यसीतिशेषः । त्वांप्रार्थयइतिशेषः । मममहानसेप्र
राशार्थं आलभन्तेपशून् तान्भक्षयेतिशेषः । शयनमारोह शयनंकुर्वित्यर्थः ॥ १० ॥ ति० ओष्ठप्रकारैः वराकोऽयंकिंकरिष्य
नभेतव्यमित्येवौष्ठाग्रोत्क्षेपणैः ॥ ११ ॥ ति० यत्पापं ममशयनमारोहेत्यादिरूपं । क्वगतोमोक्ष्यसे तत्साध्यसमूलनाशस्यलयाप

[पा०] १ क. घ.—ट. नेत्रैर्वक्रैस्तथा. २ ङ. झ. ट. कश्चिदस्मिन्निश्रेयसिस्थितः. ३ क.—ट. यत्पापं. ४ क. ख.
झ. ञ. सहितौ. ५ ङ. झ. ट. चक्षुषोविषये. ६ ङ. झ. ट. यावत्. ७ ङ. च. झ. ट. विकृते. ८ च. यन्मामनाथांनिरीक्ष
९ ङ. झ. नजिह्वापापशीर्यति. क. ग. च. छ. ज. जिह्वापापनशीर्यते. ञ. ट. जिह्वापापनशीर्यति. १० ख. त्वया. ११
च. ज.—ट. कस्माच्चिद्दारचौर्यं. १२ क. परुषं. १३ ग. च. छ. ज. ञ. सिंहसंहननः. ख. सिंहसत्वगतोवीरोदीप्त. १४
ग. घ. ङ. झ. ञ. ट. जिह्वोग्रलोचनः.

चलाग्रमुकुटप्रांशुश्चित्रमाल्यानुलेपनः ॥ रक्तमाल्याम्बरधरस्तप्ताङ्गदविभूषणः ॥ २५ ॥
श्रोणीसूत्रेण महता मेचकेन [1]सुसंवृतः ॥ [2]अमृतोत्पादनद्धेन [3]भुजगेनेव मन्दरः ॥ २६ ॥
[4]ताभ्यां स परिपूर्णाभ्यां भुजाभ्यां राक्षसेश्वरः ॥ शुशुभेऽचलसंकाशः शृङ्गाभ्यामिव मन्दरः ॥ २७ ॥
तरुणादित्यवर्णाभ्यां कुण्डलाभ्यां विभूषितः ॥ रक्तप[5]ल्लवपुष्पाभ्यामशोकाभ्यामिवाचलः ॥ २८ ॥
स कल्पवृक्षप्रतिमो वसन्त इव मूर्तिमान् ॥ श्मशानचैत्यप्रतिमो भूषितोपि भयङ्करः ॥ २९ ॥
अवेक्षमाणो वैदेहीं कोपसंरक्तलोचनः ॥ उवाच रावणः सीतां भुजङ्ग इव निश्श्वसन् ॥ ३० ॥
अनयेनाभिसंपन्नमर्थहीनमनुव्रते ॥ नाशयाम्यहमद्य त्वां सूर्यः संध्यामिवौजसा ॥ ३१ ॥
इत्युक्त्वा मैथिलीं राजा रावणः शत्रुरावणः ॥ संदिदे[6]श ततः सर्वा राक्षसीर्घोरदर्शनाः ॥ ३२ ॥
एकाक्षीमेककर्णां च कर्णप्रावरणां तथा ॥ गोकर्णीं हस्तिकर्णीं च लम्बकर्णीमकर्णिकाम् ॥ ३३ ॥
हस्तिपाद्यश्वपाद्यौ च गोपादीं पादचूलिकाम् ॥ एकाक्षीमेकपादीं च पृथुपादीमपादिकाम् ॥ ३४ ॥
अतिमात्रशिरोग्रीवामतिमात्रकुचोदरीम् ॥ अतिमात्रास्यनेत्रां च दीर्घजि[7]ह्वामजिह्विकाम् ॥ ३५ ॥
अनासिकां सिंहमुखीं गोमुखीं सूकरीमुखीम् ॥ यथा मद्वशगा सीता क्षिप्रं भवति जानकी ॥
तथा कुरुत राक्षस्यः सर्वाः क्षिप्रं [8]समेत्य च ॥ ३६ ॥
प्रतिलोमानुलोमैश्च सामदानादिभेदनैः ॥ [9]आवर्जयत वैदेहीं दण्डस्योद्यमनेन च ॥ ३७ ॥
इति प्रतिसमादिश्य राक्षसेन्द्रः पुनः पुनः ॥ काममन्युपरीतात्मा जानकीं [10]पर्यतर्जयत् ॥ ३८ ॥
उपगम्य ततः क्षिप्रं राक्षसी धान्यमालिनी ॥ परिष्वज्य दशग्रीवमिदं वचनमब्रवीत् ॥ ३९ ॥
मया क्रीड महाराज सीतया किं तवानया ॥ विवर्णया कृपणया मानुष्या राक्षसेश्वर ॥ ४० ॥
नूनमस्या महाराज न दि[11]व्यान्भोगसत्तमान् ॥ विदधात्यमरश्रेष्ठस्तव बाहुबलार्जितान् ॥ ४१ ॥

नीलेन । अमृतोत्पादनद्धेन अमृतोत्पादनार्थं नद्धेन । ताभ्यां प्रसिद्धाभ्याम् ॥ २४—२७ ॥ तरुणेत्यादि ॥ अलंकृतत्वे कल्पकसाम्यं । भयंकरत्वेपुनश्चैत्यसाम्यं । चैत्यं श्मशानवृक्षः । श्मशानमण्डपो वा । सीताया अत्यन्तभयंकरत्वज्ञापनाय रावणवर्णनं कृतं ॥ २८—३१ ॥ इत्युक्त्वेत्यादि ॥ प्रधानाप्रधानभूते द्वे एकाक्ष्यौ । अतो न पुनरुक्तिः । अथवा अक्षं इन्द्रियं । एकाक्षीं एकैकेन्द्रियां । श्रोत्रनासादावेकमात्रवतीत्यर्थः ॥ ३२—३६ ॥ प्रतिलोमानुलोमैः प्रतिकूलानुकूलाचरणैः । सामदानादिभेदनैः सामदानमुख्यैर्भेदैः । प्रथमप्रयुक्तसामदानैरित्यर्थः । आवर्जयत वशीकुरुत ॥ ३७—३८ ॥ धान्यमालिनी रावणस्य कनिष्ठपत्नी । इदं मन्दोदर्या अप्युपलक्षणं । उत्तरत्र वानरान्प्रति हनुमद्वचने तथा वक्ष्यमाणत्वात् ॥ ३९—४० ॥ अस्याः सीतायाः । अमरश्रेष्ठो ब्रह्मा । दिव्यान् भोगान्न विदधाति । अस्या दिव्यभोगे

हारोशक्यइत्यर्थः ॥ १५ ॥ ति० ताभ्यां प्रसिद्धपराक्रमाभ्यां । भुजद्वयमेवसर्वदा । युद्धादौस्वेच्छयादशभुजत्वमितिद्विवचनं ॥ वामदक्षेपुभुजत्वजात्यैकवचनमित्यन्ये ॥ २७ ॥ स० अनयेन स्त्रीवधतन्नासिकाछेदाद्यन्यायेन । अभिसंपन्नं युक्तं । अर्थहीनं निर्भाग्यं । एतादृशंराममनुव्रतेसीतेत्वां नाशयामि । सन्ध्यां सन्ध्याकालिकंतमः ॥ ३१ ॥ स० पुनरेकाक्षीमित्युपादानं व्यक्तिभेदाभिप्रायेण । अथवा पूर्वमेकाक्षीमितिमैथिलीविशेषणं । एकस्मिन्नामेअक्षिणीयस्याःसा तामित्यर्थः । एकमक्षियस्यास्सेत्येकत्र । अपरत्रच एकस्मिन्भागेअक्षिणीयस्यास्सापि निर्नासिकाव्यवधानमक्षिद्वयमेकस्मिन्प्रदेशेवर्ततइतिनैकाक्षीमितिपुनरुक्तं ॥ ३४ ॥ ति० प्रतिगर्जन प्रत्यगर्जत् ॥ ३८ ॥ उपगम्य समीपमागम्य । ततः अतिसंतर्जनंदृष्ट्वासीतायांदययेतिशेषः ॥ स० परिष्वज्य सीताताडनवारणार्थमालिङ्ग्य ॥ ३९ ॥ शि० अमरश्रेष्ठाइति । अस्याराज्यभोगोब्रह्मणानलिखितइत्यर्थः । आदराद्बहुवचनं ॥

[पा०] १ च. ज. विराजितः. २ क. ङ.—ट. अमृतोत्पादनेनद्धो. ३ क.—च. ज.—ट. भुजङ्गेनेव. ४ क. च. छ. ज. ञ. द्वाभ्यां. घ. सताभ्यांपरिपीनाभ्यां. ५ ख. फुल्लपल्लव. ६ ङ. झ. संददर्श. ७ क. घ. ङ. च. ज.—ट. जिह्वानखामपि. ८ ङ. झ. ट. समेत्यवा. ९ क. ग.—ज. आवर्तयत. १० ङ. झ. ञ. ट. प्रतिगर्जत. ११ क.—ट. देवाभोगसत्तमान् । विदधत्यमरश्रेष्ठाः.

अकामां कामयानस्य शरीरमुपतप्यते ॥ इच्छन्तीं कामयानस्य प्रीतिर्भवति शोभना ॥ ४२ ॥
एवमुक्तस्तु राक्षस्या समुत्क्षिप्तस्ततो बली ॥ प्रहसन्मेघसंकाशो राक्षसः स न्यवर्तत ॥ ४३ ॥
प्रस्थितः स दशग्रीवः कम्पयन्निव मेदिनीम् ॥ ज्वलद्भास्करवर्णाभं प्रविवेश निवेशनम् ॥ ४४ ॥
देवगन्धर्वकन्याश्च नागकन्याश्च सर्वतः ॥ परिवार्य दशग्रीवं विविशुस्तद्गृहोत्तमम् ॥ ४५ ॥

स मैथिलीं धर्मपरामवस्थितां प्रवेपमानां परिभर्त्स्य रावणः ॥
विहाय सीतां मदनेन मोहितः स्वमेव वेश्म प्रविवेश भास्वरम् ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

त्रयोविंशः सर्गः ॥ २३ ॥

रावणचोदनया एकजटादिभीराक्षसीभिः पृथक्पृथक् सीतांप्रति रावणप्रशंसनपूर्वकंतद्भार्याभावस्वीकरणचोदना ॥ १ ॥

इत्युक्त्वा मैथिलीं राजा रावणः शत्रुरावणः ॥ संदिश्य च ततः सर्वा राक्षसीर्निर्जगाम ह ॥ १
निष्क्रान्ते राक्षसेन्द्रे तु पुनरन्तःपुरं गते ॥ राक्षस्यो भीमरूपास्ताः सीतां समभिदुद्रुवुः ॥ २ ॥
ततः सीतामुपागम्य राक्षस्यः क्रोधमूर्च्छिताः ॥ परं परुषया वाचा वैदेहीमिदमब्रुवन् ॥ ३ ॥
पौलस्त्यस्य वरिष्ठस्य रावणस्य महात्मनः ॥ दशग्रीवस्य भार्यात्वं सीते न बहु मन्यसे ॥ ४ ॥
ततस्त्वेकजटा नाम राक्षसी वाक्यमब्रवीत् ॥ आमन्त्र्य क्रोधताम्राक्षी सीतां करतलोदरीम् ॥ ५ ॥
प्रजापतीनां षण्णां तु चतुर्थो यः प्रजापतिः ॥ मानसो ब्रह्मणः पुत्रः पुलस्त्य इति विश्रुतः ॥ ६
पुलस्त्यस्य तु तेजस्वी महर्षिर्मानसः सुतः ॥ नाम्ना स विश्रवा नाम प्रजापतिसमप्रभः ॥ ७ ॥
तस्य पुत्रो विशालाक्षि रावणः शत्रुरावणः ॥ तस्य त्वं राक्षसेन्द्रस्य भार्या भवितुमर्हसि ॥
मयोक्तं चारुसर्वाङ्गि वाक्यं किं नानुमन्यसे ॥ ८ ॥
ततो हरिजटा नाम राक्षसी वाक्यमब्रवीत् ॥ विवर्त्य नयने कोपान्मार्जारसदृशेक्षणा ॥ ९ ॥
येन देवास्त्रयस्त्रिंशद्देवराजश्च निर्जिताः ॥ तस्य त्वं राक्षसेन्द्रस्य भार्या भवितुमर्हसि ॥ १० ॥
ततस्तु प्रघसा नाम राक्षसी क्रोधमूर्च्छिता ॥ भर्त्सयन्ती तदा घोरमिदं वचनमब्रवीत् ॥ ११ ॥

भाग्यं नास्तीत्यर्थः ॥ ४१—४५ ॥ सर्गार्थं संग्रहेण दर्शयति—स इति ॥ ४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्वाविंशः सर्गः ॥ २२ ॥

प्रजापतीनामिति । " मरीचिरत्र्यङ्गिरसौ पुलस्त्य पुलहः क्रतुः " इति षट् प्रजापतयः । तेषां चतुर्

ति० अमरश्रेष्ठाइन्द्रादयः । दैवहतेयमदृष्टहीनेत्यर्थः ॥ ४१ ॥ ति० समुत्क्षिप्तः अन्यतोपसारितः । प्रहसन् धान्यमालिन्योर्
तव्यवहारदर्शनेनावशप्राप्तस्त्रीप्रहारापकीर्तिपरिहारेणचप्रसन्नइत्यर्थः ॥ स० समुत्क्षिप्तः बलात्परिवर्तितः । अतएवप्रहस
॥ ४३ ॥ ति० प्रविशुः प्रविविशुः ॥ ४५ ॥ इतिद्वाविंशःसर्गः ॥ २२ ॥

ति० शत्रून्रावयति हाहाशब्दंकारयति सशत्रुरावणः ॥ १ ॥ ति० नबहुमन्यसे मोहादितिशेषः ॥ ४ ॥ ति० तस्यपुत्रइत्
नेन कुलीनत्वंसूचितं ॥ ८ ॥ स० अष्टौवसवः । एकादशरुद्राः । द्वादशादित्याः । द्वावश्विनौ । आहत्यत्रयस्त्रिंशद्देवाः । द्वादश

[पा०] १ क. ङ. झ. ट. भास्करसंकाशं. २ ङ.—ज. ञ. कन्याश्वताःस्त्रियः. ग. ङ. झ. ट. कन्याश्वतास्ततः.
कन्याश्वशोभनाः. ख. कन्याश्वसर्वशः. ३ क. ग. च. छ. ज. ञ. ट. विविशुस्तागृहोत्तमं. ङ. झ. प्रविशुस्तागृहोत्तमं. ४
प्रतिपद्यवीर्यवान्. क. ज. ञ. प्रविवेशवीर्यवान्. ङ. झ. ट. प्रविवेशरावणः. ५ क. परुषंपरुषावाचो. ६ च. छ. ज. ञ. पाठे
ततोहरिजटेत्यर्धस्यस्थाने. ततोहरिजटानाम राक्षसीक्रोधमूर्छिता । भर्त्समानातदाघोरमिदंवचनमब्रवीत् इत्यर्धद्वयंदृश्यते.

ीर्योत्सिक्तस्य शूरस्य संग्रामेष्वनिवर्तिनः ॥ बलिनो वीर्ययुक्तस्य भार्यात्वं किं न लप्स्यसे ॥ १२ ॥
्रियां बहुमतां भार्यां त्यक्त्वा राजा महाबलः ॥ सर्वासां च महाभागां त्वामुपैष्यति रावणः ॥१३॥
मृद्धं स्त्रीसहस्रेण नानारत्नोपशोभितम् ॥ अन्तःपुरं समुत्सृज्य त्वामुपैष्यति रावणः ॥ १४ ॥
न्या तु विकटा नाम राक्षसी वाक्यमब्रवीत् ॥ १५ ॥
सकृद्देवता युद्धे नागगन्धर्वदानवाः ॥ निर्जिताः समरे येन स ते पार्श्वमुपागतः ॥ १६ ॥
स्य सर्वसमृद्धस्य रावणस्य महात्मनः ॥ किमद्य राक्षसेन्द्रस्य भार्यात्वं नेच्छसेऽधमे ॥ १७ ॥
तस्तु दुर्मुखी नाम राक्षसी वाक्यमब्रवीत् ॥ १८ ॥
स्य सूर्यो न तपति भीतो यस्य च मारुतः ॥ न वाति स्मायतापाङ्गे किं त्वं तस्य न तिष्ठसि ॥ १९ ॥
ुष्पवृष्टिं च तरवो मुमुचुर्यस्य वै भयात् ॥ शैलाश्च सुभ्रूः पानीयं जलदाश्च यदेच्छति ॥ २० ॥
स्य नैर्ऋतराजस्य राजराजस्य भामिनि ॥ किं त्वं न कुरुषे बुद्धिं भार्यार्थे रावणस्य हि ॥ २१ ॥
ाधु ते तत्त्वतो देवि कथितं साधु भामिनि ॥ गृहाण सुस्मिते वाक्यमन्यथा न भविष्यसि ॥२२॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

चतुर्विंशः सर्गः ॥ २४ ॥

रावणचोदनया राक्षसीभिस्तर्जितयासीतया ताःप्रति भर्तुरन्यस्यापरिग्रहविषये शच्यरुन्धतीप्रभृतिपतिव्रतानांदृष्टान्ती-
रणपूर्वकं स्वस्यमारणेपिरामान्यपुरुषापरिग्रहविषये दृढप्रतिज्ञानम् ॥ १ ॥ ततःशिंशुपास्थेहनुमति गूढंतूष्णींशृण्वति
ानाराक्षसीभिर्नानापरुषभाषणैर्नानाविधायुधोद्यमनेनच भीषणपूर्वकंसंतर्जने सीतयादुःखाद्रोदनम् ॥ २ ॥

तः सीता[11]मुपागम्य राक्षस्यो विकृताननाः ॥ परुषं[12] परुषा नार्य[13] ऊचुस्तां वाक्यमप्रियम् ॥ १ ॥
किं त्वमन्तःपुरे सीते सर्वभूतम[14]नोहरे ॥ महार्हशयनोपेते न वा[15]समनुमन्यसे ॥ २ ॥
ानुषी मानुषस्यैव भार्यात्वं बहु मन्यसे ॥ प्रत्याहर मनो रा[16]मान्न त्वं जातु भविष्यसि ॥ ३ ॥

लस्त्यः ॥ ६—१२ ॥ सर्वासां मध्ये प्रियां बहुमतां । हाभागां च भार्यां मन्दोदरीं त्यक्त्वा त्वामुपैष्यति १३—१७ ॥ यस्य यस्मात् । तस्य न तिष्ठसि स्मै न तिष्ठसे । प्रकाशनार्थेप्यार्षत्वात्परस्मैपदं षष्ठी ॥ १९ ॥ शैलाश्च जलदाश्च पानीयं रावणः दिच्छति तदा मुञ्चन्तीति विपरिणम्यते॥२०—१२॥

साधु ते कथितं साधु गृहाणेति साधुशब्दद्वयस्य निर्वाहः ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दर-काण्डव्याख्याने त्रयोविंशः सर्गः ॥ २३ ॥

न त्वं जातु भविष्यसितस्येति शेषः ॥ ३—

त्यमध्यप्रविष्टस्यविष्णोःस्वरूपस्यराक्षसीभिरज्ञानादेवमुक्तं ॥ १० ॥ स० वीर्योत्सिक्तस्य वीर्योन्मत्तस्यसकाशादपिवीर्ययुक्तस्य । लिप्ससे नेच्छसि ॥ १२ ॥ स० यस्यसकाशाद्भीतः तस्य वशेइतिशेषः ॥ १८ ॥ स० सुस्रुवुः मुमुचुः । आर्षोविसर्गलोपः १९ ॥ ति० भार्यार्थे भार्यात्वनिमित्तं ॥ २० ॥ स० अधुते रावणेनानिराकृते सत्कृतेइतियावत् । सात्वंगृहाणेतिवा ॥२१॥ तित्रयोविंशःसर्गः ॥ २३ ॥

स० परुषमपिसरुषापित्रापुत्रंप्रत्युदीरितं शठ तर्हिनपठेत्येवमादिवाक्यमन्ततोगत्वाप्रायःप्रियपर्यवसायिदृष्टमित्यतोप्रियमित्युक्तं १ ॥ ति० प्रत्याहर निवर्तय । एवं त्वदभीष्टंरामसंगमरूपंवस्तु । जातु कदाचिदपि । अतःपरंनभविष्यति । अत्ररामागमन-

[पा०] १ झ. ट. लिप्ससे. २ ग. रत्नेनशोभितं. ३ घ. झ. ट. तदुत्सृज्य. ४ झ. ट. असकृद्भीमवीर्येण. ५ झ. ट. मर्थं. ६ ङ. झ. ट. यस्यस. ७ क. झ. ञ. ट. तिष्ठसे. ८ च. वृष्टीश्च. ९ झ. ञ. ट. शैलाःसुस्रुवुः पानीयं. ठ. शैलाः स्रुवुपानीयं. १० क. च. छ. निश्चितं. ११ क. ग.—ट. सीतांसमस्तास्ताः. १२ ङ. झ. ञ. ट. परुषानर्हां. १३ ख. ङ. झ. ञ. ऊचुस्तद्वाक्यं. ग. घ. च. छ. ज. ऊचुस्तावाक्यं. १४ झ. मनोरमे. १५ घ. वासंबहुमन्यसे. १६ झ. ट. रामान्नैवंजातु.

त्रैलो[1]क्यवसुभोक्तारं रावणं राक्षसेश्वरम् ॥ भर्तारमुपसंगम्य विहरस्व यथासुखम् ॥ ४ ॥
मानुषी मानुषं तं तु राममिच्छसि शोभने ॥ राज्याद्भ्रष्टमसिद्धार्थं विक्लबं त्वमनिन्दिते ॥ ५ ॥
राक्षसीनां वचः श्रुत्वा सीता पद्मनिभेक्षणा ॥ नेत्राभ्यामश्रुपूर्णाभ्यामिदं वचनमब्रवीत् ॥ ६ ॥
यदिदं लोकविद्विष्टमुदाहरथ संगताः ॥ नैतन्मनसि वाक्यं मे किल्बिषं प्रतिभाति वः ॥ ७ ॥
न मानुषी राक्षसस्य भार्या भवितुमर्हति ॥ कामं खादत मां सर्वा न करिष्यामि वो वचः ॥ ८
दीनो वा राज्यहीनो वा यो मे भर्ता स मे गुरुः ॥ तं नित्यमनुरक्तास्मि यथा सूर्यं सुवर्चला ॥ ९
यथा शची महाभागा शक्रं स[3]मुपतिष्ठति ॥ अरुन्धती वसिष्ठं च रोहिणी शशिनं यथा ॥ १०
लोपामुद्रा यथाऽगस्त्यं सुकन्या च्यवनं यथा ॥ सावित्री सत्यवन्तं च कपिलं श्रीमती यथा ॥१
सौदासं मदयन्तीव केशिनी सगरं यथा ॥ नैषधं दमयन्तीव भैमी पतिमनुव्रता ॥
तथाऽहमिक्ष्वाकुवरं रामं पतिमनुव्रता ॥ १२ ॥
सीताया वचनं श्रुत्वा राक्षस्यः क्रोधमूर्च्छिताः ॥ भर्त्सयन्ति स्म परुषैर्वाक्यै रावणचोदिताः ॥१
अवलीनः स निर्वाक्यो हनुमाञ्शिंशुपाद्रुमे ॥ सीतां संतर्जयन्तीस्ता राक्षसीरशृणोत्कपिः ॥ १४
ता[4]मभिक्रम्य सं[5]क्रुद्धा वेपमानां समन्ततः ॥ भृशं संलिलिहुर्दीप्तान्प्र[6]लम्बान्दशनच्छदान् ॥ १५
ऊ[7]चुश्च परमक्रुद्धाः प्रगृह्याशु परश्वधान् ॥ नेयमर्हति भर्तारं रावणं राक्षसाधिपम् ॥ १६ ॥
सं[8]भर्त्स्यमाना भीमाभी राक्षसीभिर्व[9]रानना ॥ सा[10] बाष्पमुपमार्जन्ती शिंशुपां तामुपागमत् ॥ १७
ततस्तां शिंशुपां सीता राक्षसीभिः समावृता ॥ अभिगम्य विशालाक्षी तस्थौ शोकपरिप्लुता ॥१
तां कृशां दीनवदनां मलिनाम्बरधा[11]रिणीम् ॥ भर्त्सयांचक्रिरे सी[12]तां रा[13]क्षस्यस्तां समन्ततः ॥ १९
त[14]तस्तां विनता नाम राक्षसी भीमदर्शना ॥ अब्रवीत्कुपिताकारा क[15]राला निर्णतोदरी ॥ २० ॥
सीते पर्याप्तमेतावद्भर्तुः [16]स्नेहो निदर्शितः ॥ सर्वत्रातिकृतं भद्रे व्यसनायोपकल्पते ॥ २१ ॥
परितुष्टास्मि भद्रं ते मानुषस्ते कृतो विधिः ॥ ममापि तु वचः पथ्यं ब्रुवन्त्याः कुरु मैथिलि ॥२

---

४ ॥ मानुषीति हेतुगर्भं । मानुषी त्वं मानुषं तमिच्छसि ॥ ५—६ ॥ किल्बिषं पापावहं ॥ ७—८ ॥ सुवर्चलेत्यादि बहुदृष्टान्तप्रदर्शनं स्वस्य पातिव्रत्यदार्ढ्यद्योतनाय ॥ ९—१३ ॥ अवलीनः छन्नः । राक्षसीरशृणोत् राक्षसीवाक्यान्यशृणोदित्यर्थः ॥ १४—१५ ॥ नेयमर्हतीत्यत्रेतिकरणं बोध्यं । अस्य ऊचुरित्यनेनसंबन्धः ॥ १६ ॥ संभर्त्स्यमानेति । भर्त्स्यमानेतिपाठे भर्त्सनोपगमनरूपक्रियाभेदात्त्व्वद्वयं । तां हनुमदधिष्ठितां शिंशुपां ॥ १७—१९ निर्णतोदरी उन्नतोदरी ॥ २० ॥ अतिकृतं अतित्रकृतं ॥ २१ ॥ मानुषो विधिः कृतः । मनुष्यत्युचितपातिव्रत्यप्रकटनं कृतं एतावत्कालमित्

स्यतववातत्रगमनस्यप्रसक्त्यभावादितिभावः ॥ यद्वा अतःपरंजातुकदाचिदप्येवंभावश्चेत् भवती नभविष्यति मारयामइत्यर्थः ।
ति० नेत्राभ्यां उपलक्षितेतिशेषः ॥ ६ ॥ **स०** एतत् युष्मद्वाक्यं मेकिल्बिषंप्रति पापसाधनपरपुरुषसंसर्गंप्रति मनउत्पादने
नप्रतितिष्ठति ॥ ७ ॥ **ति०** सुवर्चला सूर्यपत्नी । सूर्याभिमुखपुष्पवतीकाचिदोषधिरित्यन्यः ॥ ९ ॥ **स०** दुस्समयगमनाया
निदर्शनान्याह—**यथेति** ॥ १० ॥ **स०** भैमीदमयन्तीतिसामानाधिकरण्यं ॥१२॥ **स०** साभर्त्स्यमानेतिपदमेकं । सां हिंसा
इयभर्त्स्यमाना साभर्त्स्यमाना । "सातुर्हिंसायां" इतिविश्वः । यासेत्यन्वयः । उपेत्यनेनातिसामीप्यंसूचयति ॥१७॥ **स०** वि

[पा०] १ क. ख. त्रैलोक्यमनु. २ क. ङ. च. ज.—ट. प्रतितिष्ठति. ३ क. ख. घ. च. छ. ज. ञ. समनुति
४ क. ख. घ. च. छ. ज. ञ. तामतिक्रम्य. ५ क. ख. घ. च.—ट. संरब्धाः. ६ क. ख. च. ज. प्रलंबदशन. ७ क. च
ज. ञ. ऊचुःपरमसंक्रुद्धाः. ८ क. ख. ग. ङ. छ.—ट. साभर्त्स्यमाना. घ. साभर्त्स्यमानावैदेही. ९ क. ङ. झ. ट. वैरा
१० क. स्वबाष्पमवमार्जन्ती. घ. ङ. झ. ञ. ट. साबाष्पमपमार्जन्ती. ११ क. ङ.–ट. वासिनीं. १२ घ. ङ. झ. ट. भी
१३ क. घ. झ. ट. राक्षस्यस्ताः. १४ ङ. झ. ट. ततस्तु. १५ ख. च. झ. कराली. १६ ङ.—ज. ञ. ट. स्नेहःप्रदर्शितः.

वणं भज भर्तारं भर्तारं सर्वरक्षसाम् ॥ विक्रान्तं रूपवन्तं च सुरेशमिव वासवम् ॥ २३ ॥
क्षिणं त्यागशीलं च सर्वस्य प्रियदर्शनम् ॥ २४ ॥
ानुषं कृपणं रामं त्यक्त्वा रावणमाश्रय ॥ दिव्याङ्गरागा वैदेहि दिव्याभरणभूषिता ॥ २५ ॥
ाद्य प्रभृति सर्वेषां लोकानामीश्वरी भव ॥ अग्नेः स्वाहा यथा देवी शची वेन्द्रस्य शोभने ॥ २६ ॥
कं ते रामेण वैदेहि कृपणेन गतायुषा ॥ एतदुक्तं च मे वाक्यं यदि त्वं न करिष्यसि ॥
स्मिन्मुहूर्ते सर्वास्त्वां भक्षयिष्यामहे वयम् ॥ २७ ॥
न्या तु विकटा नाम लम्बमानपयोधरा ॥ अब्रवीत्कुपिता सीतां मुष्टिमुद्यम्य गर्जती ॥ २८ ॥
हून्यप्रियरूपाणि वचनानि सुदुर्मते ॥ अनुक्रोशान्मृदुत्वाच्च सोढानि तव मैथिलि ॥ २९ ॥
च नः कुरुषे वाक्यं हितं कालपुरस्सरम् ॥ ३० ॥
ानीतासि समुद्रस्य पारमन्यैर्दुरासदम् ॥ रावणान्तःपुरं घोरं प्रविष्टा चासि मैथिलि ॥ ३१ ॥
ावणस्य गृहे रुद्धामस्माभिस्तु सुरक्षिताम् ॥ न त्वां शक्तः परित्रातुमपि साक्षात्पुरन्दरः ॥ ३२ ॥
ुरुष्व हितवादिन्या वचनं मम मैथिलि ॥ अलमश्रुप्रपातेन त्यज शोकमनर्थकम् ॥ ३३ ॥
ाज प्रीतिं प्रहर्षं च त्यजैतां नित्यदैन्यताम् ॥ सीते राक्षसराजेन सह क्रीड यथासुखम् ॥ ३४ ॥
ानासि हि यथा भीरु स्त्रीणां यौवनमध्रुवम् ॥ यावन्न ते व्यतिक्रामेत्तावत्सुखमवाप्नुहि ॥ ३५ ॥
द्यानानि च रम्याणि पर्वतोपवनानि च ॥ सह राक्षसराजेन चर त्वं मदिरेक्षणे ॥ ३६ ॥
्रीसहस्राणि ते सप्त वशे स्थास्यन्ति सुन्दरि ॥ रावणं भज भर्तारं भर्तारं सर्वरक्षसाम् ॥ ३७ ॥
त्पाट्य वा ते हृदयं भक्षयिष्यामि मैथिलि ॥ यदि मे व्याहृतं वाक्यं न यथावत्करिष्यसि ॥३८॥
तश्चण्डोदरी नाम राक्षसी क्रोधमूर्च्छिता ॥ भ्रामयन्ती महच्छूलमिदं वचनमब्रवीत् ॥ ३९ ॥
मां हरिणलोलाक्षीं त्रासोत्कम्पिपयोधराम् ॥ रावणेन हृतां दृष्ट्वा दौर्हृदो मे महानभूत् ॥ ४० ॥
कृत्प्लीहमथोत्पीडं हृदयं च सबन्धनम् ॥ अन्त्राण्यपि तथा शीर्षं खादेयमिति मे मतिः ॥ ४१ ॥

२२—२८ ॥ सोढानि रावणेनेति शेषः ॥ २९ ॥ ालपुरस्सरं कालानुरूपं ॥ ३०—३३ ॥ प्रीतिं ावणविषयप्रीतिं । प्रहर्षं कालकृतमनोविकासं ३४—३७ ॥ उत्पाट्य वा उत्पाट्यैव ॥ ३८ —३९ ॥ दौर्हृदः इच्छा ॥ ४० ॥ कुक्षिदक्षिणभागस्थः कालखण्डाख्यो मांसपिण्डो यकृत् । " स्नायुस्त्रियां कालखण्डयकृती तु समे इमे " इत्यमरः । प्लीहा तु गुल्माख्यो वामभागस्थो मांसपिण्डविशेषः ।

रणं । मानुषः मनुष्यजात्युचितः । तेनेतिशेषः । अमानुषः देवादिगोचरोवा । अमानुषः राक्षससंबन्धी अविधिः अननु-
नं । कृतः । तेनतुष्टास्मि सहसाहस्तगतयानभाव्यमितित्वयेत्थंकृतमितितुष्टास्मीत्यर्थोवा । " सभाराजाऽमनुष्यपूर्वा "
ेतिसूत्रवृत्तावमनुष्यशब्दोरक्षःपिशाचादीनाहेत्युक्तेः ॥ २२ ॥ **स०** आपतन्तं शत्रूणामुपरीतिशेषः ॥ २३ ॥ **स०** गतायुषा
स्मदाहाररूपत्वाद्गतायुष्ट्वमितिभावः ॥ सर्वास्त्वांभक्षयिष्यामहइत्युक्त्यानैकापित्वत्पक्षपातिनीवर्ततइतिद्योतयति ॥ २७ ॥ **ति०**
र्जती तर्जयन्ती ॥ २८ ॥ **स०** दैन्यं स्वार्थेघञ् । दैन्यतां दीनतां ॥ **रामानु०** प्रीतिं स्नेहं । प्रहर्षं आनन्दं । नित्यदैन्यतां

[पा०] १ ङ. झ. ट. विक्रान्तमापतन्तं. २ क. ख. घ.—ट. प्रियवादिनं. ३ ङ.—ट. लोकानांसर्वेषामीश्वरी. ४ ङ. . ञ. ट. तर्जती. ५ ख. घ. झ. ट. बहून्यप्रतिरूपाणि. ६ च. छ. ज. ञ. प्रोक्तानि. ७ क. ख. घ.—ट. कालपुरस्कृतं. ङ. झ. ञ. ट. पुरेघोरे. ९ क. ख. ङ. झ. ञ. ट. रुद्धाअस्माभिस्त्वभिरक्षिता. १० घ.—ट. मश्रुनिपातेन. ११ झ. जन्ती. ङ. छ. ज. ट. त्यजतां. १२ ख. निजदैन्यतां. १३ ङ. झ. ट. परिक्रीड. १४ झ. ट. जानीमहेयथा. १५ ङ. झ. . ट. देविवशे. १६ क. ङ. च. ज.—ट. क्रूरदर्शना. १७ ङ. झ. ट. हरिणशाबाक्षीं. १८ क. ख. घ.—झ. ट. त्रासोत्कंप. ख. ङ. झ. ट. महानयं. २० ङ. च. ज.—ट. यकृत्प्लीहंमहत्क्रोडं. क. यकृत्प्लीहमथोत्क्रुत्य. २१ च. छ. ज. स्नायुबन्धनं. झ. ट. गात्राण्यपि. २३ ङ.—ज. ञ. खादयामीति.

ततस्तु प्रघसा नाम राक्षसी वाक्यमब्रवीत् ॥ [1]कण्ठमस्या नृशंसायाः पीडयाम किमास्यते ॥ ४२
निवेद्यतां ततो राज्ञे मानुषी सा मृतेति ह ॥ नात्र कश्चन संदेहः खादतेति स वक्ष्यति ॥ ४३
ततस्त्वजामुखी नाम राक्षसी वाक्यमब्रवीत् ॥ विशस्येमां ततः [2]सर्वाः समान्कुरुत पी[3]लुकान् ॥४
विभजाम ततः सर्वा विवादो मे न रोचते ॥ पेयमानीयतां क्षिप्रं [4]लेह्यमुच्चावचं बहु ॥ ४५ ॥
ततः शूर्पणखा नाम राक्षसी वाक्यमब्रवीत् ॥ अजामुख्या [5]यदुक्तं हि तदेव मम रोचते ॥ ४६
सुरा चानीयतां क्षिप्रं सर्वशोकविनाशिनी ॥ मानुषं मांसम[6]स्वाद्य नृत्यामोथ निकुम्भिलाम् ॥ ४७
एवं सं[7]भर्त्स्यमाना सा सीता सुरसुतोपमा ॥ [8]राक्षसीभिः सुघोराभिर्धैर्यमुत्सृज्य रोदिति ॥ ४८

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

पञ्चविंशः सर्गः ॥ २५ ॥

राक्षसीगणसंतर्जनमसहमानयासीतयाऽशोकशाखालंबनेन रामलक्ष्मणादीन्प्रत्याक्रोशनपूर्वकमश्रुधाराविसर्जनेन धापरिदेवनम् ॥ १ ॥

त[9]था तासां वदन्तीनां परुषं दारुणं बहु ॥ राक्षसीनामसौम्यानां रुरोद जनकात्मजा ॥ १ ॥
एवमुक्ता तु वैदेही राक्षसीभिर्मनस्विनी ॥ उवाच परमत्रस्ता बाष्पगद्गदया गिरा ॥ २ ॥
न मानुषी राक्षसस्य भार्या भवितुमर्हति ॥ कामं खादत मां सर्वा न करिष्यामि वो वचः ॥ ३
सा राक्षसीमध्यगता सीता सुरसुतोपमा ॥ न शर्म लेभे [10]दुःखार्ता [11]रावणेन च तर्जिता ॥ ४ ॥
वेपते स्माधिकं सीता विशन्तीवाङ्गमात्मनः ॥ वने यूथपरिभ्रष्टा मृगी [12]कोकैरिवार्दिता ॥ ५ ॥
सा त्वशोकस्य विपुलां शाखामालम्ब्य पुष्पिताम् ॥ चिन्तयामास [13]शोकेन भर्तारं [14]भग्नमानसा ॥

नकारान्तस्य प्लीहन्शब्दस्य अकारान्तत्वमार्षं । "अन्त्रं पुरीतद्गुल्मस्तु प्लीहा पुंसि" इत्यमरः । उत्पीडं तस्योपरि स्थितं मांसं । हृदयं पद्मकोशप्रतीकाशं मांसं । बन्धनं तस्य धारणमधोमांसं । उत्क्रोडमिति पाठे उत्क्रोडोहृदयस्य स्थानं । अन्त्रं पुरीतत् ॥ ४१—४३ ॥ पीलुकान् मांसखण्डान् ॥ ४४ ॥ पेयं लेह्यं चास्या उपदंशत्वेनोच्यते ॥ ४५—४६ ॥ निकुम्भिला नाम लङ्कायाः पश्चिमद्वारप्रदेशवासिनी भद्रकाली ॥४७॥ रोदिति अरुदत् ॥४८॥इति श्री‍विन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारि‍काख्याने सुन्दरकाण्डव्याख्यानेचतुर्विंशःसर्गः॥

तासां वदन्तीनां तासु वदन्तीषु ॥ १ ॥ मनस्‍पातिव्रत्ये दृढमनाः ॥ २ ॥ खादत भक्षयत ॥ ३ शर्म सुखं ॥ ४ ॥ कोकैः ईहामृगैः । "कोकस्त्‍मृगो वृकः" इत्यमरः ॥ ५ ॥ अशोकस्य हनु

नित्यंदैन्यंयस्यास्सानित्यदैन्या तस्याभावोनित्यदैन्यतातां ॥ २४ ॥ **ति०** प्रघसावाक्यं **विशस्येमामिति** । मध्ये-कण्ठ इत्यादिततस्त्वजामुखीत्यन्तंश्लोकद्वयंप्रक्षिप्तमितिकतकः ॥ ४४ ॥ **ति०** शूर्पणखेयमन्या ॥ ४६ ॥ इतिचतुर्विंशःसर्गः ॥ २

स० परुषं बहिःक्रूरं । दारुणं अन्तः ॥ १ ॥ **ति०** शर्मनलेभेइव । शोकार्तेव ॥ **ती०** सीताविलापस्यवास्तवार्थस्तु श्री वियोगेन घोरराक्षसपुरावस्थानेन विरूपराक्षसीसमागमेनच विविधप्रलापादिकमितिज्ञेयं । अस्मिन्काण्डेयत्रयत्रसीताप्रलापस्तत्र वमेवोहनीयः ॥ ४ ॥ **स०** आत्मनः स्वस्य अङ्गं विशन्तीमहाङ्गेष्ववान्तराङ्गानिनिवेशयन्तीव ॥ **ति०** आत्मनोङ्गंविश भीत्यातिसंकुचितशरीराकमठवदभूदित्यर्थः ॥ ५ ॥ **शि०** अशोकस्य अशोकसदृशाशिंशुपायाः । अशोकशब्दआचारक्विबन्त

[पा०] १ एतदाद्यर्धचतुष्टयं झ. पाठेनदृश्यते. २ ङ. च. झ. ञ. ट. सर्वान्समान्. ३ ङ. झ. ञ. ट. पिण्डकान्. झ. ञ. ट. माल्यंचविविधंबहु. क. माल्यानिविविधानिच. ५ ङ.—ट. यदुक्तंवै. ६ ङ. च. ज.—ट. मासाद्य. ७ ङ ज.—ट. निर्भर्त्स्यमाना. ८ राक्षसीभिर्विरूपाभिः. ९ क. ङ. झ. ट. अथ. १० ख. ङ.—ट. शोकार्ता. ११ झ. रावणे १२ क. सिंहैरिवा. १३ क. दुःखार्ताभर्तारं. १४ क. गतमानसा. घ. ज. सक्तमानसा.

स्नापयन्ती विपुलौ स्तनौ नेत्रजलस्रवैः ॥ चिन्तयन्ती न शोकस्य तदाऽन्तमधिगच्छति ॥ ७ ॥
वेपमाना पतिता प्रवाते कदली यथा ॥ राक्षसीनां भयत्रस्ता विवर्णवदनाऽभवत् ॥ ८ ॥
स्याः सा दीर्घविपुला वेपन्त्या सीतया तदा ॥ ददृशे कम्पिनी वेणी व्यालीव परिसर्पती ॥ ९ ॥
निःश्वसन्ती दुःखार्ता शोकोपहतचेतना ॥ आर्ता व्यसृजदश्रूणि मैथिली विललाप ह ॥ १० ॥
रामेति च दुःखार्ता हा पुनर्लक्ष्मणेति च ॥ हा श्वश्रु मम कौसल्ये हा सुमित्रेति भामिनी ॥ ११ ॥
कप्रवादः सत्योऽयं पण्डितैः समुदाहृतः ॥ अकाले दुर्लभो मृत्युः स्त्रिया वा पुरुषस्य वा ॥१२॥
त्राहमेवं क्रूराभी राक्षसीभिरिहार्दिता ॥ जीवामि हीना रामेण मुहूर्तमपि दुःखिता ॥ १३ ॥
गाऽल्पपुण्या कृपणा विनशिष्याम्यनाथवत् ॥ समुद्रमध्ये नौः पूर्णा वायुवेगैरिवाहता ॥ १४ ॥
र्तारं तमपश्यन्ती राक्षसीवशमागता ॥ सीदामि खलु शोकेन कूलं तोयहतं यथा ॥ १५ ॥
पद्मदलपत्राक्षं सिंहविक्रान्तगामिनम् ॥ धन्याः पश्यन्ति मे नाथं कृतज्ञं प्रियवादिनम् ॥ १६ ॥
र्वथा तेन हीनाया रामेण विदितात्मना ॥ तीक्ष्णं विषमिवास्वाद्य दुर्लभं मम जीवितम् ॥ १७ ॥
ीदृशं तु मया पापं पुरा जन्मान्तरे कृतम् ॥ येनेदं प्राप्यते दुःखं मया घोरं सुदारुणम् ॥ १८ ॥
ीवितं त्यक्तुमिच्छामि शोकेन महता वृता ॥ राक्षसीभिश्च रक्ष्यन्त्या रामो नासाद्यते मया ॥ १९ ॥
धगस्तु खलु मानुष्यं धिगस्तु परवश्यताम् ॥ न शक्यं यत्परित्यक्तुमात्मच्छन्देन जीवितम् ॥२०॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

धिष्ठितशिंशुपासन्निहितस्य ॥ ६ ॥ अन्तं अवधिं । ाधिगच्छति अध्यगच्छत् ॥ ७ ॥ राक्षसीनां राक्षसीभ्यः ॥ ८ ॥ सीतयेति व्यत्ययेन षष्ठ्यर्थे तृतीया । रिसर्पती परिसर्पन्ती । नुमभावआर्षः ॥ ९ ॥ ःखार्ता राक्षसीवचनश्रवणजदुःखार्ता । आर्ता ामविरहार्ता ॥ १० ॥ सुमित्रेत्यत्र संबुद्धावाप कारादेशाभाव आर्षः ॥ ११ ॥ लोकप्रवाद इत्यादि- श्लोकद्वयमेकं वाक्यं ॥ अकाले अप्राप्तकाले । दुर्लभ त्यत्र इतिकरणं बोध्यं । यत्र यतः ॥ १२—१३ ॥ ूर्णा पदार्थैरिति शेषः ॥ १४—१५ ॥ मम धनं र्वेषां स्वं भविष्यतीत्याह—तमिति ॥ तं “ बहवो ृप कल्याणगुणाः पुत्रस्य सन्तिते ” इति प्रसिद्धं । ात्मगुणानुक्त्वा विग्रहगुणानाह—पद्मदलपत्राक्षं दलतीति दलं विकसितपद्माक्षमित्यर्थः । यद्वा दलतीति दलं गर्भपत्रं । विस्पष्टार्थमेकार्थे शब्दद्वयं वा । सिंहविक्रान्तगामिनं विक्रान्तं विक्रमः गमनं तद्वत गच्छतीति तथा ॥ १६—१७ ॥ पुरा जन्मान्तरे पूर्वजन्मनि । घोरं सुदारुणं अत्यन्तघोरमित्यर्थः ॥ १८ ॥ रक्ष्यन्त्या रक्ष्यमाणया ॥ १९ ॥ परवश्यतां भर्तृपरतन्त्रतां । परस्वभूतं शरीरं न स्वेच्छया त्यक्तुं शक्यमित्यर्थः । आत्मच्छन्देन मदिच्छया ॥ २० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चविंशः सर्गः ॥ २५ ॥

ेककर्तृक्विबन्तः । इवार्थस्तुशब्दोवा ॥ **ती०** हनुमदधिष्ठितशिंशुपामूलंप्राप्तायास्सीतायाअशोकशाखालंबनाभिधानादशोकशा- ाःशिंशुपाशाखाश्चपरस्परंसंमिलितावर्तन्तइत्यवगम्यते ॥ ६ ॥ **स०** भयत्रस्ता भयैः घोरैरायुधादिभिः । त्रस्ता भीता । “भयं तिभयेघोरे ” इतिविश्वः ॥ ८ ॥ **स०** अनाथवत् अनाथेव । आर्षःपुंवद्भावः ॥ १४ ॥ इतिपञ्चविंशःसर्गः ॥ २५ ॥

[पा०] १ क. विषण्णवदना. २ ङ. झ. ट. दीर्घबहुला. ३ ङ. झ. ट. कंपिता. ४ झ. शोकार्ताकोपोपहतचेतना. . क. घ. ङ. झ. ट. विललापच. ६ क. घ.—छ. झ. ञ. ट. यत्राहमाभिः. ७ ङ. झ. ञ. ट. जीवनं. ८ ङ.—ट. महापापं यादेहान्तरे. ९ ङ. ज.—ट. घोरंमहादुःखं. ङ. ट. घोरंमहद्दुःखं.

षड्विंशः सर्गः ॥ २६ ॥

राक्षसीसंतर्जनमसहमानयासीतया ताःप्रति स्वस्यचित्रहिंसयामारणेपि रावणानङ्गीकरणेदृढप्रतिज्ञानपूर्वकं स्वानय
रामानागमने बहुकारणविकल्पनेनबहुधाविलापः ॥ १ ॥

प्रसक्ताश्रुमुखी[1]त्येवं ब्रुवन्ती जनकात्मजा ॥ [2]अधोमुखमुखी बाला विलप्तुमुपचक्रमे ॥ १ ॥
उन्मत्तेव प्रमत्तेव भ्रान्तचित्तेव शोचती ॥ उपावृत्ता किशोरीव विवेष्टन्ती महीतले ॥ २ ॥
राघवस्य प्रमत्तस्य रक्षसा कामरूपिणा ॥ रावणेन प्रमथ्याहमानीता क्रोशती बलात् ॥ ३ ॥
राक्षसीवशमापन्ना भर्त्स्यमाना [3]सुदारुणम् ॥ चिन्तयन्ती सुदुःखार्ता [4]नाहं जीवितुमुत्सहे ॥ ४ ॥
न हि मे [5]जीवितैरर्थो नैवार्थैर्न च भूषणैः ॥ वसन्त्या राक्षसीमध्ये विना रामं [6]महारथम् ॥ ५ ॥
अश्मसारमिदं नूनमथवाऽप्यजरामरम् ॥ हृदयं मम येनेदं [7]न दुःखेनावशीर्यते ॥ ६ ॥
धिङ्मामनार्यामसतीं याऽहं तेन विना कृता ॥ मुहूर्तमपि [8]रक्षामि जीवितं [9]पापजीविता ॥ ७ ॥
का च मे जीविते श्रद्धा सुखे वा तं प्रियं विना ॥ भर्तारं सागरान्ताया वसुधायाः प्रियंवदम् ॥८
भिद्यतां भक्ष्यतां वाऽपि शरीरं विसृजाम्यहम् ॥ न चाप्यहं चिरं दुःखं सहेयं प्रियवर्जिता ॥ ९
चरणेनापि सव्येन न स्पृशेयं निशाचरम् ॥ रावणं किं पुनरहं कामयेयं [10]विगर्हितम् ॥ १० ॥
[11]प्रत्याख्यातं न जानाति नात्मानं नात्मनः कुलम् ॥ यो नृशंसस्वभावेन मां प्रार्थयितुमिच्छति ॥ ११
छिन्ना [12]भिन्ना विभक्ता वा दीप्ते[13]वाग्नौ प्रदीपिता ॥ रावणं नोपतिष्ठेयं किं प्रलापेन वश्चिरम् ॥ १२
ख्यातः प्राज्ञः कृतज्ञश्च सानुक्रोशश्च राघवः ॥ [14]सद्वृत्तो निरनुक्रोशः शङ्के मद्भाग्यसंक्षयात् ॥ १३

उन्मत्ता चित्तविभ्रमवती । "उन्मादश्चित्तविभ्रमः" इत्युक्तेः । प्रमत्ता अनवधाना । "प्रमादोनवधानता" इत्यमरः । भ्रान्तचित्ता अनवस्थितचित्ता । उपावृत्ता श्रमापनोदनार्थं वेष्टिता । किशोरीव बडबेव ॥ २ ॥ प्रमत्तस्य अनवहितस्य ॥ ३–४ ॥ मे जीवितैर्जीवनैः कोप्यर्थो नास्ति । केवलजीवितस्यानपेक्षितत्वेप्यर्थसहितत्वेन तदपेक्षा स्यात् नेत्याह—नैवार्थैर्न च भूषणैः भूषणैरर्थैश्च सहितैर्जीवनैर्मे नार्थः । कुत इत्यत्राह—वसन्त्या इति । राक्षसीमध्यवासाद्रामविरहाच्च सर्वोपकरणसहितमपि जीवितं नापेक्षितमित्यर्थः ॥ ५—१० ॥ प्रत्याख्यातं प्रत्याख्यानं । भावे निष्ठा । आत्मानं स्वस्वरूपं ॥११॥ छिन्ना द्विखण्डतया कृता । भिन्ना दलिता । विभक्ता अवयवशः कृता । दीप्तेव अग्नौ प्रदीपिता वा ॥ १२ एवं पातिव्रत्यदार्ढ्यमुक्त्वा रामस्यानागमने कारणा बहुधा शङ्कते—ख्यात इत्यादिना ॥ प्राज्ञः दोषवत्य गुणदर्शी । "न तेऽम्बा मध्यमा माता गर्हितव्या कथंचन" इत्युक्तं । कृतज्ञः "कथंचिदुपकारेण कृतेन तुष्यति" इत्युक्तरीत्या स्वाश्रितैः कृतं किंचित्क सर्वदा मनसि कुर्वन्नित्यर्थः । सानुक्रोशः किंचित्का करणे "भृशं भवति दुःखितः" इत्युक्तरीत्या ते व्यसने सति अतिदुःखितः राघवः । जनित्वार्जित नां गुणान्तराणामुपसंग्रहणमिदं । सद्वृत्तः परस द्ध्येकप्रयोजनः । ख्यातः एवं शत्रुगोष्ठ्यामपि प्रसिद्धः निरनुक्रोशः शङ्के अस्यामप्यवस्थायां सुखप्रदानाभ वान्नृशंसमाशङ्के । मद्भाग्यसंक्षयात् । मद्भाग्यविप

ति० असतीं असतीवत्परगृहस्थां । जीवामि जीवितंरक्षामीत्यर्थः । पाकंपचतीतिवत्प्रयोगः ॥ ७ ॥

[पा०] १ ख. ङ.—ञ. त्वेवं. २ ङ.—ट. अधोगतमुखी. ३ ङ. च. ज.—ट. चदारुणं. ४ क. नहि. ५ क. घ.—ट. जीवितेनार्थो. ६ क. ख. घ. महाबलं. ७ ङ. च. ज. झ. ट. नदुःखेनविशीर्यते. क. दुःखेननविशीर्यते. ८ झ. जीवामि. ९ ङ. झ. ट. पापजीविका. १० ङ. झ. ट. निशाचरं. ११ क. ङ. झ. ञ. ट. प्रत्याख्यानं. १२ ङ. झ. भिन्नाप्रभिन्ना. १३ ङ. झ. दीप्तावाग्नौ. १४ क. च. ज. ञ. सुवृत्तो.

सानां [1]सहस्राणि जनस्थाने चतुर्दश ॥ [2]येनैकेन निरस्तानि स मां किं नाभिपद्यते ॥ १४ ॥
रुद्धा रावणेनाहमल्पवीर्येण रक्षसा ॥ समर्थः खलु मे भर्ता रावणं हन्तुमाहवे ॥ १५ ॥
राधो दण्डकारण्ये येन राक्षसपुङ्गवः ॥ रणे रामेण निहतः स [3]मां किं नाभिपद्यते ॥ १६ ॥
मं मध्ये समुद्रस्य लङ्केयं दुष्प्रधर्षणा ॥ न तु राघवबाणानां [4]गतिरोधीह विद्यते ॥ १७ ॥
तु तत्कारणं येन रामो दृढपराक्रमः ॥ रक्षसापहृतां भार्यामि[5]ष्टां नाभ्यवपद्यते ॥ १८ ॥
स्थां मां न जानीते शङ्के लक्ष्मणपूर्वजः ॥ जानन्नपि हि तेजस्वी [6]धर्षणं मर्षयिष्यति ॥ १९ ॥
ति योधि[7]गत्वा मां राघवाय निवेदयेत् ॥ गृध्रराजोपि स रणे रावणेन निपातितः ॥ २० ॥
कर्म महत्तेन मां [8]तथाऽभ्यवपद्यता ॥ तिष्ठता [9]रावणद्वन्द्वे वृद्धेनापि जटायुषा ॥ २१ ॥
द् मामिह जानीयाद्वर्तमानां [10]सं राघवः ॥ अद्य बाणैरभिक्रुद्धः कुर्याल्लोकमराक्षसम् ॥ २२ ॥
धमेच पुरीं लङ्कां शोषयेच्च महोदधिम् ॥ रावणस्य च नीचस्य कीर्तिं नाम च नाशयेत् ॥ २३ ॥
ी निहतनाथानां राक्षसीनां गृहे गृहे ॥ यथाहमेवं रुदती तथा भूयो न संशयः ॥ २४ ॥
न्विष्य रक्षसां लङ्कां कुर्याद्रामः सलक्ष्मणः ॥ न हि ताभ्यां रिपुर्दृष्टो मुहूर्तमपि जीवति ॥ २५ ॥
ताधूमाकुलपथा गृध्रम[12]ण्डलसंकुला ॥ [13]अचिरेण तु लङ्केयं श्मशानसदृशी भवेत् ॥ २६ ॥
चिरेणैव कालेन प्राप्स्याम्येवं[14] मनोरथम् ॥ दुष्प्रस्थानोयमा[15]ख्याति सर्वेषां वो वि[16]पर्ययम् ॥ २७ ॥
दृशानीह दृश्यन्ते लङ्कायामशुभानि वै ॥ [18]अचिरेण तु कालेन भविष्यति हतप्रभा ॥ २८ ॥
नं लङ्का हते पापे रावणे [19]राक्षसाधमे ॥ [20]शोषं यास्यति दुर्धर्षा प्रमदा विधवा यथा ॥ २९ ॥

ैवं वैपरीत्यं जातं ॥ १३ ॥ एकमात्रसहायः स करिष्यतीत्यत्राह—राक्षसानामिति ॥ जनस्थाने सां चतुर्दश सहस्राणि एकेन येन रामेण निरस्तानि तितानि सः नाभिपद्यते न रक्षति ॥ १४ ॥ प्रबलो णः कथं निरस्य इत्यत्राह—निरुद्धेति ॥ १५ ॥ मर्थ्य निदर्शयति—विराध इति ॥ १६ ॥ अस्तु- नःसमर्थः तथापि समुद्रमध्यस्थालङ्कादुष्प्रधर्षेत्याश- ाह—काममिति ॥ गतिरोधि गतिप्रतिबन्धकं । ंचिदिति शेषः ॥ १७ ॥ एतत्फलितमाह—किं- ति ॥१८॥ लक्ष्मणपूर्वज इत्यनेन निरनुक्रोशत्वादि- क्त्यभावस्सूच्यते । मर्षयिष्यतीत्यत्र काकुरनुसंधे- ॥१९॥ इहास्तीत्यज्ञाने हेतुमाह—हतेति ॥२०॥ प्रसङ्गादाह—कृतमिति ॥ अभ्यवपद्यता रक्षता । रावणद्वन्द्वे रावणद्वन्द्वयुद्धे ॥ २१—२३ ॥ अहं यथा एवं रुदती रुदन्त्यस्मि । तथा निहतनाथानां राक्षसीनां गृहे गृहे भूयः भूरि । रुदन्त्यो भविष्यन्तीत्यर्थः ॥ २४ ॥ रक्षसां लङ्कामन्विष्य कुर्यात् । रिपुनाशनमिति शेषः ॥ २५—२६ ॥ दुष्प्रस्थानः दुर्मार्गः दुराचार इति यावत् ॥ २७ ॥ अशुभानि अशुभसूचकानि । हतप्रभेत्यत्र लङ्केत्यनुकर्षः । लङ्का अचिरेण कालेन हतप्रभा भविष्यतीत्यत्र यादृशानि सूचकानि स्युः इह लङ्कायां तादृशान्यशुभानिदृश्यन्त इत्यन्वयः ॥ २८ ॥ दुर्धर्षेति लङ्काविशेषणं ॥ २९ ॥

शि० सरामः मां नाभ्यवपद्यते किमर्थमितिशेषः ॥ १६ ॥ **ति०** रावणवधेतिष्ठता रावणवधार्थंयतता ॥ २१ ॥ **स०** प्रस्थानः दुस्साध्यप्रस्थानः । अनिवर्त्यइतियावत् ॥ २७ ॥ **ति०** शोषं ऐश्वर्यादेरितिशेषः ॥ २९ ॥

[पा०] १ क. घ.—ट. जनस्थानेसहस्राणि. २ च. झ. ट. एकेनैव. ३ क. ख. च. ज. ट. मांनाभ्यवपद्यते. ४ झ. ट. ारोधोभविष्यति. च. ज. ञ. गतिरोधोत्रदृश्यते. ५ ङ. झ. मिष्टांयोनाभिपद्यते. ख. च. छ. ट. मिष्टांनाभ्युपपद्यते. ६ क. —छ. झ. ञ. ट. धर्षणां. ७ ङ. झ. ट. मांयोधिगत्य. क. च. छ. ज. ञ. योभिगत्वामां. ८ च. ज. झ. ट. तदा. ९ क. झ. ट. रावणवधे. १० ङ. ज. झ. ट. हिराघवः. ११ ङ. झ. ट. निर्दहेच्च. १२ ङ.—ट. मण्डलमण्डिता. १३ ख. ङ. झ. अचिरेणैवकालेन. १४ ङ. झ. ट. म्येनं. १५ ङ. झ. ट. माभाति. १६ ङ. झ. ट. विपर्ययः. १७ ग. ङ. च. ज. झ. ट. ्शानितु. १८ क. ख. घ. ङ. च. ज.—ट. अचिरेणैव. १९ क. घ.—ट. राक्षसाधिपे. २० ङ. झ. ञ. ट. शोषमेष्यति.

पुण्योत्सववर्स[1]मुत्था च नष्टभर्त्री स[2]राक्षसी ॥ भविष्यति पुरी लङ्का नष्टभर्त्री यथाऽङ्गना ॥ ३०
नूनं राक्षसकन्यानां [3]रुदन्तीनां गृहे गृहे ॥ श्रोष्यामि नचिरादेव दुःखार्तानामिह ध्वनिम् ॥ ३
सान्धकारा हतद्योता हतराक्षसपुङ्गवा ॥ भविष्यति पुरी लङ्का निर्दग्धा रामसायकैः ॥ ३२ ॥
यदि [4]नाम स शूरो मां रामो [5]रक्तान्तलोचनः ॥ जानीयाद्व[6]र्तमानां हि रावणस्य निवेशने ॥ ३
अनेन तु नृशंसेन रावणेनाधमेन मे ॥ समयो यस्तु निर्दिष्टस्तस्य कालोऽयमागतः ॥ ३४ ॥
[[7]स च मे विहितो मृत्युरस्मिन्दुष्टेन वर्तते ॥] अकार्यं ये न जानन्ति नैर्ऋताः [8]पापकारिणः
अधर्मात्तु महोत्पातो भविष्यति हि साम्प्रतम् ॥ ३५ ॥
नैते धर्मं विजानन्ति राक्षसाः पिशिताशनाः ॥ ध्रुवं मां प्रातरा[9]शार्थे राक्षसः कल्पयिष्यति ॥३
साऽहं कथं [10]करिष्यामि तं विना प्रियदर्शनम् ॥ रामं रक्तान्तनयनमपश्यन्ती सुदुःखिता ॥ ३
यदि कश्चित्प्रदाता मे वि[11]षस्याद्य भवेदिह ॥ क्षिप्रं वैवस्वतं देवं पश्येयं पतिना विना ॥ ३८ ॥
नाजानाज्जीवतीं रामः स मां [12]लक्ष्मणपूर्वजः ॥ जानन्तौ तौ न कुर्यातां नोर्व्यां हि [13]मम मार्गणम्
नूनं ममैव शोकेन स वीरो लक्ष्मणाग्रजः ॥ देवलोकमितो यातस्त्यक्त्वा देहं महीतले ॥ ४०
धन्या देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ मम पश्यन्ति ये [14]नाथं रामं राजीवलोचनम् ॥ ४
अथवा न हि तस्यार्थो धर्मकामस्य धीमतः ॥ मया रामस्य राजर्षेर्भार्यया परमात्मनः ॥ ४२ ॥
दृश्यमाने भवेत्प्रीतिः सौहृदं [15]नास्त्यपश्यतः ॥ नाशयन्ति कृतघ्नास्तु न रामो नाशयिष्यति ॥४

पुण्योत्सवेभ्यस्समुत्था निकृत्तपुण्योत्सवेत्यर्थः । सराक्षसी राक्षसीजनमात्रयुक्तेत्यर्थः । इयं लङ्कापुरी । नष्टभर्त्री सराक्षसी अर्थात् हतराक्षसा । नष्टभर्त्री अङ्गना यथा अङ्गनेव पुण्योत्सवसमुत्था भविष्यतीत्यन्वयः ॥३०—३२॥ स रामः रावणस्य निवेशने मां वर्तमानां जानीयाद्यदि तदा लङ्का निर्दग्धा भविष्यतीति पूर्वेण संबन्धः ॥ ३३ ॥ समयः द्वादशमासात्मकः संकेतः । तस्य कालः आगतः सन्निहितः । मासद्वयमात्रपरिशेषादिति भावः ॥ ३४ ॥ पापकारिणः ये नैर्ऋताः अधर्माद्धेतोः अकार्यं न जानन्ति । तैर्महोत्पातस्संभविष्यति ॥ ३५ ॥ एतदेव विवृणोति—नैत इति ॥ ३६—३७ ॥ पतिनेति नाभाव आर्षः ॥ ३ जीवतीं जीवन्तीं । न न कुर्यातां कुर्यातामेव । त वामनः—“ संभाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ इति ॥ ३९—४१ ॥ धर्मकामस्य तस्य कामानपे इत्यर्थः । मया भार्यया कोर्थः । परमात्मनः उत स्वभावस्य ॥ ४२ ॥ सौहृदं नास्त्यपश्यतः अदृ माने प्रीतिर्न भवति । तस्माददृश्यायां मयि रा किं प्रीतिर्नासीदित्यर्थः । एवमाशङ्कितं प्रतिषेधति नाशयन्तीति । कृतघ्नाः प्रथममुत्पन्नां प्रीतिं नाश न्ति । न तु रामो नाशयिष्यति । मयिप्रीतिमिति

ति० पुण्योत्सवसमृद्धाच । अद्येतिशेषः ॥३०॥ ति० अस्मिन्काले दुष्टेन रावणेन । सकालोमेमृत्युर्विहितः । वर्ततइत्य ननुततःपरमपिस्त्रीत्वात्त्वांनहिंस्युस्तत्राह—अकार्यमिति ॥ ३५ ॥ ति० ननुत्वज्जीवनाभावनिश्चयप्रमाणोपलंभंविनाकथंरामेण स्त्यक्तइत्यतःपक्षान्तरमाह—**अथवेति** । धर्मकामस्यहिभार्ययाऽर्थः अयंतुनतथा । तदेवाह—धीमतः आत्मानात्मविवेकव अतएवपरमात्मनः परमात्मब्रह्मात्मनास्थितस्यजीवन्मुक्तस्यतस्यमयानार्थः । अनेनवैराग्यादप्रवृत्तिरितिसूचितं ॥ ४२ ॥ यद्वा सौहृदं स्नेहं । अपश्यतःपुंसः । दृश्यमानेपि सुहृदीतिशेषः । प्रीतिर्नभवेत् किमुतादृश्यमाने ॥ स० सौहृदमि “ हृद्भगसिन्धवन्ते ” इत्यादिनोभयपदवृद्ध्यभावआर्षः ॥ अवृत्तच्छित्तेस्तथैवपठितुंसुशकंवा ॥ ४३ ॥

[पा०] १ क. घ. च. झ. ञ. ट. समृद्धाच. २ क. ख. घ. ङ. च. ज.—ट. सराक्षसा. ३ घ. च. झ. ट. रुदर्त ४ क. च. छ. ज. ञ. रामःसशूरोमामिह. ५ घ. राजीवलोचनः. ६ ङ.—ज. वर्तमानांमां. झ. वर्तमानांयां. ७ इद ङ. झ. ट. पाठेषुदृश्यते. ८ क. ग. घ. च. छ. ज. पापचारिणः. ९ झ. राशार्थे. १० क. ग. छ. चरिष्यामि. ११ च. ज. विषमद्य. १२ घ. ङ. झ. ट. भरतपूर्वजः. १३ ङ.—ट. परिमार्गणं. १४ ग. ङ. च. ज.—ट. वीरं. १५ ङ. झ. नास्त्यदृश्यतः.

किंनु[1] मे न गुणाः केचित्किंवा भाग्यक्षयो[2] मम ॥ याऽहं सीदामि रामेण हीना मुख्येन भामिनी ॥ ४४ ॥
श्रेयो[3] मे जीवितान्मर्तुं विहीनाया महात्मनः[4] ॥ रामादक्लिष्टचारित्राच्छूराच्छत्रुनिबर्हणात् ॥ ४५ ॥
अथवा न्यस्तशस्त्रौ तौ वने मूलफलाशिनौ ॥ भ्रातरौ हि नरश्रेष्ठौ संवृत्तौ[5] वनगोचरौ ॥ ४६ ॥
अथवा राक्षसेन्द्रेण रावणेन दुरात्मना ॥ छद्मना सादितौ[6] शूरौ[7] भ्रातरौ रामलक्ष्मणौ ॥ ४७ ॥
साऽहमेवं[8] गते काले मर्तुमिच्छामि सर्वथा ॥ न च मे विहितो मृत्युरस्मिन्दुःखे[9]ऽपि वर्तति ॥ ४८ ॥
धन्याः खलु महात्मानो मुनयस्[10]त्यक्तकिल्बिषाः ॥ जितात्मानो महाभागा[11] येषां न स्तः प्रियाप्रिये ४९
प्रियान्न संभवेद्दुःखमप्रियादधिकं भयम्[12] ॥ ताभ्यां हि [13]ये वियुज्यन्ते नमस्तेषां महात्मनाम् ॥ ५० ॥
साऽहं त्यक्ता [14]प्रियेणेह रामेण विदितात्मना ॥ प्राणांस्त्यक्ष्यामि पापस्य रावणस्य गता वशम् ॥ ५१ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षड्विंशः सर्गः ॥ २६ ॥

सप्तविंशः सर्गः ॥ २७ ॥

सीतांसंतर्जयन्तीराक्षसीःप्रति स्वापात्प्रबुद्धयात्रिजटाख्ययाराक्षस्या स्वेनसीताराघवयोः स्वबन्धोरावणस्यच क्रमेणाभ्युदयानभ्युदयसूचकाद्भुतस्वप्नदर्शननिवेदनेन सभर्त्सनंसीतातर्जनप्रतिषेधनपूर्वकं दूरेतासामपसारणम् ॥ १ ॥ तथा तासां प्रार्थनया ताःप्रति स्वस्यस्वाम्निकार्थदर्शनप्रकारनिरूपणपूर्वकं सीतायाविजयाशंसकशुभशकुनप्रदर्शनम् ॥ २ ॥

इत्युक्ताः सीतया घोरा[15] राक्षस्यः क्रोधमूर्च्छिताः ॥ काश्चि[16]ज्जग्मुस्तदाख्यातुं रावणस्य तरस्विनः[17] ॥ १ ॥
ततः सीतामुपागम्य राक्षस्यो घोरदर्शनाः ॥ पुनः परुषमेकार्थमनर्थार्थमथाब्रुवन् ॥ २ ॥

॥ ४३ ॥ नगुणाः दुष्कृतानि ॥ ४४ ॥ मर्तुमिति भावार्थे तुमुन् । मरणमित्यर्थः । महात्मनः रामाद्विहीनायाः महात्मना रामेण हीनायाः । तृतीयार्थे पञ्चमी ॥ ४५ ॥ न्यस्तशस्त्रौ संवृत्तौ किमिति संबन्धः ॥ ४६ ॥ सादितौ हतौ ॥ ४७ ॥ वर्ततिवर्तमाने ॥ ४८ ॥ महात्मानः महाधैर्याः । त्यक्तकिल्बिषाः त्यक्तपापाः । जितात्मानः जितान्तःकरणाः । महाभागाः महाभाग्याः ॥ ४९ ॥ प्रियान्न संभवेद्दुःखं किंतु सुखमेव भवेदित्यर्थः । प्रियात् अनुकूलवस्तुनः । अप्रियात् प्रतिकूलवस्तुनः । अधिकं भयं अधिकं दुःखं । ताभ्यां प्रियाप्रियाभ्यां । नमस्तेषां त एव सर्वोत्तमा इत्यर्थः ॥ ५० ॥ साहं तद्विलक्षणाहं । केवलप्रियपरेत्यर्थः । प्रियेण त्यक्ता अप्रियं प्राप्ता । प्राणांस्त्यक्ष्यामीत्यर्थः ॥ ५१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षड्विंशः सर्गः ॥ २६ ॥

तत् मरणाध्यवसायं ॥ १ ॥ एकार्थं पूर्वोक्तवचनैरेकाभिधेयं । अनर्थार्थं अनर्थफलकं । एकाक्ष्यादयः पूर्वोक्तार्थमेव परुषवचनं पुनरब्रुवन्नित्यर्थः ॥ २ ॥

ति० मयितदुपेक्षाहेतवःकेचनअगुणाः दोषाःस्युः । अयमपिपक्षोनयुक्तः । स्वापरिज्ञातस्वापचाराभावात् । तस्मात्प्राग्भवीयदुष्कर्मजोभाग्यक्षयएवहेतुरित्याह—किंवेति ॥ ४४ ॥ ति० भाग्यक्षयनिश्चयस्यकर्तुमशक्यत्वात्पक्षान्तरं—**अथवेति** ॥ ४६ ॥ ति० इदमप्यसंभावितं । रक्षोभिःकृतवैरेणक्षत्रियेणतस्यागायोगात् । अतःपक्षान्तरं—**अथवेति** ॥ ४७ ॥ इतिषड्विंशःसर्गः ॥ २६ ॥

स० तत् सीताव्यवसितंमरणं ॥ १ ॥ **स०** एकार्थं रावणसंगमरूपैकाभिधेययुक्तं । अनर्थः राक्षसविनाशरूपः अर्थः प्रयो-

[पा०] १ ङ. झ. ञ. ट. किंवामय्यगुणाः. २ क. ग.—ट. क्षयोहिमे. क. ग. घ. ङ. झ. ञ. ट. याहिसीतावरार्हेहीनारामेणभामिनी. ३ क. श्रेयोहि. ४ ख. घ. च. ज. झ. महात्मना. ५ क. ग.—ट. चरन्तौ. ६ ख. ग. ङ.—ट. घातितौ. ७ क. घ. वीरौ. ८ ङ.—ट. मेवंविधे. ९ ङ. झ. ञ. ट. दुःखेऽतिवर्तति. १० क. ग. ट. मुनयःसत्यसंमताः. ११ घ. महात्मानो. १२ ङ.—ट. भवेत्. १३ झ. तेवियुज्यन्ते. १४ ङ. झ. ट. प्रियेणैव. १५ ग. ङ. झ. ट. घोरं. १६ घ. गताःकाश्चिद्गताःकाश्चिद्रावणायनिवेदितुं. १७ ङ. झ. ञ. ट. दुरात्मनः.

[1]अद्येदानीं तवानार्ये सीते पापविनिश्चये ॥ राक्षस्यो [2]भक्षयिष्यन्ति मांसमेतद्यथासुखम् ॥ ३ ॥
सीतां ताभिरनार्याभिर्दृष्ट्वा संतर्जितां तदा ॥ राक्षसी त्रिजटा [3]वृद्धा शयाना वाक्यमब्रवीत् ॥ ४
आत्मानं खादतानार्या न सीतां भक्षयिष्यथ ॥ जनकस्य सुतामिष्टां स्नुषां दशरथस्य च ॥ ५ ॥
स्वप्नो ह्यद्य मया दृष्टो दारुणो रोमहर्षणः ॥ राक्षसानामभावाय भर्तुरस्या [4]भवाय च ॥ ६ ॥
एवमुक्तास्त्रिजटया राक्षस्यः क्रोधमूर्च्छिताः ॥ सर्वा एवाब्रुवन्भीतास्त्रिजटां तामिदं वचः॥
कथयस्व त्वया दृष्टः स्वप्नोऽयं कीदृशो निशि ॥ ७ ॥
तासां श्रुत्वा तु वचनं राक्षसीनां [5]मुखाच्च्युतम् ॥ उवाच वचनं काले त्रिजटा स्वप्नसंश्रितम् ॥ ८
गजदन्तमयीं दिव्यां शिबिकामन्तरिक्षगाम् ॥ युक्तां [6]हंससहस्रेण स्वयमास्थाय राघवः ॥
[7]शुक्लमाल्याम्बरधरो लक्ष्मणेन [8]सहागतः ॥ ९ ॥
स्वप्ने चाद्य मया दृष्टा सीता शुक्लाम्बरावृता ॥ सागरेण परिक्षिप्तं [9]श्वेतं पर्वतमास्थिता ॥
रामेण संगता सीता भास्करेण [10]प्रभा यथा ॥ १० ॥
राघवश्च [11]मया दृष्टश्चतुर्दन्तं महागजम् ॥ आरूढः शैलसंकाशं [12]चचार सहलक्ष्मणः ॥ ११ ॥
[13]ततस्तौ नरशार्दूलौ दीप्यमानौ स्वतेजसा ॥ शुक्लमाल्याम्बरधरौ जानकीं पर्युपस्थितौ ॥ १२ ॥
ततस्तस्य नगस्याग्रे ह्याकाशस्थस्य दन्तिनः ॥ भर्त्रा परिगृहीतस्य जानकी स्कन्धमाश्रिता ॥ १३
भर्तुरङ्कात्समुत्पत्य ततः कमललोचना ॥ चन्द्रसूर्यौ मया दृष्टा [14]पाणिना परिमार्जती ॥ १४ ॥
ततस्ताभ्यां कुमाराभ्यामास्थितः स गजोत्तमः ॥ सीतया च विशालाक्ष्या लङ्काया उपरि स्थितः॥१
पाण्डुरर्षभयुक्तेन रथेनाष्टयुजा स्वयम् ॥ [[15]शुक्लमाल्यांबरधरो लक्ष्मणेन सहागतः ॥
ततोन्यत्र मया दृष्टो रामः सत्यपराक्रमः] ॥ १६ ॥
इहोपयातः काकुत्स्थः सीतया सह भार्यया ॥ १७ ॥

अद्य अस्मिन्दिने । इदानीं अस्मिन्क्षणे । भक्षयिष्यन्तीत्यब्रुवन्निति पूर्वेण संबन्धः ॥ ३ ॥ त्रिजटा विभीषणपुत्री । शयानेत्यनेन स्वप्नवृत्तान्तकथनत्वरोच्यते ॥ ४—६ ॥ निशीत्यनन्तरमितिकरणं द्रष्टव्यं ॥ ७ ॥ काले उषःकाले यस्स्वप्नः तत्संश्रितं ॥ ८ ॥ आगतः लङ्कामिति शेषः ॥९—१०॥ महागजमारूढ इति शिबिकात इति शेषः । तथोक्तं स्वप्नाध्याये— "आरोहणं गोवृषकुञ्जराणां प्रासादशैलाग्रवनस्पतीनाम् । विष्ठानुलेपो रुदितं मृतं च स्वप्नेष्वगम्यागमनं धन्यं" इति ॥११॥ चचार सीतां प्रतीति शेषः ॥१२ ततस्तस्य नगस्याग्र इति ॥ अत्र द्वादशसहस्रश्लोक गताः त्रयोदशसहस्रादिमोयं श्लोकः । गायत्र्यास्त्रय दशमक्षरमत्र बोध्यम् ॥ १३ ॥ चन्द्रसूर्यौ पाणि परिमार्जतीति । अत्र स्वप्नाध्यायवचनं । " आदि मण्डलं वातु चन्द्रमण्डलमेव वा । स्वप्ने गृह्णा हस्ताभ्यां राज्यं संप्राप्नुयान्महत् इति ॥ १४–१७

जनं यस्यतादृशं । परुषं परुषवाक्यमब्रुवन् ॥ २ ॥ **स०** अद्येत्युक्तौ श्वःप्रातःपर्यन्तमितिभ्रमोमाहिभूदितीदानीमित्युक्तं ॥ ३ **ति०** प्रबुद्धेत्यनेन तावत्पर्यन्तंसुप्तवतीतिगम्यते ॥४॥ **ती०** कालेप्रातःकाले। स्वप्नसंश्रितं प्रातःकालदृष्टस्वप्नदृष्टार्थविषयकं । अने स्वप्नस्यशीघ्रफलदत्वंसूचितं ॥७॥ **ती०** एतेन लङ्कायामेवरामस्यसीतादर्शनंसूचितं ॥९॥ **शि०** सीता स्वर्गगङ्गासदृशी। सीता वैदेह सार्धश्लोकएकान्वयी । एकःसीताशब्दः आचारक्विबन्तप्रकृतिककर्तृक्विबन्तः । " सीता लाङ्गलपद्धतिवैदेहीस्वर्गगङ्गासु " इति दिनी ॥ १० ॥ **ति०** शुक्लमाल्यांबरधरोरामोलक्ष्मणेनसहेहागतइत्यन्वयः । अन्यत्र स्वप्नान्तरे ॥ १६ ॥

[पा०] १ घ. हन्तेदानीं. २ छ. ज. ञ. भक्षयिष्यामो. ३ ङ. झ. ट. वृद्धाप्रबुद्धा. ४ क. ग. घ. जयायच. ५ ग. ङ.—ट. मुखोद्गतं. ६ ग. घ. ङ. छ. झ. ञ. ट. वाजिसहस्रेण. ७ क. च. छ. ञ. शुक्लांबरधरोवीरो. ८ क. ख. च. ज.—ट. समागतः. ९ ङ. च. छ. झ. ञ. ट. श्वेतपर्वतं. १० ट. यथाप्रभा. ११ ङ. झ. ञ. ट. पुनर्दृष्टः. १२ ङ. झ. ञ. ट. चकास. च. छ. ज. जगाम. १३ ङ. झ. ट. ततस्तुसूर्यसंकाशौ. क. च. छ. ज. ततस्तु. १४ ङ— पाणिभ्यां. १५ इदमर्धद्वयं क. ग.—ट. पाठेषुदृश्यते.

क्ष्मणेन सह भ्रात्रा सीतया सह वीर्यवान् ॥ आरुह्य पुष्पकं दिव्यं विमानं सूर्यसन्निभम् ॥
त्तरां दिशमालोक्य जगाम पुरुषोत्तमः ॥ १८ ॥
वं स्वप्ने मया दृष्टो रामो विष्णुपराक्रमः ॥ लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया ॥ १९ ॥
साण्डं त्रिभुवनं सर्वं सर्वतः सचराचरम् ॥ सर्वं ग्रस्तं मया दृष्टं रामेणाक्लिष्टकर्मणा ॥ २० ॥
ीरोदधिजले मध्ये श्वेतः शैलः समुच्छ्रितः ॥ तस्य मूर्ध्नि ततः श्वेतश्चतुर्दन्तो महागजः ॥
स्य पृष्ठे स्थितः श्रीमान्रामो राजीवलोचनः ॥ २१ ॥
तः सीता समुत्पत्य भर्तुरङ्काश्रिता तदा ॥ बाहुभ्यां संपरिष्वज्य संपूर्णं चन्द्रमण्डलम् ॥ २२ ॥
तोऽन्यत्र मया दृष्टो रामो राजीवलोचनः ॥ आसीनः प्राङ्मुखः श्रीमानासने परमाद्भुते ॥ २३ ॥
भिषिक्तस्तु काकुत्स्थः सर्वदेवैर्नमस्कृतः ॥ सब्रह्मर्षिगणैः सर्वैः सर्वतीर्थजलेन च ॥ २४ ॥
क्लमाल्यांबरधरा शुक्लमाल्यानुलेपना ॥ साधु सा तत्र सुश्रोणी रराज जनकात्मजा ॥ २५ ॥
तो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ ब्रह्माणमग्रतः कृत्वा रामं तत्र ववन्दिरे ॥ २६ ॥
नरेव मया दृष्टो रामो रमयतांवरः ॥ विष्णुरेव स्वयं भूत्वा तस्मिन्नास्ते वरासने ॥ २७ ॥
ं ब्रह्म परं तत्वं परं ज्ञानं परं तपः ॥ परं बीजं परं क्षेत्रं परं कारणकारणम् ॥ २८ ॥
ङ्खचक्रगदः श्रीमान्पुण्डरीकायतेक्षणः ॥ श्रीवत्सवक्षा नित्यश्रीरजेयः शाश्वतो ध्रुवः ॥ २९ ॥
वंभूतो महातेजा रामः कमललोचनः ॥ सर्वलोकेश्वरः श्रीमान्ससर्ज रघुनन्दनः ॥ ३० ॥

ततोमरेन्द्राः पितरो मुनीन्द्रा गन्धर्वविद्याधरपन्नगेन्द्राः ॥
कृताभिषेकं परिवार्य रामं प्रतुष्टुवुः प्राञ्जलयः प्रहृष्टाः ॥ ३१ ॥
ततस्तु सर्वाप्सरसः प्रहृष्टा नृत्यन्ति गायन्ति समेत्य तत्र ॥
वाद्यं प्रकुर्वन्ति समेत्य शङ्खा वंशाश्च वीणा मुरजाश्च भेर्यः ॥ ३२ ॥]

हि रामो महातेजाः शक्यो जेतुं सुरासुरैः ॥ राक्षसैर्वाऽपि चान्यैर्वा स्वर्गः पापजनैरिव ॥ ३३ ॥

मिह स्वप्नक्रमः । शिबिकास्थितो रामो दृष्टः । ापर्वतस्था सीता च । ततः शिबिकाया गजमारुह्य ्मणेन सह पर्वतमभ्येत्य ततस्सीतां गजस्कन्धेधि- ्य लङ्काया उपरि स्थित्वा ताभ्यां सहाष्टर्षभयुक्तेन ्नहागत्य स्वं देशं प्रति ताभ्यां पुष्पकमधिरुह्यागत अन्ये श्लोकाः प्रक्षिप्ताः । तेन ते न व्याख्याता ाहुः । लक्ष्मणेन सह भ्रात्रेति ॥ एतत्पादस्यान- , सीतया सह वीर्यवान् ॥ आरुह्य पुष्पकं दिव्यं विमानं सूर्यसन्निभम् । उत्तरां दिशमालोक्य जगाम पुरुषोत्तमः ॥ एवं स्वप्ने मया दृष्टो रामो विष्णुपरा- क्रमः । लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया ॥ इति पाठक्रमः । विमाने पुष्पके स्थितः । साण्डं त्रिभुवनमित्यारभ्य रामः सत्यपराक्रम इत्यन्तो ग्रन्थः प्रक्षिप्तः प्रकृतासंगतश्च । विष्णुरेव स्वयंभूत्वेति प्रक्षिप्तवचनस्य विष्णुपराक्रम इत्यनेन विरोधात्

ति० अत्रमध्ये ‘ साण्डंत्रिभुवनं ’ इत्यादयोबहवःश्लोकाः रामानुजसंप्रदायपुस्तकेषुदृश्यन्ते । तेप्रक्षिप्ताइतिकतकादयोऽन्येच ः ॥ **स०** विष्णुःउपेन्द्ररूपीसन् ॥ २७ ॥ **स०** तत्स्वरूपंनिरूपयति—**परंब्रह्मेति** । कीदृशंब्रह्म परंतत्वं अत्यन्तानारो- प्यं । परंज्ञानं उत्तमज्ञानस्वरूपं । परंतपः फलरूपं । परंबीजं अतिशयेननिमित्तकारणं । परंक्षेत्रं मुख्याश्रयः । कारणकारणं ाकालादिरूपकारणानामपिकारणं ॥ २८ ॥ नित्यश्रीः अनपायलक्ष्मीवान् । अत्रसाण्डंभुवनमित्याद्येतदन्तंश्लोकजातंप्रक्षि- ाकतकप्रभृतयः । अस्माभिस्तुगङ्गाजलमिश्ररथ्योदकवदुपादेयतयाव्याख्यातं ॥ २९ ॥

पा०] १ ङ. झ. ट. मालोच्यप्रस्थितः. २ घ. च. छ. ज. ञ. वीर्यवान्. ३ साण्डंत्रिभुवनमित्यारभ्यवीणामुरजाश्चभे- ताःश्लोकाः च. छ. ज. ञ. पाठेपुदृश्यन्ते. ४ च. छ. नतु. ५ क. च. छ. रक्षसांवापिलोकेन. ग. रक्षसांवापिलोकैर्वा.

रावणश्च मया दृष्टः [1]क्षितौ तैलसमुक्षितः ॥ रक्तवासाः पिबन्मत्तः करवीरकृतस्रजः ॥ ३४ ॥
विमानात्पुष्पकादद्य रावणः [2]पतितो भुवि ॥ कृष्यमाणः स्त्रिया [3]दृष्टो मुण्डः [4]कृष्णाम्बरः पुनः ॥३५
रथेन खरयुक्तेन रक्तमाल्यानुलेपनः ॥ पिबंस्तैलं हसन्नृत्यन्भ्रान्तचित्ताकुलेन्द्रियः ॥
गर्दभेन ययौ शीघ्रं दक्षिणां दिशम[5]आस्थितः ॥ ३६ ॥
पुनरेव मया दृष्टो रावणो राक्षसेश्वरः ॥ पतितोऽवाक्छिरा भूमौ गर्दभाद्भयमोहितः ॥ ३७ ॥
सहसोत्थाय संभ्रान्तो भयार्तो मदविह्वलः ॥ [6]उन्मत्त इव दिग्वासा दुर्वाक्यं प्रलपन्बहु ॥ ३८ ॥
दुर्गन्धं दुःसहं घोरं तिमिरं नरकोपमम् ॥ मलपङ्कं प्रविश्याशु मग्नस्तत्र स रावणः ॥
[[7]प्रस्थितो दक्षिणामाशां प्रविष्टः कर्दमह्रदम्] ॥ ३९ ॥
कण्ठे बद्ध्वा दशग्रीवं प्रमदा रक्तवासिनी ॥ काली कर्दमलिप्ताङ्गी दिशं याम्यां प्रकर्षति ॥ ४० ॥
एवं तत्र मया दृष्टः कुम्भकर्णो निशाचरः ॥ रावणस्य सुताः सर्वे [9]दृष्टास्तैलसमुक्षिताः ॥ ४१ ॥
वराहेण दशग्रीवः शिंशुमारेण चेन्द्रजित् ॥ उष्ट्रेण कुम्भकर्णश्च [10]प्रयातो दक्षिणां दिशम् ॥ ४२ ॥
एकस्तत्र मया दृष्टः श्वेतच्छत्रो विभीषणः ॥ शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः ॥
शङ्खदुन्दुभिनिर्घोषैर्नृत्तगीतैरलङ्कृतः ॥ ४३ ॥
आरुह्य [11]शैलसंकाशं मेघस्तनितनिस्स्वनम् ॥ चतुर्दन्तं गजं दिव्यमास्ते तत्र विभीषणः ॥
चतुर्भिः सचिवैः सार्धं [12]वैहायसमुपस्थितः ॥ ४४ ॥
समाजश्च [13]मया दृष्टो गीतवादित्रनिःस्वनः ॥ पिबतां रक्तमाल्यानां [14]रक्षसां रक्तवाससाम् ॥ ४५ ॥
लङ्का चेयं पुरी रम्या सवाजिरथकुञ्जरा ॥ सागरे पतिता दृष्टा भग्नगोपुरतोरणा ॥ ४६ ॥
लङ्का दृष्टा मया स्वप्ने रावणेनाभिरक्षिता ॥ दग्धा रामस्य दूतेन वानरेण तरस्विना ॥ ४७ ॥
पीत्वा तैलं [15]प्रनृत्ताश्च प्रहसन्त्यो महास्वनाः ॥ लङ्कायां [16]भस्मरूक्षायां [17]प्रविष्टा राक्षसस्त्रियः ॥ ४८
कुम्भकर्णादयश्चेमे सर्वे राक्षसपुङ्गवाः ॥ रक्तं निवसनं गृह्य प्रविष्टा [18]गोमयह्रदे ॥ ४९ ॥
अपगच्छत [19]नश्यध्वं [20]सीतामाप स राघवः ॥ घातयेत्परमामर्षी [21]सर्वैः सार्धं हि राक्षसैः ॥
[[22]रावणं राघवो घोरे भार्याहर्तारमाहवे] ॥ ५० ॥

॥ १८—३३ ॥ पिबन्निति । तैलसमुक्षित इत्यनेन तैलमित्युपस्थाप्यते । करवीरकृतस्रज इत्याकारान्तत्वमार्षं । हलन्ताद्वा इत्यापो विधानात् स्रक्छब्दस्याबन्तत्वेन वा निर्वाहः ॥ ३४—४२ ॥ एवं रावणविनाशसूचकमुक्त्वा विभीषणस्य राज्यप्राप्तिसूचकम्—एकस्तत्र मया दृष्टः श्वेतच्छत्र इत्यादिना ॥ ४३ ॥ वैहायसं विमानं ॥ ४४—४९ ॥ अपगच्छत अपसरत । नश्यध्वं अदर्शनं प्राप्नुत । आत्मने

स० करवीरकृतस्रजइतिरावणविशेषणं । करवीरैः रक्तकरवीरपुष्पैः कृतास्रजामालायस्यसतथा । "टापंचैव" इत्याद्युक्ते विमानविशेषणत्वेतु पृथक्साक्षादपशकुनत्वाप्रतीत्यस्वारस्यं । नचनागोजिभट्टेन टापंचैवेत्यादेःशब्देन्दुशेखरेऽनङ्गीकृतत्वेनकथ दितिवाच्यं । बहुप्रयोगविप्लवापत्तेःसाहसमात्रंतदित्यवधेयं । रक्तमाल्यानुलेपनइत्युत्तरग्रन्थानुगुण्याच्च ॥ ३४ ॥ स० स्त्रिय मुण्डस्तया कृष्यमाणइत्यन्वयः । सुवासिनीकर्षणस्यहर्षहेतुत्वात् । अतउभयत्रतथाविधतायुक्ता । अपशकुनान्तरलाभा अथवा स्त्रियानीलवासोदन्तादिमत्या ॥ ३५ ॥

[पा०] १ ङ. झ. ञ. ट. मुण्डस्तैल. २ ङ. झ. ट. पतितःक्षितौ. ३ झ. ट. मुण्डोदृष्टः. ४ क. च. छ. ज. कृष्णांबरावृतः. ५ ङ. च. ज.—ट. माश्रितः. ६ ङ. झ. ट. उन्मत्तरूपो. ७ इदमर्धं क. ङ.—ट. पाठेषुदृश्यते. ८ ङ. झ महाबलः. ९ क. ग.—ट. मुण्डास्तैल. १० क. घ. च. छ. ञ. ट. प्रयातादक्षिणां. ११ घ. ङ. च. ज. ञ. मेघसं १२ क. राघवंसमुपस्थितः. १३ झ. ञ. ट. महान्वृत्तो. १४ घ. नर्दतां. १५ क. ङ. छ.—ट. प्रमत्ताश्च. ग. घ. प्रनृत्त १६ घ. भस्मदिग्धायां. १७ क. ग.—ट. सर्वाराक्षसयोषितः. १८ क. घ. ङ. झ. ट. गोमयह्रदं. १९ क. घ.—ट. प २० ङ. झ. ट. सीतामाप्नोति. ग. सीतांसंप्राप्य. २१ झ. ट. युष्मान्सार्धं. २२ इदमर्धं क. पाठेदृश्यते.

यां बहुमतां भार्यां वनवासमनुव्रताम् ॥ भर्त्सितां तर्जितां वाऽपि नानुमंस्यति राघवः ॥ ५१ ॥
दलं क्रूरवाक्यैर्वः सान्त्वमेवाभिधीयताम् ॥ अभियाचाम वैदेहीमेतद्धि मम रोचते ॥ ५२ ॥
स्यामेवंविधः स्वप्नो दुःखितायां प्रदृश्यते ॥ सा दुःखैर्विविधैर्मुक्ता प्रियं प्राप्नोत्यनुत्तमम् ॥ ५३ ॥
र्त्सितामपि याचध्वं राक्षस्यः किं विवक्षया ॥ राघवाद्धि भयं घोरं राक्षसानामुपस्थितम् ॥ ५४ ॥
णिपातप्रसन्ना हि मैथिली जनकात्मजा ॥ अलमेषा परित्रातुं राक्षस्यो महतो भयात् ॥ ५५ ॥
पि चास्या विशालाक्ष्या न किंचिदुपलक्षये ॥ विरूपमपि चाङ्गेषु सुसूक्ष्ममपि लक्षणम् ॥ ५६ ॥
ायावैगुण्यमात्रं तु शङ्के दुःखमुपस्थितम् ॥ अदुःखार्हामिमां देवीं वैहायसमुपस्थिताम् ॥ ५७ ॥
र्थसिद्धिं तु वैदेह्याः पश्याम्यहमुपस्थिताम् ॥ राक्षसेन्द्रविनाशं च विजयं राघवस्य च ॥ ५८ ॥
नमित्तभूतमेतत्तु श्रोतुमस्या महत्प्रियम् ॥ दृश्यते च स्फुरच्चक्षुः पद्मपत्रमिवायतम् ॥ ५९ ॥
च्च हृषितो वास्या दक्षिणाया ह्यदक्षिणः ॥ अकस्मादेव वैदेह्या बाहुरेकः प्रकम्पते ॥ ६० ॥
रेणुहस्तप्रतिमः सव्यश्चोरुरनुत्तमः ॥ वेपमानः सूचयति राघवं पुरतः स्थितम् ॥ ६१ ॥

पक्षी च शाखानिलयः प्रहृष्टः पुनःपुनश्चोत्तमसान्त्ववादी ॥
सुस्वागतां वाचमुदीरयानः पुनःपुनश्चोदयतीव हृष्टः ॥ ६२ ॥

र्थे । सीतामाप सीतामचिरेणाप्स्यतीत्यर्थः । र्वैः राक्षसैस्सार्धं घातयेत् । व इति सिद्धं । अपग- छत नश्यध्वमित्युक्तेः । रावणमित्यध्याहारो वा ५० ॥ नानुमंस्यति न सहिष्यत इत्यर्थः ॥ ५१ ॥ भियाचाम अभयमिति शेषः ॥ ५२—५३ ॥ किं वक्षया अस्माभिस्तदा भर्त्सिता कथं प्रसन्ना विष्यतीति वक्तुमिच्छया किं । शङ्का न कर्तव्ये- र्थः ॥ ५४ ॥ कुत इत्यत आह—प्रणिपातप्रसन्ना ति ॥ ५५ ॥ स्वप्नदर्शनकथनेन सीतायाः शोभनं ावीत्यभिधाय शरीरलक्षणप्रदर्शनेनापि शुभं भावी- ाह—अपिचेति ॥ लक्षणं दुःखप्राप्तिहेतुभूतं रेखो- रेखादिकं ॥ ५६ ॥ तर्हि कुतस्तादृशदुःखानुभव त्यत्राह—छायेति ॥ छायावैगुण्यमात्रं उपलक्षय त्यनुषज्यते । वैहायसं विमानं । उपस्थितां प्राप्तां । व्यभोगार्हामिति यावत् । अन्वयस्तु छायावैगुण्य- ात्रं तूपलक्षये अतः अदुःखार्हां दिव्यभोगार्हामिमां ःखं उपस्थितमिति शङ्क इति । अत्र छायावैगुण्यं नाम ान्तिवैकल्यं । "छायात्वनातपेकान्तौ" इत्यमरः । द्वा छायात्राऽनातपः तद्वैगुण्यं तस्य विषमत्वं । सर्वल-

क्षणलक्षिताया अपि छायावैगुण्यमेतावद्दुःखकरमासी- दिति भावः ॥ ५७—५८ ॥ इदानीं रामवार्ताश्रवण- सूचकमाह—निमित्तभूतमिति ॥ चक्षुरिति अदक्षिण- मित्येतदत्राप्यनुषज्यते । हृषितो वा हृष्ट इव पुलकित इव । पद्मपत्रमित्यनेन रोगादिदृष्टहेत्वन्तरराहित्यमुक्तं । अकस्मात् दृष्टहेत्वन्तरं विना ॥ ५९—६१ ॥ एवं देहनिमित्तमुक्त्वा शाकुनमप्याह—पक्षीति ॥ पक्षी पिङ्गलिका । शाखानिलयः प्रहृष्टः । पुनःपुनश्चोत्त- मसान्त्ववादी भूयोभूयो मधुरवादी । उत्तरोत्तरमु- त्तमसान्त्वस्वरवादी वा । सुस्वागतां शोभनबन्ध्वागम- नमिति यावत् । "बन्धुस्वस्वजनास्समाः" इत्यमरः । वाचं स्वरमुदीरयानः चोदयतीव रामागमनं कथय- तीव । यद्वा पूर्वोक्तराघव एव कर्म । राघवमुपपादय- तीवेत्यर्थः । आचार्यास्तु पक्षावस्य स्त इति पक्षी गरुत्मान् । भूम्नि प्रशंसायां च मत्वर्थीयः । तदुक्तम् —"भूमनिन्दाप्रशंसासु नित्ययोगेतिशायने । संस- र्गेस्तिविवक्षायां भवन्ति मतुबादयः" इति ॥ तथाच पक्षौ विस्तार्य प्रदक्षिणं सञ्चरन् । शाखानि- लयः कुसुमितपल्लवितशाखायां दृढतरं स्थितः ।

ति० किंविवक्षया कुत्सितभर्त्सनादिवचनेच्छया । अलमितिशेषः । तत्रहेतुः राघवादिति ॥ ५४ ॥ ति० सुस्वागतां भनस्यस्वागतंप्राप्तिर्यस्यां तादृशींवाचं । चोदयतीव शोभनप्राप्तिंसूचयतीव ॥ ६२ ॥ इतिसप्तविंशःसर्गः ॥ २७ ॥

[पा०] १ ङ. झ. ट. वाक्यैश्च. २ क. ग. च. ज.—ट. यस्याह्येवंविधः. घ. यस्यास्त्वेवंविधः. ३ क. ग. च. झ. ञ. दुःखितायाः. ४ क.—ट. दुःखैर्बहुभिः. ५ घ. च. छ. ज. हृषितोबाहुः. ६ ङ. झ. ट. वेपन्कथयतीवास्याः. ७ क. ख. ङ.—ट. शाखानिलयंप्रविष्टः.

आर्द्रतरतरुभाग एव शाखात्वव्यपदेशः । प्रदक्षिणभ्रमणं आर्द्रशाखावरोहणं दृढतरावस्थानं च शुभशंसीत्यर्थः । प्रहृष्टः तत्र फलभोजनादिना सन्तुष्टः । पुनःपुनश्चोत्तमसान्त्ववादी उत्तरोत्तरं सान्त्ववचनं कुर्वन्निव स्थितः । मा शुचः सद्यः समागमिष्यति ते भर्ता नायमवसरश्शोकस्य इत्येवं सान्त्वयन्निव स्थितः । तदुपरि सुस्वागतां वाचमुदीरयानः । एतावन्मात्रं न भवति तस्य संतापातिरेक इति कथयन्निव स्थितः । विरहक्लिष्टायास्सुस्वागतवचनं हि नाम प्रतियोगिनः संतापातिशयकथनमेव । उक्तं हि—" तपति तनुगात्रि मदनस्त्वामनिशं मां पुनर्दहत्येव । ग्लपयति यथा शशाङ्कं न तथाहि कुमुद्वितीं दिवसः "इति ॥ पुनः पुनश्चोदयतीव प्रियागमने निश्चिते मज्जनालंकरणादिकं किमर्थं न करोषीत्येवं सीतां चोदयतीवेत्युत्प्रेक्षा । हृष्टः नायिकागमनकालिकहर्षः स्वस्यैवेत्येतद्वैलक्षण्यं हृषिततनूरुहैस्सूचयन्निव स्थितः । इदंहि रामायणमुत्तमं काव्यं । तथाहि–काव्यं तावत्रिविधं उत्तमं मध्यममधमं चेति।यत्र वाच्यातिशायिव्यङ्ग्यं तदुत्तमं। सएव ध्वनिरित्युच्यते । यत्र वाच्यानतिशायिव्यङ्ग्यं तन्मध्यमं काव्यं । तदेव गुणीभूतव्यङ्ग्यमित्युच्यते । यत्र व्यङ्ग्यमेव नास्ति तदधमं । तदेव चित्रमित्युच्यते । व्यङ्ग्यं च पदगतं वाक्यगतं प्रबन्धगतं चेति त्रिविधं भवति । एतत्काण्डरूपप्रबन्धेन अनादिभगवत्संबन्धवतश्चेतनस्योज्जीवने प्रवृत्तस्याचार्यस्य प्रवृत्तिरभिव्यज्यते । उक्तश्चायमर्थस्ततो रावणनीताया इति श्लोके । अत्र लङ्कापदेन शरीरं द्योतितं । एकाक्षीप्रभृतय इन्द्रियाणि । रावणकुम्भकर्णावहंकारममकारौ । इन्द्रजित्प्रभृतयः कामक्रोधलोभमोहमदमात्सर्यदम्भादयः।तादृशलङ्कानिरुद्धसीतासदृशश्चेतनः। तस्य भगवज्ज्ञानोपदेष्ट्राचार्यतुल्यो मारुतिः । तादृशाचार्यलक्षणमनेन श्लोकेन सूच्यते । पक्षी । पक्षिशब्देन गमनसाधनत्वात् ज्ञानकर्मणी उच्येते । तदुक्तं —"उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः। तथैव ज्ञानकर्मभ्यां नियता परमा गतिः " इति । ज्ञानकर्मणोरङ्गाङ्गिभावेनात्र समुच्चयो विवक्षितः । " ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन " इति श्रुतेः । अनेनाचार्यशब्दनिर्वचनमुक्तं । " आचिनोति हि शास्त्रार्थानाचारे स्थापयत्यपि । स्वयमाचरते यस्मात्तस्मादाचार्य उच्यते " इति ॥

शाखाशब्देन वेदशाखा उच्यन्ते । निलयश
तदेकपरत्वं । त्यागे प्रत्यवायश्रवणात् । तदुक्तं शि
यां—" अधीतमपि योवेदं विमुञ्चति नराध
भ्रूणहा स तु विज्ञेयो वियोनिमभिगच्छति " इ
किंच निलय इत्यनेन तदर्थविषयकश्रवणमनननिदि
सनरूपतदनुष्ठानान्युच्यन्ते । अनेनाचार्यलक्ष
मुक्तं । तथाहुः—" आचार्यो वेदसंपन्नो विष्णुभ
विमत्सरः । मन्त्रज्ञो मन्त्रभक्तश्च सदा मन्त्राश्रयश्शुचि
गुरुभक्तिसमायुक्तः पुराणज्ञो विशेषतः । एवंलक्ष
संपन्नो गुरुरित्यभिधीयते " इति ॥ प्रहृष्टः
संतुष्टहृदयः । अनेन सर्वदा सेवनीयत्वमुक्तं । तथ
—"आह्लादशीतनेत्राम्बुः पुलकीकृतगात्रवान्
सदा परगुणाविष्टो द्रष्टव्यस्सर्वदेहिभिः " इति
पुनःपुनश्चोत्तमसान्त्ववादी । उत्तमः " उत्त
पुरुषस्त्वन्यः परमात्मेत्युदाहृतः " इत्युक्तः परमात्
तद्विषयं सान्त्वं शिष्येभ्यो वदतीत्युत्तमसान्त्ववा
"त्वं मेहं मे कुतस्तत्तदपि कुत इदं वेदमूलप्रमाणा
च्छानादिसिद्धादनुभवविभवात्तर्हि साक्रोश एव
क्वाक्रोशः कस्य गीतादिषु मम विदितः कोत्र स
सुधीस्स्याद्धन्त त्वत्पक्षपाती स इति नृकलहे मृग्यम
स्थवत्त्वं " इत्युक्तरीत्या भगवति मनुष्याणां कल
" यमो वैवस्वतो राजा यस्तवैष हृदि स्थितः ।
चेदविवादस्ते मा गङ्गां मा कुरून्गमः "
सान्त्ववादशील इत्यर्थः । पुनः पुनरित्यनेन क
कदाचिन्न फलितमित्येतावता यथा कृषिं न प
जति पुनःपुनस्तत्रैव प्रवर्तते । तथाचार्योपि कदा
त्स्ववचनाश्रवणेपि न निवर्तते इत्युक्तं । अनेनाचा
भगवतोप्यतिशय उक्तः । स हि पार्थाय गीतामुपदि
पुनराश्वमेधिके तेन पूर्वोक्तमर्थं विस्मृत्य पुनः पृष्टे
वक्ष्यामीत्युक्तवान् " नूनमश्रद्दधानोसि दुर्मेधाश्च
पाण्डव " इत्यादिना । किंच सुस्वागतां वाचमुदी
यानः । सुष्ठु संप्रदायाविच्छेदो यथा तथाचार्यप
रया स्वस्मै आगतां वाचं अष्टाक्षरादिमन्त्रराज
निर्हेतुक्यैव दयया समूदीरयन् । 'आचार्याणामस
सावित्या भगवत्त' इति गुरुपरम्पराया अनुसन्धेय
मनेन सूचितम् । पुनःपुनश्चोदयतीव । उक्तार्थ
नुष्ठानाय चोदनां दर्शयति । अन्यथा ह्युपदेशोप्य
र्थक एव स्यात् । अत एवाहुर्निगमान्ताचार्याः
स्खालित्ये शासितारमिति । हृष्टः । एतेन शिष्य

[1]ततस्सा ह्रीमती बाला भर्तुर्विजयहर्षिता ॥ अवोचद्यदि तत्तथ्यं भवेयं शरणं हि वः] ॥ ६३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

अष्टाविंशः सर्गः ॥ २८ ॥

सीतयारावणराक्षसीगणकृतसंतर्जनाद्यसहिष्णुतयाबहुधाविलापपूर्वकं वेण्युद्बन्धनादसुविमोक्षणनिश्चयेनाशिंशुपाशाखाव-
बने तदङ्गेष्वनुभूतपूर्वशुभशकुनप्रादुर्भावः ॥ १ ॥

सा राक्षसेन्द्रस्य वचो निशम्य तद्रावणस्याप्रियमप्रियार्ता ॥
सीता वितत्रास यथा वनान्ते [2]सिंहाभिपन्ना गजराजकन्या ॥ १ ॥
सा राक्षसीमध्यगता च भीरुर्वाग्भिर्भृशं रावणतर्जिता च ॥
कान्तारमध्ये विजने विसृष्टा बालेव कन्या विललाप सीता ॥ २ ॥
सत्यं बतेदं प्रवदन्ति लोके नाकालमृत्युर्भवतीति सन्तः ॥
यत्राहमेवं परिभर्त्स्यमाना जीवामि [3]किंचित्क्षणमप्यपुण्या ॥ ३ ॥
सुखाद्विहीनं बहुदुःखपूर्णमिदं तु नूनं हृदयं स्थिरं मे ॥
[4]विशीर्यते यन्न सहस्रधाऽद्य वज्राहतं शृङ्गमिवाचलस्य ॥ ४ ॥
नैवास्ति [5]दोषं मम नूनमत्र वध्याहमस्याप्रियदर्शनस्य ॥
भावं न चास्याहमनुप्रदातुमलं द्विजो मन्त्रमिवाद्विजाय ॥ ५ ॥
नूनं ममाङ्गान्यचिरादनार्यः [6]शस्त्रैः शितैश्छेत्स्यति राक्षसेन्द्रः ॥
तस्मिन्ननागच्छति लोकनाथे गर्भस्थजन्तोरिव शल्यकृन्तः ॥ ६ ॥

र्णं स्वप्रयोजनमाचार्यस्येत्युक्तम् ॥ ६२–६३ ॥ इति
गोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गा-
तिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तविंशः
र्गः ॥ २७ ॥

यत्र येन । किंचिज्जीवामि कुत्सितं जीवामि ॥ ३
–४ ॥ नन्वात्महनने महान्दोषः स्यादित्याशङ्क्याह
—नैवेति ॥ दोषं दोषः । आर्षं नपुंसकं । अत्र
त्महनने कथमदोष इत्याशङ्क्य रावणकृतान्मरणा-
त्मनैव मरणं श्रेय इत्याह—वध्येति । अप्रियदर्श-
नस्य अस्य रावणस्य । दुर्मरणत्वाविशेषेपि दुष्टराक्षसेन
मरणमतिकष्टमितिभावः । तर्हि तदनुप्रवेशेनात्मा
रक्ष्यतां " सर्वत आत्मानं गोपायेत् " इति श्रुतेरि-
त्याशङ्क्याह—भावमिति । अस्य अस्मिन्रावणे ।
भावं हृदयं अनुप्रदातुं नालं न शक्ता । रामस्वत्वादस्य
न ह्यन्यस्य स्वमन्योन्यस्मै दातुमर्हतीति भावः ।
अनर्हश्चायं भावोन्यप्रदानस्येत्यमुमर्थं दृष्टान्तमुखेनाह
—द्विज इति । मन्त्रं वेदं । अद्विजाय शूद्राय ॥ ५ ॥
अनागच्छति मासद्वयादर्वागिति शेषः । गर्भस्थ-
जन्तोः निरुद्धनिर्गमस्य गर्भस्थजन्तोः । शल्यकृन्तः

स० तद्वचः प्रातराशायकुरुतेत्यादिरूपंवचः । अप्रियार्ता उत्तरत्रकिंभविष्यतीतिभाव्यप्रियेणार्ता ॥ १ ॥ **स०** विसृष्टा मात्रा-
मिनैर्घृण्यादिनाशकुन्तलादिवत्त्यक्ता ॥ २ ॥ **स०** यत्र अस्यां दुर्दशायां । अपुण्या शीघ्रमरणप्रापकपुण्यरहिता ॥ ३ ॥ **ति०**
आत्मघातेऽतिदोषात्सोयुक्तइत्याशङ्क्य सत्यंविचित्रवधाद्बिभेमीत्याह—**तस्मिन्निति** । तस्मिन्रामे अनागच्छतिसति ममाङ्गानि
न्त्याएवछेत्स्यन्ति । निरुद्धायाविशसनेदृष्टान्तः **गर्भेति** । शल्यं शस्त्रं तेनकृणत्तीतिशल्यकृन्तः आंबष्टवैद्यः । आर्षत्वात्साधु ।
थागर्भस्थजन्तुंव्याधिरूपंजीवन्तंकृणत्ति तद्वत् ॥ एतच्छ्लोकद्वयंकतकेनेत्थंव्याख्यातं—अन्यायप्राप्तवधेपिममदोषोनेत्याह—नै-
ति । यद्यप्यस्याहंवध्याभवामि । ममदोषोन । एवंभावाप्रदानेनपातिव्रत्यरक्षणात्सर्वदोषनिस्तारइत्यर्थः । किंचमरणप्राप्तिःपाक्षि-

[पा०] १ अयंश्लोकः. ङ—ट. पाठेपुदृश्यते. २ क. झ. सिंहाविपन्ना. ३ क. ङ. झ. यस्मात्क्षणं. ४ क. घ.—ट.
दीर्यते. ५ क. ग. ङ.—ट. नूनंममदोषं. ६ ङ. झ. ञ. ट. शरैःशितैः.

दुःखं बतेदं मम दुःखिताया मासौ चिरायाधिगमिष्यतो द्वौ ॥
बद्धस्य वध्यस्य तथा निशान्ते राजापराधादिव तस्करस्य ॥ ७ ॥
हा राम हा लक्ष्मण हा सुमित्रे हा राममातः सह मे जनन्या ॥
एषा विपद्याम्यहमल्पभाग्या महार्णवे नौरिव मूढवाता ॥ ८ ॥
तरस्विनौ धारयता मृगस्य सत्त्वेन रूपं मनुजेन्द्रपुत्रौ ॥
नूनं विशस्तौ मम कारणात्तौ सिंहर्षभौ द्वाविव वैद्युतेन ॥ ९ ॥
नूनं स कालो मृगरूपधारी मामल्पभाग्यां लुलुभे तदानीम् ॥
यत्रार्यपुत्रं विससर्ज मूढा रामानुजं लक्ष्मणपूर्वजं च ॥ १० ॥
हा राम सत्यव्रत दीर्घबाहो हा पूर्णचन्द्रप्रतिमानवक्त्र ॥
हा जीवलोकस्य हितः प्रियश्च वध्यां न मां वेत्सि हि राक्षसानाम् ॥ ११ ॥
अनन्यदेवत्वमियं क्षमा च भूमौ च शय्या नियमश्च धर्मे ॥
पतिव्रतात्वं विफलं ममेदं कृतं कृतघ्नेष्विव मानुषाणाम् ॥ १२ ॥

नापितः ॥ ६ ॥ चिरायदुःखिताया मम द्वौ मासौ वधस्यावधिभूतौ अधिगमिष्यतः । इदं दुःखं बत । कस्य दुःखमिव । राजापराधात् बद्धस्य तथा निशान्ते वध्यस्य तस्करस्येव दुःखं । यथेति पाठे इवशब्दो वाक्यालंकारे ॥ ७ ॥ मूढो वात्यारूपो वातो यस्यास्सा मूढवाता । वात्याहतेत्यर्थः । "मूढस्तन्द्रितवात्ययोः" इतिविश्वः ॥८॥ मृगस्य रूपं धारयता सत्त्वेन जन्तुना । मम कारणात् मन्निमित्तं । विशस्तौ हिंसितौ । द्वौ सिंहर्षभाविव द्वौ सिंहाविव द्वौ वृषभाविवेत्यर्थः । वैद्युतेन अशनिना ॥९॥ लुलुभे प्रलोभयामास । यत्र यस्मिन्काले । विससर्जेति सृजेर्लिट्युत्तमपुरुषैकवचनं । रामानुजं लक्ष्मणपूर्वजं च । परस्परस्य सदृशावित्युक्तपरस्परसादृश्यात् । बाल्यात्प्रभृति सुस्निग्धतया च परस्परनिरूपकभूतौ ॥ १०—११ ॥ अनन्यदेवत्वं आश्रयणीया देवतान्यास्ति सा रक्षिष्यतीति बुद्धिर्मे नास्ति । " नारायणमुपागमत् " इत्यत्राप्य-

प्राधान्येन सह पत्न्येति ह्युक्तं । नारायणमाराध रामस्यपरिचारिकास्मीत्यर्थः । इयं क्षमा च । रा परुषाक्षराणि राक्षसीनां तर्जनभर्त्सनादीनि राम रालापश्रवणकुतूहलेन ह्यहं क्षान्तवती । भूमौ शय्या । तवाङ्के समुपाविशमित्येवंविधभोगःकदा दपि किं सेत्स्यतीत्याशया हि मया भूमौ श क्रियते । नियमश्च धर्मे । रक्षकत्वधर्मोपि तस्मिन्ने मनीषया हि मया स्थितं । " न त्वां कुर्मि दश भस्म भस्मार्ह तेजसा " इत्युक्तिरपि तं दृष्ट्वैव पतिव्रतात्वं एतद्व्रतं ममेत्युक्तं व्रतं विना मम कि द्व्रतं नास्तीत्यर्थः । पत्युर्व्रतमेव व्रतं यस्यास्सा पति तस्या भावः पतिव्रतात्वं । विफलं ममेदं अमोघ मोघमासीत् । कस्येवेति चेत्तत्राह—कृतं कृतघ्ने मानुषाणां । " आत्मानं मानुषं मन्ये " इत्युक्त मानुषत्वं रामस्याप्यस्ति । अतस्तदितरमानुषाणां म कृतघ्नेषु कृतं कार्यमिव । अस्य किं मूलमिति

कीत्याह—**तस्मिन्निति** । अनागच्छत्येववधप्रसक्तिर्नान्यथेतिभावः । अनागमनपक्षेप्राप्तविशसनेदृष्टान्तः **गर्भस्येति** ॥ ६ ॥
चिरायभर्तृवियोगदुःखितायामेइदंविशसनदुःखमपिबतागमिष्यति । यतोद्वौमासौविशसनावधिभूतौकतिपयदिनावधिकावप्यभि
मिष्यतः शीघ्रंगमिष्यतःकिल । तत्रवधप्राप्तौदृष्टान्तः बद्धस्येति । तस्करस्यवधइवेतिशेषः । **स०** दुःखितायाममम । द्वौमासौ य
चिरायबहुव्यवधानरूपौ । तथापि ममदुर्दैववशात्तावभिगमिष्यतः शीघ्रमागमिष्यतः ॥ ७ ॥ **स०** मूढाऽहंविससर्जेत्यन्वय
प्रलापकालत्वाल्लिट्संभवति 'सुप्तोऽहंकिलविललाप' 'बहुजगदपुरस्तात्तस्यमत्ताकिलाऽहं' इत्यादिवत् **ति०** अहंविससर्ज अपरो
पिचित्तविक्षेपादिनापारोक्ष्यमारोप्यलिट् ॥ १० ॥ **ति०** हारामेत्यादौ हेराममांहा अहंशोचेइत्यर्थः । हाजीवममप्राणरूप ।
हितकरः प्रियश्चेत्यस्य त्वमितिशेषः ॥ ११ ॥ **ति०** धर्मोरक्षतीतिसर्वाविवादसिद्धमपिमांप्रतिनिष्फलमित्याह—अनन्यदेव
मिति । पत्येकदेवत्वमित्यर्थः । इयंक्षमा शापेनसंहारशक्तावप्येवंपीडासहनरूपा । पत्यतिरिक्तेकामासक्तिराहित्यं पतिव्रतात्वं ।

[**पा०**] १ क.—घ. च.—ट. यथा. २ ङ. झ. ट. जनन्यः. ३ च. छ. मन्दवाता. ४ ङ. झ. ञ. ट. यत्रार्यपुत्रौ.

[1]मोघो हि धर्मश्चरितो मयाऽयं तथैकपत्नीत्वमिदं निरर्थम्[2] ॥
या त्वां न पश्यामि कृशा विवर्णा हीना त्वया संगमने निराशा ॥ १३ ॥
पितुर्निदेशं नियमेन कृत्वा वनान्निवृत्तश्चरितव्रतश्च ॥
स्त्रीभिस्तु मन्ये विपुलेक्षणाभिस्त्वं रंस्य[3]से वीतभयः कृतार्थः ॥ १४ ॥
अहं तु राम त्वयि जातकामा चिरं विनाशाय निबद्धभावा ॥
मोघं चरित्वाऽथ तपो व्रतं च त्यक्ष्यामि धिग्जीवितम[4]ल्पभाग्या ॥ १५ ॥
सा[5] जीवितं क्षिप्रमहं त्यजेयं विषेण शस्त्रेण शितेन वाऽपि ॥
विषस्य दाता न हि मेऽस्ति कश्चिच्छस्त्रस्य वा वेश्मनि राक्षसस्य ॥ १६ ॥
इतीव [6]देवी बहुधा विलप्य सर्वात्मना राममनुस्मरन्ती ॥
प्रवेपमाना परिशुष्कवक्त्रा नगोत्तमं पुष्पितमाससाद ॥ १७ ॥
शोकाभितप्ता बहुधा विचिन्त्य सीताऽथ वे[7]ण्युद्ग्रथनं गृहीत्वा ॥
उद्बध्य वेण्युद्ग्रथनेन शीघ्रमहं गमिष्यामि यमस्य मूलम् ॥ १८ ॥
उपस्थिता सा मृदुसर्[8]वगात्रा शाखां गृहीत्वाऽथ नगस्य तस्य ॥ १९ ॥
तस्यास्तु रामं [9]प्रविचिन्तयन्त्या रामानुजं स्वं च कुलं शुभाङ्ग्याः ॥
शो[10]कानिमित्तानि तथा बहूनि धैर्यार्जितानि प्रवराणि लोके ॥
प्रादुर्निमित्तानि तदा बभूवुः पुराऽपि सिद्धान्युपलक्षितानि ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टाविंशः सर्गः ॥ २८ ॥

ममेदं तस्मिन्न काचिन्न्यूनता । ममैव दुष्कृतमत्र हेतुः ॥ १२—१३ ॥ पितुर्निदेशं आज्ञां नियमेन अविच्छेदेन कृत्वा चरितव्रतः चरितवन्यवृत्तिव्रतः वनान्निवृत्तश्च सन् । स्त्रीभिस्तु मत्तोपि विलक्षणाभिः स्त्रीभिः त्वं रंस्यसे । वीतभयः गतवनवासभयः । कृतार्थः निष्पन्नसर्वपुरुषार्थः। मद्विनाशेन पुनर्बह्वीरूढा रंस्यस इति भावः ॥ १४ ॥ त्वयि जातकामा अतएव त्वयि निबद्धभावा निबद्धहृदया । विनाशाय त्वयि निबद्धभावेति दुःखातिरेकोक्तिः। तपः अनशनं। व्रतं नियमं । अल्पभाग्या जन्मान्तरसुकृतरहिता । इदानीमनुष्ठितानां तपोव्रतादीनां जन्मान्तरफलत्वेन मोघत्वोक्तिः । अतएवाल्पभाग्येत्युक्तं ॥ १५ ॥ वेश्मनि राक्षसस्य। एवं सम्यङ्मरणकारी क्रूरस्यास्य गृहे कथं लभ्येतेति भावः ॥ १६ ॥ वेण्युद्ग्रथनं वेणीबन्धनं । यमस्य मूलं यमस्य समीपं । अत्रेतिकरणं बोध्यं । इति विचिन्त्य नगोत्तमां शिंशुपामाससाद। शिंशुपां तामुपागमदिति पूर्वमुक्तं । तस्य सामीप्येन गमनमद्योच्यते । पुष्पितं शुभसूचनं। यद्वा पुष्पितमाससाद अग्निप्रवेशं कुर्वन्तीवेत्यर्थः ॥ १७—१८ ॥ उपस्थितेत्यर्धमेकं वाक्यं ॥ नगस्य शाखां गृहीत्वा उपस्थिता ॥ १९ ॥ स्वं च कुलं विचिन्तयन्त्या इत्यनेन दुर्मरणाद्भीतत्वं व्यज्यते । शोकानिमित्तानि शुभसूचकानीत्यर्थः । धैर्यार्जितानि अर्जितधैर्याणि । धैर्यकराणीत्यर्थः । लोके प्रवराणि लोके प्रसिद्धानीत्यर्थः । प्रवरं हि प्रसिद्धं भवति । प्रादुर्बभूवुरित्यन्वयः । पुरापि सिद्धान्युपलक्षितानि पूर्वमपि फलव्याप्तत्वेन दृष्टानि । तान्युत्तरसर्गे विवरिष्यति ॥ २० ॥ इति श्रीगोविन्दराजविरचिते

पक्रतं ॥ १२ ॥ **ति०** वेश्मनिराक्षसस्येत्येतदनन्तरंइतीवदेवीत्यादिरेकःश्लोकःप्रक्षिप्तः ॥ १६ ॥ **वि०** शोकाभितप्तेत्यादिसार्धश्लोकमेकंवाक्यं । शोकाभितप्तासीताबहुधाविचिन्त्यवेण्युद्ग्रथनंगृहीत्वा वेण्युद्ग्रथनेनउद्बध्य उद्बंधनंकृत्वायमस्यमूलंसमीपंगमिष्यामीत्यनगस्यशाखांगृहीत्वाउपस्थिताअवस्थितेतिसंबन्धः ॥१८॥ **ति०** विशोकानि विशोककराणि ॥ २० ॥ अष्टाविंशःसर्गः ॥ २८ ॥

[पा०] १ क. ग.—ट. मोघंहि. २ ग. घ. ङ. झ. ट. निरर्थकं. ३ क. ङ.—ट. स्संरस्यसे. ४ ङ. झ. ट. ल्पभाग्यां. ५ ङ. झ. ट. संजीवितं. ६ क. ख. ग. सीता. ७ झ. ट. वेणीग्रथनं. ८ क. ख. ग. ङ.—ट. सर्वगात्री. ङ. झ. ञ. ट. परिचिन्तयित्वा. १० ङ. झ. तस्याविशोकानितदा. क. ग. शोकापनोदानितदा.

एकोनत्रिंशः सर्गः ॥ २९ ॥

ग्रन्थकृता विशिष्यसीतायाःशुभशकुनप्रतिपादनम् ॥ १ ॥ सीतया शुभशकुनानांपुरोपलब्धफलकशकुनस त्याच्छुभफलावश्यंभावनिर्धारणेन हर्षाधिगमः ॥ २ ॥

तथागतां तां व्यथितामनिन्दितां व्यपेतहर्षां परिदीनमानसाम् ॥
शुभां[1] निमित्तानि शुभानि भेजिरे नरं श्रिया जुष्ट[2]मिवोपजीविनः ॥ १ ॥
तस्याः शुभं वाममरालपक्ष्मराजी[3]वृतं कृष्णविशालशुक्लम् ॥
प्रास्पन्दतैकं नयनं सुकेश्या[4] मीनाहतं पद्ममिवाभिताम्रम् ॥ २ ॥
भुजश्च चार्वञ्चितपीनवृत्तः[5] परार्ध्यकालागरुचन्दनार्हः ॥
अनुत्तमेनाध्युषितः प्रियेण चिरेण वामः समवेपताशु ॥ ३ ॥
गजेन्द्रहस्तप्रतिमश्च पीनस्तयोर्द्वयोः संहतयोः[6] सुजातः ॥
प्रस्पन्दमानः पुनरूरुरस्या रामं पुरस्तात्स्थितमाचचक्षे ॥ ४ ॥
शुभं पुनर्हेमसमानवर्णमीषद्रजोध्वस्तमिवामलाक्ष्याः[7] ॥
वासस्स्थितायाः शिखराग्रदत्याः किंचित्परिस्रंसत[8] चारुगात्र्याः ॥ ५ ॥

श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टाविंशः सर्गः ॥ २८ ॥

तथागतां रहस्यं च प्रकाशं चेत्युक्तरीत्या सर्वं यथावत्साक्षात्कृतवतो मुनेरपि तथाशब्दप्रयोगादित्थमिति परिच्छिद्य वक्तुमशक्यदुःखां । तां धर्मिस्वरूपातिरिक्तयत्किंचिदतिशयरहितां । व्यथितां । "आशंसायां भूतवच्च" इति निष्ठा । तथाच पूर्वोक्तं सर्वं धर्मिस्वरूपमात्रं । इतःपरमेव व्यसनानि भविष्यन्तीति मन्यमानां । "समा द्वादश तत्राहं राघवस्य निवेशने । भुञ्जाना मानुषान्भोगान्सर्वकामसमृद्धिनी" इत्युक्तं भोगजातं सर्वमकिंचित्करमासीत् । दुःखमेव निरूपकमासीत् । अनिन्दितां रामविरहे यथा स्थातव्यं तथा स्थितां । एवमनवस्थाने निन्दितैव भवति । व्यपेतहर्षां हर्षः पूर्वमस्यां वसित्वा गत इति न ज्ञातामित्यर्थः । व्यपाभ्यामुपसर्गाभ्यां तथा प्रतीयते । परिदीनमानसां हर्षे समागतेप्याश्रयरहितां । परीत्यनेनतथाऽवगम्यते । शुभां गुणाधिकविषयविरहकृतविकृतित्वेन तद्दशाया एव नीराजना कर्तव्येते स्थितां । निमित्तानि शुभानि भेजिरे । निमित्त तद्विषये शुभानि सूचयित्वा स्वसत्तां लेभिरे । श्रिया जुष्टमिवोपजीविनः । अर्थिनो हि लक्ष्मीक क्षवद्विषये किंचित्कृत्य स्वप्रयोजनं लभन्ते । इम तु साक्षाल्लक्ष्मीविषये किंचित्कृत्य निमित्तस्वामि लेभिर इत्यर्थः ॥ १ ॥ शुभनिमित्तान्येवाह—त इत्यादिना ॥ अरालं वक्रं । कृष्णविशालशुक्लं म कनीनिकायां कृष्णं सर्वतो विशालं शुभ्रं च । अ ताम्रं अभितस्ताम्रं । प्रान्तरक्तमित्यर्थः । " प्रान्त च नेत्रे " इति पद्मिनीलक्षणात् ॥ २—३ ॥ त सुलक्षणवत्तया प्रसिद्धयोः ऊरुः वाम इत्यनुषज्यते सुजातः सुन्दरः ॥ ४ ॥ शिखराग्रदत्याः वृत्ताग्रद युक्तायाः । " शिखरं निस्तुलं वृत्तं " इत्युत्पलमाल शिखरं दाडिमफलबीजमित्यन्ये नैघण्टुकाः । य शिखराकाराग्रदन्तायाः "अग्रान्तशुद्धशुभ्रवृषवरा भ्यश्च" इति दन्तस्य दत्रादेशः । वासः वस्त्रं परिस्रंसत पर्यस्रंसत । अडभाव आर्षः । ऊरुकम्

स० उपसेविनः योगविभागाददन्तादिनिः । उपसेवितुंशीलमेषामित्यर्थे " सुप्यजातौ " इतिणिनिः ॥ १ ॥ **स०** संहत मांसलत्वेनश्लिष्टयोः । तयोरूर्वोर्मध्ये ऊरुःप्रस्पन्दमानः रामंपुरस्स्थितमाचचक्षे । शकुनप्रस्तावाद्वामइत्यनुक्तावप्येकवचनेनैक प्रतीयते । सचमानान्तरेणवामएवेत्यवसेयं ॥ ४ ॥ **ति०** शिखरं दाडिमबीजं तदग्रतुल्यदन्त्याः । " शिखरंशैलवृक्षाग्रेकक्ष

[पा०] १ घ. पुरापिसिद्धानि. २ ङ. झ. ट. जुष्टमिवोपसेविनः. ३ ङ. झ. ट. राज्यावृतं. ४ ग. शुभाङ्ग्याः. ५ ङ.—वृत्तपीनः. ६ च. छ. ज. ञ. संगतयोः. झ. संहतयोस्तु. ७ ङ. झ. मिवातुलाक्ष्याः. ८ क. परिस्पन्दत.

एतैर्निमित्तैरपरैश्च सुभ्रूः संबोधिता प्रागपि साधु सिद्धैः ॥
वातातपक्लान्तमिव प्रनष्टं वर्षेण बीजं प्रतिसंजहर्ष ॥ ६ ॥
तस्याः पुनर्बिम्बफलाधरोष्ठं स्वक्षिभ्रु केशान्तमरालपक्ष्म ॥
वक्त्रं बभासे सितशुक्लदंष्ट्रं राहोर्मुखाच्चन्द्र इव प्रमुक्तः ॥ ७ ॥
सा वीतशोका व्यपनीततन्द्री शान्तज्वरा हर्षविवृद्धसत्त्वा ॥
अशोभतार्या वदनेन शुक्ले शीतांशुना रात्रिरिवोदितेन ॥ ८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

त्रिंशः सर्गः ॥ ३० ॥

शिंशुपाग्रावस्थानेनैवनिखिलसीतावृत्तान्तमवगतवताहनुमता सीतायाआश्वासनानाश्वासनपक्षयोर्गुणदोषविमर्शनपूर्वकं सुचितसमयेसमाश्वासननिर्धारणम् ॥ १ ॥

नुमानपि विक्रान्तः सर्वं शुश्राव तत्त्वतः ॥ सीतायास्त्रिजटायाश्च राक्षसीनां च तर्जनम् ॥ १ ॥
वेक्षमाणस्तां देवीं देवतामिव नन्दने ॥ ततो बहुविधां चिन्तां चिन्तयामास वानरः ॥ २ ॥
ं कपीनां सहस्राणि सुबहून्ययुतानि च ॥ दिक्षु सर्वासु मार्गन्ते सेयमासादिता मया ॥ ३ ॥
ारेण तु सुयुक्तेन शत्रोः शक्तिमवेक्षता ॥ गूढेन चरता तावदवेक्षितमिदं मया ॥ ४ ॥

ति भावः । स्थितायाः तिष्ठन्त्या इति वस्त्रस्रंसनानु-णावस्थोक्तिः । यद्वा वासस्स्रंसनं कान्तागमनसूच-मिति भावः । शिखरदन्तत्वे सामुद्रिकम्— स्निग्धास्समानुरूपास्सुपङ्क्तयः शिखरिणः श्लक्ष्णाः । न्ता भवन्ति यासां तासां पादे जगत्सर्वं " इति ॥ यासां शिखरिणो दन्ता दीर्घं जीवन्ति ताः स्त्रियः " ते च ॥ ५ ॥ अपरैः पूर्वोक्तशकुनैः । संबोधिता यः कान्तागमवार्ता भविष्यतीति बोधिता । तातपक्लान्तं सम्यग्वातातपसंशोषितं । प्रनष्टं भूमा-दर्शनं गतं । यद्वा प्रनष्टं प्रकर्षेण कृशीभूतं । बीजं-र्षेणेव प्रतिसंजहर्ष । बीजस्य प्रहर्षो नाम अङ्कुरादि-वेन स्थूलीभूय बहिर्निर्गमः ॥ ६ ॥ स्वक्षिभ्रु भनाक्षिभ्रूयुक्तं । केशाः अन्ते यस्य तत् केशान्तं । रिभागप्रकीर्णालकमित्यर्थः । सितशुक्लदंष्ट्रं अत्यन्त-शुक्लदन्तं । एकार्थे शब्दद्वयप्रयोगोतिशयज्ञापनाय । यथा मुग्धमनोज्ञ इति । नीरन्ध्रत्वेन संसक्तशुक्लदंष्ट्र-मिति वार्थः । " षिञ् बन्धने " इत्यस्माद्धातोर्नि-ष्ठा ॥ ७ ॥ व्यपनीततन्द्री निरस्तजाड्या । हर्षवि-वृद्धसत्वा हर्षविकसितचित्ता । शुक्ले शुक्लपक्षे ॥ ८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोन-त्रिंशस्सर्गः ॥ २९ ॥

विक्रान्तः पराक्रमशाली । सीतायास्त्रिजटायाश्च सर्वं सर्ववृत्तान्तं । तर्जनं तर्जनवचनं ॥ १ ॥ चिन्तां चिन्तयामास चिन्तां चकार ॥ २ ॥ यामिति सर्ववानराभिलषितोर्थो मयैकेन लब्ध इति विस्मित-वान् ॥ ३ ॥ इदं वक्ष्यमाणं । तावत् कार्त्स्न्येन

कोटिषु । पक्वेदाडिमबीजेच " इतिविश्वः ॥ ५ ॥ **ति०** सितशुक्लदंष्ट्रं स्फटिकादिसितपदार्थवच्छुक्लादंष्ट्रायत्रतत् । **ती०** सित-शुक्लदंष्ट्रं पङ्क्तिबद्धधवलदन्तमित्यर्थः ॥ ७ ॥ इत्येकोनत्रिंशःसर्गः ॥ २९ ॥

ती० विश्रान्तः विगतव्यापारः ॥ **स०** सीतायागर्जितं विलापरूपं । त्रिजटायास्स्वप्नकथनरूपं । राक्षसीनांसीतातर्जनरूपमि-विवेकः ॥ १ ॥ **स०** चिन्तां चिन्तनीयं । चिन्तयामास । देवींतां चिन्तां तदीयचिन्तांचावेक्षमाणश्चिन्तयामासेत्यन्वयोवा

[पा०] १ ङ—ट. संचोदिता. २ क. ङ.—ट. फलोपमोष्ठं. ३ क. शुक्लदन्तं. ४ ङ.—ट. तन्द्रा. ५ क. ख. ग. ङ. ञ. ट. विवृद्धसत्त्वा. ६ क. घ. ङ. झ. ञ. ट. विक्रान्तः. ७ ङ. झ. राक्षसानां. ८ च. छ. ञ. ट. तर्जितं. ङ. झ. गर्जितं.

राक्षसानां विशेषश्च पुरी चेयं[1]मवेक्षिता ॥ राक्षसाधिपतेरस्य प्रभावो रावणस्य च ॥ ५ ॥
युक्तं[2] तस्याप्रमेयस्य सर्वसत्त्वदयावतः ॥ समाश्वासयितुं भार्यां पतिदर्शनकाङ्क्षिणीम् ॥ ६ ॥
अहमाश्वासयाम्येनां पूर्णचन्द्रनिभाननाम् ॥ अदृष्टदुःखां दुः[3]खार्तां दुःखस्यान्तमगच्छतीम् ॥ ७
यद्य[4]प्यहमिमां देवीं शोकोपहतचेतनाम् ॥ अनाश्वास्य गमिष्यामि दोषवद्गमनं भवेत् ॥ ८ ॥
गते हि मयि तत्रेयं राजपुत्री यशस्विनी ॥ परित्राण[5]मविन्दन्ती जानकी जीवितं त्यजेत् ॥ ९
मया[6] च स महाबाहुः पूर्णचन्द्रनिभाननः ॥ समाश्वासयितुं न्याय्यः सीतादर्शनलालसः ॥ १
निशाचरीणां प्रत्यक्ष[7]मनर्हं चापि भाषणम् ॥ कथं नु खलु कर्तव्यमिदं कृच्छ्रगतो ह्यहम् ॥ १
अनेन रात्रिशेषेण यदि नाश्वास्यते मया ॥ सर्वथा नास्ति संदेहः परित्यक्ष्यति जीवितम् ॥ १
रामश्च यदि पृच्छेन्मां किं मां सीताऽब्रवीद्वचः ॥ किमहं तं प्रतिब्रूयामसंभाष्य सुमध्यमाम् ॥ १
सीतासंदेशरहितं मामितस्त्वरया गतम् ॥ निर्दहेदपि काकुत्स्थः क्रुद्धस्तीव्रेण चक्षुषा ॥ १४ ॥
यदि चो[9]द्योजयिष्यामि भर्तारं[10] रामकारणात् ॥ व्यर्थमागमनं तस्य ससैन्यस्य भविष्यति ॥ १५
अन्तरं त्वहमासाद्य राक्षसीनामि[11]ह स्थितः ॥ शनै[12]राश्वासयिष्यामि सन्तापबहुलामिमाम् ॥ १
अहं [13]त्वतितनुश्चैव वानरश्च विशेषतः ॥ वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम् ॥ १७ ॥
यदि वाचं [14]प्रदास्यामि द्विजातिरिव संस्कृताम् ॥ रावणं मन्यमाना मां सीता भीता भविष्यति
वानरस्य विशेषेण कथं स्यादभिभाषणम् ॥ १८ ॥
अवश्यमेव वक्तव्यं मानुषं वाक्यमर्थवत् ॥ मया सान्त्वयितुं शक्या नान्यथेयमनिन्दिता ॥ १९

॥ ४—५ ॥ समाश्वासयितुं युक्तं न्याय्यं ॥ ६ ॥ आश्वासयामि " वर्तमानसामीप्ये वर्तमानवद्वा " इति लट् ॥ ७—८ ॥ दोषवत्त्वमुपपादयति—गते हीति ॥ ९ ॥ समाश्वासयितुं न्याय्यः सीतासंदेशकथनेनेति शेषः ॥ १०—१२ ॥ सीताब्रवीद्वच इत्यत्रेतिकरणं द्रष्टव्यं ॥ १३—१४ ॥ भर्तारं सुग्रीवं । व्यर्थं अनाश्वास्य गमने तदागमनपर्यन्तं दे प्राणानवस्थानादिति भावः ॥१५॥ राक्षसीनां अ अवकाशं विच्छेदं वा राक्षस्यसन्निधानसमयमि ॥ १६ ॥ अतितनुः अतिसूक्ष्मतनुः । संस प्रयोगसौष्ठवलक्षणसंस्कारयुक्तां ॥ १७ ॥ गीर्वाण षया व्यवहारे दोषमाह—यदीति ॥ १८॥ अथम

॥२॥ **ति०** राक्षसानांविशेषः तारतम्यमैश्वर्यादिकृतं ॥५॥ **ति०** अप्रमेयस्य अपरिच्छेद्यस्वरूपस्यापरिच्छेद्यगुणस्यच ॥ **स०** सत्वदयावतइति । सर्वेअरिहिंसाविषयेसत्ववान् बलवांश्चासौदयावांश्चतस्य । सर्वबलवान्सर्वदयावांस्तस्येतिवा सर्वप्राणिषुदय स्तस्येतिवा । समाश्वासयितुं मयायुक्तमितिशेषः ॥६॥ **स०** आश्वासयामीतिवर्तमानसामीप्याल्लृडर्थेलट् । अथवा क्रियाप्रबन्धे त्युक्तेर्धात्वर्थमात्रेलङ्वन्योग्येऽर्थेलृडर्थेभविष्यतीतिलटउपपत्तेः । अन्तं पारं । नाधिगच्छन्ती । यद्वा दुःखस्य कर्मणिषष्ठी । नह्यन्तंबध्नन्तं क्षणेक्षणेदुःखंनूतनयन्तमितियावत् । तंरावणं प्रकारंवा । अधिगच्छतीं प्राप्नुवन्तीं । रामाश्वासनपरतयाशेषे र्थापयतस्तीर्थस्योत्तरश्लोकइव इतरेषांतदुत्तरश्लोकःसाधकइत्युभयव्याकरणे समूले इतिज्ञेयं ॥ ७ ॥ **स०** यद्यपिरावणमरणेन ताप्रयोजनंभविष्यतीति नसर्वात्मनावैयर्थ्यं । तथापि सीतावाप्तिरूपैहिकफलालाभाद्वैयर्थ्यमेवेतिभावः ॥१५॥ **ति०** मानुषीं ष्यशरीरसाध्यां । संस्कृतां व्याकरणसंस्कारवतीं ॥ **स०** वाचंचोदाहर्तव्यांविकल्प्यैकांनिश्चिनोति—अहंहीति । मानुषींसंस्कृ वाचं । संस्कृतायाविकल्पकोटौप्रथमतोनिर्देशस्यमुख्यत्वेनन्याय्यत्वेपि मानुष्याएवभाषायाःसीतयासहभाष्यत्वेननिर्धार्य त्वात् तस्याएवादौनिवेशोयुक्तइतिनानौचिती ॥ १७ ॥ **स०** सीताभीतेति । रावणस्यविश्रवस्सुतत्वेनगीर्वाणवाणीतस्तद्भ्रमः

[पा०] १ ङ. झ. ट. चेयंनिरीक्षिता. २ ङ. झ. ट. यथा. ३ झ. दुःखस्यनह्यन्तमधिगच्छतीं. ४ ङ. झ यदिह्यहंसतीमेनां. क. घ. च. छ. ज. ञ. यदिह्यहमिमामेवं. ५ ङ.—ट. मपश्यन्ती. क. ग. मजानन्ती. ६ ङ. झ. ट. य ७ क. ग. घ. च. छ. ज. ञ. मक्षमंचापि. ङ. झ. ट. मक्षमंचाभिभाषितं. ८ ङ. झ. ट. क्रोधतीव्रेण. च. छ. ज कुपितस्तीक्ष्णचक्षुषा. ९ ङ. झ. ञ. ट. वोद्योजयिष्यामि. १० क. ग. घ. सुग्रीवं. ११ झ. ट. मवस्थितः १२ ङ. झ राश्वासयाम्यद्य. १३ क. ख. ग. ङ.—ट. ह्यतितनुः. १४ ञ. ट. प्रवक्ष्यामि.

मालोक्य मे रूपं जानकी भाषितं तथा ॥ रक्षोभिस्त्रासिता पूर्वं भूयस्त्रासं गमिष्यति ॥ २० ॥
ो जातपरित्रासा शब्दं कुर्यान्मनस्विनी ॥ जानमाना विशालाक्षी रावणं कामरूपिणम् ॥ २१ ॥
तया च कृते शब्दे सहसा राक्षसीगणः ॥ नानाप्रहरणो घोरः समेयादन्तकोपमः ॥ २२ ॥
ो मां संपरिक्षिप्य सर्वतो विकृताननाः ॥ वधे च ग्रहणे चैव कुर्युर्यत्नं यथाबलम् ॥ २३ ॥
ह्य शाखाः प्रशाखाश्च स्कन्धांश्चोत्तमशाखिनाम् ॥ दृष्ट्वा विपरिधावन्तं भवेयुर्भयशङ्किताः ॥२४॥
म रूपं च संप्रेक्ष्य वने विचरतो महत् ॥ राक्षस्यो भयवित्रस्ता भवेयुर्विकृताननाः ॥ २५ ॥
तः कुर्युः समाह्वानं राक्षस्यो रक्षसामपि ॥ राक्षसेन्द्रनियुक्तानां राक्षसेन्द्रनिवेशने ॥ २६ ॥
शूलशक्तिनिस्त्रिंशविविधायुधपाणयः ॥ आपतेयुर्विमर्देऽस्मिन्वेगेनोद्विग्नकारिणः ॥ २७ ॥
रुद्धस्तैः सुपरितो विधमन्रक्षसां बलम् ॥ शक्नुयां न तु संप्राप्तुं परं पारं महोदधेः ॥ २८ ॥
ं वा गृह्णीयुराप्लुत्य बहवः शीघ्रकारिणः ॥ स्यादियं चागृहीतार्था मम च ग्रहणं भवेत् ॥ २९ ॥
साभिरुचयो हिंस्युरिमां वा जनकात्मजाम् ॥ विपन्नं स्यात्ततः कार्यं रामसुग्रीवयोरिदम् ॥ ३० ॥
देशे नष्टमार्गेऽस्मिन्राक्षसैः परिवारिते ॥ सागरेण परिक्षिप्ते गुप्ते वसति जानकी ॥ ३१ ॥
शस्ते वा गृहीते वा रक्षोभिर्मयि संयुगे ॥ नान्यं पश्यामि रामस्य साहाय्यं कार्यसाधने ॥ ३२ ॥
मृशंश्च न पश्यामि यो हते मयि वानरः ॥ शतयोजनविस्तीर्णं लङ्घयेत महोदधिम् ॥ ३३ ॥
ामं हन्तुं समर्थोस्मि सहस्राण्यपि रक्षसाम् ॥ न तु शक्ष्यामि संप्राप्तुं परं पारं महोदधेः ॥ ३४ ॥
सत्यानि च युद्धानि संशयो मे न रोचते ॥ कश्च निस्संशयं कार्यं कुर्यात्प्राज्ञः ससंशयम् ॥३५॥
णत्यागश्च वैदेह्या भवेदनभिभाषणे ॥ एष दोषो महान्हि स्यान्मम सीताभिभाषणे ॥ ३६ ॥

ाषया व्यवहर्तव्यत्वं निश्चिनोति—अवश्यमिति ॥ त्र वाक्यस्य मानुषत्वं कोसलदेशवर्तिमनुष्यसंब-न्धित्वं विवक्षितं । तादृग्वाक्यस्यैव देवीपरिचितत्वात् १९ ॥ एवं मानुषभाषया व्यवहर्तव्यत्वं निश्चित्य ाति तयापि भाषयानेन वानररूपेण पुरः स्थित्वा-भाषणे दोषोस्तीति विचारयति—सेयमिति २० ॥ जानमाना जानाना । मुमागम आर्षः २१—२३ ॥ प्रशाखाः उपशाखाः । विपरिधावन्तं मिति शेषः ॥ २४—२६ ॥ उद्विग्नकारिणः गकारिणः ॥ २७ ॥ तैः परितः संरुद्धः । अतएव सां बलं विधमन् प्रहरन् । अहं महोदधेः परं पारं ुं न शक्नुयामित्यन्वयः ॥ २८ ॥ अगृहीतार्था अविदितरामसंदेशार्था ॥ २९—३० ॥ उद्देशे प्रदेशे । नष्टमार्गे अदृष्टमार्गे । उक्तविशेषणे उद्देशे वसतीत्यन्वयः ॥ ३१ ॥ सहाय एव साहाय्यः तं । कार्यसाधने सीतादर्शननिवेदनलक्षणकार्यसाधने ॥ ३२ ॥ यो लङ्घयेत तं न पश्यामीत्यन्वयः ॥ ३३—३४ ॥ असत्यानि अनिश्चितजयापजयानि । क्लेशस्तु भूयानिति भावः । ततो नैतन्मम मतमित्याह—संशय इति । संशयः संशयितार्थः । स च सङ्ग्रामः अथापि तथाकरणे स एव कार्यहन्ता बुद्धिहीनो निन्दाभाजनं चेत्याशयेनाह—कश्चेति । प्राज्ञः कः ससंशयं कार्यं निःसंशयं निर्विचारं कुर्यात् ॥ ३५ ॥ अनभिभाषणे रामसंदेशानिवेदने । एष दोषः पूर्वोक्तसीतासंत्रासा-

इति तेन भीतिभवनंयुक्तमितिभावः ॥१८॥ ति० नतुशक्ष्यामि युद्धश्रान्त्येतिभावः ॥ शि० नशक्ष्यामि सीतामरणशङ्कयाक्षी-क्तिर्भविष्यामीतितात्पर्यं ॥३४॥ ति० किंचयुद्धेजयोपिसंदिग्धइत्याह—असत्यानीति ॥ स० असत्यानि अनिश्चितजयकानि ।

[पा०] १ ङ. झ. ट. त्रासमुपैष्यति. २ क. शङ्कमाना. ङ.—ट. जानानामां. ३ ङ. झ. ट. महाबलाः. ४ ख. ङ. झ. ट. तंमांशाखाः. ५ ङ.—ट. दृष्ट्वाच. क. दृष्ट्वामां. ६ ङ. झ. ट. भवेयुःपरिशङ्किताः. क. भवेयुर्भयशङ्किनः. घ. भवेच्छ-विह्वलः. ७ ङ.—ट. विकृतस्वराः. ८ ङ.—ट. शूलशर. क. ग. घ. शूलाशनि. ९ झ. ञ. ट. वेगेनोद्विग्नकारणात्. क.—ङ. संक्रुद्धस्तैस्तु. ११ क. च.—ट. त्राक्षसं. १२ ङ.—ट. रात्रुत्य. १३ ख. घ. सहायं. १४ ङ. च. ज.—ट. ाम्यहंप्राप्तुं.

भूताश्चार्था विनश्यन्ति देशकालविरोधिताः ॥ विक्लवं दूतमासाद्य तमः सूर्योदये यथा ॥ ३७
अर्थानर्थान्तरे बुद्धिर्निश्चिताऽपि न शोभते ॥ [यो ह्यर्थं बहुधा वेद स समर्थोऽर्थसाधने ॥]
घातयन्ति हि कार्याणि दूताः पण्डितमानिनः ॥ ३८ ॥
न विनश्येत्कथं कार्यं वैक्लव्यं न कथं भवेत् ॥ लङ्घनं च समुद्रस्य कथं नु न वृथा भवेत् ॥ ३
कथं नु खलु वाक्यं मे शृणुयान्नोद्विजेत वा ॥ इति संचिन्त्य हनुमांश्चकार मतिमान्मतिम् ॥
राममक्लिष्टकर्माणं स्वबन्धुमनुकीर्तयन् ॥ नैनामुद्वेजयिष्यामि तद्बन्धुगतमानसाम् ॥ ४१ ॥
इक्ष्वाकूणां वरिष्ठस्य रामस्य विदितात्मनः ॥ शुभानि धर्मयुक्तानि वचनानि समर्पयन् ॥ ४२
श्रावयिष्यामि सर्वाणि मधुरां प्रब्रुवन्गिरम् ॥ श्रद्धास्यति यथा हीयं तथा सर्वं समादधे ॥ ४

इति स बहुविधं महानुभावो जगतिपतेः प्रमदामवेक्षमाणः ॥
मधुरमवितथं जगाद वाक्यं द्रुमविटपान्तरमास्थितो हनूमान् ॥ ४४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रिंशस्सर्गः ॥ ३० ॥

एकत्रिंशः सर्गः ॥ ३१ ॥

शिंशुपास्थेनहनुमता मानुषभाषाश्रयणेन रामजननप्रभृतिस्वीयसीतादर्शनावधिसकलवृत्तान्तप्रतिपादनम् ॥
तच्छ्रवणेनहर्षविस्मयापन्नयासीतया सर्वतश्चक्षुश्चालनेनशिंशुपाशाखायां हनुमतोऽवलोकनम् ॥ २ ॥

एवं बहुविधां चिन्तां चिन्तयित्वा महाकपिः ॥ संश्रवे मधुरं वाक्यं वैदेह्या व्याजहार ह ॥ १

क्रोशतन्निमित्तराक्षसागमनादिः । सीताभिभाषणे वानररूपेण पुरःस्थित्वाभिभाषणे ॥ ३६ ॥ भूताश्चार्थाः निष्पन्नार्थाः । विक्लवं अविवेकिनं । दूतमासाद्य देशकालविरोधिताः सन्तः सूर्योदये तमो यथा विनश्यति तथा विनश्यन्तीति संबन्धः ॥३७॥ अत्र विक्लवं दूतमासाद्येत्यनुषज्यते । अर्थानर्थान्तरे कार्याकार्यविषये । निश्चितापि स्वामिना सचिवैः सह निश्चितापि । बुद्धिः विक्लवं दूतमासाद्य न शोभते । अकिंचित्कराभिभवतीत्यर्थः । एतदेवोपपादयति—घातयन्तीति ॥ ३८ ॥ प्रागुक्ता दूतदोषास्स्वस्मिन्यथा न स्युस्तथा कर्तव्यमित्याह—न विनश्येदिति ॥ कार्यं स्वामिकार्यं कथं केन प्रकारेण । न विनश्येत् । वैक्लव्यं बुद्धिहीनता । मम कथं न भवेत् । समुद्रलङ्घनं कथं न वृथा भवेत् । तथा कर्तव्यमिति शेषः ॥ ३९ ॥ कथमिति अथ सीतेत्यध्याहार्यं । हनुमान् मे वाक्यं सीता केन प्रकारेण । शृणुयात्कथं नोद्विजेतेति विचार्य मान् प्रशस्तमतिः । मतिं तत्कालोचितकर्तव्यविष चकार निष्पादयामास ॥ ४० ॥ स्वबन्धुं राम कीर्तयन् " लक्षणहेत्वोः—"इति हेत्वर्थे शतृप्रत्य नैनामुद्वेजयिष्यामि एनां मद्रूपप्रदर्शनमन्तरेण रा कीर्तनेनैवानुद्विग्नांकरिष्यामीत्यर्थः । तद्बन्धुगतमा स चासौ बन्धुश्च तद्बन्धुः रामः तद्गतमानसां ॥ —४३ ॥ जगतिपतेरिति दीर्घाभाव आर्षः । ज देति वक्ष्यमाणसर्गार्थसंग्रहः ॥ ४४ ॥ इति श्री विन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गार काख्याने सुन्दरकाण्डव्याख्याने त्रिंशः सर्गः ॥ ३

चिन्तां चिन्तयित्वा चिन्तां कृत्वा । कर्तव्य

यद्वा राक्षसानांमायिकत्वान्मायामयानि ॥ ३५ ॥ शि० भूताः सिद्धप्रायाः ॥ ३७ ॥ स० सुबन्धुं कदाप्यवियोगिबान्ध तद्बन्धुः सः तद्रूपीबन्धुः । रामः तद्गतचेतनां तस्यरामस्यबन्धुराप्तःकोवाऽऽगच्छेदितितद्गतमानसांवा ॥ ४१ ॥ स० जगति भूपतेः । " ङ्यापोःसंज्ञाछन्दसोः " इतिसंज्ञात्वात् " जाह्नविसूर्यकन्ययोः " इत्यादिवद्ध्रस्वः । अजगतिपतेरितिवाछेदः । अ त्वतुर्मुखस्य गतिः उदरतोनिस्सरणं सद्गतिर्वाययासा अजगतिः रमा तस्याःपतिस्तस्येतिवा ॥ ४४ ॥ इतित्रिंशःसर्गः ॥ ३०

स० चिन्तांचिन्तयित्वेतिपूर्ववत् । संश्रवे संश्रूयतेशब्दोयत्रससंश्रवः अन्यानाकलनेनसीताऽऽकलनंयस्मिन् । समीपप्र

[पा०] १ ग. ञ. भूतार्थाहिविपद्यन्ते. ङ—झ. ट. भूताश्चार्थाविरुध्यन्ति. २ इदमर्धं ख. पाठेदृश्यते. ३ क. ख. च. छ. ज. ञ. विनश्येदिदंकार्यं. ४ ख. ङ.—ट. कथंमम. ५ क. मतिमुत्तमां. ६ ङ. झ. ट. सुबन्धुमनु. ७ ङ. झ. गतचेतनां. ८ ङ. झ. ञ. ट. यथासीतातथा. ९ ङ. झ. ट. महामतिः.

जा दशरथो नाम रथकुञ्जरवाजिमान् ॥ पुण्यशीलो [1]महाकीर्तिर्ऋजुरासीन्महायशाः ॥ २ ॥
जर्षीणां [2]गुणश्रेष्ठस्तपसा चर्षिभिः समः ॥ चक्रवर्तिकुले जातः पुरन्दरसमो बले ॥ ३ ॥
हिंसारतिरक्षुद्रो घृणी सत्यपराक्रमः ॥ मुख्यश्चेक्ष्वाकुवंशस्य लक्ष्मीवाँल्लक्ष्मिवर्धनः ॥ ४ ॥
र्थिवव्य[3]ञ्जनैर्युक्तः पृथुश्रीः पार्थिवर्षभः ॥ पृथिव्यां चतुरन्तायां विश्रुतः सुखदः सुखी ॥ ५ ॥
स्य पुत्रः प्रियो ज्येष्ठस्ताराधिपनिभाननः ॥ रामो नाम विशेषज्ञः श्रेष्ठः सर्वधनुष्मताम् ॥ ६ ॥
क्षिता स्वस्य [4]धर्मस्य [5]स्वजनस्य च रक्षिता ॥ रक्षिता जीवलोकस्य धर्मस्य च परन्तपः ॥ ७ ॥
स्य सत्याभिसंधस्य वृद्धस्य वचनात्पितुः ॥ सभार्यः सह च भ्रात्रा वीरः प्रव्राजितो वनम् ॥ ८ ॥
न तत्र महारण्ये मृगयां परिधावता ॥ राक्षसा निहताः शूरा बहवः कामरूपिणः ॥ ९ ॥
नस्थानवधं श्रुत्वा [6]हतौ च खरदूषणौ ॥ ततस्त्वमर्षापहृता जानकी रावणेन तु ॥
ञ्चयित्वा वने रामं मृगरूपेण मायया ॥ १० ॥
मार्गमाणस्तां देवीं रामः सीतामनिन्दिताम् ॥ आससाद वने मित्रं सुग्रीवं नाम वानरम् ॥११॥
तः स वालिनं हत्वा रामः [7]परपुरञ्जयः ॥ [8]प्रायच्छत्कपिराज्यं तत्सुग्रीवाय [9]महाबलः ॥ १२ ॥
ग्रीवेणापि संदिष्टा हरयः कामरूपिणः ॥ दिक्षु सर्वासु तां देवीं [10]विचिन्वन्ति [11]सहस्रशः ॥ १३ ॥
हं संपातिवचनाच्छतयोजनमायतम् ॥ [12]अस्या हेतोर्विशालाक्ष्याः [13]सागरं वेगवान्प्लुतः ॥ १४ ॥
थारूपां यथावर्णां [14]यथालक्ष्मीं च निश्चिताम् ॥ अश्रौषं राघवस्याहं सेयमासादिता मया ॥ १५ ॥
ररामै[15]वमुक्त्वासौ वाचं वानरपुङ्गवः ॥ जानकी चापि तच्छ्रुत्वा विस्मयं परमं गता ॥ १६ ॥
तः सा वक्रकेशान्ता सुकेशी केशसंवृतम् ॥ उन्नम्य वदनं भीरुः [16]शिंशुपावृक्षमैक्षत ॥ १७ ॥

श्चित्येत्यर्थः । संश्रवे सम्यक् श्रूयतेस्मिन्निति संश्रवः । मीपं समीपे व्याजहार । यद्वा पाठ्ये गेये च धुरमिति संश्रवे श्रवणे मधुरं ज्ञानप्रसरणद्वारा न्द्रियेभ्यो निस्सृत्य विषयान्गृहीत्वा तदनन्तरं हि सो जायते लोके अत्र न तथा यत्र शब्दसंसर्गो ायते तत्र रसो जायत इत्यतिशयोक्तिः । मधुरं ज्ञान- पि तद्द्वारा रसजनकं वाक्यं पूर्वापरनिरूपणं विना यं रसजनकं वैदेह्याः वैदेहीनिमित्तं । कुलानुरोधेन ःनिस्स्पृहायाः देहमपि दत्त्वा रसावहत्वमुच्यते १ ॥ वितरणविक्रमादिजनितत्वेन कीर्तियशसो- र्भेदोवगन्तव्यः ॥ २—४ ॥ पार्थिवव्यञ्जनैः राज- लक्षणैः ॥ ५—७ ॥ तस्य पितुर्वचनाद्वनं प्रव्राजितः गतः । स्वार्थे णिच् ॥ ८ ॥ मृगयां परिधावता मृगयामुद्दिश्य परिधावता । अनेन लीलया खरादि- वधः सूच्यते ॥ ९ ॥ जनस्थानवधं जनस्थानरक्षोवधं । अमर्षेणापहृता अमर्षापहृता । मृगरूपेण मृगसौन्द- र्येण प्रशस्तमृगेण वा । "प्रशंसायां रूपप्" ॥ १०—१४ ॥ यथारूपां यादृशशरीरां । यथावर्णां यादृशरूपाम् । यथालक्ष्मीं यादृशकान्तिं । राघवस्य राघवात् ॥ १५—१६ ॥ सुकेशी नीलसूक्ष्मकेशी ।

१ ॥ ति० माययामृगरूपेण मारीचेनकरणेन । रामंवञ्चयित्वेत्यर्थः ॥ १० ॥ ति० तस्याहेतोः तदन्वेषणहेतोः ॥ १४ ॥
० केशसंवृतं असंस्कारतःप्रकीर्णत्वात् ॥ १७ ॥

[पा०] १ ङ—ट. महाकीर्तिरिक्ष्वाकूणांमहायशाः. क. ग. महाकीर्तिःप्रादुरासीन्महायशाः. २ क. गुणैःश्रेष्ठः. ३ क. ञ्जनोपेतः. ४ क. ग. ङ.—ट. वृत्तस्य. ५ ख. स्वजनस्याभि. क. ङ.—ज. ञ. ट. स्वजनस्यापि. ६ ङ.—ट. निहतौ. ७ घ. पराक्रमः. ८ ङ. च. झ. ञ. ट. आयच्छत्कपिराज्यंतुसुग्रीवाय. ९ ङ.—झ. ट. महात्मने. १० ङ. झ. ट. विचिन्वन्तः. क. ततस्ततः. १२ घ.—ट. तस्याहेतोः. १३ ङ.—ट. समुद्रं. १४ ङ. झ. ट. यथालक्ष्मवतींचतां. च. ज. ञ. ालक्ष्मीविनिश्चितां. क. यथालक्ष्मींचतामपि. १५ क. घ. ङ. झ. ट. मुक्त्वारा. ग. च. छ. ज. ञ. मुक्त्वातु. १६ ङ. —ट. शिंशुपामन्ववैक्षत.

निशम्य सीता वचनं कपेश्च दिशश्च सर्वाः प्रदिशश्च वीक्ष्य ॥
स्वयं प्रहर्षं परमं जगाम सर्वात्मना राममनुस्मरन्ती ॥ १८ ॥
सा तिर्यगूर्ध्वं च [1]तथाप्यधस्तान्निरीक्षमाणा तमचिन्त्यबुद्धिम् ॥
ददर्श पिङ्गाधिपतेरमात्यं वातात्मजं सूर्यमिवोदयस्थम् ॥ १९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकत्रिंशस्सर्गः ॥ ३१ ॥

द्वात्रिंशः सर्गः ॥ ३२ ॥

सीतया शिंशुपायांदृष्टस्यहनूमतःस्वाप्नत्वबुद्ध्या स्वप्नेवानरदर्शनस्यानर्थहेतुतया दैवंप्रति रामादिकुशलप्रार्थना ॥ पुनःकारणाभावात्स्वप्नाद्यभावनिर्धारणेन ब्रह्मादीन्प्रति हनुमदुक्तस्ययाथार्थ्यसिद्धिप्रार्थना ॥ २ ॥

ततः शाखान्तरे लीनं दृष्ट्वा चलितमानसा ॥ वेष्टितार्जुनवस्त्रं तं विद्युत्संघातपिङ्गलम् ॥ १ ॥
सा ददर्श कपिं तत्र प्रश्रितं प्रियवादिनम् ॥ फुल्लाशोकोत्कराभासं तप्तचामीकरेक्षणम् ॥ २ ॥
[2][सा[3]ऽथ दृष्ट्वा हरिश्रेष्ठं विनीतवदवस्थितम् ॥] मैथिली चिन्तयामास विस्मयं परमं गता ॥ ३
अहो भीममिदं [4]रूपं वानरस्य दुरासदम् ॥ दुर्निरीक्ष्यमिति ज्ञात्वा पुनरेव मुमोह सा ॥ ४ ॥
विललाप भृशं सीता करुणं भयमोहिता ॥ रामरामेति दुःखार्ता लक्ष्मणेति च भामिनी ॥ ५
रुरोद [5]बहुधा सीता मन्दं मन्दस्वरा सती ॥ ६ ॥

वक्रिम्णः पूर्वमुक्तत्वात् ॥ १७—१८ ॥ पार्श्वे आकाशं भूमिं चावेक्षमाणा । अधस्तादित्यनेन यथा भूमिं भित्त्वा कश्चिन्नरः रामनामानि कीर्तयेत्तथान्यत्रापीत्यपिना संभावनोच्यते । शिंशुपावृक्षस्याधस्तात्तिर्यगूर्ध्वमिति वा । तमचिन्त्यबुद्धिं ददर्श । तद्वपुरवलोकनात्पूर्वं तस्यहृदयमेवं परिच्छिनत्ति स्म । इह लङ्कायां प्रविश्यावरोधाराममध्यप्रवेशेनायं निपुणतरमतिरिति निश्चितवतीत्यर्थः । पिङ्गाधिपतेरमात्यं स्वरविशेषणायं वानरः । तत्रापि न स्वतन्त्रः । किन्तु स्वसजातीयस्य राज्ञः कस्यचिदमात्योयं । तद्राज्यकार्यमेतद्धस्तगतमिति निश्चितवती । वातात्मजं रामप्राणहेतुभूतमत्प्राणनहेतुत्वेन सर्वप्राणिप्राणनहेतुत्वेन वायुपुत्रोयमित्यवगतवती । सूर्यमिवोदयस्थं रामदिवाकरस्योदयसूचकमुदयगिरिस्थमरुणमिव स्थितं । सूरः सूर्यः । "सूरसूर्यार्यमादित्यद्वादशात्मदिवाक इत्यमरः। "सूरसूतोरुणोनूरुः" इत्युक्तेस्सूरस्य सं सूर्यः । दिगादित्वाद्यत् । भवतापि संबन्धः एव । यद्वा सूर्यशब्देन तत्संबन्ध्यरुणो लक्ष्य " सूर्योरुणे च सूर्ये च " इति निघण्टुरस्तीत्या औचित्यादत्र सूर्योरुणः ॥ १९ ॥ इति श्रीगोवि राजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिल ख्याने सुन्दरकाण्डव्याख्याने एकत्रिंशः सर्गः ॥

ततः शाखान्तरे लीनमित्यादिश्लोकद्वयमेकान्व दृष्ट्वा पूर्वं सामान्यतो दृष्ट्वा भयाच्चलितमानसा विशेषतो ददर्श । वेष्टितार्जुनवस्त्रं वेष्टितधवलव तं पूर्वोक्तं ॥ १—५ ॥ रुरोदेत्यर्धं ॥ मन्दं रा श्रुत्वा किमिदमिति विचारयिष्यन्तीति भयेनेति

स० पिङ्गाधिपतेः पिङ्गाक्षस्वामिनः ॥ १९ ॥ इत्येकत्रिंशःसर्गः ॥ ३१ ॥

ति० लीनंदृष्ट्वा स्फुरन्तंदृष्ट्वा । चलितमानसा दृष्टरूपोऽयमपिमायामृगोवेतिचलितचित्ता ॥ **स०** विद्युतांसंघातः समूहः वपिङ्गलस्तं ॥ १ ॥ **स०** विनीतवत् स्वार्थेवतिः । विनीताःसन्त्यस्येतिविनीतवान् । सचासाववस्थितश्च तंवा । अथवा विनीतिः तद्वांश्चासाववस्थितश्चतं । यद्वा विनीतं विशिष्टनीतंवदतीतिसविनीतवदः विनीतवाग्मी । सचासौ वस्थितश्चतं ॥ **ति०** वानरस्य निर्धारणेषष्ठी । जातावेकवचनं । वानराणांमध्ये इदंसत्वं जीवः । भीमं प्राकृतप्राणिभयावहं । अतएवतं

[**पा०**] १ ख. निरीक्षमाणातथाप्यधस्तात्तमचिन्त्य. २ क. ग. ङ.—ट. पाठेष्विदमर्धंदृश्यते. ३ ङ.—ट. ४ झ. ट. मिदंमला. ५ क. ङ. च. छ. झ. ञ. ट. सहसासीता.

तं दृष्ट्वा [1]हरिश्रेष्ठं विनीतव[2]दुपस्थितम् ॥ मैथिली चिन्तयामास स्वप्नोऽयमिति भामिनी ॥ ७ ॥

सा वीक्षमाणा पृथुभुग्नवक्त्रं शाखामृगेन्द्रस्य यथोक्तकारम् ॥
ददर्श पि[3]ङ्गाधिपतेरमात्यं वातात्मजं बुद्धिमतां वरिष्ठम् ॥ ८ ॥
सा तं समीक्ष्यैव भृशं [4]विसंज्ञा गतासुकल्पेव बभूव सीता ॥
चिरेण संज्ञां प्रतिलभ्य [5]भूयो विचिन्तयामास विशालनेत्रा ॥ ९ ॥
[6]स्वप्ने मयाऽयं विकृतोऽद्य दृष्टः शाखामृगः शास्त्रगणैर्निषिद्धः ॥
स्वस्त्यस्तु रामाय सलक्ष्मणाय तथा पितुर्मे जनकस्य राज्ञः ॥ १० ॥
[7]स्वप्नोपि नायं न हि मेस्ति निद्रा शोकेन दुःखेन च पीडितायाः ॥
सुखं हि मे नास्ति [8]यतोस्मि हीना तेनेन्दुपूर्णप्रतिमाननेन ॥ ११ ॥
रामेति रामेति [9]सदैव बुद्ध्या विचिन्त्य वाचा ब्रुवती तमेव ॥
[10]तस्यानुरूपां च कथां [11]तमर्थमेवं प्रपश्यामि तथा शृणोमि ॥ १२ ॥
अहं हि तस्याद्य मनोभवेन संपीडिता तद्गतसर्वभावा ॥
विचिन्तयन्ती सततं तमेव तथैव पश्यामि तथा शृणोमि ॥ १३ ॥
मनोरथः स्यादिति चिन्तयामि तथाऽपि बुद्ध्या च वितर्कयामि ॥
किं कारणं तस्य हि नास्ति रूपं सुव्यक्तरूपश्च वदत्ययं माम् ॥ १४ ॥

६—७ ॥ वीक्षमाणा विचारयन्ती । ददर्श पुनर-
कूलोयं स्यादिति ददर्शेत्यर्थः । भुग्नवक्त्रं वक्रमुखं ।
थोक्तकारं आज्ञाकरं ॥ ८ ॥ विसंज्ञा मूर्च्छिता ।
तासुकल्पा मृतप्राया । इवशब्दो वाक्यालङ्कारे ।
चरेण संज्ञां प्रतिलभ्य कालेनैव प्रबोधकेन प्रबुद्धव-
त्यर्थः । विकृतवानरवेषदर्शनेन मूर्च्छिता पुनः
लेन प्रबुद्धेत्यर्थः ॥ ९ ॥ स्वप्ने स्वप्नस्थाने । स्वप्ने
ानरदर्शनं बन्धुविनाशकरमिति भावः ॥ १० ॥
वं दर्शनस्य स्वप्नत्वं संभाव्य पुनर्याथार्थ्यमाह—
प्नोपीति ॥ स्वप्नाभावे हेतुमाह—नहि मेस्ति
नद्रेति । निद्राभावे हेतुः—शोकेनेत्यादिः । एवं प्रतिब-
धकेन निद्राभावमुक्त्वा सुखरूपहेत्वभावाच्च न
नद्रेत्याह—सुखंहीति । इन्दुपूर्णप्रतिमाननेन पूर्णेन्दु-
प्रतिमाननेन ॥ ११ ॥ सदैव बुद्ध्या विचिन्त्य तमेव
राममेव । वाचा ब्रुवती । तस्यानुरूपां विचिन्तितस्या-
भिवदनस्यानुरूपां । कथां तथा शृणोमि । तमर्थं
कथार्थमेवं प्रपश्यामि । एवं उक्तप्रकारेण जानामी-
त्यन्वयः । तदर्थामिति पाठे अयमर्थः । तस्यानुरूपां
रामकीर्तनस्यानुरूपां । तदर्था स रामोर्थोभिधेयो
यस्याः तां ॥ १२ ॥ उक्तमर्थं विवृणोति—अहं हीति
॥ १३ ॥ प्रथमं इदं रामनामकथयितृदर्शनं मनोरथः
अभिलाषमात्रमिति चिन्तयामि । तथापि तथा
चिन्तायां सत्यामपि । बुद्ध्या वितर्कयामि मनोरथो
न भवतीति विचारयामि । किं कारणमिति चेत् तस्य
मनोरथस्य रूपं नास्ति । अयं वानरस्तु सुव्यक्तरूपश्च
मां वदति च । तस्मान्मनोरथो न भवेदेवेत्यर्थः

र्निरीक्ष्यंचेतिमत्वा पुनरपिमायैवेयमितिभयान्मुमोह ॥ ४ ॥ **ति०** यथोक्तकारं कामाज्ञाकरं । यद्वा यथोक्तवेष्टितार्जुनवस्त्राद्या-
ारं । छान्दसोह्रस्वः ॥ **स०** यथोक्तकारं वेष्टितार्जुनवस्त्राकारंवा । उपसर्गाणांचधातुलीनार्थबोधकत्वेनाङ्गिकलोपिकारशब्दएवा-
ारवाची ॥ ८ ॥ **शि०** तं हनूमन्तं । समीक्ष्य रावणत्वेनवितर्क्य । गतासुकल्पा विपन्नाचेष्टारहिताबभूव । चिरेणकिंचिद्विलंबतः
ज्ञांप्रतिलभ्यचिन्तयामास ॥ ९ ॥ **ति०** दृश्यमानोऽयंस्वप्नेमयाविकृतएवदृष्टः । कुतस्तत्राह—**शाखामृगइत्यादि** । एवंदु-

[**पा०**] १ ङ. झ. ट. हरिवरं. २ च. छ. झ. ञ. ट. दुपागतं. ३ ग. घ. च.—ट. पिङ्गप्रवरंमहार्हं. क. कीशप्रवरंमहार्हं.
ङ. ट. विपन्ना. ५ क. ग. च.—ट. चैवं. ख. चित्तेसाचिन्तयामास. ६ क. ख. ग. ङ.—ट. स्वप्नो. ७ ख. स्वप्नोनचायं.
ग.—छ. झ. ञ. ट. यतोविहीना. ९ ख. विचिन्त्यबुद्ध्यासदैव. १० ङ. झ. ट. तस्यानुरूपंचकथांतदर्थां. ११ ख.
दर्थंतमेवपश्यामि.

नमोस्तु वाचस्पतये सवज्रिणे स्वयंभुवे चैव हुताशनाय च ॥
अनेन चोक्तं यदिदं ममाग्रतो वनौकसा तच्च तथाऽस्तु नान्यथा ॥ १५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

जानतापिहनुमता तन्मुखाच्छ्रवणेच्छया सीतांप्रति सुरस्त्रीत्वादिनानाविकल्पैःप्रश्नपूर्वकमनेकहेतुभिःसीतात्वनिर्धारणोक्तिः ॥ १ ॥ सीतयाहनुमन्तंप्रति रावणकर्तृकस्वापहरणान्तनिखिलवृत्तान्तकथनपूर्वकं रावणसंकेतितस्वजीवनकालेमासद्वयस्यावशिष्टत्वोक्त्या तदनन्तरंस्वेनैव स्वजीवितत्यागप्रतिज्ञानम् ॥ २ ॥

सोवतीर्य द्रुमात्तस्माद्विद्रुमप्रतिमाननः ॥ विनीतवेषः कृपणः प्रणिपत्योपसृत्य च ॥ १ ॥
तामब्रवीन्महातेजा हनूमान्मारुतात्मजः ॥ शिरस्यञ्जलिमाधाय सीतां मधुरया गिरा ॥ २ ॥
का[1] नु पद्मपलाशाक्षि क्लिष्टकौशेयवासिनि ॥ द्रुमस्य शाखामालम्ब्य तिष्ठसि त्वमनिन्दिते ॥ ३ ॥
किमर्थं तव नेत्राभ्यां वारि स्रवति शोकजम् ॥ पुण्डरीकपलाशाभ्यां विप्रकीर्णमिवोदकम् ॥ ४ ॥
सुराणाम[2]सुराणां वा नागगन्धर्वरक्षसाम् ॥ यक्षाणां किन्नराणां वा का त्वं भवसि शोभने ॥ ५ ॥
का त्वं भवसि रुद्राणां मरुतां वा वरानने ॥ वसूनां वा वरारोहे देवता प्रतिभासि मे ॥ ६ ॥
किंनु चन्द्रमसा हीना पतिता विबुधालयात् ॥ रोहिणी ज्योतिषां श्रेष्ठा श्रेष्ठसर्व[3]गुणान्विता ॥ ७ ॥
का त्वं भवसि कल्याणि त्वमनिन्दितलोचने ॥ ८ ॥
कोपाद्वा यदि वा मोहाद्भर्तारमसितेक्षणे ॥ वसिष्ठं कोपयित्वा त्वं नासि कल्याण्यरुन्धती ॥ ९ ॥
को नु पुत्रः पिता भ्राता भर्ता वा ते सुमध्यमे ॥ अस्माल्लोकादमुं लोकं गतं त्वमनुशोचसि ॥ १० ॥

॥ १४ ॥ अनेनोक्तं सत्यमस्त्विति देवताः प्रार्थयते—नम इति ॥ हुताशनाय च अग्नये च ॥ १५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्वात्रिंशः सर्गः ॥ ३२ ॥

सः राक्षसीषु सुप्तासु लब्धावसर इत्यर्थः । कृपणः सीतादौस्थ्यदर्शनेन दीनः । जानन्नपि वैदेह्येव वाचयितुमब्रवीत् ॥ १—३ ॥ तव नेत्राभ्यां आनन्दाश्रुयोगार्हाभ्यां । किमर्थं कस्य कुलच्छेदाय । यद्वा किमर्थं किं चेतसि कृत्वा । पुण्डरीकेत्यादि हन्तैतत्सौन्दर्यं प्रणयिना रामेण दृष्टमासीदिति भावः ॥ ४ ॥ सुराणामित्यादिषु निर्धारणे षष्ठी । का त्वं कस्य संबन्धिनीत्यर्थः ॥ ५—७ ॥ हे कल्याणि त्वं का । अनिन्दितलोचने त्वं का भवसीति योजना ॥ ८ ॥ वसिष्ठं कोपयित्वेत्यत्रापि पतिता विबुधालयादित्यनुषज्यते । नासीत्यत्र काकुरनुसंधेया ॥ ९ ॥ अमुं लोकं गतं यमिति शेषः । परलोकं गतं यं पुत्रं पितरं भ्रातरं भर्तारं वानुशोचसि स क इत्यर्थः । गता त्वमित्यपि पाठः । तस्मात् स्वर्गादमुं मनुष्यलोकं गता या

स्स्वप्रंमत्वा स्वस्तिप्रार्थयते । जनकस्य तद्वंश्यस्य ॥ १० ॥ **ति०** एवंहनुमद्वचसोऽवास्तवत्वंनिर्णायानाप्तप्रणीतत्वेनमिथ्यार्थकत्वस्यापिसंभवात्तद्व्यावृत्तयेदेवान्प्रणमति—**नमोस्त्विति** । वाचस्पतित्वेनवाचस्सत्यत्वसंपादनयोग्यता। वज्रिणोपि बृहस्पतितःसत्यवाग्रूपशब्दपारायणग्रन्थरूपमन्त्रलाभात्तदुपासकत्वेनवाचःसत्यत्वसंपादनयोग्यता । स्वयंभुवे सत्यादिरूपब्रह्मणे । वागधिष्ठातृदेवतात्वाचाग्नयेनतिः ॥ १५ ॥ इतिद्वात्रिंशःसर्गः ॥ ३२ ॥

ती० कृपणः दीनः । सीतादैन्यात्स्वयंकृपणइत्यर्थः । अत्रराक्षसीनांनिद्राजाड्यात्त्रिजटास्वप्नश्रवणजन्यभयानन्तरमात्मत्राणायसीतैकशरणत्वेनोपेक्षणाच्चदैवानुग्रहाच्चसीताहनुमतोरयमप्रत्यूहःसंलापइत्यनुसन्धेयं ॥ अस्यार्थस्याष्टपञ्चाशत्सर्गेअङ्गदाग्रेहनुमतैव “ ततस्ताःसहिताःसर्वाः ” इत्यादिनावक्ष्यमाणत्वादिति ॥ **ति०** अत्यूर्ध्वशाखातःसीतासंमुखशाखायामवतीर्य । द्रुम

[पा०] १ ग. पद्मपत्रविशालाक्षि. घ. कालंपद्म. ज. कासिपद्म. २ क. ख. ङ.—ट. मसुराणांच. ३ ङ. झ. ट. गुणाधिका.

रोदनादतिनिश्श्वासाद्भूमिसंस्पर्शनादपि ॥ न त्वां देवीमहं मन्ये राज्ञः संज्ञावधारणात् ॥ ११ ॥
व्यञ्जनानि च ते यानि लक्षणानि च लक्षये ॥ महिषी भूमिपालस्य राजकन्याऽसि मे मता ॥१२॥
रावणेन जनस्थानाद्बलादपहृता यदि ॥ सीता त्वमसि भद्रं ते तन्ममाचक्ष्व पृच्छतः ॥ १३ ॥
यथा हि तव वै दैन्यं रूपं चाप्यतिमानुषम् ॥ तपसा चान्वितो वेषस्त्वं राममहिषी ध्रुवम् ॥१४॥
सा तस्य वचनं श्रुत्वा रामकीर्तनहर्षिता ॥ उवाच वाक्यं वैदेही हनुमन्तं द्रुमाश्रितम् ॥ १५ ॥
पृथिव्यां राजसिंहानां मुख्यस्य विदितात्मनः ॥ स्नुषा दशरथस्याहं शत्रुसैन्यप्रतापिनः ॥ १६ ॥
दुहिता जनकस्याहं वैदेहस्य महात्मनः ॥ सीता च नाम नाम्नाऽहं भार्या रामस्य धीमतः ॥ १७ ॥
समा द्वादश तत्राहं राघवस्य निवेशने ॥ भुञ्जाना मानुषान्भोगान्सर्वकामसमृद्धिनी ॥ १८ ॥
तत्र त्रयोदशे वर्षे राज्येनेक्ष्वाकुनन्दनम् ॥ अभिषेचयितुं राजा सोपाध्यायः प्रचक्रमे ॥ १९ ॥
तस्मिन्संभ्रियमाणे तु राघवस्याभिषेचने ॥ कैकेयी नाम भर्तारं देवी वचनमब्रवीत् ॥ २० ॥
न पिबेयं न खादेयं प्रत्यहं मम भोजनम् ॥ एष मे जीवितस्यान्तो रामो यद्यभिषिच्यते ॥ २१ ॥
यत्तदुक्तं त्वया वाक्यं प्रीत्या नृपतिसत्तम ॥ तच्चेन्न वितथं कार्यं वनं गच्छतु राघवः ॥ २२ ॥

त्वमनुशोचसि । तस्यास्ते को वा पुत्रादिरिति योजना ॥ १० ॥ देवीं देवस्त्रियं । संज्ञावधारणात् संज्ञायते अनयेति संज्ञा लक्षणं । राजलक्षणनिश्चयादित्यर्थः ॥११॥ व्यञ्जनानि स्तनजघनादीनि। "व्यञ्जनं तेमने चिह्ने श्मश्रुण्यवयवेपि च" इति विश्वः । लक्षणानि शुभावर्तरेखादिसामुद्रिकलक्षणानि ॥ १२—१३ ॥ यथा यादृशं ॥ १४ ॥ द्रुमाश्रितं द्रुममूलाश्रितं । सोवतीर्येति द्रुमावतरणस्य पूर्वमुक्तत्वात् । यद्वा पूर्वमग्रादवतरणमुक्तमिति ज्ञेयं ॥ १५ ॥ शत्रुसैन्यप्रतापिनः शत्रुषु जीवत्सु न मे श्वशुरो जीवितवान् । स चेदिदानीं वर्तेत कथमहमेतादृशीमवस्थां प्राप्नुयामिति भावः ॥ १६ ॥ सीता च नामेत्यत्र नामशब्दः प्रसिद्धौ ॥ १७ ॥ अहं एतादृशावस्था अहं । तत्र मम श्वशुरगृहे । द्वादश समाः द्वादश संवत्सरान् । अत्यन्तसंयोगे द्वितीया । तेनाविच्छिन्नैकरूपभोगभोक्तृत्वमुच्यते । मानुषानित्यनेन नात्मनो मानुषत्वं स्वाभाविकमिति सूच्यते । भोगान् भुञ्जाना अनुभवन्ती । काम्यन्त इति कामाः भोगोपकरणानि स्रक्चन्दनादीनि । तेषां समृद्धं समृद्धिः । भावे निष्ठा । तदस्यास्तीति सर्वकामसमृद्धिनी । "अत इनिठनौ" इति इनिप्रत्ययः । अभवमिति शेषः ॥ १८—१९ ॥ संभ्रियमाणे संभारान् संपादयति सति राघवस्याभिषेचने रामाभिषेकनिमित्तं । देवी महिषी ॥ २० ॥ भुज्यत इति भोजनं खाद्यं पेयं च । रामो यद्यभिषिच्यते तदा मम संबन्धियत् भोजनं तन्न पिबेयं न खादेयं । एषः अयमभिषेकः । जीवितस्यान्तश्च ॥ २१ ॥ तत्पूर्वोक्तं यद्वरदानरूपं वाक्यं तन्न वितथं

शब्दस्तदवयवपरः । अतएवाग्रेद्रुमाश्रितइतिवक्ष्यति ॥ १ ॥ ति० रोदनादिति । अश्रुसंबन्धोभूस्पर्शोदेवानांनास्तीतिश्रुतं । तद्वत्त्वात्त्वांनमन्ये । किंचराज्ञोरामस्यसंज्ञावधारणात् नामग्रहणात् ॥ ११ ॥ ती० व्यञ्जनानि संस्थानविशेषविशिष्टतयोत्तमस्त्रीत्वव्यञ्जकानिस्तनजघनादीनि ॥ १२ ॥ अनुक्तेपित्वत्स्वरूपनिश्चयोममास्तीतिप्रौढ्याह—यथाहीति ॥ १४ ॥ स० द्रुमाश्रितं द्रुमशब्देन तच्छायाग्राह्या । अथवा यःपूर्वंद्रुममाश्रितस्तंप्रत्युवाचेति ॥ १५ ॥ स० अमानुषान् देवभोगसमान् ॥ १८ ॥ स० सोपाध्यायः सपुरोहितः ॥ १९ ॥ स० अभिषेचनं अभिषेकसाधनं तस्मिन् ॥ २० ॥ स० अहं प्रत्यहं निरन्तरं । ममभोजनंभोज्यंयद्वर्तते तन्नपिबेयं नखादेयं । कुतएतदित्यतआह—एषइति । एषइतिबुद्ध्याविवेकेनाभिषेकेऽन्वेति । अथवा एषमेजीवितस्यान्तः एतच्चममभोजनं पालनं । तत्किमित्युक्ते यदिरामोऽभिषिच्यते तर्ह्येषः अभिषेकः मेजीवितस्यान्तः । यदिनाभिषिच्यते तर्हि एतत् ममभोजनं पालनमिति । यदि नाभिषिच्यत इतिपदानामावृत्त्याऽन्वयः । "भुजपालनाभ्यवहारयोः" इति

[पा०] १ ख. व्यञ्जनानीह. क. ग. घ. च. छ. झ. ञ. ट. व्यञ्जनानिहि. २ क. ङ. च. ज.—ट. द्रुलात्प्रमथिता. ३ क. ममसत्कथयाश्रितं. ४ घ. राजसिंहस्य. ५ ङ. झ. ट. प्रणाशिनः. क. ख. घ. प्रमाथिनः. ६ ङ. झ. ट. सीतेतिनाम्नाचोक्ताहं. ७ ङ.—ट. ततस्त्रयोदशे. ८ क. रामं. ९ ङ. झ. ट. भर्तारमिदं.

स राजा सत्यवाग्देव्या वरदानमनुस्मरन् ॥ मुमोह वचनं श्रुत्वा कैकेय्याः क्रूरमप्रियम् ॥ २३ ॥
[1]ततस्तु स्थविरो राजा [2]सत्ये धर्मे व्यवस्थितः ॥ ज्येष्ठं यशस्विनं पुत्रं रुदन्राज्यमयाचत ॥ २४ ॥
स पितुर्वचनं श्रीमानभिषेकात्परं प्रियम् ॥ मनसा पूर्वमासाद्य वाचा प्रतिगृहीतवान् ॥ २५ ॥
दद्यान्न प्रति[3]गृह्णीयान्न ब्रूयात्किंचिदप्रियम् ॥ अपि जीवितहे[4]तोर्वा रामः सत्यपराक्रमः ॥ २६ ॥
स विहायोत्तरीयाणि महार्हाणि महायशाः ॥ विसृज्य मनसा राज्यं जनन्यै मां समादिशत् ॥२७॥
साऽहं तस्याग्रतस्तूर्णं प्रस्थिता वनचारिणी ॥ न हि मे तेन हीनाया वासः स्वर्गेपि रोचते ॥ २८ ॥
प्रागेव तु महाभागः सौमित्रिर्मित्रनन्दनः ॥ पूर्वजस्यानुयात्रार्थे द्रुम[5]चीरैरलङ्कृतः ॥ २९ ॥
ते वयं भर्तुरादेशं बहुमान्य दृढव्रताः ॥ प्रविष्टाः स्म [6]पुराऽदृष्टं वनं गम्भीरदर्शनम् ॥ ३० ॥
वसतो दण्डकारण्ये तस्याहममितौजसः ॥ रक्षसाऽपहृता भार्या रावणेन दुरात्मना ॥ ३१ ॥

द्वौ मासौ तेन मे कालो जीवितानुग्रहः कृतः ॥
ऊर्ध्वं द्वाभ्यां तु मासाभ्यां ततस्त्यक्ष्यामि जीवितम् ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

कार्यं चेत्तदा रामो वनं गच्छतु ॥ २२ ॥ देव्यास्संबन्धि स्वकृतं वरदानं स्मृत्वा कैकेय्याः वचनं श्रुत्वा मुमोह ॥ २३—२४ ॥ अभिषेकात्परं प्रियं पितुर्वचनं विवासयाचनारूपं पूर्वं मनसा आसाद्य अङ्गीकृत्य । अथ वाचा प्रतिगृहीतवान् । मनःपूर्वकमङ्गीकृतवानित्यर्थः ॥ २५—२६ ॥ उत्तरीयाणि वासांसि । जनन्यै कौसल्यायै । मां समादिशत् तन्निकटे त्वया स्थातव्यमित्युक्तवानित्यर्थः ॥ २७ ॥ अग्रतः प्रस्थाने हेतुमाह—न हीति ॥ २८ ॥ प्रागेव यद्यपि रामानन्तरमेव लक्ष्मणेन द्रुमचीरादिस्वीकारः तथापि तस्य त्वरातिशयव्यञ्जनाय तथोक्तिः । महाभागः अहं सर्वं करिष्यामीति प्रतिज्ञानुसारेण सर्वविधकैङ्कर्यकरणोचिताभिषेकविघ्नहेतुभाग्यसंपन्नः । सौमित्रिः सृष्टस्त्वं वनवासायेत्युक्तवत्याः गर्भे संजातः । मित्रनन्दनः स लक्ष्मणः सर्वविधकैङ्कर्यकर्तेत्यनुकूलैरभिनन्दनीयः पूर्वजस्येत्यादि । रामकैङ्कर्यानुरूपत्वेन द्रुमचीरादीनामलंकरणत्वमित्यर्थः ॥ २९ ॥ पुरादृष्टं पूर्वमदृष्टं । अत्र गम्भीरशब्देन दुष्प्रवेशत्वं । दर्शनशब्देन स्वरूपमप्युच्यते ॥ ३०—३१ ॥ द्वौ मासौ द्विमासरूपः कालः । मे जीवितानुग्रहः जीवितानुग्राहकः जीवितधारणानुकूलःकृतः । त्यक्ष्यामि स्वयमेवेति भावः ॥ ३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

धातुव्याख्यानात् ॥ २१ ॥ **स०** अभिषेकात्परं प्रियं रावणादिदुष्टनिग्रहशिष्टपरिपालनरूपावतारफलकारणत्वात् ॥ २५ ॥ **ति०** सीतारामंस्तौति—दद्यादिति ॥ २६ ॥ **स०** उत्तरीयाणि । उपलक्षणमेतत् । परिधानवस्त्राण्यपीत्यर्थः ॥ २७ ॥ **स०** भर्तुः दशरथस्य । पुरा अयोध्यानिर्गमात्प्राक् । अदृष्टं ॥ ३० ॥ **स०** द्वौमासौ तत्परिमितःकालः । जीवितानुग्रहः जीवनार्थमनुग्रहरूपः । ततः रावणात् ॥ ३२ ॥ इतित्रयस्त्रिंशःसर्गः ॥ ३३ ॥

[पा०] १ ख. झ. ट. ततस्तं. २ क. ग. ङ. च. छ. झ. ट. सत्यधर्मे. ख. घ. सत्यधर्मेव्यवस्थितः. ३ क. ग. ङ.—ट. गृह्णीयात्सत्यंब्रूयान्नचानृतं. ४ क.—ट. हेतोर्हि. ५ च.—ट. कुशचीरैः. ६ घ. दुराधर्षं.

चतुस्त्रिंशः सर्गः ॥ ३४ ॥

हनुमता स्वप्रश्नस्यसमुचितोत्तरदानेन सीतायाःस्वस्मिन्नाश्वाससंभावनया तांप्रति स्वस्यरामदूतत्वनिवेदनपूर्वकं क्रमेण रामलक्ष्मणकर्तृककुशलप्रश्नाभिवादननिवेदनम् ॥ १ ॥ हनुमता समीपोपसर्पणेनाभिवादने सीतयातस्मिन्रावणत्वबुद्ध्या गर्हणम् ॥ २ ॥ हनुमता पुनःसीतांप्रति रामगुणानुवर्णनादिपूर्वकं स्वस्यसुग्रीवसचिवत्वहनुमन्नामकत्वाद्युक्त्या स्वस्मिन्रावणत्वशङ्कात्यागेनस्ववचनस्यश्रद्धेयत्वप्रार्थना ॥ ३ ॥

तस्यास्तद्वचनं श्रुत्वा हनुमान्हरियूथपः ॥ दुःखाद्दुःखाभिभूतायाः सान्त्वमुत्तरमब्रवीत् ॥ १ ॥
अहं रामस्य संदेशाद्देवि दूतस्तवागतः ॥ वैदेहि कुशली रामस्त्वां च कौशलमब्रवीत् ॥ २ ॥
यो ब्राह्ममस्त्रं वेदांश्च वेद वेदविदां वरः ॥ स त्वां दाशरथी रामो देवि कौशलमब्रवीत् ॥ ३ ॥
लक्ष्मणश्च महातेजा भर्तुस्तेऽनुचरः प्रियः ॥ कृतवाञ्छोकसंतप्तः शिरसा तेऽभिवादनम् ॥ ४ ॥
सा तयोः कुशलं देवी निशम्य नरसिंहयोः ॥ प्रीतिसंहृष्टसर्वाङ्गी हनुमन्तमथाब्रवीत् ॥ ५ ॥
कल्याणी बत गाथेयं लौकिकी प्रतिभाति मा ॥ एति जीवन्तमानन्दो नरं वर्षशतादपि ॥ ६ ॥
तया समागते तस्मिन्प्रीतिरुत्पादिताऽद्भुता ॥ परस्परेण चालापं विश्वस्तौ तौ प्रचक्रतुः ॥ ७ ॥
तस्यास्तद्वचनं श्रुत्वा हनुमान्हरियूथपः ॥ सीतायाः शोकदीनायाः समीपमुपचक्रमे ॥ ८ ॥
यथा यथा समीपं स हनुमानुपसर्पति ॥ तथा तथा रावणं सा तं सीता परिशङ्कते ॥ ९ ॥

दुःखात् दुःखाभिभूतायाः उत्तरोत्तरं दुःखं प्राप्तायाः ॥१॥ तव दूतः त्वां प्रति प्रेषितो दूतः ॥२॥ वेद वेत्ति। वेदविदां वेदार्थज्ञानवतां ॥३—४॥ प्रीतिसंहृष्टसर्वाङ्गी प्रीत्यापुलकितसर्वाङ्गी ॥५॥ दुःखबाहुल्येपि रामदर्शनप्रत्याशया कृच्छ्रेणजीवन्त्याः देव्याः जीवनफलस्य लब्धत्वात्तत्संवादिनीं गाथां स्तौति—कल्याणीति ॥ कल्याणी सत्यार्था । मा प्रतिभाति मां प्रतिभाति । वर्षशतादपीत्यन्ते इतिकरणं बोध्यम् ॥ ६ ॥ तया सीतया । तस्मिन् हनुमति विषये । अद्भुता प्रीतिरुत्पादिता । परस्परेणेत्यादिकं वक्ष्यमाणस्य सर्गस्य संग्रहः ॥ ७ ॥ उपचक्रमे गन्तुमिति शेषः । प्रापेतिवार्थः ॥ ८ ॥ रावणं परिशङ्कते रामकुशलकथनेन

ति० दुःखाद्दुःखाभिभूतायाइत्यलुगार्षः । दुःखपरंपराखिन्नायाइत्यर्थः ॥ स० यद्वा दुःखेनातन्तीतिदुःखान्तास्तेषामिवयद्दुःखं तेनाभिभूतायाः । यद्वा दुःखात् सान्त्वमुत्तरमब्रवीदित्यन्वयः । दुश्चखंचतयोःसमाहारः द्वन्द्वैकवद्भावोवा उत्तरपदलोपिसमासान्तंवा । तस्मात् सीताएवंक्लिश्यतीतिदुःखात् स्वागमनप्रयोजनंजातमितिखात् सुखात् । " दुर्दुःखमितिसंप्रोक्तंखंसुखंचोच्यतेबुधैः " इतिवचनाद्दुःखशब्दउभयवाची ॥ १ ॥ ती० तवागतः समीपमितिशेषः ॥ स० रामस्यसन्देशादागतइतितवदूतः ॥ २ ॥ ती० ब्राह्ममस्त्रंयोवेद । अनेनसर्वास्त्रपारगत्वमुक्तं । तदस्त्रदेवतायाब्रह्मणःसर्वजगत्समष्टित्ववत्तदस्त्रस्यापिसर्वास्त्रसमष्टित्वात् वेदांश्चेत्यनेन वैदिककर्ममार्गपरत्वं । वेदविदांवरइत्यनेन ज्ञानमार्गपरत्वमुक्तं ॥ स० योब्राह्ममस्त्रं वेदांश्च वेदेत्यन्वयः । यद्वा वेदवेदेतिद्विरभिधानेन उभयोरपिमुख्यतामभिप्रैति । यद्वा वेदान् व्याख्येयानृगादीन्। वेदवेदान् भारतादीन्व्याख्यानरूपान्विदन्ति तेतथा । तेषु वरइति । " इतिहासपुराणःपञ्चमोवेदानांवेदः " इत्युक्तेः ॥ ३ ॥ स० प्रीतिसंहृष्टसर्वाङ्गी अन्तःसंभृतस्तोषइतिसूचकरोमाञ्चितसर्वावयवा ॥ ५ ॥ स० जीवन्तंनरं आनन्दःवर्षशतादेतीतिलौकिकी लोकसिद्धागाथा या सेयं मा मांप्रति कल्याणी कल्याणसूचिका प्रतिभाति । बत हर्षः विस्मयोवा । " जीवन्नरोभद्रशतानिपश्यति " इत्युक्तेः । अस्यस्वविषयेसीतयोदाहृतत्वाज्जीवन्तीमयमितिवक्तव्यं । तथापि नरंजीवन्तमित्युक्तिः सर्वाअपियोषितःपुरुषेपरतन्त्राः । तत्राप्यहं सदातन्मात्रायत्तमङ्गलेतिसूचयितुमिति मन्तव्यं ॥ ६ ॥ ति० तस्मिन् तस्मिन्काले रामलक्ष्मणकुशलवचश्श्रवणकाले । तयोः रामलक्ष्मणयोःसमागमकालइव । सीतायास्तेनवचसा अद्भुता अचिन्त्यस्वरूपाप्रीतिरुत्पादिता । किंच तयोः सीताहनुमतोः । तस्मिन्समागमेपरस्परस्यअद्भुता प्रीतिरुत्पादिता । देवीदृष्टेतिहनुमतःप्रीतिः । रामदूतोदृष्टइतिदेव्याःप्रीतिः । अतस्तौविश्वस्तौभूत्वा परस्परेणालापंचक्रतुः ॥ ७ ॥ ति० तद्व-

[पा०] १ ङ. झ. ट. रामस्सत्वां. २ ङ. झ. ट. प्रतिसंहृष्ट. ३ क. ख. ग. प्रतिभातिमे. ४ ग. ङ.—झ. तयोःसमागमे. ५ ङ. झ. ट. शोकतप्तायाः. ६ घ. हनूमान्ससमीपमुप. क. समीपंतां.

अहो [1]धिग्दुष्कृतमिदं कथितं हि यदस्य मे ॥ रूपान्तरमुपागम्य स एवायं हि रावणः ॥ १० ॥
तामशोकस्य [2]शाखां सा विमुक्त्वा शोककर्शिता ॥ तस्यामेवानवद्याङ्गी धरण्यां समुपाविशत् ॥११॥
हनुमानपि [3]दुःखार्तां तां दृष्ट्वा भयमोहिताम् ॥ अवन्दत महाबाहुस्ततस्तां जनकात्मजाम् ॥
सा चैनं [4]भयवित्रस्ता भूयो [5]नैवाभ्युदैक्षत ॥ १२ ॥
तं दृष्ट्वा वन्दमानं तु सीता शशिनिभानना ॥ अब्रवीद्दीर्घमुच्छ्वस्य वानरं मधुरस्वरा ॥ १३ ॥
मायां प्रविष्टो मायावी यदि त्वं रावणः स्वयम् ॥ उत्पादयसि मे भूयः संतापं तन्न शोभनम् ॥ १४ ॥
स्वं परित्यज्य रूपं यः परिव्राजक[6]रूपधृत् ॥ जनस्थाने मया दृष्टस्त्वं स [7]एवासि रावणः ॥ १५ ॥
उपवासकृशां दीनां कामरूप निशाचर ॥ संतापयसि मां भूयः [8]संतप्तां तन्न शोभनम् ॥ १६ ॥
अथवा नैतदेवं हि यन्मया परिशङ्कितम् ॥ मनसो हि मम प्रीतिरुत्पन्ना तव दर्शनात् ॥ १७ ॥
यदि रामस्य दूतस्त्वमागतो भद्रमस्तु ते ॥ पृच्छामि त्वां हरिश्रेष्ठ [9]प्रिया रामकथा हि मे ॥
गुणान्रामस्य कथय प्रियस्य मम वानर ॥ १८ ॥
चित्तं हरसि मे सौम्य नदीकूलं यथा रयः ॥ १९ ॥
अहो स्वप्नस्य सुखता याऽहमेवं चिराहृता ॥ प्रेषितं नाम पश्यामि राघवेण वनौकसम् ॥ २० ॥
स्वप्नेऽपि यद्यहं वीरं राघवं सहलक्ष्मणम् ॥ पश्येयं नावसीदेयं स्वप्नोपि मम मत्सरी ॥ २१ ॥
नाहं स्वप्नमिमं मन्ये स्वप्ने दृष्ट्वा हि वानरम् ॥ न शक्योऽभ्युदयः प्राप्तुं [10]प्राप्तश्चाभ्युदयो मम ॥ २२ ॥
किंनु स्याच्चित्तमोहोऽयं भवेद्वातगतिस्त्वियम् ॥ उन्मादजो विकारो वा स्यादियं मृगतृष्णिका ॥२३॥

संजातरावणमायास्मरणा पुनः शङ्कितवतीत्यर्थः ॥९॥ मे मया । अस्य पुरतः यत्कथितं तत् दुष्कृतं अनुचितं कृतं । इदं अनालोच्य कथनं । धिक् । अहो इति खेदे । खेदहेतुमाह—रूपान्तरमिति । वर्तत इति शेषः ॥ १० ॥ यद्यपि पूर्वं शिंशुपाशाखावलम्बनमुक्तं तथापि शिंशुपाशाखा अशोकसंवलितेति क्वचिच्छिंशुपेत्युच्यते क्वचिदशोक इति । अतो न कश्चिद्दोषः ॥ ११ ॥ भयवित्रस्ता भयहेतुना वित्रस्ता ॥ १२—१३ ॥ मायावी स्वतएव मायावान् । " अस्मायामेधास्रजो विनिः " इति विनिप्रत्ययः । इदानीं मायां प्रविष्टः आश्रितः । स्वयं रावणस्सन् मम सन्तापमुत्पादयसीति यदि उत्पादयसीति यत् तत्सन्तापोत्पादनं ते न शोभनं । तवाप्यभीष्टविरहसन्तापो भविष्यतीत्यर्थः ॥ १४—१६ ॥ हनुमन्तं रावणमाशङ्क्य तज्जनितमनःप्रसादमालोच्य तां शङ्कां निराचष्टे—अथवेति ॥ मया यत् परिशङ्कितं एतन्नैवं हि नैवमेव । कुत इत्यत आह—मनस इति ॥ १७—१९ ॥ इह रामदूतागमनमत्यन्तासंभावितमिति मत्वा पुनर्बहुधा शङ्कते—अहो इत्यादिना ॥ २० ॥ स्वप्नेऽपि यद्यहं वीरं । राक्षसीमध्यवासकृतं दुःखं स्वप्नदृष्टोपि निवर्तयितुं क्षम इति वीर्यातिशयोक्तिः । राघवं सहलक्ष्मणं । विश्लेषदशायामुभयोर्दर्शनात् स्वप्नदर्शनेप्युभयोर्दर्शनं भवेत् । यद्वा तदानीमुभयोर्विश्लेषात्तौ किं परस्परं संयुक्तौ न वेति शङ्कते—पश्येयं नावसीदेयं । एवमुभयोस्स्वप्ने दर्शनेपि महद्दुःखं निवर्तेत । कथंचिज्जीवितं धारयेयं । स्वप्नोपि मम मत्सरी । मद्दशां विज्ञाय राम इव स्वप्नोपि मयि मात्सर्यं करोति ॥ २१—२२ ॥ एवं यथार्थस्वप्नपक्षौ निरस्य पुनश्चतुरो विभ्रमपक्षानुत्प्रेक्षते—किंनु स्यादिति ॥ चित्तमोहः रामक्षेमवार्ताश्रवणकुतूहलकन्दलितनिरन्तरचि-

---

चनं कल्याणीत्यादिसीतावचनं ॥ ८ ॥ **ति०** चित्तमोहः निरन्तररामध्यानजनितस्तत्प्रेषितदूतदर्शनसंभाषणादिविषयोभ्रमः । वातगतिः भूतावेशादिजनितोभ्रमः । उन्मादोविरहिणांपित्तोद्रेकरूपावस्थाविशेषजोभ्रमः । मृगतृष्णिका तद्वत्प्रत्यक्षोभ्रमः ॥ **स०** चित्तमोहः सर्वदारामध्यानात्तद्वृत्तेनसहसंभाषणादिरूपोमनोविकारः । वातगतिः पिशाचव्यापारः । ऊषरभूमौजलवत्प्रतीतंमृग-

[पा०] १ ङ. ज. झ. ट. धिग्धिक्कृतमिदं. २ ङ. झ. ट. शाखांतु. घ. साशाखां. ३ ख. ग. दुःखार्तस्तां. ४ च.—ट. भयसंत्रस्ता. ५ क. ङ. छ.—ट. नैनमुदैक्षत. ६ ग. ङ—ट. रूपवान्. ७ ङ. झ. ट. एवहि. ८ ख. घ. ङ. झ. ट. संतापंतन्नशोभनं. ९ घ. ब्रूहिरामकथांहिमे. १० ख. जातश्चा. क. ग. घ. प्रियश्चा.

अथवा नायमुन्मादो मोहोप्युन्मादलक्षणः ॥ संबुध्ये चाहमात्मानमिमं चापि वनौकसम् ॥ २४ ॥
इत्येवं बहुधा सीता संप्रधार्य बलाबलम् ॥ रक्षसां कामरूपत्वान्मेने तं राक्षसाधिपम् ॥ २५ ॥
एतां बुद्धिं तदा कृत्वा सीता सा तनुमध्यमा ॥ न प्रतिव्याजहाराथ वानरं जनकात्मजा ॥ २६ ॥
सीता[1]याश्चिन्तितं बुद्ध्वा हनुमान्मारुतात्मजः ॥ श्रोत्रानुकूलैर्वचनैस्तदा तां सं[2]प्रहर्षयत् ॥ २७ ॥
आदित्य इव तेजस्वी लोककान्तः शशी यथा ॥ राजा सर्वस्य लोकस्य देवो वैश्रवणो यथा ॥२८॥
विक्रमेणोपपन्नश्च यथा विष्णुर्महायशाः ॥ सत्यवादी मधुरवाग्देवो वाचस्पतिर्यथा ॥ २९ ॥
रूपवान्सुभगः श्रीमान्कन्दर्प इव मूर्तिमान् ॥ [3]स्थानक्रोधः प्रहर्ता च श्रेष्ठो लोके महारथः ॥३०॥
बाहुच्छायामवष्टब्धो यस्य लोको महात्मनः ॥ ३१ ॥
अपकृष्याश्रमपदान्मृगरूपेण राघवम् ॥ शून्ये येनापनीतासि तस्य द्रक्ष्यसि [4]यत्फलम् ॥ ३२ ॥
[5]नचिराद्रावणं संख्ये यो वधिष्यति वीर्यवान् ॥ रोषप्रमुक्तैरिषुभिर्ज्वलद्भिरिव पावकैः ॥ ३३ ॥
तेनाहं प्रेषितो दूतस्त्वत्सकाशमिहागतः ॥ त्वद्वियोगेन दुःखार्तः स त्वां कौशलमब्रवीत् ॥ ३४ ॥
लक्ष्मणश्च महातेजाः सुमित्रानन्दवर्धनः ॥ अभिवाद्य महाबाहुः [6]स त्वां कौशलमब्रवीत् ॥ ३५ ॥
रामस्य च सखा देवि सुग्रीवो नाम वानरः ॥ राजा वानरमुख्यानां स त्वां कौशलमब्रवीत् ॥३६॥
नित्यं स्मरति रा[7]मस्त्वां ससुग्रीवः सलक्ष्मणः ॥ दिष्ट्या जीवसि वैदेहि राक्षसीवशमागता ॥ ३७ ॥

न्तासंततिपरिणतिविशेषरूपः कोपि मनसो विभ्रम इत्यर्थः। असत्यश्चित्तसंकल्पो वा। वातगतिः उपवासादिप्रयुक्तधातुक्षोभजो वातविकाररूपो भ्रमः। तदध्यारोपो वा यथा त्वरूपस्य वायोः पांसुपुञ्जरूपविशेषोध्यारोपः । उन्मादजो विकारो वा। उन्मादो नाम विरहिणां कश्चिदवस्थाविशेषः। तज्जो विकारो भ्रमः। मृगतृष्णिका अन्यस्यान्यरूपेणावभासः। चित्तमोहोन्मादावप्रकृतिस्थप्रतिभासविशेषौ । वातगतिमृगतृष्णिके तु प्रकृतिस्थस्य ॥ २३ ॥ अनन्तरोक्तचतुष्टयं निराकरोति—अथवेत्यादिना ॥ अथवा अयं वानरतद्भाषणादिप्रतिभासः। उन्मादो न। मोहोप्युन्मादलक्षणः उन्मादस्य लक्षणमिव लक्षणं यस्य स तथोक्तः। अतः उन्मादनिराकरणेनैव सोपि निराकृत इत्यर्थः। अनयोर्निराकरणमितरपक्षद्वयनिराकरणस्योपलक्षणं कुत इत्यत आह—संबुध्य इति। अहं आत्मानमिमं वनौकसं चापि संबुध्ये सम्यग्जानामि॥ २४॥ बलाबलं मोहत्वादीनामबलत्वं रावणत्वस्य बलवत्त्वं च ॥ २५—२६ ॥ संप्रहर्षयत् संप्राहर्षयत् ॥ २७ ॥ राजेति। कुबेरस्य सर्वलोकराजत्वमुक्तं। "राजाधिराजाय प्रसह्यसाहिने नमो वयं वैश्रवणाय कुर्महे" इति ॥ २८ ॥ सत्यमधुरवाक्त्वं बृहस्पतेर्वाचस्पतित्वादेव॥२९॥रूपवान् सौन्दर्यवान्।सुभगः रमणीयः। श्रीमान् कान्तिमान्। स्थाने क्रोधस्थाने क्रोधः यस्यासौ स्थानक्रोधः । प्रहर्ता क्रोधविषयेप्रहर्ता । आदित्य इवेत्यादिनोक्तैर्विशेषणैर्विशिष्टो राम इतियोज्यं॥ ३०॥ लोकः महात्मनो यस्य बाहुच्छायां अवष्टब्धः आश्रितः। तं मृगरूपेण प्रशस्तमृगेण हेतुना। आश्रमपदादपकृष्य शून्ये येनापनीतासि तस्य रावणस्य

तृष्णा। तद्द्वयमपिकिंभ्रमविशेषइत्यर्थः ॥ २३ ॥ **स०** उन्मादस्यलक्षणमिवलक्षणंयस्यपिशाचस्यसतथा एतेन। नपुनरुक्तिर्नेवातगतेरसंग्रहश्च। मोहोनेति उन्मादलक्षणोपिनेतितत्रावृत्तिः। संबुध्ये परीक्ष्याजानामि ॥ २४ ॥ **ती०** बलाबलं बलं रक्षसां कामरूपधारणंबलं। अबलं रामदूतस्यापिवानरस्यात्रागमनासामर्थ्यंअबलंसंप्रधार्येत्यर्थः ॥ २५ ॥ **ति०** निश्चितं रावणत्वनिश्चयं। श्रोत्रानुकूलैर्वचनैः रामगुणकथनरूपैः। विश्वासार्थं 'गुणान्रामस्यकथय' इतिसीतोक्तेरितिभावः। संप्रहर्षयन् वक्ष्यमाणंवचःकथयामासेतिशेषः ॥ २७ ॥ **ति०** स्थानक्रोधे उचितक्रोधविषये । क्रोधौचित्येप्रहर्तेतियावत् ॥ **स०** स्थानक्रोधी उचितस्थलेकोपी। प्रहर्ता वैरिहन्ता। स्थानक्रोधप्रहर्तेतिपाठे कोपयोग्यस्थानेशिक्षाकर्तेत्यर्थः ॥ ३० ॥ इतिचतुस्त्रिंशः सर्गः ॥ ३४ ॥

[पा०] १ ग. ङ.—ट. सीतायानिश्चितं. २ ग. समहर्षयत् क. झ. ट. संप्रहर्षयन्. ३ झ. स्थानक्रोधे. ठ. स्थानक्रोधी. ४ ङ. झ. ट. तत्फलं. ५ —ट. अचिरात्. ६ क. ख. ग. सोपि. ७ ङ.—ट. तेरामः.

नचिराद्द्रक्ष्यसे रामं लक्ष्मणं च [1]महाबलम् ॥ मध्ये वानरकोटीनां [2]सुग्रीवं चामितौजसम् ॥ ३८ ॥
अहं सुग्रीवसचिवो हनुमान्नाम वानरः ॥ प्रविष्टो नगरीं लङ्कां लङ्घयित्वा महोदधिम् ॥ ३९ ॥
कृत्वा मूर्ध्नि पदन्यासं रावणस्य दुरात्मनः ॥ त्वां द्रष्टुमुपयातोऽहं समाश्रित्य पराक्रमम् ॥ ४० ॥
नाहमस्मि तथा [3]देवि यथा मामवगच्छसि ॥ विशङ्का त्यज्यतामेषा श्रद्धत्स्व वदतो मम ॥ ४१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

पञ्चत्रिंशः सर्गः ॥ ३५ ॥

सीतया रामसुग्रीवसख्यप्रकारंरामलक्ष्मणलक्षणंचपृष्टेनहनुमता तदङ्गलक्षणनिरूपणेनसह सविस्तरंरामसुग्रीवसख्यप्रभृतिस्वीयसीतादर्शनान्तवृत्तवृत्तान्तकथनपूर्वकं प्रभञ्जनादञ्जनायांस्वजननादिप्रतिपादनम् ॥ १ ॥

तां तु रामकथां श्रुत्वा वैदेही वानरर्षभात् ॥ उवाच वचनं [4]सान्त्वमिदं मधुरया गिरा ॥ १ ॥
क्व ते रामेण संसर्गः कथं जानासि लक्ष्मणम् ॥ वानराणां नराणां च कथमासीत्समागमः ॥ २ ॥
यानि रामस्य [5]लिङ्गानि लक्ष्मणस्य च वानर ॥ तानि [6]भूयः समाचक्ष्व न मां शोकः समाविशेत् ॥३॥
कीदृशं तस्य संस्थानं रूपं [7]रामस्य कीदृशम् ॥ कथमूरू कथं बाहू लक्ष्मणस्य च शंस मे ॥ ४ ॥
एवमुक्तस्तु वैदेह्या हनुमान्मारुतात्मजः ॥ ततो रामं यथातत्त्वमाख्यातुमुपचक्रमे ॥ ५ ॥
जानन्ती [8]बत दिष्ट्या मां वैदेहि परिपृच्छसि ॥ भर्तुः कमलपत्राक्षि संस्थानं लक्ष्मणस्य च ॥ ६ ॥
यानि रामस्य चिह्नानि लक्ष्मणस्य च यानि वै ॥ लक्षितानि विशालाक्षि वदतः शृणु तानि मे ॥७॥
रामः कमलपत्राक्षः [9]सर्वसत्त्वमनोहरः ॥ रूपदाक्षिण्यसंपन्नः प्रसूतो जनकात्मजे ॥ ८ ॥
तेजसाऽऽदित्यसंकाशः क्षमया पृथिवीसमः ॥ बृहस्पतिसमो बुद्ध्या यशसा वासवोपमः ॥ ९ ॥

यत्फलं मरणरूपं तत् द्रक्ष्यसीति योजना । यद्वा बाहुच्छायामवष्टब्धो यस्य लोको महात्मनः असावादित्य इव तेजस्वीत्येवं योजना ॥ ३१—४० ॥ वञ्चनार्थं परिगृहीतवेष इति मां यथावगच्छसि तथा नास्मीत्यर्थः ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुस्त्रिंशः सर्गः ॥ ३४ ॥

लिङ्गानि चिह्नानि ॥ ३ ॥ संस्थानं अवयवसंनिवेशः । रूपं आकारः वर्णः कान्तिर्वा ॥४—५॥ बतेत्यामन्त्रणे । जानन्ती त्वं दिष्ट्या मां परिपृच्छसीति संबन्धः ॥ ६ ॥ लक्षितानि त्वया दृष्टानि । मे मत्तः ॥ ७ ॥ रामः सर्वाङ्गसुन्दरः । कमलपत्राक्षः कान्तिप्रवाहे आवर्त इव अत्यन्तमाकर्षकनयनशोभः । तादृशनयनसौन्दर्यसीमाभूमिमाह—सर्वसत्त्वमनोहरः । तिर्यग्जातितया विटपाद्विटपं प्लवतो ममापि चित्तापहारकः अविशेषज्ञस्यापि मनोहर इत्यर्थः । रूपदाक्षिण्यसंपन्नः रूपमित्येतद्विग्रहगुणानामुपलक्षणं दाक्षिण्यमित्यात्मगुणानामुपलक्षणं देहगुणैरात्मगुणैश्चान्यून इत्यर्थः । संपन्नः प्रसूतः । इदं सर्वं नागन्तुकं किंतु औत्पत्तिकमित्यर्थः । अत्युत्कटं वदसि किमेवंविधोपरोप्यस्ति न वेत्यपेक्षायामाह—जनकात्मजे इति । भवती च तादृशीत्यर्थः ॥ ८ ॥ संग्रहेणोक्तान्गुणान्विवृणोति

तनि० गुरुकुलवासायोग्यानांवानराणांवसिष्ठशिष्याणांचईदृशसमागमःकथंजातः । शास्त्रवश्यानामेवगुरुकुलवासयोग्यत्वात् । रमयतीतिरमन्तेयोगिनइतिचरामः । रामत्वमेवाह—**कमलपत्राक्षइति** । सर्वसत्वमनोहरइति । तत्रवानरजातीयमच्चित्तापकर्षणमेवप्रमाणमितिध्वन्यते । तर्ह्येवंविधःपुमान्विद्यतेकिमितिचेन्नेत्याह—जनकात्मजइति । “ तुल्यशील ” इत्यादिना

[पा०] १ क. ग. घ. च. छ. झ. ञ. ट. महारथं. २ ग. च. छ. ज. ञ. सुग्रीवममितौजसं. ३ च. मातर्यथा. ४ घ. सौम्यमिदं. ५ क. ख. घ. ङ. झ. ट. चिह्नानि. ६ ग. घ. ङ.—ज. भूयस्त्वमाचक्ष्व. ७ ङ.—ट. तस्यच. ८ ख. यदिदिष्ट्या. ९ ङ.—ट. पूर्णचन्द्रनिभाननः, ख. ग. घ. सर्वभूतमनोहरः, क. सर्वभूतहितेरतः.

रक्षिता जीवलोकस्य स्वजनस्या[1]भिरक्षिता ॥ रक्षिता स्वस्य वृत्तस्य[2] धर्मस्य च परन्तपः ॥ १० ॥
रामो भामिनि लोकस्य[3] चातुर्वर्ण्यस्य रक्षिता ॥ मर्यादानां च लोकस्य कर्ता कारयिता च सः ॥११॥
अर्चिष्मानर्चितो[4]ऽत्यर्थं ब्रह्मचर्यव्रते स्थितः ॥ साधूनामुपकारज्ञः प्रचारज्ञश्च कर्मणाम् ॥ १२ ॥
राजविद्याविनीत[5]श्च ब्राह्मणानामुपासिता[6] ॥ श्रुतवाञ्शीलसंपन्नो[7] विनीतश्च परन्तपः ॥ १३ ॥
यजुर्वेदविनीतश्च वेदविद्भिः[8] सुपूजितः ॥ धनुर्वेदे च वेदेषु वेदाङ्गेषु च निष्ठितः ॥ १४ ॥
विपुलांसो महाबाहुः कम्बुग्रीवः शुभाननः ॥ गूढजत्रुः सुताम्राक्षो रामो[9] देवि जनैःश्रुतः ॥ १५ ॥
दुन्दुभिस्वननिर्घोषः स्निग्धवर्णः प्रतापवान् ॥ समः[10] समविभक्ताङ्गो वर्णं श्यामं समाश्रितः ॥१६॥
त्रिस्थिरस्त्रिप्रलम्बश्च त्रिसमस्त्रिषु चोन्नतः ॥ त्रिताम्रस्त्रिषु च स्निग्धो गम्भीरस्त्रिषु नित्यशः ॥१७॥
त्रिवलीमांस्त्र्यवनतश्चतुर्व्यङ्गस्त्रिशीर्षवान् ॥ चतुष्कलश्चतुर्लेखश्चतुष्किष्कुश्चतुस्समः ॥ १८ ॥

—तेजसेत्यादिना ॥ ९—११ ॥ ब्रह्मचर्यव्रते स्थितः गृहस्थस्यास्य ब्रह्मचर्यं नाम ऋतोरन्यत्र स्त्रीसङ्गमत्यागः । तदाह मनुः—"षोडशर्तुनिशाः स्त्रीणां तस्मिन्युग्मासु संविशेत् । ब्रह्मचार्येव पर्वाद्याश्चतस्रश्च विवर्जयेत् " ॥ प्रचारज्ञः प्रयोगज्ञः । ऐहिकामुष्मिकानां कर्मणां । प्रचारं गतिं हेतुफलभावव्यवस्थां तत्त्वतो जानातीत्यर्थ इत्यप्याहुः ॥ १२॥ राजविद्याविनीतश्च चतस्रो राजविद्याः । "आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती । एता विद्याश्चतस्रस्तु लोकसंस्थितिहेतवः" इत्युक्ताः । तासु विनीतः शिक्षितः । श्रुतवान् अवधृतवान् । शीलसंपन्नः सदाचारसंपन्नः । पूर्वं यज्ञादिकर्मानुष्ठातृत्वमुक्तमिति नपुनरुक्तिः ॥ १३ ॥ वेदेषु यजुर्व्यतिरिक्तवेदेषु । अनेन स्वस्य यजुर्वेदत्वं सूचितं ॥ १४ ॥ एवमात्मगुणानभिधाय विग्रहगुणानाशास्ते—विपुलांस इत्यादिना ॥ गूढजत्रुः अस्पष्टभुजसन्ध्यस्थिः ॥ १५ ॥ समः अन्यूनातिरिक्तदेहप्रमाणः ॥ १६ ॥ त्रिस्थिर इति त्रिषु स्थानेषु स्थिरः । तथोक्तं सामुद्रिके—" उरश्च मणिबन्धश्च मुष्टिश्च नृपतेः स्थिराः " इति । त्रिप्रलम्बः त्रिषु प्रलम्बः । " दीर्घभ्रूबाहुमुष्कस्तु चिरजीवी धनी नरः " इति वचनात् । अन्यत्र तु । " त्रयश्च यस्य विद्यन्ते प्रलम्बा मेढ्रबाहवः " इति । त्रिसमः त्रिषु समः । " केशाग्रं वृषणं जानु समा यस्य स भूपतिः " इति वचनात् । त्रिषु चोन्नतः । तदाहवराहमिहिरः—" उन्नतकुक्षिः क्षितिपः परिमण्डलोन्नतनाभयः क्षितिपाः । हृदयं न वेपनं पृथु समोन्नतं मांसलं च नृपतीनां " इति ॥ त्रिताम्रः त्रिषु ताम्रः । " श्लिष्टाङ्गुलीरुचिरताम्रनखौ सुपार्ष्णी पादौ करावपि सुरक्तनखात्मरेखौ " इति वचनात् । " नेत्रान्तनखपाण्यङ्घ्रितलैस्ताम्रैस्त्रिभिस्सुखी " इति च । त्रिषु स्निग्धः । " स्निग्धा भवन्ति वै येषां पादरेखाः शिरोरुहाः । तथा लिङ्गमणिस्तेषां महाभाग्यं विनिर्दिशेत् " इति सामुद्रिकवचनात् । त्रिषु गम्भीरः । अत्र वररुचिः—" स्वरः सत्त्वं च नाभिश्च गम्भीरः शस्यते बुधैः " इति । ब्राह्मे तु—" स्वरे गतौ च नाभौ च गम्भीरस्त्रिषु शस्यते " इति । नित्यश इति सर्वत्र विशेषणीयं । तेन रोगाद्युपाधिकृतरागादिनिवृत्तिः ॥ १७ ॥ त्रिवलीमान् उदरे वलित्रयवान् । कण्ठवलित्रयवान्वा । अत्र गर्गः—" स्थिरा त्रिरेखा सुभगोपपन्ना स्निग्धा सुमांसोपचिता सुवृत्ता । न

भवत्येवप्रसिद्धा नपुमान्कश्चिदितिभावः ॥ **ती०** प्रसूतइत्यनेन गुणानामुत्पत्तिविशिष्टत्वमवगम्यते ॥ ८ ॥ **ति०** लोकस्य सर्वस्यकर्ता हर्ताभर्ताचेतिशेषः । अनेनसृष्टिस्थितिसंहारकर्तृत्वरूपंब्रह्मलक्षणंरामस्योक्तंगूढं । एवंज्ञानंतत्क्षणंभगवतैवस्वमायातिरस्करिणीनिरासादितिबोध्यं । लोकस्यमर्यादानां वर्णाश्रममर्यादानांकर्ता । भगवदवतारत्वात् । कारयिता कालात्मना अवतीर्णरूपेणचातुर्वर्ण्यरक्षिताच ॥ **स०** चातुर्वर्ण्यस्य स्वार्थेष्यञ् ॥ ११ ॥ **ति०** अर्चिष्मान् आदित्यरूपःसन्नर्चितः । त्रैवर्णिकैरितिशेषः । ब्रह्मचर्यव्रते गृहस्थोचितपर्वादिवर्जनपूर्वकमृतुगमनलक्षणेस्थितः । वस्तुतस्तु गार्हस्थ्येप्यस्खलितरेताः । मनस्संकल्पेनैवदेव्यारतिप्रीतेःसंतानस्यचसंपादनमितिभावः ॥ **स०** यद्वा स्वरतलाद्भोगार्थमनपेक्षितस्त्रीसङ्गादिरितिब्रह्मचर्यव्रतंवा ॥ १२ ॥ **स०** विशिष्ययजु-

[**पा०**] १ क. घ.—ट. स्वजनस्यचरक्षिता. २ क. धर्मस्यवृत्तस्यच. ३ ख. लोकेऽस्मिंश्चातुर्वर्ण्यस्य. ४ ख. घ. नर्चितो नित्यं. ५ ङ.—ट. राजनीत्यांविनीतश्च. ६ ङ. ज. झ. ट. मुपासकः. ७ क. च. छ. ज. ञ. ट. ज्ञानवाञ्शीलसंपन्नः. ८ क. ज. वेदविद्भिश्च. ९ ङ.—ट. रामोनाम. ख. देविरामो. १० घ. ङ. झ. ट. समश्चसुविभक्ताङ्गः.

चतुर्दशसमद्वन्द्वश्चतुर्दंष्ट्रश्चतुर्गतिः ॥ महोष्ठहनुनासश्च पञ्चस्निग्धोष्टवंशवान् ॥ १९ ॥
दशपद्मो दशबृहत्त्रिभिर्व्याप्तो द्विशुक्लवान् ॥ षडुन्नतो नवतनुस्त्रिभिर्व्याप्नोति राघवः ॥ २० ॥

चातिदीर्घा चतुरङ्गुला च ग्रीवा सुदीर्घा भवतीह धन्या " इति ॥ त्र्यवनतः त्रीण्यवनतानि निम्नानि यस्यासौ त्र्यवनतः । तानि स्तनचूचुकपादरेखाः । अत्र मिहिरः—" पीनोपचितैर्निम्नैः क्षितिपतयश्चूचुकैः स्तनैः सुखिनः । स्निग्धा निम्ना रेखा धनिनां तद्व्यत्ययेन निस्वानां" इति ॥ चत्वारि व्यङ्गानि ह्रस्वानि यस्यासौ चतुर्व्यङ्गः । अत्र वररुचिः—"ग्रीवा प्रजननं पृष्ठं ह्रस्वं जङ्घा च पूज्यते " इति । यद्वा चत्वारो व्यङ्गाः विकलाः यस्य सः चतुर्व्यङ्गः । ते च सिराविकलः पादः रोमान्तरविकलो रोमकूपः दैर्घ्यविकलो मेढ्रः मांसविकलो बस्तिः । अत्र नारदः–" पादैः प्रस्वेदरहितैः सिराहीनश्च पार्थिवः । एकरोमा भवेद्राजा द्विरोमा पण्डितो भवेत् ॥ त्रिरोमा चतूरोमा च भवेद्भाग्यविवर्जितः । समपादोपविष्टस्य गुल्फं स्पृशति मेहनम् ॥ यस्येश्वरं तं जानीयात्सुखिनं चैव मानवम् । निर्मांसः संहतो बस्तिर्येषां तेसुखभागिनः " इति। त्रिशीर्षवान् त्रिभिर्लक्षणैर्युक्तं शीर्षं तदस्यास्तीति त्रिशीर्षवान् । तानि लक्षणान्यावर्ताः । " आवर्तत्रयरुचिरं यस्य शिरः स क्षितिभृतांनेता " इति कथनात् । यद्वा त्रिप्रकारं समवृत्तंछत्राकारं विशालं च शीर्षमस्यास्तीति त्रिशीर्षवान् । अत्र नारदः—" समवृत्तशिराश्चैव छत्राकारशिरास्तथा । एकछत्रां महीं भुङ्क्ते दीर्घमायुश्च विन्दति " ॥ चतस्रः कलाः वेदाः यस्य चतुष्कलः । अत्र शरीरलक्षणप्रकरणे कलाशब्दस्तत्सूचकरेखापरः । अत्र नन्दी—" मूलेऽङ्गुष्ठस्य वेदानां चतस्रस्तिस्र एव वा । एका द्वे वा यथायोगं रेखा ज्ञेया द्विजन्मनां " इति ॥ चतुर्लेखः ललाटे पादयोः पाण्योश्चतस्रो लेखा रेखा यस्य स चतुर्लेखः। "ललाटे यस्य दृश्यन्ते चतुस्त्रिव्द्येकरेखिकाः । शतद्वयं शतं षष्टिस्तस्यायुर्विंशतिस्तथा" इति कात्यायनः । " यस्य पादतले वज्रध्वजशङ्खाङ्कुशोपमाः । रेखास्सम्यक्प्रकाशन्ते मनुजेन्द्रं तमादिशेत् " इति नारदः । " पाणौ चतस्रो रेखाश्च यस्य तिष्ठन्त्यभङ्गुराः " इतिब्रह्मा । चत्वारः किष्कवः यस्य स चतुष्किष्कुः । चतुर्विंशत्यङ्गुलात्मको हस्तः किष्कुः । षण्णवत्यङ्गुलोत्सेध इत्यर्थः । " षण्णवत्यङ्गुलोत्सेधो यः पुमान्स दिवौकसः " इतिब्राह्मपुराणवचनम् । चतुस्समः चत्वारः समा यस्य स चतुस्समः । ते च बाहुजानूरुगण्डाः । तदुक्तं ब्रह्माण्डे—" बाहुजानूरुगण्डाश्च चत्वार्यथ समानि च " इति ॥ १८ ॥ चतुर्दशसमद्वन्द्वः चतुर्दशसंख्यानि समानि द्वन्द्वानि यस्य सः । तथात्र सामुद्रिकं । " भ्रुवौ नासापुटे नेत्रे कर्णावोष्ठौ च चूचुके । कूर्परौ मणिबन्धौ च जानुनी वृषणौ कटी ॥ करौ पादौ स्फिजौ यस्य समौ ज्ञेयः स भूपतिः " इति । चत्वारो दंष्ट्राकारा दन्ता यस्य स चतुर्दंष्ट्रः । तदाह मिहिरः—" स्निग्धा घनाश्च दशनाः सुतीक्ष्णदंष्ट्राः समाश्च शुभाः " इति । चतुर्गतिः चतुर्णां सिंहशार्दूलगजवृषभाणां गतिरिव गतिर्यस्य सः । " गजसिंहगती वीरौ शार्दूलवृषभोपमौ " इति बालकाण्डोक्तेः । महोष्ठहनुनासश्च ओष्ठस्य महत्त्वं बन्धुजीवबिम्बफलारुणमांसलत्वं हनोस्तु परिपूर्णमांसलत्वं नासिकाया दीर्घतुङ्गत्वं । तथाच संहिता । " बन्धुजीवकुसुमोपमोधरो मांसलो रुचिरबिम्बरूपधृत् । पूर्णमांसलहनुस्तु भूमिपस्तुङ्गतुण्डरुचिराकृतिस्तथा " इति ॥ तुण्डशब्देन नासिकोच्यते । पञ्चस्निग्धः पञ्च स्निग्धाः अवयवाः यस्य सः । ते च वाक्यवक्त्रनखलोमत्वचः केशनेत्रदन्तत्वक्पादतलानि वा । अत्र वररुचिः—" चक्षुस्स्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम् । त्वचःस्नेहेन शयनं पादस्नेहेन वाहनं " इति ॥ " स्निग्धनीलमृदुकुञ्चितास्तथा मूर्धजाः सुखकराः समं शिरः " इति मिहिरः । पूर्वं त्रिषु स्निग्ध इत्युक्तेः अत्र पञ्चस्निग्ध इतीदं मतभेदमाश्रित्योक्तं । अष्टवंशवान् अष्टौ वंशाः आयतावयवा यस्य सः आयताष्टावयव इत्यर्थः । अत्र सामुद्रिकं । " पृष्ठवंशः शरीरं च हस्तपादाङ्गुली करौ । नासिका चक्षुषी कर्णौ प्रजनो यस्य चायताः " इति ॥ प्रजनस्यायतत्वमार्जवं ॥ १९ ॥ दशपद्मः दशपद्माकारावयवाः यस्य सः दशपद्मः । " मुखने-

वेदग्रहणेन रामोयाजुषइतिसूचयति ॥ १४ ॥ **ती०** द्विशुक्लवान् द्वौशुक्लौ शुद्धौ मातृपितृवंशौयस्यसः । तदुक्तं " द्वौशुक्लौतुशुभौ शुद्धौवंशौमातुःपितुस्तथा " इति । ननुत्रिसमस्त्रिपुत्रोन्नतः । 'त्रिषुस्निग्धस्त्रिभिर्व्याप्तः' इत्युक्तंप्राक् । इहतुचतुस्समःषडुन्नतःपञ्च

सत्यधर्मपरः श्रीमान्संग्रहानुग्रहे रतः ॥ देशकालविभागज्ञः सर्वलोकप्रियंवदः ॥ २१ ॥
भ्राता च तस्य द्वैमात्रः सौमित्रिरपराजितः ॥ अनुरागेण रूपेण गुणैश्चैव तथाविधः ॥
[स सुवर्णच्छविः श्रीमान्रामः श्यामो महायशाः]॥ २२ ॥
तावुभौ नरशार्दूलौ त्वद्दर्शनसमुत्सुकौ ॥ विचिन्वन्तौ महीं कृत्स्नामस्माभिरभिसंगतौ ॥ २३ ॥
त्वामेव मार्गमाणौ तौ विचरन्तौ वसुन्धराम् ॥ ददर्शतुर्मृगपतिं पूर्वजेनावरोपितम् ॥ २४ ॥
ऋश्यमूकस्य पृष्ठे तु बहुपादपसंकुले ॥ भ्रातुर्भयार्तमासीनं सुग्रीवं प्रियदर्शनम् ॥ २५ ॥
वयं तु हरिराजं तं सुग्रीवं सत्यसङ्गरम् ॥ परिचर्यास्महे राज्यात्पूर्वजेनावरोपितम् ॥ २६ ॥
ततस्तौ चीरवसनौ धनुःप्रवरपाणिनौ ॥ ऋश्यमूकस्य शैलस्य रम्यं देशमुपागतौ ॥ २७ ॥
स तौ दृष्ट्वा नरव्याघ्रौ धन्विनौ वानरर्षभः ॥ अवप्लुतो गिरेस्तस्य शिखरं भयमोहितः ॥ २८ ॥
ततः स शिखरे तस्मिन्वानरेन्द्रो व्यवस्थितः ॥ तयोः समीपं मामेव प्रेषयामास सत्वरम् ॥ २९ ॥
तावहं पुरुषव्याघ्रौ सुग्रीववचनात्प्रभू ॥ रूपलक्षणसंपन्नौ कृताञ्जलिरुपस्थितः ॥ ३० ॥

आस्यजिह्वोष्ठतालुस्तननखाः करौ । पादौ च दशपद्मानि पद्माकाराणि यस्य च'' इति । दश बृहत् दशबृहदवयवा यस्य सः । ते च —'' उरः शिरो ललाटं च ग्रीवा बाहूंसनाभयः । पार्श्वपृष्ठस्वराश्चेति विशालास्ते शुभप्रदाः '' इति सामुद्रिकं । ब्राह्मे तु '' शिरोललाटे श्रवणे ग्रीवा वक्षश्च हृत्तथा । उदरं पाणिपादौ च पृष्ठं दश बृहन्ति च '' इति । त्रिभिर्व्याप्तः '' त्रिभिर्व्याप्तिश्च यस्य स्यात्तेजसा यशसा श्रिया '' इति ब्राह्मोक्तरीत्या त्रिभिर्व्याप्तः । द्विशुक्लवान् द्वौ दन्तनेत्रे शुक्ले यस्य सः द्विशुक्लवान् । षडुन्नतः षट् उन्नता अवयवा यस्य सः । ते च—'' कक्षः कुक्षिश्च वक्षश्च घ्राणं स्कन्धो ललाटिका । सर्वभूतेषु निर्दिष्टा उन्नताङ्गाः शुभप्रदाः '' इति वररुचिः । अत्र मतभेदेनोक्तेर्न पुनरुक्तिः । मतभेदश्रवणं च रामस्य सकलशास्त्रोक्तमहापुरुषलक्षणपरिपूर्णत्वद्योतनाय । नव तनुः नव तनवः सूक्ष्मा यस्य । तानि च—केशश्मश्रुनखलोमत्वगङ्गुलिपर्वशेफोबुद्धिदर्शनानि । '' सूक्ष्माण्यङ्गुलिपर्वाणि केशलोमनखत्वचः । शेफश्च येषां सूक्ष्माणि ते नरा दीर्घजीविनः '' इति वररुचिः । त्रिभिर्व्याप्नोति त्रिभिः पूर्वाह्णमध्याह्नापराह्णैः कालैः धर्मार्थकामान् व्याप्नोति अनुतिष्ठतीति । तदुक्तं ब्राह्मे।''धर्मार्थकामाः कालेषु त्रिषु यस्य स्वनिष्ठिताः'' इति ॥ २० ॥ संग्रहानुग्रह इति । संग्रहः अर्जनं । अनुग्रहः फलदानं ॥२१॥ द्वैमात्रः सपत्नीपुत्रः ॥२२–२३ ॥ मृगपतिं सुग्रीवं । पूर्वजेन वालिना । अवरोपितं राज्यादिति शेषः ॥ २४—२६ ॥ पाणिनाविति

स्निग्धःत्रिभिर्व्याप्नोतीत्युच्यते । सत्यं मतभेदमाश्रित्योक्तत्वान्नदोषः । अन्येषामप्येवंविधानांसकलशास्त्रोक्तमहापुरुषलक्षणानामेकसकलगुणारामोरामएवलक्ष्यमितिसूचनाय ॥ **ति०** नवतनुः नवसुसूक्ष्मः । तानिच—'' सूक्ष्माण्यङ्गुलिपर्वाणिकेशरोमनखत्वचः । शेफश्चयेषांसूक्ष्माणितेनरादीर्घजीविनः '' इतिप्रोक्तंषट्कं । मृदुश्मश्रुत्वंसूक्ष्मदृष्टित्वंसूक्ष्मबुद्धित्वंचेतिनवसूक्ष्मत्वं । दृष्टेःसौक्ष्म्यं रत्नपरीक्षान्तसूक्ष्मदर्शनचातुर्यं । बुद्धेःसूक्ष्मत्वं तत्वसाक्षात्कारसमर्थत्वं । त्रिभिर्व्याप्नोति धर्मार्थकामैःकालंयथोचितंव्याप्नोति । त्रिवर्गसेवीत्यर्थः ॥ २० ॥ **ति०** संग्रहानुग्रहे संग्रहः धनबलादीनां । अनुग्रहः ताभ्यांप्रजारक्षणं । तदुभयनिष्ठः ॥ २१ ॥ **रामानु०** द्वैमात्रः द्वयोर्मात्रोरपत्यंपुमान्द्वैमात्रः । '' मातुरुत्संख्यासंभद्रपूर्वायाः '' इत्यण्प्रत्ययः । उकाराभावआर्षः । सुमित्रापत्यस्यलक्ष्मणस्यद्वैमातुरत्वंजन्मप्रभृतिरामवत्कौसल्ययासंवर्धितत्वात् । **ति०** द्वैमात्रः राममात्रपेक्षयाद्वितीयामाता । तस्याअपत्यमित्यर्थः । भिन्नोदरभ्रातेत्यर्थः । वैमात्रइतिपाठान्तरं ॥ २२ ॥ **रामानु०** परिचर्य परिचर्यांकृत्वा । आस्महे तिष्ठामइत्यर्थः ॥ **ति०** परिचर्यामहे । तड्ड्यनावार्षौ ॥ परिचरामइत्यर्थः ॥ **स०** परिचर्यामहे सुग्रीवमुद्दिश्ययापरिचर्यासेवातद्रूपेमहेउत्सवेइत्यर्थः । स्थिताइतिशेषः । द्वितीयाषष्ठ्यर्थेवा ॥ २६ ॥ **स०** धनुःप्रवरपाणिनौ पणोव्यवहारएवपाणः । धनुःप्रवराभ्यांपाणोऽनयोरस्तीतितथा । धनुःप्रवरपाणिनां नौ नायकावित्यर्थइतिवा । '' नेतानश्वसमाख्यातः '' इतिनानार्थपदमञ्जर्यां । नान्तोवायंशब्दः ॥ २७ ॥

[पा०] १ ङ. ज.—ट. सत्यधर्मरतः. २ ङ. झ. ट. रमितप्रभः. ३ च. छ. ञ. अनुकारेण. ४ ख. गुणैरपि. ङ. झ. ट. गुणैश्चापि. ५ इदमर्धं ङ. झ. ट. पाठेषुदृश्यते. ६ ग. उभौतौ. ७ घ.—ट. मस्माभिःसहसंगतौ. ८ झ. ट. मूलेतु ९ ख. घ. प्रियवादिनं. १० ङ. झ. ट. वयंच. ११ क.—ट. परिचर्यामहे. १२ ग. घ. प्रवरधारिणौ. १३ क. ग.—ट. अभिप्लुतो.

तौ परिज्ञाततत्त्वार्थौ मया प्रीतिसमन्वितौ ॥ पृष्ठमारोप्य तं देशं प्रापितौ पुरुषर्षभौ ॥ ३१ ॥
निवेदितौ च तत्त्वेन सुग्रीवाय महात्मने ॥ तयोरन्योन्यसंलापाद्भृशं प्रीतिरजायत ॥ ३२ ॥
ततस्तौ प्रीतिसंपन्नौ हरीश्वरनरेश्वरौ ॥ परस्परकृताश्वासौ कथया पूर्ववृत्तया ॥ ३३ ॥
ततः स सान्त्वयामास सुग्रीवं लक्ष्मणाग्रजः ॥ स्त्रीहेतोर्वालिना भ्रात्रा निरस्तमुरुतेजसा ॥ ३४ ॥
ततस्त्वन्नाशजं शोकं रामस्याक्लिष्टकर्मणः ॥ लक्ष्मणो वानरेन्द्राय सुग्रीवाय न्यवेदयत् ॥ ३५ ॥
स श्रुत्वा वानरेन्द्रस्तु लक्ष्मणेनेरितं वचः ॥ तदासीन्निष्प्रभोऽत्यर्थं ग्रहग्रस्त इवांशुमान् ॥ ३६ ॥
ततस्त्वद्गात्रशोभीनि रक्षसा ह्रियमाणया ॥ यान्याभरणजालानि पातितानि महीतले ॥ ३७ ॥
तानि सर्वाणि रामाय आनीय हरियूथपाः ॥ संहृष्टा दर्शयामासुर्गतिं तु न विदुस्तव ॥ ३८ ॥
तानि रामाय दत्तानि मयैवोपहृतानि च ॥ स्वनवन्त्यवकीर्णानि तस्मिन्विगतचेतसि ॥ ३९ ॥
तान्यङ्के दर्शनीयानि कृत्वा बहुविधं तव ॥ तेन देवप्रकाशेन देवेन परिदेवितम् ॥ ४० ॥
पश्यतस्तानि रुदतस्ताम्यतश्च पुनः पुनः ॥ प्रादीपयन्दाशरथेस्तानि शोकहुताशनम् ॥ ४१ ॥
शयितं च चिरं तेन दुःखार्तेन महात्मना ॥ मयाऽपि विविधैर्वाक्यैः कृच्छ्रादुत्थापितः पुनः ॥४२॥
तानि दृष्ट्वा महाबाहुर्दर्शयित्वा मुहुर्मुहुः ॥ राघवः सहसौमित्रिः सुग्रीवे संन्यवेदयत् ॥ ४३ ॥
स तवादर्शनादार्ये राघवः परितप्यते ॥ महता ज्वलता नित्यमग्निनेवाग्निपर्वतः ॥ ४४ ॥
त्वत्कृते तमनिद्रा च शोकश्चिन्ता च राघवम् ॥ तापयन्ति महात्मानमग्न्यगारमिवाग्नयः ॥ ४५ ॥
तवादर्शनशोकेन राघवः प्रविचाल्यते ॥ महता भूमिकम्पेन महानिव शिलोच्चयः ॥ ४६ ॥
काननानि सुरम्याणि नदीः प्रस्रवणानि च ॥ चरन्न रतिमाप्नोति त्वामपश्यन्नृपात्मजे ॥ ४७ ॥
स त्वां मनुजशार्दूलः क्षिप्रं प्राप्स्यति राघवः ॥ समित्रबान्धवं हत्वा रावणं जनकात्मजे ॥ ४८ ॥
सहितौ रामसुग्रीवावुभावकुरुतां तदा ॥ समयं वालिनं हन्तुं तव चान्वेषणं तथा ॥ ४९ ॥
ततस्ताभ्यां कुमाराभ्यां वीराभ्यां स हरीश्वरः ॥ किष्किन्धां समुपागम्य वाली युद्धे निपातितः ॥५०॥
ततो निहत्य तरसा रामो वालिनमाहवे ॥ सर्वर्क्षहरिसङ्घानां सुग्रीवमकरोत्पतिम् ॥ ५१ ॥
रामसुग्रीवयोरैक्यं देव्येवं समजायत ॥ हनुमन्तं च मां विद्धि तयोर्दूतमिहागतम् ॥ ५२ ॥

नान्तत्वमार्षं ॥ २७—३५ ॥ अत्यर्थं निष्प्रभ इति आत्मवद्रामस्यापि दुःखहेतुश्रवणादिति भावः । यद्वा रामापेक्षया अत्यन्तनिष्प्रभः । रामः सीताविरहेण निष्प्रभोभूत् सुग्रीवस्तु तयोस्साहित्यादर्शनाद्रामक्लेशदर्शनाच्चात्यर्थं निष्प्रभोभूत् ॥ ३६—३७ ॥ आनीय हरियूथपा इति पूर्वं सुग्रीवेणानयनमुक्तं तद्धरियूथपद्वारेत्यत्रोच्यते । गतिं रावणस्थानं ॥ ३८ ॥ दत्तानि सुग्रीवेणेति शेषः । मयैवोपहृतानि पूर्वं पतनकाल इतिशेषः । इदानीं हरियूथपैरानीतत्वोक्तेः । स्वनवन्ति आकाशात्पतनकाले ॥ ३९—४१ ॥ शयितं मूर्च्छितं ॥ ४२ ॥ सुग्रीवे संन्यवेदयत् सुग्रीवहस्ते न्यस्तवानित्यर्थः ॥ ४३ ॥ अग्निपर्वतो नाम मेरुशिखरवर्ती कश्चिद्गिरिः । उक्तंच भारते । " अत्र माल्यवतः शृङ्गे दृश्यते हव्यवाट् सदा । नाम्ना संवर्तको नाम कालाग्निर्भरतर्षभ " इति ॥४४–५१॥ ननु वानराणां नराणां च कथमासीत्समागम इति

स० त्वन्नाशजं त्वदनुपलंभजं । " नाशो निधनानुपलंभयोः " इतिविश्वः ॥ ३५ ॥ स० ताभ्यां रामलक्ष्मणाभ्यां । छत्रिन्यायेनेयमुक्तिः ॥ हरीश्वरः वाली ॥ ५० ॥ स० ऐक्यं मत्यैक्यं ॥ ५२ ॥

[पा०] १ क. ग.—ट. संभाषात्. २ ख. घ. ङ. झ. ट. तत्रतौ. ३ क. ग.—ट. कीर्तिसंपन्नौ. ४ ङ. ज. झ. निरस्तंपुरु. ५ क. ग. घ. त्वन्नाशजनितं. ६ क. ग.—ज. तच्छ्रुत्वा. ७ क.—घ. च.—ट. महार्हाणिदर्शयित्वा. ८ क. ग.—झ. संन्यवेशयत. ९ क. घ. ङ. झ. ञ. ट. परिचाल्यते. ज. प्रतिचाल्यते. १० ख. हत्वा. ११ ङ. च. छ. झ. ञ. ट. प्रति. १२ क.—घ. च. छ. ज. ञ. युधि. १३ ङ.—ट. मुपागतं.

स्व[1]राज्यं प्राप्य सुग्रीवः समा[2]नीय हरीश्वरान् ॥ त्वदर्थं प्रेषयामास दिशो दश महाबलान् ॥५३॥
आदिष्टा वानरेन्द्रेण सु[3]ग्रीवेण महौजसा ॥ अद्रिराजप्रतीकाशाः सर्वतः प्रस्थिता महीम् ॥ ५४ ॥
ततस्ते मार्गमाणा वै सुग्रीववचनातुराः ॥ चरन्ति वसुधां कृत्स्नां वयमन्ये च वानराः ॥ ५५ ॥
अङ्गदो नाम लक्ष्मीवान्वालिसूनुर्महाबलः ॥ प्रस्थितः कपिशार्दूलस्त्रिभागबलसंवृतः ॥ ५६ ॥
तेषां नो विप्रनष्टानां विन्ध्ये पर्वतसत्तमे ॥ भृशं शोकपरीतानामहोरात्रगणा गताः ॥ ५७ ॥
ते वयं कार्यनैराश्यात्कालस्यातिक्रमेण च ॥ भयाच्च कपिराजस्य प्राणांस्त्य[4]क्तुं व्यवस्थिताः ॥५८॥
विचित्य वनदुर्गाणि गिरिप्रस्रवणानि च ॥ अनासाद्य पदं देव्याः प्राणांस्त्य[5]क्तुं समुद्यताः ॥५९॥
दृष्ट्वा प्रायोपविष्टांश्च सर्वान्वानरपुङ्गवान् ॥ भृशं शोकार्णवे मग्नः पर्यदेवयदङ्गदः ॥ ६० ॥
तव नाशं च वैदेहि वालिनश्च व[6]धं तथा ॥ प्रायोपवेशमस्माकं मरणं च जटायुषः ॥ ६१ ॥
तेषां नः स्वामिसंदेशान्निराशानां मुमूर्षताम् ॥ कार्यहेतोरि[7]वायातः शकुनिर्वीर्यवान्महान् ॥ ६२ ॥
गृध्रराजस्य सोदर्यः संपातिर्नाम गृध्रराट् ॥ श्रुत्वा भ्रातृवधं कोपादिदं वचनमब्रवीत् ॥ ६३ ॥
यवीयान्केन मे भ्राता हतः क्व[8] च निपातितः ॥ एतदाख्यातुमिच्छामि भवद्भिर्वानरोत्तमाः ॥६४॥
अङ्गदोकथयत्तस्य जनस्थाने महद्वधम् ॥ रक्षसा भीमरूपेण त्वामुद्दिश्य य[9]थातथम् ॥ ६५ ॥
जटायुषो वधं श्रुत्वा दुःखितः सोरुणात्मजः ॥ त्वां[10] शशंस वरारोहे वसन्तीं रावणालये ॥ ६६ ॥
तस्य तद्वचनं श्रुत्वा संपातेः प्रीतिवर्धनम् ॥ अङ्गद[11]प्रमुखास्तूर्णं ततः सं[12]प्रस्थिता वयम् ॥ ६७ ॥
विन्ध्यादुत्थाय संप्राप्ताः सागरस्यान्तमुत्तरम् ॥ त्वद्दर्शनकृतोत्साहा हृष्टास्तुष्टाः प्लवङ्गमाः ॥ ६८ ॥
अङ्गदप्रमुखाः सर्वे वेलोपान्त[13]मुपस्थिताः ॥ चिन्तां जग्मुः[14] पुनर्भीतास्त्वद्दर्शनसमुत्सुकाः ॥ ६९ ॥

वामदक्षिणहस्तवैषम्यमप्यविजानानां शाखायाश्शाखामाप्लुत्य जीवतां तिरश्चां वसिष्ठशिष्यतया निरतिशयाचारसंपन्नयोश्चक्रवर्तिपुत्रयोश्च कथं समागमो जात इति पृष्टं तस्य किमुत्तरमुक्तमित्यत्राह—रामसुग्रीवयोरिति ॥ रामसुग्रीवयोरैक्यमेवं समजायत । एवमिति प्रत्यक्षनिर्देशः । स्वानुजे विद्यमानेपि यथाहं सुग्रीवदूतोन्तःपुरकार्यसमाधानायागतः । तथा तयोरैक्यं मैत्री जातेत्यर्थः । यद्वा एवं समजायत अहमप्येवं दृष्टवान् । न योग्यतामवगच्छामीत्यर्थः ॥५२—५४॥ सुग्रीववचनातुराः सुग्रीवाज्ञाभीताः । सुग्रीववचनानुगा इति च पाठः ॥ ५५ ॥ त्रिभागबलसंवृतः तृतीयांशेन बलेन सैन्येन संवृत इत्यर्थः । वृत्तिविषये पूरणार्थत्वं संख्याशब्दस्येष्यते ॥ ५६ ॥ विप्रनष्टानां बिले अदर्शनं गतानां ॥५७॥ कालस्य सुग्रीवकल्पितमासस्य । कपिराजस्य सुग्रीवात् ॥ ५८—५९ ॥ दृष्ट्वेत्यादिश्लोकद्वयमेकं वाक्यं ॥ परिदेवनकर्माह—तवेति ॥ ६०—६१ ॥ स्वामिसंदेशात् मासादूर्ध्वमनागतानां भयमित्येवंरूपात् । तेषां कार्यहेतोः ॥ ६२—६७॥ हृष्टाः उत्साहवन्तः । तुष्टाः आनन्दवन्तः ॥ ६८ ॥ वेलोपान्तं वेला सिन्धुपूरः तस्यो-

---

ति० त्रिभागबलसंवृतः सेनायास्त्रिष्वंशेषुएकांशसेनावृतइत्यर्थः ॥ ५६ ॥ **ति०** कार्यहेतोः कार्यसिद्ध्यर्थमिवायातः । दैवादतिशेषः । **स०** कार्यहेतोः अस्मद्रक्षणाख्यकार्येण । इहायातः अस्मत्समीपंप्राप्तः ॥ ६२ ॥ **ति०** आख्यातुमित्यसमानकर्तृकेपितुमुन्नार्षः ॥ **स०** आख्यातुं आख्यापयितुं । तेनसमानकर्तृकत्वोपपत्तिः ॥ ६४ ॥ **स०** महद्वधं महतोजटायुषोवधः महद्वधः तं । परोपकारेप्राणत्यागान्महत्त्वं ॥६५॥ **स०** वरारोहाभ्यांसहिता सवरारोहा । तस्यास्संबुद्धिः । अतोनसइत्यस्याधिक्यं ॥६६॥

[पा०] १ झ. ट. स्वंराज्यं. २ ङ. झ. ञ. ट. स्वानानीयमहाकपीन्. ३ क. ग. च. छ. ज. ञ. हरयश्चमहौजसः. ख. ग. सुग्रीवेणवनौकसः. ङ. झ. ट. सुग्रीवेणमहौजसः. ४ ङ. झ. ट. त्यक्तुमुपस्थिताः. ५ क. ख. घ. च.—ट. त्यक्तुंव्यवस्थिताः. ६ क.—ट. तथावधं. ७ क. ख. च. छ. ज. ञ. ट. रिहायातः. ८ ग. सचविनाशितः. ९ झ. ञ. ट. यथार्थतः. १० झ. ञ. ट. त्वामाहसवरारोहे. ११ क.—च. ज. ञ. प्रमुखास्सर्वे. १२ झ. ट. प्रस्थापितावयं. १३ घ.—ट. मुपागताः. १४ ग. जग्मुर्महात्मानः. ख. ङ. छ. झ. ट. जग्मुःपुनर्भीमां.

तथा[1]ऽहं ह[2]रिसैन्यस्य सागरं प्रेक्ष्य सीद[3]तः ॥ व्यव[4]धूय भयं तीव्रं योजनानां शतं प्लुतः ॥ ७० ॥
लङ्का चापि मया रात्रौ प्रविष्टा राक्षसाकुला ॥ रावणश्च मया दृष्टस्त्वं च शोक[5]परिप्लुता ॥ ७१ ॥
एतत्ते सर्वमाख्यातं यथावृत्तमनिन्दिते ॥ अभिभाषस्व मां देवि दूतो दाशरथेरहम् ॥ ७२ ॥
तं मां रामकृतोद्योगं त्वन्निमित्तमिहागतम् ॥ सुग्रीवसचिवं देवि बुध्यस्व पवनात्मजम् ॥ ७३ ॥
कुशली तव काकुत्स्थः सर्वशस्त्रभृतां वरः ॥ गुरोराराधने युक्तो लक्ष्[6]मणश्च सुलक्षणः ॥ ७४ ॥
तस्य वीर्यवतो देवि भर्तुस्तव हिते रतः ॥ अहमेकस्तु संप्राप्तः सुग्रीववचनादिह ॥ ७५ ॥
मयेयमसहायेन चरता कामरूपिणा ॥ दक्षिणा दिगनुक्रान्ता त्वन्मार्गविचयैषिणा ॥ ७६ ॥
दिष्ट्याऽहं हरिसैन्यानां त्वन्नाशमनुशोचताम् ॥ अपनेष्यामि संतापं [7]तवाभिगमशंसनात् ॥ ७७ ॥
दिष्ट्या हि [8]मम न व्यर्थं देवि[9] सागरलङ्घनम् ॥ प्राप्स्याम्यहमिदं दि[10]ष्ट्या त्वद्दर्शनकृतं यशः ॥ ७८ ॥
राघवश्च महावीर्यः क्षिप्रं त्वामभिपत्स्यते ॥ समि[11]त्रबान्धवं हत्वा रावणं राक्षसाधिपम् ॥ ७९ ॥
[12]माल्यवान्नाम वैदेहि गिरीणामुत्तमो गिरिः ॥ ततो गच्छति गोकर्णं पर्वतं केसरी हरिः ॥ ८० ॥
स च देव[13]र्षिभिर्दिष्टः पिता मम महाकपिः ॥ तीर्थे नदीपतेः पुण्ये शंबसादनमुद्ध[14]रत् ॥ ८१ ॥
[15]तस्याहं हरिणः क्षेत्रे जातो वातेन मैथिलि ॥ हनुमानिति विख्यातो लोके स्वेनैव कर्मणा ॥ ८२ ॥
विश्वासार्थं तु वैदेहि भर्तुरुक्ता मया गुणाः ॥ [16]अचिराद्राघवो देवि त्वामितो नयिताऽनघे ॥ ८३ ॥
एवं विश्वासिता सीता हेतुभिः शोककर्शिता ॥ उपपन्नैरभिज्ञानैर्दूतं [17]तमवगच्छति ॥ ८४ ॥
अतुलं च गता हर्षं प्रहर्षेण च जानकी ॥ नेत्राभ्यां वक्रपक्ष्मभ्यां मुमोचानन्दजं [18]जलम् ॥ ८५ ॥
[19]चारु तद्वदनं तस्यास्ताम्रशुक्लायतेक्षणम् ॥ अशोभत विशालाक्ष्या राहुमुक्त इवोडुराट् ॥ ८६ ॥
हनुमन्तं कपिं व्यक्तं मन्यते नान्यथेति सा ॥ अथोवाच हनूमांस्तामुत्तरं प्रियदर्शनाम् ॥ ८७ ॥
एतत्ते सर्वमाख्यातं समाश्वसिहि मैथिलि ॥ किं करोमि कथं वा ते रोचते प्रतियाम्यहम् ॥ ८८ ॥

पान्तं । “वेलाम्बुधेस्तीरवृद्ध्योः कालमर्यादयोरपि” इति दर्पः ॥ ६९—७२ ॥ रामकृतोद्योगं रामकृतोत्साहं ॥ ७३ ॥ गुरोः ज्येष्ठस्य । आराधने शुश्रूषणे । रतः लक्ष्मणश्च कुशली ॥ ७४—७५ ॥ विचयैषिणा अन्वेषणेच्छुना ॥ ७६ ॥ तवाभिगमशंसनात् त्वत्समीपप्राप्तिकथनात् ॥ ७७—७९ ॥ बुध्यस्व पवनात्मजमिति पवनात्मजत्वमुक्तं तत्कथं वानरस्येत्यपेक्षायामाह—माल्यवानिति ॥ गच्छति अगच्छत् ॥८०॥ सः गोकर्णं गतः । देवर्षिभिः तत्रत्यैः । दिष्टः नियुक्तः । शंबसादनं तीर्थोपद्रवकारिणमसुरं शंबसादनाख्यं । उद्धरत् उदहरत् । देवर्षिप्रार्थनया अवधीदित्यर्थः ॥ ८१ ॥ हरिणः हरेः केसरिणः । क्षेत्रे पत्न्यां अञ्जनायां । जातः पितुर्देशान्तरगमनकाले जातः । अनेनान्यक्षेत्रे कथमन्येनोत्पादनमिति शङ्का पराकृता ॥ ८२ ॥ नयिता नेता ॥ ८३ ॥ अवगच्छति अवा-

---

ति० कामरूपिणा । अनेनरावणान्तःपुराद्यन्वेषणसामर्थ्यं सूचितं ॥ ७६ ॥ ति० सर्वमुत्तरं सर्वप्रत्युत्तरमाख्यातमित्यन्वयः ॥ किंकरोमीति । वर्तमानसामीप्येलटौ । प्रतियामि प्रतियास्ये रामसमीपं । किंकरोमि किंकरिष्ये । कथंवारोचते चिकीर्षितमितिशेषः ॥ ८८ ॥

[पा०] १ क. ङ. झ. ट. अथाहं. २ क. च. ज. ञ. हरिसैन्यानां. ३ क. च. छ. ज. ञ. सीदतां. ४ ग. व्यवधूयचसर्वांस्तान्. ५ ग. च. छ. ट. शोकनिपीडिता. ६ ङ.—ट. लक्ष्मणःशुभलक्षणः. ७ ङ. झ. तवाधिगमशासनात्. ८ ङ. च. ज. झ. ट. नममव्यर्थं. ९ घ. सागरस्यचलङ्घनं. ङ.—ट. सागरस्येहलङ्घनं. १० ङ. झ. ट. देवि. ११ ङ. झ. सपुत्रबान्धवं. १२ ख. छ. ज. कौरवोनाम. क. कुञ्जरोनाम. १३ ग. देवर्षिनिर्दिष्टः. १४ क.—च. ज. झ. ट. मुद्धरन्. १५ ङ. झ. ट. यस्याहं. १६ ङ. झ. ट. अचिरात्त्वामितोदेविराघवोनयिताध्रुवं. १७ ग. ङ. ञ. ट. तमधिगच्छति. १८ ग. पयः. १९ च. छ. ज. ञ. सातस्यवचनंश्रुत्वाताम्रशुक्लायतेक्षणा. अशोभतविशालाक्षी. क. चारुतच्चाननंदेव्याःपुण्डरीकायतेक्षणं.

हतेऽसुरे संयति शंबसादने कपिप्रवीरेण महर्षिचोदनात् ॥
ततोस्मि वायुप्रभवो हि मैथिलि प्रभावतस्तत्प्रतिमश्च वानरः ॥ ८९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

षट्त्रिंशः सर्गः ॥ ३६ ॥

हनुमता स्वस्मिन्नाश्वासदार्ढ्याय सीतायैश्रीरामाङ्गुलीयकदानम् ॥ १ ॥ तल्लाभहृष्टयासीतया हनुमच्छ्लाघनपूर्वकंराम-लक्ष्मणकुशलादिप्रश्नः ॥ २ ॥ हनुमता सीतांप्रत्येतावत्पर्यन्तंरामस्यानागमनात्स्वस्मिन्नप्रीतिशङ्काजातकोपापनोदनाय रामानागमनस्य सीतावस्थानस्थानापरिज्ञानहेतुकत्वाभिधानम् ॥ ३ ॥ तथातस्यां रामस्यतद्विषयकप्रीत्यतिशयनिश्चयजन-नाय सशपथंरामशोकावस्थानप्रतिपादनपूर्वकं तत्प्राप्तयेरामप्रयत्नातिशयाभिधानेन तत्समाश्वासनम् ॥ ४ ॥

भूय एव महातेजा हनुमान्मारुतात्मजः ॥ अब्रवीत्प्रश्रितं वाक्यं सीताप्रत्ययकारणात् ॥ १ ॥
वानरोऽहं महाभागे दूतो रामस्य धीमतः ॥ रामनामाङ्कितं चेदं पश्य देव्यङ्गुलीयकम् ॥ २ ॥
प्रत्ययार्थं तवानीतं तेन दत्तं महात्मना ॥ समाश्वसिहि भद्रं ते क्षीणदुःखफला ह्यसि ॥
[इत्युक्त्वा प्रददौ तस्यै सीतायै वानरोत्तमः] ॥ ३ ॥
गृहीत्वा प्रेक्षमाणा सा भर्तुः करविभूषणम् ॥ भर्तारमिव संप्राप्ता जानकी मुदिताऽभवत् ॥ ४ ॥
चारु तद्वदनं तस्यास्ताम्रशुक्लायतेक्षणम् ॥ अशोभत विशालाक्ष्या राहुमुक्त इवोडुराट् ॥ ५ ॥
ततः सा ह्रीमती बाला भर्तृसंदेशहर्षिता ॥ परितुष्टा प्रियं कृत्वा प्रशशंस महाकपिम् ॥ ६ ॥

गच्छत् ॥ ८४—८८ ॥ देवीनियुक्तार्थकरणे स्वस्य शक्तिरस्तीति द्योतयितुं स्वमाहात्म्यमाह—हत इति ॥ ततः असुरवधोपकारात् ॥ ८९ ॥ इति श्रीगोविन्द-राजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलका-ख्याने सुन्दरकाण्डव्याख्याने पञ्चत्रिंशः सर्गः ॥३५॥

इत्थं संदेशकथनादिना देवीं विश्वास्याभिज्ञानाङ्गु-लीयकदानेन दृढं विश्वासयति—वानरोहमित्यादिना ॥ २—३ ॥ गृहीत्वा देशान्तरादागतं बन्धुं दृष्ट्वेव स्वयं गृहीतवती । प्रेक्षमाणा वर्तमानार्थेन शानचा दत्तदृष्टिं न विचालितवतीत्युच्यते सा पूर्वं रावणत्वेन शङ्कितवती । भर्तुःकरविभूषणं पाणिग्रहणकाले हस्तस्पृष्टमाभरणं । करविभूषणमित्यनेन भोगातिश-यात् प्रणयकोपे प्रवृत्ते परस्परमालोकनभाषणादिविर-हदशायां काङ्क्षिते भाषणे मानातिशयेन मौने कृते रामोङ्गुलीयकं भूमौ च्यावयति स्म । तदा व्याजेन च्युतमङ्गुलीयकमिति सीतयाभिहिते प्रणयकोपशैथि-ल्यात् परस्परसंश्लेषो भूयोप्यभूत् । एवं घटकभूतं करविभूषणं भर्तारमिव संप्राप्ता अङ्गुलीयकदर्शनात्तस्य कान्तस्य करं स्मृतवती । तत्स्मृत्या बाहुं तत्स्मरणेन तद्विग्रहं । एवं भावनाप्रकर्षेण तं पुरस्स्थितमिव मत्वा तमालिङ्गितवती । जननीबुद्ध्या मुनिस्संप्राप्ते-वेत्याह । जननीकृतभोगस्यावर्ण्यत्वात् । जानकी शोकहर्षाभ्यां क्लेष्टुमनर्हे कुले जाता । मुदिताऽभवत् इयमिदानीं मुदिता उदर्के किं भविष्यतीति न जान इत्याहर्षिः ॥ ४—५ ॥ प्रियं कृत्वा संमानं कृत्वा

ति० नहिरावणआत्मानंकथमपिकपिपुत्रइतिब्रूयादितिकपिलनिश्चयायपुनःस्वजन्मानुवादः । ततः शंबसादनासुरवधप्रीतमहर्षेः प्रसादतइत्यर्थः । स० ततः मत्पितुस्तद्धननार्थगमनानन्तरं । वायुप्रभवोस्मि तदवकाशे वायुनाजातोस्मि ॥ ८९ ॥ इति पञ्चत्रिंशःसर्गः ॥ ३५ ॥

ति० असि शीघ्रमेवभविष्यसि ॥ स० दुःखं तमआदिस्थं फलंयेषांते दुःखफलाः राक्षसाः । क्षीणाःदुःखफलाययानिमित्तेन सातथा । दुःखरूपंयत्फलं तत्क्षीणंयस्यांसावा । एष्यन्निश्चयेनेदंवचनं ॥ ३ ॥ ति० ह्रीमती अङ्गुलीयसांनिध्येभर्तृसांनिध्यादिवकिंचिल्लज्जावती । स० ह्रीमती पत्यौयद्वत्यौन्नत्यंकपिरपिममापश्यदितिलज्जावती । प्रियंकृत्वा रावणादिविकल्पंविधूयप्रेमास्पदमेवकृत्वा

[पा०] १ क. पाठेइदमर्धंदृश्यते. २ घ. ङ. झ. ञ. ट. बभूवहर्षोदग्रं. च. ख. बभूवहर्षितोदग्रं. ३ छ. राहुमुक्तेन्दुमण्डलं. ४ क. छ. झ. श्रीमती. ५ क.—ट. भर्तुस्संदेश. ६ क. श्रुत्वा. ७ क. ग. च. ज. ञ. प्राशंसत.

विक्रान्तस्त्वं समर्थस्त्वं प्राज्ञस्त्वं वानरोत्तम ॥ येनेदं राक्षसपदं त्वयैकेन प्रधर्षितम् ॥ ७ ॥
शतयोजनविस्तीर्णः सागरो मकरालयः ॥ विक्रमश्लाघनीयेन क्रमता गोष्पदीकृतः ॥ ८ ॥
न हि त्वां प्राकृतं मन्ये वानरं वानरर्षभ ॥ यस्य ते नास्ति संत्रासो रावणान्नापि संभ्रमः ॥ ९ ॥
अर्हसे च कपिश्रेष्ठ मया समभिभाषितुम् ॥ यद्यपि प्रेषितस्तेन रामेण विदितात्मना ॥ १० ॥
प्रेषयिष्यति दुर्धर्षो रामो न ह्यपरीक्षितम् ॥ पराक्रममविज्ञाय मत्सकाशं विशेषतः ॥ ११ ॥
दिष्ट्या च कुशली रामो धर्मात्मा सत्यसङ्गरः ॥ लक्ष्मणश्च महातेजाः सुमित्रानन्दवर्धनः ॥१२॥
कुशली यदि काकुत्स्थः किंनु सागरमेखलाम् ॥ महीं दहति कोपेन युगान्ताग्निरिवोत्थितः ॥१३॥
अथवा शक्तिमन्तौ तौ सुराणामपि निग्रहे ॥ ममैव तु न दुःखानामस्ति मन्ये विपर्ययः ॥ १४ ॥
कच्चिन्न व्यथितो रामः कच्चिन्न परितप्यते ॥ उत्तराणि च कार्याणि कुरुते पुरुषोत्तमः ॥ १५ ॥
कच्चिन्न दीनः संभ्रान्तः कार्येषु च न मुह्यति ॥ कच्चित्पुरुषकार्याणि कुरुते नृपतेः सुतः ॥ १६ ॥
द्विविधं त्रिविधोपायमुपायमपि सेवते ॥ विजिगीषुः सुहृत्कच्चिन्मित्रेषु च परन्तपः ॥ १७ ॥

॥ ६ ॥ विक्रान्तइत्यादिपदत्रयेण तद्व्युत्क्रमेण ज्ञानशक्तिबलान्युच्यन्ते । इदं राक्षसपदमिति प्रश्नोक्ता । त्वयैकेनेति सामर्थ्यं । प्रधर्षितमिति विक्रमः ॥ ७—८ ॥ प्राकृतं क्षुद्रं । संभ्रमः व्यग्रता ॥ ९ ॥ यद्यपीतिनिपातसमुदायो यस्मादित्यर्थे । अव्ययानामनेकार्थत्वात् ॥ १०—१२ ॥ अथ प्रणयरोषेण दूतसन्निधौ रामं गर्हते—कुशलीति ॥ काकुत्स्थः परपरिभवासहकुलेजातः । अनेन परपरिभव एव परिहरणीयः न स्वीय इति नियमोस्ति किं । किंनु सागरमेखलां महीं दहति । अत्र काकुत्स्थः दहति किंनु न दहतीत्यर्थः । सागरमेखलामिति विशेषणेन द्रवद्रव्यस्यैकेन कठिनद्रव्यस्यचैकेन बाणेन भवितव्यं किं । सागरं सलिलमेव तैलं कृत्वा महीं दग्धुं समर्थो न किमित्यर्थः । यद्वा स्वपत्नीं वा सुरक्षितपरिधानाङ्करोतीति भावः । अनादिकृतमर्यादा मही कथं दग्धुं शक्येत्यत्राह—युगान्तेति । महीमर्यादा तन्नयनरागपर्यन्तैवेति भावः । किं न सागरमेखलामित्यपि पाठः । काकुत्स्थः कुशली यदि तदा महीं किं न दहति । शक्तश्चेद्दहत्येव । न दहति अतो न शक्त इत्यर्थः ॥ १३ ॥ पक्षान्तरमाह—अथवेति ॥ १४ ॥ न व्यथितः न कृशः । उत्तराणि कार्याणि मत्प्राप्तिसाधकानि कच्चित्कुरुते ॥ १५ ॥ न दीनः कच्चित्संभ्रान्तः सन् कार्येषु न मुह्यति कच्चिदित्यन्वयः । पुरुषकार्याणि पुरुषेण कर्तव्यानि ॥ १६ ॥ तान्येवाह—द्विविधमिति ॥ परन्तपो रामः मित्रेषु विषये सुहृत्सन् द्विविधं सामदानरूपमुपायमपि । सेवते कच्चित् । चकारेणामित्रास्समुच्चीयन्ते । अमित्रेषु विषये

मत्वावा ॥ ६ ॥ **ति०** विक्रान्तः शूरः । समर्थः देशकालोचितकृत्यचतुरः । प्राज्ञः धर्मार्थविषयकसर्वशास्त्रार्थतत्त्वज्ञः । पदं स्थानं ॥ ७ ॥ **ति०** संत्रासः समुद्रादितिशेषः । **स०** प्राकृतं साधारणं । यतः मेइतिशेषः । यतः मेसंभ्रमः भयं । तस्माद्रावणादपिनसंत्रासः ॥ ९ ॥ **ति०** यदि यस्मात् ॥ **ती०** यद्यपीत्यवधारणे । मयासमभिभाषितुंअर्हसेयद्यपि अर्हस्येवेत्यर्थः । कुतः विदितात्मनारामेणप्रेषितइतिसंबन्धः ॥ यद्वा अप्यवधारणे । यदि यस्मात् । विदितात्मनारामेणप्रेषितः । तस्मान्मयासमभिभाषितुं अर्हस्येवेतिसंबन्धः ॥ १० ॥ **शि०** कोपेन रावणापराधज्ञानजनितक्रोधेन । महीं लङ्काभूमिं । किंनुदहति ॥ १३ ॥ **ति०** ननुकेवलंमहीमेवेतिकिमुच्यतेइत्याशयेनपक्षान्तरं—**अथवेति** । तथाशक्तिमन्तौयदि तर्हिकिमितितूष्णींतिष्ठतःतत्राह—ममैवेति । दुःखानां दुःखहेतुपापानां । विपर्ययः नाशः । नाद्यापिसंवृत्तइत्यर्थः ॥ १४ ॥ **ति०** ममदुःखक्षयः ईषत्करः अपितु तस्यसुखावस्थानमेवमृग्यमित्याशयेनाह—**कच्चिदिति** । उत्तराणिकार्याणि मद्विमोचनफलानि ॥१५॥ **ति०** द्विविधं सौम्यासौम्यरूपप्रकारद्वयवत् ॥ त्रिविधोपायं धर्मार्थकामलक्षणत्रिविधपुरुषार्थानांप्राप्त्युपायभूतमुपायं सामाद्युपायमपिसेवतेकच्चित् । तथा मित्रेषुच विजिगीषुसुहृत्कच्चित् । विजिगीषुसुहृदिति बहुव्रीहिस्तत्पुरुषश्चेतिकतकः । सुहृत्परंतपोरामोविजिगीषुःसन् त्रिविधोपायं सामदानभेदरूपमुपायंदण्डोपायंच । मित्रेषुच चादमित्रेषुच द्विविधंयथाभवतितथा सेवतेकच्चित् । मित्रेषुसामदाने अमित्रेषुभेददण्डौचेत्येवंविभज्यप्रयुङ्क्तेकच्चिदित्यर्थइतितीर्थः ॥ **स०** त्रिविधोपायं धर्मार्थकामसाधनरूपं । तज्ज्ञानरूपासाधारणकारणकस्यमोक्षस्यसाधारण-

[पा०] १ क. ग. ङ.—ट. रावणादपि. २ क. ङ. झ. ट. यद्यसि. च. छ. ज. ञ. यदसि. ३ क. ग. च. ज. झ. ञ. दिष्ट्यास. ४ क. धर्मवत्सलः. ख. ग. ञ. सत्यवत्सलः. ५ क.—ट. व्यथते. ६ झ. विजिगीषुसुहृत्कच्चित्. ७ झ. परंतप.

कच्चिन्मित्राणि लभते मित्रैश्चाप्यभिगम्यते ॥ कच्चित्कल्याणमित्रश्च मित्रैश्चापि पुरस्कृतः ॥ १८ ॥
कच्चिदाशास्ति देवानां प्रसादं पार्थिवात्मजः ॥ कच्चित्पुरुषकारं च दैवं च प्रतिपद्यते ॥ १९ ॥
कच्चिन्न विगतस्नेहः [1]प्रसादान्मयि राघवः[2] ॥ कच्चिन्मां व्यसनादस्मान्मोक्षयिष्यति वानर ॥ २० ॥
सुखानामुचितो नित्यमसुखानाम[3]नूचितः ॥ दुःखमुत्तरमासाद्य कच्चिद्रामो न सीदति ॥ २१ ॥
कौसल्यायास्तथा कच्चित्सुमित्रायास्तथैव च ॥ अभीक्ष्णं श्रूयते कच्चित्कुशलं भरतस्य च ॥ २२ ॥
मन्निमित्तेन मानार्हः कच्चिच्छोकेन राघवः ॥ कच्चिन्नान्यमना रामः कच्चिन्मां तारयिष्यति ॥२३॥
कच्चिदक्षौहिणीं भीमां भरतो भ्रातृवत्सलः ॥ ध्वजिनीं मन्त्रिभिर्गुप्तां प्रेषयिष्यति मत्कृते ॥ २४ ॥
वानराधिपतिः श्रीमान्सुग्रीवः कच्चिदेष्यति ॥ मत्कृते हरिभिर्वीरैर्वृतो दन्तनखायुधैः ॥ २५ ॥
कच्चिच्च लक्ष्मणः शूरः सुमित्रानन्दवर्धनः ॥ अस्त्रविच्छरजालेन राक्षसान्विधमिष्यति ॥ २६ ॥
रौद्रेण कच्चिदस्त्रेण [4]ज्वलता निहतं रणे ॥ द्रक्ष्याम्यल्पेन कालेन रावणं ससुहृज्जनम् ॥ २७ ॥

कच्चिन्न तद्धेमसमानवर्णं तस्याननं पद्मसमानगन्धि ॥
मया विना शुष्यति शोकदीनं जलक्षये पद्ममिवातपेन ॥ २८ ॥
धर्मोपदेशात्त्य[5]जतश्च राज्यं मां चाप्यरण्यं नयतः [6]पदातिम् ॥
नासीद्व्यथा यस्य न भीर्न शोकः कच्चिच्च धैर्यं हृदये करोति ॥ २९ ॥
न चास्य माता न पिता [7]च नान्यः स्नेहाद्विशिष्टोऽस्ति मया समो वा ॥
[8]तावत्त्वहं दूत जिजीविषेयं यावत्प्रवृत्तिं शृणुयां प्रियस्य ॥ ३० ॥

विजिगीषुस्सन् त्रिविधोपायं दानभेददण्डान् । सेवते प्रयुङ्क्ते कच्चित् । सुहृत्सु कदाचिदपि भेददण्डौ न कार्यौ । शत्रुषु नसामेति भावः । योजनान्तरे विजिगीषुसुहृत्पदयोः प्रयोजनं मृग्यं ॥ १७ ॥ अभिगम्यते लभ्यते । मित्रस्य कंचिदुपकारं कृत्वा स्वयमुपकारं मित्रादपेक्षते कच्चिदित्यर्थः । कल्याणमित्रः पुरस्कृतमित्र इत्यर्थः ॥ १८ ॥ आशास्ति आशास्ते । पुरुषकारं स्वबलं । एकैकस्यानर्थहेतुत्वादिति भावः ॥ १९—२० ॥ अनूचित इति दीर्घ आर्षः । उत्तरं उत्कृष्टं ॥ २१—२२ ॥ मन्निमित्तेन मया हेतुना । अन्यमनाः कार्यान्तरासक्तः ॥ २३ ॥ ध्वजिनीं सेनां ॥ २४—२७ ॥ हेमशब्देन तद्वर्ण उच्यते । अभेदेन हेमवत्स्पृहणीयमित्यर्थः । मया विनेति जलक्षयस्थानं । शोकदीनमित्यातपस्थानं ॥ २८ ॥ धर्मापदेशात् धर्मोद्देशार्थं । धर्ममुद्दिश्येत्यर्थः । यद्वा धर्मव्याजाद्धेतोः । राज्यत्यागाद्व्यथा नासीत् । अरण्यसञ्चाराद्भीर्नासीत् । मत्पादसञ्चाराच्छोको नासीत् । सः तादृशधैर्ययुक्तो रामो मद्विश्लेषेपि हृदये धैर्यं करोति कच्चित् ॥ २९ ॥ धैर्याकरणे हेतुमाह—न चास्येति॥ प्रवृत्तिं मदानयनवार्तां । प्रणयरोषपक्षे किमेष पितृवचनपरिपालनाय वनं प्राप्तः न । किन्तु ममैव हिंसायै इति भावः । रामस्यैव दोषः न ममेति सीतयोक्ते वयमेव किं सम्यक् स्थितवन्तः रामविश्लेषानन्तरक्षणे न तनुस्त्यक्ता हीत्येवं हनुमदाशयं ज्ञात्वाह—नचास्येति ॥ रामस्य मात्रादयः अन्योबन्धुश्च स्नेहाद्विशिष्टा न भवन्ति । लोके कस्यचिन्माता पिता भ्रातेत्येवं स्नेहो विसृत्वरो भवति । नचैवं रामस्य मात्रादिषु संभावितः । सर्वोपि मय्येकमार्गः कृतः । यावत्प्रि-

साधनसाध्यकोटौनिवेशोनसमञ्जसइतित्रयाणांग्रहणं ॥ सुहृदितिमित्रपक्षे । इतरत्रविजिगीषुरिति ॥ १७ ॥ **स०** लभते स्वयं प्राप्नोति । कल्याणमित्रः कल्याणंगूढद्वेषरहितंमित्रंयस्यसतथा । मित्रैः स्वोपद्रवपरिहाराय चापीति धानुष्कचूडामणिरितिपुरस्कृतः ॥ १८ ॥ **रामानु०** अनुचितएवानौचितः । 'प्रज्ञादिभ्यश्च' इतिस्वार्थेऽण्प्रत्ययः । उत्तरं उत्कृष्टं ॥ **स०** अनूचितः अनुचितः । यद्वा अनुहीनं उचितं उचितत्वं । भावप्रधानोनिर्देशः । यस्येति । 'अनुहीने' इतिविश्वः ॥ २१ ॥ **स०** कुशलं क्षेमवार्ता । कैकेय्याभरतसांनिध्यादप्रश्नः ॥ २२ ॥ **स०** अन्यमनाःकन्यन्तरविवाहासंक्तचित्तः ॥ २३ ॥ **स०** प्रवृत्तिं पुनर्वार्ता ॥ ३० ॥

[पा०] १ क.—ट. विवासान्मयि. २ ग. ङ.—ट. राघवः. ३ च. छ. मनौचितः. ४ क. ख. ग. ङ.—ट. रामेण. ५ ङ. झ. ट. त्यजतस्तथराज्यं. ६ छ. झ. ञ. ट. पदातेः. ७ क. ग. ङ. च. छ. झ. ञ. ट. नचान्यः. ८ तावच्चाहं.

इतीव देवी वचनं महार्थं तं वानरेन्द्रं मधुरार्थमुक्त्वा ॥
श्रोतुं पुनस्तस्य वचोभिरामं रामार्थयुक्तं विरराम रामा ॥ ३१ ॥
सीताया वचनं श्रुत्वा मारुतिर्भीमविक्रमः ॥ शिरस्यञ्जलिमाधाय वा[1]क्यमुत्तरमब्रवीत् ॥ ३२ ॥
न[2] त्वामिहस्थां जानीते रामः कम[3]ललोचने ॥ तेन त्वां नानयत्याशु शचीमिव पुरन्दरः ॥ ३३ ॥
श्रुत्वैव तु वचो मह्यं क्षिप्रमेष्यति राघवः ॥ चमूं प्रकर्षन्महतीं हर्यृक्षगणसंकुलाम् ॥ ३४ ॥
विष्टम्भयित्वा बाणौघैरक्षोभ्यं वरुणालयम् ॥ करिष्यति पुरीं लङ्कां काकुत्स्थः शान्तराक्षसाम् ॥३५॥
तत्र यद्यन्तरा मृत्युर्यदि देवाः सहासुराः ॥ स्थास्यन्ति पथि रामस्य स तानपि वधिष्यति ॥ ३६॥
तवादर्शनजेनार्ये शोकेन स[4] परिप्लुतः ॥ न शर्म लभते रामः सिंहार्दित इव द्विपः ॥ ३७ ॥
म[5]लयेन च विन्ध्येन मेरुणा मन्दरेण च ॥ दर्दुरेण च ते देवि शपे मूलफलेन च ॥ ३८ ॥
यथा सुनयनं वल्गु बिम्बोष्ठं चारुकुण्डलम् ॥ मुखं द्रक्ष्यसि रामस्य पूर्णचन्द्रमिवोदितम् ॥ ३९ ॥
क्षिप्रं द्रक्ष्यसि वैदेहि रामं प्रस्रवणे गिरौ ॥ शतक्रतुमिवासीनं ना[6]कपृष्ठस्य मूर्धनि ॥ ४० ॥

यस्य प्रवृत्तिं श्रृणुयां श्रृणोमि । तावज्जिजीविषेयं जीवेयं । इच्छाया इष्यमाणप्रधानत्वादिष्यमाणं जीवनमिहाभिधीयते । रामः "न मांसं राघवो भुङ्क्ते" इत्युक्तरीत्या भोजनं, "अनिद्रः सततं रामः" इति निद्रां च हित्वा समुद्रं बद्ध्वा समागच्छन् तापार्ते प्रपां गते तस्यां भिन्नपानीयपात्रायां सत्यामिव मयि नष्टायां न जीवेत् । अतस्तदागमनपर्यन्तं मया जीवितव्यं परतन्त्रशरीरत्वात् । तदागमनानन्तरमपि यदि जीविष्यामि तदेत्थं वदेदिति भावः । एतावत्पर्यन्तं वानरेति संबोध्य संप्रति दूतेत्याह—रामविषयप्रणयरोषस्य दूतपर्यन्तं व्यापनात् । तेन प्रहितः खलु भवानपीति भावः । प्रणयरोषाभावपक्षेपि—न चास्येति ॥ अस्य माता चास्मिन्स्नेहात् मत्तः न विशिष्टा मया न समा च । यथाहमस्मिन् स्निग्धा तथानान्यइत्यर्थः । एतदेवोत्तरार्धेन समर्थयति—तावदिति ॥ ३० ॥ इतीव पूर्वं कतिपयानर्थान्विविच्योक्तवान् । संप्रति प्रणयधारासूक्ष्ममृषीणामपदं हि तत इतीवेत्याह—देवी । वल्लभाया व्यवहारो बहिष्ठानां न प्रतिभाति हि । वचनं महार्थं न केवलं बहिष्ठानां देशिकानामस्माकमपीत्यर्थः । महार्थमित्युक्तेः । तं वानरेन्द्रं । सुग्रीवस्य शेषत्वेभिषिक्तत्वेपि पारतन्त्र्ये हनुमानभिषिक्त इत्यर्थः । मधुरार्थं माधुर्येण मध्ये हनुमान्न वक्तुमारभतेति भावः । उक्त्वा स तदीयाश्च तयाभिवर्धन्ते तथोक्त्वा । श्रोतुं पुनस्तस्य वचोभिरामं स्ववचनानुरूपोत्तरं श्रोतुं । रामार्थयुक्तं रामप्रयोजनयुक्तं रामरूपाभिधेययुक्तं वा । विरराम स्वयं चिरभाषणात्स्वामिन्यां भाषमाणायां मध्ये भृत्येनोक्त्ययोगाच्च तूष्णींभूतस्यावकाशप्रदानमकरोत् । रामा पारंपर्यं विना साक्षाद्वचःसौन्दर्यदर्शनं रामेण न लब्धं हीति मुनिः खिद्यति ॥ ३१—३२ ॥ रामः न जीवेयं क्षणमपि विना तामसितेक्षणामित्यध्यवसायी । कथं नागच्छेत् । कमललोचने त्वन्नयनसौन्दर्यं दर्पणतलेपि किंन दृष्टवती भवती । एतत्सौन्दर्यवतीं कथं त्वां विना स तिष्ठेत् । तेन अनेन हेतुना । आशु त्वां नानयति । शचीं पुरन्दर इव । अनुह्लादहस्तगतां शचीमिन्द्रः कंचित्कालमविज्ञाय ज्ञानानन्तरं यथा आनीतवान् तथेति भावः ॥ ३३ ॥ मह्यं मम । व्यत्ययेन षष्ठ्यर्थे चतुर्थी ॥ ३४ ॥ समुद्रं कथमतिक्रमिष्यतीत्यत्राह—विष्टम्भयित्वेति ॥ विष्टम्भयित्वा स्तब्धं कृत्वेत्यर्थः ॥ ३५ ॥ स्थास्यन्ति प्रतिबन्धकतयेति शेषः ॥ ३६—३७ ॥ गिरीणां स्वजीवनस्थानत्वात्तैः शपति—मलयेनेति ॥ दर्दुरो नाम मलयपरिसरवर्ती चन्दनप्रभवः कश्चित्पर्वतः ॥ ३८ ॥ यथेति तथा शप इति पूर्वेणान्वयः ॥ ३९ ॥ नाकपृष्ठो नाम

ती० नागराजस्य ऐरावतस्य । नाकपृष्ठस्येतिपाठे स्वर्गोपरीत्यर्थः ॥ ति० प्रस्रवणेगिरौविद्यमानमपि । इहद्रक्ष्यसीत्यर्थः । नागपृष्ठस्यमूर्धनि ऐरावतोपरिस्थितमिन्द्रमिवमत्पृष्ठगंरामंद्रक्ष्यसीत्यर्थः । शि० नागाः गजाः पृष्ठे पार्श्वेइत्यर्थः । यस्यतस्य ॥ ४० ॥

[पा०] १ क. हनूमान्वाक्यमब्रवीत्. २ क. त्वामिहस्थांनजानीते. ३ ग. ङ.—ट. कमललोचनः. ४ ङ. झ. ट. परिपूरितः. ५ ग.—ट. मन्दरेणचतेदेविशपेमूलफलेनच। मलयेनचविन्ध्येनमेरुणादर्दुरेणच. ६ ख. च. छ. नागराजस्य. झ. ञ. ट. नागपृष्ठस्य.

न मांसं राघवो भुङ्क्ते न[1] चापि मधु सेवते ॥ वन्यं सुविहितं नित्यं भक्तमश्नाति पञ्चमम् ॥ ४१ ॥
नैव दंशान्न मशकान्न कीटान्न सरीसृपान् ॥ राघवोपनयेद्गात्रात्त्वद्गतेनान्तरात्मना ॥ ४२ ॥
नित्यं ध्यानपरो रामो नित्यं शोकपरायणः ॥ नान्यच्चिन्तयते किंचित्स तु कामवशं गतः ॥४३॥
अनिद्रः सततं रा[2]मः सुप्तोपि च नरोत्तमः ॥ सीतेति मधुरां वाणीं व्याहरन्प्रतिबुध्यते ॥ ४४ ॥
दृष्ट्वा फलं वा पुष्पं वा य[4]द्वाऽन्यत्सुमनोहरम् ॥ बहुशो हा प्रियेत्येवं श्व[5]संस्त्वामभिभाषते ॥ ४५ ॥

स देवि नित्यं परितप्यमानस्त्वामेव सीतेत्यभिभाषमाणः ॥
दृढ[6]व्रतो राजसुतो महात्मा तवैव लाभाय कृतप्रयत्नः ॥ ४६ ॥
सा रामसंकीर्तनवीतशोका रामस्य शोकेन समानशोका ॥
शर[7]न्मुखे साम्बुदशेषचन्द्रा निशेव वैदेहसुता बभूव ॥ ४७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

इन्द्रस्यासाधारणस्वर्गस्थानविशेषः ॥ ४० ॥ न मांसमिति "दृङ्मनःसङ्गसङ्कल्पजागराः कृशताऽरतिः । ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश" इति दशावस्थास्वरतिरनेनोच्यते । मांसाद्यभोजनं अरत्या ततः पूर्वं तद्भोजनोक्तेः । वन्यं वने भवं कन्दमूलादिकं । सुविहितं वानप्रस्थयोग्यत्वेन विहितं । भक्तं अन्नं । पञ्चमं प्रातःसङ्गवमध्याह्नापराह्णसायंरूपेषु कालेषु पञ्चमकालिकं शरीरधारणमात्रोपयुक्तं भुङ्क्ते इत्यर्थः ॥ ४१ ॥ अथ मनःसङ्गावस्थामाह—नैवेति ॥ दंशास्तु वनमक्षिकाः तान् । मशकांश्चेत्यनेन दंशमशकापरिज्ञानमुक्तं । कीटसरीसृपोक्त्या उपरिशरीरं चरतामनिवृत्तिरुच्यते । तत्र हेतुः त्वद्गतेनान्तरात्मना । परकायप्रविष्टस्य कथं त्यक्तशरीरविकृतिज्ञानं । तत्र स्थितः खलु तत्रत्यपीडां ज्ञास्यतीति भावः ॥ ४२—४३ ॥ तथास्य जागरावस्थामाह—अनिद्र इति ॥ अनिद्रः सततं रामः निद्रया सर्वदा कालक्षेपार्होपि संततमनिद्रोभूत् । सुप्तोपिचेत्यनेन परगतार्थानुसंधानाभाव उच्यते । नरोत्तमः अभिमतविश्लेषे तथावस्थानमेव हि पुरुषोत्तमस्त्वस्य लक्षणमिति भावः । सीतेति अप्राकृतसौन्दर्याद्यनुसंधानेन वासनावशाद्विलपति । मधुरां वाणीं । वासनावशाद्विलपत्यपिशब्दस्वभावाद्रसनाजलस्यन्दिनी भवतीत्यर्थः । प्रतिबुध्यते क्लेशहीनदशाविगमात्पुनरपि बाधकोद्दीपनसंदर्शनेन बाधार्हः स्थित इत्यर्थः ॥ ४४—४६ ॥ रामसद्भावातिशङ्कया कश्चिच्छोकः सीतायाः रामविरहेण कश्चिच्छोकः । तत्राद्यो हनुमदुक्त्या निवृत्तः द्वितीयस्तु वर्तत इत्याह—रामस्य शोकेन समानशोका तद्विरहकृतत्वेन तत्तुल्यशोका । अधिकशोकस्तु निवृत्त इति भावः । यद्वा रामसंकीर्तनेन वीतशोकापि नैव दंशान्न मशकानित्यादिश्रवणेन रामतुल्यशोका प्रकाशाप्रकाशशरन्मुखनिशेवाभूदित्यर्थः ॥ ४७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षट्त्रिंशः सर्गः ॥ ३६ ॥

ती० भक्तं अन्नं पञ्चमं पञ्चानामन्नानांपूरणं । वानप्रस्थाहिमूलफलादिकंपञ्चधाकृत्वादेवपितृतिथिभूतेभ्यस्तद्भागान्दत्वा पञ्चमं स्वयंभुञ्जते । यद्वा षोडशारण्यवासिनइत्युक्तवानप्रस्थभोज्यस्यपञ्चमांशंभुङ्क्ते । अनेनरामस्याल्पाहारतोक्ता ॥ ति० पञ्चमं कालं प्राप्येतिशेषः । यद्वा प्रातस्सायंसायंप्रातरितिकालचतुष्टयंत्यक्त्वा पञ्चमेप्रातःकालइत्यर्थः । दिनद्वयमतीत्यभुङ्क्तइत्यर्थः । शि० मांसं सुग्रीवसंसर्गेणवनेपि प्राप्तराज्यभोगं । नभुङ्क्ते नकरोति । वन्यं फलादिरूपंअन्नं पञ्चमं पूर्वभोज्यापेक्षयापञ्चमं ॥ ४१ ॥ ति० स्त्रीमनोहरं स्त्रीसंनिधानेमनोहरं । स्त्रीणांमनोहरंवा । श्वसन् दीर्घोच्छ्वासंत्यजन् ॥ ४५ ॥ ती० नमांसंराघवोभुङ्क्तेइत्युक्तशोकेनहेतुना समानशोका ॥ ति० नमांसंराघवोभुङ्क्तेइत्युक्तेनरामशोकेन समानशोका । शरत् लुप्तषष्ठीकं । शरदोनिशेव प्रकाशाप्रकाशयुक्तशरन्निशेवहर्षशोकवतीबभूव ॥ ४७ ॥ इतिषट्त्रिंशःसर्गः ॥ ३६ ॥

[पा०] १ ङ. ज. झ. ट. नचैव. २ ख. देविसतु. ३ क. रात्रौ. ४ क. ग. घ. ङ. ज. झ. ट. यच्चान्यत्स्त्रीमनोहरं. च. छ. ञ. यद्वान्यत्स्त्रीमनोहरं. ५ क. शोचंस्त्वां. ट. स्मरंस्त्वां. ६ क. ङ. झ. ट. धृतव्रतो. ७ ङ. झ. शरन्मुखेनांबुद. च. छ. ञ. शरन्मुखेसांबुदचन्द्रशेषा.

सप्तत्रिंशः सर्गः ॥ ३७ ॥

स्ववियोगहेतुकरामशोकातिरेकश्रवणखिन्नयासीतया सत्वरंरामसमानयनंचोदितेनहनुमता सीताशोकासहनेनतांप्रति तस्याःस्वपृष्ठारोपणेनरामसमीपप्रापणोक्तिः ॥ १ ॥ सीतया हनुमतोऽणुरूपतयास्वप्रापणासंभावनाशङ्कयोपहासे हनुमता तस्याःप्रत्ययजननाय मेरुतुल्यपरिमाणकपृथुतरशरीरपरिग्रहणम् ॥ २ ॥ सीतयातंप्रति बहुहेतूपन्यासेनतेनसहगमनस्यानौचित्यप्रतिपादनपूर्वकं सत्वरंरामस्यैवसमानयनचोदना ॥ ३ ॥

सीता तद्वचनं श्रुत्वा पूर्णचन्द्रनिभानना ॥ हनूमन्तमुवाचेदं धर्मार्थसहितं वचः ॥ १ ॥
अमृतं विषसंसृष्टं त्वया वानर भाषितम् ॥ यच्च नान्यमना रामो यच्च शोकपरायणः ॥ २ ॥
ऐश्वर्ये वा सुविस्तीर्णे व्यसने वा सुदारुणे ॥ रज्ज्वेव पुरुषं बद्ध्वा कृतान्तः परिकर्षति ॥ ३ ॥
विधिर्नूनमसंहार्यः प्राणिनां प्लवगोत्तम ॥ सौमित्रिं मां च रामं च व्यसनैः पश्य मोहितान् ॥४॥
शोकस्यास्य कदा पारं राघवोऽधिगमिष्यति ॥ प्लवमानः परिश्रान्तो हतनौः सागरे यथा ॥ ५ ॥
राक्षसानां वधं कृत्वा सूदयित्वा च रावणम् ॥ लङ्कामुन्मूलितां कृत्वा कदा द्रक्ष्यति मां पतिः॥६॥
स वाच्यः संत्वरस्वेति यावदेव न पूर्यते ॥ अयं संवत्सरः कालस्तावद्धि मम जीवितम् ॥ ७ ॥
वर्तते दशमो मासो द्वौ तु शेषौ प्लवङ्गम ॥ रावणेन नृशंसेन समयो यः कृतो मम ॥ ८ ॥
विभीषणेन च भ्रात्रा मम निर्यातनं प्रति ॥ अनुनीतः प्रयत्नेन न च तत्कुरुते मतिम् ॥ ९ ॥
मम प्रतिप्रदानं हि रावणस्य न रोचते ॥ रावणं मार्गते सङ्ख्ये मृत्युः कालवशं गतम् ॥ १० ॥
ज्येष्ठा कन्याऽनला नाम विभीषणसुता कपे ॥ तया ममेदमाख्यातं मात्रा प्रहितया स्वयम् ॥११॥
[अविन्ध्यो नाम मेधावी विद्वान्राक्षसपुङ्गवः । द्युतिमाञ्शीलवान्वृद्धो रावणस्य सुसंमतः ॥
रामक्षयमनुप्राप्तं रक्षसां प्रत्यचोदयत् ॥ न च तस्य स दुष्टात्मा शृणोति वचनं हितम् ॥ १३ ॥]
असंशयं हरिश्रेष्ठ क्षिप्रं मां प्राप्स्यते पतिः ॥ अन्तरात्मा हि मे शुद्धस्तस्मिंश्च बहवो गुणाः ॥१४॥
उत्साहः पौरुषं सत्त्वमानृशंस्यं कृतज्ञता ॥ विक्रमश्च प्रभावश्च सन्ति वानर राघवे ॥ १५ ॥
चतुर्दश सहस्राणि राक्षसानां जघान यः ॥ जनस्थाने विना भ्रात्रा शत्रुः कस्तस्य नोद्विजेत् ॥१६॥
न स शक्यस्तुलयितुं व्यसनैः पुरुषर्षभः ॥ अहं तस्य प्रभावज्ञा शक्रस्येव पुलोमजा ॥ १७ ॥
शरजालांशुमाञ्छूरः कपे रामदिवाकरः ॥ शत्रुरक्षोमयं तोयमुपशोषं नयिष्यति ॥ १८ ॥

यच्च नान्यमना इत्यमृतत्वे हेतुः । यच्छोकपरायण इति विषसंसृष्टत्वे ॥ २ ॥ रामवियोगो न स्वबुद्धिकृत इत्याह—ऐश्वर्य इति ॥ कृतान्तः दैवं ॥ ३ ॥ विधिः दैवं । असंहार्यः अनिवार्यः ॥ ४—७ ॥ दशमोमासः दशममासान्तः ॥ ८ ॥ निर्यातनं प्रत्यर्पणं ॥ ९—१४ ॥ लोकोत्तरेषु कार्येषु स्थेयान् प्रयत्न उत्साहः । पौरुषं तादृक्कार्यकरणं । सत्त्वं बलं । आनृशंस्यं अक्रूरत्वं । कृतज्ञता उपकारज्ञत्वं । विक्रमः शौर्यं । प्रभावः शक्तिः ॥ १५—१६ ॥ तुलयितुं चालयितुं ॥ १७—

शि० ऐश्वर्यव्यसनेवाविद्यमानंपुरुषं रज्ज्वाबद्ध्वेवकृतान्तःकालःपरिकर्षति । एतेन रावणविध्वंसोऽवश्यंभवितेतिसूचितं ॥ ३ ॥
ति० कन्या अजातपुरुषसंबन्धा । एतत् विभीषणानुनयनं । इदमेवाग्रे रामश्रुतंविभीषणस्यनिश्शङ्कपरिग्रहाभिषेकयोर्बीजं ॥११॥
ति०व्यसनैः व्यसनदातृभीराक्षसैः । तुलयितुं उपमितुं । तस्यतत्त्वंचममप्रत्यक्षमेवेत्याह—अहंतस्येति । तद्रूपत्वादितिगूढं ॥१७॥

[पा०] १ क. ग. ङ. च. छ. झ. ञ. ट. सासीतावचनं. घ. सीताचवचनं. २ ङ. च. छ. झ. ञ. ट. विषसंपृक्तं. ख. घ. विषसंस्तृष्टं. ३ च. छ. ञ. शोकस्यच. ४ ङ. झ. ट. कथं. ५ ङ. च. छ. झ. ञ. ट. परिक्रान्तो. ६ क—घ. क्षयं. ७ ङ. झ. ट. मुन्मथितां. ८ घ. मनः. ९ ङ. झ. ञ. कन्याकला. १० झ. ममैतदाख्यातं. ११ च. छ. ट. मात्राऽभिहितया १२ इदंश्लोकद्वयं ङ—ट. पाठेषुदृश्यते. १३ क.—घ. झ. ट. आशंसेयं. १४ ग. ङ. च. छ. झ. ञ. ट. तस्यानुभावज्ञा.

इति संजल्पमानां तां रामार्थे शोककर्शिताम् ॥ अश्रुसंपूर्णनयनामुवाच वचनं कपिः ॥ १९ ॥
कृत्वैव तु वचो मह्यं क्षिप्रमेष्यति राघवः ॥ चमूं प्रकर्षन्महतीं हर्यृक्षगणसंकुलाम् ॥ २० ॥
अथवा मोचयिष्यामि त्वामद्यैव वरानने ॥ अस्माद्दुःखादुपारोह मम पृष्ठमनिन्दिते ॥ २१ ॥
त्वां तु पृष्ठगतां कृत्वा संतरिष्यामि सागरम् ॥ शक्तिरस्ति हि मे वोढुं लङ्कामपि सरावणाम् ॥२२॥
अहं प्रस्रवणस्थाय राघवायाद्य मैथिलि ॥ प्रापयिष्यामि शक्राय हव्यं हुतमिवानलः ॥ २३ ॥
द्रक्ष्यस्यद्यैव वैदेहि राघवं सहलक्ष्मणम् ॥ व्यवसायसमायुक्तं विष्णुं दैत्यवधे यथा ॥ २४ ॥
त्वद्दर्शनकृतोत्साहमाश्रमस्थं महाबलम् ॥ पुरन्दरमिवासीनं नाकराजस्य मूर्धनि ॥ २५ ॥
पृष्ठमारोह मे देवि मा विकाङ्क्षस्व शोभने ॥ योगमन्विच्छ रामेण शशाङ्केनेव रोहिणी ॥ २६ ॥
कथयन्तीव चन्द्रेण सूर्येण च महार्चिषा ॥ मत्पृष्ठमधिरुह्य त्वं तराकाशमहार्णवौ ॥ २७ ॥
न हि मे संप्रयातस्य त्वामितो नयतोऽङ्गने ॥ अनुगन्तुं गतिं शक्ताः सर्वे लङ्कानिवासिनः ॥ २८ ॥
यथैवाहमिह प्राप्तस्तथैवाहमसंशयः ॥ यास्यामि पश्य वैदेहि त्वामुद्यम्य विहायसम् ॥ २९ ॥
मैथिली तु हरिश्रेष्ठाच्छ्रुत्वा वचनमद्भुतम् ॥ हर्षविस्मितसर्वाङ्गी हनुमन्तमथाब्रवीत् ॥ ३० ॥
हनुमन्दूरमध्वानं कथं मां वोढुमिच्छसि ॥ तदेव खलु ते मन्ये कपित्वं हरियूथप ॥ ३१ ॥
कथं वाऽल्पशरीरस्त्वं मामितो नेतुमिच्छसि ॥ सकाशं मानवेन्द्रस्य भर्तुर्मे प्लवगर्षभ ॥ ३२ ॥
सीताया वचनं श्रुत्वा हनुमान्मारुतात्मजः ॥ चिन्तयामास लक्ष्मीवान्नवं परिभवं कृतम् ॥ ३३ ॥
न मे जानाति सत्त्वं वा प्रभावं वासितेक्षणा ॥ तस्मात्पश्यतु वैदेही यद्रूपं मम कामतः ॥ ३४ ॥
इति संचिन्त्य हनुमांस्तदा प्लवगसत्तमः ॥ दर्शयामास वैदेह्याः स्वरूपमरिमर्दनः ॥ ३५ ॥
स तस्मात्पादपाद्धीमानाप्लुत्य प्लवगर्षभः ॥ ततो वर्धितुमारेभे सीताप्रत्ययकारणात् ॥ ३६ ॥
मेरुमन्दरसंकाशो बभौ दीप्तानलप्रभः ॥ अग्रतो व्यवतस्थे च सीताया वानरोत्तमः ॥ ३७ ॥

२४ ॥ नाकराजस्य मूर्धनि । नाकपृष्ठसंज्ञस्य मूर्धनि । नगराजस्येति पाठे मेरोरित्यर्थः ॥ २५ ॥ मा विकाङ्क्षस्व मोपेक्षिष्ठाः ॥ २६ ॥ चन्द्रेण कथयन्तीव चन्द्रेण भाषमाणेव तरेत्यन्वयः ॥२७—२९॥ हर्षविस्मितसर्वाङ्गी हर्षेण पुलकितसर्वाङ्गी ॥ ३०—३३ ॥ न मे जानाति सत्त्वं वा प्रभावं वासितेक्षणा । तस्मात्पश्यतु वैदेही यद्रूपं मम कामतः ॥ इति पाठः । अन्यथा पाठे वक्ष्यमाणेन विरोधः स्यात् ॥ ३४ ॥ स्वरूपं स्वस्य शरीरं ॥ ३५ ॥ एतदेवाह—स तस्मादिति ॥ अयं श्लोको वर्धनार्थं वृक्षादवरोहणं दर्शयति स्म । अनेन सोवतीर्य द्रुमादिति पूर्वं द्रुमाग्रात्सीतासमीपस्थशाखायामवतरणमुक्तं । अत्र भूमाविति बोध्यं ॥ ३६ ॥ अग्रतोऽव्यवतस्थे । संभाषणाय

ति० नगराजस्य श्रेष्ठस्यप्रस्रवणगिरेरित्यर्थः ॥२५॥ ति० कथयन्तीव संगतव्योरामइतिवचनंकथयन्तीव । शशिनारोहिणीवसंगमिष्यसीत्यन्वयः । एतद्वचनसमकालमेवरामसमीपंप्रापयिष्यामीत्यर्थः । यथातद्वचने नप्रयासः एवमनायासेनत्वांनयामीत्यर्थोवा । स० त्वत्पृष्ठारोहणेकिंफलमित्यतआह—कथयन्तीति । त्वंमत्पृष्ठारोहिणीति रोहिणी अतिसुखात्मकत्वाच्छशीरामः । यद्वा शशीरामः 'नक्षत्राणामहंशशी' इतिश्रीभगवदुक्तेः । कथयन्तीवसंगमिष्यसि । रामेणसंगतव्यमित्यालापनसमयएवसंगमिष्यसि । अनेनात्वराद्योत्यते ॥ २७ ॥ ती० पादपात् पादपमूलात् । आप्लुत्य शरीरवर्धनवेगकृतशाखाभङ्गध्वनिनाराक्षस्योज्ञास्यन्तीतिमत्वा

[पा०] १ ग.—ट. संपूर्णवदनां. २ ङ. झ. ट. श्रुत्वैवच. क. घ. च. छ. ज. ञ. श्रुत्वैवतु. ३ ङ. च. छ. झ. ञ. ट. राक्षसात्. क. ख. हिराक्षसात्. घ. ज. सरावणात्. ४ घ. हुतंहव्यं. ५ क. क्षिप्रंद्रक्ष्यसि. ६ ख. ग. ङ. च. छ. झ. ञ. नगराजस्य. ७ क. ग. घ. च. छ. ज. ञ. ट. पौलोमीवमहेन्द्रेणसूर्येणेवसुवर्चला. ङ. झ. कथयन्तीवशशिनासंगमिष्यसिरोहिणी. ८ ङ.—ट. मधिरोहत्वं. ९ ग. घ. ङ. झ. ट. तराकाशंमहार्णवं. १० ग. ङ.—ट. मसंशयं. ११ ख. घ. विहायसा. १२ घ. सासीतास्मितपूर्वंहि. १३ ङ. झ. ट. मांनेतुं. १४ घ. ङ. झ. ट. सीतायास्तुवचः. १५ क. काङ्क्षतः.

हरिः पर्वतसंकाशस्ताम्रवक्त्रो महाबलः ॥ वज्रदंष्ट्रनखो भीमो वैदेहीमिदमब्रवीत् ॥ ३८ ॥
सपर्वतवनोद्देशां साट्टप्राकारतोरणाम् ॥ लङ्कामिमां सनाथां वा नयितुं शक्तिरस्ति मे ॥ ३९ ॥
तदवस्थाप्यतां बुद्धिरलं देवि विकाङ्क्षया ॥ विशोकं कुरु वैदेहि राघवं सहलक्ष्मणम् ॥ ४० ॥
तं [1]दृष्ट्वा भीमसंकाशमुवाच जनकात्मजा ॥ पद्मपत्रविशालाक्षी मारुतस्यौरसं सुतम् ॥ ४१ ॥
तव सत्त्वं बलं चैव विजानामि महाकपे ॥ वायोरिव [2]गतिं चापि तेजश्चाग्नेरिवाद्भुतम् ॥ ४२ ॥
प्राकृतोऽन्यः कथं चेमां भूमिमागन्तुमर्हति ॥ उदधेरप्रमेयस्य पारं वानरपुङ्गव ॥ ४३ ॥
जानामि गमने शक्तिं नयने चापि ते मम ॥ अवश्यं संप्रधार्याशु कार्य[3]सिद्धिर्महात्मनः ॥ ४४ ॥
अयुक्तं तु कपिश्रेष्ठ [4]मम गन्तुं [5]त्वयाऽनघ ॥ वायुवेगसवेगस्य वेगो मां मोहयेत्तव ॥ ४५ ॥
अहमाकाश[6]मापन्ना ह्युपर्युपरि सागरम् ॥ प्रपतेयं हि ते पृष्ठा[7]द्भयाद्वेगेन गच्छतः ॥ ४६ ॥
पतिता सागरे चाहं तिमिनक्रझषाकुले ॥ भवेयमाशु विवशा यादसामन्नमुत्तमम् ॥ ४७ ॥
[8]न च शक्ष्ये त्वया सार्धं गन्तुं शत्रुविनाशन ॥ कलत्रवति संदेहस्त्वय्यपि स्यादसंशयः ॥ ४८ ॥
ह्रियमाणां तु मां दृष्ट्वा राक्षसा भीमविक्रमाः ॥ अनुगच्छेयुरादिष्टा रावणेन दुरात्मना ॥ ४९ ॥
तैस्त्वं परिवृतः शूरैः शूलमुद्गरपाणिभिः ॥ भवेस्त्वं संशयं प्राप्तो मया वीर कलत्रवान् ॥ ५० ॥
सायुधा बहवो व्योम्नि राक्षसास्त्वं निरायुधः ॥ कथं शक्ष्यसि [9]संयातुं मां चैव परिरक्षितुम् ॥५१॥
युध्यमानस्य [10]रक्षोभिस्तव तैः क्रूरकर्मभिः ॥ प्रपतेयं हि ते पृष्ठाद्भयार्ता कपिसत्तम ॥ ५२ ॥
अथ रक्षांसि भीमानि महान्ति बलवन्ति च ॥ कथंचित्सांपराये त्वां जयेयुः कपिसत्तम ॥ ५३ ॥
अथवा युध्यमानस्य पतेयं विमुखस्य ते ॥ पतितां च गृहीत्वा मां नयेयुः पापराक्षसाः ॥ ५४ ॥
मां वा हरेयुस्त्वद्धस्ताद्विशसेयुरथापि वा ॥ अव्यवस्थौ हि दृश्येते युद्धे जयपराजयौ ॥ ५५ ॥
अहं वाऽपि विपद्येयं रक्षोभिरभितर्जिता ॥ त्वत्प्रयत्नो हरिश्रेष्ठ भवेन्निष्फल एव तु ॥ ५५ ॥
कामं त्वमसि पर्याप्तो निहन्तुं सर्वराक्षसान् ॥ राघवस्य यशो हीयेत्त्वया शस्तैस्तु राक्षसैः ॥ ५७ ॥
अथवाऽऽदाय रक्षांसि [11]न्यसेयुः संवृते हि माम् ॥ यत्र ते नाभिजानीयुर्हरयो नापि [12]राघवौ ॥
[13]आरम्भस्तु मदर्थोऽयं ततस्तव निरर्थकः ॥ ५८ ॥

वृक्षमूलगतो बभूवेत्यर्थः ॥ ३७—३९ ॥ अवस्थाप्यतां निश्चलीक्रियतां । विकाङ्क्षया उपेक्षया ॥ ४०–४३ ॥ संप्रधार्या विचारणीया ॥ ४४ ॥ स्वप्रापणे प्रधानं दोषं हृदि कृत्वा आपाततो दोषमाह—अयुक्तमिति ॥ ४५ ॥ उपर्युपरि सागरमिति । " उपर्यध्यधसस्सामीप्ये " इति द्विवचनं । 'धिगुपर्यादिषु' इति द्वितीया ॥ ४६ ॥ यादसां जलजन्तूनां ॥ ४७ ॥ कलत्रवति रक्ष्यवति त्वयि संदेहः स्यात् । मयि रक्ष्यायां त्वयि विपत्संदेहः स्यादित्यर्थः ॥ ४८ ॥ एतदेव प्रपञ्चयति—ह्रियमाणामित्यादिना ॥ ४९ ॥ त्वं तैः परिवृतो भवेः । कलत्रवान् रक्ष्यवान् । त्वं संशयं प्राप्तश्च भवेरिति योजना ॥ ५० ॥ संयातुं सम्यग्योद्धुं ॥ ५१ ॥ पूर्वश्लोकोक्तं समर्थयति—युध्यमानस्येत्यादिना ॥ ५२ ॥ सांपराये युद्धे ॥ ५३ ॥ विमुखस्य युद्धपरवशस्येत्यर्थः॥५४—५७॥ संवृते गूढ-

ऽन्यत्रापसृतवानित्यर्थः ॥ ३६ ॥ ति० कलत्रवति स्त्रियासहगन्तरि । संदेहः राक्षसानामितिशेषः । स० कलत्रवति मद्रूपकल-

[पा०] १ क.—ट. दृष्ट्वाचलसंकाशं. २ ङ.—झ. ट. गतिश्चापि. ३ ङ. झ. सिद्धिरिवात्मनः. क. च. छ. ञ. सिद्धिरिहात्मनः. ४ ग. ङ.—ट. मयागन्तुं. ५ ग. ङ.—ट. त्वयासह. ६ क. ग. ङ.—ट. मासक्ता. ७ ङ.—ट. द्भूयोवेगेन. ८ च. छ. ज. नाहंशक्ष्ये. ९ क. संयोद्धुं. १० क. ग. ङ. च. छ. झ. ञ. ट. रक्षोभिस्ततस्तैः. घ. रक्षोभिस्समस्तैः. ११ ग. च. छ. नयेयुः. १२ क. ख. ग. ङ.—ट. राघवः. १३ क. प्रयत्नस्तुमदर्थाय.

त्वया हि सह रामस्य महानागमने गुणः ॥ ५९ ॥
मयि जीवितमायत्तं राघवस्य महात्मनः ॥ भ्रातॄणां च महाबाहो तव राजकुलस्य च ॥ ६० ॥
तौ निराशौ मदर्थं तु शोकसंतापकर्शितौ ॥ सह सर्वर्क्षहरिभिस्त्यक्ष्यतः प्राणसंग्रहम् ॥ ६१ ॥
भर्तृभक्तिं पुरस्कृत्य रामादन्यस्य वानर ॥ नं स्पृशामि शरीरं तु पुंसो वानरपुङ्गव ॥ ६२ ॥
यदहं गात्रसंस्पर्शं रावणस्य बलाद्गता ॥ अनीशा किं करिष्यामि विनाथा विवशा सती ॥ ६३ ॥
यदि रामो दशग्रीवमिह हत्वा सबान्धवम् ॥ मामितो गृह्य गच्छेत तत्तस्य सदृशं भवेत् ॥ ६४ ॥

श्रुता हि दृष्टाश्च मया पराक्रमा महात्मनस्तस्य रणावमर्दिनः ॥
न देवगन्धर्वभुजङ्गराक्षसा भवन्ति रामेण समा हि संयुगे ॥ ६५ ॥
समीक्ष्य तं संयति चित्रकार्मुकं महाबलं वासवतुल्यविक्रमम् ॥
सलक्ष्मणं को विषहेत राघवं हुताशनं दीप्तमिवानिलेरितम् ॥ ६६ ॥
सलक्ष्मणं राघवमाजिमर्दनं दिशागजं मत्तमिव व्यवस्थितम् ॥
सहेत को वानरमुख्य संयुगे युगान्तसूर्यप्रतिमं शरार्चिषम् ॥ ६७ ॥
स मे हरिश्रेष्ठ सलक्ष्मणं पतिं सयूथपं क्षिप्रमिहोपपादय ॥
चिराय रामं प्रति शोककर्शितां कुरुष्व मां वानरमुख्य हर्षिताम् ॥ ६८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

प्रदेशे ॥५८—५९॥ तवराजकुलस्य सुग्रीवराजकुलस्य॥६०—६२॥ अनीशा स्वयं किंचित्कर्तुमसमर्था। विनाथा विगतस्वामिका । विवशा विचेष्टा ॥ ६३—६४ ॥ प्रथमहिशब्दो गुणप्रसिद्धौ । द्वितीयो निस्समत्वप्रसिद्धौ ॥ ६५—६७ ॥ हर्षितां हर्षमासादितां। उत्तरोत्तरहर्षवतीमित्यर्थः । अनया भक्तिकया उपायान्तरं स्वरूपविरुद्धं भगवत्प्राप्तौ स एवोपाय इति दर्शितः ॥ ६८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तत्रिंशस्सर्गः ॥ ३७ ॥

त्रवतिरामे । त्वयि त्वद्विषये । असंशयंयथातथा संदेहः परपुरुषेणसहैकाऽऽयातेतिसंदेहः ॥ ४८ ॥ **ती०** ननुरावणाङ्गसंस्पर्शः कथंस्यादित्यतआह—भर्तुरिति । यस्मात्कारणात्भर्तुर्भक्तिपुरस्कृत्य भर्तुर्भक्त्यालक्ष्मणःप्रस्थापितः । तस्माद्रावणस्यगात्रसंस्पर्शंबलाद्गतेतिसंबन्धः । हासीतेलक्ष्मणेतिमारीचवाक्यंश्रुत्वा रामानर्थशङ्कयाभर्तृभक्त्यालक्ष्मणप्रस्थापनात्प्राप्तोऽयमनर्थोकामकृतइतिभावः । अनीशा स्वयंकिंचित्कर्तुमशक्नुवती । विवशा विचेष्टा । विनाथा विगतस्वामिका असंनिहितनाथेत्यर्थः ॥ ६२—६३ ॥ **ति०** तत्तस्यसदृशं स्वमहिम्नासगणंशत्रुंहत्वामन्नयनं । सगणरावणवधार्थमेवावतारात् तस्यचमद्गमनेऽसंभवात् । एवंचस्वकार्यानिष्पत्त्यागतायामपिक्रुध्येदितिगूढं ॥ ६४ ॥ **ति०** तादृशबलंचतस्यमयासुविदितमित्याह—श्रुताश्चेति । विश्वामित्रयज्ञादौकृताः वालिवधादयश्चश्रुताः । अन्येदृष्टाः ॥ **स०** रणावमर्दिनः रणेवैर्यवमर्दी । रणेअवन्तिरक्षयन्तिआगच्छन्तिस्वानितिवा रणावाः । तान्मर्दीतिवा ॥ ६५ ॥ **स०** वासवतुल्यविक्रमं वासवोपितुल्यविक्रमः योग्यतानुसारिपराक्रमोयेनसतथा । इतरोर्थःस्फुटः ॥ ६६ ॥ **स०** सयूथपं ससुग्रीवं । कपिश्रेष्ठ वानरवीरेति प्रलापकालत्वाद्विरुक्तिः । यद्वा रामंप्रतिशोककर्शितां नरवीरेणरामेणहर्षितां कुरुष्वेत्यर्थः ॥ ६८ ॥ इतिसप्तत्रिंशःसर्गः ॥ ३७ ॥

[पा०] १ ङ.—ट. राघवस्यामितौजसः. २ क.—घ. ज.—ट. भर्तुर्भक्ति. ३ ङ. झ. ट. नाहंस्प्रष्टुंस्वतोगात्रमिच्छेयं वानरोत्तम. च. छ. ज. ञ. मयापुनःपुमानन्योनयुक्तःस्प्रष्टुमात्मना. ४ ग.—ट. गताबलात्. ५ क. ख. घ.—ट. सराक्षसं. ६ ङ. झ. ट. प्रियं. ७ क.—ज. ट. वानरवीर.

स मां दृष्ट्वा महाबाहुर्वितुन्नां स्तनयोस्तदा ॥ आशीविष इव क्रुद्धः श्वसन्वाक्यमभाषत ॥ २५ ॥
केन ते नागनासोरु विक्षतं वै स्तनान्तरम् ॥ कः क्रीडति सरोषेण पञ्चवक्त्रेण भोगिना ॥ २६ ॥
वीक्षमाणस्ततस्तं वै वायसं समुदैक्षत[1] ॥ नखैः सरुधिरैस्तीक्ष्णैर्मामेवाभिमुखं स्थितम् ॥ २७ ॥
पुत्रः किल स शक्रस्य वायसः पततां वरः ॥ धरान्तरगतः शीघ्रं पवनस्य गतौ समः ॥ २८ ॥
ततस्तस्मिन्महाबाहुः कोपसंवर्तितेक्षणः ॥ वायसे कृतवान्क्रूरां मतिं मतिमतां वरः ॥ २९ ॥
स दर्भं[2] संस्तराद्गृह्य ब्राह्मेणास्त्रेण[3] योजयत् ॥ स दीप्त इव कालाग्निर्जज्वालाभिमुखो द्विजम् ॥ ३० ॥
स तं प्रदीप्तं चिक्षेप दर्भं तं वायसं प्रति ॥ ततस्तं वायसं दर्भः सोम्बरेऽनुजगाम ह ॥ ३१ ॥
अनुसृप्तस्तदा काको जगाम विविधां गतिम् ॥ लोककाम[4] इमं लोकं सर्वं वै विचचार ह ॥ ३२ ॥
स पित्रा च परित्यक्तः सुरैश्च[5] समहर्षिभिः[6] ॥ त्रीँल्लोकान्संपरिक्रम्य तमेव शरणं गतः ॥ ३३ ॥

सुप्तः तत्त्वानुगुणैव हि सुप्तिरपि । परन्तपः शयनमेव सकलशत्रुनिवर्तनक्षममित्यर्थः । सुप्तः श्रीमान् । लोके स्थानगमनशयनादिदशायां रूपवानिवलक्ष्यतेकश्चित् । संशयने प्रकाशितप्रच्छन्नदोषतयाजुगुप्सितोभवति । अयंतु शयनावस्थायामेवनीराजनाकर्तव्या दृष्टिदोषपरिहारायेत्येवंस्थितः ॥ २४ ॥ वितुन्नां दारितां ॥ २५ ॥ पञ्चवक्त्रेण व्यात्तमुखेन । " पचि विस्तारे " इत्यस्मात्पचाद्यच् । कार्यातिशयद्योतनार्थं वा पञ्चसङ्ख्याकवक्त्रत्वोक्तिः । नागनासोरु नागहस्तोरु । कुपितपञ्चवक्त्रक्रीडासमं तवस्तनविदारणमितिभावः ॥ २६—२७ ॥ ननु वायसमात्रे किमर्थमस्त्रं मुक्तमित्याशङ्क्याह—पुत्रः किलेति ॥ इदं रक्षणानन्तरं तेनैवोक्तमिति ज्ञेयं । किलेति प्रसिद्धौ । इन्द्रपुत्रत्वेन प्रसिद्धो जयन्त एव वायसरूपेणागत इत्याहुः । वायसरूपोन्यः पुत्र इत्यप्याहुः ॥ २८—२९ ॥ संस्तरात् आस्तरणात् । गृह्य गृहीत्वा । अस्त्रेण अस्त्रमन्त्रेण । योजयत् अयोजयत् । अभिमन्त्रितवानित्यर्थः । द्विजं काकं ॥ ३०—३१ ॥ अनुसृप्तः अनुसृतः । विविधां गतिं विविधं स्थानं । लोककामः लोकयितृकामः । रक्षकापेक्षीत्यर्थः ॥ ३२ ॥ भगवव्द्यतिरिक्ता बान्धवाभासा न रक्षका इत्याह—स पित्रेति । सः पुरुषकारभूतायामपि कृतापराधः । सः आर्द्रापराधः । पित्रा च परित्यक्तः अस्त्रक्षतिभीततया प्रथमं पितरं रक्षकं गतः तेन त्रैलोक्याधिपतिना च त्यक्तः । "इन्द्रो महेन्द्रस्सुरनायकोवा" इति तस्यासमर्थत्वोक्तेः । परित्यक्तः त्यागोपि नापाततः बुद्धिपूर्वं त्यक्तः । " त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्" इति न्यायात् । यद्वापरित्यक्तः भार्यापुत्रादिभिस्सह त्यक्तः । चकारेण माता समुच्चीयते । न केवलं हितपरेण पित्रा प्रियपरयामात्रा च परित्यक्तः । " सीता नारी जनस्यास्य योगक्षेमं विधास्यति " इति स्वरक्षकभूतायामपि सापराधत्वादिति भावः । पित्रपेक्षया मातुर्वात्सल्यातिशयात्तामेव प्रथमं गच्छति स्म ततः पितरं । पित्रा त्यागवचनान्मात्रा त्यागः सिद्ध एवेति चकारेण सूचितम् । पितृभ्यां त्यागेपि बान्धवा न त्यज्यन्ति । किं पितरौ सर्वथा त्यक्ष्यत इति तैरपि त्यक्त इत्याह—सुरैश्च । " कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे " इति रामनयने रक्ते तेपि बिभ्यति हि । एवं पूर्वसजातीयैस्त्यक्तत्वेपि परिगृहीतपक्षिरूपसजातीयैः किं त्यक्त इत्यपेक्षायां तथेत्याह—चकारेण । " पक्षिणोपि प्रयाचन्ते सर्वभूतानुकम्पिनं " इति पक्षिणामपि शरण्यत्वात् । स्वनायकगरुडस्वामित्वाच्च पक्षिभिरपि परित्यक्तः । स महर्षिभिः । पित्रादिबन्धूनामरक्षकत्वेपि आनृशंस्यप्रधाना महर्षयो रक्षिष्यन्तीति गतः । तैरपि प्रकामं दूरदर्शिभिः परित्यक्तः ।

ति० तदा स्तनयोर्वितुन्नांमांदृष्ट्वाक्रुद्धः । अनेन पूर्वपर्यायेकेवलंरामःकाकचेष्टाबुद्ध्यापरिहासमेवकृतवानितिसूचितं ॥ २५ ॥ **ति०** शक्रपुत्रः जयन्तः । सतुवायसः । वायसरूपधारीत्यर्थः । धरान्तरंगतः भूमिबिलंप्राप्तः । शीघ्रगतौ पवनस्यसमः । धरान्तरचारित्वंतु पवनादस्यविशेषः । नहिवायुस्तत्संचारीतिकतकः । ननुसावधानजनशरीरस्यकाककर्तृकविदारणंलोकेनदृष्टमिति कोऽयमीदृशःकाकइतिहनुमतःशङ्कांदूरीकुर्वतीआह—**पुत्रइति** । शक्रस्यपुत्रः । एतेन रामपराक्रमपरीक्षार्थंशक्रप्रेरणयैवायमागत

[पा०] १ क.—ट. समवैक्षत. २ झ. दर्भसंस्तरात्. ३ ग. ङ. झ. ट. ब्रह्मणोस्त्रेण. ४ क. ङ.—ट. त्राणकामः. ५ ङ. झ. ट. सर्वैश्च. ६ ङ. झ. ट. परमर्षिभिः.

स तं निपतितं भूमौ शरण्यः शरणागतम् ॥ वधार्हमपि काकुत्स्थः कृपया पर्यपालयत् ॥ ३४ ॥
न शर्म लब्ध्वा लोकेषु तमेव शरणं गतः ॥ ३५ ॥
परिद्यूनं विषण्णं[1] च स[2] तमायान्तमब्रवीत् ॥ मोघं[3] कर्तुं[4] न शक्यं तु ब्राह्ममस्त्रं तदुच्यताम् ॥ ३६ ॥
हिनस्तु दक्षिणाक्षि त्वच्छर इत्यथ सोऽब्रवीत् ॥ ततस्तस्याक्षि काकस्य हिनस्ति स स दक्षिणम् ॥
दत्त्वा स दक्षिणं नेत्रं प्राणेभ्यः परिरक्षितः ॥ ३७ ॥
स रामाय नमस्कृत्वा राज्ञे दशरथाय च ॥ विसृष्टस्तेन वीरेण प्रतिपेदे स्वमालयम् ॥ ३८ ॥
मत्कृते काकमात्रे[5] तु ब्रह्मास्त्रं समुदीरितम् ॥ कस्माद्यो मां[6] हरत्त्वत्तः क्षमसे तं महीपते ॥ ३९ ॥
स[7] कुरुष्व महोत्साहः[8] कृपां मयि नरर्षभ ॥ त्वया नाथवती नाथ ह्यनाथा[9] इव दृश्यते ॥ ४० ॥

आनृशंस्यविषयव्यवस्थास्तीति तैस्त्यक्त इत्यर्थः । एतदङ्गीकारे वयमपि संसर्गदोषेण नश्येम । अस्माभिस्त्यागेऽनन्यगतिकत्वाद्राम एनं स्वीकरिष्यतीति तैस्त्यक्तः महर्षिभिः "यो विष्णुं सततं द्वेष्टि तं विद्यादन्त्यरेतसं" इति विष्णुद्वेषेण चण्डालत्वात् । "चण्डालः पक्षिणां काकः" इत्युक्तेश्च । चण्डालो नास्मद्वाटमागच्छेदिति त्यक्तः । एवं रक्षकान्तरादर्शनात् "नष्टगजो घटमप्यन्वेषते" इति न्यायेन स्वैरविवृतद्वारान्सर्वान्गृहान्गत इत्याह—त्रींल्लोकान्संपरिक्रम्य परिक्रम्य एतदेव नवकृत्वो गतः । संपरिक्रम्य गृहस्थैरविज्ञाततया कवाटमूलेषु लीनश्चेत्यर्थः । अपि कदाचित्कृपैषामुत्पद्येतेति मत्वा पुनःपुनर्गत इत्यर्थः । अमुं निष्कास्य कवाटबन्धनं सर्वैः कृतमित्यर्थः । ततः किं कृतमित्यत्राह—तमेव शरणं गतः । रक्षकत्वेन प्राप्तापेक्षया हिंसकत्वेन स्थितस्य मुखमेव शीतलमित्यवस्थितः । अतस्तमेव शरणं गतः । "यदिवारावणस्स्वयं" इत्येवं स्थितो हि रामः तमेव सर्वलोकशरण्यमेव । तमेव दोषो यद्यपि न त्यजेयमिति स्थितं । शरणं गतः निवासं गतः । न तूपायतया गतः । "निवासवृक्षः साधूनां" इत्युक्तेः ॥ ३३ ॥ स तमिति ॥ सः रक्षणैकस्वभावः । तं प्रातिकूल्यैकनिरतं भूमौ निपतितं देवजातितया भूमिमस्पृशन्तमपि भूमौ पतितं । भूमौ दुष्पुत्रं पितरि शिक्षमाणे स यथा मातुः पादयोः पतति तथापतत् । शरण्यः सर्वावस्थास्वपि शरणवरणार्हः । शरणागतं अनन्यगतिकतया स्वमुपागतं । वधार्हमपि रामसिद्धान्तेनापि वधार्हं । काकुत्स्थः कृपया पर्यपालयत कुलोचितस्वभावेन रक्षितवान् । कृपया अस्मदाद्यारब्धं कार्यं प्रबलकर्मणा न समाप्यते । तथा तेनारब्धमपि कृपया न पूर्यत इति भावः ॥ ३४—३५ ॥ परिद्यूनं परितप्तं । तदुच्यतामित्यनन्तरं । "हिनस्तु दक्षिणाक्षि त्वच्छर इत्यथ सोऽब्रवीत्" इत्यर्धमनुसन्धेयम् ॥ ३६—३७ ॥ दशरथाय स्वलोकस्थतया पूर्वमेव मित्रभूताय ॥ ३८ ॥ समुदीरितं प्रमुक्तं । हरत् अहरत् ॥ ३९ ॥ सः परदुःखं दृष्ट्वा न सहामहे इत्युक्तवान् । त्वं महोत्साहः एतदनुष्ठानपर्यन्तं कुर्वन मयि अत्यन्तदुःखितायां कृपां परदुःखासहिष्णुत्वं । प्रकाशयितुमर्हसि । नरोत्तम एवंनकरोषिचेत्तव नरोत्तमत्वस्यहानिरेवस्यात् । तस्मादेतद्वचनमनुष्ठानपर्यन्तंकृत्वा मां जीवयित्वा तवनरोत्तमत्वं परिपालयेतिभावः । अनाथाइव अनाथेव । आर्षो गुणाभावः । आनृशंस्यं परो धर्मः । नावारोपणानन्तरं वेतनाभ्य-

इतिध्वनितं । वायसः तदन्तर्गतः ॥ २८ ॥ **ति०** दर्भसंस्तरात् । एकमितिशेषः ॥ ३० ॥ **स०** ब्राह्ममस्त्रं दर्भान्तर्गर्भितं । तदुच्यतां एतेनवध्यमुच्यतां भार्गववदितिभावः । **रामानु०** तदुच्यतामितिप्रश्नानन्तरं हिनस्तिस्मसदक्षिणमितिवचनादस्त्रलक्ष्यत्वेनदक्षिणाक्षिप्रदानपरंप्रतिवचनंकाकेनकृतमित्यवगम्यते ॥ ३६ ॥ **ति०** सः दक्षिणाक्षि अस्त्रसंहार्यंभवत्वित्युक्तः । परिरक्षितः परिरक्षितवान् । आत्मानमितिशेषः । **स०** प्राणेभ्यः प्राणार्थे दत्वास्थितः । परिरक्षितः रामेणेतिशेषः ॥ ३७ ॥ **ती०** एवंहनुमतेरामैकसंवेद्यमभिज्ञानमभिधायदुःखावेशाद्राममेवबुद्धिस्थंसंबोध्यसोपालंभंप्रार्थयते—**मत्कृतइत्यादिनासार्धचतुष्टयेन** । **ति०** कस्मात्क्षमसेइत्यवान्तरवाक्यान्तेइत्युक्तवतीतिब्रूहीतिवाक्यशेषोद्रष्टव्यइतिकतकः ॥ ३९ ॥ **शि०** अनाथा-

[**पा०**] १ क. ग. ङ.—ट. विवर्णंच. २ झ. ट. पतमानंतमब्रवीत्. ३ घ. च.—ञ. मोघमस्त्रं. ४ घ. च.—ञ. ब्राह्मंकर्तुं. ५ ख. काकमात्रेतद्ब्रह्मास्त्रं. झ. ट. काकमात्रेऽपि. ६ ङ. झ. ञ. माऽहरस्त्वत्तः. ७ क. त्वंकुरुष्व. ८ ग. ङ. झ. ञ. ट. महोत्साहां. ९ ख. घ. च. अनाथेवहि.

आनृशंस्यं परो धर्मस्त्वत्त एव मया श्रुतः[1] ॥ ४१ ॥
जानामि त्वां महावीर्यं महोत्साहं महाबलम् ॥ अपारपारमक्षोभ्यं गाम्भीर्यात्सागरोपमम् ॥
भर्तारं [2]ससमुद्राया धरण्या वासवोपमम् ॥ ४२ ॥
एवमस्त्रविदां श्रेष्ठः [3]सत्यवान्बलवानपि ॥ किमर्थमस्त्रं रक्षस्सु न [4]योजयति राघवः ॥ ४३ ॥
न नागा नापि गन्धर्वा नासुरा न मरुद्गणाः ॥ रामस्य समरे वेगं शक्ताः [5]प्रतिसमाधितुम् ॥४४॥
तस्य वीर्यवतः कश्चिद्यद्यस्ति मयि संभ्रमः ॥ किमर्थं न शरैस्तीक्ष्णैः क्षयं नयति राक्षसान् ॥ ४५ ॥
भ्रातुरादेशमादाय लक्ष्मणो वा परन्तपः ॥ कस्य हेतोर्न मां वीरः परित्राति महाबलः ॥ ४६ ॥
यदि तौ पुरुषव्याघ्रौ वा[6]य्वग्निसमतेजसौ ॥ सुराणामपि दुर्धर्षौ किमर्थं मामुपेक्षतः ॥ ४७ ॥
ममैव दुष्कृतं किंचि[7]न्महदस्ति न संशयः ॥ समर्थावपि तौ [8]यन्मां नावेक्षेते परन्तपौ ॥ ४८ ॥
वैदेह्या वचनं श्रुत्वा करुणं साश्रु भाषितम् ॥ [9]अथाब्रवीन्महातेजा हनुमान्मारुतात्मजः ॥ ४९ ॥
त्वच्छोकविमुखो रामो देवि [10]सत्येन मे शपे ॥ रामे [11]दुःखाभिपन्ने च लक्ष्मणः परितप्यते ॥ ५० ॥

र्थनवत्संश्लेषदशायां तवात्यन्ताभिमतोधर्मःक इति मयापृष्टे परदुःखं चेत्तदसहिष्णुत्वमेव परमो धर्म इति ममाभिमतं तथैवमत्स्वभाव इतित्वयारहस्योद्भेदनंकृतं । त्वत्तएव नतु दूतमुखेन मया श्रुतः । इदं श्रवणमात्रपर्यवसायिजातं नत्वनुष्ठानपर्यवसायीतिरामंपृच्छेतिभावः । एवं पृच्छन्त्याःसीतायाःप्रत्युत्तरं दिशतोरामस्यच कोभिप्राय इतिचेदुच्यते । एतस्य संश्लेषस्यविच्छेदोभवतिचेत् किंकरिष्यामीति कातरतया पृष्टवती । सोपि मद्विरहक्लेशेन काम्यन्तीं त्वां न कदाचिदपि पश्येयमित्युक्तवान् । अयमर्थोप्यरण्यकाण्डे अप्यहं जीवितं जह्यामिति श्लोकप्रघट्टिकादौ दर्शितः ॥ ४०—४१ ॥ अपारपारं दुरधिगमपारं असीममित्यर्थः । दुरधिगमगुणसीममित्यर्थो वा ॥ ४२—४३ ॥ प्रतिसमाधितुं प्रतिबद्धुं ॥ ४४ ॥ संभ्रमः भाववृत्तिः ॥ ४५—४६ ॥ उपेक्षतः उपेक्षेते । यदि तौ संगतावितिशेषः ॥ ४७ ॥ समर्थौ विरोधिवर्गमुन्मूल्य मद्रक्षणानुगुणशक्तिमन्तौ । परन्तपौ इतःपूर्वंप्रतिपक्षनिर्दहनंकुर्वन्तौ । एवंभूतावपि तौ मां प्राणपर्यन्तं रक्षणप्रवृत्त्यर्हदशां प्राप्तां मां नावेक्षेते इति यत् न कटाक्षयतइतियत् अस्यनिमित्तं तयोर्वा मयि वा किंचिद्भवितुमर्हति । तत्र तद्विषये तादृशनिमित्तप्रसक्तिर्नास्ति सामर्थ्यपरन्तपत्वादिदर्शनात् । परिशेषान्ममैव पापं अस्य निमित्तं भवितुमर्हति । यद्वा ममैव " द्विषन्तः पापकृत्यां " इत्युक्तरीत्या अन्यतो नागतमित्यर्थः । किंचित् नहि वयं सर्वज्ञाः अस्माभिरज्ञातं किंचिद्भवितुमर्हति । महत् प्रारब्धफलतयाऽनुभवं विना दुष्परिहरं । अस्ति न संशयः । कार्ये सति कारणे किमस्ति संदेहः । यद्वा किंचिदनिर्वचनीयं । महद्दुष्कृतमस्तीत्यनेन " किं त्वामन्यत वैदेहः " इत्यादिनोक्तो भगवदपचारः । उक्तंहि " कीदृशं तु मया पापं पुरा देहान्तरे कृतं " इति । देहान्तरे बालशरीरे ॥ ४८ ॥ साश्रु यथा तथा भाषितं उक्तं ॥ ४९ ॥ त्वच्छोकविमुखः त्वच्छोकेन विमुखः विषयान्तरपराङ्मुखः ।

इवदृश्यते ममतनुरितिशेषः ॥ ४० ॥ **शि०** ननुतवरक्षणेममनकिंचित्प्रयोजनमित्यतआह—आनृशंस्यमिति । आनृशंस्यं निर्हेतुककृपा परोधर्मः इतित्वत्तएवमयाश्रुतं । एतेन प्रयोजनाभावेपिस्वकृपयापालयेतिसूचितं ॥ ४१ ॥ **रामानु०** अपारपारं " पार कर्मसमाप्तौ " इतिधातोर्निष्पन्नत्वादत्रपारशब्देनकर्मसमाप्तिरुच्यते । अपाराः पाराः कर्मसमाप्तयोयस्यसतथोक्तः । निरवधिकापदानइत्यर्थः ॥ ४२ ॥ **ति०** प्रतिसमीहितुं प्रतिभटतयास्थित्वानिरोद्धुमित्यर्थः । प्रतिसमाधितुमितिपाठान्तरं । तत्रार्षत्वंशरणं ॥ ४४ ॥ **ति०** ममसंभ्रमइतिपाठे ममप्राप्तयेसंभ्रमइत्यर्थः ॥ ४५ ॥

[पा०] १ ङ. झ. ट. श्रुतं. २ घ. सागरान्तायाः. ३ ङ. झ. ट. बलवान्सत्ववानपि. ख. ग. घ. च. छ. ज. ञ. सत्ववान्. ४ ट. मोचयसि. ५ ङ. झ. ट. प्रतिसमीहितुं. ६ ङ. च. ज. झ. ट. वाय्विन्द्र. ७ ग. मन्येमहदस्ति. ८ क. यन्मामुपेक्षेतां. ग. यन्मांनावेक्षेतां. ९ ख. तदाऽब्रवीत्. १० क. ख. घ. ङ. च. ज.—ट. सत्येनते. ११ क. ङ. झ. ञ. ट. दुःखाभिपन्नेतु. ग. घ. दुःखाभिभूतेच.

कथंचिद्भवती दृष्टा न कालः परिशोचितुम् ॥ इमं मुहूर्तं दुःखानां[1] द्रक्ष्यस्यन्तमनिन्दिते ॥ ५१ ॥
तावुभौ पुरुषव्याघ्रौ राजपुत्रौ महाबलौ ॥ त्वद्दर्शनकृतोत्साहौ लङ्कां[2] भस्मीकरिष्यतः ॥ ५२ ॥
हत्वा च समरे क्रूरं रावणं सहबान्धवम् ॥ राघवस्त्वां विशालाक्षि नेष्यति[3] स्वां पुरीं प्रति ॥ ५३ ॥
ब्रूहि यद्राघवो वाच्यो लक्ष्मणश्च महाबलः ॥ सुग्रीवो वाऽपि तेजस्वी हरयोपि समागताः ॥ ५४ ॥
इत्युक्तवति[4] तस्मिंश्च सीता सुरसुतोपमा ॥ उवाच[5] शोकसंतप्ता हनुमन्तं प्लवङ्गमम् ॥ ५५ ॥
कौसल्या लोकभर्तारं सुषुवे यं मनस्विनी ॥ तं ममार्थे सुखं पृच्छ शिरसा चाभिवादय ॥ ५६ ॥
स्रजश्च[7] सर्वरत्नानि प्रिया याश्च वराङ्गनाः ॥ ऐश्वर्यं च विशालायां पृथिव्यामपि दुर्लभम् ॥ ५७ ॥
पितरं मातरं चैव संमान्याभिप्रसाद्य[8] च ॥ अनुप्रव्रजितो रामं सुमित्रा येन सुप्रजाः ॥ ५८ ॥
आनुकूल्येन धर्मात्मा त्यक्त्वा सुखमनुत्तमम् ॥ अनुगच्छति काकुत्स्थं भ्रातरं पालयन्वने ॥ ५९ ॥
सिंहस्कन्धो महाबाहुर्मनस्वी प्रियदर्शनः ॥ पितृवद्वर्तते रामे मातृवन्मां समाचरन् ॥ ६० ॥
ह्रियमाणां तदा वीरो न तु मां वेद लक्ष्मणः ॥ वृद्धोपसेवी लक्ष्मीवाञ्शक्तो न बहु भाषिता[9] ॥ ६१ ॥

प्रत्युत त्वय्येव दत्तचित्त इत्यर्थः ॥ ५० ॥ इमं मुहूर्तं अस्मिन्मुहूर्ते । सप्तम्यर्थे द्वितीया ॥ ५१—५५ ॥ मनस्विनी लोकभर्तारं सुषुवे । लोके स्त्रियः इहलोकपरलोकयोः स्वरक्षणार्थं पुत्रान् सुवते नैवं मेश्वश्रूः । मनस्विनी विपुलमनस्का । सर्वलोकरक्षकः पुत्रो मे भवेदिति व्रतमनुष्ठाय लोकोपकाराय पुत्रं सूतवती । एवंभूतः कौसल्यासंकल्पः कथं मोघस्स्यात् । अहमत्र लोके न किमन्तर्भूता । तं ममार्थे सुखं पृच्छ । अस्मद्रक्षणं न मया प्रार्थ्यं तच्चिन्ता तस्यैव । अस्मत्त्वरातु विलम्बासहिष्णुतया । तस्मात्तत्सत्ता चेन्मद्रक्षणस्य न कापि हानिः । अतस्तत्सत्तैवास्माभिराशास्यते । तेन तस्य सुखमस्ति किमितिमया पृष्टमिति वद । एवंच लोकवदस्माभिश्च तस्मात्किंचिदपेक्षितंचेत् लोकैर्यत्कार्यं तत्कार्यं मयापि कार्यमित्याह—शिरसा चाभिवादय । अहं तं शिरसा प्रणतवत्यस्मीति तमभिवादय । प्रणिपातंकुर्वित्यर्थः । कथं नायिका नायकं शिरसा प्रणमेदितिचेत् आचारप्रधानजनककुलनन्दिन्यैवमनुष्ठितमिति किमत्र प्रमाणं प्रष्टव्यं । प्रणयरोषेणैवमाहेति चेन्न । हनुमद्वचनेन तस्य शान्तत्वात् । ननु ममार्थे मत्कार्यसिद्ध्यर्थं तं प्रणमेत्यर्थः किंनस्यादिति चेत्, ममार्थ इत्यस्योभयत्रान्वयात् । पूर्वमत्र मया पृष्टमिति पृच्छेत्यर्थस्यावश्यकत्वादत्रापि मया प्रणतमिति प्रणमेत्यस्य स्वरसत्वात् ॥ ५६ ॥ स्रजश्चेति ॥ सन्तीति शेषः । स्रगादयः सन्ति पृथिव्यां दुर्लभमैश्वर्यमप्यस्ति । तथा पितरं मातरं चैव संमान्य सुमित्रा येन सुप्रजाः सः राममनु प्रव्रजितः ॥ ५७—५८ ॥ आनुकूल्येन भक्त्येत्यर्थः ॥ ५९ ॥ समा-

शि० यस्मात्कथंचिद्भवतीदृष्टा मयेतिशेषः । अतः इमंमुहूर्तं आरभ्येतिशेषः । दुःखानामन्तंद्रक्ष्यसि । किंच दुःखानामन्तं विध्वंसकं इमं आगामिनंमुहूर्तंद्रक्ष्यसि अतःपरिशोचितुंकालः समयोन ॥ ५१ ॥ **तनि०** लोकेस्त्रियःस्वजीवनदशायांपोषकंपरत्रोत्तारकंचपुत्रमभिलषन्ति । कौसल्यातु विपुलमनस्कतयासर्वलोकरक्षकंपुत्रंप्रार्थ्यव्रताचरणेनलब्धवती तत्प्रार्थनाविकलाकिं । अहं लोकशब्दान्तर्भूतानभवामिकिं । जलसमीपस्थितसस्यस्यशुष्कतावत्सर्वावस्थास्वप्यनुसृतायाममरक्षणेतत्प्रार्थनासंकुचिताकिं । तंममार्थेसुखंपृच्छ । ममरक्षणंनप्रार्थनीयं तस्यमनसितिष्ठत्येव । किंतु त्वयातस्यसुखजनकेनभाव्यं । तस्यावस्थाने अस्मद्रक्षणं भविष्यतीतितदेवाशास्यते । शिरसाचाभिवादय । अग्निसाक्षिकंगृहीतपाणिनाचरक्षणंकार्यं तन्नक्रियते । इतरसाधारण्येनवारक्षणं क्रियतां । तैर्यत्क्रियते तन्मयाप्यभिवादनंक्रियतेइत्यस्मदर्थमभिवादनंकुरु ॥ **ति०** ममार्थे मत्प्रतिनिधित्वेनेत्यर्थः ॥ ५६ ॥ **ति०** लक्ष्मणःपूर्वंमारीचवधायगतेरामेतत्पृष्ठगमनायसम्यक्कृतपारुष्यइतिज्ञात्वातस्यविमोचनप्रवृत्त्युपेक्षामाभूदितिविशिष्यकुशलप्रश्नं वृहीत्याह—स्रजश्चेति । दुर्लभमित्यत्र त्यक्त्वेत्यनुकर्षः ॥ ५७ ॥

[पा०] १ ङ. झ. ट. दुःखानामन्तंद्रक्ष्यसिशोभने. २ ङ. झ. ट. लोकान्भस्मी. ३ क.—ट. स्वांपुरींप्रतिनेष्यति. ४ घ. इत्युक्तासाहनुमता. ५ ख.—ट. सीतापुनरथाब्रवीत्. ६ इदमर्धं ख.—ट. पाठेषुनदृश्यते. ७ क. ग. च. छ. विसृज्य. ८ घ. संमान्याभिप्रणम्यच. ग. परित्यज्यप्रसाद्यच. ९ क. घ. च. छ. ज. ञ. भाषितुं.

राजपुत्रः प्रियः श्रेष्ठः सदृशः श्वशुरस्य मे ॥ [1]मम प्रियतरो नित्यं भ्राता रामस्य लक्ष्मणः ॥ ६२ ॥
नियुक्तो धुरि यस्यां तु तामुद्वहति वीर्यवान् ॥ यं दृष्ट्वा राघवो नैव वृत्तमार्य[2]मनुसरेत् ॥ ६३ ॥
स ममार्थाय कुशलं वक्तव्यो वचनान्मम ॥ मृदुर्नित्यं शुचिर्दक्षः प्रियो रामस्य लक्ष्मणः ॥ ६४ ॥
यथा हि वानरश्रेष्ठ दुःखक्षयकरो भवेत् ॥ त्वमस्मिन्कार्यनि[3]र्योगे प्रमाणं हरिसत्तम ॥ ६५ ॥
राघवस्त्वत्समारम्भान्मयि यत्नपरो भवेत् ॥ इदं ब्रूयाश्च मे नाथं शूरं रामं पुनः पुनः ॥ ६६ ॥
जीवितं धारयिष्यामि [4]मासं दशरथात्मज ॥ [5]ऊर्ध्वं मासान्न जीवेयं सत्येनाहं ब्रवीमि ते ॥ ६७ ॥
रावणेनोपरुद्धां मां निकृत्या पापकर्मणा ॥ त्रातुमर्हसि वीर त्वं पातालादिव कौशिकीम् ॥ ६८ ॥
ततो वस्त्रगतं मुक्त्वा दिव्यं चूडामणिं शुभम् ॥ प्रदेयो राघवायेति सीता हनुमते ददौ ॥ ६९ ॥
प्रतिगृह्य ततो वीरो मणिरत्नमनुत्तमम् ॥ [6]अङ्गुल्या योजयामास नह्यस्य प्राभवद्भुजः ॥ ७० ॥
मणिरत्नं कपिवरः प्रतिगृह्याभिवाद्य च ॥ सीतां प्रदक्षिणं कृत्वा प्रणतः पार्श्वतः स्थितः ॥ ७१ ॥
हर्षेण महता युक्तः सीतादर्शनजेन सः ॥ हृदयेन गतो [7]रामं शरीरेण तु विष्ठितः ॥ ७२ ॥

चरन् परिचरन् ॥ ६०—६२ ॥ यस्यां धुरि यस्मिन्कार्यनिर्वाहइत्यर्थः । आर्यं श्वशुरं दशरथं नानुस्मरेत् । पितृवत्सम्यग्रक्षकत्वादिति भावः ॥६३—६४॥ रामः यथा दुःखक्षयकरो भवेत्तथा वक्तव्यमित्यर्थः । कार्यनिर्योगे कार्यसंघटने । प्रमाणं व्यवस्थापकः ॥ ६५ ॥ त्वत्समारम्भात् त्वदुत्साहात् ॥ ६६ ॥ ऊर्ध्वं मासात् । रावणकृतमासद्वयावधिं न सहिष्य इति भावः ॥ ६७ ॥ निकृत्या वञ्चनेन । पातालादिव कौशिकीं । अत्रेतिकरणं द्रष्टव्यं । इदं च ब्रूया इति पूर्वेणान्वयः । कौशिकः इन्द्रः तत्संबन्धिनी श्रीः कौशिकी तामिव । एवं ब्रह्मपुराणे श्रूयते । पुरा वृत्रवधे ब्रह्महत्याभिभूतं निश्श्रीकमिन्द्रं भगवान्नारायणो देवैस्सह वैष्णवेनाश्वमेधेन निष्कल्मषं कृत्वा त्रैलोक्यराज्येऽभिषिच्य पुरातनीं पौरंदरीं श्रियमुपाह्वयत् । ततोऽशरीरवाक्याद्रवाक्षतीर्थवर्तिनीं तामुपश्रुत्य स देवदेवो देवाश्च तत्र जग्मुः । ततस्तान् दृष्ट्वा सा श्रीः पातालं प्रविवेश । तत्र प्रवेष्टुमशक्नुवन्तो देवाः पुनरप्यशरीरं वाक्यं युष्मासु सर्वलक्षणसंपन्नस्तां प्रतिनेतुमर्हतीत्युपश्रुत्य तमेव पुरुषोत्तमं प्रार्थयामासुः । स तत्र प्रविश्य पातालात्तां समुद्धृत्य तैस्सह शक्राय प्रादादिति ॥ महाभारते तु उतथ्यस्य भार्यां यमुनायां स्नान्तीं वरुणो हृत्वा पातालमनयत् । तामुतथ्यो नारदेन याचित्वा तामलब्ध्वा कुपितः पातालह्रदशोषेण तामवापेति श्रूयते । सा कौशिकीति केचित्कथयन्ति ॥ ६८—६९॥ मणिरत्नं मणिश्रेष्ठं । अङ्गुल्या योजयामास । चूडामणेरधिष्ठानस्य पृष्ठे या केशसरणिः तत्राङ्गुलिं प्रावेशयदित्यर्थः । एवं तनीयसी किमङ्गुलिरित्यत्राह—नहीति । अस्य हनुमतः भुजः न प्राभवत् न स्थूलोभवत् । न तदानीं स महाकायः भुजश्च न स्थूलः तेनाङ्गुलिस्तनीयसीत्यर्थः । एतेन देव्यैप्रदर्शितं महद्रूपंविहाय पुरप्रवेशकालिकं सूक्ष्मरूपमङ्गीकृतवानित्यवगम्यते ॥ ७० ॥ प्रणतः नम्रगात्रः ॥ ७१—७२ ॥

ति० रावणदत्तावध्यवशिष्टंकिंचिदधिकंमासद्वयमपिनसहिष्यइतिभावः । तत्समाप्तौत्वदनागमनेऽनार्योऽनार्यमेवाचरेत् । अतोऽर्वागेवमरणंज्यायइतिशीघ्रमागमनायैवमुक्तिरितिबोध्यं । निकृत्या राक्षसीकर्तृकनिग्रहेण । उपरुद्धां पातालादिवकौशिकीं पातालमग्नांभुवंभगवानिवत्रातुमर्हसि । गायत्र्याःसांख्यायनगोत्रत्ववद्भूःकौशिकीतिकतकः ॥ ६८ ॥ ति० ननुतदासूक्ष्मरूपत्वात्तत्रभुजासञ्जनमेवोचितमतआह—नहीति । अस्यभुजःसूक्ष्मोपि नप्राभवत् । तद्रन्ध्रे नप्राविशदित्यर्थः । निषेधस्यप्रसक्तिमूलकत्वात् प्रसक्तेश्चसूक्ष्मरूपएवसंभवात् । पूर्वंदेव्यैप्रदर्शितंमहद्रूपंविहाय सूक्ष्मरूपेणैवस्थितइतिगम्यतइतितीर्थः । कतकस्तु—अङ्गुल्यायोजयामाससूक्ष्मवासोबद्धं अङ्गुल्यांदृढंबबन्धेत्यर्थः । अस्यबन्धनेभुजोनप्राभवत् व्यक्ततयासर्वानुभवप्रसङ्गाद्गोपणीयत्वाच्चभुजोनोचितोऽभूदित्यर्थइत्याह ॥ ७० ॥

[पा०] १ क. ग.—ट. मत्तः. २ ङ. झ. ट. मनुस्मरत्. ३ ङ. झ. ट. निर्वाहे. ४ क. मासमात्रंनृपात्मज. ५ क. मासादूर्ध्वंन. ६ क. ज. अङ्गुल्यां. ७ ङ. झ. ट. रामंलक्ष्मणंचसलक्षणं.

मणिवरमुपगृह्य तं महार्हं जनकनृपात्मजया धृतं प्रभावात् ॥
गिरिरिव पवनावधूतमुक्तः सुखितमनाः प्रतिसंक्रमं प्रपेदे ॥ ७३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टत्रिंशः सर्गः ॥ ३८ ॥

एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

सीतया चूडामणिग्रहणेनप्रयाणोन्मुखंहनुमन्तंप्रति रामलक्ष्मणादिषुस्वकुशलप्रश्ननिवेदनचोदनपूर्वकं सत्वरंस्वानयनाय रामप्रोत्साहनचोदना ॥ १ ॥ हनुमता रामलक्ष्मणयोः सुग्रीवादीनांच दुस्तरसागरतरणेशङ्कमानांसीतांप्रति वानरप्रभाववर्णनेन कैमुत्येनतेषांतरणसमर्थनपूर्वकं राघवयोः स्वपृष्ठारोपणेनसागरतारणप्रतिज्ञानादिना समाश्वासनम् ॥ २ ॥

मणिं दत्त्वा ततः सीता हनुमन्तमथाब्रवीत् ॥ अभिज्ञानमभिज्ञातमेतद्रामस्य तत्त्वतः ॥ १ ॥
मणिं तु दृष्ट्वा रामो वै त्रयाणां संस्मरिष्यति ॥ वीरो जनन्या मम च राज्ञो दशरथस्य च ॥२ ॥
स भूयस्त्वं समुत्साहे चोदितो हरिसत्तम ॥ अस्मिन्कार्यसमारम्भे प्रचिन्तय यदुत्तरम् ॥ ३ ॥
त्वमस्मिन्कार्यनिर्योगे प्रमाणं हरिसत्तम ॥ हनुमन्यत्नमास्थाय दुःखक्षयकरो भव ॥
तस्य चिन्तयतो यत्नो दुःखक्षयकरो भवेत् ॥ ४ ॥
स तथेति प्रतिज्ञाय मारुतिर्भीमविक्रमः ॥ शिरसाऽऽवन्द्य वैदेहीं गमनायोपचक्रमे ॥ ५ ॥
ज्ञात्वा संप्रस्थितं देवी वानरं मारुतात्मजम् ॥ बाष्पगद्गदया वाचा मैथिली वाक्यमब्रवीत् ॥ ६ ॥
कुशलं हनुमन्ब्रूयाः सहितौ रामलक्ष्मणौ ॥ ७ ॥
सुग्रीवं च सहामात्यं वृद्धान्सर्वांश्च वानरान् ॥ ब्रूयास्त्वं वानरश्रेष्ठ कुशलं धर्मसंहितम् ॥ ८ ॥
यथा स च महाबाहुर्मां तारयति राघवः ॥ अस्माद्दुःखाम्बुसंरोधात्त्वं समाधातुमर्हसि ॥ ९ ॥

पवनावधूतमुक्तः महावातकम्पितः तेन रहितश्चेत्यर्थः । प्रतिसंक्रमं प्रतिप्रयाणं । प्रपेदे प्राप्तुमुद्युक्तः ॥ ७३ ॥ इति गोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टत्रिंशः सर्गः ॥ ३८ ॥

अभिज्ञातं सम्यग्ज्ञातं ॥ १ ॥ त्रयाणामिति "अधीगर्थदयेशां कर्मणि" इति षष्ठी । विवाहकाले शिरोमणिदातृत्वात्पित्रोर्ग्रहीतृत्वाच्च मम स्मरणमिति भावः । पाणिग्रहणोत्सवे मम श्वशुराभ्यां प्रथमं शिरोभूषणतया एष दत्तः । अतः त्रीनस्मान् युगपत्स्मरिष्यतीत्यर्थ इत्याह कश्चित् । तदनुचितं "मणिरत्नमिदं दत्तं वैदेह्याः श्वशुरेण मे । वधूकाले तथा बद्धमधिकं मूर्ध्नि शोभते" इत्युपरि वक्ष्यमाणत्वाद्विवाहकाले रामजनन्या अनागमनाच्च ॥ २—३ ॥ कार्यनिर्योगे कार्यसंघटने । प्रमाणं व्यवस्थापकः । चिन्तयतस्तस्य । तवेति शेषः ॥ ४ ॥ आवन्द्येति पदच्छेदः ॥ ५—६ ॥ धर्मसंहितं धर्मसहितं धर्मपुरस्सरं कुशलंब्रूया इत्यर्थः ॥८॥ दुःखाम्बुसंरोधात् अम्बूनि संरुध्यन्ते अनेनेत्यम्बुसंरोधः जलधिः ।

स० प्रभावात् सर्वदासमीपवर्तिनोपिपदार्थस्येतरादृश्यत्वप्रापकसामर्थ्यविशेषात् ॥ ति० प्रभावात् सामर्थ्यविशेषात् । राक्षसीभिर्यथानज्ञायते तथाधृतं । गिरिवरपवनावधूतमुक्तः पर्वतश्रेष्ठोर्ध्वभागीयपवनकंपितः पश्चात्तेनकंपेनमुक्तः । सइवसुखितमनाः । अयमपि पूर्वंसीतायाअदर्शनेनदुःखवशात्कंपितः । ततस्तद्दर्शनेनततःकंपान्मुक्तः । अतःसुखितमनाः । प्रतिसंक्रमं लङ्कादुर्गप्राकारंप्राप्तुं प्रपेदे यत्नमारभतेत्यर्थः ॥ ७३ ॥ इत्यष्टत्रिंशःसर्गः ॥ ३८ ॥

ती० त्रयाणांसंस्मरिष्यतीति । पाणिग्रहणकालेममजननी इमंमणिंदशरथसंनिधौ जनकहस्तादादायशिरोभूषणतयामह्यंदत्तवती । अतोममजननीं दशरथं जनकं मांच स्मरिष्यतीत्यर्थः ॥ २ ॥ स० वानरात्मजं केसरिपुत्रं वानरंच । ब्रह्मजातत्वेपिजांबवानिव कश्यपा-

[पा०] १ ग. ङ.—ट. गिरिवरपवना. २ च. ज.—ट. मणिंदृष्ट्वातु. ख. ग. मणिंतुरामोवैदृष्ट्वा. ३ क. तस्मिन्. ४ ङ. झ. ट. समुत्साहे. ५ ङ. ज.—ट. चिन्तययोयत्नः. ६ ठ. वानरात्मजं. ७ ङ. झ. ट. हनूमन्कुशलंब्रूयाः. ८ क. ख. ग. ङ. झ. ञ. ट. यथाचस.

जीवन्तीं मां यथा रामः संभावयति कीर्तिमान्[1] ॥ तत्तथा[2] हनुमन्वाच्यं वाचा धर्ममवाप्नुहि ॥ १०
नित्यमुत्साहयुक्ताश्च[3] वाचः श्रुत्वा त्वयेरिताः[4] ॥ वर्धिष्यते दाशरथेः पौरुषं मदवाप्तये ॥ ११ ॥
मत्संदेशयुता वाचस्त्वत्तः श्रुत्वैव राघवः ॥ पराक्रमविधिं[5] वीरो विधिवत्संविधास्यति ॥ १२ ॥
सीताया[6] वचनं श्रुत्वा हनुमान्मारुतात्मजः ॥ शिरस्यञ्जलिमाधाय वाक्यमुत्तरमब्रवीत् ॥ १३ ॥
क्षिप्रमेष्यति काकुत्स्थो हर्यृक्षप्रवरैर्वृतः ॥ यस्ते युधि विजित्यारीञ्शोकं व्यपनयिष्यति ॥ १४ ॥
न हि पश्यामि मर्त्येषु नासुरेषु[7] सुरेषु वा ॥ यस्तस्य क्षिपतो[8] बाणान्स्थातुमुत्सहतेऽग्रतः ॥ १५ ॥
अप्यर्कमपि पर्जन्यमपि वैवस्वतं यमम् ॥ स हि सोढुं रणे शक्तस्तव हेतोर्विशेषतः ॥ १६ ॥
स हि[9] सागरपर्यन्तां महीं शासितुमीहते[10] ॥ त्वन्निमित्तो हि रामस्य जयो जनकनन्दिनि ॥ १७ ॥
तस्य तद्वचनं श्रुत्वा सम्यक्सत्यं सुभाषितम् ॥ जानकी बहुमेनेऽथ वचनं चेदमब्रवीत् ॥ १८ ॥
ततस्तं प्रस्थितं सीता वीक्षमाणा पुनःपुनः ॥ भर्तृस्नेहान्वितं[11] वाक्यं सौहार्दादनुमानयत् ॥ १९ ॥
यदि वा मन्यसे वीर वसैकाहमरिन्दम ॥ कस्मिंश्चित्संवृते देशे विश्रान्तः श्वो गमिष्यसि ॥ २० ॥
मम चेदल्पभाग्यायाः[12] सान्निध्यात्तव वानर ॥ अस्य शोकस्य महतो मुहूर्तं मोक्षणं भवेत् ॥ २१ ॥
गते[13] हि हरिशार्दूल पुनरागमनाय[14] तु ॥ प्राणानामपि संदेहो मम स्यान्नात्र संशयः ॥ २२ ॥
तवादर्शनजः शोको भूयो मां परितापयेत् ॥ दुःखाद्दुःखपरामृष्टां दीपयन्निव वानर ॥ २३ ॥
अयं च वीर संदेहस्तिष्ठतीव ममाग्रतः ॥ सुमहांस्त्वत्सहायेषु हर्यृक्षेषु हरीश्वर[15] ॥ २४ ॥
कथं नु खलु दुष्पारं तरिष्यन्ति[16] महोदधिम् ॥ तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ[17] ॥२५॥
त्रयाणामेव भूतानां सागरस्यास्य[18] लङ्घने ॥ शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा ॥ २६ ॥

समाधातुं राममनुकूलयितुं ॥ ९ ॥ जीवन्तीं संभावयति जीवन्तीं करोतीत्यर्थः । तत्तथा अव्ययमेतत् । वचनस्य प्रयोजनमाह—वाचेति । वाचाधर्मं वाचिकधर्मं ॥ १० ॥ तमेवधर्ममुपपादयति द्वाभ्यां—नित्यमित्यादि ॥ ११—१५ ॥ पर्जन्यं इन्द्रं । "पर्जन्यौ रसदब्देन्द्रौ" इत्यमरः ॥ १६ ॥ जयः भविष्यतीति शेषः ॥१७॥ सम्यक् सोपपत्तिकं । सत्यं परमार्थं । सुभाषितं श्रुतिमधुरं ॥ १८ ॥ वचनं चेदमब्रवीदित्युक्तं विवृणोति—ततस्तमिति ॥ भर्तृस्नेहान्वितं आत्मनि यो भर्तुः स्नेहस्तेनान्वितं स्वविषयभर्तृस्नेहप्रकाशकमिति यावत् । अनुमानयत् अन्वमानयत् । वक्ष्यमाणोक्तिरूपं संमानवचनमब्रवीदित्यर्थः ॥ १९—२२ ॥ दुःखाद्दुःखपरामृष्टां पूर्वदुःखादधिकेन दुःखेन स्पृष्टां । दीपयन्निव वर्धयन्निवेत्यर्थः ॥ २३ ॥ अयं वक्ष्यमाणः । तिष्ठतीव मूर्तीभूतइत्यर्थः

त्मजत्वेपिसर्पादिवद्वानेतिसूचयितुंपदद्वयं । यद्वा नरेष्वात्माधैर्यंयस्यनरात्मा दशरथः । तस्माज्जायतइतिसतथा । तंरामं प्रतिगन्तुमुपचक्रमेवेत्यन्वयः ॥ ६ ॥ ति० वमतः बाणान्विसृजतइत्यर्थः ॥ १५ ॥ ति० महींसाधितुमर्हति जेतुमुद्युङ्क्तइत्यर्थः ॥१७॥ स० अल्पभाग्यायाममतवसांनिध्यादस्यमहतःशोकस्यमोक्षणं त्यागः ॥ २१ ॥ स० पुनरागमनायसंदेहेसति मम प्राणानांसंदेहस्यादित्यर्थः ॥ २२ ॥ ती० दुःखंदुःखपरामृष्टामितिपाठे दुःखंमां दीपयन् ज्वलयन्निवपरितापयेदितिसंबन्धः ॥ २३ ॥ ति० त्वत्सहायेष्विति । साक्षात्साधकस्यतवसहायभूतेषु मिलितेषुहर्यृक्षेषुहरीश्वरः सुग्रीवः । कथमुदधिंतरिष्यति । सैन्यानिकथंतरिष्यन्ति तौवाकथंतरिष्यतइत्यर्थः ॥ २४—२५ ॥

[पा०] १ क. राघवः. २ क. ख. ग. ङ. च. ज. झ. ट. तत्त्वया. ३ ङ. झ. ट. युक्तस्य. ४ क. ख. ग. ङ.—ट. मयेरिताः. ५ क. झ. ञ. ट. पराक्रमेमतिं. ङ. पराक्रमेगतिं. ६ ख. ङ. झ. ट. सीतायास्तद्वचः. ७ क. ख. च. छ. ज. ञ. नासुरेष्वमरेषुवा. ग. घ. नामरेष्वसुरेषुच. ८ ङ. झ. ट. वमतो. ९ ख. ग. सतु. १० ग. शासितुमर्हति. ङ. झ. ट. साधितुमर्हति. ११ क. ग. घ. छ. भर्तुःस्नेहान्वितं. १२ ङ. झ. ट. चैवाल्पभाग्यायाः. च. छ. ज. ञ. वाल्पभाग्यायाः. १३ ङ. झ. ट. ततोहि. ख. ततस्तु. १४ ग. पुनश्चागमनायतु. १५ झ. हरीश्वरः. १६ क. ख. ग. छ. झ. ञ. तरिष्यति. १७ क. दशरथात्मजौ. १८ ङ.—ट. सागरस्येह.

तदस्मिन्[1]कार्यनियोंगे वीरैवं दुरतिक्रमे ॥ किं पश्यसि समाधानं त्वं हि कार्यविदां वरः ॥ २७ ॥
काममस्य त्वमेवैकः कार्यस्य परिसाधने ॥ पर्याप्तः परवीरघ्न यशस्यस्ते फलोदयः ॥ २८ ॥
बलैः[2] समग्रैर्यदि मां रावणं जित्य संयुगे ॥ विजयी स्वपुरीं[3] यायात्[4]तत्तु मे स्याद्यशस्करम् ॥ २९ ॥
शरैस्[5]तु संकुलां कृत्वा लङ्कां परबलार्दनः ॥ मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ॥ ३० ॥
तद्यथा तस्य विक्रान्तमनुरूपं महात्मनः ॥ भवेदाहवशूरस्य तथा त्वमुपपादय ॥ ३१ ॥
तदर्थोपहितं वाक्यं सहितं[6] हेतुसंहितम् ॥ निशम्य हनुमाञ्शेषं[7] वाक्यमुत्तरमब्रवीत् ॥ ३२ ॥
देवि हर्यृक्षसैन्यानामीश्वरः प्लवतां वरः ॥ सुग्रीवः सत्त्वसंपन्नस्तवार्थे कृतनिश्चयः ॥ ३३ ॥
स वानरसहस्राणां कोटीभिरभिसंवृतः ॥ क्षिप्रमेष्यति वैदेहि राक्षसानां निबर्हणः ॥ ३४ ॥
तस्य विक्रमसंपन्नास्[8]सत्त्ववन्तो महाबलाः ॥ मनःसंकल्पसंपाता निदेशे हरयः स्थिताः ॥ ३५ ॥
येषां नोपरि नाधस्तान्न तिर्यक्सज्जते गतिः ॥ न च कर्मसु सीदन्ति महत्स्वमिततेजसः ॥ ३६ ॥
असकृत्तैर्महोत्साहैः ससागरधराधरा ॥ प्रदक्षिणीकृता भूमिर्वायुमार्गानुसारिभिः ॥ ३७ ॥
मद्विशिष्टाश्च तुल्याश्च सन्ति तत्र वनौकसः ॥ मत्तः प्रत्यवरः कश्चिन्नास्ति सुग्रीवसन्निधौ ॥ ३८ ॥
अहं तावदिह प्राप्तः किं पुनस्ते महाबलाः ॥ न हि प्रकृष्टाः प्रेष्यन्ते प्रेष्यन्ते हीतरे जनाः ॥ ३९ ॥
तदलं परितापेन देवि शोको व्यपैतु ते ॥ एकोत्पातेन ते लङ्कामेष्यन्ति हरियूथपाः ॥ ४० ॥
मम पृष्ठगतौ तौ च चन्द्रसूर्याविवोदितौ ॥ त्वत्सकाशं महासत्त्वौ नृसिंहावागमिष्यतः ॥ ४१ ॥
तौ हि वीरौ नरवरौ सहितौ रामलक्ष्मणौ ॥ आगम्य नगरीं लङ्कां सायकैर्विधमिष्यतः ॥ ४२ ॥
सगणं रावणं हत्वा राघवो रघुनन्दनः ॥ त्वामादाय वरारोहे स्वपुरं[9] प्रतियास्यति ॥ ४३ ॥
तदाश्वसिहि भद्रं ते भव त्वं कालकाङ्क्षिणी ॥ नचिराद्द्रक्ष्यसे रामं प्रज्वलन्तमिवानलम् ॥ ४४ ॥
निहते राक्षसेन्द्रे[10]ऽस्मिन्सपुत्रामात्यबान्धवे ॥ त्वं समेष्यसि रामेण शशाङ्केनेव रोहिणी ॥ ४५ ॥
"क्षिप्रं[11] त्वं देवि शोकस्य पारं यास्यसि[12] मैथिलि ॥ रावणं चैव रामेण निहतं[13] द्रक्ष्यसेऽचिरात् ॥ ४६ ॥

॥ २४—२६ ॥ समाधानं परिहारं ॥ २७ ॥ अहमेव साधयिष्यामीत्याशङ्क्याह—काममिति ॥ हे परवीरघ्न त्वं अस्य कार्यस्य सर्वराक्षसवधपूर्वकमत्प्रापणरूपस्य । परिसाधने कामं पर्याप्तः शक्तः । एवं चेत्फलोदयः शक्तिसमृद्धिः । ते यशस्यः तव यशस्करः । नतु ममेति भावः ॥ २८ ॥ तर्हि तव किं यशस्यमित्याकाङ्क्षायामाह—बलैरिति ॥ जित्य जित्वा । मां गृहीत्वेति शेषः । यायात् राम इतिच शेषः ॥ २९ ॥ एतन्नकेवलंमम रामस्यापीत्याह—शरैरिति ॥ ३० ॥ तस्य अनुरूपं विक्रान्तं यथा भवेत्तथा उपपादय कुरु ॥ ३१ ॥ अर्थोपहितं अर्थयुक्तं । सहितं परस्परसंगतं । हेतुसंहितं युक्तियुक्तं । शेषं पूर्वमनुक्तं । उत्तरं वाक्यमब्रवीत् ॥ ३२–३४ ॥ मनःसंकल्पसंपाताः मनोव्यापारतुल्यगमनाः ॥ ३५ ॥ न सज्जते न विलंबेत ॥ ३६—३७ ॥ प्रत्यवरः हीनः । पूर्वं चतुर्णामेवात्र गतिरिति विचारप्रकारमात्रमुक्तं । अत्र तु परमार्थः । यद्यपि बले हनुमानधिकः तथापि वेगे सुग्रीवसन्निहिता नीलादयः सर्वे तुल्या एवेति नानृतोक्तिः ॥ ३८—३९ ॥ एकोत्पातेन एकयत्नेन ॥ ४०–४१ ॥ विधमिष्यतः दहिष्यतः ॥ ४२—४३ ॥ कालकाङ्क्षिणी भव दिवसगणनायां तत्परा भवेत्यर्थः । नचिरात् अचिरात् ॥ ४४—४६ ॥ पुनरब्रवीदिति । दाढ्र्याय

ननुभवत्वेवंहरीणामागमनं । राघवयोःकथंतत्राह–**ममेति** । महासंघौ महासमुदाययुक्तौ ॥४१॥ इत्येकोनचत्वारिंशःसर्गः ॥३९॥

[पा०] १ ख. घ. त्वमस्मिन्. क. एतस्मिन्. २ ङ. झ. ञ. ट. समग्रैर्युधि. ३ घ. ङ. झ. ट. स्वपुरं. क. स्वांपुरीं. ग. स्वंपुरं. ४ ग. ङ. झ. ट. तत्तस्यसदृशंभवेत्. ५ क. ख. ग. ङ. झ. ट. बलैस्तु. ६ ङ.—ट. प्रश्रितं. ७ ख. हनुमाञ्श्रेष्ठं. ८ क. संपन्नाः. ९ ङ. छ.—ञ. स्वपुरीं. घ. च. ट. स्वांपुरीं. ख. स्वंपुरं. १० क.—ट. राक्षसेन्द्रेचसपुत्रा. ११ च. छ. ज. झ. क्षिप्रमेष्यसिशोकस्यपरंपारंचमैथिलि. १२ ङ. झ. ट. द्रक्ष्यसिमैथिलि. १३ ङ. झ. ट. द्रक्ष्यसेनिहतंबलात्. ख. विहतं.

एवमाश्वास्य वैदेहीं हनुमान्मारुतात्मजः ॥ गमनाय मतिं कृत्वा [1]वैदेहीं पुनरब्रवीत् ॥ ४७ ॥
तमरिघ्नं कृतात्मानं क्षिप्रं द्रक्ष्यसि राघवम् ॥ लक्ष्मणं च धनुष्पाणिं लङ्काद्वार[2]मुपस्थितम् ॥
[[3]सुग्रीवसहितं शूरं वानरैः परिवारितम्] ॥ ४८ ॥
नखदंष्ट्रायुधान्वीरान्सिंहशार्दूलविक्रमान् ॥ [4]वानरान्वारणेन्द्राभान्क्षिप्रं द्रक्ष्यसि संगतान् ॥ ४९ ॥
शैलाम्बुदनिकाशानां लङ्कामलयसानुषु ॥ नर्दतां कपि[5]मुख्यानामार्ये यूथान्यनेकशः ॥ ५० ॥
स तु मर्मणि घोरेण ताडितो मन्मथेषुणा ॥ न शर्म लभते रामः सिंहार्दित इव द्विपः ॥ ५१ ॥
[6]मा रुदो देवि शोकेन मा भूत्ते [7]मनसोऽप्रियम् ॥ [8]शचीव पत्या [9]शक्रेण भर्त्रा नाथवती ह्यसि ॥५२॥
रामाद्विशिष्टः कोन्योस्ति कश्चित्सौमित्रिणा समः ॥ अग्निमारुतकल्पौ तौ भ्रातरौ [10]तव संश्रयौ ॥ ५३ ॥
नास्मिंश्चिरं वत्स्यसि देवि देशे रक्षोगणैर[11]ध्युषितेऽतिरौद्रे ॥
न ते चिरादागमनं प्रियस्य क्षमस्व मत्सङ्गमकालमात्रम् ॥ ५४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकोनचत्वारिंशस्सर्गः ॥ ३९ ॥

चत्वारिंशः सर्गः ॥ ४० ॥

सीतयाहनुमन्तंप्रति श्रीरामे तेनस्वस्यमनश्शिलयातिलकरचनायाः प्रत्यभिज्ञानत्वेननिवेदनचोदनम् ॥ १ ॥ तथा स्वचरणप्रणामपूर्वकंप्रयाणोद्यतंहनुमन्तंप्रति श्रीरामे स्वीयदुरवस्थानिवेदनचोदनपूर्वकमाशीर्वचनेन गमनाभ्यनुज्ञानम् ॥ २ ॥

श्रुत्वा तु वचनं तस्य वायुसूनोर्महात्मनः ॥ उवाचात्महितं वाक्यं सीता सुरसुतोपमा ॥ १ ॥
त्वां दृष्ट्वा प्रियवक्तारं संप्रहृष्यामि वानर ॥ अर्धसंजातसस्येव वृष्टिं प्राप्य वसुन्धरा ॥ २ ॥
यथा तं पुरुषव्याघ्रं गात्रैः शोकाभि[12]कर्शितैः ॥ संस्पृशेयं [13]सकामाऽहं तथा कुरु दयां मयि ॥ ३ ॥
अभिज्ञानं च रामस्य [14]दद्या हरिगणोत्तम ॥ क्षिप्तामिषीकां काकस्य कोपादेकाक्षिशातनीम् ॥ ४ ॥
मनश्शिलायास्तिलको गण्डपार्श्वे निवेशितः ॥ त्वया प्रनष्टे तिलके [15]तत्किल स्मर्तुमर्हसि ॥ ५ ॥

पुनरुक्तिः ॥ ४७—४९ ॥ शैलाम्बुदेति द्रक्ष्यसीति शेषः ॥५०–५१॥ मा रुदः रोदनं मा कुरु ॥५२—५३॥ मत्सङ्गमकालमात्रं मम रामेण सङ्गमकालमात्रं ॥ ५४॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

श्रुत्वेत्यादि ॥ १ ॥ अर्धसंजातसस्या अर्धोत्पन्नसस्या ॥ २—३ ॥ काकस्यैकाक्षिशातनीं क्षिप्तां इषीकां इषीकतृणरूपमभिज्ञानं पूर्वोक्तं दद्याः । अन्यच्च वक्ष्यामीति भावः । तदेवाह—मन इति ॥ तिलके पूर्वतिलके प्रनष्टे सति । गण्डपार्श्वे गण्डस्थले गण्डशैलपार्श्वे वा । मनश्शिलायास्तिलकः मनश्शिलाकृततिलकः । तत् मनश्शिलातिलकनिर्माणं । स्मर्तुमर्हसि । इदमप्यभिज्ञानं दद्या इति योजना ॥ ४—

ति० अर्धसंजातानिअर्धवयःप्राप्तानि । ततःपरंजलाभावादासन्नशोषाणिसस्यानियस्यास्सा । यथादैवात्संपन्नवृष्ट्यासंपन्नसस्या भवति तथाऽहमपि प्राप्तजीवितनाशा मृतोपमा त्वद्दर्शनाद्धृतजीवितेतिभावः ॥ २ ॥ ति० स्मर्तुमर्हसीति मयोक्तमितिब्रूहीतिशेषः

[पा०] १ क. ख. च. छ. ज. ञ. मैथिलीं. २ ङ. झ. ट. मुपागतं. ३ इदमर्धं ग. पाठेदृश्यते. ४ क. च. छ. ज. न्वानरेन्द्रेणक्षिप्रं. ५ च. छ. ज. ञ. मुख्यानामचिराच्छ्रोष्यसिध्वनिं. ख. घ. मुख्यानांनचिराच्छ्रोष्यसिस्वनं. ग. मुख्यानांमध्ये यूथा. ६ ङ. छ. झ. ट. रुदमादेविशोकेन. क. ज. ञ. अलंतेदेविशोकेन. ७ ङ. झ. ट. मनसोभयं. ८ क. घ. ङ. च. ज.—ट. शचीवभर्त्रा. ९ च. ज. ञ. शक्रेणपत्या. ङ. झ. ट. शक्रेणसङ्गमेष्यसिशोभने. १० क. च. छ. ज. ञ. रणसंश्रयौ. ११ ग. च. छ. ज. ञ. रध्युषितेहि. १२ घ. पीडितैः. १३ च. छ. ज. समासक्ता. १४ ख. घ. दत्तं. १५ झ. तंकिल.

स वीर्यवान्कथं सीतां हृतां समनुमन्यसे ॥ वसन्तीं रक्षसां मध्ये महेन्द्र[1]वरुणोपमः ॥ ६ ॥
एष चूडामणिर्दिव्यो मया सु[2]परिरक्षितः ॥ एतं दृष्ट्वा प्रहृष्यामि व्यसने त्वामिवानघ ॥ ७ ॥
एष निर्यातितः श्रीमान्मया ते वारिसंभवः ॥ अतः परं न शक्ष्यामि जीवितुं शोकलालसा ॥ ८ ॥
असह्यानि च दुःखानि वाचश्च हृदयच्छिदः ॥ [3]राक्षसीनां सुघोराणां त्वत्कृते मर्षयाम्यहम् ॥ ९ ॥
धारयिष्यामि मासं तु जीवितं शत्रुसूदन ॥ मासादूर्ध्वं न जीविष्ये त्वया हीना नृपात्मज ॥ १० ॥
घोरो राक्षसराजोयं दृष्टिश्च न सुखा मयि ॥ त्वां च श्रुत्वा वि[4]षज्जन्तं न जीवेय[5]महं क्षणम् ॥ ११ ॥
वैदेह्या वचनं श्रुत्वा करुणं साश्रु भाषितम् ॥ [6]तथाऽब्रवीन्महातेजा हनुमान्मारुतात्मजः ॥ १२ ॥
त्वच्छोकविमुखो रामो देवि सत्येन ते शपे ॥ रामे [7]दुःखाभिभूते तु लक्ष्मणः परितप्यते ॥ १३ ॥
[8]कथंचिद्भवती दृष्टा न कालः [9]परिशोचितुम् ॥ इमं मुहूर्तं दुःखानामन्तं द्रक्ष्यसि भामिनि ॥ १४ ॥
तावुभौ पुरुषव्याघ्रौ राजपुत्रा[10]वरिन्दमौ ॥ त्वद्दर्शनकृतोत्साहौ लङ्कां भस्मीकरिष्यतः ॥ १५ ॥
[11]हत्वा तु समरे [12]क्रूरं रावणं [13]सहबान्धवम् ॥ [14]राघवौ त्वां विशालाक्षि स्वां पुरीं [15]प्रापयिष्यतः ॥ १६ ॥
यत्तु रामो विजानीयादभिज्ञानमनिन्दिते ॥ प्रीतिसंजननं तस्य भूयस्त्वं दातुमर्हसि ॥ १७ ॥
साब्रवीद्दत्तमेवेति मयाभिज्ञानमुत्तमम् ॥ एतदेव हि रामस्य दृष्ट्वा [16]मत्केशभूषणम् ॥
श्रद्धेयं हनुमन्वाक्यं तव वीर भविष्यति ॥ १८ ॥
स तं मणिवरं गृह्य श्रीमान्प्लवगसत्तमः ॥ प्रणम्य शिरसा देवीं गमनायोपचक्रमे ॥ १९ ॥
तमुत्पातकृतोत्साहमवेक्ष्य हरिपुङ्गवम् ॥ वर्धमानं महावेगमुवाच जनकात्मजा ॥
अश्रुपूर्णमुखी दीना [17]बाष्पगद्गदया गिरा ॥ २० ॥
हनुमन्सिंहसंकाशौ भ्रातरौ रामलक्ष्मणौ ॥ सुग्रीवं च सहामात्यं सर्वान्ब्रूया ह्यनामयम् ॥ २१ ॥
यथा च स महाबाहुर्मां तारयति राघवः ॥ अस्माद्दुःखांबुसंरोधात्त्वं समाधातुमर्हसि ॥ २२ ॥

इमं च [18]तीव्रं मम शोकवेगं रक्षोभिरेभिः परिभर्त्सनं च ॥
ब्रूयास्तु रामस्य गतः समीपं [19]शिवश्च तेऽध्वाऽस्तु हरिप्रवीर ॥ २३ ॥

६ ॥ प्रहृष्यामीति । अस्य चूडामणेस्त्वया बहुशो लालितत्वेन त्वत्स्मारकत्वादितिभावः ॥ ७ ॥ वारिसंभवः । रत्नं हि रत्नाकरे उत्पद्यते । अतःपरं मासात्परं ॥ ८—१० ॥ विषज्जन्तं विलम्बमानं ॥ ११—१३ ॥ इमं मुहूर्तं अस्मिन्मुहूर्ते ॥ १४—२२ ॥ शिवः अव्याहत इत्यर्थः ॥ २३ ॥

॥ ५ ॥ ति० दिव्यएषचूडामणिः एतावत्कालंसुपरिरक्षितः । एतंव्यसनेत्वामिवदृष्ट्वाप्रहृष्यामि । एतत्संनिधानेरक्षोऽभिभवासंभवादितिभावः ॥ ७ ॥ ती० त्वत्कृते त्वत्प्राप्त्याशया ॥ ९ ॥ स० मासादूर्ध्वमित्युक्तिस्तुकालेधिकेसत्यपितीव्रागमनाभिप्रायेणवा दिनेषुसत्स्वप्यात्मघाताभिप्रायेणवेतिज्ञातव्यं ॥ १० ॥ ति० यतोऽयंघोरस्तस्यदृष्टिश्च । चाद्बुद्धिः नसुखा अवधिकालादूर्ध्वंकृतविनाशनिश्चया । अतस्तत्पूर्वमेवमरणौचित्यादवधिकालस्याधिकत्वेपिमासादूर्ध्वमेवनजीविष्यामि । किंचत्वां विषज्जन्तं विलम्बंकुर्वन्तं । यदिश्रृणुयां तदा तथाश्रुत्वामासादर्वागेवक्षणमपिनजीवेयमित्युक्तमितिब्रूहीतिशेषः ॥ स० विषज्जन्तं असक्तमिवविद्यमानं ॥ ११ ॥ ति० त्वच्छोकविमुखः त्वत्स्थित्यपरिज्ञानजशोकेनत्वदुद्धारप्रवृत्तिविमुखः । नतुज्ञात्वेति सत्येनतेशपे ॥ १३ ॥ ति० त्वंसमाधातुमित्यस्य तथेत्यादिः । समाधानं संविधानं। अथापिसमहाबाहुरितिपाठे यथेत्यपिपूरणीयमेव । यद्यपिश्रुतवृत्तान्तःस्वयमेवयतिष्य-

[पा०] १ क. ख. घ. च.—ट. वरुणोपम. २ क. ङ. ट. संपरि. ३ ङ. झ. ट. राक्षसैस्सहसंवासं. ४ घ. विपन्नंतु. ५ ङ. झ. ट. मपिक्षणं. ६ क. ख. ग. ङ.—ट. अथाब्रवीत्. घ. ततोऽब्रवीत्. ७ क. ग.—च. ज. झ. ट. शोकाभिभूते. ८ क. ग. ङ.—ट. दृष्टाकथंचिद्भवती. ९ ङ. झ. ट. परिदेवितुं. १० घ.—ट. वनिन्दितौ. ११ घ. छित्त्वातु. १२ क. ग. घ. च. छ. ज. ञ. घोरं. ङ. झ. ट. रक्षो. १३ क. ङ.—ट. बान्धवैः. १४ क. ग. च. छ. ज. ञ. राघवस्त्वां. १५ ङ. झ. ट. प्रतिनेष्यतः. क. च. छ. ज. ञ. प्रतिनेष्यति. ग. प्रापयिष्यति. १६ ङ. झ. ट. यत्नेनभूषणं. १७ क. ग. च. ज. ञ. बाष्पसंदिग्धया. १८ क. ग. ञ. शोकंममतीव्रवेगं. १९ घ. शिवश्चपन्थास्तु.

स राजपुत्र्या प्रतिवेदितार्थः कपिः कृतार्थः परिहृष्टचेताः ॥
अल्पावशेषं प्रसमीक्ष्य कार्यं दिशं ह्युदीचीं मनसा जगाम ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

एकचत्वारिंशः सर्गः ॥ ४१ ॥

हनुमता रावणेनसह साक्षात्संभाषणादिनातदीयबलाध्यवसायादिपरिज्ञानस्यावश्यकत्वनिर्धारणपूर्वकंवनभञ्जनस्य तद्दर्शनोपायत्वनिर्धारणेनाशोकवनभञ्जनम् ॥ १ ॥

स च वाग्भिः प्रशस्ताभिर्गमिष्यन्पूजितस्तया ॥ तस्माद्देशादपक्रम्य चिन्तयामास वानरः ॥ १ ॥
अल्पशेषमिदं कार्यं दृष्टेयमसितेक्षणा ॥ त्रीनुपायानतिक्रम्य चतुर्थ इह लक्ष्यते ॥ २ ॥
न साम रक्षस्सु गुणाय कल्पते न दानमर्थोपचितेषु युज्यते ॥
न भेदसाध्या बलदर्पिता जनाः पराक्रमस्त्वेव ममेह रोचते ॥ ३ ॥
न चास्य कार्यस्य पराक्रमादृते विनिश्चयः कश्चिदिहोपपद्यते ॥
हतप्रवीरा हि रणे हि राक्षसाः कथंचिदीयुर्यदिहाद्य मार्दवम् ॥ ४ ॥
कार्ये कर्मणि निर्दिष्टे यो बहून्यपि साधयेत् ॥ पूर्वकार्याविरोधेन स कार्यं कर्तुमर्हति ॥ ५ ॥
न ह्येकः साधको हेतुः स्वल्पस्यापीह कर्मणः ॥ यो ह्यर्थं बहुधा वेद स समर्थोऽर्थसाधने ॥ ६ ॥

अल्पावशेषं अल्पावशिष्टं । प्रसमीक्ष्य विचार्य॥२४॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चत्वारिंशः सर्गः ॥ ४० ॥

"अभिगम्य तु वैदेहीं निलयं रावणस्यच" इत्युक्तकार्यद्वये सीतादर्शनरूपं कार्यं जातं । इदं कार्यं रावणनिलयपरिज्ञानरूपं । अल्पशेषं अल्पावशिष्टं । सान्तःपुरलङ्कायाः सम्यक्परिज्ञातत्वेपि राक्षसबलाबलरावणहृदयाद्यपरिज्ञानात्कार्यस्याल्पशेषत्वोक्तिः । इह राक्षसबलाबलरावणहृदयपरिज्ञानरूपकार्ये । त्रीनुपायानतिक्रम्य सामदानभेदानतिक्रम्य । चतुर्थो लक्ष्यते साधनतया दण्ड एवदृश्यतइत्यर्थः ॥ २ ॥ उपपत्तिपूर्वकमेतदेव विवृणोति—न सामेति ॥ "अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः । पराजयश्च संग्रामे तस्माद्युद्धं विसर्जयेत्" इति युद्धस्याव्यवस्थितफलकत्वेपि "सर्वं बलवतः पथ्यं" इति न्यायेन सर्वातिशायिबलपराक्रमस्य मम पराजयप्रसङ्ग एव नास्तीत्यभिप्रायेणाह—पराक्रम इति । मम तु इह रक्षोविषये पराक्रम एव रोचत इति संबन्धः ॥ ३—४ ॥ "अभिगम्य तु वैदेही निलयं रावणस्य च" इत्यनुज्ञातस्यातिरिक्तकार्यकरणे दोषमाशङ्क्य परिहरति—कार्य इति ॥ कार्ये विहिते कर्तव्ये । बहूनि कार्याणि ॥ ५ ॥ अल्पस्यापि कर्मणः एको

ति तथापि त्वमपियथामांशीघ्रंतारयसि तथासंविधानंकुर्वित्यर्थः ॥२२॥ **ति०** तत्कार्यं लङ्कागमनप्रयोजनं । अल्पशेषं । देवीदर्शनरूपस्यमहतःप्रधानकृत्यस्यनिष्पन्नत्वात्परबलार्दनरूपस्यानुषङ्गिकत्वादल्पशेषत्वमित्याशयः ॥२५ ॥ इतिचत्वारिंशःसर्गः ॥४०॥

ति० अस्यकार्यस्य परबलाशयपरिज्ञानरूपस्य । सर्वातिशायिपराक्रमवतोममपराजयएवनास्तीत्याशयेनाह—पराक्रमादृते इति । विनिश्चयः निश्चितोपायः । स्वबलप्रकाशनेप्रयोजनान्तरमप्यस्तीत्याह—हतेति । अथ हताःप्रवीराः श्रेष्ठायेषांतेराक्षसाः यत् यस्मात् इह भाविनिरणे । मार्दवं एकेनैवैवंपराक्रमःकृतः तादृशैरनेकैःकथमस्माकंजयाशेतिरणप्रवृत्तिराहित्यंप्राप्नुयुः । अतः पराक्रमात्परबलस्यमनोभङ्गरूपंकार्यंसिध्यतीत्याशयः । **शि०** इह अस्मिन्समये । राक्षसाःकथंचित् केनाप्युपायेनयदिहतप्रवीराः तर्हिमार्दवं किंचिन्नम्रतां । ईयुः । एतेन नम्रीभूययदिसीतांरामायसमर्पयेत् तर्हिराक्षसकुलविध्वंसो नभवेदितिसूचितं । तेनहनुमतो दयालुत्वंव्यक्तं ॥४॥ **ति०** उक्तमेवविवृणोति—**नहीति**।यस्तु स्वल्पस्यापिकर्मणोतिशयितयत्नेनसिद्धिहेतुर्भवति असावेकोमुख्यः

[पा०] १ घ. ट. प्रतिपादितार्थः. २ क.—ट. तदल्पशेषं. ३ च. त्वदा. ४ क. ग. घ. च. छ. ज. वर्तते. ५ ख. ग. ङ. झ. ट. स्त्वेष. ६ ङ. च. छ. झ. ञ. ट. निर्वृत्ते. क. संवृत्ते.

इहैव तावत्कृतनिश्चयो ह्यहं यदि व्रजेयं प्लवगेश्वरालयम् ॥
परात्मसंमर्दविशेषतत्त्ववित्ततः कृतं स्यान्मम भर्तृशासनम् ॥ ७ ॥
कथं नु खल्वद्य भवेत्सुखागतं प्रसह्य युद्धं मम राक्षसैः सह ॥
तथैव खल्वात्मबलं च सारवत्समानयेन्मां च रणे दशाननः ॥ ८ ॥
ततः समासाद्य रणे दशाननं समन्त्रिवर्गं सबलप्रयायिनम् ॥
हृदि स्थितं तस्य मतं बलं च वै सुखेन मत्वाऽहमितः पुनर्व्रजे ॥ ९ ॥
इदमस्य नृशंसस्य नन्दनोपममुत्तमम् ॥ वनं नेत्रमनःकान्तं नानाद्रुमलतायुतम् ॥ १० ॥
इदं विध्वंसयिष्यामि शुष्कं वनमिवानलः ॥ अस्मिन्भग्ने ततः कोपं करिष्यति दशाननः ॥ ११ ॥
ततो महत्साश्वमहारथद्विपं बलं समादेक्ष्यति राक्षसाधिपः ॥
त्रिशूलकालायसपट्टसायुधं ततो महद्युद्धमिदं भविष्यति ॥ १२ ॥
अहं तु तैः संयति चण्डविक्रमैः समेत्य रक्षोभिरसह्यविक्रमः ॥
निहत्य तद्रावणचोदितं बलं सुखं गमिष्यामि कपीश्वरालयम् ॥ १३ ॥
ततो मारुतवत्क्रुद्धो मारुतिर्भीमविक्रमः ॥ ऊरुवेगेन महता द्रुमान्क्षेप्तुमथारभत् ॥ १४ ॥
ततस्तु हनुमान्वीरो बभञ्ज प्रमदावनम् ॥ मत्तद्विजसमाघुष्टं नानाद्रुमलतायुतम् ॥ १५ ॥

हेतुस्साधकोन किमुत महतः कर्मण इति भावः । बहुधा बहुभिर्हेतुभिः ॥ ६ ॥ पूर्वोक्तसमर्थनायाह—इहैवेति ॥ अहमिहैव परात्मसंमर्दविशेषतत्त्ववित् परात्मनोर्युद्धतारतम्यतत्त्ववित् । कृतनिश्चयः कृतबलाबलनिश्चयः सन् यदि प्लवगेश्वरालयं व्रजेयं ततः भर्तृशासनं सीतादर्शनरावणनिलयसम्यक्परिज्ञानविषयं शासनं । तावत्साकल्येन कृतं स्यात् । अन्यथा राक्षसबलाबलं कीदृशमितिभर्त्रापृष्टे निरुत्तरः स्यामिति भावः ॥ ७ ॥ युद्धं कथं सुखागतं सुखेन प्राप्तं भवेत्तथा कर्तव्यमित्यर्थः । युद्धस्य फलमाह—तथैवेत्यादिना सार्धश्लोकेन ॥ तथैव खलु युद्धकरणे खलु । स दशाननः । रणे आत्मबलं स्वपक्षबलं मां च । सारवत् मानयेत्परिच्छिन्द्यात् ॥ ८ ॥ बलप्रयायिना सेनान्या सह वर्तत इति सबलप्रयायी तं । तस्य हृदिस्थितं मतं सीताविषयाध्यवसायं बलं च मत्वा । सुखेन इतः अस्मात्स्थानात् । पुनः व्रजे व्रजिष्यामि ॥ ९ ॥ नेत्रमनःकान्तं वर्तत इति शेषः ॥ १०—१२ ॥ समादेक्ष्यति नियोजयिष्यति । इदं अव्यवहितोत्तरकालिकं ॥ १२ ॥ कपीश्वरालयमित्यनन्तरमितिकरणं द्रष्टव्यं । इति चिन्तयामासेत्यन्वयः ॥१३॥ ततः तेन चिन्तितेन हेतुना ॥ १४ ॥ प्रमदावनं अन्तःपुरवनं । "प्रमदावनमन्तःपुरोचितं" इत्यमरः

स्साधकोहेतुर्नभवति । अपितु योह्यर्थं प्रयोजनं । अल्पेनयत्नेन बहुधाकर्तुंवेद सएवार्थसाधने समर्थः ॥ ६ ॥ ति० एवंनिश्चितार्थो युद्धप्रवृत्तिप्रकारंचिन्तयति—कथंन्विति । अद्यखलु ममेहागतं आगमनं । सुखागतं सुखफलकमागमनंकथंभवेत् । तथा राक्षसैः सहप्रसह्यस्वयमेवबलात्कृत्ययुद्धंच कथंममभवेत् । तथा तथैवकरणेसति । सारवत् ऊर्जितंस्वबलंमांच सदशाननः कथंमानयेत् श्लाघयेत् । यद्वा तथैवयुद्धकरणेखलु दशाननः आत्मबलंमांचसारवत्संमानयेत् सम्यक्परिच्छिन्द्यादित्यर्थेनयुद्धफलमुक्तं ॥ ८ ॥ ति० ततोमद्बलवशादेवमांरणेसमासाद्यवर्तमानं सबलं सयायिनं ससारथिं । अन्तर्भावितण्यर्थाद्यातेर्णिनौ यापयितायायी सारथिः । तेनसहितंरावणंज्ञात्वा हृदिस्थितंतस्यमतं अभीष्टंबलंच । सुखेन अक्लेशतोमत्वा ज्ञात्वा । पुनरितोव्रजे व्रजिष्ये । सबलप्रयायिनमित्याधुनिककल्पितःपाठः ॥ ९ ॥ शि० इदंवनं अस्य रावणस्य । मनःकान्तं मनःप्रियं । अस्तीतिशेषः ॥ १० ॥ शि० इदंवनं शुष्कंवनमनलइवविध्वंसयिष्यामि । यदितु एतच्छ्लोकघटकस्य इदमित्यस्य स्वप्रवेशिनोजनस्योद्दीपनद्वारा इंकामंददातीतितथाइत्यर्थः तदापूर्वस्यार्पाहैवान्वयः । एवंच पूर्वत्रास्तेरध्याहारस्य न प्रयोजनं ॥ ११ ॥

[पा०] १ ग. ध. सुखावहं. २ ङ. च. झ. ढ. सबलंसयायिनं. घ. सबलंसबान्धवं. ३ क. ङ.—ट. समानेष्यति. ४ ङ. झ. म. ट. रभङ्गविक्रमः. ध. रसह्यविक्रमैः. ५ ग. ङ. झ. ट. ततस्तद्धनुमान्.

तद्वनं मथितैर्वृक्षैर्भिन्नैश्च सलिलाशयैः ॥ चूर्णितैः पर्वताग्रैश्च बभूवाप्रियदर्शनम् ॥ १६ ॥
नानाशकुन्तविरुतैः प्रभिन्नैः सलिलाशयैः ॥ ताम्रैः किसलयैः क्लान्तैः क्लान्तद्रुमलतायुतम् ॥
न बभौ तद्वनं तत्र दावानलहतं यथा ॥ १७ ॥
व्याकुलावरणा रेजुर्विह्वला इव ता लताः ॥ १८ ॥

लतागृहैश्चित्रगृहैश्च नाशितैर्महोरगैर्व्यालमृगैश्च निर्धुतैः ॥
शिलागृहैरुन्मथितैस्तथा गृहैः प्रनष्टरूपं तदभून्महद्वनम् ॥ १९ ॥
सा विह्वलाऽशोकलताप्रताना वनस्थली शोकलताप्रताना ॥
जाता दशास्यप्रमदावनस्य कपेर्बलाद्धि प्रमदावनस्य ॥ २० ॥
स तस्य कृत्वाऽर्थपतेर्महाकपिर्महद्व्यलीकं मनसो महात्मनः ॥
युयुत्सुरेको बहुभिर्महाबलैः श्रिया ज्वलंस्तोरणमाश्रितः कपिः ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

द्विचत्वारिंशः सर्गः ॥ ४२ ॥

हनुमताऽवभञ्जने संभ्रान्तपक्षिकुलकोलाहलैर्वृक्षभङ्गरवैश्च प्रबुद्धाभीराक्षसीभिःसीतांप्रति हनुमत्स्वरूपादिप्रश्नः ॥ १ ॥ सीतया कैतवेनस्वस्यतदपरिज्ञानोक्तौ राक्षसीभीरावणायतन्निवेदनम् ॥ २ ॥ रावणचोदितैरशीतिसंख्याकैःकिङ्करनामकै राक्षसैस्तोरणस्थंहनुमन्तंप्रति युद्धायाभियानम् ॥ ३ ॥ हनुमता रामादिजयोद्घोषणेनसह स्वनामनिर्देशेनस्वस्यरामदूतत्वो द्घोषणपूर्वकं सकलकिङ्कर राक्षससंहरणम् ॥ ४ ॥

ततः पक्षिनिनादेन वृक्षभङ्गस्वनेन च ॥ बभूवुस्त्राससंभ्रान्ताः सर्वे लङ्कानिवासिनः ॥ १ ॥

॥ १५ ॥ पर्वताग्रैः क्रीडापर्वताग्रैः ॥ १६—१७ ॥ व्याकुलावरणाः आवरणादुपन्नाद्व्याकुलाः । विह्वलाः स्त्रिय इव ॥ १८ ॥ व्यालमृगैः श्वापदादिहिंस्रमृगैः । निर्धुतैः पीडितैः । गृहैः केवलगृहैः ॥ १९ ॥ शोच्यत इति शोकः । प्रतानं विततिः । अशोकं अशोच्यं लताप्रतानं यस्यास्सा अशोकलताप्रताना । दशास्यप्रमदावनस्य भोगवर्धनेन रावणवनितारक्षकस्य । प्रमदावनस्य अन्तःपुरोद्यानस्य । सा वनस्थली तृणगुल्मलतादिविशिष्टप्रदेशः । कपेर्बलाद्धि विह्वला लुलिता शोकलताप्रताना च जाता । यद्वा शोकलताश्शोकरताः । रलयोरभेदः । अप्प्रतानाः अप्सु प्रतानाः कमलकह्लारादयोऽस्यां सा शोकलताप्रताना । म्लानजलजेति यावत् । दशास्यप्रमदावनस्य रावणप्रमदावनस्य । "ङ्यापोस्संज्ञाच्छन्दसोर्बहुलम्" इति बहुलवचनाद्ध्रस्वाभावः । दशास्यप्रमदावनस्य वनस्थलीत्यत्र शिलापुत्रकस्य शरीरमितिवदुपचारात्षष्ठी । प्रमदावनस्य सीतारूपप्रमदापालकस्य । वनस्थली कपेर्बलाद्धिह्वला शोकलताप्रताना च जाता अशोकलतेत्युपलक्षणं ॥ २० ॥ अर्थपतेः राज्ञो रावणस्य । मनसः व्यलीकं अप्रियं पीडनं वा । "अलीकं त्वप्रियाकार्यवैलक्ष्यानृतपीडने" इति निघण्टुः।युयुत्सु योद्धुमिच्छुः । तोरणं उद्यानबहिर्द्वारं । "तोरणोऽस्त्री बहिर्द्वारं" इत्यमरः ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकचत्वारिंशः सर्गः ॥ ४१ ॥

उतशब्दो वार्थे । "उताप्यर्थविकल्पयोः"

ति० पर्वताग्रैः उपलक्षितमितिशेषः ॥ १६ ॥ शि० विह्वलाः अशोकलताप्रतानाः विस्तृताशोकलताःयस्यांसा वनस्थली प्रमदस्य उत्कृष्टमदस्य अवनंरक्षणंयास्मिंस्तस्य । नित्यंमदविशिष्टस्येत्यर्थः । दशास्यप्रमदावनस्य रावणस्त्रीसमूहस्य । कपेर्बलात् शोकरूपलताप्रतानःलताविस्तारोयस्यांसा जाता ॥ २० ॥ इत्येकचत्वारिंशःसर्गः ॥ ४१ ॥

[पा०] १ ख. घ. बभूवाद्भुतदर्शनं. ङ. च. ट. बहुधाप्रियदर्शनं. झ. बहुधाप्रियदर्शनैः. २ ङ. झ. ट. लतायुतैः ३ ङ.—ट. सादितैर्व्यालैर्मृगैरार्तरवैश्चपक्षिभिः. ४ क. व्याघ्रमृगैश्च. ५ ङ. झ. ट. ततस्सकृत्वाजगतीपतेर्महान्कपिः. ६ ग बहुभिर्निशाचरैः. ७ क. ग.—च. झ. ञ. ट. माश्रितः.

[1]विद्रुताश्च भयत्रस्ता विने[2]दुर्मृगपक्षिणः ॥ रक्षसां च निमित्तानि क्रूराणि प्रतिपेदिरे ॥ २ ॥
ततो गतायां निद्रायां राक्षस्यो विकृताननाः ॥ तद्वनं द[3]दृशुर्भग्नं तं च [4]वीरं महाकपिम् ॥ ३ ॥
स ता दृष्ट्वा महाबाहुर्महासत्त्वो महाबलः ॥ चकार सुमहद्रूपं राक्षसीनां भयावहम् ॥ ४ ॥
ततस्तं गिरिसंकाशमतिकायं महा[5]बलम् ॥ राक्षस्यो वानरं दृष्ट्वा पप्रच्छुर्जनकात्मजाम् ॥ ५ ॥
कोयं कस्य कुतो वाऽयं किंनिमित्तमिहागतः ॥ कथं त्व[6]या सहानेन संवादः कृत इत्युत ॥ ६ ॥
आचक्ष्व नो विशालाक्षि मा भूत्ते सुभगे भयम् ॥ संवादमसितापाङ्गे त्वया किं कृतवानयम् ॥७॥
अथाब्रवीत्तदा साध्वी सीता स[7]र्वाङ्गसुन्दरी ॥ रक्षसां भी[8]मरूपाणां विज्ञाने म[9]म का गतिः ॥ ८ ॥
[10]यूयमेवाभिजानीत योऽयं यद्वा करिष्यति ॥ अहिरेव ह्यहेः पादान्विजानाति न संशयः ॥ ९ ॥
[11]अहमप्यस्य भीताऽस्मि [12]नैनं जानामि कोन्वयम् ॥ वेद्मि राक्षसमेवैनं कामरूपिणमागतम् ॥१०॥
वैदेह्या वचनं श्रुत्वा राक्षस्यो विद्रुता दि[13]शः ॥ स्थिताः काश्चिद्गताः काश्चिद्रावणाय निवेदितुम् ॥११॥
रावणस्य समीपे तु राक्षस्यो विकृताननाः ॥ विरूपं वानरं भी[14]ममाख्यातुमुपचक्रमुः ॥ १२ ॥
अशोकवनिकामध्ये राजन्भीमवपुः कपिः ॥ सीतया कृतसंवादस्तिष्ठत्यमितविक्रमः ॥ १३ ॥
न च तं जानकी सीता हरिं हरिणलोचना ॥ अस्माभिर्बहुधा पृष्टा निवेदयितुमिच्छति ॥ १४ ॥
वासवस्य भवेद्दूतो दूतो वैश्रवणस्य वा ॥ प्रेषितो वाऽपि रामेण सीतान्वेषणकाङ्क्षया ॥ १५ ॥
ते[15]न त्वद्भुत[16]रूपेण यत्तत्तव मनोहरम् ॥ नानामृगगणाकीर्णं प्रमृष्टं प्रमदावनम् ॥ १६ ॥
न तत्र कश्चिदुद्देशो यस्तेन न विनाशितः ॥ यत्र सा जानकी सी[17]ता स तेन न विनाशितः ॥१७॥
जानकीरक्षणार्थं वा श्रमाद्वा नो[18]पलभ्यते ॥ अथवा कः श्रमस्तस्य सैव तेनाभिरक्षिता ॥ १८ ॥
चारुपल्लवपु[19]ष्पाढ्यं यं सीता स्वयमास्थिता ॥ प्रवृद्धः शिंशुपावृक्षः स च तेनाभिरक्षितः ॥ १९ ॥
तस्योग्र[20]रूपस्योग्र त्वं दण्डमाज्ञातुमर्हसि ॥ सीता संभाषिता येन त[21]द्वनं च विनाशितम् ॥ २० ॥

इत्यमरः । संवादो वा कथं कृत इति पप्रच्छुरिति पूर्वेण संबन्धः । कः किंनामकः । कस्य कस्य संबन्धी पुरुषः । कुतः कस्माद्देशादागतः । किंनिमित्तं किं प्रयोजनमुद्दिश्य । संवादं किं कृतवान् किमुद्दिश्य कृतवान् । सर्वस्यापि पप्रच्छुरितिपूर्वेणान्वयः ॥६–८॥ अयं यः यादृशः । यद्वा कार्यं करिष्यति तद्यूयमेवाभिजानीतेति संबन्धः ॥ ९ ॥ नैनं जानामीति । "विवाहकाले रतिसंप्रयोगे प्राणात्यये सर्वधनापहारे । मित्रस्य चार्थेप्यनृतं वदेयुः पञ्चानृतान्याहुरपातकानि" इति स्मरणादसत्योक्तिः ॥ १० ॥ दिशः दिक्षु । वनस्यपार्श्वेष्वित्यर्थः । विद्रुताः विलीनाः । निवेदितुं निवेदयितुं ॥११—१५॥ प्रमृष्टं भग्नमित्यर्थः ॥१६—१९॥ हे उग्र त्वं आज्ञातुं आज्ञापयितुं ॥२०

ति० पप्रच्छुः तस्यानिर्निद्रतयाऽवस्थानंमलेतिभावः ॥ ५ ॥ ति० त्वयाऽनेनकथंसंवादःकृतइतिचपप्रच्छुः । यद्यपितानिद्रिताः । वनभङ्गध्वनिनाजागरिताइतिसंवादज्ञानस्यैवाभावात्कथंप्रश्नोनिरवसरः । तथापि निद्रामध्येकिञ्जिज्जागरेणेषत्संवादश्रवणेपि देवमाययापुनर्निद्रेतितत्प्रश्नोपपत्तिरित्याहुः । सीतायास्तद्दर्शनेपिनिर्भयप्रसन्नमुखतयाऽवस्थानादर्शनादयंकश्चिदेतत्परिचितएतद्वृत्तान्तज्ञानार्थमेवप्रायेणागतइतिसंभाव्यानयासंवादकरणंचसंभाव्य तत्प्रश्ननिर्वाहइतिकतकः ॥ ६ ॥ ति० कागतिः कउपायः ॥८॥ ति० ननिवेदयितुमिच्छति । प्रायेणेयंतंजानातीतितासामाशयः ॥ १४ ॥ ति० उद्देशः प्रदेशः ॥ १७ ॥

[पा०] १ क. विद्रावितावश्चसंत्रस्ताः. २ ङ. झ. ट. निषेदुः. ३ घ. ददृशुर्भिन्नं. ४ च. भीमं. ५ च. ज. ञ. महामार्तिं. ६ च. छ. ज. ञ. त्वयानेनपुनः. ७ क.—ट. सर्वाङ्गशोभना. ८ क.—ट. कामरूपाणां. ९ ङ. झ. ट. कागतिर्मम. १० घ. ङ. झ. ट. यूयमेवास्यजानीत.; क. ग. यूयमेवात्र. च. छ. ज. ञ. यूयमेवहि. ११ ङ. झ. ट. अहमप्यति. १२ ङ. झ. ट. नैवजानामिकोह्ययं. १३ क. ख. दृढं. ङ. झ. ट. द्रुतं. ग. भयात्. १४ ङ. झ. ट. भीमंरावणायन्यवेदिषुः. क. भीमंव्याख्यातुमुप. १५ ङ. झ. ट. तेनैवाद्भुत. १६ क. ञ. वीर्येण. १७ ङ. झ. ट. देवी, १८ क. ङ. ज—ट. लक्ष्यते. १९ क. घ. ङ. झ. ट. पत्राढ्यं. च. छ. ज. ञ. शोभाढ्यं. २० ङ. छ. झ. ञ. रूपस्योग्रं. २१ ग. ङ.—ट. वनंतेन.

मनःपरिगृहीतां तां तव रक्षोगणेश्वर ॥ कः सीतामभिभाषेत यो न स्यात्त्यक्तजीवितः ॥ २१ ॥
राक्षसीनां वचः श्रुत्वा रावणो राक्षसेश्वरः ॥ हुताग्निरिव जज्वाल कोपसंवर्तितेक्षणः ॥ २२ ॥
तस्य क्रुद्धस्य नेत्राभ्यां प्रापतन्नास्रबिन्दवः ॥ दीप्ताभ्यामिव दीपाभ्यां सार्चिषः स्नेहबिन्दवः ॥२३॥
आत्मनः सदृशाञ्छूरान्किंकरान्नाम राक्षसान् ॥ व्यादिदेश महातेजा निग्रहार्थं हनूमतः ॥ २४ ॥
तेषामशीतिसाहस्रं किंकराणां तरस्विनाम् ॥ २५ ॥
निर्ययुर्भवनात्तस्मात्कूटमुद्गरपाणयः ॥ महोदरा महादंष्ट्रा घोररूपा महाबलाः ॥
युद्धाभिमनसः सर्वे हनुमद्ग्रहणोन्मुखाः ॥ २६ ॥
ते कपीन्द्रं समासाद्य तोरणस्थमवस्थितम् ॥ अभिपेतुर्महावेगाः पतङ्गा इव पावकम् ॥ २७ ॥
ते गदाभिर्विचित्राभिः परिघैः काञ्चनाङ्गदैः ॥ आजघ्नुर्वानरश्रेष्ठं शरैश्चादित्यसन्निभैः ॥ २८ ॥
मुद्गरैः पट्टिशैः शूलैः प्रासतोमरशक्तिभिः ॥ परिवार्य हनूमन्तं सहसा तस्थुरग्रतः ॥ २९ ॥
हनुमानपि तेजस्वी श्रीमान्पर्वतसन्निभः ॥ क्षितावाविध्य लाङ्गूलं ननाद च महास्वनम् ॥ ३० ॥
स भूत्वा सुमहाकायो हनुमान्मारुतात्मजः ॥ धृष्टमास्फोटयामास लङ्कां शब्देन पूरयन् ॥ ३१ ॥
तस्यास्फोटितशब्देन महता सानुनादिना ॥ पेतुर्विहङ्गा गगनादुच्चैश्चेदमघोषयत् ॥ ३२ ॥
जयत्यतिबलो रामो लक्ष्मणश्च महाबलः ॥ राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ ३३ ॥
दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः ॥ हनुमाञ्शत्रुसैन्यानां निहन्ता मारुतात्मजः ॥ ३४ ॥
न रावणसहस्रं मे युद्धे प्रतिबलं भवेत् ॥ शिलाभिस्तु प्रहरतः पादपैश्च सहस्रशः ॥ ३५ ॥
अर्दयित्वा पुरीं लङ्कामभिवाद्य च मैथिलीम् ॥ समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसाम् ॥३६॥
तस्य सन्नादशब्देन तेऽभवन्भयशङ्किताः ॥ ददृशुश्च हनूमन्तं संध्यामेघमिवोन्नतम् ॥ ३७ ॥

—२१॥ संवर्तितेक्षणः परिवर्तितेक्षणः ॥२२—२३॥ नाम प्रसिद्धौ । किंकर इति प्रसिद्धानित्यर्थः ॥ २४ ॥ किंकराणां संख्यां निर्दिशति—तेषामिति ॥ २५ ॥ सर्व इति विशेष्यं । कूटो नाम अयस्कारकूटसदृश आयुधविशेषः । मुद्गरः द्रुघणः ॥ २६ ॥ अवस्थितं युद्धाय सन्नद्धमित्यर्थः ॥ २७ ॥ परिघैः परिघपातनैः । काञ्चनाङ्गदैः काञ्चनपटैः ॥ २८ ॥ पट्टिशो नाम लोहदण्डः तीक्ष्णधारः क्षुरोपमआयुधविशेषः । अत्रेत्थंभूतलक्षणे तृतीया । प्रासः कुन्तः । तोमरः आयुधविशेषः ॥ २९ ॥ श्रीमानिति तात्कालिकहर्षकृतकान्तिरुच्यते ॥ ३० ॥ धृष्टमिति क्रियाविशेषणं ॥ ३१ ॥ सानुनादिना सप्रतिध्वनिना । यद्वा अनुनादिनः पर्वतगुहादयः तत्सहितेन । यद्वा सानुषु प्रतिध्वनिंकुर्वता । उच्चैश्चेदमघोषयदिति । स हनुमान इदं वक्ष्यमाणं वचनमुच्चैरघोषयत् ॥ ३२ ॥ घोषणवचनमाह—जयतीत्यादि ॥ अभिपालितः वालिवधेन ॥३३॥अक्लिष्टकर्मण इत्यनेन स्वदास्यं न कर्मकृतं किंतु स्वरूपप्रयुक्तमित्युच्यते॥३४॥ प्रतिबलं समानबलं । प्रहरतः राक्षसानितिशेषः । प्रहारमात्रेणवा हनुमद्विशेषणं ॥ ३५ ॥ मिषतां पश्यतां । अनादरे षष्ठी ॥ ३६ ॥ संध्यामेघमिवेति रक्तवर्णत्वात् ॥ ३७ ॥

ती० सीतयासहसंभाषणस्यापराधत्वंसाधयन्ति—**मनःपरिगृहीतामिति** । राजपरिग्रहसंभाषणंपुंसोपराधइतिभावः । **ति०** त्यक्तजीवितः त्यक्तजीविताशः ॥ २१ ॥ **स०** आत्मनःसदृशान् स्वदूतत्वयोग्यान् ॥ २४ ॥ तेषांसंख्या अशीतिसाहस्रमित्यन्वयः । **शि०** तेषामिति । किङ्कराणांमध्येअशीतिसाहस्रंकिङ्करास्तस्माद्भवनान्निर्ययुः ॥ २५ ॥ **ति०** क्षितावाविध्यलाङ्गूलमिति स्वभावोक्तिरलङ्कारः ॥ ३० ॥

[**पा०**] १ घ. ङ. झ. ट. सदृशान्वीरान. २ क.—ङ. झ. ञ. ट. कपिंतं. ३ ख. ग. ङ. झ. ट. शरैरादित्य. च. छ. ज. ञ. शरैरशनि. ४ क. ख. ग. ङ. च. ज.—ट. तोमरपाणयः. ५ ङ. झ. ट. पुच्छमास्फोट. ६ क. ख. च. छ. ज. ञ. दुच्चैर्घोषमघोषयत्. ७ क. राघवेणानु. ८ ट. ददृशुस्ते.

स्वामिसंदेशनिःशङ्कास्ततस्ते राक्षसाः कपिम् ॥ चित्रैः प्रहरणैर्भीमैरभिपेतुस्ततस्ततः ॥ ३८ ॥
स तैः परिवृतः शूरैः सर्वतः स महाबलः ॥ आससादायसं भीमं परिघं तोरणाश्रितम् ॥
स तं परिघमादाय जघान रजनीचरान् ॥ ३९ ॥
स पन्नगमिवादाय स्फुरन्तं विनतासुतः ॥ विचचाराम्बरे वीरः परिगृह्य च मारुतिः ॥
[[1]सूदयामास वज्रेण दैत्यानिव सहस्रदृक्] ॥ ४० ॥
स हत्वा राक्षसान्वीरा[2]न्किंकरान्मारुतात्मजः ॥ यु[3]द्धकाङ्क्षी पुन[4]र्वीरस्तोरणं सं[5]मुपाश्रितः ॥ ४१ ॥
ततस्तस्माद्भयान्मुक्ताः कतिचित्तत्र राक्षसाः ॥ निहतान्किंकरान्सर्वान्रावणाय न्यवेदयन् ॥ ४२ ॥

स राक्षसानां निहतं म[6]हद्बलं निशम्य राजा परिवृत्तलोचनः ॥
समादिदेशाप्रतिमं पराक्रमे प्रहस्तपुत्रं समरे सुदुर्जयम् ॥ ४३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

किङ्करहननानन्तरं तोरणाच्चैत्यप्रासादमाप्लुतेनहनुमता तत्प्रासादभञ्जनम् ॥ १ ॥ तद्रक्षिभीराक्षसैर्युद्धाय तदभियानम् ॥ २ ॥ हनुमता प्रासादस्तंभोत्पाटनेनतद्भ्रामणे तदुद्गताग्निना प्रासाददहनम् ॥ ३ ॥ हनुमता प्रासादरक्षकराक्षसहननपूर्वकमन्तरिक्षस्थित्या सवानरबलेनसुग्रीवेण लङ्काभङ्गस्यभविष्यत्त्वोद्घोषणम् ॥ ४ ॥

ततः स किंकरान्हत्वा ह[7]नुमान्स्थानमास्थितः ॥ १ ॥
वनं भग्नं मया चैत्यप्रासादो न विनाशितः ॥ तस्मात्प्रासादर्म[8]प्येव भीमं विध्वंसयाम्यहम् ॥ २ ॥
इति संचिन्त्य मनसा हनुमान्दर्शयन्बलम् ॥ चैत्यप्रासादमाप्लुत्य मेरुशृङ्गमिवोन्नतम् ॥
आरुरोह हरिश्रेष्ठो हनुमान्मारुतात्मजः ॥ ३ ॥
आरुह्य गिरिसंकाशं प्रासादं हरियूथपः ॥ बभौ स सुमहातेजाः प्रतिसूर्य ई[9]वोदितः ॥ ४ ॥

ततस्तत इति । अनेनास्य समीपं सहसा गन्तुमशक्ता इत्यवगम्यते॥३८–३९॥ सपन्नगमिति सपरिघत्वमात्रे दृष्टान्तः। परिगृह्य परिघमिति शेषः। स्फुरन्तं पन्नगमादाय विनतासुतइव स वीरो मारुतिः परिघं परिगृह्याम्बरे विचचारेति संबन्धः ॥४०–४१॥ तस्माद्भयान्मुक्ताः दूरस्था इत्यर्थः ॥४२–४३॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्विचत्वारिंशः सर्गः ॥ ४२ ॥

ध्वंसनफलमाह—दर्शयन् बलमिति । बलदर्शनार्थमित्यर्थः । ध्वंसनप्रकारमाह—चैत्येति ॥ चैत्यं देवायतनं तद्रूपः प्रासादः चैत्यप्रासादः तं । आप्लुत्य तोरणाल्लङ्घयित्वा । हरिश्रेष्ठो हनुमान्मारुतात्मज इत्यस्योत्तरश्लोकेनान्वयः ॥ ३ ॥ हरियूथपत्वेप्यहरिर्भविष्यतीति तद्व्यावृत्त्यर्थं हरिश्रेष्ठ इत्युक्तं । प्रतिसूर्यः द्वितीयसूर्यइत्यर्थः । अनेनसूर्योदयस्सूचितः

ति० स्वामिनोरामस्यसंदेशेननामग्रहणेन कस्यायंभटइतिसंदेहरहिताः । किंच स्वामिसंदेशेनरावणाज्ञयाऽतिघोरेणाप्यनेनयोद्धव्यमेवेतिनिश्चयात्पक्षान्तरशङ्कारहिताः । प्रहरणैः आयुधैः । अभिपेतुः प्राहरन्नित्यर्थः ॥ ३८ द्विचत्वारिंशःसर्गः ॥ ४२ ॥

ति० ध्यानं विचारः ॥ १ ॥ ति० चैत्यप्रासादः रक्षःकुलदेवताप्रासादः । एवं प्रमदावनवत् ॥ २ ॥

[पा०] १ इदमर्धं ङ. झ. ञ. ट. पाठेषुदृश्यते. २ ख. घ.—च. झ. ञ. ट. न्वीरःकिंकरान्. ३ ङ. च. छ. झ. ञ. ट. युद्धाकाङ्क्षी. ४ ङ. च. झ. ट. महावीरः. ५ क. ङ. झ. ट. समवस्थितः. ङ. च. छ. ज. ञ. समुपस्थितः. ६ ग. ङ.—ट. महाबलं. ७ क. ख. ग. ङ. च. छ. झ. ञ, ट. हनुमान्ध्यानं. ज. हनुमान्द्वारं. ८ ग. ङ. झ. ट. मयैवमिमं. क. ग. घ. च. छ. मय्येवमिमं. ९ घ. इवोत्थितः.

संप्रधृष्य च दुर्धर्षं चैत्यप्रासादमुत्तमम् ॥ हनुमान्प्रज्वलँल्लक्ष्म्या पारियात्रोपमोऽभवत् ॥ ५ ॥
स भूत्वा सुमहाकायः प्रभावान्मारुतात्मजः ॥ धृष्टमास्फोटयामास लङ्कां शब्देन पूरयन् ॥ ६ ॥
तस्यास्फोटितशब्देन महता श्रोत्रघातिना ॥ पेतुर्विहङ्गमास्तत्र चैत्यपालाश्च मोहिताः ॥ ७ ॥
अस्त्रविज्जयतां रामो लक्ष्मणश्च महाबलः ॥ राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ ८ ॥
दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः ॥ हनुमाञ्शत्रुसैन्यानां निहन्ता मारुतात्मजः ॥ ९ ॥
न रावणसहस्रं मे युद्धे प्रतिबलं भवेत् ॥ शिलाभिस्तु प्रहरतः पादपैश्च सहस्रशः ॥ १० ॥
अर्दयित्वा पुरीं लङ्कामभिवाद्य च मैथिलीम् ॥ समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसाम् ॥११॥
एवमुक्त्वा विमानस्थश्चैत्यस्थान्हरियूथपः ॥ ननाद भीमनिर्ह्रादो रक्षसां जनयन्भयम् ॥ १२ ॥
तेन शब्देन महता चैत्यपालाः शतं ययुः ॥ गृहीत्वा विविधानस्त्रान्प्रासान्खड्गान्परश्वधान् ॥
विसृजन्तो महाकाया मारुतिं पर्यवारयन् ॥ १३ ॥
ते गदाभिर्विचित्राभिः परिघैः काञ्चनाङ्गदैः ॥ आजघ्नुर्वानरश्रेष्ठं बाणैश्चादित्यसन्निभैः ॥ १४ ॥
आवर्त इव गङ्गायास्तोयस्य विपुलो महान् ॥ परिक्षिप्य हरिश्रेष्ठं स बभौ रक्षसां गणः ॥ १५ ॥
ततो वातात्मजः क्रुद्धो भीमरूपं समास्थितः ॥ १६ ॥
प्रासादस्य महान्तस्य स्तम्भं हेमपरिष्कृतम् ॥ उत्पाटयित्वा वेगेन हनुमान्पवनात्मजः ॥
ततस्तं भ्रामयामास शतधारं महाबलः ॥ १७ ॥
तत्र चाग्निः समभवत्प्रासादश्चाप्यदह्यत ॥ १८ ॥
दह्यमानं ततो दृष्ट्वा प्रासादं हरियूथपः ॥ स राक्षसशतं हत्वा वज्रेणेन्द्र इवासुरान् ॥
अन्तरिक्षे स्थितः श्रीमानिदं वचनमब्रवीत् ॥ १९ ॥
मादृशानां सहस्राणि विसृष्टानि महात्मनाम् ॥ बलिनां वानरेन्द्राणां सुग्रीववशवर्तिनाम् ॥ २० ॥
अटन्ति वसुधां कृत्स्नां वयमन्ये च वानराः ॥ २१ ॥
दशनागबलाः केचित्केचिद्दशगुणोत्तराः ॥ केचिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः ॥ २२ ॥
सन्ति चौघबलाः केचित्केचिद्वायुबलोपमाः ॥ अप्रमेयबलाश्चान्ये तत्रासन्हरियूथपाः ॥ २३ ॥
ईदृग्विधैस्तु हरिभिर्वृतो दन्तनखायुधैः ॥ शतैः शतसहस्रैश्च कोटीभिरयुतैरपि ॥
आगमिष्यति सुग्रीवः सर्वेषां वो निषूदनः ॥ २४ ॥

॥ ४ ॥ संप्रधृष्य आक्रम्य । पारियात्रोनाम कुलपर्वतः ॥ ५—११ ॥ चैत्यस्थान् चैत्यपालान् ॥ १२–१६ ॥ पवनात्मजः भ्रामयामासेत्यन्वयः । शतधारं धारा कोटिः । वज्रवत्स्थितमित्यर्थः । यद्वा शतधा अरमिति च्छेदः । अरं शीघ्रं ॥ १७ ॥ अग्निः समभवत् । भ्रामितस्तम्भैः स्तम्भान्तरसंघट्टनादिति भावः ॥ १८—१९ ॥ राक्षसानामुत्साहभङ्गं कारयितुमाह—मादृशानामित्यादि ॥ २०–२२ ॥ ओघबलाः

स० शतं बहवः ॥ १३ ॥ **ति०** परिक्षिप्येत्यंशे तोयस्यावर्तइवेतिदृष्टान्तः ॥ १५ ॥ **रामानु०** महान्तस्य महाग्रस्य । अत्युन्नतशिखरस्येत्यर्थः । महार्हस्येतिवापाठः ॥ १७ ॥ **स०** अग्निःप्रासादस्तंभान्तरसंघर्षाद्वा वायुसूनुकरपरिभ्रमणरूपमथनतो वाग्निःसमभवदितिभावः । समदह्यत समग्रग्रामदाहस्यभाविनइयंनान्दीतिभावः ॥ १८ ॥ **ती०** ओघबलाः ओघसंख्यासंख्यातगजबलाः ॥ २३ ॥

[पा०] १ ङ. झ. ट. धर्षयित्वा. २ ग. ङ.—ट. महाकायश्चैत्यस्थोहरिपुङ्गवः. ३ ङ. झ. ट. नादेन. ४ क. पालाश्चते. ५ च. ज. ञ. समाश्रितः. ६ ग. घ. ङ. झ. ट. केचित्सन्तिवायुबलोपमाः. क. केचिच्छतगुणोत्तराः. वैनतेयबलाःकेचित्केचिद्वायुबलोपमाः. ७ क. ङ. च. ज.—ट. बलाःकेचितत्रासन. ८ ग. घ. कोटिभिर्बहुभिर्वृतः. ङ. झ. ञ. ट. कोटिभिश्चायुतैरपि.

नेयमस्ति पुरी लङ्का न यूयं न च रावणः ॥ यस्मादिक्ष्वाकुनाथेन बद्धं वैरं महात्मना ॥ २५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

हनुमता रावणचोदनयासमागतवतःप्रहस्तात्मजस्यजंबुमालिनोवधः ॥ १ ॥

संदिष्टो राक्षसेन्द्रेण प्रहस्तस्य सुतो बली ॥ जम्बुमाली महादंष्ट्रो निर्जगाम धनुर्धरः ॥ १ ॥
रक्तमाल्याम्बरधरः स्रग्वी रुचिरकुण्डलः ॥ महान्विवृत्तनयनश्चण्डः समरदुर्जयः ॥ २ ॥
[दग्धत्रिकूटप्रतिमो महाजलदसंनिभः ॥ महाभुजशिरस्स्कन्धो महादंष्ट्रो महाननः ॥ ३ ॥
महाजवो महोत्साहो महासत्त्वोरुविक्रमः ॥ आजगामातिवेगेन वज्राशनिसमस्वनः ॥ ४ ॥]
धनुः शक्रधनुःप्रख्यं महद्रुचिरसायकम् ॥ विस्फारयानो वेगेन वज्राशनिसमस्वनम् ॥ ५ ॥
तस्य विस्फारघोषेण धनुषो महता दिशः ॥ प्रदिशश्च नभश्चैव सहसा समपूर्यत ॥ ६ ॥
[उद्गच्छन्निव चादित्यः प्रभाभिरिव लोहितः ॥ लोहिताङ्गेन महता कवचेनाभिसंवृतः ॥
तिष्ठतिष्ठेति सहसा हनूमन्तमथाब्रवीत् ॥ ७ ॥]
रथेन खरयुक्तेन तमागतमुदीक्ष्य सः ॥ हनुमान्वेगसंपन्नो जहर्ष च ननाद च ॥ ८ ॥
तं तोरणविटङ्कस्थं हनुमन्तं महाकपिम् ॥ जम्बुमाली महाबाहुर्विव्याध निशितैः शरैः ॥ ९ ॥
अर्धचन्द्रेण वदने शिरस्येकेन कर्णिना ॥ बाह्वोर्विव्याध नाराचैर्दशभिस्तं कपीश्वरम् ॥ १० ॥
तस्य तच्छुशुभे ताम्रं शरेणाभिहतं मुखम् ॥ शरदीवाम्बुजं फुल्लं विद्धं भास्कररश्मिना ॥ ११ ॥
तत्तस्य रक्तं रक्तेन रञ्जितं शुशुभे मुखम् ॥ यथाऽऽकाशे महापद्मं सिक्तं चन्दनबिन्दुभिः ॥ १२ ॥

ओघाख्यसंख्याकबलाः ॥ २३—२५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

विवृत्तनयनः मण्डलीकृतनयनः ॥ २—४ ॥ रुचिरसायकं रुचिरसायकार्हं । विस्फारयानः विस्फारयमाणः । ज्याकर्षणं कुर्वन्नित्यर्थः । वज्राशनिसमस्वनमिति विस्फारणक्रियाविशेषणं ॥ ५ ॥ नभस्समपूर्यत दिशः प्रदिशश्च समपूर्यन्तेति विपरिणामेनानुषङ्गः ॥ ६—८ ॥ तोरणविटङ्कं तोरणस्य कपोतपालिका । "कपोतपालिकायां तु विटङ्कं पुन्नपुंसकं" इत्यमरः । स्तम्भोपरि तिर्यङ्निहितदार्वित्यर्थः ॥ ९ ॥ एकेनेत्येतदर्धचन्द्रस्यापि विशेषणं । अर्धचन्द्राकाराग्रशरेणेत्यर्थः । कर्णिना कर्णवच्छरेण ॥ १० ॥ अम्बुजं रक्तपद्मं । भास्कररश्मिना विद्धं अतएव फुल्लमित्यर्थः ॥ ११ ॥ रक्तं स्वतएव रक्तं । रक्तेन शोणितेन । महापद्मं रक्तोत्पलं । चन्दनबिन्दुभिः

शि० नास्ति नङ्क्ष्यतीत्यर्थः ॥ २५ ॥ इतित्रिचत्वारिंशःसर्गः ॥ ४३ ॥

स० स्रग्वी सुवर्णमालः । "प्रहस्तपुत्रस्त्विहजंबुमालीप्राभञ्जनिंप्राप्यसुवर्णमाली" इति संग्रहरामायणोक्तेः ॥ २ ॥ ति० समपूर्यत । दिगादिसमुदायापेक्षमेकवचनं ॥ स० नभः आकाशं । दिशःप्रदिशश्चयदात्मिकास्तत्समपूर्यत । "साक्षिसिद्धमेव गगनंतद्भागाएवदिशोनद्रव्यान्तरं" इतिसुधोक्तेः ॥ ६ ॥ ति० कर्णी अङ्कुशाकाराग्रशरविशेषः ॥ १० ॥

[पा०] १ क. ङ.—ट. यस्त्वलिक्ष्वाकुवीरेण. २ इदंश्लोकद्वयं क. पाठेदृश्यते. ३ इदमर्धत्रयं क. ग. पाठयोर्दृश्यते. ४ ङ. झ. ट. महातेजाविव्याध. ५ घ. दशभिस्तुस्तनान्तरे. ६ ङ. झ. ञ. ट. काञ्चनबिन्दुभिः.

चुकोप बाणाभिहतो राक्षसस्य महाकपिः ॥ १३ ॥
ततः पार्श्वेतिविपुलां ददर्श महतीं शिलाम् ॥ तरसा तां समुत्पाट्य चिक्षेप [1]बलवद्बली ॥
तां शरैर्दशभिः क्रुद्धस्ताडयामास राक्षसः ॥ १४ ॥
विपन्नं कर्म तद्दृष्ट्वा हनुमांश्चण्डविक्रमः ॥ सालं विपुलमुत्पाट्य भ्रामयामास वीर्यवान् ॥ १५ ॥
भ्रामयन्तं कपिं दृष्ट्वा सालवृक्षं महाबलम् ॥ चिक्षेप सुबहून्बाणाञ्जम्बुमाली महाबलः॥ १६ ॥
सालं चतुर्भिश्चिच्छेद वानरं पञ्चभिर्भुजे ॥ [2]उरस्येकेन बाणेन दशभिस्तु स्तनान्तरे ॥ १७ ॥
स शरैः पूरिततनुः क्रोधेन महता वृतः ॥ तमेव परिघं गृह्य भ्रामयामास [3]वेगतः ॥ १८ ॥
अतिवेगोतिवेगेन भ्रामयित्वा बलोत्कटः ॥ परिघं पातयामास जम्बुमालेर्महोरसि ॥ १९ ॥
तस्य चैव शिरो नास्ति न बाहू न च जानुनी ॥ न धनुर्न रथो नाश्वास्तत्रादृश्यन्त नेषवः ॥२०॥
स हतस्तरसा तेन जम्बुमाली [4]महाबलः ॥ [5]पपात निहतो भूमौ [6]चूर्णिताङ्गविभूषणः ॥ २१ ॥
जम्बुमालिं च निहतं किंकरांश्च [7]महाबलान् ॥ चुक्रोध रावणः श्रुत्वा [8]कोपसंरक्तलोचनः ॥ २२ ॥
स रोषसंवर्तिततामलोचनः प्रहस्तपुत्रे निहते महाबले ॥
अमात्यपुत्रानतिवीर्यविक्रमान्समादिदेशाशु निशाचरेश्वरः ॥ २३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

हनुमता रावणप्रेषितमन्त्रिपुत्रसप्तकहननम् ॥ १ ॥

ततस्ते राक्षसेन्द्रेण चोदिता मन्त्रिणः सुताः ॥ निर्ययुर्भवनात्तस्मात्सप्त सप्तार्चिवर्चसः ॥ १ ॥
महाबलपरीवारा धनुष्मन्तो महाबलाः ॥ कृतास्त्रास्त्रविदां श्रेष्ठाः परस्परजयैषिणः ॥ २ ॥

रक्तचन्दनबिन्दुभिः ॥ १२ ॥ चुकोपेत्यर्धं ॥ राक्षसस्य राक्षसविषये ॥ १३—१६ ॥ पञ्चभिर्भुज इत्यादौ विव्याधेत्यध्याहारः ॥ १७—१९ ॥ नाश्वा इति अश्वशब्देनात्र खरा उच्यन्ते । रथेन खरयुक्तेनेति पूर्वमुक्तत्वात् ॥ २०—२३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

भवनात्तस्मात् रावणभवनात् । सप्तार्चिवर्चसइत्यत्र सप्तार्चीति इकारान्तत्वमार्षं ॥ १ ॥ कृतास्त्राः शिक्षि-

ति० काञ्चनबिन्दुभिःरक्ताशोकपुष्परसबिन्दुभिः । सिक्तंमहापद्मं महत्तरंरक्तपद्ममिवेत्यभूतोपमेयं ॥ " अशोकःकाञ्चनाह्वयः " स० काञ्चनबिन्दुभिः सुवर्णरसबिन्दुभिः । अभूतोपमेयं ॥ १२ ॥ स० राक्षसस्यबाणाभिहतः । एकदेशान्वयः ससंबन्धिकत्वादुक्तः । यद्वा बाणाभिहतोराक्षसस्यचुकोपेत्यन्वयः । हनुमत्कोपसहनासुशकत्वाद्यप्रतीत्यप्रवृत्तेःषष्ठी । साचशैषिकीतिकर्मणि ॥१३॥ ति० ताडयामास बिभेद ॥१४॥ ति० विपन्नं व्यर्थीकृतं ॥१५॥ स० जंबुमालेः रूढः इकारान्तोनकारान्तश्चेतिजंबुमालेरिति साधु ॥ १९ ॥ स० नाश्वाः अश्वभिन्नाः अश्वसदृशावाखराः । ते नादृश्यन्त । नञर्थस्यनशब्दस्यतद्भिन्नतत्सदृशार्थकता स्वपरसाधारण्येनदृष्टा । अथवा विभाषानुवृत्तेर्नलोपाभावान्नाश्वाइतिसंभवति । तेनखरयुक्तयानत्वमुक्तमुपपन्नं ॥२०॥ स० चूर्णिताङ्गः चूर्णीकृतशाखः चूर्णीकृतावयवोराक्षसोपि ॥२१॥ स० क्रोधसंरक्तलोचनः पूर्वकिङ्करनाशात् । पुनर्जंबुमालिनंनिहतंश्रुत्वा पूर्वापेक्षयाबहुकोपंकृतवानित्यर्थः ॥२२॥ स० वीर्यं वैरिपराक्रमः। तदतिक्रम्यपराक्रमोयेषांतान् ॥२३॥ इतिचतुश्चत्वारिंशःसर्गः ॥४४॥

स० सप्तार्चाः प्रतिमारूपाः कालीकरालीइत्याद्याः अस्यसन्तीतिसप्तार्ची वह्निः । तद्वद्वर्चोयेषांतेतथा । यद्वा इकारान्तोर्चिशब्दोर्चिश्शब्दपर्यायः । सप्तअर्चयोर्चींषि शिखायस्यसोग्निः । " अर्चिर्मयूरशिखयोः " इतिविश्वः । " इकारान्तोप्यस्ति " ' अग्नेर्भ्राजन्तेअर्चयः ' इतीतिभानुदीक्षितलेखात् ॥ १ ॥ स० परस्परजयैषिणः परस्परमुत्कर्षापेक्षाः ॥ २ ॥

[पा०] १ ग. झ. जववद्बली. २ क. ग. शिरस्येकेन. ३ ख. मारुतिः. क. ङ. झ. ञ. ट. वेगितः. ४ क. ग. ङ.—ट. महारथः. ५ ग. निपपातहतो. ६ ङ.—ट. चूर्णिताङ्गइवद्रुमः. ७ ख. महारथान्. क. महाजवान्. ८ झ. ठ. क्रोधसंरक्त.

हेमजालपरिक्षिप्तैर्ध्वजवद्भिः पताकिभिः ॥ तोयदस्वननिर्घोषैर्वाजियुक्तैर्महारथैः ॥ ३ ॥
तप्तकाञ्चनचित्राणि [1]चापान्यमितविक्रमाः ॥ विस्फारयन्तः संहृष्टास्तडिद्वन्त इवाम्बुदाः ॥ ४ ॥
[2]जनन्यस्तु ततस्तेषां विदित्वा किंकरान्हतान् ॥ बभूवुः शोकसंभ्रान्ताः सबान्धवसुहृज्जनाः ॥ ५ ॥
ते [3]परस्परसंघर्षात्तप्तकाञ्चनभूषणाः ॥ अभिपेतुर्हनूमन्तं तोरणस्थमवस्थितम् ॥ ६ ॥
सृजन्तो बाणवृष्टिं ते रथगर्जितनिःस्वनाः ॥ [4]वृष्टिमन्त इवाम्भोदा विचेरुर्नैर्ऋताम्बुदाः ॥ ७ ॥
अवकीर्णस्ततस्ताभिर्हनुमाञ्शरवृष्टिभिः ॥ अभवत्संवृताकारः शैलराडिव वृष्टिभिः ॥ ८ ॥
स शरान्मोघयामास तेषामाशुचरः कपिः ॥ [5]रथवेगं च वीराणां विचरन्विमलेऽम्बरे ॥ ९ ॥
स तैः क्रीडन्धनुष्मद्भिर्व्योम्नि वीरः प्रकाशते ॥ धनुष्मद्भिर्यथा मेघैर्मारुतः प्रभुरम्बरे ॥ १० ॥
स कृत्वा निनदं घोरं त्रासयंस्तां महाचमूम् ॥ चकार हनुमान्वेगं तेषु रक्षस्सु वीर्यवान् ॥ ११ ॥
[6]तलेनाभ्यहनत्कांश्चित्[7]पादैः कांश्चित्परन्तपः ॥ [8]मुष्टिनाभ्यहनत्कांश्चिन्नखैः कांश्चिद्व्यदारयत् ॥ १२ ॥
प्रममाथोरसा कांश्चिदूरुभ्या[9]मपरान्कपिः ॥ केचित्तस्य निनादेन तत्रैव पतिता भुवि ॥ १३ ॥
ततस्तेष्ववसन्नेषु भूमौ निपतितेषु च ॥ तत्सैन्यमगमत्सर्वं दिशो दश भयार्दितम् ॥ १४ ॥
विनेदु[10]र्विस्वरं नागा निपेतुर्भुवि वाजिनः ॥ भग्ननीडध्वजच्छत्रैर्भूश्च कीर्णाऽभवद्रथैः ॥ १५ ॥
स्रवता रुधिरेणाथ स्रवन्त्यो दर्शिताः पथि ॥ विविधैश्च स्वरैर्लङ्का ननाद विकृतं तदा ॥ १६ ॥

स तान्प्रवृद्धान्विनिहत्य राक्षसान्महाबलश्चण्डपराक्रमः कपिः ॥
युयुत्सुरन्यैः पुनरेव राक्षसै[11]स्तमेव वीरोऽभिजगाम तोरणम् ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

ताम्राः ॥ आर्षः सन्धिः । कृतास्त्राणामस्त्रविदां च श्रेष्ठा इति वा । ज्ञानशिक्षे उभे अप्येषां स्त इति भावः । परस्परजयैषिणः प्रत्येकं हनुमज्जयैषिण इत्यर्थः ॥ २ ॥ हेमजालपरिक्षिप्तैः सुवर्णजालविनिर्मितैः । स्वासाधारणचिह्नयुक्तं ध्वजं । केवलचित्रवस्त्रालंकृता पताका । तोयदस्वननिर्घोषैः तोयदस्वनतुल्यनिर्घोषवद्भिः ॥३—८॥ स शरान् मोघयामास । यथा शराः स्वस्मिन्न पतन्ति तथा चकारेत्यर्थः । रथवेगं च मोघयामासेत्यन्वयः । यथा रथवेगास्स्वप्रहाराय न भवन्ति तथा समचरदित्यर्थः ॥ ९—१० ॥ वेगं संहारोद्योगं ॥ ११ ॥ पादैः कांश्चिदिति बहुवचनं वानराणां द्विपात्सु चतुष्पात्सु च ग्रहणात् ॥ १२—१४ ॥ नीडं ध्वजावयवविशेषः ॥ १५ ॥ स्रवन्त्यः नद्यः । विकृतं यथा तथा ननाद प्रतिध्वानवती बभूव ॥ १६—१७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चचत्वारिंशः सर्गः ॥४५॥

स० एकजिह्वाः ध्वजाः । द्विजिह्वाः पताकाः ॥ ३ ॥ शि० सिंहावलोकनन्यायेननिहतकिङ्करगृहवृत्तान्तमाह—**जनन्यइति** ॥ ५ ॥ ति० तोरणस्थमवस्थितं तत्रस्थितं निश्चलमित्यर्थः ॥ ६ ॥ स० राक्षसानांशरवर्षेणकार्ष्ण्येनचमेघसमता । पूर्वमखण्डतः शरसारगमनादेकवचनंवृष्टिमिति प्रत्येकंपृथक्पृथगञ्चनाद्वृष्टिभिरितिबहुवचनंचसंभवतः ॥ ७ ॥ ति० संवृताकारः अदृश्यइति यावत् ॥ ८ ॥ ति० नीडं रथस्थंरथ्यधिष्ठानस्थानं ॥ १५ ॥ इतिपञ्चचत्वारिंशःसर्गः ॥ ४५ ॥

[पा०] १ ग. धनुष्यमित. २ ख. घ.—ट. जनन्यस्तास्ततस्तेषां. ३ ङ. ज. झ. ट. परस्परसंघर्षास्तप्त. ४ ङ. झ. ट. प्रावृट्कालइवांभोदाः. ५ क.—ट. रथवेगांश्च. ६ ङ. झ. ट. तलेनाभिहनत्. ७ ग. घ. पद्भ्यांकांश्चित्. ८ ग. ङ. छ.—ट. मुष्टिभिश्चाहनत्. ९ ङ. झ. ट. मपरानपि. १० क. ग. विंस्वराः. ११ क. ख. ङ.—ट. स्तदेव.

षट्चत्वारिंशः सर्गः ॥ ४६ ॥

हनुमता रावणप्रहितसेनापतिपञ्चकस्य पञ्चताप्रापणम् ॥ १ ॥

हतान्मन्त्रिसुतान्बुद्ध्वा वानरेण महात्मना ॥ रावणः संवृताकारश्चकार मतिमुत्तमाम् ॥ १ ॥
स विरूपाक्षयूपाक्षौ दुर्धरं चैव राक्षसम् ॥ प्रघसं भासकर्णं च पञ्च सेनाग्रनायकान् ॥ २ ॥
संदिदेश दशग्रीवो वीरान्नयविशारदान् ॥ हनुमद्ग्रहणव्यग्रान्वायुवेगसमान्युधि ॥ ३ ॥
यात सेनाग्रगाः सर्वे महाबलपरिग्रहाः ॥ सवाजिरथमातङ्गाः स कपिः शास्यतामिति ॥ ४ ॥
यत्तैश्च खलु भाव्यं स्यात्तमासाद्य वनालयम् ॥ कर्म चापि समाधेयं देशकालविरोधिनम् ॥ ५ ॥
[वानरोयमिति ज्ञात्वा न हि शुध्यति मे मनः ॥ नैवाहं तं कपिं मन्ये यथेयं प्रस्तुता कथा ॥६॥]
न ह्यहं तं कपिं मन्ये कर्मणा प्रतितर्कयन् ॥ सर्वथा तन्महद्भूतं महाबलपरिग्रहम् ॥
भवेदिन्द्रेण वा सृष्टमस्मदर्थं तपोबलात् ॥ ७ ॥
सनागयक्षगन्धर्वा देवासुरमहर्षयः ॥ युष्माभिः सहितैः सर्वैर्मया सह विनिर्जिताः ॥ ८ ॥
तैरवश्यं विधातव्यं व्यलीकं किंचिदेव नः ॥ तदेव नात्र संदेहः प्रसह्य परिगृह्यताम् ॥ ९ ॥
नावमान्यो भवद्भिश्च हरिर्धीरपराक्रमः ॥ दृष्टा हि हरयः पूर्वं मया विपुलविक्रमाः ॥ १० ॥
वाली च सहसुग्रीवो जाम्बवांश्च महाबलः ॥ नीलः सेनापतिश्चैव ये चान्ये द्विविदादयः ॥ ११ ॥
नैवं तेषां गतिर्भीमा न तेजो न पराक्रमः ॥ न मतिर्न बलोत्साहौ न रूपपरिकल्पनम् ॥ १२ ॥
महत्सत्त्वमिदं ज्ञेयं कपिरूपं व्यवस्थितम् ॥ प्रयत्नं महदास्थाय क्रियतामस्य निग्रहः ॥ १३ ॥
कामं लोकास्त्रयः सेन्द्राः ससुरासुरमानवाः ॥ भवतामग्रतः स्थातुं न पर्याप्ता रणाजिरे ॥ १४ ॥
तथापि तु नयज्ञेन जयमाकाङ्क्षता रणे ॥ आत्मा रक्ष्यः प्रयत्नेन युद्धसिद्धिर्हि चञ्चला ॥ १५ ॥
ते स्वामिवचनं सर्वे प्रतिगृह्य महौजसः ॥ समुत्पेतुर्महावेगा हुताशसमतेजसः ॥ १६ ॥

संवृताकारः अन्तर्मनाः । मतिं चिन्तां ॥१-३॥ इति वक्ष्यमाणप्रकारेण ॥ ४ ॥ तमेवाह—यत्तैरित्यादिना ॥ यत्तैः यतमानैः । अप्रमत्तैरिति यावत् । यतेः कर्तरि क्तः । समाधेयं परिहर्तव्यं । देशकालविरोधिनं देशकालविरोधीत्यर्थः ॥ ५—६ ॥ महद्भूतं मन्य इत्यनुषज्यते । इन्द्रेण वा अन्यैर्वेति शेषः । वाशब्दस्य विकल्पार्थस्य प्रयोगात् ॥ ७—८ ॥ व्यलीकं अप्रियं ॥ ९ ॥ नावमान्यो भवद्भिश्च हरिर्धीरपराक्रम इति ॥ अत्र त्रयोदशसहस्रश्लोका गताः । अयं चतुर्दशसहस्रस्यादिः । धीति गायत्र्याश्चतुर्दशाक्षरं ॥ १०—११ ॥ गतिः वेगः । रूपपरिकल्पनं यथेष्टरूपग्रहणं ॥ १२ ॥ महदिति ॥ इत्थं महत्सत्त्वं किमपि कपिरूपं सत् व्यवस्थितमिति ज्ञेयमित्यर्थः

ती० संवृताकारः गूढाकारः । अन्तस्संजातशङ्कइत्यर्थः । उत्तमांमतिं धैर्यं ॥ १ ॥ **ती०** किंचात्रदेशकालाविरुद्धंकर्मकार्यमित्याह—**कर्मचेति**। देशकालविरोधिनंदेशकालविरोधीत्यर्थः । आर्षोलिङ्गविभक्तिव्यत्ययः । कर्म समाधेयं परिहर्तव्यं । देशकालाविरोधितमितिपाठे समाधेयं कर्तव्यं । अत्रहेतुमाह—नहीति ॥ ५ ॥ **ती०** अस्मदर्थं अस्मन्निग्रहार्थं ॥ **स०** अस्मदर्थं अस्माकमर्थंनिवृत्तिमुद्दिश्य ॥ ७ ॥ **स०** वालीति । जांबवानपिकपिमध्येबहुस्थलेगणितइतिनानुपपत्तिः ॥ ११ ॥ **ती०** नैवंतेषामित्यादौसर्वत्रईदृक्छब्दोऽध्याहर्तव्यः । तथाचेत्थंयोजना तेषां वाल्यादिनां । हनुमतोभीमागतिस्तेजआदिकंचयथा तथा ईदृङ्नास्तीतिसंबन्धः । रूपपरिकल्पनंयथेप्सितरूपपरिग्रहणं ॥ १२ ॥ **ति०** प्रयत्नमित्यार्षंक्लिबत्वं ॥ १३ ॥ **ति०** कामं यद्यपीत्यर्थः

[पा०] १ ङ. झ. ट. दुर्धर्षं. २ क.—ट. हनुमद्ग्रहणे. ३ क.—ट. कालाविरोधितं. ४ अयंश्लोकः ङ. झ. पाठेषुदृश्यते. ५ ख. ग. ङ. च. छ. झ. ट. गन्धर्वदेवासुर. ६ क. युधि. ७ ख. नावमान्यश्चयुष्माभिः.

[1]रथैर्मत्तैश्च मातङ्गैर्वाजिभिश्च महाजवैः ॥ शस्त्रैश्च विविधै[2]स्तीक्ष्णैः सर्वैश्चोपचिता बलैः ॥ १७ ॥
ततस्तं ददृशुर्वीरा दीप्यमानं महाकपिम् ॥ रश्मिमन्तमिवोद्यन्तं स्वतेजोरश्मिमालिनम् ॥ १८ ॥
तोरणस्थं महोत्साहं महासत्त्वं महाबलम् ॥ महामतिं महावेगं महाकायं महाबलम् ॥ १९ ॥
तं समीक्ष्यैव ते सर्वे दिक्षु सर्वास्ववस्थिताः ॥ तैस्तैः प्रहरणैर्भीमैरभिपेतु[3]स्ततस्ततः ॥ २० ॥
तस्य पञ्चायसास्तीक्ष्णाः शिताः पीतमुखाः शराः॥शिरस्युत्पलपत्राभा दुर्धरेण निपातिताः ॥२१॥
स तैः पञ्चभिराविद्धः शरैः शिरसि वानरः ॥ उत्पपात नदन्व्योम्नि दिशो दश विनादयन् ॥ २२ ॥
ततस्तु दुर्धरो वीरः सरथः सज्यकार्मुकः ॥ किरञ्शरश[4]तैस्तीक्ष्णैरभिपेदे महाबलः ॥ २३ ॥
स कपिर्वारयामास तं व्योम्नि शरवर्षिणम् ॥ वृष्टिमन्तं पयोदान्ते पयोदमिव मारुतः ॥ २४ ॥
[5]अर्द्यमानस्ततस्तेन दुर्धरेणानिलात्मजः ॥ चकार [6]कदनं भूयो व्यवर्धत च वेगवान् ॥ २५ ॥
स दूरं सहसोत्पत्य दुर्धरस्य रथे हरिः ॥ निपपात महावेगो विद्युद्राशिर्गिराविव ॥ २६ ॥
त[7]तः स मथिताष्टाश्वं रथं भग्नाक्षकूबरम् ॥ विहाय न्यपतद्भूमौ दुर्धरस्त्यक्तजीवितः ॥ २७ ॥
तं विरूपाक्षयूपाक्षौ दृष्ट्वा निपतितं भुवि ॥ [8]संजातरोषौ दुर्धर्षावुत्पेततुररिन्दमौ ॥ २८ ॥
स ताभ्यां सहसोत्पत्य विष्ठितो विमलेऽम्बरे ॥ मुद्गराभ्यां महाबाहुर्वक्षस्यभिहतः कपिः ॥ २९ ॥
तयोर्वेगवतोर्वेगं विनि[9]हत्य महाबलः ॥ निपपात पुनर्भूमौ [10]सुपर्णसमविक्रमः ॥ ३० ॥
स सालवृक्षमासाद्य तमुत्पाट्य च वानरः ॥ तावुभौ राक्षसौ वीरौ जघान पवनात्मजः ॥ ३१ ॥
ततस्तांस्त्रीन्हताञ्ज्ञात्वा वानरेण तरस्विना ॥ [11]अभिपेदे महावेगः प्रसह्य प्रघसो [12]हरिम् ॥ ३२ ॥
भासकर्णश्च संक्रुद्धः शूलमादाय वीर्यवान् ॥ एकतः कपिशार्दूलं यशस्वि[13]नमवस्थितम् ॥ ३३ ॥
पट्टिशेन शिताग्रेण प्रघसः प्रत्ययोधयत् ॥ भासकर्णश्च शूलेन राक्षसः कपिसत्तमम् ॥ ३४ ॥
स ताभ्यां विक्षतैर्गात्रैरसृग्दिग्धतनूरुहः ॥ अभवद्वानरः क्रुद्धो बालसूर्यसमप्रभः ॥ ३५ ॥
समुत्पाट्य गिरेः शृङ्गं समृगव्यालपादपम् ॥ जघान हनुमान्वीरो राक्षसौ कपिकुञ्जरः ॥
[गिरि[14]शृङ्गविनिष्पिष्टौ तिलशस्तौ बभूवतुः] ॥ ३६ ॥

॥ १३—१७ ॥ स्वतेजोरश्मिमालिनं स्वतेजसा सूर्यं । रश्मिमन्तमिवेत्यत्र उपमा । अत्र रूपकमिति भिदा ॥ १८ ॥ उत्साहः लोकोत्तरकार्येषु स्थेयान्प्रयत्नः । महासत्त्वं महाध्यवसायं । "द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु" इत्यमरः । द्वितीयबलशब्दश्शक्तिवचनः । "बलं रूपेस्थनि स्थौल्ये शक्तिरेतश्चमूषु च"इति वैजयन्ती ॥१९—२०॥ तीक्ष्णाः क्रूराः । शिताः निशिताः । पीतमुखाः समीचीनायसनिर्मितत्वेन पीतरेखाग्राः । उत्पलपत्राभाः उत्पलपत्राणि यथा निपात्यन्ते तथा निपातिता इत्यर्थः॥२१—२३॥ वारयामास स्ववेगेन प्रापयामासेत्यर्थः ॥२४॥ कदनं युद्धं ॥ २५ ॥ विद्युद्राशिः अशनिः ॥ २६ ॥ कूबरः युगन्धरः ॥२७–२९॥ वेगं विनिहत्य परिहृत्य

॥ १४ ॥ **स०** रश्मिमन्तं रश्मिवंतं । यवादिरयं ॥ स्वतेजोरश्मिमालिनं सु अत्यन्तंअतेजसोरश्मिमालिनोयेन भवन्तिसतथा ॥१८॥ **ति०** दिक्षुसर्वास्ववस्थिताःद्राक्तत्समीपमागन्तुंचकिताइतिभावः ॥ २० ॥ **ती०** पीतमुखाः शत्रुशोणितरञ्जिताइत्यर्थः । उत्पलपत्राभाः तद्वर्णाः ॥ **ती०** पीतमुखाः फलभागेस्वर्णरूषिताः । उत्पलपत्राभाएव नतुतत्पीडार्हाइत्यर्थः ॥ **स०** पीतमुखाः पायितपानीयमुखाः ॥ २१ ॥ **ति०** ताभ्यां कर्तृभ्यां । मुद्गराभ्यां करणाभ्यांहतः ॥ २९ ॥ इतिषट्चत्वारिंशःसर्गः ॥ ४६ ॥

[**पा०**] १ छ. ज. रथैश्चमत्तनागैश्च. ङ. च. झ. ञ. ट. रथैर्मत्तैश्चनागैश्च. २ क. ङ.—ञ. निशितैः. ३ क. पेतुस्सहस्रशः. ४ क. ग. ङ. झ. ट. शतैर्नैकैः. ५ घ. हन्यमानस्ततः. ६ क. घ. ङ. च. झ. ञ. ट. निनदं. ७ क. ख. ततस्तं. ८ ङ.—ट. तौजातरोषौ. ९ क. ङ.—ट. निहत्यसमहाबलः. १० ङ.—ट. सुपर्णइववेगितः. ११ ङ. च. छ. झ. ट. अभिगम्य. १२ ङ.—ञ. बली. १३ ग. ङ.—ट. मवस्थितौ. १४ इदमर्धं ङ.—ट. पाठेपुदृश्यते.

ततस्तेष्ववसन्नेषु सेनापतिषु पञ्चसु ॥ बलं तदवशेषं च नाशयामास वानरः ॥ ३७ ॥
अश्वैरश्वान्गजैर्नागान्योधैर्योधान्रथै रथान् ॥ स कपिर्नाशयामास सहस्राक्ष इवासुरान् ॥ ३८ ॥
[1]हतैर्नागैश्च तुरगैर्भग्नाक्षैश्च महारथैः ॥ हतैश्च राक्षसैर्भूमी रुद्धमार्गा समन्ततः ॥ ३९ ॥
ततः कपिस्तान्ध्वजिनीपतीन्रणे निहत्य वीरान्सबलान्सवाहनान् ॥
[2]समीक्ष्य वीरः परिगृह्य तोरणं कृतक्षणः काल इव प्रजाक्षये ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

हनुमता रावणसुतस्याक्षकुमारस्यक्षपणम् ॥ १ ॥

सेनापतीन्पञ्च स तु प्रमापितान्हनूमता सानुचरान्सवाहनान् ॥
[3]समीक्ष्य राजा समरोद्धतोन्मुखं कुमारमक्षं प्र[4]समैक्षताग्रतः ॥ १ ॥
स तस्य दृष्ट्यर्पणसंप्रचोदितः प्रतापवान्काञ्चनचित्रकार्मुकः ॥
[5]समुत्पपाताथ सदस्युदीरितो द्विजातिमुख्यैर्हविषेव पावकः ॥ २ ॥
ततो मह[6]द्बालदिवाकरप्रभं प्रतप्तजाम्बूनदजालसंततम् ॥
रथं समास्थाय ययौ स वीर्यवान्महाहरिं तं प्रति नैर्ऋतर्षभः ॥ ३ ॥
ततस्तपःसंग्रहसञ्चयार्जितं प्रतप्तजाम्बूनदजा[7]लशोभितम् ॥
पताकिनं रत्नविभूषितध्वजं मनोजवाष्टाश्ववरैः सुयोजितम् ॥ ४ ॥
सुरासुराधृष्यमसङ्गचारिणं [8]रविप्रभं व्योमचरं समाहितम् ॥
सतूणमष्टासिनिबद्धबन्धुरं यथाक्रमावेशितशक्तितोमरम् ॥ ५ ॥

॥३०—३९॥ ध्वजिनीपतीन् सेनापतीन् । कृतक्षणः दत्तावसरः । अभूदिति शेषः ॥ ४० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षट्चत्वारिंशः सर्गः ॥ ४६ ॥

समीक्ष्य विज्ञाय ॥ १ ॥ द्विजातिमुख्यैः हविषा उदीरितः अभिवर्धितः पावक इवेत्यन्वयः ॥ २–३ ॥ ततो महदित्यनेनोक्तं विस्तरेणाह—ततस्तपस्संग्रहेत्यादिना ॥ तपस्संग्रहसञ्चयार्जितं तपोनुष्ठानसमूहसंपादितं ॥ ४ ॥ समाहितं सज्जीकृतं । अष्टासिनिबद्धबन्धुरं अष्टासिभिर्निबद्धं अतएव बन्धुरं सुन्दरं । “ बन्धुरं सुन्दरे नम्रे ” इति विश्वः । यद्वा अष्टासिभिर्निबद्धं बन्धुरं यस्य स तथा । बन्धुरं फलकासंघाट इत्याहुः । अन्ये घण्टा इत्यप्याहुः । तदानीं अष्टासिश्चासौ निबद्धबन्धुरश्चेति समासः । यथाक्रमावेशितशक्तितोमरं पङ्क्तितया स्थापितशक्तितोमरं

ति० प्रमापितान् मारितान् । समरोद्धतोन्मुखं समरोद्धतश्चासौसमरायोन्मुखश्चतं । आक्षं समक्षमवस्थितं । अक्षाख्यंकुमारं निशाम्य दृष्ट्वा । प्रसमैक्षत दृष्ट्यायुद्धार्थमाज्ञापयामासेत्यर्थः ॥ **स०** समरोद्धतोन्मुखं समरोद्धताः वैरिणः तदुन्मुखः तदभिमुखः तं । आक्षं अक्षाणां नेत्राणामिन्द्रियाणामयं विषयआक्षः तं । नेत्रविषयमितियावत् ॥ १ ॥ **ति०** सदसि यज्ञशालायां ॥ २ ॥ **ति०** महान्सइत्यन्वयः ॥ ३ ॥ **ति०** अष्टसुदिक्षु असिभिःसहनिबद्धाबन्धुरारथफलकायस्मिंस्तं ॥ **शि०** असङ्गचारिणं निरालंब-

[पा०] १ घ. हयैर्नागैश्चमत्तैश्च. २ ङ.—ट. तथैववीरः. क.—घ. तदेववीरः. ३ ङ.—ट. निशम्य. ४ झ. प्रसमैक्षताक्षं. ५ क. समुत्पपाताशु. ६ ग. ङ.—ट. महान्बाल. ७ ङ.—ट. जालचित्रितं. ८ ङ—ट. तडित्प्रभं.

विराजमानं प्र[1]तिपूर्णवस्तुना सहेमदाम्ना शशिसूर्यवर्चसा ॥
दिवाकराभं रथमास्थितस्ततः स निर्जगामामरतुल्यविक्रमः ॥ ६ ॥
स पूरयन्खं च महीं च साचलां तुरङ्गमातङ्गमहारथस्वनैः ॥
बलैः समेतैः स हि तोरणस्थितं समर्थमासीनमुपागमत्कपिम् ॥ ७ ॥
स तं समासाद्य हरिं हरीक्षणो युगान्तकालाग्निमिव प्रजाक्षये ॥
अवस्थितं विस्मितजा[2]तसंभ्रमः समैक्षताक्षो बहुमानचक्षुषा ॥ ८ ॥
स तस्य वेगं च कपेर्महात्मनः पराक्रमं चारिषु पा[3]र्थिवात्मजः ॥
वि[4]धारयन्स्वं च बलं म[5]हाबलो हि[6]मक्षये सूर्य इवाभिवर्धते ॥ ९ ॥
स जातमन्युः प्रसमीक्ष्य विक्रमं स्थिरं स्थितः संयति दुर्निवारणम् ॥
समाहितात्मा हनुमन्तमाहवे प्रचोदयामास शरैस्त्रिभिः शितैः ॥ १० ॥
ततः कपिं तं प्रसमीक्ष्य गर्वितं जितश्रमं शत्रुप[7]राजयोर्जितम् ॥
अवैक्षताक्षः समुदीर्णमानसः स बाणपाणिः प्रगृहीतकार्मुकः ॥ ११ ॥
स हेमनिष्काङ्गदचारुकुण्डलः समाससादा[8]शुपराक्रमः कपिम् ॥
तयोर्बभूवाप्रतिमः समागमः सुरासुराणामपि संभ्रमप्रदः ॥ १२ ॥
ररास भूमिर्न तताप भानुमान्ववौ न वायुः प्रचचाल चाचलः ॥
कपेः कुमारस्य च वीक्ष्य संयुगं ननाद च द्यौरुदधिश्च चुक्षुभे ॥ १३ ॥
ततः स वीरः सुमुखान्पतत्रिणः सुवर्णपुङ्खान्सविषानिवोरगान् ॥
समाधिसंयोगविमोक्षतत्त्वविच्छरानथ त्रीन्कपिमू[9]र्ध्न्यपातयत् ॥ १४ ॥
स तैः शरैर्मूर्ध्नि समं नि[10]पातितैः क्षरन्नसृग्दिग्धवि[11]वृत्तलोचनः ॥
नवोदितादित्यनिभः शरांशुमान्व्यराजतादित्य इवांशुमालिकः ॥ १५ ॥

॥ ५ ॥ प्रतिपूर्णवस्तुना समग्रोपकरणेन । शरधनुःकवचादीन्युपकरणानि । प्रतिपूर्णमस्तिनेति पाठे अस्तिना धनेनेत्यर्थः । हेमदाम्ना हेममयाश्वादिबन्धनरज्जुना । शशिसूर्यवर्चसा । दामसु किञ्चित्सितवर्णं किञ्चित्सूर्यवत्पीतवर्णमित्यर्थः । प्रतिपूर्णवस्तुना शशिसूर्यवर्चसा हेमदाम्ना च विराजमानमित्यन्वयः । यद्वा क्वचिच्छशिवर्चसा क्वचित्सूर्यवर्चसा च विराजमानमित्यन्वयः । वितानादिषु शशिवर्चसा हेममयरथाङ्गेषु सूर्यवर्चसा । दिवाकराभमित्याकाशचारित्वे दृष्टान्तः । अतो न रविप्रभमित्यनेन पुनरुक्तिः । तच्छब्दद्वयं च पूर्वानुस्मरणार्थं ॥ ६ ॥ सः अक्षः । हिः प्रसिद्धौ ॥ ७ ॥ हरीक्षणः सिंहप्रेक्षणः । प्रजाक्षये अवस्थितं प्राणिनाशे प्रवृत्तं । विस्मितश्चासौ जातसंभ्रमश्च विस्मितजातसंभ्रमः ॥ ८ ॥ विधारयन् निर्धारयन् । विचारयन्निति च पाठः ॥ ९—१२ ॥ न तताप भानुमान् । सूर्योदयः पूर्वं सूचितः सः न ततापेत्युच्यते ॥ १३ ॥ समाधिसंयोगविमोक्षतत्त्ववित् समाधिः लक्ष्यवेदनं संयोगः शरसंधानं विमोक्षः तद्विसर्गः तेषां तत्त्ववित् यथार्थवित् ॥१४॥ रक्तसिक्तत्वे दृष्टान्तो नवोदितेति । शराचितत्वे

गमनशीलं । अतएव व्योमचरं । समाहितं सम्यक्संस्थापितं ॥ ५ ॥ ति० विस्मितंचतंजातसंभ्रमंच । बालोऽयंमांयोद्धुमिच्छतीतिविस्मयः । रावणपुत्रत्वाच्च तत्रजातादरत्वं ॥ ८ ॥ ति० निष्कं उरोभूषणं । आशुपराक्रमः तीक्ष्णपौरुषइतियावत् । समागमः युद्धं । संभ्रमप्रदः भयप्रदः ॥ १२ ॥ ती० अक्षयुद्धसमयेसूर्योदयाभावाद्देशान्तरस्थोपिसूर्यः एतज्ज्ञात्वानततापेतिभावः ॥ ति० भूमिः भूमिस्थप्राणिजातं । ररास । वीर्यप्रवृत्तंसंयुगंवीक्ष्येतिशेषः ॥१३॥ ति० अताडयत् अपातयत् ॥१४॥ ति० असृग्दिग्धश्चा-

[पा०] १ क. ख. परिपूर्णवस्तुना. २ क. ङ.—ट. जातसंभ्रमं. ३ ङ. च. झ. ञ. ट. रावणात्मजः. ४ क. ख. ङ.—ट. विचारयन्. ५ ग. बलोत्कटो. ६ ख. ङ.—ट. युगक्षये. ७ ग.—ट. पराजयोचितं. क. पराजयोद्यतं. ८ दाशुनिशाचरः. ९ ङ. झ. ञ. ट. मूर्ध्न्यताडयत्. १० झ. निपातैः. ११ झ. विवृत्तनेत्रः.

ततः स पिङ्गाधिपमन्त्रिसत्तमः समीक्ष्य तं राजवरात्मजं रणे ॥
उदग्रचित्रायुधचित्रकार्मुकं जहर्ष चापूर्यत चाहवोन्मुखः ॥ १६ ॥
स मन्दराग्रस्थ इवांशुमालिको विवृद्धकोपो बलवीर्यसंयुतः ॥
कुमारमक्षं सबलं सवाहनं ददाह नेत्राग्निमरीचिभिस्तदा ॥ १७ ॥
ततः स बाणासनचित्रकार्मुकः शरप्रवर्षो युधि राक्षसांबुदः ॥
शरान्मुमोचाशु हरीश्वराचले बलाहको वृष्टिमिवाचलोत्तमे ॥ १८ ॥
ततः कपिस्तं रणचण्डविक्रमं विवृद्धतेजोबलवीर्यसंयुतम् ॥
कुमारमक्षं प्रसमीक्ष्य संयुगे ननाद हर्षाद्घनतुल्यविक्रमः ॥ १९ ॥
स बालभावाद्युधि वीर्यदर्पितः प्रवृद्धमन्युः क्षतजोपमेक्षणः ॥
समाससादाप्रतिमं कपिं रणे गजो महाकूपमिवावृतं तृणैः ॥ २० ॥
स तेन बाणैः प्रसभं निपातितैश्चकार नादं घननादनिस्स्वनः ॥
समुत्पपाताशु नभः स मारुतिर्भुजोरुविक्षेपणघोरदर्शनः ॥ २१ ॥
समुत्पतन्तं समभिद्रवद्बली स राक्षसानां प्रवरः प्रतापवान् ॥
रथी रथिश्रेष्ठतमः किरञ्शरैः पयोधरः शैलमिवाश्मवृष्टिभिः ॥ २२ ॥
स ताञ्शरांस्तस्य हरिर्विमोक्षयंश्चचार वीरः पथि वायुसेविते ॥
शरान्तरे मारुतवद्विनिष्पतन्मनोजवः संयति चण्डविक्रमः ॥ २३ ॥
तमात्तबाणासनमाहवोन्मुखं खमास्तृणन्तं विशिखैः शरोत्तमैः ॥
अवैक्षताक्षं बहुमानचक्षुषा जगाम चिन्तां च स मारुतात्मजः ॥ २४ ॥
ततः शरैर्भिन्नभुजान्तरः कपिः कुमारवीरेण महात्मना नदन् ॥
महाभुजः कर्मविशेषतत्त्वविद्विचिन्तयामास रणे पराक्रमम् ॥ २५ ॥
अबालवद्बालदिवाकरप्रभः करोत्ययं कर्म महन्महाबलः ॥
न चास्य सर्वाहवकर्मशोभिनः प्रमापणे मे मतिरत्र जायते ॥ २६ ॥

दृष्टान्तः आदित्यइवांशुमालिक इति ॥ १५ ॥ आपूर्यत व्यवर्धत ॥ १६ ॥ मन्दराग्रस्थः मन्दरो नाम भूमध्यपर्वतः । तदग्रे मध्याह्ने वर्तत इत्यौग्र्योक्तिः ॥ १७ ॥ बाणासनचित्रकार्मुकः बाणाः अस्यन्ते क्षिप्यन्तेनेनेति बाणासनः बाणविमोक्षकचित्रकार्मुक इत्यर्थः ॥ १८—२२ ॥ विमोक्षयन् शरीरे असंयोजयन् । लाघवातिशयेनेति भावः ॥ २३ ॥ आस्तृणन्तं आच्छादयन्तं । विशिखैः विविधशिखैः । चिन्तां जगाम कथमेतादृशमेनं वधिष्यामीत्येवं ॥ २४ ॥ इदमेवोपपादयति ततश्शरै-

सौविवृत्तनेत्रश्च । विवृत्तलोचनइतिपाठे अवसरोचितचक्षुरित्यर्थः । नवोदितादित्यसंनिभः रक्तवर्णइत्यर्थः । शरांशुमान् स्वमस्तकस्थशररूपांशुमान् । अंशुमालाभृत्सूर्यइव व्यराजत ॥ १५ ॥ **रामानु०** मन्दराग्रस्थः मन्दरोनामसालग्रामपर्वतोत्तरभागेभारतखण्डमध्येवर्तमानःकश्चनपर्वतः । तदग्रस्थः । अनेनोत्तरायणेमध्याह्नगतत्वमुक्तंभवति ॥ १७ ॥ **रामानु०** बाणासनचित्रकार्मुकः बाणानामसनं बाणान्क्षिपत् चित्रंचकार्मुकंयस्यसतथोक्तः । बाणासनचक्रकार्मुकइतिपाठे बाणान्क्षिपत् चक्राकारंकार्मुकं यस्यसः ॥ **ति०** बाणासनमेवशक्रकार्मुकंयस्यसः ॥ १८ ॥ **ति०** चिन्ताप्रकारः अबालवदिति० । सर्वाहवकर्मशालिन-

[पा०] १ ङ.—ट. संवृतः. २ क. मरीचिभिःकपिः. ३ ख.—ट. शक्रकार्मुकः. ४ ख. ज.—ट. प्रवृद्ध. ५ क.—ट. सायकं. ६ क.—ट. तुल्यनिस्स्वनः. ७ ङ. छ. झ. ट. समुत्सहेनाशुनभस्समारुजन. ८ ख. घ. स्तस्यविमोचयन्कपिश्चचार. ९ ख. ङ.—ट. भीमविक्रमः क. घ. चेन्द्रविक्रमः. १० ङ.—ट. विविधैः. ११ क. ख. घ. शरोत्करैः. १२ क. ख. ग. ङ.—ट. कुमारवर्येण. १३ ङ.—ट. कर्मशालिनः.

अयं महात्मा च महांश्च वीर्यतः समाहितश्चातिसहश्च संयुगे ॥
असंशयं कर्मगुणोदयादयं सनागयक्षैर्मुनिभिश्च पूजितः ॥ २७ ॥
पराक्रमोत्साहविवृद्धमानसः समीक्षते मां प्रमुखागतः स्थितः ॥
पराक्रमो ह्यस्य मनांसि कम्पयेत्सुरासुराणामपि शीघ्रगामिनः ॥ २८ ॥
न खल्वयं नाभिभवेदुपेक्षितः पराक्रमो ह्यस्य रणे विवर्धते ॥
प्रमापणं त्वेव ममास्य रोचते न वर्धमानोऽग्निरुपेक्षितुं क्षमः ॥ २९ ॥
इति प्रवेगं तु परस्य तर्कयन्स्वकर्मयोगं च विधाय वीर्यवान् ॥
चकार वेगं तु महाबलस्तदा मतिं च चक्रेऽस्य वधे महाकपिः ॥ ३० ॥
स तस्य तानष्टहयान्महाजवान्समाहितान्भारसहान्विवर्तने ॥
जघान वीरः पथि वायुसेविते तलप्रहारैः पवनात्मजः कपिः ॥ ३१ ॥
ततस्तलेनाभिहतो महारथः स तस्य पिङ्गाधिकमन्त्रिनिर्जितः ॥
प्रभग्ननीडः परिमुक्तकूबरः पपात भूमौ हतवाजिरम्बरात् ॥ ३२ ॥
स तं परित्यज्य महारथो रथं सकार्मुकः खड्गधरः खमुत्पतन् ॥
तपोभियोगादृषिरुग्रवीर्यवान्विहाय देहं मरुतामिवालयम् ॥ ३३ ॥
ततः कपिस्तं विचरन्तमम्बरे पतत्रिराजानिलसिद्धसेविते ॥
समेत्य तं मारुततुल्यविक्रमः क्रमेण जग्राह स पादयोर्दृढम् ॥ ३४ ॥
स तं समाविध्य सहस्रशः कपिर्महोरगं गृह्य इवाण्डजेश्वरः ॥
मुमोच वेगात्पितृतुल्यविक्रमो महीतले संयति वानरोत्तमः ॥ ३५ ॥
स भग्नबाहूरुकटीशिरोधरः क्षरन्नसृङ्निर्मथितास्थिलोचनः ॥
सं भग्नसंधिः प्रविकीर्णबन्धनो हतः क्षितौ वायुसुतेन राक्षसः ॥
महाकपिर्भूमितले निपीड्य तं चकार रक्षोधिपतेर्महद्भयम् ॥ ३६ ॥
महर्षिभिश्चक्रचरैर्महाव्रतैः समेत्य भूतैश्च सयक्षपन्नगैः ॥
सुरैश्च सेन्द्रैर्भृशजातविस्मयैर्हते कुमारे स कपिर्निरीक्षतः ॥ ३७ ॥

रित्यादिना ॥ २५—२६ ॥ अतिसहः अतिसोढा । कर्मगुणोदयात् युद्धकर्मोत्कर्षाभिवृद्धेः ॥२७—२९॥ परस्य शत्रोः । प्रवेगंतर्कयन् आलोचयन् । स्वकर्मयोगं विधाय युद्धक्रमं च सङ्कल्प्य । पूर्वमश्वान् हत्वा ततो रथं भङ्क्ष्यामीति निश्चित्येत्यर्थः ॥ ३० ॥ विवर्तने सव्यापसव्यभ्रमणेपि । भारसहान् रथभारसहान् ॥ ३१ ॥ तलेनाभिहतः अतएव पिङ्गाधिपमन्त्रिनिर्जितः हनुमता निर्जित इत्यर्थः । प्रभग्ननीडः प्रभग्नरथाङ्गः । कूबरः युगन्धरः । वाजिरिति इकारान्तत्वमार्षं ॥ ३२ ॥ मरुतामालयमुत्पतन् ऋषिरिव अभवदितिशेषः ॥ ३३—३४ ॥ गृह्य इवेत्यत्र गुणाभावआर्षः ॥ ३५ ॥ प्रविकीर्णबन्धनः प्रविकीर्णकक्ष्यादिबन्धनः । प्रभिन्नसंधिरितिसंधिबन्धभङ्गस्योक्तत्वात् ॥ ३६ ॥ चक्रचरैः ज्योतिश्चक्रचरैः । नभश्चक्र-

सर्वप्रकाराहवकर्मशालिनः । अत्र अस्मिन्काले । अस्यप्रमापणेमेमतिर्नजायते । प्रमापणेमारुतिरत्रजायतेइतिपाठे अयंजनइतिवत्स्वस्यैवहनुमतोमारुतिरितिनिर्देशः ॥ २६ ॥ ति० स्वकर्मयोगं स्वस्यकर्मणियोगं ज्ञानबलविशेषावस्थानलक्षणमुपायं ॥ ३० ॥ शि० विवर्तने अनेकविधमण्डलगमने । समाहितान् प्राप्तशिक्षानित्यर्थः ॥ ३१ ॥ इतिसप्तचत्वारिंशःसर्गः ॥ ४७ ॥

[पा०] १ ग. ङ. झ. ञ. ट. प्रमुखोग्रतः. २ ख.—ट. शीघ्रकारिणः. ३ ङ.—झ. ट. प्रमापणंह्यस्यममाद्य. ४ ख. छ. झ. ञ. ङ. झ. ट. वधेतदानीं. क. च. छ. ज. वधेदुरात्मनः. ५ ङ. छ. ज. झ. ट. तानष्टवरान्महाहयान्. ६ ख. ङ. च. ट. सभग्ननीडः. ७ ङ.—ट. संभिन्नसन्धिः क. ग. प्रभिन्नसन्धिः. ८ ङ. झ. ट. चक्रचरैःसमागतैः. घ. चक्रचरैर्महाबलैः.

निहत्य तं व[1]ज्रिसुतोपमप्रभं कुमारमक्षं क्षतजोपमेक्षणम् ॥
[2]तमेव वीरोऽभिजगाम तोरणं कृतक्षणः काल इव प्रजाक्षये ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

इन्द्रजिता हितोपदेशपूर्वकरावणप्रेरणया रणायहनुमन्तंप्रत्यभियानम् ॥ १ ॥ हनुमता लाघवातिशयेनेन्द्रजिद्बाणादीनांमोघीकरणे इन्द्रजिताब्रह्मास्त्रेण तद्बन्धनम् ॥ २ ॥ अस्त्रमोचनशक्तस्यापि रावणदर्शनादिप्रयोजनायास्त्रमनुवर्तमानस्यहनुमतोराक्षसैरावणसमीपप्रापणम् ॥ ३ ॥

ततः स रक्षोधिपतिर्महात्मा हनूमताऽक्षे निहते कुमारे ॥
मनः समाधाय [3]तदेन्द्रकल्पं समादिदेशेन्द्रजितं [4]सरोषम् ॥ १ ॥
त्वमस्त्रवि[5]च्छस्त्रविदां वरिष्ठः सुरासुराणामपि शोकदाता ॥
सुरेषु सेन्द्रेषु च दृष्टकर्मा पितामहाराधनसंचितास्त्रः ॥ २ ॥
[6]तवास्त्रबलमासाद्य [7]नासुरा न मरुद्गणाः ॥ न शेकुः समरे स्थातुं सुरेश्वरसमाश्रिताः ॥ ३ ॥
न कश्चित्त्रिषु लोकेषु संयुगे नगतश्रमः ॥ भुजवीर्याभिगुप्तश्च तपसा चाभिरक्षितः ॥
दे[8]शकालविभागज्ञस्त्वमेव मतिसत्तमः ॥ ४ ॥
न तेऽस्त्यशक्यं समरेषु कर्मणा न तेऽस्त्यकार्यं मतिपूर्वमन्त्रणे ॥
न सोस्ति कश्चित्त्रिषु संग्रहेषु वै न वेद यस्तेऽस्त्रबलं बलं च ते ॥ ५ ॥
ममानुरूपं तपसो बलं च ते पराक्रमश्चास्त्रबलं च संयुगे ॥
न त्वां समासाद्य रणावमर्दे मनः श्रमं गच्छति निश्चितार्थम् ॥ ६ ॥

चरैर्वा ॥ ३७—३८ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

मनः समाधाय धैर्यं कृत्वेत्यर्थः ॥ १ ॥ अस्त्रवित् ब्रह्मास्त्रवित् । संचितास्त्रः संचितास्त्रविशेषः ॥ २ ॥ तव अस्त्रबलमासाद्य असुराः न नश्यन्तीत्यर्थः ॥ ३ ॥ त्रिषु लोकेषु तव संयुगे नगतश्रमः अप्राप्तश्रमः कश्चिन्न । "सुप्सुपा" इति समासः । सर्वेप्राप्तश्रमाइत्यर्थः । हरिहयादयोपि श्रमंप्राप्नुवन्तीत्यर्थः । मतिसत्तमः मतिश्रेष्ठइत्यर्थः ॥ ४ ॥ समरेषु कर्मणा पुरुषकारेण । ते अशक्यं नास्तीत्यर्थः । तथा मतिपूर्वमन्त्रणे विवेकपूर्वविचारे । अकार्यं अज्ञातकार्यं । ज्ञातुमशक्यं कार्यं नास्तीत्यर्थः । संग्रहेषु संगृह्यन्ते भोग्यतया स्वीक्रियन्ते भोक्तृभिरिति संग्रहाः लोकाः । तेषु त्रिष्वपि यस्तवास्त्रबलं शारीरं बलं च न वेद स नास्ति । सर्वलोकप्रख्यातशस्त्रास्त्रबलसंपन्नस्त्वमित्यर्थः ॥ ५ ॥ रणावमर्दे रणसंकटे । निश्चितार्थं निश्चितजयरूपार्थं । त्वां आसाद्य विचिन्त्य । मे मनः श्रमं न

स॰ समाधाय पुत्रशोकोपहतंमनःपुनःकार्यगौरवाद्धैर्येणैकाग्रंविधाय । इन्द्रकल्पं इन्द्रोपमंकपिंप्रति इन्द्रजितंसमादिदेश । अनेनानायासेनहनुमज्जयेसमर्थइतिभ्रमेणसमादिदेशेतिभावःसूचितोभवति । इन्द्रकल्पं इन्द्रसमसमरेकल्पो दक्षइतीन्द्रजितोविशेषणंवा । एतत्पक्षेकल्पशब्दः । प्राक्पक्षेप्रत्ययइतिविवेकः ॥ **ति॰** मनःसमाधाय पुत्रनाशखिन्नमपिचेतोधीरतयाऽप्रकाशितभयंप्रतिष्ठाप्य ॥ १ ॥ **स॰** सुरेश्वरंसमाश्रिताःकेप्यन्ये नशेकुरित्यन्वयः ॥ ३ ॥

[पा॰] १ ङ. झ. ञ. ट. सुतोपमंरणे. २ क. ख. ग. ङ.—ट. तदेव. ३ ख. झ. ञ. ट. सदेवकल्पं. ४ क. ङ. ट. सरोषः. ५ क. ख. घ. ङ. ज.—ट. च्छस्त्रभृतां. ६ ङ. च. छ. झ. ञ. ट. त्वदस्त्र. ७ ङ. झ. ट. ससुरास्समरुद्गणाः. ८ ङ.—ट. देशकालप्रधानश्च.

निहताः किंकराः सर्वे जम्बुमाली च राक्षसः ॥ अमात्यपुत्रा वीराश्च पञ्च सेनाग्रयायिनः ॥ ७ ॥
लानि सुसमृद्धानि साश्वनागरथानि च ॥ सहोदरस्ते दयितः कुमारोक्षश्च सूदितः ॥ ८ ॥
। हि तेष्वेव मे सारो यस्त्वय्यरिनिषूदन ॥ ९ ॥

इदं हि दृष्ट्वा मतिमन्महद्बलं कपेः प्रभावं च पराक्रमं च ॥
त्वमात्मनश्चापि समीक्ष्य सारं कुरुष्व वेगं स्वबलानुरूपम् ॥ १० ॥
बलावमर्दस्त्वयि सन्निकृष्टे यथागते शाम्यति शान्तशत्रौ ॥
तथा समीक्ष्यात्मबलं परं च समारभस्वास्त्रविदां वरिष्ठ ॥ ११ ॥
न वीर सेनागणशोच्यवन्ति न वज्रमादाय विशालसारम् ॥
न मारुतस्यास्य गतेः प्रमाणं न चाग्निकल्पः करणेन हन्तुम् ॥ १२ ॥

च्छति विषादंनगच्छतीत्यर्थः ॥ ६—८ ॥ त्वयि मे स्सारः उत्कर्षप्रत्ययः । सः तेषु नास्त्येवहीति ोजना ॥ ९ ॥ इदं किङ्कराध्यक्षकुमारान्तमारकं तिमत् प्रशस्तमतियुक्तं । बलं शारीरं । प्रभावं न्तःशक्तिं । पराक्रमं पौरुषं ॥ १० ॥ शान्तशत्रौ मितशत्रौ । शत्रुशमनस्वभाव इति यावत् । "वा ान्तशान्त—" इत्यादिना निपातनाण्णिलोप इडभा- श्च । त्वयि संनिकृष्टे कपेरासन्ने सति । यथा लावमर्दः सेनाक्षयः । शाम्यति । तथा आत्मबलं रं परबलं च समीक्ष्य समारभस्व । बलनाशात्पूर्व- व शत्रुशान्तिं कुर्वित्यर्थः ॥ ११ ॥ हे वीर गणशोचि णानां शोचयितरि । शोचतेर्ण्यन्तात्क्विप् । एकदा

ऽनेकप्रहर्तरीत्यर्थः । एवंभूते हनुमति निमित्ते सेनाः नावन्ति न रक्षन्ति । युगपदनेकविनाशके सेना अप्रयो- जिकेत्यर्थः । अतः सेनाभिः सह मा गच्छेत्यर्थः । उपायान्तरं प्रतिषेधति—न वज्रमिति । अलसारं हनुमद्विषये जीर्णसारं । वज्रं वज्राख्यमायुधविशेषं । आदाय न विश । तत्समीपमिति शेषः । तत्र हेतुमाह —न मारुतस्येति । अस्य गतिप्रमाणं मारुतस्य नास्ति । मारुतादप्यतिशयितगतिप्रमाण इत्यर्थः । अतस्तरसा यया कयापि दिशा समागम्य प्रहर्तरि न वज्रं किञ्चित्करमिति भावः । यदि समीपमाग- मिष्यति तदा मुष्ट्यादिभिरेव निहन्यत इत्याशङ्क्याह —न चेति । अग्निकल्पो हनुमान् करणेन मुष्ट्या-

---

शि० ननुतर्हिममापिवधःस्यादित्यतआह—नेति । मे ममसंबन्धीयस्सारोबलं त्वय्यस्ति सः तेषुनिहतेषुनैव । एतेनाति- बलत्वात्तववधोनभविष्यतीतिध्वनितं ॥ ति० यद्वा मेसारः सर्वजगज्जयसामर्थ्यं स त्वय्येव त्वत्साहाय्यनिमित्तएव । नतुतेषु ुतत्साहाय्यनिमित्तकइत्यर्थः ॥ स० सारोबलं यस्त्वयि । स तेषुपूर्वविनाशितेषुनेतिमे मह्यंरोचतइतिवा भातीतिवा माच्चतुर्थीषष्ठीवाऽऽश्रयणीयेतिशेषोध्येयः ॥ ९ ॥ स० बलावमर्दैः अस्मदीयैस्सह त्वयिसंनिकृष्टे हनुमत्समीपंप्राप्तेसति । न्तशत्रुः नाशिताक्षादिः शाम्यति शान्तोभवति मृतोभवतीतियावत् । तथा आत्मबलं परबलंचसमीक्ष्यारभस्व ॥ ११ ॥ ० हनुमद्बलाकर्णनदीप्तहृदयःसेनादिसत्त्वभ्रमतोनसाहसंकुर्वितिसुतंप्रति शंसति—नेति । हेवीर आरब्धान्तगामिन् । ाशः सङ्घीभूताःसेनाः न नोपयुक्ताः । तत्रहेतुश्च्यवन्तीति । स्वामिनंगमयित्वा पलायन्ते । उत्वमार्षं । विशालसारंवज्रमा- ्यापिनप्रयोजनं । मारुतस्य हनुमतः । गतेः प्रमाणं इयत्ता । न नास्ति । करणेन सेनादिरूपेण । अग्निकल्पोऽयं नच ाक्यइतिशेषः । यद्वा नवीर नविद्यतेवीरोयस्मादन्यइतिनवीरः तत्संबुद्धिः । सेनाः गणशः अ च्यवन्ति नच्यवन्ति स्थलाद्रणाङ्गणंप्रतिनोपसर्पन्ति । "अमानोनाःप्रतिषेधे" इत्यनुशिष्टं अ इत्यव्ययं । ततश्च अ च्यवन्तीतिपदद्वयं । अथवा नाइत्यनेनाक्षेपोज्ञायते । अतःसमासोपपत्तिः । विशालसारंवज्रं तन्नामकायुधमादायापिन नगच्छतस्तवकृत्यं । अतद्गोचरइति वः । यद्वा हेनवीरगणश स्वसंघसुखद सेनाउच्च्यवन्ति परिसर्पन्ति । नचच्यवन्ति उच्च्यवन्तीत्यत्र एकचकारद्विचकारपदयो- रणवैलक्षण्यावश्यंभावात्कथमेवंपदमितिवाच्यं । "असिद्धवदत्राभात्" इतिसूत्रमहाभाष्ये "नव्यञ्जनपरस्यैकस्यवानेक- ोच्चारणेश्रवणंप्रतिविशेषोस्ति" इत्युक्तेः । इदंप्रकारस्तुभाष्यदीपिकायुक्तिवाख्यायामस्मत्कृतायांविस्तरतउदञ्चितस्ततोनुसंधेयः । ःसेनाप्रयोजनंनास्तीत्यतआह—नेति । विशालसारंवज्रमादायन नायाति । एकवचनेनएकंवज्रमादायनायाति किंतु बहुवज्रा-

[पा०] १ ग. ज. ञ. सेनाग्रनायकाः. ङ. झ. ट. सेनाग्रगामिनः. २ ग. मेमनसस्सारो. ३ ङ—ट. निरीक्ष्य. ४ ङ. छ. झ. ञ. बलावमर्दैः. ५ ङ. च. छ. झ. ञ. शान्तशत्रुः. ६ क. ग. ङ.—ञ. मारुतस्यास्तिगतिप्रमाणं.

तमेवमर्थं प्रसमीक्ष्य सम्यक्स्वकर्म[1]साम्याद्धि समाहितात्मा ॥
स्मरंश्च दिव्यं धनुषो[2]ऽस्त्रवीर्यं व्रजाक्षतं कर्म समारभस्व ॥ १३ ॥
न खल्वियं म[3]तिः श्रेष्ठा यत्त्वां संप्रेषयाम्यहम् ॥
इयं च राजधर्माणां क्षत्रस्य च मतिर्मता ॥ १४ ॥
ना[4]नाशस्त्रैश्च संग्रामे वैशारद्यमरिन्दम ॥ अवश्यमेव बोद्ध[5]व्यं काम्यश्च विजयो रणे ॥ १५ ॥
ततः पितुस्तद्वचनं निशम्य प्रदक्षिणं दक्षसुतप्रभावः ॥
चकार भर्तारम[6]दीनसत्त्वो रणाय वीरः प्रतिपन्नबुद्धिः ॥ १६ ॥

दिना । हन्तुं न शक्यः । अग्नितुल्ये मुष्ट्यादिप्रहाराप्रवृत्तेरितिभावः ॥ १२ ॥ तर्हि कथं कर्तव्यं तत्राह —तमिति ॥ तं पूर्वोक्तमर्थं एवं। सम्यक्। प्रसमीक्ष्य विचार्य। स्वकर्मसाम्यात् स्वकार्यसिद्ध्यर्थं। फलस्यापि हेतुत्वात्पञ्चमी । साम्यं समत्वं । अन्यूनातिरिक्तत्वं । समाहितात्मा एकाग्रचित्तः । दिव्यं धनुस्संबन्धि अस्त्रवीर्यं अस्त्रबलं । स्मरन् व्रज । अस्त्रबलं विना स निगृहीतुमशक्यः। तेन तन्मन्त्रं स्मरन्नेव गच्छेतिभावः ॥ १३ ॥ अहं त्वां संप्रेषयामीति यत् इयं मतिः न श्रेष्ठा खलु । नोचितेत्यर्थः । इयं मतिः त्वत्प्रेषणविषया मतिः । राजधर्माणां राजनीतिस्वरूपधर्माणां । क्षत्रस्य तदनुष्ठातुः क्षत्रियस्य च मता उचिता । यद्यपि बालस्य प्रेषणमनुचितं तथापि स्वीयेषु सत्सु प्रधानगमनं नीतिशास्त्रविरुद्धमिति त्वां प्रेषयामीति भावः ॥ १४ ॥ नानाशस्त्रैः वैशारद्यं प्रहरणसामर्थ्यं । अवश्यं बोद्धव्यं स्मर्तव्यमित्यर्थः । रणे विजयश्च काम्यः प्रार्थनीयः । जयार्थं सर्वाण्यस्त्राणि स्मर्तव्यानीत्यर्थः ॥ १५ ॥ दक्षसुतप्रभावः दक्षसुता

नादायायातो वासवापेक्षयायमतिशयितबलइत्यवलेपोनकार्यइतिभावः । यथोक्तंसंग्रहे—“ नन्वेकवज्रोरिपुमेतिवज्रीदशास्यघोरानखनामवज्राः ” इति । योमारुतः अग्निकल्पः अग्निसदृशः । आवम्येनन । “ अग्निर्वैदेवानामवमः ” इतिश्रुतेः । अतःकरणेन कस्य आत्मनः । रणेन युद्धेन अस्मज्जातियुद्धेन । मायामयेनेतियावत् । यद्वा कशब्दःकुत्सितवाची । कपटेत्यत्रकापथ्यंकुत्सितपटवत्त्वंचविवक्ष्यतइतिश्लेषकविसंप्रदायात् । केनकुत्सितेनरणेनहन्तुंन नहन्तुंयोग्यइत्यर्थः । केनापिकरणेनहन्तुंनशक्यइति । अलसारं पर्याप्तबलं । वज्रमिव वज्रंदृढंहनुमन्तं । आदायविश लङ्कामितिशेषः । हेअलस न्यायमार्गेणयुद्धंकर्तुमसमर्थ । अरं अलं अत्यन्तं । रलयोरभेदात् । वर्जनात् वैरिवर्जनाद्वज्रोहरिः तद्वान् । अर्शआद्यच् । तंहनुमन्तमादायेतिपूर्ववत् । यत्तुनागोजिभट्टेनतत्रावतेस्त्रायतिसमानार्थत्वेनपञ्चमीप्राप्तौसप्तमीत्वार्षी। अलतेर्धातोःपर्याप्त्यर्थत्वेनपर्याप्तसारमितिव्याख्यातुंयोग्यं। कुण्ठेत्यर्थस्यततोऽलाभादितितीर्थोपरिसाहसंकृतं तत्तु प्रथमपक्षेतदुक्त्यैव द्वितीयपक्षे कुण्ठधारमित्युक्त्यैवनयुक्तं । तथाहि । शब्देन्दुशेखरे “ ततश्चसंबन्धसामान्येषष्ठ्यैवसमासः । भीत्रार्थानामिति हेतुत्वप्रकारकबोधेतृतीयाबाधनार्थविभक्तिप्रकरणे नकृतं । कारकत्वप्रयुक्तकार्यानापत्तेरितिभावः । किंचहेतुत्वाविवक्षायांसंबन्धित्वेनविवक्षयाषष्ठीसूत्रारंभेपिबोध्या । अभ्युच्चयेनाहेत्यादि” । क्षितिचेत्यादाविवगणशोचीतिनिमित्तसप्तम्युपपत्तेः । मारुतस्येति । किंचिद्भूतमित्युक्तिस्तु तद्बलासहिष्णुतयेतिज्ञेयं ॥ १२ ॥ ति० स्वकर्मसाम्यात् स्वेनैवकर्मणःप्रकृतकार्यस्यसाम्यात्सिद्धेःसंपादनीयत्वात्त्वं समाहितात्मा समाहितचित्तोभूत्वा अस्त्रविषये दिव्यं धनुषोवीर्यं दिव्यास्त्रमोक्षसामर्थ्यंस्मरन् निश्चिन्वन्व्रज गच्छ ॥ स० एवं एवंविधं तंहनुमन्तं अर्थं त्वत्प्रयोजनंचप्रसमीक्ष्य स्वकर्मसाम्यात् स्वव्यापारानुगुण्यात् । समाहितात्मा अस्यहनुमतः अस्यधनुषोवीर्यंचस्मरन् व्रज । तेकर्म व्यापारः अक्षतं फलपर्यवसायियथास्यात्तथासमारभस्व ॥ १३ ॥ स० मतिश्रेष्ठ बुद्ध्यावरिष्ठ । यदित्यव्ययंतृतीयार्थे । ययामत्या त्वांप्रेषयिष्यामिइयंमतिर्नेत्यर्थः । अथवासंप्रेषयिष्यामीतियत् इयंप्रेरणा न नोचितेत्यर्थः । इयंप्रेरणविषयामतिः राज्ञांधर्माः राजधर्माःएषांसन्तीतिराजधर्माः तेषामस्माकं । क्षत्रियस्यचमता उचिता नान्येषामितिभावः । अतोनातिप्रसक्तिः । एतेन स्वस्यक्षत्रियत्वाभावेपिक्षत्रधर्मानुष्ठानात्पुत्रप्रेषणंयुक्तमितिसूचयति ॥ १४ ॥ अथराज्ञःक्षत्रियस्यचकृत्यमाह—**नानेति** । नानाशास्त्रेषु धर्मार्थनीत्यादिशास्त्रेषु संग्रामेच वैशारद्यं संपाद्यमितिशेषः । यस्यरणेविजयःकाम्योभवति तेनोक्तं नानाशास्त्रंअवश्यंबोद्धव्यमेवेत्यर्थः । यद्वा परस्यनानाशास्त्रेषुयद्वैशारद्यमस्ति तद्योद्धावश्यमेवबोद्धव्यं । बुद्ध्वापिरणेस्वस्यविजयःप्रार्थ्यएव । अहंजेष्याम्येवेतिबुद्ध्यायुद्धमारभ्यमेव । नतुतादृशशत्रोरपिनिवर्तितव्यमित्यर्थः । केचित्तु नानाशस्त्रैरितियोद्धव्यमितिचपठित्वा नानाशस्त्रकरणकसंग्रामेवैशारद्यंसामर्थ्यंतवास्ति अतस्त्वयाऽवश्यंयोद्धव्यमेव रणेजयश्चप्रार्थनीयएवेतिव्याचक्षते ॥ १५ ॥ स० दक्षःसुतोयेषांप्रचेतसांब्रह्मणइतिवा तत्प्रभावः तत्स-

[पा०] १ ख. सामर्थ्यसमीहितात्मा. २ ख. घ. ङ. च. ज.—ट. धनुषोस्त्रवीर्यं. ३ झ.—ठ. मतिश्रेष्ठ. ४ ङ. झ. ञ. ट. नानाशास्त्रेषु. ५ ख. च. छ. योद्धव्यं. ६ ङ. झ. ट. मतिखरेण.

ततस्तैः स्वगणैरिष्टैरिन्द्रजित्प्रतिकूजितः ॥ युद्धोद्धतः कृतोत्साहः संग्रामं प्रत्यपद्यत ॥ १७ ॥
श्रीमान्पद्म[1]पलाशाक्षो राक्षसाधिपतेः सुतः ॥ निर्जगाम महातेजाः समुद्र इव [2]पर्वसु ॥ १८ ॥
स [3]पक्षिराजोपमतुल्यवेगैर्व्यालैश्चतुर्भिः [4]सिततीक्ष्णदंष्ट्रैः ॥
रथं समायुक्त[5]मसह्यवेगं समारुरोहेन्द्रजिदिन्द्रकल्पः ॥ १९ ॥
स रथी धन्विनां श्रेष्ठः शस्त्रज्ञोऽस्त्र[6]विदां वरः ॥ रथेनाभिययौ क्षिप्रं हनूमान्यत्र सोऽभवत् ॥ २० ॥
स तस्य रथनिर्घोषं ज्यास्वनं कार्मुकस्य च ॥ निशम्य हरिवीरोऽसौ संप्रहृष्टतरोऽभवत् ॥ २१ ॥
[7]सुमहच्चापमादाय शितशल्यांश्च सायकान् ॥ हनुमन्त[8]मभिप्रेत्य जगाम रणपण्डितः ॥ २२ ॥
तस्मिंस्ततः संयति जातहर्षे रणाय निर्गच्छति बाणपाणौ ॥
दिशश्च सर्वाः कलुषा बभूवुर्मृगाश्च रौद्रा [9]बहुधा विनेदुः ॥ २३ ॥
समागतास्[10]तत्र तु नागयक्षा महर्षयश्चक्रचराश्च सिद्धाः ॥
नभः समावृत्य च पक्षिसङ्घा विनेदुरुच्चैः परमप्रहृष्टाः ॥ २४ ॥
आयान्तं सरथं दृष्ट्वा तूर्णमिन्द्रजितं कपिः ॥ [11]विननाद महानादं व्यवर्धत च वेगवान् ॥ २५ ॥
इन्द्रजित्तु रथं दिव्य[12]मास्थितश्चित्रकार्मुकः ॥ धनुर्विस्फारयामास तडिदूर्जितनिस्स्वनम् ॥ २६ ॥
ततः समेतावतितीक्ष्णवेगौ महाबलौ तौ रणनिर्विशङ्कौ ॥
कपिश्च रक्षोधिपतेश्च पुत्रः सुरासुरेन्द्राविव बद्धवैरौ ॥ २७ ॥
स तस्य वीरस्य महारथस्य धनुष्मतः संयति संमतस्य ॥
शरप्रवेगं व्यहनत्प्रवृद्धश्चचार मार्गे पितु[13]रप्रमेये ॥ २८ ॥
ततः शरानायत[14]तीक्ष्णशल्यान्सुपत्रिणः काञ्चनचित्रपुङ्खान् ॥
मुमोच वीरः परवीरहन्ता [15]सुसन्नतान्[16]वज्रनिपातवेगान् ॥ २९ ॥
[17]ततस्तु तत्स्यन्दननिस्स्वनं च [18]मृदङ्गभेरीपटहस्वनं च ॥
विकृष्यमाणस्य च कार्मुकस्य निशम्य घोषं पुनरुत्पपात ॥ ३० ॥

देवाः । तथोक्तं विष्णुपुराणे— "मनसा त्वेव भूतानि पूर्वं दक्षोऽसृजत्तथा । देवानृषीन्सगन्धर्वानुरगान्पक्षिणस्तथा " इति ॥ १६ ॥ युद्धोद्धतः कृतोत्साह इति पाठः ॥ १७-१८ ॥ पक्षिराजोपमतुल्यवेगैः पक्षिराजोपमैः अन्योन्यतुल्यवेगैश्च । व्यालैः हिंस्रपशुभिः । सिंहैरिति यावत् । सिंहाश्च रक्षसां वाहनानि भवन्ति । " सर्पहिंस्रपशू व्यालौ " इत्यमरः ॥ १९—२० ॥ ज्यास्वनमित्यत्र ज्या इति लुप्तषष्ठीविभक्तिकं पृथक्पदं । कार्मुकस्येत्यत्र स्वनमिति वा अध्याहारः ॥ २१—२२ ॥ संयति युद्धे । जातहर्षे जातोत्साहे ॥ २३ ॥ चक्रचराः सङ्घचारिणः ॥ २४—२५ ॥ तडिदूर्जितनिस्स्वनं । अत्र तडिच्छब्देन तत्सङ्घातोऽशनिरुच्यते । विद्युत्सङ्घातनिस्स्वनमिति पूर्वमुक्तत्वात् । अशनिवद्दृढनिस्स्वनमित्यर्थः ॥ २६ ॥ सुरासुरेन्द्राविव समेतावित्यन्वयः ॥ २७ ॥ शरप्रवेगं व्यहनत् चचार चेत्यन्वयः ॥ २८—३० ॥

मानपराक्रमः । दक्षसुतानांनारदेननाशितत्वादेवमेवार्थोबोध्यः ॥ १६ ॥ **स०** इन्द्रकल्पः इन्द्रादपिसमर्थः ॥ १९ ॥ **ति०** तटिदूर्जितनिस्स्वनं तटिन्निभमूर्जितस्वनंच ॥ २६ ॥ **रामानु०** सुपत्रिणः पत्रिणः प्रशस्तपत्राः । शोभनाश्चतेपत्रिणश्चेतिविग्रहः

[पा०] १ ङ. झ. ट. विशालाक्षो. २ घ. ङ. झ. ट. पर्वणि. ३ क. ख. पक्षिराजानिलतुल्य. ४ ङ. झ. ट. सतुतीक्ष्ण. ५ ङ. च. झ. ट. मसह्यवेगः. ६ क. विशारदः. ७ ङ. झ. ट. इन्द्रजिच्चापमादाय. ८ ग. च. छ. ज. ञ. ट. मभिप्रेक्ष्य. ९ क. विविधाः. १० क. घ. स्तत्रस. ११ ङ. झ. ट. ननादच. घ. ननादसुमहावेगं. १२ ङ. झ. ट. माश्रितः. १३ ग. ङ. झ. ट. रप्रमेयः. १४ ग. ज. ञ. तीक्ष्णवेगान्. १५ क.—च. ज.—ट. सुसंततान्. १६ ङ.—ट. वज्रसमानवेगान्. १७ क. ख. घ. च. छ. ज. ञ. सतस्य. १८ क. सशङ्खभेरी.

शराणामन्तरेष्वाशु व्यवर्तत महाकपिः ॥ हरिस्तस्याभिलक्ष्यस्य मोघयँल्लक्ष्यसंग्रहम् ॥ ३१ ॥
शराणामग्रतस्तस्य पुनः समभिवर्तत ॥ प्रसार्य हस्तौ हनुमानुत्पपातानिलात्मजः ॥ ३२ ॥
तावुभौ वेगसंपन्नौ रणकर्मविशारदौ ॥ सर्वभूतमनोग्राहि चक्रतुर्युद्धमुत्तमम् ॥ ३३ ॥

हनूमतो वेद न राक्षसोन्तरं न मारुतिस्तस्य महात्मनोन्तरम् ॥
परस्परं निर्विषहौ बभूवतुः समेत्य तौ देवसमानविक्रमौ ॥ ३४ ॥
ततस्तु लक्ष्ये स विहन्यमाने शरेष्वमोघेषु च संपतत्सु ॥
जगाम चिन्तां महतीं महात्मा समाधिसंयोगसमाहितात्मा ॥ ३५ ॥
ततो मतिं राक्षसराजसूनुश्चकार तस्मिन्हरिवीरमुख्ये ॥
अवध्यतां तस्य कपेः समीक्ष्य कथं निगच्छेदिति निग्रहार्थम् ॥ ३६ ॥

ततः पैतामहं वीरः सोस्त्रमस्त्रविदां वरः ॥ संदधे सुमहातेजास्तं हरिप्रवरं प्रति ॥ ३७ ॥
अवध्योऽयमिति ज्ञात्वा तमस्त्रेणास्त्रतत्त्ववित् ॥ निजग्राह महाबाहुर्मारुतात्मजमिन्द्रजित् ॥ ३८ ॥
तेन बद्धस्ततोस्त्रेण राक्षसेन स वानरः ॥ अभवन्निर्विचेष्टश्च पपात च महीतले ॥ ३९ ॥

ततोथ बुद्ध्वा स तदस्त्रबन्धं प्रभोः प्रभावाद्विगतात्मवेगः ॥
पितामहानुग्रहमात्मनश्च विचिन्तयामास हरिप्रवीरः ॥ ४० ॥

ततः स्वायम्भुवैर्मन्त्रैर्ब्रह्मास्त्रमभिमन्त्रितम् ॥ हनूमांश्चिन्तयामास वरदानं पितामहात् ॥ ४१ ॥

न मेऽस्य बन्धस्य च शक्तिरस्ति विमोक्षणे लोकगुरोः प्रभावात् ॥
इत्येव मत्वा विहितोस्त्रबन्धो मयाऽऽत्मयोनेरनुवर्तितव्यः ॥ ४२ ॥
स वीर्यमस्त्रस्य कपिर्विचार्य पितामहानुग्रहमात्मनश्च ॥
विमोक्षशक्तिं परिचिन्तयित्वा पितामहाज्ञामनुवर्तते स ॥ ४३ ॥

अस्त्रेणापि हि बद्धस्य भयं मम न जायते ॥ पितामहमहेन्द्राभ्यां रक्षितस्यानिलेन च ॥ ४४ ॥

अभिलक्ष्यस्य लक्ष्यवेधने प्रसिद्धस्य । लक्ष्यसंग्रहं लक्ष्यसंग्रहणं लक्ष्यविषयदृष्टिमिति यावत् । मोघयन् वितथयन् ॥३१॥ समभिवर्तत समभ्यवर्तत उत्पपात चेत्यन्वयः ॥ ३२ ॥ मनोग्राहि मनआकर्षकं ॥ ३३ ॥ अन्तरं छिद्रं ॥ ३४ ॥ अमोघेषु शरेषु संपतत्स्वपि लक्ष्ये लक्ष्यभूते हनुमति । विहन्यमाने स्वयं तेभ्यो विमुच्यमाने सति । हन्तेर्गत्यर्थात्कर्मकर्तरि लटश्शानजादेशः । समाधिसंयोगसमाहितात्मा सम्यगाधीयत इति समाधिः लक्ष्यं तस्मिन् संयोगे शरसंधाने समाहितात्मा अप्रमत्तचित्तः । स महात्मा इन्द्रजित् । महतीं चिन्तां जगाम ॥ ३५ ॥ अवध्यतां तस्य कपेस्समीक्ष्य निग्रहार्थं कथं निगच्छेत् नीचतां गच्छेदिति मतिं चकार ॥ ३६—३७ ॥ निजग्राह बबन्ध ॥ ३८—४० ॥ ब्रह्मास्त्रमभिमन्त्रितं । विज्ञायेति शेषः ॥ ४१ ॥ लोकगुरोः प्रभावात् अस्य बन्धस्य मोक्षणे मे शक्तिर्नास्तीत्येवं मत्वा एवं विहितः इन्द्रजिता अनेन प्रकारेण कृतः । आत्मयोनेरस्त्रबन्धः मया अनुवर्तितव्य इत्यन्वयः ॥ ४२ ॥ पितामहानुग्रहं विमोक्षहेतुभूतमनुग्रहं ॥ ४३ ॥ स्वस्यादित्यग्रासानन्तरं पितामहमहेन्द्राभ्यामनिलेन च रक्षितत्वान्न

॥ २९ ॥ शि० शरेषुसंपतत्सुसत्सु अतएव लक्ष्ये हनुमति । विहन्यमाने ताड्यमानेसत्येव नतुप्राणैर्वियुक्तेसतीत्यर्थः । महात्मा अतिप्रयत्नवान् । समाधिसंयोगेनअतिविचारकालप्राप्त्यासमाहितःएकाग्रीकृतः आत्मामनोयेनसः । हन्तेस्ताडनार्थकत्वंतु " मालाहतइवद्विपः " इत्यादौप्रसिद्धं । तुशब्दएवार्थे ॥ ३५ ॥ स० पितामहमहेन्द्राभ्यांरक्षितस्यममभयंनजायते । अत्रयद्यपि

[पा०] १ क. घ. ज. मन्तरेष्वेव. २ छ.—ञ. व्यावर्तत. ३ घ. ङ. छ. झ. ञ. ट. मोक्षयन्. ४ घ. मनोग्राहं. ५ क. ग. घ. मद्भुतं. ६ ख. विशारदः. ७ क.—घ. नमेस्त्रबन्धस्य. ख. घ. नमेस्त्रबद्धस्य. ८ ख. घ. ङ. च. ज.—ट. इत्येवमेवं. ९ ग. घ. ज. ममात्मयोनेः.

ग्रहणे चापि रक्षोभि[1]र्महान्मे गुणदर्शनः ॥ राक्षसेन्द्रेण संवादस्तस्माद्गृह्णन्तु मां परे ॥ ४५ ॥

स निश्चितार्थः परवीरहन्ता समीक्ष्यकारी विनिवृत्तचेष्टः ॥
परैः प्रसह्याभिगतैर्निगृह्य ननाद [2]तैस्तैः परिभर्त्स्यमानः ॥ ४६ ॥

[3]ततस्तं राक्षसा दृष्ट्वा निर्विचेष्टमरिन्दमम् ॥ बबन्धुः शणवल्कैश्च द्रुमचीरैश्च संहतैः ॥ ४७ ॥

स रोचयामास परैश्च [4]बन्धं प्रसह्य [5]वीरैरभिनिग्रहं च ॥
कौतूहलान्मां यदि राक्षसेन्द्रो द्रष्टुं व्यवस्येदिति निश्चितार्थः ॥ ४८ ॥

स बद्धस्तेन वल्केन विमुक्तोस्त्रेण वीर्यवान् ॥ अस्त्रबन्धः स चान्यं हि न बन्धमनुवर्तते ॥ ४९ ॥

[6]अथेन्द्रजित्तु द्रुमचीरबद्धं विचार्य वीरः कपिसत्तमं तम् ॥
विमुक्तमस्त्रेण जगाम [7]चिन्तां नान्येन बद्धो ह्यनुवर्ततेऽस्त्रम् ॥ ५० ॥
अहो महत्कर्म कृतं [8]निरर्थकं न राक्षसैर्मन्त्रगतिर्विमृष्टा ॥
पुनश्च नास्त्रे विहतेऽस्त्रमन्यत्प्रवर्तते संशयिताः स्म सर्वे ॥ ५१ ॥

अस्त्रेण हनुमान्मुक्तो नात्मान[9]मवबुध्यत ॥ कृष्यमाणस्तु रक्षोभिस्तैश्च बन्धैर्निपीडितः ॥ ५२ ॥

हन्यमानस्ततः क्रूरै राक्षसैः [10]काष्ठमुष्टिभिः ॥ समीपं राक्षसेन्द्रस्य प्राकृष्यत स वानरः ॥ ५३ ॥

अथेन्द्रजित्तं प्रसमीक्ष्य मुक्तमस्त्रेण बद्धं [11]द्रुमचीरसूत्रैः ॥
व्यदर्शयत्तत्र महाबलं तं हरिप्रवीरं सगणाय राज्ञे ॥ ५४ ॥

तं मत्तमिव मातङ्गं बद्धं कपिवरोत्तमम् ॥ राक्षसा राक्षसेन्द्राय रावणाय न्यवेदयन् ॥ ५५ ॥

कोऽयं कस्य कुतो [12]वाऽत्र किं कार्यं [13]को व्यपाश्रयः ॥ इति राक्षसवीराणां [14]तत्र संजज्ञिरे कथाः ॥ ५६ ॥

मे भयमित्यर्थः ॥ ४४ ॥ गुणदर्शनः गुणपर्यवसायी । संवादः ॥ ४५—४६ ॥ शणवल्कैः शणत्वग्भिः । संहतैः सज्जीकृतैः । द्रुमचीरैः वल्कलैः ॥ ४७ ॥ राक्षसेन्द्रः कौतूहलात् मां द्रष्टुं व्यवस्येदिति निश्चितार्थस्सन् बन्धनादिकं रोचयामासेति संबन्धः ॥ ४८—४९ ॥ अन्येनशणवल्कलादिना । बद्धः अस्त्रं नानुवर्तते । नास्त्रेण बद्ध इव वर्ततइत्यर्थः ॥ ५० ॥ मन्त्रगतिः ब्रह्मास्त्रमन्त्रपद्धतिः । न विमृष्टा नपर्यालोचितेत्यर्थः । बन्धान्तरेण सहानवस्थानरूपं ब्रह्मास्त्रस्वभावमनालोच्य शणबन्धादिकं राक्षसैः कृतमिति भावः । अस्त्रेविहते ब्रह्मास्त्रे प्रतिहते । अन्यदस्त्रं नप्रवर्तते न प्रभवतीत्यर्थः । तदेव ब्रह्मास्त्रं प्रयुज्यतामित्याशङ्क्याह—पुनश्चेति । पुनर्नप्रवर्तते प्रयुक्तं ब्रह्मास्त्रं पुनर्न प्रभवतीत्यर्थः । सर्व इत्यनन्तरमितिकरणं बोध्यं । इति चिन्तां । जगामेति पूर्वेण संबन्धः ॥५१॥ नावबुध्यत नावधृतवान् ॥ ५२—

इन्द्रजितोभयं इन्द्ररक्षितस्यापिभवेत् । तथापि " इन्द्रोवृत्रंहत्वामहानास " इत्युक्त्यावृत्रहननलब्धमहत्त्वगुणविशिष्टेनेन्द्रेणरक्षितस्यवरदानेनलोकदृष्ट्यासंरक्षितस्यभयंनेत्युक्तिर्युक्तेतिबोध्यं । आभ्यांसमुचिताभ्यामित्यर्थकरणे नचाशङ्कानचोत्तरं ॥ ४४ ॥ **ति०** इममर्थमिन्द्रजिदपिज्ञातवानित्याह—**अथेति** । अस्त्रेणविमुक्तं विचार्य ज्ञात्वा । अन्येनबद्धोपिहनुमानस्त्रमनुवर्तते अस्त्रेणबद्धइव वर्ततइत्यपिविचार्य चिन्तामाजगामेतिसंबन्धः । नान्येनबन्धोह्यनुवर्ततेऽस्त्रमितिपाठे चिन्तास्वरूपमिदं । राक्षसैःस्वकृतबन्धनवशात्खेदंजगामेत्यर्थः ॥५०॥ **ति०** चिन्तामाह—**अहोइति** । पाठान्तरेचिन्तान्तरमिदं । मयाकृतंमहत्कर्म निरर्थंकृतंराक्षसैः । यतस्तैर्मन्त्रगतिर्नविमृष्टा नविचारिता । अन्यबन्धेमन्त्रबन्धोनश्यतीतिनज्ञातमित्यर्थः । पुनरस्त्रंतदेवप्रयोज्यंतत्राह । अस्त्रेब्राह्मेविहते पुनरन्यदस्त्रं तदस्त्रप्रयोगान्तरं । नप्रवर्तते । अतःसर्वेवयंसंशयिताः संशयितजयाएव । मुक्तोऽयंसर्वानपिहन्यादितिभावः ॥ ५१ ॥ **ति०** अवबुध्यतेरन्तर्भावितण्यर्थतयानावबोधयतिस्म अस्त्रमोक्षंनप्रकाशयतिस्मेत्यर्थः ॥ ५२ ॥ **ती०** अत्र रावणपुरे ।

[पा०] १ ग. ङ. च. झ. ञ. ट. महन्मेगुणदर्शनं. २ ग. निशाचरैस्तैः. ३ ङ. च. झ. ञ. ट. ततस्ते. ४ क.—घ. च. ज. ञ. बन्धनं. ५ ङ. झ. ञ. ट. रभिगर्हणंच. ६ ङ. च. छ. झ. ट. अथेन्द्रजित्तं. ७ ख. घ. ङ. झ. ट. चिन्तामन्येन. ८ ङ.—झ. ट. निरर्थं. ९ घ. ङ. झ. ट. मवबुध्यते. १० ङ. झ. ट. कालमुष्टिभिः. ११ ग. च. छ. ज. ञ. द्रुमचीरवल्कैः. १२ क.—ट. वापि. १३ ङ. ट. कोभ्युपाश्रयः. १४ ङ. झ. ट. दृष्ट्वासंजज्ञिरे.

हन्यतां दह्यतां वाऽपि भक्ष्यतामिति चापरे ॥ राक्षसास्तत्र संक्रुद्धाः परस्परमथाब्रुवन् ॥ ५७ ॥

अतीत्य मार्गं सहसा महात्मा स तत्र रक्षोधिपपादमूले ॥
दर्दर्श राज्ञः परिचारवृद्धान्गृहं महारत्नविभूषितं च ॥ ५८ ॥

स ददर्श महातेजा रावणः कपिसत्तमम् ॥ रक्षोभिर्विकृताकारैः कृष्यमाणमितस्ततः ॥ ५९ ॥
राक्षसाधिपतिं चापि ददर्श कपिसत्तमः ॥ तेजोबलसमायुक्तं तपन्तमिव भास्करम् ॥ ६० ॥

स रोषसंवर्तिततात्रदृष्टिर्दशाननस्तं कपिमन्ववेक्ष्य ॥
अथोपविष्टान्कुलशीलवृद्धान्समादिशत्तं प्रति मन्त्रिमुख्यान् ॥ ६१ ॥
यथाक्रमं तैः स कपिर्विपृष्टः कार्यार्थमर्थस्य च मूलमादौ ॥
निवेदयामास हरीश्वरस्य दूतः सकाशादहमागतोस्मि ॥ ६२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

एकोनपञ्चाशः सर्गः ॥ ४९ ॥

हनुमता रावणसमृद्धिनिरीक्षणेनाश्चर्यपरवशतया तस्य बलवदधर्माभावे सशक्रसुरलोकशासनोत्प्रेक्षणम् ॥ १ ॥

ततः स कर्मणा तस्य विस्मितो भीमविक्रमः ॥ हनुमान्रोषताम्राक्षो रक्षोधिपमवैक्षत ॥ १ ॥
भ्राजमानं महार्हेण काञ्चनेन विराजता ॥ मुक्ताजालावृतेनाथ मुकुटेन महाद्युतिम् ॥ २ ॥
वज्रसंयोगसंयुक्तैर्महार्हमणिविग्रहैः ॥ हैमैराभरणैश्चित्रैर्मनसेव प्रकल्पितैः ॥ ३ ॥
महार्हक्षौमसंवीतं रक्तचन्दनरूषितम् ॥ स्वनुलिप्तं विचित्राभिर्विविधाभिश्च भक्तिभिः ॥ ४ ॥
विवृतैर्दर्शनीयैश्च रक्ताक्षैर्भीमदर्शनैः ॥ दीप्ततीक्ष्णमहादंष्ट्रैः प्रलंबदशनच्छदैः ॥ ५ ॥
शिरोभिर्दशभिर्वीरं भ्राजमानं महौजसम् ॥ नानाव्यालसमाकीर्णैः शिखरैरिव मन्दरम् ॥ ६ ॥

---

५७ ॥ परिचारवृद्धान् अमात्यवृद्धान् ॥ ५८—६१ ॥ कार्यार्थं कर्तव्यार्थं । अर्थस्य कर्तव्यार्थस्य । मूलं निमित्तं प्रेषयितारमित्यर्थः । अनयोर्विपृष्ट इत्यनेन संबन्धः । श्लोकान्त इतिकरणंबोध्यं । वक्ष्यमाणसंग्रहोयं ॥ ६२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

कर्मणा तस्य विस्मितः युद्धार्थं रावणेनागन्तव्य मिति मया यत्नः कृतः स तु नीतिज्ञ आसनस्थ ए इन्द्रजिन्मुखेन मां निबध्यानीतवानित्यानयनकर्मण जातविस्मय इत्यर्थः ॥ १—२ ॥ वज्रसंयोगसंयुक्तै वज्रकीलनेन संबद्धैः । अत्र भ्राजमानमित्यनुषज्य ॥ ३ ॥ भक्तिभिः पङ्क्तिभिः । इत्थंभूतलक्षणे तृतीया यथा पङ्क्तयो भवन्ति तथानुलिप्त इत्यर्थः ॥ ४–६

कोव्यपाश्रयः कोवाश्रयः ॥ ५६ ॥ **ति०** मन्त्रीन् मन्त्रिणइत्यर्थः ॥ **स०** मन्त्रएषामस्तीतिमत्वर्थे तद्धिताइतिबहुवचनज्ञापितेक रप्रत्ययेसति मुख्यमन्त्रीन् ॥ ६१ ॥ **ति०** कार्यं कर्तव्यं । अर्थः तत्प्रयोजनंच । समाहारद्वन्द्वः । अर्थस्यमूलं उक्तप्रयोजनप्र र्तकं । उत्तराशयस्तु दूत्यंकृत्यं प्रेरकःसुग्रीवइति ॥ ६२ ॥ इत्यष्टचत्वारिंशःसर्गः ॥ ४८ ॥

कतक० तस्य इन्द्रजितः । यत्तुरावणस्येति तन्न । तेन हनूमतिकस्यापिकर्मणोक्तत्वात् ॥ **स०** तस्य रावणस्य । कर्म स्वयंमहाराजइतिसाक्षादसंभाष्य मन्त्रिमुखेनवाचयामासेत्येवंरूपकर्मणेत्यर्थः ॥ १ ॥ **ति०** भक्तिभिः शैवत्रिपुण्ड्रवद्रचनाविशे ॥ ४ ॥ **ति०** विचित्रं आश्चर्यभूतैः । दशनच्छदैः प्रलंबं लंबदशनच्छदं तं ॥ ५ ॥ **स०** शिरोभिर्दशभिरित्यनेन हनुमद्भीषण

[पा०] १ च. छ. ज. ञ. ज्वलन्तमिव. २ ङ.—ट. मुख्यमन्त्रीन्. ३ ङ. झ. ट. कपिश्चपृष्टः. ४ ख. ङ. भूषि ५ ङ. झ. ट. विचित्रंदर्शनीयैश्च. ६ ङ. झ. ट. महादंष्ट्रंप्रलंबं.

नीलाञ्जनचयप्रख्यं हारेणोरसि राजता ॥ पूर्णचन्द्राभवक्रेण सबलाकमिवाम्बुदम् ॥ ७ ॥
बाहुभिर्बद्धकेयूरैश्चन्दनोत्तमरूषितैः ॥ भ्राजमानाङ्गदैः पीनैः पञ्चशीर्षैरिवोरगैः ॥ ८ ॥
महति स्फाटिके चित्रे रत्नसंयोगसंस्कृते ॥ उत्तमास्तरणास्तीर्णे सूपविष्टं वरासने ॥ ९ ॥
अलंकृताभिरत्यर्थं प्रमदाभिः समन्ततः ॥ वालव्यजनहस्ताभिरारात्समुपसेवितम् ॥ १० ॥
दुर्धरेण प्रहस्तेन महापार्श्वेन रक्षसा ॥ मन्त्रिभिर्मन्त्रतत्त्वज्ञैर्निकुम्भेन च मन्त्रिणा ॥ ११ ॥
सुखोपविष्टं रक्षोभिश्चतुर्भिर्बलदर्पितैः ॥ कृत्स्नं परिवृतं लोकं चतुर्भिरिव सागरैः ॥ १२ ॥
सचिवैर्मन्त्रतत्त्वज्ञैरन्यैश्च शुभबुद्धिभिः ॥ अन्वास्यमानं रक्षोभिः सुरैरिव सुरेश्वरम् ॥ १३ ॥
अपश्यद्राक्षसपतिं हनुमानतितेजसम् ॥ विष्ठितं मेरुशिखरे सतोयमिव तोयदम् ॥ १४ ॥
स तैः संपीड्यमानोपि रक्षोभिर्भीमविक्रमैः ॥ विस्मयं परमं गत्वा रक्षोधिपमवैक्षत ॥ १५ ॥
भ्राजमानं ततो दृष्ट्वा हनुमान्राक्षसेश्वरम् ॥ मनसा चिन्तयामास तेजसा तस्य मोहितः ॥ १६ ॥
अहो रूपमहो धैर्यमहो सत्त्वमहो द्युतिः ॥ अहो राक्षसराजस्य सर्वलक्षणयुक्तता ॥ १७ ॥
यद्यधर्मो न बलवान्स्यादयं राक्षसेश्वरः ॥ स्यादयं सुरलोकस्य सशक्रस्यापि रक्षिता ॥ १८ ॥
अस्य क्रूरैर्नृशंसैश्च कर्मभिर्लोककुत्सितैः ॥ तेन बिभ्यति खल्वस्माल्लोकाः सामरदानवाः ॥ १९ ॥
अयं ह्युत्सहते क्रुद्धः कर्तुमेकार्णवं जगत् ॥ इति चिन्तां बहुविधामकरोन्मतिमान्हरिः ॥
दृष्ट्वा राक्षसराजस्य प्रभावममितौजसः ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

पञ्चाशः सर्गः ॥ ५० ॥

प्रहस्तेन रावणप्रेरणयाहनुमन्तंप्रति तत्स्वरूपप्रश्नेनसह वनभञ्जनराक्षसहननप्रयोजनप्रश्नः ॥ १ ॥ हनुमता प्रहस्तस्यालक्ष्यीकरणेनरावणंप्रत्येव वनभञ्जनाक्षादिराक्षसक्षपणयोः क्रमेणतद्दर्शनात्मरक्षणार्थत्वोक्तिः ॥ २ ॥ तथातंप्रति रामदूतत्वादिनिजतत्त्वनिवेदनेनसह स्वस्यब्रह्मवरात्तदस्त्रावश्यत्वनिवेदनपूर्वकं तद्दर्शनार्थमस्त्रानुवर्तनोक्तिः ॥ ३ ॥

[12]तमुद्वीक्ष्य महाबाहुः पिङ्गाक्षं पुरतः स्थितम् ॥ [13]कोपेन महताऽऽविष्टो रावणो लोकरावणः ॥ १ ॥

पूर्णचन्द्राभवक्त्रेण पूर्णचन्द्रतुल्यनायकरत्नेन । वक्त्रं नायकरत्नं अभितोलम्बमुक्तामणिमण्डलं ॥ ७ ॥ केयूरं भुजोपरिधार्यमाणमाभरणं अङ्गदं बाहुमध्यस्थाभरणं ॥ ८—१० ॥ मन्त्रिभिः प्रशस्तमन्त्रैः । अतस्सचिवैरित्यपुनरुक्तिः ॥ ११—१७ ॥ अयं रावणकृतः अधर्मः बलवान्नस्याद्यदि । तदायं राक्षसेश्वरः सशक्रस्य सुरलोकस्यापि रक्षिता स्यात् ॥ १८ ॥ तेन कर्मभिः कृतेन पूर्वोक्तेनाधर्मेण हेतुना ॥१९-२०॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनपञ्चाशः सर्गः ॥ ४९ ॥

बाणः महाबलिसुतः । अनेन तेनापि किञ्चित्

र्थेयुद्धकालइव रूपविशेषग्रहणमितिसूचयति ॥ ६ ॥ **ती०** मन्त्री बुद्धिसहायः ॥ ११ ॥ सचिवः कार्यसहायः ॥ १३ ॥ **ति०** सर्वसंपत्तिमतोप्यधर्मवतोमहान्दोषइत्याह—यदीति । बलवान् एवंविधसमृद्धावप्युन्मूलनक्षमोऽधर्मोयद्यस्मिन्नस्यात्तदाऽयंराक्षसेश्वरः शक्रस्यसुरलोकस्यापि विष्णुवद्रक्षितास्यात् । यद्वा अधर्मइत्यर्शआद्यजन्तं । अयंबलवान्राक्षसेश्वरः यद्यधर्मवान्नस्यात् तदा शक्रस्येत्यादिप्राग्वत् ॥ १८ ॥ **ती०** क्रूरैः भीषणैः । नृशंसैः परद्रोहाचरणशीलैः । तेन पूर्वोक्तेनाधर्मेणच । **ति०** केनबिभ्यतीतिपाठे के न इतिपदच्छेदः ॥ १९ ॥ इत्येकोनपञ्चाशःसर्गः ॥ ४९ ॥

[पा०] १ ख. ङ. च. ज.—ट. सबलार्कमिवा. २ ख. घ. ङ. भूषितैः. ३ ङ.—झ. ट. मानाङ्गदैर्भीमैः. ४ ङ.—ट. चित्रिते. ५ घ.—ट. उपोपविष्टं. ६ ङ. झ. ट. दर्पितं. ७ ङ.—ट. शुभदर्शिभिः. ख. ग. बहुबुद्धिभिः. क. हितबुद्धिभिः. ८ ङ. झ. ट. आश्वास्यमानं. ९ ग. घ. नमितौजसं. १० ङ. झ. ट. सर्वेबिभ्यति. ११ क. बहुविधांचकारमतिमान्. १२ क. ख. छ. ज. समुद्वीक्ष्य. १३ क.—ट. रोषेण.

शङ्काहतात्मा दध्यौ स कपीन्द्रं तेजसा वृतम् ॥ किमेष भगवान्नन्दी भवेत्साक्षादिहागतः ॥ २
येन शप्तोसि कैलासे मया संचालिते पुरा ॥ सोयं वानरमूर्तिः स्यात्किंस्विद्बाणोपि वाऽसुरः ॥३
स राजा रोषताम्राक्षः प्रहस्तं मन्त्रिसत्तमम् ॥ कालयुक्तमुवाचेदं वचो विपुलमर्थवत् ॥ ४ ॥
दुरात्मा पृच्छ्यतामेष कुतः किं वाऽस्य कारणम् ॥ वनभङ्गे च कोऽस्यार्थो राक्षसीनां च तर्जने ॥५
मत्पुरीमप्रधृष्यां वाऽऽगमने किं प्रयोजनम् ॥ आयोधने वा किं कार्यं पृच्छ्यतामेष दुर्मतिः ॥६॥
रावणस्य वचः श्रुत्वा प्रहस्तो वाक्यमब्रवीत् ॥ समाश्वसिहि भद्रं ते न भीः कार्या त्वया कपे ॥७॥
यदि तावत्त्वमिन्द्रेण प्रेषितो रावणालयम् ॥ तत्त्वमाख्याहि मा भूत्ते भयं वानर मोक्ष्यसे ॥ ८ ॥
यदि वैश्रवणस्य त्वं यमस्य वरुणस्य च ॥ चाररूपमिदं कृत्वा प्रविष्टो नः पुरीमिमाम् ॥
विष्णुना प्रेषितो वाऽपि दूतो विजयकाङ्क्षिणा ॥ ९ ॥
न हि ते वानरं तेजो रूपमात्रं तु वानरम् ॥ तत्त्वतः कथयस्वाद्य ततो वानर मोक्ष्यसे ॥ १० ॥
अनृतं वदतश्चापि दुर्लभं तव जीवितम् ॥ अथवा यन्निमित्तं ते प्रवेशो रावणालये ॥ ११ ॥
एवमुक्तो हरिश्रेष्ठस्तदा रक्षोगणेश्वरम् ॥ अब्रवीन्नास्मि शक्रस्य यमस्य वरुणस्य वा ॥ १२ ॥
धनदेन न मे सख्यं विष्णुना नास्मि चोदितः ॥ जातिरेव मम त्वेषा वानरोऽहमिहागतः ॥ १३ ॥
दर्शने राक्षसेन्द्रस्य दुर्लभे तदिदं मया ॥ वनं राक्षसराजस्य दर्शनार्थे विनाशितम् ॥ १४ ॥
ततस्ते राक्षसाः प्राप्ता बलिनो युद्धकाङ्क्षिणः ॥ रक्षणार्थं तु देहस्य प्रतियुद्धा मया रणे ॥ १५ ॥
अस्त्रपाशैर्न शक्योऽहं बद्धुं देवासुरैरपि ॥ पितामहादेव वरो ममाप्येषोऽभ्युपागतः ॥ १६ ॥
राजानं द्रष्टुकामेन मयाऽस्त्रमनुवर्तितम् ॥ विमुक्तो ह्यहमस्त्रेण राक्षसैस्त्वभिपीडितः ॥ १७ ॥

शप्तमिति गम्यते । अत्रेतिकरणं द्रष्टव्यं ॥ ३—४ ॥ दुरात्मा पृच्छ्यतामिति । अस्य विवरणं कुत इत्यादि । कुतः कस्माद्देशादागतः । किं वास्य कारणं । अस्य कः प्रेरकः ॥ ५ ॥ मत्पुरीं प्रतीति शेषः । आयोधने युद्धे । किं कार्यं किं प्रयोजनं ॥ ६—७ ॥ यदि वैश्रवणस्येत्यादेः दूतो विजयकाङ्क्षिणेत्यन्तस्य तत्त्वमाख्याहीति पूर्वेण संबन्धः ॥ ८—९ ॥ यन्निमित्तं कृत्वा ते प्रवेशः तन्निमित्तं कथयस्वेति पूर्वेण संबन्धः ॥ १०—११ ॥ रक्षोगणेश्वरमित्यनेन प्रष्टारं प्रहस्तं पृष्ठतः कृतवानिति गम्यते ॥ १२ ॥ एषा वानरता ॥ १३ ॥ राक्षसेन्द्रस्य तवेति शेषः ॥ १४ ॥ प्रतियुद्धाः प्रतिप्रहृताः ॥ १५ ॥ ममापीति तवेवेत्यर्थः ॥ १६ ॥ तर्हि कथं बद्धोसीत्याशङ्क्याह—राजानमिति । पीडितः बद्धस्सन् । अस्त्रेण विमुक्तः ।

ति० नन्दी वानरमुखएवप्रमथगणाधिपः । **स०** यद्यपिमारुतिरितिइन्द्रजितंप्रतिरावणेनोक्तत्वान्नेयंशङ्कासंभवति । तथापि नन्दिबाणाभ्यांस्वस्यपराभूतत्वाद्भयेनतच्छङ्कायुक्तेतिज्ञेयं ॥२॥ **ती०** शप्तः मन्मुखसदृशमुखैस्तवनाशोभविष्यतीतिशप्तः ॥ ३ ॥ **स०** दुर्मतिः दुरित्यव्ययंदुःखवाचि । एवमस्मदीयदुःखेमतिर्यस्यसतथा ॥६॥ **स०** भद्रंतइत्युक्तिरुत्तरत्ररक्षःक्षयोनकार्यइतिसुमुखीकरणार्थं ॥ ७ ॥ **ति०** चाररूपं चाराणांप्रच्छन्नवेषत्वाच्छद्मकृतवानररूपं ॥ ९ ॥ **ति०** वानरमितीदमर्थेऽणन्तं ॥ १० ॥ **ति०** एषा वानराकृतिः । ममजातिरेव जन्मकृतैव । अतोवानरएवाहमिहागतः । राक्षसेन्द्रस्य तव दर्शनेदर्शननिमित्तं । इहागतइत्यर्थः । तदिदंतवदर्शनंदुर्लभं प्रकारान्तरेणाशक्यलाभंइतिज्ञात्वातवदर्शनार्थेवनंविनाशितं ॥ १३—१४ ॥ **ति०** इदानींयुद्धप्रयोजनमाह—रक्षणार्थमिति । प्रतियुद्धाः मयाप्रतिभटतयास्थित्वाकृतयुद्धाः । **स०** प्रति स्वयुद्धंप्रति युद्धं मयाकृतंयेषांतेतथा ॥ १५ ॥ **ति०** नन्वेवं भाविबन्धाद्यपर्यालोच्यकथंयुद्धंकृतंतत्राह—अस्त्रैरिति । अस्त्रैः ब्रह्मास्त्रान्तैः । पाशैः यमपाशान्तैः । एवंचेतरपाशकथापिदूरापास्तेत्युक्तं । देवासुरैः मिलितैरपीत्यर्थः ॥ १६ ॥ **ती०** ननुतवास्त्रबन्धाभावेकिमितिब्रह्मास्त्रेणबद्धोराक्षसैःपीड्यसइत्यतआह—राजानमिति । अस्त्रमुक्तोपि कार्यवशाद्बुद्धिपूर्वकमेवाहमेभिःपीड्ये । एतन्ममाकिंचित्करमितिभावः

[पा०] १ ङ. झ. ञ. ट. प्रहसिते. २ ङ. झ. ञ. ट. राक्षसानांच. ३ च. ज. ञ. कपिरूपमिदं. ४ क. ख. ङ. झ. ट. यन्निमित्तस्ते. ५ घ. ङ. झ. ट. देषवरोममापिहिसमागतः. ६ ङ. झ. ट. विमुक्तोप्यहमस्त्रेण. च. छ. ज. ञ. विमुक्तोस्म्यहमेवास्त्रेण. ७ घ. राक्षसैरति. ङ. झ. ट. राक्षसैस्त्वभिवेदितः. क. ख. ग. छ. ज. राक्षसैस्त्वतिपीडितः.

केनचिद्राजकार्येण संप्राप्तोसि तवान्तिकम् ॥ दूतोऽहमिति विज्ञेयो राघवस्यामितौजसः ॥ १८ ॥
श्रूयतां चापि वचनं मम पथ्यमिदं प्रभो ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

एकपञ्चाशः सर्गः ॥ ५१ ॥

हनुमता रावणंप्रति रामवनागमनप्रभृतिस्वीयसीतादर्शनावधिसकलवृत्तान्तनिवेदनम् ॥ १ ॥ तथा राममहिमानुवर्णनपूर्वकं तस्मैसीतायाःप्रत्यर्पणानर्पणयोर्निजजीवितलाभतदभावकारणत्वोत्कीर्तनम् ॥ २ ॥

तं समीक्ष्य महासत्त्वं सत्त्ववान्हरिसत्तमः ॥ वाक्यमर्थवदव्यग्रस्तमुवाच दशाननम् ॥ १ ॥
अहं सुग्रीवसंदेशादिह प्राप्तस्तवालयम् ॥ राक्षसेन्द्र हरीशस्त्वां भ्राता कुशलमब्रवीत् ॥ २ ॥
भ्रातुः शृणु समादेशं सुग्रीवस्य महात्मनः ॥ धर्मार्थोपहितं वाक्यमिह चामुत्र च क्षमम् ॥ ३ ॥
राजा दशरथो नाम रथकुञ्जरवाजिमान् ॥ पितेव बन्धुर्लोकस्य सुरेश्वरसमद्युतिः ॥ ४ ॥
ज्येष्ठस्तस्य महाबाहुः पुत्रः प्रियकरः प्रभुः ॥ पितुर्निदेशान्निष्क्रान्तः प्रविष्टो दण्डकावनम् ॥ ५ ॥
लक्ष्मणेन सह भ्रात्रा सीतया चापि भार्यया ॥ रामो नाम महातेजा धर्म्यं पन्थानमाश्रितः ॥ ६ ॥
तस्य भार्या वने नष्टा सीता पतिमनुव्रता ॥ वैदेहस्य सुता राज्ञो जनकस्य महात्मनः ॥ ७ ॥

हिशब्दोवधारणे । ब्रह्मास्त्रस्य साधनान्तरासहत्वादिति भावः ॥ १७ ॥ अस्तु सर्वमेतन्मद्दर्शनार्थं मद्दर्शनं वा किमर्थं तत्राह—केनचिदिति ॥ १८—१९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चाशः सर्गः ॥ ५० ॥

समीक्षणोक्तिक्रियाभेदात्तच्छब्दद्वयं॥ १ ॥ अहमिति॥ अहं रामदूत एव संदेशस्तु सुग्रीवस्येति भावः। सुग्रीवसंदेशात् सुग्रीवसंदेशाद्धेतोः । संदेशप्रापणार्थमित्यर्थः । "संदेशवाग्वाचिकं स्यात्" इत्यमरः । इह लङ्कायां । भ्राता भ्रातृवद्धितकरः । अब्रवीत् अप्राक्षीत् । यद्यपि सुग्रीवेण न संदिष्टं तथापि दूतोक्तं सर्वं स्वाम्युक्तमेवेत्याशयेनोक्तं ॥ २ ॥ समादेशं संदेशरूपमिति वाक्यविशेषणं । इह अस्मिल्लोके । अमुत्र परलोके । क्षमं अभ्युदयसाधनं ॥ ३—५ ॥ धर्म्यं धर्मादनपेतं । "धर्मपथ्यर्थन्यायादनपेते"

॥ १७ ॥ स० अमितौजसइत्यनेन अन्यथाराघवोघातयेदेवेतिसूचयति । ति० रामकार्येणेतिपाङ्कःपाठः । रामस्यतवचकःसंबन्धस्तत्राह—दूतइति ॥१८॥ ति० ननुरामदूतेनापिसीतान्वेषणमेवकार्यं एवंप्रयासेनमद्दर्शनेकिंफलंतत्राह—श्रूयतामिति । वचनं सन्देशवचनं । पथ्यं तवक्षेमकरं । त्वद्दर्शने नपुण्यावाप्तिर्मम । किंतुतुभ्यंहितंवक्तव्यमितीयानायासइतिभावः ॥ १९ ॥ इतिपञ्चाशःसर्गः ॥ ५० ॥

ति० सुग्रीवसंदेशकथनव्याजेनसामदण्डान्यतरविषयत्वनिश्चयायन्यायानुसारीनवेतिजिज्ञासति—तमित्यादि ॥ स० अव्यग्रः निर्भीः ॥ १ ॥ ति० भ्रातेतिस्नेहप्रकाशिकालोकोक्तिः । स० हेराक्षसेभ राक्षसश्रेष्ठ । वालिरावणयोर्भ्रातृसौहार्दात्तत्प्रकाशिकामृदूक्तिर्भ्रातेति । हरीशः कुशलमब्रवीत् त्वत्कुशलमुद्दिश्य पृच्छेतिमामब्रवीत् । राक्षसेभहरीशः नश्शृणोषितेनोक्तंचेत्तवहननमनायासेनकृत्वासीतांनेष्यतीत्यान्तरङ्गिकोऽर्थः राक्षसेभस्य हरीशः महासिंहइत्येकपदतायांज्ञेयः । तथाभ्रातेत्यनेन त्वद्राज्यग्रहणेपियोग्यतातस्यास्तीतिसूचयति ॥ २ ॥ स० कपिभ्योऽवृतवरत्वबलेनवा रामरूपबलिष्ठाश्रयणेनवा समादेशमित्युक्तिः। रामानु० रावणहृदयपरिज्ञानार्थं तत्कालोदितप्रतिभयासुग्रीवसंदेशंकल्पयित्वावदति—भ्रातुरिति । समादेशं संदेशं । सुग्रीवसंदेशस्यरामप्रयोजनपरत्वात्संदेशोपयोगितयारामसुग्रीवयोःसख्यादिकं राजादशरथइत्यारभ्य भ्रमताचमयादृष्टागृहेतेजनकात्म-

[पा०] १ ङ.—ट. द्रामकार्येण. २ ङ. झ. ट. आगतोस्मि. ३ घ. राघवस्यमहात्मनः. ४ ङ. झ. ट. श्रूयतामेववचनं. ५ ख. घ. स्तवान्तिकं. ङ. झ. ट. स्तवान्तिके. क. स्त्वदन्तिकं. ६ झ. ञ. ट. राक्षसेश. ठ. राक्षसेभ. ७ ङ. झ. ट. धर्मार्थसहितं. ८ झ. ट. प्रियतरः. ९ ङ. झ. ट. सह. घ. चैव. १० ङ. झ. ट. जनस्थानेभ्रष्टासीतेतिविश्रुता.

स मार्गमाणस्तां देवीं राजपुत्रः सहानुजः ॥ ऋश्यमूकमनुप्राप्तः सुग्रीवेण समागतः ॥ ८ ॥
तस्य तेन प्रतिज्ञातं सीतायाः परिमार्गणम् ॥ सुग्रीवस्यापि रामेण हरिराज्यं निवेदितम् ॥ ९ ॥
ततस्तेन मृधे हत्वा राजपुत्रेण वालिनम् ॥ सुग्रीवः स्थापितो राज्ये हर्यृक्षाणां गणेश्वरः ॥ १० ॥
त्वया विज्ञातपूर्वश्च वाली वानरपुङ्गवः ॥ रामेण निहतः सङ्ख्ये शरेणैकेन वानरः ॥ ११ ॥
स सीतामार्गणे व्यग्रः सुग्रीवः सत्यसङ्गरः ॥ हरीन्संप्रेषयामास दिशः सर्वा हरीश्वरः ॥ १२ ॥
तां हरीणां सहस्राणि शतानि नियुतानि च ॥ दिक्षु सर्वासु मार्गन्ते ह्यधश्चोपरि चाम्बरे ॥ १३ ॥
वैनतेयसमाः केचित्केचित्तत्रानिलोपमाः ॥ असङ्गगतयः शीघ्रा हरिवीरा महाबलाः ॥ १४ ॥
अहं तु हनुमान्नाम मारुतस्यौरसः सुतः ॥ सीतायास्तु कृते तूर्णं शतयोजनमायतम् ॥ १५ ॥
समुद्रं लङ्घयित्वैव तां दिदृक्षुरिहागतः ॥ भ्रमता च मया दृष्टा गृहे ते जनकात्मजा ॥ १६ ॥
तद्भवान्दृष्टधर्मार्थस्तपःकृतपरिग्रहः ॥ परदारान्महाप्राज्ञ नोपरोद्धुं त्वमर्हसि ॥ १७ ॥
न हि धर्मविरुद्धेषु बह्वपायेषु कर्मसु ॥ मूलघातिषु सज्जन्ते बुद्धिमन्तो भवद्विधाः ॥ १८ ॥
कश्च लक्ष्मणमुक्तानां रामकोपानुवर्तिनाम् ॥ शराणामग्रतः स्थातुं शक्तो देवासुरेष्वपि ॥ १९ ॥
न चापि त्रिषु लोकेषु राजन्विद्येत कश्चन ॥ राघवस्य व्यलीकं यः कृत्वा सुखमवाप्नुयात् ॥ २० ॥
तत्त्रिकालहितं वाक्यं धर्म्यमर्थानुबन्धि च ॥ मन्यस्व नरदेवाय जानकी प्रतिदीयताम् ॥ २१ ॥
दृष्टा हीयं मया देवी लब्धं यदिह दुर्लभम् ॥ उत्तरं कर्म यच्छेषं निमित्तं तत्र राघवः ॥ २२ ॥

इति यत्प्रत्ययः ॥ ६—७ ॥ सुग्रीवेण मयेतिशेषः । यद्वा लोके वक्तारः स्वात्मानमन्यमिव निर्दिशन्त्यौद्धत्यातिशयात् । यद्वा अत्रानुवादात् पूर्वसुग्रीवेणैवं वक्तव्यमिति पठितं तथैव हनुमान्पठतीति समादेशप्राधान्यादन्यवाक्यमपि तथोच्यत इति केचित्प्राहुः । यद्वा सुग्रीवसंदेशस्य रामप्रयोजनपरत्वात्संदेशोपयोगितया रामसुग्रीवयोस्सख्यादिकं दर्शयति—राजा दशरथ इत्यादिना ॥ ८—११ ॥ सत्यसङ्गरः सत्यप्रतिज्ञः । “ कर्बुरे च प्रतिज्ञाजिसंविदापत्सु सङ्गरः ” इत्यमरः ॥ १२ ॥ अधश्चोपरि चाम्बरे पाताले भूमौ आकाशे चेत्यर्थः ॥१३॥ असङ्गगतय इति शीघ्रत्वे हेतुः ॥ १४ ॥ औरसस्सुतः क्षेत्रजत्वव्यावृत्तये औरसपदं । सीतायास्तु कृते सीतालाभाय । तां दिदृक्षुरिति योज्यं ॥ १५—१६ ॥ एवं सुग्रीवसंबन्धं प्रतिपाद्य सुग्रीवसंदेशं वदति—तद्भवानित्यादिना ॥ दृष्टधर्मार्थः शास्त्रेण विदितधर्मार्थस्वरूपइत्यर्थः । तपःकृतपरिग्रहः तपसि विषये कृतस्वीकारः । यद्वा तपसा स्वयं कृतपरिग्रहः । स्वारसिकतपस्कइति यावत् । हेतुगर्भे विशेषणे ॥ १७ ॥ धर्मविरुद्धेषु धर्मशास्त्रविरुद्धेषु । धर्मविरुद्धत्वेपि यत्सौख्यावहं तत्कार्यमित्यत्राह—बह्वपायेष्विति । बहुहानिकरेष्वित्यर्थः । अपायाः कथंचित्परिह्रियन्त इत्याशङ्क्याह—मूलघातिष्विति । स्वविनाशकरेष्वित्यर्थः । कर्मसु परदारापहारेषु । न सज्जन्ते नोद्युक्ता भवन्ति ॥ १८ ॥ रामकोपानुवर्तिनां रामकोपानुसारेण निर्गतानामित्यर्थः ॥ १९ ॥ व्यलीकं अप्रियं । “ व्यलीकं त्वप्रियेऽनृते ” इत्यमरः ॥ २० ॥ तत् तस्मात् अधर्मावहत्वाद्रामापराधस्य परिहर्तव्यत्वाच्च । त्रिकालहितं भूतभविष्यद्वर्तमानकालहितं । दारुणाधर्मस्य स्वपूर्वपुरुषविनाशकत्वेन तत्परिहारस्य भूतकालहितत्वं मन्यस्व । मत्वा प्रतिदीयतामिति योज्यं ॥ २१ ॥ जानकीहरणे किं मानं तत्राह—दृष्टा हीति ॥ यत्सीतादर्शनं दुर्लभं इतरवानरालभ्यं । तल्लब्धं । तर्हि सा नीयतामित्यत्राह—उत्तरमिति । सीतादर्शनोत्तरं यच्छेषं कर्म

जेत्यन्तेनप्रतिपादयन्तद्भवानित्यादिनाकृत्वासुखमवाप्नुयादित्यन्तेनसुग्रीवसंदेशंवदति ॥ ३ ॥ ति० तांमार्गमाणःसरामः ऋश्यमूकं प्राप्तः सुग्रीवेणसंगतश्च । अनेनैवज्ञायते नेदंसुग्रीवसंदेशवाक्यं । तदाहिमयाचैवसुसंगतइतिवदेत् ॥ ८ ॥ ती० त्वयाविज्ञातपूर्वश्चवालीतिमर्मोक्तिः सतेननिहतइतिरामोत्कर्षश्चप्रतिपादितइतिज्ञेयं ॥ ११ ॥ असङ्गगतयः आलंबरहितगतिविशिष्टाः ।

[पा०] १ क. ङ.—ट. सतेन. २ ङ. झ. ट. मर्थानुयायिच. क.—घ. मर्थानुपातिच.

लक्षितेयं मया सीता तथा शोकपरायणा ॥ गृह्य[1] यां नाभिजानासि पञ्चास्यामिव पन्नगीम् ॥ २३ ॥
नेयं जरयितुं शक्या सासुरैरमरैरपि ॥ विषसंसृष्टमत्यर्थं भुक्तमन्नमिवौजसा ॥ २४ ॥
तपस्संतापलब्धस्ते योऽयं[2] धर्मपरिग्रहः ॥ न स नाशयितुं न्याय्यमात्मप्राणपरिग्रहः ॥ २५ ॥
अवध्यतां तपोभिर्यां[3] भवान्समनुपश्यति ॥ आत्मनः सासुरैर्देवैर्हेतुस्तत्राप्ययं महान् ॥ २६ ॥
सुग्रीवो न हि देवोऽयं नासुरो न च राक्षसः ॥ न[4] दानवो न गन्धर्वो न यक्षो न च पन्नगः ॥२७॥
[मानुषो[5] राघवो राजन्सुग्रीवश्च हरीश्वरः ॥] तस्मात्प्राणपरित्राणं कथं राजन्करिष्यसि ॥ २८ ॥
न तु धर्मोपसंहारमधर्मफलसंहितम्[8] ॥ तदेव फलमन्वेति धर्मश्चाधर्मनाशनः ॥ २९ ॥

सीतानयनं तत्र राघवो निमित्तं । आज्ञप्तस्यैव मया कर्तव्यत्वादितिभावः ॥ २२ ॥ दृष्टयापिमद्वशंवदया सीतया रामः किंकरिष्यतीत्याशङ्क्याह—लक्षितेयमिति ॥ तथेति वाचामगोचरत्वोक्तिः । नेयं तव वश्या प्रत्युत पन्नगीव तव प्राणहारिणीतिभावः ॥ २३ ॥ ओजसा अमरपक्षे प्रतापेन । अन्नपक्षे जाठराग्निना ॥ २४ ॥ तपःकृच्छ्रलब्धमिष्टं मज्जीवनं वृथामानाशयेत्याह—तप इति ॥ तपस्संतापः तपश्चर्या । ओदनपाकं पचतीतिवन्निर्देशः । तेन लब्धः । परिगृह्यत इति परिग्रहः फलं धर्मपरिग्रहः धर्मफलं । तादृशो योयमात्मप्राणपरिग्रहः आत्मनः प्राणानां च परिग्रहः स्वीकारः । जीवनमिति यावत् । स नाशयितुं न न्याय्यं न युक्तं । अव्ययमेतत् । तपःक्लेशलब्धं तद्व्यतिरिक्तधर्मफलभूतं च यज्जीवनमायुः तन्न विनाशयेत्यर्थः । चकाराभावादित्थमेव योजना ॥ २५ ॥ सर्वावध्यस्येह मे कोयमायुर्विनाशक इत्याशङ्क्य परिहरति—अवध्यतामिति ॥ तपोभिरार्जितां सासुरैर्देवैर्या आत्मनोऽवध्यतां भवान् समनुपश्यति । तत्रापि अवध्यतायां सत्यामपि । अयं वक्ष्यमाणः । हेतुः भवद्वधहेतुरस्ति । महान् अपरिहार्यः ॥ २६ ॥ तमेव हेतुमाह—सुग्रीव इति ॥ न च राक्षस इति पाठस्सम्यक् । न च मानुष इति पाठे प्रतिषेधप्रसक्तिरपि नास्तीत्युच्यते । "तृणभूता हि मे सर्वे प्राणिनो मानुषादयः" इत्युत्तरश्रीरामायणे मनुष्यादिभिरवध्यत्वस्याप्रार्थितत्वात् । नच तिर्यञ्च इति न प्रसज्य च प्रतिषिध्यतइतिभावः ॥ २७ ॥ तस्मात् सुग्रीवात ॥ २८ ॥ ननु किमनेनोपदेशेन कृतानि मया पापानि तैश्चावश्यंफलप्रदैर्भवितव्यमित्याशङ्क्याह—न त्विति ॥

आकाशगामिनइत्यर्थः ॥ १४ ॥ **स०** पञ्चास्यामित्यनेन आस्यस्थानीयानि रामोलक्ष्मणोराजाऽहंचेतिचत्वारिस्वयंसीतेत्येकंचेति पञ्चआस्यानियस्यास्सा तां । विस्तृतमुखींवा ॥ २३ ॥ **शि०** जरयितुं गोपयितुमित्यर्थः ॥ २४ ॥ **स०** तपस्संतापेनलब्धोयोधर्मपरिग्रहः धर्मसंचयः । यद्वा धर्मेचार्थेचेतिधर्मसाधनीभूतःपरिग्रहोमन्दोदरी । सुभार्यायाःपुण्यलभ्यत्वात् । नाशयितुं पूर्वत्रः विफलीकर्तुं परत्रविधवीकर्तुं । आत्मप्राणपरिग्रहः बहुकालवर्तिप्राणपरिग्रहणवान् । अन्यथा त्वत्प्राणपरिग्रहः प्राणवियोजकइत्यर्थ- ॥ २५ ॥ **शि०** अयंसुग्रीवोराघवश्चदेवादिर्न । किंतु सुग्रीवोहरीश्वरः राघवश्चमानुषः । एतेनाभ्यांतवाभयदानंनास्तीतिसूचितं ॥ २७ ॥ **ती०** ननुमहतापूर्वसंचितेनैवधर्मेणममत्राणंभविष्यतीत्याशंक्यरोगराज्यादिवद्धर्माधर्मफलयोःसंभूयानुभवसिद्धेरात्मत्राणसिद्धिः । उताधर्मबाधेनधर्मफलानुभवश्चेतिद्वेधाविकल्प्याद्यस्यासंभवमाह—नत्विति । धर्मोपसंहारं धर्मस्यफलविनाश्यत्वात् धर्म उपसंह्रियतइतिधर्मोपसंहारं धर्मफलंसुखंतत् अधर्मफलसंहितंनभवति । अधर्मेणसहभोग्यंनभवतीत्यर्थः । तीव्रतपःपरदारापहरणभवदीयधर्माधर्मफलयोर्वध्यत्वावध्यत्वयोःजीवनतदभावयोःसहावस्थानविरोधात् । रोगराज्यादिवत्संभूयानुभवोनसंभवतीतिभावः । द्वितीयंदूषयति—**तदेवेति**। तत् धर्मफलमेवान्वेति धर्मफलंधर्मफलेनसहतिष्ठतीतियावत्। धर्मोनाधर्मनाशनः अधर्मबाधेनधर्मफलानुभवोनघटतइतिभावः । यद्वा ननुयेभ्योऽवध्यत्वंनप्रार्थितं तेभ्योपिपूर्वोपार्जितोमहासुकृतसंचयएवरक्षिष्यतीत्याशङ्क्यएवंचेत्तुल्यन्यायतयात्वत्कृतःअधर्मनिचयोपित्वांनाशयिष्यतीत्याह—नत्विति । धर्मोपसंहारंधर्मस्यफलविनाश्यत्वात्धर्मउपसंह्रियतेअनेनेति धर्मोपसंहारंधर्मफलंसुखं । तत् अधर्मसंहितं विरुद्धकारणकत्वादुःखसंहितंनभवतीत्यर्थः । किंतु तदेवफलमन्वेति सुखमेवफलत्वेनानुवर्तते । तुश्चार्थे । तेनाधर्मफलमपि धर्मफलसहितंनभवति अधर्मफलत्वेनानुवर्ततइतिलभ्यते । नत्वधर्मंधर्मो नाशयिष्यतीत्याशङ्क्याह—धर्मश्चेति। अत्रनअनुवर्तते। धर्मः अधर्मनाशनोनभवति । पूर्वकृतोधर्मः इदानींकृताधर्मनाशनोनभवतीत्यर्थः । चकारादेवमधर्मोपि धर्मनाशनोनभवतीतिलभ्यते । धर्माधर्मावनुभवैकविनाश्याविति भावः ॥ **ती०** ननुतपोबलान्मे-

[पा०] १ ङ. झ. ट. गृहे. २ क. ग. घ. ङ. झ. ट. सोयं. ३ च. छ. ज. ञ. तपोवीर्याद्भवान्. ४ ङ. झ. ट. नयक्षो. ५ क.—घ. मानुषः. ६ क.—घ. नराक्षसो. ङ. झ. ट. पाठेष्विदमर्धंनदृश्यते. ७ ङ.—ट. पाठेष्विदमर्धंदृश्यते. ८ घ. च. संयुतं.

प्राप्तं धर्मफलं तावद्भवता नात्र संशयः ॥ फलमस्याप्यधर्मस्य क्षिप्रमेव प्रपत्स्यसे ॥ ३० ॥
जनस्थानवधं बुद्ध्वा बुद्ध्वा वालिवधं तथा ॥ रामसुग्रीवसख्यं च बुध्यस्व हितमात्मनः ॥ ३१ ॥
कामं खल्वहमप्येकः सवाजिरथकुञ्जराम् ॥ लङ्कां नाशयितुं शक्तस्तस्यैष तु न निश्चयः ॥ ३२ ॥
रामेण हि प्रतिज्ञातं हर्यृक्षगणसन्निधौ ॥ उत्सादनममित्राणां सीता यैस्तु प्रधर्षिता ॥ ३३ ॥
अपकुर्वन्हि रामस्य साक्षादपि पुरन्दरः ॥ न सुखं प्राप्नुयादन्यः किं पुनस्त्वद्विधो जनः ॥ ३४ ॥
यां सीतेत्यभिजानासि येयं तिष्ठति ते वशे ॥ कालरात्रीति तां विद्धि सर्वलङ्काविनाशिनीम् ॥ ३५ ॥
तदलं कालपाशेन सीताविग्रहरूपिणा ॥ स्वयं स्कन्धावसक्तेन क्षेममात्मनि चिन्त्यताम् ॥ ३६ ॥
सीतायास्तेजसा दग्धां रामकोपप्रपीडिताम् ॥ दह्यमानामिमां पश्य पुरीं साट्टप्रतोलिकाम् ॥ ३७ ॥
स्वानि मित्राणि मन्त्रींश्च ज्ञातीन्भ्रातॄन्सुतान्हितान् ॥ भोगान्दारांश्च लङ्कां च मा विनाशमुपानय ॥ ३८ ॥

तुशब्द उक्तशङ्काव्यावर्तकः । धर्मः उपसंह्रियतेनेनेति धर्मोपसंहारं धर्मफलं । फलेन धर्मस्योपसंह्रियमाणत्वात् । क्लीबत्वमार्षं । तत् अधर्मफलसंहितं न भवति । कुत इत्यत्राह—तदेव फलमन्वेतीति । धर्मफलमेवानुवर्तते । नन्वधर्मे च विद्यमानेकथंतत्फलाननुवृत्तिस्तत्राह—धर्मश्चाधर्मनाशनइति । च उक्तशङ्कानिवृत्त्यर्थः । विरोधिनि धर्मे जाग्रति कथमधर्मवार्तापीत्यर्थः । "धर्मेण पापमपनुदति" इति श्रुतेः । यद्वा व्यत्ययो वा किं न स्यात्तत्राह—धर्मश्चेति । चोवधारणे । धर्म एवाधर्मनाशनः तथा श्रुतेः । न त्वधर्मः प्रमाणाभावादितिभावः । ननु यदिधर्मोधर्मनाशनः तर्हि प्राथमिक एवधर्मः आधुनिकानधर्मान्निवर्तयेदित्याशङ्क्याह—प्राप्तमिति ॥ तावच्छब्दः कात्स्न्र्यवाची । कृत्स्नं धर्मफलं फलमस्येति । तथाच क्षिप्रं धर्ममाचर अन्यथा सद्यस्ते विनाशो भविष्यतीति भावः । अत्र कर्तव्यत्वेन विधीयमानो धर्मस्सीताप्रदानपूर्वकरामविषयशरणागतिरेव । शूरस्याशौर्यप्रवृत्त्या धर्मफलं सर्वं क्षीणमिति हनुमतावगतमिति मन्तव्यम् ॥ २९—३० ॥ मा भूद्धर्मापेक्षा कार्योपस्थितिरवेक्ष्यतामित्याह—जनस्थानेति ॥ रामसुग्रीवसख्यं चेति परोक्षनिर्देशस्य गतिःपूर्वमुक्ता ॥ ३१ ॥ कामं अत्यन्तं । अहं सुग्रीवः । तन्नाशनं । तस्य रामस्य । निश्चयः निश्चयविषयः ॥ ३२ ॥ कथमित्यत्राह—रामेणेति ॥ हर्यृक्षगणसन्निधौ वृद्धसभायांप्रतिज्ञातमनतिक्रमणीयमितिभावः ॥ ३२—३४ ॥ कालरात्रीति काचिच्छक्तिरिति वदन्ति । "समी च कालरात्रिश्च भैरवी गणनायिका" इत्यमरशेषः ॥ ३५ ॥ कालपाशेन यमपाशेन । अतस्सीतां रामाय देहीति हृदयं ॥ ३६ ॥ अट्टः अट्टालः । प्रतोलिका वीथिका ॥ ३७ ॥ मन्त्रीन् मन्त्रिणः । इकारान्तत्व-

---

सर्वतोजयोभविष्यतीत्यतआह—नत्विति । यःपुमान् अधर्मफलसंहितबलवत्तयाफलोन्मुखाधर्मसंबद्धस्तंपुरुषं धर्मोपसंहारमपि धर्मोपसंग्रहवन्तमपि । नत्वन्वेति धर्मफलमितिशेषः । किंतु तदेवफलं फलोन्मुखाधर्ममेवान्वेति । ननुधर्मफलादधर्मनाशोभविष्यतीत्यत्राह—धर्मश्चेति । उत्कटोऽधर्मोत्तरभावीधर्मोऽधर्मस्यनाशनः । चादुत्कटाधर्मोधर्मनाशकः । एवंचास्याधर्मस्यत्वत्कृतसफलधर्मापेक्षयोत्कटत्वादुत्तरकालत्वाच्चायमेवत्वयाप्राक्संचितस्यसकलधर्मस्यनाशकइतिभावः ॥ **स०** अधर्मफलसंयुतः उत्कटोत्तरभावी योऽधर्मः परदारधर्षणादिरूपःतत्फलं आसन्ननाशादिकंतेनसंयुतःपुमान् धर्मोपसंहारं धर्मस्योपसंहारस्तिरोधानंयेनकार्यरूपेण । कार्यनिष्पत्त्यनन्तरंकारणनिवृत्तेःसर्वत्रदृष्टत्वात् । तादृशंतदेवफलं धर्मफलंनत्वन्वेति रक्षकत्वेननप्राप्नोति । उपसंहरति—**धर्मइति** । अतोधर्मः अधर्मनाशनोनभवतीत्यर्थः । तवतुसीताधर्षणरूपादत्युत्कटोत्तरकालभाविकर्मफलस्यनाशोनकेनापीतिनात्मरक्षायांस्वयमक्षमइतिभावः ॥ २९ ॥ **ती०** ननुमहतःपुण्यफलानुभवस्यसमाप्त्यनन्तरंअधर्मफलानुभवोभविष्यतीत्यत्राह—प्राप्तमिति । धर्मफलं तावत्साकल्येन । प्राप्तं भुक्तं । अस्याधर्मस्य सीताहरणरूपस्य ॥ ३० ॥ **ती०** एषः हनुमत्कर्तृकलङ्काविनशस्तु । तस्य रामस्य । ननिश्चयः नसंमतइत्यर्थः ॥ **ति०** नन्वेवंकटुवादिनस्तवकोरक्षकइतिचेत्तत्राह—काममिति । यथेष्टमित्यर्थः । तर्हि कुतस्तन्नाशंनकरोषीत्यत्राह—तस्य । यस्याहंदूतस्तस्यरामस्य एषः मत्कर्तृकलङ्कानाशविषयोनिश्चयोन । स्वाम्याज्ञांविना तदा

[पा०] १ ङ. च. ज.—ट. वालिनश्चवधं. २ च. स्तस्यैवतुविनिश्चयः. ग. स्तस्यैवतुनसंशयः. ३ क. ङ.—ट. हे. ४ ख. ग. ङ. च. झ. ट. क्षेमं. ५ ग. ङ. च. ज. झ. ट. प्रदीपितां.

सत्यं राक्षसराजेन्द्र शृणुष्व वचनं मम ॥ रामदासस्य दूतस्य वानरस्य विशेषतः ॥ ३९ ॥
सर्वाँल्लोकान्सुसंहृत्य सभूतान्सचराचरान् ॥ पुनरेव तथा स्रष्टुं शक्तो रामो महायशाः ॥ ४० ॥
देवासुरनरेन्द्रेषु यक्षरक्षोगणेषु च ॥ विद्याधरेषु सर्वेषु गन्धर्वेषूरगेषु च ॥
सिद्धेषु किन्नरेन्द्रेषु पतत्रिषु च सर्वतः ॥ ४१ ॥
सर्वभूतेषु सर्वत्र सर्वकालेषु नास्ति सः ॥ यो रामं प्रतियुध्येत विष्णुतुल्यपराक्रमम् ॥ ४२ ॥
सर्वलोकेश्वरस्यैवं कृत्वा विप्रियमुत्तमम् ॥ रामस्य राजसिंहस्य दुर्लभं तव जीवितम् ॥ ४३ ॥

देवाश्च दैत्याश्च निशाचरेन्द्र गन्धर्वविद्याधरनागयक्षाः ॥
रामस्य लोकत्रयनायकस्य स्थातुं न शक्ताः समरेषु सर्वे ॥ ४४ ॥
ब्रह्मा स्वयंभूश्चतुराननो वा रुद्रस्त्रिनेत्रस्त्रिपुरान्तको वा ॥
इन्द्रो महेन्द्रः सुरनायको वा त्रातुं न शक्ता युधि रामवध्यम् ॥ ४५ ॥

मार्षे ॥ ३८ ॥ रामदासस्येत्यनेन रामसामर्थ्यपरिज्ञानमुक्तं । दूतस्येत्यनेन हितोपदेशाधिकारः । वानरस्येति माध्यस्थ्यं ॥ ३९ ॥ लोकान् भूरादीन् । सभूतान् पृथिव्यप्तेजोवाय्वाकाशरूपपञ्चमहाभूतयुक्तान् । सचराचरान् चतुर्मुखद्वारा सृष्टजङ्गमयुक्तान् । संहृत्य प्रलयावसाने रुद्रद्वारा स्वयं च संहृत्य । पुनः कल्पादौ तथैव "धाता यथापूर्वमकल्पयत्" इति श्रुत्युक्तरीत्या स्रष्टुं समर्थः । तत्र प्रमाणमाह—महायशा इति । "न तस्येशे कश्चन तस्य नाम महद्यशः" इति हि श्रुतिः । श्रुतिस्मृतिषु तथाप्रसिद्धइत्यर्थः ॥ ४०—४४ ॥ मा भूवन् शक्तास्सामान्यदेवाः ईश्वराश्शक्ताः स्युरित्याशङ्क्याह—ब्रह्मेति ॥ अत्र विशेषणान्तरोपादानं तेषां सामर्थ्यविशेषद्योतनार्थं पतत्प्रकर्षत्वपरिहाराय व्युत्क्रमेण योजनीयं । इन्द्रः परमैश्वर्यवान् । "इदि परमैश्वर्ये" इत्यस्माद्धातोः "ऋज्रेन्द्राग्र—" इत्यादिना निपातनात्साधुत्वं । त्रैलोक्याधिपतिरपि त्रातुं न शक्त इत्यर्थः । तस्य त्रैलोक्याधिपतित्वेपि परनिरसनसामर्थ्याभावादशक्ततेत्यत्राह—महेन्द्रइति । वृत्रहननप्रसिद्धसामर्थ्योपि न शक्तः । "योवृत्रमवधीदिति तन्महेन्द्रस्य महेन्द्रत्वं" इति श्रौतनिर्वचनं । स्वयं चतुरोपि सहायसंपत्त्यभावान्न शक्त इत्यत्राह—सुरनायकइति । स्वतुल्यत्रयस्त्रिंशत्कोटिसुरगणसहायोपि न शक्त इत्यर्थः । मा भूत्क्षुद्र इन्द्रश्शक्तः सर्वसंहारकोरुद्रस्तु शक्तस्स्यात्तत्राह—रुद्र इति । संहारकाले प्रजाः रोदयतीति रुद्रः । "रोदेर्णिलुक् च" इति रप्रत्ययः । कालविनुष्ठानमशक्यमितिभावः ।

स० तस्यैवतुविनिश्चयइतिपाठे तदाज्ञायांसत्यामित्यर्थः ॥३२॥ ति० विशेषतः निष्कृष्योच्यमानंवचनमित्यर्थः । रामदासस्येत्यादिविशेषणत्रयेण राममहिमवेत्तृत्वं स्वस्यपरोक्तवाक्यानुवादपूर्वहितोपदेशाधिकारः नररक्षोतिरिक्तजात्यन्तरत्वेनापक्षपाततोन्यायवक्तृत्वंचसूचितं ॥ ३९ ॥ ती० रुतंशब्दंवेदात्मानंब्रह्मणेकल्पादौरातीतिवा रुद्रः । यद्वा रुता नादेन सकलंजगदिदंद्रावयति रञ्जयतीति नादात्मकत्वाद्रुद्रः । यद्वा रुता नादेनप्रणवरूपेणवेदरूपेणवा दापयति इष्टमर्थंगमयतीतिवा रुद्रः । यद्वा रुतंसंसारदुःखहेतुंवाद्रावयतीतिरुद्रः। तदुक्तं "रुद्दुःखंदुःखहेतुंवातद्रावयतियःप्रभुः । रुद्रइत्युच्यतेतस्माच्छिवंपरमकारणं" इति । एवंव्युत्पत्तियुक्तरुद्रत्वशत्रुभस्मीकरणसमर्थफाललोचनयुक्तत्वत्रिपुरान्तकत्वादिधर्मविशिष्टोमहेश्वरोवा । ति० ब्रह्मास्वयंभूरित्यनेन हिरण्यगर्भःसर्वादिरुक्तः । चतुराननः ततः प्राप्तस्रष्टृत्वाधिकारः । त्रिनेत्रस्त्रिपुरान्तकोरुद्रोवेत्यनेन संहाराधिकारी । सुरनायकोमहेन्द्रः महैश्वर्यवानिन्द्रः । उपेन्द्रोविष्णुः पालनाधिकारी । एवंत्रिमूर्तिभिरपि रक्षानसिध्यति । रामस्यैवत्रिमूर्तित्वात् । स० ब्रह्मेत्यादिपादत्रयेपित्रिवारमुक्तिर्दार्ढ्याय भट्टिकाव्ये "जहिहिजहीहिजहाहिरामभार्यां" इतिवत् । यद्वा ब्रह्मा बृहस्पतिः । "ब्रह्मापितन्नजानाति" इतिगीताभाष्यप्रमेयदीपिकायांब्रह्माबृहस्पतिरितिव्याख्यानात् । अस्वयंभूः स्वयंभूभिन्नः । स्वयंभूसदृशोवायुः । चतुराननोविरिञ्चः । वाशब्दःसर्वत्रान्वेति । रुद्रः क्रूरोयमः । त्रिनेत्रोरुद्रः । त्रिपुरान्तेनरुद्रेणकंशिरोयस्यदक्षस्यविनायकस्यवा । इन्द्रः शचीपतिः । अमहेन्द्रः वृत्रहेतरः तत्सदृशः कामः । सुरनायकः सुरसेनानायकःषण्मुखः ॥ ४५ ॥ इत्येकपञ्चाशःसर्गः ॥ ५१ ॥

[पा०] १ क. घ.—ढ. नागेषुगन्धर्वेषुमृगेषुच. २ घ. सिद्धेषुचमृगेन्द्रेषु. क. नागेन्द्रेषुचसर्वेषुकिन्नरेषुपतत्रिषु. ३ क. ख. ग. सर्वलोकेषु. ४ क. ग.—ट. लोकेश्वरस्येह. ५ क. ग. ङ.—ट. विप्रियमीदृशं.

स सौष्ठवोपेतमदीनवादिनः कपेर्निशम्याप्रतिमोऽप्रियं वचः ॥
दशाननः कोपविवृत्तलोचनः समादिशत्तस्य वधं महाकपेः ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

द्विपञ्चाशः सर्गः ॥ ५२ ॥

हनुमत्परुषभाषणश्रवणरुष्टेनरावणेन तस्यवधाज्ञापनेविभीषणेनदूतवधस्यशास्त्रनिन्दितत्वोक्त्यातत्प्रतिषेधनम् ॥ १ ॥

तस्य तद्वचनं श्रुत्वा वानरस्य महात्मनः ॥ आज्ञापयद्वधं तस्य रावणः क्रोधमूर्च्छितः ॥ १ ॥
वधे तस्य समाज्ञप्ते रावणेन दुरात्मना ॥ निवेदितवतो[1] दौत्यं[2] नानुमेने विभीषणः ॥ २ ॥
[3]तं रक्षोधिपतिं क्रुद्धं तच्च कार्यमुपस्थितम् ॥ विदित्वा चिन्तयामास कार्यं कार्यविधौ[4] स्थितः ॥३॥
निश्चितार्थस्ततः साम्नाऽऽपूज्य शत्रुजिदग्रजम् ॥ उवाच हितमत्यर्थं वाक्यं वाक्यविशारदः ॥ ४ ॥

शेषे संहारकोपीदानीमप्राप्तकालत्वादशक्त इत्यत्राह—त्रिनेत्र इति । निटिलनयनदहनज्वालाविलोपितमदनोपीत्यर्थः । काकतालीयत्वशङ्काव्युदासायाह—त्रिपुरान्तकइति । प्रबलतरमहासुरसंहारकोपीत्यर्थः । मा भूत्तस्य शक्तिः “ ब्रह्मणः पुत्राय ज्येष्ठाय श्रेष्ठाय ” इत्युक्तरीत्या रुद्रस्यापि पिता ब्रह्मा शक्तस्स्यात् तत्राह—ब्रह्मेति । बृंहतीति ब्रह्मा । “ बृंहेरम् नलोपश्च ” इति मनिन् अमागमो नकारलोपश्च । रुद्रपिता स्वयं कर्मवश्यःकथं शक्नुयात्तत्राह—स्वयंभूरिति । कर्मवश्यत्वेपीतरसाधारण्येनानुत्पन्नः स्वयंभूः । स्वयंभूत्वेपि सहायसंपत्त्यभावात्कथंत्रायेतेत्यत्राह—चतुराननइति । युगपदेवसर्ववेदोच्चारणसंपादितातिशयोपि नशक्तः । प्रत्येकमशक्तत्वेपि किं संभूयागताश्शक्नुवन्ति तत्राह—न शक्ता इति । बहुवचनेनायमर्थो लभ्यते । वधमर्हतीति वध्यः । दण्डादित्वाद्यः । रामस्य वध्यो रामवध्यः । तं त्रातुं न शक्ताः । स्थानविन्निग्रहस्य चेत्युचितवधार्हस्य त्राताकः । युधि युद्धे । न शक्ताः किन्तुशरणं गत्वा त्रातुं शक्ता इत्यर्थः । अत्र “ हिरण्यगर्भस्समवर्तताग्रे । न सन्नचासीच्छिव एव केवलः । इन्द्रो मायाभिः पुरुरूप ईयते ” इति परदेवतात्वेन प्रसक्तात्त्रिकादधिकत्वमुक्तं । रामइत्यनेन वेदान्तोदितानां सद्ब्रह्मादिसामान्यशब्दानां हिरण्यगर्भशिवेन्द्रादिविशेषशब्दानां च व्यक्तिविशेषपरत्वं व्यञ्जितं । त्रातृत्वेन प्रसक्तप्रधानदेवतानिराकरणप्रकरणे विष्णोरनुपादानात्पारिशेष्याद्राम एव विष्णुरिति प्रतिपादितं । अस्माच्छ्लोकात्परं स सौष्ठवेति श्लोकः । तस्य तद्वचनमिति श्लोकस्तु उत्तरसर्गादिः । अत्र स प्रमादाल्लिखितः ॥ ४५—४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकपञ्चाशः सर्गः ॥ ५१ ॥

तस्य तद्वचनं श्रुत्वेति श्लोकस्सर्गस्य प्रथमः ॥ १ ॥ दौत्यं दूतकर्म । ब्राह्मणादेराकृतिगणत्वात् ष्यञ् । तन्निवेदितवतः उक्तवतः । नानुमेने वधमित्यनुवर्तनीयं । निवेदितमतौ दूत्यमिति पाठान्तरं । मन्यत इति मतिः कार्ये । निवेदितमतौ निवेदितकार्यांशे यथार्थवादित्वेनावध्ये हनुमति दूत्यं दूतसंबन्धितया रावणादिष्टं वधं । “ दूतवणिग्भ्यां चेति वक्तव्यं ” इति भावकर्मणोर्विहितो यप्रत्ययः अर्थानुगुण्यात्संबन्धमात्रे गमयितव्यः ॥ २ ॥ तच्च कार्यं दूतवधरूपकार्यं । कार्यं अनन्तरानुष्ठेयं । कार्यविधौ कार्यकरणे । स्थितः निश्चितार्थः । साध्वसाधुविवेकनिश्चितकार्य इत्यर्थः ॥ ३ ॥ आपूज्येति च्छेदः ॥ ४ ॥

ती० निवेदितमतौ मन्यतइतिमतिःकार्यं । निवेदितस्वागमनकार्येहनुमति । अनेनास्ययथादिष्टानुवादित्वेनापराधित्वादवध्य-

[पा०] १ च. छ. निवेदितमतौ. २ ख. ग. दौत्ये. ३ क. घ. सरक्षोधिपतिं. ४ क. कार्याकार्यविधौ.

क्षमस्व रोषं त्यज राक्षसेन्द्र प्रसीद मद्वाक्यमिदं शृणुष्व ॥
वधं न कुर्वन्ति परावरज्ञा दूतस्य सन्तो वसुधाधिपेन्द्राः ॥ ५ ॥
राजधर्मविरुद्धं च लोकवृत्तेश्च गर्हितम् ॥ तव चासदृशं वीर कपेरस्य प्रमापणम् ॥ ६ ॥
धर्मज्ञश्च कृतज्ञश्च राजधर्मविशारदः ॥ परावरज्ञो भूतानां त्वमेव परमार्थवित् ॥ ७ ॥
गृह्यन्ते यदि रोषेण त्वादृशोपि विपश्चितः ॥ ततः शास्त्रविपश्चित्त्वं श्रम एव हि केवलम् ॥ ८ ॥
तस्मात्प्रसीद शत्रुघ्न राक्षसेन्द्र दुरासद ॥ युक्तायुक्तं विनिश्चित्य दूतदण्डो विधीयताम् ॥ ९ ॥
विभीषणवचः श्रुत्वा रावणो राक्षसेश्वरः ॥ रोषेण महताऽऽविष्टो वाक्यमुत्तरमब्रवीत् ॥ १० ॥
न पापानां वधे पापं विद्यते शत्रुसूदन ॥ तस्मादेनं वधिष्यामि वानरं पापचारिणम् ॥ ११ ॥
अधर्ममूलं बहुरोषयुक्तमनार्यजुष्टं वचनं निशम्य ॥
उवाच वाक्यं परमार्थतत्त्वं विभीषणो बुद्धिमतांवरिष्ठः ॥ १२ ॥
प्रसीद लङ्केश्वर राक्षसेन्द्र धर्मार्थयुक्तं वचनं शृणुष्व ॥
दूता न वध्याः समयेषु राजन्सर्वेषु सर्वत्र वदन्ति सन्तः ॥ १३ ॥
असंशयं शत्रुरयं प्रवृद्धः कृतं ह्यनेनाप्रियमप्रमेयम् ॥
न दूतवध्यां प्रवदन्ति सन्तो दूतस्य दृष्टा बहवो हि दण्डाः ॥ १४ ॥
वैरूप्यमङ्गेषु कशाभिघातो मौढ्यं तथा लक्षणसन्निपातः ॥
एतान्हि दूते प्रवदन्ति दण्डान्वधस्तु दूतस्य न नः श्रुतोपि ॥ १५ ॥
कथं च धर्मार्थविनीतबुद्धिः परावरप्रत्ययनिश्चितार्थः ॥
भवद्विधः कोपवशे हि तिष्ठेत्कोपं नियच्छन्ति हि सत्त्ववन्तः ॥ १६ ॥
न धर्मवादे न च लोकवृत्ते न शास्त्रबुद्धिग्रहणेषु चापि ॥
विद्येत कश्चित्तव वीर तुल्यस्त्वं ह्युत्तमः सर्वसुरासुराणाम् ॥ १७ ॥

राावरज्ञाः त्याज्योपादेयविवेकयुक्ताः ॥ ५ ॥ प्रमा- णं मारणं ॥ ६ ॥ भूतानामिति निर्धारणे षष्ठी । भूतानां मध्ये ॥ ७ ॥ शास्त्रविपश्चित्त्वं विविधं पश्य- तीति विपश्चित् तस्य भावः विपश्चित्त्वं शास्त्रविषये विविधज्ञानोपेतत्वमितियावत् ॥ ८ ॥ दूतदण्डः दूत- योग्यदण्डः ॥ ९—१२ ॥ सर्वेषु सर्वत्र सर्वदेशेषु सर्वजातिष्वित्यर्थः ॥ १३ ॥ न केवलं दूतोयं अक्षा- दिवधेन शत्रुश्च तथाच हन्तव्य इत्याशङ्क्याह—असं- शयमिति ॥ दूतवध्यां दूतवधं । स्त्रियां भावे क्यप् । हन्तेर्वधादेश आर्षः ॥१४॥ लक्षणसन्निपातः दूतयो- ग्याङ्कनसंबन्धः । नः अस्माभिः ॥१५॥ धर्मार्थविनी- तबुद्धिः धर्मार्थयोश्शिक्षितबुद्धिः । परावरप्रत्ययनि- श्चितार्थः उत्कृष्टापकृष्टपरिज्ञाननिश्चितार्थः । अस्मि- न्विषये इदं कार्यं परं इदमवरमिति विवेकनिश्चितका- र्यइत्यर्थः । नियच्छन्ति निगृह्णन्ति । सत्त्ववन्तः व्यव- सायवन्तः ॥ १६ ॥ धर्मवादे धर्मशास्त्रे । लोकवृत्ते

मुक्तं ॥ २ ॥ शि० तस्मात् मदुक्तहेतोः । प्रसीद प्रसादंकुरु ॥ ९ ॥ ति० मौण्ड्यं मुण्डनं । लक्षणसंनिपातः दूतयोग्याङ्क- संबन्धइतितीर्थः । वैरूप्यादीनामेकैकंवा । तथालक्षणानांसंनिपातः सर्वानुष्ठानंवेत्यर्थइत्यन्ये । नोस्माकंश्रुतोपिनास्ति । दर्शनंतु। पास्तमितिभावः ॥ शि० अङ्गेषुवैरूप्यं नासिकाच्छेदादिनाविरूपकरणं । कशाभिघातः कशयातोत्रेण अभिघातः ताडनं ण्ड्यं भ्रुकुट्यादिमुण्डनं । लक्षणसंनिपातः ताम्रखण्डदाहादिनाललाटादौचिह्नकरणं । एतान्दण्डान्दूतेप्रवदन्ति ॥ स० मौढ्य-

[पा०] १ क. ङ. च. झ. ञ. ट. मेवाक्यं. २ ङ. झ. ट. विचक्षणाः. ३ च. ज.—ट. कोपेन. ४ झ. ट. तस्मादिमं. क. छ.—ट. पापकारिणं. ६ क. ग. घ. च. छ. झ. ञ. ट. बहुदोषयुक्तं. ७ ग. घ. ङ. झ. ट. धर्मार्थतत्वं. ८ झ. ञ. मौण्ड्यं. ९ ङ. झ. ट. श्रुतोस्ति. १० ग. प्रत्ययदर्शितार्थः. ११ क. घ. ङ. झ. ट. नगच्छन्ति. १२ क. घ. च. छ. ज. वादेपुन.

[[1]पराक्रमोत्साहमनस्विनां च सुरासुराणामपि दुर्जयेन ॥
त्वयाऽप्रमेयेन सुरेन्द्रसंघा जिताश्च युद्धेष्वसकृन्नरेन्द्राः ॥ १८ ॥
इत्थंविधस्यामरदैत्यशत्रोः शूरस्य वीरस्य तवाजितस्य ॥
कुर्वन्ति वीरा मनसाऽप्यलीकं प्राणैर्विमुक्ता न तु भोः पुरा ते ॥ १९ ॥]
न चाप्यस्य कपेर्घाते [2]कंचित्पश्याम्यहं गुणम् ॥ तेष्वयं पात्यतां दण्डो यैरयं प्रेषितः कपिः ॥२०॥
साधुर्वा यदि वाऽसाधुः परैरेष समर्पितः ॥ ब्रुवन्परार्थं परवान्न दूतो वधमर्हति ॥ २१ ॥
[3]अपि चास्मिन्हते राजन्नान्यं पश्यामि खेचरम् ॥ इह यः पुनरागच्छेत्परं पारं महोदधेः ॥ २२ ॥
तस्मान्नास्य वधे यत्नः कार्यः परपुरञ्जय ॥ भवान्सेन्द्रेषु देवेषु यत्नमास्थातुमर्हति ॥ २३ ॥
अस्मिन्विनष्टे न हि [4]दूतमन्यं पश्यामि यस्तौ नरराजपुत्रौ ॥
युद्धाय युद्धप्रिय दुर्विनीतावुद्योजयेद्दीर्घपथावरुद्धौ ॥ २४ ॥
[[5]अस्मिन्हते वानरयूथमुख्ये सर्वापवादं प्रवदन्ति सन्तः ॥
न हि प्रपश्यामि गुणं यशो वा लोकापवादो भवति प्रसिद्धः ॥ २५ ॥
मूढैः प्रगल्भैरपि दुर्विनीतैर्यैर्वानरोऽयं पुरुषैर्विसृष्टः ॥
तेषां वधार्थं कुरु वीर यत्नं शीघ्रं विनाशाय निशाचरेन्द्र ॥ २६ ॥
कुरुष्व तावत्परमप्रयत्नं धर्मं समास्थाय सुरेन्द्रशत्रो ॥
देवेषु सर्वेषु सवासवेषु दैत्येषु सर्वेषु सदानवेषु ॥ २७ ॥
कृत्वा प्रयत्नं सुदृढं सुशीघ्रं मद्वाक्यमेवं मनसा प्रगृह्य ॥
तौ राजपुत्रौ विनिगृह्य वीरौ जयं परं प्राप्स्यसि राक्षसेन्द्र ॥ २८ ॥
[6]पराक्रमोत्साहमनस्विनां च सुरासुराणामपि दुर्जयेन ॥
त्वया मनोनन्दन नैर्ऋतानां [7]युद्धायतिर्नाशयितुं न युक्ता ॥ २९ ॥

लौकिकाचारे। शास्त्रबुद्धिग्रहणेषु शास्त्रशब्देन शास्त्रार्थ उच्यते । शास्त्रार्थज्ञानतद्धारणेष्वित्यर्थः ॥ १७–१९ ॥ न केवलं दूतस्य वधे शास्त्रविरोधः गुणमपि न कंचित्पश्यामि अतः एतत्प्रेषकेष्वेव वधरूपो दण्डः पात्यतामित्याह—न चेत्यादि ॥ २० ॥ साधुर्वेति । समर्पितः प्रेषितः ॥ २१ ॥ अस्मिन्हतेसति वृत्तान्तनिवेदकाभावाद्रामलक्ष्मणयोरिहागमनाभावेन तव शत्रुक्षयो न स्यात् । विमुक्तेस्मिन् एतन्निवेदितवृत्तान्तयोस्तयोरिहागमनादयत्नेन तव शत्रुनाशो भवेदि[त्यभिप्रेत्याह]—अपि चेत्यादिना ॥ इह परं पारं इह विद्यमानं महोदधेः परं पारं इदं दक्षिणकूलमित्यर्थः ॥ २२—२३ ॥ दीर्घपथावरुद्धौ दूरमार्गेण निरुद्धगमनावित्यर्थः । एतच्छ्लोकानन्तरं पराक्रमोत्साहमनस्विनांचेति श्लोकः । ततो हिताश्चेति श्लोकः । अथ तदेकदेशेनेति श्लोकः । अथ निशाचराणामिति सर्गान्तश्लोकः । अयमेव पाठक्रमः समीचीनः । अन्

मितिपाठे धुत्तूरादिभोजनेनमुग्धताप्रापणं ॥ १५ ॥ ति० युद्धप्रियेतिसंबोधनेन रणपराक्रमविजयकीर्ती तवेष्टेकिल । तेउभेअप्ये तद्विनाशे नश्यतइत्याशयः । रावणस्यरजःप्रकृतित्वात्तत्प्रकृत्यनुसारेणयुद्धादिव्यापारेणप्रलोभनं । तत्प्रीत्यर्थमेवदुर्विनीताविल्यादु क्तिः ॥ २४ ॥ ति० हेनैर्ऋतानांमनोनन्दन सुरासुराणामपिदुर्जयेनत्वया पराक्रमेयउत्साहस्तत्र प्रशस्तमनोवतांनैर्ऋतानांमन युद्धायप्रवृत्तं निर्नाशयितुंनयुक्तं । नैर्ऋतानामित्यत्रमनइत्यत्रचतन्त्रं । यद्वा तादृशानांनैर्ऋतानांमनोनन्दन तादृशेनत्वया युद्धायति युद्धागमः । नाशयितुंनयुक्तमित्यर्थः ॥ शि० हेनन्दन राक्षसाभिरामदातः । युद्धाय समुत्सुकमितिशेषः । नैर्ऋतानांमनः निन

[पा०] १ इदंश्लोकद्वयं क. ट. पाठयोर्दृश्यते. २ क. च. ज. किंचित्. ३ घ. अस्मिन्हतेमहाराजनान्यं. ४ क. ख घ.—ज. भूतमन्यं. ५ इमेचत्वारःश्लोकाः ग. पाठेदृश्यन्ते. ६ ग. शूरेणवीरेणनिशाचरेन्द्रसुरासुराणामपि. ७ ग. झ. ट युद्धायनिर्नाशयितुंनयुक्तं.

हिताश्च शूराश्च समाहिताश्च कुलेषु जाताश्च महागुणेषु ॥
मनस्विनः शस्त्रभृतां वरिष्ठाः को[1]ऽप्यग्रतस्ते सुभृताश्च योधाः ॥ ३० ॥
तदेकदेशेन बलस्य तावत्केचित्तवादेश[2]कृतोभियान्तु ॥
तौ रा[3]जपुत्रौ विनिगृह्य मू[4]ढौ परेषु ते भावयितुं प्रभावम् ॥ ३१ ॥
निशाचराणामधिपोनुजस्य विभीषणस्योत्तमवाक्यमिष्टम् ॥
जग्राह बुद्ध्या सुरलो[5]कशत्रुर्महाबलो राक्षसराजमुख्यः ॥ ३२ ॥
[किं वा[6] परं ब्रह्म परं त्वसह्यं सर्वस्य बीजं जगतोस्य विष्णोः ॥
यद्देवदेवस्य परं च तेजस्तदेव तेजः कपिरेष वीरः ॥ ३३ ॥
वधाय मे वैष्णवतेज एव निस्संशयोऽयं कपिरूपधारी ॥
इत्येवमेतद्बहुधा विचिन्त्य रक्षोधिपः क्रोधवशं जगाम ॥ ३४ ॥
क्रोधं च जातं हृदये निरुध्य विभीषणोक्तं वचनं सुपूज्य ॥
उवाच रक्षोधिपतिर्महात्मा विभीषणं शस्त्रभृतांवरिष्ठम् ॥ ३५ ॥]
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

त्रिपञ्चाशः सर्गः ॥ ५३ ॥

रावणाज्ञया राक्षसगणैर्हनुमद्वालस्य पटवेष्टनतैलसेचनपूर्वकमग्निज्वालया संदीपनेनसवाद्यघोषंलङ्कासंचारणम् ॥ १ ॥ राक्षसीभिस्तद्वृत्तान्तं निवेदितयासीतया सशपथमग्निंप्रति हनुमददाहप्रार्थनम् ॥ २ ॥ [हनुमद्वालसंदीपनश्रवणखिन्नां सीतांप्रति विभीषणभार्ययासरमया हनुमत्कृतलङ्कादहननिवेदनेन समाश्वासनम् ॥ ३ ॥] हनुमता पुरद्वारारोहणेन पृथुतरनिजशरीरकृशीकरणाद्वालबन्धविश्लथनपूर्वकं पुनःशतीरपृथूकरणम् ॥ ४ ॥ तथा तत्रत्यपरिघेण तद्रक्षिणांरक्षसांक्षपणम् ॥ ५ ॥

त[7]स्य तद्वचनं श्रुत्वा दशग्रीवो म[8]हाबलः ॥ देशकालहितं वाक्यं भ्रातुरुत्तरमब्रवीत् ॥ १ ॥
सम्यगुक्तं हि भवता दूतवध्या विगर्हिता ॥ अवश्यं तु वधादन्यः क्रियतामस्य निग्रहः ॥ २ ॥
कपीनां किल लाङ्गूलमिष्टं भवति भूषणम् ॥ तदस्य दीप्यतां शीघ्रं तेन द[9]ग्धेन गच्छतु ॥ ३ ॥
ततः प[10]श्यन्त्विमं दीनमङ्गवैरूप्यकर्शितम् ॥ स[11]मित्रज्ञातयः सर्वे बान्धवाः ससुहृज्जनाः ॥ ४ ॥

प्यत्र सर्गे श्लोकाः कल्पिता दृश्यन्ते ॥ २४—३० ॥ तत् तस्मात्कारणात् । एकदेशेनेति सहयोगे तृतीया । बलस्य सैन्यस्य ॥ ३१—३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्विपञ्चाशः सर्गः ॥ ५२ ॥

देशकालहितं देशकालोचितमिति विभीषणवचनविशेषणं ॥ १ ॥ दूतवध्या दूतवधः ॥ २—३ ॥ समित्रेति । मित्राणि आप्ताः । समसुखदुःखा वा । सहाया वा । ज्ञातयः भ्रात्रादयः । बान्धवाः संबन्धिनः । सुहृज्जनाः स्निग्धजनाः ॥ ४ ॥

शयितुंत्वयानयुक्तं ॥ २९ ॥ ती० समाहिताः दानमानाभ्यांवशीकृताइत्यर्थः । सुभृताः सद्भृत्याः । योधाश्च वर्तन्तेखल्वितिशेषः ॥ ३० ॥ इतिद्विपञ्चाशः सर्गः ॥ ५२ ॥

[पा०] १ झ. ञ. कोपप्रशस्ताःसुभृताश्च. घ. कोट्यायुतास्तेसुहृदश्च. २ झ. ञ. ट. कृतोद्ययान्तु. क. ग. च. कृतोपयान्तु. ३ झ. ञ. ट. राजपुत्रावुपगृह्य. ४ घ. युद्धे. ५ घ. शत्रुर्दशाननो. ६ इदंश्लोकत्रयं ग. पाठेदृश्यते. ७ ङ. सतस्यवचनं. ८ ख.—ट. महात्मनः. ९ ग. घ. च. ज. ञ. दण्डेन. १० झ. ट. पश्यन्त्वमुं. ११ ङ. झ. ट. सुमित्रज्ञातयः. ख समित्राज्ञातयः. च. ज. मित्राणिज्ञातयः. घ. स्वमित्रज्ञातयः.

आज्ञापयद्राक्षसेन्द्रः पुरं सर्वं सचत्वरम् ॥ लाङ्गूलेन प्रदीप्तेन रक्षोभिः परिणीयताम् ॥ ५ ॥
तस्य तद्वचनं श्रुत्वा राक्षसाः कोपकर्शिताः ॥ वेष्टयन्ति स्म लाङ्गूलं जीर्णैः कार्पासकैः पटैः ॥ ६ ॥
संवेष्ट्यमाने लाङ्गूले व्यवर्धत महाकपिः ॥ शुष्कमिन्धनमासाद्य वनेष्विव हुताशनः ॥
तैलेन परिषिच्याथ तेऽग्निं तत्राभ्यपातयन् ॥ ७ ॥
लाङ्गूलेन प्रदीप्तेन राक्षसांस्तानपातयत् ॥ रोषामर्षपरीतात्मा बालसूर्यसमाननः ॥ ८ ॥
लाङ्गूलं संप्रदीप्तं तु द्रष्टुं तस्य हनूमतः ॥ सहस्त्रीबालवृद्धाश्च जग्मुः प्रीता निशाचराः ॥ ९ ॥
स भूयः संगतैः क्रूरै राक्षसैर्हरिसत्तमः ॥ निबद्धः कृतवान्वीरस्तत्कालसदृशीं मतिम् ॥ १० ॥
कामं खलु न मे शक्ता निबद्धस्यापि राक्षसाः ॥ छित्त्वा पाशान्समुत्पत्य हन्यामहमिमान्पुनः ॥११॥
यदि भर्तृहितार्थाय चरन्तं भर्तृशासनात् ॥ बध्नन्त्येते दुरात्मानो न तु मे निष्कृतिः कृता ॥१२॥
सर्वेषामेव पर्याप्तो राक्षसानामहं युधि ॥ किंतु रामस्य प्रीत्यर्थं विषहिष्येऽहमीदृशम् ॥ १३ ॥
लङ्का चारयितव्या वै पुनरेव भवेदिति ॥ रात्रौ न हि सुदृष्टा मे दुर्गकर्मविधानतः ॥ १४ ॥
अवश्यमेव द्रष्टव्या मया लङ्का निशाक्षये ॥ १५ ॥
कामं बद्धस्य मे भूयः पुच्छस्योद्दीपनेन च ॥ पीडां कुर्वन्तु रक्षांसि न मेऽस्ति मनसः श्रमः ॥१६॥

प्रदीप्तेन लाङ्गूलेन युक्तो हनुमान् सचत्वरं सर्वं पुरं परिणीयतां परितो नीयतां । इत्याज्ञापयदित्यन्वयः ॥ ५—७ ॥ अपातयत् लाङ्गूलभ्रामणेन अद्रावयदित्यर्थः ॥ ८—१० ॥ न मे शक्ताः न मे पर्याप्ता इत्यर्थः । मम निग्रहे नसमर्थाइतियावत् ॥ ११ ॥ भर्तृहितार्थाय रामहितार्थाय । चरन्तं प्रवर्तमानं । मामितिशेषः । भर्तृशासनात् रावणशासनात् । यदि बध्नन्ति । तावता मे निष्कृतिः प्रतिक्रिया । नकृता । इदं बन्धनमकिञ्चित्करमिति भावः ॥ १२ ॥ रामस्यप्रीत्यर्थमिदंविषहिष्ये । रावणादिवधस्य स्वेनैवकर्तव्यत्वेनरामाभिमतत्वाद्राक्षसानामहमीदृशं बन्धनाकर्षणादिरूपंपरिभवंसहिष्यइतिभावः । रामस्यप्रीत्यर्थमित्यत्र च्छन्दोभङ्गआर्षः ॥ १३ ॥ लङ्का रात्रौ दुर्गकर्मविधानतः दुर्गकर्मविधानाद्धेतोः । नहिसुदृष्टा नैवसुदृष्टा । यद्वा दुर्गकर्मविधानतः नगरगुप्तिविशेषज्ञानपूर्वकमित्यर्थः । नदृष्टेतिहेतोर्मया लङ्का पुनश्चारयितव्याभवेत् । विचरित्वा द्रष्टव्या भवेदित्यर्थः । अयं च प्रातःकालः नतूषःकालः । प्रातःकालेपि तथाव्यवहारोपपत्तेः ॥ १४—१५ ॥ मनसः श्रमइ-

---

ति० आरण्यकायथाशुष्कमिन्धनमासाद्यहुताशनमुत्पादयन्ति तथा जीर्णपटवेष्टितलाङ्गूलंतैलेपरिषिच्य तत्रतेग्निमुपपादयन् उदपादयन्नित्यर्थइतिकतकः । हुताशनइतिपाठे वृद्धौदृष्टान्तोऽयं । उपपादयन्नित्यस्यसमयोजयन्नित्यर्थइत्यन्ये ॥ ७ ॥ तान् बध्वानेतॄन् ॥ ८ ॥ ति० यदितांवधरूपांचिकीर्षुस्तदासर्वान्हनिष्याम्येवेत्याह—**सर्वेषामिति** । यदिपर्याप्तस्तर्हिंक्रियतांशत्रववधस्तत्राह—रामस्येति ॥ १३ ॥ ति० निशाक्षयइत्यनेन सीतासंभाषणार्थकतिपयदिनवासोगम्यते । तथाहि— फाल्गुनेरावणेनसीतापहारः । आश्विनशुक्लसमाप्तौहनुमत्प्रेरणयापक्षावधिदानेनवानरान्प्रतिदूतप्रेषणं । ततःकार्तिकशुक्लप्रतिपद्यन्वेषणार्थवानरप्रस्थानं । मार्गशुक्लदशम्यांसंपातिदर्शनं । तदासुग्रीवदत्तमासावधेर्गतत्वस्यवानरैरुक्तिः । अग्रएकादश्यांहनुमतोलङ्कागमनं । तद्रात्रिशेषेसीतादर्शनं । ततोद्वादश्यांदिनेस्थित्वारात्रौसीतायाःसम्यग्दर्शनं । तद्रात्रिशेषेतत्ररावणागमनं । तत्ररावणेन " मासान्द्वादशभामिनि " इतिस्वदत्तावधौमासद्वयावशेषवचनेकतिपयदिनाधिक्यंतुमासत्वानवच्छिन्नत्वेनाल्पान्तरत्वान्नविवक्षितं । ततस्त्रयोदश्यांप्रातःसीतयासहकथालापः । तद्दिनएवाशोकवनिकाभङ्गादि । चतुर्दश्यामक्षान्तवधोलङ्कादाहश्चपूर्णिमायांवा । पूर्ववासन्तिकवृक्षाणांपुष्पितत्वोक्तिस्तु तद्वर्षेक्षयमासेनोपपादिता उत्पातेनच । लक्ष्मणस्यसुग्रीवनिकटेप्रेषणसमयेरामेणमासचतुष्टयरूपकृतावधेरपगमोक्तिस्तु

[पा०] १ क. ख. ग. ङ.—ट. कोपकर्कशाः. घ. क्रोधमूर्च्छिताः. २ क. ख. ग. ङ. झ. ट. वेष्टन्ततस्यलाङ्गूलं. ३ क. ङ. झ. ट. तत्रोपपादयन्. घ. तत्रावपातयन्. ख. तत्राप्यपातयन्. च. ञ. तत्रप्रदीपयन्. ४ ख. सतुरोषपरीतात्मा. क. रोषामर्षपरीताक्षः. ५ ख. दृष्ट्वासर्वे. क. च. छ. ज. ञ. दृष्ट्वातस्यमहात्मनः. ६ क. छ.—ट. प्रीतिं. ७ क. संगतैर्वीरैः. ८ क. ख. घ. च. छ. ज. ञ. भर्तुर्हितार्थाय. ९ ङ. झ. ट. निबध्नन्ते. १० क. रामस्यकार्यार्थं. क. रामप्रियार्थंतु. ११ क. ख. ङ—ट. चारयितव्यामे. १२ क. ङ. झ. कुर्वन्ति.

ततस्ते संवृताकारं सत्त्ववन्तं महाकपिम् ॥ परिगृह्य ययुर्हृष्टा राक्षसाः कपिकुञ्जरम् ॥ १७ ॥
शङ्खभेरीनिनादैस्तं घोषयन्तः स्वकर्मभिः ॥ राक्षसाः क्रूरकर्माणश्चारयन्ति स्म तां पुरीम् ॥ १८ ॥
अन्वीयमानो रक्षोभिर्ययौ सुखमरिन्दमः ॥ हनुमांश्चारयामास राक्षसानां महापुरीम् ॥ १९ ॥
अथापश्यद्विमानानि विचित्राणि महाकपिः ॥ संवृतान्भूमिभागांश्च सुविभक्तांश्च चत्वरान् ॥२०॥
वीथीश्च गृहसंबाधाः कपिः शृङ्गाटकानि च ॥ तथा रथ्योपरथ्याश्च तथैव गृहकान्तरान् ॥
गृहांश्च मेघसंकाशान्ददर्श पवनात्मजः ॥ २१ ॥
चत्वरेषु चतुष्केषु राजमार्गे तथैव च ॥ घोषयन्ति कपिं सर्वे चारीक इति राक्षसाः ॥ २२ ॥
स्त्रीबालवृद्धा निर्जग्मुस्तत्र तत्र कुतूहलात् ॥ तं प्रदीपितलाङ्गूलं हनुमन्तं दिदृक्षवः ॥ २३ ॥
दीप्यमाने ततस्तस्य लाङ्गूलाग्रे हनूमतः ॥ राक्षस्यस्ता विरूपाक्ष्यः शंसुर्देव्यास्तदप्रियम् ॥ २४ ॥
यस्त्वया कृतसंवादः सीते ताम्रमुखः कपिः ॥ लाङ्गूलेन प्रदीप्तेन स एष परिणीयते ॥ २५ ॥
श्रुत्वा तद्वचनं क्रूरमात्मापहरणोपमम् ॥ वैदेही शोकसंतप्ता हुताशनमुपागमत् ॥ २६ ॥
मङ्गलाभिमुखी तस्य सा तदाऽऽसीन्महाकपेः ॥ उपतस्थे विशालाक्षी प्रयता हव्यवाहनम् ॥ २७ ॥
यद्यस्ति पतिशुश्रूषा यद्यस्ति चरितं तपः ॥ यदि चास्त्येकपत्नीत्वं शीतो भव हनूमतः ॥ २८ ॥
यदि किंचिदनुक्रोशस्तस्य मय्यस्ति धीमतः ॥ यदि वा भाग्यशेषो मे शीतो भव हनूमतः ॥२९॥
यदि मां वृत्तसंपन्नां तत्समागमलालसाम् ॥ स विजानाति धर्मात्मा शीतो भव हनूमतः ॥ ३० ॥
यदि मां तारयेदार्यः सुग्रीवः सत्यसङ्गरः ॥ अस्माद्दुःखाम्बुसंरोधाच्छीतो भव हनूमतः ॥ ३१ ॥
ततस्तीक्ष्णार्चिरव्यग्रः प्रदक्षिणशिखोऽनलः ॥ जज्वाल मृगशावाक्ष्याः शंसन्निव शिवं कपेः ॥ ३२ ॥

त्यनन्तरमितिकरणं बोध्यं ॥ १६ ॥ संवृताकारं गूढस्वभावं । महाकपिमिति बुद्ध्या महत्त्वं । कपिकुञ्जरमिति सजातीयश्रैष्ठ्यं ॥ १७ ॥ स्वकर्मभिः आस्फोटनसिंहनादैरित्यर्थः । तां पुरीं घोषयन्तः । अत्यन्तसंयोगे द्वितीया । चारयन्ति स्म तमिति शेषः ॥ १८ ॥ चारयामास शोधयामास ॥ १९ ॥ चत्वरान् गृहबहिरङ्गणानि ॥ २० ॥ शृङ्गाटकानि चतुष्पथानि । रथ्याः महावीथीः । उपरथ्याः अवान्तरवीथीः । गृहकान्तरान् गृहकाणि क्षुद्रगृहाणि अन्तराणि प्रच्छन्नद्वाराणि । अन्तर्द्वाराणीत्यर्थः । "तोरणोऽस्त्री बहिर्द्वारं प्रच्छन्नद्वारमन्तरं" इति वैजयन्ती । अक्लीबत्वमार्षं ॥ २१ ॥ चत्वरेषु चतसृणां रथ्यानां संभेदेषु । चतुष्केषु चतुस्स्तम्भमण्डपेषु । चार एव चारीकः । स्वार्थे कप्रत्ययः । आर्षो दीर्घः ॥ २२—२३ ॥ शंसुः शशंसुः । आर्षो द्विर्वचनाभावः ॥ २४ ॥ परिणीयते परितो नीयते ॥२५॥ उपागमत् उपासितवती ॥ २६ ॥ तस्य हनुमतः । मङ्गलाभिमुखी अदाहपरा । प्रयता शुद्धिमती । "पवित्रः प्रयतः पूतः" इत्यमरः ॥ २७ ॥ पतिशुश्रूषादिपदं तत्फलपरं । शीतो भव तेनेति शेषः । एकपत्नीत्वं पातिव्रत्यं ॥ २८ ॥ किंचिदनुक्रोश इति समस्तंपदं । तस्य रामस्य । भाग्यशेषः । इदानीं निरन्तरदुःखानुभवात् भाग्यप्रसक्तिरेवनास्तीतिमन्यमानाया इदं वचनं ॥ २९ ॥ मम पातिव्रत्यं यदि हनुमान् जानाति तदा शीतो भवेत्याह—यदि मामिति ॥ ३० ॥ यदि मां तारयेदिति । मत्तारणे इदमेव ज्ञापकमिति भावः ॥ ३१ ॥ ततः सीतोपगमात् । कपेरनलः कपिबालाग्निः । मृगशावाक्ष्याः सीतायाः । शुभं शंसन्निव प्रदक्षिणशिखो जज्वालेत्यन्वयः ॥३२॥

प्रागुपपादितरहस्यंतिदिक् । पुच्छस्योद्दीपनेनचेत्यस्योत्तरश्लोकेनान्वयः ॥ १५ ॥ ति० स्वकर्मभिः राजद्रोहिणोदुष्टस्यैवंदण्डइत्येवमादिभिः । घोषयन्तः । पूर्ववृत्तान्तस्यसर्वान्प्रतिप्रकटंप्रतिपादनंघोषणं ॥ १८ ॥ ति० एकपत्नीत्वं पातिव्रत्यं । शीतोभव हुता-

[पा०] १ क. ङ.—ट. रथ्याश्च. २ क. घ. पुरींसर्वे. ३ ङ. झ. ट. चारइत्येव. ४ क. घ. मुपासिता. ५ क. ग. घ. च. छ. कश्चिदनुक्रोशः. ६ क. ग. घ. च. छ. ज. अस्माद्दुःखान्महाबाहुश्शीतो.

हनुमज्जनकश्चापि पुच्छानलयुतोऽनिलः ॥ ववौ स्वास्थ्यकरो देव्याः प्रालेयानिलशीतलः ॥ ३३ ॥
[तां तदा परमोद्विग्नां सीतां शोकाभिकर्शिताम् ॥ हनूमति गृहीते तु रक्षोभिर्भीमविक्रमैः ॥
उवाच सरमा वाक्यं तामाश्वासयितुं तदा ॥ ३४ ॥
मा शुचो देवि वैदेहि हनूमन्तं महाकपिम् ॥ ३५ ॥
हत्वा तु रक्षिणः सर्वान्राक्षसांस्तत एव सः ॥ पुरीं लङ्कां दहति स साक्षादिव हुताशनः ॥
भवनाद्भवनं गच्छन्नसावत्यन्तवीर्यवान् ॥ ३६ ॥
प्रासादवरसंस्थाश्च गवाक्षस्थाश्च योषितः ॥ वह्निप्रदीप्तनयनास्तथा क्रन्दन्ति दुःखिताः ॥ ३७ ॥
एता वरविशालाक्ष्यो वह्निज्वालासमावृताः ॥ अपश्यन्त्यः क्वचित्स्थातुं सर्वतोऽग्निसमावृताः ॥
वह्नावभ्युत्पतन्त्याशु कर्तव्यं नैव जज्ञिरे ॥ ३८ ॥
अभिधावन्ति सहसा क्रोशन्त्यः सह बालकैः ॥ अवकुण्ठानि कृत्वा स वासोभिर्विष्ठितास्तदा ॥३९॥
स्तंभै राजतसौवर्णैः प्रवालमणिचारुभिः ॥ दृश्यन्तेऽग्निसमासक्ता वह्नौ वह्निरिवोद्यताः ॥
प्रासादमाला बहुधा अग्निदग्धाः पतन्ति हि ॥ ४० ॥
अर्चिषेव हिरण्यानां प्रभाभिः कृष्णवर्त्मनः ॥ दीप्यमाना इवाभाति लङ्केयं कालपर्यये ॥ ४१ ॥
क्वचिद्दग्धाः प्रदेशास्तु क्वचिद्दग्धा विनाशिताः ॥ बहुभौमा विभान्ति स्म गृहाणां भूमयः शुभाः ॥४२॥
कान्ताभिः सह वित्रस्ता दृश्यन्ते राक्षसास्तदा ॥ हाहेत्युच्चैर्वदन्ति स्म त्रातारं नाभिजज्ञिरे ॥ ४३ ॥
संप्रदीप्तां पुरीं लङ्कां हनुमद्वीर्यधर्षिताम् ॥ अन्तःपुराणि सर्वाणि दृष्ट्वा दुद्रुविरे तदा ॥ ४४ ॥
क्वचित्कुङ्कुमवर्णाभाः क्वचित्किंशुकसंनिभाः ॥ क्वचिन्मलिनसंकाशाः शिखा वह्नेश्चकाशिरे ॥ ४५ ॥
धूमेन संवृताः केचिद्गृहोद्देशाः सुशोभनाः ॥ वर्षाकाले तु संप्राप्ते घनैरिव नभस्स्थलम् ॥ ४६ ॥
देवि व्यपैतु ते त्रासो हनूमन्तं प्रति प्रिये ॥ दग्ध्वैव लङ्कां सुमहान्व्योम्नि वीरः प्रकाशते ॥
दीर्घैर्घनांबुसंरोधैर्मुक्तचन्द्र इवामलः ॥ ४७ ॥
एतच्छ्रुत्वाऽभवत्प्रीता सीता शशिनिभानना ॥ निर्वृतिं परमां प्राप्ता बाला स्वस्थाऽभवत्तदा ॥४८॥]
दह्यमाने च लाङ्गूले चिन्तयामास वानरः ॥ प्रदीप्तोऽग्निरयं कस्मान्न मां दहति सर्वतः ॥ ४९ ॥
दृश्यते च महाज्वालः करोति न च मे रुजम् ॥ शिशिरस्येव संपातो लाङ्गूलाग्रे प्रतिष्ठितः ॥५०॥
अथवा तदिदं व्यक्तं यद्दृष्टं प्लवता मया ॥ रामप्रभावादाश्चर्यं पर्वतः सरितां पतौ ॥ ५१ ॥
यदि तावत्समुद्रस्य मैनाकस्य च धीमतः ॥ रामार्थं संभ्रमस्तादृक्किमग्निर्न करिष्यति ॥ ५२ ॥

अनिलश्च पुच्छानलयुतोपि प्रालेयानिलशीतलः हिममारुतवच्छीतलस्सन् । देव्याः सीतायाः । स्वास्थ्यकरः सुखकरः । ववौ । अस्मात्परं दह्यमाने च लाङ्गूल इति श्लोकः । अनयोः श्लोकयोर्मध्ये केचन श्लोकाः कतिपयकोशेषु दृश्यन्ते । बहुकोशेष्वदर्शनादर्थाधिक्याभावाच्च ते अनादरणीयाः ॥ ३३—४९॥ रुजं पीडां । शिशिरस्येव संपातः शिशिरस्य चन्दनोशीरादेः संपातः संघट्ट इव स्थितः । अत्यन्तशीतल इत्यर्थः । एतेन हेतुविशेषं न पश्यामीत्युक्तं ॥ ५० ॥ हेतुविशेषान्निश्चिनोति—अथवेत्यादिना ॥ प्लवता मया सरितां पतौ । आर्षघिसंज्ञाकार्यं । समुद्रमध्ये । पर्वतः पर्वतरूपं यदाश्चर्यं अद्भुतरूपं वस्तु दृष्टं । तद्वदिदमग्नेः शैत्यं रामप्रभावात्संजातं व्यक्तं निश्चितं ॥ ५१ ॥ एतदेवोपपादयति—यदीति ॥ संभ्रमः

शनेतिशेषः । अस्याःसीताछायात्वेपिस्वस्मिंस्तदभेदबुद्धिसत्वान्नैतदुक्त्यसंगतिः ॥ २८ ॥ रामानु० हनुमज्जनकइति । अस्मात्परतोदह्यमानेचलाङ्गूलेइतिश्लोकः । अनयोःश्लोकयोर्मध्येसरमावाक्यभूताःकेचनश्लोकाःकतिपयकोशेषुदृश्यन्ते । बहुकोशेष्वदर्शनादर्थौचित्याभावाच्चतेअनादरणीयाः ॥ ३३ ॥ ति० ननुसमुद्रप्रेरणेनमैनाकोत्थानंयुज्यते अग्नेस्तुस्वभाववैपरीत्यंकुतस्तत्राह-

[पा०] १ तांतदापरमोद्विग्नामित्यारभ्य बालास्वस्थाऽभवत्तदेत्यन्ताःश्लोकाः घ. पाठेदृश्यन्ते.

सीतायाश्चानृशंस्येन तेजसा राघवस्य च ॥ पितुश्च मम सख्येन न मां दहति पावकः ॥ ५३ ॥
भूयः स[1] चिन्तयामास मुहूर्तं कपिकुञ्जरः ॥ [कथं[2]मस्मद्विधस्येह बन्धनं राक्षसाधमैः ॥
प्रतिक्रियाऽस्य युक्ता स्यात्सति मह्यं पराक्रमे ॥ ५४ ॥
ततश्छित्त्वा च तान्पाशान्वेगवान्वै महाकपिः ॥] उत्पपाताथ वेगेन ननाद च महाकपिः ॥५५॥
पुरद्वारं ततः श्रीमाञ्शैलशृङ्गमिवोन्नतम् ॥ विभक्तरक्षःसंबाधमाससादानिलात्मजः ॥ ५६ ॥
स भूत्वा शैलसंकाशः क्षणेन पुनरात्मवान् ॥ ह्रस्वतां परमां प्राप्तो बन्धनान्यवशातयत् ॥ ५७ ॥
विमुक्तश्चाभवच्छ्रीमान्पुनः पर्वतसन्निभः ॥ वीक्षमाणश्च ददृशे परिघं तोरणाश्रितम् ॥ ५८ ॥
स तं गृह्य महाबाहुः कालायसपरिष्कृतम् ॥ रक्षिणस्तान्पुनः सर्वान्सूदयामास मारुतिः ॥ ५९ ॥
स तान्निहत्वा रणचण्डविक्रमः समीक्षमाणः पुनरेव लङ्काम् ॥
प्रदीप्तलाङ्गूलकृतार्चिमाली प्रकाशतादित्य इवार्चिमाली ॥ ६० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

हनुमता लङ्कादहनस्यकार्यशेषत्वनिर्धारणेन स्ववालानलेनविभीषणभवनर्जं समग्रलङ्कादहनम् ॥ १ ॥ देवगन्धर्वादिभिर्लङ्कादहकदर्शनेन सविस्मयंहर्षाधिगमः ॥ २ ॥

वीक्षमाणस्ततो लङ्कां कपिः कृतमनोरथः ॥ वर्धमानसमुत्साहः कार्यशेषमचिन्तयत् ॥ १ ॥
किं नु खल्ववशिष्टं मे कर्तव्यमिह सांप्रतम् ॥ यदेषां रक्षसां भूयः संतापजननं भवेत् ॥ २ ॥
वनं तावत्प्रमथितं प्रकृष्टा राक्षसा हताः ॥ बलैकदेशः क्षपितः शेषं दुर्गविनाशनम् ॥ ३ ॥
दुर्गे विनाशिते कर्म भवेत्सुखपरिश्रमम् ॥ अल्पयत्नेन कार्येऽस्मिन्मम स्यात्सफलः श्रमः ॥ ४ ॥

त्वरा । किमग्निर्न करिष्यति संभ्रममिति शेषः । रामार्थं मैनाकस्य संभ्रमो यदि स्यादग्नेस्तादृशस्संभ्रमः कुतो न भविष्यतीत्यर्थः ॥ ५२ ॥ आनृशंस्येन दयया ॥ ५३ ॥ स चिन्तयामास अनन्तरकर्तव्यमितिशेषः ॥ ५४ ॥ चिन्तितमेवाह—उत्पपातेति ॥ ५५ ॥ विभक्तरक्षस्संबाधं निवृत्तरक्षस्संचारं ॥ ५६ ॥ अवशातयत् अवाशातयत अच्यावयदित्यर्थः ॥ ५७—५९ ॥ निहत्वा निहत्य । ल्यबभावआर्षः । लाङ्गूलकृतार्चिमाली लाङ्गूले कृतज्वालामालः । अर्चिमाली तेजःपुञ्जवानादित्य इव । प्रकाशत प्राकाशत । अनित्यत्वादडभावः । अर्चीतीकारान्तत्वमार्षं ॥ ६० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥

कृतमनोरथः पर्याप्तमनोरथः ॥१—२॥ बलैकदेशः सेनैकदेशः । क्षपितः नाशितः । दुर्गविनाशनं पुरविनाशनं । शेषं अवशिष्टं ॥ ३ ॥ कर्मपूर्वोक्तं वनभङ्गादिकं । समुद्रलङ्घनं दूत्यं वा । सुखपरिश्रमं सफलायासं । शक्यमेतदित्याह—अल्पयत्नेनेति । अस्मिन्कार्ये

यद्यीति ॥ तावदितिवाक्यालङ्कारे । रामार्थं रामोपकारार्थं । तादृक्संभ्रमोयदि आदरपूर्वकंत्वरायदि । तदा रामेणनित्यमुपासितोऽग्निः रामोपकारार्थं कथमपिशैत्यंकिंनकरिष्यतीत्यर्थः ॥ ५२ ॥ ति० प्रतिक्रिया लङ्कादहनरूपा । मह्यं मम ॥ ५४ ॥ शि० उत्पपात ननादच । क्रियाभेदात्कपिरितिनपौनरुक्त्यं ॥ ५५ ॥ स० विभक्तरक्षस्संबाधं नानाधिकारनियुक्तराक्षसनिबिडं ॥५६॥ स० रक्षिणः तोरणरक्षिणः ॥ ५९ ॥ इतित्रिपञ्चाशःसर्गः ॥ ५३ ॥

स० कर्म समुद्रतरणादिरूपं । सुखपरिश्रमं सुखयतीतिसुखतथा श्रमोयस्यतत् । अल्पयत्नेन पावकसंपादनाद्यायासरहितयत्नेन । मम स्वामिनइतिशेषः । श्रमः मत्प्रेषणरूपः । सफलः कीर्तिरूपफलसहितइत्यर्थः ॥ ति० अस्मिन् सीतान्वेषणप्रवृत्तिरूपे । कार्ये-

[पा०] १ क. ख. ग. ङ. छ. ज. ञ. ट. संचिन्तयामास. २ इदमर्धत्रयं. ङ.—ढ. पाठेषुदृश्यते.

यो ह्ययं मम लाङ्गूले दीप्यते हव्यवाहनः ॥ अस्य संतर्पणं न्याय्यं कर्तुमेभिर्गृहोत्तमैः ॥ ५ ॥
ततः प्रदीप्तलाङ्गूलः सविद्युदिव तोयदः ॥ भवनाग्रेषु लङ्काया विचचार महाकपिः ॥ ६ ॥
गृहाद्गृहं राक्षसानामुद्यानानि च वानरः ॥ वीक्षमाणो ह्यसंत्रस्तः प्रासादांश्च चचार सः ॥ ७ ॥
अवप्लुत्य महावेगः प्रहस्तस्य निवेशनम् ॥ अग्निं तत्र स निक्षिप्य श्वसनेन समो बली ॥ ८ ॥
ततोऽन्यत्पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान् ॥ मुमोच हनुमानग्निं कालानलशिखोपमम् ॥ ९ ॥
वज्रदंष्ट्रस्य च तथा पुप्लुवे स महाकपिः ॥ शुकस्य च महातेजाः सारणस्य च धीमतः ॥
तथा चेन्द्रजितो वेश्म ददाह हरियूथपः ॥ १० ॥
जम्बुमालेः सुमालेश्च ददाह भवनं ततः ॥ ११ ॥
रश्मिकेतोश्च भवनं सूर्यशत्रोस्तथैव च ॥ ह्रस्वकर्णस्य दंष्ट्रस्य रोमशस्य च रक्षसः ॥ १२ ॥
युद्धोन्मत्तस्य मत्तस्य ध्वजग्रीवस्य रक्षसः ॥ विद्युज्जिह्वस्य घोरस्य तथा हस्तिमुखस्य च ॥ १३ ॥
करालस्य पिशाचस्य शोणिताक्षस्य चैव हि ॥ कुम्भकर्णस्य भवनं मकराक्षस्य चैव हि ॥ १४ ॥
यज्ञशत्रोश्च भवनं ब्रह्मशत्रोस्तथैव च ॥ नरान्तकस्य कुम्भस्य निकुम्भस्य दुरात्मनः ॥ १५ ॥
वर्जयित्वा महातेजा विभीषणगृहं प्रति ॥ क्रममाणः क्रमेणैव ददाह हरिपुङ्गवः ॥ १६ ॥
तेषुतेषु महार्हेषु भवनेषु महायशाः ॥ गृहेष्वृद्धिमतामृद्धिं ददाह स महाकपिः ॥ १७ ॥
सर्वेषां समतिक्रम्य राक्षसेन्द्रस्य वीर्यवान् ॥ आससादाथ लक्ष्मीवान्रावणस्य निवेशनम् ॥ १८ ॥
ततस्तस्मिन्गृहे मुख्ये नानारत्नविभूषिते ॥ मेरुमन्दरसंकाशे सर्वमङ्गलशोभिते ॥ १९ ॥
प्रदीप्तमग्निमुत्सृज्य लाङ्गूलाग्रे प्रतिष्ठितम् ॥ ननाद हनुमान्वीरो युगान्तजलदो यथा ॥ २० ॥
श्वसनेन च संयोगादतिवेगो महाबलः ॥ कालाग्निरिव जज्वाल प्रावर्धत हुताशनः ॥ २१ ॥
प्रदीप्तमग्निं पवनस्तेषु वेश्मस्वचारयत् ॥ अभूच्छ्वसनसंयोगादतिवेगो हुताशनः ॥ २२ ॥
तानि काञ्चनजालानि मुक्तामणिमयानि च ॥ भवनान्यवशीर्यन्त रत्नवन्ति महान्ति च ॥ २३ ॥
तानि भग्नविमानानि निपेतुर्वसुधातले ॥ भवनानीव सिद्धानामंबरात्पुण्यसंक्षये ॥ २४ ॥

कृते सतीति शेषः ॥ ४ ॥ केनोपायेनेदं सुकरमित्याशङ्क्य तमाह—योहीति ॥ यः अग्निः । अतिशीतलतया मम महोपकारं कृतवान् अस्य संतर्पणं न्याय्यमित्यर्थः ॥ ५ ॥ अत्र बन्धविस्रंसनाय पूर्वं तनुसंकोचे कृतेपि कार्यार्थमग्निवर्तिः स्थापितेति बोध्यं । सविद्युदिव तोयद इति सर्वतआवृत्यसञ्चारे दृष्टान्तः ॥ ६–९ ॥ वज्रदंष्ट्रस्येत्यादि सार्धश्लोकः ॥ १० ॥ जम्बुमालेरित्यर्धं ॥ ११ ॥ रश्मिकेतोरित्यादिपञ्चश्लोकी ॥ १२—१५ ॥ प्रतिवर्जयित्वेति संबन्धः ॥ १६ ॥ भवनेष्विति गृहविशेषणं समृद्धिमत्परं । ऋद्धिं मणिमुक्ताप्रवालादिकां ॥ १७—१८ ॥ सर्वमङ्गलशोभिते सर्वमङ्गलद्रव्ययुक्ते ॥ १९—२० ॥ श्वसनेनेति । पूर्वं रावणादिभीतावश्यनिलौ इदानीं राक्षसक्षयं देवबलोदयं च प्रत्यासन्नं विदित्वा निश्शङ्कावभूतामिति

योमयाकृतःश्रमः सत्वल्पेनयत्नेन स्वल्पयत्नेनसाध्येनकरिष्यमाणलङ्कादाहेन सफलोभविष्यति ॥ ४ ॥ ति० तोयदः सन्ध्यातोयदः । हनुमतोरक्तवर्णत्वात् ॥ ६ ॥ ति० प्रहस्तस्यप्रधानमन्त्रित्वादादौतद्गृहेग्निप्रक्षेपः । प्रथमंतत्संभावनस्यौचित्यात् ॥ ८ ॥ स० कालानलशिखोपमं हनुमल्लाङ्गूलसंसर्गमाहात्म्येनजलाद्यशाम्यज्वालत्वेनैतदुपमता ॥ ९ ॥ स० प्रतिगृहंक्रमेणक्रममाणइत्यन्वयः । विभीषणगृहंवर्जयित्वा । अनेनविभीषणसाधुत्वमिवअन्योन्यसंलग्नतायामपिसद्मनांदाहतदभावयोर्हनुमदिच्छानुसारिप्रवृत्तिरग्नेश्चद्यो-

[पा०] १ क. ग. घ. सर्वेशः. २ ङ. झ. ट. तत्रविनिक्षिप्य. क.—घ. च. छ. तत्रैव. ३ ग. ङ.—ट. विशालस्य. ४ क. ग. ङ.—ट. महात्मनः. ५ ग. महाबाहुः. ६ घ. राक्षसानांच. ७ ङ—झ. ट. नानामङ्गल. ८ क. संदीप्तःप्रावर्धत.

संजज्ञे तुमुलः शब्दो राक्षसानां प्रधावताम् ॥ स्वगृहस्य परित्राणे भग्नोत्साहगतश्रियाम् ॥
नूनमेषोग्निरायातः कपिरूपेण हा इति ॥ २५ ॥
क्रन्दन्त्यः सहसा पेतुस्तनन्धयधराः स्त्रियः ॥ काश्चिदग्निपरीतेभ्यो हर्म्येभ्यो मुक्तमूर्धजाः ॥ २६ ॥
पतन्त्यो रेजिरेऽभ्रेभ्यः सौदामिन्य इवाम्बरात् ॥ २७ ॥
वज्रविद्रुमवैदूर्यमुक्तारजतसंहितान् ॥ विचित्रान्भवनान्धातून्स्यन्दमानान्ददर्श सः ॥ २८ ॥
नाग्निस्तृप्यति काष्ठानां तृणानां हरियूथपः ॥ नाग्नेर्नापि विशस्तानां राक्षसानां वसुन्धरा ॥ २९ ॥
क्वचित्किंशुकसंकाशाः क्वचिच्छाल्मलिसन्निभाः ॥ क्वचित्कुङ्कुमसंकाशाः शिखा वह्नेश्चकाशिरे ॥ ३० ॥
हनूमता वेगवता वानरेण महात्मना ॥ लङ्कापुरं प्रदग्धं तद्रुद्रेण त्रिपुरं यथा ॥ ३१ ॥

ततस्तु लङ्कापुरपर्वताग्रे समुत्थितो भीमपराक्रमोग्निः ॥
प्रसार्य चूडावलयं प्रदीप्तो हनूमता वेगवता विसृष्टः ॥ ३२ ॥
युगान्तकालानलतुल्यवेगः समारुतोग्निर्ववृधे दिविस्पृक् ॥
विधूमरश्मिर्भवनेषु सक्तो रक्षःशरीराज्यसमर्पितार्चिः ॥ ३३ ॥

भावः ॥ २१—२४ ॥ स्वगृहस्य परित्राणे भग्नोत्साहगतश्रियामिति पाठः । स्वगृहस्य परित्राणे भग्नोत्साहोर्जितश्रियामिति पाठे उत्साहश्च ऊर्जितश्रीश्च उत्साहोर्जितश्रियौ भग्ने उत्साहोर्जितश्रियौ येषामिति विग्रहः । स्वगृहस्य परित्राणे भग्नोत्साहानां श्रीमतां राक्षसानामिति वार्थः । हा इति "निपात एकाजनाङ्" इति प्रकृतिभावः ॥ २५ ॥ काश्चित् स्त्रियः हर्म्येभ्यः पेतुरिति संबन्धः । सुकेशवंश्यानां जननमात्रे रुद्रेण मातृतुल्यत्ववरप्रदानेपि तदितरेषु तदभावात् स्तनन्धयधरत्वं । अन्यजातीयाश्च राक्षसास्तत्र सन्त्येव ॥ २६ ॥ अम्बरात् पतन्त्यः अभ्रेभ्यो मेघेभ्यः पतन्त्यः सौदामिन्यः तडित इव रेजिरे ॥ २७ ॥ भवनानिति पुँल्लिङ्गत्वमार्षं । धातून् सुवर्णादीन् । "धातुस्तु गैरिके स्वर्णे" इति दर्पः । स्यन्दमानान् स्यन्दतः । अग्नितप्तत्वेन द्रवीभूतस्वर्णादीनित्यर्थः ॥ २८ ॥ काष्ठानां तृणानां चेति संबन्धसामान्ये षष्ठी । काष्ठैस्तृणैश्चेत्यर्थः । "पूरणगुण—" इत्यादिना षष्ठी वा । अग्निः काष्ठैस्तृणैश्च न तृप्यति । हरियूथपः अग्नेः न तृप्यति अग्निना न तृप्यति । अग्निप्रक्षेपणेन न तृप्यतीत्यर्थः । एवं वसुन्धराविशस्तानां राक्षसानां विशस्तैः राक्षसैः । न तृप्यतीति योज्यं । अनेन राक्षसशवाकीर्णा भूरभूदित्यर्थः ॥ २९ ॥ शिखाः ज्वालाः ॥ ३० ॥ ननु एतावत्पर्यन्तमल्पबलतयास्थितस्य हनुमतः कथमेतादृशी शक्तिरित्यत्राह—रुद्रेण त्रिपुरं यथेति । "विष्णुरात्मा भगवतो भवस्यामिततेजसः । तस्माद्धनुर्ज्यासंस्पर्शं स विषेहे महेश्वरे" इत्युक्तरीत्या विष्णवाप्यायिततेजसा रुद्रेण त्रिपुरं यथा दग्धं तथानेनेति भावः ॥ ३१ ॥ लङ्कापुरपर्वताग्रे लङ्कापुराधारत्रिकूटशिखरे । तद्वर्तित्वात्तस्यास्तथानिर्देशः । पर्वताग्रस्थलङ्कापुर इति परनिपातो वा । चूडावलयं ज्वालाजालमित्यर्थः । तत् प्रसार्य । विस्तार्य । प्रदीप्तः विसृष्टः । गृहेष्विति शेषः ॥ ३२ ॥ दिविस्पृक् अभ्रंलिहः "हलदन्तात्सप्तम्याः संज्ञायाम्" इति सप्तम्या अलुक् । रक्षश्शरीराज्यसमर्पितार्चिः

ते ॥ १६ ॥ **रामानु०** नाग्निरिति । "तृणानांचयथातथा । हनुमात्राक्षसेन्द्राणांवधेकिंचिन्नतृप्यति । नहनूमद्विशस्तानांराक्षसानांवसुन्धरा" इतिपाठः ॥ **स०** यथाग्निर्नतृप्यति तथा हनुमान्राक्षसानांवह्निनावधेसतिकिंचिन्नतृप्यति स्वल्पंवानतृप्यति । यद्वा एवंबहुवधेसत्यपिकिंचिदिदमितिनतृप्यति ॥ **शि०** यथाकाष्ठादीनां दाहेइतिशेषः । अग्निःकिञ्चिन्नतृप्यति । तथा राक्षसेन्द्राणांवधेहनुमान्नतृप्यति । सकलराक्षसवधमिच्छतीत्यर्थः । तेनसीतादुःखदर्शनासहिष्णुत्वंव्यञ्जितं । हनूमद्विशस्तानांराक्षसानां धारणे निशेषः । वसुन्धराचनतृप्यति । निहतसर्वराक्षसधारणमाकाङ्क्षतीत्यर्थः । तेनपतिवियोगजनितस्वसुतादुःखहेतुकदुःखाक्रान्तत्वं

[पा०] १ ङ. च. ज.—ट. स्वेस्वेगृहपरित्राणे. २ क. च. झ. ञ. ट. भग्नोत्साहोज्झितश्रियां. ३ क. घ. ङ. झ. ट. गिताङ्गयो. ४ घ. संनिभान्. ५ च.—ट. तृणानांचयथातथा. एतदनन्तरं क.—घ. च. झ. ट. पाठेषु हनूमात्राक्षसेन्द्राणां वधेकिंचिन्नतृप्यति. इत्यर्धमधिकंदृश्यते. ६ च.—ट. नहनूमद्विशस्तानां. ७ छ. झ. ट. वेगवतोपसृष्टः. ८ ङ.—ट. तुल्यरूपः. घ. गगनेषु.

[स[1] तामत्यर्थतो वह्निर्लङ्कां राक्षससंकुलाम् ॥ ज्वालामालापरिक्षेपैरदहन्मारुतात्मजः ॥ ३४ ॥
तेन शब्देन वित्रस्ता धर्षितास्तेन चाग्निना ॥ अभिपेतुस्तदा घोरा हनूमन्तं निशाचराः ॥ ३५ ॥
तं प्रदीप्तैश्च शूलाग्रैः प्रासैः खङ्गैः परश्वधैः ॥ हनूमन्तं महावेगैरक्षिपन्नैर्ऋतर्षभाः ॥ ३६ ॥
ते राक्षसा भीमबला नानाप्रहरणान्विताः ॥ निहत्य च स तांस्तत्र दिवमेवोत्पपात ह ॥ ३७ ॥
स च विक्रम्य सहसा संक्रामंश्च गृहाद्गृहम् ॥ लङ्कामादीपयामास वायुपुत्रः प्रतापवान् ॥ ३८ ॥
स लाङ्गूलोपसक्ताग्निर्मुक्तो मृत्युगृहादिव ॥ लङ्कां पर्यदहत्कृत्स्नां खे ग्रहः संपतन्निव ॥ ३९ ॥
तोरणेषु गवाक्षेषु रम्येषु शिखरेषु च ॥ तिष्ठन्ति स्म प्रपश्यन्ति राक्षसाः प्लवगोत्तमम् ॥ ४० ॥

हुताशनज्वालसमावृता सा हतप्रवीरा हतसर्वशोभना ॥
हनूमतः क्रोधबलाभिभूता बभूव कालोपहतेव लङ्का ॥ ४१ ॥
ससंभ्रमत्रस्तविशस्तराक्षसां समुज्ज्वलज्ज्वालहुताशनाङ्किताम् ॥
ददर्श लङ्कां हनुमान्महामनाः स्वयंभुवः कोपहतामिवावनिम् ॥ ४२ ॥
गृहाग्र्यशृङ्गाग्रतले विचित्रे प्रतिष्ठितो वानरराजसिंहः ॥
प्रदीप्तलाङ्गूलकृतार्चिमाली व्यराजतादित्य इवार्चिमाली ॥ ४३ ॥]
आदित्यकोटीसदृशः सुतेजा लङ्कां समाप्तां[2] परिवार्य तिष्ठन् ॥
शब्दैरनेकैरशनिप्ररूढै[3]र्भिन्दन्निवाण्डं प्रबभौ महाग्निः ॥ ४४ ॥
तत्राम्बरादग्निरतिप्रवृद्धो रूक्षप्रभः किंशुकपुष्पचूडः ॥
निर्वाणधूमाकुलराजयश्च नीलोत्पलाभाः प्रचकाशिरेऽभ्राः ॥ ४५ ॥
वज्री महेन्द्रस्त्रिदशेश्वरो वा साक्षाद्यमो वा वरुणानिलौ वा ॥
रुद्रोऽग्निरर्को धनदश्च सोमो न वानरोयं स्वयमेव कालः ॥ ४६ ॥
किं ब्रह्मणः सर्वपितामहस्य सर्वस्य धातुश्चतुराननस्य[4] ॥
इहागतो वानररूपधारी रक्षोपसंहारकरः प्रकोपः ॥ ४७ ॥

रक्षश्शरीराण्येवाज्यानि तैस्समार्पितार्चिः उत्थापितज्वालः ॥ ३३—४३ ॥ समाप्तां निःशेषां । अशनिप्ररूढैः अशनिवन्निष्ठुरैः । अण्डं ब्रह्माण्डं ॥ ४४ ॥ अम्बरात् अम्बरपर्यन्तं । किंशुकपुष्पचूडः तत्तुल्यशिखः । निर्वाणधूमाकुलराजयः पूर्वपूर्वदग्धभवनाग्निनिर्वाणसमयोत्थितधूमैर्व्याप्तपङ्क्तयः । अतएव नीलोत्पलाभाः निर्वाणधूमानां नीलवर्णत्वादितिभावः । अभ्राः मेघाः । पुँल्लिङ्गत्वमार्षं ॥४५॥ अथ रक्षोवचनं—वज्रीत्यादि ॥ महेन्द्रः । वज्रीत्यादिविशेषणं सामर्थ्यविशेषद्योतनार्थं । उत्तरत्राप्येवमेवगतिः । यमकालयोर्मूर्तिभेदान्नपुनरुक्तिः । रक्षोपसंहारकरइत्यत्र आर्षस्सलोपः । प्रकोपः प्रकोपकृतमूर्तिविशेषः ॥४६॥ किं वैष्णवमिति । अत्राद्यो वाशब्दोवधारणे । "वा स्याद्विकल्पोपमयोरेवार्थे चसमुच्चये " इतिविश्वः । द्वितीयो वितर्के । अनन्तं त्रिविधपरिच्छेदरहितं । अव्यक्तं चक्षुराद्यगोचरं । अचिन्त्यं केवलमनसोप्यविषयं

तस्यास्सूचितं ॥ २९ ॥ ती० सतामिति । वह्निः ज्वालामालापरिक्षिप्तैः ज्वालासमूहानांप्रसारणैः । लङ्कामत्यर्थमदहदितिसंबन्धः ॥३४॥ ती० सः हनुमान् ॥३७॥ ती० सचेति । संक्रामन् गच्छन् ॥ ३८ ॥ ती० सइति । लाङ्गूलोपसक्ताग्निः लाङ्गूलोत्थितोग्निः । मृत्युगृहान्मुक्तइवतथाऽतिभीकरइत्यर्थः ॥ ३९ ॥ ती० हुताशनेति । कालोपहतेव प्रलयकालोपहतेव ॥ ४१ ॥ शि० गृहाग्र्यशृङ्गाग्रतले गृहाग्र्याणां गृहश्रेष्ठानां शृङ्गाग्र्यतले परप्रासादभूमौ । प्रतिष्ठितः अर्चिमालीआदित्यइव प्रदीप्तलाङ्गूलकृतार्चिमालीवानरराजसिंहः व्यराजत । अतएव निर्देशादर्चिशब्दोप्यस्तीतिप्रतीयते ॥ ४३ ॥

[पा०] १ सतामत्यर्थतोवह्निरित्यादयः व्यराजतादित्यइवार्चिमालीत्यन्ताःश्लोकाः च. छ. ज. पाठेदृश्यन्ते. २ क. घ ङ. झ. ञ. ट. समस्तां. ३ ख. घ. रशनिप्रकाशैः. ४ ङ—ट. लोकस्यधातुः.

किं वैष्णवं वा कपिरूपमेत्य रक्षोविनाशाय परं सुतेजः ॥
अनन्तमव्यक्तमचिन्त्यमेकं स्वमायया सांप्रतमागतं वा ॥ ४८ ॥
इत्येवमूचुर्बहवो विशिष्टा रक्षोगणास्तत्र समेत्य सर्वे ॥
सप्राणिसङ्घां सगृहां सवृक्षां दग्धां पुरीं तां सहसा समीक्ष्य ॥ ४९ ॥
ततस्तु लङ्का सहसा प्रदग्धा सराक्षसा साश्वरथा सनागा ॥
सपक्षिसङ्घा समृगा सवृक्षा रुरोद दीना तुमुलं सशब्दम् ॥ ५० ॥
हा तात हा पुत्रक कान्त मित्र हा जीवितं भोगयुतं सुपुण्यम् ॥
रक्षोभिरेवं बहुधा ब्रुवद्भिः शब्दः कृतो घोरतरः सुभीमः ॥ ५१ ॥
हुताशनज्वालसमावृता सा हतप्रवीरा परिवृत्तयोधा ॥
हनूमतः क्रोधबलाभिभूता बभूव शापोपहतेव लङ्का ॥ ५२ ॥
स संभ्रमत्रस्तविषण्णराक्षसां समुज्ज्वलज्वालहुताशनाङ्किताम् ॥
ददर्श लङ्कां हनुमान्महामनाः स्वयंभुकोपोपहतामिवावनिम् ॥ ५३ ॥
भङ्क्त्वा वनं पादपरत्नसंकुलं हत्वा तु रक्षांसि महान्ति संयुगे ॥
दग्ध्वा पुरीं तां गृहरत्नमालिनीं तस्थौ हनूमान्पवनात्मजः कपिः ॥ ५४ ॥
त्रिकूटशृङ्गाग्रतले विचित्रे प्रतिष्ठितो वानरराजसिंहः ॥
प्रदीप्तलाङ्गूलकृतार्चिमाली व्यराजतादित्य इवांशुमाली ॥ ५५ ॥
स राक्षसांस्तान्सुबहूंश्च हत्वा वनं च भङ्क्त्वा बहुपादपं तत् ॥
विसृज्य रक्षोभवनेषु चाग्निं जगाम रामं मनसा महात्मा ॥ ५६ ॥
ततो महात्मा हनुमान्मनस्वी निशाचराणां क्षतकृत्कृतार्थः ॥
रामस्य नाथस्य जगत्त्रयाणां श्रीपादमूलं मनसा जगाम ॥ ५७ ॥
ततस्तु तं वानरवीरमुख्यं महाबलं मारुततुल्यवेगम् ॥
महामतिं वायुसुतं वरिष्ठं प्रतुष्टुवुर्देवगणाश्च सर्वे ॥ ५८ ॥
भङ्क्त्वा वनं महातेजा हत्वा रक्षांसि संयुगे ॥ दग्ध्वा लङ्कापुरीं रम्यां रराज स महाकपिः ॥ ५९ ॥

एकं अद्वितीयं । यद्वैष्णवं सुतेजः पूज्यं धाम तदेव स्वमायया स्वासाधारणयाश्चर्यशक्त्या । कपिरूपमेत्य सांप्रतमागतं वा इतियोजना । वैष्णवमिति स्वार्थे अण् । विष्णुशरीरान्तर्वर्तीतिवार्थः ॥ ४७ ॥ विशिष्टाः ...नाधिकाः ॥ ४८—५० ॥ युगपदेव शोके दूराह्वाने ... हाशब्दो वर्तते । हा जीवितमित्यत्र संबुद्ध्यलोप आर्षः । हतमितिशेषइत्यन्ये । "अभितःपरितस्समया-...कपाहाप्रतियोगे" इति द्वितीया वा । दरिद्रैरशो-...यत्वाद्रिशिनष्टि—भोगयुतं सुपुण्यमिति । सुखाढ्यं सुकृतैकफलं चेत्यर्थः । घोरतरः तीव्रतरः । अतएव सुभीमः भयङ्करः ॥ ५१ ॥ परिवृत्तयोधा परिवृत्तभटा ॥ ५२ ॥ हनुमान्महामना इतिपाठः । हनुमान्महात्मेति पाठे विषमवृत्तं वा । स्वयंभुकोपोपहतां प्रलये भगवता दग्धामित्यर्थः ॥ ५३ ॥ रत्नशब्दः श्रेष्ठवाची । तस्थौ संकल्पितकार्यस्य परिसमाप्तत्वादुपरतोद्योगो भूदित्यर्थः ॥ ५४—५५ ॥ जगाम रामं मनसेति । कृतकृत्यत्वाद्रामं गन्तुमियेषेत्यर्थः ॥ ५६—५७ ॥ वरिष्ठमिति । बलवतामिति शेषः

रामानु० रराजसमहाकपिरित्यतःपरमुत्तरसर्गादिभूतो "लङ्कांसमस्तांसंदीप्य" इत्ययंश्लोकःकेषुचित्कोशेषुप्रमादाल्लिखितः ५९ ॥ इतिचतुःपञ्चाशः सर्गः ॥ ५४ ॥

[पा०] १ ख. सुमृशंसुशब्दं. २ ङ. झ. जीवितेशाङ्गहतं. ३ ख. द्रवद्भिः. ४ ङ. झ. रोषोपहतां. ५ ग. महाद्रि. अयंश्लोकः क. घ. पाठयोर्दृश्यते.

तत्र देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ दृष्ट्वा लङ्कां प्रदग्धां तां विस्मयं परमं गताः ॥ ६० ॥
तं दृष्ट्वा वानरश्रेष्ठं हनुमन्तं महाकपिम् ॥ कालाग्निरिति सञ्चिन्त्य सर्वभूतानि तत्रसुः ॥ ६१ ॥
देवाश्च सर्वे मुनिपुङ्गवाश्च गन्धर्वविद्याधरनागयक्षाः ॥
भूतानि सर्वाणि महान्ति तत्र जग्मुः परां प्रीतिमतुल्यरूपाम् ॥ ६२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुःपञ्चाशः सर्गः ॥ ५४ ॥

पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

लङ्कायानिश्शेषभस्मीभावावलोकनेन सीतायाअपिदाहसंभावनयाऽऽत्मधिक्कारपूर्वकंसशोकंबहुधाचिन्तयताहनुमतासिद्धचारणभाषणश्रवणादिना तस्यादाहाभावनिर्धारणेन हर्षाधिगमः ॥ १ ॥

लङ्कां समस्तां संदीप्य लाङ्गूलाग्निं महाबलः ॥ निर्वापयामास तदा समुद्रे हरिसत्तमः ॥ १ ॥
संदीप्यमानां विध्वस्तां त्रस्तरक्षोगणां पुरीम् ॥ अवेक्ष्य हनुमाँल्लङ्कां चिन्तयामास वानरः ॥ २ ॥
तस्याभूत्सुमहांस्त्रासः कुत्सा चात्मन्यजायत ॥ लङ्कां प्रदहता [1]कर्म किंस्वित्कृतमिदं मया ॥ ३ ॥
[2]धन्यास्ते पुरुषश्रेष्ठा ये बुद्ध्या कोपमुत्थितम् ॥ निरुन्धन्ति महात्मानो दीप्तमग्निमिवाम्भसा ॥ ४ ॥
क्रुद्धः पापं न कुर्यात्कः क्रुद्धो हन्याद्गुरूनपि ॥ क्रुद्धः परुषया वाचा नरः साधूनधिक्षिपेत् ॥ ५ ॥
वाच्यावाच्यं प्रकुपितो न विजानाति कर्हिचित् ॥ नाकार्यमस्ति क्रुद्धस्य नावाच्यं विद्यते क्वचित् ॥६॥
यः समुत्पतितं क्रोधं क्षमयैव निरस्यति ॥ यथोरगस्त्वचं जीर्णां स वै पुरुष उच्यते ॥ ७ ॥
धिगस्तु मां सुदुर्बुद्धिं निर्लज्जं पापकृत्तमम् ॥ अचिन्तयित्वा तां सीतामग्निदं स्वामिघातकम् ॥८॥
यदि [3]दग्धा त्वियं लङ्का नूनमार्यापि जानकी ॥ दग्धा तेन मया भर्तुर्हतं कार्यमजानता ॥ ९ ॥
यदर्थमयमारम्भस्तत्कार्यमवसादितम् ॥ मया हि दहता लङ्कां न सीता परिरक्षिता ॥ १० ॥
ईषत्कार्यमिदं कार्यं कृतमासीन्न संशयः ॥ तस्य क्रोधाभिभूतेन मया मूलक्षयः कृतः ॥ ११ ॥
विनष्टा जानकी नूनं न ह्यदग्धः प्रदृश्यते ॥ लङ्कायां कश्चिदुद्देशः सर्वा भस्मीकृता पुरी ॥ १२ ॥

॥ ५८—६१ ॥ परामित्यस्य विवरणं—अतुल्यरूपामिति । अस्मिन्सर्गे एकपञ्चाशच्छ्लोकाः । ततो महात्मेति श्लोकः स राक्षसानिति श्लोकोक्तार्थकतया बहुकोशेष्वदर्शनाच्च प्रक्षिप्तः । बहुकोशेष्वेतत्सर्गसमाप्तिविपर्ययः उत्तरसर्गारम्भविपर्ययश्च दृश्यते ॥६२॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुःपञ्चाशः सर्गः ॥ ५४ ॥

लाङ्गूलाग्निं समुद्रे निर्वापयामासेत्यन्वयः ॥१-२॥ कुत्सा निन्दा ॥ ३—८ ॥ जानक्यपि यदि दग्धेत्यन्वयः ॥ ९—१० ॥ इदं कार्यं अन्वेषणपूर्वकरावणनिलयपरिज्ञानसीतादर्शनतन्निवेदनरूपं महत्कार्यं । ईषत्कार्यं ईषदवशिष्टकार्यं । असमग्रप्रायमेवकृतमासीत् । रामनिवेदनमात्रावशेषं कृतमासीदित्यर्थः । किंत्विदानीं क्रोधाभिभूतेन क्रोधान्धेन । मया तस्य कार्यस्य । मूलक्षयःकृतः न संशयः । विफलीकृतमित्यर्थः ॥ ११ ॥ सीतानाशे तत्तथैव सएव तु कुत

ति० उक्तकुत्सितकार्यमूलंकोपएवेतिनिश्चित्यतद्रहितान्स्तौति—धन्याइति । दुःखातिशयादेवमहात्मपदपौनरुक्त्यंनदोषाय ॥४॥ ति० क्रुद्धःपापंनकुर्याद्यइतिपाठे क्रुद्धोयःकश्चित्पापंकुर्यान्न । नञिकाकुः । अपितुकुर्यादेव । अकरणमशक्यमेवेत्यर्थः । तदेवदर्शयति—**क्रुद्धोहन्यादिति** ॥५॥ शि० सीतामचिन्तयित्वा विस्मृत्य अन्यत्रानीतत्वेत्यर्थः। अग्निदं अग्नयेददाति अग्निंददातिव·

[पा०] १ ङ. झ. ञ. ट. कामं. २ ङ. छ.—ञ. धन्याःखलुमहात्मानो. ३ च. झ. ञ. ट. लङ्कात्वियंसर्वा.

यदि तद्विहतं कार्यं मम प्रज्ञाविपर्ययात् ॥ इहैव प्राणसंन्यासो ममापि ह्यद्य रोचते ॥ १३ ॥
किमग्नौ निपताम्यद्य आहोस्विद्वडबामुखे ॥ शरीरमाहो सत्त्वानां दद्मि सागरवासिनाम् ॥ १४ ॥
कथं हि जीवता शक्यो मया द्रष्टुं हरीश्वरः ॥ तौ वा पुरुषशार्दूलौ कार्यसर्वस्वघातिना ॥ १५ ॥
मया खलु तदेवेदं रोषदोषात्प्रदर्शितम् ॥ प्रथितं त्रिषु लोकेषु कपित्वमनवस्थितम् ॥ १६ ॥
धिगस्तु राजसंभावमनीशमनवस्थितम् ॥ ईश्वरेणापि यद्रागान्मया सीता न रक्षिता ॥ १७ ॥
विनष्टायां तु सीतायां तावुभौ विनशिष्यतः ॥ तयोर्विनाशे सुग्रीवः सबन्धुर्विनशिष्यति ॥ १८॥
एतदेव वचः श्रुत्वा भरतो भ्रातृवत्सलः ॥ धर्मात्मा सहशत्रुघ्नः कथं शक्ष्यति जीवितुम् ॥ १९ ॥
इक्ष्वाकुवंशे धर्मिष्ठे गते नाशमसंशयम् ॥ भविष्यन्ति प्रजाः सर्वाः शोकसंतापपीडिताः ॥ २० ॥
तदहं भाग्यरहितो लुप्तधर्मार्थसंग्रहः ॥ रोषदोषपरीतात्मा व्यक्तं लोकविनाशनः ॥ २१ ॥
इति चिन्तयतस्तस्य निमित्तान्युपपेदिरे ॥ पूर्वमप्युपलब्धानि साक्षात्पुनरचिन्तयत् ॥ २२ ॥
अथवा चारुसर्वाङ्गी रक्षिता स्वेन तेजसा ॥ न नशिष्यति कल्याणी नाग्निरग्नौ प्रवर्तते ॥ २३ ॥
नहि धर्मात्मनस्तस्य भार्याममिततेजसः ॥ स्वचारित्राभिगुप्तां तां स्प्रष्टुमर्हति पावकः ॥ २४ ॥
नूनं रामप्रभावेन वैदेह्याः सुकृतेन च ॥ यन्मां दहनकर्माऽयं नादहद्धव्यवाहनः ॥ २५ ॥
त्रयाणां भरतादीनां भ्रातॄणां देवता च या ॥ रामस्य च मनःकान्ता सा कथं विनशिष्यति ॥२६॥
यद्वा दहनकर्माऽयं सर्वत्र प्रभुरव्ययः ॥ न मे दहति लाङ्गूलं कथमार्यां प्रधक्ष्यति ॥ २७ ॥
पुनश्चाचिन्तयत्तत्र हनुमान्विस्मितस्तदा ॥ हिरण्यनाभस्य गिरेर्जलमध्ये प्रदर्शनम् ॥ २८ ॥
तपसा सत्यवाक्येन अनन्यत्वाच्च भर्तरि ॥ अपि सा निर्दहेदग्निं न तामग्निः प्रधक्ष्यति ॥ २९ ॥
स तथा चिन्तयंस्तत्र देव्या धर्मपरिग्रहम् ॥ शुश्राव हनुमान्वाक्यं चारणानां महात्मनाम् ॥ ३० ॥
अहो खलु कृतं कर्म दुष्करं हि हनूमता ॥ अग्निं विसृजताऽभीक्ष्णं भीमं राक्षसवेश्मनि ॥ ३१ ॥

इत्यत्राह—विनष्टेति ॥ १२ ॥ विहतं यदि सीतानाशाद्विनष्टं यदि । प्राणसंन्यासः प्राणत्यागः ॥ १३—१५ ॥ कपित्वं कापेयं । अनवस्थितं चापलात्मकमित्यर्थः ॥ १६ ॥ राजसंभावं रजोगुणनिबन्धनचेष्टाविशेषं । अनीशं नियामकरहितं । स्वतन्त्रमिति यावत् । अनवस्थितं कुर्वत्स्वभावं । ईश्वरेणापि रक्षणसमर्थेनापि । रागात् मात्सर्यात् । "रागोनुरागे मात्सर्ये रक्तवर्णे कुसुम्भके" इतियादवः । यद्वा रागात् रजोगुणात् । आग्रहादिति यावत् ॥१७–२१॥ निमित्तान्युपपेदिरे शुभशंसिनिमित्तानि प्रादुर्बभूवुरित्यर्थः ॥ २२ ॥ एवं लोकदृष्ट्याऽनर्थमाशङ्क्य तत्त्वदृष्ट्या समाधत्ते—अथवेत्यादिना ॥ नाग्निरग्नौ प्रवर्तते । अग्निरग्निं न दहतीत्यर्थः ॥ २३—२४ ॥ दहनकर्मा भस्मीकरणस्वभावः । यत्प्रभावादयं मां

स्तुमात्रेक्षिपतिवासतं ॥ ८ ॥ **ति०** बडबामुखेअग्नावित्यन्वयः । दद्मि ददामि ॥ **स०** अग्नौ मन्निहितलङ्काग्नौ । बडबामुखे समुद्रान्तर्गतेवाऽग्नौ । बडबामुखेऽग्नावित्यन्वयेनिरर्थकताऽऽहोस्वितः । यदिप्राचीनप्राणन्यासेन समुच्चयायतदित्युच्यतेतर्हिकिमित्यस्यपूर्वार्धेविकल्पसूचकत्वेनाहोस्विदित्यस्योत्तरार्धेऽन्वयस्यवक्तव्यतयाआहोइत्यस्यवैयर्थ्यस्यदुर्वारत्वापत्तेः ॥ १३ ॥ **स०** तदेव कपित्वं सीतयापूर्वोक्तं । अनवस्थितं अव्यवस्थितं ॥ १६ ॥ **स०** त्रयाणांभरतादीनां । भरतस्यराज्येऽधिकृतत्वात्प्रथमतउक्तिः । तज्ज्यैष्ठ्यपक्षे नानुपपत्तिः । देवता तद्वत्पूज्या ॥ २६ ॥ **ती०** देवीप्रभावात्सिन्धौमद्विश्रान्तिनिमित्तगिरिदर्शनहेतुनापिदेवीमग्निर्नदहतीत्याह—पुनश्चेति ॥ तत्र तस्मिन्समये । विस्मितोहनुमान् जलमध्ये सागरान्तर्देशे । हिरण्यनाभस्यगिरेःप्रदर्शनं पुनरचिन्तयत् । एतेन पर्वतादीनामपिसर्वेषांरामाज्ञावशवर्तित्वंसूचितं । तेन सीतायानाग्नेर्भीतिरितिसूचितं ॥ २८ ॥ **स०** सहनुमान् । धारकत्वाद्धर्मोभगवान्रामः । तत्परिग्रहं भार्यां । चिन्तयन् देव्याविषयेचारणानां शुश्राव । वचइतिशेषः । धर्मपरिग्रहं रक्षकधर्मसंपत्तिंवा ॥ ३० ॥

[पा०] १ झ. ञ. शरीरमिह. २ ग. च. छ. झ. ञ. ट. मसंशयः. ३ ङ. झ. ञ. ट. असौविनिर्दहेत्. ग. अथसा. ४ झ. ञ. ट. हनुमांस्तत्र.

प्रपलायितरक्षस्स्त्रीबालवृद्धसमाकुला ॥ जनकोलाहलाध्माता क्रन्दन्तीवाद्रिकन्दरे ॥ ३२ ॥
दग्धेयं नगरी सर्वा साट्टप्राकारतोरणा ॥ जानकी न च दग्धेति विस्मयोऽद्भुत एव नः ॥ ३३ ॥
इति शुश्राव हनुमान्वाचंताममृतोपमाम् ॥ बभूव चास्य मनसो हर्षस्तत्कालसंभवः ॥ ३४ ॥
स निमित्तैश्च दृष्टार्थैः कारणैश्च महागुणैः ॥ ऋषिवाक्यैश्च हनुमानभवत्प्रीतमानसः ॥ ३५ ॥
ततः कपिः प्राप्तमनोरथार्थस्तामक्षतां राजसुतां विदित्वा ॥
प्रत्यक्षतस्तां पुनरेव दृष्ट्वा प्रतिप्रयाणाय मतिं चकार ॥ ३६ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

षट्पञ्चाशः सर्गः ॥ ५६ ॥

हनुमता शिंशुपामूलमेत्य सीतांप्रत्यभिवादनसमाश्वासनसमापृच्छनपूर्वकं सागरोत्तरतीरगमनायारिष्टगिरिसमारोहणम् ॥ १ ॥ तथा स्वचरणनिपीडनात्तद्गिरिवरस्य रसातलप्रवेशनेनततस्समुत्पतनम् ॥ २ ॥

ततस्तु शिंशुपामूले जानकीं पर्यवस्थिताम् ॥ अभिवाद्याब्रवीद्दिष्ट्या पश्यामि त्वामिहाक्षताम् ॥ १ ॥
ततस्तं प्रस्थितं सीता वीक्षमाणा पुनः पुनः ॥ भर्तृस्नेहान्वितं वाक्यं हनुमन्तमभाषत ॥ २ ॥
[यदि त्वं मन्यसे तात वसैकाहमिहानघ ॥ क्वचित्सुसंवृते देशे विश्रान्तः श्वो गमिष्यसि ॥ ३ ॥
मम चैवाल्पभाग्यायाः सांनिध्यात्तव वानर ॥ शोकस्यास्याप्रमेयस्य मुहूर्तं स्यादपि क्षयः ॥ ४ ॥
गते हि हरिशार्दूल पुनः संप्राप्तये त्वयि ॥ प्राणेष्वपि न विश्वासो मम वानरपुङ्गव ॥ ५ ॥
अदर्शनं च ते वीर भूयो मां दारयिष्यति ॥ दुःखाद्दुःखतरं प्राप्तां दुर्मनश्शोककर्शिताम् ॥ ६ ॥
अयं च वीर संदेहस्तिष्ठतीव ममाग्रतः ॥ सुमहत्सु सहायेषु हर्यृक्षेषु महाबलः ॥ ७ ॥
कथं नु खलु दुष्पारं संतरिष्यन्ति सागरम् ॥ तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ ॥ ८ ॥
त्रयाणामेव भूतानां सागरस्यातिलङ्घने ॥ शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा ॥ ९ ॥
तदत्र कार्यनिर्बन्धे समुत्पन्ने दुरासदे ॥ किं पश्यसि समाधानं त्वं हि कार्यविशारदः] ॥ १० ॥
काममस्य त्वमेवैकः कार्यस्य परिसाधने ॥ पर्याप्तः परवीरघ्न यशस्यस्ते बलोदयः ॥ ११ ॥

नादहत् स तामेव कथं दहतीत्यर्थः ॥ २५—३२ ॥ विस्मयोद्भुत एव न इति । अयं विस्मयः अद्भुत एव । अद्भुतमाश्चर्यं । कल्याणं चेत्युणादिवृत्तिः । यद्वा विस्मयः आश्चर्यं अद्भुतः अभूतपूर्वइत्यर्थः । अद्भुतः अद्भुतरसः । तस्य स्थायीभावोविस्मयः । तथाच अद्भुत एव अद्भुतरसतां प्राप्त एव । महानयं विस्मयः । न विस्मयमात्र इत्यर्थः ॥ ३३—३४ ॥ निमित्तैः दक्षिणाक्षिस्पन्दादिभिः । दृष्टार्थैः दृष्टफलसंवादैः । कारणैः सीतापातिव्रत्यरामप्रभावादिभिः । ऋषिवाक्यैः चारणवाक्यैः ॥ ३५ ॥ पूर्वं चारणवाक्यैर्विदित्वा पुनः प्रत्यक्षं दृष्ट्वा ततः प्रतिप्रयाणाय मतिं चकार । प्रतियास्यामीति संकल्पितवानित्यर्थः ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

प्रस्थितं प्रस्थानोद्युक्तं ॥ २—१० ॥ वनभङ्गाक्षवधादिना हनुमतश्शक्तिं विज्ञाय असौ रामाय निवेद्य स्वयमेव सकलराक्षससंहारपूर्वकं मम नेता मा भूदित्यभिप्रायेणाह—काममिति ॥ अस्य

स० प्राप्तमनोरथार्थः प्राप्तसीतादर्शनरूपमनोरथफलः ॥ ३६ ॥ इतिपञ्चपञ्चाशःसर्गः ॥ ५५ ॥

[पा०] १ ग. ङ. झ. ञ. ट. लङ्का. २ घ. विस्मयोदात्तभाषिणां. ३ अयंश्लोकः ङ. च. छ. झ. ञ. ट. पाठेषुदृश्यते. ४ झ. स्नेहान्विता. ५ यदित्वंमन्यसेइत्यादयः त्वंहिकार्यविशारदइत्यन्ताःश्लोकाः छ. झ. ञ. ट. पाठेषुदृश्यन्ते.

शरैः सुसंकुलां कृत्वा लङ्कां परबलार्दनः ॥ मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ॥ १२ ॥
तद्यथा तस्य विक्रान्तमनुरूपं महात्मनः ॥ भवत्याहवशूरस्य तथा[1] त्वमुपपादय ॥ १३ ॥
तदर्थोपहितं वाक्यं प्रश्रितं हेतुसंहितम् ॥ निशम्य हनुमां[2]स्तस्या वाक्यमुत्तरमब्रवीत् ॥ १४ ॥
[[3]देवि हर्यृक्षसैन्यानामीश्वरः प्लवतांवरः ॥ सुग्रीवः सत्त्वसंपन्नस्तवार्थे कृतनिश्चयः ॥ १५ ॥
स वानरसहस्राणां कोटीभिरभिसंवृतः ॥ क्षिप्रमेष्यति वैदेहि सुग्रीवः प्लवगाधिपः ॥ १६ ॥
तौ च वीरौ नरवरौ सहितौ रामलक्ष्मणौ ॥ आगम्य नगरीं लङ्कां सायकैर्विधमिष्यतः ॥ १७ ॥
सगणं राक्षसं हत्वा नचिराद्रघुनन्दनः ॥ त्वामादाय वरारोहे स्वां पुरीं प्रतियास्यति ॥ १८ ॥
समाश्वसिहि भद्रं ते भव त्वं कालकाङ्क्षिणी ॥ क्षिप्रं द्रक्ष्यसि रामेण निहतं रावणं रणे ॥ १९ ॥
निहते राक्षसेन्द्रे च सपुत्रामात्यबान्धवे ॥ त्वं समेष्यसि रामेण शशाङ्केनेव रोहिणी] ॥ २० ॥
क्षिप्रमेष्यति काकुत्स्थो हर्यृक्षप्र[4]वरैर्वृतः ॥ यस्ते युधि [5]विजित्यारीञ्शोकं व्यपनयिष्यति ॥ २१ ॥
एवमाश्वास्य वैदेहीं हनुमान्मारुतात्मजः ॥ गमनाय मतिं कृत्वा वैदेहीमभ्यवादयत् ॥ २२ ॥
[[6]राक्षसान्प्रवरान्हत्वा नाम विश्राव्य चात्मनः ॥ समाश्वास्य च वैदेहीं दर्शयित्वा परं बलम् ॥२३॥
नगरीमाकुलां कृत्वा वञ्चयित्वा च रावणम् ॥ दर्शयित्वा बलं घोरं वैदेहीमभिवाद्य च ॥
प्रतिगन्तुं मनश्चक्रे पुनर्मध्येन सागरम् ॥ २४ ॥]
ततः स कपिशार्दूलः स्वामिसंदर्शनोत्सुकः ॥ आरुरोह गिरिश्रेष्ठमरिष्टमरिमर्दनः ॥ २५ ॥
तुङ्गपद्मकजुष्टाभिर्नीलाभिर्वनराजिभिः ॥ सोत्तरीयमिवाम्भोदैः शृङ्गान्तरविलम्बिभिः ॥ २६ ॥
बोध्यमानमिव प्रीत्या दिवाकरकरैः शुभैः[7] ॥ उन्मिषन्तमिवोद्धूतैर्लोचनैरिव धातुभिः ॥ २७ ॥
तोयौघनिस्स्वनैर्मन्द्रैः प्राधीतमिव प[8]र्वतम् ॥ प्रगीतमिव वि[9]स्पष्टैर्नानाप्रस्रवणस्वनैः ॥ २८ ॥
देवदारुभि[10]रत्युच्चैरूर्ध्वबाहुमिव स्थितम् ॥ प्रपातजलनिर्घोषैः प्रा[11]क्रुष्टमिव सर्वतः ॥ २९ ॥

कार्यस्य सर्वराक्षसवधपूर्वकमत्प्रापणरूपकार्यस्य । बलोदयः सत्त्वप्रकर्षः । सैन्योत्थापनं वा । ते यशस्यः यशस्करः । नतु रामस्येति भावः ॥ ११ ॥ तर्हि रामस्य किं यशस्करमित्यत्राह—शरैरिति । तत् स्वपराक्रमेण मन्नयनं । तस्य काकुत्स्थस्य । सदृशं । एतदेव ममाभिलषितं । अन्यथा मे कथं वीरपत्नीत्वमिति भावः ॥ १२ ॥ तच्च त्वदायत्तमेवेत्याह—तद्यथेति ॥ विक्रान्तं विक्रमणं ॥ १३–२४ ॥ अरिष्टं अरिष्टाख्यं ॥ २५ ॥ अथैनं गिरिं चतुर्दशधोत्प्रेक्षते—तुङ्गेत्यादिना ॥ पद्मकाः पद्मवर्णवृक्षाः । परिधानालेख्यस्थानीयतया विशेषणमिति बोध्यं । सपरिधानमिव स्थितमितिशेषः । उत्तरार्धे सोत्तरीयत्वोत्प्रेक्षणात् ॥ २६ ॥ शुभैः तरुणैः । करैः अंशुभिः हस्तैश्च । बोध्यमानमिव स्थितं । तत्र ज्ञापकमाह—उद्धूतैरिति । उद्धूतैः उद्गतैः । लोचनैरिव स्थितैः धातुभिः उन्मिषन्तं पश्यन्तमिव स्थितं ॥ २७ ॥ तोयौघनिःस्वनैः गिरिनदीघोषैः । मन्द्रैः गंभीरैः । प्राधीतमिव प्राध्येतुं प्रवृत्तमिव । आदिकर्मणि कर्तरि क्तः । अधीयानमिवेत्यर्थः । प्रस्रवणस्वनैः पर्वतमूलाद्द्रुहिः प्रवहन्ति जलानि प्रस्रवणानि तेषां स्वनैः । प्रगीतमिव गातुं प्रवृत्तमिव गायन्तमिवेत्यर्थः । आदिकर्मणि कर्तरि क्तः ॥ २८ ॥ ऊर्ध्वबाहुमिवेति तपोविशेष उच्यते । प्रपातजलनिर्घोषैः प्रपाताः भृगवः । "प्रपातस्त्वतटो भृगुः" इत्यमरः । तेषां जलानि

ति० प्रपातजलनिर्घोषैः प्रपातेभ्यः भृगुदेशेभ्यः पतज्जलशब्दैः । प्राक्रुष्टमिव आरब्धाक्रोशमिव । सर्वत्रादिकर्मणिकर्तरिक्तः

[पा०] १ क. ग. तत्त्वमेवोपपादय. २ झ. ञ. ट. हनुमान्वीरो. ३ देविहर्यृक्षसैन्यानामित्यादयः शशाङ्केनेवरोहिणीत्यन्ताःश्लोकाः झ. ञ. ट. पाठेपुदृश्यन्ते. ४ च.—ठ. प्रवरैर्युतः. ५ ख. ग. घ. झ. ट. विनिर्जित्यशोकं. ६ राक्षसान्प्रवरानित्याद्यर्धपञ्चकं झ. ञ. ट. पाठेषु दृश्यते. ७ ख. ग. घ. सुखैः. ८ क.—घ. च.—ट. सर्वतः. ९ क. ग. च. छ. झ. ञ. ट. विस्पष्टंनाना. १० ग. घ. च. झ. ञ. ट. रुद्गतैः. ११ घ. प्रघुष्टमिव.

वेपमानमिव श्यामैः कम्पमानैः शरद्घनैः ॥ वेणुभिर्मारुतोद्धूतैः कूजन्तमिव कीचकैः ॥ ३० ॥
निश्श्वसन्तमिवामर्षाद्घोरैराशीविषोत्तमैः ॥ नीहारकृतगम्भीरैर्ध्यायन्तमिव गह्वरैः ॥ ३१ ॥
मेघ[1]पादनिभैः पादैः प्रक्रान्तमिव सर्वतः ॥ जृम्भमाणमिवाकाशे शिखरैरभ्रमालिभिः ॥ ३२ ॥
कूटैश्च बहुधाकीर्णैः शोभितं बहुकन्दरैः ॥ साल[2]तालाश्वकर्णैश्च वंशैश्च बहुभिर्वृतम् ॥ ३३ ॥
लतावितानैर्विततैः पुष्पवद्भिरलंकृतम् ॥ नानामृगग[3]णाकीर्णं धातुनिष्यन्दभूषितम् ॥ ३४ ॥
बहुप्रस्रवणोपेतं शिलासंचयसंकटम्[4] ॥ महर्षियक्षगन्धर्वकिन्नरोरगसेवितम् ॥ ३५ ॥
लतापादपसंघातं सिं[5]हाध्युषितकन्दरम् ॥ [6]व्याघ्रसङ्घसमाकीर्णं स्वादुमूलफ[7]लद्रुमम् ॥ ३६ ॥
तमारुरोह हनुमान्पर्वतं पवनात्मजः ॥ रामदर्शनशीघ्रेण प्रहर्षेणाभिचोदितः ॥ ३७ ॥
तेन पादतलाक्रान्ता रम्येषु गिरिसानुषु ॥ सघोषाः समशीर्यन्त शिलाश्चूर्णीकृतास्ततः ॥ ३८ ॥
स तमारुह्य शैलेन्द्रं व्यवर्धत महाकपिः ॥ दक्षिणादुत्तरं पारं प्रार्थयँल्लवणाम्भसः ॥ ३९ ॥
अधिरुह्य ततो वीरः पर्वतं पवनात्मजः ॥ ददर्श सागरं भीमं [8]मीनोरगनिषेवितम् ॥ ४० ॥
स मारुत इवाकाशं मारुतस्यात्मसंभवः ॥ प्रपेदे हरिशार्दूलो दक्षिणादुत्तरां दिशम् ॥ ४१ ॥
स तदा पीडितस्तेन कपिना पर्वतोत्तमः ॥ ररास सह तैर्भू[9]तैः [10]प्रविशन्वसुधातलम् ॥
कम्पमानैश्च शिखरैः पतद्भिरपि च द्रुमैः ॥ ४२ ॥
तस्योरुवेगोन्मथिताः पादपाः पुष्पशालिनः ॥ निपेतुर्भूतले [11]रुग्णाः शक्रायुधहता इव ॥ ४३ ॥
[12]कन्दरान्तरसंस्थानां पीडितानां महौजसाम् ॥ सिंहानां निनदो भीमो नभो भिन्दन्स शुश्रुवे ॥ ४४ ॥

तेभ्यः पतन्तो निर्झरा इत्यर्थः । तेषां निर्घोषैः । प्राक्रुष्टमिव आक्रोशन्तमिव । पूर्ववत् क्तः ॥ २९ ॥ शरदि ये घना भवन्ति ते शरद्घनाः । शरत्कालपुष्पिणस्सप्तच्छदादयः तैः शुभ्रीभूतैः । जरया कम्पमानमिव स्थितमित्यर्थः । शरद्घनैरितिपाठे बहुवार्षिकवृक्षैरित्यर्थः । शरवणैरिति वार्थः । तकारान्तोप्यस्ति । शरवणे जातस्य कृपाचार्यस्य शारद्वत इति नामदर्शनात् । कीचकैः कीचकाख्यैर्वेणुभिः । तदाहामरः–"वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः" इति ॥ ३० ॥ आशीविषोत्तमैः निश्श्वसन्तमिव सर्पश्रेष्ठनिश्श्वासैर्निश्श्वसन्तमिव । अमर्षात् हनुमति क्रोधादित्यर्थः । नीहारकृतगम्भीरैः नीहारपूर्णैः गम्भीरैश्च । गह्वरैः गुहाभिः ध्याननिरुद्धेन्द्रियस्थानीयैः । ध्यायन्तमिव स्थितं । निरुद्धेन्द्रियद्वारा ध्यानारूढमिवस्थितमित्यर्थः ॥ ३१ ॥ मेघपादनिभैः मेघावरोहनिभैः । पादैः प्रत्यन्तपर्वतैः । प्रक्रान्तमिव गन्तुमुद्युक्तमिव । पूर्ववत् क्तः । जृम्भमाणमिव गात्रभङ्गं कुर्वाणमिव । अभ्रमालिभिः मेघमालावद्भिः ॥ ३२ ॥ बहुधाकीर्णैः हनुमत्पादस्पर्शेन शिथिलैरित्यर्थः ॥ ३३ ॥ धातुनिष्यन्दः धातुस्रावः ॥ ३४—३५ ॥ लतापादपानां संघातो यस्मिन्निति व्यधिकरणबहुव्रीहिः ॥ ३६ ॥ रामदर्शनशीघ्रेण रामदर्शनत्वरावता ॥ ३७ ॥ चूर्णीकृतास्समशीर्यन्त । यथा चूर्णीकृता भवन्ति तथा समशीर्यन्तेत्यर्थः ॥ ३८ ॥ दक्षिणात् दक्षिणपारात् । प्रार्थयन् गन्तुमिति शेषः ॥ ३९—४० ॥ स हरिशार्दूल इति संबन्धः । पितृतुल्यवेगवत्त्वं सूचयति—मारुतस्येति ॥ ४१ ॥ तैर्भूतैः तत्रत्यजन्तुभिः ॥ ४२ ॥ रुग्णाः शीर्णा इति यावत् । शक्रायुधहताः वज्रहताः ॥ ४३ ॥ नभो भिन्दन् भिन्दन्निव । महत्तायां तात्पर्यं ॥ ४४ ॥

इत्याहुः ॥ २९ ॥ शरद्घनैः सप्तपर्णादिशारदवृक्षसंघैः ॥ ३० ॥ ति० धातुनिष्यन्दैः धातुनिर्गमैर्भूषितं ॥ ३४ ॥ शिलासंचयेन शिलासमूहेन संकटं नीरन्ध्रं ॥ ३५ ॥

[पा०] १ घ. मेघजालनिभैः. २ झ. सालतालैश्वकर्णैश्च. ३ झ. ट. गणैःकीर्णं. ४ क. घ. च. ज.—ट. संबाधं. ५ च.—ट. सिंहाधिष्ठित. ६ च. छ. झ. ञ. ट. व्याघ्रादिभिस्समाकीर्णं. ७ ग. फलोदकं. ८ च.—ट. भीमोरग. ९ छ.—ट. विविधैर्भूतैः. ख. विहतैः. १० क. घ. झ. ट. प्राविशद्वसुधातलं. ११ च.—ट. भग्नाः. १२ घ. च. झ. ञ. ट. कन्दरोदर.

स्रस्तव्याविद्धवसना व्याकुलीकृतभूषणाः ॥ विद्याधर्यः समुत्पेतुः सहसा धरणीधरात् ॥ ४५ ॥
अतिप्रमाणा बलिनो दीप्तजिह्वा महाविषाः ॥ निपीडितशिरोग्रीवा व्यवेष्टन्त महाहयः ॥ ४६ ॥
किन्नरोरगगन्धर्वयक्षविद्याधरास्तदा ॥ पीडितं तं नगवरं त्यक्त्वा गगनमास्थिताः ॥ ४७ ॥
स च भूमिधरः श्रीमान्बलिना तेन पीडितः ॥ सवृक्षशिखरोदग्रः प्रविवेश रसातलम् ॥ ४८ ॥
दशयोजनविस्तारस्त्रिंशद्योजनमुच्छ्रितः ॥ धरण्यां समतां यातः स बभूव धराधरः ॥ ४९ ॥
स लिलङ्घयिषुर्भीमं सलीलं लवणार्णवम् ॥ कल्लोलास्फालवेलान्तमुत्पपात नभो हरिः ॥ ५० ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

सप्तपञ्चाशः सर्गः ॥ ५७ ॥

लङ्कातटात्पुनरुत्प्लवनेन मध्येमार्गंमैनाकसंस्पर्शनपूर्वकमागच्छताहनुमता महेन्द्राचलावलोकनेन बन्धुकुलहर्षणायोच्चैर्गर्जनं ॥ १ ॥ जांबवता तच्छ्रवणेत सरभससमुत्थितवानरगणान्प्रति हर्षोद्घोषणहेतुना हनुमतः कृतकार्यत्वोक्तिः ॥ २ ॥ ततोमहेन्द्रशिखरमवतीर्णेनहनुमता जांबवदादिवृद्धाभिवादनपूर्वकं सर्वान्प्रति संग्रहेण सीतादर्शननिवेदनं ॥ ३ ॥ अङ्गदेन हनुमत्प्रशंसनपूर्वकं विस्तरेण सीतादर्शनवृत्तान्तशुश्रूषया सर्वैःसह महेन्द्राचलविशालशिलतलेसमुपवेशनम् ॥ ४ ॥

[आप्लुत्य च महावेगः पक्षवानिव पर्वतः ॥] सचन्द्रकुमुदं रम्यं सार्ककारण्डवं शुभम् ॥
तिष्यश्रवणकादम्बमभ्रशैवालशाद्वलम् ॥ १ ॥
पुनर्वसुमहामीनं लोहिताङ्गमहाग्रहम् ॥ ऐरावतमहाद्वीपं स्वातीहंसविलोलितम् ॥ २ ॥
वातसंघातजातोर्मि चन्द्रांशुशिशिराम्बुमत् ॥ भुजङ्गयक्षगन्धर्वप्रबुद्धकमलोत्पलम् ॥ ३ ॥
हनुमान्मारुतगतिर्महानौरिव सागरम् ॥ अपारमपरिश्रान्तः पुप्लुवे गगनार्णवम् ॥ ४ ॥
ग्रसमान इवाकाशं ताराधिपमिवोल्लिखन् ॥ हरन्निव सनक्षत्रं गगनं सार्कमण्डलम् ॥ ५ ॥

स्रस्तानि व्याविद्धानि च वसनानि यासां ताः स्रस्तव्याविद्धवसनाः ॥ ४५ ॥ निपीडितशिरोग्रीवाः शिथिलपतितशिलातलैरिति शेषः ॥ ४६—४७ ॥ सवृक्षशिखरोदग्रः सवृक्षैः शिखरैः उदग्रः श्रेष्ठः ॥ ४८—४९ ॥ कल्लोलास्फालवेलान्तं तरङ्गैरास्फाल्यमानतीरोपान्तं ॥ ५० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षट्पञ्चाशः सर्गः ॥ ५६ ॥

उत्पपात नभो हरिरित्युक्तं तल्लङ्घनं रूपकेण चतुर्भिर्वर्णयति—सचन्द्रेत्यादिना ॥ कारण्डवः जलकुक्कुटः । कादम्बः कलहंसः "कादम्बः कलहंसस्स्यात्" इत्यमरः । अभ्रशैवालशाद्वलं मेघस्य शैवालत्वेन पर्यन्तस्थशाद्वलत्वेन च रूपणं ॥ १ ॥ लोहिताङ्गः अङ्गारकः स एव महाग्रहः महाग्राहः यस्य तं । ऐरावतस्याभ्रमातङ्गत्वेनाभ्रगामित्वात्तत्र संभवः । विलोलितं अवगाढं ॥ २ ॥ वातसङ्घातजातोर्मय एव चन्द्रांशवः तैः शीतलजलवत् भुजङ्गादीनांकमलोत्पलत्वेनरूपणं तत्तद्वर्णभेदेन ॥ ३ ॥ अत्र गगनस्यार्णवत्वेन चन्द्रादीनां तदवयवकुमुदादित्वेन च रूपणात्सावयवरूपकं । तस्य नौरिवेत्युपमया तिलतण्डुलवत्संसृष्टिः ॥ ४ ॥ अथ तदेवोत्प्रेक्षया वर्णयति—

ति० व्यवेष्टन्त कुण्डलीकृतशरीराअजायन्त । व्यचेष्टन्तेतिपाठे पीडयाअलुठन्नित्यर्थः ॥ ४६ ॥ ति० कल्लोलैरास्फाल्यते स्पृश्यते तादृशोवेलान्तःतीरप्रान्तोयस्यतं सागरंलिलङ्घयिषुः नभउत्पपातेतिसंबन्धः ॥ ५० ॥ इतिषट्पञ्चाशःसर्गः ॥ ५६ ॥

स० गगनार्णवमितिनपुंसकत्वमार्षं । नपुंसकोवार्णवशब्दः । "अस्मदीयंगुणार्णवं" इत्यनुव्याख्यानसुधायांपूर्वमाचारक्विबन्ततामाश्रित्यानन्तरंपचाद्यचिअर्णवमितित्रिलिङ्गःसाधुरित्युक्तेः । गगनार्णवःप्रसिद्धार्णवइव । नपुनःसएवेतिआचारक्विबन्ततादिकमुपपन्नं ॥ ४ ॥

[पा०] १ घ. व्यावेष्टन्तमहोरगाः. च. छ. ज. ञ. व्यचेष्टन्तमहोरगाः. २ ख. ग. च.—ट. स्तथा. ३ छ. ज. ञ. गिरेः. ४ इदमर्धं छ.—ट. पाठेपुदृश्यते. ५ झ. ट. विलासितं. ञ. विलोडितं. ६ घ. च.—ट. जालोर्मि.

मारुतस्यात्मजः श्रीमान्कपिर्व्योमचरो महान् ॥ [[1]अपारमपरिश्रान्तश्चाम्बुधिं समगाहत ॥]
हनुमान्मेघजालानि विकर्षन्निव गच्छति ॥ ६ ॥
पाण्डरारुणवर्णानि नीलमाञ्जिष्ठकानि च ॥ हरितारुणवर्णानि महाभ्राणि चकाशिरे ॥ ७ ॥
प्रविशन्नभ्रजालानि निष्पतंश्च पुनः पुनः ॥ प्रच्छन्नश्च प्रकाशश्च चन्द्रमा इव लक्ष्यते ॥ ८ ॥
विविधाभ्रघनापन्नगोचरो धवलाम्बरः ॥ दृश्यादृश्यतनुर्वीरस्[3]तदा चन्द्रायतेम्बरे ॥ ९ ॥
तार्क्ष्यायमाणो गगने [4]बभासे वायुनन्दनः ॥ दारयन्मेघबृन्दानि निष्पतंश्च पुनः पुनः ॥ १० ॥
नदन्नादेन महता मेघस्वनमहास्वनः ॥ प्रवरान्राक्षसान्हत्वा नाम विश्राव्य चात्मनः ॥ ११ ॥
आकुलां नगरीं कृत्वा व्यथयित्वा च रावणम् ॥ [5]अर्दयित्वा बलं घोरं वैदेहीमभिवाद्य च ॥
आजगाम महातेजाः पुनर्मध्येन सागरम् ॥ १२ ॥
पर्वतेन्द्रं सुनाभं च समुपस्पृश्य वीर्यवान् ॥ ज्यामुक्त इव नाराचो मह[6]वेगोऽभ्युपागतः ॥ १३ ॥
स[7] किंचिदनुसंप्राप्तः समालोक्य महागिरिम् ॥ महेन्द्रं मेघसंकाशं ननाद हरिपुङ्गवः ॥ १४ ॥
स पूरयामास कपिर्दिशो दश समन्ततः ॥ नदन्नादेन [9]महता मेघस्वनमहास्वनः ॥ १५ ॥
स तं देशमनुप्राप्तः सुहृद्दर्शनलालसः ॥ ननाद हरिशार्दूलो लाङ्गूलं चाप्यकम्पयत् ॥ १६ ॥
तस्य नानद्यमानस्य [10]सुपर्णचरिते पथि ॥ फलतीवास्य घोषेण गगनं सार्कमण्डलम् ॥ १७ ॥
ये तु तत्रोत्तरे [11]तीरे समुद्रस्य महाबलाः ॥ पूर्वं संविष्ठिताः शूरा वायुपुत्रदिदृक्षवः ॥ १८ ॥
महतो वायुनुन्नस्य तोयदस्येव [12]गर्जितम् ॥ शुश्रुवुस्ते तदा घोष[13]मूरुवेगं हनूमतः ॥ १९ ॥
ते दीन[14]मनसः सर्वे शुश्रुवुः काननौकसः ॥ वानरेन्द्रस्य निर्घोषं पर्जन्यनिनदोपमम् ॥ २० ॥
निशम्य नदतो नादं वानरास्ते समन्ततः ॥ बभूवुरुत्सुकाः सर्वे सुहृद्दर्शनकाङ्क्षिणः ॥ २१ ॥
जाम्बवान्सहरिश्रेष्ठः प्रीतिसंहृष्टमानसः ॥ उपामन्त्र्य हरीन्सर्वानिदं वचनमब्रवीत् ॥ २२ ॥
सर्वथा कृतकार्योसौ हनूमान्नात्र संशयः ॥ नह्यस्याकृतकार्यस्य नाद एवंविधो भवेत् ॥ २३ ॥
तस्य बाहूरुवेगं च निनादं च महात्मनः ॥ निशम्य हरयो हृष्टाः स[15]मुत्पेतुस्ततस्ततः ॥ २४ ॥

ग्रसमान इवेत्यादिना ॥ ५—६ ॥ व्यक्ताव्यक्तवाचित्वेन अरुणशब्दयोः कथंचिदपौनरुक्त्यमुन्नेयं । यद्वा " अरुणःकृष्णलोहितः " इत्यमरशेषः । महाभ्राणिचकाशिरे हनुमत्संपर्कादित्यर्थः । अन्यथा वाजपेयशरद्वर्णनवदभ्रवर्णनम्यासंगतत्वापातः । हनुमतस्तेजस्वीत्यनेन मेघानांनानावर्णत्वापत्तिः सूर्येन्दुसंपर्कवत् ॥ ७—८ ॥ विविधेष्वभ्रघनेषु मेघसंघातेषु । आपन्नगोचरः प्राप्तविषयः । लब्धमार्ग इति यावत् । धवलाम्बरः शुक्लवासाः । दृश्यादृश्यतनुः मेघान्तःप्रवेशनिष्क्रमणाभ्यामितिभावः । चन्द्रायते चन्द्रइवाचरति । तार्क्ष्यइवाचरन् तार्क्ष्यायमाणः । उभयत्र [illegible]नादाचारे " " कर्तुः क्यङ् सलोपश्च " [illegible]त क्यङ् ॥ ९—१२ ॥ सुनाभं मैनाकं ॥ १३ ॥ किंचिदनुसंप्राप्तः मैनाकात्परं कंचित्प्रदेशं प्राप्तः ॥ १४—१५ ॥ लालसः साभिलाषः । तं देशं सुहृदावाससमीपप्रदेशं ॥ १६ ॥ नानद्यमानस्य पुनःपुनर्भृशं नदत इत्यर्थः । फलतीव दलतीव ॥ १७—१८ ॥ वातनुन्नस्य वातसंघट्टितस्य । घोषं ऊरुवेगमिति ऊरुवेगजन्यं घोषमित्यर्थः ॥ १९ ॥ ते दीनमनस इति । अनिष्टश्रवणशङ्कयेति भावः ॥ २०—२३ ॥ निशम्य ज्ञात्वेत्यर्थः । यद्वा दृष्ट्वा चेत्यध्याहार्यं । अन्यथा बाहूरुवेगपदानन्वयात् ॥२४॥

[पा०] १ इदमर्धं झ. ट. पाठयोर्दृश्यते. २ ग. च. निष्क्रामंश्च. ३ झ. ट. स्तथा. ४ झ. ञ. ट. सबभौ. ५ झ. ट. अर्दयित्वामहावीरान्. छ. ज. दर्शयित्वा. ६ च.—ट. वेगोऽभ्युपागमत्. ७ च.—ट. सकिंचिदारात्संप्राप्तः. ख. ञ. शीघ्रंतदनुसंप्राप्तः. ८ ग. घ. हनुमान्मेघ. ९ झ. ट. ननादसुमहानादं. १० च.—ट. सुपर्णाचरिते. ११ ख. ग. च.—ट. कूले. १२ च. छ. झ. ञ. ट. निस्स्वनं. १३ ख. मूरुवेगाद्धनूमतः. १४ क.—घ. दीनवदनाः. १५ ङ. च. छ. झ. ञ. समुत्पेतुर्यतस्ततः. क. ख. घ. समुत्पेतुस्समन्ततः.

ते नगाग्रान्नगाग्राणि शिखराच्छिखराणि च ॥ प्रहृष्टाः समपद्यन्त हनूमन्तं दिदृक्षवः ॥ २५ ॥
ते प्रीताः पादपाग्रेषु गृह्य शाखाः[1] सुविष्ठिताः ॥ वासांसीव[2] प्रशाखाश्च समाविध्यन्त वानराः ॥ २६ ॥
गिरिगह्वरसंलीनो यथा गर्जति मारुतः ॥ एवं जगर्ज बलवान्हनूमान्मारुतात्मजः ॥ २७ ॥
तमभ्रघनसंकाशमापतन्तं महाकपिम् ॥ दृष्ट्वा ते वानराः सर्वे तस्थुः प्राञ्जलयस्तदा ॥ २८ ॥
ततस्तु वेगवांस्[3]तस्य गिरेर्गिरिनिभः कपिः ॥ निपपात महेन्द्रस्य शिखरे पादपाकुले ॥ २९ ॥
हर्षेणापूर्यमाणोसौ रम्ये पर्वतनिर्झरे ॥ छिन्नपक्ष इवाकाशात्पपात धरणीधरः ॥ ३० ॥
ततस्ते प्रीतमनसः सर्वे वानरपुङ्गवाः ॥ हनुमन्तं महात्मानं परिवार्योपतस्थिरे ॥ ३१ ॥
परिवार्य च ते सर्वे परां प्रीतिमुपागताः ॥ प्रहृष्टवदनाः सर्वे तम[4]रोगमुपागतम् ॥ ३२ ॥
उपायनानि चादाय मूलानि च फलानि च ॥ प्र[5]त्यर्चयन्हरिश्रेष्ठं हरयो मारुतात्मजम् ॥ ३३ ॥
[वि[6]नेदुर्मुदिताः केचित्केचित्किलिकिलास्तथा ॥ हृष्टाः पादपशाखाश्च आनिन्युर्वानरर्षभाः] ॥३४॥
हनुमांस्तु गुरून्वृद्धाञ्जाम्बवत्प्रमुखांस्तदा ॥ कुमारमङ्गदं चैव सोवन्दत महाकपिः ॥ ३५ ॥
स ताभ्यां पूजितः पूज्यः कपिभिश्च प्रसादितः ॥ दृष्टा[7] सीतेति विक्रान्तः [8]संक्षेपेण न्यवेदयत् ॥३६॥
निषसाद च हस्तेन गृहीत्वा वालिनः सुतम् ॥ रमणीये वनोद्देशे महेन्द्रस्य गिरेस्तदा ॥
हनुमान[9]ब्रवीद्धृष्टस्तदा तान्वानरर्षभान् ॥ ३७ ॥
अशोकवनिकासंस्था दृष्टा सा जनकात्मजा ॥ रक्ष्यमाणा सुघोराभी राक्षसीभिरनिन्दिता ॥ ३८॥
एकवेणीधरा बा[10]ला रामदर्शनलालसा ॥ उपवासपरिश्रान्ता जटिला मलिना कृशा ॥ ३९ ॥
ततो दृष्टेति वचनं महार्थममृतोपमम् ॥ निशम्य मा[11]रुतेः सर्वे मुदिता वानरा भवन् ॥ ४० ॥

समुत्पेतुरित्युक्तं विवृणोति—ते नगाग्रादिति ॥ नगाग्रात् वृक्षाग्रात् समपद्यन्त संघीभूताः ॥ २५ ॥ प्रीता इति हेतुगर्भं विशेषणं । यथा मनुष्याः दूरस्थस्वकीयानयनाय वासांसि धून्वन्ति तथा वानराश्चान्योन्याह्वानाय पुष्पितशाखाः गृहीत्वा[illegible] प्राग्रशाखाः । समाविध्यन्त पर्यभ्रामयन् ॥ २६—२७ ॥ अभ्रघनसंकाशं अभ्रसमूहतुल्यं ॥ २८ ॥ निपपात निर्भरमाक्रान्तवान् ॥ २९ ॥ पपातेति अच्छिन्नपक्षस्य पातासंभवाच्छिन्नपक्षइत्युक्तं ॥ ३०—३१ ॥ प्रहृष्टवदनाः प्रसन्नमुखाः । आसन्निति शेषः । अरोगं कुशलिनमित्यर्थः ॥ ३२ ॥ उपायनानि [illegible]गान् ॥ ३३—३४ ॥ कुमारमङ्गदं चेति । स्वामित्वादिति भावः ॥ ३५—३९ ॥ भवन् अभवन् ।

ति० अभ्रं मेघः । तदुपरियोमेघस्तत्संकाशं । अत्युन्नतमेघसमूहसदृशमित्यर्थमन्ये । स्वजीवनदातृत्वेन स्वपूज्यत्वात्प्राञ्जलयः ॥ २८ ॥ ति० ततोगिरेः अरिष्टाख्याद्रिरेः । प्लुतःकपिः तस्यमहेन्द्रस्यगिरेःशिखरेनिपपात । अनेनाविश्रममागमनंध्वनितं ॥ २९ ॥ ति० पर्वतनिर्झरे निर्झरप्रवर्तकेशिखरेइत्यर्थमेके । श्रमनिवृत्तये जलएवपतितइत्यन्ये ॥ स० छिन्नपक्षः धरणीधरः पर्वतइवपपात । अनेन मान्द्याभावःसूच्यते । छिदितिभावेसंपदादिक्विबन्तः । छित् छिदा न ययोस्तौछिन्नौ । नशब्दोनिषेधार्थकः । तस्यछिच्छब्दानन्तरत्वं जनइत्यादिवद्बोध्यं । ततश्च अच्छिन्नौपक्षौयस्यसः । एवंचेत् हर्षापूर्यमाणता विवक्षितस्थललाभोविजयेनागमनंचेतिबह्वर्थलाभोभवतीतिबोध्यं ॥ ३० ॥ स० परां पूर्वप्रीतितोप्युत्कृष्टां । संतोषातिशयेनसर्वइतिद्विरुक्तिः । सर्वे रुद्रे । लुप्तोपमेयं । तेदूताः त्रिपुरंहत्वाआयातेरुद्रेइतिवा । "सर्वोह्येषरुद्रः" इतिश्रुतेः । "सर्वःशर्वःकालजरःशिवः" इतिनामनिधानात् ॥ ३२ ॥ ति० शाखानयनं हनूमतआसनार्थं ॥ ३४ ॥ स० ताभ्यां जांबवदङ्गदाभ्यां । यद्यपिजांबवत्प्रमुखान्गुरून्वृद्धानित्युक्त्या तैरितिसुभाषं । तथापि कार्यनिविष्टताद्वयोरेवातिशयेनेतिताभ्यामित्युपपद्यते । देवीदृष्टेतिपौर्वापर्येदेवी-

[पा०] १ ङ. च. झ. ञ. ट. शाखामवस्थिताः. क. ख. घ. शाखास्सुपुष्पिताः. २ घ. ङ. झ. ञ. ट. वासांसिचप्रकाशानि. क. वासांसिचमहार्हाणिदुधुवुर्वानरर्षभाः. च. छ. ज. वासांसिचमहाप्रीत्या. ३ ङ. झ. ट. वेगवान्वीरो. ४ ङ. झ. ट. तमागतमुपागमन्. ५ ख. प्रत्यर्पयन्हरिश्रेष्ठं. ६ अयंश्लोकः ङ. झ. ट. पाठेषुदृश्यते. ७ ग. घ. च.—ट. देवीति. ८ क. संग्रहेण. ९ ङ. झ. ट. नब्रवीत्स्पृष्टः. घ. नब्रवीद्धृष्टस्समेतान्वानरर्षभान्. १० ख. दीना. ११ क. ग. मारुतेर्वाक्यं.

क्ष्वेलन्त्यन्ये नदन्त्यन्ये [1]गर्जन्त्यन्ये [2]महाबलाः ॥ चक्रुः किलिकिलामन्ये प्रतिगर्जन्ति [3]चापरे ॥ ४१ ॥
केचिदुच्छ्रितलाङ्गूलाः प्रहृष्टाः कपिकुञ्जराः ॥ [4]अञ्चितायतदीर्घाणि लाङ्गूलानि प्रविव्यधुः ॥ ४२ ॥
अपरे च हनूमन्तं [5]वानरा वारणोपमम् ॥ आप्लुत्य गिरिशृङ्गेभ्यः संस्पृशन्ति सहर्षिताः ॥ ४३ ॥
उक्तवाक्यं हनूमन्तमङ्गदस्तमथाब्रवीत् ॥ सर्वेषां हरिवीराणां मध्ये [6]वचनमुत्तमम् ॥ ४४ ॥
सत्त्वे वीर्ये न ते कश्चित्समो वानर विद्यते ॥ यदवप्लुत्य विस्तीर्णं सागरं पुनरागतः ॥ ४५ ॥
[7][जीवितस्य प्रदाता नस्त्वमेको वानरोत्तम ॥ त्वत्प्रसादात्समेष्यामस्सिद्धार्था राघवेण ह] ॥ ४६ ॥
अहो स्वामिनि ते भक्तिरहो वीर्यमहो धृतिः ॥ [8]दिष्ट्या दृष्टा त्वया देवी रामपत्नी यशस्विनी ॥
दिष्ट्या त्यक्ष्यति काकुत्स्थः शोकं सीतावियोगजम् ॥ ४७ ॥
ततोऽङ्गदं हनूमन्तं जाम्बवन्तं च वानराः ॥ परिवार्य प्रमुदिता भेजिरे विपुलाः शिलाः ॥ ४८ ॥
[उपविष्टा गिरेस्तस्य शिलासु विपुलासु च ॥] श्रोतुकामाः समुद्रस्य लङ्घनं वानरोत्तमाः ॥ ४९ ॥
दर्शनं चापि लङ्कायाः सीताया रावणस्य च ॥ तस्थुः प्राञ्जलयः सर्वे [9]हनुमद्वदनोन्मुखाः ॥ ५० ॥
तस्थौ तत्राङ्गदः श्रीमान्वानरैर्बहुभिर्वृतः ॥ उपास्यमानो विबुधैर्दिवि देवपतिर्यथा ॥ ५१ ॥
हनूमता कीर्तिमता यशस्विना तथाङ्गदेनाङ्गदबद्धबाहुना ॥
मुदा तदाध्यासितमुन्नतं महन्महीधराग्रं ज्वलितं श्रियाऽभवत् ॥ ५२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अष्टपञ्चाशः सर्गः ॥ ५८ ॥

महेन्द्रगिरौ सर्ववानरमध्ये जांबवत्पृष्टेन हनुमता वानरान्प्रति लङ्कागमनकाले मैनाकावलोकनादिस्वपुनरागमनान्तसकलवृत्तान्तनिवेदनम् ॥ १ ॥

ततस्तस्य गिरेः शृङ्गे महेन्द्रस्य महाबलाः ॥ हनुमत्प्रमुखाः प्रीतिं हरयो जग्मुरुत्तमाम् ॥ १ ॥

अनित्यत्वादडभावः ॥ ४० ॥ क्ष्वेलन्ति सिंहनादं कुर्वन्ति । नदन्ति अव्यक्तशब्दं कुर्वन्ति । गर्जन्ति वृषभनादं कुर्वन्ति । किलिकिलां स्वजात्युचितकिलिकिलाशब्दं ॥ ४१ ॥ अञ्चितायतदीर्घाणि अत्र दीर्घपदसन्निधानादायतपदं स्थूलपरं । प्रविव्यधुः लाङ्गूलान्युद्धृत्य भूमावताडयन्नित्यर्थः ॥ ४२ ॥ संस्पृशन्ति आलिङ्गन्तीत्यर्थः ॥ ४३—४४ ॥ अवप्लुत्यविस्तीर्णमित्यङ्गदेतरव्यावृत्तिः । पुनरागत इत्यङ्गदव्यावृत्तिः ॥ ४५—५१ ॥ कीर्तिमतेति हनुमद्विशेषणं । यशस्विनेत्यङ्गदविशेषणं । भृत्यकीर्त्या स्वामिनः कीर्तिः । अन्यथा पौनरुक्त्यात् । यद्वा बुद्धिमत्त्वजन्या कीर्तिः । शौर्यजन्यं यशः ॥ ५२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तपञ्चाशःसर्गः ॥ ५७ ॥

कार्यवृत्तान्तं कार्यविषयवृत्तान्तं सीतादर्शनविषय-

विलोकितानवेतिशङ्कास्यात् सा माहिभूदितिदृष्टेपिपूर्वमुक्तिरितिज्ञेयं ॥ ३६ ॥ ति० आयताञ्चितदीर्घाणि आयामोविस्तारः । स्थौल्यमित्यन्ये ॥ ४२ ॥ इतिसप्तपञ्चाशःसर्गः ॥ ५७ ॥

[पा०] १ ङ. प्लवन्त्यन्ये. २ च. ज. महास्वनाः. ३ च. छ. ज. वानराः. ४ ङ.—ट. आयताञ्चित. ५ ङ. झ. ट. श्रीमन्तंवानरोत्तमं. च. छ. ज. वानराःप्रशशंसिरे. ६ क. ग.—ट. वाचमनुत्तमां. ७ अयंश्लोकः ङ.—ट. पाठेषुदृश्यते. ८ इदमर्धं ङ.—ट. पाठेपुदृश्यते. ९ ख. हनूमद्वचनोन्मुखाः.

[1]प्रीतिमत्सूपविष्टेषु वानरेषु महात्मसु ॥ तं ततः [2]प्रीतिसंहृष्टः [3]प्रीतिमन्तं महाकपिम् ॥
जाम्बवान्कार्यवृत्तान्तमपृच्छदनिलात्मजम् ॥ २ ॥
कथं दृष्टा त्वया देवी कथं वा तत्र वर्तते ॥ तस्यां वा स कथंवृत्तः क्रूरकर्मा दशाननः ॥ ३ ॥
तत्त्वतः सर्वमेतन्नः प्रब्रूहि त्वं महाकपे ॥ [[4]संमार्गिता कथं देवी किंच सा प्रत्यभाषत ॥]
श्रुतार्थाश्चिन्तयिष्यामो भूयः कार्यविनिश्चयम् ॥ ४ ॥
यश्चार्थस्तत्र वक्तव्यो गतैरस्माभिरात्मवान् ॥ रक्षितव्यं च यत्तत्र तद्भवान्व्याकरोतु नः ॥ ५ ॥
स नियुक्तस्ततस्तेन संप्रहृष्टतनूरुहः ॥ [5]प्रणम्य शिरसा देव्यै सीतायै प्रत्यभाषत ॥ ६ ॥
प्रत्यक्षमेव भवतां महेन्द्राग्रात्खमाप्लुतः ॥ उदधेर्दक्षिणं पारं काङ्क्षमाणः समाहितः ॥ ७ ॥
गच्छतश्च हि मे घोरं विघ्नरूपमिवाभवत् ॥ काञ्चनं शिखरं दिव्यं पश्यामि सुमनोहरम् ॥ ८ ॥
स्थितं पन्थानमावृत्य मेने विघ्नं च तं नगम् ॥ ९ ॥
उपसंगम्य तं दिव्यं काञ्चनं नगसत्तमम् ॥ कृता मे मनसा बुद्धिर्भेत्तव्योयं मयेति च ॥ १० ॥
[6]प्रहतं च मया तस्य लाङ्गूलेन महागिरेः ॥ शिखरं सूर्यसंकाशं व्यशीर्यत सहस्रधा ॥ ११ ॥
व्यवसायं च तं बुद्ध्वा स होवाच महागिरिः ॥ पुत्रेति मधुरां वाणीं मनः प्रह्लादयन्निव ॥ १२ ॥
पितृव्यं चापि मां विद्धि सखायं मातरिश्वनः ॥ मैनाक इति विख्यातं निवसन्तं महोदधौ ॥१३॥
पक्षवन्तः पुरा पुत्र बभूवुः पर्वतोत्तमाः ॥ छन्दतः पृथिवीं चेरुर्बाधमानाः समन्ततः ॥ १४ ॥
श्रुत्वा नगानां चरितं महेन्द्रः पाकशासनः ॥ चिच्छेद भगवान्पक्षान्वज्रेणैषां सहस्रशः ॥ १५ ॥
अहं तु [7]मोक्षितस्तस्मात्तव पित्रा महात्मना ॥ मारुतेन तदा वत्स [8]प्रक्षिप्तोस्मि महार्णवे ॥ १६ ॥
रामस्य च [9]मया साह्ये वर्तितव्यमरिन्दम ॥ रामो धर्मभृतां श्रेष्ठो महेन्द्रसमविक्रमः ॥ १७ ॥
एतच्छ्रुत्वा वचस्तस्य मैनाकस्य महात्मनः ॥ कार्यमावेद्य तु गिरे[10]रुद्यतं च मनो मम ॥ १८ ॥
तेन चाहमनुज्ञातो मैनाकेन महात्मना ॥ स चाप्यन्तर्हितः शैलो मानुषेण वपुष्मता ॥
शरीरेण महाशैलः शैलेन च महोदधौ ॥ १९ ॥

वृत्तान्तं ॥ २ ॥ कथं केन प्रकारेण । कथंवृत्तः कीदृग्व्यापारः ॥ ३ ॥ तत्त्वकथनस्य प्रयोजनमाह—श्रुतार्था इत्यादि ॥ ४ ॥ तत्र रामसन्निधौ । योऽर्थो वक्तव्यः वक्तुमर्हः । यच्च रक्षितव्यं गोप्तव्यं तत् । आत्मवान् बुद्धिमान् । भवान्व्याकरोतु ॥ ५—६ ॥ प्रत्यक्षमेवेति इदं न वक्तव्यमेवेति भावः । आप्लुतः आप्लुतोस्मि । पारं गन्तुमिति शेषः । समाहितः एकाग्रः । इत्येतद्भवतां प्रत्यक्षमेवेति संबन्धः ॥ ७ ॥ विघ्नरूपमिव । वस्तुतो न तथेतिभावः । पश्यामीत्यादौ व्यत्ययेन लट् । शिखरं विघ्नरूपमिवाभवत् तत् पश्यामीति योजना ॥ ८ ॥ मेने इति लिड्युत्तमपुरुषैकवचनं । परोक्षत्वाद्यभावेपि च्छान्दसं । अमनिषीत्यर्थः ॥ ९ ॥ गमनदशायामुरसा पातयामासेति सूचितं विवृणोति—भेत्तव्योयमित्यादिना ॥१०—१२॥ पितृव्यं चेति । पितृव्यत्वे हेतुमाह—सखायमिति । पितृसखत्वात् पितृव्यत्वव्यपदेश इत्यर्थः ॥ १३ ॥ छन्दतः यथेच्छं ॥ १४—१५ ॥ मोक्षणप्रकारमाह—प्रक्षिप्तोस्मि महार्णव इति ॥१६॥ साह्ये साहाय्ये । साहाय्यकरणे हेतुमाह—रामो धर्मभृतां श्रेष्ठ इति ॥१७॥ उद्यतं उद्युक्तं ॥ १८ ॥ अनुज्ञातः

ति० सशैलोमानुषेणवपुष्मता प्रशस्तेनशरीरेण । महाशैलोन्तर्हितः । शैलेनशिलारूपेणचमहोदधावन्तर्हितइत्यन्वयः ॥ स० शैलः मैनाकः । मानुषेणशरीरेणान्तर्हितोभूत् । ततश्चमहाशैलः वपुष्मतामानुषदेहान्तर्धानाधिकरणेन । शैलेन पर्वतरूपदेहेन

[पा०] १ इदमर्धं क.—ट. पाठेषुदृश्यते. २ ङ. छ. ज. झ. ट. प्रतिसंहृष्टः. ३ ङ. च. ज.—ट. प्रीतियुक्तं. ४ इदमर्धं ङ.—ट. पाठेपुदृश्यते. ५ ख. ङ. च.—ट. नमस्यञ्शिरसा. ६ ङ. झ. ट. प्रहतस्य. ७ ङ.—ट. मोचितस्तस्मात्. ८ ङ. झ. ट. प्रक्षिप्तोवरुणालये. घ. प्रक्षिप्तोस्मिमहोदधौ. ९ क. ख. ग. ङ.—ट. मयातस्य. १० ङ. झ. ट. रुद्धतंवै.

उत्तमं जवमास्थाय [1]शेषं पन्थानमास्थितः ॥ ततोऽहं सुचिरं कालं वेगेनाभ्यगमं पथि ॥ २० ॥
ततः पश्याम्यहं देवीं सुरसां नागमातरम् ॥ समुद्रमध्ये सा देवी [2]वचनं मामभाषत ॥ २१ ॥
मम भक्षः प्रदिष्टस्त्वममरै[4]र्हरिसत्तम ॥ [3]अतस्त्वां भक्षयिष्यामि विहितस्त्वं चिरस्य मे ॥ २२ ॥
एवमुक्तः सुरसया प्राञ्जलिः प्रणतः स्थितः ॥ [5]विवर्णवदनो भूत्वा वाक्यं चेदमुदीरयन् ॥ २३ ॥
रामो दाशरथिः श्रीमान्प्रविष्टो दण्डकावनम् ॥ लक्ष्मणेन सह भ्रात्रा [6]सीतया च परन्तपः ॥ २४ ॥
तस्य सीता हृता भार्या रावणेन दुरात्मना ॥ तस्याः सकाशं दूतोऽहं गमिष्ये रामशासनात् ॥
कर्तुमर्हसि रामस्य साहाय्यं विषये सती ॥ २५ ॥
अथवा मैथिलीं दृष्ट्वा रामं चाक्लिष्टकारिणम् ॥ आगमिष्यामि ते वक्त्रं सत्यं प्रतिशृणोमि ते ॥ २६ ॥
एवमुक्ता मया सा तु सुरसा कामरूपिणी ॥ अब्रवीन्नातिवर्तेत कश्चिदेष वरो मम ॥ २७ ॥
एवमुक्तः सुरसया दशयोजनमायतः ॥ [7]ततोऽर्धगुणविस्तारो बभूवाहं क्षणेन तु ॥ २८ ॥
[8]मत्प्रमाणानुरूपं च व्यादितं तु मुखं तया ॥ तद्दृष्ट्वा व्यादितं चास्यं ह्रस्वं ह्यकरवं [9]वपुः ॥ २९ ॥
तस्मिन्मुहूर्ते च पुनर्बभूवाङ्गुष्ठ[10]मात्रकः ॥ अभिपत्याशु तद्वक्त्रं निर्गतोऽहं ततः क्षणात् ॥ ३० ॥
अब्रवीत्सुरसा देवी स्वेन रूपेण मां पुनः ॥ [11]अर्थसिद्ध्यै हरिश्रेष्ठ गच्छ सौम्य यथासुखम् ॥ ३१ ॥
समानय च वैदेहीं राघवेण महात्मना ॥ सुखी भव महाबाहो प्रीताऽस्मि तव वानर ॥ ३२ ॥
ततोऽहं साधु साध्वीति सर्वभूतैः प्रशंसितः ॥ ततोऽन्तरिक्षं विपुलं प्लुतोऽहं गरुडो यथा ॥ ३३ ॥
छाया मे निगृहीता च न च पश्यामि किंचन ॥ ३४ ॥
सोऽहं विगतवेगस्तु दिशो दश विलोकयन् ॥ न किंचित्तत्र पश्यामि येन मे[12]ऽपहृता गतिः ॥ ३५ ॥
ततो मे बुद्धिरुत्पन्ना किं नाम गगने मम ॥ ईदृशो विघ्न उत्पन्नो रूपं यत्र न दृश्यते ॥ ३६ ॥
अधोभागे न मे दृष्टिः [13]शोचता पातिता [14]मया ॥ ततोऽद्राक्षमहं भीमां राक्षसीं सलिलेशयाम् ॥ ३७ ॥
प्रहस्य च महानादमुक्तोऽहं भीमया तया ॥ अवस्थितमसंभ्रान्तमिदं वाक्यमशोभनम् ॥ ३८ ॥
क्वासि गन्ता महाकाय क्षुधिताया ममेप्सितः ॥ भक्षः प्रीणय मे देहं चिरमाहारवर्जितम् ॥ ३९ ॥

अस्मीति शेषः । वपुष्मता पुष्कलवपुषा । मानुषेणशरीरेणान्तर्हितः । शैलेन तु शरीरेण महोदधौ सागरोपरि स्थित इति शेषः । "स वै दत्तवरः शैलोबभूवावस्थितस्तथा" इति प्रथमसर्गोक्तेः । प्रतिप्रयाणे च—"पर्वतेन्द्रं सुनाभं च समुपस्पृश्य वीर्यवान्" इत्युक्तं । "हिरण्यनाभं शैलेन्द्रं काञ्चनं पश्य मैथिलि" इति रामेण चोक्तं ॥ १९—२४ ॥ विषये सती स्वराज्ये वसन्ती ॥ २५–२७ ॥ अर्धगुणविस्तारः । अत्रार्धशब्दः एकदेशवाची । किंचिदधिकविस्तारोभवमित्यर्थः । एवमेवार्थः । प्रथमसर्गोक्तशतयोजनविस्तारस्तु विरुद्धः तद्ग्रन्थःकल्पितश्चेत्युक्तं ॥ २८ ॥ व्यादितं व्यात्तं ॥ २९ ॥ ह्रस्वत्वं विशेषयति—अङ्गुष्ठमात्रक इति ॥ ३०–३१ ॥ समानय संयोजय ॥ ३२ ॥ साधु साध्वीति दीर्घश्छान्दसः ॥ ३३–३६ ॥ सलिलेशयां सलिले स्थितां ॥ ३७ ॥ अवस्थितं दृढभूतं । असंभ्रान्तं अव्यग्रं ॥ ३८–३९ ॥

महोदधावन्तर्हितोऽभूत् ॥ १९ ॥ **ती०** ततोर्धगुणविस्तारः ततोदशयोजनात्अर्धस्यपञ्चयोजनस्यगुणः आवृत्तिः तद्विस्तारोदशयोजनविस्तारः । प्रथमसर्गेदशयोजनविस्तारोक्त्यानुगुण्येनैवंव्याख्यातं ॥ २८ ॥ **शि०** साध्वीतिदीर्घआर्षइतिभट्टाः । विस्मयार्थेकार-

[पा०] १ ङ. च. ज.—ट. शेषमध्वानं. २ ङ. झ. ट. वचनंचेदमब्रवीत्. ३ ग. ङ.—ट. ततस्त्वां. ४ ङ. झ. ट. स्त्वंहिमेसुरैः. ५ ग. घ. च. छ. ज. ञ. विषण्णवदनो. ६ ख. सीतयाचापिभार्यया. ७ ग. घ. च. छ. ज. ञ. ततोद्विगुण. ८ ङ.—ट. मत्प्रमाणाधिकंचैव. ९ ख. च.—ट. पुनः. १० ङ.—ट. संमितः. ११ घ. अथसाव्याहरच्छ्रेष्ठा. १२ ङ. च. ज.—ट. मेविहृता. १३ ङ. झ. ञ. ट. शोचतः. १४ च. छ. ज. तदा.

बाढमित्येव तां वाणीं प्रत्यगृह्णामहं ततः ॥ आस्यप्रमाणादधिकं तस्याः कायमपूरयम् ॥ ४० ॥
तस्याश्चास्यं महद्भीमं वर्धते मम भक्षणे ॥ न च मां साधु बुबुधे मम वा निकृतं कृतम् ॥ ४१ ॥
ततोऽहं विपुलं रूपं संक्षिप्य निमिषान्तरात् ॥ तस्या हृदयमादाय प्रपतामि नभःस्थलम् ॥ ४२ ॥
सा विसृष्टभुजा भीमा पपात लवणाम्भसि ॥ मया पर्वतसंकाशा निकृत्तहृदया सती ॥ ४३ ॥
शृणोमि खगतानां च सिद्धानां चारणैः सह ॥ राक्षसी सिंहिका भीमा क्षिप्रं हनुमता हता ॥४४॥
तां हत्वा पुनरेवाहं कृत्यमात्ययिकं स्मरन् ॥ गत्वा चाहं महाध्वानं पश्यामि नगमण्डितम् ॥४५॥
दक्षिणं तीरमुदधेर्लङ्का यत्र च सा पुरी ॥ अस्तं दिनकरे याते रक्षसां निलयं पुरम् ॥
प्रविष्टोऽहमविज्ञातो रक्षोभिर्भीमविक्रमैः ॥ ४६ ॥
तत्र प्रविशतश्चापि कल्पान्तघनसन्निभा ॥ अट्टहासं विमुञ्चन्ती नारी काऽप्युत्थिता पुरः ॥ ४७ ॥
जिघांसन्तीं ततस्तां तु ज्वलदग्निशिरोरुहाम् ॥ सव्यमुष्टिप्रहारेण पराजित्य सुभैरवाम् ॥
प्रदोषकाले प्रविशं भीतयाऽहं तयोदितः ॥ ४८ ॥
अहं लङ्कापुरी वीर निर्जिता विक्रमेण ते ॥ यस्मात्तस्माद्विजेतासि सर्वरक्षांस्यशेषतः ॥ ४९ ॥
तत्राहं सर्वरात्रं तु विचिन्वञ्जनकात्मजाम् ॥ रावणान्तःपुरगतो न चापश्यं सुमध्यमाम् ॥ ५० ॥
ततः सीतामपश्यंस्तु रावणस्य निवेशने ॥ शोकसागरमासाद्य न पारमुपलक्षये ॥ ५१ ॥
शोचता च मया दृष्टं प्राकारेण समावृतम् ॥ काञ्चनेन विकृष्टेन गृहोपवनमुत्तमम् ॥ ५२ ॥
स प्राकारमवप्लुत्य पश्यामि बहुपादपम् ॥ ५३ ॥
अशोकवनिकामध्ये शिंशुपापादपो महान् ॥ तमारुह्य च पश्यामि काञ्चनं कदलीवनम् ॥ ५४ ॥
अदूरे शिंशुपावृक्षात्पश्यामि वरवर्णिनीम् ॥ श्यामां कमलपत्राक्षीमुपवासकृशाननाम् ॥ ५५ ॥
तदेकवाससंवीतां रजोध्वस्तशिरोरुहाम् ॥ शोकसन्तापदीनाङ्गीं सीतां भर्तृहिते स्थिताम् ॥ ५६ ॥

तस्याः आस्यप्रमाणादधिकं यथा तथा कायं आत्मदेहं। अपूरयं अवर्धयं । मयि वृद्धे साप्यवर्धिष्टेत्यर्थः । अयं कामरूपीति मां । साधु सम्यक् । न बुबुधे न ज्ञातवती । मम कृतं निकृतं मया कृतां निकृतिं वा नबुबुधे ॥ ४०-४१ ॥ निकृतिमेव दर्शयति—ततोहमिति ॥ ४२ ॥ विसृष्टभुजा विसृष्टसन्धिकभुजा ॥ ४३ ॥ हतेत्यनन्तरमितिकरणंबोध्यं ॥४४॥ कृत्यमात्ययिकं स्मरन् प्राणान्तिकं तत्कर्म विचिन्तयन्नित्यर्थः ॥ ४७ ॥ भीतया तया नार्या । अशेषत इत्यनन्तरमितिकरणं द्रष्टव्यं ॥ ४८-४९ ॥ सर्वरात्रं सर्वां रात्रिं । "अहः सर्व—" इत्यादिना समासान्तोच् । अत्यन्तसंयोगे द्वितीया । तत्र लङ्कायां । विचिन्वन् अनन्तरं रावणान्तःपुरमपि गतःसन् सुमध्यमां नापश्यं ॥ ५०—५१ ॥ विकृष्टेन विप्रकृष्टेन । अतिदीर्घेणेति यावत् ॥ ५२ ॥ बहुपादपं अनेकपादपप्रमाणमिति प्राकारविशेषणं ॥ ५३ ॥ शिंशुपापादपः अस्तीतिशेषः ॥ ५४ ॥ शिंशुपावृक्षात् शिंशुपावृक्षस्य । श्यामां यौवनमध्यस्थां । तदेकवाससंवीतां येन वाससा हृता तेनैकवाससा संवीतां । यद्वा तेन तत्कालदृष्टेन पूर्वदृष्टेन एकेन वाससा संवीतां । वेषान्तरनिस्स्पृहामित्यर्थः । मानसिकत्वकायिकत्व-

प्रश्लेषेतुनार्षकल्पना ॥ **स०** साध्वी अहंप्रीतास्मीत्यन्वयोवा ॥३३॥ **ती०**तद्विकृतंकिमित्यतआह—ततोहमिति। हृदयमादाय हृदयंनिकृत्य ।प्रपतामि प्रापतं॥४२॥**ति०** आत्ययिकं जातकालविलंबं॥**स०** महदध्वानं महताकालेन गम्यमध्वानं ॥४५॥**ति०**सर्वरात्रं

[पा०] १ ख. वर्धितश्चास्मि सुमहांस्तस्याः. २ घ. ममापिविकृतं. क. मयाचविकृतं. ३ ङ. झ. ट. खगतानांचवाचः सौम्यामहात्मनां. ४ क. ख. घ. च.—ट. गत्वाचमहदध्वानं. ५ ङ. झ. ट. निलयंपुरीं. घ. प्राविशंपुरं. ६ ङ. च. ज. झ. घनसप्रभा. ७ ख. भीमा. ८ ग. तत्राहमर्धरात्रेतु. क. तत्राहमर्धरात्रंतु. ९ ग. ङ.—ट. प्राकारेणाभिसंवृतं. १० घ. च. विचित्रेण. ११ क.—ट. अदूराच्छिंशुपा.

राक्षसीभिर्विरूपाभिः क्रूराभिरभिसंवृताम् ॥ मांसशोणितभक्षाभिर्व्याघ्रीभिर्हरिणीमिव[1] ॥ ५७ ॥
सा मया राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः ॥ एकवेणीधरा दीना भर्तृचिन्तापरायणा ॥ ५८ ॥
भूमिशय्या विवर्णाङ्गी पद्मिनीव हिमागमे ॥ रावणाद्विनिवृत्तार्था मर्तव्यकृतनिश्चया ॥
कथंचिन्मृगशाबाक्षी तूर्णमासादिता मया ॥ ५९ ॥
तां दृष्ट्वा तादृशीं नारीं रामपत्नीं[2] यशस्विनीम् ॥ तत्रैव शिंशुपावृक्षे पश्यन्नहमवस्थितः ॥ ६० ॥
ततो हलहलाशब्दं काञ्चीनूपुरमिश्रितम् ॥ शृणोम्यधिकगम्भीरं रावणस्य निवेशने ॥ ६१ ॥
ततोऽहं परमोद्विग्नः[3] स्वं[4] रूपं प्रतिसंहरन् ॥ अहं तु शिंशुपावृक्षे पक्षीव गहने स्थितः ॥ ६२ ॥
ततो रावणदाराश्च रावणश्च महाबलः ॥ तं देशं[5] समनुप्राप्ता यत्र सीताऽभवत्स्थिता ॥ ६३ ॥
तद्दृष्ट्वाऽथ[6] वरारोहा सीता रक्षोमहाबलम्[7] ॥ संकुच्योरू स्तनौ पीनौ बाहुभ्यां परिरभ्य च ॥ ६४ ॥
वित्रस्तां परमोद्विग्नां वीक्षमाणां[8] ततस्ततः ॥ त्राणं किंचिदपश्यन्तीं वेपमानां तपस्विनीम्[9] ॥ ६५ ॥
तामुवाच दशग्रीवः सीतां परमदुःखिताम् ॥ अवाक्छिराः प्रपतितो बहुमन्यस्व मामिति ॥ ६६ ॥
यदि चेत्त्वं तु दर्पान्मां नाभिनन्दसि गर्विते ॥ [10]द्वौ मासावन्तरं सीते पास्यामि रुधिरं तव ॥६७॥
एतच्छ्रुत्वा वचस्तस्य रावणस्य दुरात्मनः ॥ उवाच परमक्रुद्धा सीता वचनमुत्तमम् ॥ ६८ ॥
राक्षसाधम रामस्य भार्याममिततेजसः ॥ [11]इक्ष्वाकुकुलनाथस्य स्नुषां दशरथस्य च ॥
अवाच्यं वदतो जिह्वा कथं न पतिता तव ॥ ६९ ॥
किंचिद्वीर्यं तवानार्य यो मां भर्तुरसंनिधौ ॥ अपहृत्यागतः पाप तेनादृष्टो महात्मना ॥ ७० ॥
न त्वं रामस्य सदृशो दास्येऽप्यस्य न युज्यसे ॥ [12]यज्ञीयः सत्यवादी च रणश्लाघी च राघवः ॥७१॥
जानक्या परुषं वाक्यमेवमुक्तो दशाननः ॥ जज्वाल सहसा कोपाच्चितास्थ इव पावकः ॥ ७२ ॥
विवर्त्य नयने क्रूरे मुष्टिमुद्यम्य दक्षिणम् ॥ मैथिलीं हन्तुमारब्धः स्त्रीभिर्हा हा कृतं तदा ॥ ७३ ॥
स्त्रीणां मध्यात्समुत्पत्य तस्य भार्या दुरात्मनः ॥ वरा मण्डोदरीनाम तया स प्रतिषेधितः ॥ ७४ ॥

भेदेन शोकसंतापयोर्भेदः ॥ ५५—५७ ॥ सामयेति आमयः खेदः तेन सह वर्तत इति सामया । मर्तव्ये मरणे । " कृत्यल्युटो बहुलं " इति साधुः ॥ ५८—५९ ॥ पश्यन् परामृशन् ॥ ६०—६१ ॥ गहने पर्णगूढप्रदेशे । पर्णघने निलीन इत्यधस्तादप्युक्तेः ॥ ६२—६४ ॥ परमोद्विग्नां अतीवोद्भ्रान्तहृदयां । ततस्ततः वीक्षमाणां नानादिक्षु वीक्षमाणां । त्राणमित्यनुषज्यते ॥ ६५ ॥ अवाक्छिराः अवनतमूर्धा । प्रपतितः भूमावितिशेषः ॥ ६६ ॥ द्वौ मासौ अन्तरमवधिः । ततः पास्यामीति योज्यं ॥ ६७—६९ ॥ किंचिद्वीर्यं कुत इत्यत्राह—यो मामिति । भर्तुरसंनिधौ तेन भर्त्रा अदृष्टःसन् यो मामपहृत्यागतः तस्य तव किंचिद्वीर्यमिति योज्यं ॥ ७०—७१ ॥ घोरत्वसिद्धये चितास्थइत्युक्तं ॥ ७२ ॥ आरब्धः रावण इति शेषः । हा हा कृतं हा हेत्येतत्कृतं ॥ ७३ ॥ समुत्पत्य रावणसमीपं गतेति शेषः । मण्डोदरी मण्डनभूतोदरी । " मडि भूषायाम् " इत्यस्माद्धातोः पचाद्यच् । मन्दोदरी

सर्वांरात्रीं । अल्पशेषायांरात्रावशोकवनिकायादर्शनादेवमुक्तिः ॥ ५० ॥ **रामानु०** परिरभ्य चितत्रासेतिशेषः ॥ ६४ ॥ **ति०** सादृश्यसंभावनापिदूरापास्तेत्याह—**दास्येपीति । स०** अस्यदास्ये दासत्वे । नयुज्यसे युक्तोनभवसि । अपिना मूलरूपेपि द्वार्बहिरवस्थानमेवनान्तर्दास्येयोग्यइतिसूचयति ॥ ७१ ॥ **ति०** चितास्थपावकत्वेनास्पृश्यतासूचिता ॥ ७२ ॥ **ति०** यद्वा

[पा०] १ क. ङ.—ट. हरिणींयथा. २ क.—घ. च. छ. ज. ञ. रामपत्नीमनिन्दितां. ३ ग. च. छ. ज. ञ. सहसोद्विग्नः. ४ ग. च.—ट. स्वरूपंप्रत्यसंहरं. ५ ख. देशमभिसंप्राप्ता. ६ क. ख. घ. ङ. च. ज.—ट. तंदृष्ट्वाथ. ७ क. ख. घ. ङ. च. ज.—ट. रक्षोगणेश्वरं. ८ क. ङ. झ. ञ. ट. वीक्षमाणामितस्ततः. ९ ख. मनस्विनीं. १० ङ. झ. ट. द्विमासानन्तरं. ११ ङ. झ. ञ. ट. इक्ष्वाकुवंश. १२ घ.—ट. अजेयःसत्यवाञ्छूरो. ग. धार्मिकःसत्यवादीच.

उक्तश्च मधुरां वाणीं तया स मदनार्दितः ॥ सीतया तव किं कार्यं महेन्द्रसमविक्रम ॥
[[1] मया सह रमस्वाद्य मद्विशिष्टा न जानकी] ॥ ७५ ॥
देवगन्धर्वकन्याभिर्यक्षकन्याभिरेव च ॥ सार्धं प्रभो [2]रमस्वेह सीतया किं करिष्यसि ॥ ७६ ॥
ततस्ताभिः समेताभिर्नारीभिः स महाबलः ॥ [3]प्रसाद्य सहसा नीतो भवनं स्वं निशाचरः ॥७७॥
याते तस्मिन्दशग्रीवे राक्षस्यो विकृताननाः ॥ सीतां निर्भर्त्सयामासुर्वाक्यैः क्रूरैः सुदारुणैः ॥७८॥
तृणवद्भाषितं तासां गणयामास जानकी ॥ गर्जितं च त[4]दा तासां सीतां प्राप्य निरर्थकम् ॥७९॥
वृथागर्जितनिश्चेष्टा [5]राक्षस्यः पिशिताशनाः ॥ रावणाय शशंसुस्ताः सी[6]ताध्यवसितं महत् ॥ ८० ॥
ततस्ताः सहिताः सर्वा विहताशा निरुद्यमाः ॥ [7]परिक्षिप्य समन्तात्तां निद्रावशमुपागताः ॥ ८१ ॥
तासु चैव प्रसुप्तासु सीता भर्तृहिते रता ॥ विलप्य करुणं दीना [8]प्रशुशोच सुदुःखिता ॥ ८२ ॥
तासां मध्यात्समुत्थाय त्रिजटा वाक्यमब्रवीत् ॥ ८३ ॥
आत्मानं [9]खादत क्षिप्रं न सी[10]तां विनशिष्यति ॥ [11]जनकस्यात्मजा साध्वी स्नुषा दशरथस्य च ॥८४॥
स्वप्नो ह्यद्य मया दृष्टो दारुणो रोमहर्षणः ॥ [12]रक्षसां च विनाशाय भर्तुरस्या जयाय च ॥ ८५ ॥
[13]अलमस्मात्परित्रातुं राघवाद्राक्षसीगणम् ॥ अभियाचाम वैदेहीमेतद्धि मम रोचते ॥ ८६ ॥
[14]यस्या ह्येवंविधः स्वप्नो दुःखितायाः प्रदृश्यते ॥ सा दुःखैर्विविधैर्मुक्ता [15]सुखमाप्नोत्यनुत्तमम् ॥८७॥
प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा ॥ [[16]अलमेषा परित्रातुं राक्षस्यो महतो भयात्] ॥ ८८॥
ततः सा ह्रीमती बाला भर्तुर्विजयहर्षिता ॥ अवोचद्यदि तत्तथ्यं भवेयं शरणं हि वः ॥ ८९ ॥
तां चाहं तादृशीं दृष्ट्वा सीताया दारुणां दशाम् ॥ चिन्तयामास वि[17]क्रान्तो न च मे निर्वृतं मनः ॥९०॥

वा । दडयोरभेदः । दम्भो दाडिममित्यादिवत् । यद्वा मन्दत्वं चाल्पत्वं । "मूढाल्पापटुनिर्भाग्या मन्दा" इत्यमरः । सूक्ष्मोदरीत्यर्थः । मन्दा स्थूलपिपीलिकेत्याचक्षते । तस्या इव कृशमस्या उदरमित्यर्थः । ननु पूर्वं धान्यमालिन्या प्रतिषिद्ध इत्युक्तं । संप्रति मण्डोदर्येत्युच्यते । विप्रतिषिद्धमिदं । मैवं । उभाभ्यामपि प्रतिषिद्धत्वेनान्यतरोक्तावविरोधात् । मण्डोदर्यादिनामपरिज्ञानं च हनुमतस्तदीयव्यवहारात् ॥ ७४—७६ ॥ ताभिः देवकन्याभिः । अनेन मण्डोदर्यादिवदन्यासामपि निवारयितृत्वमुक्तं ॥ ७७ ॥ क्रूरैः क्रूरशब्दैः । सुदारुणैः अर्थतोपि क्रूरैः ॥ ७८ ॥ तृणवत् गणयामासेत्यन्वयः ॥७९॥ वृथागर्जितनिश्चेष्टाः वृथागर्जितेन निर्व्यापाराः ॥ ८० ॥ ततस्ताइति । तूष्णीं रक्षतेति रावणोक्ता इति शेषः । परिक्षिप्य परिवार्य ॥ ८१ ॥ सुदुःखिता प्रशुशोच । उत्तरोत्तरं दुःखितवतीत्यर्थः ॥ ८२—८५ ॥ अलं शक्ता । "अलं भूषणपर्याप्तिशक्तिवारणवाचकं" इत्यमरः । परित्रातुं एषेति शेषः ॥ ८६—८७ ॥ अपराधिजनप्राणत्राणे हेतुमाह—प्रणिपातेति ॥ ८८ ॥ ततः त्रिजटावाक्यानन्तरं । भर्तुर्विजयहर्षिता त्रिजटाकथितस्वप्नसूचितरामविजयहर्षिता । तत् त्रिजटास्वप्नवाक्यं । शरणं हि व इत्यत्रेतिकरणं द्रष्टव्यं ॥८९॥ नच

मन्दोदर्याएवनामान्तरंधान्यमालिनीत्युक्तं ॥ ७४ ॥ **स०** राक्षसीगणं राघवात्परित्रातुं अलं समर्था । प्रसादितासीतेति शेषः । तस्मादभियाचाम प्रार्थयाम ॥ ८६ ॥ **शि०** ननुस्वप्नस्यमिथ्यात्वात्किंतद्दर्शनेनसीताभर्तृविजयादीत्यतआह—**यदीति।** दुःखितायाएवंविधःस्वप्नोयदिदृश्यते तर्हि सादुःखिता दुःखैर्विमुक्तासतीसुखमाप्नोति । एतेन स्वप्नस्यमिथ्यात्वेपितद्दर्शनजनितफल॰

[पा०] १ इदमर्धं ङ. च. ज.—ट. पाठेषुदृश्यते. २ क. ङ. झ. ट. रमस्वेति. ३ ङ. झ. ट. उत्थाप्य. ४ ङ. झ. ट. तथा. ५ घ. ट. राक्षस्योविकृताननाः. ६ क.—घ. ङ. झ. ट. सीताव्यवसितं. ७ ङ. च. ज.—ट. परिक्लिश्य. ८ ग. प्ररुरोद. घ. प्रचुक्रोश. ९ क. ख. खादतानार्यानसीतांभक्षयिष्यत. १० ङ. झ. ट. सीतामसितेक्षणां. ११ ङ. झ. ट. जनकस्यात्मजांसाध्वींस्नुषांदशरथस्यच. १२ क. राक्षसानांविनाशायराघवस्यजयायच. घ. राक्षसानामभावाय. १३ क. अलमेपापरित्रातुं. १४ ग. ङ.—ट. यदिह्येवंविधः. १५ घ. सुखंप्राप्नोत्यनुत्तमं. १६ इदमर्धं ङ.—ट. पाठेषुदृश्यते. १७ ङ. झ. ट. विश्रान्तो.

संभाषणार्थं च मया जानक्याश्चिन्तितो विधिः ॥ इक्ष्वाकूणां[1] हि वंशस्तु ततो मम पुरस्कृतः ॥ ९१ ॥
श्रुत्वा तु गदितां वाचं राजर्षिगणपूजिताम् ॥ प्रत्यभाषत मां देवी बाष्पैः पिहितलोचना ॥ ९२ ॥
कस्त्वं केन कथं चेह प्राप्तो वानरपुङ्गव ॥ का[2] च रामेण ते प्रीतिस्तन्मे शंसितुमर्हसि ॥ ९३ ॥
तस्यास्तद्वचनं श्रुत्वा ह्यहम[3]प्यब्रवं वचः ॥ ९४ ॥
देवि रामस्य भर्तुस्ते सहायो भीमविक्रमः ॥ सुग्रीवो नाम विक्रान्तो वानरेन्द्रो महाबलः ॥ ९५ ॥
तस्य मां विद्धि भृत्यं त्वं हनुमन्तमिहागतम् ॥ भर्त्राहं[4] प्रेषितस्तुभ्यं रामेणाक्लिष्टकर्मणा ॥ ९६ ॥
इदं च पुरुषव्याघ्रः श्रीमान्दाशरथिः स्वयम् ॥ अङ्गुलीयमभिज्ञानमदात्तुभ्यं यशस्विनि ॥ ९७ ॥
तदिच्छामि त्वयाऽऽज्ञप्तं देवि किं करवाण्यहम् ॥ रामलक्ष्मणयोः पार्श्वं नयामि त्वां किमुत्तरं ॥९८॥
एतच्छ्रुत्वा विदित्वा च सीता जनकनन्दिनी ॥ आह रावणमु[5]त्साद्य राघवो मां नयत्विति ॥९९॥
प्रणम्य शिरसा देवीमहमार्यामनिन्दिताम् ॥ राघवस्य मनोह्लादमभिज्ञानमयाचिषम् ॥ १०० ॥
अथ मामब्रवीत्सीता गृह्यतामयमुत्तमः ॥ मणिर्येन महाबाहू रामस्त्वां बहुमन्यते ॥ १०१ ॥
इत्युक्त्वा तु वरारोहा मणिप्रवरमद्भुतम्[6] ॥ प्रायच्छत्परमोद्विग्ना वाचा मां संदिदेश ह ॥ १०२ ॥
ततस्तस्यै प्रणम्याहं राजपुत्र्यै समाहितः ॥ प्रदक्षिणं प[7]रिक्राममिहाभ्युद्गतमानसः ॥ १०३ ॥
उ[8]त्तरं पुनरेवेदं निश्चित्य मनसा त[9]या ॥ [ज्ञा[10]त्वा संप्रस्थितं सीता मामुवाच तपस्विनी ॥]
हनुमन्मम वृत्तान्तं वक्तुमर्हसि राघवे ॥ १०४ ॥
यथा श्रुत्वैव नचिरात्तावुभौ रामलक्ष्मणौ ॥ सुग्रीवसहितौ वीरावुपेयातां तथा कुरु ॥ १०५ ॥
य[11]द्यन्यथा भवेदेतद्द्वौ मासौ जीवितं मम ॥ न मां द्रक्ष्यति काकुत्स्थो म्रिये साऽहमनाथवत् ॥ १०६ ॥
तच्छ्रुत्वा करुणं वाक्यं क्रोधो मामभ्यवर्तत ॥ उत्तरं च मया दृष्टं कार्यशेष[12]मनन्तरम् ॥ १०७ ॥
त[13]तोऽवर्धत मे कायस्तदा पर्वतसन्निभः ॥ यु[14]द्धकाङ्क्षी वनं त[15]च्च विनाशयितुमारभे ॥ १०८ ॥
त[16]द्भग्नं वनषण्डं तु भ्रान्तत्रस्तमृ[17]गद्विजम् ॥ प्र[18]तिबुद्धा निरीक्षन्ते राक्षस्यो विकृताननाः ॥ १०९ ॥
मां च दृष्ट्वा वने तस्मिन्सं[19]मागम्य ततस्ततः ॥ ता[20]ः समभ्यागताः क्षिप्रं रावणायाचचक्षिरे ॥ ११० ॥

मे निर्वृतं किन्तुदुःखितमित्यर्थः ॥ ९० ॥ विधिः उपायः ॥ ९१—१०१ ॥ वाचा मां संदिदेशेति । स्वरामैकवेद्यं प्रागुक्तं काकासुरवृत्तान्तं तिलकनिर्माणादिकं च संदिष्टवतीत्यर्थः ॥ १०२॥ परिक्रामं पर्यक्रामं । इहाभ्युद्गतमानसः इहाभ्युद्गते इहाभ्यागमने मानसं यस्य स तथा ॥१०३—१०५॥ एतत् उपयानं । यद्यन्यथा भवेत् यदि नोपेयातामित्यर्थः । तदा द्वौ मासौ मम जीवितं । ततः परं जीवामीत्यर्थः । न मां द्रक्ष्यसि मासद्वयाभ्यन्तरे मां न द्रक्ष्यति चेत् तदा म्रिय इति योज्यं । मासशब्दोत्र पक्षपरः । " पक्षा वै मासाः " इति श्रुतेः ॥ १०६ ॥ उत्तरं अनन्तरं । अनन्तरं अनन्तरकर्तव्यं उत्तरकार्यमित्यर्थः ॥१०७–

स्यसत्यत्वंध्वनितं । मतान्तरेस्वप्नस्यापिसत्यत्वमित्यन्यदेतत् ॥ ८७ ॥ **स०** सर्वैः पुरस्कृतः प्रधानीकृतः । इक्ष्वाकोर्यत्कुलंसंततिरूपंगृहं तस्यवंशः गृहाधारस्थूणावेणुस्थानीयोरामः मम मया स्तुतः ॥ ९१ ॥ **स०** अभिज्ञानं स्मृतिजनकं ॥ ९७॥ **रामानु०** त्वया आज्ञप्तमिच्छामि त्वत्कर्तृकमाज्ञापनमिच्छामीत्यर्थः । किंशब्दःक्षेपे । रामलक्ष्मणयोःपार्श्वंत्वांनयामि । उत्तरंकिं एवमेवंवदे-

[पा०] १ ग.—ट. इक्ष्वाकुकुलवंशस्तुस्तुतो. २ च. छ. ज. ञ. क्वच. ३ ख. ङ.—ट. अहमपि. ४ ङ.—ट. संप्रहितस्तुभ्यं. घ. संप्रेषितस्तुभ्यं. ५ छ. झ. ञ. ट. मुत्पाट्य. ६ क.—ट. मुत्तमं. ७ क. ग. घ. च. छ. ज. परिक्रम्यइहा. क. परिक्रम्यइहाभ्यागत. ८ ङ. छ. झ. ञ. ट. उत्तरंपुनरेवाह. ख. उक्तोहंपुनरेवेदं. ९ क. ग.—ट. तदा. १० इदमर्धं क. पाठेदृश्यते. ११ ग. ङ. च. छ. झ. ञ. ट. यदन्यथा. १२ च. छ. ज. ञ. मनुत्तमं. १३ क. ख. ततोहंवातवेगेनतदा. १४ ङ. झ. युद्धाकाङ्क्षी. १५ घ. ङ. झ. ट. तस्य. १६ क. भग्नपादपषण्डंतु. १७ घ. वनद्विजं. १८ ङ. च. झ. ञ. ट. प्रतिबुध्य १९ घ. न्समागत्य. २० क. गत्वातास्त्वरिताः.

राजन्वनमिदं दुर्गं तव भग्नं दुरात्मना ॥ वानरेण ह्यविज्ञाय तव वीर्यं महाबल ॥ १११ ॥
[1]दुर्बुद्धेस्तस्य राजेन्द्र तव विप्रियकारिणः ॥ वधमाज्ञापय क्षिप्रं यथाऽसौ [2]विलयं व्रजेत् ॥ ११२ ॥
तच्छ्रुत्वा राक्षसेन्द्रेण विसृष्टा [3]भृशंदुर्जयाः ॥ राक्षसाः किंकरा नाम रावणस्य मनोनुगाः ॥ ११३ ॥
तेषामशीतिसाहस्रं शूलमुद्गरपाणिनाम् ॥ मया तस्मिन्वनोद्देशे परिघेण निषूदितम् ॥ ११४ ॥
तेषां तु [4]हतशेषा ये ते गत्वा लघुविक्रमाः ॥ निहतं च [5]महत्सैन्यं रावणायाचचक्षिरे ॥ ११५ ॥
ततो मे बुद्धिरुत्पन्ना चैत्यप्रासादमा[6]क्रमम् ॥ तत्रस्थात्राक्षसान्हत्वा शतं स्तम्भेन वै पुनः ॥
ललामभूतो [7]लङ्कायाः स वै विध्वंसितो मया ॥ ११६ ॥
ततः प्रहस्तस्य सुतं जम्बुमालिनमादिशत् ॥ राक्षसैर्बहुभिः सार्धं घोररूपै[8]र्भयानकैः ॥ ११७ ॥
तमहं [9]बलसंपन्नं राक्षसं रणकोविदम् ॥ परिघेणातिघोरेण सूदयामि सहानुगम् ॥ ११८ ॥
तच्छ्रुत्वा राक्षसेन्द्रस्तु मन्त्रिपुत्रान्महाबलान् ॥ पदातिबलसंपन्नान्प्रेषयामास रावणः ॥ ११९ ॥
परिघेणैव तान्सर्वान्नयामि यमसादनम् ॥ १२० ॥
मन्त्रिपुत्रान्हताञ्छ्रुत्वा समरे लघुविक्रमान् ॥ पञ्च सेनाग्रगाञ्छूरान्प्रेषयामास रावणः ॥ १२१ ॥
तानहं सहसैन्यान्वै सर्वानेवाभ्यसूदयम् ॥ १२२ ॥
ततः पुनर्दशग्रीवः पुत्रमक्षं महाबलम् ॥ बहुभी राक्षसैः सार्धं प्रेषयामास रावणः ॥ १२३ ॥
तं तु मन्दोदरीपुत्रं कुमारं रणपण्डितम् ॥ सहसा खं [11]समुत्क्रान्तं पादयोश्च गृहीतवान् ॥
[12]चर्मासिनं शतगुणं भ्रामयित्वा व्यपेषयम् ॥ १२४ ॥
तमक्षमागतं भग्नं निशम्य स दशाननः ॥ [13]तत इन्द्रजितं नाम द्वितीयं रावणः सुतम् ॥
व्यादिदेश सुसंक्रुद्धो बलिनं युद्धदुर्मदम् ॥ १२५ ॥
तच्चाप्यहं बलं सर्वं तं च राक्षसपुङ्गवम् ॥ नष्टौजसं रणे कृत्वा परं हर्षमुपागमम् ॥ १२६ ॥
महतापि महाबाहुः प्रत्ययेन महाबलः ॥ प्रेषितो [14]रावणेनैव सह वीरै[15]र्मदोत्कटैः ॥ १२७ ॥
सोविषह्यं हि मां बुद्ध्वा [16]स्वबलं चावमर्दितम् ॥ ब्राह्मेनास्त्रेण स तु मां प्राबध्नाच्चातिवेगितः ॥ १२८ ॥
[17]रज्जुभिश्चाभि बध्नन्ति ततो मां तत्र राक्षसाः ॥ रावणस्य समीपं च गृहीत्वा [18]मामुपानयन् ॥ १२९ ॥
दृष्ट्वा [19]संभाषितश्चाहं रावणेन दुरात्मना ॥ पृष्टश्च लङ्कागमनं राक्षसानां च [20]तं वधम् ॥ १३० ॥
तत्सर्वं च [21]मया तत्र [22]सीतार्थमिति जल्पितम् ॥ १३१ ॥

११५ ॥ ततो मे बुद्धिरुत्पन्ना वक्ष्यमाणकार्यविषयेत्यर्थः । तादृशं बुद्धिकार्यमाह—चैत्येत्यादिना । चैत्यप्रासादं नगरमध्यस्थप्रासादं । ललामभूतः अलंकारभूतः ॥ ११६—११८ ॥ पदातिबलसंपन्नान् पदातिप्रभृ-

त्याज्ञापनरूपमुत्तरंकिमित्यर्थः ॥ ति० उत्तरं समुद्रोत्तरकूलस्थं ॥ ९८ ॥ ति० तस्यदुर्बुद्धितेतिबहुव्रीहेस्तल् । नपुनर्व्रजेत् स्वदेशमितिशेषः ॥ ११२ ॥ **रामानु०** शूलमुद्गरपाणिनामित्यत्र दीर्घाभावआर्षः ॥ ११४ ॥ **ति०** चैत्यप्रासादं विनाशयितुमितिशेषः ॥ ११६ ॥ **रामानु०** चर्मासिनमित्यत्र इन्नन्तत्वमार्षं ॥ १२४ ॥ **रामानु०** द्वितीयं प्रेषितपुत्रापेक्षयाद्वितीयं ॥ १२५ ॥

[पा०] १ ङ. झ. ट. तस्यदुर्बुद्धिताराजंस्तव. ग. तस्यदुर्बुद्धिनोराजंस्तव. २ ङ. झ. ट. नपुनर्व्रजेत. ३ ङ. झ. ट. बहुदुर्जयाः. ४ ङ.—ट. हतशिष्टाये. ५ क. ग. ङ.—ट. मयासैन्यं. ६ ग. ङ.—ट. मुत्तमं. ७ ग. ङ.—झ. ट. लङ्कायामयाविध्वंसितोरुषा. ८ ग. भयावहैः. ङ. दुरासदैः. ९ क. सबलंसार्धं. १० क. ग. ङ.—ट. संयुगे. ११ ङ.—ट. समुद्यन्तं. १२ ङ. झ. ञ. तमासीनं. १३ ङ.—ट. ततश्चेन्द्रजितं. १४ क. रावणेनैषमहावीर्योमदोत्कटः. १५ ङ.—ट. मदोद्धतैः. १६ क. ग.—ट. स्वसैन्यंच. १७ ग. रज्जुभिश्चबबन्धुस्ते. १८ ङ. छ. झ. ञ. ट. मामुपागमन्. १९ ग. घ. संभाषितस्तेन. २० क.—घ. तद्वधं. २१ क. ग. ङ.—ट. रणेतत्र. २२ ङ.—ट. सीतार्थमुप. घ. सीतार्थमभि.

[1]अस्याहं दर्शनाकाङ्क्षी प्राप्तस्त्वद्भवनं विभो ॥ मारुतस्यौरसः पुत्रो वानरो हनुमानहम् ॥ १३२ ॥
रामदूतं च मां विद्धि सुग्रीवसचिवं कपिम् ॥ सोहं [2]दूत्येन रामस्य [3]त्वत्सकाशमिहागतः ॥ १३३ ॥
[[4]शृणु चापि समादेशं यदहं प्रब्रवीमि ते ॥ राक्षसेश हरीशस्त्वां वाक्यमाह समाहितम् ॥१३४॥]
सुग्रीवश्च [5]महातेजाः स त्वां कुशलमब्रवीत् ॥ धर्मार्थकामसहितं हितं पथ्यमुवाच च ॥ १३५ ॥
वसतो ऋश्यमूके मे पर्वते विपुलद्रुमे ॥ राघवो रणविक्रान्तो मित्रत्वं समुपागतः ॥ १३६ ॥
तेन मे कथितं [6]राज्ञा भार्या मे रक्षसा हृता ॥ तत्र साहाय्यमस्माकं कार्यं सर्वात्मना त्वया ॥१३७॥
मया च कथितं तस्मै वालिनश्च वधं प्रति ॥ तत्र साहाय्यहेतोर्मे समयं कर्तुमर्हसि ॥ १३८ ॥
वालिना हृतराज्येन सुग्रीवेण [7]महाप्रभुः ॥ [8]चक्रेऽग्निसाक्षिकं सख्यं राघवः सहलक्ष्मणः ॥ १३९ ॥
[9]तेन वालिन[10]मुत्पाट्य शरेणैकेन संयुगे ॥ वानराणां महाराजः कृतः स प्लवतां प्रभुः ॥ १४० ॥
[11]तस्य साहाय्यमस्माभिः कार्यं सर्वात्मना त्विह ॥ तेन प्रस्थापितस्तुभ्यं समीपमिह धर्मतः ॥१४१॥
क्षिप्रमानीयतां सीता दीयतां [12]राघवाय च ॥ यावन्न हरयो वीरा विधमन्ति बलं तव ॥ १४२ ॥
वानराणां [13]प्रभावो हि न केन विदितः पुरा ॥ देवतानां सकाशं च ये गच्छन्ति निमन्त्रिताः ॥१४३॥
इति वानरराजस्त्वामाहेत्यभिहितो मया ॥ मामैक्षत [14]ततः क्रुद्धश्चक्षुषा प्रदहन्निव ॥ १४४ ॥
तेन वध्योऽहमाज्ञप्तो रक्षसा [15]रौद्रकर्मणा ॥ मत्प्रभावमविज्ञाय रावणेन दुरात्मना ॥ १४५ ॥
ततो विभीषणो नाम तस्य भ्राता [16]महामतिः ॥ तेन [17]राक्षसराजोसौ याचितो मम कारणात् ॥१४६॥
नैवं राक्षसशार्दूल त्यज्यतामेष निश्चयः ॥ राजशास्त्रव्यपेतो हि मार्गः [18]संसेव्यते त्वया ॥ १४७॥
दूतवध्या न दृष्टा हि राजशास्त्रेषु राक्षस ॥ दूतेन वेदितव्यं च [19]यथार्थं हितवादिना ॥ १४८ ॥
सुमहत्यपराधेपि दूतस्यातुलविक्रम ॥ विरूपकरणं दृष्टं न वधोस्तीति शास्त्रतः ॥ १४९ ॥
विभीषणेनैवमुक्तो रावणः संदिदेश तान् ॥ राक्षसानेतदेवास्य लाङ्गूलं दह्यतामिति ॥ १५० ॥
ततस्तस्य वचः श्रुत्वा मम पुच्छं समन्ततः ॥ वेष्टितं शणवल्कैश्च [20]जीर्णैः कार्पासजैः पटैः ॥१५१॥

तिसैन्यसंपन्नान् ॥ ११९—१३१ ॥ अस्याः सीतायाः । विसंधिरार्षः ॥ १३२—१३४ ॥ धर्मार्थकामसहितमिति तत्र धर्मसाहित्यात् हितं परत्र उपकारकं । अर्थसाहित्यात्पथ्यं । इहोपकारकं चेत्यर्थः ॥ १३५—१३८ ॥ सुग्रीवश्चेत्यादिना सुग्रीवोक्तं कियदनूद्य संप्रति शेषं स्वयं वक्ता सन्नाह—वालिनेति ॥ १३९—१४३ ॥ इदं वचस्सुग्रीवोक्तमेव मयोक्तमित्याह—इतीति ॥ १४४–१४६ ॥ नैवमिति । कर्तव्यमिति शेषः । राजशास्त्रं राजधर्मशास्त्रं ॥१४७॥ वेदितव्यं वक्तव्यमित्यर्थः ॥१४८—

रामानु॰ अहंप्राप्तः अहंहनुमान् इत्यहंशब्दस्यनिर्वाहः ॥ १३२ ॥ **स॰** समोऽहितेनशत्रुणेतिसमाहितः । पूर्ववालिमुखतःस ख्येपिइदानींरामसाहाय्येनशत्रुंत्वामित्यर्थः ॥ १३४ ॥ **रामानु॰** सुग्रीवेण मयेतिशेषः ॥ १३९ ॥ **रामानु॰** वानराणांमहाराजःकृतः । अहमितिशेषः ॥ १४० ॥ **रामानु॰** तेन साहाय्यस्यास्माभिःकर्तव्यत्वेन । प्रस्थापितः दूतइतिशेषः ॥ **शि॰** तेन मया ॥ १४१ ॥ **रामानु॰** विधमन्ति । " यावत्पुरानिपातयोर्लट् " इतिलडर्थेलट् ॥ १४२ ॥ **रामानु॰** येहिनिमन्त्रिताः युद्धसाहाय्यार्थमाहूताः । देवतानांसकाशंगच्छन्ति तेषांवानराणांप्रभावः पुराकेननविदितः । त्वयाविज्ञातएवेतिभावः ॥ **स॰** निमन्त्रिताः आज्ञप्ताः । अनेनराजाज्ञाभावादेवनैतावत्कालपर्यन्तमत्रागताइतिध्वन्यते ॥ **ति॰** वानराणामिति । राघवाणामितिपाठे

[पा॰] १ ङ. झ. ट. तस्यास्तु. घ. अस्याःसंदर्शनाकाङ्क्षी. २ क. घ.—ट. दौत्येन. ३ क. ख. घ. त्वत्समीपमुपागतः. ४ अयंश्लोकः ङ.—ट. पाठेषुदृश्यते. ५ ङ.—ट. महाभागस्त्वांकौशलं. ६ क.—ट. राजन्भार्या. ७ ङ.—झ. ट. सहप्रभुः. घ. समंप्रभुः. ८ ग कृत्वाग्निसाक्षिकं. ९ क. तेनवालीविनिहतोराघवेणमहाजिरे। राज्यंचसुमहत्प्राप्तंसुग्रीवेणमहात्मना. १० ख. ग. घ. मुत्साद्य. ङ. च. ज.—ट. माहत्य. ११ क. घ. तत्र. १२ ग.—ट. राघवस्यच. १३ ङ. झ. ट. प्रभावोयं. १४ ख. ग. ङ.—ट. ततोरुष्टश्चक्षुषा. घ. रुषाविष्टश्चक्षुषा. १५ घ. क्रूरकर्मणा. १६ घ. महाद्युतिः. १७ ग. ङ. छ. झ. ञ. ट. राक्षसराजश्च. १८ ङ. झ. ञ. ट. संलक्ष्यते. १९ ग. ङ. झ. ट. यथाभिहितवादिना. २० ग.—ञ. पटैःकार्पासकैस्तथा.

राक्षसाः सिद्धसन्नाहास्ततस्ते चण्डविक्रमाः ॥ [1]तदाऽदह्यन्त मे पुच्छं निघ्नन्तः काष्ठमुष्टिभिः ॥१५२॥
बद्धस्य बहुभिः पाशैर्यन्त्रितस्य च राक्षसैः ॥ [[2]न मे पीडा भवेत्काचिद्दिदृक्षोर्नगरीं दिवा] ॥१५३॥
ततस्ते राक्षसाः शूरा बद्धं मामग्निसंवृतम् ॥ अघोषयन्राजमार्गे नगरद्वारम[3]ागताः ॥ १५४ ॥
ततोऽहं सुमहद्रूपं संक्षिप्य पुनरात्मनः ॥ विमोचयित्वा तं बन्धं प्रकृतिस्थः स्थितः पुनः ॥१५५॥
आयसं परिघं गृह्य तानि रक्षांस्यसूदयन् ॥ ततस्तन्नगरद्वारं वेगेनाप्लुतवाहनम् ॥ १५६ ॥
पुच्छेन च प्रदीप्तेन तां पुरीं साट्टगोपुराम् ॥ दहाम्यहमसंभ्रान्तो युगान्ताग्निरिव प्रजाः ॥ १५७ ॥
[[4]ततो मे ह्यभवत्त्रासो लङ्कां दग्धां समीक्ष्य तु ॥] विनष्टा जानकी व्यक्तं न ह्यदग्धः प्रदृश्यते ॥
लङ्कायां कश्चिदुद्देशः सर्वा भस्मीकृता पुरी ॥ १५८ ॥
दहता च मया लङ्कां दग्धा सीता न संशयः ॥ [6]रामस्य हि महत्कार्यं मयेदं [7]वितथीकृतम् ॥ १५९ ॥
इति शोकसमाविष्टश्चिन्तामहमुपागतः ॥ १६० ॥
[8]अथाहं वाचम[9]श्रौषं चारणानां शुभाक्षराम् ॥ जानकी न च दग्धेति [10]विस्मयोदन्तभाषिताम् ॥ १६१ ॥
ततो मे बुद्धिरुत्पन्ना श्रुत्वा तामद्भुतां गिरम् ॥ अदग्धा जानकीत्येवं निमित्तै[11]श्चोपलक्षिता ॥ १६२ ॥
दीप्यमाने तु लाङ्गूले न मां दहति पावकः ॥ हृदयं च प्रहृष्टं मे वाताः सुरभिगन्धिनः ॥ १६३ ॥
तैर्निमित्तैश्च दृष्टार्थैः कारणैश्च महागुणैः ॥ ऋषिवाक्यैश्च [12]सिद्धार्थैरभवं हृष्टमानसः ॥ १६४ ॥
पुनर्दृष्ट्वा च वैदेहीं विसृष्टश्च तया पुनः ॥ १६५ ॥
ततः पर्वतमासाद्य तत्रारिष्टमहं पुनः ॥ प्रतिप्लवनमारेभे युष्मद्दर्शनकाङ्क्षया ॥ १६६ ॥
ततः [13]पवनचन्द्रार्कसिद्धगन्धर्वसेवितम् ॥ पन्थानमहमाक्रम्य भवतो [14]दृष्टवानिह ॥ १६७ ॥
राघवस्य प्रभावेन भवतां चैव तेजसा ॥ सुग्रीवस्य च कार्यार्थं मया सर्वमनुष्ठितम् ॥ १६८ ॥

---

१५२ ॥ यन्त्रितस्य आवृतस्य ॥ १५३ ॥ नगरद्वारमागतास्सन्तः राजमार्गे अघोषयन्निति योजना ॥ १५४—१५६ ॥ अट्टं वलभिः ॥ १५७—१६० ॥ विस्मयोदन्तभाषितां भाषितविस्मयोदन्तां । उक्ताद्भुतवार्तामित्यर्थः । विस्मयवृत्तान्तव्यवहृतामिति वा ॥ १६१ ॥ निमित्तैश्चोपलक्षिता शकुनादिभिश्च सीता न दग्धेति ज्ञातेत्यर्थः ॥ १६२ ॥ हृदयं प्रहृष्टं । आसीदितिशेषः । सुरभिगन्धिनः आसन्निति शेषः ॥ १६३ ॥ दृष्टार्थैः दृष्टफलैः । निमित्तैः शकुनैः । कारणैः नेत्रस्फुरणादिभिः । महागुणैः फलव्याप्तैः । सिद्धार्थैः अबाधितार्थैः । तत्र हेतुत्वेन ऋषिपदोपादानं ॥ १६४ ॥ पुनरित्यर्धमेकं वाक्यं । विसृष्टः प्रेषितोस्मि ॥ १६५ ॥ तत्र लङ्कासमीपे । सामीप्ये सप्तमी । तत्र वर्तमानं अरिष्टं पर्वतं ॥ १६६ ॥ भवतो दृष्टवानिह । भवतः युष्मान् । इह समुद्रतीरे ॥ १६७ ॥ भवतां चैव तेजसा भवदनुग्रहेणेत्यर्थः । सुग्रीवस्य च कार्यार्थं स्वामिकार्यस्यावश्यकर्तव्यत्वादिति भावः । कार्यार्थं कार्यवस्तु । क्लीबत्वमार्षं । अस्यानुवादवाक्यविस्तरस्य प्रयोजनं

मनुष्योसमर्थइतिनमन्तव्यमितिभावः ॥ १४३ ॥ **ति०** उपलक्षितं तददहनमितिशेषः । निमित्तैः शुभसूचकैः ॥ १६२ ॥ **स०** गन्धएषामस्तीतिगन्धिनः । सुरभयश्चतेगन्धिनश्चेतिविग्रहः । सुरभिलंगन्धेसप्तघटिकाभोजनमित्यत्रेवार्थादन्वेति ॥ १६३ ॥ इत्यष्टपञ्चाशःसर्गः ॥ ५८ ॥

[पा०] १ क. ग. ङ. झ. ञ. ट. तदाऽदीप्यन्त. २ इदमर्धं ङ.—ट. पाठेषुदृश्यते. ३ घ. माश्रिताः. ४ इदमर्धं क. ख. पाठयोर्दृश्यते. ५ क. ख. नमीनापरिरक्षिता. ६ च. छ. ज. ञ. रामस्येदंमयाकार्यंभूयोवा. ७ ङ. झ. ट. विफलीकृतं. ८ ङ. झ. ट. ततोहं. ९ घ. गगनेऽश्रौषं. १० क. ग. घ. विस्मयोदात्तभाषिणां. ११ ङ. झ. ट. श्चोपलक्षितं. १२ ङ. झ. ट. दृष्टार्थैरभवं. १३ ङ. झ. ट. श्वसन. १४ च. छ. ज. दृष्टवानहं.

एतत्सर्वं मया तत्र यथावदुपपादितम् ॥ [1]अत्र यन्न कृतं शेषं तत्सर्वं क्रियतामिति ॥ १६९ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टपञ्चाशः सर्गः ॥ ५८ ॥

एकोनषष्टितमः सर्गः ॥ ५९ ॥

हनुमता वानरान्प्रति सीतादुरवस्थानिवेदनपूर्वकं तदसहिष्णुतया जांबवदादिपराक्रमप्रशंसनेन तत्साहाय्यात्कैमुत्येन स्वस्य रावणादिहननसामर्थ्यनिवेदनपूर्वकं सीतापुरस्करणेन रामदर्शनस्यौचित्योक्तिः ॥ १ ॥

एतदाख्याय तत्सर्वं हनुमान्मारुतात्मजः ॥ भूयः समुपचक्राम वचनं वक्तुमुत्तरम् ॥ १ ॥
सफलो राघवोद्योगः सुग्रीवस्य च [2]संभ्रमः ॥ शीलमासाद्य सीताया मम च [3]प्रवणं मनः ॥
[[4]आर्यायाः सदृशं शीलं सीतायाः प्लवगर्षभाः] ॥ २ ॥
तपसा धारयेल्लोकान्[5]क्रुद्धो वा निर्दहेदपि ॥ सर्वथाऽति[6]प्रवृद्धोसौ रावणो राक्षसाधिपः ॥
[7]तस्य तां स्पृशतो गात्रं तपसा न विनाशितम् ॥ ३ ॥
न तदग्निशिखा कुर्यात्संस्पृष्टा पाणिना सती ॥ जनकस्यात्मजा कुर्याद्यत्क्रोधकलुषीकृता ॥ ४ ॥

वानराणां श्रवणकुतूहलातिशयप्रकाशनं ॥१६८-१६९ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टपञ्चाशः सर्गः ॥ ५८ ॥

तदेतदाख्याय उत्तरं वचनं वक्तुमुपचक्रामेत्यन्वयः ॥ १ ॥ अथ संप्रत्येव रावणं जित्वा सीतया सहैवास्माभिः प्रतियातव्यमिति हृदि निधायाह—सफल इति। संभ्रमः त्वरा । उत्साह इतियावत् । कुतस्साफल्यमित्याशङ्क्य सीतापातिव्रत्योपलम्भादित्याह—शीलमिति । शीलं वृत्तं। पातिव्रत्यमिति यावत् । अहं तु प्रागेव तदेकशरण इत्याह—मम चेति । प्रवणं प्रह्वं तत्परमिति यावत् । सीताचारित्रस्य न किंचिदसाध्यमस्तीति भावः ॥ २ ॥ तर्हि तं दुरात्मानं रावणं स्पृशन्तमेव किमिति नादहदित्याशङ्क्य तस्यापि तपःसंपत्तिसद्भावादित्याह—तपसेत्यादिना ॥ यद्वा रावणतपःकथनद्वारा सीतायाः पातिव्रत्यातिशयमाह—तपसेत्यादिना ॥ तपसा अतिप्रवृद्ध इत्यन्वयः । कोपप्रसादाभ्यां सर्वलोकनिग्रहानुग्रहसमर्थोसौ रावणस्सर्वथा महातपस्संपन्नः । अतएव सीतास्पर्शेप्यविनाशित इत्यर्थः ॥ ३ ॥ तर्हि सीताशीलं दुर्बलमस्माकं किमुपकरिष्यतीत्याशङ्क्य नेत्याह—न तदिति ॥ सीताशीलमेव बलीयस्त्वादुपकरिष्यतीत्यर्थः । क्रोधकलुषीकृतेतिवचनाद्भर्तृमुखेन वैरनिर्यातनं वीरपत्नीधर्मः । अन्यथा महालाघवं भर्तुरित्यद्यापि पारतन्त्र्यपालनाय तादृक्क्रोधाकरणाद्रावणो जीवतीति गम्यते। एतदेवोक्तं प्राक्—" असंदेशात्तु रामस्य तपसश्चानुपालनात् । न त्वां कुर्मि दशग्रीव भस्म भस्मार्ह

स० उत्तरं उत्तमं ॥ १ ॥ ति० संभ्रमः आदरः । उत्साह इत्यर्थः । ममममनः प्रीणितं तुष्टं । प्रवणमितिपाठेपि प्रवणं संतोषप्रवणमित्यर्थः ॥ स० राघवोद्योगः सीतावृत्तान्तज्ञानोत्साहः । सुग्रीवस्यसंगमः सुग्रीवेणसहसख्यंच। सीतायाःशीलं पातिव्रत्यादिसद्वृत्तं । आसाद्य प्राप्य । दृष्ट्वासफलइतिज्ञातः । एतादृश्याःस्त्रियाअन्यस्याःक्वाप्यभावेनास्याविषयेबहुलायासोपियत्नःकर्तव्य एवेतिभावः । ति० सदृशं पतिव्रतानामरुन्धत्यादीनांसदृशमित्यर्थः । स० आर्यायाः पार्वत्याः । सदृशंशीलंसीतायाः । अथवा आर्यायाः सीतायाः । शीलं सीतायाएवसदृशमित्यनन्वयालङ्कारः ॥ २ ॥ ति० तर्हिरावणंकिमितिनादहदित्यतआह—सर्वथेति । अतिप्रकृष्टः महातपस्संपन्नइत्यर्थः ॥ स० सर्वथा सर्वप्रकारेण । तपोबलादिनातिप्रकृष्टः अभिवृद्धः । कथमेवंज्ञायतइत्यतआह—यस्येति । सर्वथा रावणतपोबलेनसीतायाःकोपातिशयानुदयात्तस्यजीवनमितिफलितार्थः ॥ ३ ॥ ति० नैतावतासीताशीलंदुर्बलमित्याशङ्क्यमित्याह—नेति । यत्क्रुद्धासीताकुर्यात् तत् स्पृष्टाऽग्निशिखापिनकुर्यात् । इयंतुभर्तुःपराक्रमकीर्तये नाद्यापिक्रुध्यतीति

[पा०] १ ग. ङ. झ. ट. तत्र. च. छ. ज. ञ. अतोयत्कर्मशेषंनः. क. मयायन्नकृतंकर्मतत्सर्वंकर्तुमर्हथ. २ ठ. संगमः. ३ ङ. झ. ट. प्रीणितं. ४ ङ.—ट. पाठेष्विदमर्धंदृश्यते. ५ ङ. च. झ. ट. न्क्रुद्धावा. ६ ङ. झ. ट. प्रकृष्टोसौ. ७ क. ग. घ. ङ. झ. ट. यस्य. च. छ. ज. ञ. यस्यसंस्पृशतो.

जाम्बवत्प्रमुखान्सर्वाननुज्ञाप्य महाहरीन् ॥ अस्मिन्नेवंगते कार्ये भवतां च निवेदिते ॥
न्याय्यं स सह वैदेह्या द्रष्टुं तौ पार्थिवात्मजौ ॥ ५ ॥
अहमेकोपि पर्याप्तः सराक्षसगणां पुरीम् ॥ तां लङ्कां तरसा हन्तुं रावणं च महाबलम् ॥ ६ ॥
किं पुनः सहितो वीरैर्बलवद्भिः कृतात्मभिः ॥ कृतास्त्रैः प्लवगैः शूरैर्भवद्भिर्विजयैषिभिः ॥ ७ ॥
अहं तु रावणं युद्धे ससैन्यं सपुरस्सरम् ॥ सहपुत्रं वधिष्यामि सहोदरयुतं युधि ॥ ८ ॥
ब्राह्ममैन्द्रं च रौद्रं च वायव्यं वारुणं तथा ॥ यदि शक्रजितोस्त्राणि दुर्निरीक्षाणि संयुगे ॥ ९ ॥
तान्यहं विधमिष्यामि निहनिष्यामि राक्षसान् ॥ भवतामभ्यनुज्ञातो विक्रमो मे रुणद्धि तम् ॥१०॥
मयाऽतुला विसृष्टा हि शैलवृष्टिर्निरन्तरा ॥ देवानपि रणे हन्यात्किं पुनस्तान्निशाचरान् ॥
[भवतामननुज्ञातो विक्रमो मे रुणद्धि माम्] ॥ ११ ॥
सागरोप्यतियाद्वेलां मन्दरः प्रचलेदपि ॥ न जाम्बवन्तं समरे कम्पयेदरिवाहिनी ॥ १२ ॥
सर्वराक्षससङ्घानां राक्षसा ये च पूर्वकाः ॥ अलमेको विनाशाय वीरो[3] वालिसुतः कपिः ॥ १३ ॥
पनसस्योरुवेगेन नीलस्य च महात्मनः ॥ मन्दरोप्यवशीर्येत किं पुनर्युधि राक्षसाः ॥ १४ ॥
सदेवासुरयक्षेषु गन्धर्वोरगपक्षिषु ॥ मैन्दस्य प्रतियोद्धारं शंसत द्विविदस्य वा ॥ १५ ॥
अश्विपुत्रौ महाभागावेतौ प्लवगसत्तमौ ॥ एतयोः प्रतियोद्धारं न पश्यामि रणाजिरे ॥ १६ ॥
पितामहवरोत्सेकात्परमं दर्पमास्थितौ ॥ अमृतप्राशिनावेतौ सर्ववानरसत्तमौ ॥ १७ ॥
अश्विनोर्माननार्थं हि सर्वलोकपितामहः ॥ सर्वावध्यत्वमतुलमनयोर्दत्तवान्पुरा ॥ १८ ॥
वरोत्सेकेन मत्तौ च प्रमथ्य महतीं चमूम् ॥ सुराणाममृतं वीरौ पीतवन्तौ प्लवङ्गमौ ॥ १९ ॥
एतावेव हि संक्रुद्धौ सवाजिरथकुञ्जराम् ॥ लङ्कां नाशयितुं शक्तौ सर्वे तिष्ठन्तु वानराः ॥ २० ॥
मयैव निहता लङ्का दग्धा भस्मीकृता पुनः ॥ राजमार्गेषु सर्वत्र नाम विश्रावितं मया ॥ २१ ॥
जयत्यतिबलो रामो लक्ष्मणश्च महाबलः ॥ राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ २२ ॥
अहं कोसलराजस्य दासः पवनसंभवः ॥ हनुमानिति सर्वत्र नाम विश्रावितं मया ॥ २३ ॥
अशोकवनिकामध्ये रावणस्य दुरात्मनः ॥ अधस्ताच्छिंशुपावृक्षे साध्वी करुणमास्थिता ॥ २४ ॥
राक्षसीभिः परिवृता शोकसंतापकर्शिता ॥ मेघलेखापरिवृता चन्द्रलेखेव निष्प्रभा ॥ २५ ॥
अचिन्तयन्ती वैदेही रावणं बलदर्पितम् ॥ पतिव्रता च सुश्रोणी अवष्टब्धा च जानकी ॥ २६ ॥

तेजसा ” इति ॥४॥ एवं स्थिते युष्मदनुमत्या भृत्यविजयोपि स्वामिन एवेति कृत्वा सीतारामपदावलम्बादहमेव रावणं निर्जित्य सीतापुरस्कारेणैव राघवौ द्रक्ष्यामीत्याह—जाम्बवदिति ॥ ५ ॥ न चाशक्तिशङ्का कार्येति बहुधा प्रपञ्चयन्नाह—अहमित्यादिना ॥ ६—९ ॥ अभ्यनुज्ञातः अभ्यनुज्ञानात् । पञ्चम्यास्तसिः । मे विक्रमः तं रावणं रुणद्धि हन्तीत्यर्थः ॥ १०—११ ॥ अतियात् आर्षं ह्रस्वत्वं ॥ १२ ॥ पूर्वकाः तेषामितिशेषः ॥ १३—२० ॥ दग्धत्वेप्यङ्गारावस्था भवति सापि नास्तीत्याह—भस्मीकृतेति ॥ २१ ॥ नामविश्रावणमेवाह—जयतीति ॥ जयति सर्वोत्कर्षेण वर्तते । तदुक्तं हरिणा—“ जयिर्जयाभिभवयोराद्येर्थेसावकर्मकः । उत्कर्षप्राप्तिराद्यार्थो द्वितीयेर्थे सकर्मकः ” इति ॥ २२—२३ ॥ अथ सीतादुर्दशाविमर्शेपि संप्रत्यसौ समानेतव्येत्याशयेन तद्दशां दर्शयति—अशोकेत्यादिना ॥ २४—२६ ॥

भाव० । अक्रुद्धायाअपिस्पर्शमात्रेणप्राप्तोनाशस्तु रावणतपसानिवारितइतिज्ञेयं ॥ ४ ॥ ति० कृतास्त्रैः देवांशत्वादस्त्रप्रयोगसमर्थैः ॥ ७ ॥ स० युद्धेरावणं युद्धेलोकरावणं ॥ ८ ॥

[पा०] १ क. ग. ङ. च. झ. ञ. ट. शक्तैः. २ ङ. झ. ट. पाठेष्विदमर्धंदृश्यते. ३ क. तेषांवालिसुतः. ४ झ. ट. प्लवगस्योरुवेगेन. ५ ग. ङ. झ. ट. महावेगौ. च. छ. ज. ञ. महावीर्यौयौतौ. ६ क. मत्तौच. ग. मत्तौतौ. ७ ङ.—ट. पुरी.

अनुरक्ता हि वैदेही रामं सर्वात्मना शुभा ॥ अनन्यचित्ता रामे च पौलोमीव पुरन्दरे ॥ २७ ॥
तदेकवासस्संवीता रजोध्वस्ता तथैव च ॥ शोकसंतापदीनाङ्गी सीता भर्तृहिते रता ॥ २८ ॥
सा मया राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः ॥ राक्षसीभिर्विरूपाभिर्दृष्टा हि प्रमदावने ॥ २९ ॥
एकवेणीधरा दीना भर्तृचिन्तापरायणा ॥ अधःशय्या विवर्णाङ्गी पद्मिनीव हिमागमे ॥ ३० ॥
रावणाद्विनिवृत्तार्था मर्तव्यकृतनिश्चया ॥ कथंचिन्मृगशावाक्षी विश्वासमुपपादिता ॥ ३१ ॥
ततः संभाषिता चैव सर्वमर्थं च दर्शिता ॥ रामसुग्रीवसख्यं च श्रुत्वा प्रीतिमुपागता ॥ ३२ ॥
नियतः समुदाचारो भक्तिर्भर्तरि चोत्तमा ॥ यन्न हन्ति दशग्रीवं स महात्मा कृतागसम् ॥
निमित्तमात्रं रामस्तु वधे तस्य भविष्यति ॥ ३३ ॥
सा प्रकृत्यैव तन्वङ्गी तद्वियोगाच्च कर्शिता ॥ प्रतिपत्पाठशीलस्य विद्येव तनुतां गता ॥ ३४ ॥
एवमास्ते महाभागा सीता शोकपरायणा ॥ यदत्र प्रतिकर्तव्यं तत्सर्वमुपपद्यताम् ॥ ३५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकोनषष्टितमस्सर्गः ॥ ५९ ॥

षष्टितमः सर्गः ॥ ६० ॥

अङ्गदेनापि स्वस्वीयपराक्रमप्रशंसनेन रावणादिरक्षःक्षपणपूर्वकं सीतासमानयनस्य कर्तव्यत्वोक्तौ जांबवता सयुक्त्युपन्यासं तत्प्रतिषेधनं ॥ १ ॥

तस्य तद्वचनं श्रुत्वा वालिसूनुरभाषत ॥ १ ॥
[अहमेकोपि पर्याप्तः सराक्षसगणां पुरीम् ॥ तां लङ्कां तरसा हन्तुं रावणं च महाबलम् ॥ २ ॥

पौलोमीव पुरन्दर इति । नहुषनिर्बन्ध इतिभावः ॥ २७—२८ ॥ प्रमदावने अशोकवनिकायां ॥ २९—३० ॥ विनिवृत्तार्था त्यक्तप्रयोजना । रावणप्रलोभनवाक्यैरवशीकृतेत्यर्थः ॥ ३१ ॥ सर्वमर्थं रामोद्योगादिकं । दर्शिता बोधिता ॥ ३२ ॥ नियत इति ॥ समुदाचारः चारित्रमिति यावत् । नन्वेवंमाहात्म्या सीता स्वयमेव रावणं किमिति न हन्तीत्याशङ्क्याह—यन्न हन्तीति ॥ दशग्रीवं न हन्तीतियत् तत्र कारणं स दशाननः महात्मा महानुभावः । शापनिबन्धनदुर्मरणाभावादिति भावः । अतस्तस्य वधे रामस्तु राम एव निमित्तमात्रं भविष्यति । तथा तस्योत्कर्षात् । सीता तु निमित्तकारणमिति शेषः । भर्त्रैव वैरनिर्यातनं वीरपत्नीधर्मः अन्यथा भर्तुर्महल्लाघवमिति मनीषया नस्वयं हन्ति नत्वसामर्थ्यादिति भावः ॥ ३३—३४ ॥ फलितमुपसंहरति—एवमिति ॥ उपपद्यतां अनुष्ठीयतां ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकोनषष्टितमः सर्गः ॥ ५९ ॥

तस्येत्यादि ॥ १—३ ॥ वानरा इति संबोधनं

ति० रामेण रामप्रीत्या ॥ २७ ॥ शि० प्रमदानामवनंअतिरक्षायस्मिन् । पुरुषागम्येत्यर्थः ॥ २९ ॥ स० दशग्रीवं नहन्तियस्मात्स महात्मा । अनेन सीता रामकीर्त्यैरावणवधमुदास्ते इत्युक्तंभवति ॥ ३३ ॥ इत्येकोनषष्टितमःसर्गः ॥ ५९ ॥

[पा०] १ झ. रामे. २ झ. अनन्यचिन्तारामेण. ३ ग. ङ. च. ज.—ट. हिमोदये. ४ ङ. झ. ट. प्रकाशिता. ग. चदर्शितं. च. ज. ञ. प्रदर्शिता. ५ ग. प्रमुदिताभृशं. ६ ङ. च. ज.—ट. मुपकल्प्यतां. ७ ग. ततस्तद्वचनंश्रुत्वा. एतदर्धानन्तरं झ. पाठे. अश्विपुत्रौमहावेगौबलवन्तौप्लवङ्गमौ । पितामहवरोत्सेकात्परमंदर्पमास्थितौ । अश्विनोर्माननार्थंहिसर्वलोकपितामहः । सर्वावध्यत्वमतुलमनयोर्दत्तवान्पुरा । वरोत्सेकेनमत्तौचप्रमथ्यमहतींचमूम् । सुराणाममृतंवीरौपीतवन्तौमहाबलौ । एतावेवहिसंक्रुद्धौसवाजिरथकुञ्जराम् । लङ्कांनाशयितुंशक्तौसर्वेतिष्ठन्तुवानराः । इतिचत्वारःश्लोकाअधिकादृश्यन्ते । एतएवश्लोकाःअस्मदीयपुस्तकेएकोनषष्टितमेऽध्यायेहनुमद्वाक्ये षोडशश्लोकानन्तरंदृश्यमानत्वात् अत्रनास्माभिर्मुद्रिताः. ८ एतदर्धपञ्चकं झ. पाठेदृश्यते.

किंपुनः सहितैर्वीरैर्बलवद्भिः कृतात्मभिः ॥ कृतास्त्रैः प्लवगैः शक्तैर्भवद्भिर्विजयैषिभिः ॥
वायुसूनोर्बलेनैव दग्धा लङ्केति नः श्रुतम् ॥ ३ ॥]
अयुक्तं तु विना देवीं दृष्टवद्भिश्च वानराः ॥ समीपं गन्तुमस्माभी राघवस्य महात्मनः ॥ ४ ॥
दृष्टा देवी न चानीता इति तत्र निवे[1]दनम् ॥ अयुक्तमिव पश्यामि भवद्भिः [2]ख्यातविक्रमैः ॥ ५ ॥
न हि न[3]ः प्लवने कश्चिन्नापि कश्चित्पराक्रमे ॥ तुल्यः सामरदैत्येषु लोकेषु हरिसत्तमाः ॥ ६ ॥
[[4]जित्वा लङ्कां सरक्षौघां हत्वा तं रावणं रणे ॥ सीतामादाय गच्छामः सिद्धार्था हृष्टमानसाः ॥ ७ ॥]
तेष्वेवं [5]हतवीरेषु राक्षसेषु हनूमता ॥ किमन्यदत्र कर्तव्यं गृहीत्वा याम जानकीम् ॥ ८ ॥
[[6]रामलक्ष्मणयोर्मध्ये न्यस्याम जनकात्मजाम् ॥ किं व्यलीकैस्तु तान्सर्वान्वानरान्वानरर्षभान् ॥ ९ ॥]
वयमेव हि गत्वा तान्हत्वा राक्षसपुङ्गवान् ॥ राघवं द्रष्टुमर्हामः सुग्रीवं सहलक्ष्मणम् ॥ १० ॥]
तमेवं कृतसंकल्पं जाम्बवान्हरिसत्तमः ॥ उवाच परमप्रीतो वाक्यमर्थवदर्थवित् ॥ ११ ॥
[[7]नैषा बुद्धिर्महाबुद्धे यद्ब्रवीषि महाकपे ॥ विचेतुं वयमाज्ञप्ता दक्षिणां दिशमुत्तमाम् ॥ १२ ॥
नानेतुं कपिराजेन नैव रामेण धीमता ॥ कथंचिन्निर्जितां सीतामस्माभिर्नाभिरोचयेत् ॥ १३ ॥
राघवो नृपशार्दूलः कुलं व्यपदिशन्स्वकम् ॥ प्रतिज्ञाय स्वयं राजा सीताविजयमग्रतः ॥
सर्वेषां कपिमुख्यानां कथं मिथ्या करिष्यति ॥ १४ ॥
विफलं कर्म च कृतं भवेत्तुष्टिर्न तस्य च ॥ वृथा च दर्शितं वीर्यं भवेद्वानरपुङ्गवाः ॥ १५ ॥
तस्माद्गच्छाम वै सर्वे यत्र रामः सलक्ष्मणः ॥ सुग्रीवश्च महातेजाः कार्यस्यास्य निवेदने ॥ १६ ॥]

न तावदेषा मतिरक्षमा नो यथा भवान्पश्यति राजपुत्र ॥
यथा तु रामस्य मतिर्निविष्टा तथा भवान्पश्यतु कार्यसिद्धिम् ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षष्टितमः सर्गः ॥ ६० ॥

एकषष्टितमः सर्गः ॥ ६१ ॥

महेन्द्रपर्वतात्किष्किन्धागमनाय गगनमुत्पतितैरङ्गदादिभिः मध्येमार्गंदधिमुखरक्षितेसुग्रीवस्यप्रियतमेमधुवनेऽवतरणम् ॥ १ ॥ सर्ववानरैरङ्गदानुज्ञया यथेच्छं मधुफलोपभोगे वृक्षक्षोभमधुफलविध्वंसनरुष्टेनदधिमुखेन बलात्प्रतिषेधने तैर्नखदशनादिभिस्तत्परिपीडनं ॥ २ ॥

ततो जाम्बवतो वाक्यमगृह्णन्त वनौकसः ॥ अङ्गदप्रमुखा वीरा हनूमांश्च महाकपिः ॥ १ ॥
प्रीतिमन्तस्ततः सर्वे वायुपुत्रपुरस्सराः ॥ [8]महेन्द्राद्रिं परित्यज्य पुप्लुवुः प्लवगर्षभाः ॥ २ ॥

॥ ४-१६ ॥ अथ जाम्बवानङ्गदवाक्यं बहु मन्यमानस्सुहृद्भावेन प्रतिषेधति—नतावदिति ॥ अक्षमा अयुक्ता न किन्तु युक्तैवेत्यर्थः । यद्यपिसम्यगुक्तं समर्थैश्चापि रामाज्ञानुसारेण कर्तव्यं न स्वातन्त्र्येणेत्यर्थः ॥ १७ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

सभाज्यमानं संपूज्यमानं । वहन्त इव दृष्टिभिरिति । प्रीतिपूर्वकानिमिषदर्शनाद्दृष्टिष्वारोप्य नयन्त

ति० अगृह्णन्त युक्तियुक्तत्वेनामन्यन्त ॥ १ ॥ स० प्रीतिमन्तः हर्षयुक्ताः । नागमनकालइवचिन्तायुक्ताइत्यर्थः । पुप्लुवुः

[पा०] १ झ. निवेदितुं. २ झ. ख्यातपौरुषैः. ३ झ. वःप्लवने. ४ अयंश्लोकः झ. पाठेदृश्यते. ५ झ. हतशेषेषु. ६ इदंश्लोकद्वयं झ. पाठेदृश्यते. ७ एतेश्लोकाः झ. पाठेदृश्यन्ते. ८ ङ.—ट. महेन्द्राग्रात्समुत्पत्य.

मेरुमन्दरसंकाशा मत्ता इव महागजाः ॥ छादयन्त इवाकाशं महाकाया महाबलाः ॥ ३ ॥
सभाज्यमानं भूतैस्तमात्मवन्तं महाबलम् ॥ हनुमन्तं महावेगं वहन्त इव दृष्टिभिः ॥ ४ ॥
राघवे चार्थनिर्वृत्तिं कर्तुं च परमं यशः ॥ समाधाय समृद्धार्थाः कर्मसिद्धिभिरुन्नताः ॥ ५ ॥
प्रि[1]याख्यानोन्मुखाः सर्वे सर्वे युद्धाभिनन्दिनः ॥ सर्वे रामप्रतीकारे निश्चितार्था मनस्विनः ॥ ६ ॥
प्लवमानाः [2]खमाप्लुत्य ततस्ते काननौकसः ॥ नन्दनोपममासेदुर्वनं द्रु[3]मलतायुतम् ॥ ७ ॥
यत्तन्मधुवनं नाम सुग्रीवस्याभिरक्षितम् ॥ अधृष्यं सर्वभूतानां सर्वभूतमनोहरम् ॥ ८ ॥
यद्रक्षति म[4]हावीर्यः स[5]दा दधिमुखः कपिः ॥ मातुलः कपिमुख्यस्य सुग्रीवस्य महात्मनः ॥ ९ ॥
ते तद्वनमुपागम्य बभूवुः परमोत्कटाः ॥ वानरा वानरेन्द्रस्य म[6]नःकान्ततमं महत् ॥ १० ॥
ततस्ते वानरा हृष्टा दृष्ट्वा मधुवनं महत् ॥ कुमारमभ्ययाचन्त मधूनि मधुपिङ्गलाः ॥ ११ ॥
ततः कुमारस्तान्वृद्धाञ्जाम्बवत्प्रमुखान्कपीन् ॥ अनुमान्य ददौ तेषां नि[7]सर्गं मधुभक्षणे ॥ १२ ॥
[ते[8] निसृष्टाः कुमारेण धीमता वालिसूनुना ॥ हरयः समपद्यन्त द्रुमान्मधुकराकुलान् ॥ १३ ॥
भक्षयन्त सुगन्धीनि मूलानि च फलानि च ॥ जग्मुः प्रहर्षं ते सर्वे बभूवुश्च मदोत्कटाः ॥ १४ ॥]
ततश्चानुमताः सर्वे सं[9]प्रहृष्टा वनौकसः ॥ मुं[10]दिताः प्रेरिताश्चापि प्रनृत्यन्तोऽभवंस्ततः ॥ १५ ॥

गायन्ति केचित्प्रणमन्ति केचिन्नृत्यन्ति केचित्प्रहसन्ति केचित् ॥
पतन्ति केचिद्विचरन्ति केचित्प्लवन्ति केचित्प्रलपन्ति केचित् ॥ १६ ॥
परस्परं केचिदुपाश्रयन्ते परस्परं केचिदुपाक्रमन्ते ॥
परस्परं केचिदुपब्रुवन्ते परस्परं केचिदुपारमन्ते ॥ १७ ॥
द्रुमाद्द्रुमं केचिदभिद्रवन्ते क्षितौ नगाग्रान्निपतन्ति केचित् ॥
महीतलात्केचिदुदीर्णवेगा महाद्रुमाग्राण्यभिसंपतन्ति ॥
[धा[11]वन्ति केचित्सुपतन्ति केचिन्महाबला वानरयूथमुख्याः] ॥ १८ ॥
गायन्तमन्यः प्रहसन्नुपैति हसन्तमन्यः प्ररुदन्नुपैति ॥
रुदन्तमन्यः प्रणुदन्नुपैति नुदन्तमन्यः प्रणदन्नुपैति ॥ १९ ॥

इवेत्युत्प्रेक्षा ॥ ४ ॥ अर्थनिर्वृत्तिं अर्थसिद्धिं । समाधाय निश्चित्य संकल्प्य वा । समृद्धार्थाः सिद्धकार्याः । कर्मसिद्धिभिः कार्यसिद्धिभिः । उन्नताः इतरेभ्य उत्कृष्टाः ॥ ५ ॥ रामप्रतीकारे रामप्रत्युपकारे । पुप्लुवुरिति पूर्वेणसंबन्धः ॥६—९॥ परमोत्कटाः परमोत्सुकाः ॥१०॥ मधुपिङ्गलाः मधुवत्पिङ्गलवर्णाः वानराः ॥ ११ ॥ अनुमान्य अनुमतिं कारयित्वा । निसर्गं विसर्जनं । अनुमतिमिति यावत् ॥ १२—१४ ॥ पूर्वमेव सीतादर्शनात्प्रहृष्टाः ततः मधुवनभङ्गे अङ्गदेनानुमतास्सन्तस्ततो मुदिताः तत्प्रेरिताः प्रनृत्यन्तोऽभवन् ॥ १५ ॥ मधुवनभङ्गाभ्यनुज्ञानकृतं वानरहर्षविकारमेव वर्णयति सर्गशेषेण—गायन्ति केचित्प्रणमन्ति केचिन्नृत्यन्ति केचित्प्रहसन्ति केचित् । पतन्ति केचिद्विचरन्ति केचित्प्लवन्ति केचित्प्रलपन्ति केचित् । इति पाठः । प्रणमन्ति अवाक्छिरसः पतन्ति । पतन्ति ऊर्ध्वपादाः पृष्ठेन पतन्ति ॥१६–१९॥

वनंप्रतीतिशेषः ॥ २ ॥ ति० रामप्रतीकारे रामकर्तव्येरावणप्रतीकारे । निश्चितार्थाः अभूवन्नितिशेषः ॥ ६ ॥ ति० हर्षमुदो र्बाह्यान्तरत्वकृतोभेदः ॥ १५ ॥ ति० तत्रबाह्यमानन्दसूचकमाह—गायन्तीति ॥ १६ ॥ स० परुषाणि क्रूराणि । उवाच ।

[पा०] १ क. घ. प्रियाख्यानपराः. २ ख. ग. घ. खमुत्पत्य. क. समुत्पत्य. ३ ग.—ट. द्रुमशतायुतं. ४ ख. ग. ङ. झ. ट. महावीरः. ५ ज. सोयं. ६ ङ. झ. ञ. ट. मनःकान्तंमहावनं. ग. च. छ. ज. मनःकान्तंमहद्वनम्. घ. मनःकान्ततरंमहत्. ७ ख. प्लवतांमधुभक्षणे. ८ इदंश्लोकद्वयं ङ.—ट. पाठेषुदृश्यते. ९ च.—ट. सुसंहृष्टाः. १० ग. मुदिताश्चतत केचित्प्रनृत्यन्तितथापरे. क. घ.—छ. झ. ञ. ट. मुदिताश्चततस्तेचप्रनृत्यन्तिततस्ततः. ११ इदमर्धं क. पाठेदृश्यते.

समाकुलं तत्कपिसैन्यमासीन्मधुप्रपानोत्कटसत्त्वचेष्टम् ॥
न चात्र कश्चिन्न बभूव मत्तो न चात्र कश्चिन्न बभूव तृप्तः ॥ २० ॥
ततो वनं [1]तत्परिभक्ष्यमाणं द्रुमांश्च विध्वंसितपत्रपुष्पान् ॥
समीक्ष्य कोपाद्दधिवक्त्रनामा निवारयामास कपिः कपींस्तान् ॥ २१ ॥
स तैः प्रवृद्धैः परिभर्त्स्यमानो वनस्य गोप्ता हरिवीरवृद्धः ॥
चकार भूयो मतिमुग्रतेजा वनस्य रक्षां प्रति वानरेभ्यः ॥ २२ ॥
उवाच कांश्चित्प[2]रुषाणि धृष्टमसक्तमन्यांश्च तलैर्जघान ॥
समेत्य कैश्चित्कलहं चकार तथैव साम्नोपजगाम कांश्चित् ॥ २३ ॥
स तैर्मदा[3]त्संपरिवार्य वाक्यैर्बलाच्च तेन प्रतिवार्यमाणैः ॥
प्रधर्षितस्त्यक्तभयैः समेत्य प्रकृष्यते चाप्यनवेक्ष्य दोषम् ॥ २४ ॥
नखैस्तुदन्तो दशनैर्दशन्तस्तलैश्च पादैश्च समापयन्तः ॥
मदात्कपिं [4]तं कपयः सम[5]ग्रा महावनं निर्विषयं च चक्रुः ॥ २५ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

द्विषष्टितमः सर्गः ॥ ६२ ॥

हनुमतादधिमुखप्रतिषिद्धवानरान्प्रति प्रतिषेधकप्रतिषेधनप्रतिज्ञानपूर्वकं निश्शङ्कमधुपाननियोगे पुनर्वानरैः सवनक्षोभं यथारुचि मधुपानादिषुप्रवर्तनम् ॥ १ ॥ वानरैर्मधुपानजमदपरवशतयोन्मत्तवन्नृत्तादिनानाचेष्टाविष्करणम् ॥ २ ॥ वानरैस्ताडनादिनापीडितैर्वनपालैर्दधिमुखे तन्निवेदने तेनतैस्सह वानरान्प्रत्यायोधनम् ॥ ३ ॥ अङ्गदेन दधिमुखस्य सताडनंभूमौ निष्पेषणं ॥ ४ ॥ दधिमुखेन वनपालैःसह सुग्रीवे मधुवनधर्षणादिनिवेदनाय किष्किन्धामेत्य रामादिसंनिधौ सुग्रीवचरणयोःप्रणामः ॥ ५ ॥

तानुवाच हरिश्रेष्ठो हनुमान्वानरर्षभः ॥ अव्यग्रमनसो यूयं मधु सेवत वानराः ॥
अहमावारयिष्यामि युष्माकं परिपन्थिनः ॥ १ ॥
श्रुत्वा हनुमतो वाक्यं हरीणां प्रवरोऽङ्गदः ॥ प्रत्युवाच प्रसन्नात्मा पिबन्तु हरयो मधु ॥ २ ॥
अवश्यं कृतकार्यस्य वाक्यं हनुमतो मया ॥ अकार्यमपि कर्तव्यं किमङ्ग पुनरीदृशम् ॥ ३ ॥
अङ्गदस्य मुखाच्छ्रुत्वा वचनं वानरर्षभाः ॥ साधु साध्विति संहृष्टा वानराः प्रत्यपूजयन् ॥ ४ ॥

मधुप्रपानोत्कटसत्त्वचेष्टं मत्तचित्तचेष्टं ॥२०—२४॥ निर्विषयं निर्गतमधुमूलादिभोग्यवस्तुकं । चक्रुरित्यर्थः ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने एकषष्टितमः सर्गः ॥ ६१ ॥

तान् दधिमुखकलहव्याकुलितान् । अन्ये तु तानुवाचेत्यादिना पूर्वसर्गोक्तं संक्षेपेणानूद्य उपरि गच्छतीत्याचक्षते । अपरे तु सर्गमुखे केचिच्छ्लोकाः पतिता इत्याहुः ॥ १—२ ॥ अङ्गेति संबोधने निपातः ॥ ३ ॥ अङ्गदस्य स्वामिनः मुखाद्वचनं

ततोप्यधमान्कांश्चित् तलैः करचरणतलैः । स्वसमैः कलहंचकार । स्वतःप्रबलानङ्गदादीन् साम्नाजगाम ॥ २३ ॥ ति० समापयन्तः मृतकल्पंकुर्वन्तः ॥ २५ ॥ इत्येकषष्टितमःसर्गः ॥ ६१ ॥

[पा०] १ क. घ. तैःपरिभक्ष्यमाणं. २ झ. ट. परुषाण्यभीतं. ३ घ. झ. ञ. ट. मदादप्रतिवार्यवेगैः. क. च. छ. ज. मदाच्चाप्रतिवार्यवेगैः. ४ झ. ट. तेकपयः. ५ झ. ट. समन्तान्महावनं. क. ग. घ. समग्राबलाद्वनं. ख. समग्रामधोर्वनं.

पूजयित्वाऽङ्गदं सर्वे वानरा वानरर्षभम् ॥ जग्मुर्मधुवनं यत्र [1]नदीवेगा इव द्रुतम् ॥ ५ ॥
ते प्रविष्टा मधुवनं पालानाक्रम्य [2]वीर्यतः ॥ [3]अतिसर्गाच्च पटवो दृष्ट्वा श्रुत्वा च मैथिलीम् ॥
पपुः सर्वे मधु तदा रसवत्फलमाददुः ॥ ६ ॥
उत्पत्य च ततः सर्वे वनपालान्समागतान् ॥ [4]ताडयन्ति स्म शतशः सक्तान्मधुवने तदा ॥ ७ ॥
मधूनि द्रोणमात्राणि बाहुभिः परिगृह्य ते ॥ [5]पिबन्ति सहिताः सर्वे निघ्नन्ति स्म तथा परे ॥ ८ ॥
केचित्पीत्वाऽपविध्यन्ति मधूनि मधुपिङ्गलाः ॥ मधूच्छिष्टेन केचिच्च जघ्नुरन्योन्यमुत्कटाः ॥ ९ ॥
अपरे [6]वृक्षमूले तु [7]शाखां गृह्य व्यवस्थिताः ॥ अत्यर्थं च मदग्लानाः पर्णान्यास्तीर्य शेरते ॥ १० ॥
[8]उन्मत्तभूताः प्लवगा मधुमत्ताश्च हृष्टवत् ॥ क्षिपन्ति च तदाऽन्योन्यं [9]स्खलन्ति च तथापरे ॥ ११ ॥
केचित्क्ष्वेलां प्रकुर्वन्ति केचित्कूजन्ति हृष्टवत् ॥ हरयो मधुना मत्ताः केचित्सुप्ता महीतले ॥ १२ ॥
[10]कृत्वा केचिद्धसन्त्यन्ये केचित्कुर्वन्ति चेतरत् ॥ कृत्वा केचिद्वदन्त्यन्ये केचिद्बुध्यन्ति चेतरत् ॥ १३ ॥
येऽप्यत्र मधुपालाः स्युः प्रेष्या दधिमुखस्य तु ॥ तेपि तैर्वानरैर्भीमैः प्रतिषिद्धा दिशो गताः ॥ १४ ॥
[11]जानुभिस्तु प्रकृष्टाश्च [12]देवमार्गं प्रदर्शिताः ॥ अब्रुवन्परमोद्विग्ना गत्वा दधिमुखं वचः ॥ १५ ॥
हनूमता दत्तवरैर्हतं मधुवनं बलात् ॥ वयं च [13]जानुभिः कृष्टा देवमार्गं च दर्शिताः ॥ १६ ॥
ततो दधिमुखः क्रुद्धो वनपस्तत्र वानरः ॥ हतं मधुवनं श्रुत्वा सान्त्वयामास तान्हरीन् ॥ १७ ॥

हनुमदुक्तं श्रुत्वा ॥ ४ ॥ जग्मुर्मधुवनमिति प्रदेशभेदविवक्षया । यद्वा दधिमुखनिवारणेन भीतानां हनुमदङ्गदाभ्यां पुनरनुज्ञापनेन पुनर्जग्मुरित्यर्थः ॥ ५ ॥ वीर्यतः बलात् । अतिसर्गात् अङ्गदाभ्यनुज्ञानात् । दृष्ट्वा श्रुत्वा च मैथिलीं दर्शनश्रवणाभ्यां च हेतुना । वनपालानाक्रम्य आक्षिप्य ॥ ६ ॥ सक्तान् वनपालने रतान् ॥ ७ ॥ मधूनि मधुपटलानि । द्रोणमात्राणि द्रोणप्रमाणानि आढकप्रमाणानि । घ्नन्तिस्म पीतावशिष्टानि मधुपटलानि भिन्दन्तिस्म ॥ ८ ॥ अपविध्यन्ति अवक्षिपन्ति । मधूच्छिष्टेन सिक्थकेन । " मधूच्छिष्टं तु सिक्थकं" इत्यमरः । उत्कटाः मत्ताः ॥ ९–१० ॥ हृष्टवत् हर्षयुक्तमिति क्रियाविशेषणं । हृष्टार्हमितिवार्थः । क्षिपन्ति उत्क्षिप्य पातयन्ति । स्खलन्ति पादेन नुदन्तीत्यर्थः ॥ ११ ॥ क्ष्वेलां सिंहनादं । " क्ष्वेला तु सिंहनादः स्यात् " इत्यमरः । कूजन्ति पक्षिवच्छब्दायन्ते ॥ १२ ॥ अन्ये अवाच्यं किंचिद्ग्राम्यं कर्म कृत्वा हसन्ति । इतरत्तद्विलक्षणं ग्राम्यं कर्म केचित्कुर्वन्ति । केचिदन्यद्ग्राम्यं कर्म कृत्वा अस्माभिरिदं कृतमिति वदन्ति उच्चारयन्ति । केचिदितरद्बुध्यन्ति एवं करिष्यामीति संकल्पयन्तीत्यर्थः ॥ १३—१४ ॥ जानुभिःप्रकृष्टाः । जानून्यवलम्ब्य कृष्टा इत्यर्थः । देवमार्गं अपानद्वारं । देवशब्दो वायुवाची । उपनिषदि वायुलोके देवलोकशब्दप्रयोगात् । दर्शिताः दर्शनं कारिताः । दृशेरुपसंख्यानादणि कर्तुः कर्मत्वं । " ण्यन्तात्कर्तुश्च कर्मणः " इति तस्यैवाभिधेयत्वं च ॥ १५—१७ ॥

ति० अतिसर्गात् अङ्गदानुज्ञानात्मधु पपुः रसवत्फलंचाददुः भक्षणार्थमितिशेषः ॥ ६ ॥ **स०** मधूनिपीत्वा अपविध्यन्ति तत्करण्डमितिशेषः ॥ ९ ॥ **स०** इतरत् अप्रदर्शनीयावयवप्रदर्शनादि ॥ १३ ॥ **ति०** जानुभिःप्रघृष्टाः जानुषुगृहीत्वाआकृष्टाः । देवमार्गंदर्शिताः पादौगृहीत्वोर्ध्वंप्रक्षिप्ताइत्यर्थः । कर्णावङ्गुलिभिर्धृत्वोर्ध्वीकृताइतिवार्थ इत्यन्ये ॥ **स०** जानुभिश्चप्रघृष्टाः पश्चात्ताडिताःसन्तोदेवमार्गंसुरवर्त्मदर्शिताः पश्चाज्जानुसंताडनेमुखोर्ध्वीभवनेनाकाशावलोकनस्यजायमानत्वादेवमुक्तिः । पायुद्वारंवा । कपीनांहेलनसमयेगुदप्रदर्शनस्यभागवतदशमोत्तरार्धेबलरामद्विविदप्रस्तावेअन्यत्रापिबहुशोदृष्टत्वात् ॥ १५ ॥

[पा०] १ ख. ग. ङ. झ. नदीवेगइवद्रुमं. २ ङ. झ. ट. शक्तितः. ३ ज. अतिगर्वाच्च. ग. तेनिसर्गाच्च. घ. निसर्गाच्चापि. ख. निसर्गाच्चापिहरयो. ४ ग. ङ. झ. ट. तेताडयन्तःशतशः. ५ पिबन्तिसहिताइत्यर्धस्यस्थाने क.—ट. पाठेषु. पिबन्तिकपयःकेचित्संघशस्तत्रहृष्टवत् । घ्नन्तिस्मसहिताःसर्वेभक्षयन्तितथापरे । इत्येकःश्लोकोदृश्यते. ६ ग. घ. ङ. ज.—ट. मूलेषु. ७ ङ. च. ज.—ट. शाखागृह्य. ८ ङ. झ. ञ. ट. उन्मत्तवेगाः. ९ ख. हसन्तिच. १० झ. ञ. ट. धृष्टाःकेचित्. ११ ग. ङ. झ. ट. जानुभिश्चप्रघृष्टाश्च. १२ क. ग.—च. ज.—ट. देवमार्गंचदर्शिताः. १३ ङ. झ. ट. जानुभिर्घृष्टाः.

[1]इहागच्छत गच्छामो [2]वानरान्बलदर्पितान् ॥ बलेन वारयिष्यामो [3]मधु भक्षयतो वयम् ॥ १८ ॥
श्रुत्वा दधिमुखस्येदं वचनं वानरर्षभाः ॥ पुनर्वीरा मधुवनं तेनैव [4]सहसा ययुः ॥ १९ ॥
मध्ये चैषां दधिमुखः प्रगृह्य [5]तरसा तरुम् ॥ समभ्यधावद्वेगेन ते च सर्वे प्लवङ्गमाः ॥ २० ॥
ते शिलाः पादपांश्चापि [6]पर्वतांश्चापि वानराः ॥ गृहीत्वाभ्यगमन्क्रुद्धा यत्र ते कपिकुञ्जराः ॥ २१ ॥
ते स्वामिवचनं वीरा हृदयेष्ववसज्य तत् ॥ त्वरया ह्यभ्यधावन्त सालतालशिलायुधाः ॥ २२ ॥
वृक्षस्थांश्च तलस्थांश्च वानरान्बलदर्पितान् ॥ अभ्यक्रामंस्ततो वीराः पालास्तत्र सहस्रशः ॥ २३ ॥
[[7]बलान्निवारयन्तश्च आसेदुर्हरयो हरीन् ॥ संदष्टोष्ठपुटक्रुद्धा भर्त्सयन्तो मुहुर्मुहुः ॥ २४ ॥]
अथ दृष्ट्वा दधिमुखं क्रुद्धं वानरपुङ्गवाः ॥ अभ्यधावन्त [8]वेगेन हनुमत्प्रमुखा[9]स्तदा ॥ २५ ॥
[10]तं सवृक्षं महाबाहुमापतन्तं महाबलम् ॥ [11]आर्यकं प्राहरत्तत्र बाहुभ्यां कुपितोऽङ्गदः ॥ २६ ॥
[12]मदान्धश्च न वेदैनमार्यकोयं ममेति सः ॥ अथैनं निष्पिपेषाशु [13]वेगवद्वसुधातले ॥ २७ ॥
[14]स भग्नबाहूरुभुजो विह्वलः शोणितोक्षितः ॥ [15]मुमोह सहसा वीरो मुहूर्तं कपिकुञ्जरः ॥ २८ ॥
स समाश्वस्य सहसा संक्रुद्धो राजमातुलः ॥ वानरान्वारयामास दण्डेन मधुमोहितान् ॥ २९ ॥
स कथंचिद्विमुक्तस्तैर्वानरैर्वानरर्षभः ॥ उवाचैकान्त[16]माश्रित्य भृत्यान्स्वान्समुपागतान् ॥ ३० ॥
[17]एते तिष्ठन्तु गच्छामो भर्ता नो यत्र वानरः ॥ सुग्रीवो विपुलग्रीवः सह रामेण तिष्ठति ॥ ३१ ॥
सर्वं चैवाङ्गदे दोषं श्रावयिष्यामि पार्थिवे ॥ अमर्षी वचनं श्रुत्वा घातयिष्यति वानरान् ॥ ३२ ॥
इष्टं मधुवनं ह्येतत्सुग्रीवस्य महात्मनः ॥ पितृपैतामहं दिव्यं देवैरपि दुरासदम् ॥ ३३ ॥
स वानरानिमान्सर्वान्मधुलुब्धान्गतायुषः ॥ घातयिष्यति दण्डेन सुग्रीवः ससुहृज्जनान् ॥ ३४ ॥
वध्या ह्येते दुरात्मानो नृपाज्ञा[18]परिभाविनः ॥ अमर्षप्रभवो रोषः सफलो नो भविष्यति ॥ ३५ ॥
एवमुक्त्वा दधिमुखो वनपालान्महाबलः ॥ जगाम [19]सहसोत्पत्य वनपालैः समन्वितः ॥ ३६ ॥
निमेषान्तरमात्रेण स हि प्राप्तो वनालयः ॥ सहस्रांशु[20]सुतो धीमान्सुग्रीवो यत्र वानरः ॥ ३७ ॥
रामं च लक्ष्मणं चैव दृष्ट्वा सुग्रीवमेव च ॥ समप्रतिष्ठां जगतीमाकाशान्निपपात ह ॥ ३८ ॥
[21]संनिपत्य [22]महावीर्यैः सर्वैस्तैः परिवारितः ॥ हरिर्दधिमुखः पालैः पालानां परमेश्वरः ॥ ३९ ॥

गच्छाम इति तैः साहित्येन बहुवचनं । आत्मनि बहुवचनं वा ॥ १८—३३ ॥ गतायुष इत्यधिक्षेपवचनं ॥३४॥ अमर्षप्रभवः अक्षमाजन्यः । रोषस्य तज्जन्यत्वं च यो यस्मै न सहते तस्मै क्रुध्यतीति प्रसिद्धं ॥३५—३६ ॥ निमेषान्तरमात्रेण निमेषावकाशमात्रेण । वनालयः वानरः ॥ ३७ ॥ समप्रतिष्ठां समतलां ।

ति० एतागच्छतअग्रेइतिशेषः । गच्छामः । वयमप्यागच्छामइत्यर्थः ॥ १८ ॥ ति० आर्यकः सुग्रीवमातुलत्वात्पूज्यः ॥ २६ ॥

[पा०] १ ङ. झ. ट. एतागच्छत. २ ङ. ज.—ट. वानरानतिदर्पितान्. ३ ङ. झ. ट. प्रभुञ्जानान्मधूत्तमं. ४ ङ. च. झ. ञ. ट. सहिताः. ५ छ. ञ. सुमहातरुं. ६ ङ. झ. ट. पाषाणानपि. ७ अयंश्लोकः ङ. झ. ट. पाठेषुदृश्यते. ८ ख. ग. च. ज. संक्रुद्धाहनु. ९ ख. ग. च. ज. स्ततः. १० ङ. झ. ट. सवृक्षंतं. ११ ङ. झ. ट. वेगवन्तंविजग्राहबाहुभ्यां. १२ ङ. झ. ट. मदान्धोनकृपांचक्रेआर्यकोयं. १३ ङ. झ. ट. वेगेनवसुधातले. १४ ङ. झ. ट. सभग्नबाहूरुमुखो. ग. भग्नबाहुश्वविमुखो. ख. च. ज. ञ. सभग्नबाहुर्विमुखो. १५ ङ. झ. ट. प्रमुमोहमहावीरो. च. ज. मुमोहसमहावीर्यो. १६ ङ. झ. ट. मागत्य. ख. ज. ञ. मागम्य. १७ ग. झ. एतागच्छत. क. इहागच्छत. १८ घ. ङ. च. ज.—ट. परिपन्थिनः. १९ ख. सहसोपेत्य. २० ख. ग. सुतःश्रीमान्. २१ झ. ञ. संनिपत्य. २२ ख. ङ. झ. ट. महावीरः.

स दीनवदनो भूत्वा कृत्वा शिरसि चाञ्जलिम् ॥ [1]सुग्रीवस्य शुभौ मूर्ध्ना चरणौ प्रत्यपीडयत् ॥४०॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

त्रिषष्टितमः सर्गः ॥ ६३ ॥

दधिमुखे सुग्रीवे मधुवनवृत्तान्तंनिवेदयति लक्ष्मणेन सुग्रीवंप्रति दधिमुखवचनार्थप्रश्नः ॥ १ ॥ सुग्रीवेणलक्ष्मणंप्रति तन्निवेदनपूर्वकं मधुवनधर्षणहेतुनासीतादर्शननिर्धारणोक्तिः ॥ २ ॥ तथा दधिमुखसमाश्वासनपूर्वकंतंप्रत्यङ्गदादीनांशीघ्रप्रेषणचोदना ॥ ३ ॥

ततो मूर्ध्ना निपतितं वानरं वानरर्षभः ॥ दृष्ट्वैवोद्विग्नहृदयो वाक्यमेतदुवाच ह ॥ १ ॥
उत्तिष्ठोत्तिष्ठ कस्मात्त्वं पादयोः पतितो मम ॥ अभयं ते [2]भवेद्वीर [3]सर्वमेवाभिधीयताम् ॥ २ ॥
[किं [4]संभ्रमाद्धितं कृत्स्नं ब्रूहि यद्वक्तुमर्हसि ॥ कच्चिन्मधुवने स्वस्ति श्रोतुमिच्छामि वानर ॥ ३ ॥]
[5]स तु विश्वासितस्तेन सुग्रीवेण महात्मना ॥ उत्थाय [6]सुमहाप्राज्ञो वाक्यं दधिमुखोऽब्रवीत् ॥ ४ ॥
नैवर्क्षरजसा राजन्न त्वया नापि वालिना ॥ वनं [7]निसृष्टपूर्वं हि भक्षितं तच्च वानरैः ॥ ५ ॥
[[8]न्यवारयमहं सर्वान्सहैभिर्वनचारिभिः ॥ अचिन्तयित्वा मां हृष्टा भक्षयन्ति पिबन्ति च ॥ ६ ॥]
एभिः [9]प्रधर्षिताश्चैव वानरा वनरक्षिभिः ॥ [10]मधून्यचिन्तयित्वेमान्भक्षयन्ति पिबन्ति च ॥ ७ ॥
शिष्टमत्रापविध्यन्ति भक्षयन्ति तथा परे ॥ निवार्यमाणास्ते सर्वे [11]भ्रुवौ वै दर्शयन्ति हि ॥ ८ ॥
इमे हि संरब्धतरास्तथा तैः संप्रधर्षिताः ॥ वारयन्तो वनात्तस्मात्क्रुद्धैर्वानरपुङ्गवैः ॥ ९ ॥
ततस्तैर्बहुभिर्वीरैर्वानरैर्वानरर्षभ ॥ [12]संरक्तनयनैः क्रोधाद्धरयः [13]प्रविचालिताः ॥ १० ॥

जगतीं भूमिं ॥ ३८—४० ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने द्विषष्टितमः सर्गः ॥ ६२ ॥

उद्विग्नहृदयः भीतहृदयः । मातुलस्यापि पादपतनं स्वामित्वानुसारेण ॥ १—४ ॥ न निसृष्टपूर्वं यथेच्छभोगाय न दत्तपूर्वं । वानरैः अङ्गदप्रमुखैः । अन्यथा सुग्रीववाक्ये अङ्गदानुवादविरोधात् । भक्षितमिति वनैकदेशमधुपटलविषयं ॥ ५—६ ॥ अचिन्तयित्वा अगणयित्वा । मधूनीति फलानामुपलक्षणं । भक्षयन्ति पिबन्ति चेत्युक्तेः । यद्वा मधून्येव भक्षयन्ति भक्षवत्कुर्वन्तीत्यर्थः ॥ ७ ॥ शिष्टं अवशिष्टं मधुपटलं । अत्र मधुवने । अपविध्यन्ति ध्वंसयन्ति । भक्षयन्ति मधुपटलमित्यर्थः ॥ ८ ॥ हिशब्दः पादपू-

---

ति० तौ सर्ववानरपूज्यौ चरणावित्यन्वयः ॥ ४० ॥ इतिद्विषष्टितमःसर्गः ॥ ६२ ॥

स० अभयंप्रदास्यामि प्रमादादपराधेप्रसक्तेपीतिशेषः ॥ २ ॥ **स०** संभ्रमात्किं किंप्रयोजनं । यद्वक्तुमर्हसितद्ब्रूहि । कस्मात्संभ्रमः किंसंभ्रमस्तस्मात् । इदं पादयोःपतनं । यतस्त्वंअर्हसि योग्योसि । अर्ह्यतइत्यर्हः सइवाचरतीतिव्युत्पत्त्या पूज्योसीत्यर्थइतिवा ॥ ३ ॥ **शि०** समहाप्राज्ञः महाप्राज्ञासहितः । प्राज्ञाशब्दःस्वार्थिकाणन्तः । ङीबभावस्त्वजादित्वात् ॥ ४ ॥ **ति०** एभिः हनुमदाद्यैः प्रधर्षणायामारब्धायां वनपालकैर्वारितं । ममापि । अपिनाइतरान्पालकानचिन्तयन् अचिन्तयन्तः

[पा०] १ ख. ङ. झ. ट. सुग्रीवस्याशुतौ. २ ग. ङ. झ. ट. प्रदास्यामि. ३ ख.—ङ. ज. झ. ञ. सत्यमेवा. ४ अयंश्लोकः ङ. च. ज.—ट. पाठेषुदृश्यते. ५ ङ. झ. ट. ससमाश्वासितः. ६ घ. सहसाप्राज्ञो. क. ख. ङ. च. ज. झ. ट. समहाप्राज्ञो. ७ ख. ङ. च. ज. झ. ट. निसृष्टपूर्वंतेनाशितंतत्तु. क. निसृष्टपूर्वंहिमथितंतत्तु. ८ अयंश्लोकः घ. ङ. च. ज.—ट. पाठेषुदृश्यते. ९ झ. प्रधर्षणायांचवारितंवनपालकैः. ङ. च. ज. ञ. ट. प्रधृष्यमाणाश्चवारिताः. १० ङ. झ. मामप्यचिन्तयन्देवभक्षयन्तिवनौकसः. ट. मामप्यचिन्तयित्वाते. च. मधून्यचिन्तयित्वाते. ११ च. ज.—ट. भ्रुकुटिंदर्शयन्तिहि. १२ छ. ज. ञ. संरब्धनयनैःक्रूरैरस्मदीयाःप्रधर्षिताः. १३ झ. ट. संप्रधर्षिताः.

पाणिभिर्निहताः केचित्केचिज्जानुभिराहताः ॥ प्रकृष्टाश्च यथाकामं देवमार्गं च दर्शिताः ॥ ११ ॥
एवमेते हताः शूरास्त्वयि तिष्ठति भर्तरि ॥ कृत्स्नं मधुवनं चैव प्रकामं तैः प्रभक्ष्यते ॥ १२ ॥
एवं विज्ञाप्यमानं तं सुग्रीवं वानरर्षभम् ॥ अपृच्छत्तं महाप्राज्ञो लक्ष्मणः परवीरहा ॥ १३ ॥
किमयं [1]वानरो राजन्वनपः प्रत्युपस्थितः ॥ कं चार्थमभिनिर्दिश्य दुःखितो वाक्यमब्रवीत् ॥ १४ ॥
एवमुक्तस्तु सुग्रीवो लक्ष्मणेन महात्मना ॥ लक्ष्मणं प्रत्युवाचेदं वाक्यं वाक्यविशारदः ॥ १५ ॥
आर्य लक्ष्मण संप्राह वीरो दधिमुखः कपिः ॥ अङ्गदप्रमुखैर्वीरैर्भक्षितं मधु वानरैः ॥
विचित्य दक्षिणामाशामागतैर्हरिपुङ्गवैः ॥ १६ ॥
नैषामकृत[2]कृत्यानामीदृशः [3]स्यादुपक्रमः ॥ [4]आगतैश्च प्रमथितं यथा मधुवनं हि तैः ॥
धर्षितं च वनं कृत्स्नमुपयुक्तं च वानरैः ॥ १७ ॥
वनं [5]यदाऽभिपन्नास्ते साधितं कर्म [6]वानरैः ॥ १८ ॥
[[7]वारयन्तो भृशं प्राप्ताः पाला जानुभिराहताः ॥ तथा न गणितश्चायं कपिर्दधिमुखो बली ॥
पतिर्मम वनस्यायमस्माभिः स्थापितः स्वयम् ॥ १९ ॥]
दृष्टा देवी न संदेहो न चान्येन हनूमता ॥ न ह्यन्यः साधने हेतुः कर्मणोस्य हनूमतः ॥ २० ॥
[8]कार्यसिद्धिर्मतिश्चैव तस्मिन्वानरपुङ्गवे ॥ व्यवसायश्च [9]वीर्यं च श्रुतं चापि प्रतिष्ठितम् ॥ २१ ॥
जाम्बवान्यत्र नेता [10]स्यादङ्गदश्च महाबलः ॥ हनूमांश्चाप्यधिष्ठाता [11]न तस्य गतिरन्यथा ॥ २२ ॥
अङ्गदप्रमुखैर्वीरैर्हतं मधुवनं किल ॥ [12]वारयन्तश्च सहितास्तथा जानुभिराहताः ॥ २३ ॥
एतदर्थमयं प्राप्तो वक्तुं मधुरवागिह ॥ नाम्ना दधिमुखो नाम हरिः प्रख्यातविक्रमः ॥ २४ ॥
दृष्टा सीता महाबाहो सौमित्रे पश्य तत्त्वतः ॥ अभिगम्य [13]तथा सर्वे पिबन्ति मधु वानराः ॥२५॥
न चाप्यदृष्ट्वा वैदेहीं [14]विश्रुताः पुरुषर्षभ ॥ [15]वनं दत्तवरं दिव्यं धर्षयेयुर्वनौकसः ॥ २६ ॥
ततः प्रहृष्टो धर्मात्मा लक्ष्मणः सहराघवः ॥ श्रुत्वा कर्णसुखां वाणीं सुग्रीववदनाच्च्युताम् ॥
प्राहृष्यत भृशं रामो लक्ष्मणश्च [16]महाबलः ॥ २७ ॥

रणे । संप्रधर्षणचिह्नस्य दृश्यमानत्वाभिप्रायेण प्रसिद्धिपरो वा ॥ ९—१५ ॥ अङ्गदप्रमुखैरिति । अत्र विशिष्यानुवादाद्दधिमुखवाक्ये वानरपुङ्गवैरित्यत्रापि विशेषपरत्वं बोध्यं ॥ १६ ॥ वनं प्रमथितं भग्नं । धर्षितं आक्रान्तं । मधु च भक्षितं । यथा येन कारणेन । एषामकृतकृत्यानामीदृश उपक्रमो न स्यादिति मन्य इति योजना ॥ १७ ॥ कृतकृत्यत्वं विशेषयति—वनमित्यादिना ॥ १८—२५ ॥ वनमिति । मधुवनधर्षणमेव सीतादर्शने लिङ्गमिति भावः । दत्तवरं दिव्यमित्यनेन ऋक्षरजसे ब्रह्मणा दत्तमित्यवग-

---

॥ ७ ॥ **शि०** देवमार्गदर्शिताः प्रक्षेपेणप्रापिताः ॥ ११ ॥ **ती०** सहैववसतोलक्ष्मणस्यकंचनार्थमभिनिर्दिश्यदुःखितोवाक्यमब्रवीदितिप्रश्नकरणाद्दधिमुखेनवनभङ्गादिकंस्वजात्युचितभाषयोक्तमित्यवगन्तव्यं । उपांशूक्तमितिवाद्रष्टव्यं ॥ १३ ॥ **ति०** यत् यतः । वनमभिपन्नाः नाशयितुंप्रवृत्ताः ॥ १८ ॥ **स०** स्ववेदनावेदनवागपि रामकार्यसूचकत्वान्मधुरवाक् ॥ २४ ॥ इतित्रिषष्टितमःसर्गः ॥ ६३ ॥

[**पा०**] १ क. वनपोराजन्वानरः. २ ङ. झ. ट. मकृतकार्याणां. ३ ङ. झ. ट. स्याद्यतिक्रमः. ४ च. ज. आत्मेच्छातः प्रहृष्टैश्चहतंमधुवनं. ५ झ. यदभिपन्नाः. ६ ङ. झ. ट. तद्ध्रुवं. ७ इदमर्धत्रयं ख. ग. ङ. च. छ. झ. ञ. ट. पाठेषुदृश्यते. ८ ङ. झ. ट. कार्यसिद्धिर्हनुमति. ख. ग. घ. हनूमतःकार्यसिद्धिर्मतिश्चहरिपुङ्गवे. क. यदतःकार्यसंसिद्धिः. ९ क. च. छ. ज. ञ. वीर्यंचसूर्येतेजइवध्रुवं. १० क. स्याद्युवराजस्तथाङ्गदः. ११ ङ.—ट. नतत्र. क. ग. नह्यस्य. १२ ख. घ. च. छ. ज. वारितास्सहिताःपालास्तथा. ञ. पातिताःसहिताःपालास्तथा. क. वानरास्तुहताःपालास्तथा. ङ. झ. ट. पातितावनपालास्तेतथा. १३ क. ङ.—ट. यथा. १४ घ. विश्रान्ताः. क. विश्रुताःप्लवगर्षभाः. १५ घ. एतन्मधुवनंदिव्यं. १६ क. ख. घ. ङ. च. ज.—ट. महायशाः.

श्रुत्वा दधिमुखस्येदं सुग्रीवस्तु प्रहृष्य च ॥ वनपालं पुनर्वाक्यं सुग्रीवः प्रत्यभाषत ॥ २८ ॥
प्रीतोस्मि सोहं यद्भुक्तं वनं तैः कृतकर्मभिः ॥ मर्षितं मर्षणीयं च चेष्टितं कृतकर्मणाम् ॥ २९ ॥
[गच्छ शीघ्रं मधुवनं संरक्षस्व त्वमेव हि ॥ शीघ्रं प्रेषय सर्वांस्तान्हनुमत्प्रमुखान्कपीन् ॥ ३० ॥]
इच्छामि शीघ्रं हनुमत्प्रधानाञ्शाखामृगांस्तान्मृगराजदर्पान् ॥
द्रष्टुं कृतार्थान्सह राघवाभ्यां श्रोतुं च सीताधिगमे प्रयत्नम् ॥ ३१ ॥
प्रीतिस्फीताक्षौ संप्रहृष्टौ कुमारौ दृष्ट्वा सिद्धार्थौ वानराणां च राजा ॥
अङ्गैः संहृष्टैः कर्मसिद्धिं विदित्वा बाह्वोरासन्नां सोतिमात्रं ननन्द ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

चतुःषष्टितमः सर्गः ॥ ६४ ॥

दधिमुखेन सुग्रीवसमीपात्पुनर्मधुवनमेत्य अङ्गदक्षमापणपूर्वकं तंप्रति शीघ्रागमनविषयकसुग्रीवचोदनानिवेदनम् ॥ १ ॥ हनुमताऽङ्गदादिभिःसह सुग्रीवसमीपमेत्य श्रीरामंप्रति सप्रणामंसीताकुशलनिवेदनं ॥ २ ॥

सुग्रीवेणैवमुक्तस्तु हृष्टो दधिमुखः कपिः ॥ राघवं लक्ष्मणं चैव सुग्रीवं चाभ्यवादयत् ॥ १ ॥
स प्रणम्य च सुग्रीवं राघवौ च महाबलौ ॥ वानरैः सहितैः शूरैर्दिवमेवोत्पपात ह ॥ २ ॥
स यथैवागतः पूर्वं तथैव त्वरितं गतः ॥ निपत्य गगनाद्भूमौ तद्वनं प्रविवेश ह ॥ ३ ॥
स प्रविष्टो मधुवनं ददर्श हरियूथपान् ॥ विमदानुत्थितान्सर्वान्मेहमानान्मधूदकम् ॥ ४ ॥
स तानुपागमद्वीरो बद्ध्वा करपुटाञ्जलिम् ॥ उवाच वचनं श्लक्ष्णमिदं हृष्टवदङ्गदम् ॥ ५ ॥

म्यते ॥ २६—२७ ॥ द्वितीयसुग्रीवशब्दस्य शोभनग्रीव इत्यवयवार्थो विवक्षितः । क्रियाभेदेनापुनरुक्तिर्वा ॥ २८—३० ॥ हनुमत्प्रधानान् हनुमत्प्रमुखान् । कृतार्थान् कृतकृत्यान् । प्रयत्नं प्रयासं । तेभ्यः श्रोतुमिच्छामीत्यन्वयः ॥ ३१ ॥ अथ प्रत्युपकारार्थं सुग्रीवः स्वोद्योगसाफल्यदर्शनात् भृशं ननन्देत्याह—प्रीतिस्फीताक्षाविति । प्रीत्या संतोषेण । संप्रहृष्टौ रोमस्विति शेषः । हृषितरोमाणावित्यर्थः । "हृषेर्लोमसु" इति विकल्पादिडभावः । एवं अङ्गैः संहृष्टैरित्यत्रापि द्रष्टव्यं । कर्मसिद्धिं बाह्वोरासन्नां हस्तप्राप्तां । विदित्वा। निश्चित्येत्यर्थः । जागतं वैश्वदेवीवृत्तं । "पञ्चाश्वैश्छिन्ना वैश्वदेवी ममौ यौ" इति लक्षणात् ॥ ३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने त्रिषष्टितमस्सर्गः ॥ ६३ ॥

सहितैः स्नेहातिरेकेणान्योन्यं युक्तैः । वानरैः सहितैरिति पाठः ॥ १—३ ॥ विमदानित्यत्र हेतुमाह—मेहमानानिति । मेहमानान् मेहयतः । मूत्रयत इत्यर्थः । एतेन मूत्रणान्मधूनि जीर्णानीति गम्यते । अतएव विमदत्वं । मधूनि च उदकानि च। मधूदकमिति द्वन्द्वैकवद्भावः । उदकानि चात्र अनुपानत्वेन पीतानि । तदाह बाहटः—"अनुपानं हिमं वारि यवगोधूमयोर्हितं । दध्नि मद्ये बिसे क्षौद्रे कोष्णं पिष्टमयेषु च" इति ॥ ४ ॥ करपुटाञ्जलिं करतलयोरञ्जलिं । सम्यक्संयुक्तकरतलाञ्जलिमि-

---

ति० मधुपरिणामभूतमुदकं मधूदकं ॥ ४ ॥

[पा०] १ ङ. झ. ट. धर्षितंमर्षणीयंच. ग. च. छ. ज. ञ. अमर्षणीयमेतेषां. ख. मर्षणीयंचमेतेषां. २ अयंश्लोकः ङ. झ. ट. पाठेषुदृश्यते. ३ ख. ङ. झ. प्रष्टुं. ४ क. प्रवृत्तिं. ५ क. ङ.—ठ. प्रहृष्टैःकार्यसिद्धिं. ६ ग. ङ. झ. ट. रासन्नामतिमात्रं. ७ ङ.—ट. सहितः. ८ ख. ङ.—ट. नुद्धतान.

सौम्य रोषो न कर्तव्यो [1]यदेभिरभिवारितः ॥ अज्ञानाद्रक्षिभिः क्रोधाद्भवन्तः प्रतिषेधिताः ॥
[[2]श्रान्तो दूरादनुप्राप्तो भक्षयस्व स्वकं मधु ॥ ६ ॥]
युवराजस्त्वमीशश्च वनस्यास्य महाबल ॥ मौर्ख्यात्पूर्वं कृतो [3]दोषस्तं भवान्क्षन्तुमर्हति ॥ ७ ॥
[[4]यथैव हि पिता तेऽभूत्पूर्वं हरिगणेश्वरः ॥ तथा त्वमपि सुग्रीवो नान्यस्तु हरिसत्तम ॥ ८ ॥]
आख्यातं हि मया गत्वा पितृव्यस्य तवानघ ॥ इहो[5]पयातं सर्वेषामेतेषां वनचारिणाम् ॥ ९ ॥
[6]स त्वदागमनं श्रुत्वा सहैभिर्हरियूथपैः ॥ [7]प्रहृष्टो न तु रुष्टोसौ वनं श्रुत्वा प्रधर्षितम् ॥ १० ॥
[8]प्रहृष्टो मां पितृव्यस्ते सुग्रीवो वानरेश्वरः ॥ शीघ्रं प्रेषय सर्वांस्तानिति होवाच पार्थिवः ॥ ११ ॥
श्रुत्वा दधिमुख[9]स्येदं वचनं श्लक्ष्णमङ्गदः ॥ अब्रवीत्तान्हरिश्रेष्ठो वाक्यं वाक्यविशारदः ॥ १२ ॥
शङ्के श्रुतोऽयं वृत्तान्तो रामेण हरियूथपाः ॥ [[10]अयं च हर्षादाख्याति तेन जानामि हेतुना ॥]
तत्क्षणं नेह नः स्थातुं कृतेऽकार्ये परन्तपाः ॥ १३ ॥
पीत्वा मधु यथाकामं [11]विश्रान्ता वनचारिणः ॥ किं शेषं गमनं तत्र सुग्रीवो [12]यत्र मे गुरुः ॥ १४ ॥
सर्वे यथा मां वक्ष्यन्ति समेत्य हरियूथपाः ॥ तथाऽस्मि कर्ता कर्तव्ये भवद्भिः परवानहम् ॥ १५ ॥
नाज्ञापयितुमीशोऽहं युवराजोस्मि यद्यपि ॥ अयुक्तं कृतकर्माणो यूयं धर्षयितुं [13]मया ॥ १६ ॥
ब्रुवतश्चाङ्गदस्यैवं श्रुत्वा वचन[14]मव्ययम् ॥ प्रहृष्टमनसो वाक्यमिदमूचुर्वनौकसः ॥ १७ ॥
एवं वक्ष्यति को राजन्प्रभुः सन्वानरर्षभ ॥ ऐश्वर्यमदमत्तो हि सर्वोऽहमिति मन्यते ॥ १८ ॥
तव चेदं सुसदृशं वाक्यं नान्यस्य कस्य चित् ॥ सन्नतिर्हि तवाख्याति भविष्यच्छुभयोग्यताम् ॥ १९ ॥

त्यर्थः ॥ ५ ॥ एभिः वानरैः । अभिवारितः अभिवारितोऽसीति यत् अत्रार्थे रोषो न कर्तव्यः । भवन्त इति पूजायां बहुवचनं । नच हनुमदादिकमादाय बहुवचनं उत्तरश्लोकेपि युवराजस्त्वमित्युक्तेः । अज्ञानात्क्रोधात् । अज्ञानप्रयुक्तक्रोधादित्यर्थः । अभिवारितमिति पाठे लिङ्गव्यत्यय आर्षः । केचित्तु अज्ञानात् क्रोधाच्च भवन्तः प्रतिषेधिता इत्येतत् परिवारितं परिवारणं प्रति । रोषो न कर्तव्य इति योजयन्ति ॥ ६ ॥ क्रोधाद्वारणे कृते कुतो रोषो न कर्तव्यस्स्यादित्याशङ्क्य क्रोधस्याज्ञानकृतत्वादित्याह—युवराज इति ॥ दोषः निवारणरूपापराधः ॥ ७—८ ॥ उपयातं आगमनं ॥ ९—१२ ॥ अयं वृत्तान्तः अस्मदागमनवृत्तान्तः ॥१३॥ किं शेषं न किंचिदपि शिष्टमित्यर्थः । किन्तु मे गुरुः सुग्रीवो यत्र वर्तते तत्र गमनमेवशेषमित्यर्थः । " किंशेषं गमनं तच्च सुग्रीवो यत्र मे गुरुः " इति पाठे अस्माकं गमनं किंशेषं किंचिच्छेषं । तच्च गमनशेषं च सुग्रीवो यत्र तत्र गमनमिति संबन्धः ॥ १४ ॥ विनयपूर्वकं सर्वसंमेलनं समर्थयते—सर्व इति ॥ तथास्मि कर्ता आह्वानं करिष्यामीत्यर्थः । कर्तव्ये कार्ये भवद्भिः अहं परवान् । भवद्भिर्यथा नियुक्तं तथा करिष्यामि । गन्तव्यमित्युक्ते गमिष्यामः स्थातव्यमित्युक्ते स्थास्याम इत्यर्थः ॥१५॥ युवराजत्वाद्भवानेव कर्तव्याकर्तव्यनियन्तेत्यत आह—नाज्ञापयितुमिति ॥ ईशः स्वतन्त्रः । कृतकर्माणः कृतोपकाराः । यूयं मया धर्षयितुं अनादर्तुं परतन्त्रीकर्तुमिति यावत् । अयुक्तं अयुक्ता इत्यर्थः । आर्षमव्ययमेतत् । शक्यमितिवत्सामान्योपक्रमान्नपुंसकैकत्वनिर्देश इत्यप्याहुः ॥१६—१७॥ अहमिति मन्यते गर्विष्ठो भवतीति यावत् ॥ १८ ॥ सन्नतिः

ति० तत् तस्मात् । अकार्ये वनविध्वंसनरूपे । कृतेसति इहस्थातुं । नोस्माकं नक्षमं नयुक्तं ॥ १३ ॥

[पा०] १ ङ. झ. ट. यदेभिःपरिवारणं. ख. यदेभिर्नविचारितं. क. यदेभिरविचारितं. २ इदमर्धं ङ.—ट. पाठेषु दृश्यते. ३ ङ. झ. ट. रोषस्तद्भवान्. क. ख. घ. च. छ. ज. दोषस्तद्भवान्. ४ अयंश्लोकः ङ.—ट. पाठेषुदृश्यते. ५ क. ख. घ.—ट. यानं. ६ क. राजात्वामागतं. ङ. झ. ट. भवदागमनंश्रुत्वासहैभिर्वनचारिभिः. ७ क. संप्रहृष्टोनरुष्टस्तु. ८ क. मांचाब्रवीत्पितृव्यस्ते. ९ क. ख. ङ. झ. ट. स्यैतद्वचनं. १० इदमर्धं ख. ङ.—ट. पाठेषुदृश्यते. ११ ङ. झ. ट. विक्रान्ताः. १२ ङ. झ. ट. यत्रवानरः. १३ ङ. झ. ट. बलात्. च. छ. ज. रुषा. १४ ङ.—ट. मुत्तमं.

सर्वे वयमपि प्राप्तास्तत्र गन्तुं कृतक्षणाः ॥ स यत्र हरिवीराणां सुग्रीवः पतिरव्ययः ॥ २० ॥
त्वया ह्यनुक्तैर्हरिभिर्नैव शक्यं पदात्पदम् ॥ कचिद्गन्तुं हरिश्रेष्ठ ब्रूमः सत्यमिदं तु ते ॥ २१ ॥
एवं तु वदतां तेषामङ्गदः प्रत्यभाषत ॥ [१]बाढं गच्छाम इत्युक्त्वा [२]खमुत्पेतुर्महाबलाः ॥ २२ ॥
उत्पतन्तमनूत्पेतुः सर्वे ते हरियूथपाः ॥ कृत्वाऽऽकाशं निराकाशं [३]यन्त्रोत्क्षिप्ता इवाचलाः ॥ २३
[[४]अङ्गदं पुरतः कृत्वा हनूमन्तं च वानरम् ॥] [५]तेऽम्बरं सहसोत्पत्य वेगवन्तः प्लवङ्गमाः ॥
विनदन्तो महानादं घना वातेरिता यथा ॥ २४ ॥
अङ्गदे समनुप्राप्ते सुग्रीवो वानराधिपः ॥ उवाच [६]शोकोपहतं रामं कमललोचनम् ॥ २५ ॥
समाश्वसिहि भद्रं ते दृष्टा देवी न संशयः ॥ नागन्तुमिह शक्यं तै[७]रतीते समये हि नः ॥
[[८]अङ्गदस्य प्रहर्षाच्च जानामि शुभदर्शन ॥ २६ ॥]
न मत्सकाशमागच्छेत्कृत्ये हि विनिपातिते ॥ युवराजो महाबाहुः प्लवतां प्रवरोऽङ्गदः ॥ २७ ॥
यद्यप्यकृतकृत्यानामीदृशः स्यादुपक्रमः ॥ [९]भवेत्स दीनवदनो [१०]भ्रान्तविप्लुतमानसः ॥ २८ ॥
पितृपैतामहं चैतत्पूर्वकैरभिरक्षितम् ॥ न मे मधुवनं हन्याद[११]हृष्टः प्लवगेश्वरः ॥ २९ ॥
कौसल्या सुप्रजा राम समाश्वसिहि सुव्रत ॥ दृष्टा देवी न संदेहो न चान्येन हनूमता ॥ ३० ॥
[१२]न ह्यन्यः कर्मणो हेतुः साधनेऽस्य हनूमतः ॥ [१३]हनूमति हि सिद्धिश्च मतिश्च [१४]मतिसत्तम ॥
व्यवसायश्च [१५]वीर्यं च सूर्ये तेज इव ध्रुवम् ॥ ३१ ॥
जाम्बवान्यत्र नेता स्यादङ्गदश्च [१६]बलेश्वरः ॥ हनुमांश्चाप्यधिष्ठाता न [१७]तस्य गतिरन्यथा ॥ ३२ ॥

विनयः ॥ १९ ॥ कृतक्षणाः कृतावसराः । अवसरप्रतीक्षा इति यावत् ॥ २०—२१ ॥ बाढमित्यङ्गीकारे । इतिशब्दः काकाक्षिन्यायेन पूर्वापरयोरन्वेति । एवं तेषां वदतां तेषु वदत्सु । अङ्गदः बाढमिति प्रत्यभाषत । गच्छाम इत्युक्त्वापि उत्पपात ॥ २२ ॥ निराकाशं निरवकाशम् ॥ २३ ॥ तेम्बरमिति अत्र जग्मुरित्यध्याहार्यं ॥ २४—२६ ॥ विनिपातिते विघ्निते ॥ २७ ॥ अकृतकृत्यानां अकृतकार्याणां । ईदृशः मधुवनभङ्गरूपः । उपक्रमः उद्योगः यदि स्यात्तदाङ्गदो दीनवदनत्वादिविशिष्टो भवेत्॥२८॥ पिता चासौ पितामहश्च । पित्रा ब्रह्मणा ऋक्षरजसे दत्तं पितृपैतामहं । प्लवगेश्वरः अङ्गदः ॥ २९ ॥ हे राम कौसल्या सुप्रजाः सुप्रजावती । " नित्यमसिच् प्रजामेधयोः " इत्यसिच्प्रत्ययः । एवं देव्यवस्थानज्ञानेन भवतस्सत्तालाभादिदानीं कौसल्या सुप्रजावती अभूदिति शेषः ॥ ३०—३१ ॥ यत्र कार्ये

ती० ननुमधुवनधर्षणमात्रेणकथंकार्यसिद्धिः कापेयादिनापिसंभवादित्याशङ्क्यसत्यमन्येषांतादृशत्वेपि अङ्गदस्तुनैतादृशइत्याशयेनाह—यद्यपीत्यादिश्लोकद्वयेन । अकृतकृत्यानामन्येषांवानराणां ईदृशउपक्रमः मधुवनभङ्गहर्षव्यापारोयद्यपिस्यात् । तथापि तत्राङ्गदस्तु दीनवदनो भ्रान्तविप्लुतमानसश्चभवेत् । कुतः पितृपैतामहं पितृपितामहपरंपरागतं । मेमधुवनं जनकात्मजामदृष्ट्वानहन्यात् ॥ २८–२९ ॥ ती० हेराम कौसल्यासुप्रजाः । सीतायाःस्थितिपरिज्ञानेनभवतःसत्तालाभात् इदानींकौसल्यासुपुत्रवत्यभूदितिभावः ॥ ३० ॥ ति० अस्यकर्मणःसाधने तद्विधोहेतुरपरोनभवेत् नास्ति । इहहनूमति एतत्कार्यसाधिकासिद्धिः ब्रह्मवरजन्यामतिश्चास्ति । हि यतः । व्यवसायः उद्यमः ॥ ३१ ॥ ति० नेता प्रधानः । अधिष्ठाता कार्यकरणोद्योगवान् ॥ ३२ ॥

[पा०] १ ङ. झ. ट. साधुगच्छाम. २ च. छ. उत्पपातमहीतलात्. ख. घ. खमुत्पेतुर्महीतलात्. ३ ङ. ज.—ट. यन्त्रोत्क्षिप्ताइवोपलाः. क. ख. ग. छ. यज्ञोत्क्षिप्ताइवानलाः. ४ इदमर्धं ङ. झ. ट. पाठेषुदृश्यते. ५ च. छ. ज. ञ. तेऽङ्गदं पुरतःकृत्वा. ६ ङ.—ट. शोकसंतप्तं. ७ ङ.—ट. रतीतसमयैरिह. ८ इदमर्धं ङ.—ट. पाठेषुदृश्यते. ९ क. ङ. झ. ट. भवेत्तुदीनवदनो. ख. ग. घ. भवेयुर्दीनवदनाभ्रान्तविप्लुतमानसाः. १० छ. ज. श्रान्तविप्लुत. ११ ङ. झ. दृष्ट्वाजनकात्मजां. १२ क. घ.—ट. नह्यस्यकर्मणोहेतुस्साधनेतद्विधोभवेत्. ग. नह्यस्यसाधकोहेतुस्साधनेतद्विधोभवेत्. १३ क. च. छ. ज. ञ. हनूमतिमतिश्चैवकर्मसिद्धिश्चसत्तम. १४ क. रघुसत्तम. १५ क. ख. ग. ङ. छ.—ट. शौर्यंचश्रुतंचापिप्रतिष्ठितं. १६ ख.—ट. हरीश्वरः. १७ ङ. च. छ. झ. ञ. ट. तत्र.

मा भूश्चिन्तासमायुक्तः संप्रत्यमितविक्रम ॥ ३३ ॥
[यदा हि दर्पितोदग्राः संगताः काननौकसः ॥ नैषामकृतकार्याणामीदृशः स्यादुपक्रमः ॥
वनभङ्गेन जानामि मधूनां भक्षणेन च ॥ ३४ ॥]
ततः किलकिलाशब्दं शुश्रावासन्नमम्बरे ॥ हनुमत्कर्मदृप्तानां नर्दतां काननौकसाम् ॥
किष्किन्धामुपयातानां सिद्धिं कथयतामिव ॥ ३५ ॥
ततः श्रुत्वा निनादं तं कपीनां कपिसत्तमः ॥ आयताञ्चितलाङ्गूलः सोभवद्धृष्टमानसः ॥ ३६ ॥
आजग्मुस्तेऽपि हरयो रामदर्शनकाङ्क्षिणः ॥ अङ्गदं पुरतः कृत्वा हनूमन्तं च वानरम् ॥ ३७ ॥
तेऽङ्गदप्रमुखा वीराः प्रहृष्टाश्च मुदान्विताः ॥ निपेतुर्हरिराजस्य समीपे राघवस्य च ॥ ३८ ॥
हनुमांश्च महाबाहुः प्रणम्य शिरसा ततः ॥ नियतामक्षतां देवीं राघवाय न्यवेदयत् ॥ ३९ ॥
[दृष्टा देवीति हनुमद्वदनादमृतोपमम् ॥ आकर्ण्य वचनं रामो हर्षमाप सलक्ष्मणः ॥ ४० ॥]
निश्चितार्थस्ततस्तस्मिन्सुग्रीवः पवनात्मजे ॥ लक्ष्मणः प्रीतिमान्प्रीतं बहुमानादवैक्षत ॥ ४१ ॥
प्रीत्या च रममाणोथ राघवः परवीरहा ॥ बहुमानेन महता हनुमन्तमवैक्षत ॥ ४२ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

पञ्चषष्टितमः सर्गः ॥ ६५ ॥

रामेण सीतावृत्तान्तंपृष्टेनहनुमता तंप्रति शिंशुपामूले राक्षसीमध्यस्थित्यादितद्वृत्तान्तकथनपूर्वकं तदुक्ताभिज्ञाननिवेदनेन सह तत्सन्देशकथनम् ॥ १ ॥

ततः प्रस्रवणं शैलं ते गत्वा चित्रकाननम् ॥ प्रणम्य शिरसा रामं लक्ष्मणं च महाबलम् ॥ १ ॥
युवराजं पुरस्कृत्य सुग्रीवमभिवाद्य च ॥ प्रवृत्तिमथ सीतायाः प्रवक्तुमुपचक्रमुः ॥ २ ॥
रावणान्तःपुरे रोधं राक्षसीभिश्च तर्जनम् ॥ रामे समनुरागं च यश्चायं समयः कृतः ॥
एतदाख्यान्ति ते सर्वे हरयो रामसन्निधौ ॥ ३ ॥

नतो मन्त्री । बलेश्वरः सेनापतिः । अधिष्ठाता संरक्षक इत्यर्थः । तस्य कार्यस्य । गतिः सिद्धिः । अन्यथा विपरीता । न भवेत् । संप्रति चिन्तासंयुक्तो मा भूः ॥ ३२—३४ ॥ सिद्धिं कथयतामिव । उत्साहेनेति शेषः ॥ ३५ ॥ आयताञ्चितलाङ्गूलः आयतः दीर्घीकृतः अञ्चितः माल्यवच्छृङ्गे समास्थापितः ॥ ३६—३७ ॥ प्रहृष्टाः सञ्जातपुलकाः ॥ ३८ ॥ नियतामिति । अक्षतत्वेप्यनियतत्वे वैयर्थ्यं नियतत्वेपि क्षतत्वे च तथा । ततः आवश्यकमुभयं संग्रहेण दर्शयति ॥ अस्मिन्सर्गे सार्धैकोनचत्वारिंशच्छ्लोकाः ॥ ३९–४२ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने चतुष्षष्टितमः सर्गः ॥ ६४ ॥

प्रवृत्तिं वार्ता ॥ २ ॥ रोधं निरोधं । यश्चायं समयः कृतः । मासद्वयादूर्ध्वं हनिष्यामीति यः

ति० नियतां पातिव्रत्यसंपन्नां । अक्षतां शरीरेणकुशलिनीं ॥ ३९ ॥ शि० परमया लक्ष्म्यापि परयासीतयेत्यर्थः ॥ उपेतो मनसासंयुक्तः । राघवश्च महता प्रशंसनीयेन । बहुमानेनावैक्षत ॥ ४२ ॥ इतिचतुष्षष्टितमःसर्गः ॥ ६४ ॥

ति० रामसंनिधौ स्थिताइतिशेषः ॥ ३ ॥

[पा०] १ इदमर्धत्रयं ङ.—ट. पाठेषुदृश्यते. २ घ.—ट. नंदतां. ३ ङ. झ. ट. मदान्विताः. ४ अयंश्लोकः ङ.—ट. पाठेषुदृश्यते. ५ क. घ.—ट. निश्चितार्थततस्तस्मिन्सुग्रीवंपवनात्मजे । लक्ष्मणःप्रीतिमान्प्रीतो. ६ झ. ञ. ट. परमोपेतो. ७ ख. ङ. झ. मुपचक्रमे. ८ क. राक्षसीनांच. ९ ङ. झ. ट. यथाच. १० ङ. च. झ. एतदाख्यायते.

वैदेहीमक्षतां श्रुत्वा रामस्तूत्तरमब्रवीत् ॥ क्व सीता वर्तते देवी कथं च मयि वर्तते ॥
एतन्मे सर्वमाख्यात वैदेहीं प्रति वानराः ॥ ४ ॥
रामस्य गदितं श्रुत्वा हरयो रामसन्निधौ ॥ चोदयन्ति हनूमन्तं सीतावृत्तान्तकोविदम् ॥ ५ ॥
श्रुत्वा तु वचनं तेषां हनुमान्मारुतात्मजः ॥ प्रणम्य शिरसा देव्यै सीतायै तां दिशं प्रति ॥
उवाच वाक्यं वाक्यज्ञः सीताया दर्शनं यथा ॥ ६ ॥
[[1]तं मणिं काञ्चनं दिव्यं दीप्यमानं स्वतेजसा ॥ दत्त्वा रामाय हनुमांस्ततः प्राञ्जलिरब्रवीत् ॥७॥
समुद्रं लङ्घयित्वाऽहं शतयोजनमायतम् ॥ अगच्छं जानकीं सीतां मार्गमाणो दिदृक्षया ॥ ८ ॥
तत्र लङ्केति नगरी रावणस्य दुरात्मनः ॥ दक्षिणस्य समुद्रस्य तीरे वसति दक्षिणे ॥ ९ ॥
तत्र दृष्टा मया सीता रावणान्तःपुरे सती ॥ संन्यस्य त्वयि जीवन्ती रामा राम मनोरथम् ॥ १० ॥
दृष्टा मे राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः ॥ राक्षसीभिर्विरूपाभी रक्षिता प्रमदावने ॥ ११ ॥
दुःखमा[2]साद्यते देवी [3]तथाऽदुःखोचिता सती ॥ १२ ॥
रावणान्तःपुरे रुद्धा राक्षसीभिः सुरक्षिता ॥ एकवेणीधरा दीना [4]त्वयि चिन्तापरायणा ॥ १३ ॥
अधःशय्या विवर्णाङ्गी पद्मिनीव हिमागमे ॥ रावणाद्विनिवृत्तार्था मर्तव्यकृतनिश्चया ॥
देवी कथंचित्काकुत्स्थ त्वन्मना मार्गिता मया ॥ १४ ॥
इक्ष्वाकुवंशविख्यातिं शनैः [5]कीर्तयताऽनघ ॥ [6]सा मया नरशार्दूल [7]विश्वासमुपपादिता ॥ १५ ॥
ततः संभाषिता देवी सर्वमर्थं च दर्शिता ॥ [8]रामसुग्रीवसख्यं च श्रुत्वा प्रीतिमुपागता ॥ १६ ॥
नियतः समुदाचारो भक्तिश्चास्या[9]स्तथा त्वयि ॥ १७ ॥
एवं मया महाभागा दृष्टा जनकनन्दिनी ॥ उग्रेण तपसा युक्ता त्वद्भक्त्या पुरुषर्षभ ॥ १८ ॥
अभिज्ञानं च मे दत्तं यथा वृत्तं तवान्तिके ॥ चित्रकूटे महाप्राज्ञ वायसं प्रति राघव ॥ १९ ॥
[10]विज्ञाप्यश्च नरव्याघ्रो रामो वायुसुत त्वया ॥ [11]अखिलेनेह यद्दृष्टमिति मामाह जानकी ॥ २० ॥

संकेतो रावणेन कृत इत्यर्थः । मासशब्दःपक्षपर इत्युक्तं प्राक् । तमिति शेषः ॥ ३—५ ॥ प्रणामश्च सीतायाः स्मरणकृत इति बोध्यं । सीताया दर्शनं यथेति । येन प्रकारेण सीतादर्शनं जातं तेन प्रकारेणोवाचेत्यन्वयः ॥ ६—७ ॥ दिदृक्षया नतु श्रोतुमिच्छया । मार्गमाण इत्यर्थः ॥ ८ ॥ तत्र लङ्घने कृते सति ॥ ९ ॥ हे राम रामा सीता । त्वयि मनोरथं स्वाभिलाषं । संन्यस्य जीवन्ती । त्वदभिलाषेण धृतजीवितेत्यर्थः ॥ १०—११ ॥ दुःखमित्यर्धं । आसाद्यते आसीदति । आर्षो यत् ॥१२॥ एकवेणीधरा त्रिधा विभागं विना बद्धः केशपाशः एकवेणीत्युच्यते ॥ १३ ॥ अधःशय्या स्थण्डिलशायिनी । मर्तव्ये मरणे कृतनिश्चया ॥ १४—१५ ॥ सर्वमर्थं च दर्शिता सुग्रीवसख्यप्रभृतिसर्वमर्थं च बोधिता ॥१६॥ समुदाचारः परपुरुषाचिन्तकत्वादिः । त्वयि भक्तिश्च वर्तत इति शेषः ॥ १७ ॥ तपसा अनशनेन ॥१८॥ अभिज्ञानं चिह्नभूतं वाक्यं । तवान्तिके पूर्वं यथा येन प्रकारेण जातं तथा दत्तमित्यर्थः । तदेव दर्शयति—चित्रकूट इति । सदस्यवक्तव्यत्वात्सूचनोक्तिः ॥ १९ ॥ अखिलेनेति । रावणागमनादिकमित्यर्थः

शि० सीताक्ववर्तते । मयिकथं केनभावेनवर्तते । वैदेहीं प्रति वैदेहीसंबन्धि । एतत्सर्वं यूयमाख्यात केनभावेनेत्युक्त्या द्रुतंस्वकर्तृकरावणवधाभावजनितसीतामर्षविषयकसंभावनासूचिता ॥ ४ ॥ ति० तीरे दक्षिणसमुद्रसंबन्धिद्वीपसंनद्धतीरे ॥ ९ ॥

[पा०] १ अयंश्लोकः ङ.—ट. पाठेषुदृश्यते. २ क. ख. ङ. ज.—ट. मापद्यते. ३ ङ. झ. ञ. ट. त्वयावीरसुखोचिता. क. ख. घ. तवादुःखोचितासती. च. त्वयाऽदुःखोचिता. ४ क. त्वच्चित्तात्वत्परायणा. ५ ख. च. छ. ज. ञ. कीर्तयतामया. ६ ख. साचमेराजशार्दूल. ७ ङ. झ. शनैर्विश्वासितातदा. ८ ख. रामसुग्रीवयोःसख्यं. ९ ङ. झ. स्सदा. १० ङ. झ. ट. विज्ञाप्यःपुनरप्येषरामो. ११ ङ. च. झ. अखिलेनयथादृष्टमिति.

[1]अयं चास्मै प्रदातव्यो [2]यत्नात्सुपरिरक्षितः ॥ ब्रुवता वचनान्येवं सुग्रीवस्योपशृण्वतः ॥ २१ ॥
एष चूडामणिः श्रीमान्मया सुपरिरक्षितः ॥ मनःशिलायास्[3]तिलको गण्डपार्श्वे निवेशितः ॥ २२ ॥
त्वया प्रनष्टे तिलके तं किल स्मर्तुमर्हसि ॥ एष निर्यातितः श्रीमान्मया ते वारिसंभवः ॥ २३ ॥
[4]एतं दृष्ट्वा प्रमोदिष्ये व्यसने त्वामिवानघ ॥ जीवितं धारयिष्यामि मासं दशरथात्मज ॥
ऊर्ध्वं मासान्न जीवेयं रक्षसां वशमागता ॥ २४ ॥
इति मामब्रवीत्सीता कृशाङ्गी धर्मचारिणी ॥ रावणान्तःपुरे रुद्धा मृगीवोत्फुल्ललोचना ॥ २५ ॥
[5]एतदेव मयाख्यातं सर्वं राघव यद्यथा ॥ सर्वथा सागरजले संतारः प्रविधीयताम् ॥ २६ ॥
तौ जाताश्वासौ राजपुत्रौ विदित्वा तच्चाभिज्ञानं राघवाय प्रदाय ॥
देव्या चाख्यातं सर्वमेवानुपूर्व्याद्वाचा संपूर्णं वायुपुत्रः शशंस ॥ २७ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥

षट्षष्टितमः सर्गः ॥ ६६ ॥

रामेण सीताप्रेषितचूडामणेर्वक्षसि निक्षेपेणसकरुणंबहुधाविलापपूर्वकं हनुमन्तंप्रति पुनः सीतावचननिवेदनचोदना ॥१॥

एवमुक्तो हनुमता रामो दशरथात्मजः ॥ तं मणिं हृदये कृत्वा [6]प्ररुरोद सलक्ष्मणः ॥ १ ॥
तं तु दृष्ट्वा [7]मणिश्रेष्ठं राघवः शोककर्शितः ॥ नेत्राभ्यामश्रुपूर्णाभ्यां सुग्रीवमिदमब्रवीत् ॥ २ ॥
यथैव धेनुः स्रवति स्नेहाद्वत्सस्य वत्सला ॥ तथा ममापि हृदयं [8]मणिरत्नस्य दर्शनात् ॥ ३ ॥
मणिरत्नमिदं दत्तं वैदेह्याः श्वशुरेण मे ॥ वधूकाले यथा बद्धमधिकं मूर्ध्नि शोभते ॥ ४ ॥

॥ २० ॥ सुग्रीवस्योपशृण्वतः सुग्रीवे समीपे शृण्वति सति । एवं एष चूडामणिरित्यारभ्य रक्षसां वशमागतेत्यन्तवक्ष्यमाणप्रकारेण । वचनानि रामं प्रति मयोक्तवचनानि । ब्रुवता त्वया । अयं मणिरित्यर्थः । प्रदातव्यः ॥ २१—२४ ॥ मृगीवोत्फुल्ललोचना । त्रासातिशयादिति भावः ॥ २५ ॥ सन्तीर्यतेनेनेति संतारः सेतुः ॥ २६ ॥ ताविति । पूर्ववद्वैश्वदेवीवृत्तम् । समुद्रतरणे सुरसानिरसनादिकं अक्षवधलङ्कादहनादिकं सजातीयेभ्यः पूर्वमुक्तमपि प्रभुसंनिधावात्मश्लाघायां पर्यवस्येदिति नोक्तमिति ध्येयम् । *स्ववृत्तान्तं सर्वमाख्यातवानिति सामान्येनवक्तुंयुक्तत्वेप्यङ्गदसन्निधौ प्रपञ्चनं गोप्यविशेषगोपनार्थं । अत्र त्वप्रपञ्चनं अकथनीयाकथनार्थं चेति ज्ञेयं ॥२७॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने पञ्चषष्टितमःसर्गः ॥६५॥

यथा वत्सला वत्से स्नेहवती धेनुः । वत्सस्य स्नेहात् वत्सविषयकस्नेहात् । स्रवत्येव द्रवत्येव । तथा मणिरत्नस्य मणिश्रेष्ठस्य । दर्शनान्मम हृदयं द्रवति ॥१–३॥ मणेरागतिमाह—मणिरत्नमिति ॥ मे श्वशुरेण जनकेन । वधूकाले वधूप्रतिग्रहकाले । विवाहकाल इत्यर्थः । यथा शोभते तथा बद्धमित्यन्वयः ॥४॥

शि० एवंवचनानिउपश्शृण्वतःसुग्रीवस्यसमीपेब्रुवतात्वया यत्नात् त्वत्प्रयत्नंविज्ञाय । सुपरिरक्षितः स्वदेहइतिशेषः । अयंवृत्तान्तसमूहः त्वयाप्रदातव्यःवक्तव्यइत्यर्थः ॥ २१ ॥ **स०** स्मरस्व स्मर । स्व स्वतन्त्रेतिरामसंबोधनंवा ॥ २२ ॥ **ति०** मासात् विद्यमानाद्दशमासादूर्ध्वमित्यर्थः ॥२४॥ **ति०** संतारः सन्तारोपायः । प्रविधीयतां प्रविचार्यतां ॥२६॥ इतिपञ्चषष्टितमःसर्गः ॥६५॥

ति० वत्सस्येत्यत्रापिदर्शनादितिसंबध्यते । तथास्नेहात्स्रवतीत्यनुकर्षः ॥ ३ ॥ **ति०** वधूकाले वधूत्वसंपादकेकाले । सीतामातृहस्ताद्गृहीत्वादशरथहस्तेदत्तं । तच्चतस्मिन्काले यथाधिकंशोभते तथामूर्ध्निबद्धमित्यर्थः ॥ **स०** वधूकरणकालेवैदेह्यामूर्ध्निबद्धंयथाअधिकंअशोभत तथाइदानीमपिशोभते । कालतस्तत्प्रकाशतिरोधानंनास्तीतिमहत्त्वंरत्नस्यध्वन्यते ॥ ४ ॥

[पा०] १ घ. च. छ. ज. ञ. ट. इदंचास्मैप्रदातव्यमेतत्सुपरिरक्षितं. २ घ. च. छ. ज. ञ. मयातेपरिरक्षितः. ३ क. ख. घ.—ट. स्तिलकंतत्स्मरस्वेतिचाब्रवीत्. ४ क. घ. ङ. झ. ञ. ट. एतं दृष्ट्वा. ५ क. घ. एतदेवं. ६ च.—ट. रुरोदसहलक्ष्मणः. ७ ख. मणिवरं. ८ घ. च.—ट. मणिश्रेष्ठस्य.

अयं[1] हि जलसंभूतो मणिः सज्जन[2]पूजितः ॥ यज्ञे परमतुष्टेन दत्तः[3] शक्रेण धीमता ॥ ५ ॥
इमं दृष्ट्वा मणिश्रेष्ठं यथा[4] तातस्य दर्शनम् ॥ अद्यास्म्यवगतः सौम्य वैदेहस्य तथा विभोः ॥ ६ ॥
अयं हि शोभते तस्याः प्रियाया मूर्ध्नि मे मणिः ॥ अस्याद्य दर्शनेनाहं प्राप्तां तामिव चिन्तये ॥ ७ ॥
किमाह सीता वैदेही ब्रूहि सौम्य पुनःपुनः ॥ पिपासुमिव[5] तोयेन सिञ्चन्ती[6] वाक्यवारिणा ॥ ८ ॥
इतस्तु किं दुःखतरं यदिमं[7] वारिसंभवम् ॥ मणिं पश्यामि सौमित्रे वैदहीमागतं विना ॥ ९ ॥
चिरं जीवति वैदेही यदि मासं धरिष्यति ॥ क्षणं सौम्य[8] न जीवेयं विना तामसितेक्षणाम् ॥ १० ॥
नय मामपि तं देशं यत्र दृष्टा मम प्रिया ॥ न तिष्ठेयं क्षणमपि प्रवृत्तिमुपलभ्य च ॥ ११ ॥
कथं सा मम सुश्रोणी भीरुभीरुः सती सदा[9] ॥ भयावहानां घोराणां मध्ये तिष्ठति रक्षसाम् ॥ १२ ॥
शारदस्तिमिरोन्मुक्तो नूनं चन्द्र इवाम्बुदैः ॥ आवृतं[10] वदनं तस्या न विराजति राक्षसैः[11] ॥ १३ ॥
किमाह सीता हनुमंस्तत्त्वतः कथयाद्य[12] मे ॥ एतेन खलु जीविष्ये भेषजेनातुरो यथा ॥ १४ ॥
मधुरा मधुरालापा किमाह मम भामिनी ॥ मद्विहीना वरारोहा हनुमन्कथयस्व मे ॥
[दुःखाद्[13]दुःखतरं प्राप्य कथं जीवति जानकी] ॥ १५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

सप्तषष्टितमः सर्गः ॥ ६७ ॥

हनुमता रामचोदनया काकासुरवृत्तान्तादिप्रतिपादकसीतावचनानां विस्तरेणानुवादः ॥१॥ तथा तांप्रति स्वेनार्थरूपाभिज्ञानयाचने तयाचूडामणिरूपार्थाभिज्ञानदाननिवेदनपूर्वकं रामादिषु कुशलप्रश्ननिवेदनचोदनादिरूपतद्वचनानुवादः ॥ २ ॥

एवमुक्तस्तु[14] हनुमान्राघवेण महात्मना ॥ सीताया भाषितं सर्वं न्यवेदयत राघवे ॥ १ ॥

जनकेनापि कुतस्तल्लब्धं तत्राह—अयं हीति ॥ ५ ॥ "मणिं तु दृष्ट्वा रामो वै त्रयाणां संस्मरिष्यति" इति सीतयोक्तप्रकारेण स्मरति—इममिति । इमं दृष्ट्वा तातस्य दशरथस्य । वैदेहस्य जनकस्य । दर्शनमद्यावगतः प्राप्तोस्मि । तदा ताभ्यां तस्या मूर्ध्नि बद्धत्वादिति भावः । इह वैदेहग्रहणं सीताजनन्या अप्युपलक्षणं । सीतावाक्ये "वीरो जनन्या मम च" इत्युक्तेः । तत्र त्रयाणां संस्मरिष्यतीति त्रयग्रहणं बहुमात्रोपलक्षणं । इह वैदेहस्यापि स्मरणोक्तेः ॥ ६—८ ॥ आगतं मणिमित्यन्वयः ॥ ९—११ ॥ भीरुभीरुः अत्यन्तभीरुः ॥ १२-१३ ॥ तत्त्वतः संकोचेन न किंचिद्गोपनीयमिति भावः ॥१४॥ मधुरा सुन्दरी । मधुरालापा । येन तद्वचनानुवादेपि भवद्वचनं मधुरं भवतीत्यर्थः ॥ १५ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने षट्षष्टितमः सर्गः ॥ ६६ ॥

पूर्वं संकुचितं विस्तृणीते—सुखेत्यादिना ॥

ति० परासुं मूर्च्छितंमां ॥ ८ ॥ ति० यदिमासंधरिष्यति जीविष्यति । तदा चिरंजीवति जीविष्यतीत्यर्थः । तांविना यथाऽहंनजीवेयं तथामांविना सापिनजीविष्यतीत्यर्थः ॥ स० यदिवैदेहीचिरंजीवति तर्हि मासंधरिष्यति । यदिमासंधरिष्यति तर्ह्येव चिरंजीवतीतितज्जीवनंमज्जीवनव्याप्तं । व्यतिरेकेणाप्याह—**क्षणमिति** । तामसितेक्षणांविना क्षणमहंनजीवेयंयथा तथा इयंसीतापिमांविना नजीवा नविद्यतेजीवोयस्याःसेतियोजना । यद्वा वैदेहीयदिमासंधरिष्यतिप्राणान् तर्हि चिरंजीवति । वार्ताज्ञानानन्तरंमयातुतथाजीवितुमशक्यमित्याह—**क्षणमिति** ॥ १० ॥ स० प्रवृत्तिं वार्तां । निराहारत्वादिप्रवृत्तिंवा ॥ ११ ॥ इतिषट्षष्टितमःसर्गः ॥ ६६ ॥

[पा०] १ च. छ. ज. इदंहिजलसंभूतंमणिप्रवरमुत्तमं. २ ख. घ. झ. प्रवरपूजितः. ३ च. छ. ज. दत्तं. ४ क. ख. च. छ. झ. ञ. तथा. ५ ख. झ. ञ. ट. परासुमिव. ६ छ. स्रवन्ती. ७ झ. ञ. यमिमं. ८ ख. झ. वीर. ९ च.—झ. तदा. १० छ. झ. ञ. आवृतो. ११ झ. सांप्रतं. १२ क. छ. ज. झ. ट. कथयस्वमे. १३ इदमर्धं झ. ट. पाठयोर्नदृश्यते. १४ ख. राघवेणैवमुक्तस्तुहनूमान्मारुतात्मजः । वाक्यमुत्तरमव्यग्रस्तमुवाचप्रहृष्टधीः.

इदमुक्तवती देवी जानकी पुरुषर्षभ ॥ पूर्ववृत्तमभिज्ञानं चित्रकूटे यथातथम् ॥ २ ॥
सुखसुप्ता त्वया सार्धं जानकी पूर्वमुत्थिता ॥ वायसः सहसोत्पत्य वि[1]रराद स्तनान्तरे ॥ ३ ॥
पर्यायेण च[2] सुप्तस्त्वं देव्यङ्के भरताग्रज ॥ पुनश्च किल पक्षी स देव्या जनयति व्यथाम् ॥ ४ ॥
[3]पुनःपुनरुपागम्य वि[4]रराद भृशं किल ॥ ततस्त्वं बोधितस्तस्याः शोणितेन समुक्षितः ॥ ५ ॥
वायसेन च तेनैव सततं बाध्यमानया ॥ बोधितः किल देव्या त्वं सुखसुप्तः परन्तप ॥ ६ ॥
तां तु दृष्ट्वा महाबाहो दा[5]रितां च स्तनान्तरे ॥ आशीविष इव क्रुद्धो नि[6]श्श्वसन्नभ्यभाषथाः ॥७॥
नखाग्रैः केन ते भीरु दा[7]रितं तु स्तनान्तरम् ॥ कः क्रीडति सरोषेण पञ्चवक्त्रेण भोगिना ॥ ८ ॥
निरीक्षमाणः सहसा वायसं स[8]मवैक्षथाः ॥ नखैः सरुधिरैस्तीक्ष्णैस्तामेवाभिमुखं स्थितम् ॥ ९ ॥
सुतः किल स शक्रस्य वायसः पततां वरः ॥ धरान्तरचरः शीघ्रं पवनस्य गतौ समः ॥ १० ॥
ततस्तस्मिन्महाबाहो कोपसंवर्तितेक्षणः ॥ वायसे त्वं कृथाः क्रूरां मतिं मतिमतां वर ॥ ११ ॥
स[9] दर्भं संस्तराद्गृह्य ब्रह्मास्त्रेण [10]ह्ययोजयः ॥ स दीप्त इव कालाग्निर्जज्वालाभिमुखः खगम् ॥ १२ ॥
क्षि[11]प्तवांस्त्वं प्रदीप्तं हि दर्भं तं वायसं प्रति ॥ ततस्तु वायसं दीप्तः स द[12]र्भोऽनुजगाम ह ॥ १३ ॥
स[13] पित्रा च परित्यक्तः सुरै[14]श्च समहर्षिभिः ॥ त्रीँल्लोकान्संपरिक्रम्य त्रातारं नाधिगच्छति ॥ १४ ॥
[15]पुनरेवागतस्त्रस्तस्त्वत्सकाशमरिन्दम ॥ स[16] तं निपतितं भूमौ शरण्यः शरणागतम् ॥
वधार्हमपि काकुत्स्थ कृपया पर्यपालयः ॥ १५ ॥
मोघमस्त्रं न शक्यं तु कर्तुमित्येव राघव ॥ [17]भवांस्तस्याक्षि काकस्य हिनस्ति स स दक्षिणम् ॥ १६ ॥
[18]राम त्वां स नमस्कृत्य रा[19]ज्ञे दशरथाय च ॥ विसृष्टस्तु तदा काकः प्रतिपेदे स्वमालयम् ॥ १७ ॥

उभावपि पर्यायेण सुप्ताविति त्वया सार्धमित्युक्तं ॥ ३—६ ॥ दारितां विदारितां ॥ ७—१८ ॥

शि० पक्षी वायसः । देव्याः व्यथां स्पर्शादिनाऽस्वास्थ्यं । पुनः पुनर्जनयति । पुनःपुनर्जनयतीत्यनेन अयंरावणवधयोग्योस्तिनवेतिपरीक्षार्थमागतइतिव्यक्तं ॥ ४ ॥ **शि०** विददार विदारणानुकूलव्यापारंचकार । ततोनन्तरंशोणितेन रुधिरबिन्दुना । समुक्षितइवत्वं तस्याः तया । बोधितः। शोणितोक्षितसादृश्यंचात्यरुणबिन्दुविशिष्टसीतापटविशेषाच्छादितत्वेन। समुक्षितशब्दः आचारक्विबन्तप्रकृतिककर्तृक्विबन्तः । प्रातिभासिकंव्याख्यानंतुहेयमेव । अप्राकृताङ्गस्यरुधिरस्रावहेतुभूतविदारितत्वस्यासंभवात् । अतएव " योवेत्तिभौतिकंदेहंरामस्यपरमात्मनः । ससर्वस्माद्बहिष्कार्यःश्रौतस्मार्तविधानतः " इत्यादिसंगच्छते । प्रमाणेरामस्येत्युपलक्षणंसीतायाः ॥ ५ ॥ **ति०** रादितं दारितमित्यर्थः ॥ **स०** पञ्चवक्त्रेण अङ्गुलिरूपपञ्चमुखेनहस्तेन । कःपुमान् । सरोषेणभोगिना तद्रूपयात्वयाक्रीडति । पञ्चवक्त्रेण विस्तृतमुखेनेतिवा ॥ ८ ॥ **स०** निरीक्षमाणः समन्तात्पश्यन् । नखैः पादनखैः ॥ ९ ॥ **स०** चिक्षेप चिक्षेपिथ । " त्वंदेव शक्त्यांगुणकर्मयोनौरेतस्त्वजायांकविरादधेऽजः " इत्यादाविवयुष्मच्छब्दप्रयोगेपि प्रथमपुरुषःसंभवति । " त्वमग्नेप्रथमोमातरिश्वन " इतिऋग्भाष्यटीकायामेतद्भागवतवाक्योदाहरणेनतथैवोक्तेः ॥ १३ ॥ **स०** भीतैः त्वत्तः । नाधिगच्छति नप्राप्तवान् ॥ १४ ॥ **स०** तत्र त्रायकशून्यकाले । धरण्यां क्षितौ अनाथतयानिपतितं । भूमौ " भूमिःक्षितौस्थानमात्रे " इत्यनुशासनात्स्थानमात्रंप्रकृत्यर्थः । सप्तम्यर्थश्चोद्देश्यत्वं । स्वाश्रयार्थमितिभावः । शरणागतं शरणायस्वरक्षणायआगतं त्वामितिशेषः । **शि०** सीताङ्गस्पर्शमात्रेणतत्कल्याणप्रकटनमपहायकोपप्रकटनद्वाराकिमर्थंकृतमितितुनभ्रमितव्यं । प्रार्थनयैवपरमकल्याणंक्रियतइतिस्वाभाविकपरमात्मरीतेः । तथाहि "करुणावानपिव्यक्तंशक्तःस्वाम्यपिदेहिनां । अप्रार्थितोनगोपायेदितितत्प्रार्थनामतिः " इतिपुराणं ॥ १५ ॥ **स०** हिनस्तिस्म अहिनः ॥ १६ ॥

[पा०] १ झ. ट. विददारस्तनान्तरं. २ क. ख. च. छ. ज. प्रसुप्तस्त्वं. ३ क.—ट. ततःपुनः. ४ ग. झ. ञ. ट. विददार. ५ ख. घ. तद्व्रणंच. ६ झ. ट. ततोवाक्यंत्वमूचिवान्. ७ घ. छ.—झ. रादितंवैस्तनान्तरे. ख. दारितासिस्तनान्तरे. ८ क. च. छ. ज. समुदैक्षत. झ. ट. समुदैक्षथाः. ख. ग. समवैक्षथ. ९ ख. च. ज.—ट. सदर्भंसंस्तराद्गृह्य. १० ज.—ट. न्ययोजयः. ११ ग. च.—ट. सत्वंप्रदीप्तंचिक्षेप. १२ क. च. ज. ञ. दर्भोभिजगामतं. १३ ज. झ. ट. भीतैश्चसंपरित्यक्तः, १४ क. ख. ग. च.—ट. सुरैस्सर्वैश्चवायसः. १५ क. ख. ग. घ. छ. ज. ञ. पुनरेवागतस्तत्रत्वत्समीपं. १६ च.—ज. ञ. ततस्तंपतितं. क. ग. घ. सत्वंनिपतितं. झ. ट. त्वंतंनिपतितंभूमौधरण्यां. १७ क.—घ. च. ज.—ट. ततस्तस्याक्षि. १८ घ. रामतुभ्यं. क. च. छ. ज. ततोरामंनमस्कृत्य. झ. ञ. ट. वायसस्त्वांनमस्कृत्य. १९ क. ख. ग. च.—ट. राज्ञोदशरथस्यच.

एवमस्त्रविदां श्रेष्ठः [1]सत्त्ववाञ्छीलवानपि ॥ किमर्थमस्त्रं रक्षस्सु न [2]योजयति राघवः ॥ १८ ॥
[3]न नागा नापि गन्धर्वा नासुरा न मरुद्गणाः ॥ [4]न च सर्वे रणे शक्ता रामं प्रतिसमासितुम् ॥१९॥
[5]तस्य वीर्यवतः कश्चिद्यद्यस्ति मयि संभ्रमः ॥ क्षिप्रं [6]सुनिशितैर्बाणैर्हन्यतां युधि रावणः ॥ २० ॥
भ्रातुरादेश[7]माज्ञाय लक्ष्मणो वा परन्तपः ॥ स किमर्थं नरवरो न मां रक्षति राघवः ॥ २१ ॥
शक्तौ तौ पुरुषव्याघ्रौ वाय्वग्निसमतेजसौ ॥ सुराणामपि दुर्धर्षौ किमर्थं मामुपेक्षतः ॥ २२ ॥
ममैव दुष्कृतं किंचिन्महदस्ति न संशयः ॥ [8]समर्थौ सहितौ [9]यन्मां नावेक्षेते परंतपौ ॥ २३ ॥
वैदेह्या वचनं श्रुत्वा करुणं [10]साश्रु भाषितम् ॥ पुनरप्यहमार्यां तामिदं वचनमब्रवम् ॥ २४ ॥
त्वच्छोकविमुखो रामो देवि सत्येन ते शपे ॥ रामे दुःखाभिभूते तु लक्ष्मणः परितप्यते ॥ २५ ॥
कथंचिद्भवती दृष्टा न [11]कालः परिशोचितुम् ॥ इमं [12]मुहूर्तं दुःखानामन्तं द्रक्ष्यसि भामिनि ॥२६॥
तावुभौ नरशार्दूलौ राज[13]पुत्रावनिन्दितौ ॥ त्वद्दर्शनकृतोत्साहौ लङ्कां भस्मीकरिष्यतः ॥ २७ ॥
हत्वा च समरे रौद्रं रावणं सहबान्धवम् ॥ राघवस्त्वां [14]वरारोहे [15]स्वां पुरीं नयते ध्रुवम् ॥ २८ ॥
यत्तु रामो विजानीयादभिज्ञानमनिन्दिते ॥ प्रीतिसंजननं तस्य प्रदातुं [16]त्वमिहार्हसि ॥ २९ ॥
[17]साऽभिवीक्ष्य दिशः सर्वा वेण्युद्ग्रथनमुत्तमम् ॥ मुक्त्वा वस्त्राद्ददौ मह्यं मणिमेतं महाबल ॥ ३० ॥
प्रतिगृह्य मणिं [18]दिव्यं तव हेतो रघूद्वह ॥ शिरसा [19]तां प्रणम्यार्यामहमागमने त्वरे ॥ ३१ ॥
गमने च कृतोत्साहमवेक्ष्य वरवर्णिनी ॥ विवर्धमानं च हि मामुवाच जनकात्मजा ॥ ३२ ॥
अश्रुपूर्णमुखी दीना [20]बाष्पसंदिग्धभाषिणी ॥ ममोत्पतनसंभ्रान्ता शोकवेगसमाहता ॥ ३३ ॥
[[21]मामुवाच ततः सीता सभाग्योसि महाकपे ॥ यद्द्रक्ष्यसि महाबाहुं रामं कमललोचनम् ॥
लक्ष्मणं च महाबाहुं देवरं मे यशस्विनम् ॥ ३४ ॥
सीतयाऽप्येवमुक्तोऽहमब्रवं मैथिलीं तथा ॥ पृष्ठमारोह मे देवि क्षिप्रं जनकनन्दिनि ॥ ३५ ॥
यावत्ते दर्शयाम्यद्य ससुग्रीवं सलक्ष्मणम् ॥ राघवं च महाभागे भर्तारमसितेक्षणे ॥ ३६ ॥
साऽब्रवीन्मां ततो देवी नैष धर्मो महाकपे ॥ यत्ते पृष्ठं सिषेवेऽहं स्ववशा हरिपुङ्गव ॥ ३७ ॥
पुरा च यदहं वीर स्पृष्टा गात्रेषु रक्षसा ॥ तत्राहं किं करिष्यामि कालेनोपनिपीडिता ॥ ३८ ॥
गच्छ त्वं कपिशार्दूल यत्र तौ नृपतेः सुतौ ॥ इत्येवं सा समाभाष्य भूयः संदेष्टुमास्थिता] ॥३९॥

प्रतिसमासितुं प्रतिमुखं स्थातुं ॥ १९—२४ ॥ त्वच्छोकविमुखः त्वच्छोकेन कार्यान्तरविमुखः ॥ २५—२७ ॥ नयते नेष्यते । वर्तमानसामीप्ये वर्तमानवत्प्रयोगः ॥ २८—२९ ॥ साभिवीक्ष्य दिश इति । दिगवलोकनं राक्षस्यो दृष्ट्वा रावणाय वक्ष्यन्तीति भयेन । वेण्यामुद्ग्रथ्यत इति वेण्युद्ग्रथनं । वेणीधार्यमित्यर्थः । मुक्त्वा वस्त्रादिति वस्त्राञ्चलेन ग्रथितं मणिं मुक्त्वा ततः ददावित्यर्थः ॥ ३०—

ति० अतःपरंपरिशोचितुं नकालःतवयोग्यइतिशेषः । चिरंलङ्कायामासितुंनकालोयोग्यइतिपाठान्तरेऽर्थः ॥ ति० इदंमुहूर्तं अस्मिन्नेवमुहूर्तेइत्यर्थः ॥ २६ ॥ इतिसप्तषष्टितमः सर्गः ॥ ६७ ॥

[पा०] १ क. च. छ. ज. ञ. सत्त्ववान्बलवानपि. २ क. ग. घ. च.—ट. योजयसि. ३ झ. ट. नदानवानगन्धर्वाः. ४ ख. घ. झ. ञ. ट. तवरामरणेशक्तास्तथाप्रतिसमासितुं. ५ ख. ग. च.—ट. तववीर्यवतः. ६ झ. ट. सुनियतैः. ७ ग. घ. मादाय. ८ घ. समर्थावपितौ. ९ झ. ट. यन्मांनरक्षेते. क. च. छ. ज. यन्मामुपेक्षेते. १० च.—ट. साधुभाषितं. ११ ख. घ. कालश्चिरमासितुं. १२ क. च.—ट. इदंमुहूर्तं. १३ च. छ. ज. ञ. पुत्रौमहाबलौ. झ. ट. पुत्रौपरंतपौ. १४ ग. विशालाक्षिस्वांपुरींप्रतिनेष्यति. ख. महाभागे. १५ झ. ट. स्वपुरीं. १६ क. ग. च.—ट. तत्त्वमर्हसि. १७ च. छ. ज. ञ. सासमीक्ष्य. १८ छ. झ. ट. दोर्भ्यांतव. क. ख. ग. च. ज. ञ. देव्यास्तव. १९ ग. घ. च. छ. झ. ञ. ट. संप्रणम्यैनां. २० झ. ट. बाष्पगद्गद. २१ मामुवाचेत्यादयः भूयःसंदेष्टुमास्थितेत्यन्ताःश्लोकाः झ. ञ. ट. पाठेषुदृश्यन्ते.

हनुमन्सिंहसंकाशावुभौ तौ रामलक्ष्मणौ ॥ सुग्रीवं च सहामात्यं सर्वान्ब्रूया ह्यनामयम् ॥ ४० ॥
यथा च स महाबाहुर्मां तारयति राघवः ॥ अस्माद्दुःखाम्बुसंरोधात्त्वं समाधातुमर्हसि ॥ ४१ ॥
इमं च तीव्रं मम शोकवेगं रक्षोभिरेभिः परिभर्त्सनं च ॥
ब्रूयास्तु रामस्य गतः समीपं शिवश्च तेऽध्वास्तु हरिप्रवीर ॥ ४२ ॥
एतत्तवार्या नृपराजसिंह सीता वचः प्राह विषादपूर्वम् ॥
एतच्च बुद्ध्वा गदितं मया त्वं श्रद्धत्स्व सीतां कुशलां समग्राम् ॥ ४३ ॥
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

अष्टषष्टितमः सर्गः ॥ ६८ ॥

हनुमता श्रीरामंप्रतिराघवयोर्वानराणांच दुस्तरसागरतरणेसीताशङ्कायां तन्निवर्तकस्ववचनाद्यनुवादपूर्वकं स्वकृतसीतासमाश्वासननिवेदनेनसह सीताकुशलनिवेदनम् ॥ १ ॥

अथाहमुत्तरं देव्या पुनरुक्तः ससंभ्रमः ॥ तव स्नेहान्नरव्याघ्र सौहार्दादनुमान्य वै ॥ १ ॥
एवं बहुविधं वाच्यो रामो दाशरथिस्त्वया ॥ यथा मामाप्नुयाच्छीघ्रं हत्वा रावणमाहवे ॥ २ ॥
यदि वा मन्यसे वीर वसैकाहमरिन्दम ॥ कस्मिंश्चित्संवृते देशे विश्रान्तः श्वो गमिष्यसि ॥ ३ ॥
मम चाप्यल्पभाग्यायाः सान्निध्यात्तव वीर्यवन् ॥ अस्य शोकविपाकस्य मुहूर्तं स्याद्विमोक्षणम् ॥४॥
गते हि त्वयि विक्रान्ते पुनरागमनाय वै ॥ प्राणानामपि संदेहो मम स्यान्नात्र संशयः ॥ ५ ॥
तवादर्शनजः शोको भूयो मां परितापयेत् ॥ दुःखाद्दुःखपराभूतां दुर्गतां दुःखभागिनीम् ॥ ६ ॥
अयं च वीर संदेहस्तिष्ठतीव ममाग्रतः ॥ सुमहांस्त्वत्सहायेषु हर्यृक्षेषु हरीश्वर ॥ ७ ॥
कथं नु खलु दुष्पारं तरिष्यन्ति महोदधिम् ॥ तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ ॥ ८ ॥
त्रयाणामेव भूतानां सागरस्यास्य लङ्घने ॥ शक्तिः स्याद्वैनतेयस्य तव वा मारुतस्य वा ॥ ९ ॥
तदस्मिन्कार्यनिर्योगे वीरैवं दुरतिक्रमे ॥ किं पश्यसि समाधानं ब्रूहि कार्यविदां वर ॥ १० ॥
काममस्य त्वमेवैकः कार्यस्य परिसाधने ॥ पर्याप्तः परवीरघ्न यशस्यस्ते बलोदयः ॥ ११ ॥
बलैः समग्रैर्यदि मां हत्वा रावणमाहवे ॥ विजयी स्वां पुरीं रामो नयेत्तत्स्याद्यशस्करम् ॥ १२ ॥

---

४३ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने सप्तषष्टितमः सर्गः ॥ ६७ ॥

हे नरव्याघ्र तव स्नेहात् । मयीति शेषः । सौहार्दात् सुहृद्भावात् । आप्तत्वादिति यावत् । अनुमान्य संमान्य । उत्तरं ततः परं । उत्तरं कार्यं वा । पुनर्देव्याहमुक्त इत्यन्वयः । ससंभ्रमः गमनत्वरान्वित इत्यर्थः ॥ १—३ ॥ शोकविपाकस्य शोकवृद्धेरित्यर्थः ॥ ४—९ ॥ कार्यनिर्योगे कार्यगतौ । दुरतिक्रमे

[पा०] १ झ. ञ. ट. संरोधात्तत्त्वमाख्यातुमर्हसि. क. च. ज. संरोधात्तत्समाधातुमर्हसि. २ ग. घ. झ. ञ. ट. इदंच. ३ झ. ञ. ट. नृपसंयतासा. ४ झ. ञ. ट. गदितोयथात्वं. क. च. छ. ज. गदितंप्रियायाः. ५ घ. झ. ट. ससंभ्रमं. ६ च. छ. ज. ञ. मांप्राप्नुयात्. ७ झ. ञ. ट. वानर. ८ झ. ट. तवादर्शनजंचापिभयंमां. ग. तवादर्शनतश्चापिशोकोमां. घ. तवादर्शनजश्चापिशोकोमां. ९ ग. दुःखाद्दुःखाभिभूतांमांदुःखितां. ख. च. छ. दुःखाद्दुःखाभिभूतांचदुःखितां. घ. दुःखाद्दुःखतरंयातांदुःखितांदुःखसागरे. १० ग. हर्यृक्षप्रवरेषुच. क. ख. च. छ. ज. ञ. हर्यृक्षेषुनसंशयः. झ. हर्यृक्षेषुअसंशयः. ११ झ. ञ. ट. सागरस्येह. १२ घ. च. झ. ञ. ट. वायोर्वातवचानघ. १३ क. ग. त्वंहि. १४ झ. ट. वाक्यविदां. १५ झ. ट. स्वपुरीं. १६ च. छ. ज. नयेन्मांतद्यशस्करं.

यथाऽहं तस्य वीरस्य वनादुपधिना हृता ॥ रक्षसा तद्भयादेव तथा नार्हति राघवः ॥ १३ ॥
[1]बलैस्तु संकुलां कृत्वा लङ्कां परबलार्दनः ॥ मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ॥ १४ ॥
तद्यथा तस्य विक्रान्तमनुरूपं महात्मनः ॥ भवत्याहवशूरस्य [2]तथा त्वमुपपादय ॥ १५ ॥
तदर्थोपहितं वाक्यं प्रश्रितं हेतुसंहितम् ॥ निशम्याहं ततः शेषं वाक्यमुत्तरमब्रवम् ॥ १६ ॥
देवि हर्यृक्षसैन्यानामीश्वरः प्लवतांवरः ॥ सुग्रीवः सत्त्वसंपन्नस्[3]तवार्थे कृतनिश्चयः ॥ १७ ॥
तस्य विक्रमसंपन्नाः सत्त्ववन्तो महाबलाः ॥ मनःसंकल्प[4]संपाता निदेशे हरयः स्थिताः ॥ १८ ॥
येषां नोपरि नाधस्तान्न तिर्यक्सज्जते गतिः ॥ न च कर्मसु सीदन्ति महत्स्वमिततेजसः ॥ १९ ॥
असकृत्तैर्[5]महाभागैर्वानरैर्[6]बलदर्पितैः ॥ प्रदक्षिणीकृता भूमिर्वायुमार्गानुसारिभिः ॥ २० ॥
मद्विशिष्टाश्च तुल्याश्च सन्ति तत्र वनौकसः ॥ मत्तः प्रत्यवरः कश्चिन्नास्ति सुग्रीवसन्निधौ ॥२१॥
अहं तावदिह प्राप्तः किं पुनस्ते महाबलाः ॥ न हि प्रकृष्टाः प्रेष्यन्ते प्रेष्यन्ते हीतरे जनाः ॥२२॥
तदलं परितापेन देवि मन्युर्व्यपैतु ते ॥ एकोत्पातेन वै लङ्कामेष्यन्ति हरियूथपाः ॥ २३ ॥
मम पृष्ठगतौ तौ च [7]चन्द्रसूर्याविवोदितौ ॥ [8]त्वत्सकाशं महाभागे नृसिंहावागमिष्यतः ॥ २४ ॥
अरिघ्नं सिंहसंकाशं क्षिप्रं द्रक्ष्यसि राघवम् ॥ लक्ष्मणं च [9]धनुष्पाणिं लङ्काद्वार[10]मुपस्थितम् ॥ २५ ॥
नखदंष्ट्रायुधान्वीरान्सिंहशार्दूलविक्रमान् ॥ वानरान्वारणेन्द्राभान्क्षिप्रं द्रक्ष्यसि सङ्गतान् ॥ २६ ॥
शैलाम्बुदनिकाशानां लङ्कामलयसानुषु ॥ नर्दतां कपिमुख्यानामचिराच्छ्रोष्यसि स्वनम् ॥ २७ ॥
निवृत्तवनवासं च त्वया सार्धमरिन्दमम् ॥ अभिषिक्तमयोध्यायां क्षिप्रं द्रक्ष्यसि राघवम् ॥ २८ ॥
ततो मया वाग्भिरदीनभाषिणा शिवाभिरिष्टाभिरभिप्रसादिता ॥
[11]जगाम शान्तिं मम मैथिलात्मजा [12]तवापि शोकेन तदाऽभिपीडिता ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशत्सहस्रिकायां संहितायां
सुन्दरकाण्डे अष्टषष्टितमः सर्गः ॥ ६८ ॥

॥ सुन्दरकाण्डः समाप्तः ॥

दुर्निर्वहे ॥ १०—२२ ॥ मन्युः दैन्यं । "मन्युर्दैन्ये क्रतौ क्रुधि" इत्यमरः ॥ २३—२८ ॥ तव शोकेनापि नैव दंशानित्यादिमदुक्त्या श्रुतेन । तदा मम पुरस्तादभिपीडिता । अदीनभाषिणा मया । शिवाभिः इष्टाभिः वाग्भिः । अभिप्रसादिता शान्तिं दुःखनिवृत्तिं जगाम ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीमद्रामायणभूषणे शृङ्गारतिलकाख्याने सुन्दरकाण्डव्याख्याने अष्टषष्टितमः सर्गः ॥ ६८ ॥

इत्थं कौशिकवंशमौक्तिकमणिर्गोविन्दराजाभिधो वात्स्यश्रीशठकोपदेशिकपदद्वन्द्वैकसेवारतः ॥ पूर्वाचार्यकृता विलोक्य विविधा व्याख्या मुहुर्जानकीकान्तस्याप्रतिमाज्ञयैव तिलकं सौन्दर्यकाण्डे व्यधात् ॥ १ ॥

[पा०] १ च. छ. ज. ञ. शैरस्तु. २ ग. च. छ. झ. ञ. तत्त्वमेवोपपादय. ३ झ. ट. स्त्वदर्थे. ४ ख. झ. ट. सदृशाः. ५ ख. च. छ. ज. ञ. र्महाभागैःससागरधराधरा. ६ घ. ङ. झ. ट. बलसंयुतैः. ७ घ. चन्द्रसूर्याविवांबरे. ८ च. छ. ज. ञ. त्वत्समीपं. ९ ङ.—ट. धनुष्मन्तं. १० घ.—ट. मुपागतं. ११ झ. ट.उवाह. १२ ख. वियोगशोकेनतथा.

इदं किष्किन्धाकाण्डं कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागरमुद्रायन्त्रे मुद्रापितम् । शकाब्दाः १८३४ सन १९१३.